श्री स्कन्द महापुराणम्

THE SKANDA MAHĀPURĀṆA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Among the later forms of Hindu Literature are the Purāṇas. They are eighteen in number, besides several smaller productions of a similar kind called *upa* or Minor Purāṇas.

The name Purāṇa signifies old traditional story. It claims—to teach mythology, plus cosmogony, geography and astronomy, chronology and grammar and, sometimes, even anatomy and medicine as well as—to give the geneologies of kings; but the main object is evidently the exaltation of Brahmā, Viṣṇu and Śiva in their manifestations.

The Purāṇas are sometimes called a fifth Veda, having been designed to teach Vedic doctrines. These Purāṇas treat of Creation and Renovation of the universe, of the division of time, the institutes of law and religion, the geneology of the patriarchal families and the dynasties of kings.

They are acknowledged by all schools to be the most modern of the sacred books.

The story of *Skanda Purāṇa* is the story of Kālidāsa's *Kumāra-Sambhava* : the birth of Skanda for a Moses-like leadership of the forces of Gods then in shambles. Indeed, Gods must have been in real trouble; so nothing, short of 'a supplement and a corrective' to the age old Trinity was felt to be the need—the need to merge the twin Primes of virginity and celibacy (Pārvatī & Śiva) for producing a super-Third!

It became, thus, *the* fulfilment of *That* elusive *Turīya* of Vedic Vision in concrete. It became no less, too, the discovery of *That* basic note to be later technically known as the *ṣaḍ-ja*-peacock's note in Nature; 'ṣaḍ-ja' the *ṣaṇ-mukha* (i.e., Mother of the rest six).

Culturally, historically it was, wherefore, the age of that double *re*-conquest of Aryanism over Buddhism as well as over the Daksināpatha in the person, respectively, of Divodāsa and Agastya. Which, not only *re*-established supremacy for Śiva & Shaivism-in the shape of Temples in and around Kāśī (1), into the bargain opened fields fresh for Avanti and Prabhāsa (2-3) to go, win over.

There are seven khandas—Maheshwar, Brahma, Vaishava, Kashi, Avantya, Nangar and Prabhas.

An encyclopaedic work with a world-view verily as wide as Life-of-the-spirit as wide again as the musical-cum—aesthetic spectrum-smoothly, naturally spanning its full Seven Notes Tones of the Scale.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Amc
ture ar
number,
a simila
The
story.
cosmog
logy an
tomy a
geneolo
evidentl
Śiva in
The
Veda, I
doctrin
Renova
time, t
geneolo
dynasti
The
the mo
The
Kālidās
Skanda
of God
have b
'a sup
Trinity
merge
(Pārvat
It
elusive
becam
note to
peacoc
(i.e., M
Cul
the ag
over B
in the
Agasty
supren
Templ
bargai
Prabh
Th
Brahm
Prabh
An
verily
as th
smoot
Tones

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्री

स्कन्दमहापुराणम्

THE

SKANDA MAHĀPURĀṆAM

VOL. II

श्री काशीखण्डः

THE KĀŚI KHAṆḌA

श्री आवन्त्यखण्डः

THE ĀVANTYA KHAṆḌA

आवन्त्यक्षेत्र माहात्म्यम्

ĀVANTYA KṢETRA MAHĀTMYAM

चतुरशीतिर्लिगमाहात्म्यम्

CHATURAŚĪTI-LIṆGA-MAHĀTMYAM

रेवा खण्डः

THE REWĀ KHAṆḌA

ARRANGED BY

NAG SHARAN SINGH

NAG PUBLISHERS

11A/U.A., JAWAHARNAGAR,

DELHI-110007

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Published with the Financial Asststance from the Ministry of Education & Culture, Govt. of India

© NAG PUBLISHERS

(i) 11 A/U.A. (Postoffice Bldg.) JAWAHARNAGAR DELHI-110007
(ii) 8 A/U. A. 3 JAWAHARNAGAR, DELHI-110007
(iii) JALALPURMAFI (Chunar : Mirzapur) U.P.

No part of this be reproduced in any form including photography

FIRST EDITION, 1982

PRICE : Paper Back Edition Rs. 300-00
for Complete set of 3 Vols.
(All Seven Khandas)

PRINTED IN INDIA
PUBLISHED BY NAG SHARAN SINGH FOR NAG PUBLISHERS,
11A/U.A. (POST OFFICE BUILDING) JAWAHAR NAGAR,
DELHI-110007 AND PRINTED AT NAAZ OFFSET PRESS,
CHURIWALAN, DELHI-110006

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ श्रीस्कान्दे महापुराणे चतुर्थं काशीखण्डम् ॥ ४ ॥



अध्यायाः	विषयाः	पृ०

अथ काशीखण्डे पूर्वार्धम् ॥ (४-१) ॥

१ मङ्गलाचरणम्, सूताग्रे व्यासस्य काशीखण्डकथोपक्रमकरणम्, नारदस्य नर्मदाम्भसि स्नात्वोंकारमभ्यर्च्य च पुरतो विन्ध्यपर्वतदर्शनम्, प्रसंगेन विन्ध्याचलवर्णनम्, मेरुस्त्वामवमन्यत इति नारदमुनेर्वचः श्रुत्वा विंध्यस्य वर्धनेन श्रीसूर्यमार्गावरोधवर्णनं च. १

२ एकतो नैशतिमिरसंबंधावन्यत्र दिवाकरचण्डातपात्त्रैलोक्यानवस्थावर्णनम्, देवैर्विधिस्तवनम्, सत्यलोके भयाभावं दर्शयितुं सत्यलोकागन्तृपुरुषपुण्याचारवर्णनपूर्वकं विधिकृतदेवसान्त्वनम्, ब्रह्मणो वचनात्त्रैलोक्यापन्निवारणाय श्रीक्षेत्रकाशीस्थागस्त्यमुनिसमीपे गन्तुं श्रीकाशीशकाशीदर्शनोत्सुकाऽमरप्रयाणवर्णनम्, संक्षेपतः काशीवर्णनं च. २

३ काशीक्षेत्रे मणिकर्णिकास्नानविश्वेश्वरदर्शनादियात्रां विधाय सुराणामगस्त्यमुन्याश्रमगमनम्, सुराणां तदाश्रमे लोपामुद्रामुन्यगस्त्यरूपदर्शनं च. ४

४ बृहस्पतिप्रणीतागस्त्यमुनिस्तुतिप्रसंगेन लोपामुद्रावर्णनम्, एतत्प्रसङ्गेन पतिव्रताचारनिरूपणम्, सूर्यमार्गनिरोधकविन्ध्यवृद्धिनिवारणाय प्रार्थयमानस्य सुराचार्यस्य वचनानुसारेणागस्त्येनामराश्वासनम्, अमराणां स्वर्गलोकगमनं च. ५

५ अमरप्रार्थनामङ्गीकृत्य विन्ध्यवृद्धिनिराकरणाय भार्यया सहाऽगस्त्यमुनेः काशीक्षेत्राद्बहिः प्रयाणम्, काशीवियोगदुःखितस्य मुनेर्विश्वनाथकालभैरवादिदेवताज्ञाग्रहणपूर्वकं विशेषतो विलापकरणम्, अगस्त्यमुनिमायान्तं दृष्ट्वा विन्ध्यस्य स्वर्गतास्वीकारः, यावन्ममागमनं पुनर्न भवेत्तावत्स्वर्गतरो भवेति मुनेरद्रिं प्रति कथनम्, मुनेर्महालक्ष्मीदर्शनम्, अगस्त्यमुनिना महालक्ष्मीस्तोत्रकरणम्, महालक्ष्म्याऽगस्त्याय वरप्रदानम्, अगस्त्यस्याग्रे प्रयाणं च.... .... .. ७

६ परोपकारप्रशंसनम्, श्रीशैलशिखरादिपुण्यस्थानदर्शनेन मुक्तिश्चेत्किं काशीमहत्त्वमिति लोपामुद्राप्रश्नः, तीर्थमाहात्म्यवर्णनप्रसङ्गेन काशीक्षेत्रमहत्त्वकथनम्, सर्वतीर्थानि काशीक्षेत्रप्रापकाणीति काशीश्रैष्ठ्यद्योतनं च. ९

७ शिवशर्माख्यस्य मथुरापुरीस्थद्विजस्य स्वदेहे समागतां जरां दृष्ट्वा चिन्तोद्गाराः, सप्तपुरीयात्रार्थं गृहाद्बहिर्द्विजस्य प्रयाणम्, अयोध्यायात्रां समाप्य प्रयागे समागमनम्, प्रसङ्गेन प्रयागमाहात्म्यवर्णनम्, द्विजस्य काशीयात्राकथनम्, तस्य महाकालपुरीप्रयाणम्, तत्प्रसङ्गान्महाकालमाहात्म्यकथनम्, मायापुरीतीर्थयात्राकथनम्, द्विजस्य मायापुर्यां देहावसानम्, पुण्यशीलसुशीलनामकवैष्णवगणाधिष्ठितस्वर्णविमानमास्थाय द्विजस्य नभोवर्त्मारोहणं च. ... .१०

८ मायाख्यायां मुक्तिपुर्यां मृतस्य शिवशर्मणो द्विजस्य कथं मोक्षानवाप्तिरिति लोपामुद्रासतीप्रश्नः, मायादिषु षट्पुरीषु साक्षात्सायुज्यं नास्तीति दर्शयितुं शिवशर्मविष्णुगणसंवादारम्भः, द्विजप्रश्नानुसारेण पिशाचगुह्यकगन्धर्वलोकस्थितपुरुषसंपादितसदाचारवर्णनम्, यमलोकमागतस्य द्विजस्य शिवशर्मणः सत्कारपूर्वकपूजनार्थं धर्मराजस्यागमनम्, धर्मराजस्य सौम्यमूर्तेः सौम्यवचांसि श्रुत्वा कथमिदमिति द्विजप्रश्नः, यमस्य रूपद्वयनिरूपणप्रसङ्गेन संक्षेपतो यमलोकवर्णनं च. ... ... .१२

९ अप्सरोलोकवर्णनम्, सूर्यलोकवर्णनम्, सूर्योपासनावर्णनप्रसङ्गेन गायत्रीमन्त्रमाहात्म्यनिरूपणम्, अर्घप्रदानविधिनिरूपणं च. ... ... .१३

१० सहस्राक्षपुरवर्णनम्, अर्चिष्मत्याख्यवीतिहोत्रपुरीवर्णनम्, कृशानूत्पत्तिकथनप्रसंगेन ज्योतिष्मतीपुरीस्थविश्वानराख्यमुनीतिहासकथनम्, शुचिष्मतीकथनानुसारेण मुनेः काशीक्षेत्रे गत्वा वीरेश्वरशिवलिङ्गसमीपे तपोऽनुष्ठानकथनम्, त्रयोदशे मासि बालरूपेण लिङ्गे शिवदर्शनम्, अभिलाषाङ्कस्तोत्रकथनम्, शिवाद्वरलाभेन सन्तुष्टस्य मुनेः स्वगृहे प्रयाणं च.... ... ... .१५

११ कालान्तरेण विश्वानराच्छुचिष्मत्यां गर्भाधानम्, शुभमुहूर्ते सुतोत्पत्तिः, जातकर्मादिसंस्कारनिरूपणम्, हस्तसामुद्रिकं वीक्ष्य नारदोक्तं वैश्वानराख्यस्य बालस्य गण्डान्तं श्रुत्वा मातापित्राः शोककरणम्, अपमृत्युहरणाय मुनिकुमारस्य काश्यां लिङ्गं संस्थाप्यानुष्ठानकरणम्, तृतीयसंवत्सरे वरप्रदानाय समागतस्य कुलिशायुधस्य मुनिकुमारं प्रति वचनम्, 'नाहं त्वत्तो वरान्ग्रहीतुमुत्सहे' इति वचः श्रुत्वा इन्द्रस्य कुलिशपातनोद्योगं विलोक्य मुनिकुमारस्य मूर्च्छावगमः, तत्रैव शिवप्रादुर्भावः, शिववराद्वैश्वानरस्य दिक्पतित्वादिप्राप्तिवर्णनं च. १७

१२ नैर्ऋतलोकवर्णनम्, विन्ध्याटव्यां पल्लीपतेः पिंगाक्षस्य विश्वनाथपुरीं प्रति यातुकामस्य सार्थस्य प्राणपरिरक्षणार्थं प्राणदानाल्लोकपालत्वप्राप्तिः, वारुणलोकवर्णनम्, कर्दमस्य प्रजापतेः पुत्रस्य शुचिष्मतो जलक्रीडायां शिशुमारेण सरस्याहरणम्, सरसि मग्नं श्रुत्वाऽपि सुतं पूजायामधिकासक्तस्य मुनेः सविधे शिवगणेन सशिशुमारस्य बालकस्यानयनम्, शुचिष्मतो मुनिकुमारस्य काश्यां शिवलिंगं संस्थाप्य तपश्चरणम्, शिवप्रसादाद्वारुणलोकसंप्राप्तिश्च.... ... ... १९

१३ जगत्प्राणस्य पवनस्य गंधवतीपुरीवर्णनम्, कश्यपपुत्रस्य पूतात्मनः श्रीकाशीक्षेत्रे लिंगं संस्थाप्य तपश्चरणम्, तस्य शिवाल्लोकपालत्वप्राप्तिकथनम्, गुह्यकेश्वरस्यालकावतीपुरीवर्णनम्, काम्पिल्यनगरे यज्ञदत्तनाम्नो ब्राह्मणस्य नाम्ना गुणनिधिरप्यगुणनिधिर्द्यूतासक्तो मद्यपः पुत्रो बभूव तस्य मात्रा बहुकालं प्रच्छन्नदुराचारस्य सुतस्य दुष्कृतिं संपश्यता पित्रा स्वगृहान्निष्कासनम्, स्वार्थं दीपदशोद्द्योतेन लिंगमौलितमोहरस्य बहूपोषितस्यास्य शिवरात्र्यां शिवालये ऽन्नापहरणाद्धातितस्य कलिङ्गदेशराजपुत्रत्वप्राप्तिवर्णनम्, तत्र तस्य शिवालयेषु दीपदानात्कल्पान्तरे विश्रवःसुतत्वमभिगम्य दुःसहतपश्चरणतः शिवसख्यालकाराज्यादिलाभवर्णनं च.... ... .२१

१४ रुद्रभक्तोषितैशानीपुरीवर्णनम्, अजैकपादादिरुद्रगणस्थापितैशानलिंगमाहात्म्यवर्णनम्, चन्द्रलोकवर्णनम्, ब्रह्मणो मानसात्समुद्भूतस्य सोमस्य वाराणस्यां लिंगं विधाय तत्पुरो महत्तपश्चरणम्, शिवप्रसादात्तस्य महैश्वर्यलाभकथनं च. ... २३

१५ दक्षप्रजापतेः षष्टिदुहितृमध्ये रोहिण्यादिभिः सप्तविंशतिभिः कन्याभिरेकपतिलाभाय लिंगं संस्थाप्य वाराणस्यां तपःकरणाच्छिववरानुसारतः सोमं पतिमासाद्य संपादितस्य नक्षत्रलोकस्य संक्षेपतो वर्णनम्, अत्रिपुत्रस्य सोमस्य गुरुभार्यापहरणम्, रुद्रचन्द्रमसोर्युद्धकथनम्, युद्धं निवार्य ब्रह्मणो वचनाच्चन्द्रस्य बृहस्पतये तारासमर्पणम्, तस्यां बुधस्योत्पत्तिः, बुधकृतशिवाराधनम्, बुधस्य शिववराल्लोकपालत्वादिवरैश्वर्यलाभवर्णनं च. २४

१६ समरे देवैर्घातितानां दानवेन्द्रान्धकसैनिकानां संजीवनीमन्त्रतो भार्गवशुक्रेण पुनरुज्जीवनम्, देवप्रार्थनया शिवेन नंदिकेश्वरद्वारा शुक्रमानाय्य स्वमुखे तस्य निक्षेपणम्, अन्धकस्य ससैन्यस्य प्रमथैः सह युद्धवर्णनम्, शुक्रतः शुक्रस्य बहिर्निःसरणम्, शुक्रस्य वाराणस्यां तपश्चरणाच्छिवप्रसादतो लोकाधिपत्यादिवरप्राप्तिवर्णनं च... ... . २५

१७ श्रीशिवस्य भालस्थलतो भूमौ निपतितात्स्वेदबिन्दोर्लोहिताङ्गस्योत्पत्तिः, शिवप्रसादात्तस्य लोकाधिपत्यादिकथनम्, आङ्गिरसस्य शिवप्रसादार्थं वाराणस्यां तपःकरणम्, शिवस्य वरप्रसादाल्लोकपतित्वदेवगुरुत्वलाभः, मार्तण्डात्संज्ञाप्रतिकृतौ छायायां शनैश्चरोत्पत्तिकथनम्, तस्य वाराणस्यां तपश्चरणाल्लोकपालत्वग्रहमुख्यत्वलाभवर्णनं च. ... ... .२७

१८ ब्रह्ममानससृष्टमरीच्यादिपुत्रसप्तर्षिलोकवर्णनम्, अरुन्धतीनक्षत्रस्थानदर्शनादिवर्णनं च. ... ... .२९

१९ पितुरंकाधिष्ठितस्य सापत्नमात्रा तिरस्कृतस्य ध्रुवस्य मातृवचनात्तपस्यार्थं त्रिपिनप्रवेशः, तत्र सप्तर्षिसमागमः, तस्मै द्वादशाक्षरमन्त्रमुपदिश्य मुनीनामन्तर्धानं च. ३०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
२०	यमुनातटे मधुवने स्थितस्य ध्रुवस्य तपस्यावर्णनम्, इन्द्रप्रेषितनानाविधतपोविघ्ननिरूपणम्, ध्रुवस्य साक्षाच्छ्रीभगवतो दर्शनं च.	३२
२१	ध्रुवकृतश्रीभगवत्स्तोत्रनिरूपणम्, 'ज्योतिश्चक्रस्याधारपदं ते दास्यामि तथापि मया सह काशी याहि तत्र लिंगार्चनं कृत्वा कृतकृत्यो भव' इति ध्रुवं सन्दिश्य तेन सह भगवतः काशीपुर्यां प्रयाणम्, तत्र ध्रुवस्य लिंगस्थापनेन कृतकृत्यत्वशालाण स्वगृहे प्रयाणं च.	३३
२२	महर्जनतपोलोकवर्णनम्, सत्यलोके समागतानां ब्रह्मणा सह संवादाः, द्विजप्रशंसनपूर्वकं ब्रह्मकृतकाशीवर्णनं च.	३५
२३	भूलोकाच्छिवलोकपर्यन्तं योजनप्रमाणकथनम्, शिवोपासनतो विष्णोरात्मसात्म्यप्राप्तिकथनपूर्वकं शिवकृतविष्ण्वभिषेकवर्णनं च....	३७
२४	द्विजस्य मायापुर्यां मरणतो विष्णुलोके ब्रह्मणो वत्सरपर्यंतं बहुविधोपभोगप्राप्तिः, ततश्च पुण्यक्षये नन्दिवर्धनग्रामे भूपत्वमासाद्य प्रजारञ्जनकर्तुरस्य काशीमाहात्म्यश्रवणसंजातहर्षस्य काश्यां प्रयाणम्, विश्वेश्वरानुग्रहात्तत्र शिवप्रासादं विधाय वृद्धकालेश्वराख्यस्थापितशिवलिङ्गाग्रे तपस्यतः परीक्षणार्थमागतेन शिवेन परीक्षणोत्तरं सह तेन सस्त्रीकस्य राज्ञस्तस्मिन्नेव लिंगे लयो भविष्यति इति विष्णुगणप्रतिपादितशिवशर्मद्विजभाविस्थितिवर्णनम्.	३८
२५	अगस्त्यमुनेः सभार्यस्य श्रीगिरिं प्रदक्षिणीकृत्य स्कन्दवने कुमारदर्शनम्, अगस्त्यकृतस्कन्दस्तोत्रम्, काशीमाहात्म्यविषये स्कन्दं प्रति मुनिप्रश्नः, स्कन्दनिरूपितकाशीवासफलकथनं च....	३९
२६	अविमुक्तक्षेत्रोत्पत्तिवर्णनम्, चक्रपुष्करिणीतीरे विष्णोस्तपोवर्णनम्, मणिकर्णिकाया उत्पत्तिवर्णनम्, मणिकर्णिकास्नानविधिकथनं च.	४०
२७	गंगामाहात्म्यवर्णनम्, दशहरास्तोत्रकथनं च.	४२
२८	शिवाधिष्ठानगौरवतः काश्यां गंगास्नानान्महापातकोपपातकशमनवर्णनम्, कलिंगदेशे वाहीकनाम्नः कस्यचिन्नाममात्रद्विजस्य वृषलीपतेररण्ये व्याघ्रेण मारणम्, सास्थि तन्मांसं समादाय गच्छतो गृध्रस्यान्यगृध्रेण युद्धम्, दैवतस्तदस्थ्नो गंगाजले पतनेन गंगाजलसंगमान्महाश्चर्यम्, नानाविधपातकक्षालनाय कुम्भीपाकादिनरकेषु प्रक्षिप्तस्यापि तस्य वाहीकस्य सुखावाप्तिं विलोक्य सर्वेषां विस्मयकरणम्, अन्ते विमानमारुह्य वाहीकस्य स्वर्गलोकप्रयाणम्, गंगामाहात्म्यकथनं च. ...	४५
२९	अशक्तानां स्नानतुल्यफलावाप्तिमिच्छूनां महाघौघनिवारकश्रीगंगासहस्रनामस्तोत्रवर्णनम्.	४७
३०	मणिकर्ण्यां भगीरथनृपानीतगंगासंगमात्क्षेत्रमाहात्म्याधिक्यकथनम्, दक्षिणोत्तरभागेऽसिवरणावस्थितिकथनम्, देहलीविनायकस्य शिवाज्ञां विना अन्तः प्रवेशं कुर्वतां विघ्नोत्पादनाय नियोजनम्, धनंजयवणिगितिहासकथनम्, काश्या वाराणसीनामनिर्वचनं च.	५०
३१	ब्रह्मणः शिरश्छेत्तुं शिवात्कालराजस्योत्पत्तिः, शिवनिंदाकारिब्रह्मशिरश्छेदात्कालराजस्य कापालिकवेषेण काश्यां प्रयाणम्, तत्र गतस्य कालभैरवस्य पृष्ठलग्नाया ब्रह्महत्यायाः पातालगमनम्, तत्र कपालमोचनतीर्थे सर्वेषां पातकक्षालनाय कालभैरवस्थितिवर्णनं च.	५२
३२	पूर्णभद्रनामकयक्षस्य शिवाराधनात्कनककुण्डलाख्यभार्यायां हरिकेशाभिधपुत्रजन्मकथनम्, बाल्यावस्थामारभ्य शिवासक्तस्य हरिकेशस्य पितुस्ताडनभयाद्गृहान्निर्गतस्य काश्यां प्रयाणम्, पार्वतीं प्रति शिवनिरूपितानन्दकाननवर्णनम्, आनन्दकानने हरिकेशस्य तपःसन्तुष्टमहेश्वराद्दण्डपाणित्वकथनम्, दण्डपाण्यष्टककथनं च.	५४
३३	ज्ञानवापीनामकतीर्थोत्पत्तिवर्णनपूर्वकतन्नाममाहात्म्यवर्णनम्, काशीनिवासिहरिस्वामिकन्याया ज्ञानवापीं सेवमानायास्तद्रूपमोहितविद्याधरेणाहरणम्, मलयपर्वते विद्याधरेण साकं राक्षसस्य युद्धवर्णनम्, युद्धे राक्षसविद्याधरयोः परस्परप्रहारेणैव मरणाद्धरिस्वामिकन्याया विद्याधरं प्रति मन्यमानाया देहपरित्यागकथनम्, उभयो राजदेहमासाद्य तत्र चित्रपटीविलोकनानन्तरं विवाहः	५७
३४	माल्यकेतुकलावत्योस्तयोः काशीप्रयाणम्, तत्र काशीयात्रां विधाय ज्ञानवापीनिकटे शिवोपदेशाद्विमानमारुह्योभयोः शिवलोकगमनकथनम्, ज्ञानवापीमाहात्म्यकथनं च.	५९
३५	काशीप्रापकब्राह्मणसदाचारवर्णनप्रसङ्गेन नित्यकर्तव्यधर्मनिरूपणम्.	६१
३६	सदाचारवर्णनप्रसङ्गेन द्विजानां ब्रह्मचर्यधर्मनिरूपणम्.	६४
३७	सुलक्षणां स्त्रियं विना गृहस्थाश्रमस्य न सिद्धिस्तस्माद्विस्तरेण स्त्रीलक्षणनिरूपणम्.	६६
३८	अष्टविधविवाहवर्णनम्, द्विजादीनां काशीप्राप्तिकरस्य शुभाचारस्य विस्तरेण कथनं च.	६८
३९	दिवोदासनृपेतिहासकथनप्रसङ्गेनाविमुक्ते क्षेत्रे अविमुक्तेशशिवलिङ्गोत्पत्तिकथनम्	६९
४०	काशिकाक्षेत्रगमनविघ्नविधायिद्विजादिनिषिद्धाचारस्वरूपवर्णनम्, गृहस्थाश्रमिणां विहिताचारनिरूपणं च.	७१
४१	वानप्रस्थयतिधर्माणां विस्तरेण निरूपणे योगाख्यानम्.	७३
४२	निकटासन्नमृत्युचिह्नकथनपूर्वकं श्रीक्षेत्रकाशीमाहात्म्यमिश्रितकालवञ्चनोपायकथनम्	७६
४३	दिवोदासे काश्यामुषित्वा भुवो राज्यं शासति सति सर्वेषां विश्वेश्वरादिदेवानां भुवं परित्यज्य मन्दराचलगमनम्, दिवोदासराज्ये प्रजासौख्यवर्णनम्, भुवं परित्यज्य अग्नेरपि स्वर्गगमनम्, तद्विलोक्य राज्ञा व्याहृतस्य स्वसामर्थ्यस्य वर्णनं च.	७७
४४	विश्वनाथभवान्योर्मन्दरगिरिवरे स्थितयोः काशीवियोगदुःखवर्णनम्, दिवोदासनृपस्य काशीक्षेत्रपरित्यागार्थं शिवेन योगिनीगणप्रेषणवर्णनं च... ...	७८
४५	चतुःषष्टियोगिनीनां शिवाज्ञया काशीपुरे राज्ञो दिवोदासस्य विघ्नार्थं प्रवेशकथनम्, तासां नामनिरूपणं च....	८०
४६	दिवोदासस्य विघ्नमुत्पाद्य काश्यां बहिर्निष्कासनाय शिवादिष्टरव्यागमनम्, दिवोदासराज्ये नानाविधप्रयत्नेन च्छिद्रान्वेषणोद्यतस्य रवेर्द्वादशधा आत्मानं विभज्य काश्यामेव निवासकथनम्, लोलार्कस्थानकथनम्, तत्तीर्थयात्राविधिमाहात्म्यकथनं च.	८०
४७	उत्तरार्ककुण्डनिरूपणम्, तत्र स्थिताया द्विजकन्याया मातापित्रोर्मरणानन्तरमुत्तरार्कसमीपे तपश्चरणम्, तस्यै गौर्या स्वसखीत्वरूपवरप्रदानम्, उत्तरार्ककुण्डमाहात्म्यनिरूपणं च.	८१
४८	कृष्णपुत्रस्य सांबस्य नारदापमानात्कृष्णशापप्रभवकुष्ठरोगावगमकथनम्, तत्परिहाराय काश्यां तस्य स्वनाम्ना कुण्डं विधाय तपश्चरणाद्रोगनिवृत्तिः, कुण्डमाहात्म्यसहितसांबादित्यमाहात्म्यकथनं च.	८२
४९	पाण्डवानां वनवासप्रसङ्गेन काश्यां गमनम्, तत्र द्रौपद्या सूर्याराधनम्, तस्यै सूर्यतः स्थालीप्राप्तिः, द्रौपद्याराधितरवेः स्थाननिरूपणम्, मयूखादित्यमाहात्म्यवर्णनं च.	
५०	उच्चैःश्रवसो वर्णविषये कद्रूविनतयोर्वादकथनम्, तत्र कापट्येन विनतायाः पराभवात्कद्रूदास्यकरणम्, मातुर्दास्यापनोदाय गरुडस्य सुधाहरणवर्णनम्, विनतागरुडयोः काश्यां शिवलिंगस्थापनपूर्वकं तपश्चरणम्, तयोर्वरप्रदानपूर्वकखखोल्कादित्यस्थानमाहात्म्यकथनं च.	८५

इति श्रीकाशीखण्डपूर्वार्धम् ॥ (४–१) ॥

॥ अथ काशीखण्डोत्तरार्धम् ॥ (४–२) ॥

अध्यायाः	विषयाः	पृ०
५१	अरुणादित्यमाहात्म्यवर्णनम्, विनतादास्यकारणकथनम्, वृद्धहारीतोपासितवृद्धादित्यमाहात्म्यकथनम्, विष्णुवचनात्काश्यां शिवलिंगं प्रतिष्ठाप्य सूर्यस्य तपश्चरणम्, तस्य केशवादित्यनामप्राप्तिपूर्वकमाहात्म्यवर्णनम्, विमलगंगायमादित्यानां संक्षेपतो वर्णनं च.	८८
५२	दिवोदासनृपतिनिष्कासनाय शिवप्रेषितस्य चतुराननस्य द्विजवेषेण काश्यां दशसंख्याकाश्वमेधकरणात्तीर्थस्य दशाश्वमेधनामकरणकथनम्, तत्तीर्थमाहात्म्यवर्णनं	९०
५३	शिवप्रेषितानां योगिनीभानुविधीनां काश्यामेव शिवलिंगानि संस्थाप्य तत्रैव स्थितानां स्थितिं परिज्ञातुं दिवोदासस्य निष्कासनाय च शंकुकर्णादीनां शिवाज्ञया काशीप्रयाणवर्णनम्, काशीवर्णनं च.	९१
५४	शम्भोरत्यन्तप्रियकपर्दिगणस्थापिताशिवलिंगमाहात्म्यवर्णनप्रसङ्गेन वाल्मीकिसंज्ञकद्विजेतिहासकथनम्, तत्कृतपिशाचोद्धारवर्णनम्, पिशाचमोचनतीर्थयात्रामाहात्म्यकथनं च.	९३
५५	पिंगलादिगणस्थापितशिवलिंगमाहात्म्यनिरूपणम्, ये ये गणाद्याः काशीस्थितिं विलोकयितुं शिवेन प्रेषितास्तेषामपुनरावृत्तिं विलोक्य काश्यां शिवाज्ञया गणेशस्य प्रवेशवर्णनं च.	९४
५६	गणेशस्य ज्यौतिषिकद्विजवेषमाश्रित्य काश्यां प्रवेशवर्णनम्, स्वमायया पुरीस्थितानेकजनमोहं विधाय राज्ञोऽन्तःपुरे गणेशस्य राजस्त्रीभिः सहाऽऽलापादिवर्णनम्, दिवोदासनृपसमागमे राज्ञो वर्णनपूर्वकं गणेशेन तस्मै ब्राह्मणागमनपूर्वकब्राह्मणकृतोपदेशरूपभविष्यकथनं च.	९५
५७	अथ शिवेन कृताया गणेशस्तुतेः प्रसंगतो वर्णनम्, गणेशस्य ढुंढिराजनामकथनम्, भगीरथहरिश्चन्द्रादिगणेशस्थानकथनं च.	९६
५८	अथ गणेशेऽपि विलंबिते चिन्तापरवशेन शिवेन दिवोदासनृपस्य काशीत उच्चाटनाय विष्णुनिरूपणम्, काश्यां विष्णोर्नानाविधस्थाननिरूपणम्, विष्णुलक्ष्मीगरुडैः सौगतपरिव्राजिकाशिष्यरूपैर्बौद्धधर्मस्थापनप्रकारवर्णनम्, प्रजा अधर्मरुचीः कृत्वा गणेशवचनानुसारेण द्विजरूपस्य विष्णो राज्ञे शिवलिंगस्थापनोपदेशकथनम्, शिवलिङ्गमभ्यर्च्य राज्ञो दिवोदासस्य विमानमारुह्य कैलासपुरप्रयाणवर्णनं च.	९८

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
५९	वेदशिरसो मुनेः मुखिमण्डलस्य दृष्ट्वा स्वशिष्यवीर्यस्य चौर्यात्कन्योत्पत्तिकथनम्, तस्या भूतपापाख्यायाः कन्यायाः पितुर्वेदशिरसश्च पापनिष्कृतिकरणम्, ब्रह्मणो वरदानात्तस्याः पापिन्यविशेषतामाप्तिकथनम्, तां दृष्ट्वा धर्मस्य कामोद्दीपनात्परस्परं शापप्रसङ्गेन तयोर्नदीनदत्वप्राप्तिकथनम्, गंगासमुत्तरत्वतीरिकरणाधूतपापाधर्मनदसंगमात्पश्चिमतीर्थकथनम्, तन्माहात्म्यकथनं च. १०२	८०	पुलोमजां प्रति शिवनिरूपितस्य चैत्रशुक्लतृतीयामारभ्य फाल्गुनशुक्लचतुर्दशीपर्यन्तं विश्वभुजाख्यगौरीविनायकदैवतमनोरथतृतीयाव्रतस्य विस्तरेण वर्णनम्. १३९
६०	अग्निबिंदुमुनिकृतविष्णुस्तुतिवर्णनम्, तत्र विष्णुमाधवत्वस्थानवर्णनम्, बिन्दुमाधवमाहात्म्यवर्णनं च. १०३	८१	सुश्रोरवेर्वचनाद्ब्रह्मत्योद्भवब्राह्मसंवेत्तृत्व काश्यामुत्तरवाहिन्यां स्नात्वा धर्मशास्त्रशिवलिंगसंस्थितौ तपश्चरणम्, ब्रह्महत्यानिवृत्तिपूर्वकभिद्रस्य पूर्ववैराजःप्राप्तिकथनम्, दुर्गमभूपतिहासकथनपूर्वकधर्मेशमाहात्म्यकथनं च. ... १४०
६१	आदिकेशवतत्क्षेत्रैकेशवादिवैष्णवस्थानानां संक्षेपतो वर्णनम्, बिंदुमाधवनिरूपणनानास्थानतद्यात्राविधिनिरूपणम्, बिंदुमाधवकथनानन्तरं बिंदुमुनेः सुदर्शनचक्रसंस्पर्शात्सायुज्यलाभनिरूपणं च. १०५	८२	वीरेश्वराविर्भावप्रसङ्गेन मित्रजित्पराक्रमवर्णनम्, महाविष्णवस्य मित्रजिन्नृपस्य कंकालासुरं त्रिशूलेन हत्वा कंकालामुखदलवगन्धिनीं विद्याधरकन्यां गान्धर्वोद्वाह तया सह काश्यामागमनम्, अभीष्टतृतीयाव्रतविषये राज्ञी प्रति नृपप्रश्नश्च १४२
६२	दिवोदासनृपे विष्णुकथनानुसारेण कैलासपुरं प्रविष्टे विष्ण्वादीनां मन्दरे हरस्त्रियै शिवानयनार्थं गमनम्, शिवकृतरुपिलतीर्थवर्णनम्, लोपलतीर्थे कृष्णजग्राद्भुतकथनं च. १०६	८३	नृपप्रश्नानुसारेण मार्गशीर्षशुक्लतृतीयायां राज्ञीनिरूपितगौरीविधिदेवताभीष्टतृतीयाव्रतनिरूपणम्, व्रतकरणाद्राज्ञः पुत्रलाभः, मूलर्क्षे जातस्य मात्रा विकटादेवीपुरतः स्थापितस्य तस्य शिशोर्दैव्यनुज्ञया नादेश्वर्यादिमातृसमीपे प्रेषणम्, मातृविसृष्टस्य बालकस्यानन्दकानने पञ्चमुद्रादेवीनिकटे तपश्चरणाच्छिवलिंगाधिगमः, अत्रैव लिंगस्य वीरेश्वराख्याप्राप्तित्वन्माहात्म्यकथनम्, वीरेश्वरशिवेन तस्मै राजपुत्राय नानाविधवरान्दत्त्वा कथितानामलिंगगंगासंगमस्थितपुण्यस्थानानां क्रमेण वर्णनं च. १४३
६३	जैगीषव्यमुनिनपोवर्णनम्, तस्य शिवाद्वरप्राप्तिकथनम्, ज्येष्ठेशमाहात्म्यकथनं १६०	८४	मित्रजिन्नृपपुत्राय वीरेश्वराख्यशिवनिरूपितानां श्रीमदादिकेशवादिभगीरथतीर्थानां कथनम्. १४५
६४	मन्दराचलाद्गतं शिवं सगणं साम्बं द्रष्टुं नानातीर्थागतानां द्विजानां शिवदर्शनम्. शिवप्रणीतकाशीक्षेत्ररहस्यकथनं च. ११३	८५	आनंदकानने शिवलिंगं संस्थाप्य पञ्चत्वप्राप्तावपि कलाभावाद्दुर्वाससि काशीं शमुमुक्षते शिवस्य लिंगादाधिभांयवर्णनम्, दुर्वासःकानपूर्णात्तच्छिवलिंगस्य कामेश्वराभिधानं तन्माहात्म्यकथनं च.... .... १४६
६५	पराशरेश्वरमार्कण्ड्येश्वरजाबालेश्वरकन्दुकेश्वरादिनानाविधशिवलिङ्गमाहात्म्यकथनम् ११४	८६	विश्वकर्मनिर्मितशिवलिंगस्य काश्यां विश्वकर्मेश्वराभिधानकथनपूर्वकमाहात्म्यवर्णना १४८
६६	शैलेश्वरादीनां काशीक्षेत्रस्थितशिवलिङ्गानां निर्णयकथनम्... ... ... ११५	८७	दक्षेश्वरोत्पत्तिकथनपूर्वकं केनचित्प्रसङ्गेन शिववैरिणो यज्ञप्रजापतेः शिवौ विना यज्ञारम्भवर्णनम्. १४९
६७	गौरीं प्रति शिवनिरूपितरत्नेश्वरशिवलिङ्गमाहात्म्यकथनम्, कस्याश्चिदप्सरसः शिवराज्यां रत्नेश्वरसमीपे नर्तनगानादिना जागरणाच्च शिवप्रसादेन देहान्तरे वसुभूतिनामकगन्धर्वराजतनयात्वलाभवर्णनम्, रत्नावलीनाम्न्यास्तस्या गन्धर्वकन्याया रत्नेश्वरवरलिंगप्रभावात्परमाश्चर्यजनकविवाहादिचरितवर्णनम्, दाक्षायणीश्वरमाहात्म्यकथनं च. ११६	८८	नारदमुखादक्षवृत्तमाकर्ण्य शिवयचनमनादृत्यैव सत्या दक्षयज्ञं प्रति गमनम्, तत्र शिवनिंदां पितुर्मुखादाकर्ण्य परमकुपितया तया देहविसर्जनम्. ९५१
६८	अहिबाहुसुपुत्रस्य गजासुरस्य शिवेन शूलेन विनाशनम्. कृत्तिवासेश्वरोत्पत्तिकथनम्, कृत्तिवासेशमाहात्म्यकथनं च. १२०	८९	शिवगणवीरभद्रकृतं यज्ञविध्वंसनपूर्वकं दक्षशिरोनाशनम्, पुनर्वीरभद्रेण शिवाज्ञया दक्षस्य मेषवदनत्वं संपाद्य विमोचनम्, काश्यां शिवलिंगं संस्थाप्य दक्षस्य तपःकरणम्, दक्षेश्वरोत्पत्तिकथनं च. १५३
६९	नानाविधस्थानस्थितानां शुभदानामष्टषष्टिसंख्याकानामायतनानां काश्यां समागमकथनम्. १२१	९०	पार्वतीकृतपार्वतीशशिवलिंगस्थापनम्, तन्माहात्म्यनिरूपणं च. ... १५५
७०	पेताळाविपरिवारसहितानां नवकोटिसंख्यचण्डानां काशीरक्षणाय स्थानेस्थाने स्थापनवर्णनं च... ... ... १२३	९१	विश्वनाथशिवलिंगात्पूर्वतो गंगास्थापितगंगेशलिंगसाहात्म्यवर्णनं च. ... १५५
७१	रुरुदैत्यपुत्रस्य पुंभिरजेयस्य दुर्गासुरस्य त्रैलोक्यराज्यकर्तुर्नाशाय स्वनिकटे तन्नियुं भगवत्याः कालरात्रेः प्रेषणम्, कालरात्रिवचनात्ससैन्यस्य दुर्गादैत्यस्य भगवत्याः समीप आगमनम्, युद्धोद्यतं दुर्गासैन्यं विलोक्य देवीशरीराच्छक्त्युद्गमवर्णनम्, दुर्गासुरस्य भगवत्या सह युद्धवर्णनं च. १२४	९२	ब्रह्मणः सकाशाद्ब्रह्मसाम्यरूपं वरमलब्ध्वा काश्यां शिवलिङ्गं संस्थाप्य रेवावासपः-करणम्, नर्मदेश्वरदत्तरेवावरदानकथनपूर्वकतल्लिङ्गमाहात्म्यवर्णनं च. १५६
७२	भगवतीशरीरोत्पन्नशक्तीनां नामनिरूपणम्, दैत्यदेवीयुद्धवर्णनम्, दुर्गादैत्यवधसन्तुष्टदेवकृतदुर्गादेवीस्तुतिकथनम्, दुर्गाभैरवपूजनफलकथनं च. ... १२६	९३	शिवं पतिं लब्धुं काश्यां सतीस्थापितसतीश्वरलिंगमाहात्म्यवर्णनम्. १५६
७३	पार्वतीं प्रति शिवनिरूपितौंकारादिचतुर्दशलिंगगणनम्, ओंकारेशोत्पत्तिवर्णनप्रसंगेन ब्रह्मकृतौंकारस्तुतिकथनम्, ओंकारेशलिङ्गमाहात्म्यनिरूपणं च. १२८	९४	अमृतेश्वरकरुणेश्वरज्योतीरूपेश्वराणां शिवलिंगानां माहात्म्यवर्णनम्. ... १५६
७४	पाद्मकल्पीयभरद्वाजसुतदमनस्य विद्यामधीत्य विरक्तस्य रेवातीरेऽमरकंटकक्षेत्रे गर्गनाम्नो मुनेर्दर्शनम्, गर्गमुनिनिरूपितौंकारमाहात्म्यवर्णनं च. ... १३०	९५	काश्यामपि भुजमूर्ध्वीकृत्य हरिः सेव्यो हरिः सेव्य इति व्यासवचनं श्रुत्वा शैवादिकृतव्यासभुजवाक्स्तम्भनवर्णनम्, ततो विष्णोरुपदेशेन व्यासेन विष्णुकण्ठसंस्पर्शनात्स्तम्भनाभिनृत्य शिवस्तुतिकरणम्. १५७
७५	सप्तजन्मार्जितपापनिवारणैकक्षत्रिलोचनेश्वराविर्भावकथनम्, तन्माहात्म्यनिरूपणं च. १३२	९६	व्यासशापमोचनकथनम्, कुष्ठादिरूपकथनम्, व्यासस्य काशीतो बहिर्निष्कासनवृत्तान्तवर्णनम्. १५८
७६	मणिमाणिक्यनिर्मितत्रिलोचनप्रासादस्थितपारावतद्वन्द्वेतिहासकथनपूर्वकं त्रिलोचनाख्यशिवलिंगमाहात्म्यकथनम्. १३३	९७	सर्वपापापनोदनकाशीक्षेत्रस्थितसर्वतीर्थकथनम्. १६१
७७	केदारेश्वरमाहात्म्यकथनप्रसङ्गेनोऋषिनीस्थितद्विजशरकेतिहासकथनम्. १३५	९८	काश्यां मुक्तिमण्डपे श्रीविश्वेश्वरसमागमनमहोत्सवस्य विशेषेण वर्णनम्. १६५
७८	यमधर्माराधितधर्मेश्वराख्यशिवलिंगमाहात्म्यनिरूपणम्. १३६	९९	श्रीशम्भुना ब्रह्मविष्ण्वादिदेवेभ्यः श्रीविश्वेश्वराख्यस्य काशीक्षेत्रपरमदैवतस्य माहात्म्यनिरूपणम्. १६६
७९	धर्मतपःसाक्षिणां क्षीरशिशूनां शिवशरात्कैलासवासिकथनपूर्वकं धर्मेश्वरमाहात्म्यकथनम्. १३७	१००	काशीखण्डान्तर्गतेतिहासानुक्रमवर्णनम्, पञ्चक्रोश्यादियात्रावर्णनम्, काशीखण्डपठनफलवर्णनं च. ....

इति काशीखण्डोत्तरार्धं ॥ (४–२) ॥

इति श्रीस्कान्दे महापुराणे चतुर्थं काशीखण्डं ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ अथश्रीस्कान्दे महापुराणे पञ्चममावन्त्यखण्डम् ॥ ५ ॥

अध्यायाः विषयाः पृ०

॥ अथावन्त्यखण्डे प्रथममावन्त्यक्षेत्रमाहात्म्यम् ॥ (५–१) ॥

१ अथादौ परममङ्गलकारिणः श्रीमहाकालदेवस्य स्तवनम्, महाकालवनमाहात्म्यं शुश्रूषोर्व्यासस्य सनत्कुमारसमीप आगमनम्, सनत्कुमारव्याससंवादारम्भः, तत्र सनत्कुमारेण महाकालवनप्रशंसावर्णनम्. १

२ कल्पारंभे सृष्ट्युत्पत्तिवर्णनम्, ब्रह्मविष्णुमहेश्वराणामुत्पत्तिवर्णनम्, देवकृतेश्वरस्तुतिवर्णनम्, ब्रह्मणः पञ्चमकपालच्छेदनात्तत्कपालधारणात्कपालीति नाम्ना देवैः शिवलिंगस्थापनम्. २

३ ब्रह्मणो मस्तकगलिताद्रुधिरात्कुण्डलिपुरुषस्योत्पत्तिवर्णनम्, ब्रह्माज्ञया तस्य शिवविनाशार्थं शिवाग्रे गमनम्, शिवस्य विष्ण्वाश्रमे गमनम्, विष्णुना शिवाय दक्षिणभुजसमर्पणम्, विष्ण्वसृक्संभवस्य पुरुषस्य ब्रह्मस्वेदजातस्य पुरुषस्य च युद्धवर्णनम्, शिवविनाशार्थं राक्षसप्रेषणात्प्राप्तदोषस्य ब्रह्मणः प्रायश्चित्तविधानवर्णनम्. ३

४ सनत्कुमारव्याससंवादप्रसंगेन वैश्वानरोत्पत्तिवर्णनम्. ४

५ नरनारायणयोर्बदर्याश्रमं प्रति गमनम्, ताभ्यां जगद्धितार्थं तपःकरणम्, तद्वनं दृष्ट्वा तुष्टेन शंकरेण पादपादिकान्प्रति वरप्रदानम्, तत्र नरनारायणदर्शनम्, पादपवचनाच्छिवस्य तत्रैवावस्थानम्, शिवदर्शनार्थं ब्रह्मादिदेवानां तत्रागमनम् ५

६ तद्वनं शिवदर्शनाभावाद्देवैर्यज्ञसमारंभणम्, सहस्रसमापर्यन्तं तपस्तप्त्वा तपोऽन्ते शिवदर्शनम्, देवैः शिवस्तुतिकरणम्, शिवेन देवेभ्यो वरप्रदानम्, शिववचनाल्लिंग-...नम्, कपालमोक्षणतीर्थमाहात्म्यवर्णनम्. ६

७ महाकालवनवासविधिवर्णनम्, महाकालवने वासं कुर्वतां पुरुषाणां फलप्राप्तिवर्णनं पूर्वकं महाकालमाहात्म्यवर्णनम्. ८

८ सनत्कुमारव्याससंवादप्रसंगेन महाकालवने दानमाहात्म्यवर्णनम्, शिवगौर्योः कलहे जायमाने तत्र कलकलेश्वरोत्पत्तिवर्णनम्, कलहनाशनकुण्डोत्पत्तिवर्णनम्, कलहनाशनकुण्डे दानमाहात्म्यवर्णनम्, अप्सरस्तीर्थोत्पत्तिमाहात्म्यवर्णनम्, अप्सरसां तीर्थे स्नानदानादिमाहात्म्यवर्णनम्, अप्सरःकुण्डमाहात्म्यवर्णनम्. ९

९ माहिषकुण्डोत्पत्तिवर्णने महिषवेषधारिणो हालाहलनामकराक्षसस्य शिवेन युद्धवर्णनम्, शिवेन राक्षसस्य पराजयं कृत्वा तत्रैव लिङ्गस्थापनम्, महिषकुण्डकृतसरोमाहात्म्यवर्णनम्. १०

१० कौटुम्बिकेश्वरमाहात्म्यवर्णनम्. ११

११ पारिजातकुसुममालां गृहीत्वा विद्याधरपतेर्वासववेश्मनि गमनम्, तत्र नृत्यकारिण्यै मेनकायै तेन तन्मालाप्रदानम्, तया मालया माहितां तां मेनकां दृष्ट्वा नृत्यभंगाच्छक्रेण विद्याधरस्य शापप्रदानम्, शक्राज्ञया विद्याधरपतेरवन्त्यामागमनम्, तत्र तीर्थे स्नानेन विद्याधरपतेः स्वस्थाने गमनम्, विद्याधरतीर्थमाहात्म्यवर्णनम्. ११

१२ मर्कटेश्वरमाहात्म्यवर्णनम्, शीतलातीर्थमाहात्म्यवर्णनम्. ११

१३ स्वर्गद्वारमाहात्म्यवर्णनम्.... ... ... ११

१४ चतुःसमुद्रमध्यप्रदेशे स्थितस्य राजस्थलतीर्थस्य माहात्म्यम्, तत्र सुद्युम्नराजस्य सुदर्शनाख्यया पत्न्या पृष्टेन दाल्भ्यमुनिना चतुःसमुद्रस्नानेन पुत्रप्राप्तिरूपफलकथनम्, दाल्भ्यवचनाच्छिवाराधनाय सुद्युम्नस्य गन्धमादने गमनम्, शिववाक्यादवन्त्यां तस्य गमनम्, चतुःसमुद्राराधनेन चतुःसमुद्राणां मूर्तत्वेन दर्शनम्, चतुर्भिरब्धिभिः पार्थिवाय वरप्रदानम्, तत्रैव तीर्थस्थापनम्, चतुःसमुद्रमाहात्म्यवर्णनम्. ११

१५ शङ्करवापीतीर्थमाहात्म्यवर्णनम्, शिवेन सूर्याराधनां कृत्वा तन्नाम्ना स्वलिंगस्थापनम्, शंकरादित्यमाहात्म्यवर्णनम्. १२

१६ नीलगन्धवतीप्रभावमाहात्म्यवर्णनम्, तत्र श्राद्धादिकरणेन स्नानदानादिभिश्च महापुण्यफलप्राप्तिकथनम्.... ... ... १२

अध्यायाः विषयाः पृ०

१७ सनत्कुमारव्याससंवादप्रसङ्गेन दशाश्वमेधतीर्थमाहात्म्यवर्णने मन्वादिभिः स्नानेन दशाश्वमेधफलं सम्पादितमित्यादिसदृष्टान्तवर्णनम्. १३

१८ एकानंशादेव्युत्पत्तिवर्णने तारकासुरराक्षसपीडितेन ब्रह्मणा निशादेव्याः स्मरणम्, तया तारकविनाशार्थं ब्रह्मण उपायकथनम्, तत्रैव ब्रह्मणा तस्याः स्थापनम्, एकानंशादेवीतीर्थमाहात्म्यवर्णनम्. १३

१९ शिवपार्वत्योरक्षक्रीडासमये तत्र स्थले चण्डप्रचण्डदैत्ययोरागमनम्, पार्वत्या तयोः पराभवकरणम्, हरसिद्धिरिति शङ्करेण पार्वत्या नामकरणम्, हरसिद्धितीर्थमाहात्म्यवर्णनम्. १३

२० वटयक्षिणीमाहात्म्यवर्णनम्, पिशाचकतीर्थमाहात्म्यम्, शिप्रागुफेश्वरतीर्थमाहात्म्यवर्णनम्, अगस्त्येश्वरमाहात्म्यवर्णनम्, ढुण्ढेश्वरमाहात्म्यवर्णनम्, डमरुकेश्वरमाहात्म्यवर्णनम्, अनादिकल्पेश्वरमाहात्म्यवर्णनम्, सिद्धेश्वरवीरभद्रचंडिकामाहात्म्यवर्णनम्, स्वर्णजालेश्वरतीर्थमाहात्म्यवर्णनम्, महामायामाहात्म्यवर्णनम् कपालेश्वरमाहात्म्यवर्णनम्, स्वर्गद्वारतीर्थयात्रामाहात्म्यवर्णनम्. ... १४

२१ हनुमत्केश्वरमाहात्म्यवर्णने रावणवधानन्तरं रामादीनामयोध्यायां गमनम्, तत्र राज्याभिषेकवर्णनम्, लिंगं याचितुं हनुमता लंकां गत्वा विभीषणाज्ञया लिंगं गृहीत्वाऽवन्त्यामागमनम्, सरस्तीरे लिंगं संस्थाप्य हनुमतः स्नानकरणम्, स्नानान्ते लिङ्गस्याऽचलनं दृष्ट्वा शिवाज्ञया तत्रैव तस्य लिङ्गस्य स्थापनम्, हनुमत्केश्वरतीर्थमाहात्म्यवर्णनम्. १४

२२ यमेश्वरमाहात्म्यवर्णनम्, रुद्रसरोमाहात्म्यवर्णनम् १४

२३ महाकालयात्रावर्णनम्; यात्रामाहात्म्यवर्णनम्. १४

२४ सुमतिनामकब्राह्मणस्य कैशिकपत्न्यां जातस्याग्निशर्मणः कुमारस्याऽभ्यासत्यागवर्णनम्, अग्निशर्मकृतदुष्टसंगतिवर्णनम्, नित्यप्राणिहिंसनशीलत्वात्सप्तर्षीनागतान्दृष्ट्वाऽग्निशर्मणा तद्वधोपायकरणम्, अत्रिवचनाद्गृहं गत्वा तस्य पापभागित्वेन स्वपरिवारं प्रति प्रश्नकरणम्, ततस्तैर्गृहस्थितैः पित्रादिभिः पापफलभोगस्यास्वीकरणं श्रुत्वाऽग्निशर्मणा पश्चात्तापं कृत्वा महर्षीन्प्रति शरणं गत्वा प्रार्थनाकरणम्, ततोऽत्रिमहर्षिदत्तमन्त्रस्योपासनात्पापनिष्कृतिवर्णनम्, ततः कालांतरेण वल्मीकसम्भवाद्वाल्मीकिरिति महर्षिभिस्तस्याभिधानकरणम्, तेन वाल्मीकिना कुशस्थलीं गत्वा शिवमाराध्य स्वनाम्ना लिंगस्थापनम्, वाल्मीकीश्वरमाहात्म्यवर्णनम्. १

२५ शुक्रेश्वरभीमेश्वरगर्गेश्वरकामेश्वरचूडामणीश्वरचण्डीश्वरादितीर्थमाहात्म्यवर्णनम्. ६

२६ कालवनस्य सौन्दर्यपूर्वकमाहात्म्यवर्णनम्, कालवनस्यासमन्तात्सर्वदिक्षु स्थितानां पिंगलेशादिदेवतानां माहात्म्यवर्णनम्, कल्पसप्तकमहिमवर्णनम्, पंचेशानीयात्रामाहात्म्यम्, अक्रूरेश्वरमाहात्म्यम्, ब्रह्मकुण्डमाहात्म्यवर्णनम्, मन्दाकिनीतीर्थमाहात्म्यवर्णनम्. १६

२७ अंकपादाख्यस्थानमाहात्म्यवर्णने बलरामकृष्णयोर्जन्मकर्मनिरूपणम्, सांदीपनये गुरुदक्षिणां दातुं प्रवृत्तयोस्तयो रामकृष्णयोः समुद्रस्थं शंखासुरं हत्वा यमलोके गमनम्, तत्र यमस्य पराजयं कृत्वा सांदीपनिपुत्रं गृहीत्वा तयोर्गुरुसमीप आगमनम्, अवंत्यामङ्कपादाख्ये लिंगस्थापनम्, मूर्तिपञ्चकमाहात्म्यवर्णनम्. १८

२८ चन्द्रादित्यमाहात्म्यम्, करभेश्वरमाहात्म्यम्, गणेशमाहात्म्यम्, कुसुमेश्वरजयेश्वरयोर्माहात्म्यवर्णनम्, शिवद्वारमाहात्म्यवर्णनम्, मार्कण्डेयेश्वरमाहात्म्यवर्णनम्, ब्रह्मेश्वरमाहात्म्यम्, ब्रह्माणीकुण्डमाहात्म्यम्, यज्ञवापीमाहात्म्यम्, पशुपतिरुद्रपुररूपकुंडकेदारकुंडकरीकुंडाजागंधचक्रतीर्थादिमाहात्म्यवर्णनम्, सोमवतीलिंगसोमेश्वरलिंगमाहात्म्यवर्णनम्. १८

२९ अनरकतीर्थमाहात्म्यवर्णनम्, तत्प्रसंगेन नरकवर्णनं नरकयातनादिकानां च वर्णनम्, नरकाप्राप्तिसाधनकथनं च. २१

३० अनरकतीर्थे दीपदानमाहात्म्यम्, तत्र पूजाविधिविधानकथनम्, दीपदानेन वीर्यतेजआदिवृद्धिप्राप्त्यादिकथनम्. २२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
३१	केदारेश्वरतीर्थमाहात्म्यवर्णनम्, जटातीर्थशुंगतीर्थेन्द्रतीर्थचंद्रेश्वरकुण्डेश्वरगोपतीर्थचिपिटातीर्थानंदेश्वररामेश्वरादितीर्थमाहात्म्यवर्णनम्, तत्र रामेण पितुर्दशरथस्य श्राद्धकर्मकरणम्, सौभाग्यतीर्थघृततीर्थयोगेश्वरीदेवीशंखावर्तसुधोदकसुधेश्वरकिंपुनतीर्थपत्तनेश्वरदुर्धर्षस्थविरविनायककामोदकादितीर्थमाहात्म्यवर्णनम्.	२३
३२	शक्रवचनादर्जुनेन केशवार्कस्थापनम्, श्रीकृष्णवचसाऽर्जुनेन सूर्यस्तंभनम्, संतुष्टेन सूर्येण तस्मै नरप्रदानम्, अर्जुनेन सूर्यस्तुतिकरणम्, सूर्याज्ञया तत्रैव नरादित्येतिनाम्ना सूर्यस्य स्थापनं च, नरादित्यमाहात्म्यवर्णनम्.	२५
३३	श्रीकृष्णेन सूर्यस्तवनकरणम्, केशवादित्यमाहात्म्यवर्णनम्.	२६
३४	स्कन्दजन्मकथावर्णनम्, तत्र शंकरेण कामज्वलनम्, अग्निना शिववीर्यप्राशनम्, गंगायां वीर्यत्यागः, स्नातुमागतानां षट्कृत्तिकानामुदरे तस्य वीर्यस्य प्रवेशः, ततः स्कन्दोत्पत्तिः, शक्तिभेदतीर्थमाहात्म्यवर्णनम्.	२६
३५	अगस्त्येश्वरमाहात्म्यवर्णनम्.	२८
३६	प्रतिकल्पस्थभिन्नभिन्नलिंगानां नामनिदर्शनपूर्वकं तीर्थवर्णनम्, अन्धकासुरयुद्धसमये शिवस्थापितस्य नरदीपतीर्थस्य माहात्म्यवर्णनम्.	२८
३७	ओंकारेश्वरमाहात्म्यवर्णनम्, अभयेश्वरलिंगमाहात्म्यम्, अंगारकीचतुर्थीव्रतमाहात्म्यवर्णनम्.	२९
३८	देवीचंडीकृतं पराभयमसहमानेनान्धकासुरेण शिवस्तुतिकरणवर्णनम्, शिवेन तत्रावन्त्यां चामुंडादीनां मातॄणां स्थापनम्, मातृकापूजनविधिवर्णनम्, अन्धकस्य शिवगणत्वप्राप्तिवृत्तान्तवर्णनम्.	३०
३९	महाकालवनमाहात्म्यवर्णनम्.	३१
४०	शिवब्रह्मसंवादे कनकशृंगाभिधानपुरीवर्णनम्.	३१
४१	कुशस्थलीमाहात्म्यवर्णनम्.	३२
४२	अवन्त्यभिधानपुरीमाहात्म्यवर्णनम्.	३२
४३	उज्जयिन्यां त्रिपुरासुरेण ब्रह्माणमुद्दिश्य तपश्चरणम्, ब्रह्मणा तस्मै वरप्रदानम्, त्रिपुरासुरपीडितानामिन्द्रादीनां शिवाग्रे गमनम्, शिवेन तेभ्योऽभयदानम्, शिवाज्ञयेन्द्रादिभिरवन्त्यां चामुण्डोपास्तिकरणम्, चामुण्डावचनाच्छिवेन दैत्यपराजयकरणम्, तत्र त्रिपुरदानवस्य उज्जितत्वादुज्जयिनीति नाम्ना तस्य पुरस्य प्रसिद्धिवर्णनम्, उज्जयिनीमाहात्म्यवर्णनम्.	३३
४४	रत्नाभावाद्रत्नोत्पादनार्थं समुद्रमंथनं कृत्वा ततो निर्गतस्य पीयूषस्य ग्रहणार्थं देवासुरयोर्विवादे समुत्पन्ने भगवता मोहिनीरूपमास्थायामृतविभागे क्रियमाणे देवपंक्त्यां कपटेन स्थितस्य राहोः शिरश्छेदकरणम्, तत्र राहुकेतुपीडानिरसनार्थं तीर्थनिर्मापणम्, राहुतीर्थमाहात्म्यवर्णनम्, रत्नकुण्डस्नानमाहात्म्यवर्णनम्, पद्मावतीपुरीनामवृत्तान्तवर्णनम्.	३४
४५	कुमुद्वतीपुरीशोभावर्णनम्, कुमुद्वतीप्रभावमाहात्म्यवर्णनं च.	३४
४६	महाकालवनवर्णने नंदनवनवर्णनम्, कामधेनुवर्णनम्, अमरावतीपुरीनामवृत्तान्तवर्णनम्.	३५
४७	विशालाख्यापुरीमाहात्म्यवर्णनम्.	३५
४८	निमेषादारभ्य चतुरशीतिकल्पपर्यन्तं कालप्रमाणनियमवर्णनम्. ...	३६
४९	कपालधारिणः शिवस्य वैकुण्ठे भिक्षार्थं गमनम्, भिक्षादानसमये विष्णोरंगुल्यां शिवेन शूलेन प्रहारे कृते विष्णोरंगुलितोऽसृक्प्रवाहनिर्गमनम्, तस्यैव प्रवाहस्य नदीरूपेण परिणतस्य शिप्रानाम्ना प्रसिद्धिकथनम्, बाणासुरकृष्णयुद्धवर्णनम्, तत्र शिवविष्ण्वोर्युद्धे मिथोस्त्रप्रेषणम्, शैवज्वरवैष्णवज्वरयोर्मध्ये शैवज्वरस्य पराभववर्णनम्, तस्य स्थानस्य ज्वरघ्नीति नाम्ना प्रसिद्धिवर्णनम्, ज्वरघ्नीतीर्थमाहात्म्यवर्णनम्.	३७
५०	पापनाशिनीतीर्थवर्णनप्रसङ्गेनाधर्मचारिणो दमनस्य राज्ञो मृगयार्थमरण्ये गमनम्, निशि वटवृक्षे घोटकं बद्ध्वा तत्रैव राज्ञो निद्राकरणम्, ततो राजमस्तके सर्पपतनम्, सर्पदंशनेन पीडितस्याग्रे यमदूतानामागमनम्, ततो यमलोकगतस्य राज्ञो यमयातनासमये वायसभक्षितस्य तच्छरीरमांसस्य शिप्रायां पतनम्, तेन पुण्येन दमनस्य शिवलोके गमनम्, यमयमदूतसंवादे शिप्रामाहात्म्यवर्णनम्.	३८
५१	भिक्षार्थं शिवस्य नागलोके गमनम्, भिक्षालब्ध्यभावात्तत्रस्थैकविंशतिकुण्डस्थस्य सर्वामृतस्य प्राशनेन भीतैः पन्नगैर्वासुकिस्तवनम्; सर्वपन्नगैः शिप्रां गत्वा शिवस्तवनकरणम्, तेन तुष्टेनेशेन तत्राऽमृतोद्भवानाम्ना कुण्डस्थापनम्, अमृतोद्भवामाहात्म्यवर्णनम्.	३८
५२	हिरण्याक्षपीडितैरिंद्रादिभिर्ब्रह्मलोकं गत्वा ब्रह्मणे सर्ववृत्तान्तकथनम्, ब्रह्मदेवेन देवेभ्यो जयविजययोः शापकारणकथनम्, हिरण्याक्षहिरण्यकशिप्वोर्जन्मकर्मकथनम्, हिरण्याक्षवधाय वराहावतारवर्णनम्, वराहाङ्गतः शिप्राया उत्पत्तिवर्णनम्, शिप्रानदीशोभावर्णनम्, शिप्रामाहात्म्यवर्णनम्. ...	३९
५३	महाकालवने सुन्दराख्यतीर्थमाहात्म्यवर्णनम्, पिशाचमोचनतीर्थमाहात्म्यवर्णनम्, तत्र देवलद्विजस्य कथावर्णनम्.	४०
५४	नीलगंगामाहात्म्यवर्णनम्.	४१
५५	रेवाजलनिमग्नां भूमिं दृष्ट्वा तदुद्धारार्थमगस्त्येन विन्ध्ये तपश्चरणम्, तत्तपःप्रसन्नाया विन्ध्यवासिन्या उज्जयिन्यां गमनम्, विन्ध्यवासिनीविमलोदतीर्थमाहात्म्यवर्णनम्.	४२
५६	मांधातृक्षेत्ररुद्रसरोमाहात्म्यवर्णनम्, क्षातासंगमतीर्थवर्णने सूर्यानुसूर्ययोर्विवाहानन्तरं यमयमुनयोरुत्पत्तिवर्णनम्, क्षातासंगमतीर्थमाहात्म्यम्. ...	४२
५७	गयातीर्थमाहात्म्यवर्णनम्, तत्र गयातीर्थप्रशंसायां तुण्डुण्डराक्षसपीडितानां सर्वेषां देवानां ब्रह्माग्रे गमनम्, ब्रह्मादिभिर्विष्णुलोके गत्वा विष्णुस्तवनकरणम्, विष्ण्वनुज्ञया सर्वेषां गयातीर्थे गमनम्.	४३
५८	गयातीर्थे समंत्रकविधानपूर्वकश्राद्धकर्ममाहात्म्यवर्णनम्.	४४
५९	गयाक्षेत्रस्थफल्गुनदीमाहात्म्यवर्णनम्, आदिगयाबुद्धगयाविष्णुपदीगयाकोष्ठगदाधरवेदिकाऽक्षयवटप्रेतमुक्तिकरीशिलाऽच्छोदादितीर्थेषु स्नानदानफलमाहात्म्यम्, तत्र ऋषिपत्नीनारदसंवादे नारदेनर्षिपञ्चमीव्रतमाहात्म्यवर्णनम्. ...	४५
६०	पुरुषोत्तममाहात्म्यवर्णने लक्ष्मीनारायणसंवादप्रसंगेन मलमासमाहात्म्यवर्णनम्, अधिमासे व्रतनियमादिविधिविधानकथनम्, मलिम्लुचमासे स्नानदानादिमाहात्म्यवर्णनम्....	४५
६१	अधिमासे महाकालवनवासमाहात्म्यम्, पुरुषोत्तमपूजाक्रममाहात्म्यम्, जटेश्वरमहेश्वरतीर्थस्नानमाहात्म्यम्, भार्गवरामतीर्थमाहात्म्यम्, कौशिकीनदीमाहात्म्यम्, अधिमासे स्नानदानादिमाहात्म्यवर्णनम्.	४६
६२	गोमतीकुण्डमाहात्म्यम्, काशीमाहात्म्यम्, गोमतीकुण्डे स्नानादिपुण्यफलप्राप्तिवर्णनम्.	४६
६३	कन्थडेश्वरखगर्तासंगमवीरेश्वरवामनतीर्थमाहात्म्यवर्णनम्, तत्र बलिपीडितैर्देवैर्ब्रह्मलोकं गत्वा सर्वबलिवृत्तनिवेदनम्, ब्रह्मणा विष्णोराराधनार्थमुपायकथनम्, तत्र ब्रह्मदेवेन्द्रादिदेवसंवादप्रसंगेन विष्णुसहस्रनामकथनम्, सहस्रनामफलश्रुतिकथनम्, वामनावतारादिकुण्डस्थापनवृत्तान्तमाहात्म्यवर्णनम्. ...	४७
६४	वीरेश्वरकालभैरवतीर्थवर्णनम्, तत्र भैरवाष्टककथनम्.	५१
६५	नक्षालयतीर्थप्रस्तावे जनमेजयास्तिककथानकम्, नवकुण्डनामनिदर्शनपूर्वकमाहात्म्यवर्णनम्, रमासरस्तीर्थमाहात्म्यम्.	५१
६६	नृसिंहजन्मकथावर्णनपूर्वकं नृसिंहतीर्थमाहात्म्यवर्णनम्.	५२
६७	कुटुम्बेश्वरमाहात्म्यवर्णने दक्षमहादेवादितपश्चर्यावर्णनम्.	५२
६८	देवप्रयागतीर्थमाहात्म्यवर्णनम्, आनन्दभैरवतीर्थमाहात्म्यम्, अखण्डेश्वरतीर्थवर्णने ब्रह्मदत्तस्य महापापिनोऽपि तत्र मरणाद्ब्रह्मलोकप्राप्तिवर्णनम्, नारदब्रह्मसंवादप्रसंगेनाखंडसरस्तीर्थमाहात्म्यवर्णनम्.	५३
६९	कर्कराजतीर्थमाहात्म्यम्, विधूम्रार्चिस्तीर्थवर्णनम्, चातुर्मास्यफलवर्णनम्.	५३
७०	बिन्दुसरोरम्यसरस्तीर्थमाहात्म्यम्, तीर्थसंख्यापरिगणनपूर्वकं क्रमेण नामनिर्देशकरणम्, देवयात्रांतर्गृहीसर्वतीर्थयात्रानुक्रमणिकादिकथनम्. ...	५४
७१	अवन्तीक्षेत्रमाहात्म्यफलश्रुतिवर्णनम्, ग्रन्थोपसंहारवर्णनम्. ...	५६

इत्यावन्त्यखण्डे प्रथममवन्तीक्षेत्रमाहात्म्यम् ॥ (५-१) ॥

अथावन्त्यखण्डे द्वितीयमवन्तीस्थचतुरशीतिलिंगमाहात्म्यम् ॥ (५-२) ॥

अध्यायाः	विषयाः	पृ०
१	अथ चतुरशीतिलिंगमाहात्म्यप्रस्ताव उमामहेश्वरसंवादारम्भः, तत्र प्रथममगस्त्येश्वरलिंगमाहात्म्यवर्णनम्, तत्प्रसंगेन पूर्वेतिहासवर्णनम्, तत्र देवानां सुखप्राप्त्यर्थं कुंभयोनिना दैत्यान्हत्वा पश्चात्तापेन हत्यादोषभीतेनेश्वराराधनां कृत्वा शिवानुज्ञया स्वनाम्ना शिवलिंगस्थापनम्, तस्यागस्त्येश्वरलिंगस्य माहात्म्यवर्णनम्.	५७
२	अथ गुहेश्वरलिंगमाहात्म्यवर्णनम्, तत्र मंकणकऋषिणा तपस्तप्त्वा कस्मिंश्चित्समये कराच्छाकरसनिर्गमनेनाश्चर्यं प्राप्य नर्तनकरणम्, तेन सर्वेषां स्थावरजंगमानां संजातं नृत्यं दृष्ट्वा देवानां शिवलोके गमनम्, शिवेन तस्य मंकणकस्य शंकानिरासकरणम्, शिवाज्ञया महाकालवने लिंगस्थापनम्, मंकणकर्षेर्मुक्तिप्राप्तिवर्णनम्, गुहेश्वरमाहात्म्यवर्णनम्.	५८
३	अथ ढुंढेश्वरमाहात्म्यवर्णनम्, तत्र ढुंढनामकशैवगणस्येन्द्रसभायां गमनम्, तत्र नृत्यमानां रंभां दृष्ट्वा काममोहितस्य ढुंढस्येन्द्रेण शापप्रदानम्, ततो मानुष्यं प्राप्य ढुंढेन महाकालवने शिवमाराध्य स्वनाम्ना लिंगस्थापनम्, ढुंढेश्वरतीर्थलिंगमाहात्म्यवर्णनम्.	५८
४	अथ डमरुकेश्वरमाहात्म्यवर्णनम्, तत्र रुरुपुत्रेण वज्रदैत्येन सह युद्धे पराजयं प्राप्तानां सेन्द्रादिदेवानां ब्रह्मलोके गमनम्, ब्रह्मणः शरीरतो निर्गतायाः सक-	

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
	न्यायाः कृत्वायाः पत्नीत्वं वर्णनम्, पञ्चकन्याकृत्वारतालवर्णनम्, कृत्यादिभिरीश्वराराधनाकरणम्, ईश्वरस्य वरदानवर्णनम्, ईश्वरेणेरितवरूपेण वचनाश्वासकरणम्, तपस्तप्त्वा रामकेश्वरेतिलिंगस्थापनम्, रामकेश्वरलिंगमाहात्म्यवर्णनम्.	५५
५	गयतीर्थादिकल्पेश्वरलिंगमाहात्म्यवर्णनम्.	५९
६	अथ स्वर्णजालेश्वरमाहात्म्यवर्णनम्, तत्र पार्वत्या सह क्रीडतः शंकरस्य धीर्याभाक्षेपेन वह्निना तदाक्षेपणार्थं गंगायाश्चक्षोभनकरणम्, ततो वह्नेः काञ्चनाक्षगायसापत्यस्य दर्शनेन सर्वत्र पादस्पर्शनम्, तमर्थं दृष्ट्वा वह्निना शंकराय कांचनपुत्रस्य समर्पणम्, शंकराज्ञया काञ्चनस्य महाकालवने गमनम्, काञ्चनेन तपस्तप्त्वा ईश्वरवचनात्स्वनाम्ना लिंगस्थापनम्, स्वर्णजालेश्वरलिंगमाहात्म्यवर्णनम्.	६०
७	अथ त्रिविष्टपेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नारदवचनान्महाकालवने त्रिविष्टपैलिंगस्थापनम्, त्रिविष्टपेश्वरलिंगमाहात्म्यवर्णनम्.	६१
८	अथ कपालेश्वरलिंगमाहात्म्यवर्णनम्, तत्र महाकालवने पैतामहयज्ञे हुते कपालं धृत्वा शंकरस्यागमनम्, शंकरस्य कुचेलवेषं दृष्ट्वा ब्राह्मणैरपमानकरणम्, ततः शिवेन तत्र भक्षणपात्रे कपालं निधाय गमनम्, तदसह्यमानैर्ब्राह्मणैर्मन्त्रपाठहुतिः कपालप्रक्षेपणम्, ततः सहस्राधिककपालानां दर्शनम्, तद्दृष्ट्वा सविस्मयैर्ब्राह्मणैः शिवस्तवनकरणम्, कपालेश्वरनाम्ना लिंगस्थापनम्, कपालेश्वरलिंगदर्शनेन ब्रह्महत्यादिमहापातकविनाशकमाहात्म्यवर्णनम्.	६२
९	अथ स्वर्गद्वारलिंगमाहात्म्यवर्णनम्, तत्र यक्षयज्ञे दक्षकृतेनापमानेन संक्षुब्धस्य शिवस्याज्ञया वीरभद्रादिशैवगणानां विष्वादिदेवैः सह युद्धवर्णनम्, तत्र विष्वादिदेवानां पराभवः, शैवगणैः स्वर्गद्वारनिर्यन्त्रनकरणम्, देवैः स्वर्गप्रवेशाभावं समवलोक्य विष्वाज्ञया शिवाराधनार्थं महाकालवने गमनम्, तत्र स्वर्गद्वारनाम्नः लिंगस्थापनम्, स्वर्गद्वारलिंगमाहात्म्यवर्णनम्.	६२
१०	अथ कर्कोटकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नागदृताशापविनाशार्थं कर्कोटकनागेन महाकालवने तपश्चरणम्, तत्तपःप्रसन्नेन शिवेन तस्मै वरप्रदानम्, शिवलिंगस्य स्वनाम्ना स्थापनम्, कर्कोटकेश्वरलिंगमाहात्म्यवर्णनम्.	६३
११	अथ सिद्धेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सिद्धिप्राप्त्यर्थं देवदारुवने तपः कुर्वाणैर्विप्रैराकाशवाणीश्रवणान्महाकालवने गमनम्, तत्र तपस्तप्त्वा सिद्धिप्राप्तिदलिंगस्थापनम्, सिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	६३
१२	अथ लोकपालेश्वरलिंगमाहात्म्यवर्णनम्, तत्र हिरण्यकशिपोः सकाशात्सञ्जातपराभवैर्लोकपालैर्विष्वाज्ञया तपश्चरणाय महाकालवने गमनम्, तपःप्रभावेन दैत्यान्जित्वा स्वस्वस्थानं प्रति गमनम्, लोकपालेतिनाम्ना महाकालवने लिंगस्थापनम्, लोकपालेश्वरलिंगमाहात्म्यवर्णनम्.	६४
१३	अथ कामेश्वरमाहात्म्यवर्णनम्, तत्र ब्रह्मणा सृष्टिनिर्माणार्थं कामसुत्पाद्य तस्य ब्रह्मस्थानानि दत्त्वा शिवोपरि कामोद्दीपनार्थं प्रेषणम्, शिवेन स्वतपसो विघ्नकारिणः कन्दर्पस्य भस्मकरणम्, पतिनाशं ज्ञात्वा रत्या शोककरणम्, ततः शिवाज्ञया अनंगीभूतस्य कामस्य महाकालवने गमनम्, तत्र तपस्तप्त्वा लिंगस्थापनम्, कामेश्वरलिंगमाहात्म्यवर्णनम्.	६४
१४	अथ डुडुम्बकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र क्षीराब्धिमन्थनसमये निर्गतं कालकूटं पीत्वा बहुलं दाहमसहमानेन शंकरेण शिप्रायै तस्य कालकूटस्य प्रदानम्, तद्गृहीत्वा शिप्राया महाकालवने गमनम्, शिप्रया कामेश्वरलिंगसमीपस्थलिंगोपरि तस्य कालकूटविषस्य निक्षेपणम्, कालकूटविषलेपनात्तद्दर्शनार्थमागतानां विप्राणां मरणप्राप्तिवर्णनम्, शिवेन तत्रागत्य विप्राणां पुनरुज्जीवनकरणम्, शिवेन तल्लिंगस्य कुटुंबकेश्वरेति नामकरणम्, कुटुंबकेश्वरलिंगमाहात्म्यवर्णनम्.	६५
१५	अथेन्द्रद्युम्नेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पुण्यक्षयादिन्द्रद्युम्नस्य स्वर्गतः पतनम्, पश्चात्तापेनाक्षयां कीर्तिं सम्पादयितुं हिमवत्प्रदेशे मार्कण्डेयदर्शनं गृहीत्वा तदाज्ञया महाकालवने गत्वा शिवलिंगार्चनकरणम्, तेनाक्षयां कीर्तिं लब्ध्वा स्वनाम्ना लिंगस्थापनम्, इन्द्रद्युम्नेश्वरलिंगमाहात्म्यवर्णनम्.	६६
१६	अथेशानेश्वरलिंगमाहात्म्यवर्णनम्, तत्र मुंडपुत्रेण बहुमुण्डेन जितैर्देवैः शिवाज्ञया महाकालवने गत्वा शिवलिंगार्चनकरणम्, ईश्वरेण प्रसन्नेन स्वनाम्ना तस्य लिंगस्येशानेश्वरेति नामकरणम्, ईशानेश्वरस्य देवैः स्तोत्रकरणम्, ईशानेश्वरलिंगमाहात्म्यवर्णनम्.	६६
१७	अथाप्सरसेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शक्रसभायां नृत्यमानाया रंभायास्तालादिभिर्विकृतं प्राप्तं नृत्यं दृष्ट्वा शक्रेण क्रुधा रंभायै शापदानम्, तया शापनिवृत्त्यर्थं स्वरूपवर्णनात्स्वनाम्ना महाकालवने लिंगं संस्थाप्य नित्यपूजनेन शिवं सन्तोष्य कल्पान्तरं लब्ध्वा स्वर्लोकं प्रति गमनम्, अप्सरसेश्वरलिंगमाहात्म्यवर्णनम्.	६७
१८	अथ कण्डलेश्वरलिंगमाहात्म्यवर्णनम्, उशीनगरेश्वरवीरबाहवधे शिप्रातटे	

अध्यायाः	विषयाः	पृ०
	शुचि तत्र कर्दमः सपुत्रकेण कण्डलेविप्रेण लिंगमाहुर्नीलोत्पलस्य लिंगस्य कण्डलेतिनामकरणम्, कण्डलेश्वरलिंगमाहात्म्यवर्णनम्. ...	६७
१९	अथ नागपर्वतेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नागपर्वतेन स्थापितस्य लिंगस्य दर्शनार्थं देवानामागमनम्, तल्लिंगभूतले निर्माल्यलंघनादिदोषे प्राप्ते तस्य नागपर्वतेश्वरलिंगस्य समीपे लिंगस्थापनम्, तेन देवानां निर्माल्यलंघनादिदोषनिवृत्तिः, नागपर्वतेश्वरलिंगमाहात्म्यवर्णनम्	६८.
२०	अथ प्रतीहारेश्वरलिंगमाहात्म्यवर्णनम्, तत्र रामनागयोरसामोद्यवरयोर्मारे स्थितेन प्रतिहारेण नन्दिनाऽऽसीनेन वह्निनाऽन्तःपुरे प्रवेशकरणम्, तेन रुष्टेन शिवेन नन्दिने शापप्रदानम्, तेन शापेन नंदिना पृथिव्यां महाकालवने गत्वा प्रतीहारेश्वरेति नाम्ना शिवलिंगस्थापनम्, तत्प्रभावेन नंदिनः पुनः शिवलोके प्रति गमनम्, प्रतिहारेश्वरलिंगमाहात्म्यवर्णनम्.	७२
२१	अथ कुक्कुटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कौशिकाख्यस्य भूपस्य प्राग्जन्मनि नित्यं कुक्कुटभक्षणाच्चाक्षचूडदत्तशापेन प्रतिनिशि कुक्कुटत्वप्राप्तिः, तच्छापनाशार्थं महाकालवने पक्षियोनिविमोचनाख्यलिंगपूजनम्, तेन तस्य कुक्कुटत्वप्राप्तिनिवृत्तिः, कुक्कुटेश्वरलिंगस्थापनम्, कुक्कुटेश्वरलिंगमाहात्म्यवर्णनम्	७९
२२	अथ कर्कटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र धर्ममूर्त्याख्यनृपतिवसिष्ठसंवादप्रसंगेनेश्वर्यप्राप्तिकारणं जिज्ञासमानेन तेन पृष्टेन वसिष्ठेन 'तप प्राग्जन्मनि कृतेन पापलेन कर्कटत्वप्राप्तौ केनचिद्व्रायसेन कर्कटशरीरं धृत्वा शिवाग्रे पातितं ततोऽन्यफले शिवदर्शनप्रभावेनैतस्मिञ्जन्मन्यैश्वर्यप्राप्तिः' इति वृत्तान्तकथनम्, कर्कटेश्वरलिंगमाहात्म्यवर्णनम्.	७०
२३	अथ मेघनादेश्वरलिंगमाहात्म्यवर्णनम्, तत्र गदांधाख्येन राज्ञा दौर्जन्यायज्ञक्रियाणामकरणेन भूतले पृष्ठभमादेवानां ब्रह्मलोके गमनम्, ततो ब्रह्माज्ञया देवानां महाकालवने गमनम्, तत्र देवैर्मेघप्रतिष्ठापितलिंगस्तवनम्, तस्य लिंगस्य पूजनेन पृष्टिप्राप्तिवर्णनम्, अतस्तस्य मेघपस्थापितत्व लिंगस्य मेघनादेश्वरेतिनामकरणम्, मेघनादेश्वरलिंगमाहात्म्यवर्णनम्.	७०
२४	अथ महालयेश्वरलिंगमाहात्म्यवर्णनम्.	७१
२५	अथ मुक्तीश्वरलिंगमाहात्म्यवर्णनम्, तत्र महाकालसमीपस्थे मुक्तिलिंगे त्रयोदशवर्षपर्यंतं नारायणं ध्यायतो मुक्तिनामकविप्रस्याग्रेऽकस्मात्कस्यचिद्व्याधस्यागमनम्, विप्रदर्शनेन लिंगदर्शनेन च व्याधस्य दौर्जन्यं गत्वा सौष्ठवप्राप्तिवर्णनम्, व्याधेन जले स्थित्वा तप्श्चरणम्, अष्टाक्षरमंत्रजपेन तस्यं मुक्तिः, तत्स्थाने प्रास्तस्य कस्यचिद्व्याघ्रस्यापि तन्मंत्रश्रवणेन मोक्षवर्णनम्, व्याघ्रेण पूर्वजन्मकथानककथनपूर्वकस्वात्मनः शापकारणकथनम्, तयोर्व्याघ्र-मुक्तिद्विजयोर्महाकालवने गमनम्, तत्र लिंगस्थापनम्, मुक्तीश्वरलिंगमाहात्म्यवर्णनम्. ... ७१	
२६	अथ सोमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र रोहिणीं विनाऽन्यासु चन्द्रस्यासक्तिं दृष्ट्वा क्रोधेन दक्षेण दत्तस्य शापस्य निवृत्त्यर्थं सोमस्य सत्यलोके गमनम्, तेन ब्रह्मणा सह वैकुंठं गत्वा विष्णोःस्तवकरणम्, विष्णाज्ञया सोमस्य महाकालवने गमनम्, तत्र लिंगस्थापनम्, तेन सोमस्य यक्ष्मरोगशान्तिवर्णनम्, सोमेश्वरलिंगमाहात्म्यवर्णनम्.	७२
२७	अथानरकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नरकयातनाक्रमवर्णनपुरःसरं निर्मिना पुण्यबाहुल्येऽपि किञ्चित्पापेन यमलोकगमनम्, पुनरनरकेश्वरदर्शनेन सर्वपापक्षये जाते विमानमारुह्येन्द्रलोके गमनम्, यमयातनोपभोगकारिणां प्राणिनां दुःखेन दुःखितस्य निर्मलेर्मरुतः सान्त्वनम्, अनरकेश्वरलिंगमाहात्म्यवर्णनम्.	७३
२८	अथ जटेश्वरमाहात्म्यवर्णनम्, तत्र वीरधन्वनो राज्ञः कथाकथनपूर्वकं जटेश्वरमाहात्म्यवर्णनम्, जटेश्वरलिंगस्थापनादिवर्णनम्.	७५
२९	अथ रामेश्वरलिंगमाहात्म्यवर्णनम्, तत्रैकविंशतिवाराभिःक्षत्रियां पृथिवीं कृत्वा दक्षिणेत्यापोपनिवर्णनार्थं नानातीर्थक्षेत्राणि भ्रान्त्वा दोषानावमष्टुं नारदोपदेशाज्जामदग्न्ये रामस्य महाकालवने जटेश्वरसमीपे गमनम्, तत्र तपस्तप्त्वा दोषनाशं दृष्ट्वा स्वनाम्ना लिंगस्थापनम्, रामेश्वरलिंगमाहात्म्यवर्णनम्. ... ७६	
३०	अथ च्यवनेश्वरलिंगमाहात्म्यवर्णनम्, तत्र च्यवननामकर्षिणा शर्यातिराजकन्यां वृत्वा ततो महाकालवने तपस्तप्त्वा स्वनाम्ना लिंगस्थापनम्, च्यवनेश्वरलिंगमाहात्म्यवर्णनम्.	७७
३१	अथ खण्डेश्वरलिंगमाहात्म्यवर्णनम्, तत्र प्रियव्रतपुत्रस्य मद्राश्वराजस्य कुंभगोनिवचनान्महाकालवने गमनम्, तत्र खण्डितव्रतपूर्तार्थं लिंगस्थापनम्, खण्डेश्वरलिंगमाहात्म्यवर्णनम्.	७८
३२	अथ पत्तनेश्वरलिंगमाहात्म्यवर्णनम्.	७९
३३	अथानन्देश्वरलिंगमाहात्म्यवर्णनम्, तत्रानभिमन्युतेनानंदेन केनचित्कारणेन महाकालवने गत्वा स्वनाम्ना लिंगस्थापनम्, आनंदेश्वरलिंगमाहात्म्यवर्णनम्.	७९
३४	अथ कंगलेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पाण्डवनामकब्राह्मणस्य कन्यानिमित्तके तपस्तप्त्वा कन्यानाम्ना लिंगस्थापनम्, कन्यकेश्वरलिंगमाहात्म्यवर्णनम्.	८०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
३५	अथेन्द्रेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र ब्रह्मपुत्रस्य कुशध्वजस्य स्वर्गतः पातनात्क्रुद्धेन ब्रह्मणा स्वजटामुत्पाट्य भूमौ पातनाद्वृत्रासुरोत्पत्तिस्ततो वृत्रासुरेन्द्रयोर्युद्ध इन्द्रस्य पराभवः, वृत्रं जेतुं बृहस्पतेराज्ञया शक्रस्य महाकालवने गमनम्; तपःप्रभावेन वृत्रासुरं हत्वा तद्धत्यादोषनिवृत्तये तत्र लिंगस्थापनम्, इन्द्रेश्वरमाहात्म्यव	८०
३६	अथ मार्कण्डेयेश्वरमाहात्म्यवर्णनम्, तत्र मार्कण्डेयजन्मकथावर्णनपूर्वकं महाकालवने मार्कण्डेयेन स्वनाम्ना लिङ्गस्थापनम्, मार्कण्डेयेश्वरलिंगमाहात्म्यवर्णनम्.	८१
३७	अथ शिवेश्वरलिंगमाहात्म्यवर्णनम्, तत्र रिपुञ्जयकथानकवर्णनम्, शिवेश्वरमाहात्म्यवर्णनम्.	८२
३८	अथ कुसुमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कुसुमक्रीडाविद्युत्पात्कुसुमेश्वरेतिनामकरणम्, कुसुमेश्वरलिंगमाहात्म्यवर्णनम्.	८३
३९	अथाक्रूरेश्वरलिंगमाहात्म्यवर्णनम्, तत्र भृंगिरिटिना निजक्रूरबुद्धिविनाशाय महाकालवने लिंगं स्थापयित्वा तस्य पूजाकरणम्, तेन तस्य क्रूरभावनिवृत्तिः, तस्य लिंगस्याक्रूरेश्वरनाम्ना प्रसिद्धिः, अक्रूरेश्वरलिंगमाहात्म्यवर्णनम्. ...	८३
४०	अथ कुण्डेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवपार्वत्योर्वृषारूढयोर्मार्गे केनचिन्निमित्तेन शिवान्तर्धानं दृष्ट्वा पार्वत्या शिवदर्शनोत्सुकयाऽन्तर्विघ्नकारिणं कुण्डनामकगणं प्रति शापदानम्, तेन कुण्डेन शापनिवृत्त्यर्थं महाकालवने स्वनाम्ना लिंगस्थापनम्, कुण्डेश्वरलिंगमाहात्म्यवर्णनम्.	८४
४१	अथ लुम्पेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सामगब्राह्मणवधात्तत्पुत्रदत्तशापेन कुष्ठत्वप्राप्तेन लुंपराजेन नारदोपदेशान्महाकालवने गमनम्, तत्र कुष्ठनाशनाय लिंगस्थापनम्, सैकतेश्वरापरनाम्नो लुम्पेश्वरस्य लिंगस्य माहात्म्यवर्णनम्.	८५
४२	अथ गङ्गेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवजटाजूटतो भूम्यां गङ्गाप्रपातेन शिप्रातटे गङ्गेश्वरेतिनाम्ना भगीरथस्थापितलिंगमाहात्म्यम्, गङ्गेश्वरपूजनाविधिमाहात्म्यवर्णनम्.	८५
४३	अथांगारकेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवगात्रादंगारकपुत्रोत्पत्तिवर्णनम्, अङ्गारकेश्वरमाहात्म्यवर्णनम्.	८६
४४	अथोत्तरेश्वरलिंगमाहात्म्यवर्णनम्, तत्र नवग्रहपीडितानामिंद्रादीनां शिवादेशाच्छिप्रायां गमनम्, उत्तरमेघकृतं शिवलिंगस्थापनम्, उत्तरेश्वरलिंगमाहात्म्यवर्णनम्	८६
४५	अथ त्रिलोचनेश्वरलिंगमाहात्म्यवर्णनम्.	८८
४६	अथ वीरेश्वरलिंगमाहात्म्यवर्णनम्.	९०
४७	अथ नूपुरेश्वरलिंगमाहात्म्यवर्णनम्.	९२
४८	अथाभयेश्वरलिंगमाहात्म्यवर्णनम्.	९२
४९	अथ पृथुकेश्वरलिंगमाहात्म्यवर्णनम्....	९३
५०	अथ स्थावरेश्वरलिंगमाहात्म्यवर्णनम्.	९४
५१	अथ शूलेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र देव्याऽन्धकासुरस्य शूलेन नाशं विधाय शूलनाम्ना लिंगस्थापनम्, शूलेश्वरलिंगमाहात्म्यवर्णनम्... ...	९५
५२	अथोंकारेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र शिववक्त्रान्निर्गतेनोंकारेण शिववाक्यात्स्थापितस्योंकारेश्वरलिंगस्य माहात्म्यवर्णनम्.	९५
५३	अथ विश्वेश्वरलिंगमाहात्म्यवर्णनम्, तत्र विदूरथस्य राज्ञो ब्रह्मवधजनितदोषेण दुष्टद्वादशजन्मानि गृहीत्वा त्रयोदशे चण्डालत्वं प्राप्य शिवसंनिधौ मृतत्वाद्विश्वेशनाम्ना पुना राजकुले समुत्पत्तिवर्णनम्, पूर्वजन्मनि संस्मृत्य महाकालवने तेन लिंगस्थापनम्, विश्वेश्वरलिंगमाहात्म्यवर्णनम्.	९६
५४	अथ कंटेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कस्यचिच्छत्रुभिः पराजितस्य राज्ञो वसिष्ठाश्रमे गमनम्, तस्य वचनान्महाकालवने गत्वा राज्ञा लिंगस्थापनपूर्वकं पूजाकरणम्, तेन निष्कंटकराज्यप्राप्तिरतः कंटेश्वरनाम्ना तस्य लिङ्गस्य प्रसिद्धिः, कंटेश्वरलिंगमाहात्म्यवर्णनम्.	९६
५५	अथ सिंहेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शिवप्राप्त्यर्थं गौर्या तपसि क्रियमाणे ब्रह्मण आगमनम्, ब्रह्मवचनात्क्रुद्धाया देव्या मुखतः सिंहस्योत्पत्तिस्तत्पोषार्थं देव्याः स्तनाभ्यां दुग्धस्रावर्णनम्, पार्वत्याज्ञया सिंहस्य महाकालवने गमनम्, तस्य गौरीवाहनत्वप्राप्तिवर्णनम्, तेन सिंहेन स्वनाम्ना लिंगस्थापनम्, सिंहेश्वरलिंगमाहात्म्यवर्णनम्.	९७
५६	अथ रेवंतेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र सूर्यपुत्रेण रेवंतेन देवाञ्जित्वा कैलासे गमनम् शिववचनेन महाकालवनमागत्य तत्र स्वनाम्ना शिवलिंगस्थापनम्, रेवंतेश्वरलिंगमाहात्म्यवर्णनम्.	९८
५७	अथ घण्टेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र शैवगणेन घंटेन शिवं त्यक्त्वा स्वगायनकौशलं दर्शयितुं ब्रह्मलोके गमनम्, नारदेन तत्र गतं तं दृष्ट्वा शिवाय कथनम् तेन कुष्ठेन शिवेन घंटाख्यगणाय शापदानम्, तच्छापनिवृत्त्यै नारदादेशान्महाकालवनं गत्वा शिवलिंगस्थापनम्, घंटेश्वरलिंगमाहात्म्यवर्णनम्.	९८
५८	अथ प्रयागेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्र प्रियव्रतनारदसंवादे नारदस्य सावित्र्यदर्शनम्. सावित्रीवचनान्नारदस्य वेदनाशः, तद्दृष्ट्वाऽऽश्चर्येण पृष्टया सावित्र्या सर्ववृत्तकथनम्, सावित्रीवचनान्नारदस्य प्रयागगमने निष्ठाप्रापणम्, प्रियव्रतेन समं नारदस्यावन्तीस्थप्रयागे गमनम्, तत्र गत्वा लिंगस्य स्थापनं पूजनं च, प्रयागेश्वरलिंगमाहात्म्यवर्णनम्.	९९
५९	अथ सिद्धेश्वरलिङ्गमाहात्म्यवर्णनम्, तत्राश्वशिरसो राज्ञो जैगीषव्यकपिलमहामुन्योर्दर्शनम्, ताभ्यां दर्शितया मायया भगवत्स्वरूपं दृष्ट्वा आश्चर्येण शरणगमनम्, तयोराज्ञया तेन राज्ञा महाकालवने गत्वा सिद्धिप्राप्त्यर्थं लिंगपूजनम्, सिद्धेश्वरलिंगमाहात्म्यवर्णनम्.	१००
६०	अथ मतंगेश्वरलिंगमाहात्म्यवर्णनम्, तत्र सुगतिविप्रपुत्रेण मतंगेन लिंगस्य स्थापनं पूजनं च, मतंगेश्वरलिङ्गमाहात्म्यवर्णनम्.	१०१
६१	अथ सौभाग्येश्वरलिंगमाहात्म्यवर्णनम्, तत्राश्ववाहननृपभार्यया सुमत्या पतिवियोगादतिदुःखितया निजपतिप्राप्त्यर्थमृष्यादेशाल्लिंगपूजनम्, तत्प्रसादात्तस्याः पत्युरागमनेन सौभाग्यप्राप्तिः, सौभाग्येश्वरलिंगमाहात्म्यवर्णनम्. ...	१०१
६२	अथ रूपेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पद्मराजस्य कण्वाश्रमे गमनम्, तत्र तेन कण्वमदृष्ट्वा तत्कन्याया दर्शनम्, काममोहितेन तेन तया सह व्यभिचरणम्, तत्कण्वेन ज्ञानचक्षुषा दृष्ट्वा तयोः कुरूपभवनरूपशापप्रदानम्, ततः कण्वाज्ञया तयोर्महाकालवने गमनम्, तत्र लिंगपूजनेन सुस्वरूपप्राप्तिवर्णनम्, रूपेश्वरलिंगमाहात्म्यवर्णनम्.	१०२
६३	अथ धनुःसाहस्रेश्वरलिंगमाहात्म्यवर्णनम्, तत्र विदूरथराजस्य कन्यायाः कुसुंभदैत्येन हरणम्, ततो विदूरथपुत्राभ्यां साकं तस्य दैत्यस्य युद्धम्, तत्र राज्ञा विदूरथेन स्वपुत्रयोः पराभवं बन्धनत्वप्राप्तिं च ज्ञात्वा तत्पराजयार्थमृष्यनुज्ञया महाकालवनं गत्वा लिंगपूजनम्, तेन पूजनप्रभावेण तस्य धनुःसहस्रतुल्यधनुष्यप्राप्तिः, तेन धनुःसहायेन दैत्यस्य पराभवः, तस्य राज्ञः पुत्रकन्यादिसहितस्य सुखप्राप्तिपूर्वकमन्ते मोक्षप्राप्तिवर्णनम्, धनुःसाहस्रेश्वरलिंगमाहात्म्यवर्णनम्.	१०३
६४	अथ पशुपतीश्वरलिंगमाहात्म्यवर्णनम्, तत्र पशुपालराजेन लिंगस्य स्थापनम्, तस्य पूजनं च, पशुपतीश्वरलिंगस्य माहात्म्यवर्णनम्.	१०४
६५	अथ ब्रह्मेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पुलोमदैत्येन स्वसैन्येन सह विष्णुं जेतुं क्षीराब्धौ गमनम्, तद्दृष्ट्वा ब्रह्मणो दैत्यजयार्थं महाकालवने गमनम्, तत्र तपस्तप्त्वा प्रसन्नेन शिवेन दैत्यपराजयकरणवर्णनम्, ब्रह्मणा स्वनाम्ना लिंगस्थापनम्, ब्रह्मेश्वरलिंगस्य माहात्म्यवर्णनम्....	१०५
६६	अथ जल्पेश्वरलिंगमाहात्म्यवर्णनम्, तत्र जल्पनामकेन राज्ञा पञ्चपुत्रान्राज्ये संस्थाप्य वने गमनम्, ततः परस्परबन्धुविरोधेन मृतान्पञ्चपुत्राञ्ज्ञात्वा तद्वियोगेन दुःखितस्य जल्पस्य राज्ञो वसिष्ठाज्ञया महाकालवने गमनम्, तत्र स्वनाम्ना लिंगस्थापनम्, जल्पेश्वरलिंगमाहात्म्यवर्णनम्.	१०५
६७	अथ केदारेश्वरलिंगमाहात्म्यवर्णनम्, तत्र हिमपीडितानां सब्रह्मकानां देवानां कैलासे गमनम्, तत्र शिवं ध्यात्वा तदादेशात्केदारेश्वरे गमनम्, तत्पुण्यप्रभावेन हिमपीडानिवृत्तिवर्णनम्, केदारेश्वरलिङ्गमाहात्म्यवर्णनम्.	१०६
६८	अथ पिशाचेश्वरलिंगमाहात्म्यवर्णनम्, सोमनामकस्य शूद्रस्य दुराचारत्वात्पिशाचत्वप्राप्तिवर्णनम्, तत्र पिशाचस्य शाकटायनस्य ब्राह्मणस्य च संवादवर्णनम्, शाकटायनवचनात्पिशाचत्वतो मुक्तिहेतोर्महाकालवने गमनम्, तत्र लिंगं संपूज्य तस्य पिशाचस्य मोक्षप्राप्तिः, पिशाचेश्वरलिंगमाहात्म्यवर्णनम्.	१०७
६९	अथ सङ्गमेश्वरलिंगमाहात्म्यवर्णनम्, तत्र पत्नीवचनात्सुबाहुना प्राग्जन्मकथानककथनम्, ततः सङ्गमेश्वरकृपया राज्यमुपभुज्यान्ते मोक्षप्राप्तिवर्णनम्, संगमेश्वरलिंगमाहात्म्यवर्णनम्.	१०८
७०	अथ दुर्धर्षेश्वरलिंगमाहात्म्यवर्णनम्, दुर्धर्षनाम्नो राज्ञो मृगयायै वने गमनम्, तत्र कल्पाख्यस्यर्षेः कन्यां दृष्ट्वा तया मोहितेन तत्र वासकरणम्. राज्यस्य नाशे तत्प्राप्त्यै महाकालवने शिवपूजनेन तस्य राज्यप्राप्तिः सर्वसुखोपभोगानन्तरमन्ते मोक्षप्राप्तिश्च, दुर्धर्षेश्वरलिंगमाहात्म्यवर्णनम्.	१०९
७१	अथ प्रयागेश्वरलिंगमाहात्म्यवर्णनम्, तत्र शंतनुना वृताया गंगाया अष्टपुत्रप्राप्तिवर्णनम्, गंगाया मनुष्ययोनितो मुक्तिप्राप्त्यर्थं नारदवचनात्प्रयागेश्वरे गमनम्, लिंगपूजनेन पापान्निवृत्तिः, प्रयागेश्वरलिंगमाहात्म्यवर्णनम्.	११०
७२	अथ चन्द्रादित्येश्वरमाहात्म्यवर्णनम्, तत्र शंबरेण पराभूतान्देवान्दृष्ट्वा चन्द्रसूर्ययोर्वैकुंठे गमनम्, विष्ण्वाज्ञया तयोर्महाकालवने गत्वा शिवपूजने कृते शिवलिंगतो ज्योतिर्निर्गत्य तेन ज्योतिषा शंबरस्य पराजयकरणवर्णनम्, चन्द्रादित्येश्वरलिंगमाहात्म्यवर्णनम्.	१११
७३	अथ करभेश्वरलिंगमाहात्म्यवर्णनम्, मृगयां कर्तुं गतस्य राज्ञो वीरकेतोः करभस्यानुधावनम्, महारण्ये करभस्यान्तर्धानम्, ततः कस्यचिद्देवेरनुज्ञया महाकालवने करभेश्वरपूजनेन कैलासपदप्राप्तिवर्णनम्, करभेश्वरलिंगमाहात्म्यवर्णनम्.	११२
७४	अथ राजस्थलेश्वरलिंगमाहात्म्यवर्णनम्, तत्र ब्रह्मणा सृष्टिं विधाय अराजकां दृष्ट्वा रिपुंजयाय राजदानम्, तेन रिपुंजयेन राज्ञा पुत्रवत्प्रजापालनं कुर्वता देवदत्ता-	

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	अध्यायाः	विषयाः
	त्रिपुटवनाद्वृद्धयादित्रार्तं निराकर्तुं महाकालवने गत्वा शिवं संपूज्य सत्फलप्राप्त्या प्रजानां सुखप्राप्तिकरणवर्णनम्, राजलक्ष्मीश्वरलिंगमाहात्म्यवर्णनम्... ११३		कथनम्, ओंकरमहादानमर्दाया अक्षयत्वस्य वर्णनम्, नर्मदाषष्ठदर्शनफलवर्णनम्. .... १२७.
७५ अथ वडलेश्वरमाहात्म्यवर्णनम्, तत्र मणिभद्रपुत्रेण वडलसंज्ञकेन भार्यया सार्धं क्रीडितुं वने गमनम्, तत्र मोहावतारशिलपुत्री राज्ञीः सार्धं वडलस्य युद्धम्, तत्र राक्षसपराजयः, तेन व्यथितस्य कर्दमस्य कृष्णेन मणिभद्रेण वर्षेण स्वपुत्राय वडलाय ज्ञापयितुं, ज्ञापयित्वापि वडलस्य महाकालवने गमनम्, शिवपूजनेन तस्य मोक्षप्राप्तिवर्णनम्, वडलेश्वरलिंगमाहात्म्यवर्णनम्. ... ११४.	५	युधिष्ठिरमार्कण्डेयसंवादप्रसंगेन सप्तकल्पवर्णनम्, सप्तकल्पपर्यंतं नर्मदाया आख्यानम्, ततो मार्कण्डेयं प्रति युधिष्ठिरेण नर्मदामाहात्म्यजिज्ञासया प्रश्नवर्णनम्, मार्कण्डेयेन नर्मदामाहात्म्यकथनम्, तत्र प्रथमं नर्मदानामनिरुक्तिवर्णनम्. १२८.
७६ अथाकाशेश्वरमाहात्म्यवर्णनम्, तत्र ऊर्ध्वपर्वतभूपस्य विनतासुकन्यायाश्च नारदोपदेशान्महाकालवने गत्वा शिवपूजनेन पूर्वजन्मवित्तमाप्तिवर्णनम्, आकाशेश्वरलिंगमाहात्म्यवर्णनम्. ११५	६	मायूरकल्पे मयूररूपस्य महादेवस्य नर्मदायाश्च संवादपूर्वकं नर्मदया स्वस्या अक्षय्यत्वाधिवर्णनम्, शिखरिटस्य शिखरशब्दतो नर्मदातीरगयोत्पत्तिवर्णनम्. शिखरिटस्य भार्गीभूतहरीयशिखरतः सप्तकुलपर्वतानामुत्पत्तिवर्णनम्, नर्मदायाः सहस्रनामाहात्म्यवर्णनम्. १२९
७७ अथ पुष्पदंतेश्वरमाहात्म्यवर्णनम्, तत्र शिनिनामक्षत्रियेण पुत्रप्राप्त्यर्थमीश्वरदत्तवरधने लुब्धे सति तत्प्रसादेन तस्य पुष्पदन्तनामपुत्रप्राप्तिवर्णनम्, पुष्पदन्तेन महाकालवने शिवलिंगस्थापनम्, पुष्पदन्तेश्वरलिंगमाहात्म्यवर्णनम्. ११६	७	कूर्मकल्पसमये नद्यादिपर्वतसमुद्भववर्णनम्. १३०
७८ चित्रसेननृपतेर्दिग्जयाः कन्यायाः वपलायविधुक्षेत्रे आगमनम्, तत्र शिवलिंगपूजनेन तस्य मुक्तिप्राप्तिवर्णनम्, अविमुक्तेश्वरलिंगमाहात्म्यवर्णनम्... ११७.	८	कल्पकाले कल्पवृक्षस्य मार्कण्डेयेन दर्शनम्, कल्पमिति मार्कण्डेयमुनेन कल्पेऽयं जगत्स्थितिरक्षामलयाधिकर्त्रीत्यादिभिर्व्याख्यानवर्णनम्, मार्कण्डेयस्य त्रिपिष्टपव्रजनम्, दशदिक्षु स्थितायाः कन्यायाः दर्शनम्, ततो महाशिवलिंगदर्शनम्, शिवलिंगार्चनकारिण्याः कन्यायाः दर्शनम्, तया सहया नर्मदानामकथनम्, इत्थं पंचकल्पसमुद्भवकथनम्. १३०
७९ अथ हनुमत्केश्वरलिंगमाहात्म्यवर्णनम्, तत्र हनुमद्वालीलावर्णनपुरःसरं लिंगभूपेन हनुमतो बलप्राप्तिवर्णनम्, रामराज्याभिषेकोत्तरं रामराज्यविधेर्वरं रामस्तुत्यनुज्ञार्थने देवर्षिणा हनुमतोऽभिषेके कृते हनुमता महाकालवने गत्वा शिवपूजनम्, हनुमत्केश्वरलिंगमाहात्म्यम्. .... ११८.	९	कल्पसमये शयानं भगवन्तं दृष्ट्वा तया कार्पासकन्यया दृष्ट ओंकरे च समाधिस्थेन मार्कण्डेयेनेश्वरस्तुतिकरणम्, शंकरनर्मदासंवादवर्णनम्, नर्मदोत्पत्तिज्ञानफलादिकथनम्. ... ... १३१.
८० अथ स्वर्णेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कल्पवृक्षकथावर्णनपूर्वकं पुरुषोत्तमक्षत्रियेश्वराख्यानवर्णनम्, स्वर्णेश्वरलिंगमाहात्म्यवर्णनम्. .... ११८.	१०	सर्वकल्पेषु नर्मदायाः स्थितिवर्णनम्, नर्मदाज्ञानफलश्रुतिकथनम्. ... १३१.
८१ अथ पिंगलेश्वरलिंगमाहात्म्यवर्णनम्, तत्र चतुर्दिक्स्थितानां चतुर्लिंगानां वर्णनम्, तत्र पिंगलाभिधस्य पिंगलकन्यायाः पितृव्यानुमत्या प्रागल्भ्यमुपकुर्वत्यर्थं कृत्या धर्मानुज्ञया महाकालवने गमनम्, तत्र गत्वा स्वनाम्ना लिंगस्थापनम्, पिंगलेश्वरमाहात्म्यवर्णनम्. ११९	११	नर्मदातीरे वेदाध्ययनपठनफलम्, नर्मदायां स्नानदानजपहोमहव्यकव्यादिफलम्, नर्मदादर्शनपुण्यफलम्, नर्मदासहस्रेण सर्वतीर्थदर्शनप्राप्तिफलकथनम्, नर्मदातीरे अश्मलेपनाद्याधिकर्मफलकथनम्, नर्मदायाः सर्वेभ्योऽप्यधिकत्वोपमाहात्म्यवर्णनम्. १३३
८२ अथ कायावरोहणेश्वरलिंगमाहात्म्यवर्णनम्, तत्र वडवाग्निविध्वंसजन्यवे वीरमद्रभद्रकाल्यादिभिः पराजितानां दक्षादीनां महाकालवने गमनम्, तत्र लिंगपूजनेन सर्वेषां कायावरोहणात्कायावरोहणेश्वरेति नामस्थापनम्, कायावरोहणेश्वरलिंगमाहात्म्यवर्णनम्. १२१	१२	नर्मदातीरे संग्रामैर्ऋषिभिर्नर्मदास्तोत्रकरणम्. १३४
८३ अथ विल्वेश्वरलिंगमाहात्म्यवर्णनम्, तत्र कपिलेन शिवसाराध्याबध्यत्वसंपादनमद्भुत्वसंपादनं च, तथा विल्वेन नृपेण विष्णुमाराध्य "कपिलो यां प्रति 'त्वत्तोऽहं विभेमि' इति यथा वदेत्तथा कुरु" इत्यादिवरप्रार्थनाकरणम्, तत्रै 'तथास्तु' इत्युक्त्वा विष्णुना वरप्रदानम्, स्ववाक्यं वरं सत्यं कर्तुं विष्णुना कपिलस्य प्रार्थनाकरणम्, स्ववाक्यं विरक्षुर्यत्ना कपिलेन सह कृष्णस्य युद्धवर्णनम्, तत्र कृष्णपराजयः, ततो विल्वनृपेण स्तवनाद्विल्वेश्वरमाराध्य कपिलमुखेन 'अहं त्वत्तो विभेमि' इति ज्ञापनकरणम्, विल्वेश्वरमाहात्म्यवर्णनम्.... १२२	१३	षड्विंशतिसंख्याकानां कल्पानां यथाक्रमेण नामनिर्देशपूर्वकं वर्णनम्, तेषु कल्पेषु नर्मदावस्थानवर्णनम्. १३७
८४ अथ केदारेश्वरलिंगमाहात्म्यवर्णनम्, तत्र परीक्षिन्नामकन्यायोध्याधिपतेर्मृगयार्थमरण्ये गमनम्, तत्र कयाचित्कन्यया सह मल्लोत्तरगमनकथनेन संभाषणम्, तां वृणीत्या विज्ञप्ति कृत्वा तया कन्यया सार्धं मध्येऽरण्यं पताके गमनम्, परीक्षिता शोककरणम्, परीक्षित्कन्याया प्रसन्नाभिर्मुनिपत्नीभिः वरप्रदानकरणम्, तत्र एकेन वृद्धवर्षुरेण विस्तरपूर्वमन्यकन्याकल्पकथनपूर्वकं मालवक्षत्रेण वर्षुरत्वप्राप्तिकथनम्, वर्षुरेण कन्यावरणे कृते सति स्वरक्षोत्तरभागस्थायाः कन्यायास्तस्यै परीक्षिते समर्पणम्, उत्तरेश्वरपूजनेन वर्षुरस्य मालवदेहप्राप्तिनिवृत्तिः, उत्तरेश्वरलिंगमाहात्म्यवर्णनम्, इत्यवन्तीक्षेत्रस्थितचतुरशीतिलिंगमाहात्म्यकथाफलश्रुतिवर्णनम्, आवन्त्यखण्डस्थितचतुरशीतिलिंगमाहात्म्योपसंहारवर्णनम्. १२३	१४	कालरात्रिकृतसृष्टिसंहारसंरंभवर्णनम्. १३५
	इत्यावन्त्यखण्डे द्वितीयं चतुरशीतिलिंगमाहात्म्यम् ॥ (५-२) ॥	१५	संवर्तसमये वातोष्णशीतार्दानां प्रकोपनपूर्वकसृष्टिसंहारवर्णनम्. ... १३६
	अथावन्त्यखण्डे तृतीयं रेवाखण्डम् ॥ (५-३) ॥	१६	कालरात्रिसाहाय्येन शिवेन कृताजगन्नाशशान्तानां देवानां ब्रह्मणा सनाश्वासनम्, ब्रह्मणा कालवर्णनम्, ब्रह्मणा शिवस्तुतिकरणवर्णनम्. .... १३७.
१	गालवाचरणम्, रेवावर्णनम्, सूतशौनकसंवादप्रसंगेन पुराणवर्णप्रमाणात्मविषयाणां कुरुक्षेत्रवर्णनम्, अष्टादशमहापुराणोपपुराणानां संख्यावर्णने नामनिर्देशश्च, पुराणश्रवणफलश्रवणवर्णनम्. १२५	१७	संवर्तकाले द्वादशादित्यप्रकटनवर्णनम्, पञ्चमहाभूतप्रकोपवर्णनम्, जगत्संहरणवर्णनम्. ... . १३७.
२	जनमेजयपैलपापायनसंवादप्रसंगेन वनवाससमये पाण्डवानां पैल्यपर्वतं प्रति गमनम्, तत्र विन्ध्यारण्यवास्तव्य मार्कण्डेयपर्वदर्शनम्, त्वादित्यकारिणं मार्कण्डेयं प्रति धर्मराजस्य दीर्घक्षेत्रादिमाहात्म्यसंगन्धिप्रश्नवर्णनम्, मार्कण्डेयेन गङ्गावित्सर्पतीर्थमाहात्म्यवर्णनम्, रेवामाहात्म्यस्य तत्तोऽप्यधिकत्ववर्णनम्. १२६	१८	चतुरवधीनामेकीभवनम्, गजशुंडापरिमितधारासंपातवृष्टिवर्णनम्, चतुर्दशभुवनानां सलिलमध्य एकब्राह्मऽवशिष्टवर्णनम्, मार्कण्डेयेन भगवद्गुणवत्स्तवनकरणवर्णनम्.
३	मार्कण्डेयेन निजवृत्तान्तवर्णने प्रलयकालीनस्थितिवर्णनम्, सलिले भ्रमतो मार्कण्डेयस्यास्मे नौकां गृहीत्वा कस्याश्चिद्वयलाया आगमनम्, तया सह मार्कण्डेयस्य नावि समारोहणम्, मार्कण्डेयेन भगवत्स्तुतिवर्णनम्. १२७	१९	भगवत्स्तवनेन मार्कण्डेयं प्रति कयाचिद्वोरूपधारिण्या नर्मदयाऽभिवचनदानम्, मार्कण्डेयकृता नर्मदास्तुतिः, श्रीयराहऽवल्लभृत्तांतवर्णनम्. .... २१८.
४	मार्कण्डेयस्य त्रिपुटशिखरस्थमहादेवदर्शनम्, जवलाभृत्तान्तवर्णने नर्मदोत्पत्ति-	२०	प्रजासंहारचिह्नक्षणवर्णनम्, प्रलयकाले एकाकिना मार्कण्डेयेन त्रिया क्षेपशायिनः स्तवकरणम्, तदा कस्याश्चिद्देव्या दर्शनम्, ततो मार्कण्डेयोपदेशकारिण्या गृह्यया देव्या अन्तर्धानम्. १३९
		२१	नर्मदातीरस्थतीर्थमाहात्म्यवर्णनोपक्रमे प्रथमतः कपिलधारतीर्थमाहात्म्यवर्णनम्. १४०
		२२	गंगादिपोडशनदीनां पत्नीत्वेन प्राप्तयेऽग्निदेवधरुणिरूप्य तपःकरणम्, तेन तपसा संतुष्टेन शंकरेणाग्नये वरप्रदानम्, विल्वत्यासंभववर्णनम्. १४०
		२३	कपिलाविशल्यानद्योः संगमे स्नानदानफलमाहात्म्यवर्णनम्. १४२
		२४	करानर्मदासंगममाहात्म्यवर्णनम्. १४२
		२५	नीलगंगायाः संगममाहात्म्यवर्णनम्. १४३
		२६	जालेश्वरोत्पत्तिकथनमाहात्म्यवर्णने दानवासुरयज्ञसुरपीडितेषु देवेन्द्रादिदेवेषु ब्रह्माणं विष्णुं प्रति च शरणगमनम्, ततश्च ब्रह्मणा विष्णुना सार्धं सर्वेषां देवानां कैलासे आगमनम्, तत्र सर्वैर्देवर्षिभिर्महेश्वरस्तवनम्, शिवाज्ञया नारदस्य बाणासुरसमीप आगमनम्, बाणासुरवचनान्नारदस्य बाणपुरे आगमनात्पूर्वमेव प्रवेशः, बाणस्त्रिया गृहीतेन नारदेन तां प्रति कपूरगौरीमन्त्रज्ञानबाणाधिकमाहात्म्यकथनम्. १४३
		२७	राक्षीनारदसंवादप्रसंगेन त्रिपुरक्षोभवर्णनम्. १४५
		२८	नर्मदातट उमया सार्धं क्रीडमानस्य शिवस्यामे नारदगमनम्, कृतकार्यस्य नारदस्य शिवेन सत्कारकरणम्, त्रिपुरवधार्थं शिवेन मन्त्रपूर्वकशरप्रेरणम्, शंकरप्रेरितपत्रिणा सर्वदानवानां भस्मीकरणम्, मस्तके शिवलिंगं धृत्वा बाणेन शिवस्तुतिकरणम्, ईश्वरेण बाणासुरस्य वरप्रदानम्, जालेश्वरतीर्थस्य जालावासकथनम्, उत्पत्तिमाहात्म्यवर्णनम्, जालेश्वरतीर्थमाहात्म्यवर्णनम्. १४५
		२९	युधिष्ठिरमार्कण्डेयसंवादप्रसंगेन कावेरीसंगमस्नानदानफलमाहात्म्यवर्णनम्, तत्र कावेरीसंगमे स्नानं कर्तुं कुबेरस्य चान्द्रायणादितीव्रव्रतपोविधानाद्वा परमेश्वरत्यागमनम्, कुबेरेश्वरस्तवनम्, तुङ्गेनेन तत्तीर्थस्नानमाहात्म्यकथनम्. १४७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
१०	अथ दारुतीर्थमाहात्म्यम्....	१४८
११	ब्रह्मावर्ततीर्थमाहात्म्यम्.	१४८.
१२	पञ्चेश्वरमाहात्म्यम्, ब्रह्मेश्वरमाहात्म्यम्.	१४८.
१३	अग्नितीर्थमाहात्म्यम्, तत्र पूर्वकालिकस्य दुर्योधनाख्यस्य कस्यचिद्राज्ञः कन्यां सुदर्शनानाम्नीं वाग्विनुमागतस्य हि रूपधारिणो वीरसकर्णत्वाद्राज्ञा दुर्योधनेन निषेधकरणम्, ततो दुःखितस्यातीवदर्शनम्, यज्ञं चिकीर्षोर्दुर्योधनस्य राज्ञे यज्ञकुण्डे वह्नरूपभावं दृष्ट्वा सावित्रीभवनम्, तत्कारणं ज्ञात्वा व्यग्निना सर्मं स्वसुतायाः विवाहकरणम्.	१४९
१४	केनचिद्राज्ञाप्येन सूर्योपासनां कृत्वा नर्मदातीरे शिवलिंगस्थापनवर्णनम्, रवितीर्थे स्नानदानमाहात्म्यम्.	१४९
१५	नन्दोदरीरावणविवाहवर्णनपूर्वकं तयोर्दम्पतीनां क्रीडाविहारवर्णनम्, रावणस्य पुत्रेण मेघनादेन शिवाराधनां कृत्वा स्वनाम्ना शिवलिंगस्थापनम्, मेघनादतीर्थे स्नानदानमाहात्म्यम्.	१५०
१६	दारुकाख्येन शक्रमित्रेण शिवप्रसादेन लिंगस्थापनम्, दारुतीर्थे स्नानादिमाहात्म्यवर्णनम्.	१५०.
१७	देवतीर्थमाहात्म्यवर्णनम्.	१५०.
१८	दारुवने पार्वत्या सह विमानेन शंकरस्यागमनम्, शंकरपार्वतीसंवादपूर्वकं दारुवनमाहात्म्यवर्णनं नर्मदेश्वरतीर्थमाहात्म्यवर्णनं च.	१५१
१९	कुम्भात्सम्भूतायाः कपिलायाः ब्रह्मदेवेन स्तुतिकरणम्, ब्रह्मादया कपिलायाः स्वर्गतो मृत्युलोकं प्रत्यागमनम्, कपिलायाः प्रत्यक्षं भिन्नभिन्नदेवतास्थापनवर्णनम्, कपिलातीर्थे स्नानादिमाहात्म्यवर्णनम्....	१५२.
४०	कर्दमनामकेन वनोः पुत्रेण ईश्वराराधनां कृत्वा तत्प्रसादेन स्वनाम्ना शिवलिंगस्थापनम्, कर्दमेश्वरतीर्थे स्नानमाहात्म्यम्.	१५२
४१	विश्वसः पुत्रेण कुण्डलेन स्थापितस्य कुण्डलेश्वरतीर्थस्य माहात्म्यवर्णनम्.	१५३
४२	याज्ञवल्क्यकृततपश्चरणवर्णनम्, भ्रातरमन्वेष्टुमन्या याज्ञवल्क्यमगिन्यास्तत्रागमनम्, याज्ञवल्क्यस्य स्थाने वह्नान्तः शुक्रनिःसरणम्, भ्रातर्वह्नमितस्ततोऽन्वेषद्भ्यस्त्या याज्ञवल्क्यस्य समीपे सद्भगिन्या आगमनम्, भगिनीमुखवचनात्तत्तवृत्तान्तकथनम्, मृतमर्दकृत्या याज्ञवल्क्यभगिन्या वह्नसंछन्नैरतःसंपर्कवशाद्गर्भधारणे जाते सति उच्चाऽश्वत्थवृक्षमूले गत्वा गर्भत्यागवर्णनम्, पिप्पलमूले वर्धितेन पिप्पलादनामकबालमुनिना नारदेनोक्तं स्वस्य शनैश्चरग्रहतां पीडां दृष्ट्वाऽऽकाशवा गच्छतः शनैश्चरस्य निजदृष्टिक्षेपमात्रेणाधःपातनम्, बालकस्यायोदशाब्दपर्यन्तशनैश्चरपीडा न भविष्यतीति निर्वन्धकथनम्, आग्नेयीधारणाऽग्निं समुत्थाप्य पिप्पलादस्य कृत्यानिर्माणम्, पितुर्याज्ञवल्क्यस्योपरि कृत्यायाः प्रेरणम्, कृत्याभीतेन याज्ञवल्क्येन स्वस्य परित्राणार्थं ब्रह्मकुण्डादिलोकेषु गमनम्, शंकरेण तत्राः कृत्याया योगीश्वरीति नामकरणम्, पिप्पलादस्य तपश्चरणवर्णनम्, शिवप्रसादेन पिप्पलादेन स्वनाम्ना पिप्पलादेश्वरेति लिंगस्थापनम्, तन्माहात्म्यवर्णनम्.	१५३
४३	विमलेश्वरतीर्थमाहात्म्यवर्णनम्.	१५५
४४	शुक्लभेदप्रशंसावर्णनम्.	१५५.
४५	शुक्लभेदतीर्थोत्पत्तिवर्णनेऽन्धकासुरवधवृत्तान्तवर्णनम्.	१५६
४६	शुक्लभेदतीर्थोत्पत्तिवर्णनेऽन्धकासुरेण देवाञ्जित्वा शचीहरणवर्णनम्.	१५६.
४७	देवानां ब्रह्मलोके गमनम्, देवैर्ब्रह्मणःस्तुतिं कृत्वा स्वागमनकारणकथनम्, ब्रह्मदेवेन सह देवानां विष्णुलोके गमनम्, ब्रह्मादिदेवैर्विष्णुस्तुतिकरणम्, विष्णुना देवान्प्रत्यभयवचनदानम्.	१५७
४८	उत्तानपादशंकरसंवादे अंधकविष्ण्वोर्युद्धवर्णनम्, तत्र परस्परेण परस्परोपवर्णनप्रेषणम्, युद्धं कर्तुमसमर्थस्यान्धकस्य भगवता ज्ञानकरणम्, अन्धकेन भगवत्स्तुतिकरणम्, विष्णोराज्ञया शंकरेण सर्मं युद्धं कर्तुं गतेनान्धकेन कैलासपर्वतस्य कम्पनम्, कोपविष्टेन शिवेन साकमन्धकस्य महद्युद्धम्, शंकरप्रार्थनया दुर्गायास्तत्रागमनम्, दुर्गासाहाय्येनान्धकस्य पराभवकरणम्, अंधकेन शिवस्तुतिकरणम्, शंकरेणांधकस्य स्वसाम्यकरणवर्णनम्.	१५७.
४९	अंधकासुरं हत्वोमया सार्धं शंकरस्य कैलासे गमनम्, कैलासे प्राप्तैर्देवैः शंकरस्तुतिकरणम्, ततोऽधकासुरपुद्गलस्थाने शुक्लभेदतीर्थस्थापनम्, शुक्लभेदतीर्थमाहात्म्यवर्णनम्.	१५८
५०	पात्रापात्रपरीक्षादानादिनियमवर्णनम्.	१५९
५१	शुक्लभेदतीर्थे दानधर्मप्रशंसामाहात्म्यवर्णनम्.	१६०
५२	तीर्थत्रयोद्भवाख्यानवर्णनम्.	१६१
५३	ब्रह्मवृक्षतत्तीर्थगमनवृत्तान्तवर्णनम्.	१६१
५४	तीर्थत्रयैः स्वर्गारोहणवृत्तान्तवर्णनम्.	१६२

अध्यायाः	विषयाः	पृ०
५५	शुक्लभेदमाहात्म्ये काशीराजमोक्षगमनवृत्तान्तवर्णनम्.	१६३
५६	उत्तानपादेश्वरसंवादप्रसंगेन विन्ध्याचले देवैः शिवाराधनया भूम्यां गंगाया आह्वानकरणम्, गंगाया भुव्यागमनम्, गंगातीरे स्नानादिमाहात्म्यवर्णनम्, देवशिलामाहात्म्यवर्णनम्, चेदिनाथस्य वैधव्यं गताया भानुमतीनाम्न्याः कन्यकाया रेवातटे गमनम्, भानुमत्या ओंकारेश्वरासरकंटकचक्रतीर्थशूलभेदादितीर्थेषु गमनवर्णनम्, अथ देवशिलामाहात्म्यवर्णनम्, तत्प्रसंगेन भार्यया सह शबरव्याधस्य मृगयार्थमरण्ये गमनम्, मृगानलब्ध्वा भार्यावचनात्स्वानि मृहीतुं सरस्तीरे शबरस्य गमनं पद्ममृहणं च, शूलभेदादितीर्थेषु गत्वा शबरेण पद्मैः शिवार्चाकरणम्, भानुमतीशबरभार्ययोः संवादः, शबरेण सर्वतीर्थेषु श्राद्धविधिकरणम्, तीर्थस्नानदानादिफलमाहात्म्यवर्णनम्.	१६४
५७	भानुमत्या त्रयोदश्यां मार्कण्डेयह्रदे गत्वा स्नानदानादिकरणम्, व्याधस्वर्गगमनवृत्तान्तवर्णनम्.	१६६
५८	उत्तानपादशिवसंवादप्रसङ्गेन भानुमत्याः शूलभेदे तपःकरणम्, भानुमत्याः स्वर्गागमनवृत्तान्तवर्णनम्, शूलभेदमाहात्म्यवर्णनम्.	
५९	पुष्करिणीतीर्थमाहात्म्यवर्णनम्, आदित्यतीर्थमाहात्म्यम्.	१६७
६०	रेवासीतीर्थोत्पत्तिप्रशंसावर्णनम्, रेवायाः स्तोत्रकरणम्, रेवातीरस्थस्यादित्येश्वरस्य माहात्म्यवर्णनम्, त्रह्महत्यादिपापयुक्तानां ब्राह्मणानामादित्येश्वरक्षेत्रे स्नानादिना पापनिर्मुक्तिपूर्वकमोक्षप्राप्तिवृत्तान्तवर्णनम्.	१६७
६१	इन्द्रकृतवत्सप्रयायवर्णनपूर्वकं शक्रेश्वरतीर्थमाहात्म्यवर्णनम्.	१६८
६२	इन्द्रद्वापितकरोडीश्वरतीर्थमाहात्म्यवर्णनम्.	१६८
६३	कुमारेश्वरतीर्थमाहात्म्यवर्णनम्.	१६९
६४	अगस्त्येश्वरतीर्थमाहात्म्यवर्णनम्.	१६९
६५	आनन्देश्वरतीर्थमाहात्म्यवर्णनम्.	१६९
६६	मातृतीर्थमाहात्म्यवर्णनम्....	१६९
६७	लुंकेश्वरतीर्थमाहात्म्यवर्णनप्रसङ्गेन कालपृष्ठदानवस्य तपश्चर्यावर्णनम्, शिवेन तस्मै वरदानम्, दानवपृषभयोर्युद्धे वृषभेण लांगूलेन दानवस्य पराभवकरणम्, दानवमागतं दृष्ट्वा वृषभं समारुह्य देवस्योमया सह कैलासे गमनम्, शंकरेण स्वपृष्ठतोऽनुधावन्तं दानवं दृष्ट्वा इन्द्रब्रह्मादिलोकेषु पलायनम्, शिवस्य वचनान्नारदेन विष्णवे दानवपीडनादिसर्ववृत्तान्तकथनम्, मायया न्यग्रोधसमीपे विष्णोर्दानवमोहार्थं कन्यारूपधारणम्, कन्यां दृष्ट्वा मोहितेन कालपृष्ठेन स्वमस्तकोपरि हस्तं कृत्वा भस्ममवनम्, ततो विष्णोः स्वस्थाने गमनम्, लुंकेश्वरस्थापनम्, लुंकेश्वरतीर्थस्नानमाहात्म्यवर्णनम्.	१६९
६८	आनन्दतीर्थमाहात्म्यवर्णनम्.	१७१
६९	ब्रह्मकृतस्थापितमंगलेश्वरोत्पत्तिवर्णनपूर्वकं मंगलेश्वरमाहात्म्यवर्णनम्.	१७२
७०	रविनिर्मितरवितीर्थमाहात्म्यवर्णनम्.	१७१
७१	कामेश्वरतीर्थमाहात्म्यवर्णनम्.	१७१
७२	मणिनागेश्वरतीर्थवर्णने कद्रूविनतयोरुच्चैःश्रवोहयं दृष्ट्वा हयवर्णनिर्णयसंबन्धितं मिथः प्रतिज्ञाकरणम्, स्वस्वप्रतिज्ञां सत्यां कर्तुमुद्यतयोः प्रयत्नः, तत्र कद्रूा नागेभ्यः शापे दत्ते तच्छापनिवारणाय मणिनागेन तपः कृत्वा शिवलिंगस्थापनम्, मणिनागेश्वरतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	१७१
७३	कामधेनुपश्चरणे गोदेहान्निःसृतस्य गोपरेश्वरस्य तीर्थस्य माहात्म्यवर्णनम्. १७२	
७४	गौतमस्थापितगौतमेश्वरलिंगतीर्थमाहात्म्यवर्णनम्.	१७३
७५	शंखभूततीर्थमाहात्म्यवर्णनम्.	१७३
७६	परेश्वरतीर्थमाहात्म्यवर्णने पुत्रप्राप्त्यर्थं पराशरमुनिकृतपश्चर्यावृत्तान्तवर्णनम्, तत्तपःस्तुष्टेन शंकरेण पराशराय वरप्रदानम्, तत्र पराशरेण लिंगस्थापनम्, परेश्वरतीर्थे स्नानदानादिमाहात्म्यवर्णनम्....	१७३
७७	भीमेश्वरतीर्थमाहात्म्यवर्णनम्.	१७३.
७८	रेवाया उत्तरे तीरे नारदेन तपश्चरणम्, तत्तपःसंतुष्टेन शिवेन नारदाय वरप्रदानम्, ईश्वरवचनान्नारदेन शिवलिंगस्थापनम्, नारदेश्वरतीर्थे स्नानदानादिफलमाहात्म्यवर्णनम्.	१७३.
७९	दधिस्कन्दमधुस्कन्दयोस्तीर्थयोर्दधिमधुदानमाहात्म्यवर्णनम्, दधिस्कन्दमधुस्कन्दतीर्थस्नानदानमाहात्म्यवर्णनम्.	१७४
८०	दधिस्कन्दमधुस्कन्दतीर्थप्रभावोत्कर्षं प्रदर्शयितुं नानातीर्थान्भ्रान्त्वाऽऽगतेन नंदिना तपः कृत्वा तत्रैव स्वनाम्ना लिंगस्थापनम्, नंदिकेश्वरतीर्थमाहात्म्यवर्णनम्.	१७४
८१	वडवेश्वरतीर्थमाहात्म्यवर्णनम्.	१७४.
८२	वह्नितीर्थवर्णनपूर्वकं दधिस्कन्दादिपञ्चतीर्थानां माहात्म्यवर्णनम्.	१७४.
८३	हनुमदेश्वरमाहात्म्यवर्णने रामेण रावणादीनां विनाशे कृते हनुमतः शिवदर्शनार्थं कैलासे गमनम्, राक्षसानां विनाशे ब्रह्महत्यादोषापोहनाभिप्रायेण हनुमत्तीर्थे हनुमत्स्नानम्, ब्रह्महत्यानिवर्तनार्थं हनुमतो नर्मदायामागमनम्, हनुम-	

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अध्यायाः	विषयाः	पृ
	कृतेन तपसा तुष्टेनेश्वरेण हनुमत आशीर्वचनम्, ईश्वराज्ञया हनुमता लिंगस्थापनम्, सुपर्णनामकस्य राज्ञः पुत्रस्य शतबाहुसंज्ञकस्य क्रमशो हनुमद्गृह आगमनम्, तत्राश्लिक्षेपार्थमागतस्य पिंगलकद्विजस्य राजपुत्रेण सह समागमः संवादश्च, अस्थिक्षेपकारणं पृच्छन्तं राजपुत्रं प्रति ब्राह्मणेन शिवलिंगविराजत-कन्यासंवादपुरःसरवृत्तान्तकथनपूर्वकं हनुमदीश्वरमाहात्म्यवर्णनम्....	१७५
८४	ऋषितीर्थमाहात्म्यम्, रामेश्वरस्मरणेश्वरकुण्डेश्वरतीर्थेषु स्नानदानादिफलमाहात्म्य-वर्णनम्.	१७७
८५	कुबेरेणान्वये सप्तविंशतिकन्या दत्त्वा रोहिणी विना चान्याभ्यः पञ्चस्वाशीर्वादं दत्त्वा निजकन्याभ्यः कात्यायनाय प्रथमिलक्षणदानम्, सप्तकन्याभिः शतपतिव्रतत्व-गीश्वरस्तुतिकरणम्, तत ईशानुज्ञया सोमनाथेति लिंगस्थापनम्, सोमनाथेश्वर-लिंगप्रभावदर्शनार्थं महादेव्यायुक्तत्व कन्यैर्मोहयत्साधिनाहानपूर्वकऋषभवर्णनम्, सोमनाथेश्वरलिंगमाहात्म्यवर्णनम्.	१७७
८६	पिंगलेश्वरतीर्थमाहात्म्यवर्णनम्.	१७९
८७	मणिकर्णयमोचनतीर्थयोर्माहात्म्यवर्णनम्.	१७९
८८	कपिलेश्वरतीर्थमाहात्म्यवर्णनम्.	१७९
८९	पूर्वकेश्वरतीर्थमाहात्म्यवर्णनम्.	१७९
९०	चक्रिनिर्मितचक्रतीर्थमाहात्म्यवर्णने बालमेखलानदजितान्देवान्दृष्ट्वा ब्रह्मणो विष्णु-सभायां गमनम्, देवकृतं स्वस्तुतिं श्रुत्वा भगवता वैवेभ्योऽश्वत्थवचनश्रावणम्, ततो विष्णुबालमेखलयोर्युद्धे विधेः शस्त्रास्त्रप्रेरणम्, ततो भगवता स्वचक्रेण बालमेख-शिरश्छेदकरणम्, तद्रुधिरधारां नर्मदाम्भसि पतितां दृष्ट्वा तत्र तीर्थनिर्माणम्, तस्य तीर्थस्य जलधारोत्पन्नाम्रकपक्वतीर्थेतिनाम्ना प्रसिद्धिः, तत्र स्नानदानादिवि-शेषविधिविधानमाहात्म्यवर्णनम्.	१७९
९१	चंद्रादित्यतीर्थमाहात्म्यवर्णनम्.	१८१
९२	धनहास्यतीर्थमाहात्म्यवर्णनम्.	१८१
९३	कल्हारतीर्थमाहात्म्यवर्णनम्.	१८२
९४	नंदिकेश्वरतीर्थमाहात्म्यवर्णनम्.	१८२
९५	नरनारायणस्थापितनारायणतीर्थमाहात्म्यवर्णनम्.	१८२
९६	कोटीश्वरतीर्थमाहात्म्यवर्णनम्.	१८३
९७	व्यासतीर्थोत्पत्तिवर्णनप्रसङ्गे पराशरमुनितपश्चरणवृत्तान्तवर्णनम्, तपसोऽन्ते पराशरमुनिना कस्याश्चिद्धालाया वाशकन्याया वर्शनम्, तां प्रति 'त्वं राजकन्यासि' इत्युक्त्वा तस्याः प्राक्सर्ववृत्तान्तकथनम्, ततः पराशरस्य तया मत्स्यगंधया सह संगमे तत्क्षणमेव पराशरमुनिवीर्यप्रभावाद्व्यासोत्पत्तिवर्णनम्, व्यासेन नर्मदातटे तपश्चरणम्, तत्तपःसंतुष्टेनेश्वरेण व्यासाय वरप्रदानम्, व्यासेन नर्मदातटे व्यासेश्वरकरणं व्यासेन नर्मदातटे शिवलिंगस्थापनं च, व्यासतीर्थे स्नानदानादिफल-माहात्म्यवर्णनम्.	१८३
९८	प्रभासतीर्थमाहात्म्यवर्णनम्.	१८५
९९	नागेश्वरतीर्थमाहात्म्यवर्णनम्.	१८६
१००	मार्कंडेयस्थापितमार्कंडेयेशमाहात्म्यवर्णनम्.	१८६
१०१	संकर्षणतीर्थमाहात्म्यवर्णनम्.	१८७
१०२	मन्मथेश्वरमाहात्म्यवर्णनम्.	...
१०३	एरंडीसंगममाहात्म्यवर्णनम्, तत्रानपत्यत्वाद्व्यथनसूयाभ्यां शोकरणम्, अत्रे-रनुज्ञया नर्मदातीरस्थैरंडीसंगमेऽनसूयया तपोर्थं गमनम्, तपसोऽन्ते त्रयाणां ब्रह्मादिदेवतानामागमनम्, देवैः पुत्रप्राप्त्यर्थमनसूयायै वरप्रदानम्, ततोऽनसूयाया दुर्वाससोमदत्तसोमाख्यपुत्रत्रयप्राप्तिवृत्तान्तवर्णनम्, ततस्तत्तीर्थमाहात्म्यवर्णनम-संगेन पुत्रशोकेन संतप्तस्य गोविन्दनाम्नः कृषीवलस्य कथावर्णनम्, तत्र तस्यैव मूलौ शयानस्य कृमित्वप्राप्तिवर्णनम्, ततस्तस्य पत्न्या सममैरण्डीसंगमे स्नानार्थं गमनम्, तत्र गोभूहिरण्यादिदानेन तयोर्दुःखान्मुक्तिः, गोविंदा-ख्यानश्रवणफलवर्णनम्, एरण्डीसंगममाहात्म्यवर्णनम्.	१८७
१०४	सुवर्णशिलातीर्थमाहात्म्यवर्णनम्.	१९०
१०५	करंजतीर्थमाहात्म्यवर्णनम्.	१९०
१०६	कामदतीर्थमाहात्म्यवर्णनम्.	१९०
१०७	भण्डारीतीर्थमाहात्म्यवर्णनम्.	१९०
१०८	रोहिणीतपश्चरणपूर्वकं रोहिणीतीर्थमाहात्म्यवर्णनम्.	१९१
१०९	चक्रतीर्थमाहात्म्यवर्णनम्...	१९१
११०	धौतपापतीर्थमाहात्म्यवर्णनम्.	१९१
१११	स्कन्दतीर्थवर्णनप्रसङ्गेन स्कन्दजन्मवृत्तान्तकथनम्, स्कन्दस्य सेनापतित्वे स्थापनम्, स्कन्देन शिवलिंगस्थापनम्, स्कन्दतीर्थमाहात्म्यवर्णनम्.... ...	१९१
११२	अग्निरसतीर्थमाहात्म्यवर्णनम्.	१९२
११३	कोटितीर्थमाहात्म्यवर्णनम्.	१९२
११४	अयोनिसंभवतीर्थमाहात्म्यवर्णनम्.	१९२
११५	अप्सरकतीर्थमाहात्म्यवर्णनम्.	१९२

अध्यायाः	विषयाः	पृ
११६	पांडुतीर्थमाहात्म्यवर्णनम्.	१९२
११७	त्रिलोचनतीर्थमाहात्म्यवर्णनम्.	193
११८	देवदैत्ययुद्धे पुत्रं हत्वा महादुःखमनिभूतस्येन्द्रस्य ब्रह्मकरणार्थं कर्दमतीरे गमनम्, तत्र तत्र तपसोऽन्ते ब्रह्मविष्णुमहेश्वरानागमनम्, त्वाष्ट्रयेनेत्र शिवलिंग-स्थापनम्, इन्द्रतीर्थमाहात्म्यवर्णनम्.	१९३
११९	कपोतीतीर्थमाहात्म्यवर्णनम्.	१९३
१२०	कंचुनामकस्य राजपुत्रस्य तपोऽर्थं नर्मदातीरे गमनम्, तत्तपसः प्रभावेण तुष्टेन शंकरेण तस्मै वरप्रदानम्, कंचुकुंडं शिवलिंगस्थानम्, कंचुकेश्वरतीर्थमाहात्म्य-वर्णनम्.	१९३
१२१	सुपित्रं ब्राह्मणं प्रति सोमेन तपसस्तप्त्वा शिवलिंगस्थापनम्, सोमतीर्थचन्द्रहासतीर्थयोर्माहा-त्म्यवर्णनम्....	१९४
१२२	कोशलस्यतीर्थमाहात्म्यवर्णने मद्यनिर्मितद्रुष्टिवर्णनम्, चातुर्वर्ण्यव्यवस्थावर्णनम्, सदाचारसंज्ञेन किंचा इत्यनेति वाक्यं श्रुत्वा भिया हतं महिपालस्य यमस्य दर्शनम्, शत्रुजित्यमस्तत्कलेश्वरदर्शनं, धनराजवर्णनम्, कोशलत्वलिंगस्था-पनम्, कोशलतीर्थमाहात्म्यवर्णनम्.	१९४
१२३	कर्मदेश्वरतीर्थमाहात्म्यवर्णनम्.	१९५
१२४	नर्मदेश्वरतीर्थमाहात्म्यवर्णनम्.	१९५
१२५	रवेरादित्यभास्करेतिनामव्याप्तिकारणकथनम्, रावेरुत्पत्त तपसो वर्णनम्, रविणा शिवलिंगस्थापनम्, रवितीर्थमाहात्म्यवर्णनम्.	१९५
१२६	अयोनिप्रभवतीर्थमाहात्म्यवर्णनम्.	१९६
१२७	अग्नितीर्थमाहात्म्यवर्णनम्.	१९६
१२८	सप्तर्षेश्वरतीर्थमाहात्म्यवर्णनम्.	१९६
१२९	मणितीर्थमाहात्म्यवर्णनम्.	१९६
१३०	देवतीर्थमाहात्म्यवर्णनम्.	१९६
१३१	नागतीर्थोत्पत्तिकथने विनताकद्रोर्वादप्रसंगकथनम्, नागेश्वरतीर्थमाहात्म्यवर्णनम्.	
१३२	आदिवाराहतीर्थमाहात्म्यवर्णनम्.	१९७
१३३	चतुर्मिर्लोकपालैरीश्वराराधनं कृत्वेश्वरतः श्वेतवरप्राप्तकथनम्, तैरेव चतुर्भिर्लोक-पालैः शिवलिंगस्थापनम्, कुबेरादिलिंगचतुष्टयमाहात्म्यवर्णनम्. ...	१९७
१३४	रामेश्वरतीर्थमाहात्म्यवर्णनम्.	१९८
१३५	खिद्येश्वरमाहात्म्यवर्णनम्....	१९८
१३६	अहिल्यासंगकारिणमिन्द्रं प्रति गौतमेन शापप्रदानम्, अहिल्यायाः पतिशापेनाश्म-स्वप्राप्तिवर्णनम्, रामेण पदा स्पृष्टाया अहिल्यायाः शापमोचनम्, अहिल्यया स्वनाम्ना शिवलिंगस्थापनम्, अहिल्येश्वरतीर्थमाहात्म्यवर्णनम्.	१९८
१३७	कर्कटेश्वरमाहात्म्यवर्णनम्.	१९८
१३८	शक्रेण गौतमदत्तशापनिवृत्त्यर्थं तपस्तप्त्वा शिवलिंगस्थापनम्, शक्रेश्वरतीर्थमा-हात्म्यवर्णनम्.	१९८
१३९	सोमतीर्थमाहात्म्यवर्णनम्.	१९९
१४०	नन्दादेव्युत्पत्तिवर्णनपूर्वकनंदाह्रदतीर्थमाहात्म्यवर्णनम्.	१९९
१४१	तापेश्वरतीर्थमाहात्म्यवर्णनम्.	१९९
१४२	रुक्मिणीतीर्थमाहात्म्यवर्णनप्रसंगेन रुक्मिण्याः श्रीकृष्णेन कृतस्य पाणिग्रहणस्य वृत्तान्तवर्णनम्, तत्र श्रीकृष्णपैयमागधादीनां युद्धप्रसंगवर्णनम्, श्रीकृष्णकृतरु-क्मिण्याभवर्णनम्, रुक्मिणीकृष्णयोर्विवाहविधिवर्णनम्, रुक्मिणीस्थापितस्य रुक्मिण्तीर्थस्य माहात्म्यवर्णनम्.	१९९
१४३	योजनेश्वरतीर्थमाहात्म्यवर्णनम्.	२०१
१४४	द्वादशीतीर्थमाहात्म्यवर्णनम्.	२०१
१४५	शिवतीर्थमाहात्म्यवर्णनम्.	२०१
१४६	अस्माश्वकतीर्थे स्नानदानजपहोमादिपित्रादिश्राद्धपोत्सर्गादिनैकव्रतकर्मणां विस्तरेण फलमाहात्म्यवर्णनम्.	२०१
१४७	सिद्धेश्वरतीर्थमाहात्म्यवर्णनम्.	२०३
१४८	मंगलेश्वरतीर्थमाहात्म्यवर्णनम्.	२०३
१४९	लिंगधारातीर्थमाहात्म्यवर्णनम्.	२०३
१५०	इन्द्रेण कामे भस्मीकृते सति तदुत्पत्यनार्थं देवीश्वरस्तुतिकरणम्, कामस्य पुनरुज्जी-करणम्, कामदेवेन तपः कृत्वा शिवलिंगस्थापनम्, पुष्पमेश्वरलिंगमाहात्म्य-वर्णनम्.	२०४
१५१	देवेश्वराराहतीर्थमाहात्म्यवर्णनम्.	२०५
१५२	मार्गलेश्वरतीर्थमाहात्म्यवर्णनम्.	२०५
१५३	आदित्येश्वरतीर्थमाहात्म्यवर्णनम्.	२०५
१५४	कल्पेश्वरतीर्थमाहात्म्यवर्णनम्.	२०६
१५५	शुक्रतीर्थोत्पत्तिवर्णने वायसाभ्यां वधिरस्य पाणक्यस्य कथनम्, पाणक्यस्य कौटिल्यवर्णनम्, पाणक्यसिद्धिप्राप्तिवृत्तान्तवर्णनम्.	२०६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अध्यायाः	विषयाः	पृ०
१५६	शुक्लतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२०८
१५७	हुंकारस्वामितीर्थमाहात्म्यवर्णनम्.	२०८
१५८	संगमेश्वरतीर्थमाहात्म्यवर्णनम्.	२०९
१५९	अनरकेश्वरतीर्थमाहात्म्यवर्णने कर्मविपाकवर्णनम्, गर्भावलिवर्णनम्, वैतरण्यादिमहादानानां फलमाहात्म्यवर्णनम्, आश्विनकृष्णचतुर्दश्यां यमस्य दीपादिदानमाहात्म्यम्, अनरकेश्वरतीर्थमाहात्म्यवर्णनम्.	२०९
१६०	मोक्षतीर्थमाहात्म्यवर्णनम्.	२१०
१६१	सर्पतीर्थमाहात्म्यवर्णनम्.	२११
१६२	गोपेश्वरतीर्थमाहात्म्यवर्णनम्.	२११
१६३	नागतीर्थमाहात्म्यवर्णनम्....	२११
१६४	सांगीरेश्वरतीर्थमाहात्म्यवर्णनम्.	२११
१६५	सिद्धेश्वरतीर्थमाहात्म्यवर्णनम्.	२११
१६६	सिद्धेश्वरीतीर्थमाहात्म्यवर्णनम्.	२११
१६७	मार्कण्डेयेन तपस्तप्त्वा शिवानुज्ञया शिवलिंगस्थापनम्, मार्कण्डेयेश्वरलिंगमाहात्म्यवर्णनम्...	२११
१६८	अंकूरेश्वरतीर्थमाहात्म्यवर्णने कुबेरजन्मकथावर्णनम्, रावणादित्रयाणां जन्मकर्मवर्णनम्, रावणादिभिस्तपः कृत्वा शिवतो वरादिग्रहणम्, तैरंकूरेश्वरलिंगस्थापनम्, अंकूरेश्वरतीर्थमाहात्म्यवर्णनम्.	२१२
१६९	मांडव्यशूलारोपणकथाप्रसंगेनेश्वराराधनया जातकन्यकस्य देवपन्नाख्यस्य राज्ञः कामप्रमोदिन्याख्यायाः कन्यायाः श्येनरूपधारिणा शंबरेण हरणम्.	२१३
१७०	कामप्रमोदिनीसंज्ञकराजकन्याहरणेन तत्सखीभिः कृतस्य विलापस्य वर्णनम्, देवपन्नेन राज्ञा तद्वृत्तांतं श्रुत्वा तच्छोधनार्थं मंत्र्यादीनां प्रेषणम्, मांडव्याश्रमे राजकन्यकाया आभरणानि दृष्ट्वा सर्वे राज्ञे तद्वृत्तान्तनिवेदनम्, ततो राजाज्ञया मांडव्यस्य शूलारोपणवर्णनम्.	२१३
१७१	शूलारोपितस्य माण्डव्यस्य दर्शनार्थमृषीणामागमनम्, राज्ञे शापं दातुमृषीणां प्रवृत्तिवर्णनम्, ततो माण्डव्येन महर्षिणर्षिभ्यः कर्मविपाकवर्णनम्, मांडव्याद्यृषीणां स्वाश्रमे गमनम्, तत्र पत्न्याः स्कन्धे स्थितस्य रोगिणः शांडिल्यर्षेरागमनम्, शांडिल्यपत्न्याऽजानन्त्या स्खलनवशात्स्वपद्भ्यां शूलदण्डस्य स्पर्शने कृते सति तज्जन्यप्रतिघातेन शूलदण्डकम्पनाद्व्यथितस्य मांडव्यस्य शांडिल्यपत्न्याश्च संवादवर्णनम्, मिथः परस्पराभ्यां परस्परयोः शापप्रदानम्.	२१४
१७२	देवर्षीणां मांडव्याश्रमे पुनरागमनम्, तेषां भाषणम्, देवपन्नराजाग्रे शंबरेण कन्याया आनयनम्, मांडव्यस्य शापतो मुक्तिवर्णनम्, तया विप्रपत्न्या निजपातिव्रत्यप्रभावेण प्रतिबन्धीकृतस्य सूर्यस्य बन्धतो मोचनम्, शांडिल्यर्षेः पुनर्जीवप्रदानवर्णनम्, मांडव्यतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२१४
१७३	शुद्धेश्वरतीर्थमाहात्म्यवर्णनम्.	२१६
१७४	गोपेश्वरतीर्थमाहात्म्यवर्णनम्.	२१६
१७५	सगरात्मजानामुद्धाराय कपिलेन नर्मदारोधसि तपस्तप्त्वा निर्मितं कपिलेश्वरतीर्थम् कपिलेश्वरतीर्थमाहात्म्यवर्णनम्.	२१६
१७६	पिंगलेश्वरतीर्थमाहात्म्यवर्णनम्.	२१७
१७७	भूताश्वरतीर्थमाहात्म्यवर्णनम्.	२१७
१७८	गंगावहकतीर्थमाहात्म्यवर्णनम्.	२१७
१७९	गौतमेश्वरतीर्थमाहात्म्यवर्णनम्.	२१८
१८०	दशाश्वमेधिकतीर्थमाहात्म्यप्रस्तावे शंकरपार्वतीसंवादे केनचिद्द्विजेन तपस्तप्त्वा लिंगस्थापनवर्णनम्, दशाश्वमेधिकोत्पत्तिवर्णनपूर्वकं दशाश्वमेधिकतीर्थमाहात्म्यवर्णनम्	२१८
१८१	भृगुतीर्थमाहात्म्यवर्णने भृगुकथावर्णनपूर्वकं भृगुं हन्तुं प्राप्तस्य नंदिनोऽनु भृगुवर्गमनम्, क्वापि स्वरक्षितारमदृष्ट्वा देवसमीपे वृषभस्य गमनम्, भृगुणा शिवस्य स्तुतिकरणम्, ईश्वरेण भृगवे वरप्रदानम्, भृगुणा लिंगस्थापनम्, भृगुकच्छोत्पत्तिवर्णनपूर्वकमाहात्म्यवर्णनम्.	२१९
१८२	भृगुकच्छतीर्थे स्नानदानादिमाहात्म्यवर्णनम्.	२२०
१८३	केदारेश्वरतीर्थमाहात्म्यवर्णनम्.	२२१
१८४	ब्रह्मणः पंचमशिरश्छेदनेन ब्रह्महत्योपद्रुतेन शंभुना धौतपापाख्यतीर्थस्थापनम्, धौतपापतीर्थमाहात्म्यवर्णनम्.	२२२
१८५	एरण्डीतीर्थमाहात्म्यवर्णनम्.	२२२
१८६	गरुडेन चामुंडास्तवनकरणम्, चामुंडाप्रसादेन गरुडेन कनखलेश्वरलिंगस्थापनवर्णनम्. कनखलेश्वरलिंगमाहात्म्यवर्णनम्.	२२३
१८७	कालाग्निरुद्रतीर्थमाहात्म्यवर्णनम्.	२२३
१८८	शालिग्रामतीर्थमाहात्म्यवर्णनम्.	२२३
१८९	वराहोत्पत्तिवर्णनपूर्वकमुदीर्णवराहतीर्थमाहात्म्यवर्णनम्.	२२३
१९०	चन्द्रहास्यापरनामकचन्द्रप्रभासतीर्थमाहात्म्यवर्णनम्.	२२४
१९१	द्वादशादित्यतीर्थमाहात्म्यवर्णनम्.	२२५
१९२	नरनारायणयोस्तपोविघ्नार्थमिंद्रेणाप्सरआदीनां प्रेषणम्, अप्सरोभिर्नरनारायणस्तवनम्, नरनारायणाभ्यामप्सरआदीनामुपदेशादिकरणम्. स्वविराड्देहे नानावरांगनादीनां ब्रह्माण्डस्थवस्तूनां च दर्शनम्, तद्दर्शनविस्मितैर्वसंतकामाप्सरोभिर्विराड्रूपिनरनारायणस्तोत्रकरणम्, अप्सरआदीनां स्वर्गे गमनम्, इन्द्राय सर्ववृत्तान्तकथनम्, श्रीपतिमाहात्म्यवर्णनम्.	२२५
१९३	श्रीपतिक्षेत्रे स्नानस्य गवादिदानस्य च फलवर्णनम्.	२२६
१९४	नारायणप्रभावं शक्रमुखाच्छ्रुत्वा तं नारायणं कामयमानया लक्ष्म्या तत्प्राप्त्यर्थं सागरान्ते तपश्चरणम्, तुष्टेन नारायणेन लक्ष्म्या समं विवाहकरणम्, श्रीपतिविवाहसमारंभवर्णनम्.	२२८
१९५	श्रीपतिमाहात्म्यवर्णनम्.	२२९
१९६	हंसतीर्थमाहात्म्यवर्णनम्.	२२९
१९७	मूलस्थानतीर्थमाहात्म्यवर्णनम्.	२३०
१९८	शूलारोपितस्य माण्डव्यर्षे राज्ञा शूलतोऽवरोहणकरणम्, तत्र शंकरस्यागमनम्, माण्डव्येन शंकराग्रे दाक्षायणीविनाशादिप्राक्संभूतकथावर्णनम्, माण्डव्येन देवीस्तवनकरणम्, नानास्थलस्थितया देव्या भिन्नभिन्ननामादिवर्णनम्, शूलेश्वरनाम्ना शिवलिंगस्थापनं च, तस्य शूलेश्वरलिंगस्य माहात्म्यवर्णनम्....	२३०
१९९	आश्विनतीर्थमाहात्म्यवर्णनम्.	२३१
२००	सावित्रीतीर्थमाहात्म्यवर्णनम्.	२३२
२०१	देवतीर्थमाहात्म्यवर्णनम्.	२३२
२०२	शिखितीर्थमाहात्म्यवर्णनम्.	२३२
२०३	कोटितीर्थमाहात्म्यवर्णनम्.	२३२
२०४	पैतामहतीर्थमाहात्म्यवर्णनम्.	२३२
२०५	कुर्कुरीतीर्थमाहात्म्यवर्णनम्.	२३३
२०६	दशकन्यातीर्थमाहात्म्यवर्णनम्.	२३३
२०७	सुवर्णबिंदुतीर्थमाहात्म्यवर्णनम्.	२३३
२०८	ऋणमोचनतीर्थमाहात्म्यवर्णनम्.	२३४
२०९	पुष्कलीतीर्थक्षमानाथतीर्थमाहात्म्यवर्णनम्, भारभूतीतीर्थवर्णनप्रस्तावे विष्णुशर्माग्रे वटुवेषधारिणः शिवस्यागमनम्, वटुना स्वप्रतिज्ञायां सत्यापितायां स्वस्वप्रतिज्ञाभ्रष्टानामन्यशिष्याणां नर्मदाम्भसि मज्जनम्, गुर्वनुज्ञया शिष्यभाराणां पुनरुज्जीवनम्, तत्र लिंगस्थापनमतो भारभूतीति नाम्ना तस्य तीर्थस्य प्रसिद्धिवर्णनम्, भारभूतीतीर्थमाहात्म्यवर्णनम्, विश्वासघातिनः सुकेश्याख्यवैश्यस्य कथानककथनम्.	२३४
२१०	पुंखिलतीर्थमाहात्म्यवर्णनम्.	२३६
२११	मुण्डितीर्थमाहात्म्यवर्णनम्.	२३६
२१२	एकशालडिंडिमेश्वरतीर्थमाहात्म्यवर्णनम्.	२३६
२१३	आमलेश्वरतीर्थमाहात्म्यवर्णनम्.	२३७
२१४	श्रीकपालतीर्थमाहात्म्यवर्णनम्.	२३७
२१५	शृंगितीर्थमाहात्म्यवर्णनम्.	२३७
२१६	आषाढीतीर्थमाहात्म्यवर्णनम्.	२३७
२१७	एरंडीतीर्थमाहात्म्यवर्णनम्.	२३७
२१८	स्वपितुर्जमदग्नेरपराधकारिणः सहस्रार्जुनस्य विनाशे कृते सत्येकविंशतिवारं समस्तक्षत्रियवधे च कृते सति तत्पापशमनार्थं परशुरामेण जामदग्न्येश्वरस्थापनं जामदग्न्यतीर्थकरणं च, जामदग्न्यतीर्थमाहात्म्यवर्णनम्, जामदग्न्येश्वरपूजनविधिवर्णनम्	२३७
२१९	कोटितीर्थमाहात्म्यवर्णनम्.	२३८
२२०	लोटणेश्वरतीर्थमाहात्म्यवर्णनम्.	२३८
२२१	ब्रह्महंससंवादपूर्वकं हंसेश्वरमाहात्म्यवर्णनम्.	२३९
२२२	तिलोदेश्वरतीर्थमाहात्म्यवर्णनम्.	२४०
२२३	वासेश्वरतीर्थमाहात्म्यवर्णनम्.	२४०
२२४	कोटीश्वरतीर्थमाहात्म्यवर्णनम्.	२४०
२२५	अलिकानामकगन्धर्वकन्यया स्वनाम्ना शिवलिंगस्थापनम्, अलिकेश्वरतीर्थमाहात्म्यवर्णनम्.....	२४०
२२६	भानुमतीकामुकेन भानुना कुष्ठरोगनिरसनार्थं शान्तया भार्यया सार्धं तपस्तप्त्वा शिवाज्ञया विमलेश्वरेतिनाम्ना शिवलिंगस्थापनम्, विमलेश्वरतीर्थमाहात्म्यवर्णनम्.	२४०
२२७	नर्मदातीरस्थानां प्राक्कथितसर्वतीर्थानां यथाक्रमेण यात्राविधिवर्णनम्, विशेषतस्तीर्थमाहात्म्यवर्णनम्.	२४१
२२८	परार्थतीर्थयात्राकरणमाहात्म्यपुण्यादिकथनम्.	२४२
२२९	रेवाखण्डश्रवणपठनादिदानादिफलश्रुतिवर्णनम्.	२४२
२३०	तीर्थसंगमभेदकथनम्, तीर्थावलिवर्णनम्.	२४३
२३१	तीर्थसंख्यापरिगणनपूर्वकं सर्वतीर्थानां विशिष्टव्यवस्थाकथनपूर्वकयात्राक्रमवर्णनम्	२४४
२३२	रेवाखण्डसमाप्तिपूर्वकं रेवाखण्डपुस्तकदानफलवर्णनम्.	२४५

इति स्कान्दे महापुराणे पंचमभावन्त्यखण्डम् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ श्रीस्कांदमहापुराणांतर्गतचतुर्थंकाशीखंडपूर्वार्ध

श्रीगणेशायनमः ॥ ॥ तंमन्महेमहेशानंमहेशानप्रियाभैकम् ॥ गणेशानंकारिगणेशाननमनामयम् ॥ १ ॥

भूमष्ठापनयात्रभूस्त्रादेवताप्युच्चरधःस्थापयायावद्धाभुवमुक्तदास्युरमृतंयस्यांमृताजंतवः ॥
यानित्यंत्रिजगत्पवित्रतटिनीतीरेसुरैःसेव्यतेसाकाशीत्रिपुरारिराजनगरीपायादपायाज्जगत् ॥ २ ॥
नमस्तस्मैमहेशाययस्यसंध्याक्षयच्छलात् ॥ यातायातंप्रकुर्वंतित्रिजगत्पतयोऽनिशम् ॥ ३ ॥
अष्टादशपुराणानांकर्त्तासत्यवतीसुतः ॥ सूताग्रेकथयामासकथांपापापनोदिनीम् ॥ ४ ॥

श्रीव्यासउवाच ॥ ॥ कदाचिन्नारदःश्रीमान्स्नात्वाश्रीनर्मदांभसि ॥ श्रीमदोंकारमभ्यर्च्यसर्वदंसर्वदेहिनाम् ॥ ५ ॥ व्रजन्विलोक्यांचक्रे पुरोविंध्यंधराधरम् ॥ संसारतापसंहारिरेवावारिपरिष्कृतम् ॥ ६ ॥ द्वैरूप्येणापिकुर्वंतंस्थावरेणचरेणच ॥ साभिख्येनयथार्थाख्यासुवैर्वसुमतीमिमाम् ॥ ७ ॥ रसालयंरसालैस्तैरशोकैःशोकहारिणाम् ॥ तालैस्तमालैर्हिंतालैःसालैःसर्वत्रशालितम् ॥ ८ ॥

खपुरैःखपुराकारंश्रीफलंश्रीफलैःकिल ॥ गुरुश्रियंत्वगुरुभिःकपित्थैंगकपित्थकैः ॥ ९ ॥ वनश्रियःकुचाकारैर्लकुचैश्चमनोहरम् ॥ सुधाफलसमारंभिरंभाभिःपरिभासितम् ॥१०॥ सुरंगैश्चापिनारंगैरंगमंडपवच्छ्रियः ॥ वानीरैश्चापिजंबीरैर्बीजपूरैःप्रपूरितम् ॥ ११ ॥ अनिलालोलकंकोलवल्लीहल्लीसकायिनम् ॥ लवलीलवलीलाभिर्लास्यलीलालयंकिल ॥ १२ ॥

मंदांदोलितकर्पूरकदलीदलसंज्ञया ॥ विश्रमायश्रमापन्नानाह्वयंतमिवाध्वगान् ॥ १३ ॥ पुन्नागमिवपुन्नागपल्लवैःकरपल्लवैः ॥ फलंयताम्वाऽलोलैर्मल्लिकास्तबकस्तनम् ॥ १४ ॥ विदीर्णदाडिमैःस्वांतंदर्शयंतंतुरागवत् ॥ माधवीमधवरूपेणश्लिष्यंतमिवकानने ॥ १५ ॥ उदुंबरैरंबरगैरनंतफलमालितैः ॥ ब्रह्मांडकोटीर्बिभ्रंतमनंतमिवसर्वतः ॥ १६ ॥

पनसैर्वननासाभैःशुकनासैःपलाशकैः ॥ पलाशनाद्गिरहिणांपत्रत्यक्तैरिवावृतम् ॥ १७ ॥ कदंबवादिनोनीपान्दृष्ट्वाकंटकितैरिव ॥ समंततो भ्राजमानंकदंबककदंबकैः ॥ १८ ॥ नमेरुभिश्चमेरूच्चशिखरैरिवराजितम् ॥ राजादनैश्चमदनैःसदनैरिवकामिनाम् ॥ १९ ॥ तटेतटेपटुवटैरुच्चैःपटकुटीवृतम् ॥ कुटजस्तवकैर्भातमधिष्ठितवकैरिव ॥ २० ॥ करमर्दैःकरीरैश्चकरंजैश्चकरंबकैः ॥ सहस्रकरवद्भांतमर्थिप्रत्युद्गतैःकरैः ॥ २१ ॥

नीराजितमिवोद्दीपैराजचंपककोरकैः ॥ सपुष्पशाल्मलीभिश्चजितपद्माकरश्रियम् ॥ २२ ॥ क्वचिच्चलदलैरुच्चैःक्वचित्कांचनकेतकैः ॥ कृतमालेर्नकृतमालैःशोभमानंकचित्कचित् ॥ २३ ॥ कर्कंधुबंधुजीवैश्चपुन्नजीवैर्विराजितम् ॥ सतिंदुकेंगुदीभिश्चकरुणैःकरुणालयम् ॥ २४ ॥ गलन्मधुककुसुमैर्धरारूपधरंहरम् ॥ स्वहस्तमुक्तमुक्ताभिरर्चयंतमिवानिशम् ॥ २५ ॥ सर्जार्जुनांजनैर्बीजैर्जेर्ज्यजनैर्वीज्यमाननत् ॥ नारिकेलैःसखर्जूरैर्धृतच्छत्रमिवांबरे ॥ २६ ॥

अमंदैःपिचुमंदैश्चमंदारैःकोविदारकैः ॥ पाटलातिंतिणीचोंटाशाखोटैःकरहाटकैः ॥ २७ ॥ उद्दंडैश्चापिशेहुंडैरेरंडैर्गुडपुष्पकैः ॥ बकुलैस्तिलकैश्चैव तिलकांकितमस्तकम् ॥ २८ ॥ अक्षैःप्लक्षैःशल्लकीभिर्देवदारुहरिद्रुमैः ॥ सदाफलसदापुष्पवृक्षवल्लीविराजितम् ॥ २९ ॥ एलालवंगमरिचकुलुंजनवनावृतम् ॥ जंब्वाम्रातकभल्लातशेलुश्रीपर्णिवर्णितम् ॥ ३० ॥

शाकशंखवनैरम्यंचंदनैरक्तचंदनैः ॥ हरीतकीकर्णिकारधात्रीवनविभूषणम् ॥ ३१ ॥ द्राक्षावल्लीनागवल्लीकणावल्लीशतावृतम् ॥ मल्लिकायूथिकाकुंदमदयंतीसुगंधिनम् ॥३२॥ भ्रमद्भ्रमरमालाभिर्मालतीभिरलंकृतम् ॥ अलिच्छलागतंकृष्णंगोपीरंतुमनेकशः ॥३३॥ नानामृगगणाकीर्णंनानापक्षिविनादितम् ॥ नानासरित्सरःस्रोतःपल्वलैःपरितोवृतम् ॥३४॥ तुच्छश्रियःस्वर्गभूमीःपरिहायागतैरिव ॥ नानासुरनिकायैश्चविप्वग्भोगेच्छयोपितम् ॥३५॥

उत्सृजंतमिवार्घ्यंवैपत्रपुष्पैरितस्ततः ॥ केकिकेकारवैर्दूरात्कुर्वंतंस्वागतंकिल ॥ ३६ ॥ अथसूर्यशताभासंनभसिद्योतितांबरम् ॥ नारदंदृष्टवान्शैलो दूरात्प्रत्युज्जगामतम् ॥ ३७ ॥ ब्रह्ममूनुवपुस्तेजोदूरीकृतदरीतमाः ॥ तमागच्छंतमालोक्यमानसंतमउज्जहौ ॥ ३८ ॥ ब्रह्मतेजःसमुद्भूतसाध्वसःसाधुसत्क्रियः ॥ कठिनोपिपरित्यज्यधत्तेमृदुलतांकिल ॥ ३९ ॥ दृष्ट्वामृदुलतांतस्यद्वैरूप्येपिसनारदः ॥ मुमुदेसुतरांसंतःप्रश्रयग्राह्यमानसाः ॥ ४० ॥ गृहानायांतमालोक्यगुरुंवाऽगुरुमेववा ॥ योऽगुरुर्नव्रतांधत्तेसगुरुर्नगुरुर्गुरुः ॥ ४१ ॥ तंप्रत्युच्चैःशिराःसोपिविनम्रतरकंधरः ॥ शैलस्त्विलामिलन्मौलिःप्रणनाममहामुनिम् ॥४२॥ तमुत्थाप्यकराभ्याभ्यामाशीर्भिरभिनंद्यच ॥ तदुद्दिष्टासनंभेजेमनसोपिसमुच्छ्रितम् ॥४३॥ सदाममधुनाज्येननीराद्रांक्षतदूर्वया ॥ तिलैःकुशैःप्रसूनैस्तमर्घांगार्घ्यैरपूजयत् ॥ ४४ ॥ गृहीतार्घ्यंकिलश्रांतंपादसंवाहनादिभिः ॥ गतश्रममथालोक्यवभाषेऽवनतोगिरिः ॥ ४५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अद्यसद्यःपरिहृतंत्वदंघ्रिरजसारजः ॥ त्वदंगसंगिमहसासहसाऽप्यांतरंतमः ॥ ४६ ॥ सफलर्धिरहंचाद्यसुदिवाद्यचमेमुने ॥ प्राक्कृतैःसुकृतैरद्यफलितंमे चिरार्जितैः ॥ ४७ ॥ धराधरत्वंकुलिपुमान्यंमेऽद्यभविष्यति ॥ इतिश्रुत्वातदाकिंचिदुच्छ्वस्यस्थितवान्मुनिः ॥ ४८ ॥ पुनरूचेकुलिवरःसंभ्रमाप न्नमानसः ॥ उच्छ्वासकारणंब्रह्मन्ब्रूहिसर्वार्थकोविद ॥ ४९ ॥ अदृष्टंतवनोदृष्टंयदिष्टंविष्टपत्रये ॥ अनुक्रोशोत्रमयिचेदुच्यतांप्रणतोस्म्यहम् ॥ ५० ॥ त्वदागमनजानन्दसंदोहैर्मेदुरारवः ॥ अलंनवक्तुमसकृत्तथाप्येकंवदाम्यहम् ॥ ५१ ॥ धराधरणसामर्थ्यंमेर्वादौपूर्वपूरुषैः ॥ वर्ण्यतेसमुदायात्तदहमेको दधे धराम् ॥ ५२ ॥ गौरीगुरुत्वाद्धिमवानादिपत्याच्चभूभृताम् ॥ संबंधित्वात्पशुपतेःसएकोमान्यभृत्सताम् ॥ ५३ ॥ नमेरुःस्वर्णपूर्णत्वाद्रत्नसा नुतयाथवा ॥ सुरसद्मतयावापिक्वापिमान्योमतोमम ॥ ५४ ॥ परंशतंनकिंशैलाइलाकलनकेलयः ॥ इहसंतिसतांमान्यामान्यास्तेतुस्वभूमिषु ॥ ॥५५ ॥ मन्देहदेहसंदेहादुदयैकदयाश्रितः ॥ निषधोनौषधिधरोऽप्यस्तोप्यस्तमितप्रभः ॥ ५६ ॥

नीलश्चनीलीनिलयोमन्दरोमन्दलोचनः ॥ सर्पालयःसमलयोरायंनावैतिरेवतः ॥ ५७ ॥ हेमकूटत्रिकूटाद्याःकूटोत्तरपदास्तुते ॥ किष्किंधक्रौं चसह्याद्याभारसह्यानतेभुवः ॥ ५८ ॥ इतिविंध्यवचःश्रुत्वानारदोऽचिन्तयद्धृदि ॥ अखर्वगर्वसंसर्गोनमहत्त्वायकल्पते ॥ ५९ ॥ श्रीशैलमुख्याः किंशैलानेहसंत्यमलश्रियः ॥ येषांशिखरमात्रादिदर्शनंमुक्तयेसताम् ॥ ६० ॥ अद्यास्यबलमालोक्यमितिध्यात्वाब्रवीन्मुनिः ॥ सत्यमुक्तंहिभवतागि रिसारंविवृण्वता ॥ ६१ ॥ परंशैलेषुशैलेंद्रोमेरुस्त्वामवमन्यते ॥ मयानिःश्वसितंचैतत्त्वयिचापिनिवेदितम् ॥ ६२ ॥ अथवामद्विधानांहिकेयं चिंतामहात्मनाम् ॥ स्वस्त्यस्तुतुभ्यमित्युक्त्वाययौसव्योमवर्त्मनि ॥ ६३ ॥ गतेमुनौनिनिंदस्वमतीवोद्विग्नमानसः ॥ चिन्तामवापमहतींविंध्यो वंध्यमनोरथः ॥ ६४ ॥ विंध्यउवाच ॥ ॥ धिग्जीवितंशास्त्रकलोज्झितस्यधिग्जीवितंचोद्यमवर्जितस्य ॥ धिग्जीवितंज्ञातिपराजितस्यधिग्जीवितं व्यर्थमनोरथस्य ॥ ६५ ॥ कथंभुनक्तिसदिवाकथंरात्रौस्वपित्यहो ॥ रहःशर्मकथंतस्ययस्याभिभवनंरिपोः ॥ ६६ ॥ अहोदवाग्निदवथुस्तथामां नसबाधते ॥ बाधतेतुयथाचित्तेचिन्तासंतापसंततिः ॥ ६७ ॥ युक्तमुक्तंपुराविद्भिश्चिन्तामूर्तिःसुदारुणा ॥ नभेषजैर्लंघनैर्वानचान्यैरुपशाम्यति ॥६८॥ चिन्ताज्वरोमनुष्याणांक्षुधांनिद्रांबलंहरेत् ॥ रूपमुत्साहबुद्धिंश्रीर्जीवितंचनसंशयः ॥ ६९ ॥

ज्वरोव्यतीतेपडहेजीर्णज्वरइहोच्यते ॥ असौचिन्ताज्वरस्तीव्रःप्रत्यहंनवतांव्रजेत् ॥ ७० ॥ धन्योधन्वंतरिर्नात्रचरकश्चरतीहन ॥ नासत्यावपिनाऽ सत्यावत्रचिन्ताज्वरेकिल ॥ ७१ ॥ किंकरोमिक्वगच्छामिकथंमेरुंजयाम्यहम् ॥ उत्प्लुत्यतस्यशिरसिपतामिनपताम्यतः ॥ ७२ ॥ शक्रंकोपयता पूर्वमस्मद्गोत्रेणकेनचित् ॥ पक्षहीनःकृतोयत्रधिगपक्षस्यचेष्टितम् ॥ ७३ ॥ अथवासकथंमेरुस्तथोच्चैःस्पर्द्धतेमया ॥ भूमेर्भारभृतःप्रायोभवंतिभ्रांति भूमयः ॥ ७४ ॥ अलीकवाक्यमथवासंभाव्यंनारदेकथम् ॥ ब्रह्मचारिणिवेदज्ञेसत्यलोकनिवासिनि ॥ ७५ ॥ युक्तायुक्तविचारोथमादृशेनोपयुज्यते ॥ पराक्रमेष्वशक्तानांविचारंगाहतेमनः ॥ ७६ ॥ अथवाचिन्तनैरेतैःकिंव्यर्थैर्विश्वकारकम् ॥ विश्वेशंशरणंयायांसमेबुद्धिंप्रदास्यति ॥ ७७॥ अनाथनाथः सर्वेषांविश्वनाथोहिगीयते ॥ क्षणंमनसिसंचिंत्यभवेदित्थमसंशयम् ॥ ७८ ॥ एतदेवकरिष्यामिनेष्टंकालविलंबनम् ॥ विचक्षणैरुपेक्ष्यौनवर्द्धमानौ परामयौ ॥७९॥ मेरुंप्रदक्षिणीकुर्यान्नित्यमेवदिवाकरः ॥ सग्रहर्क्षगणोनूनंमन्यमानोबलाधिकम् ॥ ८० ॥ इतिनिश्चित्यविन्ध्याद्रिर्ववृधेसमृधेक्षणः ॥ अनंतगगनस्यांतंकुर्वद्भिःशिखरैरिव ॥ ८१ ॥

कैश्चित्सार्द्धंविरोधोनकर्तव्यःकेनचित्क्वचित् ॥ कर्तव्यश्चेत्प्रयत्नेनयथानोपहसेज्जनः ॥ ८२ ॥ निरुध्यब्राध्नमध्वानंकृतकृत्यइवाद्रिराट् ॥ स्वस्थोऽ भवद्भवाधीनाप्राणिनांहिभविष्यता ॥ ८३ ॥ यमद्ययमकर्तासौदक्षिणंप्रक्रमिष्यति ॥ सकुलीनःसचश्रीमान्समहान्महितः सच ॥ ८४ ॥ यावत्स्वश क्तिंशक्तोपिनदर्शयतिकर्हिचित् ॥ तावत्सलंघ्यःसर्वेषांज्वलनोदारुगोयथा ॥ ८५ ॥ इतिचिन्तामहाभारंत्यक्त्वातस्थौस्थिरोद्यमः ॥ आकांक्षमाणस्तरणे रुदयंब्राह्मणोयथा ॥ ८६ ॥ इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थेकाशीखंडेपूर्वार्धेविन्ध्यवर्धनंनामप्रथमोऽध्यायः ॥ १ ॥ व्यासउवाच ॥ सूर्यआत्मास्यजगतस्तस्थुषस्तमसोरिपुः ॥ उदियायोदयगिरौशुचिप्रसृमरैः करैः ॥ १ ॥ संवर्धयन्सतांधर्मान्न्यक्कुर्वंस्तामसींस्थि तिम् ॥ पद्मिनींबोधयंस्त्विष्टांरात्रौमुकुलिताननाम् ॥ २ ॥ हव्यंकव्यंभूतबलिंदेवादीनांप्रवर्तयन् ॥ प्राह्णापराह्णमध्याह्नक्रियाकालंत्रिजृंभयन् ॥ ३ ॥ असतांहृदिवक्त्रेषुनिर्दिशंस्तमसःस्थितिम् ॥ यामिनीकालकलितंजगदुज्जीवयन्पुनः ॥ ४ ॥ यस्मिन्नभ्युदितेजातःसम्यक्पुण्यजनोदयः ॥ अहोपरो पकरणंसद्यःफलतिनेतिचेत् ॥ ५ ॥ सायमस्तमितःप्रातःकथंजीवेद्रविःपुनः ॥ सानुरागकरस्पर्शैःप्राचीमाश्वास्यखंडिताम् ॥ ६ ॥ यामंभुक्त्वा तथाग्नेयींज्वलंतींविरहादिव ॥ लवंगैलामृगमदचंद्रचंदनचर्चिताम् ॥ ७ ॥ तांबूलीरागरक्तौष्ठींद्राक्षास्तबकसुस्तनीम् ॥ लवलीवल्लिदोर्वल्लींकंको लीपल्लवांगुलिम् ॥ ८ ॥ मलयानिलनिःश्वासांक्षीरोदकवरांवराम् ॥ त्रिकूटस्वर्णरत्नांगींसुवेलाद्रिनितंबिनीम् ॥ ९ ॥ कावेरीगौतमीजंघांचोलचोलां शुकावृताम् ॥ सह्यदर्दुरवक्षोजांकांतीकांचीविभूषणाम् ॥ १० ॥

सुकोमलमहाराष्ट्रीवाग्विलासमनोहराम् ॥ अद्यापिनमहालक्ष्मीर्यांविमुंचतिसद्गुणाम् ॥११॥ सुदक्षदक्षिणामाशामाशानाथः प्रतास्थवान् ॥ क्रमंतः सर्वमर्वन्तोहेलयाहेलिकस्यखम् ॥१२॥ नशेकुरग्रतोगंतुंततोऽनूरुर्व्यजिज्ञपत् ॥१३॥ अनूरुरुवाच ॥ ॥ भानोमानोन्नतोविन्ध्योनिद्ध्ययगगनंस्थि तः ॥ स्पर्धतेमेरुणाप्रेप्सुस्त्वद्दत्तांतुप्रदक्षिणाम् ॥१४॥ अनूरुवाक्यमाकर्ण्यसविताहृद्यचिन्तयत् ॥ अहोगगनमार्गोपिरुध्यतेचातिविस्मयः ॥ १५ ॥ व्यासउवाच ॥ ॥ सूरःशूरोपिकिंकुर्यात्प्रांतरेवर्त्मनिस्थितः ॥ त्वरावानपिकोरुद्धंमार्गमेकोविलंघयेत् ॥ १६ ॥ राहुबाहुग्रहव्यग्रोयः क्षणंना वतिष्ठति ॥ शून्यमार्गेनिरुद्धःसकिंकरोतुविधिर्बली ॥ १७ ॥ योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने ॥ योजनस्यनिमेषार्धाद्यातिसोपिचिरंस्थि तः ॥ १८ ॥ गतेबहुतिथेकालेप्राच्यौदीच्याभृशार्दिताः ॥ चण्डरश्मेःकरव्रातपातसन्तापतापिताः ॥ १९ ॥ पाश्चात्यादक्षिणात्याश्चनिद्रामुद्रि तलोचनाः ॥ शयिताएववीक्षन्तेसतारग्रहमंबरम् ॥२०॥ अहोनाहस्कराभावान्निशानैवाऽनिशाकरात्॥अस्तंगतर्क्षान्नभसःकःकालस्त्वेष नेक्ष्यते ॥२१॥ ब्रह्मांडंकिमकांडेवैलयमेप्यतितत्कथम् ॥ परापतंतिनाद्यापिपारावाराइतस्ततः ॥ २२ ॥ स्वाहास्वधावषट्कारवर्जितेजगतीतले ॥ पंचयज्ञक्रियालो पाच्चकंपेभुवनत्रयम् ॥ २३ ॥ सूर्योदयात्प्रवर्तंतेयज्ञाद्याःसकलाःक्रियाः ॥ ताभिर्यज्ञभुजांतृप्तिःसवितातत्रकारणम् ॥ २४ ॥ चित्रगुप्तादयःसर्वेकालं जानंतिसूर्यतः ॥ स्थितिसर्गविसर्गाणांकारणंकेवलंरविः ॥ २५ ॥ तत्सूर्यस्यगतिस्तंभात्स्तंभितंभुवनत्रयम् ॥ यद्यत्रतत्स्थितंतत्रचित्रन्यस्तमिवा खिलम् ॥ २६ ॥ एकतस्त्विमिरान्नेशादेकतस्तुदिवातपात् ॥ बहूनांप्रलयोजातःकांदिशीकमभूज्जगत् ॥ २७ ॥ इतिव्याकुलितेलोकेसुरासुरनरोरगे ॥ आःकिमेतदकांडेभूद्रुरुदुर्दुद्रुवुःप्रजाः ॥२८॥ ततःसर्वेसमालोक्यब्रह्माणंशरणंययुः ॥ स्तुवंतोविविधैःस्तोत्रैरक्षरक्षेतिचाब्रुवन् ॥२९॥ ॥ देवाऊचुः॥ नमाहिरण्यरूपायब्रह्मणेब्रह्मरूपिणे ॥ अविज्ञातस्वरूपायकैवल्यायामृतायच ॥ ३० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यन्नेदेवाविजानंतिमनोयत्रापिकुंठितम् ॥ नयत्रवाक्प्रसरतिनमस्तस्मैचिदात्मने ॥ ३१ ॥ योगिनोयंहृदाकाशेप्रणिधानेननिश्चलाः ॥ ज्योतीरूपं प्रपश्यंतितस्मैश्रीब्रह्मणेनमः ॥ ३२ ॥ कालात्परायकालायस्वेच्छयापुरुषायच ॥ गुणत्रयस्वरूपायनमःप्रकृतिरूपिणे ॥ ३३ ॥ विष्णवे सत्त्वरूपायरजोरूपायवेधसे ॥ तमसेरुद्ररूपायस्थितिसर्गांतकारिणे ॥ ३४ ॥ नमोबुद्धिस्वरूपायत्रिधाहंकृतयेनमः ॥ पंचतन्मात्र रूपायपंचकर्मेंद्रियात्मने ॥ ३५ ॥

नमोमनःस्वरूपायपंचबुद्धींद्रियात्मने ॥ क्षित्यादिपंचरूपायनमस्तेविषयात्मने ॥ ३६ ॥ नमोब्रह्मांडरूपायतदंतर्वर्तिनेनमः ॥ अर्वाचीनपराची नविश्वरूपायतेनमः ॥ ३७ ॥ अनित्यनित्यरूपायसदसत्पतयेनमः ॥ समस्तभक्तकृपयास्वेच्छाविष्कृतविग्रह ॥ ३८ ॥ तवनिश्वसितंवेदास्तवस्वे दोखिलंजगत् ॥ विश्वाभूतानितेपादः शीर्ष्णोद्यौःसमवर्तत ॥ ३९ ॥ नाभ्याआसीदंतरिक्षंलोमानिचवनस्पतिः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य स्तवप्रभो ॥ ४० ॥ त्वमेवसर्वंत्वयि देवसर्वं स्तोतास्तुतिःस्तव्यइहत्वमेव ॥ ईशत्वयाऽवाप्यमिदंहिसर्वंनमोस्तुभूयोपिनमोनमस्ते ॥ ४१ ॥

इतिस्तुत्वाविधिंदेवानिपेतुर्दंडवत्क्षितौ ॥ परितुष्टस्तदाब्रह्मात्युवाचदिवौकसः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ यथार्थयाऽनयास्तुत्यातुष्टोस्मि प्रणताःसुराः ॥ उत्तिष्ठतप्रसन्नोस्मिवृणुध्वंवरमुत्तमम् ॥ ४३ ॥ यःस्तोष्यत्यनयास्तुत्याश्रद्धावान्प्रत्यहंशुचिः ॥ तंवाहरंवाविष्णुंवातस्यतुष्टाःसदा वयम् ॥ ४४ ॥ दास्यामःसकलान्कामान्पुत्रान्पौत्रान्पशून्धनम् ॥ सौभाग्यमायुरारोग्यंनिर्भयत्वंरणेजयम् ॥ ४५ ॥ ऐहिकामुष्मिकान्भोगानपवर्गं तथाऽक्षयम् ॥ यद्यदिष्टतमंतस्यतत्तत्सर्वंभविष्यति ॥४६॥ तस्मात्सर्वप्रयत्नेनपठितव्यःस्तवोत्तमः ॥ अभीष्टदइतिख्यातः स्तवोयंसर्वसिद्धिदः॥४७॥ पुनःप्रोवाचतान्वेधाःप्रणिपत्योत्थितान्सुरान् ॥ स्वस्थास्तिष्ठतभोयूयंकिमत्रापिसमाकुलाः ॥ ४८ ॥ एतेवेदामूर्तिधराश्चत्वारोविद्यास्तथाखिलाः ॥ सदक्षिणाअमीयज्ञाःसत्यंधर्मस्तपोदमः ॥ ४९ ॥ ब्रह्मचर्यमिदंचैवाकरुणाभारतीत्वियम् ॥ श्रुतिस्मृतीतिहासार्थचरितार्थाअमीजनाः ॥ ५० ॥ नेहक्रोधोनमात्सर्यंलोभः कामोऽधृतिर्भयम् ॥ हिंसाकुटिलतागर्वोनिंदासूयाऽशुचिःक्वचित् ॥ ५१ ॥ येब्राह्मणाब्रह्मरतास्तपोनिष्ठास्तपोधनाः ॥ मासोपवासषण्मासचातुर्मास्यादिसद्व्रताः ॥ ५२ ॥ पातिव्रत्यरतानार्योयेचान्येब्रह्मचारिणः ॥ तेचामीपश्यतसुरायेपंथाः परयोपिति ॥ ५३ ॥

मातापित्रोरमीभक्ताअमीगोब्राह्मणेहताः ॥ व्रतेदानेजपेयज्ञेस्वाध्यायेद्विजतर्पणे ॥ ५४ ॥ तीर्थेतपस्युपकृतौसदाचारादिकर्मणि ॥ फला भिलाषिर्णाबुद्धिर्नयेषांतेजनाअमी ॥ ५५ ॥ गायत्रीजाप्यनिरताअग्निहोत्रपरायणाः ॥ द्विसुखीगोप्रदातारःकपिलादानतत्पराः ॥ ५६ ॥ निस्पृहाः सोमपायेवद्विजपादोदपाश्रये ॥ मृताःसारस्वतेतीर्थेद्विजशुश्रूषकाश्रय ॥ ५७ ॥ प्रतिग्रहसमर्थाहियेप्रतिग्रहवर्जिताः ॥ तएतेमत्प्रियाविप्रास्त्यक्ततीर्थ प्रतिग्रहाः ॥ ५८ ॥ प्रयागेमाघमासेयेरुपःस्नातोऽमलात्माभिः ॥ मकरस्थेरवौशुद्धास्तइमेसूर्यवर्चसः ॥ ५९ ॥ वाराणस्यांपांचनदे ज्यहंस्नातास्तुकार्तिके ॥ अमीतेशुद्धवपुषःपुण्यभाजोतिनिर्मलाः ॥ ६० ॥ स्नात्वातुमणिकर्णिक्यांप्रीणितोब्राह्मणाधनैः ॥ तएतेसर्वभोगाढ्याः कल्पंस्थास्यंतिमत्पुरे ॥ ६१ ॥ ततःकाशींसमासाद्यतेनपुण्येननोदिताः ॥ विश्वेश्वरप्रसादेनमोक्षमेप्स्यंत्यसंशयम् ॥ ६२ ॥ अविमुक्तेकृतं कर्मयदल्पमपिमानवैः ॥ श्रेयोरूपंतद्विपाकोमोक्षोजन्मांतरेष्वपि ॥ ६३ ॥ अहोवैश्वेश्वरेक्षेत्रेमरणादपिनोभयम् ॥ यत्रसर्वेप्रतीक्षंतेमृत्युंप्रियमिवातिथिम् ॥ ६४ ॥ ब्राह्मणेभ्यःकुरुक्षेत्रेयैर्दत्तंवसुनिर्मलम् ॥ निर्मलांगास्तएतेवैतिष्ठंतिममसंनिधा ॥६५॥ पितामहंममासाद्यगयायांयैःपितामहाः ॥ तर्पिताब्राह्मणमुखेतेपामेतेपितामहाः ॥६६॥ नस्नानेननदानेननृजपेननपूजया ॥ मल्लोकःप्राप्यतेदेवाःप्राप्यतेद्विजतर्पणात् ॥६७॥ सोपस्करणिवेश्मानिमुसलोलूखलादिभिः ॥ यैर्दत्तानिसशय्यानितेपांहर्म्याण्यमूनिवै ॥ ६८ ॥

ब्रह्मशालांकारयंतिवेदमध्यापयंतिच ॥ विद्यादानंचयेकुर्युःपुराणंश्रावयंतिच ॥ ६९ ॥ पुराणानिचयेदद्युः पुस्तकानिददत्यपि ॥ धर्मशास्त्राणियेदद्युस्तेषांवासोत्रमेपुरे ॥ ७० ॥ यज्ञार्थंचविवाहार्थंव्रतार्थंब्राह्मणायवै ॥ अखंडं वसुयेदद्युस्तेत्रस्युर्वसुवर्चसः ॥ ७१ ॥ आरोग्यशालांयःकुर्याद्वैद्यपोषणतत्परः ॥ आकल्पमत्रवसतिसर्वभोगसमन्वितः ॥ ७२ ॥ मुक्तीकुर्वंतितीर्थानि येच दुष्टावरोधतः ॥ ममावरोधंतेमान्याऔरसास्तनयाइव ॥ ७३ ॥ विष्णोर्वाममवाशंभोर्ब्राह्मणाएवसुप्रियाः ॥ तेषांमूर्त्यावयंसाक्षाद्विचरामोमहीतले ॥ ७४ ॥ ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् ॥ एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति ॥ ७५ ॥ ब्राह्मणाजंगमंतीर्थंनिर्मितंसार्वभौमिकम् ॥ येषांवाक्योदकेनैवशुद्ध्यंतिमलिनाजनाः ॥ ७६ ॥गावःपवित्रमतुलंगावोमंगलमुत्तमम् ॥ यासांखुरोत्थितंरेणुर्गंगावारिसमोभवेत् ॥ ७७ ॥ शृंगाग्रे सर्वतीर्थानिसुराग्रेसर्वपर्वताः ॥ शृंगयोरंतरेयस्याःसाक्षाद्गौरीमहेश्वरी ॥ ७८ ॥ दीयमानांचगांदृष्ट्वानृत्यंतिप्रपितामहाः ॥ प्रीयंतेऋषयःसर्वेतुष्यामो देवतैःसह ॥ ७९ ॥ रोरूयंतचपापानिदारिद्र्यंव्याधिभिःसह ॥ घोष्यःसर्वस्यलोकस्यगावोमातेवसर्वथा ॥ ८० ॥ गवांस्तुत्वानमस्कृत्यकृत्वाचैवप्र दक्षिणाम् ॥ प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा ॥ ८१ ॥ यालक्ष्मीःसर्वभूतानांयादेवेपुण्यवास्थिता ॥ धेनुरूपेणसादेवीमंमपापंव्यपोहतु ॥ ८२ ॥ विष्णोर्वक्षसियालक्ष्मीःस्वाहाचैवविभावसोः ॥ स्वधायापितृमुख्यानांसाधेनुर्वरदासदा ॥ ८३ ॥ गोमयंयमुनासाक्षाद्गोमूत्रेनर्मदाशुभा ॥ गंगाक्षीरंतुया सर्विकिंपवित्रमतःपरम् ॥ ८४ ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ ८५ ॥ इतिमंत्रंसमुच्चार्यधेनूर्वाधेनु मेववा ॥ योदद्याद्विजवर्यायससर्वेभ्योविशिष्यते ॥ ८६ ॥ मयाचविष्णुनासार्धंशिवेनचमहर्षिभिः ॥ विचार्यगोगुणान्नित्यंप्रार्थनेतिविधीयते ॥ ८७ ॥ गावोमेपुरतःसंतुगावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् ॥ ८८ ॥

नीराजयतियोंगानिगवांपुच्छेनभाग्यवान् ॥ अलक्ष्मीःकलहोरोगास्तस्यांगाद्यांतिदूरतः॥८९॥ गोभिर्विप्रश्चवेदैश्चसतीभिःसत्यवादिभिः॥ अलुब्धैर्दा नशीलैश्चसप्तभिर्धार्यतेमही॥९०॥ ममलोकात्परोलोकोवैकुंठइतिगीयते ॥ तस्योपरिष्टात्कोमारउमालोकस्ततःपरम् ॥९१॥ शिवलोकस्तदुपरिगोलो कस्तत्समीपतः ॥ गोमातरःसुशीलाद्यास्तत्रसंतिशिवप्रियाः ॥ ९२ ॥ गवांशुश्रूषकायेचगोप्रदायेचमानवाः ॥ एपामन्यतमेलोकेनस्युःसर्वसमृद्धयः ॥ ९३ ॥ यत्रक्षीरवहानद्योयत्रपायससकर्दमाः ॥ नजरारोगतेयत्रतत्रगच्छंतिगोप्रदाः ॥ ९४ ॥ श्रुतिस्मृतिपुराणज्ञाब्राह्मणाःपरिकीर्तिताः॥ तदुक्ताचारच रणाइतरेनामधारकाः॥९५॥ श्रुतिस्मृतीतुनेत्रेद्वेपुराणंहृदयंस्मृतम् ॥ श्रुतिस्मृतिभ्यांहीनोधःकाणःस्यादेकयाविना॥९६॥ पुराणहीनाद्धच्छून्यात्काणौ धावपितोवरौ ॥ श्रुतिस्मृत्युदितोधर्मःपुराणेपरिगीयते ॥९७॥ तद्ब्राह्मणायगोदेयासर्वत्रसुखमिच्छता ॥ नदेयाद्विजमात्रायदातारंसोप्यधोनयेत् ॥९८॥ यस्यधर्मेरतिर्जिज्ञासायस्यपापाद्भयंमहत्॥ श्रोतव्यानिपुराणानिधर्ममूलानितेनवै॥९९॥ चतुर्दशसुविद्यासुपुराणंदीपउत्तमः॥ अंधोपिननदालोकात्सं सारान्धोकचित्पतेत् ॥१००॥ श्रोतव्यानिपुराणानिवस्तव्यंजाह्नवीतटे ॥ तर्पणीयाद्विजानित्यंममलोकंप्सुभिःसदा ॥ १ ॥ इत्युद्देशान्मयाख्यातास

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्यलोकव्यवस्थितिः ॥ अभयंयद्भयार्तानांनभेतव्यंचहेसुराः ॥२॥ स्पर्धतेमरुणाविंध्योब्रध्नाध्वपरिरोधकृत् ॥ तदर्थमागतायूयंतदुपायंदिशामिवः॥३॥
अस्त्यगस्त्यस्तप्यमानस्तप उग्रं महातपाः ॥ मैत्रावरुणिराधाय चित्तं विश्वेश्वरे विभौ ॥ ४ ॥ अविमुक्तेमहाक्षेत्रेसर्वेषांमुक्तिहेतुके ॥ तारकस्यो
पदेशार्थंविश्वेशाऽधिष्ठितेस्वयम् ॥ ५ ॥ याचध्वंतत्रगत्वातंसवःकार्यंविधास्यति ॥ तेनैकदावितालोकावातापील्वलभक्षणात् ॥ ६ ॥

अतिमित्रंतत्रतेजोमित्रावरुणजेमुनौ॥तदाप्रभृतिलोकेषुकोगस्त्यान्नैवबिभ्यति ॥७॥ इत्युक्त्वांतदधेवेधास्तेपिप्रमुदिताननाः ॥ देवाःपरस्परंप्रोचुरहोधन्य
तमावयम् ॥ ८ ॥ प्रसंगतोपिद्रष्टव्यौकाशीकाशीपतीशिवौ ॥ अहोअहोभिर्बहुभिःफलितोनोमनोरथः ॥ ९ ॥ उत्फुल्लपद्मनयनानिर्मिताःसुकृतार्थिनः॥
तावेवचरणौधन्यौकाशीमभिप्रयायिनौ ॥ ११० ॥ येयंकथाश्रुतास्माभिर्वेधसासमुदीरिता ॥ तस्याःश्रवणजात्पुण्यात्प्राप्नुमस्त्वद्यकाशिकाम् ॥ ११ ॥
एकाक्रियाद्व्यर्थकरीप्राप्यतेपुण्यगौरवात् ॥ एवंवदंतोहृष्टास्याःसुराःकाशींसमाययुः ॥१२॥ व्यासउवाच ॥ इदंपुण्यतमाख्यानंयेश्रोष्यंतीहमानवाः ॥
विधूयसर्वपापानिपुत्रदारसमन्विताः ॥ १३ ॥ इहवंशंपरिस्थाप्यभुक्त्वासर्वसुखानिच ॥ सत्यलोकेचिरंस्थित्वाततोयास्यंतिशाश्वतम् ॥ ११४ ॥
इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडे पूर्वार्धे सत्यलोकवर्णनंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ सूतउवाच ॥
भगवन्भूतभव्येशसर्वज्ञानमहानिधे ॥ अवाप्यकाशींगीर्वाणैःकिमकारिवदाच्युत ॥ १ ॥

अधीत्येमांकथांदिव्यांनतृप्तिमधियाम्यहम् ॥ शेवधिस्तपसांदेवैरगस्तिःप्रार्थितःकथम् ॥ २ ॥ कथंविंध्योप्यवापस्वांप्रकृतिंतादृगुन्नतः ॥ तववागमृतां
भोधौमनोमेस्नातुमुत्सुकम् ॥ ३ ॥ इतिकृत्स्नंसमाकर्ण्यव्यासःपाराशरोमुनिः ॥ श्रद्धावतेस्वशिष्यायवक्तुंसमुपचक्रमे ॥ ४ ॥ पाराशरउवाच ॥
शृणुसूतमहाबुद्धेभक्तिश्रद्धासमन्वितः ॥ शुकवैशंपायनाद्याःशृण्वंत्वेतेचबालकाः ॥५॥ ततोवाराणसींप्राप्यगीर्वाणाःसमहर्षयः ॥ अविलंबंप्रथमतोम
णिकर्ण्यांविधानतः ॥ ६ ॥ सचैलमभिमज्ज्याथकृतसंध्यादिसत्क्रियाः ॥ संतर्प्यतर्प्यादिपितॄन्कुशगंधतिलोदकैः ॥ ७ ॥ तीर्थवासार्थिनः
सर्वान्संतर्प्यचपृथक्पृथक् ॥ रत्नैर्हिरण्यवासोभिरश्वाभरणधेनुभिः ॥ ८ ॥ विचित्रैश्चतथापात्रैःस्वर्णरौप्यादिनिर्मितैः ॥ अमृतस्वादुपक्वान्नैःपायसै
श्चसशर्करैः ॥ ९ ॥ सगोरसैरन्नदानैर्धान्यदानैरनेकधा ॥ गंधचंदनकर्पूरैस्तांबूलैश्चारुचामरैः ॥ ॥ १० ॥ सतूलैर्मृदुपर्यंकैर्दीपिकादर्पणासनैः ॥
शिविकादासदासीभिर्विमानैःपशुभिर्गृहैः ॥ ११ ॥ चित्रध्वजपताकाभिरुल्लोचैश्चंद्रचारुभिः ॥ वर्षाशनप्रदानैश्चगृहोपस्करसंयुतैः ॥ १२ ॥
उपानत्पादुकाभिश्चयतिनश्चतपस्विनः ॥ योग्यैःपट्टदुकूलैश्चविविधैश्चित्ररल्लकैः ॥ १३ ॥ दंडैःकमंडलुयुतैरजिनैर्मृगसंभवैः ॥ कौपीनैरुच्चमंचै
श्चपरिचारककांचनैः ॥ १४ ॥

मठैर्विद्यार्थिनामन्नैरतिथ्यर्थंमहाधनैः ॥ महापुस्तकसंभारैर्लेखकानांचजीवनैः॥१५॥बहुधौषधदानैश्चसत्रदानैरनेकशः ॥ ग्रीष्मेप्रपार्थद्रविणैर्हेमतेग्निष्टे
केंधनैः॥१६॥छत्राच्छादनिकाद्यर्थेवर्षाकालोचितैर्बहु॥रात्रौपाठप्रदीपैश्चपादाभ्यंजनकादिभिः ॥१७॥ पुराणपाठकांश्चापिप्रतिदेवालयंधनैः ॥ देवाल
येनृत्यगीतकरणार्थैरनेकशः ॥१८॥ देवालयसुधाकार्यैर्जीर्णोद्धारैरनेकधा ॥ चित्रलेखनमूल्यैश्चरंगमालादिमंडनैः ॥ १९ ॥ नीराजनैर्गुग्गुलुभिर्दशां
गादिसुधूपकैः ॥ कर्पूरवर्तिकाद्यैश्चदेवार्चार्थैरनेकशः ॥२०॥ पंचामृतानांस्नपनैः सुगंधस्नपनैरपि ॥ देवार्थंमुखवासैश्चदेवोद्यानैरनेकशः ॥ २१ ॥
महापूजार्थमाल्यादिगुंफनार्थैस्त्रिकालतः ॥ शंखभेरीमृदंगादिवाद्यनादैः शिवालये ॥ २२ ॥ घंटागुडुककुंभादिस्नानोपस्करभाजनैः ॥ श्वेतै
र्मार्जनवस्त्रैश्चसुगंधैर्यक्षकर्दमैः ॥ २३ ॥ जपहोमैःस्तोत्रपाठैःशिवनामोच्चभाषणैः ॥ रासक्रीडादिसंयुक्तैश्चलनैः सप्रदक्षिणैः ॥ २४ ॥ एवमादि
भिरुद्दंडैः क्रियाकांडैरनेकशः ॥ पंचरात्रमुषित्वातुकृत्वातीर्थान्यनेकशः ॥ २५ ॥
दीनानाथांश्चसंतर्प्यनत्वाविश्वेश्वरंविभुम् ॥ ब्रह्मचर्यादिनियमैस्तीर्थमेवंप्रसाध्यच ॥ २६ ॥ पुनः पुनर्विश्वनाथंदृष्ट्वास्तुत्वाप्रणम्यच ॥ जग्मुःपरो
पकारार्थमगस्तिर्यत्रतिष्ठति ॥ २७ ॥ स्वनाम्नालिंगमास्थाप्यकुंडंकृत्वातदग्रतः ॥ शतरुद्रियसूक्तेनजपन्निश्चलमानसः ॥ २८ ॥ तंदृष्ट्वादूरतोदेवा
द्वितीयमिवभास्करम् ॥ ज्वलज्ज्वलनसंकाशैरंगैःसर्वत्रसोज्ज्वलम् ॥ २९ ॥ साक्षात्किंवाडवाग्निर्वामूर्त्यावैतप्यतेतपः ॥ स्थाणुवन्निश्चलतरंनिर्मलं
सन्मनोयथा ॥ ३० ॥ अथवासर्वतेजांसिश्रित्वेमांब्राह्मणींतनुम् ॥ शीलयंतिपरंधामशांतंशांतपदाप्तये ॥ ३१ ॥ तपनस्तप्यतेऽत्यर्थंदहनोपिहिदह्यते ॥
यत्तीव्रतपसाद्यापिचपलाऽचपलाभवत् ॥ ३२ ॥ यस्याश्रमे ऽत्रदृश्यंतेहिंस्राअपिसमंततः ॥ सत्त्वरूपाअमीसत्त्वास्त्यक्त्वावैरंस्वभावजम् ॥ ३३ ॥
शुंडादंडेनकरटिः सिंहंकंडूयतेऽभयः ॥ अष्टापदांकेस्वपितिकेसरीकेसरोद्भटः ॥ ३४ ॥ सूकरःस्तब्धरोमापिविहायनिजयूथकम् ॥ चरेद्वनशुनांमध्ये
मुस्तान्यस्तेक्षणोबली ॥ ३५ ॥ भूदारोपिनभूदारंतथाकुर्याद्यथाऽन्यतः ॥ सर्वालिंगमयीकाशीयतस्तद्भीतियंत्रितः ॥ ३६ ॥ क्रोडीकृत्यक्रोडपोतं
तरक्षुःक्रीडयत्यहो ॥ शार्दूलबालानुत्सार्यशार्दूलीमेणपोतकः ॥ ३७ ॥

चलत्पुच्छोथपिबतिफेनिलेनाननेनवै ॥ स्वपंतंलोमशंभल्लंवानरश्चलदंगुलिः॥३८॥यूकांसंवीक्ष्यवीक्ष्यैवभक्षयेद्दंतकोटिभिः ॥ गोलांगूलारक्तमुखानीलां
गायूथनायकाः॥३९॥जातिस्वभावमात्सर्यंत्यक्त्वैकत्ररमंतिच ॥ शशाःक्रीडंतिचवृकैस्तैः पृष्ठलुंठनैर्मुहुः॥४०॥आखुश्चाखुभुजःकर्णंकंडूयेतचलाननः ॥
मयूरपुच्छपुटगोनिद्रात्योतुः सुखाधिकम् ॥ ४१ ॥ स्वकंठंघर्षयत्येवकेकिकंठेभुजंगमः ॥ भुजंगमफणापृष्ठेनकुलः स्वकुलोचितम् ॥ ४२ ॥
वैरंपरित्यज्यलुठेदुत्प्लुत्योत्प्लुत्यलीलया ॥ आलोक्यमूषकंसर्पश्चरंतंवदनाग्रतः ॥ ४३ ॥ क्षुधांधोपिनगृह्णातिसोपितस्माद्बिभेतिनो ॥प्रसूयमानांहरि
णींदृष्ट्वाकारुण्यपूर्णदृक् ॥ ४४ ॥ तद्दृष्टिपातंमुंचन्वैव्याघ्रोदूरंव्रजत्यहो ॥ व्याघ्रीव्याघ्रस्यचरितंमृगीमृगविचेष्टितम् ॥ उभेकथयतो
ऽन्योन्यंसख्याविवमुदान्विते ॥४५॥ दृष्ट्वाप्युद्दंडकोदंडंशबरंशंबरोमृगः ॥ धृष्टोनवर्त्मत्यजतिसोपिकंडूयतेपितम् ॥ ४६ ॥ रोहितोऽरण्यमहिषमुद्धर्षति
निराकुलः॥चमरीशबरीकेशैःसंमिमीतेस्ववालधिम् ॥४७॥ गवयःशल्यकश्चाऽयमुभावेकत्रतिष्ठतः ॥ तीव्रमात्सर्यमुत्सृज्यमुनितेजोनियंत्रितौ ॥ ४८ ॥
हुंडौचमुंडयुद्धाग्रनसज्जेतेजयैषिणौ ॥ एणशावंसृगालोपिमृदुस्पृशतिपाणिना॥४९॥तृण्वंतितृणगुल्मादीन्श्वापदास्त्वापदास्पदम्॥लोकदयेदुःखहंहिधि
क्तन्मांसस्यभक्षणम् ॥ ५० ॥ यःस्वार्थंमांसपचनंकुरुतेपापमोहितः ॥ यावंत्यस्यतुरोमाणितावत्सनरकेवसेत् ॥५१॥परप्राणैस्तुयेप्राणान्स्वान्पुष्णं
तिहिदुर्धियः ॥ आकल्पंनरकान्भुक्त्वातेभुज्यंतेत्रतैःपुनः ॥ ५२ ॥ जातुमांसंनभोक्तव्यंप्राणैःकंठगतैरपि ॥ भोक्तव्यंतर्हिभोक्तव्यंस्वमांसंनेतरस्यच
॥ ५३ ॥ वरमेतेश्वापदावैमैत्रावरुणिसेवया ॥ येषांनहिंसनेबुद्धिर्नतुहिंसापरानराः ॥ ५४ ॥ बकोपिपल्वलेमत्स्यान्नाश्नात्यग्रेचरानपि ॥ नमहांतोप्य
महतोमत्स्यामत्स्यानदंतिवै ॥ ५५ ॥ एकतःसर्वमांसानिमत्स्यमांसंतथैकतः ॥ स्मृतिःस्मृतेतिकिंत्वेभिरतोमत्स्याञ्जहत्यमी ॥ ५६ ॥ श्येनोपिवर्तिकां
दृष्ट्वाभवत्येषपराङ्मुखः ॥ चित्रमत्रापिमधुपाभ्रमंतिमलिनाशयाः ॥ ५७ ॥ सुचिरंनरकान्भुक्त्वामदिरापानलंपटाः ॥ मधुपाएवगायंतेभ्रांतिभाजः
पुनःपुनः ॥ ५८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अतएवपुराणेपुगाथेतिपरिगीयते ॥ स्फुटार्थात्रपुराणज्ञैर्ज्ञात्वात्तत्त्वंपिनाकिनः ॥ ५९ ॥ क्रमांसक्रशिवेभक्तिःक्रमद्यंक्रशिवार्चनम् ॥ मद्यमांसरतानां चदूरेतिष्ठतिशंकरः ॥ ६० ॥ विनाशिवप्रसादंहिभ्रांतिःकापिननश्यति ॥ अतएवभ्रमंत्येतेभ्रमराःशिववर्जिताः ॥ ६१ ॥ इत्याश्रमचरान्दृष्ट्वाति र्यञ्चोपिमुनीनिव ॥ अवाधिविबुधैरित्थंप्रभावः क्षेत्रजस्त्वयम् ॥ ६२ ॥ यतोविश्वेश्वरेणैतेनिर्यश्चोप्यत्रवासिनः ॥ निधनावसरेमोच्यास्तारक स्योपदेशतः ॥ ६३ ॥ ज्ञात्वाक्षेत्रस्यमाहात्म्यंयोत्रमेत्कृतनिश्चयः ॥ तंतारयतिविश्वेशोजीवंतमथवामृतम् ॥ ६४ ॥ अविमुक्तरहस्यज्ञामुच्यंतेज्ञानि नोनराः॥ अज्ञानिनोपितिर्यञ्चोमुच्यंतेगतकिल्बिषाः ॥ ६५ ॥ इत्याश्चर्यपरादेवाच्यावद्यांत्याश्रमंमुनेः ॥ तावत्पक्षिकुलंहृष्ट्वाभृशंमुमुदिरेपुनः ॥ ६६ ॥ मारसोलक्ष्मणाकंठेकंठमाधायनिश्चलः ॥ मन्यामहेननिद्रातिध्यायेद्विश्वेश्वरंकिल ॥ ६७ कंडूयमानावरटास्त्वचंचुपुटकोटिभिः ॥ हंसंकामयमानंतु वारयेत्पक्षधूननैः ॥ ६८ ॥ निरुद्धचमानाचकेणचक्रीकेंकितभाषणैः ॥ वदतीतिकिमत्रापिकामिताकामिनांवर ॥ ६९ ॥ कलकंठःकिलोत्कंठंमंजुगुं जतिकुंजगः॥ध्यानस्थःश्रोप्यतिमुनिःपारावत्येतिवार्यते॥७०॥केर्कीकेकांपरित्यज्यमोनंतिष्ठतितद्वयात्॥चकोरश्चंद्रिकाभोकानकत्रत मिवास्थितः७१ पठंतीसारिकासारंशुकंसंबोधयत्यहो ॥ अपारावारसंसारसिंधुपारप्रदःशिवः ॥ ७२ ॥ कोकिलःकोमलालापैःकलयन्किलकाकलीम् ॥ कलिकालोकलयतःकाशीस्थान्नेतिभाषते ॥ ७३ ॥ मृगाणांपक्षिणामित्थंदृष्ट्वाचेष्टांत्रिविष्टपम् ॥ अकांडपातसंकष्टंनिर्निद्रस्त्रिदशाब्रुवन् ॥ ७४ ॥ वरमेतेपक्षिमृगाःपशवःकाशिवासिनः ॥ येषांनपुनरावृत्तिर्नदेवानपुनर्भवाः ॥ ७५ ॥ काशीस्थैःपतितैस्तुल्यानवयंस्वर्गिणःक्वचित् ॥ काश्यांपाताद्भयंनास्तिस्वर्गेपाताद्भयंमहत् ॥ ७६ ॥ वरंकाशीपुरीवासोमासोपवसनादिभिः ॥ विचित्रच्छत्रसंछायंराज्यंनान्यत्रनीरिपु ॥ ७७ ॥ शशकैर्मशकैःकाश्यांयत्पदंहेलयाप्यते ॥ तत्पदंनाप्यतेऽन्यत्रयोगयुक्तयापियोगिभिः ॥ ७८ ॥ वरंवाराणसीरंकोनिःशंकोयोयमादपि ॥ नवयं त्रिदशायेपांगिरितोपीदृशीदशा ॥ ७९ ॥ ब्रह्मणोदिवसार्द्धांशेपदमेंद्रंविनश्यति ॥ सलोकपालंसाकंचसचंद्रग्रहतारकम् ॥ ८० ॥ परार्धद्वयनाशेपिकाशीस्थोयोननश्यति ॥ तस्मात्सर्वप्रयत्नेनकाश्यांश्रेयःसमाचरेत् ॥ ८१ ॥ यत्सुखंकाशिवासेत्रनतद्ब्रह्मांडमंडपे ॥ अस्तिचेत्तत्कथं सर्वकाशीवासाभिलाषुकाः ॥ ८२ ॥ जन्मांतरसहस्रेषुयत्पुण्यंसमुपार्जितम् ॥ तत्पुण्यपरिवर्तेनकाश्यांवासोऽत्रलभ्यते ॥ ८३ ॥ लब्धोपिसिद्धिनो यायाद्यदिक्रुद्धचेत्रिलोचनः ॥ तस्माद्विश्वेश्वरंनित्यंशरण्यंशरणंव्रजेत् ॥ ८४ ॥ धर्मार्थकाममोक्षाख्यंपुरुषार्थचतुष्टयम् ॥ अखंडंहियथाकाश्यांनतथा न्यत्रकुत्रचित् ॥ ८५ ॥ आलस्येनापियोयायाद्वहाद्विश्वेश्वरालयम् ॥ अश्वमेधाधिकोधर्मस्तस्यस्याच्चपदेपदे ॥ ८६ ॥ यःस्नात्वोत्तरवाहिन्यांयातिविश्वे शदर्शने ॥ श्रद्धयापरयातस्यश्रेयसोंतोनाविद्यते ॥ ८७ ॥ स्वर्धुनीदर्शनात्स्पर्शात्स्नानादाचमनादपि ॥ संध्योपासनतोजप्यात्तर्पणादेवपूजनात् ॥८८॥ पंचतीर्थावलोकाच्चततोविश्वेश्वरेक्षणात् ॥ श्रद्धास्पर्शनपूजाभ्यांधूपदीपादिदानतः ॥ ८९ ॥ प्रदक्षिणैः स्तोत्रजपैर्नमस्कारैस्तुनर्त्तनैः ॥ देवदेवमहादे वशंभोशिवशिवेतिच ॥ ९० ॥ धूर्जटेनीलकंठेशपिनाकिञ्शशिशेखर ॥ त्रिशूलपाणेविश्वेशरक्षरक्षेतिभाषणैः ॥ ९१ ॥ मुक्तिमंडपिकायांचनिमेषार्धो पवेशनात् ॥ तत्रधर्मकथालापात्पुराणश्रवणादपि ॥ ९२ ॥ नित्यादिकर्मकरणात्तथातिथिसमर्चनैः ॥ परोपकरणाद्यैश्चधर्मस्स्यादुत्तरोत्तरः ॥ ९३ ॥ शुक्लपक्षेयथाचंद्रःकलयाकलयैधते ॥ एवंकाश्यांनिवसतांधर्मराशिःपदेपदे ॥ ९४ ॥

श्रद्धानीजोविप्रपादांबुसिक्तःशाखाविद्यास्ताश्चतत्त्वादशापि ॥ पुष्पाण्यर्थाद्रेफलेस्थूलसूक्ष्मेमोक्षःकामोधर्मवृक्षोयमीड्यः ॥ ९५ ॥ सर्वार्थानामत्रदात्री भवानीमत्रांकामान्पूरयेदत्रदुंढिः ॥ सर्वाञ्जंतून्मोचयेदंतकालेविश्वेशोत्रश्रोत्रमंत्रोपदेशात् ॥ ९६ ॥ काश्यांधर्मस्तच्चतुष्पादरूपःकाश्यामर्थःसोप्यनेकप्रकारः ॥ काश्यांकामःसर्वसौख्यैकभूमिःकाश्यांश्रेयस्तत्तुकिंनात्रयच्च ॥ ९७ ॥ विश्वेश्वरोयत्रनतत्रचित्रंधर्मार्थकामामृतरूपरूपः ॥ स्वरू पंरूपःसहिविश्वरूपस्तस्मान्नकाशीसदृशीत्रिलोकी ॥ ९८ ॥ इतिब्रुवाणागीर्वाणादृशुस्तूटजंमुनेः ॥ होमधूमसुगंधाढ्यंबटुभिर्बहुभिर्वृतम् ॥ ९९ ॥ श्यामाकांजलियाच्चार्थमृषिकन्यानुयायिभिः ॥ धृतोपग्रहदर्भास्यैर्मृगशावैरलंकृतम् ॥ १०० ॥ सार्द्रवल्कलकोपीनैर्वृक्षशाखावलंबिभिः ॥ बद्धं विप्रमृगान्दिक्षुवायुराभिरिवावृतम् ॥ १ ॥

पतिव्रताशिरोरत्नलोपामुद्रांघ्रिमुद्रया ॥ मुद्रितंवीक्ष्यसत्रेमुःपर्णशालांऽगणंसुराः ॥ २ ॥ विसर्जितसमाधिंचधृतकर्णाक्षमालिकम् ॥ अधिष्ठितंवृसीपृष्ठं परमेष्ठिवदुत्कटम् ॥ ३ ॥ पुरोगस्त्यंसमालोक्यसर्वेदेनाःसवासवाः ॥ प्रहृष्टवदनाःप्रोचुःप्रोच्चैर्जयजयेतिच ॥ ४ ॥ मुनिरुत्थायतान्सर्वानुपावे श्ययथोचितम् ॥ आशीर्भिरभिनंद्याथपप्रच्छागमकारणम् ॥ ५ ॥ व्यासउवाच ॥ इदंपुण्यतमाख्यानंश्रुत्वाभक्तिसमन्वितः ॥ पठित्वापाठ यित्वाचव्रतश्रद्धावतांपुरः ॥ ६ ॥ विधूयसर्वपापानिज्ञात्वाऽज्ञात्वाकृतान्यपि ॥ हंसवर्णेनयानेनगच्छेच्छिवपुरंध्रुवम् ॥ १०७ ॥ इतिश्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडे पूर्वार्द्धे अ.स्त्याश्रमवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ❀ ॥ ॥ सूतउवाच ॥ ॥ मुनिपृष्टास्ततोदेवाभगवंस्तेकिमब्रुवन्॥सर्वलोकहितार्थायतदाख्याहिमहामुने ॥१॥ ॥ श्रीव्यासउवाच ॥ ॥ अगस्तिवचनंश्रुत्वाबहुमानपुरस्सरम् ॥ धिषणाधिपतेरास्यंविबुधाव्याकुलोकिरे ॥ २ ॥ वाक्पतिरुवाच ॥ शृण्वगस्तेमहाभागदेवागमनकारणम् ॥ धन्योसिकृतकृत्योसिमान्योसिमहता मपि ॥ ३ ॥ प्रत्याश्रमंप्रतिनगंप्रत्यरण्यंतपोधनाः ॥ किंनसंतिमुनिश्रेष्ठकाचिदन्यैवतेस्थितिः ॥४॥ तपोलक्ष्मीस्त्वयीहास्तित्रह्मतेजस्त्वयिस्थिरम् ॥ पुण्यलक्ष्मीस्त्वयिपरात्वय्योदार्यंमनस्त्वयि ॥ ५ ॥

पतिव्रतेयंकल्याणीलोपामुद्रासधर्मिणी ॥ तवांगच्छाययातुल्यायत्कथापुण्यकारिणी ॥ ६ ॥ पतिव्रतास्वरुंधत्यासाविज्याप्यनसूयया ॥ शांडिल्यया चसत्या चलक्ष्म्याचशतरूपया ॥ ७ ॥ मेनयाचसुनीत्याचसंज्ञयास्वाहयातथा ॥ यथैपावर्ण्यतेश्रेष्ठाननथान्येतिनिश्चितम् ॥ ८ ॥ भुंक्तेभुक्तेत्व यिमुनेतिष्ठतित्वयितिष्ठति॥विनिद्रेतेचनिद्रातिप्रथमंप्रतिबुध्यते ॥ ९ ॥ अनलंकृतमात्मानंतवनोदर्शयेत्कचित् ॥ कार्यार्थंप्रेषितेकापिसर्वमंडनवर्जिता ॥१०॥ नचतेनामगृह्णीयात्तवायुष्यविवृद्धये ॥ पुरुषांतरनामापिनगृह्णातिकदाचन ॥ ११ ॥ आकुष्टापिनचाक्रोशेत्ताडितापिप्रसीदति ॥ इदंकुरुकृतं स्वामिन्मन्यतामितिवक्तिच ॥ १२ ॥ आहूतागृहकार्याणित्यक्त्वागच्छतिसत्वरम् ॥ किमर्थंव्याहृतानाथसप्रसादोविधीयताम् ॥ १३ ॥ नचिरंतिष्ठ तिद्वारिनद्वारमुपसेवते ॥ अदापितंत्वयाकिंचित्कस्मैचिन्नददात्यपि ॥ १४ ॥ पूजोपकरणंसर्वमनुक्तासाधयेत्स्वयम् ॥ नियमादकवर्हीपिपत्रपुष्पाक्षता दिकम् ॥ १५ ॥ प्रतीक्षमाणावसरंयथाकालोचितंहियत् ॥ तदुपस्थापयेत्सर्वमनुद्विग्नातिबंधवत् ॥ १६ ॥ सेवतेभर्तुरुच्छिष्टमिष्टमन्नंफलादिकम् ॥ महाप्रसादइत्युक्तापरिदत्तंप्रतीच्छति ॥ १७ ॥ अविभज्यनचाश्नीयादेवपित्रतिथिष्वपि ॥ परिचारककर्मेषुगोषुभिक्षुकुलेषुच ॥ १८ ॥ संयतो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पस्करादक्षाहृष्टाव्ययपराङ्मुखी ॥ कुर्यात्त्वयाननुज्ञातानोपवासव्रतादिकम् ॥ १९ ॥ दूरतोवर्जयेदेपासमाजोत्सवदर्शनम् ॥ नगच्छेत्तीर्थयात्रादिवि
वाहप्रेक्षणादिषु ॥२० ॥ सुखसुप्तंसुखासीनंरममाणंयदृच्छया ॥ आंतरेष्वपिकार्येषुपतिंनोत्थापयेत्क्वचित् ॥ २१ ॥ स्त्रीधर्मिणीत्रिरात्रंतुस्वमुखंनैवदर्श
येत् ॥ स्ववाक्यंश्रावयेन्नापियावत्स्नातानशुद्धितः ॥२२॥सुस्नाताभर्तृवदनमीक्षतेन्यस्यनक्वचित् ॥ अथवामनसिध्यात्वापतिंभानुंविलोकयेत् ॥२३॥

हरिद्रांकुंकुमंचैवसिंदूरंकज्जलंतथा ॥ कूर्पासकंचतांबूलंमांगल्याभरणंशुभम् ॥२४॥ केशसंस्कारकबरीकरकर्णादिभूषणम् ॥ भर्त्तुरायुष्यमिच्छंतीदूरये
न्नपतिव्रता॥ २५ ॥ न रजक्यानहैतुक्यातथाश्रमणयानच ॥ नचदुर्भगयाक्वापिसखित्वंकुरुतेसती ॥ २६ ॥ भर्तृविद्वेषिणींनारींनैपासंभाषतेक्व
चित् ॥ नैकाकिनीक्वचिद्भूयान्ननग्नास्नातिचक्वचित् ॥ २७ ॥ नोलूखलेनमुसलेनवर्द्धन्यांदृषद्यपि ॥ नयंत्रकेनदेहल्यांसतीचोपविशेत्क्वचित् ॥२८॥
विनाव्यवायसमयंप्रागल्भ्यंनक्वचिच्चरेत् ॥ यत्रयत्ररुचिर्भर्त्तुस्तत्रप्रेमवतीसदा ॥ २९ ॥ इदमेवव्रतंस्त्रीणामयमेवपरोवृषः ॥ इयमेकादेवपूजाभर्त्तुर्वा
क्यंनलंघयेत् ॥ ३० ॥ क्लीबंवादुरवस्थंवाव्याधितंवृद्धमेववा ॥ सुस्थितंदुःस्थितंवापिपतिमेकंनलंघयेत् ॥ ३१ ॥ हृष्टाहृष्टेविषण्णास्याविषण्णास्ये
प्रियेसदा ॥ एकरूपाभवेत्पुण्यासंपत्सुचविपत्सुच ॥ ३२ ॥ सर्पिर्लवणतैलादिक्षयेपिचपतिव्रता ॥ पतिंनास्तीतिनब्रूयादायासेषुनयोजयेत्॥३३॥
तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत् ॥ शंकरादपिविष्णोर्वापतिरेकोधिकःस्त्रियाः ॥ ३४ ॥ व्रतोपवासनियमंपतिमुल्लंघ्ययाचरेत् ॥ आयुष्यंहरते
भर्त्तुर्मृतानिरयमृच्छति ॥ ३५ ॥ उक्ताप्रत्युत्तरंदद्याद्यानारीक्रोधतत्परा ॥ सरमाजायतेग्रामेसृगालीनिर्जनेवने ॥ ३६ ॥ स्त्रीणांहिपरमश्चैकोनियमः
समुदाहृतः ॥ अभ्यर्च्यचरणौभर्त्तुर्भोक्तव्यंकृतनिश्चयम् ॥३७॥ उच्चासनंनसेवेतनव्रजेत्परवेश्मसु ॥ नत्रपाकरवाक्यानिवक्तव्यानिकदाचन ॥ ३८ ॥
अपवादोनवक्तव्यःकलहंदूरतस्त्यजेत् ॥ गुरूणांसन्निधौक्वापिनोच्चैर्ब्रूयान्नवाहसेत् ॥ ३९ ॥ याभर्तारंपरित्यज्यरहश्चरतिदुर्मतिः ॥ उलूकीजायतेक्रूरावृ
क्षकोटरशायिनी ॥ ४० ॥ ताडिताताडितुंचेच्छेत्साव्याप्रीवृषदंशिका ॥ कटाक्षयतियाऽन्यंवैकेकराक्षीतुसाभवेत् ॥ ४१ ॥ याभर्तारंपरित्यज्य
मिष्टमश्नातिकेवलम् ॥ ग्रामेवासूकरीभूयाद्वल्गुर्वापिश्वविट्भुजा ॥ ४२ ॥

यात्वंकृत्याऽप्रियंब्रूतेमूकासाजायतेखलु ॥ यासपत्नींसदेर्ष्येतदुर्भगासापुनःपुनः ॥ ४३ ॥ दृष्टिंविलुप्यभर्तुर्याकंचिदन्यंसमीक्षते ॥ काणाचवि
मुखीचापिकुरूपाचापिजायते ॥ ४४ ॥ बाह्यादायांतमालोक्यत्वरिताचजलाशनैः ॥ तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभिः ॥ ४५ ॥ तथैवचाटुवचनैः
खेदसंनोदनैःपरैः ॥ याप्रियंप्रीणयेत्प्रीतात्रिलोकीप्रीणितातया ॥ ४६ ॥ मितंददातिहिपितामितंभ्रातामितंसुतः ॥ अमितस्यहिदातारंभर्त्तारंपूजये
त्सदा ॥ ४७ ॥ भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच ॥ तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत् ॥ ४८ ॥ जीवहीनोयथादेहःक्षणादशुचितांव्रजेत् ॥
भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा ॥ ४९ ॥ अमंगलेभ्यःसर्वेभ्योविधवात्यक्तमंगला ॥ विधवादर्शनात्सिद्धिःक्वापिजातुनजायते ॥ ५० ॥
विहायमातरंचैकांसर्वमंगलवर्जिताम् ॥ तदाशिषमपिप्राज्ञस्त्यजेदाशीविषोपमाम् ॥ ५१ ॥ कन्याविवाहसमयेवाचयेयुरितिद्विजाः ॥ भर्तुःसहचरी
भूयाज्जीवतोऽजीवतोपिवा ॥ ५२ ॥ भर्तासदानुयातव्योदेहवच्छाययास्त्रिया ॥ चंद्रमाज्योत्स्नयायद्वद्विद्युत्वान्विद्युतायथा ॥ ५३ ॥ अनुव्रजति
भर्तारंगृहात्पितृवनंमुदा ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयम् ॥ ५४ ॥ व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात् ॥ एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गं
नयेत्सती ॥ ५५ ॥ यमदूताःपलायंतेसतीमालोक्यदूरतः ॥ अपिदुष्कृतकर्माणंसमुत्सृज्यचतत्पतिम् ॥ ५६ ॥ नतथाविभीमोवह्नेर्नतथाविद्युतो
यथा ॥ आपतंतींसमालोक्यवयंदूताःपतिव्रताम् ॥ ५७ ॥ तपनस्तप्यतेत्यंतंदहनोपिचदह्यते ॥ कंपंतेसर्वतेजांसिदृष्ट्वापातिव्रतंमहः ॥ ५८ ॥
यावत्स्वलोमसंख्यास्तितावत्कोट्ययुतानिच ॥ भर्त्रास्वर्गसुखंभुंक्तेरममाणापतिव्रता ॥ ५९ ॥

धन्यासाजननीलोकेधन्योसौजनकःपुनः ॥ धन्यःसचपतिःश्रीमान्येषांगेहेपतिव्रता ॥ ६० ॥ पितृवंश्यामातृवंश्याःपतिवंश्यास्त्रयस्त्रयः ॥
पतिव्रतायाःपुण्येनस्वर्गसौख्यानिभुंजते ॥ ६१ ॥ शीलभंगेनदुर्वृत्ताःपातयंतिकुलत्रयम् ॥ पितुर्मातुस्तथापत्युरिहामुत्रचदुःखिताः ॥ ६२ ॥
पतिव्रतायाश्चरणोयत्रयत्रस्पृशेद्ध्रुवम् ॥ तत्रेतिभूमिर्मन्येतनात्रभारोस्तिपावनी ॥ ६३ ॥ बिभ्यत्पतिव्रतास्पर्शंकुरुतेभानुमानपि ॥ सोमोगंधवहश्चा
पिस्वपावित्र्यायनान्यथा ॥ ६४ ॥ आपःपतिव्रतास्पर्शमभिलष्यंतिसर्वदा ॥ अद्यजाड्यविनाशोनोजातास्त्वद्याऽन्यपावनाः ॥ ६५ ॥ गृहेगृहेन
किंनार्योरूपलावण्यगर्विताः ॥ परंविश्वेशभक्त्यैवलभ्यतेस्त्रीपतिव्रता ॥ ६६ ॥ भार्यामूलंगृहस्थस्यभार्यामूलंसुखस्यच ॥ भार्याधर्मफलावाप्त्यैभार्यासं
तानवृद्धये ॥ ६७ ॥ परलोकस्त्वयंलोकोजीयतेभार्ययाद्वयम् ॥ देवपित्रतिथीज्यादिनाभार्यःकर्मचार्हति ॥ ६८ ॥ गृहस्थःसहिविज्ञेयोयस्यगेहे
पतिव्रता ॥ ग्रसतेऽन्याप्रतिपदंराक्षस्याजरयाथवा ॥ ६९ ॥ यथागंगाऽवगाहेनशरीरंपावनंभवेत् ॥ तथापतिव्रतादृष्ट्याशुभयापावनंभवेत् ॥ ७० ॥
अनुयातिनभर्तारंयदिदैवात्कथंचन ॥ तत्रापिशीलंसंरक्ष्यंशीलभंगात्पतत्यधः ॥ ७१ ॥ तद्वैगुण्यादपिस्वर्गात्पतिःपततिनान्यथा ॥ तस्याः
पिताचमाताचभ्रातृवर्गस्तथैवच ॥ ७२ ॥ पत्यौमृतेचयायोषिद्वैधव्यंपालयेत्क्वचित् ॥ सापुनःप्राप्यभर्तारंस्वर्गभोगान्समश्नुते ॥ ७३ ॥
विधवाकबरीबंधोभर्तृबंधायजायत ॥ शिरसोवपनंतस्मात्कार्यंविधवयासदा ॥ ७४ ॥

एकाहारःसदाकार्योनद्वितीयःकदाचन ॥ त्रिरात्रंपंचरात्रंवापक्षव्रतमथापिवा ॥ ७५ ॥ मासोपवासंवाकुर्याच्चांद्रायणमथापिवा ॥ कृच्छ्रंवराकंवाकुर्या
त्तप्तकृच्छ्रमथापिवा ॥ ७६ ॥ यवान्नैर्वाफलाहारैःशाकाहारैःपयोव्रतैः ॥ प्राणयात्रांप्रकुर्वीतयावत्प्राणःस्वयंव्रजेत् ॥ ७७ ॥ पर्यंकशायिनीनारीवि
धवापातयेत्पतिम् ॥ तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया ॥ ७८ ॥ नचांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् ॥ गंधद्रव्यस्यसंयोगोनैवकार्य
स्तयापुनः ॥ ७९ ॥ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् ॥ ८० ॥ विष्णोस्तुपूजनंकार्यंपति
बुद्ध्यानचान्यथा ॥ पतिमेवसदाध्यायेद्विष्णुरूपधरंहरिम् ॥ ८१ ॥ यद्यदिष्टतमंलोकेयच्चपत्युःसमीहितम् ॥ तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया
॥ ८२ ॥ वैशाखेकार्तिकेमाघेविशेषनियमांश्चरेत् ॥ स्नानंदानंतीर्थयात्रांविष्णोर्नामग्रहंमुहुः ॥ ८३ ॥ वैशाखेजलकुंभाश्चकार्तिकेघृतदीपकाः ॥
माघेधान्यतिलोत्सर्गःस्वर्गलोकेविशिष्यते ॥ ८४ ॥ प्रपाकार्याचवैशाखेदेवेदेयागलंतिका ॥ उपानद्व्यजनंछत्रंसूक्ष्मवासांसिचंदनम् ॥ ८५ ॥ सकर्पू
रंचतांबूलंपुष्पदानंतथैवच ॥ जलपात्राण्यनेकानितथापुष्पगृहाणिच ॥ ८६ ॥ पानानिचविचित्राणिद्राक्षारंभाफलानिच ॥ देयानिद्विजमुख्येभ्यः
पतिर्मेप्रीयतामिति ॥ ८७ ॥ ऊर्जेयवान्नमश्नीयादेकान्नमथवापुनः ॥ वृंताकंसूरणंचैवशुकशिंबिंचवर्जयेत् ॥ ८८ ॥ कार्तिकेवर्जयेत्तैलंकार्तिकेवर्जये
न्मधु ॥ कार्तिकेवर्जयेत्कांस्यंकार्तिकेचापिसंधितम् ॥ ८९ ॥ कार्तिकेमौननियमेघंटांचारुप्रदापयेत् ॥ पत्रभोजीकांस्यपात्रंघृतपूर्णंप्रयच्छति ॥९०॥
भूमिशय्याव्रतेदेयाशय्याश्लक्ष्णासतूलिका ॥ फलत्यागेफलंदेयंरसत्यागेचतद्रसम् ॥ ९१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धान्यत्यागेचतद्धान्यमथवाशालयःस्मृताः ॥ धेनूर्दद्यात्प्रयत्नेनसालंकाराःसकांचनाः ॥ ९२ ॥ एकतःसर्वदानानिदीपदानंतथैकतः ॥ कार्तिकेदी पदानस्यकलांनार्हंतिषोडशीम् ॥ ९३ ॥ किंचिदभ्युदितेसूर्येमाघस्नानंसमाचरेत् ॥ यथाशक्त्याचनियमान्माघस्नायीसमाचरेत् ॥ ९४ ॥ पक्वान्नैर्भो जयेद्विप्रान्यतिनोपितपस्विनः ॥ लड्डुकैःफेणिकाभिश्चवटकेंडरिकादिभिः ॥ ९५ ॥ घृतपक्वैःसमरिचैःशुचिकर्पूरवासितैः ॥ गर्भेशर्करयापूर्णैर्नेत्रानं दैःसुगंधिभिः ॥ ९६ ॥ शुष्कैर्धनानांभारांश्चदद्याच्छीतापनुत्तये ॥ कंचुकंतूलगर्भंचतूलिकांसूपवीतिकाम् ॥ ९७ ॥ मंजिष्ठारक्तवासांसितथातूलवतीं पटीम् ॥ जातीफललवंगैश्चतांबूलानिबहून्यपि ॥ ९८ ॥ कंबलानिविचित्राणिनिर्वातानिगृहाणिच ॥ मृदुलाःपादरक्षाश्चसुगंध्युद्वर्त्तनानिच॥९९॥ घृतकंबलपूजाभिर्महास्नानपुरःसरम् ॥ कृष्णागुरुप्रभृतिभिर्गर्भागारेप्रधूपनैः ॥ १०० ॥ स्थूलवर्तिप्रदीपैश्चनैवेद्यैर्विविधैस्तथा ॥ भर्तृस्वरूपोभगवान्प्री यतामितिचोच्चरेत् ॥ १ ॥ एवंविधैश्चविधवाविविधैर्नियमैर्व्रतैः ॥ वैशाखान्कार्तिकान्माघानेवमेवातिवाहयेत् ॥ २ ॥ नाधिरोहेदनड्वाहंप्राणैः कंठगतैरपि ॥ कंचुकंनपरीदध्याद्वासोनविकृतंन्यसेत्॥३॥अपृष्ट्वातुसुतान्किंचिन्नकुर्याद्भर्तृतत्परा ॥ एवंचर्यापरानित्यंविधवापिशुभामता ॥ ४ ॥ एवंधर्मसमायुक्ताविधवापिपतिव्रता ॥ पतिलोकानवाप्नोतिनभवेत्क्वापिदुःखभाक् ॥५॥ नगंगयातयाभेदोयानारीपतिदेवता ॥ उमाशिवसमासाक्षात्त स्मात्तांपूजयेद्बुधः ॥६॥ बृहस्पतिरुवाच ॥ गंगास्नानफलंत्वेतद्यज्जातंतवदर्शनम् ॥ लोपामुद्रेमहाभागतर्भर्तृपादांबुजेक्षणे ॥ ७ ॥ इतिस्तुत्वामहाभागां राजपुत्रींपतिव्रताम् ॥ प्रणम्यचगुरुःप्राहमुनिंसर्वार्थकोविदः ॥ ८ ॥ प्रणवस्त्वंश्रुतिरियंक्षमैषात्वंस्वयंतपः ॥ सत्क्रियेयंफलंत्वंहिधन्योसीतिमहामुने ॥ ९ ॥ इदंपातिव्रतंतेजोब्रह्मतेजोभवान्परम् ॥ तत्राप्येतत्तपस्तेजःकिमसाध्यतमंतव ॥ ११० ॥

तवनाविदितंकिंचित्तथापिचवदाम्यहम् ॥ यदर्थमागतादेवास्तन्मुनेत्रनिशामय ॥ ११ ॥ अयंशतमखःश्रीमान्वृत्रहाकुलिशायुधः ॥ सिद्ध्यष्टकंहि यद्वारिदृक्प्रसादंसमीक्षते ॥ १२ ॥ यस्यपुर्याःपरिसरेकामधेनुव्रजश्चरेत् ॥ यत्पौराःकल्पवृक्षाणांनित्यंछायासुशेरते ॥ १३ ॥ यद्रथ्यासुचनिष्ठं तितेचिंतामणिकर्कराः ॥ अयमग्निर्जगद्योनिर्धर्मराजस्त्वयंपुनः ॥ १४ ॥ निर्ऋतिर्वरुणोवायुःश्रीदरुद्रादयस्त्वमी ॥ आराध्यंतेचचारित्रैःसर्वकामार्थ मीश्वराः ॥ १५ ॥ समभ्यर्थयितारोमीत्वंयाच्यस्तुजगत्कृते ॥ वाङ्मात्रोद्यमसाध्यंतत्तवविश्वोपकारकम् ॥ १६ ॥ कश्चिच्छैलोविंध्यनामाभानुमार्गा वरोधकः ॥ वर्धितःस्पर्धयामेरोस्तद्वृद्धिंत्वंनिवारय ॥१७॥ येचस्वभावकठिनायेचमार्गावरोधकाः ॥ येस्पर्धयावृद्धिमंतस्तद्वृद्धिर्वर्धिताऽशुभा ॥ १८ ॥ इतिश्रुत्वागुरोर्वाक्यमविचार्यमहामुनिः ॥ क्षणंमुनिःसमाधायतथेतिप्रत्युवाचह ॥ १९ ॥ साधयिष्यामिवःकार्यंविसर्ज्येतिदिवौकसः ॥ पुनश्चिंतापरो भूत्वाऽगस्तिर्ध्यानपरोभवत् ॥ १२० ॥ ॥ वेदव्यासउवाच ॥ ॥ इमंपतिव्रताध्यायंश्रुत्वास्त्रीपुरुषोपिवा ॥ पापकंचुकमुत्सृज्यशक्रलोकंप्रयास्यति ॥ १२१ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यांसहितायांचतुर्थे काशीखंडे पूर्वार्द्धेपतिव्रताख्यानंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ पराशरउवाच ॥ ॥ ततोध्यानेनविश्वेशमालोक्यसमुनीश्वरः ॥ सूतप्रोवाचतांपुण्यांलोपामुद्रामिदंवचः ॥ १ ॥ अयिपश्यवरारोहेकिमेतत्समुप स्थितम् ॥ क्वतत्कार्यंक्वचवयंमुनिमार्गानुसारिणः ॥ २ ॥ येनगोत्रभिदागोत्राविपक्षाहेलयाकृताः ॥ भवेत्कुंठितसामर्थ्यःसकथंगिरिमात्रके ॥ ३ ॥ कल्पवृक्षोंऽगणेयस्यकुलिशंयस्यचायुधम् ॥ सिद्ध्यष्टकंहियद्वारिसंसिद्ध्यैप्रार्थयेद्विजम् ॥ ४ ॥ क्रियंतेव्याकुलाःशैलाअहोदावाग्निनाप्रिये ॥ तद्वृ द्धिस्तंभनेशक्तिःक्वगतासाऽऽशुशुक्षणेः ॥ ५ ॥ नियन्तासर्वभूतानांयोसौदण्डधरःप्रभुः ॥ सकिंदंडयितुंनालमेकंतंग्रावमात्रकम् ॥ ६ ॥ आदित्यावसवो रुद्रास्तुषिताःसमरुद्गणाः ॥ विश्वेदेवास्तथादस्रौयेचान्येपिदिवौकसः ॥ ७ ॥ येषांदृक्पातमात्रेणपतंतिभुवनान्यपि ॥ तेकिंसमर्थानोकांतेनगवृद्धि निषेधने ॥८॥ आज्ञातंकारणंतच्चस्मृतंवाक्यंसुभाषितम् ॥ काशीमुद्दिश्ययद्गीतंमुनिभिस्तत्त्वदर्शिभिः ॥९॥ अविमुक्तंनमोक्तव्यंसर्वथैवमुमुक्षुभिः ॥ किंतुविघ्नाभविष्यंतिकाश्यांनिवसतांसताम् ॥ १० ॥ उपस्थितोयंकल्याणिसोंऽतरायोमहानिह ॥ नशक्यतेऽन्यथाकर्तुंविश्वेशोविमुखोयतः ॥ ११ ॥ काशीद्विजाशीर्भिरहोयदाप्ताकस्तांमुमुक्षुर्यदिवामुमुक्षुः ॥ ग्रासंकरस्थंसवितृज्यहृद्यंस्वकूर्परंलेढिविमूढचेताः ॥ १२ ॥

अहोजनाबालिशवत्किमेतांकाशींत्यजेयुःसुकृतैकराशिम् ॥ शालूककंदःप्रतिमज्जनंकिंलभेततद्वत्सुलभाकिमेषा ॥ १३ ॥
भवांतरावर्जितपुण्यराशिंकृच्छ्रैर्महद्भिर्ह्यवगम्यकाशीम् ॥ प्राप्यापिकिंमूढधियोन्यतोवैयियासवोदुर्गतिमुद्धियासवः ॥ १४ ॥
क्वकाशिकाविश्वपदप्रकाशिकाक्वकार्यमन्यत्परितोतिदुःखम् ॥ तत्पंडितोन्यत्रकुतःप्रयातिकिंयातिकूष्मांडफलंह्यजास्ये ॥ १५ ॥

काशींप्रकाशीकृतपुण्यराशिंहाशीघ्रनाशीविसृजेन्नरःकिम् ॥ नूनंस्वनूनंसुकृतंतदीयंमदीयमेवंविवृणोतिचेतः ॥ १६ ॥
नरोनरोगीयदिहाविहायसहायभूतांसकलस्यजंतोः ॥ काशीमनाशीसुकृतैकराशिमन्यत्रयातुंयततांनचान्यः ॥ १७ ॥

वित्रस्तपापांत्रिदशैर्दुरापांगंगांसदापांभवपाशशापाम् ॥ शिवादिमुक्तामभृतैकशुक्तिंमुक्ताविमुक्तानपरित्यजन्ति ॥ १८ ॥ हंहोकिमंहोनिचिताःप्रलब्धा बंहीयसायासभरेणकाशीम् ॥ प्रभूतपुण्यद्रविणैकपण्यांप्राप्यापिहित्वाक्वचगंतुमुद्यताः ॥ १९ ॥ अहोजनानांजडताविहायकाशींयदन्यत्रनयंतिचेतः ॥ परिस्फुरद्गांगजलाभिरामांकामारिशूलाग्रधृतांलयेपि ॥ २० ॥ रेरेभवेशोकजलैकपूर्णेपापेस्मलोकाःपतिताब्धिमध्ये ॥ विद्राणनिद्राणविरोधिपापांकाशीं परित्यज्यतरिंकिमर्थम्॥२१॥नसत्पथेनापि नयोगयुक्त्यादानैर्नवानैवतपोभिरुग्रैः ॥ काशीद्विजाशीर्भिरहोसुलभ्याकिंवाप्रसादेनचविश्वभर्तुः ॥२२॥ धर्मस्तुसंपत्तिभरैःकिलोह्यतेप्यर्थोहिकामैर्बहुदानभोगकैः ॥ अन्यत्रसर्वंसचमोक्षएकःकाश्यांनचान्यत्रतथायथात्र ॥ २३ ॥ क्षेत्रंपवित्रंहियथाऽवि मुक्तंनान्यत्तथायच्छ्रुतिभिःप्रयुक्तम् ॥ नधर्मशास्त्रैर्नचतैःपुराणैस्तस्माच्छरण्यंहिसदाऽविमुक्तम् ॥ २४ ॥ सहोवाचेतिजाबालिरारुणेसिरिडामता ॥ वरणापिंगलानाडीतदंतस्त्वविमुक्तकम् ॥ २५ ॥ सासुषुम्णापरानाडीत्रयंवाराणसीत्वसौ ॥ तदत्रोत्क्रमणेसर्वजंतूनांहिश्रुतौहरः ॥ २६ ॥ तारकंब्रह्मव्या चष्टेतेनब्रह्मभवंतिहि॥एवंश्लोकोभवत्येषआहुर्वैवेदवादिनः॥२७॥भगवानंतकालेऽत्रतारकस्योपदेशतः॥अविमुक्तेस्थिताञ्जन्तून्मोचयेन्नात्रसंशयः॥२८॥ नाविमुक्तसमंक्षेत्रंनाविमुक्तसमागतिः ॥ नाविमुक्तसमंलिंगंसत्यंसत्यंपुनःपुनः ॥ २९ ॥ अविमुक्तंपरित्यज्ययोन्यत्रकुरुतेरतिम् ॥ मुक्तिंकरतलान्मुक्त्वा सोन्यांसिद्धिंगवेषयेत् ॥३०॥ इत्थंमुनिश्चित्यमुनिर्महात्माक्षेत्रप्रभावंश्रुतितःपुराणात् ॥ श्रीविश्वनाथेनसमंनलिंगंपुरीनकाशीसदृशीत्रिकोट्याम्॥३१॥ श्रीकालराजंचततःप्रणम्यविज्ञापयामाससमुनीशवर्यः ॥ आपृच्छनायाहमिहागतोस्मिश्रीकाशिपुर्यास्तुयतःप्रभुस्त्वम् ॥ ३२ ॥ हाकालराजप्रति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भूतमत्रप्रत्यहमित्यवनीसुताकेम् ॥ नाराधयेमूलफलप्रसूनैःकिंमय्यनागस्यपराधदृक्स्याः ॥ २३ ॥ हाकालभैरवभवानभितोभयार्तान्माभैषुचे तिभणनेःस्वकरंप्रसार्य ॥ मूर्तिविधायविकटांकटुपापभोर्क्तीवाराणसीस्थितजनान्परिपातिकिंन ॥२४॥ हेयक्षराजरजनीकरचारुमूर्तेश्रीपूर्णभद्रसुतनाथ कदंडपाणे ॥ त्वंवेतपोजनितदुःखमवेपिसर्वंकिंमांबहिर्नयसिकाशिनिवासिरक्षिन् ॥ २५ ॥ त्वमन्नदस्त्वंकिलजीवदातात्वंज्ञानदस्त्वंकिलमोक्षदोपि ॥ त्वमंत्यभूधांकुरुषेजनानांजटाकलापेरुरगेंद्रहारेः ॥ २६ ॥ गणौत्वदीयौकिलसंभ्रमोद्भ्रमान्नस्थवृत्तांतविचारकोविदौ ॥ संभ्रांतिमुत्पाद्यपरामसाधून्ते त्रात्क्षणंदूरयतस्त्वमुष्मात् ॥ २७ ॥ शृणुप्रभोदुंढिविनायकत्वंवाचंमदीयांतुरटाम्यनाथवत् ॥ त्वत्स्थाःसमस्ताःकिलविघ्नपूगाःकिमन्नदुर्ग त्तवदास्थितोहम् ॥ २८ ॥

शृण्वंत्वमीपंच विनायकाश्चिंतामणिश्चापिकपर्दिनामा ॥ आशागजाख्योचविनायकौतौशृणोत्वसौसिद्धिविनायकश्च ॥ २९ ॥ परापवादोनमया किलोक्तःपरापकारोपिमयाकृतोन ॥ परस्वबुद्धिःपरदारबुद्धिःकृतामयानात्रकएषपाकः ॥ ४० ॥ गंगात्रिकालंपरिसेवितामयाश्रीविश्वनाथोपिसदाविलो कितः ॥ यात्राःकृतास्ताःप्रतिपर्वसर्वतःकोयंविपाकोममविघ्नहेतुः ॥ ४१ ॥ मातर्विशालाक्षिभवानिमंगलेज्येष्ठेशिसौभाग्यविधानसुंदरि ॥ विश्वेश्वरे विश्वभुजेनमोस्तुतेश्रीचित्रघंटेविकटेचदुर्गिके ॥ ४२ ॥ साक्षिण्यपताःकिलकाशिदेवताःशृण्वंतुनस्वार्थमहंव्रजाम्यतः ॥ अभ्यर्थितोदेवगणैःकरो मिकिंपरोपकारायनकिंविधीयते ॥ ४३ ॥ दधीचिरस्थीनिनकिंपुरादद्दोजगत्रयंकिंनददेऽर्थिनेबलिः ॥ दत्तःस्मकिंनोमधुकैटभौशिरोबभूवताक्ष्योंपिच विष्णुवाहनम् ॥ ४४ ॥ आपृच्छ्यसर्वान्समुनीन्सुनीश्वरःसबालवृद्धानपितत्रवासिनः ॥ तृणानिवृक्षांश्चलताःसमस्ताःपुरींपरिक्रम्यचनिर्ययौच ॥४५॥

शोपितस्यपरितोपिलक्षणैर्नीचकर्मपरिवर्तनोपिवा ॥ चंद्रमौलिमवलोक्ययास्यतःकस्यसिद्धिरिहनोपरिस्फुरेत् ॥४६॥ वरंहिकाश्यांतृणवृक्षगुल्मकाश्चरं तिपापंनत्वरंतिनान्यतः ॥ क्वंकराणांप्रथमाधिगस्तुनोवाराणसीहाद्यविहायगच्छतः ॥ ४७ ॥ आसिंधुपस्पृश्यपुनःपुनर्मुनिःप्रासादमालाःपरितोविलो कयन् ॥ उपाचनेत्रेसरलेप्रपश्यतंकाशींयुवांक्रक्रपुरीत्वियंवत ॥ ४८ ॥ स्वैरंहसंत्वद्यविधायतालिकांमिथःकरेणापिकरंप्रगृह्य ॥ सीमाचराभूतगणा व्रजाम्यहंविहायकाशींसुकृतैकराशिम् ॥ ४९ ॥ इत्थंविलप्यबहुशःसमुनिस्त्वगस्त्यस्तत्कौंचयुग्मवददोअबलासहायः ॥ मूर्च्छामवापमहतींविरही वज्रलपन्हाकाशिकाशिपुनरेहिचदेहिदृष्टिम् ॥ ५० ॥

स्थित्वाक्षणंशिवशिवेतिशिवेतिचोक्त्वायावःप्रियेतिकठिनाहिदिवौकसस्ते ॥ किंनस्मरेस्त्रिजगतीसुखदानदक्षंज्यंप्रहित्यमदनंयदकारितैस्तु ॥ ५१ ॥ यावद्व्रजेत्रिचतुराणिपदानिखेदान्स्वेदोदबिंदुकणिकांचितभालदेशः ॥ प्रत्युद्गमाऽकरणतःकिलमेविनाशास्तावद्धराभयवरादिवसंचुकोच ॥ ५२ ॥ तपोयानमिवारुह्यनिमेषार्धेनवैमुनिः ॥ अग्रेददर्शतंविंध्यंरुद्धांबरमथोन्नतम् ॥ ५३ ॥ चर्कपेचाचलस्तूर्णंदृष्ट्वैवाग्रस्थितंमुनिम् ॥ तमगस्त्यंसपत्नीकंवाता पीत्वलवैरिणम् ॥ ५४ ॥ तपःक्रोधसमुत्थाभ्यांकाशीविरहजन्मना ॥ प्रलयानलवत्तीव्रज्वलंतंत्रिभिरग्निभिः ॥ ५५ ॥ गिरिःखर्वतरोभूत्वाविविक्षुरवनी मिव ॥ आज्ञाप्रसादःक्रियतांकिंकरोस्मीतिचाब्रवीत् ॥ ५६ ॥ ॥ अगस्त्यउवाच ॥ ॥ विंध्यसाधुरसिप्राज्ञमांचजानासितत्त्वतः ॥ पुनरागमनंचेन्मे तावत्खर्वतरोभव ॥ ५७ ॥ इत्युक्तादक्षिणामाशांसनाथामकरोन्मुनिः ॥ निजैश्चरणविन्यासैस्तयासाध्व्यातपोनिधिः ॥ ५८ ॥ गतेतस्मिन्मु निनरेवेपमानस्तदागिरिः ॥ पश्यत्युत्कंठनिवचगतश्चेत्साध्वभूत्ततः ॥ ५९ ॥ अद्यजातःपुनरहंनशातोयदगस्तिना ॥ नमयासदृशोधन्यइतिमेने सवैगिरिः ॥ ६० ॥ अरुणोपिचतत्कालेकालज्ञोऽभान्नकालयत् ॥ जगत्स्वास्थ्यमवापोच्चैःपूर्ववद्भानुसंचरैः ॥ ६१ ॥ अद्यश्वोवापरश्वोवाप्यागमिष्य तिवैमुनिः ॥ इतिचिंतामहाभारैर्गिरिराक्रांतवत्स्थितः ॥ ६२ ॥ नाद्यापिमुनिरायातिनाद्यापिगिरिरेधते ॥ यथास्वलजनानांहिमनोरथमहीरुहः ॥ ६३ ॥ विवधिपतियोनीचःपरासूयांसमुद्वहन् ॥ दूरेतदवृद्धिवार्ताऽस्तांप्राग्वृद्धेरपिसंशयः ॥ ६४ ॥

मनोरथानसिद्धचेयुःसिद्धानश्यंत्यपिध्रुवम् ॥ खलानतिनकुशलिविश्वंविश्वेश्वरक्षितम् ॥ ६५ ॥ विधवानांस्तनायद्वद्धुवेवविलयंतिच ॥ उन्नम्यो न्नम्यतत्रोच्चैस्तद्वत्खलमनोरथाः ॥ ६६ ॥ भवेत्कूलंकषायद्वदल्पवर्षेणकन्नदी ॥ खलर्धिरल्पवर्षेणतद्वत्स्यात्स्वकुलंकषा ॥ ६७ ॥ अविज्ञायान्यसा मर्थ्यंस्वसामर्थ्यप्रदर्शयेत् ॥ उपहासमवाप्नोतितथेवायमिहाचलः ॥ ६८ ॥ ॥ व्यासउवाच ॥ ॥ गोदावरीतटंरम्यंविचरन्नपिवैमुनिः ॥ नतत्याजचतं तापंकाशीविरहजंपरम् ॥ ६९ ॥ उदीचीदिक्स्पृशमपिसमुनिर्मातरिश्वनम् ॥ प्रसार्यबाहूसंश्लिष्यकाश्याःपृच्छेदनामयम् ॥ ७० ॥ लोपामुद्रे नसामुद्राकापीहजगतीतले ॥ वाराणस्याःप्रदृश्येततत्कर्तानयतोविधिः ॥ ७१ ॥ क्वचित्तिष्ठन्क्वचिच्चलत्पन्क्वचिद्धावन्क्वचित्स्खलन् ॥ क्वचिज्जो पविरांश्चेतिवभ्रामेतस्ततोमुनिः ॥ ७२ ॥ ततोव्रजन्ददर्शाग्रेपुण्यराशिस्तपोधनः ॥ चंचच्चंद्रशताभासांभाग्यवानिवसुश्रियम् ॥ ७३ ॥ विजित्यभानु नाभानुंदिवापिसमुदित्वराम् ॥ निर्वापयंतीमिवतांस्वचेतस्तापसंततिम् ॥ ७४ ॥

तत्रागस्त्योमहालक्ष्मींदृष्टशेषुचिरंस्थिताम् ॥७५॥ रात्रावज्जेषुसंकोचोदर्शेष्वब्जःक्वचिद्व्रजेत्॥क्षीरोदेमंदरत्रासात्तद्वाध्युषितामिव ॥७६॥ यदारभ्यद धारेनामाधवोमानतःकिल ॥ तदारभ्यस्थितानूनंसपत्नीर्प्यावशादिव ॥७७॥त्रैलोक्यंकोलरूपेणत्रासयंतंमहासुरम् ॥ विनिहत्यस्थितांतत्ररम्येकोलापुरे पुरे ॥७८॥ संप्राप्याथमहालक्ष्मींमुनिर्वयःप्रणम्यच ॥ तुष्टावताभिरिष्टाभिरिष्टदांदृष्टमानसः ॥ ७९ ॥ अगस्तिरुवाच ॥ ॥ मातर्नमामिकमले कमलायतांक्षिश्रीविष्णुहृत्कमलवासिनि विश्वमातः ॥ क्षीरोदजेकमलकोमलगर्भगौरिलक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८० ॥ त्वंश्रीरुपेंद्रसदने मदनैकमातर्ज्योत्स्नासिचंद्रमसिचंद्रमनोहरास्ये ॥ सूर्येप्रभासिचजगत्रितयेप्रभासिलक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८१ ॥

त्वंजातवेदसिसदादहनात्मशक्तिर्वेधास्त्वयाजगदिदंविविधंविदध्यात् ॥ विश्वंभरोपिबिभृयादखिलंभवत्यालक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८२ ॥ त्वत्यक्तमेतदमलेहरतेहरोपित्वंपासिहंसिविदधासिपरावरासि ॥ इच्छोवभूवहरिरप्यमलेत्वदाप्यालक्ष्मिप्रसीदसततंनमतांशरण्ये ॥ ८३ ॥ शूरः सएवसगुणीसबुधःसधन्योमान्यःसएवकुलशीलकलाकलापैः ॥ एकःशुचिःसदिपुमान्सकलेपिलोकेयत्रापतेत्तवशुभेकरुणाकटाक्षः ॥ ८४ ॥ यस्मिन्वसेःक्षणमहोपुरुषेगजेऽश्वेस्त्रैणेतृणेसरसिदेवकुलेगृहेऽब्जे ॥ रत्नेपतत्रिणिपशोशयनेधरायांसश्रीकमेवसकलेतदिहास्तिनान्यत् ॥ ८५ ॥ त्वत्स्पृष्टमेवसकलंशुचितांलभेतत्वत्यक्तमेवसकलंत्वशुचीहलक्ष्मि ॥ त्वन्नामयत्रचसुमंगलमेवतत्रश्रीविष्णुपत्निकमलेकमलालयेऽपि ॥ ८६ ॥ लक्ष्मीश्रियंचकमलांकमलालयांचपद्मांरमांनलिनयुग्मकरांचमांच ॥ क्षीरोदजामृतकुंभकरामिरांचविष्णुप्रियामितिसदाजपतांकदुःखम् ॥ ८७ ॥ इतिस्तुत्वामगवतींमहालक्ष्मींहरिप्रियाम् ॥ प्रणनामसपत्नीकःसाष्टांगंदंडवन्मुनिः ॥ ८८ ॥ श्रीरुवाच ॥ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेमित्रावरुणसंभव ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पतिव्रतेत्वमुत्तिष्ठलोपामुद्रेशुभव्रते ॥ ८९ ॥ स्तुत्यानयाप्रसन्नाहंभ्रियतांयद्धृदीप्सितम् ॥ राजपुत्रिमहाभागेत्वमिहोपविशामले ॥ ९० ॥ त्वदं गलक्षणैरेभिःसुपवित्रैःवतेव्रतैः ॥ निर्वापयितुमिच्छामिदेत्याज्ञैस्तापितांतनुम् ॥ ९१ ॥ इत्युक्तामुनिपत्नीतांसमालिंग्यहरिप्रिया ॥ अलंचकारचश्री त्यावहुसौभाग्यमंडनैः ॥ ९२ ॥ पुनराहमुनेजानेतवहृत्तापकारणम् ॥ सचेतनंमुनोत्येवकाशीविश्लेषजोऽनलः ॥ ९३ ॥ यदासदेवोविश्वेशोमंदरं गतवान्पुरा ॥ तदाकाशीवियोगेनजातास्येदृशीदशा ॥ ९४ ॥ तत्प्रवृत्तिंपुनर्ज्ञातुंब्रह्माणंकेशवंगणान् ॥ गणेश्वरंचदेवांश्चप्रेषयामासशूलधृक् ॥९५॥ तेचकाशीगुणान्सर्वेविचार्यचपुनःपुनः ॥ व्रजंत्यद्यापिनकापिताहगस्तिंकुत्रापुरी ॥ ९६ ॥ इतिश्रुत्वाथसमुनिःप्रत्युवाचश्रियंततः ॥ प्रणिपत्यमहाभा गोभक्तिगर्भमिदंवचः ॥ ९७ ॥ यदिदेयोवरोमह्यंवरयोग्योस्म्यहंयदि ॥ तदावाराणसीप्राप्तिःपुनरस्त्वेषमेवरः ॥ ९८ ॥ येपठिष्यंतिचस्तोत्रंत्वद्व्रतस्था मत्कृतंसदा ॥ तेषांकदाचित्संतापोमास्तुमास्तुदरिद्रता ॥ ९९ ॥ मास्तुचेष्टवियोगश्चमास्तुसंपत्तिसंक्षयः ॥ सर्वत्रविजयश्चास्तुविच्छेदोमास्तुसं ततेः ॥ १०० ॥ ॥ श्रीरुवाच ॥ ॥ एवमस्तुमुनेसर्वंयत्त्वयापरिभाषितम् ॥ एतत्स्तोत्रस्यपठनंममसान्निध्यकारणम् ॥ १ ॥ अलक्ष्मीःकालकर्णीचतद्वेहंनविशेत्क्वचित् ॥ गजाश्वपशुशांत्यर्थमेतत्स्तोत्रंसदाजपेत् ॥ २ ॥ बालग्रहाभिभूतानांबालानांशांतिकृत्परम् ॥ भूर्जपत्रे लिखित्वातुभीयात्कंठदेशतः ॥३॥ इदंवीजरहस्यंमेरक्षणीयंप्रयत्नतः ॥ श्रद्धाहीनेनदातव्यंनदेयंचाशुचौक्वचित् ॥ ४ ॥ अन्यच्चशृणुविप्रेंद्रभविष्ये द्वापरेभवान् ॥ एकोनत्रिंशकेब्रह्मन्सत्यंव्यासोभविष्यति ॥ ५ ॥ तदावाराणसींप्राप्यासिद्धिंप्राप्स्यस्यभीप्सिताम् ॥ व्यस्यवेदान्पुराणानिधर्मा न्समुपदिश्यच ॥ ६ ॥ हितं चतेवदाम्येकंसाम्प्रतं तत्समाचर ॥ पश्यकिंचिदितोगत्वात्कंदमश्रेस्थितंप्रभुम् ॥ ७ ॥ वागणस्यारहस्यंचयथाव च्छिवभाषितम् ॥ तव तुष्टिकरंब्रह्मन्कथयिष्यतिपण्मुखः ॥ ८ ॥ इतिलब्धावरंसोथमहालक्ष्मींप्रणम्यच ॥ ययावगस्तिर्यत्रास्तिकुमारःशि खिवाहनः ॥ १०९ ॥ ॥ इति श्रीस्कन्देमहापुराणेएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेअगस्त्यश्रस्थानंनामपंचमो ऽध्यायः ॥ ९ ॥ ॥ ७ ॥ पाराशर्यउवाच ॥ शृणुसूतमहाभागकथांश्रुतिसहोदराम् ॥ चवित्रंदिनियायेहपुरुषःपुरुषार्थभाक् ॥ १ ॥ ततःश्रीदर्श नानंदसुधाधाराधुर्नीमुनिः ॥ अवगाह्यसपत्नीकःपरांमुदमवापसः ॥ २ ॥ वह्निकुंडसमुद्भूतसूतनिर्मलमानस ॥ शृणुष्वैकंपुराविद्भिर्भाषितंयत्सुभा षितम् ॥ ३ ॥परोपकरणंयेषांजागर्तिहृदयेसताम् ॥ नश्यंतिविपदस्तेषांसंपदःस्युःपदेपदे ॥ ४ ॥ तीर्थस्नानैर्नसाशुद्धिर्वहुदानैर्नतत्फलम् ॥ तपो भिरुग्रैस्तन्नाप्यमुपकृत्यायदाप्यते ॥ ५ ॥

परोपकृत्यायोधर्मोधर्मोदानादिसंभवः ॥ एकत्रतुलितौधात्रातत्रपूर्वोभवद्गुरुः ॥ ६ ॥ परिनिर्मथ्यवाग्जालंनिर्णीतमिदमेवहि ॥ नोपकारात्परोधर्मो नापकारादघंपरम् ॥ ७ ॥ उपकर्तुरगस्त्यस्यजातमेतन्निदर्शनम् ॥ कृताद्दक्काशिजंदुःखंकृताद्दक्श्रीमुखेक्षणम् ॥ ८ ॥ कारिकर्णाग्रचपलंजीवितं विविधंवसु ॥ तस्मात्परोपकरणंकार्यमेकंविपश्चिता ॥ ९ ॥ यल्लक्ष्मीनाममात्रास्यानरोनोमातिकुत्रचित् ॥ साक्षात्समीक्ष्यतांलक्ष्मींकृतकृत्यो भवन्मुनिः ॥ १० ॥ गच्छन्यदृच्छयासोथदूराच्छ्रीशैलमैक्षत ॥ यत्रसाक्षान्निवसतिदेवःश्रीत्रिपुरांतकः ॥११॥ उवाचवचनंपत्न्तीतदाप्रीतमनामुनिः ॥ इहस्थितैवपश्यत्वंकांतेकांततरंपरम् ॥ १२ ॥ श्रीशैलशिखरंश्रीमदिदंतद्यद्विलोकनात् ॥ पुनर्भवोमनुष्याणांभवेत्रभवेत्क्वचित् ॥ १३ ॥ गिरि श्चतुरशीत्यायंयोजनानांहिविस्तृतः ॥ सर्वलिंगमयोयस्मादतःकुर्यात्प्रदक्षिणम् ॥ १४ ॥ ॥ लोपामुद्रोवाच ॥ ॥ किंचिद्विज्ञप्तुमिच्छामियद्याज्ञा स्वामिनोभवेत् ॥ शृतेहियाज्ञनुज्ञातापत्यासःपतिताभवेत् ॥ १५ ॥ अगस्त्यउवाच ॥ ॥ किंवक्तुकामादेवित्वंब्रूहित्त्वमशंकिता ॥ नत्वादृशी नांवाक्यंहिपत्युःखेदायजायते ॥ १६ ॥ ततः पप्रच्छसादेवीप्रणम्यमुनिमानता ॥ सर्वेषांचहितार्थायस्वसंदेहापनुत्तये ॥ १७ ॥ लोपामुद्रोवाच ॥ श्रीशैलशिखरंदृष्ट्वापुनर्जन्मनविद्यते ॥ इदमेवहिसत्यंचेत्किमर्थंकाशिरीष्यते ॥ १८ ॥ अगस्तिरुवाच ॥ ॥ आकर्णयवरारोहेसत्यंपृष्टंत्वयामले ॥ निर्णीतमसकृच्चैतन्मुनिभिस्तत्त्वचिंतकैः ॥ १९ ॥ मुक्तिस्थानान्यनेकानिकृतस्तत्रापिनिर्णयः ॥ तानितेकथयाम्यत्रदत्तावित्तावक्षणम् ॥ २० ॥ प्रथमंतीर्थराजंतुप्रयागाख्यंसुविश्रुतम् ॥ कामिकंसर्वतीर्थानांधर्मकामार्थमोक्षदम् ॥ २१ ॥ नैमिषंचकुरुक्षेत्रंगंगाद्वारमवंतिका ॥ अयोध्यामथुराचै वद्वारकाप्यमरावती ॥ २२ ॥ सरस्वतीसिंधुसंगोगंगासागरसंगमः ॥ कांतीचन्यंवकंचापिसप्तगोदावरीतटम् ॥ २३ ॥ कालंजरंप्रभासश्चतथाबद रिकाश्रमः ॥ महालयस्तथोंकारक्षेत्रंवैपौरुषोत्तमम् ॥ २४ ॥

गोकर्णोभृगुकच्छश्चभृगुतुंगश्चपुष्करम् ॥ श्रीपर्वतादितीर्थानिधारातीर्थंतथैवच ॥ २५ ॥ मानसान्यपितीर्थानिसत्यादीनिचवैप्रिये ॥ एतानिमु क्तिदान्येवनात्रकार्याविचारणा ॥ २६ ॥ गयातीर्थंचयत्प्रोक्तंतत्पितॄणांहिमुक्तिदम् ॥ पितामहानामृणतोमुक्तास्तत्तानयाअपि ॥ २७ ॥ सध र्मिण्युवाच ॥ ॥ मानसान्यपितीर्थानियान्युक्तानिमहामते ॥ कानिकानिचतानीहब्रूतेदाख्यातुमर्हसि ॥ २८ ॥ ॥ अगस्त्यउवाच ॥ ॥ शृणुतीर्थानिगदतोमानसानिममानघे ॥ येषुसम्यङ्नरःस्नात्वाप्रयातिपरमांगतिम् ॥ २९ ॥ सत्यंतीर्थंक्षमातीर्थंतीर्थमिन्द्रियनिग्रहः ॥ सर्वभूतदयातीर्थंतीर्थमार्जवमेवच ॥ ३० ॥ दानंतीर्थंदमस्तीर्थंसंतोषस्तीर्थमुच्यते ॥ ब्रह्मचर्यंपरंतीर्थंतीर्थंचप्रियवादिता ॥ ३१ ॥ ज्ञानंतीर्थंधृतिस्तीर्थंतपस्तीर्थ मुदाहृतम् ॥ तीर्थानामपितत्तीर्थंविशुद्धिर्मनसःपरा ॥ ३२ ॥ नजलाप्लुतदेहस्यस्नानमित्यभिधीयते ॥ सस्नातोयोदमस्नातःशुचिःशुद्धमनोमलः ॥ ३३ ॥ योलुब्धः पिशुनःक्रूरोदांभिकोविषयात्मकः ॥ सर्वतीर्थेष्वपिस्नातःपापोमलिनएवसः ॥ ३४ ॥ नशरीरमलत्यागान्नरोभवतिनिर्मलः ॥ मानसेतुमलेत्यक्तेभवत्यंतःसुनिर्मलः ॥ ३५ ॥

जायंतेचम्रियंतेचजलेष्वेवजलौकसः ॥ नचगच्छंतितेस्वर्गमविशुद्धमनोमलाः ॥ ३६ ॥ विषयेष्वतिसंरागोमानसोमलउच्यते ॥ तेष्वेंवहिविरागो स्यनैर्मल्यंसमुदाहृतम् ॥ ३७ ॥ चित्तमंतर्गतंदुष्टंतीर्थस्नानान्नशुद्धचति ॥ शतशोथजलैर्धौतंसुराभांडमिवाशुचि ॥ ३८ ॥ दानमिज्यातपःशौ चंतीर्थसेवाश्रुतंतथा ॥ सर्वाण्येतान्यतीर्थानियदिभावोननिर्मलः ॥ ३९ ॥ निगृहीतेंद्रियग्रामोयत्रैवचवसेन्नरः ॥ तत्रतस्यकुरुक्षेत्रंनैमिषंपुष्करा णिच ॥ ४० ॥ ज्ञानपूतेज्ञानजलेरागद्वेषमलापहे ॥ यःस्नातिमानसेतीर्थेसयातिपरमांगतिम् ॥ ४१ ॥ एतत्तेकथितंदेविमानसंतीर्थलक्षणम् ॥ भौमानामपितीर्थानांपुण्यत्वेकारणंशृणु ॥ ४२ ॥ यथाशरीरस्योदेशाःकेचिन्मेध्यतमाःस्मृताः ॥ तथापृथिव्यामुदेशाःकेचित्पुण्यतमाःस्मृताः ॥ ४३॥ प्रभावादद्भुताद्भूमेःसलिलस्यचतेजसः ॥ परिग्रहान्मुनीनांचतीर्थानांपुण्यतास्मृता ॥ ४४ ॥ तस्माद्भौमेषुतीर्थेषुमानसेषुचनित्यशः ॥ उभयेष्व पियःस्नातिसयातिपरमांगतिम् ॥ ४५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच ॥ अदत्त्वाकांचनंगाश्चदरिद्रोनामजायते ॥ ४६ ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ नतत्फलमवा
प्नोतितीर्थाभिगमनेनयत् ॥ ४७ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ ४८ ॥ प्रतिग्रहादुपावृत्तः
संतुष्टोयेनकेनचित् ॥ अहंकारविमुक्तश्चसतीर्थफलमश्नुते ॥ ४९ ॥ अदंभकोनिरारंभोलघ्वाहारोजितेंद्रियः ॥ विमुक्तःसर्वसंगैर्यःसतीर्थफलमश्नुते
॥५०॥ अकोपनोऽमलमतिःसत्यवादीदृढव्रतः ॥ आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते ॥ ५१ ॥ तीर्थान्यनुसरन्धीरःश्रद्दधानःसमाहितः ॥ कृतपापो
विशुद्ध्येतकिंपुनःशुद्धकर्मकृत् ॥ ५२ ॥ तिर्यग्योनिंनवैगच्छेत्कुदेशेनैवजायते ॥ नदुःखीस्यात्स्वर्गभाक्चमोक्षोपायंचविंदति ॥ ५३ ॥ अश्रद्दधानः
पापात्मानास्तिकोऽच्छिन्नसंशयः ॥ हेतुनिष्ठश्चपंचैतेनतीर्थफलभागिनः ॥ ५४ ॥ तीर्थानिचयथोक्तेनविधिनासंचरंतिये ॥ सर्वद्वंद्वसहाधीरास्तेनराः
स्वर्गभागिनः ॥ ५५ ॥ तीर्थयात्रांचिकीर्षुःप्राग्विधायोपोषणंगृहे ॥ गणेशंचपितॄन्विप्रान्साधूञ्छक्त्याप्रपूज्यच ॥ ५६ ॥ कृतपारणकोहृष्टोगच्छे
न्नियमधृक्पुनः ॥ आगत्याभ्यर्च्यचपितॄन्यथोक्तफलभाग्भवेत् ॥ ५७ ॥ नपरीक्ष्योद्विजस्तीर्थेष्वन्नार्थीभोज्यएवच ॥ सक्तुभिःपिंडदानंचचरुणा
पायसेनच ॥ ५८ ॥ कर्तव्यमृषिभिर्दृष्टंपिण्याकेनगुडेनच ॥ श्राद्धंतत्रप्रकर्तव्यमर्घ्यावाहनवर्जितम् ॥ ५९ ॥ अकालेप्यथवाकालेतीर्थेश्राद्धंचतर्प
णम् ॥ अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् ॥ ६० ॥ तीर्थंप्राप्यप्रसंगेनस्नानंतीर्थेसमाचरेत् ॥ स्नानजंफलमाप्नोतितीर्थयात्राश्रितंनच ॥ ६१ ॥
नृणांपापकृतांतीर्थेपापस्यशमनंभवेत् ॥ यथोक्तफलदंतीर्थंभवेच्छ्रद्धात्मनांनृणाम् ॥ ६२ ॥ षोडशांशंसलभतेयःपरार्थंचगच्छति ॥ अर्धंतीर्थफलं
तस्ययःप्रसंगेनगच्छति ॥ ६३ ॥ कुशप्रतिकृतिंकृत्वातीर्थवारिणिमज्जयेत् ॥ मज्जयेच्चयमुद्दिश्यसोष्टमांशंलभेतवै ॥ ६४ ॥ तीर्थोपवासःकर्तव्यः
शिरसोमुंडनंतथा ॥ शिरोगतानिपापानियांतिमुंडनतोयतः ॥ ६५ ॥ यदह्नितीर्थप्राप्तिःस्यात्ततोह्नःपूर्ववासरे ॥ उपवासस्तुकर्तव्यःप्राप्ताह्निश्राद्धदो
भवेत् ॥ ६६ ॥ तीर्थप्रसंगात्तीर्थांगमप्युक्तंत्वत्पुरोमया ॥ स्वर्गसाधनमेवैतन्मोक्षोपायश्चवैभवेत् ॥ ६७ ॥ काशीकांतीचमायाख्यात्वयोध्याद्वार
वत्यपि ॥ मथुरावंतिकाचैताःसप्तपुर्योत्रमोक्षदाः ॥ ६८ ॥ श्रीशैलोमोक्षदःसर्वःकेदारोपिततोऽधिकः ॥ श्रीशैलाच्चापिकेदारात्प्रयागंमोक्षदंपरम् ॥६९॥
प्रयागादपितीर्थाग्र्यादविमुक्तंविशिष्यते ॥ यथाविमुक्तेनिर्वाणंनतथाक्वाप्यसंशयम् ॥ ७० ॥ अन्यानिमुक्तिक्षेत्राणिकाशीप्राप्तिकराणिच ॥ काशीं
प्राप्यापिमुच्येतनान्यथातीर्थकोटिभिः ॥ ७१ ॥ अत्रार्थेकथयिष्येहमितिहासंपुरातनम् ॥ यथाविष्णुगणैरुक्तंद्विजायशिवशर्मणे ॥ ७२ ॥ तीर्था
ध्यायमिमंश्रुत्वानरोनियतमानसः ॥ श्रावयित्वाद्विजांश्चापिश्रद्धाभक्तिसमन्वितान् ॥ ७३ ॥ क्षत्रियान्धर्मनिरतान्वैश्यान्सन्मार्गवर्तिनः ॥ शूद्रा
न्द्विजेषुभक्तांश्चनिष्पापोजायतेद्विजः ॥ ७४ ॥ इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेतीर्थाध्यायोनामषष्ठोऽ
ध्यायः ॥ ६ ॥ ॥ अगस्तिरुवाच ॥ ॥ मथुरायांद्विजःकश्चिदभूद्भूदेवसत्तमः ॥ तस्यपुत्रोमहातेजाःशिवशर्मेतिविश्रुतः ॥ १ ॥ अधीत्यवे
दान्विधिवदर्थंविज्ञायतत्त्वतः ॥ पठित्वाधर्मशास्त्राणिपुराणान्यधिगम्यच ॥ २ ॥ अंगान्यभ्यस्यतर्कांश्चपरिलोड्यसमंततः ॥ मीमांसाद्वयमालो
क्यधनुर्वेदंविगाह्यच ॥ ३ ॥
आयुर्वेदंविचार्यापिनाट्यवेदेकृतश्रमः ॥ अर्थशास्त्राण्यनेकानिप्राप्याश्वगजचेष्टितम् ॥ ४ ॥ कलासुचकृताभ्यासोमन्त्रशास्त्रविचक्षणः ॥ भाषाश्चनाना
देशानांलिपीर्ज्ञात्वाविदेशजाः ॥ ५ ॥ अर्थानुपार्ज्यधर्मेणभुक्त्वाभोगान्यदृच्छया ॥ उत्पाद्यपुत्रान्सुगुणांस्तेभ्योह्यर्थंविभज्यच ॥ ६ ॥ यौवनं
गत्वरंज्ञात्वाजरांदृष्ट्वाश्रितांश्रुतिम् ॥ चिन्तामवापमहतींशिवशर्माद्विजोत्तमः ॥ ७ ॥ पठतोमेगतःकालस्तथोपार्जयतोधनम् ॥ नाराधितोम
हेशानःकर्मनिर्मूलनक्षमः ॥ ८ ॥ नमयातोषितोविष्णुःसर्वपापहरोहरिः ॥ सर्वकामप्रदोनृणांगणेशोनार्चितोमया ॥ ९ ॥ तमस्तोमहरःसूर्योनार्चि
तोवैमयाक्वचित् ॥ महामायाजगद्धात्रीनध्याताभवबंधहृत् ॥ १० ॥ नप्रीणितामयादेवायज्ञैःसर्वैःसमृद्धिदाः ॥ तुलसीवनशुश्रूषानकृतापापशांतये
॥ ११ ॥ नमयातर्पिताविप्रामृष्टान्नैर्मधुरैरसैः ॥ इहापिचपरत्रापिविपदामनुतारकाः ॥ १२ ॥ बहुपुष्पफलोपेताःसुच्छायाःस्निग्धपल्लवाः ॥
पथिनारोपितावृक्षाइहामुत्रफलप्रदाः ॥ १३ ॥ दुकूलैःस्वानुकूलैश्चचोलैःप्रत्यंगभूषणैः ॥ नालंकृताःसुवासिन्यइहामुत्रसुवासदाः ॥ १४ ॥ द्विजायनोर्व
रादत्तायमलोकनिवारिणी ॥ सुवर्णंनसुवर्णायदत्तंदुरितहृत्परम् ॥१५॥ नालंकृतासवत्सागौःपात्रायप्रतिपादिता ॥ इहपापापहंत्र्याशुसप्तजन्मसुखावहा
॥ १६ ॥ ऋणापनुत्तेयमातुःकारितोनजलाशयः ॥ नातिथिस्तोषितःक्वापिस्वर्गमार्गप्रदर्शकः ॥ १७ ॥
छत्रोपानत्कुंडिकाश्चनाध्वगायसमर्पिताः ॥ यास्यतःसंयमिन्यांहिस्वर्गमार्गसुखप्रदाः ॥ १८ ॥ नचकन्याविवाहार्थंवसुक्वापिमयार्पितम् ॥ इहसौ
ख्यसमृद्ध्यर्थंदिव्यकन्यार्पकंदिवि ॥ २९ ॥ नवाजपेयावभृथेस्नातोलोभवशादहम् ॥ इहजन्मनिचान्यस्मिन्बहुमृष्टान्नपानदे ॥ २० ॥ नमयास्था
पितंलिंगंकृत्वादेवालयंशुभम् ॥ यस्मिन्संस्थापितेलिंगेविश्वंसंस्थापितंभवेत् ॥ २१ ॥ विष्णोरायतनंनैवकृतंसर्वसमृद्धिदम् ॥ नचसूर्यगणेशानां
प्रतिमाःकारितामया ॥ २२ ॥ नगौरीनमहालक्ष्मीश्चित्रेपिपरिलेखिते ॥ प्रतिमाकरणेचैषांनकुरूपोनदुर्भगः ॥ २३ ॥ सुसूक्ष्माणिविचित्राणिनो
ज्ज्वलान्यंबराण्यपि ॥ समर्पितानिविप्रेभ्योदिव्यांबरसमृद्धये ॥ २४ ॥ नतिलाश्चघृतेनाक्ताःसुसमिद्धेहुताशने ॥ हुतावैमन्त्रपूताश्चसर्वपापापनुत्तये
॥ २५ ॥ श्रीसूक्तंपावमानीचब्राह्मणोमंडलानिच ॥ जप्तंपुरुषसूक्तंनपापारिशतरुद्रियम् ॥ २६ ॥ अश्वत्थसेवानकृतात्यक्त्वाचार्कंत्रयोदशीम् ॥
सद्यःपापहरासाहिनरात्रौनभृगोर्दिने ॥ २७ ॥ शयनीयंनचोत्सृष्टंमृदुलाचप्रतूलिका ॥ दीपीदर्पणसंयुक्तंसर्वभोगसमृद्धिदम् ॥ २८ ॥ अजाश्वम
हिषीमेषीदासीकृष्णाजिनंतिलाः ॥ सकरंभास्तोयकुंभानासनंमृदुपादुके ॥ २९ ॥ पादाभ्यंगंदीपदानंप्रपादानंविशेषतः ॥ व्यजनंवस्त्रतांबूलं
तथान्यन्सुखवासकृत् ॥ ३० ॥ नित्यश्राद्धंभूतबलिंतथाऽतिथिसमर्चनम् ॥ विशंत्यन्यानिदत्त्वाचप्रशस्यानियमालये ॥ ३१ ॥
नयमंयमदूतांश्चनयामीरपियातनाः ॥ पश्यन्तितेपुण्यभाजोनैतच्चापिकृतंमया ॥ ३२ ॥ कृच्छ्रचांद्रायणादीनितथानक्तव्रतानिच ॥ शरीरशुद्धिकारी
णिनकृतानिक्वचिन्मया ॥ ३३ ॥ गवाह्निकं च नोदत्तंगोकंडूतिर्नवकृता ॥ नोद्धृतापंकमग्नागौर्गोलोकसुखदायिनी ॥ ३४ ॥ नार्थिनःप्रार्थितैरर्थैः
कृतार्थाहिमयाकृताः ॥ देहिदेहीतिजल्पाकोभविष्याम्यन्यजन्मनि ॥ ३५ ॥ नवेदानचशास्त्राणिनार्थोदारानतोसुतः ॥ नक्षेत्रंनचहर्म्यादिमायां
तमनुयास्यति ॥ ३६ ॥ शिवशर्मेतिसंचिंत्यबुद्धिंसंधायसर्वतः ॥ निश्चिकायमनस्येवंभवेत्क्षेमतरंमम ॥ ३७ ॥ यावत्स्वस्थोस्तिमेदेहोयावन्नेंद्रिय
विक्लवः ॥ तावत्स्वश्रेयसंहितुंतीर्थयात्रांकरोम्यहम् ॥ ३८ ॥ दिनानिपंचपाण्येवमतिवाह्यगृहेद्विजः ॥ शुभेतिथौशुभेवारेशुभलग्नबलेद्विजः ॥३९॥
उपोष्यरजनीमेकांप्रातःश्राद्धंविधायच ॥ गणेशान्ब्राह्मणान्नत्वाभुक्त्वाप्रस्थितवान्सुधीः ॥ ४० ॥ इतिनिश्चत्यनिर्वाणपदनिःश्रेणिकांपराम् ॥
सर्वेषामेवजंतूनांतत्रसंस्थितिकारिणाम् ॥ ४१ ॥ अथपंथानमाक्रम्यकियंतमपिसद्विजः ॥ मुहूर्तंपथिविश्रम्याचिंतयत्प्राक्क्वयाम्यहम् ॥४२॥
भुवितीर्थान्यनेकानिलोलमायुश्चलंमनः ॥ ततःसप्तपुरीर्यायांसर्वतीर्थानितत्रयत् ॥ ४३ ॥ अयोध्यांचपुरींगत्वासरयूमवगाह्यच ॥ तत्तत्तीर्थेषुसं
तर्प्यपितॄन्पिंडप्रदानतः ॥ ४४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पंचरात्रमुषित्वातुब्राह्मणान्परिभोज्यच ॥ प्रयागमगमद्विप्रस्तीर्थराजंसुहृष्टवत् ॥ ४५ ॥ सिताऽसितेसरिच्छ्रेष्ठेयत्रास्तांसुरदुर्लभे ॥ यत्राप्लुतोनरः पापःपरंब्रह्माधिगच्छति ॥ ४६ ॥ क्षेत्रंप्रजापतेःपुण्यंसर्वेषामेवदुर्लभम् ॥ लभ्यतेपुण्यसंभारैर्नान्यथाऽर्थस्यराशिभिः ॥ ४७ ॥ दमयंतींकलिंकालं कलिंदतनयांशुभाम् ॥ आगत्यमिलितायत्रपुण्यास्वर्गतरंगिणी ॥ ४८ ॥ प्रकृष्टंसर्वयागेभ्यःप्रयागमितिगीयते ॥ यज्वनांपुनरावृत्तिर्नप्रयागार्द्र वर्ष्मणाम्॥४९॥यत्रस्थितःस्वयंसाक्षाच्छूलटंकोमहेश्वरः ॥ तत्राप्लुतानांजंतूनांमोक्षवर्त्मोपदेशकः॥५०॥ तत्राऽक्षय्यवटोऽप्यस्तिसप्तपातालमूलवान्॥ प्रलयेपियमारुह्यमृकंडतनयोवसत् ॥ ५१ ॥ हिरण्यगर्भोविज्ञेयःससाक्षाद्वटरूपधृक् ॥ तत्समीपेद्विजान्भक्त्यासंभोज्याक्षयपुण्यभाक् ॥ ५२ ॥ यत्रलक्ष्मीपतिःसाक्षाद्वैकुंठादेत्यमानवान् ॥ श्रीमाधवस्वरूपेणनयेद्विष्णोःपरंपदम् ॥ ५३ ॥ श्रुतिभिःपरिपठ्येतेसिताऽसितसरिद्वरे ॥ तत्राप्लुतां गाह्यमृतंभवंतीतिविनिश्चितम् ॥ ५४ ॥ शिवलोकाद्ब्रह्मलोकादुमालोकवरात्पुनः॥कुमारलोकाद्वैकुंठात्सत्यलोकात्समंततः ॥ ५५ ॥ तपोजनमहर्भ्य श्चसर्वेस्वर्लोकवासिनः ॥ भुवोलोकाच्चभूर्लोकान्नागलोकात्तथाऽखिलात् ॥ ५६ ॥ अचलाहिमवन्मुख्याःकल्पवृक्षादयोनगाः ॥ स्नातुंमाघेसमायां तिप्रयागमरुणोदये ॥ ५७ ॥ दिगंगनाःप्रार्थयंतियत्प्रयागानिलानपि ॥ तेपिनःपावयिष्यंतिकिंकुर्मःपंगवोवयम् ॥ ५८ ॥ अश्वमेधादियागाश्चप्रया गस्यरजःपुनः ॥ तुलितंब्रह्मणापूर्वंनतेतद्रजसासमाः ॥ ५९ ॥ मज्जागतानिपापानिबहुजन्मार्जितान्यपि ॥ प्रयागनामश्रवणात्क्षीयंतेऽतीवविह्वलम् ॥ ६० ॥ धर्मतीर्थमिदंसम्यगर्थतीर्थमिदंपरम् ॥ कामिकंतीर्थमेतच्चमोक्षतीर्थमिदंध्रुवम् ॥ ६१ ॥ ब्रह्महत्यादिपापानितावद्गर्जंतिदेहिषु ॥ यावन्मज्जं तिनोमाघेप्रयागेपापहारिणि ॥ ६२ ॥

तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ एतद्यत्पठ्यतेवेदेतत्प्रयागंपुनःपुनः ॥ ६३ ॥ सरस्वतीरजोरूपातमोरूपाकलिंदजा ॥ सत्त्वरूपाचगंगात्र नयंतिब्रह्मनिर्गुणम् ॥ ६४ ॥ इयंवेणीहिनिःश्रेणीब्रह्मणोवर्त्मयास्यतः ॥ जंतोर्विशुद्धदेहस्यश्रद्धाऽश्रद्धाप्लुतस्यच ॥ ६५ ॥ काशीतिकाचिदबलाभु वनेपुरूढालोलार्ककेशवविलोलविलोचनाच ॥ तद्दोर्युगंचवरणासिरियंतदीयावेणीतियाऽत्रगदिताऽक्षयशर्मभूमिः ॥ ६६ ॥ ॥ अगस्तिरुवाच ॥ ॥ सुधर्मिणिगुणांस्तस्यकोत्रवर्णयितुंक्षमः ॥ तीर्थराजप्रयागस्यतीर्थैःसंसेवितस्यच ॥ ६७ ॥ पापिनांयानिपापानिप्रसह्यक्षालितान्यहो ॥ तच्छुद्ध्यैसेव्यतेतीर्थैःप्रयागमधिकंततः ॥ ६८ ॥ प्रयागस्यगुणान्ज्ञात्वाशिवशर्माद्विजःसुधीः ॥ तत्रमाघमुषित्वाऽथप्रापवाराणसींपुरीम् ॥ ६९ ॥ प्रवेशएवसंवीक्ष्यसदेहलिविनायकम् ॥ अन्वलिंपत्ततोभक्त्यासाज्यसिंदूरकर्दमैः ॥७०॥ निवेद्यमोदकान्पंचवंचयंतंनिजंजनम् ॥ महोपसर्गवर्गेभ्यस्ततो ऽतःक्षेत्रमाविशत् ॥७१॥ आगत्यदृष्ट्वामणिकर्णिकायामुदग्वहांस्वर्गतरंगिणींसः ॥ संक्षीणपुण्येतरपुण्यकर्मणांनृणांगणैःस्थाणुगणैरिवावृताम् ॥७२॥ सचैलमाप्लुत्यजलेऽमलेऽमलेऽविलंबमालंबितशुद्धबुद्धिः ॥ संतर्प्यदेवर्षिमनुष्यदिव्यपितॄन्पितॄन्स्वान्सहिकर्मकांडवित् ॥ ७३ ॥ विधायचद्राक्स हिपंचतीर्थिकांविश्वेशमाराध्यततोयथास्वम् ॥ पुनःपुनर्वीक्ष्यपुरींपुरारेरिदंमयालोकिनवेतिविस्मितः ॥ ७४ ॥ नस्वःपुरीसात्वनपापुरासमं समंजसापिप्रतिसाम्यमावहेत् ॥ प्रबंधभेदाद्व्यतिरिक्तपुस्तकप्रतिर्यथासल्लिपिभेदभंगतः ॥ ७५ ॥

पयोपियत्रत्यमचिंत्यवैभवंदिविस्थितासाधुसुधाप्यतोमुधा ॥ तथाप्रसूतेस्तुपयोधरेपयोनपीयतेपीतमिदंयदिक्वचित् ॥ ७६ ॥ अनामयाश्चिंतनयान येशितुर्जनामनाग्यत्रविनापिनाकिना ॥ नकर्मसत्कर्मकृतोपिकुर्वतेऽनुकुर्वतेशर्वगणांश्चसर्वतः॥७७॥नवर्ण्यतेकैःकिलकाशिकेयंजंतोःस्थितस्यात्रयतो तकाले ॥ पचेलिमैःप्राक्कृतपुण्यभारैरोंकारमोंकारयतींदुमौलिः ॥ ७८ ॥ संसारिचिंतामणिरत्रयस्मात्तंतारकंसज्जनकर्णिकायाम् ॥ शिवोभिधत्ते सहसांबकालेतदीयतेसौमणिकर्णिकेति ॥ ७९ ॥ मुक्तिलक्ष्मीमहापीठमणिस्तच्चरणाब्जयोः ॥ कर्णिकेयंततःप्राहुर्यांजनामणिकर्णिकाम् ॥ ८० ॥ जरायुजांडजोद्भिज्जाःस्वेदजाह्यत्रवासिनः ॥ नसमामोक्षभाजस्तेत्रिदशैर्मुक्तिदुर्दशैः ॥ ८१ ॥ ममजन्मवृथाजातंदुर्वृत्तस्यजडात्मनः ॥ नाद्ययावन्मयै क्षिष्टकाशिकामुक्तिकाशिका ॥ ८२ ॥ पुनःपुनश्चतत्क्षेत्रमतिथीकृत्यनेत्रयोः ॥ विचित्रंचपवित्रंचतृप्तिंनाधिजगामह ॥ ८३ ॥ सप्तानांचपुरीणांहिधुरी णामवयाम्यहम् ॥ वाराणसींसुनिर्वाणविश्राणनविचक्षणाम् ॥ ८४ ॥ तथापिनचतस्रोन्यामयादृग्गोचरीकृताः ॥ तासांप्रभावंविज्ञायाप्यागमिष्याम्य हंपुनः ॥ ८५ ॥ तीर्थयात्रांप्रतिदिनंकुर्वन्नूनंसवत्सरम् ॥ नप्रापसर्वतीर्थानितीर्थंकाश्यांतिलेतिले ॥ ८६ ॥ ॥ अगस्तिरुवाच ॥ ॥ जानन्न पिगुणान्देविक्षेत्रस्यास्यपरान्द्विजः ॥ नानाप्रमाणैःप्रवणोनिरगात्सतथाप्यहो ॥ ८७ ॥ किंकुर्वंतिहिशास्त्राणिसप्रमाणानिसुंदरि ॥ महामायांभवित्रींतां कोनिवारयितुंक्षमः ॥ ८८ ॥ कःसमुच्चलितंचेतस्तोयंवासंप्रतीपयेत् ॥ प्रोच्चस्थानस्थितमपिस्वभावोयच्चलस्तयोः ॥ ८९ ॥ शिवशर्माव्रजन्सोथदे शाद्देशांतरंक्रमात् ॥ महाकालपुरींप्रापकलिकालविवर्जिताम् ॥ ९० ॥ कल्पेकल्पेखिलंविश्वंकालयेद्यःस्वलीलया ॥ तंकालंकलयित्वायो महाकालोभवत्किल ॥ ९१ ॥

पापादवंतीसाविश्वमवंतीतिनिगद्यते ॥ युगेयुगेन्यनाम्नीसाकलावुज्जयिनीतिच ॥ ९२ ॥ विपन्नोयत्रवैजंतुःप्राप्यापिशवतांस्फुटम् ॥ नपूतिगंधमाप्नो तिसमुच्छ्रयतिनक्वचित् ॥ ९३ ॥ यमदूतानयस्यांहिप्रविशंतिकदाचन ॥ परःकोटीनिलिंगानितस्यांसंतिपदेपदे ॥ ९४ ॥ हाटकेशोमहाकालस्तारके शस्तथैवच ॥ एकंलिंगंत्रिधाभूत्वात्रिलोकींव्याप्यसंस्थितम् ॥ ९५ ॥ ज्योतिःसिद्धवटेज्योतिस्तेपश्यंतीहयेद्विजाः ॥ अथवाश्रीमहाकालद्रष्टारः पुण्यराशयः ॥ ९६ ॥ महाकालस्यतल्लिंगंयैर्दृष्टंकष्टिभिःक्वचित् ॥ नस्पृष्टास्तेमहापापैर्नदृष्टास्तेयमोद्भटैः ॥ ९७ ॥ महाकालपताकाग्रैःस्पृष्टपृष्ठास्तुरं गमाः ॥ अरुणस्यकशाघातंक्षणंविश्रमयंतिखे ॥ ९८ ॥ महाकालमहाकालमहाकालेतिसंततम् ॥ स्मरतःस्मरतोनित्यंस्मरकर्तृस्मरांतकौ ॥ ९९ ॥ एवमाराध्यभूतेशंमहाकालंततोद्विजः ॥ जगामनगरींकांतींकांतांत्रिभुवनादपि ॥ १०० ॥ लक्ष्मीकांतःस्वयंसाक्षाज्जंतूंस्तत्रनिवासिनः ॥ श्रीकांताने वकुरुतेपरत्रेहचनिश्चितम् ॥ १ ॥ दृष्ट्वाकांतींकांतिमतींकांतिमद्भिर्निषेविताम् ॥ कांतिमानभवत्सोपिनाकांतिस्तत्रकस्यचित् ॥ २ ॥ तत्रकृत्यं चयत्कृत्यंतत्कृत्वासर्वकृत्यवित् ॥ सप्तरात्रमुषित्वातुययोद्वारवतींपुरीम् ॥ ३ ॥ चतुर्णामपिवर्गाणांयत्रद्वाराणिसर्वतः ॥ अतोद्वारवतीत्युक्ता विद्वद्भिस्तत्त्ववेदिभिः ॥ ४ ॥ अस्थीन्यपिचजंतूनांयत्रचक्रांकितान्यहो ॥ किंचित्रंतत्रयत्रस्युःशंखचक्रांकितैःकरैः ॥ ५ ॥

अंतकःशिक्षयत्येवंनिजदूतान्मुहुर्मुहुः ॥ तेत्याज्यायैर्द्वारवत्यानामापिपरिगृह्यते ॥ ६ ॥ श्रीखंडेक्वसआमोदःस्वर्णेवर्णःक्वतादृशः ॥ तत्पावित्र्यंक्ववै तीर्थेतद्गोपीचंदनेयथा ॥ ७ ॥ दूताःशृण्वंतुयद्भालंगोपीचंदनलांछितम् ॥ ज्वलदिंगलवत्सोपिदूरेत्याज्यःप्रयत्नतः ॥ ८ ॥ तुलस्यलंकृतायेयेतुलसी नामजापकाः ॥ तुलसीवनपालायेतेत्याज्यादूरतोभटाः ॥ ९ ॥ युगेयुगेद्वारवत्यारत्नानिपरितोमुषन् ॥ अब्धीरत्नाकरोद्यापिलोकेषुपरिगीयते ॥ ११० ॥ द्वारवत्यांम्रियंतेयेजंतवःकालनोदिताः ॥ चतुर्भुजाःस्युर्वैकुंठेतेपीतांबरधारिणः ॥ ११ ॥ तत्रापिसंतर्प्यपितॄन्ससदेवर्षिमानवान् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत्रतेषुचतीर्थेषुसस्नौसर्वेष्वतंद्रितः ॥ १२ ॥ ततोमायापुरींप्राप्तोदुष्प्रापांपापकारिभिः ॥ यत्रसावैष्णवीमायामायापाशैर्नपाशयेत् ॥ १३ ॥ केचिदूचुर्ह
रिद्वारंमोक्षद्वारंततःपरे ॥ गंगाद्वारंचकेप्याहुःकेचिन्मायापुरंपुनः ॥ १४ ॥ यतोविनिर्गतागंगाख्याताभागीरथीभुवि ॥ यन्नामोच्चारणात्पुंसांपापंया
तिसहस्रधा ॥ १५ ॥ वैकुंठस्यैकसोपानंहरिद्वारंजगुर्जनाः ॥ अत्राप्लुतानरायांतितद्विष्णोःपरमंपदम् ॥ १६ ॥ तीर्थोपवासकंकृत्वानिशाजागरणं
तथा ॥ प्रातःस्नात्वाचगंगायांतर्प्यान्संतर्प्यसर्वतः ॥ १७ ॥ यावत्सपारणंकर्तुमियेपद्विजसत्तमः ॥ तावच्छीतज्वराक्रांतश्चकंपेऽत्यर्थमातुरः ॥ १८॥
वैदेशिकस्तथैकाकीतथाऽतिज्वरपीडितः ॥ चिंतामवापमहतींकिमेतत्समुपस्थितम् ॥ १९ ॥ चिंतार्णवेनिमग्नोभूत्त्यक्ताशोजीवितेधने ॥ सांयात्रि
कइवागाधेभिन्नपोतोमहार्णवे ॥ १२० ॥ क्वक्षेत्रंक्वकलत्रंमेक्वपुत्राःक्वचतद्वसु ॥ क्वतद्विचित्रंवैहर्म्यंक्वसापुस्तकसंभृतिः ॥ २१ ॥ अद्यापिनायुःपर्याप्तंप
लितंनतथामयि ॥ ज्वरोयंदारुणः प्राप्तःकालज्ञश्चातिदारुणः॥२२॥मृत्युर्मूर्ध्निकृतावासोवासोदूरेव्यवस्थितः ॥ अग्नौगृहोपरिप्राप्तेकूपंतुखनयेदिह॥२३॥
किमेभिश्चिंतनैर्व्यर्थैरतितापकरैर्मम ॥ चिंतयामिहृषीकेशंशिवदंशिवमेवच ॥ २४ ॥ अथवामुक्त्युपायोवैमयैकःसदनुष्ठितः ॥ मुक्तिपुर्यस्तुसप्त
ताःस्वनेत्रविषयीकृताः ॥ २५ ॥ स्वर्गापवर्गयोरेकःसाध्योहिविदुषाध्रुवम् ॥ तयोरसाधनेपश्चात्संतापेनचतप्यते ॥ २६ ॥ अथवाचिंतयाकिंमे
त्वनयादुरवस्थया ॥ रणेवामरणंश्रेयस्तीर्थेवात्रयथामम ॥ २७ ॥ किमहंमंदभागीवरथ्यांक्वापिम्रियेधुना ॥ भागीरथ्यांम्रियेचाद्यकाचिंताममगूढवत्
॥ २८ ॥ चर्मास्थिसंचयेनाहमनेनवपुषाध्रुवम् ॥ प्राप्स्यामिनिधनादत्रसिद्धिंनैःश्रेयसींध्रुवम् ॥ २९ ॥ एवंचिंतयतस्तस्यपीडासीदतिदारुणा ॥
कोटिवृश्चिकदष्टस्ययावस्थातामवापसः ॥ १३० ॥ स्मर्तव्यंविस्मृतंसर्वंक्वाहंकोहंनवेत्तिच ॥ दिनानिसप्तसप्तेतिस्थित्वापंचत्वमागतः ॥ ३१ ॥
तावद्वैकुंठभुवनाद्विमानंसमुपस्थितम् ॥ तार्क्ष्योपलक्षितोयत्रध्वजश्चातिसमुच्छ्रितः ॥ ३२ ॥ अधिष्ठितंसुकन्यानांस्वर्णकौशेयवाससाम् ॥ चाम
रव्यग्रहस्तानांसहस्रेणातिविस्तृतम् ॥३३॥ पुण्यशीलसुशीलाभ्यांगणाभ्यांचविराजितम् ॥ चतुर्भुजाभ्यांस्वास्याभ्यांकिंकिणीजालमालितम् ॥३४॥
तद्विमानमथारुह्यपीतवासाश्चतुर्भुजः ॥ अलंचक्रेनभोवर्त्मसद्विजोदिव्यभूषणः ॥ १३५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां
चतुर्थेकाशीखंडेपूर्वार्द्धेसप्तपुरीवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ लोपामुद्रोवाच ॥ ॥ जीवितेशकथामेतांपुण्यांपुण्यपुरीश्रिताम् ॥
नतृप्तिमधिगच्छामिश्रुत्वात्वच्छ्रीमुखेरिताम् ॥ १ ॥ मायापुर्यांमुक्तिपुर्यांशिवशर्माद्विजोत्तमः ॥ मृतोपिमोक्षंनैवापब्रूहितत्कारणंविभो ॥ २ ॥ ॥
अगस्त्यउवाच ॥ ॥ साक्षान्मोक्षोनचैतासुपुरीषुप्रियभाषिणि ॥ पुरोद्दिश्यामुमेवार्थमितिहासोमयाश्रुतः ॥ ३ ॥
शृणुकतिविचित्रार्थांकथांपापप्रणाशिनीम् ॥ पुण्यशीलसुशीलाभ्यांकथितांशिवशर्मणे ॥४॥ शिवशर्मोवाच ॥ अयिविष्णुगणौपुण्यौपुंडरीकदलेक्षणौ ॥
किंचिद्विज्ञप्तुकामोहंप्रबद्धकरसंपुटः ॥ ५ ॥ ननामयुवयोर्वेद्मिवेद्म्याकृत्याचकिंचन ॥ पुण्यशीलसुशीलाख्यौयुवांभवितुमर्हथः ॥ ६ ॥ ॥ गणा
वूचतुः ॥ ॥ भगवद्भक्तियुक्तानांकिमज्ञातंभवादृशाम् ॥ एतदेवहिनोनामयदुक्तंश्रीमतात्वया ॥ ७ ॥ यदन्यदपितेचित्तेप्रष्टव्यंतदशंकितम् ॥
संपृच्छस्वमहाप्राज्ञप्रीत्यातत्प्रब्रवावहे ॥ ८ ॥ इतिश्रुत्वासवचनंभगवद्गणभाषितम् ॥ अतिप्रीतिकरंहृद्यंततस्तौप्रत्युवाचह ॥ ९ ॥ ॥ दिव्य
द्विजउवाच ॥ ॥ कएषलोकोऽल्पश्रीकःस्वल्पपुण्यजनाकृतिः ॥ कइमेविकृताकाराव्रतमेतन्ममाग्रतः ॥ १० ॥ ॥ गणावूचतुः ॥ ॥ अयं
पिशाचलोकोत्रवसंतिपिशिताशनाः ॥ दत्त्वानुतापभाजोयेनोनोकृत्वाददत्यपि ॥११॥ शिवंप्रसंगतोभ्यर्च्यसकृत्त्वशुचिचेतसः ॥ अल्पपुण्याल्पलक्ष्मी
काःपिशाचास्तइमेसखे ॥ १२ ॥ ततोगच्छन्ददर्शाग्रेहृष्टपुष्टजनावृतम् ॥ पिचंडिलैःस्थूलवक्त्रैर्मेघगंभीरनिःस्वनैः ॥ १३ ॥ लोकैरध्युषितंलोकं
श्यामलांगैश्चलोमशैः ॥ गणौकथयतांकेमीकोलोकःपुण्यतःकुतः ॥ १४ ॥ ॥ ॥ गणावूचतुः ॥ ॥ गुह्यकानामयंलोकस्त्वेतेवैगुह्यकाः
स्मृताः ॥ न्यायेनोपार्ज्यवित्तानिगूहयंतिचयेभुवि ॥ १५ ॥ स्वमार्गगाधनाढ्याश्चशूद्रप्रायाःकुटुंबिनः ॥ संविभज्यचभोक्तारःक्रोधासूयाविवर्जिताः
॥ १६ ॥ नतिथिंनैववारंचसंक्रांत्यादिनपर्वच ॥ नाधर्मंनचधर्मंचविदंत्येतेसदासुखाः ॥१७॥ एकमेवहिजानंतिकुलपूज्योहियोद्विजः ॥ तस्मैगाः
संप्रयच्छंतिमन्यंतेतद्वचःस्फुटम् ॥१८॥ समृद्धिभाजोह्यत्रापितेनपुण्येनगुह्यकाः ॥ भुंजतेस्वर्गसौख्यानिदेववच्चाकुतोभयाः ॥ १९ ॥ ततोविलोकया
मासलोकंलोचनशर्मदम् ॥ केऽमीजनास्त्वसौलोकःकिंनामावदतांगणौ ॥ २० ॥ ॥ गणावूचतुः ॥ ॥ गांधर्वस्त्वेषलोकोऽमीगंधर्वाश्चशुभव्रताः॥
देवानांगायनाद्येतेचारणाःस्तुतिपाठकाः ॥ २१ ॥ गीतज्ञाअतिगीतेनतोषयंतिनराधिपान् ॥ स्तुवंतिचधनाढ्यांश्चधनलोभेनमोहिताः ॥ २२ ॥
राज्ञांप्रसादलब्धानिसुवासांसिधनान्यपि ॥ द्रव्याण्यपिसुगंधीनिकर्पूरादीन्यनेकशः ॥ २३ ॥
ब्राह्मणेभ्यःप्रयच्छंतिगीतंगायंत्यहर्निशम् ॥ श्रुतावेवमनस्तेषांनाट्यशास्त्रकृतश्रमाः ॥ २४ ॥ तेनपुण्येनगांधर्वोलोकस्त्वेषांविशिष्यते ॥ ब्राह्मणास्तो
षितायद्वै गीतविद्यार्जितैर्धनैः ॥ २५ ॥ गीतविद्याप्रभावेनदेवर्षिर्नारदोमहान् ॥ मान्योवैष्णवलोकेवैश्रीशंभोश्चातिवल्लभः ॥ २६ ॥ तुंबुरुर्ना
रदश्चोभौदेवानामतिदुर्लभौ ॥ नादरूपीशिवःसाक्षान्नादतत्त्वविदौहितौ ॥ २७ ॥ यदिगीतंक्वचिद्गीतंश्रीमद्धरिहरांतिके ॥ मोक्षस्तुतत्फलंप्राहुःसा
न्निध्यमथवातयोः ॥ २८ ॥ गीतज्ञोयदिगीतेननाप्नोतिपरमंपदम् ॥ रुद्रस्यानुचरोभूत्वातेनैवसहमोदते ॥ २९ ॥ अस्मिँल्लोकेसदाकालंस्मृतिरे
षाप्रगीयते ॥ तद्गीतमालयापूज्यौदेवौहरिहरौसदा ॥ ३० ॥ इतिशृण्वन्क्षणात्प्रापपुनरन्यन्मनोहरम् ॥ शिवशर्माथपप्रच्छकिंसंज्ञंनगरंत्विदम्
॥ ३१ ॥ गणावूचतुः ॥ ॥ असौवैद्याधरोलोकोनानाविद्याविशारदाः ॥ एतेविद्यार्थिनामन्नमुपानद्वस्त्रकंबलम् ॥ ३२ ॥ औषधान्यपियच्छं
तितत्पीडाशमनानिहि ॥ नानाकलाःशिक्षयंतिविद्यागर्वविवर्जिताः ॥ ३३ ॥ शिष्यंपुत्रेणपश्यंतिवस्त्रतांबूलभोजनैः ॥ अलंकृताश्चसत्कन्याधर्मा
दुद्वाहयंतिच ॥ ३४ ॥ अभिलाषधियानित्यंपूजयंतीष्टदेवताः ॥ एतःपुण्यैर्वसंतीहविद्याधरवराइमे ॥३५॥ यावदित्थंकथांचक्रुस्तावत्संयमिनीपतिः ॥
धर्मराजोभिसंप्राप्तोदेवदुंदुभिनिःस्वनैः ॥३६॥ सौम्यमूर्तिर्विमानस्थोधर्मज्ञैःपरिवारितः ॥ सेवाकर्मसुचतुर्भृत्यैस्त्रिचतुरैःसह ॥३७॥ धर्मराजउवाच ॥
साधुसाधुमहाबुद्धेशिवशर्मन्द्विजोत्तम ॥ कुलोचितंब्राह्मणानांभवताप्रतिपादितम् ॥ ३८ ॥ वेदाभ्यासःकृतःपूर्वंगुरवश्चापितोषिताः ॥ धर्मशास्त्रपुराणे
षुदृष्टोधर्मस्त्वयाऽऽदृतः ॥ ३९ ॥ क्षालितंमुक्तिपुर्यद्भिराशुगंतृशरीरकम् ॥ कोविदोऽस्तिभवानेवजीवितेजीवितेतरे ॥ ४० ॥
कलेवरंपूतिगंधिसदेवाशुचिभाजनम् ॥ सुतीर्थपुण्यपण्येनसम्याग्वानामतंत्वया ॥ ४१ ॥ अतएवहिपांडित्यमाद्रियंतेविचक्षणाः ॥ अहःक्षेपंनक्षिपं
तिक्षणमेकंहितेबुधाः ॥ ४२ ॥ निमेषान्पंचषान्मर्त्येप्राणंतिप्राणिनोध्रुवम् ॥ तत्रापिनप्रवर्तेयुरघकर्मणिगर्हिते ॥ ४३ ॥ स्थिरापायःसदाकायोनधनं
निधनेऽवति ॥ तन्मूढःप्रौढकार्येकिंनयतेतभवानिव ॥४४॥ सत्वरंगत्वरंचायुर्लोकःशोकसमाकुलः ॥ तस्माद्धर्मेमतिःकार्याभवतेवसुधार्मिकैः॥४५॥
सत्कर्मणोविपाकोऽयंतववंद्योममाप्यहो ॥ यदेतौभगवद्भक्तौसखित्वंभवतोगतौ ॥ ४६ ॥ ममाज्ञादीयतांतस्मात्साहाय्यंकरवाणिकिम् ॥ यत्कर्तव्यं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मादृशैस्तेतत्कृतंभवतैवहि ॥ ४७ ॥ अद्यधन्यतरोस्मीहयद्दृष्टौभगवद्गणौ ॥ सेवासदैवमेज्ञाप्याश्रीमच्चरणसन्निधौ ॥ ४८ ॥ ततःप्रस्थापितस्ताभ्यां प्राविशत्स्वपुरींयमः ॥ अप्राक्षीच्चततोविप्रस्तौगणौप्रस्थितेयमे ॥ ४९ ॥ ॥ शिवशर्मोवाच ॥ ॥ साक्षादयंधर्मराजोननुसौम्यतराकृतिः ॥ धर्म्या ण्येववचांस्यस्यमनःप्रीतिकराणिच ॥ ५० ॥ पुरीसंयमनीसेयमतीवशुभलक्षणा ॥ आकर्ण्ययस्यनामापिपापिनोऽतीवबिभ्यति ॥ ५१ ॥ यमरूपंवर्ण यंतिमर्त्यलोकेऽन्यथाजनाः ॥ अन्यथाऽयंमयादृष्टोब्रूतंतत्कारणंगणौ ॥ ५२ ॥ केनपश्यंत्यमुंलोकंनिवसंतितथात्रके ॥ इदमेवास्यकिंरूपं किंचान्यच्चनिवेद्यताम् ॥५३॥ ॥ गणावूचतुः ॥ ॥ शृणुसौम्यसुसौम्योऽसौदृश्यतेत्रभवादृशैः॥ धर्ममूर्तिः प्रकृत्यैवनिःशंकैःपुण्यराशिभिः ॥५४॥ अयमेवहिपिंगाक्षःक्रोधरक्तांतलाचनः ॥ दंष्ट्राकरालवदनोविद्युल्ललनभीषणः ॥ ५५ ॥

ऊर्ध्वकेशोऽतिकृष्णांगःप्रलयांबुदनिःस्वनः ॥ कालदंडोद्यतकरोभ्रुकुटीकुटिलाननः ॥ ५६ ॥ आनयैनंपातयैनंबधानामुंचदुर्दम ॥ घातयैनंसुदुर्वृ त्तंमूर्ध्नितीव्रमयोघनैः ॥ ५७ ॥ आताडयैनंदुर्वृत्तंधृत्वापादौशिलातले ॥ उत्पाटयास्यनेत्रेत्वंनिधायचरणंगले ॥ ५८ ॥ एतस्यगल्लावुत्फुल्लौक्षुरेणाशुवि पाटय ॥ पाशेनकंठंबद्ध्वास्यसमुल्लंबयभूरुहे ॥ ५९ ॥ विदारयास्यमूर्धानंकरपत्रेणदारुवत् ॥ पार्ष्णिघातैर्घ्नतास्यास्यंसमुच्चूर्णयदारुणैः ॥ ६० ॥ परदारप्रसृमरंकरंछिंध्यस्यपापिनः ॥ परदारगृहंयातुःपादौचास्यविखंडय ॥ ६१ ॥ सूचीभीरोमकूपेषुतनुंव्यधिहिसर्वतः ॥ दातुःपरकलत्रांगेनखपंक्ती र्दुरात्मनः ॥ ६२ ॥ परदारमुखाघ्रातुर्मुखेनिष्ठीवयास्यहि ॥ वक्तुःपरापवादस्यकीलंतीक्ष्णंमुखेक्षिप ॥ ६३ ॥ भर्जयैनंचणकवत्तप्तवालुककर्परैः ॥ भ्राष्ट्रेविकटवक्त्रत्वंपरसंतापकारिणम् ॥ ६४ ॥ दोषारोपंसदाकर्तुरदोषेक्रूरलोचन ॥ निमज्जयास्यवदनंपूयशोणितकर्दमे ॥ ६५ ॥ अदत्तपरवस्तूनां गृह्णतःकरपल्लवम् ॥ आप्लुत्याप्लुत्यतलेनतप्तांगारेपचोत्कट ॥ ६६ ॥ अपवादंगुरोर्वक्तुर्निंदाकर्तुःसुपर्वणाम् ॥ तप्तलोहशलाकाश्चमुखेभीषणनिक्षिप ॥६७॥ परमर्मस्पृशश्चास्यपरच्छिद्रप्रकाशितुः॥ सुतप्तायोमयाञ्छंकून्सर्वसंधिपुरोपय ॥ ६८ ॥ अन्येनदीयमानेस्वेनिषेद्धुःपापकारिणः ॥ आच्छेत्तुः परवृत्तीनांजिह्वांछिंध्यस्यदुर्मुख ॥६९॥ देवस्वभोक्तुःक्रोडास्यब्राह्मणस्वस्यभोजिनः ॥ विदार्योदरमस्याशुविट्कीटैःपरिपूरय ॥ ७० ॥

नदेवार्थेनविप्रार्थेनातिथ्यर्थेपचेत्क्वचित् ॥ तममुंस्वार्थपक्तारंकुंभीपाकेपचांधक ॥ ७१ ॥ उग्रास्यशिशुहंतारममुंविश्रंभघातिनम् ॥ कृतघ्नंनयवंगे नमहारौरवरौरवम् ॥ ७२ ॥ ब्रह्मघ्नंचांधतामिस्रेसुरापंपूयशोणिते ॥ कालसूत्रेहेमचौरमवीचौगुरुतल्पगम् ॥७३॥ तत्संसर्गिणमावर्षमसिपत्रवनेतथा ॥ एतान्महापातकिनस्तप्तैतलकटाहके ॥ ७४ ॥ आप्लुत्याप्लुत्यदुर्दंष्ट्रकाकोलैर्लोहतुंडकैः ॥ संतोद्यमानान्पापिष्ठान्नित्यंकल्पंनिवासय ॥ ७५ ॥ स्त्रीघ्नं गोघ्नंचमित्रघ्नंकूटशाल्मलिपादपे॥उल्लंबयाचिरंकालमूर्ध्वपादमधोमुखम्॥७६॥त्वचमस्यचसंदंशैस्त्रोटयत्वंमहाभुज॥ आश्लेषितुर्मित्रपत्न्याभुजावुत्पाटया शुच ॥७७॥ ज्वालाकीलेमहाघोरेनरकेऽमुंनिपातय ॥ योवह्निनादाहयतिपरक्षेत्रंपरालयम् ॥ ७८ ॥ कालकूटेचगरदंकूटसाक्ष्याभिवादिनम्॥मानकूटं तुलाकूटंकंठमोटेनिपातय ॥ ७९ ॥ लालापिबेचदुष्प्रेक्ष्यतथार्पुष्टीविनंनय ॥ आमपाकेचगर्भघ्नंशूलपाकेऽन्यतापिनम् ॥ ८० ॥ रसविक्रयि णंविप्रमिक्षुयंत्रेप्रपीडय ॥ प्रजापीडाकरंभूपमंधकूपेनिपातय ॥ ८१ ॥ गोतिलांश्चतुरंगांश्चविक्रेतारंद्विजाधमम् ॥ मातुलान्याःसुरायाश्चविक्रेतारं हलायुध ॥ ८२ ॥ मुसलोलूखलेवैश्यंकंडयैनंपुनःपुनः ॥ शूद्रंद्विजावमंतारंद्विजाग्रेमंचसेविनम् ॥ ८३ ॥ अधोमुखेचनरकेदीर्घग्रीवप्रपीडय ॥८४॥ शूद्रंब्राह्मणजेतारंवैश्यंब्राह्मणमानिनम् ॥ क्षत्रियंयाजकंचापिविप्रंवेदविवर्जितम् ॥ ८५ ॥ लाक्षालवणमांसानांसतैलविषसर्पिषाम् ॥ आयुधेक्षुवि काराणांविक्रेतारंद्विजाधमम् ॥ ८६ ॥ पाशपाणेकशापाणेबद्ध्वैतांश्चरणेदृढम् ॥ घातयंतौकशाघातैर्नयतंतप्तकर्दमे ॥ ८७ ॥ इमांस्त्रियंश्लेषयाशुपुं श्चलींकुलकल्मषाम् ॥ तेनोपपतिनासार्धंतप्तायसमयेनच ॥ ८८ ॥

स्वयंगृहीत्वानियमंयस्त्यजेदजितेंद्रियः ॥ तंप्रापयदुराधर्षंबहुभ्रमरदंशके ॥ ८९ ॥ इत्यादिजल्पन्दुर्वृत्तैःश्रूयतेदूरतोयमः ॥ स्वकर्मशंकितैःपापै र्दृश्यतेतिभयंकरः ॥ ९० ॥ येप्रजाःपालयंतीहपुत्रानेवनिजौरसान् ॥ दंडयंतिचधर्मेणभूपास्तेऽस्यसभासदः ॥ ९१ ॥ वर्णाश्रमाश्चयद्राष्ट्रेऽनुतिष्ठं तिनिजांक्रियाम् ॥ कालेनापन्ननिधनाभूपास्तेऽस्यसभासदः ॥ ९२ ॥ नैवदीनोनदुर्वृत्तोनापद्ग्रस्तोनशोकभाक् ॥ येषांराष्ट्रेप्रदृश्यंतेभूपास्तेऽ स्यसभासदः ॥ ९३ ॥ ब्राह्मणाःक्षत्रियावैश्याःस्वधर्मनिरताःसदा ॥ अन्येपियेसंयमिनःसंयमिन्यांवसंतिते ॥ ९४ ॥ उशीनरःसुधन्वाचवृषपर्वा जयद्रथः ॥ रजिःसहस्रजित्कुक्षिर्दृढधन्वारिपुंजयः ॥ ९५ ॥ युवनाश्वोदंतवक्त्रोनाभागोरिपुमंगलः ॥ करंधमोधर्मसेनःपरमर्दःपरांतकः ॥ ९६ ॥ एतेचान्येचबहवोराजानोनीतिवर्तिनः ॥ धर्माधर्मविचारज्ञाःसुधर्मायांसमासते ॥ ९७ ॥ अन्यच्चतेप्रवक्ष्यावोयेनपश्यंतिभास्करिम् ॥ दंडपाशो द्यतकरान्दूतानुग्राननान्क्वचित् ॥९८॥गोविंदमाधवमुकुंदहरेमुरारेशंभोशिवेशशशिशेखरशूलपाणे ॥ दामोदराच्युतजनार्दनवासुदेवत्याज्याभटायइति संततमामनंति॥९९॥गंगाधरांधकरिपोहरनीलकंठवैकुंठकैटभरिपोकमठाब्जपाणे॥भूतेशखंडपरशोमृडचंडिकेशत्याज्याभटायइतिसंततमामनंति १००॥ विष्णोनृसिंहमधुसूदनचक्रपाणेगौरीपतेगिरिशशंकरचंद्रचूड ॥ नारायणासुरनिबर्हणशार्ङ्गपाणेत्याज्याभटायइतिसंततमामनंति ॥ १ ॥ मृत्युंजयो ग्रविषमेक्षणकामशत्रोश्रीकांतपीतवसनांबुदनीलशौरे ॥ ईशानकृत्तिवसनत्रिदशैकनाथत्याज्याभटायइतिसंततमामनंति ॥ २ ॥ लक्ष्मीपतेमधुरिपो पुरुषोत्तमाद्यश्रीकंठदिग्वसनशांतपिनाकपाणे ॥ आनंदकंदधरणीधरपद्मनाभत्याज्याभटायइतिसंततमामनंति ॥ ३ ॥ सर्वेश्वरत्रिपुरसूदनदेवदे वब्रह्मण्यदेवगरुडध्वजशंखपाणे ॥ त्र्यक्षोरगाभरणबालमृगांकमौलेत्याज्याभटायइतिसंततमामनंति ॥ ४ ॥ श्रीरामराघवरमेश्वररावणारेभूतेशम न्मथरिपोप्रमथाधिनाथ ॥ चाणूरमर्दनहृषीकपतेमुरारेत्याज्याभटायइतिसंततमामनंति ॥ ५ ॥

शूलिन्गिरीशरजनीशकलावतंसकंसप्रणाशनसनातनकेशिनाश ॥ भर्गत्रिनेत्रभवभूतपतेपुरारेत्याज्याभटायइतिसंततमामनंति ॥ ६ ॥ गोपीपते यदुपतेवसुदेवसूनोकर्पूरगौरवृषभध्वजभालनेत्र ॥ गोवर्धनोद्धरणधर्मधुरीणगोपत्याज्याभटायइतिसंततमामनंति ॥ ७ ॥ स्थाणोत्रिलोचनपिनाकध रस्मरारेकृष्णानिरुद्धकमलाकरकल्मषारे ॥ विश्वेश्वरत्रिपथगार्द्रजटाकलापत्याज्याभटायइतिसंततमामनंति ॥ ८ ॥ अष्टोत्तराधिकशतेनसुचारुनाम्नां संदर्भितांललितरत्नकदंबकेन ॥ सन्नायकांदृढगुणांद्विजकंठगांयःकुर्यादिमांस्रजमहोसयमंनपश्येत् ॥ ९ ॥ इत्थंद्विजेंद्रनिजभृत्यगणान्सदैवसंशिक्षये दवनिगान्सहिधर्मराजः ॥ अन्येपियेहरिहरांकधराधरायांतेदूरतःपुनरहोपरिवर्जनीयाः ॥ ११० ॥

अगस्तिरुवाच ॥ योधर्मराजरचितांललितप्रबंधांनामावलिंसकलकल्मषबीजहंत्रीम् ॥ धीरोत्रकौस्तुभभृतःशशिभूषणस्यनित्यंजपेत्स्तनरसंसपिबे न्नमातुः ॥ ११ ॥ इतिशृण्वन्कथांरम्यांशिवशर्माप्रियेऽनघाम् ॥ प्रहृष्टवक्त्रःपुरतोददर्शाप्सरसांपुरीम् ॥ ११२ ॥ इति श्रीस्कांदेमहापुराणएकाशी तिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेयमलोकवर्णनंनामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ शिवशर्मोवाच ॥ काइमारूपलावण्यसौ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भाग्यनिधयःस्त्रियः ॥ दिव्यालंकारधारिण्योदिव्यभोगसमन्विताः ॥ १ ॥ ॥ गणावूचतुः ॥ ॥ एतावारविलासिन्योयज्ञभाजांप्रियंकराः ॥ गीतज्ञानृत्यकुशलावाद्यविद्याविचक्षणाः ॥२॥ कामकेलिकलाभिज्ञाद्यूतविद्याविशारदाः ॥ रसज्ञाभाववेदिन्यश्चतुराश्चोचितोक्तिषु ॥ ३ ॥ नानादेश विशेषज्ञानानाभाषासुकोविदाः ॥ संकेतोदंतनिपुणानैकाःस्वैरचरामुदा ॥ ४ ॥ लीलानर्मसुसाभिज्ञाःसुप्रलापेषुपंडिताः ॥ यूनांमनांसिसततंस्वैर्हावै रमयंत्यमूः ॥५॥ निर्मथ्यमानात्क्षीरोदात्पूर्वमप्सरसस्त्वमूः ॥ निःसृतास्त्रिजगज्जेतुर्मोहनास्त्रंमनोभुवः ॥ ६ ॥ उर्वशीमेनकारंभाचंद्रलेखातिलोत्तमा ॥ वपुष्मतीकांतिमतीलीलावत्युत्पलावती ॥ ७ ॥

अलंबुषागुणवतीस्थूलकेशीकलावती ॥ कलानिधिर्गुणनिधिःकर्पूरतिलकोर्वरा ॥ ८ ॥ अनंगलतिकाचापितथामदनमोहिनी ॥ चकोराक्षीचंद्रकला तथामुनिमनोहरा ॥ ९ ॥ ग्रावद्रावातपोद्वेष्ट्रीचारुनासासुकर्णिका ॥ दारुसंजीविनीसुश्रीःक्रतुशुल्काशुभानना ॥ १० ॥ तपःशुल्कातीर्थशुल्कादा नशुल्काहिमावती ॥ पंचाश्वमेधिकाचैवराजसूयार्थिनीतथा ॥ ११ ॥ अष्टाग्निहोमिकातद्वद्वाजपेयशतोद्भवा ॥ इत्याद्यप्सरसांश्रेष्ठंसहस्रंषष्टिसंमितम् ॥ १२ ॥ एतस्मिन्नप्सरोलोकेवसंत्यन्याअपिस्त्रियः ॥ सदास्खलितलावण्याःसदास्खलितयौवनाः ॥ १३ ॥ दिव्यांबरादिव्यमाल्यादिव्यगंधानुले पनाः ॥ दिव्यभोगैःसुसंपन्नाःस्वेच्छाविधृतविग्रहाः ॥१४॥ कृत्वामासोपवासानिस्खलंतिब्रह्मचर्यतः ॥ सकृदेवद्विकृत्वोवात्रिःकृत्वोदैवयोगतः ॥१५॥ ताइमादिव्यभोगिन्योरूपलावण्यसंपदः॥निवसंत्यप्सरोलोकेसर्वकामसमन्विताः ॥१६॥ कृत्वाव्रतानिसांगानिकामिकानिविधानतः ॥ भवंतिस्वैरचा रिण्योदेवभोग्याइहागताः ॥ १७ ॥ पतिव्रतधृतानार्योबलेनबलिनाधृताः ॥ भर्तृबुद्ध्यारमंतेतंकदाचित्ताइमाद्विज ॥१८॥ भर्तरिप्रोषितेयाश्चब्रह्मचर्य व्रताःसदा ॥ विप्लवंतेसकृद्देवात्ताएतावामलोचनाः॥१९॥कुसुमानिसुगंधीनिसुवासंचंदनंतथा ॥ सुगौरंचापिकर्पूरंसुसूक्ष्माण्यंबराणिच ॥ २० ॥ पर्णा निऋजुताराणिजीर्णानिकठिनानिच ॥ साग्राणिस्वर्णवर्णानिस्थूलनीलशिराणिच ॥ २१ ॥ सुवासोपस्कराढ्यानिनागवल्ल्याद्विजोत्तम ॥ शय्यावि चित्राभरणारतिशालोचितानिच ॥ २२ ॥ बहुकौतुकवस्तूनिसमर्च्यद्विजदंपती ॥ भोगदानमिदंकाम्यंप्रतिसंक्रमणंरवेः ॥ २३ ॥ किंवाप्रतिव्यतीपातमे कसंवत्सरावधि॥कोदादितिचमंत्रेणयादद्याद्वरवर्णिनी॥२४॥कामरूपधरोदेवःप्रीयतामितिवादिनी ॥ साश्रेष्ठाऽप्सरसांमध्येवसेत्कल्पमिहांगना ॥२५॥ कन्यारूपधराकाचिद्याभुक्ताकेनचित्क्वचित् ॥ देवरूपेणतंकालमारभ्यब्रह्मचारिणी ॥ २६ ॥ तदेववृत्तंध्यायंतीनिधनंयातिकालतः ॥ दिव्यरूपध रासेहजायतेदिव्यभोगभाक् ॥ २७ ॥ निदानमप्सरोलोकस्येतिशृण्वन्द्विजाग्रणीः ॥ सौरंलोकमथप्राप्यक्षणेनसविमानगः ॥ २८ ॥ यथाकदं बकुसुमंकिंजल्कैःसर्वतोवृतम् ॥ देदीप्यमानंहितथासमंताद्भानुभानुभिः ॥ २९ ॥ दूराद्रविंसविज्ञायधृततामरसद्वयम् ॥ नवभिर्योजनानांचसहस्रैःसं मितेनह ॥ ३० ॥ विचित्रेणैकचक्रेणसप्तसप्तियुतेनच ॥ अनूरुणाधिष्ठितेनपुरतोधृतरश्मिना ॥ ३१ ॥ अप्सरोमुनिगंधर्वसर्पग्रामणिनैर्ऋतैः ॥ स्यं दनेनातिजविनाप्रणनामकृतांजलिः ॥ ३२ ॥ तस्यप्रणामंदेवोपिभ्रूभंगेनानुमन्यच॥अतिदूरंनभोवर्त्मव्यतिचक्रामसक्षणात् ॥ ३३ ॥ प्रक्रांतेद्युमणौदूरं शिवशर्मातिशर्मवान् ॥ प्रोवाचभगवद्भक्तौकथंलभ्यंरवेःपदम् ॥ ३४ ॥ एतदिच्छाम्यहंश्रोतुमाचक्षाथांममाग्रतः ॥ सतांसाप्तपदीमैत्रीतन्मेमैत्र्याप्रणो दितौ ॥ ३५ ॥ ॥ गणावूचतुः ॥ शृणुद्विजमहाप्राज्ञत्वय्यकथ्यंनकिंचन ॥ सत्संगादेवसाधूनांसत्कथासंप्रवर्तते ॥ ३६ ॥ नियंतासर्वभूतानां यएकःकारणंपरम् ॥ अनामागोत्ररहितोरूपादिपरिवर्जितः ॥ ३७ ॥ आविर्भावतिरोभावौयद्भूनर्तनवर्तिनौ ॥ सएवंवक्तिसततंसर्वात्मावेदपूरुषः ॥ ३८ ॥ योसावादित्यपुरुषःसोसावहमितिस्फुटम् ॥ अंधतमःप्रविशंतियेचैवान्यमुपासते ॥ ३९ ॥

निश्चितार्थांश्रुतिमिमांब्राह्मणासोद्विजोत्तम ॥ तमेकमुपतिष्ठंतेनिश्चित्येतिपुनःपुनः ॥ ४० ॥ उपलभ्यचसावित्रींनोपतिष्ठेतयःपराम् ॥ कालेत्रिकालं सप्ताहात्सपतेन्नात्रसंशयः ॥४१॥ तावत्प्रातर्जपंस्तिष्ठेद्यावदर्धोदयोरवेः ॥ आसनस्थोजपेन्मौनीप्रत्यगातारकोदयात् ॥ ४२ ॥ सादित्यांमध्यमांसंध्यां जपेदादित्यसंमुखः ॥ काललोपोनकर्तव्यस्ततःकालंप्रतीक्षयेत् ॥ ४३ ॥ कालेफलंत्योषधयःकालेपुष्पंतिपादपाः ॥ वर्षंतितोयदाःकालेतस्मात्कालं नलंघयेत् ॥ ४४ ॥ मंदेहदेहनाशार्थमुदयास्तमयेरविः ॥ समीहतेद्विजोत्सृष्टंमंत्रतोयांजलित्रयम् ॥ ४५ ॥ गायत्रीमंत्रतोयाढ्यंदत्तंयेनांजलित्रयम् ॥ कालेसवित्रेकिंनस्यात्तेनदत्तंजगत्त्रयम् ॥ ४६ ॥ किंकिंनसवितासूतेकालेसम्यगुपासितः ॥ आयुरारोग्यमैश्वर्यंवसूनिसपशूनिच ॥ ४७ ॥ मित्रपुत्र कलत्राणिक्षेत्राणि विविधानिच ॥ भोगानष्टविधांश्चापिस्वर्गंचाप्यपवर्गकम् ॥ ४८ ॥ अष्टादशसुविद्यासुमीमांसातिगरीयसी ॥ ततोपितर्कशास्त्रा णिपुराणंतेभ्यएवच ॥ ४९ ॥ ततोपिधर्मशास्त्राणितेभ्योगुर्वीश्रुतिर्द्विज ॥ ततोप्युपनिषच्छ्रेष्ठागायत्रीचततोधिका ॥ ५० ॥ दुर्लभासर्वमंत्रेषुगायत्री प्रणवान्विता ॥ नगायत्र्याधिकंकिंचित्त्रयीषुपरिगीयते ॥ ५१ ॥ नगायत्रीसमोमंत्रोनकाशीसदृशीपुरी ॥ नविश्वेशसमंलिंगंसत्यंसत्यंपुनःपुनः ॥ ५२ ॥ गायत्रीवेदजननीगायत्रीब्राह्मणप्रसूः ॥ गातारंत्रायतेयस्माद्गायत्रीतेनगीयते ॥ ५३ ॥ वाच्यवाचकसंबंधोगायत्र्याःसवितुर्द्वयोः ॥ वाच्योसौसवितासाक्षाद्गायत्रीवाचिकापरा ॥ ५४ ॥

प्रभावेणैवगायत्र्याःक्षत्रियःकौशिकोवशी ॥ राजर्षित्वंपरित्यज्यब्रह्मर्षिपदमीयिवान्॥५५॥ सामर्थ्यंप्रापचात्युच्चैरन्यद्भुवनसर्जने ॥ किंकिंनदद्याद्गायत्री सम्यगेवमुपासिता ॥ ५६ ॥ नब्राह्मणोवेदपाठान्नशास्त्रपठनादपि ॥ देव्यास्त्रिकालमभ्यासाद्ब्राह्मणःस्याद्धिनान्यथा ॥ ५७ ॥ गायत्र्येवपरं विष्णुर्गायत्र्येवपरःशिवः ॥ गात्र्येवपरोब्रह्मागायत्र्येवत्रयीततः ॥ ५८ ॥ देवत्रयंसभगवानंशुमालीदिवाकरः ॥ सर्वेषांमहसांराशिःकालःकालप्रवर्तकः ॥ ५९ ॥ अर्कमुद्दिश्यसततमस्मल्लोकनिवासिनः ॥ श्रुतिंह्युदाहरंतीमांसारासारविवेकिनः ॥६०॥ एषोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसउगर्भेअंतः ॥ सएवजातःसजनिष्यमाणःप्रत्यङ्जानास्तिष्ठतिसर्वतोमुखः ॥ ६१ ॥ सदैवमुपतिष्ठेरन्सौरैसूक्तैरतंद्रिताः ॥ येनमंत्यत्रतेविप्राविप्राभास्करसन्निभाः ॥ ६२ ॥ पुष्यार्केप्यथहस्तार्केमूलार्केप्यथवाद्विज ॥ उत्तरार्केऽथयत्कार्यंतत्फलत्येवनान्यथा ॥ ६३ ॥ पौषेमास्यर्कदिवसेयःस्नात्वाभास्करोदये॥ दानंहोमंजपंकुर्यादर्चामर्कस्यसुव्रतः ॥ ६४ ॥ श्रद्धावानेकभक्तश्चकामक्रोधविवर्जितः ॥ सहाप्सरोभिर्द्युतिमान्सवसेदत्रभोगवान् ॥ ६५ ॥ अयनेविषुवेचापिषडशीतिमुखेषुवा ॥ विष्णुपद्यांचयेदद्युर्महादानानिसुव्रताः ॥ ६६ ॥

तिलाञ्जुह्वतिसाज्यांश्चब्राह्मणान्भोजयंतिच॥पितॄनुद्दिश्यचश्राद्धंयेकुर्वंतिविपश्चितः ॥ ६७ ॥ महापूजांचयेकुर्युर्महामंत्राञ्जपंतिच ॥ तेऽत्रवैकर्तनेलोके विकर्तनसमप्रभाः ॥६८॥ नदरिद्रानचदुःखार्ता नव्याधिपरिपीडिताः ॥ संक्रमेष्वर्कभक्तायेनविरूपानदुर्भगाः ॥६९॥ संक्रमेषुनयैर्दत्तंनस्नातंतीर्थवा रिषु॥विशेषहोमोनकृतःकपिलाज्याप्लुतैस्तिलैः ॥ ७० ॥ तेदृश्यंतेप्रतिद्वारंविहीननयनाननाः ॥ देहिदेहीतिजल्पंतोदेहिनःसपटच्चराः ॥ ७१ ॥ समं कृष्णलकेनापियोदद्यात्कांचनंकृती ॥ सूर्यग्रहेकुरुक्षेत्रेसवसेदत्रपुण्यभाक् ॥ ७२ ॥ सर्वगंगासमंतोयंसर्वेब्रह्मसमाद्विजाः ॥ सर्वदेयंस्वर्णसमंराहुग्रस्ते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिवाकरे ॥ ७३ ॥ दत्तंजप्तंहुतंस्नातंयत्किंचित्सदनुष्ठितम् ॥ भानूपरागेश्राद्धादितद्धेतुर्ब्रह्मसंनिधेः ॥७४॥ रविवारेसंक्रमश्चेदुपरागोऽथवाभवेत् ॥ तदायद र्जितंपुण्यंतदिहाक्षयमाप्यते ॥ ७५ ॥ भानुवारोयदापष्ठ्यांसप्तम्यामथजायते ॥ तदायत्सुकृतंकर्मकृतंतदिहभुज्यते ॥ ७६ ॥ हंसोभानुःसहस्रांशुस्तपनस्तापनोरविः ॥ विकर्तनोविवस्वांश्चविश्वकर्माविभावसुः ॥ ७७ ॥

विश्वरूपोविश्वकर्तामार्तंडोमिहिरोंऽशुमान् ॥ आदित्यश्चोष्णगुःसूर्योऽर्यमाब्रह्मोदिवाकरः ॥ ७८ ॥ द्वादशात्मासप्तहयोभास्करोहस्करःखगः ॥ सूरः प्रभाकरःश्रीमाँल्लोकचक्षुर्महेश्वरः ॥ ७९ ॥ त्रिलोकेशोलोकसाक्षीतमोरिःशाश्वतःशुचिः ॥ गभस्तिहस्तस्तीव्रांशुस्तरणिःसुमहोरणिः ॥८०॥ द्युमणिर्हरिदश्वोर्कोभानुमान्भयनाशनः ॥ छंदोश्वोवेदवेद्यश्चभास्वान्पूषावृषाकपिः ॥ ८१ ॥ एकचक्ररथोमित्रोमंदेहारिस्तमिस्रहा ॥ दैत्यहापापहर्ताचधर्मोधर्मप्रकाशकः ॥ ८२ ॥ हेलिकश्चित्रभानुश्चकलिघ्नस्तार्क्ष्यवाहनः ॥ दिक्पतिःपद्मिनीनाथःकुशेशयकरोहरिः ॥ ८३ ॥ घर्मरश्मिर्दुर्निरीक्ष्यश्चंडांशुःकश्यपात्मजः ॥ एभिःसप्ततिसंख्याकैःपुण्यैःसूर्यस्यनामभिः ॥ ८४ ॥

प्रणवादिचतुर्थ्यंतैर्नमस्कारसमन्वितैः ॥ प्रत्येकमुच्चरन्नामदृष्ट्वादृष्ट्वादिवाकरम् ॥ ८५ ॥ विगृह्यपाणियुग्मेनताम्रपात्रंसुनिर्मलम् ॥ जानुभ्यामवनिंगत्वापरिपूर्यजलेनच ॥ ८६ ॥ करवीरादिकुसुमैरक्तचंदनमिश्रितैः ॥ दूर्वांकुरैरक्षतैश्चनिक्षिप्तैःपात्रमध्यतः ॥ ८७ ॥ दद्यादर्घ्यमनर्घ्यायसवित्रेध्यानपूर्वकम् ॥ उपमौलिसमानीयतत्पात्रंनान्यदृङ्मनाः ॥ ८८ ॥ प्रतिमंत्रंनमस्कुर्यादुदयास्तमयेरविम् ॥ अनयानामसप्तत्यामहामंत्ररहस्यया ॥ ८९ ॥ एवंकुर्वन्नरोजातुनदरिद्रोनदुःखभाक् ॥ व्याधिभिर्मुच्यतेघोरैरपिजन्मांतरार्जितैः ॥ ९० ॥ विनौषधैर्विनावैद्यैर्विनापथ्यपरिग्रहैः ॥ कालेननिधनंप्राप्तःसूर्यलोकेमहीयते ॥ ९१ ॥ इत्येकदेशःकथितोभानुलोकस्यसत्तम ॥ महातेजोनिधेरस्यकोविशेषमवैत्यहो ॥ ९२ ॥ स्वकर्णविषयीकुर्वन्नितिपुण्यकथामिमाम् ॥ क्षणादालोकयांचक्रेमहेंद्रस्यमहापुरीम् ॥ ९३ ॥ ॥ अगस्तिरुवाच ॥ ॥ श्रुत्वासौरींकथामेतामप्सरोलोकसंयुताम् ॥ नदरिद्रोभवेत्क्वापिनाधर्मेषुप्रवर्तते ॥ ९४ ॥ ब्राह्मणैःसततंश्राव्यमिदमाख्यानमुत्तमम् ॥ वेदपाठेनयत्पुण्यंतत्पुण्यफलदायकम् ॥ ९५ ॥ ब्राह्मणाःक्षत्रियावैश्याःशृण्वंतोऽध्यायमुत्तमम् ॥ पातकानिविसृज्येहगतिंयास्यंत्यनुत्तमाम् ॥ ९६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडेपूर्वार्धेअप्सरःसूर्यलोकवर्णनंनामनवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥ शिवशर्मोवाच ॥ ॥ रमयंतीमनोतीवकेयंकस्येयमीशितुः ॥ नयनानंदसंदोहदायिनीपूरनुत्तमा ॥ १ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्महाभागसुतीर्थफलितद्रुम ॥ लोकोऽत्ररमतेविप्रसहस्राक्षपुरीत्वियम् ॥ २ ॥ तपोबलेनमहताविहिताविश्वकर्मणा ॥ दिवापिकौमुदीयस्याःसौधश्रेणीश्रियंश्रयेत् ॥ ३ ॥

यदाकलानिधिःक्वापिदर्शेऽदृश्यत्वमावहेत् ॥ तदास्वप्नेयसींज्योत्स्नांसौधेष्वेषुनिगूहयेत् ॥ ४ ॥ यदच्छभित्तौवीक्ष्यस्वमन्ययोपिद्विशंकिता ॥ मुग्धानाशुविशेच्चित्रमपिस्वांचित्रशालिकाम् ॥ ५ ॥ हर्म्येषुनीलमणिभिर्निर्मितेष्वत्रनिर्भयम् ॥ स्वनीलिमानमाधायतमोहःस्वपितिष्ठति ॥ ६ ॥ चंद्रकांतशिलाजालस्रुतमात्रामलंजलम् ॥ तत्रचादायकलशैर्नेच्छंत्यन्यज्जलंजनाः ॥ ७ ॥ कुविंदानचसंत्यत्रनचतेपश्यतोहराः ॥ चैलान्यलंकृतीरत्रयतःकल्पद्रुमोर्पयेत् ॥ ८ ॥ गणकानात्रविद्यंतेचिंताविद्याविशारदाः ॥ यतश्चिकेतिसर्वेषांचिंतांचिंतामणिर्द्रुतम् ॥ ९ ॥ सूपकारानसंत्यत्ररसकर्मविचक्षणाः ॥ दुग्धेसर्वरसानेकाकामधेनुरतोयतः ॥ १० ॥ कीर्तिरुच्चैःश्रवायस्यसर्वतोवाजिराजिषु ॥ रत्नमुच्चैःश्रवाःसोत्रहयानांपौरुषाधिकः ॥ ११ ॥ ऐरावतोदंतिवरश्चतुर्दंतोत्रराजते ॥ द्वितीयइवकैलासोजंगमस्फटिकोज्ज्वलः ॥ १२ ॥ तरुरत्नंपारिजातःस्त्रीरत्नंसोर्वशीत्विह ॥ नंदनंवनरत्नंचरत्नंमंदाकिनीह्यपाम् ॥ १३ ॥ त्रयस्त्रिंशत्सुराणांयाकोटिःश्रुतिसमीरिता ॥ प्रतीक्षतेसाऽवसरंसेवायैप्रत्यहंत्विह ॥ १४ ॥

स्वर्गेष्विंद्रपदादन्यन्नविशिष्येतकिंचन ॥ यद्यत्त्रिलोक्यामैश्वर्यंनतत्तुल्यमनेनहि ॥ १५ ॥ अश्वमेधसहस्रस्यलभ्यंविनिमयेनयत् ॥ किंतेनतुल्यमन्यत्स्यात्पवित्रमथवामहत् ॥ १६ ॥ अर्चिष्मतीसंयमिनीपुण्यवत्यमलावती ॥ गंधवत्यलकेशीचनैतत्तुल्यामहर्धिभिः ॥ १७ ॥ अयमेवसहस्राक्षस्त्वयमेवदिवस्पतिः ॥ शतमन्युरयंदेवोनामान्येतानिनामतः ॥ १८ ॥ सप्तापिलोकपालायेतएनंसमुपासते ॥ नारदाद्यैर्मुनिवरैरयमाशीर्भिरीड्यते ॥ १९ ॥ एतत्स्थैर्येणसर्वेषांलोकानांस्थैर्यमिष्यते ॥ पराजयान्महेंद्रस्यत्रैलोक्यंस्यात्पराजितम् ॥ २० ॥ दनुजामनुजादैत्यास्तपस्यंत्युग्रसंयमाः ॥ गंधर्वयक्षरक्षांसिमहेंद्रपदलिप्सवः ॥ २१ ॥ सगराद्यामहीपालावाजिमेधविधायकाः ॥ कृतवंतोमहायत्नंशक्रैश्वर्यजिघृक्षवः ॥ २२ ॥ निष्प्रत्यूहंक्रतुशतंयःकश्चित्कुरुतेऽवनौ ॥ जितेंद्रियोमरावत्यांसप्राप्नोतिपुलोमजाम् ॥ २३ ॥ असमाप्तक्रतुशतावसंत्यत्रमहीभुजः ॥ ज्योतिष्टोमादिभिर्यागैर्येयजंत्यपितेद्विजाः ॥२४॥ तुलापुरुषदानादिमहादानानिषोडश ॥ येयच्छंत्यमलात्मानस्तेलभंतेऽमरावतीम् ॥ २५ ॥ अक्लीबवादिनोधीराःसंग्रामेष्वपराङ्मुखाः ॥ विक्रांतावीरशयनेतेऽत्रतिष्ठंतिभूभुजः ॥२६॥ इत्युद्देशात्समाख्यातामहेंद्रनगरीस्थितिः ॥ यायजूकावसंत्यत्रयज्ञविद्याविशारदाः ॥ २७ ॥ इमामर्चिष्मतींपश्यवीतिहोत्रपुरींशुभाम् ॥ जातवेदसियेभक्तास्तेवसंत्यत्रसुव्रताः ॥ २८ ॥ अग्निप्रवेशंयेकुर्युर्दृढसत्त्वाजितेंद्रियाः ॥ स्त्रियोवासत्त्वसंपन्नास्तेसर्वेअग्नितेजसः ॥ २९ ॥ अग्निहोत्ररताविप्रास्तथाग्निब्रह्मचारिणः ॥ पंचाग्निव्रतिनोयेवैतेऽग्निलोकेग्नितेजसः ॥ ३० ॥

शीतेशीतापनुत्यैयस्त्विध्मभारान्प्रयच्छति ॥ कुर्यादग्निष्टिकांवाऽथसवसेदग्निसन्निधौ ॥ ३१ ॥ अनाथस्याग्निसंस्कारंयःकुर्याच्छ्रद्धयान्वितः ॥ अशक्तःप्रेरयेदन्यंसोग्निलोकेमहीयते ॥३२॥ जठराग्निविवृद्ध्यैयोदद्यादाग्नेयमौषधम् ॥ मंदाग्नयेसपुण्यात्मावह्निलोकेवसेच्चिरम् ॥ ३३ ॥ यज्ञोपस्करवस्तूनियज्ञार्थंद्रविणंतुवा ॥ यथाशक्तिप्रदद्याद्योह्यर्चिष्मत्यांवसेत्सवै ॥ ३४ ॥ अग्निरेकोद्विजातीनांनिःश्रेयसकरःपरः ॥ गुरुर्देवोव्रतंतीर्थंसर्वमग्निर्विनिश्चितम् ॥ ३५ ॥ अपावनानिसर्वाणिवह्निसंसर्गतःक्षणात् ॥ पावनानिभवंत्येवतस्माद्यःपावकःस्मृतः ॥ ३६ ॥ अपिवेदंविदित्वायस्त्यक्त्वावैजातवेदसम् ॥ अन्यत्रबध्नातिरतिंब्राह्मणोनसवेदवित् ॥३७॥ अंतरात्माह्ययंसाक्षान्निश्चितोह्याशुशुक्षणिः ॥ मांसग्रासान्पचेत्कुक्षौस्त्रीणांनोमांसपेशिकाम् ॥३८॥ तैजसीशांभवीमूर्तिःप्रत्यक्षादहनात्मिका ॥ कर्त्रीहंत्रीपालयित्रीविनैनांकिंविलोक्यते ॥ ३९ ॥ चित्रभानुरयंसाक्षान्नेत्रंत्रिभुवनेशितुः ॥ अंधंतमोमयेलोकेविनैनंकःप्रकाशकः ॥ ४० ॥ धूपप्रदीपनैवेद्यपयोदधिघृतैक्षवम् ॥ एतद्भुक्तंनिषेवंतेसर्वेदिविदिवौकसः ॥ ४१ ॥ शिवशर्मोवाच ॥ ॥ कोयंकृशानुःकस्यायंसूनुःकथमिदंपदम् ॥ आग्नेयंलब्धमेतेनब्रूतमेतन्ममाग्रतः ॥ ४२ ॥ ॥ गणावूचतुः ॥ ॥ आकर्णयमहाप्राज्ञवर्णयावोयथातथम् ॥ योयंयस्ययथाऽनेनप्रापिज्योतिष्मतीपुरी ॥ ४३ ॥ नर्मदायास्तटेरम्येपुरेनर्मपुरेपुरा ॥ पुरारिभक्तःपुण्यात्माऽभवद्विश्वानरोमुनिः ॥४४॥ ब्रह्मचर्याश्रमेनिष्ठोब्रह्मयज्ञरतःसदा ॥ शांडिल्यगोत्रःशुचिमान्ब्रह्मतेजोनिधिर्वशी ॥ ४५ ॥ विज्ञाताखिलशास्त्रार्थोलौकिकाचारचंचुरः ॥ कदाचिच्चिंतयामासहृदिध्यात्वामहेश्वरम् ॥ ४६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्णामप्याश्रमाणांकोतीवश्रेयससताम् ॥ यस्मिन्प्राप्तेतिसंक्षुण्णेपरत्रेहचवासुखम् ॥४७॥ इदंश्रेयस्त्विदंश्रेयस्त्विदंतुसुकरंभवेत् ॥ इत्थंसर्वत्रसमालो
ड्यगार्हस्थ्यंप्रशंसंह ॥ ४८ ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथभिक्षुकः ॥ एषामाधारभूतोसौगृहस्थोनान्यथेतिच ॥ ४९ ॥ देवैर्मनुष्यैःपितृभि
स्तिर्यग्भिश्चोपजीव्यते ॥ गृहस्थःप्रत्यहंयस्मात्तस्माच्छ्रेष्ठोगृहाश्रमी ॥५० ॥ अन्नात्वाचाप्युतावाऽदत्त्वावाऽतियोगृही ॥ देवादीनामृणीभूत्वानरकं
प्रतिपद्यते ॥ ५१ ॥ अन्नाताशीमलंभुंक्तेत्वजपीपूयशोणितम् ॥ अहुताशीकृमीन्भुंक्तेप्यदत्त्वाविड्भोजनः ॥ ५२ ॥ ब्रह्मचर्यहिगार्हस्थ्येयादृक्
ल्पनयांज्झितम् ॥ स्वभावचपलेचित्तेकृताद्यब्रह्मचारिणि ॥ ५३ ॥ हठाद्वालोकभीत्यावास्वार्थाद्वाब्रह्मचर्यभाक् ॥ संकल्पयतिचित्तेचेत्कृतमप्यकृतं
तदा ॥ ५४ ॥ परदारपरित्यागात्स्वदारपरितुष्टितः ॥ ऋतुकालाभिगामित्वाद्ब्रह्मचारीगृहीरितः ॥ ५५ ॥ विमुक्तरागद्वेषोयःकामक्रोधविवर्जितः ॥
सामिःसदारःसगृहीवानप्रस्थाद्विशिष्यते ॥ ५६ ॥ वैराग्याद्गृहमुत्सृज्यगृहधर्मान्हृदिस्मरेत् ॥ सभवेदुभयभ्रष्टोवानप्रस्थोनवागृही ॥ ५७ ॥ अयाचितो
पस्थितयायोवृत्त्यावर्तते गृही ॥ येनकेनापिसंतुष्टोभिक्षुकात्सविशिष्यते ॥ ५८ ॥ प्रार्थयेद्यत्कचित्किंचिद्भुप्रापंत्राभविष्यति ॥ अशनेघुनसंतुष्टः
सयतिःपतितोभवेत् ॥ ५९ ॥ गुणागुणंविचार्यैत्थंसवैविश्वानरोद्विजः ॥ उद्वाहविधानेनस्वोचितांकुलकन्यकाम् ॥ ६० ॥ अग्निशुश्रूषणरतः
पंचयज्ञपरायणः ॥ षट्कर्मनिरतोनित्यंदेवपित्रतिथिप्रियः ॥ ६१ ॥ धर्मार्थकामान्युक्तात्मासोऽयन्त्स्वस्वकालतः ॥ परस्परमसंकोचंदंपत्यो
रानुकूल्यतः ॥ ६२ ॥ पूर्वाह्णेदैविकंकर्मसोकरोत्कर्मकांडवित् ॥ मध्यंदिनेमनुष्याणांपितॄणामपराह्णके ॥६३॥ एवंचद्युतिथेकालेगतेतस्याप्रजन्मनः ॥
भार्याशुचिष्मतीनामकामपत्नीवसुव्रता ॥ ६४ ॥

अपश्यत्यंकुरमपिसंततेःस्वर्गसाधनम् ॥ विज्ञायशंकरंकांतंप्रणिपत्यव्यजिज्ञपत् ॥ ६५ ॥ ॥ शुचिष्मत्युवाच ॥ आर्यपुत्रार्यधेषणप्राणनाथप्रि
यव्रत ॥ नदुर्लभंममास्तीहकिंचित्त्वच्चरणार्चनात् ॥ ६६ ॥ येवैभोगाःसमुचिताःस्त्रीणांतित्वत्प्रसादतः ॥ अलंकृत्यमयाभुक्ताःप्रसंगाद्वच्मितान्यपि
॥६७॥ सुवासांसिसुवासाश्चसुशय्यासुनितांबिनी ॥ स्वकर्त्तावूलान्नपानाश्चअष्टौभोगाःस्वधर्मिणाम् ॥ ६८ ॥ एकमेप्रार्थितंनाथचिरायत्हृदिसंस्थितम् ॥
गृहस्थानांसमुचितंतत्त्वंदातुमिहार्हसि ॥ ६९ ॥ विश्वानरउवाच ॥ किमदेयंहिसुश्रोणितवप्रियहितैषिणि ॥ तत्प्रार्थयमहाभागेप्रयच्छाम्यखिलंचितम्
॥७०॥ महेशितुःप्रसादेनममकिंचिन्नदुर्लभम् ॥ इहासुत्रचकल्याणिसर्वकल्याणकारिणः ॥ ७१ ॥ इतिश्रुत्वावचःपत्युस्तस्यसापतिदेवता ॥ उवाच
कृपयदनायदेदेयावरोमम ॥७२॥ वरयोग्यास्मिचेन्नाथनान्यंवरमहंवृणे ॥ महेशसदृशंपुत्रंदेहिमाहेश्वरान्वय ॥ ७३ ॥ इतिस्यावचःश्रुत्वाशुचिष्मत्याः
शुचिव्रतः ॥ क्षणंसमाधिमाधायबद्धेतत्समर्चितयत् ॥७४॥ अहोकिमेतयातन्व्याप्रार्थितंह्यतिदुर्लभम् ॥ मनोरथपथातीतमस्तुवासहिसर्वकृत् ॥७५॥
तेनैवास्यामुखेस्थित्वावाक्स्वरूपेणशंभुना ॥ व्याहृतंकोऽन्यथाकर्तुमुत्सहेतभवेदिदम् ॥७६॥ ततःप्रोवाचतांपत्नीमेकपत्निव्रतेस्थितः ॥ विश्वानरमु
निःश्रीमानितिकांतेभविष्यति ॥ ७७ ॥ इत्थमाश्वास्यतांपत्नींजगामातपसेमुनिः ॥ यत्रविश्वेश्वरःसाक्षात्काशीनाथोधितिष्ठति ॥ ७८ ॥ प्राप्य
वाराणसींतूर्णंदृष्ट्वाथमणिकर्णिकाम् ॥ तत्याजतापत्रितयमपिजन्मशतार्जितम् ॥ ७९ ॥ दृष्ट्वासर्वाणिलिंगानिविश्वेशप्रमुखानिच ॥ स्नात्वासर्वेषुकुंडे
षुवापीकूटसरःसुच ॥ ८० ॥ नत्वाविनायकान्सर्वान्गौरीःसर्वाःप्रणम्यच ॥ संपूज्यकालराजंचभैरवंपापभक्षणम् ॥ ८१ ॥ दण्डनायकमुख्यां
श्चगणान्स्तुत्वाप्रयत्नतः ॥ आदिकेशवमुख्यांश्चकेशवान्पारितोष्यच ॥ ८२ ॥

लोलार्कमुख्यमूर्यांश्चप्रणम्यचपुनःपुनः ॥ कृत्वापिण्डप्रदानानिसर्वतीर्थेष्वतंद्रितः ॥ ८३ ॥ सहस्रभोजनाद्यैश्चयतीन्विप्रान्प्रतर्प्यच ॥ महापूजो
पचारैश्चलिंगान्यभ्यर्च्यभक्तितः ॥ ८४ ॥ असकृच्चिन्तयामासकिंलिंगंक्षिप्रसिद्धिदम् ॥ यत्रनिश्चलतामेतितपस्तनयकाम्यया ॥ ८५ ॥
श्रीमदोंकारनाथंवाकृत्तिवासेश्वरंकिमु ॥ कालेशंवृद्धकालेशंकलशेश्वरमेवच ॥ ८६ ॥ केदारेशंतुकामेशंचन्द्रेशंवात्रिलोचनम् ॥ ज्येष्ठेशंजंबुकेशंवाजे
गीपव्येश्वरंतुवा ॥ ८७ ॥ दशाश्वमेधमीशानंद्रुमिचंडेशमेवच ॥ दक्षेशंगरुडेशंचगोकर्णेशंगणेश्वरम् ॥ ८८ ॥ ढुंढ्याशागजसिद्धाख्यंधर्मेशंतारके
श्वरम् ॥ नन्दिकेशंनिवासेशंपर्वतीशंप्रीतिकेश्वरम् ॥ ८९ ॥ पर्वतेशंपशुपतिंब्रह्मेशंमध्यमेश्वरम् ॥ बृहस्पतीश्वरंवाथविभांडेश्वरमेवच ॥ ९० ॥
भारभूतेश्वरंकिंवामहालक्ष्मीश्वरंतुवा ॥ मरुत्तेशंतुमोक्षेशंगंगेशंनर्मदेश्वरम् ॥ ९१ ॥ मार्कंडंमणिकर्णीशंरत्नेश्वरमथापिवा ॥ अथवायोगिनीपीठं
साधकस्यैवासिद्धिदम् ॥ ९२ ॥ यामुनेशंलांगलीशंश्रीमद्विश्वेश्वरंविभुम् ॥ अविमुक्तेश्वरंवाथविशालक्षीशमेवच ॥ ९३ ॥ व्याघ्रेश्वरंवराहेशंव्यासेशं
वृषभध्वजम् ॥ वरुणेशंविधीशंवासिद्धेशंशनीश्वरम् ॥ ९४ ॥ सोमेश्वरंकिमिन्द्रेशंस्वर्लीनसंगमेश्वरम् ॥ हरिश्चंद्रेश्वरंकिंवाहरिकेशेश्वरंतुवा॥९५॥
त्रिसंध्येशंमहादेवमुपशांतिशिवंतथा॥ भवानीशंकपर्दीशंकंदुकेशंमखेश्वरम् ॥ ९६ ॥ मित्रावरुणसंज्ञंवाकिमेपामाशुपुत्रदम् ॥ क्षणंविचार्यसमुनिर्निरीति
विश्वानरःसुधीः ॥ ९७ ॥ आज्ञातंविस्मृतंतावत्फलितोमेमनोरथः ॥ सिद्धैःसंसेवितंलिंगंसर्वासिद्धिकरंपरम् ॥ ९८ ॥ दर्शनात्स्पर्शनाद्यस्यमनोनिर्वृ
तिभाग्भवेत् ॥ उद्घाटितंसदेवास्तेस्वर्गद्वारंहियत्रवै ॥ ९९ ॥ दिवानिशंपूजनार्थंविज्ञाप्यत्रिदशेश्वरम् ॥ पञ्चमुद्रेमहापीठेसिद्धिदेसर्वजंतुषु ॥ १०० ॥
यत्रसाविकटादेवीप्रकटासिद्धिरूपिणी ॥ यत्रस्थितानांभक्तानांसाक्षात्सिद्धिविनायकः ॥ १ ॥ निर्धूयविघ्नजालानिसर्वाःसिद्धीःप्रयच्छति ॥ अविमुक्ते
महाक्षेत्रेसिद्धिक्षेत्रंहितत्परम् ॥ २ ॥ यत्रवीरेश्वरंलिंगंमहागुह्यतमंमतम् ॥ तिलांतरापिनोकाश्यांभूमिर्लिंगंविनाकचित् ॥ ३ ॥ परंवीरेशसदृशंन
लिंगंत्वाशुसिद्धिदम् ॥ धर्मदंचार्थदंसम्यक्कामदंमोक्षदंतथा ॥४॥ यथावीरेश्वरंलिंगंकाश्यांनान्यत्तथाध्रुवम् ॥ पंचस्वरोत्रगंधर्वःपरांसिद्धिमगात्पुरा॥५॥
विद्याधरःस्वच्छविद्योवसुपूर्णश्चयक्षराट् ॥ नृत्यंतीनिजभावेनपुराह्यत्राप्सरोवरा ॥ ६ ॥ सदेहाकोकिलालापार्लिंगमध्येलयंगता ॥ ऋषिर्वेदशिराना
मजपन्वेशतरुद्रियम् ॥ ७ ॥ मन्त्रज्योतिर्मयेलिंगेसशरीरोविशत्पुरा ॥ चन्द्रमौलिभरद्वाजाबुधोपाशुपतोत्तमो ॥ ८ ॥ वीरेश्वरंसमभ्यर्च्यगायमानो
लयंगतो ॥ शंखचूडोहिनागेंद्रःस्वफणामणिभिर्निशि ॥ ९ ॥ षण्मासात्सिद्धिमगमद्बहुनीराजनेरिह ॥ किन्नरीहंसपद्मत्रभर्त्रावेणुप्रियेणवै ॥ ११० ॥
गायंतीसुस्वरंयातापरांनिर्वाणभूमिकाम् ॥ असंख्याताःसहस्राणिसिद्धाःसिद्धिमिहागताः ॥ ११ ॥ सिद्धलिंगमिहाख्यातंतस्माद्वीरेश्वरंपरम् ॥ १२ ॥
वीरेश्वरंसमाराध्यभ्रष्टराज्योजयद्रथः ॥ हत्वारिपूनस्वलितंराज्यंप्रापविदेहजः ॥ १३ ॥ विदूरथोऽथनृपतिरपुत्रःपुत्रवानभूत् ॥ वीरेश्वरप्रसादेनमगधा
धिपतिर्वशी ॥ १४ ॥ वसुदत्तोत्रचवणिक्सुतांवसुमतोपमाम् ॥ अब्दमभ्यर्च्यवीरेशंरत्नदत्तोप्यवाप्तवान् ॥ १५ ॥ अहमप्यत्रवीरेशंसमाराध्यत्रिका
लतः ॥ आशुपुत्रमवाप्स्यामियथाभिलषितंस्त्रिया ॥ १६ ॥ इतिकृत्वामतिंधीरोविप्रोविश्वानरःकृती ॥ चन्द्रकूपजलेःस्नात्वाजग्राहनियमंव्रती
॥ १७ ॥ एकाहारोभवन्मासंमासंनक्ताशनोभवत् ॥ अयाचिताशनोमासंमासंत्यक्ताशनःपुनः ॥ १८ ॥ पयोव्रतोभवन्मासंमासंशाकफलाशनः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मासंमुष्टितिलाहारोमासंपानीयभोजनः ॥ १९ ॥ पंचगव्याशनोमासंमासंचांद्रायणव्रती ॥ मासंकुशाग्रजलभुङ्मासंश्वसनभक्षणः ॥ १२० ॥ अथत्रयोदशेमासिस्नात्वात्रिपथगांभसि ॥ प्रत्यूषएववीरेशंयावदायातिसद्विजः ॥ २१ ॥ तावद्विलोकयांचक्रेमध्येलिंगंतपोधनः ॥ विभूतिभूषितंबाल मष्टवर्षाकृतिंशुभम् ॥२२॥ आकर्णपूर्णनेत्रंचसुरक्तदशनच्छदम् ॥ चारुपिंगजटामौलिंनग्नंप्रहसिताननम् ॥ २३ ॥ शैशवोचितनेपथ्यधारिणंचित्तहारिणम् ॥ पठंतंश्रुतिसूक्तानिहसंतंचस्वलीलया ॥ २४ ॥ तमालोक्यस्तुतिंचक्रेरोमकंचुकितोमुदा ॥ प्रोच्चरद्गद्गदालापोनमोस्त्वितिपुनःपुनः ॥ २५ ॥ विश्वानरउवाच ॥ ॥ एकंब्रह्मैवाद्वितीयंसमस्तंसत्यंसत्यंनेहनानास्तिकिंचित् ॥ एकोरुद्रोनद्वितीयोवतस्थेतस्मादेकंत्वांप्रपद्येमहेशम् ॥ २६ ॥ एकःकर्तात्वंहिसर्वस्यशंभोनानारूपेष्वेकरूपोस्यरूपः ॥ यद्वत्प्रत्यप्स्वर्कएकोप्यनेकस्तस्मान्नान्यंत्वांविनेशंप्रपद्ये ॥२७॥ रज्जौसर्पःशुक्तिकायांचरूप्यंनैरूपुरस्तन्नृगाख्यंमरीचौ ॥ यद्वत्तद्वद्विष्वगेषप्रपंचोयस्मिञ्ज्ञातेतंप्रपद्येमहेशम् ॥ २८ ॥ तोयेशैत्यंदाहकत्वंचवह्नौतापोभानौशीतभानौप्रसादः ॥ पुष्पेगंधोदुग्धमध्येपिसर्पिर्यत्तच्छंभोत्वंततस्त्वांप्रपद्ये ॥ २९ ॥ शब्दंगृह्णास्यश्रवास्त्वंहिजिघ्रेरघ्राणस्त्वंव्यंघ्रिरायासिदूरात् ॥ व्यक्षःपश्येस्त्वंरसज्ञोप्यजिह्वःकस्त्वांसम्यग्वेत्त्यतस्त्वांप्रपद्ये ॥ १३० ॥ नोवेदस्त्वामीशसाक्षाद्विवेदनोवाविष्णुर्नोविधाताऽखिलस्य ॥ नोयोगींद्रानेंद्रमुख्याश्चदेवाभक्तोवेदत्वामतस्त्वांप्रपद्ये ॥ ३१ ॥

नोतेगोत्रंनेशजन्मापिनाख्यानोवारूपंनैवशीलंनदेशः ॥ इत्थंभूतोपीश्वरस्त्वंत्रिलोक्याःसर्वान्कामान्पूरयेस्तद्भजेत्वाम् ॥ ३२ ॥ त्वत्तःसर्वंत्वंहिसर्वंस्मरारेत्वंगौरीशस्त्वंचनग्नोऽतिशांतः ॥ त्वंवैवृद्धस्त्वंयुवात्वंचबालस्तत्त्वंयत्किंनास्यतस्त्वांनतोस्मि ॥ ३३ ॥ स्तुत्वेतिभूमौनिपपातविप्रःसदंडवद्यावदतीवहृष्टः ॥ तावत्सबालोखिलवृद्धवृद्धःप्रोवाचभूदेववरंवृणीहि ॥ ३४ ॥ ततउत्थायहृष्टात्मामुनिर्विश्वानरःकृती ॥ प्रत्यब्रवीत्किमज्ञातंसर्वज्ञस्यतवप्रभो ॥ ३५ ॥ सर्वांतरात्माभगवान्सर्वःसर्वप्रदोभवान् ॥ याच्ञांप्रतिनियुंक्तेमांकिमीशोदैन्यकारिणीम् ॥ ३६ ॥ इतिश्रुत्वावचस्तस्यदेवोविश्वानरस्यह ॥ शुचेःशुचिव्रतस्याशुशुचिस्मित्वाब्रवीच्छिशुः ॥ ३७ ॥ बालउवाच ॥ त्वयाशुचेशुचिष्मत्यांयोभिलापःकृतोहृदि ॥ अचिरेणैवकालेनसभविष्यत्यसंशयः ॥ ३८ ॥ तवपुत्रत्वमेष्यामिशुचिष्मत्यांमहामते ॥ ख्यातोगृहपतिर्नाम्नाशुचिःसर्वामरप्रियः ॥ ३९ ॥ अभिलापाष्टकंपुण्यंस्तोत्रमेतत्त्वयेरितम् ॥ अब्दंत्रिकालपठनात्कामदंशिवसंनिधौ ॥ १४० ॥ एतत्स्तोत्रस्यपठनंपुत्रपौत्रधनप्रदम् ॥ सर्वशांतिकरंचापिसर्वापत्परिनाशनम् ॥ ४१ ॥ स्वर्गापवर्गसंपत्तिकारकंनात्रसंशयः ॥ प्रातरुत्थायसुस्नातोलिंगमभ्यर्च्यशांभवम् ॥ ४२ ॥ वर्षंजपन्निदंस्तोत्रमपुत्रःपुत्रवान्भवेत् ॥ वैशाखेकार्तिकेमाघेविशेषनियमैर्युतः ॥ ४३ ॥ यःपठेत्स्नानसमयेसलभेत्सकलंफलम् ॥ कार्तिकस्यतुमासस्यप्रसादादहमव्ययः ॥ ४४ ॥ तवपुत्रत्वमेष्यामियस्त्वन्यस्तत्पठिष्यति ॥ अभिलापाष्टकमिदंनदेयंयस्यकस्यचित् ॥ ४५ ॥ गोपनीयंप्रयत्नेनमहावंध्याप्रसूतिकृत् ॥ स्त्रियावापुरुषेणापिनियमाल्लिंगसंनिधौ ॥ ४६ ॥ अब्दंजप्तमिदंस्तोत्रंपुत्रदंनात्रसंशयः ॥ इत्युक्त्वांतर्दधेबालःसोपिविप्रोगृहंगतः ॥ १४७ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेइंद्राग्निलोकवर्णनंनामदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ अगस्तिरुवाच ॥ ॥ शृणुसुश्रोणिसुभगेवैश्वानरसमुद्भवम् ॥ पुण्यशीलसुशीलाभ्यांयथोक्तंशिवशर्मणे ॥ १ ॥

अथकालेनतद्योपिदंतर्वत्नीबभूवह ॥ विधिवद्विहितेतेनगर्भाधानाख्यकर्मणि ॥ २ ॥ ततःपुंसवनंतेनस्पंदनात्प्राग्विपश्चिता ॥ गृह्योक्तविधिनासम्यक्कृतंपुंस्त्वविवृद्धये ॥ ३ ॥ सीमन्तोथाष्टमेमासिगर्भरूपसमृद्धिकृत् ॥ सुखप्रसवसिद्ध्यैचतेनाकारिक्रियाविदा ॥ ४ ॥ अथातःसत्सुतारासुताराधिपवराननः ॥ केंद्रेगुरौशुभेलग्नेसुग्रहेष्वयुगेषुच ॥५॥ अरिष्टंदीपयन्दीप्त्यासर्वारिष्टविनाशकृत् ॥ तनयोनामतस्यांतुशुचिष्मत्यांबभूवह ॥६॥ सद्यःसमस्तसुखदोभूर्भुवःस्वर्निवासिनाम् ॥ गंधवाहागन्धवाहादिग्वधूमुखवासनाः ॥ ७ ॥ इष्टगन्धप्रसूनौघैर्ववर्षुस्तेघनाघनाः ॥ देवदुन्दुभयोनेदुःप्रसेदुःसर्वतोदिशः ॥८॥ परितःसरितःस्वच्छाभूतानांमानसैःसह ॥ तमोऽताम्यत्तुनितरांरजोपिविरजोभवत् ॥ ९ ॥ सत्त्वाःसत्त्वसमायुक्तावसुधासीच्छुभातदा ॥ कल्याणीसर्वतोवाणीप्राणिनःप्रीणयंत्यभूत् ॥ १० ॥

तिलोत्तमोर्वशीरंभाप्रभाविद्युत्प्रभाशुभा ॥ सुमंगलाशुभालापासुशीलाद्यावरांगनाः ॥११॥ क्वणत्कंकणपात्राणिकृत्वाकरतलेमुदा ॥ मुक्तमुक्ताफलाढ्यानियक्षकर्दमवंतिच ॥ १२ ॥ वज्रवैदूर्यदीपानिहरिद्रालेपनानिच ॥ गारुत्मतैकरूपाणिशंखशुक्तिदधीनिच ॥ १३ ॥ पद्मरागप्रवालाख्यरत्नकुंकुमवंतिच ॥ गोमेदपुष्परागेंद्रनीलसन्माल्यभांजिच ॥ १४ ॥ विद्याधर्यश्चकिन्नर्यस्तथाऽमर्यःसहस्रशः ॥ चामरव्यग्रहस्ताग्रमंगलद्रव्यपाणयः ॥ १५ ॥ गंधर्वोरगयक्षाणांसुवासिन्यःशुभस्वराः ॥ गायंत्योललितंगीतंतत्राजग्मुरनेकशः ॥ १६ ॥ मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः ॥ वसिष्ठःकश्यपश्चाहंविभांडोमांडवीसुतः ॥ १७ ॥ लोमशोलोमचरणोभरद्वाजोथगौतमः ॥ भृगुस्तुगालवोगर्गोजातूकर्ण्यःपराशरः ॥ १८ ॥ आपस्तंबोयाज्ञवल्क्यदक्षवाल्मीकिमुद्गलाः ॥ शातातपश्चलिखितःशिलादःशंखउंछभुक् ॥ १९ ॥ जमदग्निश्चसंवर्तोमतंगोभरतोंशुमान् ॥ व्यासःकात्यायनःकुत्सःशौनकःसुश्रुतःशुकः ॥२० ॥ ऋष्यशृंगोथदुर्वासारुचिर्नारदतुंबुरू ॥ उत्तंकोवामदेवश्चच्यवनोसितदेवलौ ॥२१ ॥ शालंकायनहारीतौविश्वामित्रोथभार्गवः ॥ मृकंडःसहपुत्रेणदाल्भ्यउद्दालकस्तथा ॥ २२ ॥ धौम्योपमन्युवत्साद्यामुनयोमुनिकन्यकाः ॥ तच्छांत्यर्थंसमाजग्मुर्धन्यंविश्वानराश्रमम् ॥ २३ ॥ ब्रह्मावृहस्पतियुतोदेवोगरुडवाहनः ॥ नंदिभृंगिसमायुक्तोगौर्यासहवृषध्वजः ॥ २४ ॥ महेंद्रमुख्यागीर्वाणानागाःपातालवासिनः ॥ रत्नान्यादायबहुशःससरित्कामहाब्धयः ॥ २५ ॥ स्थावराजंगमंरूपंधृत्वायाताःसहस्रशः ॥ महामहोत्सवेतस्मिन्बभूवाकालकौमुदी ॥ २६॥ जातकर्मस्वयंचक्रेतस्यदेवःपितामहः ॥ श्रुतिंविचार्यतद्रूपांनाम्नागृहपतिस्त्वयम् ॥२७॥ इतिनामददौतस्मैदेयमेकादशेहनि ॥ नामकर्मविधानेनतदर्थंश्रुतिमुच्चरन् ॥ २८ ॥ अयमग्निर्गृहपतिर्गार्हपत्यःप्रजायावसुवित्तमः ॥ अग्नेगृहपतेभिद्युम्नमभिसहआयच्छस्व ॥ २९ ॥ अग्नेगृहपतेस्थित्यापरामपिनिदर्शयन् ॥ चतुर्निगममंत्रोक्तैराशीर्भिरभिनंद्यच ॥ ३० ॥ कृत्वाबालोचितांरक्षांहरेणहरिणासह ॥ निर्ययौहंसमारुह्यसर्वेषांप्रपितामहः ॥ ३१ ॥ अहोरूपमहोतेजस्त्वहोसर्वांगलक्षणम् ॥ अहोशुचिष्मतीभाग्यमाविरासीत्स्वयंहरः ॥ ३२ ॥ अथवाकिमिदंचित्रंशर्वभक्तजनेष्वहो ॥ आविर्भवेत्स्वयंरुद्रोयतोरुद्रास्तदर्चकाः ॥ ३३ ॥ इतिस्तुवंतस्त्वन्योन्यंजग्मुःसर्वेयथागतम् ॥ विश्वानरंसमापृच्छ्यसंप्रहृष्टतनूरुहाः ॥ ३४ ॥ अतःपुत्रं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समीहितंगृहस्थाश्रमवासिनः ॥ पुत्रेणलोकाञ्जयतिश्रुतिरेषासनातनी ॥ ३५ ॥ अपुत्रस्यगृहंशून्यमपुत्रस्यार्जनंवृथा ॥ अपुत्रस्यान्वयश्छिन्नोनापवित्रं ह्यपुत्रतः ॥ ३६ ॥ नपुत्रात्परमोलाभोनपुत्रात्परमंसुखम् ॥ नपुत्रात्परमंमित्रंपरत्रेहचकुत्रचित् ॥ ३७ ॥ औरसःक्षेत्रजःक्रीतोदत्तःप्राप्तःसुतासुतः ॥ आपत्सुरक्षितश्चान्यःपुत्राःसप्तात्रकीर्तिताः ॥ ३८ ॥ एषामन्यतमःकार्योगृहस्थेनविपश्चिता ॥ पूर्वपूर्वःसुतःश्रेयान्हीनःस्यादुत्तरोत्तरः ॥ ३९ ॥ ॥ गणावूचतुः ॥ ॥ निष्क्रमोथचतुर्थेऽस्यमासिपित्राकृतोगृहात् ॥ अन्नप्राशनमब्दार्धेचूडाब्देचार्थवत्कृता ॥ ४० ॥

कर्णवेधंततःकृत्वाश्रवणर्क्षेसकर्मवित् ॥ ब्रह्मतेजोभिवृद्ध्यर्थंपंचमेऽब्देव्रतंददौ ॥ ४१ ॥ उपाकर्मततःकृत्वावेदानध्यापयत्सुधीः ॥ त्र्यब्दंवेदान्सविधिनाऽध्यैष्टसांगपदक्रमान् ॥ ४२ ॥ विद्याजातंसमस्तंचसाक्षिमात्राद्गुरोर्मुखात् ॥ विनयादिगुणानाविष्कुर्वञ्जग्राहशक्तिमान् ॥ ४३ ॥ ततोथनवमे वर्षेपित्रोःशुश्रूषणेरतम् ॥ वैश्वानरंगृहपतिंदृष्ट्वाकामचरोमुनिः ॥ ४४ ॥ विश्वानरोटजंप्राप्यदेवर्षिर्नारदःसुधीः ॥ पप्रच्छकुशलंतत्रगृहीतार्घासनः क्रमात् ॥ ४५ ॥ ॥ नारदउवाच ॥ ॥ विश्वानरमहाभागशुचिष्मतिशुभव्रते ॥ कुरुतेयुवयोर्वाक्यमयंगृहपतिःशिशुः ॥ ४६ ॥ नान्यत्तीर्थं नवादेवोनगुरुर्नचसत्क्रिया ॥ विहायपित्रोर्वचनंनान्योधर्मःसुतस्यहि ॥ ४७ ॥ नपित्रोरधिकंकिंचित्त्रिलोक्यांतनयस्यहि ॥ गर्भधारणपोषाभ्यांपितुर्मातागरीयसी ॥ ४८ ॥ अंभोभिरभिषिच्यस्वंजननीचरणच्युतैः ॥ प्राप्नुयात्स्वर्धुनीशुद्धकबंधाधिकशुद्धताम् ॥ ४९ ॥ संन्यस्ताखिलकर्मापिपितुर्वंद्यो हिमस्करी ॥ सर्ववंद्येनयतिनाप्रसूर्वंद्याप्रयत्नतः ॥ ५० ॥ इदमेवतपोत्युग्रमिदमेवपरंव्रतम् ॥ अयमेवपरोधर्मोयत्पित्रोःपरितोषणम् ॥ ५१ ॥ मन्येमान्योनाधमस्यतथान्यस्ययथायुवाम् ॥ सुखाकारैर्विनीतस्यशिशोर्गृहपतेरहम् ॥ ५२ ॥ वैश्वानरसमभ्येहिममोत्संगेनिषीदभो ॥ लक्षणानिपरीक्षेहंपाणिंदर्शयदक्षिणम् ॥ ५३ ॥ इत्युक्तोमुनिनाबालःपित्रोराज्ञामवाप्यसः ॥ प्रणम्यनारदंश्रीमान्भक्त्याप्रह्वउपाविशत् ॥ ५४ ॥

ततोदृष्ट्वास्यसर्वांगंतालुजिह्वाद्विजानपि ॥ आनीयकुंकुमारक्तंसूत्रंचत्रिगुणीकृतम् ॥ ५५ ॥ स्मृत्वाशिवौगणाध्यक्षमूर्ध्वीभूतमुदङ्मुखम् ॥ मुनिः परिममौबालमापादतलमस्तकम् ॥ ५६ ॥ तिर्यगूर्ध्वंसमोमानेयोष्टोत्तरशतांगुलः ॥ सभवेत्पृथिवीपालोबालोऽयंतेयथाद्विज ॥ ५७ ॥ पंचसूक्ष्मः पंचदीर्घःसप्तरक्तःषडुन्नतः ॥ त्रिपृथुर्लघुगंभीरोद्वात्रिंशल्लक्षणास्त्विति ॥ ५८ ॥ पंचदीर्घाणिशस्यानियथादीर्घायुषोस्यवै ॥ भुजौनेत्रेहनुर्जानुनासाऽस्यतनयस्यते ॥ ५९ ॥ ग्रीवाजंघामेहनैश्चत्रिभिर्ह्रस्वोयमीडितः ॥ स्वरेणसत्त्वनाभिभ्यांत्रिगंभीरःशिशुःशुभः ॥ ६० ॥ त्वक्केशांगुलिदशनाः पर्वाण्यंगुलिजान्यपि ॥ तथास्यपंचसूक्ष्माणिदिक्पालपदभाग्यथा ॥ ६१ ॥ वक्षःकुक्ष्यलकंस्कंधकरंवक्त्रंषडुन्नतम् ॥ तथाऽत्रदृश्यतेबालेमहदैश्वर्यभाग्यथा ॥ ६२ ॥ पाण्योस्तलेचनेत्रांतेतालुजिह्वाधरौष्ठकम् ॥ सप्तारुणंचसनखमस्मिन्राज्यसुखप्रदम् ॥ ६३ ॥ ललाटकटिवक्षोभिस्त्रिविस्तीर्णो यथाह्यसौ ॥ सर्वतेजोतिरैश्वर्यंतथाप्राप्स्यतिनान्यथा ॥ ६४ ॥ कमठीपृष्ठकठिनावकर्मकरणौकरौ ॥ राज्यहेतूशिशोरस्यपादौचाध्वनिकोमलौ ॥ ६५ ॥

अच्छिन्नातर्जनींव्याप्यतथारेखास्यदृश्यते ॥ कनिष्ठापृष्ठनिर्यातादीर्घायुष्यंयथार्पयेत् ॥ ६६ ॥ पादौसुमांसलौरक्तौसमौसूक्ष्मौसुशोभनौ ॥ समगुल्फौ स्वेदहीनौस्निग्धावैश्वर्यसूचकौ ॥ ६७ ॥ स्वल्पाभिःकररेखाभिरारक्ताभिःसदासुखी ॥ लिंगेनकृशह्रस्वेनराजराजोभविष्यति ॥ ६८ ॥ उत्कटासनगुल्फास्फिग्भिरस्यापिवर्तुला ॥ दक्षिणावर्तमरुणंमहदैश्वर्यसूचिका ॥ ६९ ॥ धारैकामूत्रयत्यस्मिन्दक्षिणावर्तिनीयदि ॥ गंधश्चमीनमधुनोर्यदिवीर्येतदानृपः ॥ ७० ॥ विस्तीर्णौमांसलौस्निग्धौस्फिचावस्यसुखोचितौ ॥ वामावर्तौसुप्रलंबौदोषौदिग्रक्षणोचितौ ॥ ७१ ॥ श्रीवत्सवज्रचक्राब्जमत्स्यकोदंडदंडभृत् ॥ तथास्यकरगारेखायथास्यात्त्रिदिवस्पतिः ॥ ७२ ॥ द्वात्रिंशद्दशनश्चायंकरकंबुशिरोधरः ॥ कौंचदुंदुभिहंसाभ्रस्वरःसर्वेश्वराधिकः ॥ ७३ ॥

मधुपिंगलनेत्रोऽसौनैनंश्रीस्त्यजतिक्वचित् ॥ पंचरेखललाटस्तुतथासिंहोदरःशुभः ॥ ७४ ॥ ऊर्ध्वरेखांकितपदोनिःश्वसन्पद्मगंधवान् ॥ अच्छिद्रपाणिः सुनखोमहालक्षणवानयम् ॥ ७५ ॥ किंतुसर्वगुणोपेतंसर्वलक्षणलक्षितम् ॥ संपूर्णनिर्मलकलंपातयेद्विधुवद्विधिः ॥ ७६ ॥ तस्मात्सर्वप्रयत्नेनरक्षणीयस्त्वसौशिशुः ॥ गुणोपिदोषतांयातिवक्रीभूतेविधातरि ॥ ७७ ॥ शंकेऽस्यद्वादशेवर्षेप्रत्यूहोविद्युदग्नितः ॥ इत्युक्त्वानारदोधीमान्सजगामयथागतम् ॥ ७८ ॥ विश्वानरःसपत्नीकस्तच्छ्रुत्वानारदेरितम् ॥ तदैवमन्यमानोभूद्वज्रपातंसुदारुणम् ॥ ७९ ॥ हाहतोस्मीतिवचसाहृदयंसमताडयत् ॥ मूर्च्छामवापमहतींपुत्रशोकसमाकुलः ॥ ८० ॥ शुचिष्मत्यपिदुःखार्तारुरोदातीवदुःसहम् ॥ आर्तस्वरेणहारावैरत्यंतव्याकुलेंद्रिया ॥ ८१ ॥ हाशिशोहागुणनिधेहापितुर्वाक्यकारक ॥ हाकुतोमंदभाग्यायाजठरेमेसमागतः ॥ ८२ ॥ त्वदेकपुत्रांहापुत्रकोऽत्रमांत्रायतेपुरा ॥ त्वदृतेत्वद्गुणोर्म्याढ्येपतितांशोकसागरे ॥ ८३ ॥ हाबालहाविमलहाकमलायताक्षहालोकलोचनचकोरकुरंगलक्ष्मन् ॥ हातातनातनयनाब्जमयूखमालिन्हामातुरुत्सवसहस्रसुखैकहेतो ॥ ८४ ॥ हापूर्णचंद्रमुखहासुनखांगुलीकहाचाटुकारवचनामृतवीचिपूर ॥ दुःखैःकियद्भिरहहांगमयात्वमाप्तःकिंकिंकृतंगृहपतेनमयात्वदाप्त्यै ॥ ८५ ॥

नोप्तोबलिर्नवतकासुचदेवतासुतीर्थानिकानिनमयाध्युषितानिवत्स ॥ केकेमयाननियमौषधमंत्रयंत्राःसंसाधितास्तवकृतेसुकृतैकलभ्य ॥ ८६ ॥ संसारसागरतरेहरदुःखभारंसारंमुखेंदुमभिदर्शयसौख्यसिंधो ॥ पुन्नामतीव्रनरकार्णववाडवाग्नेस्संजीवयस्वपितरंनिजवाक्सुधोक्षैः ॥ ८७ ॥ किंदेवताअहहजन्ममहोत्सवेऽस्यज्ञात्वेतिभाविमिलितायुगपत्समस्ताः ॥ एकस्थसर्वगुणशीलकलाकलापसौंदर्यलक्षणपरीक्षणपूर्णहर्षाः ॥ ८८ ॥ शंभोमहेशकरुणाकरशूलपाणेमृत्युंजयस्त्वमितिवेदविदोवदंति ॥ त्वद्दत्तबालतनयेयदिकालकालःस्यादेवमत्रवदकस्यभवेन्नपातः ॥ ८९ ॥ हाहंतहंतभवताभवतापहारीकस्माद्विधेऽत्रविदधेबहुभिःप्रयत्नैः ॥ बालोविशालगुणसिंधुमगाधमध्यंसद्रत्नसारमखिलंसविधंविधाय ॥ ९० ॥ हाकालबालकवतीकिमुतेनराज्ञीत्वत्कालतांनहृतवान्नसुताननेंदुः ॥ बालेतिकोमलमृणाललतांगलीलेदंभोलिनिष्ठुरकठोरकुठारदंष्ट्रः ॥ ९१ ॥ इत्थंविलप्यबहुशोनयनांबुधारासंपातजाततटिनीशतमुत्तरंगम् ॥ सातोकशोकजनितानलतापतप्ताप्रोच्छ्वस्यदीर्घविपुलोष्णमहोशुशोष ॥ ९२ ॥

आकर्ण्यतत्करुणवत्परिदेवितानितानिद्रुमाव्रततयःकुसुमाश्रुपातैः ॥ प्रायोरुदंतिपततांविरुतार्तरावैरालोल्यमौलिमसकृत्पवनच्छलेन ॥ ९३ ॥ रुण्णंतयाकिलतथाबहुमुक्तकंठमार्तस्वरैःप्रतिरवच्छलतोयथोच्चैः ॥ तद्दुःखतोनुरुरुदुर्गिरिकंदरास्याःसर्वादिशःस्थगितपत्रिमृगागमाहि ॥ ९४ ॥ श्रुत्वार्तनादमितिविश्वनरोपिमोहंहित्वोत्थितःकिमितिकिंत्वितिकिंकिमेतत् ॥ उच्चैर्वदन्गृहपतिःक्वसमेबहिस्थःप्राणोंतरात्मनिलयःसकलेंद्रियेशः ॥ ९५ ॥ अगस्त्यउवाच ॥ ॥ ततोदृष्ट्वासपितरौबहुशोकसमावृतौ ॥ स्मित्वोवाचततोमातस्त्रासस्त्वीदृक्कुतोहिवाम् ॥ ९६ ॥ नमांकृतवपुस्त्राणंभवच्चरणरेणुभिः ॥ कालःकलयितुंशक्तोवराकीचंचलाल्पिका ॥ ९७ ॥ प्रतिज्ञांशृणुतंतातौयदिवांतनयोह्यहम् ॥ करिष्येहंतथातेनविद्युन्मत्तस्त्रसिष्यति ॥ ९८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वृत्युंजयसमाराध्यसर्वज्ञंसर्वदंसताम् ॥ कालकालंमहाकालंकालकूटविषादिनम् ॥ ९९ ॥ इतिश्रुत्वावचस्तस्यजरितौद्विजदंपती ॥ अकालामृत वर्षोपशांततापौतदोचतुः ॥ १०० ॥ अपयोदपयोवृष्टिरुग्धाब्धिःसुधोदयः ॥ अनिंदुःकौमुदीकांतिःकुतोनोमुखयत्यलम् ॥ १ ॥ पुनर्बद्धिपुनर्बृद्धिकी दृक्षीदृक्पुनःपुनः ॥ कालःकलयितुंनालंवराकीचंचलालिका ॥२॥ आवयोस्तापनाशायमहोपायस्त्वयेरितः ॥ मृत्युंजयस्यदेवस्यसमाराधनलक्षणः॥ ॥३॥ तद्वच्छरणंतातनातःपरतरंहितम् ॥ मनोरथपथातीतकारिणःकालहारिणः ॥ ४ ॥ किंनश्रुतंत्वयातात श्वेतकेतुंयथापुरा ॥ पाशितंकालपाशो नररक्षात्रिपुरांतकः ॥ ५ ॥ शिलादतनयंयृत्युग्रस्तमष्टाब्दमर्भकम् ॥ शिवोनिजजनंचक्रेनंदिनंविश्वनंदिनम् ॥ ६ ॥ क्षीरोदमथनोद्भूतंप्रलयानलसं निभम् ॥ पीत्वाहालाहलंघोरमरक्षद्भुवनत्रयम् ॥ ७ ॥

जालंधरंमहादर्पंहतत्रैलोक्यसंपदम् ॥ चरणांगुष्टरेखोत्थचक्रेणनिजघानयः ॥ ८ ॥ यएकेपुनिपातोत्थज्वलनैस्त्रिपुरंपुरा ॥ विधायपत्रिणांवेष्णुंज्वा लयामासधूर्जटिः ॥ ९ ॥ अंधकंयस्त्रिशूलाग्रप्रोतंवर्षायुतंपुरा ॥ त्रैलोक्यैश्वर्यसंमूढंशोषयामासभानुना ॥ ११० ॥ कामंदृष्टिनिपातेनत्रैलोक्यविजयो र्जितम् ॥ निनायानंगपदवींवीक्षमाणेष्वजादिषु ॥ ११ ॥ तंब्रह्माद्येककर्तारमेधवाहनमच्युतम् ॥ प्रयाहिपुत्रशरणंविश्वरक्षामणिंशिवम् ॥ १२ ॥ पित्रोरनुज्ञांप्राप्येतिप्रणम्यचरणौतयोः ॥ प्रदक्षिणमुपावृत्यवह्नाश्वास्यविनिर्ययौ ॥ १३ ॥ सप्राप्यकाशींदुष्प्रापांब्रह्मनारायणादिभिः ॥ महासंवर्तसं वृत्तितापाद्रिश्वेशपालिताम् ॥ १४ ॥ फिरस्वर्धुन्याहारयष्टयेवराजितांकंठभूमिषु ॥ विचित्रगुणशालिन्याहारनीहारगौरया ॥ १५ ॥ बहुसंसारसंतापसं तमज्ञनतोद्भवम् ॥ वारयंतीवरणयाछिंदंतीमसिधारया ॥ १६ ॥ यल्लभ्यतेकैवल्यंसुदृढाष्टांगयोगतः ॥ विकासयंतींतत्सम्यक्काशिकांयांजगुर्बुधाः ॥ ॥ १७ ॥ संसारतापतप्ताभ्यांलोचनाभ्यांसदृष्टवान् ॥ कर्णाकर्णप्रकीर्णाभ्यांप्राग्ययौमणिकर्णिकाम् ॥ १८ ॥ तत्रस्नात्वाविधानेनदृष्ट्वाविश्वेश्वरंवि भुम् ॥ त्रैलोक्यप्राणिसंत्राणकारिणंप्रणनामह ॥ १९ ॥ आलोक्यालाक्यतल्लिंगंतुतोपहृदयेवहु ॥ परमानंदकंदाख्यंस्फुटमेतन्नसंशयः ॥ १२० ॥ अहोनमत्तोधन्योस्तित्रैलोक्येसचराचरे ॥ यदद्राक्षिपमद्याहंश्रीमद्विश्वेश्वरंविभुम् ॥२१॥ त्रिलोकीसारसर्वस्वंपिंडीभूतमिदंकिल ॥ किंवापीयूषपिंडो यमुद्भूतःक्षीरनीरधेः ॥२२ ॥ आत्मावबोधमहसःकिमसौप्रथमांकुरः ॥ ब्रह्मानंदसुकंदोवाकिमुब्रह्मरसायनम् ॥ २३ ॥

योगिहृत्पद्मनिलयंयदनाकारमुच्यते ॥ तदाकारत्वमापंदेकिमिदंलिंगकेतवात् ॥ २४ ॥ ब्रह्मांडभांडमथवानानारत्नोघपूरितम् ॥ अथवामोक्षवृक्ष स्यफलमेतन्नसंशयः ॥ २५ ॥ निर्वाणलक्ष्म्याःकिमथकेशपाशःसुपुष्पयुक ॥ कैवल्यमल्लीवल्लयाःकिंस्तवकःस्तावकार्थदः ॥ २६ ॥ निःश्रेयसश्रियः किंवाऽऽनंदकर्कोडनकंदुकः ॥ अपवर्गोदयाद्रेःकिमुदियायसुधाकरः ॥ २७ ॥ संसारमोहतिमिरभिदुरःकिमसौरविः ॥ किमुकल्याणरमणीरम्यशृंगारद र्पणः ॥ २८ ॥ आज्ञातंनभवेदन्यत्सर्वंपादेहधारिणाम् ॥ अनेककर्ममहीजानांबीजपूरोऽयमद्भुतः ॥२९॥ विश्वेषांविश्ववीजानांकर्माख्यानांलयोयतः ॥ अस्मिन्निर्वाणदेलिंगेविश्वलिंगमिदंततः ॥ १३० ॥ ममभाग्योदयेनैवनारदेनमहर्षिणा ॥ तदागत्यतथोक्तंयत्कृतकृत्योस्म्यहंततः ॥ ३१ ॥ इत्यानं दामृतरसंविधायसहिपारणम् ॥ततःशुभेऽह्निसंस्थाप्यलिंगंसर्वहितप्रदम् ॥ ३२ ॥ जग्राहनियमान्घोरान्दुष्करानकृतात्मनाम् ॥ अष्टोत्तरशतैःकुंभैः पूर्णैर्गंगांमृतद्रवैः ॥ ३३ ॥ संस्नाप्यवाससापूतैः पूतात्माप्रत्यहंशिवम् ॥ नीलोत्पलमयींमालांसमर्पयतिसोऽन्वहम् ॥ ३४ ॥ अष्टाधिकसहस्रेस्तुसुमनो भिर्विनिर्मिताम् ॥ सपक्षार्धेनपण्मासंकंदमूलफलाशनः॥३५॥शीर्णपर्णाशनःपक्षेत्वापण्मासंब्रभूवसः ॥ पण्मासंवायुभक्षोभूत्पण्मासंजलबिंदुभुक्॥३६॥

एवंषडब्दयंतस्यव्यतिक्रांतंतथासतः ॥ जन्मतोद्विगुणेवर्षेतद्वचोनारदेरितम् ॥ ३७ ॥ सत्यंकरिष्यन्त्रिवृतमभ्यगात्कुलिशायुधः ॥ उवाचचवरंब्रूहिद म्रितन्मनासिस्थितम् ॥३८॥ अहंशतक्रतुर्विप्रप्रसन्नोस्मिशुभव्रतैः ॥ इत्याकर्ण्यमहेंद्रस्यवाक्यंसुनिकुमारकः॥३९॥उवाचमधुरंधीरःकीरवन्मधुराक्षरम्॥ मघवन्वृत्रशत्रोत्वांजानेकुलिशपाणिनम् ॥ १४० ॥ नाहंवृणेवरंत्वत्तः शंकरोवरदोस्तिमे ॥ ४१ ॥ इंद्रउवाच ॥ नमत्तःशंकरोस्त्यन्योदेवदेवोस्म्यह शिशो ॥ विहायवाशिवंत्वंवरयाचस्वमांवरम् ॥ ४२ ॥ ब्राह्मणउवाच ॥ गच्छाहल्यापतेऽसाधोगोत्रारेपाकशासन ॥ नप्रार्थयेपशुपतेरन्यंदेवांतरं स्फुटम् ॥४३॥ इतितस्यवचःश्रुत्वाक्रोधसंरक्तलोचनः ॥ उद्यम्यकुलिशंघोरंभीषयामासबालकम् ॥४४॥ सदृष्ट्वाबालकोवज्रंविद्युज्वालाशताकुलम् ॥ स्मरन्नारदवाक्यंचमुपूर्च्छभयविह्वलः ॥ ४५ ॥ अथगौरीपतिःशंभुराविरासीत्तमोनुदः ॥ उत्तिष्ठोत्तिष्ठभद्रंतेस्पर्शेःसंजीवयन्निव ॥ ४६ ॥ उन्मील्यने त्रकमलेमुतेइवदिवाक्षये ॥ अपश्यदग्रेचोत्थायशंभुमर्कशताधिकम् ॥ ४७ ॥ भालोचनमालोक्यकंठेकालंवृषध्वजम् ॥ वामांगसंनिविष्टाद्रितनयंच द्रशेखरम् ॥ ४८ ॥ कपर्दिनंविराजंतंत्रिशूलाजगवायुधम् ॥ स्फुरत्कर्पूरगौरांगंपरिणद्धगजाजिनम् ॥४९॥ परिज्ञायमहादेवंगुरुवाक्यतआगमात् ॥ हर्ष बाष्पाकुलःसन्नकंठोरोमांचकंचुकः ॥ १५० ॥ क्षणंस्थगितवक्तस्थौचित्रकृत्रिमपुत्रकः ॥ यथातथासुसंपन्नोविस्मृत्यात्मानमेवच ॥ ५१ ॥ नस्तोतुं ननमस्कर्तुंकिंचिद्विज्ञप्तुमेवच ॥ यदासनशशाकालंतदास्मित्वाऽऽहशंकरः ॥ ५२ ॥ ईश्वरउवाच ॥ शिशोगृहपतेशक्राद्भ्रोद्यतपरादहो ॥ ज्ञातोभीतो सिमाभैषीर्जिज्ञासातेकृतामया ॥ ५३ ॥

ममभक्तस्यनोशक्रोनवज्रंनांतकोपिवा ॥ प्रभवेदिंद्ररूपेणमयैवत्वंहिभाषितः ॥ ५४ ॥ वरंददामितेभद्रत्वमग्निपदभाग्भव ॥ सर्वेषामेवदेवानांवदनंत्वंभ विष्यसि ॥५५॥ सर्वेषामेवभूतानांत्वमग्रेऽतश्चरोभव ॥ धर्मराजेंद्रयोर्मध्येदिगीशोराज्यमाप्नुहि ॥५६॥ त्वयेदंस्थापितंलिंगंतवनाम्नाभविष्यति ॥ अग्नी श्वरहतिख्यातंसर्वतेजोभिवृंहणम् ॥ ५७ ॥ अग्नीश्वरस्यभक्तानांनभयंविद्युदग्निजम् ॥ अग्निमांद्यभयंनैवनाकालमरणंक्वचित् ॥ ५८ ॥ अग्नीश्वरं समभ्यर्च्यकाश्यांसर्वसमृद्धिदम् ॥ अन्यत्रापिमृतोदेवादग्निलोकेमहीयते ॥५९॥ ततःकाशींपुनःप्राप्यकल्पांतेमोक्षमाप्नुयात् ॥ वीरेश्वरस्यपूर्वेणगंगायाः पश्चिमेतटे ॥ १६० ॥ अग्नीश्वरंसमाराध्यवह्निलोकंवसेन्नरः ॥ पितृभ्यांस्वजनैःसार्धंमित्रबंधुसमायुतः ॥६१ ॥ विमानमिदमारुह्यप्रयाह्येवदिशःपते ॥ इत्युक्तानीयतद्भूनापित्रोश्चपरिपश्यतोः ॥ दिक्पतित्वेऽभिषिच्याग्नितत्रलिंगेशिवोविशत् ॥ ६२ ॥ गणावूचतुः ॥ ॥ इत्थमग्निस्वरूपेणशिवश्चर्म न्प्रवर्णितम् ॥ किमन्यच्छ्रोतुकामोसिकथयावस्तदीरय ॥ १६३ ॥ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडेपूर्वा र्द्धेवह्निलोकवर्णननामैकादशोऽध्यायः ॥ ११ ॥ ॥छ॥ शिवशर्मोवाच ॥ नैर्ऋतादीनृक्षमाल्लोकानाख्यातंपुरुषोत्तमौ ॥ पुरुषोत्तमपादाब्जपरागो ज्ज्वलसरालकाः ॥ १ ॥ गणावूचतुः ॥ आकर्णयमहाभागसंयमिन्याःपुरींपराम् ॥ दिक्पतेर्निर्ऋतस्यासोपुण्यापुण्यजनोपिता ॥ २ ॥ गक्षमानिवसं त्यस्यामपरद्रोहिणःसदा ॥ जातिमात्रेणरक्षांसिवृत्तेःपुण्यजनाइमे ॥ ३ ॥ स्मृत्युक्तश्रुतिवर्त्मानोजातवर्णावरेष्वपि ॥ नाद्रियंतेऽन्नपानानामम्मृत्युक्तं कदाचन ॥ ४ ॥ परदारपरद्रव्यपरद्रोहपराङ्मुखाः ॥ जाताजातौनिकृष्टायामपिपुण्यानुसारिणः ॥ ५ ॥ द्विजातिभक्त्युत्पन्नार्थैरात्मानंपोषयंतिये ॥ सदासंकुचितांगाश्चद्विजसंभाषणादिषु ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आहूतावस्त्रंवदनावदंतिद्विजसंनिधौ ॥ जयजीवभगोनाथस्वामिन्नितिहिवादिनः ॥ ७ ॥ तीर्थस्नानपरानित्यंनित्यंदेवपरायणाः ॥ द्विजेषुनित्यंप्रणताः स्वनामाख्यानपूर्वकम् ॥ ८ ॥ दमदानदयाक्षांतिशौचेंद्रियविनिग्रहाः ॥ अस्तेयसत्याहिंसाश्चसर्वेपांधर्महेतवः ॥ ९ ॥ आवश्येषुसदोद्युक्तायेजाता यत्रकुत्रचित् ॥ सर्वभोगसमृद्धास्तेवसंत्यत्रपुरोत्तमे ॥१०॥ म्लेच्छाअपिसुतीर्थेषुयेमृतानात्मघातकाः ॥ विहायकाशींनिर्वाणविश्राणांतेऽत्रभोगिनः ॥ ॥ ११ ॥ अंधंतमोविशेयुस्तेयेचैवात्महनोजनाः ॥ भुक्त्वानिरयसाहस्रंतेचस्युर्ग्राममूकराः ॥ १२ ॥ आत्मघातोनकर्तव्यस्तस्मात्क्वापिविपश्चिता ॥ इहापिचपरत्रापिनशुभान्यात्मघातिनाम् ॥ १३ ॥ यथेष्टमरणंकेचिदाहुस्तत्त्वावबोधकाः ॥ प्रयागेसर्वतीर्थानांराज्ञिसर्वाभिलाषदे ॥ १४ ॥ अंत्यजाअ पियेकेचिद्दयाधर्मानुसारिणः ॥ परोपकृतिनिष्ठास्तेवसंत्यत्रतुसत्तमाः ॥ १५ ॥ अस्यस्वरूपंवक्ष्यावोदिक्पतेःक्षणतःशृणु ॥ मध्येविंध्याटवि पुरापक्कणस्थजनाग्रणीः ॥ १६ ॥ पल्लीपतिरभूदुग्रःपिंगाक्षइतिविश्रुतः ॥ निर्विंध्यायास्तटेशूरःक्रूरकर्मपराङ्मुखः ॥ १७ ॥ घातयेद्दूरसंस्थो पियःपांथपरिपंथिनः ॥ व्याघ्रादीन्दुष्टसत्त्वांश्चसहिनस्तिप्रयत्नतः ॥ १८ ॥ जीवेन्मृगयुधर्मेणतत्रापिकरुणापरः ॥ नविश्वस्तान्पक्षिमृगा न्नसुप्तान्नव्यवायिनः ॥ १९ ॥

नतोयगृध्नून्नशिशून्नांतर्वत्नित्वलक्षणान् ॥ सघातयतिधर्मज्ञोजातिधर्मपराङ्मुखः ॥ २० ॥ श्रमातुरेभ्यःपांथेभ्यःसविश्रामंप्रयच्छति ॥ हरेत्क्षुधां क्षुधार्तानामुपानद्दोऽनुपानहे ॥ २१ ॥ मृगत्त्वचोतिमृदुलाविवस्त्रेभ्यातिसर्जति ॥ अनुव्रजतिकांतारेप्रांतरेपथिकान्पथि ॥ २२ ॥ नजिघृक्षतितेभ्योर्थ मभयंचेतियच्छति ॥ आविंध्याटविमेनामग्राह्यंदुष्टभयापहम् ॥ २३ ॥ नित्यंकार्पटिकान्सर्वान्सपुत्रेणप्रपश्यति ॥ तेपिचप्रतितीर्थंहितमाशीर्वादयं तिवै ॥२४॥ इतितिष्ठतिपिंगाक्षेसाटवीनगरायिता ॥ अध्वनीनेऽध्वगान्कोपिनरुणद्धिससाध्वसः ॥२५॥ कदाचित्तत्पितृव्येणसमीपग्रामवासिना ॥ श्रुतःकार्पटिकानांहिसार्थःसार्थोमहास्वनः ॥ २६ ॥ लुब्धकस्तद्धनेलुब्धःक्षुद्रस्तन्निधनोद्यतः ॥ सरुरोधतमध्वानमग्रेगत्वाऽतिगूढवत् ॥ २७ ॥ तदा युष्यस्यशेषेणपिंगाक्षोमृगयांगतः ॥ तस्मिन्नरण्येतन्मार्गनिकषाध्युषितोनिशि ॥ २८ ॥ परप्राणद्रुहांपुंसांनसिद्ध्येयुर्मनोरथाः ॥ विश्वंकुशलितेनैत द्विश्वेशपरिरक्षितम् ॥ २९ ॥ नचिंतयेदनिष्टानितस्मात्कृष्टिःकदाचन॥ विधिदृष्टंयतोभाविकलुषंभाविकेवलम् ॥३०॥ तस्मादात्मसुखंप्रेप्सुरिष्टानिष्टंन चिंतयेत् ॥ चिंतयेच्चेत्तदाचिंत्योमोक्षोपायोनचेतरः ॥३१॥ व्युष्टायामथयामिन्यामभूत्कोलाहलोमहान् ॥ घातयध्वंपातयध्वंनग्नयध्वंद्रुतंभटाः ॥३२॥ मामारयध्वंत्रायध्वंभटाःकार्पटिकावयम् ॥ अनायासंलुंठयध्वंनयध्वंचयदस्तिनः ॥ ३३ ॥ वयंपांथाअनाथाःस्मोविश्वनाथपरायणाः ॥ सनाथास्ते नदूरंसनाथतांपथिकोऽपरः ॥ ३४ ॥ वयंपिंगाक्षविश्वासादस्मिन्मार्गेऽकुतोभयाः ॥ यातायातंसदाकुर्मःसचदूरइतोवनात् ॥३५॥ इतिश्रुत्वाऽथपिंगाक्षो भटःकार्पटिकेरितम् ॥ दूरान्माभैष्टमाभैष्टब्रुवन्नितिसमागतः ॥ ३६ ॥ तत्कर्मसूत्रैराकृष्टोभिल्लःकार्पटिकप्रियः ॥ तूर्णंतदायुष्यमिवतत्रोपस्थितवा न्क्षणात् ॥ ३७ ॥ कोयंकोयंदुराचारःपिंगाक्षेमयिजीवति ॥ उल्लुलुंठयिषुःपांथान्प्राणलिंगसमान्मम ॥ ३८ ॥

इतितद्वाक्यमाकर्ण्यताराक्षस्तत्पितृव्यकः ॥ धनलोभेनपिंगाक्षेपापंपापोव्यचिंतयत् ॥३९॥ कुलधर्मंव्यपास्यैषवर्ततेकुलपांसनः ॥ चिरंचिंतितमद्यामुं घातयिष्याम्यसंशयम् ॥ ४० ॥ विचार्येतिसदुष्टात्माभृत्यानाज्ञापयतक्रुधा ॥ आदावेनंघातयंतुततःकार्पटिकानिमान् ॥ ४१ ॥ ततोऽयुध्यन्दुराचा रास्तेनैकेनचतेऽखिलाः ॥ यथाकथंचित्ताननयत्सचस्वावसथांतिकम् ॥ ४२ ॥ आच्छिन्नंहिधनुर्बाणंछिन्नंसन्नहनंशरैः ॥ असूदयिष्यमेतांस्तदभविष्यं यदीश्वरः ॥ ४३ ॥ अभिलष्यन्निनिप्राणानत्याक्षीत्सपरार्थतः ॥ तेपिकार्पटिकाःप्राप्तास्तत्पल्लींगतसाध्वसाः ॥ ४४ ॥ यामतिस्त्वंतकालेस्याद्गति स्तदनुरूपतः ॥ दिगीशत्वमतःप्राप्तोनिर्ऋत्यांनैर्ऋतेश्वरः ॥ ४५ ॥ इत्थमस्यस्वरूपंतेआवाभ्यांसमुदीरितम् ॥ एतस्योत्तरतोलोकोवरुणस्यायमद्भुतः ॥४६॥ कूपवापीतडागानांकर्तारोनिर्मलैर्धनैः ॥ इहलोकेमहीयंतेवारुणेवरुणप्रभाः ॥४७॥ निर्जलेजलदातारःपरसंतापहारिणः ॥ अर्थिभ्योयेप्रयच्छं तिचित्रच्छत्रकमंडलून् ॥४८॥ पानीयशालिकाःकुर्युर्नानोपस्करसंयुताः ॥ दद्युर्धर्मघटांश्चापिसुगंधोदकपूरितान् ॥४९॥ अश्वत्थसेकंयेकुर्युःपथिपाद परोपकाः ॥ विश्रामशालाकर्तारःश्रांतसंतापनोदकाः ॥५०॥ ग्रीष्मोष्महंतिमायूरपिच्छादिरचितान्यपि ॥ चित्राणितालवृंतानिवितरंतितपागमे ॥५१॥ रसवंतिसुगंधीनिहिमवंतितपर्तुषु ॥ विश्राणयंतिवातृप्तिपानकानिप्रयत्नतः ॥ ५२ ॥ इक्षुक्षेत्राणिसंकल्प्यब्राह्मणेभ्योददत्यपि ॥ तथानानाप्रकारां श्चविकारानैक्षवान्बहून् ॥ ५३ ॥ गोरसानांप्रदातारस्तथागोमहिषीप्रदाः ॥ धारामंडपकर्तारश्छायामंडपकारिणः ॥५४॥ देवालयेषुयेदद्युर्बहुधारागलं तिकाः ॥ तीर्थेवाकरहर्तारस्तीर्थमार्गावनेजकाः ॥ ५५ ॥ अभयंयेप्रयच्छंतिभयार्तोद्यतपाणयः ॥ निर्भयावारुणेलोकेतेवसंतिलसंतिच ॥ ५६ ॥ विपाशयंतियेपुण्यादुर्वृत्तैःकंठपाशितान् ॥ तेपाशपाणेर्लोकेस्मिन्निवसंत्यकुतोभयाः ॥ ५७ ॥ नौकाद्युपायैर्नद्यादौपांथान्येतारयंत्यपि ॥ तारयंत्य पिदुःखाब्धेस्तत्रनागरिकाद्विज ॥५८॥ घट्टान्पुण्यतटिन्यादेर्बंधयंतिशिलादिभिः ॥ तोयार्थिसुखसिद्ध्यर्थंयेनरास्तेत्रभोगिनः ॥ ५९ ॥ वितर्पयंतिये पुण्यास्तृषितान्शीतलैर्जलैः ॥ तेऽत्रवैवारुणेलोकेसुखसंततिभागिनः ॥ ६० ॥ जलाशयानांसर्वेषामयमेकतमःपतिः ॥ प्रचेतायादसांनाथःसाक्षीसर्वे पुकर्मसु ॥ ६१ ॥ अस्योत्पत्तिंशृणुपतेर्वरुणस्यमहात्मनः ॥ आसीन्मुनिरमेयात्माकर्दमस्यप्रजापतेः ॥ ६२॥ शुचिष्मानितिविख्यातस्तनयोविनयो चितः ॥ स्थैर्यमाधुर्यधैर्याद्यैर्गुणैरुपचितोहितः ॥ ६३ ॥ अच्छोदेसरसिस्नातुंसगतोबालकैःसह ॥ जलक्रीडनसंसक्तंशिशुमारोहरच्चतम् ॥६४॥ ततस्त स्मिन्मुनिसुतेहृतेऽत्याहितशंसिभिः ॥ तैःसमागत्यशिशुभिःकथितंतत्पितुःपुरः ॥ ६५ ॥

हरार्चनोपविष्टस्यसमाधौनिश्चलात्मनः ॥ श्रुतबालविपत्तेश्चचचालनमनोहरात् ॥ ६६ ॥ अधिकंशीलयामाससर्वज्ञंत्रिलोचनम् ॥ पश्यञ्शंभोः समीपेसभुवनानिचतुर्दश ॥ ६७ ॥ नानाभूतानिभूतानिब्रह्मांडांतर्गतानिच ॥ चंद्रसूर्यर्क्षताराश्चपर्वतान्सरितोद्रुमान् ॥ ६८ ॥ समुद्रानंतरीया णिह्यरण्यानीस्सरांसिच ॥ नानादेवनिकायांश्चबह्वीर्दिविपदांपुरीः ॥ ६९ ॥ वापीकूपतडागानिकुल्याः पुष्करिणीर्बहु ॥ एकस्मिन्क्वापिसरसिजलक्री डापरायणान् ॥ ७० ॥ बहून्मुनिकुमारांश्चमज्जनोन्मज्जनादिभिः ॥ करयंत्रविनिर्मुक्ततोयधाराभिषेचनैः ॥ ७१ ॥ करताडितपानीयशब्ददिङ्मुखना दिभिः ॥ जलखेलनकैरित्थंसंसक्तान्बहुबालकान् ॥७२॥ तेषांमध्येददर्शाथसमाधिस्थःसकर्दमः ॥ स्वंशिशुंशिशुमारेणनीयमानंसुविह्वलम् ॥ ७३ ॥ कयाचिज्जलदेव्याथतस्माद्दक्रूरयादसः ॥ प्रसह्यनीत्वोदधयेदृष्टवांस्तंसमर्पितम् ॥ ७४ ॥ निर्भर्त्स्यसरितांनाथंकेनचिद्रुद्ररूपिणा ॥ त्रिशूलपाणिने त्युक्तंक्रोधताम्राननेनच ॥ ७५ ॥ कुतोजलानामधिपशिवभक्तस्यबालकः ॥ प्रजापतेःकर्दमस्यमहाभागस्यधीमतः ॥ ७६ ॥ अज्ञात्वाशिवसामर्थ्यं भवताचिरमासितः ॥ भयत्रस्तेनतद्वाक्यश्रवणात्तमुदन्वता ॥७७॥ बालंरत्नैरलंकृत्यबद्धातंशिशुमारकम् ॥ समर्पितंसमानीयशंभुपादाब्जसंनिधौ ॥ ॥ ७८ ॥ नत्वाविज्ञापयत्तंचनापराध्याम्यहंविभो ॥ अनाथनाथविश्वेशभक्तापत्तिविनाशन ॥ ७९ ॥ भक्तकल्पतरोशंभोऽनेनायंदुष्टयादसा ॥ अना यिनमयानाथभवद्भक्तजनार्भकः ॥ ८० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गणेनतेनविज्ञायशंभोरथमनोगतम् ॥ पाशेनबद्धातद्यादः शिशुहस्तेसमर्पितम् ॥ ८१ ॥ गृहाणेमंस्वतनयंपार्षदेशंकराज्ञया ॥ याहिस्वभवनंवत्सभु
वतीतिसकर्दमः ॥ ८२॥ समाधिसमयेसर्वमितिशृण्वन्नुदारधीः॥उन्मील्यनयनेयावत्प्रणिधानंविसृज्यच ॥८३॥ संपश्यतेशिशुंतावत्पुरतःसमवैक्षत ॥
गृहीतशिशुमारंचपार्श्वेऽलंकृतकर्णिकम् ॥ ८४ ॥ तोयार्द्रकाकपक्षाग्रंकषायनयनांचलम् ॥ किंचिद्विरूक्षंत्वरुक्षोभंसंभ्रमापन्नमानसम् ॥ ८५ ॥
कृतप्रणाममालिंग्यजिघ्रंस्तन्मुखपंकजम् ॥ पुनर्जातमिवामंस्तपश्यंश्चापिमुहुर्मुहुः ॥ ८६ ॥ शतानिपंचवर्षाणिप्रणिधानस्थितस्यहि ॥ कर्दमस्यव्यती
तानिशंभुमर्चयतस्तदा ॥ ८७ ॥ कर्दमोपिचतत्कालमज्ञासीत्क्षणसंगतम् ॥ यतोनप्रभवेत्कालोमहाकालस्यसंनिधौ ॥ ८८ ॥ ततस्तंतनयःपृष्ट्वा
पितरंप्रणिपत्यच ॥ जगामतूर्णंतपसेश्रीमद्वाराणसींपुरीम् ॥ ८९ ॥ तत्रतत्वातपोघोरंलिंगंसंस्थाप्यशांभवम् ॥ पंचवर्षसहस्राणिस्थितःपाषाणनि
श्चलः ॥ ९० ॥ आविरासीन्महादेवस्तुष्टस्तत्तपसाततः ॥ उवाचकार्दमेमृहिकंददामिवरोत्तमम् ॥ ९१ ॥ कार्दमिरुवाच ॥ ॥ यदिनाथप्रसन्नोसिभक्ता
नामनुकंपक ॥ सर्वासामाधिपत्यंमेदेह्यपांयादसामपि ॥ ९२ ॥ इतिश्रुत्वामहेशानःसर्वचिंतितदःप्रभुः ॥ अभ्यषिंचततंतत्रवारुणेपरमेपदे ॥ ९३ ॥
रत्नानामब्धिजातानामब्धीनांसरितामपि ॥ सरसांपल्वलानांचवाप्यंबुस्रोतसांपुनः ॥ ९४ ॥ जलाशयानांसर्वेषांप्रतीच्याश्चापिवैदिशः ॥ अधीश्वरः
पाशपाणिर्भवसर्वामरप्रियः ॥ ९५ ॥

ददामिवरमन्यंचसर्वेषांहितकारकम् ॥ त्वयैतत्स्थापितंलिंगंतवनाम्नाभविष्यति ॥ ९६ ॥ वरुणेशमितिख्यातंवाराणस्यांसुसिद्धिदम् ॥ मणिकर्णेश
लिंगस्यनैर्ऋत्यांदिशिसंस्थितम् ॥ ९७ ॥ आराधितंसदापुंसांसर्वजाड्यविनाशकृत् ॥ वरुणेशस्ययेभक्तानतेषामब्भयंक्वचित् ॥ ९८ ॥ नसंतापभयं
तेषांनापायमरणंक्वचित् ॥ जलोदरभयंनैवनभयंवैतृषःक्वचित् ॥ ९९ ॥ नीरसान्यन्नपानानिवरुणेश्वरसंस्मृतेः ॥ सरसानिभविष्यंतिनात्रकार्या
विचारणा ॥ १०० ॥ इत्युक्त्वांतर्दधेशंभुर्वरुणोपिस्वबंधुभिः ॥ इमंलोकमलंकुर्वंस्तदारभ्यस्थितोद्विजः ॥ १ ॥ इदंवरुणलोकस्यस्वरूपंतेनिरूपितम् ॥
यच्छ्रुत्वाननरःक्वापिदुरपायैःप्रबाध्यते ॥ १०२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेनिर्ऋतिवरुणलो
कवर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ गणावूचतुः ॥ ॥ इमांगंधवतींपुण्यांपुरींवायोर्विलोकय ॥ वारुण्याउत्तरेभागेमहाभाग्यनिधेद्विज
॥ १ ॥ अस्यांप्रभंजनोनामजगत्प्राणोदिगीश्वरः ॥ आराध्यश्रीमहादेवंदिक्पालत्वमवाप्तवान् ॥ २ ॥ पुराकश्यपदायादःपूतात्मेतिचविश्रुतः ॥
धूर्जटेराजधान्यांसचचारविपुलंतपः ॥ ३ ॥ वाराणस्यांमहाभागोवर्षाणामयुतंशतम् ॥ स्थापयित्वामहालिंगंपावनंपवनेश्वरम् ॥ ४ ॥ यस्यदर्शनमात्रे
णपूतात्माजायतेनरः ॥ पापकंचुकमुत्सृज्यसवसेत्पावनेपुरे ॥ ५ ॥ ततस्तस्योग्रतपसातपसांफलदःशिवः ॥ आविरासीत्ततोलिंगाज्ज्योतीरूपोमहे
श्वरः ॥ ६ ॥ उवाचचप्रसन्नात्माकरुणामृतसागरः ॥ उत्तिष्ठोत्तिष्ठपूतात्मन्वरंवरयसुव्रत ॥ ७ ॥ अनेनतपसोग्रेणलिंगस्याराधनेनच ॥ तवादेयंनपू
तात्मंस्त्रैलोक्येसचराचरे ॥८॥ ॥ पूतात्मोवाच ॥ देवदेवमहादेवदेवानामभयप्रद ॥ ब्रह्मनारायणेंद्रादिसर्वदेवपदप्रद ॥ ९ ॥ वेदास्त्वांनचविंदंतिकि
मात्मकइतिप्रभो॥प्राप्ताःशतपथत्वंचनेतिनेतीतिवादिनः ॥१०॥ ब्रह्मविष्ण्वोरपिगिरांगोचरोनचवाक्पतेः॥प्रमथेशंकथंस्तोतुंमादृशःप्रभवेत्प्रभो ॥११॥
प्रसह्यप्रमिमीतेशभक्तिर्मांस्तुतिकर्मणि ॥ करोमिकिंजगन्नाथनवश्यानींद्रियाणिमे ॥ १२ ॥ विश्वंत्वंनास्तिवैभेदस्त्वमेकःसर्वगोयतः ॥ स्तुत्यंस्तो
तास्तुतिस्त्वंचसगुणोनिर्गुणोभवान् ॥१३॥ सर्गात्पुराभवानेकोरूपनामविवर्जितः ॥ योगिनोपिनतेतत्त्वंविंदंतिपरमार्थतः ॥ १४ ॥ यदैकलोनशक्रो
पिरंतुंस्वैरचरप्रभो ॥ तदिच्छातवयोत्पन्नासेव्याशक्तिरभूत्तव ॥ १५ ॥ त्वमेकोद्वित्वमापन्नःशिवशक्तिप्रभेदतः ॥ त्वंज्ञानरूपोभगवान्स्वेच्छाशक्तिस्वरू
पिणी ॥ १६ ॥ उभाभ्यांशिवशक्तिभ्यांयुवाभ्यांनिजलीलया ॥ उत्पादिताक्रियाशक्तिस्ततःसर्वमिदंजगत् ॥ १७ ॥ ज्ञानशक्तिर्भवानीशइच्छाश
क्तिरुमास्मृता ॥ क्रियाशक्तिरिदंविश्वमस्यत्वंकारणंततः ॥ १८ ॥ दक्षिणांगंतवविधिर्वामांगंतवचाच्युतः ॥ चंद्रसूर्याग्निनेत्रस्त्वंत्वन्निःश्वासःश्रुति
त्रयम् ॥ १९ ॥ त्वत्स्वेदादंबुनिधयस्तवश्रोत्रंसमीरणः ॥ बाहवस्तेदशदिशोमुखंतेब्राह्मणाःस्मृताः ॥ २० ॥ राजन्यवर्यास्तेबाहुवैश्याऊरुसमुद्भवाः ॥
पद्भ्यांशूद्रस्तवेशानकेशास्तेजलदाःप्रभो ॥ २१ ॥

त्वंपुंप्रकृतिरूपेणब्रह्मांडमसृजःपुरा॥मध्येब्रह्मांडमखिलंविश्वमेतच्चराचरम् ॥ २२ ॥ अतस्त्वत्तोनमन्येऽहंकिंचिद्भिन्नंजगन्मय ॥ त्वयिसर्वाणिभूतानिसर्व
भूतमयोभवान् ॥ २३ ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥ अयमेववरोनाथत्वयिमेऽस्तुस्थिरामतिः ॥ २४ ॥ इत्युक्तवतिदेवेशस्तस्मिन्पू
तात्मनिप्रभुः ॥ स्वमूर्तित्वंसमारोप्यदिक्पालपदमादधे ॥ २५ ॥ सर्वगोममरूपेणसर्वतत्त्वावबोधकः ॥ सर्वेषामायुषोरूपंभवानेवभविष्यति ॥ २६ ॥
तवलिंगमिदंदिव्यंयेद्रक्ष्यंतीहमानवाः ॥ सर्वभोगसमृद्धास्तेत्वल्लोकसुखभागिनः ॥ २७ ॥ पवमानेश्वरंलिंगंमध्येजन्मसकृन्नरः ॥ यथोक्तविधिनापू
ज्यसुगंधस्नपनादिभिः ॥ २८ ॥ सुगंधचंदनैःपुष्पैर्ममलोकेमहीयते ॥ ज्येष्ठेशात्पश्चिमेभागेवायुकुंडोत्तरेणतु ॥ २९ ॥ पावमानंसमाराध्यपूतोभव
तितत्क्षणात् ॥ इतिदत्त्वावरान्देवस्तस्मिँल्लिंगेलयंययौ ॥३०॥ गणावूचतुः ॥ इतिगंधवतींपुर्याःस्वरूपंतेनिरूपितम् ॥ तस्याःप्राच्यांकुबेरस्यश्रीमत्ये
षालकापुरी ॥ ३१ ॥ शंभोःसखित्वमापेदेनाथोस्याभक्तियोगतः ॥ निधीनांपद्ममुख्यानांदातांभोक्ताहरार्चनात् ॥ ३२ ॥ ॥ शिवशर्मोवाच ॥ ॥
कोसौकस्यपुनःकीदृग्भक्तिरस्यसदाशिवे ॥ ययासखित्वमापन्नोदेवदेवस्यधूर्जटेः ॥ ३३ ॥ इतिश्रोतुंममममनःश्रुतिगोचरतांगतम् ॥ युवयोर्वाक्सुधा
स्वादमेदुरोदरमंथरम् ॥ ३४ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्महाप्राज्ञपरिशुद्धेंद्रियेश्वर ॥ सुतीर्थक्षालिताशेषजन्मजातमहामल ॥ ३५ ॥ सुहृ
दिप्रेमसंपन्नेत्वय्यनुद्यंनकिंचन ॥ साधुभिःसहसंवादःसर्वश्रेयोऽभिवृद्धये ॥ ३६ ॥ आसीत्कांपिल्यनगरेसोमयाजिकुलोद्भवः ॥ दीक्षितोयज्ञदत्ता
ख्योयज्ञविद्याविशारदः ॥ ३७ ॥ वेदवेदांगवेदार्थान्वेदोक्ताचारचंचुरः ॥ राजमान्योबहुधनोवदान्यःकीर्तिभाजनम् ॥ ३८ ॥ अग्निशुश्रूषणरतोवे
दाध्ययनतत्परः ॥ तस्यपुत्रोगुणनिधिश्चंद्रबिंबसमाकृतिः ॥ ३९ ॥

कृतोपनयनःसोथविद्यांजग्राहभूरिशः ॥ अथपित्रानभिज्ञातोद्यूतकर्मरतोऽभवत् ॥ ४० ॥ आदायादायबहुशोधनंमातुःसकाशतः ॥ ददातिद्यूतकारे
भ्योमैत्रींतैश्चचकारसः ॥ ४१ ॥ संत्यक्तब्राह्मणाचारःसंध्यास्नानपराङ्मुखः ॥ निंदकोवेदशास्त्राणांदेवब्राह्मणनिंदकः ॥४२॥ स्मृत्याचारविहीनस्तुगी
तवाद्यविनोदभाक् ॥ नटपाखंडिभंडैश्चबद्धप्रेमपरंपरः ॥ ४३ ॥ प्रेरितोपिजनन्यासनयातिपितुरंतिकम् ॥ गृहकार्यांतरव्यग्रोदीक्षितोदीक्षिता
यिनीम् ॥ ४४ ॥ यदायदैवतांपृच्छेदयेगुणनिधिःसुतः ॥ नदृश्यतेमयागेहेकयातिविदधातिकिम् ॥ ४५ ॥ तदातदेतिसाब्रूयादिदानींसबहिर्गतः ॥
स्नात्वासमर्च्यवैदेवानेतावंतमनेहसम् ॥ ४६ ॥ अधीत्याध्ययनार्थंसद्वित्रैर्मित्रैःसमंययौ ॥ एकपुत्रेतितन्माताप्रतारयतिदीक्षितम् ॥ ४७ ॥ नतत्कर्म

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पतद्वृत्तंकिंचिद्वेत्तिसदीक्षितः ॥ सचकेशांतकर्मास्यकृत्वावर्षेऽथषोडशे ॥ ४८ ॥ गृह्योक्तेनविधानेनपाणिग्राहमकारयत् ॥ प्रत्यहंतस्यजननीसुतगुणनि
धिंमृदु ॥ ४९ ॥ शास्तिस्नेहार्द्रहृदयाक्रोधनस्तेपितेत्यलम् ॥ यदिज्ञास्यतितेवृत्तंत्वांचमांताडयिष्यति ॥५०॥ आच्छादयामितेनित्यंपितुरग्रेकुचेष्टि
तम् ॥ लोकमान्योस्तितेतातःसदाचारैर्नवैधनैः ॥ ५१ ॥ ब्राह्मणानांधनंपुत्रसद्विद्यासाधुसंगमः ॥ सच्छ्रोत्रियास्त्वनूचानादीक्षिताःसोमयाजिनः ॥
॥ ५२ ॥ इतिरूढिमिहप्राप्तास्तवपूर्वपितामहाः ॥ त्यक्त्वादुर्वृत्तसंसर्गंसाधुसंगरतोभव ॥ ५३ ॥ सद्विद्यासुमनोधेहिब्राह्मणाचारमाचर ॥ तवानुरूपारूपे
णवयसाकुलशीलतः ॥ ५४ ॥ उनविंशतिकोऽसित्वमेषाषोडशवार्षिकी ॥ तवपत्नीगुणनिधेसाध्वीमधुरभाषिणी ॥ ५५ ॥ एतांसंवृणुसद्वृत्तांपितृभ
क्तियुतोभव ॥ श्वशुरोपिहितेमान्यःसर्वत्रगुणशीलतः ॥ ५६ ॥ ततोऽत्रपसेकिंनत्यजदुर्वृत्ततांशिशो ॥ मातुलास्तेऽतुलाःपुत्रविद्याशीलकुलादिभिः॥
॥ ५७ ॥ तेभ्योपिनविभेषित्वंशुद्धोस्युभयवंशतः ॥ पश्यैतान्प्रतिवेश्मस्थान्ब्राह्मणानांकुमारकान् ॥ ५८ ॥ गृहेपिशिष्यान्पश्यैतान्पितुस्तेविनयो
चितान् ॥ राजापिश्रोष्यतियदातवदुश्चेष्टितंसुत ॥ ५९ ॥ श्रद्धांविहायतेतातेवृत्तिलोपंकरिष्यति ॥ बालचेष्टितमेवैतद्वदंत्यद्यापितेजनाः ॥ ६० ॥

अनंतरंहसिष्यंतियुक्तंदीक्षिततास्त्विति ॥ सर्वेप्याक्षारयिष्यंतितवविप्रंचमांचवै ॥६१॥ मातुश्चरित्रंतनयोधत्तेदुर्भाषणैरिति ॥ पितापितेनपापीयाञ्छ्रु
तिस्मृतिपयीनकिम् ॥ ६२ ॥ तदंघ्रिलीनमनसोममसाक्षीमहेश्वरः ॥ नचर्तुस्नातयापीहमुखंदुष्टस्यवीक्षितम् ॥६३॥ अहोबलीयान्सविधिर्येनजातो
भवानिति ॥ प्रतिक्षणंजनन्येतिशिक्ष्यमाणोतिदुर्मदः ॥ ६४ ॥ ननत्याजचतद्धर्मंदुर्बोधोव्यसनीयतः ॥ मृगयामद्यपैशुन्यवेश्याचौर्यदुरोदरैः ॥ ६५ ॥
सपारदारैर्व्यसनैरेभिःकोत्रनखंडितः ॥ यद्यन्मध्येगृहेपश्येत्तत्तन्नीत्वासुदुर्मतिः ॥ ६६ ॥ अर्पयेद्द्यूतकाराणांसकुप्यंवसनादिकम् ॥ नवरत्नमयींमातुः
करतःपितुरूर्मिकाम् ॥ ६७ ॥ स्वपंत्यास्त्वेकदाऽऽदायदुरोदरिकरेऽर्पयत् ॥ एकदागच्छताराजभवनान्निजमुद्रिका ॥ ६८ ॥ दीक्षितेनपरिज्ञाताद्वै
वाद्द्यूतकृतःकरे ॥ उवाचदीक्षितस्तंचकुतोलब्धात्वयोर्मिका ॥ पृष्टस्तेनाथनिर्बंधादसकृत्प्रत्युवाचकिम् ॥ ६९ ॥ ममाक्षिपसिविप्रोच्चैःकिंमयाचौर्य
कर्मणा ॥ लब्धामुद्रात्वदीयेनपुत्रेणैषाममार्पिता ॥ ७० ॥ ममामातुर्हिपूर्वेद्युर्जित्वानीतोहिशाटकः ॥ नकेवलंममाप्येतदंगुलीयंसमर्पितम् ॥ ७१ ॥
अन्येषांद्यूतकर्तॄणांभूरितेनार्पितंवसु ॥ रत्नकुप्यदुकूलानिभृंगारुप्रभृतीनिच ॥ ७२ ॥ भाजनानिविचित्राणिकांस्यताम्रमयानिच ॥ नग्नीकृत्यप्रति
दिनंबद्ध्वतद्यूतकारिभिः ॥ ७३ ॥ नतेनसदृशःकश्चिदाक्षिकोभूमिमंडले ॥ अद्ययावत्त्वयाविप्रदुरोदरशिरोमणिः ॥ ७४ ॥ कथंनाज्ञायितनयो
ऽविनयानयकोविदः ॥ इतिश्रुत्वात्रपाभारविनम्रतरकंधरः ॥ ७५ ॥

प्रावृत्यवाससामौलिंप्राविशन्निजमंदिरम् ॥ महापतिव्रतामास्यपत्नींप्रोवाचतामथ ॥ ७६ ॥ दीक्षितायिनिकुत्रासिक्वतेगुणनिधिः सुतः ॥ अथतिष्ठतु
किंतेनक्वसाममशुभोर्मिका ॥ ७७ ॥ अंगोद्वर्तनकालेयात्वयामेंऽगुलितोहृता ॥ नवरत्नमयींशीघ्रंतामानीयप्रयच्छमे ॥ ७८ ॥ इतिश्रुत्वाथतद्वाक्यंभी
तासादीक्षितायिनी ॥ प्रोवाचसातुमाध्याह्नींक्रियांनिष्पादयत्वथ ॥ ७९ ॥ व्यग्रास्मिदेवपूजार्थमुपहारादिकर्मणि ॥ समयोयमतिक्रामेदतिथीनां
प्रियातिथे ॥ ८० ॥ इदानीमेवपक्वान्नकरणव्यग्रयामया ॥ स्थापिताभाजनेक्वापिविस्मृतेतिनवेद्म्यहम् ॥ ८१ ॥ दीक्षितउवाच ॥ ॥ हंहोसत्पुत्रजन
निनित्यंसत्यप्रभाषिणि ॥ यदायदात्वांसंपृच्छेतनयः क्वगतस्त्विति ॥ ८२ ॥ तदातदेतित्वंब्रूयानाथेदानींसनिर्गतः ॥ अधीत्याध्ययनार्थंचद्विजैर्मित्रैः
सयुग्बहिः ॥ ८३ ॥ कुतस्त्वच्छाटकः पत्निमांजिष्ठोयोमयाऽर्पितः ॥ लंबतेवस्त्रधान्यांयस्तथ्यंब्रूहिभयंत्यज ॥ ८४ ॥ सांप्रतंनेक्ष्यतेसोपिभृंगारुर्मणिमं
डितः ॥ पट्टसूत्रमयीसापित्रिपटीक्वनृपार्पिता ॥ ८५ ॥ क्वदाक्षिणात्यंतत्कांस्यंगौडीताम्रघटीक्वसा ॥ नागदंतमयीसाक्वसुखकौतुकमंचिका ॥ ८६ ॥
क्वसापर्वतदेशीयाचंद्रकांतशिलोद्भवा ॥ दीपिकाव्यग्रहस्ताग्रासालंकृच्छालभंजिका ॥ ८७ ॥ किंबहूक्तेनकुलजेतुभ्यंकुप्याम्यहंवृथा ॥ तदाभ्यवह
रिष्येहमुपयंस्याम्यहंयदा ॥ ८८ ॥ अनपत्योस्मितेनाहंदुष्टेनकुलदूषिणा ॥ उत्तिष्ठानयदर्भांबुतस्मैदद्यांतिलांजलिम् ॥ ८९ ॥ अपुत्रत्वंवरंनृणां
कुपुत्रात्कुलपांसनात् ॥ त्यजेदेकंकुलस्यार्थेनीतिरेषासनातनी ॥ ९० ॥

स्नात्वानित्यविधिं कृत्वातस्मिन्नेवाह्निकस्यचित् ॥ श्रोत्रियस्यसुतांप्राप्यपाणिंजग्राहदीक्षितः ॥ ९१ ॥ श्रुत्वातथासवृत्तांतंप्राक्तनंस्वंविनिंद्यच ॥
कांचिद्दिशंसमालोच्यनिर्ययौदीक्षितांगजः ॥९२॥ चिंतामवापमहतींक्वयामिकरवाणिकिम् ॥ नाहमभ्यस्तविद्योस्मिनचैवास्तिधनोस्म्यहम् ॥ ९३ ॥
देशांतरेह्यस्तिधनः सद्विद्यः सुखमेधते ॥ भयमस्तिधनेचौरात्सविद्यःसर्वतोऽभयः ॥ ९४ ॥ यायजूककुलेजन्मक्वक्वमेव्यसनंतथा ॥ अहोबलीयान्स
विधिर्भाविकर्मानुसंधयेत् ॥९५॥ भिक्षितुंनाधिगच्छामिनमेपरिचितःक्वचित् ॥ नचपार्श्वेधनंकिंचित्किमत्रशरणंभवेत् ॥ ९६ ॥ सदानभ्युदितेभानौ
प्रसूमेमृष्टभोजनम् ॥ दद्यादद्यात्रकंयाचेयाचेहजननीनमे ॥९७॥ इतिचिंतयतस्तस्यभानुरस्ताचलंगतः ॥ एतस्मिन्नेवसमयेकश्चिन्माहेश्वरोनरः॥९८॥
महोपहारानादायनगराद्बहिरभ्यगात् ॥ समभ्यर्चितुमीशानंशिवरात्रावुपोषितः ॥ ९९ ॥ पक्वान्नगंधमाघ्रायक्षुधितःसतमन्वगात् ॥ इदमन्नंमयाग्राह्यं
शिवायोपस्कृतंनिशि ॥ १०० ॥ इत्याशामवलंब्याथद्वारिशंभोरुपाविशत् ॥ ददर्शचमहापूजांतेनभक्तेननिर्मिताम् ॥ १ ॥ विधायनृत्यगीतादिभक्ताः
सुप्ताःक्षणंयदा ॥ नैवेद्यंसतदाऽऽदातुंगर्भागारंविवेशह ॥ २ ॥ दीपंमंदप्रभंदृष्ट्वापक्वान्नावेक्षणायसः ॥ निजचैलांचलाद्वर्तिंदत्त्वासमुददीपयत् ॥ ३ ॥
ततःपक्वान्नमादायत्वरितंगच्छतोबहिः ॥ तस्यपादतलाघातात्प्रसुप्तःकोप्यबुध्यत ॥ ४ ॥ कोयंकोयंत्वरापन्नश्चोरोयंगृह्यतामिति ॥ यावद्भूयात्समागत्य
तावत्सपुररक्षकैः ॥ ५ ॥ पलायमानोनिहतःक्षणात्पंचत्वमागतः ॥ अभक्षयच्चनैवेद्यंभाविपुण्यबलान्नसः ॥ ६ ॥
अथबद्धःसमागत्यपाशमुद्गरपाणिभिः ॥ निनीषुभिःसंयमिनींयामैःसविकटैर्भटैः ॥ ७ ॥ तावत्पारिषदाःप्राप्ताःकिंकिणीजालमालितम् ॥ दिव्यंवि
मानमादायतंनेतुंशूलपाणयः ॥ ८ ॥ शंभोर्गणान्समालोक्यभीतैस्तैर्यमकिंकरैः ॥ अवादिप्रणतैरित्थंदुर्वृत्तोयंगणाद्विजः ॥ ९ ॥ कुलाचारप्रतीपोयं
पित्रोर्वाक्यपराङ्मुखः ॥ सत्यशौचपरिभ्रष्टःसंध्यास्नानविवर्जितः ॥ ११० ॥ आस्तांदूरेऽस्यकर्माणिशिवनिर्माल्यहारकः ॥ प्रत्यक्षतोऽत्रवीक्षध्व
मस्पृश्योयंभवादृशाम् ॥ ११ ॥ शिवनिर्माल्यभोक्तारःशिवनिर्माल्यलघंकाः ॥ शिवनिर्माल्यदातारःस्पर्शस्तेषांह्यपुण्यकृत् ॥१२॥ विषमालोड्यवापे
यंश्रेयोवाऽनशनंपरम् ॥ सेवितव्यंशिवस्वंनप्राणैः कंठगतैरपि ॥ १३ ॥ यूयंप्रमाणंधर्मेषुयथानचतथावयम् ॥ अस्तिचेद्धर्मलेशोस्यगणास्तच्छृणुमो
वयम् ॥ १४ ॥ इत्थंतद्वाक्यमाकर्ण्यप्रोचुःपारिषदास्ततः ॥ किंकराःशिवधर्मायेसूक्ष्मास्तेवैभवादृशैः ॥ १५ ॥ स्थूललक्ष्यैःकथंलक्ष्यालक्ष्यायेसूक्ष्मदृ
ष्टिभिः ॥ अनेनानेनसाकर्मयत्कृतंशृणुतेहतत् ॥ १६ ॥ पतंतीलिंगशिरसिदीपच्छायानिवारिता ॥ स्वचैलांचलतोऽनेनदत्त्वादीपेदशांनिशि ॥१७॥
अपरोपिपरोधर्मोजातस्तत्रास्यकिंकराः ॥ शृण्वताशिवनामानिप्रसंगादपिगृह्णतः ॥ १८ ॥ भक्तेनविधिनापूजाक्रियमाणानिरीक्षिता ॥ उपोषिते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नभूतायामननस्थिरचेतसा ॥ १९ ॥ कलिंगराजोभविताऽधुनाविधुतकल्मषः ॥ एषद्विजवरोदूतायूयंयातयथागताः ॥ १२० ॥ पार्षदैर्यमदूतेभ्योमो
चितस्त्वितिसद्विजः ॥ अरिंदमस्यतनयःकलिंगाधिपतेर्दमः ॥ २१ ॥ क्रमाद्राज्यमवाप्याथपितर्युपरतेगुवा ॥ नान्यंधर्मंविजानातिदुर्दमोभूप
तिर्दमः ॥२२॥ शिवालयेषुसर्वेषुदीपदानादृतेद्विज॥ ग्रामाधीशान्समाहूयसर्वान्स्वविषयस्थितान् ॥२३॥ इत्थमाज्ञापयामाससमेदंड्योभविष्यति ॥
यस्ययस्याभितोग्रामंयावंतश्चशिवालयाः ॥ २४ ॥

तत्रतत्रसदादीपोद्योतनीयोऽविचारितम् ॥ ममाज्ञाभंगदोषेणशिरश्छेत्स्याम्यसंशयम् ॥ २५ ॥ इतितद्भयतोदीप्तादीपाःप्रतिशिवालयम् ॥ अनेनै
वसधर्मेणयावज्जीवंदमोनृपः ॥ २६ ॥ धर्मर्द्धिमहतींप्राप्यकालधर्मवशंगतः ॥ सदीपवासनायोगाद्बहून्दीपान्प्रदीप्यवै ॥ २७ ॥ अलकायाःपति
रभूद्रत्नदीपशिखाश्रयः ॥ एवंफलतिकालेनशिवेऽल्पमपियत्कृतम् ॥ २८ ॥ इतिज्ञात्वाशिवेकार्यंभजनंस्वसुखार्थिभिः ॥ क्वसदीक्षितदायादः सर्वधर्म
पराङ्मुखः ॥ २९ ॥ स्वार्थदीपदशोद्योतलिंगमौलितमोहरः ॥ कलिंगविषयेराज्यंप्राप्तोधर्मरतिःसदा ॥ १३० ॥ शिवालयेसमुद्दीप्यदीपान्प्राग्वा
सनोदयात् ॥ क्वैषादिक्पालपदवीशिवशर्मन्विलोकय ॥ मनुष्यधर्मणानेनसांप्रतंयेहभुज्यते ॥ ३१ ॥ गणावूचतुः ॥ ॥ सर्वदेवशिवेनासौसखित्वं
चयथेयिवान् ॥ तदप्येकमनाविप्रसंशृणुष्वब्रवावहे ॥ ३२ ॥ पाद्मेकल्पेपुराविप्रब्रह्मणोमानसात्सुतात् ॥ पुलस्त्याद्विश्रवाजज्ञेतस्यवैश्रवणःसुतः॥३३॥
तेनेयमलकाभुक्तापुरीविश्वकृताकृता ॥ आराध्यंत्र्यंबकंदेवमत्युग्रतपसापुरा ॥ ३४ ॥ व्यतीतेतत्रकल्पेवैप्रवृत्तेमेघवाहने ॥ याज्ञदत्तिरसौश्री
दस्तपस्तेपेसुदुःसहम् ॥ ३५ ॥

भक्तिप्रभावंविज्ञायशंभोस्तद्दीपमात्रतः ॥ पुरींपुरारेःसंप्राप्यकाशिकांचित्प्रकाशिकाम् ॥ ३६ ॥ शिवैकदशमुद्बोध्यचित्रस्त्रप्रदीपकम् ॥ अनन्यभक्तिस्ने
हाढ्यंनन्महोध्याननिश्चलम् ॥ ३७ ॥ शिवैक्यसुमहापात्रंतपोग्निपरिबृंहितम् ॥ कामक्रोधमहाविघ्नपतंगाघातवर्जितम् ॥ ३८ ॥ प्राणसंरोधनिर्वातंनिर्म
लंनिर्मलेक्षणात्॥संस्थाप्यशांभवंलिंगंसद्भावकुसुमार्चितम् ॥३९॥ तावत्ततापसंतपस्त्वगस्थिपरिशेषितम्॥यावद्भवतद्वर्ष्मवर्षाणामयुतंशतम्॥१४०॥
ततःसहविशालाक्ष्यादेवोविश्वेश्वरः स्वयम् ॥ अलकापतिमालोक्यप्रसन्नेनांतरात्मना ॥ ४१ ॥ लिंगेमनःसमाधायस्थितंस्थाणुस्वरूपिणम् ॥ उवाच
वरदोस्मीतितत्बालमलकापते ॥ ४२ ॥ उन्मील्यनयनेयावत्सपश्यतितपोधनः ॥ तावदुद्यत्सहस्रांशुसहस्राधिकतेजसम् ॥ ४३ ॥ पुरोददर्शश्री
कंठंचंद्रचूडमुमाधवम् ॥ तत्तेजःपरिभूताक्षितेजाः संमील्यलोचने ॥ ४४ ॥

उवाचदेवदेवेशंमनोरथपथातिगम् ॥ निजांघ्रिदर्शनेनाथदृक्सामर्थ्यंप्रयच्छमे ॥४५॥ अयमेववरोनाथयत्त्वंसाक्षान्निरीक्ष्यसे ॥ किमन्येनवरेणेशनभस्ते
शशिशेखर ॥ ४६ ॥ इतितद्वचनंश्रुत्वादेवदेवउमापतिः ॥ ददौदर्शनसामर्थ्यंस्पृष्ट्वापाणितलेनतम् ॥ ४७ ॥ प्रसार्यनयनेपूर्वमुमामेवव्यलोकयत् ॥
शंभोःसमीपेकायोपिदेपासर्वांगसुंदरी ॥ ४८ ॥ अनयाकिंतपस्तप्तंममापितपसोधिकम् ॥ अहोरूपमहोप्रेमसौभाग्यश्रीरहोभृशम् ॥ ४९ ॥ क्रूरदृग्वी
क्षतेयावत्पुनःपुनरिदंवदन् ॥ तावत्पुस्फोटतन्नेत्रंवामंवामाविलोकनात् ॥ १५० ॥ अथदेव्यब्रवीद्देवंकिमसौदुष्टतापसः ॥ असकृद्वीक्ष्यमांवक्तिन्यक्कुर्व
न्मेतपःप्रभाम् ॥ ५१ ॥ असकृद्दक्षिणेनाक्ष्णापुनर्मामेवपश्यति ॥ असूयमानोमेरूपंप्रेमसौभाग्यसंपदः ॥ ५२ ॥ इतिदेवीगिरंश्रुत्वाप्रहस्यप्राहतां
प्रभुः ॥ उमेत्वदीयःपुत्रोयंनचक्रूरेणचक्षुषा ॥ ५३ ॥ संपश्यतेतपोलक्ष्मींतवकिंत्वधिवर्णयेत् ॥ इतिदेवींसमाभाष्यतमीशःपुनरब्रवीत् ॥ ५४ ॥
वरान्ददामितेवत्सतपसानेनतोषितः ॥ निधीनामधिनाथस्त्वंगुह्यकानांभवेश्वरः ॥ ५५ ॥ यक्षाणांकिन्नराणांचराजाराज्ञांचसुव्रत ॥ पतिःपुण्यजनानां
चसर्वेषांधनदोभव ॥ ५६ ॥ मयासख्यंचतेनित्यंवत्स्यामिचतवांतिके ॥ अलकांनिकषामित्रतवप्रीतिविवृद्धये ॥ ५७ ॥ आगच्छपादयोरस्याःपतते
जननीत्वियम् ॥ इतिदत्त्वावरान्देवःपुनराहशिवांशिवः ॥ प्रसादंकुरुदेवेशितपस्विन्यंगजेऽत्रवै ॥ ५८ ॥ देव्युवाच ॥ ॥ वत्सतेनिश्चलाभक्तिर्भवे
भवतुसर्वदा ॥ भवैकपिंगोनेत्रेणवामेनस्फुटितेनह ॥ ५९ ॥ देवेनदत्तायेतुभ्यंवराःसंतुतथैवते ॥ कुबेरोभवनाम्नात्वंममरूपेर्ष्ययासुत ॥ १६० ॥ त्वयेदं
स्थापितंलिंगंतवनाम्नाभविष्यति ॥ सिद्धिदंसाधकानांचसर्वपापहरंपरम् ॥ ६१ ॥ नधनेनवियुज्येतनसख्यानचबांधवैः ॥ कुबेरेश्वरलिंगस्यकुर्या
द्योदर्शनंनरः ॥ ६२ ॥ विश्वेशाद्दक्षिणेभागेकुबेरेशंसमर्चयेत् ॥ नरोलिप्येतनोपापैर्नदारिद्र्येणनोऽसुखैः ॥ ६३ ॥ इतिदत्त्वावरान्देवोदेव्यासहमहे
श्वरः ॥ धनदायाविवेशाथधामवैश्वेश्वरंपरम् ॥ ६४ ॥

॥ गणावूचतुः ॥ इत्थंसखित्वंश्रीशंभोःप्रापैषधनदःपरम् ॥ अलकांनिकषाचैषकैलासःशंकरालयः ॥ ६५ ॥ पुर्यायक्षेश्वराणांतेस्वरूपमितिव
र्णितम् ॥ यच्छ्रुत्वासर्वपापेभ्योनरोमुच्येदसंशयम् ॥१६६॥ ॥ इतिश्रीस्कांदेमहापुराणे एकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडे पूर्वार्द्धे गंधव
त्यलकावर्णनंनामत्रयोदशोध्यायः ॥ १३ ॥ ॥ गणावूचतुः ॥ अलकायाःपुरोभागेपूरैशानीमहोदया ॥ अस्यांवसंतिसततंरुद्रभक्तास्तपोधनाः ॥१॥
शिवस्मरणसंसक्ताःशिवव्रतपरायणाः ॥ शिवसात्कृतकर्माणःशिवपूजारताःसदा ॥२॥ साभिलाषास्तपस्यंतिस्वर्गभोगोस्त्वितीहनः ॥ तेऽत्ररुद्रपुरेरम्ये
रुद्ररूपधरानराः ॥ ३ ॥ अजैकपादहिर्बुध्न्यमुख्याएकादशापिवै ॥ रुद्राःपरिवृढाश्चात्रत्रिशूलोद्यतपाणयः ॥ ४ ॥ पुर्यष्टकंचदुष्टेभ्योदेवध्रुग्भ्योह्यवं
तिते ॥ प्रयच्छंतिवरान्नित्यंशिवभक्तजनेवराः ॥ ५ ॥ एतैरपितपस्तप्तंप्राप्यवाराणसींपुरीम् ॥ ईशानेशंमहालिंगंपरिस्थाप्यशुभप्रदम् ॥ ६ ॥ ईशाने
शप्रसादेनदिश्यैश्यांहिदिगीश्वराः ॥ एकादशाप्येकचराजटामुकुटमंडिताः ॥ ७ ॥ भालनेत्रानीलगलाः शुद्धांगावृषभध्वजाः ॥ असंख्याताःसहस्रा
णियेरुद्राअधिभूतलम् ॥ ८ ॥ तेऽस्यांपुरिवसंत्यैश्यांसर्वभोगसमृद्धयः ॥ ईशानेशंसमभ्यर्च्यकाश्यांदेशांतरेष्वपि ॥ ९ ॥ विपन्नास्तेनपुण्येनजायंते
ऽत्रपुरोहिताः ॥ अष्टम्यांचचतुर्दश्यामीशानेशंयजंतिये ॥ १० ॥ तएवरुद्राविज्ञेयाइहामुत्राप्यसंशयम् ॥ कृत्वाजागरणंरात्रावीशानेश्वरसंनिधौ ॥११॥
उपोष्यभूतांयांकांचिन्ननरोगर्भभाक्पुनः ॥ स्वर्गमार्गेकथामित्थंशृण्वन्विष्णुगणोदिताम् ॥ १२ ॥ शिवशर्मादिवाप्युच्चैरपश्यच्चंद्रचंद्रिकाम् ॥ आह्ला
दयंतींबहुशःसमंसर्वेंद्रियैर्मनः ॥ १३ ॥ चमत्कृत्यचमत्कृत्यकोयंलोकोहरेर्गणौ ॥ पप्रच्छशिवशर्मातौप्रोचतुस्तंचनोद्विजम् ॥ १४ ॥

गणावूचतुः ॥ ॥ शिवशर्मन्महाभागलोकएषकलानिधेः ॥ पीयूषवर्षिभिर्यस्यकरैराप्याय्यतेजगत् ॥ १५ ॥ पितासोमस्यभोविप्रजज्ञेऽत्रिर्भगवानृ
षिः ॥ ब्रह्मणोमानसात्पूर्वंप्रजासर्गविधित्सतः ॥ १६ ॥ अनुत्तरंनामतपोयेनतप्तंहितत्पुरा ॥ त्रीणिवर्षसहस्राणिदिव्यानीतीहनोश्रुतम् ॥ १७ ॥ ऊर्ध्व
माचक्रमेतस्यरेतःसोमत्वमीयिवत् ॥ नेत्राभ्यांतच्चसुस्रावदशधाद्योतयद्दिशः ॥ १८ ॥ तंगर्भंविधिनादिष्टादशदेव्योदधुस्ततः ॥ समेत्यधारयामासुर्नै
वताःसमशक्नुवन् ॥ १९ ॥ यदानधारणेशक्तास्तस्यगर्भस्यतादिशः ॥ ततस्ताभिःसजूःसोमोनिपपातवसुंधराम् ॥२०॥ पतितंसोममालोक्यब्रह्मालो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कपिनामहः ॥ रथमारोपयामासलोकानांहितकाम्यया ॥२१॥ सतेनरथमुख्येनसागरांतांविसुंधराम् ॥ त्रिःसप्तकृत्वोद्रुहिणश्चकारामुंप्रदक्षिणम् ॥२२॥
तस्ययत्कृतिंतेजःपृथिवीमन्वपद्यत ॥ तथौषध्यःसमुद्भूतायाभिःसंधार्यतेजगत् ॥ २३ ॥ सलब्धतेजाभगवान्ब्रह्मणावर्धितःस्वयम् ॥ तपस्तेपेमहा
भागपद्मानांदशतीर्दश ॥ २४ ॥ अविमुक्तंसमासाद्यक्षेत्रंपरमपावनम् ॥ संस्थाप्यलिंगममृतंचंद्रेशाख्यंस्वनामतः ॥ २५ ॥ बीजौषधीनांतोयानां
राजाभूद्भुजन्मनाम् ॥ प्रसादाद्देवदेवस्यविश्वेशस्यपिनाकिनः ॥ २६ ॥ तत्रकूपंविधायैकममृतोदमितिस्मृतम् ॥ यस्यांबुपानस्नानाभ्यांनरोऽज्ञाना
त्प्रमुच्यते ॥ २७ ॥ तुष्टेनदेवदेवेनस्वमौलौयोधृतःस्वयम् ॥ आदायतांकलामेकांजगत्संजीवनींपराम् ॥२८॥ पश्चाद्दक्षेणशप्तोपिमासोनेक्षयमाप्यच ॥
आप्याय्यतेसौकलयापुनरेवतयाशशी ॥ २९ ॥ सतत्प्राप्यमहाराज्यंसोमःसोमवतांवरः ॥ राजसूयंसमाजह्रेसहस्रशतदक्षिणम् ॥ ३० ॥ दक्षिणामद
दत्सोमस्त्रींल्लोकानितिनौश्रुतम् ॥ तेभ्योब्रह्मर्षिमुख्येभ्यःसदस्येभ्यश्चभोद्विज ॥ ३१ ॥ हिरण्यगर्भोब्रह्माऽत्रिर्भृगुर्यत्रर्त्विजोभवन् ॥ सदस्योभूद्ध
रिस्तत्रमुनिभिर्बहुभिर्युतः ॥ ३२ ॥

तंसिनीचकुहूश्चैवद्युतिःपुष्टिःप्रभावसुः ॥ कीर्तिर्धृतिश्चलक्ष्मीश्चनवदेव्यःसिषेविरे ॥ ३३ ॥ उमयासहितंरुद्रंसंतर्प्याध्वरकर्मणा ॥ प्रापसोमइतिख्या
तिदत्तांसोमेनशंभुना ॥ ३४ ॥ तत्रैवतप्तवान्सोमस्तपःपरमदुष्करम् ॥ तत्रैवराजसूयंचचक्रेचंद्रेश्वराग्रतः ॥ ३५ ॥ तत्रैवब्राह्मणैःप्रीतैरित्युक्तोसौ
कलानिधिः ॥ सोमोस्माकंब्राह्मणानांराजात्रैलोक्यदक्षिणः ॥ ३६ ॥ तत्रैवदेवदेवस्यविलोचनपदंगतः ॥ देवेनप्रीतमनसात्रैलोक्याह्लादहेतवे ॥ ३७ ॥
त्वंममास्यपरामूर्तिरित्युक्तस्तत्तपोबलात् ॥ जगत्तवोदयंप्राप्यभविष्यतिसुखोदयम् ॥ ३८ ॥ त्वत्पीयूषमयैर्हस्तैःस्पृष्टमेतच्चराचरम् ॥ भानुतापपरीतं
चपरांग्लानिंविहास्यति ॥ ३९ ॥ एतदुक्त्वामहेशानोवरानन्यानदान्मुदा ॥ द्विजराजतपस्तप्तंयदत्युग्रंत्वयात्रवै ॥ ४० ॥ यच्चक्रतुक्रियोत्सर्गस्त्वयामह्यं
निवेदितः ॥ स्थापितंयत्त्विदंलिंगंममचंद्रेश्वराभिधम् ॥ ४१ ॥ ततोत्रलिंगेत्वन्नाम्निसोमसोमार्धरूपधृक् ॥ प्रतिमासंपंचदश्यांशुक्लायांसर्वगोप्यहम् ॥
॥ ४२ ॥ अहोरात्रंवसिष्यामित्रैलोक्यैश्वर्यसंयुतः ॥ ततोत्रपूर्णिमायांतुकृतास्वल्पापिसत्क्रिया ॥ ४३ ॥ जपहोमार्चनध्यानदानब्राह्मणभोजनम् ॥
महापूजाचसानूनंममप्रीत्यैभविष्यति ॥ ४४ ॥ जीर्णोद्धारादिकरणंनृत्यवाद्यादिकार्पणम् ॥ ध्वजारोपणकर्मादितपस्वियतितर्पणम् ॥ ४५ ॥ चंद्रे
श्वरेकृतंसर्वंतदानंत्यायजायते ॥ अन्यच्चतेप्रवक्ष्यामिशृणुगुह्यंकलानिधे ॥ ४६ ॥ अभक्तायचनाख्येयंनास्तिकायश्रुतिद्वहे ॥ अमावास्यायदासो
मजायतेसोमवासरे ॥ ४७ ॥

तदोपवासःकर्तव्योभूतायांसद्भिरादरात् ॥ कृतनित्यक्रियःसोमत्रयोदश्यांनिशामय ॥ ४८ ॥ शनिप्रदोषेसंपूज्यलिंगंचंद्रेश्वराह्वयम् ॥ नक्तंकृत्वात्रयो
दश्यांनियमंपरिगृह्यच ॥ ४९ ॥ उपोष्यचचतुर्दश्यांकृत्वाजागरणंनिशि ॥ प्रातःसोमकुहूयोगेस्नात्वाचंद्रोदवारिभिः ॥५०॥ उपास्यसंध्यांविधिवत्कृ
तसर्वोदकक्रियः ॥ उपचंद्रोदतीर्थेषुश्राद्धंविधिवदाचरेत् ॥५१॥ आवाहनार्घ्यरहितंपिंडान्दद्यात्प्रयत्नतः ॥ वसुरुद्रादितिसुतस्वरूपपुरुषत्रयम् ॥५२॥
गातामहांस्तथोद्दिश्यतथान्यानपिगोत्रजान् ॥ गुरुश्वशुरबंधूनांनामान्युच्चार्यपिंडदः ॥ ५३ ॥ कुर्वञ्छ्राद्धंचतीर्थेस्मिञ्छ्रद्धयोद्धरतेखिलान् ॥ गयायां
पिंडदानेनयथातुष्यंतिपूर्वजाः ॥ ५४ ॥ तथाचंद्रोदकुंडेऽत्रश्राद्धैस्तृप्यंतिपूर्वजाः ॥ गयायांचयथामुच्येत्सर्वर्णात्पितृजान्नरः ॥ ५५ ॥ तथाप्रमुच्यते
चर्णाच्चंद्रोदेपिण्डदाततः ॥ यदाचंद्रेश्वरंद्रष्टुंयायात्कोपिनरोत्तमः ॥५६॥ तदानृत्यंतिमुदितास्तत्पूर्वप्रपितामहाः ॥ अयंचंद्रोदतीर्थेस्मिंस्तर्पणंनःकरिष्यति
॥ ५७ ॥ अस्माकंमंदभाग्यत्वाद्यदिनैवकरिष्यति ॥ तदातत्तीर्थसंस्पर्शादस्मत्तृप्तिर्भविष्यति ॥ ५८ ॥ स्पृशेन्नापियदामंदस्तदाद्रक्ष्यतितृप्तये ॥
एवंश्राद्धंविधायाथस्पृष्ट्वाचंद्रेश्वरंव्रती ॥ संतर्प्यविप्रांश्चयतीन्कुर्याद्वैपारणंततः ॥ ५९ ॥ एवंव्रतेकृतेकाश्यांसदर्शेसोमवासरे ॥ भवेदृणत्रयान्मुक्तोमृगां
कमदनुग्रहात् ॥ ६० ॥ अत्रयात्रामहाचैत्र्यांकायाक्षेत्रनिवासिभिः ॥ तारकज्ञानलाभायक्षेत्रविघ्ननिवर्तिनी ॥ ६१ ॥ चंद्रेश्वरंसमभ्यर्च्ययद्यन्यत्रा
पिसंस्थितः ॥ अघौघपटलोंभित्त्वासोमलोकमवाप्स्यति ॥६२॥ कलौचंद्रेशमहिमानाभाग्यैरवगम्यते ॥ अन्यच्चतेप्रवक्ष्यामिपरंगुह्यंनिशापते ॥ ६३॥
सिद्धयोगीश्वरंपीठमेतत्साधकसिद्धिदम् ॥ सुरासुरेषुगंधर्वनागविद्याधरेष्वपि ॥ ६४ ॥ रक्षोगुह्यकयक्षेषुकिंनरेषुनरेषुच ॥ सप्तकोट्यस्तुसिद्धानामत्र
सिद्धाममाग्रतः ॥ ६५ ॥ षण्मासंनियताहारोध्यायन्विश्वेश्वरीमिह ॥ चंद्रेश्वरार्चनायातान्सिद्धान्पश्यतिसोऽग्रगान् ॥ ६६ ॥ सिद्धयोगीश्वरी
साक्षाद्वरदानस्यजायते ॥ तवापिमहतीसिद्धिःसिद्धयोगीश्वरीक्षणात् ॥६७॥ संतिपीठान्यनेकानिक्षितौसाधकसिद्धये ॥ परंयोगीश्वरीपीठाद्भूपृष्ठेनाशुसिद्धि
दम् ॥ ६८ ॥ यत्रचंद्रेश्वरंलिंगंत्वयेदंस्थापितंशशिन् ॥ इदमेवहितत्पीठमदृश्यमकृतात्मभिः ॥ ६९ ॥ जितकामाजितक्रोधाजितलोभस्पृहास्मिताः ॥
योगीश्वरींप्रपश्यंतिममशक्तिंपरांहिताम् ॥ ७० ॥

येतुप्रत्यष्टमिजनास्तथाप्रतिचतुर्दशि ॥ सिद्धयोगीश्वरीपीठेपूजयिष्यंतिभाविताः ॥ ७१ ॥ अदृष्टरूपांसुभगांपिंगलांसर्वसिद्धिदाम् ॥ धूपनैवेद्यदी
पाद्यैस्तेषामाविर्भविष्यति ॥ ७२ ॥ इतिदत्त्वावराञ्छंभुस्तस्मैचंद्रमसेद्विज ॥ अंतर्हितोमहेशानस्तत्रवैश्वेश्वरेपुरे ॥ ७३ ॥ तदारभ्यचलोकेऽस्मिन्द्वि
जराजोधिपोभवत् ॥ दिशोवितिमिराःकुर्वन्निजैःप्रसृमरैःकरैः ॥ ७४ ॥ सोमवारव्रतकृतःसोमपानरतानराः ॥ सोमप्रभेणयानेनसोमलोकंव्रजंतिहि ॥
॥ ७५ ॥ चंद्रेश्वरसमुत्पत्तिंतथाचांद्रमसंतपः ॥ यःश्रोष्यतिनरोभक्त्याचंद्रलोकेसइज्यते ॥ ७६ ॥ अगस्तिरुवाच ॥ ॥ शिवशर्मणिशर्मकारिणींप
थिदिव्येश्रमहारिणींगणौ ॥ कथयंतौतुकथामिमांशुभामुडुलोकंपरिजग्मतुस्ततः ॥ ७७ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थे
काशीखंडेपूर्वार्द्धेसोमलोकवर्णनंनामचतुर्दशोऽध्यायः ॥१४॥ अगस्तिरुवाच ॥ शृणुपत्निमहाभागेलोपामुद्रेसधर्मिणि ॥ कथांविष्णुगणाभ्यांचकथितां
शिवशर्मणे ॥ १ ॥ शिवशर्मोवाच ॥ अहोगणौविचित्रेयंश्रुताचांद्रमसीकथा ॥ उडुलोककथाख्यातंविष्वगाख्यानकोविदौ ॥ २ ॥ गणावूचतुः ॥ पुरा
सिसृक्षतःसृष्टिंत्रष्टुरंगुष्ठपृष्ठतः ॥ दक्षःप्रजाविनिर्माणेदक्षोजातःप्रजापतिः ॥३॥ षष्टिर्दुहितरस्तस्यतपोलावण्यभूषणाः ॥ सर्वलावण्यरोहिण्योरोहिणीप्रमुखाः
शुभाः ॥ ४ ॥ ताभिस्तप्त्वातपस्तीव्रंप्राप्यवैश्वेश्वरींपुरीम् ॥ आराधितोमहादेवःसोमःसोमविभूषणः ॥ ५ ॥ यदातुष्टोयमीशानोदातुंवरमथाययौ ॥
उवाचचप्रसन्नात्मायाचध्वंवरमुत्तमम् ॥ ६ ॥ शंभोर्वाक्यमथाकर्ण्यऊचुस्ताश्चकुमारिकाः ॥ यदिदेयोवरोऽस्माकंवरयोग्याःस्मशंकर ॥ ७ ॥
भवतोपिमहादेवभवतापहरोहियः ॥ रूपेणभवतातुल्यःसनोभर्ताभवत्विति ॥ ८ ॥ लिंगंसंस्थाप्यसुमहन्नक्षत्रेश्वरसंज्ञितम् ॥ वारणायास्तटेरम्ये
संगमेश्वरसन्निधौ ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिव्यंवर्षसहस्रंतुपुरुषायितसंज्ञितम् ॥ तपस्तप्तंमहत्ताभिःपुरुषैरपिदुष्करम् ॥ १० ॥ ततस्तुष्टोहिविश्वेशोव्यतरद्वरमुत्तमम् ॥ सर्वासामेकपत्नीनामकत्रे स्थिरचेतसाम् ॥ ११ ॥ श्रीविश्वेश्वरउवाच ॥ ॥ नक्षांतंहितपोत्युग्रमेतदन्याभिरीदृशम् ॥ पुराऽबलाभिस्तस्माद्वोनाम्नक्षत्रमत्रवै ॥ १२ ॥ पुरुषायितसंज्ञेनतप्तंयत्तपसाधुना ॥ भवतीभिस्ततःपुंस्त्वमिच्छयावोभविष्यति ॥ १३ ॥ ज्योतिश्चक्रेसमस्तेऽस्मिन्नग्रगण्याभविष्यथ ॥ मेषादीनांचराशीनांयोनयोयूयमुत्तमाः ॥ १४ ॥ ओषधीनांसुधायाश्चब्राह्मणानांचयःपतिः ॥ पतिमत्योभवत्योपितेनपत्याशुभाननाः ॥ १५ ॥ भवतीनामिदंलिंगंनक्षत्रेश्वरसंज्ञितम् ॥ पूजयित्वानरोगंताभवतीलोकमुत्तमम् ॥ १६ ॥ उपरिष्टान्मृगांकस्यलोकोवस्तुभविष्यति ॥ सर्वासांतारकाणांचमध्येमान्याभविष्यथ ॥ १७ ॥ नक्षत्रपूजकायेचनक्षत्रव्रतचारिणः ॥ तेवोलोकेवसिष्यंतिनक्षत्रसदृशप्रभाः ॥ १८ ॥ नक्षत्रग्रहराशीनांबाधास्तेषांकदाचन ॥ नभविष्यंतियेकाश्यांनक्षत्रेश्वरवीक्षकाः ॥ १९ ॥ अगस्त्यउवाच ॥ ॥ अतिथित्वमवापनेत्रयोर्बुधलोकःशिवशर्मणस्त्वथ ॥ गणयोर्भगणस्यसंकथांकथयित्रोरितिविष्णुचेतसोः ॥ २० ॥ शिवशर्मोवाच ॥ ॥ कस्यलोकोयमतुलोव्रतंश्रीभगवद्गणौ ॥ पीयूषभानोरिवमेमनःप्रीणयतेतराम् ॥ २१ ॥ ॥ गणावूचतुः ॥ ॥ शिवशर्मञ्छृणुकथामेतांपापापहारिणीम् ॥ स्वर्गमार्गविनोदायतापत्रयविनाशिनीम् ॥ २२ ॥ योसौपूर्वंमहाकांतिरावाभ्यांपरिवर्णितः ॥ साम्राज्यपदमापन्नोद्विजराजस्तवाग्रतः ॥ २३ ॥ दक्षिणाराजसूयस्ययेनत्रिभुवनंकृता ॥ तपस्ततापयोत्युग्रंपद्मानांदशतीर्दश ॥२४॥ अत्रिनेत्रसमुद्भूतःपौत्रोवैद्रुहिणस्ययः ॥ नाथःसर्वौषधीनांचज्योतिषांपतिरेवच ॥ २५ ॥

निर्मलानांकलानांचशेवधिर्यश्चगीयते ॥ उद्यन्परोपतापंयःस्वकरैर्गलहस्तयेत् ॥ २६ ॥ मुदंकुमुदिनीनांयस्तनोतिजगतांसह ॥ दिग्वधूचारुशृंगारदर्शनादर्शमंडलः ॥ २७ ॥ किमन्यैर्गुणसंभारैरतोपिनसमंविधोः ॥ निजोत्तमांगेसर्वज्ञःकलांयस्यावतंसयेत् ॥ २८ ॥ बृहस्पतेस्सवैभार्यामैश्वर्यमदमोहितः ॥ पुरोहितस्यापिगुरोर्भ्रातुरांगिरसस्यवै ॥ २९ ॥ जहारतरसातारांरूपवान्रूपशालिनीम् ॥ वार्यमाणोपिगीर्वाणैर्बहुदेवर्षिभिःपुनः ॥ ३० ॥ नायंकलानिधेर्दोषोद्विजराजस्यतस्यवै ॥ हित्वात्रिनेत्रंकामेनकस्यनोखंडितंमनः ॥३१॥ ध्वांतमेतदभितःप्रसारियत्तच्छमायविधिनाविनिर्मितम् ॥ दीपभास्करकरामहौषधंनाधिपत्यतमसस्तुकिंचन ॥ ३२ ॥ आधिपत्यमदमोहितंहितंशंसितंस्पृशतिनोहरेर्हितम् ॥ दुर्जनंविहिततीर्थमज्जनैःशुद्धधीरिवविरुद्धमानसम् ॥ ३३ ॥ धिग्धिगेतदधिकर्द्धिचेष्टितंचंक्रमेक्षणविलक्षितंयतः ॥ वीक्षतेक्षणमचारुचक्षुषाघातितेनविपदःपदेनच ॥ ३४ ॥

कःकामेननिर्जितस्त्रिजगतांपुष्पायुधेनाप्यहोकःक्रोधस्यवशंगतोननचकोलोभेनसंमोहितः ॥ योपिल्लोचनभल्लभिन्नहृदयःकोनाप्तवानापदंकोराज्यश्रियमाप्यनांधपदवीयातोपिसल्लोचनः ॥ ३५ ॥ आधिपत्यकमलातिचंचलाप्राप्यतांचयदिहार्जितंकिल ॥ निश्चलंसदसदुच्चकैर्हितंकार्यमार्यचरितैःसदैवतत् ॥ ३६ ॥ नयदांगिरसेतारांसव्यसर्जयदुल्बणः ॥ रुद्रोथपार्ष्णिजग्राहगृहीत्वाजगवंधनुः ॥ ३७ ॥ तेनब्रह्मशिरोनामपरमास्त्रंमहात्मना ॥ उत्सृष्टंदेवदेवायतेनतन्नाशितंततः ॥ ३८ ॥ तयोस्तद्युद्धमभवद्घोरंवैतारकामयम् ॥ ततस्त्वकांडब्रह्मांडभंगाद्भीतोभवद्विधिः ॥३९॥ निवार्यरुद्रंसमरात्संवर्तानलवर्चसम् ॥ ददावांगिरसेतारांस्वयमेवपितामहः ॥४०॥ अथांतर्गर्भमालोक्यतारांप्राहबृहस्पतिः ॥ मदीयायांनतेयोनौगर्भोधार्यःकथंचन ॥४१॥

इषीकास्तंबमासाद्यगर्भंसाचोत्ससर्जह ॥ जातमात्रःसभगवान्देवानामाक्षिपद्वपुः ॥ ४२ ॥ ततःसंशयमापन्नास्तारामूचुःसुरोत्तमाः ॥ सत्यंब्रूहिसुतःकस्यसोमस्याथबृहस्पतेः ॥ ४३ ॥ पृच्छमानायदादेवैर्नाहताराऽतिसत्रपा ॥ तदासाशप्तुमारब्धाकुमारेणातितेजसा ॥ ४४ ॥ तंनिवार्यतदाब्रह्मातारांपप्रच्छसंशयम् ॥ प्रोवाचप्रांजलिःसातंसोमस्येतिपितामहम् ॥ ४५ ॥ तदासमूर्ध्न्युपाघ्रायराजागर्भंप्रजापतिः ॥ बुधइत्यकरोन्नामतस्यबालस्यधीमतः ॥ ४६ ॥ ततश्चसर्वदेवेभ्यस्तेजोरूपबलाधिकः ॥ बुधःसोमंसमापृच्छ्यतपसेकृतनिश्चयः ॥४७॥ जगामकाशींनिर्वाणराशिंविश्वेशपालिताम् ॥ तत्रलिंगंप्रतिष्ठाप्यसस्वनाम्नाबुधेश्वरम् ॥ ४८ ॥ तपश्चचारचात्युग्रमुग्रंसंशीलयन्हृदि ॥ वर्षाणामयुतंबालोबालेंदुतिलकंशिवम् ॥ ४९ ॥ ततोविश्वपतिःश्रीमान्विश्वेशोविश्वभावनः ॥ बुधेश्वरान्महालिंगादाविरासीन्महोदयः ॥ ५० ॥ उवाचचप्रसन्नात्माज्योतीरूपोमहेश्वरः ॥ वरंब्रूहिमहाबुद्धेबुधान्यविबुधोत्तमः ॥ ५१ ॥ तवानेनातितपसालिंगसंशीलनेनच ॥ प्रसन्नोस्मिमहासौम्यनादेयंत्वयिविद्यते ॥ ५२ ॥ इतिश्रुत्वावचःसोथमेघगंभीरनिःस्वनम् ॥ अवग्रहपरिम्लानसस्यसंजीवनोपमम् ॥ ५३ ॥ उन्मील्यलोचनेयावत्पुरःपश्यतिबालकः ॥ तावल्लिंगेददर्शाथत्र्यंबकंशशिशेखरम् ॥५४॥ बुधउवाच ॥ ॥ नमःपूतात्मनेतुभ्यंज्योतीरूपनमोस्तुते ॥ विश्वरूपनमस्तुभ्यंरूपातीतायतेनमः ॥५५॥ नमःसर्वार्तिनाशायप्रणतानांशिवात्मने ॥ सर्वज्ञायनमस्तुभ्यंसर्वकर्त्रेनमोस्तुते ॥ ५६ ॥

कृपालवेनमस्तुभ्यंभक्तिगम्यायतेनमः ॥ फलदात्रेचतपसांतपोरूपायतेनमः ॥ ५७ ॥ शंभोशिवशिवाकांतशांतश्रीकंठशूलभृत् ॥ शशिशेखरशर्वेशशंकरेश्वरधूर्जटे ॥ ५८ ॥ पिनाकपाणेगिरिशशितिकंठसदाशिव ॥ महादेवनमस्तुभ्यंदेवदेवनमोस्तुते ॥ ५९ ॥ स्तुतिंकर्तुंनजानामिस्तुतिप्रियमहेश्वर ॥ तवपादांबुजद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुमे ॥ ६० ॥ अयमेववरोनाथप्रसन्नोसियदीश्वर ॥ नान्यंवरंवृणेत्वत्तःकरुणामृतवारिधे ॥ ६१ ॥ ततःप्राहमहेशानस्तत्स्तुत्यापरितोषितः ॥ रौहिणेयमहाभागसौम्यसौम्यवचोनिधे ॥ ६२ ॥ नक्षत्रलोकादुपरितवलोकोभविष्यति ॥ मध्येसर्वग्रहाणांचसपर्यांलप्स्यसेपराम् ॥ ६३ ॥ त्वयेदंस्थापितंलिंगंसर्वेषांबुद्धिदायकम् ॥ दुर्बुद्धिहरणंसौम्यत्वल्लोकवसतिप्रदम् ॥ ६४ ॥ इत्युक्त्वाभगवाञ्छंभुस्तत्रैवांतरधीयत ॥ बुधःस्वर्लोकमगमद्देवदेवप्रसादतः ॥ ६५ ॥ गणावूचतुः ॥ ॥ काश्यांबुधेश्वरसमर्चनलब्धबुद्धिःसंसारसिंधुमधिगम्यनरोह्यगाधम् ॥ मज्जेन्नसज्जनविलोचनचंद्रकांतिःकांताननस्त्वधिवसेच्चबुधेऽत्रलोके ॥ ६६ ॥

चंद्रेश्वरात्पूर्वभागेदृष्ट्वालिंगंबुधेश्वरम् ॥ नबुद्ध्याहीयतेजंतुरंतकालेपिजातुचित् ॥६७॥ गणौयावत्कथामित्थंचक्रातेबुधलोकगाम् ॥ तावद्विमानंसंप्राप्तंशुक्रलोकमनुत्तमम् ॥ ६८ ॥ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडेपूर्वार्द्धेनक्षत्रबुधलोकयोर्वर्णनंनामपंचदशोध्यायः ॥ १५ ॥ ॥ गणावूचतुः ॥ शिवशर्मन्महाबुद्धेशुक्रलोकोयमद्भुतः ॥ दानवानांचदैत्यानांगुरुरत्रवसेत्कविः ॥ १ ॥ पीत्वावर्षसहस्रंवैकणधूमंसुदुःसहम् ॥ यःप्राप्तवान्महाविद्यांमृत्युसंजीविनींहरात् ॥ २ ॥ इमांविद्यांनजानातिदेवाचार्योतिदुष्कराम् ॥ ऋतेमृत्युंजयात्स्कंदात्पार्वत्यागजवक्त्रतः ॥ ३ ॥ शिवशर्मोवाच ॥ ॥ कोसौशुक्रइतिख्यातोयस्यायंलोकउत्तमः ॥ कथंतेनचविद्याप्तामृत्युसंजीविनीहरात् ॥ ४ ॥ आचक्षा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

थामिदंदेवोयदिप्रीतिर्मयिप्रभू ॥ ततस्तौस्माहतुर्देवौशुक्रस्यपरमांकथाम् ॥ ५॥ यांश्रुत्वाचापमृत्युभ्योहीयंतेश्रद्धयायुताः ॥ भूतप्रेतपिशाचेभ्योनभयंचा
पिजायते ॥ ६ ॥ आजौप्रवर्तमानायामंधकांधकवैरिणोः ॥ अनिर्भेद्यगिरिव्यूहवज्रव्यूहाधिनाथयोः ॥७॥ अपसृत्यततोयुद्धादंधकःशुक्रसंनिधिम् ॥
अधिगम्यबभाषेदमवरुह्यरथात्ततः ॥ ८ ॥ भगवंस्त्वामुपाश्रित्यवयंदेवांश्चसानुगान् ॥ मन्यामहेतृणैस्तुल्यान्रुद्रोपेंद्रादिकानपि ॥ ९ ॥ कुंजराइव
सिंहेभ्योगरुडेभ्यइवोरगाः ॥ अस्मत्तोबिभ्यतिसुरागुरोयुष्मदनुग्रहात् ॥ १० ॥ वज्रव्यूहमनिर्भेद्यंविविशुर्दैत्यदानवाः ॥ विधूयप्रमथानीकंह्लदंतापा
र्दिताइव ॥ ११ ॥ वयंत्वच्छरणंभूत्वापर्वताइवनिश्चलाः ॥ स्थित्वाचरामनिःशंकाब्राह्मणेंद्रमहाहवे ॥ १२ ॥

आप्तभावेनचवयंपादौतवसुखप्रदौ ॥ सदाराःससुताश्चैवशुश्रूषामोदिवानिशम् ॥ १३ ॥ अभिरक्षाभितोविप्रप्रसन्नःशरणागतान् ॥ पश्यहुंडंतुहुंडंचकुजं
भंजंभमेवच ॥ १४ ॥ पाकंकार्तस्वनंचैवविपाकंपाकहारिणम् ॥ तंचन्द्रदमनंशूरंशूरामरविदारणम् ॥१५॥ प्रमथैर्भीमविक्रांतैःक्रांतंमृत्युप्रमाथिभिः ॥
सूदितान्पतितांश्चैवद्राविडैरिवचंदनान् ॥ १६ ॥ यापीत्वाकणधूमंवैसहस्रंशरदांपुरा ॥ वराविद्यात्वयाप्राप्तातस्याःकालोयमागतः ॥१७॥ अथविद्याफलं
तत्तेदैत्यान्संजीवयिष्यतः ॥ पश्यंतुप्रमथाःसर्वेत्वयासंजीवितानिमान् ॥१८॥इत्यंधकवचःश्रुत्वास्थिरधीर्भार्गवोमुनिः ॥ किंचित्स्मितंतदाकृत्वादानवा
धिपमब्रवीत् ॥ १९ ॥ दानवाधिपतेसर्वंतथ्यंयद्भाषितंत्वया ॥ विद्योपार्जनमेतद्धिदानवार्थंमयाकृतम् ॥ २० ॥ पीत्वावर्षसहस्रंवैकणधूमंसुदुः
सहम् ॥ एषाप्राप्तेश्वराद्विद्याबांधवानांसुखावहा ॥ २१ ॥ एतयाविद्ययासोहंप्रमथैर्मथितान्रणे ॥ उत्थापयिष्येग्लानानिधान्यान्यंबुधरोयथा ॥२२॥
निर्व्रणान्नीरुजःस्वस्थान्सुप्त्वेवपुनरुत्थितान् ॥ अस्मिन्मुहूर्तेद्रष्टासिदानवानुत्थितान्नृप ॥ २३ ॥ इत्युक्त्वादानवपतिंविद्यामावर्तयत्कविः ॥ एकैकंदैत्यमु
द्दिश्यतउत्तस्थुर्धृतायुधाः ॥ २४ ॥ वेदाइवसदभ्यस्ताःसमयेवायथांबुदाः ॥ ब्राह्मणेभ्योयथादत्ताःश्रद्धयार्थामहापदि ॥ २५॥ उज्जीवितांस्तुतान्दृष्ट्वातुहुं
डाद्यान्महासुरान् ॥ विनेदुःपूर्वदेवास्तेजलपूर्णाइवांबुदाः ॥ २६ ॥ शुक्रेणोज्जीवितान्दृष्ट्वादानवांस्तान्गणेश्वराः ॥ विज्ञाप्यमेवदेवेशेह्येवंतेऽन्यो
न्यमब्रुवन् ॥ २७ ॥ आश्चर्यरूपेप्रमथेश्वराणांतस्मिंस्तथावर्ततियुद्धयज्ञे ॥ अमर्षितोभार्गवकर्मदृष्ट्वाशिलादपुत्रोभ्यगमन्महेशम् ॥ २८ ॥

जयेतिचोक्त्वाजययोनिमुग्रमुवाचनंदीकनकावदातम् ॥ गणेश्वराणांरणकर्मदेवदेवैश्चसेंद्रैरपिदुष्करंयत् ॥ २९ ॥ तद्भार्गवेणाद्यकृतंवृथानःसंजीव्यताना
जिमृतान्विपक्षान् ॥ आवर्त्यविद्यांमृतजीवदात्रीमेकैकमुद्दिश्यसहेलमीश ॥ ३० ॥ तुहुंडहुंडादिकजंभजंभविपाकपाकादिमहासुरेंद्राः ॥ यमालयाद
द्यपुनर्निवृत्ताविद्रावयंतःप्रमथांश्चरंति ॥ ३१ ॥ यदिह्यसौदैत्यवरान्निरस्तान्संजीवयेदत्रपुनःपुनस्तान् ॥ जयःकुतोनोभवितामहेशगणेश्वराणांकुतएवशां
तिः ॥ ३२ ॥ इत्येवमुक्तःप्रमथेश्वरेणसनंदिनावैप्रमथेश्वरेशः ॥ उवाचदेवःप्रहसंस्तदानींतंनंदिनंसर्वगणेशराजम् ॥ ३३ ॥ नंदिन्प्रयाहित्वरितोतिमात्रं
द्विजेंद्रवर्यंदितिनंदनानाम् ॥ मध्यात्समुद्धृत्यतथानयाशुश्येनोयथालावकमंडजानम् ॥ ३४ ॥ सएवमुक्तोवृषभध्वजेननननादनंदीवृषसिंहनादः ॥
जगामतूर्णंचविगाह्यसेनांयत्राभवद्भार्गववंशदीपः ॥ ३५ ॥ तंरक्ष्यमाणंदितिजैःसमस्तैःपाशासिवृक्षोपलशैलहस्तैः ॥ विक्षोभ्यदैत्यान्बलवाञ्जहारकाव्यं
सनंदीशरभोयथेभम् ॥ ३६ ॥ स्रस्तांबरंविच्युतभूषणंचविमुक्तकेशंबलिनागृहीतम् ॥ विमोचयिष्यंतइवानुजग्मुःसुरारयःसिंहरवान्सृजंतः ॥ ३७ ॥
दंभोलिशूलासिपरश्वधानामुद्दंडचक्रोपलकंपनानाम् ॥ नंदीश्वरस्योपरिदानवेंद्रावर्षंववर्षुर्जलदाइवोग्रम् ॥ ३८ ॥ तंभार्गवंप्राप्यगणाधिराजोमुखा
ग्निनाशस्त्रशतानिदग्ध्वा ॥ आयात्प्रवृद्धेऽसुरदेवयुद्धेभवस्यपार्श्वेव्यथितारिसैन्यः ॥ ३९ ॥ अयंसशुक्रोभगवन्नितीदंनिवेदयामासभवायशीघ्रम् ॥
जग्राहशुक्रंसचदेवदेवोयथोपहारंशुचिनाप्रदत्तम् ॥ ४० ॥ नकिंचिदुक्त्वासहिभूतगोप्ताचिक्षेपवक्त्रेफलवत्कवींद्रम् ॥ हाहारवस्तैरसुरैःसमस्तैरुच्चै
र्विमुक्तोहहहेतिभूरि ॥ ४१ ॥

काव्येनिगीर्णेगिरिजेश्वरेणदैत्याजयाशारहिताबभूवुः ॥ हस्तैर्विमुक्ताइववारणेंद्राःशृंगैर्विहीनाइवगोवृषाश्च ॥ ४२ ॥ शरीरहीनाइवजीवसंघाद्विजाय
थाचाध्ययनेनहीनाः ॥ निरुद्यमाःसत्त्वगुणायथावैयथोद्यमाभाग्यविवर्जिताश्च ॥ ४३ ॥ पत्याविहीनाश्चयथैवयोषायथाविपक्षाइवमार्गणौघाः ॥ आयूं
षिहीनानियथैवपुण्यैर्वृत्तेनहीनानियथाश्रुतानि ॥ ४४ ॥ विनायथावैभवशक्तिमेकांभवंतिहीनाःस्वफलैःक्रियौघाः ॥ तथाविनातंद्विजवर्यमेकंदैत्याजया
शाविमुखाबभूवुः ॥ ४५ ॥ नंदिनापहृतेशुक्रेगिलितेचविषादिना ॥ विषादमगमन्दैत्याहीयमानरणोत्सवाः ॥ ४६ ॥ तान्वीक्ष्यविगतोत्साहानंधकः
प्रत्यभाषत ॥ कविंविक्रम्यनयतानंदिनावंचितावयम् ॥ ४७ ॥ तनूर्विनाहृताःप्राणाःसर्वेषामद्यतेननः ॥ धैर्यंवीर्यंगतिःकीर्तिःसत्त्वंतेजःपराक्रमः ॥४८॥
युगपन्नोहृतंसर्वमेकस्मिन्भार्गवेहृते ॥ धिगस्मान्कुलपूज्योयैरेकोपिकुलसत्तमः ॥ गुरुःसर्वसमर्थश्चत्रातात्रातोनचापदि ॥ ४९ ॥ तद्धैर्यमवलंब्येहयु
ध्यध्वमरिभिःसह ॥ सूदयिष्याम्यहंसर्वान्प्रमथान्सहनंदिना ॥ ५० ॥ अद्यैतान्विवशान्हत्वासहदेवैःसवासवैः ॥ भार्गवंमोचयिष्यामिजीवंयोगी
वकर्मतः ॥ ५१ ॥ सचापियोगीयोगेनयदिनामस्वयंप्रभुः ॥ शरीरात्तस्यनिर्गच्छेदस्माकंशेषपालिता ॥ ५२ ॥ इत्यंधकवचःश्रुत्वादानवामेघनिः
स्वनाः ॥ प्रमथानर्दयामासुर्मर्तव्येकृतनिश्चयाः ॥ ५३ ॥ सत्यायुषिननोजातुशक्ताःस्युःप्रमथाबलात् ॥ असत्यायुषिकिंगत्वात्यक्त्वास्वामिनमाहवे ॥
॥ ५४ ॥ यस्वामिनंविहायाजौबहुमानधनाजनाः ॥ यांतितेयांतिनियतमंधतामिस्रमालयम् ॥ ५५ ॥ अयशस्तमसाख्यातिंमलिनीकृत्यभूरिशः ॥
इहामुत्रापिसुखिनोनस्युर्भग्नारणाजिरात् ॥ ५६ ॥ किंदानैःकिंतपोभिश्चकिंतीर्थपरिमज्जनैः ॥ धरातीर्थेयदिस्नातंपुनर्भवमलापहे ॥ ५७ ॥
संप्रधार्येतितेऽन्योन्यंदैत्यास्तेदनुजास्तथा ॥ ममंथुःप्रमथानाजौरणभेरीर्निनाद्यच ॥ ५८ ॥ तत्रबाणासिवज्रौघैःकटंकटशिलामयैः ॥ भुशुंडीभिं
दिपालैश्चशक्तिभल्लपरश्वधैः ॥ ५९ ॥ खट्वांगैःपट्टिशैःशूलैर्लकुटैर्मुसलैरलम् ॥ परस्परमभिघ्नंतःप्रचक्रुःकदनंमहत् ॥ ६० ॥ कार्मुकाणांविकृष्टानां
पततांचपतत्रिणाम् ॥ भिंदिपालभुशुंडीनांक्ष्वेडितानांरवोऽभवत् ॥ ६१ ॥ रणतूर्यनिनादैश्चगजानांबहुबृंहितैः ॥ हेषारवैर्हयानांचमहान्कोलाहलोऽ
भवत् ॥६२॥ प्रतिस्वनैरवापूरिद्यावाभूम्योर्यदंतरम् ॥ अभीरूणांचभीरूणांमहारोमोद्गमोऽभवत् ॥ ६३ ॥ गजवाजिमहारावस्फुटच्छब्दग्रहाणिच ॥
भग्नध्वजपताकानिक्षीणप्रहरणानिच ॥ ६४ ॥ रुधिरोद्गारचित्राणिव्यश्वहस्तिरथानिच ॥ पिपासितानिसैन्यानिमुमूर्छुरुभयत्रवै ॥ ६५ ॥ दृष्ट्वासैन्यं
चप्रमथैर्भज्यमानमितस्ततः ॥ दुद्रावरथमास्थायस्वयमेवांधकोगणान् ॥ ६६ ॥ शरवज्रप्रहारैस्तैर्वज्राघातैर्नगाइव ॥ प्रमथानेशिरेवातैर्निस्तोयाइवतो
यदाः ॥ ६७ ॥ यांतमायांतमालोक्यदूरस्थंनिकटस्थितम् ॥ प्रत्येकंरोमसंख्याभिर्व्यधाद्बाणैस्तदांधकः ॥ ६८ ॥ विनायकेनस्कंदेननंदिनासोमनं
दिना ॥ नैगमेयेनशाखेनविशाखेनबलीयसा ॥ ६९ ॥ इत्याद्यैस्तुगणैरुग्रैरंधकोप्यंधकीकृतः ॥ त्रिशूलशक्तिबाणौघधारासंपातपातिभिः ॥ ७० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ततःकोलाहलोजातःप्रमथासुरसैन्ययोः ॥ तेनशब्देनमहताशुक्रःशंभूदरेस्थितः ॥ ७१ ॥ छिद्रान्वेषीभ्रमन्सोथविनिःकेतोयथानिलः ॥ सप्तलोकान् सपालान्सरुद्रदेहेव्यलोकयत् ॥७२॥ ब्रह्मनारायणेंद्राणामादित्याप्सरसांतथा ॥ भुवनानिविचित्राणियुद्धंचप्रमथासुरम् ॥ ७३ ॥ सवर्षाणांशतंकुक्षौ भवस्यपरितोभ्रमन् ॥ नतस्यददृशेरंध्रंशुचेरंध्रंखलोयथा ॥ ७४ ॥

शांभवेनाथयोगेनशुक्ररूपेणभार्गवः ॥ चस्कंदाथननामापिततोदेवेनभाषितः ॥ ७५ ॥ शुक्रवन्निःसृतोयस्मात्तस्मात्त्वंभृगुनंदन ॥ कर्मणानेनशुक्रस्त्वं ममपुत्रोसिगम्यताम् ॥ ७६ ॥ जठरान्निर्गतेशुक्रेदेवोपिमुमुदेतराम् ॥ भ्रमञ्छ्रेयोभवद्यन्मेनमृतोजठरेद्विजः ॥ ७७ ॥ इत्येवमुक्तोदेवेनशुक्रोर्कसदृशद्युतिः ॥ विवेशदानवानीकंमेघमालांयथाशशी ॥ ७८ ॥ शुक्रोदयान्मुदंलेभेसदानवमहार्णवः ॥ यथाचंद्रोदयेहर्षमूर्मिमालीमहोदधिः ॥ ७९ ॥ अंधकांधकदंत्रोर्वैवर्तमानेमहाहवे ॥ इत्थंनाम्नाभवच्छुक्रःसवैभार्गवनंदनः ॥ ८० ॥ यथाचविद्यांतांप्रापमृतसंजीवनींपराम् ॥ शंभोरनुग्रहात्काव्यस्तन्निशामय सुव्रत ॥ ८१ ॥ ॥ गणावूचतुः ॥ ॥ पुराऽसौभृगुदायादोगत्वावाराणसींपुरीम् ॥ अंडजस्वेदजोद्भिज्जजरायुजगतिप्रदाम् ॥ ८२ ॥ संस्थाप्यलिंगं श्रीशंभोःकूपंकृत्वातदग्रतः ॥ बहुकालंतपस्तेपेध्यायन्विश्वेश्वरंप्रभुम् ॥ ८३ ॥ राजचंपकधत्तूरकरवीरकुशेशयैः ॥ मालतीकर्णिकारैश्चकदंबैर्बकुलोत्पलैः ॥ ८४ ॥ मल्लिकाशतपत्रीभिःसिंदुवारैःसकिंशुकैः ॥ अशोकैःकरुणैःपुष्पैःपुन्नागैर्नागकेसरैः ॥ ८५ ॥ क्षुद्राभिर्माधवीभिश्चपाटलाबिल्वचंपकैः ॥ नवमल्लीविचिकिलैःकुंदैःसमुचुकुंदकैः ॥ ८६ ॥ मंदारैर्बिल्वपत्रैश्चद्रोणैर्मरुवकैर्बकैः ॥ ग्रंथिपर्णैर्दमनकैःसुरभूचूतपल्लवैः ॥ ८७ ॥

तुलसीदेवगंधारीबृहत्पत्रीकुशांकुरैः ॥ नंद्यावर्तैरगस्त्यैश्चसशालैर्देवदारुभिः ॥ ८८ ॥ कांचनारैःकुरवकैर्दूर्वांकुरकुरंटकैः ॥ प्रत्येकमेभिःकुसुमैःपल्लवैरपरैरपि ॥८९॥ पत्रैःशतसहस्रैश्चससमानर्चशंकरम् ॥ पंचामृतैर्द्रोणमितैर्लक्षकृत्वःप्रयत्नतः ॥९०॥ स्नपयामासदेवेशंसुगंधस्नपनैर्बहु ॥ सहस्रकृत्वोदेवेशं चंदनैर्यक्षकर्दमैः ॥९१॥ समालिलिंपदेवेशंसुगंधोद्वर्तनान्यनु ॥ गीतनृत्योपहारैश्चश्रुत्युक्तस्तुतिभिर्बहु॥९२॥नाम्नांसहस्रैरन्यैश्चस्तोत्रैस्तुष्टावशंकरम् ॥ सहस्रंपंचशरदामित्थंशुक्रःसमर्चयन् ॥ ९३ ॥ यदादेवंनालुलोकेमनागपिवरोन्मुखम् ॥ तदान्यंनियमंघोरंजग्राहातीवदुःसहम् ॥ ९४ ॥ प्रक्षाल्यचेतसोत्यंतंचांचल्याख्यंमहामलम् ॥ भावनावार्भिरसकृदिंद्रियैःसहितस्यच ॥ ९५ ॥ निर्मलीकृत्यतच्चेतोरत्नंदत्त्वापिनाकिने ॥ प्रपपौकणधूमौघंसहस्रंशरदां कविः ॥९६॥ प्रससादतदादेवोभार्गवायमहात्मने ॥ तस्माल्लिंगाद्विनिर्गत्यसहस्रार्काधिकद्युतिः ॥ ९७ ॥ उवाचचविरूपाक्षःसाक्षाद्दाक्षायणीपतिः ॥ तपोनिधेप्रसन्नोस्मिवरंवरयभार्गव ॥ ९८ ॥ निशम्येतिवचःशंभोरंभोजनयनोद्विजः ॥ उद्यदानंदसंदोहरोमांचांचितविग्रहः ॥ ९९ ॥ तुष्टावाष्टतनुंतुष्टःप्रफुल्लनयनांचलः ॥ मौलावंजलिमाधायवदञ्जयजयेतिच ॥ १०० ॥ भार्गवउवाच ॥ ॥ त्वंभाभिराभिरभिभूयतमःसमस्तमस्तंनयस्यभिमतानि निशाचराणाम् ॥ देदीप्यसेदिनमणेगगनेहितायलोकत्रयस्यजगदीश्वरतन्नमस्ते ॥ १०१ ॥

लोकेनिवेलमतिवेलमहामहोभिर्निर्मासिकौमुदमुदंचसमुत्समुद्रम् ॥ विद्राविताखिलतमाःसुतमोहिमांशोपीयूषपूरपरिपूरिततन्नमस्ते ॥ २ ॥ त्वंपावनेपथिसदागतिरस्युपास्यःकस्त्वांविनाभुवनजीवनजीवतीह ॥ स्तब्धप्रभंजनविवर्धितसर्वजंतोसंतोषिताहिकुलसर्वगतन्नमस्ते ॥ ३ ॥ विश्वैकपावकनताकपावकैकशक्तेर्ऋतेऽमृतवतामृतदिव्यकार्यम् ॥ प्राणित्यदोजगदहोजगदंतरात्मंस्तत्पावकप्रतिपदंशमदंनमस्ते ॥ ४ ॥ पानीयरूपपरमेशजगत्पवित्रचित्रंविचित्रसुचरित्रकरोपिनूनम् ॥ विश्वंपवित्रममलंकिलविश्वनाथपानावगाहनतएतदतोनतोस्मि ॥ ५ ॥

आकाशरूपबहिरंतरुतावकाशदानाद्विकस्वरमिहेश्वरविश्वमेतत् ॥ त्वत्तःसदासदयसंश्वसितिस्वभावात्संकोचमेतिभवतोस्मिनतस्ततस्त्वाम् ॥ ६ ॥ विश्वंभरात्मकबिभर्तिविभोऽत्रविश्वंकोविश्वनाथभवतोन्यतमस्तमोरे ॥ तत्त्वांविनानशमिनांहिमजाहिभूपस्तव्योऽपरःपरपरप्रणतस्ततस्त्वाम् ॥ ७ ॥ आत्मस्वरूपतवरूपपरंपराभिराभिस्ततंहरचराचररूपमेतत् ॥ सर्वांतरात्मनिलयप्रतिरूपरूपानित्यंनतोस्मिपरमात्मतनोऽष्टमूर्ते ॥ ८ ॥ इत्यष्टमूर्तिभिरिमांभिरुमाभिवंद्यवंद्यातिवंद्यभवविश्वजनीनमूर्ते ॥ एतत्ततंसुविततंप्रणतप्रणीतसर्वार्थसार्थपरमार्थततोनतोस्मि ॥ ९ ॥ अष्टमूर्त्यष्टकेनेष्टंपरिष्टूयेतिभार्गवः ॥ भर्गभूमिमिलन्मौलिःप्रणनामपुनःपुनः ॥ ११० ॥

इतिस्तुतोमहादेवोभार्गवेणातितेजसा ॥ उत्थाप्यभूमेर्बाहुभ्यांधृत्वातंप्रणतंद्विजम् ॥ ११ ॥ उवाचदशनज्योत्स्नाप्रद्योतितदिगंतरः ॥ अनेनात्युग्रतपसाह्यनन्याचरितेनच ॥ १२ ॥ लिंगस्थापनपुण्येनलिंगस्याराधनेनच ॥ चित्तरत्नोपहारेणशुचिनानिश्चलेनच ॥१३॥ अविमुक्तमहाक्षेत्रेपवित्राचरणेनच ॥ त्वांसुताभ्यांप्रपश्यामितवादेयंनकिंचन ॥ १४ ॥ अनेनैवशरीरेणममोदरदरींगतः ॥ मद्वरेंद्रियमार्गेणपुत्रजन्मत्वमेष्यसि ॥ १५ ॥ अन्यंवरंप्रयच्छामिदुष्प्रापंपार्षदैरपि ॥ हरौहिरण्यगर्भेपिप्रायशोऽहंजुगोपयाम् ॥ १६ ॥ मृतसंजीवनीनामविद्यायाममनिर्मला ॥ तपोबलेनमहतामयैवपरिनिर्मिता ॥ १७ ॥ त्वांतांतुप्रापयाम्यद्यमंत्ररूपांमहाशुचे ॥ योग्यतातेऽस्तिविद्यायास्तस्याःशुचितपोनिधे ॥ १८ ॥ यंयमुद्दिश्यनियतमेतामावर्तयिष्यसि ॥ विद्यांविद्येश्वरश्रेष्ठससप्राणिष्यतिध्रुवम् ॥१९॥ अत्यर्कमत्यग्निचतेतेजोव्योम्न्यतितारकम् ॥ देदीप्यमानंभविताग्रहाणांप्रवरोभव ॥१२०॥ अभित्वांयेकरिष्यंतियात्रांनार्योनरोपिवा ॥ तेषांत्वद्दृष्टिपातेनसर्वंकार्यंप्रणंक्ष्यति ॥ २१ ॥ तवोदयेभविष्यंतिविवाहादीनिसुव्रत ॥ सर्वाणिधर्मकार्याणिफलवंतिनृणामिह ॥ २२ ॥ सर्वाश्चतिथयोमंदास्तवसंयोगतःशुभाः ॥ तवभक्ताभविष्यंतिबहुशुक्राबहुप्रजाः ॥ २३ ॥

त्वयेदंस्थापितंलिंगंशुक्रेशमितिसंज्ञितम् ॥ येऽर्चयिष्यंतिमनुजास्तेषांसिद्धिर्भविष्यति ॥ २४ ॥ आवर्षंप्रतिशुक्रंयेनक्तव्रतपरानराः ॥ त्वद्दिनेशुक्रकूपेयेकृतसर्वोदकक्रियाः ॥ २५ ॥ शुक्रेशमर्चयिष्यंतिशृणुतेषांतुयत्फलम् ॥ अवंध्यशुक्रास्तेमर्त्याःपुत्रवंतोऽतिरेतसः ॥ २६ ॥ पुंस्त्वसौभाग्यसंपन्नाभविष्यंतिनसंशयः ॥ व्यपेतविघ्नास्तेसर्वेजनाःस्युःसुखवासिनः ॥ इतिदत्त्वावरान्देवस्तत्रलिंगेलयंययौ ॥२७॥ गणावूचतुः ॥ ॥ शुक्रेश्वरस्ययेभक्ताःशुक्रलोकेवसंतिते ॥ विश्वेश्वराद्दक्षिणतःशुक्रेशोस्तिपरंतप ॥ २८ ॥ तस्यदर्शनमात्रेणशुक्रलोकेमहीयते ॥ इत्येषाशुक्रलोकस्यस्थितिरुक्तामहामते ॥२९॥ अगस्त्यउवाच ॥ ॥ इत्थंसधर्मिणिकथांशुक्रलोकस्यसुव्रते ॥ शृण्वन्नांगारकंलोकमालुलोकेऽथसद्विजः ॥ ३० ॥ इति श्रीस्कांदे महापुराणे चतुर्थे काशीखंडेपूर्वार्धे शुक्रलोकवर्णनंनामषोडशोऽध्यायः ॥१६॥ ॥ शिवशर्मोवाच ॥ ॥ शुक्रसंबंधिनीदेवौकथाश्राविमयाशुभा ॥ यस्याःश्रवणमात्रेणप्राणितेश्रवणेमम ॥ १ ॥ कस्यपुण्यनिधेर्लोकःशोकहृत्त्वेपनिर्मलः ॥ एतदाख्यातुमुद्युक्तौभवंतौभवतांमम ॥ २ ॥ धयित्वाश्रो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रपात्राभ्यांवाणीममृतरूपिणीम् ॥ नतृप्तिमधिगच्छामिभवन्मुखसुखोद्गताम् ॥३॥ ॥ गणावूचतुः ॥ ॥ लोहितांगस्यलोकोयंशिवशर्मन्निबोधह ॥ उत्पत्तिंचास्यवक्ष्यावोभूसुतोयंयथाभवत् ॥ ४ ॥ पुरातपस्यतःशंभोर्दाक्षायण्यावियोगतः ॥ भालस्थलात्पपातैकःस्वेदबिंदुर्महीतले ॥ ५ ॥ ततः कुमारःसंजज्ञेलोहितांगोमहीतलात् ॥ स्नेहसंवर्धितःसोथधात्र्याधात्रीस्वरूपया ॥ ६ ॥ माहेयइत्यतःख्यातिंपरामेषगतःसदा ॥ ततस्तेपेतपोत्युग्रमु ग्रपुर्यांपुरानघ ॥ ७ ॥ असिश्चवरणाचापिसरितौयत्रशोभने ॥ द्युनद्योत्तरवाहिन्यामिलितेऽत्रजगद्धिते ॥ ८ ॥

सर्वगोपिहिविश्वेशोयत्रनित्यंप्रकाशते ॥ मुक्तयेसर्वजंतूनांकालोज्झितस्ववर्ष्मणाम् ॥ ९ ॥ अमृतंहिभवंत्येवमृतायत्रशरीरिणः ॥ अनुग्रहंसमासाद्यप रंविश्वेश्वरस्यह ॥ १० ॥ अपुनर्भवदेहास्तेयेऽविमुक्तेतनुत्यजः ॥ विनासांख्येनयोगेनविनानानाव्रतादिभिः ॥ ११ ॥ संस्थाप्यलिंगंविधिनास्वनाम्नां गारकेश्वरम् ॥ पांचमुद्रेमहास्थानेकंबलाश्वतरोत्तरे ॥ १२ ॥ ज्वलदंगारवत्तेजोयावत्तस्यशरीरतः ॥ विनिर्ययौतपस्तावत्तेनतप्तंमहात्मना ॥ १३ ॥ ततोंगारकनाम्नाससर्वलोकेषुगीयते ॥ तस्यतुष्टोमहादेवोददौग्रहपदंमहत् ॥ १४ ॥ अंगारकचतुर्थ्यांयेस्नात्वोत्तरवहांभसि ॥ अभ्यर्च्यांगारकेशानं नमस्यंतिनरोत्तमाः ॥१५ ॥ नतेषांग्रहपीडाचकदाचित्क्वापिजायते ॥ अंगारकेनसंयुक्ताचतुर्थीलभ्यतेयदि ॥१६॥ उपरागसमंपर्वतदुक्तंकालवेदिभिः ॥ तस्यांदत्तंहुतंजप्तंसर्वंभवतिचाक्षयम् ॥१७॥ श्रद्धयाश्राद्धदायेवैचतुर्थ्यंगारयोगतः ॥ तेषांपितॄणांभवितातृप्तिर्द्वादशवार्षिकी ॥ १८ ॥ अंगारकचतुर्थ्यां तुपुराजज्ञेगणेश्वरः ॥ अतएवतुतत्पर्वप्रोक्तंपुण्यसमृद्धये ॥ १९॥ एकभक्तव्रतीतत्रसंपूज्यगणनायकम् ॥ किंचिद्दत्त्वातमुद्दिश्यनविघ्नैरभिभूयते ॥ २० ॥ अंगारेश्वरभक्तायेवाराणस्यांनरोत्तमाः ॥ तेऽस्मिन्नंगारकेलोकेवसंतिपरमर्द्धयः ॥२१॥ अगस्त्यउवाच ॥ ॥ इत्थंकथयतोरेवरम्यांपुण्यवतींकथाम् ॥ भगवद्गणयोःप्रापनेत्रातिथ्यंगुरोःपुरी ॥ २२ ॥ नेत्रानंदकरींदृष्ट्वाशिवशर्माऽथतांपुरीम् ॥ पप्रच्छाचार्यवर्यस्यकस्येयंपुरनुत्तमा ॥ २३ ॥ ॥ गणा वूचतुः ॥ ॥ सखेसुखंसमाख्यावोनानाख्येयंतवाग्रतः ॥ अध्वखेदापनोदायपुनरस्याःपुरःकथाम् ॥ २४ ॥ विधेर्विधित्सतःपूर्वंत्रिलोकीरचनांमुदा ॥ आविरासुःसुताःसप्तमानसाःस्वस्यसंनिभाः ॥ २५ ॥ मरीच्यत्र्यंगिरोमुख्याःसर्वेसृष्टिप्रवर्तकाः ॥ प्रजापतेरंगिरसस्तेष्वभूद्देवसत्तमः ॥ २६ ॥ सुतश्चां गिरसोनामबुद्ध्याविबुधसत्तमः ॥ शांतोदांतोजितक्रोधोमृदुवाङ्निर्मलाशयः ॥ २७ ॥

वेदवेदार्थतत्त्वज्ञःकलासुकुशलोऽमलः ॥ पारदृश्वातुसर्वेषांशास्त्राणांनीतिवित्तमः ॥ २८ ॥ हितोपदेष्टाहितकृदहितात्यहितःसदा ॥ रूपवाञ्छीलसंपन्नो गुणवान्देशकालवित् ॥ २९ ॥ सर्वलक्षणसंभारसंभृतोगुरुवत्सलः ॥ ततापतापसींवृत्तिंकाश्यांसमहतींदधत् ॥ ३० ॥ महल्लिंगंप्रतिष्ठाप्यशांभवभू रिभावनः ॥ अयुतंशरदांदिव्यंदिव्यतेजामहातपाः ॥३१॥ ततःप्रसन्नोभगवान्विश्वेशोविश्वभावनः ॥ आविर्भूयततोलिंगान्महसांराशिरब्रवीत् ॥३२॥ प्रसन्नोस्मिवरंब्रूहियत्तेमनसिवर्तते ॥ इतिशंभुंसमालोक्यतुष्टावेतिसहृष्टवान् ॥ ३३ ॥ ॥ आंगिरसउवाच ॥ ॥ जयशंकरशांतशशांकरुचेरुचिरार्थ दसर्वदसर्वशुचे ॥ शुचिदत्तगृहीतमहोपहृतेहृतभक्तजनोद्धततापतते ॥ ३४ ॥

ततसर्वहृदंवरवरदनतेनतवृजिनमहावनदाहकृते ॥ कृतविविधचरित्रतनोसुतनोतनुविशिखविशोषणधैर्यनिधे ॥ ३५ ॥ निधनादिविवर्जितकृतन तिकृत्कृतिविहितमनोरथपन्नगभृत् ॥ नगभर्तृसुतार्पितवामवपुःस्ववपुःपरिपूरितसर्वजगत् ॥ ३६ ॥ त्रिजगन्मयरूपविरूपसुदृग्दृगुदंचनकुंचन कृतहुतभुक् ॥ भवभूतपतेप्रमथैकपतेपतितेष्वपिदत्तकरप्रसृते ॥ ३७ ॥ प्रसृताखिलभूतलसंवरणप्रणवध्वनिसौधसुधांशुधर ॥ धरराजकुमारि कयापरयापरितःपरितुष्टनतोस्मिशिव ॥ ३८ ॥

शिवदेवगिरीशमहेशविभोविभवप्रदगिरिशशिवेशमृड ॥ मृडयोडुपतिध्रजगत्त्रितयंकृतयंत्रणभक्तिविघातकृताम् ॥ ३९ ॥ नकृतांततएषबिभेमिहरप्र हराशुमहाघममोघमते ॥ नमतांतरमन्यदवैमिशिवंशिवपादनतेःप्रणतोस्मिततः ॥ ४० ॥ विततेऽत्रजगत्यखिलेऽघहरंहरतोषणमेवपरंगुणवत् ॥ गुणहीनमहीनमहावलयंप्रलयांतकमीशनतोस्मिततः ॥ ४१ ॥ इतिस्तुत्वामहादेवंविरराम्यांगिरःसुतः ॥ व्यतरच्चमहेशानःस्तुत्यातुष्टोवरान्बहून् ॥४२॥ ॥ श्रीमहादेवउवाच ॥ ॥ बृहतातपसानेनबृहतांपतिरेध्यहो ॥ नाम्नाबृहस्पतिरितिग्रहेष्वर्च्योभवद्विज ॥ ४३ ॥ अस्माल्लिंगार्चनान्नित्यंजीवभूतो सिमेयतः ॥ अतोजीवइतिख्यातिंत्रिपुलोकेषुयास्यसि ॥४४॥ वाचांप्रपंचैश्चतुरैर्निष्प्रपंचोयतःस्तुतः ॥ अतोवाचांप्रपंचस्यपतिर्वाचस्पतिर्भव ॥४५॥

अस्यस्तोत्रस्यपठनादपिवागुदियाच्चयम् ॥ तस्यस्यात्संस्कृतावाणीत्रिभिर्वर्षैस्त्रिकालतः ॥ ४६ ॥ समुत्पन्नेमहाकार्येनसबुद्ध्याप्रहीयते ॥ यःप ठिष्यत्यदःस्तोत्रंवायव्याख्यंदिनेदिने ॥ ४७ ॥ अस्यस्तोत्रस्यपठनान्नियतंममसंनिधौ ॥ नदुर्वृत्तौप्रवृत्तिःस्यादविवेकवतांनृणाम् ॥ ४८ ॥ अदः स्तोत्रंपठञ्जंतुर्जातुपीडांग्रहोद्भवाम् ॥ नप्राप्स्यतिततोजप्यमिदंस्तोत्रंममाग्रतः ॥ ४९ ॥ नित्यंप्रातःसमुत्थाययःपठिष्यतिमानवः ॥ इमांस्तुतिंहरिष्येऽ हंतस्यबाधाःसुदारुणाः ॥ ५० ॥ त्वत्प्रतिष्ठितलिंगस्यपूजांकृत्वाप्रयत्नतः ॥ इमांस्तुतिमधीयानोमनोवांछामवाप्स्यति ॥ ५१ ॥ इतिदत्त्वावराञ्छंभुः पुनर्ब्रह्माणमाह्वयत् ॥ सेंद्रान्देवगणान्सर्वान्सयक्षोरगकिंनरान् ॥ ५२ ॥ तानागतान्समालोक्यशिवोब्रह्माणमब्रवीत् ॥ विधेविधेहिमद्वाक्यादमुंवा चस्पतिंमुनिम् ॥ ५३ ॥ गुरुंसर्वसुरेंद्राणांपरितःस्वगुणैर्गुरुम् ॥ अभिषिंचविधानेनदेवाचार्यपदेमुदे ॥ ५४ ॥ अतीवधिषणाधीशोममप्रीतोभवि ष्यति ॥ महाप्रसादइत्याज्ञांशिरस्याधायतत्क्षणात् ॥ ५५ ॥ सुरज्येष्ठःसुराचार्यंचकारांगिरसंतदा ॥ देवदुंदुभयोनेदुर्ननृतुश्चाप्सरोगणाः ॥ ५६ ॥ गुरुपूजांव्यधुःसर्वेगीर्वाणामुदिताननाः ॥ अभिषिक्तोवसिष्ठाद्यैर्मंत्रपूतेनवारिणा ॥ ५७ ॥ पुनरन्यंवरंप्रादाद्गिरीशःपतयेगिराम् ॥ शृण्वांगिरसधर्मात्मन् देवेज्यकुलनंदन ॥ ५८॥ भवतास्थापितंलिंगंसुबुद्धिपरिवर्धनम् ॥ बृहस्पतीश्वरइतिख्यातंकाश्यांभविष्यति ॥ ५९ ॥ गुरुपुष्यसमायोगेलिंगमेतत्स मर्च्यच ॥ यत्करिष्यंतिमनुजास्तत्सिद्धिमधियास्यति ॥ ६० ॥ बृहस्पतीश्वरंलिंगंमयागोप्यंकलौयुगे ॥ अस्यसंदर्शनादेवप्रतिभाप्रतिलभ्यते ॥६१॥ चंद्रेश्वराद्दक्षिणतोवीरेशान्नैर्ऋतेस्थितम् ॥ आराध्यधिषणेशंवैगुरुलोकेमहीयते ॥६२॥ गुर्वंगनागमनजंपापंषण्माससेवनात् ॥ अवश्यंविलयंयातितमः सूर्योदयाद्यथा ॥ ६३ ॥ अतएवहिगोप्तव्यंमहापातकनाशनम् ॥ बृहस्पतीश्वरंलिंगंनाख्येयंयस्यकस्यचित् ॥ ६४ ॥ इतिदत्त्वावरान्देवस्तत्रैवांतर्हितो भवत् ॥ द्रुहिणोगुरुणासार्धंसेंद्रोपेंद्रोबृहस्पतिम् ॥ ६५ ॥

अस्मिन्पुरेभिषिच्याथविसृज्येंद्रादिकान्सुरान् ॥ अलंचकारस्वंलोकंविष्णुनाऽनुमतोद्विज ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ अतिक्रम्यगुरोर्लोकंलो पामुद्रेददर्शसः ॥ शिवशर्मापुरींसौरेःप्रभामंडलमंडिताम् ॥ ६७ ॥ पृष्टौतेनचतौतत्रतांपुरींप्रददर्शतुः ॥ द्विजेनद्विजवर्यायगणवर्यौशुचिस्मिते ॥६८॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गणावूचतुः ॥ ॥ मारीचेःकश्यपाज्जज्ञेदाक्षायण्यांद्विजोष्णगुः ॥ तस्यभार्याभवत्संज्ञापुत्रीत्वष्टुःप्रजापतेः ॥ ६९ ॥ भर्तुरिष्टाततस्तस्माद्रूपयौवनशालिनी ॥ संज्ञावभूवतपसासुदीप्तेनसमन्विता ॥ ७० ॥ आदित्यस्यहितद्रूपंमंडलस्यतुतेजसा ॥ गात्रेषुपरिदध्यौवैनातिकांतमिवाभवत् ॥ ७१ ॥ नखल्वयमृतोंऽडस्थइतिस्नेहादभाषत ॥ तदाप्रभृतिलोकेयंमार्तंडइतिचोच्यते ॥ ७२ ॥ तेजस्त्वभ्यधिकंतस्यसाऽसहिष्णुर्विवस्वतः ॥ येनातितापयामासत्रैलोक्यंतिग्मरश्मिभृत् ॥ ७३ ॥ त्रीण्यपत्यानिभोब्रह्मन्संज्ञायांमहसांनिधिः ॥ आदित्योजनयामासकन्यांद्वौचप्रजापती ॥ ७४ ॥ वैवस्वतंमनुंज्येष्ठंयमंचयमुनांततः ॥ नातितेजोमयंरूपंसोढुंसाऽलंविवस्वतः ॥ ७५ ॥ मायामयींततश्छायांसवर्णांनिर्ममेस्वतः ॥ प्रांजलिःप्रणताभूत्वासंज्ञांछायातदाब्रवीत् ॥ ७६ ॥ तवाज्ञाकारिणींदेविशाधिमांकरवाणिकिम् ॥ संज्ञोवाचततश्छायांसवर्णेशृणुसुंदरि ॥ ७७ ॥

अहंयास्यामिसदनंत्वष्टुस्त्वंपुनरत्रमे ॥ भवनेवसकल्याणिनिर्विशंकंममाज्ञया ॥ ७८ ॥ मनुरेषयमावेतौयमुनायमसंज्ञकौ ॥ स्वापत्यदृष्ट्याद्रष्टव्यमेतद्बालत्रयंत्वया ॥ ७९ ॥ अनाख्येयमिदंवृत्तंत्वयापत्यौशुचिस्मिते ॥ इत्याकर्ण्यायसात्वाष्ट्रींदेवींछायाजगादह ॥ ८० ॥ आकचग्रहणान्नाहमाशापाच्चकदाचन ॥ आख्यास्यामिचरित्रंतेयाहिदेवियथासुखम् ॥ ८१ ॥ इत्यादिश्यसवर्णांसातथेत्युक्तासवर्णया ॥ पितुरंतिकमासाद्यनत्वात्वष्टारमब्रवीत् ॥ ॥ ८२ ॥ पितःसोढुंनशक्नोमितेजस्तेजोनिधेरहम् ॥ तीव्रंतस्यार्यपुत्रस्यकाश्यपस्यमहात्मनः ॥ ॥ ८३ ॥ निशम्योदीरितंतस्याःपित्रानिर्भर्त्सिताबहु ॥ भर्तुःसमीपंयाहीतिनियुक्तासापुनःपुनः ॥ ८४ ॥ चिं ष्वापमहतींस्त्रीणांधिक्चेष्टितंत्विति ॥ निनिंदबहुधात्मानंस्त्रीत्वंचातिनिनिंदसा ॥८५॥ स्वातंत्र्यंनक्वचित्स्त्रीणांधिगस्वातंत्र्यजीवितम् ॥ शैशवेयौवनेप्रातेपितृभर्तृसुताद्भयम् ॥८६॥ त्यक्तंभर्तृगृहंमौग्ध्याद्धंतदुर्वृत्तयामया ॥ अविज्ञातापिचेद्यायामथपत्युर्निकेतनम् ॥८७ ॥ तत्रास्तिसासवर्णावैपरिपूर्णमनोरथा ॥ अथावतिष्ठेसात्रैवपित्रानिर्भर्त्सिताप्यहम् ॥ ८८ ॥ ततोतिचंडश्चंडांशुःपित्रोरतिभयंकरः ॥ अहोयदुच्यतेलोकैरुपाख्यानमिदंहितत् ॥ ८९ ॥ स्फुटंदृष्टंमयाद्येतिस्वकरांगारकर्षणम् ॥ नष्टंभर्तृगृहंमौग्ध्याच्छ्रेयोवानपितुर्गृहम् ॥ ॥ ९० ॥ वयश्चप्रथमंचारुरूपंत्रैलोक्यकांक्षितम् ॥ सर्वाभिभवनंस्त्रीत्वंकुलंचातीवनिर्मलम् ॥ ९१ ॥ पतिश्चतादृक्सर्वज्ञोलोकचक्षुस्तमोपहः ॥ सर्वेषांकर्मणांसाक्षीसर्वःसर्वत्रसंचरः ॥ ९२ ॥ मह्यंश्रेयःकथंवास्यादितिसापरिचिंत्यच ॥ अगच्छद्वडवाभूत्वातपसेपर्णनिंदिता ॥ ९३ ॥ उत्तरांश्चकुरून्प्रापचरंतीनीरसंतृणम् ॥ व्युत्तेपेचतपस्तीव्रंपतिमाधायचेतसि ॥ तपोबलेनतत्पत्युःसहिष्येतेजइत्यलम् ॥ ९४ ॥

मन्यमानोथतांसंज्ञांसवर्णायांतदारविः ॥ सावर्णिंजनयामासमनुमष्टममुत्तमम् ॥ ९५ ॥ शनैश्चरंद्वितीयंचसुतांभद्रांतृतीयिकाम् ॥ सवर्णास्वेष्वपत्येषुसापत्न्यात्स्त्रीस्वभावतः ॥ ९६ ॥ चकाराभ्यधिकंस्नेहंनतथापूर्वजेष्वथ ॥ मनुस्तत्क्षांतवाञ्ज्येष्ठोभक्ष्यालंकारलालने ॥ ९७ ॥ कनिष्ठेष्वधिकंदृष्ट्वासावर्ण्यादिषुनोयमः ॥ कदाचिद्रोषतोबाल्याद्भाविनोर्थस्यगौरवात् ॥ ९८ ॥ पदासंतर्जयामासयमःसंज्ञासरूपिणीम् ॥ तंशशापचसाक्रोधात्सावर्णेर्जननीतदा ॥ ९९ ॥ जिघांसतात्वयापापमांयदंघ्रिःसमुद्यतः ॥ अचिरात्तत्पतत्वेपतवेतिभृशदुःखिता ॥ १०० ॥ मातृशापपरित्रस्तोयमोपिपितुरग्रतः ॥ शशंससर्वंतद्वृत्तंरक्षरक्षेत्युवाचच ॥ १ ॥ मात्रासुतेषुसर्वेषुवर्तनीयंसमंयतः ॥ तस्यांमयोद्यतःपादोनदेहेपरिपातितः ॥ २ ॥ बाल्याद्वायदिवामोहात्तद्भवान्क्षंतुमर्हसि ॥ गोपतेशापतोमातुर्मापतत्वंघ्रिरेपमे ॥३॥ ॥ विवस्वानुवाच ॥ ॥ अपराधसहस्रेपिजननीनशपेत्सुतम् ॥तस्मात्किमपिभोबालभविष्यत्यत्रकारणम् ॥ ४ ॥ येनत्वांसाऽशपत्क्रोधाद्धर्मज्ञंसत्यवादिनम् ॥ मातृशापोन्यथाकर्तुंनशक्यःकेनचित्क्वचित् ॥ ५ ॥ कृमयोमांसमादाययास्यंत्यस्मान्महीतलम् ॥ इत्थंतुचरितार्थःस्याच्छापस्त्रातोभवान् . ॥ ६ ॥ इतिपुत्रंसमाश्वास्यरविरंतःपुरंययौ ॥ चिरमालोक्यतांभार्यामुवाचसविता वचः ॥ ७ ॥ अयिभामिनिबालेषुसमेष्वपिकुतस्त्वया ॥ विधीयतेऽधिकःस्नेहःसावर्ण्यादिष्वनादिषु ॥ ८ ॥ नाचचक्षेयदासाऽथभास्वतेपरिपृच्छते ॥ तदात्मानंसमाधायसोज्ञासीत्सर्वमेवहि ॥ ९ ॥ ततोभगवतेशप्तुमुद्यतेसाशशंसह ॥ यथावृत्तंतथातथ्यंतुतोषभगवानपि ॥ ११० ॥ तथ्यभाषणतस्तांतुरविर्ज्ञात्वानिरागसम् ॥ नशशापचसंक्रुद्धोययौचत्वष्टुरंतिकम् ॥११॥ त्वष्टापिचयथान्यायंसान्वयंतिग्मतेजसम् ॥ निर्दग्धुकामंकोपेनप्रागानर्चमुदातदा ॥ विज्ञायतदभिप्रायंत्वष्टोवाचाऽशुतंरविम् ॥ १२ ॥ त्वष्टोवाच ॥ ॥ तवातितेजसोभीताप्राप्योत्तरकुरून्रवे ॥ वडवारूपमास्थायवनेचरतिशाद्वले ॥ १३ ॥ द्रष्टाहितांभवानद्यस्वांभार्यामार्यचारिणीम् ॥ अधृष्यांसर्वभूतानांतेजसांनियमेनच ॥ १४ ॥

त्वष्ट्रायत्तक्षितःसूर्यस्तस्यैवानुमतेनच ॥ भ्रमिमारोप्ययत्नेनसोतिकांततरोऽभवत् ॥ १५ ॥ लब्धानुज्ञोऽथसवितागत्वोत्तरकुरूनरम् ॥ साक्षात्तपोमयींलक्ष्मींचरंतींचतपोमहत् ॥ १६ ॥ ददर्शवडवारूपांवाडवानलतेजसम् ॥ नीरसानितृणान्येववृण्वंतींयोगमायया ॥ १७ ॥ अनेनसंसविज्ञायतांत्वाष्ट्रीमश्वरूपिणीम् ॥ सहारिर्हरिरूपेणमुखेनसमभावयत् ॥ १८ ॥ त्वरमाणाचपरितःपरपूरुषशंकया ॥ सातन्निरवमच्छुक्रंनासिकाभ्यांविवस्वतः ॥ १९ ॥ देवौतस्मादजायेतामश्विनौभिषजांवरौ ॥ स्वरूपमनुरूपंचद्युमणिस्तामदर्शयत् ॥ १२० ॥ तुतोषसापितंदृष्ट्वामित्रंनेत्रमुदावहम् ॥ पतिंपतिव्रताकांतंस्वांतसंतापहारिणम् ॥ २१ ॥ निर्वृत्तिंचपरांप्रापदुष्प्रापंतपसाथकिम् ॥ तपएवपरंश्रेयस्तपएवपरंधनम् ॥ २२ ॥ तपएवहिदेवत्वेकारणंपरमंमतम् ॥ शिवशर्मन्यदेतद्वैदृश्यतेचातिदीप्तिमत् ॥ २३ ॥ ज्योतिश्चक्रस्वरूपंचव्योम्न्युपर्यधएवच ॥ तत्सर्वमिहजानीहिसुमहत्तापसंमहः ॥२४॥ एवंशनैश्चरोजज्ञेसवर्णायांविवस्वतः ॥ सोऽथवाराणसींगत्वासर्वत्रिदशवंदिताम् ॥ २५ ॥ तप्त्वातपोऽतिविपुलंलिंगंसंस्थाप्यशांकरम् ॥ इमंलोकमवापोच्चैर्ग्रहत्वंचहरार्चनात् ॥२६॥ शनैश्चरेश्वरंदृष्ट्वावाराणस्यांसुशोभनम् ॥ शनिबाधानजायेतशनिवारेतदर्चनात् ॥२७॥ विश्वेशाद्दक्षिणेभागेशुक्रेशादुत्तरेणहि ॥ शनैश्चरेशमभ्यर्च्यलोकेऽत्रपरिमोदते ॥ २८ ॥ श्रुत्वाऽध्यायमिमंपुण्यंग्रहपीडानजायते ॥ नोपसर्गभयंतस्यकाश्यांनिवसतःसतः ॥ १२९ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे भौमगुरुशनिलोकवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अगस्तिरुवाच ॥ ॥ इतिशृण्वन्कथांरम्यांशिवशर्माऽथमाथुरः ॥ मुक्तिपुर्यांसुसंस्नातोमायापुर्यांगतासुकः ॥१॥ नेत्रयोःप्राघुणीचक्रेततःसप्तर्षिमंडलम् ॥ व्रजन्सवैष्णवंलोकमंतेविष्णुपुरीक्षणात् ॥ २ ॥

उवाचचप्रसन्नात्मास्तुतश्चारणमागधैः ॥ प्रार्थितोदेवकन्याभिस्तिष्ठतिष्ठेतिचक्षणम् ॥३॥ स्थितासुतासुनिःश्वस्यमंदभाग्यावयंत्विति ॥ गतःपुण्यतमाँल्लोकानसौयत्पुण्यवत्तमः ॥४ ॥ इतिशृण्वन्मुखात्तासांवचनानिविमानगः ॥ देवौकस्यायमतुलोलोकस्तेजोमयःशुभः ॥ ५ ॥ इतिद्विजवचःश्रुत्वाप्रोचतुर्गणसत्तमौ ॥ शिवशर्मञ्छिवमतेसदासप्तर्षयोमलाः ॥६॥ वसंतीहप्रजाःस्रष्टुंविनियुक्ताःप्रजासृजा ॥ मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः ॥ ७ ॥ वसिष्ठश्चमहाभागोब्रह्मणोमानसाःसुताः ॥ सप्तब्रह्माणइत्येतेपुराणेनिश्चयंगताः ॥ ८ ॥ संभूतिरनसूयाचक्षमाप्रीतिश्चसन्नतिः ॥ स्मृतिरूर्जाक्रमादेषांपत्न्योलोकस्यमातरः ॥९॥ एतेषांतपसाचैतद्धार्यतेभुवनत्रयम् ॥ उत्पाद्यब्रह्मणापूर्वमेतेप्रोक्तामहर्षयः ॥१०॥ प्रजाःसृजतेरपुत्रानानारूपाःप्रयत्नतः॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ततःप्रणम्यब्रह्माणंतपसेकृतनिश्चयाः ॥ ११ ॥ अविमुक्तंसमासाद्यक्षेत्रंक्षेत्रज्ञधिष्ठितम् ॥ मुक्तयेसर्वजंतूनामविमुक्तंशिवेनयत् ॥ १२ ॥ प्रतिष्ठाप्यच लिंगानितेस्वनाम्नांकितानिच ॥ शिवेतिपरयाभक्त्यातेपुरुग्रंतपोभृशम् ॥१३॥ तुष्टस्तत्तपसाशंभुःप्राजापत्यपदंददौ ॥ लिंगान्यत्रीश्वगदींनिदृष्ट्वाकाश्यां प्रयत्नतः ॥ १४ ॥ प्राजापत्येऽव्रतेलोकेवसंत्युज्वलतेजसः ॥ गोकर्णेशस्यसरसःप्रत्यक्तीरेप्रतिष्ठितम् ॥ १५ ॥ लिंगमत्रीश्वरंदृष्ट्वाब्रह्मतेजोभिवर्धते ॥ कर्कोटवाप्याईशानेमरीचेःकुंडमुत्तमम् ॥ १६ ॥ तत्रस्नात्वानरोभक्त्याब्राजतेभास्करोयथा ॥ मरीचीश्वरमंभ्यंतुतत्रलिंगंप्रतिष्ठितम् ॥ १७ ॥ तल्लिंगदर्शनाद्विप्रमारीचंलोकमाप्नुयात् ॥ कांत्यामरीचिमालीवशोभतेपुरुषर्षभः ॥ १८ ॥ पुलहेशंपुलस्त्येशंस्वर्गद्वारस्यपश्चिमे ॥ तौदृष्ट्वामनुजोलोके प्राजापत्यमहीयते ॥ १९ ॥ हरिकेशवनेरम्येदृष्ट्वैवांगिरसेश्वरम् ॥ इहलोकेवसेद्विप्रतेजसापरिवृंहितः ॥ २० ॥ वरणायास्तटरम्येदृष्ट्वावासिष्ठमीश्वरम् ॥ कृत्वीश्वरंचतत्रैवलभतेवसतिंत्विह ॥ २१ ॥ काश्यामेतानिलिंगानिसंवितानिशुभैपिभिः ॥ मनोभिर्वांछितंह्यस्यारिहलोकेपरत्रच ॥ २२ ॥

गणावूचतुः ॥ ॥ शिवशर्मन्महाभागतिष्ठतेसाध्वसुंदरी ॥ अरुंधतीमहापुण्यापतिव्रतपरायणा ॥ २३ ॥ यस्याःस्मरणमात्रेणगंगास्नानफलंलभेत ॥ अंतःपुरचरैर्द्विजैःपवित्रैःसहितंविभुः ॥ २४ ॥ सदानारायणोदेवोयस्याश्चक्रेकथांमुदा ॥ कमलायाःपुरोभागेपातिव्रत्यमुतोपितः ॥ २५ ॥ पतिव्रता स्वरुंधत्याःकमलेविमलाशयः ॥ यथास्तिनतथाऽन्यस्याःकस्याश्चित्कापिभामिनि ॥२६॥ नतद्वपंनतच्छीलंनतत्कौलीन्यमेवच ॥ नतत्कलामुकौ शल्यंपत्युःशुश्रूषणंनतत् ॥ २७ ॥ नमाधुर्यंनगांभीर्यंनचार्यपरितोषणम् ॥ अरुंधत्यायथादेवितथाऽन्यासांकचित्प्रिये ॥ २८ ॥ धन्यास्तायोपितो लोकेसभाग्याःशुद्धबुद्धयः ॥ अरुंधत्याःप्रसंगेयानामापिपरिगृह्यते ॥ २९ ॥ यदापतिव्रतानांतुकथास्मद्भवनेभवेत् ॥ तदाप्राथमिकींगंगामेपाऽलंकुरुते सती ॥ ३० ॥ व्रुवतोरितिसंकथांतथागणयोर्वैष्णवयोर्मुदावहाम् ॥ ध्रुवलोकउपागतस्ततोनयनातिथ्यमतथ्यवर्जितः ॥ ३१ ॥ ॥ इतिश्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे सप्तर्षिलोकवर्णनंनामाष्टादशोऽध्यायः ॥१८॥ शिवशर्मोवाच ॥ तिष्ठत्रेकेनपादेनको यंभ्रमतिसत्तमो ॥ अनेकरशनाव्यग्रहस्ताग्र्येव्यग्रलोचनः ॥१॥ त्रिलोकीमंडपस्तंभसन्निभोभाभिरावृतः ॥ अतुलंज्योतिपांराशिंतुलयातुलयन्निव॥२॥

सूत्रधारइवव्योमव्यायामपरिमापकः ॥ त्रैविक्रमोंघ्रिदंडोवाप्रोद्दंडागगनांगणे ॥ ३ ॥ अथवांबरकासारसारयूपस्वरूपधृक् ॥ कोयंकथयतंदेवोकृपयाप रयामम ॥ ४ ॥ निशम्येतिवचस्तस्यवयस्यस्यविमानगौ॥ प्रणयादाहतुस्तस्मैध्रुवांध्रुवकथांगणौ ॥५॥ ॥ गणावूचतुः ॥ ॥ मनोःस्वायंभुवस्यासी दुत्तानचरणःसुतः ॥ तस्यक्षितिपतेर्विप्रद्वौसुतौसंबभूवतुः ॥ ६ ॥ सुरुच्यासुत्तमोज्येष्ठःसुनीत्यांतुध्रुवोपरः ॥ मध्येसभंनरपतेरुपविष्टस्यचैकदा ॥ ७ ॥ सुनीत्याराजमेवार्यैनियुक्तोऽलंकृतोर्भकः ॥ ध्रुवोधात्रेयिकापुत्रैःसमंविनयतत्परः ॥ ८ ॥ सगत्वोत्तानचरणंक्षोणीशंप्रणनामह ॥ दृष्ट्वोत्तमंतदुत्संगेनि विष्टंजनकस्यवै ॥ ९ ॥ प्रोद्भसिंहासनस्थस्यनृपतेर्बाल्यचापलात् ॥ आरोढुकामस्त्वभवत्सौनीतेयस्तदाध्रुवः ॥ १० ॥ आरुरुक्षुमवेक्ष्यामुंसुरुचिर्ध्रुवमब्रवीत् ॥ दौर्भगेयकिमारोढुमिच्छेरंकंमहीपतेः ॥ ११ ॥ बालबालिशबुद्धित्वादभाग्याजठरोद्भव ॥ अस्मिन्सिंहासनेस्थातुंनत्वयासुकृतंकृतम् ॥ ॥ १२ ॥ यदिस्यात्सुकृतंतत्किंदुर्भगोदरगोऽभवः ॥ अनेनैवानुमानेनबुध्यस्वस्वाल्पपुण्यताम् ॥ १३ ॥ भूत्वाराजकुमारोपिनालंकुर्यामममोदरम् ॥ सुकुक्षिजमसुंपश्यत्वमुत्तममनुत्तमम् ॥ १४ ॥ अधिजानुधराजानेर्मानेनपरिवृंहितम् ॥ प्रांशोःसिंहासनस्यास्यरुचिश्चेदधिरोहणे ॥ १५ ॥ कुक्षिंहित्वा किमवसःमुरुचेश्चसुगेचिपम् ॥ मध्येभूपसभंबालस्तयेतिपरिभर्त्सितः ॥ १६ ॥ पतन्निपीतबाष्पांबुर्धैर्यात्किंचिन्नचोक्तवान् ॥ उचिताऽनुचितंकिंचिन्नो चिवान्सोपिपार्थिवः ॥ १७ ॥ नियंत्रितोमहिष्याश्चतस्याःसौभाग्यगौरवात् ॥ विसृज्यचसभालोकंशोकंसंमृज्यचेष्टितैः ॥ १८ ॥

शैशवेःसशिशुर्नत्वानृपंस्वसदनंययौ ॥ सुनीतिर्नीतिनिलयमबलोक्याथबालकम् ॥ १९ ॥ मुखलक्ष्म्यैवचाज्ञासीद्ध्रुवंसमवमानितम् ॥ अभिमृत्यचतं बालंमूर्ध्न्युपाघ्रायसासकृत् ॥ २० ॥ किंचित्परिम्लानमिवससांत्वंपरिपस्वजे ॥ अथदृष्ट्वासुनीतिंसरहोंतःपुरवासिनीम् ॥२१॥ दीर्घंनिःश्वस्यबहुशो मातुरुरुरोदह ॥ सांत्वयित्वाश्रुनयनावदनंपरिमार्ज्यच ॥ २२ ॥ दुकूलांचलसंपर्केमृदुलैर्मृदुपाणिना ॥ पप्रच्छतनयंमातावदरोदनकारणम् ॥ वि लपमानेनरपतेरशोकेनापमानितः ॥ २३ ॥ अपोथसमुपस्पृश्यतांबूलंपरिगृह्यच ॥ मात्रापृष्टःसोपरोधंध्रुवस्तांपर्यभाषत ॥२४ ॥ संपृच्छेजननित्वाहं सम्यक्शंसममाग्रतः ॥ भार्यात्वेपिचसामान्येकथंसासुरुचिःप्रिया ॥ २५ ॥ कथंनभवतीमातःप्रियाक्षितिपतेरसि ॥ कथमुत्तमतांप्राप्तउत्तमःसुरुचेः सुतः ॥ २६ ॥ कुमारत्वेपिसामान्येकथंत्वहमनुत्तमः ॥ कथंत्वंमंदभाग्यासिसुकुक्षिःसुरुचिःकथम् ॥२७॥ कथंनृपासनंयोग्यमुत्तमस्यकथंनमे ॥ कथं मेसुकृतंतुच्छमुत्तमस्योत्तमंकथम् ॥ २८ ॥ इतिश्रुत्वावचस्तस्यसुनीतिर्नीतिमच्छिशोः ॥ किंचिदुच्छ्वस्यशनकैःशिशुकोपोपशांतये ॥ २९ ॥ स्वभावमधुरांवाणीवक्तुंसमुपचक्रमे ॥ सापत्रंप्रतिघंत्यक्त्वाराजनीतिविदांवरा ॥३०॥ ॥ सुनीतिरुवाच ॥ ॥ अयितातमहाबुद्धेविशुद्धेनांतरात्मना ॥ निवेदयामितेसर्वंमाऽपमानेमतिंकृथाः ॥ ३१ ॥ तथायदुक्तंततसर्वंतथ्यमेवनचान्यथा ॥ सापत्न्युर्मंदिपीराज्ञोराज्ञीनामतिवल्लभा ॥ ३२ ॥ तथाजन्मां तरेतातयत्पुण्यंसमुपार्जितम् ॥ तत्पुण्योपचयाद्राजासुरुच्यांध्रुवमुत्तमम् ॥ ३३ ॥ मादृश्योमंदभाग्यायाःप्रमदासुप्रतिष्ठिताः ॥ केवलंराजपत्नी त्ववादस्तासुनतद्वुत्तिः ॥ ३४ ॥ महासुकृतसंभारैरुत्तमश्चोत्तमोदरे ॥ उवासतस्याःपुण्यायानृपसिंहासनोचितः ॥ ३५ ॥

आतपत्रंचचंद्राभंशुभेचापिचचामरे ॥ भद्रासनंतथाचंचत्सिंधुराश्चमदोद्धुराः ॥ ३६ ॥ तुरंगमाश्चतुरगास्त्वनाधिव्याधिजीवितम् ॥ निःसपत्नंशुभंराज्यं प्राज्यंहरिहरार्चनम् ॥ ३७ ॥ विपुलंचकलाज्ञानमधीतमपराजितम् ॥ तथाजयोरिपड्वर्गैस्वभावात्सात्त्विकीमतिः ॥ ३८ ॥ दृष्टिःकारुण्यसंपूर्णावाणी मधुरभाषिणी ॥ अनालस्यंचकार्येषुतथागुरुजनेनतिः ॥ ३९ ॥ सर्वत्रशुचितातातसापरोपकृतिःसदा ॥ ओर्जस्वलामनोवृत्तिःसदैवादीनवादिता ॥ ॥ ४० ॥ सदोजिरेचपांडित्यंप्रागल्भ्यंचरणांगणे ॥ आर्जवंचध्रुवर्गेषुकाठिन्यंकयविक्रये ॥ ४१ ॥ मार्दवंस्त्रीप्रयोगेषुवत्सलत्वंप्रजासुच ॥ ब्राह्मणेभ्यो भयंनित्यंवृद्धवृत्युपजीवनम् ॥ ४२ ॥ वासोभागीरथीतीरेतीर्थेवामरणंरणे ॥ अपराङ्मुखताऽर्थिभ्यःप्रत्यर्थिभ्योविशेषतः ॥ ४३ ॥ भोगःपरिजनैः सार्धंदानावंध्यदिनागमः ॥ विद्याव्यसनितानित्यंनित्यंपित्रोरुपस्थितिः ॥ ४४ ॥ यशसःसंचयोनित्यंनित्यंधर्मस्यसंचयः ॥ स्वर्गापवर्गयोःसिद्धिः सदाशीलस्यमंडनम् ॥ ४५ ॥ सद्भिश्चसंगतिर्नित्यंमैत्रीचपितृमित्रकैः ॥ इतिहासपुराणानामुत्कंठाश्रवणेसदा ॥ ४६ ॥ विपद्यपिपरंधैर्यंस्थैर्यंसं पत्समागमे ॥ गांभीर्यंवाग्विलासेषुऔदार्यंपात्रपाणिषु ॥ ४७ ॥ देहेपरैकाकृशतातपोभिर्नियमैर्यमैः ॥ एतैर्मनोरथफलैःफलंत्येवतपोद्रुमाः ॥ ४८ ॥ तस्मादल्पतपस्त्वाद्वैत्वंचाहंचमहामते ॥ प्राप्यापिराजसांनिध्यंराजलक्ष्म्यानभाजनम् ॥ ४९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मानापमानयोस्तस्मात्स्वकृतंकारणंपरम् ॥ न्नष्टापिनापमार्ष्टुंतत्परीष्टेस्वकृतांकृतिम् ॥ याशोचस्त्वमतःपुत्रदिष्टमिष्टंसमर्पयेत् ॥५०॥ इत्याकर्ण्यसुनीत्यास्तन्महावाक्यंसुनीतिमत् ॥ सौनीतियोध्रुवोवाचमादवेकुमुत्तरम् ॥ ५१ ॥ ध्रुवउवाच ॥ ॥ जनचित्रिसुनीतिमेशृणुवाक्यमनाकुलम् ॥ मात्वालइतिमत्वामामवमंस्थास्तपस्विनि ॥ ५२ ॥ यद्यहंमानवेवंशेजातोस्म्यत्यंतपावने ॥ उत्तानपादतनयस्तवदीयोदरसंभवः ॥५३॥ तपएवहिचेन्मातः कारणंसर्वसंपदाम् ॥ तत्तदासादितंविद्धिपदमन्यैर्दुरासदम् ॥ ५४ ॥ एकमेवहिसाहाय्यंकुरुमातरतंद्रिता ॥ अनुज्ञादानमात्रंचआशीर्भिरभिनंदय ॥ ॥ ५५ ॥ सापिज्ञात्वामहावीर्यंकुमारंकुक्षिसंभवम् ॥ मुहुर्त्योत्साहसंपत्त्याराजमानमुवाचतम् ॥ ५६ ॥ अनुज्ञातुंनशक्ताऽहंत्वामुत्तानशयांगज ॥ साष्टेकर्मपदेशीयन्तथापिकथयाम्यहम् ॥ ५७ ॥ सपत्नीवाक्यभल्लीभिर्भिन्नेमहतिमेहृदि ॥ तन्नशाम्योषधारीणिनतिष्ठंतिकरोमिकिम् ॥ ५८ ॥ तानि मन्येऽग्रमार्गेणस्रवंत्यविरतंशिशो ॥ स्रवंतीश्चचिकीर्षतिप्रतिकूलजलाःकिल ॥ ५९ ॥ त्वदेकतनयातातत्वदाधारैकजीविता ॥ त्वमंगयष्टिरसिमे त्वन्मुखासक्तलोचना ॥ ६० ॥ लब्धोसिकृतिभिःकष्टैरिष्टैःसंप्रार्थ्यदेवताः ॥ त्वन्मुखेंदूदयेतातमन्मनःशीरनीरधिः ॥ ६१ ॥ आनन्दपयसापूर्य कुचावुद्वेलितोभवेत् ॥ त्वदंगसंगसंभूतसुखसन्दोहशीतला ॥ ६२ ॥

सुखंशयेसुशयनेप्रावृत्यपुलकांबरम् ॥ अपोऽथसनुपस्पृश्यतांबूलंपरिगृह्यच ॥६३॥ त्वदास्यस्यौष्ठपुटकदुग्धवार्धिविवर्धिनाम् ॥ सुधांसुधांशुवदनधर्यं त्यपिधिनोमिन ॥ ६४ ॥ त्वदीयःशीतलालापःप्रापश्रुतिपथंयदा ॥ सपत्नीवाक्यदवथुस्तदैवस्यात्सवेपथुः ॥६५॥ यदंगनिद्रामिचिरंध्यायंत्यस्मितदेत्यहम् ॥ कदानिद्रादरिद्रोसौभविताकोंदयेऽज्जवत् ॥६६॥ यदोपेयागृहान्वत्सखेलित्वाबालखेलनैः ॥ तदानर्घ्यार्घ्यमुत्सृष्टुंस्तनौस्यातामित्रोन्मुखौ ॥ ॥ ६७ ॥ यदासौधाद्विनिर्यायाःपद्मरेखांकितंपदम् ॥ प्राणानतियियामूनांतदातदवलंबनम् ॥ ६८ ॥ यदायदात्रद्यिसिपुत्रत्रिचतुरंपदम् ॥ तदात दाममप्राणःकंठप्राघुणिकीभवेत् ॥ ६९ ॥ चित्रंपुत्रत्वरयतियातुंमेमानसांडजः ॥ सुधाधाराधरइवत्वद्विश्रियतित्वयि ॥ ७० ॥ अथतिष्ठंतुकठिनाः प्राणाःकंठाटवीतटे ॥ तपस्यंतोतिसंतप्तास्तपसेत्वयियास्यति ॥ ७१ ॥ इत्यनुज्ञामनुप्राप्यजननीचरणांबुजौ ॥ क्षणंमौलिजजंबालजडौकृत्वाश्रुवो ययौ ॥ ७२ ॥ तयापिधैर्यसूत्रेणसुनीत्यापरिगुंफ्यच ॥ नेत्रेंदीवरजामालाध्रुवस्योपायनीकृता ॥ ७३ ॥ मात्रातन्मार्गरक्षार्थंतदातदनुगीकृताः ॥ पैरवार्यप्रसराःस्वाशीर्वादाःपरःशताः ॥ ७४ ॥

स्वसौधात्सविनिर्गत्यबालोऽबालपराक्रमः ॥ अनुकूलेनमरुतादाशेताध्वाऽविशद्वनम् ॥ ७५ ॥ समरुत्तरुशाखाग्रप्रसारणमिषेणसः ॥ कृताहूतिरिवप्रेष्णावनेनवनमाविशत् ॥ ७६ ॥ समातृदेवतोभिज्ञःकेवलंराजवर्त्मनि ॥ नवेदकाननाध्वानंक्षणंदध्यौनृपात्मजः ॥ ७७ ॥ यावदुन्मील्यनयनेपुरः पश्यतिसध्रुवः ॥ तावद्ददर्शसप्तर्षीनतर्कितगतीन्वने ॥ ७८ ॥ बालिशेष्वसहायेषुभवेद्राग्यंसहायकृत् ॥ अरण्यान्यांरणेगेहेततोभाग्यंहिकारणम् ॥ ॥७९॥ कराजतनयोबालोगहनंकचतद्वनम् ॥ बलात्स्वसात्प्रकुर्वत्येनमस्तेभवितव्यते ॥८०॥ यत्रयस्यहियद्भाव्यंशुभंवाऽशुभमेवच ॥ आकृष्यभा विनीरज्जुस्तत्रतस्यहिदापयेत् ॥ ८१ ॥ अन्यथाविदधात्येपमानवोबुद्धिवैभवात् ॥ भगवत्याभविष्याऽसौविदध्याद्विधिरन्यथा ॥ ८२ ॥ नवयोनचवै चित्र्यंनचित्रंविदधेहितम् ॥ नवलंनोद्यमःपुंसांकारणंप्राक्कृतंकृतम् ॥ ८३ ॥ अथदद्दाससप्तर्षीन्सप्तसस्यतितेजसः ॥ भाग्यसूत्रैरिवाकृष्योपनीतान्प्रसुमो दृह ॥ ८४ ॥ तिलकांकितसद्बालान्कुशोपग्रहितांगुलीन् ॥ कृष्णाजिनोपविष्टांश्चयज्ञसूत्रैरलंकृतान् ॥ ८५ ॥ साक्षसूत्रकरांश्चिद्विनिमीलितलो चनान् ॥ सुधौतसूक्ष्मकापायवासःप्रावरणान्वितान् ॥ ८६ ॥ अकांडेपिमहाभागान्मिलितान्सप्तनीरधीन् ॥ चित्रंविपद्विनिर्मग्नान्बुद्धिधीर्पूनिवप्रजाः ॥ ८७ ॥ उपगम्यविनम्रःसप्रबद्धकरसंपुटः ॥ ध्रुवोविज्ञापयांचक्रेप्रणम्यललितंवचः ॥ ८८ ॥ ॥ ध्रुवउवाच ॥ ॥ अवैतमांमुनिवराःसुनी त्युदरसंभवम् ॥ उत्तानपादतनयंध्रुवंनिर्विण्णमानसम् ॥ ८९ ॥ इदंवनमनुप्राप्तंसनाथंयुष्मदंघ्रिभिः ॥ प्रायोनभिज्ञंसर्वत्रमद्धूर्पितमानसम् ॥९०॥

तेदृष्ट्वोर्जस्वलंबालंस्वभावमधुराकृतिम् ॥ अनर्घ्यनयनेपथ्यंमृदुगंभीरभाषिणम् ॥ ९१ ॥ उपोपवेश्यशिशुकंप्रोचुर्वैविस्मिताभृशम् ॥ अहोबालवि शालाक्षमहाराजकुमारक ॥ ९२ ॥ विचार्यापिनजानीमोवदनिर्वेदकारणम् ॥ अद्यतेह्यर्थीचेतानोक्तापमानःप्रमूर्गृहे ॥ ९३ ॥ नीरुक्छरीरसंपत्ति र्निर्वेदेकिंनुकारणम् ॥ अनवाप्ताभिलाषाणांवैराग्यंजायतेनृणाम् ॥ ९४ ॥ सप्तद्वीपपतेराज्ञःकुमारस्त्वंतथाकथम् ॥ स्वभावभिन्नप्रकृतोलोकेस्मिन्नम नोगतम् ॥ ९५ ॥ अवगंतुंहिशक्येतयूनोवृद्धरयत्नःशिशोः ॥ इतिश्रुत्वावचस्तेषांसहजप्रेमनिर्भरम् ॥ ९६ ॥ वाचंजग्राहसतदाशिशुःश्रांशुमनोरथः ॥ ध्रुवउवाच ॥ ॥ प्रेषितोराजसेवार्थंजनन्याऽहंमुनीश्वराः ॥ ९७ ॥ राजांकमारुरुक्षुर्हिसुरुच्यापारिभर्त्सितः ॥ उत्तमंचोत्तमीकृत्यमांचमन्मातरं तथा ॥९८॥ धिक्कृत्यप्रशशंसस्वंनिर्वेदेकारणंत्विदम् ॥ निशम्येतिशिशोर्वाक्यंपरस्परमवेक्ष्यते ॥९९॥ क्षात्रमेवशशंसुस्तदहोबालेपिनक्षमा ॥ १०० ॥

ऋषयऊचुः ॥ ॥ किमस्माभिरहोकार्यंकस्तवास्तिमनोरथः ॥ ज्ञातोभवतुतावत्सनःश्रवोगोचरीकुरु ॥ १ ॥ ॥ ध्रुवउवाच ॥ ॥ मुनयोममयोवं पुरुत्तमश्लोत्तमोत्तमः ॥ पित्राद त्तंचसोऽध्यास्तांतद्भद्रासनमुत्तमम् ॥ २ ॥ भवत्कृतंहिसाहाय्यमेतदिच्छामिसुव्रताः ॥ प्रायोजानेनबालत्वादुपदे शस्तदुच्यताम् ॥ ३ ॥ अनन्यनृपभुक्तंयद्यदन्येभ्यःसमृच्छितम् ॥ इंद्रादिदुरवापंयत्कथंलभ्यंदुरासदम् ॥ ४ ॥ पित्रोत्सृष्टंनकांक्षामिकांक्षामिस्व भुजार्जितम् ॥ मनोरथपथातीतंभवेद्यत्पितुरप्यहो ॥ ५ ॥ पितृसंपत्तिभोक्तारःप्रायशोनयशोधनाः ॥ नरोत्तमास्तुतेज्ञेयायेपित्राधिक्यदर्शिनः ॥ ६ ॥ उपार्जितंहिपित्रायेनाशयंतियशःश्रुतम् ॥ धनंनिधनमेवास्तुतेषांदुर्वृत्तचेतसाम् ॥ ७ ॥ इतिश्रुत्वावचस्तस्यमुनयःमुनयोर्जितम् ॥ यथार्थमेवं प्रत्यूचुर्मरीच्याद्यास्तथाध्रुवम् ॥ ८ ॥

मरीचिरुवाच ॥ ॥ अनर्चिताच्युतपदःपदमापद्यतेकथम् ॥ यथातथात्वमात्थांगनातथ्यंकथयाम्यहम् ॥ ९ ॥ अत्रिरुवाच ॥ ॥ अनास्वादितगो विंदपदांबुजरजोरसः ॥ मनोरथपथातीतंस्फीतंनाकलयेत्पदम् ॥ ११० ॥ अंगिराउवाच ॥ ॥ अदवीयःपदंतस्यसर्वासांसंपदामिह ॥ कमलाकांतकां तांत्रिकमलेयःसुशीलयेत् ॥ ११ ॥ ॥ पुलस्त्यउवाच ॥ ॥ यस्यस्मरणमात्रेणमहापातकसंततिः ॥ परमांतमवाप्नोतिसविष्णुःसर्वदोध्रुव ॥ १२ ॥ ॥ पुलहउवाच ॥ ॥ यदाहुःपरमंब्रह्मप्रधानपुरुषात्परम् ॥ यन्मायययाततंसर्वंसवंदास्यतिसोच्युतः ॥ १३ ॥ ॥ क्रतुरुवाच ॥ ॥ योयज्ञपुरुषो विष्णुर्वेदवेद्योजनार्दनः ॥ अंतरात्माऽस्यजगतःसतुष्टःकिंनयच्छति ॥ १४ ॥ ॥ वसिष्ठउवाच ॥ ॥ यद्भूतनवर्तिन्यःसिद्धयोऽष्टौनृपात्मज ॥ तमाराध्यहृषीकेशमपवर्गोप्यदूरतः ॥ १५ ॥ ध्रुवउवाच ॥ ॥ सत्यमुक्तंमुनीशानाविष्णोराराधनंप्रति ॥ कथंवाभगवानीज्यःसविधिश्चोपदिश्यताम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥१६॥ ॥ मुनयऊचुः ॥ ॥ तिष्ठतागच्छतावापिस्वपताजाग्रतातथा ॥ शयानेनोपविष्टेनजप्योनारायणःसदा ॥१७॥ द्वादशाक्षरमंत्रेणवासुदेवात्मकेनच॥ ध्यायंश्चतुर्भुजंविष्णुंजत्वासिद्धिंनकोगतः ॥ १८ ॥ अतस्त्वपुष्पसंकाशंपीतवाससमच्युतम् ॥ क्षणंसर्वात्मकंपश्यन्कोनसिध्यतिभूतले ॥१९॥ पुत्रान्कलत्रमित्राणिराज्यंस्वर्गापवर्गकम् ॥ वासुदेवंजपन्मर्त्यःसर्वप्राप्नोत्यसंशयम् ॥ १२० ॥

वासुदेवजपासक्तानपिपापकृतोजनान् ॥ नोपस्पृशंतिवैविघ्नायमदूताश्चदारुणाः ॥ २१ ॥ पितामहेनतेप्येषमहामंत्रउपासितः ॥ मनुनाराज्यकामेनवैष्णवेनमहर्द्धिना ॥ २२ ॥ त्वमप्येतेनमंत्रेणवासुदेवपरोभव ॥ यथाभिलषितामृद्धिंक्षिप्रमाप्नुहिसत्तम ॥ २३ ॥ इत्युक्तोऽतर्हिताःसर्वेमहात्मानोमुनीश्वराः ॥ वासुदेवमनाभूत्वाध्रुवोपितपसेगतः ॥ १२४ ॥ ॥ इति श्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडेपूर्वार्द्धे ध्रुवलोकवर्णनेध्रुवोपदेशोनामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥ गणावूचतुः ॥ ॥ औत्तानपादिर्निर्गत्यततःकाननतोद्विज ॥ रम्यंमधुवनं प्रापयमुनायास्तटंमहत् ॥ १ ॥ आद्यंभगवतःस्थानंतत्पुण्यंहरिमेधसः ॥ पापोपिजंतुस्तत्प्राप्यनिष्पापोजायतेध्रुवम् ॥ २ ॥ जपन्त्सवासुदेवाख्यं परंब्रह्मनिरामयम् ॥ अपश्यत्तन्मयंविश्वंध्यानस्तिमितलोचनः ॥ ३ ॥ हरिर्हरित्सुसर्वासुहरिर्हरिमरीचिषु ॥ शिवामृगमृगेंद्रादिरूपःकाननगोहरिः ॥ ४ ॥ जलेशालूरकूर्मादिरूपेणभगवान्हरिः ॥ हरिरश्वादिरूपेणमंदुरास्त्वपिभूभुजाम् ॥ ५ ॥ अनंतरूपःपातालेगगनेऽनंतसंज्ञकः ॥ एकोप्यनं ततांयातोरूपभेदैरनंतकैः ॥ ६ ॥ देवपुर्योवसेन्नित्यंदेवानांवसतिर्हियः ॥ सवासुदेवःसर्वत्रदीव्यद्व्यासनावशात् ॥ ७ ॥ विष्लृव्याप्तावयंधातुर्यत्रसार्थकतांगतः ॥ विष्णुनामस्वरूपेहिसर्वव्यापनशीलिनि ॥ ८ ॥ सर्वेषांचहृषीकाणामीशनात्परमेश्वरः ॥ हृषीकेशइतिख्यातोयःससर्वत्रसंस्थितः ॥ ९ ॥

नच्यवंतेपियद्ब्रह्मामहतिप्रलयेसति ॥ अतोऽच्युतोऽखिलेलोकेसएकःसर्वगोऽव्ययः ॥ १० ॥ इदंचराचरंविश्वंयोवभारस्वलीलया ॥ भृत्यास्वरूपसंपत्त्यासोऽत्रविश्वंभरोऽखिलम् ॥ ११ ॥ तस्येक्षणेसमीक्षेतेनान्यद्विष्णुपदादृते ॥ निरीक्ष्यःपुंडरीकाक्षोनान्योनियमतोह्यतः ॥ १२ ॥ नान्यशब्दमहोतस्यजातौशब्दग्रहावपि ॥ विनासुकुंदगोविंददामोदरचतुर्भुज ॥ १३ ॥ गोविंदचरणार्थाचांतस्त्रियंकर्मवविना ॥ शंखचक्रांकितोतस्यनान्यकर्मकरोकरौ ॥ १४ ॥ निर्द्वंद्वचरणद्वंद्वंतन्मनोमनुतहरेः ॥ हित्वान्यन्मननंसर्वंनिश्चलत्वमवापह ॥ १५ ॥ चरणौविष्णुशरणौहित्वानारायणांगणम् ॥ तस्यनो चरतोन्यत्रचरतोविपुलंतपः ॥ १६ ॥ वाणीप्रमाणीक्रियतेगोविंदगुणवर्णने ॥ जोपंसमासतातेनमहासारंतपस्यता ॥ १७ ॥ नितांतकमलाकांतनामधेयसुधारसम् ॥ रसयंतीनरसनातस्यान्यरससस्पृहा ॥ १८ ॥ श्रीमुकुंदपदद्वंद्वपद्मामोदप्रमोदितम् ॥ गंधांतरंनतद्घ्राणंपरिजिघ्रत्यशीघ्रगम् ॥ १९ ॥ त्वर्गिंद्रियंमधुरिपोःपरिस्पृश्यपदद्वयम् ॥ सर्वस्पर्शसुखंप्रापतस्यभूजानिजन्मनः ॥ २० ॥

शब्दादिविषयाधारंसारंदामोदरंपरम् ॥ श्रुत्वेंद्रियाणिसंप्राप्यकृतार्थान्यभवंस्तदा ॥ २१ ॥ लुप्तानिसर्वतेजांसितत्तपस्तपनोदये ॥ चंद्रसूर्यानलर्क्षाणां प्रदीपितजगत्त्रये ॥ २२ ॥ इंद्रचंद्राग्निवरुणसमीरणधनाधिपाः ॥ यमनैर्ऋतमुख्याश्चजानाःस्वपदशंकिताः ॥ २३ ॥ वैमानिकास्तथाऽन्येपित्रमुख्यादिवौकसः ॥ ततोध्रुवात्समुत्रेसुःस्वाधिकारेधिनाधयः ॥२४॥ यत्रयत्रध्रुवःपादंमिनोतिपृथिवीतले ॥ धरातस्यभराक्रांताविनमेत्तत्रतत्रवै ॥२५॥ अहोतदंगसंगीनित्यकाजाड्यंजलान्यपि ॥ रसवंतिपदंस्थानिस्फुरंत्यन्यत्रतद्भयात् ॥ २६ ॥ यावंतिविष्वक्तेजांसिसिद्धरूपगुणानिच ॥ नेत्रातिथी नितावंतितत्तपस्तेजसाऽभवन् ॥ २७ ॥ अहोनिजगुणस्पर्शःसततंमातरिश्वना ॥ दूरदेशांतरस्थोपितत्त्वचोविषयीकृतः ॥ २८ ॥ व्योम्नापिशब्दगुणिनाश्रुवारायनवृद्धिना ॥ शब्दजातस्त्ववशेषोपितत्कर्णशरणीकृतः ॥२९॥ आराधितोऽनुदिवसंसभूतैरपिपंचभिः ॥ तपएवपरंमेनेगोविंदार्पितमानसः ॥ ३० ॥ कौस्तुभोद्भासितद्वंदःपीतकौशेयवाससः ॥ ध्यानात्तेजोमयंविश्वंतेनैक्षिनृपमूनुना ॥ ३१ ॥

मरुत्वेनांतिमहतीचिंताऽऽतत्तपोभयात् ॥ मत्पदंचेदकांक्षिष्यद्हरिष्यद्ध्रुवंध्रुवः ॥ ३२ ॥ समर्थस्त्वप्सरोवर्गोनियंतुंयामेनायमान् ॥ सनुयूनिप्रभवतिनात्रवालेकरोमिकिम् ॥ ३३ ॥ तपस्विनांतपोहंतुंद्रौमत्साहाय्यकारिणौ ॥ कामक्रोधौनतावस्मिन्प्रभवेतांशिशौध्रुवे ॥ ३४ ॥ एकएवकिलोपायो बालेमैप्रभविष्यति ॥ भूतालिभीषणाकारांप्रहिणोमीहतद्भिये ॥ ३५ ॥ बालत्वाद्भीपितोभूतैस्तपस्त्यक्ष्यत्यसौध्रुवम् ॥ इतिनिश्चित्यभूतालिंप्रेषयामासवासवः ॥ ३६ ॥ भल्लूकाकारसर्वांगउपूलंबशिरोधरः ॥ कश्चिद्दुर्दर्शदशनस्त्वभ्यधावत्तमर्भकम् ॥ ३७ ॥ तंव्याघ्रवदनःकश्चिद्व्यादायविकटाननम् ॥ द्विपोच्चदेहसंस्थानोमुहुर्गर्जन्समभ्यगात् ॥ ३८ ॥ रयात्तुमांसकंभुंजन्कश्चिद्विकटदंष्ट्रकः ॥ रोषात्तमभिदुद्रावद्दृष्ट्वासंतर्जयन्निव ॥ ३९ ॥ अतितीक्ष्णैर्विषाणाग्रैस्तटानुच्चान्विदारयन् ॥ खुराग्रैर्दलयन्भूमिंमहोक्षोऽभिजगर्जतम् ॥ ४० ॥ कश्चिद्विपन्नगीभूयफटाटोपभयानकः ॥ अतिलोलद्विरसनःपुस्फूर्जनिकपाचितम् ॥ ४१ ॥ कश्चिच्चमहिपाकारःक्षिपन्शृंगाग्रतोगिरीन् ॥ लांगूलताडितधरःश्वसन्वेगात्तमाप्तवान् ॥ ४२ ॥ कश्चिद्वानलालीढखर्जूरद्रुमसन्निभम् ॥ विभ्रद्रूरुद्वयंभूतोव्यात्तास्यस्तमभीपयत् ॥ ४३ ॥ मौलिजैरभ्रसंघर्षंकुर्वन्दीर्घकृशोदरः ॥ निमग्नपिंगनयनःकश्चिद्भीपयतिस्मतम् ॥ ४४ ॥ कृपाणपाणिर्भग्नास्योवामहस्तकपालधृत् ॥ प्रचंडश्चेडयन्कश्चिदभ्यधावत्तमर्भकम् ॥ ४५ ॥ विशालसालमादायकुर्वन्किल किलारवम् ॥ कश्चित्तमभितोयातिकालोदंडधरोयथा ॥ ४६ ॥ तमःसंकेतसदनंव्याघ्रंवेवदनंमहत् ॥ कृतांतकंदराकारंविभ्रत्कश्चित्तमभ्यगात् ॥ ४७ ॥ उलूकाकारतांधृत्वाफूत्कारैरतिदारुणैः ॥ हृदयाकंपनैःकश्चिद्भीषयामासतंध्रुवम् ॥ ४८ ॥

यक्षिणीकाचिदानीयरुदंतंकस्यचिच्छिशुम् ॥ अपिबद्रुधिरंकोष्ठाच्चखादास्थिमृणालवत् ॥ ४९ ॥ पिपासिताद्यरुधिरंतेपिपास्याम्यहंध्रुव ॥ यथास्यबालस्यतथाचर्वित्वास्थीनिवादिनी ॥ ५० ॥ आनीयतृणदारूणिपरिस्तीर्यसमंततः ॥ दावाग्निंज्वालयामासकाचिद्रात्र्यावितर्धितम् ॥ ५१ ॥ वेतालीरूपमास्थायमंकाकाचित्तरून्गिरीन् ॥ रुरोधगगनाध्वानंकंपयंतीचतंभृशम् ॥ ५२ ॥ अन्यासुनीतिरूपेणतमभिप्रेक्ष्यदूरतः ॥ रुरोदातीवदुःखार्तावक्षोघातंमुहुर्मुहुः ॥ ५३ ॥ उवाचचवचश्चाटुबहुमायाविनिर्मितम् ॥ कारुण्यपूर्णवात्सल्यमतीवातन्वतीसती ॥ ५४ ॥ त्वदेकशरणावत्सत्वत्तमृत्युर्जिघांसति ॥ स्मरक्षणतासुंमांशरणागतवत्सल ॥ ५५ ॥ प्रतिग्रामंप्रतिपुरंप्रत्यध्वंप्रतिकाननम् ॥ प्रत्याश्रमंप्रतिगिरिश्रांतात्वद्वीक्षणातुरा ॥ ५६ ॥ यदाप्रभृतिरेबालनिरगात्तपसेभवान् ॥ तदेवदिनमारभ्यनिर्गताऽहंत्ववदीक्षणे ॥ ५७ ॥ तैस्तैःसपत्नीदुर्वाक्यैर्दुनोपित्वंयथार्भक ॥ तथाऽहमपिदूनास्मि निनरांतद्वचोऽग्निना ॥ ५८ ॥ ननिद्राम्निजागर्मिनाश्नामिनपिबाम्यहम् ॥ ध्यायामिकेवलंत्वाऽहंयोगिनीववियोगिनी ॥५९॥ निद्रादरिद्रनयनास्यमपिनतवाननम् ॥ आनंदिसर्वथायन्मेमंदभाग्याविलोकये ॥ ६० ॥ त्वदाननप्रतिनिधिर्विधुर्विधुरयामया ॥ उदित्वरोपिनालोकितापवेत्यकृका मया ॥ ६१ ॥ त्वदालापसमालापंकलयन्किलकाकलीम् ॥ कोकिलोपिमयाकर्णिनालकाकीर्णकर्णया ॥६२॥ त्वदंगसंगमधुरोध्रुवधूपितयामया ॥ नानिलोपिमयालिंगिकचिद्विश्रांतयाभृशम् ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

न्देरा:काश्चसरितःकैशेलास्त्वत्कृतेध्रुव ॥ मयाचरणचारिण्याराजपत्न्यालंचिताः ॥ ६४ ॥ अध्रुवंसर्वमेवेतत्पश्यंत्यंधीकृतास्त्वया ॥
चार्त्राज्ञायस्वधर्मेषुत्रप्राप्यत्वंमेऽध्रयस्थिताम् ॥ ६५ ॥ मृदुलानितयागानिकेणानिक्षतपत्तिवत् ॥ परुषंपुरुषैःसाध्यंपरुषैर्निर्दयैरपि ॥ ६६ ॥
अनेनतपसावत्सत्वयाऽऽप्यंकिमनेनस ॥ धराधीशतनूजत्वादधिकंतद्वदाधुना ॥ ६७ ॥ अनेनवयसाबालखेलनीयंत्वयाऽनिशम् ॥ बालकी
डनकैरन्यैःसवयः शिशुभिःसमम् ॥ ६८ ॥ ततःकौमारमासाद्यवयोऽभिध्यानशीलिना ॥ भक्तासर्वविद्यानां भाव्येवेपारदस्त्वना ॥ ६९ ॥
वयोधचतुरंप्राप्यपोषणक्वंदनादिकान् ॥ निर्वेश्यसिबहून्भोगानिंद्रियार्थान्कृतार्थयन् ॥ ७० ॥ उत्पाद्यायबहून्पुत्रान्गुणिनोधर्मवत्सलान् ॥
परिसंक्रामिताश्रीकस्तेष्वथोत्यंतपञ्चर ॥ ७१ ॥ इदानीमेवतपसित्वात्येवयसिकःश्रमः ॥ यावांगुष्ठकरीषाग्निःकदामोलिमवाप्स्यति ॥ ७२ ॥ विपक्षप
रिधूतेनहृतभाले केनचित् ॥ परिभ्रष्टश्रियावापतनव्यंतेपुकोभवान् ॥ ७३ ॥ हृतमानेनतपसाऽनिशम्येतिवचोध्रुवः ॥ दीर्घमुष्णंहिनिःश्वस्यपुनर्दे
ध्यौहरिंहृदि ॥ ७४ ॥ जनयित्रीमनाभाव्यभूतभीतिंविहायच ॥ ध्रुवोऽच्युतध्यानपरःपुनरेवमभूवह ॥ ७५ ॥ सापिभूतावलीभीतिंबहुभीषणरूपणा ॥
दर्शयंतीतमभितोऽद्राक्षीच्चक्रंसुदर्शनम् ॥ ७६ ॥ परितःपरिवेषाभंसूर्यस्योद्वेःस्फुरत्प्रभम् ॥ रक्षणायचरक्षोभ्यस्तस्याधोक्षजनिर्मितम् ॥ ७७ ॥
भूतावलीतमालोक्यस्फुरच्चक्रंसुदर्शनम् ॥ ज्वालामालाकुलंतीव्ररक्षंतंपरितोध्रुवम् ॥ ७८ ॥ अतीवनिष्कृपत्वंगोविंदार्पितचेतसम् ॥ तपोंकुरमिवो
द्विद्यमेदिनींसमुदित्वरम् ॥ ७९ ॥ सापिप्रत्युतभीतांतंध्रुवंध्रुवविनिश्चयम् ॥ नमस्कृत्यययायातंयातान्यर्थमनोरथा ॥ ८० ॥ गर्जत्कादंबिनीजालं
व्यगेभिंव्याकुलंयथा ॥ वृथाभवतिसंप्राप्यगगनागनिललोलताम् ॥ ८१ ॥ अथजंभारिणासार्धंभीताःसर्वेदिवौकसः ॥ संमंत्र्यत्वरिताजग्मुर्ब्रह्माणं
शरणंद्विज ॥ ८२ ॥ तत्राविज्ञापयामासुःपरिपुत्यपितामहम् ॥ वचोऽत्रसरमालोक्यपृष्टाःप्रभवकारणाः ॥ ८३ ॥

॥ देवाऊचुः ॥ ॥ धातरुत्तानपादस्यतनयेनसुवर्चसा ॥ तपतातापिताःसर्वेत्रिलोकीतलवासिनः ॥ ८४ ॥ सम्यक्संविद्यहेतातध्रुवस्यनप्रणीपितम् ॥
पदंपरिजिहीर्षुःसक्रस्यास्मासुमहातपाः ॥ ८५ ॥ इतिविज्ञापितोदेवैर्विहस्यचतुराननः ॥ प्रत्युवाचाथतान्सर्वान्ध्रुवतोभीतमानसान् ॥ ८६ ॥
॥ ब्रह्मोवाच ॥ ॥ नभेतव्यंसुरास्तस्माद्बुवाद्धुवपदेपिणः ॥ व्रजंतुविज्वराःसर्वेनसवःपदमिच्छति ॥ ८७ ॥ नतस्माद्भगवद्भक्ताद्भेतव्यंकेनचित्क
चित् ॥ निश्चितंविष्णुभक्तायेनतेस्युःपरतापिनः ॥ ८८ ॥ आराध्यविष्णुंदेवेशंलब्ध्वातस्मात्स्वकांक्षितम् ॥ भवतामपिसर्वेषांपदानिस्थिरविष्यति
॥ ८९ ॥ निशम्येतिचगीर्वाणाःप्रणीतंब्रह्मणोवचः ॥ प्रणिपत्यस्वधिष्ण्यानिप्रह्वद्याःपरिवव्रजुः ॥ ९० ॥ अथनारायणोदेवस्तंदृष्ट्वादृढमानसम् ॥
अनन्यशरणंबालंगत्वातार्क्ष्यरथोऽब्रवीत् ॥ ९१ ॥ श्रीविष्णुरुवाच ॥ ॥ प्रसन्नोस्मिमहाभागवरंवस्यमुव्रत ॥ तपसोऽस्मान्निवर्तस्वचिरंखिन्नोसियालक
॥ ९२ ॥ वचोऽमृतंसमाकर्ण्यपर्युन्मील्यविलोचने ॥ इंद्रनीलमणिज्योतिःपटलीपर्यलोकयत् ॥ ९३ ॥ प्रत्यग्रविकसन्नीलोत्पलानांनिकुरंबकैः ॥
प्रोत्फुल्लितांसमंताच्चरोदसीस्मरसीमिव ॥ ९४ ॥ लक्ष्मीदेवीकटाक्षौघैःकटाक्षितमिवाखिलम् ॥ ध्रुवस्तदानिरेक्षिष्टबाष्पाम्भोर्यदंतरम् ॥ ९५ ॥
प्रोद्यत्कादंबिनीमध्यविद्युदामसमानरुक् ॥ पुरःपीतांबरःकृष्णस्तेननेत्रातिथीकृतः ॥ ९६ ॥ नभोनिकषपाषाणोमेरुकांचनरेखितः ॥ यथातथाध्रुवेणे
क्षितदागरुडवाहनः ॥ ९७ ॥ सुनीलगगनंयद्वद्भूपितंतुकलावता ॥ पीतेनवाससायुक्तंसददर्शहरिंतदा ॥ ९८ ॥ दंडवत्प्रणिपत्याथपरितःपरिलुव्यच ॥
हरोदहृष्ट्वेवचिरंपितरंदुःखितःशिशुः ॥९९॥ नारदेनसनंदेनसनकेनसुसंस्तुतः ॥ अन्यैःसनत्कुमाराद्यैर्योगिभिर्योगिनांवरः ॥१००॥ कारुण्यवाप्यनी
पार्द्रपुंडरीकविलोचनः॥ध्रुवमुत्थापयांचकेचक्रीधृत्वाकरेणतम्॥१॥हरिस्तुपरिपस्पर्शतदंगधूलिधूसरम् ॥ कराभ्यांसुकठोराभ्यांनित्यंशस्त्रपरिग्रहात्॥२॥
स्पर्शनाद्देवदेवस्यसुसंस्कृतमयीशुभा ॥ वाणीप्रवृत्तातस्यास्यात्तुष्टावाथध्रुवोहरिम् ॥ १०३ ॥ ॥ इति श्रीस्कंदेमहापुराण एकाशीतिसाहस्र्यांसंहि
तायां चतुर्थे काशीखंडे पूर्वार्द्धे ध्रुवाख्यानेभगवद्दर्शननामविंशतितमोऽध्यायः ॥ २० ॥ ॥ ध्रुवउवाच ॥ ॥ नमोहिरण्यगर्भायसर्वसृष्टिविधायिने ॥
हिरण्यरेतसेतुभ्यंसुहिरण्यप्रदायिने ॥ १ ॥ नमोहरस्वरूपायभूतसंहारकारिणे ॥ महाभूतात्मभूतायभूतानांपतयेनमः ॥ २ ॥ नमःस्थितिकृतेतुभ्यं
विष्णवेप्रभविष्णवे ॥ तृष्णाहरायकृष्णायमहाभारसहिष्णवे ॥ ३ ॥ नमोदैत्यमहारण्यदाववह्निस्वरूपिणे ॥ दैत्यद्रुमकुठाराग्रनमस्तेशार्ङ्गपाणये ॥४॥
नमःकोमोक्कीव्यग्रकराग्रायगदाधर ॥ महादनुजनाशायनमोनंदकधारिणे ॥ ५ ॥ नमःश्रीपतयेतुभ्यंनमश्चक्रधरायच ॥ धराधरायवाराहरूपिणे
परमात्मने ॥ ६ ॥ नमःकमलहस्तायकमलावल्लभायते ॥ नमोमत्स्यादिरूपायनमःकौस्तुभवक्षसे ॥ ७ ॥ नमोवेदांतवेद्यायनमःश्रीवत्सधारिणे ॥
नमोगुणस्वरूपायगुणिनेगुणवर्जिते ॥ ८ ॥

नमस्तेपद्मनाभायपांचजन्यधरायच ॥ वासुदेवनमस्तुभ्यंदेवकीनंदनायच ॥ ९ ॥ प्रद्युम्नायनमस्तुभ्यमनिरुद्धायतेनमः ॥ नमःकंसविनाशायनम
श्चाणूरमर्दिने ॥ १० ॥ दामोदररूपीकेशगोविंदाच्युतमाधव ॥ उपेंद्रकैटभारातेमधुसूदनधोक्षज ॥ ११ ॥ नारायणायनरकहारिणेपापहारिणे ॥ वामना
यनमस्तुभ्यंहरयेशौरयेनमः ॥ १२ ॥ अनंतायनमस्तुभ्यमनंतशयनायच ॥ रुक्मिणीपतयेतुभ्यंरुक्मिप्रमथनायच ॥ १३ ॥ चेद्यदंतेनमस्तुभ्यं
दानवारेसुरारये ॥ मुकुंदपरमानंदनंदगोपप्रियायच ॥ १४ ॥ नमस्तेपुंडरीकाक्षदनुजेंद्रनिषूदन ॥ नमोगोपालरूपायवेणुवादनकारिणे ॥ १५ ॥

गोपीप्रियायकेशिघ्नेगोवर्धनधरायच ॥ रामायरघुनाथायराघवायनमोनमः ॥ १६ ॥ रावणारेनमस्तुभ्यंविभीषणशरण्यद ॥ अजायजयरूपायरणां
गणविचक्षण ॥१७॥ क्षणादिकालरूपायनानारूपायशार्ङ्गिणे ॥ गदिनेचक्रिणेतुभ्यंदैत्यचक्रविमर्दिने ॥१८॥ बलायबलभद्रायबलारातिप्रियायच ॥
बलियज्ञप्रमथननमोभक्तवरप्रद ॥ १९ ॥ हिरण्यकशिपोर्वक्षोविदारणरणप्रिय ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ २० ॥ नमस्तेधर्मरूपायनमः
सत्त्वगुणायच ॥ नमःसहस्रशिरसेपुरुषायपरायच ॥ २१ ॥ सहस्राक्षसहस्राग्रेसहस्रकिरणायच ॥ सहस्रमूर्तेश्रीकांतनमस्तेयज्ञपूरुष ॥२२॥ वेदवेद्यस्व
रूपायनमोवेदप्रियायच॥वेदायवेदगादिनेसदाचाराध्वगामिने ॥२३॥ वैकुंठायनमस्तुभ्यंनमोवैकुंठवासिने ॥ विष्टरश्रवसेतुभ्यंनमोगरुडगामिने ॥२४॥

विष्वक्सेननमस्तुभ्यंजगन्मयजनार्दन ॥ त्रिविक्रमायसत्यायनमःसत्यप्रियायच ॥ २५ ॥ केशवायनमस्तुभ्यंमाधिनेब्रह्मगायिने ॥ तपोरूपायतप
सांनमस्तेफलदायिने ॥ २६ ॥ स्तुत्यायस्तुतिरूपायभक्तस्तुतिरतायच ॥ नमस्तेश्रुतिरूपायश्रुत्याचारप्रियायच ॥ २७ ॥ अंडजायनमस्तुभ्यंस्वे
दजायनमोस्तुते ॥ जरायुजस्वरूपायनमउद्भिज्जरूपिणे ॥ २८ ॥ देवानामिंद्ररूपोसिग्रहाणामसिभानुमान् ॥ लोकानांसत्यलोकोऽसिसिंधूनांशी
रसागरः ॥ २९ ॥ सुरापगाऽसेसरितांसरसांमानसंसरः ॥ हिमवानसिशैलानांधेनूनांकामधुग्भवान् ॥ ३० ॥ धातूनांहाटकंयासिस्फटिकश्चोपले
ष्वसि ॥ नीलोत्पलंतासुनेषुवृक्षेष्वतुलसीभवान् ॥ ३१ ॥ सर्वपूज्यशिलानांवैशालग्रामशिलाभवान् ॥ मुक्तिक्षेत्रेषुकाशीत्वंप्रयागस्तीर्थपंक्तिषु ॥३२॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर्णेषुश्वेतवर्णोऽसिद्विपदांब्राह्मणोभवान् ॥ गरुडोस्यंडजेष्वीशव्यवहारेषुवाग्भवान् ॥ ३३ ॥ वेदेपूपनिषद्रूपामंत्राणांप्रणवोह्यसि ॥ अक्षराणामकारोसियज्ञनांसोमरूपधृक् ॥ ३४ ॥ प्रतापिनाग्निरसिक्षमाऽसित्वंक्षमावताम् ॥ दातृणामसिपर्जन्यःपवित्राणांपरोह्यसि ॥ ३५ ॥ चापोसिसर्वशस्त्राणांगतोवेगवतामसि ॥ मनोसींद्रियवर्गेषुनिर्भयाणांकरोह्यसि ॥ ३६ ॥ व्योमव्यातिमतांत्वंवैपरमात्माऽसिचात्मनाम् ॥ संध्योपास्तिर्भवान्देवसर्वनित्येषुकर्मसु ॥ ३७ ॥ क्रतूनामश्वमेधोसिदानानामभयंभवान् ॥ लाभानांपुत्रलाभोसिवसंतस्त्वमृतुष्वहो ॥३८॥ युगानांप्रथमोसित्वंतिथीनांत्वंकुहूर्ह्यसि ॥ पुण्योसिनक्षत्रगणेसंक्रमःसर्वपर्वसु ॥ ३९ ॥ योगेषुव्यतिपातस्त्वंतृणेषुहिकुशोभवान् ॥ उद्यमानांहिसर्वेषांनिर्वाणंत्वमसिप्रभो ॥ ४० ॥

सर्वासामिहबुद्धीनांधर्मबुद्धिर्भवानज ॥ अश्वत्थःसर्ववृक्षेषुसोमवल्लीलतासुच ॥ ४१ ॥ प्राणायामोसिसर्वेषुसाधनेषुशुचिष्वहो ॥ सर्वदःसर्वलिंगेषुश्रीमान्विश्वेश्वरोभवान् ॥ ४२ ॥ मित्राणांहिकलत्रंत्वंधर्मस्त्वंसर्वबंधुषु ॥ त्वत्तोनान्यज्जगत्यस्मिन्नारायणचराचरे ॥ ४३ ॥ त्वमेवमातात्वंतातस्त्वंसुतस्त्वंमहाधनम् ॥ त्वमेवसौख्यसंपत्तिस्त्वमायुर्जीवनेश्वरः ॥ ४४ ॥ साकथायत्रतेनामतन्मनोयत्त्वदर्पितम् ॥ तत्कर्मयत्त्वदर्थंवैतत्तपोयद्भवत्स्मृतिः ॥४५॥ तद्धनंधनिनांशुद्धंयत्त्वदर्थेव्ययीकृतम् ॥ सएवसकलःकालोयस्मिञ्जिष्णोत्वमर्च्यसे ॥ ४६ ॥ तावज्जीवितंश्रेयोयावत्त्वंह्रदिवर्तसे ॥ रोगाःप्रशममायांतित्वत्पादोदकसेवनात् ॥ ४७ ॥ महापापानिगोविंदबहुजन्मार्जितान्यपि ॥ सद्योविलयमायांतिवासुदेवेतिकीर्तनात् ॥ ४८ ॥ अहोपुंसांमहामोहस्त्वहोपुंसांप्रमादता ॥ वासुदेवमनाहृत्ययदन्यत्रकृतश्रमाः ॥ ४९ ॥ इदमेवहिमांगल्यमिदमेवधनार्जनम् ॥ जीवितस्यफलंचैतद्यद्दामोदरकीर्तनम् ॥ ५० ॥ अधोक्षजात्परोधर्मोनार्थोनारायणात्परः ॥ नकामःकेशवादन्योनापवर्गोहरिंविना ॥ ५१ ॥ इयमेवपराहानिरुपसर्गोयमेवहि ॥ अभाग्यंपरमंचैतद्वासुदेवंनयत्स्मरेत् ॥ ५२ ॥ हरेराधनंपुंसांकिंकैनकुरुतेवत ॥ पुत्रमित्रकलत्रार्थराज्यस्वर्गापवर्गदम् ॥ ५३ ॥ हरत्यघंध्वंसयतिव्याधीनाधीन्नियच्छति ॥ धर्मंविवर्धयेत्क्षिप्रंप्रयच्छतिमनोरथम् ॥ ५४ ॥ भगवच्चरणद्वंद्वंनिर्द्वंद्वध्यानमुत्तमम् ॥ पापिनापिप्रसंगेनाविहितंस्वहितंपरम् ॥ ५५ ॥

पापिनांयानिपापानिमहापपदभांज्यपि ॥ सुलीनध्यानसंपन्नोनामोच्चारोहरेर्हरेत् ॥५६॥ प्रमादादपिसंस्पृष्टोयथाऽनलकणोदहेत् ॥ तथोष्टपुटसंस्पृष्टंहरिनामहरेदघम् ॥ ५७ ॥ नितांतंकमलाकांतेशांतंचित्तंविधाययः ॥ संशीलयेत्क्षणंनूनंकमलातन्निश्चला ॥५८॥ अयमेवपरोधर्मस्त्विदमेवपरंतपः ॥ इदमेवपरंतीर्थंविष्णुपादांबुयत्पिबेत् ॥ ५९ ॥ तवोपहारंभक्त्यायःसेवतेयज्ञपूरुष ॥ सेवितस्तेननियतंपुरोडाशोमहाधिया ॥ ६० ॥ सचैवावभृथस्नातःसचगंगाजलाप्लुतः ॥ विष्णुपादोदकंकृत्वाशंखेयःस्नातिमानवः ॥ ६१ ॥ शालग्रामशिलायेनपूजितातुलसीदलैः ॥ सपारिजातमालाभिःपूज्यते सुरसद्मनि ॥ ६२ ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवापदिवेतरः ॥ विष्णुभक्तिसमायुक्तोज्ञेयःसर्वोत्तमश्वसः ॥ ६३ ॥ शंखचक्रांकिततनुःशिरसामंजरीधरः ॥ गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः ॥ ६४ ॥ प्रत्यहंद्वादशशिलाःशालग्रामस्ययोऽर्चयेत् ॥ द्वारवत्याःशिलायुक्ताःसवैकुंठेमहीयते ॥ ६५ ॥

तुलसीयस्यभवनेप्रत्यहंपरिपूज्यते ॥ तद्दृहंनोपसर्पंतिकदाचिद्यमकिंकराः ॥ ६६ ॥ हरिनामाक्षरमुवंभालेगोपीमृदांकितम् ॥ तुलसीमालितोरस्कंस्पृशेपुर्नयमानुगाः ॥ ६७ ॥ गोपीमृत्तुलसीशंखःशालग्रामःसचक्रकः ॥ गृहेपियस्यपंचैतेतस्यपापभयंकुतः ॥ ६८ ॥ येमुहूर्ताःक्षणायेचयाःकाष्ठायेनिमेषकाः ॥ ऋतेविष्णुस्मृतेर्यातास्तेपुमुष्टोयमेनसः ॥ ६९ ॥ कद्रचक्षरंहरेर्नामस्फुलिंगसदृशंज्वलत् ॥ महतीपातकानांचराशिस्तूलोपमाकच ॥ ७० ॥ गोविंदंपरमानंदंमुकुंदंमधुमूदनम् ॥ त्यक्तान्यनैवजानामिनभजामिस्मरामिन ॥ ७१ ॥ ननमामिनचस्तौमिनपश्यामीहचक्षुषा ॥ नस्पृशामिनवाया मिगायामिनहरिंविना ॥ ७२ ॥ जलेस्थलेचपातालेप्यनिलेचानलेऽचले ॥ विद्याधरासुरसुरेकिंनरेवानरेनरे ॥ ७३ ॥ तृणेस्त्रैणेचपाषाणेतरुगुल्मलतासुच ॥ सर्वत्रश्यामलतनुंवीक्षेश्रीवत्सवक्षसम् ॥ ७४ ॥ सर्वेषां हृदयावासःसाक्षात्साक्षीत्वमेवहि ॥ बहिरंतर्विनात्वांतुनह्यन्यंवेद्मिसर्वगम् ॥ ७५ ॥ इत्युक्काविरामासौशिवशर्मन्ध्रुवस्तदा ॥ देवोपिभगवान्विष्णुस्तमुवाचप्रसन्नधक् ॥ ७६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अयित्वालविशालाक्षध्रुव ध्रुवमतेऽनघ ॥ परिज्ञातोमयासम्यक्तवहृत्स्थोमनोरथः ॥ ७७ ॥ अन्नाद्भवंतिभूतानिवृष्टेरन्नसमुद्भवः ॥ तद्वृष्टेःकारणंसूर्यःसूर्याधारोध्रुवेधिभोः ॥७८॥ ज्योतिश्चक्रस्यसर्वस्यग्रहर्क्षादेःसमंततः ॥ गगनेभ्रमतोनित्यंत्वमाधारोभविष्यसि ॥ ७९ ॥ मेढीभूतस्तुवैसर्वान्वायुपाशैर्नियंत्रितान् ॥ आकल्पंतत्पदंतिष्ठग्रामयञ्ज्योतिषांगणान् ॥ ८० ॥

आराध्यश्रीमहादेवंपुरापदमिदंमया ॥ आसादियत्तदेतत्तेतपसाप्रतिपादितम् ॥ ८१ ॥ केचिच्चतुर्युगंयावत्केचिन्मन्वंतरंध्रुव ॥ तिष्ठंतित्वंतुवैकल्पंपदमेतत्प्रशास्यसि ॥ ८२ ॥ मनुनापिनयत्प्रापिकिमन्यैर्मानवैर्ध्रुव ॥ तत्पदंविहितंत्वत्साच्छक्राद्यैरपिदुर्लभम् ॥ ८३ ॥ अन्यान्वरान्प्रयच्छामिस्तत्तेनानेनतोपितः ॥ सुनीतिरपितेमातात्वत्समीपेचरिष्यति ॥ ८४ ॥ इदंस्तोत्रवरंयस्तुपठिष्यतिसमाहितः ॥ त्रिसंध्यंमनुजस्तस्यपापंयास्यतिसंक्षयम् ॥८५॥ नतस्यसदनंलक्ष्मीःपरित्यक्ष्यत्यसंशयम् ॥ नजनन्यावियोगश्चनबंधुकलहोदयः ॥ ८६ ॥ ध्रुवस्तुतिरियंपुण्यामहापातकनाशिनी ॥ ब्रह्महापिविशुद्धचेतकाकथेतरपापिनाम् ॥ ८७ ॥ महापुण्यस्यजननीमहासंपत्तिदायिनी ॥ महोपसर्गशमनीमहाव्याधिविनाशिनी ॥ ८८ ॥ यस्याऽस्तिपरमाभक्तिर्मयिनिर्मलचेतसः ॥ ध्रुवस्तुतिरियंतेनजप्यामत्प्रीतिकारिणी ॥ ८९ ॥ समस्ततीर्थस्नानेनयत्फलंलभतेनरः ॥ तत्फलंसम्यगाप्नोतिजपन्स्तुत्यानयासुदा ॥ ९० ॥ संतिस्तोत्राण्यनेकानिममप्रीतिकराणिच ॥ ध्रुवस्तुतेर्नचैतस्याःकलामर्हंतिषोडशीम् ॥ ९१ ॥ श्रुत्वापीमांस्तुतिंमर्त्यःश्रद्धयाप रयासुदा ॥ पातकैर्मुच्यतेसद्योमहत्पुण्यमवाप्नुयात् ॥ ९२ ॥ अपुत्रःपुत्रमाप्नोतिनिर्धनोधनमाप्नुयात् ॥ अभक्तोभक्तिमाप्नोतिकीर्तनाच्छ्रुतेःनुतेः ॥ ॥ ९३ ॥ दत्त्वादानान्यनेकानिकृत्वानानाव्रतानिच ॥ यथालाभानवाप्नोतितथास्तुत्याऽनयानरः ॥ ९४ ॥ त्यक्तासर्वाणिकार्याणित्यक्काजप्यान्यनेकशः ॥ ध्रुवस्तुतिरियंजप्यासर्वकामप्रदायिनी ॥ ९५ ॥ श्रीभगवानुवाच ॥ ॥ ध्रुवावधेहिवक्ष्यामिहितंतवमहामते ॥ येननेनिश्चलंसम्यक्पदमेतद्धविष्यति ॥ ९६ ॥ अहंजिगमिषुस्त्वासंपुरींवाराणसींशुभाम् ॥ साक्षाद्विश्वेश्वरोयत्रतिष्ठतेमोक्षकारणम् ॥ ९७ ॥ विपन्नानांचजंतूनांयत्रविश्वेश्वरःस्वयम् ॥ कर्णेजापंप्रकुरुतेकर्मनिर्मूलनक्षमम् ॥ ९८ ॥ अस्यसंसारदुःखस्यसर्वोपद्रवदायिनः ॥ उपायएकएवास्तिकाशिकानंदभूमिका ॥ ९९ ॥ इदंरम्यमिदंनेतिबीजंदुःखमहातरोः ॥ तस्मिन्काश्यग्निनादग्धेदुःखस्यावसरःकुतः ॥१००॥ प्राप्यंसंप्राप्यतेयेननभूयोयेनशोच्यते ॥ परायानिर्वृतेःस्थानंयत्तदानंदकाननम् ॥ १ ॥ अमृतायनमुत्सृज्यपुरुषोन्यत्रयोवसेत् ॥ आनंदकाननंभोःकुतस्तत्स्यसुखोदयः ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वरंशरावहस्तस्यचांडालागारवीथिषु ॥ भिक्षार्थमटनंकाश्यांराज्यंनान्यत्रनीरिषु ॥ ३ ॥ वैकुंठनगरात्काशींनित्यंविश्वेशमर्चितुम् ॥ अहमायामिनि यमाज्जगदर्च्यंतदर्चिताम् ॥ ४ ॥ मयियापरमाशक्तिस्त्रिलोक्यारक्षणक्षमा ॥ तत्रहेतुर्महेशानःसमुदर्शनचक्रदः ॥ ५ ॥ पुराजालंधरंदैत्यंममापिपरिकं पनम् ॥ पादांगुष्ठाग्ररेखोत्थंचक्रंसृष्ट्वाहरोऽहरत् ॥ ६ ॥ तच्चचक्रंमयालब्धंनेत्रपद्मार्चनाद्विभोः ॥ एतत्सुदर्शनाख्यंवैदैत्यचक्रप्रमर्दनम् ॥ ७ ॥ तन्म यातवरक्षार्थंभूतविद्रावणंपरम् ॥ तावत्प्रणुन्नंपुरतस्ततश्चाहमिहागतः ॥८॥ काशीमिदानींयास्यामिविश्वेश्वरविलोकने ॥ अद्ययात्राऽस्तिमहतीकार्तिक्यां बहुपुण्यदा ॥ ९ ॥ कार्तिकस्यचतुर्दश्यांविश्वेशंयोविलोकयेत् ॥ स्नात्वाचोत्तरवाहिन्यांनतस्यपुनरागतिः ॥ ११० ॥ इत्युक्त्वातार्क्ष्यमारोप्यध्रुवमानं दमेदुरम् ॥ क्षणाद्वाराणसींप्रापहरिःस्मरहरोपिताम् ॥ ११ ॥ पंचक्रोश्याश्चसीमानंप्राप्यदेवोजनार्दनः ॥ वैनतेयादवारुह्यकरेधृत्वाध्रुवंततः ॥ १२ ॥ मणिकर्ण्यांपरिस्नायविश्वेशमभिपूज्यच ॥ ध्रुवंबभाषेभगवान्हितंतस्यचिकीर्षयन् ॥ १३ ॥ लिंगंस्थापययत्नेनक्षेत्रेऽत्रैवाविमुक्तके ॥ त्रैलोक्यस्थापनं पुण्यंयथाभवतितेऽक्षयम् ॥ १४ ॥ नियुतंयत्परिस्थाप्यलिंगानिफलमाप्यते ॥ अन्यत्रतदिहैकेनलिंगेनपरिलभ्यते ॥ १५ ॥ कालेनभंगमापन्नं जीर्णोद्धारंकरोतियः ॥ इहतस्यफलस्यांतःप्रलयेपिनजायते ॥ १६ ॥

वित्तशाठ्यंपरित्यज्यप्रासादंयोऽत्रकारयेत् ॥ तेनदत्तोभवेत्सर्वोमेरुर्नियुतयोजनः ॥ १७ ॥ कूपवापीतडागानिशक्त्यायोऽत्रतुकारयेत् ॥ अन्य त्रकरणात्तस्यपुण्यंकोटिगुणाधिकम् ॥ १८ ॥ इज्यार्थमत्रयःकुर्यात्सुरम्यांपुष्पवाटिकाम् ॥ पुष्पेपुष्पेफलंतस्यसुवर्णकुसुमाधिकम् ॥ १९ ॥ अत्रब्रह्म पुरींकृत्वायोविप्रेभ्यःप्रयच्छति ॥ वर्षाशनेनसंयुक्तांतस्यपुण्यफलंशृणु ॥ १२० ॥ क्षीयंतेसलिलान्यब्धेर्भौमाश्चत्रसरेणवः ॥ क्षयोनतस्यपुण्यस्य शिवलोकेसमासतः ॥ २१ ॥ मठानपितपस्विभ्यःकारयित्वाऽत्रयोर्पयेत् ॥ जीवनोपायसंयुक्तान्सोपिपूर्वफलाश्रयः ॥ २२ ॥ कृत्वामहांतिपुण्यानियो ऽत्रविश्वेश्वरेऽर्पयेत् ॥ नतस्यपुनरावृत्तिर्घोरेसंसारसागरे ॥२३॥ अनंतइतिवादोयंमयिलोकेऽत्रगीयते ॥ परंकाशीगुणानांहिमयाप्यंतोनलभ्यते ॥२४॥ तस्मात्प्रयत्नतःकाश्यांध्रुवश्रेयःसमाश्रयेत् ॥ काशीश्रेयःफलंपुंसामक्षयायोपजायते ॥२५॥ गणावूचतुः ॥ ॥ ध्रुवमित्युपदिश्याथजगामगरुडध्वजः ॥ ध्रुवोपिलिंगंसंस्थाप्यवैद्यनाथसमीपतः ॥ २६ ॥ प्रासादंसुमहत्कृत्वाकृत्वाकुंडंतदग्रतः ॥ विश्वेश्वरंसमभ्यर्च्यकृतकृत्योगृहंययौ ॥ २७ ॥ ध्रुवेश्वरं समभ्यर्च्यध्रुवकुंडेकृतोदकः ॥ ध्रुवलोकमवाप्नोतिनरोभोगसमन्वितः ॥ २८ ॥ ध्रुवस्यपरमाख्यानंयःपठेत्पाठयेदपि ॥ सविष्णुलोकमासाद्यजायते विष्णुवल्लभः ॥ २९ ॥ नरोध्रुवस्यचरितंप्रसंगेनस्मरन्नपि ॥ नपापैरभिभूयेतमहत्पुण्यमवाप्नुयात् ॥ १३० ॥ इति श्रीस्कांदे महापुराण एकाशी तिसाहस्र्यांसंहितायां चतुर्थे काशीखंडे पूर्वार्द्धे ध्रुवस्तुतिर्नामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ शिवशर्मोवाच ॥ ध्रुवाख्यानमिदंरम्यंमहापा तकनाशनम् ॥ महाश्चर्यकरंपुण्यंश्रुत्वातृप्तोस्मिभोगणौ ॥ १ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्थंयावद्द्विजोब्रूतेविमानंवायुवेगगम् ॥ तावत्प्रापमहर्लो कंस्वर्लोकात्परमाद्भुतम् ॥ २ ॥ द्विजोऽथलोकंसंवीक्ष्यसर्वतोमहसावृतम् ॥ तौगणौप्रत्युवाचेदंकोयंलोकोमनोहरः ॥ ३ ॥ तावूचतुस्ततोविप्रंनिशाम यमहामते ॥ अयंसहिमहर्लोकःस्वर्लोकात्परमाद्भुतः ॥ ४ ॥ कल्पायुषोवसंत्यत्रतपसाधूतकल्मषाः ॥ विष्णुस्मरणसंक्षीणसमस्तक्लेशसंचयाः ॥५॥ निर्व्याजप्रणिधानेनदृष्ट्वातेजोमयंजगत् ॥ महायोगसमायुक्तावसंत्यत्रसुरोत्तमाः ॥ ६ ॥

इत्थंकथांकथयतोर्भगवद्गणयोःप्रिये ॥ क्षणार्धेनविमानंतज्जनलोकंनिनायतान् ॥ ७ ॥ निवसंत्यमलायत्रमानसाब्रह्मणःसुताः ॥ सनंदनाद्यायोगींद्राः सर्वेतेह्यूर्ध्वरेतसः ॥ ८ ॥ अन्येतुयोगिनोयेवैह्यस्खलद्ब्रह्मचारिणः ॥ सर्वद्वंद्वविनिर्मुक्तास्तेवसंत्यतिनिर्मलाः ॥९॥ जनलोकात्तपोलोकस्तेषांलोचनगो चरः ॥ कृतस्तेनविमानेनमनोवेगेनगच्छता ॥ १० ॥ वैराजायत्रतेदेवावसेयुर्दाहवर्जिताः ॥ वासुदेवेमनोयेषांवासुदेवार्पितक्रियाः ॥ ११ ॥ तपसातो ष्यगोविंदमभिलाषविवर्जिताः॥तपोलोकमिमंप्राप्यवसंतिविजितेंद्रियाः ॥१२॥ शिलोंछवृत्तयोयेवैदंतोलूखलिकाश्चये ॥ अश्मकुट्टाश्चमुनयःशीर्णपर्णा शिनश्चये ॥ १३ ॥ ग्रीष्मेपंचाग्नितपसोवर्षासुस्थंडिलेशयाः ॥ हेमंतशिशिरार्धेयेक्षपंतिसलिलेक्षपाः ॥१४॥ कुशाग्रनीरविप्रुषस्तृषितायतयोऽपिबन् ॥ वाताशिनोतिक्षुधिताःपादाग्रांगुष्ठभूस्पृशः ॥ १५ ॥ ऊर्ध्वदोषोरविदृशस्त्वेकांघ्रिस्थाणुनिश्चलाः ॥ येवैदिवानिरुच्छ्वासामासोच्छ्वासाश्चयेपुनः ॥१६॥ मासोपवासव्रतिनश्चातुर्मास्यव्रताश्चये ॥ ऋत्वंततोयपानायेयेषण्मासोपवासकाः ॥ १७ ॥ येचवर्षनिमेषावैवर्षधारांबुतर्पकाः ॥ येचस्थाणूपमां प्राप्तामृगकंडूतिसौख्यदाः ॥ १८ ॥ जटाटवीकोटरांतःकृतनीडांडजाश्चये ॥ प्ररूढवामलूरांगाःस्नायुनद्धास्थिसंचयाः ॥ १९ ॥ लताप्रतानैःपरितोवे ष्टितावयवाश्चये ॥ सस्यानिचप्ररूढानियदंगेषुचिरस्थिति ॥ २० ॥

इत्यादिसुतपःक्लिष्टवर्ष्माणोयेतपोधनाः ॥ ब्रह्मायुषस्तपोलोकेतेवसंत्यकुतोभयाः ॥२१॥ यावदित्थंसपुण्यात्माशृणोतिगणयोर्मुखात् ॥ तावन्नेत्रातिथी भूतःसत्यलोकोमहोज्ज्वलः ॥ २२ ॥ त्वरावंतौगणौतत्रविमानादवरुह्यतौ ॥ स्रष्टारंसर्वलोकानांतेनसार्धंप्रणेमतुः ॥ २३ ॥ ब्रह्मोवाच ॥ गणावसौद्विजो धीमान्वेदवेदांगपारगः ॥ स्मृत्युक्ताचारचंचुश्चप्रतीपःपापकर्मसु ॥ २४ ॥ अयिद्विजमहाप्राज्ञजानेत्वांशिवशर्मक ॥ साधूकृतंत्वयावत्ससुतीर्थप्राणमो क्षणात् ॥ २५ ॥ सत्वरंगत्वरंसर्वंयच्चैतद्भवतेक्षितम् ॥ दैनंदिनप्रलयतःसृजामिचपुनःपुनः ॥ २६ ॥ आवैराजंप्रतिपदमुपसंहरतेहरः ॥ काकथामशका भानांनृणांमरणधर्मिणाम् ॥ २७ ॥ चतुर्षुभूतग्रामेषुह्येकएवगुणोनृणाम् ॥ तस्मिन्वैभारतेवर्षेकर्मभूमौमहीयसि ॥ २८ ॥ चपलानिविनिर्जित्येंद्रिया णिमनसासह ॥ विहायवैरिणंलोभंविष्वग्गुणगणस्यच ॥ २९ ॥ धर्मवंशहरंकाममर्थसंचयहारिणम् ॥ जरापलितकर्तारंविनिष्कृत्यविचारतः ॥३०॥ जित्वाक्रोधरिपुंधैर्यात्तपसोयशसःश्रियः ॥ शरीरस्यापिहर्तारंनेतारंतामसींगतिम् ॥ ३१ ॥

सदामदंपरित्यज्यप्रमादैकपदप्रदम् ॥ प्रमादैकशरण्यंचसंपदांविनिवर्तकम् ॥ ३२ ॥ सर्वत्रलघुताहेतुमहंकारंविहायच ॥ दूषणारोपणेयत्नंकुर्वाणंसज्जने ष्वपि ॥ ३३ ॥ हित्वामोहंमहाद्रोहरोपणंमतिघातिनम् ॥ अत्यंतमंधीकरणमंधतामिस्रदर्शकम् ॥ ३४ ॥ श्रुतिस्मृतिपुराणोक्तंपरिक्षुण्णंमहाजनैः ॥ धर्मसोपानमारुह्ययदिहायांतिहेलया ॥ ३५ ॥ कर्मभूमिंसमीहंतेसर्वेस्वर्गौकसोद्विज ॥ यत्तत्रार्जितभोक्तारःपदेपूच्चावचेष्वमी ॥ ३६ ॥ नार्यावर्तसमोदे शोनकाशीसदृशीपुरी ॥ नविश्वेशसमंलिंगंक्वापित्रह्मांडमंडले ॥३७॥ संतिस्वर्गाबहुविधाःसुखेतरविवर्जिताः॥ सुकृतैकफलाःसर्वेयुक्ताःसर्वसमृद्धिभिः॥ ॥ ३८ ॥ स्वर्लोकादधिकंरम्यंनहिब्रह्मांडगोलके ॥ सर्वेयतंतेस्वर्गायतपोदानव्रतादिभिः ॥ ३९ ॥ स्वर्लोकादपिरम्याणिपातालानीतिनारदः ॥ प्राहस्वर्गसदांमध्येपातालेभ्यःसमागतः ॥ ४० ॥ आह्लादकारिणःशुभ्रामणयोयत्रसुप्रभाः ॥ नागांगाभरणप्रोताःपातालंकेनतत्समम् ॥ ४१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दैत्यदानवकन्याभिरितश्चेतश्चशोभिते ॥ पातालेकस्यनप्रीतिर्विमुक्तस्यापिजायते ॥ ४२ ॥ दिवार्करश्मयस्तत्रप्रभांतन्वंतिनातपम् ॥ शशिनश्चनशी
तायनिशिद्योतायकेवलम् ॥ ४३ ॥ यत्रनज्ञायतेकालोगतोपिदनुजादिभिः ॥ घनानिनद्योरम्याणिसदंभांसिसरांसिच ॥ ४४ ॥ कलाःपुंस्को
किलालापाःसुचैलानिशुचीनिच ॥ भूषणान्यतिरम्याणिगंधाद्यमनुलेपनम् ॥ ४५ ॥ वीणावेणुमृदंगादिनिस्वनाःश्रुतिहारिणः ॥ हाटकेशंमहालिंगंयत्र
वेसंर्वकामदम् ॥ ४६ ॥ एतान्यन्यानिरम्याणिभोग्योग्यानिदानवैः ॥ दैत्योरगैश्चभुज्यंतेपातालांतरगोचरैः ॥ ४७ ॥

पातालेभ्योपिवैरम्यंद्विजवर्षमिलावृतम् ॥ रत्नसानुंसमाश्रित्यपरितःपरिसंस्थितम् ॥ ४८ ॥ सदासुकृतिनोयत्रसर्वभोगभुजोद्विज ॥ नवयौवनसंपन्ना
नित्यंयत्रमृगीदृशः ॥४९॥ भोगभूमिरियंप्रोक्ताश्रेयोविनिमयार्जिता ॥ भुज्यतेत्वद्विधैर्लोकैस्तीर्थाभित्यक्तदेहकैः ॥ ५० ॥ अक्लीवभापिभिश्चापिपुत्रक्षे
त्राद्यहीनकैः ॥ परोपकारसंक्षीणदुःखायुर्धनसंचयैः ॥ ५१ ॥ संतिद्वीपाह्यनेकावैपारावारांतरस्थिताः ॥ जंबूद्वीपसमोद्वीपोनक्रापिजगतीतले ॥ ५२ ॥
तत्रापिनववर्षाणिभारतंतत्रचोत्तमम् ॥ कर्मभूमिरियंप्रोक्तादेवानामापिदुर्लभा ॥५३॥ अष्टौकिंपुरुषादीनिदेवभोग्यानितानितु ॥ तेपुस्वर्गात्समागत्यरमं
तेत्रिदिवौकसः ॥ ५४ ॥ योजनानांसहस्राणिनवविस्तारतस्त्विदम् ॥ भारतंप्रथमंवर्षमेरोर्दक्षिणतःस्थितम् ॥ ५५ ॥ तत्रापिहिमविंध्याद्रेरंतरंपुण्यदं
परम् ॥ गंगायमुनयोर्मध्येह्यंतर्वेदीभुवःपराः ॥ ५६ ॥ कुरुक्षेत्रंहिसर्वेषांक्षेत्राणामधिकंततः ॥ ततोपिनैमिपारण्यंस्वर्गसाधनमुत्तमम् ॥ ५७ ॥ नैमि
षारण्यतोपीहसर्वास्मिन्क्षितिमंडले ॥ सर्वेभ्योपिहितीर्थेभ्यस्तीर्थराजोविशिष्यते ॥ ५८ ॥ स्वर्गदोमोक्षदश्चैवसर्वकामफलप्रदः ॥ प्रयागस्तन्महत्क्षेत्रंती
र्थराजइतिस्मृतः ॥ ५९ ॥ यागाःसर्वेमयापूर्वंतुलयाविधृताद्विज ॥ तच्चतीर्थवरंरम्यंकामिकंकामपूरणात् ॥ ६० ॥ दृष्ट्वाप्रकृष्टंयागेभ्यःपुण्येभ्योदक्षिणा
दिभिः ॥ प्रयागमितितन्नामकृतंहरिहरादिभिः ॥ ६१ ॥

नाममात्रस्मृतेर्यस्यप्रयागस्यत्रिकालतः ॥ स्मर्तुःशरीरेनोजातुपापंवसतिकुत्रचित् ॥ ६२ ॥ संतितीर्थान्यनेकानिपापत्राणकराणिच ॥ नशक्यान्य
धिकंदातुंकृतैनःपरिशुद्धितः ॥ ६३ ॥ जन्मांतरेष्वसंख्येषुयःकृतःपापसंचयः ॥ दुष्प्रणोद्योहिनितरांव्रतैर्दानैस्तपोजपैः ॥ ६४ ॥ सतीर्थराजग
मनोद्यतस्यशुभजन्मनः ॥ अंगेषुवेपतेऽत्यंतंद्रुमोवातहतोयथा ॥ ६५ ॥ ततःक्रांताधमार्गस्यप्रयागदृढचेतसः ॥ पुंसःशरीरान्निर्यातुमपेक्षेतपदांतरम् ॥
॥ ६६ ॥ भाग्यान्नेत्रातिथीभूतेतीर्थराजेमहात्मनः ॥ पलायतेद्रुततरंतमःसूर्योदयेयथा ॥ ६७ ॥ सप्तधातुमयीभूततनौपापानियानिवै ॥ केशेपुनानितिष्ठं
तिवपनाद्यांतितान्यपि ॥ ६८ ॥ एवंनिष्कलुषीभूयततःस्नायात्सितासिते ॥ यंयंकाममभिध्यायंस्तंतमाप्नोतिनान्यथा ॥ ६९ ॥ पुण्यराशिंचविपुलं
पुण्यान्भोगान्यथेप्सितान् ॥ स्वर्गंप्राप्नोतितत्पुण्यान्निष्कामोमोक्षमाप्नुयात् ॥ ७० ॥ स्नायाद्योभिलपन्मोक्षंकामानन्यान्यिहायच ॥ सोपिमोक्षमवाप्नो
तिकामदात्तीर्थराजतः ॥ ७१ ॥ तीर्थराजंपरित्यज्ययोऽन्यस्मात्कामभिच्छति ॥ भारताख्येमहावर्षेसकामंनाप्नुयात्स्फुटम् ॥ ७२ ॥ सत्यलोकेप्रयागे
नांतरंवेद्म्यहंद्विज ॥ तत्रयेशुभकर्माणस्तेमल्लोकनिवासिनः ॥ ७३ ॥ तीर्थाभिलापिभिर्मर्त्यैस्सेव्यंतीर्थांतरंनहि ॥ अन्यत्रभूमिवलयेतीर्थराजात्मया
गतः ॥७४॥ यथांतरंद्विजश्रेष्ठभूपेत्वितरसेवके ॥ दृष्टांतमात्रंकथितंप्रयागेतरतीर्थयोः ॥७५॥ यथाकथंचित्तीर्थेऽस्मिन्प्राणत्यागंकरोतियः ॥ तस्यात्म
घातदोपोनप्राप्नुयादीप्सितान्यपि ॥ ७६ ॥ यस्यभाग्यवतश्चात्रतिष्ठंत्यस्थीन्यपिद्विज ॥ नतस्यदुःखलेशोपिक्रापिजन्मनिजायते ॥ ७७ ॥
ब्रह्महत्यादिपापानांप्रायश्चित्तंचिकीर्षुणा ॥ प्रयागंविधिवत्सेव्यंद्विजवाक्यान्नसंशयः ॥ ७८ ॥ किंबहूक्तेनविप्रेंद्रमहोदयमभीप्सुना ॥ सेव्यंसिता
सितंतीर्थंप्रकृष्टंजगतीतले ॥ ७९ ॥

प्रयागतोपितीर्थेशात्सर्वेपुभुवनेष्वपि ॥ अनायासेनवैमुक्तिःकाश्यांदेहावसानतः ॥८०॥ प्रयागादपिवैरम्यमविमुक्तंनसंशयः ॥ यत्रविश्वेश्वरःसाक्षात्स्वयं
समधितिष्ठति ॥ ८१ ॥ अविमुक्तान्महाक्षेत्राद्विश्वेशसमधिष्ठितात् ॥ नचकिंचित्कचिद्रम्यमिहब्रह्मांडगोलके ॥ ८२ ॥ अविमुक्तमिदंक्षेत्रमपिब्रह्मां
डमध्यगम् ॥ ब्रह्मांडमध्येनभवेत्पंचक्रोशप्रमाणतः ॥ ८३ ॥ यथायथाहिवर्धेतजलमेकार्णवस्यच ॥ तथातथान्नयेदीशस्तत्क्षेत्रंप्रलयादपि ॥ ८४ ॥
क्षेत्रमेतत्त्रिशूलाग्रेशूलिनास्तिष्ठतिद्विज ॥ अंतरिक्षेनभूमिष्ठंनेक्षंतेमूढबुद्धयः ॥ ८५ ॥ सदाकृतयुगंचात्रमहापर्वसदाऽत्रवै ॥ नग्रहाऽस्तोदयकृतोदोषोविश्वे
श्वराश्रमे ॥८६॥ सदासोम्यायनंतत्रसदातत्रमहोदयः ॥ सदैवमंगलंतत्रयत्रविश्वेश्वरस्थितिः॥८७॥ यथाभूमितलेविप्रपुर्यःसंतिसहस्रशः ॥ तथाकाशी
नमंतव्याकापिलोकोत्तरात्त्वियम् ॥ ८८ ॥ मयासृष्टानिविप्रेंद्रभुवनानिचतुर्दश ॥ अस्याःपुर्याविनिर्मातास्वयंविश्वेश्वरःप्रभुः ॥ ८९ ॥ पुरायमस्त
पस्तप्त्वाबहुकालंसुदुष्करम् ॥ त्रैलोक्याधिकृतिंप्राप्तस्त्यक्त्वाराणसींपुरीम् ॥ ९० ॥ चराचरस्यसर्वस्ययानिकर्माणितानिवै ॥ गोचरेचित्रगुप्तस्यकाशी
वासिकृताद्दते ॥ ९१ ॥ प्रवेशोयमदूतानांनकदाचिद्विजोत्तम ॥ मध्येकाशीपुरींक्रापिरक्षिणस्तत्रतद्गणाः ॥ ९२ ॥ स्वयंनियंताविश्वेशस्तत्रकाश्यां
तनुत्यजाम् ॥ तत्रापिकृतपापानांनियंताकालभैरवः ॥ ९३ ॥ तत्रपापंनकर्तव्यंदारुणारुद्रयातना ॥ अहोरुद्रपिशाचत्वंनरकेभ्योपिदुःसहम् ॥ ९४ ॥
पापमेवहिकर्तव्यंमतिरस्तियदीदृशी ॥ सुखेनान्यत्रकर्तव्यंमहीह्यस्तिमहीयसी ॥ ९५ ॥ अपिकामातुरोजंतुरकांक्षतिमातरम् ॥ अपिपापकृताकाशी
रक्ष्यामोक्षार्थिनैकिका ॥ ९६ ॥ परापवादशीलेनपरदाराभिलाषिणा ॥ तेनकाशीनसंसेव्याकाकाशीनिरयःक्रमः ॥ ९७ ॥ अभिलष्यंतियेनित्यंधनं
चात्रप्रतिग्रहैः ॥ परस्वंकपटैर्वापिकाशीसेव्यानतैर्नरैः ॥ ९८ ॥ परपीडाकरंकर्मकाश्यांनित्यंविवर्जयेत् ॥ तदेवचेत्किमत्रस्यात्काशीवासोदुरात्मनाम् ॥
॥ ९९ ॥ त्यक्त्वाविश्वेश्वरींभक्तियेऽन्यदेवपरायणाः ॥ सर्वथातैर्नवस्तव्याराजधानीपिनाकिनः ॥ १०० ॥ अर्थार्थिनम्नुयेविप्रयेचकामार्थिनोनराः ॥
अविमुक्तंनतैःसेव्यंमोक्षक्षेत्रमिदंयतः ॥ १ ॥ शिवनिंदापरायेचवेदनिंदापराश्चये ॥ वेदाचारप्रतीपायेसंध्यावाग्गणसीनतैः ॥ २ ॥ परद्रोहधियोयेचपरे
र्ष्याकारिणश्चये ॥ परोपतापिनोयेवैतेपांकाशीनासिद्धये ॥ ३ ॥ मनसापिनयेकाशीमभिनंदंतिदुर्धियः ॥ तेषांनिर्वाणवार्तापिदूरेदुर्वृत्तचेतसाम् ॥ ४ ॥
ज्ञानेननविनामोक्षःक्वचिदस्तीहभूतले ॥ तज्ज्ञानंनव्रतैर्लभ्यमपिचांद्रायणादिभिः ॥ ५ ॥ तुलापुरुषमुख्यैश्चदानैश्चश्रद्धयान्वितैः ॥ देशेकालेच
विधिनापात्रेभ्यःप्रतिपादितैः ॥ ६ ॥ नयमैर्ब्रह्मचर्याद्यैर्नियमैर्नार्चनादिभिः ॥ शरीरशोषणैरुग्रैर्नतपोभिर्द्विजोत्तम ॥ ७ ॥ नमद्दामंत्रजप्यैश्चगुरुभिः
प्रतिपादितैः ॥ नस्वाध्यायैर्यथोक्तैश्चनाग्निशुश्रूषणैः परैः ॥ ८ ॥ नसेवयागुरूणांचनश्राद्धैर्देवतार्चनैः ॥ ननानातीर्थयात्राभिर्ज्ञानंसमधिगम्यते ॥
॥ ९ ॥ नयोगेनविनाज्ञानंयोगस्तत्त्वार्थशीलनम् ॥ गुरूपदिष्टमार्गेणसदाभ्यासवशेनच ॥ ११० ॥ तस्यांतरायावद्दवःसुदूरश्रवणादयः ॥ अतो
नप्राप्यतेज्ञानंयोगादेकेनजन्मना ॥ ११ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विनातपोजपाद्यैश्चविनायोगेनसुव्रत ॥ निःश्रेयोलभ्यतेकाश्यामिहैकेनैवजन्मना ॥१२॥ त्वयाशुद्धधियाकाश्यांयच्छ्रेयःसमुपार्जितम् ॥ तच्छ्रेयसो
प्युदर्कस्तेमहानस्तिद्विजोत्तम ॥ १३ ॥ उक्तेतिविरराजाजःशृण्वतोर्गणयोस्तयोः ॥ सोपिप्रमुदितश्चाभूच्छिवशर्मामहामनाः ॥ ११४ ॥ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे ब्रह्मकृतकाशीप्रशंसानामद्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥
शिवशर्मोवाच ॥ ॥ सत्यलोकेश्वरविधेसर्वेषांप्रपितामह ॥ किंचिद्विज्ञप्तुकामोस्मिनभयाद्वक्तुमुत्सहे ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ यत्त्वंप्रष्टुमनावि
प्रज्ञातंतेतन्मनोगतम् ॥ पिपृच्छिषुस्त्वंनिर्वाणंगणौतत्कथयिष्यतः ॥२॥ नैतयोर्विष्णुगणयोरगोचरमिहास्तिहि ॥ सर्वमेतौविजानीतोयत्किंचिद्ब्रह्मगो
लके ॥ ३ ॥ इत्युक्त्वासत्कृतास्तेवैब्रह्मणाभगवद्गणाः ॥ प्रणम्यलोककर्तारंतेऽपिहृष्टाःप्रतस्थिरे ॥ ४ ॥ पुनःस्वयानमारुह्यवैकुंठमभितोययुः ॥ गच्छता
पिपुनस्तत्रद्विजेनापृच्छितौगणौ ॥ ५ ॥ ॥ शिवशर्मोवाच ॥ ॥ कियद्दूरंवयंप्राप्तागंतव्यंचकियत्पुनः ॥ पृच्छाम्यन्यच्चवांभद्रौब्रूतंप्रीत्यातदप्यहो ॥
॥ ६ ॥ कांच्यवंतीद्वारवतीकाश्ययोध्याचपंचमी ॥ मायापुरीचमथुरापुर्यःसप्तविमुक्तिदाः ॥ ७ ॥ विहायपट्पुरीश्चान्याःकाश्यामेवप्रतिष्ठिता ॥ मुक्ति
र्विश्वसृजातत्किंममसुक्तिर्नसंप्रति ॥ ८ ॥ इतिसर्वंममपुरःप्रसादाद्वक्तुमर्हतम् ॥ इतितद्वाक्यमाकर्ण्यगणावूचतुरादरात् ॥ ९ ॥ ॥ गणावूचतुः ॥
यथार्थंकथयावस्तेयत्पृष्टंभवतानघ ॥ विष्णुप्रसादाज्जानीवोभूतंभाविभवत्तथा ॥ १० ॥ विप्रावभासतेयावत्किरणैःपुष्पवंतयोः ॥ तावतीभूःसमु
द्दिष्टाससमुद्राद्रिकानना ॥ ११ ॥

वियच्चतावदुपरिविस्तारपरिमंडलम् ॥ योजनानांचनियुतेभूमेर्भानुर्व्यवस्थितः ॥ १२ ॥ भानोःसकाशादुपरिलक्षलक्ष्यःक्षपाकरः ॥ नक्षत्रमंडलंसो
माल्लक्षयोजनमुच्छ्रितम् ॥ १३ ॥ उडुमंडलतःसौम्यउपरिष्टाद्विलक्षतः ॥ द्विलक्षेतुबुधाच्छुक्रःशुक्राद्भौमोद्विलक्षके ॥ १४ ॥ माहेयादुपरिष्टाच्चसुरेज्यो
नियुतद्वये ॥ द्विलक्षयोजनोत्सेधःसौरिर्देवपुरोहितात् ॥ १५ ॥ दशायुतसमुच्छ्रायंसौरेःसप्तर्षिमंडलम् ॥ सप्तर्षिभ्यःसहस्राणांशतादूर्ध्वंध्रुवःस्थितः ॥
॥ १६ ॥ पादगम्यंहियत्किंचिद्वस्त्वस्तिधरणीतले ॥ तद्भूर्लोकइतिख्यातःसाब्धिद्वीपाद्रिकाननम् ॥ १७ ॥ भूर्लोकाच्चभुवर्लोकोब्रह्मावधिरुदाहृतः ॥
आदित्यादाध्रुवंविप्रस्वर्लोकइतिगीयते ॥ १८ ॥ महर्लोकःक्षितेरूर्ध्वमेककोटिप्रमाणतः ॥ कोटिद्वयेतुसंख्यातोजनोभूर्लोकतोजनैः ॥ १९ ॥
चतुष्कोटिप्रमाणस्तुतपोलोकोऽस्तिभूतलात् ॥ उपरिष्टात्क्षितेरष्टौकोटयःसत्यमीरितम् ॥ २० ॥ सत्यादुपरिवैकुंठोयोजनानांप्रमाणतः ॥ भूर्लोकात्प
रिसंख्यातःकोटिषोडशसंमितः ॥ २१ ॥ यत्रास्तेश्रीपतिःसाक्षात्सर्वेषामभयप्रदः ॥ ततस्तुषोडशगुणःकैलासोऽस्तिशिवालयः ॥ २२ ॥ पार्वत्यास
हितःशंभुर्गजास्यस्कंदनंदिभिः ॥ यत्रतिष्ठतिविश्वेशःसकलःसपरःस्मृतः ॥२३॥ तस्यदेवस्यखेलोऽयंस्वलीलामूर्तिधारिणः ॥ सविश्वेशइतिख्यात
स्तस्याज्ञाकृदिदंजगत् ॥ २४ ॥ सर्वेषांशासकश्चासौतस्यशास्तानचापरः ॥ स्वयंसृजतिभूतानिस्वयंपातितथात्तिच ॥ २५ ॥ सर्वज्ञएकःसप्रोक्तःस्वे
च्छाधीनविचेष्टितः ॥ तस्यप्रवर्तकःकोपिनहिनैवनिवर्तकः ॥ २६ ॥

अमूर्तंयत्परंब्रह्मसमूर्तंश्रुतिचोदितम् ॥ सर्वव्यापिसदानित्यंसत्यंद्वैतविवर्जितम् ॥ २७ ॥ सर्वेभ्यःकारणेभ्यश्चपरात्परतरंपरम् ॥ आनंदंब्रह्मणोरूपंश्रुतयो
यत्प्रचक्षते ॥ २८ ॥ संविदंतेनयंवेदाविष्णुर्वेदनवैविधिः ॥ यतोवाचोनिवर्तंतेह्यप्राप्यमनसासह ॥ २९ ॥ स्वयंवेद्यःपरंज्योतिःसर्वस्यहृदिसंस्थितः ॥
योगिगम्यस्त्वनाख्येयोयःप्रमाणैकगोचरः ॥ ३० ॥ नानारूपोप्यरूपोयःसर्वगोपिनगोचरः ॥ अनंतोप्यंतकवपुःसर्ववित्कर्मवर्जितः ॥३१॥ तस्येदमै
श्वरंरूपंखंडचंद्रावतंसकम् ॥ तमालश्यामलगलंस्फुरद्भालविलोचनम् ॥ ३२ ॥ लसद्वामार्धनारीकंकृतशेषशुभांगदम् ॥ गंगातरंगसत्संगसदाधौ
तजटातटम् ॥ ३३ ॥ स्मरांगजरजःपुंजपूजितावयवोज्ज्वलम् ॥ विचित्रगात्रविधृतमहाव्यालविभूषणम् ॥ ३४ ॥ महोक्षस्यंदनगमंविरुताजगवायुधम् ॥
गजाजिनोत्तरासंगंदशार्धवदनंशुभम् ॥ ३५ ॥ उत्त्रासितमहामृत्युमहाबलगणावृतम् ॥ शरणार्थिकृतत्राणंनतनिर्वाणकारणम् ॥ मनोरथपथातीतं
वरदानपरायणम् ॥ ३६ ॥ तस्यतत्त्वस्वरूपस्यरूपातीतस्यभोद्विज ॥ परावरेरुद्ररूपेसर्वंव्याप्यावतिष्ठतः ॥ ३७ ॥ निराकारोपिसाकारःशिवएवहि
कारणम् ॥ मुक्तयेभुक्तयेवापिनशिवान्मोक्षदोपरः ॥ ३८ ॥ यथातेनाखिलंह्येतत्पार्वतीपतिसात्कृतम् ॥ इदंचराचरंसर्वंदृश्यादृश्यमरूपिणा ॥ ३९ ॥

तथामृडानीकांतेनविष्णुसादखिलंजगत् ॥ विधायक्रीड्यतेविप्रनित्यंस्वच्छंदलीलया ॥ ४० ॥ यथाशिवस्तथाविष्णुर्यथाविष्णुस्तथाशिवः ॥ अंतरं
शिवविष्ण्वोश्चमनागपिनविद्यते ॥ ४१ ॥ आहूयपूर्वंब्रह्मादीन्समस्तान्देवतागणान् ॥ विद्याधरोरगादींश्चसिद्धगंधर्वचारणान् ॥ ४२ ॥ निजसिंहा
सनसमंकृत्वासिंहासनंशुभम् ॥ उपवेश्यहरिंतत्रच्छत्रंकृत्वामनोहरम् ॥४३॥ श्लक्ष्णंकोटिशलाकंचविश्वकर्मविनिर्मितम् ॥ पांडुरंरत्नदंडंचस्थूलमुक्ता
वलंबितम् ॥ ४४ ॥ कलशेनविचित्रेणह्युपरिष्टाद्विराजितम् ॥ सहस्रयोजनायामंसर्वरत्नमयंशुभम् ॥४५॥ पट्टसूत्रमयैरम्यैश्चामरैश्चपरिष्कृतम् ॥ राजा
भिषेकयोग्यैश्चद्रव्यैःसर्वौषधादिभिः ॥ ४६ ॥ प्रत्यक्षतीर्थपाथोभिःपंचकुंभैर्मनोहरैः ॥ सिद्धार्थाक्षतदूर्वाभिर्मंत्रैःस्वयमुपस्थितैः ॥ ४७ ॥ देवानां
चतथर्षीणांसिद्धानांफणिनामपि ॥ आनीयमंगलकराःकन्याःषोडशषोडश ॥ ४८ ॥ वीणामृदंगाब्जभेरीमरुडिंडिमझर्झरैः ॥ आनकैःकांस्यतालाद्यै
र्वाद्यैर्ललितगायनैः ॥४९॥ ब्रह्मघोषमहारावैरापूरितनभोंगणे ॥ शुभेतिथौशुभेलग्नेताराचंद्रबलान्विते ॥५०॥ आबद्धमुकुटंरम्यंकृतकौतुकमंगलम् ॥
मृडानीकृतशृंगारंसुश्रियासुश्रियायुतम् ॥५१॥ अभिषिच्यमहेशेनस्वयंब्रह्मांडमंडपे ॥ दत्तंसमस्तमैश्वर्यंयन्निजंनान्यगामिच ॥ ५२ ॥ ततस्तुष्टावदेवे
शःप्रमथैःसहशार्ङ्गिणम् ॥ ब्रह्माणंलोककर्तारमुवाचचवचस्त्विदम् ॥ ५३ ॥ ममवंद्यस्त्वयंविष्णुःप्रणमत्वममुंहरिम् ॥ इत्युक्त्वाथस्वयंरुद्रोननामगरुड
ध्वजम् ॥ ५४ ॥ ततोगणेश्वरैःसर्वैर्ब्रह्मणाचमरुद्गणैः ॥ योगिभिःसनकाद्यैश्चसिद्धैर्देवर्षिभिस्तथा ॥ ५५ ॥ विद्याधरैःसगंधर्वैर्यक्षरक्षोप्सरोगणैः ॥
गुह्यकैश्चारणैर्भूतैःशेषवासुकितक्षकैः ॥ ५६ ॥ पतत्रिभिःकिंनरैश्चसर्वैःस्थावरजंगमैः ॥ ततोजयजयेत्युक्त्वानमोस्त्वितिनमोस्त्विति ॥ ५७ ॥ ततोह
रिर्महेशेनसंसदिद्युसदांतदा ॥ एतैर्महारवैरम्यैश्चानर्चिपरमार्चिषा ॥ ५८ ॥

त्वंकर्तासर्वभूतानांपाताहर्तात्वमेवच ॥ त्वमेवजगतांपूज्यस्त्वमेवजगदीश्वरः ॥ ५९ ॥ दाताधर्मार्थकामानांशास्तादुर्नयकारिणाम् ॥ अजेयस्त्वंचसं
ग्रामेममापिहिभविष्यसि ॥ ६० ॥ इच्छाशक्तिःक्रियाशक्तिर्ज्ञानशक्तिस्तथोत्तमा ॥ शक्तित्रयमिदंविष्णोगृहाणप्रापितंमया ॥ ६१ ॥ त्वद्वेष्टारोहरेनूनं
मयाशास्याःप्रयत्नतः ॥ त्वद्भक्तानांमयाविष्णोदेयंनिर्वाणमुत्तमम् ॥ ६२ ॥ मायांचापिगृहाणेमांदुष्प्रणोद्यांसुरासुरैः ॥ ययासंमोहितंविश्वमकिंचिज्ज्ञंभ
विष्यति ॥ ६३ ॥ वामबाहुर्मदीयस्त्वंदक्षिणोसौपितामहः ॥ अस्यापिहिविधेःपाताजनितापिभविष्यसि ॥ ६४ ॥ वैकुंठैश्वर्यमासाद्यहरेरित्थंहरः
स्वयम् ॥ कैलासेप्रमथैःसार्धंस्वैरंक्रीडत्युमापतिः ॥ ६५ ॥ तदाप्रभृतिदेवोसौशार्ङ्गधन्वागदाधरः ॥ त्रैलोक्यमखिलंशास्तिदानवांतकरोहरिः ॥६६॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इतितेकथिताविप्रलोकानांचपरिस्थितिः ॥ इदानींकथयिष्यावस्तवनिर्वाणकारणम् ॥ ६७ ॥ इदंतुपरमाख्यानंशृणुयाद्यःसमाहितः ॥ स्वर्लोकम
भिगम्याथकाश्यांनिर्वाणमाप्नुयात् ॥ ६८ ॥ यज्ञोत्सवेविवाहेचमंगलेष्वखिलेष्वपि ॥ राज्याभिषेकसमयेदेवस्थापनकर्मणि ॥ ६९ ॥ सर्वाधिकारदाने
पुनर्वेश्मप्रवेशने॥पठितव्यंप्रयत्नेनतत्कार्यपरिसिद्धये ॥७०॥ अपुत्रोलभतेपुत्रमधनोधनवान्भवेत् ॥ व्याधितोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् ॥७१॥
जप्यमेततप्रयत्नेनसततंमंगलार्थिना ॥ अमंगलानांशमनंहरनारायणप्रियम् ॥७२॥ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यांसंहितायां चतुर्थे
काशीखंडे पूर्वार्द्धे चतुर्भुजाभिषेकोनामत्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥ ॐ ॥ गणावूचतुः ॥ ॥ शिवशर्मन्नुदकंतेकथयावोनिशामय ॥
त्वमत्रवैष्णवेलोकेभुक्काभोगान्सुपुष्कलान् ॥ १ ॥ ब्रह्मणोवत्सरंपूर्णरममाणोऽप्सरोगणैः ॥ सुतीर्थमरणोपात्तपुण्यशेषेणत्रैपुनः ॥ २ ॥ भविष्यसिमही
पालोनगरेनंदिवर्धने ॥ राज्यंप्राप्यासपत्नंचसमृद्धंबलवाहनम् ॥३॥ कृष्टिभिर्हृष्टपुष्टैश्चरम्यहाटकभूषणैः ॥ संजुष्टमिष्टापूर्तानांधर्माणांनित्यकर्तृभिः॥४॥
सदासंपन्नसस्यंचसूर्वरक्षेत्रसंकुलम् ॥ सुदेशंसुप्रजंसुस्थंसुतृणंबहुगोधनम् ॥ ५ ॥ देवतायतनानांचराजिभिःपरिराजितम् ॥ सुयूपायत्रवेप्रायाःसुवित्त
र्द्धिविराजिताः ॥ ६ ॥ सुपुष्पकृत्रिमोद्यानाःससदाफलपादपाः ॥ सपद्मिनीककासारायत्रराजंतिभूमयः ॥ ७ ॥ सदंभानिम्नगागर्जिन्यत्रक्षनसाक्ष
चित् ॥ कुलान्येवकुलीनानिनचान्यायधनानिच ॥ ८ ॥ विश्रमोयत्रनारीपुनर्विद्वत्सुचकर्हिचित् ॥ नद्यःकुटिलगामिन्योनयत्रविषयेप्रजाः ॥ ९ ॥
तमोयुक्ताःक्षपायत्रबहुलेपुनमानवाः ॥ रजोयुजःस्त्रियोयत्रनधर्मबहुलानराः ॥ १० ॥ धनैरनंधोयत्रास्तिमनोनैवचभोजनम् ॥ अनयःस्यंदनंयत्रनचवै
राजपूरुषः ॥ ११ ॥ दंडःपरशुकुद्दालवालव्यजनराजिषु ॥ आतपत्रेषुनान्यत्रकचित्कोधापराधजः ॥१२॥ अन्यत्राशिकवृंदेभ्यःक्वचिन्नपरिदेवनम् ॥
आक्षिकाएवदृश्यंतेयत्रपाशकपाणयः ॥ १३ ॥ जाड्यवार्ताजलेष्वेवस्त्रीमध्यएवदुर्बलाः ॥ कठोरहृदयायत्रसीमंतिन्योनमानवाः ॥ १४ ॥ औपथेष्वे
वयत्रास्तिकुब्जयोगोनमानवे ॥ वेधोप्यंतःसुरद्रुपुशूलंमूर्तिकरेषुवै ॥ १५ ॥
कंपःसात्त्विकभावोत्थोनभयात्कापिकस्यचित् ॥ संज्वरःकामजोयत्रदारिद्र्यंकलुपस्यच ॥ १६ ॥ दुर्लभत्वंसदाकस्यसुकृतेनचवस्तुनः ॥
इभाएवप्रमत्तावैयुद्धंवीच्योर्जलाशये ॥ १७ ॥ दानहानिर्गजेष्वेवद्रुमेष्वेवहिकंटकाः ॥ जनेष्वेवविहाराहिनकस्यचिदुरःस्थली ॥ १८ ॥ वाणेषुगुणंवि
श्लेषोवंधोक्तिःपुस्तकेदृढा ॥ वेहत्यागःसदैवास्तियत्रपाशुपतेजने ॥ १९ ॥ दंडवार्तासदायत्रकृतसंन्यासकर्मणाम् ॥ मार्गणाश्चापकेष्वेवभिक्षुका
ब्रह्मचारिणः ॥ २० ॥ यत्रसपगकापएवदृश्यंतेमलधारिणः ॥ प्रायोमधुव्रतापवयत्रचंचलवृत्तयः ॥ २१ ॥ इत्यादिगुणवद्देशेत्वयिराज्यंप्रशासति ॥
धर्मेणराजधर्मज्ञशौर्यार्यगुणशालिनि ॥ २२ ॥
सौभाग्यभाजिरूपाब्धेशौर्यौदार्यगुणान्विते ॥ सीमंतिनीनांरम्याणांलावण्यार्जितमुश्रियाम् ॥ २३ ॥ राज्ञीनामयुतंभाविकुमाराणांशतत्रयम् ॥
वृद्धकालइतिख्यातउग्रःपरपुरंजयः ॥ २४ ॥ विजितानेकसमरःश्रीसंतर्पितमार्गणः ॥ अनेकगुणसंपूर्णःपूर्णचंद्रनिभद्युतिः ॥ २५ ॥ संतता
वभृथक्लिन्नमूर्धजःक्षितिपर्पभः ॥ प्रजापालनसंपन्नःकोशप्रीणितभूसुरः ॥ २६ ॥ पदारविंदंगौर्विंदद्दध्यायन्नतंद्रितः ॥ वासुदेवकथालापप
रिक्षिप्तदिनक्षपः ॥ २७ ॥ कदाचिदुपविष्टःसन्मध्येराजसभंद्विज ॥ दूरात्कार्पटिकैर्दंडोवाराणस्याःसमागतैः ॥ २८ ॥ तत्कर्मभाविसदृशै
स्तदात्वमभिनंदितः ॥ तैःसर्वैराजशार्दूलस्वाशीर्वादैरनेकशः ॥ २९ ॥ श्रीमद्भिश्चेश्वरोदेवोविश्वेषांजगतांगुरुः ॥ काशीनाथस्तुतेकुर्यात्कुमते
रपवर्जनम् ॥ ३० ॥ नैःश्रेयसींचसंपत्तियोदेयात्स्मरणादपि ॥ काशीनाथःसतेदिश्याज्ज्ञानंमलविवर्जितम् ॥ ३१ ॥ येनपुण्येनतेप्राप्तं
राज्यंप्राज्यमकंटकम् ॥ तत्पुण्यशेषतोभूयाद्विश्वनाथेमतिस्तव ॥ ३२ ॥
यस्यप्रसादात्सुलभमायुःपुत्रांबरांगनाः ॥ समृद्धयःस्वर्गमोक्षौसविश्वेशःप्रसीदतु ॥ ३३ ॥ नामश्रवणमात्रेणयस्यविश्वेशितुर्विभोः ॥ महापातकविच्छेदः
सविश्वेशोऽस्तुतेहृदि ॥ ३४ ॥ त्वंवृद्धकालोभूपालःश्रुत्वेत्याशीःपरंपराम् ॥ स्मरिष्यसीदंवृत्तांतंपुलकांकवपुस्तदा ॥ ३५ ॥ आकारगोपनंकृत्वातेभ्यो
दत्त्वाधनंबहु ॥ सुमुहूर्तमनुप्राप्यसुतेराज्यंविधायच ॥ ३६ ॥ अनंगलेखयाराज्ञायाततःकाशींगमिष्यसि ॥ दत्त्वादानानिभूरीणिप्रीणयित्वाऽर्थिनोजनान्
॥ ३७ ॥ स्वनाम्नातत्रसंस्थाप्यलिंगंनिर्वाणकारणम् ॥ प्रासादंतत्रकृत्वोच्चैस्तदग्रेकूपमुत्तमम् ॥ ३८ ॥ विधायविधिवत्तत्रकलशारोपणादिकम् ॥
मणिमाणिक्यचयैपयदुकूलेभाश्वगोधनम् ॥ ३९ ॥ महाध्वजपताकाश्चच्छत्रचामरदर्पणम् ॥ देवोपकरणंभूरिविश्राण्यश्रमवर्जितः ॥ ४० ॥ ततो
पवासनियमैःपरिक्षीणकलेवरः ॥ मध्याह्ननिर्जनेतत्रद्रक्ष्यस्येकंतपोधनम् ॥ ४१ ॥ अतीवजीर्णवपुपंपरिपिंगजटान्वितम् ॥ मूर्तिमंतमिवप्रांशुंधर्म
जनमनोहरम् ॥ ४२ ॥ भारंशरीरयष्टेश्चदृढयष्ट्यांसमर्पयंच ॥ गर्भागाराद्विनिष्क्रम्याभ्यायांतंरंगमंडपे ॥४३॥ उपविश्यसमीपेतंप्रक्ष्यत्येवमनुक्रमात् ॥
कोसित्वंकिमिहासित्वंद्वितीयइवकस्त्वयम् ॥ ४४ ॥ प्रासादःकारितःकेनजानास्येपततोवद ॥ अस्यलिंगस्यकिंनामप्रायोजानेनशार्थकात् ॥ ४५ ॥
पृष्टस्त्वमितितेनाथतदावृद्धतपस्विना ॥ कथयिष्यस्यहंराजावृद्धकालइतिश्रुतः ॥ ४६ ॥ दाक्षिणात्यइहप्राप्तस्त्वेतयासहकांतया ॥ ध्यायामिलिंगमे
तच्चप्रार्थयामिनकिंचन ॥ ४७ ॥
प्रासादस्यास्यजटिलस्त्वयंकारयिताशिवः ॥ विशंपतोऽस्यलिंगस्यनामनोवेद्मिनिश्चितम् ॥ ४८ ॥ इतिश्रुत्वानरपतेर्वाक्यंप्राहजटाधरः ॥ सत्यमुक्तंत्व
येकंहिलिंगनामनवेत्सियत् ॥ ४९ ॥ पश्येयंत्वामहंनित्यमुपविष्टंमुनिश्चलम् ॥ श्रुतोभविष्यतितवप्रासादोयेनकारितः ॥ ५० ॥ ममाग्रेतत्समा
श्वयदिजानासितत्त्वतः ॥ आकर्ण्यंतिवचस्तस्यपुनःप्राहभवानिति ॥ ५१ ॥ कर्ताकारयिताशंभुःकिमतथ्यंब्रवीम्यहम् ॥ अथवार्चितयाकिंमेतप
स्विन्नयाविभो ॥ ५२ ॥ इतित्वयिस्थितेजोपंसपुनर्वृद्धतापसः ॥ पिपासुरस्मिपानीयमानीयाशुप्रयच्छम ॥ ५३ ॥ इतितेनचनुन्नस्त्वंवार्यान।
यच्चकृपनः ॥ पाययिष्यसितंवृद्धंतापसंतत्क्षणाच्चसः ॥ ५४ ॥ तदंबुपानतोभूयात्सुपार्वणशाश्रमः ॥ तरुणोरूपसंपन्नःकोशोन्मुक्तोरगोयथा ॥ ५५ ॥
जाताश्चर्येणभवतापुनरेवाभ्यभाषिसः ॥ कःप्रभावोहिभगवन्नेपयेनभवान्पुनः ॥ ५६ ॥ परित्यज्यात्रजरसंनवोभ्राजसिसांप्रतम् ॥ अस्तिचेदवकाशस्ते
ततोब्रूहिनपोधन ॥ ५७ ॥ तपोधनउवाच ॥ ॥ वृद्धकालक्षितिपतेजानेत्वांसुमहामते ॥ इमामपिचजानेऽहंतवपत्नींपतिव्रताम् ॥ ५८ ॥ जन्मनोऽस्मा
दियंराजन्नासीद्विप्रस्यकन्यका ॥ दुर्वसोर्वेदवपुषःशुभाचाराशुभानना ॥ ५९ ॥ तेनदत्ताविवाहार्थंनेश्वायमहात्मने ॥ सचकालवशंप्राप्तोनेश्वोऽप्राप्तयौ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धनः ॥ ६० ॥ वैधव्यंपालयंत्येषामृताऽवंत्यांशुभव्रता ॥ तेनपुण्येनसंजातापांड्यस्यनृपतेःसुता ॥ ६१ ॥ परिणीतात्वयाराजन्पतिव्रतरतासदा ॥ त्वयासहेहसंप्राप्तामुक्तिंप्राप्स्यत्यनुत्तमाम् ॥ ६२ ॥ अयोध्यायामथावंत्यांमथुरायामथापिवा ॥ द्वारवत्यांचकांच्यांवामायापुर्यामथोनृप ॥ ६३ ॥ अपिपातकिनोयेचकालेननिधनंगताः ॥ तेहिस्वर्गादिहागत्यकाश्यांमोक्षमवाप्नुयुः ॥ ६४ ॥ अवैमित्वामपिनृपद्विजोऽभूःपूर्वजन्मनि ॥ माथुरः शिवशर्माख्योमायापुर्यांभवान्मृतः ॥ ६५ ॥

तत्पुण्यात्प्राप्यवैकुंठभुक्त्वाभोगान्मनोरमान् ॥ तत्पुण्यशेषात्क्षितिपोजातस्त्वंनंदिवर्धने ॥ ६६ ॥ वृद्धकालावनीपालतेनैवसुकृतेनच ॥ मोक्षक्षेत्रमिदं प्राप्तोमुक्तिंप्राप्स्यस्यनुत्तमाम् ॥ ६७ ॥ अन्यच्चशृणुराजेंद्रत्वयायत्समुदीरितम् ॥ कर्ताकारयिताशंभुःप्रासादस्येतितत्स्फुटम् ॥ ६८ ॥ सुकृतंनै वसततमाख्यातव्यंकदाचन ॥ कृतंमयेतिकथनात्पुण्यंक्षयतितत्क्षणात् ॥ ६९ ॥ तस्मात्सर्वप्रयत्नेनगोपनीयंनिधानवत् ॥ सुकृतंकीर्तनाद्व्यर्थंभवे द्भस्मद्रुतंतथा ॥ ७० ॥ निश्चितंविश्वनाथेनप्रेरितेनत्वयाऽनघ ॥ कृतंहिकृतकृत्येनप्रासादादिहवेद्म्यहम् ॥ ७१ ॥ वृद्धकालेश्वरंनामलिंगमेतन्महीपते ॥ जानीह्यनादिसंसिद्धंनिमित्तंकिंतुवैभवान् ॥ ७२ ॥ दर्शनात्स्पर्शनात्तस्यपूजनाच्छ्रवणान्नतेः ॥ वृद्धकालेशलिंगस्यसर्वंप्राप्नोतिवांछितम् ॥ ७३ ॥ कूपःकालोदकोनामजराव्याधिविघातकृत् ॥ यदीयजलपानेनमातुःस्तन्यमपानवान् ॥ ७४ ॥ कृतकूपोदकस्नानःकृतैतल्लिंगपूजनः ॥ वर्षेणसि द्धिमाप्नोतिमनोभिलषितांनरः ॥ ७५ ॥ नकुष्ठंनचविस्फोटानरंघानविचर्चिका ॥ पीतात्स्पृष्टात्प्रतिष्ठंतिकफःकालतमोदकात् ॥ ७६ ॥ नाग्निमांद्यंनै वशूलंनमेहोनप्रवाहिका ॥ नमत्रकृच्छ्रंनोपामापानीयस्यास्यसेवनात् ॥ ७७ ॥ भूतज्वराश्चयेकेचिद्येकेचिद्विषमज्वराः ॥ तेक्षिप्रमुपशाम्यंतिह्ये तत्कूपोदसेवनात् ॥ ७८ ॥ तवाग्रतोममजरापलितंचयथाविधि ॥ एतत्कूपोदपानेनक्षणान्नष्टंनवोऽभवम् ॥ ७९ ॥ वृद्धकालेश्वरेलिंगेसेवितेनदरि द्रता ॥ नोपसर्गानवारोगानपापंनाघजंफलम् ॥ ८० ॥ उत्तरेकृत्तिवासस्यवाराणस्यांप्रयत्नतः ॥ वृद्धकालेश्वरंलिंगंद्रष्टव्यंसिद्धिकामुकैः ॥ ८१ ॥

इत्युक्त्वातंमहीपालंहस्तेधृत्वातपोधनः ॥ सानंगलेखाराज्ञीकंतस्मिँल्लिंगेलयंययौ ॥ ८२ ॥ महाकालमहाकालमहाकालेतिकीर्तनात् ॥ शतधामुच्यते पापैर्नात्रकार्याविचारणा ॥ ८३ ॥ इत्थंभवित्रीतेमुक्तिःकैटभारातिदर्शनात् ॥ भोगान्भुक्त्वाबहुविधान्वैकुंठनगरेशुभे ॥ ८४ ॥ इतिसंहृष्टतनूरुहःसवि प्रोभगवत्तद्गणवक्त्रतोनिशम्य ॥ स्वमुदर्कमथार्ककोटिरम्यंहरिलोकंपरिलोकयांचकार ॥ ८५ ॥ ॥ मैत्रावरुणिरुवाच ॥ ॥ लोपामुद्रेसविप्रेंद्रोभोगान्भु क्त्वामनोरमान् ॥ मायापुर्यांकृतप्राणत्यागपुण्यबलेनच ॥ ८६ ॥ वैकुंठलोकादागत्यपत्तनेनंदिवर्धने ॥ भौमानिभुक्त्वासौख्यानिपुत्रानुत्पाद्यसुंदरान् ॥ ॥ ८७ ॥ तेषुराज्यंविनिक्षिप्यप्राप्यवाराणसींपुरीम् ॥ विश्वेश्वरंसमाराध्यनिर्वाणपदमीयिवान् ॥ ८८ ॥ एतत्पुण्यतमाख्यानंविप्रस्यशिवशर्मणः ॥ श्रुत्वापापविनिर्मुक्तोज्ञानंपरममृच्छति ॥ ॥ ८९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे शिवशर्मनिर्वा णप्रापणंनामचतुर्विंशोध्यायः ॥ २४ ॥ ॥ व्यासउवाच ॥ ॥ शृणुसूतप्रवक्ष्यामिकथांकलशजन्मनः ॥ यामाकर्ण्यनरोभूयाद्विरजाज्ञानभाजनम् ॥ १ ॥ गिरिंप्रदक्षिणीकृत्यश्रीसंज्ञंकलशोद्भवः ॥ सपत्नीकोददर्शाथरम्यंस्कंदवनंमहत् ॥ २ ॥ सर्वर्तुकुसुमाढ्यंचरसवत्फलपादपम् ॥ सुसेव्यकंद मूलाढ्यंसुवल्कलमहीरुहम् ॥ ३ ॥ निवीतश्वापदगणंससरित्पल्वलावृतम् ॥ स्वच्छगंभीरकासारंसारंसर्वभुवःपरम् ॥ ४ ॥ नानापतत्रिसंघुष्टंनानामु निजनोषितम् ॥ तपःसंकेतनिलयमिवैकंसंपदांपदम् ॥ ५ ॥ लोहितोनामतत्रास्तिगिरिःस्वर्णगिरिप्रभः ॥ सुकंदरप्रस्रवणःस्वसानुशिखरप्रभः ॥ ६ ॥

कैलासस्यैकशकलंकर्मभूमाविहागतम् ॥ तपस्तप्तुमिवप्रोच्चैर्नानाश्चर्यसमन्वितम् ॥ ७ ॥ तत्राद्राक्षीन्मुनिश्रेष्ठोऽगस्त्यःसाक्षात्षडाननम् ॥ प्रणम्यदंड वद्भूमौसपत्नीकोमहातपाः ॥ ८ ॥ तुष्टावगिरिजासूनुंसूक्तैःश्रुतिसमुद्भवैः ॥ तथास्वकृतयास्तुत्याप्रबद्धकरसंपुटः ॥ ९ ॥ अगस्तिरुवाच ॥ ॥ नमो स्तुवृंदारकवृंदवंद्यपादारविंदायसुधाकराय ॥ षडाननायामितविक्रमायगौरीहृदानंदसमुद्भवाय ॥ १० ॥ नमोस्तुतुभ्यंप्रणतार्तिहंत्रेकर्त्रेसमस्तस्यमनोरथा नाम् ॥ दात्रेरथानांपरतारकस्यहंत्रेप्रचंडासुरतारकस्य ॥ ११ ॥ अमूर्तमूर्तायसहस्रमूर्तयेगुणायगुण्यायपरात्पराय ॥ अपारपारायपरापरायनमो स्तुतुभ्यंशिखिवाहनाय ॥ १२ ॥ नमोस्तुतेब्रह्मविदांवरायदिगंबरायांबरसंस्थिताय ॥ हिरण्यवर्णायहिरण्यबाहवेनमोहिरण्यायहिरण्यरेतसे ॥ १३ ॥

तपःस्वरूपायतपोधनायतपःफलानांप्रतिपादकाय ॥ सदाकुमारायहिमारमारिणेतृणीकृतैश्वर्यविरागिणेनमः ॥ १४ ॥ नमोस्तुतुभ्यंशरजन्मनेविभो प्रभातसूर्यारुणदंतपंक्तये ॥ बालायचाबालपराक्रमायपाण्मातुरायालमनातुराय ॥ १५ ॥ मीढुष्टमायोत्तरमीढुषेनमोनमोगणानांपतयेगणाय ॥ नमोस्तुतेजन्मजरातिगायनमोविशाखायसुशक्तिपाणये ॥ १६ ॥ सर्वस्यनाथस्यकुमारकायक्रौंचारयेतारकमारकाय ॥ स्वाहेयगांगेयचकार्तिकेयशै वेयतुभ्यंसततंनमोऽस्तु ॥ १७ ॥ इत्थंपरिष्टुत्यसकार्तिकेयंनमोनमस्त्वित्यभिभाषमाणः ॥ द्विस्त्रिःपरिक्रम्यपुरोविवेशस्थितोमुनीशोपविशेतिचोक्तः ॥ १८ ॥ ॥ कार्तिकेयउवाच ॥ ॥ क्षेमोस्तिकुंभजमुनेत्रिदशैकसहायकृत् ॥ जानेत्वामिहसंप्राप्तंतथाविंध्याचलोन्नतिम् ॥ १९ ॥ अविमुक्तेमहाक्षे त्रेक्षेमंत्र्यक्षेणरक्षिते ॥ यत्रक्षीणायुषांसाक्षाद्विरूपाक्षोऽस्तिमोक्षदः ॥ २० ॥

भूर्भुवःस्वस्तलेवापिनपातालतलेमलम् ॥ नोर्ध्वलोकेमयादृष्टंतादृक्क्षेत्रंक्वचिन्मुने ॥ २१ ॥ अहमेकचरोप्यत्रतत्क्षेत्रप्राप्तयेमुने ॥ तप्येतपांसिनाद्या पिफलेयुर्मेमनोरथाः ॥ २२ ॥ नतत्पुण्यैर्नतद्दानैर्नतपोभिर्नतज्जपैः ॥ नलभ्यंविविधैर्यज्ञैर्लभ्यमैशादनुग्रहात् ॥ २३ ॥ ईश्वरानुग्रहादेवकाशीवासः सुदुर्लभः ॥ सुलभःस्यान्मुनेनूनंनवैसुकृतकोटिभिः ॥ २४ ॥ अन्यैवकाचित्सासृष्टिर्विधातुर्याऽतिरेकिणी ॥ नतत्क्षेत्रगुणान्वक्तुमीश्वरोऽपीश्वरो यतः ॥ २५ ॥ अहोमतेःसुदौर्बल्यमहोभाग्यस्यदौर्विधम् ॥ अहोमोहस्यमाहात्म्यंयत्काशीहनसेव्यते ॥ २६ ॥ शरीरंजीर्यतेनित्यंसंजीर्यतींद्रियाण्यपि ॥ आयुर्मृगोमृगयुनाकृतलक्ष्योहिमृत्युना ॥ २७ ॥ सापदंसंपदंज्ञात्वासापायंकायमुच्चकैः ॥ चपलाचपलंचायुर्मत्वाकाशींसमाश्रयेत् ॥ २८ ॥ यावन्नैत्यायुषश्चांतस्तावत्काशीनमुच्यते ॥ कालःकलालवस्यापिसंख्यातुंनैवविस्मरेत् ॥ २९ ॥ जरानिकटनिक्षिप्ताबाधंतेव्याधयोभृशम् ॥ तथा पिदेहोनानेहोनाहोकाशींसमीहते ॥ ३० ॥ तीर्थस्नानेनजप्येनपरोपकरणोक्तिभिः ॥ विनार्थंलभ्यतेधर्मोधर्मादर्थःस्वयंभवेत् ॥ ३१ ॥ विनैवार्थार्जनो पायंधर्मादर्थोभवेद्ध्रुवम् ॥ अतोऽर्थचिंतामुत्सृज्यधर्ममेकंसमाश्रयेत् ॥ ३२ ॥ धर्मादर्थोऽर्थतःकामःकामात्सर्वसुखोदयः ॥ स्वर्गोपिसुलभोधर्मात्काश्ये कादुर्लभापरम् ॥ ३३ ॥ उपायत्रयमेवात्रस्थाणुर्निर्वाणकारणम् ॥ शर्वाण्यग्रेबभाणाद्धापरिनिर्णीयसर्वतः ॥ ३४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पूर्वपाशुपतोयोगस्ततस्तीर्थसितासितम् ॥ ततोप्येकमनायासमविमुक्तंविमुक्तिदम् ॥ ३५ ॥ श्रीशैलहिमशैलाद्यानानान्यायतनानिच ॥ त्रिदंडधारणं चापिसंन्यासःसर्वकर्मणाम् ॥ ३६ ॥तपांसिनानारूपाणित्रतानिनियमायमाः ॥ सिंधूनामपिसंभेदाअरण्यानिबहून्यपि ॥ ३७ ॥ मानसान्यपिभोमा निधारातीर्थादिकानिच ॥ ऊपराश्चापिपीठानिह्यच्छिन्नाम्नायपाठनम् ॥ ३८ ॥ जपश्चापिमनूनांचतथाऽग्निहवनानिच ॥ दानानिनानाकृतवेदेवनो पासनानिच ॥ ३९ ॥ त्रिरात्रंपंचरात्राणिसांख्ययोगादयस्तथा ॥ विष्णोराराधनंश्रेष्ठंमुक्तयेऽभिहितंकिल ॥ ४० ॥ पुर्यश्चापिसप्तसंख्याताभूतजंतुविमु क्तिदाः ॥ कैवल्यसाधनानीहभवंत्येवविनिश्चितम् ॥ ४१ ॥ एतानियानिप्रोक्तानिकाशीप्राप्तिकराणिच ॥ प्राप्यकाशींभवेन्मुक्तोजंतुर्नान्यत्रकुत्र चित् ॥ ४२ ॥ अतएवहितत्क्षेत्रंपवित्रमतिचित्रकृत् ॥ विश्वेशितुःप्रियनित्यंविष्वग्ब्रह्मांडमंडले ॥ ४३ ॥ इदमेवहितत्क्षेत्रंकुशलप्रश्नकारणम् ॥ एह्येहिदेहिमेस्पर्शंनिजगात्रस्यसुव्रत ॥ ४४ ॥

अपिकाश्याःसमागच्छत्स्पर्शवत्स्पर्शइष्यते ॥ मयात्रांतष्टतानित्यंकिंतुत्वंततआगतः ॥ ४५ ॥ त्रिरात्रमपियेकाश्यांवसंतिनियतेंद्रियाः ॥ तेषांपुनं तिनियतंस्पृष्टाश्वरणरेणवः ॥ ४६ ॥ त्वंतुतत्रकृतावासःकृतपुण्यमहोचयः ॥ उत्तरप्रवहान्नानजातपिंगलमूर्धजः ॥ ४७ ॥ तत्रतत्रतुयत्कुंडमगस्त्ती श्वरसंनिधौ ॥ तत्रस्नात्वाचपीत्वाचकृतसर्वोदककियः ॥ ४८ ॥ पितॄन्पिंडैःसमभ्यर्च्यश्रद्धाश्राद्धविधानतः ॥ कृत्यकृत्योभवेन्मंतुर्वाराणस्याःफलं लभेत् ॥ ४९ ॥इत्युक्तासर्वगात्राणिस्पृष्ट्वाकुंभोद्भवस्यच ॥ स्कंदोऽमृतसरोवारिविगाह्यमुखमाप्तवान् ॥५०॥ जयविश्वेशनेत्राणिविनिमील्यत्वदन्नपि ॥ ततःकिंचित्क्षणंदध्यौगुहःस्थाणुमुनिश्चलः ॥ ५१ ॥ स्कंदेविसर्जितध्यानेसुप्रसन्नमनोमुखे ॥ प्रतीक्ष्यत्वागवसरंपप्रच्छाथमुनिर्गुहम् ॥ ५२ ॥ ॥ अगस्तिरुवाच ॥ ॥ स्वामिन्यथाभगवताभगवत्यैपुराऽकथि ॥ वाराणस्यास्तुमहिमाहिमशैलसुतुष्टया ॥ ५३ ॥ त्वयायथासमाकर्णितदुत्संग निवासिना ॥ तथाकथयषड्वक्त्रतत्क्षेत्रंमेऽतिरोचते ॥ ५४ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमेत्रावरुणेयथाभगवताऽकथि ॥ तत्क्षेत्रस्याविमुक्त स्यममप्रमातुःपुरःपुरा ॥ ५५ ॥ श्रुतंचयत्तदुत्संगेस्थितेनस्थिरचेतसा ॥ माहात्म्यंतच्छृणुमुनेकथ्यमानंमयाऽनघ ॥ ५६ ॥ गुह्यानांपरमंगुह्यमविमुक्त मिहेरितम् ॥ तत्रसंनिहितासिद्धिस्तत्रनित्यंस्थितोविभुः ॥ ५७ ॥ भूर्लोकेनैवसंलग्नंतत्क्षेत्रंत्वंतरिक्षगम् ॥ अयोगिनोनवीक्षंतेपश्यंत्येवचयोगिनः ॥ ॥ ५८ ॥ यस्तत्रनिवसेद्विप्रसंयतात्मासमाहितः ॥ त्रिकालमपिभुंजानोवायुभक्षसमोभवेत् ॥ ५९ ॥ निमेषमात्रमपियोह्यविमुक्तेऽतिभक्तिभाक् ॥ ब्रह्मचर्यसमायुक्तेनतप्तंमहत्तपः ॥ ६० ॥

यस्तुमासंवसेद्धीरोलब्धाहारोजितेंद्रियः ॥ सर्वंतेनव्रतंचीर्णंदिव्यंपाशुपतंभवेत् ॥ ६१ ॥ संवत्सरंवसंस्तत्राजितक्रोधोजितेंद्रियः ॥ अपरस्त्वविपुर्णा गःपरान्नपरिवर्जकः ॥ ६२ ॥ परापवादरहितःकिंचिदानपरायणः ॥ समाःसहस्रमन्यत्रतेनतप्तंमहत्तपः ॥ ६३ ॥ यावज्जीवंवसेद्यस्तुक्षेत्रेमाहात्म्य विन्नरः ॥ जन्ममृत्युभयंहित्वासयातिपरमांगतिम् ॥ ६४ ॥नयोगैर्यागतिर्लभ्याज्ञान्मांतरशतैरपि ॥ अन्यत्रहेलयासाऽत्रलभ्येशस्यप्रसादतः ॥६५॥ ब्रह्महायोऽभिगच्छेद्धेदेवाद्वाराणसींपुरीम् ॥ तस्यक्षेत्रस्यमाहात्म्याद्ब्रह्महत्यानिवर्तते ॥ ६६ ॥ आदेहपतनंयावद्योविमुक्तंनसुंचति ॥ नकेवलंब्रह्म हत्याप्रकृतिश्चनिवर्तते ॥ ६७ ॥ अनन्यमानसोभूत्वातत्क्षेत्रंयोनसुंचति ॥ समुंचतिजरामृत्युंगर्भवासंसुदुःसहम् ॥ ६८ ॥ अविमुक्तंनिषेवेतदेवर्षिगण सेवितम् ॥ यदीच्छेन्मानवोधीमान्नपुनर्जननंभुवि ॥ ६९ ॥ अविमुक्तंनमुंचेतसंसारभयमोचनम् ॥ प्राप्यविश्वेश्वरंदेवंनसभूयोऽभिजायते ॥ ७० ॥ कृत्वापापसहस्राणिपिशाचत्वंवरत्विह ॥ नतुकृतुशतप्राप्यःस्वर्गःकाशापुरींविना ॥ ७१ ॥ अंतकालेमनुष्याणांभिद्यमानेपुमर्मसु ॥ वातेनातुद्यमा नानांस्मृतिर्नैवोपजायते ॥ ७२ ॥ तत्रोत्क्रमणकालेतुसाक्षाद्विश्वेश्वरःस्वयम् ॥ व्याचष्टेतारकंब्रह्मयेनासोतन्मयोभवेत् ॥ ७३ ॥ अशाश्वतमिदंज्ञात्वा मानुष्यंबहुकिल्विषम् ॥ अविमुक्तंनिषेवेतसंसारभयनाशनम् ॥ ७४ ॥ विघ्नैरालोड्यमानोपियोऽविमुक्तंनमुंचति ॥ नैःश्रेयसींश्रियंप्राप्यदुःखांतं सोधिगच्छति ॥ ७५ ॥ महापापौघशमनींपुण्योपचयकारिणीम् ॥ मुक्तिमुक्तिप्रदामंतेकोनकाशींसुधीःश्रयेत् ॥ ७६ ॥ एवंज्ञात्वानुमेधावीना विमुक्तंत्यजेन्नरः ॥ अविमुक्तप्रसादेनविमुक्तोजायतेयतः ॥ ७७ ॥ अविमुक्तस्यमाहात्म्यंपङ्भिर्वक्त्रैःकथमया ॥ वक्तुंशक्यंनशक्नोनिसहस्वास्योपि यत्परम् ॥ ७८ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे स्कंदागस्त्यदर्शनंनामपंचविंशतितमोऽ ध्यायः ॥ २५ ॥ ॥ अगस्तिरुवाच ॥ ॥ प्रसन्नोसियदिस्कंदमयिप्रीतिरनुत्तमा ॥ तत्समाचक्ष्वभगवंश्चिरंयन्मेहृदिस्थितम् ॥ १ ॥ अवि मुक्तमिदंक्षेत्रंकदाभ्यभुवस्तले ॥ परांप्रथितिमापन्नंमोक्षदंचाभवत्कथम् ॥ २ ॥

कथमेषात्रिलोकीड्यागीयतेमणिकर्णिका ॥ तत्रासीत्किंपुरास्वामिन्यदानामरनिम्नगा ॥ ३ ॥ वाराणसीतिकाशीतिरुद्रावासइतिप्रभो ॥ अवापनामधे यानिकथमेतानिसापुरी ॥ आनंदकाननंरम्यमविमुक्तमनंतरम् ॥ ४ ॥ महाश्मशानइतिचकथंख्यातंशिखिध्वज ॥ एतदिच्छाम्यहंश्रोतुंसंदेहमेऽपनो दय ॥ ५ ॥ ॥ स्कंदउवाच ॥ प्रश्नभारोयमतुलस्त्वयायःसमुदाहृतः ॥ कुंभयोनेऽप्रमेवार्थमप्राक्षीदंबिकाहरम् ॥ ६ ॥ यथाचदेवदेवेनसर्वज्ञेननिवे दितम् ॥ जगन्मातुःपुरस्ताच्चतथैवकथयामिते ॥ ७ ॥ महाप्रलयकालेचनष्टेस्थावरजंगमे ॥ आसीत्तमोमयंसर्वमनर्कमहतारकम् ॥ ८ ॥ अचं द्रमनहोरात्रमनग्न्यनिलभूतलम् ॥ अप्रधानंवियच्छून्यमन्यतेजोविवर्धितम् ॥ ९ ॥ द्रष्टृदृश्यविहीनंचशब्दस्पर्शसमुज्झितम् ॥ व्यपेतगंधरूपं चरसत्यक्तमदिङ्मुखम् ॥ १० ॥ इत्थंसत्यंयतमसिमूचीभेद्येनिरंतरे ॥ तत्सद्ब्रह्मेतियच्छ्रुत्यासदेकंप्रतिपाद्यते ॥ ११ ॥ अमनोगोचरोवाचांविषयं नकथंचन ॥ अनामरूपवर्णंचनस्थूलंनचयत्कृशम् ॥ १२ ॥

अह्रस्वदीर्घमलघुगुरुत्वपरिवर्जितम् ॥ नयत्रोपचयःकाश्चत्तथाचापचयोपित्र ॥ १३ ॥ अभिधत्तेसत्वकितंयदस्तीतिश्रुतिःपुनः ॥ सत्यंज्ञानमनंतं चयदानंदंपरंमहः ॥ १४ ॥ अप्रमेयमनाधारमविकारमनाकृति ॥ निर्गुणंयोगिगम्यंचत्वंव्याप्येककारणम् ॥ १५ ॥ निर्विकल्पंनिरारंभंनिर्मायं निरुपद्रवम् ॥ यस्येत्थंसंविकल्प्यंतेसंज्ञाःसंज्ञोदितस्यवै ॥ १६ ॥तस्यैकलस्यचरतोद्वितीयेच्छामवत्किल ॥ अमूर्तेनस्वमूर्तिश्चतेनाकल्पिस्वलीलया ॥ १७ ॥ सर्वैश्वर्यगुणोपेतासर्वज्ञानमयीशुभा ॥ सर्वगासर्वरूपाचसर्वदृक्सर्वकारिणी ॥ १८ ॥ सर्वैकनंद्यासर्वाद्यासर्ववेदासर्वसंकृतिः ॥ परिकल्प्येति तांमूर्तिमीश्वरीशुद्धरूपिणीम् ॥ १९ ॥ अंतर्दधेपराख्यंयद्ब्रह्मसर्वगमव्ययम् ॥ २० ॥ अमूर्तंयत्पराख्यंवैतस्यमूर्तिरहंप्रिये ॥ अर्वाचीनपराचीनाईश्वरं मांजगुर्बुधाः ॥२१॥ ततस्तदैकलेनापिस्वैरंविहरतामया ॥ स्वविग्रहात्स्वयंसृष्टास्वशरीरानपायिनी ॥ २२ ॥ प्रधानंप्रकृतित्वांचमायांगुणवतींपराम् ॥ बुद्धितत्त्वस्यजननीमाहुर्विकृतिवर्जिताम् ॥ २३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

युगपच्चत्वयाशक्त्यासाकंकालस्वरूपिणा ॥ मयाऽऽद्यपुरुषेणैतत्क्षेत्रंचापिविनिर्मितम् ॥२४॥ स्कंदउवाच ॥ ॥ साशक्तिःप्रकृतिःप्रोक्तासपुमानीश्वरः
परः ॥ ताभ्यांचरममाणाभ्यांतस्मिन्क्षेत्रेघटोद्भव ॥ २५॥ परमानंदरूपाभ्यांपरमानंदरूपिणी ॥ पंचक्रोशपरीमाणेस्वपादतलनिर्मिते ॥ २६ ॥ मुनेप्रल
यकालेपिनतत्क्षेत्रंकदाचन ॥ विमुक्तंहिशिवाभ्यांयदविमुक्तंततोविदुः ॥ २७ ॥ नयदाभूमिवलयंनयदाऽपांसमुद्भवः ॥ तदाविहर्तुमीशेनक्षेत्रमेतद्विनि
र्मितम् ॥ २८॥ द्वंद्वस्यंक्षेत्रस्यवेदकोपिनकुंभज ॥ नास्तिकायनवक्तव्यंकदाचिच्चर्मचक्षुषे ॥ २९ ॥ श्रद्धालवेविनीतायत्रिकालज्ञानचक्षुषे ॥ शिवभ
क्तायशांतायवक्तव्यंचमुमुक्षवे ॥ ३० ॥ अविमुक्तंतदारभ्यक्षेत्रमेतदुदीर्यते ॥ पर्यंकभूतंशिवयोर्निरंतरसुखास्पदम् ॥ ३१ ॥ अभावःकल्प्यतेमूढैर्य
दाचशिवयोस्तयोः ॥ क्षेत्रस्यास्यतदाभावःकल्प्योनिर्वाणकारिणः ॥ ३२ ॥ अनाराध्यमहेशानमनवाप्यचकाशिकाम् ॥ योगाद्युपायविज्ञोपिन
निर्वाणमवाप्नुयात् ॥ ३३ ॥

अस्यानंदवनंनामपुराकारिपिनाकिना ॥ क्षेत्रस्यानंदहेतुत्वादविमुक्तमनंतरम् ॥ ३४ ॥ आनंदकंदबीजानामंकुराणियतस्ततः ॥ ज्ञेयानिसर्वलिंगा
नितस्मिन्नानंदकानने ॥ ३५ ॥ अविमुक्तमितिख्यातमासीदित्थंघटोद्भव ॥ तथाचाख्याम्यथमुनेयथासीन्मणिकर्णिका ॥ ३६ ॥ प्रागानंदवनेतत्र
शिवयोरममाणयोः ॥ इच्छेत्यभूत्कलशजसृज्यःकोप्यपरःकिल ॥ ३७ ॥ यस्मिन्न्यस्तेमहाभारेआवांस्वःस्वैरचारिणौ ॥ निर्वाणश्राणनंकुर्वःकेवलंका
शिशायिनाम् ॥ ३८ ॥ सएवसर्वंकुरुतेसएवपरिपातिच ॥ सएवसंवृणोत्यंतेसर्वैश्वर्यनिधिःसच ॥ ३९ ॥ चेतःसमुद्रमाकुंच्यचिंताकल्लोलदोलितम् ॥
सत्त्वरत्नंतमोग्राहंरजोविद्रुमवल्लितम् ॥ ४० ॥ यस्यप्रसादात्तिष्ठावःसुखमानंदकानने ॥ परिक्षिप्तमनोवृत्तौक्वहिचिंतातुरेसुखम् ॥ ४१ ॥ संप्रधार्येतिस
विभुःसर्वतश्चित्स्वरूपया ॥ तयासहजगद्धात्र्याजगद्धाताऽथधूर्जटिः ॥ ४२ ॥ सव्येव्यापारयांचक्रेदृशमंगेसुधामुचम् ॥ ततःपुमानाविरासीदेकस्त्रैलो
क्यसुंदरः ॥ ४३ ॥ शांतःसत्त्वगुणोद्रिक्तोगांभीर्यजितसागरः ॥ तथाचक्षमयायुक्तोमुनेऽलब्धोपमोऽभवत् ॥ ४४ ॥ इंद्रनीलद्युतिःश्रीमान्पुंडरीकोत्तमे
क्षणः ॥ सुवर्णाकृतिसुच्छायदुकूलयुगलावृतः ॥ ४५ ॥ लसत्प्रचंडदोर्दंडयुगलद्वयराजितः ॥ उल्लसत्परमामोदनाभीह्रदकुशेशयः ॥ ४६ ॥ एकः
सर्वगुणावासस्त्वेकःसर्वकलानिधिः ॥ एकःसर्वोत्तमोयस्मात्ततोयःपुरुषोत्तमः ॥ ४७ ॥

ततोमहांतंतंवीक्ष्यमहामहिमभूषणम् ॥ महादेवउवाचेदंमहाविष्णुर्भवाच्युत ॥ ४८ ॥ तवनिःश्वसितंवेदास्तेभ्यःसर्वमवैष्यसि ॥ वेददृष्टेनमार्गेणकुरुसर्वं
यथोचितम् ॥ ४९ ॥ इत्युक्त्वातंमहेशानोबुद्धितत्त्वस्वरूपिणम् ॥ शिवयासहितोरुद्रोविवेशानंदकाननम् ॥ ५० ॥ ततःसभगवान्विष्णुर्मौलावाज्ञांनि
धायच ॥ क्षणंध्यानपरोभूत्वातपस्येवमनोदधौ ॥ ५१ ॥ खनित्वातत्रचक्रेणरम्यांपुष्करिणींहरिः ॥ निजांगस्वेदसंदोहसलिलैस्तामपूरयत् ॥ ५२ ॥
समाःसहस्रंपंचाशत्तपउग्रंचचारसः ॥ चक्रपुष्करिणीतीरेतत्रस्थाणुसमाकृतिः ॥ ५३ ॥ ततःसभगवानीशोमृडान्यासहितोमृडः ॥ दृष्ट्वाज्वलंतंतपसानि
श्चलंमीलितेक्षणम् ॥ ५४ ॥ तमुवाचहृषीकेशंमौलिमांदोलयन्मुहुः ॥ अहोमहत्त्वंतपसस्त्वहोधैर्यंचचेतसः ॥ ५५ ॥ अहोअनिंधनोवह्निर्ज्वलत्येषनिरं
तरम् ॥ अलंतप्त्वामहाविष्णोवरंवरयसत्तम ॥ ५६ ॥ मृडस्याम्रेडितमिदंप्रत्यभिज्ञायभाषितम् ॥ उन्मीलितदृगंभोजःसमुत्तस्थौचतुर्भुजः ॥ ५७ ॥
श्रीविष्णुरुवाच ॥ ॥ यदिप्रसन्नोदेवेशदेवदेवमहेश्वर ॥ भवान्यासहितंत्वांतुद्रष्टुमिच्छामिसर्वदा ॥ ५८ ॥ सर्वकर्मसुसर्वत्रत्वामेवशशिशेखर ॥ पुरश्चरं
तंपश्यामियथातन्मेवरस्तथा ॥ ५९ ॥ त्वदीयचरणांभोजमकरंदमधूत्सुकः ॥ मच्चेतोभ्रमरोभ्रांतिंविहायास्तुसुनिश्चलः ॥६०॥ ॥ श्रीशिवउवाच ॥
एवमस्तुहृषीकेशयत्त्वयोक्तंजनार्दन ॥ अन्यंवरंप्रयच्छामितमाकर्णयसुव्रत ॥ ६१ ॥ त्वदीयस्यास्यतपसोमहोपचयदर्शनात् ॥ यन्मयांदोलितोमौ
लिरहिश्रवणभूषणः ॥ ६२ ॥ तदांदोलनतःकर्णात्पपातमणिकर्णिका ॥ मणिभिःखचितारम्याततोऽस्तुमणिकर्णिका ॥ ६३ ॥

चक्रपुष्करिणीतीर्थंपुराख्यातमिदंशुभम् ॥ त्वयाचक्रेणखननाच्छंखचक्रगदाधर ॥ ६४ ॥ ममकर्णात्पपातेयंयदाचमणिकर्णिका ॥ तदाप्रभृतिलोके
ऽत्रख्यातास्तुमणिकर्णिका ॥६५॥ ॥ श्रीविष्णुरुवाच ॥ ॥ मुक्ताकुंडलपातेनतवाद्रितनयाप्रिय ॥ तीर्थानांपरमंतीर्थंमुक्तिक्षेत्रमिहास्तुवै ॥६६॥
काशतेऽत्रयतोज्योतिस्तदनाख्येयमीश्वरः ॥ अतोनामापरंचास्तुकाशीतिप्रथितंविभो ॥ ६७ ॥ अन्यंवरंवरेदेवदेयःसोप्यविचारितम् ॥ सतेपरोपकारार्थं
जगद्रक्षामणेशिव ॥ ६८ ॥ आब्रह्मस्तंबपर्यंतंयत्किंचिज्जंतुसंज्ञितम् ॥ चतुर्षुभूतग्रामेषुकाश्यांतन्मुक्तिमाप्स्यतु ॥६९॥ अस्मिंस्तीर्थवरेशंभोमणिश्रव
णभूषणे ॥ संध्यांस्नानंजपंहोमंवेदाध्ययनमुत्तमम् ॥ तर्पणंपिंडदानंचदेवतानांचपूजनम् ॥ ७० ॥ गोभूतिलहिरण्याश्वदीपान्नांवरभूषणम् ॥ कन्या
दानंप्रयत्नेनसप्ततंतूननेकशः ॥ ७१ ॥ व्रतोत्सर्गंवृषोत्सर्गंलिंगादिस्थापनंतथा ॥ करोतियोमहाप्राज्ञोज्ञात्वायुःक्षणगत्वरम् ॥ ७२ ॥ विपत्तिंविपुलां
चापिसंपत्तिमतिभंगुराम् ॥ अक्षयामुक्तिरेकास्तुविपाकस्तस्यकर्मणः ॥७३॥ अन्यच्चापिशुभंकर्मयदत्रश्रद्धयायुतम् ॥विनात्मघातमीशानत्यक्त्वाप्रायो
पवेशनम् ॥७४॥ नैःश्रेयस्याःश्रियोहेतुस्तदस्तुजगदीश्वर ॥ नानुशोचतिनाख्यातिकृत्वाकालांतरेपियत् ॥७५॥ तदिहाक्षयतामेतुतस्येशत्वदनुग्रहात्॥
तवप्रसादात्तस्येशसर्वमक्षयमस्तुतत् ॥ ७६ ॥ यदस्तियद्भविष्यच्चयद्भूतंचसदाशिव ॥ तस्मादेतच्चसर्वस्मात्क्षेत्रमस्तुशुभोदयम् ॥ ७७ ॥ यथासदा
शिवत्वत्तोनकिंचिदधिकंशिवम् ॥ तथानंदवनादस्मात्किंचिन्मास्त्वधिकंक्वचित् ॥ ७८ ॥ विनासांख्येनयोगेनविनास्वात्मावलोकनम् ॥ विनाव्रततपो
दानैःश्रेयोऽस्तुप्राणिनामिह ॥ ७९ ॥

शशकामशकाःकीटाःपतंगास्तुरगोरगाः ॥ पंचक्रोश्यांमृताःकाश्यांसंतुनिर्वाणदीक्षिताः ॥ ८० ॥ नामापिगृह्णतांकाश्याःसदैवास्त्वेनसःक्षयः ॥ ८१ ॥
सदाकृतयुगंचास्तुसदाचास्तूत्तरायणम् ॥ सदामहोदयश्चास्तुकाश्यांनिवसतांसताम् ॥ ८२ ॥ यानिकानिपवित्राणिश्रुत्युक्तानिसदाशिव ॥ तेभ्योऽ
धिकतरंचास्तुक्षेत्रमेतत्त्रिलोचन ॥ ८३ ॥ चतुर्णामपिवेदानांपुण्यमध्ययनाच्चयत् ॥ तत्पुण्यंजायतांकाश्यांगायत्रीलक्षजाप्यतः ॥ ८४ ॥ अष्टां
गयोगाभ्यासेनयत्पुण्यमपिजायते ॥ तत्पुण्यंसाधिकंभूयाच्छ्रद्धाकाशीनिषेवणात् ॥ ८५ ॥ कृच्छ्रचांद्रायणाद्यैश्चयच्छ्रेयःसमुपार्ज्यते ॥ तदेकेनो
पवासेनभवत्वानंदकानने ॥ ८६ ॥ अन्यत्रयत्तपस्तप्त्वाश्रेयःस्याच्छरदांशतम् ॥ तदस्तुकाश्यांवर्षेणभूमिशय्याव्रतेनहि ॥ ८७ ॥ आजन्ममौनव्रततो
यदन्यत्रफलंस्मृतम् ॥ तदस्तुकाश्यांपक्षाहःसत्यवाक्परिभाषणात् ॥ ८८ ॥ अन्यत्रदत्त्वासर्वस्वंसुकृतंयत्समीरितम् ॥ सहस्रभोजनात्काश्यांतद्भूया
दयुताधिकम् ॥ ८९ ॥ मुक्तिक्षेत्राणिसर्वाणियत्संसेव्योदितंफलम् ॥ पंचरात्रात्तदत्रास्तुनिषेव्यमणिकर्णिकाम् ॥ ९० ॥ प्रयागस्नानपुण्येनयत्पुण्यं
स्याच्छिवप्रदम् ॥ काशीदर्शनमात्रेणतत्पुण्यंश्रद्धयास्त्विह ॥ ९१ ॥ यत्पुण्यमश्वमेधेनयत्पुण्यंराजसूयतः ॥ काश्यांतत्पुण्यमाप्नोतुत्रिरात्रशयना
द्यमी ॥ ९२ ॥ तुलापुरुषदानेनयत्पुण्यंसम्यगाप्यते ॥ काशीदर्शनमात्रेणतत्पुण्यंश्रद्धयास्तुवै ॥ ९३ ॥ इतिविष्णोर्वरंश्रुत्वादेवदेवोजगत्पतिः ॥
उवाचचप्रसन्नात्मातथाऽस्तुमधुसूदन ॥ ९४ ॥ ॥ श्रीमहादेवउवाच ॥ ॥ शृणुविष्णोमहाबाहोजगतःप्रभवाप्यय ॥ विधेहिसृष्टिंविविधांयथावत्त्वं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रुतीरिताम् ॥ ९५ ॥ पितेवसर्वभूतानांधर्मतःपालकोभव ॥ विध्वंसनीयाविविधाधर्मध्वंसविधायिनः ॥ ९६ ॥ धर्मेतरपथस्थानामुपसंहृतयेहरे ॥ हेतुमात्रंभवान्यस्मात्स्वकर्मनिहताहिते ॥ ९७ ॥ यथापरिणतंसस्यंपतेत्प्रसववंधनात् ॥ तेपरीणतपाप्मानःपतिष्यंतितथास्वयम् ॥ ९८ ॥ येचत्वामवमन्यंतेदर्पिताःस्वतपोबलैः ॥ तेषांचैवोपसंहृत्यप्रभविष्याम्यहंहरे ॥ ९९ ॥ उपपातकिनोयेचमहापातकिनश्चये ॥ तेपिकाशींसमासाद्यभविष्यतिगतैनसः ॥ १०० ॥ इदंममप्रियंक्षेत्रंपंचक्रोशीपरीमितम् ॥ ममाज्ञाप्रभवेदत्रनान्याज्ञाप्रभवेदिह ॥ १ ॥

पुनर्विष्णुर्मयाप्रोक्तोमृडानिशुभलोचने ॥ अत्युग्रंतेजसातेजोभ्रमंस्त्रैलोक्यविभ्रमः ॥ २ ॥ पापिनामापेजंतूनामविमुक्तनिवासिनाम् ॥ नान्यःशासयिताविष्णोतेषांशास्ताऽहमेवहि ॥ ३ ॥ योजनानांशतस्थोपियाऽविमुक्तंस्मरेद्धृदि ॥ बहुपातकपूर्णोपिनसपापैःप्रबाध्यते ॥४॥ ममप्रियस्यक्षेत्रस्ययोऽविमुक्तस्यसंस्मरेत् ॥ प्राणप्रयाणसमयेदूरगोप्यघवानपि ॥५॥ सपापपूगमुत्सृज्यस्वर्गभोगान्समश्नुत ॥ काशीस्मरणपुण्येनस्वर्गाद्भ्रष्टोहिजायते॥६॥ पृथिव्यामेकराड्भूत्वाभुक्त्वाभोगाननेकशः ॥ प्राप्याविमुक्तंतत्पुण्यान्निर्वाणपदभाग्भवेत् ॥ ७ ॥ बहुकालमुषित्वाऽत्रनियतेंद्रियमानसः ॥ यद्यन्यत्रविपद्येतदैवयोगाच्छुचिस्मिते ॥ ८ ॥ सोपिस्वर्गसुखंभुक्त्वाभूत्वाक्षितिपतीश्वरः ॥ पुनःकाशीमवाप्याथविंदेन्नैःश्रेयसींश्रियम् ॥ ९ ॥ विष्णोऽविमुक्तेसंवासःकर्मनिर्मूलनक्षमः ॥ द्वित्राणांहिपवित्राणांनिर्वाणायेहजायते ॥ ११० ॥

विष्णुरुवाच ॥ ॥ देवेशक्षेत्रमाहात्म्यंयोनजानातितत्त्वतः ॥ नश्रद्दधातिम्रियतेमृतेतस्येहकागतिः ॥११॥ ॥ शिवउवाच ॥ ॥ अन्यत्रकृत्वापापानिबहूनिसुमहांतिच ॥ अश्रद्दधानोऽतत्त्वज्ञोयद्यत्रचविपद्यते ॥ १२ ॥ महिमन्यनभिज्ञोपिक्षेत्रस्यास्यजनार्दन ॥ तस्ययागतिरुद्दिष्टातांनिशामयसुव्रत ॥ १३ ॥ पंचक्रोशींप्रविशतस्तस्यपातकसंततिः ॥ बहिरेवप्रतिष्ठेतनांतर्निर्विशतेक्वचित् ॥ १४ ॥ भयाद्बहिःस्थितायांचतस्यपातकसंततौ ॥ त्रिशूलपाशपाणीनांगणानांसीमचारिणाम् ॥ १५ ॥ प्रवेशमात्रादनघसर्वैरेनोभिरुज्झितः ॥ संस्नायमणिकर्णिक्यांपुण्यंप्राप्नोत्यनुत्तमम् ॥ १६ ॥ सर्वतीर्थेषुसंस्नानाद्यत्पुण्यंसमवाप्यते ॥ तत्पुण्यमाप्यतेसम्यङ्मणिकर्ण्येकमज्जनात् ॥ १७ ॥ विधिनातत्रसंस्नायमृद्गोमयकुशादिभिः ॥ स्वशाखावारुणैर्मंत्रैर्दूर्वापामार्गदर्भकैः ॥ १८ ॥ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् ॥ मणिकर्ण्यांविधिस्नातःश्रद्धयातदवाप्नुयात् ॥ १९ ॥ अश्रद्धयापियःस्नातोमणिकर्ण्यांविधानतः ॥ सोपिपुण्यमवाप्नोतिस्वर्गप्राप्तिकरंपरम् ॥ १२० ॥ श्रद्धयाविधिवत्स्नात्वाकृत्वादेवादितर्पणम् ॥ तिलबर्हिर्यवैःसम्यक्सर्वयज्ञफलंलभेत् ॥ २१ ॥ श्रद्दधानोविधिस्नातःकृतसर्वोदकक्रियः ॥ जपन्देवान्समभ्यर्च्यसर्वमंत्रफलंलभेत् ॥ २२ ॥ स्नात्वामौनेनविश्वेशदर्शनान्नियतेंद्रियः ॥ सर्वव्रतकृतंश्रेयोलभेद्वाचयमःशिवे ॥ २३ ॥ स्नानेदेवार्चनेजप्येमलमूत्रविसर्जने ॥ मौनंकुर्यात्प्रयत्नेनदंतधावनहोमयोः ॥ २४ ॥ विश्वेश्वरंसमभ्यर्च्यसूपचारैर्विधानतः ॥ यावज्जीवंशिवार्चायाः फलमाप्नोतिवैसकृत् ॥ २५ ॥ दत्त्वाल्पमपिदेवेशिन्यायेनोपार्जितंधनम् ॥ अविमुक्तेममक्षेत्रेनदरिद्रोभवेत्क्वचित् ॥ २६ ॥ विविधंधनमावर्ज्ययोऽविमुक्तेनयच्छति ॥ संप्राप्यनिधनंमूढोऽन्यत्रशोचतिसर्वदा ॥ २७ ॥ रम्याणियानिरत्नानिगोगजाश्वांबराण्यपि ॥ कृतानितानिश्रेयोर्थमविमुक्तनिवासिनाम् ॥ २८ ॥

विश्वेशप्रीणनार्थायधनंनिधनमेववा ॥ न्यायेनकाश्यांयःकुर्यात्सधन्यःसचधर्मवित् ॥ २९ ॥ योसौविश्वेश्वरोदेवःकाशीपुर्यामुमेस्थितः ॥ लिंगरूपधरःसाक्षान्ममश्रेयास्पदंहितत् ॥ १३० ॥ अविमुक्तंमहत्क्षेत्रंपंचक्रोशंपरीमितम् ॥ ज्योतिर्लिंगंतदेकंहिज्ञेयंविश्वेश्वराभिधम् ॥ ३१ ॥ एकदेशस्थितमपियथामार्तंडमंडलम् ॥ दृश्यतेसर्वगंसर्वैःकाश्यांविश्वेश्वरस्तथा ॥ ३२ ॥ निष्प्रत्यूहेनयोगेननानाजन्मार्जितेनच ॥ यत्फलंलभ्यतेऽन्यत्रतत्काश्यांत्यजतस्तनुम् ॥ ३३ ॥ तत्वातपांसिसर्वाणिबहुकालंजितेंद्रियैः ॥ यत्फलंलभ्यतेऽन्यत्रतत्काश्यामेकरात्रतः ॥ ३४ ॥ अक्षेत्रमहिमज्ञोपिश्रद्धाहीनोपिकालतः ॥ काशीप्रवेशादनघोऽमृतत्वंलभतेमृतः ॥ ३५ ॥ कृत्वाप्येनांसिचोग्राणिकालात्प्राप्याथकाशिकाम् ॥ त्यक्त्वातनुंप्रसादान्मेमामेवप्रतिपद्यते ॥ ३६ ॥ विनाममप्रसादंवैकःकाशींप्रतिपद्यते ॥ विनाब्रध्नंविशालाक्षिदिनकृत्कइहोच्यते ॥ ३७ ॥ अप्राप्यकाशींकोदेविनिरंतरसुखंलभेत् ॥ ब्रह्माद्याःप्राकृतैःपाशैर्यतोबद्धानिरंतरम् ॥ ३८ ॥ चतुर्विंशतिभिःपाशैस्त्रिगुणैःक्रिययादृढैः ॥ कंठेबद्धाविमुच्यंतेकथंकाशींविनाजनाः ॥ ३९ ॥ बहूपसर्गोयोगोयंकृच्छ्रसाध्यंतपोहियत् ॥ योगाद्भ्रष्टस्तपोभ्रष्टोगर्भक्लेशसहःपुनः ॥ १४० ॥ कृत्वापिकाश्यांपापानिकाश्यामेवम्रियेतचित् ॥ भूत्वारुद्रपिशाचोपिपुनर्मुक्तिमवाप्स्यति ॥ ४१ ॥ काश्यांमृतानांजंतूनांदैवात्पापकृतामपि ॥ नपातोनरकेतेषांतेषांशास्ताहमेवयत् ॥ ४२ ॥ कायंविज्ञायसापायंस्मृत्वागर्भस्यवेदनाम् ॥ त्यक्त्वाराज्यमपिप्राज्यंसेव्याकाशीनिरंतरम् ॥ ४३ ॥ अतर्कितंसमभ्येत्ययमदूताःसुदारुणाः ॥ बद्धापाशैर्हनिष्यंतिक्षिप्रंकाशींततःश्रयेत् ॥ ४४ ॥ नपापेभ्योभयंयत्रनभयंयत्रवैयमात् ॥ नगर्भवासभीर्यत्रतांकाशींकोनसंश्रयेत् ॥ ४५ ॥

अद्यप्रातःपरश्वोवामरणंप्राप्यमेवच ॥ यावत्कालविलंबोस्तितावत्काशींसमाश्रयेत् ॥ ४६ ॥ प्राप्तेतुमरणेपुंसांपुनर्जन्मपुनर्मृतिः ॥ अपुनर्भवभूमिंचतस्मात्काशींश्रयेद्बुधः ॥ ४७ ॥ पुत्रक्षेत्रकलत्राख्यांत्यक्त्वामायांहिवैष्णवीम् ॥ भवांतरेनेकरूपांभवघ्नींकाशिकांश्रयेत् ॥४८॥ ॥ स्कंदउवाच ॥ दूरंमेमरणंयुवाहमधुनाधार्यंनचित्तेत्विति श्रोतव्योनिभृतंकृतांतमहिषग्रैवेयघंटारवः ॥ नैकट्यात्प्रकटोत्कटश्रमघटामप्राप्यहित्वाद्रुतंजीर्णांपर्णकुटींततःपटुमतिर्गच्छेत्पुरींधूर्जटेः ॥ ४९ ॥ व्यासउवाच ॥ अगस्त्यस्यपुरःसूतकथयित्वाकथामिमाम् ॥ सर्वपापप्रशमनींपुनःस्कंदउवाचह ॥ १५० ॥ इति श्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडेपूर्वार्द्धेमणिकर्णिकाख्यानंनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥

स्कंदउवाच ॥ वाराणसीतिप्रथितंयथाचानंदकाननम् ॥ तथाचकथयामीहदेवदेवेनभाषितम् ॥ १ ॥ ॥ ईश्वरउवाच ॥ ॥ निशामयमहाबाहोविष्णोत्रैलोक्यसुंदर ॥ प्राप्तंवाराणसीत्याख्यामविमुक्तंयथातथा ॥ २ ॥ निर्दग्धान्सागराञ्छ्रुत्वाकपिलक्रोधवह्निना ॥ अश्वमेधाश्वसंयुक्तान्पूर्वजान्स्वान्भगीरथः ॥ ३ ॥ सूर्यवंशेमहातेजाराजापरमधार्मिकः ॥ आरिराधयिषुर्गंगांतपसेकृतनिश्चयः ॥४॥ हिमवंतंनगश्रेष्ठममात्यन्यस्तराज्यधूः ॥ जगामयशसांराशिरुद्दिधीर्षुःपितामहान् ॥ ५ ॥ ब्रह्मशापाग्निनिर्दग्धान्महादुर्गतिगानपि ॥ विनात्रिमार्गगांविष्णोकोजंतूंस्त्रिदिवंनयेत् ॥ ६ ॥ ममैवसापरामूर्तिस्तोयरूपाशिवात्मिका ॥ ब्रह्मांडानामनेकानामाधारःप्रकृतिःपरा ॥ ७ ॥ शुद्धविद्यास्वरूपाचत्रिशक्तिःकरुणात्मिका ॥ आनंदामृतरूपाचशुद्धधर्मस्वरूपिणी ॥ ८ ॥ यामेतांजगतांधात्रींधारयामिस्वलीलया ॥ विश्वस्यरक्षणार्थायपरब्रह्मस्वरूपिणीम् ॥ ९ ॥ त्रैलोक्येयानितीर्थानिपुण्यक्षेत्राणियानिच ॥ सर्वत्रसर्वेयेधर्माःसर्वयज्ञाःसदक्षिणाः ॥ १० ॥ तपांसिविष्णोसर्वाणिश्रुतिःसांगाचतुर्विधा ॥ अहंचत्वंचकश्चापिदेवतानां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गणाश्चये ॥ ॥ ११ ॥ पुरुषार्थाश्चसर्वेवैशक्तयोविविधाश्चयाः ॥ गंगायांसर्वएवैतेसूक्ष्मरूपेणसंस्थिताः ॥ १२ ॥ सस्नातःसर्वतीर्थेषुसर्वक्रतुषुदीक्षितः ॥
चीर्णसर्वव्रतःसोपियस्तुगंगांनिषेवते ॥ १३ ॥ तपांसितेनतप्तानिसर्वदानप्रदःसच ॥ सप्राप्तयोगनियमोयस्तुगंगांनिषेवते ॥१४॥ सर्ववर्णाश्रमेभ्यश्चवेद
विद्भ्यश्चवैतथा ॥ शास्त्रार्थपारगेभ्यश्चगंगास्नायीविशिष्यते ॥ १५ ॥ मनोवाक्कायजैर्दोषैर्दुष्टोबहुविधैरपि॥ वीक्ष्यगंगांभवेत्पूतःपुरुषोनात्रसंशयः ॥१६॥
कृतेसर्वव्रतीर्थानित्रेतायांपुष्करंपरम् ॥ द्वापरेतुकुरुक्षेत्रंकलौगंगैवकेवलम् ॥ १७ ॥ पूर्वजन्मांतराभ्यासवासनावशतोहरे ॥ गंगातीरेनिवासःस्यान्मद
नुग्रहतःपरात् ॥ १८ ॥ ध्यानंकृतेमोक्षहेतुस्त्रेतायांतच्चवैतपः ॥ द्वापरेतद्द्वयंयज्ञाःकलौगंगैवकेवलम् ॥ १९ ॥ योदेहपतनाद्यावद्गंगातीरंनमुंचति ॥
सहिवेदांतविद्योगीब्रह्मचर्यव्रतीसदा ॥ २० ॥ कलौकलुषचित्तानांपरद्रव्यरतात्मनाम् ॥ विधिहीनक्रियाणांचगतिर्गंगांविनानहि ॥ २१ ॥ अलक्ष्मीः
कालकर्णीचदुःस्वप्नोदुर्विचिंतितम् ॥ गंगागंगेतिजपनात्तानिनोपविशंतिहि ॥ २२ ॥ गंगाहिसर्वभूतानामिहामुत्रफलप्रदा ॥ भावानुरूपतो
विष्णोसदासर्वजगद्धिता ॥ २३ ॥

यज्ञदानतपोयोगजपाःसनियमायमाः ॥ गंगासेवासहस्रांशंनलभंतेकलौहरे ॥ २४ ॥ किमष्टांगेनयोगेनकिंतपोभिःकिमध्वरैः ॥ वासएवहिगंगायां
ब्रह्मज्ञानस्यकारणम् ॥ २५ ॥ अपिदूरस्थितस्यापिगंगामाहात्म्यवेदिनः ॥ अयोग्यस्यापिगोविंदभक्त्यागंगाप्रसीदति ॥ २६ ॥ श्रद्धाधर्मःपरः
सूक्ष्मःश्रद्धाज्ञानंपरंतपः ॥ श्रद्धास्वर्गश्चमोक्षश्चश्रद्धयासाप्रसीदति ॥ २७ ॥ अज्ञानरागलोभाद्यैःपुंसांसंमूढचेतसाम् ॥ श्रद्धानजायतेधर्मेगंगायां
चविशेषतः ॥ २८ ॥ बहिःस्थितंजलंयद्वन्नारिकेलांतरेस्थितम् ॥ तथाब्रह्मांडबाह्यस्थंपरब्रह्मांबुजाह्नवी ॥ २९ ॥ गंगालाभात्परोलाभःक्वचिदन्योन
विद्यते ॥ तस्माद्गंगामुपासीतगंगैवपरमःपुमान् ॥३०॥ शक्तस्यपंडितस्यापिगुणिनोदानशीलिनः ॥ गंगास्नानविहीनस्यहरेजन्मनिरर्थकम् ॥ ३१ ॥
वृथाकुलंवृथाविद्यावृथायज्ञावृथातपः ॥ वृथादानानितस्येहकलौगंगांनयोभजेत् ॥ ३२ ॥ गुणवत्पात्रपूजायांनस्याद्वैतादृशंफलम् ॥ यथागंगाजलस्ना
नपूजनेविधिनाफलम् ॥ ३३ ॥ ममतेजोग्निगर्भेयंममवीर्यातिसंवृता ॥ दाहिकासर्वदोषाणांसर्वपापविनाशिनी ॥ ३४ ॥ स्मरणादेवगंगायाःपापसं
घातपंजरम् ॥ शतधाभेदमायातिगिरिर्वज्रहतोयथा ॥ ३५ ॥ गंगांगच्छतियस्त्वेकोयस्तुभक्त्यानुमोदयेत् ॥ तयोस्तुल्यंफलंप्राहुर्भक्तिरेवात्रकारणम् ॥
॥ ३६ ॥ गच्छंस्तिष्ठञ्जपन्ध्यायन्भुजञ्जाग्रत्स्वपन्वदन् ॥ यःस्मरेत्सततंगंगांसहिमुच्येतबंधनात् ॥ ३७ ॥ पितॄनुद्दिश्ययोभक्त्यापायसंमधुसं
युतम् ॥ गुडसर्पिस्तिलैःसार्धंगंगांभसिविनिक्षिपेत् ॥ ३८ ॥ तृप्ताभवंतिपितरस्तस्यवर्षशतंहरे ॥ यच्छंतिविविधान्कामान्परितुष्टाःपितामहाः ॥
॥ ३९ ॥ लिंगेसंपूजितेसर्वमर्चितंस्याज्जगद्यथा ॥ गंगास्नानेनलभतेसर्वतीर्थफलंतथा ॥ ४० ॥ गंगायांतुनरःस्नात्वायोलिंगंनित्यमर्चति ॥
एकेनजन्मनामुक्तिंपरांप्राप्नोतिसध्रुवम् ॥ ४१ ॥ अग्निहोत्रंचयज्ञाश्चव्रतदानतपांसिच ॥ गंगायांलिंगपूजायाःकोट्यंशेनापिनोसमाः ॥ ४२ ॥

गंगांगंतुंविनिश्चित्यकृत्वाश्राद्धादिकंगृहे ॥ स्थितस्यसम्यक्संकल्पात्तस्यनंदंतिपूर्वजाः ॥ ४३ ॥ पापानिचरुदंत्याशुहाक्वयास्यामइत्यलम् ॥ लोभमो
हादिभिःसार्धंमंत्रयंतिपुनःपुनः ॥ ४४ ॥ यथानगंगांयात्येपनथाविघ्नंप्रकुर्महे ॥ गंगांगतोयथाचैपनउच्छित्तिंविधास्यति ॥ ४५ ॥ गृहाद्गंगावगाहार्थं
गच्छतस्तुपदेपदे ॥ निराशानिव्रजंत्येवपापान्यस्यशरीरतः ॥ ४६ ॥ पूर्वजन्मकृतैःपुण्यैस्त्यक्त्वालोभादिकंहरे ॥ व्युदस्यसर्वविघ्नौघान्गंगांप्राप्नोति
पुण्यवान् ॥ ४७ ॥ अनुषंगेणमौल्येनवाणिज्येनापिसेवया ॥ कामासक्तोपिवामर्त्योगंगास्नातोदिवंव्रजेत् ॥ ४८ ॥ अनिच्छयापिसंस्पृष्टोदहनोहि
यथादहेत् ॥ अनिच्छयापिसंस्नातागंगापापंतथादहेत् ॥ ४९ ॥ तावद्भ्रमतिसंसारेयावद्गंगांनसेवते ॥ संसेव्यगंगांनोजंतुर्भवक्लेशंप्रपश्यति ॥ ५० ॥
योगंगांभसिनिस्नातोभक्त्यासंत्यक्तसंशयः ॥ मनुष्यचर्मणानद्धःसदेवोनात्रसंशयः ॥ ५१ ॥ गंगास्नानार्थमुद्युक्तोमध्येमार्गंमृतोयदि ॥ गंगास्नान
फलंसोपितदाप्नोतिनसंशयः ॥ ५२ ॥ माहात्म्यंयेचगंगायाःशृण्वंतिचपठंतिच ॥ तेप्यशेषैर्महापापैर्मुच्यंतेनात्रसंशयः ॥ ५३ ॥ दुर्बुद्धयोदुराचाराहै
तुकाबहुसंशयाः ॥ पश्यंतिमोहिताविष्णोगंगामन्यनदीमिव ॥ ५४ ॥ जन्मांतरकृतैर्दानैस्तपोभिर्नियमैर्व्रतैः ॥ इहजन्मनिगंगायांनृणांभक्तिःप्रजायते
॥ ५५ ॥ गंगाभक्तिमतामर्थेमहेंद्रादिपुरेषुच ॥ हर्म्याणिरम्यभोगानिनिर्मितानिस्वयंभुवा ॥ ५६ ॥ सिद्धयःसिद्धिलिंगानिस्पर्शलिंगान्यनेकशः ॥
प्रासादारत्नरचिताश्चिंतामणिगणाअपि ॥ ५७ ॥ गंगाजलांतस्तिष्ठंतिकलिकल्मषभीतितः ॥ अतएवहिसंसेव्याकलौगंगेष्टसिद्धिदा ॥ ५८ ॥ सूर्यो
दयेतमांसीववज्रपातभयान्नगाः ॥ तार्क्ष्येक्षणाद्यथासर्पामेघावाताहताइव ॥ ५९ ॥ तत्त्वज्ञानाद्यथामोहःसिंहंदृष्ट्वायथामृगाः ॥ तथासर्वाणिपापानियां
तिगंगेक्षणात्क्षयम् ॥ ६० ॥ दिव्यौषधैर्यथारोगालोभेनचयथागुणाः ॥ यथाग्रीष्मोष्मसंपत्तिरगाधह्रदमज्जनात् ॥ ६१ ॥

तूलशैलःस्फुलिंगेनयथानश्यतितत्क्षणात् ॥ तथादोषाःप्रणश्यंतिगंगांभःस्पर्शनाद्ध्रुवम् ॥ ६२ ॥ क्रोधेनचतपोयद्वत्कामेनचयथामतिः ॥ अनये
नयथालक्ष्मीर्विद्यामानेनवैयथा ॥ ६३ ॥ दंभकौटिल्यमायाभिर्यथाधर्मोविनश्यति ॥ तथानश्यंतिपापानिगंगायादर्शनेनतु ॥ ६४ ॥ मानुष्यंदुर्लभं
प्राप्यविद्युत्संपातचंचलम् ॥ गंगांयःसेवतेसोत्रबुद्धेःपारंपरंगतः ॥ ६५ ॥ विधूतपापायेमर्त्याःपरंज्योतिःस्वरूपिणीम् ॥ सहस्रसूर्यप्रतिमांगंगांपश्यं
तितेभुवि ॥ ६६ ॥ साधारणांभसापूर्णांसाधारणनदीमिव ॥ पश्यंतिनास्तिकागंगांपापोपहतलोचनाः ॥ ६७ ॥ संसारमोचकश्चाहंजनानामनुकंपया ॥
गंगातरंगरूपेणसोपानंनिर्ममेदिवः ॥ ६८ ॥ सर्वएवशुभःकालःसर्वोदेशस्तथाशुभः ॥ सर्वोजनोदानपात्रंश्रीमतीजाह्नवीतटे ॥ ६९ ॥ यथाश्वमेधो
यज्ञानांनगानांहिमवान्यथा ॥ व्रतानांचयथासत्यंदानानामभयंयथा ॥ ७० ॥ प्राणायामश्चतपसांमंत्राणांप्रणवोयथा ॥ धर्माणामप्यहिंसाचकाम्यानां
श्रीर्यथावरा ॥ ७१ ॥ यथात्मविद्याविद्यानांस्त्रीणांगौरीयथोत्तमा ॥ सर्वदेवगणानांचयथात्वंपुरुषोत्तम ॥ ७२ ॥ सर्वेषामेवपात्राणांशिवभक्तोयथा
वरः ॥ तथासर्वेषुतीर्थेषुगंगातीर्थंविशिष्यते ॥ ७३ ॥ हरेयश्चावयोर्भेदंनकरोतिमहामतिः ॥ शिवभक्तःसविज्ञेयोमहापाशुपतश्चसः ॥ ७४ ॥ पापपां
सुमहावात्यापापद्रुमकुठारिका ॥ पापेंधनदवाग्निश्चगंगेयंपुण्यवाहिनी ॥ ७५ ॥ नानारूपाश्चपितरोगाथागायंतिसर्वदा ॥ अपिकश्चित्कुलेस्माकंगं
गास्नायीभविष्यति ॥ ७६ ॥ देवर्षीन्परिसंतर्प्यदीनानाथांश्चदुःखितान् ॥ श्रद्धयाविधिनास्नात्वादास्यतेसलिलांजलिम् ॥ ७७ ॥ अपिनःसकुले
भूयाच्छिवेविष्णौचसाम्यदृक् ॥ तदालयकरोभक्त्यातस्यसंमार्जनादिकृत् ॥ ७८ ॥ अकामोवासकामोवातिर्यग्योनिगतोपिवा ॥ गंगायांयोमृतोमर्त्यो
नरकंसनपश्यति ॥७९॥ तीर्थमन्यत्प्रशंसंतिगंगातीरेस्थिताश्चये ॥ गंगांनबहुमन्यंतेतेस्युर्निरयगामिनः ॥८०॥ मांचत्वांचैवयोद्वेष्टिगंगांचपुरुषाधमः॥
स्वकीयैःपुरुषैःसार्धंसघोरंनरकंव्रजेत् ॥ ८१ ॥ षष्टिर्गणसहस्राणिगंगांरक्षंतिसर्वदा ॥ अभक्तानांचपापानांवासेविघ्नंप्रकुर्वते ॥ ८२ ॥ कामक्रोधमहामो
हलोभादिनिशितैःशरैः ॥ घ्नंतितेषांमनस्तत्रस्थितिंचापनयंतिच ॥ ८३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गंगांममाश्रयेद्यस्तुसमुनिःसचपंडितः ॥ कृतकृत्यःसविज्ञेयःपुरुषार्थचतुष्टये ॥ ८४ ॥ गंगायांचसकृत्स्नातोहयमेधफलंलभेत् ॥ तर्पयंश्चपितॄंतत्र तारयेन्नरकार्णवात् ॥ ८५ ॥ नेरंतर्येणगंगायांमासंयःस्नातिपुण्यवान् ॥ शक्रलोकेसवसतियावच्छक्रःसपूर्वजः ॥ ८६ ॥ अब्दंयःस्नातिगंगायांनैरंतर्येण पुण्यभाक् ॥ विष्णोर्लोकंसमासाद्यसमुखंसंवसेन्नरः ॥ ८७ ॥ गंगायांस्नातियोमर्त्योयावज्जीवंदिनेदिने ॥ जीवन्मुक्तःसविज्ञेयोदेहांतेमुक्तएवसः ॥ ॥ ८८ ॥ तिथिनक्षत्रपर्वादिनापेक्ष्यंजाह्नवीजले ॥ स्नानमात्रेणगंगायांसंचिताघंविनश्यति ॥ ८९ ॥ पंडितोपिसमूर्खःस्याच्छक्तियुक्तोप्यशक्तिकः ॥ यस्तुभागीरथीतीरंसुखसेव्यंनसंश्रयेत् ॥ ९० ॥ किंवायुपाप्यरोगेणविकासिन्याथकिंश्रिया ॥ किंवाबुद्ध्याविमलयायदिगंगांनसेवते ॥ ९१ ॥ यःकारयेदायतनंगंगाप्रतिकृतेर्नरः ॥ भुक्त्वासभोगान्प्रेत्यापियातिगंगासलोकताम् ॥ ९२ ॥ शृण्वंतिमद्विमानंयेगंगायानित्यमादरात् ॥ गंगास्नानफलं तेषांवाचकप्रीणनाद्धनैः ॥ ९३ ॥ पितॄनुद्दिश्ययोलिंगंस्नपयेद्गांगवारिणा ॥ तृप्ताःस्युस्तस्यपितरोमहानिरयगाअपि ॥ ९४ ॥ अष्टकृत्वोमंत्रजप्तैर्वस्त्रपूतैः सुगंधिभिः ॥ प्रोक्षुगांगजलैःस्नानंघृतस्नानाधिकंबुधाः ॥ ९५ ॥ अष्टद्रव्यविमिश्रेणगंगातोयेनयःसकृत् ॥ मागधप्रस्थमात्रेणताम्रपात्रस्थितेनच ॥ ९६ ॥ भानवेऽर्घंप्रदद्याच्चस्वकीयापितृभिःसह ॥ सोतितेजोविमानेनसूर्यलोकेमहीयते ॥ ९७ ॥ आपःक्षीरंकुशाग्राणिघृतंमधुगवांदधि ॥ रक्तानि कल्हारणिरक्तचंदनमित्यपि ॥ ९८ ॥ अष्टांगार्घोयमुद्दिष्टस्त्वतीवरवितोषणः ॥ गांगैर्वार्भिःकोटिगुणोज्ञेयोविष्णोऽन्यवारितः ॥ ९९ ॥ गंगातीरे स्वशक्त्यायःकुर्याद्देवालयंसुधीः ॥ अन्यतीर्थप्रतिष्ठातोभवेत्कोटिगुणंफलम् ॥ १०० ॥ अश्वत्थवटचूतादिवृक्षारोपेणयत्फलम् ॥ कूपवापीतडागा दिप्रपासत्रादिभिस्तथा ॥ १ ॥

अन्यत्रयद्भवेत्पुण्यंतद्गंगादर्शनाद्भवेत् ॥ पुष्पवाट्यादिभिश्चापिगंगास्पर्शततोऽधिकम् ॥ २ ॥ कन्यादानेनयत्पुण्ययंयत्पुण्यंगोऽन्नदानतः ॥ तत्पुण्यंस्या च्छतगुणंगंगागंडूषपानतः ॥ ३ ॥ चांद्रायणसहस्रेणयत्पुण्यंस्याज्जनार्दन ॥ ततोऽधिकफलंगंगाऽमृतपानादवाप्नुयात् ॥ ४ ॥ भक्त्यागंगावगाहस्य किमन्यत्फलमुच्यते ॥ अक्षयःस्वर्गवासोपिनिर्वाणमथवाहरे ॥ ५ ॥ गंगायाःपादुकायुग्मंनित्यमर्चतियोनरः ॥ आयुःपुण्यंधनंपुत्रान्स्वर्गमोक्षौच विंदति ॥ ६ ॥ नास्तिगंगासमंनीथंकलिकल्मषनाशनम् ॥ नास्तिमुक्तिप्रदंक्षेत्रमविमुक्तसमंहरे ॥ ७ ॥. गंगास्नानरतंमर्त्यंद्दष्ट्वैवयमकिंकराः ॥ दिशो दशपलायंतेसिंहंदृष्ट्वायथामृगाः ॥ ८ ॥ गंगाभजनशीलस्यगंगातटनिवासिनः ॥ अर्चांकृत्वायथान्यायमश्वमेधफलंलभेत् ॥ ९ ॥ गोभूहिरण्यदानेन भक्त्यागंगातटेशुभे ॥ नरोनजायतेभूयःसंसारेदुःखकंटके ॥ १० ॥ दीर्घायुष्यंचवासोभिर्ज्ञानंपुस्तकदानतः ॥ अन्नदानेनसंपत्तिकीर्तिकन्याप्रदानतः ॥ ११ ॥ अन्यत्रयत्कृतंकर्मव्रतंदानंजपस्तपः ॥ गंगातटेतुतत्सर्वंह्यरेकोटिगुणंभवेत् ॥ १२ ॥ धेनुंसवत्सांयोदद्याद्गंगातीरेविधानतः ॥ गोरोमसं ख्ययाविष्णोर्युगान्मर्त्यमृद्धिमान् ॥ १३ ॥ गोलोकेममलोकेवाकामधेनुप्रदाननः ॥ भुंजानःसर्वकामांस्तुदिव्यान्नानाविधान्बहून् ॥ १४ ॥ देवानामप्यलभ्यांश्चभुक्त्वातुसदृशंवधैः ॥ पितृभिश्चसुहृद्भिश्चसर्वरत्नविभूषितः ॥ १५ ॥ जायतेसत्कुलेपश्चाद्धनधान्यसमाकुले ॥ रत्नकांचनसंपन्नेशी लविद्यासमन्विते ॥ १६ ॥ भुक्त्वासविपुलान्भोगान्पुत्रपौत्रसमन्वितः ॥ पुनर्गंगांसमासाद्यकाश्यामुत्तरवाहिनीम् ॥ १७ ॥ विश्वेश्वरंसमाराध्यप्राग्ज नुर्वासनावशात् ॥ कालाद्देहांतमासाद्यब्रह्मसंपद्यतेततः ॥ १८ ॥

विवर्तनद्वयमपिभूमेर्भागीरथीतटे ॥ नरोददातियोभक्त्यातस्यपुण्यफलंशृणु ॥ १९ ॥ तद्भूमित्रसरेणूनांसंख्ययायुगमानया ॥ महेंद्रचंद्रलोकेपुभुक्ताभो गान्मनःप्रियान् ॥ १२० ॥ सप्तद्वीपपतिर्भूत्वामहाधर्मपरायणः ॥ नरकस्थान्पितन्सर्वान्प्रापयेत्रिदिवंहरे ॥२१॥ स्वर्गस्थांश्चपितॄन्सर्वान्मोचयित्वाम हाद्युतिः ॥ अंतेज्ञानासिनाछित्त्वाह्यविद्यांपांचभौतिकीम् ॥ २२ ॥ परंवैराग्यमापन्नोयुंजानोयोगमुत्तमम् ॥ प्राप्याथवाविमुक्तंचपरंब्रह्माधिगच्छति ॥ ॥ २३ ॥ सुवर्णमात्रमपियःसुवर्णंसंप्रयच्छति ॥ सुवर्णायसुवर्णंचहरेभागीरथीतटे ॥ २४ ॥ सहेमरत्नखचितेविमानेसर्वगेशुभे ॥ सर्वैश्वर्यसमायुक्तःसर्व लोकेषुपूजितः ॥ २५ ॥ ब्रह्मांडांतरसंस्थेषुभुंजन्भोगान्मनोरमान् ॥ सर्वैःसंपूजितोविष्णोयावदाभूतसंप्लवम् ॥ २६ ॥ एकराट्चततोभूत्वाजंबूद्वीपे प्रतापवान् ॥ ततोऽविमुक्तमासाद्यपदंनिर्वाणमृच्छति ॥ २७ ॥ जन्मर्क्षेतुकृतेस्नानेगंगायांभक्तिपूर्वकम् ॥ जन्मप्रभृतिपापौघात्संचितान्मुच्यतेक्षणात् ॥ २८ ॥ वैशाखेकार्तिकेमाघेगंगास्नानंसुदुर्लभम् ॥ दशैशतगुणंपुण्यंसंक्रांतौचसहस्रकम् ॥२९॥ चंद्रसूर्यग्रहेलक्षंव्यतीपातेत्वनंतकम् ॥ अयुतंविषुवे चैवनियुतंत्वयनद्वये ॥ १३० ॥ सोमग्रहःसोमदिनेरविवाररवग्रहः ॥ तच्चूडामणिपर्वाख्यंतत्रस्नानमसंख्यकम् ॥ ३१ ॥ स्नानंदानंजपोहोमो यच्चूडामणौकृतम् ॥ तदक्षयंसर्वमिहविष्णोभागीरथीतटे ॥ ३२ ॥ श्रद्धयाभक्तियुक्तस्तुगंगांस्नात्वाविधानतः ॥ ब्रह्महापिविशुद्धचेतकिंपुनस्त्वं न्यपातकी ॥ ३३ ॥ कृमिकीटपतंगाद्यायेमृताजाह्नवीतटे ॥ कूलात्पतंतियेवृक्षास्तेपियांतिपरांगतिम् ॥ ३४ ॥ ज्येष्ठेमासिसितेपक्षेदशम्यांहस्तसं युते ॥ गंगातीरेतुपुरुषोनारीवाभक्तिभावतः ॥ ३५ ॥

निशायाजागरंकुर्याद्गंगादशविधेहरे ॥ पुष्पैःसुगंधैर्नैवेद्यैःफलैर्दशदशोन्मितैः ॥३६॥ प्रदीपैर्दशभिर्धूपैर्दशभिर्गंधैरुडध्वज ॥ पूजयेच्छ्रद्धयाधीमान्दशकृत्वो विधानतः ॥ ३७ ॥ साज्यांस्तिलान्क्षिपेत्तोयेगंगायाःप्रसृतीर्दश ॥ गुडसक्तुमयान्पिंडान्दद्याच्चदशमंत्रतः ॥ ३८ ॥ नमःशिवायेप्रथमंनागायण्येपदं ततः ॥ दशहरायेपदमितिगंगायैमंत्रएषवै ॥ ३९ ॥ स्वाहांतःप्रणवादिश्चभवेद्दिशाक्षरोमनुः ॥ पूजादानंजपोहोमोऽनेनैवमनुनास्मृतः ॥ ४० ॥ हेम्नारूप्येणवाशक्त्यागंगामूर्तिविधायच ॥ वस्त्राच्छादितवक्त्रस्यपूर्णकुंभस्यचोपरि ॥ ४१ ॥ प्रतिष्ठाप्यार्चयेद्देवींपंचामृतविशोधिताम् ॥ चतुर्भुजांत्रिने त्रांचनदीनदनिषेविताम् ॥ ४२ ॥ लावण्यामृतनिष्पंदसंशीलद्वात्रयाष्टिकाम् ॥ पूर्णकुंभसितांभोजवरदाभयसत्कराम् ॥ ४३ ॥ ततोध्यायेत्सुसोम्यां चचंद्रायुतसमप्रभाम् ॥ चामरैर्वीज्यमानांचश्वेतच्छत्रोपशोभिताम् ॥ ४४ ॥ सुधाप्लावितभूपृष्ठांदिव्यगंधानुलेपनाम् ॥ त्रैलोक्यपूजितपदांदिवार्पिभिर भिष्टुताम् ॥ ४५ ॥ ध्यात्वासमर्च्यमंत्रेणधूपदीपोपहारतः ॥ मांचत्वांचविधिंत्रभ्रंहिमवंतंभगीरथम् ॥ ४६ ॥ प्रतिमाग्रेसमभ्यर्च्यचंदनाक्षतनिर्मितान् ॥ दशप्रस्थतिलान्दद्याद्दशविप्रेभ्यआदरात् ॥ ४७ ॥ पलंचकुडवःप्रस्थआढकोद्रोणएवच ॥ धान्यमानेनवोद्धव्याःक्रमशोमीचतुर्गुणाः ॥ ४८ ॥ मत्स्यकच्छपमंडूकमकरादिजलेचरान् ॥ हंसकारंडवबकचक्रटिट्टिभसारसान् ॥ ४९ ॥

यथाशक्तिस्वर्णरूप्यताम्रपृष्ठविनिर्मितान् ॥ अभ्यर्च्यगंधकुसुमैर्गंगायांप्रक्षिपेद्बती ॥ १५० ॥ एवंकृत्वाविधानेनवित्तशाठ्यविवर्जितः ॥ उपवासीवश्य माणैर्दशपापैःप्रमुच्यते ॥ ५१ ॥ अदत्तानामुपादानंहिंसाचैवाविधानतः ॥ परदारोपसेवाचकायिकंत्रिविधंस्मृतम् ॥ ५२ ॥ पारुष्यमनृतंचैवपैशुन्यंचे वसर्वशः ॥ असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधम् ॥ ५३ ॥ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनम् ॥ वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतम् ॥ ॥ ५४ ॥ एतैर्दशविधैःपापैर्दशजन्मसमुद्भवैः ॥ मुच्यतेनात्रसंदेहःसत्यंसत्यंगदाधर ॥ ५५ ॥ उद्धरेन्नरकात्पूर्वान्दशचैवगदाधरान् ॥ वक्ष्यमाणमिदं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्तोत्रंगंगायैश्रद्धयाजपेत् ॥ ५६ ॥ ॐनमःशिवायैगंगायैशिवदायैनमोनमः ॥ नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्त्यैनमोस्तुते ॥ ५७ ॥ नमस्तेरुद्ररूपिण्यैशा
कर्यैतेनमोनमः ॥ सर्वदेवस्वरूपिण्यैनमोमेपजमूर्त्तये ॥ ५८ ॥ सर्वस्यसर्वव्याधीनांभिषग्भ्यश्चैवनमोस्तुते ॥ स्थानुजंगमसंभूतावेपहंन्यैनमो
स्तुते ॥ ५९ ॥ संसारविषनाशिन्यैजीवनायैनमोस्तुते ॥ तापत्रितयसंहंन्यैप्राणेश्यैतेनमोनमः ॥ १६० ॥ शांतिसंतानकारिण्यैनमस्तेशुद्धमूर्तये ॥
सर्वसंशुद्धिकारिण्यैनमःपापारिमूर्तये ॥६१॥ मुक्तिमुक्तिप्रदायिन्यैभद्रदायैनमोनमः ॥ योगोयभोगदायिन्यैभोगवत्यैनमोस्तुते ॥ ६२ ॥ मंदाकिन्यै
नमस्तेस्तुस्वर्गदायैनमोनमः ॥ नमस्त्रैलोक्यभूषायैत्रिपथायैनमोनमः ॥ ६३ ॥
नमस्त्रिशुक्लसंस्थायैक्षमावत्यैनमोनमः ॥ त्रिहुताशनसंस्थायैतेजोवत्यैनमोनमः ॥ ६४ ॥ नंदायैलिंगधारिण्यैसुधाधारात्मनेनमः ॥ नमस्तेविश्वभुरुपा
यैरवत्यैतेनमोनमः ॥ ६५ ॥ वृहत्यैतेनमस्तेस्तुलोकधात्र्यैनमोस्तुते ॥ नमस्तेत्रिश्चमित्रायैनंदिन्यैतेनमोनमः ॥ ६६ ॥ पृथ्व्यैशिवामृतायैचसुधृपायै
नमोनमः ॥ परापरशताढ्यायैतागयैतेनमोनमः ॥ ६७ ॥ पाशजालनिकृंतिन्यैअभिन्नायैनमोस्तुते ॥ शांतायैचचरिष्ठायैवरदायैनमोनमः ॥६८॥ उग्रायै
सुखजग्ध्यैचसंजीविन्यैनमोस्तुते ॥ ब्रह्मिष्ठायैब्रह्मदायैदुरितघ्न्यैनमोनमः ॥ ६९ ॥ प्रणतार्तिप्रभंजिन्यैजगन्मात्रेनमोस्तुते ॥ सर्वापन्निपक्षायैमं
गलायैनमोनमः ॥ ७० ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते ॥ ७१ ॥ निर्लेपायैदुर्गहंन्यैदक्षायैनमोनमः ॥
परापरपरायैचगंगेनिर्वाणदायिनि ॥ ७२ ॥

गंगेमामग्रतोधूयागंगेमेतिष्ठपृष्ठतः ॥ गंगेमेपार्श्वयोरेधिगंगेत्वय्यस्तुमेस्थितिः ॥ ७३ ॥ आदौत्वमंतेमध्येचसर्वत्रंगांगतेशिवे ॥ त्वमेवमूलप्रकृतिस्त्वं
पुमान्परएवहि ॥ गंगेत्वंपरमात्माचशिवस्तुभ्यंनमःशिवे ॥ ७४ ॥ यइदंपठतेस्तोत्रंशृणुयाच्छ्रद्धयापियः ॥ दशधामुच्यतेपापैःकायवाक्चित्तसंभवैः ॥
॥ ७५ ॥ रोगस्थोरोगतोमुच्येद्विपद्भ्यश्चविपद्युतः ॥ मुच्यतेबंधनाद्बद्धोभीतोभीतेःप्रमुच्यते ॥ ७६ ॥ सर्वान्कामानवाप्नोतिप्रेत्यत्रिदिवंव्रजेत् ॥ दिव्यं
विमानमारुह्यादिव्यस्त्रीपरिवीजितः ॥ ७७ ॥ गृहेपिलिखितंयस्यसदातिष्ठतिधारितम् ॥ नाग्निचौरभयंतस्थानसर्पादिभयंक्वचित् ॥ ७८ ॥ ज्यष्ठेमासे
सितेपक्षेदशमीहस्तसंयुता ॥ संहरेत्त्रिविधंपापंवुधयारेणसंयुता ॥ ७९ ॥ तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः ॥ यःपठेद्दशकृत्वस्तुदृग्द्रोग्रापि
चाक्षमः ॥ ८० ॥ सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः ॥ पूर्वोक्तेनविधानेनयत्फलंसंप्रकीर्तितम् ॥ ८१ ॥ यथागौगीतथागंगातस्माद्गौर्यास्तुपूजने ॥
योविधिर्विहितःसम्यक्सोपिगंगाप्रपूजने ॥ ८२ ॥ यथाऽहंत्वंतथाविष्णोयथात्वंतुतथाद्रुमा ॥ उमात्वथातथागंगाचतनूरूपंनभिद्यते ॥ ८३ ॥ विष्णुरुद्रौ
तरंचैवश्रीगौर्योरंतरंतथा ॥ गंगागौर्यंतरंचैवयोमूढधीस्तुसः ॥ ८४ ॥ इति श्रीस्कांदेमहापुराणेएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धे
गंगामहिमवर्णनपूर्वकदशहरास्तोत्रकथनंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥

उमोवाच ॥ ॥ किंचित्प्रभुमनानाथस्वसंदेहापनुत्तये ॥ वदखेदोयदिनतेत्रिकालज्ञानकोविद ॥ १ ॥ तदाभगीरथोराजाकक्षभागीरथीतदा ॥ यदा
विष्णुस्तपस्तेपेचक्रपुष्करिणीतटे ॥ २ ॥ ॥ शिवउवाच ॥ ॥ संदेहोऽत्रनकर्तव्योविशालाक्षिसदामले ॥ श्रुतौस्मृतौपुराणेषुकालत्रयमुदीर्यते ॥
॥ ३ ॥ भूतंभाविभवच्चापिसंशयंमावृथाकृथाः ॥ इत्युक्त्वापुनराहेशोगंगामाहात्म्यमुत्तमम् ॥४॥ ॥ अगस्त्यउवाच ॥ पार्वतीनंदनपुनर्धुन्याःपरितो
वद ॥ मांहेमोक्तोहरोयद्वद्देवदेवेनचेतदा ॥ ५ ॥ स्कंदउवाच ॥ मुनऽत्रमैत्रावरुणेयथादेवेनभाषितम् ॥ शृणुत्रिपथगामिन्यामाहात्म्यंपातकापहम् ॥६॥
त्रिस्रोतसंसमासाद्यसकृत्पिंडान्ददातियः ॥ उद्धृताःपितरस्तेनभवांभोधेस्तिलोदकैः ॥ ७ ॥ यावंतश्चतिलामर्त्यैर्गृहीताःपितृकर्मणि ॥ तावद्वर्षसहस्राणि
पितरःस्वर्गवासिनः ॥ ८ ॥ देवाःसपितरोयस्माद्गंगासंवदास्थिताः ॥ आवाहनंविसर्गंचतेपांतत्रततोनहि ॥ ९ ॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥
गुरुश्वशुरबंधूनांयेचान्येबांधवामृताः ॥ १० ॥ अजातदंतायेकेचिद्येचगर्भेप्रपीडिताः ॥ अग्निविद्युच्चोरहताव्याघ्रदंष्ट्रिभिरेवच ॥ ११ ॥ उद्बंधनमृतायै
चपतिताआत्मघातकाः ॥ आत्मविक्रयिणश्चोरायेतथाऽन्याज्ययाजकाः ॥ १२ ॥ रसविक्रयिणोयेचयेचान्येपापरोगिणः ॥ अग्निदागरदाश्चैवगोघ्नाश्चै
वस्त्ववंशजाः ॥ १३ ॥ असिपत्रवनेयेचकुंभीपाकेचयेगताः ॥ रौरवेप्यंधतामिस्रेकालसूत्रेचयेगताः ॥१४॥ जात्यंतरसहस्रेषुभ्राम्यंतेयेस्वकर्मभिः ॥
येतुपश्विमृगादीनांकीटवृक्षादिवीरुधाम् ॥ १५ ॥ योनिंगतास्त्वसंख्याताःसंख्यातानामशोभनाः ॥ प्रापितायमलोकंतुसुघोरैर्यमकिंकरैः ॥ १६ ॥
येऽबांधवाबांधवावायेऽन्यजन्मनिबांधवाः ॥ येपिचाज्ञातनामानोयेचापुत्राःस्वगोत्रजाः ॥ १७ ॥
विषेणचमृतावैयेदंष्ट्रैःशृंगैर्भेराहताः ॥ कृतघ्नाश्चगुरुघ्नाश्चयेचमित्रद्रुहस्तथा ॥ १८ ॥ स्त्रीबालघातकायेचयेचविश्वासघातकाः ॥ असत्यहिंसानिरताः
सदापापरताश्चये ॥ १९ ॥ अश्वविक्रयिणोयेचपरद्रव्यहराश्चये ॥ अनाथाःकृपणादीनामानुर्यंप्राप्तुमक्षमाः ॥ २० ॥ तर्पिताजाह्नवीतोयैर्नरेणविधि
नासकृत् ॥ प्रयांतिस्वर्गतिंतेपिस्वर्गिणोमुक्तिमाप्नुयुः ॥२१॥ एतान्मंत्रान्समुच्चार्यःकुर्यात्पितृतर्पणम् ॥ श्राद्धंपिंडप्रदानंचसविधिज्ञइहोच्यते ॥ २२ ॥
कामप्रदानितीर्थानित्रैलोक्येयानिकानिचित् ॥ तानिसर्वाणिसेवंतेकाश्यामुत्तरवाहिनीम् ॥ २३ ॥ स्वःसिंधुःसर्वतःपुण्याब्रह्महत्यापहारिणी ॥ काश्यां
विशेषतोविष्णोयत्रचोत्तरवाहिनी ॥ २४ ॥ गायंतिगाथामेनांदेवर्षिपितरोगणाः ॥ अपिदृग्गोचरानःस्यात्काश्यामुत्तरवाहिनी ॥२५॥ यत्रत्यामृतसं
तृप्तास्तापत्रितयवर्जिताः ॥ स्यामत्वमृतमवाद्यविश्वनाथप्रसादतः ॥ २६ ॥ गंगैवकेवलामुक्तयैनिर्णीतापरितोहरे ॥ अविमुक्तेविशेषेणममाधिष्ठानगो
रवात् ॥ २७ ॥ ज्ञात्वाकलियुगंघोरंगंगाभक्तिःसुगोपिता ॥ नविंदंतिजनागंगांमुक्तिमार्गेकदायिकाम् ॥ २८ ॥ अनेकजन्मनियुतंभ्राम्यमाणस्तुयो
निषु ॥ निर्वृतिंप्राप्नुयात्कोत्रजाह्नवीभजनंविना ॥ २९ ॥ नराणामल्पबुद्धीनामेनोविक्षिप्तचेतसाम् ॥ गंगैवपरमंविष्णोरेपजंभवरोगिणाम् ॥ ३० ॥
खंडस्फुटितसंस्कारंगंगार्तीकरोतियः ॥ ममलोकेचिरंकालंतस्याक्षयसुखंहरे ॥ ३१॥ गंतुमुद्दिश्ययोगंगांपरार्थंस्वार्थमेववा ॥ नगच्छतिपरंमोहात्सपते
त्पितृभिःसह ॥ ३२ ॥ सर्वाणियेपांगांगेयैस्तोयैःकृत्यानिदेहिनाम् ॥ भूमिस्थाअपितेमर्त्याअमर्त्याएववैहरे ॥ ३३ ॥ चरमेपित्र्योभागेस्वःसिंधुंयो
निषेवते ॥ कृत्वाप्येनांसिवहुशःसोपियायाच्छुभांगतिम् ॥३४॥ यावदस्थिमनुष्याणांगंगातोयेषुतिष्ठति ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥३५॥
विष्णुरुवाच ॥ ॥ हे देवजगन्नाथजगतांहितकृत्प्रभो ॥ कीकसंचेत्पतेद्देवाद्वृत्तस्यदुरात्मनः ॥३६॥ जलेद्युनद्यानिष्पापेकथंतस्यपरागतिः ॥ अपमृ
त्युविपन्नस्यतदीशविनिवेद्यताम् ॥ ३७ ॥ ॥ महेश्वरउवाच ॥ ॥ अत्रार्थेकथयिष्यामिपुरावृत्तमधोक्षज ॥ शृणुष्वैकमनाविष्णोवाहीकस्यद्वि
जन्मनः ॥ ३८ ॥ पुराकलिंगविषयेद्विजोलवणविक्रयी ॥ संध्यास्नानविहीनश्चवेदाक्षरविवर्जितः ॥ ३९ ॥ वाहीकोनामतोयज्ञसूत्रमात्रपरिग्रहः ॥
पाश्यग्रहश्चतस्यासीत्कौविदीविधवानवा ॥ ४० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दुर्भिक्षपीडितेनाथवृषलीपतिनाविना ॥ प्राणाधारंतदातेनदेशाद्देशांतरंययौ ॥ ४१ ॥ मध्येऽथदंडकारण्यंक्षुत्क्षामःसंगवर्जितः ॥ व्याघ्रेणघातितस्तत्र नरमांसप्रियेणसः ॥ ४२ ॥ तस्यवामपदंगृध्रोगृहीत्वोदपतत्ततः ॥ मांसाशिनाऽन्यगृध्रेणतस्ययुद्धमभूद्दिवि ॥ ४३ ॥ गृध्रयोरामिषंगृध्न्वोःपरस्परजयै पिणोः ॥ अवापतत्पादगुल्फंकंकचंचुपुटात्तदा ॥ ४४ ॥ तस्यवाहीकविप्रस्यव्याघ्रव्यापादितस्यह ॥ मध्येगंगंदैवयोगादपतद्वंद्वकारिणोः ॥ ४५ ॥ यदैवहतवान्द्वीपीतंवाहीकमरण्यगम् ॥ तस्मिन्नेवक्षणेबद्धःसपाशैःक्रूरकिंकरैः ॥ ४६ ॥ कशाभिर्घातितोत्यंतमाराभिःपरितोदितः ॥ वमन्रुधिरमास्ये ननीतस्तैःसयमाग्रतः ॥ ४७ ॥ आपृच्छिधर्मराजेनचित्रगुप्तोथमापते ॥ धर्माधर्मविचार्यास्यकथयाशुद्विजन्मनः ॥ ४८ ॥ वैवस्वतेनपृष्टोथचित्रगुप्तो विचित्रधीः ॥ सर्वदासर्वजंतूनांवेदितासर्वकर्मणाम् ॥ ४९ ॥ जगादयमुनावंधुंवाहीकस्यद्विजन्मनः ॥ जन्मकर्मदिनारभ्यदुर्वृत्तस्यशुभेतरम् ॥ ५० ॥ चित्रगुप्तउवाच ॥ ॥ गर्भाधानादिकंकर्मप्राक्कृतंनास्यकेनचित् ॥ जातकर्मकृतंनास्यपित्राऽज्ञानवताहरे ॥ ५१ ॥ गर्भेनःशमनेहेतुःसमस्तायुःसुख प्रदम् ॥ एकादशेह्निनामास्यनकृतंविधिपूर्वकम् ॥५२॥ ख्यातःस्याद्येनविधिनासर्वत्रविधिपावनम् ॥ नाकार्षीन्निर्गमंचास्यचतुर्थेमासिमंदधीः ॥५३॥ जनकःशुभतिथ्यादौविदेशगमनापहम् ॥ षष्ठेऽन्नप्राशनंमासिनकृतंविधिपूर्वकम् ॥ ५४ ॥ सर्वदामिष्टमश्नातिकर्मणायेनभास्करे ॥ नचूडाकरणंचास्य कृतमब्देयथाकुलम् ॥ ५५ ॥ कर्मणायेनकेशाःस्युःस्निग्धाःकुसुमवर्षिणः ॥ नाकारिकर्णवेधोस्यजनित्रासमयेशुभे ॥ ५६ ॥ सुवर्णग्राहिणौयेनकर्णौ स्यातांचसुश्रुती ॥ मौंजीबंधोप्यभूदस्यव्यतीतेब्देऽष्टमेहरे ॥ ब्रह्मचर्याभिवृद्ध्यैयोब्रह्मग्रहणहेतुकः ॥ ५७ ॥ मौंजीमोक्षणवार्तापिकृतानास्यजनुःकृता ॥ गार्हस्थ्यंप्राप्यतेयस्मात्कर्मणोऽनंतरंवरम् ॥ ५८ ॥

यथाकथंचिद्दृढाऽथपत्नीत्यक्तकुलाध्वगा ॥ वृषलीपतिनातेनपरदारापहारिणा ॥५९॥ आरभ्यपंचमाद्वर्षात्परस्वस्यापहारकः ॥ अभूदेषदुराचारोदुरो दरपरायणः ॥ ६० ॥ रुमायांवसताऽनेनहतागौरेकवार्षिकी ॥ एकदादृढदंडेनलिहंतीलवणंमृता ॥ ६१ ॥ जननींपादघातेनबहुशोऽसावताडयत् ॥ कदाचिदपिनोवाक्यंहितुःकृतमनेनवै ॥ ६२ ॥ विषंभक्षितवानेषबहुशःकलहप्रियः ॥ जनोपतापशीलोसौकृतोदरविदारणः ॥ ६३ ॥ धत्तूरकरवी रादिबहुधोपविषाणिच ॥ क्रीडाकलहमात्रेणभक्षयच्चैषदुर्मतिः ॥ ६४ ॥ दग्धोसावग्निनासौरैश्वभिश्चकवलीकृतः ॥ शृंगिभिःपरितःप्रोतोविषाणाग्रैरसौ बहु ॥ ६५ ॥ दंदशूकैर्भृशंदष्टोदुष्टःशिष्टैर्विगर्हितः ॥ काष्ठेष्टलोष्टैःपापिष्ठःकृतानिष्टःसदात्मनः ॥ ६६ ॥ आस्फालितंशिरोनेनासकृच्चापिदुरात्मना ॥ यदर्च्यतेसदासद्भिरुत्तमांगमनेकधा ॥ ६७ ॥ असाहिब्राह्मणोमंदोगायत्रीमपिवेदन ॥ कामतोमत्स्यमांसानिजग्धान्येतेनदुर्धिया ॥ ६८ ॥ आत्मार्थं पायसमसौपर्यपाक्षीदनेकधा ॥ लाक्षालवणमांसानांसपयोदधिसर्पिषाम् ॥६९॥ विषलोहायुधानांचदासीगोवाजिनामपि ॥ विक्रेताऽसौसदामूढस्तथा वैकेशचर्मणाम् ॥ ७० ॥ शूद्रान्नपरिपुष्टांगःपर्वण्यहनिमैथुनी ॥ पराङ्मुखोदैवपित्र्यकर्मण्येषदुरात्मवान् ॥ ७१ ॥ पक्षिणोघातितानेनमृगाश्चापिपरः शतम् ॥ अकारणद्रुमच्छेदीसदानिर्दयमानसः ॥ ७२ ॥ उद्वेगजनकोनित्यंनिजबंधुजनेष्वपि ॥ असत्यवादीसततंसदाहिंसापरायणः ॥ ७३ ॥ अदत्तदानःपिशुनःशिश्नोदरपरायणः ॥ किंबहूक्तेनरविजसाक्षात्पातकमूर्तिमान् ॥ ७४ ॥ रौरवेप्यंधतामिस्रेकुंभीपाकेऽतिरौरवे ॥ कालसूत्रेकृमिभु जिपूयशोणितकर्दमे ॥ ७५ ॥ असिपत्रवनेघोरेयंत्रपीडेसुदंष्ट्रके ॥ अधोमुखेपूतिगंधेविष्ठावर्त्तेष्वभोजने ॥७६॥ सूचीभेद्येऽथसंदंशेलालापेक्षुरधारके ॥ प्रत्येकंनरकेत्वेषपात्यतांकल्पसंख्यया ॥ ७७ ॥ धर्मराजःसमाकर्ण्यचित्रगुप्तमुखादिति ॥ निर्भर्त्स्यतंदुराचारंकिंकरानादिदेशह ॥ ७८ ॥

भ्रूसंज्ञयाहृतैर्नीतःसबद्धानिरयालयम् ॥ आक्रंदरावोयत्रोच्चैःपापिनांगेमहर्षणः ॥ ७९ ॥ ॥ ईश्वरउवाच ॥ ॥ यातनास्वतितीव्रासुवाहीकेसंस्थिते तदा ॥ तत्कालपुण्यफलदेगाङ्गेयांभसिनिर्मले ॥ ८० ॥ पतितंतद्धिगृध्रास्याद्वाहीकस्यद्विजन्मनः ॥ हरेविमानंतत्कालमापन्नंसुरसद्मतः ॥ ८१ ॥ घंटावलंबितंदिव्यंदिव्यस्त्रीशतसंकुलम् ॥ आरुह्यदेवयानंसदिव्यवेषधरोद्विजः ॥ ८२ ॥ वीज्यमानोऽप्सरोवृंदैर्दिव्यगंधानुलेपनः ॥ जगामस्वर्गभुवनं गंगास्थिपतनाद्धरे ॥ ८३ ॥ स्कंदउवाच ॥ ॥ वस्तुशक्तिविचारोयमद्भुतःकोपिकुंभज ॥ द्रवरूपेणकाप्येषाशक्तिःसादाशिवीपरा ॥ ८४ ॥ करुणामृतपूर्णेनदेवदेवेनशंभुना ॥ एषाप्रवर्तितागंगाजगदुद्धरणायवै ॥ ८५ ॥ यथान्याःसरितोलोकेवारिपूर्णाःसहस्रशः ॥ तथैषानानुमंतव्यासद्भि स्त्रिपथगामिनी ॥८६॥ श्रुत्यक्षराणिनिश्चोत्यकारुण्याच्छंभुनामुने ॥ निर्मितातद्द्रवैरेषागंगागंगाधरेणवै ॥ ८७ ॥ योगोपनिषदामेतंसारमाकृष्यशंकरः ॥ कृपयासर्वजंतूनांचकारसरितांवराम् ॥ ८८ ॥ अकलानिधयोरात्र्योविपुष्पाश्चैवपादपाः ॥ यथातथैवतेदेशायत्रनास्त्यमरापगा ॥ ८९ ॥ अनयाः संपदोयद्वन्मखायद्वददक्षिणाः ॥ तद्वद्देशादिशःसर्वाहीनागंगांभसाहरे ॥ ९० ॥ व्योमांगणमनर्कंचनक्तेऽदीपंयथागृहम् ॥ अवेदाब्राह्मणायद्वद्गंगाही नास्तथादिशः ॥ ९१ ॥ चांद्रायणसहस्रंतुयःकुर्याद्देहशोधनम् ॥ गंगामृतंपिबेद्यस्तुतयोर्गंगांबुपोऽधिकः ॥ ९२ ॥ पादेनैकेनयस्तिष्ठेत्सहस्रंशरदां शतम् ॥ अब्दंगंगांबुपोयस्तुतयोर्गंगांबुपोऽधिकः ॥ ९३ ॥ अवाक्छिराःप्रलंबेद्यःशतसंवत्सरान्नरः ॥ भीष्मसूवालुकातल्पशयस्तस्माद्वरोहरे ॥ ९४ ॥ पापतापाभितप्तानांभूतानामिहजाह्नवी ॥ पापतापहरायद्वद्गंगानान्यत्तथाकलौ ॥ ९५ ॥ तार्क्ष्यवीक्षणमात्रेणफणिनोनिर्विषायथा ॥ निष्प्रभाणितथै नांसिभागीरथ्यवलोकनात् ॥ ९६ ॥ गंगातटोद्भवांमृत्स्नांयोगौलोविभृयान्नरः ॥ बिभर्तिसोऽर्कबिंबंवैतमोनाशायनिश्चितम् ॥ ९७ ॥

व्यसनैरभिभूतस्यधनहीनस्यपापिनः ॥ गंगैवकेवलंतस्यगतिरुक्तानचान्यथा ॥ ९८ ॥ श्रुताभिलषितादृष्टास्पृष्टापीताऽवगाहिता ॥ पुंसांवंशद्वयं गंगातारयेन्नात्रसंशयः ॥ ९९ ॥ कीर्तनाद्दर्शनात्स्पर्शाद्गंगापानावगाहनात् ॥ दशोत्तरगुणाज्ञेयापुण्यापुण्यर्द्धिनाशयोः ॥ १०० ॥ नसुतैर्नचवावित्तै र्नान्येनापिसुकर्मणा ॥ तत्फलंप्राप्यतेमर्त्येगंगामाप्ययदाप्यते ॥ १ ॥ जात्यंधाःपंगवस्तेवैजीवंतोप्यथतेमृताः ॥ समर्थाअपियेगंगांनस्नायुर्मोक्षग र्भिणीम् ॥ २ ॥ श्रुतिंनिशामयहरेगंगामाहात्म्यभाषिणीम् ॥ विनिश्चितार्थांयांश्रुत्वाश्रयेद्गंगांनरोत्तमः ॥ ३ ॥ इरावतींमधुमतींपयस्विनीममृतरूपा मूर्जस्वतीम् ॥ त्रिदिवप्रसूतांगंगांश्रितासस्त्रिदिवंव्रजंति ॥ ४ ॥ ऋषिजुष्टांविष्णुपदींपुराणांसुपुण्यधारांमनसाहिलोके ॥ सर्वात्मनाजाह्नवींयेप्रपन्नास्ते ब्रह्मणःसदनंसंप्रयांति ॥५॥ लोकानिमान्नयतियाजननीवपुत्रान्स्वर्गंसदासर्वगुणोपपन्ना ॥ स्थानमिष्टंब्राह्ममभीप्समानैर्गंगासदैवात्मवशैरुपास्या ॥६॥ उस्रैर्जुष्टामिषतींविश्वरूपामिरावतींजनयित्रींगुहस्य ॥ शिष्टैःसेव्याममृतांब्रह्मकांतांगंगांश्रयेदात्मविशुद्धिकामः ॥ ७ ॥ गंगायांतुनरःस्नात्वाब्रह्मचारी समाहितः ॥ विधूतपापोभवतिवाजपेयंचविंदति ॥ ८ ॥ अशुभैःकर्मभिर्ग्रस्तान्मज्जमानान्महार्णवे ॥ पततोनिरयेगंगासंश्रितानुद्धरेत्सदा ॥ ९ ॥ ब्रह्मलोकस्तुलोकानांसर्वेषामुत्तमोयथा ॥ सरितांसरसांवापिवरिष्ठाजाह्नवीतथा ॥ ११० ॥ अन्यत्रसम्यक्संकल्प्यतपःकृत्वासमात्रयम् ॥ यत्फलं तद्भवेद्भक्त्यागंगायांघटिकाऽर्धतः ॥ ११ ॥ स्वर्गस्थस्यनसाप्रीतिर्भुंजतःसुखमक्षयम् ॥ यास्याद्गंगातटेपुंसांरात्रौचंद्रोदयेसति ॥ १२ ॥ जरारोगा भिपन्नंतुकुणपंजाह्नवीजले ॥ धैर्येणतृणवत्त्यक्त्वाप्रविशेदमरावतीम् ॥ १३ ॥ वायोर्घैःसततंयस्याःप्लाव्यतेशशिमंडलम् ॥ भूयोधिकतरांशोभांबिभर्तितदहः क्षये ॥ १४ ॥ आप्लुतस्यजलेयस्याःसद्योनश्यतिपातकम् ॥ महतःश्रेयसःप्राप्तिस्तत्क्षणादेवजायते ॥१५॥ पितृभ्यःश्रद्धयायत्रदत्तास्त्वापःस्ववंशजैः ॥ प्रयच्छंतिपरांतृप्तिंशरदांत्रयमच्युत ॥ १६ ॥ तारयेत्क्षितियान्मर्त्यानधःस्थांश्चसरीसृपान् ॥ स्वर्गेस्वर्गसदाविष्णोर्गंगात्रिपथगाततः ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तीर्थानामुत्तमंतीर्थंसरितामुत्तमासरित् ॥ स्वर्गदासर्वजंतूनांमहापातकिनामपि ॥ १८ ॥ अध्युष्टाःकोट्योविष्णोसंतितीर्थानिसर्वतः ॥ दिविभुव्यंत रिक्षेचजाह्नव्यांतानिकृत्स्नशः ॥ १९ ॥ ज्ञात्वाज्ञात्वाचगंगायांयःपंचत्वमवाप्नुयात् ॥ अनात्मघातीस्वर्गीस्यान्नरकान्सनपश्यति ॥ १२० ॥ गंगैवसर्व तीर्थानिगंगैवचतपोवनम् ॥ गंगैवसिद्धिक्षेत्रंहिनात्रकार्याविचारणा ॥ २१ ॥ यत्रकामफलावृक्षामहीयत्रहिरण्मयी ॥ जाह्नवीस्नायिनस्तत्रनिवसंतिवटो द्भव ॥ २२ ॥ धेनुंभागीरथीतीरेसुशीलांचपयस्विनीम् ॥ वासोरत्नैरलंकृत्वाब्राह्मणायददातियः ॥ २३ ॥ यावंतितस्यालोमानिमुनेतत्संततेरपि ॥ तावद्वर्षसहस्राणिसस्वर्गसुखभुग्भवेत् ॥ १२४ ॥ ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थे काशीखंडेपूर्वार्द्धे गंगामहिमाना माष्टाविंशतितमोऽध्यायः ॥२८॥ ॥ अगस्त्यउवाच ॥ ॥ विनास्नानेनगंगायानृणांजन्मनिरर्थकम् ॥ उपायांतरमस्त्यन्यद्येनस्नानफलंलभेत् ॥१॥ अशक्तानांचपंगूनामालस्योपहतात्मनाम् ॥ दूरदेशांतरस्थानांगंगास्नानंकथंभवेत् ॥ २ ॥ दानंवाऽथव्रतंवाऽथमंत्रःस्तोत्रंजपोऽथवा ॥ तीर्थांतराभिषे कोवादेवतोपासनंतुवा ॥ ३ ॥ यद्यस्तिकिंचित्पडक्कगंगास्नानफलप्रदम् ॥ विधानांतरमात्रेणतद्वदप्रणतायमे ॥ ४ ॥ त्वत्तोनवेदस्कंदान्योगंगागर्भ समुद्भव ॥ परंस्वर्गतरंगिण्यामहिमानंमहामते ॥ ५ ॥ ॥ स्कंदउवाच ॥ ॥ संतिपुण्यजलानीहसरांसिसरितोमुने ॥ स्थानेस्थानेचतीर्थानिजिता त्माध्युषितानिच ॥६॥ दृष्टप्रत्ययकारीणिमहामहिमभांज्यपि ॥ परंस्वर्गतरंगिण्याःकोट्यंशोपिनतत्रवै ॥ ७ ॥ अनेनैवानुमानेनबुद्ध्यस्वकलशोद्भव ॥ दध्रेगंगोत्तमांगेनदेवदेवेनशंभुना॥८॥स्नानकालेऽन्यतीर्थेषुजप्यतेजाह्नवीजनैः ॥ विनाविष्णुपदींक्वान्यत्समर्थमघमोचने॥९॥गंगास्नानफलंब्रह्मन्गंगा यामेवलभ्यते॥यथाद्राक्षाफलस्वादोद्राक्षायामेवनान्यतः ॥१०॥ अस्त्युपायइहत्वेकःस्याद्येनाविकलंफलम्॥स्नानस्यदेवसरितोमहागुह्यतमोमुने॥११॥

शिवभक्तायशांतायविष्णुभक्तिपरायच ॥ श्रद्धालवेत्वास्तिकायगर्भवासमुमुक्षवे ॥ १२ ॥ कथनीयंनचान्यस्यकस्यचित्केनचित्क्वचित् ॥ इदंरहस्यं परमंमहापातकनाशनम् ॥ १३ ॥ महाश्रेयस्करंपुण्यंमनोरथकरंपरम् ॥ द्युनदीप्रीतिजनकंशिवसंतोषसंतति ॥ १४ ॥ नाम्नांसहस्रंगंगायाःस्तवराजेषुशो भनम् ॥ जप्यानांपरमंजप्यंवेदोपनिषदासमम् ॥ १५ ॥ जपनीयंप्रयत्नेनमौनिनावाचकंविना ॥ शुचिस्थानेषुशुचिनासुस्पष्टाक्षरमेवच ॥ १६ ॥ स्कंदउवाच ॥ ॥ ॐनमोगंगादेव्यै ॥ ॐकाररूपिण्यजराऽतुलाऽनंताऽमृतस्रवा ॥ अत्युदाराऽभयाऽशोकाऽलकनंदाऽमृताऽमला ॥ १७ ॥

अनाथवत्सलाऽमोघाऽपांयोनिरमृतप्रदा ॥ अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता ॥ १८ ॥ अनाथनाथाऽभीष्टार्थसिद्धिदाऽनंगवर्धिनी ॥ अणिमादिगुणाऽधाराग्रगण्याऽलीकहारिणी ॥ १९ ॥ अचिंत्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी ॥ अद्रिराजसुताऽष्टांगयोगसिद्धिप्रदाऽच्युता ॥ २० ॥

अक्षुण्णशक्तिरसुदाऽनंततीर्थाऽमृतोदका ॥ अनंतमहिमाऽपाराऽनंतसौख्यप्रदाऽन्नदा ॥ २१ ॥ अशेषदेवतामूर्तिरघोराऽमृतरूपिणी ॥ अविद्याजालश मनाह्यप्रतर्क्यगतिप्रदा ॥ २२ ॥ अशेषविघ्नसंहर्त्रीत्वशेषगुणगुंफिता ॥ अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥ २३ ॥ अभिरामाऽनवद्यांग्यनंतसारा ऽकलंकिनी ॥ आरोग्यदाऽऽनंदवल्लीत्वापन्नार्तिविनाशिनी ॥ २४ ॥ आश्चर्यमूर्तिरायुष्याह्याढ्याऽऽद्याऽऽप्राऽऽर्यसेविता ॥ आप्यायिन्याप्तविद्याऽऽ ख्यात्वानंदाऽऽश्वासदायिनी ॥ २५ ॥

आलस्यघ्न्यापदांहंत्रीह्यानंदामृतवर्षिणी ॥ इरावतीष्टदात्रीष्टात्विष्टापूर्तफलप्रदा ॥ २६ ॥ इतिहासश्रुतीड्यार्थात्विहामुत्रशुभप्रदा ॥ इज्याशीलस मिज्येष्टात्विंद्रादिपरिवंदिता ॥ २७॥ इलालंकारमालेद्धात्विंदिरारम्यमंदिरा ॥ इदिंदिरादिसंसेव्यात्वीश्वरीश्वरवल्लभा ॥ २८ ॥ ईतिभीतिहरेड्याचत्वी डनीयचरित्रभृत् ॥ उत्कृष्टशक्तिरुत्कृष्टोडुपमंडलचारिणी ॥२९॥ उदितांबरमार्गोस्रोरगलोकविहारिणी ॥ उक्षोर्वरोत्पलोत्कुंभाउपेंद्रचरणद्रवा ॥३०॥

उदन्वत्पूर्तिहेतुश्चोदारोत्साहप्रवर्धिनी ॥ उद्वेगघ्न्युष्णशमनीउष्णरश्मिसुताप्रिया ॥३१॥ उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी ॥ ऊर्जंवहंत्यूर्जधरो र्जावतीचोर्मिमालिनी ॥ ३२ ॥ ऊर्ध्वरेतःप्रियोर्ध्वाध्वाद्यूर्मिलोर्ध्वगतिप्रदा ॥ ऋषिवृंदस्तुतर्द्धिश्चऋणत्रयविनाशिनी ॥ ३३ ॥ ऋतंभरर्द्धिदात्री चऋक्स्वरूपाऋजुप्रिया ॥ ऋक्षमार्गवहर्क्षार्चिर्ऋजुमार्गप्रदर्शिनी ॥ ३४ ॥ एधिताऽखिलधर्मार्थात्वेकैकामृतदायिनी ॥ एधनीयस्वभावैज्यात्वे जिताशेषपातका ॥ ३५ ॥ ऐश्वर्यदैश्वर्यरूपाह्यैतिह्यंह्यैंदवीद्युतिः ॥ ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ॥ ३६ ॥ ओष्ठामृतौन्नत्यदात्रीत्वौषधं भवरोगिणाम् ॥ औदार्यचंचुरौपेंद्रीत्वौग्रीह्यौमेयरूपिणी ॥ ३७ ॥

अंबराध्ववहाऽम्बष्ठांबरमालांबुजेक्षणा ॥ अंबिकांबुमहायोनिरंधोदांधकहारिणी ॥ ३८ ॥ अंशुमालाह्यंशुमतीत्वंगीकृतषडानना ॥ अंधतामिस्रहंत्र्यंधुरं जनाह्यंजनावती ॥ ३९ ॥ कल्याणकारिणीकाम्याकमलोत्पलगंधिनी ॥ कुमुद्वतीकमलिनीकांतिःकल्पितदायिनी ॥ ४० ॥ कांचनाक्षीकामधेनुः कीर्तिकृत्क्लेशनाशिनी ॥ क्रतुश्रेष्ठाक्रतुफलाकर्मबंधविभेदिनी ॥ ४१ ॥ कमलाक्षीक्लमहराकृशानुतपनद्युतिः ॥ करुणार्द्राचकल्याणीकलिकल्मषना शिनी ॥ ४२ ॥कामरूपाक्रियाशक्तिःकमलोत्पलमालिनी ॥ कूटस्थाकरुणाकांताकूर्मयानाकलावती ॥ ४३ ॥

कमलाकल्पलतिकाकालीकलुषवैरिणी ॥ कमनीयजलाकम्राकपर्दिसुकपदगा ॥ ४४ ॥ कालकूटप्रशमनीकदंबकुसुमप्रिया ॥ कालिंदीकेलिललिता कलकल्लोलमालिका ॥ ४५ ॥ क्रांतलोकत्रयाकंडूःकंडूतनयवत्सला ॥ खड्गिनीखड्गधाराभाखगाखंडेंदुधारिणी ॥ ४६ ॥ खेखेलगामिनीखस्थाखंडें दुतिलकप्रिया॥ खेचरीखेचरीवंद्याख्यातिःख्यातिप्रदायिनी ॥४७॥ खंडितप्रणताघौघाखलबुद्धिविनाशिनी ॥ खातैनःकंदसंदोहाखड्गखटांगखेटिनी॥ ॥ ४८ ॥ खरसंतापशमनीखनिःपीयूषपाथसाम् ॥ गंगागंधवतीगौरीगंधर्वनगरप्रिया ॥ ४९ ॥

गंभीरांगीगुणमयीगतातंकागतिप्रिया ॥ गणनाथांबिकागीतागद्यपद्यपरिष्टुता ॥ ५० ॥ गांधारीगर्भशमनीगतिभ्रष्टगतिप्रदा ॥ गोमतीगुह्यविद्यागौर्गो प्त्रीगगनगामिनी ॥ ५१ ॥ गोत्रप्रवर्धिनीगुण्यागुणातीतागुणाग्रणीः ॥ गुहांबिकागिरिसुतागोविंदांघ्रिसमुद्भवा ॥ ५२ ॥ गुणनीयचरित्राचगायत्रीगिरि शप्रिया ॥ गूढरूपागुणवतीगुर्वीगौरववर्धिनी ॥ ५३ ॥ ग्रहपीडाहरागुंद्रागरघ्नीगानवत्सला ॥ घर्महंत्रीघृतवतीघृततुष्टिप्रदायिनी ॥ ५४ ॥

घंटारवप्रियाघोराऽघौघविध्वंसकारिणी ॥ घ्राणतुष्टिकरीघोषाघनानंदाघनप्रिया ॥५५॥घातुकाघूर्णितजलाघृष्टपातकसंततिः ॥ घटकोटिप्रपीतापाघ टिताशेषमंगला ॥ ५६ ॥ घृणावतीघृणनिधिर्घस्मराघूकनादिनी ॥ घुसृणापिंजरतनुर्घर्घराघर्घरस्वना ॥५७॥ चंद्रिकाचंद्रकांतांबुश्चंचदापाचलद्युतिः॥ चिन्मयीचितिरूपाचचंद्रायुतशतानना ॥ ५८ ॥ चपियलोचनाचारुश्चार्वंगीचारुगामिनी ॥ चार्याचारित्रनिलयाचित्रकृच्चित्ररूपिणी ॥ ५९ ॥ चंपूश्चंदनशुच्यंबुश्चर्चनीयाचिरस्थिरा ॥ चारुचंपकमालाढ्याचमिताशेषदुष्कृता ॥ ६० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चिदाकाशवहार्चित्याचंचच्चामरवीजिता ॥ चोरिताशेषवृजिनाचरिताशेषमंडला ॥ ६१ ॥ छेदिताखिलपापौघाछद्मघ्नीछलहारिणी ॥ छन्नत्रिविष्टपत
लाछोटिताशेषबंधना ॥ ६२ ॥ छुरितामृतधारौघाछिन्नेनाश्छंदगामिनी ॥ छत्रीकृतमरालौघाछटीकृतनिजामृता ॥६३॥ जाह्नवीज्याजगन्मातार्जाप्याजं
घालवीचिका ॥ जयाजनार्दनप्रीताज्ञषणीयाजगद्धिता ॥६४॥ जीवनंजीवनप्राणाजगद्ध्येष्टाजगन्मयी ॥ जीवजीवातुलतिकाजन्मिजन्मनिबर्हिणी ॥
॥ ६५ ॥ जाड्यविध्वंसनकरीजगद्योनिर्जलाविला ॥ जगदानंदजननीजलजाजलजेक्षणा ॥ ६६ ॥

जनलोचनपीयूषाजटातटविहारिणी ॥ जयंतीजंजपूकघ्नीजनितज्ञानविग्रहा ॥ ६७ ॥ झलरीवाद्यकुशलाझलज्झालजलावृता ॥ झिंटीशवंद्याझांकारकृ
रिणीझर्झरावती ॥ ६८ ॥ टीकिताशेषपातालाटंकिकेनोद्रिपाटने ॥ टंकारनृत्यत्कल्लोलाटीकनीयमहातटा ॥६९॥ डंबरग्रहाडीनराजहंसकुलाकुला॥
डमड्डमरुहस्ताचडामरोक्तमहांडका ॥७०॥ ढौकिताशेषनिर्वाणाढक्कानादचलज्जला ॥ ढुंढिविघ्नेशजननीढणड्डुणितपातका ॥७१॥ तर्पणीतीर्थतीर्था
चत्रिपथात्रिदशेश्वरी॥त्रिलोकगोप्त्रीतोयेशीत्रैलोक्यपरिवंदिता॥७२॥तापत्रितयसंहर्त्रीतेजोबलविवर्धिनी॥त्रिलक्ष्यातारणीतारातारापतिकरार्चिता ७३
त्रैलोक्यपावनीपुण्यातुष्टिदातुष्टिरूपिणी ॥ तृष्णाछेत्रीतीर्थमातात्रिविक्रमपदोद्भवा ॥ ७४ ॥ तपोमयीतपोरूपातपःस्तोमफलप्रदा ॥ त्रैलोक्यव्यापिनी
तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ॥ ७५ ॥ त्रैलोक्यसुंदरीतुर्यातुर्यातीतपदप्रदा ॥ त्रैलोक्यलक्ष्मीस्त्रिपदीतथ्यातिथिरचंद्रिका ॥ ७६ ॥ तेजोगर्भातपःसारा
त्रिपुरारिशिरोगृहा ॥ त्रयीस्वरूपिणीतन्वीतपनांगजभीतिनुत् ॥७७॥ तारिस्तरणिजामित्रंतर्तापिताशेषपूर्वजा ॥ तुलाविरहितातीव्रपापतूलतनूनपात् ॥
॥ ७८ ॥ दारिद्र्यदमनीदक्षादुष्प्रेक्षादिव्यमंडना ॥ दीक्षावतीदुरावाप्याद्राक्षामधुरवारिभृत् ॥ ७९ ॥

दर्शितानेककुतुकादुष्टदुर्जयदुःखहृत् ॥ दैन्यहृद्दुरितघ्नीचदानवारिपदाब्जजा ॥ ८० ॥ दंदशूकविपघ्नीचदारिताघौघसंततिः ॥ द्रुतादेवद्रुमच्छन्नादुर्वा
रावांबुघातिनी ॥ ८१ ॥ दमग्राह्यादेवमातादेवलोकप्रदर्शिनी ॥ देवदेवप्रियादेवीदिक्पालपददायिनी ॥ ८२ ॥ दीर्घायुःकारिणीदीर्घादोग्ध्रीदूषण
जिता ॥ दुरधांबुवाहिनीदोह्यादेव्यादिव्यगतिप्रदा ॥ ८३ ॥ द्युनदीदीनशरणंदेहिदेहनिवारिणी ॥ द्राघीयसीदाघहंत्रीदितपातकसंततिः ॥ ८४ ॥
दूरदेशांतरचरीदुर्गमादेववल्लभा॥ दुर्वृत्तघ्नीदुर्विगाह्यादयाधारादयावती ॥ ८५ ॥

दुरासदादानशीलाद्राविणीद्रुहिणस्तुता ॥ दैत्यदानवसंशुद्धिकर्त्रीदुर्बुद्धिहारिणी ॥८६॥ दानसारादयासाराद्यावाभूमिविगाहिनी ॥ दृष्टादृष्टफलप्राप्तिर्दे
वतावृंदवंदिता ॥ ८७ ॥ दीर्घव्रतादीर्घदृष्टिर्दीप्ततोयादुरालभा ॥ दंडयित्रीदंडनीतिर्दुष्टदंडधरार्चिता ॥ ८८ ॥ दुरोदरभ्रीदावार्चिर्द्रुघण्यैकशेवधिः ॥
दीनसंतापशमनीदात्रीदवधुवैरिणी ॥ ८९ ॥ दरीविदारणपरादांतादांतजनप्रिया ॥ दारिताद्रितटादुर्गादुर्गारण्यप्रचारिणी ॥ ९० ॥ धर्मद्रवाधर्मशुराधे
नुर्धीराधृतिर्धुवा ॥ धेनुदानफलस्पर्शाधर्मकामार्थमोक्षदा ॥ ९१ ॥

धर्मोर्मिवाहिनीधुर्याधात्रीधात्रीविभूषणम् ॥ धर्मिणीधर्मशीलाचधन्विकोटिकृतावना ॥ ९२ ॥ ध्यातृपापहराध्येयाधारनीभूतकल्मषा ॥ धर्मधाराधर्म
साराधनदाधनवर्धिनी ॥ ९३ ॥ धर्माधर्मगुणच्छेत्रीधन्यरुकुसुमप्रिया ॥ धर्मेशीधर्मशास्त्रज्ञाधनधान्यसमृद्धिकृत् ॥ ९४ ॥ धर्मलभ्याधर्मजलाधर्म
प्रसवधर्मिणी ॥ ध्यानगम्यस्वरूपाचधरणीधातृपूजिता ॥ ९५ ॥ धूर्धूर्जटिजटासंस्थाधन्याधीर्धारणावती॥नंदानिर्वाणजननीनंदिनीनुन्नपातका ॥
॥ ९६ ॥ निषिद्धविघ्ननिचयानिजानंदप्रकाशिनी ॥ नभोंगणचरीनूतिर्नम्यानारायणीनुता ॥ ९७ ॥ निर्मलानिर्मलाख्यानानाशिनीतापसंप
दाम् ॥ नियतानित्यसुखदानानाश्चर्यमहानिधिः ॥ ९८ ॥

नदीनदसरोमातानायिकानाकदीर्घिका ॥ नष्टोद्धरणधीराचनंदनानंददायिनी ॥ ९९ ॥ निर्णिक्तशेषभुवनानिःसंगानिरुपद्रवा ॥ निरालंबानिष्प्रप
चानिर्णिक्तमहामला ॥ १०० ॥ निर्मलज्ञानजननीनिःशेषप्राणितापहृत् ॥ नित्योत्सवानित्यतृप्तानास्कार्यानिरंजना ॥ १ ॥ निष्ठावतीनिरातंका
निर्लेपानिश्चलात्मिका ॥ निरवद्यानिरीहाचनीललोहितसूर्धगा ॥ २ ॥ नंदिशृंगिगणस्तुत्यानागानंदानगात्मजा ॥ निष्प्रत्यूहानाकनदीनिरपायोदधी
र्धनोः ॥ ३ ॥ पुण्यप्रदापुण्यगर्भापुण्यापुण्यतरंगिणी ॥ पृथुःपृथुफलापूर्णाप्रणतार्तिप्रभंजिनी ॥ ४ ॥ प्राणदाप्राणिजननीप्राणेशरीप्राणरूपिणी ॥
पद्मालयापराशक्तिःपुरजित्परमप्रिया ॥ ५ ॥

परापरफलप्राप्तिःपावनीचपयस्विनी ॥ परानंदाप्रकृष्टार्थाप्रतिष्ठापालनीपरा ॥ ६ ॥ पुराणपठिताप्रीताप्रणवाक्षररूपिणी ॥ पार्वतीप्रेमसंपन्नापशुपाश
विमोचनी ॥ ७ ॥ परमात्मस्वरूपाचपरब्रह्मप्रकाशिनी ॥ परमानंदनिष्पंदाप्रायश्चित्तस्वरूपिणी ॥ ८ ॥ पानीयरूपनिर्वाणापरित्राणपरायणा ॥
पापेंधनदवज्वालापापारिःपापनामनुत् ॥ ९ ॥ परमैश्वर्यजननीप्रज्ञाप्राज्ञापरापरा ॥ प्रत्यक्षलक्ष्मीःपद्माक्षीपरव्योमामृतस्रवा ॥ ११० ॥ प्रसन्नरूपाप्र
णिधिःपूताप्रत्यक्षदेवता ॥ पिनाकिपरमप्रीतापरमेष्ठिकमंडलुः ॥ ११ ॥ पद्मनाभपदाध्येयप्रसूतापद्ममालिनी ॥ परर्द्धिदापुष्टिकरीपथ्यापूर्ति
प्रभंजंती ॥ १२ ॥ पुनानापीतगर्भघ्नीपापपर्वतनाशिनी ॥ फलिनीफलहस्ताचफुल्लांबुजविलोचना ॥ १३ ॥

फालिनेनोमहाक्षेत्राफणिलोकंविभूषणम् ॥ फेनच्छलप्रणुन्नेनाःफुल्लकैरवगंधिनी ॥ १४ ॥ फेनिलाच्छांबुधाराभाफुल्लघाटितपातका ॥ फाणितस्वादुस
लिलाफांटपथ्यजलाविला ॥ १५ ॥ विश्वमाताचविश्वेशीविश्वबंधेश्वरप्रिया ॥ ब्रह्मण्याब्रह्मकृद्ब्राह्मीब्रह्मिष्ठाविमलोदका ॥ १६ ॥ विभावरीच
रजाश्रिकांतानेकविष्टपा ॥ विश्वमित्रविष्णुपदीवैष्णवीविष्णवप्रिया ॥ १७ ॥ विरूपाक्षप्रियकरीविभूतिर्विश्वतोमुखी ॥ विपाशावैबुधीवेद्यावेदाक्षररस
स्रवा ॥ १८ ॥ विद्यावेगवतीवंद्यावृंहणीब्रह्मवादिनी ॥ वरदाविप्रकृष्टाचवारिष्ठाचविशोधनी ॥ १९ ॥ विद्याधरीविशोकाचवयोवृंदनिषेविता ॥ बहूद
कांबलवतीव्योमस्थाविद्युधप्रिया ॥ १२० ॥

वाणीवंदवतीवित्ताब्रह्मविद्यातरंगिणी ॥ ब्रह्मांडकोटिव्याप्तांडब्रह्मदत्यापहारिणी ॥ २१ ॥ ब्रह्मेशविष्णुरूपाचबुद्धिर्विभववर्धिनी ॥ विलासिसुखदावै
श्याव्यापिनीचवृषारणिः ॥ २२ ॥ वृषांकमौलिनिलयाविपन्नार्तिप्रभंजिनी ॥ विनीताविनताब्रध्नतनयाविनयान्विता ॥ २३ ॥ विपंचीवाद्यकुशला
वेणुश्रुतिविचक्षणा ॥ वर्चस्करीबलकरीवलोन्मूलितकल्मषा ॥ २४ ॥ विपाप्माविगतातंकाविकल्पपरिवर्जिता ॥ वृष्टिकर्त्रीवृष्टिजलाविधिर्विच्छिन्नबं
धना ॥ २५ ॥ व्रतरूपाचित्तरूपाबहुविघ्नविनाशकृत् ॥ वसुधारावसुमतीविचित्रांगीविभावसुः ॥ २६ ॥ विजयाविश्वतीर्जंचवामदेवीवरप्रदा ॥ वृषा
श्रितापिप्रीचविज्ञानोन्मेषशालिनी ॥ २७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by S3 Foundation USA

भव्याभोगवतीभद्राभवानीभूतभाविनी ॥ भूतधात्रीभयहराभक्तदारिद्र्यघातिनी ॥ २८ ॥ मुक्तिमुक्तिप्रदाभेशीभक्तस्वर्गापवर्गदा ॥ भागीरथीभानुमती भाग्यंभोगवतीधृतिः ॥ २९ ॥ भवप्रियाभवद्वेष्ट्रीभूतिदाभूतिभूषणा ॥ भाललोचनभावज्ञाभूतभव्यभवत्प्रभुः ॥ १३० ॥ भ्रांतिज्ञानप्रशमनीभिन्नब्रह्मांडमंडपा ॥ भूरिदाभक्तिसुलभाभाग्यवद्दृष्टिगोचरी ॥ ३१ ॥ भंजितेषुव्रकुलाभक्ष्यभोज्यसुखप्रदा ॥ भिक्षणीयाभिक्षुमाताभावाभावस्वरूपिणी ॥ ॥ ३२ ॥ मंदाकिनीमहानंदामातासुक्तितरंगिणी ॥ महोदयामधुमतीमहापुण्याशुदाकरी ॥ ३३ ॥

मुनिस्तुतामोहहंत्रीमहातीर्थामधुस्रवा ॥ माधवीमानिनीमान्यामनोरथपथातिगा ॥ ३४ ॥ मोक्षदामतिदामुख्यामहाभाग्यजनाश्रिता ॥ महावेगवतीमेध्यामहामहिमभूषणा ॥ ३५ ॥ महाप्रभावामहतीमीनचंचललोचना ॥ महाकारुण्यसंपूर्णामहर्द्धिश्चमहोत्पला ॥ ३६ ॥ मूर्तिमन्मुक्तिरमणीमणिमाणिक्यभूषणा ॥ मुक्ताकलापनेपथ्यामनोनयननंदिनी ॥ ३७ ॥ महापातकराशिघ्नीमहादेवार्धहारिणी ॥ महोर्मिमालिनीमुक्तामहादेवीमनोन्मना ॥ ॥ ३८ ॥ महापुण्योदयप्राप्यामायातिमिरचंद्रिका ॥ महाविद्यामहामायामहामेधामहोपमम् ॥ ३९ ॥ मालाधरीमहोपायामहोरगविभूषणा ॥ मन्मथोद्दशमनीमहामंगलमंगलम् ॥ १४० ॥

मार्तंडमंडलचरीमहालक्ष्मीर्मदोज्झिता ॥ यशस्विनीयशोदाचयोग्यायुक्तायसेविता ॥ ४१ ॥ योगसिद्धिप्रदायाज्यायज्ञेशपरिपूरिता ॥ यज्ञेशीयज्ञफलदायजनीयायशस्करी ॥४२॥ यसिसेव्यायोगयोनिर्योगिनीयुक्तबुद्धिदा ॥ योगज्ञानप्रदायुक्तायप्राप्यदुर्गयोगयुक् ॥४३॥ यंत्रितायौवसंचारायमलोकनिवारिणी॥ यातायातप्रशमनीयातनानामकृंतनी ॥४४॥ यामिनीशहिमाच्छेदायुगधर्मीविवर्जिता ॥ रेवतीरतिकृद्रम्यारत्नगर्भारमारतिः ॥४५॥ रत्नाकरप्रेमपात्ररसज्ञारसरूपिणी॥रत्नप्रासादगर्भाचरमणीयतरंगिणी॥४६॥रत्नार्चीरुद्ररमणीरागद्वेषविनाशिनी॥रमारामारम्यकरुपारोगिजीवातुरूपिणी ॥४७॥

रुचिकुद्रोचनीरम्यारुचिरारोगहारिणी ॥ राजहंसारत्नवतीराजत्कल्लोलराजिका ॥ ४८ ॥ रामणीयकरेखाचरुजारीरोगरोपिणी ॥ राकारंकार्तिशमनी रम्यारोलंबराधिणी ॥ ४९ ॥ रागिणीरंजितशिवारूपलावण्यशेवधिः ॥ लोकप्रसूर्लोकवंद्यालोलत्कल्लोलमालिनी ॥ १५० ॥ लीलावतीलोकभूमिर्लोकलोचनचंद्रिका ॥ लेखस्रवंतीलटभालघुवेगालघुत्वदृत् ॥ ५१ ॥ लास्यत्तरंगहस्ताचललितालयभंगिगा ॥ लोकबंधुर्लोकधात्रीलोकोत्तरगुणोर्जिता ॥ ५२ ॥ लोकत्रयहितालोकालक्ष्मीर्लक्षणलक्षिता ॥ लीलालक्षितनिर्वाणालावण्यामृतवर्षिणी ॥ ५३ ॥

वैश्वानरीवासवेडयावंध्यत्वपरिहारिणी ॥ वासुदेवांघ्रिरेणुघ्नीवज्रिवज्रनिवारिणी ॥ ५४ ॥ शुभावतीशुभफलाशांतिःशांतनुवल्लभा ॥ शूलिनीशेशवंद्याःशीतलाऽमृतवाहिनी ॥ ५५ ॥ शोभावतीशीलवतीशोपिताशेषकिल्विषा ॥ शरण्याशिवदाशिष्टाशरजन्मप्रसूःशिवा ॥ ५६ ॥ शक्तिःशशांकविमलाशमनस्वसूसंमता ॥ शमाशमनमार्गघ्नीशितिकंठमहाप्रिया ॥५७॥ शुचिःशुचिकरीशेषाशेषशायिपदोद्भवा ॥ श्रीनिवासश्रुतिःश्रद्धाश्रीमतीश्रीःशुभव्रता ॥ ॥ ५८ ॥ शुद्धविद्याशुभावर्ताश्रुतानंदाश्रुतिस्तुतिः ॥ शिवेतरघ्नीशवरीशांबरीरूपधारिणी ॥ ५९ ॥

श्मशानशोधनीशांताश्वच्छतधृतिप्लुता ॥ शालिनीशालिशोभाढ्याशिखिवाहनगर्भभृत् ॥ १६० ॥ शंसनीयचरित्राचशांतिताशेषपातका ॥ षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी ॥ ६१ ॥ षंढताहारिसलिलाष्टधायत्रदनदीशता ॥ सारिद्राचसुरसासुप्रभासुरदीर्घिका ॥ ६२ ॥ स्वःसिंधुःसर्वदुःखघ्नी सर्वव्याधिमहौषधम् ॥ सेव्यासिद्धिःसतीसूक्तिःस्कंदसूश्चसरस्वती ॥६३॥ संपत्तरंगिणीस्तुत्यास्थाणुमौलिकृतालया ॥ स्थैर्यदामृभगासौख्याक्षीपुत्रीभाग्यदायिनी ॥ ६४ ॥ स्वर्गनिःश्रेणिकासूक्ष्मास्वधास्वाहासुधाजला ॥ समुद्ररूपिणीस्वर्ग्यासर्वपातकवैरिणी ॥ ६५ ॥ स्मृताघहारिणीसीतासंसारार्णवितरंडिका ॥ सौभाग्यसुंदरीसंध्यासर्वसारसमन्विता ॥ ६६ ॥ हरप्रियाहृपीकेशीहंसरूपाहिरण्मयी ॥ हृताघसंघाहितकृद्धेलाहेलाधगर्वहृत् ॥६७॥

क्षेमदाक्षालिताघौघाक्षुद्रविद्राविणीक्षमा ॥ इतिनामसहस्रेहिगंगायाःकलशोद्भव ॥ कीर्तयित्वानरःसम्यग्गंगास्नानफलंलभेत् ॥६८॥ सर्वपापप्रशमनंसर्वविघ्नविनाशनम् ॥ सर्वस्तोत्रजपाच्छ्रेष्ठंसर्वपावनपावनम् ॥६९॥ श्रद्धयाभीष्टफलदंचतुर्वर्गसमृद्धिकृत् ॥ सकृच्चपादवाप्नोतिह्येकक्रतुफलंमुने ॥१७०॥ सर्वतीर्थेषुयःस्नातःसर्वयज्ञेषुदीक्षितः ॥ तस्ययत्फलमुद्दिष्टंत्रिकालपठनाच्चतत् ॥७१॥ सर्वव्रतेषुयत्पुण्यंसम्यक्चीर्णेषुवाडव ॥ तत्फलंसमवाप्नोतित्रिसंध्यं नियतःपठन् ॥ ७२ ॥ स्नानकालेपठेद्यस्तुयत्रकुत्रजलाशये ॥ तत्रसन्निहितानूनंगंगाऽपिपथगामुने ॥ ७३ ॥ श्रेयोर्थीलभतेश्रेयोधनार्थीलभतेधनम् ॥ कामीकामानवाप्नोतिमोक्षार्थीमोक्षमाप्नुयात् ॥७४॥ वर्षंत्रिकालपठनाच्छ्रद्धयाशुचिमानसः ॥ ऋतुकालाभिगमनादपुत्रःपुत्रवान्भवेत् ॥ ७५ ॥ नाकालमरणंतस्यनाग्निचोराहिसाध्वसम् ॥ नाम्नांसहस्रंगंगायायोजपेच्छ्रद्धयामुने ॥ ७६ ॥ गंगानामसहस्रंतुजप्त्वाग्रामांतरंव्रजेत् ॥ कार्यसिद्धिमवाप्नोतिनिर्विघ्नोगेहमाविशेत् ॥७७॥ तिथिवारर्क्षयोगानांनदोषःप्रभवेत्तदा ॥ यदाजप्त्वाव्रजेदेतत्स्तोत्रंग्रामांतरंनरः ॥ ७८॥ आयुरारोग्यजननंसर्वोपद्रवनाशनम्॥ सर्वसिद्धिकरंपुंसांगंगानामसहस्रकम् ॥ ७९ ॥ जन्मांतरसहस्रेपुयत्पापंसम्यगर्जितम् ॥ गंगानामसहस्रस्यजपनात्तत्क्षयंव्रजेत् ॥ १८० ॥ ब्रह्महा मद्यपःस्वर्णस्तेयीचगुरुतल्पगः ॥ तत्संयोगीभ्रूणहंतामातृहापितृहामुने ॥ ८१ ॥ विश्वासघातीगरदःकृतघ्नोमित्रघातकः ॥ अग्निदोगोवधकरोगुरुद्रव्यापहारकः ॥ ८२ ॥ महापातकयुक्तोपिसंयुक्तोप्युपपातकैः ॥ मुच्यतेश्रद्धयाजप्त्वागंगानामसहस्रकम् ॥ ८३ ॥

आधिव्याधिपरिक्षिप्तोघोरतापपरिप्लुतः ॥ मुच्यतेसर्वदुःखेभ्यःस्तवस्यास्यानुकीर्तनात् ॥ ८४ ॥ संवत्सरेणयुक्तात्मापठन्भक्तिपरायणः ॥ अभीप्सितांलभेत्सिद्धिंसर्वैःपापैःप्रमुच्यते ॥ ८५ ॥ संशयाविष्टचित्तस्यधर्माविद्वेषिणोपिच ॥ दांभिकस्यापिहिंस्रस्यचेतोधर्मपरंभवेत् ॥८६॥ वर्णाश्रमपथीनस्तुकामक्रोधविवर्जितः ॥ यत्फलंलभतेज्ञानीतदाप्नोत्यस्यकीर्तनात् ॥ ८७ ॥ गायत्र्ययुतजप्येनयत्फलंसमुपार्जितम् ॥ सकृत्पठनतःसम्यक्तदशेषमवाप्नुयात् ॥८८॥ गांदत्त्वावेदविदुषेयत्फलंलभतेकृती ॥ तत्पुण्यंसम्यगाख्यातंस्तवराजसकृज्जपात् ॥८९॥ गुरुशुश्रूषणंकुर्वन्यावज्जीवंनगोत्तमः॥ यत्पुण्यमर्जयेत्तद्धावर्षंत्रिपवर्णंजपन् ॥१९०॥ वेदपारायणात्पुण्यंयदत्रपरिपठ्यते ॥ तत्पण्मासेनलभतेत्रिसंध्यंपरिकीर्तनात् ॥ ९१ ॥ गंगायाःस्तवराजस्यप्रत्यहंपरिशीलनात् ॥ शिवभक्तिमवाप्नोतिविष्णुभक्तोऽथवाभवेत् ॥ ९२ ॥ यःकीर्तयेदनुदिनंगंगानामसहस्रकम् ॥ तस्यसर्वेपिसहचरीगंगादेवी सदाभवेत् ॥ ९३ ॥ सर्वत्रपूज्योभवतिसर्वत्रविजयीभवेत् ॥ सर्वत्रसुखमाप्नोतिजाह्नवीस्तोत्रपाठतः ॥ ९४ ॥ सदाचारंसविज्ञेयःसशुचिस्तुसदैवहि ॥ कृतसर्वसुरार्चःसकीर्तयेद्यइमांस्तुतिम् ॥९५॥ तस्मिंस्तुष्टेभवेत्तृप्ताजाह्नवीनात्रसंशयः ॥ तस्मात्सर्वप्रयत्नेनगंगाभक्तंसमर्चयेत् ॥ ९६ ॥ स्तवराजमिमं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गांगंशृणुयाद्यश्चवेपठेत ॥ श्रावयेद्यतद्भक्तान्दंभलोभविवर्जितः ॥९७॥ मुच्यतेत्रिविधैःपापैर्मनोवाक्कायसंभवैः ॥ क्षणान्निष्पापतामेतिपितॄणांचप्रियो भवेत् ॥९८॥ सर्वदेवप्रियश्चापिसर्वोपगणसंमतः ॥ अंतेविमानमारुह्यदिव्यस्त्रीशतसंवृतः ॥ ९९ ॥ दिव्याभरणसंपन्नोदिव्यभोगसमन्वितः ॥ नंदनादिवनेस्वैरंदेववत्सप्रमोदते ॥ २०० ॥ भुज्यमानेषुविप्रेषुश्राद्धकालेविशेषतः ॥ जपन्नेदंमहास्तोत्रंपितॄणांतृप्तिकारकम् ॥ १ ॥ यावंतितत्रसिक्थानि यावंतोऽबुकणाःस्थिताः ॥ तावंत्येवहिवर्षाणिमोदंतेस्वःपितामहाः ॥ २ ॥ यथाप्रीणंतिपितरोगंगायांपिंडदानतः ॥ तथैवतृप्तयुःश्राद्धेस्तवस्यास्यानुसं श्रवात् ॥ ३ ॥ एतत्स्तोत्रंगृहेयस्यलिखितंपरिपूज्यते ॥ तत्रपापभयंनास्तिशुचितद्भवनंसदा ॥ ४ ॥ अगस्तेर्किंबहूक्तेनशृणुमेनिश्चितंवचः ॥ संशयो नात्रकर्तव्यःसंदिग्धरिफलंनहि॥५॥यावंतिभर्त्यैस्तोत्राणिमंत्रजालान्यनेकशः ॥ तावंतिस्तवराजस्यगणियस्यसमानिन॥६॥ यावज्जन्मजपेद्यस्तुनाम्नामे तत्सहस्रकम् ॥ सकीकटेष्वपिमृतोनपुनर्गर्भमाविशेत् ॥७॥ नित्यंनियमतोनेतद्योजपेत्स्तोत्रमुत्तमम् ॥ अन्यत्रापिविपन्नःसगंगातीरेमृतोभवेत् ॥ ८ ॥

एतत्स्तोत्रवरंरम्यंपुराप्रोक्तंपिनाकिना ॥ विष्णवेनिजभक्तायमुक्तिबीजाक्षरास्पदम् ॥ ९ ॥ गंगास्नानप्रतिनिधिःस्तोत्रमेतन्मयेरितम् ॥ सिक्तामुर्जाह्नवीं तस्मादेतत्स्तोत्रंजपेत्सुधीः ॥ २१० ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेगंगासहस्रनामकथनंनामैकोनत्रिं शत्तमोऽध्यायः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहाभागसचराजाभगीरथः ॥ आराध्यश्रीमहादेवमुदिधीर्षुःपितामहान् ॥१॥ ब्रह्मशाप विनिर्दग्धान्सर्वान्राजर्षिसत्तमः ॥ महतातपसाभूमिमानिनायत्रिवर्त्मगाम् ॥ २ ॥ त्रयाणामपिलोकानांहिताय महतेनृपः ॥ समानीयत्ततोगंगांयत्रासी न्मणिकर्णिका ॥ ३ ॥ आनंदकाननेशंभोश्चक्रपुष्करिणीहरेः ॥ परब्रह्मैकमुक्षेत्रंलीलामोक्षसमर्पकम् ॥ ४ ॥ प्रापयामासतांगंगांदेलीपिःपुरतश्चरन् ॥ निर्वाणकाशनाद्यत्रकाशीतिप्रथितापुरी ॥ ५ ॥ अविमुक्तंमहाक्षेत्रंनमुक्तंशंभुनाक्वचित् ॥ प्रागेवहिमुनेऽनघ्यंजात्यंजांबूनदंस्वयम् ॥ ६ ॥ पुनर्वारितरे णापिंडीरेणयदिसंगतम् ॥ चक्रपुष्करिणीतीर्थंप्रागेवश्रेयसांपदम् ॥७॥ ततःश्रेष्ठतरंशंभोर्मणिश्रवणसूपणात् ॥ आनंदकाननेतस्मिन्नविमुक्तेशिवालये॥ ॥ ८ ॥ प्रागेवमुक्तिःसंसिद्धागंगासंगात्ततोधिका ॥ यदाप्रभृतिसागंगामणिकर्ण्यांसमागता ॥ ९ ॥ तदाप्रभृतितत्क्षेत्रंदुष्प्रापंत्रिदशैरपि ॥ कृत्वाकर्मा ण्यनेक.निकल्याणानीतराणिवा ॥ १० ॥ तानिक्षणात्समुत्क्षिप्यकाशीसंस्थोऽमृतोभवेत् ॥ तस्यांवेदांतवेद्यस्यनिदिध्यासनतोविना ॥ ११ ॥

विनासांख्येनयोगेनकाश्यांसंस्थोऽमृतोभवेत् ॥ कर्मनिर्मूलनवताविनाज्ञानेनकुंभज ॥ १२ ॥ शशिमौलिप्रसादेनकाशीसंस्थोऽमृतोभवेत् ॥ यत्रतो ऽयत्नतोवापिकालात्त्यक्काकलेवरम् ॥ १३ ॥ तारकस्योपदेशेनकाशीसंस्थोऽमृतोभवेत् ॥ अनेकजन्मसंसिद्धैर्वद्धोऽपिप्राकृतैर्गुणैः ॥ १४ ॥ असिसं भेदयोगेनकाशीसंस्थोऽमृतोभवेत् ॥ देहत्यागोऽत्रवैदानंदेहत्यागोत्रवैतपः ॥ १५ ॥ देहत्यागोऽत्रवैयोगःकाश्यांनिर्वाणसौख्यकृत् ॥ प्राप्योत्तरवहां काश्यामतिदुष्कृतवानपि ॥ १६ ॥ यायात्स्वैहेलयात्यक्तादिष्णोःपरमंपदम् ॥ यमेंद्राग्निमुखादेवाद्दृष्ट्वामुक्तिपथोन्मुखान् ॥ १७ ॥ सर्वान्सर्वेसमालो क्यरक्षांचक्रुःपुरापुरः ॥ असिंमहासिरूपांचपाप्यसन्मतिखंडनीम् ॥ १८ ॥ दुष्टप्रवेशंधुन्वानांधुनींदेवाविनिर्ममुः ॥ वरणांचव्यधुस्तत्रक्षेत्रविघ्ननिवा रिणीम् ॥ १९ ॥ दुर्वृत्तमुप्रवृत्तेश्चनिवृत्तिकरणींसुराः ॥ दक्षिणोत्तरदिग्भागेकृत्वाऽसिंवरणांसुराः ॥ २० ॥ क्षेत्रस्यमोक्षनिक्षेपरक्षांनिर्वृतिमाप्नुयुः ॥ क्षेत्रस्यपश्चादिग्भागेतंदेहलिविनायकम् ॥ २१ ॥ स्वयंव्यापारयामासरक्षार्थंशशिशेखरः ॥ अनुज्ञातप्रवेशानांविश्वेशेनकृपावता ॥ २२ ॥ तेप्रवेशं प्रयच्छंतिनान्येषांदिक्दाचन ॥ इत्यर्थेकथयिष्येऽहमितिहासंपुरातनम् ॥ आश्चर्यकारिपरमंकाशीभक्तिप्रवर्धनम् ॥ २३ ॥ ॥ स्कंदउवाच ॥ ॥ दक्षिणाब्धितटकश्चित्सेतुबंधसमीपतः ॥ वणिग्धनंजयोनाममातृभक्तिसमन्वितः ॥ २४ ॥ पुण्यमार्गार्जितधनोधनतोषितमार्गणः ॥ मार्गणस्फा रितयशायशोदातनयार्चकः ॥ २५ ॥

समुन्नतोपिसंपत्त्याविनयानतकंधरः ॥ आकरोपिगुणानांहिगुणिष्वाकारगोपकः ॥ २६ ॥ रूपसंपदुदारोपिपरदारपराङ्मुखः ॥ ससंपूर्णकलोप्यासी न्निष्कलंकोदयःसदा ॥ २७ ॥ ससत्यानृतवृत्तिश्चप्रायःसत्यप्रियोमुने ॥ वर्णेतरोप्यभूल्लोकेसुवर्णकृतवर्णनः ॥ २८ ॥ सदाचरणगोप्येषसुखयानचरः कृती ॥ अदरिद्रोपिमेधावीसोभूत्पापदरिद्रधीः ॥ २९ ॥ तस्यैवंवर्तमानस्यकदाचित्कालपर्ययात् ॥ जननीनिधनंप्राप्ताव्याधिताऽतिजरातुरा ॥ ३० ॥ तथाचयौवनंप्राप्यमेघच्छायातिचंचलम् ॥ प्रावृण्नदीपूरसमंस्वपतिःपरिवंचितः ॥ ३१ ॥ दिनत्रितुरस्थायियानारीप्राप्ययौवनम् ॥ भर्तारंवंचये न्मोहात्साऽक्षयंनरकंव्रजेत् ॥ ३२ ॥ शीलभंगेननारीणांभर्तांधर्मपरोपिहि ॥ पतेद्दुःखार्जितात्स्वर्गाच्छीलरक्ष्यंततःस्त्रिया ॥ ३३ ॥ विष्ठागर्तेचनिरये स्वयंपततिदुर्मतिः ॥ आभूतसंप्लवंयावत्ततःस्याद्ग्रामसूकरी ॥३४॥ स्वविष्ठापायिनीचाथवल्गुलीवृक्षलंविनी ॥ उलूकीवादिवांधास्याद्वृक्षकोटरवासिनी ॥ ॥ ३५ ॥ रक्षणीयंमहायत्नादिदंसुकृतभाजनम् ॥ वपुःपरस्यदुःस्पर्शात्सुखाभासात्मकात्स्त्रिया ॥ ३६ ॥ अनेनैवशरीरेणभर्तृसाद्विहितेनहि ॥ किंस तीनचतस्तंभभानुमुद्यंतमाज्ञया ॥ ३७ ॥ अत्रिपत्न्यनसूयाकिंभर्तृभक्तिप्रभावतः ॥ दधारनत्रयीगर्भेपतिव्रतपरायणा ॥ ३८ ॥

इहकीर्तिश्चविपुलास्वर्गेवासस्तथाऽक्षयः ॥ पातिव्रत्यात्स्त्रियालभ्यंसखित्वंचश्रियासह ॥ ३९ ॥ सादुर्वृत्त्यापरित्यज्यपतिधर्मंसनातनम् ॥ स्वच्छंदचा रिणीभूत्वामृतानिरयमुद्ययौ ॥ ४० ॥ धनंजयोपिचमुनेकेनचिच्छिवयोगिना ॥ सार्धंतपोदयादित्यंसोऽभवद्धर्मतत्परः ॥४१॥ धनंजयोपिधर्मात्मामा तृभक्तिपरायणः ॥ आदायास्थीन्यथोमातुर्गंगामार्गस्थितोऽभवत् ॥४२॥ पंचगव्येनसंस्नाप्यततःपंचामृतेनवै ॥ यक्षकर्दमलेपेनलिप्त्वापुष्पैःप्रपूज्यच ॥ ४३ ॥ आवेष्ट्यनेत्रवस्त्रेणततःपट्टांबरेणवै ॥ ततःसुरसवस्त्रेणततोमांजिष्ठवाससा ॥४४॥ नेपालकंबलेनाथमृदाचाऽथविशुद्धया ॥ ताम्रसंपुटकेकृत्वा मातुरंगान्यदोवणिक् ॥ ४५ ॥ अस्पृष्टहीनजातिःसशुचिष्मान्स्थंडिलेशयः ॥ आनयञ्जरितोप्यासीन्मध्येमार्गंधनंजयः ॥४६॥ भारवाहःकृतस्तेनक श्चिदत्त्वोचितांभृतिम् ॥ किंबहूक्तेनघटजकाशीप्राप्ताऽथतेनवै ॥ ४७ ॥ धृत्वासंभृतिरक्षार्थंभारवाहंधनंजयः ॥ जगामापणमानेतुंकिंचिद्वस्त्वशनादिकम् ॥ ४८ ॥ भारवाह्यांतरंप्राप्यतस्यसंभृतिमध्यतः ॥ ताम्रसंपुटमादायधनंज्ञात्वागृहंययौ ॥ ४९ ॥

वासस्थानमथागत्यतमदृष्ट्वाधनंजयः ॥ त्वरावान्संभृतिंवीक्ष्यताम्रसंपुटवर्जिताम् ॥ ५० ॥ हाहेत्याताड्यहृदयंचकंदबहुशोभृशम् ॥ इतस्ततस्तमालो क्यगतस्तदनुसास्तः ॥ ५१ ॥ अकृत्वाजाह्नवीस्नानमनवेक्ष्यजगत्पतिम् ॥ तस्यसंनसथंप्राप्तोभारवोदुर्धनंजयः ॥ ५२ ॥ भारवाडप्यरण्यान्यांताम्रसं पुटमध्यतः॥ दृष्ट्वास्थीनिर्विचिनेःश्वस्यतानित्यक्कागृहंययौ ॥५३॥ वणिक्चतद्दृहंप्राप्यशुष्ककंठोष्ठतालुकः ॥ दृष्ट्वाऽथचैलशंकलंतृणकुञ्चंतरेतदा ॥५४॥ आशयाकिंचिदाश्वस्यतत्पत्नीपरिपृष्टवान् ॥ सत्यंब्रूहिनमेतव्यंदास्याम्यन्यदपिध्रुवम् ॥ ५५ ॥ वसुकृतेगतोभर्तामातुरस्थीनिमेऽर्पय ॥ वयंकार्पटिकाभद्रे भवामोनचदुःखदाः ॥ ५६ ॥ अज्ञात्वालोभवशतस्तेननीतोऽस्थिसंपुटः ॥ तस्यैपदोषोनोभद्रेमातुर्मेकर्मतादृशम् ॥५७॥ अथवानप्रमूदोषोमंदभाग्यो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऽस्मितत्सुतः ॥ सुतेनकृत्यंयत्कृत्यंतत्प्राप्तिर्नास्तिभिल्लिमे ॥५८॥ उद्यमंकृतवानस्मिनसिद्ध्येन्मंदभाग्यतः ॥ आयातुसत्यवाक्यान्मेमाबिभेतुवनेचरः ॥ ॥ ५९ ॥ अस्थीनिदर्शयत्वाशुधनंदास्येऽधिकंततः ॥ इत्युक्तातेनसाभिल्लीव्याजहारनिजंपतिम् ॥ ६० ॥ लज्जानम्रशिराःसोऽथवृत्तांतंविनिवेद्यच ॥ निनायतामरण्यानींशवरस्तंधनंजयम् ॥६१॥ वनेचरोऽथतत्स्थानंदैवाद्विस्मृतवान्मुने ॥ दिग्भ्रांतिंसमवाप्याथपरिवभ्रामकानने ॥६२॥ इतोरण्यात्ततो यातिततोरण्यादितोव्रजेत् ॥ वनाद्वनांतरंभ्रांत्वाखिन्नःसोपिवनेचरः ॥ ६३ ॥ विहायमध्येऽरण्यानितंययौचस्वपक्कणम् ॥ द्वित्राण्यहानिसंभ्रम्यसकार्प टिकसत्तमः ॥ ६४ ॥ क्षुत्क्षामःशुष्ककंठोष्ठोहाहेतिपरिदेवयन् ॥ पुनःकाशीपुरींप्राप्तःपरिम्लानमुखोवणिक् ॥ ६५ ॥ तन्मंदभाग्यतांश्रुत्वालोकात्कार्प टिकोमुने ॥ कृत्वागयांप्रयागंचततःस्वविषयंययौ ॥ ६६ ॥ काश्यांप्रवेशंप्राप्यापितदस्थीनिघटोद्भव ॥ विनावैश्वेश्वरीमाज्ञांबहिर्यातानितत्क्षणात् ॥ ॥ ६७ ॥ एवंकाश्यांप्रविश्यापिपापीधर्मानुषंगतः ॥ नक्षेत्रफलमाप्नोतिबहिर्भवतितत्क्षणात् ॥ ६८ ॥

तस्माद्विश्वेश्वराज्ञैवकाशीवासेऽत्रकारणम् ॥ असिश्चवरणायत्रक्षेत्ररक्षाकृतौकृते ॥ ६९ ॥ वाराणसीतिविख्यातातदारभ्यमहामुने ॥ असेश्चवरणायाश्चसं गमंप्राप्यकाशिका ॥ ७० ॥ वाराणसीहकरुणामयदिव्यमूर्तिरुत्सृज्ययत्रतुतनुंतनुभृत्सुखेन ॥ विश्वेशदृङ्महसियत्सहसाप्रविश्यरूपेणतांवितनुतांपदवीं दधाति ॥ ७१ ॥ जातोमृतोबहुषुतीर्थवरेषुरेत्वंजंतोनजातुतवशांतिरभून्निमज्ज्य ॥ वाराणसीनिगदतीहमृतोऽमृतत्वंप्राप्याधुनाममबलात्स्मरशासनः स्याः ॥ ७२ ॥ अन्यत्रतीर्थसलिलेपतितोद्विजन्मादेवादिभावमयतेनतथातुकाश्याम् ॥ चित्रंयदत्रपतितःपुनरुत्थितिंनप्राप्नोतिपुल्कसजनोपिकिमग्र जन्मा ॥ ७३ ॥ सैषापुरीसंसृतिरूपपारावारस्यपारंपुरहापुरारिः ॥ यस्यांपरंपौरुषमर्थमिच्छन्सिद्धिंनयेत्पौरपरंपरांसः ॥ ७४ ॥

तीर्थांतराणिमनुजःपरितोऽवगाह्यहित्वातनुंकलुषितांदिविदैवतंस्यात् ॥ वाराणसीपरिसरेतुविसृज्यदेहंसंदेहभाग्भवतिदेहदशाप्तयेपि ॥ ७५ ॥ वाराणसी समरसीकरणादृतेपियोगादयोगिजनतांजनतापहंत्री ॥ तत्तारकंश्रवणगोचरतांनयंतीतद्ब्रह्मदर्शयतियेनपुनर्भवोन ॥ ७६ ॥ वाराणसीपरिसरेतनुमि ष्टदात्रींधर्मार्थकामनिलयामहहाविसृज्य ॥ इष्टंपदंकिमपिहृष्टतरोभिलष्यलाभोस्तुमूलमपिनोयदवापशून्यम् ॥ ७७ ॥ आःकाशिवासिजनताननुवं चिताभूद्भालेविलोचनवतावनितार्धभाजा ॥ आदाययत्सुकृतभाजनमिष्टदेहंनिर्वाणमात्रमपवर्जयतापुनर्भु ॥ ७८ ॥ वाराणसीस्फुरदसीमगुणैकभूमिर्यत्र स्थितास्तनुभृतःशशिभृत्प्रभावात् ॥ सर्वेगलेगरलिनोऽक्षियुजोललाटेवामार्धवामतनवोऽतनवस्ततोंऽते ॥ ७९ ॥

आनंदकाननमिदंसुखदंपुरैवतत्रापिचक्रसरसीमणिकर्णिकाऽथ ॥ स्वःसिंधुसंगतिरथोपरमास्पदंचविश्वेशितुःकिमिहतन्नविमुक्तयेयत् ॥ ८० ॥ वाराणसी हवरणासिसरिद्वरिष्ठासंभेदखेदजननीद्युनदीलसच्छ्रीः ॥ विश्रामभूमिरचलाऽमलमोक्षलक्ष्म्याहैनांविहायकिमुसीदतिमूढजंतुः ॥ ८१ ॥ किंविस्मृतं त्वहहगर्भजमामनस्यंकार्तांतदूतकृतबंधनताडनंच ॥ शंभोरनुग्रहपरिग्रहलभ्यकाशींमूढोविहायकिमुयातिकरस्थमुक्तिम् ॥ ८२ ॥ तीर्थांतराणिकलुषा णिहरंतिसद्यःश्रेयोददत्यपिबहुत्रिदिवंनयंति ॥ पानावगाहनविधानतनुप्रहाणैर्वाराणसीतुकुरुतेवतमूलनाशम् ॥८३॥ काशीपुरीपरिसरेमणिकर्णिकायां त्यक्त्वातनुंतनुभृतस्तनुमाप्नुवंति ॥ भालेविलोचनवतींगलनीललक्ष्मींवामार्धबंधुरवधूंविधुरावरोधाः ॥ ८४ ॥ ज्ञात्वाप्रभावमतुलंमणिकर्णिकायांयः पुद्गलंत्यजतिचाशुचिपूयगंधि ॥ स्वात्मावबोधमहसासहसामिलित्वाकल्पांतरेष्वपिसनैवपृथक्त्वमेति ॥ ८५ ॥

रागादिदोषपरिपूरमनोहृषीकाःकाशीपुरीमतुलदिव्यमहाप्रभावाम् ॥ येकल्पयंत्यपरतीर्थसमांसमंतात्तेपापिनोनसहतैःपरिभाषणीयम् ॥ ८६ ॥ वाराणसींस्मरहरप्रियराजधानींत्यक्त्वाकुतोव्रजसिमूढदिगंतरेषु ॥ प्राप्याप्यजाद्यसुलभांस्थिरमोक्षलक्ष्मींलक्ष्मींस्वभावचपलांकिमुकामयेथाः ॥ ८७ ॥ विद्याधनानिसदनानिगजाश्वभृत्याःस्रक्चंदनानिवनिताश्चनितांतरम्याः ॥ स्वर्गोप्यगम्यइहनोद्यमभाजिपुंसिवाराणसीत्वसुलभाशलभादिमुक्तिः॥८८॥ धात्राधृतानितुलयातुलनामवैतुंवैकुंठमुख्यभुवनानिचकाशिकाच ॥ तान्युद्ययुर्लघुतयान्यगियंगुरुत्वात्तस्थौपुरीहपुरुषार्थचतुष्टयस्य ॥ ८९ ॥ काशी पुरीमधिवसन्हिनरोनरोपिह्यारोप्यमाणइहमान्यइवैकरुद्रः ॥ नानोपसर्गजनिसर्गजदुःखभारैःकर्मापनुद्यसविशेत्परमेशधाम्नि ॥ ९० ॥

स्थिरापायंकायंजननमरणक्लेशनिलयंविहायास्यांकाश्यामहहपरिगृह्णीतनकुतः ॥ वपुस्तेजोरूपंस्थिरतरपरानंदसदनंविमूढोऽसौजंतुःस्फुटितमिवकां स्यंविनिमयन् ॥ ९१ ॥ अहोलोकःशोकंकिमिहसहतेहंतहतधीर्विपद्भारैःसारैर्नियतनिधनैर्ध्वंसितधनैः ॥ क्षितौसत्यांकाश्यांकथयतिशिवोयत्रनिधने श्रुतौकिंचिद्भूयःप्रविशतिनयेनोदरदरीम् ॥ ९२ ॥ काशिवासिनिजनेवनेचरेद्वित्रिभुज्यपिसमीरभोजने ॥ स्वैरचारिणिजितेंद्रियेप्यहोकाशिवासि निजनेविशिष्टता ॥ ९३ ॥ नास्तीहदुष्कृतकृतांसुकृतात्मनांवाकाचिद्विशेषगतिरंतकृतांहिकाश्याम् ॥ बीजानिकर्मजनितानियदूपरायांनांकूरयंति हरदृग्ज्वलितानितेषाम् ॥ ९४ ॥ शशकामशकावकाःशुकाःकलविंकाश्चवृकाःसजंबुकाः ॥ तुरगोरगवानरानरागिरिजेकाशिमृताःपरामृतम् ॥ ९५ ॥

अरुद्ररुद्राक्षफणींद्रभूषणास्त्रिपुंड्रचंद्रार्धधराधरांगताः ॥ निरंतरंकाशिनिवासिनोजनागिरींद्रजेपारिषदामतामम ॥ ९६ ॥ यावंतएवनिवसंतिचजंतवोऽत्र काश्यांजलस्थलचराझषजंबुकाद्याः ॥ तावंतएवमदनुग्रहरुद्रदेहादेहावसानमधिगम्यमयिप्रविष्टाः ॥ ९७ ॥ येतुवर्षेषवोरुद्रादिविदेविप्रकीर्तिताः ॥ वातेषवोंऽतरिक्षेयेयेभुव्यन्नेषवःप्रिये ॥ ९८ ॥ रुद्रादशदशप्राच्यवाचीप्रत्यग्दिक्स्थिताः ॥ ऊर्ध्वदिक्स्थाश्चयेरुद्राःपठ्यंतेवेदवादिभिः ॥ ९९ ॥

असंख्याताःसहस्राणियेरुद्राअधिभूतले ॥ तत्सर्वेभ्योऽधिकाःकाश्यांजंतवोरुद्ररूपिणः ॥१००॥ रुद्रावासस्ततःप्रोक्तमविमुक्तंघटोद्भव ॥ तस्मात्समर्च्य काशिस्थान्वर्णान्वर्णेतराश्रमान् ॥ १ ॥ श्रद्धयेश्वरबुद्ध्याचरुद्रार्चाफलभाङ्नरः ॥ २ ॥ श्मशब्देनशवःप्रोक्तःशानंशयनमुच्यते ॥ निर्वचंतिश्मशानार्थं मुनेशब्दार्थकोविदाः ॥ ३ ॥ महांत्यपिचभूतानिप्रलयेसमुपस्थिते ॥ शेरतेऽत्रशवाभूत्वाश्मशानंतुततोमहत् ॥ ४ ॥ अप्सुभूरिहलयेलयंव्रजेदापओर्व वदनोग्रकंदरे ॥ मातरिश्वनिमहातनूनपाद्व्योम्निसंक्षयतिवैसदागतिः ॥ ५ ॥ व्योमचापिलयमेत्यहंकृतौसापिषोडशविकारसंयुता ॥ लीयतेमहतिबुद्धिसं ज्ञकेहामहान्प्रकृतिमध्यगोभवेत् ॥ ६ ॥ सागुणत्रयमयीचनिर्गुणंतंपुमांसमवगुह्यतिष्ठति ॥ पंचविंशतितमःपरःपुमान्देहगेहपतिरेषजीवकः ॥ ७ ॥

प्राकृतःप्रलयएषउच्यतेहंसयानहरिरुद्रवर्जितः ॥ कालमूर्तिरथतंचपूरुषंहेलयाकलयतीश्वरःपरः ॥ ८ ॥ सवैमहाविष्णुरितीर्यतेबुधैस्तंवैमहादेवमुदाह रंति ॥ सोंऽतादिमध्यैःपरिवर्जितःशिवःसश्रीपतिःसोपिहिपार्वतीपतिः ॥ ९ ॥ दैनंदिनेऽथप्रलयेत्रिशूलकोटौसमुत्क्षिप्यपुरींहरःस्वाम् ॥ बिभर्तिसंवर्त महास्थिभूषणस्ततोहिकाशीकलिकालवर्जिता ॥ ११० ॥ ॥ स्कंदउवाच ॥ ॥ वाराणसीतिकाशीतिरुद्रावासइतिद्विज ॥ महाश्मशानमित्येवंप्रो क्तमानंदकाननम् ॥११॥ इतिदेवीपुरःप्रोक्तंदेवदेवेनशंभुना ॥ यथाविष्णोःपुराख्यातंतथैवचमयाश्रुतम् ॥ तच्चत्वदग्रेकथितंरहस्यंकाशिजंमहत् ॥१२॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जप्त्वाध्यायमिमंपुण्यंमहापातकनाशनम् ॥ श्रावयित्वाद्विजान्सम्यक्छिवलोकेमहीयते ॥ १३ ॥ अतःपरंकलशजकिंशुश्रूषसितद्वद ॥ काशीकथा कथ्यमानाममापिपरितोषकृत् ॥ ११४ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेवाराणसीमहिमवर्णनंनाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञहृदयानंदस्कंदस्कंदिततारक ॥ नतृप्तिमधिगच्छामिशृण्वन्वाराणसीकथाम् ॥ १ ॥ अनुग्रहोयदिमयियोग्योस्मिश्रवणेयदि ॥ तदाकथयमेनाथकाश्यांभैरवसंकथाम् ॥ २ ॥ कोसौभैरवनामात्रकाशिपुर्यांव्यवस्थितः ॥ किंरूपमस्य किंकर्मकानिनामानिचास्यवै ॥३॥ कथमाराधितश्चैवसिद्धिदःसाधकस्यवै ॥ आराधितःकुत्रकालेक्षिप्रंसिद्ध्यतिभैरवः ॥ ४ ॥ ॥ स्कंदउवाच ॥ ॥ वाराणस्यांमहाभागयथातेप्रेमवर्तते ॥ तथानकस्यचिन्मन्येततोवक्ष्याम्यशेषतः ॥ ५ ॥ प्रादुर्भावंभैरवस्यमहापातकनाशनम् ॥ यच्छ्रुत्वाकाशिवास स्यफलंनिर्विघ्नमाप्नुयात् ॥ ६ ॥ पाणिभ्यांपरितःप्रपीड्यसुदृढंनिश्चोत्यनिश्चोत्यचब्रह्मांडंसकलंपचेलिमरसालोच्चैःफलाभंमुहुः ॥ पायंपायमपायत स्त्रिजगतीमुन्मत्तवत्तैरसैर्नृत्यंस्तांडवडंबरेणविधिनापायान्महाभैरवः ॥ ७ ॥

कुंभयोनेनवेत्त्येवमहिमानंमहेशितुः ॥ चतुर्भुजोपिवैकुंठश्चतुर्वक्त्रोपिविश्वकृत् ॥ ८ ॥ नचित्रमत्रभूदेवभवमायादुरत्यया ॥ तयासंमोहिताःसर्वेनावयं त्यपितंपरम् ॥ ९ ॥ वेदयेद्यदिचात्मानंसएवपरमेश्वरः ॥ तदाविंदंतिब्रह्माद्याःस्वेच्छयैवनतंविदुः ॥ १० ॥ ससर्वगोपिनेक्ष्येतस्वात्मारामोमहेश्वरः ॥ देववद्बुध्यतेमूढैरतीतोयोमनोगिराम् ॥ ११ ॥ पुरापितामहंविप्रमेरुशृंगेमहर्षयः ॥ प्रोचुःप्रणम्यलोकेशंकिमेकंतत्त्वमव्ययम् ॥ १२ ॥ समाययामहे शस्यमोहितोलोकसंभवः ॥ अविज्ञायपरंभावमात्मानंप्राहवर्षिणम् ॥ १३ ॥ जगद्योनिरहंधातास्वयंभूरेकईश्वरः ॥ अनादिमदहंब्रह्ममामनर्च्यनमु च्यते ॥ १४ ॥ प्रवर्तकोहिजगतामहमेकोनिवर्तकः ॥ नान्योमदधिकःसत्यंकश्चित्कोपिसुरोत्तमाः ॥ १५ ॥ तस्यैवंब्रुवतोधातुःक्रतुर्नारायणांशजः ॥ प्रोवाचप्रहसन्वाक्यंरोषताम्रविलोचनः ॥ १६ ॥ अविज्ञायपरंतत्त्वंकिमेतत्प्रतिपाद्यते ॥ अज्ञानंयोगयुक्तस्यनचैतदुचितंतव ॥ १७ ॥ अहंकर्ताहिलो कानांयज्ञोनारायणःपरः ॥ नमामनादृत्यविधेजीवनंजगतामज ॥ १८ ॥ अहमेवपरंज्योतिरहमेवपरागतिः ॥ मत्प्रेरितेनभवतासृष्टिरेषाविधीयते ॥ ॥ १९ ॥ एवंविप्रकृतौमोहात्परस्परजयैषिणौ ॥ पप्रच्छतुःप्रमाणज्ञानागमांश्चतुरोपितौ ॥ २० ॥ ॥ विधिक्रतूऊचतुः ॥ ॥ वेदाःप्रमाणंसर्वत्रप्रति ष्ठांपरमामिताः ॥ यूयमेवनसंदेहःकिंतत्त्वंप्रतितिष्ठत ॥ २१ ॥ श्रुतयऊचुः ॥ ॥ यदिमान्यावयंदेवौसृष्टिस्थितिकरौविभू ॥ तदाप्रमाणंवक्ष्यामो भवत्संदेहभेदकम् ॥ २२ ॥

श्रुत्युक्तमिदमाकर्ण्यप्रोचतुस्तौश्रुतीःप्रति ॥ युष्मदुक्तंप्रमाणंनौकिंतत्त्वंसम्यगुच्यताम् ॥ २३ ॥ ऋगुवाच ॥ ॥ यदंतःस्थानिभूतानियतःसर्वंप्रवर्तते ॥ यदाहुस्तत्परंतत्त्वंसरुद्रस्त्वेकएवहि ॥ २४ ॥ ॥ यजुरुवाच ॥ ॥ योयज्ञैरखिलैरीशोयोगेनचसमिज्यते ॥ येनप्रमाणंहिवयंसएकःसर्वदृक्छिवः ॥२५॥ ॥ सामोवाच ॥ ॥ येनेदंभ्राम्यतेविश्वंयोगिभिर्योविचिंत्यते ॥ यद्भासाभासतेविश्वंसएकस्त्र्यंबकःपरः ॥ २६ ॥ ॥ अथर्वोवाच ॥ ॥ यंप्रपश्यं तिदेवेशंभक्त्यानुग्रहिणोजनाः ॥ तमाहुरेकंकैवल्यंशंकरंदुःखतस्करम् ॥ २७ ॥ श्रुतीरितंनिशम्येत्थंतावतीवविमोहितौ ॥ स्मित्वाहतुःक्रतुविधीमोहां ध्येनांकितौमुने ॥ २८ ॥ कथंप्रमथनाथोसौरममाणोनिरंतरम् ॥ दिगंबरःपितृवनेशिवयाधूलिधूसरः ॥ २९ ॥ विटंकवेशोजटिलोवृषगोव्यालभूषणः ॥ परंब्रह्मत्वमापन्नःक्वचतत्संगवर्जितम् ॥ ३० ॥ तदुदीरितमाकर्ण्यप्रणवात्मासनातनः ॥ अमूर्तोमूर्तिमान्भूत्वाहसमानउवाचतौ ॥ ३१ ॥ प्रणवउवाच ॥ नह्येषभगवाञ्छक्त्यास्वात्मनोव्यतिरिक्तया ॥ कदाचिद्रमतेरुद्रोलीलारूपधरोहरः ॥ ३२ ॥ असौहिभगवानीशः स्वयंज्योतिःसनातनः ॥ आनं दरूपातस्यैषाशक्तिर्नागतुकीशिवा ॥ ३३ ॥

इत्येवमुक्तेपितदामखमूर्तेरजस्यहि ॥ नाज्ञानमगमन्नाशंश्रीकंठस्यैवमायया ॥ ३४ ॥ प्रादुरासीत्ततोज्योतिरुभयोरंतरेमहत् ॥ पूरयन्निजयाभासाद्यावा भूम्योर्यदंतरम् ॥ ३५ ॥ ज्योतिर्मंडलमध्यस्थोददृशेपुरुषाकृतिः ॥ प्रजज्वालाथकोपेनब्रह्मणःपंचमंशिरः ॥ ३६ ॥ आवयोरंतरंकोसौबिभृयात्पुरु षाकृतिम् ॥ विधिःसंभावयेद्यावत्तावत्सहिविलोकितः ॥ ३७ ॥ स्रष्ट्राक्षणेनचमहान्पुरुषोनीललोहितः ॥ त्रिशूलपाणिर्भालाक्षोनागोडुपविभूषणः ॥ ३८ ॥ हिरण्यगर्भस्तंप्राहजानेत्वांचंद्रशेखरम् ॥ भालस्थलान्ममपुरारुद्रःप्रादुरभूद्भवान् ॥ ३९ ॥ रोदनाद्रुद्रनाम्नापियोजितोसिमयापुरा ॥ मामे वशरणंयाहिपुत्ररक्षांकरोमिते ॥ ४० ॥ अथेश्वरःपद्मयोनेःश्रुत्वागर्ववतींगिरम् ॥ सकोपतःसमुत्पाद्यपुरुषंभैरवाकृतिम् ॥ ४१ ॥ प्राहपंकजजन्मासौ शास्यस्तेकालभैरव ॥ कालवद्राजसेसाक्षात्कालराजस्ततोभवान् ॥ ४२ ॥ विश्वंभर्तुंसमर्थोऽसिभरणाद्भैरवःस्मृतः ॥ त्वत्तोभेष्यतिकालोपिततस्त्वं कालभैरवः ॥ ४३ ॥ आमर्दयिष्यतिभवांस्तुष्टोदुष्टात्मनोयतः ॥ आमर्दकइतिख्यातिंततःसर्वत्रयास्यति ॥ ४४ ॥ यतःपापानिभक्तानांभक्षयिष्य तितत्क्षणात् ॥ पापभक्षणइत्येवतवनामभविष्यति ॥ ४५ ॥ यामेमुक्तिपुरीकाशीसर्वाभ्योपिगरीयसी ॥ आधिपत्यंचतस्यास्तेकालराजसदैवहि ॥४६॥ तत्रयेपापकर्तारस्तेषांशास्तात्वमेवहि ॥ शुभाशुभंनतत्कर्मचित्रगुप्तोलिखिष्यति ॥ ४७ ॥ एतान्वरान्प्रगृह्याऽथतत्क्षणात्कालभैरवः ॥ वामांगुलिनखाग्रे णचकर्तचशिरोविधेः ॥ ४८ ॥ यदंगमपराध्नोतिकार्यंतस्यैवशासनम् ॥ अतोयेनकृतानिंदातच्छिन्नंपंचमंशिरः ॥ ४९ ॥ यज्ञमूर्तिधरोविष्णुस्ततस्तुष्टा वशंकरम् ॥ भीतोहिरण्यगर्भोपिजजापशतरुद्रियम् ॥ ५० ॥ आश्वास्यतौमहादेवःप्रीतःप्रणतवत्सलः ॥ प्राहस्वांमूर्तिमपरांभैरवंतंकपर्दिनम् ॥ ५१ ॥

मान्योऽध्वरोसौभवतातथाशतधृतिस्त्वयम् ॥ कपालंवैधसंचापिनीललोहितधारय ॥ ५२ ॥ ब्रह्महत्यापनोदायव्रतंलोकायदर्शयन् ॥ चरत्वंसततं भिक्षांकापालव्रतमास्थितः ॥ इत्युक्त्वांऽतर्हितोदेवस्तेजोरूपस्तदाशिवः ॥ ५३ ॥ उत्पाद्यकन्यामेकांतुब्रह्महत्येतिविश्रुताम् ॥ रक्तांबरधरांरक्तांरक्तस्रग्गं धलेपनाम् ॥ ५४ ॥ दंष्ट्राकरालवदनांललज्जिह्वातिभीषणाम् ॥ अंतरिक्षैकपादाग्रांपिबंतींरुधिरंबहु ॥५५॥ कर्त्रीकर्परहस्ताग्रांस्फुरत्पिंगोग्रतारकाम् ॥ गर्जयंतींमहावेगभैरवस्यापिभीषणाम् ॥ ५६ ॥ यावद्वाराणसींदिव्यांपुरीमेषगमिष्यति ॥ तावत्त्वंभीषणेकालमनुगच्छोग्ररूपिणि ॥ ५७ ॥ सर्वत्रते प्रवेशोस्तित्यक्त्वावाराणसींपुरीम् ॥ नियोज्यतामितिशिवोप्यंतर्धानंगतस्ततः ॥ ५८ ॥ तत्सान्निध्याद्भैरवोपिकालोभूत्कालकालतः ॥ सदेवदेववाक्ये नबिभ्रत्कापालिकंव्रतम् ॥ ५९ ॥ कपालपाणिर्विश्वात्माचचारभुवनत्रयम् ॥ नात्याक्षीच्चापितंदेवंब्रह्महत्यासुदारुणा ॥ ६० ॥ सत्यलोकेपिवैकुंठेमहें द्रादिपुरीष्वपि ॥ त्रिजगत्पतिरुग्रोपिव्रतीत्रिजगतीश्वरः ॥६१॥ प्रतितीर्थंभ्रमन्नापिविमुक्तोब्रह्महत्यया ॥६२॥ अनेनैवानुमानेनमहिमात्ववगम्यताम् ॥ ब्रह्महत्यापनोदिन्याःकाश्याःकलशसंभव ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संतितीर्थान्यनेकानिबहून्यायतनानिच ॥ अधित्रिलोकिनोकाश्याःकलामर्हंतिषोडशीम् ॥ ६४ ॥ तावद्गर्जंतिपापानिब्रह्महत्यादिकान्यलम् ॥ यावन्नामनशृण्वंतिकाश्याःपापाचलाशनेः ॥ ६५ ॥ प्रमथैःसेव्यमानोऽयंत्रिलोकींविचरन्हरः ॥ कापालिकोययौदेवोनारायणनिकेतनम् ॥ ६६ ॥ अथायांतंमहाकालंत्रिनेत्रंसर्पकुंडलम् ॥ महादेवांशसंभूतंभैरवंभीषणाकृतिम् ॥ ६७ ॥ पपातदंडवन्भूमौदृष्ट्वातंगरुडध्वजः ॥ देवाश्चमुनयश्चैवदेवनार्यः समंततः ॥ ६८ ॥ निपेतुःप्रणिपत्यैनंप्रणतःकमलापतिः ॥ शिरस्यंजलिमारोप्यस्तुत्वाबहुविधैःस्तवैः ॥६९॥ क्षीरोदमथनोद्भूतांप्राहपद्मालयांहरिः ॥ प्रियेपश्याऽब्जनयनेधन्याऽसिसुभगेनघे ॥ ७० ॥ धन्योऽहंदेविसुश्रोणियत्पश्यावोजगत्पतिम् ॥ अयंधाताविधाताचलोकानांप्रभुरीश्वरः ॥ ७१ ॥ अनादिःशरणःशांतःपरःषड्विंशसंमितः ॥ सर्वज्ञःसर्वयोगीशःसर्वभूतैकनायकः ॥७२॥ सर्वभूतांतरात्माऽयंसर्वेषांसर्वदःसदा ॥ यंविनिद्राविनिःश्वासाःशांताध्यानपरायणाः ॥ ७३ ॥ धियापश्यंतिहृदयेसोयमद्यसमीक्ष्यताम् ॥ यंविदुर्वेदतत्त्वज्ञायोगिनोयतमानसाः ॥ ७४ ॥ अरूपोरूपवान्भूत्वासोयमायातिसर्वगः ॥ अहोविचित्रंदेवस्यचेष्टितंपरमेष्ठिनः ॥७५॥ यस्याख्यांब्रुवतांनित्यंनदेहःसोपिदेहधृक् ॥ यंदृष्ट्वानपुनर्जन्मलभ्यतेमानवैर्भुवि॥७६॥ सोयमायातिभगवांस्त्र्यंबकःशशिभूषणः ॥ पुंडरीकदलायामेधन्येमेऽद्यविलोचने ॥ ७७ ॥ धिग्धिक्पदंतुदेवानांपरंदृष्ट्वाऽत्रशंकरम् ॥ लभ्यतेयन्ननिर्वाणंसर्वदुःखांतकृत्तुयत् ॥ ७८ ॥

देवत्वादशुभंकिंचिद्देवलोकेनविद्यते ॥ दृष्ट्वापिसर्वदेवेशंयन्मुक्तिंनलभामहे ॥ ७९ ॥ एवमुक्त्वारूपीकेशःसंप्रहृष्टतनूरुहः ॥ प्रणिपत्यमहादेवमिदमाहवृषध्वजम् ॥ ८० ॥ किमिदंदेवदेवेनसर्वज्ञेनत्वयाविभो ॥ क्रियतेजगतांधात्रासर्वपापहराऽव्यय ॥ ८१ ॥ क्रीडेयंतवदेवेशत्रिलोचनमहामते ॥ किंकारणंविरूपाक्षचेष्टितंतेस्मरार्दन ॥८२॥ किमर्थंभगवञ्छंभोभिक्षांचरसिशक्तिप ॥ संशयोमेजगन्नाथनतत्रैलोक्यराज्यद ॥ ८३ ॥ एवमुक्तस्ततःशंभुर्विष्णुमेतदुदाहरत् ॥ ब्रह्मणस्तुशिरश्छिन्नमंगुल्यग्रनखेनह ॥ ८४ ॥ तदघप्रतिघंविष्णोचराम्येतद्व्रतंशुभम् ॥ एवमुक्तोमहेशेनपुंडरीकविलोचनः ॥ ८५ ॥ स्मित्वाकिंचिन्नतशिराःपुनरेवंव्यजिज्ञपत् ॥ यथेच्छसितथाक्रीडसर्वविष्टपनायक ॥ ८६ ॥ माययामांमहादेवनच्छादयितुमर्हसि ॥ नाभीकमलकोशात्तुकोटिशःकमलासनान् ॥ ८७ ॥ कल्पेकल्पेसृजामीशत्वन्नियोगबलाद्विभो ॥ त्यजमायामिमांदेवदुस्तरामकृतात्मभिः ॥ ८८ ॥ मदादयोमहादेवमाययातवमोहिताः ॥ यथावदवगच्छामिचेष्टितंतेशिवापते ॥ ८९ ॥ संहारकालेसंप्राप्तेसदेवानखिलान्मुनीन् ॥ लोकान्वर्णाश्रमवतोहरिष्यसियदाहर ॥ ९० ॥ तदाक्वतेमहादेवपापंब्रह्मवधादिकम् ॥ पारतंत्र्यंनतेशंभोस्वैरंक्रीडेत्ततोभवान् ॥ ९१ ॥ अतीतब्रह्मणामस्थ्नांस्रक्कंठेतवभासते ॥ तदातदाक्वनुगताब्रह्महत्यातवानघ ॥ ९२ ॥ कृत्वापिसुमहत्पापंत्वांयःस्मरतिभावतः ॥ आधारंजगतामीशंतस्यपापंविलीयते ॥ ९३ ॥ यथातमोनतिष्ठेतसंनिधावंशुमालिनः ॥ तथानभवभक्तस्यपापंतस्यव्रजेत्क्षयम् ॥ ९४ ॥ यश्चिंतयतिपुण्यात्मातवपादांबुजद्वयम् ॥ ब्रह्महत्यादिकमपिपापंतस्यव्रजेत्क्षयम् ॥ ९५ ॥ तवनामानुरक्तावाग्यस्यपुंसोजगत्पते ॥ अप्यद्रिकूटतुलितंनैनस्तमनुबाधते ॥ ९६ ॥ रजसातमसाविवर्धितंक्वनुपापंपरितापदायकम् ॥ क्वचतेशिवनाममंगलंजनजीवातुजगद्रुजापहम् ॥ ९७ ॥

यदिजातुचिदंधकद्विषस्तवनामौष्ठपुटाद्विनिःसृतम् ॥ शिवशंकरचंद्रशेखरेत्यसकृत्तस्यनसंसृतिःपुनः ॥ ९८ ॥ परमात्मन्परंधामस्वेच्छाविधृतविग्रह ॥ कुतूहलंतवेशेदंक्वपराधीनतेश्वरे ॥ ९९ ॥ अद्यधन्योस्मिदेवेशयंनपश्यंतियोगिनः ॥ पश्यामितंजगन्मूलंपरमेश्वरमक्षयम् ॥ १०० ॥ अद्यमेपरमोलाभस्त्वद्यमेमंगलंपरम् ॥ त्वद्दृष्ट्यमृततृप्तस्यतृणंस्वर्गापवर्गदम् ॥ १ ॥ इत्थंवदतिगोविंदेविमलापद्मयातया ॥ मनोरथवतीनामभिक्षापात्रेसमर्पिता ॥ २ ॥ भिक्षाटनायदेवोपिनिरगात्परयामुदा ॥ दृष्ट्वाऽनुयायिनींतांतुसमाहूयजनार्दनः ॥ संप्रार्थयद्ब्रह्महत्यांविमुंचत्वंत्रिशूलिनम् ॥ ३ ॥ ॥ ब्रह्महत्योवाच ॥ ॥ अनेनापिमिषेणाऽहंसंसेव्यामुंवृषध्वजम् ॥ आत्मानंपावयिष्यामिक्वपुनर्भवदर्शनम् ॥ ४ ॥ सातत्याजनतत्पार्श्वंव्याहृतापिमुरारिणा ॥ तमूचेऽथहरिंशंभुःस्मेरास्यावेचनंशुभम् ॥ ५ ॥ त्वद्वाक्पीयूषपानेनतृप्तोस्मिबहुमानद ॥ वरंवृणीष्वगोविंदवरदोऽस्मितवानघ ॥ ६ ॥ नमाद्यंतियथाभैक्षैर्भिक्षवोप्यतिसंस्कृतैः ॥ यथामानसुधापानैर्नुन्नभिक्षाटनज्वराः ॥ ७ ॥ महाविष्णुरुवाच ॥ ॥ एषएववरःश्लाघ्योयदहंदेवताधिपम् ॥ पश्यामित्वांदेवदेवंमनोरथपथातिगम् ॥ ८ ॥ अनभ्रेयंसुधावृष्टिरनायासोमहोत्सवः ॥ अयत्नोनिधिलाभोयद्वीक्षणंहरतेसताम् ॥ ९ ॥ अवियोगोऽस्तुमेदेवत्वदंघ्रियुगलेनवै ॥ एषएववरःशंभोनान्यंकंचिद्वरंवृणे ॥ १० ॥ ईश्वरउवाच ॥ ॥ एवंभवतुतेऽनंतयत्त्वयोक्तंमहामते ॥ सर्वेषामपिदेवानांवरदस्त्वंभविष्यसि ॥ ११ ॥ अनुगृह्णेतिदैत्यारिंकेंद्रादिभुवनेचरन् ॥ भजेविमुक्तिजननींनाम्नावाराणसींपुरीम् ॥ १२ ॥

यत्रस्थितानांजंतूनांकलांनार्हंतिषोडशीम् ॥ अपिब्रह्मादिदेवानांपदानिविपदांपदम् ॥ १३ ॥ वरंवाराणसीवासीजटीमुंडीदिगंबरः ॥ नान्यत्रच्छत्रसंछन्नवसुधामंडलेश्वरः ॥ १४ ॥ वरंवाराणसीभिक्षानलक्षाधिपताऽन्यतः ॥ लक्षाधीशोविशेद्गर्भंतद्भिक्षाशीनगर्भभाक् ॥ १५ ॥ भिक्षापियत्रभिक्षुभ्योदत्तामलकसंमिता ॥ सुमेरुणापितुलितावाराणस्यांगुरुर्भवेत् ॥ १६ ॥ वर्षाशनंहियोदद्यात्काश्यांसीदत्कुटुंबिने ॥ यावंत्यब्दानितावंतियुगानिसदिवीज्यते ॥ १७ ॥ वाराणस्यांवर्षभोज्यंयोदद्यान्निरुपायिने ॥ सकदाचित्तृट्क्षुधानोदुःखंभुंक्तेनरर्षभः ॥ १८ ॥ वाराणस्यांनिवसतांयत्पुण्यमुपजायते ॥ तदेवसंवासयितुःफलंत्वविकलंभवेत् ॥ १९ ॥ ब्रह्महत्यादिपापानियस्यानाम्नोपिकीर्तनात् ॥ त्यजंतिपापिनंकाशीसाकेनेहोपमीयते ॥ १२० ॥ क्षेत्रेप्रविष्टमात्रेऽथभैरवेभीषणाकृतौ ॥ हाहेत्युक्त्वाब्रह्महत्यापातालतलमाविशत् ॥ २१ ॥ कपालंब्रह्मणोरुद्रःसर्वेषामेवपश्यताम् ॥ हस्तात्पतितमालोक्यननर्तपरयामुदा ॥ २२ ॥ विधेःकपालंनामुंचत्करमत्यंतदुःसहम् ॥ हरस्यभ्रमतःक्वापितत्काश्यांक्षणतोऽपतत् ॥ २३ ॥ शूलिनोब्रह्मणोहत्यानापैतिस्मचयाक्वचित् ॥ साकाश्यांक्षणतोनष्टाकथंकाशीनदुर्लभा ॥२४॥ अतःप्रदक्षिणीकार्यापूजनीयापुरीत्वियम् ॥ २५ ॥ वाराणसीतिकाशीतिमहामंत्रमिमंजपन् ॥ यावज्जीवंत्रिसंध्यंतुजंतुर्जातुनजायते ॥ २६ ॥ अविमुक्तंमहाक्षेत्रंस्मरन्प्राणांस्तुयस्त्यजेत् ॥ दूरदेशांतरस्थोपिसोपिजातुनजायते ॥ २७ ॥ आनंदकाननेयस्यचित्तंसंस्मरतेसदा ॥ तत्क्षेत्रनामश्रवणान्नसभूयोऽभिजायते ॥ २८ ॥ रुद्रावासेवसेन्नित्यंनरोनियतमानसः ॥ एनसामपिसंभारंकृत्वाकालाद्विमुच्यते ॥ २९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महाश्मशानमासाद्ययदिदैवाद्विपद्यते ॥ पुनःश्मशानशयनंनक्वापिलभतेपुमान् ॥ १३० ॥ कपालमोचनंकाश्यांयेस्मरिष्यंतिमानवाः ॥ तेषांविनंक्ष्य तिक्षिप्रमिहान्यत्रापिपातकम् ॥ ३१ ॥ आगत्यतीर्थप्रवरेस्नानंकृत्वाविधानतः ॥ तर्पयित्वापितॄन्देवान्मुच्यतेब्रह्महत्यया ॥ ३२ ॥ अशाश्वतमिदं ज्ञात्वावाराणस्यांवसंतिये ॥ देहांतेतत्परंज्ञानंतेषांदास्यतिशंकरः ॥ ३३ ॥ इयंकाशीपुरीविप्रसाक्षाद्रुद्रतनुःपरा ॥ अनिर्वाच्यापरानंदादुष्प्राप्येशविरो धिभिः ॥ ३४ ॥ अस्यास्तत्त्वमहंजानेशिवभक्तिपरोपिवा ॥ मुच्यंतेजंतवोऽत्रैवयथायोगेनयोगिनः ॥ ३५ ॥ परंपदमियंकाशीपरानंदइयंपुरी ॥ इयमेवपरंज्ञानंसेव्याऽसौमोक्षकांक्षिभिः ॥ ३६ ॥ अत्रोषित्वापीशभक्तान्विरुणद्धितुयःकुधीः ॥ पुर्येद्रुह्यतिवामूढस्तस्यान्यत्रात्रनोगतिः ॥ ३७ ॥ कपालमोचनंतीर्थंपुरस्कृत्वातुभैरवः ॥ तत्रैवतस्थौभक्तानांभक्षयन्नघसंततिम् ॥ ३८ ॥ पापभक्षणमासाद्यकृत्वापापशतान्यपि ॥ कुतोबिभेतिपापेभ्यः कालभैरवसेवकः ॥ ३९ ॥ आमर्दयतिपापानिदुष्टानांचमनोरथान् ॥ आमर्दकइतिख्यातस्ततोऽसौकालभैरवः ॥ ४० ॥ कलिंकालंकलयतिसदाकाशी निवासिनाम् ॥ अतःख्यातिंपरांप्राप्तःकालभैरवसंज्ञिताम् ॥ ४१ ॥ सदैवयस्यभक्तेभ्योयमदूताःसुदारुणाः ॥ परमांभीरुतांप्राप्तास्ततोसौभैरवःस्मृतः ॥ ४२ ॥ मार्गशीर्षासिताष्टम्यांकालभैरवसंनिधौ ॥ उपोष्यजागरंकुर्वन्महापापैःप्रमुच्यते ॥ ४३ ॥

यत्किंचिदशुभंकर्मकृतंमानुषबुद्धितः ॥ तत्सर्वंविलयंयातिकालभैरवदर्शनात् ॥४४॥ अनेकजन्मनियुतैर्यत्कृतंजंतुभिस्त्वघम् ॥ तत्सर्वंविलयत्याशुका लभैरवदर्शनात् ॥ ४५॥ कृत्वाचविविधांपूजांमहासंभारविस्तरैः ॥ नरोमार्गासिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत् ॥ ४६ ॥ अष्टम्यांचचतुर्दश्यांरविभूमिज वासरे ॥ यात्रांचभैरवींकृत्वाकृतैःपापैःप्रमुच्यते ॥ ४७ ॥ कालभैरवभक्तानांसदाकाशीनिवासिनाम् ॥ विघ्नंयःकुरुतेमूढःसदुर्गतिमवाप्नुयात् ॥ ४८ ॥ विश्वेश्वरेपियेभक्तानोभक्ताःकालभैरवे ॥ काश्यांतेविघ्नसंघातंलभंतेतुपदेपदे ॥ ४९ ॥ तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्वरः ॥ विलोक्यकालराजं चनिरयादुद्धरेत्पितॄन् ॥ ५० ॥ अष्टौप्रदक्षिणीकृत्यप्रत्यहंपापभक्षणम् ॥ नरोनपापैर्लिप्येतमनोवाक्कायसंभवैः ॥५१॥ तस्मिन्नामर्दकेपीठेजप्त्वास्वाभी ष्टदेवताम् ॥ षण्मासंसिद्धिमाप्नोतिसाधकोभैरवाज्ञया ॥ ५२ ॥ वाराणस्यामुषित्वायोभैरवंनभजेन्नरः ॥ तस्यपापानिवर्धंतेशुक्लपक्षेयथाशशी ॥५३॥ यंयंसंचिंतयेत्कामंपापभक्षणसेवया ॥ बलिपूजोपहारैश्चतंतंससमवाप्नुयात् ॥ ५४ ॥ कालराजंनयःकाश्यांप्रतिभूताष्टमीकुजम् ॥ भजेत्तस्यक्षयेत्पुण्यं कृष्णपक्षेयथाशशी ॥ ५५ ॥ श्रुत्वाध्यायमिमंपुण्यंब्रह्महत्यापनोदकम् ॥ भैरवोत्पत्तिसंज्ञंचसर्वपापैःप्रमुच्यते ॥ ५६ ॥ बंधनागारसंस्थोपिप्राप्तोपि विपदंपराम् ॥ प्रादुर्भावंभैरवस्यश्रुत्वामुच्येतसंकटात् ॥ ५७ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेभैरवप्रादुर्भा वोनामैकत्रिंशोध्यायः ॥ ३१ ॥ ॥ अगस्त्यउवाच ॥ ॥ बर्हियानसमाचक्ष्वहरिकेशसमुद्भवम् ॥ कोसौकस्यसुतःश्रीमान्कीदृगस्यतपोमहत् ॥ १ ॥ कथंचदेवदेवस्यप्रियत्वंसमुपेयिवान् ॥ काशीवासिजनीनोभूत्कथंवादंडनायकः ॥ २ ॥ एतदिच्छाम्यहंश्रोतुंप्रसादंकुरुमेविभो ॥ अन्नदत्वंचसंप्राप्तः कथमेषमहामतिः ॥ ३ ॥

संभ्रमोविभ्रमश्चोभौकथंतदनुगामिनौ ॥ विभ्रांतिकारिणौक्षेत्रवैरिणांसर्वदानृणाम् ॥ ४ ॥ ॥ स्कंदउवाच ॥ ॥ सम्यगापृच्छिभवताकाशीवासिसमा हितम् ॥ कुंभसंभवविप्रर्षेदंडपाणिकथानकम् ॥ ५ ॥ यदाकर्ण्यनरःप्राज्ञकाशीवासस्ययत्फलम् ॥ निष्प्रत्यूहंतदाप्नोतिविश्वभर्त्तुरनुग्रहात् ॥ ६ ॥ रत्नभद्रइतिख्यातःपर्वतेगंधमादने ॥ यक्षःसुकृतलक्षश्रीःपुरापरमधार्मिकः ॥ ७ ॥ पूर्णभद्रंसुतंप्राप्यसोऽभूत्पूर्णमनोरथः ॥ वयश्चरममासाद्यभुक्त्वाभो गाननेकशः ॥ ८ ॥ शांभवेनाथयोगेनदेहमुत्सृज्यपार्थिवम् ॥ आससादशिवंशांतंशांतसर्वेंद्रियार्थकः ॥ ९ ॥ पितर्युपरतेसोऽथपूर्णभद्रोमहायशाः ॥ सुकृतोपात्तविभवभवसंभोगभुक्तिभाक् ॥ १० ॥ सर्वान्मनोरथाँल्लेभेविनास्वर्गैकसाधनम् ॥ गार्हस्थ्याश्रमनेपथ्यंपथ्यंपैतामहंमहत् ॥ ११ ॥ संसार तापसंतप्तावयवामृतसीकरम् ॥ अपत्यंपततांपोतंबहुक्लेशमहार्णवे ॥ १२ ॥ पूर्णभद्रोऽथसंवीक्ष्यमंदिरंसर्वसुंदरम् ॥ तद्बालकोमलालापविकलंत्यक्तमं गलम् ॥ १३ ॥ शून्यंदरिद्रहृदिवजीर्णारण्यमिवाथवा ॥ पांथवत्प्रांतरमिवखिन्नोऽतीवानपत्यवान् ॥ १४ ॥ आहूयगृहिणींसोऽथयक्षःकनककुंडलाम् ॥ उवाचयक्षिणींश्रेष्ठांपूर्णभद्रोघटोद्भव ॥ १५ ॥ नहर्म्यंसुखदंकांतेदर्पणोदरसुंदरम् ॥ मुक्तागवाक्षसुभगंचंद्रकांतशिलाजिरम् ॥ १६ ॥ पद्मरागेंद्रनीला र्चिरर्चिताट्टालकंक्वणत् ॥ विद्रुमस्तंभशोभाढ्यंस्फुरत्स्फटिककुड्यवत् ॥ १७ ॥

प्रेंखत्पताकानिकरंमणिमाणिक्यमालितम् ॥ कृष्णागुरुमहाधूपबहुलामोदमोदितम् ॥ १८ ॥ अनर्घ्यासनसंयुक्तंचारुपर्यंकभूषितम् ॥ रम्यार्गलकपा टाढ्यंहुकूलच्छन्नमंडपम् ॥ १९ ॥ सुरम्यरतिशालाढ्यंवाजिराजिविराजितम् ॥ दासदासीशताकीर्णंकिंकिणीनादनादितम् ॥ २० ॥ नूपुरारावमो त्कंठकेकिकेकारवाकुलम् ॥ कूजत्पारावतकुलंगुरुसारीकथावरम् ॥ २१ ॥ खेलन्मरालयुगलंजीवंजीवककांतिमत् ॥ माल्याहृतद्विरेफाणांमंजुगुं जारवावृतम् ॥ २२ ॥ कर्पूरेणमदामोदसोदरानिलवीजितम् ॥ क्रीडामर्कटदंष्ट्राग्रीकृतमाणिक्यदाडिमम् ॥ २३ ॥ दाडिमीबीजसंभ्रांतशुकतुंडात्तमौ क्तिकम् ॥ धनधान्यसमृद्धंचपद्मालयमिवापरम् ॥ २४ ॥ कमलामोदगर्भंचगर्भरूपंविनाप्रिये ॥ गर्भरूपमुखंप्रेक्ष्येकथंकनककुंडले ॥ २५ ॥ यद्युपायोऽस्तितद्ब्रूहिधिगपुत्रस्यजीवितम् ॥ सर्वंशून्यमिवाभातिगृहमेतदनंगजम् ॥ २६ ॥ धिगेतत्सौधसौंदर्यंधिगेतद्धनसंचयम् ॥ विनापत्यं प्रियतमेजीवितंचधिगावयोः ॥ २७ ॥ प्रलपंतमिवप्रोच्चैःप्रियंकनककुंडला ॥ बभाषेऽतर्विनिःश्वस्ययक्षिणीसापतिव्रता ॥ २८ ॥ ॥ कनककुंडलो वाच ॥ ॥ किमर्थंखिद्यसेकांतज्ञानवानसियद्भवान् ॥ अत्रोपायोऽस्त्यपत्यास्यैविस्रब्धमवधारय ॥ २९ ॥ किमुद्यमवतांपुंसांदुर्लभंहिचराचरे ॥ ईश्वरार्पितबुद्धीनांस्फुरंत्यग्रेमनोरथाः ॥ ३० ॥ दैवंहेतुंवदंत्येवंभृशंकापुरुषाःपते ॥ स्वयंपुराकृतंकर्मदैवंतच्चनहीतरत् ॥३१॥ ततःपौरुषमालंब्यतत्कर्म परिशांतये ॥ ईश्वरंशरणंयायात्सर्वकारणकारणम् ॥ ३२ ॥

अपत्यंद्रविणंदाराहाराहर्म्यंहयागजाः ॥ सुखानिस्वर्गमोक्षौचनदूरेशिवभक्तितः ॥ ३३ ॥ विधातुःशांभवींभक्तिंप्रियसर्वेमनोरथाः ॥ सिद्धयोष्टौगृहद्वारंसे वंतेनात्रसंशयः ॥ ३४ ॥ नारायणोपिभगवानंतरात्माजगत्पतिः ॥ चराचराणामविताजातःश्रीकंठसेवया ॥ ३५ ॥ ब्रह्मणःसृष्टिकर्तृत्वंदत्तंतेनैवशंभुना ॥ इंद्रादयोलोकपालाजाताःशंभोरनुग्रहात् ॥ ३६ ॥ मृत्युंजयंसुतंलेभेशिलादोप्यनपत्यवान् ॥ श्वेतकेतुरपिप्रापजीवितंकालपाशतः ॥ ३७ ॥ क्षीरार्ण वाधिपतितामुपमन्युरवाप्तवान् ॥ अंधकोप्यभवद्भृंगीगाणपत्यपदोर्जितः ॥ ३८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जिगायशार्ङ्गिणंसंस्थेदधीचिःशंभुसेवया ॥ प्राजापत्यपदंप्रापदक्षः संशील्यशंकरम् ॥ ३९ ॥

मनोरथपथातीतंयच्चवाचामगोचरम् ॥ गोचरोगोचरीकुर्यात्तत्पदंक्षणतोमृडः ॥ ४० ॥ अनाराध्यमहेशानंसर्वदंसर्वदेहिनाम् ॥ कोपिकापिकिमप्यत्रन लभेतेतिनिश्चितम् ॥ ४१ ॥ तस्मात्सर्वप्रयत्नेनशंकरंशरणंव्रज ॥ यदिच्छसित्रिभियंपुत्रंत्रिशसर्वजनीनकम् ॥ ४२ ॥ इतिश्रुत्वावचःपत्न्याःपूर्णभद्रः सयक्षराट् ॥ आराध्यश्रीमहादेवंगीतज्ञोगीतविद्यया ॥ ४३ ॥ दिनैःकतिपयैरेवपरिपूर्णमनोरथः ॥ पुत्रकाममवापोच्चैस्तत्पत्न्यांयत्न्यांदृढव्रतः ॥ ४४ ॥ नादेश्वरंसमभ्यर्च्यकैःकैर्नापिस्वर्गितंतितम् ॥ तस्मात्काश्यांप्रयत्नेनसेव्योनादेश्वरोनृभिः ॥ ४५ ॥ अंतर्वत्न्यथकालेनतत्पत्नीसुषुवेसुतम् ॥ तस्यनाम पिताचक्रेहरिकेशीतिद्विज ॥ ४६ ॥ प्रीतिदायंददौचाथभूरिपुण्याननेक्षणात् ॥ पूर्णभद्रस्तथागस्त्यदृष्टाकलकुंडला ॥ ४७ ॥ बालोऽपिपूर्णचं द्राभवदनोयदनोपमः ॥ वृद्धिंप्रतिक्षणंप्रापशुक्लपक्षइवोडुराट् ॥ ४८ ॥ यदाष्टवर्षदेशीयोहरिकेशोऽभवच्छुचिः ॥ नित्यंतदाप्रभृत्येवंशिवमेकममन्यत ॥ ४९ ॥ पांसुक्रीडनसक्तोपिकुर्याल्लिंगरजोमयम् ॥ शाद्वलैःकोमलतृणैःपूजयेच्चसकौतुकम् ॥ ५० ॥ आकारयतिमित्राणिशिवनामाऽखिलानिसः ॥ चंद्रशेखरभूतेशभृत्युंजयमृडेश्वर ॥ ५१ ॥ धूर्जटेखंडपरशोमृडानीशत्रिलोचन ॥ भर्गशंभोपशुपतेपिनाकिन्नुग्रशंकर ॥ ५२ ॥ श्रीकंठनीलकंठे शस्मरारेपार्वतीपते ॥ कपालिन्भालनयनशूलपाणेमहेश्वर ॥ ५३ ॥ अजिनांबरदिग्वासःस्वर्धुनीक्लिन्नमौलिज ॥ विरूपाक्षाहिनेपथ्यगृणन्नामावली मिमाम् ॥ ५४ ॥ सवयस्कानितिमुहुःसमाह्वयतिलालयन् ॥ शब्दग्रहोनगृह्णीतस्तस्यान्यास्यांहरादते ॥ ५५ ॥ पद्यांनपद्यतेचान्यदृतेभूतेश्वरा जिरात् ॥ द्रष्टुंरूपांतरंतस्यवीक्षणेनविचक्षणे ॥ ५६ ॥

रसयेत्तस्यरसनांहरनाम्नाक्षरामृतम् ॥ शिवांघ्रिकमलामोदाद्घ्राणंनेवजिघृक्षतिं ॥ ५७ ॥ करौतत्कौतुककरौमनोमनतिनापरम् ॥ शिवसात्कृत्यपेया निपीयंतेतेनसद्धिया ॥ ५८ ॥ भक्ष्यंतेसर्वभक्ष्याणिन्यक्षप्रत्यक्षगान्यपि ॥ सर्वावस्थासुसर्वत्रनसपश्येच्छिवंविना ॥ ५९ ॥ गच्छन्गायन्स्वपंस्तिष्ठ न्छयानोऽदन्पिवन्नपि ॥ परितस्त्यक्षमैक्षिष्टनान्यंभावंचिकेतिसः ॥ ६० ॥ क्षणंदासुप्रसुप्तोपिक्षयासीतिवदन्मुहुः ॥ क्षणंन्यक्षप्रतीक्षस्वबुध्यती तिसबालकः ॥ ६१ ॥ स्पष्टांचेष्टांविलोक्येतिहरिकेशस्यतत्पिता ॥ अशिक्षयत्सुतंसोऽथगृहकर्मरतोभव ॥ ६२ ॥ एतेतुरंगमावत्सतवैतेऽश्वकिशो रकाः ॥ चित्राणीमानिवासांसिसुदुकूलान्यमूनिच ॥ ६३ ॥ रत्नान्याकरशुद्धानिनानाजातीन्यनेकशः ॥ कुप्यंबहुविधंचेतद्गोधनानिमहांतिच ॥६४॥ अमत्राणिमहार्हाणिरौप्यकांस्यमयानिच ॥ पण्यनीयानिवस्तूनिनानादेशोद्भवान्यपि ॥ ६५ ॥ चामराणिविचित्राणिगंधद्रव्याण्यनेकशः ॥ एतान्य न्यानिबहुशास्त्वमेकेधान्यराशयः ॥ ६६ ॥ एतत्त्वदीयंसकलंवस्तुजातंसमंततः ॥ अर्थोपार्जनविद्याश्चसर्वाःशिक्षस्वपुत्रक ॥ ६७ ॥ चेष्टास्त्यजदरि द्राणांधूलिधूसरिणामपूः ॥ अभ्यस्यविद्याःसकलाभोगान्निर्विंश्यचोत्तमान् ॥ ६८ ॥ तांदृशांचरमांप्राप्यभक्तियोगंततश्चर ॥ असकृच्छिक्षितःपित्रेत्यव मन्यगुरोर्गिरम् ॥ ६९ ॥ रुष्टदृष्टिंचजनकंकदाचिदवलोक्यसः ॥ निर्जगामगृहाद्भीतोहरिकेशउदारधीः ॥ ७० ॥ ततश्चितामवापोच्चैर्दिग्भ्रांतिमपि चाप्तवान् ॥ अहोबालिशबुद्धित्वात्कुतस्त्यकृंगृहंमया ॥ ७१ ॥ क्वयामिक्वस्थितेशंभोममश्रेयोभविष्यति ॥ पित्रानिर्वासितश्चाहंनचवेद्म्यथकिंचन ॥ ७२ ॥ इतिश्रुतंमयापूर्वंपितुरुत्संगवर्तिना ॥ गदतस्तातपुरतःकस्यचिद्वचनंस्फुटम् ॥ ७३ ॥

मात्रापित्रापरित्यक्तायेत्यक्तानिजबंधुभिः ॥ येषांक्वापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७४ ॥ जरयापरिभूतायेयेव्याधिविकलीकृताः ॥ येषांक्वापि गतिर्नास्तितेषांवाराणसीगतिः ॥ ७५ ॥ पदेपदेसमाक्रांतायेविपद्भिरहर्निशम् ॥ येषांक्वापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७६ ॥ पापराशि भिराक्रांतायेदारिद्र्यपराजिताः ॥ येषांक्वापिगतिर्नास्तितेषांवाराणसीग[illegible] ॥ ७७ ॥ संसारभयभीतायेयेबद्धाःकर्मबंधनैः ॥ येषांक्वापिगतिर्नास्ति तेषांवाराणसीगतिः ॥ ७८ ॥ श्रुतिस्मृतिविहीनायेशौचाचारविवर्जिताः ॥ येषांक्वापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ७९ ॥ येचयोगपरिभ्रष्टास्तपो दानविवर्जिताः ॥ येषांक्वापिगतिर्नास्तितेषांवाराणसीगतिः ॥ ८० ॥ मध्येवंधुजनेयेषामपमानंपदेपदे ॥ तेषांमानंददंचैकंशंभोरानंदकाननम् ॥८१॥ आनंदकाननेयेषांरुचिर्वैवसतांसताम् ॥ विश्वेशानुगृहीतानांतेषामानंदजोदयः ॥ ८२ ॥ भर्त्यंतेकर्मबीजानियत्रविश्वेशवह्निना ॥ अतोमहाश्मशानं तदगतीनांपरागतिः ॥ ८३ ॥ हरिकेशोविचार्येतियातोवाराणसींपुरीम् ॥ यत्राविमुक्तेजंतूनांत्यजतांपार्थिवींतनुम् ॥ ८४ ॥ पुननोंतनुसंबंधस्तनुद्रे पिप्रसादतः ॥ आनंदवनमासाद्यसतपःशरणंगतः ॥ ८५ ॥ अथकालांतरेशंभुःप्रविश्यानंदकाननम् ॥ पार्वत्युदैर्शयामासनिजमाक्रीडकाननम् ॥ ८६ ॥ अमंदामोदमंदारकोविदारपरिष्कृतम् ॥ चारुचंपकचूताढ्यंप्रोत्फुल्लनवमल्लिकम् ॥ ८७ ॥ विकसन्मालतीजालंकरवीरविराजितम् ॥ प्रस्फुटत्केतकिवनंप्रोद्यत्कुरवकोर्जितम् ॥ ८८ ॥

जृंभद्विचकिलामोदंलसत्कंकेलिपल्लवम् ॥ नवमल्लीपरिमलाकृष्टषट्पदनादितम् ॥ ८९ ॥ पुष्प्यपुन्नागनिकरंबकुलामोदमोदितम् ॥ मेदस्विपाटलामो दसदामोदितदिङ्मुखम् ॥ ९० ॥ बहुशोलंबिरोलंबमालामालितभूतलम् ॥ चलच्चंदनशाखाग्रममाणपिकाकुलम् ॥ ९१ ॥ गुरुणाऽगुरुणामत्तभृ जातिविहंगमम् ॥ नागकेसरशाखास्थशालभंजिविनोदितम् ॥ ९२ ॥ मेरुतुंगनमेरुस्थच्छायाक्रीडितकिंनरम् ॥ किंनरीमिथुनोद्गीतंगानवच्छुक किंशुकम् ॥ ९३ ॥ कदंबानांकदंबेषुगुंजद्भोलंबयुग्मकम् ॥ जितसौवर्णवर्णोच्चकर्णिकारविराजितम् ॥ ९४ ॥ शालतालतमालालीर्हिंतालीलकुचावृतम् ॥ लसत्सप्तच्छदामोदंखर्जूरीराजिराजितम् ॥ नारिकेलतरुच्छन्ननारंगीरागरंजितम् ॥ ९५ ॥ फलिजंबीरनिकरंमधूकमधुपाकुलम् ॥ शाल्मलीशीतलच्छायंपिचुमंदमहावनम् ॥ ९६ ॥ मधुरामोददमनच्छन्नंमरुवनोदितम् ॥ लवलीलोलकीलाभृन्मंदमारुतलोलितम् ॥ ९७ ॥ भिल्ली हल्लीसकप्रीतिझिल्लीरावविराविणम् ॥ क्वचित्सरःपरिसरक्रीडत्क्रोडकदंबकम् ॥ ९८ ॥

मरालीगलनालीस्थविसासक्तसितच्छदम् ॥ विशोककोकमिथुनक्रीडार्केकारमुंदरम् ॥ ९९ ॥ वकशावकसंचारंलक्ष्मणासक्तसारसम् ॥ मत्तबर्हिणसं घुष्टंकर्पिंजलकुलाकुलम् ॥ १०० ॥ जीवंजीवलसज्जीवंकणत्कारंडवोत्कटम् ॥ दीर्घिकावारिसंचारिशीतमारुतवीजितम् ॥ १ ॥ मंदांदोलितकदार परागपरिपिंगलम् ॥ उल्लसत्पंकजमुखंनीलेंदीवरलोचनम् ॥ २ ॥ तमालकबरीभारंविलसद्डिमीरदम् ॥ भ्रमरालीलसद्भकंशुकनासाविराजितम् ॥ ३ ॥ महाशुभ्रश्रवणंदूर्वाश्मश्रुभिःपरिशोभितम् ॥ कमलामोदनिःश्वासंबिंबीफलरदच्छदम् ॥ ४ ॥ सुपद्मपत्रवसनंकर्णिकारविभूषणम् ॥ कज्जलं धुलसत्कंठंशंकरस्कंधवंधुरम् ॥ ५ ॥ गंधसारसमासक्ताहीनदोर्दंडमंडितम् ॥ अशोकपल्लवांगुष्ठंकेतकीनखरोज्वलम् ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लसत्कटीरवोरस्कंगंडशैलपृथूदरम् ॥ जलावर्तलसन्नाभितरुजंघायुगान्वितम् ॥ ७ ॥ स्थलभाक्पद्मचरणंमत्तमातंगगामिनम् ॥ लसत्कदलिकेदारदलचीनांशुकावृतम् ॥ ८ ॥ नानासुकुममालाभिर्मालितंचसमंततः ॥ अकंटकितरुच्छन्नंमहिषश्वापदावृतम् ॥ ९ ॥ चंद्रकांतशिलासुप्तकृष्णेणहरितोडुपम् ॥ तरुप्रकीर्णकुसुमजितस्वर्लोकतारकम् ॥ दर्शयन्नित्यमाक्रीडंदेव्यैदेवोविशद्वनम् ॥ ११० ॥ ॥ देवदेवउवाच ॥ ॥ यथाप्रियतमादेविममत्वंसर्वसुंदरि ॥ तथाप्रियतरंचैतन्मेसदानंदकाननम् ॥ ११ ॥ अत्रानंदवनेदेविमृतानांमदनुग्रहात् ॥ वपुस्त्वमृततांप्राप्तमपुनर्भविनस्तुते ॥ १२ ॥ भविनोयेविपद्यंतेवाराणस्यांममाज्ञया ॥ तेपांबीजानिदग्धानिश्मशानज्वलदग्निना ॥ १३ ॥ महाश्मशानेयेप्राप्तादीर्घनिद्रांगिरींद्रजे ॥ नपुनर्गर्भशयनेतेस्वपंतिकदाचन ॥ १४ ॥ ब्रह्मज्ञानेनमुच्यंतेनान्यथाजंतवःक्वचित् ॥ ब्रह्मज्ञानमयेक्षेत्रेप्रयागेवातनुत्यजः ॥ १५ ॥ ब्रह्मज्ञानंतदेवाहंकाशीसंस्थितिभागिनाम् ॥ दिशामितारकंप्रांतेमुच्यंतेतेतुतत्क्षणात् ॥ १६ ॥ गृह्णीयुःपापकर्माणिकाशीमृतविनिंदकाः ॥ सुकृतानिस्तुतिकृतोमुच्यंतेतेऽप्रजंतवः ॥ १७ ॥

ब्रह्मज्ञानंकुतोदेविकलिनोपहतात्मनाम् ॥ स्वभावचंचलाक्षाणांतद्ब्रह्मेहदिशाम्यहम् ॥ १८ ॥ योगिनोयोगविभ्रष्टाःपतंत्यैश्वर्यमोहिताः ॥ काश्यांपतित्वानपुनःपतंत्यपिमहालये ॥ १९ ॥ ब्रह्मज्ञानंनविंदंतियोगैरेकेनजन्मना ॥ जन्मनैकेनमुच्यंतेकाश्यामंतकृतोजनाः ॥ १२० ॥ यथेहमुच्यतेजंतुर्गिरिजेमदनुग्रहात् ॥ अविमुक्तेमहाक्षेत्रेनतथान्यत्रकुत्रचित् ॥ २१ ॥ बहुजन्मसमभ्यासाद्योगीमुच्येतवानवा ॥ मृतमात्रोविमुच्येतकाश्यामेकेनजन्मना ॥ २२ ॥ नसिध्यतिकलौयोगोनसिध्यतिकलौतपः ॥ न्यायार्जितधनोत्सर्गःसद्यःसिध्येत्कलौनरः ॥ २३ ॥ नव्रतंनतपोनेज्यानजपोनसुरार्चनम् ॥ दानमेवककलौमुक्त्यैकाशीदानैरवाप्यते ॥ २४ ॥ कलौविश्वेश्वरोदेवःकलौवाराणसीपुरी ॥ कलौभागीरथीगंगाकलौदानंविशिष्यते ॥ २५ ॥ गंगोत्तरवहाकाश्यांलिंगंविश्वेश्वरंमम ॥ उभेविमुक्तिदेपुंसांप्राप्येदानबलात्कलौ ॥ २६ ॥ पुण्यवानितरोवापिममक्षेत्रस्यसेवया ॥ मुक्तोभवतिदेवेशिनात्रकार्याविचारणा ॥ २७ ॥ अविमुक्तस्यमाहात्म्यात्पुण्यपापेनकर्मणा ॥ देविप्रभवतःपुंसामपिजन्मशतार्जिते ॥ २८ ॥ अविमुक्तंनमोक्तव्यंतस्मादेविमुमुक्षुणा ॥ हन्यमानेनबहुधाऽप्युपसर्गशतैरपि ॥ २९ ॥ विधायक्षेत्रसंन्यासंयेवसंतीहमानवाः ॥ जीवन्मुक्तास्तुतेदेवितेषांविघ्नंहराम्यहम् ॥ १३० ॥ नयोगिनांह्रदाकाशेनकैलासेनमंदरे ॥ तथावासरतिर्मेऽस्तियथाकाश्यांरतिर्मम ॥ ३१ ॥ काशीवासिजनोदेविममगर्भेवसेत्सदा ॥ अतस्तंमोचयाम्यंतेप्रतिज्ञेयंयतोमम ॥ ३२ ॥ तामसींप्रकृतिंप्राप्यकालोभूत्वाचराचरम् ॥ ग्रसामिलीलयादेविकाशींरक्षामिगन्नतः ॥ ३३ ॥ प्रेमपात्रद्वयंदेविनितरांनेतरन्मम ॥ त्वंवातपोधनेगौरिकाशीवानंदभूमिका ॥ ३४ ॥ विनाकाशींनमेस्थानंविनाकाशींनमेरतिः ॥ विनाकाशींननिर्वाणंसत्यंसत्यंवदाम्यहम् ॥ ३५ ॥ ब्रह्मांडगोलकेयद्वन्मुक्तिःकाश्यांव्यवस्थिता ॥ अपांगयोगयुक्तयावानतथाहेलयाऽन्यतः ॥ ३६ ॥ इतिब्रुवाणोदेवेशोहरिकेशमवैक्षत ॥ मध्येवनंतपस्यंतमशोकतरुमूलगम् ॥ ३७ ॥ शुष्कस्नायुपिनद्धास्थिसंचयंनिश्चलाकृतिम् ॥ वल्मीककीटकाकोटिशोपितासृगमृग्धरम् ॥३८॥ निर्मांसकीकसचयंस्फटिकोपलनिश्चलम् ॥ शंखकुंदेंदुतुहिनमहाशंखलसच्छ्रियम् ॥ ३९ ॥ सत्वावलंबितप्राणमायुःशेषेणरक्षितम् ॥ निःश्वासोच्छासपवनवृत्तिसूचितजीवितम् ॥ १४० ॥ निमेषोन्मेषसंचारपिशुनीकृतजंतुकम् ॥ पिंगतारस्फुरद्रश्मिनेत्रदीपितदिङ्मुखम् ॥ ४१ ॥ तत्तपोग्निशिखादावचुंबितम्लानकाननम् ॥ तत्सौम्यदृक्सुधावर्षसंसिक्ताऽखिलभूरुहम् ॥ ४२ ॥

साक्षात्तपस्यंतमिवतपोधृत्वानराकृतिम् ॥ निराकृतिंनिराकांक्षंकृत्वाभक्तिंचकांचन ॥४३॥ कुरंगशावैर्गणशोभ्रमद्भिःपरिवारितम् ॥ नितांतभीषणास्यैश्वपंचास्यैःपरिरक्षितम् ॥ ४४ ॥ तंतथाभूतमालोक्यदेवीदेवंव्यजिज्ञपत् ॥ वरेणच्छंदयेशामुंनिजभक्तंतपस्विनम् ॥ ४५ ॥ त्वदेकचित्तंत्वदधीनजीवितंत्वदेककर्माणममुंत्वदाश्रयम् ॥ तीव्रैस्तपोभिःपरिशुष्कविग्रहंकुरुष्वयक्षस्यवरेनुग्रहम् ॥ ४६ ॥ देवोवृषेंद्रादवरुह्यदेव्याशैलादिनादत्तकरावलंबः ॥ समाधिसंकोचितनेत्रपत्रंपस्पर्शहस्तेनदयार्द्रचेताः ॥ ४७ ॥ ततःसयक्षोविनिमील्यचक्षुषीत्र्यक्षंपुरोवीक्ष्यसमक्षमात्मनः ॥ उद्यत्सहस्रांशुसहस्रतेजसंजगादहर्षाकुलगद्गदाक्षरम् ॥ ४८ ॥ जयेशशंभोगिरिजेशशंकरत्रिशूलपाणेशशिखंडशेखर ॥ स्पर्शात्कृपालोतवपाणिपंकजंप्राप्याभृतीभूततनूलतोऽभवम् ॥ ४९ ॥ श्रुत्वोदितांतस्यमहेश्वरोगिरंमृद्वीकयासाम्यसुपेयुषींदु ॥ भक्तस्यधीरस्यमहातपोनिधेददौवराणांनिकरंतदामुदा ॥ १५० ॥ क्षेत्रस्ययक्षास्यममप्रियस्यैमभवाधुनादंडधरोवरान्मम ॥ स्थिरस्त्वमद्यादिदुरात्मदंडकःसुपालकःपुण्यकृतांचमत्प्रियः ॥ ५१ ॥ त्वंदंडपाणिर्भवनामतोऽधुनासर्वान्गणान्च्छाधिममाज्ञयोत्कटान् ॥ गणाविमोत्वामनुयायिनौसदानाम्नायथार्थौनृषुसंभ्रमोद्भमौ ॥ ५२ ॥

त्वमंत्यभूपांकुरुकाशिवासिनांगलेसुनीलांभुजगेंद्रकंकणाम् ॥ भालेसुनेत्रांकरिकृत्तिवाससंवामेक्षणालक्षितवामभागाम् ॥ ५३ ॥ मौलौलसत्पिंगकपर्दभारिणींविभूतिसंक्षालितपुण्यविग्रहाम् ॥ अहोहिमांशोःकलयालसच्छ्रियंवृषेंद्रलीलागतिमंदगामिनीम् ॥ ५४ ॥ त्वमन्नदःकाशिनिवासिनांसदात्वंप्राणदोज्ञानदएकपवहि ॥ त्वंमोक्षदोमन्मुखमूपदेशतस्त्वंनिश्चलांसद्गसतिंविधास्यसि ॥ ५५ ॥ त्वंविघ्नपूगैःपरिपीड्यपापिनःसंभ्रांतिमुत्पाद्यविनेष्यसेबहिः ॥ आनीयभक्तान्क्षणतोपिदूरतोमुक्तिंपरांदापयितासिपिंगल ॥ ५६ ॥ त्वत्सात्कृतेक्षेत्रवरेहियक्षराट्कस्त्वामनाराध्यविमुक्तिभाजनम् ॥ सभाजनंपूर्वतपत्रतेचरेत्ततःसमर्चांममभक्तआचरेत् ॥ ५७ ॥ त्वंग्रामवासप्रदएवमेपुरेऽध्यक्षस्त्वमेधीह्यदंडनायकः ॥ दुष्टान्समुद्वाटयकाशिवैरिणःकाशींपुरींरक्षसदामुदान्वितः ॥ ५८ ॥ पूर्णभद्रसुतदंडनायकन्यक्षयक्षहरिकेशपिंगल ॥ काशिवासवसतांसदान्नदज्ञानमोक्षदगणाग्रणीर्भव ॥ ५९ ॥ मद्भक्तियुक्तोपिविनात्वदीयांभक्तिंनकाशीवसतिंलभेत ॥ गणेषुदेवेषुहिमानवेषुतदग्रमान्योभवदंडपाणे ॥ १६० ॥ ज्ञानोदतीर्थेविहितोदकक्रियोयस्त्वांसमाराधयितागणेशम् ॥ सएवलोकेकृतकृत्यतामगान्ममातुलानुग्रहतोऽग्रपुण्यवान् ॥ ६१ ॥ त्वंदक्षिणस्यांदिशिदंडपाणेसदैवमेनेत्रसमक्षमत्र ॥ त्वंदंडयन्प्राणभृतोदुरीहानिहास्वनृन्स्वानभयंदिशन्वै ॥ ६२ ॥

॥ स्कंदउवाच ॥ ॥ इतिदत्त्वावरान्विघ्नगिरीशोदंडपाणये ॥ वृषेंद्रमधिरुह्याथविवेशानदकाननम् ॥ ६३ ॥ कुंभोद्भवतदाभ्ययक्षराड्दंडनायकः ॥ पुरींवाराणसींसम्यगनुशास्तिनिदेशतः ॥ ६४ ॥ अहमप्यत्रवसतिंचक्रेतदनुसूयया ॥ वसन्नपिमयाकाश्यांयतःसंभावितोनसः ॥ ६५ ॥ मुनेक्षेत्रंयदत्याक्षीस्त्वमप्येवंविधोवशी ॥ शंकेतत्राहमेवाद्याकामंतस्यैवविक्रियाम् ॥ ६६ ॥ मनाग्विरुद्धाचरणंयदिद्विजविलक्षयेत् ॥ हरिकेशस्तदाकाश्यांक्वस्थितिः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्वचनिर्वृतिः ॥ ६७ ॥ दंडपाणिमनाराध्यकःकाश्यांसुखमाप्नुयात् ॥ प्रविविक्षुरहंकाशींदूरगोपिभजामितम् ॥ ६८ ॥ रत्नभद्रांगजोद्भूतपूर्णभद्रसुतो
त्तम ॥ निर्विघ्नंकुरुमेयक्षकाशीवासंशिवाप्तये ॥ ६९ ॥ धन्योयक्षःपूर्णभद्रोधन्याकांचनकुंडला ॥ ययोर्जठरपीठेभूर्दंडपाणेमहामते ॥ १७० ॥ जययक्ष
पतेधीरजयपिंगललोचन ॥ जयपिंगजटाभारजयदंडमहायुध ॥ ७१ ॥ अविमुक्तमहाक्षेत्रसूत्रधारोग्रतापस ॥ दंडनायकभीमास्यजयविश्वेश्वरप्रिय
॥ ७२ ॥ सौम्यानांसौम्यवदनभीषणानांभयानक ॥ क्षेत्रपापधियांकालमहाकालमहाप्रिय ॥ ७३ ॥ जयप्राणदयक्षेंद्रकाशीवासान्नमोक्षद ॥ महार
त्नस्फुरद्रश्मिचयचर्चितविग्रह ॥ ७४ ॥ महासंभ्रांतिजनकमहोद्भ्रांतिप्रदायक ॥ अभक्तानांचभक्तानांसंभ्रांत्युद्भ्रांतिनाशक ॥ ७५ ॥ प्रांतनेपथ्यचतुर
जयज्ञाननिधिप्रद ॥ जयगौरीपदाब्जालेमोक्षेक्षणविचक्षण ॥ ७६ ॥

यक्षराजाष्टकंपुण्यमिदंनित्यंत्रिकालतः ॥ जपामिमैत्रावरुणेवाराणस्याप्तिकारणम् ॥ ७७ ॥ दंडपाण्यष्टकंधीमाञ्जपन्विघ्नैर्नजातुचित् ॥ श्रद्धयापरि
भूयेतकाशीवासफलंलभेत् ॥ ७८ ॥ प्रादुर्भावंदंडपाणेःशृण्वन्स्तोत्रमिदंगृणन् ॥ विपत्तिमन्यतःप्राप्यकाशींजन्मांतरेलभेत् ॥ ७९ ॥ श्रुत्वाध्याय
मिमंपुण्यंदंडपाणिसमुद्भवम् ॥ पठित्वापाठयित्वापिनविघ्नैरभिभूयते ॥ १८० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडे
पूर्वार्द्धे दंडपाणिप्रादुर्भावोनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ अगस्त्यउवाच ॥ ॥ स्कंदज्ञानोदतीर्थस्यमाहात्म्यंवदसांप्रतम् ॥ ज्ञानवापींप्रशंसंतियतः
स्वर्गौकसोप्यलम् ॥१॥ ॥ स्कंदउवाच ॥ ॥ घटोद्भवमहाप्राज्ञशृणुपापप्रणोदिनीम् ॥ ज्ञानवाप्याःसमुत्पत्तिंकथ्यमानांमयाधुना ॥२॥ अनादि
सिद्धेसंसारेपुरादेवयुगेमुने ॥ प्रातःकुतश्चिदीशानश्चरन्स्वैरमितस्ततः ॥ ३ ॥ नवर्षंतियदाभ्राणिनप्रावर्तंतनिम्नगाः ॥ जलाभिलाषोनयदास्नानपानादि
कर्मणि ॥ ४ ॥ क्षारस्वादूदयोरेवयदासीज्जलदर्शनम् ॥ पृथिव्यांनरसंचारेवर्तमानेक्वचित्क्वचित् ॥ ५ ॥ निर्वाणकमलाक्षेत्रंश्रीमदानंदकाननम् ॥
महाश्मशानंसर्वेषांबीजानांपरमूपरम् ॥ ६ ॥ महाशयनसुप्तानांजंतूनांप्रतिबोधकम् ॥ संसारसागरावर्तपतज्जंतुतरंडकम् ॥ ७ ॥ यातायातातिसं
खिन्नजंतुविश्राममंडपम् ॥ अनेकजन्मगुणितकर्मसूत्रच्छिदाक्षुरम् ॥ ८ ॥ सच्चिदानंदनिलयंपरब्रह्मरसायनम् ॥ सुखसंतानजनकंमोक्षसाधनसिद्धि
दम् ॥ ९ ॥ प्रविश्यक्षेत्रमेतत्सईशानोजटिलस्तदा ॥ लसत्त्रिशूलविमलरश्मिजालसमाकुलः ॥ १० ॥

आलुलोकेमहालिंगंवैकुंठपरमेष्ठिनोः ॥ महाहमहमिकायांप्रादुरासयदादितः ॥ ११ ॥ ज्योतिर्मयीभिर्मालाभिःपरितःपरिवेष्टितम् ॥ वृंदैर्वृंदारकर्षीणां
गणानांचनिरंतरम् ॥ १२ ॥ सिद्धानांयोगिनांस्तोमैरर्च्यमानंनिरंतरम् ॥ गीयमानंचगंधर्वैःस्तूयमानंचचारणैः ॥ १३ ॥ अंगहारैरप्सरोभिःसेव्यमा
नमनेकधा ॥ नीराज्यमानंसततंनागीभिर्मणिदीपकैः ॥ १४ ॥ विद्याधरीकिन्नरीभिस्त्रिकालंकृतमंडनम् ॥ अमरीचमरीराजिवीज्यमानमितस्ततः
॥ १५ ॥ अस्येशानस्यतल्लिंगंदृष्ट्वेच्छेत्यभवत्तदा ॥ स्नपयामिमहल्लिंगंकलशैःशीतलैर्जलैः ॥ १६ ॥ चखानचत्रिशूलेनदक्षिणाशोपकंठतः ॥ कुंडं
प्रचंडवेगेनरुद्रोरुद्रवपुर्धरः ॥ १७ ॥ पृथिव्यावरणांभांसिनिष्क्रांतानितदामुने ॥ भूप्रमाणाद्दशगुणैर्यैरियंवसुधावृता ॥ १८ ॥ तैर्जलैःस्नापयां
चक्रेत्वत्स्पृष्टैरन्यदेहिभिः ॥ तुषारैर्जाड्यविधुरैर्जंजपूकौघहारिभिः ॥ १९ ॥ सन्मनोभिरिवात्यच्छैरनच्छैर्व्योमवर्त्मवत् ॥ ज्योत्स्नावदुज्ज्वलच्छायैः
पावनैःशंभुनामवत् ॥ २० ॥ पीयूषवत्स्वादुतरैःसुखस्पर्शैर्गवांगवत् ॥ निष्पापधीवद्गंभीरैस्तरलैःपापिशर्मवत् ॥ २१ ॥ विजिताब्जमहागंधैःपाट
लामोदमोदिभिः ॥ अदृष्टपूर्वलोकानांमनोनयनहारिभिः ॥ २२ ॥

अज्ञानतापसंतप्तप्राणिप्राणैकरक्षिभिः ॥ पंचामृतानांकलशैःस्नपनातिफलप्रदैः ॥ २३ ॥ श्रद्धोपस्पर्शिहृदयलिंगत्रितयहेतुभिः ॥ अज्ञानतिमिरार्का
भैर्ज्ञानदाननिदायकैः ॥ २४ ॥ विश्वभर्तुरुमास्पर्शसुखातिसुखकारिभिः ॥ महावभृथसुस्नानमहाशुद्धिविधायिभिः ॥ २५ ॥ सहस्रधारैःकलशैःसई
शानोघटोद्भव ॥ सहस्रकृत्वःस्नपयामाससंहृष्टमानसः ॥ २६ ॥ ततःप्रसन्नोभगवान्विश्वात्माविश्वलोचनः ॥ तमुवाचतदेशानंरुद्रंरुद्रवपुर्धरम् ॥ २७ ॥
तवप्रसन्नोस्मीशानकर्मणानेनसुव्रत ॥ गुरुणानन्यपूर्वेणममातिप्रीतिकारिणा ॥ २८ ॥ ततस्त्वंजटिलेशानवरंब्रूहितपोधन ॥ अदेयंनतवास्त्यद्यमहो
द्यमपरायण ॥ २९ ॥ ॥ ईशानउवाच ॥ ॥ यदिप्रसन्नोदेवेशवरयोग्योस्म्यहंयदि ॥ तदेतदतुलंतीर्थंतवनाम्नास्तुशंकर ॥ ३० ॥ ॥ विश्वेश्वरउवाच ॥
त्रिलोक्यांयानितीर्थानिभूर्भुवःस्वःस्थितान्यपि ॥ तेभ्योखिलेभ्यस्तीर्थेभ्यःशिवतीर्थमिदंपरम् ॥ ३१ ॥ शिवंज्ञानमितिब्रूयुःशिवशब्दार्थचिंतकाः ॥
तच्चज्ञानंद्रवीभूतमिहमेमहिमोदयात् ॥ ३२ ॥ अतोज्ञानोदनामैतत्तीर्थंत्रैलोक्यविश्रुतम् ॥ अस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ ३३ ॥ ज्ञानोदती
र्थसस्पर्शादश्वमेधफलंलभेत् ॥ स्पर्शनाचमनाभ्यांचराजसूयाश्वमेधयोः ॥ ३४ ॥ फल्गुतीर्थेनरःस्नात्वासंतर्प्यचपितामहान् ॥ यत्फलंसमवाप्नोति-
तदत्रश्राद्धकर्मणः ॥ ३५ ॥ गुरुपुष्यासिताष्टम्यांव्यतीपातोयदाभवेत् ॥ तदात्रश्राद्धकरणाद्गयाकोटिगुणंभवेत् ॥ ३६ ॥ यत्फलंसमवाप्नोतिपितॄन्सं
तर्प्यपुष्करे ॥ तत्फलंकोटिगुणितंज्ञानतीर्थेतिलोदकैः ॥ ३७ ॥ सन्निहत्यांकुरुक्षेत्रेतमोग्रस्तेविवस्वति ॥ यत्फलंपिंडदानेनतज्ज्ञानोदेदिनेदिने ॥३८॥
पिंडनिर्वपणंयेषांज्ञानतीर्थेसुतैःकृतम् ॥ मोदंतेशिवलोकेतेयावदाभूतसंप्लवम् ॥ ३९ ॥ अष्टम्यांचचतुर्दश्यामुपवासीनरोत्तमः ॥ प्रातःस्नात्वाथपी
तांभस्त्वंतलिंगमयोभवेत् ॥ ४० ॥

एकादश्यामपोप्यात्रप्राश्नातिचुलुकत्रयम् ॥ हृदयेतस्यजायंतेत्रीणिलिंगान्यसंशयम् ॥४१॥ ईशानतीर्थेयःस्नात्वाविशेषात्सोमवासरे ॥ संतर्प्यदेवर्षि
पितॄन्दत्त्वादानंस्वशक्तितः ॥ ४२ ॥ ततःसमर्च्यश्रीलिंगंमहासंभारविस्तरैः ॥ अत्रापिदत्त्वानानार्थान्कृतकृत्योभवेन्नरः ॥ ४३ ॥ उपास्यसंध्यांज्ञानो
देयत्पापंकाललोपजम् ॥ क्षणेनतदपाकृत्यज्ञानवाञ्जायतेद्विजः ॥ ४४ ॥ शिवतीर्थमिदंप्रोक्तंज्ञानतीर्थमिदंशुभम् ॥ तारकाख्यमिदंतीर्थंमोक्षतीर्थमिदं
ध्रुवम् ॥ ४५ ॥ स्मरणादपिपापौघोज्ञानोदस्यक्षयेद्ध्रुवम् ॥ दर्शनात्स्पर्शनात्स्नानात्पानाद्धर्मादिसंभवः ॥ ४६ ॥ डाकिनीशाकिनीभूतप्रेतवेतालरा
क्षसाः ॥ ग्रहाःकूश्मांडझोटिंगाःकालकर्णीशिशुग्रहाः ॥ ४७ ॥ ज्वरापस्मारविस्फोटद्वितीयकचतुर्थकाः ॥ सर्वेप्रशममायांतिशिवतीर्थजलेक्षणात् ॥
॥ ४८ ॥ ज्ञानोदतीर्थपानीयैर्लिंगंयःस्नापयेत्सुधीः ॥ सर्वतीर्थोदकैस्तेनध्रुवंसंस्नापितंभवेत् ॥ ४९ ॥ ज्ञानरूपोहमेवात्रद्रवमूर्तिंविधायच ॥ जाड्य
विध्वंसनंकुर्यांकुर्यांज्ञानोपदेशनम् ॥ ५० ॥ इतिदत्त्वावराञ्छंभुस्तत्रैवांतरधीयत ॥ कृतकृत्यमिवात्मानंसोप्यमंस्तत्रिशूलभृत् ॥ ५१ ॥ ईशानोज
टिलोरुद्रस्तत्प्राश्यपरमोदकम् ॥ अवाप्तवान्परंज्ञानंयेननिर्वृतिमाप्तवान् ॥ ५२ ॥ ॥ स्कंदउवाच ॥ ॥ कलशोद्भवचित्रार्थमितिहासंपुरातनम् ॥
ज्ञानवाप्यंहियद्वृत्तंतदाख्यामिनिशामय ॥ ५३ ॥ हरिस्वामीतिविख्यातःकाश्यामासीद्द्विजःपुरा ॥ तस्यैकातनयाजातारूपेणाऽप्रतिमाभुवि ॥ ५४ ॥
नसमाशीलसंपत्त्यातस्याःकाचनभूतले ॥ कलाकलापकुशलास्वरेणजितकोकिला ॥ ५५ ॥ ननारीतादृगस्तीहनामरीकिन्नरीनच ॥ विद्याधरीननो
नागीगंधर्वीनासुरीनच ॥ ५६ ॥ सर्वसौंदर्यनिलयासर्वलक्षणसत्खनिः ॥ अधिशेतेध्रुवंध्वांतंतन्मौलिंब्रध्नसाध्वसात् ॥५७॥ तदास्यंशरणंयातोमन्ये
दर्शभयाच्छशी ॥ दिवापिनत्यजेत्तांतुत्रस्तश्चंडमरीचितः ॥ ५८ ॥ तद्भ्रूभ्रमरराजीवगंडपत्रलतांतरे ॥ उदंचन्यंचदृड्डीनगतेरभ्यासभाजिनी ॥ ५९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तच्चारुलोचनक्षेत्रेविचरंतौचखंजनौ ॥ सदैवशारदींप्रीतिंनिर्विशेतेनिजेच्छया ॥ ६० ॥ सुदत्यारदनश्रेणीछेदेषुविषमेषुणा ॥ विहिताकांचनीरेखाकेंदावे तावतीकला ॥ ६१ ॥ प्रायोमदनभूपालहर्म्यरत्नांतरेशुभे ॥ जितप्रवालसुच्छायेतस्यारदनवाससी ॥६२॥ स्वर्गेमर्त्येचपातालेनैषारेखाक्वचित्स्त्रियाम्॥ तत्कंठरेखात्रितयव्याजेनशपतेस्मरः ॥ ६३ ॥ शंकेचित्तभुवोराज्ञोलसत्पटकुटीद्वयम् ॥ अनर्घ्यरत्नकोशाढ्यंतस्यावक्षोरुहद्वयम् ॥ ६४ ॥ अनंगभू नियमतोऽदृश्येमध्येनतभ्रुवः ॥ रोमालीलक्षिकामूर्ध्वामिवयष्टिंविधिर्व्यधात् ॥ ६५ ॥ तस्यानाभीदरींप्राप्यकंदर्पोऽनंगतांगतः ॥ पुनःप्राप्तुमिवांगा नितप्यतेपरमंतपः ॥ ६६ ॥ गुरुणैतन्नितंबेनमहामन्मथदीक्षया ॥ भुविकेकेयुवानोनस्वाधीनाःप्रापितादृशाम् ॥ ६७ ॥ ऊरुस्तंभेनचैतस्याःस्तंभव त्कस्यनोमनः ॥ तस्तंभेनमुनेर्वापिसुवृत्तेनसुवर्तनम् ॥ ६८ ॥ पादांगुष्ठनखज्योतिःप्रभयाकस्यनप्रभा ॥ विवेकजनिताऽध्वंसिमुनेतस्यानृगीदृशः ॥ ॥ ६९ ॥ साप्रत्यहंज्ञानवाप्यांस्नायंस्नायंशिवालये ॥ संमार्जनादिकर्माणिकुरुतेऽनन्यमानसा ॥ ७० ॥ तत्पादप्रतिबिंबेषुरेखाशष्पांकुरंचरन् ॥ नान्यद्वनांतरंयातिकाश्यांयूनांमनोमृगः ॥ ७१ ॥

तदास्यपंकजंहित्वायूनांनेत्रालिमालया ॥ नलतांतरमासेविअप्यामोदप्रसूनयुक् ॥ ७२ ॥ सुलोचनापिसाकन्याप्रेक्षेतास्यंनकस्यचित् ॥ सुश्रवाअ पिसाबालानादत्तेकस्यचिद्वचः ॥ ७३ ॥ सुशीलाशीलसंपन्नारहस्तद्विरहातुरैः ॥ प्रार्थितापिसुरूपाढ्यैर्नाभिलाषंबबंधसा ॥ ७४ ॥ धनैस्तस्याजनेता पियुवभिःप्रार्थितोबहु ॥ नाशकत्तांसुलीलांसदातुंशीलोर्जितश्रियम् ॥ ७५ ॥ ज्ञानोदतीर्थभजनात्सासुशीलाकुमारिका ॥ बहिरंतस्तदाऽद्राक्षीत्सर्वं लिंगमयंजगत् ॥ ७६ ॥ कदाचिदेकदातांतुप्रसुप्तांसदनांगणे ॥ मोहितोरूपसंपत्त्याकश्चिद्विद्याधरोऽहरत् ॥ ७७ ॥ व्योमवर्त्मनितांरात्रौयावन्मलयपर्व तम् ॥ सनिनीषतितावच्चविद्युन्मालीसमागतः ॥ ७८ ॥ राक्षसोभीषणवपुःकपालकृतकुंडलः ॥ वसारुधिरलिप्तांगःश्मश्रुलःपिंगलोचनः ॥ ७९ ॥ राक्षसउवाच ॥ ॥ ममदृग्गोचरंयातोविद्याधरकुमारक ॥ अद्यत्वामेतयासार्धंप्रेषयामियमालयम् ॥८०॥ इतिश्रुत्वाथसावाक्यंव्याघ्राघ्रातामृगीयथा ॥ चकंपेऽतीवसंभीताकदलीदलवन्मुहुः ॥ ८१ ॥ निजघानत्रिशूलेनरक्षोविद्याधरंचतम् ॥ विद्याधरकुमारोपिनितरांमधुराकृतिः ॥ ८२ ॥ तद्भीषणत्रि शूलेनभिन्नोरस्कोमहाबलः ॥ जघानमुष्टिघातेनकपातोपमेनतम् ॥ ८३ ॥ नरमांसवसामत्तंविद्युन्मालिनमाहवे ॥ चूर्णितोमुष्टिपातेनसोऽपतद्वसुधा तले ॥ ८४ ॥ राक्षसोमृत्युवशगोवज्रेणेवमहीधरः ॥ विद्याधरोपितच्छूलघातेनविकलीकृतः ॥ ८५ ॥ उवाचगद्गदंवाक्यंविघूर्णितविलोचनः ॥ प्रिये मुधासमानीतासुशित्यर्धोक्तिमुच्चरन् ॥ ८६ ॥ जहौप्राणान्रणेवीरस्तांप्रियांपरितःस्मरन् ॥ ८७ ॥ अनन्यपूर्वसंस्पर्शसुखंसमनुभूयसा ॥ तमेवचपतिं मत्वाचक्रेशोकाग्निसात्तनुम् ॥ ८८ ॥

लिंगत्रयशरीरिण्यास्तस्याःसान्निध्यतःसहि ॥ दिव्यंवपुःसमासाद्यराक्षसस्त्रिदिवंययौ ॥ ८९ ॥ रणेपणीकृतप्राणोविद्याधरसुतोपिसः ॥ अंतेप्रियांस्मर न्प्रापजनुर्मलयकेतुतः ॥ ९० ॥ ध्यायंतीसापितंबालाविद्याधरकुमारकम् ॥ विरहाग्नौविसृष्टासुःकर्णाटेजन्मभागभूत् ॥९१॥ सुतोमलयकेतोस्तांकाले नपरिणीतवान् ॥ माल्यकेतुरनंगश्रीःपित्रादत्तांकलावतीम् ॥ ९२ ॥ सापिप्राग्वासनायोगाल्लिंगार्चनरतासती ॥ हित्वामलयजक्षोदंविभूतिंबह्वमंस्तवै ॥ ॥ ९३ ॥ मुक्तावैदूर्यमाणिक्यपुष्परागेभ्यएवसा ॥ मेनेरुद्राक्षनेपथ्यमनर्घ्यंगर्भसुंदरी ॥ ९४ ॥ कलावतीमाल्यकेतुंपतिंप्राप्यपतिव्रता ॥ अपत्य त्रितयंलेभेदिव्यभोगसमृद्धिभाक् ॥ ९५ ॥ एकदाकश्चिदौदीच्योमाल्यकेतुंनरेश्वरम् ॥ चित्रकृच्चित्रपटिकांचित्रांदर्शितवानथ ॥ ९६ ॥ तांतुचित्रपटीं राजाकलावत्यैसमर्पयत् ॥ साथचित्रपटींरम्यांसंप्रहृष्टतनूरुहा ॥ ९७ ॥ मुहुर्मुहुःप्रपश्यंतीरहसिप्राणदेवताम् ॥ विसस्मारस्वमपिचसमाधिस्थेवयो गिनी ॥ ९८ ॥ क्षणमुन्मील्यनयनेकृत्वानेत्रातिथिंपतीम् ॥ तर्जन्यग्रमथोत्क्षिप्यस्वात्मानंसमबोधयत् ॥९९॥ संभेदोयमसेरम्यउपलोलार्कमग्रतः ॥ उपश्रीकेशवपदंवरणेपासरिद्वरा ॥१००॥ स्वर्गेप्रार्थितसंस्पर्शासैषास्वर्गतरंगिणी ॥ उदग्वहाभिलष्यंतियांदिवोद्युसदःसदा ॥१॥ अलक्ष्यामोक्षलक्ष्मी र्यावेदांतेपरिपठ्यते ॥ विमुक्तयेसतांसैषाश्रीमतीमणिकर्णिका ॥ २ ॥ मरणंमंगलंयत्रसफलंयत्रजीवितम् ॥ स्वर्गस्तृणायतेयत्रसैषाश्रीमणिकर्णिका ॥ ॥ ३ ॥ यत्रसंपत्तिसंभारान्विश्राण्यनिधनेच्छया ॥ यतिव्रतंसमालंब्यतिष्ठतेमूलकंदभुक् ॥ ४ ॥

यत्रत्रिमार्गगांगंगांमार्गमाणोमृतान्हरः ॥ स्वमौलिबालचंद्रेणमुक्तिमार्गंप्रदर्शयन् ॥ ५ ॥ संसारंयत्रदुर्वारंप्रतारयतिशंकरः ॥ मृताअप्यमृतायंतेकर्णधारा द्यतोनराः ॥ ६ ॥ संसारासारपदवीयत्रस्याददवीयसी ॥ कर्णेजपान्महेशानात्करुणावरुणालयात् ॥ ७ ॥ अनेकभवसंभूतप्रभूतसुकृतैर्नराः ॥ कर्णेजपं भवंयत्रलभंतेतेभवापहम् ॥ ८ ॥ स्वीकृत्यक्षेत्रसंन्यासंयद्बलेनमहाधियः ॥ तृणंकृतांतंमन्यंतेसेयंश्रीमणिकर्णिका ॥ ९ ॥ तृणीकृत्यनिजंदेहंयत्रराज र्षिसत्तमः ॥ हरिश्चंद्रःसपत्नीकोव्यक्रीणाद्भूरियंहिसा ॥ ११० ॥ अभिलष्यंतियत्रत्यमपिवैकुण्ठवासिनः ॥ सैकतंमृदुलंतल्पंसैषाश्रीमणिकर्णिका ॥ ॥ ११ ॥ अनेकजन्मजनितकर्मसूत्रनियंत्रणम् ॥ उन्मुच्ययत्रमुक्ताःस्युःसैषाश्रीमणिकर्णिका ॥ १२ ॥ सत्यलोकेऽपियेलोकास्तेऽर्थयंतिनिरंत रम् ॥ यामहोदीर्घनिद्रायैसेयंश्रीमणिकर्णिका ॥ १३ ॥ अयंहिसकुलस्तंभोयत्रश्रीकालभैरवः ॥ क्षेत्रपापकृतःशास्तिदर्शयंस्तीव्रयातनाम् ॥ १४ ॥ अन्यत्रविहितंपापंनश्येत्काशीनिरीक्षणात् ॥ काश्यांकृतानांपापानांदारुणेयंतुयातना ॥१५॥ कपालमोचनंतीर्थमेतत्तदपिपावनम् ॥ कपालंपतितंयत्र विधेर्भैरवपाणितः ॥ १६ ॥ ऋणत्रयाद्विमुच्यंतेयत्रस्नातानरोत्तमाः ॥ तीर्थंविशुद्धिजनकंतदेतदृणमोचनम् ॥ १७ ॥

प्रणवाख्यंपरंब्रह्मयत्रनित्यंप्रकाशते ॥ सपंचायतनोपेतॐकारेशोयमद्भुतः ॥ १८ ॥ अश्चउश्चमकारश्चनादोबिंदुश्चपंचमः ॥ पंचात्मकंपरंब्रह्मयत्रनित्यं प्रकाशते ॥१९॥ एषामत्स्योदरीरम्यायत्स्नातोमानवोत्तमः ॥ मातुर्जातूदरदरींनविशेदेषनिश्चयः ॥१२०॥ त्रिलोचनोयंभगवान्कुर्यादेवत्रिलोचनम् ॥ निजभक्तंकृपायुक्तस्त्वपिदेशांतरस्थितम् ॥ २१ ॥ असौकामेश्वरोदेवोयःकामान्पूरयेत्सताम् ॥ दुर्वासाअपियत्रापनिजकाममहोदयम् ॥ २२ ॥ स्वयं लीनोमहेशोत्रभक्तकामसमृद्धये ॥ तस्मात्स्वर्लीनसंज्ञास्यदेवदेवस्यशूलिनः ॥ २३ ॥ वाराणस्यांमहादेवोयःपुराणेषुपठ्यते ॥ क्षेत्राभिमानीभगवां स्तत्प्रासादोयमद्भुतः ॥ २४ ॥ असौस्कंदेश्वरोदेवःश्रद्धयायद्विलोकनात् ॥ आजन्मब्रह्मचर्यस्यफलमाप्नोतिमानवः ॥ २५ ॥ विनायकेश्वरश्चायंसर्व सिद्धिप्रदायकः ॥ यत्सेवयाप्रणश्यंतिनृणांसर्वेविनायकाः ॥२६॥ इयंवाराणसीदेवीसाक्षान्मूर्त्तिमयीशुभा ॥ यस्याविलोकनात्पुंसांभूयोनोगर्भसंभवः॥ ॥२७॥ पार्वतीश्वरलिंगस्यमहदायतनंत्विदम् ॥ यत्रनित्यंमहेशानोगौर्यासहविमुक्तिदः ॥२८॥ एषभृंगीश्वरःश्रीमान्महापातकनाशनः ॥ जीवन्मुक्तो ऽभवद्भृंगीयस्यलिंगस्यसेवया ॥ २९ ॥ चतुर्वेदेश्वरश्चैषचतुर्वेदधरोविधिः ॥ लभेद्यद्वीक्षणाद्विप्रोवेदाध्ययनजंफलम् ॥ १३० ॥ यज्ञैःसंस्थापितंचैत ल्लिंगंयज्ञेश्वराभिधम् ॥ यदर्चनाल्लभेन्मर्त्यःसर्वयागफलंमहत् ॥ ३१ ॥ पुराणेश्वरनामैतल्लिंगमष्टादशांगुलम् ॥ अष्टादशानांविद्यानांस्यादाधारोयंदी क्षणात् ॥ ३२ ॥ धर्मशास्त्रेश्वरश्चायंस्मृतिभिश्चप्रतिष्ठितः ॥ स्मृत्यध्ययनजंपुण्यंयद्विलोकनतोभवेत् ॥ ३३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सारस्वतमिदंलिंगंसर्वजाड्यविनाशकृत् ॥ सर्वतीर्थेश्वरंलिंगमेतत्सद्योविशुद्धिदम् ॥३४॥ शैलेश्वरस्यलिंगस्यमंडपोयंमहाद्भुतः ॥ सर्वेषांरत्नजातानां योबिभर्तिपरांश्रियम् ॥ ३५ ॥ सप्तसागरसंज्ञंवैलिंगमेतन्मनोहरम् ॥ यद्वीक्षणाल्लभेन्मर्त्यःसप्ताब्धिस्नानजंफलम् ॥ ३६ ॥ असौमंत्रेश्वरःश्रीमन्मंत्रजाप्यफलप्रदः ॥ सप्तकोटिमहामंत्रैःस्थापितोयःपुरायुगे ॥३७॥ त्रिपुरेशस्यलिंगस्यपुरःकुंडमिदंमहत् ॥ त्रिपुरैःखानितंपूर्वंत्रिपुरारिप्रियंपरम् ॥३८॥ इदंबाणेश्वरंलिंगंसहस्रभुजपूजितम् ॥ द्विभुजस्यापिबाणस्यसहस्रभुजहेतुकम् ॥ ३९ ॥ वैरोचनेश्वरश्चैषपुरःप्रह्लादकेशवात् ॥ बलिकेशवनामासावेषनारदकेशवः ॥ १४० ॥ आदिकेशवपूर्वेणत्वयमादित्यकेशवः ॥ भीष्मकेशवनामासौदत्तात्रेयेश्वरस्त्वयम् ॥ ४१ ॥ दत्तात्रेयेश्वरात्पूर्वमेषआदिगदाधरः ॥ भृगुकेशवनामासावेषवामनकेशवः ॥ ४२ ॥ नरनारायणावेतौयज्ञवाराहकेशवः ॥ विदारनारसिंहोयंगोपीगोविंदएषह ॥ ४३ ॥ एषलक्ष्मीनृसिंहस्यप्रासादोरत्नकेतनः ॥ यस्यप्रसादात्प्रह्लादःपदमैंद्रमवाप्तवान् ॥ ४४ ॥ अखर्वसिद्धिदःपुंसामेषखर्वविनायकः ॥ शेषमाधवनामासौशेषेणस्थापितःपुरा ॥४५॥ यस्यभक्तानदह्यंतेत्वपिसंवर्तवह्निना ॥ शंखमाधवनामासौशंखंहत्वात्रसंस्थितः ॥४६॥ इदंसारस्वतंस्रोतःपरंब्रह्मरसायनम् ॥ सरस्वत्यामहानद्याःसंगमोयत्रगंगया ॥ ४७ ॥ यत्राप्लुतानराभूयःसंभवंतिनभूतले ॥ श्रीबिंदुमाधवस्त्वेषसाक्षाल्लक्ष्मीपतिःपरः ॥ ४८ ॥ श्रद्धयायंनमन्मर्त्योनवसेद्गर्भवेश्मनि ॥ नदारिद्र्यमवाप्नोतिव्याधिभिर्नाभिभूयते ॥ ४९ ॥ बिंदुमाधवभक्तोयस्तंयमोपिनमस्यति ॥ प्रणवात्मायएकोऽस्तिनादबिंदुस्वरूपधृक् ॥१५०॥ अमूर्तंयत्परंब्रह्मबिंदुमाधवएवसः ॥ एतत्पंचनदंतीर्थंपंचब्रह्मात्मसंज्ञकम् ॥५१॥ यत्रस्नातोनगृह्णीयाच्छरीरंपांचभौतिकम् ॥ एषासामंगलागौरीकाश्यांपरममंगलम् ॥ ५२ ॥ यत्प्रसादादवाप्नोतिनरोऽत्रचपरत्रच ॥ मयूखादित्यसंज्ञोयंरश्मिमालीतमोपहः ॥ ५३ ॥

गभस्तीशोमहालिंगमेतद्दिव्यमहःप्रदम् ॥ मृकंडुसूनुनाप्यत्रतपस्तप्तंपुरामहत् ॥ ५४ ॥ लिंगंसंस्थाप्यपरमंस्वनाम्नायुःप्रदंपरम् ॥ किरणेश्वरनामेतल्लिंगंत्रैलोक्यविश्रुतम् ॥ ५५ ॥ सकृन्नतमिदंलोकंनयेत्किरणमालिनः ॥ धौतपापेश्वरंलिंगमेतत्पातकधावनम् ॥ ५६ ॥ निर्वाणनरसिंहोयंभक्तनिर्वाणकारणम् ॥ मणिप्रदीपनागोयंमहामणिविभूषणः ॥ ५७ ॥ यदर्चनान्नरोजातुननागैःपरिभूयते ॥ कपिलेशमिदंलिंगंकपिलेनप्रतिष्ठितम् ॥ ॥ ५८ ॥ मुच्यंतेकपयोप्यस्यदर्शनात्किमुमानवाः ॥ प्रियव्रतेश्वरंलिंगंमहदेतत्प्रकाशते ॥५९॥ यस्यार्चनाल्लभेज्जंतुःप्रियत्वंसर्वजन्तुषु ॥ इदमायतनंश्रेष्ठंमणिमाणिक्यनिर्मितम् ॥ १६० ॥ श्रीमतःकालराजस्यकलिकालार्तिहारिणः ॥ निजभक्तंजनंपातियःपापात्पापभक्षणः ॥ ६१ ॥ क्षेत्रविप्रकरान्पापान्यातयन्यातनाशतैः ॥ इयंमंदाकिनीरम्यातपस्तप्तुमिहागता ॥ ६२ ॥ काशीवाससुखंप्राप्यनाद्यापिदिवमीहते ॥ स्नात्वात्रसंतर्प्यपितॄञ्छ्राद्धंकृत्वाविधानतः ॥ ६३ ॥ नरोननरकंपश्येदपिदुष्कृतकर्मकृत् ॥ यानिकानिचलिंगानिकाश्यांसंतिसहस्रशः ॥ ६४ ॥ रत्नभूतमिदंतेषुलिंगंरत्नेश्वराभिधम् ॥ रत्नेश्वरप्रसादेनभुक्त्वारत्नान्यनेकशः ॥ ६५ ॥ पुरुषार्थमहारत्नंनिर्वाणंकोनलब्धवान् ॥ कृत्तिवासेश्वरस्यैषामहाप्रासादनिर्मितिः ॥ ॥ ६६ ॥ यांदृष्ट्वापिनरोदूरात्कृत्तिवासःपदंलभेत् ॥ सर्वेषामपिलिंगानांमौलित्वंकृत्तिवाससः ॥ ६७ ॥ ॐकारेशःशिखाज्ञेयालोचनानित्रिलोचनः ॥ गोकर्णभारभूतेशौतत्कर्णौपरिकीर्तितौ ॥६८॥ विश्वेश्वराविमुक्तौचद्वावेतौदक्षिणौकरौ ॥ धर्मेशमणिकर्णेशौद्वौकरौदक्षिणेतरौ ॥ ६९ ॥ कालेश्वरकपर्दीशौचरणावतिनिर्मलौ ॥ ज्येष्ठेश्वरोनितंबश्चनाभिर्वैमध्यमेश्वरः ॥ १७० ॥ कपर्दोस्यमहादेवःशिरोभूषाश्रुतीश्वरः ॥ चंद्रेशोहृदयंतस्यआत्मावीरेश्वरःपरः ॥ ७१ ॥ लिंगंतस्यतुकेदारःशुक्रंशुक्रेश्वरंविदुः ॥ अन्यानियानिलिंगानिपरःकोटिशतानिच ॥ ७२ ॥ ज्ञेयानिनखलोमानिवपुषोभूषणान्यपि ॥ यावेतौदक्षिणौहस्तौनित्यनिर्वाणदौहितौ ॥ ७३ ॥

जंतूनामभयंदत्त्वापततांमोहसागरे ॥ इयंदुर्गाभगवतीपितृलिंगमिदंपरम् ॥ ७४ ॥ इयंहिचित्रघंटेशीघंटाकर्णह्रदस्त्वयम् ॥ इयंसाललितागौरीविशालाक्षीयमद्भुता ॥ ७५ ॥ आशाविनायकस्त्वेषधर्मकूपोयमद्भुतः ॥ यत्रपिंडान्नरोदत्त्वापितॄन्ब्रह्मपदंनयेत् ॥ ७६ ॥ एषाविश्वभुजादेवीविश्वैकजननीपरा ॥ असौवंदीमहादेवीनित्यंत्रैलोक्यवंदिता ॥ ७७ ॥ निगडस्थानपिजनान्पाशान्मोचयतिस्मृता ॥ दशाश्वमेधिकंतीर्थमेतत्त्रैलोक्यवंदितम् ॥ ७८ ॥ यत्राहुतित्रयेणापिअग्निहोत्रफलंलभेत् ॥ प्रयागाख्यमिदंस्रोतःसर्वतीर्थोत्तमोत्तमम् ॥७९॥ अशोकाख्यमिदंतीर्थंगंगाकेशवएषवै॥मोक्षद्वारमिदंश्रेष्ठंस्वर्गद्वारमिदंविदुः ॥ १८० ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेज्ञानवापीवर्णनंनामत्रयस्त्रिंशत्तमोऽध्यायः ॥३३॥

॥ स्कंदउवाच ॥ ॥ पुनर्ददर्शतन्वंगीचित्रपट्यांघटोद्भव ॥स्वर्गद्वारात्पुरोभागेश्रीमतींमणिकर्णिकाम् ॥ १ ॥ संसारसर्पदष्टानांजंतूनांयत्रशंकरः ॥ अपसव्येनहस्तेनब्रूतेब्रह्मस्पृशञ्छ्रुतिम् ॥ २ ॥ नकापिलेनयोगेननसांख्येननचव्रतैः ॥ यागतिःप्राप्यतेपुंभिस्तांदद्यान्मोक्षभूरियम् ॥ ३ ॥ वैकुंठेविष्णुभवनेविष्णुभक्तिपरायणाः ॥ जपेयुःसततंमुक्त्यैश्रीमतींमणिकर्णिकाम् ॥४॥ हुत्वाग्निहोत्रमपिचयावज्जीवंद्विजोत्तमाः ॥ अंतेश्रयंतेमुक्त्यैयांसेयंश्रीमणिकर्णिका ॥ ५ ॥ वेदान्पठित्वाविधिवद्ब्रह्मयज्ञरताभुवि ॥ यांश्रयंतिद्विजामुक्त्यैसेयंश्रीमणिकर्णिका ॥ ६ ॥ इष्ट्वाक्रतूनपिनृपावहून्पर्याप्तदक्षिणान् ॥ श्रयंतेश्रेयसेधन्याःप्रतिऽधिमणिकर्णिकम् ॥ ७ ॥ सीमंतिन्योपिसततंपतिव्रतपरायणाः ॥ मुक्त्यैपतिमनुव्रज्यश्रयंतिमणिकर्णिकाम् ॥ ८ ॥ वैश्याअपिचसेवंतेन्यायोपार्जितसंपदः ॥ धनानिसाधुसात्कृत्वाप्रांतेश्रीमणिकर्णिकाम् ॥ ९ ॥

त्यक्त्वापुत्रकलत्रादिसच्छूद्रान्यायमार्गगाः ॥ निर्वाणप्राप्तयेचैनांभजेयुर्मणिकर्णिकाम् ॥ १० ॥ यावज्जीवंचरंतोपिब्रह्मचर्यंजितेंद्रियाः ॥ निःश्रेयसेश्रयंत्येनांश्रीमतींमणिकर्णिकाम् ॥ ११ ॥ अतिथीनपिसंतर्प्यपंचयज्ञरताअपि ॥ गृहस्थाश्रमिणोनेमांत्यजेयुर्मणिकर्णिकाम् ॥१२॥ वानप्रस्थाश्रमयुजोज्ञात्वानिर्वाणसाधनम् ॥ सन्नियम्येंद्रियग्रामंमणिकर्णीमुपासते ॥ १३ ॥ अनन्यसाधनांमुक्तिंज्ञात्वाशास्त्रैरनेकधा ॥ मुमुक्षुभिस्त्वेकदंडैःसेव्यतेमणिकर्णिका ॥ १४ ॥ दंडयित्वामनोवाचंकायंनित्यंत्रिदंडिनः ॥ नैःश्रेयसींश्रियंप्राप्तुंश्रयंतेमणिकर्णिकाम् ॥ १५ ॥ संन्यस्ताखिलकर्माणोदंडयित्वाचलंमनः ॥ एकदंडव्रतामुक्त्यैभजेयुर्मणिकर्णिकाम् ॥ १६ ॥ शिखीमुंडीजटीवापिकौपीनीवादिगंबरः ॥ मुमुक्षुःकोनसेवेतमुक्तिदांमणिकर्णिकाम् ॥१७॥ तपःकर्तुंनशक्तायेदानंवादातुमक्षमाः ॥ योगाभ्यासविहीनायेतेषामेषाविमुक्तिदा ॥ १८ ॥ संत्युपायाःसहस्रंतुमुक्तयेनतथामुने ॥ हेलयैषायथादद्यान्निर्वाणंमणिकर्णिका ॥ १९ ॥ अनशनव्रतभृतेत्रिकालाभ्यवहारिणे ॥ प्रांतेदद्यात्समांमुक्तिमुभाभ्यांमणिकर्णिका ॥ २० ॥ यथोक्तमाचरेदेकोनिष्ठापाशुपतंव्रतम् ॥ निरंतरंस्मरेदेकोहृद्येनांमणिकर्णिकाम् ॥ २१ ॥ दृष्टात्रवपुषःपातेद्वयोश्चसदृशीगतिः ॥ तस्मात्सर्वंविहायाशुसेव्यैषामणिकर्णिका ॥ ॥ २२ ॥ स्वर्गद्वारेविशेयुर्येविगाह्यमणिकर्णिकाम् ॥ तेषांविधूतपापानांक्वापिस्वर्गोनदूरतः ॥ २३ ॥ स्वर्गद्वाःस्वर्गभूरेषामोक्षभूर्मणिकर्णिका ॥ स्वर्गापवर्गावत्रैवनोपरिष्टान्नचाप्यधः ॥२४॥ दत्त्वादानान्यनेकानिविगाह्यमणिकर्णिकाम् ॥ स्वर्गद्वारंप्रविष्टायेनतेनिरयगामिनः ॥२५॥ स्वर्गापवर्गयोरर्थःकोविदैश्चनिरूपितः ॥ स्वर्गःसुखंसमुद्दिष्टमपवर्गोमहासुखम् ॥ २६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मणिकर्ण्युपविष्टस्ययत्सुखंजायतेसतः ॥ सिंहासनोपविष्टस्यतत्सुखंकशतक्रतोः ॥ २७ ॥ महासुखंयदुद्दिष्टंसमाधौविस्मृतात्मनाम् ॥ श्रीमत्यांम
णिकर्ण्यांतत्सहजेनैवजायते ॥ २८ ॥ स्वर्गद्वारात्पुरोभागेदेवनद्याश्चपश्चिमे ॥ सौभाग्यभाग्यैकनिधिःकाचिदेकामहास्थली ॥ २९ ॥ यावंतोभास्वतः
स्पर्शाद्भासंतेसैकताःकणाः ॥ तावंतोद्रुहिणाजग्मुर्नैत्येषामणिकर्णिका ॥ ३० ॥ संतितीर्थानितावंतिपरितोमणिकर्णिकाम् ॥ यावद्भिस्तिलमात्रापिनभू
मिर्विरलीकृता ॥ ३१ ॥ यदन्वयेकोपिमुक्तःसंप्राप्यमणिकर्णिकाम् ॥ तद्वंश्यास्तत्प्रभावेणमान्याःस्वर्गौकसामपि ॥ ३२ ॥ तर्पिताःपितरोयेनसंप्राप्यश
णिकर्णिकाम् ॥ सप्तसप्ततथासप्तपूर्वजास्तेनतारिताः ॥ ३३ ॥ आमध्याह्नवसरितआहरिश्चंद्रमंडपात् ॥ आगंगाकेशवादाचस्वर्द्वारान्मणिकर्णिका ॥
॥ ३४ ॥ एतद्रजःकणतुलांत्रिलोक्यपिनगच्छति ॥ एतत्प्राप्यैप्रयततेत्रिलोकस्योऽखिलोभवी ॥३५॥ कलावतीचित्रपटींपश्यंतीत्थंशुद्धुर्मुहुः ॥ ज्ञानवा
पींददर्शाथश्रीविश्वेश्वरदक्षिणे ॥ ३६ ॥ यदंबुसततंरक्षेद्रुवृत्तादंडनायकः ॥ संभ्रमोविभ्रमश्चासोदत्वाभ्रांतिंगरीयसीम् ॥ ३७ ॥ योष्टमूर्तिर्महादेवः
पुराणेपरिपठ्यते ॥ तस्यैपांशुमयीमूर्तिर्ज्ञानदाज्ञानवापिका ॥ ३८ ॥ नेत्रयोरतिथीकृत्यज्ञानवापीकलावती ॥ कदंबकुसुमाकारांबभारक्षणतस्तनुम् ॥
॥ ३९ ॥ अंगानिवेपथुंप्रापुःस्विन्नाभालस्थलीभृशम् ॥ हर्षबाष्पांबुकलिलेजातेतस्याविलोचने ॥ ४० ॥ तस्तंभगात्रलतिकासुखंवैवर्ण्यमापच ॥
स्वरोथगद्गदोजातोव्यभ्रंशत्तत्करात्पटी ॥ ४१ ॥

साक्षणंस्वंविसस्मारकाहंकाहंननवेत्तिच ॥ सौषुप्तायांदशायांचपरमात्मेवनिश्चला ॥ ४२ ॥ अथतत्परिचारिण्यस्त्वरमाणाइतस्ततः ॥ किंकिंकिमेतदे
तत्किंपृच्छंतिस्मपरस्परम् ॥ ४३ ॥ तदवस्थांसमालोक्यतांताश्चतुरचेतसः ॥ विज्ञायसात्त्विकैर्भावैरिदमूचुःपरस्परम् ॥ ४४ ॥ भवांतरेप्रेमपात्रमेतयै
क्षितुकिंचन ॥ चिरात्तेनचसंगत्यसुखमूर्च्छामवापह ॥ ४५ ॥ अथनेत्थंकथमियमकांडात्पर्यमुमुहत् ॥ प्रेक्षमाणारदश्चित्रपटीमतिपटीयसीम् ॥ ४६ ॥
तन्मोहस्यनिदानंताःसम्यगेवविचार्यच ॥ उपचेरुर्महाशांतैरुपचारैरनाकुलम् ॥ ४७ ॥ काचित्तांवीजयांचक्रेकदलीतालवृंतकैः ॥ विसिनीदलयै
रन्याधन्यांतांपर्यभूषयत् ॥ ४८ ॥ अमंदैश्चंदनरसैरभ्यर्पिचदमुंपरा ॥ अशोकपल्लवैरस्याःकाचिच्छोकमनीनशत् ॥ ४९ ॥ धारामंडपधारांबुसीकरै
स्तत्तनूलताम् ॥ इष्टार्थदि हग्लानांसिंचयामासकाचन ॥ ५० ॥ जलार्द्रवाससाकाचिदेतस्यास्तनुमावृणोत् ॥ कर्पूरक्षोदजालेपैरन्यास्तामन्वलेपयन्
॥ ५१ ॥ पद्मिनीदलशय्यांचकाचिद्व्यरचयन्मृदुम् ॥ काचित्कुलिशनेपथ्यंदूरीकृत्यतदंगतः ॥ ५२ ॥ मुक्ताकलापंरचयांचक्रेवक्षोजमंडले ॥ का
चिच्छशिमुखीतांतुचंद्रकांतशिलातले ॥ ५३ ॥ स्वापयामासतन्वंगींस्रवच्छीतांबुशीतले ॥ दृष्ट्वोपचार्यमाणांतामित्थंबुद्धिशरीरिणी ॥ ५४ ॥ अति
तापपरीतांगीतांःसखीःप्रत्यभाषत ॥ एतस्यास्तापशांत्यर्थंजानेहंपरमौषधम् ॥ ५५ ॥ उपचारानिमान्सर्वान्दूरीकुरुतमाचिरम् ॥ अपतापांकरोत्येनां
सद्यःपश्यतकौतुकम् ॥५६॥ दृष्ट्वाचित्रपटीमेपासद्योविह्वलतामगात् ॥ अत्रैवकाचिदेतस्याःप्रेममूरस्तिनिश्चितम् ॥५७॥ अतश्चित्रपटीस्पर्शात्परितापं
विहास्यति ॥ वाक्याद्बुद्धिशरीरिण्यास्ततस्तत्परिचारिकाः ॥ ५८ ॥ निधायतत्पुरःप्रोचुःपटींपश्यकलावति ॥ तवानंदकरीयत्रकाचिदस्तीष्टदेवता ॥
॥ ५९ ॥ सापीष्टदेवतानाम्नातत्पटीदर्शनेनच ॥ सुधासेकमिवप्राप्यमूर्छांहित्वोत्थितद्रुतम् ॥ ६० ॥ अवग्रहपरिम्लानावर्षासारैरिवौषधीः ॥
पुनरालोक्यांचक्रेज्ञानदांज्ञानवापिकाम् ॥ ६१ ॥

स्पृष्ट्वाकलावतीतांतुवापींचित्रगतामपि ॥ लेभेभवांतरज्ञानंयथाप्रीत्पूर्वजन्मनि ॥ ६२ ॥ पुनर्विचारयांचक्रेवापीमाहात्म्यमुत्तमम् ॥ अहोचित्रगतापीयंसं
स्पृष्टाज्ञानवापिका ॥ ६३ ॥ ज्ञानंमेजनयामासभवांतरसमुद्भवम् ॥ अथतासांपुरोहृद्याकथयामाससुंदरी ॥६४॥ निजंप्राग्भववृत्तांतंज्ञानवापीप्रभावजम् ॥
॥ कलावत्युवाच ॥ ॥ एतस्माज्जन्मनःपूर्वमहंब्राह्मणकन्यका ॥ ६५ ॥ उपविश्वेश्वरंकाश्यांज्ञानवाप्यांस्नेमुदा ॥ जनकोमेहरिस्वामीजनयित्रीप्रियं
वदा ॥ ६६ ॥ आख्याममसुशीलेतिमांचविद्याधरोऽहरत् ॥ मध्येमार्गेनिशीथेथतदोपमलयाचलम् ॥ ६७ ॥ रक्षसासहतोवीरोराक्षसंसजघानह ॥ रक्षो
पिप्रुतंशापात्तुदिव्यंवपुरवापह ॥ ६८ ॥ अवापजन्मगंधर्वस्त्वसौमलयकेतुतः ॥ कर्णाटनृपतेःकन्याबभूवाहंकलावती ॥ ६९ ॥ इतिज्ञानंममोद्भूतं
ज्ञानवापीक्षणात्क्षणात् ॥ इतितस्यावचःश्रुत्वासापिबुद्धिशरीरिणी ॥ ७० ॥ ताश्चतत्परिचारिण्यःप्रहृष्टास्तास्तदाऽभवन् ॥ प्रोचुस्तांप्राणिपत्याथपुण्य
शीलांकलावतीम् ॥ ७१ ॥ अहोकथंहिसालब्धायत्रभावोयमीदृशः ॥ धिग्जन्मतेषांमर्त्येऽस्मिन्यैर्नैक्षिज्ञानवापिका ॥ ७२ ॥ कलावतिनमस्तुभ्यं
कुरुनोपिसमीहितम् ॥ जर्नीसफलयास्माकंनयनःप्रार्थ्यभूपतिम् ॥ ७३ ॥ अथंचनियमोस्माकमद्यारभ्यकलावति ॥ निर्वेक्ष्यामोमहाभोगान्दृष्ट्वातां
ज्ञानवापिकाम् ॥ ७४ ॥ अवश्यंज्ञानवापीसानाम्नाभवितुमर्हति ॥ चित्रंचित्रगतापीहयातज्ञानदायिनी ॥ ७५ ॥ ॐकृत्यतासांवाक्यंसास्वाकारंपरि
गोप्यच ॥ प्रियाणिकृत्वाभूभर्तुःप्रस्तावज्ञाव्यजिज्ञपत् ॥ ७६ ॥ कलावत्युवाच ॥ जीवितेशनमेत्वत्तःकिंचित्प्रियतरंक्वचित् ॥ त्वामासाद्यपतिं
राजन्प्राप्ताःसर्वेमनोरथाः ॥ ७७ ॥ एकोमनोरथःप्रार्थ्योममास्त्यत्रार्यपुत्रक ॥ विचारपथमापन्नस्तवापिसमहाहितः ॥ ७८ ॥ ममतुत्वदधीनायाः
सुदुष्प्रापतरोमहान् ॥ तवस्वाधीनवृत्तेस्तुसिद्धप्रायोमनोरथः ॥ ७९ ॥ प्राणेशकिंवहूक्तेनयदिप्राणैःप्रयोजनम् ॥ तदाभिलषितंदेहिप्राणायास्यंत्यथा
न्यथा ॥ ८० ॥ प्राणेभ्योपिगरीयस्यास्तस्यावाक्यंनिशम्यसः ॥ उवाचवचनंराजातस्याःस्वस्यापिचप्रियम् ॥ ८१ ॥ राजोवाच ॥ ॥ नाहंप्रिये
तवादेयमिहपश्यामिभामिनि ॥ प्राणाअपिममक्रीतास्त्वयाशीलकलागुणैः ॥ ८२ ॥

अविलंबितमाचक्ष्वकृतंविद्धिकलावति ॥ भवद्विधानांसाध्वीनांमन्येऽप्राप्यंनकिंचन ॥ ८३ ॥ कःप्रार्थ्यःप्रार्थनीयंकिंकोवाप्रार्थयितापिये ॥ नपृथग्जनव
त्किंचिद्वर्तनंनोकलावति ॥ ८४ ॥ देशःकोशोबलंदुर्गंयदन्यदपिभामिनि ॥ तत्त्वदीयंनमेकिंचित्स्वाम्यमात्रमिहास्तिमे ॥ ८५ ॥ तच्चस्वाम्यंममान्य
त्रत्वदृतेजीवितेश्वरि ॥ राज्यंत्यजेयंत्वद्वाक्यात्तृणीकृत्यापिमानिनि ॥ ८६ ॥ माल्यकेतोर्महीजानेरितिवाक्यंनिशम्यसा ॥ प्राहगंभीरयावाचाक्वश्चारु
कलावती ॥ ८७ ॥ कलावत्युवाच ॥ नाथप्रजासृजापूर्वंसृष्टानानाविधाःप्रजाः ॥ प्रजाहितायसंसृष्टंपुरुषार्थचतुष्टयम् ॥ ८८ ॥ तद्विहीनाजनिरपिज्ञ
बुद्बुदवन्मुधा ॥तत्स्मादेकोपिसंसाध्यःपरत्रेहचशर्मणे ॥ ८९ ॥ यत्रानुकूल्यंदंपत्योश्चिवर्गस्तत्रवर्धते ॥ यदुच्यतेपुराविद्भिरितितत्तथ्यमीक्षितम् ॥९०॥
मद्विधानांतुदासीनांशतंतेऽर्त्तोहमंदिरे ॥ तथापिनितरांप्रेमस्वामिनोमयिदृश्यते ॥ ९१ ॥ तवदास्यपिभोगाढ्याकिमुतांकस्थलीचरी ॥ तत्राप्यनन्यसं
पत्तिस्तत्रस्वाधीनभर्तृता ॥ ९२ ॥ विपश्चित्संचयेदर्थानित्यापूर्तायकर्मणे ॥ तपोर्थमायुर्निर्विघ्नंदारांश्चापत्यलब्धये ॥ ९३ ॥ तवैतत्सर्वमस्तीहविश्वे
शानुग्रहात्प्रिय ॥ पूरणीयोऽभिलाषोमेयदितद्वच्म्यहंशृणु ॥ ९४ ॥ तूर्णंप्रहिणुमांनाथविश्वनाथपुरींप्रति ॥ प्राणाःप्रयाताःप्रागेववपुःशेषास्मिकेवलम्
॥ ९५ ॥ माल्यकेतुःकलावत्याइत्याकर्ण्यवचःस्फुटम् ॥ क्षणंविचार्यस्वहृदिराजाप्रोवाचतांप्रियाम् ॥ ९६ ॥ प्रियेकलावतियदितवगंतव्यंसेवहि ॥
राज्यलक्ष्म्यानयार्किमेचलंयात्वद्विहीनया ॥ ९७ ॥ नराज्यंराज्यमित्याहुराज्यश्रीःप्रेयसीध्रुवम् ॥ सप्तांगमपितद्राज्यंतयाहीनंतृणायते ॥ ९८ ॥
निःसपत्नंकृतंराज्यंभुक्तामोगाश्चिरंतरम् ॥ स्पृहीकार्थाःकृतार्थाश्चविधृताआधृतिःप्रिये ॥ ९९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपत्यान्यपिजातानिकिंकर्तव्यमिहास्तिमे ॥ अवश्यमेवगंतव्याऽऽवाभ्यांवाराणसीपुरी ॥ १०० ॥ माल्यकेतुःप्रियामित्थमाश्वास्यकृतनिश्चयः ॥ समाहूयचदेवज्ञान्प्रकृतीःपरिपूज्यच ॥ १ ॥ पुत्रेराज्यंनिधायाथराजाकाशींप्रतस्थिवान् ॥ रत्नजातंकियदपिपुत्रादर्थंप्रगृह्यच ॥ २ ॥ दृष्ट्वाविश्वेश्वरपुरीं हृष्टरोमानरेश्वरः ॥ मेनेकृतार्थमात्मानंसंसारांबुधिपारगम् ॥ ३ ॥ प्राग्जन्मवासनायोगात्सापिराज्ञीकलावती ॥ ग्रामांतरादागतेनपुरीमार्गानवैत्स्वयम् ॥ ४ ॥ मणिकर्ण्यामथस्नात्वाभूरिदत्त्वाततोवसु ॥ विश्वेशमर्चयित्वाथरत्नजातैरनेकशः ॥ ५ ॥ दत्त्वातत्रापिरत्नानिगजानश्वान्गवांव्रजम् ॥ दुकूलानि विचित्राणिपूजोपकरणानिच ॥ ६ ॥ सुवर्णरूप्यकलशान्दीपीदर्पणचामरान् ॥ ध्वजस्तंभपताकाश्चविचित्रोल्लोचकानिच ॥ ७ ॥ अथप्रदक्षिणी कृत्यमुक्तिमंडपमाविशत् ॥ तत्रधर्मकथांश्रुत्वादत्त्वातत्रापिसद्धनम् ॥ ८ ॥ सायंतनींमहापूजांपुनःकृत्वाक्षितीश्वरः ॥ तत्रजागरणंकृत्वातौर्यत्रिकमहो त्सवैः ॥९॥ अथप्रातःसमुत्थायकृत्वाशौचाचमक्रियाम् ॥ राज्ञ्याविनिर्दिष्टपथाज्ञानवापींनृपोययौ ॥११०॥ नृपःसार्धंकलावत्यातत्रसस्नौप्रहृष्टवत् ॥ अथपिंडान्सनिर्वाप्यसंतर्प्यश्रद्धयापितॄन् ॥ ११ ॥ तत्ररूप्यसुवर्णादिपात्रेभ्यःप्रतिपाद्यच ॥ दीनांधकृपणानाथान्महार्हैरत्नजातकैः ॥ १२ ॥ प्रीण यित्वानरपतिःपारणांकृतवांस्ततः ॥ संस्कार्यरत्नसोपानैर्ज्ञानवापींकलावती ॥ १३ ॥ आबबंधरतिंतत्रसहभर्त्रातपस्विनी ॥ एकांतरोपवासैश्चकदा चिच्चत्र्यहोव्रतैः ॥ १४ ॥ षडहोभोजनैश्चापिपक्षार्धनियमैरथ ॥ पक्षांतरोपवासैश्चमासोपवसनादिभिः ॥ १५ ॥ चांद्रायणव्रतैःकृच्छ्रैर्भर्तुःशुश्रूषणैरपि ॥ निनायक्षणवत्कालमायुःशेषस्यसानघा ॥ १६ ॥ एकदाज्ञानवाप्यांतुप्रातःस्नात्वोपविष्टयोः ॥ आगत्यजटिलःकश्चिद्विभूतिंदत्तवान्करे ॥ १७ ॥ उवाचचप्रसन्नास्यआशीर्भिरभिनंद्यच ॥ उत्तिष्ठतंप्रकुरुतंमहानेपथ्यमद्यवै ॥ १८ ॥ तारकोदयसंप्राप्तिर्भवित्रीवांक्षणादिह ॥ यावदित्थंसमाचष्टजटिलो ऽग्रेतयोर्वचः ॥ १९ ॥ तावद्विमानमापन्नंसक्वणत्किंकिणीगणम् ॥ पश्यतांसर्वलोकानांचन्द्रमौलिरथोरथात् ॥ १२० ॥ उत्तीर्यतच्छ्रुतिपुटेकिमपि स्वयमादिशत् ॥ अनाख्यंयत्परंज्योतिरुच्चक्रामचतत्क्षणात् ॥ २१ ॥

उद्योतयन्नभोवर्त्मदेवोपिस्वालयंययौ ॥ ॥ स्कन्दउवाच ॥ ॥ तदाप्रभृतिलोकेऽत्रज्ञानवापीविशिष्यते ॥ २२ ॥ सर्वेभ्यस्तीर्थमुख्येभ्यःप्रत्यक्ष ज्ञानदामुने ॥ सर्वज्ञानमयीचैषासर्वलिंगमयीशुभा ॥ २३ ॥ साक्षाच्छिवमयीमूर्तिर्ज्ञानकृज्ज्ञानवापिका ॥ सन्तितीर्थान्यनेकानिसद्यःशुचिकराण्य पि ॥ २४ ॥ परंतुज्ञानवाप्याहिकलांनार्हंतिषोडशीम् ॥ ज्ञानवाप्याःसमुत्पत्तिंयःश्रोष्यतिसमाहितः ॥ नतस्यज्ञानविभ्रंशोमरणेजायतेक्वचित् ॥ २५ ॥ महाख्यानमिदंपुण्यंमहापातकनाशनम् ॥ महादेवस्यगौर्याश्चमहाप्रीतिविवर्धनम् ॥ २६ ॥ पठित्वापाठयित्वावाश्रुत्वावाश्रद्धयान्वितः ॥ ज्ञानवाप्याः शुभाख्यानंशिवलोकेमहीयते ॥ १२७ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेज्ञानवापीप्रशंसनंनामचतु स्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ ॥ कुंभयोनिरुवाच ॥ ॥ अविमुक्तंमहाक्षेत्रंपरंनिर्वाणकारणम् ॥ क्षेत्राणांपरमंक्षेत्रंमंगलानांचमंगलम् ॥ १ ॥ श्मशा नानांचसर्वेषांश्मशानंपरमंमहत् ॥ पीठानांपरमंपीठमूषराणांमहोपरम् ॥ २ ॥ धर्माभिलाषिबुद्धीनांधर्मराशिकरंपरम् ॥ अर्थार्थिनांशिखिरथपरमार्थ प्रकाशकम् ॥ ३ ॥ कामिनांकामजननंमुमुक्षूणांचमोक्षदम् ॥ श्रूयतेयत्रयत्रैतत्तत्रतत्रपरामृतम् ॥ ४ ॥ क्षेत्रैकदेशवर्तिन्याज्ञानवाप्याःकथांपराम् ॥ श्रुत्वेमामितिमन्येहंगौरीहृदयनंदन ॥ ५ ॥ अणुप्रमाणमपियामध्येकाशिविकासिनी ॥ महीमहीयसीज्ञेयासासिद्ध्यैनमुधाक्वचित् ॥ ६ ॥ कियंतिसं तितीर्थानिनेहक्षोणीतलेऽखिले ॥ परंकाशीरजोमात्रतुलासाम्यंक्वतेष्वपि ॥ ७ ॥ कियंत्योनस्रवंत्योत्ररत्नाकरमुदावहाः ॥ परंस्वर्गतरंगिण्याःकाश्यां कासाम्यमुद्वहेत् ॥ ८ ॥ कियंतिसंतिनोभूम्यांमोक्षक्षेत्राणिषण्मुख ॥ परंमन्येऽविमुक्तस्यकोट्यंशोपिनतेष्वहो ॥ ९ ॥

गंगाविश्वेश्वरःकाशीजागर्तित्रितयंयतः ॥ तत्रनैःश्रेयसीलक्ष्मीर्लभ्यतेचित्रमत्रकिम् ॥ १० ॥ कथमेषात्रयीस्कंदप्राप्यतेनियतंनरैः ॥ तिष्येयुगेविशेषेण नितरांचंचलेंद्रियैः ॥ ११ ॥ तपस्तादृक्क्वातिष्येतिष्येयोगःक्वतादृशः ॥ क्वाव्रतंक्वादानंतिष्येमोक्षस्त्वतःकुतः ॥ १२ ॥ विनापितपसास्कंदविनायो गेनषण्मुख ॥ विनाव्रतैर्विनादानैःकाश्यांमोक्षस्त्वयेरितः ॥ १३ ॥ किंकिमाचरतास्कंदकाशीप्राप्येततद्वद ॥ मन्येविनासदाचारंनसिद्ध्येयुर्मनोरथाः ॥ १४ ॥ आचारःपरमोधर्मआचारःपरमंतपः ॥ आचाराद्वर्धतेह्यायुराचारात्पापसंक्षयः ॥ १५ ॥ आचारमेवप्रथमंतस्मादाचक्ष्वषण्मुख ॥ देवदेवो यथाप्राहतवाग्रेत्वंतथावद ॥ १६ ॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणजाख्यामिसदाचारंसतांहितम् ॥ यदाचरन्नरोनित्यंसर्वान्कामानवाप्नुयात् ॥१७॥ स्थावराःकृमयोऽब्जाश्चपक्षिणःपशवोनराः ॥ क्रमेणधार्मिकास्त्वेतेह्येतेभ्योधार्मिकाःसुराः ॥ १८ ॥ सहस्रभागःप्रथमाद्वितीयोनुक्रमात्तथा ॥ सर्वएते महाभागायावन्मुक्तिसमाश्रयाः ॥ १९ ॥

चतुर्णामपिभूतानांप्राणिनोऽतीवचोत्तमाः ॥ प्राणिभ्योपिमुनेश्रेष्ठाःसर्वेबुद्ध्युपजीविनः ॥ २० ॥ मतिमद्भ्योनराःश्रेष्ठास्तेभ्यःश्रेष्ठास्तुवाडवाः ॥ विप्रेभ्यो पिचविद्वांसोविद्वद्भ्यःकृतबुद्धयः ॥ २१ ॥ कृतधीभ्योपिकर्तारःकर्तृभ्योब्रह्मतत्पराः ॥ नतेषामर्चनीयोऽन्यस्त्रिपुलोकेषुकुंभज ॥ २२ ॥ अन्योन्यमर्च कास्तेवैतपोविद्याऽविशेषतः ॥ ब्राह्मणोब्रह्मणासृष्टःसर्वभूतेश्वरोयतः ॥ २३ ॥ अतोजगत्स्थितंसर्वंब्राह्मणोऽर्हतिनापरः ॥ सदाचारोहिसर्वार्होनाचारा द्विच्युतःपुनः ॥ तस्माद्विप्रेणसततंभाव्यमाचारशीलिना ॥ २४ ॥ विद्वेषरागरहिताअनुतिष्ठंतियंमुने ॥ विद्वांसस्तंसदाचारंधर्ममूलंविदुर्बुधाः ॥२५॥ लक्षणैःपरिहीनोपिसम्यगाचारतत्परः ॥ श्रद्धालुरनसूयुश्चनरोजीवेत्समाःशतम् ॥ २६ ॥ श्रुतिस्मृतिभ्यामुदितंस्वेषुस्वेषुचकर्मसु ॥ सदाचारंनिषेवे तधर्ममूलमतंद्रितः ॥ २७ ॥ दुराचाररतोलोकेगर्हणीयःपुमान्भवत् ॥ व्याधिभिश्चाभिभूयेतसदाल्पायुःसुदुःखभाक् ॥ २८ ॥ त्याज्यंकर्मपराधीनं कार्यमात्मवशंसदा ॥ दुःखीयतःपराधीनःसदैवात्मवशःसुखी ॥ २९ ॥ यस्मिन्कर्मण्यंतरात्माक्रियमाणेप्रसीदति ॥ तदेवकर्मकर्तव्यंविपरीतंनचक्व चित् ॥ ३० ॥ प्रथमंधर्मसर्वस्वंप्रोक्तायन्नियमायमाः ॥ अतस्तेष्वेववैयत्नःकर्तव्योधर्ममिच्छता ॥ ३१ ॥ सत्यंक्षमार्जवंध्यानमानृशंस्यमहिंसनम् ॥ दमःप्रसादोमाधुर्यंमृदुतेतियमादश ॥ ३२ ॥ शौचंस्नानंतपोदानंमौनेज्याध्ययनंव्रतम् ॥ उपोषणोपस्थदंडौदशैतेनियमाःस्मृताः ॥ ३३ ॥

कामंक्रोधंमदंमोहंमात्सर्यंलोभमेवच ॥ अमून्षडैरिणोजित्वासर्वत्रविजयीभवेत् ॥ ३४ ॥ शनैःशनैःसंचिनुयाद्धर्मंवल्मीकशृंगवत् ॥ परपीडामकुर्वाणः परलोकसहायिनम् ॥ ३५ ॥ धर्मएवसहायीस्यादमुत्रनपरिच्छदः ॥ पितृमातृसुतभ्रातृयोषिद्बंधुजनादिकः ॥ ३६ ॥ जायतेचैकलःप्राणीप्रम्रिये ततथैकलः ॥ एकलःसुकृतंभुंक्तेभुंक्तेदुष्कृतमेकलः ॥ ३७ ॥ देहंपंचत्वमापन्नंत्यक्त्वाकौकाष्ठलोष्टवत् ॥ बांधवाविमुखायांतिधर्मोयांतमनुव्रजेत् ॥३८॥ कृतीसंचिनुयाद्धर्मंततोऽमुत्रसहायिनम् ॥ धर्मंसहायिनंलब्ध्वासंतरेदुस्तरंतमः ॥ ३९ ॥ संबंधांनाचरेन्नित्यमुत्तमैरुत्तमैःसुधीः ॥ अधमानधमां स्त्यक्त्वाकुलमुत्कर्षतांनयेत् ॥ ४० ॥ उत्तमानुत्तमानेवगच्छन्हीनांश्चवर्जयन् ॥ ब्राह्मणःश्रेष्ठतामेतिप्रत्यवायेनशूद्रताम् ॥ ४१ ॥ अनध्ययनशील चसदाचारविलंघिनम् ॥ सालसंचदुरन्नादंब्राह्मणंबाधतेंऽतकः ॥ ४२ ॥ ततोऽभ्यसेत्प्रयत्नेनसदाचारंसदाद्विजः ॥ तीर्थान्यप्यभिलष्यंतिसदाचारिस

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मागमम् ॥ ४३ ॥ रजनीप्रांतयामार्धंब्राह्मःसमयउच्यते ॥ स्वहितंचिंतयेत्प्राज्ञस्तस्मिंश्चोत्थायसर्वदा ॥ ४४ ॥ गजास्यंसंस्मरेदादौततईशंसहांबया॥ श्रीरंगंश्रीसमेतंतुब्रह्माण्याकमलोद्भवम् ॥ ४५ ॥ इंद्रादीन्सकलान्देवान्वसिष्ठादीन्मुनीनपि ॥ गंगाद्याःसरितःसर्वाःश्रीशैलाद्यखिलान्गिरीन् ॥ ४६ ॥ क्षीरोदादीन्समुद्रांश्चमानसादिसरांसिच ॥ वनानिनंदनादीनिधेनूःकामदुघादिकाः ॥ ४७ ॥

कल्पवृक्षादिवृक्षांश्चधातून्कांचनमुख्यतः ॥ दिव्यस्त्रीरुर्वशीमुख्यागरुडादीन्पतत्रिणः ॥ ४८ ॥ नागांश्चशेषप्रमुखान्गजानैरावतादिकान् ॥ अश्वानुच्चैः श्रवोमुख्यान्कौस्तुभादीन्मणीञ्छुभान् ॥ ४९ ॥ स्मरेदरुंधतीमुख्याःपतिव्रतवतीर्वधूः ॥ नैमिषादीन्यरण्यानिपुरीःकाशीपुरीमुखाः ॥ ५० ॥ विश्वेशादीनिलिंगानिवेदानृक्प्रमुखानपि ॥ गायत्रीप्रमुखान्मंत्रान्योगिनःसनकादिकान् ॥ ५१ ॥ प्रणवादिमहाबीजंनारदादींश्चवैष्णवान् ॥ शिवभक्तांश्चबाणादीन्प्रह्लादादीन्दृढव्रतान् ॥ ५२ ॥ वदान्यांश्चदधीच्यादीन्हरिश्चंद्रादिभूपतीन् ॥ जननीचरणौस्मृत्वासर्वतीर्थोत्तमोत्तमौ ॥ ५३ ॥ पितरंचगुरूंश्चापिहृदिध्यात्वाप्रसन्नधीः ॥ ततश्चावश्यकंकर्तुंनैर्ऋतींदिशमाश्रयेत् ॥ ५४ ॥ ग्रामाद्धनुःशतंगच्छेन्नगराच्चचतुर्गुणम् ॥ तृणैराच्छाद्यवसुधांशिरःप्रावृत्यवाससा ॥ ५५ ॥ कर्णोपवीत्युदग्वक्त्रोदिवसेसंध्ययोरपि ॥ विण्मूत्रेविसृजेन्मौनीनिशायांदक्षिणामुखः ॥ ५६ ॥ नतिष्ठन्नाप्सुनोविप्रगोवह्न्यनिलसंमुखः ॥ नफालकृष्टेभूभागेनरथ्यासेव्यभूतले ॥ ५७ ॥ नालोकयेद्दिशोभागाञ्ज्योतिश्चक्रंनभोमलम् ॥ वामेनपाणिनाशिश्नंधृत्वोत्तिष्ठेत्प्रयत्नवान् ॥ ५८ ॥ अथोमृदंसमादायजंतुकर्करवर्जिताम् ॥ विहायमूषकोत्खातांशौचोच्छिष्टांचनाकुलाम् ॥ ५९ ॥ गुह्येदद्यान्मृदंचैकांपायौपंचांबुसांतराः ॥ दशवामकरेचापिसप्तपाणिद्वयेमृदः ॥ ६० ॥ एकैकांपादयोर्दद्यात्तिस्रःपाण्योर्मृदस्तथा ॥ इत्थंशौचंगृहीकुर्याद्गंधलेपक्षयावधि ॥ ६१ ॥ क्रमाद्द्वैगुण्यमेतस्माद्ब्रह्मचर्यादिषुत्रिषु ॥ दिवाविहितशौचस्यरात्रावर्धंसमाचरेत् ॥ ६२ ॥ रुज्यर्धंचतदर्धंचपथिचौरादिबाधिते ॥ तदर्धंयोषितांचापिसुस्थेन्यूनंनकारयेत् ॥६३॥ अपिसर्वंनदीतोयैर्मृत्कूटैश्चापिगोमयैः॥ आपादमाचरञ्छौचंभावदुष्टोनशुद्धिभाक् ॥६४॥आर्द्रधात्रीफलोन्मानामृदःशौचेप्रकीर्तिताः॥सर्वाश्चाहुतयोप्येवंग्रासाश्चांद्रायणेपिच॥६५॥प्रागास्यउदगास्योवासूपविष्टःशुचौभुवि॥उपस्पृशेद्विहीनायांतुषांगारास्थिभस्मभिः ॥ ६६ ॥

अनुष्णाभिरफेनाभिरद्भिर्हृद्गाभिरत्वरः ॥ ब्राह्मणोब्राह्मतीर्थेनदृष्टिपूताभिराचमेत् ॥ ६७ ॥ कंठगाभिर्नृपःशुद्ध्येत्तालुगाभिस्तथोरुजः ॥ स्त्रीशूद्रावास्यसंस्पर्शमात्रेणापिविशुद्ध्यतः ॥ ६८ ॥ शिरःप्रावृत्यकंठंवाजलेमुक्तशिखोऽपिच ॥ अक्षालितपदद्वंद्वआचांतोप्यशुचिर्मतः ॥ ६९ ॥ त्रिःपीत्वांबुविशुद्ध्यर्थंततःखानिविशोधयेत् ॥ अंगुष्ठमूलदेशेनद्विर्द्विरोष्ठाधरौस्पृशेत् ॥ ७० ॥ अंगुलीभिस्त्रिभिःपश्चात्पुनरास्यंस्पृशेत्सुधीः ॥ तर्जन्यंगुष्ठकोट्याचघ्राणरंध्रेपुनःपुनः ॥ ७१ ॥ अंगुष्ठानामिकाग्राभ्यांचक्षुःश्रोत्रेपुनःपुनः ॥ कनिष्ठांगुष्ठयोगेननाभिरंध्रमुपस्पृशेत् ॥ ७२ ॥ स्पृष्ट्वातलेनहृदयंसमस्ताभिःशिरःस्पृशेत् ॥ अंगुल्यग्रैस्तथास्कंधौसांबुसर्वत्रसंस्पृशेत् ॥ ७३ ॥ आचांतःपुनराचामेत्कृतेरथ्योपसर्पणे ॥ स्नात्वाभुक्त्वापयःपीत्वाप्रारंभेशुभकर्मणाम् ॥ ७४ ॥ सुप्त्वावासःपरीधायतथादृष्ट्वाप्यमंगलम् ॥ प्रमादादशुचिंस्पृष्ट्वाद्विराचांतःशुचिर्भवेत् ॥ ७५ ॥ अथोमुखविशुद्ध्यर्थंगृह्णीयाद्दंतधावनम् ॥ आचांतोप्यशुचिर्यस्मादकृत्वादंतधावनम् ॥ ७६ ॥ प्रतिपद्दर्शषष्ठीपुनवम्यांरविवासरे ॥ दंतानांकाष्ठसंयोगोदहेदासप्तमंकुलम् ॥ ७७॥ अलाभेदंतकाष्ठानांनिषिद्धेवाथवासरे ॥ गंडूषाद्द्वादशग्राह्यासुखस्यपरिशुद्धये ॥ ७८ ॥ कनिष्ठाग्रपरीमाणंसत्वचंनिर्व्रणंऋजुम् ॥ द्वादशांगुलमानंचसार्धंस्याद्दंतधावनम् ॥ ७९ ॥ एकैकांगुलह्रासेनवर्णेष्वन्येपुकीर्तितम् ॥ आम्राम्रातकधात्रीणांकंकोलखदिरोद्भवम् ॥ ८० ॥ शम्यपामार्गखर्जूरीशेलुश्रीपर्णिपीलुजम् ॥राजादनंचनारंगंकषायकटुकंटकम्॥८१॥क्षीरवृक्षोद्भवंवापिप्रशस्तंदंतधावनम्॥जिह्वोल्लेखनिकांचापिकुर्याच्चापाकृतिंशुभाम्॥८२॥ अन्नाद्यायव्यूहध्वंसोमोराजायमागमत् ॥ समेमुखंप्रमार्क्ष्यतेयशसाचभगेनच ॥ ८३ ॥

आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ॥ ८४ ॥ मंत्रावेतौसमुच्चार्ययःकुर्याद्दंतधावनम् ॥ वनस्पतिगतःसोमस्तस्यनित्यंप्रसीदति ॥ ८५ ॥ मुखेपर्युषितेयस्माद्भवेदशुचिभाग्नरः ॥ ततःकुर्यात्प्रयत्नेनशुद्ध्यर्थंदंतधावनम् ॥ ८६ ॥ उपवासेपिनोदुष्येद्दंतधावनमंजनम् ॥ गंधालंकारसद्वस्त्रपुष्पमालानुलेपनम् ॥ ८७ ॥ प्रातःसंध्यांततःकुर्याद्दंतधावनपूर्विकाम् ॥ प्रातःस्नानंचरित्वाचशुद्धेतीर्थेविशेषतः ॥ ८८ ॥ प्रातःस्नानाद्यतःशुद्ध्येत्कायोयंमलिनःसदा ॥ छिद्रितोनवभिश्छिद्रैःस्रवत्येवदिवानिशम् ॥ ८९ ॥ उत्साहमेधासौभाग्यरूपसंपत्प्रवर्तकम् ॥ मनःप्रसन्नताहेतुःप्रातःस्नानंप्रशस्यते ॥ ९० ॥ प्रस्वेदलालाद्याक्लिन्नोनिद्राधीनोयतोनरः ॥ प्रातःस्नानात्ततोर्हःस्यान्मंत्रस्तोत्रजपादिषु॥९१॥ प्रातःप्रातस्तुयत्स्नानंसंजातेचारुणोदये ॥ प्राजापत्यसमंप्राहुस्तन्महाघविघातकृत् ॥ ९२ ॥ प्रातःस्नानंहरेत्पापमलक्ष्मींग्लानिमेवच ॥ अशुचित्वंचदुःस्वप्नंतुष्टिंपुष्टिंप्रयच्छति ॥ ९३ ॥ नोपसर्पंतिवैदुष्टाःप्रातःस्नायिजनक्वचित् ॥ दृष्टादृष्टफलंयस्मात्प्रातःस्नानंसमाचरेत् ॥ ९४ ॥ प्रसंगतःस्नानविधिंवक्ष्यामिकलशोद्भव ॥ विधिस्नानंयतःप्राहुःस्नानाच्छतगुणोत्तरम् ॥ ९५ ॥ विशुद्धांमृदमादायबर्हींषितिलगोमयम् ॥ शुचौदेशेपरिस्थाप्यत्वाचम्यस्नानमाचरेत् ॥ ९६ ॥ उपग्रहीबद्धशिखोजलमध्येसमाविशेत् ॥ उरुंहीतिमंत्रेणतोयमावर्त्यसृष्टितः ॥ ९७ ॥ येतेशतंततोजप्त्वातोयस्यामंत्रणायच ॥ सुमित्रियानोमंत्रेणपूर्वंकृत्वाजलांजलिम् ॥ क्षिपेद्वेष्यंसमुद्दिश्यजपन्दुर्मित्रियाइति ॥ ९८ ॥

इदंविष्णुरिमंजप्त्वालिंपेदंगानिमृत्स्नया ॥ मृदेकयाशिरःक्षाल्यद्वाभ्यांनाभेस्तथोपरि ॥ ९९ ॥ नाभेरधस्तुतिसृभिःपादौषड्भिर्विशोधयेत् ॥ मज्जेत्प्रवाहाभिमुखआपोअस्मानिमंजपन् ॥१००॥ उदिदाभ्यःशुचिरितिमंत्रउन्मज्जनेमतः ॥ मानस्तोकइमंजप्त्वालिंपेद्गात्राणिगोमयैः ॥ १ ॥ इमंमेवरुणेत्यादिमंत्रःस्वात्माभिषेचनम् ॥ तत्त्वायामितथात्वन्नःसत्वंनश्चाप्युदुत्तमम् ॥ २ ॥

धाम्नोधाम्नस्तथामापोमौषधीरितिसंजपेत् ॥ यदाहुरघ्न्यामुंचंतुमेतिचावभृथेतिच ॥ ३ ॥

अब्देवताइमेमंत्राःप्रोक्ताःस्वात्माभिषेचने ॥ प्रणवेनततोविप्रोमहाव्याहृतिभिस्ततः ॥ ४ ॥ आत्मानंपावयेद्विद्वान्गायत्र्याचततःकृती ॥ आपोहिष्ठेतितिसृभिःप्रत्यृचंपावनंस्मृतम् ॥ ५ ॥ एतेपिपावनामंत्राइदमापोहविष्मतीः ॥ देवीरापअपोदेवाद्रुपदादिवसंज्ञकाः ॥ ६ ॥

शन्नोदेवीरपोदेवीस्तथापाꣳरसमित्यपि ॥ पुनंतुमेतिचनवपावमान्यःप्रकीर्तिताः ॥ ७ ॥

ततोऽघमर्षणंजप्त्वाद्रुपदांचततोजपेत् ॥ प्राणायामंचविधिवदथवांतर्जलेजपेत् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रणवंत्रिर्जपेद्वापिविष्णुंवासंस्मरेत्सुधीः ॥ स्नात्वेत्थंवस्त्रमापीड्यगृह्णीयाद्धौतवाससी ॥ ९ ॥ आचम्यचततःकुर्यात्प्रातःसंध्यांकुशान्विताम् ॥ योनसं
ध्यामुपासीतब्राह्मणोहिविशेषतः ॥ ११० ॥ सजीवन्नेवशूद्रस्तुमृतःश्वाजायतेध्रुवम् ॥ संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु ॥ ११ ॥ यदन्यत्कुरुते
कर्मनतस्यफलभाग्भवेत् ॥ प्रणवंप्राग्दिशिस्मृत्वाततोदत्त्वाकुशासनम् ॥ १२ ॥ चतुःस्रक्तिरिमंमंत्रंपठित्वानान्यदृङ्मनाः ॥ १३ ॥ प्राङ्मुखोबद्धचू
डोवाप्युपविष्टउदङ्मुखः ॥ प्रदक्षिणंस्वमभ्युक्ष्यप्राणायामंसमाचरेत् ॥ १४ ॥ गायत्रींशिरसासार्धंसप्तव्याहृतिपूर्विकाम् ॥ त्रिर्जपेत्सदशोंकारः
प्राणायामोयमुच्यते ॥१५॥ प्राणायामांश्चरन्विप्रोनियतेंद्रियमानसः ॥ अहोरात्रकृतैःपापैर्मुक्तोभवतितत्क्षणात् ॥१६॥ दशद्वादशसंख्यावाप्राणायामाः
कृतायदि ॥ नियम्यमानसंतेनतदातप्तंमहत्तपः ॥ १७ ॥ सव्याहृतिप्रणवकाःप्राणायामास्तुषोडश ॥ अपिभ्रूणहनंमासात्पुनंत्यहरहःकृताः ॥ १८ ॥
यथापार्थिवधातूनांदह्यंतेधमनान्मलाः ॥ तथेंद्रियैःकृतादोषाज्ज्वाल्यंतेप्राणसंयमात् ॥ १९ ॥ एकंसंभोज्यविधिवद्ब्राह्मणंयत्फलंलभेत् ॥ प्राणायामैर्द्वा
दशभिस्तत्फलंश्रद्धयाप्यते ॥ १२० ॥ वेदादिवाङ्मयंसर्वंप्रणवेयत्प्रतिष्ठितम् ॥ ततःप्रणवमभ्यस्येद्वेदादिंवेदजापकः ॥ २१ ॥ प्रणवेनित्ययुक्तस्यसप्तसु
व्याहृतिष्वपि ॥ त्रिपदायांतुगायत्र्यांनभयंजायतेक्वचित् ॥२२॥ एकाक्षरंपरंब्रह्मप्राणायामःपरंतपः ॥ गायत्र्यास्तुपरंनास्तिपावनंकलशोद्भव ॥ २३ ॥
कर्मणामनसावाचायद्रात्रौकुरुतेत्वघम् ॥ उत्तिष्ठन्पूर्वसंध्यायांप्राणायामैर्विशोधयेत् ॥ २४ ॥

यदह्नाकुरुतेपापंमनोवाक्कायकर्मभिः ॥ आसीनःपश्चिमांसंध्यांतत्प्राणायामतोहरेत् ॥ २५ ॥ पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् ॥ पश्चिमां
तुसमासीनःसम्यगृक्षविभावनात् ॥ २६ ॥ पूर्वांसंध्यांजपंस्तिष्ठन्नैशमेनोव्यपोहति ॥ पश्चिमांतुसमासीनोमलंहंतिदिवाकृतम् ॥ २७ ॥ नोपतिष्ठेत्तुयः
पूर्वांनोपास्तेयस्तुपश्चिमाम् ॥ सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणः ॥ २८ ॥ अपांसमीपमासाद्यनित्यकर्मसमाचरेत् ॥ गायत्रीमप्यधीयीतग
त्वारण्यंसमाहितः ॥ २९ ॥ गृहाद्बहुगुणायस्मात्संध्याबहिरुपासिता ॥ गायत्र्यभ्यासमात्रोपिवरंविप्रोजितेंद्रियः ॥ १३० ॥ त्रिवेद्यपिचनोमान्यः
सर्वभुक्सर्वविक्रयी ॥ सवितादेवतायस्यामुखमग्निस्त्रिपाच्चया ॥ ३१ ॥ विश्वामित्रेऋषिश्छंदोगायत्रीसाविशिष्यते ॥ गायत्रीमुपसिध्यायेल्लोहितां
ब्रह्मदैवताम् ॥ ३२ ॥ हंसारूढामष्टवर्षांरक्तस्रगनुलेपनाम् ॥ ऋक्स्वरूपामभयदामक्षमालावलंबिनीम् ॥ ३३ ॥ व्यासर्षिणास्तूयमानांछं
दसानुष्टुभायुताम् ॥ एतद्ध्यानादुपर्देव्यानैशमेनोव्यपोहति ॥ ३४ ॥ सूर्यश्चेतिचमंत्रेणस्यादाचमनमुत्तमम् ॥ आपोहिष्ठेतितिसृभिर्मार्जनंतुततश्चरेत्
॥ ३५ ॥ भूमौशिरसिचाकाशआकाशेभुविमस्तके ॥ मस्तकेचतथाकाशेभूमौचनवधाक्षिपेत् ॥ ३६ ॥ भूमिशब्देनचरणावाकाशंहृदयंस्मृतम् ॥
शिरस्येवशिरःशब्दोमार्जनज्ञैरुदाहृतः ॥ ३७ ॥ वारुणादपिचाग्नेयाद्वायव्यादपिचेंद्रतः ॥ मंत्रस्नानादपिपरंब्राह्मंस्नानमिदंपरम् ॥ ३८ ॥

ब्राह्मस्नानेनयःस्नातःसबाह्याभ्यंतरेशुचिः ॥ सर्वत्रचार्हतामेतिदेवपूजादिकर्मणि ॥३९ ॥ नक्तंदिनंनिमज्ज्याप्सुकैवर्ताःकिमुपावनाः ॥ शतशोपितथा
स्नातानशुद्धाभावदूषिताः ॥ १४० ॥ अंतःकरणशुद्धायेतान्विभूतिःपवित्रयेत् ॥ किंपावनाःप्रकीर्त्यंतेरासभाभस्मधूसराः ॥ ४१ ॥ सस्नातःसर्व
तीर्थेषुससर्वमलवर्जितः ॥ तेनक्रतुशतैरिष्टंचेतोयस्येहनिर्मलम् ॥ ४२ ॥ तदेवनिर्मलंचेतोयथास्यात्तन्मुनेशृणु ॥ विश्वेशश्चेत्प्रसन्नःस्यात्तदास्यान्ना
न्यथाक्वचित् ॥ ४३ ॥ तस्माच्चेतोविशुद्ध्यर्थंकाशीनाथंसमाश्रयेत् ॥ तदाश्रयेणनियतंसंक्षीयंतेमनोमलाः ॥ ४४ ॥ संक्षीणमानसमलोविश्वेशानु
ग्रहात्परात् ॥ इदंशरीरमुत्सृज्यपरंब्रह्माधिगच्छति ॥ ४५ ॥ विश्वेशानुग्रहेहेतुःसदाचारोमतोनृणाम् ॥ श्रुतिस्मृतिभ्यामुदितंतस्मात्तमनुसंश्रयेत् ॥
॥ ४६ ॥ द्रुपदांतुततोजप्त्वाजलमादायपाणिना ॥ कुर्यादृतंचमंत्रेणविधिज्ञस्त्वघमर्षणम् ॥ ४७ ॥ निमज्ज्याप्सुचयोविद्वाञ्जपेत्त्रिरघमर्षणम् ॥ यथा
श्वमेधावभृथस्तस्यस्यात्तत्तथाध्रुवम् ॥ ४८ ॥ जलेवापिस्थलेवापियःकुर्यादघमर्षणम् ॥ तस्याघौघोविनश्येतयथासूर्योदयेतमः ॥ ४९ ॥ इमंमंत्रं
ततश्चोक्त्वाकुर्यादाचमनंद्विजः ॥ आचार्याःकेचिदिच्छंतिशाखाभेदेनचापरे ॥ १५० ॥ अंतश्चरसिभूतेषुगुहायांविश्वतोमुखः ॥ त्वंयज्ञस्त्वंवषट्कार
आपोज्योतीरसोऽमृतम् ॥ ५१ ॥ गायत्रींशिरसाहीनांमहाव्याहृतिपूर्विकाम् ॥ प्रणवाद्यांजपंस्तिष्ठन्क्षिपेदंभोंजलित्रयम् ॥ ५२ ॥ तेनवज्रोदकेनाशुमं
देहानामराक्षसाः ॥ सूर्यारयःप्रलीयंतेशैलावज्रहताइव ॥५३॥ विवस्वतःसहायार्थंयोद्विजोनांजलित्रयम् ॥ क्षिपेन्मंदेहनाशायसोपिमंदेहतांव्रजेत् ॥५४॥
प्रातस्तावज्जपंस्तिष्ठेद्यावत्सूर्यस्यदर्शनम् ॥ उपविष्टोजपेत्सायमृक्षाणामाविलोकनात् ॥५५॥ काललोपोनकर्तव्योद्विजेनस्वहितेप्सुना ॥ अधोदयास्तसम
येतस्माद्वज्रोदकंक्षिपेत् ॥५६ ॥ विधिनापिकृतासंध्याकालातीताऽफलाभवेत् ॥ अयमेवहिदृष्टांतोवंध्यास्त्रीमैथुनंयथा ॥५७॥ जलंवामकरेकृत्वायासं
ध्याचरिताद्विजैः ॥ वृषलीसापरिज्ञेयारक्षोगणमुदावहा ॥५८॥ उद्वयंतमुदुत्यंचचित्रंदेवेतितत्परम् ॥ तच्चक्षुरित्युपस्थानमंत्राब्रध्नस्यसिद्धिदाः ॥५९॥
सहस्रकृत्वोगायत्र्याःशतकृत्वोथवापुनः ॥ दशकृत्वोथदेव्यैवकुर्यात्सौरीमुपस्थितिम् ॥ १६० ॥ सहस्रपरमांदेवींशतमध्यांदशावराम् ॥ गायत्रींयोजपे
द्विप्रोनसपापैःप्रलिप्यते ॥ ६१ ॥ विश्वाडित्यनुवाकंवासूक्तंवापौरुषंजपेत् ॥ शिवसंकल्पमथवाब्राह्मणंमंडलंतुवा ॥ ६२ ॥ एतानिचोपस्थानानिरवि
प्रीतिकराणिच ॥ रक्तचंदनमिश्राद्भिरक्षतैःकुसुमैःकुशैः ॥६३॥ वेदोक्तैरागमोक्तैर्वामंत्रैरर्घंप्रदापयेत् ॥ अर्चितःसवितायेनतेनत्रैलोक्यमर्चितम् ॥६४॥
अर्चितःसवितासूतेसुतान्पशुवसूनिच ॥ व्याधीन्हरेददात्यायुःपूरयेद्वांछितान्यपि ॥ ६५ ॥ अयंहिरुद्रआदित्योहरिरेषदिवाकरः ॥ रविर्हिरण्यगर्भोसौ
त्रयीरूपोयमर्यमा ॥ ६६ ॥

रवेस्तुतोषणात्तुष्टाब्रह्मविष्णुमहेश्वराः ॥ इंद्रादयोखिलादेवामरीच्याद्यामहर्षयः ॥ ६७ ॥ मानवामनुमुख्याश्चसोमपाद्याःपितामहाः ॥ रवेरर्चांविधाये
त्थंततस्तर्पणमारभेत् ॥ ६८ ॥ दर्भानगर्भानादायनवसप्तचपंचवा ॥ साग्रान्समूलानच्छिन्नान्द्विजोदक्षिणपाणिना ॥ ६९ ॥ अन्वारब्धेनसव्येनतर्प
येत्षड्विनायकान् ॥ ब्रह्मादीनखिलान्देवान्मरीच्यादींस्तथामुनीन् ॥ १७० ॥ चंदनागुरुकस्तूरीगंधवत्कुसुमैरपि ॥ तर्पयेच्छुचिभिस्तोयैस्तृप्यं
त्वितिसमुच्चरन् ॥ ७१ ॥ सनकादीन्मनुष्यांश्चनिवीतीतर्पयेद्यवैः ॥ अंगुष्ठद्वयमध्येतुकृत्वादर्भानृजून्द्विजः ॥ ७२ ॥ कव्यवाडनलादींश्चपितॄन्दिव्या
न्प्रतर्पयेत् ॥ प्राचीनावीतिकोदर्भैर्द्विगुणैस्तिलमिश्रितैः ॥ ७३ ॥ रवौशुक्रेत्रयोदश्यांसप्तम्यांनिशिसंध्ययोः ॥ श्रेयोर्थीब्राह्मणोजातुनकुर्यात्तिलतर्प
णम् ॥ ७४ ॥ यदिकुर्यात्ततःकुर्याच्छुक्लैरेवतिलैःकृती ॥ चतुर्दशयमान्पश्चात्तर्पयेन्नामउच्चरन् ॥ ७५ ॥ ततःस्वगोत्रमुच्चार्यतर्पयेत्स्वपितॄन्मुदा ॥
सव्यजानुनिपातेनपितृतीर्थेनवाग्यतः ॥ ७६ ॥ एकैकमंजलिंदेवाद्वौद्वौतुसनकादिकाः ॥ पितरस्त्रीन्प्रवांछंतिस्त्रियएकैकमंजलिम् ॥ ७७ ॥ अंगुल्य
ग्रेभवेद्दैवमार्षमंगुलिमूलगम् ॥ ब्राह्ममंगुष्ठमूलेतुपाणिमध्येप्रजापतेः ॥ ७८ ॥ मध्येंगुष्ठप्रदेशिन्योःपित्र्यंतीर्थंप्रचक्षते ॥ नवर्चमुच्चरन्विद्वान्विदध्या
त्पितृतर्पणम् ॥ ७९ ॥ उदीरतामंगिरसआयंतुनइतीष्यते ॥ ऊर्जंवहंतीपितृभ्यःस्वधायिभ्यस्ततःपठेत् ॥ १८० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

येचेहपितरस्तद्वन्मधुवाताइतितृचम् ॥ नमोवःपितरश्चोक्तापठन्सिचेच्चलंभुवि ॥ ८१ ॥ आब्रह्मस्तंबपर्यंतदेवर्षिपितृमानवाः ॥ तृप्यंतुपितरःसर्वेमातृ
मातामहादयः ॥ ८२ ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ ८३ ॥ येचास्माकंकुलेजाताअपुत्रागो
त्रिणोमृताः ॥ सर्वेतेतृप्तिमायांतुवस्त्रनिष्पीडनोदकैः ॥ ८४ ॥ अग्निकार्यंततःकृत्वावेदाभ्यासंततश्चरेत् ॥ श्रुत्यभ्यासःपंचधास्यात्स्वीकारोर्थविचारणश्
॥ ८५ ॥ अभ्यासश्चजपश्चापिशिष्येभ्यःप्रतिपादनम् ॥ लब्धस्यप्रतिपालार्थमलब्धस्यचलब्धये ॥ ८६ ॥ दातारंसमुपेयाद्वैस्वगुरुत्वंचवर्धयेत् ॥
प्रातःकृत्यमिदंप्रोक्तंद्विजातीनांद्विजोत्तम ॥ ८७ ॥ अथवाप्रातरुत्थायकृत्वावश्यकमेवच ॥ शौचाचमनमादायभक्षयेद्दंतधावनम् ॥ ८८ ॥ विशो
ध्यसर्वगात्राणिप्रातःसंध्यांसमाचरेत् ॥ वेदार्थानधिगच्छेच्चशास्त्राणिविविधान्यपि ॥ ८९ ॥ अध्यापयेच्छुचीञ्शिष्यान्हितान्मेधासमन्वितान् ॥
उपेयादीश्वरंचैवयोगक्षेमादिसिद्धये ॥ १९० ॥ ततोमध्याह्नमिद्धत्वर्थपूर्वोक्तंस्नानमाचरेत् ॥ स्नात्वामाध्याह्निकासंध्यामुपासीतविचक्षणः ॥ ९१ ॥
नवयौवनभिन्नांगींशुद्धस्फटिकनिर्मलाम् ॥ त्रिष्टुप्छंदःसमायुक्तांसावित्रींरुद्रदेवताम् ॥ ९२ ॥ कश्यपर्षिसमायुक्तांयजुर्वेदस्वरूपिणीम् ॥ त्र्यक्षरी
वृषभारूढांभक्ताभयकरांपराम् ॥ ९३ ॥ देवतांपरिपूज्याथनैत्यिकंविधिमाचरेत् ॥ पचनाग्निसमुज्ज्वाल्यवैश्वदेवंसमाचरेत् ॥ ९४ ॥ निष्पावान्को
द्रवान्माषान्कलायांश्चणकांस्त्यजेत् ॥ तैलंपक्वंचपक्वान्नंसर्वलवणयुक्तंत्यजेत् ॥ ९५ ॥ आढकीश्चमसूरांश्चवर्तुलान्वरटांस्तथा ॥ भुक्तशेषंपर्युषितंवै
श्वदेवेविवर्जयेत् ॥ ९६ ॥ दर्भपाणिःसमाचम्यप्राणायामंविधायच ॥ पृष्ठेदिवीतिमंत्रेणपर्युक्षणमथाचरेत् ॥ ९७ ॥ प्रदक्षिणंनमस्कृत्यत्रिःपरिस्तीर्य
वेकुशान् ॥ एषोहदेवमंत्रेणकुर्याद्वह्निमुखंसुखम् ॥ ९८ ॥ वैश्वानरंसमभ्यर्च्यसाज्यपुष्पाक्षतैरथ ॥ भूराद्याश्चाहुतीस्तिस्रःस्वाहांताःप्रणवादिकाः
॥ ९९ ॥ ॐभूर्भुवःस्वःस्वाहेतिविप्रोदद्यात्तथाहुतिम् ॥ तथादेवकृतस्याद्याज्जुहुयाच्चषडाहुतीः ॥ २०० ॥

यमायतूष्णीमेकांचतथास्विष्टकृतीद्वयम् ॥ विश्वेभ्यश्चापिदेवेभ्योभूमौदद्यात्ततोबलिम् ॥ १ ॥ सर्वेभ्यश्चापिभूतेभ्योनमोदद्यात्तदुत्तरे ॥ तद्दक्षिणेपि
तृभ्यश्चप्राचीनावीतिकोददेत् ॥ २ ॥ निर्णेजनोदकान्नंचैशान्यांवैयक्ष्मणेऽर्पयेत् ॥ ततोब्रह्मादिदेवेभ्योनमोदद्यात्तदुत्तरे ॥ ३ ॥ निवीतीसनकादिभ्यः
पितृभ्यस्त्वपसव्यवान् ॥ हंतःषोडशभिर्मांसश्चतुर्भिःपुष्कलंस्मृतम् ॥ ४ ॥ ग्रासमात्रभवेद्भिक्षागृहस्थसुकृतप्रदा ॥ अध्वगःक्षीणवृत्तिश्चविद्यार्थी
गुरुपोषकः ॥ ५ ॥ यतिश्चब्रह्मचारीचषडेतेधर्मभिक्षुकाः ॥ अतिथिःपथिकोज्ञेयोऽनूचानःश्रुतिपारगः ॥ ६ ॥ मान्यावेतौगृहस्थानांब्रह्मलोकमभी
प्सताम् ॥ अपिश्वपाकेशुनिवानेवान्नंनिष्फलंभवेत् ॥ ७ ॥ अन्नार्थिनिसमायातेपात्रापात्रंनचिंतयेत् ॥ शुनांचपतितानांचश्वपचांपापरोगिणाम्॥ ८ ॥
काकानांचकृमीणांचवहिरन्नंकिरेद्भुवि ॥ ऐंद्रवारुणवायव्याःसौम्यार्वेनैर्ऋताश्चये ॥ ९ ॥ प्रतिगृह्णंत्विमंपिंडंकाकाभूमौमयार्पितम् ॥ द्वौश्वानौ
श्यामशबलौवैवस्वतकुलोद्भवौ ॥ २१० ॥ ताभ्यांपिंडंप्रदास्यामिस्यातामेतावहिंसकौ ॥ देवामनुष्याःपशवोरक्षोयक्षोरगाःखगाः ॥ ११ ॥
दैत्याःसिद्धाःपिशाचाश्चप्रेताभूताश्चदानवाः ॥ तृणानितरवश्चापिमदत्तान्नाभिलाषुकाः ॥ १२ ॥ कृमिकीटपतंगाद्याःकर्मबद्धानुभुक्षिताः ॥ तृप्त्यर्थमन्नं
हिमयादत्तंतेषांमुदेस्त्विवे ॥ १३ ॥ इत्थंभूतबलिंदत्त्वाकालंगोदोहमात्रकम् ॥ प्रतीक्ष्यातिथिमायांतंविशेद्भोज्यगृहंततः ॥ १४ ॥ अदत्त्वावायसबलिं
नित्यश्राद्धंसमाचरेत् ॥ नित्यश्राद्धेस्वसामर्थ्याद्धीन्द्वाहेकमथापिवा ॥ १५ ॥ भोजयेत्पितृयज्ञार्थंदद्याद्दुद्धत्यदुर्बलः ॥ नित्यश्राद्धंदेवहीनंनियमा
दिविवर्जितम् ॥ १६ ॥ दक्षिणारहितंत्वेतद्दातृभोक्तृनतोज्झितम् ॥ पितृयज्ञंविधायेत्थंस्वस्थबुद्धिरनातुरः ॥ १७ ॥ अदुष्टासनमध्यास्यभुंजीत
रिश्तुभिःसह ॥ सुगंधिःसुमनाःस्रग्वीशुचिवासोद्वयान्वितः ॥ १८ ॥ प्रागास्यउदगास्योवाभुंजीतपितृसेवितम् ॥ १९ ॥ विधायान्नमनग्नंतदुपरि
ष्टादधस्तथा ॥ आपोशनविधानेनकृत्वाश्रीयात्सुधीर्द्विजः ॥२२०॥ प्रदद्याद्भुवःपतयेभुवनपतयेतथा॥भूतानांपतयेस्वाहेत्युक्त्वाभूमौबलित्रयम् ॥२१॥
सकृद्व्यापउपस्पृश्यप्राणाद्याहुतिपंचकम् ॥ दद्याज्जठरकुंडाग्नौदर्भपाणिःप्रसन्नधीः ॥ २२ ॥ दर्भपाणिस्तुयोभुंक्तेतस्यदोषोनविद्यते ॥ केशकीटा
दिसंभूतस्तदश्नीयात्सदर्भकः ॥ २३ ॥ यावद्भुच्यन्नमश्नीयान्नब्रूयात्तद्गुणागुणान् ॥ भुंजतेपितरस्तावद्यावन्नोक्तागुणागुणाः ॥ २४ ॥ अतोमौनेननयोभुं
क्तेसभुंक्तेकेवलामृतम् ॥ अनुपीयततःक्षीरंतकंपानीयमेववा ॥ २५ ॥ अधृतापिधानमसीत्येवंप्राश्योदकंसकृत् ॥ पीतशेषंक्षिपेद्भूमौतोयमंत्रमिमंप
ठन् ॥ २६ ॥ अप्रक्षालितहस्तस्यदक्षिणांगुष्ठमूलतः ॥ रौरवेऽपुण्यनिलयेपद्मार्बुदनिवासिनाम् ॥ २७ ॥ उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् ॥
॥ २८ ॥ पुनराचम्यमेधावीशुचिर्भूत्वाप्रयत्नतः ॥ हस्तेनोदकमादायमंत्रमेतमुदीरयेत् ॥२९॥ अंगुष्ठमात्रःपुरुषस्त्वंगुष्ठंचसमाश्रितः ॥ ईशःसर्वस्यजगतः
प्रभुःश्रीणातिविश्वमुक् ॥ २३० ॥ इत्यन्नंपरिसंकल्प्यप्रक्षाल्यचरणौकरौ ॥ ततोन्नपरिणामार्थंमंत्रानेतानुदीरयेत् ॥ ३१ ॥ अग्निराप्याययन्धातून्पा
र्थिवान्पवनेरितः ॥ दत्तावकाशोनभसाजरयत्वस्तुमेसुखम् ॥३२॥ प्राणापानसमानानामुदानव्यानयोस्तथा ॥ अन्नंपुष्टिकरंचास्तुममास्त्वव्याहतंसुखम्
॥ ३३ ॥ समुद्रोवडवाग्निश्चश्रोत्रंश्रस्यनंदनः ॥ मयाभ्यवहृतंयत्तदशेषंजरयंत्विमे ॥ ३४ ॥ मुखशुद्धिंततःकृत्वापुराणश्रवणादिभिः ॥ अतिवाह्यादि
त्यशेषंततःसंध्यांसमारभेत् ॥ ३५ ॥ गृहेगोष्ठेनदीतीरेसंध्यादशगुणाक्रमात् ॥ संभेदेस्याच्छतगुणाह्यनंताशिवसन्निधौ ॥ ३६ ॥ उपासितासंधिः
संध्यादिवामेपुनपातकम् ॥ शमयेदनृतोक्तावंमद्यगंधजमेवच ॥ ३७ ॥ सामवेदस्वरूपांचत्रसिष्ठर्षिसमायुताम् ॥ कृष्णांगींकृष्णवसनांमनाक्स्खलित
यौवनाम् ॥ ३८ ॥ सरस्वतींतार्क्ष्ययानांविप्रश्रीविष्णुदैवताम् ॥ जगतीच्छंदसायुक्तांध्यायेदेकाक्षरांपराम् ॥ ३९ ॥ अग्निश्चेतिचमंत्रेणविधायाचम
नंसुधीः ॥ पश्चिमास्योजपेत्तावद्यावन्नक्षत्रदर्शनम् ॥ २४० ॥ अतिथिंसायमायांतमपित्राग्भूतृणोदकैः ॥ संभाव्यपरिकल्प्येत्थंनिशःप्राक्प्रहरंसुधी
॥ ४१ ॥ इत्थंदिवाकर्मकृत्वाश्रुतेःपठनपाठनैः ॥ एककाष्ठमयींशय्यांनातितृप्तोथसंविशेत् ॥ ४२ ॥

उदेरातःसमास्यातोद्वेपनित्यतमोविधिः ॥ इत्थंसमाचरन्विप्रोनावसीदतिकर्हिचित् ॥ २४३ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां
चतुर्थेकाशीखंडेपूर्वार्द्धेसदाचारोनामपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ स्कंदउवाच ॥ ॥ पुनर्विशेषंवक्ष्यामिसदाचारस्यकुंभज ॥ यंश्रुत्वापिनरोधी
मान्नाज्ञानतिमिरंविशेत् ॥ १ ॥ ब्राह्मणाःक्षत्रियावैश्यास्त्रयोवर्णाद्विजाःस्मृताः ॥ प्रथमंमातृतोजाताद्वितीयंचोपनायनात् ॥ २ ॥ एषांक्रियानिषेका
दिश्मशानांताचवैदिकी ॥ आदधीतसुधीर्गर्भमृतौमूलंमचांत्यजेत् ॥ ३ ॥ स्पंदनात्प्राक्पुंसवनंसीमंतोन्नयनंततः ॥ मासिपष्टेऽष्टमेवापिजातेथेजातक
र्मच ॥ ४ ॥ नामाह्नयेकादशेगेहाच्चतुर्थेमासिनिष्क्रमः ॥ मासेन्नप्राशनंपष्ठेचूडाब्देवायथाकुलम् ॥ ५ ॥ शममेनोव्रजेदेवैर्वेजंगर्भजमेवच ॥ स्त्रीणामे
ताःक्रियास्तूष्णींपाणिग्राहस्तुमंत्रवान् ॥ ६ ॥ सप्तमेथाष्टमेवाब्देसावित्रींब्राह्मणोर्हति ॥ नृपस्त्वेकादशेवैश्योद्वादशेवायथाकुलम् ॥ ७ ॥ ब्रह्मतेजो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भिवृद्धयर्थंविप्रोब्देपंचमेर्हति ॥ षष्ठेवला[illegible]निर्मौंजीवैश्योष्टमेभ्रियेत् ॥ ८ ॥ महाव्याहृतिपूर्वंचवेदमध्यापयेद्गुरुः ॥ उपनीयचनंशिष्यंशौचाचारे चयोजयेत् ॥९॥ पूर्वोक्तविधिनाशौचंकुर्यादानमनंतथा ॥ दंताञ्जिह्वांविशोध्यायकृत्वामलविशोधनम् ॥१०॥ स्नात्वांबुदेवतेमंत्रैःप्राणानायम्ययत्नतः ॥ उपस्थानंत्रयेःकृत्वासंध्ययोरुभयोरपि ॥ ११ ॥ अग्निकार्यंततःकृत्वाब्राह्मणानभिवादयेत् ॥ भुवनमुकगोत्रोहमभिवादयइत्यपि ॥ १२ ॥ अभिवादनशीलस्यवृद्धसेवारतस्यच ॥ आयुर्यशोबलंबुद्धिर्वर्धतेऽहरहोधिकम् ॥ १३ ॥ अधीतेगुरुणाहूतःप्रातंतस्मैनिवेदयेत् ॥ कर्मणामनसावाचाद्दितंतस्याचरेत्सदा ॥ १४ ॥ दत्त्याप्याधर्मतोनार्थात्साध्वात्मज्ञानवित्तदाः ॥ शक्ताःकृतज्ञाःशुचयोऽद्रोहकाश्चानसूयकाः ॥ १५ ॥ धारयेन्मेखलादंडोपवीताजिनमेवच ॥ अनिंद्येषुचरेद्भैक्ष्यंब्राह्मणेष्वात्मवृत्तये ॥ १६ ॥ ब्राह्मणक्षत्रियविशामादिमध्यावसानतः ॥ भैक्ष्यचर्याकर्मणस्याद्वच्छब्दोपलक्षिता ॥ १७ ॥

वाग्यतोगुर्वनुज्ञातोभुंजीतान्नमकुत्सयन् ॥ एकान्नंनसमश्नीयाच्छ्राद्धेऽश्नीयात्तथापदि ॥ १८ ॥ अनारोग्यमनायुष्यमस्वर्ग्यंचातिभोजनम् ॥ अपुण्यं लोकविद्विगर्हितंस्मात्तत्परिवर्जयेत् ॥ १९ ॥ नाद्भिर्भुंजीतचैकस्मिन्दिवाक्वापिद्विजोत्तमः ॥ सायंप्रातर्द्विजोऽश्नीयादग्निहोत्रविधानवित् ॥ २० ॥ मधुमांसंप्राणिहिंसाभास्करालोकनांजने ॥ स्त्रियंपर्युषितोच्छिष्टंपरिवादंविवर्जयेत् ॥ २१ ॥ औपनायनिकःकालोब्रह्मक्षत्रविशांपरः ॥ आषोडशाद्द्वाविंशादाचतुर्विंशदब्दतः ॥ २२ ॥ इतोप्यूर्ध्वंनसंस्कार्याःपतिताव्रतवर्जिताः ॥ व्रात्यस्तोमेनयज्ञेनतत्पातित्यंपरिव्रजेत् ॥ २३ ॥ सावित्रीपतितैःसार्धंसंबंधंनसमाचरेत् ॥ ऐणंचरौरवंव्रास्तंक्रमाच्चर्मद्विजन्मनाम् ॥२४॥ वसीरन्ब्राह्मणपूर्व्येणशाणक्षौमाविकानिच ॥ द्विजस्यमेखलामौंजीमौर्वीचभुजजन्मनः ॥ भवेत्त्रिवृत्समाश्लक्ष्णाविंशस्तुशणतांतवी ॥ २५ ॥ मुंजाभावेविधातव्याकुशाश्मंतकबल्वजैः ॥ ग्रंथिनैकेनसंयुक्तात्रिभिःपंचभिरेववा ॥ २६ ॥ उपवीतंक्रमेणस्यात्कार्पासंशाणभाविकम् ॥ त्रिवृद्यूर्ध्ववृतंतच्चभवेदायुर्विवृद्धये ॥ २७ ॥ बिल्वपालाशयोर्दंडोब्राह्मणस्यनृपन्यतु ॥ न्यग्रोधवालदलयोः पीलूदुंबरयोर्विशः ॥ २८ ॥ आमौलिंवाऽऽललाटंवाऽऽनासमूर्ध्वंप्रमाणतः ॥ ब्रह्मक्षत्रविशांदंडस्त्वगाढचोनाग्रिदूषितः ॥ २९ ॥ प्रदक्षिणंपरीत्याग्निमुपस्थायदिवाकरम् ॥ दंडाजिनोपवीताढ्यश्चरेद्भैक्ष्यंयथोदितम् ॥ ३० ॥ मातृमातृष्वसॄस्वसॄपितृस्वसॄपुरःसराः ॥ प्रथमंभिक्षणीयाः स्युरेतायाचननोवदेत् ॥ ३१ ॥

यावद्वेदमधीतेचचरन्वेदव्रतानिच ॥ ब्रह्मचारीभवेत्तावदूर्ध्वंस्नातोगृहीभवेत् ॥ ३२ ॥ प्रोक्तोसावुपकुर्वाणोद्वितीयस्तत्रनैष्ठिकः ॥ तिष्ठेत्तावद्गुरुकुले यावत्स्यादायुषःक्षयः ॥ ३३ ॥ गृहाश्रमंसमाश्रित्ययःपुनर्ब्रह्मचर्यभाक् ॥ नासौयतिर्वनस्थोवास्यात्सर्वाश्रमवर्जितः ॥ ३४ ॥ अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः ॥ आश्रमंतुविनातिष्ठन्प्रायश्चित्तीयतोहिसः ॥३५॥ जपंहोमंव्रतंदानंस्वाध्यायंपितृतर्पणम् ॥ कुर्वाणोथाश्रमश्रद्दोनासौतत्फलमाप्नुयात् ॥ ॥ ३६ ॥ मेखलाजिनदंडाश्चलिंगंस्याद्ब्रह्मचारिणः ॥ गृहिणोवेदयज्ञादिनखलोमवनस्थितेः ॥ ३७ ॥ त्रिदंडादियतेरुक्तमुपलक्षणमत्रवै ॥ एतच्छ्रवणहीनस्तुप्रायश्चित्तीदिनेदिने ॥ ३८ ॥ जीर्णंकमंडलुंदंडमुपवीताजिनेअपि ॥ अप्स्वेवतानिनिक्षिप्यगृह्णीतान्यच्चमंत्रवत् ॥ ३९ ॥ विदध्यात्षोडशेवर्षे केशांतंकर्मचक्रमात् ॥ द्वाविंशेचचतुर्विंशेगार्हस्थ्यप्रतिपत्तये ॥ ४० ॥ तपोयज्ञव्रतेभ्यश्चसर्वस्माच्छुभकर्मणः ॥ द्विजातीनांश्रुतिर्ह्येकाहेतुर्निःश्रेयसश्रियः ॥ ४१ ॥ वेदारंभेविसर्गेचविदध्यात्प्रणवंसदा ॥ अफलोऽनोंकृतोयस्मात्पठितोपिनसिद्धये ॥ ४२ ॥ वेदस्यवदनंप्रोक्तंगायत्रीत्रिपदापरा ॥ तिसृभिःप्रणवाद्याभिर्महाव्याहृतिभिःसह ॥ ४३ ॥ सहस्रंसाधिकंकिंचित्त्रिकमेतज्जपन्यमी ॥ मासंवहिःप्रतिदिनंमहाद्यादपिमुच्यते ॥ ४४ ॥ अत्यब्दमिति योभ्यस्येत्प्रतिघस्रमनन्यधीः ॥ सव्योममूर्तिःशुद्धात्मापरंब्रह्माधिगच्छति ॥ ४५ ॥ त्रिवर्णमयमोंकारंभूर्भुवःस्वरितित्रयम् ॥ पादत्रयंचसावित्र्यास्त्रयोवेदाअदूदुहन् ॥ ४६ ॥ एतदक्षरमेनांचजपेद्व्याहृतिपूर्विकाम् ॥ संध्ययोर्वेदविद्विप्रोवेदपुण्येनयुज्यते ॥ ४७ ॥ विधिक्रतोर्दशगुणंजपरयफलमश्नुते ॥ विधिक्रतोर्दशगुणोजपकर्तुरुदीरितः ॥ ४८ ॥ उपांशुस्तच्छतगुणःसहस्रोमानसस्ततः ॥ ४९ ॥ अधीत्यवेदान्वेदौवावेदंवाशक्तितोद्विजः ॥ भुवर्णपूर्णधरणीदानस्यफलमश्नुते ॥ ५० ॥ श्रुतिमेवसदाभ्यस्येत्तपस्तप्तुंद्विजोत्तमः ॥ श्रुत्यभ्यासोहिविप्रस्यपरमंतपउच्यते ॥ ५१ ॥ हित्वाश्रुतेरध्ययनं योन्यत्पठितुमिच्छति ॥ सदोग्ध्रीधेनुमुत्सृज्यग्रामक्रोडींदुधुक्षति ॥ ५२ ॥

उपनीयचवैशिष्यंवेदमध्यापयेद्द्विजः ॥ सकल्पंसरहस्यंचतमाचार्यंविदुर्बुधाः ॥ ५३ ॥ योध्यापयेदेकदेशंश्रुतेरंगान्यथापिवा ॥ वृत्त्यर्थंसउपाध्यायो विद्वद्भिःपरिगीयते ॥ ५४ ॥ यथाविधिनिषेकादियःकर्मकुरुतेद्विजः ॥ संभावयेत्तथान्नेनगुरुःसइहकथ्यते ॥ ५५ ॥ अध्याधेयंपाकयज्ञानग्निष्टोमादिकान्मखान् ॥ यःकरोतिवृतोयस्यसतस्यर्त्विगिहोच्यते ॥ ५६ ॥ उपाध्यायादशाचार्यआचार्याणांशतंपिता ॥ सहस्रंतुपितुर्मातागौरवेणातिरिच्यते ॥ ५७ ॥ विप्राणांज्ञानतोज्यैष्ठ्यंक्षत्रियाणांतुवीर्यतः ॥ वैश्यानांधान्यधनतःपज्ञातानांतुजन्मतः ॥ ५८ ॥ यथादारुमयोहस्तीयथाचर्मयोमृगः ॥ तथाविप्रोऽनधीयानस्त्रयोऽमीनामधारिणः ॥ ५९ ॥ स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकामतः ॥ स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेत् ॥ ६० ॥ स्वधर्मनिरतानांचवेदयज्ञक्रियावताम् ॥ ब्रह्मचारीचरेद्भैक्ष्यंवेश्मसुप्रयतोऽन्वहम् ॥ ६१ ॥ अकृत्वाभैक्ष्यचरणमसमिध्यहुताशनम् ॥ अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेत् ॥ ६२ ॥ यथेष्टचेष्टोनभवेद्गुरोर्नयनगोचरे ॥ ननामपरिगृह्णीयात्परोक्षेप्यविशेषणम् ॥ ६३ ॥ गुरुर्निंदाभवेद्यत्रपरिवादस्तुयत्रच ॥ श्रुतीपिधायवास्थेयंयातव्यंवाततोन्यतः ॥ ६४ ॥ खरोगुरोःपरीवादाच्छ्वाभवेद्गुरुनिंदकः ॥ मत्सरीशुद्रकीटःस्यात्परिभोक्ताभवेत्कृमिः ॥ ६५ ॥ नाभिवाद्यागुरोःपत्नीस्पृष्ट्वांघ्रीयुवतीसती ॥ क्षापिवंशतिवर्षेणज्ञातृणांगुणदोषयोः ॥ ६६ ॥ स्वभावश्चंचलःस्त्रीणांदोषःपुंसामतःस्मृतः ॥ प्रमदासुप्रमाद्यंतिकचित्रेवविपश्चितः ॥ ६७ ॥ विद्वांसमप्यविद्वांसंयतस्तार्घर्षयंत्यलम् ॥ स्वबलंवापिकुर्वंतिसूत्रबद्धशकुंतवत् ॥ ६८ ॥ नमात्रानदुहित्रावानस्वस्रैकासनोभवेत् ॥ बलवंतींद्रियाण्यत्रमोहयंत्यपिकोविदान् ॥ ६९ ॥ प्रयत्नेनखनन्यद्वद्भूमेर्वार्यधिगच्छति ॥ शुश्रूषयागुरोस्तद्वद्विद्यांशिष्योधिगच्छति॥७०॥ शयानमभ्युदयतेब्रह्मश्चेद्ब्रह्मचारिणम् ॥ प्रमादादथनिम्लोचेज्जपन्नुपवसेद्दिनम् ॥ ७१ ॥ सुतस्यसंभवेद्धेशंसहेतेपितरोचयत् ॥ शक्त्यावर्षशतेनापिनो कर्तुंतस्यनिष्कृतिः ॥ ७२ ॥ अतस्तयोःप्रियंकुर्याद्गुरोरपिचसर्वदा ॥ त्रिषुतेषुसुतुष्टेषुतपःसर्वंसमाप्यते ॥ ७३ ॥ तेषांत्रयाणांशुश्रूषापरमंतपउच्यते ॥ तानतिक्रम्ययःकुर्यात्तन्नसिद्ध्येत्कदाचन ॥ ७४ ॥

त्रीनेवामूंस्समाराध्यत्रीँल्लोकान्सजयेत्सुधीः ॥ देववद्दिविदीव्येततेषांतोषंविवर्धयन् ॥ ७५ ॥ भूर्लोकंजननीभक्त्याभुवलोकंतथापितुः ॥ गुरोःशुश्रूषणात्तद्वत्स्वर्लोकंचजयेत्कृती ॥ ७६ ॥ एतदेवनृणांप्रोक्तंपुरुषार्थचतुष्टयम् ॥ यदेतेषांहिसंतोषउपधर्मोन्यउच्यते ॥ ७७ ॥ अधीत्यवेदान्वेदौवावेदंवापि क्रमाद्विजः ॥ अप्रस्खलद्ब्रह्मचर्योगृहाश्रममथाश्रयेत् ॥ ७८ ॥ अविप्लुतब्रह्मचर्योविश्वेशानुग्रहाद्भवेत् ॥ अनुग्रहश्चवेश्वेशःकाशीप्राप्तिकरःपरः ॥ ७९ ॥ काशीप्राप्त्याभवेज्ज्ञानंज्ञानान्निर्वाणमृच्छति ॥ निर्वाणार्थंप्रयत्नोहिसदाचारस्यधीमताम् ॥ ८० ॥ सदाचारोगृहेयद्वन्नतथास्त्याश्रमांतरे ॥ विद्याजातंप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ठित्वांतेगृहस्थाश्रममाश्रयेत् ॥ ८१ ॥ गृहाश्रमात्परंनास्तियदिपत्नीवशंवदा ॥ आनुकूल्यंहिदंपत्योस्त्रिवर्गोदयहेतवे ॥ ८२ ॥ आनुकूल्यंकलत्रंचेत्त्रिदि
वेनापिकिंततः ॥ प्रातिकूल्यंकलत्रंचेन्नरकेणापिकिंततः ॥ ८३ ॥ गृहाश्रमःसुखार्थायभार्यामूलंचतत्सुखम् ॥ साचभार्याविनीतायात्रिवर्गोविनयोध्रुवम्
॥ ८४ ॥ जलौकयोपमीयंतेप्रमदामंदबुद्धिभिः ॥ मृगीदृशांजलौकानांविचारान्महदंतरम् ॥ ८५ ॥ जलौकाकेवलंरक्तमाददानातपस्विनी ॥ प्रमदासर्व
दादत्तेचित्तंवित्तंबलंसुखम् ॥ ८६ ॥ दक्षाप्रजावतीसाध्वीप्रियवाक्चवशंवदा ॥ गुणैरमीभिःसंयुक्तासाश्रीःस्त्रीरूपधारिणी ॥ ८७ ॥ गुरोरनुज्ञयास्नात्वाव्रतं
वेदंसमाप्यच ॥ उद्वहेततततोभार्यांसवर्णांसाधुलक्षणाम् ॥ ८८ ॥ जनेतुरसगोत्रायामातुर्याप्यसपिंडका ॥ दारकर्मणियोग्यासाद्विजानांधर्मवृद्धये ॥ ८९ ॥
स्त्रीसंबंधेप्यपस्मारिक्षयिश्वित्रिकुलंत्यजेत् ॥ अभिशस्तिसमायुक्तंतथाकन्याप्रसूंत्यजेत् ॥ ९० ॥ रोगहीनांभ्रातृमतींस्वस्मात्किंचिल्लघीयसीम् ॥ उद्वहेत
द्विजोभार्यांसौम्यास्यांमृदुभाषिणीम् ॥ ९१ ॥ नपर्वतर्क्षवृक्षाह्वांननदीसर्पनामिकाम् ॥ नपक्ष्यहिप्रेष्यनाम्नींसौम्याख्यामुद्वहेत्सुधीः ॥ ९२ ॥ नचातिरिक्तही
नांगींनातिदीर्घांनवाकृशाम् ॥ नालोमिकांनातिलोमांनास्निग्धस्थूलमौलिजाम् ॥ ९३ ॥ मोहात्समुपयच्छेतकुलहीनांनकन्यकाम् ॥ हीनोपयमनाद्या
तिसंतानमपिहीनताम् ॥ ९४ ॥ लक्षणानिपरीक्ष्यादौततःकन्यांसमुद्वहेत् ॥ सुलक्षणासदाचारापत्युरायुर्विवर्धयेत् ॥ ९५ ॥ ब्रह्मचारिसमाचारइतितेसमुदी
रितः ॥ घटोद्भवप्रसंगेनस्त्रीलक्षणमथब्रुवे ॥ ९६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेषट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥
स्कंदउवाच ॥ ॥ सदागृहीसुखंभुंक्तेस्त्रीलक्षणवतीयदि ॥ अतःसुखसमृद्ध्यर्थमादौलक्षणमीक्षयेत् ॥ १ ॥ वपुरावर्तगंधाश्चच्छायासत्वंस्वरोगतिः ॥
वर्णश्चेत्यष्टधाप्रोक्ताबुधैर्लक्षणभूमिका ॥ २ ॥ आपादतलमारभ्ययावन्मौलिरुहंक्रमात् ॥ शुभाशुभानिवक्ष्यामिलक्षणानिमुनेशृणु ॥ ३ ॥ आदौपा
दतलंरेखास्ततोंगुष्ठांगुलीनखाः ॥ पृष्ठंगुल्फद्वयंपार्ष्णीजंघेरोमाणिजानुनी ॥ ४ ॥ ऊरूकटीनितंबस्फिग्भगोजघनबस्तिके ॥ नाभिःकुक्षिद्वयंपार्श्वो
दरमध्यवलित्रयम् ॥ ५ ॥ रोमालीहृदयंवक्षोवक्षोजद्वयचूचुकम् ॥ जत्रुस्कंधांसकक्षादोर्मणिबंधकरद्वयम् ॥ ६ ॥
पाणिपृष्ठंपाणितलंरेखांगुष्ठांगुलीनखाः ॥ पृष्ठिःकृकाटिकाकंठेचिबुकंचहनुद्वयम् ॥ ७ ॥ कपोलौवक्त्रमधरोत्तरोष्ठौद्विजजिह्विकाः ॥ घंटिकातालुहसितं
नासिकाश्रुतमक्षिणी ॥ ८ ॥ पक्ष्मभ्रूकर्णभालानिमौलिसीमंतमौलिजाः ॥ षष्टिःषडुत्तरायोषिदंगलक्षणसत्खनिः ॥ ॥ स्त्रीणांपादतलंस्निग्धंमां
सलंमृदुलंसमम् ॥ अस्वेदमुष्णमरुणंबहुभोगोचितंस्मृतम् ॥ १० ॥ रूक्षंविवर्णंपरुषंखंडितप्रतिबिंबकम् ॥ शूर्पाकारंविशुष्कंचदुःखदौर्भाग्यसूचकम्
॥ ११ ॥ चक्रस्वस्तिकशंखाब्जध्वजमीनातपत्रवत् ॥ यस्याःपादतलेरेखासाभवेत्क्षितिपांगना ॥ १२ ॥ भवेदखंडभोगायोर्द्ध्वामध्यांगुलिसंगता ॥
रेखाखुसर्पकाकाभादुःखदारिद्र्यसूचिका ॥ १३ ॥ उन्नतोमांसलोंगुष्ठोवर्तुलोतुलभोगदः ॥ वक्रोह्रस्वश्चचिपिटःसुखसौभाग्यभंजकः ॥ १४ ॥
विधवाविपुलेनस्याद्दीर्घांगुष्ठेनदुर्भगा ॥ मृदवोंगुलयःशस्ताघनावृत्ताःसमुन्नताः ॥ १५ ॥ दीर्घांगुलीभिःकुलटाकृशाभिरतिनिर्धना ॥ ह्रस्वायुष्याचह्रस्वा
भिर्भुग्नाभिर्भुग्नवर्तिनी ॥ १६ ॥ चिपिटाभिर्भवेद्दासीविरलाभिर्दरिद्रिणी ॥ परस्परंसमारूढाःपादांगुल्योभवंतिहि ॥ १७ ॥ हत्वाबहूनपिपतीन्परप्रे
ष्यातदाभवेत् ॥ यस्याःपथिसमायांत्यारजोभूमेःसमुच्छलेत् ॥ १८ ॥ सापांसुलाप्रजायेतकुलत्रयविनाशिनी ॥ यस्याःकनिष्ठिकाभूमिंनगच्छंत्याःप
रिस्पृशेत् ॥ १९ ॥ सानिहत्यपतिंयोषाद्वितीयंकुरुतेपतिम् ॥ अनामिकाचमध्याचयस्याभूमिंनसंस्पृशेत् ॥ २० ॥ पतिद्वयंनिहंत्याद्याद्वितीयाचप
तित्रयम् ॥ पतिहीनत्वकारिण्यौहीनेतेद्वेइमेयदि ॥ २१ ॥ प्रदेशिनीभवेद्यस्याअंगुष्ठाव्यतिरेकिणी ॥ कन्यैवकुलटासास्यादेषएवविनिश्चयः ॥ २२ ॥
स्निग्धाःसमुन्नतास्ताम्रावृत्ताःपादनखाःशुभाः ॥ २३ ॥ राज्ञीत्वसूचकंस्त्रीणांपादपृष्ठंसमुन्नतम् ॥ अस्वेदमशिराढ्यंचमसृणंमृदुमांसलम् ॥ २४ ॥
दरिद्रामध्यनम्रेणशिरालेनसदाध्वगा ॥ रोमाढ्येनभवेद्दासीनिर्मांसेनचदुर्भगा ॥ २५ ॥ गूढौगुल्फौशिवायोक्तावशिरालौसुवर्तुलौ ॥ स्थपुटौशिथिलौ
दृश्यौस्यातांदौर्भाग्यसूचकौ ॥ २६ ॥ समपार्ष्णिःशुभानारीपृथुपार्ष्णिश्चदुर्भगा ॥ कुलटोन्नतपार्ष्णिस्याद्दीर्घपार्ष्णिश्चदुःखभाक् ॥ २७ ॥ रोमहीने
समेस्निग्धेयज्जंघेक्रमवर्तुले ॥ साराजपत्नीभवतिविशिरेसुमनोहरे ॥ २८ ॥ एकरोमाराजपत्नीद्विरोमाचसुखावहा ॥ त्रिरोमारोमकूपेषुभवेद्वैधव्यदुः
खभाक् ॥ २९ ॥ वृत्तंपिशितसंलग्नंजानुयुग्मंप्रशस्यते ॥ निर्मांसंस्वैरचारिण्यादरिद्रायाश्चविश्लथम् ॥ ३० ॥ विशिरैःकरभाकारैरूरुभिर्मसृणैर्घनैः ॥
सुवृत्तैरोमरहितैर्भवेयुर्भूपवल्लभाः ॥ ३१ ॥ वैधव्यंरोमशैरुक्तंदौर्भाग्यंचिपिटैरपि ॥ मध्यच्छिद्रैर्महादुःखंदारिद्र्यंकठिनत्वचैः ॥ ३२ ॥ चतुर्भिरंगुलैः
शस्ताकटिर्विंशतिसंयुतैः ॥ समुन्नतनितंबाढ्याचतुरस्रामृगीदृशाम् ॥ ३३ ॥ विनताचिपिटादीर्घानिर्मांसासंकटाकटिः ॥ ह्रस्वारोमयुतानार्यादुःखवै
धव्यसूचिका ॥ ३४ ॥ नितंबबिंबोनारीणामुन्नतोमांसलःपृथुः ॥ महाभोगायसंप्रोक्तस्तदन्योऽशर्मणेमतः ॥ ३५ ॥ कपित्थफलवद्वृत्तौमृदुलौमांसलौ
घनौ ॥ स्फिचौवलिविनिर्मुक्तौरतिसौख्यविवर्धनौ ॥ ३६ ॥

शुभःकमठपृष्ठाभोगजस्कंधोपमोभगः ॥ वामोन्नतस्तुकन्याजःपुत्रजोदक्षिणोन्नतः ॥ ३७ ॥ आखुरोमागूढमणिःसुश्लिष्टःसंहतःपृथुः ॥ तुंगःकमलपर्णाभः
शुभोश्वत्थदलाकृतिः ॥ ३८ ॥ कुरंगखुररूपोयश्चुल्लिकोदरसन्निभः ॥ रोमशोविवृतास्यश्चदृश्यनासोतिदुर्भगः ॥ ३९ ॥ शंखावर्तोभगोयस्याःसागर्भ
मिहनेच्छति ॥ चिपिटःखर्पराकारःकिंकरीपददोभगः ॥ ४० ॥ वंशवेतसपत्राभोगजरोमोच्चनासिकः ॥ विकटःकुटिलाकारोलंबगल्लस्तथाऽशुभः ॥ ४१ ॥
भगस्यभालंजघनंविस्तीर्णंतुंगमांसलम् ॥ मृदुलंमृदुलोमाढ्यंदक्षिणावर्तमीडितम् ॥ ४२ ॥ वामावर्तंचनिर्मांसंभुग्नंवैधव्यसूचकम् ॥ संकटस्थपुटंरूक्षं
जघनंदुःखदंसदा ॥ ४३ ॥ वस्तिःप्रशस्ताविपुलामृद्वीस्तोकसमुन्नता ॥ रोमशाचशिरालाचरेखांकानैवशोभना ॥ ४४ ॥ गंभीरादक्षिणावर्तानाभी
स्यात्सुखसंपदे ॥ वामावर्तासमुत्तानाव्यक्तग्रंथिर्नशोभना ॥ ४५ ॥ सूतेसुतान्बहून्नारीपृथुकुक्षिःसुखास्पदम् ॥ क्षितीशंजनयेत्पुत्रंमंडूकाभेनकुक्षिणा
॥ ४६ ॥ उन्नतेनवलीभाजासावर्तेनापिकुक्षिणा ॥ वंध्याप्रव्रजितादासीक्रमाद्योषाभवेदिह ॥ ४७ ॥
समैःसमांसैर्मृदुभिर्योषिन्मग्नास्थिभिःशुभैः ॥ पार्श्वैःसौभाग्यसुखयोर्निधानंस्यादसंशयम् ॥ ४८ ॥ यस्यादृश्यशिरेपार्श्वेउन्नतेरोमसंयुते ॥ निरपत्याचदुः
शीलासाभवेद्दुःखशेवधिः ॥ ४९ ॥ उदरेणातितुच्छेनविशिरेणमृदुत्वचा ॥ योषिद्भवतिभोगाढ्यानित्यंमिष्टान्नसेविनी ॥ ५० ॥ कुंभाकारंदरिद्रायाजठरं
चमृदंगवत् ॥ कूष्मांडाभंयवाभंचदुष्पूरंजायतेस्त्रियाः ॥ ५१ ॥ सुविशालोदरीनारीनिरपत्याचदुर्भगा ॥ प्रलंबजठरांहंतिश्वशुरंचापिदेवरम् ॥ ५२ ॥
मध्यक्षामाचसुभगाभोगाढ्यासवलित्रया ॥ ऋज्वीतन्वीचरोमालीयस्याःसाशर्मनर्मभूः ॥ ५३ ॥ कपिलाकुटिलास्थूलाविच्छिन्नारोमराजिका ॥
चौरवैधव्यदौर्भाग्यंविदध्यादिहयोषिताम् ॥ ५४ ॥ निर्लोमहृदयंयस्याःसमंनिम्नत्ववर्जितम् ॥ ऐश्वर्यंचाप्यवैधव्यंप्रियप्रेमचसालभेत् ॥ ५५ ॥
विस्तीर्णहृदयायोषापुंश्चलीनिर्दयातथा ॥ उद्भिन्नरोमहृदयापतिंहंतिविनिश्चितम् ॥ ५६ ॥ अष्टादशांगुलततमुरःपीवरमुन्नतम् ॥ सुखायदुःखायभवेद्रो
मशंविषमंपृथु ॥ ५७ ॥ घनौवृत्तौदृढौपीनौसमौशस्तौपयोधरौ ॥ स्थूलाग्रौविरलौशुष्कौवामोरूणांनशर्मदौ ॥ ५८ ॥ दक्षिणोन्नतवक्षोजापुत्रिणी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्वग्रणीर्मता ॥ वामोन्नतकुचासूतेकन्यांसौभाग्यसुंदरीम् ॥ ५९ ॥ अरघट्टघटीतुल्यौकुचौदौःशील्यसूचकौ ॥ पीवरास्यौसांतरालौपृथूपांतौनशोभनौ ॥ ६० ॥ मूलेस्थूलौक्रमकृशावग्रेतीक्ष्णौपयोधरौ ॥ सुखदौपूर्वकालेतुपश्चादत्यंतदुःखदौ ॥६१॥ सुदृढंचूचुकयुगंशस्तंश्यामंसुवर्तुलम् ॥ अंतर्मग्नंचदीर्घंचकृशंक्लेशायजायते ॥ ६२ ॥ पीवराभ्यांचजत्रुभ्यांधनधान्यनिधिर्वधूः ॥ श्लथास्थिभ्यांचनिम्नाभ्यांविषमाभ्यांदरिद्रिणी ॥ ६३ ॥

अवद्धावनतौस्कंधावदीर्घावकृशौशुभौ ॥ वक्रौस्थूलौचरोमाढ्यौप्रेष्यवैधव्यसूचकौ ॥ ६४ ॥ निगूढसंधौस्रस्ताग्रौशुभावंसौसुसंहतौ ॥ वैधव्यदौसमुच्चाग्रौनिर्मांसावतिदुःखदौ ॥ ६५ ॥ कक्षेसुसूक्ष्मरोमेतुतुंगेस्निग्धेचमांसले ॥ शस्तेनशस्तेगंभीरेशिरालेस्वेदमेदुरे ॥ ६६ ॥ स्यातांदोषौसुनिर्दोषौगूढास्थिग्रंथिकोमलौ ॥ विशिरौचविरोमाणौसरलौहरिणीदृशाम् ॥ ६७ ॥ वैधव्यंस्थूलरोमाणौह्रस्वौदौर्भाग्यसूचकौ ॥ परिक्लेशायनारीणांपरिदृश्यशिरोभुजौ ॥ ६८ ॥ अंभोजमुकुलाकारमंगुष्ठांगुलिसंमुखम् ॥ हस्तद्वयंमृगाक्षीणांबहुभोगायजायते ॥ ६९ ॥ मृदुमध्योन्नतंरक्तंतलंपाण्योररंध्रकम् ॥ प्रशस्तंशस्तरेखाढ्यमल्परेखंशुभश्रियम् ॥ ७० ॥ विधवावहुरेखेणविरेखेणदरिद्रिणी ॥ भिक्षुकीसुशिराढ्येननारीकरतलेनवै ॥ ७१ ॥ विरोमविशिरंशस्तंपाणिपृष्ठंसमुन्नतम् ॥ वैधव्यहेतुरोमाढ्यंनिर्मांसंस्नायुमत्त्यजेत् ॥ ७२ ॥ रक्ताव्यक्तागभीराचस्निग्धापूर्णाचवर्तुला ॥ कररेखांगनायाःस्याच्छुभाभाग्यानुसारतः ॥ ७३ ॥ मत्स्येनसुभगानारीस्वस्तिकेनवसुप्रदा ॥ पद्मेनभूपतेःपत्नीजनयेद्भूपतिंसुतम् ॥ ७४ ॥ चक्रवर्तिस्त्रियाःपाणौनंद्यावर्तःप्रदक्षिणः ॥ शंखातपत्रकमठानृपमातृत्वसूचकाः ॥ ७५ ॥ तुलामानाकृतीरेखेवणिक्पत्नीत्वहेतुके ॥ गजवाजिवृषाकाराःकरेवामेमृगीदृशाम् ॥ ७६ ॥ रेखाप्रासादवज्राभाब्रूयुस्तीर्थकरंसुतम् ॥ कृषीवलस्यपत्नीस्याच्छकटेनयुगेनवा ॥ ७७ ॥ चामरांकुशकोदंडैराजपत्नीभवेद्ध्रुवम् ॥ अंगुष्ठमूलान्निर्गत्यरेखायातिकनिष्ठिकाम् ॥ ७८ ॥ यदिसापतिहंत्रीस्याद्दूरतस्तांत्यजेत्सुधीः ॥ त्रिशूलासिगदाशक्तिदुंदुभ्याकृतिरेखया ॥ नितंबिनीकीर्तिमतीत्यागेनपृथिवीतले ॥ ७९ ॥

कंकजंबूकमंडूकवृकवृश्चिकभोगिनः ॥ रासभोष्ट्रविडालाःस्युःकरस्थादुःखदाःस्त्रियाः ॥ ८० ॥ शुभदःसरलोंगुष्ठोवृत्तोवृत्तनखोमृदुः ॥ ८१ ॥ अंगुल्यश्चसुपर्वाणोदीर्घावृत्ताःक्रमात्कृशाः ॥ चिपिटाःस्थपुटारूक्षाःपृष्ठरोमयुजोऽशुभाः ॥ ८२ ॥ अतिह्रस्वाःकृशावक्राविरलारोगहेतुकाः ॥ दुःखायांगुलयःस्त्रीणांबहुपर्वसमन्विताः ॥ ८३ ॥ अरुणाःसशिखास्तुंगाःकरजाःसुदृशांशुभाः ॥ निम्नाविवर्णाःशुक्त्याभाःपीतादारिद्र्यदायकाः ॥ ८४ ॥ नखेषुबिंदवःश्वेताःप्रायःस्युःस्वैरिणीस्त्रियाः ॥ पुरुषाअपिजायंतेदुःखिनःपुष्पितैर्नखैः ॥ ८५ ॥ अंतर्निमग्नवंशास्थिःपृष्ठिःस्यान्मांसलाशुभा ॥ पृष्ठेनरोमयुक्तेनवैधव्यंलभतेध्रुवम् ॥ ८६ ॥ भुग्नेनविनतेनापिसशिरेणापिदुःखिता ॥ ऋज्वीकृकाटिकाश्रेष्ठासमांसाचसमुन्नता ॥ ८७ ॥ शुष्काशिरालारोमाढ्याविशालाकुटिलाशुभा ॥ मांसलोवर्तुलःकंठःप्रशस्तश्चतुरंगुलः ॥ ८८ ॥ शस्ताग्रीवात्रिरेखांकात्वव्यक्तास्थिःसुसंहता ॥ निर्मांसाचिपिटादीर्घास्थपुटानशुभप्रदा ॥ ८९ ॥ स्थूलग्रीवाचविधवावक्रग्रीवाचकिंकरी ॥ वंध्याहिचिपिटग्रीवाह्रस्वग्रीवाचनिःसुता ॥ ९० ॥ चिबुकंद्व्यंगुलंशस्तंवृत्तंपीनंसुकोमलम् ॥ स्थूलंद्विधासंविभक्तमायतंरोमशंत्यजेत् ॥ ९१ ॥ हनुश्चिबुकसंलग्नानिर्लोमासुघनाशुभा ॥ वक्रास्थूलाकृशाह्रस्वारोमशानशुभप्रदा ॥ ९२ ॥ शस्तौकपोलौवामाक्ष्याःपीनौवृत्तौसमुन्नतौ ॥ रोमशौपरुषौनिम्नौनिर्मांसौपरिवर्जयेत् ॥ ९३ ॥ समंसमांसंसुस्निग्धंस्वामोदंवर्तुलंमुखम् ॥ जनेतृवदनच्छायंधन्यानामिहजायते ॥ ९४ ॥ पाटलोवर्तुलःस्निग्धोलेखाभूषितमध्यभूः ॥ सीमंतिनीनामधरोधराजानिप्रियोभवेत् ॥ ९५ ॥ कृशःप्रलंबःस्फुटितोरूक्षोदौर्भाग्यसूचकः ॥ श्यावःस्थूलोऽधरोष्ठःस्याद्वैधव्यकलहप्रदः ॥ ९६ ॥

मसृणोमत्तकाशिन्याश्चोत्तरोष्ठःसुभोगदः ॥ किंचिन्मध्योन्नतोऽरोमाविपरीतोविरुद्धकृत् ॥ ९७ ॥ गोक्षीरसन्निभाःस्निग्धाद्वात्रिंशद्दशनाःशुभाः ॥ अधस्तादुपरिष्टाच्चसमाःस्तोकसमुन्नताः ॥ ९८ ॥ पीताःश्यावाश्चदशनाःस्थूलादीर्घाद्विपंक्तयः ॥ शुक्त्याकाराश्चविरलादुःखदौर्भाग्यकारणम् ॥ ९९ ॥ अधस्तादधिकैर्दंतैर्मातरंभक्षयेत्स्फुटम् ॥ पतिहीनाचविकटैःकुलटाविरलैर्भवेत् ॥ १०० ॥ जिह्वेष्टमिष्टभोक्त्रीस्याच्छोणामृद्वीतथासिता ॥ दुःखायमध्यसंकीर्णापुरोभागसविस्तरा ॥ १ ॥ सितयातोयमरणंश्यामयाकलहप्रिया ॥ दरिद्रिणीमांसलयालंबयाऽभक्ष्यभक्षिणी ॥ २ ॥ विशालयारसनयाप्रमदातिप्रमादभाक् ॥ स्निग्धंकोकनदाभासंप्रशस्तंतालुकोमलम् ॥ ३ ॥ सितेतालुनिवैधव्यंपीतेप्रव्रजिताभवेत् ॥ कृष्णेऽपत्यवियोगार्तारूक्षेभूरिकुटुंबिनी ॥ ४ ॥ कंठेस्थूलासुवृत्ताचक्रमतीक्ष्णासुलोहिता ॥ अप्रलंबाशुभाघंटीस्थूलाकृष्णाचदुःखदा ॥ ५ ॥ अलक्षितद्विजंकिंचित्किंचित्फुल्लकपोलकम् ॥ स्मितंप्रशस्तंसुदृशामनिमीलितलोचनम् ॥ ६ ॥ समवृत्तपुटानासालघुच्छिद्राशुभावहा ॥ स्थूलाग्रामध्यनम्राचनप्रशस्तासमुन्नता ॥ ७ ॥ आकुंचितारुणाग्राचवैधव्यक्लेशदायिनी ॥ परप्रेष्याचचिपिटाह्रस्वादीर्घाकलिप्रिया ॥ ८ ॥ दीर्घायुःकृत्क्षुतंदीर्घंयुगपद्द्वित्रिपिंडितम् ॥ ललनालोचनेशस्तेरक्तांतेकृष्णतारके ॥ ९ ॥ गोक्षीरवर्णविशदेसुस्निग्धेकृष्णपक्ष्मणी ॥ उन्नताक्षीनदीर्घायुर्वृत्ताक्षीकुलटाभवेत् ॥ ११० ॥ मेषाक्षीमहिषाक्षीचकेकराक्षीनशोभना ॥ कामगृहीलानितरांगोपिंगाक्षीसुदुर्वृता ॥ ११ ॥ पारावताक्षीदुःशीलारक्ताक्षीभर्तृघातिनी ॥ कोटरानयनादुष्टागजनेत्रानशोभना ॥ १२ ॥ पुंश्चलीवामकाणाक्षीवंध्यादक्षिणकाणिका ॥ मधुपिंगाक्षीरमणीधनधान्यसमृद्धिभाक् ॥ १३ ॥ पक्ष्मभिःसुघनैःस्निग्धैःकृष्णैःसूक्ष्मैःसुभाग्यभाक् ॥ कपिलैर्विरलैःस्थूलैर्निंद्याभवतिभामिनी ॥ १४ ॥ भ्रुवौसुवर्तुलेतन्व्याःस्निग्धेकृष्णेअसंहते ॥ प्रशस्तेमृदुरोमाणौसुभ्रुवःकार्मुकाकृती ॥ १५ ॥

खररोमाचपृथुलाविकीर्णासरलास्त्रियाः ॥ नभ्रूःप्रशस्तामिलितादीर्घरोमाचपिंगला ॥ १६ ॥ लंबौकर्णौशुभावर्तौसुखदौचशुभप्रदौ ॥ शष्कुलीरहितौनिंद्यौशिरालौकुटिलौकृशौ ॥ १७ ॥ भालःशिराविरहितोनिर्लोमार्धेंदुसन्निभः ॥ अनिम्नस्त्र्यंगुलोनार्याःसौभाग्यारोग्यकारणम् ॥ १८ ॥ व्यक्तस्वस्तिकरेखंचललाटंराज्यसंपदे ॥ प्रलंबंमस्तकंयस्यादेवरंहन्तिसाध्रुवम् ॥ १९ ॥ रोमशेनशिरालेनप्रांशुनारोगिणीमता ॥ १२० ॥ सीमन्तःसरलःशस्तोमौलिःशस्तःसमुन्नतः ॥ गजकुंभनिभावृत्तैःसौभाग्यैश्वर्यसूचकैः ॥ २१ ॥ स्थूलमूर्धाचविधवादीर्घशीर्षाचबंधकी ॥ विशालेनापिशिरसाभवेद्दौर्भाग्यभाजनम् ॥ २२ ॥ केशाअलिकुलच्छायाःसूक्ष्माःस्निग्धाःसुकोमलाः ॥ किंचिदाकुंचिताग्राश्चकुटिलाश्चातिशोभनाः ॥ २३ ॥ परुषाःस्फुटिताग्राश्चविरलाश्चशिरोरुहाः ॥ पिंगलालघवोरूक्षादुःखदारिद्र्यबंधदाः ॥ २४ ॥ भ्रुवोरन्तर्ललाटेवामशकोराज्यसूचकः ॥ वामेकपोलेमशकःशोणोमिष्टान्नदःस्त्रियाः ॥ २५ ॥ तिलकंलांछनंवापिहृदिसौभाग्यकारणम् ॥ यस्यादक्षिणवक्षोजेशोणेतिलकलांछने ॥ २६ ॥ कन्याचतुष्टयंसूतेसूतेसाचसुतत्रयम् ॥ तिलकंलांछनंशोणंयस्यावामेकुचेभवेत् ॥ २७ ॥ एकंपुत्रंप्रसूयादौततःसाविधवाभवेत् ॥ गुह्यस्यदक्षिणेभागेतिलकंयदियोषितः ॥ २८ ॥ तदाक्षितिपतेःपत्नीसूतेवाक्षितिपंसुतम् ॥ नासाग्रेमशकःशोणोमहिष्याएवजायते ॥ २९ ॥ कृष्णःसएवभर्तृघ्न्याःपुंश्चल्याश्चप्रकीर्तितः ॥ नाभेरधस्ता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्तिलकंमशकोलांछनंशुभम् ॥ १३० ॥ मशकस्तिलकंचिह्नंगुल्फदेशेदरिद्रकृत् ॥ करेकर्णेकपोलेवाकण्ठेवामेभवेद्यदि ॥ ३१ ॥ एषांत्रयाणामेकं तुभाग्गर्भेपुत्रदंभवेत् ॥ भालगेनत्रिशूलेननिर्मितेनस्वयंभुवा ॥ ३२ ॥ नितांबिनीसहस्राणांस्वामित्वंयोपिदाप्नुयात् ॥ सुतापरस्परंयातुदंतान्किटि किटायते ॥ ३३ ॥ मुलक्ष्मापिनसाशस्तायार्किंचित्प्रलपेत्तथा ॥ पाणौप्रदक्षिणावर्तोधर्म्योवामोनशोभनः ॥ ३४ ॥

नाभौश्रुतावुरासिवादक्षिणावर्तईडितः ॥ सुखायदक्षिणावर्तःपृष्ठवंशस्यदक्षिणे ॥ ३५ ॥ अन्तःपृष्ठंनाभिसमोवह्नायुःपुत्रवर्धनः ॥ राजपत्न्याःप्रदृश्येतभगमौलौप्रदक्षिणः ॥ ३६ ॥ सचेच्छकटभंगःस्याद्वह्वपत्यसुखप्रदः ॥ कटिगोगुह्यवेधेनपत्यपत्यनिपातनः ॥ ३७ ॥ स्यातामुदरवेधेनपृष्ठावर्तोनशोभनौ ॥ एकेनहंतिभर्तारंभवेदन्येनपुंश्चली ॥ ३८ ॥ कंण्ठगोदक्षिणावर्तोदुःखवैधव्यहेतुकः ॥ सीमन्तोथललाटेवात्याज्योदूरात्प्रयत्नतः ॥ ३९ ॥ सापतिंहंतिवर्षेणयस्यामध्येकृकाटिकम् ॥ प्रदक्षिणोवावामोवारोम्णामावर्त्तकःस्त्रियाः ॥ १४० ॥ एकोवामूर्धनिद्वौवावामेवामगतीयदि ॥ आदशाहं पतिम्रोतौत्याज्योदूरात्सुबुद्धिना ॥ ४१ ॥ कट्यावर्तोचकुलटानाभ्यावर्तापतिव्रता ॥ पृष्ठावर्त्तोचभर्तृघ्नीकुलटावाथजायते ॥ ४२ ॥ स्कंदउवाच ॥ सुलक्षणापिदुःशीलाकुलक्षणशिरोमणिः ॥ अलक्षणापिसाध्वीसर्वलक्षणभूस्तुसा ॥ ४३ ॥ सुलक्षणासुचारित्रास्वाधीनापतिदेवता ॥ विशेशानुग्रहा देवगृहेयोपिदवाप्यते ॥ ४४ ॥ अलंकृताःस्ववासिन्योयाभिःप्राक्तनजन्मनि ॥ नानाविधैरलंकारैस्ताःसुरूपाभवंतिहि ॥ ४५ ॥ सुतीर्थेषुवपुर्याभिःक्षयिनंवाविहायितम् ॥ तालावण्यतरंगिण्योभवंतीहसुलक्षणाः ॥ ४६ ॥ अर्चिताजगतांमातायाभिर्भृडवधूरिव ॥ ताभवंतिसुचारित्रायोपाःस्वाधीनभर्तृकाः ॥ ४७ ॥ स्वाधीनपतिकानांचसुशीलानांमृगीदृशाम् ॥ स्वर्गापवर्गावत्रैवसुलक्षणफलंहितत् ॥ ४८ ॥ सुलक्षणैःसुचारित्रैरपिमंदायुषंपतिम् ॥ दीर्घायुषंप्रकुर्वंतिप्रमदाःप्रमदास्पदम् ॥ ४९ ॥

अतःसुलक्षणायोपापरिणेयाविचक्षणैः ॥ लक्षणानिपरीक्ष्यादोहित्वादुर्लक्षणान्यपि ॥ १५० ॥ लक्षणानिमयोक्तानिसुस्त्रायगृहमेधिनाम् ॥ विवाहान पिवक्ष्यामितन्निबोधघटोद्भव ॥ १५१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेस्त्रीलक्षणवर्णनंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ स्कंदउवाच ॥ विवाहात्राह्मदैवार्षाःप्राजापत्यासुरोतथा ॥ गांधर्वोराक्षसश्चापिपैशाचोऽष्टमउच्यते ॥ १ ॥ सत्राह्मोवरमाहूययत्रकन्या स्वलंकृता ॥ दीयतेतत्सुतःपूयात्पुरुपानेकविंशतिम् ॥ २ ॥ यज्ञस्थायार्त्विजेदैवस्तज्जःपातिचतुर्दश ॥ वरादादायगोद्वंद्वमार्षस्तज्जःपुनातिषट् ॥ ३ ॥ सहोभौचरतांधर्ममित्युक्वादीयतेर्थिने ॥ यत्र कन्याप्राजापत्यस्तज्जोवंशान्पुनातिषट् ॥ ४ ॥ चत्वारएतेविप्राणांधर्म्याःपाणिग्रहाःस्मृताः ॥ आसुरःक्रयणाद्व्यैर्गांधर्वोन्योन्यमेत्रतः ॥ ५ ॥ प्रसह्यकन्याहरणाद्राक्षसोनिंदितःसताम् ॥ छलेनकन्याहरणात्पैशाचोगर्हितोऽष्टमः ॥ ६ ॥ प्रायः क्षत्रविशोरुक्तागांधर्वासुरराक्षसाः ॥ अष्टमस्त्वेषपापिष्टःपापिष्ठानांचसंभवेत् ॥ ७ ॥

सवर्णयाकरोग्राह्योधार्यःक्षत्रिययाशरः ॥ प्रतोदोवैश्ययाधार्योवासोंतःपञ्चयातथा ॥ ८ ॥ असवर्णस्त्वेषविधिःस्मृतोऽष्टश्चवेदने ॥ सवर्णाभिस्तुसर्वाभिःपाणिर्ग्राह्यस्त्वयंविधिः ॥ ९ ॥ धर्म्यैर्विवाहैर्जायंतेधर्म्याप्रवशतायुषः ॥ अधर्म्यैर्धर्मरहितामंदभाग्यधनायुषः ॥ १० ॥ ऋतुकालाभिगमनंधर्मोयं गृहिणःपरः ॥ स्त्रीणांवरमनुस्मृत्ययथाकाम्यथवाभवेत् ॥ ११ ॥ दिवाभिगमनंपुंसामनायुष्यंपरंमतम् ॥ श्राद्धादःसर्वपर्वाणियत्नात्त्याज्यानिधीमता ॥ १२ ॥ तत्रगच्छन्स्त्रियंमोहाद्धर्मात्प्रच्यवतेपरात् ॥ १३ ॥ ऋतुकालाभिगामीयःस्वदारनिरतश्चयः ॥ ससदात्रह्मचारीचविज्ञेयःसद्वृहाश्रमी ॥ १४ ॥ ऋतुःषोडशरात्रिस्तस्यांतस्तस्तासुगर्हिताः ॥ पुत्रास्तास्वपियायुग्माअयुग्माःकन्यकाप्रजाः ॥ १५ ॥ त्यक्त्वाचंद्रमसंदुःस्थंमघांपोष्णंविहायच ॥ शुचिः सन्निर्विशेत्पत्नीपुत्रामर्क्षेविशेषतः ॥ शुचिंपुत्रंप्रसूयेतपुरुषार्थप्रसाधकम् ॥ १६ ॥ आर्षेविवाहेगोद्वंद्वंयदुक्तंतन्नशस्यते ॥ शुल्कमण्वपिकन्यायाःकन्याविक्रयपापकृत् ॥ १७ ॥ अपत्यविक्रयीकल्पंवसेद्विद्रकृमिभोजने ॥ अतोनाण्वपिकन्यायाउपजीवेत्पिताधनम् ॥ १८ ॥ स्त्रीधनान्युपजीवंतियेमोहादिहबांधवाः ॥ नकेवलंनिरयगास्तेषामपिहिपूर्वजाः ॥ १९ ॥ पत्यातुष्यतियत्रस्त्रीतुष्येद्यत्रस्त्रियापतिः ॥ तत्रतुष्टामहालक्ष्मीर्निवसेदानवाऽरिणा ॥ २० ॥ वाणिज्यंनृपतेःसेवावेदानध्यापनंतथा ॥ कुविवाहःक्रियालोपःकुलेपतनहेतवः ॥ २१ ॥

कुर्याद्विवाहिकेवह्नौगृह्यंकर्मान्वहंगृही ॥ पंचयज्ञक्रियांचापिपर्किदैनंदिनीमपि ॥ २२ ॥ गृहस्थाश्रमिणःपंचसूनाकर्मदिनेदिने ॥ कंडनीपेषणीचुल्ली मुदकुंभस्तुमार्जनी ॥ २३ ॥ तासांचपंचसूनानांनिराकरणहेतवः ॥ क्रतवःपंचनिर्दिष्टागृहिश्रेयोभिवर्धनाः ॥ २४ ॥ पाठनंब्रह्मयज्ञःस्यात्तर्पणंचपितृक्रतुः ॥ होमोदैवोबलिर्भौतोऽतिथ्यर्चानृक्रतुःक्रमात् ॥ २५ ॥ पितृप्रीतिंप्रकुर्वाणःकुर्वीतश्राद्धमन्वहम् ॥ अन्नोदकपयोमूलैःफलैर्वापिगृहाश्रमी ॥ २६ ॥ गोदानेनचयत्पुण्यंपात्रायविधिपूर्वकम् ॥ सत्कृत्यभिक्षवेभिक्षांदत्त्वातत्फलमाप्नुयात् ॥ २७ ॥ तपोविद्यासमिद्दीप्तेहुतंविप्रास्यपावके ॥ तारयेद्विश्वसंघेभ्यःपापाब्धेरपिदुस्तरात् ॥ २८ ॥ अनर्चितोऽतिथिर्गेहाद्भ्राशोयस्यगच्छति ॥ आजन्मसंचितात्पुण्यात्क्षणात्सहिवहिर्भवेत् ॥ २९ ॥ सात्वपूर्वापिणवाक्यानिशय्यार्थेभूस्तृणोदके ॥ एतान्यपिप्रदेयानिसदाभ्यागततुष्टये ॥ ३० ॥ गृहस्थःपरपाकादीप्रेत्यतत्पशुतांव्रजेत् ॥ श्रेयःपरान्नपुष्टस्यगृही यादन्नदोयतः ॥ ३१ ॥ आदित्योढोऽतिथिःसायंसत्कर्तव्यःप्रयत्नतः ॥ असत्कृतोन्यतोगच्छन्दुष्कृतंभूरियच्छति ॥ ३२ ॥ भुंजानोऽतिथिशेषान्न मिहायुर्धनभाग्भवेत् ॥ प्रणोद्यातिथिमन्नाशीकिल्विषीचगृहाश्रमी ॥ ३३ ॥ वैश्वदेवांतसंप्राप्तःसूर्योढोऽतिथिःस्मृतः ॥ नपूर्वकालआयातोनचष्टष्टचरःक्वचित् ॥ ३४ ॥ बलिपात्रकृविप्रेयद्यन्योतिथिरागतः ॥ अदत्त्वातंबलिंतस्मैयथाशक्त्यान्नमर्पयेत् ॥ ३५ ॥ कुमाराश्चस्ववासिन्योगर्भिण्योऽतिरुजान्विताः ॥ अतिथेरादितोप्येतेभोज्यानात्रविवारणा ॥ ३६ ॥ पितृदेवमनुष्येभ्योदत्त्वाश्रात्यमृतंगृही ॥ स्वार्थंपचन्नवंभुंक्तेकेवलंस्वोदरंभरिः ॥ ३७ ॥

माध्याह्निकंवैश्वदेवंगृहस्थःस्वयमाचरेत् ॥ पत्नीसायंबलिंदद्यान्निसिद्धान्नैर्मत्रवर्जितम् ॥ ३८ ॥ एतत्सायंतनंनामवैश्वदेवंगृहाश्रमे ॥ सायंप्रातर्भवेदेवंवैश्व देवंप्रयत्नतः ॥ ३९ ॥ वैश्वदेवेनयेहीनाआतिथ्येनविवर्जिताः ॥ सर्वेतेवृषलाज्ञेयाःप्राप्तवेदाअपिद्विजाः ॥ ४० ॥ कृत्वावैश्वदेवंतुभुंजतेयेद्विजाधमाः ॥ इहलोकेन्नहीनाःस्युःकाकयोनिंव्रजंत्यथ ॥ ४१ ॥ वेदोदितंस्वकंकर्मनित्यंकुर्यादतंद्रितः ॥ तद्धिकुर्वन्यथाशक्तिप्राप्नुयात्सद्गतिंपराम् ॥ ४२ ॥ पशुध्यप्योर्वसेत्पापंतेलमांसेसदेवहि ॥ पंचदश्यांचतुर्दश्यांतथैवचभगक्षुरे ॥ ४३ ॥ उदयंतंनचेक्षेतनास्तंयंतंनमध्यगम् ॥ नराहुणोपसृष्टंचनांबुसंस्थं दिवाकरम् ॥ ४४ ॥ नवीक्षेतात्मनोरूपमाशुधावेत्रवर्पति ॥ नोल्लंघयेद्वत्सतंत्रींननग्नोजलमाविशेत् ॥ ४५ ॥ देवतायतनंविप्रंधेनुंमधुमृदंघृतम् ॥ जातिवृद्धंवयोवृद्धंविद्यावृद्धंतपस्विनम् ॥ ४६ ॥ अश्वत्थंचैत्यवृक्षंचगुरुंजलभृतंघटम् ॥ सिद्धान्नंदधिसिद्धार्थंगच्छन्कुर्यात्प्रदक्षिणम् ॥ ४७ ॥ रजस्वलां नमेक्षेतनाश्रीयात्सहभार्यया ॥ एकवासानभुंजीतनभुंजीतोत्कटासने ॥ ४८ ॥ नाश्नंतींस्त्रींसमीक्षेततेजस्कामोद्विजोत्तमः ॥ असंतर्प्यपितॄन्देवान्नाद्यादन्नं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नवंक्वचित् ॥ ४९ ॥ पक्वान्नंचापिनोमांसंदीर्घकालंजिजीविषुः ॥ नमूत्रंगोव्रजेकुर्यान्नवल्मीकेनभस्मनि ॥ ५० ॥ नगर्तेषुससत्वेषुनतिष्ठन्नव्रजन्नपि ॥ गोविप्रसूर्यवाय्वग्निचंद्रर्क्षांबुगुरूनपि ॥ ५१ ॥ अभिपश्यन्नकुर्वीतमलमूत्रविसर्जनम् ॥ तिरस्कृत्यावनिंलोष्टकाष्ठपर्णतृणादिभिः ॥ ५२ ॥ प्रावृत्यवा ससामौलिंमौनीविण्मूत्रमुत्सृजेत् ॥ यथासुखमुखोरात्रौदिनेच्छायांधकारयोः ॥ ५३ ॥ भीतिषुप्राणबाधायांकुर्यान्मलविसर्जनम् ॥ मुखेनोपधमेन्ना ग्निंनग्नांनेक्षेतयोषितम् ॥ ५४ ॥

नांघ्रीप्रतापयेदग्नौनवस्त्वशुचिनिक्षिपेत् ॥ प्राणिहिंसांनकुर्वीतनाश्नीयात्संध्ययोर्द्वयोः ॥५५॥ नसंविशेतसंध्यायांप्रत्यक्सौम्यशिराअपि ॥ विण्मूत्रष्ठी वनंनाप्सुकुर्याद्दीर्घंजिजीविषुः ॥ ५६ ॥ नाचक्षीतधयंतींगांनेंद्रचापंप्रदर्शयेत् ॥ नैकःसुप्यात्क्वचिच्छून्येनशयानंप्रबोधयेत् ॥ ५७ ॥ पंथानंनैकलोयाया न्नवार्यंजलिनापिबेत् ॥ नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि ॥ ५८ ॥ स्त्रीधर्मिण्यानाभिवदेन्नाद्यादातृप्तिरात्रिषु ॥ तौर्यत्रिकप्रियोनस्यात्कांस्येपादौ नधावयेत् ॥ ५९ ॥ श्राद्धंकृत्वापरश्राद्धेयोऽश्नीयाज्ज्ञानवर्जितः ॥ दातुःश्राद्धफलंनास्तिभोक्ताकिल्बिषभुग्भवेत् ॥ ६० ॥ नधारयेदन्यभुक्तंवासश्चो पानहावपि ॥ नभिन्नभाजनेश्नीयान्नासीताग्न्यादिदूषिते ॥ ६१ ॥ आरोहणंगवांपृष्ठेप्रेतधूमंसरित्तरम् ॥ बालातपंदिवास्वापंत्यजेद्दीर्घंजिजीविषुः ॥ ६२ ॥ स्नात्वानमार्जयेद्गात्रंविसृजेन्नशिखांपथि ॥ हस्तौशिरोनधुनुयान्नाकर्षेदासनंपदा ॥ ६३ ॥ नोत्पाटयेल्लोमनखंदशनेनकदाचन ॥ करजैः करजच्छेदंतृणच्छेदंविवर्जयेत् ॥ ६४ ॥ शुभायनयदायत्यांत्यजेत्तत्कर्मयत्नतः ॥ अद्वारेणनगंतव्यंस्ववेश्मपरवेश्मनोः ॥ ६५ ॥ क्रीडेन्नाक्षैःसहासी तनधर्मघ्नैर्नरोगिभिः ॥ नशयीतक्वचिन्नग्नःपाणौभुंजीतनैवच ॥ ६६ ॥ आर्द्रपादकरास्योश्नन्दीर्घकालंचजीवति ॥ संविशेन्नार्द्रचरणोनोच्छिष्टःक्व चिदाव्रजेत् ॥ ६७ ॥ शयनस्थोनचाश्नीयान्नपिबेन्नजपेद्द्विजः ॥ सोपानत्कश्चनाचामेन्नतिष्ठन्धारयापिबेत् ॥ ६८ ॥ सर्वंतिलमयंनाद्यात्सायंशर्मा भिलाषुकः ॥ ननिरीक्षेतविण्मूत्रेनोच्छिष्टःसंस्पृशेच्छिरः ॥ ६९ ॥

नाधितिष्ठेत्तुषांगारभस्मकेशकपालिकाः ॥ पतितैःसहसंवासःपतनायैवजायते ॥ ७० ॥ श्रावयेद्वैदिकंमंत्रंनशूद्रायकदाचन ॥ ब्राह्मण्याद्धीयतेविप्रः शूद्रोधर्माच्चहीयते ॥ ७१ ॥ धर्मोपदेशःशूद्राणांस्वश्रेयःप्रतिघातयेत् ॥ द्विजशुश्रूषणंधर्मःशूद्राणांहिपरोमतः ॥ ७२ ॥ कंडूयनंहिशिरसःपाणिभ्यां नशुभंमतम् ॥ आताडनंकराभ्यांचक्रोशनंकेशलुंचनम् ॥७३॥ अशास्त्रवर्तिनोभूपाल्लुब्धात्कृत्वाप्रतिग्रहम् ॥ ब्राह्मणःसान्वयोयातिनरकानेकविंशतिम् ॥ ७४ ॥ अकालविद्युत्स्तनितेवर्षर्तौपांसुवर्षणे ॥ महावातध्वनौरात्रावनध्यायाःप्रकीर्तिताः ॥ ७५ ॥ उल्कापातेचभूकंपेदिग्दाहेमध्यरात्रिषु ॥ संध्ययोर्वृषलोपांतेराज्ञोराहोश्चसूतके ॥ ७६ ॥ दर्शाष्टकासुभूतायांश्राद्धिकंप्रतिगृह्यच ॥ प्रतिपद्यपिपूर्णायांगजोष्ट्राभ्यांकृतांतरे ॥ ७७ ॥ खरोष्ट्रक्रो ष्टृविरुतेसमवायेरुदत्यपि ॥ उपाकर्मणिचोत्सर्गेनाविमार्गेतरौजले ॥ ७८ ॥ आरण्यकमधीत्यापिबाणसाम्नोरपिध्वनौ ॥ अनध्यायेषुचैतेषुनाधीयीत द्विजःक्वचित् ॥ ७९ ॥ कृतांतरायोनपठेद्भेकाखुश्वाहिबभ्रुभिः ॥ भूताष्टम्योःपंचदश्योर्ब्रह्मचारीसदाभवेत् ॥ ८० ॥ अनायुष्यकरंचैवपरदारोपसर्प णम् ॥ तस्मात्तद्दूरतस्त्याज्यंवैरिणांचोपसेवनम् ॥ ८१ ॥ पूर्वर्द्धिभिःपरित्यक्तमात्मानंनावमानयेत् ॥ सदोद्यमवतांयस्माच्छ्रियोविद्यानदुर्लभाः ॥ ८२ ॥ सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियम् ॥ प्रियंचनानृतंब्रूयादेषधर्मोघटोद्भव ॥ ८३ ॥ भद्रमेववदेन्नित्यंभद्रमेवविचिंतयेत् ॥ भद्रैरेवेहसंसर्गोनाभद्रैश्चक दाचन ॥ ८४ ॥ रूपवित्तकुलैर्हीनान्सुधीर्नाधिक्षिपेन्नरान् ॥ पुष्पवंतौनचेक्षेतत्वशुचिर्ज्योतिषांगणम् ॥ ८५ ॥

वाचोवेगंमनोवेगंजिह्वावेगंचवर्जयेत् ॥ उत्कोचद्यूतदौत्यार्तद्रव्यंदूरात्परित्यजेत् ॥८६॥ गोब्राह्मणाग्नीनुच्छिष्टपाणिनानैवसंस्पृशेत् ॥ नस्पृशेदनिमित्ते नखानिस्वानित्वनातुरः ॥ ८७ ॥ गुह्यजान्यपिलोमानितत्स्पर्शादशुचिर्भवेत् ॥ पादधौतोदकंमूत्रमुच्छिष्टान्नोदकानिच ॥ ८८ ॥ निष्ठीवनंचश्लेष्माणं गृहाद्दूरंविनिक्षिपेत् ॥ अहर्निशंश्रुतेर्जाप्याच्छौचाचारनिषेवणात् ॥ अद्रोहवत्याबुद्ध्याचपूर्वंजन्मस्मरेद्द्विजः ॥ ८९ ॥ वृद्धान्प्रयत्नाद्वंदेतदद्यात्तेषांस्वमा सनम् ॥ विनम्रधमनिस्तस्मादनुयायात्ततश्चतान् ॥ ९० ॥ श्रुतिभूदेवदेवानांनृपसाधुतपस्विनाम् ॥ पतिव्रतानांनारीणांनिंदांकुर्यान्नकर्हिचित् ॥ ९१ ॥ नमनुष्यस्तुतिंकुर्यान्नात्मानमपमानयेत् ॥ अभ्युद्यतंनप्रणुदेत्परमर्माणिनोच्चरेत् ॥ ९२ ॥ अधर्मादेधतेपूर्वंविद्वेष्टॄनपिसंजयेत् ॥ सर्वतोभद्रमाप्यापिततो नश्येच्चसान्वयः ॥ ९३ ॥ उद्धृत्यपंचमृत्पिंडान्स्नायात्परजलाशये ॥ अनुद्धृत्यचतत्कर्तुरेनसःस्यात्तुरीयभाक् ॥ ९४ ॥ श्रद्धयापात्रमासाद्ययत्किं चिद्दीयतेवसु ॥ देशेकालेचविधिनातदानंत्यायकल्पते ॥ ९५ ॥ भूप्रदोमंडलाधीशःसर्वत्रसुखिनोन्नदाः ॥ तोयदातासदातृप्तोरूपवान्रूप्यदोभवेत् ॥ ९६ ॥ प्रदीपदोनिर्मलाक्षोगोदाताऽर्यमलोकभाक् ॥ स्वर्णदाताचदीर्घायुस्तिलदःस्यात्तुसुप्रजाः ॥ ९७ ॥ वेश्मदोऽत्युच्चसौधेशोवस्त्रदश्चंद्रलो कभाक् ॥ हयप्रदोविव्ययानोलक्ष्मीवान्वृषभप्रदः ॥ ९८ ॥ सुभार्यःशिबिकादातासुपर्यंकप्रदोपिच ॥ धान्यैःसमृद्धिमान्नित्यमभयप्रदईशिता ॥९९॥ ब्रह्मदोब्रह्मलोकेज्योब्रह्मदःसर्वदोमतः ॥ उपायेनापियोब्रह्मदापयेत्सोपितत्समः ॥ १०० ॥ श्रद्धयाप्रतिगृह्णातिश्रद्धयायःप्रयच्छति ॥ स्वर्गिणौ तावुभौस्यातांपततोऽश्रद्धयात्यधः ॥ १ ॥ अनृतेनक्षरेद्यज्ञस्तपोविस्मयतःक्षरेत् ॥ क्षरेत्कीर्तनतोदानमायुर्विप्रापवादतः ॥ २ ॥ गंधपुष्पकुशाञ्छय्यां शाकंमांसंपयोदधि ॥ मणिमत्स्यगृहंधान्यंग्राह्यमेतदुपस्थितम् ॥ ३ ॥ मधूदकंफलंमूलमेधांस्यभयदक्षिणा ॥ अभ्युद्यतानिग्राह्याणित्वेतान्यपिनि कृष्टतः ॥ ४ ॥ दासनापितगोपालकुलमित्रार्धसीरिणः ॥ भोज्यान्नाःशूद्रवर्गेमीतथात्मविनिवेदकः ॥ ५ ॥ इत्थमानृण्यमासाद्यदेवर्षिपितृजादृणात् ॥ माध्यस्थ्यमाश्रयेद्गेहेसुतेविष्वग्विसृज्यच ॥ ६ ॥

गेहेपिज्ञानमभ्यस्येत्काशींवाथसमाश्रयेत् ॥ सम्यग्ज्ञानेनवामुक्तिःकिंवाविश्वेशवेश्मनि ॥ ७ ॥ सम्यग्ज्ञानंभवेत्पुंसांकुतएकेनजन्मना ॥ वाराणस्यां ध्रुवामुक्तिःशरीरत्यागमात्रतः ॥ ८ ॥ अद्यश्वोवापरश्वोवाकालाद्वाथपरःशतात् ॥ सत्वरोगत्वरोदेहःकाश्यांचेदमृतीभवेत् ॥ ९ ॥ साचवाराणसीलभ्या सदाचारवतासदा ॥ मनसापिसदाचारमतोविद्वान्नलंघयेत् ॥ ११० ॥ आकर्ण्येतिततोगस्त्यःपुनःप्राहषडाननम् ॥ पुनःकाशींसमाचक्ष्वसदाचारे णयाप्यते ॥ ॥ ११ ॥ कानिकानिचलिंगानिस्कंदज्ञानप्रदानिच ॥ वाराणस्यांपरिब्रूहितानिमेपरिपृच्छतः ॥ १२ ॥ विनाकाशींनमेप्रीतिर्विनाकाशीं नमेरतिः ॥ चित्रपुत्रकवच्चास्मिविनाकाशींषडानन ॥ १३ ॥ ननिद्रामिनजागर्मिनाश्नामिनपिबाम्यपः ॥ काशींद्व्यक्षरपीयूषंपिबामिहिचकेवलम् ॥ १४ ॥ इतिश्रुत्वावचःस्कंदोमैत्रावरुणिभाषितम् ॥ अविमुक्तस्यमाहात्म्यंवक्तुंसमुपचक्रमे ॥ ११५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यां संहितायां काशीखंडेपूर्वार्द्धेसदाचारवर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ स्कंदउवाच ॥ शृण्वगस्त्यमहाभागकथांपापप्रणाशिनीम् ॥ नैःश्रेयस्याः श्रियोहेतुमविमुक्तसमाश्रयाम् ॥ १ ॥ परंब्रह्मयदाम्नातंनिष्प्रपंचंनिरात्मकम् ॥ निर्विकल्पंनिराकारमव्यक्तंस्थूलसूक्ष्मवत् ॥ २ ॥ तदेतत्क्षेत्रमापूर्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्थितंसर्वं ममप्यहो ॥ किमन्यत्रनशक्तोसौजंतून्मोचयितुंभवात् ॥ ३ ॥ भवोध्रुवंयदत्रैवमोचयेत्तंनिशामय ॥ महत्यायोगयुक्त्यावामहादानैरकामिकैः ॥ ४ ॥ सुमहद्भिस्तपोभिर्वाशिवोन्यत्रविमोचयेत् ॥ योगयुक्तिंनमहतींनदानानिमहांतिच ॥ ५ ॥ नतपांस्यतिदीर्घाणिकाश्यांमुक्त्यैशिवोर्थयेत् ॥ वियुनक्तिनयत्काश्याउपसर्गेमहत्यपि ॥ ६ ॥

अयमेवमहायोगउपयोगस्त्विहापरः ॥ नियमेनतुविश्वेशेपुष्पंपत्रंफलंजलम् ॥ ७ ॥ यद्दत्तंसुमनोवृत्त्यामहादानंतदत्रवै ॥ मुक्तिमंडपिकायांचक्षणंयत्स्थिरमास्यते ॥ ८ ॥ स्नात्वागंगामृतेशुद्धेतपएतदिहोत्तमम् ॥ सत्कृत्यभिक्षवेभिक्षायत्काश्यांपरिदीयते ॥ तुलापुरुषएतस्याःकलांनार्हतिषोडशीम् ॥ ९ ॥ हृदिसंचिंत्यविश्वेशंक्षणंयद्विनिमील्यते ॥ देवस्यदक्षिणेभागेमहायोगोयमुत्तमः ॥ १० ॥ इदमेवतपोत्युग्रंयदिंद्रियविलोलताम् ॥ निषिध्यस्थीयतेकाश्यांक्षुत्तापाद्यवमन्यच ॥ ११ ॥ मासिमासियदाप्येतव्रताच्चांद्रायणात्फलम् ॥ अन्यत्रतदिहाप्येतभूतायांनक्तभोजनात् ॥ १२ ॥ मासोपवासादन्यत्रयत्फलंसमुपार्ज्यते ॥ श्रद्धयैकोपवासेनतत्काश्यांस्यादसंशयम् ॥ १३ ॥ चातुर्मास्यव्रतात्प्रोक्तंयदन्यत्रमहाफलम् ॥ एकादश्युपवासेनतत्काश्यांस्यादसंशयम् ॥ १४ ॥ षण्मासान्नपरित्यागाद्यदन्यत्रफलंलभेत् ॥ शिवरात्र्युपवासेनतत्काश्यांजायतेध्रुवम् ॥ १५ ॥ वर्षंकृत्वोपवासानिलभेदन्यत्रयद्वती ॥ तत्फलंस्याच्चिरात्रेणकाश्यामविकलंमुने ॥ १६ ॥ मासिमासिकुशाग्रांबुपानादन्यत्रयत्फलम् ॥ काश्यामुत्तरवाहिन्यामेकेनचुलुकेनतत् ॥ १७ ॥ अनंतोमहिमाकाश्याःकस्तंवर्णयितुंप्रभुः ॥ विपत्तिमिच्छतोजंतोर्यत्रकर्णेजपःशिवः ॥ १८ ॥ शंभुस्तत्किंचिदाचष्टेम्रियमाणस्यजन्मिनः ॥ कर्णेऽक्षरंयदाकर्ण्यमृतोप्यमृततांव्रजेत् ॥ १९ ॥ स्मारंस्मारंस्मररिपोःपुरींत्वमिवशंकरः ॥ अदुनोन्मंदरंयातोबहुशस्तदवाप्तये ॥ २० ॥ अगस्त्यउवाच ॥ स्वकार्यनिपुणैःस्वामिन्गीर्वाणैरतिदारुणैः ॥ त्याजितोहंपुरींकाशींहरोत्याक्षीत्कुतःप्रभुः ॥ २१ ॥ पराधीनोहमिवकिंदेवदेवःपिनाकवान् ॥ काशिकासोऽत्यजत्कस्मान्निर्वाणमणिराशिकाम् ॥ २२ ॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणसंभूतकथयामिकथामिमाम् ॥ तत्याजचयथास्थाणुःकाशींविध्युपरोधतः ॥ २३ ॥ प्रार्थितस्त्वंयथालेखैःपरोपकृतयेमुने ॥ द्रुहिणेनतथारुद्रःस्वरक्षणविचक्षणः ॥ २४ ॥

॥ अगस्त्यउवाच ॥ ॥ कथंसभगवान्रुद्रोद्रुहिणेनकृपांबुधिः ॥ प्रार्थितोभूत्किमर्थंचतन्मेब्रूहिषडानन ॥ २५ ॥ ॥ स्कंदउवाच ॥ ॥ पाद्मेकल्पेपुरावृत्तेमनोःस्वायंभुवेंतरे ॥ अनावृष्टिरभूद्विप्रसर्वभूतप्रकंपिनी ॥ २६ ॥ तयातुषष्टिहायिन्यापीडिताःप्राणिनोऽखिलाः ॥ केचिदंबुधितीरेषुगिरिद्रोणीषुकेचन ॥ २७ ॥ महानिम्नेषुकच्छेषुमुनिवृत्त्याजनाःस्थिताः ॥ अरण्यान्यवनिर्जाताग्रामखर्वटवर्जिता ॥ २८ ॥ क्रव्यादाएवसर्वेषुनगरेषुपुरेषुच ॥ आसन्नभ्रंलिहोवृक्षाःसर्वत्रक्षोणिमंडले ॥ २९ ॥ चौराएवमहाचौरैरुल्लुठ्यंतइतस्ततः ॥ मांसवृत्त्योपजीवंतिप्राणिनःप्राणरक्षिणः ॥ ३० ॥ अराजकेसमुत्पन्नेलोकेऽत्याहितशंसिनि ॥ प्रयत्नोविफलस्त्वासीत्सृष्टेःसृष्टिकृतस्तदा ॥ ३१ ॥ चिंतामवापमहतींजगद्योनिःप्रजाक्षयात् ॥ प्रजासुक्षीयमाणासुक्षीणायज्ञादिकाःक्रियाः ॥ ३२ ॥ तासुक्षीणासुसंक्षीणाःसर्वेयज्ञभुजोऽभवन् ॥ ततश्चिंतयतास्रष्ट्रादृष्टोराजर्षिसत्तमः ॥ ३३ ॥ अविमुक्तेमहाक्षेत्रेतपस्यन्निश्चलेंद्रियः ॥ मनोरन्वयजोवीरःक्षात्रोधर्मइवोदितः ॥ ३४ ॥ रिपुंजयइतिख्यातोराजापरपुरंजयः ॥ अथब्रह्मातमासाद्यबहुगौरवपूर्वकम् ॥ ३५ ॥ उवाचवचनंराजन्रिपुंजयमहामते ॥ इलांपालयभूपालससमुद्राद्रिकाननाम् ॥ ३६ ॥ नागकन्यांनागराजःपत्न्यर्थंतेप्रदास्यति ॥ अनंगमोहिनींनाम्नावासुकिःशीलभूषणाम् ॥ ३७ ॥ दिवोपिदेवादास्यंतिरत्नानिकुसुमानिच ॥ प्रजापालनसंतुष्टामहाराजप्रतिक्षणम् ॥ ३८ ॥ दिवोदासइतिख्यातमतोनामत्वमाप्स्यसि ॥ मत्प्रभावाच्चनृपतेदिव्यंसामर्थ्यमस्तुते ॥ ३९ ॥ परमेष्ठिवचःश्रुत्वाततोसौराजसत्तमः ॥ वेधसंबहुशःस्तुत्वावाक्यंचेदमुवाचह ॥ ४० ॥

॥ राजोवाच ॥ ॥ पितामहमहाप्राज्ञजनाकीर्णेमहीतले ॥ कथंनान्येचराजानोमांकथंकथ्यतेत्वया ॥ ४१ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयिराज्यंप्रकुर्वाणेदेवोवृष्टिंविधास्यति ॥ पापनिष्ठेचवैराज्ञिनदेवोवर्षतेपुनः ॥ ४२ ॥ ॥ राजोवाच ॥ ॥ पितामहमहामान्यत्रिलोकीकरणक्षम ॥ महाप्रसादइत्याज्ञांत्वदीयां मूर्ध्न्युपाददे ॥ ४३ ॥ किंचिद्विज्ञप्तुकामोहंतन्मदर्थंकरोपिचेत् ॥ ततःकरोम्यहंराज्यंपृथिव्यामसपत्नवत् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ अविलंबेनतद्ब्रूहिकृतंमन्यस्वपार्थिव ॥ यत्तेहृदिमहाबाहोतवादेयंनकिंचन ॥ ४५ ॥ ॥ राजोवाच ॥ ॥ यद्यहंपृथिवीनाथःसर्वलोकपितामह ॥ तदादिविपदोदेवादिवितिष्ठंतुमाभुवि ॥ ४६ ॥ देवेषुदिवितिष्ठत्सुमयितिष्ठतिभूतले ॥ असपत्नेनराज्येनप्रजासौख्यमवाप्स्यति ॥ ४७ ॥ तथेतिविश्वसृक्प्रोक्तोदिवोदासोनरेश्वरः ॥ पटहंघोषयांचक्रेदिवंदेवाव्रजंत्विति ॥ ४८ ॥ मागच्छंत्विहवैनागानराःस्वस्थाभवंत्वितः ॥ मयिप्रशासतिक्षोणींसुराःस्वस्थाभवंत्विति ॥ ४९ ॥ एतस्मिन्नंतरेब्रह्माविश्वेशंप्रणिपत्यह ॥ यावद्विज्ञप्तुकामोभूत्तावदीशोब्रवीद्विधिम् ॥ ५० ॥ लोकेश्वरसमायाहिमंदरोनामभूधरः ॥ कुशद्वीपादिहागत्यतपस्तप्येतदुष्करम् ॥ ५१ ॥ यावस्तस्मैवरंदातुंबहुकालंतपस्यते ॥ इत्युक्त्वापार्वतीनाथोनंदिभृंगिपुरोगमः ॥ ५२ ॥ जगामवृषमारुह्यमंदरोयत्रतिष्ठति ॥ उवाचचप्रसन्नात्मादेवदेवोवृषध्वजः ॥ ५३ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेवरंब्रूहिधरोत्तम ॥ सोथश्रुत्वामहेशानंदेवदेवंत्रिलोचनम् ॥ ५४ ॥ प्रणम्यबहुशोभूमावद्रिरेतद्व्यजिज्ञपत् ॥ लीलाविग्रहभृच्छंभोप्रणतैककृपानिधे ॥ ५५ ॥ सर्वज्ञोपिकथंनामनवेत्थममवांछितम् ॥ शरणागतसंत्राणसर्ववृत्तांतकोविद ॥ ५६ ॥ सर्वेषांहृदयानंदशर्वसर्वगसर्वकृत् ॥ यदिदेयोवरोमह्यंस्वभावाद्वृषदात्मने ॥ ५७ ॥ याचकायातिशोच्यायप्रणतार्तिप्रभंजक ॥ ततोऽविमुक्तक्षेत्रस्यसाम्यंह्यभिलषाम्यहम् ॥ ५८ ॥ कुशद्वीपउमासार्धंनाथाद्यसपरिच्छदः ॥ मन्मौलौविहितावासःप्रयात्वेषवरोमम ॥ ५९ ॥

सर्वेषांसर्वदःशंभुःक्षणंयावद्विचिंतयेत् ॥ विज्ञातावसरोब्रह्मातावच्छंभुंव्यजिज्ञपत् ॥ प्रणम्याग्रेसरोभूत्वामौलौबद्धकरद्वयः ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ ॥ विश्वेशजगतांनाथपत्याव्यापारितोस्म्यहम् ॥ कृतप्रसादेनविभोसृष्टिंकर्तुंचतुर्विधाम् ॥ ६१ ॥ प्रयत्नेनमयासृष्टासासृष्टिस्त्वदनुज्ञया ॥ अवृष्ट्यापष्टिहायिन्यातत्रनष्टाऽप्रजाभुवि ॥ ६२ ॥ अराजकंमहच्चासीद्दुरवस्थमभूज्जगत् ॥ ततोरिपुंजयोनामराजर्षिर्मनुवंशजः ॥ ६३ ॥ मयाभिषिक्तोराजर्षिःप्रजाःपातुंनरेश्वरः ॥ चकारसमयंसोपिमहावीर्योमहातपाः ॥ ६४ ॥ तवाज्ञयाचेत्स्थास्यंतिसर्वेदिविपदोदिवि ॥ नागलोकेतथानागास्ततोराज्यंकरोम्यहम् ॥ ६५ ॥ तथेतिचमहाप्रोक्तंप्रमाणीक्रियतांतुतत् ॥ मंदरायवरोदत्तोभवेदेवंकृपानिधे ॥ ६६ ॥ तस्यराज्ञःप्रजास्त्रातुंभूयाच्चैषमनोरथः ॥ ममनाडीद्वयंराज्यंतस्यापिचशतक्रतोः ॥ ६७ ॥ मर्त्यानांगणनाक्वेहनिमेषार्धनिमेषिणाम् ॥ देवोपिनिर्मलंमत्वामंदरंचारुकंदरम् ॥ ६८ ॥ विधेश्चगौरवंरक्षंस्तथोरीकृतवान्हरः ॥ जंबूद्वीपेयथाकाशीनिर्वाणपददासदा ॥ ६९ ॥ तथाबहुतिथंकालंद्वीपोभूत्सोपिमंदरः ॥ यियासुनाचदेवेनमंदरंचित्रकंदरम् ॥ ७० ॥ निजमूर्तिमयंलिंगमविज्ञातंविधेरपि ॥ स्थापितंसर्वसिद्धीनांस्थापकेभ्यःसमर्पितुम् ॥ ७१ ॥ विपन्नानांचजंतूनांदातुंनैःश्रेयसींश्रियम् ॥ सर्वेषामिहसंस्थानांक्षे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रंचैवाभिरक्षितुम् ॥ ७२ ॥ मंदराद्रिंगतेनापिक्षेत्रंनैतत्पिनाकिना ॥ विमुक्तंलिंगरूपेणअविमुक्तमतःस्मृतम् ॥ ७३ ॥ पुरानंदवनंनामक्षेत्रमेतत्प्रकीर्तितम् ॥ अविमुक्तंतदारभ्यनामास्यप्रथितंभुवि ॥ ७४ ॥ नामाविमुक्तमभवदुभयोःक्षेत्रलिंगयोः ॥ एतद्वयंसमासाद्यनभूयोगर्भभाग्भवेत् ॥ ७५ ॥ अविमुक्तेश्वरंलिंगंदृष्ट्वाक्षेत्रेऽविमुक्तके ॥ विमुक्तएवभवतिसर्वस्मात्कर्मबंधनात् ॥ ७६ ॥ अर्चंतिविश्वेविश्वेशंविश्वेशोर्चतिविश्वकृत् ॥ अविमुक्तेश्वरंलिंगंभुविमुक्तिप्रदायकम् ॥ ७७ ॥ पुरानस्थापितंलिंगंकस्यचित्केनचित्क्वचित् ॥ किमाकृतिभवेल्लिंगंनैतद्वेत्त्यपिकश्चन ॥ ७८ ॥

आकारमविमुक्तस्यदृष्ट्वाब्रह्माच्युतादयः ॥ लिंगंसंस्थापयामासुर्वसिष्ठाद्यास्तथर्षयः ॥ ७९ ॥ आदिलिंगमिदंप्रोक्तमविमुक्तेश्वरंमहत् ॥ ततोलिंगांतराण्यत्रजातानिक्षितिमंडले ॥ ८० ॥ अविमुक्तेशनामापिश्रुत्वाजन्मार्जितादघात् ॥ क्षणान्मुक्तोभवेन्मर्त्योनात्रकार्याविचारणा ॥ ८१ ॥ अविमुक्तेश्वरंलिंगंस्मृत्वादूरगतोपिच ॥ जन्मद्वयकृतात्पापात्क्षणादेवविमुच्यते ॥८२॥ अविमुक्तेमहाक्षेत्रेऽविमुक्तमवलोक्यच ॥ त्रिजन्मजनितंपापंहित्वापुण्यमयोभवेत् ॥ ८३ ॥ यत्कृतंज्ञानविभ्रंशादेनःपंचसुजन्मसु ॥ अविमुक्तेशसंस्पर्शात्तत्क्षयेदेवनान्यथा ॥ ८४ ॥ अर्चयित्वामहालिंगमविमुक्तेश्वरंनरः ॥ कृतकृत्योभवेदत्रनचस्याज्जन्मभाक्कुतः ॥ ८५ ॥ स्तुत्वानत्वार्चयित्वाचयथाशक्तियथामति ॥ अविमुक्तेविमुक्तेशंस्तूयतेनम्यतेऽर्च्यते ॥८६॥ अनादिमदिदंलिंगंस्वयंविश्वेश्वरार्चितम् ॥ काश्यांप्रयत्नतःसेव्यमविमुक्तंविमुक्तये ॥ ८७ ॥ संतिलिंगान्यनेकानिपुण्येष्वायतनेषुच ॥ आयांतितानिलिंगानिमाघींप्राप्यचतुर्दशीम् ॥ ८८ ॥ कृष्णायांमाघभूतायामविमुक्तेशजागरात् ॥ सदाविगतनिद्रस्ययोगिनोगतिभाग्भवेत् ॥ ८९ ॥ नानायतनलिंगानिचतुर्वर्गप्रदान्यपि ॥ माघकृष्णचतुर्दश्यामविमुक्तमुपासते ॥ ९० ॥ किंबिभेतिनरोधीरःकृतादघशिलोच्चयात् ॥ अविमुक्तेशलिंगस्यभक्तिवज्रधरोयदि ॥ ९१ ॥ क्वाविमुक्तंमहालिंगंचतुर्वर्गफलोदयम् ॥ क्वपापिपापशैलोऽल्पोयःक्षयेन्नामसंभृतः ॥ ९२ ॥ अविमुक्तेमहाक्षेत्रेविश्वेशसमधिष्ठिते ॥ यैर्नदृष्टंविमूढास्तेऽविमुक्तंलिंगमुत्तमम् ॥ ९३ ॥ द्रष्टारमविमुक्तस्यदृष्ट्वादंडधरोयमः ॥ दूरादेवप्रणमतिप्रबद्धकरसंपुटः ॥ ९४ ॥ धन्यंतन्नेत्रनिर्माणंकृतकृत्यौतुतौकरौ ॥ अविमुक्तेश्वरंयेनयाभ्यामैक्षिष्टयःस्पृशेत् ॥ ९५ ॥ त्रिसंध्यमविमुक्तेशंयोजपेन्नियतःशुचिः ॥ दूरदेशविपन्नोपिकाशीमृतफलंलभेत् ॥ ९६ ॥ अविमुक्तंमहालिंगंदृष्ट्वाग्रामांतरंव्रजेत् ॥ लब्धाशुकार्यसंसिद्धिंक्षेमेणप्रविशेद्गृहम् ॥९७॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेअविमुक्तेशाविर्भावोनामैकोनचत्वारिंशोध्यायः ॥३९॥ ॥ स्कंदउवाच ॥ ॥ अविमुक्तेशमाहात्म्यंवर्णितंतेग्रतोमया ॥ अथोकिमसिशुश्रूषुःकथयिष्यामितत्पुनः ॥ १ ॥ ॥ अगस्त्यउवाच ॥ ॥ अविमुक्तेशमाहात्म्यंश्रावंश्रावंश्रुतीमम ॥ अतीवसुश्रुतेजातेतथापिनधिनोम्यहम् ॥ २ ॥

अविमुक्तेश्वरंलिंगंक्षेत्रंचाप्यविमुक्तकम् ॥ एतयोस्तुकथंप्राप्तिर्भवेत्पण्मुखतद्वद ॥ ३ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुकुंभजवक्ष्यामियथाप्राप्तिर्भवेदिह ॥ स्वश्रेयोदातुरेतस्याविमुक्तस्यमहामते ॥ ४ ॥ समीहितार्थसंसिद्धिर्लभ्यतेपुण्यभारतः ॥ तच्चपुण्यंभवेद्विप्रश्रुतिवर्त्मसभाजनात् ॥५॥ श्रुतिवर्त्मजुषःपुंसःसंस्पर्शान्नश्यतोमुने ॥ कलिकालावपिसदाछिद्रंप्राप्यजिघांसतः ॥६॥ वर्जितस्यविधानेनप्रोक्तस्याकरणेनवै ॥ कलिकालावपिहतोब्राह्मणंरंध्रदर्शनात् ॥ ७ ॥ निषिद्धाचरणंतस्मात्कथयिष्येतवाग्रतः ॥ तद्दूरतःपरित्यज्यनरोननिरयीभवेत् ॥ ८ ॥ पलांडुंविड्वराहंचशेलुंलशुनगृंजने ॥ गोपीयूषंतंडुलीयंवर्ज्यंचकवकंसदा ॥ ९ ॥ व्रश्चनान्वृक्षनिर्यासान्पायसापूपशष्कुलीः ॥ अदेवपित्र्यंपललमवत्सागोपयस्त्यजेत् ॥ १० ॥ पयएकशफंहेयंतथाक्रामेलकाविकम् ॥ रात्रौनदधिभोक्तव्यंदिवाननवनीतकम् ॥ ११ ॥ टिट्टिभंकलविंकंचहंसंचक्रंप्लवंबकम् ॥ त्यजेन्मांसाशिनःसर्वान्सारसंकुक्कुटंशुकम् ॥ १२ ॥ जालपादान्खंजरीटान्बुडित्वामत्स्यभक्षकान् ॥ मत्स्याशीसर्वमांसाशीतन्मत्स्यान्सर्वथात्यजेत् ॥ १३ ॥

हव्यकव्यनियुक्तौतुभक्ष्यौपाठीनरोहितौ॥मांसाशिभिस्त्वमीभक्ष्याःशशशल्लककच्छपाः ॥१४॥ श्वाविद्गोधेप्रशस्तेचज्ञाताश्चमृगपक्षिणः ॥ आयुष्कामैःस्वर्गकामैस्त्याज्यंमांसंप्रयत्नतः ॥ १५ ॥ यज्ञार्थंपशुहिंसायासास्वर्ग्यानेतराक्वचित् ॥ त्यजेत्पर्युषितंसर्वमखंडस्नेहवर्जितम् ॥ १६ ॥ प्राणात्ययेक्रतौश्राद्धेभेषजेविप्रकाम्यया ॥ अलौल्यमित्थंपललंभक्षयन्नेवदोषभाक् ॥ १७ ॥ नतादृशंभवेत्पापंमृगयावृत्तिकांक्षिणः ॥ यादृशंभवतिप्रेत्यलौल्यान्मांसोपसेविनः ॥ १८ ॥ मखार्थंब्रह्मणासृष्टाःपशुद्रुममृगौषधीः ॥ निघ्नन्नहिंसकोविप्रस्तासामपिशुभागतिः ॥ १९ ॥ पितृदेवक्रतुकृतेमधुपर्कार्थमेवच ॥ तत्रहिंसाप्यहिंसास्याद्धिंसान्यत्रसुदुस्तरा ॥ २० ॥ योजंतूनात्मपुष्ट्यर्थंहिनस्तिज्ञानदुर्बलः ॥ दुराचारस्यतस्येहनामुत्रापिसुखंक्वचित् ॥ २१ ॥ भोक्तानुमंतासंस्कर्ताक्रयिविक्रयिहिंसकाः ॥ उपहर्ताघातयिताहिंसकाश्चाष्टधास्मृताः ॥ २२ ॥ प्रत्यब्दमश्वमेधेनशतंवर्षाणियोयजेत् ॥ अमांसभक्षकोयश्चतयोरंत्योविशिष्यते ॥ २३ ॥ यथैवात्मापरस्तद्वद्द्रष्टव्यःसुखमिच्छता ॥ सुखदुःखानितुल्यानियथात्मनितथापरे ॥ २४ ॥ सुखंवायदिवाचान्यद्यत्किंचित्क्रियतेपरे ॥ तत्कृतंहिपुनःपश्चात्सर्वमात्मनिसंभवेत् ॥ २५ ॥ नक्लेशेनविनाद्रव्यमर्थहीनेकुतःक्रियाः ॥ क्रियाहीनेकुतोधर्मोधर्महीनेकुतःसुखम् ॥ ॥ २६ ॥ सुखंहिसर्वैराकांक्ष्यंतच्चधर्मसमुद्भवम् ॥ तस्माद्धर्मोत्रकर्तव्यश्चातुर्वर्ण्येनयत्नतः ॥ २७ ॥ न्यायागतेनद्रव्येणकर्तव्यंपारलौकिकम् ॥ दानंचविधिनादेयंकालेपात्रेचभावतः ॥ २८ ॥ विधिहीनंतथाऽपात्रेयोददातिप्रतिग्रहम् ॥ नकेवलंहितद्यातिशेषंतस्यचनश्यति ॥ २९ ॥ व्यसनार्थेकुटुंबार्थेयदृणार्थेचदीयते ॥ तदक्षयंभवेदत्रपरत्रचनसंशयः ॥३०॥ मातापितृविहीनंयोमौंजीपाणिग्रहादिभिः ॥ संस्कारयेन्निजैरर्थैस्तस्यश्रेयस्त्वनंतकम् ॥ ॥ ३१ ॥ अग्निहोत्रैर्नतच्छ्रेयोनाग्निष्टोमादिभिर्मखैः ॥ यच्छ्रेयःप्राप्यतेमर्त्यैर्द्विजेचैकेप्रतिष्ठिते ॥ ३२ ॥ योह्यनाथस्यविप्रस्यपाणिंग्राहयतेकृती ॥ इहसौख्यमवाप्नोतिसोक्षयंस्वर्गमाप्नुयात् ॥ ३३ ॥ पितृगेहेतुयाकन्यारजःपश्येदसंस्कृता ॥ भ्रूणहातत्पिताज्ञेयोवृषलीसापिकन्यका ॥ ३४ ॥ यस्तांपरिणयेन्मोहात्सभवेद्वृषलीपतिः ॥ तेनसंभाषणंत्याज्यमपाङ्क्तेयेनसर्वदा ॥ ३५ ॥

विज्ञायदोषमुभयोःकन्यायाश्चवरस्यच ॥ संबंधंरचयेत्पश्चादन्यथादोषभाक्पिता ॥ ३६ ॥ स्त्रियःपवित्राःसततंनैतादुष्यंतिकेनचित् ॥ मासिमासिरजस्तासांदुष्कृतान्यपकर्षति ॥ ३७ ॥ पूर्वंस्त्रियःसुरैर्भुक्ताःसोमगंधर्ववह्निभिः ॥ भुंजतेमानुषाःपश्चान्नैतादुष्यंतिकेनचित् ॥ ३८ ॥ स्त्रीणांशौचंददौसोमःपावकःसर्वमेध्यताम् ॥ कल्याणवाणींगंधर्वास्तेनमेध्याःसदास्त्रियः ॥ ३९ ॥ कन्यांभुंक्तेरजःकालेऽग्निःशशीलोमदर्शने ॥ स्तनोद्भेदेपुगंधर्वास्तत्प्रागेवप्रदीयते ॥४०॥ दृश्यरोमात्वपत्यघ्नीकुलघ्न्युद्गतयौवना ॥ पितृघ्न्याविष्कृतरजास्ततस्ताःपरिवर्जयेत् ॥४१॥ कन्यादानफलप्रेप्सुस्तस्माद्दद्यादनग्निकाम् ॥ अन्यथानफलंदातुःप्रतिग्राहीपतेदधः ॥४२॥ कन्यामभुक्तांसोमाद्यैर्ददद्दानफलंलभेत् ॥ देवभुक्तांददद्दातानस्वर्गमधिगच्छति ॥४३॥ शयनासनयानानिकुणपंस्त्रीमुखंकुशाः॥ यज्ञपात्राणिसर्वाणिनदुष्यंतिबुधाःक्वचित् ॥ ४४ ॥ वत्सःप्रस्रवणेमेध्यःशकुनिःफलपातने ॥ नार्योरतिप्रयोगेषुश्वामृगग्रहणेशुचिः ॥ ४५ ॥ अजाश्वयोर्मुखंमेध्यंगावोमेध्यास्तुपृष्ठतः ॥ पादतोब्राह्मणामेध्याःस्त्रियोमेध्यास्तुसर्वतः ॥ ४६ ॥ बलात्कारोपभुक्तावाचोरहस्तगतापिवा ॥ नत्याज्यादयितानारीनास्यास्त्यागोविधीयते ॥ ४७ ॥ आम्लेनताम्रशुद्धिःस्याच्छुद्धिःकांस्यस्यभस्मना ॥ संशुद्धीरजसानार्यास्तटिन्यावेगतःशुचिः ॥४८॥ मनसापिहियानेहचिंतयेत्पुरुषांतरम् ॥ सोमयासहसौख्यानिभुंक्तेचात्रापिकीर्तिभाक् ॥४९॥ पितापितामहोभ्रातासकुल

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जननीतथा ॥ कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ॥ ५० ॥ अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ ॥ स्वयंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरम् ॥ ॥ ५१ ॥ हृताधिकारांमलिनांपिंडमात्रोपजीविनीम् ॥ परिभूतामधःशय्यांवासयेद्व्यभिचारिणीम् ॥ ५२ ॥ व्यभिचारादृतौशुद्धिर्गर्भेत्यागोविधीयते ॥ गर्भभर्तृवधादौतुमहत्यपिचकल्मषे ॥ ५३ ॥ शूद्रस्यभार्याशूद्रैवसाचस्वाचविशःस्मृते ॥ तेचस्वाचैवराज्ञस्तुताश्चस्वाचाग्रजन्मनः ॥ ५४ ॥ आरोप्यशूद्रांशयनेविप्रोगच्छेदधोगतिम् ॥ उत्पाद्यपुत्रंशूद्रायांब्राह्मण्यादेवहीयते ॥ ५५ ॥ दैवपित्र्यातिथेयानितत्प्रधानानियस्यतु ॥ देवाद्यास्तन्नचाश्नंतिसचस्वर्गंनगच्छति ॥ ५६ ॥ जामयोयानिगेहानिशपंत्यप्रतिपूजिताः ॥ कृत्याभिर्निहतानीवनश्येयुस्तान्यसंशयम् ॥ ५७ ॥ तदभ्यर्च्याः सुवासिन्योभूषणाच्छादनाशनैः ॥ भूतिकामैर्नरैर्नित्यंसत्कारेपूत्सवेषुच ॥५८॥ यत्रनार्यःप्रमुदिताभूषणाच्छादनाशनैः ॥ रमंतेदेवतास्तत्रस्युस्तत्रसफलाःक्रियाः ॥ ५९ ॥ यत्रतुष्यतिभर्त्रास्त्रीस्त्रियाभर्ताचतुष्यति ॥ तत्रवेश्मनिकल्याणंसंपद्येतपदेपदे ॥६०॥ अहुतंचहुतंचैवप्रहुतंप्राशितंतथा ॥ ब्राह्मंहुतंपंचमंचपंचयज्ञाइमेशुभाः ॥ ६१ ॥ जपोऽहुतोहुतोहोमःप्रहुतोभौतिकोबलिः ॥ प्राशितंपितृसंतृप्तिर्हुतंब्राह्मंद्विजार्चनम् ॥ ६२ ॥ पंचयज्ञानिमान्कुर्वन्ब्राह्मणोनावसीदति ॥ एतेषामननुष्ठानात्पंचसूनाअवाप्नुयात् ॥ ६३ ॥ ब्राह्मणंकुशलंपृच्छेद्बाहुजातमनामयम् ॥ वैश्यंसुखंसमागम्यशूद्रंसंतोषमेवच ॥ ६४ ॥ जातमात्रःशिशुस्तावद्यावदष्टौसमाःस्मृताः ॥ भक्ष्याभक्ष्येषुनोदुष्येद्यावन्नैवोपनीयते ॥ ६५ ॥ भरणंपोष्यवर्गस्यदृष्टादृष्टफलोदयम् ॥ प्रत्यवायोह्यभरणेभर्तव्यर त्प्रयत्नतः ॥ ६६ ॥ मातापितागुरुपत्नीःत्वपत्यानिसमाश्रिताः ॥ अभ्यागतोतिथिश्चाग्निःपोष्यवर्गाअमीनव ॥ ६७ ॥ सजीवतिपुमान्योऽत्रबहुभिश्चोपजीव्यते ॥ जीवन्मृतोथविज्ञेयःपुरुषःस्वोदरंभरिः ॥ ६८ ॥ दीनानाथविशिष्टेभ्योदातव्यंभूतिकाम्यया ॥ अदत्तदानाजायंतेपरभाग्योपजीविनः ॥६९॥ विभागशीलसंयुक्तोदयावांश्चक्षमायुतः ॥ देवतातिथिभक्तस्तुगृहस्थोधार्मिकःस्मृतः ॥७०॥ शर्वरीमध्ययामौयौहुतशेषंचयद्धविः ॥ तत्रस्वपंस्तदश्नंश्चब्राह्मणोनावसीदति ॥ ७१ ॥

नवैतानिगृहस्थस्यकार्याण्यभ्यागतेसदा ॥ सुधाव्ययानियत्सौम्यंवाक्यंचक्षुर्मनोमुखम् ॥ ७२ ॥ अभ्युत्थानमिहायातसस्नेहंपूर्वभाषणम् ॥ उपासनमनुव्रज्यागृहस्थोन्नतिहेतवे ॥ ७३ ॥ तथेषद्व्ययुक्तानिकार्याण्येतानिवैनव ॥ आसनंपादशौचंचयथाशक्त्याशनंक्षितिः ॥ ७४ ॥ शय्यातृणजलाभ्यंगदीपागार्हस्थ्यसिद्धिदाः ॥ तथानवविकर्माणित्याज्यानिगृहमेधिनाम् ॥७५॥ पैशुन्यंपरदाराश्चद्रोहःक्रोधानृताप्रियम् ॥ द्वेषोदंभश्चमायाचस्वर्गमार्गार्गलानिहि ॥ ७६ ॥ नवावश्यककर्माणिकार्याणिप्रतिवासरम् ॥ स्नानंसंध्याजपोहोमःस्वाध्यायोदेवतार्चनम् ॥ ७७ ॥ वैश्वदेवंतथातिथ्यंनवमंपितृतर्पणम् ॥ नवगोप्यानियान्यत्रमुनेतानिनिशामय ॥ ७८ ॥ जन्मर्क्षंमैथुनंमंत्रोगृहच्छिद्रंचवंचनम् ॥ आयुर्धनापमानंस्त्रीनप्रकाश्यानिसर्वथा ॥ ७९ ॥ नवैतानिप्रकाश्यानिरहःपापमकुत्सितम् ॥ प्रायोग्यमृणशुद्धिश्चसान्वयःक्रयविक्रयौ ॥ कन्यादानंगुणोत्कर्षोनान्यत्केनापिकुत्रचित् ॥ ८० ॥ पात्रमित्रविनीतेषुदीनानाथोपकारिषु ॥ मातापितृगुरुष्वेतन्नवकंदत्तमक्षयम् ॥ ८१ ॥ निष्फलंनवसूत्सृष्टंचाटचारणतस्करे ॥ कुवैद्येकितवेधूर्तेशठेमल्लेचवंदिनि ॥ ८२ ॥ आपत्स्वपिनदेयानिनववस्तूनिसर्वथा ॥ अन्वयेसतिसर्वस्वंदारांश्चशरणागतान् ॥ ८३ ॥ न्यासाधीकुलवृत्तिंचनिक्षेपंस्त्रीधनंसुतम् ॥ योददातिसमूढात्माप्रायश्चित्तैर्विशुध्यति ॥ ८४ ॥ एतन्नवानांनवकंज्ञात्वाप्रियमवाप्नुयात् ॥ अन्यच्चनवकंवच्मिसर्वेषांस्वर्गमार्गदम् ॥ ८५ ॥

सत्यंशौचमहिंसाचक्षांतिर्दानंदयादमः ॥ अस्तेयमिंद्रियाकोचःसर्वेषांधर्मसाधनम् ॥ ८६ ॥ अभ्यस्यनवतिंचैतांस्वर्गमार्गप्रदीपिकाम् ॥ सतामभिमतांपुण्यांगृहस्थोनावसीदति ॥ ८७ ॥ जिह्वाभार्यासुतोभ्रातामित्रदाससमाश्रिताः ॥ यस्यैतेविनयाढ्याश्चतस्यसर्वत्रगौरवम् ॥ ८८ ॥ पानंदुर्जनसंसर्गःपत्याचविरहोटनम् ॥ स्वप्नोन्यगृहवासश्चनारीणांदूषणानिषट् ॥८९॥ समर्घंधान्यमुद्धृत्यमहर्घंयःप्रयच्छति ॥ सहिवार्धुषिकोनामतस्यान्नंनैवभक्षयेत् ॥ ॥९०॥ अग्रेमाहिषिकंदृष्ट्वामध्येचवृषलीपतिम् ॥ अंतेवार्धुषिकंचैवनिराशाःपितरोगताः ॥ ९१ ॥ महिषीत्युच्यतेनारीयाचस्याद्व्यभिचारिणी ॥ तांदुष्टांकामयेद्यस्तुसवैमाहिषिकःस्मृतः ॥९२॥ स्ववृषंयापरित्यज्यपरवृषेवृषायते ॥ वृषलीसाहिविज्ञेयानशूद्रीवृषलीभवेत् ॥ ९३ ॥ यावदुष्णंभवत्यन्नंयावन्मौनेनभुज्यते ॥ तावदश्नंतिपितरोयावन्नोक्ताहविर्गुणाः ॥ ९४ ॥ विद्याविनयसंपन्नेश्रोत्रियेगृहमागते ॥ क्रीडंत्योषधयःसर्वायास्यामःपरमांगतिम् ॥ ९५॥ भ्रष्टशौचव्रताचारेविप्रेवेदविवर्जिते ॥ रोदित्यन्नंदीयमानंकिंमयादुष्कृतंकृतम् ॥ ९६ ॥ यस्यकोष्ठगतंचान्नंवेदाभ्यासेनजीर्यति ॥ सतारयतिदातारंदशपूर्वान्दशापरान् ॥ ९७ ॥ नस्त्रीणांवपनंकार्यंनचगाःसमनुव्रजेत् ॥ नचरात्रौवसेद्गोष्ठेनकुर्याद्वैदिकींश्रुतिम् ॥ ९८ ॥ सर्वान्केशान्समुद्धृत्यच्छेदयेदंगुलद्वयम् ॥ एवमेवतुनारीणांशिरसोमुंडनंभवेत् ॥ ९९ ॥ राजावाराजपुत्रोवाब्राह्मणोवाबहुश्रुतः ॥ अकारयित्वावपनंप्रायश्चित्तंविनिर्दिशेत् ॥ ॥ १०० ॥ केशानांरक्षणार्थायद्विगुणंव्रतमादिशेत् ॥ द्विगुणादक्षिणादेयाब्राह्मणेवेदपारगे ॥ १ ॥ योऽगृहीत्वाविवाहाग्निंगृहस्थइतिमन्यते ॥ अन्नंतस्यनभोक्तव्यंवृथापाकोहिसस्मृतः ॥ २ ॥ दाराग्निहोत्रदीक्षांचकुरुतेयोऽग्रजेस्थिते ॥ परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः ॥ ३ ॥

परिवित्तिःपरिवेत्तायया चपरिविद्यते ॥ सर्वेतेनरकंयांतिदातृयाजकपंचमाः ॥ ४ ॥ क्लीबेदेशांतरस्थेचमूकेप्रव्रजितेजडे ॥ कुब्जेखर्वेचपतितेनदोषःपरिवेदने ॥ ५ ॥ वेदाक्षराणियावंतिनियुंज्यादर्थकारणे ॥ तावतीर्वैभ्रूणहत्यावेदविक्रयकृल्लभेत् ॥ ६ ॥ यस्तुप्रव्रजितोभूत्वासेवतेमैथुनंपुनः ॥ षष्टिर्वर्षसहस्राणिविष्ठायांजायतेकृमिः ॥ ७ ॥ शूद्रान्नंशूद्रसंपर्कःशूद्रेणचसहासनम् ॥ शूद्राद्विद्यागमःकश्चिज्ज्वलंतमपिपातयेत् ॥ ८ ॥ शूद्रादाहृत्यनिर्वापंयेपचंत्यबुधाद्विजाः ॥ तेयांतिनरकंघोरंब्रह्मतेजोविवर्जिताः ॥ ९ ॥ माक्षिकंफाणितंशाकंगोरसंलवणंघृतम् ॥ हस्तदत्तानिभुक्तानिदिनमेकमभोजनम् ॥ ॥ ११० ॥ हस्तदत्ताश्चयेस्नेहालवणंव्यंजनानिच ॥ दातारंनोपतिष्ठंतेभोक्ताभुंक्तेतुकिल्बिषम् ॥ ११ ॥ आयसेनैवपात्रेणयदन्नमुपदीयते ॥ भोक्तातद्विट्समंभुंक्तेदाताचनरकंव्रजेत् ॥ १२ ॥ अंगुल्यादंतकाष्ठंचप्रत्यक्षंलवणंचयत् ॥ मृत्तिकाभक्षणंयच्चसमंगोमांसभक्षणैः ॥ १३ ॥ पानीयंपायसंभैक्षंघृतंलवणमेवच ॥ हस्तदत्तंनगृह्णीयात्तुल्यंगोमांसभक्षणैः ॥ १४ ॥ अग्रतोनिवसेन्मूर्खोदूरतश्चगुणान्वितः ॥ गुणान्वितायदातव्यंनास्तिमूर्खेव्यतिक्रमः ॥१५॥ ब्राह्मणातिक्रमोनास्तिविप्रेवेदविवर्जिते ॥ ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयते ॥ १६ ॥ सन्निकृष्टमधीयानंब्राह्मणंयोव्यतिक्रमेत् ॥ भोजनेचैवदानेचदहेदासप्तमंकुलम् ॥ १७ ॥ गोरक्षकान्वाणिजकांस्तथाकारुकुशीलवान् ॥ प्रेष्यान्वार्धुषिकांश्चैवविप्राञ्शूद्रवदाचरेत् ॥१८॥ देवद्रव्यविभागेनब्रह्मस्वहरणेनच ॥ कुलान्याशुविनश्यंतिब्राह्मणातिक्रमेणच ॥ १९ ॥ मादेहीतिचयोब्रूयाद्गवाग्निब्राह्मणेषुच ॥ तिर्यग्योनिशतंगत्वाचांडालेष्वभिजायते ॥ १२० ॥ वाचायच्चप्रतिज्ञातंकर्मणानोपपादितम् ॥ ऋणंतद्धर्मसंयुक्तमिहलोकेपरत्रच ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विघसाशीभवेन्नित्यंनित्यंचामृतभोजनः ॥ यज्ञशेषोऽमृतंभुक्तशेषंतुविघसंविदुः ॥ २२ ॥ सव्यादंसात्परिभ्रष्टेनाभिदेशेव्यवस्थिते ॥ वस्त्रेसएकवासास्तं दैवेपित्र्येचवर्जयेत् ॥ २३ ॥ यदेवतर्पयत्यद्भिःपितॄन्स्नात्वाद्विजोत्तमः ॥ तेनैवसर्वमाप्नोतिपितृयज्ञक्रियाफलम् ॥ २४ ॥ हस्तौप्रक्षाल्यगंडूषंयःपिबेद्भो जनोत्तरम् ॥ दैवंपित्र्यंतथात्मानंत्रयंसउपघातयेत् ॥ २५ ॥ गणान्नंगणिकान्नंचयदन्नंग्रामयाजके ॥ स्त्रीणांप्रथमगर्भेषुभुक्त्वाचांद्रायणंचरेत् ॥ २६ ॥ पक्षेवायदिवामासेयस्यगेहेत्तिनद्विजः ॥ भुक्त्वादुरात्मनस्तस्यचरेच्चांद्रायणव्रतम् ॥ २७ ॥ सत्रिणांदीक्षितानांचयतीनांब्रह्मचारिणाम् ॥ एतेषांसूतकंना स्तिऋत्विजांकर्मकुर्वताम् ॥ २८ ॥ अजीर्णेऽभ्युदितेवांतेश्मश्रुकर्मणिमैथुने ॥ दुःस्वप्नेदुर्जनस्पर्शेस्नानमेवविधीयते ॥ २९ ॥ चैत्यवृक्षंचितिंयूपं शिवनिर्माल्यभोजिनम् ॥ वेदविक्रयिणंस्पृष्ट्वासचैलोजलमाविशेत् ॥ १३० ॥ अग्न्यगारेगवांगोष्ठेदेवब्राह्मणसन्निधौ ॥ स्वाध्यायेभोजनेपानेपादुकेवै विसर्जयेत् ॥ ३१ ॥ खलक्षेत्रगतंधान्यंकूपवापीषुयज्जलम् ॥ अग्राह्यादपितद्ग्राह्यंयच्चगोष्ठगतंपयः ॥ ३२ ॥ यद्वेष्टितशिराभुंक्तेयोभुंक्तेदक्षिणामुखः ॥ सोपानत्कश्चयद्भुंक्तेतद्वैरक्षांसिभुंजते ॥ ३३ ॥ यातुधानाःपिशाचाश्चराक्षसाःक्रूरकर्मिणः ॥ हरंतिरसमन्नस्यमंडलेनविवर्जितम् ॥३४॥ ब्रह्माद्याश्चसुराः सर्वेवसिष्ठाद्यामहर्षयः ॥ मंडलंचोपजीवंतिततःकुर्वीतमंडलम् ॥ ३५ ॥ ब्राह्मणेचतुरस्रंस्यात्त्र्यस्रंवैबाहुजन्मनः ॥ वर्तुलंचविशःप्रोक्तंशूद्रस्याभ्युक्षणं स्मृतम् ॥ ३६ ॥ नोत्संगेभोजनंकृत्वानोपाणौनैवकर्पटे ॥ नासनेनचशय्यायांभुंजीतनमलार्दितः ॥ ३७ ॥ धर्मशास्त्ररथारूढावेदखड्गधराद्विजाः ॥ क्रीडार्थमपियद्ब्रूयुःसधर्मःपरमःस्मृतः ॥ ३८ ॥ रात्रौधानादधियुतंधर्मकामोनभक्षयेत् ॥ अश्नतोधर्महानिःस्याद्व्याधिभिश्चोपपीड्यते ॥ ३९ ॥ फाणितंगोरसंतोयंलवणंमधुकांजिकम् ॥ हस्तेनब्राह्मणोदत्त्वाकृच्छ्रंचांद्रायणंचरेत् ॥ १४० ॥ गंधाभरणमाल्यानियःप्रयच्छतिधर्मवित् ॥ ससुगंधिः सदाहृष्टोयत्रयत्रोपजायते ॥ ४१ ॥ नीलीरक्तंतुयद्वस्त्रंदूरतःपरिवर्जयेत् ॥ स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति ॥ ४२ ॥

पालनाद्विक्रयाच्चैवतद्वृत्तेरुपजीवनात् ॥ अपवित्रोभवेद्विप्रस्त्रिभिःकृच्छ्रैर्विशुध्यति ॥ ४३ ॥ स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणम् ॥ वृथातस्यम हायज्ञानीलीवासोबिभर्तियः ॥ ४४ ॥ नीलीरक्तंयदावस्त्रंविप्रःस्वांगेषुधारयेत् ॥ तंतुसंततिसंख्याकेनरकेसवसेद्ध्रुवम् ॥ ४५ ॥ अहोरात्रोषितोभूत्वापं चगव्येनशुध्यति ॥ ४६ ॥ नीलीरक्तेनवस्त्रेणयदन्नमुपकल्पयेत् ॥ भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत् ॥ ४७ ॥ अमृतंब्राह्मणस्यान्नंक्षत्रियान्नंपयः स्मृतम् ॥ वैश्यस्यचान्नमेवान्नंशूद्रस्यरुधिरंस्मृतम् ॥ ४८ ॥ वैश्वदेवेनहोमेनदेवताभ्यर्चनैर्जपैः ॥ अमृतंतेनविप्रान्नमृग्यजुःसामसंस्कृतम् ॥ ४९ ॥ व्यवहारानुरूपेणन्यायेनतुयदर्जनम् ॥ क्षत्रियस्यपयस्तेनप्रजापालनतोभवेत् ॥ १५० ॥ प्रहरानद्धवाहाद्यदन्नमुत्पाद्ययच्छति ॥ सीतायज्ञविधानेनवै श्यान्नंतेनसंस्कृतम् ॥ ५१ ॥ अज्ञानतिमिरांधस्यमद्यपानरतस्यच ॥ रुधिरंतेनशूद्रान्नंवेदमंत्रविवर्जितम् ॥ ५२ ॥ नवृथाशपथंकुर्यात्स्वल्पेप्यर्थेनरो त्तमः ॥ वृथाहिशपथंकुर्वन्प्रेत्यचेहविनश्यति ॥ ५३ ॥ कामिनीषुविवाहेचगवांभुक्तेधनक्षये ॥ ब्राह्मणाभ्युपपत्तौचशपथैर्नास्तिपातकम् ॥५४॥ सत्ये नशापयेद्विप्रंक्षत्रियंवाहनायुधैः ॥ गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः ॥५५॥ अग्निंवाहारयेदेनमप्सुचैनंनिमज्जयेत् ॥ स्पर्शयेत्पुत्रदाराणांशिरांस्येनं चवापृथक् ॥ ५६ ॥ नयमंयममित्याहुरात्मावैयमउच्यते ॥ आत्मासंयमितोयेनतंयमःकिंकरिष्यति ॥ ५७ ॥ ननिस्त्रिंशस्तथातीक्ष्णःफणीवादुरति क्रमः ॥ रिपुर्वानित्यसंक्रुद्धोयथात्मादुरधिष्ठितः ॥ ५८ ॥ एकःक्षमावतांदोषोनद्वितीयःकथंचन ॥ यदेनंक्षमयायुक्तमशक्तंमन्यतेजनः ॥ ५९ ॥ नश ब्दशास्त्राभिरतस्यमोक्षोनचैवरम्यावसथप्रियस्य ॥ नभोजनाच्छादनतत्परस्यनलोकवित्तग्रहणेरतस्य ॥ १६० ॥ एकांतशीलस्यसदैवतस्यसर्वेंद्रियप्री तिनिवर्तकस्य ॥ स्वाध्याययोगेगतमानसस्यमोक्षोध्रुवंनित्यमहिंसकस्य ॥ ६१ ॥ क्वैकांतशीलत्वमिहास्तिपुंसःक्वचेंद्रियप्रीतिनिवृत्तिरस्ति ॥ क्वयो गयुक्तिःक्वचदैवतेज्याकाश्यांविनैभिःसहजेनमुक्तिः ॥ ६२ ॥ विश्वेशसंशीलनमेवयोगस्तपश्चविश्वेशपुरीनिवासः ॥ व्रतानिदानंनियमायमाश्चस्नानं द्युनद्यांयदुदग्वहायाम् ॥६३॥ ॥ स्कंदउवाच ॥ ॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोतिथिप्रियः ॥ श्राद्धकृत्सत्यवादीचगृहस्थोपीहमुच्यते ॥६४॥

दीनांधकृपणार्थिभ्योदत्त्वान्नानिविशेषतः ॥ कृत्वागार्ह्याणिकर्माणिगृहस्थःश्रेयआप्नुयात् ॥ ६५ ॥ इत्थमाचरतांपुंसांकाशीनाथःप्रसीदति ॥ काशी नाथप्रसादेनकाशीप्राप्तिस्तुमोक्षकृत् ॥ ६६ ॥ ससर्वतीर्थसुस्नातःससर्वक्रतुदीक्षितः ॥ सदत्तसर्वदानस्तुकाशीयेननिषेविता ॥ १६७ ॥ इतिश्रीस्कांदे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेगृहस्थधर्माख्यानंनामचत्वारिंशोध्यायः ॥४०॥ ॥छ॥ ॥ स्कंदउवाच ॥ ॥ उषित्वै वंगृहेविप्रोद्वितीयादाश्रमात्परम् ॥ वलीपलितसंयुक्तस्तृतीयाश्रममाविशेत् ॥ १ ॥ अपत्यापत्यमालोक्यग्राम्याहारान्विसृज्यच ॥ पत्नींपुत्रेषुसंयज्य पत्न्यावावनमाविशेत् ॥ २ ॥ वसानश्चर्मचीराणिसाग्निर्मुन्यन्नवर्तनः ॥ जटीसायंप्रगेस्नायीश्मश्रुलोनखलोमभृत् ॥३॥ शाकमूलफलैर्वापिपंचयज्ञान्नहा पयेत् ॥ अम्मूलफलभिक्षाभिरर्चयेद्भिक्षुकातिथीन् ॥ ४ ॥ अनादाताचदाताचदांतःस्वाध्यायतत्परः ॥ वैतानिकंचजुहुयादग्निहोत्रंयथाविधि ॥ ५ ॥ मुन्यन्नैःस्वयमानीतैःपुरोडाशांश्चनिर्वपेत् ॥ स्वयंकृतंचलवणंखादेत्स्नेहंफलोद्भवम् ॥ ६ ॥ वर्जयेच्छेलुशिग्रूचकवकंपललंमधु ॥ मुन्यन्नमाश्विनेमा सित्यजेद्यत्पूर्वसंचितम् ॥७॥ ग्राम्याणिफलमूलानिफालजान्नंचसंत्यजेत् ॥ दंतोलूखलकोवास्यादश्मकुट्टोथवाभवेत् ॥ ८ ॥ सद्यःप्रक्षालकोवास्यादथ वामासमंचयी ॥ त्रिषड्द्वादशमासान्नफलमूलादिसंग्रही ॥९॥ नक्ताश्येकांतराशीवाषष्ठकालाशनोपिवा ॥ चांद्रायणव्रतीवास्यात्पक्षभुग्वाथमासभुक् ॥ ॥१०॥ वैखानसमतस्थस्तुफलमूलाशनोपिवा ॥ तपसाशोषयेद्देहंपितॄन्देवांश्चतर्पयेत् ॥ ११ ॥ अग्निमात्मनिचाधायविचरेदनिकेतनः ॥ भिक्षयेत्प्राण यात्रार्थंतापसान्वनवासिनः ॥ १२ ॥ ग्रामादानीयवाश्नीयादष्टौग्रासान्वसन्वने ॥ इत्थंवनाश्रमीविप्रोब्रह्मलोकेमहीयते ॥ १३ ॥

अतिवाह्यायुषोभागंतृतीयमितिकानने ॥ आयुषस्तुतुरीयांशेत्यक्त्वासंगान्परिव्रजेत् ॥ १४ ॥ ऋणत्रयमसंशोध्यत्वनुत्पाद्यसुतानपि ॥ तथायज्ञाननि ष्ट्वाचमोक्षमिच्छन्व्रजत्यधः ॥ १५ ॥ मनागपिनभूतानांयस्मादुत्पद्यतेभयम् ॥ सर्वभूतानितस्येहप्रयच्छंत्यभयंसदा ॥ १६ ॥ एकएवचरेन्नित्यमनग्नि रनिकेतनः ॥ सिद्ध्यर्थमसहायःस्याद्वाममन्नार्थमाश्रयेत् ॥१७॥ जीवितंमरणंवाथनाभिकांक्षेत्क्वचिद्यतिः ॥ कालमेवप्रतीक्षेतनिर्देशंभृतकोयथा॥१८॥ सर्वत्रममताशून्यःसर्वत्रसमतायुतः ॥ वृक्षमूलनिकेतश्चमुमुक्षुरिहशस्यते ॥१९॥ ध्यानंशौचंतथाभिक्षानित्यमेकांतशीलता ॥ यतेश्चत्वारिकर्माणिपंचमं नोपपद्यते ॥ २० ॥ वार्षिकांश्चतुरोमासान्विहरेन्नयतिःक्वचित् ॥ बीजांकुराणांजंतूनांहिंसातत्रयतोभवेत् ॥ २१ ॥ गच्छेत्परिहरन्जंतून्पिबेत्कंवस्त्रशो धितम् ॥ वाचंवदेदनुद्वेगांनक्रुध्येत्केनचित्क्वचित् ॥ २२ ॥ चरेदात्मसहायश्चनिरपेक्षोनिराश्रयः ॥ नित्यमध्यात्मनिरतोनीचकेशनखोवशी ॥ २३ ॥ कुसुंभवासादंडाढ्योभिक्षाशीख्यातिवर्जितः ॥ अलाबुदारुमृद्वेणुपात्रंशस्तंनपंचमम् ॥ २४ ॥ नग्राह्यंतैजसंपात्रंभिक्षुकेणकदाचन ॥ वराटकेसंगृहीते तत्रतत्रदिनेदिने ॥२५॥ गोसहस्रवधंपापंश्रुतिरेषासनातनी ॥ हृदिसस्नेहभावेनचेद्रक्षेत्स्त्रियमेकदा ॥ २६ ॥ कोटिद्वयंब्रह्मकल्पंकुंभीपाकीनसंशयः ॥ एककालंचरेद्भैक्षंनकुर्यात्तत्रविस्तरम् ॥ २७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विधूमेसन्नमुसलेव्यंगारेभुक्तवज्जने ॥ वृत्तेशरावसंपातेभिक्षांनित्यंचरेद्यतिः ॥ २८ ॥ अल्पाहारोरहःस्थायीत्विंद्रियार्थेष्वलोलुपः ॥ रागद्वेषविनिर्मुक्तो भिक्षुर्मोक्षायकल्पते ॥ २९ ॥ आश्रमेतुयतिर्यस्यमुहूर्तमपिविश्रमेत् ॥ किंतस्यानेकतंत्रेणकृतकृत्यःसजायते ॥ ३० ॥ संचितंयद्गृहस्थेनपापमामरणां तिकम् ॥ निर्धक्ष्यतिहितत्सर्वमेकरात्रोपितोयतिः ॥३१॥ दृष्ट्वाजराभिभवनमसह्यंरोगपीडितम् ॥ देहत्यागंपुनर्गर्भंगर्भक्लेशंचदारुणम् ॥३२॥ नानायो निनिवासंचवियोगंचप्रियैःसह ॥ अप्रियैःसहसंयोगमधर्माद्दुःखसंभवम् ॥ ३३ ॥ पुनर्निरयसंवासंनानानरकयातनाः ॥ कर्मदोषसमुद्भूतानृणांगतिरने कधा ॥ ३४ ॥ देहेष्वनित्यतांदृष्ट्वानित्यतांपरमात्मनः ॥ कुर्वीतमुक्तयेयत्नंयत्रयत्राश्रमेरतः ॥ ३५ ॥ करपात्रीतिविख्याताभिक्षापात्रविवर्जिता ॥ तेषां शतगुणंपुण्यंभवत्येवदिनेदिने ॥ ३६ ॥ आश्रमांश्चतुरस्त्वेवंक्रमादासेव्यपंडितः ॥ निर्द्वंद्वस्त्यक्तसंगश्चब्रह्मभूयायकल्पते ॥ ३७ ॥ असंयतःकुबुद्धी नामात्मावंधायकल्पते ॥ धीमद्भिःसंयतःसोपिपदंदद्यादनामयम् ॥३८॥ श्रुतिस्मृतिपुराणंचविद्योपनिषदस्तथा ॥ श्लोकाःसूत्राणिभाष्याणियच्चान्यद्वा ङ्मयंक्वचित् ॥ ३९ ॥ वेदानुवचनंज्ञात्वाब्रह्मचर्यंतपोदमः ॥ श्रद्धोपवासःस्वातंत्र्यमात्मनोज्ञानहेतवः ॥ ४० ॥ सहिसर्वैर्विजिज्ञास्यआत्मैवाश्रमव र्तिभिः ॥ श्रोतव्यस्त्वथमंतव्योद्रष्टव्यश्चप्रयत्नतः ॥४१॥ आत्मज्ञानेनमुक्तिःस्यात्तच्चयोगादृतेनहि ॥ सचयोगश्चिरंकालमभ्यासादेवसिध्यति ॥ ४२ ॥

नारण्यसंश्रयाद्यागोननानाग्रंथचिंतनात् ॥ नदानैर्नव्रतैर्वापिनतपोभिर्नवामखैः ॥ ४३ ॥ नचपद्मासनाद्योगोनवाघ्राणाग्रवीक्षणात् ॥ नशौचेननमौने ननमंत्राराधनैरपि ॥ ४४ ॥ अभियोगात्सदाभ्यासात्तत्रैवचविनिश्चयात् ॥ पुनःपुनरनिर्वेदात्सिध्येद्योगोनचान्यथा ॥ ४५ ॥ आत्मक्रीडस्यसततं सदात्ममिथुनस्यच ॥ आत्मन्येवसुतृप्तस्ययोगसिद्धिर्नदूरतः ॥ ४६ ॥ अत्रात्मव्यतिरेकेणद्वितीयंयोनपश्यति ॥ आत्मारामःसयोगींद्रोब्रह्मीभूतोभवे दिह ॥ ४७ ॥ संयोगस्त्वात्ममनसोर्योगइत्युच्यतेबुधैः ॥ प्राणापानसमायोगोयोगइत्यपिकैश्चन ॥ ४८ ॥ विषयेंद्रियसंयोगोयोगइत्यप्यपंडितैः ॥ विषयासक्तचित्तानांज्ञानंमोक्षश्चदूरतः ॥ ४९ ॥ दुर्निवारामनोवृत्तिर्यावत्साननिवर्तते ॥ किंवदंत्यपियोगस्यतावन्नदायसीकुतः ॥ ५० ॥ वृत्तिहीनंमनः कृत्वाक्षेत्रज्ञेपरमात्मनि ॥ एकीकृत्यविमुच्येतयोगयुक्तःसउच्यते ॥ ५१ ॥ बाह्यमुखानिसर्वाणिकृत्वाखान्यंतराणिवै ॥ मनस्येवेंद्रियग्रामंमनश्चात्म नियोजयेत् ॥ ५२ ॥ सर्वभावविनिर्मुक्तंक्षेत्रज्ञंब्रह्मणिन्यसेत् ॥ एतद्ध्यानंचयोगश्चशेषोन्याग्रंथविस्तरः ॥ ५३ ॥ यन्नास्तिसर्वलोकेषुतदस्तीति विरुध्यते ॥ कथ्यमानंतदन्यस्यहृदयेनावतिष्ठते ॥ ५४ ॥

स्वसंवेद्यंहितद्ब्रह्मकुमारीस्त्रीसुखंयथा ॥ अयोगीनैवतद्वेत्तिजात्यंधइववर्तिकाम् ॥ ५५ ॥ नित्याभ्यसनशीलस्यस्वसंवेद्यंहितद्भवेत् ॥ तत्सूक्ष्मत्वादनिर्दे श्यंपरंब्रह्मसनातनम् ॥ ५६ ॥ क्षणमप्येकमुदकंयथानस्थिरतामियात् ॥ वाताहतंयथाचित्तंतस्मात्तस्यनविश्वसेत् ॥ ५७ ॥ अतोऽनिलंनिरुंधीतचि त्तस्यस्थैर्यहेतवे ॥ मरुन्निरोधनार्थायषडंगंयोगमभ्यसेत् ॥ ५८ ॥ आसनंप्राणसंरोधःप्रत्याहारश्चधारणा ॥ ध्यानंसमाधिरेतानियोगांगानिभवंति षट् ॥ ५९ ॥ आसनानीहतावंतियावंत्योजीवयोनयः ॥ सिद्धासनमिदंप्रोक्तंयोगिनोयोगसिद्धिदम् ॥६०॥ एतदभ्यसनान्नित्यंवर्ष्मदार्ढ्यमवाप्नुयात् ॥ ॥ ६१ ॥ दक्षिणंचरणंन्यस्यवामोरूपरियोगवित् ॥ याम्योरूपरिवामंचपद्मासनमिदंविदुः ॥ ६२ ॥ कराभ्यांधारयेत्पश्चादंगुष्ठौदृढबंधवित् ॥ भवेत्पद्मा सनादस्मादभ्यासाद्दृढविग्रहः ॥ ६३ ॥

अथवाह्यासनेयस्मिन्सुखमस्योपजायते ॥ स्वस्तिकादौतदध्यास्ययोगंयुंजीतयोगवित् ॥ ६४ ॥ नतोयवह्निसामीप्येनजीर्णारण्यगोष्ठयोः ॥ नदशमश काकीर्णेनचैत्येनचचत्वरे ॥ ६५ ॥ केशभस्मतुषांगारकीकसादिप्रदूषिते ॥ नाभ्यसेत्पूतिगंधादौनस्थानेजनसंकुले ॥ ६६ ॥ सर्वबाधाविरहितेसर्वे द्रियसुखावहे ॥ मनःप्रसादजननेस्रग्धूपामोदमोदिते ॥ ६७ ॥ नातितृप्तःक्षुधार्तोननविण्मूत्रप्रबाधितः ॥ नाध्वखिन्नोनचिंतार्तोयोगंयुंजीतयोगवित् ॥ ॥ ६८ ॥ ऊरुस्थोत्तानचरणःसव्येन्यस्योत्तरंकरम् ॥ उत्तानंकिंचिदुन्नम्यवक्त्रंविष्टभ्यचोरसा ॥ ६९ ॥ निमीलिताक्षःसत्त्वस्थोदंतैर्दंतान्नसंस्पृशेत् ॥ तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः ॥ ७० ॥ सन्नियम्येंद्रियग्रामंनातिनीचोच्छ्रितासनः ॥ मध्यमंचोत्तमंचाथप्राणायाममुपक्रमेत् ॥ ७१ ॥ चलेऽनिलेचलंसर्वंनिश्चलेतत्रनिश्चलम् ॥ स्थाणुत्वमाप्नुयाद्योगीततोऽनिलनिरुंधनात् ॥ ७२ ॥ यावद्देहेस्थितःप्राणोजीवितंतावदुच्यते ॥ निर्गते तत्रमरणंततःप्राणंनिरुंधयेत् ॥ ७३ ॥ यावद्बद्धोमरुद्देहेयावच्चेतोनिराश्रयम् ॥ यावद्दृष्टिर्भ्रुवोर्मध्येतावत्कालभयंकुतः ॥७४॥ कालसाध्वसतोब्रह्माप्राणा यामंसदाचरेत् ॥ योगिनःसिद्धिमापन्नाःसम्यक्प्राणनियंत्रणात् ॥ ७५ ॥

मंदाद्वादशमात्रस्तुमात्रालघ्वक्षरामता ॥ मध्यमोद्विगुणःपूर्वादुत्तमास्त्रगुणस्ततः ॥७६॥ स्वेदंकंपंविषादंचजनयेत्क्रमशस्त्वसौ ॥ प्रथमेनजयेत्स्वेदंद्विती येनतुवेपथुम् ॥७७॥ विषादंहितृतीयेनासिद्धःप्राणोथयोगिनः ॥ भवेत्क्रमात्सन्निरुद्धःसिद्धःप्राणोथयोगिना ॥ क्रमेणसेव्यमानोसौनयतेयत्रचेच्छति ॥ ॥ ७८ ॥ हठान्निरुद्धप्राणोयंरोमकूपेषुनिःसरेत् ॥ देहंविदारयत्येषकुष्ठादिजनयत्यपि ॥ ७९ ॥ तत्प्रत्याययितव्योसौक्रमेणारण्यहस्तिवत् ॥ वन्यो गजोगजारिर्वाक्रमेणमृदुतामियात् ॥ ८० ॥ करोतिशास्त्रनिर्देशंनचतंपरिलंघयेत् ॥ तथाप्राणोहृदिस्थोयंयोगिनाक्रमयोगतः ॥ गृहीतःसेव्यमानस्तु विश्रंभमुपगच्छति ॥ ८१ ॥ षट्त्रिंशदंगुलोहंसःप्रयाणंकुरुतेबहिः ॥ सव्यापसव्यमार्गेणप्रयाणात्प्राणउच्यते ॥ ८२ ॥ शुद्धिमेतियदासर्वंनाडीचक्र मनाकुलम् ॥ तदैवजायतेयोगीक्षेमःप्राणनिरोधने ॥ ८३ ॥

दृढासनोयथाशक्तिप्राणंचंद्रेणपूरयेत ॥ रेचयेदथसूर्येणप्राणायामोयमुच्यते ॥ ८४ ॥ स्रवत्पीयूषधारौघंध्यायंश्चंद्रसमन्वितम् ॥ प्राणायामेनयोगींद्रः सुखमाप्नोतितत्क्षणात् ॥ ८५ ॥ रविणाप्राणमाकृष्यपूरयेदौदरींदरीम् ॥ कुंभयित्वाशनैःपश्चाद्योगीचंद्रेणरेचयेत् ॥ ८६ ॥ ज्वलज्ज्वलनपुंजाभंशी लयन्नूष्मगुंहृदि ॥ अनेनयाम्यायामेनयोगींद्रःशर्मभाग्भवेत् ॥ ८७ ॥ इत्थंमासत्रयाभ्यासादुभयायामसेवनात् ॥ शुद्धनाडीगणोयोगीसिद्धप्राणोभिधी यते ॥ ८८ ॥ यथेष्टंधारणंवायोरनलस्यप्रदीपनम् ॥ नादाभिव्यक्तिरारोग्यंभवेन्नाडीविशोधनात् ॥ ८९ ॥ प्राणोदेहगतोवायुरायामस्तन्निबंधनम् ॥ एकश्वासमयीमात्राप्राणायामोनिरुच्यते ॥ ९० ॥ प्राणायामेऽधमेघर्मःकंपोभवतिमध्यमे ॥ उत्तिष्ठेदुत्तमेदेहोबद्धपद्मासनोमुहुः ॥ ९१ ॥ प्राणाया मैर्दहेद्दोषान्प्रत्याहारेणपातकम् ॥ मनोधैर्यंधारणयाध्यानेनेश्वरदर्शनम् ॥९२॥ समाधिनालभेन्मोक्षंत्यक्त्वाधर्मंशुभाशुभम् ॥ आसनेनवपुर्दार्ढ्यंषडंग मितिकीर्तितम् ॥ ९३ ॥ प्राणायामद्विषट्केनप्रत्याहारउदाहृतः ॥ प्रत्याहारैर्द्वादशभिर्धारणापरिकीर्तिता ॥ ९४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवेदीश्वरसंगत्यैध्यानंद्वादशधारणम् ॥ ध्यानद्वादशकेनैवसमाधिरभिधीयते ॥ ९५ ॥ समाधेःपरतोज्योतिरनंतंस्वप्रकाशकम् ॥ तस्मिन्दृष्टेक्रियाकां
डंयातायातंनिवर्तते ॥ ९६ ॥ पवनेव्योमसंप्राप्तेध्वनिरुत्पद्यतेमहान् ॥ घंटादीनांप्रवाद्यानांततःसिद्धिरदूरतः ॥ ९७ ॥ प्राणायामेनयुक्तेनसर्वव्या
धिक्षयोभवेत् ॥ अयुक्ताभ्यासयोगेनसर्वव्याधिसमुद्भवः ॥ ९८ ॥ हिक्काश्वासश्चकासश्चशिरःकर्णाक्षिवेदनाः ॥ भवंतिविविधादोषाःपवनस्यव्यति
क्रमात् ॥ ९९ ॥ युक्तंयुक्तंत्यजेद्वायुंयुक्तंयुक्तंचपूरयेत् ॥ युक्तंयुक्तंचबध्नीयादित्थंसिध्यतियोगवित् ॥ १०० ॥ इंद्रियाणांहिचरतांविषयेषुयदृच्छया ॥
यत्प्रत्याहरणंयुक्त्याप्रत्याहारःसउच्यते ॥ १ ॥ प्रत्याहरतियःखानिकूर्मोंगानीवसर्वतः ॥ प्रत्याहृतिविधानेनसस्याद्विगतकल्मषः ॥ २ ॥ नाभि
देशेवसेद्भानुस्तालुदेशेचचंद्रमाः ॥ वर्षत्यधोमुखश्चंद्रोग्रसेदूर्ध्वमुखोरविः ॥ ३ ॥ करणंतच्चकर्तव्यंयेनसाप्राप्यतेसुधा ॥ ऊर्ध्वंनाभिरधस्तालुरूर्ध्वं
भानुरधःशशी ॥ करणंविपरीताख्यमभ्यासादेवजायते ॥ ४ ॥ काकचंचुवदास्येनशीतलंशीतलंपिबेत् ॥ प्राणंप्राणविधानज्ञोयोगीभवतिनिर्जरः ॥५॥

रसनांतालुविवरेनिधायोर्ध्वमुखोऽमृतम् ॥ धयन्निर्जरतांगच्छेदाषण्मासान्नसंशयः ॥ ६ ॥ ऊर्ध्वजिह्वःस्थिरोभूत्वासोमपानंकरोतियः ॥ मासार्धेननस
देहोमृत्युंजयतियोगवित् ॥ ७ ॥ संपीड्यरसनाग्रेणराजदंतर्बिलंमहत् ॥ ध्यात्वासुधामयींदेवींषण्मासेनकविर्भवेत् ॥ ८ ॥ अमृतापूर्णदेहस्ययोगिनो
द्वित्रिवत्सरात् ॥ ऊर्ध्वंप्रवर्ततेरेतोह्यणिमादिगुणोदयम् ॥ ९ ॥ नित्यंसोमकलापूर्णंशरीरंयस्ययोगिनः ॥ तक्षकेणापिदष्टस्यविषंतस्यनसर्पति ॥ ११० ॥
आसनेनसमायुक्तःप्राणायामेनसंयुतः ॥ प्रत्याहारेणसंपन्नोधारणामथचाभ्यसेत् ॥ ११ ॥ हृदयेपंचभूतानांधारणायःपृथक्पृथक् ॥ मनसोनिश्चलत्वे
नधारणासाभिधीयते ॥ १२ ॥ हरितालनिभांभूमिंसलकारांसवेधसम् ॥ चतुष्कोणांहृदिध्यायेदेषास्यात्क्षितिधारणा ॥ १३ ॥ कंठेऽब्धुतत्त्वमर्धेंदु
निभंविष्णुसमन्वितम् ॥ वकारबीजंकुंदाभंध्यायन्नंबुजयेदिति ॥ १४ ॥ तालुस्थमिंद्रगोपाभंत्रिकोणंरेफसंयुतम् ॥ रुद्रेणाधिष्ठितंतेजोध्यात्वावह्निंजये
दिति ॥ १५ ॥ वायुतत्त्वंभ्रुवोर्मध्येवृत्तमंजनसन्निभम् ॥ यंबीजमीशदैवत्यंध्यायन्वायुंजयेदिति ॥ १६ ॥ आकाशंचमरीचिवारिसदृशंयद्ब्रह्मरंध्रस्थितं
यन्नाथेनसदाशिवेनसहितंशांतंहकाराक्षरम् ॥ प्राणंतत्रविनीयपंचघटिकंचिंतान्वितंधारयेदेषामोक्षकपाटपाटनपटुःप्रोक्तानभोधारणा ॥ १७ ॥
स्तंभनीप्लावनीचैवदहनीभ्रामणीतथा ॥ शमनीचभवंत्येताभूतानांपंचधारणाः ॥ १८ ॥ ध्यैचिंतायांस्मृतोधातुश्चिंतातत्त्वेसुनिश्चला ॥ एतद्ध्यान
मिहप्रोक्तंसगुणंनिर्गुणंद्विधा ॥ १९ ॥

सगुणंवर्णभेदेननिर्गुणंकेवलंमतम् ॥ समंत्रंसगुणंविद्धिनिर्गुणंमंत्रवर्जितम् ॥ १२० ॥ अंतश्चेतोबहिश्चक्षुरवस्थाप्यसुखासनम् ॥ समत्वंचशरीरस्यध्या
नमुद्रातिसिद्धिदा ॥ २१ ॥ नाश्वमेधेनतत्पुण्यंनचवैराजसूयतः ॥ यत्पुण्यमेकध्यानेनलभेद्योगीस्थिरासनः ॥ २२ ॥ शब्दादीनांचतन्मात्राया
वत्कर्णादिषुस्थिता ॥ तावदेवस्मृतंध्यानंस्यात्समाधिरतःपरम् ॥ २३ ॥ धारणापंचनाडीकाध्यानंस्यात्षष्टिनाडिकम् ॥ दिनद्वाशकेनस्यात्समाधि
रिहभण्यते ॥ २४ ॥ जलसैंधवयोःसाम्यंयथाभवतियोगतः ॥ तथात्ममनसोरैक्यंसमाधिरिहभण्यते ॥ २५ ॥ यदासंक्षीयतेप्राणोमानसंचप्रली
यते ॥ तदासमरसत्वंयत्ससमाधिरिहोच्यते ॥ २६ ॥ यत्समत्वंद्वयोरत्रजीवात्मपरमात्मनोः ॥ सनष्टसर्वसंकल्पःसमाधिरभिधीयते ॥ २७ ॥
नात्मानंनपरंवेत्तिनशीतंनोष्ममेवच ॥ समाधियुक्तोयोगींद्रानसुखंनसुखेतरत् ॥ २८ ॥ काल्यतेनैवकालेनलिप्यतेनैवकर्मणा ॥ भिद्यतेनचशस्त्रा
स्त्रैर्योगीयुक्तःसमाधिना ॥ २९ ॥ युक्ताहारविहारश्चयुक्तचेष्टोहिकर्मसु ॥ युक्तनिद्राववोधश्चयोगीतत्त्वंप्रपश्यति ॥ १३० ॥ तत्त्वंविज्ञानमानंदंब्रह्मब्रह्मवि
दोविदुः ॥ हेतुदृष्टांतरहितंवाङ्मनोभ्यामगोचरम् ॥ ३१ ॥

तत्रयोगीनिरालंबेनिरातंकेनिरामये ॥ षडंगयोगविधिनापरेब्रह्मणिलीयते ॥३२॥ यथाघृतेघृतंक्षिप्तंघृतमेवहितद्भवेत् ॥ क्षीरेक्षीरंतथायोगीतत्रतन्मयतां
व्रजेत् ॥ ३३ ॥ अनसंजातपानीयैर्विदध्यादंगमर्दनम् ॥ त्यजेत्कदुष्णंलवणंक्षीरभोजीसदाभवेत् ॥ ३४ ॥ ब्रह्मचारीजितक्रोधोजितलोभोविमत्सरः ॥
अब्दमित्थंसदाभ्यासात्सयोगीतिनिगद्यते ॥ ३५ ॥ महामुद्रांनभोमुद्रामुड्डीयानंजलंधरम् ॥ मूलबंधंतुयोवेत्तिसयोगीयोगसिद्धिभाक् ॥ ३६ ॥
शोधनंनाडीजालस्यघटनंचंद्रसूर्ययोः ॥ रसानांशोषणंसम्यङ्महामुद्राभिधीयते ॥ ३७ ॥ योनिंवामांघ्रिणाऽऽपीड्यकृत्वावक्षस्थलेहनुम् ॥ हस्ताभ्यां
प्रसृतंपादंधारयेद्दक्षिणंचिरम् ॥ ३८ ॥ प्राणेनकुक्षिमापूर्यचिरंसंरेचयेच्छनैः ॥ एषाप्रोक्तामहामुद्रामहाघौघविनाशिनी ॥ ३९ ॥ चंद्रांगेतुसमभ्यस्य
सूर्यांगेपुनरभ्यसेत् ॥ यावत्तुल्याभवेत्संख्याततोमुद्रांविसर्जयेत् ॥ १४० ॥ नहिपथ्यमपथ्यंवारसाःसर्वेपिनीरसाः ॥ अपिघोरंविषंपीतंपीयूषमिवजी
र्यति ॥ ४१ ॥ क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ॥ तस्यदोषाःक्षयंयांतिमहामुद्रांचयोभ्यसेत् ॥ ४२ ॥

कपालकुहरेजिह्वाप्रविष्टाविपरीतगा ॥ भ्रुवोरंतर्गतादृष्टिर्मुद्राभवतिखेचरी ॥ ४३ ॥ नपीड्यतेशरौघेणनचलिप्येतकर्मणा ॥ बाध्यतेनसकालेनयोमुद्रावे
त्तिखेचरीम् ॥ ४४ ॥ चित्तंचरतिखेयस्माज्जिह्वाचरतिखेगता ॥ तेनैषाखेचरीनाममुद्रासिद्धैर्निषेविता ॥ ४५ ॥ यावद्बिंदुःस्थितोदेहेतावन्मृत्युभयं
कुतः ॥ यावद्बद्धानभोमुद्रातावद्बिंदुर्नगच्छति ॥ ४६ ॥ उड्डीनंकुरुतेयस्मादहोरात्रंमहाखगः ॥ उड्डीयानंततःप्रोक्तंतत्रबंधोविधीयते ॥ ४७ ॥ जठरे
पश्चिमंतानंनाभेरूर्ध्वंचधारयेत् ॥ उड्डीयानोह्ययंबंधोमृत्योरपिभयंत्यजेत् ॥ ४८ ॥ बध्नातिहिशिराजालमधोगामिनभोजलम् ॥ एषजालंधरोबंधः
कंठेदुःखौघनाशनः ॥ ४९ ॥ जालंधरेकृतेबंधेकंठसंकोचलक्षणे ॥ नपीयूषंपतत्यग्नौनचवायुःप्रधावति ॥१५०॥ पार्ष्णिभागेनसंपीड्ययोनिमाकुंचये
द्गुदम् ॥ अपानमूर्ध्वमाकृष्यमूलबंधोविधीयते ॥ ५१ ॥ अपानप्राणयोरैक्येक्षयोमूत्रपुरीषयोः ॥ युवाभवतिवृद्धोपिसततंमूलबंधनात् ॥ ५२ ॥

प्राणापानवशोजीवऊर्ध्वाधःपरिधावति ॥ वामदक्षिणमार्गेणचंचलोनास्थितिंलभेत् ॥ ५३ ॥ गुणबद्धोयथापक्षीगतोप्याकृष्यतेपुनः ॥ गुणैर्बद्धस्तथाजी
वःप्राणायामेनकृष्यते ॥ ५४ ॥ अपानःकर्षतिप्राणंप्राणोपानंचकर्षति ॥ ऊर्ध्वाधःसंस्थितावेतौसंयोजयतियोगवित् ॥ ५५ ॥ हकारेणबहिर्यातिसका
रेणविशेत्पुनः ॥ हंसहंसेत्यतोमंत्रंजीवोजपतिसर्वदा ॥ ५६ ॥ षट्शतानिदिवारात्रौसहस्राण्येकविंशतिः ॥ एतत्संख्यान्वितंमंत्रंजीवोजपतिसर्वदा ॥
॥ ५७ ॥ अजपानामगायत्रीयोगिनांमोक्षदायिनी ॥ अस्याःसंकल्पमात्रेणनरःपापैःप्रमुच्यते ॥ ५८ ॥ अंतरायाभवंतीहयोगिनोयोगहानिदाः ॥
श्रूयतेदूरगावार्तादूरस्थंदृश्यतेपुरः ॥ ५९ ॥ योजनानांशतंयातुंशक्तिःस्यान्निमिषार्धतः ॥ अचिंतितानिशास्त्राणिकंठपाठीभवंतिहि ॥१६०॥ धारणाश
क्तिरत्युग्रामहाभारोलघुर्भवेत् ॥ क्षणंकृशःक्षणंस्थूलःक्षणमल्पःक्षणंमहान् ॥ ६१ ॥ परकायंप्रविशतितिरश्चांवेत्तिभाषितम् ॥ दिव्यगंधंतनौधत्तेदिव्यां
वाणींप्रवक्तिच ॥ ६२ ॥ प्रार्थ्यतेदिव्यकन्याभिर्दिव्यंधारयतेवपुः ॥ इत्यादयोंऽतरायाःस्युर्योगसंसिद्धिसूचकाः ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यद्योभिरंतरायैर्नोक्षिप्यतेऽस्येहमानसम् ॥ तदप्येतत्समाप्नोतिपदंब्रह्मादिदुर्लभम् ॥ ६४ ॥ यत्प्राप्यनानिवर्तेतयत्प्राप्यनचशोचति ॥ तल्लभ्यतेषडंगेनयोगेनकलशोद्भव ॥ ६५ ॥ एकेनजन्मनायोगःकथमित्थंप्रसिध्यति ॥ ऋतेचयोगसंसिद्धेःकथंमुक्तिरिहाप्यते ॥ ६६ ॥ उभेएवहिनिर्वाणवर्त्मनीकिलङ्कं भज ॥ किंवाकाश्यांतनुत्यागःकिंवायोगोयमीदृशः ॥६७॥ चंचलेंद्रियवृत्तित्वात्कालिकल्मषजृंभणात् ॥ अल्पायुषांतथानृणांक्लेद्ययोगमहोदयः ॥६८॥ अतएवहिजंतूनांमहोदयपदप्रदः ॥ सदैवसदयावार्धिःकाश्यांविश्वेश्वरःस्थितः ॥ ६९ ॥ काश्यांमुखेनकैवल्यंयथालभ्येतजंतुभिः ॥ योगयुक्त्याद्युपायैश्चनतथान्यत्रकुत्रचित् ॥ १७० ॥ काश्यांस्वदेहसंयोगःसम्यग्योगउदाहृतः ॥ मुच्यतेनेहयोगेनक्षिप्रमन्येनकेनचित् ॥ ७१ ॥ विश्वेश्वरोविशालाक्षी द्युनदीकालभैरवः ॥ श्रीमान्दुंढिर्दंडपाणिःषडंगोयोगएषवै ॥ ७२ ॥ एतत्षडंगयोयोगंनित्यंकाश्यांनिषेवते ॥ संप्राप्ययोगनिद्रांसदीर्घामनृतमश्नुते ॥ ७३ ॥ ओंकारःकृत्तिवासाश्चकेदारश्चत्रिविष्टपः ॥ वीरेश्वरोथविश्वेशःषडंगोयमिहापरः ॥ ७४ ॥ पादोदकासिसंभेदज्ञानोदमणिकर्णिकाः ॥ षडंगोयं महायोगोत्रह्मधर्मह्रदावपि ॥ ७५ ॥ षडंगसेवनादस्माद्वाराणस्यांनरोत्तम ॥ नजातुजायतेजंतुर्जननीजठरेपुनः ॥ ७६ ॥ गंगास्नानंमहापुण्यंमहापातकनाशनी ॥ एतन्मुद्राकृताभ्यासोप्यमृतत्वमवाप्नुयात् ॥७७॥ काशीवीथिषुसंचारोमुद्राभवतिखेचरी॥खेचरोजायतेनूनंखेचर्यामुद्रयानया ॥७८॥

उडीयसर्वतोदेशाद्यानंवाराणसींप्रति ॥ उड्डीयानोमहाबंधएषमुक्त्यैप्रकल्पते ॥ ७९ ॥ जलस्यधारणंमूर्ध्निविश्वेशस्नानजन्मनः ॥ एषजालंधरोबंधः समस्तसुरदुर्लभः ॥ १८० ॥ वृतोविघ्नशतेनापियत्रकाशींत्यजेत्सुधीः ॥ मूलबंधःस्मृतोह्येषदुःखमूलनिकृंतनः ॥ ८१ ॥ इतियोगःसमाख्यातोमयातेद्विविधोमुने ॥ सषडंगःससुद्रश्चमुक्तयेशंभुभाषितः ॥ ८२ ॥ यावन्नेंद्रियवैकल्यंयावद्व्याधिर्नबाधते ॥ यावत्कालविलंबोस्तितावद्योगरतोभवेत् ॥ ८३ ॥ उभयोर्योगयोर्मध्येकाशीयोगोयमुत्तमः ॥ काशीयोगंसमभ्यस्यप्राप्नुयाद्योगमुत्तमम् ॥ ८४ ॥ आधिव्याधिसहायिन्याजरयामृत्युलिंगया ॥ कालं निकटतोज्ञात्वाकाशीनाथंसमाश्रयेत् ॥ ८५ ॥ काशीनाथंसमाश्रित्यकुतःकालभयंनृणाम् ॥ क्रुद्धेपिजीवद्वत्कालस्तच्चकाश्यांमुमंगलम् ॥ ८६ ॥ आतिथ्येनेहसियथाप्रतीक्षेतातिथिंकृती ॥ काश्यांकालंतथायांतंभाग्यवान्संप्रतीक्षते ॥ ८७ ॥ कलिःकालःकृतंकर्मत्रिकंटकमितीरितम् ॥ एतच्चयं नप्रभवेदानंदवनवासिनाम् ॥८८॥ अन्यत्रातर्कितःकालःकलयिष्यत्यसंशयम् ॥ कालादभयमिच्छेच्चेत्ततःकाशींसमाश्रयेत् ॥ १८९ ॥ इतिश्रीस्कंदे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेयोगाख्यानंनामैकचत्वारिंशोऽध्यायः ॥४१ ॥ ॥ अगस्तिरुवाच ॥ ॥ कथंनिकटतः कालोज्ञायतेहरनंदन ॥ तानिचिह्नानिकतिचिद्ब्रूहिमेपरिपृच्छतः ॥ १ ॥ ॥ कुमारउवाच ॥ ॥ वदामिकालचिह्नानिजायंतेयानिदेहिनाम् ॥ मृत्योर्निकटमापन्नेमुनेतानिनिबोधमय ॥ २ ॥ याम्यनासापुटेयस्यवायुर्वातिदिवानिशम् ॥ अखंडमेवतस्यायुःक्षयत्यब्दत्रयेणहि ॥ ३ ॥ अहोरात्रं त्र्यहोरात्रंविर्वइतिसंततम् ॥ अब्दमेकंचतस्येहजीवनावधिरुच्यते ॥ ४ ॥ वहेन्नासापुटयुगेदशाहानिनिरंतरम् ॥ वातश्चेत्सहसंक्रांतिस्तयाजीवेदिनत्रयम् ॥ ५ ॥ नासावर्त्मद्वयंहित्वामातरिश्वामुखाद्वहेत् ॥ शंसेदिनद्वयादर्वाक्प्रयाणंतस्यचाध्वनि ॥ ६ ॥ अकस्मादेवयत्कालेमृत्युःसन्निहितो भवेत् ॥ चिंतनीयःप्रयत्नेनसकालोमृत्युभीरुणा ॥ ७ ॥ सूर्येसप्तमराशिस्थेजन्मर्क्षस्थेनिशाकरे ॥ पौष्णःसकालोद्रष्टव्योयदायाम्येरविर्वहेत् ॥ ८ ॥

अकस्माद्वीक्षतेयस्तुपुरुषंकृष्णपिंगलम् ॥ तस्मिन्नेवक्षणेऽरूपंसजीवेद्वत्सरद्वयम् ॥ ९ ॥ यस्यबीजंमलंसूत्रंक्षुतंसूत्रंमलंतुवा ॥ इहैकदापतेद्यस्यअब्दं तस्यायुरिष्यते ॥ १० ॥ इंद्रनीलनिभंव्योम्निनागवृंदंयईक्षते ॥ इतस्ततःभ्रमृमरंषण्मासंनसजीवति ॥११॥ व्यश्रेर्द्विवारिपूर्णस्यःपृष्ठीकृत्यदिवाकरम् ॥ फूत्कृत्यार्धिद्रचापंनपश्येत्पण्मासजीवितः ॥ १२ ॥ अरुंधतींध्रुवंचैवविष्णोस्त्रीणिपदानिच ॥ आसन्नमृत्युर्नोपश्येच्चतुर्थमातृमंडलम् ॥१३॥ अरुंधती भवेन्मिह्राध्रुवोनासाग्रमुच्यते ॥ विष्णोःपदानिभ्रूमध्येनेत्रयोर्मातृमंडलम् ॥ १४ ॥ वेत्तिनीलादिवर्णस्यकटम्लादिरसस्यहि ॥ अकस्मादन्यथाभावं षण्मासेनसमृत्युभाक् ॥१५॥ षण्मासमृत्योर्मर्त्यस्यकंठोष्ठरसनारदाः ॥ शुष्यंतिसततंतद्वद्विच्छायास्तालुपंचमाः ॥१६॥ रेतःकरजनेत्रांतानीलिमानं भजंतिचेत् ॥ तर्हिकीनाशनगरींषष्ठेमासित्रजेन्नरः ॥ १७ ॥ संप्रवृत्तेनिधुवनेमध्येतेक्षौतिचेन्नरः ॥ निश्चितंपंचमेमासिघर्मराजातिथिर्भवेत् ॥ १८ ॥ द्रुतमारुह्यशरठस्त्रिवर्णोयस्यमस्तके ॥ प्रयातियातितस्यायुःषण्मासेनपरिक्षयम् ॥ १९ ॥ सुस्नातस्यापियस्याशुह्रदयंपरिशुष्यति ॥ चरणौचकरौ वापित्रिमासांतस्यजीवितम् ॥ २० ॥ प्रतिर्बिबंभवेद्यस्यपदखंडपदाकृति ॥ पांसौवाकर्दमेवापिपंचमासान्सजीवति ॥ २१ ॥ छायाप्रकंपतेयस्यवेद्दर्बधे पिनिश्चले ॥ कृतांतदूतावधंतिचतुर्थेमासितंनरम् ॥ २२ ॥ निजस्यप्रतिर्बिबस्यनीराज्यमुकुरादिषु ॥ उत्तमांगंनयःपश्येत्समासेनविनश्यति ॥ २३ ॥ मतिर्भ्रश्येत्स्खलेद्वाणीधनुर्द्रंनिरीक्षते ॥ रात्रौचंद्रद्वयंचापिदिवाद्वौचदिवाकरौ ॥ २४ ॥ दिवाचतारकाचक्रंरात्रौव्योमवितारकम् ॥ युगपच्चतुर्दिक्षुशक्रकोदंडमंडलम् ॥ २५ ॥

भूरुहेभूधराग्रेषगंधर्वनगरालयम् ॥ दिवापिशाचनृत्यंचपतेपंचत्वहेतवः ॥२६॥ सर्वेष्वेतेषुचिह्नेषुयद्येकमपिवीक्षते ॥ तदामासावधिंमृत्युःप्रतीक्षेतनचाधिकम् ॥ २७ ॥ करावरुद्धश्रवणःशृणोतिनयदाध्वनिम् ॥ स्थूलःकृशःकृशःस्थूलस्तदामासान्निवर्तते ॥ २८ ॥ यःपश्येदात्मनश्छायांदक्षिणाशासमाश्रिताम् ॥ दिनानिपंचजीवित्वापंचत्वमुपयातिसः ॥ २९ ॥ प्रोह्यतेभक्ष्यतेवापिपिशाचासुरवायसैः ॥ भूतैःप्रेतैःश्वभिर्गृध्रैर्गोमायुखरसूकरैः ॥ ३० ॥ रासभैःकरभैःकीशैःश्येनैरश्वतरैर्वकैः ॥ स्वप्नेसजीवितंत्यक्त्वापतंतंयममीक्षते ॥ ३१ ॥ गंधपुष्पांशुकैःशोणैःस्वांतनुंभूषितांनरः ॥ यःपश्येत्स्वप्नसमये सोऽष्टोमासाननित्यहो ॥ ३२ ॥ पांसुराशिचवल्मीकंयूपदंडमथापिवा ॥ योधिरोहतिवैस्वप्नेसषष्ठेमासिनश्यति ॥ ३३ ॥ रासभारूढमात्मानंतैलाभ्यक्तंचमुंडितम् ॥ नीयमानंयमाशायःस्वप्नेपश्येत्स्वपूर्वजान् ॥ ३४ ॥ स्वमौलौस्वतनौवापियःपश्येत्स्वप्नगोनरः ॥ तृणानिशुष्ककाष्टानिपष्ठेमासिनतिष्ठति ॥ ३५ ॥ लोहदंडधरंकृष्णंपुरुषंकृष्णवाससम् ॥ स्वयंयोग्नेस्थितंपश्येत्सत्रीन्मासान्नलंघयेत् ॥ ३६ ॥ कालीकुमारीयंस्वप्नेग्रभीयाद्बाहुपाशकैः ॥ समासेनसमीक्षेतनगरींशमनोपिताम् ॥ ३७ ॥ नरोयोवानरारूढोयायात्प्राचींदिशंस्वपन् ॥ दिनैःसपंचभिरेवपश्येत्संयमिनींपुरीम् ॥३८॥ कृपणोपिवदान्यःस्याद्वदान्यःकृपणोयदि ॥ प्रकृतेर्विकृतिश्चेत्स्यात्तदापंचत्वमृच्छति ॥३९॥ एतानिकालचिह्नानिसंत्यन्यानिबहून्यपि ॥ ज्ञात्वाभ्यसेन्नरोयोगमथवाकाशिकांश्रयेत् ॥ ४० ॥ नकालवंचनोपायंमुनेन्यमवयाम्यहम् ॥ विनामृत्युंजयंकाशीनाथंगर्भावरोधकम् ॥ ४१ ॥ तावद्भजंतिपापानितावद्भजेद्यमोनृपः ॥ यावद्विश्वेशशरणंनरोननिरतोव्रजेत् ॥ ४२ ॥ प्राप्तविश्वेश्वरावासःपीतोत्तरवहापयाः ॥ स्पृष्टविश्वेशसल्लिंगःकश्चयातिनवंवपुः ॥ ४३ ॥ करिष्येत्कुपितःकालःकिंकाशीवासिनांनृणाम् ॥ कालेशिवःस्वयंकर्णेयत्रमंत्रोपदेशकः ॥ ४४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यथाप्रयातिशिशुताकौमारंचयथागतम् ॥ सत्वरंगत्वरंतद्वद्यौवनंचापिवार्धकम् ॥ ४५ ॥ यावन्नहिजराक्रांतिर्यावन्नेंद्रियवैक्लवम् ॥ तावत्सर्वंफल्गुरूपं हित्वाकाशींश्रयेत्सुधीः ॥ ४६ ॥ अन्यानिकाललक्ष्माणितिष्ठंतुकलशोद्भव ॥ जरैवप्रथमंलक्ष्मचित्रंतत्रापिभीर्नहि ॥ ४७ ॥ पराभूतोहिजरयासर्वैश्चप रिभूयते ॥ हृततारुण्यमाणिक्योधनहीनःपुमानिव ॥ ४८ ॥ सुतावाक्यंनकुर्वंतिपत्नीप्रेमापिमुंचति ॥ बांधवानैवमन्यंतेजरसाश्लेषितंनरम् ॥ ४९ ॥ आश्लिष्टंजरयादृष्ट्वापरयोषिद्विशंकिता ॥ भवेत्पराङ्मुखीनित्यंप्रणयिन्यपिकामिनी ॥ ५० ॥ नजरासदृशोव्याधिर्नदुःखंजरयासमम् ॥ कारयित्र्यपमा नस्यजरैवमरणंनृणाम् ॥ ५१ ॥ नजीयतेतथाकालस्तपसायोगयुक्तिभिः ॥ यथाचिरेणकालेनकाशीवासाद्विजीयते ॥ ५२ ॥ विनायज्ञैर्विनादानैर्वि नाव्रतजपादिभिः ॥ विनातिपुण्यसंभारैःकःकाशींप्राप्तुमीहते ॥ ५३ ॥ काशीप्राप्तिरयंयोगःकाशीप्राप्तिरिदंतपः ॥ काशीप्राप्तिरिदंदानंकाशीप्राप्तिःशि वैकता ॥ ५४ ॥ कःकलिःकोथवाकालःकाजराकिंचदुष्कृतम् ॥ कारुजःकेंतरायावाश्रितावाराणसीयदि ॥ ५५ ॥ कलिस्तानेवबाधेतकालस्तांश्च जिघांसति ॥ ५६॥ एनांसितांश्चबाधंतेयेनकाशींसमाश्रिताः ॥ काशीसमाश्रितायैश्चयैश्चविश्वेश्वरोर्चितः ॥ तारकंज्ञानमासाद्यतेमुक्ताःकर्मपाशतः ॥ ॥ ५७ ॥ धनिनोनतथासौख्यंप्राप्नुवंतिनराःक्वचित् ॥ यथानिधनतःकाश्यांलभंतेसुखमव्ययम् ॥ ५८ ॥ वरंकाशीसमावासीनासीनोद्युसदांपदम् ॥ दुःखांतंलभतेपूर्वःसुखांतंलभतेपरः ॥ ५९ ॥

स्थितोपिभगवानीशोमंदरंत्वारुकंदरम् ॥ काशींविनारतिंनाऽऽपदिवोदासनृपोषिताम् ॥ ६० ॥ इति श्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडेपूर्वार्द्धे कालवंचनोपायोनामद्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ अगस्तिरुवाच ॥ ॥ दिवोदासंनरपतिंकथंदेवस्त्रिलोचनः ॥ काशींसं त्याजयामासकथमागाच्चमंदरात् ॥ एतदाख्यानमाख्याहिश्रोतॄणांप्रमुदेभगोः ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ मंदरंगतवान्देवोब्रह्मणोवाक्यगौरवात् ॥ तपसातस्यसंतुष्टोमंदरस्यैवभूभृतः ॥ २ ॥ गतेविश्वेश्वरेदेवेमंदरंगिरिसुंदरम् ॥ गिरिशेनसमंजग्मुरपिसर्वेदिवौकसः ॥ ३ ॥ क्षेत्राणिवैष्णवानीहत्यक्त्वा विष्णुरपिक्षितेः ॥ प्रयातोमंदरंयत्रदेवदेवउमाधवः ॥ ४ ॥ स्थानानिगाणपत्यानिगणेशोपिततोव्रजत् ॥ हित्वाहमपिविप्रेंद्रगतवान्मंदरंप्रति ॥ ५ ॥ सूरःसौराणिसंत्यज्यगतश्चायतनादरम् ॥ स्वंस्वंस्थानंक्षितौत्यक्त्वाययुरन्येपिनिर्जराः ॥ ६ ॥ गतेषुदेवसंघेषुपृथिव्याःपृथिवीपतिः ॥ चकारराज्यंनिर्द्वंद्वं दिवोदासःप्रतापवान् ॥ ७ ॥ विधायराजधानींसवाराणस्यांसुनिश्चलाम् ॥ एधांचक्रेमहाबुद्धिःप्रजाधर्मेणपालयन् ॥ ८ ॥ सूर्यवत्सप्रतपितादुर्हृदांहृ दिनेत्रयोः ॥ सोमवत्सुहृदामासीन्मानसेषुस्वकेष्वऽपि ॥ ९ ॥ अखंडमाखंडलवत्कोदंडंकलयन्रणे ॥ पलायमानैरालोकिशत्रुसैन्यबलाहकैः ॥ १० ॥ सधर्मराजवज्जातोधर्माधर्मविवेचकः ॥ अदंड्यान्मण्डयन्राजादंड्यांश्चपरिदंडयन् ॥ ११ ॥ धनंजयइवाधाक्षीत्परारण्यान्यनेकशः ॥ पाशीवपाशयां चक्रेवैरिचक्रंविदूरगः ॥ १२ ॥

सोभूत्पुण्यजनाधीशोरिपुराक्षसवर्धनः ॥ जगत्प्राणसमानश्चजगत्प्राणनतत्परः ॥१३॥ राजराजःसएवाभूत्सर्वेषांधनदःसताम् ॥ सएवरुद्रमूर्तिश्चप्रक्षिप्त रिपुभीरणे ॥ १४ ॥ विश्वेषांसहिदेवानांतपसारूपधृग्यतः ॥ विश्वेदेवास्ततस्तंतुस्तुवंतिचभजंतिच ॥ १५ ॥ असाध्यःसहिसाध्यानांवसुभ्योवसुना धिकः ॥ ग्रहाणांविग्रहधरोदस्रतोऽजस्ररूपभाक् ॥ १६ ॥ मरुद्गणानगणयंस्तुषितांस्तोषयन्गुणैः ॥ सर्वविद्याधरोयस्तुसर्वविद्याधरेष्वपि ॥ १७ ॥ अगर्वानेवगंधर्वान्यश्चक्रेनिजगीतिभिः ॥ ररक्षुर्यक्षरक्षांसितद्दुर्गंस्वर्गसोदरम् ॥ १८ ॥ नागानागांसिचक्रुश्चतस्यनागबलीयसः ॥ दनुजामनुजाकारं कृत्वातंचसिषेविरे ॥ १९ ॥ जातागुह्यचरायस्यगुह्यकाःपरितोनृषु ॥ संसेविष्यामहेराजन्नसुरास्त्वांस्ववैभवैः ॥ २० ॥ वयंयतस्त्वद्विषयेसुरावासोऽ पिदुर्लभः ॥ अशिक्षयत्क्षितिपतेरिहयस्यतुरंगमान् ॥ आशुगश्चाशुगामित्वंपावमानेपथिस्थितः ॥ २१ ॥ अगजान्यस्यतुगजान्नगवर्ष्मसुवर्ष्मणः ॥ अजस्रदानिनोदृष्ट्वाभवन्नन्येपिदानिनः ॥ २२ ॥ सदोजिरेचबोद्धारोयोद्धारश्चरणाजिरे ॥ नयस्यशास्त्रैर्विजितानशस्त्रैःकेनचित्क्वचित् ॥ २३ ॥ ननेत्रविषयेजाताविषयेयस्यभूभृतः ॥ सदानष्टपदाद्वेष्यास्तदाऽनष्टपदाःप्रजाः ॥ २४ ॥ कलावानेकएवास्तित्रिदिवेपिदिवौकसाम् ॥ तस्यक्षोणिभृतः क्षोण्यांजनाःसर्वेकलालयाः ॥ २५ ॥

एकएवहिकामोस्तिस्वर्गेसोप्यंगवर्जितः ॥ सांगोपांगाश्चसर्वेषांसर्वेकामाहितद्भुवि ॥२६॥ तस्योपवर्तनेप्येकोनश्रुतोगोत्रभित्क्वचित् ॥ स्वर्गेस्वर्गसदामी शोगोत्रभित्परिकीर्तितः ॥ २७ ॥ क्षयीचतस्यविषयेकोप्याकर्णिनकेनचित् ॥ त्रिविष्टपेक्षपानाथःपक्षेपक्षेक्षयीष्यते ॥ २८ ॥ नाकेनवग्रहाःसंतिदेशा स्तस्याऽनवग्रहाः ॥ २९ ॥ हिरण्यगर्भःस्वर्लोकेप्येकएवप्रकाशते ॥ हिरण्यगर्भाःसर्वेषांतत्पौराणामिहालयाः ॥ ३० ॥ सप्ताश्वएकःस्वर्लोकेनितरां भासतेंऽशुमान् ॥ सदंशुकाःप्रतिदिनंबह्वश्वास्तत्पुरौकसः ॥ ३१ ॥ सदप्सरायथास्वर्भूस्तत्पुर्यपिसदप्सराः ॥ एकैवपद्मावैकुंठेतस्यपद्माकराःशतम् ॥ ॥ ३२ ॥ अनीतयश्चतद्वामानाराजपुरुषाःक्वचित् ॥ गृहेगृहेत्रधनदानाकएकोऽलकापतिः ॥ ३३ ॥ दिवोदासस्यतस्यैवंकाश्यांराज्यंप्रशासतः ॥ गतंवर्षं दिनप्रायंशरदामयुताष्टकम् ॥ ३४ ॥ गीर्वाणाविप्रतीकारमथतस्यचिकीर्षवः ॥ गुरुणामंत्रयांचक्रुर्धर्मवर्त्मानुयायिनः ॥३५॥ भवादृशामिवमुनेप्रायशो धर्मचारिणाम् ॥ विबुधाविदधत्येवमहतीरापदांततीः ॥३६॥ यद्यप्यसौधराधीशोव्याधिनोद्दुर्धराध्वरैः ॥ तानध्वरभुजोऽत्यंतंतथापिसुहृदोनते ॥ ३७ ॥ स्वभावएवद्युसदांपरोत्कर्षासहिष्णुता ॥ बलिबाणदधीच्याद्यैरपराद्धंकिमत्रतैः ॥३८॥ अंतरायाभवंत्येवधर्मस्यापिपदेपदे ॥ तथापिननिजोधर्मोधर्मधी भिर्विमुच्यते ॥ ३९ ॥ अधर्मिणःसमेधंतेधनधान्यसमृद्धिभिः ॥ अधर्मादेवचपरंसमूलंयांत्यधोगतिम् ॥ ४० ॥ प्रजाःपालयतस्तस्यपुत्रानिवनिजो रसान् ॥ रिपुंजयस्यनाल्पोपिबभूवाधर्मसंग्रहः ॥४१॥ षाड्गुण्यवेदिनस्तस्यत्रिशक्त्यूर्जितचेतसः ॥ चतुरोपायवित्तस्यनरंध्रंविविदुःसुराः ॥ ४२ ॥

बुद्धिमंतोपिविबुधाविप्रतीकर्तुमुद्यताः ॥ मनागपिनसंशेकुरपकर्तुंतदीशितुः ॥ ४३ ॥ एकपत्नीव्रताःसर्वेपुमांसस्तस्यमंडले ॥ नारीषुकाचिन्नैवासीदप तिव्रतधर्मिणी ॥ ४४ ॥ अनधीतोनविप्रोभूदशूरोनैवबाहुजः ॥ वैश्योनभिज्ञोनैवासीदर्थोपार्जनकर्मसु ॥४५॥ अनन्यवृत्तयःशूद्राद्विजशुश्रूषणंप्रति ॥ तस्यराष्ट्रेसमभवन्दिवोदासस्यभूपतेः ॥ ४६ ॥ अविप्लुतब्रह्मचर्यास्तद्राष्ट्रेब्रह्मचारिणः ॥ नित्यंगुरुकुलाधीनावेदग्रहणतत्पराः ॥ ४७ ॥ आतिथ्यधर्म प्रवणाधर्मशास्त्रविचक्षणाः ॥ नित्यंसाधुसमाचारागृहस्थास्तस्यसर्वतः ॥ ४८ ॥ तृतीयाश्रमिणोयस्मिन्वनवृत्तिकृतादराः ॥ निःस्पृहाग्रामवार्तासुवे दवर्त्मानुसारिणः ॥ ४९ ॥ सर्वसंगविनिर्मुक्तानिर्मुक्तानिष्परिग्रहाः ॥ वाङ्मनःकर्मदंडाढ्यायतयोयत्रनिःस्पृहाः ॥ ५० ॥ अन्येनुलोमजन्मानःप्रतिलो मभवाअपि ॥ स्वपारंपर्यतोदृष्टंमनाग्वर्त्मनतत्यजुः ॥ ५१ ॥ अनपत्यानतद्राष्ट्रेधनहीनोपिकोपिन ॥ अवृद्धसेवीनोकश्चिदकांडमृतिभाक्चन ॥ ५२ ॥ नचाटानैववाचाटावंचकानोनहिंसकाः ॥ नपापंडानवैभंडानरंडानचशौंडिकाः ॥५३॥ श्रुतिघोषोहिसर्वत्रशास्त्रवादःपदेपदे ॥ सर्वत्रसुभगालापामुदामं गलगीतयः ॥ ५४ ॥ वीणावेणुप्रवादाश्चमृदंगामधुरस्वनाः ॥ सोमपानंविनान्यत्रपानगोष्ठीनकर्णगा ॥५५॥ मांसाशिनःपुरोडाशेनैवान्यत्रकदाचन ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नदुरोदरिणोयत्रनाधमर्णानतस्कराः ॥ ५६ ॥ पुत्रस्यपित्रोःपदयोःपूजनंदेवपूजनम् ॥ उपवासोव्रतंतीर्थंदेवताराधनंपरम् ॥ ५७ ॥ नारीणांभर्तृपद
योरर्चनंतद्वचःश्रुतिः ॥ समर्चयंतिसततंमनुजानिजमग्रजम् ॥ ५८ ॥ सपर्ययंतिमुदिताभृत्याःस्वामिपदांबुजम् ॥ हीनवर्णैरग्रवर्णोवर्ण्यतेगुणगौरवैः ॥
॥ ५९ ॥ वरिवस्यंतिभूयोपित्रिकालंकाशिदेवताः ॥ सर्वत्रसर्वेविद्वांसःसमर्च्यंतेमनोरथैः ॥ ६० ॥

विद्वद्भिश्चतपोनिष्ठास्तपोनिष्ठैर्जितेंद्रियाः ॥ जितेंद्रियैर्ज्ञाननिष्ठाज्ञानिभिःशेत्रयोगिनः ॥ ६१ ॥ मंत्रपूतंमहार्हंचविधियुक्तंसुसंस्कृतम् ॥ वांडवानां
मुखामोदहृयतेऽहर्निशंहविः ॥ ६२ ॥ वापीकूपतडागानामारामाणांपदेपदे ॥ शुचिभिर्द्रव्यसंभारैःकर्तारोयत्रभूरिशः ॥ ६३ ॥ यद्राष्ट्रेद्वष्टपुष्टाश्चदृश्यं
तेसर्वजातयः ॥ अनिंद्यसेवासंपन्नाविनाभृगयुसौनिकान् ॥ ६४ ॥ इत्थंतस्यमहीजानेःसर्वत्रशुचिवर्तिनः ॥ अग्निमंथंतोप्यनिमिषामन्नाच्छिद्रंनलेभिरे ॥ ६५ ॥ अथोवाचामरगुरुर्देवानपचिकीर्षुकान् ॥ तस्मिन्राजनिधर्मिष्ठेत्रारिष्टेमंत्रवेदिषु ॥६६॥ ॥ गुरुरुवाच ॥ ॥ संधिविग्रहयानास्तिसं
श्रयंद्वैधभावनम् ॥ यथासगजासर्वेत्तिनतथान्यापिकश्चन ॥ ६७ ॥ उपायोप्येकएवास्तिचतुर्ष्वहृदिवोकसः ॥ भेदोनामसचेत्सिध्येत्तपोबलिनित
त्रहि ॥६८॥ तेनयद्यपिभूभर्त्राभूमेर्देवाविवासिताः ॥ तथापिभूरिशस्तत्रसंत्यस्मत्पक्षपातिनः ॥ ६९ ॥ कालोनिमिषमात्रोपियान्विनानसुखंव्रजेत् ॥
अस्माकमपितस्यापिसंतिनेतव्रमानिताः ॥ ७० ॥ अंतर्बहिश्चरानित्यंसर्वविश्रंभभूमयः ॥ समागतेषुतेष्वत्रसर्वनःसेत्स्यतिप्रियम् ॥ ७१ ॥ समा
कर्ण्यचतेसर्वेत्रिदशागीष्पतीरितम् ॥ निर्णीतंतंतस्तस्यार्थंतस्मादंतर्बहिश्चरान् ॥ अभिनंद्याथतंसर्वेप्रोचुरित्थंभवेदिति ॥ ७२ ॥ ततःशक्रःसमाहूयवी
तिहोत्रंपुरःस्थितम् ॥ ऊचेमधुरयावाचावहुमानपुरःसरम् ॥ ७३ ॥ हव्यवाहनयामूर्तिस्तवतत्रप्रतिष्ठिता ॥ तासुपासंहरक्षिप्रंविषयात्तस्यभूपतेः ॥
॥ ७४ ॥ समागतायांतन्मूर्तौसर्वानष्टाग्नयःप्रजाः ॥ हव्यकव्यक्रियाशून्याविरजिष्यंतिराजनि ॥ ७५ ॥ प्रजासुचविरक्तासुराज्यकामदुघासुवै ॥
कृच्छ्रेणोपार्जितोऽपार्थोराजशब्दोभविष्यति ॥ ७६ ॥ प्रजानांरंजनाद्राजायेयंरूढिरुपार्जिता ॥ तस्यांरूढ्यांप्रनष्टायांराज्यमेवविनंक्ष्यति ॥ ७७ ॥
प्रजाविरहितंराजाकोशदुर्गबलादिभिः ॥ समृद्धोप्यचिरान्नश्येत्कूलसंस्थइवद्रुमः ॥ ७८ ॥ त्रिवर्गसाधनाहेतुःप्राक्प्रजैवमहीपतेः ॥ क्षीणवृत्त्यां
प्रजायांवैत्रिवर्गःक्षीयतेस्वयम् ॥ ७९ ॥
क्षीणेत्रिवर्गसंक्षीणागतिर्लोकद्वयात्मिका ॥ ८० ॥ इतींद्रवचनाद्वह्निरह्नायक्षोणिमंडलात् ॥ आचकर्षनिजांमूर्तियोगमायावलान्वितः ॥ ८१ ॥ निन्ये
नकेवलंत्रेतांजाठराग्निमपिप्रभुः ॥ वह्निणोवचसावह्निर्निजशक्तिसमन्वितम् ॥ ८२ ॥ वह्नौस्वर्लोकमापन्नेजातेमध्यंदिनेनृपः ॥ कृतमाध्याह्निकस्तूर्णं
प्राविशद्भोज्यमंडपम् ॥ ८३ ॥ महानसाधिकृतयोवेपमानास्ततोमुहुः ॥ क्षुधार्तमपिभूपालमिदंमंदंव्याजिज्ञपन् ॥ ८४ ॥ सूपकाराऊचुः ॥ अत्यहस्क
रतेजस्कप्रतापविजितानल ॥ किंचिद्विज्ञापयितुकामाःस्मोप्यकांडेरणपंडित ॥ ८५ ॥ यदिविज्ञापयेद्राजन्भवानभयदक्षिणाम् ॥ तदाविज्ञापयिष्यामः
प्रबद्धकरसंपुटाः ॥ ८६ ॥ भ्रूसंज्ञयाकृतादेशाःप्रशस्तास्येनभूभुजा ॥ मृदुविज्ञापयांचक्रुःपाकशालाधिकारिणः ॥ ८७ ॥ नजानीमोवयंनाथत्वत्प्रतः
पमयार्दितः ॥ कुसृत्यायकयाविद्वन्नष्टोवेश्वानरःपुरात् ॥ ८८ ॥ कृशानौकृशतांप्राप्तेकथंपाककियाभवेत् ॥ तथापिसूर्यपाकेनसिद्धापक्तिर्हिकाचन
॥ ८९ ॥ प्रभोरादेशमासाद्यतामिहैवानयामहे ॥ मन्यामहेचभूजानेपक्तिरद्यतनीशुभा ॥ ९० ॥ श्रुत्वांधसिकवाक्यंसमहासत्त्वोमहामतिः ॥ नृप
तिश्चिंतयामासदेवानांविकृतंत्विदम् ॥ ९१ ॥ क्षणंसंशीलयंस्तत्रददर्शतंपसोवलात् ॥ नकेवलंजहौगेहंहुतभुक्चौदरीदरीः ॥ ९२ ॥ अप्यहासीदितोलो
काञ्जगामचसुरालयम् ॥ भवत्विहहिकाहानिरस्माकंज्वलनेगते ॥ ९३ ॥ तेपामेवविचाराच्चहानिरेपासुपर्वणाम् ॥ तद्बलेनचकिंराज्यंमयेदमुररीकृतम्
॥ ९४ ॥ पितामहेनमहतोगौरवात्प्रतिपादितम् ॥ इतिचिंतयतस्तस्यमध्यलोकशतक्रतोः ॥ ९५ ॥ पौराःसमागताद्वारिसहजानपदैर्नरैः ॥ द्वास्थै
नचाज्ञयाराज्ञस्ततस्तेंतःप्रवेशिताः ॥ ९६ ॥
दत्त्वोपदंयथार्हंतेप्रणेमुःक्षोणिवन्निणम् ॥ केचित्संभाषिताराज्ञादरसौंदर्यागिरा ॥ ९७ ॥ केचिच्चसमुदाहृत्याकोचच्चकरसंज्ञया ॥ विसर्जितासनाराज्ञा
वहुमानपुरःसरम् ॥ ९८ ॥ तेजिरेभेजिरेसर्वेरत्नार्चिःपरिसेविते ॥ विजितामोदसंदोहेसुरानोकहसौरभैः ॥ राज्ञःशतशलाकस्यच्छत्रस्यच्छायययाशुभे
॥ ९९ ॥ विशांपतिरथोवाचतन्मुखच्छाययेरितम् ॥ विज्ञायतदभिप्रायमलंभीत्यापुरोक्षसः ॥ १०० ॥ विकारकारिभिर्लेखैर्यदिनीतोऽनलोभुवः ॥
एतावतैवार्किसिद्धचेन्मयितेषांपराभवः ॥ १ ॥ चिकीर्षुरहमेवासंपौराःकार्यमिदंपुरा ॥ परंह्युपेक्षितप्रायंदिष्ट्यचातैःस्मारितंचिरात् ॥ २ ॥ गतोऽनलो
ऽभवद्भंजगत्प्राणोपियात्वितः ॥ वरुणःपुष्पवंताभ्यामविलंबंप्रयात्वितः ॥ ३ ॥ अहमेवहिपर्जन्योभविष्यामितपोवलात् ॥ मुदेजनपदानांचसर्व
स्यसमृद्धिदः ॥ ४ ॥ तपोयोगबलेनाहमात्मानंपरिकल्प्यच ॥ त्रिधावह्निस्वरूपेणपक्तीष्ट्यिुष्टिकृत्तमः ॥ ५ ॥ अंतर्बहिश्चयोद्वेधानभस्वत्पदवींदधत् ॥
सर्वेषामेववेत्स्यामित्वंतःकरणचेष्टितम् ॥ ६ ॥ विधायचांभसींमूर्तिसर्वजीवैकजीवनीम् ॥ प्रजाःसंजीवयिष्यामिकिंजडैर्विषयेमम ॥ ७ ॥ यदाखे
तमसापौराग्रस्येतेशशिभास्करौ ॥ तदानार्किविनाताभ्यांजीवामःक्षितिमंडले ॥ ८ ॥ श्रियंचाद्रमसींप्राप्यह्लादयिष्याम्यहंप्रजाः ॥ निशाचरेणकि
मिहक्षयिणाचकलंकिना ॥ ९ ॥

अस्मत्कुलेमूलभूतोभास्करोमान्यएवनः ॥ सतिष्ठतुमुखेनात्रयातायातंकरोतुच ॥ १० ॥ सएकोजगतामात्माविशेषात्कुलदेवता ॥ सोपकर्तुनवेत्त्ये
वतस्येदंव्रतमुत्तमम् ॥ ११ ॥ इतिनरपतिवाक्सुधारसौघंश्रुतिपुटकैःपरिपीयपौरवर्गः ॥ विकसितवदनांबुजोजगामनिजनिजमालयमाधिमुक्तचित्तः
॥ १२ ॥ क्षितिपतिरपितत्तथाविधायतपसोसाध्यमिहास्तिकिंत्रिलोक्याम् ॥ अतिवह्न्यर्कमसौदधत्तेजोद्युसदांशल्यमिवोच्चकैर्बभूव ॥ १३ ॥
इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेदिवोदासप्रतापवर्णनंनामत्रिचत्वारिंशोध्यायः ॥४३॥ ॥ स्कंदउवाच ॥
अथमंदरकंदरोदरोद्भसदसमद्युतिरत्नमंदिरे ॥ परितःसमधिष्ठितामरेनिजशिखरैर्वसनीकृतांबरे ॥ १ ॥ निवसन्नगदीश्वरोहरःकृशरजनीशकलामनो
हरः ॥ लभतेस्मनशर्मशंकरःप्रसरत्काशिवियोगजज्वरः ॥ २ ॥ विरहानलशांतयेतदासमलेपित्रिपुरारिणापियः ॥ मलयोद्भवपंकएपसप्रतिपेदेद्रुधुना
पिपांसुताम् ॥ ३ ॥ परितापहराणिपद्मिनीनांमृदुलान्यपिकंकणीकृतानि ॥ गदितानियदीश्वरेणसर्पास्तदभूत्सत्यमहोमहेश्वरेच्छा ॥ ४ ॥ यदुदुग्धनि
धिंनिमथ्यदेवैर्मृदुसारःसमकर्पिपूर्णचंद्रः ॥ सवभूवकुशोवियोगतप्तेश्वरमूर्धोष्मपरिक्षरच्छरीरः ॥ ५ ॥
यददीधरदेपजाततापःपृथुलेमौलिजटानिकुंजकोणे ॥ परितापहरांहरस्तदानींद्रुनदींतामधुनापिनोज्जिहीते ॥ ६ ॥ महतोविरहस्यशंकरःप्रसभंतस्यवशो
वशंगतः ॥ विविदेनसुरैःसदोगतैरपिसंवीतसुतापवेष्टितः ॥ ७ ॥ अतिचित्रमिदंयदात्मनाशुचिरप्येपकृपीटयोनिना ॥ स्वपुरीविरहोद्भवेनवेपरिताप्ये
तजगत्त्रयेश्वरः ॥ ८ ॥ निजभालतलंकलानिधेःकलयान्नित्यमलंकरोतियः ॥ सतदीश्वरमप्यतापयद्विधुरेकोविपरीतएवतु ॥ ९ ॥ गरलंगलनालि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कातलेविलसेदस्यनतेनतापितः ॥ अमृतांशुतुपारदीधितिप्रचयैरेवतुतापितोऽद्भुतम् ॥ १० ॥ विलसद्धरिचंदनोदकच्छटयातद्विरहापनुत्तये ॥ हृदया हितयाप्यदूयतप्रसरद्भोगिफटाभवैर्नतु ॥११॥ सकलंत्रममेपनाशयेत्स्वगहित्वाद्यपदेशजंहरः ॥ इदमद्भुतमस्यचंद्रमःस्फुटमाल्येपिमहाहिसंभवः ॥१२॥ स्मृतिमात्रपथंगतोपियस्त्रिविधंतापमपाकरोत्यलम् ॥ सहिकाशिवियोगतापितःस्वगतंकिंचिदजल्पदित्यजः ॥ १३ ॥ अपिकाशिसमागतोऽनिलोय दिगात्राणिपरिष्वजेन्मम ॥ दवथुःपरिशांतिमेतितन्नहिमानीपरिगाहनेरपि ॥ १४ ॥

अगमिष्यदहोकथंसतापोनुदक्षांगजयायधितः ॥ समर्ज्जीवातुलताझटित्यलंभविष्यन्नहिमाद्रिजायदि ॥ १५ ॥ नतथोज्झितदेहयातयाममदक्षो द्भवयामनोऽदुनोत् ॥ अविमुक्तवियोगजन्मनापरिदूयेतयथामहोष्मणा ॥ १६ ॥ अयिकाशियुदाकदापुनस्तवलप्स्येसुखमंगसंगजम् ॥ अतिशीत लितानियेनमेऽद्भुतगात्राणिभवंतितत्क्षणात् ॥ १७ ॥ अयिकाशिविनाशिताघसंघेतवविश्लेषजआशुशुक्षणिः ॥ अमृतांशुकलामृदुद्रवैरतिचित्रंहविषे वबर्धते ॥ १८ ॥ अगमन्ममदक्षजावियोगजोदवथुःप्राग्धिमवत्सुतोपथेन ॥ अधुनाखलुनेक्षशांतिमार्यायदिकाशीनविलोकयेहमाशु ॥ १९ ॥ मनसेति गृणंस्तदाशिवःसुतरांसंवृततापपर्वकृतः ॥ जगदंबिकयाधियांजनन्याकथमप्येपवियुक्तइत्यमानि ॥ २० ॥ प्रिययावपुषोर्धयानयाप्यपरिज्ञातवियो गकारणः ॥ वचनैरुपचर्यतेस्मसप्रणतप्राणिनिदाघदारणः ॥ २१ ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ तवसर्वगसर्वमस्तिहस्तेविलसद्योगवियोगपक्वकस्ते ॥ तवभूतिरहोविभूतिदात्रीसकलापत्कलिकापिभूतधात्री ॥ २२ ॥ त्वदनीक्षणतःक्षणाद्विभोप्रलयंयांतिजगंतिशोच्यवत् ॥ च्यवतेभवतःकृपालवादितरो धीरनयस्त्वयोंकृतः ॥ २३ ॥

भवतःपरितापहेतवोनभवंतींदुदिवाकराग्नयः ॥ नयनानियतस्त्रिनेत्रतेऽमीप्रणयिन्यस्तिलसज्जलाचमौलौ ॥ २४ ॥ भुजगाभुजगाःसदैवतेऽमीनविषं संक्रमतेत्वनीलकंठ ॥ अहमस्मिचवामदेववामातववामंवपुरत्रचित्तयुक्ता ॥२५॥ इतिसंस्तुतिसंचीजजनन्याभिहितेहिते ॥ गिरांनिगुंफेगिरिशोवक्तुमप्या ददेगिरम् ॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ अयिकाशीत्यपूर्तिर्भवोभावाष्टकोभवत् ॥ सत्वरंशिवयाज्ञायेधुवंकाश्यात्ततोहरः ॥२७॥ अथबालसखी भूततत्तत्काननवीरुधम् ॥ शिवाप्रस्तावयांचक्रेविमुक्तांमुक्तिदांपुरीम् ॥२८॥ ॥ पार्वत्युवाच ॥ ॥ गगनतलमिलितसलिलप्रलयेपिभवच्छिशूलपरि घिधृताम् ॥ कृतपुंडरीकशोभांस्मरहरकाशींपुरींयावः ॥२९॥ धरगधरेंद्रस्यधरातिसुंदरानमांतथास्यापिधिनोतिधूर्जटेः॥धरागतापीहनयाधुवंधरापुरीधुरी णातवकाशिकायथा॥३०॥नयत्रकाश्यांकलिकालजंभयंनयत्रकाश्यांमरणात्पुनर्भवः॥नयत्रकाश्यांक्लुपोद्भवंभयंकथंविभोसानयनानिथिर्भवेत् ॥३१॥

किमत्रनोसंतिपुरःसहस्रशःपदेपदेसर्वसमृद्धिभूमयः ॥ परंनकाशीसदृशीदृशोःपदंकचिद्वितामेभवताशपेशिव ॥ ३२ ॥ त्रिविष्टपेसंतिनकिंपुरःशतं समस्तकौतूहलजन्मभूमयः ॥ तृणीभवंतीहचताःपुरःपुरःपदंपुरारेभवतोभवद्विषः ॥३३॥ नकेवलंकाशिवियोगजोज्वरःप्रवाधतेत्वांतुतथायथात्रमाम् ॥ उपायएषोत्रनिदाघशांतयेपुरीतुमावाममजन्मभूरथ ॥ ३४ ॥ मयानमेनेममजन्मभूमिकावियोगजन्मापरिदाहईशितः ॥ अवाप्यकाशींपरितः प्रशांतिदांसमस्तसंतापविघातहेतुकाम् ॥ ३५ ॥ नमोक्षलक्ष्म्योत्रममप्रमीक्षितास्तनूभृताकेनचिदेवकुत्रचित् ॥ अवैम्यहंशर्मदसर्वशर्मदासरूपिणी मुक्तिरसौहिकाशिका ॥ ३६ ॥

नमुक्तिरस्तीहतथासमाधिनास्थिरेंद्रियत्वोज्झिततत्समाधिना ॥ क्रतुक्रियाभिर्ननवेदविद्ययायथाहिकाश्यांपरिहायविग्रहम् ॥३७॥ ननाकलोकेसुखम स्तितादृशंकुतस्तुपातालतलेऽतिसुंदरे ॥ वार्तापिमर्त्येसुखसंश्रयाकवाकाश्यांहियादृक्तनुमात्रधारिणि ॥ ३८ ॥ क्षेत्रेत्रिशूलिन्भवतोऽविमुक्तेविमुक्ति लक्ष्म्यानकदापिमुक्ते ॥ मनोपियःप्राणिवरःप्रयुंक्तेषडंगयोगंससदैवयुक्ते ॥ ३९ ॥ षडंगयोगान्नहितादृशीनृभिःशरीरसिद्धिःसहसात्रलभ्यते ॥ सुखे नकाशींसमवाप्ययादृशीदशौस्थिरीकृत्यशिवत्वयिक्षणम् ॥ ४० ॥ वरंहितिर्यक्कमबुद्धिवैभवंनमानवत्वंवबुद्धिभाजनम् ॥ अकाशिसंदर्शनिष्फलो दयंप्रमंततःपुष्करवुद्बुदोपमम् ॥ ४१ ॥ दृशौकृतार्थेकृतकाशिदर्शनेतनुःकृतार्थाशिवकाशिवासिनी ॥ मनःकृतार्थंधृतकाशिसंश्रयंमुखंकृतार्थंकृतका शिसंमुखम् ॥ ४२ ॥ वरंहितत्काशिरजोतिपावनंरजस्तमोध्वंसिशशिप्रभोज्वलम् ॥ कृतप्रणामैर्मणिकर्णिकाभुवेलललाटगंयद्वहुमन्यतेसुरैः ॥ ४३ ॥

नदेवलोकोनचसत्यलोकोननागलोकोमणिकर्णिकायाः ॥ तुलांत्रजेद्यत्रमहाप्रयाणकृच्छ्रतिर्भवेद्ब्रह्मरसायनास्पदम् ॥४४॥ महामहोभूर्मणिकर्णिकास्थ लीतमस्ततिर्यत्रसमेतिसंक्षयम् ॥ परःशतैर्जन्मभिरेधितापियादिवाकरार्चीदुकरैरनिग्रहा ॥ ४५ ॥ किमुनिर्वाणपदस्यभद्रपीठंमृदुलंतल्पमथोनुमो क्षलक्ष्म्याः ॥ अथवामणिकर्णिकास्थलीपरमानंदमुकंदजन्मभूमिः ॥ ४६ ॥ समतीतविमुक्तजंतुसंख्याक्रियतेयत्रजनैःसुखोपविष्टैः ॥ विलसद्द्युति सूक्ष्मशर्कराभिःस्ववपुःपातमहोत्सवाभिलाषैः ॥ ४७ ॥ ॥ स्कंदउवाच ॥ ॥ अपर्णापरिवर्ण्येतिपुरीवाराणसींमुने ॥ पुनर्विज्ञापयामासकाशीप्राप्येपि नाकिनम् ॥ ४८ ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ प्रमथाधिपसर्वेशनित्यस्वाधीनवर्तन ॥ यथानंदवनंयायांतथाकुरुवरप्रद ॥ ४९ ॥ स्कन्द उवाच ॥ ॥ जितपीयूषमाधुर्याकाशीस्तवनसुंदरीम् ॥ अथाकर्ण्यहिमुदितोगिरिशोगिरिजांगिरम् ॥ ५० ॥ श्रीदेवदेवउवाच ॥ ॥ अयिप्रियतमेगौरित्वद्वा गमृतसीकरैः ॥ आप्यायितोस्मिनितरांकाशीप्राप्तैयतेधुना ॥ ५१ ॥

त्वंजानासिमहादेविममयत्तन्महद्व्रतम्॥अभुक्तपूर्वमन्येनवस्तूपाश्रामिनेतरत् ॥५२॥ पितामहस्त्यवचनादिवोदासेमहीपतौ ॥धर्मेणशासतिपुरींकउपायो विधीयताम् ॥५३॥ कथंसराजाधर्मिष्ठःप्रजापालनतत्परः ॥ वियोज्यतेपुरःकाश्यादिवोदासोमहीपतिः॥५४॥अधर्मवर्तिनोयस्माद्विघ्नःस्यान्नेतरस्यतु ॥ तस्मात्कंप्रेषयामीशेयस्तंकाश्याद्वियोजयेत् ॥ ५५ ॥ धर्मवर्त्मानुसरतांयोविघ्नंसमुपाचरेत् ॥ तस्यैवजायतेविघ्नःप्रत्युतप्रेमवर्धिनि ॥५६॥ विनाच्छिद्रेणतंभूपंनोत्सादयितुमुत्सहे ॥ मयैवहियतोरक्ष्याःप्रियेधर्मधुरंधराः ॥ ५७ ॥ नजरातमतिक्रामेन्नतंमृत्युर्जिवांसति ॥ व्याधयस्तंनबाधंतेधर्मवर्त्म भृदव्रयः ॥ ५८ ॥ इतिसंचिंतयन्देवोयोगिनीचक्रमग्रतः ॥ ददर्शातिमहाप्रौढंगाढकार्यस्यसाधनम् ॥५९॥ अथदेव्यासमालोच्यव्योमकेशोमहामुने ॥ योगिनीवृंदमाहूयजगौवाक्यमिदंहरः ॥ ६० ॥ सत्वरंयातयोगिन्योमम्वाराणसींपुरीम् ॥ यत्रराजादिवोदासोराज्यंधर्मेणशास्त्यलम् ॥ ६१ ॥ स्वधर्म विच्युतःकाशींयथातूर्णत्यजेन्नृपः ॥ तथोपचरतप्राज्ञायोगमायाबलान्विताः ॥६२॥ यथापुनर्नवीकृत्यपुरींवाराणसीमहम् ॥ इतःप्रयामियोगिन्यस्तथा क्षिप्रंविधीयताम् ॥ ६३ ॥ इतिप्रसादमासाद्यशासनंशिरसावहन् ॥ कृतप्रणामोनिर्यातोयोगिनीनांगणस्तनः ॥ ६४ ॥ ययुराकाशमाविश्यमनसोप्य तिरंहसा ॥ परस्परंभाषमाणायोगिन्यस्तामुदान्विताः ॥६५॥ अद्यधन्यनराःस्मोवैदेवदेवेनयत्स्वयम्॥कृतप्रसादाःसहिताःश्रीमदानंदकाननम् ॥६६॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अद्यसद्योमहालाभावभूतांनोतिदुर्लभो ॥ त्रिनेत्रराजसंमानस्तथाकाशीविलोकनम् ॥ ६७ ॥ इतिमुदितमनाःसयोगिनीनांनिकुरंबस्त्वथमंदराद्रिकुं
जात् ॥ नभसिलघुकृतप्रयाणवेगोनयनातिथ्यमलंभयत्पुरींताम् ॥ ६८ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धे
काशीवर्णनंनामचतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ स्कंद उवाच ॥ ॥ अथतद्योगिनीवृंदंदूराद्दृष्टिप्रसार्यच ॥ स्वनेत्रदैर्घ्यनिर्माणंप्रशंसंफला
न्वितम् ॥ १ ॥ दिव्यप्रासादमालानांपताकाश्चलपल्लवाः ॥ सादरंदूरमार्गस्थान्पांथानाह्वयतीरिव ॥२॥ चंचत्प्रासादमाणिक्यैर्विजृंभितमरीचिभिः ॥
सुनीलमपिचव्योमवीक्ष्यमाणंसुनिर्मलम् ॥ ३ ॥ देवत्वंमाययाच्छाद्यवेषंकार्पटिकोचितम् ॥ विधायकाशीमविशद्योगिनीचक्रमक्रमम् ॥ ४ ॥ काचि
द्योगिनीभूताकाचिज्जातातपस्विनी ॥ काचिद्भूवसैरंध्रीकाचिन्मासोपवासिनी ॥५॥ मालाकारवधूःकाचित्काचिन्नापितसुंदरी ॥ सूतिकर्मविचारज्ञा
ऽपरामेषज्यकोविदा ॥ ६ ॥ वेश्याचकाचिदभवत्कयविक्रयचंचुरा ॥ व्यालग्राहिण्यभूत्काचिद्दासीधात्रीचकाचन ॥ ७ ॥ एकाचनृत्यकुशलात्व
न्यागानविशारदा ॥ अपरावेणुवादज्ञापरावीणाधराभवत् ॥ ८ ॥ मृदंगवादनज्ञान्याकाचित्तालकलावती ॥ काचित्कार्मणतत्त्वज्ञाकाचिन्मौक्तिकगुं
फिका ॥ ९ ॥ गंधभागविधिज्ञान्याकाचिदक्षकलालया ॥ आलापोल्लासकुशलाकाचिच्चत्वरचारिणी ॥ १० ॥

वंशाधिरोहणेदक्षारुमार्गेणचेतरा ॥ का॥ चेद्वातुलचेष्टाऽभूत्पथिचीवरवेष्टना ॥ ११ ॥ अपत्यदाऽनपत्यानांपरातत्रपुरेऽवसत् ॥ काचित्करांघ्रिरेखाणां
लक्षणानिचिकेतिच ॥ १२ ॥ चित्रलेखननैपुण्यात्काचिच्चनमनोहरा ॥ वशीकरणमंत्रज्ञाकाचित्तत्रचचारह ॥ १३ ॥ गुटिकासिद्धिदाकाचित्का
चिदंजनसिद्धिदा ॥ धातुवादविदग्धान्यापादुकासिद्धिदापरा ॥ १४ ॥ अग्निस्तंभंजलस्तंभंवाक्स्तंभंचाप्यशिश्नयत् ॥ खेचरीत्वंददौकाचिद्दृश्यत्वं
पराददौ ॥ १५ ॥ काचिदाकर्षणसिद्धिददावुच्चाटनंपरा ॥ काचिन्निजांगसौंदर्ययुवचित्तविमोहिनी ॥ १६ ॥ चिंतितार्थप्रदाकाचित्काचिज्ज्योतिः
कलावती ॥ इत्यादिवेषभाषाभिरनुकृत्यसमंततः ॥ १७ ॥ प्रत्यंगणंप्रतिगृहंप्राविशद्योगिनीगणः ॥ इत्थमब्दंचरंत्यस्तायोगिन्योऽहर्निशंपुरि ॥१८॥
नच्छिद्रंलेभिरेकापिनृपविघ्नचिकीर्षवः ॥ ततःसमेत्यताःसर्वायोगिन्योवंध्यवांछिताः ॥ तस्थुःसंमंत्र्यतत्रैवनगतामंदंपुनः ॥ १९ ॥ प्रभुकार्यम
निष्पाद्यसदःसंभावनेधिनः॥कःपुरःशक्नुयात्स्थातुंस्वामिनोक्षतविग्रहः ॥२०॥ अन्यच्चचिंतितंतताभिर्योगिनीभिरिदंमुने ॥ प्रभुंविनापिजीत्रामोनतुकाशीं
विनापुनः ॥ २१ ॥ प्रभूरुद्योपिसद्भक्त्येजीविकामात्रहारकः ॥ काशीहरत्कराद्भक्तापुरुषार्थत्रतुष्टयम् ॥ २२ ॥ नाद्यापिकाशींसंत्यज्यतदारभ्यमहामुने ॥
योगि नोन्यत्रतिष्ठंतिचरंत्योपिजगत्त्रयम् ॥ २३ ॥

प्राप्यापिश्रीमत्काशींयस्तितिक्षतिदुर्मतिः ॥ सएवप्रत्युतत्यक्तोधर्मकामार्थमुक्तिभिः ॥२४॥ कःकाशींप्राप्यदुर्बुद्धिरपरत्रयियासति ॥ मोक्षनिक्षेपकलशीं
तुच्छश्रीकृतमानसः ॥ २५ ॥ विमुखोपीश्वरोऽकंकाशीसेवनपुण्यतः ॥ संमुखोभवितापुण्यंकृतकृत्याःस्मतद्व्रयम् ॥ २६ ॥ दिनैःकतिपयैरेवसर्वज्ञो
पिसमेष्यति ॥ विनाकाशींनरमतेयतोऽन्यत्रत्रिलोचनः ॥ २७ ॥ शंभोःशक्तिरियंकाशीकाचित्सर्वैरगोचरा ॥ शंभुरेवहिजानीयादेतस्याःपरमंसुखम् ॥
॥ २८ ॥ इतिनिश्चित्यमनसिशंभोरानंदकानने ॥ अतिष्ठद्योगिनीवृंदंकयाचिन्मायययावृतम् ॥ २९ ॥ व्यासउवाच ॥ ॥ इत्थंसमाकर्ण्यमुनिःपुनः
पप्रच्छपण्मुखम् ॥ कानिकानिचनामानितासांतानिवदेश्वर ॥ ३० ॥ भजनाद्योमिनीनांचकाश्यांकिंजायतेफलम् ॥ कस्मिन्पर्वणिताःपूज्याःकथं
पूज्याश्चतद्वद ॥ ३१ ॥ श्रुत्वेतिप्रश्नमौमेयोयोगिनीसंश्रयंततः ॥ प्रत्युवाचमुनेवच्मिशृणोत्वंहितोभवान् ॥ ३२ ॥ ॥ स्कंदउवाच ॥ ॥ नामधेया
निवक्ष्यामियोगिनीनांघटोद्भव ॥ आकर्ण्ययानिपापानिक्षयंतिभविनांक्षणात्॥३३॥ गजाननानिंहमुखीगृध्रास्याकाकतुंडिका॥ उष्ट्रग्रीवाहयग्रीवावाराही
शरभानना ॥३४॥ उलूकिकाशिवारावावामयूरीविकटानना ॥ अष्टवक्राकोटराक्षीकुब्जाविकटलोचना ॥३५॥ शुष्कोदरीललज्जिह्वाश्वदंष्ट्रावानरानना ॥
ऋक्षाक्षीकेकराक्षीचवृहत्तुंडासुराप्रिया ॥ ३६ ॥ कपालहस्तारक्ताक्षीशुकीश्येनीकपोतिका ॥ पाशहस्तादंडहस्ताप्रचंडाचंडविक्रमा ॥ ३७ ॥ शिशुघ्नी
पापहंत्रीचकालीरुधिरपायिनी ॥ वसाधयागर्भभक्षाशवहस्तांत्रमालिनी ॥३८॥ स्थूलकेशीवृहत्कुक्षिःसर्पास्याप्रेतवाहना ॥ दंदशूककराकोंचीमृगशी
र्षावृषानना ॥ ३९ ॥ व्यात्तास्याधूम्रनिःश्वासाव्योमैकचरणोर्ध्वदृक् ॥ तापनीशोषणीदृष्टिःकोटरीस्थूलनासिका ॥ ४० ॥ विद्युत्प्रभाबला
कांस्यामाजारीकटपूतना ॥ अट्टाट्टहासाकामाक्षीमृगाक्षीमृगलोचना ॥४१॥ नामानीमानियोमर्त्यश्चतुःपष्टिंदिनेदिने ॥ जपेन्निसंध्यंतस्येहदुष्टबाधाप्र
शाम्यति ॥ ४२ ॥ नडाकिन्योनशाकिन्योनकूष्मांडानराक्षसाः ॥ तस्यपीडांप्रकुर्वंतिनामानीमानियःपठेत् ॥ ४३ ॥

शिशूनांशांतिकारीणिगर्भशांतिकराणिच ॥ रणेराजकुलेवापिविवादेजयदान्यपि ॥ ४४ ॥ लभेदभीप्सितांसिद्धियोगिनीपीठसेवकः ॥ मंत्रांतराण्य
पिजपंस्तत्पीठेसिद्धिभाग्भवेत् ॥ ४५ ॥ बलिपूजोपहारैश्चधूपदीपसमर्पणैः ॥ क्षिप्रंप्रसन्नायोगिन्यःप्रयच्छेयुर्मनोरथान् ॥ ४६ ॥ शरत्कालेमहापूजां
तत्रकृत्वाविधानतः ॥ हर्वीपिहुत्वामंत्रज्ञोमहतींसिद्धिमाप्नुयात् ॥ ४७ ॥ आरभ्याश्वयुजःशुक्लांतिथिंप्रतिपदंशुभाम् ॥ पूजयेन्नवमींयावन्नरश्चिंति
तमाप्नुयात् ॥ ४८ ॥ कृष्णपक्षस्यभूतायामुपवासीनरोत्तमः ॥ तत्रजागरणंकृत्वामहतींसिद्धिमाप्नुयात् ॥ ४९ ॥ प्रणवादिचतुर्थ्यंतैर्नामभिर्भ
क्तिमान्नरः ॥ प्रत्येकंहवनंकृत्वाशतमष्टोत्तरंनिशि ॥ ५० ॥ ससर्पिपायुग्गुलुनालघुकोलिप्रमाणतः ॥ यांयांसिद्धिमभीप्सेततांतांप्राप्नोतिमानवः ॥५१॥
चैत्रकृष्णप्रतिपदितत्रयात्राप्रयत्नतः ॥ क्षेत्रविघ्नप्रशांत्यर्थंकर्तव्यापुण्यकृज्जनैः ॥ ५२ ॥ यात्रांचसांवत्सरिकींयोनकुर्यादवज्ञया ॥ तस्यविघ्नप्रयच्छं
तियोगिन्यःकाशिवासिनः ॥ ५३ ॥ अग्रेकृत्वास्थिताःसर्वास्ताःकाश्यांमणिकर्णिकाम् ॥ तत्रमस्कारमात्रेणनरोविघ्नैर्नवाध्यते ॥ ५४ ॥ इतिश्रीस्कां
देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेचतुःषष्टियोगिन्यागमनंनामपंचचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ स्कंदउवाच ॥ ॥
गतेथयोगिनीवृंदेदेवदेवोवटोद्भव ॥ काशीप्रवृत्तिंजिज्ञासुःप्राहिणोदंशुमालिनम् ॥१॥ देवदेवउवाच ॥ ॥ सप्ताश्चत्वारितोयाहिपुरीवाराणसींशुभाम् ॥
यत्रास्तिसदिवोदासोधर्ममूर्तिर्महीपतिः ॥ २ ॥ तस्यधर्मविरोधेनयथातत्क्षेत्रमुद्वसेत् ॥ तथाकुरुष्वभो क्षिप्रंमावमंस्थाश्चतंनृपम् ॥ ३ ॥ धर्ममार्ग
प्रवृत्तस्यक्रियतेयावमानना ॥ सामवेदात्मनोनूनंमहदेनश्चजायते ॥ ४ ॥ तवबुद्धिविकासेनच्यवतेचेत्सधर्मतः ॥ तदासानगरीभानोत्वयोद्वास्याऽ
सहैःकरैः ॥ ५ ॥ कामक्रोधौलोभमोहौमत्सराहंकृतीअपि ॥ तेतत्रनभवेतांयत्तत्कालोपिनतंजयेत् ॥ ६ ॥ यावद्धर्मेस्थिराबुद्धिर्यावद्धर्मेस्थिरंमनः ॥
तावद्विघ्नोदयःकास्तिविपद्यापिरवेर्नृषु ॥ ७ ॥

सर्वेषामिहजंतूनांत्वंवेत्सित्रत्रचेष्टितम् ॥ अतएवजगच्चक्षुर्व्रजत्वंकार्यसिद्धये ॥ ८ ॥ रविरादायदेवाज्ञांमूर्तिमन्यांप्रकल्प्यच ॥ नभोध्वगामहोरात्रंकाशी
मभिमुखोऽभवत् ॥ ९ ॥ मनसातीवलोलोऽभूत्काशीदर्शनलालसः ॥ सहस्रचरणोप्येच्छत्तदाखेनैकपादताम् ॥ १० ॥ हंसत्वंतस्यसूर्यस्यतदासफ
लतामगात् ॥ सदानभोध्वनीनस्यंकाशींप्रतियियासतः ॥ ११ ॥ अथकाशींसमासाद्यरविरंतर्वहिश्चरन् ॥ मनागपिनतद्रूपेधर्मध्वस्तिमवेक्षत ॥१२॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विभावसुर्वसन्काश्यांनानारूपेणवत्सरम् ॥ क्वचिन्नावसरंप्रापतत्रराज्ञिसुधर्मिणि ॥ १३ ॥ कदाचिदतिथिर्भूतोदुर्लभंप्रार्थयन्रविः ॥ नतस्यराज्ञोविषये दुर्लभंकिंचिदैक्षत ॥ १४ ॥ कदाचिद्याचकोजातोबहुदोषिकदाप्यभूत् ॥ कदाचिद्दीनतांप्राप्तःकदाचिद्व्रणकोप्यभूत् ॥ १५ ॥ वेदवाह्यांक्रियांचापिकदाचित्प्रत्यपादयत्॥कदाचित्स्थापयामासदृष्टप्रत्ययमैहिकम् ॥१६॥ कदाचिन्नटिलोजातःकदाचिच्चादिगंबरः ॥ सकदाचिन्मांगुलिकोविषविद्याविशारदः॥ ॥ १७ ॥ सर्वपाषंडधर्मज्ञःकदाचिद्ब्रह्मवाद्यभूत् ॥ ऐंद्रजालिकआसीच्चकदाचिद्भ्रामयञ्जनान् ॥ १८ ॥ नानाव्रतोपदेशैश्चकदाचित्सपतिव्रताः ॥ क्षो भयामासबहुशःसदृष्टांतकथानकैः ॥ १९ ॥ कापालिकव्रतधरःकदाचिच्चाभवद्द्विजः ॥ कदाचिदपिविज्ञानीधातुवादीकदाचन ॥ २० ॥ क्वचिद्विप्रःक्व चिद्राजपुत्रोवैश्योंत्यजःक्वचित् ॥ ब्रह्मचारीक्वचिदभूद्वृहद्वनचरःक्वचित् ॥ २१ ॥ यतिःकदाचिदितिसरूपेरश्रामयज्जनान् ॥ सर्वविद्यासुकुशलः सर्वज्ञश्चाभवत्क्वचित् ॥ २२ ॥

इतिनानाविधैरूपैश्चरन्काश्यांग्रहेश्वरः ॥ नकदाप्यजनेक्षापिच्छिद्रंप्रापकदाचन ॥ २३ ॥ ततोनिर्निंदचात्मानंचिंतार्तःकश्यपात्मजः ॥ धिक्परप्रेष्यतां यस्यांयशोलभ्येतनक्वचित् ॥ २४ ॥ ॥ मार्तंडउवाच ॥ ॥ मंदरंयदियाम्यद्यसद्यस्तत्क्रुद्धयतीश्वरः ॥ अनिष्पादितकार्यार्थेमयिसामान्यभृत्यवत् ॥ ॥ २५ ॥ कोपमप्युररीकृत्ययदियायांकथंचन ॥ कथंतिष्ठेपुरस्तस्यतर्हिवैभूढभृत्यवत् ॥ २६ ॥ अथोंकृत्यावदेलंवायामिचेच्चकथंचन ॥ क्रोधान्निरी क्षेत्स्वक्षोमांविषंपेयंतदामया ॥ २७ ॥ हरकोपानलेनूनंयदियातःपतंगताम् ॥ पितामहोपिमांत्रातुंतदाशक्ष्यतिनस्फुटम् ॥ २८ ॥ न्यास्याम्यत्रेवतत्रित्यं नत्यक्ष्यामिकदाचन ॥ क्षेत्रसंन्यासविधिनावाराणस्यांकृताश्रमः ॥ २९ ॥ पुरःपुरारेःकार्यार्थमनिवेद्येहतिष्ठतः ॥ यत्पापंभाविमेतस्यकाशीपापस्यनि ष्कृतिः ॥३०॥ अन्यान्यपिचपापानिमहांत्यल्पानियानिच ॥ क्षयंतितानिसर्वाणिकाशींप्रविशतांसताम् ॥३१॥ बुद्धिपूर्वंमयाचेतदपांसमुपार्जितम् ॥ पुरारिणेहपुराऽऽज्ञासिधर्मोहिरक्ष्यताम् ॥ ३२ ॥ धर्मोहिरक्षितोयेनदेहेसत्वरगत्वरे ॥ त्रैलोक्यंरक्षितंतेनर्किंकामार्थैःसुरक्षितैः ॥ ३३ ॥ रक्षणीयोय दिभवेत्काम कामारिणाकथम् ॥ क्षणादनंगतांनीतोबहूनांसुखकार्यपि ॥३४॥ अर्थश्चेत्सर्वथारक्ष्यइतिकैश्चिदुदाहृतम् ॥ तत्कथंनहरिश्चंद्रोऽरक्षत्कुशिकनं दने ॥ ३५ ॥ धर्मस्तुरक्षितःसर्वैरपिदेहव्ययेनच ॥ शिबिप्रभृतिभूपालैर्दधीचिप्रमुखैर्द्विजैः ॥ ३६ ॥ अयमेवहिवैधर्मःकाशीसेवनसंभवः ॥ रुषितादपिरुद्रान्मांरक्षिष्यतिनसंशयः ॥ ३७ ॥ अवाप्यकाशींदुष्प्रापांकोजहातिसचेतनः ॥ रत्नंकरस्थमुत्सृज्यकःकाचंसंजिघृक्षति ॥ ३८ ॥

वाराणसींसमुत्सृज्ययस्त्वन्यत्रयियासति ॥ हत्वानिधानंपादेनसोर्थमिच्छतिभिक्षया ॥ ३९ ॥ पुत्रमित्रकलत्राणिक्षेत्राणिचधनानिच ॥ प्रतिजन्मे हलभ्यंतेकाश्येकानैवलभ्यते ॥ ४० ॥ येनलब्धापुरीकाशीत्रैलोक्योद्धरणक्षमा ॥ त्रैलोक्यैश्वर्यदुष्प्रापंतेनलब्धंमहासुखम् ॥ ४१ ॥ कुपितोपिहिमे रुद्रस्तेजोहानिंविधास्यति ॥ काश्यांचलप्स्येतत्तेजोयद्वैस्वात्मावबोधजम् ॥ ४२ ॥ इतराणीहतेजांसिभासंतेतावदेवहि ॥ खद्योताभानियावन्नोजृंभते काशिजंमह ॥ ४३ ॥ इतिकाशीप्रभावज्ञोजगच्चक्षुस्तमोनुदः ॥ कृत्वाद्वादशधात्मानंकाशीपुर्याव्यवस्थितः ॥ ४४ ॥ लोलार्कउत्तरार्कश्चसांबादि त्यस्तथैवच ॥ चतुर्थोद्रुपदादित्योमयूखादित्यएवच ॥ ४५ ॥ खखोल्कश्चारुणादित्योवृद्धकेशवसंज्ञकौ ॥ दशमोविमलादित्योगंगादित्यस्तथैवच ॥ ॥ ४६ ॥ द्वादशश्चयमादित्यःकाशिपुर्याघटोद्भव ॥ तमोऽरिकेभ्योदुष्टेभ्यःक्षेत्ररक्षंत्यमीसदा ॥ ४७ ॥ तस्यार्कस्यमनोलोलंयदासीत्काशिदर्शने ॥ अतोलोलार्कइत्याख्याकाश्यांजाताविवस्वतः ॥ ४८ ॥ लोलार्कस्त्वसिसंभेदेदक्षिणस्यांदिशिस्थितः ॥ योगक्षेमंसदाकुर्यात्काशीवासिजनस्यच ॥ ॥ ४९ ॥ मार्गशीर्षस्यसप्तम्यांपष्ठ्यांवारविवासरे ॥ विधायवार्षिकींयात्रांनरःपापैःप्रमुच्यते ॥ ५० ॥ कृत्वानियानिपापानिनरैःसंवत्सरावधि ॥ नश्यं तिक्षणतस्तानिपष्ठ्यर्केलोलदर्शनात् ॥ ५१ ॥ नरःस्नात्वासिसंभेदेसंतर्प्यपितृदेवताः ॥ श्राद्धंविधायविधिनापित्रानृण्यमवाप्नुयात् ॥५२॥ लोलार्कसं गमेस्नात्वादानंहोमंसुरार्चनम् ॥ यत्किंचित्क्रियतेकर्मतदानंत्यायकल्पते ॥ ५३ ॥ सूर्योपरागेलोलार्केस्नानदानादिकाःक्रियाः ॥ कुरुक्षेत्रादशगुणाभवं तीहनसंशयः ॥ ५४ ॥ लोलार्केरथसप्तम्यांस्नात्वागंगासिसंगमे ॥ सप्तजन्मकृतैःपापैर्मुक्तोभवतितत्क्षणात् ॥ ५५ ॥

भ्रत्यर्कवारंलोलार्कंयःपश्यतिशुचिव्रतः ॥ नतस्यदुःखंलोकेस्मिन्कदाचित्संभविष्यति॥५६॥ नतस्यदुःखंनोपामानदद्धुर्नाविचर्चिका ॥ लोलार्कमर्कंयः पश्येत्तत्पादोदकसेवकः ॥ ५७ ॥ वाराणस्यामुपित्वापियोलोलार्कंनसेवते ॥ सेवंतेतंनरंनूनंक्लेशाःक्षुद्व्याधिसंभवाः ॥ ५८ ॥ सर्वेषांकाशितीर्थानांलो लार्कःप्रथमंशिरः ॥ ततोऽगान्यन्यतीर्थानितज्जलद्यावितानिहि ॥ ५९ ॥ तीर्थांतराणिसर्वाणिभूमीवलयगान्यपि ॥ असिसंभेदतीर्थस्यकलांनार्हं तिषोडशीम् ॥ ६० ॥ सर्वेषामेवतीर्थानांस्नानाद्यल्लभ्यतेफलम् ॥ तत्फलंसम्यगाप्येतनरैर्गंगासिसंगमे ॥ ६१ ॥ नार्थवादोयमुदितःस्तुतिवादोनवै मुने ॥ सत्यंयथार्थवादोयंश्रद्धेयःसद्भिरादरात् ॥ ६२ ॥ यत्रविश्वेश्वरःसाक्षाद्यत्रस्वर्गतरंगिणी ॥ मिथ्यातत्रानुमन्यंतेतार्किकाश्चानुसूयकाः ॥ ६३ ॥ उदाहरंतियेमूढाःकुतर्कबलदर्पिताः ॥ काश्यांसर्वेर्थवादोयंतेविद्कीटायुगेयुगे ॥ ६४ ॥ कस्यचित्काशितीर्थस्यमहिम्नोमहतस्तुलाम् ॥ नाधिरोहेन्मुने नूनमपित्रैलोक्यमंडपः ॥ ६५ ॥ नास्तिकावेदवाह्याश्चशिश्नोदरपरायणाः ॥ अंत्यजाताश्चयेतेषांपुरःकाशीनवर्ण्यताम् ॥ ६६ ॥ लोलार्करनि घ्नाअसिधारविखंडिताः ॥ काश्यांदक्षिणदिग्भागेनविशेयुर्महामलाः ॥६७॥ महिमानमिमंश्रुत्वालोलार्कस्यनरोत्तमः ॥ नदुःखीजायतेक्वापिसंसारेदुःखसागरे ॥ ६८ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेलोलार्कवर्णनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ स्कंदउवाच ॥ ॥ अथोत्तरस्यामाशायांकुंडमर्कांख्यमुत्तमम् ॥ तत्रनाम्नोत्तरार्केणरश्मिमालीव्यवस्थितः ॥ १ ॥

तापयन्दुःखसंघातंसाधूनाप्याययन्रविः ॥ उत्तरार्कोमहातेजाःकाशींरक्षतिसर्वदा ॥ २ ॥ तत्रेतिहासोयोवृत्तस्तंनिशामयसुव्रत ॥ विप्रःप्रियव्रतोनामक श्चिदात्रेयवंशजः ॥ ३ ॥ आसीत्काश्यांशुभाचारःसदातिथिजनप्रियः ॥ भार्याशुभव्रतातस्यव्रभूवातिमनोहरा ॥ ४ ॥ भर्तृशुश्रूषणरतागृहकर्मसुपे शला ॥ तस्यांसजनयामासकन्यामेकांसुलक्षणाम् ॥ ५ ॥ मूलर्क्षप्रथमेपादेतथार्केद्रेवृहस्पतौ ॥ ववृधेसागृहेपित्रोःशुक्लेपक्षेयथाशशी ॥ ६ ॥ सुरूपा विनयाचारापित्रोश्चप्रियकारिणी ॥ अतीवनिपुणाजातागृहोपस्करमार्जने ॥ ७ ॥ यथायथासमैधिष्टसाकन्यापितृमंदिरे ॥ तथातथापितुस्तस्याश्चिंतासं ववृधेतराम् ॥ ८ ॥ कस्मैदेयावराकन्यासुरम्येयंसुलक्षणा ॥ अस्याअनुगुणोलभ्यःकमयावरउत्तमः ॥ ९ ॥ कुलेनवयसाचापिशीलेनापिगुणेनच ॥ रूपेणार्थेनसंयुक्तःकस्मैदत्तासुखंलभेत् ॥ १० ॥ इतिचिंतयतस्तस्यज्वरोभूदतिदारुणः ॥ यश्चिताख्योज्वरःपुंसामौषधैर्नापिशाम्यति ॥ ११ ॥ तन्मूलर्क्षविपाकेनचिंताख्येनज्वरेणच ॥ सविप्रःपंचतांप्राप्तस्त्यक्तसर्वगृहादिकम् ॥ १२ ॥ पितर्युपरतेतस्याःकन्यायाःसाजनन्यपि ॥ शुभव्रतापरि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्यज्यतांकन्यांपतिमन्वगात् ॥ १३ ॥ धर्मोयंसहचारिण्याजीवताजीवतापिवा ॥ पत्यासहैवस्थातव्यंपतिव्रतयुजासदा ॥ १४ ॥ नापत्यंपातिनोमातान पितानैववांधवाः ॥ पत्युश्चरणशुश्रूषापायाद्वैकेवलंस्त्रियम् ॥१५॥सुलक्षणापिदुःखार्तापित्रोःपंचत्वमाप्तयोः ॥ और्ध्वदैहिकमापाद्यदशाहंविनिवर्त्यच ॥ ॥ १६ ॥ चिंतामवापमहतीमनाथादैन्यमागता ॥ कथमेकाकिनीपित्रामात्राहीनाभवांबुधेः ॥ १७ ॥ दुस्तरंपारमाप्स्यामिस्त्रीत्वंसर्वाभिभावियत् ॥ नकस्मैचिद्वरायाहंपितृभ्यांप्रतिपादिता ॥ १८ ॥ तददत्ताकथंस्वैरमहमन्यंवरंवृणे ॥ वृतोपिनकुलीनश्चेद्गुणवान्नचशीलवान् ॥ १९ ॥ स्वाधीनोपि नतत्तेनवृतेनापिहिकिंभवेत् ॥ इतिसंचिंतयंतीसारूपौदार्यगुणान्विता ॥ २० ॥ युवभिर्बहुभिर्नित्यंप्रार्थितापिमुहुर्मुहुः ॥ नकस्यापिददौबालाप्रवेशं निजमानसे ॥ २१ ॥ पित्रोरुपरतिंदृष्ट्वावात्सल्यंचतथाविधम् ॥ निनिंदबहुधात्मानंसंसारंचनिनिंदह ॥ २२ ॥ याभ्यामुत्पादिताचाहंयाभ्यांचपरिपा लिता ॥ पितरौकुत्रतौयातौदेहिनोधिगनित्यताम् ॥ २३ ॥

अहोदेहोप्यहोंगत्वंयथापित्रोःपुरोमम ॥ इतिनिश्चित्यसाबालाविजितेंद्रियमानसा ॥ २४ ॥ ब्रह्मचर्यंदृढंकृत्वातपउग्रंचचारह ॥ उत्तरार्कस्यदेवस्यसमी पेस्थिरमानसा ॥२५॥ तस्यांतपस्यमानायामेकाच्छागीलघीयसी ॥ तत्रप्रत्यहमागत्यतिष्ठेत्तत्पुरतोऽचला ॥२६॥ तृणपर्णादिकंकिंचित्सायमभ्यवहृ त्यसा ॥ तत्कुंडपीतपानीयास्वस्वामिसदनंव्रजेत् ॥ २७ ॥ ततइत्थंव्यतीतासुपंचपासुसमासुच ॥ लीलयाविचरन्देवस्तत्रदेव्यासहागतः ॥ २८ ॥ सन्निधावुत्तरार्कस्यतपस्यंतींसुलक्षणाम् ॥ स्थाणुवन्निश्चलांस्थाणुरद्राक्षीत्तपसाकृशाम् ॥२९॥ ततोगिरिजयाशंभुर्विज्ञप्तःकरुणात्मना ॥ वरेणानुगृहाणे मांबंधुहीनांसुमध्यमाम् ॥ ३० ॥ शर्वाणीगिरमाकर्ण्यततःशर्वःकृपानिधिः ॥ समाधिमीलिताक्षींतामुवाचवरदोहरः ॥ ३१ ॥ सुलक्षणेप्रसन्नोस्मिवरं वरयसुव्रते ॥ चिरंग्विन्नासितपसाकस्तेऽस्तीहमनोरथः ॥३२॥ सापिशंभोर्गिरंश्रुत्वामुखपीयूषवर्षिणीम् ॥ महासंतापशमनींलोचनेउदमीलयत् ॥३३॥ त्र्यक्षंप्रत्यक्षमावीक्ष्यवरदानोन्मुखंपुरः ॥ देवींचवामभागस्थांप्रणनामकृतांजलिः ॥ ३४ ॥ किंवृणेयावदित्थंसाचिंतयेच्चारुमध्यमा ॥ तावत्तयानिरै क्षिष्टवराकीवर्करीपुरः ॥ ३५ ॥ आत्मार्थंजीवलोकेस्मिन्कोनजीवतिमानवः ॥ परंपरोपकारार्थंयोजीवतिसजीवति ॥ ३६ ॥ अनयामत्तपोवृत्तिसा क्षिण्याबह्वनेहसम् ॥ असेव्यहंतदेतस्यैवरयामिजगत्पतिम् ॥ ३७ ॥ परामृश्यमनस्येतत्प्राहत्र्यक्षंसुलक्षणा ॥ कृपानिधेमहादेवयदिदेयोवरोमम ॥ ॥ ३८ ॥ अजशावीवराक्येपातर्हिप्रागनुगृह्यताम् ॥ वक्तुंपशुत्वान्नोवेत्तिकिंचिन्मद्भक्तिपेशला ॥ ३९ ॥ इतिवाचंनिशम्येशःपरोपकृतिशालिनीम् ॥ सुलक्षणायानितरांतुतोपप्रणतार्तिहा ॥ ४० ॥ देवदेवस्ततःप्राहदेविपश्यगिरींद्रजे ॥ साधूनामीदृशीबुद्धिःपरोपकरणोर्जिता ॥ ४१ ॥ तेधन्याःसर्वलो केषुसर्वधर्माश्रयाश्चते ॥ यतंतेसर्वभावेनपरोपकरणायये ॥४२॥ संचयाःसर्ववस्तूनांचिरंतिष्ठंतिनोक्वचित् ॥ सुचिरंतिष्ठतेचैकंपरोपकरणंप्रिये ॥४३॥ धन्यासुलक्षणाचैषायोग्याऽनुग्रहकर्मणि ॥ ब्रूहिदेविवरोदेयःकोऽस्यैच्छाग्यैचकःप्रिये ॥ ४४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ सर्वसृष्टिकृतांकर्तःसर्वज्ञप्रणता र्तिहन् ॥ सुलक्षणाशुभाचारासखीमेस्तुशुभोद्यमा ॥ ४५ ॥ यथाजयाचविजयायथाचैवजयंतिका ॥ शुभानंदासुनंदाचकौमुदीचयथोर्मिला ॥ ४६ ॥ यथाचंण्कमालाचयथामलयवासिनी ॥ कर्पूरलतिकायद्वद्गंधधारायथाशुभा ॥ ४७ ॥ अशोकाचविशोकाचयथामलयगंधिनी ॥ यथाचंदननिः श्वासायथामृगमदोत्तमा ॥ ४८ ॥ यथाचकोकिलालापायथामधुरभाषिणी ॥ गद्यपद्यनिधिर्यद्वदनुक्तज्ञायथाचसा ॥ ४९ ॥ दृगंचलेंगितज्ञाचय थाकृतमनोरथा ॥ गानचित्तहरायद्वत्तथाचैषासुलक्षणा ॥ ५० ॥ अतिप्रियाभवित्रीमेयद्बालब्रह्मचारिणी ॥ अनेनैवशरीरेणदिव्यावयवभूषणा ॥ ॥ ५१ ॥ दिव्यांबरादिव्यगंधादिव्यज्ञानसमन्विता ॥ समयामांसदेवास्तांचंचच्चामरधारिणी ॥ ५२ ॥ एषापिकाशिराजस्यकुमार्यस्त्विहवर्करी ॥ अत्रैवभोगान्संप्राप्यमुक्तिंप्राप्स्यत्यनुत्तमाम् ॥ ५३ ॥ अनयात्वर्ककुंडेस्मिन्पुष्येमासिरवेर्दिने ॥ स्नातंत्वनुदितेसूर्येशीतादक्षुब्धचित्तया ॥ ५४ ॥ राजपुत्रीततःपुण्यादस्त्वेषाशुभलोचना ॥ वरदानप्रभावेणतवविश्वेश्वरप्रभो ॥ ५५ ॥ वर्करीकुंडमित्याख्यात्वर्ककुंडस्यजायताम् ॥ एतस्याःप्रतिमाप ज्याभविष्यत्यत्रमानवैः ॥ ५६ ॥ उत्तरार्कस्यदेवस्यपुष्येमासिरवेर्दिने ॥ कार्यासांवत्सरीयात्रानतैःकाशीफलेप्सुभिः ॥५७॥ मृडान्याभिहितंसर्वंकृत्वै तद्विश्वगोविभुः ॥ विश्वनाथोविवेशाथप्रासादंस्वमतर्कितः ॥ ५८ ॥ ॥ स्कंदउवाच ॥ ॥ लोलार्कस्यचमाहात्म्यमुत्तरार्कस्यचद्विज ॥ कथितंते महाभागसांबादित्यंनिशामय ॥ ५९ ॥ श्रुत्वैतत्पुण्यमाख्यानंशुभंलोलोत्तरार्कयोः ॥ व्याधिभिर्नाभिभूयेतनदारिद्र्येणबाध्यते ॥ ६० ॥ इतिश्रीस्कां देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेउत्तरार्कवर्णनंनामसप्तचत्वारिंशोध्यायः ॥ ४७ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमैत्राव रुणेद्वारवत्यांयदूद्वहः ॥ दानवानांवधार्थायभुवोभारापनुत्तये ॥ १ ॥

आविरासीत्स्वयंकृष्णःकृष्णवर्त्मप्रतापवान् ॥ वासुदेवोजगद्धामदेवक्यांवसुदेवतः ॥२॥ साशीतिलक्षंतस्यासन्कुमाराअर्कवर्चसः ॥स्वर्गेपितादृशाबालाः सुशीलानहिकुंभज ॥ ३ ॥ अतीवरूपसंपन्नाअतीवसुमहाबलाः ॥ अतीवशस्त्रशास्त्रज्ञाअतीवशुभलक्षणाः ॥ ४ ॥ तांद्रष्टुंमानसःपुत्रोब्रह्मणस्तपसां निधिः ॥ कृतवल्कलकौपीनोधृतकृष्णाजिनांबरः ॥५॥ गृहीतब्रह्मदंडश्चत्रिवृन्मौंजीसुमेखलः ॥ उरस्थलस्थतुलसीमालयासमलंकृतः ॥ ६ ॥ गोपी चंदननिर्यासलसदंगविलेपनः ॥ तपसाकृशसर्वांगोमूर्तोज्वलनवज्वलन् ॥७॥ आजगामांबरचरोनारदोद्वारकांपुरीम् ॥ विश्वकर्मविनिर्माणांजितस्वर्ग पुरीश्रियम् ॥८॥ तंदृष्ट्वानारदंसर्वेविनम्रतरकंधराः ॥ प्रबद्धमूर्धांजलयःप्रणेमुर्वृष्णिनंदनाः ॥ ९ ॥ सांबःस्वरूपसौंदर्यगर्वसर्वस्वमोहितः ॥ नननाममु नितत्रहसंस्तद्रूपसंपदम् ॥ १० ॥ सांबस्यतमभिप्रायंविज्ञायसमहामुनिः ॥ विवेशसुमहारम्यंनारदःकृष्णमंदिरम् ॥ ११ ॥ कृष्णोथदृष्ट्वाऽऽगच्छंतं प्रत्युद्गम्यचनारदम् ॥ मधुपर्केणसंपूज्यस्वासनेचोपवेशयत् ॥ १२ ॥ कृत्वाकथाविचित्रार्थास्ततएकांतवर्तिनः ॥ कृष्णस्यकर्णेऽकथयन्नारदःसांबचे ष्टितम् ॥ १३ ॥ अवश्यंकिंचिदत्राऽस्तियशोदानंदवर्धन ॥ प्रायशस्तन्नघटतेऽसंभाव्यंनाथवास्त्रियाम् ॥ १४ ॥ यूनांत्रिभुवनस्थानांसांबोऽतीवसु रूपवान् ॥ स्वभावचंचलाक्षीणांचेतोवृत्तिःसुचंचला ॥ १५ ॥ अपेक्षंतेनमुग्धाक्ष्यःकुलंशीलंश्रुतंधनम् ॥ रूपमेवसमीक्षंतेविषमेषुविमोहिताः ॥१६॥ अथवाविदितंनोतेवल्लवीनांविचेष्टितम् ॥ विनाष्टौनायिकाःकृष्णकामयंतेऽबलाह्यमुम् ॥ १७ ॥ वामभ्रुवांस्वभावाच्चनारदस्यचवाक्यतः ॥ विज्ञाता ऽखिलवृत्तांतस्तथ्यंकृष्णोप्यमन्यत ॥ १८ ॥

तावद्धैर्यंचलाक्षीणांतावच्चेतोविवेकिता ॥ यावन्नार्थीविविक्तस्थोविविक्तेर्थिनिनान्यथा ॥ १९॥ इत्थंविवेचयंश्चित्तेकृष्णःक्रोधनदीरयम् ॥ विवेकसेतुना ऽऽस्तभ्यनारदंप्राहिणोत्सुधीः ॥२०॥ सांबस्यवैकृतंकिंचित्क्वचित्कृष्णोनवैक्षत ॥ गतेदेवमुनौतस्मिन्वीक्षमाणोप्यहर्निशम् ॥२१॥ कियत्यपिगतेकाले पुनरप्याययौमुनिः ॥ मध्येलीलावतीनांचज्ञात्वाकृष्णमवस्थितम् ॥ २२ ॥ बहिःक्रीडंतमाहूयसांबमित्याहनारदः ॥ याहिकृष्णांतिकंतूर्णंकथयागमनं मम ॥ २३ ॥ सांबोपियामिनोयामिक्षणमित्थमचिंतयत् ॥ कथंरहःस्थंपितरंयामिस्त्रैणसखंप्रति ॥ २४ ॥ नयामिचकथंवाक्यादस्याहंब्रह्मचारिणः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ज्वलदंगारसंकाशस्फुरत्सर्वांगतेजसः ॥ २५ ॥ प्रणमत्सुकुमारेषुव्रीडितोयंमयैकदा ॥ इदानीमपिनोयायामस्यवाक्यान्महामुनेः ॥ २६ ॥ अत्याहितं तदस्तीहतदागोद्वयदर्शनात् ॥ पितुःकोपोपिसुश्लाघ्योमयिनोब्राह्मणस्यतु ॥ २७॥ ब्रह्मकोपाग्निनिर्दग्धाःप्ररोहंतिनजातुचित् ॥ अपराग्निविनिर्दग्धारो हंतेदावदग्धवत् ॥ २८॥ इतिध्यात्वाक्षणंसांबोऽविशदंतःपुरंपितुः ॥ मध्येस्त्रैणसभंकृष्णंयावज्जांबवतीसुतः ॥ २९ ॥ दूरात्प्रणम्यविज्ञप्तिंसचकारसशं कितः ॥ तावत्तमन्वगच्छच्चनारदःकार्यसिद्धये ॥ ३० ॥ ससंभ्रमोथकृष्णोपिदृष्ट्वासांबंचनारदम् ॥ समुत्तस्थौपरिदधत्पीतकौशेयमंबरम् ॥ ३१ ॥ उत्थितेदेवकीसूनौताःसर्वाअपिगोपिकाः ॥ विलज्जिताःसमुत्तस्थुर्गृह्णंत्यःस्वंस्वमंबरम् ॥ ३२ ॥ महार्हशयनीयेतंहस्तेधृत्वामहामुनिम् ॥ समुपावे शयत्कृष्णःसांबश्चक्रीडितुंययौ ॥ ३३ ॥ तासांस्खलितमालोक्यतिष्ठंतीनांपुरोमुनिः ॥ कृष्णलीलाद्रवीभूतवरांगानांजगौहरिम् ॥ ३४ ॥ पश्य पश्यमहाबुद्धेदृष्ट्वाजांबवतीसुतम् ॥ इमाःस्खलितमापन्नास्तद्रूपक्षुब्धचेतसः ॥ ३५ ॥ कृष्णोपिसांबमाहूयसहसैवाशपत्सुतम् ॥ सर्वाजांबवतीतुल्याः पश्यंतमपिदुर्विधेः ॥ ३६ ॥ यस्मात्त्वद्रूपमालोक्यगोपाल्यःस्खलिताइमाः ॥ तस्मात्कुष्ठीभवक्षिप्रमकांडागमनेनच ॥ ३७ ॥

वेपमानोमहाव्याधिभयात्सांबोपिदारुणात् ॥ कृष्णंप्रसादयामासबहुशःपापशांतये ॥ ३८ ॥ कृष्णोप्यनेनसंजानन्सांबंस्वसुतमौरसम् ॥ अब्रवात्कुष्ठमो क्षायव्रजवैश्वेश्वरींपुरीम् ॥ ३९ ॥ तत्रब्रध्नंसमाराध्यप्रकृतिंस्वामवाप्स्यसि ॥ महैनसांक्षयोन्यत्रनास्तिवाराणसींविना ॥ ४० ॥ यत्रविश्वेश्वरःसाक्षाद्य त्रस्वर्गापगाचसा ॥ येषांमहैनसांदृष्टामुनिभिर्नैवनिष्कृतिः ॥ तेषांविशुद्धिरस्त्येवप्राप्यवाराणसींपुरीम् ॥ ४१ ॥ नकेवलंहिपापेभ्योवाराणस्यांवि मुच्यते ॥ प्राकृतेभ्योपिपापेभ्योमुच्यतेशंकराज्ञया ॥ ४२ ॥ पुरापुरारिणासृष्टमविमुक्तंविमुक्तये ॥ सर्वेषामेवजंतूनांकृपयांतेतनुत्यजाम् ॥ ४३ ॥ तत्रानंदवनेशंभोस्तवशापनिराकृतिः ॥ सांबतत्त्वेरितंयाहिनान्ययाशापनिर्वृतिः ॥ ४४ ॥ ततःकृष्णंसमापृच्छ्यकर्मनिर्मुक्तचेष्टितः ॥ नारदःकृतकृत्यः सन्ययावाकाशवर्त्मना ॥ ४५ ॥ सांबोवाराणसींप्राप्यसमाराध्यांशुमालिनम् ॥ कुंडंतत्पृष्ठतःकृत्वानिजांप्रकृतिमाप्तवान् ॥ ४६ ॥ सांबादित्यस्तदार भ्यसर्वव्याधिहरोरविः ॥ ददातिसर्वभक्तेभ्योऽनामयाःसर्वसंपदः ॥ ४७ ॥ सांबकुंडेनरःस्नात्वारविवारेऽरुणोदये ॥ सांबादित्यंचसंपूज्यव्याधिभिर्ना भिभूयते ॥ ४८ ॥ नस्त्रीवैधव्यमाप्नोतिसांबादित्यस्यसेवनात् ॥ वंध्यापुत्रंप्रसूयेतशुद्धरूपसमन्वितम् ॥ ४९ ॥ शुक्लायांद्विजसप्तम्यांमाघेमासिरवे र्दिने ॥ महापर्वसमाख्यातंरविपर्वसमंशुभम् ॥ ५० ॥ महारोगात्प्रमुच्येततत्रस्नात्वारुणोदये ॥ सांबादित्यंप्रपूज्यापिधर्ममक्षयमाप्नुयात् ॥ ५१ ॥ सन्निहत्यांकुरुक्षेत्रेयत्पुण्यंराहुदर्शने ॥ तत्पुण्यंरविसप्तम्यांमाघेकाश्यांनसंशयः ॥ ५२ ॥ मघौमासिरवेर्वारेयात्रासांबत्सरीभवेत् ॥ अशोकैस्तत्रसं पूज्यकुंडेस्नात्वाविधानतः ॥ ५३ ॥ सांबादित्यंनरोजातुनशोकैरभिभूयते ॥ संवत्सरकृतात्पापाद्बहिर्भवतितत्क्षणात् ॥ ५४ ॥ विश्वेशात्पश्चिमाशा यांसांबेनात्रमहात्मना ॥ सम्यगाराधितामूर्तिरादित्यस्यशुभप्रदा ॥ ५५ ॥

इयंभविष्यातन्मूर्तिरगस्तेत्वत्पुरोऽकथि ॥ तामभ्यर्च्यनमस्कृत्यकृत्वाष्टौचप्रदक्षिणाः ॥ नरोभवतिनिष्पापःकाशीवासफलंलभेत् ॥ ५६ ॥ सांबा दित्यस्यमाहात्म्यंकथितंतेमहामते ॥ यच्छ्रुत्वापिनरोजातुयमलोकंनपश्यति ॥ ५७ ॥ इदानींद्रौपदादित्यंकथयिष्यामितेनघ ॥ तथाद्रौपदआदित्यः संसेव्योभक्तसिद्धिदः ॥ ५८ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेपूर्वार्द्धेसांबादित्यमाहात्म्यकथनंनामाष्टचत्वा रिंशोध्यायः ॥४८॥ सूत उवाच ॥ ॥ पाराशर्यमुनेव्यासकुमारःकुंभजन्मने ॥ यदावदत्कथामेतांतदाक्वद्रुपदात्मजा ॥ १ ॥ ॥ व्यासउवाच ॥ ॥ पुराणसंहितांसूतब्रूतेत्रैकालिकींकथाम् ॥ संदेहोनात्रकर्तव्योयतस्तद्गोचरोखिलम् ॥२॥ ॥ स्कंदउवाच ॥ ॥ आकर्णयमुनेपूर्वंपंचवक्त्रोहरःस्वयम् ॥ पृथिव्यांपंचधाभूत्वाप्रादुरासीज्जगद्धितः ॥३॥ उमापिचजगद्धात्रीद्रुपदस्यमहीभुजः ॥ यजतोवह्निकुंडाच्चप्रादुश्चक्रेतिसुंदरी ॥ ४ ॥ पंचापिपांडुतनयाः साक्षाद्रुद्रवपुर्धराः ॥ अवतेरुरिहस्वर्गाद्दुष्टसंहारकारकाः ॥ ५ ॥ नारायणोपिकृष्णत्वंप्राप्यतत्साहचर्यकृत् ॥ उद्वृत्तवृत्तशमनःसद्वृत्तस्थितिकारकः ॥ ॥ ६ ॥ प्रतपंतःपृथिव्यांतेपार्थाश्चेरुःपृथक्पृथक् ॥ उदयानुदयौतस्मिन्संपदांविपदामपि ॥ ७ ॥ कदाचित्तेमहावीराभ्रातृव्यप्रतिपादिताम् ॥ विप त्तिमाप्यमहतींबभूवुःकाननौकसः ॥ ८ ॥ पांचाल्यपिचतत्पत्नीपतिव्यसनतापिता ॥ धर्मज्ञाप्राप्यतन्वंगीब्रध्नमाराधयद्भृशम् ॥ ९ ॥

आराधितोथसवितातयाद्रुपदकन्यया ॥ सदर्वीसपिधानांचस्थालिकामक्षयांददौ ॥ १० ॥ उवाचचप्रसन्नात्माभास्करोद्रुपदात्मजाम् ॥ आराधयंतीं भावेनसर्वत्रशुचिमानसाम् ॥ ११ ॥ स्थाल्यैतयामहाभागेयावंतोऽन्नार्थिनोजनाः ॥ तावंतस्तृप्तिमाप्स्यंतियावच्चत्वंनभोक्ष्यसे ॥ १२ ॥ भुक्तायांत्व यिरिक्तैषापूर्णभक्ताभविष्यति ॥ रसवद्व्यंजननिधिरिच्छाभक्ष्यप्रदायिनी ॥ १३ ॥ इत्थंवरस्तयालब्धःकाश्यामादित्यतोमुने ॥ अपरश्चवरोदत्तस्तस्यै देवेनभास्वता ॥ १४ ॥ ॥ रविरुवाच ॥ ॥ विश्वेशाद्दक्षिणेभागेयोमांत्वत्पुरतःस्थितम् ॥ आराधयिष्यतिनरःक्षुद्बाधातस्यनश्यति ॥ १५ ॥ अन्यश्चमेवरोदत्तोविश्वेशेनपतिव्रते ॥ तपसापरितुष्टेनतंनिशामयवच्मिते ॥ १६ ॥ प्राग्रवेत्वांसमाराध्ययोमांद्रक्ष्यतिमानवः ॥ तस्यत्वंदुःखति मिरमपानुदनिजैःकरैः ॥ १७ ॥ अतोधर्मप्रियेनित्यंप्राप्यविश्वेश्वराद्वरम् ॥ काशीस्थितानांजंतूनांनाशयाम्यघसंचयम् ॥ १८ ॥ येमामत्रभजिष्यंति मानवाःश्रद्धयान्विताः ॥ त्वद्वरोद्यतपाणिंचतेषांदास्यामिचिंतितम् ॥ १९ ॥ भवतींमत्समीपस्थांयुधिष्ठिरपतिव्रताम् ॥ विश्वेशाद्दक्षिणेभागेदंडपाणेः समीपतः ॥ २० ॥ येर्चयिष्यंतिभावेनपुरुषावास्त्रियोपिवा ॥ तेषांकदाचिन्नोभाविभयंप्रियवियोगजम् ॥ २१ ॥ नव्याधिजंभयंक्वापिनक्षुत्तृड्दोषसं भवम् ॥ द्रौपदीक्षणतःकाश्यांतवधर्मप्रियेनघे ॥ २२ ॥ इतिदत्त्वावरान्देवआदित्यःसर्वदःसताम् ॥ शंभुमाराधयामासधर्मंद्रौपद्युपाययौ ॥ २३ ॥ आदित्यस्यकथामेतांद्रौपद्याराधितस्यवै ॥ यःश्रोष्यतिनरोभक्त्यातस्यैनःक्षयमेष्यति ॥ २४ ॥ स्कंदउवाच ॥ ॥ द्रौपदादित्यमाहात्म्यंसंक्षेपात्कथितं मया ॥ मयूखादित्यमाहात्म्यंशृण्विदानींघटोद्भव ॥ २५ ॥ पुरापंचनदेतीर्थेत्रिषुलोकेषुविश्रुते ॥ सहस्ररश्मिर्भगवांस्तपस्तेपेसुदारुणम् ॥ २६ ॥ प्रति ष्ठाप्यमहालिंगंगभस्तीश्वरसंज्ञितम् ॥ गौरींचमंगलानाम्नींभक्तमंगलदांसदा ॥ २७ ॥ दिव्यंवर्षसहस्रंतुशतेनगुणितंमुने ॥ आराधयञ्शिवंसोमंसोमार्ध कृतशेखरम् ॥ २८ ॥ स्वरूपतस्तुतपनस्त्रिलोकीतापनक्षमः ॥ ततोतितीव्रतपसाजज्वालनितरांमुने ॥ २९ ॥ मयूखैस्तत्रसवितुस्त्रैलोक्यदहनक्षमैः ॥ ततंसमस्तंतत्कालेद्यावाभूम्योर्यदंतरम् ॥ ३० ॥ वैमानिकैर्विष्णुपदेतत्यजेचगतागतम् ॥ तीव्रेपतंगमहसिपतंगत्वभयादिव ॥ ३१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मयूखाएवदृश्यंतेतिर्यगूर्ध्वमधोपिच॥ आदित्यस्यनचादित्योनीपपुष्पस्थितेरिव ॥३२॥ तस्यवैमहसांराशेस्तपोराशेस्तपोर्चिषाम् ॥ चकंपेसाध्वसात्ती व्रात्रैलोक्यंसचराचरम् ॥ ३३ ॥ सूर्यआत्मास्यजगतोवेदेषुपरिपठ्यते ॥ सएवचेज्ज्वालयिताकोनस्त्राताभवेदिह ॥ ३४ ॥ जगच्चक्षुरसौसूर्योजगदात्मै षभास्करः ॥ जगद्योयन्मृतप्रायंप्रातःप्रातःप्रबोधयेत् ॥ ३५ ॥ तमोंधकूपपतितमुद्यन्नेपदिनेदिने ॥ प्रसार्यपरितःपाणीन्प्राणिजातंसमुद्धरेत् ॥ ३६ ॥ उदितेऽत्रोदिमोनित्यमस्तंयात्यस्तमाप्नुमः ॥ उदयेऽनुदयेतस्मादस्माकंकारणंरविः ॥ ३७ ॥ इतिव्याकुलितांविश्वंपश्यन्विश्वेश्वरःस्वयम् ॥ विश्वत्रातावरं दातुंसंजग्मेतिग्मरश्मये ॥ ३८ ॥ मयूखमालिनंशंभुरालोक्यातिसुनिश्चलम् ॥ समाधिविस्मृतात्मानंविसिस्मायतपःप्रति ॥ ३९ ॥ उवाचचप्रस न्नात्माश्रीकंठःप्रणतार्तिहृत् ॥ अलंतत्वावरंब्रूहिद्युमणेमहसांनिधे ॥ ४० ॥ निरुद्धेंद्रियवृत्तित्वाद्ब्रह्मोध्यानसमाधिना ॥ नजग्राहवचःशंभोर्द्वित्रिरुक्तो प्यकर्णवत् ॥ ४१ ॥ काष्ठीभूतंतुतंज्ञात्वाशिवःपस्पर्शपाणिना ॥ महातपःसमुद्भूतसंतापामृतवर्षिणा ॥ ४२ ॥ ततउन्मीलयांचक्रेलोचनेविश्वलोचनः ॥ तस्योदयमिवप्राप्यप्रगेपंकजिनीवनी ॥४३॥ परिव्यपेतसंतापस्तपनःस्पर्शनाद्विभोः ॥ अवग्रहितसस्यश्रीरुल्ललासयथांबुदात् ॥ ४४ ॥

मित्रोनेत्रातिथीकृत्यत्र्यक्षंप्रत्यक्षमग्रतः ॥ दंडवत्प्रणनामोच्चैस्तुष्टावचपिनाकिनम् ॥ ४५ ॥ ॥ रविरुवाच ॥ ॥ देवदेवजगतांपतेविभोभर्गभीमभवचं द्रभूषण ॥ भूतनाथभवभीतिहारकत्वांनतोस्मिनतवांछितप्रद ॥ ४६ ॥ चंद्रचूडमृडधूर्जटेहरत्र्यक्षदक्षशततंतुशातन ॥ शांतशाश्वतशिवापतेशिवत्वांनतो स्मिनतवांछितप्रद ॥ ४७ ॥ नीललोहितसमीहितार्थदद्व्येकलोचनविरूपलोचन ॥ व्योमकेशपशुपाशनाशनत्वांनतोस्मिनतवांछितप्रद ॥ ४८ ॥ वामदेवशितिकंठशूलभृच्चंद्रशेखरफणींद्रभूषण॥ कामकृत्पशुपतेमहेश्वरत्वांनतोस्मिनतवांछितप्रद॥४९॥त्र्यंबकत्रिपुरसूदनेश्वरत्राणकृत्त्रिनयनत्रयीमय॥ कालकूटदलनांतकांतकत्वांनतोस्मिनतवांछितप्रद ॥ ५० ॥ शर्वरीरहितशर्वसर्वगस्वर्गमार्गसुखदापवर्गद ॥ अंधकासुररिपोकपर्दभृत्त्वांनतोस्मिनतवां छितप्रद ॥५१॥ शंकरोग्रगिरिजापतेपतेविश्वनाथविधिविष्णुसंस्तुत ॥ वेदवेद्यविदिताऽखिलेंगितत्वांनतोस्मिनतवांछितप्रद ॥५२॥ विश्वरूपपररूपव र्जितब्रह्मजिह्मरहितामृतप्रद ॥ वाङ्मनोविषयदूरदूरगत्वांनतोस्मिनतवांछितप्रद ॥ ५३ ॥ इत्थंपरीत्यमार्तंडोमृडंदेवंमृडानिकाम् ॥ अथतुष्टावप्रीतात्मा शिववामार्धहारिणीम् ॥ ५४ ॥ रविरुवाच ॥ ॥ देवित्वदीयचरणांबुजरेणुगौरींभालस्थलींवहतियःप्रणतिप्रवीणः ॥ जन्मांतरेपिरजनीकरचारु लेखातांगौरयत्यतितरांकिलतस्यपुंसः ॥ ५५ ॥

श्रीमंगलेसकलमंगलजन्मभूमेश्रीमंगलेसकलकल्मषतूलवह्ने ॥ श्रीमंगलेसकलदानवदर्पहंत्रिश्रीमंगलेऽखिलमिदंपरिपाहिविश्वम् ॥५६॥ विश्वेश्वरित्वम सिविश्वजनस्यकर्त्रीत्वंपालयित्र्यसितथाप्रलयेपिहंत्री ॥ त्वन्नामकीर्तनसमुल्लसदच्छपुण्यास्रोतस्विनीहरतिपातककूलवृक्षान् ॥५७॥ मातर्भवानिभवती भवतीत्रदुःखसंभारहारिणिशरण्यमिहास्तिनान्या ॥ धन्यास्तएवभुवनेषुतएवमान्यायेषुस्फुरेत्तवशुभःकरुणाकटाक्षः ॥ ५८ ॥ येत्वांस्मरंतिसततंसह जप्रकाशांकाशीपुरीस्थितिमतींनतमोक्षलक्ष्मीम् ॥ तान्संस्मरेत्स्मरहरोधृतशुद्धबुद्धीन्निर्वाणरक्षणविचक्षणपात्रभूतान् ॥५९॥ मातस्तवांघ्रियुगलंविमलं हृदिस्थंयस्यास्तितस्यभुवनंसकलंकरस्थम् ॥ योनामतेजपतिमंगलगौरिनित्यंसिद्ध्यष्टकंनपरिमुंचतितस्यगेहम् ॥ ६० ॥ त्वंदेविवेदजननीप्रणवस्व रूपागायत्र्यसित्वमसिवैद्विजकामधेनुः ॥ त्वंव्याहृतित्रयमिहाऽखिलकर्मसिद्ध्यैस्वाहास्वधासिसुमनःपितृतृप्तिहेतुः ॥ ६१ ॥ गौरित्वमेवशशिमौलि निवेधसित्वंसावित्र्यसित्वमसिचक्रिणिचारुलक्ष्मीः ॥ काश्यांत्वमस्यमलरूपिणिमोक्षलक्ष्मीस्त्वंमेशरण्यमिहमंगलगौरिमातः ॥ ६२ ॥

स्तुत्वेतितांस्मरहरार्धशरीरशोभांश्रीमंगलाष्टकमहास्तवनेनभानुः ॥ देवींचदेवमसकृत्परितःप्रणम्यतूष्णींबभूवसविताशिवयोःपुरस्तात् ॥ ६३ ॥ ॥ देवदेवउवाच ॥ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेप्रसन्नोस्मिमहामते ॥ मित्रमन्नेत्रगोनित्यंप्रपश्येतच्चराचरम् ॥ ६४ ॥ ममर्मूर्तिर्भवान्सूर्यसर्वज्ञोभवसर्वगः ॥ सर्वेषांमहसांराशिःसर्वेषांसर्वकर्मवित् ॥ ६५ ॥ सर्वेषांसर्वदुःखानिभक्तानांत्वंनिराकुरु ॥ त्वयानाम्नांचतुःषष्ट्यायदष्टकमुदीरितम् ॥ ६६ ॥ अनेनमांप रिष्टुत्यनरोमद्भक्तिमाप्स्यति ॥ अष्टकंमंगलागौर्यामंगलाष्टकसंज्ञकम् ॥ ६७ ॥ अनेनमंगलागौरींस्तुत्वामंगलमाप्स्यति ॥ चतुःषष्ट्यष्टकंस्तोत्रंमं गलाष्टकमेवच ॥ ६८ ॥ एतत्स्तोत्रवरंपुण्यंसर्वपातकनाशनम् ॥ दूरंदेशांतरस्थोपिजपन्नित्यंनरोत्तमः ॥६९॥ त्रिसंध्यंपरिशुद्धात्माकाशींप्राप्स्यतिदुर्ल भाम् ॥ अनेनस्तोत्रयुग्मेनजप्तेनप्रत्यहंनृभिः ॥७०॥ ध्रुवंदैनंदिनंपापंक्षालितंनात्रसंशयः ॥ नतस्यदेहिनोदेहेजातुचित्किल्बिषस्थितिः ॥७१॥ त्रिका लंयोजपेन्नित्यमेतत्स्तोत्रद्वयंशुभम् ॥ किंजप्तैर्बहुभिःस्तोत्रैश्चंचलश्रीप्रदैर्नृणाम् ॥ ७२ ॥ एतत्स्तोत्रद्वयंदद्यात्काश्यांनैःश्रेयसींश्रियम् ॥ तस्मात्सर्व प्रयत्नेनमानवैर्मोक्षकांक्षिभिः ॥ ७३ ॥ एतत्स्तोत्रद्वयंजप्यंत्यक्त्वास्तोत्राण्यनेकशः ॥ प्रपंचआवयोरेवसर्वएषचराचरः ॥ ७४ ॥ तदावयोःस्तवादस्मा न्निष्प्रपंचोजनोभवेत् ॥ समृद्धिमाप्यमहतींपुत्रपौत्रवतीमिह ॥ ७५ ॥ अंतेनिर्वाणमाप्नोतिजपन्स्तोत्रमिदंनरः ॥ अन्यच्चशृणुसप्ताश्वग्रहराजदिवाकर॥ ॥ ७६ ॥ त्वयाप्रतिष्ठितंलिंगंगभस्तीश्वरसंज्ञितम् ॥ सेवितंभक्तिभावेनसर्वसिद्धिसमर्पकम् ॥ ७७ ॥ त्वयागभस्तिमालाभिश्चापियांबुजकांतिभिः ॥ यदर्चित्वैश्वरंलिंगंसर्वभावेनभास्कर ॥ ७८ ॥ गभस्तीश्वरइत्याख्यांततोलिंगमवाप्स्यति ॥ अर्चयित्वागभस्तीशंस्नात्वापंचनदेनरः ॥ ७९ ॥ नजातुजायतेमातुर्जठरेधूतकल्मषः ॥ इमांचमंगलागौरींनारीवापुरुषोपिवा ॥ ८० ॥ चैत्रशुक्लतृतीयायामुपोषणपरायणः ॥ महोपचारैःसंपूज्यदु कूलाभरणादिभिः ॥ ८१ ॥ रात्रौजागरणंकृत्वागीतनृत्यकथादिभिः ॥ प्रातःकुमारीःसंपूज्यद्वादशाच्छादनादिभिः ॥ ८२ ॥ संभोज्यपरमान्नाद्यैर्द त्वान्येभ्योपिदक्षिणाम् ॥ होमंकृत्वाविधानेनजातवेदसइत्यृचा ॥ ८३ ॥

अष्टोत्तरशताभिश्चतिलाज्याहुतिभिःप्रगे ॥ एकंगोमिथुनंदत्त्वाब्राह्मणायकुटुंबिने ॥८४॥ श्रद्धयासमलंकृत्यभूषणैर्द्विजदंपती ॥ भोजयित्वामहार्हान्नैः प्रीयेतांमंगलेश्वरौ ॥ ८५ ॥ इतिमंत्रंसमुच्चार्यप्रातःकृत्वाथपारणम् ॥ नदुर्भगत्वमाप्नोतिनदारिद्र्यंकदाचन ॥ ८६ ॥ नवैसंतानविच्छित्तिंभोगोच्छि त्तिंनजातुचित् ॥ स्त्रीवैधव्यंनचाप्नोतिननायोपिद्वियोगभाक् ॥ ८७ ॥ पापानिविलयंयांतिपुण्यराशिश्चलभ्यते ॥ अपिवंध्याप्रसूयेतकृत्वैतन्मंगलाव्र तम् ॥ ८८ ॥ एतद्व्रतस्यकरणात्कुरूपत्वंनजातुचित् ॥ कुमारीविंदतेत्यंतंगुणरूपयुतंपतिम् ॥८९॥ कुमारोपिव्रतंकृत्वाविंदतिस्त्रियमुत्तमाम् ॥ संति व्रतानिबहुशोधनकामप्रदानिच ॥९०॥ नाप्नुयुर्जातुचित्तानिमंगलाव्रततुल्यताम् ॥ कर्तव्याचाब्दिकीयात्रामधौतस्यांतिथौनरैः ॥ ९१ ॥ सर्वविघ्नप्रशां त्यर्थंसदाकाशीनिवासिभिः ॥ अपरंद्युमणेवच्मितवचात्रतपस्यतः ॥ ९२ ॥ मयूखाएवखेदृष्टानचदृष्टंकलेवरम् ॥ मयूखादित्यइत्याख्याततस्तेदि तिनंदन ॥ ९३ ॥ त्वदर्चनान्नृणांकश्चिन्नव्याधिःप्रभविष्यति ॥ भविष्यतिनदारिद्र्यंरविवारेत्वदीक्षणात् ॥ ९४ ॥ इत्थंमयूखादित्यस्यशिवोदत्त्वा बहून्वरान् ॥ तत्रैवांतर्हितोभूतोरविस्तत्रैवतस्थिवान् ॥ ९५ ॥ श्रुत्वाख्यानमिदंपुण्यंमयूखादित्यसंश्रयम् ॥ द्रौपदादित्यसहितंनरोननिरयंव्रजेत् ॥९६॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेद्रौपदादित्यमयूखादित्ययोर्वर्णनंनामैकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ॥
॥ स्कंदउवाच ॥ ॥ वाराणस्यांतथादित्यायेचान्येतान्वदाम्यतः ॥ कलशोद्भवतेप्रीत्यासर्वेसर्वाघनाशनाः ॥ १ ॥ खखोल्कोनामभगवानादित्यःप
रिकीर्तितः ॥ त्रिविष्टपोत्तरेभागेसर्वव्याधिविघातकृत् ॥ २ ॥ यथाखखोल्कइत्याख्यातस्यादित्यस्यतच्छृणु ॥ पुराकद्रूश्चविनतादक्षस्यतनयेशुभे ॥
॥३॥ कश्यपस्यचतेपत्न्यौमारीचेःप्राक्प्रजापतेः ॥ क्रीडंत्यावेकदान्योन्यंमुनेतेऊचतुस्त्विति ॥ ४ ॥ ॥ कद्रूरुवाच ॥ ॥ विनतेत्वंविजानासिय
दितद्ब्रूहिमेग्रतः॥अखंडितागतिस्तेस्तियतोगगनमंडले ॥ ५ ॥ योसावुच्चैःश्रवावाजीश्रूयतेसवितूरथे ॥ किंरूपःसोस्तिशबलोधवलोवावदाशुमे ॥ ६ ॥

पणंचकुरुकल्याणितुभ्यंयोरोचतेनघे ॥ एवमेवनयात्येषकालःक्रीडनकंविना ॥७॥ ॥ विनतोवाच ॥ ॥ किंपणेनभगिन्यत्रकथयाम्येवमेवहि ॥
त्वज्जयेकाचमेप्रीतिर्मज्जयेकिंनुतेसुखम् ॥ ८ ॥ ज्ञात्वापणोनकर्तव्योमिथःस्नेहमभीप्सता ॥ ध्रुवमेकस्यविजयेक्रोधोन्यस्येहजायते ॥९॥ कद्रूरुवाच ॥
क्रीडेयंनात्रभगिनिकारणंकिमपिक्रुधः ॥ खेलस्यव्यवहारोयंपणेयत्किंचिदुच्यते ॥ १० ॥ ॥ विनतोवाच ॥ ॥ तथाकुरुयथाप्रीतिस्तवा
स्तिपवनाशिनि ॥ अथतां विनतामाहकद्रूःकुटिलमानसा ॥ ११ ॥ तस्यास्तुसाभवेद्दासीपराजीयेतयायया ॥ अस्मिन्पणेइमाःसर्वाःसख्यःसा
क्षिण्यएवनौ ॥ १२ ॥ इत्यन्योन्यंपणीकृत्यसर्पिण्यपिपतत्रिणी ॥ उवाचकर्बुरंकद्रूरश्वंश्वेतंगरुत्मती ॥ १३ ॥ कदागंतव्यमितिचचक्रातेतेगमाव
धिम् ॥ जग्मतुश्चविरम्याथक्रीडनात्स्वंस्वमालयम् ॥ १४ ॥ विनतायांगतायांतुकद्रूराहूयचांगजान् ॥ उवाचयातवैपुत्राद्रुतंवचनतोमम ॥ १५ ॥
तुरंगमुच्चैःश्रवसं प्रोद्भूतंक्षीरनीरधेः ॥ सुरासुरैर्मथ्यमानान्मंदराघातसाध्वसात् ॥ १६ ॥ कार्यंकारणरूपस्यसादृश्यमधिगच्छति ॥ अतस्तंक्षीरवर्णा
भंकल्माषयतपुत्रकाः ॥ १७ ॥ तस्यवालधिमध्यास्यकृष्णकुंतलतांगताः ॥ तथातदंगलोमानिविधत्तविषसीत्कृतैः ॥ १८ ॥ इतिश्रुत्वावचोमातुः
काद्रवेयाःपरस्परम् ॥ संमंत्र्यमातरंप्रोचुःकद्रूंकद्रूपमागताः ॥ १९ ॥ ॥ नागाऊचुः ॥ ॥ मातर्वयंत्वदाह्वानाद्विहायक्रीडनंबलात् ॥ प्राप्ताःप्रहृ
ष्टामृष्टान्नंदास्यत्यद्यप्रसूरिति ॥ २० ॥ मृष्टंतिष्ठतुतदूरंविषादप्यधिकंकटु ॥ तत्त्वयावादियन्मंत्रैरौषधैर्नोपशाम्यति ॥ २१ ॥ वयंनयामोयद्भाव्यं
तदस्माकंभवत्विह ॥ इतिप्रोक्तंविषास्यैस्तैस्तदाकुटिलगामिभिः ॥ २२ ॥ ॥ स्कंदउवाच ॥ – ॥ अन्येपियेकुटिलगाःपररंध्रनिषेविणः ॥ अकर्णाः
क्रूरहृदयाःपितरौव्रीडयंतिते ॥ २३ ॥ पित्रोर्गिरंनिराकृत्ययेतिष्ठेयुःसुदुर्मदाः ॥ अत्याहितमिहप्राप्यगच्छेयुस्तेऽचिराल्लयम् ॥ २४ ॥

तेषांवचनमाकर्ण्यनयामइतिसोरगी ॥ शशापतान्क्रुधाविष्टानागांश्चागःसमागतान् ॥ २५ ॥ तार्क्ष्यस्यभक्ष्याभवतयूयमद्वाक्यलघनात् ॥ जातमात्रां
श्चसर्पिण्योभक्षयंतुस्ववालकान् ॥ २६ ॥ इतिशापानलाद्भीतैःकैश्चित्पातालमाश्रितम् ॥ जिजीविषुभिरन्यैश्चद्वित्रैश्चक्रेप्रसूवचः ॥ २७ ॥ तेपुच्छमौ
च्चैःश्रवसमधिगम्यमहाधियः ॥ सुनीलचिकुराभासंचक्रुरंगंचकर्बुरम् ॥ २८ ॥ तत्क्ष्वेडानलधूमौघैःफूत्कारभरनिःसृतैः ॥ मातृवाक्पतिजाद्धर्मान्नदग्धा
भानुभानुभिः ॥ २९ ॥ विनतापृष्ठमारुह्यकद्रूःस्नेहवशात्ततः ॥ वियन्मार्गमलंकृत्यददर्शोष्णांशुमंडलम् ॥ ३० ॥ तिग्मरश्मिप्रभावेणव्याकुली
भूतमानसा ॥ कद्रूस्ततःखगींप्राहविस्रब्धंविनतेव्रज ॥ ३१ ॥ उष्णगोरुष्णगोभिर्मेताप्यतेनितरांतनुः ॥ विस्रब्धाहंस्वभावेनत्वंसापेक्षाहिसर्वतः ॥
॥ ३२ ॥ स्वरूपेणपतंगीत्वंपतंगोसौसहस्रगुः ॥ अतएवनतेबाधागगनेतापसंभवा ॥ ३३ ॥ वियत्सरसिहंसोयंभवतीहंसगामिनी ॥ चंद्ररश्मिप्रतापा
ग्निस्त्वामतोनेहबाधते ॥ ३४ ॥ खगीमुद्गीयमानांखेपुनरूचेविलेशया ॥ त्राहित्राहिभगिन्यत्रयावोन्यत्रवियत्पथः ॥ ३५ ॥ विनतेविनतांमांत्वंकिंनाव
सिपतत्रिणी ॥ तवदासीभविष्यामित्वदुच्छिष्टनिषेविणी ॥ ३६ ॥ यावज्जीवमहंभूयांत्वत्पादोदकपायिनी ॥ खखोल्कानिपतेदेषाभूशंगद्गदभाषिणी ॥
॥ ३७ ॥ मूर्च्छांगतवतीपक्षपुटौधृत्वाविडोरगी ॥ सख्युल्कानिपतेदेषावक्तव्येत्वितिसंभ्रमात् ॥ ३८ ॥ खखोल्केतियदुक्तागीःकद्रूसंभ्रांतचेतसा ॥
तदाखखोल्कनामार्कःस्तुतोविनतयाबहु ॥ ३९ ॥ मनागतिग्मतांप्राप्तेखेप्रयातिविवस्वति ॥ ताभ्यांतुरंगमोदर्शिकिंचित्किर्मीरवान्रथे ॥ ४० ॥

उक्ताविनतयैवैषातापोपहतलोचना ॥ क्रूरासरीसृपीसत्यवादिन्याविश्वमान्यया ॥ ४१ ॥ कद्रुत्वयाजितंभद्रेयतउच्चैःश्रवाहयः ॥ चंद्ररश्मिप्रभोप्ये
षकल्माषइवभासते ॥ ४२ ॥ विधिर्बलीयान्भुजगिचित्रजयपराजये ॥ क्रूरोपिविजयीक्वापित्वक्रूरोपिपराजयी ॥ ४३ ॥ विनताविनताधारावदंतीति
यथागतम् ॥ कद्रूनिवेशनंप्राप्तातस्यादास्यमचीकरत् ॥४४॥ कदाचिद्विनतादर्शिसुपर्णेनाश्रुलोचना ॥ विच्छायामलिनादीनादीर्घनिःश्वासवत्यपि ॥
॥ ४५ ॥ सुपर्णउवाच ॥ ॥ प्रातःप्रातरहोमातःक्वयासित्वंदिनेदिने ॥ सायमायासिचकुतोविच्छायादीनमानसा ॥ ४६ ॥ कुतोनिःश्वसिसिप्रोच्चै
रश्रुपूर्णविलोचना ॥ यथाक्लीबसुतायोपिद्यथापतितिरस्कृता ॥४७॥ ब्रूहिमातर्झटित्यद्यकुतोदूनासिपत्रिणि ॥ मयिजीवतितेबालेकालेपिकृतसाध्वसे॥
॥ ४८ ॥ अश्रुनिर्माणकरणेकारणंकिंतपस्विनि ॥ सुचरित्रासुनारीपुनामंगलमिहेष्यते ॥ ४९ ॥ धिक्तांश्चपुत्रान्यन्मातातेषुजीवत्सुदुःखभाक् ॥ वरंवं
ध्यैवसायस्याःसुतावंध्यमनोरथाः ॥ ५० ॥ इत्यूर्जस्वलमाकर्ण्यवचःसूनोर्गरुत्मतः ॥ विनताप्राहतंपुत्रंमातृभक्तिसमन्वितम् ॥ ५१ ॥ अहंदास्यस्मिरे
बालकद्वाश्चक्रूरचेतसः ॥ पृष्ठेवहामितांनित्यंतत्पुत्रानपिपुत्रक ॥५२॥ कदाचिन्मंदरंयामिकदाचिन्मलयाचलम् ॥ कदाचिदंतरीपेषुचरेयंतदुदन्वताम् ॥
॥ ५३ ॥ यत्रयत्रनयेयुस्तेकाद्रवेयाःसुदुर्मदाः ॥ व्रजेयंतत्रतत्राहंतदधीनायतःसुत ॥ ५४॥ गरुडउवाच ॥ ॥ दासीत्वकारणंमातःकिंतेजातंसुलक्षणे ॥
दक्षप्रजापतेःपुत्रिकश्यपस्यप्रियेऽनघे ॥ ५५ ॥ विनतोवाचगरुडंपुरावृत्तमशेषतः ॥ दासीत्वकारणंयद्वदादित्याश्वविलोकनम् ॥ ५६ ॥ श्रुत्वेतिगरुडः
प्राहमातरंसत्वरंव्रज॥पृच्छाद्यमातस्तान्दुष्टान्काद्रवेयानिदंवचः ॥५७॥ यद्दुर्लभंहिभवतांयत्रात्यंतरुचिश्चवः॥मद्दासीत्वविमोक्षायतद्याचध्वंददाम्यहम् ॥
॥ ५८ ॥ तथाकरोच्चविनतातेपिश्रुत्वातदीरितम् ॥ सर्पाःसंमंत्र्यतांप्रोचुर्विनतांहृष्टमानसाः ॥ ५९ ॥ मातृशापविमोक्षाययदिदास्यतिनःसुधाम् ॥
तदासमीहितंतेस्तुनदास्यत्यथदास्यसि ॥ ६० ॥

इत्योंकृत्यसमापृच्छ्यकद्रूंद्रुतगतिःखगी ॥ गरुत्मंतंसमाचष्टदृष्ट्वासंहृष्टमानसम् ॥ ६१ ॥ नागांतकस्ततःप्राहमातरंचिंतयातुराम् ॥ आनीतंविद्धिपी
यूषंमातर्मेदेहिभोजनम् ॥ ६२ ॥ विनताप्राहतंपुत्रंसंप्रहृष्टमनुरुरा॥ ओं सुपर्णार्णवंतूर्णयाहिमंगलमस्तुते ॥ ६३ ॥ संतितत्रापिबहुशोनिपादामत्स्यघा
तिनः ॥ वेलातटनिवासाश्चतान्भक्षयदुरात्मनः ॥ ६४ ॥ परप्राणांनजप्राणान्येपुष्णंतीहदुर्धियः ॥ शासनीयाःप्रयत्नेनश्रेयस्तच्छासनंपरम् ॥ ६५ ॥
बहुहिंसाकृतांहिंसाभवेत्स्वर्गस्यसाधनम् ॥ विहिंसितेषुदुष्टेषुरक्ष्यंतेभूरिशोयतः ॥६६॥ निपादेष्वपिचेद्विप्रःकश्चिद्भवतिपुत्रक ॥ सरक्षणीयोयत्नेनभक्षणी
योनकर्हिचित् ॥ ६७ ॥ ॥गरुडउवाच ॥ ॥ मत्स्यादिनांवसन्मध्येकथंज्ञेयोद्विजोमया ॥ अभक्ष्योयस्त्वयाप्रोक्तस्तच्चिह्नंकिंचनात्थमे ॥ ६८ ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विननोवाच ॥ ॥ यज्ञमूत्रंगलेयस्यसोत्तरीयंमुनिर्मलम् ॥ नित्यधौतानिवासांसिभालंतिलकलांछितम् ॥६९॥ सपवित्रोकरोयस्ययत्रीवीकुशगर्भिणी॥ यन्मौलिःसशिखाग्रंथिःसज्ञेयोब्राह्मणस्त्वया ॥ ७० ॥ उच्चरेद्यज्ञुःसाम्नामृचमेकामपीहयः ॥ गायत्रीमात्रमंत्रोपिसविज्ञेयोद्विजस्त्वया ॥ ७१ ॥ गरुडउवाच ॥ मध्येमदानिपादानांयोवसेज्जननिद्विजः ॥ तस्यैतच्चैकमप्येवनमन्येलक्ष्मत्रोधकम् ॥ ७२ ॥ लक्ष्मांतरंसमाचक्ष्वद्विजबोधकरंप्रभुः ॥ येनविज्ञायतंविप्रंत्यजेयमपिकंठगम् ॥ ७३ ॥ तच्छ्रुत्वाविननाप्राहयस्तेकंठगतोऽगज ॥ खदिरांगारवद्ब्राह्मत्तमपाकुरुदूरतः ॥ ७४ ॥ द्विजमात्रे पियाहिंसामाहिंसाकुशलायन ॥ देशंवंशंश्रियंस्वंचनिर्मूलयनिकालनः ॥ ७५ ॥ निशम्यकाश्यपिरितिप्रभूपादौप्रणम्यच ॥ गृहीताशीर्ययौशीघ्रंखमार्गे णत्वगेश्वरः ॥७६॥ दृग्दालोकयांचकेनिषादान्मत्स्यजीविनः ॥ पक्षौविधूयपक्षीद्रोरजसापूर्यगेदसी ॥ ७७ ॥ अधोकृत्यदिशोभागानध्विरोधस्युपा विशत ॥ व्यादायवदनंघोरंमहाकंदरसन्निभम् ॥ ७८ ॥ कांदिशीकानिपादास्तुविविशुस्तत्रचस्वयम् ॥ मन्वानेप्वथपंथानंतेपुकंठंविशत्स्वपि ॥ ७९ ॥ जज्वालेंगलसंस्पर्शोद्विजस्तत्कंठकंदलीम् ॥ प्राक्प्रविष्टानथोताक्ष्योनिषादानेदरीदरीम् ॥ ८० ॥

प्रवेश्यकंठतालुस्थंतंविज्ञायद्विजंस्फुटम् ॥ भयाद्गुदगिरत्तूर्णंमातृवाक्येनयंत्रितः ॥ ८१ ॥ तमुद्वीर्णंनरंदृष्ट्वापक्षिराट्समभाषत ॥ कस्त्वंजात्यासिनि गदममकंठविदाहकृत् ॥ ८२ ॥ सतदाहेतिविप्रोहंपृष्टःसन्गरुडाग्रतः ॥ वसाम्येषुनिषादेषुजातिमात्रोपजीवकः ॥ ८३ ॥ तमेष्यगरुडोदूरंभक्षयि त्वाथभूरिशः ॥ नभोविशोभयांचकेप्रलयानिलसन्निभः ॥ ८४ ॥ तंदृष्ट्वातिग्मतेजस्कंज्वालाततदिगंतरम् ॥ ज्वलद्दावानलंशैलमिवविभ्युर्दिवौकसः ॥ ॥ ८५ ॥ तैमत्रह्मंनयुद्धायमज्जीकृतबलायुधाः ॥ अध्यास्यवाहनान्याशुसर्वेवर्मभृतःसुराः ॥ ८६ ॥ तिर्यग्गतीरविर्नायंनायमग्निःसधूमवान् ॥ क्षणप्रभाप्यसौनैवकोनःसम्मुखएत्यसौ ॥ ८७ ॥ नदैत्येषुप्रभेदस्यान्नाकृतिर्दानवेष्वियम् ॥ महासाध्वसदःकोयमस्माकंहृत्प्रकंपनः ॥ ८८ ॥ यावत्सं भावयंतीतिर्नानिज्ञाअपिनिर्जराः ॥ तावद्बुधास्त्वौपक्षौपक्षिराजोमहाबलः ॥ ८९ ॥ निपेतुःपक्षवातेनसायुधाश्चसवाहनाः ॥ नज्ञायंतेकसंप्राप्तावात्य यापार्णतार्णवत् ॥ ९० ॥ अथतेपुरणष्टेषुबुद्ध्याविज्ञायपक्षिराट् ॥ कोशागारंसुधायाःसतत्रापश्यच्चरक्षिणः ॥ ९१ ॥ शस्त्रास्त्रोद्यतपाणींस्तान्सुरानाभूयसर्वशः ॥ ददर्शकर्तरीयंत्रममृतोपरिसंस्थितम् ॥ ९२ ॥ मनःपवनवेगेनभ्रममाणंमहारयम् ॥ अपिस्पृशंतंमशकंयत्खंडयतिकोटिशः ॥ ९३ ॥ उपोपविश्यपक्षीद्रस्तस्ययंत्रस्यनिर्भयः ॥ क्षणंविचारयामासकिमत्रकरवाण्यहो ॥ ९४ ॥

म्प्रदृनलभ्यतेचैतद्वात्यानप्रभवेदिह ॥ कउपायोत्रकर्तव्योवृथाजातोममोद्यमः ॥ ९५ ॥ नबलंप्रभवेदत्रनकिंचिदपिपौरुषम् ॥ अहोप्रयत्नोदेवानामे तत्पीयूषरक्षणे ॥९६॥ यदिमेशंकरेभक्तिर्निर्द्वंद्वार्तावनिश्चला ॥ तदासदेवदेवोमांवियुनक्तुमहाऽधिया ॥९७॥ यद्यहंमातृभक्तोस्मिस्वामिनःशंकरादपि ॥ तदामेबुद्धिरत्रास्तुपीयूपहरणक्षमा ॥ ९८ ॥ आत्मार्थंनोद्यमश्चायंहृत्स्थोवेत्तीतिविश्वगः ॥ मातुर्दास्यविमोक्षाययतेहममृतंप्रति ॥ ९९ ॥ जरितो पितरोयस्यत्रालापत्यश्चयःपुमान् ॥ साध्वीभार्याचतत्पुष्टेदोषोऽकृत्येपितस्थन ॥ १०० ॥ इतिचिंतयतस्तस्यबुद्धिरासीन्महात्मनः ॥ १ ॥ देहं एकांसात्यंतमर्णायांममणोरपि ॥ परमाणुसहस्रांशंकृत्वारूपंमहाद्भुतम् ॥ २ ॥ प्रविश्यकर्तरीयंत्रमधोदेहस्यलाघवात् ॥ विभ्यत्तद्यंत्रतोदेहंवं चयन्वायुखंडनात् ॥ मूलमुत्पाट्यतरसागृहीत्वाऽमृतभाजनम् ॥ ३ ॥ निर्ययौपावनेमार्गेक्रोशात्सुस्वर्गसद्मसु ॥ ४ ॥ तथावैकुंठनाथंतेगत्वाप्रोचुः सुधाभुजः ॥ निर्जित्यनीयतेचक्रिन्सुधानोजीवितंपरम् ॥ ५ ॥ इत्याकर्ण्यहरिस्तेभ्योऽभयंदत्त्वात्वरायुतः ॥ कृत्वायुद्धंचसुमहद्विशार्कघटिकाद्वयम् ॥ ॥ ६ ॥ शुंभदेव्योर्यथामृतगरुडस्तत्रचाधिकः ॥ तदाप्रसन्नोभगवान्महायुद्धेनसर्वदः ॥ ७ ॥ गत्वागरुडमाहेदंप्रसन्नोस्मिखगेश्वर ॥ वरंवृणीहिभद्रंते जितवृंदारवृंदक ॥ ८ ॥ हसित्वागरुडःप्राहविश्वरूपंजनार्दनम् ॥ अहमेवप्रसन्नोस्मित्वंप्रार्थयवरद्वयम् ॥ ९ ॥ ततःकैटभजित्प्राहवैनतेयंमुदान्वितः ॥ वृतंवृतंमहोदारंदिदिहिवरद्वयम् ॥ ११० ॥ इतिविष्णूदितंश्रुत्वाप्रहसन्प्राहपक्षिराट् ॥ किंविलंबेनतद्बूहिदत्तंदत्तंवरद्वयम् ॥ ११ ॥ अलब्धलाभे संजातेघृतादिविजयोदये ॥ दातव्यंसुधियापात्रेसदालाभजयोकवा ॥ १२ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ बलवानसिपक्षींद्रतन्मेवाहनतांव्रज ॥ पकोवरोयंवरदद्वितीयंशृणुकाश्यप ॥ १३ ॥

दर्शयित्वामृतंप्राज्ञमातृदास्यविमोक्षकम् ॥ द्विजिह्वेभ्यःकुरुंतथाद्यागश्रंतिनतेयथा ॥ १४ ॥ देयासुधासुधाभुग्भ्योद्वितीयोस्तुवरोमम ॥ तथेतिसप्र तिज्ञायनिर्ययौपक्षिगद्दिवः ॥ १५ ॥ समातरंविनिर्मोच्यदास्यात्काश्यपनंदनः ॥ नागानांपुरतोधृत्वामहामृतकमंडलुम् ॥ १६ ॥ अमृतंपातुकामां स्तानित्याचष्टमहामतिः ॥ नागाःशुचित्वमासाद्यभोक्तव्यैषासुधाशुभा ॥ १७ ॥ नोचेदशुचिभिःस्पृष्टान्नानादिपरिवर्जितैः ॥ यास्यत्यदृश्यतामे पासुधाऽनिमिषरक्षिता ॥ १८ ॥ सामान्यमपियद्भक्ष्यंस्पृश्यतेऽशुचिभिःक्वचित् ॥ हरंतितद्वसंदेवास्तच्चतिष्ठतिनीरसम् ॥ १९ ॥ इत्युक्तासहितो मात्रावैनतेयोविनिर्ययौ ॥ कुशासनेचतैरुक्तोधृत्वापीयूषभाजनम् ॥ १२० ॥ यावत्स्नातुंगताःसर्पास्तावत्पीयूषभाजनम् ॥ आदायविष्णुनादत्तंदेवे भ्यइवजीवितम् ॥ २१ ॥ आगत्यभुजगाःस्नात्वानदृष्ट्वामृतभाजनम् ॥ अहोप्रतारितानीतममृतंचेतिचुक्रुशुः ॥ २२ ॥ ततःपर्यलिहन्दर्भान्पीयूषस्पर्श कांक्षिणः ॥ आस्तांतावत्सुधादूरंजिह्वास्तेषांद्विधाभवन् ॥ २३ ॥ अन्येप्यन्यायलब्धार्थंयेवुभुक्षंतिकेवलम् ॥ तन्नोपरिणतिंगच्छेद्रोकुंवातेनलभ्यते ॥ ॥ २४ ॥ न्यायाध्वस्थेनतार्क्ष्येणसुधाप्राप्तातिदुर्लभा ॥ लब्धाप्यन्यायतोनागैर्दृष्टमात्राक्षणाद्धता ॥२५॥ अथदास्याद्विनिर्मुक्ताविनतोवाचखेचरम् ॥ पुत्रकार्शीप्रयास्यामिदास्यपापापनुत्तये ॥ २६ ॥ तावत्पापानिजंतूनांतेनानाजन्मार्जितान्यपि ॥ यावत्काशीनहृत्संस्थापुनर्भवविघातिनी ॥ २७ ॥ काशीस्मरणमात्रेणकिंचित्रंयदवंत्रजेत् ॥ गर्भवासोपिनश्येतविश्वेशानुग्रहात्परात् ॥ २८ ॥ यत्रविश्वेश्वरःसाक्षात्तारापतिविभूषणः ॥ तारयेत्तारकद्रो ण्यादुस्तराद्भवसागरात् ॥ २९ ॥ विश्वेशानुगृहीतानांविच्छिन्नाखिलकर्मणाम् ॥ भवेत्काशींप्रतिमतिर्नेतरेषांकदाचन ॥ १३० ॥ काशींप्रतिमनोयेषां निःशेषक्लालितेनसाम् ॥ तएवमानवालोकेसत्यंनृपशवेपरे ॥ ३१ ॥ तैरेवकालोविजितस्तएवहिगतैनसः ॥ अपुनर्गर्भवासास्तेप्राप्तावाराणसीह्ययैः ॥ ॥ ३२ ॥ श्रेयसांभाजनंचैतन्नृजन्मनसुधानयेत् ॥ देवानामपिदुष्प्राप्यंकाशीसंदर्शनाद्दते ॥ ३३ ॥ कःकलिःकोथवाकालःकिंवाकर्माण्यनेकधा ॥ परानंदप्रदंक्षेत्रमविमुक्तंयदीक्षितम् ॥ ३४ ॥ तेगर्भवासेतिष्ठंतिपुनस्तेगर्भवासिनः ॥ येनगर्भवनच्छेत्रीसेवंतेवरणामसिम् ॥ ३५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निशम्येतिवचःप्राहताक्ष्योंनत्वाथमातरम् ॥ अहमप्यागमिष्यामिकाशींद्रष्टुंशिवार्चिताम् ॥ ३६॥ मातुराज्ञामथप्राप्यजनन्यासहपक्षिराट् ॥ क्षणाद्वारा णसींप्रापमोक्षनिक्षेपभूमिकाम् ॥ ३७ ॥ उभावपिचतेपातेतपउग्रंमहामती ॥ संस्थाप्यशांभवंलिंगंपतत्रींद्रोऽचलेंद्रियः ॥ ३८ ॥ नाम्नाखखोल्कमा दित्यंसंस्थाप्यविनताशुभम् ॥ अचिरेणैवकालेनमहतस्तपसस्तयोः ॥३९॥ काश्यांप्रसन्नौसंजातौदेवौशंकरभास्करौ ॥ गरुडस्थापिताल्लिंगादाविरासी दुमापतिः ॥ १४० ॥ गरुडायवरान्प्रादात्सुबहूनतिदुर्लभान् ॥ खगेंद्रममभक्तोसितवज्ञानंभविष्यति ॥ ४१ ॥ वेत्स्यसित्वंरहस्यंमेयन्नज्ञातंसुरैरपि ॥ त्वयैतत्स्थापितंलिंगंगरुडेश्वरसंज्ञितम् ॥ ४२ ॥ परमज्ञानदंपुंसांदृष्टंस्पृष्टंसमर्चितम् ॥ अन्यच्चशृणुपक्षींद्रहितंतेवच्मिसांप्रतम् ॥ ४३ ॥ असावहंसवै विष्णुर्मास्तुतेभेददृक्चनौ ॥ एवंतस्यैवपक्षींद्रदैत्येंद्रबलहारिणः ॥ ४४ ॥ प्राप्यसत्पत्रतांपत्रिंस्त्वमप्यर्च्योभविष्यसि ॥ इतिदत्त्वावरंशंभुःस्वभक्तायग रुत्मते ॥ ४५ ॥ तत्रैवांतर्हितोजातोगरुडोपिहरिंययौ ॥ हरेरथत्वंसंप्राप्यसोपिपूज्योऽभवद्भुवि ॥ ४६ ॥ तपस्यंतीमथालोक्यकदाचिद्विनतांप्रभुः ॥ शिवस्यैवपरामूर्तिःखखोल्कोनामभास्करः ॥ ४७ ॥ दत्त्वावरंचपापघ्नंशिवज्ञानसमन्वितम् ॥ काशीवासिजनानेकभवपापक्षयंकरः ॥ ४८ ॥ विनता दित्यइत्याख्यःखखोल्कस्तत्रसंस्थितः ॥ इत्थंखखोल्कआदित्यःकाशीविघ्नतमोहरः ॥ ४९ ॥ तस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ काश्यांपैशं गिलेतीर्थेखखोल्कस्यविलोकनात् ॥ नरश्चिंतितमाप्नोतिनीरोगोजायतेक्षणात् ॥ १५० ॥ नरःश्रुत्वैतदाख्यानंखखोल्कादित्यसंभवम् ॥ गरुडेशेनस हितंसर्वपापैःप्रमुच्यते ॥ १५१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डेपूर्वार्द्धेखखोल्कादित्यगरुडेशयोर्वर्णनंनामपं चाशत्तमोऽध्यायः ॥ ५० ॥ इतिकाशीखंडपूर्वार्धंसमाप्तम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इति श्रीकाशीखंडपूर्वार्द्धं समाप्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA



श्रीगणेशायनमः ॥ ॥ अगस्तिरुवाच ॥ ॥ पार्वतीहृदयानंदसर्वज्ञागमवप्रभो ॥ किंचित्प्रष्टुमनाःस्वामिंस्तद्भवान्वक्तुमर्हति ॥ १ ॥ दक्षप्रजापतेः पुत्रीकश्यपस्यपरिग्रहः ॥ गरुत्मतःप्रसूःसाध्वीकुतोदास्यमवापसा ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ हंजिकात्वंग्रथाप्राताविनतासातपस्विनी ॥ तदप्यहंसमाख्यामिनिशामयमहामते ॥ ३ ॥ कद्रूरजीजनत्पुत्राञ्शतंकश्यपतःपुरा ॥ उलूकमरुणंताक्ष्यंमसूतविनताद्वयम् ॥ ४ ॥ कौशिको राज्यमाप्यापिश्रेष्ठत्वात्पक्षिणांमुने ॥ निर्गुणत्वाच्चतैःसर्वैःसराज्यादवरोपितः ॥ ५ ॥ क्रूराक्षोयंदिवांधोयंसदावकनखस्त्वसौ ॥ अतीवोद्वेगजनकंसर्वे षामस्यभोपणम् ॥ ६ ॥ इत्थंतस्यगुणग्रामान्विकथ्यबहुशःखगाः ॥ नाद्यापिवृण्वतेराज्येकमपिस्वैरचारिणः ॥ ७ ॥ कौशिकेथतथावृत्तेपुत्रवीक्षणलालसा ॥ अंडंप्रस्फोटयामासमध्यमंविनतातदा ॥ ८ ॥ पूर्णेवर्षसहस्रेतुप्रस्फोट्यघटसंभव ॥ तदभेदितयोत्सुक्यादंडमष्टमकेसति ॥ ९ ॥ तावत्सूर्वा णिगात्राणितस्यातिमहसःशिशोः ॥ ऊर्वोरुपरिसिद्धानितदंडांतनिवासिनः ॥ १० ॥ अंडान्निर्गतमात्रेणक्रोधारुणमुखश्रिया ॥ अर्धनिष्पन्नदेहेनशिशु नाशापिताप्रसूः ॥ ११ ॥ जनयित्रित्वयादृष्टाकाद्रवेयान्स्वलीलया ॥ खेलतोमातुरुत्संगेयदंड्याधितद्विधा ॥ १२ ॥ तदनिष्पन्नसर्वांगःरोषामित्या विहंगमे ॥ तेपामेवेधिदासीत्वंसर्पत्न्यंगभुवाभिह ॥ १३ ॥ वेपमानाथतच्छापादिदंप्रोवाचपक्षिणी ॥ अनूरोबृहिमेशापावसानमातुरंगज ॥ १४ ॥ ॥ अनूरुरुवाच ॥ अंडतृतीयंमाभिधिद्यानिष्पन्नममेवहि ॥ अस्मिन्नंडभविष्योयःसतेदास्यंहरिष्यति ॥ १५ ॥ इत्युक्तासोरुणोगच्छदुद्वीयानंदकान नम् ॥ यत्रविश्वेश्वरोद्यादपिपंगोःशुभांगतिम् ॥ १६ ॥

एतत्तेपृच्छतःख्यातंविनतादास्यकारणम् ॥ मुनेप्रसंगतोवच्मिअरुणादित्यसंभवम् ॥ १७ ॥ अनूरुत्वादनूरुर्योरुणःक्रोधारुणोयतः ॥ वाराणस्यांतप स्तप्त्वातेनाराधिदिवाकरः ॥ १८ ॥ सोपिप्रसन्नोदत्त्वाश्ववरांस्तस्माअनूरवे ॥ आदित्यस्तस्यनाम्नाभूदरुणादित्यइत्यपि ॥ १९ ॥ ॥ अर्कउवाच ॥ तिष्ठानूरोममरथेसदेवविनतात्मज ॥ जगतांचहितार्थायध्वांतंविध्वंसयन्पुरः ॥ २० ॥ अत्रत्वत्स्थापितांमूर्तियेभजिष्यंतिमानवाः ॥ वाराणस्यांमहा देवोत्तरेतेपांकुतोभयम् ॥ २१ ॥ येचैयिष्यंतिसततमरुणादित्यसंज्ञकम् ॥ मामत्रतेपांनोदुःखंनदारिद्र्यंनपातकम् ॥ २२ ॥ व्याधिभिर्नाभिभूयंतेनो पसर्गैश्चकेश्चन ॥ शोकाग्निनादह्यतेह्यरुणादित्यसेवनात् ॥ २३ ॥ अथस्यंदनमारोप्यनीतवानरुणंरविः ॥ अद्यापिसरथेसौरेप्रातरेवसमुद्यति ॥ २४ ॥ यःकुर्यात्प्रातरुत्थायनमस्कारंदिनेदिने ॥ अरुणायससूर्यायतस्यदुःखभयंकुतः ॥ २५ ॥ अरुणादित्यमाहात्म्यंयःश्रोष्यतिनरोत्तमः ॥ नतस्य दुष्कृतंकिंचिद्रविष्यतिकदाचन ॥ २६ ॥ स्कंदउवाच ॥ वृद्धादित्यस्यमाहात्म्यंशृणुतेकथयाम्यहम् ॥ यस्यश्रवणमात्रेणनरोनोदुष्कृतंभजेत् ॥ २७ ॥ पुराऽत्रवृद्धहारीतोवाराणस्यांमहातपाः ॥ महातपःसमृद्ध्यर्थंसमाराधितवान्विभुम् ॥ २८ ॥ मूर्तिसंस्थाप्यशुभदांभास्वतःशुभलक्षणाम् ॥ दक्षिणेनवि शालाक्ष्याद्दृढभक्तिसमन्वितः ॥ २९ ॥ तुष्टस्तस्मैवरंप्रादाद्भ्रोवृद्धतपस्विने ॥ अलंविलंब्ययाचस्वकस्तेदेयोवरोमया ॥ ३० ॥ सोथप्रसन्नाद्द्युमणं खृणीतवरंमुनिः ॥ यदिप्रसन्नोभगवान्युवत्वंदेहिमेपुनः ॥ ३१ ॥ तपःकरणसामर्थ्यंस्थविरस्यनमेयतः ॥ पुनस्तारुण्यमातोहंचरिष्याम्युत्तमंतपः ॥ ३२ ॥ तपएवपरोधर्मस्तपएवपरंवसु ॥ तपएवपरःकामोनिर्वाणंतपएवहि ॥ ३३ ॥ ऋतेनतपसःक्वापिलभ्याऐश्वर्यसंपदः ॥ पदंशुचादिभिःप्रापिकेवलंतपसो बलात् ॥ ३४ ॥ ततस्तपश्चरिष्यामिलोकद्वयमहत्त्वदम् ॥ प्राप्यत्वद्वरदानेनयौवनंसर्वसंमतम् ॥ ३५ ॥ धिग्जरांप्राणिनामत्रययासर्वोविरज्यति ॥ जरातुरेंद्रियग्रामेस्त्रियोपिनयतःस्वसात् ॥ ३६ ॥

वरंमरणमेवास्तुमाजरास्त्वतिशोच्यकृत् ॥ क्षणंदुःखंचमरणंजरादुःखंक्षणेक्षणे ॥ ३७ ॥ कांक्षंतिनिर्दीर्घतपसेचिरमायुर्जितेंद्रियाः ॥ धनंदानायपुत्रायकलत्रं मुक्तयेधियम् ॥ ३८ ॥ वृद्धस्यवार्धकंत्रस्तंक्षणादपहृत्यवै ॥ ददौचचारुताहेतुंतारुण्यंपुण्यसाधनम् ॥ ३९ ॥ एवंसवृद्धहारीतोवाराणस्यांमहामुनिः ॥ संप्राप्ययौवनंत्रधात्तपउग्रंचचारह ॥ ४० ॥ वृद्धेनाराधितोयस्माद्धारीतेनतपस्विना ॥ आदित्योवार्धकहरोवृद्धादित्यस्ततःस्मृतः ॥ ४१ ॥ वृद्धादित्यं समाराध्यवाराणस्यांवटोद्भव ॥ जराद्युंतिरोगग्रंथहरःसिद्धिमागताः ॥ ४२ ॥ वृद्धादित्यंनमस्कृत्यवाराणस्यांत्रवोनरः ॥ लभेदभीप्सितांसिद्धिंनक

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चिद्दुर्गतिंलभेत् ॥ ४३ ॥ ॥ स्कंदउवाच ॥ ॥ अतःपरंशृणुमुनेकेशवादित्यमुत्तमम् ॥ यथातुकेशवंप्राप्यसविताज्ञानमाप्तवान् ॥ ४४ ॥ व्योम्निसं चरमाणेनसप्ताश्वेनादिकेशवः ॥ एकदादर्शिभावेनपूजयँल्लिंगमैश्वरम् ॥ ४५ ॥ कौतुकादिवउत्तीर्यहरेरवि रुषाविशत् ॥ निःशब्दोनिश्चलःस्वस्थो महाश्चर्यसमन्वितः ॥ ४६ ॥ प्रतीक्षमाणोवसरंकिंचित्प्रष्टुमनाहरिम् ॥ हरिंविसर्जितार्चंचप्रणनामकृतांजलिः ॥ ४७ ॥ स्वागतंतेहरिःप्राहबहुमान पुरःसरम् ॥ स्वाभ्याशआसयामासभास्वंतंनतकंधरम् ॥ ४८ ॥ अथावसरमालोक्यलोकचक्षुरधोक्षजम् ॥ नत्वाविज्ञापयामासकृतानुज्ञोऽसुरारिणा ॥ ४९ ॥ ॥ रविरुवाच ॥ ॥ अंतरात्मासिजगतांविश्वंभरजगत्पते ॥ तवापि पूज्यःकोप्यस्तिजगत्पूज्यात्रमाधव ॥ ५० ॥ त्वत्तश्चाविर्भवेदेतत्त्व यिसर्वंप्रलीयते ॥ त्वमेवपातासर्वस्यजगतोजगतांनिधे ॥ ५१ ॥ इत्याश्चर्यंसमालोक्यप्राप्तोस्म्यत्रतवांतिकम् ॥ किमिदंपूज्यतेनाथभवताभव तापहृत् ॥ ५२ ॥ इतिश्रुत्वाहृषीकेशःसहस्रांशोरुदीरितम् ॥ उच्चैर्मांशंससप्ताश्वंवारयन्करसंज्ञया ॥ ५३ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ देवदेवो महादेवोनीलकंठउमापतिः ॥ एकएवहिपूज्योत्रसर्वकारणकारणम् ॥ ५४ ॥ अत्रत्रिलोचनादन्यंसमर्चयतियोल्पधीः ॥ सलोचनोपिविज्ञेयोलोचना भ्यांविवर्जितः ॥ ५५ ॥ एकोमृत्युंजयःपूज्यो जन्ममृत्युजराहरः ॥ मृत्युंजयंकिलाभ्यर्च्यश्वेतोमृत्युंजयोभवत् ॥ ५६ ॥ कालकालंसमाराध्यभृंगीकालं जिगायवै ॥ शैलादिमपितत्याजमृत्युर्मृत्युंजयार्चकम् ॥ ५७ ॥ विजिग्येत्रिपुरंयस्तुहेलयैकेषुमोक्षणात् ॥ तंसमभ्यर्च्यभूतेशंकोनपूज्यतमोभवेत् ॥ ५८ ॥

त्रिजगज्जयिनोहेतोस्त्र्यक्षस्याराधनंपरम् ॥ कोनाराधयतिब्रध्नसारस्यस्मरविद्विषः ॥ ५९ ॥ यस्याक्षिपक्ष्मसंकोचाज्जगत्संकोचमेत्यदः ॥ विकस्वरं विकासाच्चकस्यपूज्यतमोनसः ॥ ६० ॥ शंभोर्लिंगंसमभ्यर्च्यपुरुषार्थचतुष्टयम् ॥ प्राप्नोत्यत्रपुमान्सद्योनात्रकार्याविचारणा ॥ ६१ ॥ समर्च्यशांभवं लिंगमपिजन्मशतार्जितम् ॥ पापपुंजंजहात्येवपुमानत्रक्षणाद्ध्रुवम् ॥ ६२ ॥ किंकिंनसंभवेदत्रशिवलिंगसमर्चनात् ॥ पुत्राःकलत्रक्षेत्राणिस्वर्गोमोक्षो प्यसंशयम् ॥ ६३ ॥ त्रैलोक्यैश्वर्यसंपत्तिर्मयाप्राप्तासहस्रगो ॥ शिवलिंगार्चनादेकात्सत्यंसत्यंपुनःपुनः ॥ ६४ ॥ अयमेवपरोयोगस्त्विदमेवपरंतपः ॥ इदमेवपरंज्ञानंस्थाणुलिंगंयदर्च्यते ॥ ६५ ॥ यैर्लिंगंसकृदप्यत्रपूजितंपार्वतीपतेः ॥ कुतोदुःखभयंतेषांसंसारेदुःखभाजने ॥ ६६ ॥ सर्वंपरित्यज्यरवेयो लिंगंशरणंगतः ॥ नतंपापानिबाधंतेमहांत्यपिदिवाकर ॥ ६७ ॥ लिंगार्चनेभवेद्बुद्धिस्तेषामेवात्रभास्कर ॥ येषांपुनर्भवच्छेदंचिकीर्षतिमहेश्वरः ॥ ६८ ॥ नलिंगाराधनात्पुण्यंत्रिषुलोकेषुचापरम् ॥ सर्वतीर्थाभिषेकःस्याल्लिंगस्नानांबुसेवनात् ॥ ६९ ॥ तस्माल्लिंगंत्वमप्यर्कसमर्चयमहेशितुः ॥ संप्राप्तुं परमांलक्ष्मींमहातेजोभिजृंभणीम् ॥ ७० ॥ इतिश्रुत्वाहरेर्वाक्यंतदारभ्यसहस्रगुः ॥ विधायस्फाटिकंलिंगंमुनेद्यापिसमर्चयेत् ॥ ७१ ॥ गुरुत्वे नतदाकल्यविवस्वानादिकेशवम् ॥ तत्रोपतिष्ठतेद्यापिउत्तरेणादिकेशवात् ॥ ७२ ॥ अतःसकेशवादित्यःकाश्यांभक्ततमोनुदः ॥ समर्चितःसदादेयान्म नसोवांछितंफलम् ॥ ७३ ॥ केशवादित्यमाराध्यवाराणस्यांनरोत्तमः ॥ परमंज्ञानमाप्नोतियेननिर्वाणभाग्भवेत् ॥ ७४ ॥ तत्रपादोदकेतीर्थेकृतसर्वो दकक्रियः ॥ विलोक्यकेशवादित्यंमुच्यतेजन्मपातकैः ॥ ७५ ॥ अगस्तेरथसप्तम्यांरविवारोयदाप्यते ॥ तदापादोदकेतीर्थेआदिकेशवसन्निधौ ॥ ७६ ॥ स्नात्वोपसिनरोमौनीकेशवादित्यपूजनात् ॥ सप्तजन्मार्जितात्पापान्मुक्तोभवतितत्क्षणात् ॥ ७७ ॥ यद्यज्जन्मकृतंपापंमयासप्तसुजन्मसु ॥ तन्मेरोगंचशो कंचमाकरीहंतुसप्तमी ॥ ७८ ॥

एतज्जन्मकृतंपापंयच्चजन्मांतरार्जितम् ॥ मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः ॥ ७९ ॥ इतिसप्तविधंपापंस्नानान्मेसप्तसप्तिके ॥ सप्तव्याधिसमायुक्तं हरमाकरिसप्तमि ॥ ८० ॥ एतन्मंत्रत्रयंजप्त्वास्नात्वापादोदकेनरः ॥ केशवादित्यमालोक्यक्षणान्निष्कलुषोभवेत् ॥ ८१ ॥ केशवादित्यमाहात्म्यं शृण्वञ्श्रद्धासमन्वितः ॥ नरोनलिप्यतेपापैःशिवभक्तिंचविंदति ॥ ८२ ॥ ॥ स्कंदउवाच ॥ ॥ अतःपरंशृणुमुनेविमलादित्यमुत्तमम् ॥ हरिकेशवने रम्येवाराणस्यांव्यवस्थितम् ॥ ८३ ॥ उच्चदेशेभवत्पूर्वंविमलोनामबाहुजः ॥ सप्राक्तनात्कर्मयोगाद्विमलेपथ्यपिस्थितः ॥ ८४ ॥ कुष्ठरोगमवाप्यो च्चैस्त्यक्त्वादारान्गृहंवसु ॥ वाराणसींसमासाद्यब्रध्नमाराधयत्सुधीः ॥ ८५ ॥ करवीरैर्जपाभिश्चगंधकैःकिंशुकैःशुभैः ॥ रक्तोत्पलैरशोकैश्चससमानर्च भास्करम् ॥ ८६ ॥ विचित्ररचनैर्माल्यैःपाटलाचंपकोद्भवैः ॥ कुंकुमागुरुकर्पूरमिश्रितैःशोणचंदनैः ॥ ८७ ॥ देवमोहनधूपैश्चबह्वामोदततांबरैः ॥ कर्पूरवर्तिदीपैश्चनैवेद्यैर्घृतपायसैः ॥ ८८ ॥ अर्घदानैश्चविधिवत्सौरैःस्तोत्रजपैरपि ॥ एवंसमाराधयतस्तस्याकोवरदोभवत् ॥ ८९ ॥ उवाचचवरंब्रू हिविमलामलचेष्टित ॥ कुष्ठश्चतेप्रयात्वेषप्रार्थयान्यंवरंपुनः ॥ ९० ॥ आकर्ण्यविमलश्चेत्थमालापंरश्मिमालिनः ॥ प्रणतोदंडवद्भूमौसंप्रहृष्टतनूरुहः ॥ ९१ ॥ शनैर्विज्ञापयांचक्रएकचक्ररथंरविम् ॥ जगच्चक्षुरमेयात्मन्महाध्वांतविधूनन ॥ ९२ ॥ यदिप्रसन्नोभगवन्यदिदेयोवरोमम ॥ तदात्वद्भक्ति निष्ठायेकुष्ठंमास्तुतदन्वये ॥ ९३ ॥ अन्येपिरोगामासंतुमास्तुतेषांदरिद्रता ॥ मास्तुकश्चनसंतापस्त्वद्भक्तानांसहस्रगो ॥ ९४ ॥

॥ श्रीसूर्यउवाच ॥ ॥ तथास्त्वितिमहाप्राज्ञशृण्वन्यंवरमुत्तमम् ॥ त्वयेयंपूजितामूर्तिरेवंकाश्यांमहामते ॥ ९५ ॥ अस्याःसान्निध्यमत्राहंनत्यक्ष्या मिकदाचन ॥ प्रथितातवनाम्नाचप्रतिमैषाभविष्यति ॥ ९६ ॥ विमलादित्यइत्याख्याभक्तानांवरदासदा ॥ सर्वव्याधिनिहंत्रीचसर्वपापक्षयंकरी ॥ ९७ ॥ इतिदत्त्वावरान्सूर्यस्तत्रैवांतरधीयत ॥ विमलोनिर्मलतनुःसोपिस्वभवनंययौ ॥ ९८ ॥ इत्थंसविमलादित्योवाराणस्यांशुभप्रदः ॥ तस्यदर्शनमात्रेणकु ष्ठरोगःप्रणश्यति ॥ ९९ ॥ यश्चैतांविमलादित्यकथांवैशृणुयान्नरः ॥ प्राप्नोतिनिर्मलांशुद्धिंत्यज्यतेचमनोमलैः ॥ १०० ॥ ॥ स्कंदउवाच ॥ ॥ गंगादित्यो स्तितत्रान्योविश्वेशाद्दक्षिणेनवै ॥ तस्यदर्शनमात्रेणनरःशुद्धिमियादिह ॥ १ ॥ यदागंगासमायाताभगीरथपुरस्कृता ॥ तदागंगांपरिष्टोतुंरविस्तत्रैवसं स्थितः ॥ २ ॥ अद्याप्यहर्निशंगंगां संमुखीकृत्यभास्करः ॥ परिष्टौतिप्रसन्नात्मागंगाभक्तवरप्रदः ॥ ३ ॥ गंगादित्यंसमाराध्यवाराणस्यांनरोत्तमः ॥ दुर्गतिं जातु न क्वापिलभतेनचरोगभाक् ॥ ४ ॥ स्कंदउवाच ॥ अन्यच्छृणुमहाभागयमादित्यस्यसंभवम् ॥ यच्छ्रुत्वापिनरोजातुयमलोकंनपश्यति ॥ ५ ॥ यमेशात्पश्चिमेभागेवीरेशात्पूर्वतोमुने ॥ यमादित्यंनरोदृष्ट्वायमलोकंनपश्यति ॥ ६ ॥ यमतीर्थेनरःस्नात्वाभूतायांभौमवासरे ॥ यमेश्वरंवि लोक्याशुसर्वैःपापैः प्रमुच्यते ॥ ७ ॥ यमतीर्थेयमःपूर्वंतप्त्वासुविमलंतपः ॥ यमेशंचयमादित्यंप्रत्यष्ठाद्भक्तसिद्धिदम् ॥ ८ ॥ यमेनस्थापितोयस्मा दादित्यस्तत्रकुंभज ॥ अतःसहियमादित्योयामींहरतियातनाम् ॥ ९ ॥ यमेशंचयमादित्यंयमेनस्थापितंनमन् ॥ यमतीर्थेकृतस्नानोयमलोकंन पश्यति ॥ ११० ॥ यमतीर्थेचतुर्दश्यांभरण्यांभौमवासरे ॥ तर्पणंपिंडदानंचकृत्वापित्रनृणीभवेत् ॥ ११ ॥ अभिलष्यंतिसततंपितरोनरकौकसः ॥ भौमेभरण्यांभूतायांयदियोगोयमुत्तमम् ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

काश्यांकश्चिद्यमेतीर्थेकृत्वास्नानंमहामतिः ॥ अपियस्तर्पणंकुर्यात्सतिलंनोविमुक्तये ॥ १३ ॥ किंगयागमनैःपुंसांकिंश्राद्धैर्भूरिदक्षिणैः ॥ यदिकाश्यां यमेतीर्थेयोगेस्मिन्श्राद्धमाप्यते ॥ १४ ॥ श्राद्धंकृत्वायमेतीर्थेपूजयित्वायमेश्वरम् ॥ यमादित्यंनमस्कृत्यपितॄणामनृणोभवेत् ॥१५॥ ॥ स्कंदउवाच ॥ ॥ इतितेद्वादशादित्याःकथिताःपापनाशनाः ॥ यत्संभवंसमाकर्ण्यनरोननिरयीभवेत् ॥ १६ ॥ अन्येपिसंतिघटजरविभक्तैरनेकशः ॥ काश्यांसंस्थापिताःसूर्यागुह्यकोर्कादयःकिल ॥ १७ ॥ श्रुत्वाध्यायानिमान्पुण्यान्द्वादशादित्यसूचकान् ॥ श्रावयित्वापिनोमर्त्योदुर्गतिंयातिकुत्रचित् ॥ ११८ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायामुत्तरार्द्धेचतुर्थेकाशीखण्डेअरुणवृद्धकेशर्षिविमलगंगायमादित्यवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ॥ ५१ ॥ ॥ ॐ ॥ स्कंदउवाच ॥ ॥ गभस्तिमालिनिगतेकाशीं त्रैलोक्यमोहिनीम् ॥ पुनश्चितामवापोच्चैर्मंदरस्थोमुनेहरः ॥ १ ॥ नाद्याप्याप्यायांतियोगिन्योनाद्याप्यायातितिग्मगुः ॥ प्रवृत्तिरपिमेकाश्याश्चित्रमत्यंतदुर्लभा ॥२॥ किमत्रचित्रंयत्काशीमदीयमपिमानसम् ॥ निश्चलंचंचलयतिगणनाकेतरेसुरे ॥३॥ अधाक्षिपमहंकामंत्रिजगज्जित्त्वरंदृशा ॥ अहोकाश्यभिलाषोत्रमामेवदुनुयात्तराम् ॥४॥ काशीप्रवृत्तिमन्वेषुंकंवाप्रहिणुयामितः ॥ ज्ञातुंकएवनिपुणोयतःसचतुराननः ॥ ५ ॥ इत्याहूयविधातारंबहुमानपुरःसरम् ॥ तत्रोपवेश्यश्रीकंठःप्रोवाचचतुराननम् ॥ ६ ॥ योगिन्यःप्रेषिताःपूर्वं प्रेषितोथसहस्रगुः ॥ नाद्यापितेनिवर्ततेकाश्याःकलशसंभव ॥ ७ ॥

सासमुत्सुकयेत्काशीलोकेशममनसम् ॥ प्राकृतस्यजनस्येवचंचलाक्षीवकाचन ॥ ८ ॥ मंदरेत्ररतिर्मेनभृशंसुंदरकंदरे ॥ अनच्छतुच्छपानीयेनक स्येवाल्पपल्वले ॥ ९ ॥ नाद्याधिष्ठतथामांसतापोहालाहलोद्भवः ॥ काशीविरहजन्मात्रयथामामतिबाधते ॥ १० ॥ शीतरश्मिःशिरःस्थोपिवर्षन्पीयूषसीकरैः ॥ काशीविश्लेषजंतापंनाहोगमयितुंप्रभुः ॥ ११ ॥ विधेविधेहिमेकार्यमार्यधुर्यमहामते ॥ याहिकाशीमितस्तूर्णंयतस्त्वचममेहिते ॥ १२ ॥ ब्रह्मंस्त्वमेवनद्रेन्सिकाशीत्यजनकारणम् ॥ मंदोपिनत्यजेत्काशींकिमुयोवेत्तिकिंचन ॥१३॥ अद्यैवकिंनगच्छेयंकाशींब्रह्मन्स्वमायया ॥ दिवोदासंस्व धर्मस्थंनतूल्लंघितुमुत्सहे ॥ १४॥ विधेसर्वविधेयानित्वमेवविदधासियत् ॥ इतिचेतिचवक्तव्यंत्वय्यपार्थमतोखिलम् ॥१५॥ अरिष्टंगच्छपंथास्तेशुभोदर्कोभवत्वलम् ॥ आदायाज्ञांविधिर्मूर्ध्नियौवाराणसींमुदा ॥१६॥ सितहंसरथस्तूर्णंप्राप्यवाराणसींपुरीम् ॥ कृतकृत्यमिवात्मानममन्यततदात्मभूः ॥ ॥ १७ ॥ हंसयानफलंमेद्यजातंकाशीसमागमे ॥ काशीप्राप्तौयतःप्रोक्ताअंतरायाःपदेपदे ॥ १८ ॥ हृशिथातुरभूदद्यमदृशौप्राप्यसान्वयः ॥ स्पष्टंदृष्टिपथं प्राप्तायदेपाऽऽनंदवाटिका ॥ १९ ॥ स्वयंसिंचतियामद्भिःस्वाभिःस्वर्गतरंगिणी ॥ यत्रानंदमयाभृक्षायत्रानंदमयाजनाः ॥ २० ॥ निर्विशंतिसदाकाश्यां फलान्यानंदवंत्यपि ॥ सदैवानंदभूःकाशीसदैवानंददःशिवः ॥ २१ ॥ आनंदरूपाजायंतेतेनकाश्यांहिजंतवः ॥ चरणौचरितुंवित्तस्तावेवकृतिनामिह ॥ ॥ २२ ॥ चरणौविचरेतांयौविश्वभर्तृपुरीभुवि ॥ तावेवश्रवणौश्रोतुंसंविदातेबहुश्रुतौ ॥ २३ ॥ इहश्रुतिमतांपुंसांयाभ्यांकाशीश्रुतासकृत् ॥ तदेवमनुतेसर्वंमनस्त्विहमनस्विनाम् ॥ २४ ॥ येनानुमन्यतेचैपाकाशीसर्वप्रमाणभूः ॥ बुद्धिर्बुध्यतिसासर्वंमिहबुद्धिमतांसताम् ॥ ययैतज्जूर्जटेर्धाम्नध्रुवंस्व विषयीकृतम् ॥ २५ ॥ वरंतृणानिधान्यानितानिवात्याहतान्यपि ॥ काश्यांयान्यापततींहिनजनाःकाश्यदर्शनाः ॥ २६ ॥

अद्यमेसफलंचायुःपरार्धद्वयसंमितम् ॥ यस्मिन्सतिमयाप्रापिदुष्प्रापाकाशिकापुरी ॥ २७ ॥ अहोमेधर्मसंपत्तिरहोमेभाग्यगौरवम् ॥ यदद्राक्षिपमद्याहं काशींसुचिरचिंतिताम् ॥ २८ ॥ अद्यमेस्वतपोवृक्षोमनोरथफलैरलम् ॥ शिवभक्त्यंबुनासिक्तःफलितोतिवृहत्तरैः ॥ २९ ॥ मयान्यधायित्वदुधासृष्टिःसृष्टिवितन्वता ॥ परमन्यादृशीकाशीस्वयंविश्वेशनिर्मितिः ॥ ३० ॥ इतिहृष्टमनावेधाहृष्ट्वाराणसींपुरीम् ॥ वृद्धब्राह्मणरूपेणराजानंचददर्शह ॥ ३१ ॥ जलार्द्रक्षतपाणिश्चस्वस्त्युक्तापृथिवीभुजे ॥ कृतप्रणामोराज्ञाथभेजेतदत्तमासनम् ॥३२॥ कृतमानोनृपतिनासोभ्युत्थानासनादिभिः ॥ विप्रोव्यजिज्ञपद्भूपंपृष्टागमनकारणम् ॥ ३३ ॥ ॥ ब्राह्मणउवाच ॥ ॥ भूपालबहुकालीनोस्म्यहमत्रचिरंतनः ॥ त्वंतुमनैवजानासिजानेत्वांहिरिर्पुंजयम् ॥ ॥ ३४ ॥ परःशतामयाहष्टाराजानोभूरिदक्षिणाः ॥ विजितानेकसंग्रामायायजूकाजितेंद्रियाः ॥ ३५ ॥ विनिष्कृतारिषड्वर्गाःसुशीलाःसत्त्वशालिनः ॥ श्रुतस्यपारदृश्वानोराजनीतिविचक्षणाः ॥ ३६ ॥ दयादाक्षिण्यनिपुणाःसत्यव्रतपरायणाः ॥ क्षमयाक्षमयातुल्यागांभीर्येजितसागराः ॥ ३७ ॥ जितरोषराशूराःसौम्यसौंदर्यभूमयः ॥ इत्यादिगुणसंपन्नाःसुसंचितयशोधनाः ॥३८॥ परंद्रित्राःपवित्रायेराजपैतवसद्गुणाः ॥ तेष्वेपुराजसुममप्रायशोनदृशंगताः ॥ ३९ ॥ प्रजानिजकुटुंबस्त्वंत्वंतुभूदेवदेवतः ॥ महातपःसहायस्त्वंयथानान्येतथानृपाः ॥ ४० ॥ धन्योमान्योसिचसतांपूजनीयोसिसद्गुणैः ॥ देवाअपिदिवोदासत्वत्रासात्रविमार्गगाः ॥ ४१ ॥ किंनःस्तुत्यातवनृपद्विजानामस्पृहात्मताम् ॥ किंकुर्मस्त्वद्गुणग्रामाःस्तावकान्नःप्रकुर्वते ॥४२॥ गोष्ठी तिष्ठत्वियंतावत्प्रस्तुतंस्तोमिसांप्रतम् ॥ यदुकामोस्म्यहंराजंस्त्वांसहायमतोवृणे ॥४३॥ त्वयाराजन्वतीचैपाऽवनिःसर्वर्धिभाजनम् ॥ अहंचास्तिधनोराजन्न्यायोपात्तमहाधनः ॥४४॥ इयंचराजधानीतेकर्मभूमावनुत्तमा ॥ यस्यांकृतानांकार्याणांसंवर्तेपिनसंक्षयः ॥४५॥ संचितंयद्धनंपुंभिर्नयसन्मार्गगामिभिः ॥ तत्काश्यांविनियुज्येतक्लेशायेतरथाभवेत् ॥४६॥ महिमानंपरंकाश्याःकोपिवेदनभूपते ॥ ऋतेत्रिनयनाच्छंभोःसर्वज्ञानप्रदायिनः ॥४७॥ मन्येधन्यतरोसित्वंबहुजन्मशतार्जितैः ॥ सुकृतैःपासियत्काशींविश्वभर्तुःपरांतनुम् ॥ ४८ ॥ काशीत्रिजगतीसारस्त्रिवेदीसारएववै ॥ त्रिवर्गोत्तरसारश्च निर्णीतेतिमहर्षिभिः ॥ ४९ ॥ विश्वेशानुग्रहेणैवत्वयेपापाल्यतेपुरी ॥ एकस्याप्यवनात्काश्यांत्रैलोक्यमवितंभवेत् ॥५०॥ अन्यच्चतेहितंवच्मियदितेरोचतेऽनघ ॥ प्रीणनीयःसदैवैकोविश्वेशःसर्वकर्मभिः ॥ ५१ ॥ अन्यदेवधियाराजन्विश्वेशंपश्यमाकचित् ॥ ब्रह्मविष्ण्विंद्रचंद्रार्काक्रीडयंतस्यधूर्जटेः ॥ ॥ ५२ ॥ विप्रैरुदर्कमिच्छद्भिःशिक्षणीयायतोनृपाः ॥ अतस्तवहितंख्यातंकिंवामेचिंतयानया ॥ ५३ ॥ इतिजोपंस्थितंविप्रंप्रत्युवाचनृपोत्तमः ॥ सर्वं मयाह्यदिधृतंयत्त्वयोक्तंद्विजोत्तम ॥ ५४ ॥ ॥ राजोवाच ॥ ॥ अहंयियक्षमाणस्यतवसाहाय्यकर्मणि ॥ दासोस्मियज्ञसंभारान्नयमेकोशतोऽखिलान् ॥ ५५ ॥ यदस्तिमेखिलंतत्रसन्नागेपिभवान्प्रभुः ॥ यजस्वैकमनाब्रह्मन्सिद्धंमन्यस्ववांछितम् ॥ ५६ ॥ राज्यंकरोमियद्ब्रह्मन्स्वार्थंतन्नमनागपि ॥ पुत्रैःकलत्रैर्देहेनपरोपकृतयेयते ॥ ५७ ॥ राज्ञांक्रतुक्रियाभ्योपितीर्थेभ्योपिसमंततः ॥ प्रजापालनमेवैकोधर्मःप्रोक्तोमनीषिभिः ॥ ५८ ॥ प्रजासंतापजोवह्निर्वज्राग्नेरपिदारुणः ॥ द्विजान्दहतिवज्राग्निःपूर्वोराज्यंकुलंतनुम् ॥ ५९ ॥ यदावभृथसिक्तास्मूर्धवेयंद्विजसत्तम ॥ तदाविप्रपदांभोभिरभिषेकंकरोम्यहम् ॥ ६० ॥ हवनंब्राह्मणमुखेयत्करोमिद्विजोत्तम ॥ मन्येक्रतुक्रियाभ्योपितद्विशिष्टंमहामते ॥६१॥ अभिलाषेपुसर्वेषुजागर्त्यैकोहृदीहमे ॥ अद्यापिमार्गणःकोपिद्रष्टव्यःस्वतनोरपि ॥ ६२ ॥ अहोअहोभिर्बहुभिःफलितोमेमनोरथः ॥ यत्त्वंमेद्यगृहेप्राप्तःकिंचित्प्रार्थयितुंद्विज ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एकाग्रमानसोविप्रयज्ञान्विपुलदक्षिणान् ॥ बहून्यजकृतंविद्धिसाहाय्यंसर्ववस्तुषु ॥ ६४ ॥ इतिराज्ञोमहाबुद्धेर्धर्मशीलस्यभाषितम् ॥ श्रुत्वातुष्टमनाः स्रष्टाक्रतुसंभारमाहरत् ॥ ६५ ॥ साहाय्यंप्राप्यराजर्षेर्दिवोदासस्यपद्मभूः ॥ इयाजदशभिःकाश्यामश्वमेधैर्महामखैः ॥६६ ॥ अद्यापिहोमधूमौघैर्व्याप्तंगगनांतरम् ॥ तदाप्रभृतिनव्योमनीलिमानंजहात्यदः ॥ ६७ ॥

तीर्थंदशाश्वमेधाख्यंप्रथितंजगतीतले ॥ तदाप्रभृतितत्रासीद्वाराणस्यांशुभप्रदम् ॥ ६८ ॥ पुरारुद्रसरोनामतत्तीर्थंकलशोद्भव ॥ दशाश्वमेधिकंपश्चाज्जातं विधिपरिग्रहात् ॥ ६९ ॥ स्वर्धुन्यथततःप्राप्ताभगीरथसमागमात् ॥ अतीवपुण्यवज्जातमतस्तत्तीर्थमुत्तमम् ॥७०॥ विधिर्दशाश्वमेधेशंलिंगंसंस्थाप्य तत्रवै ॥ स्थितवान्नगतोद्यापिक्वापिकाशींविहायतु ॥ ७१ ॥ राज्ञोधर्मरतेस्तस्यच्छिद्रंनावापकिंचन ॥ अतःपुरारेःपुरतोव्रजित्वाकिंवदेद्विधिः ॥ ७२ ॥ क्षेत्रप्रभावंविज्ञायध्यायन्विश्वेश्वरंशिवम् ॥ ब्रह्मेश्वरंचसंस्थाप्यविधिस्तत्रैवसंस्थितः ॥ ७३ ॥ परातनुरियंकाशीविश्वेशस्येतिनिश्चितम् ॥ अस्याः संसेवनाच्छंभुर्नकुप्यतिपुरोमयि ॥ ७४ ॥ कःप्राप्यकाशींदुर्मेधाःपुनस्त्यक्तुमिहेहते ॥ अनेकजन्मजनितकर्मनिर्मूलनक्षमाम् ॥ ७५ ॥ विश्वसंतापसं हर्तुःस्थानेविश्वपतेस्तनुः ॥ संताप्यतेतरांकाश्याविश्लेषजमहाग्निना ॥ ७६ ॥ प्राप्यकाशींत्यजेद्यस्तुसमस्ताघौघनाशिनीम् ॥ नृपशुःसपरिज्ञेयोमहासौख्यपराङ्मुखः ॥ ७७ ॥ निर्वाणलक्ष्मींयःकांक्षेत्त्यक्त्वासंसारदुर्गतिम् ॥ तेनकाशीनसंत्याज्यायद्याप्तैशादनुग्रहात् ॥ ७८ ॥ यःकाशींसंपरित्यज्यगच्छेदन्यत्रदुर्मतिः ॥ तस्यहस्ततलाद्गच्छेच्चतुर्वर्गफलोदयः ॥ ७९ ॥ निवर्हणीमघौघस्यसुपुण्यपरिबृंहिणीम् ॥ कःप्राप्यकाशींदुर्मेधास्त्यजेन्मोक्षसुखप्रदाम् ॥ ८० ॥ सत्यलोकेक्वतत्सौख्यंक्वसौख्यंवैष्णवेपदे ॥ यत्सौख्यंलभ्यतेकाश्यांनिमेषार्धनिषेवणात् ॥ ८१ ॥ वाराणसीगुणगणान्निर्णीयद्रुहिणस्त्विति ॥ व्यावृत्यमंदरगिरिंनपुनःप्रत्यगान्मुने ॥८२॥ ॥ स्कंदउवाच ॥ ॥ मित्रावरुणयोःपुत्रमहिमानंब्रवीमिते ॥ काश्यांदशाश्वमेधस्यसर्वतीर्थशिरोमणेः ॥ ८३ ॥ दशाश्वमेधिकंप्राप्यसर्वतीर्थोत्तमोत्तमम् ॥ यत्किंचित्क्रियतेकर्मतदक्षयमिहेरितम् ॥ ८४ ॥ स्नानंदानंजपोहोमःस्वाध्यायोदेवतार्चनम् ॥ संध्योपास्तिस्तर्पणंचश्राद्धंपितृसमर्चनम् ॥८५॥ दशाश्वमेधिकेतीर्थेसकृत्स्नात्वानरोत्तमः ॥ दृष्ट्वादशाश्वमेधेशंसर्वपापैःप्रमुच्यते ॥८६॥ ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिम् ॥ दशाश्वमेधिकेस्नात्वामुच्यतेजन्मपातकैः ॥ ८७ ॥ ज्येष्ठेशुक्लद्वितीयायांस्नात्वारुद्रसरोवरे ॥ जन्मद्वयकृतंपापंतत्क्षणादेवनश्यति ॥ ८८ ॥

एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः ॥ आशुक्लपक्षदशमिप्रतिजन्माघमुत्सृजेत् ॥ ८९ ॥ तिथिंदशहरांप्राप्यदशजन्माघहारिणीम् ॥ दशाश्वमेधिकेस्नातोयामींपश्येन्नयातनाम् ॥९०॥ लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ ॥ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः ॥ ९१ ॥ स्नातोदशहरायांयःपूजयेल्लिंगमुत्तमम् ॥ भक्त्यादशाश्वमेधेशंनतंगर्भदशास्पृशेत् ॥९२॥ ज्येष्ठेमासिसितेपक्षेपक्षंरुद्रसरेनरः ॥ कुर्वन्वैवार्षिकींयात्रांनविघ्नैरभिभूयते ॥९३॥ दशाश्वमेधावभृथैर्यत्फलंसम्यगाप्यते ॥ दशाश्वमेधेतन्नूनंस्नात्वादशहरातिथौ ॥ ९४ ॥ स्वर्धुन्याःपश्चिमेतीरेनत्वादशहरेश्वरम् ॥ नदुर्दशामवाप्नोति पुमान्पुण्यतमःक्वचित् ॥ ९५ ॥ यत्काश्यांदक्षिणद्वारमंतर्गेहस्यकीर्त्यते ॥ तत्रब्रह्मेश्वरंदृष्ट्वाब्रह्मलोकेमहीयते ॥ ९६ ॥ इतिब्राह्मणवेषेणवाराणस्यांमहाधिया ॥ द्रुहिणेनस्थितंतावद्यावद्विश्वेश्वरागमः ॥ ९७ ॥ दिवोदासोपिराजेंद्रोवृद्धब्राह्मणरूपिणे ॥ ब्रह्मणेकृतयज्ञायब्रह्मशालामकल्पयत् ॥ ९८ ॥ ब्रह्मेश्वरसमीपेतुब्रह्मशालामनोहरा ॥ ब्रह्मातत्रावसद्व्योमब्रह्मघोषैर्निनादयन् ॥ ९९ ॥ इतितेकथितोब्रह्मन्महिमातिमहत्तरः ॥ दशाश्वमेधतीर्थस्यसर्वाघौघविनाशनः ॥ १०० ॥ श्रुत्वाध्यायमिमंपुण्यंश्रावयित्वातथैवच ॥ ब्रह्मलोकमवाप्नोतिश्रद्धयामानवोत्तमः ॥ १०१ ॥ ॥ इतिश्रीस्कांदेमहापुराण एकाशीतिसाहस्र्यांसंहितायामुत्तरार्द्धेचतुर्थेकाशीखंडेदशाश्वमेधवर्णनंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥छ॥ ॥ अगस्तिरुवाच ॥ ॥ अपूर्वेयंकथाख्याताब्रह्मणोब्रह्मवित्तम ॥ किंचकारपुनःशंभुस्तत्रब्रह्मण्यपिस्थिते ॥ १ ॥ ॥ स्कंदउवाच ॥ शृण्वगस्त्यमहाभागकाश्यांब्रह्मण्यपिस्थिते ॥ गिरिशश्चिंतयामासभृशमुद्विग्नमानसः ॥ २ ॥ पुरीसायादृशीकाशीवशीकरणभूमिका ॥ नतादृशीदृशीहासीत्क्वचिन्मेप्रायशोध्रुवम् ॥ ३ ॥ योयोयातिपुरींतांतुससतत्रैवतिष्ठति ॥ अभूवन्ननुयोगिन्योऽयोगिन्यःकाशिसंगताः ॥ ४ ॥ अकिंचित्करतांप्राप्तःससहस्रकरोप्यरम् ॥ विधिर्विधानदक्षोपिनमेससविधोभवत् ॥ ५ ॥

चिंतयन्नितिदेवेशोगणानाहूयभूरिशः ॥ प्रेषयामासभोयातक्षिप्रंवाराणसींपुरीम् ॥६॥ किंकुर्वंतितुयोगिन्यःकिंकरोतिसभानुमान् ॥ गत्वावित्तत्वरायुक्ताविधिश्चविदधातिकिम् ॥ ७ ॥ नामग्राहंततःऽप्रैषीद्बहुमानपुरःसरम् ॥ शंकुकर्णमहाकालघंटाकर्णमहोदर ॥८॥ सोमनंदिन्नंदिषेणकालपिंगलकुण्ट ॥ कुंडोदरमयूराक्षबाणगोकर्णतारक ॥ ९ ॥ तिलपर्णस्थूलकर्णदृमिचंडप्रभामय ॥ सुकेशविंदतेछागकपर्दिन्पिंगलाक्षक ॥ १० ॥ वीरभद्रकिराताख्यचतुर्मुखनिकुंभक ॥ पंचाक्षभारभूताख्यत्र्यक्षक्षेमकलांगलिन् ॥११॥ विराधसुमुखाषाढेभवंतोममसूनवः ॥ यथेमौस्कंदहेरंबौनैगमेयोयथात्वयम् ॥१२॥ यथाशाखविशाखौचयथेमौनंदिभृंगिणौ ॥ भवत्सुविद्यमानेषुमहाविक्रमशालिषु ॥ १३ ॥ काशीप्रवृत्तिंनोजानेदिवोदासनृपस्यच ॥ योगिन्यर्कविधीनांचतद्वौयातंभवत्स्वमू ॥ १४ ॥ शंकुकर्णमहाकालौकालस्यापिप्रकंपनौ ॥ ज्ञातुंवाराणसीवार्तामायातंचत्वरान्वितौ ॥ १५ ॥ कृतप्रतिज्ञौतौतूर्णंप्राप्यवाराणसींपुरीम् ॥ शंकुकर्णमहाकालौविस्मृत्यशांभवींगिरम् ॥ १६ ॥ यथैंद्रजालिकींदृष्ट्वामायामिहविचक्षणः ॥ क्षणेनमोहमायातिकाशींवीक्ष्यतथैवतौ ॥ १७ ॥ अहोमोहस्यमाहात्म्यमहोभाग्यविपर्ययः ॥ निर्वाणराशिंयत्काशींप्राप्ययांत्यन्यतोऽबुधाः ॥ १८ ॥ तत्यजेयैरियंकाशीमहाशीर्वादभूमिका ॥ तेषांकरतलान्मुक्तिःप्राप्तापिपरितोगता ॥ १९ ॥ यत्रसर्वावभृथतःस्नानमात्रंविशिष्यते ॥ अप्युष्णीकृतपानीयैस्तांकाशींकःपरित्यजेत् ॥ २० ॥

यत्रैकपुष्पदानेनशिवलिंगस्यमूर्धनि ॥ दशसौवर्णिकंपुण्यंकस्तांकाशींपरित्यजत् ॥ २१ ॥ यत्रदंडप्रणामेनअप्येकेनशिवाग्रतः ॥ तुच्छमैंद्रपदंप्राहुस्तांकाशींकोविमुंचति ॥ २२ ॥ यत्रैकद्विजमात्रंतुभोजयित्वायथेच्छया ॥ वाजपेयाधिकंपुण्यंतांकाशींकोविमुंचति ॥ २३ ॥ एकांगांयत्रदत्त्वावैविधिवद्ब्राह्मणायवै ॥ लभेदयुतगोपुण्यंकस्तांकाशींत्यजेत्सुधीः ॥ २४ ॥ एकंलिंगंप्रतिष्ठाप्ययत्रसंस्थापितंभवेत् ॥ अपित्रैलोक्यमखिलंतांकाशींकःसमुज्झति ॥ २५ ॥ परिनिश्चित्यतावित्थंलिंगेसंस्थाप्यपुण्यदे ॥ तत्रैवसंस्थितिंप्राप्तौकाशींनाद्यापिमुंचतः ॥ २६ ॥ शंकुकर्णेश्वरंलिंगंशंकुकर्णगणार्चितम् ॥ दृष्ट्वानजायतेजंतुर्जातुमातुर्महोदरे ॥ २७ ॥ विश्वेशाद्वायुदिग्भागेशंकुकर्णेश्वरंनरः ॥ संपूज्यनविशेदत्रघोरेसंसारसागरे ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महाकालेश्वरंलिंगंमहाकालगणार्चितम् ॥ अर्चयित्वाचनत्वाचस्तुत्वाकालभयंकुतः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ शंकुकर्णेमहाकालेचिरंतनविलं
बिते ॥ ज्ञात्वासर्वज्ञनाथोयंप्राहेंपीदपरोगणौ ॥ ३० ॥ घंटाकर्णत्वमागच्छमहोदरमहामते ॥ काशीयातंयुवांतूर्णज्ञातुंतत्रत्यचेष्टितम् ॥३१॥ इत्यगस्ते
गणौतौतुगत्वाकाशींमहापुरीम् ॥ व्यावृत्याद्यापिनोयातौकापितत्रैवसंस्थितौ ॥ ३२ ॥ घंटाकर्णेश्वरंलिंगंघंटाकर्णगणोत्तमः ॥ काश्यांसंस्थाप्यवि
धिवत्स्वयंतत्रैवनिर्वृतः ॥ ३३ ॥ कुंडंतत्रैवसंस्थाप्यलिंगस्नपनकर्मणे ॥ नाद्यापिसंत्यजेत्काशींध्यायँल्लिंगंतथैवहि ॥ ३४ ॥ महोदरोपितत्प्राच्यां
शिवध्यानपरायणः ॥ महोदरेश्वरंलिंगंध्यायेदद्यापिकुंभज ॥ ३५ ॥ महोदरेश्वरंदृष्ट्वावाराणस्यांद्विजोत्तम ॥ कदाचिदपिवैमातुःप्रविशेन्नौदरींदरीम् ॥
॥ ३६ ॥ घंटाकर्णह्रदेस्नात्वादृष्ट्वाव्यासेश्वरंविभुम् ॥ यत्रकुत्रविपन्नोपिवाराणस्यांमृतोभवेत्॥३७॥ घंटाकर्णेमहातीर्थेश्राद्धंकृत्वाविधानतः ॥ अपिदुर्ग
तिमापन्नानुद्धरेत्सप्तपूर्वजान् ॥ ३८ ॥ निमज्याद्यापितत्कुंडेक्षणंयोवहितोभवेत् ॥ विश्वेश्वरमहापूजाघंटारावाश्रृणोतिसः ॥३९॥ वदंतिपितरःकाश्यां
घंटाकर्णेमलेजले॥दातातिलोदकस्त्यापिवंशेनःकोपिजायते॥४०॥यद्वंश्यासुनयःकाश्यांघंटाकर्णमहाह्रदे॥कृतोदककियाःप्राप्ताःपरांसिद्धिंघटोद्भव ॥४१॥

॥ स्कंदउवाच ॥ ॥ घंटाकर्णेगणेयातेप्रेमतेचमहोदरे ॥ विस्मितास्मायस्मरद्वैष्णौलिंगंदोलयन्मुहुः ॥४२॥ उवाचचमनत्येवहरःस्मित्वापुनःपुनः ॥
महामोहनविद्यासिकथितात्वांपर्यवेम्यहम् ॥ ४३ ॥ पुरादिदंप्रशंसंतित्वांमहामोहहारिणीम् ॥ काशीत्वितिनजानंतिमहामोहनभूरियम् ॥ ४४ ॥ प्रेष
यिष्यान्यहंसर्वान्भवतीमोहयिष्यति ॥ इतिसम्यग्विजानामिकाशित्वांमोहनौषधिम् ॥ ४५ ॥ तथापिप्रेषयिष्यामियावान्मेस्तिपरिच्छदः ॥ नोद्यमाद्वि
रमंतीहज्ञानिनःसाध्यकर्मणि ॥ ४६ ॥ नोद्यमाद्विरतिःकार्याकापिकार्येविचक्षणैः ॥ प्रतिकूलेपिसिद्धेतविधिस्तत्सततोद्यमात् ॥ ४७ ॥ शीतोष्णभानू
स्वर्भानुमस्तावपिनभोंगणे ॥ गर्तिनत्यजतोद्यापिमक्तांव्यकृतोद्यमौ ॥ ४८ ॥ एकत्रहंतिकार्याणिप्रातिकूल्याद्विधिर्मुहुः ॥ एकत्रकरणीयानिसेत्स्यं
त्यत्रमृशोद्यमात् ॥ ४९ ॥ दैवंपूर्वकृतंकर्मकथ्यतेनेतरत्पुनः ॥ तन्निराकरणेयत्नःस्वयंकार्योविपश्चिता ॥ ५० ॥ भाजनोपस्थितंदैवाद्भोज्यंनास्यंस्वयं
विशेत् ॥ हस्तवक्त्रोद्यमात्तच्चप्रविशेदोदरींदरीम् ॥ ५१ ॥ इत्युद्यमंसमर्थ्येशोनिश्चितंदैवजित्वरम् ॥ पुनश्चप्रेषयांचक्रेगणान्पंचमहारथान् ॥ ५२ ॥
सोमनंदीनंदिषेणःकालपिंगलकुब्जटाः ॥ तेद्यापिननिवर्ततेकाश्यांजीवामृतायथा ॥५३॥ तेपिस्वनाम्नालिंगानिशंभुसंतुष्टिकाम्यया॥ प्रतिष्ठाप्यस्थिताः
काश्यांविश्वनिर्वाणजन्मनि ॥ ५४ ॥ सोमनंदीश्वरंदृष्ट्वालिंगंनंदवनेपरम् ॥ सोमलोकेपरानंदंप्राप्नुयाद्भक्तिमान्नरः ॥ ५५ ॥ तदुत्तरेविलोक्याथनंदिषे
णेश्वरंनरः ॥ आनंदसेनांसंप्राप्यजयेन्मृत्युमपिक्षणात् ॥ ५६ ॥ कालेश्वरंमहालिंगंगंगायाःपश्चिमोत्तरे ॥ प्रणम्यकालपाशेननोबध्येतकदाचन ॥
॥ ५७ ॥ पिंगलेश्वरमभ्यर्च्यकालेशात्किंचिदुत्तरे ॥ लभतेपिंगलज्ञानंयेनतन्मयतांव्रजेत् ॥ ५८ ॥

कुकुटेश्वरलिंगस्ययेत्रभक्तिंवितन्वते ॥ कुकुटांडाकृतेस्तस्यनतेगर्भमवाप्नुयुः ॥ ५९ ॥ ॥ स्कंदउवाच ॥ ॥ सोमनंदिप्रभृतिषुमुनेपंचगणेष्वपि ॥
आनंदकाननंप्राप्यस्थितेपुस्थाणुरब्रवीत् ॥ ६० ॥ कार्यमस्माकमेवैतद्यदिसम्यग्विमृश्यते ॥ अनेनोपाधिनाम्येतेतत्रतिष्ठंतुमामकाः ॥ ६१ ॥ प्रमथे
पुप्रविष्टेषुप्रायावीर्यमहत्त्वपि ॥ अहमेवप्रविष्टोस्मिवाराणस्यांन्संशयः ॥ ६२ ॥ क्रमेणप्रेषयिष्यामियोस्तिमेस्वपरिच्छदः ॥ तत्रसर्वेषुयातेषुततो
यास्याम्यहंपुनः ॥ ६३ ॥ संप्रधार्येतिहृदयेदेवदेवेनशूलिना ॥ प्रैषिषुप्रमथानांततोगणचतुष्टयम् ॥ ६४ ॥ कुंडोदरोमयूराख्योवाणोगोकर्णएवच ॥
मायाबलंसमाश्रित्यकाशींप्रविविशुर्गणाः ॥ ६५ ॥ कृत्वोपायशतंतेस्तुदिवोदासस्यसंभ्रमे ॥ यदैकोपिसमर्थोनतदातत्रैवसंस्थितम् ॥६६॥ अपराधशते
ष्वीशःकेनतुष्यतिकर्मणा ॥ संप्रधार्यैतितेचक्रुर्लिंगाराधनमुत्तमम् ॥ ६७ ॥ एकस्मिन्शांभवेलिंगेविधिनात्रसमर्चिते ॥ क्षमेत्यक्षोपराधानांशतंमोक्षं
चयच्छति ॥६८॥ नतुष्यतितथाशंभुर्यज्ञदानतपोव्रतैः ॥ यथातुष्येत्सकृल्लिंगेविधिनाभ्यर्चितेसति ॥ ६९ ॥ लिंगार्चनविधानज्ञोलिंगार्चनरतःसदा ॥
त्र्यक्षएवसविज्ञेयःसाक्षाद्व्यक्षोपिमानवः ॥ ७० ॥ नगोशतप्रदानेननन्नस्वर्णशतदानतः ॥ तत्फलंलभ्यतेपुंभिर्यत्सकृल्लिंगपूजनात् ॥ ७१ ॥ अश्वमेधा
दिभिर्यागैर्नतत्फलमवाप्यते ॥ यत्फलंलभ्यतेमर्त्यैर्नित्यंलिंगप्रपूजनात् ॥ ७२ ॥ स्नापयित्वाविधानेनयोलिंगस्नपनोदकम् ॥ त्रिःपिबेद्विधिवत्पापं
तत्त्येहाशुप्रणश्यति ॥ ७३ ॥ लिंगस्नपनवार्भिर्यैःकुर्यान्मूर्ध्यभिषेचनम् ॥ गंगास्नानफलंतस्यजायतेत्रविपाप्मनः ॥ ७४ ॥ लिंगंसमर्चितंदृष्ट्वायःकुर्या
त्प्रणतिंसकृत् ॥ संदेहोजायतेतस्यपुनर्देहनिबंधने ॥ ७५ ॥ लिंगंयःस्थापयेद्भक्त्यासप्तजन्मकृतादघात् ॥ मुच्यतेनात्रसंदेहोविशुद्धःस्वर्गभाग्भवेत् ॥
॥ ७६ ॥ विचार्येतिगणैःकाश्यांस्वामिद्रोहोपशांतये ॥ प्रतिष्ठितानिलिंगानिमहापातकभिद्यपि ॥ ७७ ॥ कुंडोदरेश्वरंलिंगंदृष्ट्वालोलार्कसन्निधौ ॥
सर्वपापविनिर्मुक्तःशिवलोकेमहीयते ॥७८॥ कुंडोदरेश्वरालिंगात्प्रतीच्यामसिरोधसि ॥ मयूरेश्वरमभ्यर्च्यनगर्भप्रतिपद्यते ॥७९॥ मयूरेशात्प्रतीच्यांचलिं
गंवाणेश्वरंमहत् ॥ तत्स्पर्शनमात्रेणसर्वैःपापैःप्रमुच्यते ॥ ८० ॥ गोकर्णेशंमहालिंगमंतर्गेहस्यपश्चिमे ॥ द्वारेसमर्च्यवैकाश्यांनविघ्नैरभिभूयते ॥ ८१ ॥
गोकर्णेश्वरभक्तस्यपंचत्वसमयेसति ॥ ज्ञानभ्रंशोनजायेतकदिचिदप्यंतमृच्छतः ॥८२॥ ॥ स्कंदउवाच ॥ ॥ चिरयत्सुगणेष्वेषुचतुर्ष्वपिगणेश्वरः ॥
महिमानंमहत्त्वंतुतत्काश्याःपर्यवर्णयत् ॥ ८३ ॥ वैष्णव्यामायययाविश्वंभ्राम्येतात्रययाखिलम् ॥ ध्रुवंमूर्तिमतीसेपाकाशीविश्वैकमोहिनी ॥ ८४ ॥
अपास्यसोदरान्दारान्पुत्रक्षेत्रंगृहंधनम् ॥ अभ्यंगीकृत्यनिधनंसर्वेकाशीमुपासते ॥ ८५॥ मरणादपिनोकाश्यांभयंयत्रमनागपि ॥ गणास्तत्रतुतिष्ठंतःकुतो
मर्तोपिबिभ्यति ॥ ८६ ॥ मरणंमंगलंयत्रविभूतिर्यत्रभूषणम् ॥ कौपीनंयत्रकौशेयंकाशीकुत्रोपमीयते ॥ ८७ ॥ निर्वाणरमणीयत्ररंकवाऽरंकमेववा ॥
ब्राह्मणंवाश्वपाकंवावृणीतेमांत्यभूषणम् ॥ ८८ ॥ मृतानांयत्रजंतूनांनिर्वाणपदमृच्छताम् ॥ कोत्यंशेनापिनसमाअपिशक्रादयःसुराः ॥ ८९ ॥
यत्रकाश्यांमृतोजंतुर्ब्रह्मनारायणादिभिः ॥ प्रबद्धमूर्धांजलिभिर्नमस्येतातियत्नतः ॥ ९० ॥ यत्रकाश्यांशवत्वेपिजंतुर्नाशुचितांव्रजेत् ॥ अतस्तत्कर्णसं
स्पर्शंकरोम्यहमपिस्वयम् ॥ ९१ ॥ यस्तुकाशीतिकाशीतिद्विर्त्रिर्जपतिपुण्यवान् ॥ अपिसर्वपवित्रेभ्यःसपवित्रतरोमहान् ॥ ९२ ॥ येनकाशीह्रदि
ध्यातायेनकाशीहसेविता ॥ तेनाहंह्रदिसंध्यातस्तेनाहंसेवितःसदा ॥ ९३ ॥ काशींयःसेवतेजंतुर्निर्विकल्पेनचेतसा ॥ तमहंह्रदयेनित्यंधारयामि
प्रयत्नतः ॥ ९४ ॥ स्वयंवस्तुमशक्तोपिवासयेत्तीर्थवासिनम् ॥ अप्येकमपिमूलेनसवस्तुःफलभाग्भवम् ॥ ९५ ॥ काश्यांवसंतियेधीराआपंचत्वविनि
श्चयाः ॥ जीवन्मुक्तास्तुतेज्ञेयावंद्याःपूज्यास्तएवहि ॥ ९६ ॥ इत्थंविनृश्यत्वहुराःस्थाणुर्वाराणसीगुणान् ॥ गणानन्यान्समाहूयप्रादिशत्प्रीतिपूर्वकम् ॥
॥९७॥ तारकत्वंसमागच्छगच्छतिस्वच्छमानस ॥ दिवोदासोवृषावासोयामधीष्टेवरांपुरीम् ॥९८॥ तिलपर्णस्थूलकर्णह्रस्वमिचंडप्रभामय ॥ सुकेशविंदते
त्यगकपर्दिन्पिंगलाक्षक ॥९९॥ वीरभद्रकिरातास्यचतुर्मुखनिकुंभक ॥ पंचाक्षभारभूतास्यव्यक्षेमकलांगलिन् ॥ १०० ॥ विराधसुमुखापाढेर्यांतुसर्वे
पृथक्पृथक्॥एतेगणामहाभागाःस्वामिभक्ताद्दढव्रताः ॥१॥ कृत्वामायावहुविधावहुरूपाविचक्षणाः॥ अनिमेषेक्षणास्तस्थुःक्षोणीशच्छद्मकांक्षिणः ॥२॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपरिज्ञाततच्छिद्राविद्रावितयशोधनाः॥आःकिमेतदहोजातंनिनिंदुःस्वमितीहते ॥३॥ गणाऊचुः ॥ ॥ धिगस्मान्स्वामिनानित्यंकृतसंभावनान्मुहुः ॥ मनुष्यमात्रमप्यत्रयैरेकंनवशीकृतम् ॥ ४ ॥ बहुमानेनदानेनसौहार्देनमहीयसा ॥ कृतप्रसादांस्त्र्यक्षेणधिङ्नस्तत्कार्यवंचकान् ॥५॥ कागतिर्नोभवित्री हस्वामिकृत्यप्रमादिनाम् ॥ अंधंतमोमयेलोकेध्रुवंवासोभविष्यति ॥ ६ ॥ अकृतस्वामिकार्याणामहोजीवितधारिणाम्॥ अक्षतेंद्रियवृत्तीनांदुर्गतिश्चपदे पदे ॥ ७ ॥ लब्धसंभावनानांचन्यकृतस्वामिकर्मणाम् ॥ भृत्यानांभूरिभाजांचभंगुराःस्युर्मनोरथाः ॥ ८ ॥ अनिष्पादितकार्यार्थायेमुखंप्रेक्षयंत्यहो ॥ अपत्रपाःपुरोभर्तुस्तैर्भूर्भारवतीत्वियम् ॥९॥ नाद्रीणांनसमुद्राणांनद्रुमाणांमहीयसाम् ॥ भूतधात्र्यास्तथाभारोयथास्वामिद्रुहांमहान् ॥ १० ॥ अहोपौरा णिकीगाथास्मृतास्माभिरनिंदिता ॥तदर्थमवलंब्येहस्थास्यामःकृतनिश्चयाः ॥ ११ ॥ अनाकलितपुण्यानांपरिक्षीणधनायुषाम् ॥ सर्वोपायविहीनानां गतिर्वाराणसीपुरी ॥ १२ ॥ अपुण्यभारखिन्नानांपश्चात्तापमुपेयुषाम् ॥ विष्वगूर्ध्वगतीनांचगतिर्वाराणसीपुरी ॥ १३ ॥ स्वामिद्रुहःकृतघ्नाश्चयेचविश्रं भघातकाः ॥ तेषांक्वापिगतिर्नास्तिमुक्त्वावाराणसींपुरीम् ॥ १४ ॥ इत्थंनिश्चित्यगाथार्थंप्रमथाअवतस्थिरे ॥ अविज्ञातस्वरूपाश्चदिवोदासेनभूभुजा ॥ ॥ १५ ॥ नबुबोधसभूपालोनितरांबुद्धिमानपि ॥ विबुधान्विविधाकारैःस्थितानीशप्रभावतः ॥ १६ ॥ चित्रंनचित्रगुप्तोपिवेत्तिवाराणसीस्थितान् ॥ जंतून्कागणनान्येषांमर्त्यलोकनिवासिनाम् ॥ १७ ॥ अविच्छिन्नप्रभावाणामपरिच्छिन्नतेजसाम् ॥ कृतलिंगप्रतिष्ठानांनांतंप्राप्नोतिधर्मराट् ॥ १८ ॥ इतितेप्रमथाःसर्वेघटोद्भवमहामुने ॥ कृतलिंगार्चनाःकाशींनाद्याप्युज्झंतिशर्मदाम् ॥ १९ ॥ तारकेशंमहालिंगंतारकाख्योगणोत्तमः ॥ तारकज्ञानदंपुं सांमुनेऽद्यापिसमर्चयेत् ॥ २० ॥ तारकेश्वरलिंगस्यकृत्वाभक्तिंसुनिश्चलाम् ॥ सुखेनतारकज्ञानंलभ्यतेतैर्नरोत्तमैः ॥२१॥ तिलपर्णेश्वरंलिंगंतिलपर्ण प्रतिष्ठितम् ॥ तिलप्रमाणमप्यत्रदृष्ट्वापापंनसंभवेत् ॥ २२ ॥ स्थूलकर्णेश्वरंलिंगंपरिपूज्यनरोत्तमः ॥ नदुर्गतिमवाप्नोतिपुण्यमाप्नोतिचोत्तमम् ॥ ॥ २३ ॥ दृमिचंडेश्वरंलिंगंतथालिंगंप्रभामयम् ॥ आराध्यतत्प्रतीच्यांचनपापैरभिभूयते ॥ २४॥ प्रभामयेश्वरंलिंगंदृष्ट्वान्यत्रापिसंस्थितः ॥ प्रभामये नयानेनशिवलोकेव्रजेत्सुधीः ॥ २५ ॥ सुकेशेश्वरमभ्यर्च्यहरिकेशवनेनरः ॥ षाट्कौशिकमयंदेहंधारयेन्नपुनःपुनः ॥ २६ ॥

विंदतीशंनरोभ्यर्च्यभीमचंडीसमीपतः ॥ त्यक्त्वाप्रचंडमप्येनोमोक्षंविंदतिशाश्वतम् ॥ २७ ॥ छागलेशंमहालिंगंपित्रीश्वरसमीपगम् ॥ विलोक्यपशुव त्कोपिनपापंप्राकृतंस्पृशेत् ॥ २८ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्द्धेवाराणसीवर्णनगणप्रेषणंनामत्रिपं चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ स्कंदउवाच ॥ ॥ कुंभसंभववक्ष्यामिशृणोत्ववहितोभवान् ॥ कपर्दीशस्यलिंगस्यमहामाहात्म्यमुत्तमम् ॥ १ ॥ कपर्दीनामगणपःशंभोरत्यंतवल्लभः ॥ पित्रीशादुत्तरेभागेलिंगंसंस्थाप्यशांभवम् ॥२॥ कुंडंचखानतस्याग्रेविमलोदकसंज्ञकम् ॥ यस्यतोयस्यसंस्पर्शी द्विमलोजायतेनरः ॥ ३ ॥ इतिहासंप्रवक्ष्यामितत्रत्रेतायुगेपुरा ॥ यथावृत्तंकुंभयोनेश्रवणात्पातकापहम् ॥ ४ ॥ एकःपाशुपतश्रेष्ठोवाल्मीकिरितिसं ज्ञितः ॥ तपश्चचारसमुनिःकपर्दीशंसमर्चयन् ॥ ५ ॥एकदासहिहेमंतेमार्गेमासितपोधनः ॥ स्नात्वातत्रमहातीर्थेमध्याह्नेविमलोदके ॥ ६ ॥ चकारभ स्मनास्नानमापादतलमस्तकम् ॥ लिंगस्यदक्षिणेभागेकृतमाध्याह्निकक्रियः ॥ ७ ॥ न्यस्तमस्तकपांसुश्चसंध्यामाध्यात्मिकींस्मरन् ॥ जपन्पंचाक्षरीं विद्यांध्यायन्देवंकपर्दिनम् ॥ ८ ॥ कृत्वासंहारमार्गेणसप्रमाणंप्रदक्षिणम् ॥ हुडुंकृत्यहुडुंकृत्यहुडुंकृत्यत्रिरुच्चकैः ॥ ९ ॥

प्रणवंपुरतःकृत्वापड्जादिस्वरभेदतः ॥ गीतंविधायसानंदंसनृत्यंहस्तकान्वितम् ॥ १० ॥ अंगहारैर्मनोहारिचारीमंडलसंयुतम् ॥ क्षणंतत्रसरस्तीरे उपविष्टोमहातपाः ॥ ११ ॥ अद्राक्षीद्राक्षसंघोरमतीवविकृताकृतिम् ॥ शुष्कशंखकपोलास्यंनिमग्नापिंगलोचनम् ॥१२॥ रूक्षस्फुटितकेशाग्रंमहालंब शिरोधरम् ॥ अतीवचिपिटघ्राणंशुष्कौष्ठमतिदंतुरम् ॥ १३ ॥ महाविशालमौलिंचप्रोर्ध्वीभूतशिरोरुहम् ॥ प्रलंबकर्णपालीकंपिंगलश्मश्रुभीषणम् ॥ ॥ १४ ॥ प्रलंबितललज्जिह्वमत्युत्कटकृकाटिकम् ॥ स्थूलास्थिजत्रुसंस्थानंदीर्घस्कंधद्वयोत्कटम् ॥ १५ ॥ निमग्नकक्षाकुहरंशुष्कह्रस्वभुजद्वयम् ॥ विरलांगुलिहस्ताग्रंनतपीननखावलिम् ॥ १६ ॥ विशुष्कपांसुलोत्क्रोडंपृष्ठलग्नोदरत्वचम् ॥ कटीतटेनविकटंनिर्मांसत्रिकबंधनम् ॥ १७ ॥ प्रलंब स्फिग्युगयुतंशुष्कमुष्काल्पमेहनम् ॥ दीर्घनिर्मांसलोरूकंस्थूलजान्वस्थिपंजरम् ॥ १८ ॥ अस्थिचर्मावशेषंचशिराजालितविग्रहम् ॥ शिरालंदी र्घजंघ्रचस्थूलगुल्फास्थिभीषणम् ॥ १९ ॥

अतिविस्तृतपादंचदीर्घवक्रकृशांगुलिम् ॥ अस्थिचर्मावशेषेणशिराताडितविग्रहम् ॥ २० ॥ विकटंभीषणाकारंक्षुत्क्षाममतिलोमशम् ॥ दावदग्धद्रु माकारमतिचंचललोचनम् ॥ २१ ॥ मूर्तंभयानकमिवसर्वप्राणिभयप्रदम् ॥ हृदयाकंपनंदृष्ट्वातंप्रेतंवृद्धतापसः ॥ अतिदीनाननंकस्त्वमितिधैर्येणपृष्ट वान् ॥ २२ ॥ कुतस्त्वमिहसंप्राप्तःकस्मात्तेगतिरीदृशी ॥ अनुक्रोशधियारक्षःपृच्छामिवदनिर्भयम् ॥ २३ ॥ अस्माकंतापसानांचनभयंत्वद्विधान्म नाक् ॥ शिवनामसहस्राणांविभूतिकृतवर्मणाम् ॥ २४ ॥ तापसोदीरितमितितद्रक्षःप्रीतिपूर्वकम् ॥ निशम्यप्रांजलिःप्राहतंकृपालुंतपोधनम् ॥ २५ ॥ ॥ राक्षसउवाच ॥ अनुक्रोशोस्तियदितेभगवंस्तापसोत्तम ॥ स्ववृत्तांतंतदावच्मिशृणुष्वावहितःक्षणम् ॥ २६ ॥ प्रतिष्ठानाभिधानोस्तिदेशोगोदावरी तटे ॥ तीर्थप्रतिग्रहरुचिस्तत्रासंब्राह्मणस्त्वहम् ॥ २७ ॥ तेनकर्मविपाकेनप्राप्तोस्मिगतिमीदृशीम् ॥ मरुस्थलेमहाघोरेतरुतोयविवर्जिते ॥ २८ ॥ गतोबहुतरःकालस्तत्रमेवसतोमुने ॥ क्षुधितस्यतृषार्तस्यशीततापसहस्यच ॥ २९ ॥ वर्षत्यपिमहामेघेधारासारैर्दिवानिशम् ॥ प्रावृट्कालेऽनिलेवाति किंचित्प्रावरणंनमे ॥ ३० ॥ पर्वण्यदत्तदानायेकृततीर्थप्रतिग्रहाः ॥ तइमांयोनिमृच्छंतिमहादुःखनिबंधनीम् ॥ ३१ ॥ गतेबहुतिथेकालेमरुभूमौमुने मया ॥ दृष्टोब्राह्मणदायादएकदाकश्चिदागतः ॥ ३२ ॥ सूर्योदयमनुप्राप्यसंध्याविधिविवर्जितः ॥ कृत्वामूत्रपुरीषेतुशौचाचमनवर्जितः ॥ ३३ ॥ मुक्तकच्छमशौचंचसंध्याकर्मविवर्जितम् ॥ तंदृष्ट्वातच्छरीरेहंसंक्रांतोभोगलिप्सया ॥ ३४ ॥ सद्विजोमंदभाग्यान्मेकेनचिद्वणिजासह ॥ अर्थलोभेनसं प्राप्तःपुरींपुण्यामिमांमुने ॥३५॥ अंतःपुरिप्रविष्टोभूत्सद्विजोमुनिसत्तम ॥ तच्छरीराद्बहिर्भूतस्त्वहंपापैःसमंक्षणात् ॥३६॥ प्रवेशोनास्तिचास्माकंप्रेतानां तपसांनिधे ॥ महतांपातकानांचवाराणस्यांशिवाज्ञया ॥३७॥ अद्यापितानिपापानितद्बहिर्निर्गमेच्छया॥बहिरेवहितिष्ठंतिसीम्निप्रमथसाध्वसात् ॥३८॥

अद्यश्वोवापरश्वोवासबहिर्निर्गमिष्यति ॥ इत्याशयास्थिताःस्मोवैयावदद्यतपोधन ॥ ३९ ॥ नाद्यापिसबहिर्गच्छेन्नाद्याप्याशाप्रयातिनः ॥ इत्यास्महे निराधाराआशापाशनियंत्रिताः ॥ ४० ॥ चित्रमद्यतनंवच्मितपस्विंस्तन्निशामय ॥ अतीवभाविकल्याणमितिमन्येऽधुनैवहि ॥ ४१ ॥ आप्रयागंप्र तिदिनंप्रयामःक्षुधितावयम् ॥ आहारकाम्ययाक्वापिपरंनोकिंचिदाप्नुमः ॥ ४२ ॥ संतिसर्वत्रफलिनःपादपाःप्रतिकाननम् ॥ जलाशयाश्चस्वच्छापाः संतिभूम्यांपदेपदे ॥ ४३ ॥ अन्यान्यपिचभक्ष्याणिसर्वेषांसुलभान्यहो ॥ पानान्यपिविचित्राणिसंतिभूयांसिसर्वतः ॥ ४४ ॥ परंनोदृग्गतान्येवदूरे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दूरेव्रजंत्यहो ॥ देवादप्येकमायांतंदृष्ट्वाकार्पटिकंमुने ॥४५॥ तस्यांतिकमहंप्राप्तःक्षुधयापरिपीडितः ॥ प्रसह्यभक्षयाम्येनमितिमत्वात्वरान्वितः ॥ ४६ ॥ यावत्तंतुजिघृक्षामितावत्तद्भदनांगुजात् ॥ शिवनामपवित्रावाङ्निरगाद्विघ्नहारिणी ॥ ४७ ॥ शिवनामस्मरणतोमदीयमपिपातकम् ॥ मंदीभूतंततस्तेन प्रवेशंलब्धवानहम् ॥ ४८ ॥ सीमस्थैःप्रमथैर्नाहंसद्योदग्गोचरीकृतः ॥ शिवनामश्रुतौयेपांतान्नपश्येद्यमोपियत् ॥ ४९ ॥ अंतर्गेहस्यसीमानंप्राप्तस्तेनसहाधुना ॥ सतुकार्पटिकोमध्यंप्रविष्टोहमिहस्थितः ॥ ५० ॥ आत्मानंबहुमन्येहंत्वांविलोक्याधुनामुने ॥ मामुद्धरकृपालोत्वंयोनेरस्मात्सुदारुणात् ॥ ५१ ॥ इतिप्रेतवचःश्रुत्वासकृपालुस्तपोधनः ॥ मनसाचिंतयामासधिङ्निजार्थोद्यमान्नरान् ॥ ५२ ॥ स्वोदरंभरयःसर्वेपशुपक्षिमृगादयः ॥ सएवधन्यःसंसारेयःपरार्थोद्यतःसदा ॥५३॥ तपसाद्यनिजेनाहंप्रेतमेतमवाप्तुरम् ॥ मामेवशरणंप्राप्तंमुद्धरिष्याम्यसंशयम् ॥ ५४ ॥ विमृश्येतिसवैचित्ते पिशाचंप्राहसत्तमः ॥ विमलोदेसरस्यस्मिन्स्नाहिरेपापमुत्तये ॥ ५५ ॥

पिशाचतेपिशाचत्वंतीर्थस्यास्यप्रभावतः ॥ कपर्दीशेक्षणाद्यक्षणात्क्षीणंविनंक्ष्यति ॥ ५६ ॥ श्रुत्वेतिसमुनेर्वाक्यंप्रेतःप्राहप्रणम्यतम् ॥ प्रक्षाल्यपाणी तमनसंप्रबद्धकरसंपुटः ॥५७॥ पानीयंपातुमपिनोलभेयंमुनिसत्तम ॥ स्नानस्यकाकथानाथरक्षेयुर्जलदेवताः ॥५८॥ पानस्याप्यत्रकावार्ताजलस्पर्शो पिदुर्लभः ॥ इतिप्रेतोक्तमाकर्ण्यसभृशंप्रीतिमानभूत् ॥ ५९ ॥ उवाचचतपस्वीतंजगदुद्धरणक्षमः ॥ गृहाणेमांविभूतिंत्वंललाटफलकेकुरु ॥ ६० ॥ अस्माद्विभूतिमाहात्म्यात्प्रेतकोपिनकुत्रचित् ॥ बाधांकरोतिकस्यापिमहापातकिनोप्यहो ॥ ६१ ॥ भालेविभूतिधवलंविलोक्ययमकिंकराः ॥ पापिनो पिपलायंतेभीताःपाशुपतास्त्रतः ॥ ६२ ॥ अस्थिध्वजांकितंदृष्ट्वायथापांथाजलाशयम् ॥ दूरयंतितथाभस्मभालांकंयमकिंकराः ॥ ६३ ॥ कृतभूति तनुत्राणंशिवमंत्रेर्नरोत्तमम् ॥ नोपसर्पंतिनियतमपिहिंस्राःस्मंततः ॥ ६४ ॥ भक्त्याविभर्तियोभस्मशिवमंत्रपवित्रितम् ॥ भालेवक्षसिदोर्मूलेनतांहिंसंतिहिंसकाः ॥ ६५ ॥ सर्वेभ्योदुष्टसत्त्वेभ्योयतोरक्षेदहर्निशम् ॥ रक्षत्येषयतःप्रोक्तोविभूतिर्भूतिकृद्यतः ॥ ६६ ॥ भासनाद्भर्त्सनाद्भस्मपांसुःपांसुत्वदायतः ॥ पापानांक्षारणात्क्षारोवुधैरेवंनिरुच्यते ॥ ६७ ॥ गृहीत्वाधारमध्यात्सभस्मप्रेतकरेऽर्पयत् ॥ सोप्यादरात्समादायभालदेशेन्यवेशयत् ॥ ६८ ॥ विभूतिधारिणंवीक्ष्यपिशाचंजलदेवताः ॥ जलावगाहनपरंबाश्यांचक्रिरेनतम् ॥ ६९ ॥ स्नात्वापीत्वासनिर्गच्छेद्यावत्तस्माज्जलाशयात् ॥ तावत्पै शाच्यमगमद्दिव्यदेहमवापच ॥ ७० ॥ दिव्यमालांवरधरोदिव्यगंधानुलेपनः ॥ दिव्ययानंसमारुह्यवर्त्मप्रातोथपावनम् ॥ ७१ ॥ गच्छतातेनगगने सतपस्वीनमस्कृतः ॥ प्रोचेःप्रोवाचभगवन्मोचितोस्मित्वयानघ ॥ ७२ ॥ तस्मात्कदर्ययोनित्वादतीवपरिनिंदितात् ॥ अस्यतीर्थस्यमाहात्म्याद्दिव्यदे हमवाप्तवान् ॥७३॥ पिशाचमोचनंतीर्थमद्यारभ्यसमाख्यया ॥ अन्येषामपिपैशाच्यमिदंस्नानाद्भरिष्यति ॥७४॥ अस्मिंस्तीर्थेमहापुण्येयेस्नास्यंतीहमानवाः ॥ पिंडांश्चनिर्वपिष्यंतिसंध्यातर्पणपूर्वकम् ॥ ७५ ॥ दैवात्पैशाच्यमापन्नास्तेषांपितॄपितामहाः ॥ तेपिपैशाच्यमुत्सृज्ययास्यंतिपरमांगतिम् ॥ ७६ ॥ अद्यशुक्लचतुर्दश्यांमार्गेमासितपोनिधे ॥ अत्रस्नानादिकंकार्यंपैशाच्यपरिमोचनम् ॥ ७७ ॥ इमांसांवत्सरींयात्रांयेकरिष्यंतिमानवाः ॥ तीर्थप्रतिग्रहात्पापान्निःसरिष्यंतितेनराः ॥ ७८ ॥

पिशाचमोचनेस्नात्वाकपर्दीशंसमर्च्यच ॥ कृत्वात्रान्नदानंचनरोन्यत्रापिनिभेयाः ॥ ७९ ॥ मार्गशुक्लचतुर्दश्यांकपर्दीश्वरसंनिधौ ॥ स्नात्वान्यत्रापि मरणान्नपैशाच्यमवाप्नुयुः ॥ ८० ॥ इत्युक्तादिव्यपुरुषोभूयोभूयोनमस्यतम् ॥ तपोधनंमहाभागोदिव्यांगतिमवाप्तवान् ॥८१॥ तपोधनोपितद्दृष्ट्वामहा श्चर्यघटोद्भव ॥ कपर्दीश्वरमाराध्यकालान्निर्वाणमाप्तवान् ॥ ८२ ॥ पिशाचमोचनंतीर्थतदारभ्यमहामुने ॥ वाराणस्यांपरांख्यातिमगमत्सर्वपापहृत् ॥ ॥ ८३ ॥ पैशाचमोचनेतीर्थेसंभोज्यशिवयोगिनम् ॥ कोटिभोज्यफलंसम्यगेकेकपरिसंख्यया ॥ ८४ ॥ श्रुत्वाध्यायमिमंपुण्यंनरोनियतमानसः ॥ भूतेःप्रेतैःपिशाचैश्चकदाचिन्नाभिभूयते ॥ ८५ ॥ बालग्रहाभिभूतानांबालानांशांतिकारकम् ॥ पठनीयंप्रयत्नेनमहाख्यानमिदंपरम् ॥ ८६ ॥ इदमा ख्यानमाकर्ण्यगच्छन्देशांतरंनरः ॥ चोरव्याघ्रपिशाचाद्यैर्नाभिभूयेतकुत्रचित् ॥ ८७ ॥ ॥ इतिश्रीस्कंदेमहापुराणएककाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडउत्तरार्द्धेपिशाचमोचनमहिमाकथननामचतुप्पंचाशत्तमोऽध्यायः ॥५४॥ ॥ स्कंदउवाच ॥ अन्येपियेगणास्तत्रकाश्यांलिंगानिचक्रिरे ॥ तांश्चतेकथयिष्यामिकुंभयोनेनिशामय ॥ १ ॥ गणेनापिंगलाख्येनपिंगलाख्येशसंज्ञितम् ॥ लिंगंप्रतिष्ठितंशंभोःकपर्दीशादुदग्दिशि ॥२॥ तस्यदर्श नमात्रेणपापानांजायतेक्षयः ॥ वीरभद्रोमहाप्रीतोदेवदेवस्यशूलिनः ॥ ३ ॥ वीरभद्रेश्वरंलिंगंध्यायेदद्यापिनिश्चलः ॥ तस्यदर्शनमात्रेणवीरसिद्धिः प्रजायते ॥ ४ ॥ अविमुक्तेश्वरात्पश्चाद्वीरभद्रेश्वरंनरः ॥ समर्च्यनरणेभंगंकदाचिदपिचाप्नुयात् ॥ ५ ॥ वीरभद्रःस्वयंसाक्षाद्वीरमूर्तिधरोमुने ॥ संहरे द्विघ्नसंघातमविमुक्तनिवासिनाम् ॥ ६ ॥ भद्रयाभद्रकाल्याचभार्ययाशुभयायुतम् ॥ वीरभद्रंनरोभ्यर्च्यकाशीवासफलंलभेत् ॥ ७ ॥ किरातेनकिरातेशं लिंगंकाश्यांप्रतिष्ठितम् ॥ केदाराद्दक्षिणेभागेभक्तानामभयप्रदम् ॥ ८ ॥ चतुर्मुखोगणःश्रीमान्वृद्धकालेशसन्निधौ ॥ चतुर्मुखेश्वरंलिंगंध्यायेदद्यापि निश्चलः ॥ ९ ॥ भक्ताश्चतुर्मुखेशस्यचतुराननवद्विभो ॥ पूज्यंतेसुरसंघातैःसर्वभोगसमन्विताः ॥ १०॥ निकुंभेश्वरमालोक्यनिकुंभगणपूजितम् ॥ पूज यित्वात्रजन्मांमकार्यसिद्धिमवाप्नुयात् ॥ कुबेरेशसमीपेतुशिवलोकेमहीयते ॥ ११ ॥ पंचाक्षेशंमहालिंगंमहादेवस्यदक्षिणे ॥ समभ्यर्च्यनरःकाश्यां जातिस्मृतिमवाप्नुयात् ॥ १२ ॥ भारभूतेश्वरंलिंगंभारभूतगणार्चितम् ॥ अंतर्गृहोत्तरद्वारिध्यात्वाशिवपुरेवसेत् ॥ १३ ॥ भारभूतेश्वरंलिंगंयैःकाश्यां नविलोकितम् ॥ भारभूताःपृथिव्यास्तेऽवकेशिनइवद्रुमाः ॥ १४ ॥

गणेनव्यक्षसंज्ञेनलिंगंव्यक्षेश्वरंपरम् ॥ त्रिलोचनपुरोभागेशील्येताद्यापिकुंभज ॥ १५ ॥ तस्यलिंगस्ययेभक्तास्तेतुदेहावसानतः ॥ व्यक्षाएवप्रजायंते नात्रकार्याविचारणा ॥ १६ ॥ क्षेमकोनामगणपःकाश्यांमूर्तिधरःस्वयम् ॥ विश्वेश्वरंसर्वगतंध्यायेदद्यापिनिश्चलः ॥१७॥ क्षेमकंपूजयेद्यस्तुवाराणस्यां महागणम् ॥ विघ्नास्तस्यप्रलीयंतेक्षेमंस्याच्चपदेपदे ॥ १८ ॥ देशांतरंगतोयस्तुतस्यागमनकाम्यया ॥ क्षेमकःपूजनीयोत्रक्षेमेणाशुसआव्रजेत् ॥१९॥ लांगलीश्वरमालोक्यलिंगंलांगलिनार्चितम् ॥ विश्वेशादुत्तरेभागेनननरोरोगभाग्भवेत् ॥ २० ॥ लांगलीशंसकृत्पूज्यपंचलांगलदानजम् ॥ फलंप्राप्नोत्य विकलंसर्वसंपत्करंपरम् ॥ २१ ॥ विराधेश्वरमाराध्यविराधगणपूजितम् ॥ सर्वापराधयुक्तोपिनापराध्यतिकुत्रचित् ॥ २२ ॥ दिनेदिनेपराधोयःक्रियते काशिवासिभिः ॥ सयातिसंक्षयंक्षिप्रंविराधेशसमर्चनात् ॥ २३ ॥ नैर्ऋतेदंडपाणस्तुविराधेशंप्रयत्नतः ॥ नत्वासर्वापराधेभ्योमुच्यतेनात्रसंशयः ॥२४॥ सुमुखेशंमहालिंगंसुमुखास्यगणार्चितम् ॥ पश्चिमाभिमुखंलिंगंदृष्ट्वापापैःप्रमुच्यते ॥ २५ ॥ स्नात्वापिलिपिलातीर्थे सुमुखेशंविलोक्यच ॥ सदे वसुमुखंपश्येद्धर्मराजंनदुर्मुखम् ॥ २६ ॥ आपाढिनार्चितंलिंगमापाढीश्वरसंज्ञकम् ॥ दृष्ट्वापाढयांनरोभक्त्यासर्वैःपापैःप्रमुच्यते ॥ २७ ॥ उदी च्यांभारभूतेशादापाढीशंसमर्चयन् ॥ आपाढयांपंचदश्यांविनापापैःपरितप्यते ॥ २८ ॥ शुचिशुक्लचतुर्दश्यांपंचदश्यामथापिवा ॥ कृत्वासांवत्सरीं यात्रामनेनाजायतेनरः ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥ मुनेगणेषुचैतेषुवाराणस्यांस्थितेष्विति ॥ स्वनाम्नास्थाप्यलिंगानिविश्वेशपरितुष्टये ॥ ॥ ३० ॥ विश्वेशश्चितयांचकेपुनःकाशीप्रवृत्तये ॥ कंवाहितंप्रहित्याद्यनिर्वृतिंपरमांभजे ॥ ३१ ॥ योगिन्यस्तिग्मयुर्वेधाःशंकुकर्णमुखागणाः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्यावृत्त्यनागताःकाश्याःसिंधुगाइवसिंधवः ॥ ३२ ॥ ध्रुवंकाश्यांप्रविष्टायेतेप्रविष्टाममोदरे ॥ तेषांविनिर्गमोनास्तिदीप्तेग्नौहविषामिव ॥ ३३ ॥ येषांहिसंस्थितिःकाश्यांलिंगार्चनरतात्मनाम् ॥ तएवममलिंगानिजंगमानिनसंशयः ॥ ३४ ॥ स्थावराजंगमाःकाश्यामचेतनसचेतनाः ॥ सर्वेममैव लिंगानितेभ्योद्रुह्यंतिदुर्धियः ॥ ३५ ॥ वाचिवाराणसीयेषांश्रुतौवैश्वेश्वरीकथा ॥ तएवकाशीलिंगानिवराण्यर्च्यान्यहंयथा ॥ ३६ ॥ वाराणसीतिकाशी तिरुद्रावासइतिस्फुटम् ॥ मुखाद्विनिर्गतंयेषांतेषांनप्रभवेद्यमः ॥ ३७ ॥

आनंदकाननंप्राप्ययेनिरानंदभूमिकाम् ॥ अन्यांहृदापिवांछंतिनिरानंदाःसदाव्रते ॥ ३८ ॥ अद्यैववास्तुमरणंबहुकालांतरेपिवा ॥ कलिकालभियापुंसां काशीत्याज्यानकर्हिचित् ॥ ३९ ॥ अवश्यंभाविनोभावाभविष्यंतिपदेपदे ॥ सलक्ष्मीनिलयांकाशींतत्यजंतिकुतोधियः ॥ ४० ॥ वरंविघ्नसहस्राणिसो ढव्यानिपदेपदे ॥ काश्यांनान्यत्रनिर्विघ्नंवांछेद्राज्यमपिक्वचित् ॥ ४१ ॥ कियन्निमेषसंभोग्याःसंतिलक्ष्म्याःपदेपदे ॥ परंनिरंतरसुखाऽमुत्राप्यत्रापिका शिका ॥ ४२ ॥ विश्वनाथोह्यहंनाथःकाशिकामुक्तिकाशिका ॥ सुधातरंगास्वर्गंगात्रय्येषाकिन्नयच्छति ॥ ४३ ॥ पंचक्रोश्यापरिमितातनुरेषापुरी मम ॥ अविच्छिन्नप्रमाणार्धिर्भक्तनिर्वाणकारणम् ॥ ४४ ॥ संसारभारखिन्नानांयातायातकृतांसदा ॥ एकैवमेपुरीकाशीध्रुवंविश्रामभूमिका ॥ ४५ ॥ मंडपःकल्पवल्लीनांमनोरथफलैरलम् ॥ फलितःकाशिकाख्योयंसंसाराध्वजुषांसदा ॥ ४६ ॥ चक्रवर्तेरियंछत्रंविचित्रंसर्वतापहृत् ॥ काशीनिर्वाणराज स्यममशूलोच्चदंडवत् ॥ ४७ ॥ निर्वाणलक्ष्मींयेपुण्याःपरिवांछंतिलीलया ॥ निरंतरसुखप्राप्त्यैकाशीत्याज्यानतैर्नृभिः ॥ ४८ ॥ ममानंदवनेयेवैनिरं तरवनौकसः ॥ मोक्षलक्ष्मीफलान्यत्रसुस्वादूनिलभंतिते ॥४९॥ निर्ममंचापिनिर्मोहंयामामपिविमोहयेत् ॥ कैर्नसंस्मरणीयासाकाशीविश्वविमोहिनी ॥ ॥ ५० ॥ नामापिमधुरंयस्याःपरानंदप्रकाशकम् ॥ काश्याःकाशीतिकाशीतिसाकैःपुण्यैर्नजप्यते ॥ ५१ ॥ काशीनामसुधापानंयेकुर्वंतिनिरंतरम् ॥ तेषांवर्त्मभवत्येवसुधामवसुधामयम् ॥ ५२ ॥ ममतारहितस्यापिममसर्वात्मनोध्रुवम् ॥ तएवमामकालोकेयेकाशीनामजापकाः ॥ ५३ ॥ रहस्यमिति विज्ञायवाराणस्यागणेश्वरैः ॥ सब्रह्मयोगिनीव्रध्नैःस्थितंतत्रैवनान्यथा ॥ ५४ ॥ अन्यथाताश्चयोगिन्यःसरविःसपितामहः ॥ तेगणामांपरित्यज्यकथं तिष्ठेयुरन्यतः ॥ ५५ ॥ अतीवभद्रंसंजातंकाश्यांतिष्ठत्सुतेषुहि ॥ एकोपिभेदेप्रभवेद्राज्येराज्यांतरंविना ॥ ५६ ॥

लब्धप्रवेशास्तावंतस्तेसर्वेमत्स्वरूपिणः ॥ यतिष्यंतियतोवश्यंमदागमनहेतवे ॥५७॥ अन्यानपिप्रेषयामिमत्पार्श्वपरिवर्तिनः ॥ येतेतत्रस्थिताःश्रेष्ठाअ पिगंतास्म्यहंततः ॥ ५८ ॥ विचार्येतिमहादेवःसमाहूयगजाननम् ॥ प्राहिणोत्कथयित्वेतिगच्छकाशीमितःसुत ॥ ५९ ॥ तत्रस्थितोपिसंसिद्ध्यै यतस्वसहितोगणैः ॥ निर्विघ्नंकुरुचास्माकंनृपेविघ्नंसमाचर ॥ ६० ॥ आधायशासनंमूर्ध्निगणाधीशोथधूर्जटेः ॥ प्रतस्थेत्वरितःकाशींस्थितिज्ञःस्थि तिहेतवे ॥६१॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेकाशीवर्णनगणेशप्रेषणंनामपंचपंचाशत्तमोऽध्यायः॥५५॥ ॥स्कंदउवाच॥ ॥ अथेशाज्ञांसमादायगजवक्त्रःप्रतस्थिवान् ॥ शंभोःकाश्यागमोपायंचिंतयन्मंदराद्रितः ॥ १ ॥ प्राप्यवाराणसींतूर्णमाशुस्यंदनगो विभुः ॥ वाडवींमूर्तिमालंब्यप्राविशच्छकुनैःस्तुतः ॥ २ ॥ नक्षत्रपाठकोभूत्वावृद्धःप्रत्यवरोधगः ॥ चचारमध्येनगरंपौराणांप्रीतिमावहन् ॥३॥ स्वयमेव निशाभागेस्वप्नंसंदर्शयन्नृणाम् ॥ प्रातस्तेषांगृहान्गत्वातेषांवक्तिबलाबलम् ॥ ४ ॥ भवद्भिरद्यरात्रौयद्दृष्टंस्वप्नविचेष्टितम् ॥ भवत्कौतूहलोत्पत्त्यैतदे वकथयाम्यहम् ॥ ५ ॥ स्वपताभवतारात्रौतुर्येयामेमहाह्रदः ॥ अदर्शितत्रचभवान्मज्जन्मज्जंस्तटंगतः ॥ ६ ॥ तदंबुपिच्छिलेपंकेमग्नोन्मग्नोसिभू रिशः ॥ दुःस्वप्नस्यास्यचमहान्विपाकोतिभयप्रदः ॥ ७ ॥ काषायवसनोमुंडःप्रेक्ष्यहोभवतापियः ॥ परितापंमहानेषजनयिष्यतिदारुणम् ॥ ८ ॥ रात्रौसूर्यग्रहोदृष्टोमहानिष्टकरोध्रुवम् ॥ ऐंद्रंधनुर्द्वयंरात्रौयदलोकिनतच्छुभम् ॥ ९ ॥ प्रतीच्यांरविरागत्यप्रोद्यंतंव्योम्निशीतगुम् ॥ पातयामासभूपृष्ठेतद्रा ज्यभयसूचकम् ॥ १० ॥ युगपत्केतुयुगलंयुध्यमानंपरस्परम् ॥ यददर्शिनतद्भद्रंराष्ट्रभंगायकेवलम् ॥ ११ ॥ विशीर्यत्केशदशनंनीयमानंचदक्षिणे ॥ आत्मानंयत्समद्राक्षीःकुटुंबस्यापिभीषणम् ॥ १२ ॥ प्रासादध्वजभंगोयस्त्वयैक्षतनिशाक्षये ॥ राज्यक्षयकरंविद्धिमहोत्पातायनिश्चितम् ॥ १३ ॥

नगरीप्लावितास्वप्नेतरंगैःक्षीरनीरधेः ॥ पक्षैस्त्रिचतुरैःशंकेमहाशकांपुरौकसाम् ॥ १४ ॥ स्वप्नेवानरयानेनयत्त्वमूढोसिदक्षिणाम् ॥ अतस्तद्वंचनोपायः पुरत्यागोमहामते ॥ १५ ॥ रुदतीयात्वयादृष्टामहिलैकानिशात्यये ॥ मुक्तकेशीविवसनासानारीश्रीरिवोद्गता ॥ १६ ॥ देवालयस्यकलशोयत्त्वयावी क्षितःपतन् ॥ दिनैःकतिपयैरेवराज्यभंगोभविष्यति ॥ १७ ॥ पुरीपरिवृतास्वप्नेमृगयूथैःसमंततः ॥ रोरूयमाणैरत्यर्थंमासेनैवोद्वसीभवेत् ॥ १८ ॥ आतायिथूकगृध्राद्यैःपुरीमुपरिचारिभिः ॥ सूच्यतेत्याहितंकिंचिद्ध्रुवमत्रनिवासिनाम् ॥१९॥ स्वप्नोत्पातानितिबहूञ्शंसञ्शंसन्नितस्ततः ॥ बहूनुच्चाट्यां चक्रेसविघ्नेशःपुरौकसः ॥ २० ॥ केषांचित्पुरतोवादीद्बहचारंप्रदर्शयन् ॥ एकराशिस्थिताःसौरिसितभौमानशोभनाः ॥ २१ ॥ सोयंधूमग्रहोव्योम्नि भित्त्वासप्तर्षिमंडलम् ॥ प्रयातःपश्चिमामाशांसनाशायविशांपतेः ॥ २२ ॥ अतिचारगतोमंदःपुनर्वक्राध्वसंस्थितः ॥ पापग्रहसमायुक्तोनयुक्तोयमिहे ष्यते ॥ २३ ॥ व्यतीतेवासरेयोयंभूकंपःसमपद्यत ॥ कंपंजनयतेऽतीवहृदोमेपिपुरौकसः ॥ २४ ॥ उदीच्यादक्षिणाशायांयेयमुल्काप्रधाविता ॥ विलीनाचवियत्येवसनिर्घातंनसाशुभा ॥ २५ ॥ उन्मूलितोमहामूलोमहानिलरयेणयः ॥ चत्वरेचैत्यवृक्षोयंमहोत्पातंप्रशंसति ॥ २६ ॥ सूर्योदयम नुप्राप्यप्राच्यांशुष्कतरूपरि ॥ करटोरारटीत्येषकटूत्कटभयप्रदः ॥ २७ ॥ मध्येविपणियत्तूर्णंकौचिच्चारण्यचारिणौ ॥ मृगौमृगयतांयातौपौराणांपुरतो ऽहितौ ॥२८॥ रसालशालमुकुलंवीक्ष्यतेयच्छरद्यदः ॥ महाकालभयंमन्येप्यकालेपिपुरौकसाम् ॥ २९ ॥ साध्वसंजनयित्वेतिकेचिदुच्चाटिताःपुरः ॥ तेनविघ्नकृतापौराःकपटद्विजरूपिणा ॥ ३० ॥

अथमध्येवरोधंसप्रविश्यनिजमायया ॥ दृष्टार्थमेवकथयन्स्त्रीणांविस्रंभभूरभूत् ॥३१॥ तवपुत्रशतंजज्ञेसप्तोनंशुभलक्षणे ॥ तेष्वेकस्तुरगारूढोवाह्याल्यां पतितोमृतः ॥ ३२ ॥ अंतर्वत्नीत्वियंकन्यांजनयिष्यतिशोभनाम् ॥ एषाहिदुर्भगापूर्वंसांप्रतंसुभगाऽभवत् ॥ ३३ ॥ असौहिराज्ञोराज्ञीनामत्यंत मिहवल्लभा ॥ मुक्तालंकृतिरेतस्यैराज्ञादत्तानिजोरसः ॥ ३४ ॥ पंचसप्तदिनान्येवजातानीतीहतर्क्यते ॥ अस्यैराज्ञाप्रसादेनग्रामौदातुमुदीरितौ ॥ ३५॥ इतिदृष्टार्थकथनैराज्ञीमान्योभवद्द्विजः ॥ वर्णयंतिचताराज्ञःपरोक्षेपिगुणान्बहून् ॥ ३६ ॥ अहोयादृगसौविप्रःसर्वत्रातिविचक्षणः ॥ सुशीलश्चसुरूपश्च सत्यवाङ्मितभाषणः ॥ ३७ ॥ अलोलुपउदारश्चसदाचारोजितेंद्रियः ॥ अपिस्वल्पेनसंतुष्टःप्रतिग्रहपराङ्मुखः ॥ ३८ ॥ जितक्रोधःप्रसन्नास्य स्त्वनसूयुरवंचकः ॥ कृतज्ञःप्रीतिसुमुखःपरिवादपराङ्मुखः ॥३९॥ पुण्योपदेष्टापुण्यात्मासर्वव्रतपरायणः॥शुचिःशुचिचरित्रश्चश्रुतिस्मृतिविशारदः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ४० ॥ धीरःपुण्येतिहासज्ञःसर्वदक्षसर्वसंमतः ॥ कलाकलापकुशलोज्योतिःशास्त्रविदुत्तमः ॥ ४१ ॥ क्षमीकुलीनोऽकृपणोभोक्तानिर्मलमानसः ॥ इत्यादिगुणसंपन्नःकोपिक्षापिनदग्गतः ॥ ४२ ॥ इत्थंतास्तद्गुणग्रामंवर्णयंत्यःपदेपदे ॥ कालंविनोदयंतिस्मअंतःपुरचराःस्त्रियः ॥ ४३ ॥ एकदावसरं प्राप्यद्विनोदासस्यभूभुजः ॥ राज्ञीलीलावतीनामराज्ञेतंविन्यवेदयत् ॥ ४४ ॥ राजन्वृद्धोगुणैर्वृद्धोब्राह्मणःभुविचक्षणः ॥ एकोस्तिसतुदृष्ट्योमूर्तो ब्रह्मनिधिःपरः ॥ ४५ ॥ राज्ञीराज्ञाकृतानुज्ञासखीप्रेष्यविचक्षणाम् ॥ आनिनायचतंविप्रंब्राह्मंतेजस्वांगवत् ॥ ४६ ॥ राजापिदूरादायांतंविलोक्ययमही सुरम् ॥ यत्राकृतिर्गुणास्तत्रजहर्षेतिवदन्हृदि ॥ ४७ ॥ पदेद्वित्रैर्नृपतिनाकृताभ्युत्थानसत्कृतिः ॥ चत्वारिंगमजाभिःसतमाशीर्भिरनंदयत् ॥ ४८ ॥ कृतप्रणामोराज्ञासंसादरंदत्तमासनम् ॥ भेजेथकुशलंपृष्टःसराज्ञातेनभूपतिः ॥ ४९ ॥

परस्परंकुशलिनौकुशलोचकथागमे ॥ प्रश्नोत्तराभ्यांसंतुष्टौद्विजवर्यक्षमाभृतौ ॥ ५० ॥ कथावसानराज्ञाथगेहंविससृजेद्विजः ॥ लब्धमानमहापूजः सस्त्रमाश्रममाविशत् ॥ ५१ ॥ गतेऽथस्वाश्रमंविप्रेदिवोदासोनरेश्वरः ॥ लीलावत्यांपुरोविप्रंवर्णयामासभूरिशः ॥ ५२ ॥ महादेविमहाप्राज्ञेलीलाव तिगुणप्रिये ॥ यथाशंसितथाविप्रस्ततोपिगुणवत्तरः ॥ ५३ ॥ अतीतंवेत्तिसकलंवर्तमानमवैतिच ॥ प्रष्टव्यःप्रातराहूयभविष्यंकिंचिदेपदे ॥ ५४ ॥ महा विभवसंभारैर्महाभोगैरनेकधा ॥ व्युष्टायांसनृपोराज्ञांप्रातराहूतवाद्विजम् ॥ ५५ ॥ सत्कृत्यतंद्विजंराजापप्र च्छनिजहृत्स्थितम् ॥५६॥ ॥ राजोवाच ॥ ॥ द्विजवर्योभवानेकःप्रतिभातीतिनिश्चितम् ॥ यथातत्त्ववतीतेधीर्नतथान्यस्यमेमतिः ॥५७॥ दृष्ट्वात्वां तुमहाप्राज्ञंशांतंदांतंतपोनिधिम् ॥ किंचित्प्रष्टुमनाविप्रतदारूयाहियथार्थवत् ॥ ५८ ॥ शासितेयंमयापृथ्वीनतथान्यैस्तुपार्थिवैः ॥ यावद्भूतिमयाभुक्ता दिव्याभोगाअनेकधा ॥५९॥ निर्जरेभ्योप्यधिकंरात्रिंदिवमतंद्रितम् ॥ विनिर्जित्यहठाद्दुष्टान्प्रजेयंपरिपालिता ॥६०॥ द्विजपादार्चनान्नैकंचित्सुकृतं वेद्मिनापरम् ॥ अनेनापरिकथ्येनकथितेनेहकिंमम ॥ ६१ ॥ निर्विस्मयमिदंमेचेतःसांप्रतंसर्वकर्मसु ॥ विचार्यार्यशुभोदर्कमतआख्याहिसत्तम ॥६२॥ ॥ द्विजउवाच ॥ ॥ अपिस्वल्पतरंकृत्यंयद्भवेद्भूभुजामिह ॥ एकांतेतत्तुपृष्टेनवक्तव्यंसुधियासदा ॥ ६३ ॥ अमात्येनाप्यपृष्टेननवक्तव्यंनृपाग्रतः ॥ महापमानभीतेनस्तोकमप्यत्रकिंचन ॥ ६४ ॥ पृष्टश्चेत्कथयामीहमातत्रकुरुसंशयम् ॥ तत्कृतेतवगंतावैमनोनिर्वेदकारणम् ॥६५॥ शृणुराजन्महाबुद्धे नायथार्थत्रवीम्यहम् ॥ विक्रांतोस्यतिशूरोसिभाग्यवानसिसर्वदा ॥ ६६ ॥ पुण्येनयशसाबुद्ध्यासंपन्नोस्तिभवान्यथा ॥ मन्येतथामरावत्यांत्रिदशेशो पिनेवहि ॥ ६७ ॥ सुधियात्वांगुरुंमन्येप्रसादेनसुधाकरम् ॥ तेजसास्तिभवानर्कःप्रतापेनाशुशुक्षणिः ॥६८॥ प्रभंजनोबलेनासिश्रीदोसिश्रीसमर्षणैः ॥ शासनेनभवान्रुद्रोनिर्ऋतिस्त्वंरणांगणे ॥ ६९ ॥ दुष्टपाशयितापाशीयमोनियमनेऽसताम् ॥ इंदनात्त्वंमहेंद्रोसिक्षमयात्वमसिक्षमा ॥ ७० ॥ मर्यादयाभवानब्धिर्मरुत्त्वेहिमवानसि ॥ भार्गवोराजनीत्यासिराज्येनमनुनासमः ॥ ७१ ॥

संतापहर्तावुदवत्पवित्रोगांगनामवत् ॥ सर्वेषामेवजंतूनांकाशीवसुगतिप्रदः ॥ ७२ ॥ रुद्रःसंहाररूपेणपालनेनचतुर्भुजः ॥ विधिवत्त्वंविधातासिभारतीते सुखांबुजे ॥ ७३ ॥ त्वत्पाणिपद्मैकमलात्वत्कोधेस्तिहलाहलः ॥ अमृतंतववागेवत्वद्भुजावश्विनीसुतौ ॥ ७४ ॥ तत्किंयत्त्वयिभूजानौसर्वदेवमयो ह्यसि ॥ तस्मात्तवशुभोदर्कोमयाज्ञातोस्तितत्त्वतः ॥ ७५ ॥ आरभ्याद्यदिनाद्भूपब्राह्मणोऽद्यादशेहनि ॥ उदीच्यःकश्चिदागत्यश्रुवंत्वामुपदेक्ष्यति॥७६॥ तस्यवाक्यंत्वयाराजन्कर्तव्यमविचारितम् ॥ ततस्तेहस्थितंसर्वंसेत्स्यत्येवमहामते ॥ ७७ ॥ इत्युक्त्वापृच्छ्यराजानंलब्धानुज्ञोद्विजोत्तमः ॥ विवे शस्वाश्रमंतुष्टोनृपोप्याश्चर्यवानभूत् ॥ ७८ ॥ इत्थंविप्रजितासर्वापुरीस्वात्मवशीकृता ॥ सपौरासावरोधाचसनृपानिजमायया ॥ ७९ ॥ कृतकृत्य मिवात्मानंततोमत्वासविप्रजित् ॥ विधायबहुधात्मानंकाश्यांस्थितिमवापच ॥ ८० ॥ यदासनदिवोदासःप्रागासीत्कुंभसंभव ॥ तदातनंनिजंस्थानम लंचक्रेगणाधिपः ॥ ८१ ॥ दिवोदासेनरपतौविष्णुनोच्चाटितेसति ॥ पुनर्नवीकृतायांचनगर्यांविश्वकर्मणा ॥ ८२ ॥ स्वयमागत्यदेवेनमंदरात्सुंदरां पुरीम् ॥ वाराणसींप्रथमतस्तुष्टुवेगणनायकम् ॥ ८३ ॥ ॥ अगस्त्यउवाच ॥ ॥ कथंस्तुतोभगवतादेवदेवेनविघ्नजित् ॥ कथंचबहुधात्मानं सचकारविनायकः ॥ ८४ ॥ केनकेनसवेनाम्नाकाशिपुर्यांव्यवस्थितः ॥ इतिसर्वंसमासेनकथयस्वषडानन ॥ ८५ ॥ इत्युदीरितमाकर्ण्यकुंभयोनेः षडाननः ॥ यथावक्तकथयामासगणराजकथांशुभाम् ॥ ८६ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेगणेशप्रादुर्भा प्रपंचोनामपद्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ स्कंदउवाच ॥ ॥ विघ्नेशोविश्वयासार्धंमयाचमुनिसत्तम ॥ महाशाखविशाखाभ्यांनंदिभृंगिपुरो गमः ॥ १ ॥ नैगमेयेनसहितोरुद्रैःसर्वत्रसंवृतः ॥ देवर्षिभिःसमायुक्तःसनकाद्यैरभिष्टुतः ॥ २ ॥ समस्तायतनाधीशैर्दिक्पालैरभिनंदितः ॥ तीर्थैर्ब्र शिततीर्थश्चगंधर्वैर्गीतमंगलः ॥ ३ ॥ कृतपूजोप्सरोभिश्चनृत्यहस्तकपल्लवैः ॥ वियत्यनाहतैर्वाद्यैःसमंतादनुमोदितः ॥ ४ ॥ ऋषीणांब्रह्मनिर्घोषैर्बधिरी कृतदिङ्मुखः ॥ कृतस्तुतिश्चारणैर्वेविमानैरभितोवृतः ॥ ५ ॥

त्रिविष्टपवधूमुष्टिप्रेरितैर्लाजैरितस्ततः ॥ अभिवृष्टोमहादेवःसंप्रहृष्टतनूरुहः ॥ ६ ॥ दत्तमाल्योपहारश्चबहुविद्याधरीगणैः ॥ यक्षगुह्यकसिद्धैश्चखेचरैरभिनं दितः ॥ ७ ॥ कृतप्रवेशशाकुनोमृगैःशङ्खनिभैःपुरः ॥ किंनरीभिःप्रहृष्टास्यैःकिंनरैरुपवर्णितः ॥ ८ ॥ विष्णुनाचमहालक्ष्म्याब्रह्मणाविश्वकर्मणा ॥ नंदिनाथगणेशेनआविष्कृतमहोत्सवः ॥ ९ ॥ नागांगनाभिःपरितःकृतनीराजनाविधिः ॥ प्रविवेशमहादेवःपुरींवाराणसींशुभाम् ॥ १० ॥ पश्यतांसर्व देवानामवरुह्यवृषेंद्रतः ॥ परिष्वज्यगणाधीशंप्रोवाचवृषभध्वजः ॥ ११ ॥ यदहंप्राप्तवानस्मिपुरींवाराणसींशुभाम् ॥ मयाप्यतीवदुष्प्राप्यांसप्रसादो स्यवैशिशोः ॥ १२ ॥ यद्दुष्प्रसाध्यंहिपितुरपित्रिजगतीतले ॥ तत्सुतेनासुसाध्यंस्याद्यद्यंततातमायि ॥ १३ ॥ अनेनगजवक्त्रेणस्वबुद्धिविभवैरिह ॥ काशीप्राप्तिर्यथामेस्यात्तथाकिंचिदनुष्ठितम् ॥ १४ ॥ पुत्रवानहमेवास्मियच्चमेचिरचिंतितम् ॥ स्वपौरुषेणकृतवानभिलाषंकरस्थितम् ॥ १५ ॥ इत्यु क्त्वित्रिपुरीहंतापुरुहूतादिभिःस्तुतः ॥ परितुष्टवसंदृष्टःस्पष्टगीर्भिर्गजाननम् ॥ १६ ॥ ॥ श्रीकंठउवाच ॥ ॥ जयविघ्नकृतामाद्यभक्तनिर्विघ्नकारक ॥ अविघ्नविघ्नशमनमहाविघ्नैकविघ्नकृत् ॥ १७ ॥ जयसर्वगणाधीशजयसर्वगणाग्रणीः ॥ गणप्रणतपादाब्जगणनातीतसद्गुण ॥ १८ ॥ जयसर्वगसर्वे शसर्वबुद्धेकशोधवे ॥ सर्वमायाप्रपंचज्ञसर्वकर्माग्रपूजित ॥ १९ ॥ सर्वमंगलमांगल्यजयत्वंसर्वमंगल ॥ अमंगलोपशमनमहामंगलहेतुक ॥ २० ॥ जयसाष्टकृतांवंद्यजयस्थितिकृतानत ॥ जयसंहृतिकृत्स्तुत्यजयसत्कर्मसिद्धिद ॥ २१ ॥ सिद्धवंद्यपदांभोजजयसिद्धिविधायक ॥ सर्वसिद्धेक निलयमहासिद्धबुद्धिसूचक ॥२२॥ अशेषगुणनिर्माणगुणातीतगुणाग्रणीः ॥ परिपूर्णचरित्रार्थजयत्वंगुणवर्णित ॥ २३ ॥ जयसर्वबलाधीशबलारति बलप्रद ॥ बलाकोज्वलदंताग्रबालाबालपराक्रम ॥ २४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनंतमहिमाधारधराधरविदारण ॥ दंताग्रप्रोतदिङ्नागजयनागविभूषण ॥ २५ ॥ येत्वांनमंतिकरुणामयदिव्यमूर्तेसर्वेनसामपिभुवोभुविमुक्तिभाजः॥ तेषांसदैवहरसीहमहोपसर्गान्स्वर्गापवर्गमपिसंप्रददासितेभ्यः ॥ २६ ॥ येविघ्नराजभवताकरुणाकटाक्षैःसंप्रेक्षिताःक्षितितलेक्षणमात्रमत्र ॥ तेषांक्षयंतिसकलान्यपिकिल्बिषाणिलक्ष्मीःकटाक्षयतितान्पुरुषोत्तमान्हि ॥ २७ ॥ येत्वांस्तुवंतिनतविघ्नविघातदक्षदाक्षायणीहृदयपंकजतिग्मरश्मे ॥ श्रूयंतएवतइहप्रथितानचित्रंचित्रंतदत्रगणपायदहोतएव ॥ २८ ॥ येशीलयंतिसततंभवतोंघ्रियुग्मंतेपुत्रपौत्रधनधान्यसमृद्धिभाजः ॥ संशीलितांघ्रिकमलाबहुभृत्यवर्गैर्भूपालभोग्यकमलांविमलांलभंते ॥ २९ ॥ त्वंकारणंपरमकारणकारणानांवेद्योसिवेदविदुषांसततंत्वमेकः ॥ त्वंमार्गणीयमसिकिंचनमूलवाचांवाचामगोचरचराचरदिव्यमूर्ते ॥ ३० ॥ वेदाविदंतिनयथार्थतयाभवंतंब्रह्मादयोपिनचराचरसूत्रधार ॥ त्वंहंसिपासिविदधासिसमस्तमेकःकस्तेस्तुतिव्यतिकरोमनसाप्यगम्य ॥ ३१ ॥ त्वद्दुष्टदृष्टिविशिखैर्निहतान्निहन्मिदैत्यान्पुरांधकजलंधरमुख्यकांश्च ॥ कस्यास्तिशक्तिरिहयस्त्वदृतेपितुच्छंवांछेद्विधातुमिहसिद्धिदकार्यजातम् ॥ ३२ ॥ अन्वेषणेढुंढिरयंप्रथितोस्तिधातुःसर्वार्थढुंढिततयातवढुंढिनाम ॥ काशीप्रवेशमपिकोलभतेत्रदेहीतोपांविनातवविनायकढुंढिराज ॥ ३३ ॥

ढुंढेप्रणम्यपुरतस्तवपादपद्मंयोमांनमस्यतिपुमानिहकाशिवासी ॥ तत्कर्णमूलमधिगम्यपुरादिशामितत्किंचिदत्रनपुनर्भवतास्तियेन ॥ ३४ ॥ स्नात्वानरःप्रथमतोमणिकर्णिकायामुद्धूलितांघ्रियुगलस्तुसचैलमाशु ॥ देवर्षिमानवपितॄनपितर्पयित्वाज्ञानोदतीर्थमभिलभ्यभजेत्ततस्त्वाम् ॥ ३५ ॥ सामोदमोदकभरैर्वरधूपदीपैर्माल्यैःसुगंधबहुलैरनुलेपनैश्च ॥ संप्रीण्यकाशिनगरीफलदानदक्षंप्रोक्त्वाथमांकइहसिध्यतिनैवढुंढे ॥ ३६ ॥ तीर्थांतराणिचततःक्रमवर्जितोपिसंसाधयन्निहभवत्करुणाकटाक्षैः ॥ दूरीकृतस्वहितघात्युपसर्गवर्गोढुंढेलभेदविकलंफलमत्रकाश्याम् ॥ ३७ ॥ यःप्रत्यहंनमतिढुंढिविनायकंत्वांकाश्यांप्रगेप्रतिहताखिलविघ्नसंघः ॥ नोतस्यजातुजगतीतलवर्तिवस्तुदुष्प्रापमत्रचपरत्रचकिंचनापि ॥ ३८ ॥ योनामतेजपतिढुंढिविनायकस्यतंवैजपंत्यनुदिनंहृदिसिद्धयोष्टौ ॥ भोगान्विभुज्यविविधान्विबुधोपभोग्यान्निर्वाणयाकमलयाव्रियतेसचांते ॥ ३९ ॥ दूरेस्थितोप्यहरहस्तवपादपीठंयःसंस्मरेत्सकलसिद्धिदढुंढिराज ॥ काशीस्थितेरविकलंसफलंलभेतनैवान्यथानवितथाममवाक्कदाचित् ॥ ४० ॥ जानेविघ्नानसंख्यातान्विनिहंतुमनेकधा ॥ क्षेत्रस्यास्यमहाभागनानारूपैरिहस्थितः ॥ ४१ ॥

यानियानिचरूपाणियत्रयत्रचतेनघ ॥ तानितत्रप्रवक्ष्यामिशृण्वंत्वेतेदिवौकसः ॥ ४२ ॥ प्रथमंढुंढिराजोसिममदक्षिणतोमनाक् ॥ आढुंढ्यसर्वभक्तेभ्यःसर्वार्थान्संप्रयच्छसि ॥ ४३ ॥ अंगारवासरवतीमिहयैश्चतुर्थींसंप्राप्यमोदकभरैःपरिमोदवद्भिः ॥ पूजाव्यधायिविविधातवगंधमाल्यैस्तानत्रपुत्रविदधामिगणान्गणेश ॥ ४४ ॥ येत्वामिहप्रतिचतुर्थिसमर्चयंतिढुंढेविगाढमतयःकृतिनस्तएव ॥ सर्वापदांशिरसिवामपदंनिधायसम्यग्गजाननगजाननतांलभंते ॥ ४५ ॥ माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः ॥ येत्वांढुंढेर्चयिष्यंतितेऽर्च्याःस्युरसुरद्रुहाम् ॥४६॥ विधायवार्षिकींयात्रांचतुर्थींप्राप्यतापसीम् ॥ शुक्लांशुक्लतिलैर्बद्धाप्राश्नीयाल्लड्डुकान्व्रती ॥ ४७ ॥ कार्यायात्राप्रयत्नेनक्षेत्रसिद्धिमभीप्सुभिः ॥ तस्यांचतुर्थ्यांत्वत्प्रीत्यैढुंढेसर्वोपसर्गहृत् ॥ ४८ ॥ तांयात्रांनात्रयःकुर्यान्नैवेद्यंतिललड्डुकैः ॥ उपसर्गसहस्रैस्तुसहंतव्योममाज्ञया ॥ ४९ ॥ होमंतिलाज्यद्रव्येणयःकरिष्यतिभक्तितः ॥ तस्यांचतुर्थ्यांमंत्रज्ञस्तस्यमंत्रःप्रसेत्स्यति ॥ ५० ॥ वैदिकोऽवैदिकोवापियोमंत्रस्तेगजानन ॥ जप्तस्त्वत्संनिधौढुंढेसिद्धिंदास्यतिवांछिताम् ॥ ५१ ॥ ॥ ईश्वरउवाच ॥ इमांस्तुतिंममकृतिंयःपठिष्यतिसन्मतिः ॥ नजातुतंतुविघ्नौघाःपीडयिष्यंतिनिश्चितम् ॥ ५२ ॥ ढौंढींस्तुतिमिमांपुण्यांयःपठेड्ढुंढिसंनिधौ ॥ सान्निध्यंतस्यसततंभजेयुःसर्वसिद्धयः ॥ ५३ ॥ इमांस्तुतिंनरोजप्त्वापरंनियतमानसः ॥ मानसैरपिपापैस्तैर्नाभिभूयेतकर्हिचित् ॥५४॥ पुत्रान्कलत्रंक्षेत्राणिवराश्वान्वरमंदिरम् ॥ प्राप्नुयाच्चधनंधान्यंढुंढिस्तोत्रंजपन्नरः ॥ ५५ ॥ सर्वसंपत्करंनामस्तोत्रमेतन्मयेरितम् ॥ प्रजप्तव्यंप्रयत्नेनमुक्तिकामेनसर्वदा ॥५६॥ जप्त्वास्तोत्रमिदंपुण्यंक्वापिकार्येगमिष्यतः ॥ पुंसःपुरःसमेष्यंतिनियतंसर्वसिद्धयः ॥५७॥ अन्यच्चकथयाम्यत्रशृण्वंत्वेतेदिवौकसः ॥ ढुंढिनाक्षेत्ररक्षार्थंयत्रयत्रस्थितिःकृता ॥ ५८ ॥ काश्यांगंगासिसंभेदेनामतोर्कविनायकः ॥ दृष्टोर्कवासरेपुंभिःसर्वतापप्रशांतये ॥ ५९ ॥ दुर्गोनामगणाध्यक्षःसर्वदुर्गतिनाशनः ॥ क्षेत्रस्यदक्षिणेभागेपूजनीयःप्रयत्नतः ॥ ६० ॥ भीमचंडीसमीपेतुभीमचंडविनायकः ॥ क्षेत्रनैर्ऋतदेशस्थोदृष्टोहंतिमहाभयम् ॥ ६१ ॥ क्षेत्रस्यपश्चिमेभागेसदेहलिविनायकः ॥ सर्वान्निवारयेद्विघ्नान्भक्तानांनात्रसंशयः ॥ ६२ ॥ क्षेत्रवायव्यदिग्भागेउद्दंडाख्योगजाननः ॥ उद्दंडानपिविघ्नौघान्भक्तानांदंडयेत्सदा ॥ ६३ ॥ काश्याःसदोत्तराशायांपाशपाणिर्विनायकः ॥ विनायकान्पाशयतिभक्त्याकाशीनिवासिनाम् ॥ ६४ ॥ गंगावरणयोःसंगेरम्यःखर्वविनायकः ॥ अखर्वानपिविघ्नौघान्भक्तानांखर्वयेत्सताम् ॥ ६५ ॥

प्राच्यांतुक्षेत्ररक्षार्थंसिद्धःसिद्धिविनायकः ॥ पश्चिमेयमतीर्थस्यसाधकक्षिप्रसिद्धिदः ॥ ६६ ॥ बाह्यावरणगाश्चैतेकाश्यामष्टौविनायकाः ॥ उच्चाटयंत्यभक्तांश्चभक्तानांसर्वसिद्धिदाः ॥ ६७ ॥ द्वितीयावरणेचैवयेरक्षंतिविनायकाः ॥ अविमुक्तमिदंक्षेत्रंतानहंकथयाम्यतः ॥ ६८ ॥ स्वर्धुन्याःपश्चिमेकूलेउत्तरेर्कविनायकात् ॥ लंबोदरोगणाध्यक्षःक्षालयेद्विघ्नकर्दमम् ॥६९॥ तत्पश्चिमेकूटदंतउदग्दुर्गविनायकात् ॥ दुर्गोपसर्गसंहर्तारक्षेत्क्षेत्रमिदंसदा ॥ ॥ ७० ॥ भीमचंडगणाध्यक्षात्किंचिदीशानदिग्गतः ॥ क्षेत्ररक्षोगणाध्यक्षःपूज्यःशालकटंकटः ॥ ७१ ॥ प्राच्यांदेहलिविघ्नेशात्कूश्मांडाख्योविनायकः ॥ पूजनीयःसदाभक्तैर्महोत्पातप्रशांतये ॥ ७२ ॥ उद्दंडाख्याद्गणपतेराशुशुक्षणिदिक्स्थितः ॥ महाप्रसिद्धःसंपूज्योभक्तैर्मुंडविनायकः ॥ ७३ ॥ पातालेतस्यदेहोस्तिमुंडंकाश्यांव्यवस्थितम् ॥ अतःसंगीयतेकाश्यांदेवोमुंडविनायकः ॥ ७४ ॥ पाशपाणेर्गणेशानाद्दक्षिणेविकटद्विजम् ॥ पूजयित्वागणपतिंगाणपत्यपदंलभेत् ॥ ७५ ॥ खर्वाख्यान्नैर्ऋतेभागेराजपुत्रोविनायकः ॥ भ्रष्टराज्यंचराजानंराजानंकुरुतेऽर्चितः ॥ ७६ ॥ गंगायाःपश्चिमेकूलेप्रणवाख्योगणाधिपः ॥ अवाच्यांराजपुत्राच्चप्रणतःप्रणयेद्दिवम् ॥ ७७ ॥ द्वितीयावरणेकाश्यामष्टावेतेविनायकाः ॥ उत्सादयेयुर्विघ्नौघान्काशीस्थितिनिवासिनाम् ॥ ७८ ॥ क्षेत्रेतृतीयावरणेक्षेत्ररक्षाकृतःसदा ॥ येविघ्नराजाःसंतीहतेवक्तव्यामयाधुना ॥ ७९ ॥ उदग्वहायाःस्वर्धुन्यारम्येरोधसिविघ्नराट् ॥ लंबोदरादुदीच्यांतुवक्रतुंडोघसंघहृत् ॥ ८० ॥ कूटदंताद्गणपतेरुदीच्यामेकदंतकः ॥ सदोपसर्गसंसर्गात्पायादानंदकाननम् ॥ ८१ ॥ काशीभयहरोनित्यमैश्यांशालकटंकटात् ॥ त्रिमुखोनामविघ्नेशःकपिसिंहद्विपाननः ॥८२॥ कूश्मांडात्पूर्वदिग्भागेपंचास्योनामविघ्नराट् ॥ पंचास्यस्यंदनवरःपातिवाराणसींपुरीम् ॥ ८३ ॥ हेरंबाख्यःसदाग्नेय्यांपूज्योमुंडविनायकात् ॥ अंबावत्पूरयेत्कामान्सर्वेषांकाशिवासिनाम् ॥ ८४ ॥ अवाच्यामर्चयेद्धीमान्सिद्ध्यैविकटदंततः ॥ विघ्नराजंगणपतिंसर्वविघ्नविनाशनम् ॥ ८५ ॥ विनायकाद्राजपुत्रात्किंचिद्रक्षोदिशिस्थितः ॥ वरदाख्योगणाध्यक्षःपूज्योभक्तवरप्रदः ॥ ८६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

याम्यांप्रणवविघ्नेशाद्गणेशोमोदकप्रियः ॥ पूज्यःपिशंगिलातीर्थेदेवनद्यास्तटेशुभे ॥ ८७ ॥ चतुर्थावरणेकाश्यांभक्तविघ्नविनाशकाः ॥ द्रष्टव्याहृष्टचेतो
भिःस्पष्टमष्टौविनायकाः ॥ ८८ ॥ वक्रतुंडादुदग्दिक्स्थःस्वःसिंधोरोधसिस्थितः ॥ विनायकोस्त्यभयदःसर्वेषांभयनाशनः ॥ ८९ ॥ कौबेर्यामेकद
शनात्सिंहतुंडोविनायकः ॥ उपसर्गगजान्हंतिवाराणसिनिवासिनाम् ॥ ९० ॥ कूणिताक्षोगणाध्यक्षस्त्रितुंडादीशदिक्स्थितः ॥ महाश्मशानंसततंपाया
द्दुष्टकुदृष्टितः ॥ ९१ ॥ प्राच्यांपंचास्यतःपायात्पुरींक्षिप्रप्रसादनः ॥ क्षिप्रप्रसादनार्चातः क्षिप्रंसिध्यंतिसिद्धयः ॥ ९२ ॥ हेरंबाद्वह्निदिग्भागेचिंतामणिं
विनायकः ॥ भक्तचिंतामणिःसाक्षाच्चिंतितार्थसमर्पकः ॥ ९३ ॥ विघ्नराजादवाच्यांतुदंतहस्तोगणेश्वरः ॥ लिखेद्विघ्नसहस्राणिनृणांवाराणसीद्रुहाम् ॥
॥ ९४ ॥ वरदाद्यातुधान्यांचयातुधानगणावृतः ॥ देवःपिचिंडिलोनामपुरींरक्षेदहर्निशम् ॥ ९५ ॥ दृष्टःपिलिपिलातीर्थेदक्षिणेमोदकप्रियात् ॥ उद्दंडमुं
डोहेरंबोभक्तेभ्यःकिंनयच्छति ॥ ९६ ॥ प्राकारेपंचमेकाश्यांद्विचतुष्कविनायकाः ॥ कुर्वंतिरक्षांक्षेत्रस्ययेतानत्रब्रवीम्यहम् ॥ ९७ ॥ तीरेस्वर्गतरंगि
ण्याउत्तरेचाभयप्रदात् ॥ स्थूलदंतोगणेशानःस्थूलाःसिद्धीर्दिशेत्सताम् ॥ ९८ ॥ सिंहतुंडादुदग्भागेकलिप्रियविनायकः ॥ कलहंकारयेन्नित्यमन्योन्यं
तैर्थिकद्रुहाम् ॥ ९९ ॥ कूणिताक्षात्तथैशान्यांचतुर्दंतोविनायकः ॥ तस्यदर्शनमात्रेणविघ्नसंघःक्षयेत्स्वयम् ॥ १०० ॥ क्षिप्रप्रसादनादैंद्र्यांद्वितुंडोगण
नायकः ॥ अग्रतःपृष्ठतश्चापिबिभर्तिसदृशींश्रियम् ॥ १ ॥ तस्यसंदर्शनात्पुंसांभवेच्छ्रीःसर्वतोमुखी ॥ ज्येष्ठोनामगणाध्यक्षोज्येष्ठोमेपुत्रसंपदि ॥ २ ॥
ज्येष्ठशुक्लचतुर्दश्यांसंपूज्योज्येष्ठताप्तये ॥ स्थितोवह्निदिशोभागेचिंतामणिविनायकात् ॥ ३ ॥ दंतहस्ताद्यमाशायांपूज्योगजविनायकः ॥ तस्यसंपूजना
द्भक्त्यागजांताश्रीरवाप्यते ॥ ४ ॥ पिचिण्डिलाद्गणपतेर्याम्यांकालविनायकः ॥ भयंनकालकलितंतस्यसंसेवनान्नृणाम् ॥ ५ ॥ उद्दंडमुंडाद्गणपात्की
नाशदिशिसंस्थितम् ॥ नागेशंगणपंदृष्ट्वानागलोकेमहीयते ॥ ६ ॥

अथषष्ठावरणगाःप्रोच्यंतेविघ्ननायकाः ॥ तेषांनामश्रवादेवपुंसांसिद्धिःप्रजायते ॥ ७ ॥ मणिकर्णोगणपतिःप्राच्यांविघ्नविघातकृत् ॥ आशाविनायको
वह्न्यांभक्ताशांपूरयन्स्थितः ॥ ८ ॥ याम्यांसृष्टिगणेशश्चसृष्टिसंहारसूचकः ॥ नैर्ऋत्यांयक्षविघ्नेशःसर्वविघ्नहरःपरः ॥ ९ ॥ प्रतीच्यांगजकर्णश्चसर्वेषां
क्षेमकारकः ॥ चित्रघंटोगणपतिर्वायव्यांपालयेत्पुरीम् ॥ ११० ॥ स्थूलजंघउदीच्यांचशमयेच्छमिनामघम् ॥ ऐश्यामैशींपुरींपायात्समंगलविनायकः
॥ ११ ॥ यमतीर्थादुदीच्यांचपूज्योमित्रविनायकः ॥ सप्तमावरणेयेचतांश्चवक्ष्येविनायकान् ॥ १२ ॥ मोदाद्याःपंचविघ्नेशाःषष्ठोज्ञानविनायकः ॥
सप्तमोद्वारविघ्नेशोमहाद्वारपुरश्चरः ॥ १३ ॥ अष्टमःसर्वकष्टौघानविमुक्तविनायकः ॥ अविमुक्तेममक्षेत्रेहरेत्प्रणतचेतसाम् ॥१४॥ षट्पंचाशद्गजमुखाने
तान्यःसंस्मरिष्यति ॥ दूरदेशांतरस्थोपिसमृतोज्ञानमाप्नुयात् ॥ १५ ॥ ढुंढिस्तुतिंमहापुण्यांषट्पंचाशद्गजाननाम् ॥ यःपठिष्यतिपुण्यात्मातस्यसिद्धिः
पदेपदे ॥ १६ ॥ इमेगणेश्वराःसर्वेस्मर्तव्यायत्रकुत्रचित् ॥ महाविपत्समुद्रांतःपतंतंपांतिमानवम् ॥१७॥ इतिस्तुतिंमहापुण्यांश्रुत्वाचैतान्विनायकान् ॥
जातुविघ्नैर्नबाध्येतपापेभ्योपिप्रहीयते ॥ १८ ॥ इत्युक्त्वादेवदेवोपिमहोत्सवितमानसः ॥ कृताभिषेकोब्रह्माद्यैस्तेभ्योदत्त्वाभिवांछितम् ॥ १९ ॥ संप्रसा
द्ययथायोगंसर्वानुचितचंचुरः ॥ अविशद्राजसदनंविश्वकर्मविनिर्मितम् ॥ १२० ॥ स्कंदउवाच ॥ एवंस्तुतोभगवतादेवदेवेनविघ्नजित् ॥ इत्थंचबहु
धात्मानंसचकारविनायकः ॥ २१ ॥

एतानितस्यनामानिढुंढिराजस्यकुंभज ॥ जपित्वायानिमनुजोलप्स्यतेनिजवांछितम् ॥ २२ ॥ अन्येपितत्रवैभेदास्तस्यढुंढेर्गणेशितुः ॥ भक्तैःसम
र्चिताभक्त्याह्यसंख्याताःसहस्रशः ॥ २३ ॥ भगीरथगणाध्यक्षोहरिश्चंद्रविनायकः ॥ कपर्दाख्योगणपतिस्तथाबिंदुविनायकः ॥ २४ ॥ इत्याद्यास्तत्र
विघ्नेशाःप्रतिभक्तप्रतिष्ठिताः ॥ तेषामप्यर्चनात्पुंसांजायंतेसर्वसंपदः ॥ २५ ॥ श्रुत्वाध्यायमिमंपुण्यंनरःश्रद्धासमन्वितः ॥ सर्वविघ्नान्समुत्सृज्यलभते
वांछितंपदम् ॥ १२६ ॥ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्द्धेढुंढिविनायकप्रादुर्भावोनामसप्तपंचाशत्तमो
ऽध्यायः ॥ ५७ ॥ अगस्त्यउवाच ॥ किंचकारहरःस्कंदमंदराद्रिगतस्तदा ॥ विलंबमालंबयतितस्मिन्नपिगजानने ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥
शृण्वगस्त्यकथांपुण्यांकथ्यमानांमयाधुना ॥ वाराणस्येकविषयामशेषाघौघनाशिनीम् ॥ २ ॥ करींद्रवदनेतत्रक्षेत्रवर्येऽविमुक्तके ॥ विलंबभाजिन्यक्षेणप्रे
क्षिक्षिप्रमधोक्षजः ॥ ३ ॥ प्रोक्तोथबहुशश्चेतिबहुमानपुरःसरम् ॥ तथात्वमपिमाकार्षीर्यथाप्राक्प्रस्थितैःकृतम् ॥ ४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥
उद्यमःप्राणिभिःकार्योयथाबुद्धिबलाबलम् ॥ परंफलंतिकर्माणित्वदधीनानिशंकर ॥ ५ ॥ अचेतनानिकर्माणिस्वतंत्राःप्राणिनोपिन ॥ त्वंचतत्कर्मणां
साक्षीत्वंचप्राणिप्रवर्तकः ॥ ६ ॥ किंतुत्वत्पादभक्तानांतादृशीजायतेमतिः ॥ ययात्वमेवकथयेःसाध्वनेनत्वनुष्ठितम् ॥ ७ ॥ यत्किंचिदिहवैकर्मस्तो
कंवाऽस्तोकमेववा ॥ तत्सिद्ध्यत्येवगिरिशत्वत्पादस्मृत्यनुष्ठितम् ॥ ८ ॥ सुसिद्धमपिवैकार्यंसुबुद्ध्यापिस्वनुष्ठितम् ॥ अत्वत्पदस्मृतिकृतंविनश्यत्ये
वतत्क्षणात् ॥ ९ ॥ शंभुनाप्रेषितेनाद्यसूद्यमःक्रियतेमया ॥ त्वद्भक्तिसंपत्तिमतांसंपन्नप्रायएवनः ॥ १० ॥ अतीवयदसाध्यंस्यात्स्वबुद्धिबलपौरुषैः ॥
तत्कार्यंहिसुसिद्धंस्यात्त्वदनुध्यानतःशिव ॥ ११ ॥ यांतिप्रदक्षिणीकृत्ययेभवंतंभवंविभो ॥ भवंतितेषांकार्याणिपुरोभूतानितेभयात् ॥ १२ ॥ जातंवि
द्धिमहादेवकार्यमेतत्सुनिश्चितम् ॥ काशीप्रावेशिकश्चिंत्यशुभलग्नोदयःपरम् ॥ १३ ॥

अथवाकाशिसंप्राप्तौनचिंत्यंहिशुभाशुभम् ॥ तदैवहिशुभःकालोयदैवाप्येतकाशिका ॥ १४ ॥ शंभुंप्रदक्षिणीकृत्यप्रणम्यचपुनःपुनः ॥ प्रतस्थेऽ
थसलक्ष्मीकोमंदराद्गरुडध्वजः ॥ १५ ॥ दृशोरतिथितांनीत्वाविष्णुर्वाराणसींततः ॥ पुंडरीकाक्षइत्याख्यांसफलीकृतवान्मुदा ॥ १६ ॥ गंगावरणयो
र्विष्णुःसंभेदेस्वच्छमानसः ॥ प्रक्षाल्यपाणिचरणंसचैलःस्नातवानथ ॥१७॥ तदाप्रभृतितत्तीर्थंपादोदकमितीरितम् ॥ पादौयदादौशुभदौक्षालितौपीतवा
ससा ॥ १८ ॥ तत्रपादोदकेतीर्थेयेस्नास्यंतीहमानवाः ॥ तेषांविनश्यतिक्षिप्रंपापंसप्तभवार्जितम् ॥ १९ ॥ तत्रश्राद्धंनरःकृत्वादत्त्वाचैवतिलोदकम् ॥
सप्तसप्ततथासप्तस्ववंश्यांस्तारयिष्यति ॥ २० ॥ गयायांयादृशीतृप्तिर्लभ्यतेप्रपितामहैः ॥ तीर्थेपादोदकेकाश्यांतादृशीलभ्यतेध्रुवम् ॥ २१ ॥ कृतपादो
दकस्नानंपीतपादोदकोदकम् ॥ दत्तपादोदपानीयंनरंननिरयःस्पृशेत् ॥ २२ ॥ विष्णुपादोदकेतीर्थेप्राश्यपादोदकंसकृत् ॥ जातुचिज्जननीस्तन्यंनपिबे
दितिनिश्चितम् ॥ २३ ॥ सचक्रशालग्रामस्यशंखेनस्नापितस्यच ॥ आर्द्रःपादोदकस्यांबुपिबन्नमृततांव्रजेत् ॥ २४ ॥ विष्णुपादोदकेतीर्थेविष्णुपादो
दकंपिबेत् ॥ यदितत्सुधयाकिंनुबहुकालीनयातया ॥ २५ ॥ काश्यांपादोदकेतीर्थेयैःकृतानोदकक्रियाः ॥ जन्मैवविफलंतेषांजलबुद्बुदसश्रियाम् ॥२६॥
कृतनित्यक्रियोविष्णुःसलक्ष्मीकःसकाश्यपिः ॥ उपसंहृत्यतांमूर्तिंत्रैलोक्यव्यापिनींतथा ॥ २७ ॥ विधायंदार्षदींमूर्तिंस्वहस्तेनादिकेशवः ॥ स्वयंसं
पूजयामाससर्वसिद्धिसमृद्धिदाम् ॥ २८ ॥ आदिकेशवनाम्नींतांश्रीमूर्तिंपारमेश्वरीम् ॥ संपूज्यमर्त्योवैकुंठंमन्यतेस्वगृहांगणम् ॥ २९ ॥ श्वेतद्वीपह
तिख्यातंतत्स्थानंकाशिसीमनि ॥ श्वेतद्वीपेवसंत्येवनरास्तन्मूर्तिसेवकाः ॥ ३० ॥ क्षीराब्धिसंज्ञंतत्रान्यत्तीर्थंकेशवतोव्रतः ॥ कृतोदकक्रियस्तत्रवसे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षीराब्धिरोचसि ॥ ३१ ॥ तत्रश्राद्धंनरःकृत्वागोदत्त्वाचपयस्विनीम् ॥ यथोक्तसर्वाभरणांक्षीरोदेवासयेत्पितॄन् ॥ ३२ ॥ एकोत्तरशतंवंश्यान्नयेत्पायस कर्दमम् ॥ क्षीरोदरोधःपुण्यात्माभक्त्यातत्रैकधेनुदः ॥३३॥ बह्वीश्चनैचिकीर्दत्त्वाश्रद्धयाग्रसदक्षिणाः ॥ शय्योत्तरांश्चप्रत्येकंपितॄंस्तत्रसुवासयेत् ॥३४॥ क्षीरोदाद्दक्षिणेतत्रशंखतीर्थमनुत्तमम् ॥ तत्रापिसंतर्प्यपितॄन्विष्णुलोकेमहीयते ॥ ३५ ॥

तद्याम्यांचक्रतीर्थंचपितॄणामपिदुर्लभम् ॥ तत्रापिविहितश्राद्धोमुच्यतेपैतृकाद्दणात् ॥३६॥ तत्सन्निधौगदातीर्थंविष्वग्गाधिनिबर्हणम् ॥ तारणंचपितॄणां वैकारणंचैनसांक्षयं ॥ ३७ ॥ पद्मतीर्थंतदग्रेतुतत्रस्नात्वानरोत्तमः ॥ पितॄन्संतर्प्यविधिनापद्मयानेवहीयते ॥ ३८ ॥ तत्रैवचमहालक्ष्म्यास्तीर्थंत्रैलोक्य विश्रुतम् ॥ स्वयंयत्रमहालक्ष्मीःस्नातात्रैलोक्यदर्पदा ॥३९॥ तत्रतीर्थेकृतस्नानोदत्त्वारत्नानिकांचनम् ॥ षडांबराणिविप्रेभ्योनलक्ष्म्यापरिहीयते ॥४०॥ यत्रयत्रद्विजायेततत्रतत्रसमृद्धिमान् ॥ पितरोपिहिसश्रीकास्तस्यस्युस्तीर्थगौरवात् ॥४१॥ तत्रास्तिहिमहालक्ष्म्यासूर्तिस्त्रैलोक्यवंदिता ॥ तांप्रणम्यनरो भक्त्यानरोगीजायतेक्वचित् ॥ ४२ ॥ नभस्यबहुलाष्टम्यांकृत्वाजागरणंनिशि ॥ समभ्यर्च्यमहालक्ष्मींव्रतीव्रतफलंलभेत् ॥ ४३ ॥ तार्क्ष्यतीर्थंहितत्रास्तितार्क्ष्येकेशवसन्निधौ ॥ तत्रस्नात्वानरोभक्त्यासंसारार्हिनपश्यति ॥ ४४ ॥ तदग्नेनारदंतीर्थंमहापातकनाशनम् ॥ ब्रह्मविद्योपदेशंचप्राप्तवान्यत्रनारदः ॥४५॥ तत्रस्नातोनरःसम्यग्ब्रह्मविद्यामवाप्नुयात् ॥ केशवात्तेनतत्रोक्तःकाश्यांनारदकेशवः ॥४६ ॥ अर्चयित्वानरोभक्त्यादेवंनारदकेशवम् ॥ जनन्याज ठरंपीठमध्यास्तेनकदाचन ॥ ४७ ॥ प्रह्लादतीर्थंतस्याग्रेयत्रप्रह्लादकेशवः ॥ तत्रश्राद्धादिकंकृत्वाविष्णुलोकेमहीयते ॥ ४८ ॥ आंबरीषमहातीर्थं मघमंतस्यसन्निधौ ॥ तत्रोदर्कीक्रियांकुर्वन्निष्कालुष्यंलभेन्नरः ॥४९॥ आदित्यकेशवःपूज्यआदिकेशवपूर्वतः ॥ तस्यसंदर्शनादेवसुच्यतेचोच्चपातकैः ॥ ॥ ५० ॥ दत्तात्रेयेश्वरंतीर्थंतत्रैवादिगदाधरः ॥ पितॄन्संतर्प्य तत्रैवज्ञानयोगमवाप्नुयात् ॥ ५१ ॥ भृगुकेशवपूर्वेणतीर्थंवैभार्गवंपरम् ॥ तत्रस्नातोनरःप्राज्ञो भवेद्भार्गववत्सुधीः ॥ ५२ ॥ तत्रवामनतीर्थंचप्राच्यांवामनकेशवात् ॥ पूजयित्वाचतंविष्णुंवसेद्वामनसन्निधौ ॥ ५३ ॥ नरनारायणंतीर्थंनरनाराय णात्पुरः ॥ तत्रतीर्थेकृतस्नानोनरोनारायणोभवेत् ॥ ५४ ॥ यज्ञवाराहतीर्थंचतदग्रेपापनाशनम् ॥ प्रतिमज्जनतस्तत्रराजसूयक्रतोःफलम् ॥ ५५ ॥ विदारनारसिंहाख्यंतत्रतीर्थंसुनिर्मलम् ॥ स्नातोविदारयेत्तत्रपापंजन्मशतार्जितम् ॥ ५६ ॥ गोपिगोविंदतीर्थंचगोपिगोविंदपूर्वतः ॥ स्नात्वातत्र समभ्यर्च्यविष्णुंविष्णुश्रियोभवेत् ॥ ५७ ॥ लक्ष्मीनृसिंहाख्यंगोपिगोविंददक्षिणे ॥ नलक्ष्म्यात्यज्यतेकापितत्तीर्थपरिमज्जनात् ॥ ५८ ॥ तदग्नेशेषतीर्थंचशेषबाधक्षसन्निधौ ॥ तर्पितानांपितॄणांक्षयस्तृप्तिर्नशिष्यते ॥ ५९ ॥ शंखमाधवतीर्थंचतदवाच्यांसुनिर्मलम् ॥ कृतोदकोनरस्तत्र भवेत्पापोपिनिर्मलः ॥ ६० ॥

तदग्नेचहयग्रीवंतीर्थंपरमपावनम् ॥ तत्रस्नात्वाहयग्रीवंकेशवंपरिपूज्यच ॥ ६१ ॥ पिंडंचतत्रनिर्वाप्यहयग्रीवस्यसन्निधौ ॥ हायग्रीवींश्रियंप्राप्यसमुच्ये तसपूर्वजः ॥ ६२ ॥ ॥ स्कंदउवाच ॥ ॥ प्रसंगतोमयैतानितीर्थानिकथितानिते ॥ भूमौतिलांतराधायत्तत्रतीर्थान्यनेकशः ॥ ६३ ॥ उदिष्टानां हनीर्णानामेतत्पांकलशोद्भव ॥ नाममात्रमपिश्रुत्वानिष्पापोजायतेनरः ॥ ६४ ॥ इदानींप्रस्तुतंविप्रशृणुवक्ष्यामितेग्रतः ॥ वैकुंठनाथोयच्चक्रेशंखचक्रगदा धरः ॥ ६५ ॥ तस्यांमूर्तौसमावेश्यकेशव्यामथकेशवः ॥ शंभोःकार्यंकृतमनाअंशांशांशेननिर्गतः ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ अंशांशां शेननिश्चक्रेकुतोभोश्चक्रपाणिना ॥ क्वनिर्गतंचहरिणाप्राप्यकाशींपडानन ॥ ६७ ॥ ॥ स्कंदउवाच ॥ ॥ सामस्त्येनयदर्थंनिर्गतंविष्णुनामुने ॥ श्रुणतत्कारणमितिशमात्रंनिशामय ॥ ६८ ॥ संप्राप्यपुण्यसंभारैःप्राज्ञोवाराणसींपुरीम् ॥ नत्यजेत्सर्वभावेनमहालाभैरपीरितः ॥ ६९ ॥ अतःप्रतिकृ तिःस्वीयातत्रकाश्यांमुरारिणा ॥ प्रतितस्थेकलशजस्तोकांशेनचनिर्गतम् ॥ ७० ॥ किंचित्काश्याउदीच्यांचगत्वादेवेनचक्रिणा ॥ स्वस्थित्यैकल्पितं स्थानंधर्मक्षेत्रमितीरितम् ॥ ७१ ॥ ततस्तुसौगतंरूपंशिश्रायश्रीपतिःस्वयम् ॥ अतीवसुंदरतरंत्रैलोक्यस्यापिमोहनम् ॥ ७२ ॥ श्रीःपरिव्राजिकाजाता नितरांसुभगाकृतिः ॥ यामालोक्यजगत्सर्वंचित्रन्यस्तमिवास्थितम् ॥ ७३ ॥ विश्वयोनिंजगद्धात्रींन्यस्तहस्ताग्रपुस्तकाम् ॥ गरुत्मानपितच्छिप्यो जातोलोकोत्तराकृतिः ॥ ७४ ॥ अत्यद्भुतमहाप्राज्ञोनिःस्पृहःसर्ववस्तुषु ॥ गुरुशुश्रूषणपरोन्यस्तहस्ताग्रपुस्तकः ॥ ७५ ॥ अपृच्छत्परमंधर्मंसंसारवि निर्मोचकम् ॥ आचार्यवर्यंसौम्यास्यंप्रसन्नात्मानमुत्तमम् ॥ ७६ ॥ धर्मार्थशास्त्रकुशलंज्ञानविज्ञानरंजिनम् ॥ सुस्वरंसुपदव्यक्तिसुस्निग्धमृदुभा षिणम् ॥ ७७ ॥ स्तंभनोच्चाटनाकृष्टिवशीकर्मादिकोविदम् ॥ व्याख्यानसमयाकृष्टपक्षिरोमांचकारिणम् ॥ ७८ ॥

पीततद्भातपीयूषमृगपूगैरुपासितम् ॥ मन्दामोदभराक्रांतवातचांचल्यहारिणम् ॥ ७९ ॥ वृक्षैरपिपतत्पुष्पच्छलैःकृतसमर्चनम् ॥ ततःप्रोवाचपुण्यात्मा पुण्यकीर्तिःससौगतः ॥ ८० ॥ शिष्यंविनयकीर्तिंतंमहाविनयभूषणम् ॥८१॥ ॥ पुण्यकीर्तिरुवाच ॥ ॥ त्वयाविनयकीर्तेयोधर्मःपृष्टःसनातनः ॥ वक्ष्यांम्यहमशेषेणशृणुष्वत्वंमहामते ॥ ८२ ॥ अनादिसिद्धःसंसारःकर्तृकर्मविवर्जितः ॥ स्वयंप्रादुर्भवेदेपस्वयमेवविलीयते ॥ ८३ ॥ ब्रह्मादिस्तंबपर्यं तंयावद्देहनिबंधनम् ॥ आत्मैवैकेश्वरस्तत्रनद्वितीयस्तदीक्षिता ॥ ८४ ॥ यद्ब्रह्मविष्णुरुद्राद्यास्तथाख्यादेहिनामिमाः ॥ आख्यायथास्मदादीनांपुण्यको र्त्यादिरुच्यते ॥ ८५ ॥ देहोयथास्मदादीनांस्वकालेनविलीयते ॥ ब्रह्मादिमशकांतानांस्वकालाल्लीयतेतथा ॥ ८६ ॥ विचार्यमाणेदेहेस्मिन्नकिंचिदधिकंक्वचित् ॥ आहारोभुवनंनिद्राभयंसर्वत्रयत्समम् ॥ ८७ ॥ निजाहारपरीमाणंप्राप्यसर्वोपिदेहभृत् ॥ सदृशीमेवसंतृप्तिंप्राप्नुयान्नाधिकेतराम् ॥ ८८ ॥ यथा वितृपिताःस्यामपीत्वापेयंमुदावयम् ॥ तृपितास्तुतथान्येपिनविशेषोल्पकोधिकः ॥८९॥ संतुनार्यःसहस्राणिरूपलावण्यभूमयः ॥ परंनिधुवनेकालेद्वे कैवेहोप्युज्यते ॥ ९० ॥ अश्वाःपरःशताःसंतुसंत्वनेकेप्यनेकपाः ॥ अधिरोहेतथाप्येकोनद्वितीयस्तथात्मनः ॥ ९१ ॥ पर्यंकशायिनांस्वापेसुखंयदुप पद्यते ॥ तदेवसौख्यंनिद्रायानि हभूशायिनामपि ॥ ९२ ॥ यथैवमरणाद्भीतिरस्मदादिवपुष्मताम् ॥ ब्रह्मादिकीटकांतानांतथामरणतोभयम् ॥ ९३ ॥ सर्वेतुभूतस्तुल्यायदिबुद्ध्याविचार्यते ॥ इदंनेदंमित्यंकेनापिनोहिंस्यःकोपिकुत्रचित् ॥ ९४ ॥ धर्मोजीवदयातुल्योनक्वापिजगतीतले ॥ तस्मात्सर्व प्रात्नेनकार्याचीवदयानृभिः ॥ ९५ ॥

एकस्मिन्रक्षितेजीवेत्रैलोक्यंरक्षितंभवेत् ॥ घातितेघातितंतद्वत्तस्माद्रक्षेन्नघातयेत् ॥ ९६ ॥ अहिंसापरमोधर्मइहोक्तःपूर्वसूरिभिः ॥ तस्मान्नाहिंसाकर्त व्यानरैर्नरकभीरुभिः ॥ ९७ ॥ नहिंसासदृशंपापंत्रैलोक्येसचराचरे ॥ हिंसकोनरकंगच्छेत्स्वर्गंगच्छेदहिंसकः ॥ ९८ ॥ संतिदानान्यनेकानिकिंतेस्तुच्छफलप्रदैः ॥ अभीतिदानसदृशंपरमेकमपीहन ॥९९॥ इहचत्वारिदानानिप्रोक्तानिपरमर्षिभिः ॥ विचार्यनानाशास्त्राणिशर्मणेत्रपरत्रच ॥१००॥ भीतेभ्यश्चाभयंदेयंव्याधितेभ्यस्तथौषधम् ॥ देयाविद्यार्थिनांविद्यादेयमन्नंक्षुधातुरे ॥ १ ॥ अविचिंत्यप्रभावंहिमणिमंत्रौषधीबलम् ॥ तदभ्यस्यंप्रयत्ने ननानार्थोपार्जनायवै ॥ २ ॥ अर्थानुपार्ज्यबहुशोद्वादशायतनानिवै ॥ पारितःपरिपूज्यानिकिमन्यैरिदपूजितैः ॥ ३ ॥ पंचकर्मेंद्रियाण्येवपंचबुद्धींद्रिया

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

णिच ॥ मनोबुद्धिरिहप्रोक्तंद्वादशायतनंशुभम् ॥ ४ ॥ इहैवस्वर्गनरकौप्राणिनांनान्यतःक्वचित् ॥ सुखंस्वर्गःसमाख्यातोदुःखंनरकएवहि ॥ ५ ॥ सुखे पुभुज्यमानेषुयत्स्याद्देहविसर्जनम् ॥ अयमेवपरोमोक्षोनमोक्षोऽन्यःक्वचित्पुनः ॥ ६ ॥ वासनासहितक्लेशसमुच्छेदेसतिध्रुवम् ॥ विज्ञानोपरमोमोक्षो विज्ञेयस्तत्त्वचिंतकैः ॥ ७ ॥ प्रामाणिकीश्रुतिरियंप्रोच्यतेवेदवादिभिः ॥ नहिंस्यात्सर्वभूतानिनान्याहिंसाप्रवर्तिका ॥ ८ ॥

अग्नीषोमीयमितियाभ्रामिकासाऽसतामिह ॥ नसाप्रमाणंज्ञातॄणांपश्वालंभनकारिका ॥ ९ ॥ वृक्षांश्छित्त्वापशून्हत्वाकृत्वारुधिरकर्दमम् ॥ दग्ध्वावह्नौ तिलाज्यादिचित्रंस्वर्गोऽभिलष्यते ॥ ११० ॥ इत्येवंधर्मजिज्ञासांपुण्यकीर्तौप्रकुर्वति ॥ पारंपर्येणतच्छत्वापौरायात्रांप्रचक्रिरे ॥ ११ ॥ परिव्राजिकयाप्ये वंसमाकृष्टाःपुरांगनाः ॥ तयाविज्ञानकौमुद्यासर्वविद्याविदग्धया ॥ १२ ॥ ततस्तासांपुरस्तात्साबौद्धधर्माननीवदत् ॥ दृष्टार्थप्रत्ययकरान्देहसौख्यैकसा धनान् ॥ १३ ॥ ॥ विज्ञानकौमुद्युवाच ॥ ॥ आनंदंब्रह्मणोरूपंश्रुत्यैवंयन्निगद्यते ॥ तत्तथैवेहमंतव्यंमिथ्यानानात्वकल्पना ॥ १४ ॥ यावत्स्वस्थ मिदंवर्ष्मयावन्नेंद्रियविक्लवः ॥ यावज्जराचदूरेस्तितावत्सौख्यंप्रसाधयेत् ॥ १५ ॥ अस्वास्थ्येंद्रियवैकल्येवार्धकेतुकुतःसुखम् ॥ शरीरमपिदातव्यमर्थिभ्यो तःसुखेप्सुभिः ॥ १६ ॥ याचमानमनोवृत्तिप्रीणनेयस्यनोजनिः ॥ तेनभूर्भारवत्येषासमुद्रागद्रुमैर्नहि ॥ १७ ॥ सत्वरोगत्वरोदेहःसंचयाःसपरिक्षयाः ॥ इतिविज्ञायविज्ञातादेहेसौख्यंप्रसाधयेत् ॥ १८ ॥ श्ववायसकृमीणांचप्रतिभोज्यमिदंवपुः ॥ भस्मांतंतच्छरीरंचवेदेसत्यंप्रपद्यते ॥ १९ ॥ क्षुधाजा तिविकल्पोयंलोकेषुपरिकल्प्यते ॥ मानुष्येसतिसामान्येकोधमःकोथचोत्तमः ॥ १२० ॥ ब्रह्मादिसृष्टिरेषेतिप्रोच्यतेवृद्धपूरुषैः ॥ तस्यस्रष्टुः सुतौदक्षमरीचीचेतिविश्रुतौ ॥ २१ ॥

मारीचिनाकश्यपेनदक्षकन्याःसुलोचनाः ॥ धर्म्येणकिलमार्गेणपरिणीतास्त्रयोदश ॥ २२ ॥ अपीदानींतनैर्मर्त्यैरल्पबुद्धिपराक्रमैः ॥ अयंगम्यस्त्वगम्यो यंविचारःक्रियतेमुधा ॥ २३ ॥ मुखबाहूरुपज्जातंचातुर्वर्ण्यमिहोदितम् ॥ कल्पनेयंकृतापूर्वैर्नघटेतविचारतः ॥ २४ ॥ एकस्यांचतनौजाताएकस्माद्य दिवाक्वचित् ॥ चत्वारस्तनयास्तत्किंभिन्नवर्णत्वमाप्नुयुः ॥ २५ ॥ वर्णावर्णविवेकोयंतस्मान्नप्रतिभासते ॥ अतोभेदोनमंतव्योमानुष्येकेनचित्क्वचित् ॥ ॥ २६ ॥ विज्ञानकौमुदीवाणीमित्याकर्ण्यपुरांगनाः ॥ भर्तृशुश्रूषणवतींविजहुर्मतिमुत्तमाम् ॥ २७ ॥ अभ्यस्याकर्षणींविद्यांवशीकृतिमतीमपि ॥ पुरुषाःसफलीचक्रुःपरदारेषुमोहिताः ॥ २८ ॥ अंतःपुरचरानार्यस्तथाराजकुमारकाः ॥ पौराःपुरांगनांश्चापिसर्वेताभ्यांविमोहिताः ॥ २९ ॥ वंध्यानां चापिवंध्यात्वंसापरिव्राजिकाहरत् ॥ तैस्तैश्चकार्मणोपायैरसौभाग्यवतीःस्त्रियः ॥ १३० ॥ सौभाग्यभाग्यसंपन्नाव्यधाद्विज्ञानकौमुदी ॥ कस्यैचिदं जनंदत्तंकस्यैचित्तिलकौषधम् ॥ ३१ ॥ वशीकरणमंत्रैश्चतथाबह्व्योपिदीक्षिताः ॥ मंत्राञ्जपेयुःकाश्चिच्चयंत्राण्यन्यालिखंतिच ॥ ३२ ॥ काश्चिज्जुह्व तिकुंडाग्नौनानाद्रव्याणिनिश्चलाः ॥ एवंसर्वेषुपौरेषुनिजधर्मेषुसर्वथा ॥ पराङ्मुखेषुजातेषुप्रोल्लासवृषेतरः ॥ ३३ ॥ सिद्धयोकृष्टपच्याद्यानष्टाएनः प्रवेशनात् ॥ आसीत्कुंठितसामर्थ्योनृपोपिसमनाङ्मनाक् ॥ ३४ ॥ दूरस्थितोपिविघ्नेशोनृपंनिर्विण्णमानसम् ॥ चकारराज्यकरणेढुंढिराजोरिपुं जयम् ॥ ३५ ॥ अजीगणद्दिवोदासोप्यष्टादशदिनावधिम् ॥ कदागंतासवैविप्रोयोमांसमुपदेक्ष्यति ॥ ३६ ॥ इत्थमष्टादशेप्राप्तेदिवसेदिवसेश्वरे ॥ प्राप्तेमध्यंनभोभागंद्वारंप्राप्तोद्विजोत्तमः ॥ ३७ ॥ सएवपुण्यकीर्त्याख्योधर्मक्षेत्रादधोक्षजः ॥ द्विजवेषंसमालंब्यसमायातोनृपांतिकम् ॥ ३८ ॥ द्वित्रैः पवित्रैर्बहुधाजयजीवेतिवादिभिः ॥ समेतःसइतोविप्रोमूर्तिमानिवपावकः ॥ ३९ ॥ विलोक्यतंसमायांतंदूरादुत्कंठितोनृपः ॥ मेनेभवेद्गुरुरयंयुक्तोमदु पदेशने ॥ १४० ॥ अभिगम्यचतंराजाप्रणम्यचपुनःपुनः ॥ गृहीतस्वस्तिवचनोनिनायांतःपुरंद्विजम् ॥ ४१ ॥

मधुपर्केणविधिनातंसंपूज्यजनाधिपः ॥ व्यपेताध्वश्रमंस्वस्थंप्रोल्लसन्मुखपंकजम् ॥ ४२ ॥ निवेद्यखाद्यवस्तूनिकृतकृत्यक्रियाविधिम् ॥ परितृप्तं सुखासीनंपप्रच्छब्राह्मणंनृपः ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ खिन्नोस्मिविप्रवर्याहंराज्यभारंसमुद्वहन् ॥ खेदोनास्त्येवहिपरंवैराग्यमिवजायते ॥ ४४ ॥ किंकरोमिक्वगच्छामिकथंमेनिर्वृतिर्भवेत् ॥ पक्षद्वय्येवयातेतिममचिंतयतोद्विज ॥ ४५ ॥ असीमंसुखसंतानंभुक्तंराज्यंमयाद्विज ॥ परिक्षीणविपक्षंचत्र्यक्षै श्वर्यमिवस्फुटम् ॥ ४६ ॥ स्वसामर्थ्यादहंजातःपर्जन्याग्न्यनिलात्मकः ॥ प्रजाश्चपालिताःसम्यक्पुत्राइवनिजौरसाः ॥ ४७ ॥ तर्पिताश्चापिभूदेवावसु भिश्चदिनेदिने ॥ एकमेवापराद्धंचमयाराज्यंप्रशासता ॥ ४८ ॥ देवास्तृणीकृताःसर्वेस्वतपोबलदर्पतः ॥ तच्चप्रजोपकारार्थंनस्वार्थंभवताशपे ॥ ४९ ॥ अधुनागुरुरेधित्वंममभाग्योदयागतः ॥ राज्यंतुप्रकरोम्येवंन्यक्कृतांतकसाध्वसम् ॥ १५० ॥ अकालकालकलनंममराज्येनकुत्रचित् ॥ जराव्याधिद रिद्रेभ्योममराज्येपिनोभयम् ॥ ५१ ॥ कोपिधर्मेतरांवृत्तिंनश्रयेन्मयिशासति ॥ धर्मोदयाजनाःसर्वेसर्वेसंतिसुखोदयाः ॥ ५२ ॥ सद्विद्याव्यसनाः सर्वेसर्वेसन्मार्गचंचुराः ॥ अथवायदिकल्पांतंतिष्ठेदायुस्ततोपिकिम् ॥ ५३ ॥ सर्वेभोग्यास्तथाभांतियथाचर्वितचर्वणम् ॥ किंपिष्टपेषणेनात्रराज्येन द्विजपुंगव ॥ ५४ ॥ किमप्युपदिशप्राज्ञगर्भवासोपशांतये ॥ अथवात्वांप्रपन्नस्यममकिंचिंतनैरिमः ॥ ५५ ॥ यदेवकथयस्यद्यतत्करिष्याम्यसंशयम् ॥ त्वद्विलोकनमात्रेणसर्वएवमनोरथाः ॥ ५६ ॥ अन्येषामपिजायंतेजातप्रायाममैवतु ॥ जानेदेवविरोधेनकेकेनप्रलयंगताः ॥ ५७ ॥ अवंतोपिप्रजाः स्वीयानिजधर्ममनुव्रताः ॥ पुरातेत्रिपुराःशूराःशिवभक्तिपराअपि ॥ ५८ ॥ धरामयंरथंकृत्वाधनुःकृत्वाहिमाचलम् ॥ वेदांश्चवाजिनःकृत्वागुणं कृत्वाचवासुकिम् ॥ ५९ ॥ विरिंचिंसारथिंकृत्वाकृत्वाविष्णुंचपत्रिणम् ॥ रथचक्रेपुष्पवंतौप्रतोदंप्रणवात्मकम् ॥ १६० ॥

ताराग्रहमयान्कीलान्वरूथंगगनात्मकम् ॥ ध्वजदंडंसुमेरुंचप्रांशुकल्पतरुंध्वजम् ॥ ६१ ॥ योक्त्राणिचक्षुःश्रवसश्छंदांस्यंगानिरक्षकान् ॥ भल्लंकाला ग्निरुद्राख्यंपुंखीकृत्यप्रभंजनम् ॥ ६२ ॥ हरेणैकेषुपातेनलीलयाभस्मसात्कृताः ॥ बलिर्यज्ञकृतांश्रेष्ठःकृत्वाकपटखर्वताम् ॥ ६३ ॥ पातालंगमितः पूर्वंहरिणाविक्रमैस्त्रिभिः ॥ वृत्तवानपिवैवृत्रःसुत्राम्णाविनिसूदितः ॥ ६४ ॥ दधीचिरपिविप्रेंद्रोदेवैरस्थिकृतेहतः ॥ पूर्ववैरमनुस्मृत्यजयार्थंयुध्यतोहरेः ॥ कुशास्त्रैर्विजितस्याजौतेनैवचदधीचिना ॥ ६५ ॥ शिवभक्तस्यबाणस्यदोःसहस्रंपुराहरिः ॥ चिच्छेदसंख्येकिंतेनापराद्धंसाधुवर्तिना ॥ ६६ ॥ तस्मा द्विरोधोभद्रायनभवेद्दैवतैःसह ॥ देवेभ्योमद्भयंनास्तिसत्पथीनस्यवैमनाक् ॥ ६७ ॥ यज्ञैर्देवत्वमापन्नागीर्वाणावासवादयः ॥ यज्ञैर्दानैस्तपोभिश्चतेभ्यो प्याधिक्यमस्तिमे ॥ ६८ ॥ अस्तुन्यूनत्वमाधिक्यंकिमनेनाधुनामम ॥ इंद्रियोपरमःप्राप्तःसुखदस्तवदर्शनात् ॥ ६९ ॥ इदानींदिशमेतातकर्मनिर्मू लनक्षमम् ॥ उपायंत्वमुपायज्ञयेननिर्वृतिमाप्नुयाम् ॥ १७० ॥ ॥ स्कंदउवाच ॥ ॥ गणेशावेशवशंतोराज्ञेतियदुदीरितम् ॥ तदाकर्ण्यहृषीकेशः प्राहब्राह्मणवेषभृत् ॥ ७१ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ साधुसाधुमहाप्राज्ञनृपचूडामणेऽनघ ॥ मयायदुपदेष्टव्यंतत्त्वयैवनिरूपितम् ॥ ७२ ॥ त्वमा दावेवनिर्वृत्तःपरंमेमानदोह्यसि ॥ क्षालितेंद्रियपंकश्चसुतपःस्वच्छवारिभिः ॥ ७३ ॥ यदुक्तंभवताभूपतत्सर्वंतथ्यमेवहि ॥ तवशक्तिंचजानामिविर

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्तिंचमहामते ॥ ७४ ॥ नभवत्सदृशोराजाभुविभूतोभविष्यति ॥ राज्यंभोक्तुंत्वयाज्ञायियुक्तंयत्तुमुमुक्षसि ॥ ७५ ॥ विरोधेपिहिदेवानांत्वयानापकृतंक्व चित् ॥ धर्मेतरप्रवेशश्चतवराष्ट्रेपिनोभवत् ॥ ७६ ॥ प्रवर्तिताभिर्भवताप्रजाभिर्यदनुष्ठितम् ॥ धर्मेधर्मस्वधर्मज्ञतेनतृप्तादिवौकसः ॥ ७७ ॥ एकएव हितेदोषोहृदिमेप्रतिभासते ॥ काश्यांविश्वेश्वरोदूरंयत्कृतोभवताकिल ॥ ७८ ॥

महांतमपराधंतेजानेभूजानिसत्तम ॥ इमंतत्पापशांत्यैचवच्म्युपायंमहत्तरम् ॥ ७९ ॥ संख्यास्तियावतीदेहेदेहिनोरोमसंभवा ॥ तावंतोप्यपराधावैयां तिलिंगप्रतिष्ठया ॥ १८० ॥ एकंप्रतिष्ठितंयेनलिंगमत्रेशभक्तितः ॥ तेनात्मनासमंविश्वंजगदेतत्प्रतिष्ठितम् ॥ ८१ ॥ रत्नाकरेरत्नसंख्यासंख्याविद्भिरपी ष्यते ॥ लिंगप्रतिष्ठापुण्यस्यनतुसंख्येतिलिख्यते ॥ ८२ ॥ तस्मात्सर्वप्रयत्नेनकुरुलिंगंप्रतिष्ठितम् ॥ तयालिंगप्रतिष्ठित्याकृतकृत्योभविष्यसि ॥८३॥ इत्युक्त्वाब्राह्मणोदध्यौक्षणंनिश्चलमानसः ॥ उवाचचप्रहृष्टास्योराजानंपाणिनास्पृशन् ॥ ८४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अन्यच्चकिंचित्पश्यामिभूपा लज्ञानचक्षुषा ॥ शृणुष्वावहितोभूत्वातदपिप्राज्ञसत्तम ॥ ८५ ॥ धन्योसिकृतकृत्योसिमान्योसिमहतामपि ॥ जप्यंचतवनामेहप्रातःशुभफलेप्सुना ॥ ॥ ८६ ॥ दिवोदासत्वदभ्याशादपिधन्यतरावयम् ॥ तेपिधन्यतरामर्त्येयेत्वदाख्यांप्रचक्षते ॥८७॥ स्मायंस्मायंजगौविप्रोमौलिमांदोलयन्मुहुः ॥ हृद्ये वबहुशोहृष्टःसंप्रहृष्टतनूरुहः ॥ ८८ ॥ अहोभाग्योदयश्चास्यअहोनैर्मल्यमस्यवै ॥ यदेनमनिशंध्यायेद्ध्येयोविश्वेश्वरोऽखिलैः ॥ ८९ ॥ अहोउदर्क एतस्यनकैश्चित्प्रतिपद्यते ॥ अस्माकमपियदूरमदवीयस्तदस्ययत् ॥ १९० ॥ हृद्यालोच्येतिविप्रोथवर्णयित्वाक्षितीश्वरम् ॥ आविश्चकारतत्सर्वंयत्स माधावलोकयत् ॥ ९१ ॥ ॥ ब्राह्मणउवाच ॥ ॥ राजंस्तवाद्यफलितोमनोरथमहाद्रुमः ॥ अनेनैवशरीरेणत्वंगंतासिपरंपदम् ॥ ९२ ॥ यथाविश्वे श्वरोनित्यंत्वामेवहृदिशीलयेत् ॥ तथास्मदादीनपिनद्विजांस्तत्पादलोचनान् ॥ ९३ ॥ कृतलिंगप्रतिष्ठंत्वांसप्तमेह्यद्यवासरात् ॥ दिव्यंविमानमागत्यने तुमेप्यतिशांभवम् ॥ ९४ ॥ राजंस्त्वंवेत्सिकस्यायंविपाकःसुकृतस्यते ॥ वाराणस्याःपुरःसम्यक्सेवनादित्यवैम्यहम् ॥ ९५ ॥ एकमप्यत्रयःपायाद्वारा णस्यांस्थितंजनम् ॥ तस्याप्येवंविपाकोस्तिदेहांतेराजसत्तम ॥ ९६ ॥ इतिश्रुत्वासराजर्षिर्दिवोदासःप्रतापवान् ॥ ब्राह्मणायसशिष्यायप्रादात्प्रीतोभिवां छितम् ॥९७॥ अथसंप्रीणितंविप्रंप्रणम्यचमुहुर्मुहुः॥प्रोवाचराजासंहृष्टस्तारितोस्मिभवार्णवात् ॥९८॥ ब्राह्मणोपिप्रहृष्टात्मापरिपूर्णमनोरथः ॥ समापृ च्छ्यमहीनाथंस्वेष्टंदेशंजगामह॥९९॥विलोक्यकाशींपरितोमायाद्विजवपुर्हरिः॥भूयोभूयोविचार्यापिकिमत्रातीवपावनम्॥२००॥ स्थानंयच्चाहमध्यास्य निजभक्तानशेषतः ॥ नेष्यामिपरमंधामविश्वेशानुग्रहात्परात्॥१॥संप्रधार्येतिभगवान्दृष्ट्वापांचनदंह्रदम् ॥ तत्रकृत्वाविधिस्नानंततस्तत्रैवसंस्थितः ॥२॥ प्रतीक्षमाणोलक्ष्मीशोमंक्षुत्र्यक्षसमागमम् ॥ तार्क्ष्यंप्रस्थापयांचक्रेराजवृत्तांतवेदिनम् ॥ ३ ॥ दिवोदासोपिराजेंद्रोविप्रेंद्रंपरिवर्णयन् ॥ आहूयप्रकृतीः सर्वाःसामात्यान्मंडलेश्वरान् ॥ ४ ॥ अध्यक्षानपिसर्वांश्चकोशाश्वेभादिदेशितान् ॥ पुत्रान्पंचशतंप्राग्र्यंसुतंचसमरंजयम् ॥ ५ ॥ पुरोहितंप्रतीहारमृ त्विजोगणकान्द्विजान् ॥ सामंतान्राजपुत्रांश्चसूपकारांश्चिकित्सकान् ॥ ६ ॥ वैदेशिकानपिबहून्नानाकार्यसमागतान् ॥ सांतःपुरांचमहिषींवृद्धगो पालबालकान् ॥ ७ ॥ सर्वान्प्रोवाचहृष्टात्माप्रबद्धकरसंपुटः ॥ यथासब्राह्मणःप्राहदिनसप्तावधिस्थितिम् ॥ ८ ॥ आश्चर्यंतेषुशृण्वत्सुवि षण्णवदनेषुच ॥ स्वयंराजगृहंनीत्वाकुमारंसमरंजयम् ॥ ९ ॥ अभिषिच्यमहाबुद्धिःपौराञ्जानपदानपि ॥ प्रसादीकृत्यपुण्यात्मापुनःकाशी मगान्नृपः ॥ २१० ॥ आगत्यकाशींमेधावीसभूपालोरिपुंजयः ॥ प्रासादंकारयामासस्वर्धुन्याःपश्चिमेतटे ॥ ११ ॥ रिपून्प्रमथ्यसमरेयावतीश्रीरुपा र्जिता ॥ तावत्यासहिभूपालःशिवालयमचीक्लृपत् ॥ १२ ॥ भूपाललक्ष्मीरखिलायत्तत्रविनियोजिता ॥ भूपालश्रीरितिख्याताततःसाभूरभूच्छुभा ॥ ॥ १३ ॥ दिवोदासेश्वरंलिंगंप्रतिष्ठाप्यरिपुंजयः ॥ कृतकृत्यमिवात्मानममन्यतनरेश्वरः ॥ १४ ॥ अथैकस्मिन्दिनेराजातल्लिंगंविधिपूर्वकम् ॥ सम्यर्च्यनमस्कृत्ययावत्तुष्टावतुष्टिदम् ॥ १५ ॥ तावन्नभोंगणादाशुदिव्यंयानमवातरत् ॥ पार्षदैःपरितःकीर्णंशूलखड्गांगपाणिभिः ॥ १६ ॥ अत्यादि त्याग्नितेजोभिर्भालनेत्रैःकपर्दिभिः ॥ शुद्धस्फटिकसंकाशैरंगैर्दीप्तनभोंगणैः ॥ १७ ॥ विभूषाहिफणारत्नज्योतिःपूजितविग्रहैः ॥ नित्यप्रकाशसं त्रस्ततमःश्रितशिरोधरैः ॥ १८ ॥

चामरव्यग्रहस्ताग्ररुद्रकन्याशतावृतम् ॥ अथपारिषदैराजादिव्यस्रगनुलेपनैः ॥१९॥ दिव्यैर्दुकूलनेपथ्यैरलंचक्रेमुदान्वितैः ॥ त्रिनेत्रीकृतसद्भालंश्यामी कृतशिरोधरम् ॥ २२० ॥ सुगौरीकृतसर्वांगंकपर्दीकृतमौलिजम् ॥ चतुर्भुजीकृततनुंभूषणीकृतपन्नगम् ॥ २१ ॥ चंद्रार्धीकृतमूर्धानंनिन्युस्तंपार्षदा दिवम् ॥ २२ ॥ तदाप्रभृतितत्तीर्थंभूपालश्रीरितिश्रुतम् ॥ तत्रश्राद्धादिकंकृत्वादानंदत्त्वास्वशक्तितः ॥ २३ ॥ दिवोदासेश्वरंदृष्ट्वासमभ्यर्च्यचभक्तितः ॥ राज्ञश्चाख्यायिकांश्रुत्वाननरोगर्भमाविशेत् ॥ २४ ॥ आख्यानमेतन्नृपतेर्दिवोदासस्यपावनम् ॥ पठित्वापाठयित्वापिनरःपापैःप्रमुच्यते ॥ २५ ॥ दिवोदासशुभाख्यानंश्रुत्वायःसमरंविशेत् ॥ नजातुजायतेतस्यभयंवैरिकृतंक्वचित् ॥ २६ ॥ दिवोदासकथापुण्यामहोत्पातनिकृंतनी ॥ पठनीयाप्रयत्ने नसर्वविघ्नोपशांतये ॥ २७ ॥ नावृष्टिर्जायतेतत्रनाकालमरणाद्भयम् ॥ दैवोदासीकथायत्रसर्वपातकनाशिनी ॥ २८ ॥ अस्याख्यानस्यपठनाद्विष्णो रिवमनोरथाः ॥ संपूर्णतांगमिष्यंतिशंभोश्चिंतितकारिणः ॥२२९॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेदिवो दासनिर्वाणप्राप्तिर्नामाष्टपंचाशत्तमोऽध्यायः ॥५८॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञहृदयानंदगौरीचुंबितमूर्धज ॥ तारकांतकषड्वक्त्रतारिणेभद्रकारिणे ॥ ॥ १ ॥ सर्वज्ञाननिधेतुभ्यंनमःसर्वज्ञसूनवे ॥ सर्वथाजितमारायकुमारायमहात्मने ॥२॥ कामारिमर्धनारीशंवीक्ष्यकामकृतंकिल ॥ योजिगायकुमारो पिमारंतस्मैनमोस्तुते ॥ ३ ॥ यदुक्तंभवतास्कंदमायाद्विजवपुर्हरिः ॥ काश्यांपंचनदंतीर्थमध्यासातीवपावनम् ॥ ४ ॥ भूर्भुवःस्वःप्रदेशेषुकाशीपरम पावनम् ॥ तत्रापिहरिणाज्ञायितीर्थंपंचनदंपरम् ॥ ५ ॥ कुतःपंचनदंनामतस्यतीर्थस्यषण्मुख ॥ कुतश्चसर्वतीर्थेभ्यस्तदासीत्पावनंपरम् ॥ ६ ॥ कथं चभगवान्विष्णुरंतरात्माजगत्पतिः ॥ सर्वेषांजगतांपाताकर्ताहर्ताचलीलया ॥ ७ ॥ अरूपोरूपमापन्नोह्यव्यक्तोव्यक्ततांगतः ॥ निराकारोपिसाकारो निष्प्रपंचःप्रपंचभाक् ॥ ८ ॥ अजन्मानेकजन्माचत्वनामास्फुटनामभृत् ॥ निरालंबोऽखिलालंबोनिर्गुणोपिगुणास्पदम् ॥ ९ ॥ अहृषीकोहृषीकेशो प्यनंघ्रिरपिसर्वगः ॥ उपसंहृत्यरूपंस्वंसर्वव्यापीजनार्दनः ॥ १० ॥

स्थितःसर्वात्मभावनतीर्थेपंचनदेपरे ॥ एतदाख्याहिषड्वक्त्रपंचवक्त्राद्यथाश्रुतम् ॥११॥ स्कंदउवाच ॥ ॥ कथयामिकथामेतांनमस्कृत्यमहेश्वरम् ॥ सर्वाघौघप्रशमनींसर्वश्रेयोविधायिनीम् ॥ १२ ॥ यथापंचनदंतीर्थंकाश्यांप्रथितिमागतम् ॥ यन्नामग्रहणादेवपापंयातिसहस्रधा ॥ १३ ॥ प्रयागो पिचतीर्थेशोयत्रसाक्षात्स्वयंस्थितः ॥ पापिनांपापसंघातंप्रसह्यनिजतेजसा ॥ १४ ॥ हरंतिसर्वतीर्थानिप्रयागस्यबलेनहि ॥ तानिसर्वाणितीर्थानिमाघे मकरगेरवौ ॥ १५ ॥ प्रत्यब्दंनिर्मलानिस्युस्तीर्थराजसमागमात् ॥ प्रयागश्चापितीर्थेंद्रःसर्वतीर्थार्पितंमलम् ॥ १६ ॥ महाघिनांमहाघंचहरेत्पांचनदाद्ध

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लात् ॥ यंसंचयतिपापौघमावर्षतीर्थनायकः ॥ तमेकमज्जनादूर्जेत्यजेत्पंचनदेध्रुवम् ॥ १७ ॥ यथापंचनदोत्पत्तिस्तथाचकथयाम्यहम् ॥ निशामयम
हाभागमित्रावरुणनंदन ॥ १८ ॥ पुरावेदशिरानाममुनिरासीन्महातपाः ॥ भृगुवंशसमुत्पन्नोमूर्तोवेदइवापरः ॥ १९ ॥ तपस्यतस्तस्यमुनेःपुरोदृग्गो
चरंगता ॥ शुचिरप्सरसांश्रेष्ठारूपलावण्यशालिनी ॥ २० ॥ तंस्यादर्शनमात्रेणपरिक्षुब्धंमुनेर्मनः ॥ चस्कंदसमुनिस्तूर्णंसाधभीतावराप्सराः ॥ २१ ॥
दूरादेवनमस्कृत्यतमृषिंसाभ्यभाषत ॥ अतीववेपमानांगीशुचिस्तच्छापभीतितः ॥ २२ ॥ नापराध्नोम्यहंकिंचिन्महोग्रतपसांनिधे ॥ क्षंतव्यंमेक्षमाधार
क्षमारूपास्तपस्विनः ॥ २३ ॥ मुनीनांमानसंप्रायोयत्पद्मादपितन्मृदु ॥ स्त्रियःकठोरहृदयाःस्वरूपेणैवसत्तम ॥ २४ ॥ इतिश्रुत्वावचस्तस्याःशुचे
रप्सरसोमुनिः ॥ विवेकसेतुनास्तंभीन्महारोषनदीरयम् ॥ २५ ॥ उवाचचप्रसन्नात्माशुचेशुचिरसिध्रुवम् ॥ नमेऽल्पोपिहिदोषोत्रनतेदोषोस्तिसुंदरि ॥
॥ २६ ॥ वह्निस्वरूपाललनानवनीतसमःपुमान् ॥ अनभिज्ञावदंतीतिविचारान्महदंतरम् ॥ २७ ॥ स्निह्येदुद्धृतसारोपिवह्नेःसंस्पर्शमाप्यवै ॥ चित्रं
स्त्र्याख्यासमादानात्पुमान्स्निह्यतिदूरतः ॥ २८ ॥ अतःशुचेनभेतव्यंत्वयाशुचिमनोगते ॥ अतर्कितोपस्थितमात्वयाचस्खलितंमया ॥ २९ ॥

स्खलनान्नतथाहानिरकामात्तपसोमुनेः ॥ यथाक्षणांधीकरणाद्धानिःकोपरयादरेः ॥ ३० ॥ कोपात्तपःक्षयंयातिसंचितंयत्सुकृच्छ्रतः ॥ यथाभ्रपटलं
प्राप्यप्रकाशःपुष्पवंतयोः ॥ ३१ ॥ अनर्थकारिणःक्रोधात्कार्थानांपरिजृंभणम् ॥ क्वाखलजनोत्सेधात्साधूनांपरिवर्धनम् ॥ ३२ ॥ अमर्षेकर्षतिमनो
मनोभूसंभवःकुतः ॥ विधुंतुदेतुदत्युच्चैर्विधुंकुत्रास्तिकौमुदी ॥ ३३ ॥ ज्वलतोरोषदावाग्नेःक्वनाशांतितरोःस्थितिः ॥ दृष्टाकेनापिकिंक्वापिसिंहात्कलभसु
स्थता ॥ ३४ ॥ तस्मात्सर्वप्रयत्नेनप्रतीपःप्रतिघातुकः ॥ चतुर्वर्गस्यदेहस्यपरिहेयोविपश्चिता ॥ ३५ ॥ इदानींशृणुकल्याणिकर्तव्यंयत्त्वयाशुचे ॥
अमोघबीजाहिवयंतद्बीजमुररीकुरु ॥ ३६ ॥ एतस्मिन्रक्षितेवीर्येपरिस्कन्नेत्वदीक्षणात् ॥ त्वयातवभवित्रेकंकन्यारत्नंमहाशुचि ॥ ३७ ॥ इत्युक्तातेन
मुनिनापुनर्जातेवसाप्सराः ॥ महाप्रसादइत्युक्त्वामुनेःशुक्रमजीगिलत् ॥ ३८ ॥ अथकालेनदिव्यस्त्रीकन्यारत्नमजीजनत् ॥ अतीवनयनानंदिनिधानं
रूपसंपदाम् ॥ ३९ ॥ तस्यैववेदशिरसआश्रमेतांनिधायसा ॥ शुचिरप्सरसांश्रेष्ठाजगामचयथेप्सितम् ॥४०॥ तांचवेदशिराःकन्यांस्नेहेनसमवर्धयत् ॥
क्षीरेणस्वाश्रमस्थायाहरिण्याहरिणीक्षणाम् ॥४१॥ मुनिर्नामददौतस्यैधूतपापेतिचार्थवत् ॥ यन्नामोच्चारणेनापिकंपतेपातकावली ॥४२॥ सर्वलक्षणशो
भाढ्यांसर्वावयवसुंदरीम् ॥ मुनिस्तत्याजनोत्संगात्क्षणमात्रमपिक्वचित् ॥ ४३ ॥ दिनेदिनेवर्धमानांतांपश्यन्मुमुदेभृशम् ॥ क्षीरनीरधिवद्रम्यांनिशिचां
द्रमसींकलाम् ॥ ४४ ॥ अथाष्टवार्षिकींदृष्ट्वातांकन्यांसमुनीश्वरः ॥ कस्मैदेयेतिसंचिंत्यतामेवसमपृच्छत ॥ ४५॥ ॥ वेदशिराउवाच ॥ ॥ अयिपुत्रि
महाभागेधूतपापेशुभेक्षणे ॥ कस्मैदद्यांवरायत्वांत्वमेवाख्याहितंवरम् ॥ ४६ ॥ अतिस्नेहार्द्रचित्तस्यजनेतुश्चेतिभाषितम् ॥ निशम्यधूतपापासाप्रोवाच
विनतानना ॥ ४७ ॥ ॥ धूतपापोवाच ॥ ॥ जनेतर्यद्यहंदेयासुंदरायवरायते ॥ तदातस्मैप्रयच्छत्वंयमहंकथयामिते ॥ ४८ ॥ तुभ्यंचरोचतेतातशृणो
त्ववहितोभवान् ॥ सर्वेभ्योतिपवित्रोयोयःसर्वेषांनमस्कृतः ॥ ४९ ॥

सर्वेयमभिलष्यंतियस्मात्सर्वसुखोदयः ॥ कदाचिद्योननश्येतयःसदैवानुवर्तते ॥ ५० ॥ इहामुत्रापियोरक्षेन्महापदुदयाद्ध्रुवम् ॥ सर्वेमनोरथायस्मात्प
रिपूर्णाभवंतिहि ॥ ५१ ॥ दिनेदिनेचसौभाग्यंवर्धतेयस्यसन्निधौ ॥ नैरंतर्येणयत्सेवांकुर्वतोनभयंक्वचित् ॥ ५२ ॥ यन्नामग्रहणादेवकेपिबाधांनकुर्वते ॥
यदाधारेणतिष्ठंतिभुवनानिचतुर्दश ॥ ५३ ॥ एवमाद्यागुणायस्यवरस्यवरचेष्टितम् ॥ तस्मैप्रयच्छमांतातममतेपीहशर्मणे ॥ ५४ ॥ एतच्छ्रुत्वापि
तातस्याभृशंमुदमवापह ॥ धन्योस्मिधन्यामेपूर्वेयेषामेषासुतान्वये ॥ ५५ ॥ ध्रुवाहिधूतपापासौयस्याईदृग्विधामतिः ॥ ईदृग्विधैर्गुणगणैर्गरिम्णाको
त्रवैभवेत् ॥ ५६ ॥ अथवासकथंलभ्योविनापुण्यभरोदयम् ॥ इतिक्षणंसमाधायमनःसमुनिपुंगवः ॥ ५७ ॥ ज्ञानेनतंसमालोच्यवरमीदृग्गुणोदयम् ॥
धन्यांकन्यांबभाषेथशृणुवत्सेशुभैषिणि ॥ ५८ ॥ ॥ पितोवाच ॥ ॥ वरस्ययेत्वयाप्रोक्तागुणाएतेविचक्षणे ॥ एषांगुणानामाधारोवरोस्तीतिविनि
श्चितम् ॥ ५९ ॥ परंससुखलभ्योननितरांसुभगाकृतिः ॥ तपःपणेनसक्रय्यःसुतीर्थविपणौक्वचित् ॥ ६० ॥ नार्थभारैःससुलभोनकौलीन्येनकन्यके ॥
नवेदशास्त्राभ्यसनैर्नचैश्वर्यबलेनवै ॥ ६१ ॥ नसौंदर्येणवपुषानबुद्ध्यानपराक्रमैः ॥ एकयैवमनःशुद्ध्याकरणानांजयेनच ॥ ६२ ॥ महातपः
सहायेनदमदानदयायुजा ॥ लभ्यतेसमहाप्राज्ञोनान्यथासदृशःपतिः ॥ ६३ ॥ इतिश्रुत्वाथसाकन्यापितरंप्रणिपत्यच ॥ अनुज्ञांप्रार्थयामासतपसेकृत
निश्चया ॥ ६४ ॥ ॥ स्कंदउवाच ॥ ॥ कृतानुज्ञाजनेत्रासाक्षेत्रेपरमपावने ॥ तपस्ततापपरमंयदसाध्यंतपस्विभिः ॥ ६५ ॥ क्वसाबालातिमृद्वंगी
क्वचतत्तादृशंतपः ॥ कठोरवर्ष्मसंसाध्यमहोसच्चेतसोधृतिः ॥ ६६ ॥ धारासारासुवर्षासुमहावातवतीष्वलम् ॥ शिलासुसावकाशासुसाबह्वीरनय
न्निशाः ॥ ६७ ॥ श्रुत्वागर्जरवंघोरंदृष्ट्वाविद्युच्चमत्कृतीः ॥ आसारसीकरैःक्लिन्नानचकंपेमनाक्चसा ॥ ६८ ॥ तडित्स्फुरंतीत्वसकृत्तमिस्रासुतपोवने ॥
यातायातंकरोतीवद्रष्टुंतत्तपसःस्थितिम् ॥६९॥ तपर्तुरेवसाक्षाच्चकुमारीकैतवात्किल॥पंचाग्नीन्परिधायात्रतपस्यतितपोवने॥७०॥ जलाभिलाषिणीबा
लानमनागपिसापिबत्॥कुशाग्रतोयपृषतंपंचाग्निपरितापिता॥७१॥रोमांचकंचुकवतीवेपमानतनुच्छदा॥पर्यक्षिपत्क्षपाःक्षामातपसाहैमनीश्वसा ॥७२॥
निशीथिनीपुशिशिरेश्रयंतीसारसंरसम् ॥ मेनेसासारसैःकेयमुद्यताद्येतिपद्मिनी ॥ ७३ ॥ मनस्विनामपिमनोरागतांसृजतेमधौ ॥ तदोष्ठपल्लवाद्रागो
जह्रेमाकंदपल्लवैः ॥ ७४ ॥ वसंतेनिवसंतीसावनेबालाचलंमनः ॥ चक्रेतपस्यपिश्रुत्वाकोकिलाकाकलीरवम् ॥ ७५ ॥ बंधुजीवेऽधररुचिंकलहंसे
कलागतीः ॥ निक्षेपमिवसाक्षिप्त्वाशरद्यासीत्तपोरता ॥ ७६ ॥ अपास्तभोगसंपर्काभोगिनांवृत्तिमाश्रिता ॥ क्षुदुद्बोधनिरोधायधूतपापातपस्विनी ॥
॥ ७७ ॥ शाणेनमणिवल्लीढाकृशाप्यायादनर्घताम् ॥ तथापितपसाक्षामादिदीपेतत्तनुस्तराम् ॥ ७८ ॥ निरीक्ष्यतांतपस्यंतींविधिःसंशुद्धमानसाम् ॥
उपेत्योवाचसुप्रज्ञेप्रसन्नोस्मिवरंवृणु ॥ ७९ ॥ साचतुर्वक्त्रमालोक्यहंसयानोपरिस्थितम् ॥ प्रणम्यप्रांजलिःप्रीताप्रोवाचाथप्रजापतिम् ॥ ८० ॥ ॥
धूतपापोवाच ॥ ॥ पितामहवरोमह्यंयदिदेयोवरप्रद ॥ सर्वेभ्यःपावनेभ्योपिकुरुमामतिपावनीम् ॥ ८१ ॥ स्रष्टातदिष्टमाकर्ण्यनितरांतुष्टमानसः ॥
प्रत्युवाचाथतांबालांविमलांविमलैषिणीम् ॥ ८२ ॥ ॥ ब्रह्मोवाच ॥ ॥ धूतपापेपवित्राणियानिसंत्यत्रसर्वतः ॥ तेभ्यःपवित्रमतुलंत्वमेधिवरतो
मम ॥ ८३ ॥ तिस्रःकोट्योऽर्धकोटीचसंतितीर्थानिकन्यके ॥ दिविभुव्यंतरिक्षेचपावनान्युत्तरोत्तरम् ॥ ८४ ॥ तानिसर्वाणितीर्थानित्वत्तनौप्र
तिलोमवै ॥ वसंतुममवाक्येनभवसर्वातिपावनी ॥ ८५ ॥ इत्युक्त्वांतर्दधेवेधाःसापिनिर्धूतकल्मषा ॥ धूतपापोटजंप्राप्ताथोवेदशिरसःपितुः ॥ ८६ ॥
कदाचित्तांसमालोक्यखेलंतीमुटजाजिरे ॥ धर्मस्तत्तपसाकृष्टःप्रार्थयामासकन्यकाम् ॥ ८७ ॥ ॥धर्मउवाच ॥ ॥ पृथुश्रोणिविशालाक्षिक्षामोदरि
शुभानने ॥ क्रीतःस्वरूपसंपत्त्यात्वयाहंदेहिमेरहः ॥ ८८ ॥ नितरांबाधतेकामस्त्वत्कृतेमांसुलोचने ॥ अज्ञातनाम्नासातेनप्रार्थितेत्यसकृद्वहः ॥ ८९ ॥
उवाचसापितादातातंप्रार्थयसुदुर्मते ॥ पितृप्रदेयायत्कन्याश्रुतिरेषासनातनी ॥ ९० ॥ निशम्येतिवचोधर्मोभाविनोर्थस्यगौरवात् ॥ पुनर्निर्बंधयांचक्रे
ऽपधृतिर्धृतिशालिनीम् ॥ ९१ ॥ ॥ धर्मउवाच ॥ ॥ नप्रार्थयेहंसुभगेपितरंतवसुंदरि ॥ गांधर्वेणविवाहेनकुरुमेत्वंसमीहितम् ॥ ९२ ॥ इतिनिर्बं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धवद्वाक्ष्यसानिशाम्यकुमारिका ॥ पितुःकन्याफलंदेहसुःपुनरावेतितंद्विजम् ॥ ९३ ॥ अरेजडमतेमात्वंपुनर्ग्रहीतियाद्यतः ॥ इत्युक्तोपिकुमार्यासनातिधुन्मदनातुरः ॥ ९४ ॥ ततःशशापतंबालाप्रबलातपसोबलात् ॥ जडोसिनितरांयस्माज्जलाधारोनदोभव ॥ ९५ ॥ इतिशप्तस्तयासोथतां शशापकुपान्वितः ॥ कठोरहृदयेत्वंतुशिलाभवसुदुर्मते ॥ ९६ ॥ ॥ स्कंदउवाच ॥ ॥ इत्यन्योन्यस्यशापेनमुनेधर्मोनदोऽभवत् ॥ अविमुक्तेमहाक्षेत्रेख्यातोधर्मनदोमहान् ॥ ९७ ॥ साप्याहपितरंत्रस्तास्वशिलात्वस्यकारणम् ॥ ध्यानेनधर्मविज्ञायमुनिःकन्यामथाब्रवीत् ॥ ९८ ॥ माभैःपुत्रिकरिष्यामितवसर्वशुभोदयम् ॥ तच्छापोनान्यथाभूयाच्चंद्रकांतशिलाभव ॥ ९९ ॥ चंद्रोदयमनुप्राप्यद्रवीभूततनुस्ततः ॥ धुनीभवसुतेसाध्विधूतपापेतिविश्रुता ॥ १०० ॥ सचधर्मनदःकन्येतवभर्तासुशोभनः ॥ तैर्गुणैःपरिपूर्णांगोयेगुणाःप्रार्थितास्त्वया ॥ १ ॥ अन्यच्चशृणुसद्भक्तेममापितपसोबलात् ॥ द्वैरूप्यंभवतोभावीप्राकृतंचद्रवंचवै ॥ २ ॥ इत्याश्वास्यपिताकन्यांधूतपापांपरंतप ॥ चंद्रकांतशिलाभूतामनुजग्राहबुद्धिमान् ॥३॥ तदारभ्यमुनेकाश्यांख्यातोधर्मनदोह्रदः ॥ धर्मोद्रवस्वरूपेणमहापातकनाशनः ॥ ४ ॥ धुनीचधूतपापासासर्वतीर्थमयीशुभा ॥ हरेन्महाघसंघातान्कूलजानिवपादपान् ॥ ॥ ५ ॥ तत्रधर्मनदेतीर्थेधूतपापासमन्विते ॥ यदानस्वर्धुनीतत्रतदाब्रह्मन्नस्तपोव्ययात् ॥ ६ ॥ गभस्तिमालीभगवान्गभस्तीश्वरसन्निधौ ॥ शीलयन्मंगलांगौरींतपउग्रंचचारह ॥ ७ ॥ नाम्नामयूखादित्यस्यतीर्थेतत्रतपस्यतः ॥ किरणेभ्यःप्रववृतेमहास्वेदोतिखेदतः ॥ ८ ॥ किरणेभ्यःप्रवृत्तायामहास्वेदस्यसंततिः ॥ ततःसाकिरणानामजातापुण्यातरंगिणी ॥९॥ महापापांधतमसंकिरणाख्यातरंगिणी॥ ध्वंसयेत्स्नानमात्रेणमिलिताधृतपापया ॥११०॥ आदौधर्मनदःपुण्योमिश्रितोधृतपापया ॥ ययाधूतानिपापानिसर्वतीर्थीकृतात्मना ॥ ११ ॥ ततोपिमिलितागत्यकिरणारविणेधिता ॥ यन्नामस्मरणादेवगहामोहांधतांत्रजेत् ॥१२॥ किरणाधूतपापेचतस्मिन्धर्मनदेशुभे ॥ स्नवंत्योपापसंहर्त्र्योवाराणस्यांशुभद्रवे ॥ १३ ॥ ततोभागीरथीप्राप्तातेनदैलीपिनासह ॥ भागीरथीसमायातायमुनाचसरस्वती ॥ १४ ॥ किरणाधूतपापाचपुण्यतोयासरस्वती ॥ गंगाचयमुनाचैवपंचनद्योत्रकीर्तिताः ॥ १५ ॥ अतःपंचनदंनामतीर्थत्रैलोक्यविश्रुतम् ॥ तत्राप्लुतोनगृह्णीयादेहंनापापांचभौतिकम् ॥ १६ ॥ अस्मिन्पंचनदीनांचसंभेदोघोघभेदिनि ॥ स्नानमात्रात्प्रयात्येवभित्वाब्रह्मांडमंडपम् ॥ १७॥ तीर्थानिसंतिभूरीणिकाश्यामत्रपदेपदे ॥ नपंचनदतीर्थस्यकोटचंशेनसमान्यपि ॥ १८ ॥ प्रयागेमाघमासेतुसम्यक्स्नातस्ययत्फलम् ॥ तत्फलंस्याद्दिनेकेनकाश्यांपंचनदेध्रुवम् ॥ १९ ॥ स्नात्वापंचनदेतीर्थेकृत्वाचपितृतर्पणम् ॥ बिंदुमाधवमभ्यर्च्यनभूयोजन्ममाग्भवेत् ॥ १२० ॥ यावत्संख्यास्तिलादत्ताःपितृभ्योजलतर्पणे ॥ पुण्येपंचनदेतीर्थेतृप्तिःस्यात्तावदाब्दिकी ॥ २१ ॥ श्रद्धयायेःकृतंश्राद्धंतीर्थेपंचनदेशुभे ॥ तेषांपितामहासुक्तानानायोनिगताअपि ॥ २२ ॥ यमलोकेपितृगणेगीर्थेयंपरिगीयते ॥ महिमानंपांचनदंदृष्ट्वाश्राद्धविधानतः ॥२३॥ अस्माकमपिवंश्योत्रकश्चिच्छ्राद्धंकरिष्यति ॥ काश्यांपंचनदंप्राप्याप्येनमुच्यामहेवयम् ॥ २४ ॥ इयंगाथाप्रतिदिनंश्राद्धदेवस्यसन्निधौ ॥ पितृभिःपरिगीयेतकाश्यांपंचनदंप्रति ॥ २५ ॥ तत्रपंचनदेतीर्थेयत्किंचिद्दीयतेवसु ॥ कल्पक्षयेपिनभवेत्तस्यपुण्यस्यसंक्षयः ॥२६॥ वंध्यापिवर्षपर्यंतंस्नात्वापंचनदेह्रदे ॥ समर्च्यमंगलांगौरींपुत्रंजनयतिध्रुवम् ॥ २७ ॥ जलैःपांचनदैःपुण्यैर्वाससापरिशोधितैः ॥ महाफलमवाप्नोतिस्नपयित्वेष्टदेवताम् ॥ २८ ॥ पंचामृतानांकलशैरष्टोत्तरशतोन्मितैः ॥ तुलितोधिकतांयातोबिंदुःपंचनदांभसः ॥२९॥ पंचकूर्चेनपीतेनयात्रशुद्धिरुदाहृता ॥ साशुद्धिःश्रद्धयाप्राप्यबिंदुंपांचनदांभसः ॥ १३० ॥ भवेदवभृथस्नानाद्राजसूयाश्वमेधयोः ॥ यत्फलंतच्छतगुणंस्नानात्पांचनदांभसा ॥३१॥ राजसूयाश्वमेधौचभवेतांस्वर्गसाधनम् ॥ आब्रह्मवटिकाद्वंद्वंमुक्तयेपांचनदाप्लुतिः ॥३२॥ स्वर्गराज्याभिषेकोपिनतथासंमतःसताम् ॥ अभिषेकःपांचनदोयथानल्पसुखप्रदः ॥३३॥ वरंवाराणसींप्राप्यभृत्यःपंचनदांभसाम् ॥ नान्यत्रसेवकीभूतभूपकोटिनरेश्वरः ॥ ३४ ॥

ऊर्गपंचनदेस्नातंकार्तिकेपापहारिणि ॥ तेऽद्यापिगर्भेतिष्ठंतिपुनस्तेगर्भवासिनः ॥ ३५ ॥ कृतेधर्मनदंनाम्नात्रेतायांधूतपापकम् ॥ द्वापरेबिंदुतीर्थंचकलौपंचनदंस्मृतम् ॥ ३६ ॥ शतंसमास्तपस्तप्त्वाकृतेयत्प्राप्यतेफलम् ॥ तत्कार्तिकेपंचनदेसकृत्स्नानेनलभ्यते ॥ ३७ ॥ इद्यापूर्तेपुधर्मेपुयावज्जन्मकृतेभुयात् ॥ अन्यत्रस्यात्फलंतत्स्याद्यूर्जेधर्मनदाप्लवात् ॥ ३८ ॥ नधूतपापसदृशंतीर्थंक्वापिमहीतले ॥ यदेकस्नानतोनश्येदघंजन्मत्रयार्जितम् ॥ ३९ ॥ बिंदुतीर्थेनरोदत्त्वाकांचनंकृष्णलोन्मितम् ॥ नदरिद्रोभवेत्क्वापिनस्वर्णेनवियुज्यते ॥ १४० ॥ गोभूतिलहिरण्याश्ववासोन्नस्विभूषणम् ॥ यत्किंचिद्बिंदुतीर्थेत्रदत्त्वाक्षयमवाप्नुयात् ॥ ४१ ॥ एकामप्याहुतिंदत्त्वासमिद्धेग्नौविधानतः ॥ पुण्येधर्मनदेतीर्थेकोटिहोमफलंलभेत् ॥ ४२ ॥ नपंचनदतीर्थस्यमहिमानमनंतकम् ॥ कोपिवर्णयितुंशक्तश्चतुर्वर्गशुभौकसः ॥ ४३ ॥ श्रुत्वाख्यानमिदंपुण्यंश्रावयित्वापिभक्तितः ॥ सर्वपापविशुद्धात्माविष्णुलोकेमहीयते ॥ ४४ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेपंचनदाविर्भावोनामैकोनपष्टितमोऽध्यायः ॥ ५९ ॥

स्कंदउवाच ॥ ॥ उक्तापंचनदोत्पत्तिर्मित्रावरुणनंदन ॥ इदानींकथयिष्यामिमाधवाविष्कृतिंपराम् ॥ १ ॥ यांश्रुत्वाश्रद्धयाधीमान्पापेभ्योमुच्यतेक्षणात् ॥ नचश्रियावियुज्येतसंयुज्येतवृषेणच ॥ २ ॥ आगत्यमंदराद्रेरुपेंद्रश्चंद्रशेखरम् ॥ आपृच्छ्यताक्ष्यरथगःक्षणाद्वाराणसींपुरीम् ॥ ३ ॥ दिवोदासंमहीपालंसमुचाव्यस्वमायया ॥ स्थित्वापादोदकेतीर्थेकेशवाख्यस्वरूपतः ॥ ४ ॥ महिमानंपरंकाश्यांविचार्यनुविचार्यच ॥ दृष्ट्वापंचनदंतीर्थंपरांमुदमवापह ॥ ५ ॥ उवाचचप्रसन्नात्मापुंडरीकविलोचनः ॥ अगण्याअपिवेकुंठगुणाविगणिताममा ॥ ६ ॥ क्षीरनीरधेःसंतितावंतोनिर्मलागुणाः ॥ यावंतोविजयंतेत्रकाश्यांपंचनदेह्रदे ॥ ७ ॥ श्वेतद्वीपेपिसामग्रीकगुणानांगरीयसी ॥ ईदृशीयादृशीकाश्यांधूतपापेस्तिपावनी ॥ ८ ॥ मुदेकोमोदकीस्पर्शस्तथानममजायते ॥ धूतपापांशुसंपर्कोयथाभवतिसर्वथा ॥ ९ ॥ नक्षीरनीरधिजयासुखमेलिष्टगात्रया ॥ तथाभवेद्यथात्रस्यात्स्पृष्ट्याधूतपापया ॥ १० ॥ इत्थंपंचनदेतीर्थेक्षीरनीरधिजाधवः ॥ संप्रेष्यताक्ष्यंव्यक्षाग्रेवृत्तांतंविनिवेदितुम् ॥ ११ ॥ आनंदकाननभवंदिवोदासक्षमापतेः ॥ संवर्णयन्गुणग्रामंपुण्यंपांचनदोद्भवम् ॥ १२ ॥ सुखोपविष्टःसंहृष्टःमुदृष्टिर्विप्रश्रवाः ॥ दृष्ट्वांस्तपसाजुष्टमपुर्यांगंतपोधनम् ॥ १३ ॥

सत्रूपित्तंसमभ्येत्यपुंडरीकाक्षमच्युतम् ॥ उपोपविष्टकमलंवनमालाविराजितम् ॥ १४ ॥ शंखपद्मगदाचक्रचंचत्करचतुष्टयम् ॥ कौस्तुभोद्भासितोरस्कंपीतकौशेयवाससम् ॥ १५ ॥ मुनीलेंदीवरुरुचिंसुस्निग्धमुरुाकृतिम् ॥ नाभीह्रदलसत्पद्मसुपाटलरदच्छदम् ॥ १६ ॥ दाडिमीबीजदशनंकिरीटद्योतितांबरम् ॥ देवेंद्रवंदितपदंसनकादिपरिष्टुतम् ॥ १७ ॥ दिव्यर्षिभिर्नारदाद्यैःपरिगीतमहोदयम् ॥ प्रह्लादाद्यैर्भागवतैःपरिनंदितमानसम् ॥ १८ ॥ धृतशार्ङ्गघनुर्दंडंदंडिताखिलदानवम् ॥ मधुकैटभहंतारंकंसविध्वंसमूचकम् ॥ १९ ॥ कैवल्यंयत्परंब्रह्मनिराकारमगोचरम् ॥ तत्पुंमूर्त्यापरिणतंभक्तानांभक्तिहेतुतः ॥२०॥ वेदाविदुर्यदाकारंनैवोपनिषदोदितम् ॥ ब्रह्माद्यानचगीर्वाणाश्चक्रेनेत्रातिथिंसतम् ॥२१॥ प्रणनामसुदायुक्तःक्षितिविन्यस्तमस्तकः ॥ सत्रूपित्तंहृषीकेशमग्निर्विंदुमहातपाः ॥ २२ ॥ तुष्टावपरयाभक्त्यामौलिबद्धकरांजलिः ॥ अध्यस्तविस्तीर्णशिलंवलिध्वंसिनमच्युतम् ॥ २३ ॥ तत्रपंचनदाभ्याशेमार्कंडेयादिसेविते ॥ गोविंदमग्निर्विंदुःसस्तुतवांस्तुष्टमानसः ॥ २४ ॥ ॥ अग्निर्विंदुरुवाच ॥ ॥ ओंनमःपुंडरीकाक्षबाह्यांतःशौचदा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यिने ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ २५ ॥ नमामितेपदद्वंद्वंसर्वद्वंद्वनिवारकम् ॥ निर्द्वंद्वयाधियाविष्णोजिष्ण्वादिसुरवंदित ॥ २६ ॥ यंस्तोतुंनाधिगच्छंतिवाचोवाचस्पतेरपि ॥ तमीष्टेकइहस्तोतुंभक्तिरत्रबलीयसी ॥ २७ ॥ अपियोभगवानीशोमनःप्राचामगोचरः ॥ समादृशैरल्पधीभिःकथंस्तुत्योवचःपरः ॥ २८ ॥ यंवाचोनविशंतीशंमनतीहमनोनयम् ॥ मनोगिरामतीतंतंकःस्तोतुंशक्तिमान्भवेत् ॥ २९ ॥ यस्यनिःश्वसितंवेदाःसषडंगपदक्रमाः ॥ तस्यदेवस्यमहिमामहान्कैरवगम्यते ॥ ३० ॥

अतंद्रितमनोबुद्धींद्रियायंसनकादयः ॥ ध्यायंतोपिहृदाकाशेनविंदंतियथार्थतः ॥ ३१ ॥ नारदाद्यैर्मुनिवरैराबालब्रह्मचारिभिः ॥ गीयमानचरित्रोपिनसम्यग्योधिगम्यते ॥ ३२ ॥ तंसूक्ष्मरूपमजमव्ययमेकमाद्यंब्रह्माद्यगोचरमजेयमनंतशक्तिम् ॥ नित्यंनिरामयममूर्तमचिंत्यमूर्तिंकस्त्वांचराचरचराचरभिन्नवेत्ति ॥ ३३ ॥ एकैकमेवतवनामहरेन्मुरारेजन्मार्जिताघमघिनांचमहापदाढ्यम् ॥ दद्यात्फलंचमहितंमहतोमखस्यजप्तंमुकुंदमधुसूदनमाधवेति ॥ ३४ ॥ नारायणेतिनरकार्णवतारणेतिदामोदरेतिमधुहेतिचतुर्भुजेति ॥ विश्वंभरेतिविरजेतिजनार्दनेतिक्वास्तीहजन्मजपतांक्वकृतांतभीतिः ॥ ३५ ॥ येत्वांत्रिविक्रमसदाहृदिशीलयंतिकादंबिनीरुचिररोचिषमंबुजाक्षम् ॥ सौदामनीविलसितांशुकवीतमूर्तेतेपिस्पृशंतितवकांतिमचिंत्यरूपाम् ॥ ३६ ॥ श्रीवत्सलांछनहरेच्युतकैटभारेगोविंदतार्क्ष्यरथकेशवचक्रपाणे ॥ लक्ष्मीपतेदनुजसूदनशार्ङ्गपाणेत्वद्भक्तिभाजिनभयंक्वचिदस्तिपुंसि ॥३७॥ यैरर्चितोसिभगवंस्तुलसीप्रसूनैर्दूरीकृतैणमदसौरभदिव्यगंधैः ॥ तानर्चयंतिदिविदेवगणाःसमस्तामंदारदामभिरलंविमलस्वभावान् ॥ ३८ ॥ यद्वाचिनामतवकामदमब्जनेत्रयच्छ्रोत्रयोस्तवकथामधुराक्षराणि ॥ यच्चित्तभित्तिलिखितंभवतोस्तिरूपंनीरूपभूपपदवीनहितैर्दुरापा ॥ ३९ ॥ येत्वांभजंतिसततंभुविशेषशायिंस्ताञ्छ्रीपतेपितृपतींद्रकुबेरमुख्याः ॥ वृंदारकादिविसदैवसभाजयंतिस्वर्गापवर्गसुखसंततिदानदक्ष ॥ ४० ॥ येत्वांस्तुवंतिसततंदिवितान्स्तुवंतिसिद्धाप्सरोमरगणालसदब्जपाणे ॥ विश्राणयत्यखिलसिद्धिदकोविनात्वांनिर्वाणचारुकमलांकमलायताक्ष ॥ ४१ ॥ त्वंहंसिपासिसृजसिक्षणतःस्वलीलालीलावपुर्धरविरिंचिनतांघ्रियुग्म ॥ विश्वंत्वमेवपरविश्वपतिस्त्वमेवविश्वस्यबीजमसितत्प्रणतोस्मिनित्यम् ॥ ४२ ॥

स्तोतात्वमेवदनुजेंद्ररिपोस्तुतिस्त्वंस्तुत्यस्त्वमेवसकलंहिभवानिहैकः ॥ त्वत्तोनकिंचिदपिभिन्नमवैमिविष्णोतृष्णांसदाकृणुहिमेभवजांभवारे ॥ ४३ ॥ इतिस्तुत्वाहृषीकेशमग्निबिंदुर्महातपाः ॥ तस्थौतूष्णींततोविष्णुरुवाचवरदोमुनिम् ॥ ४४ ॥ श्रीविष्णुरुवाच ॥ अग्निबिंदोमहाप्राज्ञमहतांतपसांनिधे ॥ वरंवरयसुप्रीतस्तवादेयंनकिंचन ॥४५॥ अग्निबिंदुरुवाच ॥ ॥ यदिप्रीतोसिभगवन्वैकुंठेशजगत्पते ॥ कमलाकांततद्देहियदिहप्रार्थयाम्यहम् ॥ ॥ ४६ ॥ कृतानुज्ञोथहरिणाभ्रूभंगेनसतापसः ॥ कृतप्रणामोहृष्टात्मावरयामासकेशवम् ॥ ४७ ॥ भगवन्सर्वगोपीहतिष्ठपंचनदेह्रदे ॥ हितायसर्वजंतूनांमुमुक्षूणांविशेषतः ॥ ४८ ॥ लक्ष्मीशेनवरोमह्यमेषदेयोऽविचारतः ॥ नान्यंवरंसमीहेहंभक्तिंचत्वपदांबुजे ॥ ४९ ॥ इतिश्रुत्वावरंतस्याग्निबिंदोर्मधुसूदनः ॥ प्रीतःपरोपकारार्थंतथेत्याहाब्धिजापतिः ॥ ५० ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अग्निबिंदोमुनिश्रेष्ठस्थास्याम्यहमिहध्रुवम् ॥ काशीभक्तिमतांपुंसांमुक्तिमार्गंसमादिशन् ॥ ५१ ॥ मुनेपुनःप्रसन्नोस्मिवरंब्रूहिददामिते ॥ अतीवममभक्तोसिभक्तिस्तेस्तुदृढामयि ॥ ५२ ॥ आदावेवहितिष्ठासुरहमत्रतपोनिधे ॥ ततस्त्वयासमभ्यर्थिस्थास्याम्यत्रसदैवहि ॥ ५३ ॥ प्राप्यकाशींसुदुर्मेधाःकस्त्यजेज्ज्ञानवान्यदि ॥ अनर्घ्यंप्राप्यमाणिक्यंहित्वाकाचंकईहते ॥ ५४ ॥ अल्पीयसाश्रमेणेहवपुषोव्ययमात्रतः ॥ अवश्यंगत्वरस्याशुयथामुक्तिस्तथाक्वहि ॥ ५५ ॥ विनिमय्यजराजीर्णंदेहंपार्थिवमत्रवै ॥ प्राज्ञाःकिमुनगृह्णीयुरमृतंनैर्जरंवपुः ॥ ५६ ॥ नतपोभिर्नवादानैर्नयज्ञैर्बहुदक्षिणैः ॥ अन्यत्रलभ्यतेमोक्षोयथाकाश्यांतनुव्ययात् ॥ ५७ ॥ अपियोगंहियुंजानायोगिनोयतमानसाः ॥ नैकेनजन्मनामुक्ताःकाश्यांमुक्तावपुर्व्ययात् ॥ ५८ ॥ इदमेवमहादानमिदमेवमहत्तपः ॥ इदमेवव्रतंश्रेष्ठंयत्काश्यांम्रियतेतनुः ॥ ५९ ॥ सएवविद्वाञ्जगतिसएवविजितेंद्रियः ॥ सएवपुण्यवान्धन्योलब्ध्वाकाशींनयस्त्यजेत् ॥ ६० ॥ तावत्स्थास्याम्यहंचात्रयावत्काशीमुनेत्विह ॥ प्रलयेपिननाशोस्याःशिवशूलाग्रसुस्थितेः ॥ ६१ ॥ इत्याकर्ण्यगिरंविष्णोरग्निबिंदुर्महामुनिः ॥ प्रहृष्टरोमाप्रोवाचपुनरन्यंवरंवृणे ॥ ६२ ॥ मापतेममनाम्नात्रतीर्थेपंचनदेशुभे ॥ अभक्तेभ्योपिभक्तेभ्यःस्थितोमुक्तिंसदादिश ॥ ६३ ॥ येत्रपंचनदेस्नात्वागत्वादेशांतरेष्वपि ॥ नराःपंचत्वमापन्नामुक्तिंतेभ्योपिवैदिश ॥ ६४ ॥ येतुपंचनदेस्नात्वात्वांभजिष्यंतिमानवाः ॥ चलाचलापिद्वैरूपामात्याक्षीच्छ्रीश्चतान्नरान् ॥ ६५ ॥

॥ श्रीविष्णुरुवाच ॥ ॥ एवमस्त्वग्निबिंदोत्रभवतायद्वृतंमुने ॥ त्वन्नाम्नोऽर्धेनमेनाममयासहभविष्यति ॥६६॥ बिंदुमाधवइत्याख्याममत्रैलोक्यविश्रुता ॥ काश्यांभविष्यतिमुनेमहापापौघघातिनी ॥ ६७ ॥ येमामत्रनराःपुण्याःपुण्येपंचनदेह्रदे ॥ सदासपर्ययिष्यंतितेषांसंसारभीःकुतः ॥ ६८ ॥ वसुस्वरूपिणीलक्ष्मीर्लक्ष्मीर्निर्वाणसंज्ञिका ॥ तत्पार्श्वगासदायेषांहृदिपंचनदेह्यहम् ॥ ६९ ॥ यैर्नपंचनदंप्राप्यवसुभिःप्रीणिताद्विजाः ॥ आशुलभ्यविपत्तीनांतेषांतद्वसुरोदिति ॥ ७० ॥ तएवधन्यालोकेस्मिन्कृतकृत्यास्तएवहि ॥ प्राप्ययैर्ममसांनिध्यंवसवोममसात्कृताः ॥ ७१ ॥ बिंदुतीर्थमिदंनामतवनाम्नाभविष्यति ॥ अग्निबिंदोमुनिश्रेष्ठसर्वपातकनाशनम् ॥ ७२ ॥ कार्तिकेबिंदुतीर्थेयोब्रह्मचर्यपरायणः ॥ स्नास्यत्यनुदितेभानौभानुजात्तस्यभीःकुतः ॥७३॥ अपिपापसहस्राणिकृत्वामोहेनमानवः ॥ ऊर्जेधर्मनदेस्नातोनिष्पापोजायतेक्षणात् ॥ ७४ ॥ यावत्स्वस्थोस्तिदेहोयंयावन्नेंद्रियविक्लवः ॥ तावद्व्रतानिकुर्वीतयतोदेहफलंव्रतम् ॥ ७५ ॥ एकभक्तेननक्तेनतथैवायाचितेनच ॥ उपवासेनदेहोयंसंशोध्योशुचिभाजनम् ॥ ७६ ॥ कृच्छ्रचांद्रायणादीनिकर्तव्यानिप्रयत्नतः ॥ अशुचिःशुचितामेतिकायोयद्व्रतधारणात् ॥ ७७ ॥ व्रतैःसंशोधितेदेहेधर्मोवसतिनिश्चलः ॥ अर्थकामौसनिर्वाणौतत्रयत्रवृषस्थितिः ॥ ७८ ॥ तस्माद्व्रतानिसततंचरितव्यानिमानवैः ॥ धर्मसान्निध्यकर्तॄणिचतुर्वर्गफलेप्सुभिः ॥ ७९ ॥ सदाकर्तुंनशक्नोतिव्रतानियदिमानवः ॥ चातुर्मास्यमनुप्राप्यतदाकुर्यात्प्रयत्नतः ॥ ८० ॥ भूशय्याब्रह्मचर्यंचकिंचिद्भक्ष्यनिषेधनम् ॥ एकभक्तादिनियमोनित्यदानंस्वशक्तितः ॥ ८१ ॥ पुराणश्रवणंचैवतदर्थाचरणंपुनः ॥ अखंडदीपोद्बोधश्चमहापूजेष्टदैवते ॥ ८२ ॥ प्रभूतांकुरबीजाढ्येदेशेचापिगतागतम् ॥ यत्नेनवर्जयेद्धीमान्महाधर्मविवृद्धये ॥ ८३ ॥ असंभाष्यानसंभाष्याश्चातुर्मास्यव्रतस्थितैः ॥ मौनंचापिसदाकार्यंतथ्यंवक्तव्यमेववा ॥८४॥ निष्पावांश्चमसूरांश्चकोद्रवान्वर्जयेद्व्रती ॥ सदाशुचिभिरास्थेयंस्प्रष्टव्योनाव्रतीजनः ॥ ८५ ॥ दंतकेशांबरादीनिनित्यंशोध्यानियत्नतः ॥ अनिष्टचिंतानोकार्याव्रतिनाहृद्यपिक्वचित् ॥ ८६ ॥ द्वादशस्वपिमासेषुव्रतिनोयत्फलंभवेत् ॥ चातुर्मास्यव्रतभृतांतत्फलंस्यादखंडितम् ॥ ८७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्ष्वपिचमासेषुनसामर्थ्यंव्रतेयदि ॥ तदोर्जेव्रतिनाभाव्यमप्यब्दफलमिच्छता ॥ ८८ ॥ अव्रतःकार्तिकोयेषांगतोमूढधियामिह ॥ तेषांपुण्यस्यलेशो
पिनभवेत्सूकरात्मनाम् ॥ ८९ ॥ कृच्छ्रंवाचातिकृच्छ्रंवाप्राजापत्यमथापिवा ॥ संप्राप्तेकार्तिकेमासिकुर्याच्छक्त्यातिपुण्यवान् ॥ ९० ॥ एकांतरंव्रतं
कुर्याच्चिरात्रव्रतमेववा ॥ पंचरात्रंसप्तरात्रंसंप्राप्तेकार्तिकेव्रती ॥ ९१ ॥ पक्षव्रतंवाकुर्वीतमासोपोषणमेववा ॥ नोर्जोवंध्योविधातव्योव्रतिनाकेनचित्क
चित् ॥ ९२ ॥ शाकाहारंपयोहारंफलाहारमथापिवा ॥ चरेद्यवान्नाहारंवासंप्राप्तेकार्तिकेव्रती ॥९३॥ नित्यंनैमित्तिकंस्नानंकुर्यादूर्जेव्रतीनरः ॥ ब्रह्मचर्यं
चरेदूर्जेमहाव्रतफलार्थवान् ॥ ९४ ॥ बाहुलंब्रह्मचर्येणयःक्षिपेच्छुचिमानसः ॥ समस्तंहायनंतेनब्रह्मचर्यंकृतंभवेत् ॥९५॥ यस्तुकार्तिकिकंमासमुपवासैः
समापयेत् ॥ अप्यब्दमपितेनेहभवेत्सम्यगुपोषितम् ॥ ९६ ॥ शाकाहारपयोहारैरूर्जोयैरतिवाहितः ॥ अखंडिताशस्तेनतदाहारेणयापिता ॥ ९७ ॥
पत्रभोजीभवेदूर्जेकांस्यंत्याज्यंप्रयत्नतः ॥ योव्रतीकांस्यभोजीस्यान्नतद्व्रतफलंलभेत् ॥९८॥ कांस्यस्यनियमेदद्यात्कांस्यंसर्पिःप्रपूरितम् ॥ ऊर्जेनभक्षये
त्क्षौद्रमतिक्षुद्रगतिप्रदम् ॥ ९९ ॥ मधुत्यागेघृतंदद्यात्पायसंचसशर्करम् ॥ अभ्यंगेऽभ्यवहारेचतैलमूर्जेविवर्जयेत् ॥१००॥ भूयात्सनारकीदेहीतत्राभ्यं
गाद्यतोनघ ॥ तैलत्यागेतिलान्दद्याद्द्रोणमात्रान्सकांचनान् ॥ १ ॥ कार्तिकेमत्स्यभोजीयःसतैर्मीयोनिमृच्छति ॥ बाहुलेमांसभोजीयःसकृमिःपूयशो
णिते ॥ २ ॥ मांसाशिनोपियेभूपास्त्यजेयुस्तेपिकार्तिके ॥ मत्स्यमांसानिसंत्यज्यकार्तिकेव्रततत्परः ॥ ३ ॥ मत्स्यमांसादनाद्दोषाद्बहिर्भवतिनि
श्चितम् ॥ नियमेमत्स्यमांसानांदद्यात्कार्तिकिकेव्रती ॥ कूश्मांडानिसमाषाणिदशस्वर्णयुतान्यपि ॥ ४ ॥ कार्तिकेमौनभोजीयःसोश्नात्यमृतमेवहि ॥
सुघंटांसतिलांमौनीसहिरण्यांप्रदापयेत् ॥ ५ ॥ कार्तिकेलवणंत्यक्तंयेनव्रतभृतासता ॥ त्यक्ताःसर्वेरसास्तेनतत्त्यागीगांप्रदापयेत् ॥ ६ ॥ भूशय्यांका
र्तिकेकुर्वन्नभुवंसंस्पृशेद्व्रती ॥ पर्यंकंभूशयोदद्यात्सतूलंसोपधानकम् ॥ ७ ॥ दीपंयःकार्तिकेदद्यादखंडंघृतवर्तिकम् ॥ मोहांधतमसंप्राप्यसनगच्छतिदुर्ग
तिम् ॥८॥ यःकुर्यात्कार्तिकेमासेरजन्यांदीपकौमुदीम् ॥ तामिस्रंचांधतामिस्रंनसपश्येत्कदाचन ॥९॥ पापांधकारसंक्रुद्धःकार्तिकेदीपदानतः ॥ क्रोधां
धकारितमुखंभास्करिंसनवीक्षते ॥ ११० ॥

सउद्द्योतमयंपश्येत्त्रैलोक्यंसचराचरम् ॥ प्रबोधयेन्ममाग्रेयोदीपंसोज्ज्वलवर्तिकम् ॥ ११ ॥ पंचामृतानांकलशैरूर्जेमांस्नापयेन्नरः ॥ क्षीराब्धतट
मासाद्यवसेत्कल्पंसपुण्यवान् ॥ १२ ॥ प्रतिक्षपंकार्तिकिकेकुर्वञ्ज्योत्स्नांप्रदीपजाम् ॥ ममाग्रेभक्तिसंयुक्तोगर्भध्वांतंनसंविशेत् ॥ १३ ॥ आज्यव
र्तिकमूर्जेयोदीपंमेग्रेप्रबोधयेत् ॥ बुद्धिभ्रंशंनचाप्नोतिमहामृत्युभयेसति ॥ १४ ॥ कार्तिकेमासिमेयात्रायैःकृताभक्तितत्परैः ॥ बिंदुतीर्थेकृतस्नानैस्तेषांमु
क्तिर्नदूरतः ॥ १५ ॥ व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम ॥ दामोदरगृहाणार्घ्यंदनुजेंद्रनिषूदन ॥ १६ ॥ स्नानेनैमित्तिकेकृष्णकार्तिकेपापशो
षणे ॥ गृह्णात्वर्घ्यंमयादत्तंराधयासहितोभवान् ॥ १७ ॥ इमौमंत्रौसमुच्चार्ययोर्घ्यंमह्यंप्रयच्छति ॥ सुवर्णरत्नपुष्पांबुयुजाशंखेनपुण्यवान् ॥ १८ ॥
सुवर्णपूर्णपृथिवीसंकल्पोदकपूर्वकम् ॥ तेनदत्ताभवेत्सम्यक्सुपात्रायसुपर्वणि ॥ १९ ॥ एकादशींसमासाद्यप्रबोधकरणींमम ॥ बिंदुतीर्थकृतस्नानोरात्रौ
जागरणान्वितः ॥ १२० ॥ दीपान्प्रबोध्यबहुशोममालंकृत्यशक्तितः ॥ तौर्यत्रिकविनोदेनपुराणश्रवणादिभिः ॥ २१ ॥ महामहोत्सवंकृत्वायावत्पूर्णा
तिथिर्भवेत् ॥ तत्रान्नदानंबहुशःकृत्वामत्प्रीतयेनरः ॥ २२ ॥ महापातकयुक्तोपिनविशेत्प्रमदोदरम् ॥ बिंदुमाधवनामानंयोमामत्रसमर्चयेत् ॥ २३ ॥
बिंदुतीर्थकृतस्नानोनिर्वाणंसहिविंदति ॥ आदिमाधवनामाहंपूज्यःसत्ययुगेमुने ॥ २४ ॥ अनंतमाधवोज्ञेयस्त्रेतायांसर्वसिद्धिदः ॥ श्रीदमाधवसंज्ञोहं
द्वापरेपरमार्थकृत् ॥२५॥ कलौकलिमलध्वंसीज्ञेयोहंबिंदुमाधवः ॥ कलौकल्मषसंपन्नानमांविंदंतिमानवाः ॥२६॥ ममैवमाययामूढाभेदवादपरायणाः॥
ममभक्तिंप्रकुर्वाणायेविश्वेशंद्विषंतिवै ॥ २७ ॥ विद्विषोममतेज्ञेयाःपिशाचपदगामिनः ॥ पैशाचींयोनिमाप्यापिकालभैरवशासनात् ॥ २८ ॥ त्रिंशद्वर्ष
सहस्राणिउषित्वादुःखसागरे ॥ विश्वेशानुग्रहादेवततोमोक्षमवाप्नुयुः ॥ २९ ॥ तस्माद्द्वेषोनकर्तव्योविश्वेशेपरमात्मनि ॥ विश्वेशद्वेषिणांपुंसांप्रायश्चित्तं
यतोनहि ॥ १३० ॥ मनसापिहिविश्वेशंविद्विषंतीहयेऽधमाः ॥ अध्यासतेंधतामिस्रंमृतास्तेन्यत्रसंततम् ॥३१॥ शिवनिंदापरायेचयेपाशुपतनिंदकाः ॥
विद्विषोममतेज्ञेयाःपतंतोनरकेऽशुचौ ॥ ३२ ॥ अष्टाविंशतिकोटीषुनरकेषुक्रमेणहि ॥ कल्पंकल्पंवसेयुस्तेयेविश्वेश्वरनिंदकाः ॥ ३३ ॥ विश्वेशानुग्रहं
प्राप्यमुनेहमपिमुक्तिदः ॥ मद्भक्तैस्तद्विशेषेणसेव्योविश्वेश्वरोऽनिशम् ॥ ३४ ॥ इयंवाराणसीज्ञेयामुनेपाशुपतस्थली ॥ तस्मात्पशुपतिःसेव्यःकाश्यां
निःश्रेयसार्थिभिः ॥ ३५ ॥ अत्रपंचनदेतीर्थेस्नातिविश्वेश्वरःस्वयम् ॥ ऊर्जेसदैवसगणःसस्कंदःसपरिच्छदः ॥ ३६ ॥

ब्रह्मासवेदःसमखोब्रह्माण्याद्याश्चमातरः ॥ सप्ताब्धयःससरितःस्नांत्यूर्जेधूतपापके ॥३७॥ सचेतनाहियावंतस्त्रैलोक्येदेहधारिणः ॥ तावंतःस्नातुमायांतिका
र्तिकेधूतपापके ॥ ३८ ॥ यैर्नपंचनदेस्नातंप्राप्यकार्तिकिकंशुभम् ॥ जलबुद्बुदवत्तेषांवृथाजन्मशरीरिणाम् ॥३९॥ आनंदकाननंपुण्यंपुण्यंपांचनदंततः ॥
ततोपिममसान्निध्यमग्निबिंदोमहामुने ॥ १४० ॥ अनेनैवानुमानेनविद्धिपंचनदस्यवै ॥ महिमानंमहाप्राज्ञसर्वतीर्थोत्तमोत्तमम् ॥ ४१ ॥ श्रुत्वापियं
महाप्राज्ञोमहापापैःप्रमुच्यते ॥ विष्णोर्मुखादितिश्रुत्वासोग्निबिंदुर्महामुनिः ॥ ४२ ॥ पुनःप्रणम्यपप्रच्छबिंदुमाधवमच्युतम् ॥४३॥ अग्निबिंदुरुवाच ॥
भगवञ्छ्रोतुमिच्छामिबिंदुमाधवतद्वद ॥ कतिधातवरूपाणिकाश्यांसंतिजनार्दन ॥ ४४ ॥ भविष्याण्यपिकानीहतानिमेकथयाच्युत ॥ यानिसंपूज्यते
भक्ताःप्राप्स्यंतिकृतकृत्यताम् ॥ १४५ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेबिंदुमाधवाविर्भावोनामष
ष्टितमोऽध्यायः ॥ ६० ॥ ॥ अगस्त्यउवाच ॥ ॥ षडास्यमाधवाख्यानंश्रुतंमेपापनाशनम् ॥ महिमापिश्रुतःश्रेयान्सम्यक्पंचनदस्यवै ॥ १ ॥
यदग्निबिंदुनापृच्छिमाधवोदैत्यसूदनः ॥ तस्योत्तरंसमाख्याहियथाख्यातंमधुद्विषा ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहर्षेत्वंकथ्यमानं
मयाधुना ॥ माधवेनयथाचक्षिमुनयेचाग्निबिंदवे ॥३॥ ॥ बिंदुमाधवउवाच ॥ आदौपादोदकेतीर्थेविद्धिमामादिकेशवम् ॥ अग्निबिंदोमहाप्राज्ञभक्तानां
मुक्तिदायकम् ॥ ४ ॥ अविमुक्तेऽमृतेक्षेत्रेयेर्चयंत्यादिकेशवम् ॥ तेऽमृतत्वंभजंत्येवसर्वदुःखविवर्जिताः ॥ ५ ॥ संगमेशंमहालिंगंप्रतिष्ठाप्यादिकेशवः ॥
दर्शनादघहंनॄणांभुक्तिंमुक्तिंदिशेत्सदा ॥ ६ ॥ याम्यांपादोदकाच्छ्रेतद्वीपतीर्थंमहत्तरम् ॥ तत्राहंज्ञानदोनॄणांज्ञानकेशवसंज्ञकः ॥ ७ ॥ श्वेतद्वीपेनरः
स्नात्वाज्ञानकेशवसन्निधौ ॥ नज्ञानाद्भ्रश्यतेक्वापिज्ञानकेशवपूजनात् ॥ ८ ॥ तार्क्ष्यकेशवनामाहंतार्क्ष्यतीर्थेनरोत्तमैः ॥ पूजनीयःसदाभक्त्यातार्क्ष्य
वत्तेप्रियामम ॥ ९ ॥ तत्रैवनारदेतीर्थेस्म्यहंनारदकेशवः ॥ ब्रह्मविद्योपदेष्टाचतत्तीर्थाप्लुतवर्ष्मणाम् ॥१०॥ प्रह्लादतीर्थंतत्रैवनाम्नाप्रह्लादकेशवः ॥ भक्तैः
समर्चनीयोहंमहाभक्तिसमृद्धये ॥ ११ ॥ तीर्थेऽवरीषेतत्राहंनाम्नैवादित्यकेशवः ॥ पातकध्वांतनिचयंध्वंसयामीक्षणादपि ॥ १२ ॥

दत्तात्रेयेश्वराद्याम्यामहमादिगदाधरः ॥ हरामितत्रभक्तानांसंसारगदसंचयम् ॥ १३ ॥ तत्रैवभार्गवेतीर्थेभृगुकेशवनामतः ॥ काशीनिवासिनःपुंसो
बिभर्मिचमनोरथैः ॥ १४ ॥ वामनाख्येमहातीर्थेमनःप्रार्थितदेशुभे ॥ पूज्योहंशुभमिच्छद्भिर्नाम्नावामनकेशवः ॥ १५ ॥ नरनारायणेतीर्थेनरनाराय
णात्मकम् ॥ भक्ताःसमर्च्यमांस्युर्वैनरनारायणात्मकाः ॥ १६ ॥ तीर्थेयज्ञवराहाख्येयज्ञवाराहसंज्ञकः ॥ नरैःसमर्चनीयोहंसर्वयज्ञफलेप्सुभिः ॥१७॥
विदारनरसिंहोहंकाशीविघ्नविदारणः ॥ तन्नाम्नितीर्थेसंसेव्यस्तीर्थोपद्रवशांतये ॥ १८ ॥ गोपीगोविंदतीर्थेतुगोपीगोविंदसंज्ञकम् ॥ समर्च्यमांनरोभक्त्या

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ममायांनसंस्पृशेत् ॥ १९ ॥ मुनेलक्ष्मीनृसिंहोस्मितीर्थेतत्राभिषावने ॥ दिशाभिमुक्तियुक्तेभ्यःसदानैःश्रेयसींश्रियम् ॥ २० ॥ शेषमाधवनामाहंशेषतीर्थेऽघहारिणि ॥ विश्राणयाम्यशेषांश्चविशेषान्भक्तचिंतितान् ॥ २१ ॥ शंखमाधवतीर्थेचस्नात्वामांशंखमाधवम् ॥ शंखोदकेनसंस्नाप्यभवेच्छंखनिधेःपतिः ॥२२॥ हयग्रीवेमहातीर्थेमांहयग्रीवकेशवम् ॥ प्रणम्यप्राप्नुयान्नूनंतद्विष्णोःपरमंपदम् ॥ २३ ॥ भीष्मकेशवनामाहंवृद्धकालेशपश्चिमे ॥ उपसर्गान्हरेभीष्मान्सेवितोभक्तियुक्तितः ॥ २४ ॥ निर्वाणकेशवश्चाहंभक्तनिर्वाणसूचकः ॥ लोलार्कादुत्तरेभागेलोलत्वंचेतसोहरे ॥ २५ ॥ वंध्यस्त्रिलोकसुंदर्यांयाम्यांयोमांसमर्चयेत् ॥ काश्यांख्यातंत्रिभुवनकेशवंनसगर्भभाक् ॥ २६ ॥ ज्ञानवाप्याःपुरोभागेविद्धिमांज्ञानमाधवम् ॥ तत्रमांभक्तितोभ्यर्च्यज्ञानंप्राप्नोतिशाश्वतम् ॥ २७ ॥ श्वेतमाधवसंज्ञोहंविशालाक्ष्याःसमीपतः ॥ श्वेतद्वीपेश्वरंरूपंकुर्यांभक्त्यासमर्चितः ॥ २८ ॥ उदग्दशाश्वमेधान्मांप्रयागाख्यंचमाधवम् ॥ प्रयागतीर्थेमुस्नातोदङ्गापापैःप्रमुच्यते ॥ २९ ॥ प्रयागगमनेपुंसांयत्फलंतपसिश्रुतम् ॥ तत्फलंस्याद्दशगुणमत्रस्नात्वाममाग्रतः ॥ ३० ॥ गंगायमुनयोःसंगेयत्पुण्यंस्नानकारिणाम् ॥ काश्यांमत्सन्निधावत्ततत्पुण्यंस्याद्दशोत्तरम् ॥ ३१ ॥ दानानिराहुग्रस्तेर्केददतांयत्फलंभवेत् ॥ कुरुक्षेत्रेहितत्काश्यामत्रैवस्याद्दशाधिकम् ॥ ३२ ॥ गंगोत्तरवहायत्रयमुनापूर्ववाहिनी ॥ तत्संभेदंनरःप्राप्यमुच्यतेत्रह्महत्यया ॥ ३३ ॥ वपनं तत्रकर्तव्यंपिंडदानंचभावतः ॥ देयानितत्रदानानिमहाफलमभीप्सुना ॥ ३४ ॥ गुणाःप्रजापतिक्षेत्रेयेसर्वेसमुदीरिताः ॥ अविमुक्तेमहाक्षेत्रेऽसंख्याताश्चभवंतिहि ॥ ३५ ॥ प्रयागेशंमहालिंगंतत्रतिष्ठतिकामदम् ॥ तत्सान्निध्याच्चतत्तीर्थंकामदंपरिकीर्तितम् ॥ ३६ ॥

काश्यांमाघःप्रयागेयैर्नस्नातोमकरार्कगः ॥ अरुणोदयमासाद्यतेपांनिःश्रेयसंकुतः ॥ ३७ ॥ काश्युद्भवेप्रयागेयेतपसिस्नांतिसंयताः ॥ दशाश्वमेधजनितंफलंतेषांभवेद्ध्रुवम् ॥३८॥ प्रयागमाधवंभक्त्याप्रयागेशंचकामदम् ॥ प्रयागेतपसिस्नात्वायेचयंत्यन्वहंसदा॥३९॥ धनधान्यसुतर्द्धीस्तेलब्ध्वाथोगान्मनोरमान् ॥ भुक्त्वेहपरमानंदंपरंमोक्षमवाप्नुयुः ॥ ४० ॥ माघेसर्वाणितीर्थानिप्रयागमधियांतिहि ॥ प्राच्युदीचीप्रतीचीतोदक्षिणाधस्तथोर्ध्वतः ॥ ४१ ॥ काशीस्थितानितीर्थानिमुनेयांतिनकुत्रचित् ॥ यदियांतितदायांतितीर्थत्रयमनुत्तमम् ॥ ४२ ॥ आर्यात्यूर्जेपंचनदेप्रातःप्रातर्ममांतिकम् ॥ महाघौघप्रशमनेमहाश्रेयोविधायिनि ॥ ४३ ॥ प्राप्यमाघमघारिंचप्रयागेशसमीपतः ॥ प्रातःप्रयागेसंस्नांतिसर्वतीर्थानिमामनु ॥ ४४ ॥ समासाद्यच मध्याह्नमभियांतिचनित्यशः ॥ संस्नातुंसर्वतीर्थानिमुक्तिदांमणिकर्णिकाम् ॥ ४५ ॥ काश्यांरहस्यंपरममेतत्तेकथितंमुने ॥ यथातीर्थत्रयीश्रेष्ठास्वस्वकालेविशेषतः ॥ ४६ ॥ अन्यद्रहस्यंवक्ष्यामिनवाच्यंयत्रकुत्रचित् ॥ अभक्तेषुसदागोप्यंनगोप्यंभक्तिमज्जने ॥ ४७ ॥ काश्यांसर्वाणितीर्थानिएकेकादुत्तरोत्तरम् ॥ महैनांसिप्रहंत्येवप्रसह्यनिजतेजसा ॥ ४८ ॥ एतदेवरहस्यंतेवाराणस्याउदीर्यते ॥ उत्क्षिप्येकांगुलिंतथ्यंश्रेष्ठेकामणिकर्णिका ॥४९॥ गर्जंतिसर्वतीर्थानिस्वस्वधिष्ण्यगतान्यहो ॥ केवलंवलमासाद्यसुमहन्माणिकर्णिकम् ॥ ५० ॥ पापानिपापिनांहत्वामहांत्यपिबहून्यपि ॥ काशीतीर्थानिमध्याह्नेपापश्चित्तचिकीर्षया ॥ ५१ ॥ पर्वस्वपर्वस्वपिवानित्यंनियमवंत्यहो ॥ निर्मलानिभवंत्येवविगाह्यमणिकर्णिकाम् ॥ ५२ ॥ विश्वेशोविश्वयासार्धंसदोपमणिकर्णिकम् ॥ मध्यंदिनंसमासाद्यसंस्नातिंप्रतिवासरम् ॥ ५३ ॥ वैकुंठादप्यहंनित्यंमध्याह्नेमणिकर्णिकाम् ॥ विगाहेपंचयासार्धंमुदापरमयामुने ॥ ५४ ॥ सकृन्ममाख्यांगृणतांनिर्हरन्यदघान्यहम् ॥ हरिनामसमापन्नस्तद्वलान्माणिकर्णिकात् ॥ ५५ ॥ सत्यलोकात्प्रतिदिनंहंसयानःपितामहः ॥ माध्याह्निकविधानायसमायान्मणिकर्णिकाम् ॥५६॥ इंद्राद्यालोकपालाश्चमरीच्याद्यामहर्षयः ॥ माध्याह्निकींक्रियांकर्तुंसमीयुर्मणिकर्णिकाम् ॥ ५७ ॥ शेषवासुकिमुख्याश्चनागावैनागलोकतः ॥ समायांतीहमध्याह्नेसंस्नातुंमणिकर्णिकाम् ॥ ५८ ॥

चराचरेणुसर्वेपुयावंतश्चसचेतनाः ॥ तावंतःस्नांतिमध्याह्नेमणिकर्णीजलेमले ॥ ५९ ॥ केमाणिकर्णिकेयानांगुणानांसुगरीयसाम् ॥ शक्तावर्णयितुंविप्राऽसंख्येयानांमदादिभिः ॥ ६० ॥ चीर्णान्युग्राण्यरण्येषुतैस्तपांसितपोधनैः ॥ यैरिहंहिसमासादिमुक्तिर्भूर्मणिकर्णिका ॥ ६१ ॥ विश्राणितमहादानास्तपवनरपुंगवाः ॥ चरमेवयसिप्राप्तायैरेषामपिकर्णिका ॥ ६२ ॥ चीर्णसर्वव्रतास्तेतुयथोक्तविधिनाधुवम् ॥ यैःस्वतल्पीकृतामाणिकर्णिकेयीस्थली मृदुः ॥६३॥ तएवधन्यामर्त्येस्मिन्सर्वकृतपुदीक्षिताः ॥ त्यक्तापुण्यार्जितांलक्ष्मीमैक्षिचैर्मोणिकर्णिका ॥६४॥ कृतानानाविधाधर्माइष्टापूर्तास्तुतैर्नृभिः ॥ वार्धकंसमनुप्राप्यप्रापियैर्मणिकर्णिका ॥ ६५ ॥ रत्नानिसदुकूलानिकांचनंगजवाजिनः ॥ देयाःप्राज्ञेनयत्नेनसदोपमणिकर्णिकम् ॥ ६६ ॥ पुण्येनोपार्जितंद्रव्यमत्यल्पमपियैर्नरैः ॥ दत्तंतदक्षयंनित्यंमुनेयिमणिकर्णिकम् ॥ ६७ ॥ कुर्याद्यथोक्तमप्येकंप्राणायामंनरोत्तमः ॥ यस्तेनविहितोनूनंषडंगोयोगउत्तमः ॥ ६८ ॥ जपेदेकामपिगायत्रींसंप्राप्यमणिकर्णिकाम् ॥ लभेदयुतगायत्रीजपनस्यफलंस्फुटम् ॥ ६९ ॥ एकामप्याहुतिंश्राद्धोदत्त्वोपमणिकर्णिकम् ॥ यावज्जीवाग्निहोत्रस्यलभेदविकलंफलम् ॥ ७० ॥ इतिश्रुत्वाहरेर्वाक्यमग्निर्विदुर्महातपाः ॥ प्रणिपत्यमहाभक्त्यापुनःपप्रच्छमाधवम् ॥ ७१ ॥ ॥ अग्निर्विदुरुवाच ॥ विष्णोकियत्परीमाणंपुण्यैषामणिकर्णिका ॥ ब्रूहिमेपुंडरीकाक्षनत्वत्तस्तत्त्ववित्परः ॥ ७२ ॥ ॥ श्रीविष्णुरुवाच ॥ आगंगाकेशवादाचहरिश्चंद्रस्यमंडपात् ॥ आमध्यादेवसारितःस्वर्द्वारान्मणिकर्णिका ॥ ७३ ॥ स्थूलमेतत्परीमाणंसूक्ष्मंचप्रवदामिते ॥ हरिश्चंद्रस्यतीर्थस्यहरिश्चंद्रविनायकः ॥ ७४ ॥ सीमाविनायकश्चात्रमणिकर्णीह्रदोत्तरे ॥ सीमाविनायकंभक्त्यापूजयित्वानरोत्तमः ॥ ७५ ॥ मोदकैःसोपचारैश्चाप्नुयान्मणिकर्णिकाम् ॥ हरिश्चंद्रमहातीर्थेतर्पयेयुःपितामहान् ॥७६॥ शतंसमाःसुतृप्ताःस्युःप्रयच्छंतिचवांछितम् ॥ हरिश्चंद्रमहातीर्थेस्नात्वाश्रद्धान्वितोनरः ॥ ७७ ॥ हरिश्चंद्रेश्वरंनत्वानसत्याःपरिहीयते ॥ ततःपर्वततीर्थंचपर्वतेश्वरसंनिधौ ॥ ७८ ॥ अधिष्ठानंनहामेरोर्महापातकनाशनम् ॥ तत्रस्नात्वार्चयित्वेशंकिंचिदत्त्वास्वशक्तितः ॥ ७९ ॥ अध्यास्यमेरुशिखरंदिव्यान्भोगान्समश्नुते ॥ कंबलाश्वतरंतीर्थंपर्वतेश्वरदक्षिणे ॥८०॥ कंबलाश्वतरेशंचतत्तीर्थात्पश्चिमेशुभम् ॥ तस्मिंस्तीर्थेकृतस्नानस्तल्लिंगंयःसमर्चयेत् ॥ ८१ ॥ अपितस्यकुलेजातागीतज्ञाःस्युःश्रियान्विताः ॥ चक्रपुष्करिणीतत्रयोनिचक्रनिवारिणी ॥ ८२ ॥

संसारचक्रेगहनेयत्रस्नातोविशेन्नरः ॥ चक्रपुष्करिणीतीर्थममाधिष्ठानमुत्तमम् ॥ ८३ ॥ संख्याःपरार्धसंख्याताःस्तत्रतंमहातपः ॥ तत्रप्रत्यक्षतांयातोममविश्वेश्वरःपरः ॥ ८४ ॥ तत्रलब्धंमयैर्यत्रमविनाशिमहत्तरम् ॥ चक्रपुष्करिणीचैवख्याताभून्मणिकर्णिका ॥ ८५ ॥ द्रवरूपंपरित्यज्यललनारूपधारिणी ॥ प्रत्यक्षरूपिणीतत्रमयैक्षिमणिकर्णिका ॥ ८६ ॥ तस्याःरूपंप्रवक्ष्यामिभक्तानांशुभदंपरम् ॥ यद्रूपंप्राप्यतःपुंभिरापण्मासंत्रिसंध्यतः ॥ ८७ ॥ प्रत्यक्षरूपिणीदेवीदृश्यतेमणिकर्णिका ॥ चतुर्भुजाविशालाक्षीस्फुरद्बालविलोचना ॥ ८८ ॥ पश्चिमाभिमुखीनित्यंप्रबद्धकरसंपुटा ॥ इंदीवरवर्तीमालांदधतीदक्षिणेकरे ॥ ८९ ॥ वरोद्यतेकरेसव्येमातुलुंगफलंशुभम् ॥ कुमारीरूपिणीनित्यंनित्यंह्लादशवार्षिकी ॥ ९० ॥ शुद्धस्फटिककांतिश्चसुनीलस्निग्धमूर्द्धजा ॥ जितप्रवालमाणिक्यरमणीयरदच्छदा ॥ ९१ ॥ प्रत्यग्रकेतकीपुष्पलसद्धम्मिल्लमस्तका ॥ सर्वांगमुक्ताभरणाचंद्रकांत्यंशुकावृता ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ९२ ॥ पुंडरीकमयींमालांसश्रीकांबिभ्रतीहृदि ॥ ध्यातव्यानेनरूपेणमुमुक्षुभिरहर्निशम् ॥ ९३ ॥ निर्वाणलक्ष्मीभवनंश्रीमतींमणिकर्णिका ॥ मंत्रंतस्याश्चवक्ष्याभिभक्तकल्पद्रुमाभिधम् ॥ यस्यावर्तनतःसिद्ध्येदपिसिद्ध्यष्टकंनृणाम् ॥ ९४ ॥ वाग्भवमायालक्ष्मीमदनप्रणवान्वदेत्पूर्वम् ॥ भांत्यं बिंदूपेतंमणिपदमथकर्णिकेसहृत्प्रणवपुटः ॥ ९५ ॥ मंत्रःसुरद्रुमसमःसमस्तसुखसंततिप्रदोजप्यः ॥ तिथिभिःपरिमितवर्णःपरमपदंदिशतिनिशित धियाम् ॥ ९६ ॥ तारस्तारतृतीयोबिंद्वंतोमणिपदंततःकर्णिके ॥ प्रणवात्मिपदकेनमइतिमनुसंख्यवर्णमनुः ॥ ९७ ॥

अयंमंत्रोऽनिशंजप्यःपुंभिर्मुक्तिमभीप्सुभिः ॥ होमोदशांशकःकार्यःश्रद्धाबद्धादरैर्नृभिः ॥ ९८ ॥ परिप्लुतैःपुंडरीकैर्गव्येनहविषास्फुटैः ॥ सशर्करेणमे धावीसक्षौद्रेणसदाशुचिः ॥ ९९ ॥ त्रिलक्षमंत्रजप्येनमृतोदेशांतरेष्वपि ॥ अवश्यंमुक्तिमाप्नोतिमंत्रस्यास्यप्रभावतः ॥ १०० ॥ सोवर्णीप्रतिमाकार्या नवरत्नसमन्विता ॥ पूर्वोक्तरूपसंपन्नासंपूज्यासाप्रयत्नतः ॥ १ ॥ संपूज्यावासदागेहेनरैर्मोक्षैककांक्षिभिः ॥ मणिकर्ण्यामथाक्षेप्यासमभ्यर्च्यप्रयत्नतः ॥ २ ॥ संसारभीरुभिःपुंभिःश्रद्धाबद्धादरैरिह ॥ उपायःसमनुष्ठेयोह्यपिदूरनिवासिभिः ॥ ३ ॥ मणिकर्ण्यांकृतस्नानोमणिकर्णीशवीक्षणात् ॥ जननी जठरावासेवसतिंनलभेन्नरः ॥४॥ मणिकर्णीश्वरंलिंगंपुरासंस्थापितंमया ॥ प्राग्द्वारेंतर्गृहस्यात्रसमर्च्योमोक्षकांक्षिभिः ॥५॥ ततःपाशुपतंतीर्थमवाच्यां मणिकर्णितः ॥ कृतोदकक्रियस्तत्रपश्येत्पशुपतीश्वरम् ॥ ६ ॥ यत्रपाशुपतोयोगउपदिष्टःपिनाकिना ॥ ममापिविधिमुख्यानांसुराणांपशुपाशहृत् ॥ ॥ ७ ॥ अतःपशुपतिर्यत्रलिंगरूपधरःस्वयम् ॥ पशुपाशविमोक्षायनित्यंकाश्यांप्रकाशते ॥ ८ ॥ तत्रचैत्रचतुर्दश्यांशुक्लायांशुचिमानसैः ॥ कार्या यात्राप्रयत्नेनरात्रौजागरणंतथा ॥ ९ ॥ पूजयित्वापशुपतिमुपोषणपरायणाः ॥ पशुपाशैर्नबध्यंतेदर्शेविहितपारणाः ॥ ११० ॥ रुद्रावासस्ततस्ती र्थंतीर्थात्पाशुपतात्पुरः ॥ तत्रस्नात्वानरैरर्च्योरुद्रावासेश्वरोहरः ॥ ११ ॥ मणिकर्णीश्वराद्याभ्यांरुद्रावासेश्वरंनरः ॥ समाराध्यवसेल्लोकेरुद्रावासेनसं शयः ॥ १२ ॥ विश्वतीर्थंततोयाभ्यांविश्वैस्तीर्थैरधिष्ठितम् ॥ तत्रस्नात्वानरोभक्त्याविश्वनाथंविलोकयेत् ॥ १३ ॥ विश्वांगौरींचतदनुपूजयित्वा तिभक्तितः ॥ विश्वस्यपूज्योभवतिततोविश्वमयोभवेत् ॥ १४ ॥ मुक्तितीर्थंचतदनुतत्रापिकृतमज्जनः ॥ मोक्षेश्वरंततोभ्यर्च्यमोक्षमाप्नोत्यसंशयम् ॥ १५ ॥ अविमुक्तेश्वरात्पश्चान्मोक्षेशंवीक्ष्यमानवः ॥ नपुनर्मानवेलोकेयातायातंकरोत्यहो ॥ १६ ॥ अविमुक्तेश्वरंतीर्थंमुक्तितीर्थान्मनाक्परे ॥ तत्राप्लुत्याविमुक्तेशमर्चयित्वाविमुच्यते ॥ १७ ॥

तत्परेतारकंतीर्थंयत्रविश्वेश्वरःस्वयम् ॥ आचष्टेतारकंब्रह्ममृतकर्णेमृतात्मकम् ॥ १८ ॥ सुस्नातस्तारके तीर्थेतारकेश्वरदर्शनात् ॥ संसारसागरंतीर्त्वा तारयेत्स्वपितॄनपि ॥ १९ ॥ तत्राभ्याशेस्कंदतीर्थंतत्राप्लुत्यनरोत्तमः ॥ दृष्ट्वापडाननंचैवजह्यात्पाट्टौशिकींतनुम् ॥ १२० ॥ तारकेश्वरपूर्वेणदृष्ट्वादेवं पडाननम् ॥ वसेत्पडाननेलोकेकौमारंवपुरुद्वहन् ॥ २१ ॥ ढुंढितीर्थंततःपुण्यंनरस्तत्रकृतोदकः ॥ ढुंढिंगणपतिंस्तुत्वानविघ्नैरभिभूयते ॥ २२ ॥ भवानीतीर्थमतुलंढुंढितीर्थस्यदक्षिणे ॥ तत्रस्नात्वाविधानेनभवानींपरिपूज्यच ॥ २३॥ दुकूलैरत्ननेपथ्यैर्नैवेद्यैर्बहुविस्तरैः ॥ पुष्पैर्धूपैःप्रदीपैश्चभवानी शौप्रपूज्यच ॥ २४ ॥ समस्तमर्चितंतेनत्रैलोक्यंसचराचरम् ॥ भवानीशंकरौकाश्यामर्चितौश्रद्धयातुयैः ॥ २५ ॥ चैत्राष्टम्यांमहायात्रांभवान्याःकारये त्सुधीः ॥ अष्टाधिकाःप्रकर्तव्याःशतकृत्वःप्रदक्षिणाः ॥ २६ ॥ प्रदक्षिणीकृतातेनसप्तद्वीपवतीमही ॥ सशैलाससमुद्राचसाश्रमाचसकानना ॥ २७ ॥ अष्टौप्रदक्षिणादेयाःप्रत्यहंतुष्टितत्परैः ॥ नमनीयौप्रयत्नेनभवानीशंकरौसदा ॥ २८ ॥ भक्तानांकामदानित्यंभवानीवाससांप्रदा ॥ अतोभवानीसंपूज्या काश्यांतीर्थंनिवासिभिः ॥ २९ ॥ योगक्षेमंसदाकुर्याद्भवानीकाशिवासिनाम् ॥ तस्माद्भवानीसंसेव्यासततंकाशिवासिभिः ॥ १३० ॥ भिक्षणीयासदा भिक्षाभिक्षुणामोक्षकांक्षिणा ॥ यतोभिक्षाप्रदाकाश्यांविश्वेशस्यकुटुंबिनी ॥ ३१ ॥ गृहमध्येत्रविश्वेशोभवानीतत्कुटुंबिनी ॥ सर्वेभ्यःकाशिसंस्थेभ्योमो क्षभिक्षांप्रयच्छति ॥ ३२ ॥ दुष्प्रापमपियत्किंचित्काशीक्षेत्रनिवासिनाम् ॥ तत्सुप्राप्यंकरोत्येवभवानीपूजितानृभिः ॥ ३३ ॥ कुर्याज्जागरणंरात्रौमहा ष्टम्यांव्रतीनरः ॥ प्रातर्भवानीमभ्यर्च्यप्राप्नुयाद्वांछितंफलम् ॥ ३४ ॥ शुक्रेशात्पश्चिमाशायांभवानींयोऽभिवीक्षते ॥ सर्वेमनोरथास्तस्यसिद्ध्यंतीहनसं शयः ॥ ३५ ॥ काश्यांसदैववस्तव्यंस्नातव्योत्तरवाहिनी ॥ भवानीशंकरौसेव्यौप्राप्तव्येभुक्तिमुक्तिके ॥ ३६ ॥ मातर्भवानितवपादरजोभवानिमातर्भ वानितवदासतरोभवानि ॥ मातर्भवानिनभवानियथाभवेस्मिंस्त्वद्भाग्भवान्यनुदिनंनपुनर्भवानि ॥ ३७ ॥

तिष्ठतागच्छतावापिस्वपताजाग्रतापिवा ॥ अयंमंत्रःसदाजप्यःसुखात्यैकाशिवासिना ॥ ३८ ॥ ईशानतीर्थंतत्रैवभवानीतीर्थसन्निधौ ॥ तत्रस्नातोयई शानमर्चयेन्नसजन्मभाक् ॥ ३९ ॥ ज्ञानतीर्थंचतत्रैवज्ञानदंसर्वदानृणाम् ॥ कृताभिषेकस्तत्तीर्थेदृष्ट्वाज्ञानेश्वरंशिवम् ॥ १४० ॥ ज्ञानवापीसमीपस्थो ज्ञानेशोयैःसमर्चितः ॥ ज्ञानभ्रंशोनतेषांस्यादपिपंचत्वमृच्छताम् ॥ ४१ ॥ शैलादितीर्थंतत्रैवपरमर्द्धिप्रकाशकम् ॥ तत्रश्राद्धादिकंकृत्वादत्त्वादानंस्वश क्तितः ॥ ४२ ॥ शैलादीश्वरमालोक्यज्ञानवाप्याउदग्दिशि ॥ लभेद्गणत्वपदवींनात्रकार्याविचारणा ॥ ४३ ॥ नंदितीर्थादवाच्यांतुविष्णुतीर्थंपरंमम ॥ तत्रपिंडान्विनिर्वाप्यपितॄणामनृणोभवेत् ॥ ४४ ॥ विष्णुतीर्थेकृतस्नानोयोमांविष्णुंविलोकयेत् ॥ विश्वेशाद्दक्षिणेपार्श्वेविष्णुलोकंसगच्छति ॥ ४५ ॥ यःप्रत्येकादशींप्राप्यशयनींबोधिनींतथा ॥ कुर्याज्जागरणंरात्रौममसूर्तिसमीपतः ॥ ४६ ॥ प्रातःसमर्च्यमांभक्त्याभोजयित्वाद्विजानपि ॥ दत्त्वागाः कां चनंभूमिंनभूयोभूमिभाग्भवेत् ॥४७॥ कृत्वातत्रव्रतोत्सर्गंवित्तशाठ्यविवर्जितः ॥ सम्यग्व्रतफलंधीमान्प्राप्नोत्येवममाज्ञया ॥४८॥ ममतीर्थादवाच्यांतुती र्थंपैतामहंशुभम् ॥ तत्रश्राद्धविधानेनतर्पयित्वापितामहान् ॥४९॥ पितामहेश्वरंलिंगंब्रह्मनालोपरिस्थितम् ॥ पूजयित्वानरोभक्त्याब्रह्मलोकमवाप्नुयात् ॥ ॥ १५० ॥ ब्रह्मस्रोतःसमीपेतुकृतंकर्मशुभाशुभम् ॥ परामक्षयतामेतिशुभमेवततश्चरेत् ॥ ५१ ॥ अत्यल्पमपियत्कर्मकृतमत्रशुभाशुभम् ॥ प्रलयेपि नतस्यास्तिप्रलयोमुनिसत्तम ॥ ५२ ॥ नाभितीर्थमिदंप्रोक्तंनाभिभूतंयतःक्षितेः ॥ आपेब्रह्मांडगोलस्यनाभिरेषाशुभोदया ॥५३॥ सामाणिकर्णिकेयी यंनाभिर्गांभीर्यभूमिका ॥ ब्रह्मांडगोलकंसर्वंयस्यामेतिलयोदयम् ॥ ५४ ॥ ब्रह्मनालंपरंतीर्थंत्रिषुलोकेषुविश्रुतम् ॥ तत्संगमेनरःस्नात्वाकोटिजन्ममलं हरेत् ॥ ५५ ॥ ब्रह्मनालेपतेद्येषामपिकीकसमात्रकम् ॥ ब्रह्मांडमंडपांतस्तेनविशंतिकदाचन ॥ ५६ ॥ ततोभागीरथेस्तीर्थंब्रह्मनालाच्चदक्षिणे ॥ तत्रस्नात्वानरःसम्यङ्मुच्यतेब्रह्महत्यया ॥ ५७ ॥ भागीरथीश्वरंलिंगंस्वर्गद्वारस्यसन्निधौ ॥ दर्शनाद्ब्रह्महत्यायाःपुरश्चरणमुच्यते ॥ ५८ ॥ अशुभांग तिमापन्नायस्यपूर्वेपितामहाः ॥ तेनभागीरथीतीर्थेतर्पणीयाःप्रयत्नतः ॥ ५९ ॥ तत्रभागीरथेतीर्थेश्राद्धंकृत्वाविधानतः ॥ ब्राह्मणान्भोजयित्वातुब्रह्मलो केनयेत्पितॄन् ॥ १६० ॥ तद्दक्षिणेमहातीर्थंखुरकर्तरिसंज्ञितम् ॥ गोलोकादागताभिश्चगोभिर्यत्खुरकोटिभिः ॥ ६१ ॥ स्थपुटीकृतभूभागंततस्तत्खुर कर्तरि ॥ तस्मिंस्तीर्थेकृतस्नानःकृतपिंडोदकक्रियः ॥ ६२ ॥

खुरकर्तरीशंलिंगंदृष्ट्वागोलोकमाप्नुयात् ॥ गोधनैर्नविमुच्येततल्लिंगस्यसमर्चनात् ॥६३॥ दक्षिणेखुरकर्तर्यामार्कंडंतीर्थमुत्तमम् ॥ कृतश्राद्धविधानश्चत स्मिंस्तीर्थेऽघहारिणि ॥ ६४ ॥ मार्कंडेयेश्वरंलिंगंदृष्ट्वायुर्दीर्घमाप्नुयात् ॥ ब्रह्मतेजोभिवृद्धिंचकीर्तिंचपरमांभुवि ॥ ६५ ॥ वसिष्ठतीर्थंपरमंमहापात

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कनाशनम् ॥ तर्पयित्वापितॄंस्तत्रवसिष्ठेशंविलोक्यच ॥ ६६ ॥ नरोनलिप्यतेपापैर्जन्मत्रयसमर्जितैः ॥ वासिष्ठलोकेवसतिब्रह्मतेजःसमन्वितः ॥ ६७ ॥ तत्रैवारुंधतीतीर्थंस्त्रीणांसौभाग्यवर्धनम् ॥ पतिव्रताभिस्तत्तीर्थंगाहनीयंविशेषतः ॥ ६८ ॥ पौंश्चल्यजनितोदोषस्तत्तीर्थंपरिमज्जनात् ॥ क्षणाद्विनाश मागच्छेदरुंधत्याःप्रभावतः ॥ ६९ ॥ मार्कंडेयेश्वरात्प्राच्यांवसिष्ठेश्वरपूजनात् ॥ निष्पापोजायतेमर्त्योमहत्पुण्यमवाप्नुयात् ॥ १७० ॥ मूर्तीवसिष्ठारुं धत्योस्तत्रपूज्येप्रयत्नतः॥ नस्त्रीवैधव्यमाप्नोतिनपुमान्स्त्रीवियोगिताम् ॥७१॥ वसिष्ठतीर्थतोयाम्यांनर्मदातीर्थमुत्तमम्॥विधायश्राद्धंमेधावीनर्मदेशंविलो क्यच ॥ ७२ ॥ तत्रदत्त्वामहादानंपद्मयानविमुच्यते ॥ ततस्त्रिसंध्यंवैतीर्थंत्रिसंध्येश्वरपूर्वतः ॥ ७३ ॥ तत्रतीर्थेनरःस्नात्वाकृत्वासंध्यांविधानतः ॥ संध्याकालविलोपोत्थपातकैर्नाभिभूयते ॥ ७४ ॥ त्रिसंध्येश्वरमालोक्यकृतसंध्यस्त्रिकालतः ॥ त्रिवेदावर्तजंपुण्यंप्राप्नुयाच्छ्रद्धयाद्विजः ॥ ७५ ॥ ततोऽनुयोगिनीतीर्थंनरस्तत्रकृताप्लवः ॥ दृष्ट्वातुयोगिनीपीठंयोगसिद्धिमवाप्नुयात् ॥ ७६ ॥ अगस्तितीर्थंतत्रास्तिमहाघौघविघातकृत् ॥ तत्रस्नात्वा प्रयत्नेनदृष्ट्वागस्तीश्वरंविभुम् ॥ ७७ ॥ अगस्तिकुंडेचततःसंतर्प्यचपितामहान् ॥ अगस्तिनासमेतांचलोपामुद्रांप्रणम्यच ॥ ७८ ॥ सर्वपापविनिर्मुक्तः सर्वक्लेशविवर्जितः ॥ गच्छेत्सपूर्वजैःसार्धंशिवलोकंनरोत्तमः ॥७९॥ दक्षिणेऽगस्त्यतीर्थाच्चतीर्थमस्त्यतिपावनम्॥गंगाकेशवसंज्ञंचसर्वपातकनाशनम् ॥ ॥१८०॥ तत्रमेशुभदांमूर्तिंमुनेतत्तीर्थसंज्ञिकाम् ॥ संपूज्यश्रद्धयाधीमान्ममलोकेमहीयते ॥८१॥ तत्रपिंडान्विनिर्वाप्यदत्त्वादानंस्वशक्तितः ॥ शतसां वत्सरींतृप्तिंपितॄणांससमर्पयेत् ॥ ८२ ॥ मणिकर्णीपरीमाणमेतत्तेकीर्तितंमहत् ॥ सीमाविनायकाद्याम्यांसर्वविघ्नविघातनात् ॥ ८३ ॥ वैरोचने श्वरात्प्राच्यामहंवैकुंठमाधवः ॥ तत्रमांभक्तितोभ्यर्च्यवैकुंठार्चामवाप्नुयात् ॥ ८४ ॥

वीरमाधवसंज्ञोहंवीरेशात्पश्चिमेमुने ॥ तत्रव्रतीसमभ्यर्च्यनयामींयातनालभेत् ॥ ८५ ॥ कालमाधवनामाहंकालभैरवसन्निधौ ॥ कलिःकालोनकलये न्मद्भक्तमितिनिश्चितम् ॥८६॥ मार्गशीर्षस्यशुक्लायामेकादश्यामुपोषितः ॥ तत्रजागरणंकृत्वायमंनालोकयेत्क्वचित् ॥ ८७ ॥ निर्वाणनरसिंहोहंपुलस्ती श्वरदक्षिणे ॥ भक्तोनिर्वाणमाप्नोतितन्मूर्तिनमनादपि ॥८८॥ महाबलनृसिंहोहमोंकारात्पूर्वतोमुने ॥ दूतान्महाबलान्याम्यान्नपश्येत्तुतदर्चकः ॥८९॥ प्रचंडनरसिंहोहंचंडभैरवपूर्वतः ॥प्रचंडमप्यघंकृत्वानिष्पाप्मास्यात्तदर्चनात् ॥ १९० ॥ अहंगिरिनृसिंहोस्मितद्देहलिविनायकात् ॥ प्राच्यांप्रबलपापौ घगजानांप्रविदारणः ॥ ९१ ॥ महाभयहरश्चाहंनरसिंहोमहामुने ॥ पितामहेश्वरात्पश्चाद्भक्तसाध्वससाध्वसः ॥ ९२ ॥ अत्युग्रनरसिंहोहंकलशेश्वरप श्चिमे ॥ अत्युग्रमपिपापौघंहरामिश्रद्धयार्चितः ॥ ९३ ॥ ज्वालामालीनृसिंहोऽहंज्वालामुख्याःसमीपतः ॥ संज्वालयामिपापौघतृणानिपरिपूजितः ॥ ॥ ९४ ॥ कोलाहलनृसिंहोस्मिदैत्यदानवमर्दनः ॥ ममनामसमुच्चारादघकोलाहलोयतः ॥ ९५ ॥ कंकालभैरवोयत्रकाशीरक्षणदक्षधीः ॥ तत्रमांभ क्तितोभ्यर्च्यनोपसर्गैर्निरुध्यते ॥ ९६ ॥ विटंकनरसिंहोस्मिनीलकंठेश्वरादनु ॥ तत्रमांश्रद्धयापूज्यनरोभवतिनिर्भयः ॥९७॥ अनंतवामनश्चाहमनं तेश्वरसन्निधौ ॥ अनंतान्यपिभक्तस्यकलुषाणिहरेऽर्चितः ॥ ९८॥ दधिवामनसंज्ञोहंभक्तानांदधिभक्तदः ॥ यन्नामस्मरणादेवनदरिद्रोनरोभवेत् ॥ ९९ ॥ त्रिविक्रमोस्म्यहंकाश्यामुदीच्यांचत्रिलोचनात् ॥ ददामिपूजितोलक्ष्मींहरामिवृजिनान्यपि ॥२००॥ बलिवामननामाहंबलिनापरिपूजितः ॥ बलिभद्रे श्वरात्प्राच्यांभक्तानांबलवर्धनः ॥ १ ॥ दक्षिणेभवतीर्थाच्चताम्रद्वीपादिहागतः ॥ नाम्नाताम्रवराहोस्मिभक्तानांचिंतितार्थदः ॥ २ ॥ मुनेधरणिवाराहः प्रयागेश्वरसन्निधौ ॥ स्नात्वावाराहतीर्थेत्रदृष्ट्वामांकिटिरूपिणम् ॥३॥ संपूज्यबहुभावेननविशेद्योनिसंकटम् ॥ तत्राल्पमपिदत्त्वान्नंधरादानफलंलभेत् ॥ ॥ ४ ॥ महाकलुषगंभीरसागरेनिपतञ्जनः ॥ ममभक्त्युडुपंप्राप्यप्रलयेपिनमज्जति ॥ ५ ॥ अहंकोकावराहोस्मिकिटीश्वरसमीपतः ॥ तत्रमांपूज यन्मर्त्योलभतेचिंतितंफलम् ॥ ६ ॥ नारायणाःशतंपंचशतंचजलशायिनः ॥ त्रिंशत्कमठरूपाणिमत्स्यरूपाणिविंशतिः ॥ ७ ॥ गोपालाश्चशतंसाष्टं बुद्धाःसंतिसहस्रशः ॥ त्रिंशत्परशुरामाश्चरामाएकोत्तरंशतम् ॥ ८ ॥

विष्णुरूपोस्म्यहंचैकोमुक्तिमंडपमध्यतः ॥ मुनेकृतप्रसादेनविश्वेशेनश्रितःस्वयम् ॥ ९ ॥ नारायणस्वरूपेणगणाश्चक्रगदोद्यताः ॥ कुर्वंतिरक्षांक्षेत्रस्यप रितोनियुतानिषट् ॥ २१० ॥ सोग्निर्विदुरितिश्रुत्वासंप्रहृष्टतनूरुहः ॥ पुनःपप्रच्छमेधावीमूर्तिभेदान्वदप्रभो ॥ ११ ॥ हितायनिजभक्तानांममसंदेहशां तये ॥ कतितेमूर्तयोनंतकथंज्ञेयास्तथावद ॥ १२ ॥ इत्याकर्ण्यवचस्तस्याग्निर्विदोस्तपसांनिधेः ॥ उवाचभगवान्विष्णुर्मूर्तिभेदाननुक्रमात् ॥ १३ ॥ याञ्श्रुत्वापिहिनोमर्त्योयमगोचरतांव्रजेत् ॥ केशवादींश्चतुर्विंशद्भेदानाहप्रजापतिः ॥ १४ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ अग्निर्विदोमहाप्राज्ञशृणुते कथयाम्यहम् ॥ आद्यदक्षिणहस्ताच्चविद्धिसृष्टिक्रमान्मुने ॥ १५ ॥ शंखचक्रगदापद्मैर्मूर्तिजानीहिकेशवीम् ॥ पूजितायानृणांकुर्याच्चिंतितार्थमसंशयम् ॥ ॥ १६ ॥ मधुहापरिचेतव्यःशंखपद्मगदारिभिः ॥ वैरिणोनाशमायांतितन्मूर्तिपरिसेवनात् ॥ १७ ॥ संकर्षणःसमर्च्योत्रशंखाब्जारिगदायुधः ॥ तन्मू र्तिपूजनाज्जातुजंतुर्नस्यात्पुनर्भवी ॥ १८ ॥ शंखकौमोदकीचक्रपद्मैर्दामोदरोर्च्यते ॥ ददातिवित्तंपुत्रांश्चगोधनंधान्यमेवहि ॥ १९ ॥ वामनःशंखच क्राब्जगदाभिरुपलक्षितः ॥ लक्ष्मीवंतंजनंकुर्याद्गृहेपिपरिधारितः ॥ २२० ॥ पांचजन्यंगदांपद्मंचित्रमूर्तिसुदर्शनम् ॥ प्रद्युम्नःपूज्यतेमर्त्यैर्बहुद्युम्नंप्रय च्छति ॥ २१ ॥ ऊर्ध्ववामकरात्सृष्ट्याविष्ण्वाद्यंषट्कमुच्यते ॥ यस्यस्मरणमात्रेणविलीयंतेघराशयः ॥ २२ ॥ शंखारिभ्यांगदाब्जाभ्यांपूज्योविष्णुः श्रियेनरैः ॥ शंखपद्मगदाचक्रैर्माधवःपरमर्द्धिदः ॥ २३ ॥ ध्येयोऽनिरुद्धःसंसिद्ध्यैशंखाब्जारिगदोद्यतः ॥ शंखेनगदयाचक्रांबुजाभ्यांपुरुषोत्तमः ॥ ॥ २४ ॥ अधोक्षजोजनिहरःशंखार्यब्जगदोमुने ॥ शंखकौमोदकीपद्मचक्रैर्ध्येयोजनार्दनः ॥ २५ ॥ अधोवामकरात्सृष्ट्याषड्गोविंदादिमूर्तयः ॥ शंखंचक्रंगदांपद्मंगोविंदोबिभृयात्सदा ॥ २६ ॥

शंखपद्मगदाचक्रैरर्च्योलक्ष्म्यैत्रिविक्रमः ॥ शंखाब्जचक्रंबिभ्राणोगदावाञ्श्रीधरःश्रिये ॥ २७ ॥ हृषीकेशश्चशंखेनगदाचक्रांबुजैर्मतः ॥ नृसिंहःशंखच क्राभ्यांपद्मेनगदयोह्यते ॥२८॥ अच्युतःशंखभृन्नित्यंगदापद्मरथांगवान् ॥ दक्षिणाधःकरादूह्यावासुदेवादयश्चषट् ॥२९॥ वासुदेवश्चशंखारिगदाजलजभृ त्सदा॥शंखांबुजगदाचक्रीध्येयोनारायणोनृभिः ॥२३०॥ शंखीपद्मीपद्मनाभोज्ञेयश्चक्रीगदीमुने ॥ उपेंद्रःशंखवान्नित्यंगदारिकमलायुधः ॥ ३१ ॥ हरि र्हरेदघंशंखीचक्रीपद्मीगदीनृणाम् ॥ शंखेनगदयापद्मचक्राभ्यांकृष्णउच्यते ॥३२॥ एतेभेदामयाख्याताःस्वमूर्तीनांमहामुने ॥ यान्विज्ञायध्रुवंमर्त्योमु क्तिंमुक्तिंचविंदति ॥ ३३ ॥ एवंवदतिगोविंदेमुनयेचाग्निविंदवे ॥ पक्षींद्रःपक्षविक्षिप्तविपक्षोऽक्षिपथंगतः ॥ ३४ ॥ प्राहचप्रणिपत्याशुत्र्यक्षस्यागमनं मुदा ॥ संभ्रमेणहृषीकेशःक्वेशइत्यवदत्ततः ॥३५॥ ॥ गरुडउवाच ॥ ॥ प्रत्यक्षःक्रियतामेषमहावृषभकेतनः ॥ यस्यध्वजस्यरत्नार्चिःपूरयेद्रोदसी मिमाम् ॥ ३६ ॥ लोकलोचननिर्माणसफलीकरणक्षमम् ॥ कोटिमार्तंडविद्योतप्रद्योतितदिगाननम् ॥ ३७ ॥ निरीक्ष्यपुंडरीकाक्षस्त्र्यक्षस्यवृषभध्व

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जय ॥ विमानिनांविमानौघैःपरीतगगनांगणम् ॥ ३८ ॥ महावाद्यनिनादौघैःप्रतिध्वनितकंदरम् ॥ विचारपरिषत्पुण्यांजलिसुगंधितम् ॥३९॥ क्षणव्यूहादपिचसंप्रष्टतनूरुहः ॥ अभ्युत्थायुंमनश्चक्रेशंसचक्रगदाधरः ॥ २४० ॥ अग्निर्बिंदुमथप्राहभक्तिदस्तुमुदांनिधिः ॥ इदंमुदर्शनं चक्रंस्पृशास्यव्येनपाणिना ॥ ४१ ॥

अग्निर्बिंदुरितिप्रोक्तःस्पृशेद्यावत्सुदर्शनम् ॥ तावत्सुदर्शनोजातःपरमाद्भुतमाद्भरेः ॥ ४२ ॥ ॥ स्कंदउवाच ॥ ॥ ज्योतीरूपोयमुनिःकौस्तुभेज्यो तिषांतनो ॥ एकीभूतःकलशजबिंदुमाधवसेवनात् ॥ ४३ ॥ बिंदुमाधवपादाब्जभ्रमरीकृतमानसाः ॥ अग्निर्बिंदूपमांयांतिकलशोद्भवनिश्चितम् ॥ ४४ ॥ काश्यांसदैववस्तव्यंमुक्त्योर्बिंदुमाधवः ॥ श्रोतव्यमिदमाख्यानंजेतव्याजगतांगतिः ॥४५॥ पुण्यापंचनदीत्पत्तिःपुण्यामाधवसंकथा ॥ पुण्योवाराणसी वासःसंभवेत्पुण्यजन्मनाम् ॥ ४६ ॥ अग्निर्बिंदोःस्तुतिंयोत्रमाधवाग्रेपठिष्यति ॥ सबृद्धसर्वकामःसमोलक्ष्मीपतिर्भवेत् ॥ ४७ ॥ श्राद्धकालेसदाजप्य मिदमाख्यानमुत्तमम् ॥ द्विजानांभुंजमानानांपुरस्तात्परतृप्तये ॥ ४८ ॥ जप्तव्यमिदमाख्यानंपर्वकालेविशेषतः ॥ पुण्येपंचनदाभ्यारोपुण्यलक्ष्मीवि वृद्धये ॥ ४९ ॥ पठितव्यःप्रयत्नेनबिंदुमाधवसंगमः ॥ श्रोतव्यःपरयाभक्त्याशुक्तिमुक्तिसतृद्धये ॥२६०॥ संप्राप्तेवासरेविष्णोरात्रौजागरणान्वितः ॥ शुत्वाख्यानमिदंपुण्यंवैकुंठेवसतिंलभेत् ॥ २६१ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेबिंदुमाधवाविर्भा वोनामाग्निर्बिंदुसंवादेवेष्णवतीर्थमाहात्म्यवर्णनंनामैकषष्टितमोध्यायः ॥ ६१ ॥ ॥ ॥८॥ ॥ अगस्त्यउवाच ॥ श्रुत्वात्कंदमुनृतोस्मितंतव क्रेरितांकथाम् ॥ अत्याश्चर्यकरंप्रोक्तमाख्यानंबिंदुमाधवम् ॥ १ ॥ इदानींश्रोतुमिच्छामिदेवदेवसमागमम् ॥ ताभ्यांबिंदवसःसमाकर्ण्यबिंदोवासस्यचे ष्टितम् ॥ २ ॥ विष्णुमायाप्रपंचंचकिमाहगरुडध्वजम् ॥ केकेचरांशुनासार्धंसमीशुर्भंदराद्रिदे ॥३॥ प्रसन्नेशःकथंदक्षप्राप्तुलितचक्षुषा ॥ किमाहदे वब्रह्माणंकिमुक्तंभास्वतापिच ॥ ४ ॥ योगिनीभिःकिमाख्यायिगणाद्भिणाःकिमब्रुवन् ॥ एतदाख्याहिमेस्कंदमहत्कौतूहलंमयि ॥५॥ इमंप्रश्नंनिशम्यैवं शिशुनेःकलशजन्मनः ॥ प्रत्युवाचनमस्कृत्यशिवौमणतसिद्धिदौ ॥६॥ ॥ स्कंदउवाच ॥ ॥ शुनेमृणुकथामेतांसर्वपापप्रकाशिनीम् ॥ अशेषविघ्नशमनीं यशाश्रेयोभिवर्धिनीम् ॥ ७ ॥ अथदेवोऽसुरंरुद्रःश्रुत्वाशंभुंसमागतम् ॥ द्विजराजायसमुदासमदात्पारितोषिकम् ॥ ८ ॥ आचार्यांशंसतेशंभोरुपचाराण सिमिश्रम् ॥ ब्रह्माणंप्रणतःकृत्वाततश्चाभ्युद्ययौहरिः ॥ ९ ॥ विस्तृतास्तंभेस्तंभैःपरितोभूतः ॥ योगिनीभिरनुव्याप्तोगणेशःसंस्थितः ॥ १० ॥ अथनेत्रातिथीकृत्यदेवदेवंवृषध्वजम् ॥ संस्तुताद्यैर्वचोऽग्र्यैर्गणनागश्रियःपतिः ॥ ११ ॥ पितामहोपिस्थविरैर्भूशंनम्रशिरोधरः ॥ प्रणतेनमृडेनेष्टप्रणम न्विनिवारितः ॥ १२ ॥ स्वस्त्यभ्युदितयाणिश्चलत्कलकलमंत्रया ॥ अक्षतान्यक्षताद्रीणिदर्भायन्सफलान्यजः ॥ १३ ॥ मौलिंपादाब्जयोःकृत्वागणेशः सत्वरोनतः ॥ मूर्ध्नुपाजिग्रयांचकेहरोहर्षाद्भुजाननम् ॥ १४ ॥ अभ्युपावेशयच्चापिपरिष्वज्यनिजासने ॥ सोमनंदिप्रभृतयःप्रणेमुर्दंडवद्गणाः ॥ १५ ॥ योगिन्योपिप्रणम्येशंचक्रुर्मंगलगायनम् ॥ तरणिःप्रणनामाग्रयप्रणधार्यपतिंहरम् ॥ १६ ॥ खंडेंदुशेखरश्चाथउपविशहासनंहरिम् ॥ समुपावेशयद्भ क्त्यापार्श्वेमानपुरःसरम् ॥ १७ ॥ ब्रह्माणंदक्षिणेभागेपरिविश्राणितासनम् ॥ दृष्ट्वासंभाविताःसर्वेशर्वेणप्रणतागणाः ॥ १८ ॥ मौलिचालनमात्रेणयोगिन्यो पिप्रसादिताः ॥ संतोषितोरविश्चापिविशेतिकरसंज्ञया ॥ १९ ॥ अथशंभुंशतधृतिःप्रबद्धकरसंपुटः ॥ परिविज्ञापयांचक्रेप्रसन्नवदनांबुजम् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ भगवन्देवदेवेशक्षंतव्यंगिरिजापते ॥ वाराणसींसमासाद्यमदहंनागतःपुनः ॥ २१ ॥ प्रसंगतोपिकःकाशींप्राप्यचंद्रविभूषण ॥ किंचिद्वि घातुंशक्तोपित्यजेत्स्थविरतांदधत् ॥ २२ ॥ स्वरूपतोब्राह्मणत्वादपाकर्तुंनशक्यते ॥ अथशक्तोव्यपाकर्तुंकःपुण्येसंचिकीर्षति ॥ २३॥ विभोरपिसमाज्ञे यंधर्मवर्त्मानुसारिणि ॥ नकिंचिदपकर्तव्यंजानताकेनचित्कचित् ॥ २४॥ कस्तादृशिमहीजानौपुण्यवर्त्मन्यतंद्रिते ॥ काशीपालेदिवोदासेमनागपि विरुद्धधीः ॥२५॥ निशम्येतिवचस्तुष्टःश्रीकंठोतिविशुद्धधीः ॥ हसन्प्रोवाचधातारंब्रह्मन्सर्वमवेम्यहम् ॥२६॥ ॥ देवदेवउवाच ॥ ॥ आदौतावददो षंहिब्रह्मत्वंब्राह्मणस्यते ॥ वाजिमेधाध्वराणांचततोपिदशकंकृतम् ॥ २७ ॥ ततोपिविहितंब्रह्मन्भवतापरमंहितम् ॥ अपराधसहस्राणियल्लिंगंस्थापितं मम ॥२८॥ येनैकमपिमोलिंगंस्थापितंयत्रकुत्रचित् ॥ तस्यापराधलेशोपिनास्तिसर्वापराधिनः ॥ २९॥ अपराधसहस्रेपिब्राह्मणंयोपराध्नुयात् ॥ दिनैः कतिपयैरेवतस्यैश्वर्यंविनश्यति ॥ ३० ॥ इतिश्रुतिदेवेशोप्यंतरुच्छ्वसितंगणैः ॥ समातृभिःसमंताच्चविलोक्यास्यंपरस्परम् ॥ ३१ ॥ अर्कोप्यवसरं ज्ञात्वानत्वाशंभुंव्यजिज्ञपत् ॥ प्रसन्नास्यमुमाकांतंदृष्ट्वादृष्टचराचरः ॥ ३२ ॥ ॥ अर्कउवाच ॥ ॥ नाथकाशीमितोगत्वायथाशक्तिकृतोपधिः ॥ अकिंचित्करतांप्राप्तःसहस्रकरवानपि ॥ ३३ ॥

स्वधर्मपालकेतस्मिन्दिवोदासेधरापतौ ॥ निश्चितागमनंज्ञात्वादेवस्याहमिहस्थितः॥३४॥ प्रतीक्षमाणोदेवेशत्वदागमनमुत्तमम् ॥ विभज्यबहुधात्मानं त्वदाराधनतत्परः ॥ ३५ ॥ मनोरथद्रुमश्चाद्यफलितःश्रीमदीक्षणात् ॥ किंचिन्नक्तिलवांभोभिःसिक्तोध्यानेनपुष्पितः ॥ ३६ ॥ इत्युदीरितमाकर्ण्यरवेर्वे रविलोचनः ॥ प्रोवाचदेवदेवेशोनापराध्यसिभास्कर ॥३७॥ ममैवकार्यंविहितंत्वंयदत्रव्यवस्थितः ॥ यस्यांसुरप्रवेशोनतस्मिन्राजनिशासति ॥ ३८ ॥ इतिसूरंसमाश्वास्यदेवदेवःकृपानिधिः ॥ गणानाश्वासयामासत्रीडानम्रशिरोधरान् ॥३९॥ योगिन्योपिसुदृङ्नाथशंभुनासंप्रसादिताः ॥ त्रपाभरसमाक्रां तकंधराइवसंगताः ॥ ४० ॥ ततोव्यापारयांचक्रेभ्यशोनेत्राणिचक्रिणि ॥ हरिर्नकिंचिदप्यूचेसर्वज्ञाग्रेमहामनाः ॥ ४१ ॥ ईशोपिश्रुतवृत्तांतस्तार्क्ष्यां द्रूणपशार्ङ्गिणोः ॥ मनसैवप्रसन्नोभून्नकिंचित्पर्यभाषत ॥ ४२ ॥ एतस्मिन्नंतरेप्राप्तागोलोकात्पंचधेनवः ॥ सुनंदासुमनाःश्रीपिसुशीलासुरभिस्तथा ॥ ॥ ४३ ॥ पंचमीकपिलाचापिसर्वाघौघविघट्टिनी ॥ वात्सल्यदृष्ट्याभर्गस्यतासामूधांसिसुस्रुवुः॥४४॥ ववर्षुःपयसांपूरैस्तद्दूधांसिपयोधराः ॥ धारासा रैरविच्छिन्नैस्तावद्यावद्भदोऽभवत् ॥४५॥ पयःपयोधिरिवसाद्वितीयःप्रेक्षिपार्षदैः ॥ देवेशसमधिष्ठानात्तत्तीर्थमभवत्परम् ॥४६॥ कपिलाह्रदइत्याख्यां चक्रेतस्यमहेश्वरः ॥ ततोदेवाज्ञयासर्वेस्नातास्तत्रदिवौकसः ॥ ४७ ॥ आविरासुस्ततस्तीर्थादथदिव्यपितामहाः ॥ तान्दृष्ट्वातेसुराःसर्वेतर्पयांचक्रिरेमुदा ॥ ४८ ॥ अग्निष्वात्तावर्हिषदआज्यपासोमपास्तथा ॥ इत्याद्यादिव्यपितरस्तृप्ताःशंभुंव्यजिज्ञपन् ॥४९॥ देवदेवजगन्नाथभक्तानामभयप्रद ॥ अस्मिंस्तीर्थेत्वदभ्याशाज्जातानस्तृप्तिरक्षया ॥ ५० ॥ तस्माच्छंभोवरंदेहिप्रसन्नेनांतरात्मना ॥ इतिदिव्यपितॄणांसश्रुत्वावाक्यंवृषध्वजः ॥ ५१ ॥ शृण्वतांसर्वदेवानामिदंवचनमब्रवीत् ॥ शर्वःसर्वपितॄणांवैपरतृप्तिकरंपरम् ॥ ५२ ॥ ॥ श्रीदेवदेवउवाच ॥ ॥ शृणुविष्णोमहाबाहोशृणुत्वंचपि तामह ॥ एतस्मिन्कापिलेतीर्थेकापिलेदपयोभृते ॥ ५३ ॥ योपिंडान्निर्वपिष्यंतिश्रद्धयाश्राद्धदानतः ॥ तेषांपितॄणांसंतृप्तिर्भविष्यतिममाज्ञया ॥५४॥ अन्यंविशेषंवक्ष्यामिमहातृप्तिकरंपरम् ॥ कुहूसोमसमायोगेदत्तंश्राद्धमिहाक्षयम् ॥५५॥ संवर्तकालेसंप्राप्तेजलराशिर्जलान्यपि ॥ क्षीयतेनक्षयत्यत्रश्राद्धं सोमकुहूकृतम् ॥ ५६ ॥ अमासोमसमायोगेश्राद्धंयद्यत्रलभ्यते ॥ तीर्थेकापिलधारेस्मिन्गययापुष्करेणकिम् ॥ ५७ ॥ गदाधरभवान्यत्रयत्रत्वंच स्थितःसह ॥ वृषध्वजोस्म्यहंयत्रफल्गुस्तत्रननसंशयः ॥ ५८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिव्यांतरिक्षभौमानियानितीर्थानिसर्वतः ॥ तान्यत्रनिवसिष्यंतिदर्शेसोमदिनान्विते ॥ ५९ ॥ कुरुक्षेत्रेनैमिषेचगंगासागरसंगमे ॥ ग्रहणेश्राद्धतो यत्स्यात्तत्तीर्थेवार्षभध्वजे ॥ ६० ॥ अस्यतीर्थस्यनामानियानिदिव्यपितामहाः ॥ तान्यहंकथयिष्यामिभवतांतृप्तिदान्यलम् ॥६१॥ मधुस्रवेतिप्रथम मेषापुष्करिणीस्मृता ॥ कृतकृत्याततोज्ञेयाततोऽसौक्षीरनीरधिः ॥ ६२ ॥ वृषभध्वजतीर्थंचतीर्थपैतामहंततः ॥ ततोगदाधराख्यंचपितृतीर्थंततःपरम् ॥ ॥ ६३ ॥ ततःकापिलधारंवैसुधाखानीरियंपुनः ॥ ततःशिवगयाख्यंचज्ञेयंतीर्थमिदंशुभम् ॥६४॥ एतानिदशनामानितीर्थस्यास्यपितामहाः ॥ भवतां तृप्तिकारीणिविनापिश्राद्धतर्पणैः ॥ ६५ ॥ सूर्येंदुसंगमेयेत्रपितॄणांतृप्तिकामुकाः ॥ ब्राह्मणान्भोजयिष्यंतितेषांश्राद्धमनंतकम् ॥ ६६ ॥ श्राद्धेपितॄणां संतृप्त्यैदास्यंतिकपिलांशुभाम् ॥ येत्रतेषांपितृगणोवसेत्क्षीरोदरोधसि ॥ ६७ ॥ वृषोत्सर्गःकृतोयैस्तुतीर्थेस्मिन्वार्षभध्वजे ॥ अश्वमेधपुरोडाशैः पितरस्तेनतर्पिताः ॥ ६८ ॥ गयातोष्टगुणंपुण्यमस्मिंस्तीर्थेपितामहाः ॥ अमायांसोमयुक्तायांश्राद्धैःकापिलधारिके ॥ ६९ ॥ येषांगर्भेऽभवत्स्रावोयेऽ दंतजननामृताः ॥ तेषांतृप्तिर्भवेन्नूनंतीर्थेकापिलधारिके ॥ ७० ॥ अदत्तमौंजीदानायेयेचादारपरिग्रहाः ॥ तेभ्योनिर्वापितंपिंडमिहह्यक्षयतांव्रजेत् ॥ ॥ ७१ ॥ अग्निदाहमृतायेवैनाग्निदाहश्चयेषुवै ॥ तेसर्वेतृप्तिमायांतितीर्थेकापिलधारिके ॥ ७२ ॥ और्द्धदैहिकहीनायेषोडशश्राद्धवर्जिताः ॥ तेतृप्तिम धिगच्छंतिघृतकुल्यांनिवापतः ॥ ७३ ॥ अपुत्राश्चमृतायेवैयेषांनास्त्युदकप्रदः ॥ तेपितृप्तिंपरांयांतिमधुस्रवसितर्पिताः ॥ ७४ ॥ अपमृत्युमृतायेवैचो रविद्युज्जलादिभिः ॥ तेषामिहकृतंश्राद्धंजायतेसुगतिप्रदम् ॥ ७५ ॥ आत्मघातेननिधनंयेषामिहविकर्मणाम् ॥ तेपितृप्तिंलभंतेत्रपिंडैःशिवगयाकृतैः॥ ॥ ७६ ॥ पितृगोत्रेमृतायेवैमातृपक्षेचयेमृताः ॥ तेषामत्रकृतःपिंडोभवेदक्षयतृप्तिदः ॥ ७७ ॥ पत्नीवर्गेमृतायेवैमित्रवर्गेचयेमृताः ॥ तेसर्वेतृप्तिमायां तितर्पितावार्षभध्वजे ॥ ७८ ॥ ब्रह्मक्षत्रविशांवंशेशूद्रवंशेऽत्यजेषुच ॥ येषांनामगृहीत्वात्रदीयतेतेसमुद्धृताः ॥ ७९ ॥ तिर्यग्योनिमृतायेवैयेपिशाच त्वमागताः ॥ तेप्यूर्ध्वगतिमायांतितृप्ताःकापिलधारिके ॥ ८० ॥ येतुमानुषलोकेस्मिन्पितरोमर्त्ययोनयः ॥ तेदिव्ययोनयःस्युर्वैमधुस्रवसितर्पिताः ॥ ॥ ८१ ॥ येदिव्यलोकेपितरःपुण्यैर्देवत्वमागताः ॥ तेब्रह्मलोकेगच्छंतितृप्तास्तीर्थेवृषध्वजे ॥ ८२ ॥ कृतेक्षीरमयंतीर्थंत्रेतायांमधुमत्पुनः ॥ द्वापरेस र्पिषापूर्णंकलौजलमयंभवेत् ॥ ८३ ॥ सीमाबहिर्गतमपिज्ञेयंतीर्थमिदंशुभम् ॥ मध्येवाराणसिश्रेष्ठंममसान्निध्यतोनरैः ॥ ८४ ॥

काशीस्थितैर्यतोदर्शिध्वजोमेवृषलांछनः ॥ वृषध्वजेननाम्नातःस्थास्याम्यत्रपितामहाः ॥ ८५ ॥ पितामहेनसहितोगदाधरसमन्वितः ॥ रविणापार्षदैः सार्धंतुष्टयेवःपितामहाः ॥ ८६ ॥ इतियावद्वरंदत्तेपितृभ्योवृषभध्वजः ॥ तावन्नंदीसमागत्यप्रणम्येशंव्यजिज्ञपत् ॥८७॥ ॥ नंदिकेश्वरउवाच ॥ ॥ विहितःस्यंदनःसज्जस्ततोस्तुविजयोदयः ॥ अष्टौकंठीरवायत्रयत्रोक्ष्णामष्टकंशुभम् ॥ ८८ ॥ यत्रेभाःपरिभांत्यष्टौयत्राष्टौजविनोहयाः ॥ मनःसंयमनं यत्रकशापाणिव्यवस्थितम् ॥ ८९ ॥ गंगायमुनयोरीषेचक्रेपवनदेवता ॥ सायंप्रातर्मयेचक्रेछत्रंद्यौर्मंडलंशुचि ॥९०॥ तारावलीमयाःकीलाआहेयाउप नायकाः ॥ श्रुतयोमार्गदर्शिन्यःस्मृतयोरथगुप्तयः ॥ ९१ ॥ दक्षिणाधूर्दृढायत्रमखायत्राभिरक्षकाः ॥ आसनंप्रणवोयत्रगायत्रीपादपीठभूः ॥ ९२ ॥ सांगाव्याहृतयोयत्रशुभाःसोपानवीथिकाः ॥ सूर्याचंद्रमसौयत्रसततंद्वाररक्षकौ ॥९३॥ अग्निर्मकरतुंडश्चरथभूःकौमुदीमयी॥ध्वजदंडोमहामेरुःपताकाह स्करप्रभा ॥ ९४ ॥ स्वयंवाग्देवतायत्रचंचच्चामरधारिणी ॥ ॥ स्कंदउवाच ॥ ॥ शैलादिनेतिविज्ञप्तोदेवदेवउमापतिः ॥ ९५ ॥ कृतनीराजनवि धिरष्टभिर्देवमातृभिः ॥ पिनाकपाणिरुत्तस्थौदत्तहस्तोथशार्ङ्गिणा ॥ ९६ ॥ निनादोदिव्यवाद्यानांरोदसीपर्यपूरयत् ॥ गीतमंगलगीर्भिश्चचारणैरनुव र्धितः ॥ ९७ ॥ तेनदिव्यनिनादेनबधिरीकृतदिङ्मुखाः ॥ आहूताइवआजग्मुर्विष्वग्भुवनवासिनः ॥ ९८ ॥

देवाःकोट्यस्त्रयस्त्रिंशद्गणाःकोट्ययुतद्वयम् ॥ नवकोट्यस्तुचामुंडाभैरव्यःकोटिसंमिताः ॥ ९९ ॥ षडाननाःकुमाराश्चमयूरवरवाहनाः ॥ ममानुगाः समायाताःकोट्योष्टौमहाबलाः ॥ १०० ॥ आययुःकोट्यःसप्तस्फुरत्परशुपाणयः ॥ पिचंडिलामहावेगाविघ्नविघ्नागजाननाः ॥ १ ॥ षडशीतिसहस्रा णिमुनयोब्रह्मवादिनः ॥ तावंतोपिसमाजग्मुस्तत्रान्येगृहमेधिनः ॥ २ ॥ नागानांकोटयस्तिस्रःपातालतलवासिनाम् ॥ दानवानांचदैत्यानांद्विद्वेकोटी शिवात्मनाम् ॥ ३ ॥ गंधर्वानियुतान्यष्टौकोट्यर्धंयक्षरक्षसाम् ॥ विद्याधराणामयुतंनियुतद्वयसंयुतम् ॥ ४ ॥ तथाषष्टिसहस्राणिदिव्याश्चाप्सरसः शुभाः ॥ गोमातरोऽष्टौलक्षाणिसुपर्णान्ययुतानिषट् ॥ ५ ॥ सागराःसप्तसंप्राप्तानानारत्नोपदप्रदाः ॥ सरितांचसहस्राणित्रीणिपंचायुतानिच ॥ ६ ॥ गिरयोऽष्टौसहस्राणिवनस्पतिशतत्रयम् ॥ आजग्मुर्दिग्गजाअष्टौयत्रदेवःपिनाकधृक् ॥७॥ एतैःसमेतःसंतुष्टःपरिष्टुतइतस्ततः ॥ श्रीकंठोरथमारुह्यकाशीं प्राविशदुत्तमाम् ॥८॥ सगिरींद्रसुतस्त्र्यक्षोमुदांधाममुदांखनिः ॥ काशींप्रेक्षिष्टसंहृष्टस्त्रिविष्टपसमुत्कटाम् ॥९॥ ॥ स्कंदउवाच ॥ ॥ श्रुत्याख्यानमिदं पुण्यंकोटिजन्माघनाशनम् ॥ पठित्वापाठयित्वाचशिवसायुज्यमाप्नुयात् ॥ ११० ॥ श्राद्धकालेविशेषेणपटनीयंप्रयत्नतः ॥ अक्षयंतद्भवेच्छ्राद्धंपितृतु ष्टिकरंपरम् ॥ ११ ॥ वृषभध्वजमाहात्म्यंपठित्वाशिवसन्निधौ ॥ प्रत्यहंवर्षमात्रंतुह्यपुत्रःपुत्रवान्भवेत् ॥ १२ ॥ विश्वेशितुःसंप्रवेशोयःकाश्यां समुदाहृतः ॥ परमानंदकंदस्यबीजमेतत्सुनिश्चितम् ॥ १३ ॥ पठित्वैतन्मुदाख्यानंप्रविशेद्योनवंगृहम् ॥ ससर्वसौख्यनिलयोभवेदेवनसंशयः ॥१४॥ त्रैलोक्यानंदजनकमेतदाख्यानमुत्तमम् ॥ अस्यश्रवणमात्रेणविश्वेशःसंप्रसीदति ॥ १५ ॥ अलभ्यलाभोदेवस्यजातोत्रहियतःपरः ॥ ततःकाशी प्रवेशाख्यंजप्यमाख्यानमुत्तमम् ॥ ११६ ॥ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्द्धेवृषभध्वजप्रादुर्भा वोनामद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥

अगस्त्यउवाच ॥ ॥ दृष्ट्वाकाशींदृगानंदांतारकारेपुरारिणा ॥ किमकारिसमाचक्ष्वप्राप्तांबहुमनोरथैः ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ पतिव्रतापते ऽगस्त्यशृणुवक्ष्याम्यशेषतः ॥ मृगांकलक्ष्मणोत्कंठंकाशीनेत्रातिथीकृता ॥ २ ॥ अथसर्वज्ञनाथेनभक्तवत्सलचेतसा ॥ जैगीषव्योमुनिश्रेष्ठोगुहां तस्थोनिरीक्षितः ॥ ३ ॥ यमनेहसमारभ्यमंदराद्रिंविनिर्ययौ ॥ अद्रींद्रसुतयासार्धंरुद्रेणोक्षेंद्रगामिना ॥ ४ ॥ तंवासरंपुरस्कृत्यजग्राहनियमंदृढम् ॥ जैगीषव्योमहामेधाःकुंभयोनेमहाकृती ॥५॥ विषमेक्षणपादाब्जंसमीक्षिष्येयदापुनः ॥ तदांबुविप्रुषमपिभक्षयिष्यामिचेत्यहो ॥६॥ कुतश्चिद्धारणायो गादथवाशंभ्वनुग्रहात् ॥ अनश्नन्नपिवन्योगीजैगीषव्यःस्थितोमुने ॥ ७ ॥ तंशंभुरेवजानातिनान्योजानातिकश्चन ॥ अतएवततःप्राप्तःप्रथमंप्रमथा धिपः ॥ ८ ॥ ज्येष्ठशुक्लचतुर्दश्यांसोमवारानुराधयोः ॥ तत्पर्वणिमहायात्राकर्तव्यातत्रमानवैः ॥ ९ ॥ ज्येष्ठस्थानंततःकाश्यांतदाभूदपिपुण्यदम् ॥ तत्रलिंगंसमभवत्स्वयंज्येष्ठेश्वराभिधम् ॥ १० ॥ तल्लिंगदर्शनात्पुंसांपापंजन्मशतार्जितम् ॥ तमोकोंदयमाप्येवतत्क्षणादेवनश्यति ॥११॥ ज्येष्ठवाप्यां नरःस्नात्वातर्पयित्वापितामहान् ॥ ज्येष्ठेश्वरंसमालोक्यनभूयोजायतेभुवि ॥ १२ ॥ आविरासीत्स्वयंतत्रज्येष्ठेश्वरसमीपतः ॥ सर्वसिद्धिप्रदागौरीज्ये ष्ठाश्रेष्ठासमंततः ॥ १३ ॥ ज्येष्ठेमासिसिताष्टम्यांतत्रकार्योमहोत्सवः ॥ रात्रौजागरणंकार्यंसर्वसंपत्समृद्धये ॥ १४ ॥ ज्येष्ठांगौरींनमस्कृत्यज्येष्ठवापीप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रिप्लुता ॥ सौभाग्यभाजनंभूयाद्योपासौभाग्यभागपि ॥ १५ ॥ निवासंकृतवान्शंभुस्तस्मिन्स्थानेयतःस्वयम् ॥ निवासेशइतिख्यातंलिंगंतत्रपरंततः ॥ ॥ १६ ॥ निवासेश्वरलिंगस्यसेवनात्सर्वसंपदः ॥ निवसंतिगृहेनित्यंनित्यंप्रतिपदंपुनः ॥ १७ ॥ कृत्वाश्राद्धंविधानेनज्येष्ठस्थानेनरोत्तमः ॥ ज्येष्ठांतृप्तिंददात्येवपितृभ्योमधुसर्पिषा ॥ १८ ॥ ज्येष्ठतीर्थेनरःकाश्यांदत्त्वादानानिशक्तितः ॥ ज्येष्ठान्स्वर्गानवाप्नोतिनरोमोक्षंचगच्छति ॥ १९ ॥ ज्येष्ठेश्वरोर्च्यःप्रथमंकाश्यांश्रेयोर्थिभिर्नरैः ॥ ज्येष्ठागौरीततोभ्यर्च्यासर्वज्येष्ठमभीप्सुभिः ॥ २० ॥ अथनंदिनमाहूयधूर्जटिःसकृपानिधिः ॥ शृण्वतांसर्वदेवानामिदंवचनमब्रवीत् ॥ २१ ॥ ॥ ईश्वरउवाच ॥ ॥ शैलादेप्रविशाशुत्वंगुहास्त्यत्रमनोहरा ॥ तदंतरेस्तिमेभक्तोजैगीषव्यस्तपोधनः ॥ २२ ॥ महानियमवान्नंदिंस्त्वगस्थिस्नायुशेषितः ॥ तमिहानयमद्भक्तंमद्दर्शनदृढव्रतम् ॥ २३ ॥ यदाप्रभृत्यगांकाश्यामंदरंसर्वसुंदरम् ॥ महानियमवानेषतदारभ्योज्झिताशनः ॥ २४ ॥ गृहाणलीलाकमलमिदंपीयूषपोषणम् ॥ अनेनतस्यगात्राणिस्पृशसद्यःसुबृंहिणा ॥ २५ ॥

ततोनंदीसमादायतल्लीलाकमलंविभोः ॥ प्रणम्यदेवदेवेशमाविशद्गह्वरांगुहाम् ॥२६॥ नंदीदृष्ट्वायतंतत्रधारणादृढमानसम् ॥ तपोग्निपरिशुष्कांगंकमलेनसमस्पृशत् ॥ २७ ॥ तपतिवृष्टिसंयोगाच्छालूरइवकोटरे ॥ उल्ललाससयोगींद्रःस्पर्शमात्रात्तदब्जजात् ॥ २८ ॥ अथनंदीसमादायसत्वरंमुनिपुंगवम् ॥ देवदेवस्यपादाग्रेनमस्कृत्यन्यपातयत् ॥ २९ ॥ जैगीषव्योथसंभ्रांतःपुरतोवीक्ष्यशंकरम् ॥ वामांगसन्निविष्टाद्रितनयंप्रणनामह ॥ ३० ॥ प्रणम्यदंडवद्भूमौपरिलुंठ्यसमंततः ॥ तुष्टावपरयाभक्त्यासमुनिश्चंद्रशेखरम् ॥३१॥ ॥ जैगीषव्यउवाच ॥ ॥ नमःशिवायशांतायसर्वज्ञायशुभात्मने॥ जगदानंदकंदायपरमानंदहेतवे ॥ ३२ ॥ अरूपायसरूपायनानारूपधरायच ॥ विरूपाक्षायविधयेविधिविष्णुस्तुतायच ॥३३॥ स्थावरायनमस्तुभ्यंजंगमायनमोस्तुते ॥ सर्वात्मनेनमस्तुभ्यंनमस्तेपरमात्मने ॥ ३४ ॥ नमस्त्रैलोक्यकाम्यायकामांगदहनायच ॥ नमोशेषविशेषायनमःशेषांगदायते ॥ ॥ ३५ ॥ श्रीकंठायनमस्तुभ्यंविषकंठायतेनमः ॥ वैकुंठवंद्यपादायनमोऽकुंठितशक्तये ॥३६॥ नमःशक्त्यर्धदेहायविदेहायसुदेहिने ॥ सकृत्प्रणाममात्रेणदेहिदेहनिवारिणे ॥ ३७ ॥ कालायकालकालायकालकूटविषादिने ॥ व्यालयज्ञोपवीतायव्यालभूषणधारिणे ॥ ३८ ॥ नमस्तेखंडपरशोनमःखंडेंदुधारिणे ॥ खंडिताशेषदुःखायखड्गखेटकधारिणे ॥ ३९ ॥ गीर्वाणगीतनाथायगंगाकल्लोलमालिने ॥ गौरीशायगिरीशायगिरिशायगुहारणे ॥ ॥ ४० ॥ चंद्रार्धशुद्धभूषायचंद्रसूर्याग्निचक्षुषे ॥ नमस्तेचर्मवसननमोदिग्वसनायते ॥ ४१ ॥ जगदीशायजीर्णायजराजन्महरायते ॥ जीवायतेनमस्तुभ्यंजंजपूकादिहारिणे ॥ ४२ ॥

नमोडमरुहस्तायधनुर्हस्तायतेनमः ॥ त्रिनेत्रायनमस्तुभ्यंजगन्नेत्रायतेनमः ॥ ४३ ॥ त्रिशूलव्यग्रहस्तायनमस्त्रिपथगाधर ॥ त्रिविष्टपाधिनाथायत्रिवेदीपठितायच ॥ ४४ ॥ त्रयीमयायतुष्टायभक्ततुष्टिप्रदायच ॥ दीक्षितायनमस्तुभ्यंदेवदेवायतेनमः ॥ ४५ ॥ दारिताशेषपापायनमस्तेदीर्घदर्शिने ॥ दूरायदुरवाप्यायदोषनिर्दलनायच ॥ ४६ ॥ दोषाकरकलाधारत्यक्तदोषागमायच ॥ नमोधूर्जटयेतुभ्यंधत्तूरकुसुमप्रिय ॥४७॥ नमोधीरायधर्मायधर्मपालायतेनमः ॥ नीलग्रीवनमस्तुभ्यंनमस्तेनीललोहित ॥ ४८ ॥ नाममात्रस्मृतिकृतांत्रैलोक्यैश्वर्यपूरक ॥ नमःप्रमथनाथायपिनाकोद्यतपाणये ॥ ॥ ४९ ॥ पशुपाशविमोक्षायपशूनांपतयेनमः ॥ नामोच्चारणमात्रेणमहापातकहारिणे ॥ ५० ॥ परात्परायपारायपरापरपरायच ॥ नमोऽपारचरित्रायसुपवित्रकथायच ॥ ५१ ॥ वामदेवायवामार्धधारिणेवृषगामिने ॥ नमोभर्गायभीमायनतभीतिहरायच ॥ ५२ ॥ भवायभवनाशायभूतानांपतयेनमः ॥ महादेवनमस्तुभ्यंमहेशमहसांपते ॥ ५३ ॥ नमोमृडानीपतयेनमोमृत्युंजयायते ॥ यज्ञारयेनमस्तुभ्यंयक्षराजप्रियायच ॥ ५४ ॥ यायजूकाययज्ञाययज्ञानांफलदायिने ॥ रुद्रायरुद्रपतयेकद्रुद्रायरमायच ॥ ५५ ॥ शूलिनेशाश्वतेशायश्मशानावनिचारिणे ॥ शिवाप्रियायशर्वायसर्वज्ञायनमोस्तुते ॥ ५६ ॥ हरायक्षांतिरूपायक्षेत्रज्ञायक्षमाकर ॥ क्षमायक्षितिहर्त्रेचक्षीरगौरायतेनमः ॥ ५७ ॥ अंधकारेनमस्तुभ्यमाद्यंतरहितायच ॥ इडाधारायईशायउपेंद्रेंद्रस्तुतायच ॥५८ ॥ उमाकांतायउग्रायनमस्तेऊर्ध्वरेतसे ॥ एकरूपायचैकायमहदैश्वर्यरूपिणे ॥ ५९ ॥ अनंतकारिणेतुभ्यमंबिकापतयेनमः ॥ त्वमोंकारोवषट्कारोभूर्भुवःस्वस्त्वमेवहि ॥६०॥ दृश्यादृश्यंयदत्रास्तितत्सर्वंत्वमुमाधव ॥ स्तुतिंकर्तुंनजानामिस्तुतिकर्तात्वमेवहि ॥ ॥ ६१ ॥ वाच्यस्त्वंवाचकस्त्वंहिवाक्चत्वंप्रणतोस्मिते ॥ नान्यंवेद्मिमहादेवनान्यंस्तौमिमहेश्वर ॥ ६२ ॥

नान्यंनमामिगौरीशनान्याख्यामाददेशिव ॥ मूकोन्यनामग्रहणेबधिरोन्यकथाश्रुतौ ॥६३॥ पंगुरन्याभिगमनेऽस्म्यंधोऽन्यपरिवीक्षणे॥एकएवभवानीशएकःकर्तात्वमेवहि॥ ६४ ॥ पाताहर्तात्वमेवैकोनानात्वंमूढकल्पना ॥ अतस्त्वमेवशरणंभूयोभूयःपुनःपुनः ॥६५॥ संसारसागरेमग्नंमामुद्धरमहेश्वर ॥ इतिस्तुत्वामहेशानंजैगीषव्योमहामुनिः ॥ ६६ ॥ वाचंयमोभवत्स्थाणोःपुरतःस्थाणुसन्निभः ॥ इतिस्तुतिंसमाकर्ण्यमुनेश्चंद्रविभूषणः ॥ उवाचचप्रसन्नात्मावरंब्रूहीतितंमुनिम् ॥ ६७ ॥ ॥ जैगीषव्यउवाच ॥ ॥ यदिप्रसन्नोदेवेशततस्तवपदांबुजात् ॥ माभवानिभवानीशदूरंदूरपदप्रद ॥६८॥ अपरश्चवरोनाथदेयोयमविचारतः ॥ यन्मयास्थापितंलिंगंतत्रसान्निध्यमस्तुते ॥६९॥ ॥ ईश्वरउवाच ॥ ॥ जैगीषव्यमहाभागयदुक्तंभक्तानघ ॥ तदस्तुसर्वंतेभीष्टंवरमन्यंददामिच ॥ ७० ॥ योगशास्त्रंमयादत्तंतवनिर्वाणसाधकम् ॥ सर्वेषांयोगिनांमध्येयोगाचार्योऽस्तुवैभवान् ॥ ७१ ॥ रहस्यंयोगविद्यायायथावत्त्वंतपोधन ॥ संवेत्स्यसेप्रसादान्मेयेननिर्वाणमाप्स्यसि ॥ ७२ ॥ यथानंदीयथाभृंगीसोमनंदीयथातथा ॥ त्वंभविष्यसिभक्तोमेजरामरणवर्जितः ॥ ७३ ॥ संतिव्रतानिभूयांसिनियमाःसंत्यनेकधा ॥ तपांसिनानासंत्यत्रसंतिदानान्यनेकशः ॥ ७४ ॥ श्रेयसांसाधनान्यत्रपापघ्नान्यपिसर्वथा ॥ परंहिपरमश्चैषनियमोयस्त्वयाकृतः ॥ ७५ ॥ परोहिनियमश्चैषमांविलोक्ययदश्यते ॥ मामनालोक्ययद्भुक्तंतद्भुक्तंकेवलंत्वघम् ॥ ७६ ॥ असमर्च्यचयोभुङ्क्तेपत्रपुष्पफलैरपि ॥ रेतोभक्षीभवेन्मूढःसजन्मान्येकविंशतिम् ॥ ७७ ॥ महतोनियमस्यास्यभवतानुष्ठितस्यवै ॥ नार्हंतिषोडशींमात्रामप्यन्येनियमायमाः ॥ ७८ ॥ अतोमच्चरणाभ्याशेत्वंनिवत्स्यसिसर्वथा ॥ अतोनैःश्रेयसींलक्ष्मींतत्रैवप्राप्स्यसिध्रुवम् ॥ ७९ ॥ जैगीषव्येश्वरंनामलिंगंकाश्यांसुदुर्लभम् ॥ त्रीणिवर्षाणिसंसेव्यलभेद्योगंनसंशयः ॥ ८० ॥ जैगीषव्यगुहांप्राप्ययोगाभ्यसनतत्परः ॥ षण्मासेनलभेत्सिद्धिंवाञ्छितांमदनुग्रहात् ॥ ८१ ॥ तवलिंगमिदंभक्तैःपूजनीयंप्रयत्नतः ॥ विलोक्याचगुहारम्यापरांसिद्धिमभीप्सुभिः ॥ ८२ ॥ अत्रज्येष्ठेश्वरक्षेत्रेत्वल्लिंगंसर्वसिद्धिदम् ॥ नाशयेदघसंघानिदृष्टंस्पृष्टंसमर्चितम् ॥ ८३ ॥

अस्मिञ्ज्येष्ठेश्वरक्षेत्रेसंभोज्यशिवयोगिनः ॥ कोटिभोज्यफलंसम्यगेकैकपरिसंख्यया ॥ ८४ ॥ जैगीषव्येश्वरंलिंगंगोपनीयंप्रयत्नतः ॥ कलौकलुषबुद्धीनांपुरतश्चविशेषतः ॥ ८५ ॥ करिष्याम्यत्रसांनिध्यमस्मिँल्लिंगेतपोधन ॥ योगसिद्धिप्रदानायसाधकेभ्यःसदैवहि ॥८६॥ ददेशृणुमहाभागजैगीषव्यापरंवरम् ॥ त्वयेदंयत्कृतंस्तोत्रंयोगसिद्धिकरंपरम् ॥ ८७ ॥ महापापौघशमनंमहापुण्यप्रवर्धनम् ॥ महाभीतिप्रशमनंमहाभक्तिविवर्धनम् ॥ ८८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एतत्स्तोत्रजपात्पुंसामसाध्यंनैवकिंचन ॥ तस्मात्सर्वप्रयत्नेनजपनीयंसुसाधकैः ॥ ८९ ॥ इतिदत्त्वावरंतस्मैस्मरारिःस्मेरलोचनः ॥ ददर्शब्राह्मणां स्तत्रसमेतान्क्षेत्रवासिनः ॥ ९० ॥ ॥ स्कंदउवाच ॥ ॥ निशम्याख्यानमतुलमेतत्प्राज्ञःप्रयत्नतः ॥ निष्पापोजायतेमर्त्योनोपसर्गैःप्रबाध्यते ॥ ९१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धे ज्येष्ठेशाख्यानंनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ अगस्त्यउवाच ॥ दृष्ट्वाभूदेवताःशंभुंकिमाचख्युःषडानन ॥ कानिकानिचलिंगानितत्रतान्यपिचक्ष्वमे ॥ १ ॥ ज्येष्ठस्थानेमहापुण्येदेवदेवस्यवल्लभे ॥ आश्चर्यंकिमभूत्त त्रतदाचक्ष्वषडानन ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्ययथापृच्छिभवतातद्ब्रवीम्यहम् ॥ मंदराद्रिंयदादेवोगतवान्ब्रह्मगौरवात् ॥ ३ ॥ तदानि राश्रयाविप्राःक्षेत्रसंन्यासिनोनघाः ॥ उपाकृताश्चाविरतंमहाक्षेत्रप्रतिग्रहात् ॥ ४ ॥ खातंखातंचदंडाग्रैर्भूमिंकंदादिवृत्तयः ॥ चक्रुःपुष्करिणींरम्यांदं डखाताभिधांमुने ॥ ५ ॥ तत्तीर्थंपरितःस्थाप्यमहालिंगान्यनेकशः ॥ महेशाराधनपरास्तपश्चक्रुःप्रयत्नतः ॥ ६ ॥ विभूतिधारिणोनित्यंनित्यंरुद्राक्षधा रिणः ॥ लिंगपूजारतानित्यंशतरुद्रियजापिनः ॥ ७ ॥ तेश्रुत्वादेवदेवस्यपुनरागमनंमुने ॥ तपःकृशाअतितरामासुरानंदमेदुराः ॥ ८ ॥ द्विजाःपं चसहस्राणिचरंतोविपुलंतपः ॥ दंडखातान्महातीर्थादाजग्मुर्देवदर्शने ॥ ९ ॥ तीर्थान्मंदाकिनीनाम्नोद्विजाःपाशुपतव्रताः ॥ शिवैकाराधनपराः समेताअयुतोन्मिताः ॥ १० ॥

हंसतीर्थात्परिप्राप्ताअयुतंत्रिशतोत्तरम् ॥ शतंदुर्वाससस्तीर्थादेकादशशताधिकम् ॥ ११ ॥ मत्स्योदर्याःपरापेतुःसहस्राणिषडेवहि ॥ कपालमोचना त्सप्तशतान्यभ्यागताद्विजाः ॥ १२ ॥ ऋणमोचनतस्तीर्थात्सहस्रंद्विशताधिकम् ॥ वैतरण्याअपिमुनेद्विजानामयुतार्धकम् ॥ १३ ॥ ततःपृथूदकात्कुंडा त्पृथुनापरिखानितात् ॥ अयासिषुर्द्विजानांचशतान्येवत्रयोदश ॥ १४ ॥ तथैवाप्सरसःकुंडान्मेनकाख्याच्छतद्वयम् ॥ उर्वशीकुंडतःप्राप्ताःसहस्रंद्विशता धिकम् ॥ १५ ॥ तथैरावतकुंडाच्चब्राह्मणास्त्रिशतानिच ॥ गंधर्वाप्सरसःसप्तशतानिद्विशतानिच ॥ १६ ॥ वृषेशतीर्थादाजग्मुर्नवतिःसशतत्रया ॥ यक्षिणीकुंडतःप्राप्ताःसहस्रंत्रिशतोत्तरम् ॥ १७ ॥ लक्ष्मीतीर्थात्परंजग्मुःषोडशैवशतानिच ॥ पिशाचमोचनात्सप्तसहस्राणिद्विजोत्तमाः ॥ १८ ॥ पितृकुंडाच्छतंसाग्रंध्रुवतीर्थाच्छतानिषट् ॥ मानसाख्याच्चसरसोद्विशतीसशतत्रया ॥ १९ ॥ ब्राह्मणावासुकिह्रदात्सहस्राणिदशैवतु ॥ तथैवाष्टशतंद्रष्टुं जानकीकुंडतोद्विजाः ॥ २० ॥ काशीनाथमनुप्राप्ताःपरमानंददायिनम् ॥ तथागौतमकुंडाच्चशतानिनवचागताः ॥ २१ ॥ तीर्थाद्दुर्गतिसंहर्तुर्ब्राह्मणाःप्र तिपेदिरे ॥ एकादशशतान्येवद्रष्टुंदेवमुमापतिम् ॥ २२ ॥ असीसंभेदमारभ्यगंगातीरस्थिताद्विजाः ॥ आसंगमेश्वरात्तत्रपरिप्राप्ताघटोद्भव ॥ २३ ॥ अष्टादशसहस्राणितथापंचशतान्यपि ॥ ब्राह्मणाःपंचपंचाशद्गंगातीरात्समागताः ॥ २४ ॥ सार्द्रदूर्वाक्षतकरैःसपुष्पफलपाणिभिः ॥ सुगंधमाल्यहस्तै श्चब्राह्मणैर्जयवादिभिः ॥ २५ ॥ स्तुतोमंगलसूक्तैश्चप्रणतश्चपुनःपुनः ॥ तेभ्योदत्ताभयःशंभुःपप्रच्छकुशलंमुदा ॥ २६ ॥ ततस्तेब्राह्मणाःप्रोचुः प्रबद्धकरसंपुटाः ॥ क्षेत्रेनिवसतांनाथसदानःकुशलोदयः ॥ २७ ॥ विशेषतःकृतोऽस्माभिःसाक्षान्नयनगोचरः ॥ त्वंयत्स्वरूपंश्रुतयोनविदुःपरमार्थतः ॥ २८ ॥ सदैवाकुशलंतेषांयेत्वत्क्षेत्रपराङ्मुखाः ॥ चतुर्दशापिवैलोकास्तेषांनित्यंपराङ्मुखाः ॥ २९ ॥ येषांहृदिसदैवास्तेकाशीत्वाशीविषांगद ॥ संसाराशीविषविषंनतेषांप्रभवेत्क्वचित् ॥ ३० ॥ गर्भरक्षामणिर्मंत्रःकाशीवर्णद्वयात्मकः ॥ यस्यकंठेसदातिष्ठेत्तस्याकुशलताकुतः ॥ ३१ ॥

सुधांपिबतियोनित्यंकाशीवर्णद्वयात्मिकाम् ॥ सनैर्जरींदशांहित्वासुधैवपरिजायते ॥ ३२ ॥ श्रुतंकर्णामृतंयेनकाशीत्यक्षरयुग्मकम् ॥ नसमाकर्णयत्ये वसपुनर्गर्भजांकथाम् ॥ ३३ ॥ काशीरजोपियन्मूर्ध्निपतेदप्यनिलाहतम् ॥ चंद्रशेखरतन्मूर्धाभवेच्चंद्रकलांकितः ॥ ३४ ॥ प्रसंगतोपियन्नेत्रपथमानं दकाननम् ॥ यातंतेत्रनजायंतेनेक्षेरन्पितृकाननम् ॥ ३५ ॥ गच्छतातिष्ठतावापिस्वपताजाग्रताथवा ॥ काशीत्येषमहामंत्रोयेनजप्तःसनिर्भयः ॥ ३६ ॥ येनबीजाक्षरयुगंकाशीतिहृदिधारितम् ॥ अबीजानिभवंत्येवकर्मबीजानितस्यवै ॥ ३७ ॥ काशीकाशीतिकाशीतिजपतोयस्यसंस्थितिः ॥ अन्यत्रा पिसतस्तस्यपुरोमुक्तिःप्रकाशते ॥ ३८ ॥ क्षेममूर्तिरियंकाशीक्षेममूर्तिर्भवान्भव ॥ क्षेममूर्तिस्त्रिपथगानान्यत्क्षेमत्रयंक्वचित् ॥ ३९ ॥ ब्राह्मणानामिति वचःक्षेत्रभक्तिविबृंहितम् ॥ निशम्यगिरिजाकांतस्तुतोपनितरांहरः ॥ ४० ॥ प्रोवाचचप्रसन्नात्माधन्यायूयंद्विजर्षभाः ॥ येषामिहेदृशीभक्तिर्ममक्षेत्रे तिपावने ॥ ४१ ॥ जानेसत्त्वमयाजाताःक्षेत्रस्यास्यनिषेवणात् ॥ नीरजस्कावितमसःसंसारार्णवपारगाः ॥ ४२ ॥ वाराणस्यास्तुयेभक्तास्तेभक्तामम निश्चितम् ॥ जीवन्मुक्ताहितेनूनंमोक्षलक्ष्म्याकटाक्षिताः ॥ ४३ ॥ यैश्चकाशीस्थितोजंतुरल्पकोपिविरोधितः ॥ तैर्वैविश्वंभरासर्वामयासहविरोधिता ॥ ॥ ४४ ॥ वाराणस्याःस्तुतिमपियोनिशम्यानुमोदते ॥ अपिब्रह्मांडमखिलंध्रुवंतेनानुमोदितम् ॥ ४५ ॥ निवसंतिहियेमर्त्याअस्मिन्नानंदकानने ॥ ममां तःकरणेतेवैनिवसेयुरकल्मषाः ॥ ४६ ॥ निवसंतिममक्षेत्रेममभक्तिंप्रकुर्वते ॥ ममलिंगधरायेतुतानेवोपदिशाम्यहम् ॥ ४७ ॥ निवसंतिममक्षेत्रेममभ क्तिंनकुर्वते ॥ ममलिंगधरायेनोनतानुपदिशाम्यहम् ॥ ४८ ॥ काशीनिर्वाणनगरीयेषांचित्तेप्रकाशते ॥ तेमत्पुरःप्रकाशंतेनैःश्रेयस्याश्रियावृताः ॥ ४९ ॥ मोक्षलक्ष्मीरियंकाशीनयेभ्यः परिरोचते ॥ स्वर्लक्ष्मींकांक्षमाणेभ्यःपतितास्तेनसंशयः ॥ ५० ॥ काशींसंकांक्षमाणानांपुरुषार्थचतुष्टयम् ॥ पुरःकिंकरव त्तिष्ठेन्ममानुग्रहतोद्विजाः ॥ ५१ ॥ आनंदकाननेह्यत्रज्वलद्दावानलोस्म्यहम् ॥ कर्मबीजानिजंतूनांज्वालयेनप्ररोहये ॥ ५२ ॥

वस्तव्यंसततंकाश्यांयष्टव्योहंप्रयत्नतः ॥ जेतव्यौकलिकालौचरंतव्यामुक्तिरंगना ॥ ५३ ॥ प्राप्यापिकाशींदुर्बुद्धिर्योनमांपरिसेवते ॥ तस्यहस्तगताप्याशुकं वल्मश्रीःप्रणश्यति ॥ ५४ ॥ धन्यामद्भक्तिलक्ष्माणोब्राह्मणाःकाशिवासिनः ॥ यूयंयच्चेतसोवृत्तेर्नदूरेहंनकाशिका ॥ ५५ ॥ दातव्योवोवरःकोत्रव्रियतांमे यथारुचि ॥ प्रेयांसोमेयतोयूयंक्षेत्रसंन्यासकारिणः ॥ ५६ ॥ इतिपीत्वामहेशानमुखक्षीराब्धिजांसुधाम् ॥ परितृप्ताद्विजाःसर्वेवव्रुर्वरमनुत्तमम् ॥ ५७ ॥ ब्राह्मणाऊचुः ॥ ॥ उमापतेमहेशानसर्वज्ञवरएषनः ॥ काशीकदापिनत्याज्याभवताभवतापहृत् ॥ ५८ ॥ वचनाद्ब्राह्मणानांतुशापोमाप्रभवत्विह ॥ कदाचिदपिकेषांचित्काश्यांमोक्षांतरायकः ॥ ५९ ॥ तवपादांबुजद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुनः ॥ आकलेवरपातंचकाशीवासोस्तुनोनिशम् ॥ ६० ॥ किमन्ये नवरेणेशदेयएषवरोहिनः ॥ अवधेह्यंधकध्वंसिन्वरमन्यंवृणीमहे ॥ ६१ ॥ तवप्रतिनिधीकृत्यास्माभिस्त्वद्भक्तिभावितैः ॥ प्रतिष्ठितेषुलिंगेषुसान्निध्यं भवतोऽस्त्विह ॥ ६२ ॥ श्रुत्वेतितेषांवाक्यानितथास्त्वितिपिनाकिना ॥ प्रोचेऽन्योपिवरोदत्तोज्ञानंवश्चभविष्यति ॥ ६३ ॥ पुनःप्रोवाचदेवेशोनिशामयतभो द्विजाः ॥ हितंवःकथयाम्यत्रतदनुष्ठीयतांध्रुवम् ॥ ६४ ॥ सेव्योत्तरवहानित्यंलिंगमर्च्यंप्रयत्नतः ॥ दमोदानंदयानित्यंकर्तव्यंमुक्तिकांक्षिभिः ॥ ६५ ॥ इदमेवरहस्यंचकथितंक्षेत्रवासिनाम् ॥ मतिःपरहिताकार्यावाच्यंनोद्वेगकृद्वचः ॥ ६६ ॥ मनसापिनकर्तव्यमेनोत्रविजिगीषुणा ॥ अत्रत्यमक्षयंयस्मात्सुकृतं सुकृततरम् ॥ ६७ ॥ अन्यत्रयत्कृतंपापंतत्काश्यांपरिणश्यति ॥ वाराणस्यांकृतंपापमंतर्गेहेप्रणश्यति ॥ ६८ ॥ अंतर्गेहेकृतंपापंपैशाच्यनरकावहम् ॥ पिशाचनरकप्राप्तिर्गच्छत्येवबहिर्यदि ॥ ६९ ॥ नकल्पकोटिभिःकाश्यांकृतंकर्मप्रमृज्यते ॥ किंतुरुद्रपिशाचत्वंजायतेऽत्रायुतत्रयम् ॥ ७० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वाराणस्यांस्थितोयोवैपातकेपुरतःसदा ॥ योनिंप्राप्यापिपैशाचींवर्षाणामयुतत्रयम् ॥ ७१ ॥ पुनस्त्रैवनिवसञ्ज्ञानंप्राप्स्यत्यनुत्तमम् ॥ तेनज्ञानेथसं प्राप्तिमोक्षमाप्स्यत्यनुत्तमम् ॥ ७२ ॥ दुष्कृतानिविधायेहबहिःपंचत्वमागताः ॥ तेषांगतिंप्रवक्ष्यामिशृणुतद्विजसत्तमाः ॥ ७३ ॥ यामाख्यामेगणाः संतिघोराविकृतमूर्त्तयः ॥ मूपायांतेधमंत्यादौक्षेत्रेदुष्कृतकारिणः ॥ ७४ ॥ नयंत्यनूपप्रायांश्चततःप्राचींदुरासदाम् ॥ वर्षाकालेदुराचारान्पातयंतिमहा जले ॥ ७५ ॥ जलौकाभिःसपक्षाभिर्दंदशूकैर्जलोद्भवैः ॥ दुर्निवारैश्चमशकैर्दश्यंतेतेदिवानिशम् ॥ ७६ ॥ ततोयामेर्हिमतेंतेनीयंतेऽद्रौहिमाल्ये ॥ अशनावरणैर्हीनाःक्लेश्यंतेतेदिवानिशम् ॥ ७७ ॥ मरुस्थलेततोग्रीष्मेवारिवृक्षविवर्जिते ॥ दिवाकरकरैस्तीव्रैस्ताप्यंतेतेपिपासिताः ॥ ७८ ॥ क्षुधितास्ते गणैरुग्रैर्यातनाभिःसमंततः ॥ इत्थंकालमसंख्यातमानीयंतेततस्त्विह ॥ ७९ ॥ निवेदयंतितेयामाःकालराजांतिकेततः ॥ कालराजोपितान्दृष्ट्वाकर्मसं स्मार्यदुष्कृतम् ॥ ८० ॥ विवस्त्रान्क्षुत्तृषार्ताँश्चलग्नपृष्ठोदरत्वचः ॥ अन्यैरुद्रपिशाचैश्चसहसंयोजयत्यपि ॥ ८१ ॥ ततोरुद्रपिशाचास्तेभैरवानुचराः सदा ॥ सहंतेक्रममत्यर्थंक्षुत्तृष्णोग्रत्वसंभवम् ॥ ८२ ॥ आहारंरुधिरोन्मिश्रंतैलभंतेकदाचन ॥ एवंव्ययुतसंख्याकंकालंतत्रातिदुःखिताः ॥ ८३ ॥ श्मशानस्तंभमभितोनीयंतेकंठपाशिताः ॥ पिपासिताअपिनतेंऽबुस्पर्शंमपिचाप्नुयुः ॥ ८४ ॥ अथसंक्षीणपापास्तेकालभैरवदर्शनात् ॥ इहैवदेहिनो भूत्वामुच्यंतेतेममाज्ञया ॥ ८५ ॥ तस्मान्नकामयेतात्रवाङ्मनःकर्मणा यद्यहम् ॥ शुचौपथिसदास्थेयंमहालाभमभीप्सुभिः ॥ ८६ ॥ नावि मुक्तेभृतःकश्चिन्नरकंयातिकिल्बिषी ॥ ममानुग्रहमासाद्यगच्छत्येवपरांगतिम् ॥ ८७ ॥ अनाशनंयःकुरुतेमद्भक्तइहसुव्रतः ॥ नतस्यपुनरावृत्तिः कल्पकोटिशतैरपि ॥ ८८ ॥

अशाश्वतमिदंज्ञात्वामानुष्यंबहुकिल्बिषम् ॥ अविमुक्तंसदासेव्यंसंसारभयमोचकम् ॥ ८९ ॥ नान्यत्पश्यामिजंतूनांमुक्तावाराणसींपुरीम् ॥ सर्वपाप प्रशमनींप्रायश्चित्तंकलौयुगे ॥ ९० ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ अविमुक्तंप्रविष्टस्यतत्सर्वंत्रजतिक्षयम् ॥ ९१ ॥ जन्मांतरसहस्रेषुयुंजन्यो गीयदाप्नुयात् ॥ तदिहैवपरोमोक्षोमरणादधिगम्यते ॥ ९२ ॥ तिर्यग्योनिगताःसत्त्वायेविमुक्तकृतालयाः ॥ कालेननिधनंप्राप्तास्तेपियांतिपरांगतिम् ॥ ९३ ॥ अविमुक्तंनसेवंतेयेमूढास्तमसावृताः ॥ विष्मूत्ररेतसांमध्येतेवसंतिपुनःपुनः ॥ ९४ ॥ अविमुक्तंसमासाद्ययोलिंगंस्थापयेत्सुधीः ॥ कल्पको टिशतैर्वापिनास्तितस्यपुनर्भवः ॥ ९५ ॥ ब्रह्महत्यांनरःकृत्वापश्चात्सं यतमानसः ॥ प्राणांस्त्यजतियःकाश्यांसमुक्तोनात्रसंशयः ॥ ९७ ॥ स्त्रियःपतिव्रतायाश्चममभक्तिसमाहिताः ॥ अविमुक्तेमृतावापियांतिताःपरमांग तिम् ॥ ९८ ॥ अत्रोत्क्रमणकालेहंस्वयमेवद्विजोत्तमाः ॥ दिशामितारकंब्रह्मदेहीस्याद्येनतन्मयः ॥ ९९ ॥ मन्मनाममभक्तश्चमयिसर्वार्पितक्रियः ॥ यथामोक्षमिहाप्नोतिनतथान्यत्रकुत्रचित् ॥ १०० ॥ मरणंनिश्चितंज्ञात्वागतिंचासुखरूपिणीम् ॥ चलमागंतुकंसर्वंततःकाशींसमाश्रयेत् ॥ १ ॥ काशीसमाश्रितायैस्तुमनोवाक्कायकर्मभिः ॥ तानत्रनिर्मलधियोनिर्वाणश्रीःसमाश्रयेत् ॥ २ ॥ काशीस्थितैकमपियःप्रीणयेन्न्यायजैर्धनैः ॥ तेनत्रैलो क्यमखिलंप्रीणितंतुमयासह ॥ ३ ॥ यःप्रीणयतिपुण्यात्मानिर्वाणनगरीनरम् ॥ पुमर्थेनास्थितेर्नित्यंब्राह्मणाःप्रीणयामितम् ॥ ४ ॥ दिवोदासो पिराजर्षिःकाशीधर्मेणपालयन् ॥ सदेहोमत्पदंप्राप्तोयतोनपुनरागतिः ॥ ५ ॥ अत्रयोगस्तथाज्ञानंमुक्तिरेकेनजन्मना ॥ अतोविमुक्तमासाद्यनान्यद्गच्छे त्तपोवनम् ॥ ६ ॥ मोक्षंसुदुर्लभंज्ञात्वासंसारंचातिभीषणम् ॥ अश्मनाचरणोद्दत्वाकालमत्रप्रतीक्षयेत् ॥ ७ ॥ अविमुक्तंपरित्यज्ययदायास्यंतिदुर्धियः ॥ हसिष्यंतितदाभूतान्यन्योन्यकरताडनैः ॥ ८ ॥ प्राप्यवाराणसींपुण्यांसिद्धिक्षेत्रमनुत्तमम् ॥ परिनिष्कांतुमन्यत्रकस्यजंतोर्मतिर्भवेत् ॥ ९ ॥ महादानेनचान्यत्रयत्फलंलभ्यतेनरैः ॥ अविमुक्तेतुकाकिण्यांदत्तायांतदवाप्यते ॥ ११० ॥

एकंसमर्चयेल्लिंगंतपस्तप्येतचापरः ॥ तयोर्मध्येतुसश्रेष्ठोयोलिंगंपूजयेदिह ॥ ११ ॥ तीर्थांतरेगवांकोटिंविधिवद्यःप्रयच्छति ॥ एकाहंयोवसेत्काश्यांकाशी वासीतयोर्वरः ॥ ॥ १२ ॥ अन्यत्रब्राह्मणानांतुकोटिसंभोज्ययत्फलम् ॥ वाराणस्यांतुचैकेनभोजितेनतदाप्यते ॥ १३ ॥ सन्निहत्यांकुरुक्षेत्रेराहुग्रस्तेदिवा करे ॥ तुलापुरुषदानेनकाशीमिक्षासमाभवेत् ॥ १४ ॥ ममेहपरमंज्योतिरापातालाद्व्यवस्थितम् ॥ अतीत्यसप्तलोकादीननंतंलिंगरूपधृक् ॥ १५ ॥ पृथिव्यंतेपियेलिंगमविमुक्तंस्मरंतिमे ॥ कलुषैस्तेविमुच्यंतेमद्गिरितिनिश्चितम् ॥ १६ ॥ अस्मिन्क्षेत्रेतुयेनाहंदृष्टःस्पृष्टःसमर्चितः ॥ संप्राप्यतार कंज्ञानंनसभूयोभिजायते ॥ १७ ॥ योमामिहसमभ्यर्च्यश्रियतेन्यत्रकुत्रचित् ॥ जन्मांतरेपिमांप्राप्यसविमुक्तोभविष्यति ॥१८॥ इत्युक्वाक्षेत्रमाहात्म्यं द्विजानामग्रतोहरः ॥ पश्यतामेवतेषांतुतत्रैवांतर्हितोभवत् ॥ १९ ॥ तेपिसाक्षाद्विरूपाक्षंप्रत्यक्षीकृत्यवाडवाः ॥ प्रहृष्टमनसोऽत्यंतंप्रययुःस्वंस्वमाश्रयम् ॥ १२० ॥ शंभोर्वाक्यंविनिश्चित्यसर्वज्ञस्यकृपानिधेः ॥ त्यक्त्वाकार्यांतरंविप्रालिंगान्येवसमर्चिषुः ॥ २१ ॥ ॥ स्कंदउवाच ॥ ॥ पठित्वापाठयित्वाच रहस्याख्यानमुत्तमम् ॥ श्रद्धालुःपातकैर्मुक्तःशिवलोकेमहीयते ॥ १२२ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्त रार्द्धे क्षेत्ररहस्यकथनंनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ स्कंदउवाच ॥ ॥ ज्येष्टेश्वरस्यपरितोयानिलिंगानिकुंभज ॥ तानिपंचसहस्राणिमुनीनांसि द्धिदान्यलम् ॥ १ ॥ पराशरेश्वरंलिंगंज्येष्ठेशादुत्तरेमहत् ॥ तस्यदर्शनमात्रेणनिर्मलंज्ञानमाप्यते ॥ २ ॥ तत्रैवसिद्धिदंलिंगमांडव्येश्वरसंज्ञितम् ॥ नतस्यदर्शनाज्जातुदुर्बुद्धिंप्राप्नुयान्नरः ॥ ३ ॥ लिंगंचशंकरेशाख्यंतत्रैवशुभदंसदा ॥ भृगुनारायणस्तत्रभक्तानांसर्वसिद्धिदः ॥ ४ ॥ जावालीश्वरसंज्ञं चलिंगंतत्रातिसिद्धिदम् ॥ तस्यसंदर्शनाज्जातुनजंतुर्दुर्गतिंव्रजेत् ॥ ५ ॥ सुमंतुमुनिनाश्रेष्ठस्तत्रादित्यःप्रतिष्ठितः ॥ तस्यसंदर्शनादेवकुष्ठव्याधिः प्रशाम्यति ॥ ६ ॥ भैरवीभीषणानामतत्रभीषणरूपिणी ॥ क्षेत्रस्यभीषणंसर्वनाशायेद्भावतोर्चिता ॥ ७ ॥ तत्रोपजंघनेलिंगंकर्मबंधविमोक्षणम् ॥ नृभिः संसेवितंभक्त्यापण्मासात्सिद्धिदंपरम् ॥८॥ भारद्वाजेश्वरंलिंगंलिंगंमाद्रीश्वरंवरम् ॥ एकत्रसंस्थितेद्वेतुद्रष्टव्येमुक्ततात्मना ॥९॥ अरुणिस्थापितंलिंगंतत्रै वकलशोद्भव ॥ तस्यलिंगस्यसेवातःसर्वासृद्धिमवाप्नुयात्॥१०॥लिंगंवाजसनेयाख्यंतत्रास्त्यतिमनोहरम् ॥ तस्यसंदर्शनात्पुंसांवाजपेयफलंभवेत्॥११॥

कण्वेश्वरंशुभंलिंगंलिंगंकात्यायनेश्वरम् ॥ वामदेवेश्वरंलिंगमौतथ्येश्वरमेवच ॥ १२ ॥ हारीतेश्वरसंज्ञंचलिंगंवैगालवेश्वरम् ॥ कुंभेलिंगंमहापुण्यंतथावै कौसुमेश्वरम् ॥ १३ ॥ अग्निवर्णेश्वरंचैवनैध्रुवेश्वरमेवच ॥ वत्सेश्वरंमहालिंगंपर्णादेश्वरमेवच ॥ १४ ॥ सक्तुप्रस्थेश्वरंलिंगंकणादेशंतथैवच ॥ अन्यत्तत्रमहालिंगंमांडूकायनिरूपितम् ॥ १५ ॥ वाभ्रवेयेश्वरंलिंगंशिलावृत्तीश्वरंतथा ॥ च्यवनेश्वरलिंगंचशालंकायनकेश्वरम् ॥ १६ ॥ कलिंदमे श्वरंलिंगंलिंगमक्रोधनेश्वरम् ॥ लिंगंकपोतवृत्तीशंकंकेशंकुंतलेश्वरम् ॥ १७ ॥ कंठेश्वरंकहोलेशंलिंगंतुंबुरुपूजितम् ॥ मतंगेशंमरुत्तेशंमगदेयेश्वरं तथा ॥ १८ ॥ जातूकर्णेश्वरंलिंगंजंबुकेश्वरमेवच ॥ जारुधीशंजलेशंचजालमेशंजालकेश्वरम् ॥ १९ ॥ एवमादीनिलिंगानिअयुतार्धानिकुंभज ॥ स्मरणाद्दर्शनात्स्पर्शादर्चनान्नमनात्स्तुतेः ॥ २० ॥ नजातुजायतेजंतोःकलुषस्यसमुद्भवः ॥ एतेषांशुभलिंगानांज्येष्ठस्थानेतिपावने ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ स्कंदउवाच ॥ ॥ एकदातत्रयद्वृत्तंज्येष्ठस्थानेमहामुने ॥ तदहंतेप्रवक्ष्यामिशृणुष्वाघविनाशनम् ॥ २२ ॥ स्वैरंविहरतस्तत्रज्येष्ठस्थानेमहेशितुः ॥ कौतुकेनैवचिक्रीडशिवाकंदुकलीलया ॥ २३ ॥ उदंचन्व्यंचदंगानांलाघवंपरितन्वती ॥ निःश्वासामोदमुदितभ्रमराकुलितेक्षणा ॥ २४ ॥ भ्रश्यद्भिमिलसन्माल्यस्थपुटीकृतभूमिका ॥ स्विद्यत्कपोलपत्रालीस्रवदंबुकणोज्वला ॥ २५ ॥ स्फुटच्चोलांशुकपथनिर्यदंगप्रभावृता ॥ उल्लसत्कंदुकास्फालातिशोणितकरांबुजा ॥ २६ ॥ कंदुकानुगसद्दृष्टिनर्तितभ्रूलतांचला ॥ मृडानीकिलखेलंतींददृशेजगदंबिका ॥ २७ ॥ अंतरिक्षचराभ्यांचदितिजाभ्यां मनोहरा ॥ कटाक्षिताभ्यामिन्नेसमुपस्थितमृत्युना ॥ २८ ॥ विदलोत्पलसंज्ञाभ्यांदत्ताभ्यांवरतोविधेः ॥ तृणीकृतत्रिजगतीपुरुषाभ्यांस्वदोर्बलात् ॥ २९ ॥ देवींपरिजिहीर्षूतोविपमेषुप्रपीडितौ ॥ दिव्योवतेरतुःक्षिप्रंमायास्वीकृत्यशांबरीम् ॥ ३० ॥

धृत्वापारपदींमूर्तिमायातावंबिकांतिकम् ॥ तावत्यंतंसुदुर्वृत्तावतिचंचलमानसौ ॥ ३१ ॥ सर्वज्ञेनपरिज्ञातौचांचल्याल्लोचनोद्भवात् ॥ कटाक्षिताथदेवेनदुर्गादुर्गारिघातिनी ॥ ३२ ॥ विज्ञायनेत्रसंज्ञांतुसर्वज्ञार्धशरीरिणी ॥ तेनैवकंदुकेनाथयुगपन्निजघानतौ ॥ ३३ ॥ महाबलौमहादेव्याकंदुकेनसमाहतौ ॥ परिभ्रम्यपरिभ्रम्यतोदुर्गोविनिपेततुः ॥ ३४ ॥ वृंताद्विफलेपक्वेतालादनिललोलिते ॥ दंभोलिनापरिहतेशृंगेइवमहागिरेः ॥ ३५ ॥ तौनिपात्यमहादैत्यावकार्यकरणोद्यतौ ॥ ततःपरिणतियातोलिंगरूपेणकंदुकः ॥३६॥ कंदुकेश्वरसंज्ञंवतल्लिंगमभवत्तदा ॥ ज्येष्ठेश्वरसमीपेतुसर्वदुष्टनिवारणम् ॥३७॥ कंदुकेशसमुत्पत्तियःश्रोष्यतिमुदान्वितः ॥ पूजयिष्यतियोभक्तस्तस्यदुःखभयंकुतः ॥ ३८ ॥ कंदुकेश्वरभक्तानांमानवानांनिरंनसाम् ॥ योगक्षेमं सदाकुर्याद्भवानीभयनाशिनी ॥ ३९ ॥ मृडानीतस्यलिंगस्यपूजांकुर्यात्सदैवहि ॥ तत्रैवदेव्याःसान्निध्यंपार्वत्याभक्तसिद्धिदम् ॥ ४० ॥ कंदुकेशंमहालिंगंकाश्यांयैर्नसमर्चितम् ॥ कथंतेपांभवानीशौस्यातांसर्वेप्सितप्रदौ ॥ ४१ ॥ द्रष्टव्यंचप्रयत्नेनतल्लिंगंकंदुकेश्वरम् ॥ सर्वोपसर्गसंघातविघातकरणं परम् ॥ ४२ ॥ कंदुकेश्वरनामापिश्रुत्वावृजिनसंततिः ॥ क्षिप्रंक्षयमवाप्नोतितमःप्राप्योष्णगुंयथा ॥ ४३ ॥ ॥ स्कंदउवाच ॥ ॥ संशृणुष्वमहाभाग ज्येष्ठेश्वरसमीपतः ॥ यद्वृत्तांतमभूद्विप्रपरमाश्चर्यकृद्ध्रुवम् ॥ ४४ ॥ दंडखातेमहातीर्थेदेवार्पितृतृप्तिदे ॥ तप्यमानेषुविप्रेषुनिष्कामंपरमंतपः ॥ ४५ ॥ दैत्योदुंदुभिनिर्ह्रादोदुष्टःप्रह्लादमातुलः ॥ देवाःकथंमुजेयाःस्युरित्युपायमचिंतयत् ॥ ४६ ॥ किंबलाश्चकिमाहाराःकिमाधाराहिदेवताः ॥ विचार्य बहुशोदैत्यस्तत्त्वंविज्ञायनिश्चितम् ॥ ४७ ॥ अवश्यमग्रजन्मानोहंतव्याविचारतः ॥ ब्राह्मणान्हंतुमसकृत्कृतवानुद्यमंततः ॥ ४८ ॥ यतःक्रतुभुजोदेवाः क्रतवोवेदसंभवाः ॥ तेवेदाब्राह्मणाधीनास्ततोदेवाबलंद्विजाः ॥ ४९ ॥ निश्चितंब्राह्मणाधाराःसर्वेवेदाःसवासवाः ॥ गीर्वाणाब्राह्मणबलान्नात्रकार्याविचारणा ॥ ५० ॥ ब्राह्मणायदिनद्याःस्युर्वेदानद्यास्ततःस्वयम् ॥ आम्नायेषुप्रणष्टेषुविनष्टाःशततंतवः ॥ ५१ ॥ यज्ञेषुनाशंगच्छत्सुहुताहारास्ततःसुराः ॥ निर्बलाःसुखजेयाःस्युर्जितेषुत्रिदशेष्वथ ॥ ५२ ॥ अहमेवभविष्यामिमान्यस्त्रिजगतीपतिः ॥ आहरिष्याभिदेवानामक्षय्याःसर्वसंपदः ॥ ५३ ॥ निर्वेक्ष्यामिसुखान्येवराज्यनिहतकंटके ॥ इतिनिश्चित्यदुर्बुद्धिःपुनश्चितिवान्मुने ॥ ५४ ॥ द्विजाःक्रसंतिभूयांसोब्रह्मतेजोहृतेहिताः ॥ श्रुत्यध्ययनसंपन्नास्तपोबलसमन्विताः ॥ ५५ ॥ भूयसांब्राह्मणानांतुस्थानंवाराणसीभवेत् ॥ तानादाद्युपसंहृत्ययामितीर्थांतरंततः ॥ ५६ ॥ यत्रयत्रहितीर्थेषुयत्रयत्राश्रमेषुच ॥ संतिसर्वेऽप्रजन्मानस्तेमयाद्याःसमंततः ॥ ५७ ॥

इतिदुंदुभिनिर्ह्रादोमतिंकृत्वाकुलोचिताम् ॥ प्राप्यापिकार्शीदुर्वृत्तोमायावीन्यवधीद्द्विजान् ॥ ५८ ॥ समित्कुशान्समादातुंयत्रयांतिद्विजोत्तमाः ॥ अरण्येतत्रतान्सर्वान्सभक्षयतिदुर्मतिः ॥ ५९॥ यथाकोपिनवेत्त्येवतथाच्छन्नोऽभवत्पुनः ॥ वनेवनेचरोभूत्वायादोरूपीजलाशये ॥ ६० ॥ अदृश्यरूपी मायावीदेवानामप्यगोचरः ॥ दिवाध्यानपरस्तिष्ठेन्मुनिवन्मुनिमध्यगः ॥ ६१ ॥ प्रवेशमुटजानांचनिर्गमंचविलोकयन् ॥ यामिन्यांव्याघ्ररूपेणब्राह्मणान्भक्षयेद्बहून् ॥ ६२ ॥ निःशब्दमेवनयतिनत्यजेदपिकीकसम् ॥ इत्थंनिपातिताविप्रास्तेनदुष्टेनभूरिशः ॥ ६३ ॥ एकदाशिवरात्रौतुभक्तस्त्वेको निजोटजे ॥ सपर्यादेवदेवस्यकृत्वाध्यानस्थितोभवत् ॥ ६४ ॥ सचदुंदुभिनिर्ह्रादोदैत्येंद्रोबलदर्पितः ॥ व्याघ्ररूपंसमास्थायतमादातुंमतिंदधे ॥६५॥ तंभक्तंध्यानमापन्नंदृढचित्तंशिवेक्षणे ॥ कृताह्नमंत्रविन्यासंतंकांतुमशकन्नसः ॥ ६६ ॥ अथमर्वगतःशंभुर्ज्ञात्वातस्याशयंहरः ॥ दैत्यस्यदुष्टरूपस्यवधाय विदधेधियम् ॥ ६७ ॥ यावदादित्सतिव्याघ्रस्तावदाविरभूद्धरः ॥ जगद्रक्षामणिरुग्यक्षोभक्तरक्षणदक्षधीः ॥ ६८ ॥ रुद्रमायांतमालोक्यतद्भक्तार्चित लिंगतः ॥ दैत्यस्तेनैवरूपेणववृधेभूधरोपमः ॥ ६९ ॥ सावज्ञमथसर्वज्ञंयावत्पश्यतिदानवः ॥ तावदायांतमादायकक्षायंत्रेन्यपीडयत् ॥ ७० ॥ पंचास्यस्त्वथपंचास्यंमुष्ट्यामूर्धन्यताडयत् ॥ सचतेनैवरूपेणकक्षानिष्पेषणेनच ॥७१ ॥ अत्यार्तमरटद्व्याघ्रोरोदसीपरिपूरयन् ॥ तेननादेनसहसासंप्रवेपितमानसाः ॥७२॥तपोधनाःसमाजग्मुर्निशिशब्दानुसारतः ॥ तत्रेश्वरंसमालोक्यकक्षीकृतमृगेश्वरम् ॥७३॥ तुष्टुवुःप्रणताःसर्वेशर्वंजयजयाक्षरैः ॥ परित्राताजगत्रातःप्रत्यूहाद्दारुणादितः ॥७४ ॥ अनुग्रहंकुरुष्वेशतिष्ठात्रैवजगद्गुरो ॥ अनेनैवहिरूपेणव्याघ्रेशहतिनामतः ॥ ७५ ॥ कुरुरक्षांमहादेव ज्येष्ठस्थानस्यसर्वदा ॥ अन्येभ्योप्युपसर्गेभ्योरक्षनस्तीर्थवासिनः ॥ ७६ ॥ इतिश्रुत्वावचस्तेषांदेवश्चंद्रविभूषणः ॥ तथेत्युक्त्वापुनःप्राहशृणुध्वंद्विजपुंगवाः ॥ ७७ ॥ योमामनेनरूपेणद्रक्ष्यतिश्रद्धयात्रवै ॥ तस्योपसर्गसंघातंघातयिष्याम्यसंशयम् ॥ ७८ ॥

एतल्लिंगंसमभ्यर्च्ययोयांतिपथिमानवः ॥ चौरव्याघ्रादिसंभूतंभयंतस्यकुतोभवेत् ॥ ७९ ॥ मच्चरित्रमिदंश्रुत्वास्मृत्वालिंगमिदंह्यदि ॥ संग्रामेप्रविशन्मर्त्योजयमाप्नोतिनान्यथा ॥८०॥ इत्युक्तादेवदेवशस्तस्मिँल्लिंगेलयंययौ ॥ सविस्मयास्ततोविप्राःप्रातर्यातायथागतम् ॥ ८१ ॥ ॥ स्कन्द उवाच ॥ ॥ तदाप्रभृतिकुंभोत्थलिंगंव्याघ्रेश्वराभिधम् ॥ ज्येष्ठेशादुत्तरेभागेदृष्टंस्पृष्टंभयापहम् ॥ ८२ ॥ व्याघ्रेश्वरस्ययेभक्तास्तेभ्योबिभ्यतिकिंकराः ॥ यामाअपि महाक्रूराजयजीवेतिवादिनः ॥ ८३ ॥ पराशरेश्वरादीनांलिंगानामिहसंभवम् ॥ श्रुत्वानरोनलिप्येतमहापातककर्दमैः ॥ ८४ ॥ कंदुकेशसमुत्पत्तिव्याघ्रेशाविर्भवंतथा ॥ समाकर्ण्यनरोजातुनोपसर्गैःप्रदूयते ॥ ८५ ॥ उटजेश्वरलिंगंतुव्याघ्रेशात्पश्चिमेस्थितम् ॥ भक्तरक्षार्थमुद्भूतंस्यात्समभ्यर्च्यनिर्भयः ॥ ८६ ॥ इतिश्रीस्कंदमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखण्डउत्तरार्धेपराशरेश्वरादिलिंगसंभवोनामपंचपंचाशत्तमोऽध्यायः ॥ ६५ ॥ ॥ स्कन्दउवाच ॥ ॥ ज्येष्ठेश्वरस्यपरितोलिंगान्यन्यानियानितु ॥ तानितेकथयिष्यामिशृणुष्वतापितापन ॥ १ ॥ ज्येष्ठेशादक्षिणेभागेलिंगमप्सरसांशुभम् ॥ तत्रैवाप्सरसःकूपःसौभाग्योदकसंज्ञकः ॥ २ ॥ तत्कूपजलमुन्नातोविलोक्याप्सरसेश्वरम् ॥ नदौर्भाग्यमवाप्नोतिनारीवापुरुषोथवा ॥ ३ ॥ तत्रैवकुब्जेशाख्यंलिंगंवापीसमीपगम् ॥ तस्यपूजनतःपुंसांकुटुंबंपरिवर्धते ॥ ४ ॥ पितामहेश्वरंलिंगंज्येष्ठवापीतटेशुभम् ॥ तत्रश्राद्धंनरःकृत्वापितॄणां मुदमर्पयेत् ॥ ५ ॥ पितामहेशात्रैर्ऋत्यांपूजनीयंप्रयत्नतः ॥ गदाधरेश्वरंलिंगंपितॄणांपरितृप्तिदम् ॥ ६ ॥ दिशिपुण्यजनाख्यायांलिंगाज्येष्ठेश्वरान्मुने ॥ वासुकीश्वरसंज्ञंचलिंगमर्च्यंसमंततः ॥ ७ ॥ तत्रवासुकिकुंडेचस्नानदानादिकाःक्रियाः ॥ सर्पभीतिहराःपुंसांवासुकीशप्रभावतः ॥ ८ ॥ यःस्नातो नागपंचम्यांकुंडेवासुकिसंज्ञिते ॥ नतस्यविषसंसर्गोभवेत्सर्पसमुद्भवः ॥ ९ ॥ कर्तव्यानागपञ्चम्यांयात्रावर्षासुतत्रवै ॥ नागाःप्रसन्नाजायंतेकुलेतस्या

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिसर्वदा ॥ १० ॥ तत्कुण्डात्पश्चिमेभागेलिंगंवेतक्षकेश्वरम् ॥ पूजनीयंप्रयत्नेनभक्तानांसर्वसिद्धिदम् ॥ ११॥ सुनेतस्योत्तरेभागेकुण्डंतक्षककसंज्ञितम् ॥ कृतोदककियस्तत्रनसर्पैरभिभूयते ॥१२॥ तत्कुण्डादुत्तरेभागेक्षेत्रक्षेमकरःसदा॥भक्तानांसाध्वसध्वंसीकपालीनामभैरवः॥१३॥भैरवस्यमहाक्षेत्रंतद्वेसाध कसिद्धिदम्॥तत्रसंसाधिताविद्याःपण्मासात्सिद्धिमाप्नुयुः॥१४॥तत्रचण्डीमहामुण्डाभक्तविघ्नोपशांतिदा॥बलिपूजोपहाराद्यैःपूज्यास्त्वाभीष्टसिद्धये॥१५॥

तस्यायात्रांतुयःकुर्यान्महाष्टम्यांनरोत्तमः ॥ यशस्वीपुत्रपौत्राढ्योलक्ष्मीवाँश्चापिजायते ॥ १६ ॥ महामुण्डाप्रतीच्यांतुचतुःसागरवापिका ॥ तस्यां स्नातोभवेत्स्नातःसागरेषुचतुर्ष्वपि ॥ १७ ॥ महाप्रसिद्धंतत्स्थानंचतुःसागरसंज्ञितम् ॥ चत्वारितत्रलिंगानिसागरैःस्थापितानिच ॥ १८ ॥ तस्यावाप्या श्चतुर्दिक्षुपूजितानिदहंत्यघम् ॥ तदुत्तरेमहालिंगंवृषभेश्वरसंज्ञितम् ॥ १९ ॥ हरस्यवृषभेणैवस्थापितंतत्स्वभक्तितः ॥ तस्यदर्शनतःपुंसांपण्मासान्मु क्तिरुद्भवेत् ॥ २० ॥ वृषेश्वरादुदीच्यांतुगंधर्वेश्वरसंज्ञितम् ॥ गंधर्वकुण्डंतत्प्राच्यांतत्स्नात्वानरोत्तमः ॥ २१ ॥ गंधर्वेश्वरमभ्यर्च्यदत्त्वादानानिश क्तितः ॥ सन्तर्प्यपितृदेवांश्चगंधर्वैःसहमोदते ॥ २२ ॥ कर्कोटनामानागोस्तिगन्धर्वेश्वरपूर्वतः ॥ तत्रकर्कोटवापीचलिंगंकर्कोटकेश्वरम् ॥ २३ ॥ तस्यांवाप्यांनरःस्नात्वाकर्कोटेशंसमर्च्यच ॥ कर्कोटनागमाराध्यनागलोकेमहीयते ॥ २४ ॥ कर्कोटनागोयैर्दृष्टस्तद्वाप्यांविहितोदकैः ॥ क्रमतेनविषंतेषां देहेस्थावरजंगमम् ॥ २५ ॥ कर्कोटेशात्प्रतीच्यांतुधुंधुमारीश्वराभिधम् ॥ तल्लिंगाभ्यर्चनात्पुंसांनभवेद्वैरिजंभयम् ॥ २६ ॥ पुरूरवेश्वरंलिंगंतदुदीच्यां व्यवस्थितम् ॥ द्रष्टव्यंतत्प्रयत्नेनचतुर्वर्गफलप्रदम् ॥ २७ ॥ दिग्गजेनार्चितंलिंगंसुप्रतीकेनतत्पुरः ॥ सुप्रतीकेश्वरंनाम्नायशोबलविवर्धनम् ॥ २८ ॥ सरश्चसुप्रतीकाख्यंतत्पुरोभासतेमहत् ॥ तत्रस्नात्वाचतल्लिंगंदृष्ट्वादिग्पतितांलभेत् ॥ २९ ॥ तत्रास्त्येकामहागौरीनाम्नाविजयभैरवी ॥ रक्षार्थमुत्तरद्वा रिस्थितापूज्येष्टसिद्धये ॥ ३० ॥ वरणायास्तटेरम्येगणोंडुंडनमुंडनौ ॥ क्षेत्ररक्षांविधत्तस्तौविघ्नस्तंभनकारकौ ॥ ३१ ॥ तौद्रष्टव्यौप्रयत्नेनक्षेत्रनिर्विघ्न हेतवे ॥ डुंडनेशंमुंडनेशंतत्रदृष्ट्वासुखीभवेत् ॥ ३२ ॥ स्कंदउवाच ॥ ॥ इत्वलारेकथामेकांशृणुष्वावहितोभव ॥ वरणायास्तटेरम्येयदृत्तंपूर्वमुत्तमम् ॥ ३३ ॥ एकदाद्रींद्रमालोक्यमेनासंहृष्टमानसम् ॥ उमांसंस्मृत्यनिःश्वस्यप्रोवाचेतिपतिव्रता ॥ ३४ ॥ ॥ मेनोवाच ॥ ॥ आर्यपुत्रनजानामिप्रवृ त्तिमपिकांचन ॥ विवाहसमयादूर्ध्वंतस्यागौर्यागिरीश्वर ॥ ३५ ॥ सवृषेंद्रगतिर्देवोभस्मोरगांबेभूषणः ॥ महापितृवनावासोदिग्वासाःक्वास्तिसंप्रति ॥ ३६ ॥ अष्टौयामातरोदृष्ट्वात्राह्मीप्रभृतयःप्रिय ॥ स्वस्वरूपास्तामन्येऽहंवालिकाःकष्टहेतवः ॥ ३७ ॥

तस्यैकस्यनकोप्यन्योस्त्यद्वितीयस्यशूलिनः ॥ तदुदंतप्रवृत्त्यैचक्रियतामुद्यमोविभो ॥ ३८ ॥ तस्याःप्रियायावाक्येनतदपत्यप्रियोगिरिः ॥ उवाचव चनंसाक्षुमावात्मन्यसन्नगीः ॥३९॥ ॥ गिरिराजउवाच ॥ ॥ अहमेवगमिष्यामितस्यामेनेगवेषणे ॥ नितरांबाधतेप्रेमतदद्दष्टयभिदूषितम् ॥४०॥ यदाप्रभृतिसागौरीनिर्गतामसद्मतः ॥ मन्येमेनेतदारभ्यपद्मसद्मविनिर्ययौ ॥ ४१॥ तदालापामृतधयौनमेशब्दग्रहौप्रिये ॥ प्राणेश्वरितदारभ्यस्यातां शब्दांतरग्रहौ ॥ ४२ ॥ जैवातृकीयतोद्वहःस्यादूरीभूताद्दशोर्मम ॥ अहोजैवातृकीज्योत्स्नाततोद्वोतिदुनोतिमाम् ॥ ४३ ॥ इत्युक्तादायरत्नानिवासांसि पिविधानिच ॥ घराघरेंद्रोनिर्यातःशुभलग्नबलोदये ॥ ४४ ॥ अगस्त्यउवाच ॥ ॥ कानिकानिचरत्नानिकियंत्यपिचपण्मुख ॥ यान्यादायप्रतस्थेस तानिमेब्रूहिपृच्छतः ॥ ४५ ॥ ॥ स्कंदउवाच ॥ तुलासुक्ताफलानांतुकोटिद्वयपरीमिताः ॥ तथावारितराणांचहीरकाणांतुलाशतम् ॥ ४६ ॥

नवलक्षाधिकंविप्रषडसाणांसुतेजसाम् ॥ लक्षद्वयंविदूराणांतुलाविमलवर्चसाम् ॥ ४७ ॥ कोटयःपद्मरागाणांपंचवैहितुलामुने ॥ पुष्परागतुलालक्षंगु णितंनवसंख्यया ॥ ४८ ॥ तथागोमेदरत्नानांतुलालक्षमितामुने ॥ इंद्रनीलमणीनांचतुलाःकोट्यर्धसंमिताः ॥ ४९ ॥ गरुडोद्गाररत्नानांतुलाःप्रयुतसं मिताः ॥ शुद्धविद्रुमरत्नानांतुलाश्चनवकोटयः ॥ ५० ॥ अष्टांगाभरणानांचसंख्याकर्तुंनशक्यते ॥ वाससांचविचित्राणांकोमलानांतथामुने ॥ ५१ ॥ चामराणिचभूर्यांसिद्रव्याण्यामोदवंतिच ॥ सुवर्णदासदास्यादीन्यसंख्यातानिवैमुने ॥ ५२ ॥ सर्वाण्यपिसमादायप्रतस्थेभूधरेश्वरः ॥ आगत्यवरणातीरं दृष्ट्वात्काशीमलोकयत् ॥ ५३ ॥ अनेकरत्ननिचयैःखचिताऽखिलभूमिकाम् ॥ नानाप्रासादमाणिक्यज्योतिस्ततततांवराम् ॥ ५४ ॥ सौधाग्रविवि धस्वर्णकलशोज्वलदिङ्मुखाम् ॥ जयंतीवैजयंतीनांनिकरैस्त्रिदिवस्थलीम् ॥ ५५ ॥ महासिद्धयष्टकस्यापिक्रीडाभवनमद्भुतम् ॥ जितकल्पद्रुमवनां वनैःसर्वफलावनैः ॥ ५६ ॥ इतिकाशीसमृद्धिंसविलोक्याभूद्विलम्बितः ॥ उवाचचमनस्येत्रभूधरेंद्रमिदंवचः ॥ ५७ ॥ प्रासादेषुप्रतोलीषुप्राकारेषुगृहे षुच ॥ गोपुरेषुविचित्रेषुकपाटेषुतटेष्वपि ॥ ५८ ॥ मणिमाणिक्यरत्नानामुच्छलच्चारुरोचिषम् ॥ ज्योतिर्जालैर्जटिलितंयथेदमत्रलोक्यते ॥ ५९ ॥ द्यावाभूम्योरंतरालंतथेतिसमवैम्यहम् ॥ ईदृक्संपत्तिसंभारःकुबेरस्यापिनोगृहे ॥ ६० ॥ अपिवैकुंठभुवनेनेतरस्येदृक्काकथा ॥ इतियावद्गिरींद्रोसौसं भावयतिचेतसि ॥ ६१ ॥ तावत्कार्पटिकःकश्चित्तल्लोचनपथंगतः ॥ आहूयवद्धमानंतमपृच्छच्चाचलेश्वरः ॥ ६२ ॥ ॥ हिमवानुवाच ॥ ॥ हंहो कार्पटिकश्रेष्ठअध्यास्वैतदिहासनम् ॥ स्वपुरोदंतमाख्याहिकिमपूर्वमिहाध्वग ॥ ६३ ॥

कोत्रसंप्रत्यधिष्ठाताकिमधिष्ठातृचेष्टितम् ॥ यदिजानासितत्सर्वंमिहाचक्ष्वममाग्रतः ॥ ६४ ॥ सोपिकार्पटिकस्तस्यगिरिराजस्यभाषितम् ॥ समाकर्ण्य समाचष्टेमुनेसमुपचक्रमे ॥ ६५ ॥ ॥ कार्पटिकउवाच ॥ ॥ आचक्षेशृणुराजेंद्रयत्पृष्टोस्मित्वयाखिलम् ॥ अहानिपंचपाण्येवव्यतिक्रांतानिमानद ॥६६॥ समायातेजगन्नाथेपर्वतेंद्रसुतापतौ ॥ सुंदरान्मंदराद्रेर्दिवोदासेगतेदिवि ॥६७॥ योवैजगदधिष्ठातासोधिष्ठातात्रसर्वगः ॥ सर्वदृक्सर्ववेदःशर्वःकथंनज्ञायते विभो ॥६८॥ मन्येदृपत्स्वरूपोसिदृपदोपिकठोरधीः ॥ यतोविश्वेश्वरंकाश्यांनवेत्सिगिरिजापतिम् ॥६९॥ स्वभावकठिनात्मापिसत्वरंहिमवान्गिरिः ॥ प्राणाधिकसुतादानाद्योधिनोद्विश्वनायकम् ॥ ७० ॥ बिभ्रत्सहजकाठिन्यंजातोगौरीगुरुर्गुरुः ॥ शंभुंप्रपूज्यसुतयालजावीश्वगुरोरपि ॥ ७१ ॥ चेष्टितं तस्यकोवेदवेदवेद्यस्यचेशितुः ॥ मनागितिचजानेहंतच्चेष्टितमिदंजगत् ॥७२॥ अधिष्ठातामयाख्यातस्तथाधिष्ठातृचेष्टितम् ॥ अपूर्वंयत्त्वयापृष्टंतदाख्या मिचतच्छृणु ॥ ७३ ॥ शुभेज्येष्टेश्वरस्थानेसांप्रतंसउमापतिः ॥ कार्शीप्राप्यमुदातिष्ठद्विरिराजोगजासखः ॥ ७४ ॥ ॥ स्कंदउवाच ॥ ॥ यदायदासगि रिजामृदुनामाक्षरामृतम् ॥ आविष्करोतिपथिकोऽद्रींद्रोहृष्येत्ततदादा ॥ ७५ ॥ उमानामामृतंपीतंयेनेहजगतीतले ॥ नजातुजननीस्तन्यंसपिबेत्कुंभ संभव ॥ ७६ ॥ उमेतिद्व्यक्षरंमंत्रंयोऽहर्निशमनुस्मरेत् ॥ नस्मरेच्चित्रगुप्तस्तंकृतपापमपिद्विज ॥ ७७ ॥ पुनःशुश्रावहिमवान्हृष्टःकार्पटिकोदितम् ॥ ॥ कार्पटिकउवाच ॥ ॥ राजन्विश्वेश्वरार्थेयःप्रासादोविश्वकर्मणा ॥ ७८ ॥ निर्मीयतेमुनिर्माणोजन्मिनिर्वाणदायिनः ॥ तदपूर्वंनकर्णा भ्यामप्याकर्णितवानहम् ॥ ७९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यत्रातिमित्रतेजोभिःशलाकाभिःसमंततः ॥ मणिमाणिक्यरत्नानांप्रासादेभित्तयःकृताः ॥८०॥ यत्रसंतिशतंस्तंभाभास्वंतोद्वादशोत्तराः ॥ एकैकंभुवनं धर्तुमष्टाष्टावितिकल्पिताः ॥ ८१ ॥ चतुर्दशसुयाशोभाविष्टपेषुसमंततः ॥ तस्मिन्विमानेसास्तीहशतकोटिगुणोत्तरा ॥ ८२ ॥ चंद्रकांतमणीनांचस्तंभाधारशिलाश्चयाः ॥ चित्ररत्नमयैःस्तंभैःस्तंभितास्तत्प्रभाभराः ॥ ८३ ॥ पद्मरागेंद्रनीलानांशालीनाःशालभंजिकाः ॥ नीराजयंत्यहोरात्रंयत्ररत्नप्रदीपकैः ॥ ८४ ॥ स्फुरत्स्फटिकनिर्माणश्लक्ष्णपद्मशिलातले ॥ अनेकरत्नरूपाणिविचित्राणिसमंततः ॥८५॥ आरक्तपीतमंजिष्ठनीलकिर्मीरवर्णकैः ॥ विन्यस्तानीवभासंतेचित्रेचित्रकृतायतः ॥ ८६ ॥ दृक्पिच्छिलाविलोक्यंतेमाणिक्यस्तंभराजयः ॥ यतोऽविमुक्तेस्वक्षेत्रेमोक्षलक्ष्म्यंकुराइव ॥ ८७ ॥ रत्नाकरेभ्यःसर्वेभ्योगणारत्नोच्चयान्बहून् ॥ राशींश्चक्रुःसमानीययत्राद्रिशिखरोपमान् ॥ ८८ ॥ यत्रपातालतलतोनागानांकोशवेश्मतः ॥ गणैर्मणिगणाःसर्वेसमाहृत्यगिरीकृताः ॥ ८९ ॥ शिवभक्तःस्वयंयत्रपौलस्त्यःस्वद्रिकूटतः ॥ कोटिहाटककूटानिआनयामासराक्षसैः ॥ ९० ॥ प्रासादनिर्मितिंश्रुत्वा भक्ताद्वीपांतरस्थिताः ॥ माणिक्यानिसमाजह्रुर्यथासंख्यान्यहोनृप ॥ ९१ ॥ चिंतामणिःस्वयंयत्रकर्मणेविश्वकर्मणे ॥ विश्राणयेदहोरात्रंविचित्रांश्चिंतितान्मणीन् ॥ ९२ ॥ नानावर्णपताकाश्चयत्रकल्पमहीरुहः ॥ अनल्पाःकल्पयंत्येवनित्यंभक्तिसमन्विताः ॥ ९३ ॥ अब्धयोयत्रसततंदधिक्षीरेक्षुसर्पिषाम् ॥ पंचामृतानांकलशैःस्नपयंतिदिनेदिने ॥ ९४ ॥ यत्रकामदुघानित्यंस्नपयेन्मधुधारया ॥ स्वदुग्धयास्वयंभक्त्यापिश्वेशंलिंगरूपिणम् ॥ ९५ ॥ गंधसाररसैर्यंचसेवतेमलयाचलः ॥ कर्पूररंभाकर्पूरपूरैर्भक्त्यानिषेवते ॥ ९६ ॥

इत्याद्यपूर्वंयत्रास्तिप्रत्यहंशंकरालये ॥ कथंतंत्वमुमाकांतंनवेत्सिकठिन ॥ ९७ ॥ इतितस्यसमृद्धिंतांदृष्ट्वाजामातुरद्रिराट् ॥ त्रपयापरिभूतोभून्नितरां कुंभसंभव ॥ ९८ ॥ तस्मैकार्पटिकायाथसदत्त्वापारितोषिकम् ॥ पुनश्चिंतापरोजातोऽद्रिराट्कार्पटिकेगते ॥ ९९ ॥ उवाचेतिमनस्येवविस्मयोत्फुल्ललोचनः ॥ अहोभद्रमिदंजातंयत्त्वयाश्राविशर्मभाक् ॥ १०० ॥ यावत्संपत्तिसंभारःश्रूयतेदृश्यतेत्रवै ॥ जामातुरत्रसदनेलीलात्रिजगतीपतेः ॥ १ ॥ ततः प्राभृतकस्तुच्छोनितरांप्रतिभातिमे ॥ कन्यार्थंयोमयानीतोजामातुःपरितोषकृत् ॥ २ ॥ अहंमन्येतथैवासौयथादर्शिमयापुरा ॥ वृद्धोक्षमात्रसंपत्तिःसर्वकर्मपराङ्मुखः ॥ ३ ॥ नैनंकोपिविजानीयान्नान्वयोस्यकदाचन ॥ नामापियस्यनैकंचकिंदेशीयश्चनोह्यते ॥ ४ ॥ किंवृत्तश्चकिमाचारोनाममात्रेणचेश्वरः ॥ ऐश्वर्यसूचकंवस्तुयस्यकिंचिन्नलक्ष्यते ॥ ५ ॥ सोसौनिर्वाणसंपत्तिरकायापिददात्यहो ॥ सुमुखःसर्वकर्माणिफलवंतिकरोतिसः ॥ ६ ॥ वेदवेद्योहिसर्वज्ञोयत्संतानोऽखिलंजगत् ॥ यंनकोपिहिवेदादौवेदवेद्यःसएषवै ॥ ७ ॥ योनभिज्ञःसदाज्ञातःससर्वज्ञोयमेवहि ॥ यस्यैकमपिनोनामपुंसाज्ञेयंनकेनचित् ॥८॥ सर्वेषांसर्वनामानियस्यनामानिनिश्चितम् ॥ सोसौहिसर्वदेशीयःसर्वेभ्यःसर्वसिद्धिदः ॥९॥ यस्यदेशोनविदितोयस्तुवृत्तिपराङ्मुखः ॥ आचारहीनमिवयंपुराऽपश्यंकठोरधीः ॥ ११० ॥ श्रुतिस्मृतीयतःसर्वमाचारंवित्तएवहि ॥ नाममात्रेणनियतंयमज्ञासिषमीश्वरम् ॥ ११ ॥ साक्षादीश्वरएवैषसोन्येष्वैश्वर्यसूचकः ॥ अपिसर्वगुणाधारोगुणातीतःपरापरः ॥ १२ ॥ अर्वाचीनइहाप्येषपराचीनःपरात्परः ॥ भूधराणामहंनाथोविश्वनाथउमापतिः ॥१३॥ अहंप्रमितसंपत्तिरप्रमेयधनोह्यसौ ॥ तुच्छप्राभृतकस्तस्मान्नेदानीमस्यदर्शनम् ॥ १४ ॥ करिष्येथकरिष्यामिव्यावृत्त्यागत्यकर्हिचित् ॥ संप्रधार्येतिमनसिसायंसचगिरीश्वरः ॥ १५ ॥ आहूयसर्वाननुगान्पार्वतीयान्महाबलान् ॥ आदिष्टवानिदंवाक्यंसर्वेयूयंबलाधिकाः ॥ १६ ॥ कुर्वंत्वेकंममादेशंयावन्नोद्यतिभानुमान् ॥ तावच्छिवालयंचैकंविदधत्वत्रसत्वरम् ॥ १७ ॥ यस्मिन्कृतेकृतार्थःस्यामिहलोकेपरत्रच ॥ समागत्येहकाश्यांयःकुर्यादेकंशिवालयम् ॥ १८ ॥ तेनत्रैलोक्यमखिलंसालयंकृतमेवहि ॥ तेनदत्तानिदानानिमहांतिविधिपूर्वकम् ॥ १९ ॥ सुपर्वणिसुपात्रायसुताथश्रद्धयाधिकम् ॥ येनस्ववित्तमानेनधर्मोपार्जितवित्ततः ॥ १२० ॥ कृतंशंभोर्महासद्मनतंपद्मात्यजेत्क्वचित् ॥ तपांसितेनतप्तानिशीर्णपर्णाशनान्यपि ॥ २१ ॥ वाराणसींसमासाद्ययेनाकारिशिवालयः ॥ अशेषाःसुविशेषाढ्याइष्टास्तेनमहामखाः ॥ २२ ॥ आनंदकाननेयेनदेवदेवालयःकृतः ॥ इतितस्यसमादेशंसमाकर्ण्यानुगास्ततः ॥ २३ ॥ चक्रुर्देवालयंश्रेष्ठंयावद्व्युष्टानयामिनी ॥ तावच्छैलेश्वरंलिंगंशैलेशेनप्रतिष्ठितम् ॥ चंद्रकांतमणेश्चंचत्कांतिश्चेतितमंडपम् ॥ २४ ॥ अलेखयत्प्रशस्तिंचप्रशस्ताक्षरमालिनीम् ॥ व्याचक्षाणांनिजांसर्वगोत्रेभ्योप्याधिकोन्नतिम् ॥ २५ ॥ ततोऽरुणोदयेजातेस्नात्वापंचनदेह्रदे ॥ शैलराजःकालराजंनमस्कृत्यसमर्च्यच ॥ २६ ॥ तत्रराशिंसमुत्सृज्यपरितस्तुवरितोययौ ॥ पार्वतीयैरनुगतःसर्वैरपिनिजालयम् ॥ २७ ॥ ततःप्रातःसमालोक्यगणौहुंडनमुंडनौ ॥ हृष्टौदेवालयंरम्यंवरणायास्तटेशुभे ॥ २८ ॥ अदृष्टपूर्वंदेवायनिवेदयितुमागतौ ॥ तौतुदृष्ट्वामहादेवमुमादर्शितदर्पणम् ॥ २९ ॥ प्रणम्यदंडवद्भूमौकृतांजलिपुटौगणौ ॥ कृताभ्यनुज्ञौभ्रूक्षेपाद्विज्ञप्तिमथचक्रतुः ॥ १३० ॥ देवदेवनजानीवःकेनचिद्दृढभक्तिना ॥ अतीवरम्यःप्रासादोनिर्मितोवरणातटे ॥ ३१ ॥ आसायंनैक्षिचावाभ्यांदृष्टोद्यैवप्रगेविभो ॥ गणोदितमितीशानोनिशम्याहगिरींद्रजाम् ॥ ३२ ॥ विज्ञातसर्ववृत्तांतःसर्वज्ञोप्यनभिज्ञवत् ॥ अचलेंद्रांगजेयावस्तत्प्रासादविलोकने ॥ ३३ ॥ इत्युक्तेशःसगिरिजोनिरगात्सगणोमुने ॥ महास्यंदनमारुह्यप्रासादंद्रष्टुमुत्सुकः ॥ ३४ ॥ अथालुलोकेगिरिशःप्रासादंवरणातटे ॥ अतीवरम्यस्वनंयामिनीमात्रनिर्मितम् ॥ ३५ ॥ स्यंदनादवरुह्याथगर्भागारमवीविशत् ॥ ददर्शचमहालिंगंचंद्रकांतशिलामयम् ॥ ३६ ॥ देदीप्यमानंमहसामोक्षलक्ष्म्यंकुराकृति ॥ दृष्टिप्रसादजननंपुनर्जननशातनम् ॥ ३७ ॥ केनेदंस्थापितंलिंगंयावज्जिज्ञासतीश्वरः ॥ तावद्ददर्शपुरतःप्रशस्तिकर्तृसूचिकाम् ॥३८॥ वाचयित्वेवचमनाङ्मनस्येवमनोजहृत् ॥ उवाचदेवींदिष्ट्येतिप्रेक्षस्वात्मपितुःकृतिम् ॥ ३९ ॥ उमाश्रुत्वेतिसंहृष्टाकदंबकुसुमश्रियम् ॥ आनंदांकुरलक्ष्मीवदंगेषुपरिबिभ्रती ॥ १४० ॥ ततोव्यजिज्ञपद्देवंदेवीपादौप्रणम्यच ॥ अस्मिँल्लिंगवरेनाथत्वयास्थेयमहर्निशम् ॥ ४१ ॥ अस्यलिंगस्ययेभक्ताःशैलेशस्यमहेशितुः ॥ तेभ्यस्त्वंमहतीमृद्धिंदास्यसीहपरत्रच ॥ ४२ ॥ तथेतिदेवउक्तातांपार्वतींपुनरब्रवीत् ॥ वरणायांकृतस्नानैःशैलेशोयैःसमर्चितः ॥ ४३ ॥ पितॄन्संतर्प्यचमुदादत्त्वादानानिशक्तितः ॥ नतेषांपुनरावृत्तिरत्रसंसारवर्त्मनि ॥ ४४ ॥ शैलेश्वरेमहालिंगेनित्यंस्थास्याम्यहंशुभे ॥ प्रदास्यामिपरांमुक्तिमेतल्लिंगार्चकेजने ॥ ४५ ॥

शैलेश्वरंयेद्रक्ष्यंतिवरणायाःसुरोधसि ॥ तेषांकाश्यांनिवसतांदुःखंनाभिभविष्यति ॥ ४६ ॥ उमयापिवरोदत्तस्तत्रलिंगेघटोद्भव ॥ शैलेश्वरस्ययेभक्तास्तेमेपुत्रानसंशयः ॥ ४७ ॥ स्कंदउवाच ॥ ॥ इतिशैलेश्वरंलिंगंकथितंतेमहामुने ॥ इदानींकथयिष्यामिरत्नेश्वरसमुद्भवम् ॥ ४८ ॥ श्रुत्वाशैलेशमाहात्म्यंश्रद्धयापरयानरः ॥ पापकंचुकमुत्सृज्यशिवलोकमवाप्नुयात् ॥ १४९ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धे शैलेशादिलिंगनिर्णयोनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ अगस्त्यउवाच ॥ ॥ रत्नेश्वरसमुत्पत्तिंकथयस्वषडानन ॥ रत्नभूतंमहालिंगंयत्काश्यांपरिवर्ण्यते ॥ १ ॥ कोस्यलिंगस्यमहिमाकेनैतच्चप्रतिष्ठितम् ॥ एतंविस्तरतोब्रूहिगौरीहृदयनंदन ॥ २ ॥ ॥ स्कंदउवाच ॥ रत्नेश्वरस्यमाहात्म्यंकथयिष्यामितेमुने ॥ यथाचतस्यलिंगस्यप्रादुर्भावोऽभवद्भुवि ॥ ३ ॥ श्रुतंनामापिलिंगस्ययस्यजन्मत्रयार्जितम् ॥ वृजिनंनाशये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्तस्यप्रादुर्भावंब्रुवेमुने ॥ ४ ॥ शैलराजेनरत्नानियानिपुंजीकृतान्यहो ॥ उत्तरेकालराजस्यतानितस्यगिरेर्वृषात् ॥ ५ ॥ सर्वरत्नमयंलिंगंजातं तत्सुकृतात्मनः ॥ शक्रचापसमच्छायंसर्वरत्नद्युतिप्रभम् ॥ ६ ॥ तल्लिंगदर्शनादेवज्ञानरत्नमवाप्यते ॥ शैलेश्वरंसमालोक्यशिवौतत्रसमागतौ ॥ ७ ॥ यत्ररत्नमयंलिंगमाविर्भूतंस्वयंमुने ॥ तस्यस्फुरत्प्रभाजालैस्ततमंबरमंडलम् ॥ ८ ॥ तत्रदृष्ट्वाशुभंलिंगंसर्वरत्नसमुद्भवम् ॥ भवान्यदृष्टपूर्वाहिप रिपप्रच्छशंकरम् ॥ ९ ॥ देवदेवजगन्नाथसर्वभक्ताभयप्रद ॥ कुतस्त्यमेतल्लिंगंहिसप्तपातालमूलवत् ॥ १० ॥ ज्वालाजटिलिताकाशंप्रभाभासित दिङ्मुखम् ॥ किमाख्यंकिंस्वरूपंचकिंप्रभावंभवांतक ॥ ११ ॥ यस्यसंवीक्षणादेवमनोमेतीवहृष्टवत् ॥ इहैवरमतेनाथकथयैतत्प्रसादतः ॥ १२ ॥ ॥ देवदेवउवाच ॥ ॥ शृण्वपर्णेसमाख्यामियत्त्वयापृच्छिपार्वति ॥ स्वरूपमेतल्लिंगस्यसर्वतेजोनिधेःपरम् ॥ १३ ॥ तवपित्राहिमवतागिरिराजेनभा मिनि ॥ त्वामुद्दिश्यमहारत्नसंभारोत्राप्यनायिहि ॥ १४ ॥

अत्रतानिचरत्नानिराशीकृत्यहिमाद्रिणा ॥ सुकृतोपार्जितान्येवययौस्वसदनंपुनः ॥ १५ ॥ तवार्थंवाममार्थंवाश्रद्धयायत्समर्प्यते ॥ काश्यांतस्यपरी पाकोभवेदीदृग्विधोऽनघे ॥ १६ ॥ लिंगंरत्नेश्वराख्यंवैमत्स्वरूपंहिकेवलम् ॥ अस्यप्रभावोहिमहान्वाराणस्यामुमेध्रुवम् ॥ १७ ॥ सर्वेषामिहलिंगानां रत्नभूतमिदंपरम् ॥ अतोरत्नेश्वरंनामपरंनिर्वाणरत्नदम् ॥ १८ ॥ अनेनैवसुवर्णेनपित्रांराशीकृतेनच ॥ प्रासादमस्यलिंगस्यविधापयमहेश्वरि ॥१९॥ लिंगप्रासादकरणात्खंडस्फुटितसंस्कृतेः ॥ लिंगस्थापनजंपुण्यंहेलयैवेहलभ्यते ॥ २०॥ तथेतिभगवत्योक्तागणाःप्रासादनिर्मितौ ॥ सोमनंदिप्रभृतयो ऽसंख्याव्यापारितामुने ॥ २१ ॥ गणैश्चकांचनमयोनानाकौतुकचित्रितः ॥ निर्ममेयाममात्रेणप्रासादोमेरुशृंगवत् ॥२२॥ देवीप्रहृष्टवदनादृष्ट्वाप्रासाद निर्मितिम् ॥ गणेभ्योव्यतरद्भूरिसंमानंपारितोषिकम् ॥ २३ ॥ पुनश्चदेवीपप्रच्छप्रणिपातपुरःसरम् ॥ महिमानंमहादेवंलिंगस्यास्यमहामुने ॥२४॥ ॥ देवदेवउवाच ॥ ॥ लिंगंत्वनादिसंसिद्धमेतद्देविशुभप्रदम् ॥ आविर्भूतमिदानींचत्वत्पितुःपुण्यगौरवात् ॥ २५ ॥ गुह्यानांपरमंगुह्यंक्षेत्रेऽस्मिंश्चिंति तप्रदम् ॥ कलौकलुषबुद्धीनांगोपनीयंप्रयत्नतः ॥ २६ ॥ यथारत्नंगृहेगुप्तंनकैश्चिज्ज्ञायतेपरैः ॥ अविमुक्तेतथालिंगंरत्नभूतंगृहेमम ॥ २७ ॥ यानिब्रह्मां डमध्येत्रसंतिलिंगानिपार्वति ॥ तैरर्चितानिसर्वाणिरत्नेशोयैःसमर्चितः॥२८॥प्रमादेनापियैर्गौरिलिंगंरत्नेशमर्चितम् ॥ तेभवंत्येवनियतंसप्तद्वीपेश्वरानृपाः ॥ २९ ॥ त्रैलोक्येयानिवस्तूनिरत्नभूतानितानितु ॥ रत्नेश्वरंसमभ्यर्च्यसकृत्प्राप्नोतिमानवः ॥ ३० ॥ पूजयिष्यंतियेलिंगंरत्नेशंकामवर्जिताः ॥ तेसर्वे मद्गणाभूत्वाप्रांतेद्रक्ष्यंतिमामिह ॥ ३१ ॥ रुद्राणांकोटिजप्येनयत्फलंपरिकीर्तितम् ॥ तत्फलंलभ्यतेदेविरत्नेशस्यसमर्चनात् ॥ ३२ ॥ लिंगेचानादिसं सिद्धेयद्वृत्तंतद्ब्रवीमिते ॥ इतिहासंमहाश्चर्यंसर्वपापनिकृंतनम् ॥ ३३ ॥ पुरेहनर्तकीकाचिदासीन्नाट्यार्थकोविदा ॥ सैकदाफाल्गुनेमासिशिवरात्र्यां कलावती ॥३४॥ ननर्तजागरंप्राप्यजगौगीतंचपेशलम् ॥ स्वयंचवादयामासनानावाद्यानिवाद्यवित् ॥३५॥ तेनतौर्यत्रिकेणापिप्रीणयित्वाथसानटी॥ रत्नेश्वरंमहालिंगंदेशमिष्टंजगामह ॥ ३६ ॥ कालधर्मवशंयातातत्रसावरनर्तकी ॥ सुतागंधर्वराजस्यवसुभूतेर्बभूवह ॥ ३७ ॥ संगीतस्यसवाद्यस्यतस्यला स्यस्यपुण्यतः ॥ तत्रेशाग्रेकृतस्येहजागरेशिवरात्रिजे ॥ ३८ ॥

रम्यारत्नावलीनामरूपलावण्यशालिनी ॥ कलाकलापकुशलामधुरालापवादिनी ॥ ३९ ॥ पितुरानंदकृन्नित्यंवसुभूतेर्घटोद्भव ॥ सर्वगांधर्वकुशलागुण रत्नमहाखनिः ॥ ४० ॥ मुनेसखीत्रयंतस्याश्चारुचातुर्यभाजनम् ॥ शशिलेखानंगलेखाचित्रलेखेतिनामतः ॥ ४१ ॥ तिसृभिस्ताभिरेकत्रवाग्देवीप रिशीलिता ॥ ताभ्यःसर्वाःकलाःप्रादात्परिप्रीतासरस्वती ॥ ४२ ॥ प्राप्यरत्नावलीगौरिसाजन्मांतरवासनाम् ॥ रत्नेश्वरस्यलिंगस्यजग्राहनियमंशुभम् ॥ ४३ ॥ रत्नभूतस्यलिंगस्यकाश्यांरत्नेश्वरस्यवै ॥ नित्यंसंदर्शनंप्राप्यवक्ष्याम्यपिवचोमुखे ॥ ४४ ॥ इत्थंनियमवत्यासीत्सागंधर्वसुतोत्तमा ॥ ताभिः सखीभिःसहितानित्यंलिंगंचपश्यति ॥ ४५॥ एकदाराध्यरत्नेशंममैतल्लिंगमुत्तमम् ॥ समानर्चचसाबालारम्ययागीतमालया ॥ ४६ ॥ सख्यःप्रदक्षिणी कर्तुंलिंगंतिस्रोऽप्युमेगताः ॥ तस्यागीतेनतुष्टोहंलिंगस्थोवरदोभवम् ॥ ४७ ॥ यस्त्वयारंस्यतेरात्रावद्यगंधर्वकन्यके ॥ तवनामसमानाख्यःसतेभर्ताभ विष्यति ॥ ४८ ॥ इतिलिंगांबुधेर्जातांपरिपीयवचःसुधाम् ॥ बभूवानंदसंदोहमंथरातीवह्रीमती ॥ ४९ ॥ गताथव्योममार्गेणसखीभिःस्वपितुर्गृहम् ॥ कथयंतीनिजोदंतंतमालीनांपुरोमुदा ॥ ५० ॥ ताभिर्दिष्ट्येतिदिष्ट्येतिसखीभिःपरिनंदिता ॥ अद्यतेवांछितंभाविरत्नेशस्यसमर्चनात् ॥ ५१ ॥ यद्यायातिसतेरात्रावद्यकौमारहारकः ॥ चोरोवाहुलतापाशैःपाशितव्योतियत्नतः ॥ ५२ ॥ गोचरीक्रियतेस्माभिर्यथाससुकृतैकभूः ॥ प्रातरेवतवप्रेयान्रत्ने शादिष्टइष्टकृत् ॥५३ ॥ यातास्वस्मासुहृष्टासुभवतीपुण्यगौरवात् ॥ अहोरत्नेश्वरंलिंगंप्रत्यक्षीकृतवत्यसि ॥ ५४ ॥ अहोभाग्योदयोनृणामहोपुण्यसमु च्छ्रयः ॥ एकस्यैवभवेत्सिद्धिर्यदेकत्रापितिष्ठताम् ॥ ५५ ॥

सत्यंवदंतिनासत्यंदैवप्राधान्यवादिनः ॥ दैवमेवफलेदकंनोद्यमोनापरंबलम् ॥ ५६ ॥ भवत्याअपिचास्माकमेकएवहिचोद्यमः ॥ परंदैवंफलत्येकंयथा तवननःपुरः ॥ ५७ ॥ लोकानांव्यवहारोयमालिप्रोक्तःप्रसंगतः ॥ परंमनोरथावाप्तिस्तवयासैवनःस्फुटम् ॥५८॥ इतिसंव्याहरंतीनामनंतोध्वाऽतितुच्छ वत् ॥ क्षणात्तासांव्यतिक्रांतःप्राप्ताश्चस्वंस्वमालयम् ॥ ५९ ॥ अथप्रातःसमुत्थायपुनरेकत्रसंगताः ॥ साचमौनवतीताभिःपरिभुक्तेवलक्षिता ॥ ॥ ६० ॥ तूष्णींप्राप्याथकाशींसास्नात्वामंदाकिनीजले ॥ सखीभिःसहितापश्यल्लिंगंरत्नेश्वरंमम ॥ ६१ ॥ निर्वर्त्यनियमंसाथलज्जामुकुलितेक्षणा ॥ निर्बंधेनवयस्याभिःपरिपृष्टाजगादह ॥ ६२ ॥ ॥ रत्नावल्युवाच ॥ ॥ अथरत्नेशयात्रायाःप्रयातासुस्वमंदिरम् ॥ भवतीषुस्मरंत्येवतद्रत्नेशवचोऽ मृतम् ॥ ६३ ॥ सविशेषांगसंस्काराऽविशंसंवेशमंदिरम् ॥ निद्रादरिद्रनयनातद्विलोकनलालसा ॥६४॥ बलात्स्वप्नदशांप्राप्ताभाविनोर्थस्यगौरवात् ॥ आत्मविस्मरणेहेतूततोभेद्वोबभूवतुः ॥ ६५ ॥ तंद्रीतदंगसंस्पर्शौममबोधापहारकौ ॥ तंद्र्यापरवशाचासंततस्तत्स्पर्शनेनच ॥ ६६ ॥ नजानेत्वथ किंवृत्तंकाहंक्वाहंसचाथकः ॥ तंनिर्जिगमिषुंसख्योयावद्धर्तुंप्रसारितः ॥६७॥ दोःकंकणेनरिपुणाक्वणितंतावदुत्कटम् ॥ महतासिंजितेनाहंतेनाल्पंपरिबो धिता ॥ ६८ ॥ सुखसंतानपीयूषह्रदेपरिनिमज्ज्यवै ॥ क्षणेनतद्वियोगाग्निकीलासुपतितावलात् ॥६९॥ किंकुलीयःसनोवेद्मिकिंदेशीयःकिमाख्यकः ॥ दुनोतिनितरांसख्यस्तद्विश्लेषानलोमहान् ॥७०॥ अनल्पोत्कलितंचेतःपुनस्तत्संगमाशया ॥ प्राणानांमेयियासूनामेकमेवमहौषधम् ॥ ७१ ॥ वयस्यानिशिभुक्तस्यतस्यैवपुनरीक्षणम् ॥ भवतीनामधीनंचतत्पुनर्दर्शनंमम ॥७२॥ काऽलीकमालयोवक्तिस्निग्धमुग्धेसखीजने ॥ तद्दर्शनेनस्थास्यं तिप्राणायास्यंतिचान्यथा ॥ ७३ ॥

दशम्यवस्थासन्नह्येद्बाधितुंमाधुनाभृशम् ॥ इतितस्यागिरःश्रुत्वादूनायानितरांचताः ॥ ७४ ॥ प्रवेपमानहृदयाःप्रोचुर्वीक्ष्यपरस्परम् ॥ ७५ ॥ ॥ सख्यऊचुः ॥ ॥ यस्यग्रामोननोनामनान्वयोनापिबुध्यते ॥ सकथंप्राप्यतेभद्रेकउपायोविधीयताम् ॥ ७६ ॥ इतिरत्नावलीश्रुत्वाससंदेहांचत द्गिरम् ॥ वयस्यास्तदवाप्तौमेयूयंकुंठिमुमूर्छह ॥ ७७ ॥ इत्यर्धोक्तेनसाबालायूयंकुंठितशक्तयः ॥ यद्वक्तव्यंत्वितितयायूयंकुंठीतिभाषितम् ॥ ७८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ततस्तास्त्वरिताःसख्यःपरितापोपहारकान् ॥ बहुशःशीतलोपायान्व्यधुर्मोहप्रशांतये ॥ ७९ ॥ व्यपैतिनयदामूर्छातत्तच्छीतोपचारतः ॥ तस्यास्तदै कयानीतंरत्नेशस्नपनोदकम् ॥ ८० ॥ तदुक्षणात्क्षणादेवतन्मूर्छाविररामह ॥ सुप्तोत्थितेवसावादीन्मुहुःशिवशिवेतिच ॥ ८१ ॥ ॥ स्कंदउवाच ॥ श्रद्धावतांस्वभक्तानामुपसर्गेमहत्यपि ॥ नोपायांतरमस्त्येवविनेशचरणोदकम् ॥ ८२ ॥ येव्याधयोपिदुःसाध्यावहिरंतःशरीरगाः ॥ श्रद्धयेशोदकस्पर्शा त्तेनश्यंत्येवनान्यथा ॥ ८३ ॥ सेवितंयेनसततंभगवच्चरणोदकम् ॥ तंबाह्याभ्यंतरशुचिंनोपसर्पतिदुर्गतिः ॥ ८४ ॥ आधिभौतिकतापंचतापंचाप्या धिदैविकम् ॥ आध्यात्मिकंतथातापंहरेच्छ्रीचरणोदकम् ॥ ८५ ॥ व्यपेतसंज्वराचाथगंधर्वतनयामुने ॥ उचितज्ञेतिहोवाचताःसखीःस्निग्धधीरधीः ॥ ८६ ॥ ॥ रत्नावल्युवाच ॥ ॥ शशिलेखेनंगलेखेचित्रलेखेमदीहिते ॥ यूयंकुंठितसामर्थ्याःकुतोवस्ताःकलाःक्वचा ॥८७॥ मत्प्रियप्राप्तयेसम्यगुपायो ऽस्तिमयेक्षितः ॥ रत्नेश्वरानुग्रहतोऽनुतिष्ठतहितंहिताः ॥ ८८ ॥ शशिलेखेभिलषितप्राप्त्यैलेखांस्त्वमालिख ॥ संलिखानंगलेखेत्वंयूनःसर्वावनी चरान् ॥ ८९ ॥ चित्रगेचित्रलेखेत्वंपातालतलशायिनः ॥ किंचिदाविर्भवच्चारुतारुण्यालंकृतीँल्लिख ॥ ९० ॥

अथाकर्ण्येतिताःसख्यस्तच्चातुर्यंप्रवर्ण्यच ॥ लिलिखुःक्रमशःसख्योयूनोयौवनशेवधीन् ॥ ९१ ॥ निर्यत्कौमारलक्ष्मीकान्पुंवत्त्वश्रीसमावृतान् ॥ प्रातःसंध्येवगंधर्वीनृपाद्यांस्तानवैक्षत ॥ ९२ ॥ सर्वान्सुरनिकायान्साव्यलोकतशुभेक्षणा ॥ नचांचल्यंजहावक्ष्णोस्तेषुस्वर्लोकवासिषु ॥ ९३ ॥ ततोमध्यमलोकस्थान्मुनिराजकुमारकान् ॥ विलोक्यापिनसाप्रीतिंकाप्यापप्रेमनिर्भरा ॥ ९४ ॥ अथरत्नावलीबालाकर्णाभ्यर्णविलोचना ॥ दृशौ व्यापारयामासबलिसद्मयुवस्वपि ॥ ९५ ॥ दितिजान्दनुजान्वीक्ष्यमागंधर्वीकुमारकान् ॥ रतिंबबंधनक्वापितापितामान्मथैःशरैः ॥ ९६ ॥ सुधाक रकरस्पृष्टाप्यतिदूनांगयष्टिका ॥ पश्यंतीनागयूनःसाकिंचिदुच्छ्वसिताऽभवत् ॥ ९७ ॥ भोगिनस्तान्विलोक्यापिचित्रंचित्रगतानथ ॥ मनाक्सं भुक्तभोगेवक्षणमासीत्कुमारिका ॥ ९८ ॥ यूनःप्रत्येकमद्राक्षीदशेषाञ्छेषवंशजान् ॥ तक्षकान्वयगांस्तद्वदथवासुकिगोत्रजान् ॥ ९९ ॥ पुलीकानं तकर्कोटभद्रसंतानगानपि ॥ दृष्ट्वानागकुमारांस्ताञ्छंखचूडमथैक्षत ॥ १०० ॥ शंखचूडेक्षणादेवपरांलज्जांबभारसा ॥ उद्भिन्नपुलकाप्यासीदंगप्रत्यं गसंधिषु ॥ १ ॥ तत्रपाभरतोऽज्ञायितत्कौमारहरोवरः ॥ तयावैदग्ध्यवरयाक्षणतश्चित्रलेखया ॥ २ ॥ अथचित्रपटीचित्रलेखाचित्रपटांचलम् ॥ परिक्षिप्यावृणोत्तूर्णंपरिहासैकपेशला ॥ ३ ॥ रत्नावलीचित्रलेखांह्रियामौनावलंबिनी ॥ दृशाकुटिलयाद्राक्षीत्प्रस्फुरद्दशनांबरा ॥ ४ ॥ कटाक्षितानंगलेखातयाथशशिलेखया ॥ चित्रलेखापरिक्षिप्तपटांचलमपाकरोत् ॥ ५ ॥ वसुभूतिसुतासाथकन्यारत्नावलीशुभा ॥ शंखचूडान्व वायेतंरत्नचूडमवैक्षत ॥ ६ ॥

तदीक्षणक्षणाद्दृष्टिरानंदाश्रुभिरावृता ॥ कपोलभित्तिरभवत्स्वेदोदकणिकांचिता ॥ ७ ॥ चकंपेगात्रलतिकाधृतरोमांचकंचुका ॥ चित्रन्यस्तेवतस्तं भक्षणंमुकुलिताननाः ॥ ८ ॥ ततःसाचित्रलेखातामेत्याश्वासयदातुराम् ॥ मौत्सुक्यंव्रजगंधर्विसिद्धस्तेद्यमनोरथः ॥९॥ एतस्यावगतंसर्वंदेशनामान्वया दिकम् ॥ माविषीदालिसुलभस्त्वेषरत्नेश्वरार्पितः ॥११०॥ अहोसदृग्वरावाप्त्यारत्नेशेनासितोषिता ॥ उत्तिष्ठयामःसदनंरत्नेशःसर्वदोहिनः ॥ ११ ॥ अथदैववशाद्यांत्यस्तादृष्टागगनाध्वगाः ॥ सुबाहुनादानवेनपातालतलवासिना ॥ १२ ॥ गृहीत्वाताश्चतस्रोपिनिरगाद्दानवोगृहम् ॥ हरिर्विकटदंष्ट्रास्यः प्रांतरेहरिणीरिव ॥ १३ ॥ तास्तंविलोक्यगंधर्व्योदंष्ट्राविकटिताननम् ॥ रुधिरारुणनेत्रंचजातावेपथुभूमयः ॥ १४ ॥ हामातर्हापितस्त्राहिहाविधेमावि धेहितत् ॥ यदेतत्कर्तुमारब्धमनाथास्वतिनिष्ठुरम् ॥ १५ ॥ हादैवमंदभाग्याभिःकिमस्माभिरनुष्ठितम् ॥ सुकृतेतरवार्तापिनोचित्तेव्याहृताक्व चित् ॥ १६ ॥ शिशुक्रीडनकंहित्वाहित्वारत्नेश्वरार्चनम् ॥ पित्रोःस्वाधीनसच्चेष्टाइष्टंविद्मोनकिंचन ॥१७॥ अधोभुवनगादीनाहीनानाथेनकोत्रनः ॥ त्रातित्राणार्थिनीर्बालाःशंभोरत्नेशसर्वग ॥ १८ ॥ इत्थंगंधर्वतनयाविलपंतीःकृपातुरम् ॥ शुश्रावनागराजोसौरत्नचूडोमहामनाः ॥ १९ ॥ कोसौ मत्स्वामिनोनामरत्नेशस्यमहेशितुः ॥ लिंगराजस्यगृह्णातिकर्मबंधनभेदिनः ॥ १२० ॥ पुनरप्यार्तरावंसश्रुत्वाबालामुखेरितम् ॥ रत्नेशरक्षरक्षेतिगृही तास्त्रोविनिर्ययौ ॥२१॥ तंवसारसपानेनमहामांसनिषेवणात् ॥ अत्यंतोन्मत्तदुश्चेष्टंरत्नचूडोनिरैक्षत ॥ २२ ॥ अध्याक्षिपच्चरेदुष्टशिष्टकन्यापहारक ॥ मद्दृष्टिगोचरंयातःक्वयास्यस्यद्यरेऽधम ॥ २३ ॥ ममबाणहतप्राणःप्रयाणंकुरुदुर्मते ॥ आर्तत्राणोद्यतमतेर्वैवस्वतपुरंप्रति ॥ २४ ॥ रत्नेश्वरस्ययैर्ना मप्रलयापद्यपिस्फुटम् ॥ गृहीतंनभवादृग्भ्यस्तेषुभीतिर्भयात्मसु ॥ २५ ॥

रत्नेश्वरमहानामकृतत्राणास्तुयेनराः ॥ तेषांजन्मजराव्याधिकलिकालभयंकुतः ॥२६॥ इत्युक्त्वाताभयत्रस्तास्तन्मुखप्रहितेक्षणाः ॥ व्याघ्रघ्राताइवमृगी र्माभैषिष्टेत्युवाचसः ॥ २७ ॥ इत्याश्वास्याथगंधर्वीःसवैभुजगराजजः ॥ आकर्णपूर्णमाकृष्यकोदंडंप्राहिणोच्छरम् ॥ २८ ॥ सोपिक्रुद्धोदनुजराट्पदा स्पृष्टभुजंगवत् ॥ आविद्ध्यकालदंडाभंपरिघंव्यसृजन्महत् ॥२९॥ हृदिरत्नेश्वरंलिंगंयस्यसम्यग्विजृंभते ॥ अलातदंडवत्तस्मिन्कालदंडोपिजायते ॥ ॥ १३० ॥ अंतरेवसचिच्छेदपरिघंस्वमहेषुभिः ॥ दुर्वृत्तस्ययथेहायुर्विच्छिद्येतांतरेवहि ॥ ३१ ॥ ततोस्यबाणंचिक्षेपकालानलसमप्रभम् ॥ सबाणस्त स्यहृदयंप्रविश्यप्रगवेप्यच ॥ ३२ ॥ प्राणानस्यविनिर्यात्यस्वयंतूणमगात्पुनः ॥ हृदिस्थंतस्यदौरात्म्यंसर्वंविज्ञायतत्त्वतः ॥ ३३ ॥ दिगंगनापुरः ख्यातुमिवनागाशुगोगतः ॥ ३४ ॥ अन्यायोपार्जितैर्द्रव्यैर्यःसुखंभोक्तुमिच्छति ॥ तानिद्रव्याणियांत्येवसप्राणानिकुतःसुखम् ॥ ३५ ॥ इतितंदानवं हत्वानागराजोमहाबली ॥ प्रत्युवाचाथताःकन्याःकायूयंकस्यचात्मजाः ॥ ३६ ॥ दुरात्मनाकुतोनेनसंगतादनुजन्मना ॥ क्वचारत्नेश्वरंलिंगंभवतीभि र्विलोकितम् ॥ ३७ ॥ यस्यनामाक्षरोच्चाराद्व्यपेतपरमापदः ॥ यूयमाशुतदाख्यातयेनजानामितत्त्वतः ॥३८॥ इतिश्रुत्वागिरस्तस्यनितरांप्रेमनिर्भराः॥ परस्परमुखंवीक्ष्यकोसौस्याद्दृष्टपूर्ववत् ॥ ३९ ॥ अकारणसखाकोसौप्रांतरेसमुपस्थितः ॥ निजप्राणान्पणीकृत्ययेनत्राताःस्मबालिकाः ॥ १४० ॥ अस्यसंदर्शनादेवस्वभावचपलान्यपि ॥ मंथराणींद्रियाणिस्युःपरिपीयसुधामिव ॥ ४१ ॥ यातुमन्यत्रनोनेत्रेप्रोत्सहेतेयथातथा ॥ अन्यद्वस्त्वंतरंप्रे क्ष्यरमणीयतरंत्वपि ॥ ४२ ॥ वचःपीयूषमाधुर्यंनितरांप्राप्यनःश्रुती ॥ शब्दांतरग्रहापेक्षांनकुर्वातेस्वजन्मनः ॥ ४३ ॥

आप्लुतःपंगुतामेतौपादौनश्चंचलावपि ॥ अमुंयुवानमालोक्यचोरंनःसन्मनोमणेः ॥ ४४ ॥ इतिब्रुवंत्यस्ताबालाःपरस्परमनुल्बणम् ॥ दृष्ट्वापिचि त्रमध्यस्थंविविदुस्तन्नबालिकाः ॥ ४५ ॥ अतीवभीषणाकारदनुजस्यातिसाध्वसात् ॥ अंधीभूतेक्षणास्तंनाज्ञासिषुर्हरिणीक्षणाः ॥ ४६ ॥ ऊचुश्चतं युवानंतानिजजीवितरक्षिणम् ॥ यदंगभवतापृष्टंस्नेहनिर्भरचेतसा ॥ ४७ ॥ तदाचक्षामहेसर्वमवधेहिक्षणंमनः ॥ इयंगंधर्वराजस्यवसुभूतेस्तनूद्भवा ॥ ॥ ४८ ॥ कन्यारत्नावलीनामगुणरत्नमहाखनिः ॥ वयंवयस्याएतस्याश्छायेवानुगताःसदा ॥ ४९ ॥ आरभ्यबाल्यमप्येषालिंगंरत्नेश्वराभिधम् ॥ याति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पित्राप्यनुज्ञाताकाश्यामर्चयितुंसदा ॥ १५० ॥ करोपिदत्तस्तेनास्यैप्रसन्नेनाथशंभुना ॥ हरिष्यतीतियःस्वप्नेकोमारंतेकुमारिके ॥ ५१ ॥ तवना मसमानाख्यःसतेभर्ताभविष्यति ॥ युवानंस्वप्नभोक्तारंप्राप्याप्येषामुदुःखिता ॥५२॥ युनस्तद्विरहोत्येनवह्निनातीवतापिता॥कलाकोशल्यतोऽस्माभिः सोपिचित्रेप्रदर्शितः ॥ ५३ ॥ यस्यनाममनायापिनान्वयोप्यवबुध्यते ॥ तंदृष्ट्वाचित्रलिखितमप्येषाजीवितापुनः ॥ ५४ ॥ ततोरत्नेश्वरंनत्वास्वगृहायो त्सुकाभवत् ॥ यांतीस्ततोऽन्ययासार्धंभ्रांतरेगगनाध्वनि ॥ ५५ ॥ अतर्कितागमश्चास्मान्भृत्वापातालमाविशत् ॥ अनंतरंभवानेवतर्वेत्तिदनुजाधमम् ॥ ॥५६॥ अंगहत्येवबृत्तांतोनिजोऽस्माभिरुदीरितः ॥ प्रसादंकुरुचास्माकंपुरःकोसिकूपनिधे ॥५७॥ यदाप्रभृतिचास्माभिःसदृष्टोदुष्टदानवः ॥ तदाप्रभृ तिनोनेत्रेविद्युतेवहतश्रमे ॥ ५८ ॥ कांदिशंकामयत्रातर्नविद्मःकिंचिदेवहि ॥ क्वचयंकावयंकस्त्वंकिंजातंकिंभविष्यति ॥ ५९ ॥ निशम्येतिसपुण्यात्मा नागराजकुमारकः ॥ आश्वास्यताभयत्रस्ताःप्रोवाचेदंचपुण्यधीः ॥ १६० ॥ मयासहसमायातरत्नेशंदर्शयामिवः ॥ इत्याहूयलतानिन्येकीडावापींसुखो दकाम् ॥६१॥ विचित्रमणिसोपानहंसकोक्कूतारवाम्॥कवीनांवासितव्याजात्स्वागतंकुर्वतीमिव ॥६२॥ तत्रतेनाभ्यनुज्ञाताःक्रीडावाप्यांनिमज्यताः ॥ सचैलपुष्पाभरणाःप्रोन्मज्जुस्ततःपुनः ॥ ६३ ॥ वह्निर्निर्गत्यगंधर्व्यःपश्यंत्यःस्थगिताइव ॥ रत्नेशालयमालोक्यकालराजसमीपतः ॥ ६४॥ परस्पं रंततःप्रोक्तुर्गंधर्व्योविस्मिताइव ॥ स्वप्नोयंकिंनुवासत्यंखेलोरत्नेश्वरस्यवा ॥ ६५ ॥

वयमेवंहिवाभ्रांतागंधर्व्योनवयंकिमु ॥ किमेतन्नैवजानीमर्षेंद्रजालिकखेलवत् ॥ ६६ ॥ एषोत्तरवहागंगास्फुटमेवभवेदिह ॥ शंखचूडस्यवाप्येषाशं खचूडालयस्त्वसौ ॥ ६७ ॥ एतत्पंचनदंतीर्थमेषवागीश्वरालयः ॥ यस्यसंदर्शनादेववाग्विभूतिर्विजृंभते ॥ ६८ ॥ शंखचूडेश्वरश्चैषशंखचूडप्रतिष्ठितः ॥ यस्यसंदर्शनात्पुंसांनभयंकालसर्पजम् ॥ ६९ ॥ एषामंदाकिनीनामदीर्घिकापुण्यतोयभूः ॥ यस्यांकृतोदकामर्त्यामर्त्यलोकेविरंतिन ॥ १७० ॥ असावाशापुरीदेवीयास्तुतात्रिपुरारिणा ॥ त्रिपुरंजेतुकामेनमंदाकिन्यास्तटेशुभे ॥ ७१ ॥ याद्यापिपूजितामर्त्यैराशांपूरयतेर्थिनाम् ॥ मंदाकिन्याः प्रतीच्यांतुएषसिद्धचपटेश्वरः ॥ ७२ ॥ भवेद्यत्स्नपर्यातोगृहेसिद्धचपटंस्फुटम् ॥ कुंडंसिद्धचपटाख्यंचतत्रैवविजोदकम् ॥ ७३ ॥ यत्रस्नात्वा कृतश्राद्धोविरजस्कोदिवंव्रजेत् ॥ मृत्यस्तःसिद्धयश्चाष्टौयाःकाश्यांसर्वसिद्धिदाः ॥ ७४ ॥ सर्वसिद्धिप्रदश्चासौमहाराजविनायकः ॥ विनायकाःप्रणश्यं तियस्मैप्रणमतांनृणाम् ॥ ७५ ॥ असौसिद्धेश्वरस्योच्चैःप्रासादःकांचनोज्वलः ॥ रत्नध्वजपताकाश्चसिद्धिःस्याद्यद्विलोकनात् ॥ ७६ ॥ क्षेत्रस्यमध्यमे भागेमध्यमेश्वरएषवै ॥ मध्याधोलोकयोर्मध्येनवसेद्यस्यवीक्षणात् ॥ ७७ ॥ मध्यमेशंसमभ्यर्च्यनरोमध्यमविष्टपे ॥ आसमुद्रक्षितींद्रःस्यात्तनोमोक्षं चविंदति ॥ ७८ ॥ ऐरावतेश्वरंलिंगंतत्प्राच्यामिष्टसिद्धिकृत् ॥ दृश्यतेयत्पताकायांरम्येरावतोगजः ॥७९॥ वृद्धकालेश्वरस्यैषप्रासादोरत्ननिर्मितः ॥ प्रतिदर्शंसेद्यन्नरात्रौचंद्रःसतारकः ॥ १८० ॥ यस्यसंदर्शनान्नृणांनकालःप्रभवेद्भवे ॥ नकलिःप्रभवेत्सत्यंनचकल्मषराशयः ॥ ८१ ॥ इतियावत्कथां चक्रुःसंभ्रांताइववालिकाः॥तावद्वसुविभूतिःसगंधर्वस्त्वरयाययौ ॥८२॥ नारदाच्छ्रुतवृत्तांतःसुव्राहुदनुजन्मनः ॥ रत्नावलीसुतांप्रीतासससखीकायथाहृता ॥ ८३ ॥ रत्नेश्वरात्समायांतीशून्येगगनवर्त्मनि ॥ यथानयच्चपातालंयथायुद्धमभूत्पुनः ॥ ८४ ॥ यथारत्नेशभक्तेनरत्नचूडेनघातितः ॥समुव्राहुर्दनुज नुर्मद्देष्वासेनचेषुणा ॥ ८५ ॥ यथाचपृष्टवृत्तांतोवापीमार्गेणचानयत् ॥ शंखचूडस्यवापींतांपातालेपुप्रवर्तिनीम् ॥ ८६ ॥ यथाचप्राप्यनिर्यांताःकाशीं दृष्ट्वापिबालिकाः ॥ भृशंसंभ्रांतिमापन्नाःपश्यंत्योपिसमुत्सुकाः ॥ ८७ ॥

दृष्ट्वागंधर्वराजस्तांपुनर्जातामिवात्मजाम् ॥ सवयस्यामनम्लानमुखपंकजसुश्रियम् ॥ ८८ ॥ परिष्वज्यसमाघ्रायललाटफलकंमुहुः ॥ अंकमारोप्यपप्र च्छसर्ववृत्तांतमादरात्॥८९॥अथसाकथयामासदनुजापद्गतेःकथाम् ॥ रत्नेश्वरंवरावार्तिंस्वप्नावस्थांविहायच॥१९०॥रत्नावलीमनोवृत्तिंविज्ञायाथमुखं गितैः ॥ शशिलेखासमाचष्टस्पष्टवर्णैःसविस्तरम् ॥ ९१ ॥ तुतोपनितरांसोथगंधर्वाधिपतिःकृती ॥ प्रभावंवर्णयामासमुदारत्नेश्वरस्यच ॥ ९२ ॥

स्कंदउवाच ॥ ॥ आकर्णयमुनिश्रेष्ठविंध्यबृद्धिविवर्धन ॥ प्रत्यहंरत्नचूडोपिवापीमार्गेणसंयमी ॥९३॥ नागलोकात्समागत्यस्नात्वामंदाकिनीजले ॥ रत्नेश्वरंसमभ्यर्च्यरत्नांजल्यष्टकेनवै ॥ ९४ ॥ सुवर्णपंकजान्यष्टौसमर्पयतिहृष्टवत् ॥ एकदास्वप्नसमयेरत्नेशोलिंगरूपधृक् ॥ ९५ ॥ रत्नचूडमुवाचेदंनिजभक्तंदृढव्रतम् ॥ दानवेनहृतांकन्यांमोचयिष्यतियांभवान् ॥ ९६ ॥ तंदानवंरणेजित्वासातेपत्नीभविष्यति ॥ इतिस्मरन्वरंसोथनागराजो महामनाः ॥९७॥ तांकन्यांदानवंहत्वाविमोच्यनिजवीर्यतः ॥ वापीमार्गेणपातालादानिनायपुनर्महीम् ॥९८॥ स्वयंचसाधयांचक्रेप्रत्यहंनियमंसुधीः॥ लिंगंसमर्चयित्वाथकृत्वाचापिप्रदक्षिणम् ॥ ९९ ॥ यावद्गहिःसमागच्छेद्भम्यांद्रत्नेशमंडपात् ॥ तावद्गंधर्वराजायताभिःसवसुभूतये ॥ २०० ॥ सोयं सोयंयुवाधन्यस्तर्जन्यग्रेणदर्शितः ॥ गंधर्वराजस्तंदृष्ट्वानागराजकुमारकम् ॥ १ ॥ अतीवस्मेरनयनःसंप्रहृष्टतनूरुहः ॥ मनस्येनंचसंवर्ण्यतद्रूपंसवयो न्वयम् ॥ २ ॥ धन्योस्म्यनुगृहीतोस्मिरत्नेशेनवरार्पणात् ॥ कन्याधन्यतराचेयमनुरूपोस्तियत्पतिः ॥ ३ ॥ संप्रधार्येतिहृद्येनंसमाकार्यचसुंदरम् ॥ पृष्ट्वःनाम्नागोत्रंचगणयित्वाबलाबलम् ॥ ४ ॥ रत्नेश्वरस्यपुरतस्तस्मैकन्यांददौमुदा ॥ नीत्वागंधर्वलोकंचकृतकौतुकमंगलम् ॥ ५ ॥ मधुपर्केणसं पूज्यपाणिमग्राहयत्ततः ॥ वैवाह्किनविधिनाददौरत्नान्यनेकशः ॥ ६ ॥ शशिलेखानंगलेखाचित्रलेखापिकुंभज ॥ विज्ञाप्यस्वजनेतारंवरयामासतंप तिम् ॥ ७ ॥ उपयम्यचतस्रोपिसगंधर्वसुताःशुभाः ॥ रत्नचूडोजगामाथताभिःस्वपितृमंदिरम् ॥ ८ ॥ यथाचतमृभिःसार्धंश्रुतिभिःप्रणवःशिवम् ॥ स्वपित्रोश्चरणौनत्वानवोढाभिःसनागराट् ॥ ९ ॥

विनिवेदितवृत्तांतोरत्नेशानुग्रहस्यच ॥ उवासताभिःससुखंपितृभ्यामभिनंदितः ॥२१०॥ ॥ ईश्वरउवाच ॥ ॥ रत्नेश्वरस्यालिंगस्यममस्थावररूपिणः ॥ सर्वेषांसर्वदस्यास्यप्रभावोगिरिजेऽतुलः ॥ ११ ॥ अस्मिँल्लिंगेपरांसिद्धिंप्राप्ताःसिद्धाःसहस्रशः ॥ गुप्तमासीदिदंलिंगमद्ययावत्समध्यमे ॥ ॥ १२ ॥ तवपित्राहिमवतामममभक्तेनसर्वथा ॥ पुण्यार्जितैर्महारत्नैरत्नेशःप्रकटीकृतः ॥ १३ ॥ अस्मिँल्लिंगेममप्रीतिर्नितरामद्रिराजजे ॥ वागणस्या मिदंलिंगंपूजनीयंप्रयत्नतः ॥ १४ ॥ नानारत्नानिलभ्यंतेरत्नेशानुग्रहादुमे ॥ स्त्रीरत्नपुत्ररत्नादिस्वर्गमोक्षावपिप्रिये ॥ १५ ॥ योऽत्ररत्नेश्वरंनत्वामृतो देशांतरेष्वपि ॥ नसस्वर्गादिहागच्छेत्कल्पकोटिशतैरपि ॥१६॥ असितायांचतुर्दश्यामुपोष्यनिशीजागरात्॥रत्नेशसन्निधौदेविममसान्निध्यमाप्नुयात् ॥ ॥ १७ ॥ अस्यलिंगस्यपूर्वेणतत्क्षयाजन्मांतरेप्रिये ॥ दाक्षायणीश्वरींलिंगंमद्भक्तयात्रप्रतिष्ठितम् ॥ १८ ॥ तस्यसंदर्शनादेवननरोयातिदुर्गतिम् ॥ अंबिकानामगौरीत्वंतत्राहंचाविकेश्वरः ॥ १९ ॥ मूर्तःपडाननस्तत्रतवपुत्रःसुमध्यमे ॥ एतत्रयंनरोदृष्ट्वानगर्भंप्रविशेदुमे ॥ २२० ॥ रत्नेश्वरस्यमाहा त्म्यंमयातेसमुदीरितम् ॥ गोपनीयंप्रयत्नेनकलिकल्मषचेतसाम् ॥ २१ ॥ इदंरत्नेश्वराख्यानंयःपठिष्यतिसर्वदा ॥ सपुत्रपौत्रपशुभिर्नरोविपुल्यैतक र्हिचित् ॥ २२ ॥ श्रुत्वारत्नेश्वरोत्पत्तिंसेतिहासांनरोत्तमः ॥ अवूढोलभतेसत्यंकन्यारत्नंकुलोचितम् ॥ २३ ॥ कन्यापीमंसमाकर्ण्यत्रितिहासं मनोरमम् ॥ श्रद्धयासत्पतिंप्राप्यभविष्यतिपतिव्रता ॥ २४ ॥ इतिहासमिमंश्रुत्वानारीवापुरुषोपिवा ॥ नजात्वित्थवियोगाग्नितापेनपरितप्यते ॥२२५॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेरत्नेश्वरप्रशंसनंनामसप्तपंचाशत्तमोऽध्यायः ॥ ६७ ॥ ॥ स्कंदउवाच ॥ अन्यच्चशृणुविप्रेंद्रवृत्तांतंतत्रसंभवम् ॥ महाश्चर्यप्रजननंमहापातकहारिच ॥ १ ॥ इत्थंकथांप्रकुर्वाणेरत्नेशस्यमहेश्वरे ॥ कोलाहलोमहानासीत्रातत्राते तिसर्वतः ॥ २ ॥ महिषासुरपुत्रोसौसमायातिगजासुरः ॥ प्रमथन्प्रमथान्सर्वान्निजवीर्यमदोद्धतः ॥ ३ ॥

यत्रयत्रधरायांसचरणंप्रमिणोतिहि ॥ अचलोल्लोलयांचकेतत्रतत्रास्यभारतः ॥ ४ ॥ ऊरुवेगेनतरवःपतंतिशिखरैःसह ॥ यस्यदोर्दंडघातेनचूर्णाः स्युश्चशिलोच्चयाः ॥ ५ ॥ यस्यमौलिजसंघर्षाद्धनाव्योमत्यजंत्यपि ॥ नीलिमानंनचाद्यापिजह्नुस्तत्केशसंगजम् ॥ ६ ॥ यस्यनिःश्वाससंभारैरुत्तरं गामहाब्धयः ॥ नद्योप्यमंदकल्लोलभवंतितिमिभिःसह ॥ ७ ॥ योजनानांसहस्राणिनवयस्यसमुच्छ्रयः ॥ तावानेवहिविस्तारस्तनोर्मायाविनोस्यहि ॥ ॥ ८ ॥ यत्रेत्रयोःपिंगलिमातथातरलिमापुनः ॥ विद्युतानोज्ज्वयतेऽद्यापिसोयमायातिसत्वरः ॥ ९ ॥ यांयांदिशंसमभ्येतिसोयंदृःसहदानवः ॥ सासा समीभवेदस्यसाध्वसादिवदिग्ध्रुवम् ॥ १० ॥ ब्रह्मलब्धवरश्चायंतृणीकृतजगत्त्रयः ॥ अवध्योहंभवामीतिस्त्रीपुंसैःकामनिर्जितैः ॥ ११ ॥ ततस्त्रिशूलहे तिस्तमायांतंदैत्यपुंगवम् ॥ विज्ञायावध्यमन्येनशूलेनाभिजघानतम् ॥ १२ ॥ प्रोतस्तेनत्रिशूलेनसचदैत्योगजासुरः ॥ छत्रीकृतमित्रात्मानंमन्यमानो जगोहरम् ॥ १३ ॥ ॥ गजासुरउवाच ॥ ॥ त्रिशूलपाणेदेवेशजानेत्वांस्मरहारिणम् ॥ तवहस्तेममवधःश्रेयानेवपुरांतक ॥ १४ ॥ किंचिद्विज्ञप्तु मिच्छामिअवधेहिममेरितम् ॥ सत्यंब्रवीमिनासत्यंमृत्युंजयविचारय ॥१५॥ त्वमेकोजगतांवंद्योविश्वस्योपरिसंस्थितः ॥ अहंत्वदुपरिष्टाच्चस्थितोस्मी तिजितंमया ॥ १६ ॥ धन्योस्म्यनुगृहीतोस्मित्वत्रिशूलाग्रसंस्थितः ॥ कालेनसर्वेमर्तव्यंश्रेयसेमृत्युरीदृशः ॥ १७ ॥ इतितस्यवचःश्रुत्वादेवदेवःकृपा निधिः ॥ प्रोवाचप्रहसन्छंभुर्घटोद्भवगजासुरम् ॥ १८ ॥ ॥ ईश्वरउवाच ॥ ॥ गजासुरप्रसन्नोस्मिमहापौरुषशोधने ॥ स्वानुकूलंवरंब्रूहिददामिमुमते ऽसुर ॥ १९ ॥ इत्याकर्ण्यसदैत्येंद्रःप्रत्युवाचमहेश्वरम् ॥ ॥ गजासुरउवाच ॥ ॥ यदिप्रसन्नोदिग्वासस्तदानित्यंवसानमे ॥ २० ॥ इमांकृत्तिं विरूपाक्षत्वत्रिशूलाग्निपावितां ॥ स्वप्रमाणांसुखस्पर्शांरणांगणपणीकृताम् ॥ २१ ॥ इष्टगंधिःसदैवास्तुसदैवास्त्वतिकोमला ॥ सदैवनिर्मलाचास्तु सदैवास्त्वतिमंडनम् ॥ २२ ॥ महातपोऽनलज्वालाःप्राप्यापिमुचिरंविभो ॥ नदग्धाकृत्तिरेषामेपुण्यगंधनिधिस्ततः ॥ २३ ॥

यदिपुण्यवतीनेपाममकृत्तिर्दिगंबर ॥ तदात्वदंगसंगोस्याःकथंजातोरणांगणे ॥ २४ ॥ अन्यंचमेवरंदेहियदितुष्टोसिशंकर ॥ नामास्तुकृत्तिवासास्तेभार भ्याद्यतनंदिनम् ॥ २५ ॥ इतितस्यवचःश्रुत्वातथेत्युक्वाचशंकरः ॥ पुनःप्रोवाचतंदैत्यंभक्तिनिर्मलमानसम् ॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुपुण्यनिधेदैत्यवरमन्यंसुदुर्लभम् ॥ अविमुक्तेमहाक्षेत्रेरणत्यक्तकलेवर ॥२७॥ इदंपुण्यशरीरंतेक्षेत्रेस्मिन्मुक्तिसाधने ॥ ममलिंगंभवत्वत्रसर्वेषांमुक्ति दायकम् ॥ २८ ॥ कृत्तिवासेश्वरंनाममहापातकनाशनम् ॥ सर्वेषामेवलिंगानांशिरोभूतमिदंवरम् ॥ २९ ॥ यावंतिसंतिलिंगानिवाराणस्यांमहात्यपि ॥ उत्तमंतावतामेतदुत्तमांगवदुत्तमम् ॥ ३० ॥ मानवानांहितायात्रस्थास्येहंसपरिग्रहः ॥ दृष्टेनानेनलिंगेनपूजितेनस्तुतेनच ॥ कृतकृत्योभवेन्मर्त्यःसंसारं नविशेत्पुनः ॥ ३१ ॥ रुद्राःपाशुपताःसिद्धाऋषयस्तत्त्वचिंतकाः ॥ शांतादांताजितक्रोधानिर्द्वंद्वानिष्परिग्रहाः ॥ ३२ ॥ अविमुक्तेस्थितायेतुममभ क्तामुमुक्षवः ॥ मानापमानयोस्तुल्याःसमलोष्टाश्मकांचनाः ॥३३॥ कृत्तिवासेश्वरेलिंगेस्थास्येहंतदनुग्रहे ॥ दशकोटिसहस्राणितीर्थानिप्रतिवासरम् ॥ ॥ ३४ ॥ त्रिकालमागमिष्यंतिकृत्तिवासेनसंशयः ॥ कलिद्वापरसंभूतानराःकल्मषबुद्धयः ॥ ३५ ॥ सदाचारविनिर्मुक्ताःसत्यशौचपराङ्मुखाः ॥ मायया दंभलोभाभ्यांमोहाहंकृतिसंयुताः ॥ ३६ ॥ शूद्रान्नसेविनोविप्राजिह्मालाअतिलालसाः ॥ संध्यास्नानजपेज्यासुदूरीकृतमनोधियः ॥ ३७ ॥ कृत्तिवासेश्वरंप्राप्यसर्वपापविवर्जिताः ॥ सुखेनमोक्षमेष्यंतियथासुकृतिनस्तथा ॥ ३८ ॥ कृत्तिवासेश्वरंलिंगंसेव्यंकाश्यांततोनरैः ॥ जन्मांतरसहस्रेषु मोक्षोन्यत्रसुदुर्लभः ॥ ३९ ॥ कृत्तिवासेश्वरेलिंगेलभ्यस्त्वेकेनजन्मना ॥ पूर्वजन्मकृतंपापंतपोदानादिभिःशनैः ॥ नश्येत्सद्योविनश्येतकृत्तिवा सेश्वरेक्षणात् ॥४०॥ कृत्तिवासेश्वरंलिंगंयेचैयिष्यंतिमानवाः ॥ प्रविष्टास्तेशरीरेमेतेषांनास्तिपुनर्भवः ॥४१॥ अविमुक्तेऽन्यवस्तव्यंजप्तव्यंशतरुद्रियम् ॥ कृत्तिवासेश्वरोदेवोद्रष्टव्यश्चपुनःपुनः ॥ ४२ ॥ सप्तकोटिमहारुद्रैःसुजप्तैर्यत्फलंभवेत् ॥ तत्फलंलभ्यतेकाश्यांपूजनात्कृत्तिवाससः ॥ ४३ ॥ माघ कृष्णचतुर्दश्यामुपोष्यनिशिजागृयात् ॥ कृत्तिवासेशमभ्यर्च्ययःसयायात्परांगतिम् ॥ ४४ ॥

शुक्लायांपंचदश्यांयश्चैत्र्यांकर्तामहोत्सवम् ॥ कृत्तिवासेश्वरेलिंगेनसगर्भंप्रवेक्ष्यते ॥ ४५ ॥ कथयित्वेतिदेवेशस्तत्कृत्तिंपरिगृह्यच ॥ गजासुरस्यमहतीं प्रावृणोद्धरिदंबरः ॥ ४६ ॥ महामहोत्सवोजातस्तस्मिन्नहनिकुंभज ॥ कृत्तिवासत्वमापेदेयस्मिन्देवोदिगंबरः ॥ ४७ ॥ यत्रच्छत्रीकृतोदैत्यःशूलमारो प्यभूतले ॥ तच्छूलोत्पाटनाज्जातंततत्रकुंडंमहत्तरम् ॥४८॥ तस्मिन्कुंडेनरःस्नात्वाकृत्वाचपितृतर्पणम् ॥ कृत्तिवासेश्वरंदृष्ट्वाकृतकृत्योनरोभवेत् ॥४९॥ स्कंदउवाच ॥ तस्मिंस्तीर्थेतुयदृत्तंतदगस्तेनिशामय ॥ काकाहंसत्वमापन्नास्तत्तीर्थस्यप्रभावतः ॥ ५० ॥ एकदाकृत्तिवासेतुचैत्र्यांयात्राऽभवत्पुरा ॥ अग्रंराशीकृतंतत्रोपहारसमुद्भवम् ॥ ५१ ॥ बहुदंवलकैर्विप्रतंदृष्ट्वापक्षिणोमिलन् ॥ परस्परंतदन्नार्थंयुध्यंतोव्योमवर्त्मनि ॥ ५२ ॥ बलिपुष्टैरपुष्टांगारटंतःकरटाःकटु ॥ त्रलिभिश्चातिपुष्टांगैरबलाश्चंचुभिर्हताः ॥ ५३ ॥ तेहन्यमानान्यपतंस्तस्मिन्कुंडेनभोंगणात् ॥ आयुःशेषेणसंत्राताहंसी भूतास्तुवायसाः ॥ ५४ ॥ आश्चर्यंतंतस्तत्रयायायार्यांमिलिताजनाः ॥ ऊचुरंगुलिनिर्देशंरहोपश्यतपश्यत ॥ ५५ ॥ अस्मासुवीक्षमाणेषुकाकाः कुंडेत्रयेपतन् ॥ पार्तराष्ट्रास्तुतेजाताःस्तीर्थस्यास्यप्रभावतः ॥ ५६ ॥ हंसतीर्थंतदाराभ्यकृत्तिवाससमीपतः ॥ नाम्नाख्यातमभूल्लोकेतत्कुंडंकलशोद्भव ॥ ॥ ५७ ॥ अतीवमलिनात्मानोमहामलिनकर्मभिः ॥ क्षणान्निर्मलतांयांतिहंसतीर्थकृतोदकाः ॥ ५८ ॥ काश्यांसदैववस्तव्यंस्नातव्यंहंसतीर्थके ॥ द्रष्टव्यःकृत्तिवासेशःप्रातव्यंपरमंपदम् ॥ ५९ ॥ काश्यांलिंगान्यनेकानिसुनेसंतिपदेपदे ॥ कृत्तिवासेश्वरंलिंगंसर्वलिंगशिरःस्मृतम् ॥ ६० ॥

कृत्तिवासंसमाराध्यभक्तियुक्तेनचेतसा ॥ सर्वलिंगाराधनजंफलंकाश्यामवाप्यते ॥ ६१ ॥ जपोदानंतपोहोमस्तर्पणंदेवताचनम् ॥ समीपेकृत्तिवास स्यकृतंसर्वमनंतकम् ॥ ६२ ॥ तीर्थत्वनादिसंसिद्धमेतत्कलशसंभव ॥ पुनर्देवस्यसान्निध्याद्भविरासीन्महेशितुः ॥ ६३ ॥ पतानिसिद्धलिंगानिच्छन्ना निस्युर्युगेयुगे ॥ अवाप्यशंभुसान्निध्यंपुनराविर्भवंतिहि ॥ ६४ ॥ हंसतीर्थस्यपरितोलिंगानामयुतंमुने ॥ प्रतिष्ठितंमुनिवरैरत्रास्तिद्विशतोत्तरम् ॥६५॥ एकैकंसिद्धिदंनृणामविमुक्तनिवासिनाम् ॥ लिंगंकात्यायनेशादिव्यक्तनेशांतमेवहि ॥ ६६ ॥ लोमशेशंमहालिंगंलोमशेनप्रतिष्ठितम् ॥ कृत्तिवासःप्रती च्यांयुतद्वाकांतकाद्भयम् ॥ ६७ ॥ मालतीशंशुभंलिंगंकृत्तिवासोत्तरेमहत् ॥ सपर्ययित्वातल्लिंगंराजागजपतिर्भवेत् ॥ ६८ ॥ अंतकेश्वरसंज्ञंच लिंगंतद्भद्रदिक्स्थितम् ॥ अतिपापोपिनिष्पापोजायतेतद्विलोकनात् ॥६९॥ ऊनकेशंमहालिंगंतत्पार्श्वेज्ञानदंपरम्॥तल्लिंगवरिवस्यातोब्रह्मज्ञानमवाप्यते ॥७०॥ तदुत्तरेमहामूर्तिरसितांगोस्तिभैरवः ॥ तस्यदर्शनतःपुंसांनभवेद्यमदर्शनम् ॥७१॥ शुष्कोदरीचतत्रास्तिदेवीविकटलोचना ॥ कृत्तिवासादुदी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च्यांतुकाशीप्रत्यूहभक्षिणी ॥ ७२ ॥ अग्निजिह्वोस्तिवेतालस्तस्याद्देव्यास्तुनेऋते ॥ ददातिवांछितांसिद्धिंसोर्चितोभीमवासरे ॥ ७३ ॥ वेतालकुंडंतत्रास्तिसर्वव्याधिविघातकृत् ॥ तत्कुंडोदकसंस्पर्शाद्व्रणविस्फोटरुग्व्रजेत् ॥ ७४ ॥ वेतालकुंडेसुस्नातोवेतालंमणिपत्यच ॥ लभेतवांछितांसिद्धिंदुर्लभांसर्वदेहिभिः ॥ ७५ ॥ गणोस्तितत्रद्विभुजश्चतुष्पात्पंचशीर्षकः ॥ तस्यसंवीक्षणादेवपापंयातिसहस्रधा ॥ ७६ ॥ तदुत्तरेसुनेरुद्रश्चतुःशृंगोस्तिभीषणः ॥ त्रिपादस्तुद्विशीर्षाचइस्ताःस्युःसप्तषड्हि ॥ ७७ ॥

रोरूयतेवृषाकारस्त्रिधाबद्धःसकुंभज ॥ काशीविघ्नकरायेचयेकाश्यांपापबुद्धयः ॥ ७८ ॥ तेषांचसंछिदांकर्तुमहंभूतकुठारकः ॥ येकाश्यांविघ्नहर्तारोयेकाश्यांधर्मबुद्धयः ॥ ७९ ॥ सुधाघटकरश्चाहंतद्द्वेषपरिपेककृत् ॥ तंदृष्ट्वावृषरुद्रंवैपूजयित्वातुभक्तितः ॥ ८० ॥ महामद्योपचारैश्चनविघ्नैरभिभूयते ॥ मणिप्रदीपोनागोऽस्तितस्माद्व्रादुदग्दिशि ॥ ८१ ॥ मणिकुंडंतदप्येतुविषव्याधिहरंपरम् ॥ तस्मिन्कुंडेकृतस्नानस्तंनागंपरिवीक्ष्यच ॥ ८२ ॥ मणिमाणिक्यसंपूर्णगजाश्वरथसंकुलम् ॥ श्रीरत्नपुत्ररत्नैश्चसतृद्धंराज्यमाप्नुयात् ॥ ८३ ॥ कृत्तिवासेश्वरंलिंगंकाश्यांयेनविलोकितम् ॥ तेमर्त्यलोकेभाग्यभुवोभूतानसंशयः ॥ ८४ ॥ ॥ स्कंदउवाच ॥ ॥ कृत्तिवासःसमुत्पत्तिर्येश्रोष्यंतीहमानवाः ॥ तल्लिंगदर्शनाच्छ्रेयोलप्स्यंतेनात्रसंशयः ॥ ८५ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेकृत्तिवासःसमुद्भवोनामाष्टषष्टितमोऽध्यायः ॥६८॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यतपोराशेकाश्यांलिंगानियानिवै ॥ सेवितानिनृणांमुक्त्यैभवेयुर्भावितात्मनाम् ॥ १ ॥ कृत्तिप्रावरणंयत्रकृतंदेवेनलीलया ॥ रुद्रावासइतिख्यातंतत्स्थानंसर्वसिद्धिदम् ॥ २ ॥ स्थितेतत्रोमयासार्धंस्वेच्छयाकृत्तिवाससि ॥ आगत्यनंदीविज्ञप्तिंचक्रेप्रणतिपूर्वकम् ॥ ३ ॥ देवदेवशशिन्चेशप्रासादाःसुमनोहराः ॥ सर्वरत्नमयारम्याःसाष्टापष्टिरभूदिह ॥ ४ ॥ यूथ्यवःस्वस्तलेयानिशुभान्यायतनानिहि ॥ मुक्तिदान्यपितानीहमयानीतानिसर्वतः ॥ ५ ॥ यतोयत्रसमानीतंयत्रयत्रकृतात्पदम् ॥ कथयिष्याम्यहंनाथक्षंतव्यंदयधार्यताम् ॥ ६ ॥ स्थाणुर्नाममहालिंगंदेवदेवस्यमोक्षदम् ॥ कुरुक्षेत्राद्विहोद्भूतंकलाशेषोस्तितत्रवै ॥ ७ ॥ तदग्नेसन्निधत्याख्यामहापुष्करिणीशुभा ॥ लोलार्कपश्चिमेभागेकुरुक्षेत्रस्थलीतुसा ॥ ८ ॥ तत्रस्नातंदुतं जप्तंतप्तंदत्तंशुभार्थिभिः ॥ कुरुक्षेत्राद्भवेत्सत्यंकोटिकोटिगुणाधिकम् ॥ ९ ॥ नैमिषादेवदेवोत्रब्रह्मावर्तेनसंयुतः ॥ तत्रांशमात्रंसंस्थाप्यकाश्यामाविरभूद्विश्वो ॥ १० ॥ ढुंढिराजोत्तरेभागेसिद्धिदंसाधकस्यवै ॥ लिंगंवैदेवदेवाख्यंतदग्नेकूपउत्तमः ॥ ११ ॥

ब्रह्मावर्तइतिख्यातः पुनरावृत्तिहृन्नृणाम् ॥ तत्कूपाद्भिःकृतस्नानोदेवदेवंसमर्च्यच ॥ १२ ॥ तत्पुण्यैर्नैमिषारण्यात्कोटिकोटिगुणंस्मृतम् ॥ गोकर्णायतनादत्रस्वयमाविरभून्महत् ॥ १३ ॥ लिंगंमहाबलंनामसांबादित्यसमीपतः ॥ दर्शनात्स्पर्शनाद्यस्यक्षणंदेनोमहाबलम् ॥ १४ ॥ वाताहतस्थूलशिरिवविद्रातिदूरतः ॥ कपालमोचनपुरोद्दृष्ट्वालिंगंमहाबलम् ॥ १५ ॥ महाबलमवाप्नोतिनिर्वाणनगरंव्रजेत् ॥ ऋणमोचनतःप्राच्यांप्रभासात्क्षेत्रसत्तमात् ॥ १६ ॥ शशिभूषणसंज्ञंतुलिंगमत्रप्रतिष्ठितम् ॥ तल्लिंगसेवनान्मर्त्यःशशिभूषणतांव्रजेत् ॥ १७ ॥ प्रभासक्षेत्रयात्रायाःपुण्यंप्राप्नोतिकोटिकृत ॥ उज्जयिन्यांमहाकालःस्वयमत्रागतोविभुः ॥ १८ ॥ यन्नामस्मरणादेवनभयंकलिकालतः ॥ प्रणवाख्यान्महालिंगात्प्राच्यांक्रोशमपनाशनम् ॥ १९ ॥ महाकालाभिधंलिंगंदर्शनान्मोक्षदंपरम् ॥ अयोगंधेश्वरंलिंगंपुष्करात्तीर्थराजतः ॥ २० ॥ आविरासीदिहमहत्पुष्करेणसदैवतु ॥ मत्स्योदर्युत्तरेभागेदृष्ट्वाऽयोगंधमीश्वरम् ॥ २१ ॥ स्नात्वाऽयोगंधकुंडेतुभवात्तारयतेपितॄन् ॥ महानादेश्वरंलिंगमट्टहासादिहागतम् ॥ २२ ॥ त्रिलोचनादुदीच्यांतुदृष्टमुक्तयेमतम् ॥ महोत्कटेश्वरंलिंगंमरुत्कोटादिहागतम् ॥ कामेश्वरोत्तरेभागेदृष्टंविमलसिद्धिदम् ॥ २३ ॥ विश्वस्थानादिहायातंलिंगंवैविमलेश्वरम् ॥ स्वर्लीनात्पश्चिमेभागेदृष्टंविमलसिद्धिदम् ॥ २४ ॥ महाव्रतंमहालिंगंमहेंद्रादिहसंस्थितम् ॥ स्कंदेश्वरसमीपेतुमहाव्रतफलप्रदम् ॥ २५ ॥ वृंदारकार्पिवृंदानांस्तुवतांप्रथमेयुगे ॥ उत्पन्नंयन्महालिंगंभूमिंभित्त्वासुदुर्भिदाम् ॥ २६ ॥ महादेवेतितैरुक्तंयन्मनोरथपूरणात् ॥ वाराणस्यांमहादेवस्तदारभ्याभवच्चयत् ॥ २७ ॥ मुक्तिक्षेत्रंकृतंयेनमहालिंगेनकाशिका ॥ अविमुक्तेमहादेवंयोद्रक्ष्यत्यत्रमानवः ॥ २८ ॥ शंभुलोकेगमस्तस्ययत्रतत्रमृतस्यहि ॥ अविमुक्तेप्रयत्नेनततःसेव्यंमुमुक्षुभिः ॥ २९ ॥ कल्पांतरेपिनत्यक्तंकदाप्यानंदकाननम् ॥ येनलिंगस्वरूपेणमहादेवेनसर्वथा ॥ ३० ॥ तत्प्रासादोयमतुलःसर्वरत्नमयःशुभः ॥ हिरण्यगर्भतीर्थाच्चप्रतीच्यांक्षेत्ररक्षकम् ॥ ३१ ॥ वाराणस्यामधिष्ठात्रीदेवतासाग्निलापदा ॥ महादेवेतिसंज्ञावैसर्वलिंगस्वरूपिणी ॥ ३२ ॥ वाराणस्यांमहादेवोदृष्टोयैर्लिंगरूपधृक् ॥ तेनत्रैलोक्यलिंगानिदृष्टानीहनसंशयः ॥ ३३ ॥

वाराणस्यांमहादेवंसमभ्यर्च्यसकृन्नरः ॥ आभूतसंप्लवंयावच्छिवलोकेवसेन्मुदा ॥३४॥ पवित्रपर्वणिसदाश्रावणेमासियत्नतः ॥ लिंगेपवित्रमारोप्यमहादेवेनगर्भभाक् ॥३५॥ पितामहेश्वरंलिंगंगंगयातीर्थादिहागतम् ॥ फल्गुप्रभृतिभिस्तीर्थैःसार्धकोट्यर्धसंमितैः ॥३६॥ धर्मेणयंत्रवैतत्तंयुगानामयुतंशतम् ॥ साक्षीकृत्यंमहालिंगंश्रीमद्धर्मेश्वराभिधम् ॥ ३७ ॥ पितामहेश्वरंलिंगंतत्राभ्यर्च्यनरोमुदा ॥ त्रिःसप्तकुलसंयुक्तोमुच्यतेनात्रसंशयः ॥ ३८ ॥ प्रयागात्तीर्थराजाच्छूलटंकोमहेश्वरः ॥ तीर्थराजेनसहितःस्थितआगत्यवैस्वयम् ॥ ३९ ॥ निर्वाणमंडपाद्भ्यादशाच्यामतिनिर्मलः ॥ प्रासादोमेरुणायस्यस्पर्धतेकांचनोज्वलः ॥ ४० ॥ देवेनैववरोदत्तोयत्रपूर्वंयुगांतरे ॥ पूज्योमहेश्वरःकाश्यांप्रथमंकलुषापहः ॥ ४१ ॥ यःप्रयागइहस्नातोनमस्यतिमहेश्वरम् ॥ समभ्यर्च्यविधानेनमहासंभारविस्तरैः ॥ ४२ ॥ प्रयागस्नानजात्पुण्याच्छूलटंकविलोकनात् ॥ सप्रामुयान्नसंदेहःपुण्यंकोटिगुणोत्तरम् ॥ ४३ ॥ शंकुकर्णान्महाक्षेत्रान्महातेजइतीरितम् ॥ लिंगमाविरभूदत्रमहातेजोविवृद्धिदम् ॥ ४४ ॥ महातेजोनिधिस्तस्यप्रासादोतीवनिर्मलः ॥ ज्वालाजटिलिताकाशोमाणिक्यैरेवनिर्मितः ॥ ४५ ॥ तल्लिंगदर्शनात्स्पर्शात्स्तवनाच्चसमर्चनात् ॥ प्राप्यतेतत्परंधामयत्रगत्वानशोचते ॥ ४६ ॥ विनायकेश्वरात्पूर्वंमहातेजःसमर्चनात् ॥ तेजोमयेनयानेनयातिमाहेश्वरंपदम् ॥ ४७ ॥ रुद्रकोटिसमाख्यातात्तीर्थात्परमपावनात् ॥ महायोगीश्वरंलिंगमाविश्चक्रेस्वयंपरम् ॥ ४८ ॥ पार्वतीश्वरलिंगस्यसंमीपेसर्वसिद्धिकृत् ॥ तल्लिंगदर्शनात्पुंसांकोटिलिंगफलंभवेत् ॥ ४९ ॥ तत्प्रासादस्यपरितोरुद्राणांकोटिसंमिताः ॥ प्रासादाराम्यसंस्थानानिर्मितारुद्रमूर्तिभिः ॥ ५० ॥ काश्यांरुद्रस्थलीसातुपञ्चतेवेदवादिभिः ॥ रुद्रस्थल्यांमृतायेवैकृमिकीटपतंगकाः ॥ ॥ ५१ ॥ पशुपक्षिमृगांमर्त्यांम्लेच्छावाप्यथदीक्षिताः ॥ तेषांतुरुद्रीभूतानांपुनरावृत्तिरत्रन ॥ ५२ ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ रुद्रस्थलींप्रविष्टस्यतत्सर्वंव्रजतिक्षयम् ॥ ५३ ॥ अकामोवासकामोवातिर्यग्योनिगतोपिवा ॥ रुद्रस्थल्यांत्यजन्प्राणान्परंनिर्वाणमाप्नुयात् ॥ ५४ ॥ स्वयमेकांवरात्क्षेत्रात्कृत्तिवासाइहागतः ॥ कृत्तिवाससिलिंगेत्रस्वयमेवव्यवस्थितः ॥ ५५ ॥ अस्मिन्स्थानेस्वभक्तानांसांनिध्यंसर्पिगणोविभुः ॥ स्वयंचोपदिशेद्ब्रह्मश्रुतौश्रुतिभिरीडितम् ॥ ५६ ॥ क्षेत्रेत्रसिद्धिदेप्राप्तश्चंडीशोमरुजांगलात् ॥ प्रचंडपापसंघातखंडयेच्छतधेक्षणात् ॥ ५७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पाशपाणिगणाध्यक्षसमीपेयःप्रपश्यति ॥ चंडीश्वरंमहालिंगंसयातिपरमांगतिम् ॥ ५८ ॥ कालंजरान्नीलकंठस्तिष्ठेदत्रस्वयंविभुः ॥ गणेशाद्दंतकूटाख्यात्समीपेभवनाशनः ॥ ५९ ॥ नीलकंठेश्वरंलिंगंकाश्यांयैःपरिपूजितम् ॥ नीलकंठास्तएवस्युस्तएवशशिभूषणाः ॥ ६० ॥ काश्मीरादिहसंप्राप्तं लिंगंविजयसंज्ञितम् ॥ सदाविजयदंपुंसांप्राच्यांशालकटंकटात् ॥ ६१ ॥ रणेराजकुलेद्यूतेविवादेसर्वदेवहि ॥ विजयोजायतेपुंसांविजयेशसमर्चनात् ॥ ॥ ६२ ॥ ऊर्ध्वरेताश्चिदंडाद्याः संप्राप्तोत्रस्वयंविभुः ॥ कूश्मांडकंगणाध्यक्षपुरस्कृत्यव्यवस्थितः ॥ ६३ ॥ ऊर्ध्वागतिमवाप्नोतिधीक्षणाद्दृर्ध्वरेतसः ॥ ऊर्ध्वरेतसियेभक्तानहितेषामधोगतिः ॥ ६४ ॥ मुंडलेश्वरतःक्षेत्राल्लिंगंश्रीकंठसंज्ञितम् ॥ विनायकान्मंडसंज्ञादुत्तरस्यांव्यवस्थितम् ॥ ६५ ॥ श्रीकंठस्यचयेभक्ताःश्रीकंठाएवतेनराः ॥ नेहश्रियाविमुंज्यंतेनपत्रकदाचन ॥ ६६ ॥ छागलांडान्महातीर्थात्कपर्दीश्वरसंज्ञितः ॥ पिशाचयोचनेतीर्थेस्व यमाविरभूद्विभुः ॥ ६७ ॥ कपर्दीशंसमभ्यर्च्यननरोनिरयंव्रजेत् ॥ नपिशाचत्वमाप्नोतिकृत्वाप्याप्यवसुत्तमम् ॥ ६८ ॥ आम्रातकेश्वरात्क्षेत्रालिंगंसूक्ष्मेशसंज्ञितम् ॥ स्वयमभ्यागतंचात्रक्षेत्रेत्रैश्रेयसांपदे ॥ ६९ ॥ विकटद्विजसंज्ञस्यगणेशस्यसमीपतः ॥ दृष्ट्वासूक्ष्मेश्वरंलिंगंगतिंसूक्ष्मामवाप्नुयात् ॥७०॥ संप्राप्तमिहदेवेशंजयंतंमधुकेश्वरात् ॥ लंबोदराद्गणपतेःपुरस्तात्तदवस्थितम् ॥ ७१ ॥ जयंतेश्वरमालोक्यस्नात्वागंगाजलेशुभे ॥ प्राप्नुयाद्वांछितांसिद्धिं सर्वत्रविजयीभवेत् ॥ ७२ ॥ प्रादुश्चकारदेवेशःश्रीशैलात्रिपुरांतकः ॥ शैश्रीलशिखरंदृष्ट्वायत्फलंसमुदीरितम् ॥ ७३ ॥ त्रिपुरांतकमालोक्यतत्फलंहेलयाप्यते ॥ विश्वेशात्पश्चिमेभागेत्रिपुरांतकमीश्वरम् ॥ ७४ ॥ संपूज्यपरयाभक्त्याननरोगर्भमाविशेत् ॥ सौम्यस्थानादिहायातोभगवान्कुक्कुटेश्वरः ॥ ॥ ७५ ॥ वक्रतुंडगणाध्यक्षसमीपेसोपतिष्ठते ॥ तद्दर्शनादर्चनाच्चकरस्थाःसर्वसिद्धयः ॥७६॥ जालेश्वराद्विशूलीचस्वयमीशःसमागतः ॥ कूटदंताद्गणपतेःपुरस्तात्सर्वसिद्धिदः ॥ ७७ ॥ रामेश्वरान्महाक्षेत्राच्चटीदेवःसमागतः ॥ एकदंतोत्तरेभागेसोर्चितःसर्वकामदः ॥ ७८ ॥ त्रिसंध्यात्क्षेत्रतोदेयरुयंव कोस्तिसमागतः ॥ त्रिमुखात्पूर्वदिग्भागेपूजितरुयंवकत्वकृत् ॥ ७९ ॥

हरेश्वरोहरिश्चंद्रात्क्षेत्रादत्रसमागतः ॥ हरिश्चंद्रेश्वरपुरःपूजितोजयदः सदा ॥ ८० ॥ इहशर्वः समायातःस्थानान्मध्यमकेश्वरात् ॥ चतुर्वेदेश्वरंलिंगंपुरोधायव्यवस्थितम् ॥ ८१ ॥ शर्वलिंगंसमभ्यर्च्यकाश्यांपरमसिद्धिकृत् ॥ नजातुजंतुपदवींप्राप्नुयात्कापिमानवः ॥ ८२ ॥ स्थलेश्वरान्महालिंगंप्रादुर्भूतंपरंत्विह ॥ यत्रयज्ञेश्वरंलिंगंसर्वलिंगफलप्रदम् ॥ ८३ ॥ महालिंगंसमभ्यर्च्यमहाश्रद्धासमन्वितः ॥ महतींश्रियमाप्नोतिलोकेत्रचपरत्रच ॥ ८४ ॥ इहलिंगंसहस्रांशसुवर्णाख्यात्समागतम् ॥ यस्यसंदर्शनात्पुंसांज्ञानचक्षुःप्रजायते ॥ ८५॥ शैलेश्वरादवाच्यांतुसहस्रांशेश्वरंविभुम् ॥ दृष्ट्वाजन्मसहस्राणां शतानांपातकंत्यजेत् ॥ ८६ ॥ हृपिताद्धर्पितंचात्रप्रादुरासीत्तमोहरम् ॥ लिंगंहर्षप्रदंपुंसांदर्शनात्स्पर्शनादपि ॥ ८७ ॥ मंत्रेश्वरसमीपेतुप्रासादोहर्षितेशितुः ॥ तद्विलोकनतःपुंसांनित्यंहर्षपरंपरा ॥ ८८ ॥ इहस्वयंसमायातोरुद्रोरुद्रमहालयात् ॥ यस्यदर्शनतोयांतिरुद्रलोकेनराःस्फुटम् ॥ ८९ ॥ येस्तुरुद्रेश्वरंलिंगंकाश्यामत्रसमर्चितम् ॥ तेरुद्ररूपिणोमर्त्याविज्ञेयानात्रसंशयः ॥ ९० ॥ त्रिपुरेशसमीपेतुदृष्ट्वारुद्रेश्वरंविभुम् ॥ रुद्रास्तइवविज्ञेयाजीवंतोपिमृताअपि ॥९१॥ आगादिहमहादेवोवृषेशोवृषभध्वजात् ॥ बाणेश्वरस्यलिंगस्यसमीपेवृषदःसदा ॥९२॥ इहागतंतुकेदारादीशानेश्वरसंज्ञितम् ॥ तद्दृष्ट्वंप्रतीच्यांचलिंगंप्रह्लादकेशवात् ॥ ९३ ॥ ईशानेशंसमभ्यर्च्यस्नात्वोत्तरवहांभसि ॥ वसेदीशाननगरेईशानसदृशप्रभः ॥ ९४ ॥ भैरवाद्भैरवीमूर्तिरत्रायातामनोहरा ॥ संहारभैरवोनामद्रष्टव्यःसप्रयत्नतः ॥ ९५ ॥ पूजनात्सर्वसिद्धयैसप्राच्यांखर्वविनायकात् ॥ संहारभैरवःकाश्यांसंहरेद्यवसंततिम् ॥ ९६ ॥ उग्रःकनखलात्तीर्थादाविरासेहसिद्धिदः ॥ तद्विलोकनतोनृणामुग्रंपापंप्रणश्यति ॥ ९७ ॥ उग्रंलिंगंसदासेव्यंप्राच्यामर्कविनायकात् ॥ अस्युग्राअपिनश्येयुरुपसर्गास्तदर्चनात् ॥ ९८ ॥ वस्त्रापथान्महाक्षेत्राद्भवोनामस्वयंविभुः ॥ भीमचंडीसमीपेतुप्रादुरासीदिहप्रभो ॥ ९९ ॥ भवेश्वरं समभ्यर्च्यभवेनाविर्भवेन्नरः ॥ प्रभुर्भवतिसर्वेषांराज्ञामाज्ञाकृतामिह ॥ १०० ॥ देवदारुवनादंडीदंडयन्पातकावलीः ॥ वाराणस्यांसमागत्यस्थितोलिंगाकृतिर्विभुः ॥१॥ प्राच्यांदंडीश्वरःपूज्यःसदेहलिविनायकात् ॥ तस्यार्चनेनमर्त्यानांनपुनर्भवदृश्यते ॥ २ ॥ भद्रकर्णह्रदाद्दत्रभद्रकर्णह्रदान्वितः ॥ शिवःसाक्षादिहायातःसर्वेषांशिवदोर्चितः ॥ ३ ॥

उद्दंडास्प्याद्गणपतेःप्राच्यांतत्तीर्थमुत्तमम् ॥ भद्रकर्णह्रदेस्नात्वाभ्यर्च्यलिंगंशिवाह्वयम् ॥ ४ ॥ सर्वत्रशिवमाप्नोतिभद्रकर्णेशपूजनात् ॥ मृगुपातात्सर्वभूतानांभद्रंपश्यतिचाक्षिभिः ॥ ५ ॥ शंकरश्चहरिश्चंद्रात्त्रपुरःप्रतिभासते ॥ तत्पूजनाज्जननानांजननीजठरेजनिः ॥ ६ ॥ यमलिंगान्महातीर्थात्काललिंगमिहस्थितम् ॥ कलशेशहितिख्यातंचंद्रेशात्पश्चिमेनच ॥ ७ ॥ यमतीर्थेनरःस्नात्वायमित्रावरुणदक्षिणे ॥ काललिंगंसमालोक्यकलिकालभयंकृतः ॥ ८ ॥ तत्रभौमचतुर्दश्यांयस्तुयात्रांकरिष्यति ॥ अपिपातकयुक्तःसयमयात्रांनयास्यति ॥ ९ ॥ नेपालाच्चमहाक्षेत्रादायात्पशुपतिस्त्विह ॥ यत्रपाशुपतोयोगउपदिष्टःपिनाकिना ॥ ११० ॥ भवतादेवदेवेनब्रह्मादिभ्योविमुक्तये ॥ तस्यसंदर्शनादेवपशुपाशैर्विमुच्यते ॥ ११ ॥ करवीरकतीर्थाच्चकपालीशहागतः ॥ कपालमोचनेतीर्थेद्रष्टव्यःसप्रयत्नतः ॥ १२ ॥ तद्विलोकनमात्रेणब्रह्महत्याविलीयते ॥ उमापतिर्दैविकायाइहागत्यव्यवस्थितः ॥ १३ ॥ दृष्टःपशुपतिःप्राच्यांहरेत्पापंचिरार्जितम् ॥ लिंगंमहेश्वरक्षेत्रादिहदीतेशसंज्ञितम् ॥ १४ ॥ उपोमापतितिष्ठतदीत्येवेहपरत्रच ॥ मुक्तिमुक्तिप्रदंलिंगंदीतेशंकाशिमध्यगम् ॥१५॥ कायारोहणतःक्षेत्रादाचार्योनकुलीश्वरः ॥ शिष्यैःपरिवृतस्तिष्ठेन्महापाशुपतव्रतैः ॥ १६ ॥ दक्षिणेहिमहादेवाद्दृष्टो ज्ञानंप्रयच्छति ॥ अज्ञाननंनाशयेत्क्षिप्रंगर्भसंसृतिहेतुकम् ॥ १७ ॥ गंगासागरतश्चायादमरेशइतीरितम् ॥ लिंगंयदर्शनादेवनामरत्वंहिदुर्लभम् ॥१८॥ समगोदावरीतीर्थादेवोभीमेश्वरःप्रभुः ॥ प्रकाशतेलिंगरूपीभुक्तयेमुक्तयेनृणामिह ॥ १९ ॥ नकुलीशात्पुरोभागेदृष्ट्वाभीमेश्वरंप्रभुम् ॥ महाभीमानिपापानिप्रणश्यंतिहितत्क्षणात् ॥ १२० ॥ भूतेश्वराद्भस्मगात्रंप्रादुरासीदिहस्वयम् ॥ भीमेशाद्दक्षिणेभागेतदभ्यर्च्यप्रयत्नतः ॥ २१ ॥ सम्यक्पाशुपताद्योगाद्भ्यस्ताब्दसमाःशतम् ॥ यत्प्राप्यतेफलंतत्स्याद्भस्मगात्रविलोकनात् ॥ २२ ॥ नकुलीश्वरतोदेवःस्वयंभूरितिविश्रुतः ॥ आत्मनाप्रकटीभूतःकाश्यांलिंगाकृतिर्हरेः ॥ २३ ॥ स्वयंभुर्लिंगंसंपूज्यस्नात्वासिद्धिह्रदेनरः ॥ महालक्ष्मीश्वरपुरोनभूयोजन्ममाग्भवेत् ॥ २४ ॥ प्रयागतीर्थनिकपाप्रासादोविद्रुमप्रभः ॥ वाराहस्यमहानेपधरणीनाम्नपवहि ॥ २५ ॥

विंध्यपर्वततःप्राप्तोदेवंश्रुत्वासमागतम् ॥ सगणंसर्षिदेवंचमंदराद्गनकंदरात् ॥ २६ ॥ काश्यांधरणिवाराहोद्रष्टव्यःसप्रयत्नतः ॥ आपत्समुद्रसंमग्नमुद्धरेच्चरणागतम् ॥ २७ ॥ कर्णिकाराद्गणाध्यक्षःकर्णिकारप्रसूनरुक् ॥ समर्च्योयंगदाहस्तउपसर्गसहस्रहृत् ॥२८॥ तस्माद्धरणिवाराहात्प्रतीच्यांदिशिसंस्थितम् ॥ पूजयित्वागणाध्यक्षंगाणपत्यपदंलभेत् ॥ २९ ॥ हेमकूटाद्विरूपाक्षंलिंगमत्राविरासह ॥ महेश्वरादवाच्यांचद्रष्टव्यंसंसारतारकम् ॥ ३० ॥ गंगाह्रदाद्धिमस्थेशंलिंगंहिमसमप्रभम् ॥ ब्रह्मनालात्प्रतीच्यांचद्रष्टव्यमिहसिद्धिदम् ॥ ३१ ॥ गणाधिपश्चकैलासाद्गणाअन्येमहाबलाः ॥ कैलासाद्रेःसमायाताःसप्तकोटिमिताःप्रभो ॥ ३२ ॥ दुर्गाणितैःकृतानीहसप्तस्वर्गसमानिच ॥ सद्वाराणिसयंत्राणिकपाटविकटानिच ॥३३॥ कोटिकोटिभटाढ्या

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निसर्वर्द्धिसहितान्यपि ॥ सुवर्णरूप्यताम्रैश्चकांस्यरीतिकसीसकैः ॥ ३४ ॥ अयस्कांतेनकांतानिदृढान्यभ्रंलिहान्यपि ॥ ततःशैलंमहादुर्गंतैःकाशीपरितःकृतम् ॥ ३५ ॥ परिखापिकृतानित्रामत्स्योदर्याजलाविला ॥ मत्स्योदरीद्विधाजातावहिरंतश्चरापुनः ॥ ३६ ॥ तच्चतीर्थंमहत्ख्यातंयिलिंतंगां गयारिभिः ॥ यदासंहारमार्गेणगंगांभःप्रसरेदिह ॥ ३७ ॥ तदामत्स्योदरीतीर्थंलभ्यतेपुण्यगौरवात् ॥ सूर्याचंद्रमसोःपर्वतदाकोटिगुणंशतम् ॥ ३८ ॥ सर्वपर्वाणितत्रैवसर्ववीर्थानितत्रवै ॥ तत्रैवसर्वलिंगानिगंगामत्स्योदरीयतः ॥ ३९ ॥ मत्स्योदर्याहियेस्नातायत्रकुत्रापिमानवाः ॥ कृतपिंडप्रदानास्ते नमातुरुदरेशयाः ॥ १४० ॥ अविमुक्तमिदंक्षेत्रंमत्स्याकारत्वमाद्रुयात् ॥ परितःस्वर्धुनीवारिसंसारिपरिवीक्ष्यते ॥ ४१ ॥ मत्स्योदर्याकृतस्नानायेनरास्तेनरोत्तमाः ॥ कृत्वापिबहुपापानिनेक्षंतेभास्करःपुरीम् ॥४२॥ किंस्तात्वावहुतीर्थैश्चकिंतत्वादुष्करंतपः ॥ यदिमत्स्योदरीस्नाताकुतोगर्भभयंततः॥ ॥ ४३ ॥ यत्रयत्रहिलिंगानिनृदेवर्षिकृतान्यपि ॥ तत्रमत्स्योदरींप्राप्यमुस्नातोमोक्षभाजनम् ॥४४॥ संतितीर्थान्यनेकानिभूर्भुवःस्वर्गतान्यपि ॥ नसमानिपरंतानिकोटयंशेनापिनिश्चितम् ॥ ४५ ॥ इत्थंतीर्थकृतंतेनविभोकैलासवासिना ॥ गणाधिपेनसुमहत्सुमहोदारकर्मणा ॥ ४६ ॥

भूर्भुवःसंज्ञकंलिंगंपर्वताद्वंधमादनात् ॥ स्वयमाविरभूद्यत्रतत्स्मात्माच्यांगणाधिपात् ॥ ४७ ॥ विलोक्यभूर्भुवंलिंगंभूर्भुवःस्वर्महःपरे ॥ निवसंतिजनाः पुण्याःसुचिरंदिव्यभोगिनः ॥ ४८ ॥ हाटकेशंमहालिंगंभोगवत्यासमायुतम् ॥ सप्तपातालतलतद्दहायातंस्वयंविभो ॥ ४९ ॥ शेषवासुकिमुख्यैश्चतत्मा सादोमहानिह ॥ मणिमाणिक्यरत्नौघैर्निरमायिप्रयत्नतः ॥ १५० ॥ तल्लिंगंहाटकमयंरत्नमालाभिरंचितम् ॥ ईशानेश्वरतःप्राच्यांपूजनीयंप्रयत्नतः ॥ ॥ ५१ ॥ भक्तितोऽभ्यर्च्यतल्लिंगंनरःसर्वसमृद्धिमान् ॥ भुक्त्वाभोगानसंख्यातानंतेनिर्वाणमृच्छति ॥५२॥ आकाशात्तारकाख्यंगंज्योतीरूपमिहागतम् ॥ ज्ञानवाप्याःपुरोभागेतल्लिंगंतारकेश्वरम् ॥ ५३ ॥ तारकंज्ञानमाप्येततल्लिंगस्यसमर्चनात् ॥ ज्ञानवाप्यांनरःस्नात्वातारकेशंविलोक्यच ॥ ५४ ॥ कृतसंध्यादिनियमःपरितर्प्यपितामहान् ॥ धृतमौनव्रतोधीमान्यावल्लिंगविलोकनम् ॥ ५५ ॥ मुच्यतेसर्वपापेभ्यःपुण्यंप्राप्नोतिशाश्वतम् ॥ प्रतिचतारकंज्ञानं यस्माज्ज्ञानाद्विमुच्यते ॥ ५६ ॥ किरातश्चकिरातेशद्दहचाविर्वभूवह ॥ किरातरूपोभगवान्यत्रदेवोऽभवत्पुरा ॥ ५७ ॥ तत्किरातेश्वरंलिंगंभारभूते श्वरादनु ॥ नमस्कृत्यनरोजातुनमातुरुदरेशयः ॥ ५८ ॥ लंकापुर्याःसमागच्छन्मरुत्केश्वरसंज्ञकम् ॥ लिंगंयदर्चनात्पुंसांनभयंरक्षसांभवेत् ॥ ५९ ॥ नैर्ऋत्यांदिशितल्लिंगंनैर्ऋतेश्वरसंज्ञकम् ॥ पौलस्त्यराघवात्पश्चात्पूजितंसर्वदुष्टहृत् ॥ १६० ॥ पुण्यंजलप्रियंलिंगंजलेलिंगंस्थलादपि ॥ आयातं तच्चगङ्गायाजलमध्येव्यवस्थितम् ॥ ६१ ॥ तत्प्रासादोऽद्भुततरोमध्येगंगंनिरीक्ष्यते ॥ सर्वधातुमयःश्रेष्ठःसर्वरत्नमयःशुभः ॥ ६२ ॥ अद्यापिदृश्यते कैश्चिरपुण्यसंभारगौरवात् ॥ श्रेष्ठंलिंगमिहायातंतीर्थात्कोटीश्वरादपि ॥ ६३ ॥ कोटिलिंगेक्षणेपुण्यंतल्लिंगस्यनिरीक्षणात् ॥ श्रेष्ठंज्येष्ठेश्वरात्पश्चाच्छ्रेष्ठ सिद्धिप्रदायकम् ॥ ६४ ॥ वडवास्यात्समुद्भूतंलिंगमज्ञानलेश्वरम् ॥ नलेश्वरपुरोभागेपूजितंसर्वसिद्धिदम् ॥ ६५ ॥ आगत्यविरजस्तीर्थादेवदेवोविलो चनः ॥ लिंगेत्वनादिसंसिद्धेह्यवतस्थेत्रिविष्टपे ॥ ६६ ॥ पुण्येपिलिपिलातीर्थेसर्वेषांतारकप्रदे ॥ आविश्चक्रेस्वयंदेवओंकारोमरकंटकात् ॥ ६७ ॥

तदाद्यंतारकक्षेत्रंयदागंगानचागता ॥ यदैवाविरभूत्काशीत्रैलोक्योद्धरणायवै ॥ ६८ ॥ तदाकृतिमहल्लिंगंस्वयमाविरभूत्ततः ॥ महिमानंनतस्यान्यःपरिवे त्तिविभोर्ऋते ॥ ६९ ॥ एतान्यायतनानीशआनिनायमहांतिच ॥ शेषयित्वांशमात्रंचतस्मिन्क्षेत्रेनिजेनिजे ॥ १७० ॥ इहायातानिपुण्यानिसर्वभावे ननान्यथा ॥ प्रासादाःसर्वतश्चैषांरम्याअभ्रंलिहाविभो ॥७१॥ बहुधातुमयाश्चित्राःसर्वरत्नसमुज्ज्वलाः ॥ येषांकलशमात्रस्यदर्शनान्मुक्तिराप्यते॥७२॥ श्रुत्वापिनामचैतेषांलिंगानांसुरसत्तम ॥ अपिजन्मसहस्रोत्थाःक्षीयंतेपापराशयः ॥ ७३ ॥ इदानींकोनिदेशोत्रमयानुष्ठेयईशितः ॥ प्रसादीक्रियतांसो पिसिद्धोमंतव्यएवहि ॥ ७४ ॥ स्कंदउवाच ॥ ॥ श्रुत्वेतिनंदिनोवाक्यंदेवदेवेश्वरोहरः ॥ श्रद्धाप्रसाद्यशैलादिमिदंप्रोवाचकुंभज ॥ ७५ ॥ ॥ श्रीदेवदेवउवाच ॥ ॥ साधूक्तंत्वयानंदिन्सदानंदविधायक ॥ विधेहिमेनिदेशंचचंडीर्व्यापारयाधुना ॥७६॥ नवकोऽस्तुचामुंडायायत्रनिवसंतिहि ॥ स्वदेवताभिःसहितोभूतवेतालभैरवैः ॥ ७७ ॥ तांपुरीरक्षणार्थायसवाहनवलायुधाः ॥ प्रतिदुर्गंदुर्गरूपांपरितःपरिवासय ॥ ७८ ॥ ॥ स्कंदउवाच ॥ नंदिनंसंनिदेश्येतिमृडान्यासहितोमृडः ॥ ययौत्रैविष्टपंक्षेत्रंमुक्तिबीजप्ररोहणम् ॥ ७९ ॥ शिलादतनयोप्येशींमूर्द्धन्याज्ञांविधायच ॥ आहूयसर्वतो दुर्गाःप्रतिदुर्गन्यवेशयत् ॥ १८० ॥ निशम्याध्यायमेतंचपुण्यायतनगर्भिणम् ॥ नरःस्वर्गापवर्गौचप्राप्नुयाच्छ्रद्धयाक्रमात् ॥ ८१ ॥ श्रुत्वाष्टपष्टिमेतां वैमहायतनसंश्रयाम् ॥ नजातुप्रविशेन्मर्त्योजनन्याजाठरींदरीम् ॥ १८२ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडे उत्तरार्धेऽष्टषष्टायतनसमागमोनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ अगस्त्यउवाच ॥ कात्यायनेयकथयनंदिनाविश्वनंदिना ॥ यथाव्यापारितादेव्योदेवदेवनिदेशतः ॥ १ ॥ अविमुक्तस्यरक्षार्थंयत्रयादेवताःस्थिताः ॥ प्रसादंकुरुमेदेवताःसमाचक्ष्वतत्त्वतः ॥ २ ॥ इत्यगस्त्युदितंश्रुत्वामहा देवतनूद्भवः ॥ कथयामाससायत्रस्थिताऽऽनंदवनेमुदा ॥ ३ ॥

स्कंदउवाच ॥ ॥ वाराणस्यांविशालाक्षीक्षेत्रस्यपरमेष्टदा ॥ विशालतीर्थंगंगायांकृत्वापृष्ठेव्यवस्थिता ॥ ४ ॥ स्नात्वाविशालतीर्थेवैविशालाक्षी प्रणम्यच ॥ विशालांलभतेलक्ष्मींपरत्रेहचशर्मदाम् ॥ ५ ॥ भाद्रकृष्णतृतीयायामुपोषणपरैर्नृभिः ॥ कृत्वाजागरणंरात्रौविशालाक्षीसमीपतः ॥ ६ ॥ प्रातर्भोज्याःप्रयत्नेनचतुर्दशकुमारिकाः ॥ अलंकृतायथाशक्त्यावस्त्रगंधरविभूषणैः ॥७॥ विधायपारणंपश्चात्पुत्रभृत्यसमन्वितैः॥सम्यग्वाराणसीवासफलं लभ्येतकुंभज ॥ ८ ॥ तस्यांतिथौमहायात्राकार्याक्षेत्रनिवासिभिः ॥ उपसर्गप्रशांत्यर्थंनिर्वाणकमलाप्तये ॥ ९ ॥ वाराणस्यांविशालाक्षीपूजनीयाप्रय त्नतः ॥ धूपैर्दीपैःशुभैर्माल्यैरुपहारैर्मनोहरैः ॥१०॥ मणिमुक्ताद्यलंकारैर्विचित्रोल्लोचचामरैः ॥ शुभैरनुपभुक्तैश्चवस्त्रकूलैर्गंधवासितैः ॥ ११॥ मोक्षलक्ष्मी समृद्धचर्थंयत्रकुत्रनिवासिभिः ॥ अभ्यल्पमपियद्दत्तंविशालाक्ष्यैनरोत्तमैः ॥ १२ ॥ तदानंत्यायजायेतमुनेलोकद्वयेपिहि ॥ विशालाक्षीमहापीठेदत्तं जप्तंहुतंस्तुतम् ॥ १३ ॥ मोक्षस्तस्यपरीपाकोनात्रकार्याविचारणा ॥ विशालाक्षीसमर्चांतोरूपसंपत्तियुक्पतिः ॥ १४ ॥ प्राप्यतेत्रकुमारीभिर्गुणशी लाद्यलंकृतः ॥ सुविणीभिःसुतनयोवंध्याभिर्गर्भसंभवः ॥ १५ ॥ असौभाग्यवतीभिश्चसौभाग्यमहदाप्यते ॥ विधवाभिर्नवैधव्यंपुनर्जन्मांतरेकचित् ॥ ॥ १६ ॥ सीमंतिनीभिःपुंभिर्वापरंनिर्वाणमिच्छुभिः ॥ श्रुताद्दष्टार्चिताकाश्यांविशालाक्ष्यभिलाषदा ॥१७॥ ततोन्यल्ललितातीर्थंगंगाकेशवसन्निधौ ॥ तत्रास्तिललितादेवीक्षेत्ररक्षाकरीपरा ॥ १८ ॥ साचपूज्याप्रयत्नेनसर्वसंपत्समृद्धये ॥ ललितापूजकानांचजातुविघ्नोनजायते ॥ १९ ॥ इपेकृष्णद्वितीयायांललितांपरिपूज्यवै ॥ नारीवापुरुषोवापिलभतेवांछितंपदम् ॥ २० ॥ स्नात्वाचललितातीर्थेललितांप्रणिपत्यवै ॥ लभेत्सर्वत्रलालित्यंयद्यतद्वा ऽनुलप्यच ॥ २१ ॥ मुनेविश्वभुजागोरीविशालाक्षीपुरःस्थिता ॥ संहरंतीमहाविघ्नक्षेत्रभक्तिजुषांसदा ॥ २२ ॥ शारदंनवरात्रंचकार्यायात्राप्रयत्नतः ॥ देव्याविश्वभुजायावैसर्वकामसमृद्धये ॥ २३ ॥ योनविश्वभुजांदेवींवाराणस्यांनमेन्नरः ॥ कुतोमहोपसर्गेभ्यस्तस्यशांतिर्दुरात्मनः ॥ २४ ॥ येस्तुविश्वभु जादेवीवाराणस्यांस्तुतार्चिता ॥ नहितान्विघ्नसंघातोबाधतेसुकृतात्मनः ॥ २५ ॥ अन्यास्तिकाश्यांवाराहीकृतुवाराहसन्निधौ ॥ तांप्रणम्यनरो भक्त्याविपदब्धौनमज्जति ॥ २६ ॥

परीपाकःफलम् ॥ १४ ॥ अत्रकाश्याम् ॥ जगतीतिवा ॥ शैलमाचारः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ इपेमासिने ॥ २० ॥ ललित्यंसौभाग्यम् ॥ यद्यतद्वाऽनुलप्यपर्वोक्तंवि स्तृतंवेत्यर्थः ॥ यत्रतत्रस्थितोपिचेतिकश्चित् ॥ २१ ॥ २२ ॥ शारदंशरत्तत्सम्बन्धि ॥ सादरमितिकश्चित् ॥ नवरात्रैशुक्लप्रतिपदारभ्यनवमीपर्यंतमित्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शिवदूतीतुतत्रैवद्रष्टव्याऽऽपद्विनाशिनी ॥ आनंदवनरक्षार्थमुद्यच्छूलारितर्जनी ॥ २७ ॥ वज्रहस्तातथाचैंद्रीगजराजरथास्थिता ॥ इंद्रेशाद्दक्षिणेभागेऽ
र्चितासंपत्करीसदा ॥ २८ ॥ स्कंदेश्वरसमीपेतुकौमारीबर्हियानगा ॥ प्रेक्षणीयाप्रयत्नेनमहाफलसमृद्धये ॥ २९ ॥ महेश्वराद्दक्षिणतोदेवीमाहेश्वरी
नरैः ॥ वृषयानवतीपूज्यामहावृषसमृद्धिदा ॥ ३० ॥ निर्वाणनरसिंहस्यसमीपेमोक्षकांक्षिभिः ॥ नारसिंहीसमर्च्याचसमुद्यच्चक्रकरम्यदोः ॥ ३१ ॥
हंसयानवतीब्राह्मीब्रह्मेशात्पश्चिमेस्थिता ॥ गलत्कमंडलुजलचुलकाताडिताहिता ॥ ३२ ॥ ब्रह्मविद्याप्रबोधार्थंकाश्यांपूज्यादिनेदिने ॥ ब्राह्मणैर्यतिभि
र्नित्यंनिजतत्त्वावबोधिभिः ॥ ३३ ॥ शार्ङ्गचापविनिर्मुक्तमहेषुभिरितस्ततः ॥ उत्सादयंतींप्रत्यूहान्काश्यांनारायणींश्रयेत् ॥ ३४ ॥ प्रतीच्यांगोपिगो
विंदाद्भ्राम्यच्चक्रोच्चतर्जनीम् ॥ नारायणींयःप्रणमेत्तस्यकाश्यांमहोदयः ॥३५॥ ततोगौरींविरूपाक्षींदेवयान्याउदग्दिशि ॥ पूजयित्वानरोभक्त्यावांछितां
लभतेश्रियम् ॥ ३६ ॥ शैलेश्वरीसमभ्यर्च्याशैलेश्वरसमीपगा ॥ तर्जयंतीचतर्जन्यासंसर्गमुपसर्गजम् ॥ ३७ ॥ चित्रकूपेनरःस्नात्वाविचित्रफलदे
नृणाम् ॥ चित्रगुप्तेश्वरंवीक्ष्यचित्रघंटांप्रपूज्यच ॥ ३८ ॥ बहुपातकयुक्तोपित्यक्तधर्मपथोपिवा ॥ नचित्रगुप्तलेख्यःस्याच्चित्रघंटार्चकोनरः ॥ ३९ ॥
योपिद्वापुरुषोवापिचित्रघंटांनयोर्चयेत् ॥ काश्यांविघ्नसहस्राणितंसेवंतेपदेपदे ॥४०॥ चैत्रशुक्लतृतीयायांकार्यायात्राप्रयत्नतः ॥ महामहोत्सवःकार्योनि
शिजागरणंतथा ॥ ४१ ॥ महापूजोपकरणैश्चित्रघंटांसमर्च्यच ॥ शृणोतिनांतकस्येहघंटांमहिषकंठगाम् ॥ ४२ ॥ चित्रांगदेश्वरप्राच्यांचित्रग्रीवां
प्रणम्यच ॥ नजातुजंतुर्वीक्षेतविचित्रांयमयातनाम् ॥ ४३ ॥ भद्रकालींनरोदृष्ट्वानाभद्रंपश्यतिक्वचित् ॥ भद्रनागस्यपुरतोभद्रवाप्यांकृतोदकः ॥ ४४ ॥
हरसिद्धिंप्रयत्नेनपूजयित्वानरोत्तमः ॥ महासिद्धिमवाप्नोतिप्राच्यांसिद्धिविनायकात् ॥ ४५ ॥ विधिंसंपूज्यविधिवद्विविधैरुपहारकैः ॥ विविधांलभते
सिद्धिंविधीश्वरसमीपगाम् ॥ ४६ ॥ प्रयागतीर्थेसुस्नातोजनोनिगडभंजनीम् ॥ सभाजयित्वानोजातुनिगडैःपरिबाध्यते ॥ ४७ ॥ भौमवारेसदापूज्या
देवीनिगडभंजनी ॥ कृत्वैकभुक्तंभक्त्यात्रवंदीमोक्षणकाम्यया ॥ ४८ ॥

संसारबंधविच्छित्तिमपियच्छतिसार्चिता ॥ गणनाशृंखलादीनांकाचतस्याःसमर्चनात् ॥४९॥ दूरस्थोपिहियोबंधुःसोपिक्षिप्रंसमेष्यति ॥ बंदीपदजुषां
पुंसांश्रद्धयानात्रसंशयः ॥ ५० ॥ किंचिन्नियममालंब्ययदिसापरिषेविता ॥ कामान्पूरयतिक्षिप्रंकाशीसंदेहहारिणी ॥ ५१ ॥ घनटंककरादेवीभक्तबं
धनभेदिनी ॥ कंकंनपूरयेत्कामंतीर्थराजसमीपगा ॥ ५२ ॥ देवीपशुपतेःपश्चादमृतेश्वरसन्निधौ ॥ स्नात्वाचैवामृतेकूपेनमनीयाप्रयत्नतः ॥ ५३ ॥ पूज
यित्वानरोभक्त्यादेवताममृतेश्वरीम् ॥ अमृतत्वंभजेदेवतत्पादांबुजसेवनात् ॥ ५४ ॥ धारयंतींमहामायाममृतस्यकमंडलुम् ॥ दक्षिणेऽभयदांवामे
ध्यात्वाकोनाऽमृतत्वभाक् ॥५५॥ सिद्धलक्ष्मीजगद्धात्रीप्रतीच्याममृतेश्वरात् ॥ प्रपितामहलिंगस्यपुरतःसिद्धिदार्चिता ॥५६॥ प्रासादंसिद्धलक्ष्म्याश्च
विलोक्यकमलाकृतिम् ॥ लक्ष्मीविलाससंज्ञंचकोनलक्ष्मींसमाप्नुयात् ॥५७॥ ततःकुब्जाजगन्मातानलकूबरलिंगतः ॥ पूजनीयापुरोभागेप्रपितामहप
श्चिमे ॥ ५८ ॥ उपसर्गानशेषांश्चकुब्जाहरतिपूजिता ॥ तस्मात्कुब्जाप्रयत्नेनपूज्याकाश्यांशुभार्थिभिः ॥ ५९ ॥ कुब्जांबरेश्वरंलिंगंनलकूबरपश्चिमे ॥
त्रिलोकसुंदरीगौरीतत्रार्च्याभीष्टदायिनी ॥ ६० ॥ त्रिलोकसुंदरीसिद्धिंदद्यात्त्रैलोक्यसुंदरीम् ॥ वैधव्यंनाप्यतेक्वापितस्यादेव्याःसमर्चनात् ॥ ६१ ॥
दीप्तानाममहाशक्तिःसांबादित्यसमीपगा ॥ देदीप्यमानलक्ष्मीकाजायंतेतत्समर्चनात् ॥ ६२ ॥ श्रीकंठसन्निधौदेवीमहालक्ष्मीर्जगज्जनिः ॥ स्नात्वाश्री
कुंडतीर्थेतुसमर्च्याजगदंबिका ॥ ६३ ॥ पितॄन्संतर्प्यविधिवत्तीर्थेश्रीकुंडसंज्ञिते ॥ दत्त्वादानानिविधिवन्नलक्ष्म्यापरिमुच्यते ॥ ६४ ॥ लक्ष्मीक्षे
त्रंमहापीठंसाधकस्यैवसिद्धिदम् ॥ साधकस्तत्रमंत्रांश्चनरःसिद्धिमवाप्नुयात् ॥ ६५ ॥ संतिपीठान्यनेकानिकाश्यांसिद्धिकराण्यपि ॥ महालक्ष्मीपी
ठसमंनान्यल्लक्ष्मीकरंपरम् ॥ ६६ ॥ महालक्ष्म्यष्टमींप्राप्यतत्रयात्राकृतांनृणाम् ॥ संपूजितेहविधिवत्पद्मासद्मनमुंचति ॥ ६७ ॥ उत्तरेतुमहालक्ष्म्या
हयकंठीकुठारधृक् ॥ काशीविघ्नमहावृक्षांश्छिनत्तिप्रतिवासरम् ॥ ६८ ॥ कौर्मीशक्तिर्महालक्ष्मीदक्षिणेपाशपाणिका ॥ बध्नातिविघ्नसंघातंक्षे
त्रस्यास्यप्रतिक्षणम् ॥ ६९ ॥

सापूजितास्तुतामर्त्यैःक्षेत्रसिद्धिंप्रयच्छति ॥ वायव्यांचशिखीचंडीक्षेत्ररक्षाकरीपरा ॥ ७० ॥ खादंतीविघ्नसंघातंशिखीशब्दंकरोतिच ॥ तस्याःसंदर्श
नात्पुंसांनश्यंतिव्याधयोखिलाः ॥ ७१ ॥ भीमचंड्युत्तरद्वारंसदारक्षेदतंद्रिता ॥ भीमेश्वरस्यपुरतःपाशमुद्गरधारिणीम् ॥ ७२ ॥ भीमचंडींनरोदृष्ट्वाभी
मकुंडेकृतोदकः ॥ भीमाकृतीन्नवैपश्येद्याम्यान्दूतान्क्वचित्कृती ॥७३॥ छागवक्त्रेश्वरीदेवीदक्षिणेवृषभध्वजात् ॥ अहर्निशंभक्षयतिविघ्नौघतरुपल्लवान् ॥
॥ ७४ ॥ तस्यादेव्याःप्रसादेनकाशीवासःप्रलभ्यते ॥ अतश्छागेश्वरींदेवींमहाष्टम्यांप्रपूजयेत् ॥७५॥ तालजंघेश्वरीदेवीतालवृक्षकृतायुधा ॥ उत्सादय
तिविघ्नौघानानंदवनमध्यगान् ॥ ७६ ॥ संगमेश्वरलिंगस्यदक्षिणेविकटाननाम् ॥ तालजंघेश्वरींनत्वानविघ्नैरभिभूयते ॥७७॥ उद्दालकेश्वराल्लिंगात्तीर्थ
उद्दालकाभिधे ॥ याम्यांचयमदंष्ट्राख्याचर्वयेद्विघ्नसंहतिम् ॥ ७८ ॥ प्रणतायमदंष्ट्रायैस्तीर्थेचोद्दालकाभिधे ॥ कृत्वापिपापसंघातंनयमाद्बिभ्यतीहते ॥
॥ ७९ ॥ दारुकेश्वरतीर्थेतुदारुकेशसमीपतः ॥ पातालतालुवदनामाकाशोष्ठींधराधराम् ॥ ८० ॥ कपालकर्त्रींहस्तांचब्रह्मांडकवलप्रियाम् ॥ शुष्कोदरीं
स्नायुबद्धांचर्ममुंडेतिविश्रुताम् ॥ ८१ ॥ क्षेत्रस्यपूर्वदिग्भागंरक्षंतींविघ्नसंघतः ॥ लसत्सहस्रदोर्दंडांज्वलत्केकरवीक्षणाम् ॥ ८२ ॥ पारावारप्रसृमहस्त
न्यस्तारिमोदकाम् ॥ द्वीपिकृत्तिपरीधानांकटुकाट्टाट्टहासिनीम् ॥ ८३ ॥ मृणालनालवत्तीव्रंचर्वंतीमस्थिपापिनः ॥ शूलाग्रप्रोतदुर्वृत्तक्षेत्रद्रोहिकले
वराम् ॥ ८४ ॥ कपालमालाभरणांमहाभीषणरूपिणीम् ॥ चर्ममुंडांनरोनत्वाक्षेत्रविघ्नैर्नबाध्यते ॥ ८५ ॥ यथैवचर्ममुंडैषामहारुंडापितादृशी ॥ एतावा
नेवभेदोस्यारुंडस्रग्भूषणात्वियम् ॥ ८६ ॥ क्षेत्ररक्षांप्रकुरुतउभेदेव्यौमहाबले ॥ हसंत्यौकरतालीभिरन्योन्यंदोःप्रसारणात् ॥८७॥ हयग्रीवेश्वरेतीर्थेलो
लार्कादुत्तरेसदा ॥ महारुंडाप्रचंडास्यातिष्ठतेभक्तविघ्नहृत् ॥८८॥ चर्ममुंडामहारुंडाकथितेयेतुदेवते ॥ तयोरंतरतस्तिष्ठेच्चामुंडामुंडरूपिणी ॥ ८९ ॥
एतास्तिस्रःप्रयत्नेनपूज्याःक्षेत्रनिवासिभिः ॥ धनधान्यप्रदाश्चैताःपुत्रपौत्रप्रदाइमाः ॥ ९० ॥ उपसर्गानमूर्ध्नंतिदद्युर्नैःश्रेयसींश्रियम् ॥ स्मृतादृष्टानताः
स्पृष्टाःपूजिताःश्रद्धयानरैः ॥ ९१ ॥ महारुंडाप्रतीच्यांचदेवीस्वप्नेश्वरीशुभा ॥ भविष्यंकथयेत्स्वप्नेभक्तस्याग्रेशुभाशुभम् ॥ ९२ ॥ तत्रस्वप्नेश्वरंलिंगं
देवींस्वप्नेश्वरींतथा ॥ स्नात्वासिसंगमेपुण्येयस्मिन्कस्मिंस्तिथावपि ॥ ९३ ॥ उपोषणपरोधीमान्नारीवापुरुषोपिवा ॥ संपूज्यस्थंडिलशयःस्वप्नेभावि
विलोकयेत् ॥९४॥ अद्यापिप्रत्ययस्तत्रकार्यएषविजानता ॥ भूतंभाविभवत्सर्वंवदेत्स्वप्नेश्वरीनिशि ॥९५॥ अष्टम्यांचचतुर्दश्यांनवम्यांनिशिवादिवा ॥
प्रयत्नतःसमर्च्यासाकाश्यांज्ञानार्थिभिर्नरैः ॥ ९६ ॥ स्वप्नेश्वर्याश्चवारुण्यांदुर्गादेवीव्यवस्थिता ॥ क्षेत्रस्यदक्षिणंभागंसासदैवाभिरक्षति ॥ ९७ ॥
इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदेवताधिष्ठानंनामसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ अगस्त्यउवाच ॥ ॥
कथंदुर्गेतिवैनामदेव्याजातमुमासुत ॥ कथंचकाश्यांसासेव्यासमाचक्ष्वेतिमामिह ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ कथयामिमहाबुद्धेयथाकलशसंभव ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दुर्गानामाभवद्देव्यायथासेव्याचसाधकैः ॥ २ ॥ दुर्गोनाममहादैत्योरुरुदैत्यांगजोभवत् ॥ यश्चतप्त्वातपस्तीव्रंपुंभ्योजेयत्वमाप्तवान् ॥ ३ ॥ ततस्तेना खिलालोकाभूर्भुवःस्वर्मुखाअपि ॥ स्वसात्कृताविनिर्जित्यरणेस्वभुजसारतः ॥ ४ ॥ स्वयमिंद्रःस्वयंवायुःस्वयंचंद्रःस्वयंयमः ॥ स्वयमग्निःस्वयंपाशी धनदोभूत्स्वयंबली ॥ ५ ॥ स्वयमीशानरुद्रार्कवसूनांपदमाददे ॥ तत्साध्वसाद्विमुक्तानितपांस्यतितपस्विभिः ॥ ६ ॥ नवेदाध्ययनंचक्रुर्ब्राह्मणास्तद्भया र्दिताः ॥ यज्ञवाटाविनिर्ध्वस्तास्तद्भटैरतिदुःसहैः ॥ ७ ॥ विध्वस्ताबहुशःसाध्व्यस्तैरमार्गकृतास्पदैः ॥ प्रसभंचपरस्वानिअपहृत्यदुरासदाः ॥ ८ ॥ अभोक्षिषुर्दुराचाराःक्रूरकर्मपरिग्रहाः ॥ नद्योविमार्गगाआसञ्ज्वलंतिनतथाग्नयः॥९॥ ज्योतींषिनप्रदीप्यंतितद्भयाकुलितान्यहो ॥ दिग्वधूवसनान्यास न्विच्छायानिसमंततः ॥ १० ॥ धर्मक्रियाविलुप्ताश्चप्रवृत्ताःसुकृतेतराः ॥ तएवजलदीभूयववृषुर्निजलीलया ॥ ११ ॥

सस्यानितद्भयात्सूतेत्वनुप्तापिवसुंधरा ॥ सदैवफलिनोजातास्तरवोप्यवकेशिनः ॥१२॥ बंदीकृताःसुरर्षीणांपत्न्यस्तेनातिदर्पिणा ॥ दिवौकसःकृतास्ते नसमस्ताःकाननौकसः ॥ १३ ॥ मर्त्याअमर्त्यान्स्वगृहंप्राप्तानपिभयार्दिताः ॥ अपिसंभाषमात्रेणनार्चयंतिविपज्जुषः ॥ १४ ॥ ॥ स्कंदउवाच ॥ नकौलीन्यंनसद्वृत्तंमहत्त्वायप्रकल्पते ॥ एकमेवपदंश्रेयःपदभ्रंशोहिलाघवम् ॥ १५ ॥ विपद्यपिहितेधन्यानयेदैन्यप्रणोदिताः ॥ धनैर्मलिनचित्ताना मालभंतेंगणंक्वचित् ॥ १६ ॥ पंचत्वमेवहिवरंलोकेलाघववर्जितम् ॥ नामरत्वमपिश्रेयोलाघवेनसमन्वितम् ॥ १७ ॥ तएवलोकेजीवंतिपुण्यभाजस्त एववै ॥ विपद्यपिनगांभीर्यंयच्चेतोब्धिःपरित्यजेत् ॥ १८ ॥ कदाचित्संपदुदयःकदाचिद्विपदुद्गमः ॥ दैवाद्वयमपिप्राप्यधीरोधैर्यंनहापयेत् ॥ १९ ॥ उदयानुदयौप्राज्ञैर्द्रष्टव्यौपुष्पवंतयोः ॥ सदैकरूपताऽत्याज्याहर्षाहर्षौततोऽध्रुवौ ॥ २० ॥ यस्त्वापदंसमासाद्यदैन्यग्रस्तोविपद्यते ॥ तस्यलोकद्वयंनष्टं तस्माद्दैन्यंविवर्जयेत् ॥ २१ ॥ आपद्यपिहियेधीराइहलोकेपरत्रच ॥ नतान्पुनःस्पृशेदापत्तद्धैर्येणावधीरिता ॥ २२ ॥ भ्रष्टराज्याश्चविबुधामहेशंशरणं गताः ॥ सर्वज्ञेनततोदेवीप्रेरिताऽसुरमर्दने ॥२३॥ माहेश्वरींसमासाद्यभवान्याज्ञांप्रहृष्टवत् ॥ अमर्त्यायाऽभयंदत्त्वासमरायोपचक्रमे ॥२४॥ कालरात्रीं समाहूयकांत्यात्रैलोक्यसुंदरीम् ॥ प्रेषयामासरुद्राणीतमाह्वातुंसुरद्रुहम् ॥ २५ ॥ कालरात्रीसमासाद्यतंदैत्यंदुष्टचेष्टितम् ॥ उवाचदैत्याधिपतेत्यजत्रैलो क्यसंपदम् ॥ २६ ॥ त्रिलोकींलभतामिंद्रस्त्वंतुयाहिरसातलम् ॥ प्रवर्ततांक्रियाःसर्वावेदोक्तावेदवादिनाम् ॥ २७ ॥ अथचेद्गर्वलेशोऽस्तितदायाहि समाजये ॥ अथवाजीविताकांक्षीतदिंद्रंशरणंव्रज ॥ २८ ॥

इतिवक्तुंमहादेव्यामहामंगलरूपया ॥ त्वदंतिकेप्रेषिताहंमृत्युस्तेतदुपेक्षया ॥२९॥ अतोयदुचितंकर्तुंतद्विधेहिमहासुर ॥ परंहितंचेच्छृणुयाज्जीवग्राहंततो व्रज ॥ ३० ॥ इत्याकर्ण्यवचोदेव्यामहाकाल्याःसदैत्यराट् ॥ प्रजज्वालतदाक्रोधाद्गृह्यतांगृह्यतामियम् ॥ ३१ ॥ त्रैलोक्यमोहिनीह्येषाप्राप्तामद्भाग्यगौ रवैः ॥ त्रैलोक्यराज्यसंपत्तिवल्ल्याःफलमिदंमहत् ॥ ३२ ॥ एतदर्थंहिदेवर्षिनृपाबंदीकृतामया ॥ अनायासेनमेप्राप्तागृहमेषाशुभोदयात् ॥ ३३ ॥ अवश्यंयस्ययोग्यंयत्तत्तस्येहोपतिष्ठते ॥ अरण्येवागृहेवापियतोभाग्यस्यगौरवात् ॥ ३४ ॥ अंतःपुरचराएतांनयंत्वंतःपुरंमहत् ॥ अनयासदलं कृत्याममराष्ट्रमलंकृतम् ॥ ३५ ॥ अहोमहोदयश्चाद्यजातोमममहामतेः ॥ केवलंनममैकस्यसर्वदैत्यान्वयस्यच ॥ ३६ ॥ नृत्यंतुपितरश्चाद्यमोदंतांबां धवाःसुखम् ॥ मृत्युःकालोंऽतकोदेवाःप्राप्नुवंत्वद्यमेभयम् ॥ ३७ ॥ इतियावत्समायातास्तांनेतुंसौविदल्लकाः ॥ तावत्तयाकालरात्र्याप्रत्युक्तोदैत्यपुंगवः॥ ॥ ३८ ॥ ॥ कालरात्र्युवाच ॥ ॥ दैत्यराजमहाप्राज्ञनैतद्युक्तंभवादृशाम् ॥ वयंदूत्यःपरवशाराजनीतिविदुत्तम ॥ ३९ ॥ अल्पोपिदूतसंबाधांनवि दध्यात्कदाचन ॥ किंपुनर्येभवादृक्षामहांतोबलिनोऽधिपाः ॥ ४० ॥ दूतीषुकोनुरागोयंमहाराजाल्पिकास्विह ॥ अनायासेनचवयमायास्यामस्तदाग मात् ॥ ४१ ॥ विजित्यसमरेतांतुस्वामिनींममदैत्यप ॥ मादृशीनांसहस्राणिपरिभुंक्ष्वयथेच्छया ॥४२॥ अद्यैवतेमहासौख्यंभावितस्याविलोकनात्॥ बांधवानांसुखंतेद्यभवितासहपूर्वजैः ॥ ४३ ॥ संपत्स्यंतेऽद्यतेकामाःसर्वेयेचिरचिंतिताः ॥ अबलासाचमुग्धाचतस्यास्त्रातानकश्चन ॥ ४४ ॥ सर्व रूपमयीचैवतांभवान्द्रष्टुमर्हति ॥ अहंहिदर्शयिष्यामियत्रसाऽस्तिजगत्खनिः ॥ ४५ ॥ धृतायामपिचैकस्यांकस्तेकामोभविष्यति ॥ अहंतेसन्निधिंनै वत्यक्ष्याम्यद्यदिनावधि ॥ ४६ ॥ ततोनिवारयैतान्मामादित्सून्सौविदल्लकान् ॥ इतिश्रुत्वावचस्तस्याःसकामक्रोधमोहितः ॥ ४७ ॥

तामेवबह्वमंस्तैकांदूतींमृत्योरिवासुरः ॥ शुद्धांतरक्षिणश्चैतांशुद्धांतंप्रापयंत्वरम् ॥ ४८ ॥ इतितेनसमादिष्टाःसर्वेवर्षवरामुने ॥ तांधर्तुमुद्यमंचक्रुर्बले नबलवत्तराः ॥ ४९ ॥ सातान्भस्मीचकाराशुहुंकारजनिताग्निना ॥ ततोदैत्यपतिःक्रुद्धोदृष्ट्वातान्भस्मसात्कृतान् ॥ ५० ॥ क्षणेनैवतयादूत्यादैत्यां स्त्र्ययुतसंमितान् ॥ दृशाव्यापारयामासदुर्धरंदुर्मुखंखरम् ॥ ५१ ॥ सीरपाणिंपाशपाणिंसुरेंद्रदमनंहनुम् ॥ यज्ञारिंखड्गलोमानमुग्रास्यंदेवकंपनम् ॥ ॥ ५२ ॥ बद्ध्वापाशैरिमांदुष्टामानयंत्वाशुदानवाः ॥ विध्वस्तकेशवेशांचविस्रस्तांबरभूषणाम् ॥ ५३ ॥ इतिदैत्याधिपादेशाद्दुर्धरप्रमुखास्ततः ॥ पाशा सिमुद्गरधरास्तामादातुंकृतोद्यमाः ॥ ५४ ॥ गिरींद्रगुरुवर्ष्माणःशस्त्रास्त्रोद्यतपाणयः ॥ दिगंतंतेपरिप्राप्तास्तदुच्छ्वासानिलाहताः ॥ ५५ ॥ तेषूड्डीने षुदैत्येषुशतकोटिमितेषुच ॥ निर्जगामततःसातुकालरात्रिर्नभोध्वगा ॥ ५६ ॥ ततस्तांतुविनिर्यांतीमनुजग्मुर्महासुराः ॥ कोटिकोटिसहस्राणिपूर यित्वातुरोदसी ॥ ५७ ॥ दुर्गोनाममहादैत्यःशतकोटिरथावृतः ॥ गजानामर्बुदशतद्वयेनपरिवारितः ॥ ५८ ॥ कोट्यर्बुदेनसहितोहयानांवातरंहसाम् ॥ पदातिभिरसंख्यातैःपच्चूर्णितशिलोच्चयैः ॥ ५९ ॥ उदायुधैर्महाभीमैःकृतत्रिजगतीभयैः ॥ समेतःसमहादैत्योदुर्गःक्रुद्धोविनिर्ययौ ॥ ६० ॥ अथदृष्ट्वामहादेवींविंध्याचलकृतालयाम् ॥ आगत्यकालरात्र्याचनिवेदिततदागसम् ॥ ६१ ॥ महाभुजसहस्राढ्यांमहातेजोभिबृंहिताम् ॥ तत्तद्घोरप्रह रणांरणकौतुकसादराम् ॥ ६२ ॥ प्रोद्यच्चंद्रसहस्रांशुनिर्मार्जितशुभाननाम् ॥ लावण्यवार्धिनिर्गच्छच्चंचच्चंद्रैकचंद्रिकाम् ॥ ६३ ॥

महामाणिक्यनिचयरोचिःखचितविग्रहाम् ॥ त्रैलोक्यरम्यनगरीसुप्रकाशप्रदीपिकाम् ॥६४॥ हरनेत्राग्निनिर्दग्धकामजीवातुवीरुधम् ॥ लसत्सौंदर्यसं भारजगन्मोहमहौषधिम् ॥ ६५ ॥ विषमेषुशरैर्भिन्नहृदयोदैत्यपुंगवः ॥ आदिष्टवान्महासैन्यनायकानुग्रशासनः ॥ ६६ ॥ अयिजंभमहाजंभकुजंभ विकटानन ॥ लंबोदरमहाकायमहादंष्ट्रमहाहनो ॥ ६७ ॥ पिंगाक्षमहिषग्रीवमहोग्रात्युग्रविग्रह ॥ क्रूराक्षक्रोधनाक्रंदसंक्रंदनमहाभय ॥ ६८ ॥ जितां तकमहाबाहोमहावक्त्रमहीधर ॥ दुंदुभेदुंदुभिरवमहादुंदुभिनासिक ॥ ६९ ॥ उग्रास्यदीर्घदशनमेघकेशवृकानन ॥ सिंहास्यसूकरमुखशिवारावमहो त्कट ॥ ७० ॥ शुकतुंडप्रचंडास्यभीमाक्षक्षुद्रमानस ॥ उलूकनेत्रकंकास्यकाकतुंडकरालवाक् ॥७१॥ दीर्घग्रीवमहाजंघक्रमेलकशिरोधर ॥ रक्तबिंदो जपानेत्रविद्युज्जिह्वाग्नितापन ॥ ७२ ॥ धूम्राक्षधूमनिःश्वासचंडचंडांशुतापन ॥ महाभीषणमुख्याश्चशृण्वंत्वाज्ञांममादरात् ॥ ७३ ॥ भवत्स्वेतेषुचान्ये षुयएतांविंध्यवासिनीम् ॥ धृत्यानेष्यतिबुद्ध्यावाबलेनापिच्छलेनवा ॥७४॥ तस्याहमिंद्रपदवीमद्यदास्याम्यसंशयम् ॥ दृष्ट्वैतांसुंदरीमद्यमनोमेव्याकुलं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवेत् ॥ ७५ ॥ यांतुक्षिप्रंनयावन्मेपंचेषुशरपीडितम् ॥ मनोविह्वलतांगच्छेदेतत्प्राप्तेरभावतः ॥७६॥ इत्याकर्ण्यवचस्तस्यदुर्गस्यदनुजेशितुः ॥ प्रोचुः सर्वेतदादैत्याःप्रबद्धकरसंपुटाः ॥ ७७ ॥ अवधेहिमहाराजकिमेतत्कर्मदुष्करम् ॥ अनाथायास्तथैकस्याअबलायाविशेषतः ॥ ७८॥ अस्याआनयने कोयंमहायत्नविधिःप्रभो ॥ कोऽस्मान्प्रलयकालाग्निमहाज्वालावलीसमान् ॥ ७९ ॥ सहेतत्रिषुलोकेषुत्वत्प्रसादात्कृतोद्यमान् ॥ यद्यादेशोभवेदद्यतदेंद्रं समरुद्गणम् ॥ ८० ॥ सांतःपुरंसमानीयक्षिप्रमस्त्वत्पदाग्रतः ॥ भूर्भुवःस्वरिदंसर्वंत्वदाज्ञावशवर्तितम् ॥ ८१ ॥ महर्जनस्तपःसत्यलोकास्त्वदधिका रिणः ॥ तत्राप्यसाध्यंनास्माकंत्वन्निदेशान्महासुर ॥ ८२ ॥ वैकुंठनायकोनित्यंत्वदाज्ञापरिपालकः ॥ यानिरम्याणिरत्नानितानिसंप्रेषयन्मुदा ॥८३॥

अस्माभिरेवसंत्यक्तःकैलासाधिपतिःसवै ॥ विपाशीचातिनिःस्वत्वाद्भस्मकृत्त्यहिभूषणः ॥ ८४ ॥ अर्धांगेनास्मद्भयतोयोपिदेकानिगूहिता ॥ तस्यग्रामे पिसकलेद्वितीयोनचतुष्पदः ॥ ८५ ॥ एकोऽजरद्गवःसोपिनान्यस्मात्परिजीवति ॥ श्मशानवासिनःसर्वेसर्वेकौपीनवाससः ॥८६॥ सर्वेविभूतिधवलाः सर्वेप्येककपर्दिनः ॥ समस्तेनगरेतस्यवसंत्येवंविधागणाः॥८७॥ तेषांगणानांकिंकुर्मोदरिद्राणांवयंविभो ॥ समुद्रारत्नसंभारंप्रत्यहंप्रेषयंतिच ॥ ८८ ॥ नागावराकाश्चास्माकंसायंसायंस्वयंप्रभो ॥ प्रदीपयंतिसततंफणारत्नप्रदीपकान् ॥ ८९ ॥ कल्पद्रुमःकामगवीचिंतामणिगणाबहु ॥ तवप्रसादाद स्माकमपितिष्ठंतिवेश्मसु ॥ ९० ॥ वायुर्व्यजनतांयातस्त्वांसेवेतप्रयत्नतः ॥ स्वच्छान्यंबूनिवरुणःप्रत्यहंपूरयत्यहो ॥ ९१ ॥ वासांसिक्षालयेदग्निश्चं द्रश्छत्रधरःस्वयम् ॥ सूर्यःप्रकाशयेन्नित्यंक्रीडावाप्यंबुजानिच ॥९२॥ कस्त्वत्प्रसादंनेक्षेतमर्त्यामर्त्योरगेषुच ॥ सर्वेत्वामुपजीवंतिसुराऽसुरखगादयः ॥ ॥ ९३ ॥ पश्यनःपौरुषंराजन्नानयामोबलादिमाम् ॥ इत्युक्त्वायुगपत्सर्वेक्षुब्धास्तोयधयोयथा ॥९४॥ संवर्तकालमासाद्यप्लावितुंजगतीमिमाम् ॥ रणतूर्य निनादसमुत्तस्थौसमंततः ॥ ९५ ॥ रोमांचितायच्छ्रवणात्कातराअप्यकातराः ॥ ततोदेवाभयत्रस्ताश्चकंपेचवसुंधरा ॥ ९६ ॥ क्षुब्धाअंबुधयःसर्वेपे तुर्नक्षत्रमालिकाः ॥ रोदसीमंडलंव्याप्तंतेनतूर्यरवेणवै ॥ ९७ ॥ ततोभगवतीदेवीस्वशरीरसमुद्भवाः ॥ शक्तीरुत्पादयामासशतशोऽथसहस्रशः ॥९८॥ ताभिःशक्तिभिरेतेषांबलिनांदितिजन्मनाम् ॥ प्रत्येकंपरितोरुद्धउद्वेलःसैन्यसागरः ॥ ९९ ॥

शस्त्रास्त्राणिमहादैत्यैर्यान्युत्सृष्टानिसंगरे ॥ ताभिःशक्तिभिरुग्राणितृणीकृत्योज्झितान्यरम् ॥ १०० ॥ ततोतिकोपपूर्णास्तेजंभमुख्याःसुरारयः ॥ असि चक्रभुशुंडीभिर्गदामुद्गरतोमरैः ॥ १ ॥ भिंदिपालैश्चपरिघैःकुंतैःशल्यैश्चशक्तिभिः ॥ अर्धचंद्रैःक्षुरप्रैश्चनाराचैश्चशिलीमुखैः ॥ २ ॥ महाभल्लैःपरशुभि र्भिंदुरैर्मर्मभेदिभिः ॥ वृक्षोपलमहावर्षैर्ववृषुर्जलदाइव ॥ ३ ॥ अथसाविंध्यनिलयामहामायामहेश्वरी ॥ आदायोद्दंडकोदंडंवायव्यास्त्रेणहेलया ॥ ४ ॥ दैत्यास्त्रशस्त्रजालानिपरिचिक्षेपदूरतः ॥ ततोमहासुरोदुर्गोवीक्ष्यसैन्यंनिरायुधम् ॥ ५ ॥ ज्वलंतींशक्तिमादायतांदेवींप्रतिसोऽक्षिपत् ॥ तांतुशक्तिंसमायां तींमहावेगवतींरणे ॥ ६ ॥ निजचापविनिर्मुक्तैर्बाणैश्चूर्णीचकारसा ॥ भग्नांशक्तिंसमालोक्यततोदुर्गोमहासुरः ॥ ७ ॥चक्रंचप्रेषयामासदैत्यचक्रातिहर्ष दम् ॥ तच्चदेव्याशरशतैरंतरैवाणुवत्कृतम् ॥ ८ ॥ ततःशार्ङ्गंसमादायधनुःशक्रधनुर्यथा ॥ हृदिविव्याधबाणेनतांदेवीममरार्दनः ॥ ९ ॥ सचबाणस्तया देव्यानिजबाणैर्महाजवैः ॥ निवारितोपिवेगेनतांदेवीमभ्यगान्मुने ॥ ११० ॥ ततःकोदंडदंडेनआशुगेनतमाशुगम् ॥ हत्वानिवारयामासकालदंड मिवापरम् ॥ ११ ॥ तस्मिन्विमुखतांयातेमार्गणेदुर्गमासुरः ॥ क्रुद्धःशूलंसमादायसंवर्तानलसुप्रभम् ॥ १२ ॥ महावेगेनचिक्षेपतांदेवीमभिदैत्यपः ॥ परापतच्चतच्छूलंनिजशूलेनचंडिका ॥ १३ ॥ अंतरैवप्रचिच्छेदसहदैत्यजयाशया ॥ तस्मिन्नपिमहाशूलेदेवीशूलावहेलिते ॥ १४ ॥

गदामादायदैत्येंद्रःसहसाभिपपातह ॥ आजघानचतांदेवींभुजमूलेमहाबलः ॥ १५ ॥ सापिदेवीभुजंप्राप्यगिरींद्रशिखराकृतिः ॥ गदाशुपरिपुस्फो टशतधाचसहस्रधा ॥ १६ ॥ तदादेव्यासदैत्येंद्रोवामपादतलेनहि ॥ आताडितःपपातोर्व्यांहृदिगाढंप्रपीडितः ॥१७॥ तत्क्षणादेवदैत्येंद्रःपतित्वापुनरु त्थितः ॥ बभूवसहसादृश्योदीपोवातहतोयथा ॥ १८ ॥ तावज्जगज्जनन्याताःप्रेरितानिजशक्तयः ॥ विचेरुर्दैत्यसैन्येषुसंवर्तेमृत्युसैन्यवत् ॥ ११९ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदुर्गपराक्रमोनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ अगस्त्यउवाच ॥ पार्वतीहृदयानंदस्कंदसर्वज्ञनंदन ॥ काःकास्तुशक्तयस्तावैतासांनामानिमेवद ॥१॥ ॥ स्कंदउवाच ॥ ॥ तासांपरमशक्तीनामुमावयवसंभुवाम् ॥ आख्याम्याख्यांशृणुमुनेकुंभसंभवतत्त्वतः ॥ २ ॥ त्रैलोक्यविजयाताराक्षमात्रैलोक्यसुंदरी ॥ त्रिपुरात्रिजगन्माताभीमात्रिपुरभैरवी ॥ ३ ॥ कामाख्या कमलाक्षीचधृतिस्त्रिपुरतापनी ॥ जयाजयंतीविजयाजलेशीचापराजिता ॥४॥ शंखिनीगजवक्त्राचमहिषघ्नीरणप्रिया ॥ शुभानंदाकोटराक्षीविद्युज्जिह्वा शिवारवा ॥ ५ ॥ त्रिनेत्राचत्रिवक्त्राचत्रिपदासर्वमंगला ॥ हुंकारहेतिस्तालेशीसर्पास्यासर्वसुंदरी ॥ ६ ॥ सिद्धिर्बुद्धिःस्वधास्वाहामहानिद्राशराशना ॥ पाशपाणिःखरमुखीवज्रताराषडानना ॥ ७ ॥ मयूरवदनाकाकीशुकीभासीगरुत्मती ॥ पद्मावतीपद्मकेशीपद्मास्यापद्मवासिनी ॥ ८ ॥ अक्षरात्र्यक्षरातं तुःप्रणवेशीस्वरात्मिका ॥ त्रिवर्गागर्वरहिताअजपाजपहारिणी ॥ ९ ॥ जपसिद्धिस्तपःसिद्धिर्योगसिद्धिःपरामृता ॥ मैत्रीकृन्मित्रनेत्राचरक्षोघ्नीदैत्य तापनी ॥ १० ॥ स्तंभनीमोहनीमायाबहुमायाबलोत्कटा ॥ उच्चाटनीमहोल्कास्यादनुजेंद्रक्षयंकरी ॥११॥ क्षेमंकरीसिद्धिकरीछिन्नमस्ताशुभानना ॥ शाकंभरीमोक्षलक्ष्मीस्त्रिवर्गफलदायिनी ॥ १२ ॥ वार्तालीजंभलीक्लिन्नाअश्वारूढासुरेश्वरी ॥ ज्वालामुखीप्रभृतयोनवकोट्योमहाबलाः ॥ १३ ॥ बलानिबलिनांताभिर्दानवानांस्वलीलया ॥ संक्षिप्तानिजगंतीवप्रलयानलहेतिभिः ॥ १४ ॥

तावत्सदुर्गोदैत्येंद्रःपयोदांतरतोबली ॥ चकारकरकावृष्टिंवात्यावेगवतींबहु ॥१५॥ ततोभगवतीदेवीशोषणास्त्रप्रयोगतः॥वृष्टिंनिवारयामासवर्षोपलमयीं क्षणात् ॥ १६ ॥ योपिन्मनोरथवतीषंढंप्राप्ययथाऽफला ॥ सादैत्यकरकावृष्टिर्देवींप्राप्यतथाभवत् ॥ १७ ॥ अथदैतेयराजेनबाहुसंकर्षकोपतः ॥ उत्पाट्यशैलशिखरंपरिक्षिप्तंनभोंगणात् ॥ १८ ॥ अद्रेःशृंगंसुविस्तीर्णमापतत्परिवीक्ष्यसा ॥ शतकोटिप्रहारेणकोटिशःसकलंव्यधात् ॥ १९ ॥ आंदोल्यमौलिमसकृत्कुंडलाभ्यांविराजितम् ॥ गजीभूयाशुदुद्रावतांदेवींसमरेऽसुरः ॥२०॥ शैलाकारंतमायांतंदृष्ट्वाभगवतीगजम् ॥ बद्ध्वापाशेनजवतः खड्गेनकरमच्छिनत् ॥ २१ ॥ ततोत्यंतंसचीत्कृत्यदेव्याकृत्तकरःकरी ॥ अकिंचित्करतांप्राप्यमाहिषंवपुराददे ॥ २२ ॥ अचलांसचलांसर्वांसचक्रेखुर घाततः ॥ शिल्लोच्चयांश्चबहुशःशृंगाभ्यांसोक्षिपद्बली ॥२३॥ निःश्वासवातनिहताःपेतुरुर्व्यांमहाद्रुमाः ॥ उद्वेलिताःसमभवन्सप्तापिजलराशयः ॥२४॥ महामहिषरूपेणतेनत्रैलोक्यमंडपः ॥ आंदोलितोतिबलिनायुगतिवात्ययायथा ॥ २५ ॥ ब्रह्मांडमप्यकडिनतद्भयेनसमाकुलम् ॥ दृष्ट्वाभगवतीक्रुद्धा त्रिशूलेनजघानतम् ॥ २६ ॥ त्रिशूलघातविभ्रांतःपतित्वापुनरुत्थितः ॥ तंत्यक्त्वामाहिषंवेषमभूद्बाहुसहस्रभृत् ॥ २७ ॥ सदुर्गोनितरांदुर्गोविबभौ समराजिरे ॥ आयुधानांसहस्राणिबिभ्रत्कालांतकोपमः ॥ २८ ॥ अथतूर्णंसदैत्येंद्रस्तांदेवींरणकोविदाम् ॥ महाबलःप्रगृह्याशुनीतवान्गगनांगणम् ॥ ॥ २९ ॥ ततोनभोंगणाद्दूरात्क्षिप्त्वासजगदंबिकाम् ॥ क्षणात्कलंबजालेनच्छादयामासवेगवान् ॥ ३० ॥ अथांतरिक्षगादेवीतस्यमार्गणमध्यगा ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विद्युन्मालेवविबभौमहाभ्रपटलीधृता ॥३१॥ तंविधूयशरव्रातंनिजेषुनिकरैरलम् ॥ महेषुणाथविव्याधसातंदैत्यजनेश्वरम् ॥ ३२ ॥ हृदिविद्धस्तयादे व्यासचेतनमहेषुणा ॥ व्याघूर्णमाननयनःक्षितिमापातिविह्वलः ॥३३॥ महारुधिरधाराभिःस्रवंतींचप्रवर्तयन् ॥ तस्मिन्निपतितेदुर्गेमहादुर्गपराक्रमे॥ ॥ ३४ ॥ देवदुंदुभयोनेदुःप्रहृष्टानिजगंतिच ॥ सूर्याचंद्रमसौसाग्नीतेजोनिजमवापतुः ॥ ३५ ॥ पुष्पवृष्टिंप्रकुर्वंतःप्राप्तादेवामहर्षिभिः ॥ तुष्टुवुश्चमहा देवींमहास्तुतिभिरादरात् ॥ ३६ ॥ ॥ देवाऊचुः ॥ ॥ नमोदेविजगद्धात्रिजगत्त्रयमहारणे ॥ महेश्वरमहाशक्तेदैत्यद्रुमकुठारिके ॥ ३७ ॥

त्रैलोक्यव्यापिनिशिवेशंखचक्रगदाधरि ॥ स्वशार्ङ्गव्यग्रहस्ताग्रेनमोविष्णुस्वरूपिणि ॥ ३८ ॥ हंसयानेनमस्तुभ्यंसर्वसृष्टिविधायिनि ॥ प्राचांवाचां जन्मभूमेचतुराननरूपिणि ॥ ३९ ॥ त्वमैंद्रीत्वंचकौबेरीवायवीत्वंत्वमंबुपा ॥ त्वंयामीनैर्ऋतीत्वंचत्वमैशीत्वंचपावकी ॥ ४० ॥ शशांककौमुदीत्वंचसौ रीशक्तिस्त्वमेवच ॥ सर्वदेवमयीशक्तिस्त्वमेवपरमेश्वरी ॥ ४१ ॥ त्वंगौरीत्वंचसावित्रीत्वंगायत्रीसरस्वती ॥ प्रकृतिस्त्वंमतिस्त्वंचत्वमहंकृतिरूपिणी ॥ ॥ ४२ ॥ चेतःस्वरूपिणीत्वंवैत्वंसर्वेंद्रियरूपिणी ॥ पंचतन्मात्ररूपात्वंमहाभूतात्मिकेंबिके ॥ ४३ ॥ शब्दादिरूपिणीत्वंवैकरणानुग्रहात्मसु ॥ ब्रह्मांडकर्त्रीत्वंदेविब्रह्मांडांतस्त्वमेवहि ॥ ४४ ॥ त्वंपरासिमहादेवित्वंचदेविपरापरा ॥ परापराणांपरमापरमात्मस्वरूपिणी ॥ ४५ ॥ सर्व रूपात्वमीशानित्वमरूपासिसर्वगे ॥ त्वंचिच्छक्तिर्महामायेत्वंस्वाहात्वंस्वधामृते ॥ ४६ ॥ वषट्सौषट्स्वरूपासित्वमेवप्रणवात्मिका ॥ सर्वमंत्रमयीत्वंवै ब्रह्माद्यास्त्वत्समुद्भवाः ॥ ४७ ॥

चतुर्वर्गात्मिकात्वंवैचतुर्वर्गफलोदये ॥ त्वत्तःसर्वमिदंविश्वंत्वयिसर्वंजगन्निधे ॥ ४८ ॥ यद्दृश्यंयद्दृश्यंचस्थूलसूक्ष्मस्वरूपतः ॥ तत्रत्वंशक्तिरूपेणकिं चिन्नत्वदृतेक्वचित् ॥ ४९ ॥ मातस्त्वयाद्यविनिहत्यमहासुरेंद्रंदुर्गंनिसर्गविबुधार्पितदैत्यसैन्यम् ॥ त्राताःस्मदेविसततंनमतांशरण्येत्वत्तोऽपरःकइहयं शरणंव्रजामः ॥ ५० ॥ लोकेतएवधनधान्यसमृद्धिभाजस्तेपुत्रपौत्रसुकलत्रसुमित्रवंतः ॥ तेषांयशःप्रसरचंद्रकरावदातंविश्वंभवेद्भवसियेषुसुदृक्क्रमीशे ॥ ॥ ५१ ॥ त्वद्भक्तिचेतसिजनेनविपत्तिलेशःक्लेशःक्वचानुभवतीनतिकृत्सुपुंसु ॥ त्वन्नामसंसृतिजुषांसकलायुषांक्वभूयःपुनर्जनिरिहत्रिपुरारिपत्नि ॥ ५२ ॥ चित्रंयदत्रसमरेसहिदुर्गदैत्यस्त्वद्दृष्टिपातमधिगम्यसुधानिधानम् ॥ मृत्योर्वशत्वमगमद्विदितंभवानिदुष्टोपितेदृशिगतःकुगतिंनयाति ॥ ५३ ॥ त्वच्छस्त्रव ह्निशलभत्वमिताअपीहदैत्याःपतंगरुचिमाप्यदिवंव्रजंति ॥ संतःखलेष्वपिनदुष्टधियोयतःस्युःसाधुष्विवप्रणयिनःस्वपथंदिशंति ॥ ५४ ॥ प्राच्यांमृडा निपरिपाहिसदानतान्नोयाम्यामवप्रतिपदंविपदोभवानि ॥ प्रत्यग्दिशित्रिपुरतापनपत्निरक्षत्वंपाह्युदीचिनिजभक्तजनान्महेशि ॥ ५५ ॥ ब्रह्माणिरक्षसततं नतमौलिदेशंत्वंवैष्णविप्रतिकुलंपरिपालयाधः ॥ रुद्राग्निनैर्ऋतिसदागतिदिक्षुपांतुमृत्युंजयात्रिनयनात्रिपुरात्रिशक्त्यः ॥ ५६ ॥ पातुत्रिशूलममलेतवमौ लिजान्नोभालस्थलंशशिकलामृदुमाभ्रुवौच ॥ नेत्रेत्रिलोचनवधूर्गिरिजाचनासामोष्ठंजयाचविजयात्वधरप्रदेशम् ॥ ५७ ॥ श्रोत्रद्वयंश्रुतिरवादशनाव लिंश्रीश्चंडीकपोलयुगलंरसनांचवाणी ॥ पायात्सदैवचिबुकंजयमंगलानःकात्यायनीवदनमंडलमेवसर्वम् ॥ ५८ ॥ कंठप्रदेशमवतादिहनीलकंठी भूदारशक्तिरनिशंचकृकाटिकायाम् ॥ कौर्म्यंसदेशमनिशंभुजदंडमैंद्रीपद्माचपाणिफलकंनतिकारिणांनः ॥ ५९ ॥

हस्तांगुलीःकमलजाविरजानखांश्चकक्षांतरंतरणिमंडलगातमोघ्नी ॥ वक्षःस्थलंस्थलचरीहृदयंधरित्रीकुक्षिद्वयंत्ववतुनःक्षणदाचरघ्नी ॥६०॥ अव्यात्सदो दरदरींजगदीश्वरीनोनाभिंनभोगतिरजात्वथपृष्ठदेशम् ॥ पायात्कटिंचविकटापरमास्फिचौनोगुह्यंगुहारणिरपानमपायहंत्री ॥ ६१ ॥ ऊरुद्वयंचविपुलाल लिताचजानूजंघेजवाऽवतुकठोरतरात्रगुल्फौ ॥ पादौरसातलचरांगुलिदेशमुग्राचांद्रीनखान्पदतलंतलवासिनीच ॥६२॥ गृहंरक्षतुनोलक्ष्मीःक्षेत्रंक्षेमकरी सदा ॥ पातुपुत्रान्प्रियकरीपायादायुःसनातनी ॥ ६३ ॥ यशःपातुमहादेवीधर्मंपातुधनुर्धरी ॥ कुलदेवीकुलंपातुसद्गतिंसद्गतिप्रदा ॥ ६४ ॥ रणेरा जकुलेद्यूतेसंग्रामेशत्रुसंकटे ॥ गृहेवनेजलादौचशर्वाणीसर्वतोऽवतु ॥ ६५ ॥ इतिस्तुत्वाजगद्धात्रींप्रणेमुश्चपुनःपुनः ॥ सर्वेसवासवादेवाःसर्पिगंधर्वचा रणाः ॥ ६६ ॥ ततस्तुष्टाजगन्मातातानाहसुरसत्तमान् ॥ स्वाधिकारान्सुराःसर्वेशासतुप्राग्यथायथा ॥ ६७॥ तुष्टाहमनयास्तुत्यानितरांतुयथार्थया ॥ वरमन्यंप्रदास्यामितच्छृणुध्वंसुरोत्तमाः ॥ ६८ ॥ ॥ दुर्गोवाच ॥ ॥ यःस्तोष्यतितुमांभक्त्यानरःस्तुत्यानयाशुचिः ॥ तस्याहंनाशयिष्यामिविपदं चपदेपदे॥६९॥एतत्स्तोत्रस्यकवचंपरिधास्यतियोनरः ॥ तस्यक्वचिद्भयंनास्तिवज्रपंजरगस्यहि ॥७०॥ अद्यप्रभृतिमेनामदुर्गेतिख्यातिमेष्यति ॥ दुर्गदै त्यस्यसमरेपातनादतिदुर्गमात्॥७१॥येमांदुर्गांशरणगानतेषांदुर्गतिःक्वचित् ॥ दुर्गास्तुतिरियंपुण्यावज्रपंजरसंज्ञिका ॥७२॥ अनयाकवचंकृत्वामाबिभे तुयमादपि ॥ भूतप्रेतपिशाचाश्चशाकिनीडाकिनीगणाः॥७३॥झोटिंगाराक्षसाःक्रूराविषसर्पाग्निदस्यवः ॥ वेतालाश्चापिकंकालग्रहाबालग्रहाअपि॥७४॥

वातपित्तादिजनितास्तथाचविषमज्वराः ॥ दूरादेवपलायंतेश्रुत्वास्तुतिमिमांशुभाम् ॥७५॥ वज्रपंजरनामैतत्स्तोत्रंदुर्गाप्रशंसनम् ॥ एतत्स्तोत्रकृतत्राणे वज्रादपिभयंनहि ॥ ७६ ॥ अष्टजप्तेनचानेनयोभिमंत्र्यजलंपिबेत् ॥ तस्योदरगतापीडाक्वापिनोसंभविष्यति ॥७७॥ गर्भपीडातुनोजातुभविष्यत्यभिमं त्रणात् ॥ बालानांपरमाशांतिरेतत्स्तोत्रांबुपानतः ॥ ७८ ॥ यत्रसान्निध्यमेतस्यस्तवस्येहभविष्यति ॥ एतास्तुशक्तयःसर्वाःसर्वत्रसहितामया ॥ ७९ ॥ रक्षांपरिकरिष्यंतिमद्भक्तानांममाज्ञया ॥ इतिदत्त्वावरान्देवीदेवेभ्योंतर्हितातदा ॥ ८० ॥ तेपिस्वर्गौकसःसर्वेस्वंस्वंस्वर्गंययुर्मुदा ॥ ॥ स्कंदउवाच ॥ इत्थंदुर्गाभवन्नामतयादेव्यामहामुने ॥ काश्यांसेव्यायथासाचतच्छृणुष्ववदामिते ॥८१॥ अष्टम्यांचचतुर्दश्यांभौमवारेविशेषतः ॥ संपूज्यासततंकाश्यां दुर्गादुर्गतिनाशिनी ॥ ८२ ॥ नवरात्रंप्रयत्नेनप्रत्यहंसासमर्चिता ॥ नाशयिष्यतिविघ्नौघान्सुमतिंचप्रदास्यति ॥ ८३ ॥ महापूजोपहारैश्चमहाबलिनि वेदनैः ॥ दास्यत्यभीष्टदासिद्धिंदुर्गाकाश्यांनसंशयः ॥ ८४ ॥ प्रतिसंवत्सरंतस्याःकार्यायात्राप्रयत्नतः ॥ शारदंनवरात्रंचसकुटुंबैःशुभार्थिभिः ॥८५॥ योनसांवत्सरींयात्रांदुर्गायाःकुरुतेकुधीः ॥ काश्यांविघ्नसहस्राणितस्यस्युश्चपदेपदे ॥ ८६ ॥ दुर्गाकुंडेनरःस्नात्वासर्वदुर्गार्तिहारिणीम् ॥ दुर्गांसंपूज्यवि धिवन्नवजन्माघमुत्सृजेत् ॥ ८७ ॥ सादुर्गाशक्तिभिःसार्धंकाशींरक्षतिसर्वतः ॥ ताःप्रयत्नेनसंपूज्याःकालरात्रिमुखानरैः ॥८८॥ रक्षंतिक्षेत्रमेतद्वैतथान्यान वशक्तयः ॥ उपसर्गसहस्रेभ्यस्तावैदिग्देवताःक्रमात् ॥ ८९ ॥ शतनेत्रासहस्रास्यातथायुतभुजापरा ॥ अश्वारूढागजास्याचत्वरिताशववाहिनी ॥ ९० ॥ विश्वासौभाग्यगौरीचसृष्टाःप्राच्यादिमध्यतः ॥ एतायत्नेनसंपूज्याःक्षेत्ररक्षणदेवताः ॥९१॥ तथैवभैरवाश्चाष्टौदिक्ष्वष्टासुप्रतिष्ठिताः ॥ रक्षंतिसततंकाशीं निर्वाणश्रीनिकेतनम् ॥ ९२ ॥ रुरुश्चंडोसितांगश्चकपालीक्रोधनस्तथा ॥ उन्मत्तभैरवस्तद्वत्क्रमात्संहारभीषणौ ॥ ९३ ॥ चतुःषष्टिस्तुवेतालामहाभी षणमूर्तयः ॥ रुंडमुंडस्रजःसर्वेकर्त्रीखर्परपाणयः ॥ ९४ ॥ श्ववाहनारक्तमुखामहादंष्ट्रामहाभुजाः ॥ नग्नाविमुक्तकेशाश्चप्रमत्तारुधिरासवैः ॥ ९५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नानारूपधराःसर्वेनानाशस्त्रास्त्रपाणयः ॥ तदाकारैश्चतद्भृत्यैःकोटिशःपरिवारिताः ॥ ९६ ॥ विद्युज्जिह्वोलललज्जिह्वःक्रूरास्यःक्रूरलोचनः॥ उग्रोविकटदंष्ट्रश्चवक्रास्योवक्रनासिकः ॥ ९७ ॥ जंभकोजृंभणसुखोज्वालानेत्रोवृकोदरः ॥ गर्तनेत्रोमहानेत्रस्तुच्छनेत्रोंत्रमण्डनः ॥ ९८ ॥ ज्वलत्केशःकंकुशिराः खर्वग्रीवोमहाहनुः ॥ महानासोलंबकर्णःकर्णप्रावरणोनसः ॥९९॥ इत्यादयोमुनेक्षेत्रंदुर्वृत्तरुधिरप्रियाः ॥ त्रासयंतोदुराचारारक्षंतिपरितःसदा ॥१००॥ त्रैलोक्यविजयाद्याश्चज्वालामुख्यंतगाश्चयाः ॥ शक्तयोऽत्रमयाख्याताअनेकलक्षसंभव ॥ १ ॥ ताःकाशींपरिरक्षंतिचतुर्दिक्षुव्यतायुधाः ॥ ताःसमर्च्याःप्रयत्नेनमहाविघ्नप्रशांतये ॥२॥ भैरवारुरुमुख्याश्चमहाभयनिवारकाः ॥ संपूज्याःसर्वदाकाश्यांसर्वसंपत्तिहेतवः ॥३॥ विद्युज्जिह्वप्रभृतयोवेतालाउग्ररूपिणः ॥ अत्युग्रानपिविघ्नौघान्हरिष्यंत्यर्चिताइह ॥ ४ ॥ तथाभूतावलीचात्रनानाभीषणरूपिणी ॥ उदायुधाऽवतिपुरींशतकोटिभिरावृते ॥ ५ ॥ निर्वाणलक्ष्मीक्षेत्रस्यपालयित्रीपदेपदे ॥ एतावैदेवताःपूज्याःकाश्यांनिर्वाणकांक्षिभिः ॥ ६ ॥ श्रुत्वाध्यायमिमंपुण्यंनरोदुर्गजयाभिधम् ॥ नानाशक्तिसमायुक्तंदुर्गमाशुतरिष्यति ॥ ७ ॥ यएतेभैरवाःप्रोक्तायेवेतालाउदाहृताः ॥ तेषांनामानिचाकर्ण्यनरोविघ्नैर्नदूयते ॥ ८ ॥ अदृष्टाअपितेभूताएतद्ध्यानपाठकम् ॥ रक्षिष्यंतिप्रयत्नेनसहश्रोतृजनेनच ॥ ९ ॥ तस्मात्सर्वप्रयत्नेनकाशीभक्तिपरैर्नरैः ॥ श्रोतव्यमिदमाख्यानंमहाविघ्ननिवारणम् ॥ ॥ ११० ॥ गृहेपियस्यलिखितमेतत्स्थास्यतिपूजितम् ॥ तस्यापदांसहस्राणिनाशयिष्यंतिदेवताः ॥ ११ ॥ काश्यांयस्यास्तिवैप्रेमतेनकृत्वाऽऽदरंगुरुम् ॥ श्रोतव्यमिदमाख्यानंवज्रपंजरसन्निभम् ॥११२ ॥ ॥ इतिश्रीस्कंदमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदुर्गाविजयो नामद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ अगस्त्यउवाच ॥ त्रिलोचनंसमासाद्यदेवदेवःषडाननः ॥ जगदंबिकयायुक्तःकिंचकाराशुतद्वद ॥ १ ॥ ॥ स्कन्दउवाच ॥ ॥ मुनेकलशजाख्यामियत्पृष्टंतन्निशामय ॥ विरजःसंज्ञकंपीठंयत्प्रोक्तंसर्वसिद्धिदम् ॥ २ ॥ तत्पीठदर्शनादेवविरजाजायतेनरः ॥ यत्रास्तितन्महालिंगंवाराणस्यांत्रिलोचनम् ॥ ३ ॥

तीर्थपिलिपिलाख्यंतद्द्युनद्यंभसिविश्रुतम् ॥ सर्वतीर्थमयंतीर्थंतत्काश्यांपारेगीयते ॥ ४ ॥ विष्टपत्रितयांतर्येदेवर्षिमनुजोरगाः ॥ ससरित्पर्वतारण्याःसंतितेतन्नयन्मुने ॥ ५ ॥ तदारभ्यचतत्तीर्थंतच्चलिंगंत्रिलोचनम् ॥ त्रिविष्टपमितिख्यातमतोहेतोर्महत्तरम् ॥ ६ ॥ त्रिविष्टपस्यलिंगस्यमहिमोक्तःपिनाकिना ॥ जगज्जनन्याःपुरतोयथावच्मितथामुने ॥७॥ ॥ देव्युवाच ॥ ॥ देवदेवजगन्नाथशर्वसर्वदसर्वग ॥ सर्वदृक्सर्वजनकर्किंचित्पृच्छामितद्वद ॥ ॥८॥ इदंतवप्रियंक्षेत्रंकर्मबीजमहौषधम् ॥ नैःश्रेयस्याःश्रियोयोगेदंममापिप्रीतिदंमहत् ॥९॥ यत्क्षेत्ररजसोप्यग्रेत्रिलोक्यपितृणायते ॥ तस्याखिलस्यमहिमाविप्वक्केनावगम्यते ॥ १० ॥ यानीहसंतिलिंगानितानिसर्वाण्यसंशयम् ॥ निर्वाणकारणान्येवस्वयंभून्यपितान्यपि ॥ ११ ॥ यद्यप्येवंतथापीश विशेषंवक्तुमर्हसि ॥ काश्यामनादिसिद्धानिकानिलिंगानिशंकर ॥१२॥ यत्रदेवःसदातिष्ठेत्संवर्तेऽपिसवल्लभः ॥ यैरियंप्रथितिंप्राताकाशीमुक्तिपुरीतिच ॥ ॥ १३ ॥ येषांस्मरणतोप्यत्रभवेत्पापस्यसंक्षयः ॥ दर्शनस्पर्शनाभ्यांचस्यातांस्वर्गापवर्गकौ ॥ १४ ॥ येषांसमर्चनादेवमध्येजन्मसकृद्विभो ॥ लिंगानिपूजितानिस्युःकाश्यांसर्वाणिनिश्चितम् ॥१५॥ विधायमय्यनुक्रोशंकारुण्यामृतसागर ॥ एतदाचक्ष्वमेशंभोपादयोःप्रणतास्म्यहम् ॥१६॥ इत्याकर्ण्यदेवीमहेशानस्तस्यादेव्याःसुभाषितम् ॥ कथयामासविंध्यारेमहालिंगानिसत्तम ॥१७॥ यन्नामाकर्णनादेवक्षीयंतेपापराशयः ॥ प्राप्यतेपुण्यसंभारःकाश्यांनिर्वाणकारणम् ॥ १८ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविपरंगुह्यंक्षेत्रेऽस्मिन्मुक्तिकारणम् ॥ इदंविदंतिनेवापित्रह्मनारायणादयः ॥ १९ ॥ असंख्याता निर्लिंगानिपार्वत्यानंदकानने ॥ स्थूलान्यपिचसूक्ष्माणिनानारत्नमयानिच ॥ २० ॥ नानाधातुमयानीशेदार्षदान्यप्यनेकशः ॥ स्वयंभून्यप्यनेकानिदेवर्षिस्थापितान्यहो ॥२१॥ सिद्धचारणगंधर्वयक्षरक्षोर्चितान्यपि ॥ असुरोरगमर्त्यैश्चदानवैरप्सरोगणैः ॥२२॥ दिग्गजैर्गिरिभिस्तीर्थैर्ऋक्षवानरकिन्नरैः ॥ पतत्रिप्रमुखैर्देविस्वस्वनामांकितानिवै ॥२३॥ प्रतिष्ठितानियानीहमुक्तिहेतूनितान्यपि ॥ अदृश्यान्यपिदृश्यानिदुरवस्थान्यपिप्रिये ॥२४॥

भग्नान्यपिचकालेनतानिपूज्यानिसुंदरि ॥ परार्धशतसंख्यानिगणितान्येकदामया ॥ २५ ॥ गंगांभस्यपितिष्ठंतिषष्टिकोटिमितानिहि ॥ सिद्धलिंगानितानीशेतिष्ठेऽदृश्यत्वमाययुः ॥ २६ ॥ गणनादिवसादर्वाङ्ममभक्तजनैःप्रिये ॥ प्रतिष्ठितानियानीहतेषांसंख्यानविद्यते ॥२७॥ त्वयातुयानिपृष्टानियैरिदंक्षेत्रमुत्तमम् ॥ तानिलिंगानिवक्ष्यामिमुक्तिहेतूनिसुंदरि ॥ २८ ॥ कलावतीवगोप्यानिभविष्यंतिगिरींद्रजे ॥ परंतेषांप्रभावोयःस्वंस्वंस्थानंनहास्यति ॥ २९ ॥ कलिकल्मषपुष्टायेयेदुष्टानास्तिकाःशठाः ॥ एतेषांसिद्धलिंगानांज्ञास्यंत्याख्यामपीह न ॥ ३० ॥ नामश्रवणतोपीहयल्लिंगानांशुभानने ॥ वृजिनानिक्षयंयांतिवर्धतेपुण्यराशयः ॥ ३१ ॥ ओंकारःप्रथमंलिंगंद्वितीयंचत्रिलोचनम् ॥ तृतीयंश्रीमहादेवःकृत्तिवासाश्चतुर्थकम् ॥ ॥ ३२ ॥ रत्नेशःपंचमंलिंगंपष्ठंचंद्रेश्वराभिधम् ॥ केदारःसप्तमंलिंगंधर्मेशश्चाष्टमंप्रिये ॥ ३३ ॥ वीरेश्वरंचनवमंकामेशंदशमंविदुः ॥ विश्वकर्मेश्वरंलिंगंशुभमेकादशंपरम् ॥ ३४ ॥ द्वादशंमणिकर्णीशमत्रिमुक्तंत्रयोदशम् ॥ चतुर्दशंमहालिंगंममविश्वेश्वराभिधम् ॥ ३५ ॥ प्रियेचतुर्दशैतानिश्रियोहेतूनिसुंदरि ॥ एतेषांसमवायोयंमुक्तिक्षेत्रमिहेरितम् ॥ ३६ ॥ देवताःसमधिष्ठाय्यःक्षेत्रस्यास्यपराइमाः ॥ आराधिताःप्रयच्छंतिनृभ्योनैःश्रेयसींश्रियम् ॥३७॥ आनंदकाननेमुक्त्यैप्रोक्तान्येतानिसुंदरि ॥ प्रियेचतुर्दशेज्यानिमहालिंगानिदेहिनाम् ॥ ३८ ॥ प्रतिमासंसमारभ्यतिथिप्रतिपदंशुभाम् ॥ एतेषांलिंगमुख्यानांकार्यायात्राप्रयत्नतः ॥३९॥ अनाराध्यमहादेवमेषुलिंगेषुकुंभज ॥ कःकाश्यांमोक्षमाप्नोतिसत्यंसत्यंपुनःपुनः ॥४०॥ तस्मात्सर्वप्रयत्नेनकाशीफलमभीप्सुभिः ॥ पूज्यान्येतानिलिंगानिभक्त्यापरमयामुने ॥४१॥ ॥ अगस्त्यउवाच ॥ ॥ एतान्येवकिमन्यानिमहालिंगानिपण्मुख ॥ निर्वाणकारणानीहयदिसंतितदावद ॥ ४२ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिचसंतीहमहालिंगानिसुव्रत ॥ कलिप्रभावाद्वृत्तानिभविष्यंत्येवतानिवै ॥ ॥ ४३ ॥ यस्येश्वरेसदाभक्तिर्यःकाशीतत्त्ववित्तमः ॥ सएवैतानिलिंगानिवेत्स्यत्यन्योनकश्चन ॥ ४४ ॥ येषांनामग्रहेणापिकलिकल्मषसंक्षयः ॥ अमृतेशस्तारकेशोज्ञानेशःकरुणेश्वरः ॥ ४५ ॥

मोक्षद्वारेश्वरश्चैवस्वर्गद्वारेश्वरस्तथा ॥ ब्रह्मेशोलांगलश्चैववृद्धकालेश्वरस्तथा ॥ ४६ ॥ वृषेशश्चैवचंडीशोनंदिकेशोमहेश्वरः ॥ ज्योतीरूपेश्वरंलिंगंख्यातमत्रचतुर्दशम् ॥ ४७ ॥ काश्यांचतुर्दशैतानिमहालिंगानिसुंदरि ॥ इमानिमुक्तिहेतूनिलिंगान्यानंदकानने ॥ ४८ ॥ कलिकल्मषबुद्धीनांनाख्येयानिकदाचन ॥ एतान्याराधयेद्यस्तुलिंगानीहचतुर्दश ॥ ४९ ॥ नतस्यपुनरावृत्तिःसंसाराध्वनिकर्हिचित् ॥ काशीकोशोयमतुलोनप्रकाश्योयतस्ततः ॥ ॥ ५० ॥ एतल्लिंगाभिधादेविमहापद्मपिदुःखहृत् ॥ रहस्यंपरमंचेतत्क्षेत्रस्यास्यवरानने ॥ ५१ ॥ चतुर्दशापिलिंगानिमत्सान्निध्यकराणिहि ॥ अविमुक्तस्यहृदयमेतदेवगिरींद्रजे ॥ ५२ ॥ इमानियानिलिंगानिसर्वेषांमुक्तिदानिहि ॥ एकैकमुवनस्येहसारमादायसर्वतः ॥ मयैतानिकृतान्येवमहाभक्तिप्रपाक्रमात् ॥ ५३ ॥ अस्मिन्क्षेत्रेध्रुवंमुक्तिरितियामथितिःप्रिये ॥ कारणंतत्रलिंगानिप्रमेतानिचतुर्दश ॥५४॥ तपोव्रतादिनःकतितपोवचतपस्विनः॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ध्यातान्येतानियैर्भक्तैर्लिंगान्यानंदकानने ॥५५॥ तएवाभ्यस्तसद्योगादत्तदानास्तएवहि ॥ काश्यामिमानिलिंगानियैर्दृष्टान्यपिदूरतः ॥ ५६॥ इष्टापूर्ता श्चयेधर्माःप्रणीतामुनिसत्तमैः ॥ तेसर्वेतेनविहितायावज्जीवंनिरेनसा ॥ ५७ ॥ येनाविमुक्तमासाद्यमहालिंगानिपार्वति ॥ सकृदभ्यर्चितानीहसमुक्तो नात्रसंशयः ॥ ५८ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिचविंध्यारेदेव्यैप्रोक्तानिशंभुना ॥ स्वभक्तानांहितार्थायतान्यथाकर्णयाग्रज ॥ ५९ ॥ शैलेशःसंगमेशश्चस्वर्लीनोमध्यमेश्वरः ॥ हिरण्यगर्भईशानोगोप्रेक्षोवृषभध्वजः ॥ ६० ॥ उपशांतशिवोज्येष्ठोनिवासेश्वरएवच ॥ शुक्रेशोव्याघ्रलिंगं चजंबुकेशंचतुर्दशम् ॥ ६१ ॥ मुनेचतुर्दशैतानिमहांत्यायतनानिवै ॥ एतेषामपिसेवातोनरोमोक्षमवाप्नुयात् ॥ ६२ ॥ चैत्रकृष्णप्रतिपदंसमारभ्यप्रय त्नतः ॥ आचतुर्दशिपूज्यानिलिंगान्येतानिसत्तमैः ॥ ६३ ॥ एतेषांवार्षिकीयात्रासुमहोत्सवपूर्वकम् ॥ कार्यामुमुक्षुभिःसम्यक्क्षेत्रसंसिद्धिदायिनी ॥ ॥ ६४ ॥ मुनेचतुर्दशैतानिमहालिंगानियत्नतः ॥ दृष्ट्वानजायतेजंतुःसंसारेदुःखसागरे ॥६५॥ क्षेत्रस्यपरमंतत्त्वमेतदेवप्रियेध्रुवम् ॥ संसाररोगग्रस्ताना मिदमेवमहौषधम् ॥ ६६ ॥ क्षेत्रस्योपनिषच्चैषामुक्तिबीजमिदंपरम् ॥ कर्मकाननदावाग्निरेषालिंगावलिःप्रिये ॥ ६७ ॥

एकैकस्यास्यलिंगस्यमहिमाद्यंतवर्जितः ॥ मयैवज्ञायतेदेविसम्यङ्नान्येनकेनचित् ॥६८॥ इतिश्रुत्वामुनेप्राहदेवीहृष्टतनूरुहा ॥ प्रणम्यदेवमीशानंसर्व ज्ञंसर्वदंशिवम् ॥ ६९ ॥ ॥ देव्युवाच ॥ ॥ रहस्यंपरमंकाश्यांयदेतत्समुदीरितम् ॥ तच्छ्रुत्वोत्सुकतांप्राप्तंमनोमेतीववल्लभ ॥ ७० ॥ यदुक्तंलिंगमे कैकंमहासारतरंपरम् ॥ काश्यांपरमनिर्वाणकारणंकारणेश्वर ॥ ७१ ॥ प्रत्येकंमहिमानंमेब्रूह्येषांभुवनेश्वर ॥ चतुर्दशानांलिंगानांश्रवणादघहारिणाम् ॥ ॥ ७२ ॥ ओंकारेशस्यलिंगस्यकथमत्रसमागमः ॥ अतिपुण्यतमात्तस्मात्क्षेत्रादमरकंटकात् ॥ ७३ ॥ किमात्मकोऽयमोंकारोमहिमास्यचकोहर ॥ केनाराधिपुराचैपददावाराधितश्चकिम् ॥ ७४ ॥ मृडानीवाक्सुधामेतांविधायश्रुतिगोचराम् ॥ कथामकथयद्देवओंकारस्यमहाद्भुताम् ॥ ७५ ॥ ॥ देवदेवउवाच ॥ ॥ कथामाकर्णयापर्णेवर्णयामितवाग्रतः ॥ यथोंकारस्यलिंगस्यप्रादुर्भावइहाभवत् ॥७६॥ पुरानंदवनेचात्रब्रह्मणाविश्वयोनिना ॥ तपस्तप्तंमहादेविसमाधिंदधतापरम् ॥ ७७ ॥ पूर्णेयुगसहस्रेऽथभित्त्वापातालसप्तकम् ॥ उदतिष्ठत्पुरोज्योतिर्विद्योतितहरिन्मुखम् ॥ ७८ ॥ यदंतरावि रभवन्निर्व्याजेनसमाधिना॥तदेवपरमंधामबहिराविरभूद्विधेः ॥७९॥ योभूच्चटचटाशब्दःस्फुटतोभूमिभागतः ॥ तच्छब्दाद्व्यसृजद्वेधाःसमाधिंक्रमतोवशी ॥ ॥ ८० ॥ स्रष्टाविसृष्टतद्ध्यानोयावदुन्मील्यलोचने ॥ पुरःपश्येद्ददर्शाग्रेतावदक्षरमादिमम् ॥ ८१ ॥ अकारंसत्त्वसंपन्नमृक्क्षेत्रंसृष्टिपालकम् ॥ नाराय णात्मकंसाक्षात्तमःपारेप्रतिष्ठितम् ॥ ८२ ॥ उकारमथतस्याग्रेरजोरूपंयजुर्जनिम् ॥ विधातारंसमस्तस्यस्वाकारमिवविंबितम् ॥ ८३ ॥

नीरवध्वांतसंकेतसदनाभंतदग्रतः ॥ मकारंसददर्शाथतमोरूपंविशेषतः ॥ ८४ ॥ साम्नोयोनिंलयेहेतुंसाक्षाद्रुद्रस्वरूपिणम् ॥ अथतत्पुरतोध्याताव्य ता त्स्वनयनातिथिम् ॥ ८५ ॥ विश्वरूपमयाकारंसगुणंवापिनिर्गुणम् ॥ अनाख्यनादसदनंपरमानंदविग्रहम् ॥८६॥ शब्दब्रह्मेतियत्ख्यातंसर्ववाङ्मयका रणम् ॥ अथोपरिष्टान्नादस्यबिंदुरूपंपरात्परम् ॥ ८७ ॥ कारणंकारणानांचजगद्योनिंचतंपरम् ॥ विधिर्विलोकयांचक्रेतपसागोचरीकृतम् ॥ ८८ ॥ अवनादोमितिख्यातंसर्वस्यास्यप्रभावतः ॥ भक्तमुन्नयतेयस्मात्तदोमितियईरितः ॥ ८९ ॥ अरूपोपिसरूपाढ्यःसधात्रानेत्रगीकृतः ॥ तारयेद्यद्भवांभो धेःस्वजपासक्तमानसम् ॥ ततस्तारइतिख्यातोयस्तंब्रह्माव्यलोकयत् ॥ ९० ॥ प्रणूयतेयतःसर्वैःपरनिर्वाणकामुकैः ॥ सर्वेभ्योभ्यधिकस्तस्मात्प्रणवो यःप्रकीर्तितः ॥ ९१ ॥ स्वसेवितारंपुरुषंप्रणयेद्यःपरंपदम् ॥ अतस्तंप्रणवंशांतंप्रत्यक्षीकृतवान्विधिः ॥ ९२ ॥ त्रयीमयस्तुरीयोयस्तुर्यातीतोखिला त्मकः ॥ नादबिंदुस्वरूपोयःसप्रैक्षिद्विजगामिना ॥ ९३ ॥ प्रावर्तंतयतोवेदाःसांगाःसर्वस्ययोनयः ॥ सवेदादिःपद्मभुवापुरस्तादवलोकितः ॥ ९४ ॥ वृषभोयस्त्रिधाबद्धोरोरवीतिमहोमयः ॥ सनेत्रविषयीचक्रेपरमःपरमेष्ठिना ॥ ९५ ॥

शृंगाश्चत्वारियस्यासन्हस्तासःसप्तएवच ॥ द्वेशीर्षेचत्रयःपादाःसदेवोविधिनैक्षत ॥ ९६ ॥ यदंतर्लीनमखिलंभूतंभाविभवत्पुनः ॥ तद्बीजंबीजरहितंद्रु हिणेनविलोकितम् ॥ ९७ ॥ लीनंमृग्येतयत्रैतदाब्रह्मस्तंबभाजनम् ॥ अतःसभाज्यतेसद्भिर्यल्लिंगंतद्विलोकितम् ॥९८॥ पंचार्थायप्रभासंतेपंचब्रह्ममयं हियत् ॥ आदिपंचस्वरूपंयन्निरैक्षिब्रह्मणाहितत् ॥ ९९ ॥ तमालोक्यततोवेधालिंगरूपिणमीश्वरम् ॥ पंचाक्षरंप्रपंचाच्चभिन्नंतुष्टावशंकरम् ॥ १०० ॥ ब्रह्मोवाच ॥ ॥ नमओंकाररूपायनमोऽक्षरवपुर्धृते ॥ नमोऽकारादिवर्णानांप्रभवायसदाशिव ॥ १ ॥ अकारस्त्वमुकारस्त्वंमकारस्त्वमनाकृते ॥ ऋग्यजुःसामरूपायरूपातीतायतेनमः ॥ २ ॥ नमोनादात्मनेतुभ्यंनमोबिंदुकलात्मने ॥ अलिंगलिंगरूपायसर्वरूपस्वरूपिणे ॥ ३ ॥ नमस्तेधाम निधयेनिधनादिविवर्जित ॥ नमोभवायरुद्रायशर्वायचनमोस्तुते ॥ ४ ॥

नमउग्रायभीमायपशूनांपतयेनमः ॥ नमस्तारस्वरूपायसंभवायनमोस्तुते ॥ ५ ॥ अमायायनमस्तुभ्यंनमःशिवतरायते ॥ कपर्दिनेनमस्तुभ्यंशिति कंठनमोस्तुते ॥ ६ ॥ मीढुष्टमायगिरिशशिपिविष्टायतेनमः ॥ नमोऽह्रस्वायखर्वायबृहतेवृद्धरूपिणे ॥ ७ ॥ कुमारगुरवेतुभ्यंकुमारवपुषेनमः ॥ नमः श्वेतायकृष्णायपीतायारुणमूर्तये ॥ ८ ॥ धूम्रवर्णायपिंगायनमःकिर्मीरवर्चसे ॥ नमःपाटलवर्णायनमोहरिततेजसे ॥ ९ ॥ नानावर्णस्वरूपायवर्णा नांपतयेनमः ॥ नमस्तेस्वररूपायनमोव्यंजनरूपिणे ॥ ११० ॥ उदात्तायानुदात्तायस्वरितायनमोनमः ॥ ह्रस्वदीर्घप्लुतेशायसविसर्गायतेनमः ॥ ॥ ११ ॥ अनुस्वारस्वरूपायनमस्तेसानुनासिक ॥ नमोनिरनुनासायदंत्यतालव्यरूपिणे ॥ १२ ॥ ओष्ठ्योरस्यस्वरूपायनमऊष्मस्वरूपिणे ॥ अंतस्थायनमस्तुभ्यंपंचमायपिनाकिने ॥ १३ ॥ निषादायनमस्तुभ्यंनिषादपतयेनमः ॥ वीणावेणुमृदंगादिवाद्यरूपायतेनमः ॥ १४ ॥

नमस्तारायमंद्रायघोरायाघोरमूर्तये ॥ नमस्तानस्वरूपायमूर्च्छनापतयेनमः ॥ १५ ॥ स्थायिसंचारिभेदेननमोभावस्वरूपिणे ॥ तालप्रियायतालाय लास्यतांडवजन्मने ॥ १६ ॥ तौर्यत्रिकस्वरूपायतौर्यत्रिकमहाप्रिय ॥ तौर्यत्रिककृतांभक्त्यानिर्वाणश्रीप्रदायक ॥१७॥ स्थूलसूक्ष्मस्वरूपायदृश्यादृ श्यस्वरूपिणे ॥ अर्वाचीनायचनमःपराचीनायतेनमः ॥ १८ ॥ वाक्प्रपंचस्वरूपायवाक्प्रपंचपरायच ॥ एकायानेकभेदायसदसत्पतयेनमः ॥१९॥ शब्दब्रह्मनमस्तुभ्यंपरब्रह्मनमोस्तुते ॥ नमोवेदांतवेद्यायवेदानांपतयेनमः ॥ १२० ॥ नमोवेदस्वरूपायवेदगोचरमूर्तये ॥ पार्वतीशनमस्तुभ्यंजगदी शनमोस्तुते ॥ २१ ॥ नमस्तेदेवदेवेशदेवदिव्यपदप्रद ॥ शंकरायनमस्तुभ्यंनमस्तुभ्यंमहेश्वर ॥ २२ ॥ नमस्तेजगदानंदनमस्तेशशिशेखर ॥ मृत्युं जयनमस्तुभ्यंनमस्तेत्र्यंबकायच ॥ २३ ॥ नमःपिनाकहस्तायत्रिशूलायुधधारिणे ॥ नमस्त्रिपुरहंत्रेचनमोंधकनिषूदन ॥ २४ ॥ कंदर्पदर्पदलननमो जालंधरारये ॥ कालायकालकालायकालकूटविषादिने ॥ २५ ॥ विषादहंत्रेभक्तानामभक्तैकविषादद ॥ ज्ञानायज्ञानरूपायसर्वज्ञायनमोऽस्तुते ॥ ॥ २६ ॥ योगसिद्धिप्रदोसित्वंयोगिनांयोगसत्तम ॥ तपसांफलदोसित्वंतपस्विभ्यस्तपोधन ॥ २७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्वमेवमंत्ररूपोसिमंत्राणांफलदोभवान् ॥ महादानफलंत्वंवैमहादानप्रदोभवान् ॥ २८ ॥ महायज्ञस्त्वमेवेशमहायज्ञफलप्रद ॥ त्वंसर्वःसर्वगस्त्वंवैसर्वदः सर्वदृग्भवान् ॥ २९ ॥ सर्वभुक्सर्वकर्तात्वंसर्वसंहारकारक ॥ योगिनांहृदयाकाराकृतालयनमोस्तुते ॥ १३० ॥ त्वमेवविष्णुरूपेणशंखचक्रगदाधर ॥ त्रिलोकींशायसेत्रातःसत्त्वमूर्तेनमोस्तुते ॥ ३१ ॥ त्वमेवविदधास्येतद्विधिर्भूत्वाविधानवित् ॥ रजोरूपंसमालंब्यनीरजस्कपदप्रद ॥ ३२ ॥ त्वमेवहिं महारुद्रस्त्वंमहोग्रोभुजंगभृत् ॥ त्वमेवहिमहाग्नीमोमहापितृवनेचर ॥ ३३ ॥ तामसींतनुमाश्रित्यत्वंकृतांतकृतांतक ॥ कालाग्निरुद्रोभूत्वातित्वंसंवर्त प्रवर्तकः ॥ ३४ ॥ त्वंपुंप्रकृतिरूपाभ्यांमहदाद्यखिलंजगत् ॥ अक्षिपक्ष्मसमुत्क्षेपात्पुनराविःकरोष्यज ॥३५॥ उन्मेषविनिमेषौतेसर्गासर्गैककारणम् ॥ कपालमालाखेलोयंभवतःस्वैरचारिणः ॥ ३६ ॥ त्वत्कंठेनृकरोटीयंधूर्जटेयाविभासते ॥ सर्वेषामंतदग्धानांसास्फुटंबीजमालिका ॥ ३७ ॥ त्वत्तःसर्व मिदंशंभोत्वयिसर्वंचराचरम् ॥ कस्त्वांस्तोतुंविजानातिपुरावाचामगोचरम् ॥ ३८ ॥ स्तोतात्वंहिस्तुतिस्त्वंहिनित्यंस्तुत्यस्त्वमेवच ॥ वेद्योन्नमः शिवायेतिनान्यद्वेद्मयेवर्किचन ॥ ३९ ॥ त्वमेवहिशरण्यंमेत्वमेवहिगतिःपरा ॥ त्वामेवप्रणमामीशानमस्तुभ्यंनमोनमः ॥ १४० ॥ इत्युदीर्यासकृद्देव्याः प्रणनामभवेश्वरम् ॥ प्रणवास्त्यंमहालिंगरूपिणंदंडवत्स्थितौ ॥ ४१ ॥ ॥ ईश्वरउवाच ॥ ॥ ततोगिरींद्रतनयेश्रुत्वान्नह्मस्तुतिंपराम् ॥ परमैश्वर्यसंप त्तिहेतुंतुष्टोहमद्भुतम् ॥ ४२ ॥ अमूर्तोऽहंततोलिंगान्मूर्तिमास्थायशांकरीम् ॥ प्रसन्नोस्मिवरंब्रूहीत्युवाचचतुराननम् ॥ ४३ ॥ चतुर्वक्त्रःसमुत्थायप्रत्यक्षं वीक्ष्यमामथ ॥ पुनर्जयजयेत्युक्त्वाप्रणनामकृतांजलिः ॥ ४४ ॥ आनंदबाष्पसलिलनेत्रोद्भूतपुरुदः ॥ गद्गदेनस्वरेणाथमोवाचजलजासनः ॥ ४५ ॥ ब्रह्मोवाच ॥ ॥ यदिप्रसन्नोदेवेशयदिदेयोवरोमम ॥ तदेतस्मिन्महालिंगेसान्निध्यंतेऽस्तुशंकर ॥ ४६ ॥

अयमेववरोदेयोनान्यंवरमहंवृणे ॥ ओंकारेश्वरनामैतदस्तुभक्तैकमुक्तिदम् ॥ ४७ ॥ ॥ स्कंदउवाच ॥ ॥ विधुत्क्रमितिविप्रपेंसमाकर्ण्यतदेरिता ॥ उवाचवचनंचैतत्तथास्तुचतुराननम् ॥४८॥ वरानन्यानपिविभुःप्रसन्नस्तत्क्षणाद्ददौ॥विधयेदीर्घतपसेतयास्तुत्यातितोषितः ॥४९॥ ॥ ईश्वरउवाच ॥ सुरश्रेष्ठतपःश्रेष्ठसर्वाम्नायनिधिर्भव ॥ सृष्टेःकरणसामर्थ्यंतवास्तुमदनुग्रहात् ॥१५०॥ पितामहस्त्वंसर्वेषांसर्वेषांमान्यभूर्भवान् ॥ त्वत्तपःफलदानार्थंयदेत ल्लिंगमुत्थितम् ॥ ५१ ॥ परमोंकाररूपंचशब्दब्रह्ममयंविधे ॥ अस्याराधनतःपुंसांनदूरंब्रह्मणःपदम् ॥५२॥ अकाराख्यमिदंलिंगमुकाराख्यमिदंपर ॥ मकाराह्वयमेतच्चनादाख्यंविंदुसंज्ञकम् ॥ ५३ ॥ पंचायतनमीशानमित्थमेतदुदीरितम् ॥ मोक्षायसर्वजंतूनामस्मिन्नानंदकानने ॥ ५४ ॥ स्नात्वामत्स्यो दरीतीर्थेविलोक्योंकारमीश्वरम् ॥ नजातुजायतेजंतुर्जननीजठरेक्वचित् ॥ ५५ ॥ एतल्लादेश्वरंलिंगमेतल्लिंगंसुदुर्लभम् ॥ रम्येमत्स्योदरीतीरेदृष्ट्वास्पृष्ट्वाविमु क्तिदम् ॥ ५६ ॥ यदेतत्कापिलंज्योतिरेतल्लिंगेविलोक्यते ॥ अतस्तुकपिलेशाख्यमेतल्लिंगंसुदुर्लभम् ॥५७॥ मत्स्योदरीयदागंगाकपिलेश्वरसन्निधौ ॥ तदातत्रनरःस्नात्वाब्रह्महत्याव्यपोहति ॥ ५८ ॥ वरणोत्सिक्तपानीयेधुनदीतोयमिश्रिते ॥ स्नात्वानादेश्वरंदृष्ट्वानरःकिमनुशोचति ॥ ५९ ॥ अष्टम्यां चचतुर्दश्यांतीर्थानिसहसागरैः ॥ षष्टिकोटिसहस्राणिमत्स्योदर्यांविशंतिहि ॥१६०॥ प्रणवेशसमीपेतुयदागंगासमेष्यति ॥ तदापुण्यतमःकालोदेवर्षि पितृवल्लभः ॥ ६१ ॥ तत्रस्नानंजपोदानंहवनंदेवतार्चनम् ॥ मत्स्योदर्यामक्षयंस्यादोंकारेश्वरसन्निधौ ॥ ६२ ॥ ओंकारदर्शनादेववाजिमेधफलंलभेत् ॥ तस्मात्काश्यांप्रयत्नेनदृश्यओंकारईश्वरः ॥ ६३ ॥ दुर्लभंमानवंजन्मचतुर्वर्गैकसाधनम् ॥ जलबुद्बुदवत्तत्स्यान्नादेशोयेननेक्षितः ॥ ६४ ॥ निरीक्ष्यक पिलेशानंस्नात्वामत्स्योदरीजले ॥ कृत्वापिंडप्रदानानिपितॄणामनृणोभवेत् ॥ ६५ ॥ कृत्वापिमोहात्पापानिभूरीण्येवमहांत्यपि ॥ काश्यामोंकारमालो क्यकृतस्त्रस्यतिवैयमात् ॥ ६६ ॥ ओंकारयात्राभिमुखंनरंवीक्ष्यपितामहाः ॥ परिनृत्यंतिमुदिताःस्वसंतानसमुद्भवम् ॥ ६७ ॥ यस्ययस्यचवै नामस्मृत्वास्मृत्वानमस्यति ॥ तंतमुन्नयतेप्राज्ञःपितरंब्रह्मणःपदम् ॥ ६८ ॥ रुद्राणांनियुतंजप्त्वायत्फलंसम्यगाप्यते ॥ तत्फलंलभतेनूनंभक्त्यों कारविलोकनात् ॥ ६९ ॥

केवलंभूमिभारायजन्मिनोजन्मतस्यवै ॥ येनानंदवनेदृष्टोनोंकारःसर्वकामदः ॥ १७० ॥ एकमोंकारमालोक्यसमस्तेक्षोणिमंडले ॥ लिंगजातानिसर्वा णिदृष्टानिस्युर्नसंशयः ॥ ७१ ॥ प्रणवेशंप्रणम्याथयद्यन्यत्रविपद्यते ॥ स्वर्गलोकमवाप्याथकाश्यांमुक्तिमवाप्नुयात् ॥ ७२ ॥ अस्मिँल्लिंगेसदाब्रह्म न्त्यास्यामीतिविनिश्चितम् ॥ दास्यामिचसदामोक्षमेतल्लिंगार्चकायवै ॥ ७३ ॥ ओंकारंसकृदप्यत्रनरोनत्वाप्रयत्नतः ॥ कृतकृत्योभवेन्नूनंपरमान्मद नुग्रहात् ॥ ७४ ॥ ओंकारपश्चिमेभागेतारतीर्थमनुत्तमम् ॥ कृतोदकस्त्रियस्तत्रनरस्तरतिदुर्गतिम् ॥ ७५ ॥ ओंकारेशस्ययेभक्ताज्ञेयास्तेनैवमानवाः ॥ मनुष्यचर्मणानद्धास्तेरुद्रामोक्षगामिनः ॥ ७६ ॥ अस्यलिंगस्यमहिमानान्यैस्त्रावगम्यते ॥ त्वत्पुण्योदयतोयस्माद्विधेत्राविरभूदिदम् ॥ ७७ ॥ एतल्लिंगप्रभावाच्चसर्वज्ञास्यसितत्त्वतः ॥ विधेविधेहितस्मात्त्वंसर्वमेतच्चराचरम् ॥७८॥ इतिदत्त्वावरंतस्मैब्रह्मणेपद्मसंभुवे॥ तस्मिन्नेवमहालिंगेशंभुर्लीनो बभूवह ॥७९॥ ॥ स्कंदउवाच ॥ ॥ ब्रह्मापिभजतेद्यापितल्लिंगंकलशोद्भव ॥ स्तुवन्ब्रह्मस्तवेनैवस्वात्मनाविहितेनहि ॥१८०॥ ब्रह्मस्तवंजपन्मर्त्यः सर्वैःपापैःप्रमुच्यते ॥ पूर्यतेचमहापुण्यैर्ज्ञानंप्राप्नोतिसत्तमम् ॥ ८१ ॥ ब्रह्मस्तवमिमंजप्त्वात्रिकालंपरिवत्सरम् ॥ अंतकालेभवेज्ज्ञानंयेनबंधात्प्रमुच्यते ॥ ॥ १८२ ॥ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धओंकारमहिमवर्णननामत्रिसप्ततितमोऽध्यायः॥ ७३ ॥ ॥ स्कंदउवाच ॥ ॥शृणुवातापिसंहर्तःकाश्यांपातकर्तांकिनी ॥ पद्मकल्पेतुयावृत्तादमनस्यद्विजन्मनः ॥१॥ भारद्वाजस्यतनयोदमनोनामनामतः ॥ कृतमौंजीविधिःसोथविद्याजातंप्रगृह्यच ॥ २ ॥ संसारंदुःखबहुलंजीवितंचापिचंचलम् ॥ विज्ञायदमनोविद्वान्निर्जगामगृहान्निजात् ॥ ३ ॥ कांचिद्दिशं समालंब्यनिर्वेदंपरमंगतः ॥ प्रत्याश्रमंप्रतिनगंप्रत्यब्धिप्रतिकाननम् ॥ ४ ॥ प्रतितीर्थंप्रतिनदिसवभ्रामतपोयुतः ॥ यावंत्यायतनानीहतिष्ठंतिपरितो भुवम् ॥५॥ अभ्युवाससतावंतिसंयतेंद्रियमानसः ॥ परंनमनसःस्थैर्यंकापिप्रापिचतेनवै ॥ ६ ॥ मनोरथोपदेष्टाचकुत्रचित्कापिनेक्षितः ॥ कदाचिद्देवयो गात्सदमनोनामतापसः ॥७॥ रेवातटेनिरीक्षितीर्थंचामरकंटकम् ॥ महदायतनंपुण्यमोंकारस्यापितत्रवै ॥८॥ दृष्ट्वाहृष्टमनाआसीच्चेतःस्थैर्यमवापह ॥ अथपाशुपतांस्तत्रसन्निरीक्ष्यतपोधनान् ॥ ९ ॥

विभूतिभूषिंततनून्कृतलिंगसमर्चनान् ॥ विहितप्राणयात्रांश्चकृतागमविचारणान् ॥ १० ॥ स्वस्थोपविष्टान्स्वगुरोरग्रतोऽचलमानसान् ॥ प्रणम्योपा विशत्तत्रतदाचार्यस्यसन्निधौ ॥ ११ ॥ प्रबद्धहस्तयुगलःप्रणम्यत्तरकंधरः ॥ अथपाशुपताचार्योगर्गोनाममहामुनिः ॥ १२ ॥ वार्धकेनसमाक्रांतस्तप साकृशविग्रहः ॥ शंभोराराधनेनिष्ठःश्रेष्ठःसर्वतपस्विषु ॥१३॥ पप्रच्छदमनंचेतिकस्त्वंकस्मादिहागतः ॥ तरुणोपिविरक्तोसिकुतस्तद्वदसत्तम ॥१४॥ इतिप्रणयपूर्वंसनिशम्यदमनोऽब्रवीत् ॥ भगोःपाशुपताचार्यसर्वज्ञाराधनप्रिय ॥ १५ ॥ कथयामियथार्थंतेनिजचेतोविचेष्टितम् ॥ अहंब्राह्मणदायादो वेदशास्त्रकृतश्रमः ॥ १६ ॥ संसारासारतांज्ञात्वावानप्रस्थमशिश्रियम् ॥ अनेनैवशरीरेणमहासिद्धिमभीप्सता ॥१७॥ स्नातंत्रपुतीर्थेषुभंत्राजप्तास्तुकोटिशः ॥ देवताःसेविताबह्व्योहवनंचकृतंबहु ॥ १८ ॥ शुश्रूषिताश्चगुरवोवदनोद्यद्गनेहसम् ॥ महाश्मशानेपुनिशाभूयस्योप्यतिवाहिताः ॥ १९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शिखराणिगिरींद्राणांमयाचाध्युषितान्यहो ॥ दिव्यौषधिसहस्राणिमयासंसाधितान्यपि ॥२०॥ रसायनानिबहुशःसेवितानिमयापुनः ॥ महानादसमालंब्यसिद्धाध्युषितकंदराः ॥ २१ ॥ प्रयागविष्टाबहुशःकृतांतवदनोपमाः ॥ तपश्चापिमहत्तप्तंबहुभिर्नियमैर्यमैः ॥ २२ ॥ परंकिंचित्कचिन्नेशिसिद्धयं कुरमपिप्रभो ॥ इदानींत्वामनुप्राप्यमहींपर्यटतामया ॥ २३ ॥ मनसःस्थैर्यमापन्नमिवसंप्राप्तसिद्धिना ॥ अवश्यंत्वन्मुखांभोजाद्भवचोनिःसरिष्यति ॥ ॥ २४ ॥ तेनैवमहतीसिद्धिर्भवित्रीममनान्यथा ॥ तद्भूहिमूपदेशंचकथंसिद्धिर्भवेन्मम ॥ २५ ॥ अनेनैवशरीरेणपार्थिवेनप्रथीयसी ॥ दमनस्यनि शम्येतिगर्गाचार्योवचस्तदा ॥ २६ ॥ प्रत्यक्षदृष्टप्रोवाचमहदाश्चर्यमुत्तमम् ॥ सर्वेषांशृण्वतांतत्रशिष्याणांस्थिरचेतसाम् ॥ मुमुक्षूणांभूतवतांमहापाशुपतं व्रतम् ॥२७॥ ॥ गर्ग उवाच ॥ ॥ अनेनैवेहदेहेनयदित्वंसिद्धिकामुकः ॥ शृणुष्वावहितोभूत्वातदातेकथयाम्यहम् ॥२८॥ अविमुक्तेमहाक्षेत्रेसर्वसि द्धिप्रदेसताम् ॥ धर्मार्थकाममोक्षाख्यरत्नानांपरमाकरे ॥ २९ ॥

समाश्रितानांजंतूनांसर्वेषांसर्वकर्मणाम् ॥ शलभानांप्रदीपाभेतमःस्तोममहाद्रिपि ॥ ३० ॥ कर्मभूरुहदावाग्नौसंसाराब्ध्यौर्वशोचिषि ॥ निर्वाणलक्ष्मी क्षीराब्धौसुखसंकेतसद्मनि ॥ ३१ ॥ दीर्घनिद्राप्रसुप्तानांपरमोद्बोधदायिनि ॥ यातायातश्रमापन्नप्राणिमार्गमहीरुहि ॥ ३२ ॥ अनेकजन्मजनि तमहापापाद्रिवज्रिणि ॥ नामोच्चारकृतांपुंसांमहाश्रेयोविधायिनि ॥ ३३ ॥ विश्वेशितुःपरेधाम्निसीम्निस्वर्गापवर्गयोः ॥ स्वर्धुनीलोलकल्लोलनित्यक्षा लितभूतले ॥ ३४ ॥ एवंविधेमहाक्षेत्रेसर्वदुःखौघहारिणि ॥ प्रत्यक्षंममयद्वृत्तंतद्ब्रवीमिमहामते ॥ ३५ ॥ यत्रकालभयंनास्तियत्रनास्त्येनसोभयम् ॥ तत्क्षेत्रमद्रिमानंकःसम्यग्वर्णयितुंक्षमः ॥ ३६ ॥ तीर्थानियानिलोकेस्मिञ्जंतूनामघहान्यहो ॥ तानिसर्वाणिशुद्धचर्थंकाशीमायांतिनित्यशः ॥ ३७ ॥ अपिकाश्यांवसेद्यस्तुसर्वाशीसर्वविक्रयी ॥ सयांगतिंलभेन्मर्त्योयज्ञैर्दानैर्नसान्यतः ॥ ३८ ॥ रागबीजसमुद्भूतःसंसारविटपोमहान् ॥ दीर्घस्वाप कुठारेणच्छिन्नःकाश्यांनवर्धते ॥ ३९ ॥ सर्वेषामूपराणांतुकाशीपरमऊपरः ॥ वप्तुर्बीजमिदंतस्मिन्नुप्तंनैवप्ररोहति ॥ ४० ॥ स्मरिष्यंतीहयेकाशी मवस्थंतेपिसाश्रवः ॥ तेप्यधौघविनिर्मुक्तायास्यंतिगतिमुत्तमाम् ॥ ४१ ॥ विभूतिःसर्वलोकानांसत्यादीनांसुभंगुरा ॥ अभंगुराविमुक्तस्यसातुलभ्या शिवाज्ञया ॥ ४२ ॥ कृमिकीटपतंगानामविमुक्तेतनुत्यजाम् ॥ विभूतिर्दृश्यतेयासाब्रह्मास्तिन्नब्रह्मांडमंडले ॥४३ ॥ वाराणसीयदाप्राप्ताकदाचित्कालपर्य यात् ॥ सउपायोविधातव्योयेननोनिष्कमोव्रहिः ॥ ४४ ॥ पूर्वतोमणिकर्णीशोव्रह्मेशोदक्षिणेस्थितः ॥ पश्चिमेचेवगोकर्णोभारभूतस्तथोत्तरे ॥४५॥

इत्येतदुत्तमंक्षेत्रमविमुक्तेमहाफलम् ॥ मणिकर्णीह्रदेस्नात्वादृष्ट्वाविश्वेश्वरंविभुम् ॥४६॥ क्षेत्रंप्रदक्षिणीकृत्यराजसूयफलंलभेत् ॥ तत्रश्राद्धप्रदातुश्चमुच्यं तेप्रपितामहाः ॥ ४७ ॥ अविमुक्तसमंक्षेत्रमपित्रह्मांडगोलके ॥ नविद्यतेकचित्सत्यंसत्यंसाधकसिद्धिदम् ॥४८॥ रक्षंतिसततंक्षेत्रंयत्रपाशासिपाणयः ॥ महापारिषदाउग्राःक्रूरेभ्योऽक्रूरबुद्धयः ॥ ४९ ॥ प्राग्द्वारमट्टहासश्चगणकोटिपरीवृतः ॥ रक्षेद्दहर्निशंक्षेत्रंदुर्वृत्तेभ्योविभीषणः ॥ ५० ॥ तथैवभूतधात्री शःक्षेत्रदक्षिणरक्षकः ॥ गोकर्णःपश्चिमद्वारंपातिकोटिगणावृतः ॥ ५१ ॥ उदग्द्वारंतथारक्षेद्घंटाकर्णोमहागणः ॥ ऐशंकोणंछागवक्त्रोभीषणोवह्निदि ग्दलम् ॥५२॥ रक्षःकाष्ठांशंकुकर्णोदमिचंडोमरुद्दिशम् ॥ इत्थंक्षेत्रंसदापांतिगणाएतेऽतिभास्वराः ॥५३॥ कालाक्षोरणभद्रस्तुकौलेयःकालकंपनः ॥ एतेपूर्वेणरक्षंतिगंगापारेस्थितागणाः ॥ ५४ ॥ वीरभद्रोनमश्चैवकर्दमालिप्तविग्रहः ॥ स्थूलकर्णोमहावाहुरसिपारेव्यवस्थिताः ॥ ५५ ॥ विशालाक्षो महाभीमःकुंडोदरमहोदरौ ॥ रक्षंतिपश्चिमद्वारंदेहलीदेशसंस्थिताः ॥५६॥ नंदिसेनश्चपंचालःखरपादःकरंटकः ॥ आनंदोगोपकोवभ्रूरक्षंतिवरणांतटे ॥ ॥ ५७ ॥ तस्मिन्क्षेत्रेमहापुण्येलिंगमोंकारसंज्ञकम् ॥ तत्रसिद्धिंपरांप्राप्तादेहेनानेनसाधकाः ॥ ५८ ॥ कपिलश्चैवसावर्णिःश्रीकंठःपिंगलोंशुमान् ॥ एतेपाशुपताःसिद्धास्तल्लिंगाराधनेनहि ॥ ५९ ॥ एकदातस्यलिंगस्यकृत्वापंचापिपूजनम् ॥ नृत्यंतःसहुडुत्कारंतस्मिँल्लिंगेलयंययुः ॥ ६० ॥ अन्यच्चतंप्रवक्ष्यामितत्रयद्वृत्तमद्भुतम् ॥ निशामयमहाबुद्धेदमनद्विजसत्तम ॥ ६१ ॥ एकामेकीमुनेतत्रचरंतीलिंगसन्निधौ ॥ प्रदक्षिणंसदाकुर्याद्विर्मा ल्याक्षतभक्षिणी ॥ ६२ ॥ सातत्रमृत्युंनाप्नोपशिवनिर्माल्यभक्षणात् ॥ क्षेत्रादन्यत्रमरणंजातंतस्यास्तदेनसः ॥ ६३ ॥ वरंविषमपिप्राश्यंशिवस्वंनै वभक्षयेत् ॥ त्रिपमेकाकिनंहंतिशिवस्वंपुत्रपौत्रकम् ॥ ६४॥ शिवस्वपरिपुष्टांगाःस्पर्शनीयानसाधुभिः ॥ तेनकर्मविपाकेनततस्तेरौरवोकसः ॥६५॥ कश्चित्काकःसमालोक्यमंडकींतामितस्ततः ॥ पोप्लूयमानामादायचंच्वाक्षेत्राद्बहिर्गतः ॥ ६६ ॥

वर्षाभ्रीतेनसाक्षिप्ताकाकेनक्षेत्रबाह्यतः ॥ अथसाकालतोभेकीतत्रैवक्षेत्रसत्तमे ॥ ६७ ॥ प्रदक्षिणीकरणतोलिंगस्यस्पर्शनादपि ॥ पुण्यापुण्यवतीजाता कन्यापुष्पवटोर्गृहे ॥ ६८ ॥ शुभावयवसंस्थानाशुभलक्षणलक्षिता ॥ परंगृध्रमुखीजातानिर्माल्याक्षतभक्षणात् ॥ ६९ ॥ सम्यग्गीतरहस्यज्ञानितरां मधुरस्वरा ॥ सप्तस्वरास्त्रयोग्रामामूर्च्छनास्त्वेकविंशतिः ॥७०॥ तानाएकोनपंचाशत्तालाएकोत्तरंशतम् ॥ रागाःषडेवतेपांतुपंचपंचापिचांगनाः॥७१॥

षड्रिशद्रागरागिण्यइतिरागिमुदावहाः ॥ देशकालविभेदेनपंचपष्टिस्तथापराः ॥ ७२ ॥ यावंतएवतालाःस्यूरागास्तावंतएवहि ॥ इतिगीतोपनिषदाप्रत्य हंसाशुभव्रता ॥ ७३ ॥ माधवीमधुरालापासदोंकारंसमर्चयेत् ॥ प्राप्याप्यनर्घ्यतारुण्यंसातुपुष्पवटोःसुता ॥ ७४ ॥ प्राग्जन्मवासनायोगादोंकारंवह्नमं स्तवै ॥ स्वभावचंचलंचेतस्तस्यास्तल्लिंगसेवनात् ॥ ७५ ॥ दमनस्थैर्यमगमद्योगेनेवमहात्मनः ॥ नदिवाबाधयांचक्रेक्षुत्तृष्णिद्राक्षपासुताम् ।. ७६ ॥ अतंद्रितमनाआसीत्सातल्लिंगनिरीक्षणे ॥ अक्ष्णोर्निमेपायावंतस्तस्याआसन्दिवानिशम् ॥ ७७ ॥ तावत्कालस्तयासाध्यानहान्निम्रोऽनुमीयते ॥ निमेषांतरितःकालोयोयोव्यर्थोगतोमम ॥ लिंगानवेक्षणात्तत्रप्रायश्चित्तंकथंभवेत् ॥ ७८ ॥ इतिसंचिंतयंत्येवसेवांतत्याजनोकृतेः ॥ जलाभिला पिणीसातुलिंगनामामृतंपिबेत् ॥ ७९ ॥ नान्यद्दिदृक्षिणीतस्याअक्षिणीश्रुतिगेअपि ॥ विहायलिंगमोंकारंद्विहायःस्थितंसताम् ॥ ८० ॥ तस्याः शब्दग्रहोनान्यशब्दग्रहणतत्परौ ॥ अतीवनिपुणौजातौतत्सन्माल्यकरौकरौ ॥ ८१ ॥ नान्यत्रचरणौतस्याश्चरतःसुखवांछया ॥ त्यक्त्वोंकाराजिरक्षो णींक्षुण्णांनिर्वाणपद्मया ॥ ८२ ॥ ओंकारंप्रणवंसारंपरंब्रह्मप्रकाशकम् ॥ शब्दब्रह्मत्रयीरूपंनादविंदुकलालयम् ॥ ८३ ॥ सदक्षरंचादिरूपंविश्वरूपं परावरम् ॥ वरंवरेण्यंवरदंशाश्वतंशांतमीश्वरम् ॥ ८४ ॥

सर्वलोकैकजनकंसर्वलोकैकरक्षकम् ॥ सर्वलोकैकसंहर्तृसर्वलोकैकवंदितम् ॥ ८५ ॥ आद्यंतरहितंनित्यंशिवंशंकरमव्ययम् ॥ एकंत्रिगुणत्रयातीतं भक्तस्यांतकृतास्पदम् ॥ ८६ ॥ निरुपाधिंनिराकारंनिर्विकारंनिरंजनम् ॥ निर्मलंनिरहंकारंनिष्प्रपंचंनिजोदयम् ॥ ८७ ॥ स्वात्मारामममनंतंत्रसर्व गंसर्वदर्शिनम् ॥ सर्वदंसर्वभोक्तारंसर्वंसर्वसुखास्पदम् ॥८८॥ वाग्विद्रियंतदीयंचप्रोच्चरत्तदहर्निशम् ॥ नामांतरंनगृह्णातिकिंचिदन्यस्यकस्यचित्॥८९॥ एतन्नामाक्षररसंरसयंतीदिवानिशम् ॥ रसनानैवजानातितस्याअन्यद्रसांतरम् ॥ ९० ॥ संमार्जनंरंगमालाःप्रासादंपरितःसदा ॥ विदध्यान्माधवीतत्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

थार्चापात्रशोधनम् ॥ ९१ ॥ तत्रपाशुपतायैवैप्रणवेशार्चनेरताः ॥ तांश्चशुश्रूषयेन्नित्यंपितृबुद्ध्यातिभक्तितः ॥ ९२ ॥ वैशाखस्यचतुर्दश्यामेकदासातु माधवी ॥ रात्रौजागरणंकृत्वादिवोपवसनान्विता ॥ ९३ ॥ यात्रामिलितभक्तेषुप्रातर्यातेषुसर्वतः ॥ संमार्जनादिकंकृत्वालिंगमभ्यर्च्यहर्षतः ॥ ९४ ॥ गायंतीम[illegible]गीतंनृत्यंतीनिजलीलया॥ध्यायंतीलिंगमोंकारंतत्रलिंगेलयंययौ ॥ ९५ ॥ अनेनैवशरीरेणपार्थिवेनमहामतिः ॥ अस्मदाचार्यमुख्यानां पश्यतांचतपस्विनाम् ॥ ९६ ॥ प्रादुर्बभूवयल्लिंगाज्योतिर्जटिलितांबरम् ॥ तत्रज्योतिषिसाबालाज्योतिर्मय्यपिसाप्यभूत् ॥ ९७ ॥ राधशुक्लचतुर्दश्यामद्यापिक्षेत्रवासिनः ॥ तत्रयात्रांप्रकुर्वंतिमहोत्सवपुरःसराः ॥ ९८ ॥ तत्रजागरणंकृत्वाचतुर्दश्यामुपोषिताः ॥ प्राप्नुवंतिपरंज्ञानंयत्रकुत्रापिवै मृताः ॥ ९९ ॥ ब्रह्मांडोदरमध्येतुयानितीर्थानिसर्वतः ॥ तानिवैशाखभूतायामायांत्योंकृतिदर्शने ॥१००॥ लिंगाग्रेश्रीमुखीनाम्नीगुहास्तिपरमोत्तमा ॥ पातालस्यचतद्द्वारंतत्रसिद्धावसंतिहि ॥ १ ॥ तिष्ठंतुःपंचरात्रंयेगुहायांतत्रसुव्रताः ॥ तेनागकन्याःपश्यंतिब्रूयुस्ताश्चशुभाशुभम् ॥ २ ॥ कंदरोत्तरदिग्भागेतत्रकूपोरसोदकः ॥ आषण्मासंचतत्पीत्वापिबेद्ब्रह्मरसायनम् ॥ ३ ॥ तत्रनादेश्वरंलिंगंदृष्ट्वानादनिदानभूः ॥ सर्वनादात्मकंविश्वंतच्छ्रवोगोचरी भवेत् ॥ ४ ॥ तत्रमत्स्योदरींस्नात्वास्वर्धुनींवरुणाप्लुताम् ॥ कृतकृत्योभवेज्जंतुर्नैवशोचतिकुत्रचित् ॥ ५ ॥

असंख्यातागताःसिद्धिमोंकारेश्वरसेवकाः ॥ पार्थिवेनैवदेहेनदिव्यभूतेनतत्क्षणात् ॥ ६ ॥ अविमुक्तंपरंक्षेत्रंब्रह्मांडादपिसर्वतः ॥ ततोपिपरओंकारउक्तोमत्स्योदरीतटे ॥ ७ ॥ प्रणवेशोंऽगयैःकाश्यांननतोनापिचार्चितः ॥ किमर्थंतेसमुत्पन्नामातृतारुण्यहारिणः ॥ ८ ॥ यदाप्रभृतिविश्वेशोमंदरादागतोऽभवत् ॥ तस्मिन्नानंदगहनेतदाप्रभृतिसत्तम ॥ ९ ॥ सर्वाण्यायतनान्याशुसाध्वीनिसगिरीण्यपि ॥ सनदीनिसतीर्थानिसद्वीपानिययुस्ततः ॥ ॥ ११० ॥ इदानींममभाग्येनस्मारितोहंत्वयामुने ॥ अहमप्यागमिष्यामियामःकाशींशनैःशनैः ॥ ११ ॥ एतेपिममशिष्यायेमहापाशुपतव्रताः ॥ काशींयियासवस्तेपियतःसर्वेमुमुक्षवः ॥ १२ ॥ अपिवार्धकमासाद्ययैःकाशीनैवशीलिता ॥ मानुषेदुर्लभेनष्टेकुतस्तेषांमहासुखम् ॥ १३ ॥ यावन्नेंद्रियवैकल्यंयावन्नैवायुषःक्षयः ॥ तावत्सेव्यंप्रयत्नेनशंभोरानंदकाननम् ॥ १४ ॥ यआनंदवनंशंभोःशिश्रियुःश्रीनिकेतनम् ॥ अचलाश्रीर्नमुंचेत्तान्महासौख्यैकशेवधीन् ॥ १५ ॥ इत्याख्यायकथांरम्यांगर्गःपाशुपतोत्तमः ॥ भारद्वाजेनसहितःप्रापवाराणसींपुरीम् ॥ १६ ॥ दमनोपिहिधर्मात्मागर्गाचार्येणसंयुतः ॥ आराध्यश्रीमदोंकारंतस्मिँल्लिंगेलयंगतः ॥ १७ ॥ ॥ स्कंदउवाच ॥ ॥ इल्वलारेपरंस्थानमोंकारमविमुक्तके ॥ तत्रसिद्धिंपरांजग्मुःसाधकाबहुशोमुने ॥ १८ ॥ कलौकलुषचित्तानांपुरोनाख्येयमेवहि ॥ प्रणवेश्वरमाहात्म्यंनास्तिकानांविशेषतः ॥ १९ ॥ येनिंदंतिमहादेवंक्षेत्रंनिंदंतियेऽधियः ॥ पुराणंयेचनिंदंतितेसंभाष्यानकुत्रचित् ॥ १२० ॥ ओंकारसदृशंलिंगंनक्वचिज्जगतीतले ॥ इतिगौर्यैसामाख्यातंदेवदेवेननिश्चितम् ॥ १२१ ॥ इममध्यायमाकर्ण्यनरस्तद्गतमानसः ॥ विमुक्तःसर्वपापेभ्यःशिवलोकमवाप्नुयात् ॥ १२२ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धओंकारमाहात्म्यंनामचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ छ ॥ ॥ अगस्त्यउवाच ॥ ॥ श्रुत्वोंकारकथामेतांमहापातकनाशिनीम् ॥ नतृप्तोस्मिविशाखाथब्रूहित्रैविष्टपंकिंथाम् ॥ १ ॥

कथंचकथितादेव्यैदेवदेवेनषण्मुख० ॥ आविर्भूतिर्महाबुद्धेपुण्यात्रैलोचनीपरा ॥ २ ॥ स्कंदउवाच ॥ ॥ आकर्णयमुनेवच्मिकथांश्रमनिवारिणीम् ॥ यथादेवेनकथितांत्रिविष्टपसमुद्भवाम् ॥ ३ ॥ विरजाख्यंहितत्पीठंतत्रलिंगंत्रिविष्टपम् ॥ तत्पीठदर्शनादेवविरजाजायतेनरः ॥ ४ ॥ तिस्रस्तुसंगतास्तत्रस्रोतस्विन्योघटोद्भव ॥ तिस्रःकल्मषहारिण्योदक्षिणेहित्रिलोचनात् ॥ ५ ॥ स्रोतोमूर्तिधराःसाक्षाल्लिंगंस्नपनहेतवे ॥ सरस्वत्यथकालिंदीनर्मदाचातिशर्मदा ॥ ६ ॥ तिस्रोपिहित्रिसंध्यंताःसरितःकुंभपाणयः ॥ स्नपयतिमहाधामलिंगंत्रैविष्टपंमहत् ॥ ७ ॥ लिंगानिपरितस्ताभिःस्वनाम्नास्थापितान्यपि ॥ तेषांसंदर्शनात्पुंसांतासांस्नानफलंभवेत् ॥ ८ ॥ सरस्वतीश्वरंलिंगंदक्षिणेनत्रिविष्टपात् ॥ सारस्वतंपदंदद्याद्दृष्टंस्पृष्टंचजाड्यहृत् ॥ ९ ॥ यमुनेशंप्रतीच्यांचनरैर्भक्त्यासमर्चितम् ॥ अपिकिल्बिषवद्भिश्चयमलोकनिवारणम् ॥ १० ॥ दृष्टंत्रिलोचनात्प्राच्यांनर्मदेशंसुशर्मदम् ॥ तल्लिंगार्चनतोनृणांगर्भवासोनिषिध्यते ॥ ११ ॥ स्नात्वापिलिपिलातीर्थेत्रिविष्टपसमीपतः ॥ दृष्ट्वात्रिलोचनंलिंगंकिंभूयःपरिशोचति ॥ १२ ॥ त्रिविष्टपस्यलिंगस्यस्मरणादपिमानवः ॥ त्रिविष्टपपतिर्भूयान्नात्रकार्याविचारणा ॥ १३ ॥ त्रिविष्टपस्यद्रष्टारःस्रष्टारःस्युर्नसंशयः ॥ कृतकृत्यास्तएवात्रतएवात्रमहाधियः ॥ १४ ॥ आनंदकाननेलिंगंप्रणतंयैस्त्रिविष्टपम् ॥ त्रिलोचनस्यनामापियैःश्रुतंशुद्धबुद्धिभिः ॥ १५ ॥ सप्तजन्मार्जितात्पापात्तेपूतानात्रसंशयः ॥ पृथिव्यांयानिलिंगानितेषुदृष्टेषुयत्फलम् ॥ १६ ॥ तत्स्यात्त्रिविष्टपेदृष्टेकाश्यांमन्येततोधिकम् ॥ काश्यांत्रिविष्टपेदृष्टेदृष्टंसर्वंत्रिविष्टपम् ॥ १७ ॥ क्षणान्निर्धूतपापोसौनपुनर्गर्भभाग्भवेत् ॥ सस्नातःसर्वतीर्थेषुसर्वावभृथवान्सच ॥ १८ ॥ योवैपिलिपिलातीर्थेस्नात्वोत्तरवहांभसि ॥ सरित्त्रयंमहापुण्यंयत्रसाक्षाद्वसेत्सदा ॥ १९ ॥ तत्रश्राद्धादिकंकृत्वागयायांकिंकरिष्यति ॥ स्नात्वापिलिपिलातीर्थेकृत्वावैपिंडपातनम् ॥ २० ॥ दृष्ट्वात्रिविष्टपंलिंगंकोटितीर्थफलंलभेत् ॥ यदन्यत्रार्जितंपापंतत्काशीदर्शनाद्व्रजेत् ॥ २१ ॥ काश्यांतुयत्कृतंपापंतत्पैशाचपदप्रदम् ॥ प्रमादात्पातकंकृत्वाशंभोरानंदकानने ॥ २२ ॥ दृष्ट्वात्रिविष्टपंलिंगंतत्पापमपिहास्यति ॥ सर्वस्मिन्नपिभूपृष्ठेश्रेष्ठमानंदकाननम् ॥ २३ ॥ तत्रापिसर्वतीर्थानिततोप्योंकारभूमिका ॥ ओंकारादपिसल्लिंगान्मोक्षवर्त्मप्रकाशकात् ॥ २४ ॥ अतिश्रेष्ठतरंलिंगंश्रेयोरूपंत्रिलोचनम् ॥ २५ ॥ तेजस्विषुयथाभानुर्दृश्येषुचयथाशशी ॥ तथालिंगेषुसर्वेषुपरंलिंगंत्रिलोचनम् ॥ २६ ॥ त्रिलोचनार्चकानांसापदवीनदवीयसी ॥ परंनिर्वाणपद्मायामहासौख्यैकशेवधेः ॥ २७ ॥

सकृत्त्रिलोचनार्चातोयच्छ्रेयःसमुपार्ज्यते ॥ नतदाजन्मसंपूज्यलिंगान्यन्यानिलभ्यते ॥२८॥ काश्यांत्रिलोचनंलिंगंयेर्चयंतिमहाधियः ॥ तेर्च्यास्त्रिभुवनौकोभिर्ममप्रीतिमभीप्सुभिः ॥ २९ ॥ कृत्वापिसर्वसंन्यासंकृत्वापाशुपतव्रतम् ॥ नियमेभ्यःस्खलित्वापिकुतोबिभ्यतिमानवाः ॥ ३० ॥ विद्यमानेमहालिंगेमहापापौघहारिणि॥त्रिविष्टपेपुण्यराशौमोक्षनिक्षेपसद्मनि ॥३१॥ समभ्यर्च्यमहालिंगंसकृदेवत्रिलोचनम् ॥ मुच्यतेकलुषैःसर्वैरपिजन्मशतार्जितैः ॥ ३२ ॥ ब्रह्महापिसुरापोवास्तेयीवागुरुतल्पगः ॥ तत्संयोग्यपिवावर्षंमहापापीप्रकीर्तितः ॥ ३३ ॥ परदाररतश्चापिपरहिंसारतोपिवा ॥ परापवादशीलोपितथाविस्रंभघातकः ॥ ३४ ॥ कृतघ्नोपिभ्रूणहापिवृषलीपतिरेववा ॥ मातापितृगुरुत्यागीवह्निदोगरदोपिवा ॥ ३५ ॥ गोघ्नःस्त्रीघ्नोपिशूद्रघ्नःकन्यादूषयितापिच ॥ क्रूरोवापिशुनोवापिनिजधर्मपराङ्मुखः ॥ ३६ ॥ निंदकोनास्तिकोवापिकूटसाक्ष्यप्रवादकः ॥ अभक्ष्यभक्षकोवापितथाऽविक्रेयविक्रयी ॥ ३७ ॥ इत्यादिपापशीलोपिमुक्त्वैकंशिवनिंदकम् ॥ पापान्निष्कृतिमाप्नोतिनत्वालिंगंत्रिलोचनम् ॥ ३८ ॥ शिवनिंदारतोमूढःशिवशास्त्रविनिंदकः ॥ तस्यनीनिष्कृतिर्दृष्टाक्वापिशास्त्रेपिकेनचित् ॥ ३९ ॥ आत्मघातीसविज्ञेयःसदात्रैलोक्यघातकः ॥ शिवनिंदांविधत्तेयःसनाभाष्योऽधमाधमः ॥ ४० ॥ शिवनिंदारतायेचशिवभक्तजनेष्वपि ॥ तेयांतिनरकेघोरेयावच्चंद्रदिवाकरौ ॥ ४१ ॥ शैवाःपूज्याःप्रयत्नेनकाश्यांमोक्षमभीप्सुभिः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तेष्वर्चितेष्वपिशिवःप्रीतोभवत्यसंशयः ॥ ४२ ॥ सर्वेषामिहपापानामायश्चित्तचिकीर्षया ॥ निःशंकेरुक्तव्यंप्रमाणहोरिदंवचः ॥ ४३ ॥ पुरश्चरणकामश्चेद्भीतोसियदिपापतः ॥ मन्यसेयदिनःसत्यंवाक्यंशास्त्रप्रमाणतः ॥ ४४ ॥ ततःसर्वपरित्यज्यकृत्वामनसिनिश्चयम् ॥ आनंदकाननंयाहि यत्रविश्वेश्वरःस्वयम् ॥ ४५ ॥ यत्रक्षेत्रेप्रविष्टानांनराणांनिश्चितात्मनाम् ॥ नश्यतेऽघनिचयःप्राप्येतत्पदमव्ययम् ॥ ४६ ॥ तत्राद्यापिमहातीर्थेत्रिस्रोतस्यतिनिर्मले ॥ पुण्येपिंडिलिपिलानामिभिःसरित्परिसेविते ॥ ४७ ॥ त्रिलोचनाक्षिविक्षेपपरिपूतमहेक्षणे ॥ स्नात्वाशुद्धोक्तविधिनातर्पणीयान्प्रतर्प्यच ॥ ४८ ॥ दत्त्वादेयंयथाशक्तिवित्तशाठ्यविवर्जितः ॥ दृष्ट्वात्रिविष्टपंलिंगंसमभ्यर्च्यातिमुक्तितः ॥ ४९ ॥

गंधाद्यैर्विविधैर्माल्यैःपंचामृतपुरःसरैः ॥ धूपैर्दीपैःसनैवेद्यैर्वासोभिर्बहुभूषणैः ॥ ५० ॥ पूजोपकरणैर्द्रव्यैर्घंटादर्पणचामरैः ॥ विभव्यजनताकाभिर्भक्त्यावाद्यमुखायनैः ॥ ५१ ॥ जयैःप्रदक्षिणाभिश्चनमस्कारैःसुदाद्भुतैः ॥ परिचारकसंतोषैःकृत्वेतियःपरिपूजनम् ॥ ५२ ॥ ब्राह्मणान्वाचयेत्पश्चान्निष्पापोद्भवितिद्युवत् ॥ एवंकुर्वन्नरःप्राज्ञोनिरयंनाजायतेक्वणात् ॥ ५३ ॥ ततःपंचनदेस्नात्वामणिकर्णीह्रदेततः ॥ ततोविश्वेशमभ्यर्च्यमायातिमुक्तिमुत्तमम् ॥ ५४ ॥ सायश्चित्तमिदंप्रोक्तंमहापापविशोधनम् ॥ नास्तिकेनप्रवक्तव्यंकाशीमाहात्म्यनिंदके ॥ ५५ ॥ यदब्रह्मब्रुवलोकेनसायश्चित्तमिदंस्मृतम् ॥ दातानरकमाप्नोतिसत्यंसत्यंघटोद्भव ॥ ५६ ॥ क्षमाप्रदक्षिणीकृत्ययत्फलंसमवाप्यते ॥ मदोपेतफलंकाश्यांसप्तकृत्वश्चिलोचने ॥ ५७ ॥ भुजंगमेखलंलिंगंकाश्यांदृष्ट्वात्रिविष्टपम् ॥ जन्मांतरेपिमुक्तःस्यादन्यत्रमरणेसति ॥ ५८ ॥ वक्तव्यसर्वलिंगेषुपुण्यकालोविशिष्यते ॥ त्रिविष्टपेपुण्यकालःसदाराजन्दिवं नृणाम् ॥ ५९ ॥ लिंगान्योंकारमुख्यानिसर्वपापप्रकृंत्यलम् ॥ परंत्रैलोचनीशक्तिःकाचिदन्येवपार्वति ॥ ६० ॥ यतःसर्वेषुलिंगेषुलिंगमेतदनुत्तमम् ॥ तत्कारणंशृण्वपर्णेकर्णेकुरुवदाम्यहम् ॥ ६१ ॥ पुरामेयोगयुक्तस्यलिंगमेतद्भवत्तलात् ॥ उद्भिद्यसप्तपातालंनिरगातपुरतोमहत् ॥ ६२ ॥ अस्मिँल्लिंगे पुरागौरिसुखमासीत्तिष्ठतामथ ॥ तुभ्यंनेत्रत्रयंदत्तंगिरिशास्तत्थोत्तमम् ॥ ६३ ॥ तदाश्रुतिर्देवेशिलिंगमेतत्त्रिलोचनम् ॥ त्रिविष्टपंत्रितयांतःस्थैर्गीयते ज्ञानदृष्टिदम् ॥ ६४ ॥ त्रिलोचनस्ययेभक्तास्तेपित्रैर्वैत्रिलोचनाः ॥ अमपारिषदात्तेहुजीवन्मुक्तास्तएवहि ॥ ६५ ॥ त्रिलोचनस्यलिंगस्यमहिमानं नकश्चन ॥ सम्यग्वेत्तिमहेशानिसयेवपरिगोपितम् ॥६६॥ शुक्लराधतृतीयायांस्नात्वापैलिपिलेह्रदे ॥ उपोषणपरामक्त्यारात्रौजागरणान्विताः ॥६७॥ त्रिलोचनंपूजयित्वाप्रातःस्नात्वापितत्रवै ॥ पुनर्लिंगंसमभ्यर्च्यदत्त्वाधर्मघटानपि ॥ ६८ ॥ सान्नान्नदक्षिणान्देविपितृनुद्दिश्यदर्पिताः ॥ विधायपारणं पश्चाच्छिवभक्तजनैःसह ॥ ६९ ॥ विमृज्यपार्थिवंदेहंतेनपुण्येननोदिताः ॥ भवंतिदेवित्रितयंतंगणाममपुरोगमाः ॥ ७० ॥ तावद्भ्रमंतिसंसारेदेवामर्त्या महोरगाः ॥ गौरीयावन्नपश्यंतिकाश्यांलिंगंत्रिलोचनम् ॥७१॥ सकृत्त्रिविष्टपंह्रदस्नात्वापैलिपिलेह्रदे ॥ नजातुःमातुस्तनपोजायतेजंतुरत्रहि ॥७२॥

प्रतिमासंसदाएभ्यांचतुर्दश्यांचभामिनि ॥ आयांतिसर्वतीर्थानिह्रदंदेवंत्रिविष्टपम् ॥७३॥ त्रिविष्टपाद्दक्षिणतःस्नातःपैलिपिलेऽभसि॥तत्रसंध्यामुपास्येकाराजसूयफलंलभेत् ॥ ७४ ॥ पादोदकाख्यस्तत्रैवकूपःपापविनाशकः ॥ प्राश्यतस्योदकंमर्त्योनमर्त्योजायतेपुनः ॥ ७५ ॥ तस्यलिंगस्यपार्श्वेतुसंतिलिंगान्यनेकशः ॥ कैवल्यदानितान्यत्रदर्शनात्स्पर्शनादपि ॥७६॥ तत्रशांतनवंलिंगंगंगातीरेप्रतिष्ठितम् ॥ तद्दृष्ट्वाशांतिमाप्नोतिनरःसंसारतापितः॥७७॥ तद्दक्षिणेमहालिंगमुनेर्भीष्मेशसंज्ञितम् ॥ कलिःकालश्चकामश्चनाधतेनतदीक्षणात् ॥ ७८ ॥ तत्प्रतीच्यांमहालिंगंद्रोणेशइतिकीर्तितम् ॥ यल्लिंगपूजनाद्द्रोणोज्योतीरूपंपुनर्दधौ ॥ ७९ ॥ अश्वत्थामेश्वरंलिंगंतदग्रेचातिपुण्यदम् ॥ यदर्चनवशाद्द्रौणिर्नविभेत्यपिकालतः ॥ ८० ॥ द्रोणेशाद्वायुदिग्भागेबालखिल्येश्वरंपरम् ॥ तल्लिंगंश्रद्धयादृष्ट्वासर्वक्रतुफलंलभेत् ॥ ८१ ॥ तद्वामेलिंगमालोक्यवाल्मीकेश्वरसंज्ञितम् ॥ तस्यसंदर्शनादेवविशोकोजायते नरः ॥ ८२ ॥ अन्यच्चात्रैवयदृत्तंतद्वक्ष्येमिघटोद्भव ॥ त्रिविष्टपस्यमाहात्म्यंदेव्यैदेवेनभाषितम् ॥ ८३ ॥ ॥ इतिश्रीस्कंदेमहापुराणएककाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ स्कंदउवाच ॥ ॥ शृणुष्वमैत्रावरुणेपुराकल्पेरथंतरे ॥ इतिहासइहासीद्यःपीठेविरजसंज्ञिते ॥ १ ॥ त्रिलोचनस्यप्रासादेमणिमाणिक्यनिर्मिते ॥ नानाभंगिगवाक्षाब्धेरत्नसानाविवायते ॥ २ ॥ कदाचिदपिकल्पांतेव्योलोकेऽंशतिक्षये ॥ प्रोत्तंभनंस्तंभइवदत्तोविश्वकृतास्वयम् ॥ ३ ॥ मरुत्तरंगिताग्राभिःपताकाभिरितस्ततः ॥ सन्निवास्यतीवेत्थमघोचान्विशतोमुने ॥ ४ ॥ देदीप्यमानसौवर्णकलशेनविराजिते ॥ पार्वणेनशशांकेनस्वेदादिवसमाश्रिते ॥ ५ ॥

तत्रपारावतद्वंद्वंवसेत्स्वैरंकृतालयम् ॥ प्रातःसायंचमध्याह्नेत्रैत्रित्यंप्रदक्षिणम् ॥ ६ ॥ उद्गीयमानंपरितःपक्षवातैरितस्ततः ॥ रजःप्रासादसंलग्नंदूरीकुर्वदिनेदिने ॥ ७ ॥ त्रिलोचनेतिसततंनामभक्तैरुदाहृतम् ॥ त्रिविष्टपेतिचतथातयोःकर्णातिथीभवेत् ॥ ८ ॥ चतुर्विधानिवाद्यानिशंभुप्रीतिकराण्यलम् ॥ तयोःकर्णगुहांप्राप्यप्रतिशब्दंप्रतन्वते ॥ ९ ॥ मंगलारार्तिकज्योतिस्त्रिसंध्यंपक्षिणोस्तयोः ॥ नेत्रांतर्निविशत्रित्यंभक्तचेष्टांप्रदर्शयेत् ॥१०॥ प्राणयात्रां विहायापिकदाचित्स्थिरमानसौ ॥ नोड्डीयवांछितंयातःपश्यतोंकौतुकंखगौ ॥ ११ ॥ तत्रभक्तजनाकीर्णप्रासादंपरितोमुने ॥ तंडुलादिचरंतोतौकुर्यातेचप्रदक्षिणम् ॥ १२ ॥ देवदक्षिणदिग्भागेचतुःस्रोतस्विनीजलम् ॥ तृषार्तोधयतोविप्रस्नातौजातुचिदंडजौ ॥ १३ ॥ तयोरित्थंविचरतोस्त्रिलोचनसमीपतः ॥ अगाद्बहुतिथःकालोद्विजयोःसाधुचेष्टयोः ॥ १४ ॥ अथदेवालयस्कंधेगवाक्षांतर्गतौचतौ ॥ श्येनेननकेनचिद्दृष्टैःक्रूरदृष्ट्यामुखस्थितौ ॥ १५ ॥ तत्रपारावतद्वंद्वंश्येनःपरिजिघृक्षुकः ॥ अवतीर्यावरादाशुप्रविष्टोन्यशिवालये ॥ १६ ॥ ततोविलोकयामासतदागमविनिर्गमौ ॥ केनमार्गेणविशतोदुर्गमेतौपतत्रिणौ ॥ १७ ॥ केनाध्वनाचनिर्यातःककालेकुरुतश्चकिम् ॥ कथंयुगपदेतौमेग्राह्यौस्वैरंभविष्यतः ॥ १८ ॥ मध्येदुर्गप्रविष्टोचममवश्यंविमोनयत् ॥ एकदृष्टिःक्षणंतस्थौश्येनइत्थंविचिंतयन् ॥ १९ ॥ अहोदुर्गबलंप्राज्ञाःशंसंत्येवेतिहेतुतः ॥ दुर्बलोप्याकलयितुंसहसारिर्नशक्यते ॥ २० ॥ कारिणांतुसहस्रेषुवराश्चानांनलक्षतः ॥ तत्कर्मसिद्धिर्नृपतेर्दुर्गेणैकेनयद्भवेत् ॥ २१ ॥ दुर्गस्थोनाभिभूयेतविपक्षःकेनचित्कचित् ॥ स्वतंत्रंयदिदुर्गस्यादमर्मज्ञप्रकाशितम् ॥ २२ ॥ इतिदुर्गबलंशंसन्श्येनोरोषारुणेक्षणः ॥ असाध्यसौकलरवोवीक्ष्ययातोनभोंगणम् ॥ २३ ॥ अथपारावतीदत्ताविपक्षंप्रेक्ष्यपक्षिणम् ॥ महाबलंदुर्गबलाप्राहपारावतंपतिम् ॥ २४ ॥ ॥ कलरव्युवाच ॥ ॥ प्रियपारावतप्राज्ञसर्वकामिसुखावह ॥ तवद्दग्विषयंप्राप्तःश्येनोयंप्रबलोरिपुः ॥ २५ ॥ सावज्ञंवाक्यमाकर्ण्यपारावत्याःसतत्पतिः ॥ पारावतीमुवाचेदंकार्चितेतितवप्रिये ॥ २६ ॥ ॥ पारावतउवाच ॥ ॥ कतिनामनसंतीहसुभगेव्योमचारिणः ॥ कतिदेवालयेष्वेपुखगानोपविशंतिहि ॥ २७ ॥

कतिचैनंपश्यंतिनोसुखस्थावेहप्रिये ॥ तेभ्योयदीहभेतव्यकुतोनोतत्सुखंप्रिये ॥ २८ ॥ रमस्वत्वंमयासार्धंत्यजचिंतामिमांशुभे ॥ अस्यश्येनवराकस्यगणनापिनमेहृदि ॥ २९ ॥ इत्थंपारावतंवचःश्रुत्वापारावतीततः ॥ मौनमालंब्यसंतस्थेपत्युःपादार्पितेक्षणा ॥ ३० ॥ हितवर्त्मोपदिश्यापिप्रिय

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रियन्विर्पया ॥ साध्व्याजोपंसमास्थेयंकार्यंपत्युर्वचःसदा ॥ ३१ ॥ अन्येद्युरप्यथायातःश्येनोपश्यत्सदंपती ॥ अपरिच्छिन्नयादृष्ट्यायथामृत्युर्गतायुषम् ॥ ३२ ॥ अथमंडलगत्यासप्रासादंपरितोभ्रमन् ॥ निरीक्ष्यतद्गतायातोयातोगगनमार्गतः ॥ ३३ ॥ गतेऽथनभसिश्येनेपुनःपारावतांगना ॥ प्रोवाचप्रेयसीनाथदृष्टोदुष्टस्त्वयाऽहितः ॥ ३४ ॥ तस्यावाक्यंसमाकर्ण्यपुनःकलरवोब्रवीत् ॥ किंकरिष्यत्यसौमुग्धेममव्योमविहारिणः ॥ ३५ ॥ दुर्गंचस्वर्गतुल्यंमेयत्रनास्त्यरितोभयम् ॥ अयंनतागतीर्वेत्तियावेदाहंनभोंगणे ॥ ३६ ॥ प्रडीनोड्डीनसंडीनकांडव्याडकपाटिकाः ॥ स्रंसनीमंडलवतीगतयोष्टावुदाहृताः ॥ ३७ ॥ यथैतास्विहकौशल्यंमयिपारावतिप्रिये ॥ गतिषुक्वापिकस्यापिपक्षिणोनतथांबरे ॥ ३८ ॥ सुखेनतिष्ठकाचिंतामयिजीवतितप्रिये ॥ इतिवद्वचनंश्रुत्वासास्थितामूकवत्सती ॥ ३९ ॥ अपरेद्युरपिश्येनस्तत्रभारशिलातले ॥ कियदंतरमासाद्योपविष्टोऽतिप्रहृष्टवत् ॥४०॥ आयामंतत्रसंस्थित्वातत्कुलायंविलोक्यच ॥ पुनर्विनिर्गतःश्येनःसापिभीताब्रवीत्पुनः ॥४१॥ प्रियस्थानमिदंत्याज्यंदुष्टदृष्टिविदूषितम् ॥ असौक्रूरोतिनिकटमुपविष्टोऽतिहृष्टवत् ॥ ४२ ॥ सावज्ञंसपुनःप्राहकिंकरिष्यत्यसौप्रिये ॥ मृगाक्षीणांस्वभावोयंप्रायशोभीरुवृत्तयः ॥ ४३ ॥ इतरेद्युरपिप्राप्तःसचश्येनोमहाबलः ॥ तयोरभिमुखंतत्रस्थितोयामद्वयावधि ॥४४॥ पुनर्विलोक्यतद्वर्त्मशीघ्रंयातोयथागतम् ॥ गतेथशकुनौतस्मिन्सावभाषेविहंगमी ॥ ॥ ४५ ॥ नाथस्थानांतरंयावोमृत्युर्नौनिकटोत्रयत् ॥ पुनर्दुष्टेप्रणष्टेस्मिन्नावांस्यावःसुखंप्रिय ॥ ४६ ॥ प्रिययस्यसपक्षस्यगतिःसर्वत्रसिद्धिदा ॥ सकिंस्वदेशरागेणनाशंप्राप्नोतिबुद्धिमान् ॥ ४७ ॥ सोपसर्गंनिजंदेशंत्यक्त्वायोन्यत्रनव्रजेत ॥ सपंगुर्नाशमाप्नोतिकूलस्थितइवद्रुमः ॥ ४८ ॥

प्रियोदितंनिशम्येतिसभवित्रीदशार्दितः ॥ सरीढंपुनरप्याहप्रियेमाभैःखगात्ततः ॥ ४९ ॥ अथापरस्मिन्नहनिसश्येनःप्रातरेवहि ॥ तद्वारदेशमासाद्यसायंयावत्स्थितोबलः ॥ ५० ॥ अस्ताचलस्यशिखरंयातेभानौगतेखगे ॥ कुलायाद्बाह्यमागत्योवाचपारावतीपतिम् ॥ ५१ ॥ नाथनिर्गमनस्यायंकालःकालोऽतिदूरतः ॥ यावत्तावद्विनिर्याहित्यक्त्वामामपिसन्मते ॥ ५२ ॥ त्वयिजीवतिदुष्प्राप्यंनकिंचिज्जगतीतले ॥ पुनर्दाराःपुनर्मित्रंपुनर्वसुपुनर्गृहम् ॥ ॥ ५३ ॥ यद्यात्मारक्षितःपुंसादारैरपिधनैरपि ॥ तदासर्वंहरिश्चंद्रभूपेनेवेहलभ्यते ॥ ५४ ॥ अयमात्माप्रियोबंधुरयमात्मामहद्धनम् ॥ धर्मार्थकाममोक्षाणामयमात्मार्जकःपरः ॥ ५५ ॥ यावदात्मनिवैक्षेमंतावत्क्षेमंजगत्त्रये ॥ सोपिक्षेमःसुमतिनायशसासहवांछ्यते ॥ ५६ ॥ यशोहीनंतुयत्क्षेमंतत्क्षेमान्निधनंवरम् ॥ तद्यशःप्राप्यतेपुंभिर्नीतिमार्गप्रवर्तने ॥ ५७ ॥ अतोनीतिपथंश्रुत्वानाथस्थानादितोव्रज ॥ नगमिष्यसिचेत्प्रातस्ततोमेसंस्मरिष्यसि ॥ ॥ ५८ ॥ इत्युक्तोपिसवैपत्न्यापारावत्यासुमेधया ॥ ननिर्ययौप्रतिस्थानाद्भवित्र्याप्रतिवारितः ॥ ५९ ॥ अथोषसिसमागत्यश्येनेनबलिनातदा ॥ तन्निर्गमाध्वासंरुद्धःकिंचिद्भक्ष्यवतामुने ॥ ६० ॥ दिनानिकतिचित्तत्रस्थित्वाश्येनोमहामतिः ॥ पारावतमुवाचेदंधिक्त्वांपौरुषवर्जितम् ॥ ६१ ॥ किंवायुध्यस्वदुर्बुद्धेकिंवानिर्याहिमेगिरा ॥ क्षुधाक्षीणोमृतःपश्चान्निरयंयास्यसिध्रुवम् ॥ ६२ ॥ द्वौभवंतावहंचैकश्चलाजयपराजयौ ॥ स्थानार्थंयुध्यतःसत्त्वात्स्वर्गोवादुर्गमेववा ॥ ६३ ॥ पुरुषार्थंसमालंब्ययेयतंतेमहाधियः ॥ विधिरेवहिसाहाय्यंकुर्यात्तत्सत्त्वचोदितः ॥ ६४ ॥ इत्थंसश्येनसंप्रोक्तःपत्न्याप्युत्साहितःखगः ॥ अयुध्यत्तेनश्येनेनस्वदुर्गद्वारमाश्रितः ॥ ६५ ॥ क्षुधितस्तृषितःसोथश्येनेनबलिनाधृतः ॥ चरणेनदृढेनाशुचंच्वासापिधृताखगी ॥ ६६ ॥ तावादायोड्डयांचक्रेश्येनोव्योमनिसत्वरम् ॥ चिंतयद्भक्षणस्थानमन्यपक्षिविवर्जितम् ॥ ६७ ॥ अथपत्न्याकलरवःप्रोक्तस्तत्रसुमेधया ॥ वचोवमानितंनाथत्वयामेस्त्रीतिबुद्धितः ॥ ६८ ॥ अतोऽवस्थामिमांप्राप्तःकिंकुर्यामबलायतः ॥ अधुनापिवचश्चैकंकरोषियदिमेप्रिय ॥ ६९ ॥ तदाहिततेवक्ष्यामिकुरुचैवाविचारितम् ॥ ममैकवाक्यकरणात्स्त्रीजितोनभविष्यसि ॥ ७० ॥

यावदास्यगतास्म्यस्ययावत्खस्थोनभूमिगः ॥ तावदात्मविमुक्त्यैत्वमरेःपादंदृढंदश ॥७१॥ इतिपत्नीवचःश्रुत्वातथासकृतवान्खगः ॥ सपीडितोदृढंपादेश्येनश्चीत्कृतवान्बहु ॥ ७२ ॥ तेनचीत्करणेनाथमुक्तासामुखसंपुटात् ॥ पादांगुलिश्लथत्वेनसोपिपारावतोऽपतत् ॥ ७३ ॥ विपद्यपिचनप्राज्ञैःसंत्याज्यःक्वचिदुद्यमः ॥ क्वचचंचुपुटस्तस्यक्वचतत्पादपीडनम् ॥७४॥ क्वचद्वयोस्तथाभूतादरेर्मोक्षणमद्भुतम् ॥ दुर्बलेप्युद्यमवतिफलंभाग्यंयतोऽर्पयेत् ॥ ॥ ७५ ॥ तस्माद्भाग्यानुसारेणफलत्येवसदोद्यमः ॥ प्रशंसंत्युद्यमंचातोविपद्यपिमनीषिणः ॥ ७६ ॥ अथतौकालयोगेनविपन्नौसरयूतटे ॥ मुक्तिपुर्यामयोध्यायामेकोविद्याधरोऽभवत् ॥ ७७ ॥ मृतानांयत्रजंतूनांकाशीप्राप्तिर्भवेद्ध्रुवम् ॥ मंदारदामतनयोनाम्नापरिमलालयः ॥ ७८ ॥ अनेकविद्यानिलयःकलाकौशलभाजनम् ॥ कौमारंवयआसाद्यशिवभक्तिपरोभवत् ॥ ७९ ॥ नियमंचातिजग्राहविजितेंद्रियमानसः ॥ एकपत्नीव्रतंनित्यंचरिष्यामीतिनिश्चितम् ॥ ८० ॥ परयोपित्समासक्तिरायुःकीर्तिबलंसुखम् ॥ हरेत्स्वर्गगतिंचापितस्मात्तांवर्जयेत्सुधीः ॥ ८१ ॥ अपरंचापिनियमंसशुचिष्मान्समाददे ॥ गतजन्मांतराभ्यासात्त्रिलोचनसमाश्रयात् ॥ ८२ ॥ समस्तपुण्यनिलयंसमस्तार्थप्रकाशकम् ॥ समस्तकामजनकंपरानंदैककारणम् ॥ ॥ ८३ ॥ यावच्छरीरमरुजंयावन्नेंद्रियविप्लवः ॥ तावत्त्रिलोचनंकाश्यामनर्च्याश्नामिनाण्वपि ॥८४॥ इत्थंमांदारदामिःसनित्यंपरिमलालयः ॥ काश्यांत्रिविष्टपंद्रष्टुंसमागच्छेत्प्रयत्नवान् ॥ ८५ ॥ पारावत्यपिसाजातारत्नदीपस्यमंदिरे ॥ नागराजस्यपातालेनाम्नारत्नावलीतिच ॥ ८६ ॥ समस्तनागकन्यानांरूपशीलकलागुणैः ॥ एकैवरत्नभूतासीद्रत्नदीपोरगात्मजा ॥ ८७ ॥ तस्याःसखीद्वयंचासीदेकानाम्नाप्रभावती ॥ कलावतीतथान्याचनित्यंतदनुगेउभे ॥ ८८ ॥ स्वदेहादनपायिन्यौछायाकांतीयथातथा ॥ तेद्वेसख्यावभूतांहिरत्नावल्याघटोद्भव ॥ ८९ ॥ सातुबाल्येव्यतिक्रांतिकिंचिदुद्भिन्नयौवना ॥ शिवभक्तंस्वपितरंदृष्ट्वानियममग्रहीत् ॥ ९० ॥ पितस्त्रिलोचनंकाश्यामर्चयित्वादिनेदिने ॥ आभ्यांसखीभ्यांसहितामौनंत्यक्ष्यामिनान्यथा ॥ ॥ ९१ ॥ एवंनागकुमारीसासखीद्वयसमन्विता ॥ त्रिलोचनंसमभ्यर्च्यगृहानहरहोव्रजेत् ॥ ९२ ॥ दिनेदिनेसाप्रत्यग्रैःकुसुमैरिष्टगंधिभिः ॥ सुविचित्राणिमाल्यानिपरिगुंफ्यार्चयेद्विभुम् ॥ ९३ ॥ तिस्रोपिगीतंगायंतिलसद्गांधारसुंदरम् ॥ रासमंडलभेदेनलास्यंतिस्रोपिकुर्वते ॥ ९४ ॥

वीणावेणुमृदंगांश्चलयतालविचक्षणाः ॥ वादयंतिमुदायुक्तास्तिस्रोपीश्वरसन्निधौ ॥९५॥ इत्थमाराधयंतीशंतिस्रोनागकुमारिकाः ॥ विचित्रगंधमालाभिःसंमार्जनविलेपनैः ॥ ९६ ॥ एकदामार्धवेमासितृतीयायामुपोषिताः ॥ रात्रौजागरणंकृत्वानृत्यगीतकथादिभिः ॥ ९७ ॥ प्रातश्चतुर्थीस्नात्वाथतीर्थपैलिपिलेशुभे ॥ त्रिलोचनंसमर्च्याथप्रसुप्तारंगमंडपे ॥ ९८ ॥ सुप्तासुतासुबालासुत्रिनेत्रःशशिभूषणः ॥ शुद्धकर्पूरगौरांगोजटामुकुटमंडलः ॥ ९९ ॥ तमालनीलसुग्रीवःस्फुरत्फणिविभूषणः ॥ वामार्धविलसच्छक्तिर्नागयज्ञोपवीतवान् ॥१००॥ तस्मादेवविनिष्क्रम्यलिंगात्पन्नगमेखलात् ॥ उवाचचततोबालाविभुरुत्तिष्ठतेतिसः ॥ १ ॥ उत्थायताविनिर्माज्यलोचनेश्रुतिसंगते ॥ अंगमोटनवत्यश्चजृंभाभिःक्वणिताननाः ॥ २ ॥ यावत्पश्यंतिपुरतःसंभ्रमापन्नमानसाः ॥ अतर्कितागमस्तावत्ताभिर्दृष्टस्त्रिलोचनः ॥३॥ ववंदुरथताबालाज्ञात्वालक्ष्मभिरीश्वरम् ॥ तुष्टुवुश्चप्रहृष्टास्याःसन्नकंठ्योतिगद्गदम् ॥ ॥ ४ ॥ जयशंभोजयेशानजयसर्वगसर्वद ॥ जयत्रिपुरसंहर्तर्जयांधकनिषूदन ॥ ५ ॥ जयजालंधरहरजयकंदर्पदर्पहृत् ॥ जयत्रैलोक्यजनकजयत्रैलो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्यवर्धन ॥ ६ ॥ जयत्रैलोक्यनिलयजयत्रैलोक्यवंदित ॥ जयभक्तजनाधीनजयप्रमथनायक ॥ ७ ॥ जयत्रिपथगापाथःप्रक्षालितजटातट ॥ जयचं द्रकलाज्योतिर्विद्योतितजगत्त्रय ॥ ८ ॥ जयसर्पफणारत्नप्रभाभासितविग्रह ॥ जयाद्रिराजतनयातपःक्रीतार्धदेहक ॥ ९ ॥ जयश्मशाननिलयजय वाराणसीप्रिय ॥ जयानंदवनाध्यासिप्राणिनिर्वाणदायक ॥ ११० ॥ जयविश्वपतेशर्वशर्वरीपरिवर्जित ॥ जयनृत्यप्रियेशोग्रजयगीतविशारद ॥ ११ ॥ जयप्रणवसद्वासजयधाममहानिधे ॥ जयशूलिन्विरूपाक्षजयप्रणतसर्वद ॥ १२ ॥ विधिःसर्वविधिज्ञोपिनत्वांस्तोतुंविचक्षणः ॥ वाचोवाचस्पतेर्ना थत्वत्स्तुतौपरिकुंठिताः ॥ १३ ॥

विदंतिवेदाःसर्वज्ञनत्वांनाथयथार्थतः ॥ मनतीहमनोनत्वामनंतंचादिवर्जितम् ॥ १४ ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥ त्रिलोचननमस्तुभ्यं त्रिविष्टपनमोस्तुते ॥ १५ ॥ इत्युक्त्वादंडवद्भूमौप्रणिपेतुःकुमारिकाः ॥ अथोत्थाप्यकुमारीस्ताःप्रोवाचशशिभूषणः ॥ १६ ॥ सुतोमंदारदामाश्चनाम्नापरि मलालयः ॥ पतिर्विद्याधरवरोभवतीनांभविष्यति ॥ १७ ॥ चिरंविद्याधरेलोकेभोगान्भुक्त्वासमंततः ॥ ततोनिर्वेदमापन्नाःकाशीसिद्धिमवाप्स्यथ ॥ ॥ १८ ॥ यूयंतिस्रोपिमेभक्ताःसचविद्याधरोयुवा ॥ चत्वारोप्येतएवात्रप्रतिमोक्षमवाप्स्यथ ॥ १९ ॥ जन्मांतरेपिमेत्सेवाभवतीभिश्चतेनच ॥ विहिताते नवोजन्मनिर्मलंभक्तिभावितम् ॥ २० ॥ एतच्चभवतीस्तोत्रंयःपठिष्यतिमेपुरः ॥ तस्यकामंप्रदास्यामिभवतीनामिवस्फुटम् ॥ २१ ॥ त्यजेत्क्षपाकृतं पापंशुचिःप्रातःपठन्नरः ॥ दिवाकृतमलंहंतिसायंपठनतःस्फुटम् ॥२२॥ इत्युक्तवतिदेवेशेताःकन्याहृष्टमानसाः ॥ प्रणम्यप्रोचुरीशानंप्रबद्धकरसंपुटाः ॥ ॥ २३ ॥ नागकन्याऊचुः ॥ ॥ पृच्छामोब्रूहिनोनाथकरुणाकरशंकर ॥ जन्मांतरेकथंसेवाचतुर्भिर्भवतःकृता ॥ २४ ॥ भवप्राग्भववृत्तांतंतस्यापि सुकृतात्मनः ॥ अस्माकमपिचाख्याहिकृपांकुरुकृपानिधे ॥२५॥ इतिश्रुत्वाप्रणयतोबालोदीरितमीशिता ॥ प्रोवाचतासांतस्यापिभवांतरविचेष्टितम् ॥ ॥ २६ ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुध्वंनागतनयास्तिस्रोपिहिसमाहिताः ॥ प्राग्भवंभवतीनांचतस्यापिकथयाम्यहम् ॥ २७ ॥ एषारत्नावली पूर्वमासीत्पारावतीखगी ॥ सचविद्याधरवरःपतिरस्याःखगोभवत् ॥ २८ ॥ प्रासादेत्रममैताभ्यामुषितंसुचिरंसुखम् ॥ रजःप्रासादसंलग्नंनुन्नंपक्षानिलैः पुनः ॥ २९ ॥ उपरिष्टादधस्ताच्चकृतावह्न्यःप्रदक्षिणाः ॥ व्योम्नासंचरमाणाभ्यांसंचरद्भ्यांममाजिरे ॥ १३० ॥ स्नातंचतुर्नदेतीर्थेपीतंतत्रांबुचासकृत् ॥ आभ्यांकलरवाभ्यांचकृतःकलरवोमुदे ॥ ३१ ॥ एताभ्यांस्थिरचेतोभ्यांमुदिताभ्यामतीवहि ॥ दृष्टानिकौतुकान्यत्रममभक्तैःकृतानिवै ॥३२॥ अमूभ्यां बहुशोदृष्टाममंगलदीपिकाः ॥ पीतंश्रुतिपुटाभ्यांचममनामाक्षरामृतम् ॥ ३३ ॥ तिर्यग्योनिप्रभावेननमृतौममसन्निधौ ॥ मृतंपुर्यामयोध्यायांकाशीप्रा प्तिकृतिध्रुवम् ॥ ३४ ॥ अयोध्यानिधनादेषारत्नदीपसुताभवत् ॥ पतिःपारावतोऽस्याःसजातोविद्याधरांगजः ॥३५॥ एषाप्रभावतीनागीनागराजस्यप द्मिनः ॥ इहजन्मनिकन्यासीत्पूर्वंजन्मब्रवीमिवः ॥३६॥ त्रिशिखस्योरगेंद्रस्यसुताचेयंकलावती ॥ एतस्याअपिवृत्तांतंनिशाप्रयतवच्म्यहम् ॥ ३७ ॥

भवांतरेतृतीयेऽतःकन्येचारायणस्यह ॥ आस्तांमहर्षेःशीलाढ्येप्रेमवत्यौपरस्परम् ॥३८॥ पित्राचारायणेनापिताभ्यांसंप्रेरितेनते ॥ आमुष्यायणपुत्रा यदत्तेनारायणायहि ॥३९॥ अप्राप्तयौवनःसोथसमिदाहरणायवै ॥ गतोविधिवशाद्दष्टोदंदशूकेनकानने ॥१४०॥ भवानीगौतमीनाम्न्यौतेतुचारायणां गजे ॥ वैधव्यदुःखमापन्नेदैन्यग्रस्तेबभूवतुः ॥ ४१ ॥ अतएवप्रयत्नेनपरिणेताविवर्जयेत् ॥ देवतासरिदाह्वानांकन्यांपाणिग्रहेसुधीः ॥ ४२ ॥ अथर्षेः कस्यचिद्दैवादाश्रमेपरमाद्भुते ॥ रंभाफलान्यदत्तानिमोहाज्जगृहतुस्तदा ॥४३॥ कृत्वामासोपवासादिव्रतानिब्राह्मणांगजे ॥ अवाप्यनिधनंकालाच्छाखा मृग्यौबभूवतुः ॥ ४४ ॥ फलचौर्यविपाकेनवानरीत्वंतयोरभूत् ॥ शीलरक्षणधर्मेणकाश्यांजनिमवापतुः ॥४५॥ सचनारायणोविप्रःपितृशुश्रूषणव्रतः॥ दष्टोपिदंदशूकेनकाश्यांपारावतोभवत् ॥ ४६ ॥ एवंभवांतरेचासीदेतयोःपतिरेषकः ॥ तिसृणांभवतीनांचभावीभर्ताधुनापिहि ॥ ४७ ॥ प्रासादस्या स्यपार्श्वेतुन्यग्रोधस्तुमहानभूत् ॥ तस्मिञ्शाखिनिशाखाढ्येशाखामृग्यौबभूवतुः ॥ ४८ ॥ चतुःस्रोतस्विनीतीर्थेक्रीडयाचममच्चतुः ॥ पपतुश्चापि पानीयंतस्मिंस्तीर्थेतृषातुरे ॥ ४९ ॥ जातिस्वभावचापल्यात्क्रीडंत्यौचप्रदक्षिणम् ॥ चक्रतुर्बहुकृत्वश्चलिंगंददृशतुर्बहु ॥ १५० ॥ विचरंत्यावितिस्वैरं तत्रन्यग्रोधसन्निधौ ॥ केनचिद्योगिवेषेणपाशेनचनियंत्रिते ॥ ५१ ॥ भिक्षार्थंशिक्षितेतेनतदुत्कृत्यादिनर्तनम् ॥ अथतेक्वापिमर्कट्यौकालधर्मवशंगते॥ ॥ ५२ ॥ काशीवासजपुण्येनत्रैलोचन्यानुसेवया ॥ प्रादक्षिण्यादिरूपिण्याजातेनागसुतेइति ॥५३॥ अधुनातंपतिंप्राप्यविद्याधरकुमारकम् ॥ निर्वि श्यस्वर्गभोगांश्चकाश्यांनिर्वृतिमेप्यर्थं ॥ ५४ ॥ यदल्पमपिवैकाश्यांकृतंकर्मशुभावहम् ॥ तस्यमोक्षःपरीपाकोनिश्चितंमदनुग्रहात् ॥५५॥ त्रिलोक्याअ पिसर्वस्याःश्रेष्ठावाराणसीपुरी ॥ ततोपिलिंगमोंकारंततोप्यत्रत्रिलोचनम् ॥५६॥ तिष्ठमानोत्रलिंगेहंभक्तमुक्तिंदिशाम्यहम् ॥ ततःसर्वप्रयत्नेनकाश्यांपू ज्यस्त्रिलोचनः ॥ ५७ ॥ इत्युक्त्वादेवदेवेशस्तत्प्रासादांतरंविशत् ॥ अवाच्यरूपमासाद्यस्थूलंत्रिभुवनादपि ॥ ५८ ॥ ताश्चस्वंस्वंपदंप्राप्यतद्वृत्तांतमशे षतः ॥ स्वमातृपुरतश्चोक्त्वाकृतकृत्याइवाभवन् ॥५९॥ एकदामाधवेमासिमहायात्रासमागता ॥ विद्याधरास्तथानागामिलिताःसपरिच्छदाः ॥१६०॥

विरजस्केमहाक्षेत्रेत्रिलोचनसमीपतः ॥ देवस्यवरदानाच्चपृष्ट्वान्योन्यंकुलावलीम् ॥६१॥ विद्याधरायतानागैःकन्यास्तिस्रोपिकल्पिताः ॥ मंदारदामासं तुष्टःप्राप्यतच्चस्नुषात्रयम् ॥ ६२ ॥ रत्नदीपश्चनागेंद्रःपद्मीचभुजगेश्वरः ॥ त्रिशिखोपिफणींद्रश्चहृष्टाएतेत्रयोपिच ॥ ६३ ॥ जामातरंसमासाद्यशुभंप रिमलालयम् ॥ अन्योन्यंस्वजनास्तेतुमुदाविकसितेक्षणाः ॥ ६४ ॥ विवाहोत्सवमाकल्प्यस्वंस्वंभुवनमाविशन् ॥ त्रिलोचनस्यलिंगस्यवर्णयंतोतिगौ रवम् ॥ ६५ ॥ सचविद्याधरःश्रीमान्नागीभिर्विपुलंसुखम् ॥ भुक्त्वावाराणसींप्राप्यसंसेव्याथत्रिलोचनम् ॥ ६६ ॥ गायन्गीतंसुमधुरंनागीभिःसहितः कृती ॥ आत्मानंचातिसंस्मृत्यमध्येलिंगंलयंगतः ॥ ६७ ॥ ॥ स्कंदउवाच ॥ ॥ त्रिलोचनस्यमहिमाकलौदेवेनगोपितः ॥ अतोल्पसत्त्वामनुजानत ल्लिंगमुपासते ॥ ६८ ॥ त्रिलोचनकथामेतांश्रुत्वापापान्वितोप्यहो ॥ विपाप्माजायतेमर्त्योलभतेचपरांगतिम् ॥ १६९ ॥ ॥ इतिश्रीस्कांदेमहापु राणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंड उत्तरार्धे त्रिलोचनप्रभावोनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ पार्वत्युवाच ॥ ॥ नमस्ते देवदेवेशप्रणमत्करुणानिधे ॥ वदकेदारमाहात्म्यंभक्तानामनुकंपया ॥१॥ तस्मिँल्लिंगेमहाप्रीतिस्तवकाश्यामनुत्तमा ॥ तद्भक्ताश्चजनानित्यंदेवदेवमहा धियः ॥ २ ॥ ॥ देवदेवउवाच ॥ ॥ शृण्वपर्णेभिधास्यामिकेदारेश्वरसंकथाम् ॥ समाकर्ण्यापियांपापोप्यपापोजायतेक्षणात् ॥ ३ ॥ केदारंयातु कामस्यपुंसोनिश्चितचेतसः ॥ आजन्मसंचितंपापंतत्क्षणादेवनश्यति ॥ ४ ॥ गृहाद्विनिर्गतेपुंसिकेदारमभिनिश्चितम् ॥ जन्मद्वयार्जितंपापंशरीराद पिनिर्व्रजेत् ॥ ५ ॥ मध्येमार्गंप्रपन्नस्यत्रिजन्मजनितंत्वघम् ॥ देहगेहाद्विनिःसृत्यनिराशंयातिनिःश्वसत् ॥ ६ ॥ सायंकेदारकेदारकेदारेतित्रिरुच्चरन् ॥ गृहेपिनिवसन्नूनंयात्राफलमवाप्नुयात् ॥ ७ ॥ दृष्ट्वाकेदारशिखरंपीत्वातत्रत्यमंबुच ॥ सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः ॥८॥ हरपापह्रदेस्नात्वाके दारेशंप्रपूज्यच ॥ कोटिजन्मार्जितैनोभिर्मुच्यतेनात्रसंशयः ॥९॥ सकृत्प्रणम्यकेदारंहरपापकृतोदकः ॥ स्थाप्यलिंगंहृदंभोजेप्रांतेमोक्षंगमिष्यति॥१०॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हरपापह्रदेश्राद्धंश्रद्धयायःकरिष्यति ॥ उद्धृत्यसप्तपुरुषान्समेलोकंगमिष्यति ॥ ११ ॥ पुरार्थतरेकल्पेयदसूदत्रतच्छृणु ॥ अपर्णदत्तकर्णोत्वंवर्णेया मितवाग्मतः ॥१२॥ एकोब्रह्मणदायादउज्जयिन्याइहागतः ॥ कृतोपनयनःपित्राब्रह्मचर्यव्रतेस्थितः ॥१३॥ स्थलीपाशुपतींकार्शीसविलोक्यसमंततः॥ द्विजैःपाशुपतैःकीर्णांजटामुकुटभूषितैः ॥ १४ ॥ कृतलिंगसमर्चैश्चभूतिभूषितवर्ष्मभिः ॥ भिक्षाहतान्नसंतुष्टैःपुष्टैर्गंगामृतोदकैः ॥ १५ ॥ बभूवानंदितमनाव्रतंजग्राहचोत्तमम् ॥ हिरण्यगर्भादाचार्यान्महत्पाशुपताभिधम् ॥ १६ ॥ सचशिष्योवशिष्टोभूत्सर्वपाशुपतोत्तमः ॥ स्नात्वाह्रदेहरपापेनित्यंप्रातः समुत्थितः ॥१७॥ विभूत्याहरहःस्नातित्रिकालंलिंगमर्चयन् ॥ नांतरंसविजानातिशिवलिंगेगुरौतथा ॥१८॥ सद्वादशाब्ददेशीयोवशिष्टोगुरुणासह ॥ ययौकेदारयात्रार्थंगिरिंगौरीगुरोर्गुरुम् ॥१९॥ यत्रगत्वानशोचंतिकिंचित्संसारिणःक्वचित् ॥ प्राश्योदकंलिंगरूपंलिंगरूपत्वमागताः ॥२०॥ असिधारं गिरिंप्राप्यवशिष्टस्यतपस्विनः ॥ गुरुर्हिरण्यगर्भाख्यःपंचत्वमगमत्तदा ॥ २१ ॥ पश्यतांतापसानांचविमानेसार्वकामिके ॥ आरोप्यतंपारिषदाः कैलासमनयन्मुदा ॥ २२ ॥ यस्तुकेदारमुद्दिश्यगेहादर्धपथेप्यहो ॥ अकातरस्त्यजेत्प्राणान्कैलासेससचिरंवसेत् ॥ २३ ॥ तदाश्चर्यंसमालोक्यसव शिष्टस्तपोधनः ॥ केदारमेवलिंगेषुवह्नमंस्तमुनिश्चितम् ॥ २४ ॥ अथकृत्वासकेदारींयात्रांवाराणसीमगात् ॥ अग्रहीन्नियमंचापियथार्थंचाकरोत्पुनः ॥ ॥ २५ ॥ प्रतिचैत्रंसदाचैत्र्यांयावज्जीवमहंश्रुवम् ॥ विलोकयिष्येकेदारंवसन्वाराणसींपुरीम् ॥ २६ ॥ तेनयात्राःकृताःसम्यक्षष्टिरेकाधिकासुदा ॥ आनंदकाननेनित्यंवसताब्रह्मचारिणा ॥ २७ ॥ पुनर्यात्रांसचैवक्रेमधौनिकटवर्तिनि ॥ परमोत्साहसंतुष्टःपलिताकलितोप्यलम् ॥ २८ ॥ तपोधनै स्तंन्निघनंशंकमानैर्निवारितः ॥ कारुण्यपूर्णहृदयैरन्यैरपिचसंगिभिः ॥ २९ ॥ ततोपिनतदुत्साहभंगोभूद्दृढचेतसः ॥ मध्येयागंमृतस्यापिगुरोरिवग तिर्मम ॥ ३० ॥ इतिनिश्चितचेतस्केवशिष्टेतापसेशुचौ ॥ अशुद्धान्नपरीपुष्टेतुष्टोहंचंडिकेऽभवम् ॥ ३१ ॥ स्वप्नेमयाससंप्रोक्तोवशिष्टस्तापसोत्तमः ॥ दृढव्रतप्रसन्नोस्मिकेदारंविद्धिमामिह ॥ ३२ ॥ अभीष्टंचवरंमत्तःप्रार्थयस्वाविचारितम् ॥ इत्युक्तवत्यपिमयिस्वप्नोमिथ्येतिसोब्रवीत् ॥ ३३ ॥ ततोपि समयाप्रोक्तःस्वप्नोमिथ्याऽशुचिर्भवेत् ॥ भवादृशामिथ्येवस्वाख्यासदृशवर्तिनाम् ॥ ३४ ॥

वरंब्रूहिप्रसन्नोस्मिस्वप्नशंकांत्यजद्विज ॥ तवसत्त्ववतःकिंचिन्मयादेयंनकिंचन ॥ ३५ ॥ इत्युक्तंमेसमाकर्ण्यवरयामासमामिति ॥ शिष्योहिरण्यगर्भ स्यतपस्विजनसत्तमः ॥ ३६ ॥ यदिप्रसन्नोदेवेशतदामेसानुगाइमे ॥ सर्वेशूलिव्रतानुग्राह्याएपएववरोमम ॥ ३७ ॥ देवितस्येदमाकर्ण्यपरोपकृतिशा लिनः ॥ वचनंनितरांप्रीतस्तथेतिप्रत्युवाचह ॥ ३८ ॥ पुनःपरोपकरणात्तत्तपोद्विगुणीकृतम् ॥ तेनपुण्येनसमयापुनःप्रोक्तोवरंवृणु ॥ ३९ ॥ सवशिष्टो महाप्राज्ञोदृढपाशुपतव्रतः ॥ देविमेप्रार्थय.मासहिमशैलादिहस्थितिम् ॥ ४० ॥ ततस्तत्तपसाकृष्टःकलामात्रेणतत्रहि ॥ हिमशैलेतत्रश्चात्रसर्वभावेनसं स्थितः ॥ ४१ ॥ ततःप्रभातेसंजातेप्रवेपांपश्यतामहम् ॥ हिमाद्रेःप्रस्थितःप्रातःस्तूयमानःसुरर्षिभिः ॥४२॥ वशिष्टंपुरतःकृत्वासर्वसार्थसमायुतम् ॥ हरपापह्रदेतीर्थेस्थितोहंतदनुग्रहात् ॥ ४३ ॥ मत्परिग्रहतःसर्वेहरपापेकृतोदकाः ॥ आराध्यमामनेनैववपुपासिद्धिमागताः ॥ ४४ ॥ तदाप्रभृतिलिंगे स्मिन्स्थितःसाधकसिद्धये ॥ अविमुक्तेपरेक्षेत्रेकलिकालेविशेषतः ॥ ४५॥ तुपारार्द्रिसमारुह्यकेदारंवीक्ष्ययत्फलम् ॥ तत्फलंसप्तगुणितंकाश्यांकेदारद र्शने ॥ ४६ ॥ गौरीकुंडंयथातत्रहंसतीर्थंचनिर्मलम् ॥ यथामधुस्रवागंगाकाश्यांतदखिलंतथा ॥ ४७ ॥ इदंतीर्थंहरपापंसप्तजन्माघनाशनम् ॥ गंगायां मिलितंपश्चाज्जन्मकोटिकृताघहम् ॥ ४८ ॥ अत्रपूर्वंतुकाकोलौयुध्यंतौखान्निपेततुः ॥ पश्यतांतत्रसंस्थानांहंसौभूत्वाविनिर्गतौ ॥४९॥ गौरीत्वयाकृतंपूर्वंस्नानमत्रमहाह्रदे ॥ गौरीतीर्थंततःख्यातंसर्वतीर्थोत्तमोत्तमम् ॥ ५० ॥ अत्रामृतस्रवागंगामहामोहांधकारहृत् ॥ अनेकजन्मजनितजाड्यध्वंसविधा यिनी ॥ ५१ ॥ सरसामानसेनात्रपूर्वंतप्तंमहातपः ॥ अतस्तुमानसंतीर्थंजनेख्यातिमिदंगतम् ॥५२॥ अत्रपूर्वंजनःस्नानमात्रेणैवप्रमुच्यते ॥ पश्चात्प्रसा दितश्चंद्रशेखरोमुक्तिदुर्दशैः ॥ ५३ ॥ सर्वेमुक्तिंगमिष्यंतियदिदेवेहमानवाः ॥ केदारकुंडेमुक्तास्तदोच्छित्तिर्भविष्यति ॥ ५४ ॥ सर्वेषामेववर्णानामा श्रमाणांचधर्मिणाम् ॥ तस्मात्तुविसर्गेत्रमोक्षंदास्यतिनान्यथा ॥ ५५ ॥ ततस्तदुपरोधेनतथेतिचमयोदितम् ॥ तदारभ्यमहादेविस्नानात्केदारकुंडतः॥ ॥ ५६ ॥ समर्चनाच्चभक्त्यावैममनामजपादपि ॥ नैःश्रेयसींश्रियंदद्यामन्यत्रापितनुत्यजाम् ॥ ५७ ॥ केदारतीर्थेयःस्नात्वापिंडान्दास्यतिचात्वरः ॥ एकोत्तरशतंवंश्यास्तस्यतीर्णाभवांबुधिम् ॥ ५८ ॥

भौमवारेयदादर्शेस्तदायःश्राद्धदोनरः ॥ केदारकुंडमासाद्यगयाश्राद्धेनकिंततः ॥ ५९ ॥ केदारंगंतुकामस्यबुद्धिर्देयानरैरियम् ॥ काश्यांस्पृशस्त्वंकेदारं कृतकृत्योभविष्यसि ॥ ६० ॥ चैत्रकृष्णचतुर्दश्यामुपवासंविधायच ॥ त्रिगंडूषान्पिबन्प्रातर्हृल्लिंगमधितिष्ठति ॥ ६१ ॥ केदारोदकपानेनयथात त्रफलंभवेत् ॥ तथात्रजायतेपुंसांस्त्रीणांचापिनसंशयः ॥ ६२ ॥ केदारभक्तसंपूज्यवासोन्नद्रविणादिभिः ॥ आजन्मजनितंपापंत्यक्त्वायातिममालयम् ॥ ॥ ६३ ॥ आषण्मासंत्रिकालंयःकेदारेशंनमस्यति ॥ तंनमस्यंतिसततंलोकपालायमादयः ॥ ६४ ॥ कलौकेदारमाहात्म्ययोपिकोपिनवेत्स्यति ॥ योवे त्स्यतिसपुण्यात्मासर्ववेत्स्यतिसश्रुवम् ॥ ६५ ॥ केदारेशंसकृद्दृष्ट्वादेविमेऽनुचरोभवेत् ॥ तस्मात्काश्यांप्रयत्नेनकेदारेशंविलोकयेत् ॥६६॥ चित्रांगदेश्वरं लिंगंकेदारादुत्तरेशुभम् ॥ तस्यार्चनान्नरोनित्यंस्वर्गभोगानुपाश्नुते ॥ ६७ ॥ केदाराद्दक्षिणेभागेनालकंठविलोकनात् ॥ संसारोरगदष्टस्यतस्यनास्ति विपाद्भयम् ॥ ६८ ॥ तद्वायव्येंवरीपेशोनरस्तदवलोकनात् ॥ गर्भवासंनचाप्नोतिसंसारेदुःखसंकुले ॥६९॥ इंद्रद्युम्नेश्वरंलिंगंतत्समीपेसमर्च्यच ॥ तेजो मयेनयानेनसस्वर्गभुविमोदते ॥ ७० ॥ तद्दक्षिणेनरोदृष्ट्वालिंगंकालंजरेश्वरम् ॥ जरांकालंविनिर्जित्यममलोकेवसेच्चिरम् ॥ ७१॥ दृष्ट्वाक्षमेश्वरंलिंगमुद कित्रांगदेश्वरात् ॥ सर्वत्रक्षेममाप्नोतिलोकेऽत्रचपरत्रच ॥७२॥ ॥ स्कंदउवाच ॥ ॥ देवदेवेनविंध्यारेकेदारमहिमामहान् ॥ इत्याख्यायिपुरांवाये मयातेपिनिरूपितः ॥ ७३ ॥ केदारेश्वरलिंगस्यश्रुत्वोत्पत्तिंकृतीनरः ॥ शिवलोकमवाप्नोतिनिष्पाप्तेजायतेक्षणात् ॥ ७४ ॥ ॥ इतिश्रीस्कंदि महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेकेदारमहिमाख्यानंनामसप्तसप्ततितमोऽध्यायः ॥७७॥ ॥ पार्वत्युवाच ॥ ॥ आनं दकाननेशंभोयल्लिंगंपुण्यवर्धनम् ॥ यन्नामस्मरणादेव.महापातकसंक्षयः ॥ १ ॥ यत्सेव्यंसाधकैर्नित्यंयत्रप्रीतिरनुत्तमा ॥ यत्रदत्तंहुतंजप्तंध्यातंभवति चाक्षयम् ॥ २ ॥ यस्यसंस्मरणादेवयल्लिंगस्यविलोकनात् ॥ यल्लिंगप्रणतेश्चापियस्यसंस्पर्शनादपि ॥ ३ ॥ पंचामृतादिस्नपनपूर्वाद्यस्यार्चनादपि ॥ तल्लिंगंकथयेशानभवेच्छ्रेयःपरंपरा ॥४॥ ॥ स्कंदउवाच ॥ ॥ इतिदेवीसमुदितंसमाकर्ण्यघटोद्भव ॥ सर्वज्ञेनयदाख्यातंतदाख्यास्यामितेशृणु ॥ ५ ॥ देवदेवउवाच ॥ ॥ उमेभवत्यायत्पृष्टंभवबंधविमोक्षकृत् ॥ ततोऽहंकथयिष्यामिलिंगंस्थिरमनाभव ॥ ६ ॥

आनंदकाननेचात्ररहस्यंपरममम ॥ नमयाकस्यचित्ख्यातंनप्रष्टुंवेत्तिकश्चन ॥७॥ संतिलिंगान्यनेकानिममानंदवनेप्रिये॥परंत्वयायथापृष्टंयथावत्तद्ब्रवी मिते ॥ ८ ॥ यत्रमुक्तिस्वरूपात्वंस्वयंतिष्ठसिसंविश्वगे ॥ यत्रतेनंदनश्चास्तिक्षेत्रविघ्नविघातकृत् ॥ ९ ॥ ममापियेनत्रिपुरसमरेजयकांक्षिणः ॥ जयाशापू रितास्तुत्यावहुमोदकदानतः ॥ १० ॥ यत्रास्तितीर्थमघवद्भृप्तितृप्तीतिविवर्धनम् ॥ यत्स्नानाद्भृत्रहावृत्रवधपापाद्विमुक्तवान् ॥ ११ ॥ धर्माधिकरणंयत्र धर्मराजोप्यवातवान् ॥ सुदुष्करंतपस्तप्त्वापरमेणसमाधिना ॥ १२ ॥ पक्षिणोपिहियत्रापुर्ज्ञानंसंसारमोचनम् ॥ रम्योहिरण्मयोयत्रवभूववहुपाद्रुमः ॥ ॥ १३ ॥ [illegible] ॥ १७ ॥ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निशामयाभिधास्यामिमहापातकनाशनम् ॥ १५ ॥ धर्मपीठंतदुद्दिष्टमत्रानंदवनेमम ॥ तत्पीठदर्शनादेवनरःपापैःप्रमुच्यते ॥ १६ ॥ पुराविवस्वतः पुत्रोयमःपरमसंयमी ॥ तपस्तताप विपुलंविशालाक्षितवाग्रतः ॥ १७ ॥ शिशिरेजलमध्यस्थोवर्षास्वभ्रावकाशकः ॥ तपर्तौपंचवह्निस्थःकदाचिदि तितप्तवान् ॥ १८ ॥ पादाग्रांगुष्ठभूस्पर्शीबहुकालंसतस्थिवान् ॥ एकपादस्थितःसोपिकदाचिद्बह्वनेहसम् ॥ १९ ॥ समीराभ्यवहर्तासीद्बहुदिष्टंसदि ष्टवान् ॥ पपौसतुपिपासुःसन्कुशाग्रजलविप्रुषः ॥ २० ॥ दिव्यांचतुर्युगीमित्थंसनिनायतपश्चरन् ॥ चतुर्गुणंदिदृक्षुर्मांपरमेणसमाधिना ॥ २१ ॥ ततोहंतस्यतपसासंतुष्टःस्थिरचेतसः ॥ ययौतस्मैवरान्दातुंशमनायमहात्मने ॥२२॥ वटःकांचनशाखाख्योयस्तपस्तापसंततिम् ॥ दूरीचकारसुच्छायो बहुद्विजसमाश्रयः ॥ २३ ॥ मंदमंदमरुल्लोलपल्लवैःकरपल्लवैः ॥ योध्वगानध्वसंतप्तानाह्वयेदिवतापहृत् ॥ २४ ॥ स्वानुरागैःसुरभिभिःस्वादुभिश्चपचे लिमैः ॥ प्रीणयेदर्थिसार्थंयोवृत्तैर्निजफलैरलम् ॥२५॥ तदधस्तात्परंवीक्ष्यतमहंतपनांगजम् ॥ स्थाणुनिश्चलवर्ष्माणंनासाग्रन्यस्तलोचनम् ॥ २६ ॥ तपस्तेजोभिरुद्यद्भिःपरितःपरिधीकृतम् ॥ भानुमंतमिवाकाशेसुनीलेस्वेनतेजसा ॥ २७ ॥

स्वाख्यांकितंमहालिंगंप्रतिष्ठाप्यातिभक्तितः ॥ स्वच्छसूर्योपलमयतेजःपुंजैरिवार्चितम् ॥ २८ ॥ साक्षीकृत्येवतल्लिंगंतप्यमानंमहत्तपः ॥ प्रत्यवोचंधर्म राजंवरंगृहीतिभास्करे ॥ २९ ॥ अलंतत्वामहाभागप्रसन्नोस्मिशुभव्रत ॥ निशम्यशमनश्चेतिदृष्ट्वामांप्रणनामह ॥ ३० ॥ चकारस्तवनंचापिपरिहृष्टेंद्रिये श्वरः ॥ निर्व्याजंससमाधिंचविसृज्यब्रह्मनंदनः ॥ ३१ ॥ धर्मउवाच ॥ ॥ नमोनमःकारणकारणानांनमोनमःकारणवर्जिताय ॥ नमोनमःकार्यमया यतुभ्यंनमोनमःकार्यविभिन्नरूप ॥ ३२ ॥ अरूपरूपायसमस्तरूपिणेपराणुरूपायपरापराय ॥ अपारपारायपराब्धिपारप्रदायतुभ्यंशशिमौलयेनमः॥ ॥ ३३ ॥ अनीश्वरस्त्वंजगदीश्वरस्त्वंगुणात्मकस्त्वंगुणवर्जितस्त्वम् ॥ कालात्परस्त्वंप्रकृतेःपरस्त्वंकालायकालात्प्रकृतेनमस्ते ॥ ३४ ॥ त्वमेवनिर्वा णपदप्रदोसित्वमेवनिर्वाणमनंतशक्ते ॥ त्वमात्मरूपःपरमात्मरूपस्त्वमंतरात्मासिचराचरस्य ॥ ३५ ॥ त्वत्तोजगत्त्वंजगदेवसाक्षाज्जगत्त्वदीयंजगदे कबंधो ॥ हर्तावितात्वंप्रथमोविधाताविधातृविष्ण्वीशनमोनमस्ते ॥ ३६ ॥ मृडस्त्वमेवश्रुतिवर्त्मगेषुत्वमेवभीमोऽश्रुतिवर्त्मगेषु ॥ त्वंशंकरःसोमसु भक्तिभाजामुग्रोसिरुद्रत्वमभक्तिभाजाम् ॥ ३७ ॥ त्वमेवशूलीद्विषतांत्वमेवविनम्रचेतोवचसांशिवोसि ॥ श्रीकंठएकःस्वपदश्रितानांदुरात्मनांहालहलो ग्रकंठः ॥ ३८ ॥ नमोस्तुतेशंकरशांतशंभोनमोस्तुतेचंद्रकलावतंस ॥ नमोस्तुतुभ्यंफणिभूषणायपिनाकपाणेंऽधकवैरिणेनमः ॥ ३९ ॥ सएवधन्यस्तव भक्तिभाग्यस्तवार्चकोयःसुकृतीसएव ॥ तवस्तुतिंयःकुरुतेसदैवसस्तूयतेदुर्व्यवनादिदेवैः ॥ ४० ॥ कस्त्वामिहस्तोतुमनंतशक्तेशक्नोतिमादृग्लघुबुद्धिवै भवः ॥ प्राचांनवाचामिहगोचरोयःस्तुतिस्त्वयीयंनतिरेवयावत् ॥ ४१ ॥

स्कंदउवाच ॥ ॥ उदीर्यसूर्यस्यसुतोतिभक्त्यानमःशिवायेतिसमुच्चरन्सः ॥ इलामिलन्मौलिरतीवहृष्टःसहस्रकृत्वःप्रणनामशंभुम् ॥४२॥ ततःशिवस्तं तपसातिखिन्नंनिवार्यताभ्यःप्रणतिभ्यईश्वरः ॥ वरान्ददौसप्ततुरंगमूनवेत्वंधर्मराजोभवनामतोधि ॥ ४३ ॥ त्वमेवधर्माधिकृतौसमस्तशरीरिणांस्थावरजं गमानाम् ॥ मयानियुक्तोद्यदिनादिकृत्यःप्रशाधिसर्वान्ममशासनेन ॥४४॥ त्वंदक्षिणायाश्चदिशोधिनाथस्त्वंकर्मसाक्षीभवसर्वजंतोः ॥ त्वद्दर्शिताध्वान इतोव्रजंतुस्वकर्मयोग्यांगतिमुत्तमाधमाः ॥ ४५ ॥ त्वयायदेतन्ममभक्तिभाजालिंगंसमाराधितमत्रधर्म ॥ तद्दर्शनात्स्पर्शनतोऽर्चनाच्चसिद्धिर्भविष्यत्य चिरेणपुंसाम् ॥ ४६ ॥ धर्मेश्वरंयःसकृदेवमर्त्योविलोकयिष्यत्यवदातबुद्धिः ॥ स्नात्वापुरस्तेऽत्रचधर्मतीर्थेनतस्यदूरेपुरुषार्थसिद्धिः ॥ ४७ ॥ कृत्वाप्य घानामिहयःसहस्रंधर्मेश्वरंपश्यतिदैवयोगात् ॥ सहेतनोजातुसनारकींव्यथांकथांतदीयांदिविकुर्वतेमराः ॥ ४८ ॥ योधर्मपीठंप्रतिलभ्यकाश्यांस्वश्रेयसे नोयततेऽत्रमर्त्यः ॥ कथंसधर्मत्वमिवातितेजाःकरिष्यतिस्वंकृतकृत्यमेव ॥४९॥त्वयायथाप्ताइहधर्मराजमनोरथास्तेगुरुभिस्तपोभिः ॥ तथैवधर्मेश्वरभ क्तिभाजांकामाःफलिष्यंतिनसंशयोत्र ॥ ५० ॥ कृत्वाप्यघान्येवमहांत्यपीहधर्मेश्वरार्चांसकृदेवकुर्वन् ॥ कुतोविभेतिप्रियबंधुरेवतवत्वदीयार्चित लिंगभक्तः ॥ ५१ ॥ पत्रेणपुष्पेणजलेनदूर्वयायोधर्मधर्मेश्वरमर्चयिष्यति ॥ समर्चयिष्यंत्यमृतांधसस्तंमंदारमालाभिरतिप्रहृष्टाः ॥ ५२ ॥ त्वत्तो विभेष्यंतिकृतैनसोयेभयंनतेषांभविताकदाचित् ॥ धर्मेश्वरार्चारचनांकरिष्यतांहरिष्यतांबंधुतयामनस्ते ॥ ५३ ॥ यदत्रदास्यंतिहिधर्मपीठेनराद्युनद्यां कृतमज्जनाश्च ॥ तदक्षयंभावियुगांतरेपिकृतप्रणामास्तवधर्मलिंगे ॥ ५४ ॥ येकार्तिकेमासिसिताष्टमीतिथौयात्रांकरिष्यंतिनराउपोषिताः ॥ रात्रौचवै जागरणंमहोत्सवैर्धर्मेश्वरेतेनपुनर्भवाभुवि ॥ ५५ ॥ स्तुतिंचयेवैत्वदुदीरितामिमांनराःपठिष्यंति[illegible]ग्रतःक्वचित् ॥ निरेनसस्तेममलोकगामिनःप्राप्स्यं तितेवैभवतःसखित्वम् ॥ ५६ ॥

पुनर्वरंब्रूहियथेप्सितंददेतेजोनिधेनंदनधर्मराज ॥ अदेयमत्रास्तिनकिंचिदेवतेविधेहिवागुद्यममात्रमेव ॥ ५७ ॥ प्रसन्नमूर्तिंसविलोक्यशंकरंकारुण्यपूर्णं स्वमनोरथाभिदम् ॥ आनंदसंदोहसरोनिमग्नोवक्तुंक्षणंनैवशशाककिंचित् ॥ ५८ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडउत्तरार्धेधर्मेशमहिमाख्यानंनामाष्टसप्ततितमोऽध्यायः ॥ ७८॥ ॥ स्कंदउवाच ॥ आनंदबाष्पसलिलरुद्धकंठंविलोक्यतम् ॥ मृडःपस्पर्श पाणिभ्यांसौधाभ्यांतुसुधांबुधिः ॥ १ ॥ अथतत्स्पर्शसौख्येनधर्मराजोमहातपाः ॥ पुनरंकुरयामासतपोग्निज्वलितांतनुम् ॥ २ ॥ ततःप्रोवाचसब्राह्मिर्देव देवमुमापतिम् ॥ प्रसन्नवदनंशांतंशांतपारिषदावृतम् ॥ ३ ॥ प्रसन्नोसियदीशानसर्वज्ञकरुणानिधे ॥ किमन्येनवरेणात्रयत्त्वंसाक्षात्कृतोमया ॥ ४ ॥ यंनवेदाविदुःसम्यङ्नचतौवेदपूरुषौ ॥ ततोपिवरयोग्योस्मितन्नाथप्रार्थयाम्यहम् ॥ ५ ॥ श्रीकंठांडजडिंभानाममीषांमधुरब्रुवाम् ॥ मत्तपश्चिरसाक्षीणां मत्पुरःप्राप्तजन्मनाम् ॥ ६ ॥ पितृभ्यांपरिहीनानामितिहासकथाविदाम् ॥ त्यक्ताहारविहाराणांकीराणांवरदोभव ॥७॥ एतत्प्रसूतिसमयेआमयेनप्रपी डिता ॥ शुकीपंचत्वमापन्नाशुकःश्येनेनभक्षितः ॥ ८ ॥ रक्षितानामनाथानांसदामन्मुखदर्शिनाम् ॥ अनाथनाथभवताह्यायुःशेषस्वरूपिणा ॥ ९ ॥ इतिधर्मवचःश्रुत्वापरोपकृतिनिर्मलम् ॥ तानाहूयमुनेशंभुर्विनयावनताननान् ॥१०॥ उवाचधर्मेतिप्रीतःशुकशावानिदंवचः ॥ अयिपत्ररथाब्रूतसाधवो धर्मसंगताः ॥ ११ ॥ कोवरोभवतांदेयोधर्मेशपरिचारिणाम् ॥ साधुसंसर्गसंक्षीणजन्मांतरमहैनसाम् ॥ १२ ॥ इतिश्रुत्वामहेशस्यवचनंतेपत त्रिणः ॥ प्रोचुःप्रणम्यदेवेशंनमस्तेभवनाशन ॥ १३ ॥ ॥ पक्षिणऊचुः ॥ ॥ अनाथनाथसर्वज्ञकोवरोनःसमीहितः ॥ इतोपित्र्यक्षयत्साक्षा त्तिर्यक्त्वेपिसमीक्षिताः ॥ १४ ॥

लाभाःसंतूद्यमवतांगिरीशेहपरःशताः ॥ परंपरोयंलाभोत्रयत्त्वंदृग्गोचरीभवेः ॥ १५ ॥ यदेतदृश्यतेनाथतत्सर्वंक्षणभंगुरम् ॥ अभंगुरोभवानेकस्त्वत्स पर्याप्यभंगुरा ॥ १६ ॥ विचित्रजन्मकोटीनांस्मृतिर्नोत्रपरिस्फुरेत् ॥ एतत्तपस्विरचितलिंगपूजाविलोकनात् ॥ १७ ॥ देवयोनिरपिप्राप्ताचिरमस्मा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भिरीशितः ॥ दिव्यांगनाःसहस्राणितत्रभुक्तास्वलीलया ॥ १८ ॥ आसुरीदानवीनागीनैर्ऋतीचापिकैन्नरी ॥ विद्याधरीचगांधर्वीयोनिरस्माभिरर्जिता ॥ ॥ १९ ॥ नरत्वेभूपतित्वंचपरिप्राप्तमनेकशः ॥ जलेजलचरत्वंचस्थलेचस्थलचारिता ॥ २० ॥ वनेवनौकसोजाताग्रामेषुग्रामवासिनः ॥ दातारोया चितारश्चरक्षितारश्चघातुकाः ॥ २१ ॥ सुखिनोपिवयंजातादुःखिनोवयमास्मच ॥ जेतारश्चवयंजाताःपराजेतारएवच ॥ २२ ॥ अधीतिनोपिमूर्खा श्चस्वामिनःसेवकाअपि ॥ चतुर्षुभूतग्रामेषुउत्तमाधममध्यमाः ॥ २३ ॥ अभूमभूरिशःशंभोनक्वापिस्थैर्यमागताः ॥ इतोयोनेस्ततोयोनौततोयोनेस्ततो न्यतः ॥ २४ ॥ पिनाकिन्क्वापिनप्रापिसुखलेशोमनागपि ॥ इदानींपुण्यसंभारैर्धर्मेश्वरविलोकनात् ॥२५॥ तापनेःसुतपोवह्निज्वालाप्रज्वलितैनसः ॥ संवीक्ष्यत्र्यक्षसाक्षात्त्वांकृतकृत्याबभूविम ॥ २६ ॥ तथापिचेद्वरोदेयस्तिर्यक्ष्वस्मासुधूर्जटे ॥ कृपणेष्वपिशोच्येषुज्ञानंसर्वज्ञदेहितत् ॥ २७ ॥ येनज्ञाने नमुक्ताःस्मोऽमुष्मात्संसारबंधनात् ॥ यंत्रिताःप्राकृतैःपाशैरदुर्भेद्यैश्चमादृशैः ॥ २८ ॥ ऐंद्रंपदंनवांछामोनचांद्रंनान्यदेवहि ॥ वाञ्छामःकेवलंमृत्युंका श्यांशंभोऽपुनर्भवम् ॥ २९ ॥ त्वत्सान्निध्याद्विजानीमःसर्वज्ञसकलंवयम् ॥ यथाचंदनसंसर्गात्सर्वेसुरभयोद्रुमाः ॥ ३० ॥ एतदेवपरंज्ञानंसंसारोच्छित्ति कारणम् ॥ वपुर्विसर्जनंकालेयत्तवानंदकानने ॥ ३१ ॥ निर्मथ्यविष्वग्वाग्जालंसारभूतमिदंपरम् ॥ ब्रह्मणोदीरितंपूर्वंकाश्यांमुक्तिस्तनुत्यजाम् ॥३२॥ यद्वाच्यंबहुभिर्ग्रंथैस्तदष्टाभिरिहाक्षरैः ॥ हरिणोक्तंरविपुरःकैवल्यंकाशिसंस्थितौ ॥ ३३ ॥ याज्ञवल्क्योमुनिवरःप्रोक्तवान्मुनिसंसदि ॥ रवेरधीत्यनि गमान्काश्यामंतेपरंपदम् ॥ ३४ ॥ स्वामिनापिजगद्धात्रीपुरतोमंदराचले ॥ इदमेवपुराप्रोक्तंकाशीनिर्वाणजन्मभूः ॥ ३५ ॥

कृष्णद्वैपायनोप्येवंशंभोवक्ष्यतिनान्यथा ॥ यत्रविश्वेश्वरःसाक्षान्मुक्तिस्तत्रपदेपदे ॥३६॥ वदंत्यन्येपिमुनयस्तीर्थसंन्यासकारिणः ॥ चिरंतनालोमशाद्याः काशिकामुक्तिकाशिका ॥ ३७ ॥ वयमप्येवंजानीमोयत्रस्वर्गतरंगिणी ॥ आनंदकाननेशंभोर्मोक्षस्तत्रैवनिश्चितम् ॥ ३८ ॥ भूतंभाविभविष्यंयत्स्वर्गे मर्त्येरसातले ॥ तत्सर्वमेवजानीमोधर्मेशानुग्रहात्परात् ॥३९॥ अतोहिरण्यगर्भोक्तंहरिप्रोक्तंमुनीरितम् ॥ भवतोक्तंचनिखिलंशंभोजानीमहेवयम् ॥४०॥ करामलकवत्सर्वमेतद्ब्रह्मांडगोलकम् ॥ अस्मद्वाग्गोचरेऽस्त्येवधर्मपीठनिषेवणात् ॥ ४१ ॥ धर्मराजस्यतपसातिर्यञ्चोपिवयंविभो ॥ जाताःस्मनिर्वि कल्पंहिसर्वज्ञानस्यभाजनम् ॥ ४२ ॥ मधुरंमृदुलंसत्यंस्वप्रमाणंसुसंस्कृतम् ॥ हितंमितंसदृष्टांतंश्रुत्वापक्षिसुभाषितम् ॥ ४३ ॥ देवोतिविस्मयापन्ना ऽवर्णयत्पीठगौरवम् ॥ त्रैलोक्यनगरेचात्रकाशीराजगृहंमम ॥ ४४ ॥ तत्रापिभोगभवनमनर्घ्यमणिनिर्मितम् ॥ मोक्षलक्ष्मीविलासाख्यःप्रासादोमेति शर्मभूः ॥ ४५ ॥ पतत्रिणोपिमुच्यंतेयंकुर्वाणाःप्रदक्षिणम् ॥ स्वेच्छयाविचरंतःखेखेचराअपिदेवताः ॥४६॥ मोक्षलक्ष्मीविलासाख्यप्रासादस्यविलो कनात् ॥ शरीराद्दूरतोयातिब्रह्महत्यापिनान्यथा ॥ ४७ ॥ मोक्षलक्ष्मीविलासस्यकलशोयैर्निरीक्षतः ॥ निधानकलशास्तांस्तुनमुंचंतिपदेपदे ॥ ४८ ॥ दूरतोपिपताकापिममप्रासादमूर्धगा ॥ नेत्रातिथीकृतायैस्तुनित्यंतेऽतिथयोमम ॥ ४९ ॥ भूमिंभित्त्वास्वयंजातस्तत्प्रासादमिषेणहि ॥ आनंदाख्यस्यकं दस्यकोप्येषपरमोंकुरः ॥५०॥ ब्रह्मादिस्थावरांतानियत्ररूपाण्यनेकशः ॥ मामेवोपासतेनित्यंचित्रंचित्रगतान्यपि ॥५१॥ ससौधोमेखिलेलोकेस्थानं परमनिर्वृतेः ॥ रतिशालासमेरम्यासमेविश्वासभूमिका ॥५२॥ ममसर्वगतस्यापिप्रासादोयंपरास्पदम् ॥ परंब्रह्मयदाम्नातंपरमोपनिषद्गिरा ॥ अमूर्तंतदहं मूर्तोभूयांभक्तकृपावशात् ॥ ५३ ॥ नैःश्रेयस्याःश्रियोधामतद्याम्यांमंडपोस्तिमे ॥ तत्राहंसततंतिष्ठेतत्सदोमंडपंमम ॥ ५४ ॥ निमेषार्धप्रमाणंचकालं तिष्ठतिनिश्चलः ॥ तत्रयस्तेनवैयोगःसमभ्यस्तःसमाःशतम् ॥ ५५ ॥ निर्वाणमंडपंनामतत्स्थानंजगतीतले ॥ तत्रर्चंसंजपन्नेकांलभेत्सर्वश्रुतेःफलम् ॥ ॥ ५६ ॥ प्राणायामंतुयःकुर्यादप्येकंमुक्तिमंडपे ॥ तेनाष्टांगःसमभ्यस्तोयोगोऽन्यत्रायुतंसमाः ॥ ५७ ॥

निर्वाणमंडपेयस्तुजपेदेकंषडक्षरम् ॥ कोटिरुद्रेणजप्तेनयत्फलंतस्यतद्भवेत् ॥५८॥ शुचिर्गंगांभसिस्नातोयोजपेच्छतरुद्रियम् ॥ निर्वाणमंडपेज्ञेयःसरुद्रो द्विजवेषभृत् ॥ ५९ ॥ ब्रह्मयज्ञंसकृत्कृत्वाममदक्षिणमंडपे ॥ ब्रह्मलोकमवाप्याथपरंब्रह्माधिगच्छति ॥ ६० ॥ धर्मशास्त्रंपुराणानिसेतिहासानितत्रयः ॥ पठेन्निरभिलाषुःसन्सवसेन्ममवेश्मनि ॥ ६१ ॥ तिष्ठेदिंद्रियचापल्यंयोनिवार्यक्षणंकृती ॥ निर्वाणमंडपेन्यत्रतेनतप्तंमहत्तपः ॥ ६२ ॥ वायुभक्षणतो न्यत्रयत्पुण्यंशरदांशतम् ॥ तत्पुण्यंघटिकार्धेनमौनंदक्षिणमंडपे ॥ ६३ ॥ मितंकृष्णलकेनापियोदद्यान्मुक्तिमंडपे ॥ स्वर्णंसौवर्णयानेनसतुसंचरते दिवि ॥ ६४ ॥ तत्रैकंजागरंकुर्याद्यस्मिन्कस्मिन्दिनेपियः ॥ उपोषितोर्चयेल्लिंगंससर्वव्रतपुण्यभाक् ॥ ६५ ॥ तत्रदत्त्वामहादानंतत्रकृत्वामहाव्रतम् ॥ तत्राधीत्याखिलंवेदंच्यवतेननरोदिवः ॥ ६६ ॥ प्रयाणंकुर्वतेयस्यप्राणामेमुक्तिमंडपे ॥ समामनुप्रविष्टोत्रतिष्ठेद्यावदहंखलु ॥ ६७ ॥ जलक्रीडां सदाकुर्यांज्ञानवाप्यांसहोमया ॥ यदंबुपानमात्रेणज्ञानंजायेतनिर्मलम् ॥ ६८ ॥ तज्जलक्रीडनस्थानंममप्रीतिकरंमहत् ॥ अमुष्मिन्राजसदनेजाड्यहृ ज्जलपूरितम् ॥ ६९ ॥ तत्प्रासादपुरोभागेममशृंगारमंडपः ॥ श्रीपीठंतद्धिविज्ञेयंनिःश्रीकश्रीसमर्पणम् ॥७०॥ मदर्थंतत्रयोदद्याद्दुकूलानिशुचीन्यहो ॥ माल्यानिसुविचित्राणियक्षकर्दमवंतिच ॥ ७१ ॥ नानानेपथ्यवस्तूनिपूजोपकरणाऽन्यपि ॥ सश्रियालंकृतस्तिष्ठेद्यत्रकुत्रापिसत्तमः ॥७२॥ निर्वाणल क्ष्मीर्वृणुतेतंनिर्वाणपदाप्तये ॥ यत्रकुत्रापिनिधनंप्राप्नुयादपिसध्रुवम् ॥ ७३ ॥ मोक्षलक्ष्मीविलासाख्यप्रासादस्योत्तरेमम ॥ ऐश्वर्यमंडपंरम्यंतत्रैश्वर्यं ददाम्यहम् ॥ ७४ ॥ मत्प्रासादैंद्रदिग्भागेज्ञानमंडपमस्तियत् ॥ ज्ञानंदिशामिसततंतत्रमांध्यायतांसताम् ॥ ७५ ॥ भवानिराजसदनेममास्तिहिमहा नसम् ॥ यत्तत्रोपहृतंपुण्यंनिर्विशामिमुदैवतत् ॥ ७६ ॥ विशालाक्ष्यामहासौधेममविश्रामभूमिका ॥ तत्रसंसृतिखिन्नानांविश्रामंश्राणयाम्यहम् ॥ ॥ ७७ ॥ नियमस्नानतीर्थंचचक्रपुष्करिणीमम ॥ तत्रस्नानवतांपुंसांतन्नैर्मल्यंदिशाम्यहम् ॥ ७८ ॥

यदाहुःपरमंतत्त्वंयदाहुर्ब्रह्मसत्तमम् ॥ स्वसंवेद्यंयदाहुश्चतत्तत्रांतेदिशाम्यहम् ॥७९॥ यदाहुस्तारकंज्ञानंयदाहुरतिनिर्मलम् ॥ स्वात्मारामंयदाहुश्चतत्तत्रां तेदिशाम्यहम् ॥ ८० ॥ जगन्मंगलभूर्यात्रपरमामणिकर्णिका ॥ विपाशयामितत्राहंकर्मभिःपाशितान्पशून् ॥ ८१ ॥ निर्वाणश्राणनेयत्रपात्रापात्रंनचिं तये ॥ आनंदकाननेतन्मेदानस्थानंदिवानिशम् ॥ ८२ ॥ भवांबुधौमहागाधेप्राणिनःपारमिज्जतः ॥ भूत्वैवकर्णधारोंतेयत्रसंतारयाम्यहम् ॥ ८३ ॥ सौभाग्यभाग्यभूर्यावैविख्यातामणिकर्णिका ॥ ददामितस्यांसर्वस्वमग्रजायांत्यजायवा ॥८४॥ महासमाधिसंपन्नैर्वेदांतार्थनिषेविभिः ॥ दुष्प्रापोन्यत्रयो मोक्षःशोच्यैरपिसलभ्यते ॥ ८५ ॥ दीक्षितोवादिवाकीर्तिःपंडितोवाप्यपंडितः ॥ तुल्योमेमोक्षदीक्षायांसंप्राप्यमणिकर्णिकाम् ॥ ८६ ॥ यत्त्यागेन्यत्र कृपणस्तत्प्राप्यमणिकर्णिकाम् ॥ ददामिजंतुमात्रायसर्वस्वंचिरसंचितम् ॥ ८७ ॥ यदिदैवादिहप्राप्तस्त्रिसंयोगोऽतिदुर्घटः ॥ अविचारंतदादेयंसर्वस्वं चिरसंचितम् ॥ ८८ ॥ शरीरमथसंपत्तिरथसामणिकर्णिका ॥ त्रिसंयोगोयमप्राप्योदेवैरिंद्रादिकैरपि ॥ ८९ ॥ पुनःपुनर्विचार्येतिजंतुमात्रेभ्यएवच ॥ निर्वाणलक्ष्मींयच्छामिसदोपमणिकर्णिकम् ॥ ९० ॥ मुक्तिदानमहीसामेवाराणस्यांमहीयसी ॥ तन्महीरजसासाम्यंत्रिलोक्यपिनचोद्वहेत् ॥ ९१ ॥ परंलिंगार्चनस्थानमविमुक्तेश्वरेश्वरम् ॥ तत्रपूजांसकृत्कृत्वाकृतकृत्योनरोभवेत् ॥ ९२ ॥ सायंपाशुपतींसंध्यांकुर्यांपशुपतीश्वरे ॥ विभूतिधारणात्त

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रपशुपाशैर्नबध्यते ॥ ९३ ॥ प्रातःसंध्यांकरोम्येवसदोंकारनिकेतने ॥ तत्रैकापिकृतासंध्यासर्वपातककृंतनी ॥ ९४ ॥ वसामिकृत्तिवासेहंसदाप्रति चतुर्दशि ॥ अत्रजागरणंकृत्वाचतुर्दश्यांनगर्भभाक् ॥ ९५ ॥ रत्नेश्वरोर्चितोदद्यान्महारत्नानिभक्तितः ॥ रत्नैःसमर्च्यतल्लिंगंस्त्रीरत्नादिलभेन्नरः ॥ ९६ ॥ विष्टपत्रितयांतःस्थोप्यहंलिंगेत्रिविष्टपे ॥ तिष्ठामिसततंभक्तमनोरथसमृद्धये ॥ ९७ ॥

विरजस्कंमहापीठंतत्रसंसेव्यमानवः ॥ विरजाजायतेनूनंचतुर्नदकृतोदकः ॥ ९८ ॥ महादेवेमहापीठंममसाधकसिद्धिदम् ॥ तत्पीठदर्शनादेवमहापापैः प्रमुच्यते ॥ ९९ ॥ पितृप्रीतिप्रदंपीठंवृषभध्वजसंज्ञकम् ॥ पितृतर्पणकृत्तत्रपितॄंस्तारयतिक्षणात् ॥ १०० ॥ आदिकेशवपीठेहमादिकेशवरूपधृक् ॥ श्वेतद्वीपंनयेभक्तान्वैष्णवानतिवल्लभान् ॥ १ ॥ तत्रैवमंगलापीठेसर्वमंगलदायिनि ॥ उपपंचनदेतीर्थेभक्तान्संतारयाम्यहम् ॥ २ ॥ बिंदुमाधवरूपे णयत्राहंवैष्णवाञ्जनान् ॥ नयेपंचनदस्नातांस्तद्विष्णोःपरमंपदम् ॥ ३ ॥ पंचमुद्रेमहापीठेयेवीरेश्वरसेवकाः ॥ तेषांपरमनिर्वाणंकालेनाल्पेनजायते ॥ ॥ ४ ॥ तत्रसिद्धेश्वरीपीठेचंद्रेश्वरसमीपतः ॥ तत्रसंनिधिकर्तॄणांसिद्धिःषण्मासतोभवेत् ॥ ५ ॥ काश्यांचयोगिनीपीठेयोगसिद्धिविधायिनि ॥ सिद्धी रुच्चाटनाद्याश्चकैर्नलब्धाःसुसाधकैः ॥ ६ ॥ अनेकानीहपीठानिसंतिकाश्यांपदेपदे ॥ परंधर्मेशपीठस्यकाचिच्छक्तिरनुत्तमा ॥ ७ ॥ यत्रामीबालकी राश्चनिर्मलज्ञानभाजनम् ॥ आसुःसदुपदेशान्मेत्रातत्रातेतिभाषिणः ॥ ८ ॥ एतद्धर्मेश्वरंपीठंत्यजाम्यद्यदिनावधि ॥ नकदाचित्तरणिजत्वत्तपोवनमु त्तमम् ॥ ९ ॥ ममानुग्रहतःकीरानेतान्पश्यरवेःसुत ॥ दिव्यंविमानमारुह्यगंतारोमत्पुरंमहत् ॥ ११० ॥ तत्रभुक्त्वाचिरंभोगाञ्ज्ञानंप्राप्यमयेरितम् ॥ इहमुक्तिमवाप्स्यंतित्वत्संसर्गातिनिर्मलाः ॥ ११ ॥ इत्युक्तवतिदेवेशेकैलासशिखरोपमम् ॥ दिव्यंविमानमापन्नंरुद्रकन्यापरिष्कृतम् ॥ १२ ॥ आरुह्यते नयानेनदिव्यरूपधराःखगाः ॥ कैलासमभिसंजग्मुर्धर्ममापृच्छ्यतेऽमलाः ॥११३॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थे काशीखंडउत्तरार्धेधर्मेशाख्यानंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ स्कंदउवाच ॥ ॥ कुंभोद्भूततदाश्चर्यंविलोक्यजगदंबिका ॥ उवाचशंभुं प्रणताप्रणतार्तिहरंपरम् ॥१॥ ॥ अंबिकोवाच ॥ ॥ अस्यपीठस्यमाहात्म्यंमहादेवमहेश्वर ॥ तिरश्चामपियज्जातंज्ञानंसंसारमोचनम् ॥ २ ॥ अतः प्रभावंविज्ञायधर्मपीठस्यधूर्जटे ॥ धर्मेश्वरसमीपेहंस्थास्याम्यद्यदिनावधि ॥ ३ ॥

अत्रलिंगेतुयेभक्ताःस्त्रियोवापुरुषास्तुवा ॥ तेषामभीष्टांसंसिद्धिंसाधयिष्याम्यहंसदा ॥ ४ ॥ ॥ ईश्वरउवाच ॥ ॥ साधुकृतंत्वयादेविकृतवत्याप रिग्रहम् ॥ अस्येहधर्मपीठस्यमनोरथकृतःसताम् ॥ ५ ॥ तएवविश्वभोक्तारोविश्वमान्यास्तएवहि ॥ येत्वांविश्वभुजामत्रपूजयिष्यंतिमानवाः ॥ ६ ॥ विश्वेविश्वभुजेविश्वस्थित्युत्पत्तिलयप्रदे ॥ नरास्त्वदर्चकाश्चात्रभविष्यंत्यमलात्मकाः ॥७॥ मनोरथतृतीयायांयस्तेभक्तिंविधास्यति ॥ तन्मनोरथसं सिद्धिर्भवित्रीमदनुग्रहात् ॥ ८ ॥ नारीवापुरुषोवाथत्वद्व्रताचरणात्प्रिये ॥ मनोरथानिहप्राप्यज्ञानमंतेचलप्स्यते ॥ ९ ॥ ॥ देव्युवाच ॥ ॥ मनो रथतृतीयायांव्रतंकीदृक्कथाकथम् ॥ किंफलंकैःकृतंनाथकथयैतत्कृपांकुरु ॥ १० ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुदेवियथापृष्टंभवत्याभवतारिणि ॥ मनोरथव्रतंचैतद्गुह्याद्गुह्यतरंपरम् ॥ ११ ॥ पुलोमतनयापूर्वंततापपरमंतपः ॥ किंचिन्मनोरथंप्राप्तुंनचापतपसःफलम् ॥ १२ ॥ अपूपुजत्ततोमांसाभ क्तयापरमयामुदा ॥ गीतेनसरहस्येनकलकंठीकलेनहि ॥ १३ ॥ तद्गानेनातिसंतुष्टोमृदुनामधुरेणच ॥ सुतालेनसुरंगेणधातुमात्राकलावता ॥ १४ ॥ प्रोवाचतांवरंब्रूहिप्रसन्नोस्मिपुलोमजे ॥ अनेनचसुगीतेनत्वनयालिंगपूजया ॥ १५ ॥ ॥ पुलोमजोवाच ॥ ॥ यदिप्रसन्नोदेवेशतदायोमेमनोरथः ॥ तंपूरयमहादेवमहादेवीमहाप्रिय ॥ १६ ॥ सर्वदेवेषुयोमान्यःसर्वदेवेषुसुंदरः ॥ यायजूकेषुसर्वेषुयःश्रेष्ठःसोस्तुमेपतिः ॥ १७ ॥ यथाभिलषितंरूपंयथा भिलषितंसुखम् ॥ यथाभिलषितंचायुःप्रसन्नोदेहिमेभव ॥ १८ ॥ यदायदाचपत्यामेसंगःस्याद्धृत्सुखेच्छया ॥ तदातदाचतंदेहंत्यक्त्वान्यंदेहमाप्नुयाम् ॥ ॥ १९ ॥ सदाचलिंगपूजायांममभक्तिरनुत्तमा ॥ भवभूयाद्भवहरजरामरणहारिणी ॥ २० ॥ भर्तुर्व्ययेपिवैधव्यंक्षणमात्रमपीहनं ॥ ममभाविमहादेवपा तिव्रत्यंचयातुमा ॥ २१ ॥ ॥ स्कंदउवाच ॥ ॥ इमंमनोरथंतस्याःपौलोम्याःपुरसूदनः ॥ समाकर्ण्यक्षणंस्मित्वाप्राहेशोविस्मयान्वितः ॥ २२ ॥ ईश्वरउवाच ॥ ॥ पुलोमकन्येयश्चैषत्वयाकारिमनोरथः ॥ लप्स्यसेव्रतचर्यातस्तत्कुरुष्वजितेंद्रिये ॥ २३ ॥

मनोरथतृतीयायाश्चरणेनभविष्यति ॥ तत्प्राप्तयेव्रतंवक्ष्येतद्विधेहियथोदितम् ॥ २४ ॥ तेनव्रतेनचीर्णेनमहासौभाग्यदेनतु ॥ अवश्यंभवितावालेतवचैवं मनोरथः ॥ २५ ॥ ॥ पुलोमकन्योवाच ॥ ॥ कारुण्यवारिधेशंभोप्रणतप्राणिसर्वद ॥ किमात्मिकाथकाशक्तिःकापूज्यातत्रदेवता ॥ २६ ॥ कदा चतद्विधातव्यमितिकर्तव्यताचका ॥ इत्याकर्ण्यशिवोवाक्यंतांतुप्रणिजगादह ॥ २७ ॥ ॥ ईश्वरउवाच ॥ ॥ मनोरथतृतीयायांव्रतंपौलोमितच्छुभम् ॥ पूज्याविश्वभुजागौरीभुजविंशतिशालिनी ॥ २८ ॥ वरदोऽभयहस्तश्चसाक्षसूत्रःसमोदकः ॥ देव्याःपुरस्ताद्व्रतिनापूज्यआशाविनायकः ॥२९॥ चैत्रशुक्ल तृतीयायांकृत्वावैदंतधावनम् ॥ सायंतनींचनिर्वर्त्यनातितृप्त्याभुजिक्रियाम् ॥३०॥ नियमंचेतिगृह्णीयाज्जितक्रोधोजितेंद्रियः ॥ संत्यक्तास्पृश्यसंस्पर्शः शुचिस्तद्गतमानसः ॥ ३१ ॥ प्रातर्व्रतंचरिष्यामिमातर्विश्वभुजेनघे ॥ विधेहितत्रसांनिध्यंमन्मनोरथसिद्धये ॥ ३२ ॥ नियमंचेतिसंगृह्यस्वपेद्रात्रौशुभं स्मरन् ॥ प्रातरुत्थायमेधावीविधायावश्यकंविधिम् ॥ ३३ ॥ शौचमाचमनंकृत्वादंतकाष्ठंसमाददेत् ॥ अशोकवृक्षस्यशुभंसर्वशोकनिशातनम् ॥३४॥ नित्यंतनंचनिष्पाद्यविधिंविधिविदांवरः ॥ स्नात्वाशुद्धांवरःसायंगौरीपूजांसमाचरेत् ॥ ३५ ॥ आदौविनायकंपूज्यघृतपूरान्निवेद्यच ॥ ततोर्चयेद्विश्वभु जामशोककुसुमैःशुभैः ॥ ३६ ॥ अशोकवर्तिनैवेद्यैर्धूपैश्चागुरुसंभवैः ॥ कुंकुमेनानुलिप्यादावेकभक्तंततश्चरेत् ॥ ३७ ॥ अशोकवर्तिसहितैर्घृतपूरैर्म नोहरैः ॥ एवंचैत्रतृतीयायांव्यतीतायांपुलोमजे ॥३८॥ राधादिफाल्गुनांतासुतृतीयासुव्रतंचरेत् ॥ क्रमेणदंतकाष्ठानिकथयामितवानघे ॥३९॥ अनुले पनवस्तूनिकुसुमानितथैवच ॥ नैवेद्यानिगजास्यस्यदेव्याश्चापिशुभव्रते ॥ ४० ॥ अन्नानिचैकभक्तस्यशृणुतानिफलाप्तये ॥ जंब्वपामार्गखदिरजाती चूतकदंबकम् ॥४१॥ प्लक्षोदुंबरखर्जूरीबीजपूरीसदाडिमी ॥ दंतकाष्ठद्रुमाएतेव्रतिनःसमुदाहृताः ॥४२॥ सिंदूरागुरुकस्तूरीचंदनंरक्तचंदनम् ॥ गोरोचना देवदारुपद्माक्षंचनिशाद्वयम् ॥४३॥ प्रीत्यानुलेपनंबालेयक्षकर्दमसंभवम् ॥ सर्वेषामप्यलाभेचप्रशस्तोयक्षकर्दमः ॥४४॥ कस्तूरिकायाद्वौभागौद्वौभागौ कुंकुमस्यच ॥ चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि ॥ ४५ ॥ यक्षकर्दमइत्येषसमस्तसुरवल्लभः ॥ अनुलिप्याथकुसुमैरर्चयेद्वच्मितान्यपि ॥ ४६ ॥

पाटलामल्लिकापद्मकेतकीकरवीरकैः ॥ उत्पलैराजचंपैश्चनंद्यावर्तैश्चजातिभिः ॥ ४७ ॥ कुमारीभिःकर्णिकारैरलाभेतच्छदैःसह ॥ सुगंधिभिःप्रसूनौघैः सर्वालाभेपिपूजयेत् ॥ ४८ ॥ करंभोदधिभक्तंचसचूतरसमंडकाः ॥ फेणिकावटकाश्चैवपायसंचसशर्करम् ॥ ४९ ॥ समुद्गंसघृतंभक्तंकार्त्तिकेविनिवे दयेत् ॥ इंडेरिकाश्चलड्डुकामाघेलंपसिकाशुभा ॥ ५० ॥ मुष्टिकाःशर्करागर्भाःसर्पिषापरिसाधिताः ॥ निवेद्याःफाल्गुनेदेव्यैसार्धंविघ्नजितामुदा ॥ ५१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निवेदयेद्यदन्नंहिएकभक्तेपितत्स्मृतम् ॥ अन्यन्निवेद्यसंमूढोभुंजानोऽन्यत्पतेदधः ॥ ५२ ॥ प्रतिमासंतृतीयायामेवमाराध्यवत्सरम् ॥ व्रतसंपूर्तयेकुर्या त्स्थंडिलेऽग्निसमर्चनम् ॥ ५३ ॥ जातवेदसमंत्रेणतिलाज्यद्रविणेनच ॥ शतमष्टाधिकंहोमंकारयेद्विधिनाव्रती ॥५४॥ सदैवनक्तेपूजोक्तासदानक्तेतुभो जनम् ॥ नक्तएवहिहोमोऽयंनक्तएवक्षमापनम् ॥ ५५ ॥ गृहाणपूजांमेभक्त्यामातर्विघ्नजितासह ॥ नमोस्तुतेविश्वभुजेपूरयाशुमनोरथम् ॥ ५६ ॥ नमो विघ्नकृतेतुभ्यंनमआशाविनायक ॥ त्वंविश्वभुजयासार्धंममदेहिमनोरथम् ॥५७॥ एतौमंत्रौसमुच्चार्यपूज्यौगौरीविनायकौ ॥ व्रतक्षमापनेदेयंपर्यंकस्तू लिकान्वितः ॥ ५८ ॥ उपधान्यासमायुक्तोदीपीदर्पणसंयुतः ॥ आचार्यंचसपत्नीकंपर्यंकउपवेश्यच ॥ ५९ ॥ व्रतीसमर्चयेद्वस्त्रैःकरकर्णविभूषणैः ॥ सुगंधचंदनैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥ ६० ॥ दद्यात्पयस्विनागांचव्रतस्यपरिपूर्तये ॥ तथोपभोगवस्तूनिच्छत्रोपानत्कमंडलुम् ॥ ६१ ॥ मनो रथतृतीयायाव्रतमेतन्मयाकृतम् ॥ न्यूनातिरिक्तंसंपूर्णमेतदस्तुभवद्गिरा ॥६२॥ इत्याचार्यंसमापृच्छ्यतथेत्युक्तश्चतेनवै ॥ आसीमांतमनुव्रज्यदत्त्वान्ये भ्योपिशक्तितः ॥ ६३ ॥ नक्तंसमाचरेत्पोष्यैःसार्धंसुप्रीतमानसः ॥ प्रातश्चतुर्थ्यांसंभोज्यचतुरश्चकुमारकान् ॥ ६४ ॥ अभ्यर्च्यगंधमाल्याद्यैर्द्वादशा पिकुमारिकाः ॥ एवंसंपूर्णतांयातिव्रतमेतत्सुनिर्मलम् ॥६५॥ कार्यंमनोरथावाप्त्यैसर्वैरेतद्व्रतंशुभम् ॥ पत्नींमनोरमांकुल्यांमनोवृत्त्यनुसारिणीम् ॥६६॥ तारिणींदुःखसंसारसागरस्यपतिव्रताम् ॥ कुर्वन्नेतद्व्रतंवर्षंकुमारःप्राप्नुयात्स्फुटम् ॥ ६७ ॥ कुमारीपतिमाप्नोतिस्वाढ्यंसर्वगुणाधिकम् ॥ सुवासिनीलभे त्पुत्रान्पत्युःसौख्यमखंडितम् ॥ ६८ ॥ दुर्भगासुभगास्याच्चधनाढ्यास्याद्दरिद्रिणी ॥ विधवापिनवैधव्यंपुनराप्नोतिकुत्रचित् ॥ ६९ ॥ गुर्विणीचशुभं पुत्रंलभतेसुचिरायुषम् ॥ ब्राह्मणोलभतेविद्यांसर्वसौभाग्यदायिनीम् ॥ ७० ॥

राज्यभ्रष्टोलभेद्राज्यंवैश्योलाभंचविंदति ॥ चिंतितंलभतेशूद्रोव्रतस्यास्यनिषेवणात् ॥७१॥ धर्मार्थीधर्ममाप्नोतिधनार्थीधनमाप्नुयात् ॥ कामीकामानवा प्नोतिमोक्षार्थीमोक्षमाप्नुयात् ॥ ७२ ॥ योयोमनोरथोयस्यसततंविंदतेध्रुवम् ॥ मनोरथतृतीयायाव्रतस्यचरणाद्व्रती ॥ ७३ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंनिशम्यशिवतःशिवासंतुष्टमानसा ॥ पुनःपप्रच्छविश्वेशंप्रबद्धकरसंपुटा ॥ ७४ ॥ अन्यत्रयेव्रतंचैतत्करिष्यंतिसदाशिव ॥ तेकथंपूजयिष्यंतिमां चआशाविनायकम् ॥ ७५ ॥ ॥ शिवउवाच ॥ ॥ साधुपृष्टंत्वयादेविसर्वसंदेहभेदिनि ॥ वाराणस्यांसमर्च्यात्वंविश्वेप्रत्यक्षरूपिणी ॥७६॥ आशा विघ्नजितासार्धंसर्वाशापूर्तिकारिणा ॥ हारिणानंतविघ्नानांममक्षेत्रशुभार्थिना ॥ ७७ ॥ क्षिप्रमागमयित्वाचनत्वादूरंगतानपि ॥ कृतकृत्यान्विधायाथचिं तितैःसुमनोरथैः ॥ ७८ ॥ अन्यत्रव्रतिभिर्विश्वेकांचनीप्रतिमातव ॥ पंचकृष्णलकादूर्ध्वंकार्याविघ्नहृतोपिच ॥ ७९ ॥ आचार्यायव्रतीदद्याद्व्रतांतेप्रति माद्वयम् ॥ सकृत्कृतेव्रतीचास्मिन्कृतकृत्योव्रतीभवेत् ॥ ८० ॥ ततःपुलोमजादेविश्रुत्वैतद्व्रतमुत्तमम् ॥ कृत्वामनोरथंप्रापयथाभिवांछितंहृदि ॥८१॥ अरुंधत्यावसिष्ठोपिलब्धोऽत्रिरनसूयया ॥ सुनीत्योत्तानपादाच्चध्रुवःप्राप्तोऽगजोत्तमः ॥ ८२ ॥ सुनीतेर्दुर्भगत्वंचपुनरस्माद्व्रताद्गतम् ॥ चतुर्भुजःपतिः प्राप्तःक्षीरनीरधिजन्मना ॥ ८३ ॥ किंबहूक्तेनसुश्रोणिकृतंयेनव्रतंत्विदम् ॥ व्रतानितेनसर्वाणिकृतानिव्रतिनाध्रुवम् ॥ ८४ ॥ श्रुत्वाधीमान्कथांपुण्यां पुनस्तद्गतमानसः ॥ शुभबुद्धिमवाप्नोतिपापैरपिविमुच्यते ॥ ८५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेधर्मे श्वराख्यानेविश्वभुजाशाविनायकप्रशंसनेमनोरथतृतीयाव्रताख्यानंनामाशीतितमोध्यायः ॥ ८० ॥ ॥ अगस्त्यउवाच ॥ ॥ धर्मतीर्थस्यमाहात्म्यं कीदृग्देवेनशंभुना ॥ स्कंददेव्यैसमाख्यातंतदाख्याहिकृपांकुरु ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ विंध्योन्नतिहृदाख्यामिधर्मतीर्थसमुद्भवम् ॥ आकर्ण यमहाप्राज्ञयथादेवेनभाषितम् ॥ २ ॥

वृत्रंनिहत्यवृत्रारिर्ब्रह्महत्यामवाप्तवान् ॥ अनुतप्तोथपप्रच्छप्रायश्चित्तंपुरोहितम् ॥ ३ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ यदित्वंदेवराजेमांब्रह्महत्यांसुदु स्त्यजाम् ॥ अपानुनुत्सुस्तद्याहिकाशींविश्वेशपालिताम् ॥ ४ ॥ नान्यत्किंचित्क्वचिद्दृष्टंब्रह्महत्यामहौषधम् ॥ राजधानींपरित्यज्यशक्रविश्वेशितुः पराम् ॥ ५ ॥ भैरवस्यापिहस्ताग्रादपतद्वैधसंशिरः ॥ यत्रानंदवनेतत्रवृत्रशत्रोव्रजद्रुतम् ॥६॥ सीमानमपिसंप्राप्यशक्रानंदवनस्यहि ॥ ब्रह्महत्यापलाये तवेपमानानिराश्रया ॥ ७ ॥ अन्येषामपिपापानांमहापापजुषामपि ॥ नाशयित्रीपराकाशीविश्वेशसमधिष्ठिता ॥ ८ ॥ महापातकतोमुक्तिःकाश्यामे वशतक्रतो ॥ महासंसारतोमुक्तिःकाश्यामेवनचान्यतः ॥९॥ निर्वाणनगरीकाशीकाशीसर्वाघसंघहृत् ॥ विश्वेशितुःप्रियाकाशीद्यौःकाशीसदृशीनहि ॥ ॥ १० ॥ ब्रह्महत्याभयंयस्ययस्यसंसारतोभयम् ॥ जातुचित्तेननत्याज्याकाशिकामुक्तिकाशिका ॥११॥ जंतूनांकर्मबीजानांयत्रदेहविसर्जने ॥ नजातु चित्प्ररोहोस्तिहरदृष्ट्याप्तशुष्मणाम् ॥ १२ ॥ तांकाशींप्राप्यवृत्रारेवृत्रहत्यापनुत्तये ॥ समाराधयविश्वेशंविश्वमुक्तिप्रदायकम् ॥ १३ ॥ बृहस्पतेरिति वचोनिशम्यससहस्रदृक् ॥ आयाद्द्रुततरंकाशींमहापातकघातुकाम् ॥ १४ ॥ स्नात्वोत्तरवहायांचधर्मेशंपरितःस्थितः ॥ आराधयन्महादेवंब्रह्महत्याप नुत्तये ॥ १५ ॥ महारुद्रजपासक्तःसुत्रामाथत्रिलोचनम् ॥ ददर्शलिंगमध्यस्थंस्वभासादीपितांबरम् ॥ १६ ॥ पुनस्तुष्टाववेदोक्तैरुद्रसूक्तैरनेकधा ॥ विनिष्क्रम्यततोलिंगादाविर्भूयभवोवदत् ॥ १७ ॥ शचीपतेप्रसन्नोस्मिवरंवरयसुव्रत ॥ किंदेयंद्रुतमाख्याहिधर्मपीठकृतास्पद ॥ १८ ॥ श्रुत्वेतिदेवदे वस्यसप्रेमवचनंहरिः ॥ सर्वज्ञकिंतेऽविदितंतमुवाचेतिवृत्रहा ॥ १९ ॥ ततस्तत्कृपयानुन्नोधर्मपीठनिषेवणात् ॥ निष्पाद्यतीर्थंतत्रेशोऽत्रस्नाहींद्रेति चाब्रवीत् ॥२०॥ तत्रेंद्रःस्नानमात्रेणदिव्यगंधोऽभवत्क्षणात् ॥ अवापचरुचिंचारुंप्राक्तनींशातयाज्ञिकीम् ॥२१॥ तदाश्चर्यमथोदृष्ट्वामुनयोनारदादयः ॥ परिसस्रुर्मुदायुक्ताधर्मतीर्थेऽवहारिणि ॥ २२ ॥ अतर्पयन्पितॄन्दिव्यान्व्यधुःश्राद्धानिश्रद्धया ॥ धर्मेशंस्नापयामासुस्तत्तीर्थाम्बुभृतैर्घटैः ॥ २३ ॥ तदाप्रभृतितत्तीर्थंधर्मांधुरितिविश्रुतम् ॥ ब्रह्महत्यादिपापानामक्लेशंक्षालनंपरम् ॥ २४ ॥

यत्फलंतीर्थराजस्यस्नानेनपरिकीर्त्यते ॥ सहस्रगुणितंतत्स्याद्धर्मांधुस्नानमात्रतः ॥ २५ ॥ गंगाद्वारेकुरुक्षेत्रेगंगासागरसंगमे ॥ यत्फलंलभतेमर्त्यो धर्मतीर्थेतदाप्नुयात् ॥ २६ ॥ नर्मदायांसरस्वत्यांगौतम्यांसिंहगेगुरौ ॥ स्नात्वायत्फलमाप्येतधर्मकूपेतदाप्नुयात् ॥ २७ ॥ मानसेपुष्करेचैवद्वारिकेसाग रेतथा ॥ तीर्थेस्नात्वाफलंयत्स्यात्तत्स्याद्धर्मजलाशये ॥२८॥ कार्तिक्यांसूकरक्षेत्रेचैत्र्यांगौरीमहाह्रदे ॥ शंखोद्धारेहरिदिनेयत्फलंतत्फलंत्विह ॥२९॥ तीर्थद्वयंप्रतीक्षंतेसिस्नासून्पितरोनरान् ॥ गंगायांधर्मकूपेचपिंडनिर्वपणाशया ॥३०॥ पितामहसमीपेवाधर्मेशस्याग्रतोथवा ॥ फल्गौचधर्मकूपेचमाद्यं तिप्रपितामहाः ॥ ३१ ॥ धर्मकूपेनरःस्नात्वापरितर्प्यपितामहान् ॥ गयांगत्वाकिमधिकंकर्तापितृमुदावहम् ॥ ३२ ॥ यथागयायांतृप्ताःस्युःपिंडदाने पितामहाः ॥ धर्मतीर्थेतथैवस्युर्नन्यूनंनैवचाधिकम् ॥ ३३ ॥ तेधन्याःपितृभक्तास्तेप्रीणितास्तैःपितामहाः ॥ पैत्राहणाद्धर्मतीर्थेनिष्कृतिर्यैःकृतासुतैः ॥ ॥ ३४ ॥ तत्तीर्थस्यप्रभावेणनिष्पापोभूत्क्षणेनच ॥ प्रणम्यदेवदेवेशमिंद्रोऽगादमरावतीम् ॥३५॥ अपारोमहिमातस्यधर्मतीर्थस्यकुंभज ॥ तत्कूपेस्वं निरीक्ष्यापिश्राद्धदानफलंलभेत् ॥ ३६ ॥ तत्रापिकाकिणीमात्रंयच्छेत्पितृमुदेनरः ॥ अक्षयंफलमाप्नोतिधर्मपीठप्रभावतः ॥ ३७ ॥ तत्रयोभोजयेद्वि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रान्यतिनोथतपस्विनः ॥ सिक्थेसिक्थेलभेत्सोथवाजपेयफलंस्फुटम् ॥ ३८ ॥ प्राप्यामरावतींशक्रस्ततोदिविपदांपुरः ॥ धर्मपीठस्यमाहात्म्यं महत्काश्यामवर्णयत् ॥ ३९ ॥ आगत्यपुनरप्यत्रशंभोरानंदकानने ॥ मुनिवृंदारकैःसार्धंलिंगमस्थापयद्धरिः ॥४०॥ तारकेशात्पश्चिमतइंद्रेश्वरमितीरितम् ॥ तस्यसंदर्शनात्पुंसामैंद्रलोकोनदूरतः ॥४१॥ तद्दक्षिणेशचीशश्चस्वयंशच्याप्रतिष्ठितः ॥ शचीशार्चनतःस्त्रीणांसौभाग्यमतुलंभवेत् ॥ ४२ ॥ तत्समीपेस्तिरंभेशोबहुसौख्यसमृद्धिदः ॥ इंद्रेश्वरस्यपरितोलोकपालेश्वरोपरः ॥ ४३ ॥ तदर्चनात्प्रसीदंतिलोकपालाःसमृद्धिदाः ॥ धर्मेशात्पश्चिमाशायांधरणीशःप्रकीर्तितः ॥ तद्दर्शनेनधैर्यंस्याद्राज्येराजकुलादिषु ॥ ४४ ॥ धर्मेशाद्दक्षिणेपूज्यंतत्त्वेशाख्यंपरंनरैः ॥ तत्त्वज्ञानंप्रवर्तेततल्लिंगस्य समर्चनात् ॥ ४५ ॥ धर्मेशात्पूर्वदिग्भागेवैराग्येशंसमर्चयेत् ॥ निवृत्तिश्चेतसस्तस्यलिंगस्यस्पर्शनादपि ॥ ४६ ॥ ज्ञानेश्वरंतथैशान्यांज्ञानदंसर्वदेहिनाम् ॥ ऐश्वर्येशमुदीच्यांचलिंगाद्धर्मेश्वराच्छुभात् ॥ ४७ ॥ तद्दर्शनाद्भवेन्नृणामैश्वर्यमनसेप्सितम् ॥ पंचवक्त्रस्यरूपाणिलिंगान्येतानिकुंभज ॥४८॥

एतान्यवश्यंसंसेव्यनरःप्राप्नोतिशाश्वतम् ॥ अन्यत्तत्रैवयद्वृत्तंतदाख्यामिमुनेशृणु ॥४९॥ यच्छ्रुत्वापिनरोघोरेसंसाराब्धौनमज्जति ॥ कदंबशिखरोनाम विंध्यपादोमहानिह ॥ ५० ॥ दमस्यपुत्रस्तत्रासीद्दुर्दमोनामपार्थिवः ॥ पितर्युपरतेराज्यंसंप्राप्याविजितेंद्रियः ॥ ५१ ॥ हरेत्पुरंध्रीःप्रसभंपौराणांकाममोहितः ॥ असाधवःप्रियास्तस्यसाधवोऽप्रियतांययुः ॥ ५२ ॥ अदंड्यान्दंड्यांचक्रेदंड्येष्वासीत्पराङ्मुखः ॥ सदैवमृगयाशीलःसोऽभून्मृगयुसंगतः ॥ ॥ ५३ ॥ विवासिताःस्वविषयात्तेनसन्मतिदायिनः ॥ धर्माधिकारिणःशूद्राब्राह्मणाःकरदीकृताः ॥५४॥ परदारेषुसंतुष्टःस्वदारेषुपराङ्मुखः ॥ आनर्च जातुचिन्नैवदेवौदुःखांतकारिणौ ॥ ५५ ॥ हारिणौसर्वपापानांसर्ववांछितदायिनौ ॥ सर्वेषांजगतीसारौश्रीकंठश्रीपतीपती ॥ ५६ ॥ स्वप्रजास्वेकउदितोधूमकेतुरिवापरः ॥ दुर्दमोनामभूपालःक्षयायाकांडएवहि ॥५७॥ सकदाचिन्मृगयुभिःपापर्धिव्यसनातुरः ॥ सार्धंविवेशारण्यानिगृष्टिपृष्ठानुगोहयी ॥ ॥ ५८ ॥ एकाकीदैवयोगेनदुर्दमःसोऽवनीपतिः ॥ धन्वीतुरंगमारूढोऽविशदानंदकाननम् ॥ ५९ ॥ सविलोक्याथसर्वत्रपादपानवकेशिनः ॥ सुच्छायांश्चसुविस्तारान्गतश्रमहवाभवत् ॥ ६० ॥ सुगंधेनसुशीतेनसुमंदेनसुवायुना ॥ क्षणंसंवीजितोराजापल्लवव्यजनैःकुजैः ॥ ६१ ॥ केवलंमृगयाजातस्तत्खेदोनव्यपाव्रजत् ॥ आजन्मजनितःखेदोनिरगात्तद्वनेक्षणात् ॥ ६२ ॥ मध्येवनंसचापश्यत्प्रासादंचुंबितांबरम् ॥ महारत्नशलाकानांरम्यमेकमिवाकरम् ॥६३॥ अथावरुह्यतुरगात्सभूपालोतिविस्मितः ॥ धर्मेशमंडपंप्राप्यस्वात्मानंप्रशशंसह ॥६४॥ धन्योस्म्यहंप्रसन्नोस्मिधन्येमेद्यविलोचने ॥ धन्यमद्यतनंचाहर्यदपश्यमिमांभुवम् ॥ ६५ ॥ पुनर्निनिंदचात्मानंधर्मपीठप्रभावतः ॥ धिङ्मांदुर्जनसंसर्गंत्यक्तसज्जनसंगमम् ॥ ६६ ॥ जंतूद्वेगकरंमूढंप्रजापीडनपंडितम् ॥ परदारपरद्रव्यापहृत्यासुखमानिनम् ॥६७॥ अद्ययावन्ममगतंवृथाजन्माल्पमेधसः ॥ धर्मस्थानानीदृशानियद्दृष्टानिनकुत्रचित् ॥ ६८ ॥ एवंबहुविनिंद्यस्वंनत्वाधर्मेश्वरंविभुम् ॥ आरुह्याश्वंययौराजादुर्दमोविषयंस्वकम् ॥ ६९ ॥ ततोमात्यान्समाहूयक्रमायातांश्चिरंतनान् ॥ नवीनान्परिनिर्वास्यपौरांश्चापिसमाह्वयत् ॥ ७० ॥ ब्राह्मणांश्चनमस्कृत्यतेभ्योवृत्तीःप्रदायच ॥ पुत्रेराज्यंसमारोप्यप्रजाधर्मेनिवेश्यच ॥ ७१ ॥ परिदंड्यचदंडार्हान्साधूंश्चपरितोष्यच ॥ दारानपिपरित्यज्यविषयेषुपराङ्मुखः ॥ ७२ ॥

समागच्छदथैकाकीकाशींश्रेयोविकासिनीम् ॥ धर्मेश्वरंसमाराध्यकालान्निर्वाणमाप्तवान् ॥ ७३ ॥ धर्मेशदर्शनान्नित्यंतथाभूतःसदुर्दमः ॥ बभूवदमिनांश्रेष्ठःप्रतिमोक्षंचलब्धवान् ॥ ७४ ॥ इत्थंधर्मेशमाहात्म्यंमयास्वल्पंनिरूपितम् ॥ धर्मपीठस्यमाहात्म्यंसम्यक्कोवेदकुंभज ॥ ७५ ॥ इदंधर्मेश्वराख्यानंयःश्रोष्यतिनरोत्तमः ॥ आजन्मसंचितात्पापात्समुक्तोभवतिक्षणात् ॥७६॥ श्राद्धकालेविशेषेणधर्मेशाख्यानमुत्तमम् ॥ श्रावयेद्ब्राह्मणान्धीमान्पितॄणांतृप्तिकारणम् ॥ ७७ ॥ धर्माख्यानमिदंशृण्वन्नपिदूरस्थितःसुधीः ॥ सर्वपापैर्विनिर्मुक्तोगंतांतेशिवमंदिरम् ॥ ७८ ॥ ॥ इतिश्रीस्कांदेमहापुराणे एकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडेउत्तरार्धेधर्मेश्वराख्यानंनामैकाशीतितमोध्यायः ॥ ८१ ॥ ॥ पार्वत्युवाच ॥ ॥ वीरेशस्यमहेशानश्रूयतेमहिमामहान् ॥ परांसिद्धिंपरोपतुस्तत्रसिद्धाःपरःशताः ॥१॥ कथमाविर्भवस्तस्यकाश्यांलिंगवरस्यतु ॥ आशुसिद्धिप्रदस्येहतन्मेब्रूहिजगत्पते ॥ ॥ २ ॥ ॥ महेश्वरउवाच ॥ ॥ निशामयमहादेविवीरेशाविर्भवंपरम् ॥ यंश्रुत्वापिनरःपुण्यंप्राप्नोतिविपुलंशिवे ॥३॥ आसीदमित्रजिन्नामराजापरपुरंजयः ॥ धार्मिकःसत्त्वसंपन्नःप्रजारंजनतत्परः ॥ ४ ॥ यशोधनोवदान्यश्चसुधीर्ब्राह्मणदैवतः ॥ सदैवावभृथस्नानपरिक्लिन्नशिरोरुहः ॥ ५ ॥ विनीतोनीतिसंपन्नःकुशलःसर्वकर्मसु ॥ विद्याब्धिपारदृश्वाचगुणवान्गुणिवत्सलः ॥ ६ ॥ कृतज्ञोमधुरालापःपापकर्मपराङ्मुखः ॥ सत्यवाक्छौचनिलयःस्वल्पवाग्विजितेंद्रियः ॥ ७ ॥ रणांगणेकृतांताभःसंख्यावांश्चसदोजिरे ॥ कामिनीकामकेलिज्ञोयुवापिस्थविरप्रियः ॥ ८ ॥ धर्मार्थैधितकोशश्चसमृद्धबलवाहनः ॥ सुभगश्चसुरूपश्चसुमेधाःसुप्रजाश्रयः ॥९॥ स्थैर्यधैर्यसमापन्नोदेशकालविचक्षणः ॥ मान्यमानप्रदोनित्यंसर्वदूषणवर्जितः ॥ १० ॥ वासुदेवांघ्रियुगलेचेतोवृत्तिंनिधायसः ॥ चकारराज्यंनिर्द्वंद्वंविष्वगीतिविवर्जितम् ॥ ११ ॥ अलंघ्यशासनःश्रीमान्विष्णुभक्तिपरायणः ॥ अभुनक्प्रचुरान्भोगान्समंताद्विष्णुसात्कृतान् ॥ १२ ॥

हरेरायतनान्युच्चैःप्रतिसौधंपदेपदे ॥ तस्यराज्येसमभवन्महाभाग्यनिधेःशिवे ॥१३॥ गोविंदगोपगोपालगोपीजनमनोहर ॥ गदापाणेगुणातीतगुणाढ्यगरुडध्वज ॥ १४ ॥ केशिहृत्कैटभारातेकंसारेकमलापते ॥ कृष्णकेशवकंजाक्षकीनाशभयनाशन ॥ १५ ॥ पुरुषोत्तमपापारेपुंडरीकविलोचन ॥ पीतकौशेयवसनपद्मनाभपरात्पर ॥ १६ ॥ जनार्दनजगन्नाथजाह्नवीजलजन्मभूः ॥ जन्मिनांजन्महरणजंजपूकाघनाशन ॥ १७ ॥ श्रीवत्सवक्षःश्रीकांतश्रीकरश्रेयसांनिधे ॥ श्रीरंगशार्ङ्गकोदंडशौरेशीतांशुलोचन ॥ १८ ॥ दैत्यारेदानवारातेदामोदरदुरंतक ॥ देवकीहृदयानंददंदशूकेश्वरेशय ॥ १९ ॥ विष्णोवैकुंठनिलयवाणारेविपृरश्रवः ॥ विष्वक्सेनविराधारेवनमालिन्वनप्रिय ॥ २० ॥ त्रिविक्रमत्रिलोकीशचक्रपाणेचतुर्भुज ॥ इत्यादीनिपवित्राणिनामानिप्रतिमंदिरम् ॥ २१ ॥ स्त्रीवृद्धबालगोपालवदनोदीरितानितु ॥ श्रूयंतेयत्रकुत्रापिरम्याणिमधुविद्विषः ॥ २२ ॥ सुरसाकाननान्येवविलोक्यंतेगृहेगृहे ॥ चरित्राणिविचित्राणिपवित्राण्यब्धिजापतेः ॥ २३ ॥ सौधभित्तिषुदृश्यंतेचित्रकृन्निर्मितानितु ॥ ऋतेहरिकथायास्तुनान्यावार्तानिशम्यते ॥ ॥ २४ ॥ हरिणानैवविध्यंतेहरिनामांशधारिणः ॥ तस्यराज्ञोभयाद्व्याधैररण्यसुखचारिणः ॥ २५ ॥ नमत्स्यानैवकमठानवराहाश्चकेचचित् ॥ हन्यंतेक्वापितद्भीत्यामत्स्यमांसाशिनापिवै ॥ २६ ॥ अप्युत्तानशयास्तस्यराष्ट्रेमित्रजितःक्वचित् ॥ स्तनपानंनकुर्वंतिसंप्राप्यहरिवासरम् ॥ २७ ॥ पशवोपितृणाहारंपरित्यज्यहरेर्दिने ॥ उपोषणपराजाताअन्येषांकाकथानृणाम् ॥ २८ ॥ महामहोत्सवःसर्वैःपुरोकोभिर्वितन्यते ॥ तस्मिन्प्रशासतिभुवंसंप्राप्तेहरिवासरे ॥ २९ ॥ सदवदंड्योऽभूत्तस्यराज्ञोमित्रजितःक्षितौ ॥ योविष्णुभक्तिरहितःप्राणैरपिधनैरपि ॥ ३० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अंत्यजाअपितद्राष्ट्रेशंखचक्रांकधारिणः ॥ संप्राप्यवैष्णवींदीक्षांदीक्षिताइवसंबभुः ॥ ३१ ॥ शुभानियानिकर्माणिक्रियंतेऽनुदिनंजनैः ॥ वासुदेवेसमर्प्यं तेतानितैरफलेप्सुभिः ॥ ३२ ॥ विनामुकुंदंगोविंदंपरमानंदमच्युतम् ॥ नान्योजप्येतमन्येतनभज्येतजनैःक्वचित् ॥ ३३ ॥ कृष्णएवपरोदेवःकृष्णए वपरागतिः ॥ कृष्णएवपरोबंधुस्तस्यासीदवनीपतेः ॥३४॥ एवंतस्मिन्महीपालेराज्यंसम्यक्प्रशासति ॥ एकदानारदःश्रीमांस्तंदिदृक्षुःसमाययौ ॥३५॥ राज्ञासमर्चितःसोथमधुपर्कविधानतः ॥ नारदोवर्णयामासतममित्रजितंनृपम् ॥ ३६ ॥ ॥ नारदउवाच ॥ ॥ धन्योसिकृतकृत्योसिमान्योप्यसि दिवौकसाम् ॥ सर्वभूतेषुगोविंदंपरिपश्यन्विशांपते ॥ ३७ ॥ योवेदपुरुषोविष्णुर्योयज्ञपुरुषोहरिः ॥ योंतरात्मास्यजगतःकर्ताहर्ताविताविभुः ॥ ३८ ॥ तन्मयंपश्यतोविश्वंतवभूपालसत्तम ॥ दर्शनंप्राप्यशुभदंशुचित्वमगमंपरम् ॥ ३९ ॥ एकएवहिसारोत्रसंसारेक्षणभंगुरे ॥ कमलाकांतपादाब्जभक्तिभावो ऽखिलप्रदः ॥ ४० ॥ परित्यज्यहियःसर्वंविष्णुमेकंसदाभजेत् ॥ सुमेधसंभजंतेतंपदार्थाःसर्वएवहि ॥ ४१ ॥ हृषीकेशेहृषीकाणियस्यस्थैर्यंगतान्यहो ॥ सएवस्थैर्यमाप्नोतिब्रह्मांडेऽतीवचंचले ॥ ४२ ॥ यौवनंधनमायुष्यंपद्मिनीजलबिंदुवत् ॥ अतीवचपलंज्ञात्वाऽच्युतमेकंसमाश्रयेत् ॥ ४३ ॥ वाचिचे तसिसर्वत्रयस्यदेवोजनार्दनः ॥ सएवसर्वदावंद्योनररूपीजनार्दनः ॥ ४४ ॥ निर्व्याजप्रणिधानेनशीलयित्वाश्रियःपतिम् ॥ पुरुषोत्तमतांकोनप्राप्तवा निहभूतले ॥ ४५ ॥ अनयाविष्णुभक्त्यातेसंतुष्टेंद्रियमानसः ॥ उपकर्तुमनाब्रूयांतन्निशामयभूपते ॥ ४६ ॥ बालाविद्याधरसुतानाम्नामलयगंधिनी ॥ क्रीडंतीपितुराक्रीडेहृताकंकालकेतुना ॥ ४७ ॥ कपालकेतुपुत्रेणदानवेनबलीयसा ॥ आगामिन्यांतृतीयायांतस्याःपाणिग्रहःकिल ॥ ४८ ॥ पाताले चंपकावत्यांनगर्यांसास्तिसांप्रतम् ॥ हाटकेशात्समागच्छंस्तयाहंसाश्रुनेत्रया ॥ ४९ ॥ दृष्टःप्रणम्यविज्ञप्तोयथातच्चनिशामय ॥ ब्रह्मचारिन्मुनिश्रेष्ठगं धमादनशैलतः ॥ ५० ॥ बालक्रीडनकासक्तांमोहयित्वानिनायसः ॥ कंकालकेतुर्दुर्वृत्तोदुर्जयोन्यास्त्रघाततः ॥ ५१ ॥ स्वस्यत्रिशूलघातेनम्रियते नान्यथारणे ॥ जगत्पर्याकुलीकृत्यनिद्रात्यत्रविनिर्भयः ॥ ५२ ॥

यदिकोपिकृतज्ञोमांहत्वेमंदुष्टदानवम् ॥ मद्दत्तेनत्रिशूलेननयेद्भद्रंभवेन्नरः ॥ ५३ ॥ यदत्रोपचिकीर्षुस्त्वंरक्षमांदुष्टदानवात् ॥ ममापिहिवरोदत्तोभगव त्यामहामुने ॥ ५४ ॥ विष्णुभक्तोयुवाधीमान्पुत्रित्वांपरिणेष्यति ॥ आतृतीयातिथियथातद्वाक्यंतथ्यतांव्रजेत् ॥ ५५ ॥ तथानिमित्तमात्रंत्वंभवयत्नं समाचर ॥ इतितद्वचनाद्राजान्विष्णुभक्तिपरायणम् ॥ युवानंचापिधीमंतंत्वामनुप्राप्तवानहम् ॥५६॥ तद्गच्छकार्यसिद्ध्यैत्वंहत्वातंदुष्टदानवम् ॥ आन याशुमहाबाहोशुभांमलयगंधिनीम् ॥ ५७ ॥ सातुविद्याधरीजीवेद्विलोक्यत्वांनरेश्वर ॥ पार्वतीवचनाद्दुष्टंघातयिष्यत्ययत्नतः ॥ ५८ ॥ इतिनारदवाक्यंस निशम्यामित्रजिन्नृपः ॥ अनल्पोत्कलिकोजातोविद्याधरसुतांप्रति ॥ ५९ ॥ उपायंचापिपप्रच्छगंतुंतांचंपकावतीम् ॥ नारदेनपुनःप्रोक्तःसराजागिरि राजजे ॥ ६० ॥ तूर्णमर्णवमासाद्यपूर्णिमादिवसेनृप ॥ भवान्द्रक्ष्यतिपोतस्थःकल्पवृक्षंरथस्थितम् ॥६१॥ तत्रदिव्यांगनाकाचिद्दिव्यपर्यंकसंस्थिता ॥ वीणामादायगायंतींगाथांगास्यतिसुस्वरम् ॥ ६२ ॥ यत्कर्मविहितंयेनशुभंवाथशुभेतरम् ॥ सएवभुंक्तेतत्तथ्यंविधिसूत्रनियंत्रितः ॥ ६३ ॥ गाथामि मांसासंगीयसरथासमहीरुहा ॥ सपर्यंकाक्षणादेवमध्येसिंधुप्रवेक्ष्यति ॥६४॥ भवानप्यविशंकंचततःपोतान्महार्णवे ॥ तामनुव्रजतुक्षिप्रंयज्ञवाराहमास्तु वन् ॥६५॥ ततोद्रक्ष्यसिपातालेनगरींचंपकावतीम् ॥ महामनोहरांराजन्सहितांबालयानया ॥६६॥ इत्युक्त्वांतर्हितोदेविसचतुर्मुखनंदनः ॥ राजाप्यर्ण वमासाद्ययथोक्तंपरिलक्ष्यच ॥ ६७ ॥ विवेशांतःसमुद्रंचनगरीमाससादताम् ॥ साथविद्याधरीबालानेत्रप्राघुणकीकृता ॥ ६८ ॥ तेनराज्ञात्रिजगतीसौं दर्यश्रीरिवैकिका ॥ पातालदेवतेयंवाममनेत्रोत्सवायकिम् ॥६९॥ निरणायिमधुद्वेष्ट्रास्रष्टुःसृष्टिविलक्षणा ॥ कुहूराहुभयादेषाकांतिश्चांद्रमसीकिमु ॥७०॥ योषिद्रूपंसमाश्रित्यतिष्ठतेऽत्राकुतोऽभया ॥ इत्थंक्षणंतांनिर्वर्ण्यसराजागात्तदंतिकम् ॥ ७१ ॥ साविलोक्याथतंबालानितरांमधुराकृतिम् ॥ विशालो रस्थलतलंप्रलंबतुलसस्रिजम् ॥ ७२ ॥ शंखचक्रांकसुभगभुजद्वयविराजितम् ॥ हरिनामाक्षरसुधासुधोत्तरदनावलिम् ॥ ७३ ॥ भवानीभक्तिबीजोत्थं भूरुहंपुरुषाकृतिम् ॥ मनोरथफलैःपूर्णमासीद्धृष्टतनूरुहा ॥७४॥ दोलापर्यंकमुत्सृज्यह्रीभरानम्रकंधरा ॥ वेपथुंचपरिष्टभ्यबालाप्रोवाचभूपतिम् ॥७५॥ कस्त्वमत्रकृतांतस्यभवनंमधुराकृते ॥ प्राप्तोमेमंदभाग्यायाश्चेतोवृत्तिंनिरुंधयन् ॥ ७६ ॥ यावन्नायातिसुभगसकठोरतराकृतिः ॥ अतिपर्याकुलीकृत्य त्रिलोकींदानवोमुहुः ॥७७॥ कंकालकेतुर्दुर्वृत्तस्त्ववध्यःपरहेतिभिः ॥ तावद्गुप्तंसमातिष्ठशस्त्रागारेतिगह्वरे ॥७८॥ नमेकन्याव्रतंभंक्तुंससमर्थउमावरात् ॥ आगामिन्यांतृतीयायांपरश्वःपाणिपीडनम् ॥ ७९ ॥ संचिकीर्षतिदुष्टात्मागतायुर्ममशापतः ॥ मातद्भीतिंकुरुयुवंस्तत्कार्यंभविताचिरम् ॥ ८० ॥ विद्याधर्येतिचोक्तःसशस्त्रागारेनिगूढवत् ॥ स्थितोवीरोमहाबाहुर्दानवागमनक्षणः ॥८१॥ अथसायंसमायातोदानवोभीषणाकृतिः ॥ त्रिशूलंकलयन्पाणौ मृत्योरपिभयावहम् ॥ ८२ ॥ आगत्यदानवोरौद्रःप्रलयांबुदनिस्वनः ॥ विद्याधरींजगादेतिमदाघूर्णितलोचनः ॥८३॥ गृहाणेमानिरत्नानिदिव्यानिवरव र्णिनि ॥ कन्यात्वंचपरश्वस्तेपाणिग्राहादपैष्यति ॥ ८४ ॥ दासीनामयुतंप्रातर्दास्यामितवसुंदरि ॥ आसुरीणांसुरीणांचदानवीनांमनोहरम् ॥ ८५ ॥ गंधर्वीणांनरीणांचकिन्नरीणांशतंशतम् ॥ विद्याधरीणांनागीनांयक्षिणीनांशतानिषट् ॥ ८६ ॥ राक्षसीनांशतान्यष्टौशतमप्सरसांवरम् ॥ एतास्तेपरि चारिण्योभविष्यंत्यमलाशये ॥ ८७ ॥ यावत्संपत्तिसंभारोदिक्पालानांगृहेषुवै ॥ मत्परिग्रहतांप्राप्यतावतस्त्वमिहेश्वरी ॥ ८८ ॥ दिव्यान्भोगान्मया सार्धंभोक्ष्यसेमत्परिग्रहात् ॥ कदापरश्वोभवितायस्मिन्वैवाहिकोविधिः ॥ ८९ ॥ त्वदंगसंगसंस्पर्शसुखसंदोहमेदुरः ॥ परांनिर्वृतिमाप्स्यामिपरश्वोनि कटंयदि ॥ ९० ॥ मनोरथाश्चिरंयावद्येमेहृदिसमेधिताः ॥ तान्कृतार्थीकरिष्यामिपरश्वस्तवसंगमात् ॥ ९१ ॥ जित्वादेवान्रणेसर्वान्निद्रादीन्मृगलो चने ॥ त्रैलोक्यैश्वर्यसंपत्तेस्त्वांकरिष्यामिचेश्वरीम् ॥ ९२ ॥ आधायांकेत्रिशूलंस्वेसुष्वापेतिप्रलप्यसः ॥ नरमांसवसास्वादप्रमत्तोवीतसाध्वसः ॥ ॥९३॥ वरंस्मरंतीसागौर्याविद्याधरकुमारिका ॥ विज्ञायतंप्रमत्तंचसुसुप्तंचातिनिर्भयम् ॥ ९४ ॥ आहूयतंनरवरवरंसर्वांगसुंदरम् ॥ विष्णुभक्तिकृतत्राणं प्राणनाथेतिजल्प्यच ॥ ९५ ॥ शूलंतदंकादादायगृहाणेमंजहिद्रुतम् ॥ इतित्रिशूलंबालातोबालार्कसदृशद्युतिः ॥ ९६ ॥

समादायमहाबाहुःसतदामित्रजिन्नृपः ॥ जहर्षचजगादोच्चैर्बालायाश्चाभयंदिशन् ॥ ९७ ॥ वामपादप्रहारेणतमाताड्यसनिर्भयः ॥ संस्मरंश्चक्रिणंचित्ते जगद्रक्षामणिंहरिम् ॥ ९८ ॥ जगादतिष्ठरेदुष्टकन्याधर्षणलालस ॥ युध्यस्वात्रमयासार्धंनसुप्तंहन्म्यहंरिपुम् ॥९९॥ इतिसंश्रुत्यसंभ्रांतउत्थायसदनोः सुतः ॥ त्रिशूलंदेहिमेकांतेप्रोवाचेतिमुहुर्मुहुः ॥ १०० ॥ कोयंमृत्युगृहंप्राप्तःकस्यरुष्टोऽद्यचांतकः ॥ कआयुषाद्यसंत्यक्तोयःप्राप्तोममगोचरम् ॥ १ ॥ ममप्रचंडदोर्दंडकंडूकंडूयनक्षमः ॥ नाल्पोनरोयंभविताकिंत्रिशूलेनसुंदरि ॥२॥ माभैर्मेकौतुकंपश्यभक्ष्योऽयंममसांप्रतम् ॥ कालेनमत्तोभीतेनस्वयमे वोपढौकितः ॥ ३ ॥ इत्युक्त्वामुष्टिघातेनतेनोच्चैर्दनुसूनुना ॥ हृदयेनिहतोराजाशिलातिकठिनेद्रुतम् ॥ ४ ॥ सचक्रिणाकृतत्राणःपीडामल्पीयसीमपि ॥ नोवेदकठिनोरस्कस्तत्करंप्रत्युतानुदत् ॥ ५ ॥ अथकोपवताराज्ञाहतोवक्त्रेचपेटया ॥ आघूर्णितशिराभूमौपतित्वापुनरुत्थितः ॥ ६ ॥ उवाचचवचोधैर्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सवघ्न्यमहावली ॥ ७ ॥ ॥ दानवउवाच ॥ ॥ ज्ञातंनत्वंमनुष्योसिनृरूपेणचतुर्भुजः ॥ आयातश्छद्ममासाद्यहंतुंमांदानवांतकः ॥ ८ ॥ एकंवि धेहिमशिभिर्दित्संकलशानासे ॥ विहायैतन्महच्छूलंयुष्यस्वत्वापुधैर्मया ॥९॥ त्वयाकपटरूपेणबलिनःकेटभादयः ॥ नबलेनहताःसंख्येहतास्वच्छल नांहे ॥ ११० ॥ बलिंपातालमनयस्त्वंनृत्वामनतांदधत् ॥ नृमृगत्वेनभवताहिरण्यकशिपुर्हतः ॥ ११ ॥ त्वयाजटिलरूपेणलंकेशोविनिपातितः ॥ गोपालवेषमासाद्यकंसश्चाचाणितस्त्वया ॥ १२ ॥ स्त्रीरूपेणाहरस्त्वंतुविप्रलाप्यासुरान्सुधाम् ॥ पादोरूपेणभवताशंखाद्यानिहतावहु ॥१३॥ मायावि नामग्रगण्यस्त्वंमधुसूदनसायक ॥ नत्वत्तोहंविरोध्यस्मद्विशूलंविद्धास्यसि ॥ १४ ॥ अथवादेन्यवचनःकिमेभिःकातरोचितैः ॥ नत्यक्ष्यासित्रिशूलंत्व नत्वांजिष्याम्यहंरणे ॥ १५ ॥ अवश्यमेवमर्तव्यमजातःशरीरिणा ॥ त्वत्कृतेनवरंमृत्युर्वलेनापिच्छलेनवा ॥ १६ ॥ इत्थंविद्याधरीकन्यानमयादूषि तासती ॥ साक्षाच्छ्रीरंतव्यतत्वार्थरहितामवा ॥ १७ ॥

इत्युक्त्वामदोर्दंडप्रहारेणातिनिष्ठुरम् ॥ निजघानदनोःसूनुस्तांशिलोच्चयकंपिना ॥ १८ ॥ नृपोवक्षःप्रहारंतंविषह्यरणमूर्धनि ॥ लब्धीचकारतद्वक्षश्चिशूलं सोल्यन्करे ॥ १९ ॥ निजघानमहावाहुःसचप्राणाञ्जहौक्षणात् ॥ इत्थंकंकालकेतुंसनिहत्यासुरकंपनम् ॥ १२० ॥ विद्याधरीमप्यवधीत्प्राप्तदुष्टतदूरु हाद्भ ॥ नारदस्यमुनेर्वाक्यात्तावशुश्रोणिवांछितम् ॥ २१ ॥ कृतंमयाकृतघ्नेकिंकरवाण्यधुनावद ॥ श्रुत्वेतित्स्यसाभाक्यंप्राहगंभीरचेतसः ॥ २२ ॥ मलयगंधिन्युवाच ॥ ॥ अथोदारयतेवीरनिजप्राणैःपणीकृताम् ॥ किंमांपृच्छसिजीवातोःकुलकन्यामदूषिताम् ॥ २३ ॥ इतिश्रुत्वाकन्यायांपुनः स्वैरचरोमुनिः ॥ अतर्कितागमःप्राप्तोनारदोदेवलोकतः ॥२४॥ ततस्तुतुषतुस्तोतुदृष्ट्वातंमुनिसत्तमम् ॥ कृतप्रणामौमुनिनापरिविश्राणितासिनौ ॥२५॥ पाणिग्रहेणविधिनाऽभिपिक्तोनारदेनतु ॥ जग्मतुर्नारदादिष्टवर्त्मनाकृतमंगलौ ॥ २६ ॥ तयामलयगंधिन्यायुतःसोऽभिन्नजिन्नृपः ॥ पुरींवाराणसीं प्राप्यपरैर्विधितमंगलाम् ॥ २७ ॥ यद्वीक्षणादपिनरोनारकीनैवजातुचित् ॥ गतिमान्नोतिमेधावीतांपुरीमविशन्नृपः ॥ २८ ॥ यस्यांपुर्याम्प्रवेशंनलभंते पापवादयः ॥ कैवल्यजनयित्र्यांहितांपुरीमविशन्नृपः ॥२९॥ अपिस्मृत्वापुरींयांविकारात्रैलोक्यकांक्षिताम् ॥ ननरोलिप्यतेपापैस्तांविवेशसभूपतिः ॥ ॥ १३० ॥ यस्यांपुर्यांप्रविष्टोनामहद्भिरपिपातकैः ॥ नाभिभूयेततांकाशींप्राविशत्सविशांपतिः ॥ ३१ ॥ सापिविद्याधरीकाशीसमृद्धिंवीक्ष्यदूरतः ॥ निर्निंदस्स्वर्गलोकंचपातालनगरीमपि ॥ ३२ ॥ प्राप्यामित्रजितंकांततंयाद्दृष्टानसावधूः ॥ यथादृष्ट्वाप्यहोकाशींपरमानंदकेतनम् ॥ ३३ ॥ साकृतार्थं मिवात्मानंमन्यमानामनस्विनी ॥ तेनपत्याचकांक्ष्याचपरांनिर्वृतिमाययौ ॥ ३४ ॥ सोप्यमित्रजिद्दासाःश्वपर्वामलयगंधिनीम् ॥ धर्मप्रयानंससे व्यकामंप्रापोत्तमंसुखम् ॥ ३५ ॥ सैकदातंपतिंराज्ञीविष्णुभक्तिपरायणम् ॥ स्नेहविज्ञापयांचक्रेपतिभक्तासुतार्थिनी ॥ ३६ ॥ ॥ गद्युवाच ॥ ॥ कृपाभीष्टतृतीयायाश्चरिष्यामिमहाव्रतम् ॥ यद्यनुज्ञाभवेन्नूनंपुत्रकामार्थितंमदम् ॥ ३७ ॥ ॥ राजोवाच ॥ ॥ देव्यभीष्टतृतीयायाव्रतंकीदृग्भवेद्वद ॥ कादेवतात्रपूज्याविधानंचापिकिंफलम् ॥ ३८ ॥

नारीपत्यननुज्ञातायाव्रतादिसमाचरेत् ॥ जीवंतीदुःखिनीसास्यान्मृतानिरयमृच्छति ॥ ३९ ॥ इतिराज्ञोदिताराज्ञीप्रवक्तुमुपचक्रमे ॥ इतिकर्तव्यता तस्यव्रतस्यसरहस्यकाम् ॥१४०॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराविर्भावेऽमित्रजित्पराक्रमो नामद्व्यशीतितमोध्यायः ॥ ८२ ॥ राज्युवाच ॥ ॥ अवधेहिधरानाथकथयाभियथातथम् ॥ व्रतस्यास्यविधानंचफलंचाभीष्टदेवताम् ॥ १ ॥ पुरापुरःश्रीदपत्न्याःश्रीसुख्याब्रह्ममुनुना ॥ नारदेनसुतार्थिन्याव्रतमेतदुदीरितम् ॥ २ ॥ चीर्णंचाथतयादेव्यापुत्रोभून्नलकूवरः ॥ अन्याभिरपिवह्वीभिः पुत्राःप्राप्ताव्रतादितः ॥ ३ ॥ विधिनाप्यव्रतंपूज्यागौरीसर्वविधानवित् ॥ स्तनंधयेनसहिताधयतास्तनमुन्मुखम् ॥ ४ ॥ मार्गशीर्षतृतीयायांशुक्लायां कलशोपरि ॥ ताम्रपात्रंनिधायैकंतंडुलैःपरिपूरितम् ॥ ५ ॥ अविच्छिन्नंनवीनंचरजनीरागरंजितम् ॥ वासःपात्रोपरिन्यस्यसूक्ष्मात्सूक्ष्मतरंपरम् ॥६॥ तस्योपरिशुभंपद्मरविरश्मिविकासितम् ॥ तत्कर्णिकायाउपरिचतुःस्वर्णविनिर्मितम् ॥ ७ ॥ विधिसंपूजयेद्व्रत्त्यारत्नपट्टांवरादिभिः ॥ पुष्पैर्नानाविधै रम्यैःफलैर्नारंगमुख्यकैः ॥ ८ ॥ सुगंधैश्चंदनाद्यैश्चकर्पूरमृगनाभिभिः ॥ परमान्नादिनैवेद्यैःपक्वान्नैर्बहुभंगिभिः ॥९॥ धूपैरगुरुमुख्यैश्चरम्येकुसुममंडपे ॥ रात्रौजागरणंकार्यंविनिद्रैःपरमोत्सवैः ॥ १० ॥ हस्तमात्रमितेकुंडेजातवेदसइत्यृचा ॥ घृतेनमधुनाशुत्यज्जुहुयान्मंत्रविद्विजः ॥ ११ ॥ सहस्रंकमलानां चस्मेराणांस्वयमेवहि ॥ नवप्रसूतांकपिलांसुशीलांचपयस्विनीम् ॥ १२ ॥ दद्यादाचार्यवर्यायसालंकारांसलक्षणाम् ॥ उपोष्यदंपतीभक्त्यानवांवरवि भूषितौ ॥ १३ ॥ प्रातःस्नात्वाचतुर्थ्यांचसंपूज्याचार्यमादृतः ॥ वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितौ ॥ १४ ॥

सोपस्करांचतांमूर्तिमाचार्यायनिवेदयेत् ॥ ससुस्वरन्निमंमंत्रंव्रतकृन्मिथुनंमुदा ॥ १५ ॥ नमोविश्वविधानज्ञेविधेविविधकारिणि ॥ सुतंवंशकरंदेहि तुष्टामुष्माद्व्रताच्छुभात् ॥ १६ ॥ सहस्रंभोजयित्वाथद्विजानांभक्तिपूर्वकम् ॥ भुक्तशेषेणचान्नेनकुर्याद्वैपारणंततः ॥ १७ ॥ इत्थमेतद्व्रतंराजंश्चिर्कीर्षा मित्वयासह ॥ कुरुचैतत्प्रियंमह्यममभीष्टफललब्धये ॥ १८ ॥ इतिभूपालवर्येणश्रुत्वासंहृष्टचेतसा ॥ मुनेव्रतंसमाचीर्णंसांतर्वत्नीबभूवह ॥ १९ ॥ तयाथप्रार्थितागौरीगर्भिण्याभक्तितोपिता ॥ पुत्रंदेहिंमहामायेसाक्षाद्विष्णवंशसंभवम् ॥ २० ॥ जातमात्रोव्रजेत्स्वर्गंपुनरायातिचात्रवे ॥ भक्तःसदाशिवे ऽत्यर्थंप्रसिद्धःसर्वभूतले ॥२१॥ विनैवस्तन्यपानेनषोडशाब्दाकृतिःक्षणात् ॥ एवंभूतःसुतोगौरियथामेस्यात्तथाकुरु ॥२२॥ मृडान्यापितथेत्युक्ताराज्ञी भक्त्यातितुष्टया ॥ अथकालेनतनयंमूलर्क्षेसाप्यजीजनत् ॥ २३ ॥ हितैरमात्यैरथसाविज्ञातारिष्टसंस्थिता ॥ देविराजार्थिनीचेत्त्वंत्यजदुष्टर्क्षजंसुतम् ॥ ॥ २४ ॥ सामंत्रिवाक्यमाकर्ण्यकेवलंपतिदेवता ॥ अत्याक्षीत्तंतथाप्राप्तंतनयंनयकोविदा ॥ २५ ॥ धात्रेयिकांसमाकार्यप्राहेदंसानृपांगना ॥ पंचमुद्रे महापीठेविकटानाममातृका ॥ २६ ॥ तदग्रेस्थापयित्वासुंबालंधात्रेयिकेवद ॥ गौर्यादत्तःशिशुरसौतवाग्रेविनिवेदितः ॥ २७ ॥ राज्यापत्युःप्रियंपि ण्यामंत्रिविज्ञातिनुन्नया ॥ सापिराज्ञुदितंश्रुत्वाशिशुंलास्यशशिप्रभम् ॥ २८ ॥ विकटायाःपुरःस्थाप्यगृहंधात्रेयिकागता ॥ अथसाविकटादेवीसमाहू यचयोगिनीः ॥ २९ ॥ उवाचनयतक्षिप्रंशिशुंमातृगणाग्रतः ॥ तासामाज्ञांचक्रुरुतरक्षतासुंप्रयत्नतः ॥ ३० ॥ योगिन्योविकटावाक्यात्खेचर्यस्ताःक्षणे नतम् ॥ निन्युर्गगनमार्गेणब्राह्म्याद्यायत्रमातरः ॥ ३१ ॥ प्रणम्ययोगिनीवृंदंशिशुंसूर्यवर्चसम् ॥ पुरोनिधायमातॄणांप्रोवाचविकटोदितम् ॥ ३२ ॥ ब्रह्माणीवैष्णवीरौद्रीवाराहीनारसिंहिका ॥ कौमारीचापिमार्हेंद्रीचामुंडाचैवचंडिका ॥ ३३ ॥ दृष्ट्वातंबालकंरम्यंविकटाग्रेपतिततः ॥ पद्मश्चशुंगप द्मिभंकस्तेतातःप्रसूश्चका ॥ ३४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मातृभिश्चेतिपृष्टःसयदाकिंचिन्नवक्तिच ॥ तदातद्योगिनीचक्रंप्राहमातृगणस्त्विति ॥ ३५ ॥ राज्ययोग्योभवत्येषमहालक्षणलक्षितः ॥ पुनस्तत्रैवनेतव्यो योगिन्यस्त्वविलंबितम् ॥ ३६ ॥ पंचमुद्रामहादेवीतिष्ठतेयत्रकाम्यदा ॥ यस्याःसंसेवनान्नृणांनिर्वाणश्रीरदूरतः ॥ ३७ ॥ सर्वत्रशुभजन्मिन्यांकाश्यांमुक्तिःपदेपदे ॥ तथापिसविशेषंहितत्पीठंसर्वसिद्धिकृत् ॥ ३८ ॥ तत्पीठसेवनादस्यपोडशाब्दाकृतेःशिशोः ॥ सिद्धिर्भवित्रीपरमाविश्वेशानुग्रहात्परात् ॥ ॥ ३९ ॥ एवंमातृगणाशीर्भिर्योगिनीभिःक्षणेनहि ॥ प्रापितोमातृवाक्येनपंचमुद्रांकितंपुनः ॥ ४० ॥ संप्राप्यतन्महापीठंस्वर्गलोकादिहागतः ॥ आनंदकाननेदिव्यंततापविपुलंतपः ॥ ४१ ॥ तपसातीवतीव्रेणनिश्चलेंद्रियचेतसः ॥ तस्यराजकुमारस्यप्रसन्नोभूदुमाधवः ॥४२॥ आविर्बभूवपुरतोलिंगरूपेणशंकरः ॥ प्रोवाचचप्रसन्नोस्मिवरंब्रूहिनृपांगज ॥४३॥ ॥ स्कंदउवाच ॥ ॥ सर्वज्योतिर्मयंलिंगंपुरतोवीक्ष्यवाङ्मयम् ॥ सप्तपातालमुद्भिद्यस्थितंगृहदनुग्रहात् ॥ ४४ ॥ प्रणम्यदंडवद्भूमौपरितुष्टावधूर्जटिम् ॥ सूक्तैर्जन्मांतराभ्यस्तैःसुहृष्टोरुद्रदैवतैः ॥ ४५ ॥ ततःप्रसन्नोभगवान्देवदेवोमहेश्वरः ॥ संतुष्टस्तपसातस्यप्रोवाचवृषभध्वजः॥ ४६ ॥ ॥ देवदेवउवाच ॥ ॥ वरंवरयसंतप्ततपसाक्लेशितंवपुः ॥ त्वयेदंबालवपुषावशीकृतंमनोमम ॥ ४७ ॥ शिवोक्तंचसमाकर्ण्यवरदानंपुनःपुनः ॥ वरंचप्रार्थयांचक्रेपरिहृष्टतनूरुहः ॥ ४८ ॥ ॥ कुमारउवाच ॥ ॥ देवदेवमहादेवयदिदेयोवरोमम ॥ तदत्रभवतास्थयंभवतापहृतासदा ॥ ४९ ॥ अस्मिँल्लिंगेस्थितःशंभोकुरुभक्तसमीहितम् ॥ विनामुद्रादिकरणंमंत्रेणापिविनाविभो ॥ ५० ॥ दिशसिद्धिंपरामत्रदर्शनात्स्पर्शनान्नतेः ॥ अस्यलिंगस्ययेभक्तामनोवाक्कायकर्मभिः ॥५१॥ सदैवानुग्रहस्तेषुकर्तव्योवरएषमे ॥ इतितद्वरमाकर्ण्यलिंगरूपोवदत्प्रभुः ॥५२॥ एवमस्तुयदुक्तंतेवीरवैष्णवसूनुना ॥ जनेतुर्विष्णुभक्ताच्चराज्ञोऽमित्रजितोभवान् ॥ ५३ ॥ विष्ण्वंशएवमुत्पन्नोममभक्तिपरांगज ॥ वीरवीरेश्वरंनामलिंगमेतत्त्वदाख्यया ॥ ५४ ॥ काश्यांदास्यत्यभीष्टानिभक्तानांचिंतितान्यहो ॥ अस्मिँल्लिंगेसदावीरस्थास्याम्यद्यदिनावधि ॥ ५५ ॥ दास्याभिचपरांसिद्धिमाश्रितेभ्योनसंशयः ॥ परंनमहिमानंमेकलौकश्चिच्चवेत्स्यति ॥ ५६ ॥ यस्तुवेत्स्यतिभाग्येनसपरांसिद्धिमाप्स्यति ॥ अनजप्तंहुतंदत्तंस्तुतमर्चितमेवंवा ॥ ५७ ॥ जीर्णोद्धारादिकरणमक्षय्यफलहेतुकम् ॥ त्वंतुराज्यंपरंप्राप्यसर्वभूपालदुर्लभम् ॥ ५८ ॥

भुक्त्वाभोगांश्चविपुलानंतेसिद्धिमवाप्स्यसि ॥ पुरीवाराणसीरम्यासर्वस्मिन्नगतीतले ॥५९॥ पुण्यस्तत्रापिसंभेदःसरितोरसिगंगयोः ॥ ततोऽपिचहयग्रीवंतीर्थंचैवातिपुण्यदम् ॥ ६० ॥ यत्रविष्णुर्हयग्रीवोभक्तचिंतितमर्पयेत् ॥ हयग्रीवाच्चवैतीर्थाद्गजतीर्थंविशिष्यते ॥ ६१ ॥ यत्रवेस्नानमात्रेणगजदानफलंलभेत् ॥ कोकावराहतीर्थंचपुण्यदंगजतीर्थतः ॥ ६२ ॥ कोकावराहमभ्यर्च्यतत्रनोजन्मभाग्जनः ॥ अपिकोकावराहाच्चदिलीपेश्वरसन्निधौ ॥ ६३ ॥ दिलीपतीर्थंसुश्रेष्ठंसद्यःपापहरंपरम् ॥ ततःसगरतीर्थंचसगरेशसमीपतः ॥ ६४ ॥ यत्रमज्जन्नरोमज्जेन्नभूयोदुःखसागरे ॥ सप्तसागरतीर्थंचशुभंसगरतीर्थतः ॥ ६५ ॥ सप्ताब्धिस्नानजंपुण्यंयत्रस्नात्वानरोलभेत् ॥ महोदधीतिविख्यातंतीर्थंसप्ताब्धितीर्थतः ॥ ६६ ॥ सकृद्यत्राप्लुतोधीमान्दहेदघमहोदधिम् ॥ चौरतीर्थंततःपुण्यंकपिलेश्वरसन्निधौ ॥ ६७ ॥ पापंसुवर्णचौर्यादियत्रस्नात्वाक्षयंव्रजेत् ॥ हंसतीर्थंततोपीडयंकेदारेश्वरसन्निधौ ॥ ६८ ॥ हंसस्वरूपीयत्राहंनयामिब्रह्मदेहिनः ॥ ६९ ॥ ततस्त्रिभुवनाख्यस्यकेशवस्यातिपुण्यदम् ॥ तीर्थंयत्राप्लुतामर्त्यामर्त्यलोकंविशंतिन ॥ ७० ॥ गोव्याघ्रेश्वरतीर्थंचततोप्यधिकमेवहि ॥ स्वभाववैरमुत्सृज्ययत्रोभौसिद्धिमापतुः ॥ ७१ ॥ ततोपिहिवरंवीरतीर्थंमांधातृसंज्ञितम् ॥ चक्रवर्तिपदंयत्रप्राप्तंतेनमहीभुजा ॥ ७२ ॥ ततोपिमुचुकुंदाख्यंतीर्थंचातीवपुण्यदम् ॥ यत्रस्नातोनरोजातुरिपुभिर्नाभिभूयते ॥७३॥ पृथुतीर्थंततोप्युच्चैःश्रेयसांसाधनंपरम् ॥ पृथ्वीश्वरंयत्रदृष्ट्वानरःपृथ्वीपतिर्भवेत् ॥ ७४ ॥ ततःपरशुरामस्यतीर्थंचातीवसिद्धिदम् ॥ यत्रक्षत्रवधात्पापाज्जामदग्न्योविमुक्तवान् ॥ ७५ ॥ अद्यापिक्षत्रवधजंपापंतत्रप्रणश्यति ॥ एकेनस्नानमात्रेणज्ञानाज्ञानकृतेनच ॥ ७६ ॥ ततोपिश्रेयसांकर्तृतीर्थंकृष्णाग्रजस्यहि ॥ यत्रसूतवधात्पापाद्बलदेवोविमुक्तवान् ॥ ७७ ॥ दिवोदासस्यवैतीर्थंतत्रराज्ञोऽतिमेधसः ॥ तत्रस्नातोनरोजातुनज्ञानाच्च्यवतेऽततः ॥ ७८ ॥ ततोपिहिमहातीर्थंसर्वपापप्रणाशनम् ॥ यत्रभागीरथीसाक्षान्मूर्तिरूपेणतिष्ठति ॥ ७९ ॥ स्नात्वाभागीरथीतीर्थेकृत्वाश्राद्धंविधानवित् ॥ दत्त्वादानंचपात्रेभ्योनभूयोगर्भभाग्भवेत् ॥ ८० ॥ हरपापंचभोवीरतीर्थंभागीरथीतटे ॥ तत्रस्नात्वाक्षयंयांतिमहापापकुलान्यपि ॥८१॥ योनिष्पापेश्वरंलिंगंतत्रपश्यतिमानवः ॥ निष्पापोजायतेवीरसतल्लिंगेक्षणात्क्षणात् ॥८२॥ दशाश्वमेधतीर्थंचततोपिप्रवरंमतम् ॥ दशानामश्वमेधानांयत्रस्नात्वाफलंलभेत् ॥८३॥ ततोपिशुभदंवीरवंदीतीर्थंप्रचक्षते ॥ यत्रस्नातोनरोमुच्येदपिसंसारबंधनात् ॥ ८४ ॥ हिरण्याक्षेणदैत्येनबहुशोदेवताःपुरा ॥ वंदीकृतानिगडितास्तुष्टुवुर्जगदंबिकाम् ॥ ८५ ॥

ततोविशृंखलीभूतैर्वंदितायज्जगज्जनिः ॥ तदाप्रभृतिवंदीतिगीयतेद्यापिमानवैः ॥ ८६ ॥ वंदीतीर्थंतुतत्रैवमहानिगडखंडनम् ॥ तत्रस्नातोविमुच्येतसर्वस्मात्कर्मपाशतः ॥ ८७ ॥ वंदीतीर्थंमहाश्रेष्ठंकाशिपुर्यांविशांपते ॥ तत्रस्नातोनरोयायाद्विमुक्तिंदेव्यनुग्रहात् ॥ ८८ ॥ ततोपिहिश्रेष्ठतरंप्रयागमितिविश्रुतम् ॥ प्रयागमाधवोयत्रसर्वयागफलप्रदः ॥ ८९ ॥ क्षोणीवराहतीर्थंचततोपिशुभदंपरम् ॥ तत्रस्नातोनरोजातुतिर्यग्योनिंनगच्छति ॥ ९० ॥ ततःकालेश्वरंतीर्थंवीरश्रेष्ठतरंपरम् ॥ कलिकालौनबाधेतेयत्रस्नातंनरोत्तमम् ॥९१॥ अशोकतीर्थंतत्रैवततोप्यतितरांशुभम् ॥ यत्रस्नातोनरोजातुनापतेच्छोकसागरे ॥ ९२ ॥ ततोतिनिर्मलतरंशुक्रतीर्थंनृपांगज ॥ शुक्रद्वारानजायेतयत्रस्नातोनरोत्तमः ॥९३॥ ततोऽपिपुण्यदंराजन्भवानीतीर्थमुत्तमम् ॥ यत्रस्नात्वाभवानीशौदृष्ट्वानैवपुनर्भवेत् ॥ ९४ ॥ प्रभासतीर्थंविख्यातंततोपिशुभदंनृणाम् ॥ सोमेश्वरस्यपुरतस्तत्रस्नातोनगर्भभाक् ॥ ९५ ॥ ततोगरुडतीर्थंचसंसारविपनाशनम् ॥ गरुडेशंसमभ्यर्च्यतत्रस्नात्वानशोचति ॥ ९६ ॥ ब्रह्मतीर्थंततःपुण्यंवीरब्रह्मेश्वरात्पुरः ॥ ब्रह्मविद्यामवाप्नोतितत्रस्नानेनमानवः ॥ ९७ ॥ ततोवृद्धार्कतीर्थंचविधितीर्थंततःपरम् ॥ तत्राप्लुतोनरोयातिरविलोकंसुनिर्मलम् ॥ ९८ ॥ ततोनृसिंहतीर्थंचमहाभयनिवारणम् ॥ कालादपिकुतस्तत्रस्नात्वापरिबिभेतिच ॥ ९९ ॥ ततोपिपुण्यदंनृणांतीर्थंचित्ररथेश्वरम् ॥ यत्रस्नात्वाचदत्त्वाचचित्रगुप्तंनपश्यति ॥१००॥ धर्मतीर्थंततःपुण्यंधर्मेशपुरतःस्थितम् ॥ तत्रश्राद्धादिकंकृत्वापितॄणामनृणोभवेत् ॥१॥ विशालतीर्थंविमलंविशालफलदंततः ॥ तत्रस्नात्वाविशालाक्षींदृष्ट्वागर्भेनजायते ॥ २ ॥ जरासंधेशतीर्थंचजरासंधेशसन्निधौ ॥ संसारज्वरपीडाभिस्तत्रस्नातोनमुह्यति ॥ ३ ॥ ततोऽपिललितातीर्थंमहासौभाग्यवर्धनम् ॥ स्नात्वार्चयित्वाललितांनदरिद्रोनदुःखभाक् ॥ ४ ॥ ततोगौतमतीर्थंचसर्वपापविशोधनम् ॥ स्नात्वापिंडान्विनिर्वाप्ययत्रशोचतिनक्वचित् ॥ ५ ॥ गंगाकेशवतीर्थंचतीर्थंचागस्त्यसंज्ञकम् ॥ ततस्तुयोगिनीतीर्थंत्रिसंध्याख्यंततःपरम् ॥ ६ ॥ ततस्तुनार्मदंतीर्थंततआरुंधतेयकम् ॥ वासिष्ठंचततस्तीर्थमार्कंडेयमनुत्तमम् ॥ ७ ॥

ज्ञेयान्येतानितीर्थानिपुण्यदान्युत्तरोत्तरम् ॥ खुरकर्तरिसंज्ञंचततस्तीर्थमनुत्तमम् ॥ ८ ॥ तत्रश्राद्धादिकरणान्नरोमुच्येतकिल्बिषैः ॥ ततोभगीरथंतीर्थंराजर्षेरतिपुण्यदम् ॥ ९ ॥ तत्राल्पमपियच्छेद्यत्कल्पतिप्यक्षयंहितत् ॥ एतेभ्योपिहितीर्थेभ्योलिंगकोटित्रयादपि ॥११०॥ वीरवीरेश्वरंलिंगंमहाश्रेष्ठंम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रिष्यति ॥ वीरतीर्थेनरःस्नात्वावीरेशंपरिपूज्यच ॥ ११ ॥ तीर्थेष्वेतेषुसर्वेषुस्नातोभवतिनान्यथा ॥ यस्तुवीरेश्वरंलिंगंनत्वाभ्यर्चयिष्यति ॥ तेनत्रिकोटिसंख्यानिलिंगानीहार्चितानिवै ॥ १२ ॥ यस्तुकामयतेलक्ष्मींमुक्तिंदांभुक्तिदामपि ॥ तेनवीरेश्वरंलिंगंसंसेव्यमतियत्नतः ॥ १३ ॥ विधायैकंजागरणं नरोवीरेशमर्चयन् ॥ भूतायानिवगृह्णातिशरीरंपांचभौतिकम् ॥ १४ ॥ इदंलिंगंसदाभ्यर्च्यंसिद्धैःसंसिद्धिकाङ्क्षिभिः ॥ येहिकामुष्मिकान्यस्मात्सर्वान्कामान्समर्थयेत् ॥ १५ ॥ पंचामृतेनस्नपनंयःकरिष्यतिमानवः ॥ पलेपलेफलंतस्यवीरेशेशतकोटिजम् ॥ १६ ॥ यदन्यत्रफलंलिंगेकोटिपुष्पप्रदानतः ॥ तदेकेनैवपुष्पेणवीरेशेनात्रसंशयः ॥ १७ ॥ एकामप्याहुतिंदत्त्वावीरेश्वरस्रयीपतः ॥ कोटिहोमफलंसम्यङ्नात्रकार्याविचारणा ॥ १८ ॥ सिक्थेसिक्थेचनैवेद्येकोटिसिक्थफलंभवेत् ॥ अत्यल्पमपिवीरेशेकृतमक्षयतांव्रजेत् ॥ १९ ॥ अप्येकंयोमहालुद्रंजपेद्वीरेशसन्निधौ ॥ जापयेद्वाभवेत्तस्यकोटिरुद्रफलंध्रुवम् ॥ १२० ॥ व्रतोत्सर्गादिवीरेशयत्कृतंव्रतिभिर्नृभिः ॥ तत्कोटिगुणसंख्याकंभवत्येवनसंशयः ॥ २१ ॥ कृताअघौनमस्काराये नवीरेश्वराग्रतः ॥ अष्टकोटिनमस्कारफलंतस्यनसंशयः ॥ २२ ॥ सर्वासांसंपदांस्थानमिदंलिंगंभविष्यति ॥ वीरेश्वरंनमस्तेदेहोवीरमेवरदानतः ॥ २३ ॥ ज्ञानमुत्पत्स्यतेपुंसांतारकाख्यंममाज्ञया ॥ जीवतामेवतत्सेव्यमेतल्लिंगंशुभार्थिभिः ॥ २४ ॥ श्रुत्वेत्थंवापुनःप्राहवीरोमित्रजितःसुतः ॥ प्रणम्यदेवदेवेशंप रिपूर्णमनोरथः ॥ २५ ॥ तीर्थान्येतानिदेवेशयान्युक्तानिममाग्रतः ॥ कृपयापुनरप्येतदन्यानिवदप्रभो ॥ २६ ॥ आदिकेशवमारभ्यतत्तीर्थंत्रिभगी रथात् ॥ येषांश्रवणमात्रेणनिष्पापोजायतेनरः ॥ २७ ॥ इतिश्रुत्वामहेशानोमहीपतनयोदितम् ॥ पुनस्तीर्थानिगंगायांवक्तुंसमुपचक्रमे ॥ १२८ ॥ इतिश्रीस्कंदमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराविर्भावोनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ स्कंदउवाच ॥ आकर्णयमुनीशाशुरथास्थाणुरचीकरत् ॥ गंगावरणयोःपुण्यात्संभेदात्तीर्थभूमिकाम् ॥ १ ॥

संगमेतत्रनिष्णातःसंगमेशंसमर्च्यच ॥ नरोनजातुजननीगर्भसंगमवाप्नुयात् ॥ २ ॥ तत्रपादोदकंतीर्थंयत्रदेवेनशार्ङ्गिणा ॥ आदौपादोत्तालितोतुमं दराज्जागतेनयत् ॥ ३ ॥ विष्णुपादोदकेनीर्थेनास्किंकार्यंकरोतियः ॥ व्यतीपातेननियतंभूयःसांसारिकीगतिः ॥४॥ कृतपादोदकस्नानःकृतकेशवपूजनः ॥ वीतसंसारवसतिःकाश्यामासीन्नरोत्तमः ॥ ५ ॥ काश्यांसाभूमिरुद्दिष्टाश्वेतद्वीपइतिद्विजैः ॥ तत्रपुण्यार्जनंकृत्वाश्वेतद्वीपाधिपोभवेत् ॥ ६ ॥ ततःपादो दकात्तीर्थात्तीर्थंक्षीराब्धिसंज्ञकम् ॥ तत्रार्जितमहापुण्योवसेत्क्षीराब्धिरोधसि ॥ ७ ॥ क्षीरोदाद्दक्षिणेभागेतीर्थंशंखाख्यमुत्तमम् ॥ तत्रस्नातोभवेन्नूनं नाशंखादिनिधेःपतिः ॥ ८ ॥ अर्वाक्चशंखतीर्थाद्धिचक्रतीर्थमनुत्तमम् ॥ संसारचक्रेनपतेत्तत्तीर्थंजलमज्जनात् ॥ ९ ॥ गदातीर्थंतदग्रेतुसंसारगदनाशनम् ॥ तत्रश्राद्धादिकरणात्पश्येद्देवंगदाधरम् ॥ १० ॥ पद्माकृत्पद्मतीर्थंचतदग्रेपितृतृप्तिकृत् ॥ तत्रस्नानादिकरणात्मायुयादघसंक्षयम् ॥ ११ ॥ ततस्तीर्थंमहालक्ष्म्यामहापुण्यफलप्रदम् ॥ तत्राभ्यर्च्यमहालक्ष्मींनिर्वाणकमलांलभेत् ॥ १२ ॥ ततोगारुत्मतंतीर्थंसंसारगरवाशनम् ॥ कृतोदकक्रियस्तत्रवैकुंठेवसतिंलभेत् ॥ १३ ॥ ततोनारदतीर्थंचब्रह्मविद्यैककारणम् ॥ तत्रस्नानेनमुक्तःस्याद्दृष्ट्वानारदकेशवम् ॥ १४ ॥ प्रह्लादतीर्थंतद्ग्राम्येमहाभ क्तिफलप्रदम् ॥ तत्रवैस्नानमात्रेणविष्णोःप्रियतरोभवेत् ॥ १५ ॥ अंबरीषंततस्तीर्थंमहापातकनाशनम् ॥ तत्रवैशुभकर्माणोजनानोगर्भभाजनम् ॥ ॥ १६ ॥ आदित्यकेशवंनामतदग्रेतीर्थमुत्तमम् ॥ कृताभिषेकस्तत्रापिलभेत्स्वर्गाभिषेचनम् ॥ १७ ॥ दत्तात्रेयस्यतत्रास्तितीर्थंत्रैलोक्यपावनम् ॥ योगसिद्धिंलभेत्तत्रस्नानमात्रेणभावतः ॥ १८ ॥ तदग्रेभार्गवंतीर्थंमहाज्ञानसमर्पकम् ॥ तत्रस्नानविधानेनभवेद्भार्गवलोकभाक् ॥ १९ ॥ ततो वामनतीर्थंचविष्णुसान्निध्यहेतुकम् ॥ तत्रश्राद्धविधानेनमुच्यतेपितृजाद्दणात् ॥ २० ॥ नरनारायणाख्यंहिततस्तीर्थंशुभप्रदम् ॥ तत्तीर्थमज्जनात्पुंसांगर्भवासःसुदुर्लभः ॥ २१ ॥

यज्ञवाराहतीर्थंचततोदक्षिणतःशुभम् ॥ यत्रस्नातस्यवैपुंसांराजसूयफलंध्रुवम् ॥ २२ ॥ विदारनारसिंहाख्यंतीर्थंतत्रास्तिपावनम् ॥ यत्रैकस्नानतोनश्ये दघंजन्मशतार्जितम् ॥ २३ ॥ गोपीगोविंदतीर्थंचततोवैष्णवलोकदम् ॥ यस्मिन्स्नातोनरोविद्वान्नविंद्याद्गर्भवेदनम् ॥ २४ ॥ लक्ष्मीनृसिंहतीर्थंचगोपी गोविंददक्षिणे ॥ निर्वाणलक्ष्म्यायत्रत्योम्रियतेतुनरोत्तमः ॥ २५ ॥ तदक्षिणायांकाष्ठायांशेषतीर्थमनुत्तमम् ॥ महापापौघशेषोपिनतिष्ठेद्यन्निमज्जनात् ॥ ॥ २६ ॥ शंखमाधवतीर्थंचतद्याम्यांदिशिचोत्तमम् ॥ तत्तीर्थसेवनान्नृणांकुतःपापभयंमहत् ॥ २७ ॥ ततोपिपावनतरंतीर्थंतत्क्षणसिद्धिदम् ॥ नीलश्वे ताख्यमतुलंतत्स्नायीसर्वदाशुचिः ॥ २८ ॥ तत्रोद्दालकतीर्थंचसर्वाघौघविनाशनम् ॥ ददातिमहतीमृद्धिंस्नानमात्रेणतन्नृणाम् ॥ २९ ॥ ततःसांख्या ख्यतीर्थंचसांख्येश्वरसमीपतः ॥ तत्तीर्थसेवनात्पुंसांसांख्ययोगःप्रसीदति ॥ ३० ॥ स्वर्लोकाद्यत्रसंलीनःस्वयंदेवउमापतिः ॥ अतःस्वर्लीनतीर्थंचस्वर्लीनेश्वरसन्निधौ ॥ ३१ ॥ तत्रस्नानेनदानेनश्रद्धयाद्विजभोजनैः ॥ जपहोमार्चनैःपुंसामक्षयंसर्वमेवहि ॥ ३२ ॥ महिंपासुरतीर्थंचततत्समीपेतिपावनम् ॥ यत्रतत्वासदैत्येंद्रोविजिग्येसकलान्सुरान् ॥ ३३ ॥ तत्तीर्थसेवकोद्यापिनारिभिःपरिभूयते ॥ नपातकैर्महद्भिश्चप्रार्थितंचफलंलभेत् ॥ ३४ ॥ वाणतीर्थं चतस्यारात्तत्सहस्रभुजप्रदम् ॥ तत्रस्नातोनरोभक्तिंप्राप्नुयाच्छंभवींस्थिराम् ॥ ३५ ॥ गोप्रतारेश्वरंनामतदग्रेतीर्थमुत्तमम् ॥ अपुत्रोपितरेद्यत्रस्नातो वेतरणींसुखम् ॥ ३६ ॥ तीर्थंहिरण्यगर्भाख्यंतद्याम्येसर्वपापहृत् ॥ तत्रस्नातोहिरण्येनमुच्यतेनकदाचन ॥३७॥ ततःप्रणवतीर्थंचसर्वतीर्थोत्तमोत्तमम् ॥ तीव्रमुक्तोभवेत्तत्रस्नानमात्रेणमानवः ॥ ३८ ॥ ततःपिशंगिलातीर्थंदर्शनादपिपापहृत् ॥ मुनेममाधिष्ठानंवेतदगस्तेऽतिसिद्धिदम् ॥ ३९ ॥ स्नात्वा पेरोगिलातीर्थेदत्त्वादानंचकिंचन ॥ किंरोचतिकृतांत्पापादन्यत्रापिमृतोयदि ॥ ४० ॥ योवैपिशंगिलातीर्थेस्नात्वामामर्चयिष्यति ॥ भविष्यतिसमे मेवंमित्रतेजःसमप्रभम् ॥ ४१ ॥ ततस्त्वैविष्टपीदृष्टिर्निर्मलीकृतपुष्कलम् ॥ तीर्थंपिलिपिलाख्यंवैमनोमलविनाशनम् ॥ ४२ ॥

तत्रश्राद्धादिकरणादीनानाथप्रतर्पणात् ॥ महतींश्रियमाप्नोतिमानवोतीवनिश्चलाम् ॥ ४३ ॥ ततोनागेश्वरंतीर्थंमहाघपरिशोधनम् ॥ तत्तीर्थमज्जनाद्भ वेत्सर्वाघसंक्षयः ॥ ४४ ॥ तदक्षिणेमहापुण्यंकर्णादित्याख्यमुत्तमम् ॥ तीर्थंयत्राप्लुतोमर्त्योभास्करींश्रियमावहेत् ॥ ४५ ॥ ततोभैरवतीर्थंचमहापा पक्षयप्रदम् ॥ चतुरर्थोदयकरंसर्वविघ्ननिवारणम् ॥ ४६ ॥ भौमाष्टम्यांततत्रनरःस्नात्वासंतर्पयेत्पितॄन् ॥ दृष्ट्वाचभैरवंकालंकलिंकालंचसंजयेत् ॥ ४७ ॥ तीर्थंखर्वनृसिंहाख्यंतीर्थाद्भरवतःपुरः ॥ तत्रस्नातस्यवैपुंसःकुतोवजनितंभयम् ॥ ४८ ॥ मृकंडस्यमुनेस्तीर्थंतद्याम्यामतिनिर्मलम् ॥ तत्रस्नानेनमर्त्यानांनापायमरणंक्वचित् ॥ ४९ ॥ ततःपंचनदाख्यंवैसर्वतीर्थेष्वपेक्षितम् ॥ तीर्थंयत्रनरःस्नात्वानसंसारीपुनर्भवेत् ॥ ५० ॥ ब्रह्मांडोदरवर्तीनियानितीर्थानिसर्वतः ॥ रुद्रजेयत्रसमायांतिस्वाघौघपरिमुक्तये ॥ ५१ ॥ पर्वदायत्रसर्वाणिदशम्यादिदिनत्रयम् ॥ तिष्ठंतितीर्थवर्याणिनिजनैर्मल्यहेतवे ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ५२ ॥ भूरिशःसर्वतीर्थानिमध्येकाशिपदेपदे ॥ परंपांचनदःकैश्चिन्महिमानापिकुत्रचित् ॥ ५३ ॥ अप्येकंकार्तिकस्याहस्तत्रवेसफलीकृतम् ॥ जपहोमार्चनादानैःकृतकृत्यास्तएवहि ॥ ५४ ॥ सर्वाण्यपिचतीर्थानियुगपत्तुलितान्यपि ॥ नाधिजग्मुःपंचनद्याःकलायाअपितुल्यताम् ॥ ५५ ॥ स्नात्वापांचनदेतीर्थेदृष्ट्वावैबिंदुमाधवम् ॥ नजातुजायतेधीमाञ्जननीजठराजिरे ॥ ५६ ॥ ततोज्ञानह्रदंतीर्थंजडानामपिजाड्यहृत् ॥ तत्रस्नातोनरो जातुज्ञानभ्रंशंनचाप्नुयात् ॥ ५७ ॥ तत्रज्ञानह्रदेस्नात्वादृष्ट्वाज्ञानेश्वरंनरः ॥ ज्ञानंतदधिगच्छेद्वैयेननोबाध्यतेपुनः ॥ ५८ ॥ ततोस्तिमंगलंतीर्थं सर्वामंगलनाशनम् ॥ तत्रावगाहनंकृत्वाभवेन्मंगलभाजनम् ॥ ५९ ॥ अमंगलानिनश्येयुर्भवेयुर्मंगलानिच ॥ स्नातुर्वैमंगलेतीर्थेनमस्कर्तुश्चमंगलम् ॥ ॥ ६० ॥ मयूखमालिनस्तीर्थंतदग्रेमलनाशनम् ॥ तत्राप्लुतोगभस्तीशंविलोक्यविमलोभवेत् ॥ ६१ ॥ मखतीर्थंतुतत्रैवमखेश्वरसमीपतः ॥ मखजं पुण्यमाप्नोतितत्रस्नातोनरोत्तमः ॥ ६२ ॥ तत्पार्श्वेबिंदुतीर्थंचपरमज्ञानकारणम् ॥ तत्रश्राद्धादिकंकृत्वालभेत्सुकृतमुत्तमम् ॥ ६३ ॥ पिप्पलाद स्यचमुनेस्तीर्थंतद्याम्यदिक्स्थितम् ॥ स्नात्वाशनेर्दिनेतत्रदृष्ट्वावैपिप्पलेश्वरम् ॥ ६४ ॥ पिप्पलंतत्रसेवित्वाअश्वत्थइतिमंत्रतः ॥ शनिपीडांनलभतेदुः स्वप्नंचापिनाशयेत् ॥ ६५ ॥

ततस्ताम्रवराहाख्यंतीर्थंचैवातिपावनम् ॥ यत्रस्नानेनदानेननमज्जेदंघसागरे ॥ ६६ ॥ तत्रैकालगंगाचकलिकल्मषनाशिनी ॥ तस्यांस्नात्वानरोधी मांस्तत्क्षणान्निरघोभवेत् ॥ ६७ ॥ इंद्रद्युम्नमहातीर्थमिंद्रद्युम्नेश्वराग्रतः ॥ तोयकृत्यंतत्रकृत्वालोकमैंद्रमवाप्नुयात् ॥ ६८ ॥ ततस्तुरामतीर्थंचवीरराजेश्वराग्रतः ॥ तत्तीर्थस्नानमात्रेणवैष्णवंलोकमाप्नुयात् ॥ ६९ ॥ ततऐक्ष्वाकवंतीर्थंसर्वाघौघविनाशनम् ॥ तत्रस्नानेनपूतात्माजायतेमनुजोत्तमः ॥ ७० ॥ मरुत्तातीर्थंतत्प्रतिमरुत्तेश्वरसन्निधौ ॥ तत्रस्नात्वातमर्च्येशंमहदैश्वर्यमाप्नुयात् ॥ ७१ ॥ मैत्रावरुणतीर्थंचततःपातकनाशनम् ॥ तत्रपिंडप्रदानेनपितॄणांभवति प्रियः ॥ ७२ ॥ ततोग्नितीर्थंविमलमग्नीशपुरतोमहत् ॥ अग्निलोकमवाप्नोतितत्तीर्थपरिमज्जनात् ॥ ७३ ॥ अंगारतीर्थंतत्रैवअंगारेश्वरसन्निधौ ॥ तत्रां गारचतुर्थ्यांतुस्नात्वानिष्पापतामियात् ॥ ७४ ॥ ततोवैकालितीर्थंचकलशेश्वरसन्निधौ ॥ स्नात्वातल्लिंगमभ्यर्च्यकालेकालान्नबिभ्यति ॥ ७५ ॥ चंद्रती र्थंचतत्रैवचंद्रेश्वरसमीपतः ॥ तत्रस्नात्वार्च्यचंद्रेशंचंद्रलोकमवाप्नुयात् ॥ ७६ ॥ तदग्रेवीरतीर्थंचवीरेश्वरसमीपतः ॥ यदुक्तंप्राक्तवपुरस्तीर्थानामुत्तमं परम् ॥ ७७ ॥ विघ्नेशतीर्थंचततःसर्वविघ्नविघातकृत् ॥ जातुचित्तत्रसंस्नातोनविघ्नैरभिभूयते ॥ ७८ ॥ हरिश्चंद्रस्यराजर्षेस्ततस्तीर्थमनुत्तमम् ॥ यत्र स्नातोनरोजातुनसत्याच्च्यवतेक्वचित् ॥ ७९ ॥ हरिश्चंद्रस्यतीर्थेतुयच्छ्रेयःसमुपार्जितम् ॥ तदक्षयफलंवीरइहलोकेपरत्रच ॥ ८० ॥ ततःपर्वततीर्थंचपर्व तेशंसमीपतः ॥ सर्वपर्वफलंतस्यस्नात्वापर्वण्यपर्वणि ॥ ८१ ॥ कंबलाश्वतरंतीर्थंतत्रसर्वविषापहम् ॥ तत्रस्नातोभवेन्मर्त्योगीतविद्याविशारदः ॥ ८२ ॥ ततःसारस्वतंतीर्थंसर्वविद्योपपादकम् ॥ तिष्ठेयुःपितरस्तत्रसहदेवर्षिमानवैः ॥ ८३ ॥ उमातीर्थंतुतत्रैवसर्वशक्तिसमन्वितम् ॥ औमेयलोकंप्राप्यैस्या त्स्नानमात्रेणनिश्चितम् ॥ ८४ ॥ ततस्त्रिलोकीविख्यातंत्रिलोक्युद्धरणक्षमम् ॥ तीर्थंश्रेष्ठतरंवीरयदाख्यामणिकर्णिका ॥ ८५ ॥ चक्रपुष्करिणीती र्थंतदादौविष्णुनाकृतम् ॥ तदाख्याकर्णनादेवसर्वैःपापैःप्रमुच्यते ॥ ८६ ॥ स्वर्गौकसस्त्रिसंध्यंवैजपंतिमणिकर्णिकाम् ॥ यन्नामग्रहणंपुंसांश्रेयसेपरमा यहि ॥ ८७ ॥ यैःश्रुतायैःस्मृतावीरयैर्दृष्टामणिकर्णिका ॥ तएवकृतिनोलोकेकृतकृत्यास्तएवहि ॥ ८८ ॥ त्रिलोकेयेजपंतीहमानवामणिकर्णिकाम् ॥ जपामितानहंवीरत्रिकालंपुण्यकर्मणः ॥ ८९ ॥

इष्टंतेनमहायज्ञैःसहस्रशतदक्षिणैः ॥ पंचाक्षरीमहाविद्यायेनोक्तामणिकर्णिका ॥ ९० ॥ महादानानिदत्तानितेनवैपुण्यकर्मणा ॥ येनाहमर्चितोवीरसं प्राप्यमणिकर्णिकाम् ॥ ९१ ॥ मणिकर्ण्यंबुभिर्येनतर्पिताःप्रपितामहाः ॥ तेनश्राद्धानिदत्तानिगयायांमधुपायसैः ॥ ९२ ॥ मणिकर्णीजलंयेनसंपीतं शुद्धबुद्धिना ॥ किंतस्यसोमपानैस्तैःपुनरावृत्तिलक्षणैः ॥ ९३ ॥ तेस्नाताःसर्वतीर्थेषुमहापर्वसुभूरिशः ॥ तथाचसर्वावभृथैर्यैःस्नातामणिकर्णिका ॥ ॥ ९४ ॥ तैःसुराःपूजिताःसर्वेब्रह्मविष्णुमुखामखैः ॥ यैःस्वर्णकुसुमैरत्नैरर्चितामणिकर्णिका ॥ ९५ ॥ अहंतेनोमयासार्धंदीक्षांसंप्राप्यशांभवीम् ॥ अर्चितः प्रत्यहंयेनपूजितामणिकर्णिका ॥ ९६ ॥ तपांसितेनतप्तानिशीर्णपर्णादिनाचिरम् ॥ सेविताश्रद्धयायेनश्रीमतीमणिकर्णिका ॥ ९७ ॥ दत्त्वादानानि भूरीणिमखानिष्ट्वातुभूरिशः ॥ चिरंतप्त्वाप्यरण्येषुस्वर्गैश्वर्यान्महींपुनः ॥ ९८ ॥ विपुलेत्रमहीपृष्ठेपंचक्रोश्यांमनोहरा ॥ संश्रितामणिकर्णीयैस्तेयाताःश्वा निवर्तकाः ॥ ९९ ॥ दानानांचव्रतानांचक्रतूनांतपसामपि ॥ इदमेवफलंमन्येयदाप्यामणिकर्णिका ॥ १०० ॥ मोक्षलक्ष्मीरियंसाक्षाच्छ्रीमतीमणिक र्णिका ॥ प्रायोस्यामहिमानंवैनवेद्म्यहमपिस्फुटम् ॥ १ ॥ अवाच्यांमणिकर्ण्याश्चतीर्थंपाशुपतंपरम् ॥ तीर्थंतुरुद्रवासाख्यंविश्वतीर्थमतःपरम् ॥ २ ॥ मुक्तितीर्थंततोरम्यमविमुक्तमथोत्तमम् ॥ तीर्थंचतारकंस्कांदंढुंढेस्तीर्थंततोपिच ॥ ३ ॥ भवानेयमथैशानंज्ञानतीर्थमथोत्तमम् ॥ नंदितीर्थंविष्णुतीर्थंती र्थंपैतामहंततः ॥ ४ ॥ नाभितीर्थमिदंचैवब्रह्मनालमतःपरम् ॥ ततोभागीरथंतीर्थंयत्तवाग्रेपुराकथि ॥ ५ ॥ तीर्थान्युत्तरवाहिन्यांस्वर्धुन्यांकाशिसन्निधौ ॥ संत्यनेकानिपुण्यानिमयोक्तान्यल्पशःपुनः ॥ ६ ॥ तत्रापिनितरांश्रेष्ठापंचतीर्थीनृपांगज ॥ यस्यांस्नात्वानरोभूयोगर्भवासंनसंस्मरेत् ॥ ७ ॥ प्रथमंचा सिसंभेदंतीर्थानांप्रवरंपरम् ॥ ततोदशाश्वमेधाख्यंसर्वतीर्थनिषेवितम् ॥ ८ ॥ ततःपादोदकंतीर्थमादिकेशवसन्निधौ ॥ ततःपंचनदंपुण्यंस्नानमात्रादघौ घहृत् ॥ ९ ॥ एतेषामपितीर्थानांचतुर्णामपिसत्तम ॥ पंचमंमणिकर्ण्याख्यंमनोवयवशुद्धिदम् ॥ ११० ॥ अहंस्नाम्यत्रसततमुमयासहपर्वसु ॥ ब्रह्मणा विष्णुनासार्धंसहेंद्रादिसुरर्षिभिः ॥ ११ ॥

अतएवात्रगीयेतगाथेयंश्रुतिसंमता ॥ नागलोककृतावासैःस्वर्गौकोभिश्चसंततम् ॥ १२ ॥ सत्यंसत्यंपुनःसत्यंसत्यपूर्वमिदंवचः ॥ मणिकर्णीसमंती र्थंनास्तिब्रह्मांडगोलके ॥ १३ ॥ पंचतीर्थ्यांनरःस्नात्वानदेहंपांचभौतिकम् ॥ गृह्णातिजातुचित्काश्यांपंचास्योवाथजायते ॥ १४ ॥ इतिदत्त्वावरान्देवो वीरस्यांतर्दधेहरः ॥ सचवीरोपिवीरेशंप्रार्च्यप्राप्तःसमीहितम् ॥ १५ ॥ ॥ स्कंदउवाच ॥ ॥ तीर्थाध्यायमिमंपुण्यमगस्तेयोनिशामयेत् ॥ तस्याघं संक्षयंयायादपिजन्मशतार्जितम् ॥ १६ ॥ इतिवीरेश्वराख्यानंतीर्थाख्यानप्रसंगतः ॥ कथितंतेपुरागस्तेकामेशंकथयाम्यतः ॥ ११७ ॥ ॥ इतिश्रीस्कां देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेवीरेश्वराख्यानंनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥छ॥ ॥ स्कंदउवाच ॥ ॥ जगज्जनन्याःपार्वत्याःपुरोगस्तेपुरारिणा ॥ यथाख्यायिकथापुण्यातथातेकथयाम्यहम् ॥ १ ॥ पुरामहीमिमांसर्वांससमुद्राद्रिकाननाम् ॥ ससरित्कां सार्णवांचसग्रामपुरपत्तनाम् ॥ २ ॥ परिभ्रम्यमहातेजामहामर्षोमहातपाः ॥ दुर्वासाःसंपरिप्राप्तःशंभोरानंदकाननम् ॥ ३ ॥ विलोक्याक्रीडमखिलं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बहुप्रासादमंडितम् ॥ बहुकुंडतडागंचशंभोस्तोषमुपागमत् ॥४॥ पदेपदेमुनीनांचजितकालमहाभियाम् ॥ दृष्ट्वोटजानिरम्याणिदुर्वासाविस्मितोभवत् ॥ ॥ ५ ॥ सर्वर्तुकुसुमान्वृक्षान्सुच्छायस्निग्धपल्लवान् ॥ सफलान्मुलताश्लिष्टान्दृष्ट्वाप्रीतिमगान्मुनिः ॥ ६ ॥ दुर्वासाश्चातिहृष्टोभूद्दृष्ट्वापाशुपतोत्तमान् ॥ भूतिभूषितसर्वांगाञ्जटाजटितमौलिकान् ॥ ७ ॥ कौपीनमात्रवसनान्स्मरारिध्यानतत्परान् ॥ कक्षीकृतमहालावृन्दुडुत्कारजितांबुदान् ॥ ८ ॥ करंडदंडपानीयपात्रमात्रपरिग्रहान् ॥ क्वचित्त्रिदंडिनोदृष्ट्वानिःसंगान्निष्परिग्रहान् ॥ ९ ॥ कालादपिनिरातंकान्विश्वेशशरणंगतान् ॥ क्वचिद्वेदरहस्यज्ञानाबाल्यब्रह्मचारिणः ॥ १० ॥ नित्यंभागीरथीस्नानपरिपिंगलमूर्धजान् ॥ विलोक्यकाश्यांदुर्वासाब्राह्मणान्मुमुदेतराम् ॥ ११ ॥

पशुष्वपिचयातुष्टिर्मृगेष्वपिचयाद्युतिः ॥ तिर्यक्ष्वपिचयाहृष्टिःकाश्यांनान्यत्रसास्फुटम् ॥ १२ ॥ इदंसुश्रेयसोव्युष्टिःकामरेषुत्रिविष्टपे ॥ यत्रत्येष्वपितिर्यक्षुपरमानंदवर्धिनी ॥ १३ ॥ वरमेतेपिपशवआनंदवनचारिणः ॥ सदानंदाःपुनर्देवाननंदनवनाश्रिताः ॥ १४ ॥ वरंकाशीपुरीवासीम्लेच्छोप्रिहिशुभायतिः ॥ नान्यत्रत्योदीक्षितोपिसहिमुक्तेरभाजनम् ॥ १५ ॥ वैश्वेश्वरीपुरीचैषायथामेचित्तहारिणी ॥ सर्वापिनतथाक्षोणीनस्वर्गोनैवनागभूः ॥१६॥ स्थैर्यंवबंधनक्वापिभ्रमतोमेमनोगतिः ॥ सर्वस्मिन्नपिभूभागेयथास्थैर्यमगादिह ॥ १७ ॥ रम्यापुरीभवेदेषाब्रह्मांडादखिलादपि ॥ परिष्टुत्येतिदुर्वासाश्चेतोवृत्तिमवापह ॥ १८ ॥ तप्यमानोपिहितपःसुचिरंसमहातपाः ॥ यदानापफलंकिंचिच्चुकोपचतदाभृशम् ॥ १९ ॥ धिक्चमांतापसंदुष्टंधिक्चमेदुश्चरंतपः ॥ धिक्चक्षेत्रमिदंशंभोःसर्वेषांचमतारकम् ॥ २० ॥ यथानमुक्तिरत्रस्यात्कस्यापिकरवैतथा ॥ इतिशप्तुंयदोद्युक्तःसंजहासतदाशिवः ॥२१॥ तत्रलिंगमभूदेकंख्यातंप्रहसितेश्वरम् ॥ तल्लिंगदर्शनात्पुंसामानंदःस्यात्पदेपदे ॥ २२ ॥ उवाचविस्मयाविष्टोमनस्येवमहेशिता ॥ ईदृशेभ्यस्तपस्विभ्योनमोस्त्वितिपुनःपुनः ॥२३॥ यत्रैवहितपस्यंतियत्रैवविहिताश्रमाः ॥ लब्धप्रतिष्ठायत्रैवतत्रैवामर्षिणोद्विजाः ॥२४॥ मनाक्चिंतितमात्रंतुचेल्लभंतेनतापसाः ॥ कुर्यातदैवजीर्यंतेहारिण्यातपसांश्रियः ॥ २५ ॥ तथापितापसामान्याःस्वश्रेयोवृद्धिकांक्षिभिः ॥ अक्रोधनाःक्रोधनावाकाचिंताहितपस्विनाम् ॥ २६ ॥ इतियावन्महेशानोमनस्येवविचिंतयेत् ॥ तावत्तत्क्रोधजोवह्निर्व्यानशेव्योममंडलम् ॥ २७ ॥ तत्क्रोधानलधूमौघैर्व्यापितंयन्नभोंगणम् ॥ तद्दधातिनभोद्यापिनीलिमानंमहत्तरम् ॥ २८ ॥ ततोगणाःपरिक्षुब्धाःप्रलयार्णवनीरवत् ॥ आःकिमेतत्किमेतद्वैभापमाणाःपरस्परम् ॥ २९ ॥ गर्जंतस्तर्जयंतश्चप्रोद्यतायुधपाणयः ॥ प्रमथाःपरितस्थुस्तेपरितोधामशांभवम् ॥३०॥ कोयमःकोथवाकालःकोमृत्युःकस्तथांतकः ॥कोवाविधाताकेलेखाःक्रुद्धेष्वस्मासुकःपरः ॥ ३१ ॥ अग्निंपिबामोजलवच्चूर्णीकुर्मोखिलान्गिरीन् ॥ सप्तापिचार्णवांस्तूर्णंकरवाममरुस्थलीम् ॥ ३२ ॥ पातालंचानयामोर्ध्वमधोदध्मोथवादिवम् ॥ एकमेवहिवाग्रासंगगनंकरवामहे ॥ ३३ ॥

ब्रह्मांडभांडमथवास्फोटयामःक्षणेनहि ॥ आस्फालयामोवान्योन्यंकालंमृत्युंचतालवत् ॥ ३४ ॥ ग्रसामोवाथभुवनंमुक्त्वावाराणसींपुरीम् ॥ यत्रमुक्ताभवंत्येवमृतमात्रेणजंतवः ॥ ३५ ॥ कुतोऽयंधूमसंभारोज्वालावल्यःकुतस्त्वमूः ॥ कोवामृत्युंजयंरुद्रंनोविद्यान्मदमोहितः ॥ ३६ ॥ इतिपारिषदाःशंभोर्महाभयभयप्रदाः ॥ जल्पंतःकल्पयामासुःप्राकारंगगनस्पृशम् ॥३७॥ शकलीकृत्यबहुशःशिलावत्प्रलयानलम् ॥ नंदीचनंदिषेणश्चसोमनंदीमहोदरः ॥ ॥ ३८ ॥ महाहनुर्महाग्रीवोमहाकालोजितांतकः ॥ मृत्युप्रकंपनोभीमोघंटाकर्णोमहाबलः ॥३९॥ क्षोभणोद्रावणोजृंभीपंचास्यःपंचलोचनः ॥ द्विशिरास्त्रिशिराःसोमःपंचहस्तोदशाननः ॥ ४० ॥ चंडोभृंगिरिटिस्तुंडीप्रचंडस्तांडवप्रियः ॥ पिचिंडिलःस्थूलशिराःस्थूलकेशोगभस्तिमान् ॥ ४१ ॥ क्षेमकःक्षेमधन्वाचवीरभद्रोरणप्रियः ॥ चंडपाणिःशूलपाणिःपाशपाणिःकृशोदरः ॥ ४२ ॥ दीर्घग्रीवोथपिंगाक्षःपिंगलःपिंगमूर्धजः ॥ बहुनेत्रोलंबकर्णःखर्वःपर्वतविग्रहः ॥४३॥ गोकर्णोगजकर्णश्चकोकिलाख्योगजाननः ॥ अहंवैनैगमेयश्चविकटास्योट्टहासकः ॥४४॥सीरपाणिःशिवारावोवैणिकोवेणुवादनः ॥ दुराधर्षोदुःसहश्चगर्जनोरिपुतर्जनः ॥ ४५ ॥ इत्यादयोगणेशानाःशतकोटिदुरासदाः ॥ काश्यांनिवारयामासुरपिप्राभंजनींगतिम् ॥ ४६ ॥ क्षुब्धेषुतेषुवीरेषुचकंपेभुवनत्रयम् ॥ दुर्वाससश्चकोपाग्निज्वालाभिर्व्याकुलीकृतम् ॥ ४७ ॥ तदाविविशतुःकाश्यांसूर्याचंद्रमसावपि ॥ नगणैरकृतानुज्ञौतत्तेजःशमितप्रभौ ॥ ४८ ॥ निवार्यप्रमथानीकमतिक्षुब्धमुमाधवः ॥ मदंशएवहिमुनीरानसूयेयएषवै ॥ ४९ ॥ अथोदुर्वाससोलिंगादाविरासीत्कृपानिधिः ॥ महातेजोमयःशंभुर्मुनिशापात्पुरीमवन् ॥५०॥ माभूच्छापोमुनेःकाश्यांनिर्वाणप्रतिबंधकः ॥ इत्यनुक्रोशतोदेवस्तस्यप्रत्यक्षतांगतः ॥ ५१ ॥ उवाचचप्रसन्नोस्मिमहाक्रोधनतापस ॥ वरयस्ववरःकस्तेमयादेयोविशंकितः ॥ ५२ ॥ ततोविलज्जितोगस्त्यशापोद्यतकरोमुनिः ॥ अपराद्धंबहुमयाक्रोधांधेनेतिदुर्धिया ॥ ५३ ॥ उवाचचेतिबहुशोधिङ्मांक्रोधवशंगतम् ॥ त्रैलोक्याभयदांकाशींशप्तुमुद्यतचेतसम् ॥ ५४ ॥

दुःखार्णवनिमग्नानांयातायातेतिखेदिनाम् ॥ कर्मपाशितकंठानांकाश्येकामुक्तिसाधनम् ॥ ५५ ॥ सर्वेषांजंतुजातानांजनन्येकेवकाशिका ॥ महामृतस्तन्यदात्रीनेत्रीचपरमंपदम् ॥ ५६ ॥ जनन्यासहनोकाशीलभेदुपमितिंक्वचित् ॥ धारयेज्जननीगर्भेकाशीगर्भाद्विमोचयेत् ॥५७॥ एवंभूतांतुयःकाशीमन्योपिहिशपिष्यति ॥ तस्यैवशापोभवितानतुकाश्याःकथंचन ॥ ५८ ॥ इतिदुर्वाससोवाक्यंश्रुत्वादेवस्त्रिलोचनः ॥ अतीवतुपितोजातःकाशीस्तवनलब्धमुत् ॥५९॥ यःकाशींस्तौतिमेधावीयःकाशींहृदिधारयेत् ॥ तेनतप्तंतपस्तीव्रंतेनेष्टंक्रतुकोटिभिः ॥६०॥ जिह्वाग्रेवर्ततेयस्यकाशीत्यक्षरयुग्मकम् ॥ नतस्यगर्भवासःस्यात्क्वचिदेवसुमेधसः ॥ ६१ ॥ योमंत्रंजपतिप्रातःकाशीवर्णद्वयात्मकम् ॥ सतुलोकद्वयंजित्वालोकातीतंव्रजेत्पदम् ॥६२॥ आनुसूयेयतेज्ञानंकाशीस्तवनपुण्यतः ॥ यथेदानींसमुत्पन्नंतथानतपसःपुरा ॥ ६३ ॥ मुनेनमेप्रियस्तद्वद्दीक्षितोममपूजकः ॥ यादृक्प्रियतरःसत्यंकाशीस्तवनलालसः ॥६४॥ तादृक्तुष्टिर्नमेदानैस्तादृक्तुष्टिर्नमेमखैः ॥ नतुष्टिस्तपसातादृग्यादृशीकाशिसंस्तवैः ॥ ६५ ॥ आनंदकाननंयेनस्तुतमेतत्सुचेतसा ॥ तेनाहंसंस्तुतःसम्यक्सर्वैःसूक्तैःश्रुतीरितैः ॥ ६६ ॥ तवकामाःसमृद्धाःस्युरानुसूयेयतापस ॥ ज्ञानंतेपरमंभाविमहामोहविनाशनम् ॥ ६७ ॥ अपरंचवरंब्रूहिकिंदातव्यंतवानघ ॥ त्वादृशाएवमुनयःश्लाघनीयायतःसताम् ॥ ६८ ॥ यस्यास्त्येवहिसामर्थ्यंतपसःक्रुद्ध्यतीहसः ॥ कुपितोप्यसमर्थस्तुकिंकर्ताक्षीणवृत्तिवत् ॥६९॥ इतिश्रुत्वापरिष्टुत्यदुर्वासाःकृत्तिवाससम् ॥ वरंचप्रार्थयामासपरिहृष्टतनूरुहः ॥ ७० ॥ ॥ दुर्वासाउवाच ॥ ॥ देवदेवजगन्नाथकरुणाकरशंकर ॥ महापराधविध्वंसिन्नंधकारेस्मरांतक ॥ ७१ ॥ मृत्युंजयोग्रभूतेशमृडानीशत्रिलोचन ॥ यदिप्रसन्नोमेनाथयदिदेयोवरोमम ॥ ७२ ॥ तदिदंकामदंनामलिंगमस्त्विहधूर्जटे ॥ इदंचपल्वलंमेत्रकामकुंडाख्यमस्तुवै ॥ ७३ ॥ ॥ देवदेवउवाच ॥ ॥ एवमस्तुमहातेजोमुनेपरमकोपन ॥ यत्त्वयास्थापितंलिंगंदुर्वासेश्वरसंज्ञितम् ॥ ७४ ॥ तदेवकामकृन्नृणांकामेश्वरमिहास्त्विति ॥ यःप्रदोषेत्रयोदश्यांशनिवासरसंयुजि ॥ ७५ ॥ संस्नास्यतिनरोधीमान्कामकुंडेत्वदास्पदे ॥ त्वत्स्थापितंचकामेशंलिंगंद्रक्ष्यतिमानवः ॥ ७६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वैकामकृताद्दोषाद्यामींनाप्स्यतियातनाम् ॥ बहवोपिहिपाप्मानोबहुभिर्जन्मभिःकृताः ॥ ७७ ॥ कामतीर्थांबुसंस्नानाद्यास्यंतिविलयंक्षणात् ॥ कामाः समृद्धिमाप्स्यंतिकामेश्वरनिषेवणात् ॥ ७८ ॥ इतिदत्त्वावराञ्शंभुस्तल्लिंगेलयमाययौ ॥ ॥ स्कंदउवाच ॥ तल्लिंगाराधनात्कामाःप्राप्तादुर्वाससा भृशम् ॥ ७९ ॥ तस्मात्सर्वप्रयत्नेनकाश्यांकामेश्वरःसदा ॥ पूजनीयःप्रयत्नेनमहाकामाभिलाषुकैः ॥ ८० ॥ कामकुंडकृतस्नानैर्महापातकशांतये ॥ इदं कामेश्वराख्यानंयःपठिष्यतिपुण्यवान् ॥ यःश्रोष्यतिचमेधावीतौनिष्पापौभविष्यतः ॥ ८१ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायां चतुर्थेकाशीखंडउत्तरार्धेदुर्वाससोवरप्रदानंनामपंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ पार्वत्युवाच ॥ ॥ विश्वकर्मेश्वरंलिंगंयत्काश्यांप्रथितंपरम् ॥ तस्यलिंगस्यकथयदेवदेवसमुद्भवम् ॥ १ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिकथांपातकनाशिनीम् ॥ विश्वकर्मेशलिंगस्यप्रादुर्भावंमनोहरम् ॥२॥ विश्वकर्माभवत्पूर्वंब्रह्मणस्त्वपरातनुः ॥ त्वष्टुःप्रजापतेःपुत्रोनिपुणःसर्वकर्मसु ॥३॥ कृतोपनयनःसोथबालोगुरुकुलेवसन् ॥ चकारगुरुशुश्रूषां भिक्षान्नकृतभोजनः ॥४ ॥ एकदातद्गुरुःप्राहप्रावृट्कालेसमागते ॥ कुरूटजंमदर्थंत्वंयथाप्रावृण्नबाधते ॥ ५ ॥ यत्कदाचिन्नभज्येतनपुरातनतांव्रजेत् ॥ गुरुपत्न्यात्वभिहितोरेत्वाष्ट्रकुरुकंचुकम् ॥६॥ ममांगयोग्यंनोगाढंनश्लथंचप्रयत्नतः ॥ विनैववाससाचारुवाल्कलंचसदोज्ज्वलम् ॥७॥ गुरुपुत्रेणचाज्ञप्तो ममार्थंपादुकेकुरु ॥ यदारूढस्यमेपादौनपंकःसंस्पृशेत्क्वचित् ॥ ८ ॥ चर्मादिबंधनिर्मुक्तेधावतोमेसुखप्रदे ॥ याभ्यांचसंचरेवारिस्थलभूमाविवद्रुतम् ॥ ॥ ९ ॥ गुरुकन्यापितंप्राहत्वाष्ट्रमेश्रवणोचिते ॥ भूषणेस्वेनहस्तेनकुरुकांचननिर्मिते ॥१०॥ कुमारीक्रीडनीयानिकौतुकानिचदेहिमे ॥ दंतिदंतमयान्येवस्वहस्तरचितानिच ॥ ११ ॥ गृहोपकरणंद्रव्यंमुसलोलूखलादिकम् ॥ तथाघटयमेधाविन्यथाप्रुट्यतिनक्वचित् ॥ १२ ॥ अक्षालितान्यपियथानित्यं पीठानिसत्तम ॥ उज्ज्वलानिभवंत्येवस्थालिकाश्चतथाकुरु ॥ १३ ॥ सूपकर्मण्यपिचमांप्रशाधित्वष्टनंदन ॥ यथांगुल्योनदह्यंतेपाकःस्याच्चयथाशुभः ॥ ॥ १४ ॥ एकस्तंभमयंगेहमेकदारुविनिर्मितम् ॥ तथाकुरुवरंत्वाष्ट्रयत्रेच्छातत्रधारये ॥ १५ ॥ येसहाध्यायिनोप्यस्यवयोज्येष्ठाश्चतेपिहि ॥ सर्वेसर्वं समीहंतेकर्मतत्कृतमेवहि ॥ १६ ॥

तथेतिसप्रतिज्ञायसर्वेषांपुरतोद्विजे ॥ मध्येवनंप्राविशच्चमहाचिंताभयार्दितः ॥१७॥ किंचित्कर्तुंनजानातिप्रतिज्ञातंचतेनवै ॥ सर्वेषांपुरतःसर्वंकरिष्यामीतिनिश्चितम् ॥ १८ ॥ किंकरोमिक्वगच्छामिकोमेसाहाय्यमर्पयेत् ॥ बुद्धेरपिवनस्थस्यशरणंकंव्रजामिच ॥ १९ ॥ अंगीकृत्यगुरोर्वाक्यंगुरुपत्न्यागुरोः शिशोः ॥ योननिष्पादयेन्मूढःसभवेन्निरयीनरः ॥ २० ॥ गुरुशुश्रूषणंधर्मएकोहिब्रह्मचारिणाम् ॥ अनिष्पाद्यतुतद्वाक्यंकथंमेनिष्कृतिर्भवेत् ॥ २१ ॥ गुरूणांवाक्यकरणात्सर्वएवमनोरथाः ॥ सिद्ध्यंतीतरथानैवतस्मात्कार्यंहितद्वचः ॥२२॥ कथंतद्वचसःसिद्धिंप्राप्स्याम्यत्रवनेस्थितः ॥ कश्चमेत्रसहायी स्याद्धिषणादुर्बलस्यवै ॥ २३ ॥ आस्तांगुरुकथादूरंयोऽन्यस्यापिलघोरपि ॥ ओमित्युक्त्वानकुरुतेकार्यंसोथव्रजत्यधः ॥ २४ ॥ कथमेतानिकर्माणिकरिष्येऽज्ञोऽसहायवान् ॥ अंगीकृतानितद्भीत्यानमस्तेभवितव्यते ॥ २५ ॥ यावदित्थंचिंतयतिसत्वाष्ट्रोवनमध्यगः ॥ तावत्तदैवसंप्राप्तस्तेनैकोऽदर्शितापसः ॥ २६ ॥ अथनत्वासतंप्राहवनेदृष्टंतपस्विनम् ॥ कोभवान्मानसंमेयोनितरांसुखयत्यहो ॥२७॥ त्वद्दर्शनेनमेगात्रंचिंतासंतापतापितम् ॥ हिमानीगाहनेनेवशीतलंभवतिक्षणम् ॥ २८ ॥ किंत्वंमेप्राक्तनंकर्मप्राप्तंतापसरूपधृक् ॥ अथवाकरुणावार्धिराविर्भूतःशिवोभवान् ॥ २९ ॥ योसिसोसिनमस्तुभ्यमुपदेशेनयुंक्ष्वमाम् ॥ गुरूक्तंगुरुपत्न्युक्तंगुर्वपत्योक्तमेवच ॥ ३० ॥ कथंकर्तुमहंशक्तःकर्मतत्रदिशाद्भुतम् ॥ कुरुमेबुद्धिसाहाय्यंनिर्जनेबंधुतांगतः ॥ ॥ ३१ ॥ इत्युक्तस्तेनसवनेतापसोब्रह्मचारिणा ॥ कारुण्यपूर्णहृदयोयथोक्तमुपदिष्टवान् ॥ ३२ ॥ यआप्तत्वेनसंपृष्टोदुर्बुद्धिंसंप्रयच्छति ॥ सयातिनरकंघोरंयावदाभूतसंप्लवम् ॥ ३३ ॥ तापसउवाच ॥ ॥ ब्रह्मचारिञ्शृणुब्रूयांकिमद्भुततरंत्विदम् ॥ विश्वेशानुग्रहाद्ब्रह्माप्यभवत्सृष्टिकोविदः ॥ ३४ ॥ यदित्वंत्वाष्ट्रसर्वज्ञंकाश्यामाराधयिष्यसि ॥ ततस्तेविश्वकर्मेतिनामसत्यंभविष्यति ॥ ३५ ॥ विश्वेशानुग्रहात्काश्यामभिलाषानदुर्लभाः ॥ सुलभोदुर्लभोवैयद्यत्रमोक्षस्तनुत्यजाम् ॥ ३६ ॥

सृष्टेःकरणसामर्थ्यंसृष्टिरक्षाप्रवीणता ॥ विधिनाविष्णुनाप्रापिविश्वेशानुग्रहात्परात् ॥ ३७ ॥ याहिवैश्वेश्वरंसद्मपद्मयासमधिष्ठितम् ॥ निर्वाणसंज्ञयाबालायदीच्छेःस्वान्मनोरथान् ॥ ३८ ॥ सहिसर्वप्रदःशंभुर्याचितश्चोपमन्युना ॥ पयोमात्रंददौतस्मैसर्वंक्षीराब्धिमेवच ॥ ३९ ॥ आनंदकानने शंभोःकिंकिंकेननलभ्यते ॥ यत्रवासकृतांपुंसांधर्मराशिःपदेपदे ॥ ४० ॥ स्वर्धुनीस्पर्शमात्रेणमहापातकसंततिः ॥ यत्रसंक्षयतिक्षिप्रंतांकाशींकोनसंश्रयेत् ॥ ४१ ॥ नतादृग्धर्मसंभारोलभ्यतेक्रतुकोटिभिः ॥ यादृग्वाराणसीवीथीसंचारेणपदेपदे ॥ ४२ ॥ धर्मार्थकाममोक्षाणांयद्यस्तिमनोरथः ॥ तदावाराणसींयाहियाहित्रैलोक्यपावनीम् ॥ ४३ ॥ सर्वकामफलप्राप्तिस्तदैवस्याद्भुवंनृणाम् ॥ यदैवसर्वदःसर्वःकाश्यांविश्वेश्वरःश्रितः ॥ ४४ ॥ सतापसोक्तमाकर्ण्यत्वाष्ट्रइत्थंसुहृष्टवान् ॥ काशीसंप्राप्त्युपायंचतमेवसमपृच्छत ॥४५॥ ॥ त्वाष्ट्रउवाच ॥ ॥ तदानंदवनंशंभोःक्वास्तितापससत्तम ॥ यत्रनोदुर्लभंकिंचित्साधकानांत्रयीस्थितम् ॥ ४६ ॥ स्वर्गेवामर्त्यलोकेवाबलिसद्मनिवामुने ॥ क्वतदानंदगहनंयत्रानंदपयोब्धिजा ॥ ४७ ॥ यत्रविश्वेश्वरोदेवोविश्वेषांकर्णधारकः ॥ व्याचष्टेतारकंज्ञानंयेनतन्मयतांययुः ॥ ४८ ॥ सुलभायत्रनियतमानंदवनचारिणः ॥ अपिनैःश्रेयसीलक्ष्मीःकिमन्येल्पमनोरथाः ॥४९॥ कस्तांमांप्रापयेच्छंभोःकथंयामितथावद ॥ सतपस्वीतितद्वाक्यमाकर्ण्यश्रद्धयान्वितम् ॥५०॥ प्राहागच्छनयामित्वांयियासुरहमप्यहो ॥ दुर्लभंप्राप्यमानुष्यंयदिकाशीनसेविता ॥ ५१ ॥ पुनःक्वनृत्वंश्रेयोभूःक्वकाशीकर्मबंधहृत् ॥ वृथागतेहिमानुष्येकाशीप्राप्तिविवर्जनात् ॥ ५२ ॥ आयुष्यंचभविष्यंचसर्वमेववृथागतम् ॥ अतोहंसफलीकर्तुंमानुष्यंचातिचंचलम् ॥ ५३ ॥ यास्यामिकाशीमायाहिमायांहित्वात्वमप्यहो ॥ इतितेनसहत्वाष्ट्रोमुनिनातिकृपालुना ॥ ५४ ॥ पुरींवैश्वेश्वरींप्राप्तांमनःस्वास्थ्यमवापच ॥ ततःप्रापय्यतांकाशींतापसःक्वाप्यतर्कितम् ॥ ५५ ॥ जगामकुंभसंभूतसत्वाष्ट्रोपीत्यमन्यत ॥ अवश्यंसहिविश्वेशःसर्वेषांचिंतितप्रदः ॥५६॥ सत्पथस्थिरवृत्तीनांदूरस्थोपिसमीपगः ॥ यस्मिन्प्रसन्नदृक्त्र्यक्षस्तंदविष्ठमपिध्रुवम् ॥५७॥

सुनेदिष्ठंकरोत्येवस्वयंवर्त्मोपदर्शयन् ॥ क्वाहंतत्रवनेबालश्चिंताकुलितमानसः ॥ क्वतापसःसयोमविसूपदिश्येहचानयत् ॥ ५८ ॥ खेलोयमस्यत्र्यक्षस्य यस्यभक्तस्यकुत्रचित् ॥ नदुर्लभतरंकिंचिदहोक्वाहंक्वकाशिका ॥ ५९ ॥ नाराधितोमयाशंभुःप्राक्तनेजन्मनिक्वचित् ॥ शरीरित्वानुमानेनज्ञातमेतदसंशयम् ॥ ६० ॥ अस्मिञ्जन्मनिबालत्वान्नचैवाराधितःस्फुटम् ॥ प्रत्यक्षमेवमेवैतत्कुतोनुग्रहधीर्मयि ॥ ६१ ॥ आज्ञातंगुरुभक्तिर्मेहेतुःशंभुप्रसादने ॥ ययेहानुगृहीतोस्मिविश्वेशेनकृपालुना ॥ ६२ ॥ अथवाकारणापेक्षस्त्र्यक्षस्त्वितरदेववत् ॥ रंकमप्यनुगृह्णातिकेवलंकारणंकृपा ॥ ६३ ॥ यदिनोमय्यनुक्रोशःकथंतापससंगतिः ॥ तद्रूपेणस्वयंशंभुरानिनायेहमांध्रुवम् ॥ ६४ ॥ नदानानिनवैयज्ञानतपांसिव्रतानिच ॥ शंभोःप्रसादहेतूनिकारणंतत्कृपैवहि ॥ ॥ ६५ ॥ दयामपितदाकुर्यादसौविश्वेश्वरःपरम् ॥ यदाश्रुत्युक्तमध्वानंसद्भिःक्षुण्णंनसंत्यजेत् ॥ ६६ ॥ अनुक्रोशंसमर्थ्येतिसत्वाष्ट्रःशांभवंशुचिः ॥ संस्थाप्यलिंगमीशस्याराधयत्स्वस्थमानसः ॥ ६७ ॥ आनीतपुष्पसंभारमार्तवंकाननाद्वह ॥ स्नात्वाभ्यर्चयतीशानंकंदमूलफलाशनः ॥ ६८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्थंत्वष्टृतनूजस्यलिंगाराधनचेतसः ॥ त्रिहायनात्प्रसन्नोभूत्तस्येशःकरुणानिधिः ॥ ६९ ॥ तस्मादेवहिलिंगाच्चप्रादुर्भूयभवोऽब्रवीत् ॥ वरंवरयरे त्वाष्ट्रदृढभक्त्यानयातव ॥ ७० ॥ प्रसन्नोस्मिभृशंबालगुर्वर्थकृतचेतसः ॥ गुरुणागुरुपत्न्याचगुर्वपत्यद्वयेनच ॥ ७१ ॥ यथार्थितंतथाकर्तुंनेसामर्थ्यं भविष्यति ॥ ७२ ॥ अन्यान्वरांश्चतेदद्यांत्वाष्ट्रतुष्टस्त्वदर्चया ॥ ताञ्शृणुष्वमहाभागलिंगस्यास्याद्भुतश्रियः ॥ ७३ ॥ त्वंसुवर्णादिधातूनांदारूणां दृषदामपि ॥ मणीनामपिरत्नानांपुष्पाणामपिवासरम् ॥ ७४ ॥ कर्पूरादिसुगंधीनांद्रव्याणामप्यपामपि ॥ कंदमूलफलानांचद्रव्याणामपिचत्वचाम् ॥ ॥ ७५ ॥ सर्वेषांवस्तुजातानांकर्तुंकर्मप्रवेत्स्यसि ॥ यस्ययस्यरुचिर्यत्रसद्मदेवालयादिषु ॥ ७६ ॥ तस्यतस्येहतुष्ट्यैत्वंतथाकर्तुंप्रवेत्स्यसि ॥ सर्वने पथ्यरचनाःसर्वाःसूपस्यसंस्कृतीः ॥७७॥ सर्वाणिशिल्पिकार्याणितौर्यत्रिकमथापिच ॥ सर्वंज्ञास्यसिकर्तुंत्वंद्वितीयइवपद्मभूः ॥७८॥ नानाविधानियं त्राणिनानायुधविधानकम् ॥ जलाशयानांरचनाःसुदुर्गरचनास्तथा ॥ ७९ ॥ तादृक्कर्तुंपुरावेत्सियादृङ्नान्योऽधियास्यति ॥ कलाजातंहिसर्वंत्वम वयास्यसिमेवरात् ॥ ८० ॥ सर्वेंद्रजालिकीविद्यात्वदधीनाभविष्यति ॥ सर्वकर्मसुकौशल्यंसर्वबुद्धिवरिष्ठताम् ॥ ८१ ॥ सर्वेषांचमनोवृत्तिंत्वंज्ञास्य सिवरान्मम ॥ किंबहुक्तेनयत्स्वर्गेयत्पातालेयदत्रच ॥ ८२ ॥ अतिलोकोत्तरंकर्मतत्सर्वंवेत्स्यसिस्वयम् ॥ ८३ ॥

विश्वेषांविश्वकर्माणिविश्वेषुभुवनेषुच ॥ यतोज्ञास्यसितन्नामविश्वकर्मेतितेऽनघ ॥ ८४ ॥ अपरःकोवरोदेयस्तवतंप्रार्थयाश्वहो ॥ तवादेयंनमेकिंचि ल्लिंगार्चनरतस्यहि ॥ ८५ ॥ अन्यत्रापिहियोलिंगंसमर्चयतिसन्मतिः ॥ तस्यापिवांछितंदेयंकिंपुनर्योविकाशिकम् ॥ ८६ ॥ येनकाश्यांसमभ्यर्चिये नकाश्यांप्रतिष्ठितम् ॥ येनकाश्यांस्तुतंलिंगंसमेरूपायदर्पणः ॥ ८७ ॥ तत्त्वंस्वच्छोसिमुकुरोममनेत्रत्रयस्यहि ॥ काश्यांलिंगार्चनात्त्वाष्ट्रवरंवरयसुव्रत ॥ ८८ ॥ काश्यांयोराजधान्यांमेहित्वामामन्यमर्चयेत् ॥ सवराकोल्पधीर्मुष्टोऽल्पतुष्टिर्मुक्तिवर्जितः ॥ ८९ ॥ तदानंदवनेह्यत्रसमर्च्योहंमुमुक्षुभिः ॥ द्रुहिणोपेंद्रचंद्रेंद्रैरिहान्योनसमर्च्यते ॥ ९० ॥ यथानंदवनंप्राप्यत्वंमामर्चितवानसि ॥ तथान्येपुण्यकर्माणोमामभ्यर्च्यैवमामिताः ॥ ९१ ॥ अनु ग्राह्योऽसिनितरांततोवरयदुर्लभम् ॥ श्राणितंतदवैहित्वंवदमाचिरयस्वभोः ॥ ९२ ॥ ॥ विश्वकर्मोवाच ॥ ॥ इदंयत्स्थापितंलिंगंमयाज्ञेनापिशंकर ॥ तल्लिंगमन्येप्याराध्यसंतुसद्बुद्धिभाजनम् ॥ ९३ ॥ अन्यच्चनाथप्रार्थ्योसितच्चविश्राणयिष्यसि ॥ मयाविनिर्मापयितास्वंप्रासादंकदाभवान् ॥ ९४ ॥ देवदेवउवाच ॥ ॥ एवमस्तुयदुक्तंतेतवलिंगसमर्चकाः ॥ सद्बुद्धिभाजनंवैस्युःस्युश्चनिर्वाणदीक्षिताः ॥ ९५ ॥ यदाचराजाभवितादिवोदासोविधेर्व रात् ॥ तदामेवचनात्तातप्रासादंमेविधास्यति ॥ ९६ ॥ नवीकृत्यपुनःकाशीनिर्विष्टातेनभूभुजा ॥ गणेशमाययाराज्यात्परिनिर्विण्णचेतसा ॥ ९७ ॥ विष्णोःसदुपदेशाच्चमामेवशरणंगतः ॥ निर्वाणलक्ष्मीःप्राप्तेहहित्वाराज्यश्रियंचलाम् ॥ ९८ ॥ विश्वकर्मन्व्रजगुरोःशासनाययतस्वच ॥ गुरुभक्तिकृतो यस्मान्मद्भक्तानात्रसंशयः ॥ ९९ ॥ येगुरुंचावमन्यंतेतेवमान्यामयाप्यहो ॥ तस्माद्गुरूपदिष्टंहिकुरुशिष्यसमीहितम् ॥ १०० ॥ ततआगत्यमे पार्श्वंयावन्निर्वाणमेष्यसि ॥ तावत्स्थास्यसिशुद्धात्मादेवानांहितमाचरन् ॥ १ ॥ तवात्रलिंगेसततंस्थास्याम्यहमभीष्टदः ॥ अस्यलिंगस्यभक्तानां निर्वाणश्रीरदूरतः ॥ २ ॥ अंगारेशादुदीच्यांयेत्वल्लिंगस्यसमर्चकाः ॥ तेषांमनोरथावाप्तिर्भविष्यतिपदेपदे ॥ ३ ॥

इत्युक्त्वांतर्दधेदेवस्त्वाष्ट्रोपिगुरुमाप्तवान् ॥ गुरोःसमीहितंभूरिविधायसगृहान्ययौ ॥४॥ गृहेपिमातापितरौसंतोष्यनिजकर्मणा ॥ तदुक्ताज्ञांसमाधायपुनः काशींसमाययौ ॥ ५ ॥ स्वलिंगाराधनासक्तोनाद्यापित्वद्वनंदनः ॥ काशींत्यजतेमधावीसर्वदेवप्रियंचरन् ॥ ६ ॥ ॥ ईश्वरउवाच ॥ ॥ पृष्टा नियानिलिंगानित्वयादेविगिरींद्रजे ॥ काशीमुक्तौसमर्थानितान्युक्तानिमयातव ॥ ७ ॥ लिंगमोंकारसंज्ञंचतथादेवंत्रिविष्टपम् ॥ महादेवःकृत्तिवासारत्ने शश्चंद्रसंज्ञकः ॥ ८ ॥ केदारश्चापिधर्मेशस्तथावीरेश्वराभिधः ॥ कामेशविश्वकर्मेशौमणिकर्णीश्वरस्तथा ॥ ९ ॥ ममार्च्यमविमुक्ताख्यंततोदेविममा ख्यकम् ॥ विश्वनाथेतिविश्वस्मिन्प्रथितंविश्वसौख्यदम् ॥ ११० ॥ अविमुक्तंसमासाद्ययेनविश्वेश्वरोर्चितः ॥ नतस्यास्तिपुनर्जन्मकल्पकोटिशतेष्वपि ॥ ११ ॥ अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनाम् ॥ एकत्रचतुरोमासानब्दंनावासइष्यते ॥ १२ ॥ अविमुक्तेप्रविष्टानांविहारोनयुज्यते ॥ मोक्षो प्यसंशयश्चात्रतस्मात्त्याज्यानकाशिका ॥ १३ ॥ आनंदकाननंहित्वानान्यद्गच्छेत्तपोवनम् ॥ तपोयोगश्चमोक्षश्चयतोत्रैवमदाश्रयात् ॥ १४ ॥ कृपयासर्वजंतूनांक्षेत्रमेतन्मयाकृतम् ॥ अपश्यमेवसिद्ध्यंतिक्षेत्रेस्मिन्सिद्धिकांक्षिणः ॥ १५ ॥ अतीतंवर्तमानंचज्ञानतोऽज्ञानतःकृतम् ॥ यदेनस्तत्क्षयं यायादानंदवनवीक्षणात् ॥ १६ ॥ अत्युग्रैश्चतपोभिर्यन्महादानैर्महाव्रतैः ॥ नियमैश्चयमैःसम्यक्स्वयोगेनमहामखैः ॥ १७ ॥ वेदांतशास्त्राभ्यसनैः सर्वोपनिषदाश्रयात् ॥ एभिर्वैयदवाप्येततत्काश्यांहिलयाप्यते ॥१८॥ कर्मसूत्रेणबद्धावैभ्राम्यंतेतावदेवहि ॥ यावद्वैश्वेश्वरेधाम्निममनैवतनुत्यजः ॥१९॥ काश्यांस्वलीलयादेवितिर्यग्योनिजुषामपि ॥ ददामिचांतेतत्स्थानंयत्रयांतिनयाज्ञिकाः ॥ १२० ॥ भूतग्रामोऽखिलोप्यत्रमुक्तिक्षेत्रेकृतालयः ॥ काले ननिधनंयातोयात्येवपरमांगतिम् ॥ २१ ॥ विषयासक्तचित्तोपित्यक्तधर्मरतिस्त्वपि ॥ कालेनोज्झितदेहोऽत्रनसंसारंपुनर्विशेत् ॥ २२ ॥ प्रयागे यत्फलंदेविमाघेचोपसिमज्जनात् ॥ तत्फलंकोटिगुणितंवाराणस्यांक्षणेक्षणे ॥ २३ ॥ अस्यक्षेत्रस्यमहिमाकोपिवाचामगोचरः ॥ उद्देशमात्रमाख्या यिमयातेप्रीतिकाम्यया ॥ २४ ॥ चतुर्दशानांलिंगानांश्रुत्वाख्यानानिसत्तमः ॥ चतुर्दशसुलोकेषुपूजांप्राप्स्यत्यनुत्तमाम् ॥ १२५ ॥ इतिश्रीस्कांदे महापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेविश्वकर्मेशप्रादुर्भावोनामषडशीतितमोऽध्यायः ॥ ८६ ॥

॥ अगस्त्यउवाच ॥ ॥ सर्वज्ञसूनोषड्वक्त्रसर्वार्थकुशलप्रभो ॥ प्रादुर्भावंनिशम्यैषांलिंगानांमुक्तिदायिनाम् ॥ १ ॥ नितरांपरितृप्तोस्मिसुधांपीत्वेव निर्जरः ॥ ओंकारप्रमुखैर्लिंगैरिदमानंदकाननम् ॥२॥ आनंदमेवजनयेदपिपापजुषामिह ॥ परानंदमहंप्राप्तःश्रुत्वैतल्लिंगकीर्तनम् ॥३॥ जीवन्मुक्तइवासं हिक्षेत्रतत्त्वश्रुतेरहम् ॥ स्कंददक्षेश्वरादीनिलिंगानीहचतुर्दश ॥ यान्युक्तानिसमाचक्ष्वतत्प्रभावमशेषतः ॥ ४ ॥ योदक्षोगर्हयामासमध्येदेवसभंविभुम् ॥ सकथंलिंगमीशस्यप्रत्यस्थापयदद्भुतम् ॥५॥ इतिश्रुत्वाशिखिरथःकुंभयोनेरुदीरितम् ॥ सूतसंकथयामासदक्षेश्वरसमुद्भवम् ॥६॥ ॥ स्कंदउवाच ॥ आकर्णयमुनेवच्मिकथांकल्मषहारिणीम् ॥ पुरश्चरणकामोसौदक्षःकाशींसमाययौ ॥ ७ ॥ छागवक्त्रोविरूपास्योदधीचिपरिधिक्कृतः ॥ प्रायश्चित्तवि धानार्थंसूपदिष्टःस्वयंभुवा ॥ ८ ॥ एकदादेवदेवस्यसेवार्थंशशिमौलिनः ॥ कैलासमगमद्विष्णुःपद्मयोनिपुरस्कृतः ॥ ९ ॥ इंद्रादयोलोकपालाविश्वेदे वामरुद्गणाः ॥ आदित्यावसवोरुद्राःसाध्याविद्याधरोरगाः ॥ १० ॥ ऋषयोऽप्सरसोयक्षागंधर्वाःसिद्धचारणाः ॥ तैर्नतोदेवदेवेशःपरिहृष्टतनूरुहैः ॥११॥ स्तुतश्चनानास्तुतिभिःशंभुनापिकृतादराः ॥ विविशुश्चासनश्रेण्यांतन्मुखासक्तदृष्टयः ॥ १२ ॥ अथतेपूपविष्टेषुशंभुनाविष्टरश्रवाः ॥ कृतहस्तपरिस्पर्श मानःपृष्टोमहादरम् ॥ १३ ॥ श्रीवत्सलांछनहरेदैत्यवंशदवानल ॥ कच्चित्पालयितुंशक्तिस्त्रिलोकीमस्त्यकुंठिता ॥ १४ ॥ दितिजान्दनुजान्दुष्टान्क च्चिच्छासिरणांगणे ॥ अपिक्रुद्धान्महीदेवान्मामिवप्रतिमन्यसे ॥ १५ ॥ बाधयारहितागावःकच्चित्संतिमहीतले ॥ स्त्रियःसंतिहिसुश्रीकाःपतिव्रतप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रायणाः ॥ १६ ॥ विधियज्ञाःप्रवर्ततेपृथिव्यांबहुदक्षिणाः ॥ निराबाधंतपःकच्चिदस्तिशश्वत्तपस्विनाम् ॥ १७ ॥ निष्प्रत्यूहंपठंत्येवसांगान्वेदान्द्विजोत्तमाः ॥ महीपालाःप्रजाःकच्चित्पांतित्वमिवकेशव ॥ १८॥ स्वेषुस्वेषुचधर्मेषुकच्चिद्वर्णाश्रमास्तथा ॥ निष्ठावंतोहितिष्ठंतिप्रहृष्टेंद्रियमानसाः ॥ १९ ॥

धूर्जटिःपरिपृच्छ्येतिहृष्टंवैकुंठनायकम् ॥ ब्रह्माणंचापिपप्रच्छब्राह्मंतेजःसमेधते ॥ २० ॥ सत्यमस्खलितंकच्चिदस्तित्रैलोक्यमंडपे ॥ तीर्थावरोधोनक्वापिकेनचित्क्रियतेविधे ॥ २१ ॥ इंद्रादयःसुराःकच्चित्स्वेषुस्वेषुपुरेष्वहो ॥ राज्यंप्रशासतिस्वस्थाःकृष्णदोर्दंडपालिताः ॥ २२ ॥ प्रत्येकंपरिपृच्छ्येशःसर्वानित्थंकृतादरान् ॥ पृष्ट्वागमनकार्यंचतेषांकृत्वामनोरथान् ॥ २३ ॥ विससर्जाथतान्सर्वान्देवःसौधंसमाविशत् ॥ गतेष्वथचदेवेषुस्वस्वधिष्ण्येषुहृष्टवत् ॥ २४ ॥ मध्येमार्गंसचिंतोभूद्दक्षःसत्याःपितातदा ॥ अन्यदेवसमानंसमानंप्रापनचाधिकम् ॥ २५ ॥ अतीवक्षुब्धचित्तोभून्मंदराघातोऽब्धिवत् ॥ उवाचचमनस्येतन्महाक्रोधरयांधदृक् ॥ २६ ॥ अतीवगर्वितोजातःसतींमेप्राप्यकन्यकाम् ॥ कस्यचिन्नाप्यसौप्रायोनकोस्यापिक्वचित्पुनः ॥ २७ ॥ किंवंश्यस्त्वेपकिंगोत्रःकिंदेशीयःकिमात्मकः ॥ किंवृत्तिःकिंसमाचारोविषादीवृषवाहनः ॥ २८ ॥ नप्रायशस्तपस्व्येपक्वतपःक्वास्त्रधारणम् ॥ नगृहस्थेषुगण्योसौश्मशाननिलयोयतः ॥ २९ ॥ असौनब्रह्मचारीस्यात्कृतपाणिग्रहस्थितिः ॥ वानप्रस्थ्यंकुतश्चास्मिन्नैश्वर्यमदमोहिते ॥३०॥ नत्राह्मणोभवत्येषयतोवेदोनवेत्त्यमुम् ॥ शस्त्रास्त्रधारणात्प्रायःक्षत्रियःस्यान्नसोप्ययम् ॥ ३१ ॥ क्षतात्संत्राणनात्क्षत्रंतत्क्वास्मिन्प्रलयप्रिये ॥ वैश्योपिनभवेदेषसदानिर्धनचेष्टनः ॥ ३२ ॥

शूद्रोपिनभवेत्प्रायोनागयज्ञोपवीतवान् ॥ एवंवर्णाश्रमातीतःकोसौसम्यङ्नकीर्त्यते ॥ ३३ ॥ सर्वःप्रकृत्याज्ञायेतस्थाणुःप्रकृतिवर्जितः ॥ प्रायशःपुरुषोनासावर्धनारीवपुर्यतः ॥ ३४ ॥ योषापिनभवेदेषयतोसौश्मश्रुलाननः ॥ नपुंसकोपिनभवेल्लिंगमस्ययतोर्च्यते ॥ ३५ ॥ बालोपिनभवत्येषयतोऽयंबहुवार्षिकः॥ अनादिवृद्धोलोकेषुगीयतेचोग्रएषयत् ॥ ३६ ॥ अतोयुवत्वंसंभाव्यंनात्रनूनंचिरंतने ॥ वृद्धोऽपिनभवत्येषजरामरणवर्जितः ॥ ३७ ॥ ब्रह्मादीन्संहरेत्प्रांतेतथापिचनपातकी ॥ पुण्यलेशोपिनास्त्यस्मिन्ब्रह्ममौलिच्छिदिक्रुधा ॥ ३८ ॥ अस्थिनेपथ्यवतिचक्वशुचित्वंविवाससि ॥ किंबहूक्तेननोकिंचिज्ज्ञायतेऽस्यविचेष्टितम् ॥ ३९ ॥ अहोधार्ष्ट्यंमहद्दृष्टंजटिलस्याद्यचाद्भुतम् ॥ यदासनान्नोत्थितोसौदृष्ट्वामांश्वशुरंगुरुम् ॥ ४० ॥ एवंभूता भवंत्येवमातापितृविवर्जिताः ॥ निर्गुणाअकुलीनाश्चकर्मभ्रष्टानिरंकुशाः ॥ ४१ ॥ स्वच्छंदचारिणोऽनाथाःसर्वत्रस्वाभिमानिनः ॥ अकिंचनाअपिप्रायस्तथापीश्वरमानिनः ॥ ४२ ॥ जामातॄणांस्वभावोयंप्रायशोगर्वभाजनम् ॥ किंचिदैश्वर्यमासाद्यभवत्येवनसंशयः ॥ ४३ ॥ द्विजराजःसगर्विष्ठोरोहिणीप्रेमनिर्भरः ॥ कृत्तिकादिषुचास्नेहीमयाशप्तःशयीकृतः ॥ ४४ ॥ अस्याहंगर्वसर्वस्वंहरिष्याम्येवशूलिनः ॥ यथावमानितश्चाहमनेनास्यगृहंगतः ॥ ४५ ॥ तथास्याहंकरिष्यामिमानहानिंचसर्वतः ॥ संप्रधार्येतिबहुशःसतुदक्षःप्रजापतिः ॥ ४६ ॥ प्राप्यस्वभवनंदेवानाजुहावसवासवान् ॥ अहंयियक्षुर्यूयंमेयज्ञसाहाय्यकारिणः ॥ ४७ ॥ भवंतुयज्ञसंभारानानयंतुत्वरान्विताः ॥ श्वेतद्वीपमथोगत्वाचक्रेचक्रिणमच्युतम् ॥ ४८ ॥ महाक्रतूपद्रष्टारंयज्ञपूरुषमेवच ॥ तस्यर्त्विजोभवन्सर्वऋषयोब्रह्मवादिनः ॥ ४९ ॥ प्रावततततस्तस्यदक्षस्यचमहाध्वरः ॥ दृष्ट्वादेवनिकायांश्चतस्मिन्दक्षमहाध्वरे ॥ ५० ॥ अनीश्वरांस्ततोवेधाव्याजंकृत्वागृहंययौ ॥ दधीचिरथसंवीक्ष्यसर्वांस्त्रैलोक्यवासिनः ॥ ५१ ॥

दक्षयज्ञेसमायातान्सतीश्वरविवर्जितान्॥प्राप्तसंमानसंभारान्वासोलंकृतिपूर्वकम्॥५२॥दक्षस्यहिशुभोदर्कमिच्छन्प्रोवाचचेतिवै ॥ ॥ दधीचिरुवाच ॥ दक्षप्रजापतेदक्षसाक्षाद्धातृस्वरूपधृक् ॥ ५३ ॥ नचास्तितवसामर्थ्यंक्वापिकस्यापिनिश्चितम् ॥ यादृशःक्रतुसंभारस्तवचेहसमीक्ष्यते ॥ ५४ ॥ नतादृङ्नेदसिप्रायःक्वापिज्ञातोमहामते ॥ क्रतुस्तुनैवकर्तव्योनास्तिक्रतुसमोरिपुः ॥ ५५ ॥ कर्तव्यश्चेत्तदाकार्यःस्याच्चेत्संपत्तिरीदृशी ॥ साक्षादग्निःस्वयंकुंडेसाक्षादिंद्रादिदेवताः ॥५६॥ साक्षाच्चसर्वेमंत्रावैसाक्षाद्यज्ञपुमानसौ ॥ आचार्यपदवीमेषदेवाचार्यःस्वयंचरेत् ॥ साक्षाद्ब्रह्मास्वयंचैषभृगुर्वैकर्मकांडवित् ॥ ॥ ५७ ॥ अयंपूषाभगस्त्वेषइयंदेवीसरस्वती ॥ एतेचसर्वदिक्पालायज्ञरक्षाकृतःस्वयम् ॥ ५८॥ त्वंचदीक्षांशुभांप्राप्तोदेव्याचशतरूपया ॥ जामातात्वेषतेधर्मःपत्नीभिर्दशभिःसह ॥ ५९ ॥ स्वयमेवहिकुर्वीतधर्मकार्यंप्रयत्नतः ॥ ओषधीनामयंनाथस्तवजामातृपूत्तमः ॥ ६० ॥ सप्तविंशतिभिःसार्धंपत्नीभिस्तवकार्यकृत् ॥ ओषधीःपूरयेत्सर्वाद्विजराजोमहासुधीः ॥६१॥ दीक्षितोराजसूयस्यदत्तत्रैलोक्यदक्षिणः॥मारीचःकश्यपश्चासौप्रजापतिषुसत्तमः ॥ त्रयोदशमिताभिश्चभार्याभिस्तवकार्यकृत् ॥ ६२ ॥ हविःकामदुघासूतेकल्पवृक्षःसमित्कुशान् ॥ दारुपात्राणिसर्वाणिशकटंमंडपादिकम् ॥ ६३ ॥ विश्वकर्माप्यलंकारान्कुरुतेभ्यागतर्त्विजाम् ॥ वसूनिचाऽपिवासांसिवसवोष्टौददत्यपि ॥ ६४ ॥ स्वयंलक्ष्मीरलंकुर्याद्यावैचात्रसुवासिनीः ॥ ६५ ॥ सर्वेसुखायमेदक्षवीक्षमाणस्यसर्वतः ॥ एकंदुःखाकरोत्येवयत्त्वंविस्मृतवानसि ॥ ६६ ॥ जीवहीनोयथादेहोभूषितोपिनशोभते ॥ तथेश्वरंविनायज्ञःश्मशानमिवलक्ष्यते ॥ ६७ ॥ इत्थंदधीचिवचनंश्रुत्वादक्षःप्रजापतिः ॥ भृशंजज्वालकोपेनहविषाकृष्णवर्त्मवत् ॥ ६८ ॥ पूर्वंस्तुत्यातिसंहृष्टोदृष्टोयोसौदधीचिना ॥ सएवचापिकोपाग्निमुद्वमन्वीक्षितोमुखात् ॥ ६९ ॥ प्रत्युवाचाथतंविप्रंवेपमानांगयष्टिकः ॥ दक्षःप्रजापतीरोषाज्जिघांसुरिवतंद्विजम् ॥ ७० ॥ ॥ दक्षउवाच ॥ ॥ ब्राह्मणोसिदधीचेत्वंकिंकरोमितवात्रवै ॥ दीक्षामहमहोप्राप्तःकर्तुंनायातिकिंचन ॥ ७१ ॥ भवान्केनसमाहूतोयदत्रागतोमहाजडः ॥ आगतोपिहिकेनत्वंपृष्टइत्थंब्रवीषियत् ॥ ७२ ॥

सर्वमंगलमांगल्योयत्रश्रीमानयंहरिः ॥ स्वयंवैयज्ञपुरुषःसमखःकिंश्मशानवत् ॥ ७३ ॥ यत्रवज्रधरःशक्रःशतयज्ञैकदीक्षितः ॥ त्रयस्त्रिंशतिकोटीनाममरगणांपतिःस्वयम् ॥ ७४ ॥ तंत्वंचोपमिमीषेमुंश्मशानेनमहामखम् ॥ धर्मराट्चस्वयंयत्रधर्माधर्मैककोविदः ॥ ७५ ॥ श्रीदोस्तियत्रश्रीदातासाक्षाद्यत्राशुशुक्षणिः ॥ तंयज्ञमुपमासि त्वममंगलभुवातया ॥ ७६ ॥ देवाचार्यःस्वयंयत्रक्रतोराचार्यतांगतः ॥ अभिमानवशात्तंत्वमाख्यासिपितृकाननम् ॥ ७७ ॥ यत्रार्त्विज्यंभजंतेऽमीवसिष्ठप्रमुखर्षयः ॥ तमध्वरंसमाचक्षेमंगलेतरभूमिवत् ॥ ७८ ॥ निशम्येतिमुनिःप्राहदधीचिर्ज्ञानिनांवरः ॥ सर्वमंगलमांगल्योभवेद्यज्ञपुमान्हरिः ॥ ७९ ॥ तथापिशांभवीशक्तिर्वेदेविष्णुःप्रपठ्यते ॥ वामांगंस्रष्टुराद्यस्यहरिस्तदितरद्विधिः ॥ ८० ॥ दीक्षितोयोश्वमेधानांशतस्यकुलिशायुधः ॥ दुर्वाससाक्षणेनापिनीतोनिःश्रीकतांहिसः ॥ ८१ ॥ पुनराराध्यभूतेशंप्रापैकाममरावतीम् ॥ यस्त्वयाधर्मराजोत्रकथितःक्रतुरक्षकः ॥ ८२ ॥ बलंतस्याखिलैर्ज्ञातंश्वेतंपाशयतःपुरा ॥ धनदस्त्र्यंबकसखस्तच्चक्षुश्चाशुशुक्षणिः ॥ ८३ ॥ पार्ष्णिग्राह्यभवद्रुद्रोदेवाचार्यस्यवैतदा ॥ यदातारामधार्षीत्सद्विजराजोऽतिसुंदरीम् ॥ ८४ ॥ तंविदंतिवसिष्ठाद्यास्तवार्त्विज्यंभजंतिये ॥ एकोरुद्रोनद्वितीयःसंविदानाअपीतिहि ॥८५॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रावर्ततर्षयोन्येपिगौरवात्तवतेक्रतौ ॥ यदिमेब्राह्मणस्यैकंशृणोषिवचनंहितम् ॥ ८६ ॥ तदाक्रतुफलाधीशंविश्वेशंत्वंसमाह्वय ॥ विनातेनक्रतुरसौकृतो प्यकृतएवहि ॥ ८७ ॥ सतितस्मिन्महादेवेविश्वकर्मैकसाक्षिणि ॥ तवापिचैषांसर्वेषांफलिष्यंतिमनोरथाः ॥ ८८ ॥ यथाजडानिबीजानिनफलं तिस्वयंतथा ॥ जडानिसर्वकर्माणिनफलंतीश्वरंविना ॥ ८९ ॥ अर्थहीनायथावाणीधर्महीनायथातनुः ॥ पतिहीनायथानारीशिवहीनातथाक्रिया ॥ ॥ ९० ॥ गंगाहीनायथादेशाःपुत्रहीनायथागृहाः ॥ दानहीनायथासंपच्छिवहीनातथाक्रिया ॥ ९१ ॥ मंत्रिहीनंयथाराज्यंश्रुतिहीनायथाद्विजाः ॥ योपाहीनंयथासौख्यंशिवहीनातथाक्रिया ॥ ९२ ॥ दर्भहीनायथासंध्यातिलहीनंचतर्पणम् ॥ हविर्हीनोयथाहोमःशिवहीनातथाक्रिया ॥ ९३ ॥

इत्थंदधीचिनाख्यातंजग्राहवचनंनतत् ॥ दक्षोदक्षोपितत्रैवशंभोर्मायाविमोहितः ॥ ९४ ॥ प्रोवाचचभृशंक्रुद्धःकाचिंतातवमेक्रतोः ॥ क्रतुमुख्यानिसर्वा णियानिकर्माणिसर्वतः ॥ ९५ ॥ तानिसिद्ध्यंतिनियतंयथार्थकरणादिह ॥ अयथार्थविधानेनसिद्ध्येत्कर्मापिनेशितुः ॥ ९६ ॥ स्वकर्मसिद्धयेचाथ सर्वएवहिचेश्वरः ॥ ईश्वरःकर्मणांसाक्षीयत्त्वयापीतिभाषितम् ॥ ९७ ॥ तत्तथास्तुपरंसाक्षीनार्थंदद्याच्चकुत्रचित् ॥ ९८ ॥ जडानिसर्वकर्माणिनफलंती श्वरंविना ॥ यदुक्तंभवतातत्राप्यहोदृष्टांतयाम्यहम् ॥ ९९ ॥ जडान्यपिचबीजानिकालंसंप्राप्यचात्मनः ॥ अंकूरयंतिकालाच्चपुष्प्यंतिचफलंतिच ॥ १०० ॥ विनापीशंतथाकर्मस्वयंकालात्फलत्यहो ॥ किमीश्वरेणतेनात्रमहामंगलमूर्तिना ॥ १ ॥ ॥ दधीचिरुवाच ॥ ॥ यथार्थकरणात्सि द्धमपिकार्यंकदाचन ॥ ईश्वरप्रातिकूल्याच्चसिद्धमेवाशुनश्यति ॥ २ ॥ ईश्वरेच्छाबलात्कर्मकृतमप्यविधानतः ॥ संसिद्ध्येत्तदधीनाश्चकथंसर्वइहे श्वराः ॥ ३ ॥ सामान्यसाक्षिवन्नेशःसर्वेषांसर्वकर्मणाम् ॥ साक्षीभवेदसंदिग्धःफलस्यप्रतिभूरपि ॥ ४ ॥ भूजलादिस्वरूपेणबीजमाविश्यसर्वकृत् ॥ स्वयंकालस्वरूपेण[illegible]दध्यादंकुरोदयम् ॥ ५ ॥ यत्त्वयोक्तंविनापीशंकालेकर्मफलेत्स्वयम् ॥ सएवकालोभगवान्सर्वकर्तामहेशिता ॥ ६ ॥ अन्यच्चभव ताप्रोक्तंतदेकंतथ्यमेवतत् ॥ किमीश्वरेणतेनात्रमहामंगलमूर्तिना ॥ ७ ॥ येमहांतोभवंत्येवयेचमंगलमूर्तयः ॥ ईश्वराख्याचयेष्व[illegible]किंतैरत्रतवांतिके ॥ ८ ॥ उत्तरादुत्तरंचेतिप्रत्युत्तरयतिद्विजे ॥ दधीचौचुक्रुधेऽत्यंतंदक्षोगर्वातिसुश्रिया ॥ ९ ॥ आदिदेशसमीपस्थानालोक्यपरितस्त्विति ॥ ब्राह्मणा [illegible]दंचासुंपरिदूरयताशुवै ॥ ११० ॥ अमुष्मादध्वरश्रेष्ठादवरिष्ठमनोगतम् ॥ इत्थंदधीचिराकर्ण्यप्रोवाचप्रहसन्निव ॥ ११ ॥ किंमांदूरयसेमूढदूरीभूतो भवानपि ॥ सर्वेभ्योमंगलेभ्यश्चसर्वैरेभिःसमंध्रुवम् ॥ १२ ॥

अकलिक्रोधजोदंडस्तवमूर्ध्निपतिष्यति ॥ महेशितुस्त्रिजगतीपरिशास्तुःप्रजापते ॥ १३ ॥ इत्युक्त्वानिर्जगामाशुयज्ञवाटात्ततोद्विजः ॥ तस्मिन्निर्यातिनि र्यातोदुर्वासाश्च्यवनोभवान् ॥ १४ ॥ उत्तंकउपमन्युश्चऋचीकोद्दालकावपि ॥ मांडव्योवामदेवश्चगाल[illegible]गर्गगौतमौ ॥१५॥ शिवतत्त्वविदोन्येपिदक्षय ज्ञाद्विनिर्ययुः ॥ गतेदधीचौसानंदंप्रावर्ततमहामखः ॥१६॥ येस्थिताब्राह्मणास्तत्रतेभ्योद्विगुणदक्षिणाम् ॥ प्रादात्प्रजापतिर्दक्षस्त्वन्येभ्योप्यधिकंवसु ॥ ॥ १७ ॥ सर्वेजामातरस्तेनतोषिताभूरिशोधनैः ॥ कन्याश्चालंकृताःसर्वामहाविभवविस्तरैः ॥१८॥ ऋषिपत्न्योपिबहुशोदेवपत्न्योप्यनेक[illegible] ॥ तथापु रांगनाःसर्वास्तेनमानभुवःकृताः ॥ १९ ॥ ब्रह्मघोषेणतारेणव्योमशब्दगुणंस्फुटम् ॥ कारितंतेनदक्षेणविप्राणांहृष्टचेतसाम् ॥ १२० ॥ अग्निर्मंदाग्नि रभवत्तस्मिञ्जुह्वतिदीक्षिते ॥ हविःपरिमलेनैवपरितृप्तादिगंगनाः ॥ २१ ॥ स्वाहाकारैर्वषट्कारैःसुराजाताःपिचंडिलाः ॥ रचितागिरयस्तेनसदन्नानां पदेपदे ॥२२॥ घृतकुल्याःकृतास्तेनमधुकुल्याःसहस्रशः ॥ महासरांसिपयसांद्रप्सस्यापिमहाह्रदाः ॥ २३ ॥ राशयश्चदुकूलानांरत्नानांशिखराणिच ॥ यज्ञवाटस्यवसुधास्वर्णरूप्यमयीकृता ॥ २४ ॥ नलभ्यंतेक्रतौतस्यमार्गिताअपिमार्गणाः ॥ हृष्टाःपुष्टाःसमभवन्नपितत्परिचारकाः ॥ २५ ॥ ध्वनिर्मं गलगीतानांव्यानशेगगनांगणम् ॥ जहृषेचाप्सरोवृंदैर्गंधर्वैर्मुमुदेतराम् ॥ २६ ॥ विद्याधरैर्ननंदेचवसुधाववृधेभृशम् ॥ महाविभवसंभारेतस्मिन्दाक्षे महाक्रतौ ॥ इत्थंप्रवृत्तेऽथमुनिःकैलासंनारदोययौ ॥१२७॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदक्षयज्ञप्रादुर्भा वोनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ अगस्त्यउवाच ॥ ॥ शिवलोकंसमासाद्यमुनिनाब्रह्मसूनुना ॥ किंचक्रेब्रूहिषड्वक्त्रकथांकौ तुकशालिनीम् ॥ १ ॥ स्कंदउवाच ॥ ॥ शृणुकुंभजवक्ष्यामिनारदेनमहात्मना ॥ यत्कृतंतत्रगत्वाशुकैलासंशंकरालयम् ॥ २ ॥ मुनिर्गगनमार्गे णप्राप्यतद्धामशांभवम् ॥ दृष्ट्वाशिवौप्रणम्याथशिवेनविहितादरः ॥ ३ ॥

तदुद्दिष्टासनंभेजेपश्यंस्तत्क्रीडनंपरम् ॥ क्रीडंतौतौतुचाक्षाभ्यांयदानचविरेमतुः ॥ ४ ॥ तदौत्सुक्येनसमुनिःप्रेर्यमाणउवाचह ॥ ॥ नारदउवाच ॥ ॥ देवदेवतवक्रीडाखिलंब्रह्मांडगोलकम् ॥ मासाद्वादशयेनाथतेसारिफलकेगृहाः ॥ ५ ॥ कृष्णाःकृ[illegible]तरायावैतिथयस्ताश्चसारिकाः ॥ द्विपंचदशमासे यास्त्वक्षयुग्मंतथायने ॥ ६ ॥ सृष्टिप्रलयसंज्ञौद्वौग्लहौजयपराजयौ ॥ देवीजयेभवेत्सृष्टिरसृष्टिर्धूर्जटेर्जये ॥ ७ ॥ भवतोःखेलसमयोयःसास्थिति रुदाहृता ॥ इत्थंक्रीडैवसकलमेतद्ब्रह्मांडमीशयोः ॥ ८ ॥ नदेवीजेष्यतिपतिंनेशःशक्तिंविजेष्यति ॥ किंचिद्विज्ञातुकामोस्मितन्मातरवधार्यताम् ॥ ९ ॥ देवःसर्वज्ञनाथोपिनकिंचिदवबुध्यति ॥ मानापमानयोर्यस्मादसौदूरेव्यवस्थितः ॥ १० ॥ लीलात्मागुणवानेषविचारादतिनिर्गुणः ॥ कुर्वन्नपिहिकर्मा णिबाध्येतेनैवकर्मभिः ॥ ११ ॥ मध्यस्थोपिहिसर्वस्यमाध्यस्थ्यमवलंबते ॥ सर्वत्रायंमहेशानोमित्राऽमित्रसमानदृक् ॥ १२ ॥ त्वंशक्तिरस्यदेवस्यसर्वे षांमान्यभूःपरा ॥ दक्षस्यापित्वयामानोदत्तोपत्यनिमित्तकः ॥ १३ ॥ परंत्वंसर्वजगतांजनयित्र्येकिकाध्रुवम् ॥ त्वत्तऊविर्भवंत्येवधातृकेशववासवाः ॥ ॥ १४ ॥ त्वमात्मानंनजानासित्र्यक्षमायाविमोहिता ॥ अतएवहिमेचित्तंदुनोत्यतितरांसति ॥ १५ ॥ अन्याअपिहियाःसत्यःपातिव्रत्यपरायणाः ॥ ताभर्तृचरणौहित्वाकिंचिदन्यन्नमन्वते ॥ १६ ॥ अथवास्तामियंवार्ताप्रस्तुतंप्रब्रवीम्यहम् ॥ अद्यनीलगिरेस्तस्माद्धरिद्वारसमीपतः ॥ १७ ॥ अपूर्व मिवसंवीक्ष्यपरिप्राप्तस्तवांतिकम् ॥ अत्याश्चर्यविषादाभ्यांकिंचिद्वक्तुमिहोत्सुकः ॥ १८ ॥ आश्चर्यहेतुरेवायंयत्पुंजातंत्रयीतले ॥ तद्दृष्टंसकलत्रंचदक्ष स्याध्वरमंडपे ॥ १९ ॥ सालंकारंसमानंचसानंदमुखपंकजम् ॥ विस्मृताखिलकार्यंचदक्षयज्ञप्रवर्तकम् ॥ २० ॥ विषादेकारणंचैतद्यतोजातमिदंज गत् ॥ यस्मिन्प्रवर्ततेयत्रलयमेष्यतिचध्रुवम् ॥ २१ ॥ तदेवतत्रनोदृष्टंभवद्वंद्वंभवापहम् ॥ प्रायोविषादजनकंभवतोर्यददर्शनम् ॥ २२ ॥

तदेवनाभवत्तत्रसमभूदन्यदेवहि ॥ तच्चवक्तुंनशक्येततद्वक्तादक्षएवसः ॥ २३ ॥ तानिवाक्यानिचाकर्ण्यद्रुहिणेनययेततः ॥ महर्षिणादधीचेनधिक्कृतो नितरांहिसः ॥ २४ ॥ शप्तश्चवीक्षमाणानांदेवर्षीणांप्रजापतिः ॥ मयाचकर्णौपिहितौश्रुत्वातद्गर्हणागिरः ॥ २५ ॥ दधीचिनासमंकेचिद्दुर्वासःप्रमुख द्विजाः ॥ भवनिंदांसमाकर्ण्यकियंतोपिविनिर्ययुः ॥२६॥ प्रावर्ततमहायागोहृष्टपुष्टमहाजनः ॥ तथाद्रष्टुंनशक्नोमिततआगतवानिह ॥ २७ ॥ भगिन्यो पिचयादेवितवतत्रसभर्तृकाः ॥ तासांगौरवमालोक्यनकिंचिद्वक्तुमुत्सहे ॥ २८ ॥ इतिदेवीसमाकर्ण्यसतीदक्षकुमारिका ॥ करादक्षौसमुत्सृज्यदध्यौ[illegible]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चित्क्षणंहृदि ॥ २९ ॥ उवाचचभवत्वेवंशरणंभवएवमे ॥ संप्रधार्येतिमनसिसतीदाक्षायणीततः ॥३०॥ द्रुतमेवसमुत्तस्थौप्रणनामचशंकरम् ॥ मौलावंजलिमाधायदेवीदेवंव्यजिज्ञपत् ॥३१॥ ॥ देव्युवाच ॥ ॥ विजयस्वांधकध्वंसिंस्त्र्यंबकत्रिपुरांतक ॥ चरणौशरणंतेमेदेह्यनुज्ञांमदाशिव ॥३२॥ मानिषेधीःप्रार्थयामियास्यामिपितुरंतिकम् ॥ उक्त्वेतिमौलिमदधादंधकारिपदांबुजे ॥ ३३ ॥ अथोक्ताशंभुनादेवीमृडान्युत्तिष्ठभामिनि ॥ किमपूर्णं तवास्त्यत्रवदसौभाग्यसुंदरि ॥ ३४ ॥ लक्ष्म्याअपिचसौभाग्यंब्रह्माण्यैकांतिरुत्तमा ॥ शच्यैनित्यनवीनत्वंभवत्यादत्तमीश्वरि ॥ ३५ ॥ त्वयाचशक्तिमानस्मिमहदैश्वर्यरक्षणे ॥ त्वांचशक्तिंसमासाद्यस्वलीलारूपधारिणीम् ॥ ३६ ॥ एतत्सृजामिपाम्यद्मित्वल्लीलाप्रेरितोंगने ॥ कुतोमांहातुमिच्छेस्त्वं ममवामार्धधारिणि ॥ ३७ ॥ शिवाशिवोदितंचेतिश्रुत्वाप्याहमहेश्वरम् ॥ जीवितेशविहायत्वांनक्वापिपरियाम्यहम् ॥३८॥ मनोमेचरणद्वंद्वेतवस्थास्यतिनिश्चलम् ॥ क्रतुंद्रष्टुंपितुर्यामिनैक्षियज्ञोमयाक्वचित् ॥३९॥ शंभुःकात्यायनीवाक्यमितिश्रुत्वातदाब्रवीत् ॥ क्रतुस्त्वयानेक्षितश्चेदाहरामितत्क्रतुम् ॥ ४० ॥ मच्छक्तिधारिणीत्वंवासृजैवान्यांक्रतुक्रियाम् ॥ अन्योयज्ञपुमानस्तुसंत्वन्येलोकपालकाः ॥ ४१ ॥ अन्यानाशुविधेहित्वमृषीनार्त्विज्यकर्मणि ॥ पुनर्जगाददेवीतिश्रुत्वाशंभोरुदीरितम् ॥ ४२ ॥

पितुर्यज्ञोत्सवोनाथद्रष्टव्योऽत्रमयाध्रुवम् ॥ देह्यनुज्ञांगमिष्यामिमामेकार्षीर्वचोन्यथा ॥ ४३ ॥ कःप्रतीपयितुंशक्तश्चेतोवाजलमेववा ॥ निम्नायाभ्युद्यतंनाथमाद्यमांप्रतिषेधय ॥ ४४ ॥ निशम्येतिपुनःप्राहसर्वज्ञोभूतनायकः ॥ पायाहिदेविमांहित्वागताचनमिलिष्यसि ॥ ४५ ॥ अद्यप्राचींयियासुंत्वांवारयेत्पंगुवासरः ॥ नक्षत्रंचतथाज्येष्ठातिथिश्चनवमीप्रिये ॥ ४६ ॥ अद्यसप्तदशोयोगोवियोगोद्यतनोऽशुभः ॥ धनिष्ठार्धसमुत्पन्नेतवताराद्यपंचमी ॥ ॥ ४७ ॥ मागादेविगताद्यत्वंनहिद्रक्ष्यसिमांपुनः ॥ पुनर्देवीबभाषेसायदिनाम्नाप्यहंसती ॥ ४८ ॥ तदातन्वंतरेणापिकरिष्येतवदासताम् ॥ ततोभवः पुनःप्राहकोवावारयितुंप्रभुः ॥ ४९ ॥ परिक्षुब्धमनोवृत्तिंस्त्रियंवापुरुषंतुवा ॥ पुनर्नदर्शनंदेविमयासत्यंब्रवीम्यहम् ॥५०॥ परंनदेविगंतव्यंमहामानधनेच्छुभिः ॥ अनाहूततयाकांतेमातापितृगृहानपि ॥ ५१ ॥ यथासिंधुगतासिंधुर्नपुनःपरिवर्तते ॥ तथाद्यगंत्र्यानोजातुतवागमनमिष्यते ॥ ५२ ॥ ॥ देव्युवाच ॥ ॥ अवश्यंयद्यहंरक्तातवपादांबुजद्वये ॥ तथात्वमेवमेनाथोभविष्यसिभवांतरे ॥ ५३ ॥ इत्युक्त्वानिर्ययौदेवीकोपांधीकृतलोचना ॥ यियासुभिश्चकार्यार्थंयत्कर्तव्यंनतत्कृतम् ॥ ५४ ॥ नननाममहादेवंनचचक्रेप्रदक्षिणम् ॥ अतएवहिसादेवीनगतापुनरागता ॥ ५५ ॥ अप्रणम्यमहेशानमकृत्वापिप्रदक्षिणम् ॥ अद्यापिननिवर्ततेगताःप्राग्वासराइव ॥ ५६ ॥ तयाचरणचारिण्याराज्ञ्यात्रिभुवनेशितुः ॥ अपितत्पावनंवर्त्ममेनेतिकठिनंबहु ॥ ५७ ॥ देवोपितांसतींयांतींदृष्ट्वाचरणचारिणीम् ॥ अतीवविव्यथेचित्तेगणांश्चाथसमाह्वयत् ॥ ५८ ॥ गणाविमानंनयतमनःपवनचक्रिणम् ॥ पंचास्यायुतसंयुक्तंरत्नसानुध्वजोच्छ्रितम् ॥ ५९ ॥ महावातपताकंचमहाबुद्ध्यक्षलक्षितम् ॥ नर्मदालकनंदाचयत्रेपादंडतांगते ॥ ६० ॥ छत्रीभूतौचयत्रस्तःसूर्याचंद्रमसावपि ॥ यस्मिन्मकरतुंडंचवाराहीशक्तिरुत्तमा ॥ ६१ ॥ धूःस्वयंचापिगायत्रीरज्जवस्तक्षकादयः ॥ सारथिःप्रणवोयत्रकेंकारःप्रणवध्वनिः ॥ ६२ ॥ अंगानिरक्षकायत्रवरूथश्छंदसांगणः ॥ इत्याज्ञप्तागणास्तूर्णंरथंनिन्युर्हराज्ञया ॥ ६३ ॥

देव्यासनाथंतंकृत्वाविमानंपार्षदादिवि ॥ अनुजग्मुर्महादेवींदिव्यांतेजोविजृंभिणीम् ॥ ६४ ॥ साक्षणंत्र्यक्षरमणीवीक्ष्यदक्षसभांगणम् ॥ नभोंऽगणाद्विमानस्थानतोवेगादवातरत् ॥ ६५ ॥ अविशद्यज्ञवाटंचचकितंरक्षिवीक्षिता ॥ कृतमंगलनेपथ्यांप्रसूंदृष्ट्वाकिरीटिनीम् ॥ ६६ ॥ सभर्तृकाश्चभगिनीर्नवालंकृतिशालिनीः ॥ साश्चर्याश्चसगर्वाश्चसानंदाश्चससाध्वसाः ॥६७॥ अचिंतितात्वनाहूताविमानाद्धरवल्लभा ॥ कथमेषापरिप्राप्ताक्षमित्थंप्रपश्यती ॥ ॥ ६८ ॥ असंभाष्यापिताःसर्वागतादक्षांतिकंसती ॥ पित्रापृष्टातुमात्रापिभद्रंजातंत्वदागमे ॥ ६९ ॥ ॥ सत्युवाच ॥ ॥ यदिभद्रंजनेतर्नेसमागमनतोभवेत् ॥ कथंनाहंसमाहूतायथैतामेसहोदराः ॥ ७० ॥ ॥ दक्षउवाच ॥ ॥ अयिकन्येमहाधन्येह्यनन्येसर्वमंगले ॥ अयंतेनमनाग्दोषोदोषएषममैवहि ॥ ७१ ॥ तादृग्विधाययत्पत्येमयादत्ताज्ञबुद्धिना ॥ यदहंतंसमाज्ञास्यमीश्वरोसौनिरीश्वरः ॥ ७२ ॥ तदाकथमदास्यंत्वांतस्मैमानास्वरूपिणे ॥ अहंशिवाख्ययातुष्टोनजानेशिवरूपिणम् ॥ ७३ ॥ पितामहेनबहुधावर्णितोसौममाग्रतः ॥ शंकरोयमयंशंभुरसौपशुपतिःशिवः ॥ ७४ ॥ श्रीकंठोसौमहेशोऽसौसर्वज्ञोसौवृषध्वजः ॥ अस्मैकन्यांप्रयच्छत्वंमहादेवायधन्विने ॥ ७५ ॥ वाक्याच्छतधृतेस्तस्मात्तस्मैदत्तामयानघे ॥ नजानेतंविरूपाक्षमुक्षगंविषभक्षिणम् ॥ ७६ ॥ पितृकाननसंवासंशूलिनंचकपालिनम् ॥ द्विजिह्वसंगसुभगंजलाधारंकपर्दिनम् ॥ ७७ ॥ कलंकिकृतमालिंचधूलिधूसरचर्चितम् ॥ क्वचित्कौपीनवसनंनग्नंवातूलवत्क्वचित् ॥ ७८ ॥ क्वचिच्चचर्मवसनंक्वचिद्भिक्षाटनप्रियम् ॥ विटंकभूतानुचरंस्थाणुमुग्रंतमोगुणम् ॥ ॥ ७९ ॥ रुद्रंरौद्रपरीवारंमहाकालवपुर्धरम् ॥ नृकरोटीपरिकरंजातिगोत्रविवर्जितम् ॥ ८० ॥

नसम्यग्वेत्तितंकश्चिज्जानानोपिप्रतारितः ॥ किंबहूक्तेनतनयेसमस्तनयशालिनि ॥ ८१ ॥ क्वपांसुलपटच्छन्नोमहाशंखविभूषणः ॥ प्रबद्धसर्पकेयूरःप्रलंबितजटासटः ॥ ८२ ॥ डमड्डमरुकव्यग्रहस्ताग्रःखंडचंद्रभृत् ॥ तांडवाडंबररुचिःसर्वामंगलचेष्टितः ॥८३॥ मृडानिसहरःक्वाऽयमध्वरोमंगलालयः ॥ अतएवसमाहूतानेहत्वंसर्वमंगले ॥ ८४ ॥ दुकूलान्यनुकूलानिरत्नालंकृतयःशुभाः ॥ प्रागेवधारितास्तेत्रपश्यागत्यगृहाणच ॥ ८५ ॥ इहमंगलवेशेषुदेवेंद्रेषुसशूलधृक् ॥ कथमर्होभवेच्चेतिमंगलेविषमेक्षणः ॥ ८६ ॥ इत्याकर्ण्यसतीसाध्वीजनेतुरुदितंतदा ॥ अत्यंतदूनहृदयावक्तुंसमुपचक्रमे ॥८७॥ सत्युवाच ॥ ॥ नाकार्णितंमयाकिंचित्त्वयिप्रब्रुवतिप्रभो ॥ पदद्वयींसमाकर्ण्यतांचतेकथयाम्यहम् ॥८८॥ नसम्यग्वेत्तितंकश्चिज्जानानोपिप्रतारितः ॥ एतत्सम्यक्त्वयाख्यायिकस्तंवेत्तिसदाशिवम् ॥ ८९ ॥ त्वंतुप्रतारितःपूर्वमधुनापिप्रतारितः ॥ कृत्वातेनचसंबंधमसंबद्धप्रलापभाक् ॥ ९० ॥ यादृशंवक्षितंशंभुंतादृशंयद्यमन्यथाः ॥ कुतोमामददास्तस्मैयंचकश्चनवेदन ॥ ९१ ॥ अथवातेनसंबंधेनहेतुर्भवतोमतिः ॥ तत्रहेतुरभूत्तातममपुण्यैकगौरवम् ॥ ॥ ९२ ॥ अथोक्त्वैवंबहुतरंत्वंजनेतास्यवर्ष्मणः ॥ श्रुतानेनचदेहेनपत्युःपरिविगर्हणा ॥ ९३ ॥ पुरश्चरणमेवैतद्यदस्यैवविसर्जनम् ॥ सुश्लाघ्यजन्मयातावत्प्राणितव्यंसुयोषिता ॥ यावज्जीवितनाथस्याश्रवणीयाविगर्हणा ॥ ९४ ॥ इत्युक्त्वाक्रोधदीप्ताग्नौमहादेवस्वरूपिणि ॥ जुहावदेहसमिधंप्राणरोधविधानतः ॥ ९५ ॥ ततोविवर्णतांप्राप्ताःसर्वेदेवाःसवासवाः ॥ नाग्निर्जज्वालचतथायथाज्याहुतिभिःपुरा ॥ ९६ ॥ मंत्राःकुंठितसामर्थ्यास्तत्क्षणादेवचाभवन् ॥ अहोमहानिष्टतरंकिमेतत्समुपस्थितम् ॥९७॥ केचिदूचुर्द्विजवरामिथःपरियियासवः ॥ महाझंझानिलःप्राप्तःपर्वतांदोलनक्षमः ॥ ९८॥ मखमंडपभूस्तेनक्षणतःस्थपुटीकृता ॥ अकांडतडिदापातोजातोभूद्भूप्रकंपनः ॥९९॥ दिवश्चोल्काःप्रपतिताःपिशाचानृत्यमादधुः ॥ आतापिगृध्रैरुपरिगगनेमंडलायितम् ॥ १०० ॥ रवेरधस्तादशिवंशिवास्तत्राप्यरारिपुः ॥ मेघारुधरविप्रुडभिस्तत्रवृष्टिंव्यधुःपराम् ॥ १ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निर्घातनिःस्वनोभूमेरुत्थितोहृत्प्रकंपनः ॥ दिव्यायुधानिचमिथोयुध्यंतिस्मातिभीषणम् ॥ २ ॥ हवनीयंमहाद्रव्यंदूषितंक्रोष्टुभिःश्वभिः ॥ चकोराः करटास्तत्रविचेरुर्यज्ञमंडपे ॥ ३ ॥ श्मशानवाटवज्जातोयज्ञवाटःसवैक्षणात् ॥ यद्यत्रावस्थितंसर्वंतत्तत्रैवपरिष्ठितम् ॥ ४ ॥ चित्रन्यस्तमिवासीच्चवस्तुजातमशोभिच ॥ स्थगिताइवसंवृत्तास्तत्रचक्रधरादयः ॥ ५ ॥ दक्षोपिवदनम्लानिमवाप्यसपरिच्छदः ॥ पुनर्यथाकथंचिच्चयज्ञंप्रावर्तयन्द्विजाः ॥१०६॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेसतीदेहविसर्जनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ स्कंदउवाच ॥ पुनःसनारदोऽगस्त्यदेव्याःप्राक्समुपागतः ॥ तद्वृत्तांतमशेषंचहरायावेदितुंययौ ॥ १ ॥ दृष्ट्वासनारदःशंभुंनंदिनासहसंकथाम् ॥ कांचित्तर्जनिविन्यासपूर्वंकुर्वंतमानमत् ॥ २ ॥ उपाविशच्चशैलादिविसृष्टासनमुत्तमम् ॥ वैलक्ष्यंनाटयन्किंचित्क्षणंजोषंसमास्थितः ॥३॥ आकारेणैवसर्वज्ञस्तद्वृत्तांतंविवेदह ॥ अवादीच्चमुनिंशंभुःकुतोमौनावलंबनम् ॥ ४ ॥ शरीरिणांस्थितिरियमुत्पत्तिप्रलयात्मिका ॥ दिव्यान्यपिशरीराणिकालाद्यांत्येवमेवहि ॥ ५ ॥ दृश्यंविनश्वरंसर्वंविशेषाद्यदनीश्वरम् ॥ ततोऽत्रचित्रंकिंब्रह्मन्कंकालःकालयेन्नवै ॥६॥ अभाविनोहिभावस्यभावःक्वापिनसंभवेत् ॥ भाविनोपिहिनाभावस्ततोमुह्यंतिनोबुधाः ॥ ७ ॥ शंभूदीरितमाकर्ण्यसइत्थंमुनिपुंगवः ॥ प्रोक्तवान्सत्यमेवैतद्यद्देवेनप्रभाषितम् ॥ ८ ॥ अवश्यमेवयद्भाव्यंतद्भूतंनात्रसंशयः ॥ परंमांबाधतेत्यंतंचिंतैकाचित्तमाथिनी ॥ ९ ॥ नापचीयेततेकिंचिन्नोपचीयेततत्त्वतः ॥ अव्ययत्वाच्चपूर्णत्वाद्धानिवृद्धीकुतस्त्वयि ॥ १० ॥

अहोवराकःसंसारःक्वभविष्यत्यनीश्वरः ॥ आरभ्याद्यदिनंनत्वामर्चयिष्यंतिकेपियत् ॥ ११ ॥ यतःप्रजापतिर्दक्षोनत्वामाहूतवान्क्रतौ ॥ तेनाद्यरीढितंदृष्ट्वादवर्षिमनुजाअपि ॥ १२ ॥ तवरीढांकरिष्यंतिकिमैश्वर्येणरीढिनाम् ॥ प्राप्तावहेडनालोकेजितकालभयाअपि ॥ अथैश्वर्येणसंपन्नाःप्रतिष्ठाभाजनंकिमु ॥ १३ ॥ महीयसायुपातेपांवसुभिर्भूरिभिश्चकिम् ॥ येऽभिमानधनानेहलब्धरीढाःपदेपदे ॥ १४ ॥ अचेतनाश्चसावज्ञाजीवंतोपिनकीर्तये ॥ अभिमानधनाधन्यावरंयोपित्सुसासती ॥ १५ ॥ यात्वद्विनिंदाश्रवणात्तृणीचक्रेस्वजीवितम् ॥ इत्याकर्ण्यमहाकालःसम्यग्ज्ञात्वासतीव्ययम् ॥ १६ ॥ सत्यंमुनेसतीदेवीतृणीचक्रेस्वजीवितम् ॥ जोषंस्थितेमुनौतत्रतन्महाकालसाध्वसात् ॥१७॥ रुद्रश्चातीवरुद्रोभूद्बहुकोपाग्निदीपितः ॥ ततस्तत्कोपजाद्वह्नेराविरासीन्महाद्युतिः ॥१८॥ प्रत्यक्षःप्रतिमाकारःकालमृत्युप्रकंपनः ॥ उवाचचप्रणम्येशंभुशुंडींमहतींदधत् ॥१९॥ आज्ञांदेहिपितःकिंतेकरवैदास्यमुत्तमम् ॥ ब्रह्मांडमेककवलंकरवाणित्वदाज्ञया ॥ २० ॥ पिबामिचार्णवान्सप्ताप्येकेनचुलुकेनवै ॥ रसातलंवापातालंपातालंवारसातलम् ॥ २१ ॥ त्वदाज्ञयानयामीशविनिमय्यस्वहेलया ॥ सलोकपालमिंद्रंवाधृत्वाकेशैरिहानये ॥ २२ ॥ अपिवैकुंठनाथश्चेत्तत्साहाय्यंकरिष्यति ॥ तदातंकुंठितास्त्रंचकरिष्यामित्वदाज्ञया ॥ २३ ॥ दनुजादितिजाःकेवैवराकारणदुर्बलाः ॥ तेषुचोत्कटतांकोपिधत्तेतंप्रणिहन्म्यहम् ॥ २४ ॥ कालंबध्नामिवासंख्येमृत्योर्वामृत्युमर्थये ॥ स्थावरेषुचरेष्वत्रमयिक्रुद्धेरणांगणे ॥ २५ ॥ त्वद्बलेनमहेशाननकोपिस्थैर्यमेष्यति ॥ ममपादतलाघातादेतद्वैक्षोणिमंडलम् ॥ २६ ॥ कदलीदलवद्वाताद्वेपतेसरसातलम् ॥ चूर्णीकरोमिदोर्दंडघाताच्चैतान्कुलाचलान् ॥ २७ ॥ किंबहूक्तेनदेह्याज्ञांममासाध्यंनकिंचन ॥ त्वत्पादबलमासाद्यकृतंसिद्ध्यद्यचिंतितम् ॥ २८ ॥

इतिप्रतिज्ञांतस्येशःश्रुत्वाकृतममन्यत ॥ कृतकृत्यमिवात्यंतंतंमुदाप्रत्युवाचच ॥ २९ ॥ महावीरोसिरेभद्रममसर्वगणेष्विह ॥ वीरभद्राख्ययात्वंहिप्रथितिंपरमांव्रज ॥ ३० ॥ कुरुमेसत्वरंकार्यंदक्षयज्ञंक्षयंनय ॥ येत्वांतत्रावमन्यंतेतत्साहाय्यविधायिनः ॥ ३१ ॥ तेत्वयाप्यवमंतव्याव्रजपुत्रशुभोदय ॥ इत्याज्ञांमूर्ध्निचाधायसततःपारमेश्वरीम् ॥ ३२ ॥ हरंप्रदक्षिणीकृत्यजग्मिवानतिरंहसा ॥ ततस्तदनुगाञ्शंभुःस्वनिःश्वाससमुद्गतान् ॥ ३३ ॥ शतकोटिमितानुग्रान्गणानन्यानवासृजत् ॥ तेगणावीरभद्रंतंयांतंकेचित्पुरोगताः ॥ ३४ ॥ केचित्तदनुगाजाताःकेचित्तत्पार्श्वगाययुः ॥ अंबरंतैःसमाक्रांतंतेजोविजितभास्करैः ॥ ३५ ॥ शृंगाग्राणिगिरीणांचकैश्चिदुत्पाटितानिवै ॥ आचूडमूलाःकैश्चिच्चविधृतावैशिलोच्चयाः ॥३६॥ उत्पाट्यमहतोवृक्षान्केचित्प्राप्तामखांगणम् ॥ कैश्चिदुत्पाटितायूपाःकेचित्कुंडान्यपूपुरन् ॥ ३७ ॥ मंडपंध्वंसयामासुःकेचित्क्रोधोद्धुरागणाः ॥ अचीखनन्वैवेदीश्चकेचिद्वैशूलपाणयः ॥ अभक्षयन्हवींष्यन्येपृषदाज्यंपपुःपरे ॥ ३८ ॥ दध्वंसुरन्नराशींश्चकेचित्पर्वतसन्निभान् ॥ केचिद्वैपायसाहाराःकेचिद्वैक्षीरपायिनः ॥ ॥ ३९ ॥ केचित्पक्वान्नपुष्टांगायज्ञपात्राण्यचूर्णयन् ॥ अमोटयन्स्रुचांदंडान्केचिद्दोर्दंडशालिनः ॥ ४० ॥ व्यभंजञ्छकटान्केचित्पशून्केचिदजीगिलन् ॥ अग्निंनिर्वापयामासुःकेचिदत्यग्नितेजसः ॥ ४१ ॥ स्वयंपरिदधुश्चान्येदुकूलानिमुदायुताः ॥ जगृहुःकेचनपुरारत्नानांपर्वतंकृतम् ॥ ४२ ॥ एकेनचभगोदेवःपश्यंश्चक्रेविलोचनः ॥ पूष्णोदंतावलीमन्यःपातयामासकोपितः ॥ ४३ ॥ यज्ञःपलायितोदृष्टःकेनचिन्मृगरूपधृक् ॥ शिरोविरहितश्चक्रेतेनचक्रेणदूरतः ॥ ४४ ॥ एकःसरस्वतींयांतींदृष्ट्वानिर्नासिकांव्यधात् ॥ अदितेरोष्ठपुटकौछिन्नान्येनकोपिना ॥ ४५ ॥ अर्यम्णोबाहुयुगलंतथोत्पाटितवान्परः ॥ अग्नेरुत्पाटयामासकश्चिज्जिह्वांप्रसह्यच ॥४६॥ चिच्छेदवायोर्वृषणंपार्षदोन्यःप्रतापवान् ॥ पाशयित्वायमंकश्चित्कोधर्मइतिपृष्टवान् ॥४७॥

यत्रधर्मेमहेशोनप्रथमंपरिपूज्यते ॥ नैर्ऋतंसंगृहीत्वान्यःकेशेष्वातोल्यचासकृत् ॥४८॥ अनीश्वरंहविर्भुक्तंत्वयेत्याताडयत्पदा ॥ कुबेरमपरोधृत्वापादयोरधुनोद्बलात् ॥ ४९ ॥ वामयामासबहुशोभक्षिताद्वाध्वराहुतीः ॥ एकादशाऽपियेरुद्रालोकपालैकपंक्तयः ॥ ५० ॥ रुद्रा याधारणवशात्प्रमथैस्तेऽवहेलिताः ॥ वरुणोदरमापीड्यप्रमथोन्योबलेनहि ॥ ५१ ॥ बहिरुद्गिरयामासयद्दत्तंचेशवर्जितम् ॥ मायूरींतनुमासाद्यसहस्राक्षोमहामतिः ॥ ५२ ॥ उड्डीयगिरिमाश्रित्यच्छन्नःकौतुकमैक्षत ॥ ब्राह्मणान्प्रमथानत्वायातयातेतिचाब्रुवन् ॥ ५३ ॥ प्रमथाःकालयामासुरन्यानपिचयाचकान् ॥ इत्थंप्रमथितेयागेप्रमथैःप्रथमागतैः ॥ वीरभद्रःस्वतःप्राप्तःप्रमथानीकिनीवृतः ॥५४॥ यज्ञवाटंश्मशानाभंदृष्ट्वातैःप्रमथैःपुरा ॥ अतिशोच्यांदशांनीतंवीरभद्रस्ततोजगौ ॥ ॥ ५५ ॥ गणाःपश्यतदुर्वृत्तैःप्रारब्धानांचकर्मणाम् ॥ अनीश्वरैरवस्थेयंकुतोद्वेषोमहेश्वरे ॥ ५६ ॥ येद्विषंतिमहादेवंसर्वकर्मैकसाक्षिणम् ॥ धर्मकार्येप्रवृत्तास्तुतेप्राप्स्यंतीदृशींदशाम् ॥ ५७ ॥ क्वसदक्षोदुराचारःक्वचयज्ञभुजःसुराः ॥ धृत्वासर्वानानयतयातद्रुततरंगणाः ॥५८॥ इत्याज्ञांवीरभद्रस्यप्राप्यतेप्रमथाद्रुतम् ॥ यावद्यांत्यग्रतस्तावद्दृष्टःक्रुद्धोगदाधरः ॥ ५९ ॥ तेनतेप्रमथाःसर्वेमहाबलपराक्रमाः ॥ शुष्कपर्णतृणावस्थांप्रापितावात्ययेवहि ॥६०॥ अथनष्टेषुसर्वेषुप्रमथेषुहरेर्भयात् ॥ चुकोपवीरभद्रःसप्रलयानलसंनिभः ॥ ६१ ॥ ददर्शशार्ङ्गिणंचाग्रेस्वगणैश्चपरिष्टुतम् ॥ चतुर्भुजैरसंख्यातैर्जितदैत्यमहाबलैः ॥६२॥ चक्रिभिर्गदिभिर्जुष्टंखड्गिभिश्चापिशार्ङ्गिभिः ॥ वीरभद्रस्ततःप्राहदृष्ट्वातंदैत्यसूदनम् ॥ ६३ ॥ त्वंतुयज्ञपुमानत्रमहायज्ञप्रवर्तकः ॥ रक्षितानिजवीर्येणदक्षस्यत्र्यक्षवैरिणः ॥ ६४ ॥ किंवादक्षंसमानीयदेहियुध्यस्ववामया ॥ नदास्यसिचचेद्दक्षंततस्तंरक्षयत्नतः ॥ ६५ ॥ प्रायशःशंभुभक्ते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुयतस्त्वंप्रोच्यसेऽग्रणीः ॥ एकोनेऽब्जसहस्रेप्राग्ददौनेत्रांबुजंभवान् ॥ ६६ ॥ तुष्टेनशंभुनादत्तंतुभ्यंचक्रंसुदर्शनम् ॥ यत्साहाय्यमवाप्याजौत्वंजयेर्दनुजाधिपान् ॥ ६७ ॥ इत्याकर्ण्यवचस्तस्यवीरभद्रस्यचोर्जितम् ॥ जिज्ञासुस्तद्बलंविष्णुर्वीरभद्रमुवाचह ॥ ६८ ॥ त्वंशंभोःसुतदेशीयोगणानांप्रवरोस्यहो ॥ राजादेशमनुप्राप्यततोप्यतिबलोमहान् ॥ ६९ ॥

योसिसोस्यहमप्यत्रदक्षरक्षणदक्षधीः ॥ पश्यामितवसामर्थ्यंकथंदक्षंहरिष्यसि ॥ ७० ॥ इत्युक्तोवीरभद्रःसतेनवैशार्ङ्गधन्वना ॥ प्रमथान्दृष्टिभंग्यैवप्रेरयामाससंगरे ॥ ७१ ॥ अथतैःप्रमथैर्विष्णोरनुगागदितारणे ॥ आददानास्तृणंवक्त्रेणापिताःपाशवींदशाम् ॥ ७२ ॥ ततस्तार्क्ष्यरथःक्रुद्धस्त्वेकैकंरणमूर्धनि ॥ सहस्रेणसहस्रेणबाणानांदृढताडयत् ॥ ७३ ॥ तेभिन्नवक्षसःसर्वेगणारुधिरवर्षिणः ॥ वासंतींकेंशुकींशोभांपरिप्रापूरणाजिरे ॥ ७४ ॥ क्षरंतइवमातंगाःस्रवंतइवपर्वताः ॥ मदेनधातुरागेणमिश्रैःशुशुभिरेगणाः ॥ ७५ ॥ ततःप्रहस्यगणपोऽब्रवीद्वैकुंठनायकम् ॥ हेशार्ङ्गधन्वञ्जानेत्वांत्वंरणांगणपंडितः ॥ ७६ ॥ परंयुध्यसिदैत्येंद्रैर्दानवेंद्रैर्नपार्षदैः ॥ इत्युक्त्वावीरभद्रेणभुशुंडीकलिताकरे ॥७७॥ गदिनाऽथगदातूर्णंदैत्येंद्रगिरिरेणुकृत् ॥ ततःप्रहतवान्वीरोभुशुंड्यातंगदाधरम् ॥ ७८ ॥ तदंगसंगमासाद्यविदद्रेशतधातया ॥ कौमोदकीप्रहारेणवीरभद्रंप्रतापिनम् ॥ ७९ ॥ जघानवासुदेवोपितरसाऽज्ञातवेदनम् ॥ ततःखट्वांगमादायगदाहस्तंगदाधरम् ॥८०॥ आताड्यसव्यदोर्दंडेगदांभूमावपातयत् ॥ कुपितोयंमधुद्वेषीचक्रेणाताडयच्च ताम् ॥ ॥ ८१ ॥ सचचक्रंसमागच्छद्दृष्ट्वासस्मारशंकरम् ॥ शंकरस्मरणाच्चक्रंमनाग्वक्रत्वमाप्यच ॥ कंठमासाद्यवीरस्यसम्यग्जातंसुदर्शनम् ॥८२॥ तेनचक्रेणशुशुभेनितरांसगणेश्वरः ॥ वीरलक्ष्म्यावृतइवसमरेविजयस्रजा ॥ ८३ ॥ ततःसुदर्शनंदृष्ट्वातत्कंठाभरणंहरिः ॥ मनाक्सचकितंस्मित्वाततोजग्राहनंदकम् ॥ ८४ ॥ सनंदकंकरंतस्यप्रोद्यतंमधुविद्विषः ॥ पश्यतांदिविसिद्धानांस्तंभयामासहुंकृता ॥ ८५ ॥ अभ्यधावच्चवेगेनगृहीत्वाशूलमुज्ज्वलम् ॥ यावज्जिघांसतिहरिंतावदाकाशवाचया ॥ ८६ ॥ वारितोगणराजःसमाकार्षीःसाहसंत्विति ॥ ततस्तमपहायाशुवीरभद्रोगणोत्तमः ॥ ८७ ॥

प्राप्यदक्षंविनद्योच्चैर्धिक्कामीश्वरनिंदकम् ॥ यस्येदृगस्तिसंपत्तिर्यत्रदेवाःसहायिनः ॥ सकथंसेश्वरंकर्मनकुर्याद्दक्षतांदधत् ॥ ८८ ॥ येनास्येनापवित्रेणभवतानिंदितःशिवः ॥ चूर्णयामितदास्यंतेचपेटाभिःसमंततः ॥८९॥ इत्युक्त्वातस्यदक्षस्यहरपारुष्यभाषिणः ॥ चिच्छेदवदनंवीरश्चपेटशतघातनैः ॥ ॥ ९० ॥ ततस्त्वदितिमुख्यानांमिलितानांमहोत्सवे ॥ त्रोटयामासकर्णादीन्यंगप्रत्यंगकानिच ॥ ९१ ॥ वेणीदंडाश्चकासांचित्तेनच्छिन्नामहारुजा ॥ कासांचिच्चकराश्छिन्नाःकासांचित्कर्तिताःस्तनाः ॥ ९२ ॥ नासापुटांस्तथान्यासांपाटयामासपार्षदः ॥ चिच्छेदचांगुलीश्चापितथान्यासांशिरःप्रियः ॥ ॥ ९३ ॥ येयेनिनिंदुर्देवेशंयेयेचशुश्रुवुस्तदा ॥ तेषांजिह्वाश्रुतीःकोपादच्छिनच्चाकरोद्द्विधा ॥ ९४ ॥ केचिदुल्लंबितायूपेपाशयित्वादृढंगले ॥ अधोमुखायैर्देवेशंविहायात्तंमहाहविः ॥ ९५ ॥ द्विजराजश्चधर्मश्चभृगुमारीचिमुख्यकाः ॥ अत्यंतमपमानस्यभाजनंतेनकारिताः ॥ ९६ ॥ एतेजामातरस्तस्ययतोदक्षस्यदुर्धियः ॥ हित्वामहेश्वरममून्सोपश्यदधिकाञ्शिवात् ॥ ९७ ॥ तानिकुंडानितेयूपास्तेस्तंभाःसचमंडपः ॥ तावेद्यस्तानिपात्राणितानिहव्यान्यनेकधा ॥ ९८ ॥ तेचवैयज्ञसंभारास्तेतेयज्ञप्रवर्तकाः ॥ तेरक्षपालास्तेमंत्राविनेशुर्हेलयाऽखिलाः ॥ ९९ ॥ स्तोकेनैवहिकालेनयथर्धिःपरवंचनात् ॥ अर्जितानश्यतिक्षिप्रंदक्षसंपद्गताऽशिवा ॥१००॥ नीतेमहाक्रतौतेनसगणेनेदृशींदशाम् ॥ विधिर्विधिविलोपाच्चहरंविज्ञाप्यचानयत् ॥१॥ तत्रयत्रमखःसोभूदीदृक्षःशिववर्जितः ॥ आयातेथमहादेवेवीरभद्रोतिलज्जितः ॥ २ ॥ नत्वानकिंचिदवदद्देवःसर्वमवैत्स्वयम् ॥ प्रसाद्यदेवदेवेशंसुरज्येष्ठोऽब्रवीत्पुनः ॥ ३ ॥ अपराध्यप्ययंदक्षःसंप्रसाद्यःकृपानिधे ॥ यथापूर्वंपुनरमून्सर्वान्कारयशंकर ॥ ४ ॥ यथाविधिःप्रवर्तेतवैदिकःपुनरेवहि ॥ तथाज्ञादीयतांशंभोकर्मसिद्ध्यतिसेश्वरम् ॥५ ॥ अनीश्वरासुसर्वासुक्रियासुपरमेश्वर ॥ एवमेवभवंत्येवविघ्नजाताःसहस्रशः ॥ ६ ॥

विचारतोवराकोयंदक्षोभक्ततरस्तव ॥ कुर्वन्योऽनीश्वरंकर्मपरदृष्टांततांगतः ॥ ७ ॥ अन्योपियोमहेशानंहित्वाकर्मकरिष्यति ॥ तस्यतत्कर्मसंसिद्धिर्दक्षस्येवभविष्यति ॥८॥ अतोनकश्चित्किंचिच्चक्वचित्कर्मविनाशिवम् ॥ विधास्यतिनिशम्यास्यदक्षस्येदृक्षचेष्टितम् ॥९॥ विधीरितमितिश्रुत्वास्मित्वादेवोमहेश्वरः ॥ वीरमाज्ञापयामासयथापूर्वंप्रकल्पय ॥ ११० ॥ वीरभद्रोपितत्सर्वंशर्वाज्ञांप्रतिपद्यच ॥ विनादक्षस्यवदनंयथापूर्वमकल्पयत् ॥ ११ ॥ ईश्वरंयेविनिंदंतितेमूकाःपशवोध्रुवम् ॥ ततोमेषमुखंदक्षंवीरभद्रोगणोव्यधात् ॥ १२ ॥ देवोब्रह्माणमापृच्छ्यधर्माद्गार्हस्थ्यतश्च्युतः ॥ सपार्षदोहिमप्रस्थंजगामतपसेततः ॥ १३ ॥ अनाश्रमवतापुंसायतःकालोमनागपि ॥ मुधाकलांयतव्योनतस्माच्छ्रेयःसदाश्रमः ॥ १४ ॥ अतःससर्वतपसांफलदातामहेश्वरः ॥ तपश्चचारसगणोब्रह्मादक्षंत्वशिक्षयत् ॥ १५ ॥ हरनिंदासमुद्भूतपापपंकंसुदुस्त्यजम् ॥ यदिक्षालयितुंकांक्षातदावाराणसींव्रज ॥ १६ ॥ प्राप्यवाराणसींपुण्यांमहापापौघहारिणीम् ॥ कुरुलिंगप्रतिष्ठांत्वंतेनशंभुःसतुष्यति ॥ १७ ॥ तुष्टेमहेश्वरेतुष्टंजगदेतच्चराचरम् ॥ नान्यत्रपापंतेगंतृविनावाराणसींपुरीम् ॥ १८ ॥ ब्रह्महत्यादिपापानांप्रायश्चित्तंमनीषिभिः ॥ प्रोक्तंनहरनिंदायास्तत्रकाश्येवकेवलम् ॥१९॥ काश्यांलिंगप्रतिष्ठायैःकृताऽत्रसुकृतात्मभिः ॥ सर्वेधर्माःकृतास्तैस्तुतएवपुरुषार्थिनः ॥ १२० ॥ इत्याकर्ण्यविधेर्वाक्यंदक्षःप्राप्याथसत्वरम् ॥ अविमुक्तंमहाक्षेत्रंततापपरमंतपः ॥२१॥ संस्थाप्यलिंगंविधिवल्लिंगाराधनतत्परः ॥ नवेत्तिलिंगादपरंसकिंचिज्जगतीतले ॥ २२ ॥ दिवानिशंमहेशानंपरिष्टौतिसमर्चति ॥ नमतिध्यायतीक्षेतदक्षोदक्षप्रजापतिः ॥२३॥ एकचित्तस्यदक्षस्यध्यायतोलिंगमैश्वरम् ॥ समाःसहस्रमगमन्मितंद्वादशसंख्यया ॥२४॥ मेनांयावत्सतीप्राप्यहिमाचलपतिव्रताम् ॥ उमारूपातितपसापतिंप्रापपिनाकिनम् ॥२५॥ तावत्सदक्षस्तपसिनिश्चलोलिंगमार्चयत् ॥ ततःकाशींसमासाद्यसहभर्त्रागिरींद्रजा ॥२६॥ दृष्ट्वातंनिश्चलहृदंशिवलिंगार्चनेरतम् ॥ हरंव्यजिज्ञपद्देवीक्षीणोयंतपसाविभो ॥ २७ ॥ प्रसादयकृपासिंधोवरेणैनंप्रजापतिम् ॥ इत्युक्तोऽपर्णयाशंभुःप्राहतंदक्षमीशिता ॥ २८ ॥ वरंब्रूहिमहाभागदास्यामिमनसेप्सितम् ॥ इतीशोदितमाकर्ण्यप्रणम्यबहुशोहरम् ॥२९॥ स्तुत्वानानाविधैःस्तोत्रैःप्रसन्नंवीक्ष्यशंकरम् ॥ प्रोवाचदेवदेवेशंयदिदेयोवरोमम ॥ १३० ॥ तत्त्वदीयपदद्वंद्वेनिर्द्वंद्वाभक्तिरस्तुमे ॥ इदंचतेमहालिंगंयन्मयाऽत्रप्रतिष्ठितम् ॥ अस्मिँल्लिंगेत्वयानाथस्थातव्यंसर्वदैवहि ॥ ३१ ॥

मयाप्रसाद्यंयद्देवतत्क्षंतव्यंकृपानिधे ॥ एतएवपराःसंतुकिमन्यैरुत्तमैर्वरैः ॥३२॥ इतिश्रुत्वामहादेवःप्रसन्नोतितरांभवः ॥ प्रोवाचचयदुक्तंतेतत्तथास्तुनचान्यथा ॥ ३३ ॥ अन्यच्चतेवरंदद्यांतच्छृणुष्वप्रजापते ॥ यत्त्वयास्थापितंलिंगमेतद्दक्षेश्वराभिधम् ॥ ३४ ॥ अस्यसंसेवनात्पुंसामपराधसहस्रकम् ॥ क्षमिष्येहनसंदेहस्तस्मात्पूज्यमिदंजनैः ॥ ३५ ॥ त्वंतुलिंगार्चनादस्मात्सर्वमान्योभविष्यसि ॥ परार्धद्वितयप्रांतेततोमोक्षमवाप्स्यसि ॥ ३६ ॥ इत्युक्त्वादेवदेवेशस्तस्मिँल्लिंगेलयंययौ ॥ दक्षोपिगतवान्गेहंपरिप्राप्तमनोरथः ॥ ३७ ॥ ॥ स्कंदउवाच ॥ ॥ इत्यगस्त्यसमाख्यातोदक्षेश्वरसमुद्भवः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यंश्रुत्वामुच्यतेजंतुरपराधशतैरपि ॥३८॥ श्रुत्वाख्यानमिदंपुण्यंदक्षेश्वरसमुद्भवम् ॥ नरोनलिप्यतेपापैरपराधालयोपिहि ॥ १३९ ॥ ॥ इतिश्रीस्कां देमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेदक्षेश्वरप्रादुर्भावोनामनवाशीतितमोऽध्यायः ॥ ८९ ॥ ॥ अगस्त्यउवाच ॥ ॥ पार्वतीहृदयानंदपार्वतीशसमुद्भवम् ॥ कथयेहयदुद्दिष्टंभवताप्रागघापहम् ॥ १ ॥ ॥ स्कंदउवाच ॥ शृण्वगस्तेयदामेनाहिमाचलपतिव्रता ॥ गिरीं द्रजांसुतामाहपुत्रितेस्यमहेशितुः ॥ २ ॥ किंस्थानंवसतिर्वाकाकोबंधुर्वेत्सिकिंचन ॥ प्रायोगृहंनजामातुरस्यकोपिचकुत्रचित् ॥ ३ ॥ निशम्येतिवचो मातुरतिक्रीणागिरींद्रजा ॥ आसाद्यावसरंशंभुंनत्वागौरीव्यजिज्ञपत् ॥ ४ ॥ मयाचश्रुगृहंकांतगम्यमद्यविनिश्चितम् ॥ नाथात्रनैववस्तव्यंनयमांस्वं निकेतनम् ॥ ५ ॥ गिरींद्रजागिरंश्रुत्वागिरीशइतितत्त्ववित् ॥ हित्वाहिमगिरिंप्राप्तोनिजमानंदकाननम् ॥ ६ ॥ प्राप्यानंदवनंदेवीपरमानंदकारणम् ॥ विस्मृत्यमितुसंवासंजाताचानंदरूपिणी ॥ ७ ॥ अथविज्ञापयांचक्रेगौरीगिरिशमेकदा ॥ अच्छिन्नानंदसंदोहःकुतःक्षेत्रेऽत्रतद्वद ॥ ८ ॥ इतिगौरीरितं श्रुत्वाप्रत्युवाचपिनाकधृक् ॥ पंचक्रोशपरीमाणेक्षेत्रेस्मिन्मुक्तिसद्मनि ॥ ९ ॥

तिलांतरंनदेव्यस्तिविनालिंगंहिकुत्रचित् ॥ एकैकंपरितोलिंगंक्रोशंक्रोशंचयावनिः ॥ १० ॥ अन्यत्रापिहिसादेविभवेदानंदकारणम् ॥ अत्रानंदवनेद विपरमानंदजन्मनि ॥ ११ ॥ परमानंदरूपाणिसंतिलिंगान्यनेकशः ॥ चतुर्दशसुलोकेषुकृतिनोयेवसंतिहि ॥ १२ ॥ तैःस्वनाम्नेहलिंगानिकृत्वाऽपि कृतकृत्यता ॥ अत्रयेनमहादेविलिंगंसंस्थापितंमम ॥ १३ ॥ वेत्तितच्छ्रेयसःसंख्यांशेषोपिनविशेषवित् ॥ १४ ॥ परिच्छेदव्यतीतस्यानंदस्यपरका रणम् ॥ अतस्त्विदंपरंक्षेत्रंलिंगैर्भूयोभिरद्रिजे ॥ १५ ॥ निशम्येतिमहादेवीपुनःपादौप्रणम्यच ॥ देह्यनुज्ञांमहादेवलिंगसंस्थापनायमे ॥१६॥ पत्युराज्ञां समासाद्ययच्छेच्छ्रेयःपतिव्रता ॥ नतस्याःश्रेयसोहानिःसंवर्तेपिकदाचन ॥ १७ ॥ इतिप्रसाद्यदेवेशमाज्ञांप्राप्यमहेशितुः ॥ लिंगंसंस्थापितंगौर्यामहा देवसमीपतः ॥ १८ ॥ तल्लिंगदर्शनात्पुंसांब्रह्महत्यादिपातकम् ॥ विलीयेतनसंदेहोदेहबंधोपिनोपुनः ॥ १९ ॥ तत्रलिंगेवरोदत्तोदेवदेवेनयःपुनः ॥ निशामयमुनेतंतुभक्तानांहितकाम्यया ॥ २० ॥ लिंगंयःपार्वतीशाख्यंकाश्यांसंपूजयिष्यति ॥ तद्देहावसितिंप्राप्यकाशीलिंगंभविष्यति ॥ २१ ॥ काशीलिंगत्वमासाद्यमामेवानुप्रवेक्ष्यति ॥ चैत्रशुक्लतृतीयायांपार्वतीशसमर्चनात् ॥ २२ ॥ इहसौभाग्यमाप्नोतिपरत्रचशुभांगतिम् ॥ पार्वतीश्वरमारा ध्ययेपिद्वापुरुषोपिवा ॥ २३ ॥ नगर्भमाविशेद्भूयोभवेत्सौभाग्यभाजनम् ॥ पार्वतीशस्यलिंगस्यनामापिपरिगृह्णतः ॥२४॥ अपिजन्मसहस्रस्यपापं क्षयतितत्क्षणात् ॥ पार्वतीशस्यमाहात्म्यंयःश्रोष्यतिनरोत्तमः ॥ ऐहिकामुष्मिकान्कामान्सप्राप्स्यतिमहामतिः ॥ २५ ॥ ॥ इतिश्रीस्कांदेमहापु राणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेपार्वतीशवर्णनंनामनवतितमोऽध्यायः ॥ ९० ॥ ॥ स्कंदउवाच ॥ ॥ पार्वतीशस्यमहिमाक थितस्तेस्यानघ ॥ मुनेनिशामयेदानींगंगेश्वरसमुद्भवम् ॥ १ ॥ यंश्रुत्वायत्रकुत्रापिगंगास्नानफलंलभेत् ॥ चक्रपुष्करिणीतीर्थंयदागंगासंज्ञकम् ॥ ॥ २ ॥ नैनदैलीपिनासार्धमस्मिन्नानंदकानने ॥ क्षेत्रप्रभावमतुलंज्ञात्वाशंभुपरिग्रहात् ॥ ३ ॥

स्मृत्वालिंगप्रतिष्ठायाःकाश्यांलोकोत्तरंफलम् ॥ गंगयास्थापितंलिंगंविश्वेशात्पूर्वतःशुभम् ॥ ४ ॥ गंगेश्वरस्यलिंगस्यकाश्यांदृष्टिःसुदुर्लभा ॥ तिथौ दशहरायांचयोगंगेशंसमर्चयेत् ॥ ५ ॥ तस्यजन्मसहस्रस्यपापंसंक्षीयतेक्षणात् ॥ कलौगंगेश्वरंलिंगंगुप्तप्रायंभविष्यति ॥ ६ ॥ तस्यसंदर्शनंपुंसां जायतेपुण्यहेतवे ॥ दृष्टंगंगेश्वरंलिंगंयेनकाश्यांसुदुर्लभम् ॥ ७ ॥ प्रत्यक्षरूपिणीगंगातेनदृष्टानसंशयः ॥ कलौसुदुर्लभागंगासर्वकल्मषहारिणी ॥ ८ ॥ भविष्यतिनसंदेहोमित्रावरुणनंदन ॥ ततोपितिष्येसंप्राप्तेकाश्यत्यंतंसुदुर्लभा ॥ ९ ॥ ततोपिदुर्लभंकाश्यांलिंगंगंगेश्वराभिधम् ॥ यस्यसंदर्शनंपुंसांभ वेत्पापक्षयायवै ॥ १० ॥ श्रुत्वागंगेशमाहात्म्यंननरोनिरयीभवेत् ॥ लभेच्चपुण्यसंभारंचिंतितंचाधिगच्छति ॥ ११ ॥ इतिश्रीस्कांदेमहापुराणएकाशी तिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेगंगेश्वरमहिमाख्यानंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ स्कंदउवाच ॥ ॥ नर्मदेशस्यमाहात्म्यं कथयामिमुनेतव ॥ यस्यस्मरणमात्रेणमहापातकसंक्षयः ॥ १ ॥ अस्यवाराहकल्पस्यप्रवेशेमुनिपुंगवैः ॥ आपृच्छिकासरिच्छ्रेष्ठावदतांत्वंमृकंडज ॥२॥ मार्कंडेयउवाच ॥ ॥ शृणुध्वंमुनयःसर्वेसंतिनद्यःपरःशतम् ॥ सर्वाअप्यघहारिण्यःसर्वाअपिवृषप्रदाः॥३॥ सर्वाभ्योपिनदीभ्यश्चश्रेष्ठाःसर्वाःसमुद्रगाः॥ ततोपिहिमहाश्रेष्ठाःसरित्सुसरिदुत्तमाः ॥ ४ ॥ गंगाचयमुनाचाथनर्मदाचसरस्वती ॥ चतुष्टयमिदंपुण्यंधुनीषुमुनिपुंगवाः ॥ ५ ॥ ऋग्वेदमूर्तिर्गंगास्या द्यमुनाचयजुर्ध्रुवम् ॥ नर्मदासाममूर्तिस्तुस्यादथर्वासरस्वती ॥ ६ ॥ गंगासर्वसरिद्योनिःसमुद्रस्यापिपूरणी ॥ गंगायानलभेत्साम्यंकाचिदत्रसरिद्वरा ॥ ॥ ७ ॥ किंतुपूर्वंतपस्तप्त्वारेवयावह्वनेहसम् ॥ वरदानोन्मुखोधाताप्रार्थितश्चेतिसत्तम ॥ ८ ॥ गंगासाम्यंविधेदेहिप्रसन्नोसियदिप्रभो ॥ ब्रह्मणाथततः प्रोक्तानर्मदास्मितपूर्वकम् ॥९॥ यदित्र्यक्षसमत्वंतुलभ्यतेऽन्येनकेनचित् ॥ तदागंगासमत्वंचलभ्यतेसरितान्यया ॥१०॥ पुरुषोत्तमतुल्यःस्यात्पुरुषो न्योयदिक्वचित् ॥ स्रोतस्विनीतदासाम्यंलभतेगंगयापरा ॥ ११ ॥ यदिगौरीसमानारीक्वचिदन्याभवेदिह ॥ अन्याधुनीहस्वर्धुन्यास्तदासाम्यमुपै ष्यति ॥ १२ ॥ यदिकाशीपुरीतुल्याभवेदन्याक्वचित्पुरी ॥ तदास्वर्गतरंगिण्याःसाम्यमन्यानदीलभेत् ॥ १३ ॥

निशम्येतिविधेर्वाक्यंनर्मदासरिदुत्तमा ॥ धातुर्वरंपरित्यज्यप्राप्तावाराणसींपुरीम् ॥ १४ ॥ सर्वेभ्योपिहिपुण्येभ्यःकाश्यांलिंगप्रतिष्ठितेः ॥ अपरानसमु द्दिष्टाकैश्चिच्छ्रेयस्करीक्रिया ॥ १५ ॥ अथसानर्मदापुण्याविधिपूर्वांप्रतिष्ठितिम् ॥ व्यधात्पिलिपिलातीर्थेत्रिविष्टपसमीपतः ॥ १६ ॥ ततःशंभुः प्रसन्नोभूत्तस्यैनद्यैशुभात्मने ॥ वरंवृणीष्वसुभगेयत्तुभ्यंरोचतेऽनघे ॥ १७ ॥ सरिद्वरानिशम्येतिरेवाप्राहमहेश्वरम् ॥ किंवरेणेहदेवेशभृशंतुच्छेनधूर्जटे ॥ ॥ १८ ॥ निर्द्वंद्वात्वत्पदद्वंद्वेभक्तिरस्तुमहेश्वर ॥ श्रुत्वेतिनितरांतुष्टोरेवागिरमनुत्तमाम् ॥ १९ ॥ प्रोवाचचसरिच्छ्रेष्ठेत्वयोक्तंयत्तथास्तुतत् ॥ गृहाण पुण्यनिलयेवितरामिवरांतरम् ॥ २० ॥ यावंत्योदृषदःसंतितवरोधसिनर्मदे ॥ तावंत्योलिंगरूपिण्योभविष्यंतिवरान्मम ॥ २१ ॥ अन्यंचतेवरंदद्यां तमप्याकर्णयोत्तमम् ॥ दुष्प्रापंयच्चतपसांराशिभिःपरमार्थतः ॥ २२ ॥ सद्यःपापहरागंगासप्ताहेनकलिंदजा ॥ त्र्यहात्सरस्वतीरेवेत्वंतुदर्शनमात्रतः ॥ ॥ २३ ॥ अपरंचवरंदद्यांनर्मदेदर्शनाद्यहे ॥ भवत्यास्थापितंलिंगंनर्मदेश्वरसंज्ञकम् ॥ २४ ॥ यत्तल्लिंगंमहापुण्यंमुक्तिंदास्यतिशाश्वतीम् ॥ अस्य लिंगस्ययेभक्तास्तान्दृष्ट्वासूर्यनंदनः ॥ २५ ॥ प्रणमिष्यतियत्नेनमहाश्रेयोभिवृद्धये ॥ संतिलिंगान्यनेकानिकाश्यांदेविपदेपदे ॥ २६ ॥ परंहि नर्मदेशस्यमहिमाकोपिचाद्भुतः ॥ इत्युक्त्वादेवदेवेशस्तस्मिँल्लिंगेलयंययौ ॥ २७ ॥ नर्मदापिप्रहृष्टासीत्पावित्र्यंप्राप्यचाद्भुतम् ॥ स्वदेशंचपरिप्राप्ताद्द ष्टमात्राघहारिणी ॥ २८ ॥ वाक्यंमृकंडजमुनेस्तेपिश्रुत्वामुनीश्वराः ॥ प्रहृष्टचेतसोजाताश्चक्रुःस्वंस्वंततोहितम् ॥ २९ ॥ ॥ स्कंदउवाच ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नर्मदेशस्यमाहात्म्यंश्रुत्वाभक्तियुतोनरः ॥ पापकंचुकमुत्सृज्यप्राप्स्यतिज्ञानमुत्तमम् ॥ ३० ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेनर्मदेश्वराख्यानंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ अगस्त्यउवाच ॥ ॥ नर्मदेशस्यमाहात्म्यंश्रुतंकल्मषनाशनम् ॥ इदानींकथयस्कंद सतीश्वरसमुद्भवम् ॥ १ ॥

स्कंदउवाच ॥ ॥ मित्रावरुणसंभूतकथयामिकथांशृणु ॥ यथासतीश्वरंलिंगंकाश्यामाविर्बभूवह ॥ २ ॥ पुराततापसुमहत्तपःशतधृतिर्मुने ॥ तपसातेनदेवेशःसंतुष्टोवरदोऽभवत् ॥ ३ ॥ उवाचचापिब्रह्माणंनितरांब्राह्मणप्रियः ॥ सर्वज्ञनाथोलोकात्मावरंवरयलोककृत् ॥ ४ ॥ ॥ ब्रह्मोवा . ॥ ॥ यदिप्रसन्नोदेवेशवरंदास्यसिवांछितम् ॥ तदात्वंमेभवसुतोदेवीदक्षसुताऽस्तुच ॥ ५ ॥ इतिश्रुत्वामहादेवःसर्वदोब्रह्मणोवरम् ॥ स्मित्वादेवीमुखंवीक्ष्यप्रोवाचचतुराननम् ॥ ६ ॥ ब्रह्मंस्त्वद्वांछितंभूयात्किमदेयंपितामह ॥ इत्युक्त्वाब्रह्मणोभालादाविरासीच्छशांकभृत् ॥ ७ ॥ रुदन्सउत्तानशयोब्रह्मणोमुखमैक्षत ॥ ततोब्रह्मापितंबालंरुदंतंप्रविलोक्यच ॥ ८ ॥ किंमांजनकमाप्यापित्वंरोदिषिमुहुर्मुहुः ॥ श्रुत्वेतिपृथुकःप्राहयथोक्तंपरमेष्ठिना ॥ ९ ॥ नाम्नेरोदिमिमेस्रष्टर्नामदेहिपितामह ॥ रोदनाद्रुद्रइत्याख्यांसमायाडिंभकोलभत् ॥१०॥ ॥ अगस्त्यउवाच ॥ ॥ अर्भकत्वंगतोपीशःकिंरुरोदपडानन ॥ यदिवेत्सितदाचक्ष्वमहत्कौतूहलंहिमे ॥ ११ ॥ ॥ स्कंदउवाच ॥ ॥ सर्वज्ञस्यकुमारत्वात्किंचित्किंचिदवैम्यहम् ॥ रोदनेकारणंवच्मिशृणुकुंभसमुद्भव ॥ १२ ॥ मनसीतिविचारोभूद्देवस्यपरमात्मनः ॥ बुद्धिवैभवमस्याहोवीक्षितुंपरमेष्ठिनः ॥१३॥ सत्यलोकाधिनाथस्यचतुरास्यस्यवेधसः ॥ इत्यानंदात्समुद्भूतोबाष्पपूरोमहेशितुः ॥१४॥ ॥ अगस्त्यउवाच ॥ ॥ किंबुद्धिवैभवंधातुःशंभुनामनसीक्षितम् ॥ येनानंदाश्रुसंभारोबाल्येप्यभवदीशितुः ॥१५॥ एतत्कथयमेप्राज्ञसर्वज्ञानंदवर्धन ॥ श्रुत्वागस्त्युदितंवाक्यंतारकारिरुवाचह ॥१६॥ देवेनमनसिध्यातमितिकुंभजनेमुने ॥ विनापत्यंजनेतारंकउद्धर्तुमिहप्रभुः ॥ १७ ॥ एकोमनोरथश्चायंद्वितीयोयंसुनिश्चितम् ॥ अपत्यत्वंगतेचास्मिन्स्मर्तुरुत्पत्तिहारिणि ॥ १८ ॥ क्षणंक्षणंसमालोक्यमंगस्पर्शेक्षणंक्षणम् ॥ एकशय्यासनाहारंलप्स्येऽनेनक्षणेक्षणे ॥ १९ ॥ योयंनगोचरःक्वापिवाणीमनसयोरपि ॥ समेऽपत्यत्वमासाद्यकिंनदास्यतिचिंतितम् ॥ २० ॥

योऽमुंसकृत्स्पृशेज्जंतुर्योमुंपश्येत्सकृन्मुदा ॥ नसभूयोभिजायेतभवेज्जानंदमेदुरः ॥ २१ ॥ गृहक्रीडनकंमेसौयदिभूयात्कथंचन ॥ तदापरस्यसौख्यस्यनिधानंस्यामसंशयम् ॥ २२ ॥ विधेःसमीहितंचेतिनूनंज्ञात्वाससर्ववित् ॥ आनंदबाष्पकलितंचक्षुस्त्रयमदीधरत् ॥ २३ ॥ श्रुत्वेत्यगस्तिःस्कंदस्यभाषितंपर्यमूमुदत् ॥ ननामचांघ्रीप्रोवाचजयसर्वज्ञनंदन ॥ २४ ॥ विधेरपिमनोज्ञातंशंभोरपिमनोगतम् ॥ सम्यक्चित्तंत्वयाज्ञातंनमस्तुभ्यंचिदात्मने ॥ २५ ॥ स्कंदोपिनितरांतुष्टःश्रोतुरानंददर्शनात् ॥ धन्योस्यगस्त्यधन्योसिश्रोतुंजानासि[illegible]वतः ॥ २६ ॥ नमेश्रमोवृथाजातोब्रुवतस्तेपुरःकथाम् ॥ इत्यगस्तिंसमाभाष्यपुनःप्राहपडाननः ॥ २७ ॥ देवेरुद्रत्वमापन्नेदेवीदक्षसुताभवत् ॥ सापितप्त्वातपस्तीव्रंसतीकाश्यांवरार्थिनी ॥ २८ ॥ ददर्शलिंगरूपेणप्रादुर्भूतंहरंपुरः ॥ अलंतप्त्वामहादेविप्रोक्तवंतमितिस्फुटम् ॥ २९ ॥ इदंसतीश्वरंलिंगंतवनाम्नाभविष्यति ॥ यथामनोरथस्तेऽत्रफलितेदक्षकन्यके ॥ ३० ॥ तथैतल्लिंगमाराध्यान्यस्यापिहिफलिष्यति ॥ कुमारीप्राप्स्यतिपतिंमनसोपिसमुच्छ्रितम् ॥ ३१ ॥ एतल्लिंगंसमाराध्यकुमारोपिवरांगनाम् ॥ यस्यगस्यहियःकामस्तस्यतस्यहिसध्रुवम् ॥ ३२ ॥ भविष्यतिनसंदेहःसतीश्वरसमर्चनात् ॥ सतीश्वरंसमभ्यर्च्ययोयोयंयंसमीहते ॥३३॥ तस्यतस्यससक्षिप्रंभविष्यतिमनोरथः ॥ ३४ ॥ इतोष्टमेचदिवसेत्वज्जनेताप्रजापतिः ॥ मह्यंदास्यतिकन्यांत्वांसफलस्तेमनोरथः ॥ इत्युक्त्वादेवदेवेशस्तत्रैवांतर्हितोभवत् ॥ ३५ ॥ सापिस्वभवनंयातासतीदाक्षायणीमुदा ॥ पितापितस्मैप्रादात्तांरुद्रायदिवसेष्टमे ॥ ३६ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंसतीश्वरंलिंगंकाश्यांप्रादुरभून्मुने ॥ स्मरणादपिलिंगंचदद्यात्सत्त्वगुणंपरम् ॥ ३७ ॥ रत्नेशात्पूर्वतोभागेदृष्ट्वालिंगंसतीश्वरम् ॥ मुच्यतेपातकैःसद्यःक्रमाज्ज्ञानंचविंदति ॥ ३८ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेसतीश्वरप्रादुर्भावोनामत्रिनवतितमोऽध्यायः ॥९३॥ ॥ छ ॥ ॥ स्कंदउवाच ॥ ॥ अन्यान्यपिच लिंगानिकथयामेमहामुने ॥ अमृतेशमुखादीनियन्नामाप्यमृतप्रदम् ॥ १ ॥ पुरासनारुनामासीन्मुनिरत्रगृहाश्रमी ॥ ब्रह्मयज्ञरतोनित्यंनित्यंचातिथिदैवतः ॥ २ ॥

लिंगभूमारतोनित्यंनित्यंतीर्थाप्रतिग्रही ॥ तस्यपैरभवत्पुत्रःसनारोरुपजंघनिः ॥ ३ ॥ सकदाचिद्गतोरण्यंतत्रदष्टःपृदाकुना ॥ अथतत्सवयोभिश्चसआनीतःस्वमाश्रमम् ॥ ४ ॥ सनारुणासमुच्छ्वस्यनीतःसउपजंघनिः ॥ महाश्मशानभूभागंस्वर्गद्वारसमीपतः ॥ ५ ॥ तत्रासीच्छ्रीफलाकारंलिंगमेकंसुगुप्तवत् ॥ निधायतत्रतंयावच्छवंसंचिंतयेत्सुधीः ॥ ६ ॥ सर्पदष्टस्यसंस्कारःकथंभवतिचेतिवै ॥ तावत्सजीवन्नुत्तस्थौसुतवच्चोपजंघनिः ॥ ७ ॥ अथतंवीक्ष्यसमुनिःसनारुरुपजंघनिम् ॥ पुनःप्राणितसंपन्नंविस्मयंप्राप्तवान्परम् ॥ ८ ॥ प्राणितव्येऽत्रकोहेतुर्मच्छिशोरुपजंघनेः ॥ क्षेत्राद्बहिरहिर्यंहिदष्टानैषीत्परासुताम् ॥ ९ ॥ इतियावत्ससंधत्तेधियंतज्जीवितैकिकाम् ॥ तावत्पिपीलिकात्वेकामृतंक्वापिपिपीलिकम् ॥ १० ॥ आनिनायचतत्रैवसोप्यनन्निर्गतस्ततः ॥ अथविज्ञायसमुनिस्तत्त्वंजीवितसूचितम् ॥ ११ ॥ मृदुहस्ततलेनैवयावत्खनतिवैमुनिः ॥ तावच्छ्रीफलमात्रंहिलिंगंतेनसमीक्षितम् ॥ १२ ॥ सनारुणाथतल्लिंगंतेनतत्रसमर्चितम् ॥ चिरकालीनलिंगस्यकृतंनामापिसान्वयम् ॥ १३ ॥ अमृतेश्वरनामेदंलिंगमानंदकानने ॥ एतल्लिंगस्यसंस्पर्शादमृतत्वंलभेद्ध्रुवम् ॥ १४ ॥ अमृतेशंसमभ्यर्च्यजीवत्पुत्रःसवैमुनिः ॥ स्वास्पदंसमनुप्राप्तोदृष्टआश्चर्यवज्जनैः ॥ १५ ॥ तदाप्रभृतितल्लिंगममृतेशंमुनीश्वर ॥ काश्यांसिद्धिप्रदंनृणांकलौगुप्तंभवेत्पुनः ॥ १६ ॥ अमृतेश्वरसंस्पर्शान्मृताजीवंतितत्क्षणात् ॥ अमृतत्वंभजंतेऽत्रजीवंतःस्पर्शमात्रतः ॥ १७ ॥ अमृतेशसमंलिंगंनास्तिक्वापिमहीतले ॥ तल्लिंगंशंभुनातिष्येकृतंगुप्तंप्रयत्नतः ॥ १८ ॥ अमृतेश्वरनामापियेकाश्यांपरिगृह्णते ॥ नतेषामुपसर्गोत्थंभयंक्वापिभविष्यति ॥१९॥ मुनेऽन्यच्चमहालिंगंकरुणेश्वरसंज्ञितम् ॥ मोक्षद्वारसमर्पितुमोक्षद्वारेश्वराग्रतः ॥२०॥ दर्शनात्तस्यलिंगस्यमहाकारुणिकस्यवै ॥ नक्षेत्रान्निर्गमोजातुबहिर्भवतिकस्यचित् ॥ २१ ॥ स्नातव्यंमणिकर्ण्यांचद्रष्टव्यःकरुणेश्वरः ॥ क्षेत्रोपसर्गजाभीतिर्हातव्यापरयामुदा ॥ २२ ॥ सोमवासरमासाद्यएकभक्तव्रतंचरेत् ॥ यद्रष्टव्यःकरुणांपुष्पैर्व्रतिनाकरुणेश्वरः ॥ २३ ॥

तेनव्रतेनसंतुष्टःकरुणेशःकदाचन ॥ नतंक्षेत्राद्बहिःकुर्यात्तस्मात्कार्यंव्रतंत्विदम् ॥ २४ ॥ तत्पत्रैस्तत्फलैर्वापिसंपूज्यःकरुणेश्वरः ॥ योनजानातितल्लिंगंसम्यग्ज्ञानविवर्जितः ॥ २५ ॥ तेनार्च्यःकरुणावृक्षोदेवेशःप्रीयतामिति ॥ योवर्षंसोमवारस्यव्रतंकुर्यादितिद्विजः ॥ २६ ॥ प्रसन्नःकरुणेशोत्रतस्यदास्यतिवांछितम् ॥ द्रष्टव्यःकरुणेशोत्रकाश्यांयत्नेनमानवैः ॥ २७ ॥ इतितेकरुणेशस्यमहिमोक्तामहत्तरः ॥ यंश्रुत्वानोपसर्गोत्थंभयंकाश्यांभवि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ष्यति ॥ २८ ॥ मोक्षद्वारेश्वरंचैवस्वर्गद्वारेश्वरंतथा ॥ उभौकाश्यांनरोदृष्ट्वास्वर्गंमोक्षंचविंदति ॥ २९ ॥ ज्योतीरूपेश्वरंलिंगंकाश्यामन्यत्प्रकाशते ॥ तस्यसंपूजनाद्भक्ताज्योतीरूपाभवंतिहि ॥ ३० ॥ चक्रपुष्करिणीतीरेज्योतीरूपेश्वरंपरम् ॥ समभ्यर्च्यामुयान्मर्त्योज्योतीरूपंनसंशयः ॥ ३१ ॥ यदाभागीरथीगंगातत्रप्राप्तासरिद्वरा ॥ तदारभ्यार्चयेन्नित्यंतल्लिंगंस्वर्धुनीमुदा ॥ ३२ ॥ पुराविष्णौतपत्यत्रतल्लिंगंस्वयमेवहि ॥ तत्राविरासीत्तेजस्विते नक्षेत्रमिदंशुभम् ॥ ३३ ॥ चक्रपुष्करिणीतीरेज्योतीरूपेश्वरंतदा ॥ दूरस्थोपीहयोध्यायेत्तस्यासेद्धिरदूरतः ॥ ३४ ॥ एतेष्वपिचलिंगेषुचतुर्दशसुसत्तम ॥ लिंगाष्टकंमहावीर्यंकर्मबीजदवानलम् ॥ ३५ ॥ ओंकारादीनिलिंगानियान्युक्तानिचतुर्दश ॥ तथाक्षेश्वरादीनिलिंगान्यष्टौमहांतिच ॥ ३६ ॥ शैलेशादी निलिंगानितथायानिचतुर्दश ॥ पुनःषट्त्रिंशदेतानिक्षेत्रसंसिद्धिहेतवे ॥ ३७ ॥ षट्त्रिंशत्तत्त्वरूपोसौलिंगेष्वेषुसदाशिवः ॥ अस्मिन्क्षेत्रेवसन्नित्यं तारकंज्ञानमादिशेत् ॥ ३८ ॥ क्षेत्रस्यतत्त्वमेतद्धिषट्त्रिंशल्लिंगरूप्यहो ॥ एतेषांभजनात्पुंसांनभवेद्दुर्गतिःक्वचित् ॥ ३९ ॥ मुनेरहस्यभूतानिलिंगान्येता निनिश्चितम् ॥ एतल्लिंगप्रभावाच्चमुक्तिरत्रसुनिश्चिता ॥ ४० ॥ मोक्षक्षेत्रमिदंकाशीलिंगैरेतैर्महामते ॥ एतान्यन्यानिसिद्धानिसंभवंतियुगेयुगे ॥ ४१ ॥

आनंदकाननंशंभोःक्षेत्रमेतदनादिमत् ॥ अत्रसंस्थितिमाप्यामुक्ताएवनसंशयः ॥ ४२ ॥ योगसिद्धिरिहास्त्येवतपःसिद्धिरिहैवहि ॥ व्रतसिद्धिर्मंत्रसि द्धिस्तीर्थसिद्धिःसुनिश्चितम् ॥ ४३ ॥ सिद्ध्यष्टकंतुयत्प्रोक्तमणिमादिमहत्तरम् ॥ तज्जन्मभूमिरेषैवशंभोरानंदवाटिका ॥ ४४ ॥ निर्वाणलक्ष्म्याःसदनं मेतदानंदकाननम् ॥ एतत्प्राप्यनमोक्तव्यंपुण्यैःसंसारभीरुणा ॥ ४५ ॥ अयमेवमहालाभइदमेवपरंतपः ॥ एतदेवमहत्पुण्यंलब्धावाराणसीहयत् ॥ ॥ ४६ ॥ अवश्यंजन्मिनोमृत्युर्यत्रकुत्रभविष्यति ॥ कर्मानुसारिणीलब्ध्वागतिःपश्चाच्छुभाशुभा ॥ ४७ ॥ मृत्युंविज्ञायनियतंगतिंकर्मानुसारिणीम् ॥ अवश्यंकाशिकासेव्यासर्वकर्मनिवारिणी ॥ ४८ ॥ मानुष्यंप्राप्ययेमूढानिमेषमितजीवितम् ॥ नसेवंतेपुरीकाशींतेमुष्टामंदबुद्धयः ॥ ४९ ॥ दुर्लभं जन्ममानुष्यंदुर्लभाकाशिकापुरी ॥ उभयोःसंगमासाद्यमुक्ताएवनसंशयः ॥ ५० ॥ क्वचतादृक्तपांसीहयतादृग्योगउत्तमः ॥ यादृग्भिःप्राप्यतेमुक्तिः काश्यांमोक्षोत्तमोत्तमः ॥ ५१ ॥ सत्यंसत्यंपुनःसत्यंसत्यपूर्वंपुनःपुनः ॥ नकाशीसदृशीमुक्त्यैभूमिरन्यामहीतले ॥ ५२ ॥ विश्वेशोमुक्तिदोनित्यंमुक्त्यै चोत्तरवाहिनी ॥ आनंदकाननेमुक्तिर्मुक्तिर्नान्यत्रकुत्रचित् ॥ ५३ ॥ एकएवहिविश्वेशोमुक्तिदोनान्यएवहि ॥ सएवकाशींप्राप्यमुक्तिंयच्छतिनान्यतः ॥ ५४ ॥ सायुज्यमुक्तिरत्रैवसान्निध्यादिरथान्यतः ॥ सुलभासापिनोनूनंकाश्यांमोक्षोस्तिहेलया ॥ ५५ ॥ ॥ स्कंदउवाच ॥ ॥ शृण्वगस्त्यमहाभागभ विष्यंकथयाम्यहम् ॥ कृष्णद्वैपायनोव्यासोऽकथयद्यन्महद्वचः ॥ निश्चिकेतुमनाःपश्चाद्यत्करिष्यतितच्छृणु ॥ ५६ ॥ ॥ इतिश्रीस्कांदेमहापुराणएकाशी तिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेऽमृतेशादिलिंगप्रादुर्भावोनामचतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ व्यासउवाच ॥ ॥ शृणुसूतमहाबुद्धे यथास्कंदेनभाषितम् ॥ भविष्यंममतस्याग्रेकुंभयोनेमहामते ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ निशामयमहाभागत्वंमैत्रावरुणेमुने ॥ पाराशर्यो मुनिवरोयथामोहमुपैष्यति ॥ २ ॥

व्यस्यवेदान्महाबुद्धिर्नानाशाखाप्रभेदतः ॥ अष्टादशपुराणानिसूतादीन्परिपाठ्यच ॥ ३ ॥ श्रुतिस्मृतिपुराणानांरहस्यंयस्त्वचीकरत् ॥ महाभारतसं ज्ञंचसर्वलोकमनोहरम् ॥ ४ ॥ सर्वपापप्रशमनंसर्वशांतिकरंपरम् ॥ यस्यश्रवणमात्रेणब्रह्महत्याविनश्यति ॥ ५ ॥ एकदासमुनिःश्रीमान्पर्यटन्पृथिवीतले ॥ संप्राप्तोनैमिषारण्यंयत्रसंतिमुनीश्वराः ॥ ६ ॥ अष्टाशीतिसहस्राणिशौनकाद्यास्तपोधनाः ॥ त्रिपुंड्रितमहाभालालसद्रुद्राक्षमालिनः ॥ ७ ॥ विभूतिधा रिणोभक्त्यारुद्रसूक्तजपप्रियान् ॥ लिंगाराधनसंसक्ताञ्छिवनामकृतादरान् ॥ ८ ॥ एकएवहिविश्वेशोमुक्तिदोनान्यएवहि ॥ इतिब्रुवाणान्सततंपरिनि श्चितमानसान् ॥ ९ ॥ विलोक्यसमुनिर्व्यासस्तान्सर्वान्गिरिशात्मनः ॥ उत्क्षिप्यतर्जनीमुच्चैःप्रोवाचेदंवचःपुनः ॥ १० ॥ परिनिर्मथ्यवाग्जालंसुनि श्चित्यासकृद्बहु ॥ इदमेकंपरिज्ञातंसेव्यःसर्वेश्वरोहरिः ॥ ११ ॥ वेदेरामायणेचैवपुराणेषुचभारते ॥ आदिमध्यावसानेषुहरिरेकोऽत्रनापरः ॥ १२ ॥ सत्यंसत्यंत्रिसत्यंपुनःसत्यंनमृषापुनः ॥ नवेदादपरंशास्त्रंनदेवोच्युततःपरः ॥ १३ ॥ लक्ष्मीशःसर्वदोनान्योलक्ष्मीशोप्यपवर्गदः ॥ एकएवहिलक्ष्मी शस्ततोध्येयोनचापरः ॥ १४ ॥ भुक्तेर्मुक्तेरिहान्यत्रनान्योदाताजनार्दनात् ॥ तस्माच्चतुर्भुजोनित्यंसेवनीयःसुखेप्सुभिः ॥ १५ ॥ विहायकेशवादन्यं येसेवंतेल्पमेधसः ॥ संसारचक्रेगहनेतेविशंतिपुनःपुनः ॥ १६ ॥ एकएवहिसर्वेशोहृषीकेशःपरात्परः ॥ तंसेवमानःसततंसेव्यस्त्रिजगतांभवेत् ॥ १७ ॥ एकोधर्मप्रदोविष्णुस्त्वेकोबह्वर्थदोहरिः ॥ एकःकामप्रदश्चक्रीत्वेकोमोक्षप्रदोच्युतः ॥ १८ ॥ शार्ङ्गिणंयेपरित्यज्यदेवमन्यमुपासते ॥ तेसद्भिश्चबहि ष्कार्यावेदहीनायथाद्विजाः ॥ १९ ॥ श्रुत्वेतिवाक्यंव्यासस्यनैमिषारण्यवासिनः ॥ प्रवेपमानहृदयाःपरिप्रोचुरिदंवचः ॥ २० ॥ ॥ ऋषयऊचुः ॥ ॥ पाराशर्यमुनेमान्यस्त्वमस्माकंमहामते ॥ यतोवेदास्त्वयाव्यस्ताःपुराणान्यपिवेत्सियत् ॥ २१ ॥ यतश्चकर्तात्वमसिमहतोभारतस्यवै ॥ धर्मार्थकाममो क्षाणांविनिश्चयकृतोध्रुवम् ॥ २२ ॥ तत्त्वज्ञःकोपरश्चात्रत्वत्तःसत्यवतीसुत ॥ भवतायत्प्रतिज्ञातंनिश्चित्योत्क्षिप्यतर्जनीम् ॥ २३ ॥

अस्मिन्माणवकास्तत्रपरिश्रद्दधतेनहि ॥ प्रतिज्ञातस्यवचसस्तवश्रद्धाभवेत्तदा ॥ २४ ॥ यदाऽऽनंदवनेशंभोःप्रतिजानासिवैवचः ॥ २५ ॥ गच्छवाराणसीं व्यासयत्रविश्वेश्वरःस्वयम् ॥ नतत्रयुगधर्मोस्तिनचलग्नावसुंधरा ॥ २६ ॥ इतिश्रुत्वामुनिर्व्यासःकिंचित्कुपितवद्धृदि ॥ जगामतूर्णंसहितःस्वशिष्यैरयुतो न्मितैः ॥ २७ ॥ प्राप्यवाराणसींव्यासःस्नात्वापंचनदेह्रदे ॥ श्रीमन्माधवमभ्यर्च्ययथोपादोदकंततः ॥ २८ ॥ तत्रस्नानादिकंकृत्वादृष्ट्वाचैवादिकेशवम् ॥ पंचरात्रंततःकृत्वावैष्णवैरभिनंदितः ॥ २९ ॥ अग्रतःपृष्ठतःशंखैर्वाद्यमानैःप्रमोदितः ॥ जयविष्णोहृषीकेशगोविंदमधुसूदन ॥ ३० ॥ अच्युतानंतवै कुंठमाधवोपेंद्रकेशव ॥ त्रिविक्रमगदापाणेशार्ङ्गपाणेजनार्दन ॥ ३१ ॥ श्रीवत्सवक्षःश्रीकांतपीतांबरमुरांतक ॥ कैटभारेबलिध्वंसिन्कंसारेकेशिसूदन ॥ ॥ ३२ ॥ नारायणासुररिपोकृष्णशौरेचतुर्भुज ॥ देवकीहृदयानंदयशोदानंदवर्धन ॥ ३३ ॥ पुंडरीकाक्षदैत्यारेदामोदरबलप्रिय ॥ बलारातिस्तुतहरे वासुदेववसुप्रद ॥ ३४ ॥ विष्वक्चमूस्तार्क्ष्यरथवनमालिन्नरोत्तम ॥ अधोक्षजक्षमाधारपद्मनाभजलेशय ॥ ३५ ॥ नृसिंहयज्ञवाराहगोपगोपालवल्लभ ॥ गोपीपतेगुणातीतगरुडध्वजगोत्रभृत् ॥ ३६ ॥ जयचाणूरमथनजयत्रैलोक्यरक्षण ॥ जयानाद्यजयानंदजयनीलोत्पलद्युते ॥ ३७ ॥ कौस्तुभोद्भूषितो रस्कपूतनाधातुशोषण ॥ रक्षरक्षजगद्रक्षामणेनरकहारक ॥ ३८ ॥ सहस्रशीर्षपुरुषपुरुहूतसुखप्रद ॥ यद्भूतंयच्चभाव्यंवैतत्रैकःपुरुषोभवान् ॥ ३९ ॥ इत्यादिनाममालाभिःसंस्तुवन्वनमालिनम् ॥ स्वच्छंदलीलयागायन्नृत्यंश्चपरयामुदा ॥ ४० ॥ व्यासोविश्वेशभवनंसमायातःसहृष्टवत् ॥ ज्ञानवापी पुरोभागेमहाभागवतैःसह ॥ ४१ ॥ विराजमानसत्कंठस्तुलसीवरदामभिः ॥ स्वयंतालधरोजातःस्वयंजातःसुनर्तकः ॥ ४२ ॥ वेणुवादनतत्त्वज्ञःस्वयंश्रु तिधरोभवत् ॥ नृत्यंपरिसमाप्येत्थंव्यासःसत्यवतीसुतः ॥ ४३ ॥ पुनरूर्ध्वंभुजंकृत्वादक्षिणांशिष्यमध्यगः ॥ पुनःपपाठतानेवश्लोकान्गायन्निवो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चकेः ॥ ३४ ॥ परिनिर्मथ्यवाग्जालंमुनिश्चित्यासकृद्द्रुतं ॥ इदमेकंपरंज्ञातंसेव्यःसर्वेश्वरोहरिः ॥ ४५ ॥

इत्यादिश्लोकसंघातंस्वमतिज्ञाप्रकाशकम् ॥ यावत्पठतिसव्यासःसव्यबुद्धिस्तदैवसः ॥४६॥ तस्तंभवतद्वाहुसरोलादिःस्वलीलया ॥ पश्चस्तंभ्यापितस्यासीन्मुनेर्व्यासस्यसन्मुनेः ॥ ४७ ॥ ततोगुप्तंसमागम्यविष्णुर्व्यासमभाषत ॥ अपराद्धंमहाभाग्यभवताव्यासनिश्चितम् ॥ ४८ ॥ तवैतत्पराधेनभीतिर्मेपिमहत्तरा ॥ एकएवहिविश्वेशोद्वितीयोनास्तिकश्चन ॥ ४९ ॥ तत्प्रसादादहंचक्रीलक्ष्मीश्चत्प्रभावतः ॥ त्रैलोक्यरक्षासामर्थ्यंदत्तंतेनवशंभुना ॥५०॥ तद्वृत्तंत्यापरमेयंमयालब्धंरात्ततः ॥ इदानींस्तुहितंशंभुंयदिमेशुभमिच्छसि ॥५१॥ अथयदापिनवैकार्याभवताशेमुषीदृशी ॥ पाराशर्यइतिश्रुत्वासंज्ञयाव्याजहारह ॥५२॥ भुजस्तंभःकृतस्तेननंदिनादृष्टिमात्रतः ॥ वाक्स्तंभस्तद्भ्रयाज्जातःस्पृशमेकंठकंदलौ ॥ ५३ ॥ यथास्तोतुमवानीशंप्रभवामिभवांतकम् ॥ संस्पृश्यविष्णुस्तत्कंठंगुप्तमेवमगाद्मह ॥५४॥ ततःसत्यवतीसूनुस्तथास्तंभितदोर्लतः ॥ प्रारब्धवान्महेशानंपरिष्टोतुमुदारधीः ॥ ॥ ५५ ॥ ॥ व्यासउवाच ॥ ॥ एकोरुद्रोनद्वितीयोयतस्तद्वेवैकंनेहनानास्तिकिंचित् ॥ यद्यप्यन्यःकोपिवाकुत्रचिद्वाव्याघ्रांतंदग्ध्वशक्तिर्मदमे ॥ ५६ ॥ यःक्षीराब्धेर्मंदराघातजातोज्वालामालीकालकूटोतिभीमः ॥ तंसोढ्वाकोपरोऽभून्महेशाद्यत्कीलाभिःकृष्णतामापविष्णुः ॥ ५७ ॥ यद्वाणोभूच्छ्रीपतिर्यस्ययंतालोकेशोयत्स्यंदनंभूःसमस्ता ॥ वाहावेदायस्यथेनेपुपातादग्धाग्राभात्रिपुरास्तत्समःकः ॥ ५८ ॥

यंकंदर्पोवीक्षमाणःसमानंदेवैरन्यैर्भस्मजातःस्वयंहि ॥ पौष्णंवर्णेःसर्वविश्वैकजेताकोवास्तुत्यंःकामजेतुस्ततोन्यः ॥ ५९ ॥ यंवेदोवेदनोनंविष्णुर्नावेधानोमनोनैववाणी ॥ तंदेवेशंमादृशःकोल्पमेधायाथात्म्याद्वैवेत्यहोविश्वनाथम् ॥ ६० ॥ यस्मिन्सर्वंयस्तुसर्वत्रसर्वोयोवैकर्तायोऽवितात्योऽपहर्ता ॥ नोयस्यादिर्यःसमस्तादिरेकोनोयस्यांतोयोंतकृत्तंनतोस्मि ॥ ६१ ॥ यस्यैकाख्यावाजिमेधनतुल्यायस्यानत्याचैकथाल्पेंद्रलक्ष्मीः ॥ यरस्तुत्यालभ्यतेसत्यलोकोयस्यार्चातोमोक्षलक्ष्मीरदूरा ॥६२॥ नान्यंदेवंवेद्मयहंशंभमहेशान्नान्यंदेवंस्तौमिशंभोर्ऋतेऽहम् ॥ नान्यंदेवंज्ञानमामेतिनेत्यासत्यंसत्यंसत्यमेतन्मृषान ॥ ६३ ॥ इत्थंयावत्स्तौतिशंभुंमहर्षिस्तावन्नंदीशांभवाद्वक्प्रसादात् ॥ तदोःस्तंभंत्यक्तवांश्चाक्षभापेस्मायंस्मायंब्राह्मणेभ्योनमोवः ॥ ६४ ॥ नंदिकेश्वरउवाच ॥ इदंस्तवंमहापुण्यंव्यासतेपरिकीर्तितम् ॥ यःपठिष्यतिमेधावीतस्यतुष्यतिशंकरः ॥६५॥ व्यासाष्टकमिदंप्रातःपठितव्यंप्रयत्नतः ॥ दुःस्वप्नपापशमनंशिवसान्निध्यकारकम् ॥ ६६ ॥ मातृहापितृहावापिगोघ्नोबालघ्नपत्नवा ॥ सुरापीस्वर्णहृद्ब्रह्मनिष्पापोस्यान्तेजपात् ॥ ६७ ॥ स्कंदउवाच ॥ ॥ पाराशर्यस्तदारभ्यशंभुभक्तिपरोभवत् ॥ लिंगंव्यासेश्वरंन्याप्यघंटाकर्णह्रदाप्लुतः ॥६८॥ विभूतिभूषणोनित्यंनित्यंरुद्राक्षभूषणः ॥ रुद्रसूक्तपरोनित्यंनित्यंलिंगार्चकोभवत् ॥ ६९ ॥ सकृत्स्नात्वेत्रसंन्यासंत्यजेन्नाद्यापिकाशिकाम् ॥ तत्त्वंक्षेत्रस्यदिज्ञानंनिर्वाणपददायिनः ॥ ७० ॥ घंटाकर्णह्रदेस्नात्वादृष्ट्वाव्यासेश्वरंनरः ॥ यत्रकुत्रमृतोवापिवाराणस्यांमृतोभवेत् ॥ ७१ ॥ काश्यांव्यासेश्वरंलिंगंपूजयित्वात्रमोत्तमः ॥ नज्ञानाद्भ्रश्यतेक्वापिपातकैर्नाभिभूयते ॥ ७२ ॥ व्यासेश्वरस्थयेभक्तानतेषांकलिकालतः ॥ नपापतोभयंक्वापिनचक्षेत्रोपसर्गतः ॥ ७३ ॥ व्यासेश्वरःप्रयत्नेनपूज्यःकाशिवासिभिः ॥ घंटाकर्णकृतस्नानैःक्षेत्रपातकभीरुभिः ॥ ७४ ॥ ॥ इतिश्रीस्कंदमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेव्यासभुजस्तंभोनामपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ अगस्त्यउवाच ॥ ॥ कृष्णद्वैपायनःस्कंदशंभुभक्तिपरोयदि ॥ यदिक्षेत्रंहरस्यक्षेत्रसंन्यासकृथदि ॥ १ ॥

तथाहृद्यप्रभावश्चेत्तत्क्षेत्रंवेज्ञानिनांवरः ॥ पुरीवाराणसीश्रेष्ठांकथंकिलशपिष्यति ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ सत्यमेतत्त्वयापृच्छिकथयामिमुनेशृणु ॥ तस्यव्यासस्यचरितंभविष्यंत्वयिपृच्छति ॥ ३ ॥ यदारभ्यमुनेस्तस्यनंदीस्तंभितवान्भुजम् ॥ तदारभ्यमहेशानंसंस्तौतिपरमादृतः ॥ ४ ॥ काश्यांतीर्थान्यनेकानिकाश्यांलिंगान्यनेकशः ॥ तथापिसेव्योविश्वेशःस्नातव्यामणिकर्णिका ॥५॥ लिंगंप्येकोहिविश्वेशस्तीर्थेषुमणिकर्णिका ॥ इतिसंव्याहरन्व्यासस्तद्दृयंबहुमन्यते ॥ ६ ॥ त्यक्तासबहुवाग्जालंप्रातःस्नात्वादिनेदिने ॥ निर्वाणमंडपेवक्तिमहिमानंमहेशितुः ॥ ७ ॥ शिष्याणांपुरतोनित्यंक्षेत्रस्यमहिमामहान् ॥ व्याख्यायतेस्मुदातेनव्यासेनपरमर्षिणा ॥ ८ ॥ अत्रयत्क्रियतेक्षेत्रेशुभंवाऽशुभमेववा ॥ संवर्तेपिनतस्यांतस्तत्स्मात्क्षेत्रेयःसमाचरेत् ॥ ९ ॥ क्षेत्रसिद्धिसमीहंतेयेचान्यत्रकृतिनोजनाः ॥ यावन्नीवंनतेस्त्याज्यासुधीभिर्मणिकर्णिका ॥ १० ॥ चक्रपुष्करिणीतीर्थेस्नातव्यंप्रतिवासरम् ॥ पुष्पैःपत्रैःफलैस्तोयैरर्च्योविश्वेश्वरःसदा ॥ ११ ॥ स्ववर्णाश्रमधर्मश्चत्यक्तव्योनमनागपि ॥ प्रत्यहंक्षेत्रमहिमाश्रोतव्यःश्रद्धयासकृत् ॥१२॥ यथाशक्तिचदेयानिदानान्यत्रसुगुप्तवत् ॥ अन्यान्यपिचदेयानिविघ्नान्परिजिहीर्षुणा ॥ १३ ॥ परोपकरणंचात्रकर्तव्यंसुधियासदा ॥ पर्वस्वपेविशेषेणस्नानदानादिकाःक्रियाः ॥१४॥ विशेषपूजाकर्तव्यासुमहोत्सवपूर्वकम् ॥ क्रियास्तथाधिकायात्राःसमर्च्याःक्षेत्रदेवताः ॥१५॥ अत्रमर्मनवक्तव्यंसुधियाकस्यचित्कचित् ॥ परदारपरद्रव्यपरापकरणंत्यजेत् ॥ १६ ॥ परापवादोनोवाच्यःपरेष्वानचकारयेत् ॥ असत्यंनैववक्तव्यंप्राणैःकंठगतैरपि ॥ १७ ॥ अत्रत्यजंतुरक्षार्थंमसत्यमपिभाषयेत् ॥ येनकेनप्रकारेणशुभेनाप्यशुभेनवा ॥१८॥ अत्रत्यःप्राणिमात्रोपिरक्षणीयःप्रयत्नतः ॥ एकस्मिन्क्षितेजंतावत्रकाश्यांप्रयत्नतः ॥ त्रैलोक्यरक्षणात्पुण्यंयेंस्यात्तत्स्यात्रसंशयः ॥ १९ ॥ येवसंतिसदाकाश्यांक्षेत्रसंन्यासकारिणः ॥ तएवरुद्रामंतव्याजीवन्मुक्तानसंशयः ॥ २० ॥ तेभ्योस्तेनभक्तकार्यास्संतोष्याःप्रयत्नतः ॥ तेषुवैपरितुष्टेषुतुष्येद्विश्वेश्वरःस्वयम् ॥ २१ ॥ काश्यांवसंतियेमर्त्यादूरस्थेरपिसन्नरैः ॥ योगक्षेमोविघात्यस्तेपांविश्वेशितुर्मुदे ॥ २२ ॥ प्रसरंस्त्रिद्रियाणांचनिवार्योत्रनिवासिभिः ॥ मनसोपिहिचांचल्यमिहवार्यंप्रयत्नतः ॥ २३ ॥ मरणंनाभिकांक्षेद्धिकाश्यामेकोऽपिपुरुषः ॥ शरीरशोषणोपायःकर्तव्यःसुधियानहि ॥ २४ ॥

शरीरसौष्ठवंकांक्ष्यंव्रतस्नानादिसिद्धये ॥ आयुर्वेद्मत्रवैचित्यंमहाफलसमृद्धये ॥ २५ ॥ आत्मरक्षात्रकर्तव्यामहाश्रेयोभिवृद्धये ॥ अत्रात्मत्यजनोपायं मनसापिनचिंतयेत् ॥ २६ ॥ एकस्मिन्नपियच्चाह्निकाशांश्रेयोभिलभ्यते ॥ नतुवर्षशतेनापितदन्यत्राप्यतेकेंचित् ॥ २७ ॥ अन्यत्रयोगाभ्यसनंन्यासंवज्जन्मयदर्ज्यते ॥ वाराणस्यांतदेकेनप्राणायामेनलभ्यते ॥२८॥ सर्वतीर्थावगाहाच्चयात्रज्जन्मयदर्ज्यते ॥ तदानंदवनेप्राप्यंमणिकर्ण्येकमज्जनात् ॥ ॥ २९ ॥ सर्वलिंगार्चनात्पुण्यंयावज्जन्मयदर्ज्यते ॥ सकृद्विश्वेशमभ्यर्च्यश्रद्धयातदवाप्यते ॥३०॥ यज्जन्मनांसहस्रेणनिर्मलंपुण्यमर्जितम् ॥ तत्पुण्यपरिवर्तेनभवेद्विश्वेशदर्शनम् ॥ ३१ ॥ गवांकोटिप्रदानेनसम्यग्दत्तेनयत्फलम् ॥ तत्फलंसम्यगाप्येतविश्वेश्वरविलोकनात् ॥ ३२ ॥ यत्पोडशमहादानैःपुण्यंप्रोक्तंमहर्षिभिः ॥ तत्पुण्यंजायतेपुंसांविश्वेशेपुष्पदानतः ॥३३॥ अश्वमेधादिभिर्यज्ञैर्यत्फलंप्राप्यतेखिलैः ॥ पंचामृतानांस्नपनाद्विश्वेशेतदवाप्यते ॥३४॥ राजपेयसहस्रेणसम्यगिष्टेनयत्फलम् ॥ सकृन्महार्हनैवेद्यैर्विश्वेशेतच्छताधिकम् ॥३५॥ ध्वजातपत्रंचमरंविश्वेशेयःसमर्पयेत् ॥ एकच्छत्रंसवै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राज्यंप्राप्नुयाद्वसुधातले ॥ ३६ ॥ महापूजोपकरणंयोर्ग्येद्विश्वभर्तरि ॥ नतंसंपत्तिसंभाराविमुंचंतीहकुत्रचित् ॥ ३७ ॥ सर्वर्तुकुसुमाढ्यांचयः कुर्यात्पुष्पवाटिकाम् ॥ तदंगणेकल्पवृक्षाश्छायांकुर्वंतिशीतलाम् ॥३८॥ यःक्षीरस्नपनार्थंवैविश्वेशेधेनुमर्पयेत् ॥ क्षीरार्णवतटेतस्यनिवसेयुःपितामहाः ॥ ॥ ३९ ॥ विश्वेशराजसदनेयःसुधांचित्रमेववा ॥ कारयेत्तस्यभवनंकैलासंचित्रितंभवेत् ॥ ४० ॥ ब्राह्मणान्यतिनोवापितथैवशिवयोगिनः ॥ भोजये द्योत्रवैकाश्यामेकैकगणनाक्रमात् ॥ ४१ ॥ कोटिभोज्यफलं..स्यश्रद्धयानात्रसंशयः ॥ तपस्तत्रप्रकर्तव्यंदानमत्रप्रदापयेत् ॥ ४२ ॥ विश्वेशस्तोषणी योत्रस्नानहोमजपादिभिः ॥ अन्यत्रकोटिजप्येनयत्फलंप्राप्यतेनरैः ॥ अष्टोत्तरशतंजप्त्वातदत्रसमवाप्यते ॥ ४३ ॥ कोटिहोमेनयत्प्रोक्तंफलमन्यत्रसू रिभिः ॥ अष्टोत्तराहुतिशतात्तदत्रानंदकानने ॥ ४४ ॥ योजपेद्रुद्रसूक्तानिकाश्यांविश्वेशसन्निधौ ॥ पारायणेनवेदानांसर्वेषांफलमाप्यते ॥ ४५ ॥

तस्यपुण्यंनजानामिचिंतितेचाक्षरेपरे ॥ काश्यांनित्यंप्रवस्तव्यंसेव्योत्तरवहासदा ॥ ४६ ॥ आपद्यपिहिघोरायांकाशीत्याज्यानकुत्रचित् ॥ यतःसर्वा पदांहर्तात्राताविश्वपतिःप्रभुः ॥ ४७ ॥ ..वंध्यंदिवसंकुर्यात्स्नानदानजपादिभिः ॥ यतःकाश्यांकृतंकर्ममहत्त्वायप्रकल्पते ॥ ४८ ॥ कृच्छ्रचांद्रायणा..ी निकर्तव्यानिप्रयत्नतः ॥ तथेंद्रियविकाराश्चनबाधंतेत्रकर्हिचित् ॥ ४९ ॥ यदींद्रियाणिकुर्वंतिविक्रियामिहदेहिनाम् ॥ तदात्रवा..सिद्धिर्विद्येभ्योनै वलभ्यते ॥ ५० ॥ ॥ अगस्त्यउवाच ॥ ॥ कृच्छ्रचांद्रायणादीनिव्यासोवक्ष्यतियानिवै ॥ तेषांस्वरूपमाख्याहिस्कंदेंद्रियविशुद्धये ॥ ५१ ॥ ॥ स्कंदउवाच ॥ ॥ कथयामिमहाबुद्धेकृच्छ्रादीनितवाग्रतः ॥ यानिकृत्वात्रमनुजोदेहशुद्धिंलभेत्पराम् ॥ ५२ ॥ एकभक्तेननक्तेनतथैवायाचितेनच ॥ उपवासेनचैकेनपादकृच्छ्रःप्रकीर्तितः ॥ ५३ ॥ वटोदुंबरराजीवबिल्वपत्रकुशोदकम् ॥ प्रत्येकंप्रत्यहंपीतंपर्णकृच्छ्रःप्रकीर्तितः ॥५४॥ पिण्याकघृततक्रां बुसक्तूनांप्रतिवासरम् ॥ एकैकमुपवासश्चकृच्छ्रःसौम्यःप्रकीर्तितः ॥ ५५ ॥ हविषाप्रातरश्नीतहविषासायमेवच ॥ हविषायाचितंत्रींस्तुसोपवासस्त्र्यहं वसेत् ॥ ५६ ॥ एकैकंग्रासमश्नीयादहानित्रीणिपूर्ववत् ॥ त्र्यहंचोपवसेदंत्यमतिकृच्छ्रंचरन्द्विजः ॥ ५७ ॥ कृच्छ्रातिकृच्छ्रंपयसादिवसानेकविंशतिः ॥ द्वादशाहोपवासेनपराकःपरिकीर्तितः ॥ ५८ ॥ त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम् ॥ त्र्यहंचोपवसेदंत्यंप्राजापत्यंचरन्द्विजः ॥ ५९ ॥ गोमूत्रंगोमयं क्षीरंदधिसर्पिःकुशोदकम् ॥ एकरात्रोपवासश्चकृच्छ्रःसांतपनःस्मृतः ॥ ६० ॥ पृथक्सांतपनद्रव्यैःषडहःसोपवासकः ॥ सप्ताहेनतुकृच्छ्रोयंमहासांतपनः स्मृतः ॥ ६१ ॥ तप्तकृच्छ्रंचरन्विप्रोजलक्षीरंघृतानिलान् ॥ एतांस्त्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितः ॥ ६२ ॥ त्र्यहमुष्णांःपिबेदापस्त्र्यहमुष्णंपयःपि बेत् ॥ त्र्यहमुष्णंघृतंप्राश्यवायुभक्षोदिनत्रयम् ॥ ६३ ॥ पलमेकंपयःपीत्वासर्पिषश्चपलद्वयम् ॥ पलमेकंतुतोयस्यतप्तकृच्छ्रउदाहृतः ॥ ६४ ॥ गोमूत्रे णसमायुक्तंयावकंयःप्रयोजयेत् ॥ कृच्छ्रमेकाह्निकंप्रोक्तंशरीरस्यविशोधनम् ॥ ६५ ॥

हस्तावुत्ता..ःकृत्वादिवसंमारुताशनः ॥ रात्रौजलेस्थितोव्युष्टःप्राजापत्येनतत्समम् ॥ ६६॥ एकैकंह्रासयेद्ग्रासंकृष्णेशुक्लेचवर्धयेत् ॥ उपस्पृशंस्त्रिषवण मेतच्चांद्रायणंस्मृतम् ॥ ६७ ॥ एकैकंवर्धयेद्ग्रासंशुक्लेकृष्णेचह्रासयेत् ॥ भुंजीतदर्शेनोकिंचिदेषचांद्रायणोविधिः ॥६८॥ चतुरःप्रातरश्नीयात्पिंडान्विप्रः समाहितः ॥ चतुरोस्तमितेसूर्येशिशुचांद्रायणंस्मृतम् ॥ ६९ ॥ अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदिनेस्थिते ॥ नियतात्माहविष्यस्ययतिचांद्रायणं स्मृतम् ॥ ७० ॥ यथाकथंचित्पिंडानांतिस्रोशीतीःसमाहितः ॥ मासेनाश्नन्हविष्यस्यचंद्रस्यैतिसलोकताम् ॥ ७१ ॥ अद्भिर्गात्राणिशुध्यंतिमनःसत्ये नशुद्ध्यति ॥ विद्यातपोभ्यांभूतात्माबुद्धिर्ज्ञानेनशुद्ध्यति ॥७२॥ तच्चज्ञानंभवेत्पुंसांसम्यक्काशीनिषेवणात् ॥ काशीनिषेवणेनस्याद्विश्वेशकरुणोदयः ॥ ॥ ७३ ॥ ..तोमहोदयावाप्तिःकर्मनिर्मूलनक्षमा ॥ अतःकाश्यांप्रयत्नेनस्नानंदानंतपोजपः ॥७४॥ व्रतंपुराणश्रवणंस्मृत्युक्ताध्वनिषेवणम् ॥ प्रतिक्षणंप्रति दिनंविश्वेशपदचिंतनम् ॥ ७५ ॥ लिंगार्चनंत्रिकालंचलिंगस्यापिप्रतिष्ठितिः ॥ साधुभिःसहसंलापोजल्पःशिवशिवेतिच ॥७६॥ अतिथेश्चापिसत्कारो मैत्रीतीर्थनिवासिभिः ॥ आस्तिक्यबुद्धिर्विनयोमानामानसमानधीः ॥ ७७ ॥ अकामितात्वनौद्धत्यमरागित्वमहिंसनम् ॥ अप्रतिग्रहवृत्तिश्चमति श्चानुग्रहात्मिका ॥ ७८ ॥ अदंभितात्वमात्सर्यमप्रार्थितधनागमः ॥ अलोभित्वमनालस्यमपारुष्यमदीनता ॥ ७९ ॥ इत्यादिसत्प्रवृत्तिश्चकर्तव्याक्षे त्रवासिना ॥ प्रत्यहंचेतिशिष्येभ्यःसधर्ममुपदेक्ष्यति ॥ ८० ॥ नित्यंत्रिषवणस्नायीनित्यंभिक्षाकृताशनः ॥ लिंगपूजार्चकोनित्यमित्थंव्यासोवसेत्पुरा ॥ ॥ ८१ ॥ एकदातस्..जिज्ञासांकर्तुंदेवींहरोवदत् ॥ अद्यभिक्षाटनंप्राप्तेव्यासेपरमधार्मिके ॥ ८२ ॥ अपिसर्वगतेक्वापिभिक्षांमायच्छसुंदरि ॥ तथे त्युक्त्वाभवानीसाभवंभवनिवारणम् ॥ ८३ ॥ नमस्कृत्यप्रतिगृहंतस्यभिक्षांन्यषेधयत् ॥ समुनिःसहितःशिष्यैर्भिक्षामप्राप्यदूनवत् ॥ ८४ ॥ वेलाति क्रममालोक्यपुनर्वभ्रामतांपुरीम् ॥ गृहेगृहेपरिप्राप्ताभिक्षान्यैःसर्वभिक्षुकैः ॥८५॥ तदह्निनालभद्भिक्षांसशिष्यःसमुनिःक्वचित् ॥ अथसायंतनंकर्मकृत्वा छात्रैःसमन्वितः ॥ ८६ ॥ उपोषणपरोभूत्वातथैवासीदहर्निशम् ॥ अथान्येद्युर्मुनिर्व्यासःकृत्वामाध्याह्निकंविधिम् ॥ ८७ ॥

ययौभिक्षाटनंकर्तुंसशिष्यःपरितःपरीम् ॥ सर्वत्रसपरिभ्रांतःप्रतिसौधंमुहुर्मुहुः ॥ ८८ ॥ नक्वापिलब्धवान्भिक्षांभाग्यहीनोधनंयथा ॥ अथचिंतितवा न्व्यासःपरिश्रांतःपरिभ्रमन् ॥ ८९ ॥ कोहेतुर्यन्नलभ्येतभिक्षायत्नेनरक्षिता ॥ अंतेवासिनआहूयव्यासःपप्रच्छ..खिलान् ॥ ९० ॥ भवद्भिरपिनोभि क्षापरिप्राप्तेतिगम्यते ॥ किमत्रपुरिसंवृत्तंद्वित्रायातममाज्ञया ॥ ९१ ॥ द्वितीयेह्न्यपियद्भिक्षानलभ्येतातियत्नतः ॥ अनिष्टंकिंचिदत्रासीन्महागुरुनिपात जम् ॥ ९२ ॥ अन्नक्षयोवासर्वस्यांनगर्यामभवत्क्षणात् ॥ राजदंडोथयुगपज्जातःसवपुरौकसाम् ॥ ९३ ॥ अथवावारिताभिक्षाकेनाप्यस्मासुचेर्ष्यया ॥ पुरौकसोभवन्दुस्थास्तूपसर्गेणकेनचित् ॥ ९४ ॥ किमेतदखिलंज्ञात्वासमागच्छतसत्वरम् ॥ द्वित्राः पवित्रचरणात्प्राप्यानुज्ञांगुरोरथ ॥ समाचख्युः समागम्यदृष्ट्वर्द्धितत्पुरौकसाम् ॥ ९५ ॥ ॥ शिष्याऊचुः ॥ ॥ शृण्वंत्वाराध्यचरणानोपसर्गोत्रकश्चन ॥ नान्नक्षयोवासर्वस्यांनगर्यामिहकुत्रचित् ॥ ॥ ९६ ॥ यत्रविश्वेश्वरःसाक्षाद्यत्राऽमरधुनीस्वयम् ॥ त्वादृशायत्रमुनयःक्वभीस्तत्रोपसर्गजा ॥ ९७ ॥ समृद्धिर्यागृहस्थानामिहविश्वेशितुःपुरि ॥ नस र्द्धिरस्तिवैकुंठेत्वल्पास्..अलकादयः ॥ ९८ ॥ रत्नाकरेपुरत्नानिनतावंतिमहामुने ॥ यावंतिसंतिविश्वेशनिर्माल्योपभुजांगृहे ॥ ९९ ॥ गृहेगृहेत्रधान्यानां राशयोयादृशःपुनः ॥ नतादृशःकल्पवृक्षदत्ताऐंद्रेपुरेक्वचित् ॥ १०० ॥ यत्रसाक्षाद्विशालाक्षीसुविस्तारफलप्रदा ॥ नतत्रपुरिसर्वस्यांनरोवैनिर्धनःक्व चित् ॥ १ ॥ निर्वाणलक्ष्म्याःसदनेत्वस्मिन्नानंदकानने ॥ मोक्षोपियत्रसुलभःकिमन्यत्तत्रदुर्लभम् ॥ २ ॥ सीमंतिन्यःस्त्रियःसर्वाःपतिव्रतपरायणाः ॥ सर्वाभवानीरूपिण्योविश्वेशार्पितसत्क्रियाः ॥३॥ यावंतःपुरुषाःकाश्यांसर्वएवगणाधिपाः ॥ सर्वएवकुमारावैसर्वेतारकदृष्टयः ॥४॥ त्रिपुंड्रांकितभालाये तेसर्वेचंद्रमौलयः ॥ उपसर्गसहस्रैश्चपीड्यमानाअपीहये ॥ ५ ॥ नत्यजंतिसदाकाशींसर्वज्ञाएवतेखिलाः ॥ गृहेगृहेपिवटवोब्रह्मवादविवादिनः ॥ ६ ॥ स्वर्धुनीधूतकलुषाःसंतीहचतुराननाः ॥ निर्वाणलक्ष्मीपतयःक्षेत्रसंन्यासकारिणः ॥७॥ सर्वएवहृषीकेशाःसर्वेवैपुरुषोत्तमाः ॥ अच्युताएवविज्ञेयाएतत्क्षे त्रपरिग्रहाः ॥ ८ ॥ स्त्रियोवापुरुषावापिसर्वएवनसंशयः ॥ सर्वएवत्रिनयनाःसर्वएवचतुर्भुजाः ॥ ९ ॥ श्रीकंठाःसर्वएवात्रसर्वेमृत्युंजयाध्रुवम् ॥ मोक्षश्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रितवष्मा णस्त र्धनारीश्वरायतः ॥ ११० ॥ धर्मराशिःपरश्चात्रमहांतोऽत्रार्थराशयः ॥ सर्वेकामाःफलंत्यत्रकैवल्यंचात्रनिर्मलम् ॥ ११ ॥

नगर्भवाससंसर्गःकाशीसंस्थितिकारिणाम् ॥ नकलिश्चात्रबाधेतकालोनैवप्रबाधते ॥ १२ ॥ एनांसिनात्रबाधंतेविश्वेशशरणार्थिनः ॥ यत्रविश्वेश्वरः साक्षान्नादबिंदुकलात्मकः ॥ १३ ॥ ध्वनिरूपोहितत्रास्तिप्रणवोमंत्रविग्रहः ॥ अतोविग्रहवंतोत्रसंतिवेदाविनिश्चितम् ॥ १४ ॥ सरस्वतीसरिद्रूपाह्यतः शास्त्रनिकेतनम् ॥ आनंदकाननंसर्वधर्मशास्त्रकृतालयम् ॥ १५ ॥ यावंतोदिविदेवास्तावंतोऽमृपानहि ॥ नीराजयंतिविश्वेशंरात्रौरात्रौसदाऽव्ययः ॥ ॥ १६ ॥ स्वफणामणिदीपैश्चप्राप्यकाशीरसातलात् ॥ समुद्राःसर्वएवात्रकामधेनुब्रजाजिरा ॥ १७ ॥ पंचपीयूषधाराभिर्विश्वेशस्नपनंहि ॥ मंदारःपारिजातश्चसंतानोहरिचंदनः ॥ १८ ॥ कल्पद्रुमश्चपंचैतेतरुभिःसहसर्वदा ॥ १९ ॥ सर्वेसुरनिकायाश्चसर्वएवमहर्षयः ॥ योगिनःसर्वएवात्रकाशीनाथमुपासते ॥ १२० ॥ विद्यानांसदनंकाशीकाशीलक्ष्म्याःपरालयः ॥ मुक्तिक्षेत्रमिदंकाशीकाशीसर्वात्रयीमयी ॥ २१ ॥ इतिश्रुत्वामुनिवरःपाराशर्योमहातपाः ॥ एवंबभाषेतांश्शिष्यान्पुनःश्लोकंपठंत्वमुम् ॥ २२ ॥ ॥ शिष्याऊचुः ॥ ॥ विद्यानांचाश्रयःकाशीकाशीलक्ष्म्याःपरालयः ॥ मुक्तिक्षेत्रमिदंकाशी काशीसर्वात्रयीमयी ॥ २३ ॥ ॥ स्कंदउवाच ॥ ॥ निशम्येतिदाव्यासःक्रोधांधीकृतलोचनः ॥ क्षुत्कृशानुज्वलन्मूर्तिःकाशींशप्त्यतिरुंभज ॥ ॥ २४ ॥ ॥ व्यासउवाच ॥ ॥ माभूत्रैपुरुषीविद्यामाभूत्रैपूरुषंधनम् ॥ माभूत्रैपूरुषीमुक्तिःकाशींव्यासःशपन्निति ॥ २५ ॥ गर्व परोत्रविद्यानांधनगर्वो त्रवैमहान् ॥ मुक्तिगर्वेणनोभिक्षांप्रयच्छंत्यत्रवासिनः ॥ २६ ॥ इतिकृत्वातिव्यासःकाश्यांशापमदात्तदा ॥ दत्त्वापिशापंसमुनिर्भिक्षितुंक्रोधवान्ययौ ॥ ॥ २७ ॥ प्रतिगेहंत्वरायुक्तःप्रविशन्व्योमदत्तदृक् ॥ वभ्रामनगरींसर्वांकापिभिक्षांनलब्धवान् ॥ २८ ॥ अंशुमालिनमाधीक्ष्यमानंरोहितमंडलम् ॥ भिक्षापात्रंपरिक्षिप्यनिर्ययावाश्रमंप्रति ॥ २९ ॥ अथगच्छन्महादेव्यागृहद्वारिनिपण्णया ॥ प्राकृतस्त्रीस्वरूपिण्याभिक्षायैप्रार्थितोतिथिः ॥ १३० ॥ ॥ गृहिण्युवाच ॥ ॥ भगवन्भिक्षुकास्तावद्बहवोद्यानकुत्रचित् ॥ असत्कृत्यातिथिंनाथोनगमेद्भोक्ष्यतिकर्हिचित् ॥ ३१ ॥ वैश्वदेवादिकंकर्मकृत्वागृहपतिर्मम ॥ प्रतीक्षेतातिथिंयावत्तस्मात्त्वमतिथिर्भव ॥ ३२ ॥ विनातिथिंगृहस्थोयस्त्वन्नमेकोनिषेवते ॥ निषेवतेऽघंसपरंक्षित्तःस्वपितामहः ॥ ३३ ॥

तस्मात्त्वरितमायाहिकुरुमेपत्युरीहितम् ॥ गार्हस्थ्यंसफलंकर्तुमिच्छतोऽतिथिपूजनात् ॥ ३४ ॥ इतिश्रुत्वागतामर्पोव्यासस्तामाहविस्मितः ॥ ॥ व्यासउवाच ॥ ॥ भद्रेकात्वंकुतःप्राप्तापूर्वंदृष्टानकुत्रचित् ॥ ३५ ॥ मन्येधर्ममयीमूर्तिःकापित्वंशुचिमानसा ॥ त्वद्दर्शनात्परांप्रीतिंसंप्राप्तानींद्रियाणिमे ॥ ३६ ॥ त्वंसुधेवभवेःप्रायःसर्वावयवसुंदरि ॥ मंदराघातसंत्रासात्त्यक्तक्षीरार्णवस्थितिः ॥ ३७ ॥ कलासुधाकरस्याथकुहूरात्रुभयार्दिता ॥ सीमंतिनीस्वरूपेणतिष्ठेःकाश्यामनिर्भया ॥ ३८ ॥ अथवाकमलासित्वंविहायकमलालयम् ॥ निशिसंकोचिनंकाश्यांविकाशिन्यांवसेःसदा ॥ ३९ ॥ किंवा नुकरुणामूर्तिरिहकांशिनिवासिनाम् ॥ सर्वदुःखोवहरिणीपरानंदप्रदायिनी ॥ १४० ॥ वाराणस्याःकिमथवाऽधिष्ठात्रीदेवतात्वमु ॥ किंवानिर्वाणलक्ष्मीस्त्वंयाकाश्यांपरिगीयते ॥ ४१ ॥ स्वपाकंयायजंकंवाप्रातिऽलंकुर्वतीसमम् ॥ मद्भाग्यंवापरिणतमेतद्योपित्स्वरूपतः ॥ ४२ ॥ अथवासाभवेच्चूनंयाऽरे रे परिगीयते ॥ भक्तपेतप्रदाभक्त्याभवानीभवनाशिनी ॥ ४३ ॥ सर्वथैवनवारीत्वंनासुरीनैवकिन्नरी ॥ विद्याधरीननोनागीनोगंधर्वीनयक्षिणी ॥ ४४ ॥ त्वमिष्टदेवतेवासिकाचिन्मेमोहहारिणी ॥ केयंचिंताथवामेत्रकाचित्त्वंभवसुंदरि ॥ ४५ ॥ परंवानस्म्यहंजातस्तवदर्शनतोऽधुना ॥ अवश्यमेवकर्तास्मिन्ना देशंयतदादिश ॥ ४६ ॥ एकंतपोव्ययंहित्वाकारयिष्यसियत्पुनः ॥ तदेवाहंकरिष्यामिविधेयःशुभलोचने ॥ ४७ ॥ नवचस्त्व शीनांहिमहत्त्वंह्यपपत्स्यताम् ॥ परंत्वंकासिसुभगेसत्यंब्रूहिममाग्रतः ॥ ४८ ॥ अथवातवदेहेस्मिन्कासत्यंनिर्मलेक्षणे ॥ इतिपृष्टाहमुनिनासाविश्वायुर्घटोद्भव ॥ ४९ ॥ अत्रत्यस्यैवहिमुनेर्गृहिणीगृहमेधिनः ॥ नित्यंवीक्षेचरंतंत्वांभिक्षांशिष्यगणैर्वृतम् ॥ १५० ॥ त्वमेवमानोजानीषेजात्वामहमेवहि ॥ तपःक्रियाविधिर्नित्यंकिंबहूक्तेनयावन्नास्तंव्रजेद्रविः ॥ ५१ ॥ प्राणनाथस्यतावदातिथ्यंसफलीकुरु ॥ तच्छ्रुत्वासमुनिःप्राहावनयानतकंधरः ॥ ५२ ॥ ॥ व्यासउवाच ॥ ॥ अस्तिमेनियमःकश्चित्सासिद्धिंचेद्व्रजेच्छुभे ॥ एकभिक्षांतदाहंतुकरिष्येनान्यथापुनः ॥ ५३ ॥ तपस्व्युदीरितंश्रुत्वासाप्रोवाचवचस्ततः ॥ अविशंकंवदमुनेकस्तेस्तिनियमःसुधीः ॥ ५४ ॥

ममभर्तुःप्रसादेनकिंचिन्यूनंयतोऽत्रन ॥ इतिश्रुत्वाप्रहृद्यात्मासतामाहतपोधनः ॥ ५५ ॥ अयुतंममशिष्याणांतैःसपक्तिमहंवृणे ॥ अस्तंयावन्नयात्यर्कस्तावन्नोस्त्येन्यथानहि ॥ ५६ ॥ निशम्येतिप्रहृद्यात्मासाप्रोवाचशुर्निततः ॥ किंविलंबेनतद्याहिसर्वांश्शिष्यान्समाह्वय ॥ ५७ ॥ पुनःप्राहसतांसाध्वि नेतावत्सिद्धिरस्तिते ॥ येनतृप्तिंगमिष्यंतिमच्छिष्याःसर्वएवते ॥ ५८ ॥ स्मित्वाथसात्रवीत्तंतुमुनेर्भर्तुरनुग्रहात् ॥ सिद्धमेवसदेवास्तेसर्वतावन्ममालये ॥ ॥ ५९ ॥ यावतार्थिजनस्तृप्तिंगतिसर्वोपिसर्वशः ॥ वयंनतादृङ्महिलाभर्तुर्संदेहकारेकाः ॥ १६० ॥ आयातोर्थीयदागेहेसिद्धंकार्यंतदेवहि ॥ परिपूर्णादिशःसर्वाःपरिपूर्णामनोरथाः ॥ ६१ ॥ परिपूर्णंगृहंसर्वंपत्युःपादप्रसादतः ॥ याहितूर्णंसमायाहियावद्वन्नार्थिभिःसह ॥ ६२ ॥ पतिर्मेबहुकालीनःकालंनसहतेचिरम् ॥ प्रियातिथिंःप्रियतमस्तदातिथ्यसमृद्धये ॥ ६३ ॥ आशुगत्वासमागच्छयावन्नास्तमितोरविः ॥ इतिप्रहृष्टस्त्वरितःशिष्यानाहूयसर्वतः ॥ ॥ ६४ ॥ आगत्यतांपुनःप्राहद्वात्तन्मार्गलोचनाम् ॥ मातःसर्वेसमायातास्त्वरितंदेहिभोजनम् ॥ ६५ ॥ अस्त्याचलंहिसमयासमियंदेपभास्करः ॥ इत्युक्तामंदिरस्यांतर्विविशुस्तेतपोधनाः ॥ ६६ ॥ तन्मंडपमणिंज्योतिस्तत्याहितदिनश्रियः ॥ यावद्गच्छंतितत्सौधमध्यमाश्रुतपस्विनः ॥ ६७ ॥ पादौप्रक्षाल्यतावत्तेकेश्चित्केश्चित्समर्च्यच ॥ कतिचित्परिविष्टान्नाभोक्तुमेवोपवेशिताः ॥ ६८ ॥ तद्दिव्यपाकंसंभारान्दृष्ट्वातद्दृष्यःक्षणात् ॥ परांतृप्तिमुपागच्छन्प्राणन्यामोदराजिभिः ॥ ६९ ॥ अतितृप्तिसमापन्नास्तेतदन्ननिषेवणात् ॥ आचांताश्चंदनेःलग्निरंवरैःपरिभूषिताः ॥ १७० ॥ अथसांध्यंविधिंकृत्वाप्रोपविश्यतदग्रतः ॥ अभिनंद्यमहाशीर्भिर्यावद्वंतुंप्रचक्रमुः ॥ ७१ ॥ तावद्गृहस्थेनगृहिणीसाकटाक्षिता ॥ पप्रच्छतीर्थेवसतांकोधर्मोमुख्यएवहि ॥ ७२ ॥ तथातदनुसारेणतीर्थेवर्तामहेवयम् ॥ सर्वधर्मविदांश्रेष्ठःश्रुत्वातद्गृहिणीवचः ॥ ७३ ॥ तदादरसुधाक्लिन्नमहान्नस्वादतर्पितः ॥ प्रत्युवाचमुनिर्व्यासःस्मित्वातांसर्ववित्तमाम् ॥ ७४ ॥ ॥ व्यासउवाच ॥ ॥ स्वच्छांतःकरणेमातर्महामिष्टान्नमानदे ॥ सएषधर्मोनान्योस्तियत्त्वयापरिचर्यते ॥ ७५ ॥

त्वमेवधर्मजानासिपतिशुश्रूषणेरता ॥ यदिपृच्छसिमांसत्यंतदाकिंचनवच्मिते ॥ ७६ ॥ वक्तव्यमेवपृष्टेनमनागपिविजानता ॥ सएवधर्मःसुभगेनान्योधर्मोस्तिकश्चन ॥ ७७ ॥ येनैपतोपमायातितवभर्ताचिरंतनः ॥ ॥ गृहिण्युवाच ॥ ॥ अयंधर्मोभवेच्चूनंक्रियतेचत्स्वशक्तितः ॥ ७८ ॥ साधारणानिधर्माणिसंपृच्छेतानिमेवद ॥ ॥ व्यासउवाच ॥ ॥ अनुद्वेगकरंवाक्यंपरोत्कर्षसहिष्णुता ॥ ७९ ॥ विचार्यकारितानित्यंस्वधिष्ण्योदयचिंतनम् ॥ गृहस्थउवाच ॥ ॥ एषधर्मःपुनर्भद्रेस्त्वयिकोस्तीहतद्वद ॥ १८० ॥ ततस्त्यगितव्यासस्तस्थौकिंचिन्नचोक्तवान् ॥ ततःपुनर्गृहस्थेनसहिप्रोक्तस्तपो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धनः ॥ ८१ ॥ यद्येतएववेधर्मास्त्वयायेप्रतिपादिताः ॥ तदांततातवैक्षिदानंशापस्यचोत्तमम् ॥ ८२ ॥ त्वय्येवहिदयासम्यग्धैर्यंत्वय्येवचोत्तमम् ॥ त्वयिसंभावनास्त्येवक्रामक्रोधविनिग्रहे ॥ ८३ ॥ त्वमेवसम्यग्ज्ञानीपेवकुंचेद्विगर्वजितम् ॥ त्वय्येवसम्यग्दृश्येतपरोत्कर्षसहिष्णुता ॥ ८४ ॥ विचार्य कारिताया श्चत्वमेवनिलयोमहान् ॥ स्वस्यधिष्ण्यस्यचभवांश्चिंतयेदुदयंध्रुवम् ॥ ८५ ॥ समैकंह्रहिभोविद्वच्छापंदद्याच्चयःकुधा ॥ अलभन्त्वार्थसंसिद्धिमभाग्यात्तस्यैकस्यसः ॥ ८६ ॥ ॥ व्यासउवाच ॥ ॥ यःस्वार्थसिद्धिमलभन्नभाग्याच्छपतिक्रुधा ॥ सशापःप्रत्युतश्रेच्छहुरेवाविवेकिनः ॥ ८७ ॥ ॥ गृहस्थउवाच ॥ ॥ भवताम्रमताविप्रनाताभिक्षायदाप्यहो ॥ तदापराद्धंकिमिहवराकैःक्षेत्रवासिभिः ॥ ८८ ॥ तपास्विन्शृणुमे वाक्यंराजधान्यांममेहयः ॥ ऋद्धिंद्रष्टुंनशक्नोतिपरिशांतःसएवहि ॥ ८९ ॥ अद्यप्रभृतिनक्षेत्रेमदीयेशापवर्जिते ॥ आवसक्रोधनमुनेनवासेयोग्यताव्रते ॥ ॥ १९० ॥ इदानीमेवनिर्गच्छबहिःक्षेत्रादितोभव ॥ त्वद्विधानांनयोग्यंमेक्षेत्रंमोक्षैकसाधनम् ॥ ९१ ॥ अत्रालपमपियद्दोष्प्यंकृतंमत्क्षेत्रवासिनाम् ॥ तद्दौष्प्यंस्यपरीपाकोरुद्रपैशाच्यमेवहि ॥ ९२ ॥ तच्छ्रुत्वावेपमानःसपरिशुष्कोष्ठतालुकः ॥ जगामशरणंगौरींलुठंस्तच्चरणाग्रतः ॥ ९३ ॥ उवाचचवचोमातस्त्राहित्राहिभृशंरुदन् ॥ अनाथस्त्वत्सनाथोहंबालिशस्तवबालकः ॥ ९४ ॥ शरणागतंचसंत्राहिरक्षशरणागतम् ॥ बहूनामागसांगेहमस्माकंदुष्टमानसम् ॥ ९५ ॥ शंभुशापोऽन्यथाकर्तुंभवत्यापिनशक्यते ॥ अहंचशरणायातस्तदेकंक्रियतांशिवे ॥ ९६ ॥ प्रत्यहंमिसदाक्षेत्रेप्रतिभूतंचपार्वति ॥ दिशप्रवेशनादेशंनेशस्तद्वाक्यलंघकः ॥ ९७ ॥ इत्युक्तातेनशुनिनाभवानीकरुणाजनिः ॥ सुखंमहेशितुर्वीक्ष्यतथेत्याहतदाज्ञया ॥ ९८ ॥ अथांतर्हितवंतौतौशिवौक्षेत्रशिवंकरौ ॥ व्यासोपिनिर्ययौक्षेत्रात्त्वापराधवशंवदन् ॥ ९९ ॥

अहोरात्रंसपश्यन्क्षेत्रंक्षेत्रदृष्टेरदूरगम् ॥ प्राप्याष्टमींचभूतांचमध्येक्षेत्रंसदाविशेत् ॥ २०० ॥ लोलार्कादग्निदिग्भागेस्वर्धुनीपूर्वरोधसि ॥ स्थितोह्यद्यापश्येत्सकाशीप्रासादराजिकाम् ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ इत्थंकुंभजसव्यासःक्षेत्रेशापंप्रदास्यति ॥ क्षेत्रशापप्रदानाच्चबहिर्यास्यतितत्क्षणात् ॥ ॥ २ ॥ अतएवाविमुक्तस्यक्षेत्रस्यशुभशंसिनः ॥ भविष्यतिशुभंनित्यमन्यथात्वन्यथैवहि ॥ ३ ॥ श्रुत्वाध्यायमिमंपुण्यंव्यासशापविमोक्षणम् ॥ महादुर्गोपसर्गेभ्योभयंतस्यनकुत्रचित् ॥ २०४ ॥ ॥ इतिश्रीस्कंदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेव्यासशापविमोक्षणंनामपण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ७ ॥ ॥ अगस्त्यउवाच ॥ ॥ एतद्वृत्तंश्रुत्वाहंव्यासस्यशिवनंदन ॥ आश्चर्यभाजनंजातस्तीर्थानिकथयाधुना ॥ १ ॥ आनंदकाननेयानियत्रसंतिषडानन ॥ तानिलिंगस्वरूपाणिसमाचक्ष्वममाग्रतः ॥ २ ॥ ॥ स्कंदउवाच ॥ ॥ अयमेवहिवेप्रश्रोदेव्यैदेवेनभोस्तदा ॥ यादृशःकथितोवह्निमतादृशंशृणुकुंभज ॥ ३ ॥ ॥ देव्युवाच ॥ ॥ यानियानिहितीर्थानियत्रयत्रमहेश्वर ॥ तानितानीहमेकाश्यांतत्रतत्रवदप्रभो ॥ ४ ॥ ॥ देवदेवउवाच ॥ ॥ शृणुदेविविशालाक्षितीर्थलिंगमुदाहृतम् ॥ जलाशयेपितीर्थाख्यांजातामूर्तिपरिग्रहात् ॥ ॥ ५ ॥ मूर्तयोत्रह्मविष्ण्वर्कशिवविघ्नेश्वरादिकाः ॥ लिंगंशैवमितिख्यातंयत्रतत्तीर्थमेवतत् ॥ ६ ॥ वाराणस्यांमहादेवःप्रथमंतीर्थमुच्यते ॥ तदुत्तरेमहाकूपःसारस्वतपदप्रदः ॥ ७ ॥ क्षेत्रपूर्वोत्तरेभागेतद्दृष्ट्वपशुपाशहृत् ॥ तत्पश्चाद्विघ्नहृतीपूज्यावाराणसीनरैः ॥ ८ ॥ सापूजिताप्रयत्नेनसुखवस्तिप्रदासदा ॥ महादेवस्यपूर्वेणगोप्रेक्षंलिंगमुत्तमम् ॥ ९ ॥ तद्दर्शनाद्भवेत्सम्यग्गोदानजनितंफलम् ॥ गोलोकात्प्रेषितागावःपूर्वंयच्छंभुनास्वयम् ॥ १० ॥ वाराणसींसमायातागोप्रेक्षंतत्ततःस्मृतम् ॥ गोप्रेक्षाद्दक्षिणेभागेदधीचीश्वरसंज्ञितम् ॥ ११ ॥ तद्दर्शनाद्भवेत्पुंसांफलंयज्ञसमुद्भवम् ॥ अत्रीश्वरंतुतत्प्राच्यांम्धुकेऽभूजितम् ॥ १२ ॥ लिंगंदृष्ट्वाप्रयत्नेनवेष्णवंपदमृच्छति ॥ गोप्रेक्षात्पूर्वदिग्भागेलिंगंवैविज्वरंस्मृतम् ॥ १३ ॥ तस्यपूजनान्मर्त्योविज्वरोजायतेक्षणात् ॥ प्राच्यांविदेश्वरस्तस्यचतुर्वेदफलप्रदः ॥ १४ ॥ वेदेश्वरादुदीच्यांतुक्षेत्रज्ञश्चादिकेशवः ॥ दृष्ट्वैत्रिभुवनंसर्वंतस्यसंदर्शनाद्भवम् ॥ १५ ॥

संगमेश्वरमालोक्यतत्प्राच्यांजायतेनघः ॥ चतुर्मुखेनावेधिनातत्पूर्वेणचतुर्मुखम् ॥ १६ ॥ प्रयागसंज्ञकंलिंगमर्चितंत्रह्मलोकदम् ॥ तत्रशांतिकरीगौरीपूजिताशांतिकृद्भवेत् ॥ १७ ॥ वरणायास्तटेपूर्वेपूज्यंकुंतीश्वरंनृभिः ॥ तत्पूजनात्प्रजायतेपुत्रानिजकुलोज्ज्वलाः ॥ १८ ॥ कुंतीश्वरादुत्तरतस्तीर्थंवैकापिलोह्रदः ॥ तत्रवैस्नानमात्रेणवृषभध्वजपूजनात् ॥ १९ ॥ राजसूयस्यचाश्वमेधस्यफलंत्वविकलंभवेत् ॥ रौरवादिपुयेकेचित्पितरःकोटिसंमिताः ॥ २० ॥ तत्रश्राद्धेकृतेपुत्रैःपितृलोकंप्रयांतिते ॥ आनुसूयेश्वरंलिंगंगोप्रेक्षादुत्तरेमुने ॥ २१ ॥ तद्दर्शनाद्भवेत्स्त्रीणांपातिव्रत्यफलंस्फुटम् ॥ तल्लिंगपूर्वदिग्भागेपूज्यः सिद्धिविनायकः ॥ २२ ॥ यांसिद्धिंयःसमीहेतसतामाप्नोतितत्रतेः ॥ हिरण्यकशिपोर्लिंगंगणेशात्पश्चिमेततः ॥ २३ ॥ हिरण्यकूपस्तत्रास्तिहिरण्याश्वसमृद्धिकृत् ॥ २४ ॥ मुंडासुरेश्वरंलिंगंतत्प्रतीच्यांचसिद्धिदम् ॥ अभीष्टदंतुनैर्ऋत्यांगोप्रेक्षादृपभेश्वरम् ॥ २५ ॥ सुनेस्कंदेश्वरंलिंगंमहादेवस्यपश्चिमे ॥ तल्लिंगपूजनाद्वृणांभवेन्मम सलोकता ॥ २६ ॥ तत्पार्श्वतोहिशाखेशोविशाखेशश्चतत्रवै ॥ नैगमेयेश्वरस्तत्रयेन्येनंद्यादयोगणाः ॥ २७ ॥ तेषामपिहिलिंगानितत्रसंतिसहस्रशः ॥ तद्दर्शनाद्भवेत्पुंसांतत्तद्गणसलोकता ॥ २८ ॥ नंदीश्वरात्प्रतीच्यांचशिलादेशःकुधीहरः ॥ महाबलप्रदस्तत्रहिरण्यक्षेश्वरःशुभः ॥ २९ ॥ तद्दक्षिणेट्टहासाख्यंलिंगंसर्वसुखप्रदम् ॥ प्रसन्नवदनेशाख्यंलिंगंतस्योत्तरेशुभम् ॥ ३० ॥ प्रसन्नवदनस्तिष्ठेद्रुद्रस्तद्दर्शनाच्छुभात् ॥ तदुत्तरेप्रसन्नोदंकुंडनेर्मल्यदंनृणाम् ॥ ३१ ॥ प्रतीच्याभट्टहासस्यमित्रावरुणनामनी ॥ लिंगेतल्लोकदेपूज्येमहापातकहारिणी ॥ ३२ ॥ नैर्ऋत्यांचाट्टहासस्यवृद्धवासिष्टसंज्ञकम् ॥ लिंगंतत्पूजनात्पुंसांज्ञानमुत्पद्यतेमहत् ॥ ३३ ॥ वसिष्टेशसमीपस्थःकृष्णेशोविष्णुलोकदः ॥ तद्याम्यांयाज्ञवल्क्येशोत्रह्मते जोविवर्धनः ॥ ३४ ॥ प्रह्लादेश्वरमभ्यर्च्यतत्पश्चाद्भक्तिवर्धनः ॥ स्वयंलीनःशिवोयत्रभक्तानुग्रहकाम्यया ॥ ३५ ॥ अतःस्वलीनंतत्पूर्वेलिंगंपूज्यंप्रयत्नतः ॥ सदैवज्ञाननिष्ठानांपरमानंदमिच्छताम् ॥ यागतिर्विहितातेषांस्वलीनेसातुतत्यजाम् ॥ ३६ ॥ वैरोचनेश्वरंलिंगंस्वलीनात्पुरतःस्थितम् ॥ तदुत्तरेबलीशंचमहाबलविवर्धनम् ॥ ३७ ॥ तत्रैवलिंगंवाणेशंपूजितंसर्वकामदम् ॥ चंद्रेश्वरस्यपूर्वेणलिंगंविद्येश्वराभिधम् ॥ ३८ ॥

सर्वाविद्याःप्रसन्नाःस्युस्तस्यलिंगस्यसेवनात् ॥ तद्दक्षिणेतुवीरेशोमहासिद्धिविधायकः ॥ ३९ ॥ तत्रैवविकटादेवीसर्वदुःखौघमोचनी ॥ पंचरुद्रंमहापीठंतज्ज्ञेयंसर्वसिद्धिदम् ॥ ४० ॥ तत्रजप्तामहामंत्राःक्षिप्रंसिध्यंतिनान्यथा ॥ तत्पीठेवायुकोणेतुसंपूज्यःसगरेश्वरः ॥ ४१ ॥ तदर्चनादश्वमेधफलंलभ्यविकलंभवेत् ॥ तदीशानेचवालीशस्तिर्यग्योनिनिवारकः ॥ ४२ ॥ महापापौघविध्वंसीसुग्रीवेशस्तदुत्तरे ॥ हनूमदीश्वरस्तत्रब्रह्मचर्यफलप्रदः ॥ ४३ ॥ महाबुद्धिप्रदस्तत्रपूज्योजांघवतीश्वरः ॥ आश्विनेयेश्वरोपूज्योगंगायाःपश्चिमेतटे ॥ ४४ ॥ तदुत्तरेभद्रह्रदोगवांक्षीरेणपूरितः ॥ कपिलानांसहस्रेणसम्यग्दत्तेनयत्फलम् ॥ ४५ ॥ तत्फलंलभतेमर्त्यःस्नातोभद्रह्रदेध्रुवम् ॥ पूर्वाभाद्रपदायुक्तापौर्णमासीयदाभवेत् ॥ ४६ ॥ तदापुण्यतमःकालोवाजिमेधफलप्रदः ॥ ह्रदपश्चिमतीरेतुभद्रेश्वरविलोकनात् ॥ ४७ ॥ गोलोकंप्राप्नुयात्तस्मात्पुण्यत्रेत्रात्रसंशयः ॥ भद्रेश्वराद्यातुधान्यामुपशांतश्चिवोमुने ॥ ४८ ॥ तस्यलिंगस्यसंस्पर्शात्परांशांतिंसमृच्छति ॥ उपशांतशिवंलिंगंदृष्ट्वाजन्मशतार्जितम् ॥ ४९ ॥ त्यजंदश्रेयसोराशिंश्रेयोराशिंचविंदति ॥ तदुत्तरेचचक्रेशो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

योनिचक्रनिवारकः ॥ ५० ॥ तदुत्तरेचकह्लदोमहापुण्यविवर्धनः ॥ स्नात्वाचकह्लदेमर्त्यश्चक्रेशंपरिपूज्यच ॥ ५१ ॥ शिवलोकमवाप्नोतिभावतेनां तरात्मना ॥ तन्नैर्ऋतेचशूलेशोद्रष्टव्यश्चप्रयत्नतः ॥ ५२ ॥ शूलंतत्रपुरान्यस्तंस्नानार्थंवरवर्णिनि ॥ ह्रदस्तत्रसमुत्पन्नःशूलेश्वर्याश्चतोमहान् ॥ ५३ ॥ स्नानंकृत्वाह्रदेतत्रदृष्ट्वाशूलेश्वरंविभुम् ॥ रुद्रलोकंनरायातित्यक्त्वासंसारगह्वरम् ॥५४॥ तत्पूर्वतोनारदेनतपस्तप्तंमहत्तरम् ॥ लिंगंचस्थापितंश्रेष्ठंकुंडंचापिशुभंकृतम् ॥ ५५ ॥ तत्रकुंडेनरःस्नात्वादृष्ट्वानारदेश्वरम् ॥ संसाराब्धिंमहाघोरंसंतरेन्नात्रसंजयः ॥ ५६ ॥ नारदेश्वरपूर्वेणदृष्ट्वाऽवभ्रातकेश्वरम् ॥ निर्मलंगतिमाप्नोतिपापोघंचविमुंचति ॥ ५७ ॥ तदग्रेताम्रकुंडंचतत्रस्नातोनगर्भभाक् ॥ विघ्नहर्तागणाध्यक्षस्तद्वायव्येसुविघ्नहृत् ॥ ५८ ॥ तत्रविद्रुमकुंडंतत्रस्नातोनविघ्नभाक् ॥ अनारकेश्वरंलिंगंतदुदग्दिशिचोत्तमम् ॥ ५९ ॥ कुंडंचाङ्गारकाख्यंवैतत्रस्नातोननारकी ॥ वरणायास्तटेरम्येवरणेशस्तदुत्तरे ॥ ६० ॥ तत्रपाशुपतःसिद्धस्त्वक्षपादोमहामुने ॥ अनेनैवशरीरेणशाश्वतींसिद्धिमागतः ॥ ६१ ॥ तत्पश्चिमेचशैलेशःपरनिर्वाणकारकः ॥ कोटीश्वरंतुतद्याम्यांलिंगंशाश्वतसिद्धिदम् ॥ ६२ ॥ कोटितीर्थेह्रदेस्नात्वाकोटीशंपरिपूज्यच ॥ गवांकोटिप्रदानस्यफलमाप्नोतिमानवः ॥ ६३ ॥ महाश्मशानस्तंभोस्तिकोटीशाद्रह्रिदिक्स्थितः ॥ तस्मिन्स्तंभेमहारुद्रस्तिष्ठतेचोमयासह ॥ ६४ ॥

तंस्तंभंसमलंकृत्यनरस्तत्पदमाप्नुयात् ॥ तत्रैवतीर्थपरमंकपालेशसमीपतः ॥६५॥ कपालमोचनंनामतत्रस्नातोऽश्वमेधभाक् ॥ ऋणमोचनतीर्थंतुतदुदग्दिशिशोभनम् ॥ ६६ ॥ तत्रतीर्थेनरःस्नात्वामुक्तोभवतिचर्णतः ॥ तत्रैवांगारकंतीर्थंकुंडंचांगारनिर्मलम् ॥ ६७ ॥ स्नात्वांगारकतीर्थेतुभवेद्भूयोनगर्भभाक् ॥ अंगारवारयुक्तायांचतुर्थ्यांस्नातियोनरः ॥ व्याधिभिर्नाभिभूयेतनचदुःखीकदाचन ॥ ६८ ॥ विश्वकर्मेश्वरंलिंगंज्ञानदंचतदुत्तरे ॥ महाकुंडेश्वरंलिंगंतस्यदक्षिणतःशुभम् ॥ ६९ ॥ कूपःशुभोदनामापिस्नातव्यंतत्रनिश्चितम् ॥ तत्रमुंडमयीमालामयाक्षितातिशोभना ॥ ७० ॥ महामुंडातततो देवीसमुत्पन्नाघहारिणी ॥ खट्वांगंचधृतंतत्रखट्वांगेशस्ततोभवत् ॥ ७१ ॥ निष्पापोजायतेमर्त्यःखट्वांगेशविलोकनात् ॥ भुवनेशस्ततो याम्यांकुंडंचभुवनेश्वरम् ॥ ७२ ॥ तत्रकुंडेनरःस्नात्वाभुवनेशोभवेन्नरः ॥ तद्याम्यांविमलेशश्चकुंडंचविमलोदकम् ॥ ७३ ॥ तत्रस्नात्वाविलोक्येशंवैमलौजायतेन्नरः ॥ तत्रपाशुपतःसिद्धस्त्र्यंबकोनामनामतः ॥ ७४ ॥ अनेनैवशरीरेणरुद्रलोकमवाप्तवान् ॥ भृगोरायतनंतस्यपश्चिमेऽतीवपुण्यदम् ॥ ७५ ॥ विधिपूर्वं तदभ्यर्च्यंप्राप्नुयाच्छिवमंदिरम् ॥ शुभेश्वरश्चतद्याम्यांमहाशुभफलप्रदः ॥ ७६ ॥ तत्रसिद्धःपाशुपतःकपिलर्षिर्महातपाः ॥ तत्रास्तिदिग्गुहारम्याकपिलेश्वरसंनिधौ ॥ ७७ ॥ तांगुहांप्रविशेद्योवैनसगर्भेविशेत्क्वचित् ॥ तत्रयज्ञोदकूपोस्तिवाजिमेधफलप्रदः ॥ ७८ ॥ ओंकारएषएवांसावादिवर्णमयात्मकः ॥ मत्स्योदर्युत्तरेकूलेनादेशस्त्वहमेवच ॥ ७९ ॥ नादेशःपरमंस्थानमनादेशःपरमागतिः ॥ नादेशःपरमंस्थानंदुःखसंसारमोचनम् ॥ ८० ॥ कदाचित्तस्यदेवस्यदर्शनेयातिजाह्नवी ॥ मत्स्योदरीसाकथितास्नानंपुण्यैरवाप्यते ॥ ८१ ॥ मत्स्योदरीयदागंगाप्रश्चिमेकपिलेश्वरम् ॥ समातिमहादेवितदायोगःसुदुर्लभः ॥ ८२ ॥ उद्दालकेश्वरंलिंगमुदीच्यांकपिलेश्वरात् ॥ तद्दर्शनेनसंसिद्धिःपरासर्वैरवाप्यते ॥ ८३ ॥ तदुत्तरेवाष्कुलीशंलिंगंस्वार्थसिद्धिदम् ॥ वाष्कुलीशाद्दक्षिणतोलिंगंवैकौस्तुभेश्वरम् ॥ ८४ ॥ तस्यार्चनेनरत्नौघैर्नवियुज्येतकर्हिचित् ॥ शंकुकर्णेश्वरंलिंगंकौस्तुभेश्वरदक्षिणे ॥ ॥ ८५ ॥ संसेव्यपरमंज्ञानंलभेद्यापिसाधकः ॥ अघोरेशोगुहाद्वारिकूपस्तस्योत्तरेशुभः ॥ ८६ ॥ अघोरोदक्षितिख्यातोवाजिमेधफलप्रदः ॥ गर्गेशोदमनेशश्चतर्लिंगद्वयंशुभम् ॥ ८७ ॥

अननैवेहदेहेन्यत्रतोसिद्धिमापतुः ॥ ताल्लिंगयोःसमर्चातःसिद्धिर्भवतिवांछिता ॥ ८८ ॥ तदक्षिणेमहाकुंडंरुद्रावासइतिस्मृतम् ॥ तत्ररुद्रेशमभ्यर्च्यकोटिरुद्रफलंभवेत् ॥ ८९ ॥ चतुर्दशीयदापर्णेरुद्रनक्षत्रसंयुता ॥ तदापुण्यतमःकालस्तस्मिन्कुंडेमहाफलः ॥ ९० ॥ रुद्रकुंडेनरःस्नात्वादृष्ट्वारुद्रेश्वरंविभुम् ॥ यत्रतत्रमृतोवापिरुद्रलोकमवाप्नुयात् ॥ ९१ ॥ रुद्रस्यनैर्ऋतेभागेलिंगंतत्रमहालयम् ॥ तदग्रेपितृकूपोस्तिपितॄणामालयंपरः ॥९२॥ तत्रश्राद्धं नरःकृत्वापिंडान्कूपेपरिक्षिपेत् ॥ एकविंशकुलोपेतःश्राद्धकृद्रुद्रलोकभाक् ॥ ९३ ॥ तत्रवैतरणीनामदीर्घिकापश्चिमानना ॥ तस्यांस्नातोनरोदेविनरकंनैवगच्छति ॥ ९४ ॥ बृहस्पतीश्वरंलिंगंरुद्रकुंडाच्चपश्चिमे ॥ गुरुपुष्यसमायोद्दृष्ट्वादिव्यंलभेद्गिरम् ॥ ९५ ॥ रुद्रावासाद्दक्षिणतःकामेशंलिंगमुत्तमम् ॥ तद्दक्षिणेमहाकुंडंस्नानाद्वांछितकामदम् ॥ ९६ ॥ चैत्रशुक्लत्रयोदश्यांतत्रयात्राचकामदा ॥ नलकूबरलिंगंचप्राच्यांकामेश्वराच्छुभम् ॥९७॥ तदग्रेपावनंकूपंधनधान्यसमृद्धिदः ॥ नलकूबरपूर्वेणसूर्याचंद्रमसेश्वरौ ॥ ९८ ॥ अज्ञानध्वांतपटलींहरतस्तौसमर्चितौ ॥ तद्दक्षिणेध्वकेशश्चदृष्टोमोहविनाशनः ॥ ॥९९॥ तत्रसिद्धीश्वरंलिंगंमहासिद्धिसमर्पकम् ॥ तत्रैवमंडलेशश्चमंडलेशपदप्रदः ॥ १०० ॥ कामकुंडस्यपूर्वेणच्यवनेशःसमृद्धिदः ॥ तत्रैवसनकेशश्चरात्रसूयफलप्रदः ॥ १ ॥ सनत्कुमारलिंगंचतत्पश्चाद्योगसिद्धिकृत् ॥ तदुत्तरेसनंदेशोमहाज्ञानसमर्थकः ॥२॥ तद्याम्यामाहुतीशश्चदृष्टोहोमफलप्रदः ॥ तद्याम्यांपुण्यदंकर्कलिंगंपंचशिखेश्वरम् ॥ ३ ॥ मार्कंडेयह्रदस्तस्यपश्चिमेपुण्यवर्धनः ॥ तस्मिन्ह्रदेनरःस्नात्वाकिंभूयःपरिशोचति ॥ ४ ॥ तत्रस्नानंचदानंचभवेदक्षयपुण्यदम् ॥ तदुत्तरेचकुंडेशःसर्वसिद्धेर्नमस्कृतः ॥५॥ दीक्षांपाशुपतींलब्ध्वाद्वादशाब्देनयत्फलम् ॥ तत्फलंलभतेविप्रमर्त्यःकुंडेशदर्शनात् ॥ ॥ ६ ॥ मार्कंडेयह्रदात्पूर्वेशांडिल्येशःसुपुण्यदः ॥ तत्पश्चिमेचचंडेशश्चंडांशुग्रहणाघहृत् ॥ ७ ॥ दक्षिणेचकपालेशात्कुंडंश्रीकंठसंज्ञितम् ॥ तत्रकुंडेनरःस्नात्वादात्तास्याच्छ्रीप्रभावतः ॥ ८ ॥ महालक्ष्मीश्वरंलिंगंतस्यकुंडस्यसन्निधौ ॥ महालक्ष्मींसमभ्यर्च्यस्नातस्तत्कुंडवारिषु ॥९॥ चामरासक्तहस्ताभिर्दिव्यस्त्रीभिश्चवीज्यते ॥ यदामत्स्योदरीयांतिस्वर्गलोकाद्दिवौकसः ॥ तदातेनैवमार्गेणयांतिस्त्रीभिर्वृताःसुखम् ॥१०॥ स्वर्गद्वारमतःख्यातंतत्स्थानं मुनिसत्तम ॥ तत्कुंडदक्षिणेभागेलिंगंब्रह्मपदप्रदम् ॥ ११ ॥ गायत्रीश्वरसावित्रीश्वरौपूज्यौप्रयत्नतः ॥ मत्स्योदर्यास्तटेरम्येलिंगंसत्यवतीश्वरम् ॥१२॥

तयोःपूर्वेणसंपूज्यंतपःश्रीपरिवर्धनम् ॥ उग्रेश्वरंमहालिंगंलक्ष्मीशात्पूर्वदिक्स्थितम् ॥१३॥ जातिस्मरोभवेन्मर्त्यस्तल्लिंगम्यसमर्चनात् ॥ तद्दक्षिणेचोग्रकुंडंस्नानात्कनखलाधिकम् ॥ १४ ॥ करवीरेश्वरंलिंगंतस्यकुंडस्यपश्चिमे ॥ तस्यदर्शनतःपुंसांजायतेरोगसंक्षयः ॥ १५ ॥ तद्वायव्येमरीचींशंकुंडंचाघौघनाशनम् ॥ तत्पश्चाच्चंद्रकुंडं लिंगंचंद्रेश्वरंमुने ॥ १६ ॥ इंद्रेशाद्दक्षिणेभागेशुभाककोटवापिका ॥ तत्रवापीजलेस्नात्वाद्दृष्ट्वाककोटकेश्वरम् ॥ ॥ १७ ॥ नागानामाधिपत्यंतुजायतेनात्रसंशयः ॥ तत्पश्चाद्दमिचंडेशंब्रह्महत्याहरोहरः ॥ १८ ॥ तद्दक्षिणेमहाकुंडंरुद्रलोकफलप्रदम् ॥ तत्पश्चिमे महालिंगमग्नीशइतिविश्रुतम् ॥ १९ ॥ आग्नेयंनामकुंडंचतत्पूर्वेत्रिसलोकदम् ॥ आग्नेयेश्वरतःप्राच्यांकुंडंतद्दक्षिणेशुभम् ॥ १२० ॥ तत्रकुंडेनरःस्नात्वास्वर्गेवसतिपूर्वजैः ॥ तत्प्राच्यांबालचंद्रेशश्चंद्रलोकगतिप्रदः ॥ २१ ॥ परितोबालचंद्रेशंगणलिंगान्यनेकशः ॥ विलोक्यतानिलिंगानिगाणपत्यंपदंलभेत् ॥ २२ ॥ बालचंद्रसमीपेतुकूपःपितृगणप्रियः ॥ तत्रश्राद्धप्रदःस्नात्वापितॄन्सप्ताऽऽतारयेत् ॥ २३ ॥ तदंधोःपूर्वतोलिंगंपुण्यंविश्वेश्वराह्वयम्॥ विश्वेशग्रस्यपूर्वेणवृद्धकालेश्वरोहरः ॥ २४ ॥ कालोदोनामकूपोस्तितदग्रेसर्वरोगहृत् ॥ येस्तुतत्रोदकंपीतंस्त्रीभिःपुंभिःस्वकर्मभिः ॥ २५ ॥ नतेषांपरि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर्तोग्रकल्पकोटिशतैरपि ॥ तत्पीत्वाजन्मबंधोत्थाद्भयान्मुच्येतमानवः ॥ २६ ॥ तत्रकूपेतुयद्दत्तंदानंशिवरतात्मनाम् ॥ संवर्तेपिनतस्यास्तिनाशः कल्पशतंभवेत् ॥२७॥ खंडस्फुटितसंस्कारंतत्रकुर्वंतियेनराः ॥ तेरुद्रलोकमासाद्यमोदंतेऽखिलःसदा ॥ २८ ॥ कालेशादक्षिणेभागेमृत्युवीरास्त्वपमृत्युहृत् ॥ लिंगंदक्षेश्वरंह्वंचततःकूपादुदग्दिशि ॥ २९ ॥ अपराधसहस्रंतुनश्येत्तस्यसमर्चनात् ॥ १३० ॥ महाकालेशलिंगंचदक्षेशात्पूर्वतोमहत् ॥ महाकुंडनरःस्नात्वामहाकालंतुयोर्चयेत् ॥३१॥ अर्चितंतेनवैतत्रजगदेतच्चराचरम् ॥ अंतकेश्वरमालोक्यतद्याम्यांनांतकस्यभीः ॥ ३२ ॥ हस्तिपालेश्वरं लिंगंतस्यदक्षिणतोमुने ॥ तस्यपूजनतोयात्पिपुण्यंवेहस्तिदानजम् ॥ ३३ ॥ तत्रैरावतकुंडंचलिंगमैरावतेश्वरम् ॥ तल्लिंगमर्चयन्मर्त्योधनधान्यसमृद्धिभाक् ॥ ३४ तद्दक्षिणेश्रेयसेचलिंगंस्यान्मालतीश्वरम् ॥ हस्तीश्वरादुत्तरेतुजयंतेशोजयप्रदः ॥ ३५ ॥ नंदीश्वरोमहाकालकुंडादुत्तरतःशुभः ॥ नंदिकुंडंचविख्यातंवाराणस्यांमहाफलम् ॥ ३६॥ तत्रस्नानेनदानेनश्राद्धेनाक्षयमश्नुते ॥ धन्वंतरीश्वरंलिंगंकुंडंतत्रामचेयहि ॥ ३७ ॥ तस्यलिंगस्यनामान्यत्कुंडनामान्यदेवहि ॥ तुंगेश्वरंलिंगनामकुंडंवैद्येश्वराभिध ॥ ३८ ॥ सुधामय्योमहौषध्यःक्षिप्तास्तत्रमहाधियः ॥ तत्कुंडस्नानतस्तस्मात्तल्लिंगपरिवीक्षणात् ॥ नश्यंतिव्याधयःसर्वेसहपापैःसुदारुणैः ॥ ३९ ॥

तदुत्तरेहलीशेशःसर्वव्याधिनिपूदनः ॥ शिवेश्वरःशिवकरस्तुंगनाम्नश्चदक्षिणे ॥ १४० ॥ जमदग्नीश्वरंलिंगंशिवेशादक्षिणेशुभम् ॥ तत्पश्चिमेभैरवेशःकूपस्तस्योत्तरेशुभः ॥ ४१ ॥ तदुत्स्पर्शमात्रेणसर्वयज्ञफलंलभेत् ॥ तत्कूपपश्चिमेभागेसुकेशोयोगसिद्धिदः ॥ ४२ ॥ तत्रव्यासांच्यासेशःकूपश्चविमलोदकः ॥ व्यासकूपेनरःस्नात्वातर्पयित्वासुरान्पितॄन् ॥ ४३ ॥ अक्षयंलभतेलोकंयत्रकुत्राभिवांछितम् ॥ व्यासतीर्थात्पश्चिमतोघंटाकर्णोह्रदोमहान् ॥ ४४ ॥ घंटाकर्णह्रदेस्नात्वाव्यासेशपरिदर्शनात् ॥ यत्रतत्रमृतोवापिवाराणस्यांमृतोभवेत् ॥ ४५ ॥ घंटाकर्णसमीपेतुपंचचूडाप्सरःसरः ॥ पंचचूडाजलेस्नात्वाद्दृष्ट्वादेवंतमीश्वरम् ॥ ४६ ॥ स्वर्गलोकंनरोयातिपंचचूडाप्रियोभवेत् ॥ गौरीकूपस्ततोवाच्यांसर्वजाड्यविनाशनः ॥ ४७ ॥ पंचचूडोत्तरेभागेतीर्थंचाशोकसंज्ञितम् ॥ मंदाकिनीमहातीर्थंतदुदीच्यांमहाफलम् ॥ ४८ ॥ स्वर्गलोकेपिसापुण्याकिंपुनर्मानवेमुने ॥ तदुत्तरेमध्यमेशोमध्येक्षेत्रस्यपित्यहो ॥४९॥ तत्रजागरणंकृत्वाऽशोकाष्टम्यांमधौनरः ॥ नजातुशोकंलभतेसदानंदमयोभवेत्॥१५०॥ मुक्तिक्षेत्रप्रमाणंचक्रोशंक्रोशंचसर्वतः॥ आरभ्यलिंगादस्माच्चपुण्यदान्मध्यमेश्वरात् ॥५१॥ एतदेवसदाप्राहुःसर्वेवैप्रपितामहाः ॥ कश्चिदस्मत्कुलेजातोमंदाकिन्याजलाप्लुतः ॥५२॥ भोजयेत्प्रयतोविप्रान्यतीन्पाशुपतानपि ॥ मंदाकिन्यांनरःस्नात्वादृष्ट्वावैमध्यमेश्वरम् ॥ ५३ ॥ एकविंशत्कुलोपेतोरुद्रलोकेवसेच्चिरम् ॥ मध्यमेशादवाच्यांच विश्वेदेवेश्वरःशुभः ॥५४॥ तदर्चनादर्चिताःस्युर्विश्वेदेवास्त्रयोदश ॥ तत्पूर्वेवीरभद्रेशोमहावीरपदप्रदः ॥५५॥ भद्रदाभद्रकालीचतस्यदक्षिणतःशुभा ॥ भद्राकालह्रदोनामतत्रातीवशुभप्रदः ॥५६॥ आपस्तंबेश्वरंलिंगंतत्प्राच्यांज्ञानदंपरम् ॥ तदुत्तरेपुण्यकूपस्तत्पश्चाच्छोनकोह्रदः ॥ ५७ ॥ ह्रदपश्चिमतोलिंगंशौनकेशंसुधीप्रदम् ॥ ह्रदेतत्रनरःस्नात्वादृष्ट्वाशौनकेश्वरम् ॥ ५८ ॥ ज्ञानंतत्संलभेद्दिव्यंयेनमृत्युंतरत्यसौ ॥ तद्दक्षिणेजंबुकेशस्तिर्यग्योनिनिवारकः ॥५९॥ तदुत्तरेमतंगेशोगानविद्याप्रबोधकः ॥ मतंगेशस्यवायव्येनानालिंगानिसर्वतः ॥१६०॥ मुनिभिःस्थापितानीहसर्वसिद्धिप्रदानिच ॥ ब्रह्मरातेश्वरंलिंगंमतंगेश्वरदक्षिणे ॥६१॥ तल्लिंगदर्शनादायुर्नातराच्छिद्यतेक्वचित् ॥ तत्राज्यपेश्वरंलिंगंपितॄलिंगान्यनेकशः ॥ तल्लिंगसेवयासर्वेतुष्यंतिप्रपितामहाः ॥ ६२ ॥ तद्दक्षिणेसिद्धकूपःसिद्धाःसंतिसहस्रशः ॥ वायुरूपास्तुयेसिद्धायेसिद्धाभानुरश्मिगाः ॥ ६३ ॥

तैःस्थापितंतुयल्लिंगंतत्सिद्धेश्वरमीरितम् ॥ तस्यसंदर्शनादेवसर्वाःस्युःसिद्धयोऽमलाः ॥ ६४ ॥ तत्पश्चिमेसिद्धवापीपीतास्नाताचसिद्धिदा ॥ प्राच्यांचसिद्धकूपाद्वैलिंगंव्याघ्रेश्वराभिधम् ॥ ६५ ॥ तल्लिंगदर्शनान्नृणांनभयंव्याघ्रचोरजम् ॥ ज्येष्ठेश्वरंचतद्याम्यांज्येष्ठस्थानेतिसिद्धिदम् ॥६६॥ तद्दक्षिणेमुदांधामलिंगंप्रहसितेश्वरम् ॥ तदुत्तरेनिवासेशःकाशीवासफलप्रदः ॥ ६७ ॥ चतुःसमुद्रकूपोस्तितत्राभिस्नानपुण्यदः ॥ ज्येष्ठादेवीतुतत्रास्थिताज्येष्ठपदप्रदा ॥ ६८ ॥ अवाच्यांव्याघ्रलिंगंचलिंगंचंडीश्वराभिधम् ॥ तदुत्तरेदंडखातंसरःपितृमुदावहम् ॥ ६९ ॥ ग्रहणानंतरेस्नानंदंडखातेतिपुण्यदम् ॥ जेगीषव्यगुहातत्रतत्रलिंगंतदाह्वयम् ॥१७०॥ त्रिरात्रोपितस्तत्रज्ञानंलभ्येतनिर्मलम् ॥ महापुण्यप्रदंलिंगंतत्पश्चाद्देवलेश्वरम् ॥ ७१ ॥ शतकालस्तत्समीपेशतंकालानुमापतिः ॥ तल्लिंगाविर्भवेत्काश्यांकालयामासकुंभज ॥ ७२ ॥ तल्लिंगदर्शनादायुःशतवर्षाण्यखंडितम् ॥ शातातपेशस्तद्याम्यांमहाजपफलप्रदः ॥ ७३ ॥ तत्पश्चिमेहेतुकेशोहेतुभूतोमहाफले ॥ तद्दक्षिणेक्षपादेशोमहाज्ञानप्रदोनृणाम् ॥ ७४ ॥ तदग्नेचकणादेशस्तत्रपुण्योदकःप्रहिः ॥ स्नात्वाकाणादकूपेयःकणादेशंसमर्चयेत् ॥ ७५ ॥ नधनेननधान्येनत्यज्यतेसकदाचन ॥ तस्यदक्षिणतोदृश्योभूतीशेभितिकृत्सता ॥७६॥ तत्पश्चिमेऽघसंहर्तृआपाढीश्वरसंज्ञितम् ॥ दुर्वासेश्वरतत्पूर्वेसर्वकामसमृद्धिकृत् ॥ ७७ ॥ तद्याम्यांभारभूतेशःपापभारापहारकः ॥ व्यासेश्वरस्यपूर्वेणद्वोशंखलिखितेश्वरौ ॥ तौदृश्यौयत्नतःकाश्यांमहाज्ञानप्रवर्तकौ ॥ ७८ ॥ यत्समाप्याऽप्यतेपुण्यंनिष्टापाशुपतव्रतम् ॥ तदाप्यतेत्रविश्वेशसकृदीक्षणतःक्षणात् ॥७९॥ तदीशानेवधूतेशोयोगज्ञानप्रवर्तकः ॥ तीर्थंचैवावधूतेशंसर्वकल्मषनाशकृत् ॥१८०॥ अवधूतेश्वरात्पूर्वेलिंगंपशुपतीश्वरम् ॥ तल्लिंगसेवयापुंसांपशुपाशविमोक्षणम् ॥८१॥ तद्दक्षिणेगणाभिलशोमहाभिलषितप्रदः॥ जीमूतवाहनेशश्चतत्पश्चाल्लिंगमुत्तमम् ॥ ८२ ॥ विद्याधरपदप्राप्तिस्तल्लिंगपरिसेवनात्॥ मयूखार्कःपंचनदेगभस्तीशश्चतत्रवै ॥ ८३ ॥ दधिकल्पह्रदोनामतदुदीच्यांमहाप्रहिः ॥ दुर्लभंतत्प्रस्नानंदुर्लभंचतदीक्षणम् ॥ ८४ ॥ गभस्तीशोत्तरेभागेदधिकल्पेश्वरोहरः ॥ नरस्तमाशुसंवीक्ष्यकल्पंशपुरेवसेत् ॥ ८५ ॥ गभस्तीशादक्षिणेतुमंगलांमंगलालयाम् ॥ उद्दिश्यमंगलांगौरींभोजयेद्विजदंपती ॥ ८६ ॥ अलंकृत्यशक्तितत्पुण्यांतोनकर्हिचित् ॥ क्षितिप्रदक्षिणफलामंगलेकाप्रदक्षिणा ॥ ८७ ॥

वदनप्रेक्षणादेवीमुखप्रेक्षेश्वरोत्तरे ॥ मंगलायाःसमापेतुसर्वसिद्धिकरीशिवा ॥ ८८ ॥ लिंगेत्वग्रीशवृत्तेशौमुखप्रेक्षोत्तरेशुभे ॥ सहेमभूमिदानस्यफलंदर्शनतस्तयोः ॥८९॥ तदुत्तरेचर्चिकायादेव्याःसंदर्शनंशुभम् ॥ रंवतेश्वरलिंगंचचर्चिकाग्रेणशांतिकृत् ॥ १९० ॥ महाशुभायतस्याग्रेलिंगंपंचनदेश्वरम् ॥ मंगलोदोमहाकूपःमंगलापश्चिमेशुभः ॥ ९१ ॥ उपमन्योर्महालिंगंमंगलापश्चिमेशुभम् ॥ व्याघ्रपादेश्वरंलिंगंतत्पश्चाद्व्याघ्रभीतिहृत् ॥ ९२ ॥ नैर्ऋत्यांचगभस्तीशाच्छशांकेशोघसंघहृत् ॥ तत्पश्चिमेचैत्ररथंलिंगंदिव्यगतिप्रदम् ॥ ९३ ॥ रेवतेशात्पश्चिमतोजैमिनीशोमहाघहृत् ॥ तत्रलिंगान्यनेकानिऋषीणामृषिसत्तम ॥ ९४ ॥ जैमिनीशाच्चवायव्येलिंगंवैरावणेश्वरम् ॥ नतदर्शनतःपुंसांराक्षसानांमहाभयम् ॥ ९५ ॥ तद्दक्षिणेवराहेशोमांडव्येशस्ततोयनः ॥ तद्दक्षिणेप्रचंडेशोयोगेशोदक्षिणेततः ॥ ९६ ॥ तद्दक्षिणेचधातेशःसोमेशश्चतदग्रतः ॥ तत्रैऋत्यांकनकेशोमहाकनकदःसताम् ॥ ९७ ॥ तदुत्तरेपांडवानांपंचलिंगानिसन्मुने ॥ संवर्तेशस्तदग्रेचश्वेतेशस्तस्यपश्चिमे ॥ ९८ ॥ तत्पश्चात्कलशेशश्चलिंगंकालाभयप्रदम् ॥ कालेनपाशितेश्वेते मुनेकुंभत्समुत्थित ॥१९९॥ चित्रगुप्तेश्वरंलिंगंतदुदीच्यामघापहम् ॥ चित्रगुप्तेश्वरात्पश्चाद्व्योढदेशोमहाफलः ॥ २०० ॥ कलशेशादवाच्यांचह्रदेशो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लिंगमुत्तमम् ॥ ग्रहबाधांशमयतितल्लिंगपरिलोकनम् ॥ १ ॥ चित्रगुप्तेश्वरात्पश्चाद्यदृच्छेशोमहाफलः ॥ उतथ्यवामदेवेशंलिंगंयाम्यांग्रहेश्वरात् ॥२॥ कंबलाश्वतरेशौचतस्यदक्षिणतःशुभे ॥ तत्रैवनिर्मलंलिंगंनलकूबरपूजितम् ॥ ३ ॥ तद्याम्यांमणिकर्णीशंतदुदक्पलितेश्वरम् ॥ जराहरंचतत्रैवतत्पश्चात्पापनाशनम् ॥४॥ तत्पश्चिमेनिर्जरेशस्तन्नैर्ऋत्यांपितामहः ॥ पितामहस्रोतिकाचतत्रश्राद्धंमहाफलम् ॥५॥ तद्याम्यांवरुणेशश्चबाणेशस्तस्यदक्षिणे॥ पितामहस्रोतिकायांकूश्मांडेशस्तुसिद्धिकृत् ॥ ६ ॥ तत्पूर्वतोरासेशोगंगेशस्तस्यदक्षिणे ॥ तदुत्तरेनिम्नगेशाःसंतिलिंगान्यनेकशः ॥ ७ ॥ वैवस्वतेश्वरस्तत्रयमलोकनिवारकः ॥ तत्पश्चाददितीशश्चचक्रेशस्तस्यचाग्रतः ॥ ८ ॥ तदग्रेकालकेशाख्योदृष्टप्रत्ययकृत्परः ॥ छायासंदृश्यतेतत्रनिष्पापस्तदवेक्षणात् ॥ ९ ॥ तदग्रेतारकेशश्चतदग्रेस्वर्णभारदः ॥ तदुत्तरेमरुत्तेशःशक्रेशश्चतदग्रतः ॥ २१० ॥ तद्दक्षिणेचरंभेशस्तत्रैवचशशीश्वरः ॥ तदुत्तरेलोकपेशास्तत्रलिंगान्यनेकशः ॥ ११ ॥ नागगंधर्वयक्षाणांकिन्नराप्सरसामपि ॥ देवर्षिगणवृंदानांनानासिद्धिकराण्यपि ॥ १२ ॥

शक्रेशाद्दक्षिणेभागेफाल्गुनेशोमहाघहृत् ॥ महापाशुपतेशश्चतद्याम्यांशुभकृत्परः ॥ १३ ॥ तत्पश्चिमेसमुद्रेशईशानेशस्तदुत्तरे ॥ तत्पूर्वेलांगलीशश्चसर्वसिद्धिसमर्पकः ॥ १४ ॥ रागद्वेषविनिर्मुक्ताःसिद्धिंयांतिचपूजकाः ॥ तेषांमोक्षोमयाख्यातोनतुतेदेविमानवाः ॥ १५ ॥ मधुपिंगश्वेतकेतूलांगलीशेतपस्विनौ ॥ अनेनैवशरीरेणजग्मतुःसिद्धिमुत्तमाम् ॥ १६ ॥ तत्रैवनकुलीशश्चकपिलेशश्चतत्रवै ॥ रहस्यंपरमंचोभौममव्रतनिषेविणौ ॥ १७ ॥ तत्सन्निधौप्रीतिकेशस्तत्रप्रीतिर्ममप्रिये ॥ तत्रोपवासादेकस्मात्फलमब्दशताधिकम् ॥ १८ ॥ एकंजागरणंकृत्वाप्रीतिकेशउपोषितः ॥ गणत्वपदवीतस्यनिश्चिताममपर्वणि ॥ १९ ॥ देवस्यदक्षिणेभागेतत्रवापीशुभोदका ॥ तदंबुप्राशनंनृणामपुनर्भवहेतवे ॥ २२० ॥ तज्जलात्पश्चिमेभागेदंडपाणिःसदावति ॥ तत्प्राच्यवाच्युत्तरस्यांतारःकालःशिलादजः ॥२१॥ लिंगत्रयंहृदज्ञेयच्छ्रद्धयापीतमर्पयेत् ॥ यैस्तत्रतज्जलंपीतंकृतार्थास्तेनरोत्तमाः ॥२२॥ अविमुक्तसमीपेच्यांमोक्षेशोमोक्षबुद्धिदः ॥ करुणेशोदयाधामतदुदीच्यांसमर्चयेत् ॥२३॥ स्वर्णाक्षेशस्तुतत्प्राच्यांज्ञानदस्तस्यचोत्तरे ॥ सौभाग्यगौरीसंपूज्यबहुसौभाग्यसंपदे ॥२४॥ विश्वेशाद्दक्षिणेभागेनिकुंभेशःप्रयत्नतः ॥ क्षेत्रक्षेमकरःपूज्यस्तत्पश्चाद्विघ्ननायकः ॥ २५ ॥ सर्वविघ्नच्छिदभ्यर्च्यश्चतुर्थ्यांतुविशेषतः ॥ विरूपाक्षोनिकुंभेशाद्वह्नेःपूज्यःसुसिद्धिदः ॥ २६ ॥ तद्दक्षिणेचशुक्रेशःपुत्रपौत्रप्रवर्धनः ॥ तदुदीच्यांमहालिंगंदेवयानीश्वराभिधम् ॥ २७ ॥ शुक्रेशादग्रतःपूज्यःकचेशइतिसंज्ञितः ॥ शुक्रकूपमुपस्पृश्यहयमेधफलंलभेत् ॥ २८ ॥ भवानीशौनमस्यौचशुक्रेशात्पश्चिमेशुभौ ॥ भक्तपोतप्रदौतौतुनिजभक्तस्यसर्वदा ॥ २९ ॥ अलर्केशःसमभ्यर्च्यःशुक्रेशात्पूर्वदिक्स्थितः ॥ मदालसेश्वरस्तत्रतत्पूर्वेसर्वविघ्नहृत् ॥ २३० ॥ गणेश्वरेश्वरंलिंगंसर्वसिद्धिकरंपरम् ॥ हत्वालंकेश्वरंविप्ररघुणाथप्रतिष्ठितम् ॥३१॥ तल्लिंगस्पर्शनादाशुब्रह्महापिविशुध्यति ॥ महापुण्यप्रदंचान्यत्तत्रार्च्यंत्रिपुरांतकम् ॥ ३२ ॥ दत्तात्रेयेश्वरंलिंगंतस्यपश्चिमतःशुभम् ॥ तद्याम्यांहरिकेशेशोगोकर्णेशस्ततःपरम् ॥ ३३ ॥ सरस्तदग्रेपापघ्नंतत्पश्चाच्चध्रुवेश्वरः ॥ तदग्रेध्रुवकुंडंचपितृप्रीतिकरंपरम् ॥ ३४ ॥ तदुत्तरेपिशाचेशःपैशाच्यपदहारकः ॥ पित्रीशस्तद्यमदिशिपितृकुंडंतदग्रतः ॥ ३५ ॥ तत्रश्राद्धकृतांपुंसांपुष्येयुःप्रपितामहाः ॥ अग्रेध्रुवेशात्तारेशोवैद्यनाथःसएवहि ॥ ३६ ॥

तन्नैर्ऋत्यांमनोर्लिंगंवंशवृद्धिकरंपरम् ॥ प्रियव्रतेश्वरंलिंगंवैद्यनाथपुरोगतम् ॥ ३७ ॥ तद्याम्यांमुचुकुंदेशस्तत्पार्श्वेगौतमेश्वरः ॥ तत्पश्चिमेनभद्रेशस्तद्याम्यामृष्यशृंगिणः ॥ ३८ ॥ ब्रह्मेशस्तत्पुरस्ताच्चपर्जन्येशस्तदीशगः ॥ तत्प्राच्यांनहुषेशश्चविशालाक्षीचतत्पुरः ॥ ३९ ॥ विशालाक्षीश्वरंलिंगंतत्रैवक्षेत्रवस्तिदम् ॥ जरासंधेश्वरंलिंगंतद्याम्यांज्वरनाशनम् ॥ २४० ॥ तत्पुरस्ताद्धिरण्याक्षलिंगंपूज्यंहिरण्यदम् ॥ तत्पश्चिमेगयाधीशस्तत्प्रतीच्यांभगीरथः ॥ ४१ ॥ तदग्रेचदिलीपेशोब्रह्मेशात्पश्चिमेमुने ॥ तत्रलिंगंसकुंडंचस्नातुरिष्टफलप्रदम् ॥ ४२ ॥ तत्रविश्वावसोर्लिंगंमुंडेशस्तत्रपूर्वतः ॥ तद्दक्षिणेविधेशश्चतद्याम्यांवाजिमेधकः ॥४३ ॥ दशाश्वमेधिकेस्नात्वादृष्ट्वातल्लिंगमुत्तमम् ॥ दशानामश्वमेधानांफलंप्राप्नोतिमानवः ॥ ४४ ॥ तदुत्तरेमातृतीर्थंस्नातुर्जन्मभयापहृत् ॥ तत्रस्नानंतुयःकुर्यान्नारीवापुरुषोपिवा ॥ ४५ ॥ ईप्सितंफलमाप्नोतिमातॄणांचप्रसादतः ॥ दक्षिणेतवकुंडाच्चपुष्पदंतेश्वरःपरः ॥ ४६ ॥ तदग्निदिशिदेवर्षिगणलिंगान्यनेकशः ॥ पुष्पदंताद्दक्षिणतःसिद्धीशःपरसिद्धिदः ॥ ४७ ॥ पंचोपचारपूजातःस्वप्नेसिद्धिंपरांदिशेत् ॥ राज्यप्राप्तिर्भवेत्पुंसांहरिश्चंद्रेशसेवया ॥ ४८ ॥ तत्पश्चिमेनैर्ऋतेशोंगिरसेशस्ततोयमे ॥ तद्दक्षिणेचक्षेमेशश्चित्रांगेशस्ततोयमे ॥ ४९ ॥ तद्दक्षिणेचकेदारोरुद्रानुचरताप्रदः ॥ चंद्रसूर्यान्वयैर्भूपैःकेदाराद्दक्षिणापथे ॥ २५० ॥ प्रतिष्ठितानिलिंगानिशतशोथसहस्रशः ॥ लोलार्काद्दक्षिणाशायांसर्वाशापूरकोर्चितः ॥ ५१ ॥ करंधमेश्वरंलिंगंतत्प्रतीच्यांमहाफलम् ॥ तत्पश्चिमेमहादुर्गामहादुर्गप्रभंजनी ॥ ५२ ॥ शुष्केश्वरंचतद्याम्यांशुष्कयासरितार्चितम् ॥ जनकेशस्तत्प्रतीच्यांशंकुकर्णस्तदुत्तरे ॥ ५३ ॥ महासिद्धीश्वरंलिंगंतत्प्राच्यांसर्वसिद्धिदम् ॥ सिद्धकुंडेनरःस्नात्वादृष्ट्वासिद्धेश्वरंमहत् ॥ ५४ ॥सर्वासामेवसिद्धीनांपारंगच्छतिमानवः ॥ शंकुकर्णेशवायव्येलिंगंवाडव्यसंज्ञितम् ॥ ५५ ॥ तदग्रेचविभांडेशःकहोलेशस्तदुत्तरे ॥ तत्रद्वारेश्वरंलिंगंदेवीद्वारेश्वरीशुभा ॥ ५६ ॥ तत्पूजनाद्भवेत्सिद्धिरानंदारण्यवस्तिदा ॥ रक्षकाश्चगणास्तत्रनानारूपायुधामुने ॥ ५७ ॥ तत्रैवहरिदीशंचलिंगंकात्यायनंततः ॥ तत्पार्श्वेजांगलेशश्चतत्पश्चान्मुकुटेश्वरः ॥ ५८ ॥ तत्रैवकुंडंविमलंसर्वयात्राफलप्रदम् ॥ स्नात्वामुकुटकुंडेचदृष्ट्वावैमुकुटेश्वरम् ॥ ५९ ॥ यात्रयासर्वलिंगानांयत्फलंतदवाप्यते ॥ तपसश्चापियोगस्यसिद्धिदासाऽवनीपरा ॥२६०॥ मुनेशतंसहस्राणितत्रलिंगानिसिद्धये ॥ एकादिगुत्तरादेविवाराणस्यांप्रियामम ॥ ६१ ॥ तत्रापिपंचायतनेरतिर्मेनितरांप्रिये ॥ उत्पत्तिस्थितिकालेपितत्राहंसर्वदास्थितः ॥ ६२ ॥

एवंयस्तुविजानातिनसपापैःप्रलिप्यते ॥ सत्यंसत्यंपुनःसत्यंत्रिसत्यंनान्यतःप्रिये ॥ ६३ ॥ शीघ्रंतत्रैवगंतव्यंयदीच्छेन्मामकंपदम् ॥ उद्देशमात्रंलिंगानिकथितानिमयामुने ॥ ६४ ॥ द्विस्त्रिःकृत्वःस्थापितानिभक्त्यालिंगानिकानिचित् ॥ नतानिपुनरुक्तानिश्रद्धयार्च्यानिसर्वतः ॥ ६५ ॥ एतानियानिलिंगानियानिकुंडानियेऽधवः ॥ यावन्त्यस्तानिसर्वाणिश्रद्धेयानिमनीषिभिः ॥६६॥ एतेषांदर्शनात्स्नानात्फलमत्रोत्तरोत्तरम् ॥ अत्रत्यानांचलिंगानांकूपानांसरसामपि ॥६७॥ वापीनांचापिमूर्तीनांकःसंख्यातुंप्रभुर्भवेत् ॥ आनंदकाननस्थानितृणान्यपिपरंवरम् ॥६८॥ दिवौकसोपिनान्यत्रयत्पुनर्जन्मभाजनम् ॥ सर्वलिंगमयीकाशीसर्वतीर्थैकजन्मभूः ॥६९॥ स्वर्गापवर्गयोर्दात्रीदृष्टादेहांतसेविता ॥ ममप्रियतमादेवित्वमेवतपसोबलात् ॥ २७० ॥ स्वभावतस्त्वियंकाशीसुखविश्रामभूर्मम ॥ येकाश्यानामगृह्णंतियेनुमोदंतएवहि ॥ ७१ ॥ तेमेशाखविशाखाभाःस्कंदनंदिगजास्यवत् ॥ तएवभक्तामेदेवितःममसेवकाः ॥७२॥ मुमुक्षवस्तएवात्रयेचानंदवनौकसः ॥ तपस्तप्तंमहत्तैस्तुकृतंतैस्तुमहाव्रतम् ॥ ७३ ॥ तैश्चदत्तंमहादानंयेचानंदवनौकसः ॥ तेस्नातसर्वतीर्थावैतेखिलाध्वरदीक्षिताः ॥ ७४ ॥ तेचीर्णसर्वधर्माहियेचानंदवनौकसः ॥ सुरासुरोरगनराभूमिभारायतेऽखिलाः ॥ वयस्यपीहचरमेयेनानंदवनौकसः ॥ ७५ ॥ अंत्यजोपिवरःकाश्यांनान्यत्रश्रुतिपारगः ॥ संसारपारगःपूर्वस्त्वंत्यश्चांत्यजतोप्यधः ॥ ७६ ॥ सएवनूनंसर्वज्ञःसएवह्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विदे क्षणः ॥ यःपार्थिवींतनुंहित्वाकाश्यांधत्तेसुधामयीम् ॥७७॥ श्रुत्वाध्यायमिदंपुण्यंसर्वतीर्थरहस्यवत् ॥ काशीदर्शनजंपुण्यंप्राप्नोतिनियतंनरः॥७८॥ यःपठेदिममध्यायंप्रातःप्रातर्दिनेदिने ॥ दृष्टानितेनसर्वाणितीर्थान्येतानिनान्यथा ॥ ७९ ॥ सर्वलिंगमयाध्यायंयोऽमुंनित्यंजपेत्सुधीः ॥ नतंयमोनतं दूतानेनमंहोपि [illegible] यते ॥ २८० ॥ ब्रह्मयज्ञफलंतस्यजायतेसुकृतात्मनः ॥ योजपेदमुमध्यायंशुचिस्तद्गतमानस ॥ ८१ ॥ सस्नातःसर्वकुंडेषुसर्वत्र [illegible] बुधःसच ॥ सर्वलिंगार्चकःसोत्रयोऽमुमध्यायमाजपेत्॥८२॥ [illegible] यैर्बहुभिःस्तोत्रैरतिस्तोकफलप्रदैः ॥ मत्प्रेमवद्भिरध्यायोजप्तव्योयंमहाफलः॥८३॥ महादानेषुदत्तेषुयत्फलंप्राप्यतेऽत्रवै ॥ सकृज्जपान्महाध्यायादमुष्मात्तत्समाप्यते ॥ ८४ ॥

स्नात्वा [illegible] र्वाणितीर्थानिदृष्ट्वालिंगान्य [illegible] कशः ॥ यत्फलंलभ्यतेमर्त्यैस्तदेतज्जपनाद्ध्रुवम् ॥ ८५ ॥ इदमेवतपोत्युग्रमयमेवजपोमहान् ॥ काशीलिंगावली नामाध्यायोजप्येतयन्मुने ॥ ८६ ॥ म [illegible] दुहेनास्तिकायवेदनिंदारताय [illegible] ॥ नदातव्योनदातव्योनदातव्योजपस्त्वयम् ॥ ८७ ॥ अध्यायस्यास्यजप नात्पापंब्रह्मवधोद्भवम् ॥ अगम्यागमनंचापितथाभक्ष्यस्यभक्षणम् ॥ ८८ ॥ गुरुदाराभिचारोत्थंहेमस्तेयसमुद्भवम् ॥ मातापितृवधाज्जातंगोभ्रूणहननो द्भवम् ॥ ८९ ॥ महापापानिपापानिज्ञाताज्ञातानिभूरिशः ॥ उपपापानिपापानिमनोवाक्कायजान्यपि ॥ ९० ॥ विलयंयांत्यशेषाणिनिःसंदेहं ममाज्ञया ॥ पुत्रान्पौत्रान्धनंधान्यंकलत्रंक्षेत्रमेवच ॥९१॥ मनःसमीहितंसर्वंस्वर्गंमोक्षंसुखान्यपि ॥ जप्त्वाध्यायमिमंविद्वान्प्राप्स्यत्येवनसंशयः॥९२॥ इतिय [illegible] त्समाख्यातिदेवोदेवीपुरःकथाम् ॥ तावन्नंदीसमागत्यप्रणम्येतिव्यजिज्ञपत् ॥ ९३ ॥ जातापरिसमाप्तिश्चमहाप्रासादनिर्मितेः ॥ सज्जीकृतो रथश्चायंब्रह्माद्यामिलिताःसुराः ॥ ९४ ॥ तार्क्ष्यगःपुंडरीकाक्षोद्वारितिष्ठतिसानुगः ॥ प्रतीक्षमाणोऽवसरंपुरस्कृत्यमुनीश्वरान् ॥ ९५ ॥ चतुर्दशसुलो केषुयेयेतिष्ठंतिसुव्रताः ॥ तेनिशम्याद्यमिलिताःप्रावेशिकमहोत्सवम् ॥ ९६ ॥ ॥ स्कंदउवाच ॥ ॥ इतिनंदिवचःश्रुत्वादेवोदेवीसमायुतः ॥ दिव्यं [illegible] संसमारुह्यनिर्जगामत्रिविष्टपात् ॥ २९७ ॥ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेक्षेत्रतीर्थवर्णनं नामसप्तनवतितमोऽध्यायः ॥ ९७॥ ॥ व्यास उवाच ॥ ॥ शृणुसूतमहाभागयथास्कंदेनभाषितः ॥ महामहोत्सवःशंभोःपृच्छतेकुंभसंभवे ॥ १ ॥ ॥ स्कंदउवाच ॥ ॥ निशामयमहाप्राज्ञशंभुप्रावेशिकींकथाम् ॥ त्रैलोक्यानंदजननींमहापातकतंकिनीम् ॥ २ ॥ मंदरादागतःशंभुश्चैत्रेदमनपर्वणि ॥ प्राप्याप्यानंदगहनमितश्चेतश्चचारह ॥ ३ ॥ मोक्षलक्ष्मीविलासेथप्रासादेसिद्धिमागते ॥ देवोविरजसःपीठा [illegible] तगेहंविवेशह ॥ ४ ॥ ऊर्जशुक्लप्रतिपदि बुधराधासमायुजि ॥ चंद्रेसप्तमराशिस्थेशेषेपूच्चग्रहेषुच ॥ ५ ॥ वाद्यमानेषुवाद्येषुप्रसन्नासुहरित्सुच ॥ ब्राह्मणानांश्रुतिरवन्यकृतान्यरवांतरे ॥ ६ ॥

प्रतिशब्दितभूर्लोकभुवर्लोकांतराध्वनि ॥ सर्वंप्रमुदितंचासीच्छंभोःप्रावेशिकोत्सवे ॥ ७ ॥ जगुर्गंधर्वनिकरानन्नृतुश्चाप्सरोगणाः ॥ चारणास्तुस्तुतिं कुर्युर्जह्रुषुर्देवतागणाः ॥८॥ ववुर्गंधवहावातावृषुःकुसुमैर्घनाः ॥ सर्वेमंगलनेपथ्याःसर्वेमंगलभाषिणः ॥९॥ स्थावराजंगमाःसर्वेजाताआनंदमेदुराः॥ सुरासुरेषुसर्वेषु [illegible] धर्वेपूरगेषुच ॥ १ ॥ विद्याधरेषुसाध्येषुकिन्नरेषुनरेषुच ॥ स्त्रीपुंजातेषुसर्वेषुरेजुश्चत्वारएवच ॥ ११ ॥ निष्प्रत्यूहंचनितरांपुरुषार्थाः पदेपदे ॥ धूपधूमभरैर्व्योमयद्रक्तंतुतदामुने ॥ १२ ॥ नाद्यापिनीलिमानंतंपरित्यजतिकर्हिचित् ॥ नीराजनाययेदीपास्तदासर्वेप्रबोधिताः ॥ १३ ॥ तेषांज्योतींषिखेद्यापि [illegible] जंतेतारकाच्छलात् ॥ प्रतिसौधंपताकाश्चनानाकाराविचित्रिताः ॥ १४ ॥ रम्यध्वजप्रभाधौतारेजुःप्रतिशिवालयम् ॥ क्वचि द्गा [illegible] तिगीतज्ञाःक्वचिन्नत्यंतिनर्तकाः ॥ १५ ॥ चतुर्विधानिवाद्यानिवाद्यंतेचक्वचित्क्वचित् ॥ प्रत्यध्वंचंदनरसच्छटापिच्छिलभूमयः ॥ १६ ॥ हरितश्वेतमांजिष्ठनीलपीतबहुप्रभाः ॥ प्रत्यंगणशुभाकारारंगमालाश्चकाशिरे ॥ १७ ॥ रत्नकुट्टिमभूभागागोपुराग्रेषुरेजिरे ॥ सुधोज्ज्वलाहर्म्यमालाःसौ धनामप्रपेदिरे ॥१८॥ अचेतनान्यपितदाचेतनानीवसंबभुः ॥ यानिकानीहकीर्त्यंतेमंगलानिघटोद्भव ॥ १९॥ तेषामेवहिसर्वेषांतत्तुजन्मदिवाभवत् ॥ आगत्यदेवदेवोथमुक्तिमंडपमाविशत् ॥ २० ॥ [illegible] थाभिषिक्तश्चतुराननेनमहर्षिवृंदैःसहदेवदेवः ॥ शुभासनस्थःसहितोभवान्याकुमारवृंदैःपरितोवृतश्च॥ ॥ २१ ॥ रत्नैरसंख्यैर्बहुभिर्दुकूलैर्माल्यैर्विचित्रैर्लसदिष्टगंधैः ॥ अपूपुजन्देवगणामहेशंतदामुदातेचमहोरगेंद्राः ॥ २२ ॥ रत्नाकरैश्चापिगिरींद्रवर्यैर्य थास्वमन्यैरपिपुण्यधीभिः ॥ संपूजितःकुंभजतत्रशंभुर्नीराजितोमातृगणैरथेशः ॥२३॥ संतोष्यसर्वान्पथमंमुनींद्रान्स्वैःस्वैर्हृदिस्थैश्चचिराभिलाषैः ॥ ब्रह्माणमाभाष्यशिवोथविष्णुंजगादसर्वामरवृंदवंद्यः ॥ २४ ॥ इतोनिषीदेतिसमानपूर्वंत्वंमेसमस्तप्रभुतैकहेतुः ॥ दूरेपितिष्ठन्निकटस्त्वमेवत्वत्तोनक श्चिन्ममकार्यकर्ता ॥ २५ ॥ त्वयादिवोदासनरेंद्रवर्यःसदूपदेशैश्चतथोपदिष्टः ॥ यथाससिद्धिंपरमामवापसमीहितंमेनिखिलंचसिद्धम् ॥ २६ ॥ विष्णो वरंब्रूहियईप्सितस्तेनादेयमत्रास्तिकिमप्यहोते ॥ इदंमयाऽऽनंदवनंयदाप्तंहेतुस्तुतत्रत्वमसौगणेशः ॥ २७ ॥

नमेप्रियंकिंचनविष्टपत्रयेतथायथेयंपरसौख्यभूमिः ॥ वाराणसीब्रह्मरसायनस्यखनिर्जनिर्यत्रनदीर्घशायिनाम् ॥ २८ ॥ श्रुत्वेतिवाक्यंजगदीशितुश्चप्रो वाचविष्णुर्वरदंमहेशम् ॥ यदिप्रसन्नोसिपिनाकपाणेतदापदाद्दूरमहंनतेस्याम् ॥ २९ ॥ श्रुत्वेतिवाक्यंमधुसूदनस्यजगादतुष्टोनितरांपुरारिः ॥ सदामुरारे ममसन्निधौत्वंतिष्ठस्वनिर्वाणरमाश्रयेत्र ॥ ३० ॥ आदावनाराध्यभवंतमत्रयोमांभजिष्यत्यपिभक्तियुक्तः ॥ समीहितंतस्यनसेत्स्यतिध्रुवंपरात्परान्मे बुजचक्रपाणे ॥ ३१ ॥ सर्वत्रसौख्यंममसुक्तिमंडपेसंतिष्ठमानस्यभवेदिहाच्युत ॥ नतत्तुकैलासगिरौसुनिर्मलेनभक्तचेतस्यपिनिश्चलश्रियि ॥ ३२ ॥ निमेषमात्रंस्थिरचित्तवृत्तयस्तिष्ठंतियेदक्षिणमंडपेत्रमे ॥ अनन्यभावाअपिगाढमानसानतेपुन [illegible] र्भिदशामुपासते ॥ ३३ ॥ संस्नाययेचक्रसरस्यगाधे समस्ततीर्थैकशिरोविभूषणे ॥ क्षणंविशंतीहनिरीहमानसानिरेनसस्तेममपार्षदाहि ॥ ३४ ॥ स्मरंतियेमामपवर्गमंडपेकिंचिद्यथाशक्तिददत्यपिस्वम् ॥ शृण्वंतिपुण्याश्चकथाः क्षणंस्थिरास्तेकोटिगोदानफलंभजंति ॥ ३५ ॥ उपेंद्रतप्तानितपांसितैश्चिरंस्नाताहितेचाखिलतीर्थसार्थकैः ॥ स्नात्वेहयेवैमणिकं र्णिकाह्रदेसमासतेमुक्तिजनाश्रयेक्षणम् ॥ ३६ ॥ तीर्थानिसंतीहपदेपदेहरेतुलाक्वतेषांमणिकर्णिकायाः ॥ कतीहनोसंतिशुभाश्चमंडपाःपरंपरोमुक्तिरमा श्रयोयम् ॥ ३७ ॥ कैवल्यमंडपस्यास्यभविष्येद्वापरेहरे ॥ लोकेख्यातिर्भवित्रीयमेषकुक्कुटमंडपः ॥ ३८ ॥ ॥ हरिरुवाच ॥ ॥ भालनेत्रसमाख्या हिकथंनिर्वाणमंडपः ॥ तथाख्यातिमसौगंतायथादेवेनभाषितम् ॥ ३९ ॥ ॥ देवदेवउवाच ॥ ॥ महानंदोद्विजोनामभविष्योत्रचतुर्भुज ॥ अग्रवेदीसमाचारस्त्यक्ततीर्थप्रतिग्रहः ॥ ४० ॥ अदांभिकोऽक्रूरमनाःसदैवातिथिवल्लभः ॥ अथयौवनमासाद्यपितर्युपरतेसहि ॥ ४१ ॥ विषमेषुशरै स्तीव्रैःकारितस्त्वपदेपदम् ॥ जहारकस्याचिद्भार्यांमैत्रींकृत्वातुतेनवै ॥ ४२ ॥ तयाचप्रेरितोऽपेयंपपौचापिविमोहितः ॥ अभक्ष्यभक्षणरुचिरभून्मदनमो हितः ॥४३॥ वैष्णवान्धनिनोदृष्ट्वाक्षणंवैष्णववेषभृत् ॥ शैवान्निंदतिमूढात्मानरकत्राणकारणम् ॥४४॥ शिवभक्तान्समालोक्यकिंचिच्चपरिदित्सुकान् ॥ गर्हयेद्वैष्णवान्सर्वाञ्शैवलिंगोपजीवकः ॥ ४५ ॥ इतिपाखंडधर्मज्ञःसंध्यास्नानपराङ्मुखः ॥ विशालतिलकःस्रग्वीशुद्धधौतांबरोज्ज्वलः ॥ ४६ ॥ शिखीचोपग्रहकरःसर्वेभ्योऽसत्प्रतिग्रही ॥ तस्यापत्यद्वयंजातमुन्मत्तपथवर्तिनः ॥ ४७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एवंतस्यप्रवृत्तस्यकश्चित्पर्वतदेशतः ॥ समागमिष्यतिधनीतीर्थयात्रार्थसिद्धये ॥ ४८ ॥ स्नात्वासचक्रसरसिकथयिष्यतिचेतिवै ॥ अहमस्तिधनो दित्सुर्जात्याचांडालसत्तमः ॥४९॥ अस्तिकश्चित्प्रतिग्राहीयस्मैदद्यामहंधनम् ॥ इतितस्यवचःश्रुत्वाकौश्चिच्चांगुलिसंज्ञया ॥५०॥ उद्दिष्टउपविष्टोसौयो जपेद्ध्यानमुद्रया ॥ एषप्रतिग्रहंत्वत्तोग्रहीष्यतिनचेतरः ॥५१॥ इतितेषांवचःश्रुत्वासगत्वातत्समीपतः ॥ दंडवत्प्रणिपत्याथतंबभाषेतदांत्यजः ॥५२॥ मामुद्धरमहाविप्रतीर्थमेसफलीकुरु ॥ किंचिद्वस्त्वस्तिमेतत्त्वंगृहाणानुग्रहंकुरु ॥ ५३ ॥ अथाक्षमालिकांकर्णेकृत्वाध्यानंविसृज्यच ॥ केयद्धनंतवास्ती हपप्रच्छकरसंज्ञया ॥ ५४ ॥ तस्यसंज्ञांसवैबुद्ध्वाप्रोवाचातिप्रहृष्टवत् ॥ संतृप्तिर्यावतातेस्यात्तावद्दास्यामिनान्यथा ॥ ५५ ॥ इतितद्वचनंश्रुत्वात्यक्त्वामौ नमुवाचह ॥ सानंदःसमहानंदोनिःस्पृहोस्मिप्रतिग्रहे ॥ ५६ ॥ परंतेऽनुग्रहार्थंतुकरिष्यामिप्रतिग्रहम् ॥ किंचमेवचनंत्वंचेत्करिष्यत्युत्तमोत्तम ॥ ५७ ॥ यावदस्त्यखिलंवित्तंतन्मध्येन्यस्यकस्यचित् ॥ नस्तोकमपिदातव्यंतदाऽऽदास्यामिनान्यथा ॥५८॥ ॥ चांडालउवाच ॥ ॥ यावदस्तिमयानीतंवि श्वेशप्रीतयेवसु ॥ तावत्तुभ्यंप्रदास्यामिविश्वेशस्त्वंयतोमम॥५९॥ येवसंतीहविश्वेशराजधान्यांद्विजोत्तम ॥ क्षुद्राक्षुद्राजंतुमात्राविश्वेशांशास्तएवहि॥६०॥ परोद्धरणशीलायेयेपरेच्छाप्रपूरकाः ॥ परोपकृतिशीलायेविश्वेशांशास्तएवहि ॥ ६१ ॥ इतितद्वचनंश्रुत्वाप्रहृष्टेंद्रियमानसः ॥ उवाचपार्वतीयंतंसोऽ ग्रजन्मांत्यजंतदा ॥ ६२ ॥ आयाहिदर्भानादेहिकुरूत्सर्गंत्वरान्वितः ॥ तथेतिसचकाराशुपार्वतीयोमहामनाः ॥ ६३ ॥ विश्वेशःप्रीयतांचेतिप्रोच्ययातो यथागतः ॥ सचद्विजोद्विजैरन्यैर्धिक्कृतोपिवसन्निह ॥ ६४ ॥ बहिर्निर्गतमात्रस्तुबहुभिःपरिभूयते ॥ चांडालब्राह्मणश्चैषचांडालात्तधनस्त्वसौ ॥ ६५ ॥ असावेवहिचांडालःसर्वलोकबहिष्कृतः ॥ इत्थंतमनुधावंतिथूत्कुर्वंतःपरितोहरे ॥ ६६ ॥ सचतद्भयतोगेहात्काकभीतदिवांधवत् ॥ ननिःसरेत्क्वचिदपि लज्जाकृतिनतास्यकः ॥६७॥ सएकदासंप्रधार्यगृहिण्यालोकदूषितः ॥ जगामकीकटान्देशांस्त्यक्त्वावाराणसींपुरीम् ॥६८॥ मध्येमार्गंसगच्छन्वैलक्षितस्तु सकांचनः ॥ अपिकार्पटिकांतस्थःसरुद्धोमार्गरोधिभिः॥६९॥ नीत्वातेतंमरण्यानींतस्कराःसपरिच्छदम् ॥ उद्बुंध्यधनमादायसमालोच्यपरस्परम्॥७०॥

प्रोचुर्भूरिधनंचैतज्जीर्यत्यस्मिन्नजीवति ॥ असौधनीप्रयत्नेनवध्यःसपरिचारकः ॥ ७१ ॥ संप्रधार्येतितेप्राहुःस्मर्तव्यंस्मरपांथिक ॥ त्वांवयंघात यिष्यामोनिश्चितंसपरिच्छदम् ॥ ७२ ॥ निशम्येतिमनस्येवकथयामाससद्विजः ॥ अहोप्रतिगृहीतंमेयदर्थंवसुभूरिशः ॥ ७३ ॥ कुटुंबमपि तन्नष्टंनष्टश्चापिप्रतिग्रहः ॥ जीवितंचापिमेनष्टंनष्टाकाशीपुरीस्थितिः ॥ ७४ ॥ युगपत्सर्वमेवाशुनष्टंदुर्बुद्धिचेष्टया ॥ नकाश्यांमरणंप्राप्तंतस्माद्दुष्प्रति ग्रहात् ॥ ७५ ॥ प्रांतेकुटुंबस्मरणात्तथाकाशीस्मृतेरपि ॥ चोरैर्हतोपिसतदाकीकटेकुक्कुटोऽभवत् ॥७६॥ साकुक्कुटीसुतौतौतुताम्रचूडत्वमापतुः ॥ प्रांते काशीस्मरणतोजाताजातिस्मृतेःपरा ॥ ७७ ॥ इत्थंबहुतिथेकालेगतेकार्पटिकोत्तमाः ॥ तस्मिन्नेवाध्वनिप्राप्ताश्चत्वारोयत्रकुक्कुटाः ॥७८॥ वाराणस्याः कथांप्रोच्चैःकुर्वंतोऽन्योन्यमेवहि ॥ काशीकथांसमाकर्ण्यतदातेचरणायुधाः ॥ ७९ ॥ जातिस्मृतिप्रभावेणतत्संगेनतुनिर्गताः ॥ तैश्चकार्पटिकश्रेष्ठःपथि दृष्ट्वाकृपालुभिः ॥ ८० ॥ तंदुलादिपरिक्षेपैःप्रापिताःक्षेत्रमुत्तमम् ॥ तेतुक्षेत्रंसमासाद्यचत्वारश्चरणायुधाः ॥ ८१ ॥ चरिष्यंतोऽत्रपरितोमुक्तिमंडपमु त्तमम् ॥ जिताहारान्सनियमान्कामक्रोधपराङ्मुखान् ॥ ८२ ॥ प्रहासान्मत्कथालापाँल्लोभमोहविवर्जितान् ॥ स्वर्धुनीस्नानसंक्लिन्नसुनिर्मलशिरो रुहान् ॥ ८३ ॥ मन्नामोच्चारणपरान्मत्कथार्पितसुश्रुतीन् ॥ मद्दत्तचित्तसद्वृत्तीन्दृष्ट्वाक्षेत्रनिवासिनः ॥ ८४ ॥ मानयामासुरथतान्कुक्कुटान्साधुवर्त्मनः ॥ प्राक्तनाद्वासनायोगात्संप्रधार्यपरस्परम् ॥ क्रमेणाहारमाकुंच्यप्राणांस्त्यक्ष्यंतिचात्रवै ॥ ८५ ॥ पश्यतांसर्वलोकानांविष्णोतेमदनुग्रहात् ॥ विमानम धिरुह्याशुकैलासंप्राप्यमत्पदम् ॥ ८६ ॥

निर्विश्यसुचिरंकालंदिव्यान्भोगाननुत्तमान् ॥ ततोऽत्रज्ञानिनोभूत्वामुक्तिंप्राप्स्यंतिशाश्वतीम् ॥ ८७ ॥ ततोलोकास्तदारभ्यकथयिष्यंतिसर्वतः ॥ मुक्तिमंडपनामैतदेषकुक्कुटमंडपः ॥ ८८ ॥ चरित्रमपिवैतेषांयेस्मरिष्यंतिमानवाः ॥ मुक्तिमंडपमासाद्यश्रेयःप्राप्स्यंतितेपिहि ॥ ८९ ॥ इतियावत्कथां शंभुर्भविष्यामग्रतोहरेः ॥ अकरोत्तुमुलोनादोघंटानांतावदुद्गतः ॥ ९० ॥ अथनंदिनमाहूयदेवदेवउमाधवः ॥ प्रोवाचनंदिन्विज्ञायागत्यब्रूहिकुतोरवः ॥९१॥ अथनंदीसमागत्यप्रोवाचवृषभध्वजम् ॥ नमस्कृत्यप्रहृष्टास्यःप्रबद्धकरसंपुटः ॥ ९२ ॥ ॥ नंद्युवाच ॥ ॥ देवदेवत्रिनयनकिमपूर्वंब्रवीमिते ॥ मोक्षलक्ष्मीविलासोऽत्रकैश्चित्कैश्चित्समर्च्यते ॥९३॥ अथस्मित्वाब्रवीच्छंभुःसिद्धंनस्तुसमीहितम् ॥ उत्थायदेवदेवेशःसहदेव्यासुमंगलः॥९४॥ ब्रह्मणाह रिणासार्धंततोऽगाद्रंगमंडपम् ॥ ॥ स्कंदउवाच ॥ ॥ श्रुत्वाध्यायमिमंपुण्यंपरमानंदकारणम् ॥ नरःपरांमुदंप्राप्यकैलासंप्राप्स्यतिध्रुवम् ॥ ९५ ॥ इतिश्रीस्कांदेमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेमुक्तिमंडपगमनंनामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ व्यासउवाच ॥ शृणुसूतयथाप्रोक्तंकुंभजेशरजन्मना ॥ देवदेवस्यचरितंविश्वेशस्यपरात्मनः ॥ १ ॥ अगस्त्यउवाच ॥ सेनानीःकथयत्वंमेततोनिर्वाणमंडपात् ॥ निर्गत्यदेवोदेवेंद्रैःसहितःकिंचकारह ॥ २ ॥ स्कंदउवाच ॥ मुक्तिमंडपतःशंभुर्ब्रह्मविष्णुपुरोगमः ॥ शृंगमंडपंप्राप्ययच्चकारवदामितत् ॥ ३ ॥ प्राङ्मुखस्तूपविश्येशःसहास्माभिःसहेशया ॥ ब्रह्मणाधिष्ठितःसव्येवामपार्श्वेथशार्ङ्गिणा ॥ ४ ॥ वीज्यमानोमहेंद्रेणऋषिभिःपरितोवृतः ॥ गणैःपृष्ठप्रदे शस्थैर्जोषंतिष्ठद्भिरादरात् ॥ ५ ॥ उदायुधैःसेव्यमानश्चावसन्मानभूरिभिः ॥ ब्रह्मणेविष्णवेशंभुःपाणिमुत्क्षिप्यदक्षिणम् ॥ ६ ॥ दर्शयामासदेवेशोलिंगं पश्यतपश्यत ॥ इदमेवपरंज्योतिरिदमेवपरात्परम् ॥ ७ ॥

इदमेवहिमेरूपंस्थावरंचातिसिद्धिदम् ॥ एतेपाशुपताःसिद्धाआबालब्रह्मचारिणः ॥ ८ ॥ जितेंद्रियास्तपोनिष्ठाःपंचार्थज्ञाननिर्मलाः ॥ भस्मकूटशयादां ताःसुशीलाऊर्ध्वरेतसः ॥ ९ ॥ लिंगार्चनरतानित्यमनन्येंद्रियमानसाः ॥ सदैववारुणाग्नेयस्नानद्वयसुनिर्मलाः ॥ १० ॥ कंदमूलफलाहाराःपरतत्त्वा र्पितेक्षणाः ॥ सत्यवंतोजितक्रोधानिर्मोहानिष्परिग्रहाः ॥ ११ ॥ निरीहानिष्प्रपंचाश्चनिरातंकानिरामयाः ॥ निर्भगानिरुपायाश्चनिःसंगानिर्मलाशयाः ॥ १२ ॥ निस्तीर्णोदग्रसंसारानिर्विकल्पानिरेनसः ॥ निर्द्वंद्वानिश्चितार्थाश्चनिरहंकारवृत्तयः ॥ १३ ॥ सदैवमेमहाप्रीतामत्पुत्रामत्स्वरूपिणः ॥ एते पूज्यानमस्याश्चमद्बुद्ध्यामत्परायणैः ॥ १४ ॥ अर्चितेष्वेष्वहंप्रीतोभविष्यामिनसंशयः ॥ अस्मिन्वैश्वेश्वरेक्षेत्रेसंभोज्याःशिवयोगिनः ॥ १५ ॥ कोटिभोज्यफलंसम्यगेकैकपरिसंख्यया ॥ अयंविश्वेश्वरःसाक्षात्स्थावरात्माजगत्प्रभुः ॥ १६ ॥ सर्वेषांसर्वसिद्धीनांकर्ताभक्तिजुषामिह ॥ अहंकदा चिद्दृश्यःस्यामदृश्यःस्यांकदाचन ॥ १७ ॥ आनंदकानने चात्रस्वैरंतिष्ठामिदेवताः ॥ अनुग्रहायसर्वेषांभक्तानामिहसर्वदा ॥ १८ ॥ स्थास्यामिलिंगरूपे णचिंतितार्थफलप्रदः ॥ स्वयंभून्यस्वयंभूनियानिलिंगानिसर्वतः ॥ तानिसर्वाणिचायांतिद्रष्टुंलिंगमिदंसदा ॥ १९ ॥ अहंसर्वेषुलिंगेषुतिष्ठाम्येवनसं शयः ॥ परंत्वियंपरामूर्तिर्ममलिंगस्वरूपिणी ॥ २० ॥ येनलिंगमिदंदृष्टंश्रद्धयाशुद्धचक्षुषा ॥ साक्षात्कारेणतेनाहंदृष्टएवदिवौकसः ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रवणादस्यलिंगस्यपातकंजन्मसंचितम् ॥ क्षणात्क्षयतिशृण्वंतुदेवाऋषिगणैःसह ॥ २२ ॥ स्मरणादस्यलिंगस्यपापंजन्मद्वयार्जितम् ॥ अवश्यंनश्य तिक्षिप्रंममवाक्यान्नसंशयः ॥२३॥ एतल्लिंगंसमुद्दिश्यगृहान्निष्क्रमणक्षणात् ॥ विलीयतेमहापापमपिजन्मत्रयार्जितम् ॥२४॥ दर्शनादस्यलिंगस्यहय मेधशतोद्भवम् ॥ पुण्यंलभेतनियतंममानुग्रहतोमराः ॥२५॥ स्वयंभुवोस्यलिंगस्यममविश्वेशितुःसुराः ॥ राजसूयसहस्रस्यफलंस्यात्स्पर्शमात्रतः ॥२६॥ पुष्पमात्रप्रदानाच्चचुलुकोदकपूर्वकम् ॥ शतसौवर्णिकंपुण्यंलभतेभक्तियोगतः ॥२७॥ पूजामात्रंविधायास्यलिंगराजस्यभक्तितः ॥ सहस्रहेमकमलपूजा फलमवाप्यते ॥ २८ ॥ विधायमहतींपूजांपंचामृतपुरःसराम् ॥ अस्यलिंगस्यलभतेपुरुषार्थचतुष्टयम् ॥ २९ ॥ वस्त्रपूतजलैर्लिंगंस्नापयित्वाम मामराः ॥ लक्षाश्वमेधजनितंपुण्यमाप्नोतिसत्तमः ॥ ३० ॥ सुगंधचंदनरसैर्लिंगमालिप्यभक्तितः ॥ आलिप्यतेसुरस्त्रीभिःसुगंधैर्यक्षकर्दमैः ॥ ३१ ॥ सामोदधूपदानैश्चदिव्यगंधाश्रयोभवेत् ॥ घृतदीपप्रबोधैश्चज्योतीरूपविमानगः ॥ ३२ ॥ कर्पूरवर्तिदीपेनसकृद्दत्तेनभक्तितः ॥ कर्पूरदेहगौरश्रीर्भवेद्भाल विलोचनः ॥ ३३ ॥ दत्त्वानैवेद्यमात्रंतुसिक्थेसिक्थेयुगंयुगम् ॥ कैलासाद्रौवसेद्धीमान्महाभोगसमन्वितः ॥ ३४ ॥ विश्वेशेपरमान्नंयोदद्यात्साज्यं सशर्करम् ॥ त्रैलोक्यंतर्पितंतेनसदेवपितृमानवम् ॥ ३५ ॥ मुखवासंतुयोदद्याद्दर्पणंचारुचामरम् ॥ उल्लोचंसुखपर्यंकंतस्यपुण्यफलंमहत् ॥ ३६ ॥ संख्यासागररत्नानांकथंचित्कर्तुमिष्यते ॥ मुखवासादिदानस्यकःसंख्यामत्रकारयेत् ॥ ३७ ॥ पूजोपकरणद्रव्यंयोघंटागडुकादिकम् ॥ भक्त्यामेभवने दद्यात्सवसेदत्रमेंतिके ॥ ३८ ॥ योगीतवाद्यनृत्यानामेकंमत्प्रीतयेत्यधात् ॥ तस्याग्रतोदिवारात्रंभवेत्तौर्यत्रिकंमहत् ॥ ३९ ॥ चित्रलेखनकर्मादिप्रासा देमेऽत्रकारयेत् ॥ यःसचित्रान्महाभोगान्भुंक्तेमत्पुरतःस्थितः ॥४०॥ सकृद्विश्वेश्वरंनत्वामध्येजन्मसुधीर्नरः ॥ त्रैलोक्यवंदितपदोजायतेवसुधापतिः॥ ॥ ४१ ॥ यस्तुविश्वेश्वरंदृष्ट्वाह्यन्यत्रापिनिपद्यते ॥ तस्यजन्मांतरेमोक्षोभवत्येवनसंशयः ॥ ४२ ॥ विश्वेशाख्यातुजिह्वाग्रेविश्वनाथकथाश्रुतौ ॥ विश्वे शशीलनंचित्तेयस्यतस्यजनिःकुतः ॥ ४३ ॥ लिंगंमेविश्वनाथस्यदृष्ट्वायश्चानुमोदते ॥ समेगणेषुगण्येतमहापुण्यबलाश्रितः ॥ ४४ ॥ नित्यंविश्वेश विश्वेशविश्वनाथेतियोजपेत् ॥ त्रिसंध्यंतंसुकृतिनंजपाम्यहमपिध्रुवम् ॥ ४५ ॥ ममापीदंमहालिंगंसदापूज्यतमंसुराः ॥ तस्मात्सर्वप्रयत्नेनपूज्यंदेवर्षि मानवैः ॥ ४६ ॥ यैर्नविश्वेश्वरोदृष्टोयैर्नविश्वेश्वरःस्मृतः ॥ कृतांतदूतैस्तेदृष्टास्तैःस्मृतागर्भवेदना ॥ ४७ ॥ यैरिदंप्रणतंलिंगंप्रणतास्तेसुरासुरैः ॥ यस्यै केनप्रणामेनदिक्पालपदमल्पकम् ॥ दिक्पालपदतःपातःपातःशिवनतेर्नहि ॥ ४८ ॥ शृण्वंतुदेवर्षिगणाःसमस्तास्तथ्यंब्रुवेतत्परोपकृत्यै ॥ नभूर्भुवः स्वर्गमहर्जनांतर्विश्वेशतुल्यंक्वचिदस्तिलिंगम् ॥ ४९ ॥ नसत्यलोकेनतपस्यहोसुरावैकुंठकैलासरसातलेषु ॥ तीर्थंक्वचिद्वैमणिकर्णिकासमंलिंगंचविश्वे श्वरतुल्यमन्यतः ॥ ५० ॥ नविश्वनाथस्यसमंहिलिंगंनतीर्थमन्यन्मणिकर्णिकातः ॥ तपोवनंकुत्रचिदस्तिनान्यच्छुभंममानंदवनेनतुल्यम् ॥ ५१ ॥ वाराणसीतीर्थमयीसमस्तायस्यास्तुनामापिहितीर्थतीर्थम् ॥ तत्रापिकाचिन्ममसौख्यभूमिर्महापवित्रामणिकर्णिकासौ ॥ ५२ ॥ स्थानादमुष्मान्ममरा जसौधात्प्राच्यांमनागीशसमाश्रितायाम् ॥ सव्येपसव्येचकराःक्रमेणशतत्रयीयापिशतद्वयीच ॥ ५३ ॥

हस्ताःशतंपंचसुरापगायामुदीच्यवाच्योर्मणिकर्णिकेयम् ॥ सारस्त्रिलोक्याःपरकोशभूमिर्यैःसेवितातेममहृच्छयाहि ॥ ५४ ॥ अस्मिन्ममानंदवनेयदेत ल्लिंगंसुधाधामसुधामधाम ॥ आसप्तपातालतलात्स्वयंभुसमुत्थितंभक्तकृपावशेन ॥५५॥ येस्मिञ्जनाःकृत्रिमभावबुद्ध्यालिंगंभजिष्यंतिचहेतुवादैः ॥ तेषांहिदंडःपरएषएवनगर्भवासाद्विरमंतितेध्रुवम् ॥ ५६ ॥ यद्यद्धितंस्वस्यसदैवतत्तल्लिंगेत्रदेयंममभक्तिमद्भिः ॥ इहाप्यमुत्रापितस्यसंक्षयोयथेहपाप स्यकृतस्यपापिभिः ॥ ५७ ॥ दूरस्थितैरप्यधिबुद्धिभिर्यैर्लिंगंसमाराधिममेदमत्र ॥ मयैवदत्तैःशुभवस्तुजातैर्निःश्रेयसःश्रीर्वसंयेत्सतस्तान् ॥ ५८ ॥ शृणुष्वविष्णोशृणुसृष्टिकर्तःशृण्वंतुदेवर्षिगणाःसमस्ताः ॥ इदंहिलिंगंपरसिद्धिदंसतांभेदोमनागत्रनमत्सकाशतः ॥ ५९ ॥ अस्मिन्हिलिंगेऽखिलसि द्धिसाधनेसमर्पितंयैःसुकृतार्जितंवसु ॥ तेभ्योतिमात्राखिलसौख्यसाधनंददामिनिर्वाणपदंसुनिर्भयम् ॥ ६० ॥ उत्क्षिप्यबाहुंत्वसकृद्ब्रवीमित्रमीमयेऽ स्मिंस्त्रयमेवसारम् ॥ विश्वेशलिंगंमणिकर्णिकांबुकाशीपुरीसत्यमिदंत्रिसत्यम् ॥ ६१ ॥ उत्थायदेवोथसशक्तिरीशस्तस्मिन्हिलिंगेकृतचारुपूजः ॥ ययौ लयंतेचसुराजयेतिजयेतिचोक्त्वानुनुवुस्तमीशम् ॥ ६२ ॥

स्कंदउवाच ॥ ॥ क्षेत्रस्यमैत्रावरुणेविमुक्तस्यमहामते ॥ प्रभावस्यैकदेशोयंकथितःकल्मषापहः ॥ ६३ ॥ तवाग्रेतुयथाबुद्धिकाशीविश्लेषतापिनः ॥ अचिरेणैवकालेनकाशींप्राप्स्यस्यनुत्तमाम् ॥ ६४ ॥ अस्ताचलस्यशिखरंप्राप्तवानेषभानुमान् ॥ तवापिहिममाप्येषमौनस्यसमयोऽभवत् ॥ ६५ ॥ ॥ व्यासउवाच ॥ ॥ श्रुत्वेतिसमुनिःसूतसंध्योपास्त्यैविनिर्गतः ॥ प्रणम्यौमेयमसकृल्लोपामुद्रासमन्वितः ॥ ६६ ॥ रहस्यंपरिविज्ञायक्षेत्रस्यशशिमौ लिनः ॥ अगस्त्योनिश्चितमनाःशिवध्यानपरोभवत् ॥ ६७ ॥ आनंदकाननस्येहमहिमानंमहत्तरम् ॥ कोत्रवर्णयितुंशक्तःसूतवर्षशतैरपि ॥ ६८ ॥ यथादेव्यैसमाख्यायिशिवेनपरमात्मना ॥ तथास्कंदेनकथितंमाहात्म्यंकुंभसंभवे ॥ ६९ ॥ तवाग्रेचसमाख्यातंशुकादीनांचसत्तम ॥ इदानींप्रष्टुकामोसि किंतत्पृच्छवदामिते ॥७०॥ श्रुत्वाध्यायमिमंपुण्यंसर्वकल्मषनाशनम् ॥ समस्तचिंतितफलप्रदंमर्त्योभवेत्कृती ॥७१॥ इतिश्रीस्कांदेमहापुराणएकाशी तिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेविश्वेश्वरलिंगमहिमाख्योनामनवनवतितमोऽध्यायः ॥ ९९ ॥ ॥ सूतउवाच ॥ ॥ इदंस्कांदमहं श्रुत्वाकाशीखंडमनुत्तमम् ॥ नितरांपरितृप्तोस्मिहृदिचाभिविधारितम् ॥ १ ॥ अनुक्रमणिकाध्यायंतथामाहात्म्यमुत्तमम् ॥ पाराशर्यसमाचक्ष्वयथापूर्वं मिदंभवेत् ॥ २ ॥ ॥ व्यासउवाच ॥ ॥ सूतावधेहिधर्मात्मञ्जातूकर्ण्यनिशामय ॥ शुकवैशंपायनाद्याःशृण्वंत्वपिचबालकाः ॥ ३ ॥ अनुक्रम णिकाध्यायंमाहात्म्यंचापिखंडजम् ॥ प्रवक्ष्याम्यघनाशायमहापुण्यप्रवर्धनम् ॥ ४ ॥ विंध्यनारदसंवादःप्रथमेपरिकीर्तितः ॥ सत्यलोकप्रभावश्च द्वितीयःसमुदाहृतः ॥ ५ ॥ अगस्तेराश्रमपदेदेवानामागमस्ततः ॥ पतिव्रताचरित्रंचप्रस्थानंकुंभसंभवः ॥ ६ ॥ तीर्थप्रशंसाचततःसप्तपुर्यस्ततः स्मृताः ॥ संयमिन्याःस्वरूपंचब्रह्मलोकस्ततःपरम् ॥ ७ ॥ इंद्राग्न्योर्लोकसंप्राप्तिस्ततश्चशिवशर्मणः ॥ अग्नेःसमुद्भवस्तस्मात्क्रव्याद्वरुणसंभवः ॥ ८ ॥ गंधवत्यलकापुर्योरीशयोस्तुसमुद्भवः ॥ चंद्रलोकपरिप्राप्तिःशिवशर्मद्विजन्मनः ॥ ९ ॥ उडुलोककथातस्मात्ततःशुक्रसमुद्भवः ॥ माहेयगुरुसौरीणांलो कानांवर्णनंततः ॥ १० ॥ सप्तर्षीणांततोलोकाध्रुवस्यचतपस्ततः ॥ ततोध्रुवपदप्राप्तिर्ध्रुवलोकस्थितिस्ततः ॥ ११ ॥ दर्शनंसत्यलोकस्यतस्यवैशिव शर्मणः ॥ चतुर्भुजाभिषेकश्चनिर्वाणंशिवशर्मणः ॥१२॥ स्कंदागस्त्योश्चसंवादोमणिकर्ण्याःसमुद्भवः ॥ ततस्तुगंगामाहात्म्यंततोदशहरास्तवः ॥१३॥ प्रभावश्चापिगंगायागंगानामसहस्रकम् ॥ वाराणस्याःप्रशंसाथभैरवाविर्भवस्ततः ॥ १४ ॥ दंडपाणेःसमुद्भूतिर्ज्ञानवाप्युद्भवस्ततः ॥ आख्यानंचकलाव त्याःसदाचारस्ततःपरम् ॥ १५ ॥ ब्रह्मचारिप्रकरणंततःस्त्रीलक्षणानिच ॥ कृत्याकृत्यप्रकरणमविमुक्तेशवर्णनम् ॥ १६ ॥ ततोगृहस्थधर्माश्चततोयोग

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निरूपणम् ॥ कात्यज्ञानंततःप्रोक्तंदिवोदासस्यवर्णनम् ॥ १७ ॥ काश्यांश्ववर्णनंतस्माद्योगिनीवर्णनंततः ॥ लोलार्कस्यसमाख्यानमुत्तरार्ककथाततः॥ ॥१८॥ सांबादित्यस्यमहिमाद्रुपदादित्यशंसनम् ॥ ततस्तुगरुडास्थानमरुणार्कोदयस्ततः ॥ १९ ॥ दशाश्वमेधिकंतीर्थमंदराच्चगणागमः ॥ पिशाचमोचनाख्यानंगणेशप्रेषणंततः ॥ २० ॥

मायागणपतेश्चाथढुंढिप्रादुर्भवस्ततः ॥ विघ्नुमायाप्रपंचोथदिवोदासविसर्जनम् ॥ २१ ॥ ततःपंचनदोत्पत्तिर्विदुमाधवसंभवः ॥ ततोवैष्णवतीर्थानां माहात्म्यपरिवर्णनम् ॥ २२ ॥ प्रयाणंमंदरात्कार्शिवृषभध्वजशूलिनः ॥ जेगीषव्येनसंवादोज्येष्ठस्थानेमहेशितुः ॥ २३ ॥ ततःक्षेत्ररहस्यस्यकथनं पापनाशनम् ॥ अथातःकंदुकेशस्यव्याघ्रेशस्यसमुद्भवः ॥२४॥ ततःशैलेश्वरकथारत्नेशंस्यचदर्शनम् ॥ कृत्तिवासःसमुत्पत्तिस्ततश्चायतनागमः ॥२५॥ देवतानामधिष्ठानंदुर्गासुरपराक्रमः ॥ दुर्गायाविजयश्चाथताततओंकारवर्णनम् ॥ २६ ॥ पुनरोंकारमाहात्म्यंत्रिलोचनसमुद्भवः ॥ त्रिलोचनप्रभावोथकेदाराख्यानमेवच ॥ २७ ॥ ततोघमेंशमहिमाततःपक्षिकथाशुभा ॥ ततोविश्वभुजाख्यानंदुर्दमस्यकथाततः ॥ २८ ॥ ततोवीरेश्वराख्यानंवारेशमहिमापुन ॥ गंगार्तीर्थंश्चसंयुक्ताकामेशमहिमाततः ॥ २९ ॥ विश्वकर्मेशमहिमादक्षयज्ञसमुद्भवः ॥ सत्यादेहत्यिसर्गश्चततोदक्षेश्वरोद्भवः ॥ ३० ॥ ततोविपार्वतीशस्यमहिम्नःपरिकीर्तनम् ॥ गंगेशस्याथमहिमानर्मदेशसमुद्भवः ॥ ३१ ॥ सतीश्वरसमुत्पत्तिरमृतेशादिवर्णनम् ॥ व्यासस्यहिभुजस्तंभो व्यासशापविमोक्षणम् ॥ ३२ ॥ क्षेत्रतीर्थकदंबंचमुक्तिमंडपसंकथा ॥ विश्वेशाविर्भवश्चाथततोयात्रापरिक्रमः ॥ ३३ ॥

एतदाख्यानशतकंक्रमेणपरिकीर्तितम् ॥ यस्यश्रवणमात्रेणसर्वखंडश्रुतेःफलम् ॥ अनुक्रमणिकाध्यायेष्वस्तियात्रापरिक्रमः ॥३४॥ ॥ सूतउवाच ॥ यात्रापरिक्रमंब्रूहिजनानांहितकाम्यया ॥ यथावत्सिद्धिकामानांसत्यवत्यासुतोत्तम ॥ ३५ ॥ ॥ व्यासउवाच ॥ ॥ निशामयमहाप्राज्ञलोमहर्षणवच्मिते ॥ यथाप्रथमतोयात्राकर्तव्यायात्रिकैर्मुदा ॥ ३६ ॥ सचैलमादौसंस्नायचक्रपुष्करिणीजले ॥ संतर्प्यदेवान्सपितॄन्ब्राह्मणांश्चतथार्थिनः ॥ ३७ ॥ आदित्यंद्रोपदींविष्णुंदंडपाणिंमहेश्वरम् ॥ नमस्कृत्यततोगच्छेद्ढुंढिविनायकम् ॥३८॥ ज्ञानवापीमुपस्पृश्यनंदिकेशंततोर्चयेत् ॥ तारकेशंततोभ्यर्च्य महाकालेश्वरंततः ॥ ३९ ॥ ततःपुनर्दंडपाणिमित्येषापंचतीर्थिका ॥ ४० ॥ दैनंदिनीविधातव्यामहाफलमभीप्सुभिः ॥ ततोवैश्वेश्वरीयात्राकार्यासर्वार्थसिद्धिदा ॥ ४१ ॥ द्विसप्तायतनानांचकार्यायात्राप्रयत्नतः ॥ कृष्णांप्रतिपदंप्राप्यभूतावधियथाविधि ॥ ४२ ॥ अथवाप्रतिभूतंचक्षेत्रसिद्धिमभीप्सुभिः ॥ तत्तत्तीर्थकृतस्नानस्तत्तल्लिंगकृतार्चनः ॥४३॥ मौनेनयात्रांकुर्वाणःफलंप्राप्नोतियात्रिकः॥ ओंकारंप्रथमंपश्येन्मत्स्योदर्यांकृतोदकः ॥ ४४ ॥ त्रिविष्टपंमहादेवंततोवैकृत्तिवाससम् ॥ रत्नेशंचाथचंद्रेशंकेदारंचततोव्रजेत् ॥४५॥ धर्मेश्वरंचवीरेशंगच्छेत्कामेश्वरंततः ॥ विश्वकर्मेश्वरंचाथमणिकर्णीश्वरंततः ॥ ४६ ॥ अविमुक्तेश्वरंदृष्ट्वाततोविश्वेशमर्चयेत् ॥ एषायात्राप्रयत्नेनकर्तव्याक्षेत्रवासिना ॥ ४७ ॥ यस्तुक्षेत्रमुपित्वातुनैतांयात्रांसमाचरेत् ॥ विघ्नास्तस्योपतिष्ठंतेक्षेत्रोच्चाटनमूचकाः ॥ ४८ ॥ अष्टायतनयात्रान्याकर्तव्याविघ्नशांतये ॥ दक्षेशःपार्वतीशश्चतथापशुपतीश्वरः ॥४९॥ गंगेशोनर्मदेशश्चकपर्तीशःसर्तीश्वरः ॥ अष्टमस्तारकेशश्चप्रत्यष्टमिविशेषतः ॥ ५० ॥ दृश्यान्येतानिलिंगानिमहापापोपशांतये ॥ अपरापिशुभायात्रायोगक्षेमकरीसदा ॥ ५१ ॥ सर्वविघ्नोपहंत्रीचकर्तव्याक्षेत्रवासिभिः ॥ शैलेशंप्रथमंवीक्ष्यवरणास्नानपूर्वकम् ॥ ५२ ॥ स्नानंतुसंगमेकृत्वाद्रष्टव्यःसंगमेश्वरः ॥ स्वलीतीर्थेसुस्नातःपश्येत्स्वलीनमीश्वरम् ॥ ५३ ॥ स्नात्वामंदाकिनीतीर्थेद्रष्टव्योमध्यमेश्वरः ॥ पश्येद्धिरण्यगर्भेशंततश्चतीर्थेकृतोदकः ॥ ५४ ॥ मणिकर्ण्यांततःस्नात्वापश्येदीशानमीश्वरम् ॥ ततःकूपमुपस्पृश्यगोप्रेक्षमवलोकयेत् ॥ ५५ ॥ कापिलेयह्रदेस्नात्वावीक्षेतवृषभध्वजम् ॥ उपशांतशिवंपश्येत्तत्कूपविहितोदकः ॥ ५६ ॥ पंचचूडाह्वदेस्नात्वाज्येष्ठस्थानंतोर्चयेत् ॥ चतुःसमुद्रकूपेतुस्नात्वादेवंसमर्चयेत् ॥ ५७ ॥

देवस्यप्रेक्षणावापीतत्रोपस्पर्शनेकृते ॥ शुक्रेश्वरंततःपश्येत्तत्कूपविहितोदकः ॥५८॥ दंडखातेततःस्नात्वाव्याघ्रेशंपूजयेत्ततः ॥ शौनकेश्वरकुंडेतुस्नानं कृत्वाततोर्चयेत् ॥५९॥ जंबुकेशंमहालिंगंकृत्वायात्राभिमानरः॥ क्वचिन्नजायतेभूयःसंसारदुःखसागरे ॥६०॥ समारभ्यप्रतिपदंयावत्कृष्णाचतुर्दशी ॥ एतत्तमेणकर्तव्यान्येतदायतनानिवै ॥६१॥ इमांयात्रांनरःकृत्वानभूयोप्यभिजायते ॥ अन्यायात्राप्रकर्तव्यैकांदशायतनोद्भवा ॥ ६२ ॥ आग्नीध्रकुंडेसुस्नातःपश्येदाग्नीध्रमीश्वरम् ॥ उर्वशीशंततोगच्छेत्ततस्त्रिकुलीश्वरम् ॥६३॥ आषाढीशंततोदृष्ट्वाभारभूतेश्वरंततः ॥ लांगलीशमथालोक्यततस्तु त्रिपुरांतकम् ॥ ६४ ॥ ततोमनःप्रकामेशंप्रीतिकेशमथाव्रजेत् ॥ मदालसेश्वरंतस्मात्तिलपर्णेश्वरंततः ॥ ६५ ॥ यात्रैकादशलिंगानामेषाकार्याप्रयत्नतः॥ इमांयात्रांप्रकुर्वाणोरुद्रत्वंप्राप्नुयान्नरः ॥ ६६॥ अतःपरंप्रवक्ष्यामिगारीयात्रामनुत्तमाम् ॥ शुक्लपक्षेतृतीयायांयात्राविघ्नशुद्धिदा ॥ ६७ ॥ गोप्रेक्षतीर्थेसुस्नायमुखनिर्मालिकांव्रजेत् ॥ ज्येष्ठावा नरःस्नात्वाज्येष्ठागौरीसमर्चयेत् ॥६८॥ सौभाग्यगौरीसंपूज्याज्ञानवाप्यांकृतोदकेः॥ततःशृंगारगौरींचततत्रैवकृतोदकः ॥ ६९ ॥ स्नात्वाविशालगंगायांविशालाशीततोव्रजेत् ॥ सुस्नातोललितातीर्थेललितामर्चयेत्ततः ॥७०॥ स्नात्वाभवानीतीर्थेथभवानीं परिपूजयेत् ॥ मंगलाचततोभ्यर्च्यांविंदुतीर्थेकृतोदकेः ॥ ७१ ॥ ततोगच्छेन्महालक्ष्मींस्थिरलक्ष्मीसमृद्धये ॥ इमांयात्रांनरःकृत्वाक्षेत्रेस्मिन्मुक्तिजन्मनि ॥ ७२ ॥ नदुःखेरभिभूयेतइहामुत्रापिकुत्रचित् ॥ कुर्यात्प्रतिचतुर्थीह्ययात्रांविघ्नेशितुःसदा ॥ ७३ ॥ ब्राह्मणेभ्यस्तदुदेशादेयावैमोदकामुदे ॥ भौमेभैरवयात्रांकार्यापातकहारिणी ॥ ७४ ॥ विवारेरवेर्यात्रापष्ठ्यांवारविसंयुजि ॥ तथैवरविसप्तम्यांसर्वविघ्नोपशांतये ॥ ७५ ॥ नवम्यामथवाष्टम्यांचंडीयात्राशुभामता ॥ अंतर्गृहस्यवैयात्राकर्तव्याप्रतिवासरम् ॥ ७६ ॥ प्रातःस्नानंविधायादौनत्वापंचविनायकान् ॥ नमस्कृत्वाथविश्वेशंस्थित्वानिर्वाणमंडपे ॥ ७७ ॥ अंतर्गृहस्ययात्रेयंकरिष्येवोपशांतये ॥ गृहीत्वानियमंचेतिगत्वाथमणिकर्णिकाम् ॥ ७८ ॥ स्नात्वामोनेनचागत्य मणिकर्णीशमर्चयेत् ॥ कंबलाश्वतरौनत्वावासुकीशंप्रणम्यच ॥ ७९ ॥ पर्वतेशंततोदृष्ट्वागंगाकेशवमप्यथ ॥ ततस्तुललितांदृष्ट्वाजरासंधेश्वरंततः ॥८०॥ ततोवैसोमनाथंचवाराहंचततोव्रजेत् ॥ ब्रह्मेश्वरंततोनत्वानत्वागस्तीश्वरंततः ॥ ८१ ॥ कश्यपेशंनमस्कृत्यहरिकेशवनंततः ॥ वैद्यनाथंततोदृष्ट्वाध्रुवेशमथवीक्ष्यच ॥ ८२ ॥ गोकर्णेश्वरमभ्यर्च्यहाटकेशमथोव्रजेत् ॥ अस्थिक्षेपतडागेचदृष्ट्वाविकीकसेश्वरम् ॥ ८३ ॥

भारभूतंततोनत्वाचित्रगुप्तेश्वरंततः ॥ चित्रघंटाप्रणम्याथततःपशुपतीश्वरम् ॥ ८४ ॥ पितामहेश्वरंगत्वाततस्तुकलशेश्वरम् ॥ चंद्रेशस्त्वथवीरेशोविद्येशोग्नीशएवच ॥८५॥ नागेश्वरोहरिश्चंद्रश्चिंतामणिविनायकः ॥ सेनाविनायकश्चाथद्रष्टव्यःसर्वविघ्नहृत् ॥ ८६ ॥ वसिष्ठकामदेवौचमूर्तिरूपधरावुभौ ॥ द्रष्टव्यौयवतःकाश्यांमहाविघ्नविनाशिनौ ॥ ८७ ॥ सीमाविनायकंचायकरुणेशंततोव्रजेत् ॥ त्रिसंध्येशोविशालाक्षीधर्मेशोविश्वबाहुका ॥ आशाविनायकश्चाथवृद्धादित्यस्ततःपुनः ॥ ८८ ॥ चतुर्वक्त्रेश्वरंलिंगंब्राह्मीशस्तुततःपरः ॥ ततोमनःप्रकामेशईशानेशस्ततःपरम् ॥ ८९ ॥ चंडीचंडीश्वरौदृश्यौ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवानीशंवरौततः ॥ ढुंढिंप्रणम्यचततोराजराजेशमर्चयेत् ॥ ९० ॥ लांगलीशस्ततोभ्यर्च्यस्ततस्तुनकुलीश्वरः ॥ परान्नेशमथोनत्वापरद्रव्येश्वरंततः ॥ ९१ ॥ प्रतिग्रहेश्वरंवापिनिष्कलंकेशमेवच ॥ मार्कंडेयेशमभ्यर्च्यततश्चाप्सरसेश्वरम् ॥ ९२ ॥ गंगेशोर्च्यस्ततोज्ञानवाप्यांस्नानंसमाचरेत् ॥ नंदिकेशंतारकेशंमहाकालेश्वरंततः ॥ ९३ ॥ दंडपाणिंमहेशंचमोक्षेशंप्रणमेत्ततः ॥ वीरभद्रेश्वरंनत्वाअविमुक्तेश्वरंततः ॥९४॥ विनायकांस्ततःपंचविश्वनाथंततोव्रजेत् ॥ ततोमौनंविसृज्याथमंत्रमेतमुदीरयेत् ॥ ९५ ॥ अंतर्गृहस्ययात्रेयंयथावद्यामयाकृता ॥ न्यूनातिरिक्तयाशंभुःप्रीयतामनयाविभुः ॥९६॥ इतिमंत्रंसमुच्चार्यक्षणंवैमुक्तिमंडपे ॥ विश्रम्ययायाद्भवनंनिष्पापःपुण्यवान्नरः ॥९७॥ संप्राप्यवासरंविष्णोर्विष्णुतीर्थेपुसर्वतः ॥ कार्यायात्राप्रयत्नेनमहापुण्यसमृद्धये ॥ ९८ ॥ नभस्यपंचदश्यांचकुलस्तंभंसमर्चयेत् ॥ दुःखंरुद्रपिशाचत्वंनभवेद्यस्यपूजनात् ॥ ९९ ॥ श्रद्धापूर्वमिमायात्राःकर्तव्याःक्षेत्रवासिभिः ॥ पर्वस्वपिविशेषेणकार्यायात्राश्चसर्वतः ॥ १०० ॥ नवंध्यंदिवसंकुर्याद्विनायात्रांक्वचित्कृती ॥ यात्राद्वयंप्रयत्नेनकर्तव्यंप्रतिवासरम् ॥ १ ॥ आदौस्वर्गतरंगिण्यास्ततोविश्वेशितुर्ध्रुवम् ।' यस्यवंध्यंदिनंयातंकाश्यांनिवसतःसतः ॥२॥निराशाःपितरस्तस्यतस्मिन्नेवदिनेऽभवन् ॥ सदृष्टःकालसर्पेणसदृष्टोमृत्युनास्फुटम् ॥ ३ ॥ समुष्टस्तत्रदिवसेविश्वेशोयत्रनेक्षितः ॥ सर्वतीर्थेषुसस्नौससर्वयात्रांव्यधात्सच ॥ मणिकर्ण्यांतुयःस्नातोयोविश्वेशंनिरैक्षत ॥४॥ सत्यंसत्यंपुनःसत्यंसत्यंसत्यंपुनःपुनः ॥ दृश्योविश्वेश्वरोनित्यंस्नातव्यामणिकर्णिका ॥५॥ ॥ व्यासउवाच ॥ ॥ सूतस्कांदमिदंश्रुत्वाकाशीमाहात्म्यमुत्तमम् ॥ नरोननिरयंयातिकृत्वाप्यघसहस्रकम् ॥ ६ ॥ स्नात्वासर्वाणितीर्थानियच्छ्रेयःसमुपार्ज्यते ॥ काशीखंडस्यश्रवणात्तत्स्यात्सूतनसंशयः ॥७॥ दत्त्वादानानिसर्वाणिकृत्वायज्ञाननेकशः ॥ तत्पुण्यलभतेमर्त्यस्तदातच्छ्रवणाद्ध्रुवम् ॥८॥ तप्त्वातपांसिचोग्राणिप्राप्यतेयन्महत्फलम् ॥ श्रवणादस्यखंडस्यलभतेतन्नसंशयः ॥ ९ ॥

अधीत्यचतुरोवेदान्सांगान्यत्फलमाप्यते ॥ काशीखंडंसमाकर्ण्यतत्फलंलभ्यतेनरैः ॥ ११० ॥ गयायांश्राद्धदानाच्चयथातृप्यंतिपूर्वजाः ॥ तथैतच्छ्रवणान्नृणांतृप्नुवंतिपितामहाः ॥ ११ ॥ तैश्चसर्वपुराणानिश्रुतानिस्थिरबुद्धिभिः ॥ काशीखंडंश्रुतंयैश्चसर्वेषांश्रेयसांपदम् ॥ १२ ॥ श्रुताश्चसर्वधर्मास्तैर्महापुण्यैकराशिभिः ॥ श्रुतंयैःस्थिरचेतोभिःकाशीमाहात्म्यमुत्तमम् ॥१३॥ इदमेवहिदेवेज्यापरमापरिकीर्तिता ॥ जपेत्तत्खंडमखिलंश्रोतव्यंश्रद्धयाद्विजाः ॥ १४ ॥ शृणुयादेकमपियआख्यानंकाशिखंडजम् ॥ श्रुतानितेनसर्वाणिधर्मशास्त्राण्यसंशयम् ॥ १५ ॥ महाधर्मैकजननंमहार्थप्रतिपादकम् ॥ कारणंसर्वकामाप्तेःकाशीखंडमिदंस्मृतम् ॥ १६ ॥ एतच्छ्रवणतःपुंसांकैवल्यंनैवदूरतः ॥ तुष्यंतिसर्वेपितरःश्रुत्वैतत्खंडमुत्तमम् ॥ १७॥ प्रीणंत्यमर्त्याःसर्वेपिब्रह्मविष्णुशिवादयः ॥ मुनयःपरिमोदंतेमाद्यंतिसनकादयः ॥ १८ ॥ हृष्टःसर्वोभवेदेवभूतग्रामश्चतुर्विधः ॥ महिमश्रवणादस्माद्वाराणस्यानसंशयः ॥ १९ ॥ यइदंश्रावयेद्विद्वान्समस्तंत्वर्धमेववा ॥ पादमात्रंतदर्धंवात्वेकंव्याख्यानमुत्तमम् ॥ १२० ॥ सनमस्यःप्रयत्नेनसंपूज्यस्त्विष्टदेववत् ॥ तस्मैदेयंप्रयत्नेनविश्वेशप्रीतयेसदा ॥ २१ ॥ तस्मिंस्तुष्टेहिसंतुष्टोविश्वेशोनात्रसंशयः ॥ यत्रैतत्पठ्यतेखंडंपरानंदसमाश्रयम् ॥ २२ ॥ नतत्रप्रभवेत्कश्चिदमंगलसमुद्भवः ॥ यइदंशृणुयाद्विद्वान्यश्चेदंश्रावयेत्सुधीः ॥ २३ ॥ यःपठेदपिपुण्यात्मातेसर्वेरुद्रमूर्तयः ॥ यएतत्पुस्तकंरम्यंलेखयित्वासमर्पयेत् ॥ २४ ॥ अखिलानिपुराणानितेनदत्तानिनान्यथा ॥ अत्राख्यानानियावंतिश्लोकायावंतएवहि ॥ २५ ॥ तथापदानियावंतिवर्णायावंतएवहि ॥ यावंत्यपिचमात्राणियावत्यःपदपंक्तयः ॥ २६ ॥ गुणेसूत्राणियावंतियावंतःपटतंतवः ॥ चित्ररूपाणियावंतिरम्यपुस्तकसंचके ॥ २७ ॥ तावद्युगसहस्राणिदातास्वर्गेमहीयते ॥ एतद्द्वादशकृत्वोयःशृणुयात्खंडमुत्तमम् ॥ २८ ॥ ब्रह्महत्यापितस्याशुनश्येच्छंभोरनुग्रहात् ॥ अपुत्रःशृणुयाद्यस्तुसुस्नातःश्रद्धयान्वितः ॥ २९ ॥ तस्यपुत्रोभवत्येवशंभोराज्ञाप्रभावतः ॥ किंबहूक्तेनसूतेहयस्ययस्यमनोरथः ॥ १३० ॥ योयस्तंतंससदाश्रुत्वैतत्प्राप्नुयात्कृती ॥ शृणुयादूरदेशेपियःकाशीखंडमुत्तमम् ॥ ३१ ॥ सकाशीवासपुण्यस्यभाजनंस्याच्छिवाज्ञया ॥ एतच्छ्रवणतःपुंसांसर्वत्रविजयोभवेत् ॥ सौभाग्यंचापिसर्वत्रप्राप्नुयान्निर्मलाशयः ॥ ३२ ॥ यस्यविश्वेश्वरस्तुष्टस्तस्यैतच्छ्रवणेमतिः ॥ जायतेपुण्ययुक्तस्यमहानिर्मलचेतसः ॥ ३३ ॥

सर्वेषांमंगलानांचमहामंगलमुत्तमम् ॥ गृहेपिलिखितंपूज्यंसर्वमंगलसिद्धये ॥१३४॥ ॥ इतिश्रीस्कंदिमहापुराणएकाशीतिसाहस्र्यांसंहितायांचतुर्थेकाशीखंडउत्तरार्धेऽनुक्रमणिकानामशततमोऽध्यायः ॥ १०० ॥ ॥छ॥ ॥ श्रीकाशीखण्डोत्तरार्धंसम्पूर्णम् ॥ ॥ समाप्तंचेदंचतुर्थंकाशीखंडम् ॥४॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति श्रीस्कांदमहापुराणांतर्गतचतुर्थकाशीखंडोत्तरार्धं सम्पूर्णम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA





CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA



॥ श्रीगणेशाय नमः ॥ श्रीजगदंबायै नमः ॥ ॥ अथावन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रारभ्यते ॥ ॥ व्यास उवाच ॥ ॥ स्कंदोऽपि
प्रजानां प्रबलभवभयाद्यं नमस्यंति देवा यो ह्यव्यक्ते प्रविष्टः प्रविहितमनसां ध्यानयुक्तात्मनां च ॥ लोकानामादिदेवः स जयतु भगवाञ्छ्रीमहः
कालनामा बिभ्राणः सोमलेखामहिवलययुतं व्यक्तलिंगं कपालम् ॥ १ ॥ ॥ उमोवाच ॥ ॥ पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा॥
कथ्यंतां तानि यत्नेन श्रद्धा येषु प्रजायते ॥ २ ॥ ईश्वर उवाच ॥ ॥ अस्ति लोकेषु विख्याता गंगा त्रिपथगा नदी ॥ सेविता देवग
न्धर्वैर्मुनिभिश्च निषेविता ॥ ३ ॥ तपनस्य सुता देवी यमुना लोकपावनी ॥ पितृणां वल्लभा देवी महापातकनाशिनी ॥ ४ ॥ चन्द्रभागा वितस्ता
च नर्मदाऽमरकण्टके ॥ कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥ ५ ॥ केदारं पुष्करं चैव तथा कायावरोहणम् ॥ तथा पुण्यतमं देवि महा
कालवनं शुभम् ॥ ६ ॥ यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः ॥ क्षेत्रं योजनपर्यंतं ब्रह्महत्यादिनाशनम् ॥ ७ ॥ मुक्तिदं मुक्तिदं क्षेत्र कलिक
ल्मषनाशनम् ॥ प्रलयेऽप्यक्षयं देवि दुष्प्रापं त्रिदशैरपि ॥ : ॥ ॥ उमोवाच ॥ ॥ प्रभावः कथ्यतां देव क्षेत्रस्यास्य महेश्वर ॥ यानि
तीर्थानि विद्यन्ते यानि लिंगानि संति वै ॥ ९ ॥ तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १० ॥ ॥ महादेव उवाच ॥ ॥ शृणु देवि
प्रयत्नेन प्रभावं पापनाशनम् ॥ क्षेत्रमाद्यं महादेवि सर्वपापप्रणाशनम् ॥ ११ ॥ श्रीमेरोः संनिधाने च शिखरं रत्नचित्रितम् ॥ अनेकाश्चर्यनि
लयं बहुपादपसंकुलम् ॥ १२ ॥ विचित्रधातुभिश्चित्रं स्वच्छस्फटिकवेदिकम् ॥ विचित्रवर्णशोभाढ्यनृपिसंघनिनादितम् ॥ १३ ॥ मृगनागेन्द्रसं
युक्तं गजयूथसमाकुलम् ॥ निर्झरांबुप्रपातोत्थशीकराकरसंकुलम् ॥ १४ ॥ वाताहततरुव्रातप्रसूनास्थानचित्रितम् ॥ मृगनाभिवरामोदवासिता
शेषकाननम् ॥ १५ ॥ लतागृहरतिस्थानं सिद्धविद्याधराश्रयम् ॥ प्रवीणकिन्नरव्रातमधुरध्वनिनादितम् ॥ १६ ॥ तस्मिन्वने महारम्ये शोभिताशेष
भूमिकम् ॥ वैराजंनाम भवनं ब्रह्मणः परमेष्ठिनः ॥ १७ ॥ तत्र दिव्यांगनागीतमधुरध्वनिनादिता ॥ पारिजाततरुच्छन्नमंजरीदामशोभिता ॥
॥ १८ ॥ बहुवाद्यसमुद्भूतमहास्वननिनादिता ॥ लयतालयुतानेकगीतवाद्यनादिता ॥ १९ ॥ विन्यस्ता कोटिभिः स्तंभैर्निर्मलादर्शशोभिता ॥
लयतालयुतानेकमहाकौतुकसंयुता ॥ २० ॥ अप्सरोनृत्यविन्यासविलासोल्लासशोभिता ॥ सभा कांतिमतीनाम देवानां हर्षदायिका ॥ २१ ॥
ऋषिसंघसमाकीर्णा मुनिवृन्दनिषेविता ॥ द्विजातिवेदशब्देन नादिताऽनंददायिका ॥ २२ ॥ तस्यां निविष्टं वागीशं शंकराराधने रतम् ॥ सन
त्कुमारं ब्रह्मर्षिं ब्रह्मणो मानसं सुतम् ॥ २३ ॥ मुनिमध्यात्सरुषाय कृष्णद्वैपायनो मुनिः ॥ पराशरसुतो व्यासः प्रणिपत्य यथाविधि ॥ २४ ॥
कृतांजलिपुटो भूत्वा भवभक्त्यानुभावितः ॥ पप्रच्छ परया तुष्ट्या हर्षितांगरुहाननः ॥ २५ ॥ माहाकालस्य महात्म्यं प्राणिनां मोहनाशनम् ॥
॥ ॥ व्यास उवाच ॥ ॥ महाकालवनं कस्मात्प्रोच्यते सर्वतो वरम् ॥ २६ ॥ भगवन्क्षेत्रमाहात्म्यं महाकालस्य कथ्यताम् ॥ कथं गुह्यवनं प्रोक्तं
पीठत्वमूपरं तथा ॥ २७ ॥ फलं यथात्र वसतां मृतानां च गतिर्यथा ॥ स्नानेन यद्भवेत्पुण्यं दानेनापि च यत्फलम् ॥ २८ ॥ कथमेतत्स्मशानं
च क्षेत्रं प्रोक्तं यथा तथा ॥ पृष्टं मे शंकरे भक्त्या ब्रूहि त्वं शास्त्रकोविद ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥ क्षीयते पातकं यत्र तेनेदं
क्षेत्रमुच्यते ॥ यस्मात्स्थानं च मातॄणां पीठं तेनैव कथ्यते ॥ ३० ॥ मृताः पुनर्न जायंते तेनेदमूपरं स्मृतम् ॥ गुह्यमेतत्प्रियं नित्यं क्षेत्रं शंभोर्महा
त्मनः ॥३१॥ यस्मादिष्टं हि भूतानां स्मशानमतिवल्लभम् ॥ महाकालवनं यच्च तथा चैवाविमुक्तिकम् ॥ ३२ ॥ एकाम्रकं भद्रकालं करवीरवनमेव

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च ॥ कोलागिरिस्तथा काशी प्रयागममरेश्वरम् ॥ ३३ ॥ भरथं चैव केदारं दिव्यं रुद्रमहालयम् ॥ दिव्यस्मशानान्येतानि रुद्रस्येष्टानि नित्यशः ॥ ॥ ३४ ॥ रमते भगवानेषु सिद्धक्षेत्रेषु सर्वदा ॥ पृथिव्यां नैमिषं तीर्थमुत्तमं तीर्थपुष्करम् ॥ ३५ ॥ त्रयाणामपि लोकानां कुरुक्षेत्रं प्रशस्यते ॥ कुरुक्षेत्राद्दशगुणा पुण्या वाराणसी मता ॥ ३६ ॥ तस्या दशगुणं व्यास महाकालवनोत्तमम् ॥ प्रभासाद्यानि तीर्थानि पृथिव्यामिह यानि तु ॥ ३७ ॥प्रभासमुत्तमं तीर्थं क्षेत्रमाद्यं पिनाकिनः ॥ श्रीशैलमुत्तमं तीर्थं देवदारुवनं तथा ॥ ३८ ॥ तस्मादप्युत्तमं व्यास पुण्या वाराणसी मता॥तस्माद्दशगुणं प्रोक्तं सर्वतीर्थोत्तमं यतः॥३९॥महाकालवनं गुह्यं सिद्धक्षेत्रं तथोपरम् ॥ किंचिद्ब्रह्मान्यथान्यानि स्मशानान्यूपराणि च ॥४०॥ सर्वतस्तु समाख्यातं महाकालवनं मुने ॥ स्मशानमूपरं क्षेत्रं पीठं तु वनमेव च ॥४१॥ पंचैकत्र न लभ्यंते महाकालपुराद्ऋते ॥४२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालवनप्रशंसावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा त्वेकार्णवे प्राप्ते नष्टे स्थावरजंगमे ॥ नाग्निर्न वायुरादित्यो न भूमिर्न दिशो नभः ॥१॥ न नक्षत्राणि न ज्योतिर्न द्यौर्नैवदुर्ग्रहास्तथा ॥ न देवासुरगंधर्वाः पिशाचोरगराक्षसाः ॥ २ ॥ सरांसि नैव गिरयो नापगा नाध्वयस्तथा ॥ सर्वमेव तमोभूतं न प्राज्ञायत किंचन ॥ ३ ॥ तदेको हि महाकालो लोकानुग्रहकारणात् ॥ तस्थौ स्थानान्यशेषाणि काष्ठास्वालोकयन्प्रभुः ॥ ४ ॥ सृष्टयर्थं स महाकालः करे कामं प्रतिष्ठितम् ॥ दक्षिणस्य तु तर्जन्यां स ममंथाविशोषितम् ॥५॥ कललं बुद्बुदं भूत्वा तीव्रवेगविवर्द्धितम् ॥ जज्ञे तदंडं सुदृढं सुश्लक्ष्णं वृत्तं हिरण्मयम् ॥६॥ करेण ताडितं तद्धि बभूव द्विदलं महत् ॥ अधःखंडं स्मृता भूमिरूर्ध्वं द्यौस्तारकान्वितम् ॥ ७ ॥ मध्येऽभवत्तदा ब्रह्मा पंचवक्त्रश्चतुर्भुजः ॥ महेश्वरोऽनुमान्यैव तमयोजदनंतरम् ॥ ८ ॥ कुरु सृष्टिं महाबाहो विचित्रां मदनुग्रहात् ॥ इत्युक्तांतर्हितः क्वापि देवो ब्रह्मा न जग्मिवान् ॥ ९ ॥ प्रेर्यमाणोऽपि वै स्रष्टुं ब्रह्मा देवमचिंतयत् ॥ ब्रह्मणा ध्यायमानश्च ज्ञानार्थं भगवान्भवः ॥ १० ॥ ब्रह्मणस्तपसा तुष्टः प्रादाद्वेदं षडंगकम् ॥ लब्धे वेदेऽपि न चिरात्सृष्टिं कर्तुं शशाक सः ॥११॥ तपसाऽतिष्ठदो भूयः समाराधयितुं भवम् ॥ नापश्यत्स यदा देवं तदा तुष्टाव भावितः ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमः शिवायामलसत्त्वचेतसे गुणत्रयार्तातविसारितेजसे ॥ षडंगवेदस्य ममापि वेधसे परस्वरूपानुभवाय चक्षुषे ॥ १३ ॥ नमोऽस्तु ते सृष्टिविधौ रजोजुषे जगत्स्थितौ सत्त्वमधिष्ठिताय ते ॥ विनाशहेतौ तमसा महीयसे शिवाय निर्वाणसुखप्रदायिने ॥१४॥ अशेषभूतप्रकृतेः परायवै परात्मरूपाय नमः शिवाय वै ॥ नृबुद्ध्यहंकारमनोविधायिने भेत्रे च षड्विंशकरूपकाय वै ॥ १५ ॥ भूतोयवह्नयम्बरवायुचंद्रसूर्यात्मरूपाभिरिदं तनूभिः ॥ व्याप्तं जगद्यस्य नमोऽस्तु तस्मै भूतं भविष्यमथ वर्तमानम् ॥ १६ ॥ यानीह तेजांसि जगंति यानि भूतानि भव्यान्यथ कारणानि ॥ भवंति सृष्टौ विलयं विनाशे व्रजंति यस्यात्मनि तं नमामि ॥ १७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं संस्तुवतो व्यास ब्रह्मणो भगवान्परः ॥ अन्तर्हित उवाचेदं ब्रह्मन्संयाच्यतां वरः ॥ १८ ॥ स वव्रे मनसा पुत्रं भवं गौरवकारणात् ॥ विज्ञायांतर्गतं तस्य परमेश उवाच तम् ॥ १९ ॥ यस्मान्मां मनसा पुत्रं चतुर्मुख समीहसे ॥ कस्मिंश्चित्कारणे तस्मादहं छेत्स्यामि ते शिरः ॥ २० ॥ अयाच्यं याचितं यस्मान्ममांशो नीललोहितः ॥ रुद्रो भविष्यति सुतः स च ते हिंस्यति प्रभान् ॥ २१ ॥ अन्यद्यस्मात्स्मृतो भक्त्या त्वयाहं पितृभावतः ॥ परब्रह्मस्वरूपेण जिज्ञासा मम या कृता ॥ ॥ २२ ॥ तस्माद्ब्रह्मेति लोकेऽत्र नाम ख्यातं भविष्यति ॥ पितामहत्वं तेनापि पितामहस्ततो ह्यसि ॥ २३ ॥ लब्ध्वा शापवरावेवं पुत्रसृष्टिं चकार सः ॥ स्वतेजोजनितं वह्निं शुद्धतः स्वेदमावहत् ॥२४॥ समियुक्तेन हस्तेन ललाटं मार्जतोऽभवत् ॥ स्विन्नभ्रष्टस्ततो रक्तबिंदुरेको विभावसौ ॥२५॥ स नीललोहितोऽभूद्वै स च रुद्रो भवाज्ञया ॥ तदनन्तरमासाद्य उत्तरात सुतोऽतिकात् ॥ २६ ॥ पंचवक्त्रो दशभुजः शूलचापासिशक्तिमान् ॥ त्रिपंचनयनो रौद्रो व्यालयज्ञोपवीतकः ॥ २७ ॥ सेन्दुः कपर्द विभ्राणः सिंहचर्माबरंधरः ॥ जातमेवं स दृष्ट्वा तु ब्रह्मा नामाकरोत्तदा ॥ २८ ॥ नीललोहितनामेति भव रुद्र पिनाकधृक् ॥ ततः प्रववृते सृष्टिः स्रष्टुर्लोकपितामहात् ॥ २९ ॥ सप्तादौ मानसान्सृज्ञे सनकादींस्ततोऽपरान् ॥ मरीचिदक्षप्रभृतीन्मन्वादींश्च प्रजासृजः ॥ ३० ॥ अष्टभेदान्सुरान्कृत्वा तिर्यग्योनिं च पंचधा ॥ मनुष्यानेकभेदांश्च सृष्टिमेवं ससर्ज ह ॥ ३१ ॥ सृष्टिः सुरादिका जाता कृत्वा ब्रह्माणमप्यधः ॥ प्रणम्याथ सिषेवुस्ते केवलं नीललोहितम् ॥ ३२ ॥ ततो ब्रह्माऽवदद्रुद्रमपूज्यो हि त्वया कृतः ॥ स्वतेजसा भवान्पूज्यो यतो याहि हिमालयम् ॥३३॥ तं नीललोहितः प्रोचे भवता नार्चितो ह्यहम् ॥ ततो जगाम रुद्रोऽसौ स यत्र भगवान्भवः ॥३४॥ ततो ब्रह्माऽभवन्मूढो रजसा चापबृंहितः ॥ तताप तेजसा सृष्टिं मन्यमानो मया कृताम् ॥ ३५ ॥ मत्तुल्यो नास्ति वै देवो येन सृष्टिः प्रवर्द्धिता ॥ सदेवासुरगन्धर्वा पशुपक्षिमृगाकुला ॥ ३६ ॥ एवं मूढः स पंचास्यो विरंच्योऽभवदर्पितः ॥ प्राग्वक्त्रं सुस्वरं तस्य सामवेदप्रवर्तकम् ॥ ३७ ॥ द्वितीयं वदनं तस्य ऋग्वेदस्य प्रवर्तकम् ॥ यजुर्वेदधरं चान्यदथर्वाख्यं चतुर्थकम् ॥ ३८ ॥ सांगोपांगेतिहासांश्च सरहस्यान्ससंग्रहान् ॥ वेदानधीते वक्त्रेण पंचमेनोपचक्षुषा ॥ ॥ ३९ ॥ तस्याऽपुराः सुराः सर्वे वक्त्रस्याद्भुततेजसः ॥ तेजसा न प्रकाशंत दीपः सूर्योदये यथा ॥ ४० ॥ सपुत्रा अपि सोद्वेगा बभूवुर्नष्टचेतसः ॥ नाभिगन्तुं न च द्रष्टुं चिरं तेजोऽपसर्पितुम् ॥ ४१ ॥ अभिभूतमिवात्मानं मन्यमाना अविद्विषः ॥ सर्वे ते मन्त्रयामासुर्देवा वै हितमात्मनः ॥ ४२ ॥ गच्छाम शरणं देवं निस्तेजा ब्रह्मतेजसा ॥ किं तु तस्य न जानीमः स्थानं यत्र व्यवस्थितः ॥ ४३ ॥ तं भीममत्र द्रक्ष्यामो भक्त्या नान्येन केनचित् ॥ एवं संमन्त्र्य ते देवाः कृतांजलिपुटास्तदा ॥ चक्रुः स्तोत्रं महेशस्य परया स्वरसंपदा ॥ ४४ ॥ ॥ देवा ऊचुः ॥ नमस्ते देवदेवेश महेश्वर नमोनमः ॥ ४५ ॥ न विद्मः परमं मूढा महिमानं तवातुलम् ॥ यद्योगेन परं ब्रह्म भूतानां त्वं सनातनः ॥ ४६ ॥ प्रतिष्ठा सर्वभूतानां हेतुः सर्वस्य सर्जने ॥ विभर्षि चैव नेत्रस्थान्सोमसूर्यविभावसून् ॥ ४७ ॥ नामसंकीर्तनादेव मुच्यन्ते जंतवोऽशुभात् ॥ पृथिव्यबग्निचन्द्रार्कव्योमवायूपलक्षणाः ॥ ४८ ॥ मूर्तयस्ते महादेव व्याप्तमाभिरशेषतः ॥ रजःसत्त्वतमोभावैर्भ्राम्यमाणं त्वया जगत् ॥ ४९ ॥ नावबुध्यति सर्वज्ञ सर्वमूर्तिधरो यतः ॥ ब्रह्मादीनां सुरेशानां संमोहनविमोहनम् ॥ त्वं करोषि युगावर्तकाले काले च दुःसहम् ॥ ५० ॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रत्यक्षं दर्शनं दत्त्वा देवानामनुकंपया ॥ प्रसन्नवदनो भूत्वा देवेशापि नमस्कृतः ॥ ५१ ॥ वाक्षयन्मोहनाम्ना तु सह देवैर्महेश्वरः ॥५२॥ एवं संस्तूयमानोऽसौ देवर्षिपितृमानवैः ॥ अन्तर्हित उवाचेदं देवा ब्रूत यथेप्सितम् ॥ ५३ ॥ ॥ देवा ऊचुः ॥ ॥ प्रत्यक्ष दर्शनं स्थाणो प्रार्थयाम सदा तव ॥ त्वया कारुण्यतोऽस्माकं वरश्चापि प्रदीयताम् ॥ ५४ ॥ यदस्माकं महद्वीर्यं तेजश्चैव पराक्रमम् ॥ तत्सर्व ब्रह्मणा ग्रस्तं पंचमास्यस्य तेजसा ॥ ५५ ॥ विनेशुः सर्वतेजांसि त्वत्प्रसादात्पुनः प्रभो ॥ जायते तद्यथापूर्वं तथा कुरु महेश्वर ॥ ५६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रत्यक्षमेत्य वै पश्चाच्चलितः शर्व एव हि ॥ जगाम तत्र यत्रासौ रजोऽहंकारमूर्त्तिमान् ॥ देवाः स्तुवंतो देवेशं परिवार्य उपाविशन् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ५७ ॥ दृष्ट्वा तमागतं देवं नाजानात्तमसा वृतः ॥ सूर्यकोटिसहस्राणां तेजसा रंजयञ्जगत् ॥ ५८ ॥ तदाऽदृश्यत विश्वात्मा विश्वमूर्त्विश्वभावनः ॥ स पितामहमासीनं सकले देवमण्डले ॥ ५९ ॥ तेजसाभिभवन्रुद्रस्तेन मत्तोऽयतः स्थितः ॥ रुद्रतेजोभिभूतं च ब्रह्मवक्त्रं न राजते ॥ ६० ॥ रात्रौ प्रकाशकिरणश्चंद्रः सूर्योदये यथा ॥ सगर्वोथात्मजं दृष्ट्वा रुद्रदेवं सनातनम् ॥ ६१ ॥ अवन्दत करेणैव प्राह वै सस्मितं वचः ॥ प्रत्युवाच विरूपाक्षो ब्रह्माणं तं हसन्निव ॥ ६२ ॥ यतो न वेद परमं देवं तत्तेजसावृतः ॥ ततोऽट्टहासं भगवान्मुमोच शशिशेखरः ॥ ६३ ॥ पश्यतां सर्वदेवानां शृण्वतां वाचमुक्तवान् ॥ तेनाट्टहासशब्देन मोहयित्वा पितामहम् ॥ ६४ ॥ तेजोराशिशशांकाभः शशांकार्काग्निलोचनः ॥ वामांगुष्टनखाग्रेण ब्रह्मणः पञ्चमं शिरः ॥ ६५ ॥ चकर्त कदलीगर्भं नरः कररुहैरिव ॥ छिद्यमानं न तद्वक्त्रं बुबुधे न पितामहः ॥ ६६ ॥ रुद्रस्य तेजसा तस्मान्मोहितो न नतिं गतः ॥ छिन्नं तस्य शिरः पश्चाद्रुद्रहस्ते स्थितं तदा ॥ ६७ ॥ अपश्यद्देवतैः सार्धं रौद्रमतिभयाज्ज्वलत् ॥ महेश्वरकरांतस्थनखे वक्त्रं विराजते ॥ ६८ ॥ ब्रह्मण्डलमध्यस्थो द्वितीय इव चन्द्रमाः ॥ उत्क्षिप्य तत्कपालेन ननर्त शशिशेखरः ॥ ६९ ॥ शिखरस्थेन सूर्येण कैलास इव पर्वतः ॥ छिन्ने वक्त्रे ततो देवा हृष्टपुष्टा वृषध्वजम् ॥ तुष्टुवुर्विविधैः स्तोत्रैर्देवदेवं कपालिनम् ॥ ७० ॥ ॥ देवा ऊचुः ॥ ॥ नमः कपालिने नित्यं महाकालाय शंखिने ॥ ७१ ॥ ऐश्वर्यज्ञानयुक्ताय सर्वभोगप्रदायिने ॥ नमो दर्पविनाशाय सर्वदेवमयाय च ॥ ७२ ॥ कालसंहारकर्ता त्वं महाकालस्ततो ह्यसि ॥ भक्तानां दुःखशमनो दुःखांतस्तेन रोचसे ॥ ७३ ॥ शंकरोप्याशु भक्तानां तेन त्वं शंकरः स्मृतः ॥ छित्त्वा ब्रह्मशिरो यस्मात्कपालं च बिभर्षि च ॥७४॥ तेन देव कपाली त्वं स्तुतो ह्यसि प्रसीद नः ॥ एवं स्तुतः प्रसन्नात्मा देवानुत्थाप्य शंकरः ॥७५॥ कृपानिधिः स भगवांस्तत्रैवांतरधीयत ॥ शशिशकलमयूखैर्भासितं यत्कपर्दं द्रवति गगनगंगातोयचर्चाविचेयम् ॥ सिनविधृतकपालो मालया रुद्रपार्श्वे स जयति जितवेधा ऊर्जितः प्राज्यतेजाः ॥७६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये ब्रह्मशिरश्छेदवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥७॥ ॥ सनत्कुमार उवाच ॥ ॥ छिन्ने वक्त्रे ततो ब्रह्मा क्रोधेन तमसा वृतः ॥ ललाटे स्वेदमुत्पन्नं गृहीत्वाऽताडयद्भुवि ॥ १ ॥ तत्स्वेदात्कुंडली जज्ञे सघनुः समहेषुधिः ॥ सहस्रकवचो वीरः किं करोमीत्युवाच ह ॥ २ ॥ तमुवाच विरंचिस्तु दर्शयन्रुद्रमोजसा ॥ वध्यतामेष दुर्बुद्धिर्जायते न यथा पुनः ॥ ३ ॥ ब्रह्मणो वचनं श्रुत्वा धनुरुद्यम्य पृष्ठतः ॥ स प्रतस्थे महेशस्य बाणहस्तोऽतिरोषभृत् ॥ ४ ॥ स दृष्ट्वा पुरुषं चोग्रमगमद्विस्मितो भवः ॥ दिव्यबाणधनुर्हस्तं वेगविक्रांतगामिनम् ॥ ५ ॥ मया न वध्योऽतिबलः सखा विष्णोर्भविष्यति ॥ अनुग्राह्यो ह्यहं तेन सख्यार्थं तपसि स्थितः ॥ ६ ॥ चिंतयन्नित्थमीशोऽपि विष्णोराश्रममन्यगात् ॥ हुंकारध्वनिना ब्रह्मन्मोहयित्वा ततो नरम् ॥ ७ ॥ प्रपात्य च तदा हृष्टः क्रीडां कुर्वञ्जगत्स्थितौ ॥ यत्र नारायणः श्रीमांस्तपस्तेपे प्रतापवान् ॥ ८ ॥ अदृश्यः सर्वभूतानां विश्वात्मा विश्वसृग्विभुः ॥ तत्र प्राप्तो विरूपाक्षो ददर्श मधुसूदनम् ॥ ९ ॥ एकांगुष्टस्थितं भूमौ तपोऽत्यंतमनातुरम् ॥ युगांतार्कमहत्रस्य तेजसा वृतमद्भुतम् ॥ १० ॥ पुण्यारसमायुक्तं पुराणपुरुषोत्तमम् ॥ दृष्ट्वा नारायणं देवं भिक्षां देहीत्युवाच ह ॥ ११ ॥ कपालं दर्शयित्वाग्रे ज्वलज्ज्वलनसोत्कटम् ॥ कपालपाणिं संप्रेक्ष्य रुदं विष्णुरचिंतयत् ॥ १२ ॥ कोऽन्यो योग्यो भवेद्भिक्षुर्भिक्षादानस्य सांप्रतम् ॥ योग्योऽयमिति संकल्प्य दक्षिणं भुजमर्पयत् ॥ १३ ॥ तं विभेदांतगंतज्ञः शूलेन शशिशेखरः ॥ ततः प्रवाह उत्पन्नः शोणितस्य विभोर्भुजात् ॥ १४ ॥ जांबूनदरसाकारा वह्निज्वालेव निर्मला ॥ निष्पपात कपालांते शंभुना संप्रतीच्छिता ॥ १५ ॥ ऋज्वी वेगवती शिघ्रा दीधितीवांवरे रवेः ॥ पंचाशद्योजना दीर्घा विस्तारे दशयोजना ॥ १६ ॥ दिव्यं वर्षसहस्रं सा समुवाह हरेर्भुजात् ॥ कियंतं कालमीशो हि भिक्षां जग्राह भाविनः ॥ १७ ॥ दत्तां नारायणेनाथ सत्पात्रे पात्र उत्तमे ॥ ततो नारायणः प्राह हरं परमिदं वचः ॥ १८ ॥ संपूर्णं तव पात्रं हि ततो वै परमेश्वर ॥ सतोयांबुदनिर्घोषं श्रुत्वा वाक्यं हरेर्हरः ॥ १९ ॥ शशिसूर्याग्निनयनः शशिशेखरशोभितः ॥ कपाले दृष्टिमावेश्य त्रिनेत्रैश्च जनार्दनम् ॥ २० ॥ अंगुल्या घटयन्प्राह कपालं चातिपूरितम् ॥ श्रुत्वा हरिरिदं वाक्यं रक्तधारां समाहरत् ॥ २१ ॥ पार्श्वतोथ हरेरीशः स्वांगुल्या रुधिरं तदा ॥ दिव्यं वर्षसहस्रं च दृष्टिपातं ममंथ वै ॥ २२ ॥ मथ्यमाने ततो रक्ते कललं बुद्बुदं क्रमात् ॥ बभूव च ततः पश्चात्किरीटी सशरासनः ॥ २३ ॥ सहस्रबाहू रक्ताक्षो धनुर्ज्यां संस्पृशन्मुहुः ॥ बभूव तूणीरगलो वृषस्कंधोंऽगुलित्रवान् ॥ २४ ॥ परुषोऽर्जुनसंकाशः कपाले संप्रकाशयन् ॥ तं दृष्ट्वा भगवान्विष्णुः प्राह रुद्रमिदं वचः ॥ २५ ॥ कपाले भगवन्कोऽयं प्रादुर्भूतोऽभवन्नरः ॥ उक्तिं श्रुत्वा हरेरीशस्तमुवाच हरे शृणु ॥ २६ ॥ नरो नामेति पुरुषः परमात्मविदांवरः ॥ यस्त्वयोक्तो नर इति नरस्तस्माद्भविष्यति ॥ २७ ॥ नरनारायणौ चोभौ युगे ख्यातौ भविष्यतः ॥ संग्रामे देवकार्येषु लोकानां परिपालने ॥ २८ ॥ एष नारायणः सखा नरस्तव भविष्यति ॥ तव एकाकिनः संख्ये तपसश्च महामुनिः ॥ २९ ॥ विज्ञानस्य परीक्षायै तेजो लोके भविष्यति ॥ तेजोधिक्रमिदं दिव्यं ब्रह्मणः पंचमं शिरः ॥ ३० ॥ तेजसा ब्रह्मणो दीप्तो भुजस्य तव शोणितात् ॥ मम दृष्टिनिपाताच्च त्रीणि तेजांसि यान्यतः ॥ ३१ ॥ तत्संयोगात्समुत्पन्नः शत्रूनुद्वेजयिष्यति ॥ अवध्या ये भविष्यंति दुर्जयास्तव चापरे ॥ ३२ ॥ शक्रस्य चामरारीणां तेषामेव भयंकरः ॥ एवमुक्तवतः शंभोर्विस्मितस्तस्य तेजसा ॥ ३३ ॥ हरिरेपि स तत्रैव तुष्टाव हरकेशवौ ॥ नमो हर हरे तुभ्यं नमः शंकर विष्णवे ॥ ३४ ॥ नमस्ते शूलहस्ताय नमस्ते खड्गपाणये ॥ नमोनमस्ते मेध्याय हृषीकेश नमोऽस्तु ते ॥ ३५ ॥ नमोऽस्तु वाचां पतये श्रीधराय नमोनमः ॥ एवं स्तुवन्तं तं भक्त्या कृतांजलिपुटं नरम् ॥ ३६ ॥ तथैवांजलिसबद्धं गृहीत्वाशु करद्वयम् ॥ उद्धृत्याथ कपालात्तु पुनर्वचनमब्रवीत् ॥ ३७ ॥ य एव पुरुषो रौद्रो ब्रह्मणः स्वेदसंभवः ॥ मम हुंकारशब्देन मोहनिद्रामुपागतः ॥ ३८ ॥ निबोध तं च त्वरितमित्युक्तांतर्हितो हरः ॥ नारायणस्य प्रत्यक्षं बोधयित्वा द्रुतं हि तम् ॥ ३९ ॥ वामपादेन हत्वा च समुत्तस्थौ नरो रुषा ॥ तयोर्युद्धं समभवत्स्वेदरक्तजयोर्महत् ॥ ४० ॥ विस्फारितधनुःशब्देनादिताशेषभूतलम् ॥ कवचं स्वेदजस्यैकं रक्तजस्य तथा भुजौ ॥४१॥ एवं समेन वै युद्धं दिव्यं जातं तु भूतले ॥ त्रिवर्षोनानि वर्षाणां शतानि दश सुद्विज॥४२॥ युध्यतोः समतीतानि स्वेदरक्तजयोर्मुने ॥ रक्तजो द्विभुजो दृष्ट्वा कवचैकेन स्वेदजम् ॥ ४३ ॥ विभेद बाणवेगेन ब्रह्मणस्तं नर परम् ॥ ससंभ्रममुवाचेदं ब्रह्माणं मधुसूदनः ॥ ४४ ॥ मन्नरेणोच्छ्रितो ह्यस्त्वदीयो विनिपातितः ॥ श्रुत्वा तदाकुलो ब्रह्मा बभाषे मधुसूदनम् ॥ ४५ ॥ हरेऽन्यज न्मनि नरो मदीयो यदि हीयते ॥ तेन तुष्टेन संप्रोक्तं हरिणैवं भविष्यति ॥ ४६ ॥ कृत्वा तयो रणमपि निवार्य तावुवाच ह ॥ अथान्यजन्मनि नरो मदीयो भविता कलौ ॥ ४७ ॥ ततो महारणे जाते तत्राहं योजयामि तम् ॥ विष्णुनाथ समाहूय महेश्वरसुरेश्वरौ ॥ ४८ ॥ उक्ताविमौ नरौ रुद्रौ पालनीयौ स्वशक्तितः ॥ स्वेदजातासृजातौ तु स्वकायांशौ धरातले ॥ स्वांशभूतौ द्वापरांते नियोज्यौ भूतले त्वया ॥ ४९ ॥ ततोऽब्रवीत्तदा विष्णुं सुरेशो दुःखितं वचः ॥ ५० ॥ अस्मिन्मन्वंतरे देव त्रेतायुगं तदा यदा ॥ त्वद्रूपेणेह महता सूर्यपुत्रहितार्थिना ॥ वालीनाम महावाहुः सुग्रीवार्थे निपातितः ॥ ५१ ॥ तेन दुःखेन तप्तोऽहं नाहं गृह्णामि ते नरम् ॥ अगृह्णमानं देवेशं कारणांतरवादिनम् ॥ ५२ ॥ विष्णुः प्रोवाच मघवन्भुवो भारावतारणं ॥ अवतारं करिष्यामि मर्त्यलोकेऽप्यहं विभं ॥ ५३ ॥ ततो हृष्टोऽभवच्छक्रो विष्णुवाक्येन तेन वै ॥ प्रतिगृह्य नरं हृष्टः सत्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मस्तु वचस्तव ॥ ५४ ॥ इत्युक्त्वा तु रवीन्द्रौ स प्रेषयित्वा च तौ पुनः ॥ गत्वा च पुण्डरीकाक्षो ब्रह्माणं ब्रह्मवेश्मनि ॥ ५५ ॥ कृतं जुगुप्सितं कर्म ब्रह्मन्नीशं जिघांसता ॥ यत्त्वया देवदेवेश पुमान्कोपेन भाषितः ॥ ५६ ॥ शुद्ध्यर्थमस्य पापस्य प्रायश्चित्तं परं कुरु ॥ गृह्णन्वह्नित्रयं ब्रह्मन्नग्निं होत्रमुपास्व ह ॥ ५७ ॥ एको वै गार्हपत्योऽस्तु द्वितीयाहवनीयकः ॥ दक्षिणाग्निस्तृतीयस्तु त्रिकुण्डेषु प्रकल्पय ॥ ५८ ॥ वर्तुले तर्पयात्मानं मामथो धनुषाकृतौ ॥ चतुष्कोणे हरं देवमृग्यजुःसामनामभिः ॥ ५९ ॥ हुत्वा त्वग्निं च तपसा हरमेवार्च्य तत्क्षणात् ॥ दिव्यं वर्षसहस्रं तु हुत्वाग्निं सिद्धिमाप्स्यसि ॥ ६० ॥ प्रायश्चित्तविशुद्धात्मा प्रतिपद्य महेश्वरम् ॥ ततो निष्कल्मषो भूत्वा विषादस्ते गमिष्यति ॥ ६१ ॥ इत्येवमुक्त्वा हरिरुग्रतेजा गतः स्वकीयं निलयं महात्मा ॥ ब्रह्मापि चित्तं तपसे निधाय समादधे सर्वमथाच्युतोक्तम् ॥६२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्ये ब्रह्मणः प्रायश्चित्तवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥छ॥ ॥ व्यास उवाच ॥ ॥ योऽसौ कपाल उत्पन्नो नरोनाम धनुर्धरः॥किमेवं सोऽधुना जात उत्पत्तौ विश्वकर्मणः॥१॥ कथं रुद्रेण जनितः प्रभुणा बुद्धिपूर्वकम् ॥ विष्णुना वा भगवता ब्रह्मणा भावभेदतः ॥२॥ केनकस्मात्समुत्पन्नः शंकराच्युतब्रह्मणाम् ॥ ब्रह्मा हिरण्यगर्भो यो यो जातश्च चतुर्मुखः ॥ ३ ॥ अद्भुतं पंचमं वक्त्रं कथं तस्याप्युपस्थितम् ॥ स तस्थौ भगवान्ब्रह्मा कथं रुद्रे मनोऽदधत् ॥ ४ ॥ मूढात्मना नरो येन हंतुं स प्रहितो हरम् ॥ ५ ॥ ॥ सनत्कुमार उवाच ॥ ॥ महेश्वरहरी एतौद्वावेव सति तिष्ठतः ॥ तयोरविदितं नास्ति सिद्धासिद्धं महात्मनोः ॥ ६ ॥ ब्रह्मणः पंचमं वक्त्रं यत्तदासीन्महात्मनः ॥ तस्यैव मानसः सोग्निः शिरसा तेन वै धृतः ॥ ७ ॥ यो नरो ब्रह्मणः प्रोक्तः सोऽप्यग्निस्तस्य मानसः ॥ दधार तं महादेवः कृत्वांगुल्यंतरांतरे ॥ ८ ॥ पूर्वं दृष्ट्वा समुत्पत्तिमेवं तस्य महान्नरः ॥ तस्मात्कपालमंगुल्यां घट्टमानमजायत ॥ ९ ॥ स तं हत्वा शरेणाजौ ब्रह्मणो निहितं रजः ॥ मुमोह रजसा सत्त्वं यदृच्छाकृत्प्रभुर्यतः ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ कथमग्निः समुत्पन्नो योग्निः सर्वेण धारितः ॥ विस्तरेण तदाचक्ष्व भगवन्मुनिवंदित ॥ ११ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अव्यक्तादीन्ससर्जादावंडं हि तदजायत ॥ जज्ञे सौवर्णवर्णाभो ब्रह्मा लोकपितामहः ॥ १२ ॥ स्वयंभूः स तपस्तप्त्वा दिव्यं वर्षशतं महत् ॥ स तपःस्थो व्याजहार भूर्भुवःस्वरिति श्रुतीः ॥ १३ ॥ श्रुतियोगात्तु मनसः पश्चादग्निरजायत ॥ अधोमुखः पपाताग्निः पृथिवीं निर्दहन्यदा ॥ १४ ॥ पाणिभ्यां ब्रह्मणा सोग्निर्भूमेरूर्ध्वं निवेशितः ॥ ततो दक्षिणहस्तेन वेद्यामग्निः प्रणीयते ॥ १५ ॥ पुरापतन्नधोज्वालऊर्ध्वज्वालो यदा धृतः ॥ उत्तानश्च कृतो यस्माद्ब्रह्मणा निर्मितो मिथः ॥ १६ ॥ ज्वालाभिः प्रज्वलन्नूर्ध्वं सर्वशब्दस्फुलिंगवान् ॥ हिरण्यवर्णं ब्रह्माणं तदोवाचाग्निरुत्कटः ॥ १७ ॥ किमर्थं तु त्वया देव भूमिभक्षं निवारितम् ॥ बुभुक्षयाहमाविष्ट आहारो मे प्रदीयताम् ॥ १८ ॥ एवमुक्तोऽग्नये ब्रह्मा स्वरोमाणि जुहाव सः ॥ कृशश्चखाद अग्निस्तु सर्वरोमाणि ब्रह्मणः ॥ १९ ॥ अब्रवीच्च न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ त्वचं जुहाव ब्रह्मा च चखादाग्निस्त्वचं तदा ॥ २० ॥ अब्रवीत्तं तदा वह्निस्तृप्तिर्नास्ति ममेति हि ॥ जुहाव स्वानि मांसानि त्वचोत्कृत्य प्रजापतिः ॥ २१ ॥ अब्रवीच्च न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ जुहाव ब्रह्मा चास्थीनि तान्यश्नात्स बुभुक्षितः ॥ २२ ॥ ततो धात्रा हुताशाय कृतो देहो विधातुकः ॥ तमदेहमथो दृष्ट्वा ब्रह्माणमवदच्च सः ॥ २३ ॥ अहो ब्रह्मन्न मे तृप्तिर्न च मे देहनिर्वृतिः ॥ क्रुद्धेन ब्रह्मणा सोऽग्निर्हुंकारेण द्विधा कृतः ॥ २४ ॥ आहतू रुदंतावग्नी आहारार्थं प्रजापतिम् ॥ हुंकारेण पुनर्ब्रह्मा द्विधैकैकं चकार वै ॥ २५ ॥ त्रयस्तेषां रुदंतिस्म रुदन्ह्येको ह्यसंवृतः ॥ क्रुद्धेन ब्रह्मणा व्यास हुंकारेणैव ताडितः ॥ २६ ॥ रोरूयमाणे चाग्नौ तु पुनर्ब्रह्मा कृपान्वितः ॥ प्राह कामाभिभूतानां भुंक्ष्व त्वं देहधातुकम् ॥ २७ ॥ स कालस्तस्य कामस्य सा वृत्तिः संप्रकल्पिता ॥ अकाराग्निं सन्निविष्टं दृष्ट्वा मनसि मानसः ॥ २८ ॥ हुंकाराग्निः प्रजज्वाल किमेतदिति चाब्रवीत् ॥ ब्रह्मा तमाह त्वमपि यथेष्टां वृत्तिमाश्रय ॥ २९ ॥ देवमध्ये वहिर्वापि मुनीनामाश्रमेषु च ॥ इत्येवमुक्तस्तेनाशु वृत्तिमेतामरोचयत् ॥ ३० ॥ अहमेवं प्रदास्यामि पुनः पुनरुवाच ह ॥ यस्मादेष द्वितीयोग्निर्हुंकारात्समजायत ॥ ३१ ॥ साभिमानोऽपमानो वा हुंकारो यत्र कथ्यते ॥ सा च वृत्तिर्ममादेशाद्बुभुक्षाशांतये तव ॥ ३२ ॥ इकाराग्निं समाहूय ब्रह्मा वचनमब्रवीत् ॥ भवतोग्ने त्वियं वृत्तिरन्नं भुक्तं दहेरिति ॥३३॥ उकाराग्निं समाहूय ब्रह्मा वचनमब्रवीत् ॥ यत्पृथिव्यां गुरुध्यानं भगवंस्तत्समाश्रय॥३४॥ अहं च ते विधास्यामि स्थानमाहारमेव च ॥ इत्युक्तः स तु तेनाग्निर्यत्पृथिव्यां शिलाचयः ॥ ३५ ॥ यतोऽग्निर्व्यास तेनोक्तो गिरौ दुर्गे महामुने ॥ उकाराग्निः स चाप्येष समुद्रे वडवामुखः ॥ ३६ ॥ सोऽपि भिन्नः समाहूतो ब्रह्मणा स्थानलिप्सया ॥ त्वं चक्षुः सर्वलोकस्य ब्रह्मा वचनमब्रवीत् ॥ ३७ ॥ तस्मात्त्वं संस्कृतां वाणीं द्विजातीनां प्रकाशय ॥ दैवी पुण्या हि पापांश्च आयुष्यं हंत्यसंस्कृता ॥ ३८ ॥ तस्माद्द्विजातेर्विज्ञेया वाणी पुण्या प्रकाशिता ॥ वाक्च माता द्विजातीनां मुखे सा संप्रतिष्ठिता ॥ ३९ ॥ अनृताक्षरविन्यासादमंगल्या ह्यसंस्कृता ॥ वक्तारं हंत्यतो ह्यग्निः सदा संस्कृतकृद्द्विजः ॥ ४० ॥ आहूय भूयोऽकाराग्निं प्रजापतिरचक्षुषम् ॥ वाग्वेदवाणीमवदत्सोपि संमीलितेक्षणः ॥ ४१ ॥ ब्रह्माणमाह वह्निस्तु वाचोहं मुखमस्मि हे ॥ स्थानं मम प्रयच्छस्व सर्वतेजोवरं परम् ॥ ४२ ॥ ब्रह्मा तमाह यस्मात्त्वं तेजःस्थानं समीहसे ॥ तस्मात्तेजोमयं यत्ते रविस्थानं भविष्यति ॥४३॥ यस्मात्तेजः प्रपश्यंति चक्षुर्भवति दुर्बलम् ॥ तस्मात्तत्तेजसा युक्तं पश्येदनिमिषं क्वचित् ॥ ४४ ॥ इकारमथ संभिन्नमग्निमाह पितामहः ॥ सौम्यदृष्ट्या तु ब्रह्माणं समुदीक्षमुपागतम् ॥ ४५ ॥ यस्माच्छीघ्रं महासत्त्व सौम्यदृष्टिरिहागतः ॥ तस्माद्दास्याम्यहं स्थानं सर्वभूतमनोरमम् ॥ ४६ ॥ संशीतात्मा शीतरश्मिश्चंद्रमास्त्वं भविष्यसि ॥ सर्वतेजोधिको दिव्यः सौम्यः परमभासुरः ॥ ४७ ॥ तरुस्थः सर्वतेजांसि तेजसाऽभिभविष्यसि ॥ इत्युक्त्वा तं विसृज्याथ उकाराग्निमथाह्वयत् ॥ ४८ ॥ इहैहीतीति शिरसि समादाय न्यवेशयत् ॥ तत्रस्थं पंचमं वक्त्रं ऊर्ध्वमेतत्प्रजायते ॥ ४९ ॥ स एवं रूपवानग्निरुकाराग्निः प्रतिष्ठितः ॥ तस्मादग्निश्च सूर्यश्च एकमेतौ विनिर्दिशेत् ॥ ५० ॥ भवाग्निरूपं परमं ब्रह्माणमिदमब्रवीत् ॥ ममापि रुचिरं स्थानं प्रयच्छस्व यथा स्वयम् ॥ ५१ ॥ ब्रह्मा तमाह कतमं स्थानं ते रोचतेऽनल ॥ अग्निस्तं प्रत्युवाचेदं स्थानं कथय मे परम् ॥ ५२ ॥ स्थानं नैवास्ति ते भव्यं ततो ह्येवं भविष्यति ॥ अत्र ते स्थातुमिच्छास्ति यदि संस्थास्यते त्विह ॥ ५३ ॥ लोके नित्यं समाचार लोकसंस्थितिहेतुकः ॥ संभवार्थमिहास त्वं निजसत्त्वपराक्रमः ॥ ५४ ॥ यदिह त्वं महाज्वालाभाभिः कलितशोभनः ॥ प्राप्स्यसे सर्वजंतूनां भासुरत्वमनुत्तमम् ॥ न ह्येष धर्मश्चैवाद्यो मायामोहितकाम्यया ॥५५॥ इत्युक्ते ब्रह्मणा सोऽग्निः प्रजज्वाल सहस्रशः ॥ अनंतज्वालाभिततो नानावर्णादिभिः श्रितः ॥ ५६ ॥ अकारेकार ऊकारो ब्रह्मा तमथ दृष्टवान् ॥ नैवासौ शाम्यतां याति वह्निर्भूयो व्यवर्धत ॥ ५७ ॥ व्याप्तं भवाग्निना सर्वं तिर्यगूर्ध्वमधस्तथा ॥ ज्वालाभिरुपरि क्षिप्तं दृष्ट्वात्मानं समंततः ॥ ५८ ॥ चिंतयंतं तु ब्रह्माणं भीतं चैव विशेषतः ॥ शिरस्यंजलिमाधाय तुष्टाव प्रणम्य तम् ॥ ५९ ॥ तेजोनिधिं च सर्वेशं ज्ञातुमिच्छन्प्रजापतिः ॥ निरुक्तसूक्तराहस्यैर्ऋग्यजुःसामभाषितैः ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समतेजो नमस्तेऽस्तु परस्मै परमात्मने ॥ अद्भुतानां प्रतिश्रोत्रे तेजसां निधये नमः ॥ ६१ ॥ बीजं यो विश्वभावानां संमोहनविमोहनम् ॥ अंधकारो युगावर्तकाले काले च दुःसह ॥ ६२ ॥ ऊर्ध्ववक्त्र नमस्तेस्तु सत्त्वात्मक धरात्मक ॥ ज्वलज्ज्वालोत्पन्नजल जलजेश जलेचर ॥ ६३ ॥ जलजोत्फुल्लपत्राश जलदेव हुताशन ॥ कृष्णकांते कृष्णमार्ग स्वर्गमार्गप्रदायक ॥ ६४ ॥ यज्ञाहुतिसमाचार यज्ञरूप नमोनमः॥ स्वर्णगर्भ शमीगर्भ जय देव सनातन ॥ ६५ ॥ तमोहार महाहार स्वाहाप्रिय तमोहर ॥ प्रदीप्तरोचिर्देवेश चित्रभानो नमोस्तु ते ॥ ६६ ॥ वैश्वानरानलोदग्र ऊर्ध्वपावक सर्वग ॥ विभावसो महाभाग कृष्णवर्त्मन्नमोनमः ॥ ६७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं स्तुतस्तदा सोग्निर्विरंचिमब्रवीद्वचः॥ तुष्टोऽहं भवतो ब्रह्मन्भावकर्म प्रसिध्यति ॥ ६८ ॥ एवमुक्तस्तदा ब्रह्मा नमस्कृत्याब्रवीत्पुनः॥ ज्ञातुमिच्छाम्यहं देव को हि त्वं भगवानिति ॥ ६९ ॥ अब्रवीत्सोऽथ ब्रह्माणं पुरुष स्त्वं प्रजापतिः ॥ अज्ञेयं परमं रूपं तेन योग्येन पश्य मे ॥ ७० ॥ अथापश्यत्स दिव्येन भगवंतं सनातनम् ॥ सर्वज्ञं विधिकर्तारमीश्वरं मदसत्परम् ॥ ७१ ॥ ज्वलनं गगनं भूमिं दृश्यादृश्यं परं पदम् ॥ भूतं भव्यं भविष्यं च जगत्स्थावरजंगमम् ॥ सदेव कुरुते देवो भुंक्ते सर्वं यतः प्रभुः ॥ ॥ ७२ ॥ अतिसंभूतिभव्येन स्तोत्रेणाथ प्रजापतिः ॥ तुष्टाव देवं प्रकृतं पुराणमजमव्ययम् ॥ ७३ ॥ ततोऽतिरक्तवर्णं च दृष्ट्वा देवः प्रजापतिः ॥ विश्वतोबाहुचरणं विश्वतोऽग्निशिरोमुखम् ॥७४॥ व्यक्ताव्यक्तप्रणेतारं प्रणमञ्छिरसा स्वयम् ॥ पश्यतेऽथ नमस्तेऽस्तु तुभ्यं विश्वभवात्मने ॥ ७५ ॥ पृथिवी वायुराकाशं यच्चान्यद्भुवनत्रयम् ॥ लोकालोकेश्वरं चैव जगत्स्थावरजंगमम् ॥ ७६ ॥ तत्त्वसर्गं भूतसर्गं भावसर्गं तथैव च ॥ ब्रह्मतेजोमया त्मानं संपश्यंश्चक्षुषा स्वतः ॥ ७७ ॥ यत्किंचिद्वस्तुजातं हि तत्सर्वमचरं चरम् ॥ एवं स्तुतः स तु तदा अनादिर्भगवान्प्रभुः ॥ ७८ ॥ अथेशः प्राह ब्रह्माणं त्वया दृष्टं यथातथम् ॥ सृजेदानीं प्रजाः सर्वाः स च त्वं विनयान्वितः ॥ ७९ ॥ कर्ताहमनुकर्ता त्वं लोकानां स्थितिकारणे ॥ कुरुष्वेत त्तथा भाव्यं मया पूर्वं विनिर्मितम् ॥ ८० ॥ इत्युक्तो देवदेवेन ब्रह्मा वचनमब्रवीत् ॥ नमस्तेऽस्तु महादेव भव शर्व नमोऽस्तु ते ॥ ८१ ॥ त्वत्प्र सादात्प्रजासर्गं कुर्वतो मे महेश्वर ॥ सखायं प्राप्तुमिच्छामि त्वया दत्तं जगत्पते ॥८२॥ ॥ महेश्वरउवाच ॥ ॥ ध्यायतः पुत्रकामस्य सृष्टं कामस्य ते यतः ॥ कल्पितं भविता देव मदुत्पत्तिं यदीप्स्यसि ॥ ८३ ॥ पुत्रत्वं प्राप्य हीशस्ते छेत्स्यामि पंचमं शिरः ॥ तत्र चोत्पादयिष्यामि नरनारायणावुभौ ॥ ८४ ॥ ॥ ब्रह्मोवाच ॥ ॥ कथं नारायणो देवस्तपसा मन्यते स नः ॥ कीर्तयस्व सखा धन्यः स नः पूज्यो भविष्यति ॥ ॥ ८५ ॥ अथापश्यत्ततो ब्रह्मा तेजसा हरिमच्युतम् ॥ तं सर्वगमनं गम्यं शिवं नारायणात्मकम् ॥ ८६ ॥ महेश्वरस्य तेजोर्ध्वं संतं नारायणं प्रभुम् ॥ चकार व्याहरन्नार्तं श्रीरूपं शक्तिसाम्यतः ॥ ८७ ॥ अंगुल्या संस्पृशन्देवो ब्रह्माणमब्रवीद्वचः ॥ ब्रह्मंस्ते परमं धाम ऋषिर्नारायणानुगः ॥ ॥ ८८ ॥ भविता लोकरक्षार्थं श्रेष्ठः सर्वधनुष्मताम् ॥ नारायण महद्वीर्यं शक्तिरेषा मदीयिका ॥ ८९ ॥ इत्युक्त्वा भगवान्देवस्तमग्निं पाणिनाऽग्रहीत् ॥ दक्षहस्तांगुलिनखमध्यस्थं समर्चीकरत् ॥ ९० ॥ इति सत्कृत्य सततं नरं चैव महेश्वरः ॥ ब्रह्मणो दर्शयित्वाथ तत्रैवांतरधीयत ॥ ९१ ॥ अथाब्रवीत्ततो ब्रह्मा अग्निं तं तु युगक्षये ॥ स्पृशन्दक्षिणवामाभ्यां सांत्वयन्निव तं गिरा ॥ ९२ ॥ भृगुश्चैवांगिराः पुत्रौ भवितारौ न संशयः ॥ अत्रैव मम भवतां वंशे विख्यातकर्मणौ ॥ ९३ ॥ द्विधा संभज्य तेनाग्निं सृष्टेर्यज्ञो भविष्यति ॥ भवंतौ तिष्ठतस्तत्र पृथिव्यां दानमाश्रितौ ॥ ९४ ॥ ब्रह्मणाऽग्नी समेतौ तु ब्रह्माणमनुनोदितौ ॥ तस्मादेवं विधातव्यो निर्मथ्य विधिपूर्वकम् ॥ ९५ ॥ अतोऽश्वत्थे शमीगर्भे संयोगस्तत्र पठ्यते ॥ भार्गवांगिरसश्चैव द्विविधो दैव उच्यते ॥ ९६ ॥ तस्मात्सुतहितः श्रेष्ठश्चतुर्थ इति कथ्यते ॥ एवं व्यास समुत्सन्नो नरोऽसौ पूर्वजन्मनि ॥ ९७ ॥ एवं तु ब्रह्मणो वक्त्रं पञ्चमं समपद्यत ॥ ९८ ॥ एतद्यो बुध्यते देव तेजःसर्गमनुत्तमम् ॥ ब्रह्मणो याति सालोक्यं शांतो दांतो जितेन्द्रियः ॥ ९९ ॥ एतद्यो ग्निसमुद्भवं पशुपतेर्माहात्म्यसंसूचकं वह्नेः साधुमतिः शृणोति सततं यः श्रद्धया भावितम्॥ यो व्यास द्विजदेवताग्रमुखतः संश्रावयेद्भक्तितः सोऽत्यर्थं भवभावितः शिवपुरे संपूज्यते दैवतैः ॥ १०० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये वैश्वानरोत्पत्ति वर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ युद्धे निवारिते तत्र रक्तस्वेदजयोः पुरा ॥ किं कृतं ब्रह्मणा तत्र प्राय श्चित्तं च कर्मणाम् ॥ १ ॥ जनार्दनेन किं कर्म शंकरेण च यन्सुने ॥ एतत्सर्वं समाख्याहि प्रसीद वदतांवर ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्रह्मा जुह्वन्नग्निहोत्रं वनौषधिफलच्छदैः ॥ शस्तैः कुशसमिद्भिश्च यथोक्तं हरिणा पुरा ॥ ३ ॥ वदर्याश्रममासाद्य नरनारायणावृषी ॥ तेपतुस्तौ तपश्चोग्रं हितार्थं सर्वदेहिनाम् ॥ ४ ॥ कपालपाणिर्देवेशः पर्यटन्वसुधामिमाम् ॥ कुशस्थलीं समासाद्य प्रविष्टस्तद्वनोत्तमम् ॥ ५ ॥ नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् ॥ नानापक्षिरवाकीर्णं नानामृगसमाकुलम् ॥ ६ ॥ द्रुमपुष्पभरामोदवासितं यत्सुवायुना ॥ बुद्धिपूर्वमिव न्यस्तैः फलपुष्पैः सुपूजितम् ॥ ७ ॥ नानागंधरसाढ्यैश्च पक्वापक्वफलोद्भवैः ॥ फलैः सुवर्णरूपाढ्यैरासमन्तान्मनोरमैः ॥ ८ ॥ जीर्णपत्रतृणादीनि शुष्क काष्ठफलानि च ॥ बहिः क्षिपंति जातानि मरुतोनुग्रहाणि च ॥ ९ ॥ नानापुष्पसमूहानां गन्धमादाय मारुतः ॥ शीतलो वाति तं भूमिदेशं यत्र विवेश सः ॥ १० ॥ हरितस्निग्धनिच्छिद्रैः पर्णैरच्छिद्रकोटरैः ॥ वृक्षैरनेकसंख्यैश्च भूषितं शिरसान्वितैः ॥ ११ ॥ अरोगिदर्शनीयैश्च सुवृत्तैः कचिदुद्धतैः ॥ कुटुम्बैरिव विप्राणां सिद्धिर्वै भाति सर्वतः ॥ १२ ॥ शोभनैर्वायुसंकीर्णैरंकुरैः प्रावृता द्रुमाः ॥ कुलीनैरिव निश्छिद्रैः स्वगुणैः प्रावृता नराः ॥ १३ ॥ पवनोद्धूतशिखरैः स्पर्शयंति परस्परम् ॥ आत्मवन्तोऽन्योन्यस्पृष्टशाखावतंसकाः ॥ १४ ॥ नागवृक्षाः क्वचित्पुष्पैर्भ्रमरालीनकेसरैः ॥ नयनैरिव शोभंते धवलैः कृष्णतारकैः ॥ १५ ॥ पुष्पसन्नद्धशिखराः कर्णिकारद्रुमाः क्वचित् ॥ युग्मयुग्मविवाहे च शोभंते साधु दंपतीः॥१६॥ सुपुष्पविभवाटोपैः सिन्दुवारस्य पक्तयः ॥ मूर्तिमत्य इवाभांति पूजिता वनदेवताः ॥ १७ ॥ क्वचित्क्वचित्कुन्दलताः सुपुष्पाभरणोज्ज्वलाः ॥ दिक्षुदिक्षु प्रशोभन्ते बालचन्द्रा इवोद्यताः ॥ १८ ॥ अतिविद्रुमशोभाढ्या कासंत्यो यूथिकालताः ॥ पुष्पिताः पुष्पविटपान्नीजयंत्य इवोत्थिताः ॥ १९ ॥ शालार्जुनाः क्वचिद्भांति वनोद्देशेषु पुष्पिताः ॥ धौतकौशेयवासोभिः प्रावृताः पुरुषोत्तमाः ॥ २० ॥ अविमुक्तं तु यष्टीभिः पुष्पितास्तु द्रुमास्तथा ॥ उपगूढा विराजन्ते नारीभिरिव सुप्रियाः ॥ २१ ॥ चूताश्च तिलकाश्चैव मञ्जरीभिः करैरिव ॥ वायुप्रत्ताभिरन्यान्यं द्रोकन्तीव हि सज्जनान् ॥ २२ ॥ परस्परं च संयुक्तैस्तिलकाशोकपल्लवैः ॥ हस्तैर्हस्तान्स्पृशंतीव सुहृदश्चित्तसंगताः ॥ २३ ॥ फलपुष्पनगानम्राः पेशलेनेव सज्जनाः ॥ अन्योन्यमर्पयंतीव सपुष्पाणि फलानि च ॥ २४ ॥ मारुताश्लिष्टसंतुष्टैः पादपाः शालिवारिभिः ॥ आर्याः समागता लोके प्रीतिदाय इव स्थिताः ॥ २५ ॥ पुष्पाणामिव वेगेन स्वशोभार्थं व्रजंति वै ॥ समसन्नाहमासाद्य पुरुषाः स्पर्धयैव हि ॥ २६ ॥ पुष्पशोभाग रनतैः शिखरैः कंपसंयुतैः ॥ नृत्यन्ति पक्षिणो मत्ता युक्ताः शोभनशेखरैः ॥ २७ ॥ भृंगाः पवनविक्षिप्तामृतवल्लीलताश्रिताः ॥ सवल्लिकाः प्रफु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्यन्ति मानवा इव सप्रियाः ॥ २८ ॥ पुष्पाभिः कुन्दवल्लीभिः पादपाः क्वचिदावृताः ॥ भाति तारागणैश्चित्रैः शरदीव नभस्तलम् ॥ २९ ॥ द्रुमा णामप्यथाग्रेषु पुष्पिता माधवी लता ॥ शिखरा इव शोभन्ते रचिता बुद्धिपूर्वकम् ॥३०॥ हरिताः कांचनच्छायाः फलिताः पुष्पिता द्रुमाः॥ सौहृदं दर्शयन्तीव नराः साधुसमागमे ॥ ३१ ॥ पुष्पकिंजल्कबहुलाः किंजल्कबहुलोदराः ॥ किंजल्कमत्तमधुपा विशदा इव शारिकाः ॥ ३२ ॥ शिरीष पुष्पसंकाशाः शुका मिथुनतः क्वचित्॥ कीर्तयंति गिरश्चित्राः पूजिता ब्राह्मणा यथा ॥ ३३ ॥ संयुक्ताः सहचारिण्या मयूराश्चित्रबर्हिणः ॥ वनां तरे व्यतिष्ठंत एकांत इव संस्थिताः ॥ ३४ ॥ कूजंति पत्रिसंघाता नानाद्भुतविराविणः ॥ कुर्वंति रमणीय हि रमणीयतरं वनम् ॥ ३५ ॥ नाना मृगगणाकीर्णं नित्यं समुदितांडजम् ॥ तद्वनं नंदनसमं मनोदृष्टिविवर्धनम् ॥ ३६ ॥ कपालपाणिर्भगवांस्तथारूपं व नोत्तमम् ॥ ददर्श शंकरो दृष्ट्वा सौम्यया नंदनोपमम् ॥ ३७ ॥ ता वृक्षपंक्तयः सर्वा दृष्ट्वा रुद्रं समागतम् ॥ निंद्य शंभवे भक्त्या मुमुचुः पुष्पसंपदम् ॥ ३८ ॥ पुष्पप्रति ग्रहं कृत्वा पादपानां महेश्वरः ॥ वरं वृणीध्वं भद्रं वः पादपानित्युवाच सः ॥ ३९ ॥ एवमुक्ते भगवता तरवो निरवग्रहाः ॥ ऊचुः प्रांजलयः सर्वे नमस्कृत्य महेश्वरम् ॥ ४० ॥ वरं ददासि देवेश प्रसन्न जनवत्सल ॥ इहैव भगवन्नित्य वने सन्निहितो भव ॥ ४१ ॥ एष नः परमः कामो देवदेव नमोऽस्तु ते ॥ त्वं चेद्वससि देवेश वनेऽस्मिन्विश्वभावन ॥ ४२ ॥ सर्वात्मना प्रपन्ना वै याचामहे वरोत्तमम् ॥ किमन्यवरकोटीभिरेष नो दीयतां वरः ॥ ४३ ॥ इत्युक्तः पादपैः सर्वैः शरणागतवत्सलः ॥ वरं ददौ पादपेभ्यः प्रोच्यमानं मया शृणु ॥ ४४ ॥ ॥ महेश्वर उवाच ॥ ॥ वाढं मे मनसा वासो नित्यमत्र वनोत्तमे ॥ वरं ददामि भूयो वो न वृथा दर्शनं मम ॥ ४५ ॥ नाग्निर्न वायुर्न जलं न सूर्यकिरणातपः ॥ न विद्यु दशनिः शीतं रुजं वो जनयिष्यति ॥ ४६ ॥ नित्यं पुष्पवरोपेता नित्यं सुस्थिरयौवनाः ॥ कामगाः कामरूपाश्च कामरूपफलप्रदाः ॥ ४७ ॥ कामसंदर्शनाः पुंसां तपःसंध्याज्वलद्दृशाम् ॥ श्रिया परमया युक्ता मत्प्रसादाद्भविष्यथ ॥ ४८ ॥ एवं स वरदः शंभुरनुजग्राह पादपान् ॥ स्थित्वा वर्षसहस्रं तु कपालं चाक्षिपद्भुवि ॥ ४९ ॥ क्षितिं निपतता तेन कंपते स्म रसातलम् ॥ विवशास्तत्यजुर्वेलां सागराः क्षुभितोर्मयः ॥ ५० ॥ शक्राशनिहतानीव व्याघ्रव्यालान्वितानि च ॥ शिखराणि व्यशीर्यंत पर्वतानां सहस्रशः ॥ ५१ ॥ देवसिद्धविमानानि गंधर्वनगराणि च ॥ प्रस्फु रन्ति विनिष्पेतुर्विनिनेशुर्धरातले ॥ ५२ ॥ कपोतमेघाश्चात्यंतं पुनः संघातदर्शनाः ॥ ज्योतिर्ग्रहाश्छादयंतो बभूवुस्तीर्णभास्कराः ॥ ५३ ॥ महता तस्य शब्देन जडांधबधिरं कृतम् ॥ बभूव व्याकुलं सर्वं त्रैलोक्यं सचराचरम् ॥ ५४ ॥ सुरासुराणां सर्वेषां शरीराणि मनांसि च ॥ अवसे दुश्चकंपुश्च किमेतदिति जज्ञिरे ॥ ५५ ॥ धैर्यमालंब्य सर्वेऽपि समागम्येंद्रपूर्वकाः ॥ ब्रह्मलोकं समासाद्य ब्रह्माणमिदमूचिरे ॥ ५६ ॥ किं निमित्तं तु भगवन्ने तदुत्पातदर्शने ॥ त्रैलोक्यं कंपितं येन संयुक्तं कालकर्मणा ॥ ५७ ॥ जात कल्पावसानं च भिन्नमर्यादसागरम् ॥ चत्वारो दिग्गजाः किं नु बभूवुश्चलाश्चलाः ॥ ५८ ॥ धरा समाधृता कस्मात्सप्तसागरवारिणा ॥ उत्पत्तिर्नास्ति सर्वस्य भगवन्न प्रयोजनम् ॥ ५९ ॥ यादृशोऽयं श्रुतः शब्दो न भूतो नापि विश्रुतः ॥ त्रैलोक्यमाकुलं येन चक्रे रौद्रेण भूयसा ॥ ६० ॥ एवमुक्तोऽब्रवीद्ब्रह्मा परमेशानुभावितः ॥ तत्प्रसादात्प्रति ज्ञानी ज्ञात्वा रुद्रमुपस्थितम् ॥ ६१ ॥ यत्पृष्टं मरुतः सर्वे शृणुध्वं तत्र कारणम् ॥ निश्चयेनात्र विज्ञेयं श्रद्दधानैर्यथाविधि ॥ ६२ ॥ मुखं छित्त्वा नखाग्रेण मदेहात्पंचमं शिरः ॥ कपालपाणिर्भगवान्विष्णोराश्रममभ्यगात् ॥ ६३ ॥ ययाचे पात्रमादाय भिक्षां नारायणं प्रभुम् ॥ उत्पपात मुनिस्तत्र नरोनाम धनुर्धरः ॥ ६४ ॥ ततः कुशस्थलीमेत्य भगवांस्तद्वनोत्तमम् ॥ विवेश तरुमार्गेण पुष्पामोदाभिनंदितः ॥ ६५ ॥ अनुगृह्याथ भगवान्वनं तत्सर्वगांडजम् ॥ जगतोऽनुग्रहार्थाय तत्र वासमरोचयत् ॥ ६६ ॥ तत्कपालं करस्थं यस्यस्तं भगवता क्षितौ ॥ तेनैषा कम्पिता भूमिः कृतं त्रैलोक्यमाकुलम् ॥ ६७ ॥ तद्वक्ष्यथ विरूपाक्षं प्रपद्यत मया सह ॥ आराध्यमानो भग वान्प्रदास्यति वरं हि वः ॥ ६८ ॥ इत्युक्त्वा भगवान्ब्रह्मा सह तैर्देवदानवैः ॥ जगाम तद्वनोद्देशं यत्रास्ते वृषभध्वजः ॥ ६९ ॥ प्रहृष्टमनसः सर्वे कोकिलालापलापिताम् ॥ पुष्पोच्चयोक्षितां सीमां विविशुः शंकरेप्सवः ॥ ७० ॥ संप्राप्तं सर्वमेतैस्तद्वनं नंदनसंमितम् ॥ सुवल्लीगृहशोभाढ्यं सुहृदं शुशुभे तदा ॥ ७१ ॥ दृष्ट्वा तद्वनमुत्तमं तनुभृतामाह्लादकं चेतसां नानासत्फलपुष्पपादपवनैरासेवितं सर्वतः ॥ तस्मिन्विहंगहंससारसकुले मद्भकमत्स्येर्युतं द्रक्ष्यामो हरमत्र चेतसि सुराः प्रापुर्मुदं ते तदा ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य खण्डेऽवन्तीक्षेत्रमाहात्म्ये देवागमनवर्णनंनाम पंचमोऽध्यायः ॥५॥ ॥ सनत्कुमार उवाच ॥ ॥ प्रविश्याथ वनं देवाः सर्वपुष्पोपशोभितम् ॥ इह देवो ऽत्र देवोऽत्र विविशुस्ते दिदृक्षवः ॥ १ ॥ अद्भुतस्य वनस्यांते न ते ददृशिरे सुराः ॥ विचिन्वंतो महादेवं देवैर्बहुविलोकितः ॥२॥ तमुवाच स भद्रं वे द्रक्ष्यध्वं न तपो विना ॥ विचिन्वन्तो विरूपाक्षं नैनं पश्यत शंकरम् ॥ ३ ॥ स युक्तं हृदये स्मृत्वा ब्रह्मा देवांस्ततोऽब्रवीत् ॥ त्रिविधो दर्शनोपाय स्तस्य देवस्य सर्वदा ॥ ४ ॥ श्रद्धाज्ञानेन तपसा योगेनैव निगद्यते ॥ सकलं निष्कलं चापि देवाः पश्यंति योगिनः ॥ ५ ॥ तपस्विनस्तु सकलं ज्ञानिनो निष्कलं परम् ॥ समुत्पन्नेऽपि विज्ञाने मंदश्रद्धो न पश्यति ॥ ६ ॥ भक्त्या परमयोपेताः परं पश्यंति योगिनः ॥ द्रष्टव्यो निर्विकारोऽसौ प्रधानपुरुषेश्वरः ॥ ७ ॥ नादीक्षितैरतो देवाः शैवीं दीक्षां प्रपद्यत ॥ कर्मणा मनसा वाचा नित्ययुक्ता महेश्वरे ॥ ८ ॥ तपश्चरत भद्रं वो रुद्राराध नतत्पराः ॥ शिवदीक्षां प्रपन्नानां भक्तानां च तपस्विनाम् ॥ ९ ॥ सर्वकालं विजानाति दातव्यं दर्शनं मया ॥ ब्रह्मणो वचनं श्रुत्वा हितमेव यदु क्तवान् ॥ १० ॥ शिवेक्षाविष्टमतयो ब्रह्माणमिदमब्रुवन् ॥ मार्गेण विधिना चैव शिवदीक्षासु तत्पराः ॥ ११ ॥ प्रयच्छ ब्रह्मन्सर्वेषां दीक्षां नः शिवतोषदाम् ॥ श्रुत्वेति वचनं ब्रह्मा प्रत्युवाच विचारितम् ॥ १२ ॥ संदिदीक्षयिषुः क्षिप्रममरान्छिवदीक्षया ॥ शिवयज्ञार्थसंभारानानयध्वमलं सुराः ॥ १३ ॥ वेदी प्रकल्प्यतामत्र यज्ञव्योऽयतनुः शिवः ॥ पद्मयोनेर्वचः श्रुत्वा चक्रुः सर्वमतः सुराः ॥ १४ ॥ विनीतवेषाः प्रणता अनेन सस्तमब्रुवन् ॥ शिवप्रसादसंप्राप्त्ये पुष्करज्ञानमीरितम् ॥ १५ ॥ यज्ञं चकार विधिना वेधाश्चन्द्रार्धधारिणः ॥ पद्मयोनिः पुरस्कृत्य तदा दीक्षां प्र योगतः ॥१६॥ अनुग्रहेण देवांस्तानकारयत भावतः ॥ ततो व्रतानां प्रवरं व्रतं दिव्यं महाप्रभुः ॥१७॥ तेभ्यो ददौ देवताभ्यः स तदप्यविरोधवित् ॥ पञ्चते शिवशोलायां महापाशुपतं व्रतम् ॥१८॥ शैवं यथोदितं यच्च आगमाचारचेष्टितम् ॥ शिवाराधनमुख्यानां मुनीनां तीव्रतेजसाम् ॥१९॥ सर्वानु ग्राहकः शंभुः सर्वदेवैः प्रकल्पितम् ॥ तदेवं प्रार्थितं बुद्ध्या व्रतं रौद्रं शिवं समम् ॥ २० ॥ तत्तेभ्यो विस्मयं त्यक्त्वा प्रायच्छत्कनकांडजः ॥ व्रमिकं भस्मनामाख्यं सर्वदा कीर्तितं शुभम् ॥ २१ ॥ पापघ्नं दुःखशमनं पुष्टिश्रीबलवर्धनम् ॥ सिद्धिदं कीर्तिकृत्कांतं कलिकल्मषमोक्षणम्॥२२॥तस्मात्सर्वप्रय त्नेन भस्मस्नानं समाहिताः ॥ कुर्वंतो मानवा दांता दीक्षिताः संयतेंद्रियाः ॥ २३ ॥ सर्वे कमंडलुधराः सर्वे रुद्राक्षधारिणः ॥ अनिष्टदर्शनालाप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

संगत्या परिवर्जिताः ॥ २४ ॥ एवं व्रतधराः सर्वे वने तस्मिन्महेश्वरम् ॥ आराधयंस्तमीशानं व्रतेनैव समाधयम् ॥ २५ ॥ भक्त्या परमया युक्ता विधिना परमेण च ॥ कालेन महता ध्यानादेवं ज्ञात्वा मनोगतम् ॥ २६ ॥ रुद्रध्यानाग्निनिर्दग्धकल्मषाश्च श्रियान्विताः ॥ तदा हृत्वाऽसुरं शंभुः प्रत्यक्षो भगवानभूत् ॥ २७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्रह्मदत्तं वरं देवाः सर्वे शंवानुभाविताः ॥ समर्चीकरन्प्रयुक्ता ब्रह्माणी ज्ञानभावितः ॥ २८ ॥ गते वर्षसहस्रे स दिव्ये देवेश्वरेश्वरः ॥ जातानुकंपो देवानां दीपो दर्शनमेयिवान् ॥ २९ ॥ गणैर्नानाविधैः सार्धं नानाभूषणभूषितैः ॥ सुदर्पोद्भूतदर्पघ्नैर्घोरैर्घोरविघातिभिः ॥ ३० ॥ कामरूपैरकामैश्च सर्वकामसमन्वितैः ॥ करीन्द्रकरटोपपाटनैः सिंहदंष्ट्राभिः ॥ ३१ ॥ अणिमादि गुणैर्दिव्यैर्योगैश्वर्यादिनामभिः ॥ व्यालोलकेशरशनादंष्ट्राकटकटोद्भवैः ॥ ३२ ॥ व्याघ्रव्यालाननैर्रौद्रैः काककंकवटस्त्रथा ॥ ३३ ॥ अरूपैः समरूपैश्च सुरूपैर्बहुरूपकैः ॥ एकद्वित्रिशिरोभिश्च बहुशीर्षैरशीर्षकैः ॥ ३४ ॥ एकद्वित्रिशिखैश्चैव नानारूपविराजितैः ॥ बहुनेत्रैरनेत्रैश्च एकद्वित्रिविलोचनैः ॥ ३५ ॥ एककर्णैर्द्विकर्णैश्च बहुकर्णैर्विकर्णकैः ॥ एकद्वित्रिसुनासैश्च बहुनासैरनासिकैः ॥ ३६ ॥ एकजंघैर्द्विजंघैश्च बहुजंघैरजंघकैः ॥ एकपादैर्द्विपादैश्च बहुपादैरपादकैः ॥ ३७ ॥ गौरश्यामैः श्यामगौररसितैः कर्बुरैस्तथा ॥ भुजगहारवलयैः कृतयज्ञोपवीतकैः ॥ ३८ ॥ शूलासिपाट्टिशधरैर्भुशुंडीपरिघायुधैः ॥ चक्रकर्तरिकोदंडकांडदंडास्त्रपाणिभिः ॥ ३९ ॥ गदासुद्गरपाषाणमुशलायुधहस्तकैः ॥ वज्रशक्त्यशनिप्रासकुंतकर्तृकधारिभिः ॥ ४० ॥ भंभाभेरीर्वादयद्भिर्वीणापणववेणुकान् ॥ मृदंगविमलाडक्काकाहलानकदुंदुभान् ॥ ४१ ॥ डुडंकाशृंगिकाद्यानि नानावाद्यानि वादकैः ॥ एवं नानाविधैः रौद्रैर्भीमैर्भीमपराक्रमैः ॥ ४२ ॥ गणेश्वरैः सुदुर्द्धर्षैर्वृतः सूर्यो ग्रहैरिव ॥ आविर्भूतो महादेवः स्वगणैः परिवारितः ॥ तं दृष्ट्वा तां तदा व्यास ब्रह्मादीनां दिवौकसाम् ॥ ४३ ॥ अथ ब्रह्मादयो देवा दृष्ट्वाग्रे गणनायकम् ॥ तेजसाध्यासितास्तस्य बभूवुर्भ्रांतचेतसः ॥ ४४ ॥ ततोऽवतीर्य ते धैर्यं दृष्ट्वा देवं यथाविधि ॥ षडंगवेदयोगेन हृष्टचित्तवपुर्धराः ॥ ४५ ॥ शिरोगतैरंजलिभिः पादेभ्यश्च महीं गतैः ॥ तुष्टुवुः सृष्टिसंहारस्थितिकर्तारमीश्वरम् ॥ ४६ ॥ ॥ देवा ऊचुः ॥ ॥ नमः शिवाय शांताय सगणाय सनंदिने ॥ वृषासनाय सौम्याय शूलशक्तिधराय ते ॥४७॥ नमो दिक्चर्मवस्त्राय शुचये तीव्रतेजसे ॥ ब्रह्मणे ब्रह्मदेहाय ब्रह्मणा योजिताय च ॥ ४८ ॥ नमोंधकविनाशाय परेशाय नमोनमः ॥ रुद्राय पंचवक्त्राय सर्वरोगापहारिणे ॥ ४९ ॥ गिरिशाय सुरेशाय ईशानाय नमोनमः ॥ भीमोग्रादिस्वरूपाय विजयाय नमोनमः ॥ ५० ॥ सुरासुराधिपतये यतीनां पतये नमः ॥ चंडाय चंडदंडाय वरखट्वांगदंडिने ॥ ५१ ॥ विरूपाक्षशुभाख्याय विश्वरूपाय वै नमः ॥ शांताय च मनोज्ञाय त्रिनेत्राय नमोनमः ॥ ५२ ॥ वेधसे विश्वरूपाय दैत्यसंहारिणे नमः ॥ भक्तानुकंपिनेऽत्यर्थं रुद्रज्ञानपराय च ॥ ५३ ॥ विरूपाय सुरूपाय रूपाणां शतधारिणे ॥ पंचास्याय शुभास्याय चन्द्रास्याय नमोनमः ॥ ५४ ॥ वरदाय वराहाय सुकूर्माय नमोनमः ॥ ५५ ॥ त्रिनेत्र त्राणमस्माकं त्रिपुरघ्न विधीयताम् ॥ वाङ्मनःकायभावैस्त्वां प्रपन्नानां महेश्वर ॥ ५६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं स्तुतस्तदा देवैर्विरिंच्याद्यैस्तथा हरः ॥ शरीराणि विलोक्येशः कृशान्यथ दिवौकसाम् ॥ ५७ ॥ दिव्यव्रतापधारेण त्रिवेधेनांतरात्मना ॥ ५८ ॥ आराधनां समीक्ष्याह ब्रह्मादीनां सुरेश्वरः ॥ साधुसाधु महाभागाः श्लाघ्यद्भुतमुपासितम् ॥ ५९ ॥ दिव्येनानेन विधिना भृशमाराधितो ह्यहम् ॥ भवद्भिः अद्ध्यात्यर्थं मम दर्शनकांक्षया ॥ ६० ॥ व्रतस्था मां हि पश्यंति मानुषा देवता अपि ॥ यदि यच्च प्रयच्छामि कांश्चिद्वो हि वराञ्छुभान् ॥ ६१ ॥ एकैकशो द्वित्रिशो वा समस्तेभ्यः समेन वः ॥ सर्वकामप्रसिद्ध्यर्थं दास्याम्येनं वरं हि वः ॥ ६२ ॥ हिताय भवतां चाद्य गामुञ्जयिनीं प्रति ॥ क्षिप्तं कपालं च मया किं पुनर्भद्रमस्तु वः ॥ ६३ ॥ ॥ देवा ऊचुः ॥ ॥ किं कृतं हितमस्माकं कपालं क्षिपता त्वया ॥ ६४ ॥ किमर्थं कंपिता भूमिस्त्रैलोक्यं व्याकुलीकृतम् ॥ नैतन्निरर्थकं देव कथ्यतामत्र कारणम् ॥ ६५ ॥ ॥ महादेव उवाच ॥ ॥ युष्मद्धितार्थमेतद्वै भयं विनिहितं कृतम् ॥ देवतानां तु रक्षार्थं श्रूयतामत्र कारणम् ॥ ६६ ॥ असुरो द्रोहणोनाम बलवान्योगमायिकः ॥ अवस्थितस्त्ववष्टभ्य रसातलतलाश्रयम् ॥ ६७ ॥ तस्य दैत्यस्य बलिनो दैत्याः परपुरंजयाः ॥ युष्माञ्ज्ञात्वा तपःस्थांश्चाप्यभ्यगुर्बहवो हि ते ॥ ६८ ॥ सेंद्रान्निर्हंतुमिच्छंतो मायाप्रच्छन्नचारकाः ॥ पुरीं कनकशृंगाढ्यामेनामधिकुशस्थलीम् ॥ समुद्ययुः सुरान्हंतुमुद्यता उद्यतायुधाः ॥ ६९ ॥ तेषां कपालपातेन भूमिनिष्कंपनेन च ॥ शब्देन चातिघोरेण देहात्प्राणा विनिर्ययुः ॥ ७० ॥ लोकस्थितिविनाशार्थं तेषामासीत्समुद्यमः ॥ राज्यैश्वर्येण दर्पिष्ठास्तेन ते निहता मया ॥ ७१ ॥ ॥ देवा ऊचुः ॥ ॥ विश्वस्तानां पुनश्चैवमेव चानुग्रहः कृतः ॥ देवानुग्रहकर्तारं त्वं गुणस्मृतिनिषेवितः ॥ ७२ ॥ दिव्यदृष्टिभिरत्यर्थं यशोऽर्थं भीम नंदिताः ॥ इत्युक्ता प्रणतान्देवानुत्थाप्योचे पुनर्भवः ॥ ७३ ॥ ॥ शिव उवाच ॥ ॥ परिचर्याभिसंयुक्तं नित्यमुग्रनिषेवितम् ॥ ध्यानसाधननिष्पन्नं यदन्येषां न विद्यते ॥ ७४ ॥ मनोवाक्कायभावेन दुष्करं दुश्चरं तपः ॥ अनेन तपसा युक्ताः कष्टेन दुःसहेन च ॥ ७५ ॥ महता तनुसाध्येन बहुकालार्जितेन वः ॥ समंतादभिवर्धेतां युष्मत्तेजस्तपोऽपि च ॥ ७६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ इत्युक्ता देवदेवेन देवा ब्रह्मपुरोगमाः ॥ ऊचुरुग्राम्य वक्त्राणि स्थिता जानुभिरीश्वरम् ॥ ७७ ॥ ॥ देवा ऊचुः ॥ ॥ प्राणदस्त्वं कारणस्त्वं तपसां देव दृश्यसे ॥ तदस्माकं प्रवृत्तानां मानुपाणां वरप्रद ॥ ७८ ॥ रक्षां कुरुष्व देवेश भक्तानामभयंकर ॥ ७९ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्नेन विधिना दृष्टं सुव्यक्तं दर्शनं हि वः ॥ सुदुर्लभान्यपि पुनर्दास्यामि वो वरान्बहून् ॥ ८० ॥ एवमुक्ते भगवता ब्रह्मा वचनमब्रवीत् ॥ देवानामग्रतः स्थित्वा श्रुतशब्दोद्भवं भवम् ॥ ८१ ॥ प्राप्ता वयं च भगवन्सुपर्याप्तो महावरः ॥ जायतां नः सदेश्वर्यं वासस्थानमथाक्षयम् ॥ ८२ ॥ ॥ ॥ शिव उवाच ॥ ॥ लोकेऽस्मिन्मम ये भक्ता मया विनिहताश्च ये ॥ नैव ते दुर्गतिं यांति लभंते सुमतिं परम् ॥ ८३ ॥ सार्धं तत्र जटाजूटैः शिरोभिः शूलपाणयः ॥ भांति मद्रामपार्श्वस्था इमे ते दारुणा गणाः ॥ ८४ ॥ येषां विनिग्रहार्थाय युष्मत्संबोधनाय च ॥ सविकारं मया क्षिप्तं कपालं धरणीतले ॥८५॥ कृतो मेऽनुग्रहस्तेषां भक्तानां भक्तिमिच्छताम् ॥ वनेऽस्मिन्नित्यवासो मे वृक्षैरभ्यर्थितस्य च ॥ ८६ ॥ महाकालवने देवा आगतस्य ममानघाः ॥ तपस्यतां च भवतां महाकालवनं ततः ॥ ८७ ॥ नामद्वययुतं गुह्यं लोके ख्यातं भविष्यति ॥ गुह्यं वनं श्मशानं च क्षेत्राणां प्रवरं महत् ॥८८॥ कपालव्रतचर्या च मया ह्येषा प्रकीर्तिता ॥ कपालपात्रे भुंजानः कपालव्रतभूषणः ॥८९॥ कपालपाणिः संतुष्टो भिक्षाव्रतसमन्वितः ॥ श्मशाननिलयो रौद्रो व्रतोन्मत्तविमूढधीः॥९०॥ नंदितः सर्वभूतेषु प्रियाप्रियसमः सदा ॥ भस्मभूषितसर्वांगो ज्ञानी चैव विशेषतः ॥९१॥ जितेंद्रियोऽसर्वसंगो मृद्भस्मोदकसंग्रही ॥ नित्ययुक्तः सदा व्यापी जापी जितवरासनः ॥ ९२ ॥ पुण्यतीर्थाश्रमोपेतः स्वरे देवे समाहितः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लोकातीतं परं ज्ञानं महापाशुपतं व्रतम् ॥ ९३ ॥ कपालव्रतमास्थाय पुरा चीर्णं मया स्वयम् ॥ कपालं परमं गुह्यं पवित्रं पापनाशनम् ॥ ९४ ॥ कपालव्रतमेतद्धि दुर्धरं परमाद्भुतम् ॥ अत्यंतमुत्कटं रौद्रमघोरं लोमहर्षणम् ॥ ९५ ॥ महाव्रतं द्विपन्मोहात्पापेनैव स्थितो नरः ॥ न मुच्यते स पापेन जन्मकोटिशतैरपि ॥ ९६ ॥ महापाशुपतं तस्मान्न हन्यान्न च दूषयेत् ॥ एतस्मिन्निहते तस्मात्कोटिर्भवति घातिता ॥ ९७ ॥ एवं महाव्रतं यस्तु भोजयेच्छ्रद्धयान्वितः ॥ तस्य भुक्ता भवेत्कोटिर्विप्राणां वेदपाठिनाम् ॥ ९८ ॥ कपालपूरणीं भिक्षां यतीनां यः प्रयच्छति ॥ विमुक्तः सर्व पापेभ्यो नासौ दुर्गतिमाप्नुयात् ॥ ९९ ॥ कपाले भोजनं श्रेष्ठं मार्गोऽयं ब्रह्मसंभवः ॥ वदंति लोके वेदेषु पूजितं देवदानवैः ॥ १०० ॥ धारयिष्यंति ये विप्राः कपालं भूतमोहनम् ॥ मम तुल्यास्तु ते ब्रह्मन्विचरंति महीतले ॥ १ ॥ जपैककिरता धीराः कपालकृतभूषणाः ॥ महापाशुपता लोके रुद्राः संसारतारकाः ॥ २ ॥ धर्माधर्मविमुक्ताश्च कृत्याकृत्यविवर्जिताः ॥ दीक्षया ज्ञानयोगेन प्राणिनस्तारयंति ते ॥ ३ ॥ यानि तीर्थानि लोकेऽस्मिन्यज्ञकोटिशतानि च ॥ विशुद्धस्य विज्ञानस्य कलां नार्हंति षोडशीम् ॥ ४ ॥ यथाहं सर्वदेवानां संपूज्यो वै पितामह ॥ तथैव सर्वयोगेभ्यः संपूज्योऽयं महाव्रती ॥ ५ ॥ संसारबन्धमोक्षार्थं शिवगुह्यमिदं व्रतम् ॥ यदेतत्सर्वधर्मेण अपुनर्भवकारणम् ॥ ६ ॥ कपालव्रतमादाय यस्त्यजेदजितेन्द्रियः ॥ रौरवं स प्रयात्याशु प्रणीतो यमकिंकरैः ॥ ७ ॥ आलापयति भावेन न तु कर्म करोति यः ॥ सरागचित्तः शृंगारी न च धर्मप्रियंकरः ॥ ८ ॥ एकत्र भोजी मिष्टाशी कैतवेन प्रियस्तथा ॥ कुग्रामनगरे वासी कृष्णिवाणिज्यसेवकः ॥ ९ ॥ इत्यादिदुष्टदोषश्च तस्य संभाषणादपि ॥ नरो नरकगामी स्याद्यतो मद्व्रतदूषकः ॥ ११० ॥ दृष्ट्वा च शिष्टमथ वै महाव्रतधरो नरः ॥ न स्पृशेदंगमंगेन स्पृष्ट्वा स्नायात्तु वाग्भिः ॥ ११ ॥ एवं च सर्वमाख्यातं कपालस्य च मोक्षणम् ॥ यथा मयात्र निक्षिप्तमज्ञानेन हतं स्वयम् ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवमुक्ता स भगवान्ब्रह्माद्यैरमरैः सह ॥ क्षेत्रं निवासयामास यथावत्कथयामि ते ॥१३॥ अयमेतत्स्मशानं च पठ्यते मुनिसत्तमैः ॥ महाकालवनं व्यास यत्र सन्निहितो हरः ॥१४॥ अनुग्रहस्य भुवनं भूमिभागो न संशयः ॥ अनुग्रहार्थं भूतानां क्षेत्रांतर्मृत्युधर्मिणाम् ॥१५॥ सुवर्णवज्रपर्यंकवेदिका च मही कृता ॥ विचित्रकुसुमा रत्नैः कारिता सर्वशोभना ॥१६॥ स्वर्णवज्रांकिततला श्रेष्ठा हरितशाद्वला ॥ त्रिंशच्चत्वारिंशत्पूर्णाः कलशाः कोणसंस्थिताः ॥ १७ ॥ द्वाराणि तत्र चत्वारि प्रवर्णानि तपंति च ॥ कुम्भाः शोभंति तत्स्थाः उदिता भास्करा इव ॥१८॥ रमते तत्र भगवान्वनानामुत्तमे वने ॥ सनंदिदेवगणपः कालदंडादिसंयुतः ॥१९॥ एतत्कृतयुगे सर्वं प्रत्यक्षं दृश्यते वने ॥ त्रेतायां धर्मनिरतास्तापसा ब्रह्मचारिणः ॥१२०॥ द्वापरे धर्मशीला ये श्रुतविज्ञानशालिनः ॥ कलौ तु शुद्धविज्ञानशालिनः शंकरं हरम् ॥२१॥ तपोधिकाः प्रपश्यंति देवदेवं महेश्वरम् ॥ महाकालवने नित्यं शूलपट्टिशधारिणम् ॥ ॥ २२ ॥ एतत्ते तथ्यमाख्यातं लोकानुग्रहकारकम् ॥ सहितानुक्रमेणात्र मन्त्रैश्च विधिपूर्वकम् ॥ २३ ॥ समर्चयंति ये विप्रा भक्त्या शंभुमहापदम् ॥ वसंतीह समीपं ते महाकालानुभाविताः ॥ २४ ॥ पठते य इह लोके तस्य संस्थानमेतत्प्रथितगुणगणैर्वरर्चितं दोषहं तत् ॥ शुभमतिरभिपिक्तः सोऽमरैरर्च्यमानो व्रजति हरपुरं यः संशृणोत्येकचित्तः ॥१२५॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्ती क्षेत्रमाहात्म्ये कपालमोक्षणवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्केन विधिना महाकालवने नरैः ॥ रुद्रलोकमभीप्सद्भिर्वस्तव्यं क्षेत्रवासिभिः ॥ १ ॥ किं मनुष्यैरुत स्त्रीभिः सिद्ध्यर्थं ह्याश्रमान्वितैः ॥ वसद्भिः किमनुष्ठेयमेतत्सर्वं ब्रवीहि नः ॥ २ ॥ नरैः स्त्रीभिश्च वस्तव्यं वर्णैश्चाश्रमवासिभिः ॥ स्वधर्मानुरतैर्दंभमोहविवर्जितैः ॥ ३ ॥ कर्मणा मनसा वाचा रुद्रभक्तैर्यतेन्द्रियैः ॥ अनुश्रुतिभिरक्षुद्रैः सर्वभूतहितैषिभिः ॥ किं कुर्वाणैर्नरैः कर्म रुद्रभक्तिं ब्रवीहि नः ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ त्रिविधा कथिता ह्यत्र मनोवाक्कायसंभवा ॥ लौकिकी वैदिकी चान्या भवेदाध्यात्मिकी तथा ॥ ५ ॥ ध्यानधारणया बुद्ध्या रुद्राणां स्मरणं हि तत् ॥ रुद्रभक्तिकरी चैषा मानसी भक्तिरुच्यते ॥ ६ ॥ व्रतोपवासनियमैर्यतेन्द्रियनिरोधिभिः ॥ कायिका भक्ती रुद्रस्य ज्ञानध्यानस्य धर्मिणाम् ॥ ७ ॥ गोघृतक्षीरदधिभिर्गंधरक्तकुशोदकैः ॥ गन्धमाल्यैश्च विविधैर्धातुभिश्चोपपादिता ॥ ८ ॥ घृतगुग्गुलधूपैश्च कृष्णागरुसुगंधिभिः ॥ भूषणैर्हेमरत्नानां चित्राभिः स्रग्भिरेव च ॥ ९ ॥ वासप्रविसरास्तोत्रैः पताकाव्यजनोच्छ्रितैः ॥ नृत्यवादित्रगीतैश्च सर्वप्रत्युपहारकैः ॥ १० ॥ भक्ष्यभोज्यानुपानैश्च यावत्पूजाश्रितैर्नरैः ॥ महेश्वरं पुरस्कृत्य भक्तिः सा लौकिकी मता ॥ ११ ॥ वेदमन्त्रहविर्यागैर्या क्रिया वैदिकी मता ॥ १२ ॥ दर्शे च पूर्णमास्यां वा कर्तव्यं चाग्निहोत्रकम् ॥ प्राशनं दक्षिणादानं पुरोडाशश्च सत्क्रिया ॥ १३ ॥ इष्टवृत्तिः सोमपानं याज्ञिकं सत्कर्म च ॥ ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ॥१४॥ क्रियते रुद्रमुद्दिश्य सा भक्तिर्वैदिकी स्मृता ॥ अग्निभूम्यनिलाकाशनिशाकरदिवाकरान् ॥ १५ ॥ समुद्दिश्य कृतं कर्म तत्सर्वं दैविकं भवेत् ॥ आध्यात्मिकी तु द्विविधा रुद्रभक्तिः स्थिता मुने ॥ १६ ॥ सांख्याख्या यौगिकी चान्या विभागं तत्र मे शृणु ॥ चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यया ॥ १७ ॥ अचेतनानि योज्यानि पुरुषः पञ्चविंशकः ॥ चेतनः पुरुषो भोक्ता न कार्यं तस्य कर्मणः ॥ १८ ॥ रुद्रः षड्विंशकः कर्ता सर्वज्ञश्चेतनः प्रभुः ॥ अजन्मा नित्यमव्यक्तमधिष्ठाता प्रयोजकः ॥ १९ ॥ पुरुषो नित्यव्यक्तः स्यात्कारणं च महेश्वरः ॥ तत्त्वसर्गं भवेत्सर्गं भूतसर्गं च तत्त्वतः ॥ २० ॥ संख्यया परिसर्गाय प्रधानं च गुणात्मकम् ॥ साधर्म्यमात्मनैश्वर्यं प्रधानं वै विधर्मि च ॥ २१ ॥ कारणं तच्च रुद्रस्य काम्यत्वमिदमुच्यते ॥ सर्वत्र कर्तृता रुद्रे पुरुषे चाप्यकर्तृता ॥ २२ ॥ अचेतन्यं प्रधाने च तच्च तत्त्वमिदं स्मृतम् ॥ तत्त्वांतरेण मुच्यंते कार्यं कारणमेव च ॥ २३ ॥ प्रयोजने च वैजात्यं ज्ञात्वा तत्त्वमसंख्यया ॥ संख्यास्तीत्युच्यते प्राज्ञैः रुद्रतत्त्वार्थचिंतकैः ॥ २४ ॥ इति तस्य तत्त्वभावं तत्त्वसंख्यां च तत्त्वतः ॥ रुद्रतत्त्वाधिकं चापि ज्ञानतत्त्वं विदुर्बुधाः ॥ २५ ॥ सांख्ये कृता भक्तिरेषा सद्भिराध्यात्मिकी मता ॥ योगिनामपि मे भक्त्या शृणु भक्तिं महासुर ॥ २६ ॥ प्राणायामपरो नित्यं ध्यायते नियतेंद्रियः ॥ धारणां हृदये कृत्वा ध्यायते यो महेश्वरम् ॥ २७ ॥ दृत्कञ्जकर्णिकासीनं पञ्चवक्त्रं त्रिलोचनम् ॥ शशांकज्योतिजठरं व्यालवृत्तकटीतटम् ॥ २८ ॥ श्वेतं दशभुजं भद्रं वरदाभयहस्तकम् ॥ योगजा मानसी व्यास रुद्रभक्तिः परा स्मृता ॥ २९ ॥ य एव भक्तिमाद्रुद्रे रुद्रभक्तः स उच्यते ॥ विधिं तु शृणु मे व्यास यः स्मृतः क्षेत्रवासिनाम् ॥ ३० ॥ स्वयं रुद्रेण विहितो ब्रह्मादीनां समागमे ॥ कथितो विस्तरात्पूर्वं सर्वेषां तत्र सन्निधौ ॥३१॥ निर्ममा निरहंकारा निःसंगा निष्परिग्रहाः ॥ बंधुवर्गेण निःस्नेहाः समलोष्टाश्मकांचनाः ॥ ३२ ॥ भूतानां कर्मभिर्नित्यं विविधैरभयप्रदाः ॥ सांख्ययोगविधिज्ञाश्च धर्मज्ञाश्छिन्नसंशयाः ॥ ३३ ॥ यजंतो विविधैर्यज्ञैर्ये विप्राः क्षेत्रवासिनः ॥ महाकालवने तेषां भूतानां यत्फलं शृणु ॥ ३४ ॥ व्रजंत्येव सुदुष्प्राप्यं ब्रह्मसायुज्यमक्षयम् ॥ संप्राप्य न पुनः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जन्य लभते मोक्षमव्ययम् ॥ ३५ ॥ पुनरावर्तनं हित्वा विधिं शाहेश्वरं स्थिताः ॥ पुनरावृत्तिरन्येषां मर्त्यचाश्रमवासिनाम् ॥ ३६ ॥ गार्हस्थ्यं विधिमासाद्य पट्कर्मनिरताः सदा ॥ जुह्वते विधिना सम्यङ्मंत्रस्तोत्रैर्नियंत्रिताः ॥ ३७ ॥ अधिकं फलमाप्नोति सर्वदुःखविवर्जिताः ॥ सर्व लोकेषु चान्यत्र गतिस्तस्य न हन्यते ॥ ३८ ॥ दिव्येनैश्वर्ययोगेन स्वारूढः स्वपरिग्रहः ॥ बहुसूर्यप्रकाशेन विमानेन सुवर्चसा ॥ ३९ ॥ वृतः स्त्रीणां सहस्रैश्च स्वच्छंदगमनालयः ॥ विचरत्यविचार्यैव सर्वलोकान्दिवौकसाम् ॥ ४० ॥ स्पृहणीयतमः पुंसां सर्ववर्णोत्तमो धनी ॥ स्वर्गाच्च्युतः प्रजायेत कुले महति रूपवान् ॥ ४१ ॥ धर्मज्ञो रुद्रभक्तश्च सर्वविद्यार्थपारगः ॥ तथैव ब्रह्मचर्येण गुरुशुश्रूषणेन च ॥ ४२ ॥ वेदाध्ययनसंयुक्तो भैक्षवृत्तिर्जितेंद्रियः ॥ नित्यं सत्यव्रते युक्तः स्वधर्मे च प्रमोदवान् ॥ ४३ ॥ वृतः काले सदृक्षेन सर्वभोगावलंबिना ॥ सूर्येणेव द्वितीयेन विमानेन विचारितः ॥ ४४ ॥ गुह्यकोनाम रुद्रस्य गणः परमसंमतः ॥ अप्रमेयबलैश्वर्यो देवदानवपूजितः ॥ ४५ ॥ तेषां च समतां याति तुल्यैश्वर्यसमन्वितः ॥ देवदानवमर्त्येषु स च पूज्यतमो भवेत् ॥ ४६ ॥ वर्षकोटिसहस्राणि वर्षकोटिशतानि च ॥ एवमैश्वर्यसंयुक्तो रुद्रलोके महीयते ॥ ४७ ॥ उषित्वाऽसौ विभूत्या वै यदा च च्यवते नरः ॥ रुद्रलोकाच्युतो भूमौ वसते नात्र संशयः ॥ ४८ ॥ महाकालवने क्षेत्रे ब्रह्मचर्याश्रमे स्थितः ॥ महेश्वरपरो नित्यं वसेद्वाऽथ म्रियेत वा ॥ ४९ ॥ मृतोऽसौ याति दिव्ये वै विमाने सूर्यवर्चसि ॥ पूर्णचंद्रप्रकाशो वै शशिवत्प्रियदर्शनः ॥ ५० ॥ रुद्रलोकं समासाद्य गुह्यकैः सह मोदते ॥ ऐश्वर्यं च महद्भुंक्ते सर्वस्य जगतः प्रभुः ॥ ५१ ॥ भुक्त्वा युगसहस्राणि रुद्रलोके महीयते ॥ प्रच्युतस्तु पुनस्तस्माद्रुद्रलोकात्क्रमेण तु ॥ ५२ ॥ नित्यं प्रमुदितस्तत्र भुक्त्वा लोकमनामयम् ॥ द्विजानां साधने नित्यं कुले महति जायते ॥ ५३ ॥ मानवेषु च धर्मेषु वसेद्भूयांश्च रूपवान् ॥ स्पृहणीयवपुः स्त्रीणां महाभोगपतिर्भवेत् ॥ ५४ ॥ वानप्रस्थसमाचारो वनौषधिविवर्जितः ॥ शीर्णपर्ण समाहारः फलपुष्पांबुभोजनः ॥ ५५ ॥ कणाशनोऽश्मकुट्टो वा दंतोलूखलकोऽथ वा ॥ येन केनाप्युपायेन जीर्णवल्कलधारकः ॥ ५६ ॥ जटी त्रिषवणस्नायी मुक्तकेशः सुदंडवान् ॥ जलशायी पंचतपा वर्षास्वभ्रावकाशकः ॥ ५७ ॥ कीटकंटकपाषाणभूम्यां तु शयनं तथा ॥ स्थानं वीरासनस्थः संविभागी दृढव्रतः ॥ ५८ ॥ अरण्यौषधिभोक्ता च सर्वभूताभयप्रदः ॥ नित्यं धर्मपरो मौनी जितक्रोधो जितेंद्रियः ॥ ५९ ॥ रुद्रभक्तः क्षेत्रवासी महाकालवने मुनिः ॥ सर्वसंगपरित्यागी स्वारामो विगतस्पृहः ॥ ६० ॥ यश्चात्र वसते व्यास शृणु तस्य हि या गतिः ॥ तरुणार्कप्रदीप्तेन वेदिकास्तंभशोभिना ॥ ६१ ॥ रुद्रभक्तो विमानेन याति कामप्रचारिणा ॥ विराजमानो नभसि द्वितीय इव चंद्रमाः ॥ ६२ ॥ गीतवादित्रशब्देन संवृतोऽप्सरसां गणैः ॥ वर्षकोटिशतं साग्रं रुद्रलोके महीयते ॥ ६३ ॥ रुद्रलोकाच्युतश्चापि विष्णुलोके महीयते ॥ विष्णुलोकात्परिभ्रष्टो ब्रह्मलोकं स गच्छति ॥ ६४ ॥ तस्मादपि च्युतः स्थानादीपेषु स हि जायते ॥ स्वर्गांश्च तथान्येषु भोगान्भुंक्ते यथेप्सया ॥ ६५ ॥ भुक्त्वैश्वर्यो नरस्तेषु मर्त्यार्थेषु जायते ॥ राजा वा राजतुल्यो वा जायते धनवान्सुखी ॥ सुरूपः सुभगः कांतः कीर्तिमाद्रुद्रभावितः ॥ ६६ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा क्षेत्रवासिनः ॥ स्वधर्मनिरता व्यास स्वभूत्या चारजीविनः ॥ ६७ ॥ सर्वात्मना रुद्रभक्ता भूतानुग्रहकारिणः ॥ महाकालवने क्षेत्रे ये वसंति सुमुक्षवः ॥ ६८ ॥ मृतास्ते रुद्रभवनं विमानैर्यांति रोधसैः ॥ अप्सरोगणसंयुक्तैः कामगैः कामरूपिभिः ॥ ६९ ॥ अथवा संविदग्नौ च शरीरं विसृजंति यः ॥ रुद्रध्यायी महासत्त्वः स रुद्र भवने वसेत् ॥ ७० ॥ रुद्रलोकोऽक्षयस्तेषां शाश्वतो गुह्यकैः सह ॥ सर्वलोकोत्तमो रम्यो भवतीष्टार्थसाधकः ॥ ७१ ॥ ये त्यजंति महाकाले प्राणान नशनैर्नराः ॥ तेषामप्यक्षयो व्यास रुद्रलोको महात्मनाम् ॥ ७२ ॥ सांख्याः स्तुवंति ते रुद्रं सर्वदुःखविवर्जिताः ॥ सर्वामरयुतं देवं नंदिदेवगणैर्युतम् ॥ अनाशकमृताः शूद्रा महाकालवने नराः ॥ ७३ ॥ सिंहयुक्तैस्तु ते यांति विमानैरर्कसन्निभैः ॥ नानावर्णसुवर्णाढ्यैर्दृढगंधाधिवासितैः ॥ अनौपम्यगुणैः रम्यैरप्सरोगीतवादिभिः ॥ ७५ ॥ पताकाध्वजविन्यस्तैर्नानाघंटानिनादितैः ॥ सुप्रभैर्गुणसंपन्नैर्मयूरवरचारिभिः ॥ ७६ ॥ रुद्रलोके नरा धीराः सर्वे चानशनैर्मृताः ॥ तत्रोषित्वा चिरं कालं भोगान्भुक्त्वा यथेप्सितान् ॥ धनी विप्रकुले भोगी जायते मर्त्यमागतः ॥ ७७ ॥ करीषं साधयेद्यस्तु महाकालवने नरः ॥ सर्वभोगविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ७८ ॥ रुद्रलोके वसेत्तावद्यावत्कल्पक्षयो भवेत् ॥ ७९ ॥ तत्र भुक्त्वा महाभोगानिह जातो महीपतिः ॥ पृथिव्याः सकलायाश्च रूपवान्सुभगो भवेत् ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालयनवासविधिवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ आचारः परमो धर्मः सर्वधर्मपरायणः ॥ स्वधर्मनिरताश्चैव जितक्रोधा जितेंद्रियाः ॥ १ ॥ रुद्रलोकं व्रजंतीह नात्र चित्रा मतिर्मम ॥ असंशयं च गच्छंति लोकानन्यान्सुशिप्रभेः ॥ २ ॥ विनापि क्षेत्रवासेन तथैव नियमेन च ॥ स्त्रियो म्लेच्छाश्च शूद्राश्च पशवः पक्षिणो मृगाः ॥ ३ ॥ मूका जडांधबधिरास्तपोनियमवर्जिताः ॥ एषां तु का गतिश्चेत्ते महाकालवने मृताः ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्त्रियो म्लेच्छाश्च मूढाश्च पशवः पक्षिणो मृगाः ॥ कालेनैव मृता व्यास रुद्रलोकं व्रजंति ते ॥ ५ ॥ शरीरैर्दिव्यरूपैश्च सर्वभोगसमन्विताः ॥ रमंते शंभुना सार्धं स्मशाने प्रेतसंकुले ॥ ६ ॥ निर्भर्त्सिता पुरा देवी कालीति पार्वतीति च ॥ तदा सा कुपिता देवी कटके शंकरं प्रति ॥७॥ एवं हि कलहो जातः शिवगौर्योर्हि यत्र तु ॥ देवस्तत्र समुद्भूतो नाम्ना कलकलेश्वरः ॥ ८ ॥ कृतमग्रे तदा कुंडं नाम्ना कलहनाशनम् ॥ स्नाने तत्र कृते व्यास जाताऽकलहदेवता ॥ ९ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरम् ॥ उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥१०॥ तत्र यच्छति यो दानं त्रुटितोऽत्रं च चंदनम् ॥ आत्मना तारितास्तेन दश पूर्वे दशापरे ॥ ११ ॥ भूमिदानं च यस्तत्र प्रदास्यति नरो शुने ॥ अपि गोचर्ममात्रेण सर्वभूम्यधिपो भवेत् ॥ १२ ॥ क्षमेकां रक्तिकामेकां भूमेरप्येकमंगुलम् ॥ यः प्रयास्यति भक्त्या हि स वै राजा भविष्यति ॥ १३ ॥ घेनुमश्वांस्तिलान्वस्त्रं भाजनं ताम्रदोहनम् ॥ उपानहश्च च्छत्रं च तथा च श्रेष्ठपादुके ॥ १४ ॥ य प्रदास्यंति विप्रेभ्यस्तेषां लोकाः सदाक्षयाः ॥ तस्य दक्षिणपार्श्वे तु प्रभुं मात्राख्य देवताः ॥ १५ ॥ स्नात्वा तत्र सर्वलोकानां देवी दुरितहारिणी ॥ सर्वतीर्थं तु विज्ञेयं मणिकर्णिकमुत्तमम् ॥ १६ ॥ तस्मिन्स्नात्वा तु यः पश्यत्पुरुषमात्मन आदरात्॥ स मुक्तः सर्वपापेभ्यः सिद्धिमाप्नोति वांछिताम् ॥ १७ ॥ तासां तु दर्शनं कृत्वा मार्गं गमनमाचरेत् ॥ न भयं तस्य चोग्भ्यो रक्षोभूतभयं तथा ॥ १८ ॥ स्वदेशे परदेशे वा पर्वतेष्वटवीषु च ॥ न समुद्रे भयं तस्य तथा वै दुष्टभावना ॥ १९ ॥ ग्रहपीडासु सर्वासु तथा गजभयादिकम् ॥ ग्रस्तं वा यदि वा मेषं महिषं चापि घातयेत ॥ २० ॥ देवीमुद्दिश्य यो विप्र सोऽभीष्टफलमश्नुते ॥ आश्विनस्य सिताष्टम्यामर्धरात्रिगते नरः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ २१ ॥ यः स्नाति पुरतो देव्याः स सिद्धिं लभते पराम् ॥ मृतपुत्रा च या नारी कुण्डे स्नात्वा सभर्तृका ॥ २२ ॥ स्नाते वै फलकुम्भेन अग्रे देव्या विधानतः ॥ स्नात्वा नान्यमुखं पश्येत्कुम्भस्नानेन वै मुने ॥ २३ ॥ तस्य संजायते पुत्रो यथा देवः षडाननः ॥ पृष्ठे मातुः परं पुण्यं तीर्थमप्सरसां शुभम् ॥ २४ ॥ रूपसौभाग्यसंपन्नस्तत्र स्नातो भवेन्नरः ॥ उर्वश्या वै पुरा व्यास तीर्थं यास्य प्रभावतः ॥ २५ ॥ भर्ता पुरूरवा लब्ध ऐलेयोऽसौ महीपतिः ॥ इति कौतूहलं श्रुत्वा व्यासो वचनमब्रवीत् ॥ २६ ॥ ॥ व्यास उवाच ॥ ॥ कथमप्सरसां तीर्थं तत्र जातं महामुने ॥ कारणेन यथा तेन यस्मिन्काले प्रतिष्ठितम् ॥ तथा तन्मे सविस्तारं सरहस्यं प्रकीर्तय ॥ २७ ॥ कथ पुरूरवाश्चासौ भार्यास्तस्य वराप्सराः ॥ उर्वशीनाम का सा तु केन जाता वरांगना ॥ सर्वमेतद्यथावृत्तं वद कौतूहलं हि मे ॥ २८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नरनारायणौ पूर्वं यत्र वै तेपतुस्तपः ॥ २९ ॥ बदरिकाश्रमस्थौ तौ तेनेन्द्रो भयमागतः ॥ सर्वाश्चाप्सरसो दृष्ट्वा रूपयौवनदर्पिताः ॥ ३० ॥ आदिष्टा वा मघवता विघ्नार्थे च समागताः ॥ तौ दृष्ट्वाप्सरसस्तत्र रमन्तीमदविह्वलाः ॥ ३१ ॥ विघ्नार्थमिह आयातास्तदा देवा जजल्पुः ॥ अस्माकं न स्त्रियः सांत तेन वै विघ्नकारणम् ॥ ३२ ॥ एवं संजल्प्य च नरो नारायणमुवाच ह ॥ करिष्याम्यहमेकां वै आसां तु रूपतोऽधिकाम् ॥३३॥ मंजर्या सहकारस्य स्त्रीभ्यरुभ्यां चकार ह ॥ रूपेणाप्रतिमां लोके सर्वाभरणभूषिताम् ॥ ३४ ॥ उत्थितां प्रमदां दृष्ट्वा ज्वलनाभां वरांगनाम् ॥ गत्वा त्रासमुस्ताः शक्रं न तौ लोभयितुं क्षमाः ॥ ३५ ॥ शक्रस्तासां वचः श्रुत्वा गत्वा देवाबुवाच ह ॥ प्रणामावनतो भूत्वा कृत्वा शिरसि चांजलिम् ॥ ३६ ॥ अहमर्थी स्त्रियाश्चास्याः प्रसादः क्रियतामिति ॥ ततस्तां ददतुर्देवाविंद्राय परमेश्वरी ॥ ३७ ॥ अस्मद्वचनसामर्थ्याद्गृहाणेमां त्वमुर्वशीम् ॥ ऊरुभ्यां जनिता यस्मान्नरेणेयं वरांगना ॥ ३८ ॥ मंजर्या सहकारस्य तेनेयमुर्वशी स्मृता ॥ पुरंदरो गृहीत्वा तामुर्वशीं परमांगनाम् ॥ ३९ ॥ गत्वा स्वर्गमथाहूय चित्रांगदमुवाच ह ॥ शिक्षाऽस्याः क्रियतां चित्र यथा नृत्ये विचक्षणा ॥ ४० ॥ क्रियतामचिरादेषा यन्नमास्थाय शोभनम् ॥ एवमुक्ते तु शक्रेण कृता तेन विचक्षणा ॥ वरं प्रवीणा सा जाता नृत्ये गीते च कोविदा ॥ ४१ ॥ एवं सा न्यवसत्तत्र सुरसद्मनि सुन्दरी ॥ गते बहुतिथे काले तत्रागात्स नरेश्वरः ॥ ४२ ॥ इलस्य पुत्रो धर्मात्मा नाम्ना चैव पुरूरवाः ॥ इन्द्रस्यार्द्धासनगतो नृत्यं पश्यति तत्र ह ॥ ४३ ॥ नृत्यन्तीं वासवस्याग्रे उर्वशीं वीक्ष्य कामुकः ॥ हृतचित्तस्तया राजा न किंचित्प्रत्यपद्यत ॥ ४४ ॥ धैर्यं चित्ते समावेश्य मुहूर्तं पर्यवस्थितः ॥ उर्वशी च तदा तेन दर्शनाहृतमानसा ॥ ४५ ॥ तत्प्रदेशाद्विनिष्क्रम्य कामार्ता चातिविह्वला ॥ भूमौ सा पतिता बाला उच्छ्रिताद्गमण्डलात् ॥ ४६ ॥ अथात्मानं च संवेद्य उत्थिता भूमिमण्डलात् ॥ दृष्टा सा राजसिंहेन मन्मथेन प्रपीडिता ॥ ४७ ॥ गतः पुरूरवा भूमिं तामेव मनसा स्मरन् ॥ स्मरन्ती राजशार्दूलं गता साप्युर्वशी गृहम् ॥ ४८ ॥ चित्रांगदगृहे गत्वा दूतं साथ चकार ह ॥ चित्रांगदेन सा नीता रात्रौ यत्र पुरूरवाः ॥ ४९ ॥ उर्वश्या रहितः स्वर्गः शून्योऽप्यासीद्दिवौकसाम् ॥ रात्रावेव च सा तेन आनीता त्रिदिवं पुनः ॥ ५० ॥ तया विरहितः सोऽपि शून्यचित्तः परिभ्रमन् ॥ उन्मत्ततां गतो व्यास पृथिवपर्णाणि पार्थिवः ॥५१॥ परिभ्रमन्स तीर्थानि महाकालवनं गतः ॥ गंधर्वेणोर्वशी स्वर्गे नीता सा परमाप्सराः ॥ ५२ ॥ नापि शेते न वा स्नाति हे राजन्निति जल्पति ॥ तावदप्सरसः सर्वास्ताः प्राप्ता यत्र चोर्वशी ॥ ५३ ॥ रंभा च मेनका चैव प्रम्लोचा पुंजिकस्थली ॥ जलपूर्णाशुपूर्णा च वसंता चंद्रिका तथा ॥ ५४ ॥ सूर्यदत्ता विशालाक्षी चंद्रा चन्द्रप्रभा तथा ॥ आगत्य तास्तु सहिता उर्वशीं वाक्यमब्रुवन् ॥ ५५ ॥ किं रोदिषि वरारोहे मर्त्यहेतोः सुलोचने ॥ तद्वाक्यमुर्वशी तासां श्रुत्वा वचनमब्रवीत् ॥ ५६ ॥ सौख्यं पण्ढो न जानाति संगात्स्त्रीपुंसयोर्हि यत् ॥ अनयोपमया ह्येयं तस्यार्थे कृतनिश्चया ॥ ५७ ॥ श्रुत्वा चेति वचस्तस्यास्ताः संमंत्र्य समाहिताः ॥ अविदिते च देवानां महाकालवने गताः ॥ ५८ ॥ नृपं च ददृशुस्तत्र वृक्षच्छायानिषेवितम् ॥ दृष्ट्वा चाथ नृपं सर्वा भृशं जाताः सुविह्वलाः ॥ ५९ ॥ दृष्ट्वा तथाविधाः सर्वाः कामार्ताः सुरयोषितः ॥ मूढचित्ताः प्रहस्यैवमुर्वशी वाक्यमब्रवीत् ॥६०॥ ॥ उर्वश्युवाच ॥ ॥ अयं स पुरुषव्याघ्रो विना येनाहमीदृशी ॥ ऐलः पुरूरवानाम विख्यातो जगतीपतिः ॥ ६१ ॥ एवं ब्रुवन्त्यां वै तस्यामुर्वश्यामप्सरोगणः ॥ मौनीभूतश्चिरं तस्थौ लज्जयानतकन्धरः ॥ ६२ ॥ एतस्मिन्नन्तरे प्रायाद्भगवांस्तत्र नारदः ॥ दृष्ट्वा तथागताः सर्वा उर्वश्या सहितं नृपम् ॥ ६३ ॥ संप्रेक्ष्य च ततः प्राह किं यूयमिह निःस्वनाः ॥ त्यक्ता तथाविधं रम्यमिन्द्रस्यालयमुत्तमम् ॥ ६४ ॥ वरं च त्रियतां शीघ्रं वियोगो न भविष्यति ॥ माहात्म्यं चास्य तीर्थस्य कथयामास नारद ॥ ६५ ॥ अस्मिन्हि दुर्भगा तीर्थे स्नात्वा स्त्री पुरुषोऽपि वा ॥ सौभाग्यं लभते सम्यक्सर्वभोगांस्तथोत्तमान् ॥ ६६ ॥ आत्मानं तोलयेद्यस्तु तिलैर्वा लवणेन वा ॥ शर्कराभिश्च वह्नीभिर्वित्तशाठ्यविवर्जितः ॥ ६७ ॥ गुडेन मधुना वापि देवीमुद्दिश्य पार्वतीम् ॥ लवणेन स्वरूपाढ्यस्तिलैः सर्वांगशोभनः ॥ ६८ ॥ द्रव्यवृद्धिः शर्करया गुडेनांगेषु पूर्णता ॥ मधुना चैव सौभाग्यं तीर्थस्यास्य प्रभावतः ॥ ६९ ॥ द्वादशैव तु युग्मानि देव्या देवस्य भोजयेत् ॥ कूर्पी नखरिणीं दद्यात्ताटंकं कंतकांजनम् ॥ ७० ॥ वेत्रजां कंचुकीं चैव वस्त्रे कौसुंभके तथा ॥ श्वेतानुलेपनं पुंसां स्त्रीणां दद्याच्च कुंकुमम् ॥ ७१ ॥ आषाढे श्रावणे वापि मासि भाद्रपदे तथा ॥ शुक्लाश्विनतृतीयाया मुत्तमं व्रतमाचरेत् ॥ ७२ ॥ उत्तमा जायते नारी यथा देवी उमा तथा ॥ उमामहेश्वरौ कार्यौ सौवर्णौ च स्वशक्तितः ॥ ७३ ॥ धार्यौ नार्या हि तौ देवौ स्वयं तुलारोहणे ॥ फलानि चैव देयानि शाकानि विविधानि च ॥ ७४ ॥ तत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् ॥ एवं या कुरुते तत्र तीर्थे नारी समाहिता ॥ ७५ ॥ गन्धर्वाप्सरसां लोके मृता याति न संशयः ॥ अत्र तीर्थे च द्वे लिंगे पूजिते देवदानवैः ॥ ७६ ॥ दृष्ट्वा ते परमां ऋद्धिं प्राप्नुतो दंपती तदा ॥ कार्तिक्यां तु विशेषेण कृत्वा तत्र प्रजागरम् ॥ संपूज्य गंधपुष्पैश्च रुद्रलोकमवाप्नुयात् ॥ ७७ ॥ यथा देव्याः स्वरूपेण वियोगो नैव दृश्यते ॥ तथा तयोर्वियोगश्च दृश्यते न कदाचन ॥ ७८ ॥ एवं कृत्वाथ तां विप्र सर्वाश्च त्रिदिवं गताः ॥ उक्तमप्सरसां तीर्थं तीर्थांतरमथोच्यते ॥ ७९ ॥ दक्षिणे पृष्टदेव्या वै माहिषं कुण्डमुच्यते ॥ महिषो दानवः पूर्वं निहतो गणनायकैः ॥ ८० ॥ तत्र तीर्थे नरः स्नात्वा मातॄः संपूज्य यत्नतः ॥ प्रेतराक्षसपिशाचानां पीडया स विमुच्यते ॥ ८१ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽप्सरःकुण्डमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ कथं तन्माहिषं कुण्डं मातॄणामाकृतिः कथम् ॥ रुद्रस्यैव कथं क्षेत्रे महिषो दानवो हतः ॥१॥ ॥ सनत्कुमार उवाच ॥ ॥ कपालखंडमादाय महादेवोऽप्यतिप्रभम् ॥ ब्रह्मतेजोमयं दिव्यं ज्वलंतमिव चार्चिषा ॥२॥ क्रीडमानो जगन्नाथो मोहयामास वै सुरान् ॥ निमेषात्स इमं लोकं योगात्मा योगलीलया ॥३॥ प्राप्य पुण्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तमं क्षेत्रं यत्रातिष्ठन्महाप्रभुः ॥ तत्र तच्च महद्दिव्यं कपालं देवताधिपः ॥ ४ ॥ स्थापयामास दीप्तार्चिर्गणानामग्रतः प्रभुः ॥ त्वत्स्थापितमथो दृष्ट्वा
गताः सर्वे महौजसः ॥ ५ ॥ विनदत्सु महानादं नादयंतो दिशो दश ॥ क्षोभार्णवाशनिप्रख्यं नभो येन विदीर्यते ॥ ६ ॥ तेन शब्देन घोरेण
दानवो देवकंटकः ॥ हालाहल इति ख्यातो देशं तमभिधावितः ॥ ७ ॥ अमृष्यमाणः क्रोधार्तो दुरात्मा दुर्जयः सुरैः ॥ ब्रह्मदत्तवरश्चैव माहिषं
वपुरास्थितः ॥ ८ ॥ दैत्यैः परिवृतो घोरैः कोटिभिश्चोद्यतायुधैः ॥ तमायांतं तु सक्रोधं महिषं देवकंटकम् ॥ ९ ॥ समावेक्ष्याह वै देवो गणान्सर्वा
न्पिनाकधृक् ॥ मायावी गणपा दैत्यस्त्रैलोक्यस्यापि कंटकः ॥ १० ॥ आयाति त्वरितो यूयं तस्मादेनं विनिघ्नथ ॥ कपालस्य गतिं सर्व आश्रिता
गणनायकाः ॥ ११ ॥ ततो देवगणा दृष्ट्वा तमायांतं महासुरम् ॥ गर्जमानं महानादं भ्रममाणं महाभुजम् ॥ १२ ॥ विभिदुः शूलसंघातैरसिभि
र्मुसलैस्तथा ॥ संमुह्य शरजालेन ततो भूमौ न्यपातयन् ॥ १३ ॥ हते तस्मिन्महादेवो देवान्प्रोवाच वै तदा ॥ अहो दर्पातिमूढः स दर्पेण निधनं
गतः ॥ १४ ॥ एतस्मिन्नंतरे व्यास तत्कपालात्सुभैरवाः ॥ दीप्तास्या मातरः सर्वाः प्रचंडास्या महाबलाः ॥ १५ ॥ अभ्यधावंस्तमुद्देशं महादेवं निवे
द्य वै ॥ दैत्यं ता भक्षयंति स्म भित्त्वा भित्त्वा महाबलाः ॥ १६ ॥ कपालमातरस्तस्मात्ख्याताः क्षेत्रे महाबलाः ॥ महाकपाल.त्तस्माद्वै तादृशः परि
कीर्तितः ॥ १७ ॥ स्थापितस्य कपालस्य भित्त्वा समभवत्पुरा ॥ ख्यातं शिवतडागं च सर्वपापप्रणाशनम् ॥ १८ ॥ तदद्यापि महद्दिव्यं सरस्तत्र
प्रकाशते ॥ त्रिषु लोकेषु विख्यातं गणगंधर्वसेवितम् ॥ १९ ॥ पात्रस्थमुद्धृतं वापि शीतोष्णं क्वथितं जलम् ॥ रौद्रं सरः पुनातीहाश्वमेधावभृथो
यथा ॥ २० ॥ प्रागाद्ब्रह्मापि तं देशं देवतानां शतैर्वृतः ॥ स्वर्गलोकस्य निःश्रेणी कीर्तिता ब्रह्मणा स्वयम् ॥ २१ ॥ अत्र त्यजंति ये प्राणान्रुद्र
लोकं व्रजंति ते ॥ धन्या व्यास नरा मर्त्ये महाकालवने स्थिताः ॥ २२ ॥ रौद्रे सरसि ये स्नांति जलं वापि पिबंति ये ॥ स्वधर्माचारनिरताः
पश्यंतीशानमीश्वरम् ॥ २३ ॥ इति स्वर्गगता देवाः स्पृहां कुर्वंति नित्यशः ॥ २४ ॥ इदं शुभं दिव्यमघप्रणाशनं महाकपालं सुरदेवपूजितम् ॥
महाप्रभं पापहरं सनातनं सुरेशलोकादपि दुर्लभं सदा ॥ २५ ॥ तपोरतैः सिद्धगणैरधिष्ठितं यथा नभःस्थं दिननाथमंडलम् ॥ य एकचित्तः
शृणुयात्प्रसादतस्त्रिविष्टपं गच्छति सोऽभिनंदितः ॥२६॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डेऽवन्तीक्षेत्र.
माहात्म्ये महिषकुण्डरुद्रसरोमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि तीर्थं त्रैलोक्य
विश्रुतम् ॥ स्वयंभूतं महेशस्य विख्यातं कुटुंबिकेश्वरम् ॥ १ ॥ मुच्यते सर्वपापेस्तु सप्तजन्मकृतैरपि ॥ शुचिः पश्यति यो देवं कृत्वा श्राद्धं यथा
विधि ॥ २ ॥ सर्वाल्लोकानतिक्रम्य शिवलोकं स गच्छति ॥ यस्तु सर्वाणि शाकानि कन्दानि विविधानि च ॥ ३ ॥ तीरे तस्य प्रयच्छेत स
प्राप्नोति परां गतिम् ॥ पौषे प्रतिपदि सिते अष्टम्यां वा समाहितः ॥ ४ ॥ एकेनैवोपवासेन अश्वमेधफलं लभेत् ॥ आश्विन्यां पौर्णमास्यां च
शुचिः पश्यति मानवः ॥ ५ ॥ पट्टबंधं महेशस्य स विपाप्मा दिवं व्रजेत् ॥ चैत्रे मासि सिते पक्षे पञ्चम्यां समुपोषितः ॥ ६ ॥ कर्पूरं कुंकुमं चैव
मृगनाभि सचन्दनम् ॥ निवेदयंति देवाय नैवेद्यं घृतपायसम् ॥ ७ ॥ स्वरूपं चैव विप्रेन्द्र सभार्यं भोजयेद्द्विजम् ॥ रुद्रलोकमवाप्नोति यावद्निद्राश्चतु
र्दश ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कुटुम्बिकेश्वरमाहात्म्यवर्णनंनाम
दशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ अथातः संप्रवक्ष्यामि तीर्थं विद्याधरस्य तु ॥ तत्र स्नात्वा शुचिर्भूत्वा विद्याधरपतिर्भवेत् ॥ १ ॥ ॥ व्यास
उवाच ॥ ॥ कथं तीर्थमिदं क्षेत्रे जातमत्र महामुने ॥ प्रसादाद्ब्रूहि मे ब्रह्मञ्छ्रोतुमिच्छामि सांप्रतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥
विद्याधरपतिः कश्चिदासीद्रूपधरः पुरा ॥ ग्रथिता पारिजातस्य माला तेन मनोरमा ॥ ३ ॥ गृहीत्वा च स तां मालां गतो वासववेश्मनि ॥
नृत्यंती वासवस्याग्रे दृष्टा तेन च मेनका ॥ ४ ॥ दत्ता तस्यै तदा तेन सा माला नृत्यमाश्रितः ॥ सा मेनका स्तुताऽस्थाने मालया मोहिता
भवत् ॥ ५ ॥ कोपाविष्टेन शक्रेण शप्तो विद्याधरस्तदा ॥ पृथिव्यां गच्छ पापिष्ठ नृत्यभंगस्त्वया कृतः ॥ ६ ॥ विद्याभ्रष्टं त्यक्ता मम शापाच्च
सांप्रतम् ॥ एवमुक्तस्तु शक्रेण वाक्यं विद्याधरोऽब्रवीत् ॥ ७ ॥ अजानता मया नाथ अपराधः कृतोऽधुना ॥ अनुग्रहमतो देव कुरु मे त्वं प्रसा
दतः ॥ ८ ॥ एवमुक्तः स शक्रो वै विद्याधरमुवाच ह ॥ गच्छावंतीं त्वमद्यैव यत्रास्ते गांगटी गुहा ॥९॥ तस्याश्चोत्तरभागे तु विद्यते तीर्थमुत्तमम् ॥
ख्यातं तत्त्रिषु लोकेषु नाम्ना विद्याधरं शुभम् ॥ १० ॥ भक्त्या तत्र कृते स्नाने विद्याधरपतिर्भवेत् ॥ अतस्त्वमपि तत्रैव कुरु स्नानं प्रयत्नतः ॥११॥
एवमुक्तः स शक्रेण आगतोऽवंतिमंडले ॥ स्नानं कृत्वा च तेनैव तीर्थे तस्मिन्मनोरमे ॥ १२ ॥ प्रभावात्तस्य तीर्थस्य पुनः प्राप्तं पदं स्वकम् ॥
एवं व्यास समाख्यातं तीर्थं विद्याधरं शुभम् ॥१३॥ तत्र पुष्पाणि यो दद्याच्चंदनं च विलेपनम् ॥ लभेत्समस्तभोगान्स इह लोके परत्र च ॥१४॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये विद्याधरतीर्थमाहात्म्यवर्णनंनामैकादशोऽध्यायः
॥११॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ उत्तरे तु प्रवक्ष्यामि मर्कटेश्वरमुत्तमम् ॥ तत्र तीर्थं च विख्यातं सर्वकामप्रदायकम् ॥ १ ॥ तस्मिंस्तीर्थे
नरः स्नात्वा गोशतस्य फलं लभेत् ॥ विस्फोटानां प्रशांत्यर्थं बालानां चैव कारणे ॥२ ॥ मापेन मापितान्कृत्वा मसूरांस्तत्र क्षिपेद् ॥ शीतलायाः
प्रभावेन बालाः संतु निरामयाः ॥ ३ ॥ ये पश्यंति नरा भक्त्या शीतलां दुरितापहाम् ॥ न तेषां दुष्कृतं किंचिन्न दारिद्र्यं द्विजोत्तम ॥ ४ ॥ न
च रोगभयं तेषां ग्रहपीडा तथैव च ॥५॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शीतला
माहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा देवं च भैरवम् ॥ श्राद्धं तत्रैव कुर्वीत
पितॄनुद्दिश्य भक्तितः ॥ १ ॥ पितॄंश्च स नरो व्यास तारयेदात्मना सह ॥ स्वर्गद्वारेण योऽभ्येति रुद्रस्य परमं पदम् ॥ २ ॥ भैरवस्याग्रतो देवी पूर्वे
तिष्ठति चांबिका ॥ तां तु दृष्ट्वा नरः स्त्री वा मुच्यते सर्वपातकैः ॥ ३ ॥ महानवम्यां पुरुषः कृत्वा वस्तमयं बलिम् ॥ महिषं वा सुरां मांसं माला
बिल्वमयीं शुभाम् ॥ भक्त्या निवेद्य देव्यै तु सर्वां सिद्धिमवाप्नुयात् ॥ ४ ॥ तत्र स्नात्वा नरो भक्त्या पूजां कृत्वा महेश्वरे ॥ स्वर्गद्वारेण सोऽभ्येति
रुद्रस्य भवनं द्विज ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये स्वर्गद्वारमाहात्म्य
वर्णनंनाम त्रयोदशोध्यायः ॥ १३ ॥ ॥७॥ ॥ सनत्कुमार उवाच ॥ ॥ स्नात्वा चतुःसमुद्रे तु पश्येद्राजस्थलं शिवम् ॥ यस्य दर्शनमात्रेण पुत्रवा
ञ्जायते नरः ॥ १ ॥ समुद्राः संति चत्वारः क्षारक्षीरदधीक्षवः ॥ समीपे तस्य देवस्य सुधुम्नेन प्रतिष्ठिताः ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ राजस्थल
समीपे तु समुद्राः केन हेतुना ॥ कथय त्वं मुनिश्रेष्ठ सुधुम्नेन प्रतिष्ठिताः ॥ ३ ॥ लक्षयोजनपर्यंतं जंबुद्वीपं सुशोभनम् ॥ मर्यादायां स्थापितोऽयं
समुद्रः क्षारसंज्ञित. ॥४॥ शाकद्वीपे द्विलक्षे तु क्षीराब्धिः संप्रतिष्ठितः ॥ दध्यब्धिस्तु कुशद्वीपे चतुर्लक्षः प्रतिष्ठितः ॥ शाल्मले त्विक्षुजलधिर्द्वयलक्ष.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रतिष्ठितः ॥ ५ ॥ चत्वारस्ते समाख्याताः समुद्रा भूमिमंडले ॥ राजस्थलसमीपे तु कथमेकत्र संगताः ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ सुद्युम्नो नाम राजासीत्पुरा कल्पे सुधार्मिकः ॥ तस्य पत्नी वरारोहा नाम्ना ख्याता सुदर्शना ॥ ७ ॥ मुनिं दाल्भ्यं च सा दृष्ट्वा पप्रच्छ सुतकाम्यया ॥ भगवन्केन दानेन स्नानेन विधिनाऽथवा ॥ ८ ॥ सर्वलक्षणसंपूर्णः पुत्रो लभ्यो मया कथम् ॥ एतदाख्याहि विप्रर्षे याथातथ्यं सविस्तरम् ॥ ॥ ९ ॥ ॥ दाल्भ्य उवाच ॥ ॥ विहितास्ते पुरा पुत्र्यब्धयः पुत्रेप्सयोत्तमाः ॥ स्वयंभुवेन देवेन ब्रह्मणा लोककारिणा ॥ १० ॥ तेषु राज्ञा कृते स्नाने तव पुत्रो भविष्यति ॥ शंकराराधने पुत्रि तस्मात्प्रेरय वल्लभम् ॥ ११ ॥ दाल्भ्यस्यैव तु वाक्येन विचित्राख्यानकेन च ॥ प्रस्थापयामास पतिं शंकराराधने द्रुतम् ॥ १२ ॥ स गत्वा तोषयामास शंकरं गंधमादने ॥ संतुष्टः शंकरः प्राह शशिसूर्याग्निलोचनः ॥१३॥ अवंतीं गच्छ राजेंद्र पुत्रं प्राप्स्यसि शोभनम् ॥ मच्छासनाज्जलधयो गमिष्यंति कुशस्थलीम् ॥ १४ ॥ मेरुरूपे स्थले राजन्समीपे शंकरस्य च ॥ द्रक्ष्यसि त्वं नरश्रेष्ठ जलधींस्तत्र संगतान् ॥ अभ्यर्थितास्त्वया तत्र स्थास्यंति कलया सदा ॥ १५ ॥ एवमुक्त्वा महादेवो जगामादर्शनं विभुः ॥ सुद्युम्नो भार्यया सार्धमाजगाम कुशस्थलीम् ॥ १६ ॥ आगतस्तु कुशस्थल्यां समुद्रांश्च ददर्श ह ॥ तांस्तु दृष्ट्वा नमश्चक्रे राजस्थलसमीपतः ॥ १७ ॥ ते वै दृष्ट्वा च सुद्युम्नं प्रणतं भक्तवत्सलम् ॥ प्रोचुर्वारिधयः सर्वे वरं वरय सुव्रत ॥१८॥ स वव्रे मनसा पुत्रं सर्वलक्षणसंयुतम् ॥ उवाच च पुना राजा यावत्तिष्ठति मेदिनी ॥ तावदत्रैव स्थातव्यं राजस्थलसमीपतः ॥ १९ ॥ ॥ समुद्रा ऊचुः ॥ ॥ तावत्स्थास्यामहेऽत्रैव यावत्कल्पावसानकम् ॥ २० ॥ भविष्यति च ते पुत्रः सर्वलक्षणसंयुतः ॥ अत्र ते स्नानमात्रेण तस्मात्स्नानं समाचर ॥ २१ ॥ स्थले चात्र शुभे राजन्स्थास्यामः कलया सह ॥ एवं व्यास समुद्रास्तु सुद्युम्नेनावतारिताः ॥ २२ ॥ कुरुते तेषु यो यात्रां तस्य पुण्यफलं शृणु ॥ स्नानं कृत्वा महापुण्ये समुद्रे क्षारसंज्ञके ॥ ॥ २३ ॥ कुर्याच्छ्राद्धं ततो व्यास पितॄणां भक्तितत्परः ॥ पूजयेच्च महादेवं स्थलस्थं पार्वतीपतिम् ॥ २४ ॥ मंडकांश्च ततो दद्याद्ब्राह्मणे वेदपारगे ॥ पात्रं ताम्रमयं कार्यं लवणेन प्रपूरितम् ॥ २५ ॥ सहिरण्यं च दातव्यं ब्राह्मणे वेदपारगे ॥ सप्तधान्यसमायुक्तं वेणुजं वस्त्रवेष्टितम् ॥ २६ ॥ सदक्षिणं फलैर्युक्तमर्घ्यं दद्यात्प्रयत्नतः ॥ क्षीराब्धिं च ततो गत्वा स्नानं कुर्याच्च पूर्ववत् ॥ २७ ॥ क्षीरं तत्र प्रदातव्यं ताम्रपात्रेण पूरितम् ॥ दध्यब्धौ च तथा कृत्वा दद्याद्दध्योदनं शुभम् ॥ २८ ॥ इक्ष्वब्धौ च तथा कृत्वा दद्याद्विप्रे गुडं शुभम् ॥ यात्रां कृत्वा तु वै व्यास गां च दद्यात्पयस्विनीम् ॥ २९ ॥ एवं यः कुरुते यात्रां राजस्थलसमीपतः ॥ भव्यां हि लभते लक्ष्मीं पुत्रांश्चापि मनोरमान् ॥ ३० ॥ मृते स्वर्गमवाप्नोति यावदिंद्राश्चतुर्दश ॥ तावत्स्वर्गफलं भुक्त्वा पश्चान्मोक्षं प्रयास्यति ॥ ३१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये राजस्थलेश्वरसमीपे चतुःसमुद्रमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महातीर्थं नाम्ना शंकरवापिका ॥ क्रीडमानेन देवेन निर्मितं तीर्थमुत्तमम् ॥ १ ॥ प्रक्षिप्तं देवदेवेन कपालक्षालनं जलम् ॥ वापीगतं कृतं यस्मादतः शंकरवापिका ॥ २ ॥ अर्काष्टम्यां नरः स्नात्वा दिशासु विदिशासु च ॥ पूर्वादिक्रमतो यावद्वापीमध्ये तथैव च ॥ ३ ॥ हविष्यान्नयुतान्व्यास दद्याच्च करकान्नवान् ॥ शाकमूलांश्च विप्रेभ्यस्तस्य पुण्यफलं शृणु ॥ ४ ॥ परत्र चेह ये लोकाः सर्वभावसमन्विताः ॥ तत्रतत्र समायाति भुनक्त्यैश्वर्यमुत्तमम् ॥ ॥ ५ ॥ ये नराः कीर्तयिष्यंति माहात्म्यमतिभाविकाः ॥ रुद्रलोकेऽपि ते पूज्यास्तेभ्योऽपि सततं नमः ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ततो वै देवदेवेशः पिनाकी वृषभध्वजः ॥ तुष्टाव प्रयतो भूत्वा देवदेवं दिवाकरम् ॥ ७ ॥ आजगाम दिवानाथः संतुष्टः प्राह शंकरम् ॥ ८ ॥ ॥ ॥ सूर्य उवाच ॥ ॥ वरं वरय भूतेश वरदोऽस्मि ददामि ते ॥ तमाह वरदश्चेत्त्वं याच्यमानं कुरुष्व मे ॥ ९ ॥ अंशेन स्थीयतामत्र हितार्थं सर्वदेहिनाम् ॥ अवतीर्णो रविस्तत्र श्रुत्वा माहेश्वरं वचः ॥ १० ॥ ततो देवाधिदेवस्य शंकरस्य महौजसः ॥ वाक्येन भास्करस्तत्र ययौ ख्यातिं महाद्युतिः ॥ ११ ॥ शंकरादित्यनामेति लोकानुग्रहकारकः ॥ देवा दैत्याश्च गंधर्वा विस्मिताः सह किन्नरैः ॥ १२ ॥ अहो धन्यमिदं स्थानं यत्रास्ते त्रिपुरांतकः ॥ भास्करोऽपि च तत्रस्थस्तीर्थमध्ये च वर्तते ॥ १३ ॥ ततस्तुष्टाश्च ते सर्वे ब्रह्माद्याः सुरसत्तमाः ॥ देवेशं पूजयामासुरादित्यं शंकरं तथा ॥१४॥ मूर्तिमंतश्च ते देवा अवतीर्य च शोभनम् ॥ स्थापयित्वाऽब्रवीद्वाक्यं येऽत्र स्नास्यंति मानवाः ॥१५॥ न दुःखं जायते तेषां जरामरणशोकजम् ॥ सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ तस्माच्चैवाधिकं ह्यत्र शंकरादित्यदर्शनात् ॥१६॥ व्याधयो नाधयश्चैव दारिद्र्यं न कदाचन ॥ ऐश्वर्यं चातुलं तेषां जायते भुवि सर्वदा ॥१७॥ न रोगो न च दारिद्र्यं वियोगो न च बन्धुभिः ॥ जायते मुनिशार्दूल शंकरादित्यदर्शनात् ॥१८॥ इत्येवं देवदेवेन पुरा वै शूलपाणिना ॥ शंकरादित्यनाम्ना च स्थापितं परमं पदम् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शंकरादित्यमाहात्म्यवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि तीर्थानां तीर्थमुत्तमम् ॥ स्थापितं परमं तीर्थं स्वनाम्ना मुनिसत्तम ॥ १ ॥ एकदा समये व्यास कपालक्षालनाय वै ॥ शीर्षोदकं गृहीत्वा तु कपालेन महेश्वरः ॥ २ ॥ प्रक्षाल्य चाक्षिपद्भूमौ तत्र तीर्थमनुत्तमम् ॥ नाम्ना गन्धवती पुण्या नदी त्रैलोक्यविश्रुता ॥३॥ ब्रह्मणो रुधिरेणाशु परिपूर्णाभवत्क्षणात् ॥ तस्यां स्नानं सदा शस्तं स्वयं देवेन भाषितम् ॥ ४ ॥ श्राद्धं च तर्पणं कृत्वा तत्सर्वं चाक्षयं भवेत् ॥ वायुभूतास्तु पितरस्तस्यास्तीरे तु दक्षिणे ॥ ५ ॥ तिष्ठंति मुनिशार्दूल चिंतयंति स्वगोत्रजम् ॥ आगमिष्यति पुत्रोऽद्य नप्ता वा संतताविह ॥ ६ ॥ संयावं पायसं वापि श्यामाकं सनिवारकम् ॥ सकृत्क्षौद्रतिलैर्युक्तं पिण्डं दास्यति वै कदा ॥ ७ ॥ तेन पिंडप्रदानेन तृप्तिर्भवति चाक्षया ॥ यस्तु स्नात्वा च वै पिंडं दद्याद्वै चंद्रपर्वणि ॥ ८ ॥ पितरो द्वादशाब्दानि तृप्तिं यास्यंति तस्य वै ॥ येऽत्रागत्य सुविद्वांसो मानवा वा तथा द्विजाः ॥ ९ ॥ पितॄन्संतर्पयिष्यंति स्वर्गस्तेषां सदाऽक्षयः ॥ तत्र यद्दीयते दानं त्रुटिमात्रं तु कांचनम् ॥ १० ॥ अक्षयं तस्य तत्प्रोक्तं ब्रह्मणा वै स्वयंभुवा ॥ गंगाद्वारे प्रयागे च कुरुक्षेत्रेऽथ पुष्करे ॥ ११ ॥ वाराणस्यां गयायां च सा न तृप्तिर्भविष्यति ॥ तुष्टाश्च पितरो नॄणां दास्यंति कांक्षितान्वरान् ॥ १२ ॥ यो यमुद्दिश्य वै काममिह श्राद्धं करिष्यति ॥ तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ १३ ॥ नवमी अष्टमी चैव अमावास्याथ पूर्णिमा ॥ सर्वाण्येतानि वै व्यास रवेः संक्रम एव च ॥ १४ ॥ ब्रह्मेंद्ररुद्रदेवांश्च सूर्याग्निब्रह्मदैवतान् ॥ विश्वेदेवान्सगन्धर्वान्यक्षांश्च मनुजान्पशून् ॥ १५ ॥ सरीसृपान्पितृगणान्यच्चान्यद्भुवि संस्थितम् ॥ श्राद्धं वै श्रद्धया कुर्वन्प्रीणयत्यखिलं जगत् ॥ १६ ॥ मासिमास्यसिते पक्षे पंचदश्यां द्विजोत्तम ॥ इन्दुक्षये यदा मैत्रं विशाखां चैव रोहिणीम् ॥ १७ ॥ श्राद्धे पितृगणास्तृप्तिं प्रयांति पितरोऽर्जिताम् ॥ वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छता ॥ १८ ॥ भक्त्या श्राद्धं प्रकर्तव्यं पितरस्तेन तर्पिताः ॥ अपि धन्याः कुले जाता अस्माकं मतिशालिनः ॥ १९ ॥ ये कुर्वंति च वै श्राद्धं पिंडान्ये निर्वपंति च ॥ तेन पिंडप्रदानेन

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तृप्तिर्नो भविताऽक्षया ॥ २० ॥ इहैत्य वै पुण्यजलेषु सम्यक्स्नात्वा नरस्तांस्तु लभेत कामान् ॥ श्राद्धाप्य च प्रेतगणैः समेतः स मोदते देववृ
तोऽथ सिद्धः ॥ २१ ॥ चित्तं च वित्तं च नृणां च शुद्धं शस्तश्च कालः कथितो विधिश्च ॥ पात्रं यथोक्तं परमा च भक्तिर्नृणां प्रयच्छंति हि वांछि
तानि ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नीलगन्धवतीप्रभाववर्णनंनाम
षोडशोऽध्यायः ॥ १६ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ दशाश्वमेधिके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मान
वः ॥ १ ॥ मनुना मानवेन्द्रेण राज्ञा चैव ययातिना ॥ रघणोशनसा चैव लोमशेन महर्षिणा ॥ २ ॥ अत्रिणा भृगुणा व्यास दत्तात्रेयेण धीमता ॥
पुरूरवसा पुण्येन नहुषेण नलेन च ॥ ३ ॥ अत्र स्नानेन संप्राप्तं दशाश्वमेधिकं फलम् ॥ संप्राप्ते द्वापरस्यांते राज्ञा वै कलिना तथा ॥ ४ ॥ दशा
नामश्वमेधानां फलं प्राप्तं द्विजोत्तम ॥ कृष्णवर्णं तथा लिंगं पूजितं भक्तितः सदा ॥ ५ ॥ दृष्ट्वा स्पृष्ट्वा च तं देवं प्राप्नुयात् लभते फलम् ॥ चैत्रे मासि
सिताष्टम्यां देवं संपूज्य भक्तितः ॥ ६ ॥ अश्वं दद्याच्च विप्राय सुरूपं च गुणान्वितम् ॥ यावंति तस्य रोमाणि गण्यंते संख्यया द्विज ॥ ७ ॥ ताव
द्वर्षसहस्राणि शिवलोके महीयते ॥ शिवलोकात्परिभ्रष्टः सार्वभौमो भवेद्भुवि ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये दशाश्वमेधमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥७॥ ॥ सनत्कुमार उवाच ॥ ॥ एकानंशां नमस्कृत्य
देवीं त्रैलोक्यविश्रुताम् ॥ पूजां कृत्वा विधानेन सर्वसिद्धिफलं लभेत् ॥ १ ॥ अणिमादिगुणान्सर्वान्गुटिकासिद्धिमंजनम् ॥ खड्गं च
पादुके चैव विलवासं रसायनम् ॥ सर्वं तुष्टा प्रयच्छेत नात्र कार्या विचारणा ॥ २ ॥ सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता ॥ सर्वा
न्कामान्नृणां देवी तुष्टा दद्याच्च सर्वदा ॥ ३ ॥ महानवम्यां यो देवीं महिषेण प्रपूजयेत् ॥ मेषेण वा यथालाभं सर्वान्कामानवाप्नुया
त् ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ कथं देवी समुत्पन्ना एकानंशेति विश्रुता ॥ तत्सर्वं श्रोतुमिच्छामि सर्वपापप्रणाशिनी ॥ ५ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ निशां सस्मार भगवान्स्वां तनूं पूर्वसंभवाम् ॥ ६ ॥ ततो भगवती
रात्रिरुपतस्थे पितामहम् ॥ तां विविक्ते समालोक्य ब्रह्मोवाच विभावरीम् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ विभावरि महामाये विबुधानामुपस्थितम् ॥
यत्कर्तव्यं त्वया देवि शृणु चार्थस्य निश्चयम् ॥ ८ ॥ तारकोनाम दैत्येंद्रः सुरशत्रुरनिर्जितः ॥ तस्य भयेन वै देवास्त्रस्ताः सर्वे दिवौकसः ॥ ९ ॥
तस्माद्भद्रे महेशो वै जनयिष्यति चेद्वरम् ॥ सुतं स भविता तस्य तारकस्यांतकः किल ॥ १० ॥ शंकरस्याभवत्पत्नी सती दक्षसुता तु या ॥ सा
पितुः कुपिता भद्रे कस्मिंश्चित्कारणांतरे ॥ ११ ॥ भवित्री हिमशैलस्य दुहिता लोकपावनी ॥ विरहेण हरस्तस्या मत्वा शून्यं जगत्त्रयम् ॥ १२ ॥
अतंपद्धिमशैलस्य कंदरे सिद्धसेविते ॥ प्रतीक्षमाणस्तज्जन्म किंचित्कालं वसिष्यति ॥ १३ ॥ तस्मात्सुतप्ततपसोर्भविता यो महाप्रभुः ॥
स भविष्यति दैत्यस्य तारकस्य निवारकः ॥ १४ ॥ जातमात्रा तु सा देवी स्वल्पसंज्ञैव भामिनी ॥ विरहोत्कंठिता गाढं हरसंगमलालसा
॥ १५ ॥ तयोः सुतप्ततपसोः संयोगः स्यात्सुयुक्तयोः ॥ पार्वतीहरयोस्तस्मात्सुरतं शक्तिकारणम् ॥ १६ ॥ भवेत्तत्र सुराणां च कार्यार्थं विघ्नमाचर ॥
विघ्नं त्वया विधातव्यं यथा ताभ्यां तथा शृणु ॥ १७ ॥ गर्भस्थानेऽथ तां मोनः स्वेन रूपेण रंजय ॥ ततो रहसि शर्वस्तां विश्रब्धानंदपूर्वकम् ॥१८॥
हांसयिष्यति कालीति ततः सा कुपिता सती ॥ प्रयास्यति तपः कर्तुं ततः सा तपसा युता ॥ १९ ॥ जनयिष्यति यं शर्वादिंदुवज्ज्योतिमंड
लम् ॥ स भविष्यति हंता वै सुरारीणां न संशयः ॥ २० ॥ त्वयापि दानवा देवि हंतव्या लोकदुर्जयाः ॥ यावच्च न सती देहे संक्रांतगुणसंचया
॥ २१ ॥ तत्संगमेन तावत्त्वं दैत्यान्हंतुं भविष्यसि ॥ एवं कृते त्वया देवि तपः काली करिष्यति ॥ २२ ॥ समाप्तनियमा सा च यदा गौरी
भविष्यति ॥ तदा तवापि साारूप्यं शैलजा संप्रदास्यति ॥ २३ ॥ ततस्त्वापि सहजा सैकानंशा भविष्यति ॥ रूपांशेन च संयुक्ता त्वमुमाख्या
भविष्यसि ॥ २४ ॥ एकानंशेति लोकास्त्वां वरदे पूजयिष्यति ॥ भेदैर्बहुविधाकारैः सर्वगां कामसाधनीम् ॥ २५ ॥ ॐकारवक्त्रा गायत्री त्वमेव
ब्रह्मवादिनी ॥ आक्रांतरुचिराकारा राज्ञां चाहवशालिनी ॥२६॥ विशां त्वं कमलादेवी शूद्राणां जननी स्वयम् ॥ ज्ञानिनां ज्ञेयरूपा त्वं त्वं गतिः
सर्वदेहिनाम् ॥ २७ ॥ त्वं च कीर्तिमतां कीर्तिस्त्वं भूतिः सर्वदेहिनाम् ॥ रतिदा रक्तचित्तानां प्रीतिस्त्वं स्नेहवर्तिनाम्॥ २८ ॥ त्वं कांतिः कृतभूपा
णां त्वं शांतिर्हतकर्मणाम् ॥ त्वं च भ्रांतिरबोधानां त्वं कीर्तिः क्रमयाजिनाम् ॥ २९ ॥ महावेला समुद्राणां विलासस्त्वं विलासिनाम् ॥ संभूतिस्त्व
पदार्थानां स्थितिस्त्वं लोकशालिनाम् ॥ ३० ॥ इत्यनेकविधैर्देवि रूपैर्लोकेषु चर्चिता ॥ ये त्वां पश्यंति वरदे पूजयिष्यंति चापि ये ॥ काम्या
नाप्स्यंति ते सर्वे नियतं नात्र संशयः ॥ ३१ ॥ इत्येवं सा समुत्पन्ना ब्रह्मणा संस्तुता सती ॥ एकानंशा महादेवी ध्यातव्या सापि भक्तितः ॥३२॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्य एकानंशामाहात्म्यवर्णनंनामाष्टादशो
ऽध्यायः ॥ १८ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि हरसिद्धिं सुसिद्धिदाम् ॥ पार्वत्या हरणे यत्र
सिद्धिः प्राप्ता हरेण च ॥ १ ॥ बलिनौ दानवौ जातौ नाम्ना चण्डप्रचंडकौ ॥ उत्खाय त्रिदिवं सर्वं गिरिं कैलासमागतौ ॥ २ ॥ दृष्ट्वा तत्र गिरीशं
तु उद्यताक्षौक्षहस्तकम् ॥ नागेशं शशिखद्वांगं गृहीत्वा दक्षिणे करे ॥ ३ ॥ देविदेवीति जल्पंतं दासस्तेऽस्मीतिवादिनम् ॥ यावदेकं तु फलकं
तावद्द्यूतं प्रवर्तताम् ॥ ४ ॥ रागीभूते तदा देवे तौ प्राप्तौ देवकंटकौ ॥ उत्सादिताः शिवगणा नंदिना प्रतिषेधितौ ॥ ५ ॥ ततस्ताभ्यां तदा नंदी
शूलाभ्यां पविदारितः ॥ समं सव्यदक्षिणं वै सुस्राव रुधिरं बहु ॥ ६ ॥ नंदिनं ताडितं दृष्ट्वा तदा शिलादनंदनम् ॥ ध्याता हरेण सा देवी प्रणता
साऽग्रतः स्थिता ॥ ७ ॥ वध्यतां तौ महादैत्यौ वधामीति वचोऽब्रवीत् ॥ गृहीत्वा मुद्गरं घोरमतिक्रोधादताडयत् ॥ ८ ॥ यदा तया हतौ दृष्टौ
दानवौ बलगर्वितौ ॥ हरस्तामाह हे चंडि संहृतौ दुष्टदानवौ ॥ ९ ॥ हरसिद्धिरतो लोके नाम्ना ख्यातिं गमिष्यसि ॥ ततः प्रभृति सा देवी हरसिद्धि
प्रदायिनी ॥ हरसिद्धिरिति ख्याता महाकाले बभूव ह ॥ १० ॥ यः पश्येत्परया भक्त्या हरसिद्धिं नरोत्तमः ॥ सोऽक्षयाल्लभते कामान्मृतः
शिवपुरं व्रजेत् ॥ ११ ॥ आदिसिद्धिं महादेवीं नित्यां व्योमस्वरूपिणीम् ॥ हरसिद्धिं प्रपश्येद्यः सोऽभीष्टं लभते फलम् ॥ १२ ॥ यः स्मरेद्धर
सिद्धीति मंत्रं च चतुरक्षरम् ॥ न वैरिणो भयं तस्य दारिद्र्यं नैव जायते ॥ १३ ॥ नवम्यां महानवम्यां यो हरसिद्धिं प्रपूजयेत् ॥ महिषं च बलिं
दद्यात्स भवेद्भूपतिर्भुवि ॥ १४ ॥ नवम्यां पूजिता देवी हरसिद्धिर्हरप्रिया ॥ तुष्टा नृणां सदा व्यास ददात्यन्नमं फलम् ॥ १५ ॥ सा पुण्या सा
पवित्रा च सर्वत्र सुखदायिनी ॥ स्मृता संपूजिता दृष्टा धनपुत्रसुखप्रदा ॥ १६ ॥ महानवम्यां ये व्यास हन्यंते महिषादयः ॥ सर्वे ते स्वर्गिनो यांति
हता पापं न विद्यते ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये हरसिद्धिमाहात्म्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ मासमेकं नरो भक्त्या पश्येद्वा वटयक्षिणीम् ॥ पूजयेत्स्वर्णपुष्पैश्च तस्य सिद्धिर्न हीयते ॥ १ ॥ इति वटयक्षिणीमाहात्म्यम् ॥ पिशाचके नरः स्नात्वा चतुर्दश्यां विशेषतः ॥ तिलान्ददाति यो भक्त्या न पिशाचः प्रजायते ॥ २ ॥ यं समुद्दिश्य यद्दत्तं तदक्षयतरं भवेत् ॥ तत्कुलं हि पिशाचत्वान्मुच्यते नात्र संशयः ॥ ३ ॥ यस्य नाम्ना नरः स्नाति पिशाचत्वात्स मुच्यते ॥ कुंभान्वा करकान्वापि योऽत्र दद्यात्समंडकान् ॥ ४ ॥ तस्य वै शाश्वती मुक्तिः कुले प्रेतो न जायते ॥ शिप्रायुंफेश्वरं दृष्ट्वा रुद्र भक्तो जितेंद्रियः ॥ ५ ॥ मुच्यते सर्वपापेभ्यः कंचुकेन फणी यथा ॥ स्नात्वागस्त्येश्वरं पश्येद्योऽतिभक्त्या च मानवः ॥ ६ ॥ त्यक्त्वा यमगृहं व्यास रुद्रलोकं स गच्छति ॥ शिप्रायां यो नरः स्नात्वा पश्येद्ढुंढेश्वरं शिवम् ॥ ७ ॥ सोऽश्वमेधफलं व्यास लभते नात्र संशयः ॥ देवेनात्र पुरा व्यास वादितो डमरुर्यतः ॥ ८ ॥ देवस्तेन समाख्यातो नाम्ना डमरुकेश्वरः ॥ भक्त्या पश्येन्नरो यस्तु देवं डमरुकेश्वरम् ॥ ९ ॥ नैव व्याधिभयं तस्य मृतः शिवपुरं व्रजेत् ॥ अनादिकल्पेश्वरं यस्तु भक्त्या पश्यति मानवः ॥ १० ॥ राज्यं स लभते स्वर्गं यथा देवः पुरंदरः ॥ देवानामप्यसौ व्यास स्पर्धनीयः सदा भवेत् ॥ ११ ॥ कल्पकोटिशतं साग्रं भोगयुक्तस्तु मोदते ॥ पश्येत्सिद्धेश्वरं यस्तु वीरभद्रं च चंडिकाम् ॥ ॥ १२ ॥ सोत्रैव लभते सिद्धिं जयं सर्वत्र मानवः ॥ स्वर्णजालेश्वरं दृष्ट्वा स्नातस्तीर्थे त्रिविष्टपे ॥१३॥ स्वर्णेन पूजयेद्देवं सर्वपापैः प्रमुच्यते ॥ स्नात्वा पश्येन्नरो भक्त्या यः कर्कोटेश्वरं शिवम् ॥ १४ ॥ सर्पतो न भयं तस्य दारिद्र्यं नैव जायते ॥ यः पश्येत्परया भक्त्या महामायां सनातनीम् ॥ ॥ १५ ॥ विष्णुमायाविनिर्मुक्तः स याति परमं पदम् ॥ अर्चयेत्परया भक्त्या यः कपालेश्वरं नरः ॥ १६ ॥ स मुच्येत महापापैर्यद्यपि ब्रह्महा भवेत् ॥ स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा देवं च भैरवम् ॥ १७ ॥ दर्शनात्तस्य देवस्य शतयज्ञफलं भवेत् ॥ १८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये चतुर्दशतीर्थयात्रावर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि देवं त्रिदशपूजितम् ॥ हनुमत्केश्वरंनाम भुक्तिमुक्तिफलप्रदम् ॥ १ ॥ शैवे सरसि यः स्नात्वा पश्येद्धनुमत्केश्वरम् ॥ कल्पकोटिसहस्राणि वायुलोके स मोदते ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ हनुमत्केश्वरो यस्तु ह्युक्तः पूर्वं त्वयाऽनघ ॥ कथां कथय ह्येतस्य वृत्तपूर्वां सनातनीम् ॥ ३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ त्रैलोक्यकण्टकः पूर्वं रावणोनाम राक्षसः ॥ विष्णुना रामरूपेण लंकायां विनिपातितः ॥ ४ ॥ घातयित्वा तु तं दुष्टं सीतामादाय जानकीम् ॥ वानरैः सह ऋक्षैश्च नगरीं स्वामुपागतः ॥ ५ ॥ तत्र राज्यमनुप्राप्य ऋषिभिः परिवारितः ॥ कथावसाने रामेण ह्यगस्त्यो मुनिसत्तमः ॥ ६ ॥ पप्रच्छ च द्वयोर्वीर्यं शंभुपातजयोस्तदा ॥ तदा दाशरथिं प्राह अगस्तिर्मुनिसत्तमः ॥ ७ ॥ अनौपम्यो यथा देवो युद्धे शौर्ये महेश्वरः ॥ ज्ञेयो वायुसुतस्तद्वत्सत्यमेतद्ब्रवीमि ते ॥ ८ ॥ एतच्छ्रुत्वाथ हनुमान्यद्धरेणोपमा मम ॥ कृता मुनिवरेणेह प्रत्यक्षं राघवस्य ह ॥ ९ ॥ गमिष्ये नगरीं लंकां लिंगमेकं प्रयाचितुम् ॥ राक्षसेन्द्रं महाभागं विभीषणमकल्मषम् ॥ १० ॥ ततो गतः स लंकायां विभीषणमुवाच ह ॥ देहि मे त्वं महाभाग लिंगमेकं च शोभनम् ॥ ११ ॥ उक्तं च राक्षसेन्द्रेण गृहाणैतद्यथा रुचि ॥ एतानि षट् च लिंगानि रावणस्थापितानि वै ॥ १२ ॥ त्रैलोक्यविजयात्पूर्वं मम भ्रात्रा महात्मना ॥ एतेषु यदभीष्टं ते लिंगं कथय सुव्रत ॥ तत्प्रयच्छामि तेऽद्यैव सत्यमेतत्प्लवंगम ॥ १३ ॥ ततो जग्राह हनुमाँल्लिंगं मौक्तिकसंनिभम् ॥ यदेतद्दृश्यते वीर तत्प्रयच्छ ममानघ ॥ ॥ १४ ॥ श्रुत्वा हनुमतो वाक्यमथोवाच विभीषणः ॥ दत्तमेतन्महावीर लिंगं यद्धर्तवानसि ॥ १५ ॥ श्रूयते हि पुरावृत्तं लिंगमेतद्धनेश्वरः ॥ रुद्र भक्त्या समायुक्तस्त्रिकालमप्यपूजयत् ॥ १६ ॥ रावणेन यदा बद्धस्तदानीं हि धनेश्वरः ॥ लिंगस्यास्य प्रभावेन विमुक्तः समपद्यत ॥ १७ ॥ प्रसादात्तस्य लिंगस्य धनेशो धनरक्षकः ॥ गृहीत्वा तन्महालिंगं स्वस्थो जातोऽथ वानरः ॥ १८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ गृहीत्वा तु ततो लिंगं प्रस्थितो विमलेऽम्बरे ॥ सप्तमे दिवसे चैव संप्राप्तोऽवंतिकां पुरीम् ॥ १९ ॥ तत्र रुद्रसरस्तीरे स्थाप्य स्नानमथाकरोत् ॥ महाकालस्य पूजार्थं गमनं प्रत्यचिंतयत् ॥ २० ॥ उद्धर्तुकामस्तल्लिंगमुद्धर्तुं न शशाक सः ॥ २१ ॥ ततो व्यवस्थितो देवः प्राह तं वायुनन्दनम् ॥ अस्मिन्क्षेत्रे हनूमन्मां त्वन्नाम्नैव प्रतिष्ठाप्य ॥ २२ ॥ हनुमत्केश्वरं चाथ लोके ख्यातं भविष्यति ॥ शैलवद्योन्नतं लिंगं स्थापितं वायुसूनुना ॥ २३ ॥ शनौ पश्येन्नरो यस्तु हनुमत्केश्वरं शिवम् ॥ तस्य शत्रुभयं नास्ति संग्रामे जयमाप्नुयात् ॥ २४ ॥ न च चौरभयं तस्य न दारिद्र्यं न दुर्गतिः ॥ तैलाभिषेकं यः कुर्याद्धनुमत्केश्वरे शिवे ॥२५॥ तस्य रोगाः प्रलीयन्ते ग्रहपीडा न जायते ॥ ये द्रक्ष्यंति नराः भक्त्या तेषां मोक्षो भविष्यति ॥२६॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये हनुमत्केश्वरमाहात्म्यवर्णनंनामैकविंशोऽध्यायः ॥२१॥ ॥ छ ॥ ॥ श्रीसनत्कुमार उवाच ॥ ॥ यमेश्वरं तु यः पश्येत्स्नापयित्वा तिलांभसा ॥ कुंकुमेन समालिप्य पूजयेदुत्पलैस्ततः ॥ १ ॥ दहेत्कृष्णागरुं धूपं स्नापयेत्तिलतण्डुलान् ॥ य एवमर्चयेद्देवमीश्वरं शूलहस्तकम् ॥ २ ॥ यत्र कुत्र मृतस्यापि यमः पितृसमो भवेत् ॥ ३ ॥ ॥ इति यमेश्वरमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ कथयामि परं व्यास तीर्थं तीर्थेषु चोत्तमम् ॥ नाम्ना रुद्रसरः प्रोक्तं त्रिषु लोकेषु विश्रुतम् ॥ ४ ॥ तत्र स्नात्वा शुचिर्भूत्वा पश्येत्कोटेश्वरं शिवम् ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ५ ॥ श्राद्धं तत्रैव कृत्वा तु शृणु यत्फलमाप्नुयात् ॥ दशानामश्वमेधानां वाजपेयशतस्य च ॥६॥ फलं कोटिगुणं व्यास लभते नात्र संशयः ॥ पितॄनुद्दिश्य यत्किंचित्कोटितीर्थे प्रदीयते ॥७॥ तत्सर्वं कोटिगुणितं जायते नात्र संशयः ॥ कोटितीर्थे नरः स्नात्वा ध्यायेद्यः परमाक्षरम् ॥८॥ मुच्यते सर्वपापेभ्यो निर्मोकेन यथोरगः ॥ प्रातरुत्थाय यो विप्र तत्र स्नानं करोति वै ॥९॥ दृष्ट्वा देवं महाकालं गोसहस्रफलं लभेत् ॥ कोटितीर्थे नरः स्नात्वा सप्तरात्रोषितः शुचिः ॥१०॥ चांद्रायणसहस्रस्य फलं प्राप्नोति मानवः ॥ जागरं तत्र कुर्याद्यो ह्यनंतफलमश्नुते ॥ ११ ॥ गन्धपुष्पार्चनं कृत्वा महास्नपनपूर्वकम् ॥ य एवं नयते रात्रिं सोपवासो जितेंद्रियः ॥ १२ ॥ लभते सर्वकामित्वं यत्सुरैरपि दुर्लभम् ॥ कार्तिक्यामथ वैशाख्यां देवं तत्र प्रपूजयेत् ॥ १३ ॥ गंधपुष्पैश्च कालीनैस्तथा वस्त्रैः सुशोभनैः ॥ कर्पूरं कुंकुमं चैव श्रीखण्डमगरुं तथा ॥ १४ ॥ समभागानि कृत्वा तु शिलापृष्ठे च पेषयेत् ॥ अनुलिप्य महाकालं रुद्रस्यानुचरो भवेत् ॥ १५ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये रुद्रसरोमाहात्म्यवर्णनंनाम द्वाविंशोऽध्यायः ॥ ॥ २२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथ यात्रां प्रवक्ष्यामि महाकालस्य यत्नतः ॥ शिवां श्रेयस्करीं पुण्यां पुण्यलोकप्रदायिनीम् ॥ ॥ १ ॥ स्नात्वा सरसि रुद्रस्य दृष्ट्वा कोटेश्वरं शिवम् ॥ नमस्कृत्य ततो गच्छेन्महाकालं सनातनम् ॥ २ ॥ गन्धैः पुष्पैर्नमस्कारैः संपूज्य त्रिद

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शेश्वरम् ॥ प्रणिपत्य ततो गच्छेद्देवं कपालमोचनम् ॥ ३ ॥ तत्रैव देवदेवेशः कपालं न्यस्तवान्हितौ ॥ कपाले तत्क्षणान्यस्ते तत्राभूल्लिंगमुत्तमम ॥ ॥ ४ ॥ कपालमोचनंनाम सर्वपापप्रणाशनम् ॥ तत्र वै स्नपनं कुर्यादाज्यपलशतेन वै ॥ ५ ॥ तदर्धार्धेन पादेन वित्तशाठ्यविवर्जितः ॥ काले पूर्णे स विप्रेन्द्र शिवलोके महीयते ॥ ६ ॥ नमस्कृत्य ततो गच्छेत्कपिलेश्वरमुत्तमम् ॥ दर्शनादस्य देवस्य मुच्यते ब्रह्महत्यया ॥ ७ ॥ हनुमत्के श्वरं देवं ततो गच्छेत्समाहितः ॥ ऐश्वर्यमतुलं व्यास दर्शनादस्य जायते ॥ ८ ॥ ततो गच्छेन्महादेवं पेप्पलाख्यं सनातनम् ॥ यस्य दर्शनमात्रेण मुक्तिः स्याद्विजसत्तम ॥ ९ ॥ स्वप्नेश्वरं ततो गच्छेद्भक्तिश्रद्धासमन्वितः ॥ दर्शनादस्य देवस्य दुःस्वप्नं च विनश्यति ॥ १० ॥ ततो गच्छेन्महादेवमी शानं विश्वतोमुखम् ॥ यस्य दर्शनमात्रेण विश्वस्यैव पतिर्भवेत् ॥ ११ ॥ सोमेश्वरं ततो गच्छेज्जितक्रोधो जितेंद्रियः ॥ कुष्ठरोगादिदोषेभ्यो दर्शना दस्य मुच्यते ॥ १२ ॥ वैश्वानरेश्वरं व्यास ततो गच्छेत्समाहितः ॥ तस्य वृद्धिः सदा लोके जायते तस्य दर्शनात् ॥ १३ ॥ बीजपूरकहस्तं तु लकु लीशं ततो व्रजेत् ॥ रुद्रत्वं दर्शनात्तस्य जायते नात्र संशयः ॥ १४ ॥ ततो गच्छेन्महादेवं गद्याणेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण जायंते सर्व सिद्धयः ॥१५॥ अभ्यर्थितः सदा देवैः पूजितः सिद्धिकारणात् ॥ तेनाभ्यर्थितेश्वरोऽयं विख्यातो विघ्ननायकः ॥१६॥ वयोवृद्धं ततो गच्छेन्महाकालं सनातनम् ॥ न रोगा न जरा व्याधिर्दर्शनान्नात्र संशयः ॥ १७ ॥ विघ्ननाशं ततो गच्छेत्प्राणेशं बलमुत्तमम् ॥ स्नानं षटशतैस्तस्य कुर्याद्भक्त्या समाहितः ॥ १८ ॥ तस्य चैव कृते स्नाने लभ्यंते सर्वसिद्धयः ॥ स्वर्गश्चापि सदा व्यास दर्शनादस्यजायते ॥ १९ ॥ तनयं तमनूल्लंघ्य दंड पाणिं ततो व्रजेत् ॥ यस्य दर्शनमात्रेण यमलोको न दृश्यते ॥ २० ॥ पुष्पदन्तं ततो गच्छेद्भक्तिश्रद्धासमन्वितः ॥ यस्य दर्शनमात्रेण मुच्यते सर्वपातकैः ॥ २१ ॥ गुह्यं चैव महाकालं ततो गच्छेत्समाहितः ॥ यस्य दर्शनमात्रेण गुह्यपापैः प्रमुच्यते ॥ २२ ॥ ततो गच्छेत्समा धिस्थो दुर्वासेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ २३ ॥ श्वासावरोधनं कृत्वा दुर्वाससः समीपतः ॥ गौरीं गत्वा महादुर्गां त्यजेच्छ्वासमनंतरम् ॥ २४ ॥ तत्रोच्छ्वासो विमोक्तव्यस्तामभ्यर्च्य तु सर्वथा ॥ कालेश्वरं ततो गच्छेद्देवदेवं महेश्वरम् ॥ २५ ॥ यस्य दर्शनमात्रेण यमलोकं न पश्यति ॥ विधीशं च ततो गच्छेद्देवदेवं महेश्वरम् ॥ २६ ॥ यस्य दर्शनमात्रेण वधिरत्वं न जायते ॥ कीर्तये दात्मनो नाम स्थानं गोत्रं च तस्य वै ॥ २७ ॥ न कीर्तयेद्यदा नाम सा यात्रा विफलीभवेत् ॥ देवस्याग्रे ततो व्यास उपविश्य समाहितः ॥ ॥ २८ ॥ भक्तियुक्तस्ततो ब्रूयान्नमस्कृत्वा पुनःपुनः ॥ मया समर्पिता यात्रा त्वत्प्रसादान्महेश्वर ॥ २९ ॥ संसारसागराद्घोरान्मामुद्धर जगत्पते ॥ अनेन विधिना यस्तु महाकालं प्रदक्षयेत् ॥ ३० ॥ प्रदक्षिणीकृता तेन तत्तद्वीपा वसुंधरा ॥ गोलक्षं द्विजलक्षाय दत्त्वा यल्लभते फलम् ॥ ३१ ॥ तत्फलं देवदेवस्य सकृद्दत्त्वा प्रदक्षिणम् ॥ भक्त्या परमया युक्तो महाकालं प्रदक्षयेत् ॥ ३२ ॥ पदेपदे यज्ञफलमिति मे शंकरोऽब्रवीत् ॥ षष्टिकोटि सहस्राणि षष्टिकोटिशतानि च ॥ ३३ ॥ पूजितानि भवंत्यत्र यात्रेश्वरसमर्चनात् ॥ य एवं कुरुते यात्रां शिवध्यानपरायणः ॥ ३४ ॥ सहस्रद क्षिणां दद्यात्तस्य पुण्यफलं शृणु ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ ३५ ॥ एवं यात्रां समाप्याथ गत्वा निजगृहं नरः ॥ यात्रादेवत संख्यान्वै पञ्चविंशतिद्विजोत्तमान् ॥ ३६ ॥ भोजयेच्छिवभक्तांश्च शिवध्यानपरायणान् ॥ सवस्त्रां दक्षिणां दत्त्वा प्राप्यानुज्ञां विसर्जयेत् ॥ ३७ ॥ यात्राक्रमेण चैकैकं द्वारांतरमनुव्रजेत् ॥ धर्मोपदेशके पश्चात्सर्वोपस्करसंयुताम् ॥ ३८ ॥ धेनुं पयस्विनीं दद्याद्वित्तशाठ्यविवर्जितः ॥ भुञ्जीताथ स्वयं व्यास सर्वभृत्यसमन्वितः ॥ ३९ ॥ दीनानाथदरिद्रांधविकलाद्यांश्च भोजयेत् ॥ यदत्र फलमुद्दिष्टं तद्ददामि शृणुष्व मे ॥ ४० ॥ कुलानां शत मुद्धृत्य मातापित्रोः समाहितः ॥ कल्पकोटिसहस्राणि शिवलोके स मोदते ॥ ४१ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालेश्वरयात्रामाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ वाल्मीकेश्वरमित्याख्यं यस्तु देवं प्रपूजयेत् ॥ मौनी ध्यानपरो भूत्वा स कवित्वमवाप्नुयात् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कथमत्र समुत्पन्नः कोऽसौ वाल्मीकेश्वरः प्रभुः ॥ यस्य दर्शनमात्रेण कवित्वमुपजायते ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ आसीद्व्यास पुरा विप्रः सुमतिर्भृगु वंशजः ॥ रूपयौवनसंपन्ना तस्य भार्याथ कौशिकी ॥ ३ ॥ तस्य पुत्रः समुत्पन्नो ह्यग्निशर्मेति नामतः ॥ स पित्रा प्रोच्यमानोऽपि वेदाभ्यासं न मन्यते ॥ ४ ॥ ततो बहुतिथे काले अनावृष्टिरजायत ॥ तस्यां विपद्गतः सोऽथ दक्षिणामाश्रितो दिशम् ॥ ५ ॥ ततोऽसौ सुमतिर्विप्रः सभार्यःस सुतस्तथा ॥ विदेशं काननं प्राप्तः कृत्वा चाश्रममाश्रितः ॥ ६ ॥ आभीरैर्दस्युभिः सार्धं संगोऽभूदग्निशर्मणः॥ आगच्छति पथा तेन यस्तं हंति स पापकृत् ॥ ७ ॥ स्मृतिर्नष्टा गता वेदा गतं गोत्रं गता श्रुतिः ॥ कस्मिंश्चिदथ काले तु तीर्थयात्राप्रसंगतः ॥ ८ ॥ सप्तर्षयः पथा तेन सुव्रताः समुप स्थिताः ॥ अग्निशर्माथ तान्दृष्ट्वा हन्तुकामोऽब्रवीदिदम् ॥ ९ ॥ वस्त्राणीमानि मुञ्चध्वं छत्रिकोपानहौ तथा ॥ हन्तव्या हि मया यूयं गन्तारो यम सादने ॥ १० ॥ तस्य तद्वचनं श्रुत्वा अत्रिर्वचनमब्रवीत् ॥ अस्मत्पीडनजं पापं कथं ते हृदि वर्तते ॥ वयं तपस्विनो भूत्वा तीर्थयात्राकृतोद्यमाः ॥ ११ ॥ ॥ अग्निशर्मोवाच ॥ ॥ ममास्ति माताथ पिता सुतो भार्या गरीयसी ॥ पोषयामि सदा तांस्तु एतन्मे हृदि संस्थितम् ॥ १२ ॥ ॥ अत्रिरुवाच ॥ ॥ पित्रादीनाशु पृच्छस्व स्वकर्मोपार्जितं प्रति ॥ यद्युष्मदर्थं क्रियते पापं तत्कस्य कथ्यताम् ॥१३॥ यदि ते कथयंति स्म मा मृषा प्राणिनो वधीः ॥ १४ ॥ ॥ अग्निशर्मोवाच ॥ ॥ न कदाचिन्मया ते तु संगृह्या ईदृशं वचः॥ युष्माकं वचसा मेऽद्य प्रतिबोधः प्रवर्तते ॥ १५ ॥ गत्वा पृच्छामि तान्सर्वान्कस्य भावश्च कीदृशः ॥ यूयमत्रैव तिष्ठध्वं यावदागमनं मम ॥ १६ ॥ इत्युक्त्वा तूर्णगामाशु पितरं स्वमुवाच ह ॥ धर्मस्य प्रतिघातेन प्राणिनां पीडनेन च ॥ १७ ॥ सुमहद्दृश्यते पापं कस्य तत्कथ्यतां मम ॥ पितः प्राह तथा माता नापुण्यमावयोरिह ॥ १८ ॥ त्वं जानासि यत्कुरुषे कृतं भाव्यं पुनस्त्वया ॥ तयोस्तद्वचनं श्रुत्वा भार्या वचनमब्रवीत् ॥ १९ ॥ तयाप्युक्तं न मे पापं पापमंतस्तवैव हि ॥ तद्वाक्यमब्रवीत्पुत्रं बालोऽहमिति सोऽब्रवीत् ॥ २० ॥ तज्ज्ञात्वा हृदयं तेषां चेष्टितं चैव तत्त्वतः ॥ नष्टोऽहमिति मन्वानः शरणं मे तपस्विनः ॥ ॥ २१ ॥ क्षिप्त्वाथ लगुडं कृष्णं येन वै जंतवो हताः॥ प्रकीर्य केशांस्त्वरित ऋषीणामग्रतः स्थितः ॥ २२ ॥ प्रणम्य दंडपातेन ततो वचनमब्रवीत् ॥ न मे माता न च पिता न भार्या न च मे सुतः ॥ २३ ॥ सर्वैस्तैः परिमुक्तोऽहं भवतां शरणं गतः ॥ सुष्ठूपदेशदानान्मां नरकाद्रातमर्हथ ॥ २४ ॥ एवं तं वादिनं दृष्ट्वा ऋषयोऽत्रिमथाब्रुवन् ॥ भवतो वचनादस्य प्रतिबोधः समागतः ॥ २५ ॥ भवताऽयमनुग्राह्यः शिष्यो भवतु ते मुने ॥ तथेत्युक्ताथ तान्प्राह चाग्निं ध्यानं समाचर ॥ २६ ॥ अनेन ध्यानयोगेन महामंत्रजपेन च ॥ अनेकदुस्तरात्युग्रपापकृज्जनघातकः॥ संस्थितो मुक्त मूले त्वं परां सिद्धिं गमिष्यसि ॥ २७ ॥ इत्युक्ता ते ययुः सर्वे सकामं सोऽपि तत्र वै ॥ तद्ध्यानस्थोऽभवद्योगी वत्सराणि त्रयोदश ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तस्योपर्यभवत्तत्र वल्मीकोऽविचलस्य च ॥ निवृत्तास्तु पथा तेन मुनयस्तत्र ऊचुवः ॥ २९ ॥ उदीरितं ध्वनिं तेन वल्मीके विस्मयान्विताः ॥
ततः खनित्वा वल्मीकं काष्टीभूतोरुशंकुभिः ॥३०॥ तं दृष्ट्वोत्थापयामासुर्मुनयो नयसंयुतम् ॥ नमश्चक्रेऽथ तान्सर्वान्स वि ो मुनिपुंगवान् ॥३१॥
तान्प्राह प्रणतो भूत्वा तपसा दीप्ततेजसः ॥ प्रसादाद्भवतामद्य ज्ञानं लब्धं मया शुभम् ॥ ३२ ॥ दीनोऽहमुद्धृतः सर्वैर्मग्नोऽहं पापकर्दमे ॥ श्रुत्वा
तस्येति ते वाक्यमूचुः परमधार्मिकाः ॥ ३३ ॥ वल्मीकेऽस्मिन्स्थितः पुत्र यतस्त्वमेकचित्ततः ॥ वाल्मीकिरिति ते नाम भुवि ख्यातं भवि
ष्यति ॥ ३४ ॥ इत्युक्त्वा मुनयो जग्मुः स्वां दिशं तपसान्विताः ॥ गतेषु मुनिमुख्येषु वाल्मीकिस्तपतां वरः ॥ कुशस्थल्यामथागम्य समाराध्य
महेश्वरम् ॥ ३५ ॥ तस्मात्कवित्वमासाद्य चक्रे काव्यं मनोरमम् ॥ रामायणं च यत्प्राहुः कथां सुप्रथमस्थिताम् ॥ ३६ ॥ ततः प्रभृति देवेशो
वाल्मीकेश्वरसंज्ञकः ॥ ख्यातोऽवंत्यां ततो व्यास नृणां कवित्व यकः ॥ ३७ ॥ इति ते कथितं लिंगं वाल्मीकेश्वरमुत्तमम् ॥ यस्य दर्शनमात्रे
ण कवित्वमुपपद्यते ॥ ३८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्य वाल्मीकेश्वरमाहात्म्य
वर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शुक्रेश्वरं समभ्यर्च्य सितपुष्पैर्विलेपनैः ॥ प्रणिपत्य ततो भक्त्या
रुद्रलोके महीयते ॥ १ ॥ भीमेश्वरं नरो दृष्ट्वा भक्त्या संपूज्य यत्नतः ॥ न भयं लभते व्यास रणे रात्रौ जलेऽनले ॥ २ ॥ गर्गेश्वरं स्नापयित्वा
तिलतैलेन मानवः ॥ बिल्वपत्रैस्तु संपूज्य धर्मवृद्धिमवाप्नुयात् ॥ ३ ॥ उपोषितश्चतुर्दश्यां तिलप्रस्थतिलांभसा ॥ स्नापयित्वा तिलैरिष्ट्वा सदा
सौख्यमवाप्नुयात् ॥ ४ ॥ गोसहस्रं नरो दत्त्वा भावं कृत्वा विशेषतः ॥ भवबंधविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ५ ॥ कामेश्वरं समभ्यर्च्य
कुंकुमादिविलेपनैः ॥ कामिकेन विमानेन याति स्वर्गं न संशयः ॥ ६ ॥ चूडामणिं नमस्कृत्य नवम्यां कार्तिके सिते ॥ न वियोनिं नरो याति
धर्मबुद्धिः स जायते ॥ ७ ॥ चंडीश्वरं समभ्यर्च्य कृष्णाष्टम्यामुपोषितः ॥ निर्मात्सर्योल्लंघनोत्थेन न शोकेनापि लिप्यते ॥ ८ ॥ इत्यौदितीर्थानि
महेश्वरस्य पुण्यानि सर्वाणि नरोऽभिगम्य ॥ विशुद्धचित्तो भुवि भावितात्मा प्रयाति शंभोर्भुवनं सुरम्यम् ॥ ९ ॥ इति श्रीस्कंदे महापुराण एकाशी
तिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शुक्रेश्वरभीमेश्वरगर्गेश्वरकामेश्वरचूडामणीश्वरचण्डीश्वरादितीर्थमाहात्म्यवर्णनं
नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ गुह्यस्थाने पवित्राणि कीर्तितानि त्वया मुने ॥ प्रमाणं
कथयस्वाद्य महाकालवनस्य मे ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ यथाश्रुतं मया पूर्वं गदतो ब्रह्मणः स्वयम् ॥ तत्तेऽहं संप्रव
क्ष्यामि शृणु त्वं गदतो मम ॥ २ ॥ योजनस्यैव पर्यंतं चतुर्दिक्षूपशोभितम् ॥ सौवर्णैस्तोरणैश्चैव मुक्तादामविलंबिभिः ॥ ३ ॥
द्वाराणि तत्र शोभंते कांचनैः कलशैः स्थितैः ॥ सितपद्ममुखैर्द्वारैरनेकमणिमंडितैः ॥ ४ ॥ महेश्वरप्रयुक्ताश्च द्वाराध्यक्षा महाबलाः ॥
द्वारेषु तेषु शोभंते लोकानुग्रहकारकाः ॥ ५ ॥ पिंगलेशः स्थितः पूर्वे बालरूपो विभावसुः ॥ तीर्थस्याभिमुखो गौरो गुरुर्गणैरथानुगः ॥
॥ ६ ॥ दक्षिणेऽपि महायोगी कायावरोहणेश्वरः ॥ बिल्वेशः पश्चिमे द्वारे क्षेत्रस्याभिमुखः स्थितः ॥ ७ ॥ नियुक्तो वै महेशेन वारुणीं दिश
मास्थितः ॥ उत्तरां दिशमाश्रित्य स्थितश्चैवोत्तरेश्वरः ॥ ८ ॥ साधकः सर्वकार्याणामादिष्टः शंकरेण सः ॥ मानवा ये वसंत्यत्र क्षेत्रमध्ये सुधा
र्मिकाः ॥ ९ ॥ मृता रुद्रपुरं यांति विमानैः सार्वकामिकैः ॥ कृष्णपक्षे चतुर्दश्यामथ वार्केन्दुसंगमे ॥ १० ॥ पंचेशानीं नमस्कृत्य प्रतिलोमानु
लोमतः ॥ उपोषितो दिनैकेन ध्यायमानो महेश्वरम् ॥ ११ ॥ मुच्यते सर्वपापैस्तु बहुजन्मकृतैरपि ॥ एवं च विप्र यो यात्रां पंचेशानीं समाच
रेत् ॥ १२ ॥ अनेनैव स्वदेहेन रुद्रलोकं स गच्छति ॥ पंचेशानीमथान्यां ते सुखेन क्रियते यथा ॥ १३ ॥ तथा शृणु प्रवक्ष्यामि सर्वपापप्रणा
शिनीम् ॥ प्रातः स्नात्वा रुद्रसरस्येकादश्यां समाहितः ॥ १४ ॥ श्राद्धं कृत्वा महाकालं नत्वा चेशानमीश्वरम् ॥ पिंगलेशं ततः प्राप्य स्नात्वा
श्राद्धं समाचरेत् ॥ १५ ॥ उपगम्य ततो देवं गणेशं पिंगलेश्वरम् ॥ गन्धैः पुष्पैश्च धूपैश्च तमभ्यर्च्य निवर्तयेत् ॥ १६ ॥ महाकालेश्वरं प्राप्य भूयः
स्नातो जितेंद्रियः ॥ अर्चयेद्देवदेवेशं स्वयंभुवं सनातनम् ॥ १७ ॥ ईशाने गमयेद्रात्रिं कृत्वा वै नक्तभोजनम् ॥ ध्यायमानो महेशानं भूमौ
विन्यस्य विग्रहम् ॥ १८ ॥ द्वादश्यां पूर्ववत्स्नात्वा प्रातः स्नात्वा व्रजेच्छरः ॥ कायावरोहणं गत्वा पिंगलेश्वरवद्व्रजेत् ॥ १९ ॥ त्रयोदश्यामथाप्येवं
बिल्वेशं पश्चिमेऽर्चयेत् ॥ चतुर्दश्यां तथा सौम्ये पूजयेदुत्तरेश्वरम् ॥ २० ॥ अमावास्यां शुचिः स्नातो महाकालेश्वरं यजेत् ॥ गन्धैः पुष्पैश्च धूपैश्च
नैवेद्यैर्विविधैस्तथा ॥ २१ ॥ गीतनृत्यादिकं कृत्वा प्रणिपत्य क्षमापयेत् ॥ यात्रां कृत्वा तु पूर्वोक्तां ततो निजगृहं व्रजेत् ॥ २२ ॥ ब्राह्मणान्भोजये
त्पञ्च शिवभक्तिपरायणान् ॥ प्रणम्य देवतारूपान्महाकालोपिपन्द्विजान् ॥ २३ ॥ पूजयित्वा द्विजश्रेष्ठान् सूक्ष्मवस्त्रयुगेनवैः ॥ रथं पिंगलके दत्त्वा
द्रुजं कायावरोहणे ॥ २४ ॥ दत्त्वा बिल्वेश्वरे चाश्वं वृषं दत्त्वा तु चोत्तरे ॥ धेनुं दत्त्वा महाकाले सर्वोपस्करसंयुतम् ॥ २५ ॥ य एवं कुरुते व्यास
तस्य पुण्यफलं शृणु ॥ २६ ॥ पितृकर्मार्तकैः सार्धं कुलैः स दिवि मोदते ॥ अप्सरोगीतनृत्याद्यैर्विमानैः सार्वकामिकैः ॥ २७ ॥ ॥ इति पंचे
शानीयात्रामाहात्म्यम् ॥ ॥ यस्तु प्रदक्षिणां कुर्यान्नियमेन कुशस्थलीम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ २८ ॥ यस्तु पद्मावतीं पश्ये
दर्चयेत्पंकजैर्नरः ॥ दत्त्वा भूपं सनैवेद्यं मृतो ब्रह्मपुरं व्रजेत् ॥ २९ ॥ स्वर्णशृंगाटिकां व्यास कुसुमैः स्वर्णसंनिभैः ॥ समभ्यर्च्य महाभक्त्या स
याति शिवमन्दिरम् ॥ ३० ॥ अवन्तिनां तु यः पश्येद्देवीं त्रैलोक्यविश्रुताम् ॥ कामिकेन विमानेन याति पौरंदरं पुरम् ॥ ३१ ॥ अर्चयेत्पंकजै
र्भक्त्या यो देवीमारावतीम् ॥ अमरैः सह संहृष्टो मोदते दिवि सर्वदा ॥ ३२ ॥ देवीमुजयनीं भक्त्या यः पश्यति समाहितः ॥ सर्वैश्वर्यसमायुक्तो
रुद्रलोके महीयते ॥ ३३ ॥ विशालां चैव यः पश्येद्रुद्रभक्त्या समाहितः ॥ मुच्यते त्रिविधैः पापैर्नात्र कार्या विचारणा ॥ ३४ ॥ ॥ इति श्रीक
ल्पसप्तकमहिमा ॥ ॥ शृणु व्यास महातीर्थं पुरा यद्ब्रह्मणार्चितम् ॥ अक्रूरेश्वरमित्याख्यं यत्र सिद्धः पितामहः ॥ ३५ ॥ तत्र देवार्चनं कृत्वा
कृष्णाष्टम्यामुपोषितः ॥ जितेंद्रियः शुचिर्दांतो रुद्रलोकमवाप्नुयात् ॥ ३६ ॥ न वदेत्केनचित्सार्धं नरः प्रातर्गृहे स्थितः ॥ दृष्ट्वाऽक्रूरेश्वरं देवं हेमदा
नफलं लभेत् ॥३७॥ ॥ इत्यक्रूरेश्वरमाहात्म्यम् ॥ ॥ यस्तु पश्यति ब्रह्माणं शुचिः स्नातो जितेंद्रियः ॥ मुच्यते पातकाद्घोराद्ब्रह्मलोकं मृतो व्रजेत्
॥ ३८ ॥ पद्मासनस्थितो ब्रह्मा ध्यायमानः परं पदम् ॥ वसिष्ठाद्यैर्मुनिवरैर्विज्ञप्तः कर्मसंभवान् ॥ ३९ ॥ ॥ ऋषय ऊचुः ॥ ॥ आदित्या
मरुतः साध्यास्तथा चैवाश्विनावुभौ ॥ पितरो ये च लोकानां पूज्यंते भुवि मानवैः ॥ ४० ॥ ग्रहार्कतारका यक्षा दिग्गजाश्चानलानिलाः ॥
अमी देवा वयं सर्वे त्वदंशाः परिपठ्यते ॥ ४१ ॥ कथं ध्यायसि देवेश एतत्सर्वं ब्रवीहि नः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ द्वे विद्ये तत्त्वरूपे ये
परा चैवापरा तथा ॥ ते द्वे च मम रूपे द्वे नित्ये मूर्त्यात्मिके मम ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ पितामह कथं विद्यो भवंतं परमं विभुम् ॥ येना
स्माकं परा सिद्धिर्जायते तव दर्शनात् ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ ॥ माहेश्वरं परं क्षेत्रं कुशस्थलीतिसंज्ञितम् ॥ वंशार्थिना मया देवः श्रीकंठः पार्वती

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पतिः ॥ ४५ ॥ याचितस्तेन देवेन उक्तोऽहं परमेष्ठिना ॥ समंताद्योजनं साग्रं क्षेत्रमेतत्पितामहः ॥ ४६ ॥ मया दत्तं तव विभो महाकालवनाद्दते ॥ शांतिः स मया तत्र ने गुप्तो हि रोपतः ॥ कपर्दिना च तत्रोक्तो यास्यामो न तवांतिकम् ॥ ४७ ॥ आरब्धो वै ततो यज्ञो नारायणपरिग्रहात् ॥ ज्ञातस्तथापि मे यज्ञो देवदेवेन शंभुना ॥ ४८ ॥ यज्ञवाटं कपर्दीशस्ततो भिक्षार्थमागतः ॥ याज्ञिकैः सोऽथ तत्रोक्तो मात्र तिष्ठ जुगुप्सितः ॥ ४९ ॥ कपर्दिना च ते तत्र उक्ता यास्याम्यहं पुनः ॥ एवमुक्त्वा कपालं स भूमौ संस्थाप्य तत्र हि ॥ ५० ॥ स्नातुं नदीं ययौ शिप्रां कपर्दी परमेश्वरः ॥ उक्तं तस्मिन्गते शिप्रां कपर्दिनि द्विजातिभिः ॥ ५१ ॥ कथं हि क्रियते होमः कपाले सदसि स्थिते ॥ अकपालानि शौचानि पुरा प्रोक्तं मनीषिभिः ॥ ५२ ॥ तत्कपालं सदस्येन उक्षिप्तं पाणिना स्वयम् ॥ तस्मिन्क्षिप्तेऽभवच्चान्यत्पुनः क्षिप्तेऽभवत्पुनः ॥ ५३ ॥ एवं नीतं कपालानां प्राप्य ते मुनिसत्तमाः ॥ रुद्रं कपर्दिनं मत्वा शरणं तं समागताः ॥ ५४ ॥ ततः स दर्शनं प्रादाद्भक्त्या तुष्टो महेश्वरः ॥ कपालपाणिर्भगवान्मामुवा च ततः शुभुः ॥ ५५ ॥ वरं वरय भो ब्रह्मन्यत्ते मनसि वर्तते ॥ नास्त्यदेयं मया तुभ्यं सर्वं दास्यामि तत्त्वतः ॥५६॥ ब्रह्मोत्तरमिदं स्थानं मया दत्तं चतुर्मुख ॥ कारयस्व यथाकामं यथावर्णंचतुष्टयम् ॥ ५७ ॥ एवं वदंतं वरदमीशानं परमेश्वरम् ॥ तथेति चोक्ता सदसि न मयाऽन्यो वरो वृतः ॥ ॥ ५८ ॥ उज्जयिनीति वै नाम कुशस्थल्यां निवेशितम् ॥ कुंडं मंदाकिनी तत्र मया कृतमनंतरम् ॥ ५९ ॥ तत्र विप्राः कृते स्नाने सर्वपापैः प्रमुच्यते ॥ तस्यां संस्थापयेद्विप्रं चतुरोऽर्थघटाञ्छुभान् ॥ ६० ॥ सतिलांस्तान्सवस्त्रांश्च सफलान्मंडकैः सह ॥ कार्तिक्यामथ माघ्यां च चातुर्विद्ये प्रदापयेत् ॥ ६१ ॥ प्रथमं च ऋग्वेदाय यजुर्वेदाय दक्षिणम् ॥ पश्चिमं सामवेदाय अथर्वणे तथोत्तरम् ॥ ६२ ॥ वेदानुद्दिश्य चाप्येवं प्रीयतां मे पितामहः ॥ कृते चैवं हि यत्पुण्यं तच्छृणुध्वं समाहिताः ॥ ६३ ॥ सर्वतीर्थेषु यत्पुण्यं मंदाकिन्यां तथा भवेत् ॥ सहस्रगुणितं स्नानं जाप्यं लक्षगुणं भवेत् ॥ ६४ ॥ दानं कोटिगुणं ज्ञेयं मंदाकिन्यां न संशयः ॥ कौमुदे मासि संप्राप्ते गोदानं तत्र कारयेत् ॥ ६५ ॥ घृतधेनुं च कार्तिक्यां माघ्यां तिलमयीं तथा ॥ जलधेनुं तु वैशाख्यां दत्त्वा मुच्येत पातकैः ॥ ६६ ॥ वाचिकं मानसं पापं कर्मजं यच्च दुष्कृतम् ॥ विनश्येत्किल्बिषं सर्वं मंदाकिन्यास्तु दर्शनात् ॥ ६७ ॥ मंदाकिनीसमं तीर्थं पृथिव्यां नैव दृश्यते ॥ यस्य दर्शनमात्रेण ब्रह्मलोके स मोदते ॥ ६८ ॥ मंदाकिन्यां तु यः स्नानं कृत्वा श्राद्धं प्रदास्यति ॥ दर्शे च पूर्णिमायां वा पितृलोके स मोदते ॥ ॥ ६९ ॥ पितामहं तु यो भक्त्या नित्यं पश्यति मानवः ॥ अश्वमेधसहस्रेण राजसूयशतेन च ॥ ७० ॥ युज्यते नात्र संदेहः सत्यमेतत्तु योधनाः ॥ ततो मन्वंतरेऽतीते प्राप्ते वैवस्वते पुनः ॥ ७१ ॥ तेनैवोन्मत्तवेषेण ऊर्ध्वशेपो महेश्वरः ॥ प्रविष्टो ब्रह्मणः सत्रे दृष्टस्तैर्द्विजसत्तमैः ॥ ७२ ॥ ते ब्राह्मणाः शपंति स्म निन्दां कुर्वंति चापरे ॥ अपरे पांशुभिः शिश्नं घ्नंति तस्याशपन्द्विजाः ॥ ७३ ॥ लोष्टैर्लगुडकैश्चान्ये घ्नंति तं बलगर्वितः ॥ जटामुकुटकं केचिद्धृत्वा कर्षंति चापरे ॥ ७४ ॥ पृच्छंति व्रतचर्यां वै केन व्रतं च दर्शितम् ॥ अत्र चैव स्त्रियः संति कथमेतत्त्वया कृतम् ॥ ७५ ॥ ब्रह्मणा चेदृशी चर्या विष्णुना वा कृता स्वयम् ॥ गिरिशेनापि देवेन केनेदं दुष्कृतं कृतम् ॥ ७६ ॥ मा विडम्बय देवेशं वध्यो हि नस्त्वमद्य वै ॥ एवं तैर्हन्यमानस्तु ब्राह्मणैस्तत्र शंकरः ॥ ७७ ॥ स्मितं कृत्वाऽब्रवीत्सर्वान्ब्राह्मणान्परमेश्वरः ॥ किं यूयं मामभिहथ ह्युन्मत्तं नष्टचेतसम् ॥ ७८ ॥ यूयं कारुणिकाः सर्वे मैत्रभावे व्यवस्थिताः ॥ तमेवं वादिनं देवं जाल्मरूपधरं हरम् ॥ ७९ ॥ मायया तस्य देवस्य मोहितास्ते द्विजातयः ॥ पुनः कपर्दिनं जघ्नुः पाणिपादेन वै द्विजाः ॥ ८० ॥ ताड्यमानस्तु तैर्विप्रैः परं कोपमुपागमत् ॥ ततो देवेन ते शप्ता यूयं वेदविवर्जिताः ॥ ८१ ॥ ऊर्ध्वजटाः सलगुडाः परदारोपजीविनः ॥ रता द्यूते च वेश्यायां पितृमातृविवर्जिताः ॥ ८२ ॥ न पुत्रे पितृवित्तं च विद्या वापि भविष्यति ॥ शेपो मम हतो यैश्च ते सर्वेंद्रियवर्जिताः ॥ ८३ ॥ रौद्रां भिक्षां तु भिक्षंतः परपिंडोपजीविनः ॥ आत्मानं वर्णयिष्यंति धनधान्यविवर्जिताः ॥ ८४ ॥ येश्च तत्र कृता विप्रैर्हन्यमाने कृपा मयि ॥ तेषां धनं च पुत्राश्च दासीदासादयश्च वै ॥८५॥ कुलोत्पन्नाश्च वै नार्यो भविष्यंति वरान्मम ॥ एवं शापं वरं दत्त्वा गतोंऽतर्धानमीश्वरः ॥ ८६ ॥ ततो द्विजा गते देवे मत्वा तं शंकरं विभुम् ॥ अन्वेषयंतो यत्नेन महाकालवनं गताः ॥ ८७ ॥ स्नात्वा सरसि रुद्रस्य जपंतः शतरुद्रियम् ॥ जाप्यावसाने तान्देवोऽशरीरिण्या गिराऽब्रवीत् ॥ ८८ ॥ अनृतं न मया प्रोक्तं स्वैरेष्वपि कुतः सुखम् ॥ भूयोऽप्यनुग्रहं विप्रा युष्माकं करवाण्यहम् ॥ ८९ ॥ शांता दांताश्च ये विप्रा भक्तिमंतो मयि स्थिताः ॥ न तेषां छिद्यते वंशो न धनं न च संततिः ॥ ९० ॥ अग्निहोत्ररता ये च भक्तिमंतो जनार्दने ॥ पूजयंति च ब्रह्माणं तेजोराशिं दिवाकरम् ॥९१॥ नाशुभं विद्यते तेषां येषां साम्ये स्थिता मतिः ॥ एतावदुक्त्वा देवेशस्तूष्णीमासीज्जगत्प्रभुः ॥ ९२ ॥ एवं शापं वरं लब्ध्वा देवदेवान्महेश्वरात् ॥ आजग्मुः सहिताः सर्वे यत्र देवः पितामहः ॥ ९३ ॥ विरंचिमथ ते जाप्यैस्तोषयन्तोऽप्रतः स्थिताः ॥ तुष्टस्तानब्रवीद्ब्रह्मा मत्तोऽपि ब्रियतां वरः ॥ ९४ ॥ ब्रह्मणस्तेन वाक्येन तुष्टाः सर्वे द्विजोत्तमाः ॥ को वरो याच्यतां विप्राः परितुष्टे पितामहे ॥ ९५ ॥ एके तत्रानुवन्विप्रा वेदान्वै वृणवामहै ॥ ततोऽन्ये च धनं धान्यं ब्रियतामविशंकितैः ॥ ९६ ॥ अन्ये प्राहुः किमस्माकं धनैस्तुष्टे पितामहे ॥ अग्निहोत्राणि वेदाश्च शास्त्राणि विविधानि च ॥ ९७ ॥ शांता आढ्याश्च लोकाश्च वरदानाद्भवंतु नः ॥ एवं प्रजल्पतां तत्र विप्राणां क्षोप आविशत् ॥ ९८ ॥ परस्परं वरार्थेऽथ युद्धं कर्तुं समुद्यताः ॥ युध्यंते सायुधाः केचित्केचित्तत्रोपसर्पकाः ॥ ९९ ॥ केचिद्विप्रा उदासीनाः केचिद्वै मौनमास्थिताः ॥ दृष्ट्वैवं भगवान्प्राह विप्रान्युद्धं प्रकुर्वतः ॥ १०० ॥ यस्मात्कुमंत्रिता विप्राः शालाया वाग्प्रसंस्थिते ॥ तस्मादासूलतो विप्रा गुल्मे युद्धोपसर्पकाः ॥ १ ॥ उदासीनस्तु यो गुल्मो वृत्तिहीनो भविष्यति ॥ वेदास्तस्य भवेयुर्वै यस्त्वस्ति मौनसंस्थितः ॥ २ ॥ तृतीयः सायुधो गुल्मो योद्धुकामस्तु यः स्थितः ॥ परदारेषु वेश्यायां द्यूते चौर्ये सदा रतः ॥३॥ चतुर्विधः स वै विप्रो वृत्तिहीनो भविष्यति ॥ एवमुक्ता ययौ ब्रह्मा वैराजं भवनोत्तमम् ॥ ४ ॥ एवं मे परमं क्षेत्रं मुनयोऽवंतिमंडले ॥ यां देवनगरीं लोके प्रवदन्तीह मानवाः ॥ ५ ॥ तस्यां तु ये द्विजाः शांता वसंति क्षेत्रवासिन॥ न तेषां दुर्लभं किंचिन्मम लोके भविष्यति ॥ ६ ॥ कोलामुखे कुरुक्षेत्रे नैमिषे पुष्करेषु च ॥ वाराणस्यां प्रभासे च तथा बदरिकाश्रमे ॥ ७ ॥ गंगाद्वारे प्रयागे च गंगासागरसंगमे ॥ रुद्रकोट्यां विरूपाक्षे मित्रस्यापि तथा वने ॥ ८ ॥ तीर्थेष्वेतेषु क्षेत्रेषु या सिद्धिर्द्वादशाब्दिका ॥ प्राप्यते मानवैर्लोके सा मासेनेह लभ्यते उज्जयिन्यां न संदेहो ब्रह्मचर्ये मनो यदि ॥ ९ ॥ तीर्थानां प्रवरं तीर्थं क्षेत्राणामपि चोत्तमम् ॥ सदाभिरुचितं मह्यमेतद्वै मुनिसत्तमाः ॥ ११० ॥ मंदाकिन्यास्तु माहात्म्यं क्षेत्रस्योत्पत्तिरुत्तमा ॥ भूयः किमन्यदिच्छास्ति श्रोतुं वै द्विजसत्तमाः ॥ ११ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एतत्ते ब्रह्मणो वाक्यं श्रुत्वा व्यास तथाविधम् ॥ वसिष्ठाद्याश्च मुनयः परं ध्यानमथो गताः ॥ १२ ॥ ध्यात्वा तु सुचिरं कालं तत्र वासे मनो दधुः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

साग्निहोत्राः सपत्नीका गताश्चावंतिमंडले ॥ १३ ॥ महाकालवनं दृष्ट्वा शिप्रां चैव महानदीम् ॥ श्मशानभूपरं चैव नदीं गन्धवतीं तथा ॥ १४ ॥ कोटितीर्थमुपस्पृश्य चक्रुर्वासं च तत्र वै ॥ स्मृत्वा तद्ब्रह्मणो वाक्यं रुचिस्तेषां तदाऽभवत् ॥ १५ ॥ अरुन्धत्या वसिष्ठश्च गमनं प्रति नोदितः ॥ उवाच तां महात्मासौ स्वां भार्यां मुनिसत्तमाः ॥ १६ ॥ महाकालः सरिच्छिप्रा गतिश्चैव मुनिर्मला ॥ उज्जयिन्यां विशालाक्षि वासः कस्य न रोचते ॥ १७ ॥ स्नानं कृत्वा नरो यस्तु महानद्यां हि दुर्लभम् ॥ महाकालं नमस्कृत्य नरो मृत्युं न शोचयेत् ॥ १८ ॥ मृतः कीटः पतंगो वा रुद्र स्यानुचरो भवेत् ॥ यत्रैषा श्रूयते मुक्तिः कथं सा त्यज्यते मया ॥ १९ ॥ एवं प्रजल्प्याथ मुनिप्रधानस्तत्रैव वासं सहसा चकार ॥ वनस्य व्युष्टिं परिकीर्तयंस्तु स्थितः सहैवात्र मुनिप्रधानैः ॥ १२० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये मंदाकिनीक्षेत्रमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ओ३म्॥ ॥ सनत्कुमार उवाच ॥ ॥ योऽवंत्यामंकपादाख्ये पश्येद्देवं जनार्दनौ ॥ ययोर्दर्शनमात्रेण यमलोकं न पश्यति ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कथं तावंकपादाख्ये यातावत्र महामुने ॥ न पश्येद्यमलोकं स यद्यपि ब्रह्महा भवेत् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भारावतारणार्थाय देवौ रामजनार्दनौ ॥ अवतीर्णौ यदोर्वंशे दिव्यरूपौ महाद्युती ॥ ३ ॥ कंसं हत्वा सचाणूरमुग्रसेनं नराधिपम् ॥ अभिषिच्य स्वयं राज्ये यदुसिंह उवाच तम् ॥ ४ ॥ किं कार्यं ते मया ब्रूहि कर्तव्यं ते सुते हते ॥ एवमुक्तः स राजा वाँ उग्रसेनोऽब्रवीदिदम् ॥ ५ ॥ सर्वं सपत्स्यते कृष्ण भवतो हि न दुर्लभम् ॥ विज्ञातास्खिलविज्ञानौ भवितारावुभावपि ॥ ६ ॥ गच्छेतमुज्जयिन्यां वै कृतविद्यौ भविष्यथः॥ ततः सांदीपनिं विप्रं जग्मतू रामकेशवौ॥७॥कण्ठस्थांश्चक्रतुर्वेदानाचारमखिलं च तौ॥ सरहस्यं धनुर्वेदं ससंहारं तथैव च ॥८॥ अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ॥ सांदीपनिरसंभाव्यं तयोः कर्मातिमानुषम् ॥ ९ ॥ विचिंत्य तौ तदा येने प्राप्तौ चंद्र दिवाकरौ ॥ ततः किंचिन्स नोवाच स्नातुं तीर्थमथाययौ ॥१०॥ शिष्यैस्तु सहितो विप्रो महाकालवनेऽविशत् ॥ शिष्यैः सह प्रविष्टौ द्वौ तदा तौ रामकेशवौ ॥११॥ वन्दमानौ महाकालं स तं केशवमब्रवीत् ॥ त्वया नाथेन देवानां मानुष्यत्वे हि तिष्ठता ॥ १२ ॥ सुखमासीच्च साधूनामज्ञानां च सदा जने पीडाकरा ये तु सदा वा बलदर्पिताः ॥१३॥ युवाभ्यां ते हताः सर्वे कंसप्रमुखतो नृपाः ॥ मुनिसिद्धसुरादीनां स्थितिः कार्या त्वयाऽनघ ॥१४॥ करिष्यामि तमित्युक्त्वा स नमस्य ततो ययौ ॥ दृष्ट्वा सांदीपनिं शिष्या ऊचुरेवं दिनेदिने ॥ १५ ॥ कस्य न श्रद्दधे तेषां वचस्त्वत्यद्भुतं यतः ॥ स्वयं ययौ ततो द्रष्टुमाश्चर्यं शिष्यभाषितम् ॥ १६ ॥ ततस्तत्रोत्थितः शब्दः संश्लेषे च तथा तयोः॥ तावागतौ गृहं तत्र गुरुर्वचनमब्रवीत् ॥ १७ ॥ न वै ज्ञातौ मया वीरौ यदुवृष्णिकुलोद्भवौ ॥ ततः सांदीपनिं कृष्णः कृतकृत्योऽब्रवीद्वचः ॥ १८ ॥ गुर्वर्थं किं ददामीति सह रामेण हर्षितः ॥ तच्छ्रुत्वा वचनं हृद्यं गुरुः प्रोवाच हर्षितः ॥ १९ ॥ पुत्रमिच्छाम्यहं त्वत्तो यो मृतो लवणांभसि ॥ पुत्र एको हि मे जातः स चापि तिमिना हृतः ॥ २० ॥ प्रभासे तीर्थयात्रायां त्वमेव तमिहानय ॥ तथेति चाब्रवीत्कृष्णो रामस्यानुमते गतः ॥ २१ ॥ तं समुद्र उवाचेदं दैत्यः पंचजनो महान् ॥ तिमिरूपेण तं बालं ग्रस्तवान्मयि संस्थितः ॥ २२ ॥ ततः पंचजनं हत्वा ग्राहरूपं महाबलम् ॥ तन्मध्यस्थं च जग्राह शंखं ग्रस्तो हि यः पुरा ॥ २३ ॥ जलेश्वरगृहात्तेन ग्राहेणातीव लीलया ॥ तस्योदरे यदा बालं नापश्यंस्तु जनार्दनः ॥ २४ ॥ यमालयगतं मत्वा तदा वरुणमब्रवीत् ॥ भगवन्यादसामीश रथो मे दीयतां महान् ॥ २५ ॥ पुराजिरे हता दैत्या दानवा बलदर्पिताः ॥ मया येन रथेनाद्य मह्यं स दीयतां रथः ॥ २६ ॥ न्यासभूतो रथो यस्ते विधृतो निहतारिणा ॥ मया धर्मं पुरस्कृत्य स दीयतामपांपते ॥ २७ ॥ येनाहवे प्रेतराजं जित्वा पश्यामि बालकम् ॥ एतच्छ्रुत्वा प्रहृष्टात्मा ज्ञात्वा कार्यार्थिनं हरिम् ॥ ददौ तु रथमक्षोभ्यं रणे तस्मै सुरासुरैः ॥ २८ ॥ ततो हरिः समालोक्य रथं रत्नपरिष्कृतम् ॥ द्वीपिचर्मपरीधानं वैयाघ्रपरिवारितम् ॥ २९ ॥ नानाचित्रविचित्रांगं गरुडध्वजराजितम् ॥ संयुक्तं शैव्यसुग्रीवपुष्पदंतबलाहकैः ॥ ३० ॥ अजेयं देवदेवेंद्रदानवासुरराक्षसैः ॥ अनेकायुधसंपूर्णं मणिविद्रुमभूषितम् ॥३१॥ सहस्रसूर्यप्रतिमं चारुवक्रचतुर्युगम् ॥ किंकिणीशतशोभाढ्यं घंटाचामरचंद्रिकम् ॥ ३२ ॥ संवर्ताकारविपमं खगेंद्रवरकेतनम् ॥ दृष्ट्वा कृष्णः सरामस्तु मुमुदे वीतविस्मयात् ॥ ३३ ॥ प्रदक्षिणमुपाकृत्य देवताभ्यः प्रणम्य च ॥ आरुरोह रथं विष्णुर्विमानं साग्रयोजनम् ॥ ३४ ॥ ततो जगाम त्वरितो जनार्दनो जगन्निवासो यमलोकमाश्रिताम् ॥ दिशं सहस्रैः किरणैर्वृतां पुरीं दध्मौ च शंखं परिगृह्य चाच्युतः ॥ ३५ ॥ तत्र प्रध्मापयामास शंखं शार्ङ्गधनुर्धरः ॥ तेन शब्देन वित्रस्ताः कृतांतालयवासिनः ॥ ३६ ॥ नरकांतर्गता मर्त्याः पापाचारपरायणाः ॥ सुखमापुः प्रसन्नाश्च वह्नयः कृष्णदर्शनात् ॥ ३७ ॥ शस्त्राणि कुंठतां प्रापुर्यंत्राणि विविधानि च ॥ विदीर्णानि तदा चासुर्देवदेवस्य दर्शनात् ॥ ३८ ॥ असिपत्रवनंनाम शीर्णपर्णमजायत ॥ रौरवंनाम नरकमभैरवमभूत्तदा ॥ ३९ ॥ अभैरवं भैरवाख्यं कुंभीपाकमवाचिकम् ॥ शृंगाटं शृंगसदृशं लोहसूच्यप्यसूचिका ॥ ४० ॥ दुस्तरा सुतरा जाता नदी वैतरणी नृणाम् ॥ नरकांते तदा जाते गते विश्वेश्वरे विभौ ॥ ४१ ॥ पापक्षयात्ततः सर्वे ते मुक्ता नारका नराः ॥ पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम् ॥ ४२ ॥ विमानेषु सहस्रेषु ह्यारूढास्ते समंततः ॥ समीक्ष्य पुंडरीकाक्षं मुक्तास्ते सर्वपातकात् ॥ ४३ ॥ ततः शून्यं मुने जातं सर्वं निरयमंडलम् ॥ दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिणः ॥ ४४ ॥ ततो दूताः कृतांतस्य कृष्णं च युद्धकारिणम् ॥ वारयामासुरत्युग्रा विशंतं नरकान्प्रति ॥ ४५ ॥ ॥ ॥ किंकरा ऊचुः ॥ ॥ मा वीरानेन मार्गेण रथमानय मानवन् ॥ प्रयांत्यधोगतिं पापात्परस्त्रीस्वापहारकाः ॥ ४६ ॥ यमादिष्टा नराः पापा येऽमोच्या वर्षकोटिभिः ॥ दृष्ट्वा त एव सद्यस्त्वां गताः स्वर्गमपावृताः ॥ ४७ ॥ एतच्छ्रुत्वा वचस्तेषां कृपया पीडितो भृशम् ॥ पुनः प्रोवाच मधुहा मोक्षायाद्यमुपागतः ॥ ४८ ॥ सर्वेषां स्वर्गदाताहं यमलोकनिवारकः ॥ अंजसा यमराड्दूता यमायाख्यात मे वचः ॥ ४९ ॥ एतच्छ्रुत्वा वचो दूताः सत्वरा यममागताः ॥ सर्वमाचख्युरे वृत्तं यथा नारकमोक्षणम् ॥ ५० ॥ ततो यमो रुषाविष्टः प्राह तान्यमकिंकरान् ॥ यः कश्चिदद्य तो मर्त्यो मर्यादाभेदकृन्नरः ॥ ५१ ॥ तं गत्वा वारयध्वं वै गृहीत्वानीयतामिति ॥ अयं नरांतको यातु किंकरः सह किंकरैः ॥ ५२ ॥ एवमुक्तो यमेनाथ किंकरः स नरांतकः ॥ गत्वा तं वारयामास नाराचैरुग्रशक्तिभिरच्युतम् ॥ ५३ ॥ यदा न वारितस्तस्थौ तदा क्रुद्धो नरांतकः ॥ तदा शरैरतीवोग्रैस्ताडितस्तेन केशवः ॥ ५४ ॥ बलदेवोऽपि समरे ताडितो विविधैः शरैः ॥ तावुभौ ताडितौ घोरैः समंताद्यमकिंकरैः ॥ ५५ ॥ आदाय धनुषी दिव्ये जघ्नतुर्यमकिंकरान् ॥ बाणैरनेकसाहस्रैः क्रुद्धौ रामजनार्दनौ ॥ ५६ ॥ नरांतकोऽपि समरे बलेन बलिनार्दितः ॥ पपात गदया भिन्नो मूर्ध्नि निर्यातलोचनः ॥ ५७ ॥ ततो नरांतके वीरे पतिते यमकिंकरे ॥ किंकराणामभूत्सैन्यमार्तं रणपराङ्मुखम् ॥ ५८ ॥ रामकृष्णाभ्यां ते दूता हन्यमाना भयातुराः ॥ यमाय कथयामासुर्नरांतकस्तु पातितः ॥ ५९ ॥ ततो यमो ययौ क्रुद्धः समंतात्किंकरैर्वृतः ॥ प्राह ततो यमः क्रुद्धो नो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जितोहं पुरा परैः ॥ ६० ॥ ततो वादित्रनिर्घोषैस्तुमुलानकगोमुखैः ॥ नानाडमरुकैश्चैव चित्रगुप्तेश्च गच्छति ॥ ६१ ॥ देवा विद्याधराः सिद्धा दृष्ट्वा यांतं महाबलम् ॥ कृतांतस्य रणेऽक्षोभ्यं कामपालं जगत्पतिम् ॥ ६२ ॥ ततस्ते किंकराः सर्वे चित्रगुप्तेन नोदिताः॥ रथमावृत्य बाणौघैः प्रविव्यधुः समंततः ॥ ६३ ॥ बलं च केशवं संख्ये जघ्नतुस्तानुभावपि ॥ रणे च विविधैर्बाणैश्चित्रगुप्तस्य पश्यतः ॥ ६४ ॥ विदार्य च सहस्राणि किंकराणां समंततः ॥ कृतांतानीकिनीमध्ये कृतांत इव केशवः ॥ चचार रणदुर्धर्षः कामपालेन पालितः ॥ ६५ ॥ ततश्चित्रगुप्तो रणे किंकराद्यं विदीर्णं निरीक्ष्यार्तनादं चकार ॥ ६६ ॥ शरैः पंचभिः कृष्णमायांतमाजौ जघानाष्टभिर्वक्षदेशे स भिन्नः ॥ शरार्तो रथोपस्थ आसीत्तदार्तस्तमालोक्य भिन्नं रणे नष्टसंज्ञम् ॥ ६७ ॥ रथं स्वं समादाय यातः कृतांतस्ततश्चित्रगुप्ते शरार्ते प्रसुप्ते ॥ रणे कीर्तिलुप्ते भयक्षोभयुक्तः स्वसैन्येश्च युक्तो भयार्तो निपण्णः ॥ ६८ ॥ प्रधानाश्च भग्ना विचित्राश्च भग्नास्ततश्चित्रगुप्तं निशम्याथ भग्नम् ॥ स कालस्तमायांतमालोक्य दूराद्धर सैन्यमादाय देवारि शत्रुम् ॥ ६९ ॥ विनाशाय शुष्यद्भुगांते प्रजानां यथा वाडवो ज्वालवृद्धः प्रवृत्तः ॥ तमायांतमालोक्य कालं कराले शरैरावृणोदंतकं कालकल्पैः ॥ ७० ॥ स कालः कराले समादाय दंडं मुमोचाच्युते पश्यतां देवतानाम् ॥ ततः कालदंडः प्रजानां विनाशो हरेः संनिकाशं समभ्याजगाम ॥ ७१ ॥ ततो देवगंधर्वयक्षा मुनींद्राः परं विस्मयं प्रापुरालोक्य रामम् ॥ ज्वलंतं च जग्राह कालस्य दंडं स रामो वरं लीलयाऽनंतमूर्तिः ॥ ७२ ॥ गृहीते बलेनाहवे कालदंडे मोक्तुकामे पुनः कालनाशाय वै ॥ तूर्णमभ्येत्य तत्रांतरे पद्मजस्तं रणे वारयामास कृष्णं तदा ॥ ७३ ॥ मा मुंच त्यत्रवीद्वेधाः कालं कालायुधं बल ॥ त्वया बलवता वीर चराचरधरा धरा ॥ ७४ ॥ धार्यते शिरसा देव संसारे नास्ति ते समः ॥ त्वया विश्वपतिं विष्णुरुत्संगेन सदोह्यते ॥७५॥ कोऽन्योऽस्ति त्वत्समो राम यो जग्दहने क्षमः॥ जगत्स्रष्टा जगद्धाता जगद्धर्ता जगत्पतिः ॥७६॥ पाल्यते यत्त्वया सो पि विष्णुर्विश्वैकनायकः ॥ कस्ते स्तुतिकरोऽस्तीह को गुणान्वेत्तुमर्हति ॥ ७७ ॥ ततो वयं त्वदंकस्थविष्णुनाभिभवा यतः ॥ इत्युक्त्वा बलदेवं च वासुदेवं पुनर्वचः ॥ ७८ ॥ उवाच चतुरास्यस्तु स्तुतिपूर्व वृतः सुरैः ॥ कृष्णकृष्ण करालस्य कालस्यास्य कृपां कुरु ॥ ७९ ॥ यतो भवंतमायांतं विष्णुं विश्वैकनायकम् ॥ वेत्ति नायं जगन्नाथं नरकार्णवतारकम् ॥ ८० ॥ त्वया वै भगवन्पूर्वं यमः संस्थापितः पदे ॥ नृणां दुष्कृतकर्तृणां नरकाय यमः प्रभो ॥ ८१ ॥ तस्मादस्य जगन्नाथ क्षम्यतां पुरुषोत्तम ॥ विभो कृपां कुरुष्वास्य ब्रूहि यत्ते विवक्षितम् ॥ ८२ ॥ एतच्छ्रुत्वाऽब्रवीत्कृष्णो घातः शृणु गुरोर्मम ॥ सांदीपनेः समानीतः सुतस्तेनागताविह ॥ ८३ ॥ समर्प्यतां गुरुश्रेष्ठ श्रेष्ठाय गुरुदक्षिणा ॥ आवाभ्यां वै प्रतिज्ञाता तस्मात्सा पाल्यतां विभो ॥ ८४ ॥ एतत्पितामहः श्रुत्वा यमं समरनिर्जितम् ॥ समाहूयाब्रवीद्विष्णुर्यद्ब्रवीति कुरुष्व तत् ॥ ८५ ॥ तच्छ्रुत्वा धर्मराजस्तु विरंचिमिदमब्रवीत् ॥ भगवन्विश्वकृल्लोके नेप मार्गस्त्वया कृतः ॥ ८६ ॥ यमलोकमनुप्राप्य कायहीनः शरीरवान् ॥ यत्कायरहितो याति नैतदत्र प्रपद्यते ॥ ८७ ॥ तच्छ्रुत्वा हि पुनर्ब्रह्मा विचत्स्यास्य विभुः स्वयम् ॥ विश्वकृद्विश्वहृद्यस्माद्यदिच्छति करोतु तत् ॥ ८८ ॥ तस्मा दर्पय पुत्रं त्वं सुनेः सांदीपनेश्च यः ॥ नरकेऽयं पुनः कृत्वा तं चानय महामते ॥ ८९ ॥ तच्छ्रुत्वा धर्मराजस्तु पुत्रं सांदीपनेस्तथा ॥ ससर्ज बाल रूपं च तदात्मानं तदुद्भवम् ॥ ९० ॥ अर्पयामास कृष्णस्य बालं रूपसमन्वितम् ॥ स सर्वदेवतानां च तदद्भुतमिवाभवत् ॥ ९१ ॥ ततः प्राप्य गुरोः पुत्रं प्रभुः प्रीतः प्रजापतिम् ॥ प्राह प्राप्तो मया ब्रह्मन्स्वरूपो द्विजदारकः ॥ ९२ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अद्यप्रभृति लोकेश देशे मच्चरणांकिते ॥ अवंत्यामंकपादाख्ये मृता नेक्षंति ते यमम् ॥ ९३ ॥ महाकालपुरे देवमाद्यं वै पुरुषोत्तमम् ॥ विश्वरूपं च गोविंदं शंखोद्धारं च केशवम् ॥ ९४ ॥ ये पश्यंति कुशस्थल्यामेतेषां मूर्तिपंचकम् ॥ ते नरा न गमिष्यंति विरंचे निरयं क्वचित् ॥ ९५ ॥ तथेवागमनादत्र मम रामस्य वा रकाः ॥ विमुक्तास्ते त्वधाद्वारात्प्राप्नुवंत्यखिला दिवम् ॥ ९६ ॥ इत्युक्ते वचने वेधाः प्रोवाच प्रीतिमान्हरिम् ॥ यत्त्वयोक्तं वचः कृष्ण तदस्तु सकलं सदा ॥ ९७ ॥ ये च त्वामादिपुरुषं प्रथमं पुरुषोत्तमम् ॥ प्रणम्य पश्चाद्द्रक्ष्यंति स्नात्वा शिवसरस्यपि ॥ ९८ ॥ अधोज्वालं महाकालं सोऽश्वमेध फलं लभेत् ॥ एवमुक्तो हरिः पुत्रमादाय बलिना सह ॥ ९९ ॥ संमान्य वेधसं कालं समारोह्यथं ततः ॥ शंखमापूरयामास कृतकार्यो जनार्दनः ॥ १०० ॥ मोक्षाय निरयस्थानां नृणां वै पापकर्मणाम् ॥ ततस्ते शंखशब्देन स्मरणेनाच्युतस्य च ॥ १ ॥ दिव्यान्विमानानारूढा दिवमेवाखिला गताः ॥ शून्यं तन्मंडलं जातं नारायणसमागमे ॥ २ ॥ कालोऽपि दंडमासाद्य बलदेवात्पुनः पुरम् ॥ प्रविवेश ततो धाता तत्रैवांतरधीयत ॥ ३ ॥ कृष्णोऽपि बलवान्धीरः प्राप्त उज्जयिनीं पुरीम् ॥ बलदेवसहायस्तु सत्वरेणाशुगामिना ॥ ४ ॥ ततः सांदीपनेः पुत्रमर्पयामास केशिहा ॥ गुरवे यत्प्रतिज्ञातं स तस्मादनृणोऽभवत् ॥ ५ ॥ एवं सांदीपनिः पुत्रं दृष्ट्वा च पुनरागतम् ॥ नागरास्तत्र राजा च विस्मयं परमं ययुः ॥ ६ ॥ तौ वीरावर्चयामासुर्भक्त्वा देवोत्तमोत्तमौ ॥ सांदीपनिरुवाचेदं तौ च रामजनार्दनौ ॥ ७ ॥ इह स्थास्यति वां कीर्तिर्यावदाभूतसंप्लवम् ॥ स्थाने मदीय एतस्मिंस्तिष्ठतौ यदुनंदनौ ॥८॥ न विज्ञातौ मया वीरौ यदुवृष्णिकुलोद्भवौ ॥ नरनारायणौ देवौ देवकार्यार्थमागतौ ॥९॥ नाल्पमृत्युर्भवेत्तस्य न व्याधिर्न च दुर्गतिः ॥ प्राप्य ह्यत्र च यः स्नाति स्वर्गलोके स मोदते ॥१०॥ शंखिनं विश्वरूपं च गोविंदं चक्रिणं तथा ॥ चत्वारि विष्णुक्षेत्राणि अंकपादस्तु पंचमः ॥ ११ ॥ एषां यात्रां प्रवक्ष्यामि यथा कार्या मनीषिभिः ॥ मंदाकिन्यां कृतस्नानो दृष्ट्वा रामजनार्दनौ ॥ १२ ॥ शंखोद्धारे ततः स्नात्वा प्रपश्येद्बलकेशवौ ॥ स्नानं कृत्वा ततः कुंडे गोविंदं च समर्चयेत् ॥ १३ ॥ चक्रिणं च ततो दृष्ट्वा देवदेवं च शंखिनम् ॥ अंकपादौ ततो दृष्ट्वा विश्वरूपं ततो व्रजेत् ॥ १४ ॥ तस्याग्रतः करीकुंडे स्नानं कृत्वा यथाविधि ॥ पुनस्तेन प्रकारेण प्रपश्येद्बलकेशवौ ॥ १५ ॥ स्नानं कृत्वा ततः कुंडे गोविंदं च समर्चयेत् ॥ तथैव चक्रिहलिनौ दृष्ट्वा तं केशवं व्रजेत् ॥ १६ ॥ शिप्रांभसि नरः स्नात्वा भक्त्या संपूज्य केशवम् ॥ परावृत्यांक पादे तु तां रात्रिं गमयेच्छुचिः ॥ १७ ॥ प्रातर्वै भोजयेत्तत्र पंच विप्रांश्च सुव्रतान् ॥ गोदक्षिणां शंखिने तु विश्वरूपाय वै हयम् ॥ १८ ॥ गोविंदाय गजं दद्यात्सर्वं दद्याच्च केशवे ॥ उपोष्य द्वादशीं विप्र योऽकपादं समर्चयेत् ॥ १९ ॥ गंधपुष्पैश्च धूपैश्च नैवेद्यैर्विविधैस्तथा ॥ श्राद्धं यः कुरुते सर्वं तस्य पुण्यफलं शृणु ॥ १२० ॥ कुलानां शतमुद्धृत्य विमानैः सर्वकामिकैः ॥ गीतनृत्यादिभोगैश्च वैकुंठे सुचिरं वसेत् ॥ २१ ॥ पुनर्लोकमिमं प्राप्य पवित्रे जायते कुले ॥ प्राप्नोत्यनंतसंतानं विष्णुलोकं पुनर्व्रजेत् ॥१२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवंतीक्षेत्रमाहात्म्येऽकपादमाहात्म्यवर्णनंनाम सप्तविंशोऽध्यायः ॥२७॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यं संप्रवक्ष्यामि देवं त्रैलोक्यविश्रुतम् ॥ चंद्रादित्यमिति ख्यातं चंद्रादित्यार्चितं पुरा ॥१॥ यस्तं समर्चयेद्देवं सुरासुरनमस्कृतम् ॥ गंधपुष्पैस्तथा धूपैर्नैवेद्यैर्विविधैस्तथा ॥ २ ॥ चंद्रादित्यादिसालोक्यं प्रयाति सर्वकामिकम् ॥ विमानैः सूर्यसंकाशैर्यावच्चंद्रदिवाकरौ ॥ ३ ॥ ॥ इति चन्द्रादित्यमाहात्म्यम् ॥ ॥ सनत्कु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मार उवाच ॥ ॥ करभेशं ततो गच्छेद्देवदेवं महेश्वरम् ॥ यस्य दर्शनमात्रेण कुयोनौ नैव जायते ॥ ४ ॥ ॥ व्यास उवाच ॥ ॥ करभेशमहं देवं श्रोतुमिच्छामि तत्त्वतः ॥ कथं देवः समुत्पन्नः करभेशेतिसंज्ञितः ॥ ५ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा देवगणैः सार्धं देवदेवो महेश्वरः ॥ वनेऽस्मिन्क्रीडयामास परमाह्लादसंयुतः ॥ ६ ॥ क्रीडन्बहुतिथे काले शंकरः करभोऽभवत् ॥ ज्ञायते च स नो देवैः शंकरः करभाकृतिः ॥ ७ ॥ अन्वेषयंति ते देवास्ततो विस्मयसंयुताः ॥ न पश्यंति यदा तत्र तं देवं शूलपाणिनम् ॥ ८ ॥ देवैः पृष्टस्ततो ब्रह्मा प्रयास्ति देवो महेश्वरः ॥ ध्यात्वाथ ब्रह्मणा दृष्टो गुप्तो योगप्रभुर्हरः ॥ ९ ॥ देवैः सार्धं ततो ब्रह्मा पप्रच्छ गणनायकम् ॥ न दृष्टः शंकरोऽस्माभिर्गतः कुत्र विनायक ॥ १० ॥ कथयस्व नमस्तुभ्यं दास्यामो लड्डुकान्विभो ॥ एवमुक्तस्तदा दृष्टः प्रोवाच गणनायकः ॥ ११ ॥ करभोऽयं महादेवो दृश्यते विबुधो त्तमाः ॥ श्रुत्वा चैवं वचो देवाः प्रहृष्टाः करभं ययुः ॥ १२ ॥ ज्ञातोऽस्माभिर्महादेव जल्पंत इति ते स्वयम् ॥ गत्वा चैव ततः सर्वे चतुर्दिक्षु स्थिताः स्वयम् ॥१३॥ विचिंत्येति कथं ज्ञातः शंकरो विस्मयं गतः ॥ त्यक्त्वाथ कारमं रूपं देवदेवो महेश्वरः ॥ १४ ॥ लिंगमुत्पादयामास दिव्यं यत्करभेश्वरम् ॥ ते दृष्ट्वाऽथ सुराः सर्वे साष्टांगप्रणतिस्थिताः ॥ १५ ॥ ततःप्रभृति विख्यातः शंकरः करभेश्वरः ॥ कोटितीर्थादुत्तरस्मिन्स्थापयामास विश्रुतम् ॥ १६ ॥ स्वनाम्ना प्रथितं चक्रे करभं चातिपूजितम् ॥ स्नात्वा तत्र शुचिर्भूत्वा यस्तमर्चयते शिवम् ॥ १७ ॥ गंधपुष्पैश्च नैवेद्यैः शृणु तेषां च यत्फलम् ॥ सर्वमेधेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ १८ ॥ ततोऽधिकं स लभते नात्र कार्या विचारणा ॥ महाकालं ततो गच्छन्संपूर्णं फलमाप्नुयात् ॥ १९ ॥ ततः प्रसिद्धो लोकेऽस्मिन्नृद्धिदः करभेश्वरः ॥ २० ॥ ॥ इति करभेश्वरमाहात्म्यम् ॥ ॥ ७ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ लड्डुकेश्च ततो देवैर्विघ्ननाथः समर्चितः ॥ तदाप्रभृति विख्यातो विघ्नेशो लड्डुकप्रियः ॥ २१ ॥ यः समर्चयते भक्त्या तस्य विघ्नो न जायते ॥ तस्मै ददाति संतुष्टः सर्वान्कामान्विनायकः ॥ २२ ॥ निराहारश्चतुर्थ्यां च स्नात्वा शिप्रां विशेषतः ॥ रक्तां वरधरो भूत्वा रक्तपुष्पैर्विनायकम् ॥ २३ ॥ रक्तचंदनतोयेन मंत्रैः स्नपनपूर्वकम् ॥ चंदनेनापि रक्तेन तं विलेप्य प्रपूजयेत् ॥ २४ ॥ धूपं दद्यात्तथा दिव्यं सुगंधं लड्डुकप्रिये ॥ नैवेद्ये लड्डुका देया आज्यखंडपरिप्लुताः ॥ २५ ॥ न तस्य जायते व्याधिर्भयं विघ्नं कदाचन ॥ लभते च सदाभीष्टं मृतः शिवपुरं व्रजेत् ॥ २६ ॥ अवतीर्णः पुनर्लोके जायते वसुधाधिपः ॥ मतिमान्पुत्रवाञ्छूरो नात्र कार्या विचारणा ॥ २७ ॥ ॥ इति गणेशमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ कुसुमेशं सुरद्वारे सुरासुरनमस्कृतम् ॥ श्रद्धया पूजयेद्यस्तु शिवलोके स मोदते ॥ २८ ॥ जयेश्वरं तु यः पश्येद्देवदेवं महेश्वरम् ॥ जयी स्यात्सर्वकार्येषु शिवलोकं स गच्छति ॥ २९ ॥ शिवद्वारे शिवं लिंगमर्चयेन्मानवो यदि ॥ त्रिदिवं याति यानेन गाणपत्यं च विंदति ॥ ३० ॥ अथान्यं संप्रवक्ष्यामि मार्कंडेश्वरमुत्तमम् ॥ मार्कंडेयो मुनिर्यत्र तत्तवान्सुमहत्तपः ॥ ३१ ॥ दृष्ट्वा तं शंकरं देवं वाजपेयफलं लभेत् ॥ सर्वपापविशुद्धात्मा चिरायुर्जायते नरः ॥ ३२ ॥ शृणु व्यास महास्थानं यस्यां पुर्यामनुत्तमम् ॥ यत्र तिष्ठति सा देवी ब्रह्माणी हंसवाहिनी ॥ ३३ ॥ भक्तानां पूरयेदाशां पुत्रवत्परिपालयेत् ॥ यथा माता तथा देवी दृष्टा शांतिपरेरपि ॥ ३४ ॥ अर्चिता ब्रह्मणा सा तु स्तुता देवी सुरोत्तमैः ॥ अर्चयेद्गंधपुष्पैश्च नैवेद्यैः सर्वसिद्धिदाम् ॥ अपि या ब्रह्मणः पूर्वमभूदेव सुसिद्धिदा ॥ ३५ ॥ यः स्नात्वा ब्रह्मसरसि पश्येद्ब्रह्मेश्वरं शिवम् ॥ भवबंधविनिर्मुक्तो ब्रह्मलोके स मोदते ॥ ३६ ॥ अथान्यां संप्रवक्ष्यामि यज्ञवापीमनुत्तमाम् ॥ यत्र वै ब्रह्मणा पूर्वमिष्टो यज्ञः सदक्षिणः ॥ ३७ ॥ यज्ञार्थं यत्कृतं कुंडं यज्ञवापी च सा स्मृता ॥ पशुश्च पतितो यस्मात्तस्मात्पशुपतिः स्मृतः ॥ ३८ ॥ तस्यां स्नात्वा शुचिर्भूत्वा पश्येत्पशुपतिं तु यः ॥ उद्धरेत्स पितॄन्व्यास पशुयोनिगतानपि ॥ ३९ ॥ सुवर्णमणिमुक्ताद्यैर्विमानैः सर्वकामगैः ॥ याति रुद्रपुरं दिव्यं यत्र देवो महेश्वरः ॥ ४० ॥ रूपकुंडे नरः स्नात्वा सुरूपो जायते नरः ॥ स्वर्गे स देवगंधर्वैः स्पृहणीयवपुर्भवेत् ॥ ४१ ॥ कुंडे स्नात्वाप्यनंगे यः शुचिर्भूत्वा समाहितः ॥ पश्येच्च देवदेवेशमनंगेनार्चितं पुरा ॥ कामं स लभतेऽभीष्टं मृतो याति शिवालयम् ॥ ४२ ॥ आषाढे तु सिताष्टम्यां जागरं यस्तु कारयेत् ॥ केदारे यत्फलं प्रोक्तं तत्समानमवाप्नुयात् ॥ ४३ ॥ करीकुंडे नरः स्नात्वा विश्वरूपं तु योऽर्चयेत् ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ४४ ॥ अजागंधे नरः स्नात्वा दृष्ट्वा ब्रह्मेश्वरं शिवम् ॥ ब्रह्महत्यासमं पापं तत्क्षणात्संव्यपोहति ॥ ४५ ॥ चक्रतीर्थे नरः स्नात्वा चक्रस्वामिनमर्चयेत् ॥ जायते स नरो व्यास चक्रवर्ती सदा भुवि ॥ ४६ ॥ सिद्धेश्वरं यदा पश्येत्स्नात्वा सुविधिपूर्वकम् ॥ कामिकेन विमानेन रुद्रलोकं स गच्छति ॥ ४७ ॥ ॥ इति यज्ञवापीमाहात्म्यम् ॥ ॥ सोमवत्यां नरः स्नात्वा यः सोमेश्वरमर्चयेत् ॥ सोमवन्निर्मलो भूत्वा सोमलोके समोदते ॥ ४८ ॥ ॥ व्यास उवाच ॥ ॥ तीर्थं सोमवतीनाम लिंगं सोमेश्वरं तथा ॥ अभूदेतत्कथं नाम श्रोतुमिच्छामि तत्त्वतः ॥ ४९ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास यथोत्पन्नं सोमतीर्थं सुशोभनम् ॥ सोमेश्वरं यथा लिंगमेतत्सत्यं वदामि ते ॥५०॥ यो देवो भगवान्सोमो लोकस्याप्यायनं परम् ॥ आसीत्तस्य पुरा व्यास पिता विप्रो महातपाः ॥ ५१ ॥ अवन्त्यां च महाभागो योऽत्रिर्नामा तपोनिधिः ॥ वर्षाणां त्रीणि दिव्यानि सहस्राणि तपो महत् ॥ ५२ ॥ ऊर्ध्ववाहुः स वै तेपे ब्रह्मध्यानपरायणः ॥ ऊर्ध्वं गतं ततो व्यास ग्राहयं तेजो महात्मनः ॥ ५३ ॥ नेत्राभ्यां तेन सुस्राव भासयच्च दिशो दश .. तेजस्तत्सहसा दृष्ट्वा दिशो दशोद्गतं स्वतः ॥ ५४ ॥ दिशश्च तद्यदा व्यास सर्वा धर्तुं न चाशकन् ॥ असृस्रवत्तदा दिग्भ्यस्तद्धि तेजोतिदुःसहम् ॥ ५५ ॥ लोकांश्च भासयत्सर्वान्धरण्यां वै पपात ह ॥ सोमो जातस्ततस्तेन शीतांशुश्च जनप्रियः ॥ ५६ ॥ वारि सोमात्समुत्पन्नं व्यास तेनैव तेजसा ॥ प्रविष्टा सा नदीं शिप्रामृतेनातिपूरिता ॥ ५७ ॥ ततः सोमवती शिप्रा विख्याता सर्वसिद्धिदा ॥ सोमयुक्तां नदीं शिप्रां दृष्ट्वा पापं व्यपोहति ॥ ५८ ॥ ख्याता च त्रिषु लोकेषु पापिनां पुण्यदायिनी ॥ ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ ५९ ॥ चत्वारोऽप्यत्र पापेन मुच्यंते दर्शनाद्ध्रुवम् ॥ अमासोमो यदा युक्तो सोमवत्यां तदा मुने ॥ ६० ॥ स्नानं दानं च यो धीमाञ्जपं होमं समाचरेत् ॥ अक्षयं तस्य तत्सर्वं यावच्चंद्रदिवाकरौ ॥ ६१ ॥ तिलोदकप्रदानेन पिंडदानेन कारिता ॥ अकाले कालिकी तृप्तिः पितॄणां च यतो मता ॥ ६२ ॥ सर्वत्र दुर्लभा सिद्धा सोमं सोमग्रहस्तथा ॥ सोमेश्वरः सोमवारः सकाराः पंच दुर्लभाः ॥ ६३ ॥ शिप्रासोमजलं व्यास कोटितीर्थफलप्रदम् ॥ अमासोमसमायोगे पितृतीर्थसमं स्मृतम् ॥ ६४ ॥ अमायां सोमवारश्चेद्व्यतीपातो यदा भवेत् ॥ शतगुणं गयायास्तु सोमवत्यां प्रकीर्तितम् ॥ ६५ ॥ एवं सोमवतीतीर्थं जातमत्र महामुने ॥ सोमं दृष्ट्वाथ पतितं क्षितौ ब्रह्मा जगद्गुरुः ॥ ६६ ॥ रथे तं स्थापयामास लोकानां हितकाम्यया ॥ सं तु वेदमयो व्यास धर्माक्षः सत्यसंग्रहः ॥ ६७ ॥ युक्तो वाजिसहस्रेण ब्रह्मणा प्रेरितस्तदा ॥ दृष्ट्वा सोमं ततो देवा रथे तं ब्रह्मणा धृतम् ॥ ६८ ॥ तुष्टुवुः सर्वभावेन दृष्ट्वाः सर्वे समाहिताः ॥ तस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संस्तूयमानस्य तेजः सोमस्य भास्वरम् ॥ ६९ ॥ आप्यायमानं त्रीँल्लोकान्पपात धरणीतले ॥ ब्रह्मा तेन रथेनाथ सागरांतां वसुन्धराम् ॥ ७० ॥ त्रिःसप्तकृत्वोऽतिशयाच्चकाराब्धिप्रदक्षिणम् ॥ तस्य तत्पतितं तेजो व्यास सोमस्य शीतलम् ॥ ७१॥ तदेवौषधयो दिव्या जाता भुवि सुनिर्मलाः ॥ याभिर्धार्यो ह्ययं लोकः प्रजाश्चैव चतुर्विधाः ॥ ७२ ॥ तुष्टोऽथ भगवान्सोमो जगतेः सर्वदा मुने ॥ दशवर्षसहस्राणि तेपेऽतिदुःसहं तपः ॥ ७३ ॥ ततस्तस्मै ददौ वाक्यं ब्रह्मा लोकपितामहः ॥ बीजौषधानि विप्राणां सोमो राजा बभूव ह ॥ ७४ ॥ सप्तविंशतिं सोमाय दाक्षायणीर्महाव्रताः ॥ पत्नीः प्राचेतसो दक्षो ददौ नक्षत्रसंज्ञकाः ॥ ७५ ॥ स तत्प्राप्य महद्राज्यं सोमो भार्यायुतस्तदा ॥ समारेभे राजसूयं सहस्रशतदक्षिणम् ॥ ७६ ॥ होता च भगवानत्रिरध्वर्युर्भगवान्भृगुः ॥ हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान् ॥ ७७ ॥ सदस्यो भगवान्विष्णुः सनकादिमुखैर्युतः ॥ ददौ स दक्षिणां सोमस्त्रीँल्लोकान्सुसमाहितः ॥ ७८ ॥ सिनीवाली कुहूश्चैव धृतिः पुष्टिः प्रभा वसुः ॥ कीर्तिर्धृतिश्च लक्ष्मीस्तं देव्यो दिव्याः सिषेविरे ॥ ७९ ॥ प्राप्यावभृथमव्यग्रः सर्वदेवर्षिपूजितः ॥ अतीव राजते चन्द्रो दशधा भासयन्दिशः ॥ ८० ॥ तस्य तत्प्राप्य दुष्प्राप्यमैश्वर्यमृषिसंस्कृतम् ॥ विबभ्राम मतिर्व्यास विनयाद्यमपास्य च ॥ ८१ ॥ बृहस्पतेस्तदा भार्यां तारानाम्नीं यशस्विनीम् ॥ जहार तमसा साध्वीमवमान्यां गिरःसुतम् ॥ ८२ ॥ वाच्यमानस्तदा सोमो देवैर्देवर्षिभिस्तथा ॥ नैव व्यसर्जयत्तारां तस्मा आंगिरसाय च ॥ ८३ ॥ बृहस्पतेस्ततः पक्षं शक्रो जग्राह कोपतः ॥ स हि शिष्यो महातेजा गुरोः पूर्वं बृहस्पतेः ॥ ८४ ॥ ततो युद्धमभूत्तत्र सुघोरं शक्रसोमयोः ॥ देवानां दानवानां च व्यास त्रासकरं महत् ॥ ८५ ॥ सर्वे भीतास्ततो देवा ब्रह्माणं शरणं गताः ॥ अग्रतो ब्रह्मणो युद्धं कथितं शक्रसोमयोः ॥ ८६ ॥ देवानां वचनं श्रुत्वा सार्द्धं देवैः पितामहः ॥ आगत्य युद्धभूमिं सोऽवारयद्देवदानवान् ॥ ८७ ॥ वारितास्ते स्थितास्तत्र युद्धं त्यक्त्वा सुरासुराः ॥ तारामादाय स तदा ददावांगिरस द्विजे ॥ ८८ ॥ तामंतःप्रसवां दृष्ट्वा प्राह भार्यां बृहस्पतिः ॥ मदीयायां न ते योन्यां गर्भो धार्यः कथंचन ॥ ८९ ॥ उत्ससर्ज ततस्तारा कुमारं देवरूपिणम् ॥ हृषीकास्त्रं समासाद्य ज्वलंतमिव पावकम् ॥ ९० ॥ स तेजो जातमात्रोऽपि देवानामाक्षिपच्छिशुः ॥ ततः संशयमापन्ना ऊचुस्तारां दिवौकसः ॥ ९१ ॥ कस्यायं ब्रूहि सुभगे सोमस्याथ बृहस्पतेः ॥ नाचचक्ष तु देवानां वेधाः पप्रच्छ तां पुनः ॥ ९२ ॥ यदत्र सत्यं तद्ब्रूहि तारे कस्य सुतो ह्ययम् ॥ सा प्रांजलिरुवाचेदं ब्रह्माणं वरदं विभुम् ॥ ९३ ॥ सोमस्येति रहः सोऽयं कुमारो देवसंनिभः ॥ सोमस्य तं सुतं ज्ञात्वा परिष्वज्य पितामहः ॥ ९४ ॥ बुध इत्यकरोन्नाम तस्य पुत्रस्य वै तदा ॥ परदारापहाराच्च यत्पापं तेन दुःसहम् ॥ ९५ ॥ तेन सोमोऽभवत्कुष्ठी क्षयरोगयुतस्तदा ॥ ततो राज्ये स्वकं पुत्रं स्थापयित्वा यथाविधि ॥ ९६ ॥ अवन्तीमाजगामाशु सोमो देवदिदृक्षया ॥ सोमाहे सोमवत्यां च अमायोगे जितेंद्रियः ॥ ९७ ॥ स्नात्वा संपूजयामास सोमः सोमेश्वरं ततः ॥ तस्य भक्त्या च सन्तुष्टः प्राह सोमं महेश्वरः ॥ ९८ ॥ मत्प्रसादाद्वपुः कांतं तव सोम भविष्यति ॥ सोमेश्वरमिति ख्यातं भुक्तिप्रदायकम् ॥ ९९ ॥ एवं व्यास तु तत्तीर्थं लिंगं चैवाहुति दुर्लभम् ॥ कथितं तथ्यभावेन मया तुष्टेन सांप्रतम् ॥ १०० ॥ श्रावणं प्राप्य यो मासं सोमनाथं जितेंद्रियः ॥ नित्यं पश्येन्नरो व्यास तस्य पुण्यफलं शृणु ॥ १०१ ॥ सौराष्ट्रे सोमनाथस्य पूजायाः प्रत्यहं फलम् ॥ लभते स नरो व्यास नात्र कार्या विचारणा ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये सोमवतीतीर्थमाहात्म्यवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थस्याऽनरकस्यास्य माहात्म्यं शृणु सांप्रतम् ॥ तीर्थे चानरके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ न पश्येन्नरकं क्वापि यद्यपि ब्रह्महा भवेत् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ कियंतो नरकास्तात कस्मिन्स्थाने प्रतिष्ठिताः॥ पतन्ति केन पापेन पापिनस्तेषु दुःखिताः ॥ २ ॥ तत्कथं प्राणिनस्तत्र गच्छन्ति पापकारिणः ॥ तत्सर्वं समाख्याहि यदि तुष्टोऽसि मे प्रभो ॥ ३ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व नरकान्व्यास यावन्तो यत्र संस्थिताः ॥ न लभ्यंते यथा चैते सत्यमेतद्वदामि ते ॥ ४ ॥ पातालनिलयाः सर्वे विख्याता दुःखदाः सदा ॥ पुण्यप्लावेन ते सर्वे तिर्यग्यांति स्वकर्मभिः ॥ ५ ॥ रौरवः सूकरो रौद्रस्तालो विनशकस्तथा ॥ तप्तकुम्भस्तु तप्तायो महाज्वालस्तथैव च ॥ ६ ॥ कुंभीपाकः क्रकचनस्तथा देवातिदारुणः ॥ कृमिभुक्तिश्च रक्ताख्यो लालाभक्षश्च गंडकः ॥ ७ ॥ अधोमुखश्चास्थिभंगो यंत्रपीडनकस्तथा ॥ संदंशो रुधिरांगश्च श्वभोज्यश्च कुभोजनः ॥ ८ ॥ इत्येवमादयः सर्वे नरका भृशदारुणाः ॥ यमस्य विषये संति स्तुता हि भयदायिनः ॥९॥ पतंति पुरुषास्तेषु पापकर्मरताश्च ये ॥ पतिताश्च प्रपच्यंते नराः कर्मानुरूपतः ॥१०॥ यातनाभिर्विचित्राभी रौद्रकर्म क्षयाद्भृशम् ॥ सुगाढं हस्तयोर्बद्धास्तप्तशृंखलया नराः ॥ ११ ॥ महावृक्षाग्रशृंगेषु लंब्यंते यमकिंकरैः ॥ शोचंतः स्वानि कर्माणि तूष्णीं तिष्ठंति निश्चलाः ॥ १२ ॥ अग्निवर्णैः शंकुभिश्च लोहदंडैः सकंटकैः॥ हन्यंते किंकरैर्घोरैः समंतात्पापकारिणः ॥ १३ ॥ तत्तत्क्षणात्प्रदीप्तेन वह्निना च विशेषतः ॥ समंततः प्रक्षिप्यंते कृत्ताश्च जर्जरीकृताः ॥ १४ ॥ कूटसाक्षी तथाऽसम्यक्पक्षपातेन यो वदेत् ॥ यश्चान्यदनृतं ब्रूयात्स नरो याति रौरवम् ॥ १५ ॥ सुरापो ब्रह्महा हर्ता सुवर्णस्य च सूचकः ॥ प्रयांति नरकांश्चैव तैः संसर्गमुपैति यः ॥ १६ ॥ भ्रूणहा गुरुहंता च गोघ्नश्च मुनिसत्तम ॥ यांत्येते नरकं रौद्रं ये च विश्वासघातकाः ॥ १७ ॥ तप्तलोष्ठेषु पच्यंते यस्तु भक्तं परित्यजेत् ॥ स्नुषां सुतां च यो गच्छेन्महाज्वाले स पात्यते ॥ १८ ॥ कुंभीपाके प्रयात्येव पादैरूर्ध्वैरधोमुखः ॥ करोति कर्म वै नित्यं यश्च गां प्रतिषेधयेत् ॥ १९ ॥ स्वामिद्रोही च यो रौद्रस्तप्तकुंभे स पात्यते ॥ देवदूषयिता यश्च वेदविक्रयिकस्तथा ॥ २० ॥ परस्त्रीगामिनो ये च यांति क्रकचने तु ते ॥ चौरोऽतिदारुणे याति मर्यादाभेदकस्तथा ॥ २१ ॥ देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥ स याति कृमिभक्षे वै रक्ताख्ये च पतंति ते ॥ २२ ॥ पितृदेवगुरूणां च सपर्यां न करोति यः ॥ लालाभक्षे स यात्युग्रे कूटकर्म करोति यः ॥ २३ ॥ अंत्यजेभ्यो ग्रहीता च नरके यात्यधोमुखे ॥ अस्थिभंगे प्रयात्येव एको मिष्टान्नभुङ्नरः ॥ २४ ॥ कृतघ्नः पिशुनः क्रूरः कूटमानी विडंबकः ॥ यंत्रपीडनके यांति परगुह्यप्रकाशकः ॥ २५ ॥ लाक्षामांसरसानां च तिलानां रसकस्य च ॥ विक्रयी ब्राह्मणो याति श्वदंशे नात्र संशयः ॥ २६ ॥ मधुहा ग्रामहंता च याति वैतरणीं नरः ॥ वर्णाश्रमविरुद्धं च कर्म कुर्वंति ये नराः ॥ २७ ॥ कर्मणा मनसा वाचा महानद्यां प्रयांति ते ॥ गुरूणामवमंता च शास्त्रदूषयिता च यः ॥ २८ ॥ असिपत्रे प्रयात्येव तथा पर्वविलंघकः ॥ धनयौवनमत्ता ये मर्यादाभेदिनो नराः ॥ २९ ॥ ते यांति नरके घोरे कृष्णसूत्रेऽतिदारुणे ॥ असंस्कृतश्च यो विप्रो वृषलीं सेवते तु वै ॥ ३० ॥ वृषलीमिथुनो यश्च पततस्तावुभावपि ॥ उच्छिष्टा ये स्पृशंतीह गावोऽग्निं जननीं द्विजान् ॥ ३१ ॥ ते पच्यंते कुभोज्ये च मित्रद्वेषी विशेषतः ॥ पंक्तिभेदे दिवास्वप्ने ये नरोऽब्रह्मचारिणः ॥ ३२ ॥ पुत्रैरध्यापिता ये वै ते पतंति श्वभोजने ॥ एते चान्ये च नरकाः शतशोऽथ सहस्रशः ॥ ३३ ॥ तत्र दुष्कृतकर्माणः पच्यंते यातनागताः ॥ नृणां स्वर्गाश्च यावंतस्तावंतो निरयास्तथा ॥ ३४ ॥ पापं कृत्वा तु बहुलं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रायश्चित्तमसङ्ख्याताः ॥ कृते पापे च वै तापो यस्य पुंसः प्रजायते ॥ ३५ ॥ प्रायश्चित्तं तु तस्यैकं शिवसंस्मरणं परम् ॥ तस्मादहर्निशं शंभुं संस्मरन्पुरुषोत्तमः ॥ ३६ ॥ न याति नरकं शुद्धः संक्षीणाखिलपातकः ॥ कार्तिकस्यासिते पक्षे कृष्णा या च चतुर्दशी ॥ तस्यां दीपः प्रदातव्यो देवदेवस्य चाग्रतः ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नरकऽकथनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ दीपेऽस्मिन्यत्फलं चास्ति विधिना येन दीयते ॥ तत्सर्वं ब्रूहि मे तात दीपोत्पत्तिं च शोभनाम् ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा कृतयुगे व्यास पार्वती शंकरोऽग्रतः ॥ अभिप्रयाचितुं यातस्तं यापि सोऽभियाचितः ॥ २ ॥ ॥ पार्वत्युवाच ॥ ॥ शरीरे कृष्णता शंभो ममास्ति रूपहारिणी ॥ तस्माद्याचे भृशं शंभो प्रसीद दिव्य लोचन ॥ ३ ॥ भवेन वर्णिता सा वै अतीव शोभना मम ॥ लोचने पक्ष्ममालायाः शोभसेऽतितरां सदा ॥ ४ ॥ सिताञ्जसंस्थितो भृंगो यथा शोभयते च तम् ॥ तया तथा याचितोसौ धूर्जटिर्वृषभासनः ॥ ५ ॥ विरूपरूपकर्तासि न शृणोपि वचो यदा ॥ तदा त्वद्दं सर्वे राग्या चरेयं दुष्करं तपः ॥ ६ ॥ भवस्तथेति चोक्तस्तु तस्या वै पाणिमग्रहीत् ॥ कदाचिच्छंकरो देवो रतिं याचितवान्प्रियाम् ॥ ७ ॥ रतिं दत्तवती सा तु जहास नाम कीर्तयन् ॥ सुदुःखिताऽभवत्सा तु पराङ्मुखी विहाय तम् ॥ ८ ॥ उवाच रोषसंयुक्ता संस्मृत्य देवभाषितम् ॥ तपोक्तिं व्रजाम्यद्य सुगौरत्वोपलब्धये ॥ ९ ॥ सुवर्णरूपरूपा च यदा पुनर्भवामि च ॥ तदा तव सानुरागा भवामि चैव नान्यथा ॥ १० ॥ इतीदमेव जल्पंती जगाम विंध्यपर्वतम् ॥ हरः शुशोच ततस्तां क्व गता सा विहाय माम् ॥ ११ ॥ स्मरंस्तदेव चेष्टितं तदेव पूर्वभाषितम् ॥ तदैव मे वृथा मतिर्भुवा यदा न मानिता ॥ १२ ॥ यतो मया हिमाद्रिजा समस्तलोकसुन्दरी ॥ पुरैव नाभिनंदिता गता विहाय मामिति ॥ १३ ॥ इती दमेव सोऽप्यक्षैस्तत्स्वदर्शनं ततः ॥ प्रियावियोगमीदृशं गुरुं न सोढुमुत्सहे ॥ १४ ॥ ततो जगद्धि संकुलं महाभयेन संयुतम् ॥ सुरासुरा महर्षयः परं विषादमभ्यगुः ॥ १५ ॥ विहाय मंदिराणि ते परं विषादमागताः ॥ हरस्तुतिं परां च ते प्रचक्रुरद्भुतोपमाः ॥ १६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ न हरकते यदा देवो रुद्रो बालेन्दुशेखरः ॥ नष्टालोकं जगत्सर्वं कांतारमभवत्तदा ॥ १७ ॥ त्रीणि नेत्राणि रुद्रस्य यतः सूर्येंदुवह्नयः ॥ गते रुद्रे न ते भोगि जगत्यस्मिंश्चराचरे ॥ १८ ॥ ततस्तमसि दुस्तारे संभूते लोमहर्षणे ॥ अन्योन्यं हि न पश्यंति सुरासुरास्तमोवृताः ॥ ॥ १९ ॥ एषा बुद्धिस्ततस्तेषामुत्पन्ना कार्यसिद्धये ॥ यया बुद्ध्या जगन्नाथो ज्ञायते पार्वतीपतिः ॥ २० ॥ न ह्यालोको विना तेन शशिसूर्याग्निचक्षुषा ॥ परम्परं ब्रुवंति स्म दुःखिनस्ते विसंज्ञया ॥ २१ ॥ हे देव हे मुने सिद्धे हे ऋषे हे निशाचर ॥ हे दैत्य हे दनुश्रेष्ठ हे मनुष्यनिदेशक ॥ ॥ २२ ॥ गतोऽसि कां दिशं तात को वा लब्धस्त्वया विभो ॥ क्वचिद्विश्रामभूमिस्ते क्वचिदालंबनेऽपि वा ॥ २३ ॥ पाथेयमस्ति किंचित्ते दिशि किं वाथ कुत्रचित् ॥ प्रकाशं वाहनं छत्रमन्नं शयनं गृहम् ॥ २४ ॥ क्वचिद्वासि कथं तोयमथवा चित्तनिर्वृतिः ॥ बन्धुः पुत्रोऽसि वा तात वृक्ष च्छाया सुशीतला ॥ २५ ॥ एवंप्रकारं करुणं समाभाष्य परस्परम् ॥ भूयश्चिन्तापराः सर्वे देवाश्चेंद्रपुरोगमाः ॥ २६ ॥ भूमेर्विवरमाश्रित्य प्राणिनो ये वसंत्यपि ॥ रसातले च दैतेयाः संस्थिताः पन्नगाश्च ये ॥ २७ ॥ न तेषां विद्यते सूर्यो नेन्दुर्नान्ये महाग्रहाः ॥ नाग्निर्नेत्रमुखं विद्युन्नैव तारकको ट्यः ॥ २८ ॥ केनालोकेन पश्यंति समानि विषमाणि च ॥ नरकस्था नरा लोके न पश्यंत्यन्यलोकगाः ॥ २९ ॥ विचरन्तः समं को वा मनो रथशतप्रदः ॥ तृष्णाभिःक्षुधितान्नं च श्रांतानामथ वाहनम् ॥ ३० ॥ समे शय्या जले नौश्च रोगे सत्परिचारकः ॥ श्रेष्ठौषधीभिः सन्मत्रैः संपदो व्याधिसंकटे ॥ ३१ ॥ सुहृद्विदेशे च्छायोष्णे निर्धूमः शिशिरे शिखी ॥ महाभये परित्राणं प्रकाशश्च महानिशि ॥ ३२ ॥ एतैर्दशैव सर्वेषां मनोरथशतप्रदः ॥ एक एव भवान्द्योतस्त्वां च जानीमहे वयम् ॥ ३३ ॥ ब्रुवंत इति ते व्यास शुश्रुवुर्मधुरां गिरम् ॥ श्रुतपूर्वां तमोमध्याद्विष्णोर तुलकर्मणः ॥ ३४ ॥ न जानंति स्थितः कुत्र भाषते केशवो विभुः ॥ शृणुध्वमिति मे वाक्यं सर्वे चैव समाहिताः ॥ ३५ ॥ दानमेकं सदा सम्य क्चिंतामणिसमं स्मृतम् ॥ सर्वेषामेव दानानां दीपदानं प्रशस्यते ॥ ३६ ॥ तच्च देयमतः सर्वैः शृणुध्वं तत्त्वतो भृशम् ॥ मया रसातले पूर्वं नागा नामनुकंपया ॥ ३७ ॥ उत्पादितो दीपवरो येन ध्वस्तमिदं तमः ॥ एवंभूतस्तु वायूनामग्रधृष्यो महाप्रभः ॥३८॥ निष्कंपो निर्मलो ह्यः सुस्थिरो भास्करप्रभः ॥ नात्युष्णो नातिशीतश्च देव्या योगसमुद्भवः ॥ तेन दीपप्रकाशेन गोकर्णो निर्वृतिं ययौ ॥ ३९ ॥ नागाः शेषादयः सर्वे नोद्यमानाश्च संघशः ॥ दीपादीपसहस्राणि ददुस्ते वै शिवाग्रतः ॥ ४० ॥ पर्वतेषु समुद्रेषु वनेदूषवनेषु च ॥ नदीतीरेषु सर्वत्र दीपान्प्रज्वाल्य रेमिरे ॥ ४१ ॥ भुंजानाः पञ्च मूलानि दिव्यानि क्षीरसंयुतम् ॥ परमान्नं च मांसानि मकरंदं घृतौदनम् ॥ ४२ ॥ चन्द्रशालिभवं भक्तं तांबूलं सप्तधा गतम् ॥ मद्यमष्टप्रकारं तु भार्यापीतावशेषकम् ॥ ४३ ॥ शयनेषु महार्हेषु ह्यासु वनराजिषु ॥ वृक्षमूलेषु सर्वेषु वनच्छायोपशोभिषु ॥ ४४ ॥ रमन्ते स्म च ते सर्वे ह्युद्वेष्टंतः परस्परम् ॥ कामतन्त्रोपदिष्टैस्तु शास्त्रैश्च चुंबनादिभिः ॥ ४५ ॥ सूर्यतापभयान्मुक्ताश्चंद्ररश्मिभयाच्च ते ॥ विमुक्ताश्च भयाद्घो रात्पिपीलिकोद्भवात्तथा ॥ ४६ ॥ सूर्यतापेन दाहः स्याच्छीतं चंद्रमरीचिभिः ॥ मयूरनकुलाद्यैश्च पिपीलीमरणाद्भयम् ॥ ४७ ॥ सौवर्णान्दीपका न्कृत्वा द्विजेभ्यस्ते ददुः पुनः ॥ तेन पातालमाश्रित्य कृत्वा भोगवतीं पुरीम् ॥ ४८ ॥ वसंति सुखिनस्तत्र स्वर्गादप्यगुणैः सुखैः ॥ एवमंधं तमो देवाः पातालादीपतो गतम् ॥ ४९ ॥ एतद्ब्रह्मं मया ख्यातं भवतां चानुकम्पया ॥ दीपदानमतो यूयं कुरुध्वं सुसमाहिताः ॥ ५० ॥ दीपाग्निना विना नैव तमोदारु प्रदह्यते ॥ नारायणपरा देवा निशम्याथ समाहिताः ॥ ५१ ॥ पप्रच्छुस्ते पुनः सर्वे हृष्टा दामोदरं विभुम् ॥ ब्रूहि नोग्निं जगन्नाथ स दीपो येन जायते ॥ ५२ ॥ घोरे तमसि वै मग्ना नाग्निं जानीमहे वयम् ॥ देवानां मानसो वह्निरथ कृष्णेन कीर्तितः ॥ ५३ ॥ तेन दीपं प्रतिज्वाल्य देवाः शिवपरायणाः ॥ ददुस्ते शिवमुद्दिश्य सर्वाभीष्टफलप्रदम् ॥ ५४ ॥ दत्ते दीपे ततो देवैर्दीप्तो हृष्टो महेश्वरः ॥ तिमिरं तद्गतं चापि जगद्येन जडीकृतम् ॥ ५५ ॥ ततो देवाः सुखं प्रापुः स्वर्गे सेन्द्रपुरोगमाः ॥ राज्यं भोगान्वितं प्राप्य सार्धं स्त्रीभिश्च रेमिरे ॥ ५६ ॥ दीपदा नफलं ज्ञात्वा दैतेयाश्चापि विस्मिताः ॥ तथैव तत्फलं ज्ञात्वा व्यास यक्षाश्च विस्मिताः ॥ ५७ ॥ पूजयित्वा महादेवं पुष्पैश्च निर्मलैर्जलैः ॥ ददुर्दीप सहस्राणि सर्वे शिवपरायणाः ॥ ५८ ॥ स्वस्थाने चाभवन्सर्वे दीपदानाच्च शोभनाः ॥ स्वेच्छया भुंजते भोगान्बन्धुभृत्यादिसंयुताः ॥ ५९ ॥ निराहारास्ततो व्यास पिशाचा वै निराश्रयाः ॥ दीपदानफलं ज्ञात्वा सर्वे तेऽतीव विस्मिताः ॥ ६० ॥ चंडालादग्निमानीय ददुर्दीपं शिवे रताः ॥ दीपदानफलं ते वै पुत्रदारसमन्विताः ॥ ६१ ॥ लीढमन्नं गतरसं पूति पर्युषितं तथा ॥ उच्छिष्टं सूतिकास्पृष्टं न मेध्यं चातिलंघितम् ॥ ६२ ॥ भुंजानास्ते सदा हृष्टा रमंते दुष्टभूमिषु ॥ विद्याधरास्तथा मर्त्याः सिद्धाश्च शिवमानसाः ॥ ६३ ॥ दीपदानफलं ज्ञात्वा ददुर्दीपं शिवाग्रतः ॥ दीप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दानात्ततः सर्वे सर्वभोगसमन्विताः ॥ ६४ ॥ स्थानेषु मुदितास्तेषु रमंते सुखिनस्तदा ॥ तिमिरं तद्गतं चैव व्यास लोकेषु दीपतः ॥ ६५ ॥ ततो घोरं स्थितं सम्यक्प्रेतलोकेषु सर्वदा ॥ प्रेतलोकं तदा दृष्ट्वा घोरेण तमसा वृताः ॥ ६६ ॥ दामोदरं जगन्नाथमूचुः सर्वे सुरोत्तमाः ॥ घोरं चैव तमो हत्वा प्रसन्नास्ते सदा विभो ॥ ६७ ॥ गंधर्वाश्च तथा यक्षाः सिद्धा विद्याधरोरगाः ॥ वयं चैव तथा मर्त्याः सर्वभोगैश्च संयुताः ॥ ॥ ६८ ॥ स्थानेषु च सदा ह्येषु सुखिनश्च रमामहे ॥ प्रेतलोके नरा ये वै घोरेण तमसा वृताः ॥ ६९ ॥ वसंति च जगन्नाथ वर्तंते तेऽतिदुःखिताः ॥ यैर्नो कृतं हि तत्कर्म कृष्णालं पापमोहितैः ॥ ७० ॥ न तेषां विद्यते किंचिद्यत्प्रकाशं करोति च ॥ घोरे तमसि ते मग्नास्तत्र नार्केन्दुवह्नयः ॥ ७१ ॥ न सहायो न जायेयं नालंबो न च देशिकाः ॥ न वाहनं न शय्या च केवलं तु महत्तमः ॥ ७२ ॥ तत्राष्टाविंशतिः ख्याता घोरा नरककोटयः ॥ तमोमयाश्च ताः सर्वाः पापिनां भयदाः सदा ॥ ७३ ॥ सुखं तत्र कथं कृष्ण लभंते दुःखिता नराः ॥ दारिद्र्यदुःखरोगैश्च मायामोहैश्च सर्वदा ॥ ७४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ इति श्रुत्वा तु देवानां प्रार्थनां गरुडध्वजः ॥ उवाच वचनं हृद्यं मनोरथफलप्रदम् ॥७५॥ शृणुध्वं त्रिदशाः सर्वे यत्प्रवक्ष्यामि वो वचः॥७६॥ अवंत्यां वर्तते तीर्थं सद्यः पापहरं परम् ॥ अनरकाख्यं महापुण्यं सर्वतीर्थोत्तमोत्तमम् ॥ ७७ ॥ कार्तिकस्यासिते पक्षे चतुर्दश्यां समाहितः ॥ तत्र स्नात्वा नरो यस्तु यमध्यानपरायणः ॥ ७८ ॥ संगृह्य वै तिलान्कृष्णान्पितृभक्तो जितेंद्रियः ॥ दक्षिणाभिमुखो भूत्वा मध्याह्ने सुरसत्तमाः ॥ ७९ ॥ अपसव्यं तथा कृत्वा मंत्रैः संतर्पयेद्यमम् ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ ८० ॥ वैवस्वताय कालाय दक्षाय मनवे तथा ॥ कृष्णाय कृष्णगुप्ताय प्रेतलोकपराय च ॥ ८१ ॥ हरये रविपुत्राय कालिंदीसोदराय च ॥ तथा वै श्राद्धदेवाय पितॄणां पतये तथा ॥ ८२ ॥ मंत्रैरेभिर्नमःप्रोक्तैरोंकाराद्यैः सुशोभनैः ॥ जलांजलिं सदर्भं वै दद्याच्च तिलसंयुतम् ॥ ८३ ॥ संतर्पयेद्यमं देवं तिलपात्रं समाहितः ॥ प्राज्ञो विप्राय वै दद्याद्वित्तशाठ्यविवर्जितः ॥ ८४ ॥ अनेन विधिना यस्तु संतर्पयेद्यमं विभुम् ॥ पितरस्तस्य मुच्यंते निरये ये गता अपि ॥ ८५ ॥ रात्रिं तत्राथ संप्राप्य मानवः क्रमसंयुतः ॥ नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे ॥ ८६ ॥ नमः सूर्याय रुद्राय कालांतपतये नमः ॥ एभिर्मंत्रैर्यमे दीपं यो दद्याद्घृतपूरितम् ॥ ८७ ॥ कार्तिकं हि समग्रं तु वर्धंते तस्य संपदः ॥ संपूर्णे कार्तिके चैव दीपोद्यापनमाचरेत् ॥ ८८ ॥ दिवाकराह्नेऽस्तमिते च सूर्ये दीपस्य वर्त्तिं पुरुषप्रमाणाम् ॥ यूपाकृतौ दारुमये करोति यथा च धीमान्यमभक्तिचित्तः ॥८९॥ निक्षिप्य भूमावथ हस्तमात्रं मूर्ध्नि द्विहस्ताष्टदलान्वितस्य ॥ धार्याश्च तस्रः शुभपट्टिकाश्च च्छिद्रेण युक्ताश्चतुरंगुलेन ॥ ९० ॥ तत्कर्णिकायां तु महाप्रकाशो देयो हि दीपः परया च भक्त्या ॥ उदङ्मुखान्दीपवरांस्तथाष्टौ दलेषु तस्या घृतपूर्यमाणाः ॥ ९१ ॥ अनंगलग्नं धवलं च वस्त्रं नवं सुरक्तं ह्यथवा सुशुक्लम् ॥ वर्त्यां प्रदेयं च स्वके च दद्यात्स्निग्धे त्वखण्डे सुसमे प्रशस्ते ॥ ९२ ॥ तच्छालिपिष्टोपरि संनिधाय यथा न निर्याति न कंपते च ॥ सर्वं प्रकुर्यात्त्रिगुणप्रमाणं मध्यस्थितस्तस्य च दीपराजः ॥ ९३ ॥ दलेषु शोभार्थमतीव कुर्यान्मनोरथप्रत्युपलब्धये च ॥ घंटाष्टकं लंबितपुष्पदाम सवस्त्रशोभान्वितमत्र कार्यम् ॥ ९४ ॥ संलिप्य भूमिं त्वथ गोमयेन पुनः सुगंधेन जलेन लिप्त्वा ॥ कुर्याद्विचित्रं त्वथ मंडले च दलाष्टकं वै कमलं च रम्यम् ॥ ९५ ॥ ततो जलं शीतलमानयित्वा आपूर्य चाष्टौ कलशांस्तु रम्यान् ॥ निधाय मूर्ध्नि क्रमशो हि धीमान्फलानि मूलानि तथेक्षुकानि ॥ ९६ ॥ मध्वाज्ययुक्ता दधिदुग्धपूर्णा नैर्ऋत्यकोणादथ दक्षिणांतम् ॥ धर्माय दद्यादथ शंकराय दामोदरायाप्यथ वेधसे च ॥९७॥ प्रजापतिभ्यः क्रमशो हि भक्त्या प्रेतेभ्य इंद्राय तथा पितृभ्यः ॥ होमादिपात्रं तिलचूर्णमेव दद्याद्द्विजानां च सदक्षिणं च ॥ ९८ ॥ गावो हिरण्यं रजतं च वस्त्रं फलानि मूलानि यवाश्च धान्यम् ॥ गृहं रथं कुंजरमश्वमेव मनोज्ञमन्यं हृदयप्रियं यत् ॥ ९९ ॥ विद्याधिकेभ्यो द्विजसत्तमेभ्यः पौराणिकेभ्यश्च तथा द्विजेभ्यः ॥ एकैकसुप्रीणनमत्र कुर्याद्दीपैर्दलस्थैश्च यमादिकानाम् ॥ १०० ॥ धर्माय देयस्त्वथ मध्यदीप आज्ञां च लब्ध्वा व्रतदेशिकस्य ॥ नृत्येन गीतेन सुशोभनेन युक्तं सुवाद्येन च कारयेच्च ॥ १ ॥ एतत्समग्रं विधिवच्च कुर्यात्स्वशक्तिमादौ स्वधनं समीक्ष्य ॥ आहूय विप्राञ्छुभभावयुक्तान्वदेच्च धीमान्परया च भक्त्या ॥ २ ॥ दीपान्समग्रान्नव वर्जयित्वा सर्वं नयेयुः स्थितमत्र विप्राः ॥ प्रदक्षिणीकृत्य विसृज्य विप्रांस्ततो भवेद्वै स च नक्तभोजी ॥ ३ ॥ एवंकृते नागलोकाद्विशिष्टं सुखं भवेत्प्रेतलोके स्थितानाम् ॥ ४ ॥ एवं ह्यनरके व्यास दीपदानं करोति यः ॥ तस्यैव यत्फलं प्रोक्तं तदिहैकमनाः शृणु ॥ ५ ॥ विमानैः कामिकैर्दिव्यैरप्सरोगणसेवितैः ॥ उह्यमानो दिवं याति यावच्चंद्रदिवाकरौ ॥ १०६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽनरकेश्वरदीपदानमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि केदारेश्वरमुत्तमम् ॥ प्रवरं सर्वतीर्थानां त्रिषु लोकेषु विश्रुतम् ॥ १ ॥ तत्र स्नात्वा शुचिर्भूत्वा यः पश्यति महेश्वरम् ॥ केदारे यत्फलं प्रोक्तं तदत्रापि लभेन्नरः ॥ २ ॥ सर्वपापविनिर्मुक्तः स्वकीयकुलसंयुतः ॥ विमानेनार्कवर्णेन शिवलोके स मोदते ॥ ३ ॥ जटाशृंगे नरः स्नात्वा शुचिर्भूत्वा जितेंद्रियः ॥ दृष्ट्वा जटेश्वरं देवं ततः पापाद्विमुच्यते ॥ ४ ॥ महातपनमादौ च कृत्वा गच्छेच्छिवं प्रति ॥ मातृकं पितृकं चैव कुलानां तारयेच्छतम् ॥ ५ ॥ इंद्रतीर्थे नरः स्नात्वा दृष्ट्वा चेंद्रेश्वरं शिवम् ॥ विमुक्तः सर्वपापेभ्यः शक्रलोके महीयते ॥ ६ ॥ कुंडेश्वरं तु यः पश्येच्छिवध्यानपरायणः ॥ लभते स नरो व्यास शिवदीक्षाफलं शिवम् ॥ ७ ॥ गोपतीर्थे नरः स्नात्वा दृष्ट्वा गोपेश्वरं शिवम् ॥ शिवलोकं नरो याति ह्यमृतादमरो यथा ॥ ८ ॥ स्नात्वा तु चिपिटातीर्थे शिवं देवं प्रणम्य च ॥ तिर्यग्योनिं नरो नैव प्रयाति मुनिपुंगव ॥ ९ ॥ विजये च नरः स्नात्वा आनंदेश्वरपूजनात् ॥ विमुक्तः सर्वपापेभ्यः स्वर्लोके विजयी भवेत् ॥ १० ॥ अथान्यं संप्रवक्ष्यामि कुशस्थल्यां विनिर्मितम् ॥ देवं रामेश्वरं व्यास भुक्तिमुक्तिप्रदायकम् ॥ ११ ॥ चित्रकूटात्पुरा रामो मैथिल्या लक्ष्मणेन च ॥ समन्वितः समागत्य पप्रच्छ मुनिसत्तमम् ॥ १२ ॥ ॥ राम उवाच ॥ ॥ कानि तीर्थानि पुण्यानि किं वा क्षेत्रं महामुने ॥ यत्र गत्वा न चाप्नोति वियोगं सह बांधवैः ॥ १३ ॥ अनेन वनवासेन मरणेन पितुः प्रभो ॥ भरतस्य वियोगेन प्रतप्येऽहं त्रिभिर्मुने ॥ १४ ॥ तद्वाक्यं राघवेणोक्तं श्रुत्वा विप्रर्षभस्तदा ॥ ध्यात्वा तु सुचिरं कालमिदं वचनमब्रवीत् ॥ १५ ॥ साधु पृष्टं त्वया वीर रघूणां वंशवर्धन ॥ मम पित्रा कृतं क्षेत्रं प्रयाच्य शिवमादरात् ॥ १६ ॥ अवंतीविषये राम पुरी तस्मिन्कुशस्थली ॥ उज्जयिनीति वै नाम्ना ख्यातिं लोके गता विभो ॥ १७ ॥ तस्यां गत्वा दशरथं पिंडदानेन तर्पय ॥ सुरासुरगुरुस्तत्र महाकालो व्यवस्थितः ॥ १८ ॥ देवः स वै सदा राजन्वांछितार्थफलप्रदः ॥ दृष्टे तस्मिञ्जगन्नाथे वियोगो नैव जायते ॥ १९ ॥ तत्र गच्छंति ये विप्रा राजा चैव महाबलः ॥ लभंते परमं स्थानं यत्र देवो महेश्वरः ॥ २० ॥ तीर्थानामपि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत्तीर्थं प्रविष्टोऽन्तिमंडले ॥ आजगाम ततोवंतां सा शिप्रा यत्र पुण्यदा ॥ २१ ॥ तस्यां स्नात्वा ततो रामस्तर्पयामास पूर्वजान् ॥ महाकालं यदा द्रष्टुं प्रतस्थे रघुनंदनः॥२२॥ वाण्या ततोऽशरीरिण्या देवदेवेन भाषितम् ॥ भोभो राघव भद्रं ते स्वनाम्ना स्थापयस्व माम् ॥२३॥ अत्र स्थानं मया दत्तं मा विचारय राघव ॥ ततो हृष्टमना रामो लक्ष्मणं वाक्यमब्रवीत् ॥ २४ ॥ अनुगृहीताः सौमित्रे देवदेवेन शंभुना ॥ तस्मात्स्थापय तीर्थेऽस्मिँ ल्लिंगं रामेश्वरं शुभम् ॥ २५ ॥ वाक्यं तल्लक्ष्मणः श्रुत्वा स्थापयामास शंकरम् ॥ दृष्ट्वा देवं पुरा रामो लक्ष्मणं वाक्यमब्रवीत् ॥ २६ ॥ एहि लक्ष्मण शीघ्रं त्वं शिप्राया जलमानय ॥ करिष्यामि यतोऽद्याहं देवस्य स्नपनं शुभम् ॥ २७ ॥ लक्ष्मणस्त्वब्रवीद्वाक्यं सीतया किं करिष्यसि ॥ राम नाहं सर्वकालं दासभावं करोमि ते ॥ २८ ॥ इयं च पुष्टा सुदृढा पीवरा च ममाग्रतः ॥ वद राघव सत्येन अनया किं करिष्यसि ॥ २९ ॥ श्रुत्वा रामो हि तद्वाक्यं लक्ष्मणेन प्रभाषितम् ॥ विमना राघवस्तस्थौ सीता चापि वरानना ॥ ३० ॥ यदुक्तं लक्ष्मणेनाथ तच्च सीता चकार ह ॥ स्नात्वा भुक्त्वा च तौ वीरौ महाकालमुपागतौ ॥ ३१ ॥ नीत्वा विभावरीं तत्र गमनाय मनो दधे ॥ उत्तिष्ठ वत्स सौमित्रे व्रजामोः दक्षिणां दिशम्॥ ॥ ३२ ॥ सौमित्रिरब्रवीद्वाक्यं नाहं गन्ता कथंचन ॥ व्रज त्वमनया सार्धं भार्यया कमलेक्षण ॥ ३३ ॥ नाहमग्रे वनं यामि न वायोध्यां कथंचन ॥ एवं ब्रुवाणं सौमित्रिमुवाच रघुनंदनः ॥ ३४ ॥ कथं पूर्वमयोध्याया निर्गतोऽसि मया सह ॥ वने वसाम्यहं राम नव वर्षाणि पंच च ॥ ३५ ॥ प्रसादः क्रियतां मह्यं नय मामपि राघव ॥ इदानीं त्वमर्धपथे कथं स्थातासि शत्रुहन् ॥ ३६ ॥ लक्ष्मणस्त्वब्रवीद्राम नाहं गन्ता वनं पुनः ॥ लक्ष्मणं विकृतं ज्ञात्वा रामो वचनमब्रवीत् ॥ ३७ ॥ मा माऽनुव्रज सौमित्रे ह्येको यास्यामि काननम् ॥ द्वितीयापि त्वियं सीता उक्तो रामेण लक्ष्मणः ॥ ३८ ॥ धनुः संगृह्य विमना उत्तस्थौ लक्ष्मणस्तदा ॥ प्राप्तौ प्राकारमर्यादां क्षेत्रसीमां परंतपौ ॥ ३९ ॥ क्षेत्रसीमां समुल्लंघ्य रामो लक्ष्मणमब्रवीत् ॥ ४० ॥ निवर्तयस्व सौमित्रे समर्पय च मे धनुः ॥ रामवाक्यमुपश्रुत्य सीतां वै लक्ष्मणोऽब्रवीत् ॥ ४१ ॥ किमर्थं हि परित्यक्तः कोऽपराधः कृतो मया ॥ रामेण हि परित्यक्तः प्राणांस्त्यक्ष्याम्यसंशयम् ॥ ४२ ॥ रामं ततोऽब्रवीत्सीता किमर्थं लक्ष्मणस्त्वया ॥ देव संत्यज्यते वीरः सुमित्रानंदिवर्धनः ॥ ४३ ॥ राघवस्त्वब्रवीत्सीतां नाहं त्यक्ष्यामि लक्ष्मणम् ॥ न कदाचिदपि स्वप्ने लक्ष्मणसदृशं प्रियम् ॥ ४४ ॥ श्रुतपूर्वं तु सुश्रोणि क्षेत्रस्यास्य विचेष्टितम् ॥ अस्मिन्क्षेत्रे न सौभ्रात्रं सर्वो हि स्वार्थतत्परः ॥ ४५ ॥ परस्परं न मन्यंते स्वार्थनिष्ठैकहेतवः ॥ न शृण्वंति पितुः पुत्राः पुत्राणां वा तथा पिता ॥ ४६ ॥ न च शिष्यो गुरोर्वाक्यं गुरुर्वा शिष्यकर्म च ॥ अर्थानुबंधिनी प्रीतिर्न कश्चित्कस्यचित्प्रियः ॥४७॥ एवमुक्ता ययौ रामो लक्ष्मणो जानकी तथा ॥ लिंगं तत्र प्रतिष्ठाप्य स्वनाम्ना रघुनंदनः ॥४८॥ रामतीर्थे नरः स्नात्वा दृष्ट्वा रामेश्वरं शिवम् ॥ विमुक्तः सर्वपापेभ्यः शिवलोकं स गच्छति ॥४९॥ ॥ इति रामेश्वरमाहात्म्यम् ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थे सौभाग्यके स्नात्वा दृष्ट्वा सौभाग्यमीश्वरम् ॥ सर्वपापविनिर्मुक्तः सौभाग्यं परमं लभेत् ॥ ५० ॥ घृततीर्थे नरः स्नात्वा घृतेन स्नापयेच्छिवम् ॥ घृतमग्रावथो हुत्वा रुद्रलोके महीयते ॥५१॥ देवीं योगीश्वरीं पूज्य सुरासुरनमस्कृताम् ॥ सर्वपापविनिर्मुक्तः परं योगमवाप्नुयात् ॥५२॥ शंखावर्ते नरः स्नात्वा सर्वपापविवर्जितः ॥ धनधान्यसमायुक्तो जायते निर्मले कुले ॥ ५३ ॥ सुधोदके चतुर्दश्यां मुक्त्यर्थं स्नापयेन्नरः॥शिवं सुधेश्वरं दृष्ट्वा ततो मोक्षगतिर्भवेत् ॥५४॥ तथान्यत्संप्रवक्ष्यामि तीर्थं त्रैलोक्यविश्रुतम् ॥ किंपुनेति च विख्यातं ब्रह्महत्याविमोचनम् ॥५५॥ पूर्वं त्रेतायुगे व्यास सुनेत्रोनाम वै द्विजः ॥ तस्य पुत्रः समुत्पन्नो विश्वावसुरिति स्मृतः ॥५६॥ यवक्रीतस्य शापेन स्वपिता तेन घातितः ॥ ब्रह्महत्यान्वितो व्यास तीर्थात्तीर्थं परिभ्रमन् ॥५७॥ तीर्थे किंपुनके स्नात्वा धारातीर्थे गतो द्विजः ॥ ततः कपिलधारायां चिंतयत्यात्मना स्वयम् ॥ ५८ ॥ कथं मे पतिता धारा अनृता वा श्रुतिस्तथा ॥ एवं ह्यचिंत यत्सोऽथ पुनरायादवंतिकाम् ॥ ५९ ॥ अत्र तीर्थे पुनः स्नाति यावद्वाणीं ततोऽशृणोत् ॥ किं पुनर्ध्यायसि ब्रह्मन्येन जातो द्विजोत्तमः ॥ ६० ॥ न तेऽस्ति ब्रह्महत्या वै तीर्थस्नानेन नाशिता ॥ गच्छ शीघ्रं गृहं विप्र पापहीनो यथासुखम् ॥ ६१ ॥ ॥ इति किंपुनामाहात्म्यम् ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुनरन्यत्प्रवक्ष्यामि पत्तनेश्वरमुत्तमम् ॥ तत्र स्थित्वा महेशेन पुनः पत्तनमीक्षितम् ॥ ६२ ॥ पत्तनेश्वर इत्याख्यो देवदेवो महेश्वरः ॥ यस्तु गंधैश्च पुष्पैश्च धूपैर्दीपैर्मनोरमैः ॥ ६३ ॥ भावयुक्तो नरो व्यास पूजयेद्विधिवत्सदा ॥ यथावत्तिष्ठते लिंगं वंशश्छेदो न जायते ॥ ६४ ॥ हंसयुक्तेन यानेन शिवलोकं स गच्छति ॥ तथान्यत्संप्रवक्ष्यामि तीर्थं त्रैलोक्यविश्रुतम् ॥ ६५ ॥ दुर्धर्षमिति विख्यातं ब्रह्महत्याविमोचनम् ॥ पुरा दिवाकरो व्यास चक्रे दुर्धर्षनामतः ॥ ६६ ॥ तीर्थमासीन्नदीतीरे विख्यातं सूर्यसंस्कृतम् ॥ तेजःपुंजं भवेल्लिंगं गणगंधर्वपूजितम् ॥ ६७ ॥ सप्तम्यामथवाष्टम्यां संक्रांतौ रविवासरे ॥ तत्र स्नात्वा शुचिर्भूत्वा दिनमेकमुपोषितः ॥ ६८ ॥ दृष्ट्वा महेश्वरं तत्र शिप्राकूले व्यवस्थितम् ॥ पूजयित्वा तु भावेन यत्फलं तच्छृणुष्व मे ॥ ६९ ॥ पितृमातृकुलं सर्वं समुद्धृत्य शिवं व्रजेत् ॥ तत्र यच्छति यो दानं गोहेमादि विशेषतः ॥ ७० ॥ तावत्तदक्षयं लोके यावच्चंद्रदिवाकरौ ॥ तथान्यत्संप्रवक्ष्यामि गोपींद्रं तीर्थमुत्तमम् ॥ ७१ ॥ गौतमेन पुरा यत्र इन्द्रः शापाद्गोकृतः ॥ भगत्रीडायुतः शक्रः प्रविश्य वनमुत्तमम् ॥ ७२ ॥ अतोपयत्तदोग्रेण तपसा शंकरं पुरा ॥ तुष्टेन शंभुना विप्र ये भगास्तच्छरीरगाः ॥ ॥ ७३ ॥ गोसहस्रीकृतास्तेन गोपींद्रस्तेन कथ्यते ॥ तत्र स्नात्वा दिवं याति शक्रतुल्यपराक्रमः ॥ ७४ ॥ ये मृतास्ते पुनर्जन्म नाप्नुवंति महीतले ॥ गंगातीर्थे नरः स्नात्वा पुण्यमाप्नोति पुष्कलम् ॥ ७५ ॥ ज्येष्ठशुक्लदशम्यां तु गंगायां फलमादिशेत् ॥ स्नात्वा पुष्पकरंडे च दृष्ट्वा पुष्पकरण्डकम् ॥ ७६ ॥ पुष्पकेन विमानेन प्रयातो दिवि मोदते ॥ नरकादुद्धरत्याशु नरः स्नात्वोत्तरेश्वरे॥७७॥ इष्टभोगसमापन्नो याति स्वर्गं न संशयः ॥ भूतेश्वरे नरः स्नात्वा भूतेश्वरमथार्चयेत् ॥ ७८ ॥ गंधपुष्पादिनैवेद्यैर्भृतो रुद्रपरं व्रजेत् ॥ शिप्रायां तु नरः स्नात्वा कैलासं तु नमस्यति ॥ ७९ ॥ सूर्याऽऽइतं तमो यद्वत्तद्वत्पापं प्रणश्यति ॥ अंबालिकां च यः पश्येत्समाधिनियमेन च ॥ ८० ॥ स मुक्तः सर्वपापेभ्यः कंचुकेन फणी यथा ॥ घण्टेश्वरं प्रवक्ष्यामि यत्सुरैरपि पूजितम् ॥ ८१ ॥ यत्र कूपे एकं पीत्वा सौभाग्यमतुलं लभेत् ॥ अर्चयेद्यस्तु देवेशं गंधपुष्पैरनुक्रमात् ॥ ८२ ॥ शिवलोके वसत्यावद्यावदिंद्राश्चतुर्दश ॥ पुण्येश्वरं तु यः पश्येच्छुचिः स्नातो जितेन्द्रियः ॥ ८३ ॥ स गाणपत्यमाप्नोति यत्सुरैरपि दुर्लभम् ॥ लंपेश्वरे नरः स्नात्वा समभ्यर्च्य महेश्वरम् ॥८४॥ न याति नरकं मर्त्यः स्वर्गलोके महीयते॥तथान्यत्संप्रवक्ष्यामि यत्सुरैरपि दुर्लभम् ॥८५॥ पूजितं ब्रह्मणा पूर्वं स्थविरास्यं विनायकम् ॥ तत्र स्नात्वा शुचिर्भूत्वा पूजयेद्यो विनायकम्॥८६॥गंधैर्धूपैश्च नैवेद्यैर्भक्ष्यैर्भोज्यैः फलं शृणु ॥ समीहिता भवेत्तस्य द्विर्नृतः शिवपुरं व्रजेत् ॥८७॥ नवनद्याः समीपे तु पार्वतीं पूजयेद्यदि ॥ गंधपुष्पैश्च धूपैश्च सौभाग्यमतुलं लभेत् ॥८८॥ कामोदके नरः स्नात्वा दृष्ट्वा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कामं रतिप्रियम् ॥ स्वर्गे च देवगंधर्वस्पृहणीयवपुर्भवेत् ॥८९॥ प्रयागे तु नरः स्नात्वा प्रयागेशं तु पश्यति ॥ सर्वलोकानतिक्रम्य शिवलोके महीयते ॥ ९० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये सौभाग्येश्वरादिनानातीर्थमाहात्म्यवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि नरादित्यं दिवाकरम् ॥ यस्य दर्शनमात्रेण सर्वरोगैर्विमुच्यते ॥ १ ॥ स्थापनां ते प्रवक्ष्यामि नरादित्यस्य यादृशी ॥ युद्धे निवारिते तस्मिन्रक्तस्वेदजयोः पुरा ॥ २ ॥ नरनारायणौ देवाववतीर्णौ धरातले ॥ कुंत्यां देव्यां च देवक्यां मथुरायामजायताम् ॥ ३ ॥ एवं तौ वर्तितौ लोके कांतौ वृद्धिं परां गतौ ॥ अन्यस्मात्कारणात्कृष्णोऽन्यस्माज्जातो धनंजयः ॥ ४ ॥ कंसादीन्दानवान्सर्वान्निजघान रणे हि सः ॥ स्वर्गं गतस्ततः पार्थो वासवादस्त्रसिद्धये ॥ ५ ॥ कृतास्त्रेण तु वीरेण देवराजस्य दक्षिणा ॥ संस्तुता देवराजस्तु ययाचे तां हि दक्षिणाम् ॥ ६ ॥ निवातकवचा ह्युग्रा हिरण्यपुरवासिनः ॥ वध्यंतामर्जुन क्षिप्रमेषा मे गुरुदक्षिणा ॥ ७ ॥ अर्जुनेन प्रतिज्ञातो वधस्तेषां दुरात्मनाम् ॥ ऐंद्रं स रथमास्थाय गृहीत्वा सशरं धनुः ॥ ८ ॥ निहत्य तांस्ततः पार्थः कृत्वा कर्म सुदुष्करम् ॥ प्रीतिमुत्पादयामास सर्वेषां च दिवौकसाम् ॥ ९ ॥ कृतकार्यं तदा शक्रस्तमर्जुनं वाक्यमब्रवीत् ॥ यत्तेऽभिरुचिरं वीर मृत्युलोके सुदुर्लभम् ॥ १० ॥ मनसा कांक्षितं पार्थ वरं त्वं वरयोत्तमम् ॥ स वव्रे प्रतिमे द्वे तु येऽर्चिते ब्रह्मणा स्वयम् ॥ ११ ॥ ब्रह्मणा प्रीतियुक्तेन दक्षाय प्रतिपादिते ॥ दक्षेणापि युगं साग्रं पूजिते तिमिरापहे ॥ १२ ॥ सुराणामसुराणां च विग्रहे समुपस्थिते ॥ दानवैर्निर्जितः शक्रो हृतराज्यो वनं गतः ॥ १३ ॥ तपश्चचार दुर्धर्षमेकपादः शतक्रतुः ॥ दिव्यवर्षसहस्रं तु धिषणस्तं ददर्श ह ॥ १४ ॥ दृष्ट्वा तु देवराजं तं बृहस्पतिरुवाच ह ॥ हित्वा त्रिदिवमायातः कथं शक्र त्विदं वनम् ॥ १५ ॥ एकाकिना वनस्थेन न साध्याः शत्रवस्त्वया ॥ ज्ञात्वैवं देवराज त्वं शीघ्रं दशाश्रमं व्रज ॥ १६ ॥ पूजार्थे ब्रह्मणा दत्ते पारिजातसमुद्भवे ॥ चकार विश्वकर्मा ये ते याचस्व प्रजापतिम् ॥ १७ ॥ शत्रूणां च क्षयो भावी प्रसादादर्चयोस्तयोः ॥ गुरोस्तु तेन वाक्येन हृष्टो देवः शतक्रतुः ॥१८॥ जगाम सत्वरस्तत्र यत्र दक्षः प्रजापतिः ॥ विनयावनतो भूत्वा ययाचे प्रतिमे शुभे ॥ ददौ तस्मै ततो दक्षः शक्राय प्रतिमे शुभे ॥ १९ ॥ पूजिते प्रतिमे व्यास शक्रेण शरदां शतम् ॥ तयोस्तु तेजसा सर्वे विनाशं दानवा गताः ॥ २० ॥ प्रतिमे चोचतुः शक्रं वरयस्व वरोत्तमम् ॥ भक्त्यानया परं तुष्टावावां जानीहि वासव ॥ २१ ॥ वरं वव्रे तदा शक्रः प्रसन्नात्मा द्विजोत्तम ॥ अस्माकं प्रतिपन्ना ये दानवाः पापचेतसः ॥ २२ ॥ सर्वे ते नाशमृच्छंतु वर एष मतो मम ॥ युवां पूजितुमिच्छामि यावदिंद्रो भवाम्यहम् ॥ २३ ॥ तथेति चोक्त्वा प्रतिमे ते नाकं प्रति जग्मतुः ॥ तत्तु याचे ह्यवश्यार्थे वरार्थे प्रतिमाद्वयम् ॥ २४ ॥ ॥ इंद्र उवाच ॥ ॥ साधु पार्थ पुनः साधु यत्रेत्थं प्रतितिष्ठतः ॥ इमे च प्रतिमे पार्थ शंकरेण महात्मना ॥ २५ ॥ सुरक्तैः शतपत्रैश्च पूजिते ब्रह्मणो दिनम् ॥ त्रैलोक्यपालनार्थाय पूजिते विष्णुना पुरा ॥ २६ ॥ नीलोत्पलैः सुगंधैश्च सहस्रपरिवत्सरान् ॥ ततः प्रजापतिः सृष्टिं कर्तुकामः समाहितः ॥ २७ ॥ पूजयामास प्रतिमे पद्मै रक्तोत्पलैः शुभैः ॥ त्वमेव हि कथं पार्थ मृत्युलोके नयिष्यति ॥ २८ ॥ एताभ्यां रहितः स्वर्गो मृत्युतुल्यो भविष्यति ॥ अदातुकामं देवेंद्रं प्रणिपत्य तमर्जुनः ॥ २९ ॥ उवाच नाहमर्थ्यस्मिन्वरेणानेन वै प्रभो ॥ ततः शक्रः पुनः पार्थमुवाच मुनिपुंगव ॥ ३० ॥ गृहीत्वा त्वमिमे वीर कुशस्थल्यां निवेशय ॥ शिप्राया उत्तरे तीरे केशवार्कं तु केशवः ॥ ३१ ॥ प्रतितिष्ठति वै यत्र सर्वपापप्रणाशनः ॥ संस्थापयस्व वै तत्र सर्वपापप्रणाशने ॥ भविष्यति तदा यात्रा आषाढी चाथ कौमुदी ॥ ३२ ॥ आगमिष्याम्यहं तत्र सहितोऽप्सरसां गणैः ॥ मरुतश्चागमिष्यंति मेघाश्चैव सविद्युतः ॥ ३३ ॥ मेघखण्डे समुद्भूते मयि तत्र प्रवर्षति ॥ प्रवदिष्यंति वै लोकाः प्राप्तो देवः पुरंदरः ॥ ३४ ॥ भास्करं च नमस्कृत्य ब्रह्माद्यैः पूजितं विभुम् ॥ प्रतियामि तु बीभत्सो पुनरेव यथागतम् ॥ ३५ ॥ एवं मूर्तिद्वयं व्यास दत्त्वा पार्थाय वासवः ॥ भूर्लोकं प्रेषयामास सूतेन सह पांडवम् ॥ ३६ ॥ नारदो द्वारकायां तु कृष्णस्याह्वानकारणात् ॥ देवराजस्य तद्वाक्यं सरहस्यं च केशवम् ॥ ३७ ॥ श्रावयामास विप्रेंद्र एहि कृष्ण कुशस्थलीम् ॥ अर्च्चे हि पारिजातस्य विश्वकर्मसुकारिते ॥ ३८ ॥ इंद्रेणाथ प्रदत्ते वै ते तुभ्यं पांडवाय च ॥ श्रुत्वा शौरिस्तु तद्वाक्यं प्रतस्थेऽवंतिनीं पुरीम् ॥ ३९ ॥ अवातरच्च आकाशात्तमालिंग्य च पांडवम् ॥ प्रीतः प्रोवाच वचनं परिष्वज्य च फाल्गुनम् ॥ ४० ॥ जन्म मे सफलं जातं प्रीतिर्मे जनितार्जुन ॥ यतो मे प्रीतिरतुला क्रियतां कार्यमुत्तमम् ॥ ॥ ४१ ॥ इत्युक्त्वा तौ तदा व्यास समायातौ कुशस्थलीम् ॥ पार्थं प्राह तदा कृष्णः सुसंपूर्णमनोरथः ॥ ४२ ॥ गत्वार्जुन दिशं प्राचीं मूर्तिमेकां निवेशय ॥ पूर्वाह्णे हि शुभं लग्नं भविष्यति मनोरमम् ॥ ४३ ॥ अहमप्युत्तरां यामि स्थापनार्थं नदीं मुने ॥ मम शंखस्य नादेन प्रतितिष्ठ रविं प्रभुम् ॥ ४४ ॥ पूर्वां गत्वा ततः पार्थ शुभं स्थानं व्यलोकयत् ॥ व्यास संस्थापयामास दिननाथं च सुस्थिरम् ॥ ४५ ॥ अर्कं देवं स्थापयामि यावद्दध्यौ च पांडवः ॥ तावत्स चाब्रवीदेनं स्थानं कारय शोभनम् ॥ ४६ ॥ कथयामास पार्थाय तेजसा तेन दुःसहम् ॥ सव्यसाची ततो भीतो दृष्ट्वार्चां तां प्रजल्पतीम् ॥ ४७ ॥ तेजस्त्वसहमानो वै देवं वचनमब्रवीत् ॥ क्व देव त्वां स्थापयामि किं स्थानं तव रोचते ॥ ४८ ॥ सौम्यरूपः सुदर्शश्च प्रजाभ्यो भव गोपते ॥ दिवि संस्थाश्च ये देवा नागाः पातालसंश्रयाः ॥ ४९ ॥ भुविस्था मानवाः पूता भवंतु तव दर्शनात् ॥ सोऽर्जुनमब्रवीद्देवो मा भैस्त्वं मम दर्शनात् ॥ ५० ॥ दक्षिणेन करेणाथ ह्यभयेनाभयप्रदः ॥ समाश्वास्याथ तं शांतं सौम्यमूर्तिर्बभूव ह ॥ ५१ ॥ प्रभाकरेण देवेन निजं तेजः प्रदर्शितम् ॥ ततः सूर्योऽब्रवीत्स्थानमेतदेवाचलं मम ॥ ५२ ॥ प्राप्ते लग्ने च हरिणा शंखश्चापूरितो महान् ॥ नरेण च स वै सूर्यः स्थापितोऽमरसंस्तुतः ॥ ५३ ॥ ॥ अर्जुन उवाच ॥ ॥ जयति किरणमाली भासुरः श्रांतसप्तिः सकलभुवनधामा प्राग्दिगंताट्टहासः ॥ भवति विगतपापं कीर्तनादेव यस्य प्रचुरकलुषदोषैर्ग्रस्तमंगं नराणाम् ॥ ५४ ॥ ब्रह्माद्यैर्मुनिभिरभिष्टुतं पतंगं कः स्तोतुं कविरभिवांछते प्रकामम् ॥ स्तोष्येहं तदपि सुविस्तरात्सुबुद्धे किं दीपो ज्वलति हि नोदिते शशांके ॥ ५५ ॥ शास्त्रार्थकामनिपुणैर्मुनिभिः स्तुतस्य किं वस्तु यन्न रचितं विविधैः प्रयोगैः ॥ द्वैपायनप्रभृतिभिर्मुनिभिः पुराणैरापीतसारमिह भाति जगत्समस्तम् ॥ ५६ ॥ कामं तथाप्यहमतीव विचार्य बुद्ध्या भानोस्त्रिलोकगुरुपूजितपादयुग्मम् ॥ वृत्तैः स्फुटार्थमधुराक्षरसंधियुक्तैस्त्वां वै विचित्रगतिभिः परिकीर्तयिष्ये ॥ ५७ ॥ तावज्जगद्भवति निश्चलमेव सर्वं तावत्क्रियाश्च विविधा न च यांति सिद्धिम् ॥ यावच्च नाथ कमलामलमंडल त्वमुत्तिष्ठसे व्यपनयन्किरणैस्तमांसि ॥ ५८ ॥ तावन्न भांति शिखराणि महीरुहाणां गुच्छैस्तु फुल्लवनमीलितलोचनानि ॥ सुप्तानि बोधयसि षट्चरणाकुलानि यावन्न भाभिरमलाभिरनुत्तमाभिः ॥ ५९ ॥ उद्यंतमंबरतले सुरसिद्धसंघाः सब्रह्मदैत्यमुनिकिन्नरनागयक्षाः ॥ त्वामर्चयंति विबुधाः प्रणतैः शिरोभिश्चञ्चत्किरीटमणिभाभिरनुत्तमाभिः ॥ ६० ॥ अस्तं गते त्वयि जगद्भवति प्रसुप्तं भूयस्त्वयि प्रतपति प्रतिबोधमेति ॥ एवं सदा वरद लोकहितार्थहेतोरेकस्त्वमेव भगवंस्तिमिरस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हंता ॥ ६१ ॥ उत्साहशक्तिनयशौर्यसमन्वितानां सेवाप्रयोगरचनाविधितत्पराणाम् ॥ कार्याणि यत्र फलदानि भवंति पुंसां हेतस्त्वभक्तिरिह नाथ
तवेति नूनम् ॥ ६२ ॥ यत्संयुगेषु रथकुञ्जरकुन्तशक्तिनाराचचक्रशरतोमरभीमखड्गैः ॥ क्षिप्रं नराः समुपयांति विजित्य शत्रून्सद्यः सदा प्रणतवत्सल
चेष्टितं ते ॥ ६३ ॥ कांतारदुर्गविषमेष्वपि वर्तमाना ऋक्षेर्भसिंहवहुकण्टकतस्करेषु ॥ तृष्णान्विताश्च वहुशोकविमूढचित्तास्त्वत्कीर्तनाद्धि गतमृत्यु
भया भवंति ॥ ६४ ॥ तेजोराशिस्त्वमिह शरणं सर्वतो दुःखितानां त्वत्तुल्योऽन्यो जगति सकले नास्ति कश्चिद्दयालुः ॥ त्वय्येकस्मिन्भवति
सकला भक्तिरन्विष्यमाणा त्वामासाद्य प्रभवति कुतो व्याधिदुःखं नराणाम् ॥ ६५ ॥ कः कुष्ठाभिहतः क्व चारिभिरथो को व्याधिभिः पीडितः
के पंगवंधजडाः क्व शीर्णचरणः को वा विपन्नक्रियः ॥ इत्येवं प्रसमीक्ष्य देव कृपया दोषात्परित्रायसे कस्यान्यस्य परोपकारनिरता चेष्टा यथैपा
तव ॥ ६६ ॥ धर्मः परत्र किल तिष्ठति सेवितोऽसौ कालांतरेण विबुधा वरदा भवंति ॥ त्वं सेवितः प्रणतवत्सल भूतिकामैः सद्यः प्रयच्छसि फलं
यदभीप्सितं नैः ॥ ६७ ॥ विभ्रांतकांतहरिणीसुदृशेक्षणाभिः कांतोरुहारमणिकुण्डलमेखलाभिः ॥ तेषां भवंति भवनानि विलासिनीभिर्येषां
नृणां त्वमसि वै वरदः प्रसन्नः ॥ ६८ ॥ यस्त्वं नरैः सकृदपि प्रणतः कथंचिद्धचातोऽथवा भुवननाथ तथांतकाले ॥ निष्कल्मपा जगति दुष्कृतिनो
भवंति ते निर्मलाः सुकृतिनो गतिमाप्नुवंति ॥ ६९ ॥ ये त्वां कुतर्कमतिभिर्न नमंति भक्त्या रोमांचकंचुकशताकुलितैः शरीरैः ॥ ते निर्धनाः
परगृहेष्ववभूतमन्नं क्षुत्क्षामकण्ठवदनाः परितर्कयंति ॥ ७० ॥ उदधिजलतरंगक्षोभलोलाक्षियुग्मैः सफणिमणिमयूखोद्भासितैर्लेलिहद्भिः ॥
प्रणिपति शिरोभिर्नागमुख्यैरजस्रं श्रुतिभिरनुपमाभिः स्तूयसे पुष्कलाभिः ॥ ७१ ॥ तव सुरवर गच्छतोऽनुसरंति त्रिदशनदीकमलोद्भ
त्यानि वातैः ॥ कनककमलरेणुपिंजरितानि भ्रमरकुलानि पतंग चामराणि ॥ ७२ ॥ तत्त्वंध्यानं जलनिधिनिवहे स्थित्वा स्थित्वा
चरणनिवहैः ॥ आजीवार्थं प्रतपसि भगवन्कस्ते तुल्यस्त्रिभुवनसमये ॥ ७३ ॥ उदयाद्रिनितंबसंस्थितस्य ह्रुदयेष्वस्तमयेषु चावृतस्य ॥
किरणास्तपनीयसप्रभास्ते विलसन्तस्तडितो विडंवयंति ॥ ७४ ॥ यथायथा व्रजति रथस्तवांबरे विपाटयन्घनतिमिरौघसंचयान् ॥
तथातथा क्षुभितमहानिलोर्मिभिः प्रतीयते मुहुरिव दुन्दुभिर्यथा ॥ ७५ ॥ चारुपद्मविनिमीलितेक्षणां चक्रवाककलहंसमेखलाम् ॥ कामिनी
मिव रतिश्रमालसां तां विबोधयसि पद्मिनीं करैः ॥ ७६ ॥ नीललोलमतिकान्तमुत्पलं भृंगतुंगचरणाकुलीकृतम् ॥ त्वत्प्रभाभिरनुरा
गरंजितं पद्मरागमिव शोभते भृशम् ॥ ७७ ॥ स्फुरच्छशांकहारगिर्मलं खग त्वदंकेष्वचंचलम् ॥ विभात्यतीव कांतमंबरं समं वृहच्चैक
पाटलम् ॥ ७८ ॥ हरिति च तावन्मुहिर्निपेवितमस्यशुभं भवति च यावदेव किरणैस्तव पूजिततरम् ॥ ऋषिभिर्मुनिभिरुदारधीभिः शाश्व
तमार्गपरैर्वरद न शक्यते तव गुणस्तुतिराश्रयितुम् ॥ ७९ ॥ त्वं विष्णुस्त्वं शशांकस्त्वमसुरमथनः पण्मुखस्त्वं धनेशस्त्वं कालस्त्वं च धाता
क्षितिधरमलयापाश्रयस्त्वं हुताशः ॥ ॐकारस्त्वं द्विजानां त्वमिह जलनिधिस्त्वं शरस्त्वं च रुद्रस्त्वं मुख्यस्त्वं पयोदो व्रतयमनियमास्त्वं जग
त्सर्वमेव ॥ ८० ॥ त्वमनिंद्य गोपते त्रिपुरमथन मन्मथदाहकरस्त्वमसुरभीमदर्पहा पाहि माम् ॥ त्रिदशाधिपकमलवाननस्त्वमिह देवगुरुर्भगवां
स्त्रिभुवनमण्डलेऽस्ति कतमस्तव तुल्यगुणः ॥ ८१ ॥ आदित्य भास्कर दिवाकर सप्तसप्ते मार्तंड सूर्य हरिदश्वपते च भानो ॥ अश्रांतवाहन
खरूप गर्भास्तमालिस्त्वां लोकनाथ शरणं प्रतिपद्यतेऽसौ ॥ ८२ ॥ प्राग्दिग्वधूतिलकभासुरकर्णपूर मंदाकिनीदयितनाथ जगत्प्रदीप ॥ हेमाद्रिता
पन नभस्तलहारिरश्म सन्ध्यांगनावदनराग नमोनमस्ते ॥ ८३ ॥ ब्रह्मेव सत्य शुभमंगल लोकनाथ व्योमांगणेश मुनिसंस्तुत विश्वमूर्ते ॥ आर्तस्य
शोकहर किंकरपालकश्च त्वं मे प्रसीद भगवञ्छरणागतस्य ॥ ८४ ॥ कृत्वांजलिं शिरसि पंकजकुड्मलाभं यत्संस्तुतस्त्वमिह देव मयाद्य
भक्त्या ॥ तेन प्रभो भव ममोपरि सौम्यमूर्तिर्धर्मे मतिं कुरु सदा श्रियमूर्जितां च ॥ ८५ ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहे
तवे ॥ त्रयीमयाय त्रिगुणात्मधारणे विरंचिनारायणशंकरात्मने ॥ ८६ ॥ ॥ सूर्य उवाच ॥ ॥ तुष्टोहमधुना पार्थ स्तोत्रेणानेन सुव्रत ॥ वरं
दास्यामि यत्तेन यत्ते मनसि वर्तते ॥ ८७ ॥ मद्दर्शनं हि विफलं न कदाचित्प्रजायते ॥ शूराणां च विशेषेण हृदेयं नास्ति यत्नतः ॥ ८८ ॥
॥ ॥ अर्जुन उवाच ॥ ॥ एप एव वरो मह्यं वराणामुत्तमोत्तमः ॥ अत्र संनिहितो देव सर्वकालं भव प्रभो ॥ ८९ ॥ ये च त्वां मानवा भक्त्या स्तो
ष्यंति प्रणताः सदा ॥ तेषां धनं च धान्यं च पुत्रदारादिकं वसु ॥९० ॥ मनसश्चेप्सितं सर्वं दातव्यं हि वरो मम ॥ सनत्कुमार उवाच ॥ आदित्यो
ऽस्मै वरं दत्त्वा हृष्टवाच वचनं शुभम् ॥ ९१ ॥ यस्त्वत्कृतेन स्तोत्रेण मां स्तोष्यति नरोत्तमः ॥ श्रिया न विच्युतिस्तस्य भवेदेप वरो मम ॥ ९२ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नरादित्यमाहात्म्येऽर्जुनस्तुतिवर्णनंनाम द्वात्रिं
शोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नारायणोऽपि संस्थाप्य शंखं दध्मौ प्रयत्नतः ॥ तुष्टाव प्रयतो भूत्वा स्तोत्रेणा
नेन भास्करम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ॥ दिवाकरं दिवानाथं तपनं तपतां वरम् ॥ २ ॥
वरेण्यं वरदं विष्णुमनघं वासवानुजम् ॥ वलवीर्यं सहस्रांशुं सहस्रकिरणद्युतिम् ॥ ३ ॥ मयूखमालिनं विश्वं मार्तंडं चंडरोचिषम् ॥ सदागतिं सुभां
स्वंतं सप्तसप्तिं सुखोदयम् ॥ ४ ॥ देवदेवमहिर्बुध्न्यं धात्रां निधिमनुत्तमम् ॥ तपोव्रह्ममयालोकं लोकपालमपांपतिम् ॥ ५ ॥ जगत्प्रबोधजनकं
जगद्वीजं जगत्प्रभुम् ॥ अर्कं निःश्रेयसप्रं कारणं श्रेयसां परम् ॥ ६ ॥ इनं प्रभाविणं पुण्यं पतंगं पद्मेश्वरम् ॥ दातारं वांछितार्थानां दृष्टादृष्ट
फलप्रदम् ॥ ७ ॥ गृहं गृहकरं हंसं हरिदश्वं हुताशनम् ॥ मंगल्यं मंगलं मेध्यं ध्रुवं धर्मप्रबोधनम् ॥ ८ ॥ भक्तसंभावित भावं
भूतभव्यभवात्मकम् ॥ दुर्गमं दुर्गतिहरं हरनेत्रं त्रयीमयम् ॥ ९ ॥ त्रैलोक्यतिलकं तीर्थं तरणिं सर्वतोमुखम् ॥ तेजोराशिं मुनिर्वाणं विश्वेशं
धाम साम्प्रतम् ॥ १० ॥ कल्पं कल्पानलं कालं कालचक्रं क्रतुप्रियम् ॥ भूपणं मरुतं सूर्यं मणिरत्नं सुलोचनम् ॥ ११ ॥ त्वष्टारं विष्टरं विश्वं
सदसत्कर्मसाक्षिकम् ॥ सवितारं सहस्राक्षं प्रजापालमधोक्षजम् ॥ १२ ॥ ब्रह्माणं वासरारंभे रक्तवर्णं महाद्युतिम् ॥ शुक्लं मध्यंदिने रुद्रं श्यामं विष्णुं
दिनक्षये ॥ १३ ॥ नाम्नामष्टशतं दिव्यं विष्णुना समुदाहृतम् ॥ य इदं प्रयतो भूत्वा पठेद्भक्त्या समाहितः ॥ १४ ॥ न तस्य विघ्नः क्वापि
सर्वत्रापि शुभा गतिः ॥ धनधान्यसुखावाप्तिः पुत्रलाभश्च जायते ॥ १५ ॥ तेजः प्रज्ञां परं लाभं ज्ञानं च लभते गतिम् ॥ एतत्स्तुत्वा जगन्नाथं
जगामादर्शनं ततः ॥ १६ ॥ केशवार्कमुखं दृष्ट्वा पद्मरागसमप्रभम् ॥ विमुक्तः सर्वपापेभ्यः सूर्यलोके महीयते ॥ १७ ॥ केशवार्कसमीपे तु रेणुतीर्थं
प्रचक्षते ॥ तद्वह्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽ
वन्तीक्षेत्रमाहात्म्ये केशवादित्यमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थमन्यत्तथा वक्ष्ये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शक्तिभेदमिति स्मृतम् ॥ स्कंदस्य च जटाभद्रं चक्रे यत्र पुरा शिवः ॥ १ ॥ तारकं च तथा दैत्यं हत्वा यत्र सुरद्विषम् ॥ शक्तिं स्कंदः स्वयं कुद्धो निश्चिक्षेप महीतले ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्ब्रूहि यत्नेन संशयो मे महामुने ॥ कथं स्कंदः समुत्पन्न एतदिच्छामि वेदितुम् ॥३॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा देवासुरे युद्धे निर्जिता दानवैः सुराः ॥ दिवं त्यक्त्वा दिशो याता शक्राद्या भयविह्वलाः ॥ ४ ॥ तत्र तु देव राजेन तपसोग्रेण वै मुने ॥ आराधितो महादेवस्त्र्यंबकस्त्रिपुरांतकः ॥ ५ ॥ ततस्तुष्टो महादेवः शक्रस्याभिमुखः स्थितः ॥ उवाच वचनं श्लक्ष्णं वरमिष्टं ददामि ते ॥ ६ ॥ ॥ शक्र उवाच ॥ ॥ यदि तुष्टोऽसि भगवन्कारुण्यान्मम शंकर ॥ महासेनापतिं देव प्रयच्छ परमेश्वर ॥ ७ ॥ ॥ ॥ ॥ हर उवाच ॥ ॥ उत्पादयामि देवेंद्र स्ववीर्यार्द्धार्जितं सुतम् ॥ सेनान्यां च महासेनं सुराणां भयहारकम् ॥ ८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ इत्युक्त्वांतर्दधे देवः सर्वभूतपतिर्हरः ॥ सुतचिंतापरो देवो जगाम च हिमालयम् ॥ ९ ॥ देवदारुवने तस्थौ ज्ञानध्यानपरोऽभवत् ॥ ब्रह्मादयोऽपि यं देव योगिनो ध्यानचिंतकाः ॥ १० ॥ ध्यायंति नियतात्मनः प्राणायामपरा मुने ॥ लिंगमूर्तिश्च यो नित्यं पूज्यते सर्वजंतुभिः ॥ ११ ॥ स ध्यायति किमर्थं तन्न विद्मः परमार्थिनः ॥ वं ध्यानपरे देवे देवी हिमवतो गृहे ॥ १२ ॥ मध्ये वयसि वर्तंती यासीद्दाक्षायणी सती ॥ पितुर्गेहे निजो देहो यया योगाद्विसर्जितः ॥ १३ ॥ निमंत्रितो न मे भर्ता इति कोपं चकार या ॥ तां देवीं हिमवान्पूर्वं श्रुत्वा देवर्षिनारदात् ॥ ॥ १४ ॥ भवभार्या भवित्रीति नान्यं वरमचिंतयत् ॥ तपस्यति च रुद्राय सा सखीभ्यां समन्विता ॥ १५ ॥ कथं हि शंकरो देवो मम भर्ता भविष्यति ॥ यावदेवं गतो देवो देवी हिमवतः सुता ॥ १६ ॥ ततः समागता देवाः कृत्वाग्रे बलमूदनम् ॥ जग्मुर्ब्रह्मसदः पुण्यं द्रष्टुं ब्रह्माणमव्ययम् ॥ १७ ॥ ते सुरास्तत्स्तुतिं कृत्वा वाक्यमेतत्समैरयन् ॥ शरणं भव देवानां दानवैर्विजितात्मनाम् ॥ १८ ॥ ततोऽवोचत्सुरान्ब्रह्मा ज्ञातं कार्यं समाहितम् ॥ नैतच्छंभोर्विना वीर्यात्कायसिद्धिर्भविष्यति ॥ १९ ॥ तथा यतध्वं देवेशं यथा वांछति पार्वतीम् ॥ इत्युक्त्वांतर्दधे ब्रह्मा स्वप्ने लब्धं धनं यथा ॥ २० ॥ ततो मेरुं समागत्य पुनर्मंत्रं प्रचक्रिरे ॥ तेषामाहेदृशं शक्रस्तुष्टः शंभुः पुरा मम ॥ २१ ॥ प्रतिपन्नं च देवेन स्वागतेना पतिं प्रति ॥ तस्मादेवं गते कार्ये कारणं गरुडध्वजः ॥ २२ ॥ इति संचिंत्य देवेशः काममाहूय सत्वरम् ॥ उवाच वचनं हृद्यं देवाना मनुकंपया ॥ २३ ॥ यथा देवो भजेद्देवीं तथा काम विधीयताम् ॥ कारणं महदेतद्धे देवानां समुपस्थितम् ॥ २४ ॥ कामो वाक्यं हरेः श्रुत्वा प्रहस्येदमुवाच ह ॥ करिष्ये सर्वमेवं हि सखा मे चेद्रवेन्मधुः ॥ २५ ॥ तस्मिन्क्षणेऽथ शक्रेण कामवाक्यादनंतरम् ॥ समादिष्टो मधुः क्षिप्रं कामस्यानुचरो भव ॥ २६ ॥ लब्ध्वा कामो मधुं मित्रं प्रतस्थे भार्यया सह ॥ कृत्वा सज्यं धनुर्यांणं पौष्पं पाणौ समाहितः ॥ २७ ॥ यत्र देवाधिदेवेशो देवदारुवने स्थितः ॥ नन्दीश्वरः प्रतीहारः कृतध्यानोऽवतिष्ठति ॥ २८ ॥ चूतवृक्षाश्रितः कामो यावद्वाणं सुमोहनम् ॥ संदधात्यंतरे चास्मिन्देवी प्राप भवाश्रमम् ॥ २९ ॥ त्यक्तध्यानव्रतो देवो हृष्टश्चाह्लादचेतनः ॥ ततो विलोकयामास दिशः सर्वाः प्रयत्नतः ॥ ३० ॥ चूतवृक्षाश्रितं काममपश्यच्च रुषान्वितः ॥ भस्मीकृतस्तृतीयाक्ष्णा वह्निज्वालावता ततः ॥ ३१ ॥ देवोऽप्यन्तर्दधे तस्मात्स्थानादाशु गणैः सह ॥ पार्वती विस्मिता साध्वी लज्जिता दुःखिताऽभवत् ॥ ३२ ॥ हिमवांस्तां समुत्थाप्य निनायाशु निजं गृहम् ॥ गते देवे च देव्यां च कामपत्नी सुदुःखिता ॥ ३३ ॥ भस्मीकृतं पतिं दृष्ट्वा विललाप सुदुःखिता ॥ दृष्ट्वा रतिं सुदुःखार्तां वागुवाचाशरीरिणी ॥३४॥ आश्वासयंती कृपया सखीमिव सुदुःखिताम् ॥ मा रोदीस्त्वं शुभापांगि तव भर्ता करिष्यति ॥३५॥ सर्वकार्याण्यनंगोपि मित्रकार्यं विधानतः ॥ यदा चायं महादेवः परिणेष्यति पार्वतीम् ॥ ३६ ॥ ततः शंभोरनुध्यानादुत्थास्यति न संशयः ॥ द्वापरांते यदा कृष्णो द्वारकायां निवत्स्यति ॥ ३७ ॥ तत्पुत्रो भविता देही प्रद्युम्नोनाम ते पतिः ॥ इत्युक्ता साऽजहाच्छोकमाकाशाज्जातया गिरा ॥ ३८ ॥ अचिंतयत्तदा देवी उमापि हिमवद्गृहे ॥ कामस्य दहनं तेजः शंभोर्यत्तदनुत्तमम् ॥ ३९ ॥ कथं भर्त्ता भवेद्देवः कामस्योत्थापनं कथम् ॥ नैतत्तपो विना कार्यं क्वचित्कस्यापि सिध्यति ॥ ४० ॥ एवं संचिंतयित्वाथ सखीभिः सहिता ततः ॥ तपश्चकार सुमहत्पित्रादेशाच्छुभव्रता ॥ ४१ ॥ वर्षास्वभ्रावकाशस्था हेमंते जलशायिनी ॥ ग्रीष्मे पंचाग्नितप्तांगी तपस्युग्रे समास्थिता ॥ ४२ ॥ तां दृष्ट्वा तपसोपेतां ब्रह्मचारिवपा हरः ॥ आजगामाश्रमं देव्याः कृतातिथ्योऽब्रवीदिदम् ॥ ४३ ॥ कृशमध्ये कृशापांगि किमर्थं नवयौवने ॥ तपः करोषि कल्याणि कस्यार्थे कारणं वद ॥ ४४ ॥ उवाच चोत्तरं सा वै सत्यं च मधुरं तथा ॥ वटो तपःसमारंभः क्रियते शंकरा नये ॥ ४५ ॥ विचार्य च हरः श्रुत्वाऽनंदयत्कार्यमात्मनः ॥ उमाभक्तिपरीक्षार्थं शिवं वाचा निनिन्द वै ॥ ४६ ॥ तस्य तद्वचनं श्रुत्वा न सेहे सा गिरेः सुता ॥ गंतुकामामुमां मत्वा तस्मात्स्थानान्महेश्वरः ॥ स्वं वपुर्दर्शयामास त्रिनेत्रं शूलपाणिनम् ॥ ४७ ॥ लज्जिताभूद्भवानीशं दृष्ट्वा तत्रावधोमुखी ॥ विर्जेयाथाह योगीन्द्रं प्रार्थ्या चाभिजने त्वियम् ॥ पार्वतीहरणार्थाय यत्नं च प्रकरोम्यहम् ॥ ४८ ॥ इत्युक्त्वांतर्दधे देवो देव्यागाच्च पितुर्गृहम् ॥ देवीलाभाय सप्तर्षीन्सस्मार स्मरशासनः ॥ ४९ ॥ प्रणेमुस्तेप्यथागम्य संस्मृताः परमेश्वरम् ॥ ऊचुश्च प्रांजलिपुटाः कुर्म किं शाधि नो भृशम् ॥ ५० ॥ ततोऽब्रवीन्मुनीनीशः समस्तांश्च गिरेर्गृहम् ॥ गत्वा तथा कुरुध्वं मे पार्वती स्याद्यथा प्रिया ॥ ॥ ५१ ॥ तथेति ते प्रतिज्ञाय संकेतं शंभुना समम् ॥ कृत्वा जग्मुः सपत्नीका गिरींद्रस्य निवेशनम् ॥ ५२ ॥ दत्तार्घा भूधरेंद्रेण कृतासन परिग्रहाः ॥ ऊचुरद्रिसुमां यच्छ शंकरायार्थिने प्रियाम् ॥ ५३ ॥ दत्तेत्युक्ता गिरींद्रेण निरूप्योद्वाहवासरम् ॥ लब्ध्वानुज्ञां समायाता यत्रास्ते स महेश्वरः ॥ ५४ ॥ ऊचुस्ते शंकरं सर्वं दत्ता हिमवता शिवा ॥ कृतकार्याश्च सर्वेऽपि वव्रजुस्ते यथागतम् ॥ ५५ ॥ चक्रुर्विवाह सामग्रीं ब्रह्मेन्द्रादिसुरास्तदा ॥ वृषासनो जगामाथ नंदीशप्रमुखैर्गणैः ॥ ५६ ॥ शंखदुंदुभिनादैश्च ब्रह्माद्यैरमरैः सह ॥ प्राप्यागेंद्रालयं हीशः कृतकौतुकमंगलः ॥ ५७ ॥ विवाह्येमां विधानेन जगाम स्वालयं पुनः ॥ तत्रेकांतरतिर्देवो यावत्तिष्ठति कामवान् ॥ ५८ ॥ तावत्रस्तैः सुरैरग्निः प्रेषितोऽगान्महेश्वरम् ॥ अग्नौ तत्र गते देवो रतिं कृत्वा महेश्वरः ॥ ५९ ॥ निचिक्षेप मुखे वह्नेः स्वरेतो व्रीडितो भृशम् ॥ रेतसा तेन तप्तोऽग्निर्गंगातोये निक्षिप्तवान् ॥ ६० ॥ हररेतोऽग्निनोद्वीर्णं गंगामध्ये पपात ह ॥ तया तु स्वतटे न्यस्तं दग्धया रुद्ररेतसा ॥ ६१ ॥ सप्तर्षीणां च पट्पत्न्यः स्नानार्थं जाह्नवीं ययुः ॥ शीतार्तास्ताः कृतस्नाना दृष्ट्वा तेजस्तटे ज्वलत् ॥ ६२ ॥ मत्वाग्निमिति ताः सर्वास्तपंति स्म यथेच्छया ॥ तपंतीनां च वै तासां तद्बीजसंभवं मुने ॥ ६३ ॥ षडाननं समारूढं श्रोणिद्वारेण सत्वरम् ॥ यदान्योन्यसुतप्तितुं शक्ता नाग्निपुरोगमात् ॥ ६४ ॥ चिंतां जग्मुस्तदा सर्वा मुनित्रासात्ततो भयात् ॥ ततश्च तपसो वीर्यान्निष्कृष्य स्वोदरात्ततः ॥ ६५ ॥ पट्क्रिरेकत्वमापद्य श्वेतपर्वतमस्तके ॥ मध्ये शराणां वै कृत्य निक्षिप्तं वीर्यमुत्तमम् ॥ ६६ ॥ शुक्लायां प्रतिपद्यासीद्द्वितीयायां समीकृतः ॥ तृतीयायां च साकारः सर्वलक्षणलक्षितः ॥ ६७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्थ्यां परिपूर्णांगः षण्मुखो द्वादशेक्षणः ॥ अलंकृतस्तु पंचम्यां षष्ठ्यां च स समुत्थितः ॥ ६८ ॥ तेजसा श्वेततार्क्ष्येण ततापसु जगत्त्रयम् ॥
जातमित्थं समाकर्ण्य सर्वे शक्रमुखाः सुराः ॥ ६९ ॥ समागत्यास्य संस्कारं ब्रह्मा चक्रे यथाविधि ॥ तुष्टेन पार्वतीशेन शक्तिर्दत्ता दृढा शुभा
॥ ७० ॥ ततो गौर्या मयूरश्च वाहने परिकल्पितः ॥ छागश्चैवाग्निना दत्तः कुक्कुटं सरितां पतिः ॥ ७१ ॥ शूलेन कृत्तिकाभिश्च वर्धितः
पुत्रकाम्यया ॥ ततस्तु प्राप्तसंस्कारो ब्रह्माद्यैरभिनंदितः ॥ ७२ ॥ शक्तिहस्तोऽभिषिक्तस्तु देवसेनासमावृतः ॥ वित्ताधिपेन साह्लेनं पावकिः षण्मुखो
ऽशतः ॥ ७३ ॥ गांगेयः कार्तिकेयश्च गुहः स्कंद उमासुतः ॥ देवसेनापतिः स्वामी सेनानीश्च शिखिध्वजः ॥ ७४ ॥ कुमारः शक्तिधारी च तस्य
नामानि षोडश ॥ यः पठेन्मानवो भक्त्या बाधा तस्य न जायते ॥ ७५ ॥ एवं जातो महासेनो दानवानां क्षयंकरः ॥ कुशस्थल्यां समानीतः
शंभुना स्थानकारणात् ॥ ७६ ॥ अभिषिक्तः स तेनासौ भद्रितः स जटाः पुरा ॥ तेन भद्रजटंनाम देवतीर्थं च कथ्यते ॥ ७७ ॥ कृताभिषेकं
लब्धास्त्रं महासेनं महेश्वरः ॥ तमुवाच समधुरं सर्वदेवसमागमे ॥ ७८ ॥ रक्षा कार्या त्वया पुत्र सामरस्य शतक्रतोः ॥ देवानां बाधकाः सर्वे
निहंतव्याः सुरद्विषः ॥ ७९ ॥ इत्थं महोत्सवे जाते हृष्टप्रमथसागरे ॥ मातरोऽभ्यागताः सर्वाः पातालतलसंस्थिताः ॥ ८० ॥ तासामाहारसंज्ञा
भिश्चक्रे नामानि शंकरः ॥ यानि तानि प्रवक्ष्यामि शृणु त्वं मुनिपुंगव ॥८१॥ वटभोजनकामा या ज्ञेयास्ता वटमातरः ॥ भुञ्जते चर्पटान्यास्तु ता
वे चर्पटमातरः ॥८२॥ क्रीडार्थं शंभुना चाथ प्राप्ता याः पौलभोजने ॥ पण्णवतिमातरः सत्याः सर्वास्ताः पौलमातरः ॥८३॥ सर्वासां दर्शनं पुण्यं
ग्रहभूतविनाशनम् ॥ प्रयत्नतः सदा देव्यो द्रष्टव्या मानवैर्मुने ॥८४॥ लब्ध्वा शक्तिं महासेनो देवसेनो महाव्रतः ॥ जघान दानवेंद्रं तं तारकं तरसा
तदा ॥ ८५ ॥ दत्त्वा राज्यं तथेंद्राय स्फीतं निहतकंटकम् ॥ कुशस्थलीं समागम्य तत्र वासं समाचरत् ॥८६॥ एवं निहत्य दैत्येंद्रं स गांगेयो महाव
लः ॥ शक्तिं शिप्राजले मुक्त्वा पातालं च विभेद सा ॥८७॥ ततो भोगवती व्यास शक्तिभेदेन निर्गता ॥ वंदिता सर्वदेवैश्च मुनिभिश्च तपोधनैः॥८८॥
पृथिव्यां यानि तीर्थानि समुद्रादिगतानि च ॥ शक्तिभेदे तु न्यस्तानि शतकोटिसहस्रशः ॥ ८९ ॥ अतोऽतिपुण्यं त्रैलोक्ये कोटितीर्थमुदाहृतम् ॥
ब्रह्मणा स्थापितस्तत्र कोटितीर्थेश्वरः शिवः ॥ ९० ॥ कोटितीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं शिवम् ॥ मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगः ॥
॥ ९१ ॥ श्राद्धं करोति यस्तत्र पितृभक्तो नरो मुने ॥ दशानामश्वमेधानां प्राप्नोति सकलं फलम् ॥ ९२ ॥ पितॄनुद्दिश्य यत्किंचित्कोटितीर्थे
प्रदीयते ॥ तत्सर्वं कोटिगुणितं जायते नात्र संशयः ॥ ९३ ॥ तत्र तीर्थे नरो यस्तु गां ददाति पयस्विनीम् ॥ सर्वलोकानतिक्रम्य स गच्छेत्प
रमां गतिम् ॥ ९४ ॥ यावन्त्यंगेषु रोमाणि तत्प्रसूतिकुलेषु च ॥ तावद्युगसहस्राणि शिवलोके महीयते ॥ ९५ ॥ पौर्णमास्यामथावास्यां पश्येच्छ
क्तिधरं तु यः ॥ नापुत्रो नाधनो रोगी सप्तजन्मसु जायते ॥ ९६ ॥ जलप्रवेशं यः कुर्यात्तत्र तीर्थे नरोत्तमः ॥ सोऽक्षयं लभते लोकं यावच्चन्द्र
दिवाकरौ ॥ ९७ ॥ वृषोत्सर्गं तु यः कुर्यात्पितृभक्तो नरो मुने ॥ सोऽक्षयं लभते स्थानं यत्सुरैरपि दुर्लभम् ॥ ९८ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शक्तिभेदतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥७॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ स्वर्णशृंगे नरः स्नात्वा दृष्ट्वा देवं महेश्वरम्॥ कपिलाशतदानस्य फलमप्यधिकं भवेत् ॥ १ ॥ वाप्यां पितामह
स्यापि यः स्नायाद्विजितेंद्रियः ॥ हंसयुक्तेन यानेन ब्रह्मलोकं स गच्छति ॥ २ ॥ तैलाभिधानमात्रौणां रात्रौ यच्छति यो बलिम् ॥ तस्य सिद्धिर्भवे
त्सद्यो मृतः शिवपुरं व्रजेत् ॥ ३ ॥ विष्णुवाप्यां नरः स्नात्वा चैत्रे वा फाल्गुनेऽथवा ॥ जागरं यस्तु कुर्वीत सोपवासो जितेन्द्रियः ॥ मुच्यते सर्व
पापेभ्यो विष्णुलोकं स गच्छति ॥ ४ ॥ अभयेश्वरदेवस्य भक्त्या नियतमानसः ॥ पूजाबन्धमथो दृष्ट्वा रुद्रलोकं स गच्छति ॥ ५ ॥ लोके तु
जायते दाता सार्वभौमो महीपतिः ॥ यस्त्वगस्त्येश्वरं गच्छेदेकचित्तो नरो मुने ॥ ६ ॥ दृष्ट्वागस्त्येश्वरं देवं सोपवासो जितेंद्रियः ॥ अगस्त्योदयवे
लायां मुच्यते सर्वपातकैः ॥ ७ ॥ कृत्वागस्त्यं च सौवर्णं रौप्यं वाथ स्वशक्तितः ॥ पञ्चरत्नसमायुक्तं वस्त्रेण च समन्वितम् ॥८॥ तत्कालीनैः फलैः
पुष्पैः पूजनीयो विधानतः ॥ विधानं तस्य वक्ष्यामि चातुर्वर्ण्ये द्विजोत्तम ॥ ९ ॥ सप्तधान्यानि मुख्यानि तावन्त्यंव फलानि च ॥ एकं धान्यं फलं
चैकमग्रे त्याज्यं भवेन्मुने ॥ १० ॥ यावद्वै सप्त वर्षाणि व्रतमेवं समाचरेत् ॥ ११ ॥ ॥ अर्घ्यमन्त्रः ॥ ॥ काशपुष्पप्रतीकाश वह्निमारुतसं
भव ॥ मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ १२ ॥ दत्तेऽर्घे यत्फलं व्यास तद्वै श्लोकमनाः शृणु ॥ पुत्रवान्धनवांश्चैव जायते नात्र
संशयः ॥ १३ ॥ मृतः स्वर्गमवाप्नोति संपन्ने जायते कुले ॥ मर्त्यलोकं पुनः प्राप्य महायोगीश्वरो भवेत् ॥ १४ ॥ यश्चैतच्छृणुयान्नित्यं पठेद्वा
सुसमाहितः ॥ सर्वपापविनिर्मुक्तो मुनिलोके स मोदते ॥ १५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य
खण्डेऽवन्तीक्षेत्रमाहात्म्येऽगस्त्येश्वरमाहात्म्यवर्णनंनाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ महाकालं किमर्थं तु
किं वा शिवपदं स्मृतम् ॥ कोटीश्वरं किमर्थं तु पावकं तत्किमुच्यते ॥ १ ॥ नरदीपं किमर्थं तु द्वितीया वटमातरः ॥ अभयेश्वरं किमर्थं तु शंखोद्धा
रणमेव च ॥ २ ॥ शूलेश्वरं किमर्थं तु किमोंकारस्तु कथ्यते ॥ धूतपापं किमर्थं तु किमंगारेश्वरं तथा ॥ ३ ॥ पुरी चोज्जयिनी दिव्या सप्तकल्पा
कथं स्मृता ॥ कथयस्व मुनिश्रेष्ठ तस्या नामानि यानि च ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास यथा ख्याता पुरी दिव्या कुश
स्थली ॥ नामतः कर्मतः श्रेष्ठा सप्तकल्पानुवासिनी ॥ ५ ॥ प्राक्कल्पे स्वर्णशृंगाख्या द्वितीये तु कुशस्थली ॥ तृतीयेऽवंतिका प्रोक्ता चतुर्थे त्वमरा
वती ॥ ६ ॥ विख्याता पञ्चमे कल्पे पुरी चूडामणीति च ॥ षष्ठे पद्मावती ज्ञेया सप्तमे चोज्जयिनी पुरी ॥ ७ ॥ पुनरंते तु कल्पस्य स्वर्णशृङ्गादि
का स्मृता ॥ एतानि सप्त नामानि प्रातरुत्थाय यः पठेत् ॥ ८ ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ उज्जयिन्यां पुरा राजा बभूव किल
चांधकः ॥ ९ ॥ तस्य पुत्रो महावीर्यो नाम्ना कनकदानवः ॥ युद्धार्थं स महावीर्यः शक्रं युद्धे समाह्वयत् ॥ १० ॥ कोधार्दिद्रेण संग्रामे युध्य
मानो निपातितः ॥ निहत्य दानवं शक्रो भयादंधासुरस्य तु ॥ ११ ॥ जगाम शंकरान्वेषी कैलासं शंकरालयम् ॥ दृष्ट्वा प्रणम्य देवेशं चंद्रार्धकृत
शेखरम् ॥ १२ ॥ भीतो विज्ञापयामास स चाश्वाकुललोचनः ॥ अभयं देहि मे देव दानवादंधकाच्च वै ॥ १३ ॥ शक्रस्येत्थं वचः श्रुत्वा शरणा
गतवत्सलः ॥ ददावभयमेवासौ मा भैस्त्वमंधकाद्धि वै ॥ १४ ॥ कृत्वा रूपं महादेवो विश्वरूपं सुभैरवम् ॥ सर्पैर्ललद्भिरत्युग्रैस्तीक्ष्णदंष्ट्रैर्विषोल्वणैः
॥ १५ ॥ पातालोदररूपैश्च भैरवारावनादिभिः ॥ भुजैरनेकसाहस्रैर्बहुशस्त्रधृतैस्तथा ॥ १६ ॥ सिंहचर्मपरीधानं व्याघ्रत्वगुत्तरीयकम् ॥ गजाजिन
कृताटोपं चंद्राग्निरविलोचनम् ॥ १७ ॥ महामहीध्रतुल्याभ्यां जंघाभ्यां भूषितं सदा ॥ क्षोभयंश्चालयन्सर्वान्पातालस्य तलावधि ॥ १८ ॥ ईदृ
शं विधायेशो दनुदैत्यभयावहम् ॥ अवातरन्महीं भीमः पादेनैकेन शंकरः ॥ १९ ॥ तत्रैव हि ह्रदो जातः सर्वदेवतवंदितः ॥ ख्यातं शिवपदं तद्धि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यत्पदाऽऽक्रांतवान्विभुः ॥ २० ॥ पापानां च पुरा कोटिः पादांगुष्ठेन दारिता ॥ कोटितीर्थमतः ख्यातं सर्वपापप्रणाशनम् ॥ २१ ॥ अगस्त्यन
तथा कोटिस्तीर्थानामवधारिता ॥ अतोऽपीदं शुभं लोके कोटितीर्थं सदा स्मृतम् ॥ २२ ॥ दृष्ट्वा तु त्रिदशाः सर्वे स्नाता वै हितकाम्यया ॥ महा
कालकृतं रूपं महाकालस्ततः स्मृतः ॥ २३ ॥ अंधासुरोऽपि दनुजः पुत्रं श्रुत्वा हतं युधि ॥ क्रोधेन तमसाविष्टो रणतूर्याण्यवादयत् ॥ २४ ॥
सैन्यो निर्गतः प्रातो यत्र ते त्रिदशाः स्थिताः ॥ महत्या सेनया सार्धं रथवारणयुक्तया ॥ २५ ॥ तंदेव दानवान्वीक्ष्य महाहवकृतोद्यमान् ॥
वपंतस्ते सुसंनद्धाः शंभुं शरणमाययुः ॥ २६ ॥ मा भैरिति महाकालो देवानुक्त्वा त्रिलोचनः ॥ गृहीत्वा शूलमातिष्ठद्दृष्ट्वादंग्राधरो रुषा ॥ २७ ॥
कोपयुक्ते विरूपाक्षे ज्वालाभिः पूरितं नभः ॥ अंधकेनाथ रुष्टेन शरकोटिस्तु दुःसहा ॥ २८ ॥ मुक्ता जगाम देवानां ननाश शलभाकृति ॥
विष्णुलिंगार्चिषं वह्निं मुंचमानः पिनाकधृक् ॥ २९ ॥ शतशः शकलीचक्रं तं च बाणैरताडयत् ॥ अंधकोऽपि हि मुद्धस्थः शिथिलः शिथिल
बुधः ॥ ३० ॥ निरुद्धः शंभुना बाणैरलिभिः पंकजं यथा ॥ तस्य सैन्यं शरैर्विद्धं च तद्गणैर्युधि योधिभिः ॥ ३१ ॥ योधयंरहता दिव्यैः स्थाणु
सान्निध्यमाश्रितैः ॥ ततोऽधकेन सैन्यं स्वं भिन्नं दृष्ट्वा तथा सुरैः ॥ ३२ ॥ आत्मानं च महेशेन विद्धं च बाणकोटिभिः ॥ विदलीकृतदेहोऽसौ भय
माश्रित्य वै गतः ॥ ३३ ॥ चकार तामसीं मायां मायाशतविशारदः ॥ तयांतर्हितदेवेशो जगाम दिशमुत्तराम् ॥ ३४ ॥ शंभुर्भीतिभरं बिभ्रद्भ्राम
भुवि भिन्नहृत् ॥ यस्मिन्मार्गे गतो देवस्तेन दैत्यो जगाम ह ॥ ३५ ॥ वदन्न दृश्यते क्वासौ गतो दुष्टः पुनःपुनः ॥ उवाच चांधकः शब्दं तथोवा
च महेश्वरः ॥ ३६ ॥ तत्र तीर्थमथोत्पन्नं वागंधकमभिश्रुतम् ॥ तत्र स्नात्वा शुचिर्भूत्वा यो वै दद्यात्सशर्करम् ॥ ३७ ॥ नवम्यां मार्गशीर्षस्य शुक्ला
यां श्रद्धयान्वितः ॥ अक्षयं तद्भवेद्दत्तं दाता शिवपुरं व्रजेत् ॥ ३८ ॥ पितॄनुद्दिश्य यत्किंचिद्दीयते भक्तितः शिवे ॥ तृप्तास्तिष्ठंति ते तावद्यावदाभूत
संप्लवम् ॥ ३९ ॥ तमसा च्छादिता देवाः संबभ्रुवुः समाकुलाः ॥ संभ्रांतमनसः सर्वे न किंचिदपि मेनिरे ॥ ४० ॥ एतस्मिन्नंतरे व्यास नरा
दित्यः स्वतेजसा ॥ उत्तस्थौ नररूपेण कुर्वन्तितिमिरा दिशः ॥ ४१ ॥ नष्टे तमसि दैत्येपि प्रकाशे प्रकटे सति ॥ देवा मुदमवापुस्ते दृष्ट्वा नरं
त्रिलोचनेः ॥ ४२ ॥ स्तुवंतो विविधैः स्तोत्रैर्नररूपं दिवाकरम् ॥ उत्तस्थौ नररूपेण दीप्तो यस्मादिवाकरः ॥ ४३ ॥ तेनास्य नाम ते चक्रुर्नरदीप
इतीश्वराः ॥ यः पश्यति नरो भक्त्या नरदीपं दिवाकरम् ॥ ४४ ॥ मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् ॥ षष्ट्यामर्कदिने विप्र सप्तम्यामुप
वासयेत् ॥ ४५ ॥ दिनच्छिद्रेथ संक्रांतौ ग्रहणे विषुवत्यथ ॥ कुंडे स्नात्वा शुचिर्भूत्वा जपन्नियतमानसः ॥ ४६ ॥ नरदीपं नरः पश्येत्स्तोत्रवा
दित्रमंगलैः ॥ गंधैर्धूपैस्तथा दीपैर्नवेद्यैः पूजयेत्तथा ॥ ४७ ॥ गीतं वाद्यं पुरस्कृत्य प्रणम्याष्टांगमेव च ॥ प्रातर्मध्यापराह्णे वा कृत्वार्कस्य प्रदक्षिणा
म् ॥ ४८ ॥ स मुक्तः सर्वपापेस्तु सप्तजन्मकृतैरपि ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ॥४९॥ सूर्यलोकं प्रयात्याशु यत्सुरैरपि दुर्लभम् ॥
शक्रात्प्राप्य पुरा यस्माद्भानुत्र प्रतिष्ठितः ॥ ५० ॥ नरेणैव प्रसादेन नरदीपस्ततो ह्ययम् ॥ तदेवास्य पुरा व्यास यात्रा शक्रेण निर्मिता ॥ ५१ ॥
आगमिष्याम्यहं पार्थ सार्धं देवैः समाहितः ॥ ज्येष्टे सिते द्वितीयायां नरदीपे तु सर्वदा ॥५२॥ तत्राहमागतो ज्ञेयो लोके देवस्य वर्षणात् ॥ ततोऽ
नंतरमागत्य देवा ये त्रिदशालयात् ॥ ५३ ॥ दृष्ट्वा देवं तथारूढं नरदीपं सुदीपितम् ॥ कृत्वा यात्रां च ते यांति देवयानैरितस्ततः ॥ ५४ ॥ यः
पश्येन्मानवो भक्त्या नरदीपं रथस्थितम् ॥ सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ ५५ ॥ रथयात्रामथो वक्ष्ये नरदीपस्य या मुने ॥ तां कृत्वा
चैव यत्पुण्यं मुनिभिः परिकीर्तितम् ॥ ५६ ॥ ज्येष्टे सिते द्वितीयायां रथस्थो हि दिवाकरः ॥ कुशस्थल्यां द्विजैः श्रेष्टैर्वाहुक्षेपैः प्रणीयते ॥ ५७ ॥
उत्तरां दिशमायांतं यः पश्यति दिवस्पतिम् ॥ अग्निष्टोमस्य यज्ञस्य लभते सोऽखिलं फलम् ॥५८॥ निवृत्य केशवाकांक्षो रथं पश्यति मानवः॥
शुंडीरस्वामिनो यात्रा कृता तेन न संशयः ॥ ५९ ॥ रथमाकर्षते यस्तु रज्वाकर्षेण वै मुने ॥ कुलमुद्धरते सोऽपि पूर्वान्पितृपितामहान् ॥ ६० ॥
दक्षिणाभिमुखं यांतं नरदीपं द्विजोत्तम ॥ ये संयताः प्रपश्यंति ते यांति च त्रिविष्टपम् ॥ ६१ ॥ सूत्रेण वेष्टयेत्सेतुं रथं देवमथापि वा ॥ सर्वान्का
मानवाप्नोति कृतपुण्यश्च जायते ॥ ६२ ॥ प्रदक्षिणां तु सूर्यस्य भक्त्या कुर्वंति ये नराः ॥ प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुंधरा ॥ ६३ ॥ प्रातरु
त्थय योभक्त्या मौनी याति दिवाकरम् ॥ दृष्ट्वा तु पूर्वद्वारेण नमस्कृत्य द्विजोत्तम ॥ ६४ ॥ प्रविश्य दक्षिणेनैव रथचक्रं प्रपूजयेत् ॥ तेन द्वारेण
निष्क्रम्य प्रणिपत्य व्रजेत्ततः ॥६५॥ पश्चिमं द्वारमाश्रित्य रथस्थं सूर्यमर्चयेत् ॥ चामरं च वितानं च घंटादीनि निवेदयेत् ॥६६॥ पूर्वद्वारे तु गौर्दे
या तथाश्वैर्न दक्षिणे ॥ पश्चिमे च गजः प्रोक्त उत्तरे रथएव च ॥६७॥ कुर्यादेवं तु यो यात्रां नरदीपस्य मानवः॥ सर्वान्कामानवाप्नोति कृतपुण्यश्च
जायते ॥६८॥ गोसूर्यशिवशक्राणां स्वर्लोकं लभते शुभम् ॥ प्रदक्षिणा महामेरोः कृता तेन भवेन्मुने ॥६९॥ दद्याद्गवां सहस्रं यो व्यतीपातशते नरः॥
अश्वानां च सहस्रेण यद्यायात्तत्फलं लभेत् ॥७०॥ नरदीपे रथारूढे वपनं कारयेत्तु यः॥ श्रिया न विच्युतिस्तस्य सूर्यलोके महीयते॥७१॥ सूर्यस्य
पुरतो वाप्यां मासं नित्यं सरस्वती॥ यस्तामालोकते मर्त्यो दुःस्वप्नं तस्य नश्यति॥७२॥ भक्त्या योऽनुदिनं व्यास नरदीपं प्रपश्यति॥ उत्तमं स्थान
मासाद्य पुत्रपौत्रसमन्वितः॥७३॥ प्रकीर्ज्य बंधुभिः सार्धं मृतः सूर्यपुरं व्रजेत्॥ प्रनष्टे तिमिरे विप्र जाते सर्वत्र सुप्रभे ॥७४॥ हतेऽधके महेशेन शूलेन
त्रिशिखेन वै ॥ प्रहृष्टाश्च सुराः सर्वे ब्रह्मेंद्रप्रमुखास्तदा ॥७५॥ शंखं दध्मौ तदा विष्णुः सुराणां हितकाम्यया ॥ तत्र तीर्थमथोत्पन्नं शंखोद्भारणसंज्ञ
कम् ॥७६॥ तत्र संनिहितो विष्णुर्लिंगं चैव चतुर्मुखम् ॥ अनाद्यं चैव विप्रेंद्र लिंगस्यैव समीपतः ॥७७॥ देवस्य दक्षिणे भागे शूलेनाधिष्ठितः स्थि
तः ॥ चतुर्दश्यां तथाष्टम्यां ये पश्यंति जितेंद्रियाः ॥ ७८ ॥ ते क्षीणाशेषपापौघाः प्राप्स्यंति परमां गतिम् ॥ योगिनीनां बलिं यस्तु यथावत्संप्रदा
स्यति ॥ ७९ ॥ भूतप्रेतपिशाचाद्यैर्नासौ केनापि बाध्यते ॥ द्वादशीं समुपोष्यैव स्नात्वा देवं जनार्दनम् ॥ ८० ॥ यः पश्येच्छंखिनं देवं सोऽच्युतं
स्थानमाप्नुयात् ॥ ८१ ॥ यः स्थूलसूक्ष्मप्रकटप्रकाशो यः सर्वभूतो न च सर्वभूतः ॥ विश्व यतश्चैव हि विश्वहेतुर्नमोस्तु तस्मै पुरुषोत्तमाय ॥ ८२ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमः आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये नरदीपमाहात्म्यवर्णननाम षट्त्रिंशोऽध्यायः ॥३६॥
॥ ७ ॥ सनत्कुमार उवाच ॥ ॥ भिन्नेऽधके त्रिशूलेन ध्वनी रुद्रस्य निर्गतः ॥ तत्रोंकारः समुत्पन्नो देवदेवो महेश्वरः ॥ १ ॥ तत्र स्नात्वा शुचिर्भू
त्वा समाधिनियमेन च ॥ दृष्ट्वोंकारं महादेवं मुच्यते सर्वपातकैः ॥ २ ॥ हत्वांधके त्रिशूलश्च भोगवत्या जले ययौ ॥ दृष्ट्वा शूलं सुतेजस्कं हाटको
विस्मयं गतः ॥ पप्रच्छ केन कार्येण भवानिह समागतः ॥ ३ ॥ कथयामास शूलोसौ शंकरेणाहमीरितः ॥ अंधकस्य वधार्थाय पापवृत्तेः सुदु
र्मतेः ॥ ४ ॥ भित्त्वा तमहमायातो भोगवत्या जले शुभे ॥ गमिष्यामि पुनस्तत्र यत्र तिष्ठति शंकरः ॥ ५ ॥ शूलोक्तं वचनं श्रुत्वा परमेशादे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दक्षया ॥ हाटकः शूलमार्गेण निर्जगाम जवेन सः ॥ बहुवक्त्रसमाकीर्णं सुप्रभं सुमनोरमम् ॥ ६ ॥ तं दृष्ट्वा त्रिदशाः सर्वे शूलेशं हाटकेश्वरम् ॥ प्रणम्य हृष्टरोमाणो ययुः प्रोत्फुल्लपंकजम् ॥ ७ ॥ तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्मविष्णुपुरोगमाः ॥ हाटकेश्वरनामासीत्पाताले यो व्यवस्थितः ॥ ८ ॥ निर्गतः शूलमार्गेण तेन शूलेश्वरः स्मृतः ॥ धूतपापं च यत्तीर्थं देवदेवस्य चोत्तरे ॥ ९ ॥ तत्र पापः स दैत्येंद्रो धूतः शूलेन वीर्यवान् ॥ तेन तीर्थमिदं व्यास धूतपापं निगद्यते ॥ १० ॥ अष्टम्यां वा पौर्णमास्यां चतुर्दश्यां शनौ तथा ॥ उपोष्य रजनीमेकां शिवभक्तो जितेंद्रियः ॥ ११ ॥ धूतपापं तु यः पश्येद्देवदेवं महेश्वरम् ॥ विमुक्तः सर्वपापेभ्यः स सप्तजन्मकृतैरपि ॥१२॥ कुलानां शतमुद्धृत्य शिवलोकं च गच्छति ॥ कृताभिषेकं यः पश्येत्पौषे मासि स वै नरः ॥ १३ ॥ शूलेश्वरप्रभावेन मुच्यते ब्रह्महत्यया ॥ विमानानां सहस्रेण मृतो याति परं पदम् ॥ १४ ॥ इति चांधकशूलोयं यावद्भोगवतीं गतः ॥ तावत्समुत्थिता घोरा असुरा रुधिरोद्भवाः ॥ १५ ॥ खड्गहस्ता महावीर्या अनेकशतसंख्यया ॥ चतुर्दिक्षु स्थितैर्घोरैर्हन्यमानो महेश्वरः ॥ सिंहनादं मुमोचाथ पीडितस्तैर्दुरात्मभिः ॥ १६ ॥ सिंहनादेन ते पापा मूर्छिताः पतिता भुवि ॥ पुनः समुत्थिता जग्मुर्देवदेवं महेश्वरम् ॥ वित्रस्ताश्च ततो देवा ब्रह्मविष्णुपुरोगमाः ॥ १७ ॥ असाध्यांस्तांस्तथा मत्वा मंत्रं कृत्वा हितैषिणः ॥ ततो देवा विचार्याथ स्त्रीं सृजाम इति स्वयम् ॥ १८ ॥ इत्युक्त्वोत्पादयामास ब्रह्मा हंसासनां शुभाम् ॥ चतुर्वक्त्रां चतुर्हस्तां ब्रह्माणीं रूपधारिणीम् ॥ १९ ॥ कुमारश्चैव कौमारीं मयूरवरवाहनाम् ॥ रक्तमाल्यांबरधरां शक्तिकुक्कुटधारिणीम् ॥ २० ॥ पुनः कुमारः कौमारीं पक्षींद्रवरवाहनाम् ॥ कृष्णां करालदशनां धर्मराजस्य वाहनीम् ॥ २१ ॥ दैत्यदेहप्रमथनीं दंडमुद्गरधारिणीम् ॥ ललाटलोचनां नीलां कपालकरभूषिताम् ॥ २२ ॥ सिंहाजिनधरां कृष्णां सर्वभूषणभूषिताम् ॥ कर्त्रीहस्तां खड्गहस्तां खेटखट्वांगधारिणीम् ॥ चर्मास्थिकेशवपुषं चामुंडामसृजत्प्रभुः ॥ २३ ॥ वटस्य निकटे पूर्वं निर्मिता लोकमातरः ॥ ततो लोके सुविख्याताः प्रत्यक्षा वटमातरः ॥ २४ ॥ तत्र स्नात्वा शुचिर्भूत्वा मातॄः पश्यति यो नरः ॥ स मुक्तः सर्वपापेभ्यो मातृलोके महीयते ॥ २५ ॥ सिंहनादोऽपि देवेन कृतो यत्र महामुने ॥ तत्र सिंहेश्वरो देवः सर्वदुष्कृतनाशनः ॥ २६ ॥ दर्शनात्तस्य देवस्य सिंहवत्सु बली भवेत् ॥ सिंहनादे कृते यत्र जातं कण्टकितं वपुः ॥ २७ ॥ तत्र कण्टेश्वरो देवो भक्तानां सर्वदः सदा ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा कण्टेश्वरं शिवम् ॥ २८ ॥ ग्रहभूतपिशाचेभ्यो न भयं प्राप्नुयात्क्वचित् ॥ ततस्ता मातरः सर्वा आदिष्टास्तु हरेण वै ॥ २९ ॥ अन्धासुरस्य रौद्रस्य पिबध्वं रुधिरं द्रुतम् ॥ एतस्मिन्नन्तरे व्यास प्रज्वलज्ज्वलनोपमः ॥ ३० ॥ अभयं शक्र मा भैस्त्वं यत्रोवाचेति शंकरः ॥ तत्र लिंगं समुद्भूतमभयेश्वरमुत्तमम् ॥ ३१ ॥ वंदितं देवगंधर्वैः सिद्धविद्याधरोरगैः ॥ तत्र स्नात्वा शुचिर्भूत्वा सोपवासो जितेन्द्रियः ॥ ३२ ॥ अर्चयेद्देवदेवेशमश्वमेधफलं लभेत् ॥ भूतप्रेतपिशाचेभ्यो भयं तस्य न विद्यते ॥ ३३ ॥ सिंहयुक्तेन यानेन शिवलोकं स गच्छति ॥ अन्धकस्य तु या माया रक्तासुरसमुद्भवा ॥ ३४ ॥ मातृभिर्युध्यमानाभिः क्षयमाशु जगाम सा ॥ देव्यः पिबन्त्यो रक्तौघं दैतेयतनुतश्च्युतम् ॥ ३५ ॥ पद्भ्यां पद्भ्यां जगमुर्न तु तृप्ता ललाटजा ॥ हतमायः शिष्टकस्तु भिन्नशूलतनुच्छदः ॥ ३६ ॥ उत्तराभिमुखं शूलमंधकोऽकर्षयद्बली ॥ संनिरुद्धो महादेवो वारितो गणपेन सः ॥ ३७ ॥ महाविनायकः ख्यातस्तस्माल्लोकेऽभवन्मुने ॥ दर्शनात्तस्य देवस्य न विघ्नैः पीड्यते नरः ॥ ३८ ॥ मासेमासे चतुर्थ्यां यो गणेशं पूजयेद्द्विज ॥ न तस्य विघ्नं जायेत इह लोके परत्र च ॥ ३९ ॥ स्वेदविंदुरथो तस्य ललाटादपतद्भुवि ॥ तस्मादंगारको जातो रक्तमाल्यानुलेपनः ॥ ४० ॥ आवन्त्ये विषये जातो लोहितांगो धरासुतः ॥ अंगारकस्तु रक्ताक्षो महादेवसुतस्तथा ॥ ४१ ॥ नामभिर्ब्रह्मणा स्तुत्वा ग्रहमध्येऽधिरोपितः ॥ तत्र तीर्थमथोत्पन्नमंगारेश्वरमुत्तमम् ॥ ४२ ॥ ब्रह्मणा स्थापितं लिंगं गणगंधर्वसेवितम् ॥ शुचिस्तत्र च यः स्नाति नरो ह्यंगारवासरे ॥ ४३ ॥ दृष्ट्वांगारेश्वरं सोथ मुच्यते सर्वपातकैः ॥ चतुर्थ्यां मंगलदिने नक्तं चार्घ्यं निवेदयेत् ॥ ४४ ॥ यावत्पूर्णाश्चतस्रः स्युस्तावत्कार्याः प्रयत्नतः ॥ पञ्च वै करकाः कार्यास्ताम्रपात्रेण संयुताः ॥ ४५ ॥ गुडपीठमयाः कार्या रक्तवस्त्रसमन्विताः ॥ रक्तचंदनसंयुक्ता रक्तपुष्पैश्च पूजिताः ॥ ४६ ॥ तिलतंडुलसंपूर्णमेकं तत्रैव कारयेत् ॥ द्वितीयं लड्डुकैश्चैव तृतीयं पयसा तथा ॥ ४७ ॥ उत्तरीभिश्चतुर्थं च पञ्चमं मूलकैस्तथा ॥ कृत्वा ह्येवं विधानेन मंत्रेणार्घ्यं निवेदयेत् ॥ ४८ ॥ कुजाय लोहितांगाय ग्रहमध्यस्थिताय च ॥ कार्तिकेयानुरूपाय सुरूपाय नमो नमः ॥४९॥ शिवललाटसंभूत धरणीगर्भसम्भव ॥ रूपार्थं त्वां प्रपन्नोस्मि गृहाणार्घ्यं नमोऽस्तु ते ॥५०॥ ज्वलितांगारवर्णाभ स्निग्धविद्रुमनासुर ॥ पुत्रार्थी त्वां प्रपन्नोस्मि गृहाणार्घ्यं धरात्मज ॥ ५१ ॥ आवन्त्यमण्डले जातो धरण्यां च शिवेन वै ॥ पुत्रं देहि धनं देहि यशो देहि नमोऽस्तु ते ॥ ५२ ॥ एवं संपूजितो भौमश्चतुर्थ्यां मुनिसत्तम ॥ भुक्त्वा भोगांस्तथा पुत्रान्प्राप्य वै क्षितिमंडले ॥ ५३ ॥ मृतः स्वर्गमवाप्नोति यावदिन्द्राश्चतुर्दश ॥ ५४ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽङ्गारकीचतुर्थीव्रतमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ नास्ति शेषं यदा रक्तं पीयमानं च रक्षसः ॥ चामुंडायास्ततो रक्तमभूदास्यं च भासुरम् ॥१॥ कृष्णं कृतांतकल्पांतं करालदशनाधरम् ॥ प्रज्वलत्यंधके शांतं ज्वलत्केसरलोचनम् ॥२॥ घोरघर्घरनिर्घोषस्फीतफेत्कारविस्वरम् ॥ तार्क्ष्यपक्षकृतापीडं तीक्ष्णदंष्ट्रांकुरोज्वलम् ॥३॥ तस्मिन्मुखे कपालाग्रं निधाय रुपिताननाः ॥ अपिबद्रुधिरं चंडी चण्डदोर्दंडमंडिता ॥ ४ ॥ तया पिबंत्या दैत्येंद्रः शरीरे कृशतां गतः ॥ क्षयं निन्येऽथ संक्षीणक्षुद्रक्षुभितवीक्षणः ॥ ५ ॥ इत्थं निर्वीर्यदेहोऽसौ बभूवांधकदानवः ॥ सर्वां संहृत्य मायां यो बलं क्षीणमथाकरोत् ॥ ६ ॥ तीव्रं भयं समासाद्य प्राणत्राणपरायणः ॥ दृष्ट्वा नान्यां गतिं लोके दैत्यस्तुष्टाव शंकरम् ॥ ७ ॥ कृतांजलिपुटो भूत्वा रोमांचितशरीरकः ॥ सात्त्विकं भावमापन्नस्त्यक्त्वा चैव रजस्तमः ॥ ८ ॥ लोकानां कारणं देवं विबुधाधिपतिं प्रभुम् ॥ शश्वद्भक्त्यान्वितो भक्त्या निर्मलेनांतरात्मना ॥ ९ ॥ श्लाघ्यं शिवं च तुष्टाव देवं चंद्रार्धशेखरम् ॥ १० ॥ ॥ अंधक उवाच ॥ ॥ कृत्स्नस्य योऽस्य जगतः सचराचरस्य कर्ता कृतस्य च तथा सुखदुःखदाता ॥ संसारहेतुरपि यः पुनरंतकाले तं शंकरं शरणदं शरणं व्रजामि ॥११॥ यं योगिनो विगतमोहतमोरजस्का भक्त्येकतानमनसो विनिवृत्तकामाः ॥ ध्यायंति योऽखिलधियोऽमितदिव्यभूर्ति तं शंकरं शरणदं शरणं व्रजामि ॥ १२ ॥ यश्चंद्रखंडममलं विलसन्मयूखं वह्निं सदा सुरसरिच्छिरसा बिभर्ति ॥ यस्यार्धदेहमभजद्गिरिराजपुत्री तं शंकरं शरणदं शरणं व्रजामि ॥ १३ ॥ यः सिद्धचारणनिषेवितपादपद्मो गंगां महोर्मिविषमां गगनात्पतंतीम् ॥ मूर्ध्ना दधे स्वजमिव त्रिजगत्पुनंतीं तं शंकरं शरणदं शरणं व्रजामि ॥ १४ ॥ कैलासशैलशिखरं प्रविकंप्यमानं कैलासशृंगसदृशेन दशाननेन ॥ यः पादपद्मपरिपीडनसेव्यमानस्तं शंकरं शरणदं शरणं व्रजामि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ १५ ॥ दक्षाध्वरे च नयने च तथा भगस्य पूष्णस्तथा दशनपंक्तिमशातयद्यः ॥ व्यष्टंभयत्कुलिशहस्तमथेंद्रमीशं तं शंकरं शरणदं शरणं व्रजामि ॥१६॥ येनासकृद्दितिसुताश्च दनोः सुताश्च विद्याधरोरगगणाश्च वरैः समग्रैः ॥ संयोजिता मुनिवराः फलमूलभक्षास्तं शंकरं शरणदं शरणं व्रजामि ॥ १७ ॥ एवं कृतेपि विषयेष्वपि सक्तभावा ज्ञानेन च श्रुतगुणैरपि तेन युक्ताः ॥ यं संश्रिताः सुखभुजः पुरुषा भवंति तं शंकरं शरणदं शरणं व्रजामि ॥ १८ ॥ ब्रह्मेंद्रविष्णुमरुतां च सपण्मुखानां योऽदाद्वरान्सुबहुशो भगवान्महेशः ॥ सूतं च मृत्युवदनात्पुनरुज्जहार तं शंकरं शरजद शरणं व्रजामि ॥ १९ ॥ आराधितस्तु तपसा हिमवन्निकुंजे धूम्रव्रतेन तपसा च परैरगम्यः ॥ संजीवनीं समददादृगवे महात्मा तं शंकरं शरणद शरणं व्रजामि ॥२०॥ क्रीडार्थमेव भगवान्भुवनानि सप्त नानानदीविहगपादपमंडितानि ॥ सव्रह्मकानि समृजे सुकृताभिधानि तं शंकरं शरणदं शरणं व्रजामि ॥ २१ ॥ यः सव्यपाणिकमलाग्रनखेन देवस्तत्पंचमं प्रसभमेव करालरंध्रम् ॥ ब्राह्मं शिरस्तरणिपद्मनिभं चकर्त तं शंकरं शरणदं शरणं व्रजामि ॥ २२ ॥ ये त्वां सुरोत्तमगुरुं पुरुषा विमूढा जानंति नास्य जगतः सचराचरस्य ॥ ऐश्वर्यमानविगमेऽनुशयेन पश्चात्ते यातनामनुभवंति यथाहमेव ॥ २३ ॥ यः पठेत्स्तुतिमिमां शुचिकर्मा यः शृणोति सततं शिवभक्तः ॥ विप्रसंसदि सदा शुभकर्मा स प्रयाति शिवलोक मखंडम् ॥ २४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तस्यैवं स्तुवतो देवः शूलपाणिर्वृषध्वजः ॥ पूर्णे वर्षशतस्यांते प्रीतः प्रोवाच शंकरः ॥ २५ ॥ पुत्र तुष्टोऽस्मि भद्रं ते जातस्त्वं निर्मलोऽधुना ॥ दिव्यं ददामि ते चक्षुः पश्य मां विगतज्वरः ॥ २६ ॥ यच्च ते मनसा वापि किंचिच्च कांक्षितं फलम् ॥ तत्तत्सर्वं प्रदास्यामि ब्रूहि दानवसत्तम ॥ २७ ॥ ॥ दानव उवाच ॥ ॥ ब्राह्म्यं वैष्णवमैंद्रं वा पदमावृत्तिलक्षणम् ॥ विदितं मम तत्सर्वं मनागपि न कांक्षये ॥ २८ ॥ यदि तुष्टोऽसि देवेश गाणपत्यं ददस्व मे ॥ सविशेषं विशुद्धं च तदक्षय्यं च सर्वदा ॥ २९ ॥ ॥ महादेव उवाच ॥ ॥ अमरो जरया त्यक्तः सर्वदुःखविवर्जितः ॥ भविष्यसि गणाध्यक्षः सर्वलोकनमस्कृतः ॥ ३० ॥ कामरूपो महायोगी महासत्त्वो महाबलः ॥ अणिमादिगुणैर्युक्तः प्रियश्च मम सर्वदा ॥ ३१ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ततश्च सोंऽधकः श्रीमान्वराल्लब्ध्वा सुदुर्लभान् ॥ महादेवगणो भूत्वा तत्रैवांतरधीयत ॥ ३२ ॥ गतेंऽधके ततो देव्यो ब्रह्माण्याद्याः समागताः ॥ स देवो यत्र भगवानंधकस्य वरप्रदः ॥ ३३ ॥ तास्तुष्टुवुर्महादेवमथ तुष्टो महेश्वरः ॥ चामुंडा चं महेशेन समाश्वस्ता शिवाऽभवत् ॥ ३४ ॥ शंकरं प्रणतं दृष्ट्वा तासामग्रे व्यवस्थितम् ॥ ब्रह्मादयोऽपि ते दृष्टास्तुष्टुवुर्विविधैः स्तवैः ॥ ३५ ॥ प्रशांतास्ता यदा दृष्टाः शंभुना रुधिराशनाः ॥ तदा वोचदिदं वाक्यं तासां स्थित्यर्थमुत्तमम् ॥ ३६ ॥ आवंत्ये विषये सर्वा यस्माज्जाता महाबलाः ॥ आवंत्यमातरस्तस्माख्याता लोके भविष्यथ ॥ ॥ ३७ ॥ अवंत्यां प्रीतिसंपन्नाः सर्वपापप्रणाशिनीः ॥ स्थिरा वसंत्यो लोकानां वरदाश्च भविष्यथ ॥ ३८ ॥ श्रावणस्य तु मासस्य अमावास्यां समाहिताः ॥ ये द्रक्ष्यंति सदा भक्त्या तेषां लोका महोदयाः ॥ ३९ ॥ अपुत्रो लभते पुत्रान्धनार्थी लभते धनम् ॥ रूपवान्सुभगो भोगी सर्वशास्त्र विशारदः ॥ ४० ॥ हंसयुक्तेन यानेन पितृलोके महीयते ॥ पुरीमिमां च रक्षध्वं कल्पेकल्पे क्रमेण तु ॥ ४१ ॥ एवमुक्त्वा तु देवेशो गतः कैलास पर्वतम् ॥ स्तूयमानो गणैः रौद्रैर्दैत्यामरगणेश्वरैः ॥ ४२ ॥ असुरसुरगणानां नायकस्यानुकीर्तिं कथयति कथनीयां श्रद्धया यः शृणोति ॥ सकल सुखनिधानं रुद्रलोकं स कांतं सुरगणदनुनाथैरर्चितं यात्यनंतम् ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्येऽन्धकवृत्तांतवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्क्षेत्रमाहात्म्यं कथितं च यथातथम् ॥ तीर्थानामुत्तमं तीर्थं पुण्यानां पुण्यवर्धनम् ॥ १ ॥ कति संत्यत्र तीर्थानि लिंगानि च तथा कति ॥ कथयस्व प्रसादेन पृच्छतो मम सांप्रतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ महाकालवने व्यास लिंगसंख्या न विद्यते ॥ ३ ॥ अकामो वा सकामो वा जायते योऽत्र मानवः ॥ महाकालवने रम्ये शिवलोके महीयते ॥ ४ ॥ कृतकामानि तीर्थानि प्रासादायतनानि च ॥ तेषु स्नात्वा शुचिर्भूत्वा शिवलोके महीयते ॥ ५ ॥ पुण्यानि सर्वतीर्थानि सिद्धिक्षेत्राणि सर्वतः ॥ तेषां मुख्यतमं विद्धि क्षेत्रं तीर्थं तथोत्तमम् ॥ ॥ ६ ॥ यः शृणोति महाभक्त्या स याति परमां गतिम् ॥ ७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खण्डेऽवन्तीक्षेत्रमाहात्म्ये महाकालवनमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्भवता सर्वं भवभीतिविनाशकम् ॥ ईश्वरस्थानमाख्यातं समंतात्सप्तयोजनम् ॥ १ ॥ यत्र क्षेत्रे मृता मर्त्याः सदाचारास्तथोत्तमाः ॥ विमानस्थाः पुरे नूनमैश्वरे ते वसंति च ॥ २ ॥ यत्र कीटपतंगाद्या मृता यांति परां गतिम् ॥ किं तीर्थं पुण्यमन्यच्च महाकालवनादृते ॥ ३ ॥ तस्माद्ब्रूहि ममैकं तु प्रश्नं तथ्येन सांप्रतम् ॥ कथं कनकशृंगेति ख्याता ह्येषा पुरा मुने ॥ ४ ॥ कुशस्थली कथं नाम तथावंती कथं स्मृता ॥ पद्मावती कथं साधो कथमुज्जयिनी तथा ॥ ५ ॥ नाम्नां हेतुमथो तेषां ब्रूहि त्वं मुनिसत्तम ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास प्रवक्ष्यामि यथा पूर्वं विरंचिना ॥ कथितं वामदेवाय गौरकल्पे पुरातने ॥ ७ ॥ महेशेन भगवता विधिश्चैवात्र हेतुतः ॥ पृष्टस्तु स्वच्युतानां च कुतो निवसतां सुखम् ॥ ८ ॥ स्वर्गप्राप्तिश्च भवति स्वेच्छाचारविहारिणाम् ॥ कोऽतिपुण्यतमः श्रेष्ठः प्रदेशः पापदारकः ॥ ९ ॥ कुतो निवर्तितं चित्तं जायते वसतां क्वचित् ॥ वसतामपि लोके शमैहिकं पारलौकिकम् ॥ एतन्मे भगवन्ब्रूहि हितार्थं सर्वदेहिनाम् ॥ ॥ १० ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवमादौ पुरा कल्पे प्रोक्तः श्रेष्ठः स शंभुना ॥ ११ ॥ प्रोवाच पार्वतीकांतं प्रभुः प्रीतः पितामहः ॥ ॥ १२ ॥ भगवन्सर्वकर्ता त्वं सर्वदर्शी सदाशिवः ॥ अजानन्निव त्वं सर्वं मां पृच्छसि सनातन ॥ यत्र कल्पांतको वह्निरविज्वालः प्रतिष्ठितः ॥ ॥ १३ ॥ त्वमेव च महाकालः सर्वं वै ज्ञायते त्वया ॥ नाथ ये मानवास्तत्र सदाचारास्तथा परे ॥ १४ ॥ निवसंति न ते मर्त्याः सुरास्ते वै न संशयः ॥ लभंते च पुनः स्वर्गं मृता वै कालपर्ययं ॥ १५ ॥ वर्तते च पुरी तत्र रम्यहर्म्या सुशोभना ॥ यस्यां भांति विचित्राणि हर्म्याणि विविधानि च ॥ १६ ॥ स्वर्णशृङ्गाश्च प्रासादा विहिता विश्वकर्मणा ॥ देवाः संति सदा तत्र तीर्थानि विविधानि च ॥ १७ ॥ पूर्वकल्पे स्थितोऽहं च यत्र त्वं केशवस्तथा ॥ तामेव च पुरीं द्रष्टुं सर्वे लोका ह्यवंतिकाम् ॥ १८ ॥ तथा देवर्षयः सिद्धा यक्षकिंनरदानवाः ॥ आजग्मुः स्थाणुना सार्धं वेधसा ब्रह्मयोनिना ॥ १९ ॥ तथैव च वरा नार्यो देवानामतिवल्लभाः ॥ समापेतुः सहस्राणि द्रष्टुमत्यद्भुतां पुरीम् ॥ २० ॥ आगत्य च यदा देवः सह देवैर्महेश्वरः ॥ वीक्षते नगरीं रम्यामपश्यदावृतां तथा ॥ २१ ॥ प्रासादैः स्वर्णशृंगाढ्यैर्मणिरत्नविभूषितैः ॥ विश्वरूपो हि भगवान्राजा विश्वैक

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः ॥ २२ ॥ तत्रास्ते शोभने दिव्ये प्रासादे मणिभूषिते ॥ सेव्यमानः सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥ २३ ॥ ततो महेशश्च पितामहश्च
समेत्य तं विश्वपतिं ननंदतुः ॥ समर्चितौ तेन यथार्हमादरात्सहानुगावागमनं त्वपृच्छत् ॥ २४ ॥ किमागतौ वा त्रिदिवान्महीतलं सहानुगावांश
यकश्च कथ्यताम् ॥ ततस्तु तावूचतुरब्जजेश्वरौ भवान्हरे यत्र च तत्र नौ रतिः ॥ २५ ॥ त्वया विना नैव सुरालये सुखं महीतले वाथ रसातलेऽ
स्ति नः ॥ कदा त्वया कांचनशेखरा पुरी निदेशिता देशमवती विचित्रिता ॥ २६ ॥ ॥ हरिरुवाच ॥ ॥ त्वदर्थमेवेश विशेषशालिनी सृष्टा
हि वै सर्वगुणाकरा मया ॥ प्रयच्छ विश्वेश्वर चात्रयोरिह स्थानं च तीर्थं प्रलयेऽक्षयं च ॥ २७ ॥ ददाम्यभीष्टं युवयोरिहालयं प्रजापते ह्युत्तरतस्तव
स्थितिः ॥ महेश्वर त्वं व्रज दक्षिणालयं स्थानं सुदत्तं युवयोः सुशोभनम् ॥ २८ ॥ महाकालो ह्यधोज्वालो जगदात्मा प्रभुः स्थितः ॥ गणैरनेक
साहस्रैरावृतः परमेश्वरः ॥ २९ ॥ क्रीडार्थं नगरी सृष्टा सर्वभूतहितैषिणा ॥ मयाद्य युवयोर्दत्ता विहायाऽचलमात्मनः ॥ ३० ॥ भवद्भ्यां हेमशृं
गेति यस्माच्च समुदीरिता ॥ पुरी कनकशृंगेति लोके ख्याता भविष्यति ॥ ३१ ॥ एवं कनकशृङ्गेति प्रथमं नाम कथ्यते ॥ ३२ ॥ जपंतश्च
स्थिता यत्र ब्रह्मविष्णुमहेश्वराः ॥ नित्यं रमंति भक्तानां सर्वाभीष्टफलप्रदाः ॥ ३३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कनकशृङ्गाभिधानवृत्तांतवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ सनत्कुमार
उवाच ॥ ॥ शृणु व्यास यथेयं तु प्रोच्यते हि कुशस्थली ॥ कल्पे तत्पुरुषे पूर्वं वेदविद्भिर्मनीषिभिः ॥ १ ॥ वेधसा सृजितं विश्वं दैत्यदानवरा
क्षसम् ॥ अन्योन्यमदमत्तमन्योन्यद्वेषि वै रणे ॥ २ ॥ देवाश्च दानवाः संख्ये नित्यं स्पर्धासमन्विताः ॥ मनुष्या मनुजैः सार्धं सिद्धविद्याधरैः
सह ॥ ३ ॥ चारणाः किंनरैः सार्धमेवं ते द्वेषतत्पराः ॥ युद्धं कुर्वंति सततमविस्पष्टार्थया गिरा ॥ ४ ॥ सर्वे चैव च बलिनो दुर्बलैर्मनुजैः सह ॥
पशवः पशुभिः सार्धं पक्षिणः सह पक्षिभिः ॥ ५ ॥ एवमन्योन्यमन्येश्च निर्मर्यादमिदं जगत् ॥ दृष्ट्वा विश्वस्य कर्तारं विष्णुं विश्वेश्वरं परम् ॥ ६ ॥
व्रजामि शरणं देवं शरणार्त्तिहरं हरिम् ॥ एवं मनसि संधाय दध्यौ ध्यानेन माधवम् ॥ ७ ॥ ततो ध्यातो महायोगी विश्वरूपधरो हरिः ॥ लोहद
ण्डधरः श्रीमानिदमाह पितामहम् ॥ ८ ॥ ब्रह्मन्ध्यातस्त्वया सम्यग्ध्यानयोगेन पश्य माम् ॥ समायांतं तथा ध्यातं जगतां पातुमुद्यतम् ॥ ९ ॥
ततो धाता निशम्येतत्त्यक्त्वा ध्यानमवेक्ष्य तम् ॥ समुत्थायैकमनसा नमश्चक्रेऽर्चयत्पुनः ॥ १० ॥ पाद्येनाचमनीयेन मधुपर्केण केशवम् ॥ पूज
यित्वा पुनर्वाक्यमुवाचाच्युतमब्जजः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव जगन्नाथ जगत्सृष्टमिदं त्वया ॥ ऋते त्वया जगद्विष्णो नैवावस्थातु
महति ॥ १२ ॥ शास्ता त्वमस्य विश्वस्य विशुद्धस्य च नापरः ॥ त्वत्तोस्तीदं जगत्सर्वं तस्मात्त्वमनुशासय ॥ १३ ॥ देवदानवगंधर्वाः सयक्षो
रगराक्षसाः ॥ त्वामृते पुण्डरीकाक्ष व्यापिताशेषविग्रहाः ॥ परस्परं विनिघ्नंति तांश्च त्वं रक्षितुं क्षमः ॥ १४ ॥ त्वमस्य विश्वस्य चराचरस्य स्थितेः
सदा प्राणभृदात्मरूपिणी ॥ १५ ॥ त्वया धृतं सर्वमिदं जगद्वै यतस्ततोऽसि त्वमुपेन्द्रसंज्ञः ॥ प्रवेशनं व्याप्तमिदं स्वधाम यैस्त्वमुच्यसे विष्णुरतो
मुनींद्रैः ॥ १६ ॥ निवासितं विश्वमिदं त्वयाद्य वासश्च धातोरिति वासुदेवः ॥ तवानुगं विश्वमिदं विभुस्त्वमशेषविश्वस्य विभासि राजा ॥ १७ ॥
सेनानुरूपं जगदेव यस्मादतः स्मृतस्त्वं किल विश्वसेनः ॥ विलेखनादस्य चराचरस्य कृतेश्च धातोस्त्वमतोऽसि कृष्णः ॥ १८ ॥ जितं त्वया देव
जगत्त्रयं यच्चितेश्च धातोस्त्वमतोऽसि जिष्णुः ॥ तस्मात्समस्तग्रहलोकपालं जगद्विभो पालय सर्वकालम् ॥१९॥ त्वमस्य सर्वस्य भवादिराजस्त
वास्तु भद्रासनमद्वितीयम् ॥ प्रदक्षिणावर्तनकस्तु शंखः करस्थितः शोभति पूरुषस्य ॥ २० ॥ सुदर्शनं नाम तवास्ति चक्रमतो हि गीतः कविभि
स्तु चक्री ॥ ध्वजोऽस्ति ते देव सुपर्णसेवितस्तथा सुपर्णश्च तवास्ति वाहनम् ॥२१॥ तुरंगमाः संतु तवारिसंहरे तथा हृषीकेश सुदन्तदन्तिनः॥ कि
रीटनिष्कांगदकर्णपूरकेयूरहारोत्तमहेमसूत्रैः ॥ २२ ॥ विचित्रवस्त्रोत्तमरक्तमाल्यैर्विभूषितस्त्वं भव भीमसेनः ॥ श्रिया कदाचिच्च न मुच्यते भवान्भवं
ति ते नित्यमनंतसंपदः ॥ २३ ॥ तवानुगा भक्तिरिहास्तु वै सती मुकुन्द भक्ते त्वमतः प्रसीद मे ॥ २४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ स एव
मुक्तस्तु पुरो दिवौकसां विभुः प्रसन्नस्त्विदमब्रवीद्धरः ॥ विरिंचे मे दर्शय तस्य मंडलं त्वया विमुक्तं च सदाशिवं विभो ॥ २५ ॥ स्थिरं स्थि
यत्र जगत्करोम्यहं ततो विरिंचिः कुशमुष्टिमाददे ॥ पवित्रदेशस्य निदर्शनाय जगाम पुण्यं च्यवनाश्रमं तदा ॥ २६ ॥ ततः स्थलीमुच्चतरामवाप्य
पितामहः केशवमाह चादरात् ॥ त्वदुद्भवं चात्र पवित्रमंडलं त्वया विमुक्तं च सदा शिवं विभो ॥ २७ ॥ त्वमेव विष्णुर्विबुधार्चितः
सदा स्मृतो मुनींद्रैः स च विप्रश्रवाः ॥ निषीद विश्वेश कुशस्थलं यदा तदाश्रितो माधवमासरूपवान् ॥ २८ ॥ कुशस्थलीं संस्थित
एव देव इत्थं विधात्रा पुरुषोत्तमः स्तुतः ॥ स्थलीं कुशैरास्तरितामुपाविशत्कुशस्थलीं देवमुनीन्द्रसेविताम् ॥ २९ ॥ समंततो योजनसं
ख्ययावृतां ततो विधाता पुरुषोत्तमस्तथा ॥ कुशस्थलीति प्रथितं जगत्त्रये प्रचक्रतुर्नाम च तावुभावपि ॥ ३० ॥ तत्र विश्वपतिः
श्रीमान्विश्वेशो विश्वकृद्विभुः ॥ विश्वं शशास विश्वात्मा सर्वविश्वस्य नायकः ॥ ३१ ॥ एवं कुशस्थली ख्याता हेमशृङ्गेति या
पुरा ॥ स्तीर्णा कुशैर्यतो धात्रा कुशस्थली ततः स्मृता ॥ ३२ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम
आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये व्याससनत्कुमारसंवादे कुशस्थलीनामहेतुकथावर्णननामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥
॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा चैशानकल्पे तु स्मृतावंती यथा पुरी ॥ तथा शृणु सुरैः पूर्वं दैत्यसैन्यपराजितैः ॥ १ ॥ आश्रितं मेरुशिखरं
वनकंदरगुहावृतम् ॥ तत्र गत्वा द्विजश्रेष्ठ मंत्रं च चक्रुरुद्यताः ॥ २ ॥ अन्योन्यं च समासाद्य समभ्यर्च्य परस्परम् ॥ जग्मुः सर्वे सुरगणा यत्र ब्रह्मा
प्रजापतिः ॥ ३ ॥ निवेदयांचक्रिरे सर्वं तत्रागमनकारणम् ॥ तेषां तद्वचनं श्रुत्वा देवानां स प्रजेश्वरः ॥४॥ जगाम त्रिदशैः साकं दवदेवं महेश्वरम् ॥
स चापि ह्यगमत्तत्र वैकुंठं धाम यत्र वै ॥ ५ ॥ ऋद्धिसिद्धिप्रदं नित्यं मुनिचारणसेवितम् ॥ किन्नरैर्गीयमानं च अप्सरोगणसेवितम् ॥ ६ ॥
ऋषिभिर्भार्गवादिभिर्देवर्षिनारदोत्तमैः ॥ सिद्धगंधर्वमुख्यैश्च कुमारैः सनकादिभिः ॥ ७ ॥ प्रजापतिगणाकीर्णं मानवैश्च चतुर्दशैः ॥ वसुभिर्विश्वे
देवैश्च पितृणामुत्तमैर्गणैः ॥ ८ ॥ संसेव्यं च सदाचारैः पुण्यवद्भिर्जनैस्तथा ॥ दिव्यं दिव्यैश्च प्रासादैर्दिव्यपादपशोभितम् ॥ ९ ॥ मणिरत्नैश्च सोपानै
र्दिव्यं सरसशोभितम् ॥ हंसकारंडवाकीर्णं मणिभामिः सुभास्वरम् ॥ १० ॥ पङ्कैरहितं स्थानं यत्र तिष्ठन्ति पक्षिणः ॥ तत्र गत्वा सुराः सर्वे वासु
देवदिदृक्षया ॥ स्तुतिभारैरभिरे कर्तुं देवदेवजगत्पतेः ॥ ११ ॥ ॥ देवा ऊचुः ॥ ॥ नमोऽनंताय बृहते कूर्माय वै नमोनमः ॥ १२ ॥ नृसिंहरूपायोग्राय
नमो वाराहरूपिणे ॥ राघवाय च रामाय ब्रह्मणेऽनंतशक्तये ॥ १३ ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥ नमो बुद्धाय शुद्धाय कल्कये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

म्लेछनाशिने ॥ १४ ॥ इति स्तवाभियुक्तानां वागुवाचाशरीरिणी ॥ शृणुध्वं भोः सुराः सर्वे भूत्वा चैकाग्रमानसाः ॥ १५ ॥ महाकालवने रम्ये ब्रह्मर्षिगणसेविते ॥ तत्र पुण्या पुरी ह्येका सर्वकामफलप्रदा ॥ १६ ॥ नाम्ना कुशस्थली रम्या सिद्धगंधर्वसेविता ॥ कल्पादौ कल्पमध्ये वा यत्र संनिहितो हरः ॥ १७ ॥ कल्पक्षये क्षयं यांति स्थावराणि चराणि च ॥ तीर्थानि चैव सर्वाणि पुण्यान्यायतनानि च ॥ १८ ॥ सरितः सागराः सर्वे सरांस्युपवनानि च ॥ ओषधीर्वृक्षवल्लीश्च यंत्रं मंत्रं शुभाशुभम् ॥ १९ ॥ ज्योतींषि चंद्रसूर्यौ च सर्वं विष्णुमयं जगत् ॥ तेषां बीजं च पुण्यं च जीवकर्माशयं तथा ॥ २० ॥ सर्वमादाय भगवाञ्छंकरस्तत्र तिष्ठति ॥ सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः ॥ २१ ॥ सर्वयज्ञमयो वेदः सर्वधर्ममयी दया ॥ रेवा च सरितां श्रेष्ठा भुवि पुण्यकृताधिका ॥ २२ ॥ तस्माद्धितकरं क्षेत्रं कुरूणां वै सुरोत्तमाः ॥ तस्मादशगुणं मन्ये प्रयागं तीर्थमुत्तमम् ॥ २३ ॥ तस्माद्दशगुणा काशी काश्या दशगुणा गया ॥ ततो दशगुणा प्रोक्ता कुशस्थली च पुण्यदा ॥ २४ ॥ उपरागसहस्राणि व्यतिपातायुतानि च ॥ अमालक्षं तु एतस्याः कलां नार्हति षोडशीम् ॥ २५ ॥ लक्षमिंदुक्षये दानं सहस्रं चायनद्वये ॥ व्यतीपाते च कोटिः स्याद्रा कार्या च ह्यनंतकम् ॥ २६ ॥ तस्माद्धितकरा देवा पुरी ह्येषा कुशस्थली ॥ अनंताऽनंतसंख्यातं दानं किंचित्कृतं नरैः ॥ २७ ॥ तत्सर्वं भोः सुर श्रेष्ठाः सर्वं तच्चाक्षयं भवेत् ॥ तस्मात्सर्वप्रयत्नेन यूयं यात हि मा चिरम् ॥ २८ ॥ क्षीणपुण्या भवंतो वै बाधंते तेन वः सुराः ॥ महाकालवने रम्ये पुरी ह्येषा कुशस्थली ॥ २९ ॥ तत्र गत्वा भवंतो वै स्नानदानादिकं भुवि ॥ आचरध्वं सुविधिना पुण्यात्स्वर्गमवाप्स्यथ ॥ ३० ॥ एतच्छ्रुत्वा वचस्तस्या वाण्याश्चाकाशगं तदा ॥ प्रणम्य शिरसा तस्यै ब्रह्मेशानपुरोगमाः ॥ ३१ ॥ पुनर्जग्मुः सुराः सर्वे यत्र माहेश्वरं वनम् ॥ पुरीं चैव द्विजश्रेष्ठ सर्वकामफलप्रदाम् ॥ ३२ ॥ चातुर्वर्ण्यसमाकीर्णामृषिगंधर्वसेविताम् ॥ पुण्यवद्भिर्जनैः पूर्णां सिद्धचारणसेविताम् ॥ ३३ ॥ दरिद्रो न जडो मूर्खो न रोगी न च मत्सरी ॥ न व्याधितो नापकारी जनः क्वचित्प्रदृश्यते ॥ ३४ ॥ दांताः शांताः सुशीलाश्च जरारोगविवर्जिताः ॥ स्वधर्मनिरता नित्यं सदाचारातिथिप्रियाः ॥ ३५ ॥ नरा यत्र निवसंति नार्यश्चैव पतिव्रताः ॥ महोत्सवाः सुगीतानि हव्यं कव्यं गृहेगृहे ॥ ३६ ॥ ईदृशीं च पुरीं दृष्ट्वा देवा हर्षं परं गताः ॥ तत्र तीर्थं समाख्यातं नाम्ना पैशाचमोचनम् ॥ ३७ ॥ पुण्यवद्भिः सदा सेव्यं सर्वतीर्थनिषेवितम् ॥ तस्मिन्स्नात्वा च जप्त्वा च हुत्वा दत्त्वा च देवताः ॥ ३८ ॥ पुण्यं चाथाक्षयं लब्ध्वा पुनर्याताः सुरालयम् ॥ जित्वाऽसुरान्महादुष्टान्स्थान प्राप्ताः स्वकंस्वकम् ॥ ३९ ॥ येऽस्यां कुर्युर्महाभागाः स्नानं दानं तथार्चनम् ॥ हवनं तर्पणं पितॄंस्तत्सर्वं स्याद्ध्यनंतकम् ॥ ४० ॥ तस्मात्सर्वप्रयत्ने न एतत्कार्यं सदा बुधैः ॥ देवतीर्थोपधीबीजभूतानां चैव पालनम् ॥ ४१ ॥ कल्पेकल्पे च यस्यां वै तेनावंती पुरी स्मृता ॥ अद्यप्रभृति पुरी ह्येषा नाम्नावंती कुशस्थली ॥ ४२ ॥ इत्युक्त्वा वै तदा देवाः स्वधाम परमं गताः ॥ तदारभ्य द्विजश्रेष्ठ ह्यवंती भुवि विश्रुता ॥ ४३ ॥ य एतां सुकथां दिव्यां पुण्यां च पापहारिणीम् ॥ शृणुयाच्छ्रावयेद्वो वै सर्वपापैः स मुच्यते ॥ ४४ ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ वाजपेयसहस्राणां राजसूयशताधिकम् ॥ ४५ ॥ पुण्यं लब्ध्वा नरो नित्यं शिवलोके महीयते ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽवंत्यभिधानकथावर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एकस्मिन्नंतरे व्यास यथोज्जयनी स्मृता पुरी ॥ तथाहं संप्रवक्ष्यामि शृणुष्व त्वं समाहितः ॥ १ ॥ त्रिपुराख्यो महादैत्यः सर्वदैत्यजनेश्वरः ॥ तप स्तेपे सुदुर्धर्षं ब्रह्मणस्तुष्टिकारणात् ॥ २ ॥ आतपे चाग्निसेवां वै प्रावृषि मेघडंबरम् ॥ देमयित्वा तदात्मानं शीतकाले जलाशये ॥ ३ ॥ शीर्णपत्र जलाहारो वायुभक्षी निराश्रयः ॥ गायत्रीव्रतमास्थाय त्यक्तसर्वपरिग्रहः ॥४॥ एवं वर्षसहस्रं तु तपस्तप्तं सुदुश्चरम् ॥ पूर्णे वर्षसहस्रे तु ब्रह्मा प्रीततमो ऽब्रवीत् ॥ ५ ॥ ब्रियतां भोऽसुरश्रेष्ठ वरं मत्तोभिवांछितम् ॥ तत्सर्वं सांप्रतं लोके वरं तुभ्यं ददामि वै ॥ ६ ॥ एवमुक्तः स विधिना दैत्यस्त्रिपुरसंज्ञितः ॥ उवाच वचनं सद्यो ब्रह्माणं संशितव्रतम् ॥ ७ ॥ ॥ त्रिपुर उवाच ॥ ॥ यदि तुष्टमना ब्रह्मन्वरं मे दातुमिच्छसि ॥ देवदानवगंधर्वपिशाचो रगराक्षसैः ॥ अवध्योऽहं सदा भूयां वरमेतदृणोम्यहम् ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं भवतु भो वत्स विचरस्वाकुतोभयः ॥ इत्युक्त्वा सहसा ब्रह्मा तत्रैवांतरधीयत ॥९॥ तदारभ्य महादैत्यो देवानां कदनं महत् ॥ चकार कोपपूर्णो वै पूर्ववैरमनुस्मरन् ॥ १० ॥ त्रासयित्वा यत्र तत्र त्रिपुराणि चराणि च ॥ अत्र वासकृतः सर्वे वर्णाश्रमपरा जनाः ॥ ११ ॥ तेषां वै कदनं चक्रे नानोपायेन पापधीः ॥ तस्मिन्पुरे दुष्टवासे ब्राह्मणा वेदपारगाः ॥ १२ ॥ न जुहुयुश्चाग्निहोत्रं सोमपानं न कर्हिचित् ॥ कुतश्चित्सुकृतं कर्म जनाः कुर्वंति नो मुने ॥ १३ ॥ स्वाहाकारस्वधाकारवषट्कारविवर्जिताः ॥ नोत्सवो दृश्यते गेहे कस्यचिद्भुवि विस्तृतः ॥ १४ ॥ देवतायतनं नास्ति तथा नो शिवपूजनम् ॥ नास्ति यज्ञो न दानानि न गोब्राह्मणपूजनम् ॥ ॥ १५ ॥ सदाचारजनो नास्ति दया मानविवर्जिता ॥ न दानी नोपकारी च तपस्वी नैव दृश्यते ॥ १६ ॥ एवं व्यास पुरे तस्मिन्नरैष्टप्रायमिदं जगत् ॥ प्रजानां ब्राह्मणा मूलं वेदमूला हि ब्राह्मणाः ॥ १७ ॥ वेदमूलपरा यज्ञा यज्ञमूला हि देवताः ॥ तस्माद्व्यास हतं सर्वं कृतं तेन दुरात्मना ॥ ॥ १८ ॥ तेन देवगणाः सर्वे हतप्राया हतौजसः ॥ विचरंति यथा मर्त्या भुवि तेन पराजिताः ॥ १९ ॥ अन्योन्यकृतसंधाना मंत्रं कृत्वा समा हिताः ॥ जग्मुस्ते तत्र यत्रास्ते प्रजापतिरकल्मषः ॥ २० ॥ त्रिदशाः कथयामासुरात्मव्यसनकारणम् ॥ तज्ज्ञात्वा सहसोत्थाय ब्रह्मा लोकपितामहः ॥ २१ ॥ जगाम त्रिदशैः सार्धं महाकालवनोत्तमम् ॥ यत्रास्ते सततं देव उमया सहितः शिवः ॥ २२ ॥ यत्रावंती पुरी दिव्या सर्वतीर्थनिषेविता ॥ तत्रागत्य सुरैः साकं स्वयंभूश्चतुराननः ॥२३॥ स्नानं दानं जपं होमं कृत्वा रुद्रसरे तदा ॥ पूजयित्वा महाकालं ब्रह्मा वचनमब्रवीत् ॥२४॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेव महादेव भक्तानामभयंकर ॥ श्रूयतां भोः सुरश्रेष्ठ देवकार्यमनुत्तमम् ॥२५॥ त्रिपुरोनाम दैत्येंद्रो देवानां कदनं महत् ॥ करोति सततं दैत्यो देवब्राह्मणनिंदकः ॥२६॥ त्रासयित्वा पुरस्तिस्रो विस्तीर्णा विचरत्यथ ॥ तत्र स्थितानि भूतानि नाशं यांति दुरात्मना ॥२७॥ एवं कृत्वा प्रजाः सर्वाः क्षयं नीताश्चराचराः ॥ उद्वासितानि द्वीपानि ग्रामाश्च नगराणि च ॥२८॥ ऋषीणामाश्रमाः सर्वे यतीनामायतनानि च ॥ एवं कृत्वा सुराः सर्वे भ्रष्टराज्याः पराजिताः ॥ २९ ॥ विचरंति यथा मर्त्यास्त्रिपुरेण दुरात्मना ॥ मत्तो लब्धवरो नित्यं व्रजत्येवाकुतोभयः ॥ ॥ ३० ॥ तस्मात्सर्वप्रयत्नेन वधस्तस्य विचिंत्यताम् ॥ ३१ ॥ इति श्रुत्वा वचस्तस्य ब्रह्मणः संशितात्मनः ॥ चिरं ध्यात्वा महादेवो ब्रह्माणं तमुवाच ह ॥ ३२ ॥ ॥ महादेव उवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा ब्रह्मशक्रपुरोगमाः ॥ जयोपायं करिष्यामि दैत्यस्यास्य दुरात्मनः ॥३३॥ तपश्चरत यूयं वो आत्मनो जयकांक्षिणः ॥ अवंत्यां यद्धुतं दत्तं तत्सर्वं चाक्षयं भवेत् ॥ ३४ ॥ इत्युक्त्वा सर्वदेवानां तत्रैवांतर्हितः शिवः ॥ गत्वा स्मशाननिलये भूतप्रेतनिषेविते ॥ ३५ ॥ जयार्थं तस्य दैत्यस्य त्रिपुरस्य दुरात्मनः ॥ उपासांचक्रिरे तत्र चामुण्डायाः सुरेश्वराः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ३६ ॥ महिषैश्च महामेध्यैः पशुपुष्पार्घतर्पणैः ॥ बलिभिर्विविधैर्दानैर्धूपदीपाग्नितर्पणैः ॥ पूजयित्वा तदा देवीं तामीडे वृषभध्वजः ॥ ३७ ॥
दुर्गां भगवतीं भद्रां दुर्गसंसारतारणीम् ॥ त्रिपुरांतकारिणीं कृत्यां चंडमुंडवधोद्यताम् ॥ ३८ ॥ दैत्यमेदोमदोन्मत्तां रक्ताख्यां रक्तदंतिकाम् ॥ रक्तांबरधरां धीरां रक्तपुष्पावतीं सतीम् ॥ ३९ ॥ महिषवाहिनीं श्यामां यक्षासनपरिग्रहाम् ॥ द्वीपिचर्मपरीधानां शुष्कमांसातिभैरवाम् ॥ ४० ॥ पूजयित्वा प्रसन्नात्मा ध्यानमास्थाय संस्थितः ॥ तदा भगवती भद्रा ययेदं धार्यते जगत् ॥ प्रसन्नवदना भूत्वा प्रेत्यक्षं प्राह चंडिका ॥ ४१ ॥ ॥ देव्युवाच ॥ ॥ ब्रियतां भोः सुरश्रेष्ठ वरं मत्तोऽभिवांछितम् ॥ सर्वं त्वयोक्तं यच्छाभि जगतामुपकारकम् ॥ ४२ ॥ ॥ श्रीहर उवाच ॥ ॥ यदि तुष्टासि वै देवि देहि मे वरमुत्तमम् ॥ येन हन्मि महादैत्यं त्रिपुरं देवकंटकम् ॥ ४३ ॥ ॥ श्रीदेव्युवाच ॥ ॥ जय ह्येनं महादेव गृहाण पाशुपतं परम् ॥ मया दत्तं सुरश्रेष्ठ दैत्यनाशकरं परम् ॥ ४४ ॥ महापाशुपतं शस्त्रं करे कृत्वा च शंकरः ॥ ४५ ॥ उज्जहार तदा शंभुर्दैत्यनाशाय सत्वरः ॥ महाडंबरिको भूत्वा सर्वप्राणिभयंकरः ॥ ४६ ॥ स्तुतिं कृत्वा ययौ वाग्भिः पृष्ठतोऽनुययुः सुराः ॥ शरेणैकेन वै रुद्रो जघान तं महासुरम् ॥ ४७ ॥ मायिनं तं त्रिधा भित्त्वा मायायुद्धेन शंकरः ॥ पुनरागात्पुरीमेतामवंतीम मरसेविताम् ॥ ४८ ॥ जयाशिषा प्रयुंजाना ऋषयः सिद्धचारणाः ॥ तुष्टुवुश्च तदा देवा जयशब्देन हर्षिताः ॥ ४९ ॥ अप्सरा ननृतुस्तत्र गंधर्वा ललितं जगुः ॥ ववौ तदा पुण्यतमो वायुः सुखप्रदो नृणाम् ॥५०॥ जयशब्दस्तदा जातः प्राणिनां च गृहे गृहे ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥ ५१ ॥ प्रवर्तते तदा यज्ञा महोत्सवसदक्षिणाः ॥ देवाः प्रपेदिरे स्थानं स्वकीयं पुनरादृतम् ॥ ५२ ॥ उज्जितो दानवो यस्मान्नैलोक्ये स्थापितं यशः ॥ तस्मात्सर्वैः सुरश्रेष्ठैर्ऋषिभिः सनकादिभिः ॥ ५३ ॥ कृतं नाम ह्यवंत्या वा उज्जयिनी पापनाशिनी ॥ अवंती च पुरा प्रोक्ता सर्वकामवरप्रदा ॥ ५४ ॥ अद्यप्रभृति पुरी व्यास उज्जयिनी समाश्रिताः ॥ येऽस्यां च स्नानदानादि भुवि कुर्वंति मानवाः ॥ ५५ ॥ न तेषां दुष्कृतं किंचिदेहे तिष्ठति पापजम् ॥ ५६ ॥ विद्यार्थी गिरीशं धनार्थी धनेशं सुतार्थी सुतेशं दिनेशं सुखार्थी ॥ श्रियोर्थी गणेशं श्रियार्थी वरेद्वै गिरां ब्राह्ममानी जनश्चोज्जयिन्याम् ॥ ५७ ॥ य एतस्यां महाभाग सदा वसति मानवः ॥ भुक्त्वा कामान्मनोऽभीष्टान्मृतः शिवपुरं व्रजेत् ॥ ५८ ॥ तत्रैव वसते नित्यं कल्पकोटिशताधिकम् ॥ ५९ ॥ य एतां वै कथां पुण्यां पठते शृणुतेऽथ वा ॥ मुच्यते सर्वपापेभ्यो गोसहस्रफलं लभेत् ॥ ६० ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्य उज्जयिन्यभिधानकथनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अथातः संप्रवक्ष्यामि पद्मावती यथाऽभवत् ॥ शृणुष्व चाहतो व्यास बहुपुण्यकृतां कथाम् ॥ १ ॥ एकदा सर्वरत्नानां हानिर्जाता दुरात्मभिः॥ धर्मग्लानिर्निरोधश्च जातो वै दुष्टदानवैः ॥ २ ॥ तदा सुरासुरैः सर्वैर्मिलित्वा मथितोंऽबुधिः ॥ मेरुर्वंशोर्दधिः पात्रं रज्जुर्वासुकिपन्नगः ॥ ३ ॥ कूर्मपृष्ठे विधिं कृत्वा रत्नानि दुदुहुस्तदा ॥ आदौ लक्ष्मीर्विनिर्याता कृष्णाय प्रतिपादिता ॥ ४ ॥ तेन कृत्वा विषादोऽभूद्देवदानवयोस्तदा ॥ एतस्मिन्नंतरे प्राप्तो नारदो देवदर्शनः॥ ५ ॥ वारितः कलहस्तेन देवदैत्यसमुद्भवः ॥ महाकालवने साऽस्तु पद्मा सिंधुमसुद्भवा ॥ ६ ॥ सागरांते च रत्नानि तिष्ठंति विविधानि च ॥ तानि सर्वाणि चादाय भवतां वै ददाम्यहम् ॥ ७ ॥ मथ्यतामुदधिः शीघ्रं नात्र कार्या विचारणा ॥ पुनस्ते तृष्यमं चक्रुरमृतार्थं सुरासुराः ॥ ८ ॥ मथ्यमानेऽब्धौ तेषां मणिः प्रादुश्च कौस्तुभः ॥ परिजाततरुः पश्चात्सुरा जाता ततः परम् ॥ ९ ॥ धन्वंतरिरथोत्पन्नश्चंद्रो जातोऽपि वै ततः ॥ कामधेनुस्ततो जाता गजरत्नं ततः परम् ॥ १० ॥ उच्चैःश्रवा हयश्रेष्ठः सुधा रंभा ततस्ततः ॥ ततः परं च सारंगं धनुः सर्वास्त्रसंभवम् ॥ ११ ॥ पांचजन्यस्तथा शंखः करे तिष्ठति मुरद्विषः ॥ निधिरेष महापद्मो विषं हालाहलं ततः ॥ १२ ॥ चतुर्दशापि रत्नानि प्राप्तानि विविधानि च ॥ समादाय गतास्तत्र यत्र माहेश्वरं वनम् ॥ १३ ॥ गत्वा ते च समासीना मंत्रं चक्रुः परस्परम् ॥ अहंपूर्वमहंपूर्वमिति ते समयंत्रिताः ॥ १४ ॥ कोलाहलस्तथोत्पन्नो नारदः पुनरभ्यगात् ॥ तेषां कलिमलं दृष्ट्वा विष्णुमाराधयत्ततः ॥ १५ ॥ मोहनीरूपमास्थाय नारीभूत्वाभ्यगाद्धरिः ॥ अतिरूपवती तन्वी तामालोक्य महासुराः ॥ १६ ॥ विह्वलांगाश्च ते सर्वे कामबाणवशंगताः ॥ एतस्मिन्नंतरे तेषां सुरां प्रादात्सुरेश्वरः ॥ १७ ॥ हस्तलाघवयोगेन देवानाममृतं ददौ ॥ एतस्मिन्नंतरे व्यास राहुस्तद्रूपधारकः ॥ १८ ॥ तेषामंतरगो भूत्वा पपौ चामृतमुत्तमम् ॥ तज्ज्ञात्वा च द्रुतं विष्णुः शिरश्चक्रेण चाच्छिनत् ॥ १९ ॥ सुधास्पर्शप्रसंगेन न ममारा सुरस्तदा ॥ साहुः केतुरिति ख्यातो क्षेत्रेऽस्मिन्मुनिसत्तम ॥ २० ॥ राहुकायात्समुद्भूतं बहु सुस्राव शोणितम् ॥ तस्मिन्क्षेत्रे महत्तीर्थं जातं तदोपनाशनम् ॥ २१ ॥ तत्र स्नात्वा शुचिर्भूत्वा राहोर्दर्शनतत्पराः ॥ न तेषां जायते किंचिद्राहुपीडा कदाचन ॥ २२ ॥ वांछितार्थमवाप्नोति गोसहस्रफलं भवेत् ॥ ततस्तानि च रत्नानि महाकालवने सुराः॥ २३ ॥ विभज्य भागांस्ते सर्वे प्राप्य रत्नभुजोऽभवन् ॥ मणिं पद्मां धनुः शंखं विष्णवे नारदो ददौ ॥ २४ ॥ सूर्याय च ददौ ह्यश्वं सप्तास्यं चाविंसंभवम् ॥ ऐरावतं गजश्रेष्ठं वासवाय समर्पयत् ॥ २५ ॥ पीयूषं दिविषद्गणान्ददौ चंद्रं च शंभवे ॥ पारिजातं तरुश्रेष्ठं रंभां चैव वरांगनाम् ॥ २६ ॥ इंद्रक्रीडावने रम्ये नंदने च समर्पयत् ॥ ऋषीणां समदाद्धेनुं कामदोग्ध्रीं यज्ञसिद्धये ॥ २७ ॥ निधिरेष महापद्मः कुबेरभवनं गतः ॥ यत्तद्धालाहलं प्रोक्तं विषं केनापि नाहृतम् ॥ २८ ॥ यतोयतः प्रसरति प्रलयं यांति जंतवः ॥ दधार तांडवं शंभुर्जगतां हितकाम्यया ॥ २९ ॥ तदाप्रभृति महादेवो नीलकंठ इति स्मृतः ॥ रत्नकुंडे नरः स्नात्वा नीलग्रीवं च पश्यति ॥ ३० ॥ मुक्त्वा स सर्वपापेभ्यः सर्वरत्नभुजो भवेत् ॥ शताश्वमेधिकं पुण्यं लब्ध्वा शिवपुरं व्रजेत् ॥ ३१ ॥ तदादाय सुराः सर्वे ब्रह्मविष्णुपुरोगमाः ॥ ऊचुश्च ते तदा व्यास हर्षनिर्भरमानसाः ॥ ३२ ॥ उज्जयिनीं समासाद्य जाता रत्नभुजो वयम् ॥ पद्मायाश्च निवासेन यस्मात्सर्वसुखावहा ॥ ३३ ॥ तस्मात्सर्वेषु कालेषु पद्मा वसतु निश्चला ॥ अद्यप्रभृति पूरेषा पद्मावतीति च स्मृता ॥ ३४ ॥ य एतस्यां महाभागाः स्नानं दानं तथार्चनम् ॥ तर्पणं चैव देवानां पितॄणां च विशेषतः ॥ ३५ ॥ न तेषां दुष्कृतं किंचिन्न दारिद्र्यं न दुर्गतिः ॥ शतं कुलानि सर्वाणि तारयेन्निरयात्तदा ॥ ३६ ॥ धनार्थी चैव पुत्रार्थी विद्यार्थी बहुकामुकः ॥ यत्र कुत्र स्थितो भूत्वा पद्मावतीति च स्मरेत् ॥ ३७ ॥ सर्वान्कामानवाप्नोति शिवः साक्षाद्ददेवरः ॥ एतद्व्यास फलं नाम्नः किं चिरं सेवनेन वै ॥ ३८ ॥ ये शृण्वंति कथां पुण्यां ये श्रावयंति नित्यशः ॥ न तेषां पातकं किंचिदश्वमेधफलं लभेत् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये पद्मावतीनामकथावर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्वावहितो व्यास कथां पापहरां पराम् ॥ एषा कुमुद्वती जाता यथा पद्मावती पुरी ॥ तथाहं संप्रवक्ष्यामि यथा मे लोमशोऽब्रवीत् ॥ १ ॥ ॥ लोमश उवाच ॥ ॥ शृणु वत्स मया दृष्टा बहुपुण्यतमा पुरी ॥ एकदा तीर्थयात्रायां गतो ऽहं वै कुशस्थलीम् ॥ गुणाढ्यतरं स्थानं यत्र संनिहितो हरः ॥ २ ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ यत्र तत्र स्थिता विप्रा ब्रह्मघोषम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुर्वत ॥ ३ ॥ यज्ञांश्चैव तथा चित्रान्ऋत्विजोदारकर्मणः ॥ ऋषयश्च महाभागाः प्रकुर्वंति समाहिताः ॥ ४ ॥ ऋषिपत्न्यस्तथा साध्व्यः परि
चर्यां प्रकुर्वते ॥ दश विष्णुसमाः ख्याातास्तत्रैव निवसंति ते ॥ ५ ॥ रुद्रा ह्येकादश प्रोक्ता द्वादशार्कास्तथैव च ॥ अष्टौ च वसवः ख्याता विश्वे
देवास्त्रयोदश ॥ ६ ॥ अष्टौ च दिग्गजाश्चैव मनवश्च चतुर्दश ॥ मरुद्गणाश्च ते सर्वे तत्रैवेंद्रपुरोगमाः ॥ ७ ॥ गंधर्वाप्सरसश्चैव किंनरोरगराक्षसाः ॥
सिद्धास्तपस्विनो वत्स तत्रैव समुपस्थिताः ॥८॥ अष्टौ वै भैरवाः ख्याताश्चत्वारः पवनात्मजाः ॥ विनायकाश्च षट् प्रोक्ता देव्यश्च चतुर्विंशतिः ॥
॥ ९ ॥ एते देवगणाः प्रोक्ता रौद्राश्चैव तथा गणाः ॥ ब्रह्मा वेदविदां श्रेष्ठो मरीचिकश्यपादयः ॥ १० ॥ दक्षः प्रजापतिश्रेष्ठो दितिर्वै देवमातरः ॥
सुरभीप्रमुखा गावः स्थावराणि चराणि च ॥ ११ ॥ तीर्थानि यानि सर्वाणि नद्यः प्रस्रवणानि च ॥ क्षेत्राणि चैव सर्वाणि भुवि पुण्यतमानि
वै ॥ १२ ॥ सप्त पुर्यस्त्रयो ग्रामा नवारण्या नवोपराः ॥ चतुर्दशानि गुह्यानि मुक्तिद्वाराणि भूतले ॥ १३ ॥ समुद्राश्चैव चत्वारो रत्नानि विविधानि
च ॥ सती पतिव्रताः साध्व्यस्तथा ब्रह्मर्षयोऽमलाः ॥ राजर्षयस्तथा शांता ब्राह्मणा वेदपारगाः ॥ १४ ॥ वेदाः पुराणस्मृतयो गाथा गीतिप्रहे
लिकाः ॥ उपासांचक्रिरे तस्य देवदेवेर्ङमापतेः ॥ १५ ॥ तस्य दर्शनमात्रेण जातोऽहं विज्वरोऽमलः ॥ दीर्घायुर्दीप्ततपसा जरारोगविवर्जितः ॥१६॥
स्नातोऽहं सर्वतीर्थेषु शुचिर्भूत्वा समाहितः ॥ प्रसन्नमानसो जातः सर्वपापपराङ्मुखः ॥ १७ ॥ दृष्ट्वा पद्मावतीं शुद्धां सर्वकामवरप्रदाम् ॥ न यत्र
दृश्यते कश्चिच्छोकरोगपरो जनः ॥ १८ ॥ न दुःखी न च दारिद्रो न मूर्खो नाजितेंद्रियः ॥ परस्परविरोधी न नृतिर्यक्षु च दृश्यते ॥ १९ ॥ अ
न्योन्यं सर्वमित्राणि अन्योन्यं चोपकारिणः ॥ सर्वे दांताश्च शांताश्च सर्वे विद्योपदेशिनः ॥ २० ॥ उद्यानानि च रम्याणि वनान्युपवनानि च ॥
हर्म्याणि च सुशुभ्राणि श्रेणीबद्धानि भांति वै ॥२१ ॥ नानारत्नसमाकीर्णैर्हेमकुंभैः सुशोभनैः ॥ विराजंते विचित्राणि गीतवाद्यमहोत्सवैः ॥२२ ॥
सदैव वसते यत्र उमया सह शंकरः ॥ चंद्रचूडः कृत्तिवासाश्चितताभस्मांगलेपनः ॥ २३ ॥ चंद्रज्योत्स्नाकलापूर्णमरीचिभिः सदा वभौ ॥ यत्र नो
कृष्णपक्षोऽभून्नामावास्या न वै तमः ॥ २४ ॥ सदैव पुष्पिता श्यामा बालरूपवती यथा ॥ हर्म्यपृष्ठे गवाक्षे च द्वाराजिरगृहांतरे ॥ २५ ॥ गिरि
गह्वरकुंजेषु गुहाध्वांतांतरेषु च ॥ आश्रमेषु च रम्येषु वनेषूपवनेषु च ॥ २६ ॥ गृहदीपिकासु रम्यासु शालामालासु सर्वतः ॥ चंद्रज्योत्स्नासमा
पूर्णा दृश्यंते धवला दिशः ॥ २७ ॥ कुमुद्वतीप्रफुल्लानि विराजंते सरांसि च ॥ ज्योतिर्गणसमाकीर्णं शरदीव नभःस्थलम् ॥ २८ ॥ नद्यः
सरांसि सर्वाणि वापीकूपसुपल्वलाः ॥ कुमुद्वत्या समाकीर्णा आसीद्भद्रमसी मही ॥ २९ ॥ यस्मात्सर्वेषु कालेषु प्रफुल्ला च कुमुद्वती ॥ तस्मा
त्पद्मावती ह्येषा जाता कुमुद्वती पुरी ॥ ३० ॥ कुमुद्वत्यां नरा ये तु श्राद्धं कुर्युः समाहिताः ॥ न तेषां पितरः स्वर्गाच्च्यवंते
हि कदाचन ॥ ३१ ॥ अक्षयं लभते श्राद्धं पितृणां दत्तमक्षयम् ॥ स्नानं दानं तथा होमो देवताराधनं तथा ॥ ३२ ॥ यत्किंचित्क्रियते
कर्म तत्सर्वं चाक्षयं भवेत् ॥ एवं कुमुद्वती जाता पुरी व्यास सनातनी ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कुमुद्वतीप्रभावकथनंनाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ॐ ॥ ॥ सनत्कुमार उवाच ॥ ॥
अमरावती यथा जाता पुरी ह्येषा कुशस्थली ॥ शृणु व्यास महाभाग यथा ब्रह्मात्रवीत्सुरान् ॥ १ ॥ तथाहं संप्रवक्ष्यामि विस्तरेण तपोधन ॥
एकदा ब्रह्मणादिष्टः प्रजार्थमृषिसत्तमः ॥ २ ॥ मरीचः कश्यपस्तेपे तपः परमदुष्करम् ॥ महाकालवने रम्ये दिव्ये स हि महानृषिः ॥ ३ ॥
शीर्णपत्रानिलाहारो वायुभक्षी जितेन्द्रियः ॥ पूर्णे वर्षसहस्रे तु वायुर्वाचाशरीरिणी ॥ ४ ॥ शृयतां भो द्विजश्रेष्ठ मम वाक्यमनुत्तमम् ॥ यस्मात्त
पसि तपस्तीव्रं फलमुद्दिश्य सुव्रत ॥ ५ ॥ तस्मात्ते संततिस्तात यावच्चंद्रदिवाकरौ ॥ तावत्तिष्ठतु मेदिन्यां यशसा पुत्रपौत्रकैः ॥ ६ ॥ अदितिस्ते
सती भार्या त्वया सहाचरत्तपः ॥ तस्मात्सर्वेषु कालेषु छायाभूता यशस्विनी ॥७॥ भविष्यंति सुताः सर्वे विष्णुश्चेंद्रपुरोगमाः ॥ अमरा निर्जरा देवा
दिवि ख्याताः सदैव हि ॥ ८ ॥ त्वं चापि च ऋषिश्रेष्ठः प्रजापतिरकल्मषः ॥ भविष्यसि न संदेहो मम वाक्याद्विजोत्तम ॥ ९ ॥ इत्युक्त्वा च पुन
र्देवी तत्रैवांतरधीयत ॥ तदारभ्य पुरीं व्यास कुशस्थलीमनुत्तमाम् ॥ १० ॥ कश्यपः सह दाक्षिण्या साग्निकः समुपाश्रितः ॥ प्रजापि वबृधे तस्मा
त्सदेवासुरमानुषा ॥ ११ ॥ मरीचेः कश्यपो जज्ञ ततः सर्वं प्रतिष्ठितम् ॥ सुवापानकृतो देवाः शश्वत्तेनामराः कृताः ॥ १२ ॥ नंदनं चापि
तत्रैव महाकालवनोत्तमे ॥ कामधेनुः समाख्याता मनोरथवरप्रदा ॥ १३ ॥ सा सिषेवे सदा तत्र महाकालं महेश्वरम् ॥ पारिजाततरुश्रेष्ठस्तथा
चाम्लानपंकजम् ॥ १४ ॥ विंदुसरः समाख्यातं मानसं सर उत्तमम् ॥ हंससारससमाकीर्णं सुरसिद्धनिषेवितम् ॥ १५ ॥ मुक्तामणिगणाकीर्णं
रत्नशोभनशोभितम् ॥ निधिरेष महापद्मः कह्लारकुमुदोज्ज्वलः ॥ १६ ॥ यानि यानि च दिव्यानि संति ब्रह्मांडगोलके ॥ तानि सर्वाणि तिष्ठंति
महाकालवने शुभे ॥ १७ ॥ तेनतेनात्मयोगेन मानवाश्चात्र संस्थिताः ॥ तदाहारास्तदाचारास्तद्रूपास्तत्पराक्रमाः ॥ १८ ॥ अन्योन्यं च समा
कीर्णाः सर्वे चामरसंनिभाः ॥ विचरंति यथा देवाः पुरीमेतां जना भुवि ॥ १९ ॥ अमरांगनासमा नार्यः सदैव स्थिरयौवनाः ॥ ईदृशी च पुरी
दृष्टा भुवि व्यास सनातनी ॥ २० ॥ देवदानवगन्धर्वैः किन्नरोरगराक्षसैः ॥ भुक्तिमुक्तिप्रदा नित्या बहुकालफलप्रदा ॥ २१ ॥ अमराणां कटकं
ह्यत्र तस्माज्जातामरावती ॥ य एतस्यां महाभागाः प्रसंगेन समागताः ॥ २२ ॥ स्नानदानादिकं कृत्वा पश्यंत्येव महेश्वरम् ॥ न तेषां दुर्लभं किञ्चि
त्पुत्रतो धनतोऽपि वा ॥ २३ ॥ सर्वभोगानवाप्नोति मृतः शिवपुरं व्रजेत् ॥ पठनाच्छ्रवणाद्वापि शतरुद्रियफलं लभेत् ॥ २४ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽमरावतीनामकथनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ ॐ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाभाग पुरी ह्येषामरावती ॥ विशाला च समाख्याता सर्वलोकेषु
गीयते ॥ १ ॥ तथाहं संप्रवक्ष्यामि ब्रह्मणा कथितं पुरा ॥ गुह्याद्गुह्यतरं क्षेत्रं सर्वपापप्रणाशनम् ॥ २ ॥ उमया सहितो देव
एक एवाचरद्वने ॥ ततो भूतगणाः सर्वे पश्चात्सर्वे सुरासुराः ॥ ३ ॥ विष्णुर्दशाकृतिर्यत्र देव्यो वै लोकमातरः ॥ विनायकाश्च वेताला: कूष्मांडा
भैरवादयः ॥ ४ ॥ कल्पोद्भेदाश्च लिंगाश्च चतुराशीतिसंख्यकाः ॥ क्षेत्राणि क्षेत्रपालाश्च ऋद्धिः सिद्धिस्तथैव च ॥ ५ ॥ पितरो लोकपा
लाश्च सिद्धाः सिद्धिप्रदाश्च ये ॥ ऋषयश्च महाभागा ऋषिपत्न्योऽमलाशयाः ॥ ६ ॥ किंनरा देवगन्धर्वा ह्यप्सराश्च वरांगनाः ॥ मरुद्गणाश्च ये सर्वे
साधकानां गणाश्च ये ॥ ७ ॥ यक्षा गुह्यकसंघाश्च पिशाचोरगराक्षसाः ॥ स्थावरा जंगमाः सर्वे ध्यानं मानसमाश्रिताः ॥ ८ ॥ उपासांचक्रिरे तत्र
देवदेवसुमापतिम् ॥ तान्दृष्ट्वा सा तदा देवी पार्वती गिरिजा तदा ॥ उवाच श्लक्ष्णया वाचा शंकरं जगदाश्रयम् ॥ ९ ॥ ॥ पार्वत्युवाच ॥ ॥ देवदेव
जगन्नाथ जगदाधारतत्पर ॥ पश्य एतान्महाभागान्ध्यायमानांस्तवाश्रितान् ॥१०॥ नानुपेक्ष्यांश्च तान्सर्वान्वातवर्षातपार्दितान् ॥ कल्पय त्वं महा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भाग एतेषामात्मनो हितम् ॥११॥ यथायोग्यं वासनार्थं स्थानं परमशोभनम् ॥ पुरीं कल्पय मे नाथ वासार्थं सर्वकामदाम् ॥१२॥ एषा मे वासना स्वामिन्भवतां यदि रोचते ॥ इति श्रुत्वा वचस्तस्याः पार्वत्याः परमेश्वरः ॥ कल्पयामास पुरीं रम्यां सर्वभूतमनोरमाम् ॥ १३ ॥ आत्मनोपि हितां पुण्यां शंभुः सर्वात्मना तदा ॥ बहुयोजनविस्तीर्णां दिव्यां दिव्यजनप्रियाम् ॥ १४ ॥ दिव्याभिश्चायसंयुक्तां दिव्यस्थानमनोरमाम् ॥ दिव्यसर्वगुणोपेतां विशालां विरजां शुभाम् ॥ १५ ॥ क्रयविक्रयसंपन्नहट्टाट्टालकचत्वराम् ॥ बहुहर्म्यगृहाकीर्णां सौधपंक्तिविराजिताम् ॥ १६ ॥ स्फाटिकाभित्तिरचितां वैडूर्यमणिभूमिकाम् ॥ प्रवालस्तंभप्रवरां हेमाभरणसंभराम् ॥ १७ ॥ आरक्तमणिदेहल्यां द्वारशाखाभिमंडिताम् ॥ जांबूनदकपाटाढ्यां वज्रार्गलसुसंस्कृताम् ॥ १८ ॥ मणिरत्नसमाभूमिद्वाराजिरगृहांतराम् ॥ घोषजालातिरम्यां च मुक्तादामविलंबिनीम् ॥ १९ ॥ हेमस्तंभध्वजोपेताः पताकाश्च गृहेगृहे ॥ कलशाश्च विराजंते मणिहेमाचिता गृहे ॥ २० ॥ वापीकूपतडागानि सरांसि विमलानि च ॥ पद्मकिंजल्कगंधीनि जलयंत्रोपशोभिताम् ॥ २१ ॥ हंसकारंडवाकीर्णां शिखंडिगणशोभिताम् ॥ जलयंत्रकृताधारां गृहवापीवनाकराम् ॥ २२ ॥ क्वचिन्नृत्यंति मयूराः क्वचित्कूजंति कोकिलाः ॥ भ्रमरावलीढपुष्पाढ्यस्तवका वनराजयः ॥२३॥ नरनारीगणाकीर्णां वर्णाश्रमनिषेविताम् ॥ हर्म्यांतरागता नार्यो विलोकनपरा बभुः ॥ २४ ॥ चंद्रमालाकृतश्रेणीतोरणानीव च शोभते ॥ एवं व्यास पुरी रम्या आत्मयोगेन वासिता ॥ २५ ॥ यत्रालकापुरी रम्या कुबेरभवनांकिता ॥ धवला पुण्यजनैः कीर्णा पक्षिभिश्चोपशोभिता ॥ २६ ॥ तत्र भोगवती दिव्या वरुणालय उत्तमः ॥ नागकन्याभिरुद्भाभिर्नागपत्नीभिः संकुला ॥ २७ ॥ संयमनीपुरी श्रेष्ठा धर्मराजेन पालिता ॥ सदाचारजनैः पूर्णा कृता कृतविचक्षणैः ॥ २८ ॥ देवतानां पुरी रम्या वासवेनाभिरक्षिता ॥ पुण्यस्त्रीणां गणाकीर्णा किन्नरोद्गीतमंडिता ॥ २९ ॥ एवंविधानि रम्याणि पुरा बहुतराणि च ॥ बहुविस्तीर्णमानानि शुभाप्यतितराणि च ॥ ३० ॥ क्वचिद्रंभाकृतद्वारा यवांकुरघटाः शुभाः ॥ क्वचिद्गायन्ति गन्धर्वाः क्वचिन्नृत्यंति नर्तकाः ॥ ३१ ॥ क्वचिद्बालाः पठंति स्म वेदाध्ययनका द्विजाः ॥ क्वचिद्यज्ञान्यजंति स्म यजमानाः सऋत्विजः ॥३२॥ क्वचिच्चावभृथस्नाताः क्वचिद्दानान्यकुर्वत ॥ क्वचित्कचित्तूपनयनं विवाहाग्निपरिग्रहम् ॥ ३३ ॥ क्वचिदारामपूर्तं वै क्वचिद्यात्रावधारणम् ॥ वापीकूपतडागानां तथैव विधिपूर्वकम् ॥ ३४ ॥ क्वचित्कथाप्रसंगांश्च परिशंसंति वाचकाः ॥ क्वचिद्गाथाः प्रकुर्वंति कवयः पुर उत्तमे ॥ ३५ ॥ क्वचिन्मल्ला नियुध्यंते नटा नाट्यपराः क्वचित् ॥ तडागानि विराजंते मणिसोपानपंक्तिभिः ॥ ३६ ॥ चंचलाश्चपला बालाः श्यामाः षोडशवार्षिकाः ॥ वारिहारपरास्तत्र मणिहेमघटोत्कटाः ॥ ३७ ॥ एवं व्यास पुरी रम्या निर्मिता योगमायया ॥ शंभुना सर्वपापघ्नी प्रियाप्रियचिकीर्षया ॥३८॥ विशाला बहुविस्तीर्णा पुण्या पुण्यजनाश्रया ॥ तस्मात्सर्वेषु कालेषु सर्वलोकेषु गीयते ॥ ३९ ॥ विशालेति समाख्याता पुरी रम्या सनातनी ॥ यत्र तत्र स्थितो वापि सर्वावस्थां गतोऽपि वा ॥ ४० ॥ विशालेदं वदेन्नित्यं शिवलोके महीयते ॥ ईदृशी न पुरी व्यास भुवि ब्रह्मांडगोलके ॥ ४१ ॥ विशालासदृशी चान्या भुक्तिमुक्तिप्रदा नृणाम् ॥ पितॄनुद्दिश्य कुर्वंति श्राद्धं काले नरा यदि ॥ ४२ ॥ तदक्षयं भवेत्तेषां पितृकल्पे च गीयते ॥ स्नानदानादिकं यैस्तु विशालायां प्रसंगतः ॥ ४३ ॥ यत्र कुत्र गतास्ते वै मृता यांति शिवालयम् ॥ धन्याः पुण्यतमा लोके प्रीतिर्येषां सदाचला ॥ ४४ ॥ विशालायां फलं शश्वच्छेषः शक्तो न वर्णितुम् ॥ कथाश्रवणमात्रेण वाच्यमानेन तत्क्षणात् ॥ महापापोद्भवात्पापान्मुच्यते नात्र संशयः ॥ ४५ ॥ एवं व्यास पुरी जाता विशाला च कुशस्थली ॥ प्रतिकल्पा यथा जाता तथा मे शृणु भापतः ॥ ४६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये विशालाभिधानकथनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्वावहितो व्यास स्थितिमेकाग्रमानसः ॥ मया व्यासमुखात्प्राप्ता कल्पभेदे कथा शुभा ॥ १ ॥ गुह्याद्गुह्यतरा श्रेष्ठा न देया यस्य कस्यचित् ॥ नास्तिकाय कृतघ्नाय नाशिष्याय कदाचन ॥ ॥ २ ॥ एषा पुण्यतमा व्यास कथा पापहरा परा ॥ यस्याः श्रवणमात्रेण कल्पदोषो न बाधते ॥ ३ ॥ प्रमाणं कल्पपर्यंतं ब्रह्मणः परमेष्ठिनः ॥ मन्वंतरेषु सर्वेषु कल्पकल्पांतरेषु च ॥ ४ ॥ यावत्संख्यापरिमिता तावती शृणु सत्तम ॥ अहोरात्रं च भजते सूर्यो मानुषदैवतम् ॥ ५ ॥ तामुपादाय गणनां शृणु संख्यां द्विजोत्तम ॥ निमेषैः पंचदशभिः काष्ठा त्रिंशत्तु ताः कला ॥ ६ ॥ त्रिंशत्कला मुहूर्तस्तु त्रिंशता तैर्मनीषिणः ॥ अहोरात्रमिति प्राहुश्चंद्रादित्यगतिस्तदा ॥७॥ रविर्गतिविशेषेण सन्ध्यायां याति नित्यशः ॥ तदहस्तु मनुष्याणां रात्रिश्चैव तु तादृशी ॥ ८ ॥ पक्षौ मासा ऋतुश्चाब्दमयने च प्रकीर्तिते ॥ पितॄणां चैव देवानां ब्रह्मणश्च यथातथम् ॥ ९ ॥ यावत्संख्या समाख्याता आयुरंतश्च तादृशः ॥ अहोरात्राः पंच दश पक्ष इत्यभिशब्दितः ॥ १० ॥ पक्षौ द्वौ तौ कृतौ मासौ मासौ द्वावृतुरुच्यते ॥ अयनं चर्तुभिस्त्रिभिरब्दं द्वे अयने स्मृतम् ॥ ११ ॥ दक्षिणं चोत्तरं चैव संख्यातत्त्वविशारदैः ॥ मानेनानेन यो मासः पक्षद्वयसमन्वितः ॥ १२ ॥ पितॄणां तदहोरात्रमिति कालविदो विदुः ॥ शुक्ल पक्षस्त्वहस्तेषां कृष्णपक्षस्तु शर्वरी ॥ १३ ॥ कृष्णपक्षे त्विह श्राद्धं पितॄणां वर्तते द्विज ॥ मानुषेण तु मानेन यो वै संवत्सरः स्मृतः ॥ १४ ॥ देवानां तदहोरात्रं दिवा चैवोत्तरायणम् ॥ दक्षिणायनं स्मृता रात्रिः प्राज्ञैस्तत्त्वार्थकोविदैः ॥ १५ ॥ दिव्यमब्दं शतगुणं दिव्यमब्दसहस्रकम् ॥ मुनिभिश्चैव तत्त्वज्ञैरहोरात्रं मनोः स्मृतम् ॥ १६ ॥ अहोरात्रं दशगुणं मानवः पक्ष उच्यते ॥ पक्षाद्दशगुणो मासो मासा द्वादशभिर्गुणैः ॥ १७ ॥ ऋतुर्मनूनां संप्रोक्तः प्राज्ञैस्तत्त्वार्थदर्शिभिः ॥ षड्भिस्तैर्वर्षं संप्रोक्तं तेन संख्या निबध्यते ॥ १८ ॥ चत्वार्येव सहस्राणि वर्षाणां तु कृतं युगम् ॥ तावती तु भवेत्संध्या संध्यांशश्च तथाविधः ॥ १९ ॥ त्रीणि वर्षसहस्राणि त्रेता तत्परिमाणतः ॥ तस्याश्च त्रिशती संध्या संध्यांशश्च तथा परः ॥ २० ॥ तथा वर्षसहस्रे द्वे द्वापरं परिकीर्तितम् ॥ तस्य च द्विशती संध्या संध्यांशश्च तथा परः ॥ २१ ॥ कलिर्वर्षसहस्रं तु संख्या चोक्ता मनीषिभिः ॥ तस्य चैकशती संध्या संध्यांशश्च तथाविधः ॥ २२ ॥ (४८०० कृतं, ३६०० त्रेता, २४०० द्वापरम्, १२०० कलिः) एषा द्वादशसाहस्री युगसंख्या प्रकीर्तिता ॥ दिव्यैनानेन मानेन युगसंख्यां निबोध मे ॥ २३ ॥ ससर्ज स पुनस्तात जगत्सर्वमिदं ततः ॥ कृतं त्रेता द्वापरं च कलिश्चैव चतुर्युगम् ॥ २४ ॥ युगं तदेकसप्तत्या गुणितं द्विजसत्तम ॥ मन्वंतरमिति प्रोक्तं संख्यानार्थविशारदैः ॥ २५ ॥ अयनं चापि तत्प्रोक्तं द्व्ययने दक्षिणोत्तरे ॥ मनुः प्रलीयते ह्यत्र संप्राप्ते जगतः प्रभौ ॥ २६ ॥ ततोऽपरो मनुः कालमेतावन्तं भवत्पुनः ॥ समतीते तु राजेंद्र प्रोक्तः संवत्सरस्य वै ॥ २७ ॥ तदेव चायनं प्रोक्तं मुनिना तत्त्वदर्शिना ॥ ब्रह्मणस्तदहः प्रोक्तं कल्पमेति स उच्यते ॥ २८ ॥ सहस्रयुगपर्यंतं सा निशा प्रोच्यते बुधैः ॥ निमज्जत्यत्र चोर्वी सा सशैलवनकानना ॥ २९ ॥ तस्मिन्युगसहस्रे तु पूर्णे वै द्विजसत्तम ॥ ब्राह्मे दिवसपर्यंते कल्पो निःशेष उच्यते ॥ ३० ॥ युगानि सप्ततिं तानि साम्राणि कथितानि ते ॥ कृतत्रेतादियुक्तानि मनोरंतर

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुच्यते ॥ ३१ ॥ चतुर्दशैते मनवः कथिताः कीर्तिवर्धनाः ॥ वेदेषु सपुराणेषु सर्वेषु प्रभविष्णवः ॥ ३२ ॥ प्रजानां पतयो व्यास धन्यमेषां प्रकीर्तनम् ॥ ३३ ॥ मन्वंतरेषु संहाराः संहारांतेषु संभवाः ॥ न शक्यमंतस्तेषां वै वक्तुं वर्षशतैरपि ॥ ३४ ॥ विसर्गश्च प्रजानां वै संहारस्य च भारत ॥ मन्वंतरेषु संहारः श्रूयते भरतर्षभ ॥ ३५ ॥ यत्र तिष्ठंति वै देवाः सर्वे सप्तर्षिभिः सह ॥ तपसा ब्रह्मचर्येण श्रुतेन च समन्विताः ॥ ३६ ॥ पूर्णे युगसहस्रे तु कल्पो निःशेष उच्यते ॥ तत्र सर्वाणि भूतानि दग्धान्यादित्यरश्मिभिः ॥ ३७ ॥ ब्रह्माणमग्रतः कृत्वा सहादित्येर्गणैर्द्विज ॥ प्रविशंति सुरश्रेष्ठं हरिं नारायणं प्रभुम् ॥ ३८ ॥ स स्रष्टा सर्वभूतानां कल्पांते तु पुनःपुनः ॥ अव्यक्तः शाश्वतो देवस्तस्य सर्वमिदं जगत् ॥ ३९ ॥ स एव विद्यते व्यास महेशा सह संयुतः ॥ महाकालवने वासं चकार जगदीश्वरः ॥ ४० ॥ प्रलयोनं बाधते व्यास महाकालवनोत्तमे ॥ कल्पे कल्पे च वै रम्या पुरी ह्येषा कुशस्थली ॥ ४१ ॥ निरामया निरातंका निर्विकारा युगेयुगे ॥ मार्कंडेयोपदिष्टानि कल्पानि संभवंति च ॥ ४२ ॥ अत्रैव च वने रम्ये ब्रह्मा लोकपितामहः ॥ प्रजानां पतयो ये ते दक्षः प्राचेतसस्तथा ॥ ४३ ॥ मरीचिः कश्यपो रुद्रो येऽन्ये भृग्वादयस्तथा ॥ कल्पादौ ससृजे लोकांश्चराचरान्यथा तथा ॥ ४४ ॥ एवमादौ पुरा व्यास कल्पं कल्पायते तदा ॥ वाराहवामनविष्णुपितॄणां वै तथैव च ॥४५॥ कल्पभेदाः समाख्याता महाकालवने शुभे ॥ चतुराशीतिकल्पानि संजातानि द्विजोत्तम ॥ ४६ ॥ तावंति योगलिंगानि वने तिष्ठन्ति सत्तम॥ पुनर्जाताः पुनर्नष्टा महीसागरपर्वताः ॥४७॥ पुनःपुनर्भविष्यंति पुरी ह्येषाऽचला स्मृता ॥ तस्मात्सर्वेषु कालेषु सर्वलोकेषु गीयते ॥४८॥ प्रतिकल्पेति विख्याता भुवि व्यास भविष्यति ॥ येऽस्यां वै मानवा दांताः स्नानदानादिकं तथा ॥ ४९ ॥ जपं होमं तथा श्राद्धं पितॄनुद्दिश्य देवताः ॥ न तेषां पुनरावृत्तिः कोटिकल्पशतैरपि ॥ ५० ॥ प्रतिकल्पामनुप्राप्य दृष्ट्वा देवं महेश्वरम् ॥ वैशाखे पौर्णमास्यां वै स्नापयंत्येकवासरम् ॥ ५१ ॥ प्रसंगतो रजः क्षांतः शिप्रांभसि च मानवाः ॥ न तेषां दुष्कृतं किंचिद्विष्णुलोके वसंति ते ॥५२॥ मन्वंतरसहस्रेषु काश्चिद्वासेषु यत्फलम् ॥ तत्फलं प्राप्नुयाच्चंतुः प्रतिकल्पं क्षणादपि ॥ ५३ ॥ प्रतिकल्पे च कल्पांते सैवासीच्च पुरी शुभा ॥ तस्मात्सर्वजनैः ख्याता प्रतिकल्पा द्विजोत्तम ॥ ५४ ॥ ये चैतस्यां महाभागाः प्रीतिं कुर्वंति मानवाः ॥ न तेषां कल्पभेदोऽयं स्वप्नवज्जायते क्षणात् ॥ ५५ ॥ यः शृणोति कथां पुण्यां प्रतिकल्पोद्भवां शुभाम् ॥ श्रावयेद्वा प्रयत्नेन ब्रह्महत्यां व्यपोहति ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये प्रतिकल्पाभिधानकथनंनामाष्टाचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ एवं व्यास पुरी रम्या नामभूता सनातनी ॥ युगेयुगे यथा जाता तथा ख्याता मयाऽनघ ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ भूयोऽहं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ शिप्रायाश्च कथां पुण्यां पवित्रां पापहारिणीम् ॥ २ ॥ सुन्दरं कुंडमाख्यातं पिशाचमोचनं तथा ॥ नीलगंगा इति प्रोक्ता कर्कराजमतः परम् ॥ ३ ॥ पुष्कराणि च सर्वाणि गयातीर्थमनुत्तमम् ॥ गोमतीकुण्डमाख्यातं नाम्ना धर्मसरस्तथा ॥ ४ ॥ ख्यातं संगमजं तीर्थं शनेर्जन्मकथां शुभाम् ॥ च्यवनाश्रमे च या वार्ता तथा नागालये शुभे ॥ ५ ॥ पुरुषोत्तममहिमानं काले केन कथं भवेत् ॥ एतद्वेदितुमिच्छामि यत्ते मनसि वर्तते ॥ ६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाभाग कथां पापहरां पराम् ॥ यस्मिन्काले यदा जाता महाकालवने शुभे ॥ ७ ॥ नास्ति वत्स महीपृष्ठे शिप्रायाः सदृशी नदी ॥ यस्यास्तीरे क्षणान्मुक्तिः किं चिरात्सेवनेन वै ॥ ८ ॥ वैकुण्ठे जायते शिप्रा ज्वरघ्नी च सुरालये ॥ महाद्वारे च पापघ्नी पातालेऽमृतसंभवा ॥ ९ ॥ वाराहकल्पे वै प्रोक्ता विष्णुदेहेति नामतः ॥ शिप्रावंत्यां समाख्याता कामधेनुसमुद्भवा ॥ १० ॥ ॥ व्यास उवाच ॥ ॥ विचित्रमिदमाख्यातं भवता ऋषिसत्तम ॥ वक्तुमर्हसि शिप्रायाः समासेन कथां शुभाम् ॥ ११ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ब्राह्मं कपालमादाय भिक्षार्थं संचरन्महीम् ॥ महादेवो विशुद्धात्मा सर्वलोकेषु सर्वतः ॥१२॥ अप्राप्तभिक्षो भिक्षार्थी वैकुण्ठमगमद्विभुः ॥ गतश्चातिथ्यकेलायां भ्रममाणो यतस्ततः॥१३॥लोकनिंदापरः क्रुद्धः क्षुधितो बहुवासरैः ॥ भिक्षां देहीति भो ब्रह्मन्क्षुधितोऽहं समाहितः ॥१४॥ कपालं च करे कृत्वा इत्युवाच पुनः पुनः ॥ गृह्यतां हर भिक्षां ते ददामीति हरिस्तदा ॥१५॥ इत्युक्त्वा करमुद्यम्य तर्जन्यंगुलिमादधत् ॥ तदा रुद्रः समाध्मातस्त्रिशूलेनाहनद्रुषा ॥१६॥ तदांगुलिसमुद्भूतं बहु सुस्राव शोणितम् ॥ तेनाशु पात्रं तत्पूर्णं शंकरस्य करे स्थितम् ॥१७॥ तदा उद्वेलिता सा वै धारा जाता समं ततः ॥ तत्र स्थाने समुद्भूता शिप्राऽसृग्धारसंभवा ॥ १८ ॥ वैकुंठे नाभवत्सद्यो नदी त्रैलोक्यपावनी ॥ एवं शिप्रा सरिच्छ्रेष्ठा त्रिषु लोकेषु विश्रुता ॥ १९ ॥ ज्वरघ्नी च यथा प्रोक्ता तथा व्यास ब्रवीम्यहम् ॥ यदा बाणासुरो दैत्यः कृष्णेन सह संयुगे ॥ २० ॥ योधयामास दैत्येंद्रो ह्यनिरुद्धप्रहेलनः ॥ सहस्रबाहुभिर्वीरो नानाप्रहरणोद्यतः ॥ २१ ॥ तस्मात्क्रुद्धो वासुदेवश्चक्रमादाय सत्वरः ॥ चिच्छेद बाहुसाहस्रं क्षुरप्रेणाशुगामिना ॥ २२ ॥ स तदा भग्नसंकल्पश्छिन्नदोश्च व्रणार्दितः ॥ पराङ्मुखपरो भूत्वा शंकरं शरणं ययौ ॥ २३ ॥ तदागतं महादैत्यं समीपं भयविह्वलम् ॥ विलोक्य कृपयाविष्टो गते संग्राममूर्धनि ॥ २४ ॥ छित्त्वा बाहुसहस्रं वै दैत्यराजस्य चाहवे ॥ क्रुद्धः कृष्णो महाबाहुः परसेनांतको वरः ॥ २५ ॥ स्थितो यत्राचलो व्यास तत्रागतो महेश्वरः ॥ वारयामास कृष्णं वै शरौघैश्च समाकिरन् ॥२६॥ अन्योन्यं च समासाद्य कृत्वा युद्धं तु दारुणम् ॥ शस्त्रास्त्रैश्च महाघोरैः सर्वप्राणिभयंकरैः ॥ २७ ॥ वैष्णवास्त्रं तदा कृष्णः संदधे हरजिघांसया ॥ पाशुपतं च नामास्त्रं सर्वसंहारकारकम् ॥ २८ ॥ संदधे वै तदा शंभुः कृष्णप्राणहरोत्सुकः ॥ हाहाकारस्तदा जातः सर्वलोकेषु श्रूयते ॥ २९ ॥ मोहनास्त्रं पुनः कृष्णः शिवोपरि मुमोच ह ॥ तेनास्त्रेण तदा शंभुर्मोहितो देवमायया ॥ ३० ॥ जृंभमाणः स्थितः संख्ये किंचित्कालं मुहुर्मुहुः ॥ लब्धसंज्ञः पुनर्जातो यदा रुद्रो महाहवे ॥ ३१ ॥ तदा क्रोधाभिभूतेन कृतो माहेश्वरो ज्वरः ॥ ललाटफलकात्सद्यो वीरभद्रो महाबलः ॥ ३२ ॥ त्रिनेत्रस्त्रिशिरा ह्रस्वस्त्रिपादो वर्करांकृतिः ॥ क्षुद्रो जटिलभस्मांगो महाव्याधिर्दुरत्ययः ॥ ३३ ॥ कृष्णसेनां समासाद्य महादेवेन प्रेरितः ॥ प्राणिनां कदनं चक्रे सर्वेषां कृष्णसंगिनाम् ॥ ३४ ॥ परास्मुख्यपरा भग्ना ज्वराभिघातपीडिता ॥ बभूव सहसा व्यास सेना कृष्णेन पालिता ॥३५॥ तथाभूतां समालोक्य जृंभमाणां रुजार्दिताम् ॥ स्वसेनां भग्नसंकल्पां माहेशज्वरपीडिताम् ॥ ३६ ॥ ससर्ज वैष्णवं तापं कृष्णः परमकोपनः॥ तेन सह वैष्णवेन माहेश्वरेण ज्वरेण च ॥ ३७ ॥ अन्योन्यमभवद्युद्धं घोरं घोरतरं महत् ॥ संग्रामं बहुलं कृत्वा भग्नो माहेश्वरो ज्वरः ॥३८॥ सर्वलोकेषु गत्वा वै न शांतिं प्रतिजग्मिवान् ॥ महाकालवने रम्ये प्राप्तस्तेनाभिपीडितः ॥ ३९ ॥ निमग्नोऽथ वै शिप्रायां ततः शांतिं परां ययौ ॥ दृष्ट्वा माहेश्वरं शांतं ज्वरं परमकोपनम् ॥ ४० ॥ वैष्णवोऽपि समासाद्य तस्यां मज्जनमाचरत् ॥ तस्याः प्रभावसंप्राप्तौ ज्वरौ हरिहरोद्भवौ ॥ ४१ ॥ तस्मात्सर्वेषु कालेषु ज्वरघ्नी साऽभवत्क्षणात् ॥ ज्वराभिभूतास्तां प्राप्य जनाः परमदुःखिताः ॥ ४२ ॥ निमज्जंति च शिप्रायां व्यासोपसि समाहिताः ॥ न तेषां बाधते पीडा ज्वरोद्भूता कदाचन ॥ ॥ ४३ ॥ सत्यमुक्तं तदा व्यास ब्रह्महरिहरेण च ॥४४॥ ये शृण्वंति कथां दिव्यां नराश्चैकाग्रमानसाः ॥ न तेषां जायते किंचिज्ज्वरसंतापजं भयम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडेऽवन्तीक्षेत्रमाहात्म्ये शिप्राया माहात्म्ये ज्वरानुग्रहोनाम कोन पंचाशत्तमोऽध्यायः ॥४९॥ ॥ सनत्कुमार उवाच ॥ ॥ पापनाशिनी विख्याता यथा शिप्रा पयस्विनी ॥ तथाहं संप्रवक्ष्यामि समासेन परंतप॥१॥ पुरा कृतयुगे व्यास दमनोनाम वै नृपः ॥ कीकटेषु समाख्यातो राजा परमकोपनः ॥२॥ उत्पथी सर्वधर्माणां गोब्राह्मणविनिंदकः ॥ सुरापा ी हेम हारी मत्सरी गुरुतल्पगः ॥ ३ ॥ प्रजासर्वस्वहर्ता च परदाराभिमर्शकः ॥ धूर्तको धूर्तसंगी च पिशुनस्तस्करात्मकः ॥४॥ गोग्रहः पुरभेदी च बंदी वंदिजनप्रियः ॥ कुत्सितः कोपपूर्णश्च वेदशास्त्रविवर्जितः ॥५ ॥ साधुसंगपरित्यागी दुष्टो दुष्टजनप्रियः ॥ कुलांगनापरित्यागी पण्यस्त्रीवृषलीपतिः ॥ ६ ॥ धर्मनिंदाकरो नित्यमधर्मे रमते मतिः ॥ न हूयते न पूज्यते न श्रूयते कथा बुधैः ॥ ७ ॥ वेदा यज्ञाश्च देवानां मूर्तिः पद्भ्यां च ताड्यते ॥ एवं दुष्टतरो राजा न भूतो न भविष्यति ॥ ८ ॥ स एकदा वने घोरे मृगयावनगोचरः ॥ इतस्ततो भ्रममाणो व्याधैः परिवृतः खलः ॥ ॥ ९ ॥ न लब्ध्वा खेटकं किंचित्क्षुधार्तस्तृषितः खलः ॥ एकाकी विगतोऽसंगो महाकालवनांतिके ॥ १० ॥ रात्रिः समागता तत्र घोरा घोरनिषेविता ॥ वृक्षमूलमुपावृत्य शयनार्थी क्षुधार्दितः ॥ ११ ॥ तत्राश्वं विटपे बद्धा स्वयमेव न्यपीदत ॥ तदैव काले वृक्षाद्धे सर्पः पपात मस्तके ॥१२॥ किमिदं कुत आश्चर्यं कृत्वा हस्तेन वाग्यितः ॥ तेन वारयिता राजा दष्टोऽगुष्ठे तदाऽहिना ॥ १३ ॥ दष्टमात्रे च नृपतिर्व्यथितः क्षितिमागतः ॥ कियत्काले व्यथाविष्टो मुमोह क्षीणमंगलः ॥ १४॥ एतत्क्षणात्प्रेतभूतो घोरे नरकसंचये ॥ यमदूतैस्ताड्यमानो विविधास्त्रैः स्वकर्मजैः ॥ १५ ॥ हर्षिताश्च गणाः सर्वे यमराजस्य किंकराः ॥ बद्धा पाशैश्च तं निन्युः पापिष्ठं यममंदिरे ॥ १६ ॥ एतस्मिन्नंतरे व्यास क्रव्यादैः खादितं शवम् ॥ किंचिच्छेषतरं भ्रातर्वायसेनाभिलक्षितम् ॥ १७ ॥ तत्र गत्वानयन्मांसं तुंडेन वियदुद्गतः ॥ ततोऽन्यैर्वायसैर्भग्नो भ्राम्यमाण इतस्ततः ॥ १८ ॥ तत्राटतो हि यत्रारते दिव्या शिप्रा पयस्विनी ॥ किंचित्कर्मविपाकेन वायसास्यगतं पलम् ॥ १९ ॥ पतितं वै जले तस्याः शिप्रायास्तस्य काय जम् ॥ तेन पुण्यप्रभावेन शिवोऽजायत तत्क्षणात् ॥ २० ॥ त्रिनेत्रोथ जटाजूटी व्याघ्रांबरपरीवृतः ॥ शूलहस्तो वृषारूढो भालचंद्रो द्युमापतिः ॥ २१ ॥ इत्याश्चर्यमयं रूपं दृष्ट्वा दूताश्च धर्षिताः ॥ तद्गणैस्ताडिता भग्ना धर्मराज्ञे शशंसिरे ॥ २२ ॥ श्रूयतां भो महाराज धर्मराज नमोस्तु ते ॥ दूतानां यद्वचो रम्यं वह्वाश्चर्यमयं परम् ॥२३॥ कीकटाधिपतिर्मंदः पापिष्ठो वृषलीपतिः ॥ दमनोनाम राजाभूत्समस्ते क्षितिमंडले ॥२४॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तानि सर्वाणि तेनापि कृतानि भुवि सत्तम ॥ २५ ॥ मर्यादाभेदको मूढो वर्णाश्रमसुधर्मिणाम् ॥ कुसंगी द्यूतकोन्मादी बहुव्यंगभरः खलः ॥ २६ ॥ यमदंडपरः पापी अस्माकं हर्षवर्धनः ॥ स कथं शिवरूपी स्यात्किमाश्चर्यमतः परम् ॥ २७ ॥ यावंतः पतिताः पूर्वं पापिनः सर्व एव हि ॥ कृष्णेन तारिताः सर्वे ब्रह्मपुत्रार्थिना तदा ॥ २८ ॥ तदाप्रभृति सर्वाणि कुंडानि नरकस्य वै ॥ शुष्काणि चैव दृश्यंते ग्रीष्मांते वै ह्रदा यथा॥२९॥न चैवार्तरवं किंचिच्छ्रूयते तव मंदिरे ॥ अस्माकं जीवनं नास्ति किमुपायं वदस्व नः ॥३०॥ एक एवागतो लोके वृत्तिदो नो यमाधिप ॥ सोऽपि शिवत्वमापन्नः कस्माद्गो जीव्यते कथम् ॥ ३१ ॥ धर्मराजस्तदाश्रुत्य किंकराणां परं वचः ॥ चिरं ध्यात्वा स्वकानूचे देशकालोचितं वचः ॥ ३२ ॥ ॥ धर्मराज उवाच ॥ ॥ श्रूयतां भो गणाः सर्वैः श्रुतिरेकाग्रमानसैः ॥ येन पुण्यप्रभा वेन पापिष्ठः शिवतां गतः ॥ ३३ ॥ भुवि पुण्यतमे देशे महाकालवने शुभे ॥ शिप्रानाम सरिच्छ्रेष्ठा सर्वपापहरा परा ॥ ३४ ॥ येषां शिप्रोदक स्पर्शो जायते भुवि किंकराः ॥ न तेषां पातकं किंचिन्मृतः शिवपुरं व्रजेत् ॥ ३५ ॥ मनसा वपुषा वाचा पापानि विविधानि च ॥ तत्क्षणात्प्र लयं यांति शिप्र सरिन्निषेवणात् ॥ ३६ ॥ शिप्राशिप्रेति यो ब्रूते यत्र कुत्रापि मानवः ॥ स एव शिवतां याति न जाने स्नानजं फलम् ॥३७॥ यत्र कीटपतंगाश्च शिप्रावारिचराश्च ये ॥ मृताः शिवपुरं यान्ति शिप्रानीरनिषेवणात् ॥ ३८ ॥ कृत्वान्यत्र महापापं येऽन्ते शिप्रातटं श्रिताः ॥ महापा तकिनोऽप्येते मृता यांति शिवालयम् ॥ ३९ ॥ माधवे मासि संप्राप्ते निमज्जंति नरोत्तमाः ॥ न तेषां निरयं किंचिच्छिवरूपाश्चरंति ते ॥ ४० ॥ वायसेनाहृतं मांसं तस्य राज्ञः कृतागसः ॥ शिप्रागाधजले क्षिप्तं का तत्र परिदेवना ॥ ४१ ॥ वापीकूपतडागादि अधिकाधिकसत्फलम् ॥ तस्माद्दशगुणं पुण्यं नदीषु उपजायते ॥ ४२ ॥ तस्माद्दशगुणा तापी गोदा पुण्या ततोधिका ॥ तस्माद्दशगुणा रेवा गंगा पुण्या ततोऽधिका ॥ तस्माद्दशगुणा शिप्रा पवित्रा पापनाशिनी ॥ ४३ ॥ दमनस्य शरीरस्य मांसं शिप्रासमागतम् ॥ तेन पुण्यप्रभावेन शिवरूपधरोऽभ वत् ॥ ४४ ॥ ईदृशा च नदी रम्या अवन्त्यां भुवि वर्तते ॥ वांछंति देवताः सर्वास्तस्या दुर्लभदर्शनम् ॥ ४५ ॥ धर्मराजवचः श्रुत्वा गणा विस्मय मागताः ॥ मनसा च निरातंकाः शिप्रां शरणमागताः ॥ ४६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तदाप्रभृति विख्याता शिप्रेयं पापनाशिनी ॥ गीयते च पुराणेषु यस्या माहात्म्यमुत्तमम् ॥ ४७ ॥ दमनस्य च निर्मुक्तिः शिप्रामाहात्म्यमुत्तमम् ॥ यमदूतानां संवादं श्रुत्वा मुक्तिर्न संशयः ॥ ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शिप्रामाहात्म्ये पञ्चाशत्तमो ऽध्यायः ॥ ५० ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाबुद्धे शिप्रामाहात्म्यमुत्तमम् ॥ यथाऽमृतभवा ख्याता पाताले नागसंमते ॥१॥ एकदा रुद्रो भिक्षार्थं नागलोके बुभुक्षितः ॥ करे कपालमादाय भोगवत्यां समागतः ॥ २ ॥ भिक्षां देहि वचो दीनं वाचयित्वा गृहेगृहे ॥ भिक्षा केनापि नो दत्ता क्षुधितस्य च धूर्जटेः ॥ ३ ॥ तदा क्रोधाभिरक्ताक्षः शूलपाणिः क्षुधार्दितः ॥ भ्रामयित्वा पुरीं सर्वां शनैर्वहिर्विनिर्ययौ ॥ ४ ॥ एकविंशतिकुण्डानि पीयूषस्य द्विजोत्तम ॥ यत्र तिष्ठंति सर्वाणि नागलोकस्य रक्षणे ॥ ५ ॥ तत्र गत्वा स भगवान्छंभुः सर्वात्मसंभवः ॥ अपिब त्पीयूषम् ॥ ७ ॥ कस्येदं कर्म किं जातं सुधा यस्मादिनो गता ॥ इत्युक्ता चैव ते सर्वे नागा वासुकिपुरोगमाः ॥ ८ ॥ महदतिक्रमणे शंकाः पुरात्ते निर्ययुर्वहिः ॥ किं कुर्याम क्व गच्छाम कस्येदं हेलनं कृतम् ॥ ९ ॥ येनास्माकं कोपितेन हृतं चामृतमुत्तमम् ॥ अस्माकं जीवनं तस्मात्कथं जीवाम पन्नगाः ॥ १० ॥ इत्युक्त्वा पन्नगाः सर्वे सस्त्रीबालपरिग्रहाः ॥ हरिं च जग्मुः शरणं मनसा परिशंकिताः ॥ ११ ॥ तेषामनुग्रहार्थाय वागुवाचाशरीरिणी ॥ श्रूयतामुरगाः सर्वे युष्माभिर्देवहेलनम् ॥ १२ ॥ भिक्षा र्थमागतः शम्भुः क्षुधार्तश्च गृहेगृहे ॥ विदित्वातिथिवेलायां कपालकरभिक्षुकः ॥ १३ ॥ दत्ता न भिक्षा केनापि भोगवत्यां पिन किनः ॥ तदा बहिर्गतो नाथः क्षुधितो धर्मविग्रहः ॥ १४ ॥ तेन नष्टा सुधा सर्वा कुंडांते पन्नगोत्तमाः ॥ यूयं प्रयात पातालान्म हाकालवनोत्तमे ॥ १५ ॥ तत्रैका वै सरिच्छ्रेष्ठा शिप्रानामेति विश्रुता ॥ त्रैलोक्यपावनी ह्येषा सर्वकामफलप्रदा ॥ १६ ॥ यस्या दर्शनमा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रेण सर्वपापक्षयो भवेत् ॥ तत्र गत्वा भवद्भिश्च स्नानं कार्यं यथाविधि ॥ १७ ॥ भजनं देवदेवस्य ततः पूजां करिष्यथ ॥ भजनाद्देवदेवस्य शिप्रासलिलमज्जनात् ॥ १८ ॥ भविष्यति ततः सद्यः सुधा लोके पुरैव वः ॥ इति संभाष्य तान्नागांस्तत्रैवांतरधीयत ॥ १९ ॥ वाणीं व्यास तदा दिव्यां सहसा लोकसाक्षिणीम् ॥ श्रुत्वा देवेरितां वाणीं तथेत्युक्त्वा च पन्नगाः ॥ २० ॥ स्त्रीबालवृद्धसहिता महाकालवनं ययुः ॥ तत्र गत्वा ददृशुस्ते नदीं त्रैलोक्यवंदिताम् ॥ २१ ॥ सर्वत्र कुसुमाकीर्णां तरुच्छायाभिराश्रिताम् ॥ हंसकारंडवाकीर्णां मणिमुक्ताप्रवालकाम् ॥ ॥ २२ ॥ मणिसोपानरचितां पद्मखंडैश्च मंडिताम् ॥ सायं प्रातः स्थिता विप्राः संध्योपासनतत्पराः ॥ २३ ॥ ऋषयश्च महाभागा भृग्वंगिरसमुख्यकाः ॥ गंधर्वाश्चैव तत्रैव देवर्षिनारदादयः ॥ २४ ॥ वसवश्च तथादित्या ऋभवो मरुतस्तथा ॥ रुद्राः साध्याश्च देवाश्च पितरो विमलाशयाः ॥ ॥ २५ ॥ उपासते च शिप्रां वै संध्यावेलां समाहिताः ॥ ऋषिपत्न्यो महाभागा देवकन्याप्सरोगणाः ॥ २६ ॥ पतिव्रता महाभागास्तत्रैव पतिभिः सह ॥ उपासंते सदाचारा वर्णाश्रमपुरोगमाः ॥ २७ ॥ राजर्षयः समासीना निर्वाणपदवीं गताः ॥ सिद्धा योगेश्वराः शांतास्तापसाः शंसितव्रताः ॥ ॥ २८ ॥ नानादेशोद्भवा लोका यात्रिणः समुपागताः ॥ शिप्राकूले समासीना नरनारीसमन्विताः ॥ २९ ॥ कुर्वंते तत्र धर्माणि महादानानि सर्वशः ॥ एवंविधां समालोक्य व्यास त्रैलोक्यवंदिताम् ॥ ३० ॥ नदीं सुधामयीं सर्वां नागाः परमहर्षिताः ॥ स्नानदानादिकं कृत्वा महादेवमुपासिरे ॥ ३१ ॥ वेदोक्तविधिना सर्वे भक्त्या पन्नगसत्तमाः ॥ पंचांगपूर्वकं स्नानं यक्षकर्दमलेपनम् ॥ ३२ ॥ अम्लानपंकजां मालां नानापुष्पाश्रितेस्तथा ॥ वासःस्रगनुलेपाद्यैश्चन्दनेनगंधधूपकैः ॥ ३३ ॥ दीपदानादिनैवेद्यैस्तांबूलमथ दक्षिणाः ॥ कर्पूरार्तिकराः सर्वे महादेवमुपागताः ॥ स्तुतिमारेभिरे कर्तुं सुधाकामास्तदोरगाः ॥ ३४ ॥ ॥ सर्पा ऊचुः ॥ ॥ नमोऽनंताय वृहते सर्वदेव नमोनमः ॥ चंद्रमौले नमस्तेऽस्तु कपर्दिन्परमात्मने ॥ वृषध्वज नमस्तेऽस्तु त्रिशूलवरधारिणे ॥ ३५ ॥ त्र्यम्बकाय नमस्तेऽस्तु जटाकुटधारिणे ॥ शेषहार नमस्तेस्तु चिताभस्मांगधारिणे ॥ ३६ ॥ कृत्तिवास नमस्तेऽस्तु गिरीशायं नमोनमः ॥ त्रिपुरघ्न नमस्तेस्तु स्मरांतक नमोऽस्तु ते ॥ ३७ ॥ मृगव्याध नमस्तेऽस्तु वत्सराय नमोनमः ॥ शंकरात्मन्नमस्तेस्तु सर्वकामफलप्रद ॥ ३८ ॥ सर्वसाक्षिन्नमस्तेऽस्तु सर्वभूताशयाकृते ॥ सर्वाधार नमस्तेऽस्तु सर्वशक्तिधराय च ॥ ३९ ॥ सर्वभोग नमस्तेऽस्तु सर्ववीजसमुद्भव ॥ दिव्यहास नमस्तेऽस्तु नमोऽद्भुतलयाय च ॥ ४० ॥ काम्यकाम नमस्तेस्तु सर्वकामवरप्रद ॥ नमः शिवाय शांताय पशूनां पतये नमः ॥ ४१ ॥ नमो मृडाय दांताय शांतरूपाय वै नमः ॥ ४२ ॥ एवं प्रसादितो नागैर्भगवान्वृषभध्वजः ॥ प्रसन्नवदनो भूत्वा प्रत्यक्षः प्राह पन्नगान् ॥ ४३ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणुध्वमुरगाः सर्वे वचस्तथ्यं वदामि वः ॥ नागलोके पुरा नित्यं भिक्षार्थं चागतोस्म्यहम् ॥ ४४ ॥ गृहेगृहे भोगवत्यां व्यचरत्सु थितो भृशम् ॥ कपालं च करे कृत्वा धृत्वा कंथां सुचीरकाम् ॥ ४५ ॥ अप्राप्तभिक्षो भिक्षार्थी पुनरागां ततो गृहम् ॥ तेन पापप्रसंगेन सुधा नष्टा च वः स्थलात् ॥ ४६ ॥ किंचित्पुण्यप्रसंगेन महाकालवनोत्तमे ॥ यूयं प्राप्ता महाभागा हित्वा नागालयोत्तमम् ॥ ४७ ॥ आबालवृद्धैः सस्त्रीभिर्दृष्टा शिप्रा सरिद्वरा ॥ यस्या दर्शनमात्रेण सुनिष्पापोऽस्म्यहं पुरा ॥ ४८ ॥ शिप्रायां स्नानजं पुण्यं वक्तुं शक्तो न कीदृशम् ॥ दर्शनाज्जायते शंभुस्तत्क्षणाद्भुवि पन्नगाः ॥ ४९ ॥ यस्मात्स्नानं कृतं सर्वैः शिप्रायां पन्नगोत्तमैः ॥ तेन पुण्यप्रभावेन सुधास्तु वो गृहेगृहे ॥ ५० ॥ नीत्वा शिप्रोदकं पुण्यं कुण्डेषु परिपिच्यत ॥ तेनेतानि च कुण्डानि अमृतान्येकविंशतिः ॥ ५१ ॥ संपूर्णानि भविष्यंति स्थिराणि पन्नगोत्तमाः ॥ तथेत्युक्त्वा च ते सर्वे धृत्वा शिप्रोदकं करैः ॥ ५२ ॥ गतास्ते वै स्वकं लोकं नमस्कृत्वा महेश्वरम् ॥ ततः प्रभृति सा शिप्रा नागलोकेऽमृतोद्भवा ॥ ५३ ॥ सर्वलोकेषु विख्याता व्यास शिप्राऽमृतोद्भवा ॥ ये तु तस्यां प्रकुर्वंति नराः स्नानादिकं भुवि ॥ ५४ ॥ न तेषां दुष्कृतं किंचिन्नापदो न च दुर्गतिः ॥ न वियोगो भवेत्तेषां पुत्रदारादिकैः कदा ॥ ५५ ॥ न च मित्राणि दुष्यंति न रोगो न दरिद्रता ॥ कथां पापहरां पुण्यां सर्वकामवरप्रदाम् ॥ पठनाच्छ्रवणाद्वापि गोसहस्रफलं लभेत् ॥ ५६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये शिप्रामाहात्म्येऽमृतोद्भवानामकथावर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भूयः शृणु महाभाग शिप्रामाहात्म्यमुत्तमम् ॥ यस्य श्रवणमात्रेण हयमेधफलं भवेत् ॥ १ ॥ शिप्रा च सर्वतः पुण्या पवित्रा पापहारिणी ॥ अवंत्यां च विशेषेण शिप्रा चोत्तरवाहिनी ॥ २ ॥ तथापि तत्समुत्पत्तिं विस्तराद्वदतो मम ॥ यथा वाराहकल्पेन विष्णुर्देहोद्भवा शिवा ॥ शृणु व्यास महापुण्यां कथां पौराणिकीं शुभाम् ॥ ३ ॥ पुरा महासुरो जातो हिरण्याक्षो महाबलः ॥ ४ ॥ स चेमां सकलां पृथ्वीं वशीकृत्वा चकार ह ॥ राज्यं च सार्वभौमानां दानवेंद्र दुरात्मभिः ॥ ५ ॥ जित्वा च सकलाँल्लोकान्सुरानींद्रपुरोगमान् ॥ दिक्पालान्वसुपालांश्च तिरस्कृत्यासुराधिपः ॥ ६ ॥ स सर्वान्सर्वलोकेभ्यः स्वयमेवाधितिष्ठति ॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ ७ ॥ विचरंति यथा मर्त्या भ्रष्टराज्याः परा जिताः ॥ अलब्धशरणाः सर्वे ब्रह्माणं शरणं ययुः ॥ ८ ॥ तत्र गत्वा नमस्कृत्य दैत्यकृत्यं न्यवेदयन् ॥ भगवन्किमिदं कार्यं भवता परमेष्ठिना ॥ ॥ ९ ॥ येन देवगणाः सर्वे नष्टप्रायाश्च तत्क्षणात् ॥ हिरण्याक्षेण दैत्येन हृतं स्वर्गमकण्टकम् ॥ १० ॥ यज्ञभागांश्च वै सर्वानुपाश्नाति पृथक्पृथक् ॥ कनोपायेन जीवाम कथं तिष्ठाम भूतले ॥ ११ ॥ इति विज्ञपितं तेषां देवानां स पितामहः ॥ उवाच वचनं रम्यं तत्कालसमयोचितम् ॥ १२ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणुध्वं भोः सुरश्रेष्ठा यूयं सर्वे समाहिताः ॥ पुरायं पार्षदश्रेष्ठो द्वारपालः समाहितः ॥ १३ ॥ वैकुण्ठभवने रम्ये विष्णो रत्नुलतेजसः ॥ जयोनाम महावाहुर्विजयेन समन्वितः ॥ १४ ॥ द्वावेव सचिवौ दांतौ विष्णुवेषधरावुभौ ॥ आत्तयष्टी च विक्रांतौ द्वारे संतिष्ठतः सदा ॥ ॥ १५ ॥ एकदा वै मुनिश्रेष्ठ ब्रह्मणो मानसात्मजाः ॥ स्वैरं चरंतो लोकानां विष्णोर्भवनमागताः ॥ १६ ॥ सनकाद्यो महाभागा भगवद्दर्शनलालसाः ॥ ताभ्यां निवारिताः सर्वे पेतुर्वै धरणीतले ॥ १७ ॥ मुमुहुश्च तदा व्यास कुमारा भृशदुःखिताः ॥ ततोऽगात्स महाबाहुर्भगवान्कमलेक्षणः ॥ १८ ॥ ददर्श सहसा विष्णुः कुमारान्भुवि दुःखितान् ॥ उत्थाप्यांकं समारोप्य सस्वजे मधुसूदनः ॥ १९ ॥ मूर्ध्नि चाघ्राय बाहुभ्यां परिष्वज्य ह्युवाच ह ॥ कस्माद्वः कश्मलमिदं केनापि दुःखिता भृशम् ॥ २० ॥ सर्वं तत्कारणं बाला ब्रूत नो धर्मवित्तमाः ॥ २१ ॥ ॥ कुमारा ऊचुः ॥ ॥ श्रूयतां भो महाराज अस्माकं दुःखमीदृशम् ॥ येन प्राप्ता वयं ब्रह्मन्दशामेतां शृणुष्व ह ॥ २२ ॥ आयाता भ्रातरो ह्येते चत्वारो लोकपर्यटाः ॥ दर्शनार्थं रमानाथ साभिलाषाः शुचार्दिताः ॥ २३ ॥ निवारिताश्च सहसा ताभ्यां वै द्वारपालनात् ॥ तेनैवेयं दशा प्राप्ता भवता परिपालिताः ॥ २४ ॥ ॥ ॥ भगवानुवाच ॥ ॥ अतः प्रभृति स्थानेस्मिन्स्थितिर्नास्ति च शाश्वती ॥ एतयोरासुरीं योनिः प्राप्स्यते यन्मनाहितौ ॥ २५ ॥ सद्यः प्राप्तौ तदा व्यास आसुरीं योनिमेव तौ ॥ जयविजयनामाख्यौ दुष्टभावसमाश्रितौ ॥ २६ ॥ जन्मांतरसहस्रेण तपोदानसमाधिभिः ॥ नराणां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ २७ ॥ दुष्टभावेन सद्यो वै जन्मभिर्जायते त्रिभिः ॥ भविष्यति च तस्माद्वो विष्णुभक्तिः परा स्मृता ॥२८॥ जन्मजन्मांतरे जातौ तामसीं योनिमुद्धतौ ॥ हिरण्यकशिपुश्चैव हिरण्याक्षो महाबलः ॥ २९ ॥ तथैव कुंभकर्णाख्यो रावणो लोकरावणः ॥ दंतवक्रः शिशुपालश्च जन्मत्रयमिति स्मृतम् ॥ ३० ॥ योऽसौ महाबलो दैत्यो हिरण्याक्ष इति स्मृतः ॥ दुष्टभावसमापन्नो देवब्राह्मणनिंदकः ॥ ॥ ३१ ॥ जित्वा च सकलान्देवान्स्वयमेवाधितिष्ठति ॥ ३२ ॥ स्वर्गान्निराकृताः सर्वे भ्रष्टराज्याः पराजिताः ॥ विचरंति यथा मर्त्यास्तेन देवगणा भुवि ॥ ३३ ॥ स्वधाकारो वषट्कारः स्वाहाकारो न दृश्यते ॥ देवपूजार्चनं नास्ति ब्राह्मणानां विशेषतः ॥ ३४ ॥ नैव तीर्थं प्रकाशेत पुण्यान्यायतनानि च ॥ आश्रमेषु च सर्वेषु ऋषीणां च महात्मनाम् ॥ ३५ ॥ उद्वृत्तं च प्रकुर्वंति दुष्टदैत्याः प्रहारिणः ॥ वर्णाश्रमवतां धर्माः स्त्रीणां चैव सुशीलता ॥ ३६ ॥ उच्छिन्ना हि तदा जातास्तस्मिन्ब्राह्मे दुरात्मनि ॥ दुष्टाचारा दुरात्मानो मायिनो बहुमानिनः ॥ ३७ ॥ पाखंडिनोऽपराक्रांताः सर्वे धर्मबहिर्मुखाः ॥ पशुधर्मरताः सर्वे सर्वे ब्रह्मेतिशंसिनः ॥ ३८ ॥ बहुम्लेच्छा बहुक्लेशा वह्नावाधावनी कृता ॥ को वेदः का स्मृतिः पुण्या को यज्ञः का च दक्षिणा ॥ ३९ ॥ तमीभूतं जगत्सर्वं दृश्यते वसुधातले ॥ एवं व्यास यदा जातं दुष्टं सर्वं जगत्त्रयम् ॥ ४० ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ४१ ॥ इति ज्ञात्वा महाविष्णुर्वाराहं वपुरात्मवान् ॥ दधार लीलया दिव्यं श्वेतद्वीपोपमं शुभम् ॥ ४२ ॥ यूपदंष्ट्रो हविर्गंधो वीजौषधितनूरुहः ॥ वेदपादः शुचिर्दंडी जिह्वाग्निस्तालुकाहुतिः ॥ ४३ ॥ अंतरास्यरुचादार्ढो यज्ञकायः सुदक्षिणः ॥ उद्गानघुर्घुरोन्नादो विहार ऋत्विजाकृतिः ॥ ४४ ॥ होत्रश्वासपरो दक्षसदस्यावयवः स्मृतः ॥ पुंच्छकर्माशनो नित्यं यजमानसुमानदः ॥ ४५ ॥ वेदिपल्वलसंस्तारो ब्रह्माद्यर्थवनाकरः ॥ लोककल्पो लोकसाक्षी परावरवहः शुचिः ॥ ४६ ॥ आद्यः पुरुष ईशानः पुरुहूतः पुरुष्टुतः ॥ तेनासौ निहतो दैत्यो हिरण्याक्षो दुरासदः ॥ ४७ ॥ संग्रामान्सुबहून्कृत्वा बहुकष्टेन विष्णुना ॥ दैत्येन पीडिता पृथ्वी रसातलतलंगता ॥ ४८ ॥ उद्धृता च वराहेण दंष्ट्रया चंद्ररेखया ॥ हतास्ते दानवाः सर्वे शेषाः पातालमाययुः ॥ ४९ ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥ ५० ॥ सरितो मार्गवाहिन्यः सागराः प्रकृतिं गताः ॥ दृष्ट्वा देवो खिलं व्यास प्रसन्नात्मा बभूव ह ॥ ५१ ॥ वाराहमूर्तिर्भगवान्सर्वकामफलप्रदः ॥ आनंदनिर्भरो देवो हतदैत्यो वरप्रदः ॥ ५२ ॥ तस्यापि हृदयाज्जाता नदी श्रेष्ठा सनातनी ॥ आनंदजलसंपूर्णा सर्वानंदवरप्रदा ॥५३॥ बहुयोजनविस्तारा बहुला कामचारिणी ॥ पद्माकरसमाकीर्णा हंसकारण्डसंकुला ॥५४॥ सरला तरलच्छाया यक्षगंधर्वसेविता ॥ किन्नरीगीयमाना च गीयमाना खगालिभिः ॥५५॥ अप्सरोभिर्नृत्यमाना स्तूयमाना महर्षिभिः॥ हूयमाना हुताग्निभी राजर्षिभिः समाश्रिता ॥ ५६ ॥ तुंगस्तनभराक्रांतयोपिद्भिः क्रीडितान्तरा ॥ क्वचित्करिवरांदोले रम्यमाणा विराजिता ॥५७॥ वेदविद्भिर्द्विजैः सेव्या ऋषिभिस्संशितात्मभिः ॥ सर्वदा सर्वकाले च सिद्धेः सिद्धिप्रदा नृणाम् ॥ ५८ ॥ महाकालवने रम्ये रम्या पद्मावती पुरी ॥ सुन्दरं कुण्डमपरं रम्यं प्राचीनकं शुभम् ॥ ५९ ॥ यत्र स्नात्वा नरा यांति शिवलोकं सनातनम् ॥ यत्र नीला परा व्यास शिप्रा वै लोकपावनी ॥ ६० ॥ वाराहेण कृतं सर्वं दुष्टदैत्यनिबर्हणम् ॥ तेन देवा निरातंकाः कृता वाराहमूर्तिना ॥ ६१ ॥ कृतप्रांजलयः सर्वे देवा इंद्रपुरोगमाः ॥ स्तुतिं कृत्वा महाविष्णोः सतत पुरतः स्थिताः ॥ ६२ ॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ॥ किं दानं किं तपः पुण्यं किं तीर्थं का च देवता ॥ ॥ ६३ ॥ येन पुण्यप्रभावेन पुनः स्वर्गो ह्यवाप्यते ॥ एतन्निश्चित्य नो ब्रूहि सर्वं गुह्यतरं विभो ॥ ६४ ॥ ॥ विष्णुरुवाच ॥ ॥ शृणुध्वं भोः सुराः सर्वे गुप्माकं सिद्धिकारणम् ॥ गुह्याद्गुह्यतरं पुण्यं महाकालवनं शुभम् ॥ ६५ ॥ मम देहोद्भवा शिप्रा यत्र लीना पयस्विनी ॥ नीलगंगा सरिच्छ्रेष्ठा यत्र प्राची सरस्वती ॥ ६६ ॥ पुष्करं च गयातीर्थं पुरुषोत्तमसरः शुभम् ॥ तत्रैव गच्छत क्षिप्रं पुनर्लोकानवाप्स्यथ ॥ ६७ ॥ इति श्रुत्वा परं वाक्यं देवदेवजगद्गुरोः ॥ तत्र देवगणाः सर्वे ब्रह्मशक्रपुरोगमाः ॥ ६८ ॥ महाकालवने रम्ये यत्र शिप्रा सरिद्वरा ॥ स्नानदानादिकं कृत्वा श्राद्धं कृत्वा यथोचितम् ॥ ६९ ॥ तेन पुण्यप्रभावेन स्वकाँल्लोकान्गताः सुराः ॥ एवं व्यास समाख्याता शिप्रा वै लोकपावनी ॥ ७० ॥ जातं सरो वराहस्य विष्णोरतुलतेजसः ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ ७१ ॥ अत्र स्नात्वा पयः पीत्वा श्राद्धं कृत्वा यथोचितम् ॥ पयस्विनीं च गां दत्त्वा विष्णुलोके महीयते ॥ ७२ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्ती क्षेत्रमाहात्म्ये शिप्रामाहात्म्यवर्णनंनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पृथिव्यां यानि तीर्थानि तानि सर्वाणि सुव्रत ॥ अवंत्यां सुन्दरे तीर्थे तिष्ठंति सर्वदा भुवि ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ किमिदं सुन्दरं कुण्डं कदाकालेऽभवत्क्षितौ ॥ निर्मितं केन को देवः किं वा तस्य फलं स्मृतम् ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु पुण्यतमे क्षेत्रे सुन्दराख्यं यदाऽभवत् ॥ सर्वपापप्रशमनं वांछितार्थफलप्रदम् ॥ ३ ॥ यस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति ॥ अश्वमेधादिकं पुण्यं वाजपेयशताधिकम् ॥ ४ ॥ पुरा कल्पक्षये व्यास नष्टकल्पा च मेदिनी ॥ प्रचण्डवातवर्षाभ्यां घूर्णितो मेरुपर्वतः ॥ ५ ॥ तदात्र पतितं व्यास वैकुण्ठशिखरोत्तमम् ॥ महाकालवने घोरे गुह्ये चाव्ययके ध्रुवे ॥ ६ ॥ तत्क्षणात्पतिते शृंगे कुण्डं जातं सुनिश्चितम् ॥ रत्नसोपानमच्छोदं मुक्तासिकतपूरितम् ॥ ७ ॥ जांबूनदकरारोहं हेमपद्मविराजितम् ॥ कल्पद्रुमकृतच्छायं चिंतामणिसमुच्छ्रितम् ॥ ८ ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ बीजौषधिगणाकीर्णं सर्वतत्त्वाभिसंयुतम् ॥ ९ ॥ कल्पक्षये न क्षीयंते यानि तत्त्वानि सर्वशः ॥ तानि तत्र प्रतिष्ठंति मूर्तिमंति पराणि च ॥ १० ॥ वेदशास्त्रपुराणानि गाथागीतिक्षराक्षराः ॥ ॐकारश्च वषट्कारो गायत्री त्रिपदा परा ॥ ॥ ११ ॥ कलाः काष्ठा मुहूर्ताश्च लवत्रुटिपलं घटिः ॥ अहर्निशश्च यामाश्च पक्षमासावृतुस्तथा ॥ १२ ॥ संवत्सरयुगाश्चैव कुण्डे तिष्ठंति मूर्तितः ॥ देवा यक्षाश्च नागाश्च गुह्यकाः किन्नरास्तथा ॥ १३ ॥ गंधर्वाप्सरसो यक्षाः सिद्धाः किंपुरुषास्तथा ॥ उपासांचक्रिरे तस्य कल्पदोषभयातुराः ॥ १४ ॥ ब्रह्मा रुद्रश्च कालश्च लोकपाला महौजसः ॥ केचिद्ध्यानपराः सिद्धास्तापसाः संशितव्रताः ॥ १५ ॥ तिष्ठंति बहुयुगं व्यास यावत्कल्पः समाप्यते ॥ सुदर्शनसमाकारं पूरितं चामृतांबुभिः ॥ १६ ॥ दिव्यपादपसंयुक्तं पारिजातगुणान्वितम् ॥ दिव्यस्त्रीस्नानगंधोर्दवासितोद्गारिसौरभम् ॥ १७ ॥ क्वचिन्मयूरा नृत्यंति क्वचित्कूजंति कोकिलाः ॥ क्वचित्केकारवाः क्वापि मेघघोषसमाकुलम् ॥ ॥ १८ ॥ सुन्दरं सुन्दराकारं सुन्दरं तेन चोच्यते ॥ बहुपुण्यकरं व्यास सर्वपापहरं परम् ॥ १९ ॥ यत्र संनिहितो विष्णुः शिवः शक्त्या युतो वशी ॥ उपासांचक्रिरे शश्वत्सर्वकालेषु सर्वदा ॥ २० ॥ पक्षार्धं पक्षमेकं च सुन्दरकुण्डे नरो वसेत् ॥ वैकुण्ठे नियतं वासो यावत्कल्पशतं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवेत् ॥ २१ ॥ पक्षिकीटपतगाश्च मृता यांति शिवालयम् ॥ किं पुनर्मानवा लोके स्नानपूताश्च तत्र वै ॥ २२ ॥ य ददाति तिलान्धेनु गजवा
जिरथावनीः॥दासीर्दासान्सुवर्णं च रत्नानि विविधानि च ॥२३॥ शय्यादानविमानानि दानानि विविधानि च ॥ न तेषां दानजं वह्नि कीटव्यास
फलं भवेत् ॥ २४ ॥ भूयः शृणु परं व्यास सुन्दरकुण्डफलं स्मृतम् ॥ एकदा बहुपापेन पतितः पापयोनिषु ॥ २५ ॥ पिशाचो मोक्षमापन्नः शिव
रूपधरो गतः ॥ पिशाचमोचने स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ २६ ॥ मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥
कोऽसौ पिशाच इति ख्यातः किं तेन दुष्कृतं कृतम् ॥ येन पापप्रसंगेन पिशाचत्वमुपागतः ॥ २८ ॥ कथं तीर्थप्रसंगोऽस्य जातो वै द्विज
सत्तम ॥ एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ २९ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महाख्यानं तीर्थमाहात्म्यमुत्तमम् ॥
यस्य श्रवणमात्रेण सर्वपापक्षयो भवेत् ॥३०॥ ब्राह्मणो देवलो नाम दाक्षिणात्यो द्विजाधमः ॥ सदा पापरतो लोभी कूटसाक्षी च लंपटः ॥ ३१ ॥
गुरुद्रोही कितवो धूर्तो गुरुहा गुरुतल्पगः ॥ हेमहारी सुरापी च ब्रह्महा स्वामिद्रोहकः ॥ ३२ ॥ अभक्ष्यभक्षकश्चैव वेदशास्त्रविवर्जितः ॥
अनेकजन्मार्जितपापी सर्वधर्मबहिष्कृतः ॥३३॥ विश्वासघातको मानी चोरसंगरतः खलः ॥ देशांतरगतो मंदश्चौरकार्यार्थसाधकः ॥ ३४ ॥
बहवो निहता मार्गे पापाचारेण जंतवः॥ मगधं स गतो दुष्टः प्रसंगात्पापकारिणाम् ॥३५॥ तत्रैको ब्राह्मणो दांतो वेदवेदांगपारगः ॥ साग्निकः शुद्धस
त्स्थो ब्रह्मकर्मरतः सदा ॥ ३६ ॥ श्वशुरगृहे स्थिता भार्यां तामादाय यशस्विनीम् ॥ चलितो यानमारुह्य तेन पापेन घातितः ॥ ३७ ॥ तस्य
स्त्री च वरारोहा रूपलावण्यशालिनी ॥ पतिव्रता महाभागा दृढचित्ता शुचिस्मिता ॥ ३८ ॥ हते भर्तरि दुःखार्ता पतिविरहकातरा ॥ वने घोरे
परिभ्रष्टा काष्ठान्यादाय भामिनी ॥ ३९ ॥ आरुरोह चितां दीप्तां पतिना हृष्टमानसा ॥ स च दुष्टतरः सर्वं तस्य विप्रस्य जीवनम् ॥ ४० ॥
गृहीत्वा चलितो मार्गे गृहीतो राजकिंकरैः ॥ बंधयित्वा च तैः सर्वंस्तेन वित्तेन वै सह ॥ नीतोऽसौ राजभवनं निवेदितो राजसंनिधौ ॥४१॥ पाति
तौ वै गले बद्ध्वा रज्जुना वृक्षकोटरे ॥ चांडालैर्धृष्टितो भूमावितस्ततः श्वपाकिभिः ॥ ४२ ॥ तेन कर्मविपाकेन रौरवं नरकं गतः ॥ पंचत्रिंशसहस्रा
णि विष्टायां कृमितां गतः ॥ ४३ ॥ ततोऽन्यं नरकं प्राप्तो यमशासनकारकैः ॥ असिपत्रवनं घोरमायसं तप्तसायकम् ॥ ४४ ॥ मुद्गरैस्ताड्यमानो
हि शृंखलाभिश्च किंकरैः ॥ कुंभीपाकगतो रौति वैतरण्यां सुपीडितः ॥ ४५ ॥ एवं बहुविधान्कुण्डान्भुक्त्वा पापी नवान्नवान् ॥ ततः प्रेतत्वमापन्नो
युगानां पंचसप्ततिम् ॥ ४६ ॥ महाकायो महारावो महोदरः सूचीमुखः ॥ क्षुत्तृड्भ्यां च पराक्रांतो मरुदेशं समाश्रितः ॥ ४७ ॥ ततः कष्टतरां
प्राप्य पैशाचीं तनुमाश्रितः ॥ कुटिलो दुष्टभावश्च दुष्टचारी दिगंबरः ॥ ४८ ॥ विण्मूत्रदूषितोच्छिष्टपूतिपर्युषितभोजनः ॥ श्मशानोच्छिष्टभोजी
च कृत्तिवासा विलोचनः ॥ ४९ ॥ भग्नवापीतडागे च शुष्कवृक्षे निरूदके ॥ प्राकारपरिखागारे शून्यागारे नदीतटे ॥ ५० ॥ निवासो रोचते
तस्य सर्वदा सर्वसंधिषु ॥ एवं बहुयुगे याते महाकालवने गतः ॥ ५१ ॥ यत्र भाद्रेश्वरं लिंगं सुन्दरं कुंडमुत्तमम् ॥ तत्रोपितत्वमात्रेण सिंहेन विनि
पातितः ॥ ५२ ॥ घातयित्वा च तं पापं जलार्थी कुंडमाविशत् ॥ दंष्ट्रांतरगतं चास्यपतत्तस्य मुखाज्जले ॥ ५३ ॥ तेन पुण्यप्रभावेन सर्वपापं क्षयं
गतम् ॥ मृतमात्रे च लिंगं तन्नेत्रांतरगतं तदा ॥ ५४ ॥ हित्वा पैशाचकं देहं ज्योतिस्तल्लिंगमाविशत् ॥ तदारभ्य परं व्यास तीर्थं पैशाचमोचनम्॥
॥ ५५ ॥ पिशाचमोचनेशेति देवः ख्यातिं ततो गतः ॥ तावद्गर्जंति पापानि मदोन्मत्तगजा यथा ॥ ५६ ॥ यावन्नायाति शिप्रायास्तीर्थे पैशाचमो
चने ॥ पिशाचमोचने स्नात्वा शुचिर्भूत्वा समाहितः ॥ ५७ ॥ पिशाचमोचनं देवं पूजयित्वा यथाविधि ॥ सर्वपापविशुद्धात्मा जायते नात्र
संशयः ॥ ५८ ॥ पिशाचमोचने व्यास महादानानि कारयेत् ॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाचन ॥ ५९ ॥ पिशाचमोचनकथां पवित्रां
पापहारिणीम् ॥ यः पठेच्छृणुयाच्चैव ह्यमेधफलं लभेत् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽव
न्तीक्षेत्रमाहात्म्ये सुन्दरकुंडपिशाचमोचनतीर्थमाहात्म्यवर्णनंनाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ व्यास उवाच ॥ ॥ भूयस्तु श्रोतुमि
च्छामि त्वत्तो ब्रह्मविदांवर ॥ नीलगंगा कदा ब्रह्मञ्छिप्राकुंडे समागता ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महातीर्थं सर्वतीर्थफल
प्रदम् ॥ नीलगंगां नरः स्नात्वा संगमेश्वरमर्चयेत् ॥ २ ॥ दुःसंगसंभवा दोषा न भवंति कदाचन ॥ एकदा ब्रह्मलोके वै गंगा त्रिपथगा
नदी ॥ ३ ॥ गता पुनंती त्रीँल्लोकान्नीलवासा शुचार्दिता ॥ भगवन्किमिदं जातं पातकं मे कृतं पुरा ॥ ४ ॥ दुष्टाचारापराधेन
येनेमां प्रापिता दशाम् ॥ सर्वलोकेषु यत्किंचिज्जनानां पातकं भुवि ॥ ५ ॥ तत्सर्वं तिष्ठति मयि सर्वेषामपि देहिनाम् ॥ तेनाहं वै भराक्रांता नो
शक्या चलितुं धराम् ॥ ६ ॥ नीलभासा विवर्णा च सर्वधर्मबहिर्मुखा ॥ यत्किंचित्क्रियते कर्म शुभं वा यदि वाऽशुभम् ॥७॥ मयि त्यक्ता पुनंतीह
जंतवः सर्वशोऽमलाः ॥ तिष्ठंति पुण्यलोकेषु भुक्तिमुक्तिप्रदेषु च ॥ ८ ॥ अस्माकं च महत्कष्टं जातं धातः परं मलम् ॥ न हि शर्म न वै शांतिर्न
निद्रा न च निर्वृतिः ॥ ९ ॥ न लोके च स्थितिर्मेद्य पापिष्टायाः सनातनी ॥ दुष्टसंगोद्भवैर्दोषैः प्लाविताहं जगद्गुरो ॥१०॥ किं करोमि क्व गच्छामि
येन शांतिर्भवेन्मम ॥ किं तपः किं च दानं मे किं तीर्थं किं च साधनम् ॥ ११ ॥ येनाहं पापलिप्तांगी पुनः प्रकृतिमाप्नुयाम् ॥ एवं ज्ञात्वा महायो
गिन्यथा योग्यं तथा कुरु ॥ १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सरिच्छ्रेष्ठे कारणं पापनाशनम् ॥ महाकालवने रम्ये पुरी ह्यपा
ऽमरावती ॥ १३ ॥ तत्र शिप्रा सरिच्छ्रेष्ठा वर्तते भुवि पावनी ॥ तस्या दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ १४ ॥ तत्र गच्छ महाभागे सद्यश्चात्म
विशुद्धये ॥ ब्रह्मणेति समाख्यातं श्रुत्वा गंगा सरिद्वरा ॥ १५ ॥ तमभिज्ञाय संप्राप्ता महाकालवनं शुभम् ॥ पुष्करस्याग्निभागे च यत्र देवो
मरुत्सुतः ॥ १६ ॥ विंध्यस्य चोत्तरे भागे अंजन्याश्रममुत्तमम् ॥ सा पुत्रेण तपस्तेपे पवित्रा ब्रह्मचारिणी ॥ १७ ॥ पतिव्रताभिः सर्वाभिः
पतिभिर्ब्रह्मचारिभिः ॥ देवांगनाभिर्बहुभिः क्रीडद्भिर्वालकुंजरैः ॥ १८ ॥ सरसीकुल्लकल्हारैर्मत्तालिकुलनादितैः ॥ निर्वैरजंतुभिः सेव्यं ब्रह्मर्षिगणसं
वितम् ॥ १९ ॥ मनोहादकरं पुण्यं पवित्रं पापनाशनम् ॥ तत्र प्रवेशमात्रेण नीलवासाः सरिद्वरा ॥ २० ॥ शुक्लवासोऽभवत्सद्यो नष्टपापमला
ऽशुभा ॥ शरच्चंद्रनिभाकारा धूतपापा पयस्विनी ॥ २१ ॥ तत्रैव चाश्रमं चक्रे मनःसंदर्पकारणम् ॥ तत्प्रभृति समाख्यातं सर्वलोकेषु पुण्यदम् ॥
॥ २२ ॥ नीलगंगेति वै व्यास तीर्थं किल्विषनाशनम् ॥ अस्मिंस्तीर्थे नरः स्नात्वा हनुमंतमथार्चयेत् ॥ २३ ॥ तस्य सिद्धिः करगता भविष्यति
न संशयः ॥ आश्विने मासि संप्राप्ते कृष्णपक्षे समाहितः ॥२४॥ दर्शे पितॄन्समुद्दिश्य श्राद्धं कुर्यान्महालयम् ॥ तारितं च कुलं सर्वं तेनात्मैकोत्तरं
शतम् ॥ २५ ॥ समगोत्रेषु ये जाताः पूर्वजा निरयवासिनः ॥ ते सर्वे सद्गतिं यांति तेषां लोकाः सनातनाः ॥ २६ ॥ स्नात्वा तिलांजलिं दद्यात्पितृ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नुद्दिश्य तत्परः ॥ अक्षया जायते तृप्तिः स्वर्गलोके महीयते ॥ २७ ॥ भोजयेद्ब्राह्मणान्सप्त श्राद्धं कृत्वा तु पायसैः ॥ अक्षयं लभते श्राद्धमश्वमेधफलं भवेत् ॥ २८ ॥ तीर्थं पुण्यतरं व्यास शृणु चान्यद्वदामि ते ॥ दुग्धकुंडमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ २९ ॥ सर्वपापहरं पुण्यं सर्वकामवरप्रदम् ॥ पुरा दुग्धधरा देवी पृथुना धर्ममूर्तिना ॥ ३० ॥ दुग्धं सर्वं हविर्भाव्यं सर्वेषां जीवनप्रदम् ॥ दत्तं निधाय कुंडेस्मिंस्तेन दुग्धसरः स्मृतम् ॥ ३१ ॥ कुंडे स्नात्वा पयः पीत्वा दत्त्वा गां च पयस्विनीम् ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ ॥ ३२ ॥ जायते सर्वकालेषु मृतः स्वर्गपुरं व्रजेत् ॥ ततः पुष्करमासाद्य स्नानदानादिकं चरेत् ॥ ३३ ॥ सर्वपापविशुद्धात्मा पुष्करस्य फलं लभेत् ॥ ३४॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नीलगंगामाहात्म्यवर्णनंनाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ कोऽसौ विंध्यगिरिर्ब्रह्मन्कदा काले समागतः ॥ महाकालवने रम्ये केन वा प्रेषितः पुरा ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरा रेवाजलैर्व्यास प्लावितेयं वसुंधरा ॥ तदा सर्वसुरैरेवमगस्तिर्मुनिसत्तमः ॥ २ ॥ आराधितो महाभागो धरणीत्राणकारणात् ॥ तदागत्य गिरौ रम्ये विंध्ये स मुनिसत्तमः ॥ ३ ॥ एकाग्रमानसो भूत्वा भवानीं विंध्यवासिनीम् ॥ आराधयामास तदा तां च देवीं वरेप्सया ॥ ४ ॥ कंसविद्रावणकरीमसुराणां क्षयंकरीम् ॥ भारावतारणीं पुण्यां बलदेवानुजां शुभाम् ॥ ५ ॥ यशोदागर्भसंभूतां चाणूरबलमर्दिनीम् ॥ विद्युदाभां नभःस्थां च कृष्णां कृष्णाहिमर्दिनीम् ॥६॥ जननीं देवसेनस्य कवीनां वाचमीश्वरीम् ॥ गायत्रीं द्विजमुख्यानां व्याहृतिश्छंदसां वराम् ॥ ७ ॥ सहस्राक्षीं तथेंद्रस्यं ऋषेश्चारुंधतीं पराम् ॥ गवां कामदुघां श्यामां लतां मधुतमप्रियाम् ॥८॥ अदितिं सर्वमातॄणां पार्वतीं सर्वयोषिताम् ॥ ज्योत्स्नां चांद्रमसीं बालां सर्वकामवरप्रदाम् ॥ ९ ॥ शारदीमृतुवेलायां वृंदावनचरीं वराम् ॥ मायिनां वैष्णवीं मायां सर्वदैत्यविमोहिनीम् ॥ १० ॥ लक्ष्मीं च श्रीमतामिष्टां यक्षिणीं धनदार्चिताम् ॥ महोदधीप्सितां वेलां राज्ञां च राजसंपदम् ॥ ॥११॥ वेदिकां यज्ञशालानां हविराहवनीं शुभाम् ॥ दक्षिणां सर्वदीक्षाणां सर्वकामफलप्रदाम् ॥१२॥ एवं स्तुता तदा देवी प्रत्यक्षा विंध्यवासिनी ॥ प्राह प्रसादसुमुखी ऋषीणां प्रवरं ह्यृषिम् ॥ १३ ॥ व्रियतां भो द्विजश्रेष्ठ यदस्मत्तोऽभिवांछितम् ॥ यदीप्सिता त्वया वत्स स्तुतिर्मे शुचिना कृता॥ ॥ १४ ॥ ॥ अगस्तिरुवाच ॥ ॥ यदि मातर्वरो देयो देवानामुपकारिणि ॥ रेवेयं वर्द्धिता लोके सर्वलोकभयप्रदा ॥१५॥ तयेदं प्लावितं विश्वं तस्यास्तु ग्रहणं कुरु ॥ इति सा प्रार्थिता तेन तदा काले महर्षिणा ॥ १६ ॥ आगात्साध्वी तदा व्यास महाकालवनं शुभम् ॥ सांत्वपूर्वं वचस्तथ्यमगस्तिमिदमब्रवीत् ॥ १७ ॥ वारयिष्ये परां देवीं वर्धमानां द्रुतं ह्यपे ॥ तावत्कालं न चोत्तिष्ठेद्विंध्यो नाम महागिरिः ॥ १८ ॥ यावत्त्रिकूटे द्वारे त्वं स्थास्यसि ऋषिसत्तम ॥ देवकार्योद्यतो नित्यं दक्षिणां दिशमुत्तमाम् ॥१९॥ कुशस्थली महापुण्या पवित्रा पापहारिणी ॥ पुरी ह्येषा मुनिश्रेष्ठ त्रिषु लोकेषु विश्रुता ॥ तत्रैवाहं चिरं कालं मातृभिर्निवसामि वै ॥ २० ॥ तत्रापि त्वं सदा सिद्धक्षेत्राधिपत्यमाप्नुयाः ॥ मत्सरो निर्मलं पुण्यं विमलोदं च विश्रुतम् ॥ २१ ॥ यत्र पुण्यवतां वासो देव्यस्तिष्ठंति कोटिशः ॥ तस्मिंस्तीर्थे नराः स्नात्वा शुचीभूय समाहिताः ॥ २२ ॥ यजंति चैव मां भक्त्या धूपदीपाग्नितर्पणैः ॥ क्षीरखंडाज्यभोज्यैश्च भोजयेद्विधिवद्द्विजान् ॥२३॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥ धनधान्यधरैश्वर्यपुत्रदारादिसंपदाम् ॥ २४ ॥ प्राप्यंते विविधा भोगा देवानामपि दुर्लभाः ॥ शत्रुतो न भयं तेषां दस्युभ्यो वा न राजतः ॥ २५ ॥ न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ दीर्घायुर्बुद्धिमाँल्लोके उषित्वा शाश्वतीः समाः ॥ २६ ॥ सर्वपापविशुद्धात्मा मृतः शिवपुरं व्रजेत् ॥ एवं व्यास पुरीं प्राप्य रम्यां चोज्जयिनीं शुभाम् ॥ २७॥ समाश्रिता तदा देवी सततं विंध्यवासिनी ॥ तस्मिंस्तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ २८ ॥ स्त्रियो वा रजोदोषार्ता वंध्याः काकबकादिकाः॥दुर्भगाः शीलहीनाश्च सर्वकामविवर्जिताः॥२९॥ विमलोदेऽपि ताः स्नात्वा दृष्ट्वा वै विंध्यवासिनीम्॥ मुच्यंते सर्वदोषैस्ता नात्र कार्या विचारणा ॥ ३० ॥ अपुत्राः प्राप्नुयुः पुत्रान्कन्या वीरपतिं वरम् ॥ प्राप्यते सर्वसौभाग्यं सर्वकामवरप्रदम् ॥ ३१ ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ॥ वैश्यश्च बहुलाभाढ्यः शूद्रः सुखमथाश्नुते ॥ ३२ ॥ कथां पुण्यवतीमेतां सर्वकामवरप्रदाम् ॥ पठन्वाप्यथवा शृण्वन्गोसहस्रफलं लभेत् ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये विंध्यवासिनी विमलोदतीर्थमाहात्म्यवर्णनंनाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ तीर्थमन्यतरं व्यास क्षातासंगमसंभवम् ॥ यत्र तु स्नानमात्रेण महापापैः प्रमुच्यते ॥ १ ॥ अमा वै शनिवारेण यदायाति समाहितः ॥ पितॄनुद्दिश्य यः कुर्याच्छ्राद्धं चैव तिलोदकम् ॥ २ ॥ पश्येच्छनैश्चरं देवं स्थावरं लिंगमुत्तमम् ॥ तस्य शनैश्चरी पीडा न भवेत्तु कदाचन ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ महातीर्थं समाख्यातं महाकालवने शुभे ॥ भूयस्तु श्रोतुमिच्छामि विस्तरेण तपोधन ॥४॥ ॥ सनत्कुमार उवाच ॥ ॥ श्रूयतां भो द्विजश्रेष्ठ कथा पौराणिकी शुभा ॥ यस्याः श्रवणमात्रेण महापापक्षयो भवेत् ॥५॥ रेवा चर्मण्वती क्षाता तिस्रो नद्यः पुराऽनघ ॥ जातास्त्रैलोक्यपावन्यो भुवि चामरकंटकात् ॥ ६ ॥ पुण्याः पुण्यजला रम्याः पवित्राः पापहारकाः ॥ पुनंत्यः सर्वलोकानां स्नानात्पानात्तथापगाः॥ ७ ॥ एकदोपवने रम्ये मांधातृक्षेत्र उत्तमे ॥ मिथो रमंति संहृष्टाः परस्परजिगीषया ॥ ८ ॥ किंचिद्दोषप्रसंगेन मिथो भेदो ह्यजायत ॥ रेवासंगं परित्यक्ता भित्त्वा विंध्यगिरिं वरम् ॥ ९ ॥ महाकालवने रम्ये समायाता सरिद्वरा ॥ यत्र शिप्रा महापुण्या पुरी ह्येषाऽमरावती ॥ १० ॥ सर्वतीर्थवरं श्रेष्ठं नाम्ना रुद्रसरः स्मृतम् ॥ भुक्तिमुक्तिप्रदंनित्यं सिद्धर्षिगणसेवितम् ॥ ११ ॥ तत्रागत्य पुरा क्षाता शिप्रासंगं समाश्रिता ॥ तत्र तीर्थं परं जातं क्षातासंगमसंज्ञितम् ॥ यत्र धूतरजा जातः सद्यः प्रोक्तो विभावसुः ॥ १२ ॥ ॥ व्यास उवाच ॥ ॥ कथं सूर्यस्त्वया प्रोक्तो विरजो ह्यभवत्पुरा ॥ एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ १३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ पुरानुसूर्यां सावित्रीं त्वष्टा स्वतनयां ददौ ॥ १४ ॥ पतिधर्मरता नित्यं सिषेवे लोकचक्षुषे ॥ तस्यां वै मिथुनं जज्ञे लोकसाक्षिविभावसोः ॥ १५ ॥ यमो वैवस्वतो जातो यमुना लोकपावनी ॥ ततस्त्वष्टाऽब्रवीच्छायां स्वकीयां सूनृतां गिरम् ॥ १६ ॥ मिथुनं मे तवोत्संगे धृतं त्वं परिपालय ॥ तावदेवमिह च्छाये यावत्पितुर्गृहेचरी ॥ १७ ॥ रविभक्तिरता नित्यं चर त्वं मम वेश्मनि ॥ नो वाच्याहं कदा च्छाये पितुर्वेश्मगता रवेः ॥ १८ ॥ एवं सा समयं कृत्वा सावित्री ह्यगमत्तदा ॥ पितुर्वेश्मगता बाला सवितुर्भयविह्वला ॥ १९ ॥ पित्रा निवारिता सद्यो वडवारूपधारिणी ॥ विचचार वने रम्ये बहुलोदकशाद्वले ॥ २० ॥ एकदा याचिता तेन वैवस्वतेन बुभुक्षता ॥ नोदनं वै तया दत्तं याचमानाय तत्क्षणात् ॥ २१ ॥ तदा पदा हता तेन च्छाया तं च शशाप ह ॥ यतस्त्वं मे पदाघातं कृतवान्बालभावनात् ॥ ॥ २२ ॥ तस्मात्त्वं च पदा खंजो भविष्यसि न संशयः ॥ एवं शप्तो रुजाक्रांतो विललाप शुचार्दितः ॥ २३ ॥ एतस्मिन्नंतरे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्यास परिभ्रम्य वसुंधराम् ॥ भावयन्सकलाँल्लोकान्यहचारी विभावसुः ॥ २४ ॥ दृष्ट्वा च तनयं पंगुमित्युवाच विभावसुः ॥ किमिदं वत्स ते कष्टं कुतः प्राप्तं त्वयाऽनघ ॥ २५ ॥ इति पृष्टो यदा तेन सवित्रा लोकभास्वता ॥ उवाच गद्गदां वाचं यमः संयमिनीपतिः ॥ २६ ॥ प्रातराशाय मे नाथ याचितं मातुरंतिकात् ॥ नो दत्तं भोजनं शिघ्रं बालभावेन ताडिता ॥ २७ ॥ पादौ मे गलितौ सद्यो मातुः शापपराभवौ ॥ तच्छ्रुत्वा मोहमापन्नो रविर्ध्यानपरायणः ॥ २८ ॥ विचित्रमिदमाख्यातं मातुः शापस्य कारणम् ॥ एवं ध्यात्वा चिरं कालं ज्ञातवान्विरंशुमान् ॥ ॥ २९ ॥ नेयं सा रुचिरापांगी त्वाष्ट्री लोकस्य पावनी ॥ केयं वा कुत आयाता काँसि त्वं च शुचिस्मिते ॥ ३० ॥ ॥ छायोवाच ॥ ॥ नानुसूर्या महाराज छाया तस्याः समुद्भवा ॥ गता वै सा पितुर्गेहे वारिताहं तयाऽनघ ॥ ३१ ॥ सवित्रे नैव वक्तव्यं छाये किंचित्कथंचन ॥ एष मे समयो नाथ तेनाहं मौनमास्थिता ॥ ३२ ॥ तच्छ्रुत्वा भगवांस्तस्थुः समीपं रोषमास्थितः ॥ जगाम सहसा भानुर्वधुरोषसमन्वितः ॥ ॥ ३३ ॥ तं दृष्ट्वा सहसोत्थाय त्वष्टा लोकपितामहः ॥ पाद्यार्घ्याचमनीयं च मधुपर्कैरपूजयत् ॥ ३४ ॥ नत्वा पादौ परिक्रम्य बहुमानपुरःसरम् ॥ उवाच मधुरया वाचा प्रियं ते करवाम किम् ॥ ३५ ॥ ॥ रविरुवाच ॥ ॥ क्व सानुसूर्या सावित्री ममानुप्रियकारिणी ॥ आगता ते गृहं तात मम मार्गानुमोदिनी ॥ ३६ ॥ ॥ त्वष्टोवाच ॥ ॥ न जानीमो वयं तात प्रिया मे क्व गता सुता ॥ इत्युक्ते वचने त्वष्टा रविर्दुश्चितमानसः ॥ ३७ ॥ किं करोमि क्व गच्छामि क्व च प्रियतरा मम ॥ इति संभाषमाणे तु त्वष्टा वाक्यमथाब्रवीत् ॥ ३८ ॥ तव तेजःपरिभ्रष्टा भग्ना क्वापि गतावला ॥ यदि ते वल्लभा भार्या तेजस्त्वं परिशामय ॥ ३९ ॥ ॥ सूर्य उवाच ॥ ॥ यद्येवं दुस्सहं तेजो मम पूर्वपितामह ॥ तदा ते रोचते सम्यग्यथा स्याद्वै तथा कुरु ॥ ४० ॥ इति सूर्यवचः श्रुत्वा शाणं कृत्वा सुदर्शनम् ॥ घृष्टितः क्षुरधारेण लघीयान्निर्मलोऽभवत् ॥ ४१ ॥ तस्य घृष्टितमात्रेण त्वष्टा चक्रे विवस्वतः ॥ शाणं सुदर्शनं चक्रं सैकता मणिजातयः ॥ ४२ ॥ तदा त्वष्टाऽब्रवीद्वाक्यं मधुरं सूर्यसंनिधौ ॥ महाकाल वने रम्ये वडवारूपधारिणी ॥ ४३ ॥ गृह्यतां भोः सुरश्रेष्ठ शीघ्रं गच्छतु शाद्वले ॥ यत्र शिप्रा सरिच्छ्रेष्ठा यत्र ज्ञाता समागता ॥ ४४ ॥ उभयोः संगमो यत्र तत्र मुक्तिर्न संशयः ॥ तत्र तां सुभगां पत्नीं प्राप्स्यसि त्वं न संशयः ॥ ४५ ॥ इति तस्य वचः श्रुत्वा सविता सर्वतापनः ॥ तत्रागमद्वनं यत्र महाकालस्य पावनम् ॥ ४६ ॥ ज्ञातासंगमसंयुक्ता यत्र शिप्रा पयस्विनी ॥ तत्र मुक्तिश्च मुक्तिश्च धनधान्यसमागमः ॥ ४७ ॥ तत्रागत्य प्रियां भार्यां वडवारूपधारिणीम् ॥ ददर्श तां पुनः श्यामां हरिरूपधरो हरिः ॥ ४८ ॥ नाभिकाग्राणमात्रेण यत्र जातौ सुतावुभौ ॥ दर्शनीयौ सुतृप्तांगौ भिषजौ तौ दिवौकसाम् ॥ ४९ ॥ छाया च सुषुवे तत्र मिथुनं द्विजसत्तम ॥ तापी शनैश्चरं चैव सर्वलोकप्रतापनम् ॥५०॥ शनि योगे यदामा वै जायते सर्वकामदा ॥ तदा स्नानं च दानं च श्राद्धं चैव तु कारयेत् ॥ ५१ ॥ तस्य हस्तगता लक्ष्मीर्जायते सर्वदा भुवि ॥ ज्ञाता संगमे नरः स्नात्वा दानं दत्त्वा च शक्तितः ॥ ५२ ॥ स्थावरेशं समभ्यर्च्य तस्य पापक्षयो भवेत् ॥ सौरिः शनैश्चरो मंदः कृष्णोऽनंतोऽतकोयमः ॥ ५३ ॥ पिंगश्छायासुतो बभ्रुः स्थावरः पिप्पलायनः ॥ एतानि शनिनामानि प्रातःकाले पठेन्नरः ॥ ५४ ॥ तस्य शानैश्चरी पीडा न भवेत्तु कदाचन ॥ यमधर्मोऽपि चात्रैव तपस्तेपे सुदुस्तरम् ॥ ५५ ॥ यज्ञकुण्डोत्तरे भागे यत्र तिष्ठति मारुतिः ॥ धर्मसरेति विख्यातं नाम्ना तत्तीर्थमुत्तमम् ॥ ५६ ॥ यत्र सिद्धिं परां प्राप्ततपसा पवनात्मजः ॥ तस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा वै कांस्यभाजनम् ॥ ५७ ॥ सवासोमणिमुक्ताभिः कांचनालंकृतं वरम् ॥ ब्राह्मणेभ्यः स्वलंकृत्य वेदविद्भ्यश्च सादरम् ॥ ५८ ॥ मातृलोकं समुत्तीर्णो ब्रह्मलोके महीयते ॥ श्रावणे मासुभे पक्षे एकादश्यां तु यो नरः ॥ ५९ ॥ धर्मतीर्थे सदाचारी स्नानदानादिकाः क्रियाः ॥ करोति सततं तस्य विष्णुलोकः सनातनः ॥ ६० ॥ च्यव नाश्रमे नरः स्नात्वा च्यवनेश्वरं विलोकयेत् ॥ यत्र सिद्धिंगतौ पुण्यावश्विनौ भिषजां वरौ ॥ ६१ ॥ च्यवनस्य प्रसादेन देवपंक्तिमवापतुः ॥ च्यवनेन पुरा दृष्टिः प्राप्ता वै देवभेषजात् ॥ ६२ ॥ तस्मिंस्तीर्थे द्विजश्रेष्ठ दिव्यदृष्टिर्भवेन्नरः ॥ अत्रैव प्राप्तवान्सूर्यः सामिद्धोत्राश्रमं परम् ॥ ६३ ॥ अनु सूर्या महाभागां सावित्रीं लोकविश्रुताम् ॥ सूर्यलोकं समासाद्य बुभुजे विपुलां श्रियम् ॥ ६४ ॥ तस्माद्व्यास परं तीर्थं ज्ञातासंगमसंज्ञितम् ॥ सर्वपापहरं पुण्यं सर्वकामवरप्रदम् ॥ ६५ ॥ य एतां तु कथां पुण्यां शृणोति भुवि भक्तितः ॥ पठेद्वा प्रातरुत्थाय तस्य पुण्यफलं शृणु ॥ ६६ ॥ कपिलागोसहस्रेण फलं भवति पर्वणि ॥ तत्फलं समवाप्नोति नात्र कार्या विचारणा ॥ ६७ ॥ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये ज्ञातासंगममाहात्म्यवर्णनंनाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास प्रवक्ष्यामि तीर्थमेकमतः परम् ॥ तीर्थानामुत्तमं तीर्थं गयानामेति नामतः ॥ १ ॥ तत्र स्नात्वा नरो नित्यं मुच्यते च ऋणत्रयात् ॥ देवान्पितॄन्समभ्यर्च्य विष्णुलोकं स गच्छति ॥ २ ॥ ॥ व्यास उवाच ॥ ॥ क्रीकटेषु गया पुण्या नदी पुण्या पुनः पुना ॥ च्यवनस्याश्रमः पुण्यः पुण्यो राजगिरिस्तथा ॥ ३ ॥ स कथं विदितो देशे महाकालवने शुभे ॥ एतद्वेदितुमिच्छामि विस्तरेण तपोधन ॥ ॥ ४ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास कथां पुण्यां पवित्रां पापहारिणीम् ॥ यस्याः श्रवणमात्रेण पितरो यांति सद्गतिम् ॥ ५ ॥ पुरा कृतयुगे पुण्ये युगादिदेवनामतः ॥ राजासीत्स तु धर्मात्मा पुण्यश्रवणकीर्तनः ॥ ६ ॥ तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभूवुः सर्वसंपन्ना वर्धमानाः समंततः ॥ ७ ॥ धर्मश्चतुष्पदो नित्यं यस्मिन्राज्ञि प्रशासति ॥ कालवर्षी च पर्जन्य ऋतवः स्वांगचारिणः ॥ ८ ॥ बहुस्यफला पृथ्वी गावश्च बहुदुग्धदाः ॥ वेदवादरता विप्राः क्षत्रिया बाहुशालिनः ॥ ९ ॥ वैश्या धनपरा नित्यं शूद्राः शुश्रूषणे रताः ॥ वर्णाश्रमरताः सर्वे सर्वे धर्मोपदेशकाः ॥ १० ॥ श्रुतिस्मृतिपरो धर्मो दृष्टपुष्टजनाकरः ॥ नाधिव्याध्यभिभूतश्च लक्ष्यते कोऽपि मानवः ॥ ११ ॥ दुःशीला दुर्भगा नारी विधवा नैव लक्ष्यते ॥ बहुपुत्राऽल्पपुत्रा च मृतपुत्रा न वंध्यका ॥१२॥ रूपशीलगुणोपेता पतिव्रतपरायणा ॥ नो मार्गः कंटसंकीर्णो दस्युदोषैश्च दूषितः ॥ १३ ॥ हूयतां भुज्यतां शश्वदीयतां च गृहेगृहे ॥ दयादानतपोहोमजपयज्ञक्रियापराः ॥ १४ ॥ जनाः सर्वत्र दृश्यंते सर्वधर्मपरायणाः ॥ चतुष्पादचरो धर्मो ह्यधर्मोऽपादविग्रहः ॥ १५ ॥ एवं राजा स धर्मात्मा युगादिदेवसंज्ञितः ॥ येनेयं पालिता पृथ्वी धर्मेण वर्धिताः प्रजाः ॥ १६ ॥ अवंत्यां च पुरा व्यास यज्ञकोटिं समाचरत् ॥ तस्मिन्कालेतिविक्रांतस्तुहुंडोनाम दानवः ॥ १७ ॥ तेन सर्वं हृतं नीतं चराचरमिदं जगत् ॥ घोरं तप्त्वा तपः पुण्यं ब्रह्मलब्धवरः खलः ॥ १८ ॥ नैव देवा न यज्ञाश्च वेदमार्गश्च वर्जिताः ॥ देवतापूजनं नास्ति स्वधा स्वाहा न दृश्यते ॥ १९ ॥ उत्सन्नो धर्ममार्गोऽयं शाश्वतो वै दुरात्मना ॥ नष्टप्रायाः सुरास्तेन कृताः सर्वे द्विजोत्तमाः ॥२०॥ ब्रह्माणं शरणं जग्मुः पितृभिः सह साधुभिः ॥ किं कुर्मो वा क्व गच्छाम तुहुंडेन पराजिताः ॥ २१ ॥ इति श्रुत्वा वचस्तेषां ब्रह्मा लोकपितामहः ॥ समुत्थाय ततः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वविष्णुलोकं जगाम ह ॥ २२ ॥ तत्र गत्वा समाराध्य विष्णुं देवगणैः सह ॥ स्तुतिं पुरुषमूक्तेन विष्णोरतुलतेजसः ॥ २३ ॥ प्रचक्रुः सर्व एवैते ह्यात्मनोभ्युदयाय च ॥ तदा तेषां शमिच्छन्ती वागुवाचाशरीरिणी ॥ २४ ॥ शृण्वतां भोः सुरश्रेष्ठा भवतां श्रेय उत्तमम् ॥ यूयं यात क्षिप्रं क्षिप्रं महाकालवनं प्रति ॥ २५ ॥ गुह्याद्गुह्यतरं पुण्यं पवित्रं पापनाशनम् ॥ नो यत्र मायिनां माया प्रकाशयति भूतले ॥ २६ ॥ सर्वतीर्थमयं तीर्थं कोटितीर्थवरप्रदम् ॥ यत्र शिप्रा सरिच्छ्रेष्ठा सर्वकामफलप्रदा ॥ २७ ॥ दैत्यांतकारिणी दिव्या महाकाली कुलेश्वरी ॥ कोटिकोटिगणाकीर्णा मातृणां शक्तिवर्धिनी ॥ २८ ॥ यत्र गया महापुण्या फल्गुश्चैव महानदी ॥ पुरुषोत्तमगिरिश्रेष्ठो यत्र बुद्धगया स्मृता ॥ २९ ॥ तथैवाद्यगया ख्याता त्रिषु लोकेषु विश्रुता ॥ विष्णोः पोडशपदीतीर्थं गदाधरविनिर्मितम् ॥ ३० ॥ सर्वपापहरा पुण्या यत्र प्राची सरस्वती ॥ महासुरनदी प्रोक्ता यत्र तिष्ठति पुण्यदा ॥ ३१ ॥ न्यग्रोधश्चाक्षयो नित्यः पुरा प्रोक्तो महर्षिणा ॥ तत्रैव सा शिला प्रोक्ता प्रेतमोक्षकरी शुभा ॥ ३२ ॥ तत्रैव संति ताः सर्वा देवताः पितृकल्पजाः ॥ सर्वाक्षरमयोंकारः सर्वदेवमयो हरिः ॥ ३३ ॥ सर्वतीर्थमया देवा गयातीर्थमनुत्तमम् ॥ शीघ्रं गच्छत तत्रैव परां सिद्धिं मवाप्स्यथ ॥ ३४ ॥ यत्र प्रविष्टमात्रेण पितरो निरयस्थिताः ॥ ते सर्वे स्वर्गमायांति ब्रह्मभूयाय कल्पते ॥ ३५ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्ये गयातीर्थप्रशंसावर्णनं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ विचित्रमिदमाख्यातं गयामाहात्म्यमुत्तमम् ॥ भगवन्भवता सर्वं विदितं विश्वमूर्तिना ॥ १ ॥ तत्सर्वं श्रोतुमिच्छामि श्राद्धस्य फलमुत्तमम् ॥ क्षेत्रस्य च द्विजश्रेष्ठ विस्तरेण तपोधन ॥ २ ॥ कियंतः पितरो नित्यं तृप्ता यांति मुरालयम् ॥ केषां के पितरः प्रोक्ताः किमुद्देश्याः पुराऽनघ ॥ ३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ धन्योऽसि कृतकृत्योऽसि यस्य ते नैष्ठिकी मतिः ॥ तथापि शृणु वै वत्स श्राद्धस्य विधिमुत्तमम् ॥ ४ ॥ श्राद्धे प्रकल्पिता लोकाः श्राद्धे धर्मः प्रतिष्ठितः ॥ श्राद्धे यज्ञा हि तिष्ठंति सर्वकर्मफलप्रदाः ॥ ५ ॥ श्रद्धया दीयते किंचिद्वैवं ब्रह्माग्नितर्पणम् ॥ श्राद्धं तु तद्विजानीयात्पुरा प्रोक्तं महर्षिणा ॥ ६ ॥ मनुष्या ऋषयः सर्वे सुरसिद्धाश्च राक्षसाः ॥ गंधर्वाः किन्नरा नागा ब्रह्मेशानसुरेश्वराः ॥ ७ ॥ त्रीन्पितॄंश्च समुद्दिश्य श्राद्धं दद्युः समाहिताः ॥ प्राप्नुवन्त्यखिलान्कामान्सर्वान्व्यास मनोगतान् ॥ ८ ॥ एवं परंपरामार्गं प्रवर्तते सनातनम् ॥ तथापि पितरो ह्येते समाख्यातमया भुवि ॥ ९ ॥ तत्सर्वं संप्रवक्ष्यामि यथा श्रुतं तथा शृणु ॥ त एते पितरो देवा देवाश्च पितरस्तथा ॥ १० ॥ अन्योन्यं पितरो ह्येते देवाः पितृगणैः सह ॥ मार्कंडेन पुरा पृष्टं प्रश्नमेतद्विजोत्तम ॥ ११ ॥ निबोध त्वं मतं सर्वं यदुक्तं तत्समाहितः ॥ यावंतस्ते पितृगणास्तस्मिँल्लोके च ये गताः ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ सप्तैते यजतां श्रेष्ठाः सर्वे पितृगणाः स्मृताः ॥ चत्वारो मूर्तिमंतो वै त्रयस्तेषां च मूर्तयः ॥ ॥ १३ ॥ तेषां लोकं विसर्गं च कीर्तयिष्यामि तच्छृणु ॥ प्रभावं त्वं महत्त्वं च विस्तरेण तपोधन ॥ १४ ॥ धर्ममूर्तिधरास्तेषां तपो ये परमं गताः ॥ तेषां नामानि लोकांश्च कीर्तयिष्यामि तच्छृणु ॥ १५ ॥ लोकाः सनातना नाम यत्र तिष्ठंति भास्वराः ॥ अमूर्तयः पितृगणास्ते वै पुत्राः प्रजापतेः ॥ १६ ॥ विराजस्य द्विजश्रेष्ठ वैराजा इति नः श्रुतम् ॥ यजन्ते तान्देवगणा विधिदृष्टेन कर्मणा ॥ १७ ॥ एते वै योगविभ्रष्टा लोकान्प्राप्य सनातनान् ॥ पुनर्युगसहस्रांते जायंते ब्रह्मवादिनः ॥ १८ ॥ ते प्राप्य तां स्मृतिं भूयः सांख्ययोगमनुत्तमम् ॥ यांति योगगतिं सिद्धाः पुनरावृत्तिदुर्लभाम् ॥ १९ ॥ एते स्युः पितरस्तात योगिनां योगवर्धनाः ॥ आप्याययन्ति ये पूर्वं सोमं योगबलेन वै ॥ २० ॥ तस्माच्छ्राद्धानि देयानि योगिनां द्विजसत्तम ॥ एष वै प्रथमः कल्पः सोमपानामनुत्तमः ॥ २१ ॥ एतेषां मानसी कन्या मेनानाम महागिरेः ॥ पत्नी हिमवतः श्रेष्ठा यस्यां मैनाक उच्यते ॥ २२ ॥ मेनाकस्य सुतः श्रीमान्क्रौंचोनाम महागिरिः ॥ अग्निष्वात्ताः पितृगणास्तत्र तिष्ठंति भास्वराः ॥ २३ ॥ याम्यां वर्हिषदश्चासन्यमाश्च पश्चिमां दिशम् ॥ सोमपाश्चोत्तरां प्राप्ता दिशं धनदपालिताम् ॥ २४ ॥ अमूर्तिमंतावाकाशे कव्यवाडनलौ क्षितौ ॥ ॥ २५ ॥ यक्षरक्षःपिशाचाश्च यजंते भावितात्मनः ॥ साध्या देवान्यजन्ति स्म विश्वेदेवा ऋषींस्तथा ॥ २६ ॥ मानवाः श्राद्धदेवं च ऋषयो ब्रह्म सनातनम् ॥ एवं परंपराप्राप्तः श्राद्धधर्मः सनातनः ॥ २७ ॥ देवकार्यात्परं कार्यं पितृकार्यं विशिष्यते ॥ भरद्वाजात्मजाः सप्त श्राद्धधर्मपरायणाः ॥ २८ ॥ जातिस्मरत्वमापन्ना निर्वाणपदवीं गताः ॥ गुरोश्च दोग्ध्रीं गां हत्वा सप्तैते वै द्विजाधमाः ॥ २९ ॥ पितॄनुद्दिश्य ते सर्वे भक्षयंतः क्षुधार्दिताः ॥ तेन पुण्यप्रभावेन योगभ्रष्टा दिवंगताः ॥ ३० ॥ सप्त जातिस्मरास्ते वै योगयुक्ता बभूविरे ॥ तस्माच्छ्राद्धं परं प्रोक्तं सूरिभिः परमात्मभिः ॥ ३१ ॥ श्राद्धे प्रतिष्ठिता लोकाः श्राद्धे योगः परंतप ॥ एवं ते पितरः प्रोक्ताः श्राद्धस्य च विधिं शृणु ॥ ३२ ॥ ब्रह्मचर्यरतो दांतो न क्रोधी न च मत्सरी ॥ शौचाचारपरो धीरः शास्त्रदृष्टिर्जितेंद्रियः ॥ ३३ ॥ एवं यः कुरुते श्राद्धं तीर्थे चैव विशेषतः ॥ ततोऽधिकतरा प्रोक्ता तृप्तिर्व्यास क्षयेऽहनि ॥ ३४ ॥ वृद्धिश्राद्धे तथा प्रोक्ता महालये शताधिका ॥ ततो दशगुणा प्रोक्ता प्रयागे द्विजसत्तम ॥ ३५ ॥ प्रयागादशगुणा तृप्तिः कुरुक्षेत्रे च सत्तम ॥ कुरुक्षेत्रात्ततो व्यास दशाधिका गया स्मृता ॥ ३६ ॥ ततो दशाधिका व्यास महाकालवने शुभे ॥ अवंत्यां सर्वतः पुण्यं गयातीर्थं च सर्वदा ॥ ३७ ॥ येषां निरयमापन्नाः पितरो जन्मजन्मनि ॥ तेषामुद्धरणार्थाय तीर्थमेतत्सुदुर्लभम् ॥ ३८ ॥ सकृत्स्मरणमात्रेण पितॄणां दत्तमक्षयम् ॥ ये नरा रणमध्यस्थाः पितृवंशविवर्जिताः ॥ ३९ ॥ गर्भपाते मृता ये च नामगोत्रच्युतास्तथा ॥ स्वगोत्रे परगोत्रे वा आत्मघातमृताः परे ॥ ४० ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयताम् ॥ उद्बंधनमृता ये च विषशस्त्रैर्मृताश्च ये ॥ ४१ ॥ दृष्टिभिर्व्यंगतो वापि दौर्ब्राह्मण्ये मृताश्च ये ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४२ ॥ अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथा परे ॥ ४३ ॥ विद्युद्घातेन ये केचिन्मुद्गराभिहताः परे ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४४ ॥ रौरवे चांधतामिस्रे कालसूत्रे च ये गताः ॥ अनेकयातनासंस्थाः प्रेतलोके च ये गताः ॥ ४५ ॥ असिपत्रवने घोरे कुंभीपाके च ये गताः ॥ पशुयोनिगता ये च पक्षिकीटसरीसृपाः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४६ ॥ उदकेषु मृता ये च नारीसूतीमृतास्तथा ॥ ४७ ॥ अश्वमूकरकृमिदंष्ट्रिश्वशृंगिशकटाहताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४८ ॥ भग्नदंष्ट्राश्च शस्त्रास्त्रैर्व्याघ्राद्विगजभूमिपैः ॥ शलभैर्वृश्चिकैर्दष्टैर्ये चापि घातिताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४९ ॥ अपशब्दैर्मृता ये च शौचाचारविवर्जिताः ॥ विषूचिकामृता ये च ये चातीसारतो मृताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५० ॥ शाकिन्यादिग्रहग्रस्तजलमध्ये च ये मृताः ॥ अस्पृश्यस्पर्शसंस्पृष्टाः पापा अपत्यवर्जिताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५१ ॥ जन्मांतरसहस्राणि भ्रमंति स्वेन कर्मणा ॥ मानुषं दुर्लभं येषां तेभ्यः श्राद्धं विधीयताम् ॥ ५२ ॥ येऽन्यजन्मन्यबांधवा येऽन्यजन्मनि बांधवाः ॥ येऽन्यजन्मनि संबद्धा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मित्रामित्रे तथा परे ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५३ ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबंधूनां ये चान्ये बांधवा मृताः ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५४ ॥ ये मे कुले लुप्तपिंडाः पुत्रदारादिवर्जिताः ॥ क्रियालोपगता ये च तेभ्यः श्राद्धं विधीयते ॥ ५५ ॥ पंगुकुब्जा विरूपाश्च आमगर्भाश्च ये मृताः॥ ज्ञाताऽज्ञाताः कुले ये च तेभ्यः श्राद्धं विधीयते ॥ ५६ ॥ आब्रह्मभुवनाच्चैव अन्यैर्दुर्मरणैर्मृताः॥तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥५७॥ तृषार्ताः क्षुधिताश्चैव ह्यापिताश्चैव ये मृताः॥ प्रेतयोनिं गताश्चैव म्लेच्छयोनिं गताश्च ये ॥ तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥५८॥ एवं श्राद्धविधिं व्यास तस्मिंस्तीर्थे समाचरेत् ॥ ऋणत्रयविनिर्मुक्तो वांछितार्थं लभेत सः ॥ गयायां च समासाद्य सुरा इंद्रपुरोगमाः ॥ चक्रुश्च विधिवत्सर्वं यदुक्तं देवभाषया ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयामाहात्म्ये श्राद्धविधिवर्णनंनामाष्टापञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ७ ॥ ॥ सनत्कुमार उवाच ॥ ॥ ततः सुरगणाः सर्वे धूतपापाः समाहिताः ॥ पुनर्योगबलं प्राप्य स्वाधिकारं ययुः पुरा ॥ १ ॥ एवं व्यास गयातीर्थं कुमुद्त्यां सुनिश्चितम् ॥ गयायां यानि तीर्थानि पुण्यान्यायतनानि च ॥ २ ॥ तत्तीर्थेषु नरः स्नात्वा तत्तत्तीर्थफलं भवेत् ॥ तथैव च गयाक्षेत्रं गयाश्राद्धफलप्रदम् ॥ ३ ॥ फल्गुश्च सरितां श्रेष्ठा तथैव फलदायिनी ॥ आदिगया बुद्धगया तथा विष्णुपदी स्मृता ॥ ४ ॥ गयाकोष्टस्तथा प्रोक्तो गदाधरपदानि च ॥ वेदिका पोडशी प्रोक्ता तथैव चाक्षयो वटः ॥ ५ ॥ प्रेतमुक्तिकरी नित्यं शिला चोक्ता तथैव च ॥ अच्छोदा निम्नगा प्रोक्ता पितृणां चाश्रमोत्तमः ॥ ६ ॥ देवानां दानवानां च यक्षकिन्नररक्षसाम् ॥ पन्नगानां च सर्वेषां तथैवाश्रम उत्तमः ॥७॥ एतत्स्थानेषु सर्वेषु स्नानदानादिकाः क्रियाः ॥ श्राद्धं च विधिवद्देयं तत्तत्तीर्थफलं लभेत् ॥८॥ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात् ॥ ९ ॥ एवं व्यास गयातीर्थं पुरावन्त्यां प्रतिष्ठितम् ॥ पश्चात्तु कैकटे जातं यत्र संनिहितोऽसुरैः ॥ १० ॥ तदारभ्य द्विजश्रेष्ठ गया तत्र प्रतिष्ठिता ॥ गदाधरपदाघातैर्महासुरो निपातितः ॥ ११ ॥ तत्पदे च महिमानं जनार्दनसमर्पितम् ॥ १२ ॥ पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ यत्र तत्र करिष्यामि पितृणां दत्तमक्षयम् ॥ सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥ १३ ॥ संवत्सरे परं व्यास दिनमेकं प्रतिष्ठितम् ॥ कन्यास्थे च दिवानाथे हस्तनक्षत्रसंयुते ॥ महालयेति तत्प्रोक्तं पितृणां दत्तमक्षयम् ॥१४॥ सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥१५॥ संवत्सरे परं व्यास दिनमेकं प्रतिष्ठितम् ॥ अन्वष्टकायां कुर्वंति मातृणां श्राद्धमुत्तमम् ॥ १६ ॥ अक्षय्या जायते तृप्तिः पितृणां कल्पसंख्यया ॥ एवं व्यास पुरी रम्या स्नानदानादिकर्मसु ॥ १७ ॥ भूयस्तु संप्रवक्ष्यामि माहात्म्यं परमाद्भुतम् ॥ तच्छृणुष्व मयाख्यातं पवित्रं पापनाशनम् ॥ १८ ॥ सप्तर्षीणां च या भार्या ऋषिपत्न्यः पतिव्रताः ॥ स्वाहादोषपरिभ्रष्टा दूषिताः पावकेन च ॥ १९ ॥ ऋषिभिश्च परित्यक्ता वह्निमुश्च वनाद्वनम् ॥ एवं बहुतिथे काले नारदो देवदर्शनः ॥ २० ॥ तासां च प्रियमन्विच्छन्समायातो वनांतरे ॥ ताभिश्च सत्कृतो नित्यं समासीनो धृतव्रतः ॥ २१ ॥ उवाच श्लक्ष्णया वाचा देशकालोचितं वचः ॥ किमिदं विकृतं जातं भवतीनां पराभवः ॥ २२ ॥ कस्माच्च ऋषिभिस्त्यक्ता लोकमातरः पतिव्रताः ॥ २३ ॥ ॥ ॥ ऋषिपत्न्य ऊचुः ॥ ॥ न जानीमो वयं तात येन दोषेण तापसैः ॥ विमुक्ताः साग्निकैः क्षिप्रं कार्तिकेयप्रसंगतः ॥ २४ ॥ लोकापवादजं किंचिज्जातं दिष्टवशादधम् ॥ किं कुमों वा क्व गच्छामः किं तपः का च देवता ॥ २५ ॥ यस्याराधनपुण्येन पतिसांनिध्यमाप्नुयुः ॥ एतन्निश्चित्य भो ब्रह्मन्ब्रूहि त्वं वेद तत्त्वतः ॥२६॥ इति पृष्टस्तदा ताभिर्ऋषिपत्नीभिर्नारदः ॥ उवाच सुचिरं ध्यात्वा तासां स शर्महेतवे ॥२७॥ ॥ नारद उवाच ॥ ॥ श्रूयतां भोस्तपःश्रेष्ठा भवतीनां च कारणम् ॥ महाकालवने रम्ये गयातीर्थमनुत्तमम् ॥ २८ ॥ तत्रैव चाक्षयो नाम न्यग्रोधः शाखिनां वरः ॥ तत्रागमनमात्रेण धूतदोषा भविष्यथ ॥ २९ ॥ सर्वदोपहरं तीर्थं सर्वकामवरप्रदम् ॥ सर्वसौख्यकरं पुण्यं तत्र गच्छत मा चिरम् ॥ ३० ॥ नारदस्य वचः श्रुत्वा ऋषिपत्न्यः सुचोदिताः ॥ महाकालवने व्यास इच्छंत्यः प्रियमात्मनः ॥ ३१ ॥ ओजग्मुस्तद्वनं तत्र यत्र तीर्थं गयाभिधम् ॥ तत्र गत्वा शुचीभूय स्नानदानादिकाः क्रियाः ॥ ३२ ॥ कृतास्ताभिश्च पुण्याभिर्नभस्यस्यांसिते तरे ॥ पंचम्यामृषिसंज्ञायां ताभिः सुचरितं व्रतम् ॥ ३३ ॥ उपाप्य चैकरात्रं तु जागरं चैव योगतः ॥ कृतमात्रे व्रते व्यास धूतपापा बभुः क्षणात् ॥ ॥ ३४ ॥ भर्तृकोपपरिभ्रष्टाः सद्यः प्राप्ता गृहाश्रमम् ॥ ऋषिभिः साग्निकं दत्तं पूर्ववद्पिसत्तमा॥३५॥ तदाप्रभृति लोकेस्मिन्पंचमी ऋषिसंज्ञिता ॥ ये नराश्चाथ नार्यो यास्तां कुर्वन्ति तु भक्तितः ॥३६॥ नीवाराहारकं कृत्वा शुचीभूय समाहिताः ॥३७॥ न तेषां जायते किंचिदापद्दुःखं कदाचन ॥ दुर्भगत्वं च नारीणां न वियोगश्च मातृभिः ॥ ३८ ॥ पुत्रतो धनतो वापि कदाचित्संभविष्यति ॥ एवं व्यास समाख्यातं यत्त्वया परिपृच्छितम् ॥ ३९ ॥ अवंत्यामीदृशं तीर्थं वर्तते भुवि सत्तम ॥ तादृशं पुण्यदं किंचिन्नास्ति ब्रह्मांडगोलके ॥ ४० ॥ अस्मिंस्तीर्थे नरः कश्चिन्महादानानि चेच्चरेत् ॥ अक्षयाणि भवंत्यस्य विष्णुलोके महीयते ॥ ४१ ॥ यो वै नियमवान्भूत्वा कथामेतां शृणोति वा ॥ पठेच्च सततं व्यास हयमेधफलं लभेत् ॥ ४२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्यवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ पुरुषोत्तमं परं तीर्थं त्वया प्रोक्तं पुरानघ ॥ माहात्म्यं तस्य तीर्थस्य विस्तराद्वद मे प्रभो ॥ एतत्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व भो द्विजश्रेष्ठ कथां पापहरां पराम् ॥ २ ॥ यस्याः श्रवणमात्रेण महापापक्षयो भवेत् ॥ पुराकल्पेषु वै ब्रह्मन्वैकुण्ठे विमले शुभे ॥ ३ ॥ समासीनो रमानाथः पार्षदैः सनकादिभिः ॥ महर्षिभिः सदाचारैः पितामहपुरोगमैः ॥ ४ ॥ ऋद्धिसिद्धिगुणोपेतैस्तत्त्वेस्तैर्महदादिभिः ॥ गणगंधर्वसंघैश्च सेव्यमानः समंततः ॥ ५ ॥ किन्नरोद्गानसन्मानैर्नृत्यद्भिरप्सरोगणैः ॥ चिंतामणिगृहोद्गारललितांगणभूमिषु ॥ ६ ॥ कल्पद्रुमकृतच्छाय आसीनो हि सुरुद्विपः ॥ धर्मवादरताः सर्वे ब्रह्ममार्गसुनिश्चिताः ॥७॥ तेषां मध्ये परा भाषा ह्यपृच्छत्कमलापतिम् ॥ ८ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ पुण्यकानां विधिं नाथ श्रोतुमिच्छामि तत्त्वतः ॥ सर्वज्ञोसि महाप्राज्ञ वाच्यतां यदि रोचते ॥ ९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ दानं स्नानं तपः । श्राद्धं सदा शस्तं हि शोभने ॥ तथापि विधिना प्राप्तं तत्सर्वं चाक्षयं भवेत् ॥ १० ॥ देशे काले पर्वणि च तीर्थे चायतने पदे ॥ दानं स्नानं तपः श्राद्धं सुनिभिः परिकीर्तितम् ॥ ११ ॥ पूर्णमास्यामममावास्यां संक्रांतौ ग्रहणे तथा ॥ वैधृतौ च व्यतीपाते दानवृद्धिः परा स्मृता ॥ १२ ॥ गंगायां भास्करक्षेत्रे कुरुक्षेत्रे च पुष्करे ॥ गोदावर्यां गयायां च तीर्थे चामरकंटके ॥ १३ ॥ अवंत्यां च हुतं दत्तं तत्सर्वं चाक्षयं भवेत् ॥ तस्मात्सर्वप्रयत्नेन पर्वे तीर्थं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समाचरेत् ॥ १४ ॥ कुचैलो दुर्भगो मूर्खो जडो रोगसमन्वितः ॥ तीर्थपर्वपरिभ्रष्टो नरो भवति निश्चितम् ॥ १५ ॥ के योगाः सुकृतानां च कर्तव्याश्च विशेषतः ॥ १६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधु पृष्टः प्रिये प्रश्नः पुण्यकानां त्वयाऽनघे ॥ मलमासे समायाते ये नरा व्रतवर्जिताः ॥ जन्मजन्मनि दारिद्र्यं तेषां भवति शोभने ॥ १७ ॥ ॥ श्रीरुक्मिण्युवाच ॥ ॥ कीदृशो हि मलो मासः केन योगेन जायते ॥ कदा काले समायाति एतन्नो वद विस्तरात् ॥ १८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ युक्तमुक्तं त्वया देवि प्रश्नः कालेऽयमीदृशः ॥ देवतापितृकार्याणि विधिना हि मलिम्लुचे ॥ १९ ॥ क्षौरं मौंजी विवाहश्च व्रतोपवासकं तथा ॥ विशेषेण गृहस्थानां वर्ज्यं मुनिवरोत्तमैः ॥ २० ॥ संवत्सरत्रयांते च मासोऽयमधिगच्छति ॥ असंक्रमे रवेरस्मिंस्तस्मादधिकमासकः ॥ २१ ॥ अधिमासाधिपत्योऽहं सदैव पुरुषोत्तमः ॥ ममाभिधानं तीर्थं च महाकालवने शुभम् ॥ २२ ॥ पुरुषोत्तमाख्यं मे धाम सदैवात्र प्रतिष्ठति ॥ तस्मात्सर्वप्रयत्नेन गंतव्यं हि त्वया सह ॥ २३ ॥ महाकालवने तत्र यत्र तीर्थं ममाभिधम् ॥ प्राणिनो ये समायांति मज्जनार्थं प्रिये ध्रुवम् ॥ २४ ॥ तेषामिह ममादेयं न कदापि भविष्यति ॥ धनधान्यकलत्रादिपुत्रसौख्यं सदैव हि ॥ २५ ॥ असंक्रांतेऽपि संप्राप्ते मामुद्दिश्य व्रतं चरेत् ॥ अधिमासाधिपत्योऽहं सदा वै पुरुषोत्तमः ॥ २६ ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ देवतार्चां च मध्याह्ने ये कुर्वंति नरोत्तमाः ॥ २७ ॥ अक्षयं च भवेत्सर्वं तेषां वै कमले ध्रुवम् ॥ मलमासो गतः शून्यो येषां देवि प्रमादतः ॥ २८ ॥ दारिद्र्यं च सदा तेषां शोकरोगविवर्धनम् ॥ अधिमासे समायाते अवंत्यां व्रतमाचरेत् ॥ २९ ॥ तेषां ददाम्यहं प्रीत्या त्वामेव च न संशयः ॥ स्वल्पं दानमलं कार्यं यत्किंचिदिह यत्कृतम् ॥ तत्सर्वं मत्प्रसादेन ह्यनंतं प्रियदर्शने ॥ ३० ॥ ॥ श्रीरुवाच ॥ ॥ ईदृशो हि त्वया प्रोक्तो ह्यधिमासस्य सुव्रत ॥ ३१ ॥ महिमा ह्यपि लोकानां सर्वकामवरप्रदः ॥ अधिमासव्रतं पुण्यं कथयस्व प्रसादतः ॥ ३२ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ असंक्रांतो यदा मासः प्राप्यते मानवैः प्रिये ॥ महोत्सवस्तदा कार्य आत्मनो हितकांक्षिभिः ॥ ३३ ॥ कृष्णपक्षे चतुर्दश्यां नवम्यां वा सुरेश्वरि ॥ अष्टम्यां चाथ कर्तव्यं व्रतं शोकविनाशनम् ॥ ३४ ॥ यथालाभोपहारेण मासे चापि मलिम्लुचे ॥ पुण्याहे प्रातरुत्थाय कृत्वा पौर्वाह्णिकीं क्रियाम् ॥ ३५ ॥ गृहीत्वा नियमं पश्चाद्वासुदेवं हृदि स्मरन् ॥ उपवासं च नक्तं च एकभुक्तं च मानिनि ॥ ३६ ॥ एकस्य निश्चयं कृत्वा ततो विप्रान्निमंत्रयेत् ॥ सपत्नीकान्सदाचारान्कुलीनाञ्ज्ञातिसंभवान् ॥ ३७ ॥ ततो मध्याह्नसमये लक्ष्मीयुक्तं सनातनम् ॥ स्थापयेदव्रणे कुंभे वेदमंत्रैर्द्विजातिभिः ॥ ३८ ॥ पूजयेत्परया भक्त्या गोत्रिभिः सपितामहम् ॥ गंधतोयेन संस्थाप्य पंचामृतैस्तथैव च ॥ ३९ ॥ मिष्टान्नैर्नवभिश्चैव नैवेद्यैर्धूपदीपकैः ॥ आच्छादनैश्च वस्त्रैश्च पीतकौशेयकैस्तथा ॥ ४० ॥ घंटामृदंगनिर्ह्रादैर्घोषध्वनिसमन्वितैः ॥ आरार्तिकं व्रती कुर्यात्कर्पूरागरुचंदनैः ॥ ४१ ॥ अलाभे तूल्मुकैश्चापि फलस्यानंत्यहेतवे ॥ ताम्रपात्रस्थिते तोये चंदनाक्षतपुष्पकैः ॥ ४२ ॥ अर्घ्यं दद्यात्सपत्नीकः प्रहृष्टेनांतरात्मना ॥ पंचरत्नैः समायुक्तैर्जानुनी कृत्य भूतले ॥ समादाय च पाणिभ्यां सर्वभक्तिसमन्वितः ॥ ४३ ॥ अर्घ्यमन्त्रः ॥ कृपावन्सर्वभूतेषु जगदानंदकारक ॥ गृहाणार्घ्यमिमं देव संपूर्णफलदो भव ॥ ४४ ॥ प्रार्थनामंत्रः ॥ स्वयंभुवे नमस्तुभ्यं ब्रह्मणेऽमिततेजसे ॥ नमोस्तु ते श्रियानंद ब्रह्मानंद कृपाकर ॥ ४५ ॥ एवं संप्रार्थ्य गोविंदं पूजयेद्ब्राह्मणान्स्वयम् ॥ सपत्नीकाञ्छुचीन्स्नाताँल्लक्ष्मीनारायणौ स्मरन् ॥ ४६ ॥ पूजयित्वा विधानेन भोजयेद्घृतपायसैः ॥ ४७ ॥ भोजयित्वा विधानेन सपत्नीकं यथोचितम् ॥ विद्याविनयसंपन्नं तथा पत्न्या समन्वितम् ॥ ४८ ॥ पूजयित्वा यथाशक्त्या वस्त्रालंकारकुंकुमैः ॥ गोस्तन्याम्रकपित्थैश्च खर्जूरैः कदलीफलैः ॥ ४९ ॥ पनसैर्नारिकेलैश्च नारंगैर्दाडिमैस्तथा ॥ घृतपक्वान्नगोधूमैः शुभैः सोमालिकैर्वटैः ॥ ५० ॥ शर्कराघृतपूरैश्च कर्णिकैः खंडमंडकैः ॥ उर्वारुकर्कटीशाकैः शृंगवेरैः समूलकैः ॥ ५१ ॥ अन्यैश्च विविधैः शाकैराम्रैः पक्वैः पृथक्पृथक् ॥ भक्ष्यभोज्यलेह्यपेयकंदकानि विशेषतः ॥ ५२ ॥ सुवासितान्गोरसांश्च परिवेष्य मृदु ब्रुवन् ॥ इदं स्वादु रसं भोज्यं भवदर्थे प्रकल्पितम् ॥ ५३ ॥ याच्यतां रोचते यच्च यन्मया पाचितं प्रभो ॥ धन्योस्म्यनुगृहीतोस्मि कृतं सार्थं च मंदिरम् ॥ ५४ ॥ विसर्जयेत्ततो विप्रान्दत्त्वा तांबूलदक्षिणाः ॥ चतुर्भिर्मिलितैर्देवि तांबूलं मम वल्लभम् ॥ ५५ ॥ यो ददाति द्विजश्रेष्ठे स भवेत्सुभगो नरः ॥ सुभगा च सदाचारा वल्लभा स्वजने सदा ॥ ५६ ॥ पुत्रसौभाग्ययुक्ता च तांबूलैर्जायते प्रिये ॥ पत्रैस्तु केशवः प्रीतः पूगैरीशः सहोमया ॥ ५७ ॥ चूर्णकेनानलः प्रीतः खदिरेण तु मन्मथः ॥ चतुर्भिर्विश्वरूपोऽसौ यः पुष्णाति जगत्त्रयम् ॥ ५८ ॥ परितोष्य सपत्नीकान्हस्ते दत्त्वा च मोदकान् ॥ आसीमांतमनुव्रज्य भुंजीत सह बंधुभिः ॥५९॥ असंक्रांते व्रतं नारी या करोतीह सुप्रिये ॥ दारिद्र्यं पुत्रशोकं च वैधव्यं नाप्नुयात्क्वचित् ॥६०॥ नरो वा यदि वा नारी यः कुर्याच्च मलिम्लुचे ॥ स सर्वसुखभोक्ता च भवेन्नास्त्येव संशयः ॥ ६१ ॥ मलिम्लुचे प्राप्य न पूजितो यैर्नारायणोऽहं परयेह भक्त्या ॥ कथं भवेयुः सुखपुत्रसंपत्सुहृत्सुभार्याः सुगुणैरुपेताः ॥६२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडेऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तममाहात्म्ये दानादिमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ अधिमासं समासाद्य योऽन्यत्र स्थितिमात्मनः ॥ करोति स नरो मूर्खो महाकालवनादृते ॥ १ ॥ अधिमासे नरो व्यास तीर्थे पुरुषोत्तमाभिधे ॥ स्नात्वा दत्त्वा च दानानि तेषां लोकाः सनातनाः ॥ २ ॥ पुरुषोत्तमं समभ्यर्च्य रमालालितपादकम् ॥ तथैव च उमां देवीं शंकरेण च पूजयेत् ॥ ३ ॥ वांछितार्थशतं प्राप्य विष्णुलोके महीयते ॥ भाद्रपदे सिते पक्षे एकादश्यां समाहितः ॥ उपोष्य विधिवद्व्यास रात्रौ जागरणं चरेत् ॥ ४ ॥ विष्णोश्च पूजनं कार्यं जलयात्रा तथैव च ॥ पुरुषोत्तमसरे नित्यं तस्य पुण्यफलं शृणु ॥ ५ ॥ पुत्रदारधनं सम्यगायुरारोग्यसंपदः ॥ न तेषां दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥६॥ तस्य पूर्वतरे भागे जटेश्वरमहेश्वरः ॥ तिष्ठति तापसस्तीरे यत्र राजा भगीरथः ॥ ७ ॥ तपस्तप्त्वा परं लेभे पुण्यं पुण्यवतां वरः ॥ गंगां भूतलमानीय सर्वलोकसुखाय वै ॥ ८ ॥ तस्य तीर्थे नरः स्नात्वा तिलधेनुं प्रदापयेत् ॥ सर्वयज्ञफलं प्राप्य पुत्रवाञ्जायते नरः ॥ ९ ॥ तस्येशानतरे भागे रामो भार्गवसत्तमः ॥ तपस्तेपे सुधर्मात्मा आत्मकायविशुद्धये ॥ १० ॥ कौशिकी च सरिच्छ्रेष्ठा सर्वतीर्थवरप्रदा॥ तत्र स्नात्वा नरो जातिहत्यादोषविवर्जितः ॥११॥ रामेश्वरं समालोक्य धूतपापो भवेन्नरः॥१२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तमेश्वरमाहात्म्येऽधिमासस्नानदानादिमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥६१॥ ॥ व्यास उवाच ॥ गोमतीकुण्डं त्वया प्रोक्तं पुरा ब्रह्मन्सनातनम् ॥ कस्मिन्काले कदा जातं तन्नो वद सुविस्तरात् ॥ १ ॥ ॥ सनत्कुमार उवाच ॥ शृणुष्वभो महाप्राज्ञ कथां पापहरां पराम् ॥ गोमतीकुण्डोद्भवां पुण्यां पुरा रुद्रेण भाषिताम् ॥ २ ॥ नैमिषे च समासीना ऋषयः शौनकादयः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कथयंति कथां पुण्यां सर्वतीर्थोद्भवां शुभाम् ॥ ३ ॥ तस्मिन्नवसरे पुण्ये काशीमाहात्म्यमुत्तमम् ॥ कथितं नारदेनैव पवित्रं पापहारकम् ॥ ४ ॥ ऊपरः पुण्य पापानां धन्या वाराणसी पुरी ॥ ध्रुवं लभंते मोक्षं च समं चंडालपंडिताः ॥ ५ ॥ असीवरुणयोर्मध्ये पंचक्रोशी महाफलम् ॥ अमरा मरणमिच्छन्ति का कथा इतरे जनाः ॥ ६ ॥ इति स्मृत्वा तदा व्यास स्वयंभूः प्रत्यभाषत ॥ शृण्वतां सर्वदेवानामृषीणां च परंतप ॥ ७ ॥ नदी न गोमतीतुल्या कृष्णतुल्या न देवता ॥ सर्वपातालभूमध्ये न द्वारकासमा पुरी ॥ ८ ॥ इति ते निश्चयं ज्ञात्वा ऋषयः शौनकादयः ॥ यत्र तत्र स्थिताः सर्वे प्रातःसंध्यामुपासितुम् ॥ ९ ॥ तत्रैव गोमतीतीरे चक्रुस्ते वै धृतव्रताः ॥ सांदीपनोऽपि तत्रैव प्रातःसंध्यां समाचरत् ॥ १० ॥ एवं बहुतिथे काले चरतस्तस्य वै व्रतम् ॥ सांदीपनस्य वै व्यास ह्यवंतीपुरवासिनः ॥ ११ ॥ तस्यैव कामपूर्त्यर्थं विद्यार्थिनी गमज्जनादनौ ॥ समायातौ सुकुमारांगौ सततं ब्रह्मचारिणौ ॥ १२ ॥ निवासं चक्रतुस्तस्य गुरोर्गेहे परंतप ॥ तस्य पाठ्यतः सम्यग्विद्यां सर्वश्रुतीः परम् ॥ १३ ॥ उपस्थुषि तत्रैव दृश्यते न तदा गुरुः ॥ विद्योपदेशकालोऽयं क्व गतो नौ गुरुर्वरः ॥ १४ ॥ इति पृष्टे तयोरेवं गुरुपत्नी ह्युवाच ह ॥ सदैव कुरुते वत्स प्रातःसंध्याद्युपासनम् ॥ १५ ॥ तत्रैव याति वै नित्यं गुरुस्ते स्नानकारणात् ॥ गोमती वै सरिच्छ्रेष्ठा द्वारकायां च पावनी ॥ १६ ॥ इति श्रुत्वा तदा कृष्णो रामेण सह संयुतः ॥ किं कर्तव्यमिहास्माभिरात्मनो हितमुत्तमम् ॥ १७ ॥ गुरोरागमनं कांक्षे अत्रैव स्थितिकांक्षया ॥ एतस्मिन्नेव काले तु सांदीपनिरगाद्गृहम् ॥ १८ ॥ तत उत्थाय तौ वीरौ गुरोरावंदनं ततः ॥ प्रश्रयावनतौ कृत्वा ह्यूचतुः वचनं गुरुम् ॥ १९ ॥ श्रयतां भो महायोगिन्नस्माकं वासकारणम् ॥ विद्यार्थिनाविह प्राप्तौ युष्माकं च ग्रहोत्तमे ॥ २० ॥ प्रातःकाले च ते ब्रह्मन्समयो नास्ति नौ प्रभो ॥ एतच्छ्रुत्वा वचस्तस्य कृष्णस्य च बलस्य च ॥ २१ ॥ उवाच भगवान्व्यास आत्मनो व्रतकारणम् ॥ अस्माकं परमं वत्स व्रतं वै शाश्वतं मतम् ॥ २२ ॥ गोमतीस्नानं कर्तव्यं प्रातःकाले सदा बुधैः ॥ तत्रैवोपासनं पुण्यं संध्याया इति निश्चितम् ॥ २३ ॥ इति निश्चित्य युष्माभिर्यद्योग्यं क्रियतां तथा ॥ तच्छ्रुत्वा भगवान्विष्णुर्मायामानुषरूपवान् ॥ २४ ॥ गोमत्याराधनं चक्रे कुशस्थल्यां द्विजोत्तम ॥ यत्र शिवेश्वरो देवो यज्ञकुण्डमनुत्तमम् ॥ २५ ॥ कंथडेश्वरस्योत्तरे भागे गोमती सा समागता ॥ पातालतलमाभेद्य सरस्वत्या सहागता ॥ २६ ॥ प्रातरुत्थाय ते सर्वे गोमतीं सरितां वराम् ॥ ददृशुः सुचिरापांगीं व्यास स्वाश्रमगामिनीम् ॥ २७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अत्रैव चागता ब्रह्मन्गोमती सरितांवरा ॥ स्नानदानादिकं सर्वमत्रैव सुपासय ॥ २८ ॥ गोमत्यत्र समालीना यज्ञकुण्डे सरस्वती ॥ तदाप्रभृति लोकेऽस्मिन्गोमतीकुण्डमुच्यते ॥ २९ ॥ सर्वेषामपि लोकानां मार्गोऽत्रैव च विद्यते ॥ तस्माद्धाम महापुण्यं भुवि तीर्थमनुत्तमम् ॥ ३० ॥ गोमतीकुण्डमाख्यानं सर्वपापप्रणाशनम् ॥ भाद्रे मास्यसिताऽष्टम्यां कृष्ण जन्ममहोदयम् ॥ ३१ ॥ तत्र स्नात्वा नरो नित्यं रात्रौ जागरणं चरेत् ॥ उपोष्य विधिवद्व्यास सशिष्यं व्यासमर्चयेत् ॥ ३२ ॥ वैष्णवांश्च नरांश्चैव कृष्णजन्मोत्सुकान्वरान् ॥ नानासुगंधपुष्पाद्यैर्वस्त्रालंकारसंयुतैः ॥ ३३ ॥ गोब्राह्मणानां पूजाश्च क्रियते यैः समाहितैः ॥ न तेषां दुर्लभं किंचित्सर्वलोकेषु विद्यते ॥ ३४ ॥ गोमतीस्नानजात्पुण्याद्वासुदेवसमागमात् ॥ मनोरथफलप्राप्तिर्जायते नाऽत्र संशयः ॥ ३५ ॥ तथा चैत्रसिते पक्षे यावच्चैकादशी भवेत् ॥ तद्दिने च नरः स्नात्वा गोमत्यां च विशेषतः ॥ ३६ ॥ रात्रौ जागरणं कृत्वा विष्णुपूजां तथैव च ॥ आमलकीं ततो गत्वा प्रदक्षिणान्पदेपदे ॥ ३७ ॥ गोसहस्रफलं तेषां प्राप्यते नाऽत्र संशयः ॥ ये शृण्वंति कथां पुण्यां पवित्रां पापहारिणीम् ॥ ३८ ॥ सर्वपापविनिर्मुक्ता विष्णुलोकं प्रयांति ते ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये गोमतीतीर्थकुण्डमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ कंथडेश्वर इति ख्यातं तत्र तीर्थमनुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ १ ॥ मुच्यते सर्वपापेभ्यः शुचिः प्रयतमानसः ॥ विमानशतसंयुक्तः शिवलोके महीयते ॥ २ ॥ भुवि पुण्यतमं तीर्थं सर्वपापहरं परम् ॥ खेगतांगमो यत्र गंगेश्वरसमीपतः ॥ ३ ॥ महापापहरं पुण्यं महापुण्यफलप्रदम् ॥ आकाशात्पतिता यत्र गंगा त्रैलोक्य पावनी ॥ ४ ॥ विधृता शिरसि सद्यो महादेवेन शंभुना ॥ तस्मिंस्तीर्थे नरः स्नात्वा गंगेशमवलोकयेत् ॥ ५ ॥ गंगास्नानफलं प्राप्य विष्णुलोके महीयते ॥ धीरेश्वरमनुप्राप्य तस्मिंस्तीर्थे नरो वसेत् ॥ ६ ॥ सर्वपापविशुद्धात्मा वीरलोकमवाप्नुयात् ॥ तीर्थमन्यन्महापुण्यं भुवि ख्यातं महर्षिभिः ॥ ७ ॥ वामनकुण्डेति विख्यातं त्रिषु लोकेषु विश्रुतम् ॥ यस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥ ८ ॥ मनोरथशतं प्राप्य पश्चाद्विष्णुपुरं व्रजेत् ॥ ॥ व्यास उवाच ॥ ॥ कदा काले समुत्पन्नं वामनाख्यं पुराऽनघ ॥ ९ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुष्व भो द्विजश्रेष्ठ कथां पापहरां पराम् ॥ १० ॥ यस्य श्रवणमात्रेण सर्वपापात्प्रमुच्यते ॥ दैत्येंद्रस्तु पुरा प्रोक्तो विष्णुभक्तिपरायणः ॥ ११ ॥ प्रह्लाद इति विख्यातः सर्वधर्मभृतां वरः ॥ आचारविजितो धर्मः सत्येन विजिता गमा ॥ १२ ॥ धैर्येण च धृता लोकाः क्षमया विधृता मही ॥ गांभीर्येणार्णवा दिव्याः शौर्येण शत्रुणां गणाः ॥ १३ ॥ प्रश्रयेणाभ्यागताश्च जितास्तेन महात्मना ॥ दक्षिणाभिर्जितो यज्ञो हविषा हव्यवाहनः ॥ १४ ॥ शौचाऽऽचारविशुद्धात्मा तपसा च हताऽशुभः ॥ दानमानजिता विप्रा भोजनाच्छादनादिभिः ॥ १५ ॥ संस्कारेण जितं जन्म दमेनाऽऽत्मा सनातनः ॥ प्राणायामजितो वायुर्योगध्यानजितो हरिः ॥ १६ ॥ ईदृशश्च महायोगी सत्यधर्मपरायणः ॥ प्रह्लादेन समो धीरो न भूतो न भविष्यति ॥ १७ ॥ तस्य पौत्रः सदाचारी बलिरित्यभिधीयते ॥ तस्य पालयतः सम्यक्प्रजाः सम्यग्विवर्धिताः ॥ १८ ॥ नाल्पायुर्न जडो मूर्खो न रोगी न च मत्सरी ॥ अपुत्रो द्रव्यहीनश्च कोऽपि नाऽस्ति महीतले ॥ १९ ॥ महाराजो महीपालो यज्वा विपुलदक्षिणः ॥ सप्तद्वीपवती तेन पालिता वसुधा सदा ॥ २० ॥ एकदा च समासीने सभामध्ये वरासने ॥ जयशब्दे वर्तमाने गंधर्वा ललितं जगुः ॥ २१ ॥ वाद्यमानेषु वाद्येषु ननृतुश्चाऽप्सरोगणाः ॥ कथायां कथ्यमानायां शुभायां च विचक्षणैः ॥ २२ ॥ सूता वैतालिकाः सिद्धाश्चारणाश्च बहुश्रुताः ॥ ऋषयश्च समायातास्तत्रैव द्विजसत्तम ॥ २३ ॥ सुन्दोपसुन्दतुहुंडाद्या महिषासुरकोल्वणाः ॥ शुम्भनिशुम्भधूम्राक्षकालकेयाश्च दानवाः ॥ २४ ॥ कालनेमिश्च विक्रांतो दौर्ह्रदो मूषको यमः ॥ निकुम्भः कुम्भविशठो ह्यन्धकश्च महाबलः ॥ ॥ २५ ॥ शंखो जलंधरो रौद्रो वातापी च बलाधिकः ॥ सर्वजिद्विश्वहंता च कामचारी हलायुधः ॥ २६ ॥ एते चाऽन्ये च बहवो दनुवंशविवर्धनाः ॥ उपासांचक्रिरे तत्र बलिराजमकल्मषम् ॥ २७ ॥ सिद्धा नागाश्च यक्षाश्च किन्नराः किंपुरुषास्तथा ॥ खेचरा भूचरा बाला राक्षसाश्चैव दारुणाः ॥ २८ ॥ एते चाऽन्ये च बहवो राजानं पर्युपासत ॥ तत्र सभा महादिव्या शुशुभे च द्विजोत्तम ॥ २९ ॥ ग्रहैरुच्चलितैः कीर्णा शारदीव नभःस्थलम् ॥ तत्सभायां समासीनो राजा बलिरिह तथा ॥ ३० ॥ मरुद्भिरिव संवीतो वासवो दिवि देवतैः ॥ एकदा च सभामध्ये नारदो देवद

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

र्शनः ॥ ३१ ॥ आगतस्तेषु सर्वेषु दानवेषु स्थितेषु च ॥ दृष्ट्वा तमागतं सर्वे ह्युत्तस्थुर्दितिनंदनाः ॥ ३२ ॥ वन्दिरे सर्वशस्तु बलिना किंनरोत्तमम् ॥ सकृत्य चासनं दत्त्वा पप्रच्छ कुशलं नृपः ॥ ३३ ॥ कृत्वाऽऽतिथ्यं समासीनो नारदः प्राह सत्तमः ॥ मेघगंभीरया वाचा बलिं प्राहर्षिसत्तमः ॥ ३४ ॥ ॥ नारद उवाच ॥ ॥ श्रूयतां दितिजश्रेष्ठ गतोऽहं वृषमंदिरे ॥ तत्र देवसभा रम्या दिव्याऽभिप्रायसंयुता ॥ तत्र देवाः सगंधर्वाः पुरंदरपुरोगमाः ॥ ३५ ॥ समासीनाः कथां पुण्यां कथयंति परस्परम् ॥ तत्र दैत्यैकथां शुभ्रां मया ख्यातां न सेदिरे ॥ ३६ ॥ हिरण्यकशिपुर्दैत्यः पुराऽऽसीच्च प्रजापतिः ॥ त्रैलोक्यविजयी नेता येनेयं वसुधा जिता ॥ ३७ ॥ सर्वलोकं वशीकृत्य बुभुजे च वसुन्धराम् ॥ अतीव तेजःसंपन्नो महाबलपराक्रमः ॥ ३८ ॥ वशी सर्वत्रगः कामी नृसिंहेन निपातितः ॥ बलिं कियद्बलं लोके नारद त्वं प्रशंससि ॥ ३९ ॥ इति मां विधपयित्वा च विडौजा लोकसंग्रही ॥ बहुधा वादयन्वादान्कटुकान्दानवोत्तम ॥ ४० ॥ तस्मात्त्वं दानवश्रेष्ठ पितृपर्यागतां महीम् ॥ विजित्य सार्वभौमत्वं लभस्व वसुधाधिप ॥ ४१ ॥ कियद्बलधृता नूनं देवाश्च दनुजोत्तम ॥ पलायनपरा दांताः सदैव रणभीरवः ॥ ४२ ॥ मम वाक्यपरो भूत्वा त्रैलोक्याधिपतिर्भव ॥ नारदस्य वचः श्रुत्वा बलिर्वैरोचनिस्तदा ॥ ४३ ॥ चकार कोपमतुलं त्रैलोक्यविजये द्विज ॥ मंत्रयित्वाऽसुरान्सर्वान्सर्वदैत्यजनेश्वरः ॥ ४४ ॥ संग्राममकरोत्तीव्रं वासवेन बलीयसा ॥ जित्वा च सकलान्देवान्वशीचक्रे सवासवान् ॥ ४५ ॥ सर्वलोकेश्वरो जातो बलिर्वैरोचनोऽसुरः ॥ हताधिकारास्त्रिदशा भ्रष्टराज्याः पराजिताः ॥ ४६ ॥ विचरंति यथा मर्त्यास्तेन देवगणा भुवि ॥ किंचित्कालं समासाद्य ब्रह्माणं शरणं ययुः ॥ ४७ ॥ भो ब्रह्मन्बलिना भ्रष्टा देवलोकात्परंतप ॥ किं कुर्मः क्व च गच्छामः कमुपायं चरामहे ॥ ४८ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा युष्माकं साधनं परम् ॥ यूयं यात पुरीं रम्यां पद्मावतीमम रोत्तमाः ॥ ४९ ॥ तत्र तीर्थवरं श्रेष्ठं नाम्ना चोत्तरमानसम् ॥ यत्राऽष्टसिद्धिदा ख्याता महासिद्धिप्रदा नृणाम् ॥ ५० ॥ निधयश्च नवैवापि तत्र तिष्ठंति सत्तम ॥ तस्यैव दक्षिणे भागे विष्णुतीर्थमनुत्तमम् ॥५१॥ तत्र स्नात्वा नरः पश्येत्सिद्धेश्वरीं सुसिद्धिदाम् ॥ ऋद्धिसिद्धिपरो भूत्वा विष्णुलोके महीयते ॥ ५२ ॥ आश्विनस्य सिते पक्षे दशम्यां दिवसे तथा ॥ अष्टसिद्धिशमीदेशे गणेश्वरं प्रपूजयेत् ॥ ५३ ॥ विजयी सर्वलोकेषु जायते नाऽत्र संशयः ॥ शमीमूलस्थितं नित्यंवृद्धिसिद्धिवरप्रदम् ॥ ५४ ॥ पूजयेद्वै नरो नित्यं गणेशं सर्वकामदम् ॥ सर्वकामवरं लब्ध्वा पुत्रवान्धनवान्भवेत् ॥ ५५ ॥ तस्मात्सर्वप्रयत्नेन महाकालवनं व्रजेत् ॥ यत्र विष्णुसरस्तीर्थं तत्र गच्छत माचिरम् ॥ ५६ ॥ उपासनां सुरश्रेष्ठा विष्णोरतुलतेजसः ॥ कुरुध्वं सर्वभीतिभ्यस्त्राता स स्यात्सुरोत्तमाः ॥ ५७ ॥ इति श्रुत्वा वचस्तस्य ब्रह्मणः शंसितात्मनः ॥ महाकालवने प्राप्ता देवास्ते कार्यसाधकाः ॥ ५८ ॥ अत्राऽऽगत्य शुचीभूय स्नानदानादिकर्मभिः ॥ उपासांचक्रिरे सिद्धा विष्णुभक्तिपरायणाः ॥ ५९ ॥ ब्रह्माणमथ ते सर्वे पप्रच्छुर्विधिमादरात् ॥ उपासनाया देवस्य देवाः शक्रपुरोगमाः ॥ ६० ॥ ॥ देवा ऊचुः ॥ ॥ ब्रह्मन्केन प्रकारेण विष्णुभक्तिः परा भवेत् ॥ तत्सर्वं श्रोतुमिच्छामस्त्वत्तो ब्रह्मविदां वर ॥ ६१ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा विष्णुभक्तिमनुत्तमाम् ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥ ६२ ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ ६३ ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥ अभीप्सितार्थसिद्ध्यर्थं पूज्यते यः सुरैरपि ॥ ६४ ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ कल्पादौ सृष्टिकामेन प्रेरितोहं च शौरिणा ॥ ६५ ॥ न शक्तो वै प्रजाः कर्तुं विष्णुध्यानपरायणः ॥ एतस्मिन्नंतरे सद्यो मार्कंडेयो महाऋषिः ॥ ६६ ॥ सर्वसिद्धेश्वरो दांतो दीर्घायुर्विजितेंद्रियः ॥ मया दृष्टो ऽथ गत्वा तं तदाहं समुपस्थितः ॥ ततः प्रफुल्लनयनौ सत्कृत्य चेतरेतरम् ॥ ६७ ॥ पृच्छमानौ परं स्वास्थ्यं सुखासीनौ सुरोत्तमाः ॥ तदा मया स पृष्टो वै मार्कंडेयो महामुनिः ॥ ६८ ॥ भगवन्केन प्रकारेण प्रजा मेऽनामया भवेत् ॥ तत्सर्वं श्रोतुमिच्छामि भगवन्मुनिवंदित ॥ ६९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ विष्णुभक्तिः परा नित्या सर्वार्तिदुःखनाशिनी ॥ सर्वपापहरा पुण्या सर्वसुखप्रदायिनी ॥ ७० ॥ एषा ब्राह्मी महाविद्या न देया यस्य कस्यचित् ॥ कृतघ्नाय ह्यशिष्याय नास्तिकायावृताय च ॥ ७१ ॥ ईर्ष्यकाय च रूक्षाय कामिकाय कदाचन ॥ तद्व्रतं सर्वं विघ्नंति यत्तद्धर्मं सनातनम् ॥ ७२ ॥ एतद्ब्रह्मतमं शास्त्रं सर्वपापप्रणाशनम् ॥ पवित्रं च पवित्राणां पावनानां च पावनम् ॥७३॥ विष्णोर्नामसहस्रं च विष्णुभक्तिकरं शुभम् ॥ सर्वसिद्धिकरं नृणां भुक्तिमुक्तिप्रदं शुभम् ॥ ७४ ॥ ॐ अस्य श्रीविष्णुसहस्रनामस्तोत्रमंत्रस्य मार्कंडेय ऋषिः विष्णुर्देवता अनुष्टुप्छंदः सर्वकामावाप्त्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥ सजलजलदनीलं दर्शितोदारशीलं करतलधृतशैलं वेणुवाद्ये रसालम् ॥ व्रजजनकुलपालं कामिनीकेलिलोलं तरुणतुलसिमालं नौमि गोपालबालम् ॥ ७५ ॥ ॐविश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ ७६ ॥ पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥ अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ ७७ ॥ योगो योगविदां नेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ ७८ ॥ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ७९ ॥ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ८० ॥ अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ८१ ॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥ ८२ ॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८३ ॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ८४ ॥ सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ ८५ ॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ८६ ॥ वसुर्वसुमनाः सत्यः समात्मा संमितः समः ॥ अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ ८७ ॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ ८८ ॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ ८९ ॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ॥ चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ ९० ॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ ९१ ॥ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ ९२ ॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महाबलः ॥ ९३ ॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ ९४ ॥ महेष्वासो महीभर्ता श्रीनिवासः सतांगतिः ॥ अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः ॥ ९५ ॥ मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ ९६ ॥ अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ९७ ॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ ९८ ॥ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ ९९ ॥ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ॥ अहःसंवर्तको वह्निरनिलो धरणीधरः ॥ १०० ॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ १०१ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ १०२ ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ १०३ ॥ सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ १०४ ॥ ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ १०५ ॥ अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ १०६ ॥ भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥ कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥ १०७ ॥ युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ॥ १०८ ॥ इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ १०९ ॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ११० ॥ स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ १११ ॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ११२ ॥ पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ॥ महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ११३ ॥ अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ॥ ११४ ॥ विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ महीधरो महाभागो वेगवानमिताशनः ॥ ११५ ॥ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥ करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ११६ ॥ व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥ परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ११७ ॥ रामो विरामो विरजो मार्गो नेयो नयोऽनयः ॥ वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ११८ ॥ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ११९ ॥ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥ उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ १२० ॥ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ॥ अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ १२१ ॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ १२२ ॥ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः ॥ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ १२३ ॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥ मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ १२४ ॥ स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥ वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ १२५ ॥ धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ॥ अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ १२६ ॥ गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ १२७ ॥ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भूरिदक्षिणः ॥ १२८ ॥ सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ॥ विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः ॥ १२९ ॥ जीवो विनयिता साक्षी मुकुंदोऽमितविक्रमः ॥ अंभोनिधिरनंतात्मा महोदधिशयोंऽतकः ॥ १३० ॥ अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥ १३१ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ॥ १३२ ॥ महावराहो गोविंदः सुषेणः कनकांगदी ॥ गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ १३३ ॥ वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ॥ वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ १३४ ॥ भगवान्भगहाऽऽनंदी वनमाली हलायुधः ॥ आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ १३५ ॥ सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ॥ दिवःस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ १३६ ॥ त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ॥ संन्यासकृच्छमः शांतो निष्ठा शांतिः परायणम् ॥ १३७ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ १३८ ॥ अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ १३९ ॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्रयः ॥ १४० ॥ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ १४१ ॥ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ॥ भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ १४२ ॥ अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ १४३ ॥ कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ॥ त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ १४४ ॥ कामदेवः कामपालः कामी कांतः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥ १४५ ॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ १४६ ॥ महाक्रमो महाकर्मा महातेजा महोरगः ॥ महाक्रतुर्महायज्वा यज्ञो यज्ञपतिर्यजुः ॥ १४७ ॥ यज्ञांगो यज्ञवाहश्च यज्ञभृद्यज्ञसाधनः ॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ १४८ ॥ आत्मयोनिः स्वयंजातो वैखानः सामगायनः ॥ देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ॥ १४९ ॥ शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः ॥ रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १५० ॥ सर्वप्रहरणायुध ॐ नमः इति ॥ वनमाली गदी शार्ङ्गी शंखी चक्री च नंदकी ॥ श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १५१ ॥ ॥ फलश्रुतिः ॥ ॥ इतीदं कीर्तनीयस्य केशवस्य महात्मनः ॥ नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १५२ ॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ॥ नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥ १५३ ॥ वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ १५४ ॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः ॥ १५५ ॥ भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ १५६ ॥ यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ १५७ ॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति ॥ भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ १५८ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ १५९ ॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ १६० ॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १६१ ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ १६२ ॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ १६३ ॥ विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ॥ भजंति ये पुष्कराक्षं न ते यांति पराभवम् ॥ १६४ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं मया सुरश्रेष्ठा विष्णुभक्तिः परा भवेत् ॥ उपासनाया देवस्य देवाः शक्रपुरोगमाः ॥ १६५ ॥ ॥ देवा ऊचुः ॥ ॥ ब्रह्मन्केन प्रकारेण विष्णुभक्तिः परा भवेत् ॥ तत्सर्वं श्रोतुमिच्छामस्त्वत्तो ब्रह्मविदां वर ॥ १६६ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रूयतां भोः सुरश्रेष्ठा विष्णुभक्तिमनुत्तमाम् ॥ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥ १६७ ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ १६८ ॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः ॥ अभीप्सितार्थसिद्ध्यर्थं पूज्यते यः सुरैरपि ॥ १६९ ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ कल्पादौ सृष्टिकामेन प्रेरितोहं च शौरिणा ॥ १७० ॥ न शक्तो वै प्रजाः कर्तुं विष्णुध्यानपरायणः ॥ एतस्मिन्नंतरे सद्यो मार्कंडेयो महाऋषिः ॥ १७१ ॥ सर्वसिद्धेश्वरो दांतो दीर्घायुर्विजितेंद्रियः ॥ मया दृष्टो ऽथ गत्वा तं तदाहं समुपस्थितः ॥ ततः प्रफुल्लनयनौ सत्कृत्य चेतरेतरम् ॥ १७२ ॥ पृच्छमानौ परं स्वास्थ्यं सुखासीनौ सुरोत्तमाः ॥ तदा मया स पृष्टो वै मार्कंडेयो महामुनिः ॥ १७३ ॥ भगवन्केन प्रकारेण प्रजा मेऽनामया भवेत् ॥ तत्सर्वं श्रोतुमिच्छामि भगवन्मुनिवंदित ॥ १७४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ विष्णुभक्तिः परा नित्या सर्वार्तिदुःखनाशिनी ॥ सर्वपापहरा पुण्या सर्वसुखप्रदायिनी ॥ १७५ ॥ एषा ब्राह्मी महाविद्या न देया यस्य कस्यचित् ॥ कृतघ्नाय ह्यशिष्याय नास्तिकायावृताय च ॥ १७६ ॥ ईर्ष्यकाय च रूक्षाय कामिकाय कदाचन ॥ तद्व्रतं सर्वं विघ्नंति यत्तद्धर्मं सनातनम् ॥ १७७ ॥ एतद्ब्रह्मतमं शास्त्रं सर्वपापप्रणाशनम् ॥ पवित्रं च पवित्राणां पावनानां च पावनम् ॥१७८॥ विष्णोर्नामसहस्रं च विष्णुभक्तिकरं शुभम् ॥ सर्वसिद्धिकरं नृणां भुक्तिमुक्तिप्रदं शुभम् ॥ १७९ ॥ ॐ अस्य श्रीविष्णुसहस्रनामस्तोत्रमंत्रस्य मार्कंडेय ऋषिः विष्णुर्देवता अनुष्टुप्छंदः सर्वकामावाप्त्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥ सजलजलदनीलं दर्शितोदारशीलं करतलधृतशैलं वेणुवाद्ये रसालम् ॥ व्रजजनकुलपालं कामिनीकेलिलोलं तरुणतुलसिमालं नौमि गोपालबालम् ॥ १८० ॥ ॐविश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १८१ ॥ पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥ अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १८२ ॥ योगो योगविदां नेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ १८३ ॥ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ १८४ ॥ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ १८५ ॥ अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ १८६ ॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥ १८७ ॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ १८८ ॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ १८९ ॥ सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १९० ॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ १९१ ॥ वसुर्वसुमनाः सत्यः समात्मा संमितः समः ॥ अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १९२ ॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ १९३ ॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ १९४ ॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ॥ चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १९५ ॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १९६ ॥ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १९७ ॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महाबलः ॥ १९८ ॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९९ ॥ महेष्वासो महीभर्ता श्रीनिवासः सतांगतिः ॥ अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः ॥ २०० ॥ मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २०१ ॥ अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २०२ ॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २०३ ॥ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २०४ ॥ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ॥ अहःसंवर्तको वह्निरनिलो धरणीधरः ॥ २०५ ॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २०६ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २०७ ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २०८ ॥ सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २०९ ॥ ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ २१० ॥ अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ २११ ॥ भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥ कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥ २१२ ॥ युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ॥ २१३ ॥ इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ २१४ ॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ २१५

दंती भालचन्द्रो गजाननः ॥ नृसिंह उग्रदंष्ट्रश्च नखी दानवनाशकृत् ॥ ९६ ॥ प्रह्लादपोषकर्ता च सर्वदेत्यजनेश्वरः ॥ शलभः सागरः साक्षी कल्प द्रुमविकल्पकः ॥ ९७ ॥ हेमदो हेमभागी च हिमकर्ता हिमाचलः ॥ भूधरो भूमिदो मेरुः कैलासशिखरो गिरिः ॥ ९८ ॥ लोकालोकांतरो लोकी विलोकी भुवनेश्वरः ॥ दिक्पालो दिक्पतिर्दिव्यो दिव्यकायो जितेंद्रियः ॥ ९९ ॥ विरूपो रूपवान्रागी नृत्यगीतविशारदः ॥ हाहा हूहूश्चित्ररथो देव र्षिनारदः सखा ॥ १०० ॥ विश्वेदेवाः साध्यदेवा धृताशीश्च चलोऽचलः ॥ कपिलो जल्पको वादी दत्तो हैहयसंवराट् ॥ १ ॥ वसिष्ठो वामदेवश्च सप्तर्षिप्रवरो भृगुः ॥ जामदग्न्यो महावीरः क्षत्रियांतकरो ऋषिः ॥ २ ॥ हिरण्यकशिपुश्चैव हिरण्याक्षो हरप्रियः ॥ अगस्तिः पुलहो दक्षः पौल स्त्यो रावणो घटः ॥३॥ देवारिस्तापसस्तापी विभीषणहरिप्रियः ॥ तेजस्वी तेजदस्तेजी ईशो राजपतिः प्रभुः ॥ ४ ॥ दाशरथी राघवो रामो रघुवंश विवर्धनः ॥ सीतापतिः पतिः श्रीमान्ब्रह्मण्यो भक्तवत्सलः ॥५॥ सन्नद्धः कवची खड्गी चीरवासा दिगंबरः ॥ किरीटी कुंडली चापी शंखचक्री गदाधरः ॥६॥ कौसल्यानंदनोदारो भूमिशायी गुहप्रियः ॥ सौमित्रो भरतो बालः शत्रुघ्नो भरताग्रजः ॥ ७ ॥ लक्ष्मणः पर्वताग्रः स्त्रीसहायः कपीश्वरः ॥ हनुमान्नृपराजश्च सुग्रीवो वालिनाशनः ॥ ८ ॥ दूतप्रियो दूतकारी ह्यंगदो गदतां वरः ॥ वनध्वंसी वनी वेगो वानरध्वजलांगुली ॥ ९ ॥ रविर्दंष्ट्री च लंकाहा हाहाकारो वरप्रदः ॥ भवसेतुर्महासेतुर्यद्धसेतू रमेश्वरः ॥ ११० ॥ जानकीवल्लभः कामी किरीटी कुण्डली खगी ॥ पुण्डरीकविशालाक्षो महाबाहुर्घनाकृतिः ॥ ११ ॥ चंचलश्चपलः कामी वामी वामांगवत्सलः ॥ स्त्रीप्रियः स्त्रीपरः स्त्रैणः स्त्रियो वामांगवासकः ॥ १२ ॥ जितवैरी जित कामो जितक्रोधो जितेंद्रियः ॥ शांतो दांतो दयारामो ह्येकस्त्रीव्रतधारकः ॥ १३ ॥ सात्त्विकः सत्त्वसंस्थानो मदहा क्रोधहा खरः ॥ बहुराक्षस संवीतः सर्वराक्षसनाशकृत् ॥ १४ ॥ रावणारी रणक्षुद्रदशमस्तकच्छेदकः ॥ राज्यकारी यज्ञकारी दाता भोक्ता तपोधनः ॥ १५ ॥ अयोध्याधि पतिः क्रांतो वैकुंठोऽकुंठविग्रहः ॥ सत्यव्रतो व्रती शूरस्तपी सत्यफलप्रदः ॥ १६ ॥ सर्वसाक्षी सर्वगश्च सर्वप्राणहरोऽव्ययः ॥ प्राणश्चापाप्यपानश्च व्यानोदानः समानतः ॥ १७ ॥ नागः कूकलः कूर्मश्च देवदत्तो धनंजयः ॥ सर्वप्राणविदो व्यापी योगधारकधारकः ॥१८॥ तत्त्ववित्तत्त्वदस्तत्त्वी सर्वतत्त्वविशारदः ॥ ध्यानस्थो ध्यानशाली च मनस्वी योगवित्तमः ॥ १९ ॥ ब्रह्मज्ञो ब्रह्मदो ब्रह्मज्ञाता च ब्रह्मसंभवः ॥ अध्यात्मविद्विदो दीपो ज्योतीरूपो निरंजनः ॥ १२० ॥ ज्ञानदोऽज्ञानहा ज्ञानी गुरुः शिष्योपदेशकः ॥ सुशिष्यः शिक्षितः शाली शिष्यशिक्षाविशारदः ॥ २१ ॥ मंत्रदो मंत्रहा मंत्री तंत्री तन्त्रजनप्रियः ॥ सन्मंत्रो मन्त्रविन्मन्त्री यन्त्रमन्त्रैकभंजनः ॥ २२ ॥ मारणो मोहनो मोही स्तंभोच्चाटनकृत्खलः ॥ बहुमायो विमायश्च महामायाविमोहकः ॥ २३ ॥ मोक्षदो बंधको बंदी ह्याकर्षणविकर्षणः ॥ ह्रींकारो बीजरूपी च क्लींकारः कीलकाधिपः ॥ ॥ २४ ॥ सौंकारः शक्तिमाञ्छक्तिः सर्वशक्तिधरो धरः ॥ अकारोकार ओंकारश्छंदोगायत्रसम्भवः ॥ २५ ॥ वेदो वेदविदो वेदी वेदाऽध्यायी सदाशिवः ॥ ऋग्यजुःसामाथर्वेशः सामगानकरोऽकरी ॥ २६ ॥ त्रिपदो बहुपादी च शतपथः सर्वतोमुखः ॥ प्राकृतः संस्कृतो योगी गीतग्रंथप्रहेलिकः ॥ २७ ॥ सगुणो विगुणश्छंदो निःसंगो विगुणो गुणी ॥ निर्गुणो गुणवान्संगी कर्मी धर्मी च कर्मदः ॥ २८ ॥ निष्कर्मा कामकामी च निःसंगः संगवर्जितः ॥ निर्लोभो निरहंकारी निष्किंचनजनप्रियः ॥ २९ ॥ सर्वसंगकरो रागी सर्वत्यागी बहिश्चरः ॥ एकपादो द्विपादश्च बहु पादोऽल्पपादकः ॥ १३० ॥ द्विपदस्त्रिपदोऽपादी विपादी पदसंग्रहः ॥ खेचरो भूचरो भ्रामी भृंगकीटमधुप्रियः ॥ ३१ ॥ ऋतुः संव त्सरो मासो गणिताकों ह्यहर्निशः ॥ कृतं त्रेता कलिश्चैव द्वापरश्चतुराकृतिः ॥ ३२ ॥ दिवाकालकरः कालः कुलधर्मः सनातनः ॥ कला काष्ठा कला नाड्यो यामः पक्षः सितासितः ॥ ३३ ॥ युगो युगन्धरो योग्यो युगधर्मप्रवर्तकः ॥ कुलाचारः कुलकरः कुलदैवकरः कुली ॥ ३४ ॥ चतुराऽऽश्रमचारी च गृहस्थो ह्यतिथिप्रियः ॥ वनस्थो वनचारी च वानप्रस्थाऽऽश्रमोऽश्रमी ॥ ३५ ॥ बटुको ब्रह्मचारी च शिखासूत्री कमण्डली ॥ त्रिजटी ध्यानवान्ध्यानी बदरिकाश्रमवासकृत् ॥ ३६ ॥ हेमाद्रिप्रभवो हेमो हेमराशिर्हिमाकरः ॥ महाप्रस्थानको विप्रो विरागी रागवान्गृही ॥ ३७ ॥ नरनारायणोऽनंगो केदारोदारविग्रहः ॥ गंगाद्वारतपःसारस्तपोवन तपोनिधिः ॥ ३८ ॥ निधिरेष महापद्मः पद्माकरश्रियालयः ॥ पद्मनाभः परीतात्मा परिव्राट्पुरुषोत्तमः ॥ ३९ ॥ परानंदः पुराणश्च सम्राड्राज विराजकः ॥ चक्रस्थश्चक्रपालस्थश्चक्रवर्ती नराधिपः ॥१४०॥ आयुर्वेदविदो वैद्यो धन्वंतरिश्च रोगहा ॥ ओषधीबीजसंभूतो रोगी रोगविनाशकृत् ॥ ॥ ४१ ॥ चेतनश्चेतकोऽचिंत्यश्चित्तचिंताविनाशकृत् ॥ अतींद्रियः सुखस्पर्शश्चरचारी विहंगमः ॥ ४२ ॥ गरुडः पक्षिराजश्च चाक्षुषो विनता त्मजः ॥ विष्णुयानविमानस्थो मनोमयतुरंगमः ॥ ४३ ॥ बहुवृष्टिकरो वर्षी ऐरावणविरावणः ॥ उच्चैःश्रवाऽरुणो गामी हरिदश्वो हरिप्रियः ॥४४॥ प्रावृषो मेघमाली च गजरत्नपुरंदरः ॥ वसुदो वसुधारश्च निद्रालुः पन्नगाशनः ॥ ४५ ॥ शेषशायी जलेशायी व्यासः सत्यवतीसुतः ॥ वेदव्यास कर्ता वाग्मी बहुशाखाविकल्पकः ॥ ४६ ॥ स्मृतिः पुराणधर्मार्थी परावरविचक्षणः ॥ सहस्रशीर्षा सहस्राक्षः सहस्रवदनोज्वलः ॥ ४७ ॥ सहस्रबाहुः सहस्रांशुः सहस्रकिरणो नरः ॥ बहुशीर्षैकशीर्षश्च त्रिशिरा विशिराः शिरी ॥ ४८ ॥ जटिलो भस्मरागी च दिव्यांबरधरः शुचिः ॥ अणुरूपो बृहद्रूपो विरूपो विकराकृतिः ॥ ४९ ॥ समुद्रमाथको मार्गी सर्वरत्नहरो हरिः ॥ वज्रवैडूर्यको वज्री चिंतामणिमहामणिः ॥१५०॥ अनिर्मूल्यो महामूल्यो निर्मूल्यः सुरभिः सुखी ॥ पिता माता शिशुर्बंधुर्धाता त्वष्टार्यमा यमः ॥ ५१ ॥ अंतःस्थो बाह्यकारी च बहिःस्थो वै बहिश्चरः ॥ पावनः पावकः पाकी सर्वभक्षी हुताशनः ॥ ५२ ॥ भगवान्भगहा भागी भवभंजो भयंकरः ॥ कायस्थः कार्यकारी च कार्यकर्ता करप्रदः ॥ ५३ ॥ एकदृ ङ् द्विधर्मा च सुखी दूत्योपजीवकः ॥ बालकस्तारकस्त्राता कालो मूषकभक्षकः ॥ ५४ ॥ संजीवनो जीवकर्ता सजीवो जीवसंभवः ॥ पड्विंशको महा विष्णुः सर्वव्यापी महेश्वरः ॥ ५५ ॥ दिव्यांगदो मुक्तमाली श्रीवत्सो मकरध्वजः ॥ श्याममूर्तिर्घनश्यामः पीतवासाः शुभाननः ॥ ५६ ॥ चीरवासा विवासाश्च भूतदानवबल्लभः ॥ अमृतोऽमृतभागी च मोहिनीरूपधारकः ॥ ५७ ॥ दिव्यदृष्टिः समदृष्टिर्देववदानववंचकः ॥ कबंधः क्रतुकारी च स्वर्भानुश्चंद्रतापनः ॥ ५८ ॥ ग्रहराजो ग्रही ग्राहः सर्वग्रहविमोचकः ॥ दानमानजपो होमः सानुकूलः शुभग्रहः ॥ ५९ ॥ विघ्नकर्ताऽपहर्ता च विघ्ननाशो विनायकः ॥ अपकारोपकारी च सर्वसिद्धिफलप्रदः ॥ १६० ॥ सेवकः सामदानी च भेदी दंडी च मत्सरी ॥ दयावान्दानशीलश्च दानी यज्वा प्रतिग्रही ॥ ६१ ॥ हविरग्निश्चरुस्थाली समिधश्चानिलो यमः ॥ होतोद्गाता शुचिः कुण्डः सामगो वैकृतिः स्रवः ॥ ६२ ॥ द्रव्यं पात्राणि संकल्पो मुशलो ह्यरणिः कुशः ॥ दीक्षितो मंडपो वेदिर्यजमानः पशुः क्रतुः ॥ ६३ ॥ दक्षिणा स्वस्तिमान्स्वस्ति ह्याशीर्वादः शुभप्रदः ॥ आदिवृक्षो महावृक्षो देववृक्षो वनस्पतिः ॥ ६४ ॥ प्रयागो वेणुमान्वेणी न्यग्रोधश्चाऽक्षयो वटः ॥ सुतीर्थस्तीर्थकारी च तीर्थगजो व्रती व्रतः ॥ ६५ ॥ वृत्तिदाता पृथुः पुत्रो दोग्धा गौर्वत्स एव च ॥ क्षीरं क्षीरवहः क्षीरी क्षीरभागविभागवित् ॥ ६६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राज्यभागविदो भागी सर्वभागविकल्पकः ॥ वाहनो वाहको वेगी पादचारी तपश्चरः ॥ ६७ ॥ गोपनो गोपको गोपी गोपकन्याविहारकृत् ॥
वासुदेवो विशालाक्षः कृष्णो गोपीजनप्रियः ॥ ६८ ॥ देवकीनंदनो नंदी नंदगोपगृहाऽऽश्रमी ॥ यशोदानंदनो दामी दामोदर उलूखली ॥ ६९ ॥
पूतनारिः पदाकारी लीलाशकटभंजकः ॥ नवनीतप्रियो वाग्मी वत्सपालकबालकः ॥ १७० ॥ वत्सरूपधरो वत्सी वत्सहा धेनुकांतकृत् ॥ वका
रिर्वनवासी च वनक्रीडाविशारदः ॥ ७१ ॥ कृष्णवर्णाऽऽकृतिः कांतो वेणुवेत्रविधारकः ॥ गोपमोक्षकरो मोक्षो यमुनापुलिनेचरः ॥ ७२ ॥
मायावत्सकरो मायी ब्रह्ममायापमोहकः ॥ आत्मसारविहारज्ञो गोपदारकदारकः ॥ ७३ ॥ गोचारी गोपतिर्गोपो गोवर्धनधरो बली ॥ इन्द्रद्युम्नो
मखध्वंसी वृष्टिहा गोपरक्षकः ॥ ७४ ॥ सुरभित्राणकर्ता च दावपानकरः कली ॥ कालीयमर्दनः काली यमुनाह्रदविहारकः ॥ ७५ ॥ संक
र्षणो बलश्चाग्र्यो बलदेवो हलायुधः ॥ लांगली मुसली चक्री रामो रोहिणिनंदनः ॥ ७६ ॥ यमुनाकर्षणोद्धारो नीलवासा हली हली ॥ रेवती
रमणो लोला बहुमानकरः परः ॥ ७७ ॥ धेनुकारिर्महावीरो गोपकन्याविदूषकः ॥ काममानहरः कामी गोपीवासोऽपतस्करः ॥ ७८ ॥ वेणुवादी
च नादी च नृत्यगीतविशारदः ॥ गोपीमोहकरो गानी रासको रजनीचरः ॥ ७९ ॥ दिव्यमाली विमाली च वनमालाविभूषितः ॥ कैटभारिश्च
कंसारिर्मधुहा मधुसूदनः ॥१८०॥ चाणूरमर्दनो मल्लो मुष्टी मुष्टिकनाशकृत् ॥ मुरहा मोदको मोदी मदघ्नो नरकांतकृत् ॥८१॥ विद्याध्यायी भूमि
शार्या सुदामा सुसखा सुखी ॥ सकलो विकलो वेद्यः कलितो वै कलानिधिः ॥ ८२ ॥ विद्याशाली विशाली च पितृमातृविमोक्षकः ॥ रुक्मिणी
रमणो रम्यः कालिंदीपतिः शंखहा॥८३॥पांचजन्यो महापद्मो बहुनायकनायकः॥धुंधुमारो निकुंभघ्नः शंवरांतो रतिप्रियः॥८४॥प्रद्युम्नश्चानिरुद्धश्च
सात्वतां पतिरर्जुनः ॥ फाल्गुनश्च गुडाकेशः सव्यसाची धनंजयः ॥ ८५ ॥ किरीटी च धनुष्पाणिर्धनुर्वेदविशारदः ॥ शिखंडी सात्यकिः शैव्यो
भीमो भीमपराक्रमः ॥ ८६ ॥ पांचालश्चाभिमन्युश्च सौभद्रो द्रौपदीपतिः ॥ युधिष्ठिरो धर्मराजः सत्यवादी शुचिव्रतः ॥ ८७ ॥ नकुलः सहदेव
श्च कर्णो दुर्योधनो घृणी ॥ गांगेयोऽथ गदापाणिर्भीष्मो भागीरथीसुतः ॥ ८८ ॥ प्रज्ञाचक्षुर्धृतराष्ट्रो भारद्वाजोथ गौतमः ॥ अश्वत्थामा विकर्णश्च
जयद्रथविशारदः॥८९॥सीमंतिको गर्दा गाल्वो विश्वामित्रो दुरासदः ॥ दुर्वासा दुर्विनीतश्च मार्कंडेयो महामुनिः ॥१९०॥ लोमशो निर्मलोऽलो
मी दीर्घायुश्च चिरोऽचिरी ॥ पुनर्जीवी मृतो भावी भूतो भव्यो भविष्यकः ॥ ९१ ॥ त्रिकालोऽथ त्रिलिंगश्च त्रिनेत्रस्त्रिपदीपतिः ॥ यादवो याज्ञव
ल्क्यश्च यदुवंशविवर्धनः ॥ ९२ ॥ शल्यक्रीडी विक्रीडश्च यादवांतकरः कलिः ॥ सदयो ह्रदयो दायो दायदो दायभाग्दयी ॥ ९३ ॥ महोदधि
र्महीपृष्ठो नीलपर्वतवासकृत् ॥ एकवर्णो विवर्णश्च सर्ववर्णबहिश्चरः ॥ ९४ ॥ यज्ञनिंदी वेदनिंदी वेदबाह्यो बलो बलिः ॥ बौद्धारिर्बाधको बाधो
जगन्नाथो जगत्पतिः ॥ ९५ ॥ भक्तिर्भागवतो भागी विभक्तो भगवत्प्रियः ॥ त्रिग्रामोऽथ नवारण्यो गुह्योपनिषदासनः ॥ ९६ ॥ शा
लिग्रामः शिलायुक्तो विशालो गंडकाश्रयः ॥ श्रुतदेवः श्रुतः श्रावी श्रुतबोधः श्रुतश्रवाः ॥ ९७ ॥ कल्किः कालकलः कल्को दुष्टम्लेच्छविनाश
कृत् ॥ कूर्मो धवलो धीरः क्षमाकरो वृषाकपिः ॥९८॥ किंकरः किन्नरः कण्वः केकी किंपुरुषाधिपः ॥ एकरोमा विरोमा च बहुरोमा बृहत्कविः ॥
॥ ९९ ॥ वज्रप्रहरणो वज्री वृत्रघ्नो वासवानुजः ॥ बृहत्तीर्थकरस्तीर्थः सर्वतीर्थजनेश्वरः ॥ २०० ॥ व्यतीपातोपरागश्च दानवृद्धिकरः शुभः ॥ असं
ख्येयोऽप्रमेयश्च संख्याकारो विसंख्यकः ॥ १ ॥ मिहिकोत्तारकस्तारो बालचंद्रः सुधाकरः ॥ किंवर्णः कीदृशः किञ्चित्किंस्वभावः किमाश्रयः ॥२॥
निर्लोकश्च निराकारी बह्वाकारैककारकः ॥ दौहित्रः पुत्रिकः पौत्रो नप्ता वंशधरो धरः ॥ ३ ॥ द्रवीभूतो दयालुश्च सर्वसिद्धिप्रदो मणिः ॥
॥ ४ ॥ आधारोऽपि विधारश्च धरासूनुः सुमंगलः ॥ मंगलो मंगलाकारो मांगल्यः सर्वमंगलः ॥ ५ ॥ नाम्नां सहस्रनामेदं विष्णोरतुलतेजसः ॥
सर्वसिद्धिकरं काम्यं पुण्यं हरिहरात्मकम् ॥ ६ ॥ यः पठेत्प्रातरुत्थाय शुचिर्भूत्वा समाहितः ॥ यश्चेदं शृणुयान्नित्यं नरो निश्चलमानसः ॥ ७ ॥
त्रिसंध्यं श्रद्धया युक्तः सर्वपापैः प्रमुच्यते ॥ नंदते पुत्रपौत्रैश्च दारैर्भृत्यैश्च पूजितः ॥ ८ ॥ प्राप्नुते विपुलां लक्ष्मीं मुच्यते सर्वसंकटात् ॥ सर्वान्का
मानवाप्नोति लभते विपुलं यशः ॥ ९ ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ॥ वैश्यश्च धनलाभाढ्यः शूद्रः सुखमवाप्नुयात् ॥ २१० ॥
रणे घोरे विवादे च व्यापारे पारतंत्रके ॥ विजयी जयमाप्नोति सर्वदा सर्वकर्मसु ॥ ११ ॥ एकधा दशधा चैव शतधा च सहस्रधा ॥ पठते हि
नरो नित्यं तथैव फलमश्नुते ॥ १२ ॥ पुत्रार्थी प्राप्नुते पुत्रान्धनार्थी धनमव्ययम् ॥ मोक्षार्थी प्राप्नुते मोक्षं धर्मार्थी धर्मसंचयम् ॥ १३ ॥ कन्यार्थी
प्राप्नुते कन्यां दुर्लभां यत्सुरैरपि ॥ ज्ञानार्थी जायते ज्ञानी योगी योगेषु युज्यते ॥ १४ ॥ महोत्पातेषु घोरेषु दुर्भिक्षे राजविग्रहे ॥ महामारीसमुद्भूते
दारिद्र्ये दुःखपीडिते ॥ १५ ॥ अरण्ये प्रांतरे वाऽपि दावाग्निपरिवारिते ॥ सिंहव्याघ्राभिभूतेऽपि वने हस्तिसमाकुले ॥ १६ ॥ राज्ञा क्रुद्धेन
चाज्ञप्ते दस्युभिः सह संगमे ॥ विद्युत्पातेषु घोरेषु स्मर्तव्यं हि सदा नरैः ॥ १७ ॥ ग्रहपीडासु चोग्रासु वधबन्धगतावपि ॥ महार्णवे महानद्यां
पोतस्थेषु न चापदः ॥ १८ ॥ रोगग्रस्तो विवर्णश्च गतकेशनखत्वचः ॥ पठनाच्छ्रवणाद्वापि दिव्यकाया भवंति ते ॥ १९ ॥ तुलसीवनसंस्थाने
सप्तद्वीपे सुरालये ॥ बदरिकाश्रमे शुभे देशे गंगाद्वारे तपोवने ॥ २२० ॥ मधुवने प्रयागे च द्वारकायां समाहितः ॥ महाकालवने सिद्धे
नियताः सर्वकामिकाः ॥ २१ ॥ ये पठंति शतावर्तं भक्तिमंतो जितेंद्रियाः ॥ ते सिद्धाः सिद्धिदा लोके विचरंति महीतले ॥ २२ ॥
अन्योन्यभेदभेदानां मैत्रीकरणमुत्तमम् ॥ मोहनं मोहनानां च पवित्रं पापनाशनम् ॥ २३ ॥ बालग्रहविनाशाय शांतीकरणमुत्तमम् ॥
दुर्वृत्तानां च पापानां बुद्धिनाशकरं परम् ॥ २४ ॥ पतद्गर्भा च वंध्या च स्रावणी काकवन्ध्यका ॥ अनायासेन सततं पुत्रमेव प्रसूयते ॥
॥ २५ ॥ पयःपुष्कलदा गावो बहुधान्यफला कृषिः ॥ स्वामिधर्मपरा भृत्या नारी पतिव्रता भवेत् ॥ २६ ॥ अकालमृत्युनाशाय तथा
दुःस्वप्नदर्शने ॥ शांतिकर्मण्यि सर्वत्र स्मर्तव्यं च सदा नरैः ॥ २७ ॥ यः पठत्यन्वहं मर्त्यः शुचिष्मान्विष्णुसन्निधौ ॥ एकाकी च जिता
हारो जितक्रोधो जितेंद्रियः ॥ २८ ॥ गरुडारोहसंपन्नः पीतवासाश्चतुर्भुजः ॥ वाञ्छितं प्राप्य लोकेऽस्मिन्विष्णुलोके स गच्छति ॥ २९ ॥
एकतः सकला विद्या एकतः सकलं तपः ॥ एकतः सकलो धर्मो नाम विष्णोस्तथैकतः ॥ २३० ॥ यो हि नामसहस्रेण स्तोतुमिच्छति वै द्विजः ॥
सोऽयमेकेन श्लोकेन स्तुत एव न संशयः ॥ ३१ ॥ सहस्राक्षः सहस्रपात्सहस्रवदनोज्ज्वलः ॥ सहस्रनामानंताक्षः सहस्रबाहुर्नमोस्तु ते ॥ ३२ ॥
विष्णोर्नामसहस्रं वै पुराणं वेदसम्मतम् ॥ पठितव्यं सदा भक्तैः सर्वमंगलमंगलम् ॥ ३३ ॥ इति स्तवाभियुक्तानां देवानां तत्र वै द्विज ॥ प्रत्यक्षं
प्राह भगवान्वरदो वरदार्चितः ॥ ३४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ ब्रियतां भोः सुराः सर्वैर्वरोऽस्मत्तोभिवांछितः ॥ तत्सर्वं संप्रदास्यामि नाऽत्र
कार्या विचारणा ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ वरदोऽसि यदा विष्णो वरमेतं ददस्व नः ॥ अदितेर्गर्भसंभूतः शक्रस्याऽप्यनुजो भव ॥ ३६ ॥
इति संप्रार्थितो देवैर्ब्रह्मशक्रपुरोगमैः ॥ तथेत्युक्त्वा च भगवांस्तत्रैवांऽतरधीयत ॥ ३७ ॥ ततः कतिपये काले भगवानदितिनंदनः ॥ विष्णुरूपधरो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ऽनंतो वामनत्वाच्च वामनः ॥ ३८ ॥ बलिर्वैरोचनो व्यास वाजिमेधशतेन च ॥ ईजे द्विजवरश्रेष्ठ इंद्रराज्यजिहीर्षया ॥३९॥ ऋत्विजं कश्यपं कृत्वा होतारं भृगुसत्तमम् ॥ ब्रह्मा तत्राभवच्चैव स्वयमेव पितामहः ॥ २४० ॥ अध्वर्युर्भगवानत्रिर्बभूव मुनिसत्तमः ॥ उद्गाता नारदश्चैव वसिष्ठश्च सभासदः ॥ ४१ ॥ ये यत्र विहिताः सर्वे तत्र तत्र मुनीश्वराः ॥ बलिस्तत्राऽभवद्व्यास दीक्षितो राजसत्तमः ॥ ४२ ॥ एवं प्रवर्तमानेषु यज्ञेषु मुनिसत्तम ॥ हूयतां भुज्यतां चैव दीयतां धीयतां तथा ॥ ४३ ॥ इति वाचः शुभास्तत्र श्रूयंते च द्विजोत्तम ॥ तस्मिन्काले सुचित्रेषु वामनोऽगाच्छुचिस्मितः ॥ ४४ ॥ पठमानो मुखाग्रेण चातुर्वेदिकमंत्रकान् ॥ द्वारे तिष्ठति राजेंद्र वामनो द्विजसत्तमः ॥ ४५ ॥ प्रतिहारेण वै व्यास सर्वं राज्ञे निवेदितम् ॥ उत्थाय च महाराजो बलिर्वैरोचनिस्तदा ॥ ४६ ॥ अर्घ्यमादाय तत्सर्वं जगाम स्वैः सभासदैः ॥ पूजयित्वा यथान्यायं वामनं लोकभावनम् ॥ ४७ ॥ आनयित्वा सभामध्ये दत्त्वाऽऽसनपरिग्रहम् ॥ कृतस्त्वागमनं ब्रह्मन्किं तेऽभीष्टं ददामि वै ॥ ४८ ॥

॥ ॥ वामन उवाच ॥ ॥ राजराजाखिला सृष्टिर्ब्रह्मणः परमेष्ठिनः ॥ ततोऽहमागतो भूमन्यज्ञं चैव दिदृक्षया ॥ ४९ ॥ वरुणस्य च यज्ञो वै दृष्टो मे वै पुरानघ ॥ यक्षाधिपतेर्नूनं च यज्ञं वै दृष्टवानहम् ॥ २५० ॥ धर्मस्याऽपि च यज्ञो मे प्रजापतेश्च सत्तम ॥ वायोर्यज्ञो महाराज दृष्टो मे विधिपूर्वकः ॥ ५१ ॥ राजर्षीणां च ये यज्ञा दृष्टास्तेऽपि महाव्रत ॥ यादृशं वै महाराज यज्ञं ते दृष्टवानहम् ॥ ५२ ॥ ईदृशो राज राजेंद्र न भूतो न भविष्यति ॥ तस्मादिहागतो राजन्याचनार्थं तवाऽनघ ॥ ५३ ॥

॥ बलिरुवाच ॥ ॥ याचस्व त्वं द्विजश्रेष्ठ किं तेऽभीष्टं ददाम्यहम् ॥५४॥

॥ वामन उवाच ॥ ॥ देहि मे राजराजेंद्र पदानि त्रीणि मेदिनीम् ॥ वासार्थं रोचते तेऽद्य यदि पार्थिवसत्तम ॥५५॥

॥ बलिरुवाच॥ ॥ किमिदं याचितं विप्र स्वल्पं ते नहि ते परम् ॥ गजवाजिरथाः क्षोणी रत्नानि विविधानि च ॥ ५६ ॥ दासदासीवरारोहाः स्त्रियो नाना वसूनि च ॥ द्रव्याणि वाससी शुभ्रे याचस्व त्वं द्विजोत्तम ॥५७॥ पात्रोऽसि कृतकृत्योऽसि वेदवेदांगपारग ॥५८॥

॥ वामन उवाच ॥ ॥ न मे किंचित्स्पृहा राज ल्विद्यते भुवि मानद ॥ देहि त्वं त्रिपदां भूमिं यदि श्रद्धाऽस्ति तेऽधुना ॥ ५९ ॥ इत्युक्ते वामनेनाथ बलिर्वैचनमब्रवीत् ॥ गृहाण त्रिपदां भूमिं वासस्यार्थं हि मानद ॥ २६० ॥ इत्युक्त्वा स च राजर्षिर्ददौ भूमिं द्विजाय वै ॥ वारितोऽपि तदा व्यास भृगुणा देवनोदितः ॥ ६१ ॥ दत्तमात्रे जले सद्यो ब्रह्माण्डं चाक्रमद्धरिः ॥ सार्धपादद्वयं जाता सशैलवनकानना ॥ ६२ ॥ वसुधेयं तदा व्यास बलिना चार्पितं वसु ॥ जित्वाऽसुरगणान्सर्वा ब्राज्यं दत्त्वा शतक्रतोः ॥ ६३ ॥ पश्चात्कुमुद्वतीं प्राप्तो विष्णुर्वामनरूपधृक् ॥ ६४ ॥ ऋद्धिसिद्धयाश्रमे पुण्ये तीर्थं कृत्वाऽऽत्मसंभवम् ॥ निवासमकरोद्व्यास तत्रैव स सुरोत्तमः ॥ ६५ ॥ वामनेन कृतं तीर्थं वामनं कुण्डमुच्यते ॥ भाद्रे मासि सिते पक्षे द्वादशी श्रवणान्विता ॥ ६६ ॥ वामन द्वादशी प्रोक्ता हत्याकोटिविनाशिनी ॥ अस्मिंस्तीर्थे नरः स्नात्वा ह्युपोष्यैकादशीं यदा ॥ ६७ ॥ रात्रौ जागरणं कुर्याद्ब्रह्मभूयाय कल्पते ॥ द्वादश्यां वै विशेषेण महादानानि कुर्वते ॥ ६८ ॥ न तेषां दुर्लभं किंचिद्त्रिषु लोकेषु विद्यते ॥ एवं वै वामनं तीर्थं पुरा प्रोक्तं महर्षिणा ॥ ॥ ६९ ॥ सर्वपापहरं पुण्यं सर्वकामवरप्रदम् ॥ प्राप्यते तेन सर्वं हि नाऽत्र कार्या विचारणा ॥ २७० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये वामनकुण्डमहिमविष्णुसहस्रनामकथनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ७ ॥

॥ ॥ सनत्कुमार उवाच ॥ ॥ अतः परं प्रवक्ष्यामि वीरेश्वरमथो शृणु ॥ तस्मिंस्तीर्थे नरः स्नात्वा वीरलोकमवाप्नुयात् ॥ १ ॥ नागानां प्रवरं तीर्थं सर्वकामवरप्रदम् ॥ कालभैरवमित्याख्यं तत्र तीर्थं परं स्मृतम् ॥ २ ॥ यस्य दर्शनमात्रेण सर्वदुःखातिगो भवेत् ॥ ३ ॥

॥ व्यास उवाच ॥ ॥ कस्मिन्काले हि विख्यातं कालभैरवसंज्ञितम् ॥ तीर्थं मुनिवरश्रेष्ठ एतद्विस्तरतो वद ॥ ४ ॥

॥ सनत्कुमार उवाच ॥ ॥ पुराऽयं भैरवो योगी योगिनीत्रासकारकः ॥ कालचक्रकृताः कृत्या योगिनीनां गणास्तदा ॥ ५ ॥ तासां कालीति विख्याता योगिनी परमोत्तमा ॥ तयायं पालितो नित्यं पुत्रवद्भैरवोऽमलः ॥ ६ ॥ तेनैते च विनिर्धूता दोषोत्पाताश्च सत्तम ॥ त्रिविधा भुवि विख्याताः सर्वविघ्नकराः पराः ॥ ७ ॥ कालकृत्यास्तदा तेन भ्रंशिताः परमात्मना॥महामारी पूतना कृत्या शकुनी रेवती खला॥८॥कोटरी तामसी माया नवैता मातृकाःस्मृताः॥दुष्टदोषवहा दुष्टाः सर्वप्राणिभयंकराः ॥९॥ वशीचक्रे स धर्मात्मा सर्वकामवरप्रदाः ॥ शिप्रातीरे स्थितो नित्यं कूले चोत्तरतः शुभे ॥१०॥ ऊपरस्थ परे पूर्वे सोऽपि तिष्ठति सर्वदा ॥ आषाढस्य सिते पक्षे रविवारे समाहितः ॥११ ॥ नवमीं चाऽष्टमीं प्राप्य चतुर्दश्यां त्रिशेपतः ॥ पूजां कुर्वंति ये केचिन्नरा निश्चलमानसाः ॥ १२ ॥ विवाहे पुत्रजनने मांगल्ये च शुभे परम् ॥ पत्रपुष्पार्घगंधैश्च नैवेद्यैर्विविधैस्तथा ॥ १३ ॥ तांबूलवासगंधाद्यैः पूजयेद्भरवं रूपिणम् ॥ विप्राणां भोजनैर्होमैस्तर्पयेत्सततं विभुम् ॥ १४ ॥ एतत्परमकल्याणमेतत्परममंगलम् ॥ नत्वा स्तुत्वा च तं देवं सर्वकामार्थमिद्धये ॥ ॥ १५ ॥ सकलकलुषहारी धूर्तदुष्टांतकारी सुचिरचरितचारी मुंडमौंजीप्रचारी ॥ करकलितकपाली कुण्डली दंडपाणिः स भवतु सुखकारी भैरवो भावहारी ॥ १६ ॥ विविधरासविलासविलासितं नववधूरवधूतपराक्रमम् ॥ मदविघूर्णितगोप्पदगोप्पदं भवपदं सततं सततं स्मरे ॥ १७ ॥ अमलकमलनेत्रं चारुचंद्रावतंसं सकलगुणगरिष्ठं कामिनीकामरूपम् ॥ परिहृतपरितापं डाकिनीनाशहेतुं भज जन शिवरूपं भैरवं भूतनाथम् ॥ ॥ १८ ॥ सबलबलविघातं क्षेत्रपालेकपालं विकटकटिकरालं ह्यट्टहासं विशालम् ॥ करगतकरवालं नागयज्ञोपवीतं भज जन शिवरूपं भैरवं भूतनाथम् ॥ १९ ॥ भवभयपरिहारं योगिनीत्रासकारं सकलसुरगणेशं चारुचंद्रार्कनेत्रम् ॥ मुकुटरुचिरभालं मुक्तमालं विशालं भज जन शिवरूपं भैरवं भूतनाथम् ॥ २० ॥ चतुर्भुजं शंखगदाधराऽऽयुधं पीतांवरं सांद्रपयोदसौभगम् ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं शीलप्रदं शंकरक्षणं भैरवं भूतनाथम् ॥ २१ ॥ लोकाऽभिरामं भुवनाभिरामं श्रियाभिरामं यशसाभिरामम् ॥ कीर्त्याभिरामं तपसाऽभिरामं तं भूतनाथं शरणं प्रपद्ये ॥ २२ ॥ भजे ॥ २३ ॥ आद्यं ब्रह्म सनातनं शुचिपरं सिद्धिप्रदं कामदं सेव्यं भक्तिसमन्वितं हरिहरैः सृष्ट्यासहं साधुभिः ॥ योग्यं योगविचारितं युगधरं योग्याननं योगिनं वंदेहं सकलं कलंकरहितं मत्सेवितं भैरवम् ॥ २३ ॥ भैरवाष्टकमिदं पुण्यं प्रातःकाले पठेन्नरः ॥ दुःस्वप्ननाशनं तस्य वांछितार्थफलं भवेत् ॥ २४ ॥ राजद्वारे विवादे च संग्रामे संकटे तथा ॥ राज्ञा क्रुद्धेन चाऽऽज्ञप्ते शत्रुवेधगते तथा ॥ २५ ॥ दारिद्र्यदुःखनाशाय पठितव्यं समाहितैः ॥ न तेषां जायते किंचिद्दुर्लभं भुवि वांछितम् ॥२६॥

॥ इति भैरवाष्टकम् ॥ ॥ अस्मिंस्तीर्थे प्रकर्तव्यं स्नानदानादिकं नरैः॥संसारभयभीतैश्च पूजितो भैरवो वरः ॥ तस्मात्सर्वप्रयत्नेन कर्तव्यं तीर्थमुत्तमम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे ऽवन्तीक्षेत्रमाहात्म्ये कालभैरवतीर्थयात्रावर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

॥ व्यास उवाच ॥ ॥ नागतीर्थं त्वया ब्रह्मन्पुरा प्रोक्तं महर्षिणा ॥ तस्य तीर्थवरस्याऽपि महिमानं च सत्तम ॥ १ ॥ भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ कियत्काले समाख्यातमेतद्विस्तरं यशस्विना ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गतो वद ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु ब्रह्मन्प्रवक्ष्यामि तवाऽग्रे नागतीर्थजाम् ॥ कथां पुण्यतमां तुभ्यं भुवि पापहरां पराम् ॥ ३ ॥ यस्याः श्रवणमात्रेण शापमुक्तो भवेन्नरः ॥ पुरा नागाः परिभ्रष्टा मातुः शापात्परंतप ॥ ४ ॥ जनमेजयेन दग्धास्ते मोक्षिता ह्यास्तिकेन च ॥ पप्रच्छुस्ते द्विजश्रेष्ठ जरत्कार्वात्मजं तदा ॥ ५ ॥ ॥ नागा ऊचुः ॥ ॥ ब्रह्मंस्तव प्रसादेन मोक्षिता हव्यवाहनात् ॥ जनमेजयस्य यज्ञे स्मिन्देवराजस्य संनिधौ ॥ ६ ॥ अस्माकं भूतिमन्विच्छन्वासस्यार्थं परंतप ॥ यस्मिन्स्थाने सदा ब्रह्मन्निवासो जायतेऽभयः ॥ ७ ॥ ॥ आस्तीक उवाच ॥ ॥ श्रूयतां मातुलश्रेष्ठा युष्माकं हितमुत्तमम् ॥ महाकालवने रम्ये या वै कुशस्थली स्मृता ॥ ८ ॥ तस्या हि दक्षिणे भागे पूर्वतीर्थं सनातनम् ॥ नागालयं पुरा प्रोक्तं यत्र सन्निहितो हरिः ॥ ९ ॥ योगनिद्रां समासाद्य शेते ब्रह्म सनातनम् ॥ शेषशायीति विख्यातः सर्वलोकेषु गीयते ॥ १० ॥ कल्पदोषो न तत्रैव बाधते सर्वदेहिनाम् ॥ बकदाल्भ्य ऋषिस्तत्र तपस्तेपे धृतव्रतः ॥ १० ॥ लोमशश्च महातेजास्तत्रैव प्रतितिष्ठति ॥ दीर्घायुष्ट्वं समापन्नो मार्कंडेयो महामुनिः ॥ १२ ॥ न वर्तते कालचक्रं महाकालप्रतापतः ॥ कपिलः सिद्धिमापन्नो यत्र तीर्थवरोत्तमे ॥१३॥ हरिश्चंद्रो विमुक्तोऽभूद्ब्रह्मचण्डालयोनितः॥सप्तर्षिप्रवरा ये ते निर्वाणपदवीं गताः ॥१४॥ एतस्मात्कारणात्सर्वैस्तत्र विश्रम्यतां सदा ॥ मातुः शापोद्भवो दोषो युष्माकं नैव बाधते ॥ १५ ॥ एतत्ते वचनं श्रुत्वा महर्षेरास्तिकस्य च ॥ आगच्छंस्तत्र ते शीघ्रं वासार्थं पन्नगोत्तमाः ॥ १६ ॥ एलापत्रः कंबलश्च ककोटकधनंजयौ ॥ वासुकिः पन्नगश्रेष्टस्तक्षको नील एव च ॥ १७ ॥ पद्मकश्चार्बुदश्चैव नागास्ते सर्व एव हि ॥ अन्यागत्य स्वस्वस्थानानि चक्रुस्ते सुचिरव्रताः ॥ १८ ॥ तत्र रम्याणि तीर्थानि जातानि परमाणि च ॥ नवानि चक्रुः कुंडानि तीर्थभूतानि सत्तम ॥ १९ ॥ महापुण्यप्रदान्याहुर्महापापहराणि च ॥ यत्र सिद्धाश्च गंधर्वा ऋषयः संशितव्रताः ॥ २० ॥ अप्सरोगणसंघैश्च सेव्यंते च सदा वरैः ॥ यत्र शेषो महानागः पुरा प्रोक्तो महर्षिणा ॥ २१ ॥ शेषशायी ह्यलं विष्णुर्भगवान्कमलेक्षणः ॥ तत्र सर्वाणि तीर्थानि तिष्ठंति भुवि सर्वदा ॥ २२ ॥ श्वेतद्वीपेति विख्याता मणिविक्रांतभूमिका ॥ यत्र पुण्याश्च वै वृक्षाः पुष्पिताश्चैव सर्वशः ॥ २३ ॥ हंसकारंडकाकादिपिककोकिलसारसाः ॥ पद्मखंडगणास्तत्र नृत्यंति च शिखंडिनः ॥ २४ ॥ निधिरेष महापद्मो नीलोत्पलसुगंधिना ॥ वासितो वायुना शुभ्रः किन्नरोद्गारनादितः ॥ २५ ॥ यत्र सुसंस्कृता नार्यो विहरंति सुरांगनाः॥नागकन्याभी रम्याभिर्मंडितं परमाद्भुतम् ॥२६॥ यत्र स्नात्वा नरो याति वैकुंठं धाम शोभनम् ॥ शेषशायी हरिर्यत्र शेते हि च रमापतिः ॥ २७ ॥ तत्र रमासरोनाम तीर्थं परमशोभनम् ॥ यत्र स्नात्वा नरो नित्यं श्रीमान्भवति नाऽन्यथा ॥२८॥ एवं व्यास परं स्थानं सर्वपापहरं परम् ॥ अत्रैव च परं तीर्थं बलेराश्रममद्भुतम् ॥ २९ ॥ अत्र स्नानादिकं कार्यं यत्र संनिहितो हरिः ॥ सर्वपापविशुद्धात्मा नरो भवति तत्क्षणात् ॥ ३० ॥ कियत्प्रमाणमात्रां च ये ददंति वसुंधराम् ॥ तनूरुहाणि यावन्ति तावत्कालसुसंख्यया ॥ ३१ ॥ अक्षय्या लभ्यते वृद्धिस्तेषां लोकाः सनातनाः ॥ श्रावणे मासि दर्शे च पंचम्यां सोमवासरे ॥ ३२ ॥ नागानां पूजनं कार्यं श्राद्धं दर्शे विधीयते ॥ अक्षयं जायते श्राद्धं वांछितार्थं भवेत्ततः ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये तीर्थयात्रायां नागतीर्थमहिमवर्णनंनाम पंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भूयः शृणु परं व्यास तीर्थानामुत्तमं वरम् ॥ तत्तीर्थं सर्वपापघ्नं नृसिंहस्य महात्मनः ॥ १ ॥ यस्य दर्शनमात्रेण सर्वपापं समुत्तरेत् ॥ दैत्यराजः समाख्यातो हिरण्यकशिपुः पुरा ॥ २ ॥ तेनेयं वसुधा सर्वा संप्राप्ता च दुरात्मना ॥ दुष्टदैत्यबलेर्व्याप्ता भाराक्रांता शुचार्दिता ॥ ३ ॥ गौर्भूत्वाऽश्रुमुखी दीनैर्ब्रह्माणं शरणं ययौ ॥ भाराक्रांतां धरां दृष्ट्वा ब्रह्मा लोकपितामहः ॥ ४ ॥ उवाच श्लक्ष्णया वाचा तस्याः श्रमं व्यपोहितुम् ॥ श्रूयतां भोऽवने पुण्ये भवत्या उपकारकम् ॥ ५ ॥ वचो वदामि ते तथ्यं देशकालोचितं तथा ॥ पुराऽनेन तपश्चीर्णं दुष्करं सर्वदेहिनाम् ॥ ६ ॥ गायत्र्युपासना तेन कृता सुनियतात्मना ॥ मयौ चास्य वरो दत्तः प्रीतियुक्तेन चेतसा ॥ ७ ॥ न दिवा न तथा रात्रौ नांतरिक्षे न भूतले ॥ नातिशुष्केण चार्द्रेण न चास्त्रशस्त्रघातनैः ॥ ८ ॥ न देवासुरगंधर्वैर्न यक्षोरगकिन्नरैः ॥ पिशाचैर्गुह्यकाद्यैश्च राक्षसैर्न कदाचन ॥ ९ ॥ मानवैः पक्षिजातैश्च न मे मृत्युर्भवेदिति ॥ एककरतलाघातैः सकुलबलवाहनम् ॥ १०॥ मारयिष्यति मां वीरः स मे मृत्युर्भविष्यति ॥ तथेत्युक्त्वाऽतिहृष्टात्मा तमहं च तदाऽवने ॥११॥ आगमं चैव लोकं स्वं स दत्यो घोरशासनः ॥ बभूव सर्वलोकानां शास्ता चातुलविक्रमः ॥ १२ ॥ तस्येवाऽधिकृता लोके बभूवुर्विगतज्वराः ॥ त्रैलोक्यं बुभुजे नित्यं सर्वदैत्यजनेश्वरः ॥ १३ ॥ तस्माद्यूयं वनं यात महाकालं महेश्वरम् ॥ तत्र तीर्थं महच्चासीत्सर्वतीर्थवरोत्तमम् ॥ १४ ॥ संगमेश्वरस्य दक्षिणे कर्कराजोत्तरे तथा ॥ शिप्रातीरे शुभे देशे पूर्वं वैकुण्ठसन्निभम् ॥ १५ ॥ नृसिंहाख्यं परं धाम तस्य तीर्थं प्रतिष्ठितम् ॥ तत्र गत्वा सुरश्रेष्ठाः स्नानदानादिकाः क्रियाः ॥ १६ ॥ कुरुत सत्वरं सर्वे पुनर्लोकानवाप्स्यथ ॥ ते तस्य वचनं श्रुत्वा देवा इन्द्रपुरोगमाः ॥ १७ ॥ महाकालवनं प्राप्ता यत्र शिप्रा पयस्विनी ॥ नृसिंहतीर्थोपकूले उषित्वा शाश्वतीः समाः ॥ १८ ॥ स्नानदानादिकं कृत्वा नृसिंहस्याऽर्चनं तथा ॥ एवं कृत्वा विधानेन परां सिद्धिमितो गताः ॥ १९ ॥ नृसिंहस्य स्वरूपेण हतो दानवपुंगवः ॥ सभामध्ये तदा व्यास हरिणाऽमित्रघातिना ॥ २० ॥ करेणैकप्रहारेण हिरण्यकशिपुर्हतः ॥ ततः सुरगणाः सर्वे स्वाधिकारान्ययुस्तदा ॥ २१ ॥ तदारभ्य सुराः सर्वे मध्याह्नोपासनं सदा ॥ प्रकुर्वंति च तत्रैव यत्र तीर्थे हरिः परम् ॥ २२ ॥ एवं तीर्थं परं व्यास अवंत्यां विद्यते भुवि ॥ अस्मिंस्तीर्थे द्विजश्रेष्ठ स्नानदानादिकाः क्रियाः ॥ २३ ॥ ये कुर्वंति नराः पुण्यास्ते यांति परमां गतिम् ॥ सर्वदा सर्वकालेषु पुण्यदं तीर्थमुत्तमम् ॥ २४ ॥ कदाचिन्नृसिंहतिथिं प्राप्य चैव चतुर्दशीम् ॥ स्नानं कृत्वाऽर्चनं तस्य नृसिंहस्य च धीमतः ॥ २५ ॥ नृसिंहेश्वरदेवेशं पूजयेद्यः समाहितः ॥ तस्य हस्तगता लक्ष्मीर्भविष्यति न संशयः ॥ २६ ॥ ततोऽगस्त्येश्वरं देवं यः पश्येत्सुसमाहितः ॥ तस्य व्यास क्षितौ किंचिदुर्लभं नैव दृश्यते ॥ २७ ॥ यत्र सिद्धिं परां प्राप्तो हनुमान्पवनात्मजः ॥ ब्रह्मचारी सदाचारो यतिः सर्वार्थसाधकः ॥ २८ ॥ तिष्ठति परदेवज्ञः सर्वकामार्थसिद्धये ॥ यस्मिन्वटे पुरा तप्तं तपः परमदुश्चरम् ॥ २९ ॥ मित्रावरुणपुत्रेण सिद्धिहेतोस्तपस्विना ॥ बोधी न्यग्रोध इत्याख्यो ह्यगस्तिवट एव च ॥ ३० ॥ नरो नारीसमायुक्तः सावित्रीव्रतमाचरेत् ॥ सौभाग्यं लभते नित्यं सावित्र्याश्च परंतप ॥३१॥ यस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा दानं च सौभगम् ॥ अष्टसौभाग्यसंपूर्णं वंशपात्रं सवासकम् ॥ ३२ ॥ सप्तधान्यसमोपेतं पंचरत्नपरिष्कृतम् ॥ सौगंध्यादीनि माल्यानि मौलिसूत्रसमायुतम् ॥ ३३ ॥ सावित्रीं हाटकीं कृत्वा यथाशक्ति परं तप ॥ यो वै ददाति विप्राय वेदवेदांगधर्मिते ॥ ३४ ॥ लभते विपुलां लक्ष्मीं बहुभोगकरीं शुभाम् ॥ भुक्त्वा वै विविधान्भोगान्पुनः स्वर्गमवाप्नुयात् ॥ ३५ ॥ सावित्रीव्रतकृन्नारी जायते पतिवल्लभा ॥ पतिव्रता महाभागा विधवा न कदाचन ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नृसिंहतीर्थमहिमवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास परं तीर्थं भुवि विख्यातमुत्तमम् ॥ कुटुम्बेश्वरेतिविख्यातो नाम्ना चैव महेश्वरः ॥ १ ॥ तस्य तीर्थ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर तीर्थं सर्वतीर्थफलप्रदम् ॥ यस्मिंस्तीर्थे नरः स्नात्वा कुटुम्बी जायते ध्रुवम् ॥ २ ॥ कुटुम्बार्थं तपस्तेपे पुरा दक्षः प्रजापतिः ॥ नारदेन पुरा व्यास पुत्रपष्टिर्विवासिता ॥ ३ ॥ प्रजाकामः स धर्मात्मा सुचिरं व्रतमाचरत् ॥ सपत्नीको महातेजा निराहारो जितेन्द्रियः ॥ ४ ॥ अस्मिंस्तीर्थे शुचिः स्नातो जपन्ब्रह्म सनातनम् ॥ वर्षाणामयुतं व्यास तपस्तेपे सुदारुणम् ॥ ५ ॥ तेन तीर्थप्रसादेन लभत्स बहुलां प्रजाम् ॥ प्रजापतिरिति ख्यातो जातो दक्षः प्रतापवान् ॥ ६ ॥ ब्रह्माऽपि तत्र वै पश्चात्तपः कृत्वा सुदुष्करम् ॥ निष्कलंकमलं रूपं प्राप्तवांस्तत्क्षणाद्विधिः ॥ ७ ॥ महादेवोऽपि तत्रैव प्राप्तवान्ब्रह्मणः पदम् ॥ चतुर्मुखवरं लिंगं दृश्यतेऽद्यापि सत्तम ॥ ८ ॥ भद्रपीठधरा देवी भद्रकालीति विश्रुता ॥ तत्रैव च सदा व्यास क्रीडतिस्म धृतव्रता ॥ ९ ॥ द्वारे तिष्ठति तत्रैव भैरवः क्षेत्रपालकः ॥ पादेन खंजतां यातः पुरा देत्यवरार्दितः ॥ १० ॥ पुत्रवत्पालितो देव्या सदा तिष्ठति तत्स्थले ॥ ये ते देवगणाः सर्वे तस्मिंस्तीर्थे प्रतिष्ठिताः ॥ ११ ॥ ऋषयोऽपि महाभागाः सदा पर्वणिपर्वणि ॥ आयांति चैव संध्यार्थं बहुपुत्रप्रदे सरे ॥ १२ ॥ अस्मिंस्तीर्थे सदाचाराः स्नानं कुर्वन्ति ये नराः ॥ न तेषां दुर्लभं किंचिज्जायते जन्मजन्मनि ॥ १३ ॥ महाबाधासु घोरासु महामारीषु तत्परैः ॥ हवनं क्रियते नित्यं सर्पिषे राजिकेर्यवैः ॥ १४ ॥ पायसैर्विविधैर्भोगैस्तेषां दोषो न जायते ॥ दुर्भिक्षे राज्यभ्रंशे च संग्रामे भृशदारुणे ॥ १५ ॥ पूजयेत्क्षेत्रपालं च सर्वाऽऽपदि समाहितः ॥ सर्वदुःखविनिर्मुक्तो जायते नाऽत्र संशयः ॥ १६ ॥ स्नात्वा कुटुंबके तीर्थे पूजयित्वा म[illegible]रम् ॥ दानं कूष्मांडकं दद्याद्ब्राह्मणाय तपस्विने ॥ १७ ॥ सौवर्णमणिमुक्ताभिर्वासोऽलंकारसंयुतम् ॥ धनधान्यसमायुक्तः कुटुंबी जायते नरः ॥ १८ ॥ फाल्गुने च सिते पक्षे या वै चतुर्दशी भवेत् ॥ त्रयोदशीयुता व्यास शिवरात्रिस्तथोच्यते ॥ १९ ॥ तद्दिने च नरः स्नात्वा रात्रौ जागरणं चरेत् ॥ बिल्वोदकेन गंधेन बहुपुष्पफलैस्तथा ॥ २० ॥ धूपैर्दीपैश्च नैवेद्यैर्वासोऽलंकारकादिभिः ॥ पूजयेद्यो नरो भक्त्या गिरीशं सगणं परम् ॥ २१ ॥ तस्य पापं क्षयं याति शिवलोके महीयते ॥ द्वादशीकादशीपुण्यं लभते भुवि मानवः ॥ २२ ॥ अश्वमेधफलं तस्य जागरे च क्षणेक्षणे ॥ ततस्तु प्रातरुत्थाय स्नानदानादिकाः क्रियाः ॥ २३ ॥ कृत्वा तु विधिवद्व्यास शिवपूजार्चनं तथा ॥ विप्रांश्च भोजयेत्पश्चात्तस्य पुण्यफलं शृणु ॥ २४ ॥ कपिलानां सवत्सानां सहस्राणि चतुर्दश ॥ वाजपेयसहस्रस्य फलं प्राप्नोति नान्यथा ॥ २५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कुटुंबेश्वरमाहात्म्यवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास महापुण्यं तीर्थं परमशोभनम् ॥ देवप्रयागमाख्यातं सर्वपापप्रणाशनम् ॥ १ ॥ देवानां च परं स्थानं यत्र तीर्थं परंतप ॥ सोमतीर्थोत्तरे भागे प्रयागस्य च दक्षिणे ॥ २ ॥ शिप्रायाः पूर्वभागे च तत्र तीर्थं प्रतिष्ठितम् ॥ तत्र तीर्थे नरः स्नात्वा पश्येद्वेव सुरोत्तमम् ॥ ३ ॥ देवं माधवमित्याख्यं भुवि सर्वफलप्रदम् ॥ ददाति तस्य देवेंद्रो वांछितार्थं जगत्पतिः ॥ ४ ॥ आनंदभैरवस्तत्र सर्वदेवनमस्कृतः ॥ यस्यदर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ ॥ ५ ॥ न तस्य जायते व्यास यातना भैरवी कदा ॥ स्वर्गद्वारे सदा व्यास जायते निर्भयः पुमान् ॥ ६ ॥ ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः ॥ गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥ दशाला जायते वत्स गंगाजन्म परं शुचि ॥ ७ ॥ तद्दिने च नरः स्नात्वा सर्वतीर्थफलं लभेत् ॥ अखण्डं च परं तीर्थं शृणु व्यास ह्यतः परम् ॥ ८ ॥ यस्य श्रवणमात्रेण व्रतभंगो न जायते ॥ एक एव पुरा ब्रह्मन्ब्राह्मणो ब्रह्मवित्तमः ॥ ९ ॥ धर्मशर्मेति विख्यातः सदाचारस्तः शुचिः ॥ बहुव्रतधरो दांतो वेदवेदांगपारगः ॥ १० ॥ किंचिद्दोषप्रसंगेन व्रतपूर्तिर्न चाभवत् ॥ एवं बहुतिथे काले नारदो देवदर्शनः ॥ ११ ॥ तस्य गेहागता ब्रह्मन्नातिथ्यार्थं महातपाः ॥ तदोत्थाय द्विजो नित्यं बहुमानपुरःसरम् ॥ १२ ॥ सत्कृत्य नारदं भूमन्विधिदृष्टेन कर्मणा ॥ पूजयित्वा द्विजश्रेष्ठः पप्रच्छ मुनिसत्तम ॥ १३ ॥ भगवन्भवता सर्वं विदितं ज्ञानचक्षुषा ॥ अस्माकं च परं दोषः किंचिज्जातः पुराऽनघ ॥ १४ ॥ येन पापप्रसंगेन व्रतभंगोऽभवद्ध्रुवम् ॥ कारणं ब्रूहि मे नाथ किं दोषोऽत्र तु गण्यते ॥ १५ ॥ ॥ नारद उवाच ॥ ॥ शृण्वतां भो द्विजश्रेष्ठ भवद्भिश्च पुराकृतम् ॥ महाराष्ट्रे सुविख्यातो ब्राह्मणो धनसंचकः ॥ १६ ॥ ब्रह्मदत्तेत्यसौ विप्रो वेदब्राह्मणनिंदकः ॥ धनलोभी पराक्रांतः सर्वधर्मबहिर्मुखः ॥ ॥ १७ ॥ नास्तिको देवतीर्थेषु परद्रव्यापहारकः ॥ परस्त्रीषु रतो नित्यं द्यूतवादी च तस्करः ॥ १८ ॥ एवमायुःपरिक्षीणो धनहीनोऽभवत्तदा ॥ इतस्ततोऽभ्रमद्भ्रष्टो नदीतीरे सुविह्वलः ॥ १९ ॥ गतश्चौर्यप्रसंगेन यात्रिकैः सह संगतः ॥ किंचित्कालेषु दुःशीलो मृतिं प्राप्तो रुजार्दितः ॥ २० ॥ नीतः संयमिनीं विप्रस्तत्कालं यमकिंकरैः ॥ यमराजपुरं प्राप्तो बहुपापकरो द्विजः ॥ २१ ॥ दृष्टोऽसौ धर्मराजेन तदा पापपरायणः ॥ निरीक्ष्य सहसो वाच धर्मपूर्वमिदं वचः ॥ २२ ॥ शृणुध्वं किंकराः सर्वे यूयमेकाग्रमानसाः ॥ अनेनाचरितं सर्वं दुष्कर्म सर्वकिल्विषम् ॥ २३ ॥ गोदातीरे मृतः पापी तत्र नःकारणं न हि ॥ तिस्रःकोट्योऽर्धकोटिश्च यानि तीर्थान्यहर्निशम् ॥ २४ ॥ आयांति गौतमीतीरे सिंहस्थेऽपि बृहस्पतौ ॥ तेषां तु वायुसंस्पर्शो जातोस्याते कलेवरे ॥ २५ ॥ तेन पुण्यप्रभावेन नोऽस्माकं कारणं क्वचित् ॥ ग्राह्यो भवद्भिर्नैवायं मुच्यतां भोः पुरःसराः ॥ २६ ॥ एवं तेषां चितो विप्रः पुनर्ब्रह्मगतिं गतः ॥ तेन पापप्रसंगेन व्रतभंगी गतो भुवि ॥ २७ ॥ ॥ ब्राह्मण उवाच ॥ ॥ ब्रह्मन्केन प्रकारेण सर्वपापक्षयो भवेत् ॥ किं तपः किं च दानं च किं तीर्थव्रतसेवनम् ॥ २८ ॥ येन पुण्यप्रभावेन व्रतभंगो न जायते ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ शृणु द्विजवरश्रेष्ठ महाकालवनं स्मृतम् ॥ यत्र रुद्रसरः प्रोक्तमृषिणा तत्त्वदर्शिना ॥ ३० ॥ कोटिकोटिसुतीर्थानि वर्तते द्विजसत्तम ॥ कोटितीर्थमिति विख्यातं तस्माद्विज सनातनम् ॥ ३१ ॥ तत्तीर्थस्योत्तरे भागे सुतीर्थं सर्वकामदम् ॥ नाम्नाऽखंडसरः ख्यातमखंडेश्वरनिर्मितम् ॥ ३२ ॥ यस्य दर्शनमात्रेण सर्वयज्ञफलं लभेत् ॥ तस्माद्धि सर्वथा वत्स गच्छ त्वं तत्र मा चिरम् ॥ ३३ ॥ इति तस्य वचः श्रुत्वा स द्विजोऽगाल्कुपुत्रनीम् ॥ स्नात्वाऽखण्डसरे व्यास दृष्ट्वा देवं महेश्वरम् ॥ ३४ ॥ सद्यः पुण्यवतां लोकान्प्राप्तो वै द्विजसत्तमः ॥ एवं व्यास महातीर्थमखंडेश्वरसंज्ञितम् ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेऽवन्तीक्षेत्रमाहात्म्येऽखंडेश्वरनर्मदासंगमनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ सनत्कुमार उवाच ॥ ॥ भूयः शृणु परं तीर्थं सर्वतीर्थफलप्रदम् ॥ कीर्तितं ब्रह्मणा पूर्वं मार्कंडेयस्य पृच्छतः ॥ १ ॥ शृणु वत्स महीपृष्ठे शिप्रा दिव्यतरा नदी ॥ तस्यास्तीरे वरं तीर्थं कर्कराजेतिविश्रुतम् ॥ २ ॥ यस्य दर्शनमात्रेण महापापक्षयो भवेत् ॥ विकारा मानसाः सर्वे चंद्रो मानसनंभवः ॥ ३ ॥ तस्य स्थानेन तो भानुर्याम्यायनकरः परः ॥ ऋतुत्रयं समाख्यातं विधुब्राचिस्तदुच्यते ॥ ४ ॥ तत्र मृताः प्रयतंते योगिनोऽपि परंतप ॥ चातुर्मास्ये हरौ सुप्ते ये नरा व्रतवर्जिताः ॥ ५ ॥ न तेषां सद्गतिर्वत्स सत्यमेव ब्रवीमि ते ॥ चातुर्मास्ये मृता ये च ये मृता दक्षिणायने ॥ ६ ॥ तेषामुद्धरणार्थाय तीर्थमेतद्विनिर्मितम् ॥ कर्कराजइतिख्यातं सर्वलोकेषु गीयते ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भगवन्भवता सर्वं निर्मितं विश्वमूर्तिना ॥ चराचरमिदं विश्वं जगत्सर्वं जगत्पते ॥ ८ ॥ चातुर्मास्ये हरौ सुप्ते धर्माऽऽचारविधिः स्मृतः ॥ तदहं श्रोतुमिच्छामि ब्रह्मविदां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु वत्स परं पुण्यं चातुर्मास्यफलं शुभम् ॥ यच्छ्रुत्वा भारते खण्डे नृणां मुक्तिर्न दुर्लभा ॥ १० ॥ मुक्तिप्रदोऽयं भगवान्संमार्गेत्तारकारणः ॥ यस्य स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥ ११ ॥ मानुष्यं दुर्लभं लोके तत्राऽपि च कुलीनता ॥ तत्राऽपि संयमित्वं च तत्र सत्संगमः शुभः ॥ १२ ॥ सत्संगमो न यत्राऽस्ति विष्णुभक्तिर्व्रतानि न ॥ चातुर्मास्ये विशेषेण विष्णुव्रतकरः शुभः ॥ १३ ॥ चातुर्मास्ये व्रती यस्तु तस्य पुण्यं निरर्थकम् ॥ सर्वतीर्थानि दानानि पुण्यान्यायतनानि च ॥ १४ ॥ विष्णुमाश्रित्य तिष्ठंति चातुर्मास्ये समागते ॥ स विष्णु राश्रितो नित्यं कर्कराजं सुतीर्थकम् ॥ १५ ॥ सुपुष्टेन च देहेन जीवितं तस्य शोभनम् ॥ चातुर्मास्ये समायाते हरिर्येनाऽर्चितस्तदा ॥ १६ ॥ कृतार्थास्तस्य विबुधा यावज्जीवं वरप्रदाः ॥ संप्राप्य मानुषं देहं चातुर्मास्ये पराङ्मुखः ॥ १७ ॥ तस्य पापशतान्याहुर्देहस्थानि न संशयः ॥ मानुष्यं दुर्लभं लोके हरिभक्तिश्च दुर्लभा ॥ १८ ॥ चातुर्मास्ये विशेषेण सुते देव जनार्दने ॥ चातुर्मास्ये नरः स्नात्वा कर्कराजे द्विजोत्तम ॥ ॥ १९ ॥ सर्वक्रतुफलं प्राप्य देववद्दिवि मोदते ॥ विशेषेण तु तत्स्नानं कर्कस्थेऽपि दिवाकरे ॥ २० ॥ दुर्लभं सर्वजंतूनां ससुरासुरमानुषम् ॥ देहशुद्धिं विधायाऽऽशु मुक्तिमार्गमवाप्नुयात् ॥२१॥ तत्राऽपि निर्झरे कूपे तडागे वा सरस्यपि ॥ तस्मात्तदधिकं पुण्यं समाख्यातं सुरासुरैः ॥ तेषु यः स्नाति वै नित्यं तस्य पापक्षयो भवेत् ॥ २२ ॥ तस्मान्नद्यधिका पुण्या समाख्याता सुरासुरैः ॥ पुष्करे च प्रयागे च यत्र क्वाऽपि महाजले ॥ २३ ॥ चातुर्मास्ये तु यः स्नाति पुण्यसंख्या ततोऽधिका ॥ रेवायां भास्करे क्षेत्रे प्राच्यां सागरसंगमे ॥ २४ ॥ एकाहमपि यः स्नाति चातुर्मास्ये न दुःखभाक् ॥ दिनत्रयं च यः स्नाति नर्मदायां समाहितः ॥२५॥ सुप्ते देवे जगन्नाथे पापं याति सहस्रधा ॥ पक्षमेकं तु यः स्नाति गोदावर्यां दिनोदये ॥ २६ ॥ स भित्त्वा कर्मजं देहं याति विष्णोः सलोकताम् ॥ अवंत्यां कर्कराजे तु साक्षाद्विष्णुर्भवन्नरः ॥ क्षणमेकं क्षणार्धं वा चातुर्मास्ये ऽतिलंघयेत् ॥ २७ ॥ तिलोदकेनामलसंयुतेन बिल्वोदकेनापि च मज्जयेद्यः ॥ न तस्य जानामि फलाधिकं वै किं तस्य कीदृङ्मुनिभिः प्रणीतम् ॥ २८ ॥ गंगां स्मरति यो नित्यमुदपानसमीपतः ॥ तद्गांगेयजलं जातं तेन स्नानं समाचरेत् ॥ २९ ॥ गंगाऽपि देवदेवस्य चरणांगुष्ठवाहिनी ॥ पापहा सा सदा प्रोक्ता चातुर्मास्ये विशेषतः ॥ ३० ॥ चातुर्मास्ये जलगतो देवो नारायणो भवेत् ॥ सर्वतीर्थाऽधिकं स्नानं विष्णुतेजोंऽशसंगतम् ॥ ॥ ३१ ॥ स्नानं दशविधं कार्यं विष्णुनाम्ना महाफलम् ॥ सुप्ते देवे विशेषेण नरो देवत्वमाप्नुयात् ॥ ३२ ॥ विना स्नानं तु यत्कर्म पुण्यकार्यमयं शुभम् ॥ क्रियते विफलं ब्रह्मंस्तद्गृह्णन्ति हि राक्षसाः ॥ ३३ ॥ स्नानेन सत्यमाप्नोति सत्ये धर्मः सनातनः ॥ धर्मान्मोक्षपथं प्राप्य पुनर्नैवावसीदति ॥ ॥ ३४ ॥ ये चाध्यात्मविदः पुण्या ये च वेदांतपारगाः ॥ सर्वदानप्रदाने च तेषां स्नानेन शुध्यति ॥ ३५ ॥ कृतस्नानस्य हि हरिर्देहमाश्रित्य तिष्ठति ॥ सर्वक्रियाफलं येषु संपूर्णफलदं भवेत् ॥ ३६ ॥ सर्वपापविनाशाय देवतातोषणाय च ॥ चातुर्मास्ये जलस्नानं सर्वपापक्षयावहम् ॥ ३७ ॥ निशायां चैव न स्नायात्संध्यायां ग्रहणं विना ॥ उष्णोदकेन न स्नायाद्रात्रौ शुद्धिर्न जायते ॥ ३८ ॥ भानुसंदर्शनाच्छुद्धिर्विहिता सर्वकर्मसु ॥ चातुर्मास्ये विशेषेण जलशुद्धिस्तु भाविनी ॥ ३९ ॥ अशक्तयां तु शरीरस्य भस्मस्नानेन शुध्यति ॥ मंत्रस्नानेन विप्रेंद्र विष्णुपादोदकेन वा ॥ ४० ॥ नारायणाऽग्रतः स्नानं क्षेत्रे तीर्थे नदीषु च ॥ विशेषतोऽपि शिप्रायां तीर्थे कर्काभिधे वरे ॥ ४१ ॥ यश्च स्नाति नरो नित्यं स यानि वैष्णवं पदम् ॥ तस्मात्त्वं भार्गवश्रेष्ठ तत्र गच्छस्व मा चिरम् ॥ ४२ ॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ॥ तानि सर्वाणि तिष्ठंति कर्कराजजले सदा ॥ ४३ ॥ कर्कस्थे च दिवानाथे स्नानं कुर्वंति ये नराः ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ४४ ॥ चातुर्मास्यं समासाद्य तत्रैव निवसाम्यहम् ॥ नास्ति रेवासमा पुण्या नदी ब्रह्मांडभूतले ॥ ४५ ॥ महेशान्नाऽपरो देवो मुक्तिदो न जनार्दनात् ॥ उज्जयिनीसमा नास्ति पुरी कामवरप्रदा ॥ ४६ ॥ कर्कराजसमं तीर्थं नास्ति वत्स महीतले ॥ यस्य दर्शनमात्रेण मुक्तिभागी भवेन्नरः ॥ ४७ ॥ एवं व्यास समाख्यातं ब्रह्मणा भार्गवाय च ॥ तस्मात्सर्वप्रयत्नेन महाकालवनं व्रज ॥ ४८ ॥ अस्माकं चाऽपि तत्रैव स्थानं परमशोभनम् ॥ चातुर्मास्ये हरौ सुप्ते यावद्यायात्प्रबोधिनी ॥ ४९ ॥ तावत्कालं हि तत्रैव मुक्तिरेव न संशयः ॥ चातुर्मास्ये हरौ सुप्ते जहाति चेत्कलेवरम् ॥ ५० ॥ यमलोके चिरं वासो जायते नाऽत्र संशयः ॥ तस्माच्छुलसिकाभागे शालिग्रामे सुरालये ॥ ५१ ॥ आत्मानं हि पशीकृत्य तत्रैव संनियोजयेत् ॥ यावत्प्रबोधिनी चैति द्वादशी द्विजसत्तम ॥५२॥ पश्चाद्घृतसुवर्णेन मोचयित्वा स्वकं नयेत् ॥ चातुर्मास्योद्भवं दोषं बाधते न च मानवम् ॥५३॥ यस्य शिप्रोदके स्नानं कर्कराजोऽनुजायते ॥ एवं व्यास वरं तीर्थं सर्वतीर्थफलप्रदम् ॥ ५४ ॥ पृथिव्यां यानि तीर्थानि सरितः सागराश्च ये ॥ ते सर्वे च समायांति चातुर्मास्ये द्विजोत्तम ॥ ५५ ॥ तस्माच्च तद्वरं तीर्थं कर्कराज इति स्मृतम् ॥ ५६ ॥ य एतां वै कथां पुण्यां शृण्वंति श्रावयंति च ॥ न तेषां जायते दोषश्चातुर्मास्योद्भवः कदा ॥ ५७ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये कर्कराजतीर्थमहिमवर्णननामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ ७० ॥ ॥ सनत्कुमार उवाच ॥ ॥ मेरोश्च दक्षिणे भागे दुग्धकुण्डोत्तरे तथा ॥ ऋषभः पर्वतश्रेष्ठो देवगन्धर्वसेवितः ॥ १ ॥ यत्र देवांगना रम्याः क्रीडन्ति सततं द्विज ॥ तत्र रम्यसरोनाम तिष्ठते सर्वकामदम् ॥ २ ॥ तत्र तीर्थं नरः स्नात्वा सुभगो जायते ध्रुवम् ॥ देवैश्च क्रीडते नित्यं भुवि विख्यातकः परम् ॥ ३ ॥ भाद्रपदसिताष्टमी मैत्रर्क्षेण समन्विता ॥ तद्दिनेऽत्र समागम्यं स्नानदानादिकाः क्रियाः ॥ ४ ॥ करोति सततं व्यास तेषां लोकाः सनातनाः ॥ मेरोश्चैशानके तीर्थं दिव्यं परम शोभनम् ॥५॥ विन्दुमंगेति विख्यातं सर्वकामवरप्रदम् ॥ गंगा सरस्वती पुण्या शरयूश्च पयस्विनी ॥६॥ एताः सरिद्वरा यातास्तत्र सत्यवतीसुत ॥ ये सिद्धा ये च साध्याश्च तपस्विनो धृतव्रताः ॥७॥उपासांचक्रिरे तत्र तस्य तीर्थस्य सर्वदा ॥ तस्मिंस्तीर्थे नरः स्नात्वा सर्वार्थान्प्राप्नुते ध्रुवम् ॥८॥ भाद्रपदे च शुक्ला वै चतुर्थी या प्रकीर्तिता ॥सिद्धा सा सर्वदा प्रोक्ता यत्र जातो गणाधिपः ॥९॥मनःकामेश्वरः ख्यातः सर्वकामवरप्रदः ॥ तस्य तीर्थं नरः स्नात्वा दृष्ट्वा देवं गणेश्वरम् ॥ मनोरथशतं प्राप्य कामचारी भवेन्नरः ॥१०॥ ॥ व्यास उवाच ॥ ॥ अस्मिन्क्षेत्रे शुभे ब्रह्मन्महाकालवनोत्तमे ॥११॥ तीर्थानि कतिसंख्यानि देवतायतनानि च ॥ यानि कानि च ख्यातानि तानि नो वद विस्तरात् ॥ १२ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणु व्यास ऋषिश्रेष्ठ कथां पापहरां पराम् ॥ अवन्त्यां यानि तीर्थानि लिंगानि च महामुने ॥ १३ ॥ तानि वर्णयितुं शक्तः स्वयंभूश्चतुराननः ॥ वर्षाणामयुतैः षड्भिर्न च वक्तुं कथंचन ॥ १४ ॥ यावंतो मेघमालानां विंदवो हि स्रवंति च ॥ धरित्र्यां तृणसंख्या वै पृथिव्यां सिकतास्तथा ॥१५॥ नभोज्योतिषां संख्यां वक्तुं कोऽपि न शक्नुते ॥ न हि तीर्थलिङ्गसंख्याः संत्यवंत्यां तपोधन ॥१६॥ अंतरिक्षे च मेदिन्यां तीर्थभूता पुरी त्वियम् ॥ वापीकूपतडागादिप्रमाणोद्धरणानि च ॥ १७ ॥ नद्यः सरांसि खाताश्च तीर्थभूतं हि सर्वशः ॥ तथापि देवयात्रायां प्रसंगेन निबोध मे ॥ १८ ॥ पापानि कानि च क्षुद्राणि तानि तुभ्यं वदाम्यहम् ॥ यज्ज्ञात्वा भाव्यसे नित्यं पूताऽऽचाण्डशुभाशुभैः ॥ १९ ॥ प्रातरुत्थाय यो नित्यं शुचिः प्रयत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
CC-0. In Public Domain. Digitized by S3 Foundation USA

मानसः ॥ विष्णुस्मरणसंपन्नः सर्वकामक्रियादिकम् ॥ २० ॥ कृत्वा वै सर्वगंधादितिलाक्षतसमन्वितः ॥ स्नात्वा रुद्रसरे तात तथैव च व्रतं चरेत् ॥ २१ ॥ ऊर्जमाघवयोश्चैव वैशाखाऽऽषाढयोस्तथा ॥ शिवरात्र्यां विशेषेण देवयात्रा प्रशस्यते ॥२२॥ यस्य देवस्य यत्तीर्थं यस्य देवस्य संनिधौ ॥ तत्राभिषेकः कार्यो वै देवतायाश्च पूजनम् ॥२३॥ विधिवच्चाचरेद्यस्तु स सर्वं फलमश्नुते ॥ तस्मात्सर्वप्रयत्नेन देवयात्रां समाचरेत् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ ब्रह्मन्केन प्रकारेण देवयात्रां चरेन्नरः॥ तत्सर्वं श्रोतुमिच्छामि विस्तरेण तपोधन ॥२५॥ ॥ सनत्कुमार उवाच ॥॥ शृणु व्यास परं गुह्यं मनश्च्यामि यथाश्रुतम् ॥ उमामहेश्वरसंवादं देवयात्रादिकर्मसु ॥२६॥ ॥ उमोवाच ॥ ॥ भगवः कथ्यतां देव क्षेत्रस्याऽस्य महेश्वर ॥ यानि तीर्थानि विद्यंते यानि लिंगानि संति वै ॥ तान्यादितो मे भूमंस्त्वं वदस्व वदतां वर ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ २८ ॥ क्षेत्रयात्रां महादेवि मयातीव प्रियं सदा ॥ यत्र शिप्रा महापुण्या दिव्या नलनदी प्रिया ॥ २९ ॥ नीलगंगासंगमं च तथा गंधवती नदी॥ चतस्रो मे प्रिया नद्यः कुमुद्वत्यां हि सुव्रते ॥ ३० ॥ ईश्वराश्चतुराशीतिस्तथाऽष्टौ संति भैरवाः ॥ एकादश तथा रुद्रा आदित्या द्वादश स्मृताः ॥ ॥ ३१ ॥ षड्वै विनायकाश्चाऽत्र देव्यश्च चतुर्विंशतिः ॥ यतोहमागतो भद्रे महाकालवनोत्तमे ॥ ३२ ॥ विष्णुब्रह्मादयः सर्वे ह्यत्रैव निहिताः शुभे ॥ देवैर्व्याप्तमिदं क्षेत्रं देवि योजनमायतम् ॥ ३३ ॥ दश विष्णुः समाख्यातास्तेषां नामानि मे शृणु ॥ वासुदेवो ह्यनंतश्च बलरामो जनार्दनः ॥ ३४ ॥ नारायणो हृषीकेशो वाराहो धरणीधरः ॥ विष्णुर्वा मनरूपेण शेषशायी श्रियालयः ॥ ३५ ॥ दशैते वैष्णवाः प्रोक्ताः सर्वपापहराः पराः ॥३६॥ ॥ उमोवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि देवानामनुपूर्वतः ॥ महाकालवने रम्ये ये वसंति सुरेश्वराः ॥ ३७ ॥ विनायका भैरवा देव्यो ये संति पवनात्मजाः ॥ रुद्रादित्यास्तथा चाऽन्ये तेषां नामानि मे वद ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ ऋद्धिदः सिद्धिदो नित्यं कामदो वै गणाधिपः॥ विघ्नहा च प्रमोदी च चतुर्थीव्रतकप्रियः॥३९॥ पंडिते वै समाख्याता विघ्ननाशकराः पराः॥ उमा चंडीश्वरी गौरी ऋद्धिसिद्धिप्रदा नृणाम् ॥४०॥ वटयक्षिणी वीरभद्रा इत्येताश्चाष्ट मातरः॥४१॥ महामाया सती ख्याता कपालमातृका तथा ॥ अंबिका शीतला चैव एकानंशा च सिद्धिदा॥४२॥ ब्रह्माणी पार्वती चैव योगिनी योगशालिनी ॥ कौमारी भगवती चैव षट्कृत्तिकास्तथैव च ॥ ४३ ॥ चर्पटामातृकाः ख्याता वटमातर एव च ॥ सरस्वती तथा ख्याता महालक्ष्मीश्च वै स्मृता ॥ ४४ ॥ योगिनीमातृका ख्याताश्चतुषष्टिस्ततः स्मृताः ॥ कालिका च महाकाली चामुण्डा ब्रह्मचारिणी ॥ ४५ ॥ वैष्णवी च समाख्याता वाराही विंध्यवासिनी ॥ अंबा अंबालिका चैव चतुर्विंशतिकाः पराः ॥ ४६ ॥ हनुमान्ब्रह्मचारी च कुमारश्च महाबली ॥ चत्वारो वै समाख्याता मया ते पवनात्मजाः ॥ ४७ ॥ दंडपाणिश्च विक्रांतो महाभैरवसिताऽसिताः ॥ बटुको बालको नंदी षट्पञ्चाशतिकोऽपरः ॥ ४८ ॥ कालभैरवश्च विख्यातः क्षेत्रपालस्तथाष्टमः ॥ अष्टौ भैरवाः ख्याता महापापहराः पराः ॥ कपर्दी च कपाली च कलानाथो वृषासनः ॥ ४९ ॥ त्र्यंबकः शूलपाणिश्च चीरवासा दिगम्बरः ॥ गिरीशः कामचारी च सर्वः सर्वांगभूषणः ॥ ५० ॥ रुद्राश्चैकादश प्रोक्ताः शत्रुपक्षविनाशनाः ॥ अरुणः सूर्यो वर्दांगो भानुरिन्द्रो रविरंशुमान् ॥ ५१ ॥ सुवर्णरेताऽहःकर्ता मित्रो विष्णुः सनातनः ॥ इत्येते द्वादशाऽऽदित्याः सर्वरोगहराः पराः ॥ ५२ ॥ अगस्त्येश्वरमुख्यानां लिंगानां चतुराशिनाम् ॥ हिमाचलसुते नित्यं नामानि गदतः शृणु ॥ ५३ ॥ अगस्त्येश्वर आख्यातो गुहेश्वरस्ततः परम् ॥ दुंडेश्वरस्ततः प्रोक्तो डमरुकेश्वरश्च भामिनि ॥ ५४ ॥ अनादिकल्पेश्वरः शंभुः स्वर्णजालेश्वरः परः ॥ त्रिविष्टपेश्वरो देवः कपालेश्वरसंज्ञकः ॥ ५५ ॥ कर्कोटकेश्वरः शंभुः सिद्धेश्वरस्ततः परम् ॥ स्वर्गद्वारेश्वरो रुद्रो लोकपालेश्वरोऽपरः ॥ ५६ ॥ कामेश्वर इति ख्यातः कुटुम्बेश्वरस्ततः परम् ॥ इन्द्रद्युम्नेश्वरः ख्यात ईशानेशस्ततः परम् ॥ ५७ ॥ अप्सरेश्वरइतिख्यातः कल्पकलेश्वर एव च ॥ नागचंडेश्वरो देवो दिवापापहरोऽपरः ॥ ५८ ॥ प्रतिहारेश्वरश्चैव कुरुकुटेशस्ततः परम् ॥ मेघनादेश्वरः पुण्यो महाकालेश्वरः परः ॥ ५९ ॥ मुक्तेश्वरः समाख्यातः सोमेश्वरस्ततः परम् ॥ अनरकेश्वरो देवो जटेश्वरस्ततः परम् ॥ ६० ॥ रामेश्वरो महादेवश्चयवनेशस्ततः परम् ॥ अखंडेशः समाख्यातः पत्तनेशस्ततः स्मृतः ॥ ६१ ॥ आनंदेशस्ततः प्रोक्तः कंथडेशस्ततः परम् ॥ इन्द्रेश्वर इति ख्यातो मार्कंडेशस्ततः परः ॥ ६२ ॥ शिवेश्वर इति प्रोक्तः कुसुमेशस्ततः परम् ॥ अक्रूरेश इति ख्यातः कुण्डेश्वरस्ततः परम् ॥ ६३ ॥ लुम्पेश्वरः समाख्यातो गंगेश्वरस्ततः परम् ॥ शूलेश्वरेति विख्यात ओंकारेशस्ततः स्मृतः ॥ ६४ ॥ कंटकेशो महारुद्रः सिंहेश्वरस्ततः परम् ॥ रेवंतेश्वरः परो देवो घंटेश्वरपुरःसरः ॥ ६५ ॥ प्रयागेश्वरो महादेवः सिद्धेश्वरस्ततः परम् ॥ मातंगेश्वरः परो देवः सौभाग्येशस्ततो वरः ॥ ६६ ॥ रूपेश्वरेति विख्यातो ब्रह्मेश्वरस्ततः परम् ॥ जलपेश्वरस्ततो देवः केदारेश्वर एव च ॥ ६७ ॥ पिशाचेश्वरशंभुश्च संगमेशस्ततः परः ॥ दुर्धर्षेशश्च विख्यातश्चंडादित्येश्वरस्ततः ॥ ६८ ॥ करभेश्वरः परः प्रोक्तो राजस्थलेश्वरः शिवः ॥ वडलेश्वरस्ततः प्रोक्तो ह्यरुणेशस्ततः स्मृतः ॥ ६९ ॥ पुष्पदंतेश्वरो देवो ह्यविमुक्तेश्वरस्ततः ॥ हनुमंतेश्वरो देवो विश्वेश्वरस्ततः परम् ॥ ७० ॥ स्वप्नेश्वर इति ख्यातः सिद्धेश्वरस्ततः परः ॥ नीलकंठेश्वरो देवः स्थावरेशस्ततः परम् ॥ ७१ ॥ कामेश्वर इति प्रोक्तः प्रतिहारेश्वरस्ततः ॥ पशुपतीश्वरः प्रोक्तो विश्वेश्वरस्ततः परः ॥ स्वर्णजालेश्वरः प्रोक्तो मनःकामेश्वरस्ततः ॥ ७२ ॥ दुर्वासेश्वरनामासौ नागचंडेश्वरस्ततः ॥ खर्परेशश्च विख्यातो ब्रह्मेश्वरस्ततः परम् ॥ ७३ ॥ पातालेश्वर आख्यातो गुप्तेश्वरस्ततः परः ॥ कपिलेश्वर इत्याख्यो योगयोगेश्वरः परः ॥ ७४ ॥ भीमेश्वरेति विख्यातो धनुःसहस्राभिधः परः ॥ अग्नीश्वरः परः प्रोक्तो देवेश्वरस्ततः परः ॥ ७५ ॥ द्वादशार्कः समाख्यातो दशाश्वमेधिकेश्वरः ॥ गदाधरेश्वरः ख्यातो वैजनाथेति शंभुराट् ॥ ७६ ॥ सोमनाथेश्वरः ख्यातो घुष्मेश्वरस्ततः परः भीमशंकर इत्याख्यो घंटेश्वरस्ततः परः ॥ ७७ ॥ ऊपरेश्वरसंज्ञश्च चन्द्रादित्येश्वरः परः ॥ केशवार्कः समाख्यातः शक्तिभेदेश्वरः परः ॥ ७८ ॥ रामेश्वरः परो देवो वाल्मीकेश्वरशंकरः ॥ ज्वालेश्वरः शिवः प्रोक्तो ह्यभयेशस्ततः परः ॥ ७९ ॥ विघ्नहस्तेश्वरः प्रोक्तश्चंचलेशस्ततः परः ॥ पुरुषोत्तमेति विख्यातो वीरेश्वरस्ततः परः ॥ ८० ॥ कर्णेश्वरश्च विख्यातः पृथुकेशस्ततः परम् ॥ आनंदेशश्च विख्यातः कोटेश्वरस्ततः परः ॥ ८१ ॥ अविमुक्तेश्वरः प्रोक्तो हनुमत्केश्वरः परः ॥ विमलेश्वरेति विख्यातश्चंद्रेश्वरस्ततः परः ॥ ८२ ॥ विंदुकेशश्च विख्यातो वासुकेश्वरसंज्ञकः ॥ बृहस्पतीश्वरो देवो ह्यसंख्यातेश्वरस्ततः ॥ ८३ ॥ यानि कानि च तीर्थानि तानि लिंगानि सत्तम ॥ तिष्ठंति तत्र पूज्यानि तानि वंद्यानि सर्वशः ॥ ८४ ॥ चत्वारो विदिताः सर्वे द्वारपाला महात्मभिः ॥ पिंगलेश्वरेति च ख्यातः पूर्वद्वारे द्विजोत्तम ॥ ८५ ॥ दक्षिणे च तथा द्वारे कायावरोहणेश्वरः ॥ विल्वकेश्वरेति विख्यातः पश्चिमद्वारमाश्रितः ॥ ८६ ॥ दर्दुरेश्वरस्ततः प्रोक्तो द्वारे चोत्तरसंज्ञिके ॥ एते चाऽन्ये च बहवो लिंगाख्याह्यिभुवनेश्वराः ॥ ८७ ॥ महाकालवने रम्ये समाख्याता हि पावनाः ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ८८ ॥ महाकालवने व्यास लिंगसंख्या न विद्यते ॥ तथाऽपि च प्राधान्येन मयाऽत्र परिकीर्तिताः ॥ ८९ ॥ यस्य देवस्य यत्तीर्थं तन्नाम्ना परिकीर्तितम् ॥ स्नात्वा दत्त्वा च तदानं तत्तीर्थे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्य फलं लभेत् ॥ ९० ॥ तथा नवग्रहाः पुण्याः समाख्याताः पुराऽनघ ॥ तेषां नामानि पुण्यानि तीर्थानि च तथा शृणु ॥ ९१ ॥ नरादित्य इति ख्यातः सोमेश्वरस्ततः परः ॥ मंगलेश्वरः समाख्यातो बुधेश्वरस्ततः परम् ॥ ९२ ॥ बृहस्पतीश्वरः प्रोक्तस्तथा शुक्रेश्वरः शिवः ॥ स्थावरेश्वरो महादेवः समाख्यातो मुनीश्वरैः ॥ ९३ ॥ राहुकेतू समाख्यातौ तेषां तीर्थानि सत्तम ॥ तत्तीर्थेषु नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ९४ ॥ ग्रहा राज्यं प्रयच्छंति ग्रहा राज्यं हरंति च ॥ ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम् ॥ ९५ ॥ ग्रहतीर्थे नरः स्नात्वा ग्रहाणामर्चनं चरेत् ॥ न तस्य ग्रहपीडा वै बाधते हि कदाचन ॥ ९६ ॥ एवं व्यास समाख्याता मया देवाश्च तीर्थकाः ॥ यात्रा पुण्यतरा श्रेष्ठा पवित्रा पापनाशिनी ॥ ९७ ॥ ग्रहपीडासु चोग्रासु दारिद्र्ये घोरसंकटे ॥ तेषामुद्धरणार्थाय देवयात्रा प्रकीर्तिता ॥ ९८ ॥ क्षेत्रस्यांतर्गृहीं नित्यं ये कुर्वंति नरोत्तमाः ॥ न तेषां दुर्लभं किंचिद्विषु लोकेषु विद्यते ॥ ९९ ॥ अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥ विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ॥ १०० ॥ अक्षया संततिस्तस्य शिवलोके महीयते ॥ १०१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे ऽवन्तीक्षेत्रमाहात्म्ये देवयात्रांऽतर्गृहीसर्वतीर्थयात्राऽनुक्रमणिकादिकथनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॐ ॥ ॥ व्यास उवाच ॥ ॥ भगवन्भवता सर्वं कथितं देवमूर्तिना ॥ अवंतीतीर्थमाहात्म्यं पवित्रं वेदसंमितम् ॥ १ ॥ भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ महाकालवने रम्ये अवंत्यां भुवि सत्तम ॥ तीर्थानि कतिसंख्यानि विद्यंते ह्यत्र सुव्रत ॥ २ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुतां भो द्विजश्रेष्ठ कथां पापहरां पराम् ॥ ॥३॥उमामहेश्वरसंवादं नारदस्य च धीमतः ॥ नारदेन पुरा पृष्टं प्रश्नमेतद्द्विजोत्तम ॥ ४ ॥ ॥ नारद उवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि महाकाल वने शुभे ॥ तीर्थानि यानि वर्तंते तानि नो वद विस्तरात् ॥ ५ ॥ इति पृष्टस्तदा विप्र नारदेन पुराऽनघ ॥ उवाच श्लक्ष्णया वाचा उमया सहितो हरः ॥ ६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणुष्व भो ऋषिश्रेष्ठ महाकालवने शुभे ॥ तीर्थानि यानि तिष्ठंति तानि वक्ष्यामि सुव्रत ॥ ७ ॥ पुष्कराद्यानि तीर्थानि यानि कानि महीतले ॥ तानि सर्वाणि वर्तंते महाकालवनोत्तमे ॥ ८ ॥ असंख्यातसहस्राणि कोटिकोटीनि सत्तम ॥ रुद्रसरे निमज्जंति कोटितीर्थं तथोच्यते ॥ ९ ॥ नीहारकणिकावृष्टिं गिरौ वर्षंति किन्नराः ॥ हेमंते चैव दृश्यंते तीर्थे पैशाचमोचने ॥ १० ॥ न हि संख्यां विजानामि तीर्थानां भुवि सत्तम ॥ कियन्ति संति तीर्थानि लिंगानि च तथैव च ॥ ११ ॥ तथाऽपि च प्राधान्येन कथयिष्यामि सत्तम ॥ संवत्सरस्य यावंति अहानि च द्विजोत्तम ॥ १२ ॥ तावंति प्रापणीयानि प्रसिद्धानि परंतप ॥ वत्सरे परिपूर्णे च जायतेऽवंतियात्रिका ॥ १३ ॥ विधिवत्कुरुते यस्तु साक्षाच्छंभुर्भवेच्च सः ॥ मन्वंतरसहस्रेषु कांशीवासे च यत्फलम् ॥ १४ ॥ तत्फलं जायतेऽवंत्यां वैशाखे पंचभिर्दिनैः ॥ अवंती यात्रा कर्तव्या प्रयत्नेन मुमुक्षुणा ॥ १५ ॥ माधवेऽपि विशेषेण ह्यवंतीस्नानमाचरेत् ॥ यो हि वैशाखमासाद्य अवंत्यां स्नाति मानवः ॥ १६ ॥ संवत्सरत्रयी स्नातस्तीर्थेतीर्थे यथाविधि ॥ दत्त्वा दानानि सर्वाणि समूलं फलमश्नुते ॥ १७ ॥ भुक्त्वा भोगान्सुविपुलाञ्छिवलोके महीयते ॥१८॥ माहात्म्यमेतच्छिवभक्तिवर्द्धनं यशस्करं पुण्यविवर्द्धनं च ॥ यः श्रावयेद्वा शृणुयाच्च भक्त्या कुलं समुद्धृत्य हरेः पदं व्रजेत् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडेऽवन्तीक्षेत्रमाहात्म्ये व्याससनत्कुमारसंवादे ऽवन्तीक्षेत्रमाहात्म्यवर्णनंनामैक सप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥

॥इति श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्यं प्रथमं संपूर्णम्(५-१)॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥अथ श्रीस्कंदे महापुराणे पञ्चम आवन्त्यखंडेऽवंतीस्थचतुरशीतिलिंगमाहात्म्यं द्वितीयं प्रारभ्यते॥(५—२)॥

॥ श्रीगणेशाय नमः ॥ श्रीमहाकालाय नमः ॥ ॥ अथावन्त्यखण्डेऽवन्तीस्थचतुरशीतिलिङ्गमाहात्म्यं प्रारभ्यते ॥ ॥ उमोवाच ॥ ॥ पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा ॥ कथ्यंतां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ अस्ति लोकेषु विख्याता गंगा त्रिपथगामिनी ॥ सेविता देवगंधर्वैर्मुनिभिश्च निषेविता ॥ २ ॥ तपनस्य सुता देवी यमुना लोकपावनी ॥ पितॄणां वल्लभा देवि महापातक हारिणी ॥ ३ ॥ चंद्रभागा वितस्ता च नर्मदोऽमरकंटके ॥ कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥४॥ केदारं पुष्करं चैव तथा कायावरोहणम् ॥ तथा पुण्यतमं देवि महाकालवनं शुभम् ॥ ५ ॥ यत्रास्ते श्रीमहाकालः पापेंधनहुताशनः ॥ क्षेत्रं योजनपर्यंतं ब्रह्महत्याविनाशनम् ॥ ६ ॥ मुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनम् ॥ प्रलयेऽप्यक्षयं देवि दुष्प्राप्यं त्रिदशैरपि ॥ ७ ॥ ॥ उमोवाच ॥ ॥ प्रभावः कथ्यतां देव क्षेत्रस्यास्य महेश्वर ॥ ८ ॥ यानि तीर्थानि वंद्यानि यानि लिंगानि संति वै ॥ तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ क्षेत्रमाद्यं महादेवि ममातीव प्रियं सदा ॥ १० ॥ यत्रास्ति च महापुण्या सर्वपापहरा परा ॥ तथा गंधवती पुण्या दिव्या नैवनदी प्रिया ॥ ११ ॥ नीलगंगा चतुर्थी तु श्रेष्ठा नद्यः प्रकीर्तिताः ॥ आसां तु संगमे स्नात्वा श्राद्धं यः कुरुते नरः ॥ ॥ १२ ॥ गंगायाश्चगुणं देवि चतुर्वर्गफलप्रदम् ॥ क्षेत्रं योजनपर्यंतमवंत्या विद्धि सुव्रते ॥ १३ ॥ सिद्धलिंगानि तिष्ठंति भुक्तिमुक्तिकराणि च ॥ ईश्वराश्चतुराशीतिस्तथाष्टौ संति भैरवाः ॥ १४ ॥ एकादश तथा रुद्रा आदित्या द्वादश स्मृताः ॥ षड्वै विनायकाश्चात्र चैतुर्विंशतिमातरः ॥ १५ ॥ यदाहं गतवांस्तत्र महाकालवने शुभे ॥ ब्रह्मविष्ण्वादयः सर्वे तत्राजग्मुर्मुदान्विताः ॥ १६ ॥ एभिर्व्याप्तं क्षेत्रमिदं देवि योजनमायतम् ॥ दश स्थानगतो विष्णुः सर्वपापप्रणाशनः ॥ १७ ॥ एतन्नामानि योऽधीते प्रभाते भक्तितः पुमान् ॥ विमुक्तः सर्वपापेस्तु रुद्रलोकं स गच्छति ॥ १८ ॥ ॥ उमोवाच ॥ ॥ चतुराशीतिलिंगानि त्वयोक्तानीह यानि तु ॥ तानि विस्तरतो ब्रूहि सर्वपापहराणि तु ॥ १९ ॥ ॥ हर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि तेषां नामानि यानि च ॥ ख्यातं पृथिव्यां प्रथममगस्त्येश्वरमुत्तमम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ २० ॥ ॥ ॥ उमोवाच ॥ ॥ अगस्त्येश्वरनामेह कथं लब्धमनेन वै ॥ कस्मिन्स्थाने कथं जातं विस्तराद्वक्तुमर्हसि ॥ २१ ॥ ॥ हर उवाच ॥ ॥ शृणु देवि महाभागे कथामस्य पुरातनीम् ॥ सर्वपापप्रशमनीं समीहितफलप्रदाम् ॥२२॥पुराऽसुरैर्जिता देवा निरुत्साहाश्च ते ततः॥भागाश्चेषां हृताः सर्वे निराशाः पितरः कृताः ॥ भ्रष्टैश्वर्यास्तदा देवि चेरुर्देवा महीतले ॥ २३ ॥ ततः कदाचित्ते दीना दीप्तमादित्यवर्चसम् ॥ ददृशुस्तेजसा युक्तम् गस्त्यं विपुलव्रतम् ॥ २४ ॥ अभिवाद्य ततो देवा दृष्ट्वा तं तेजसा वृतम् ॥ इदमूचुर्महात्मानमगस्त्यं लोकविश्रुतम् ॥ २५ ॥ दानवैर्निर्जिता युद्धे सर्वे स्वर्गाच्च पातिताः ॥ ततस्त्वं नो भयात्तीव्रात्रायस्व मुनिपुंगव ॥ २६ ॥ इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत् ॥ प्रजज्वाल च तेजस्वी कालाग्निरिव संक्षये ॥ २७ ॥ तदा दीप्तांशुजालेन निर्दग्धा दानवास्तथा ॥ अंतरिक्षान्महादेवि पतिताश्च सहस्रशः ॥ २८ ॥ दह्यमानास्ततो दैत्या स्तस्यागस्त्यस्य तेजसा ॥ ऋषेश्च दानवाः सर्वे पातालं वज्रबुर्भयात् ॥ २९ ॥ ततोऽगस्त्यो महात्मा वै तान्दृष्ट्वा शोकमूर्छितः ॥ बभूवातिशयं चासौ चिंतयोद्विग्नमानसः ॥ ३० ॥ कृतं घोरं महत्पापं हता यद्दानवा मया ॥ अहिंसा परमो धर्मो मनुना कथ्यते यतः ॥ किं करोमि क्व गच्छामि कथं शुध्येय चाप्यहम् ॥ ३१ ॥ एवं चिंतयतस्तस्य समागच्छत्पितामहः ॥ प्रोवाच स मुनिं तत्र कस्मात्त्वं शोकविह्वलः ॥ ३२ ॥ लक्ष्यसे मुनिशार्दूल कारणं कथ्यतां त्वरम् ॥ स ब्रह्माणं नमस्कृत्य कथयामास पृच्छतः ॥ ३३ ॥ देवदेव जगन्नाथ दाहोंतर्मानसं मम ॥ ब्रह्महत्या समायाता यन्मया दानवा हताः ॥ ३४ ॥ ममोपायं समाचक्ष्व प्रसादात्सुरसत्तम ॥ बहुकालार्जितं देव गतं मे संक्षयं तपः ॥ ३५ ॥ प्रोवाचेदं सुरश्रेष्ठः शृणु त्वं यत्नतः परम् ॥ उपायं सर्वपापस्य क्षयो येन भवेद्ध्रुवम् ॥ ३६ ॥ महाकालवने दिव्ये यक्षगंधर्वसेविते ॥ उत्तरे वटयक्षिण्या यत्तल्लिंगमनुत्तमम् ॥ ३७ ॥ पिशाचस्यापि तीर्थस्य भागे दक्षिणतः स्थितम् ॥ तं समाराध्यतः सर्वं पापं नाशमवाप्नुयात् ॥ ३८ ॥ आराधय शुभं लिंगं सर्वपापप्रणाशनम् ॥ वाढं प्रोवाच धर्मात्मा महाकालवनं ययौ ॥३९॥ तस्मिन्स लिंगे देवेशि समाराधनतत्परः ॥ बभूवाहर्निशं भक्त्या तद्ध्यानैकरतो मुनिः ॥ ४० ॥ अहं तुष्टस्तदा देवि मुनेस्तस्य महात्मनः ॥ ४१ ॥ प्रोक्तं मया महाभाग मुने शृणु समाहितः ॥ वरं वरय विप्रेंद्र यत्ते मनसि वर्त्तते ॥ ४२ ॥ तुष्टोऽहमनया भक्त्या तपसा दुष्करेण तु ॥ लिंगस्यास्य प्रभावेण जातस्त्वं निर्मलोऽधुना ॥४३॥ प्रणष्टा ब्रह्महत्या ते दानवोत्था मुनी श्वर ॥ मदीयं वचनं श्रुत्वा तेनोक्तं वरवर्णिनि ॥ ४४ ॥ यदि देव प्रसन्नस्त्वं शरणागतवत्सलः ॥ त्वदंघ्रियुगले भूयान्मम भक्तिर्महेश्वर ॥ ४५ ॥ तपस्यथ तथा धर्मे न मे विघ्नो भवेदिति ॥ तस्य तद्वचनं श्रुत्वा कुंभयोनेर्महात्मनः ॥ मया प्रोक्तं विशालाक्षि मुने एवं भविष्यति ॥ ४६ ॥ यस्त्वया पूजितो देवो ब्रह्महत्याविनाशनः ॥ त्वन्नाम्ना भुवि लोकेषु सोऽयं ख्यातो भविष्यति ॥ ४७ ॥ अगस्त्येश्वरदेवोपि विख्यातो भुवनत्रये ॥ एवमुक्तो मया देवि स विप्रस्तत्र संस्थितः ॥ कृपया तस्य लिंगस्य पंचमुद्राविभूषितः ॥ ४८ ॥ ये नरास्तन्महालिंगं निरीक्षिष्यंति भक्तितः ॥ सर्वपापविनिर्मुक्ताः सर्वकामैरलंकृताः॥४९॥भविष्यंति महात्मानः पुत्रैश्वर्यसमन्विताः ॥ अंतकाले च मां यांति विमानैः सर्वकामदैः ॥५०॥ स्तुता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गंधर्वमुख्यैश्च रुद्रलोके च शाश्वते ॥ येऽर्चयंति सदा देवमगस्त्येश्वरसंज्ञकम् ॥ ५१ ॥ कृतपुण्या नरा मर्त्यास्ते यांति परमं पदम् ॥ संस्मृते देवदे
वेशे नराणां कोटिजन्मजम् ॥५२॥ अशुभं क्षयमाप्नोति कस्तं न प्रणमेच्छिवम् ॥ यः प्रणम्य नरो भक्त्या देवं तं च निषेवते ॥५३॥ मुच्यते ब्रह्महत्यादिपा
तकैर्नरकप्रदैः ॥ ५४ ॥ राजसूयशतेनैव यत्पुण्यं च भविष्यति ॥ तत्पुण्यमधिकं देवि दर्शनाच्च भविष्यति ॥ ५५ ॥ किं तीर्थैर्विविधैः स्नानैः किं
दानैर्विविधैः कृतैः ॥ ते प्राप्स्यंति फलं सर्वं मत्प्रसादान्न संशयः ॥५६॥ अष्टम्यां च चतुर्दश्यां दिने सोमस्य शक्तितः ॥ यः करिष्यति लिंगस्य पूज
भक्तिसमन्वितः ॥ कुलानां तारयत्येव मातृकं पितृकं शतम् ॥५७॥ ये च पश्यंति पुरुषा भावहीनाः प्रसंगतः ॥ न ते पश्यंति संसारे नरकं वै कदा
चन ॥ ५८ ॥ एतत्ते कथितं देवि लिंगमाहात्म्यमुत्तमम् ॥ प्रथमं कथितं लोके द्वितीयं शृणु यत्नतः ॥ ५९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसा
हस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्येऽगस्त्येश्वरमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ श्रीरुद्र उवाच ॥ ॥
शृणु गुहेश्वरं लिंगं द्वितीयं पापनाशनम् ॥ यस्य दर्शनमात्रेण जायते सिद्धिरुत्तमा ॥ १ ॥ पुरा राथंतरे कल्पे देवदारुवने शुभे ॥ ऋषिर्मंकणकोना
म वेदवेदांगपारगः ॥ योगाभ्यासरतो नित्यं शांतिदांतिसमास्थितिः ॥ २ ॥ सिद्धिकामस्तपस्तेपे कथं सिद्धो भवाम्यहम् ॥ रक्तमयविकारोयं कथं
यास्यति संक्षयम् ॥ ३ ॥ इति संचिंत्य हृदये प्रारब्धं तप उत्तमम् ॥ बहून्यब्दसहस्राणि तस्यातीतानि पार्वति ॥ ४ ॥ कस्मिंश्चिदथ काले तु
विद्धस्य पर्वतात्मजे ॥ कराच्छाकरसो जातः कुशाग्रेण तदैव हि ॥ ५ ॥ स च दृष्ट्वा तदाश्चर्यं विस्मयं परमं गतः ॥ मेने सिद्धिं परां प्राप्तां सगर्वो
वाक्यमब्रवीत् ॥ ६ ॥ अहो तपःप्रभावोऽयं प्राप्ता सिद्धिर्मयाद्य वै ॥ मत्तुल्यो नास्ति वै विप्रो येन सिद्धिः समागता ॥ ७ ॥ शरीरं कुत्सितं चेदं
मलमूत्रेण संयुतम् ॥ मज्जस्नायुवसापृक्तमांसशोणितपूरितम् ॥ हर्षेण महता युक्तः स ननर्त्त द्विजस्तथा ॥ ८ ॥ एतस्मिन्नृत्यति विप्रे जगत्स्थावर
जंगमम् ॥ अनृत्यद्रागसंयुक्तं प्रभावात्तस्य वै मुनेः ॥ ९ ॥ न स्वाध्यायो वषट्कारः कर्मकांडो न च क्वचित् ॥ १० ॥ एतस्मिन्नंतरे देवा ब्रह्मविष्णु
पुरःसराः ॥ मामूचुर्विस्मिताः सर्वे नाथ नृत्यं तदा कुरु ॥ ११ ॥ ऋषौ मंकणके देव नृत्यति नृत्यति सर्वतः ॥ सदेवासुरमानुष्यं सर्वं लोक
त्रयं विभो ॥ १२ ॥ चलिताः पर्वताः स्थानात्क्षुभिता मेघपंक्तयः ॥ शिखराणि विशीर्यंते धरणी पीडिता भृशम् ॥ १३ ॥ स्रोतोमात्रा महानद्यो
ग्रहा उन्मार्गतः स्थिताः ॥ १४ ॥ त्रैलोक्यं व्याकुलीभूतं यावन्नायाति संक्षयम् ॥ तावन्निवारयस्वैनं नान्यः शक्तो विना त्वया ॥ १५ ॥ तेषां तद्वचनं
श्रुत्वा त्रिदशानां यशस्विनि ॥ प्रतिज्ञातं मयात्यर्थं गत्वा तस्य समीपतः ॥ १६ ॥ द्विजरूपं समास्थाय मया पृष्टो द्विजोत्तमः ॥ किमर्थं नृत्यसि
ब्रह्मन्कस्मात्ते हर्ष आगतः ॥ १७ ॥ विरुद्धमृषिधर्माणां कामरागेण नर्त्तनम् ॥ गीतं च नर्त्तनं चैव युवतीजनवल्लभम् ॥ १८ ॥ ब्राह्मणस्य तपो
भ्रंशः सदाचारस्य सत्तम ॥ इति मत्वा द्विजश्रेष्ठ किमर्थं नृत्यसे भृशम् ॥ १९ ॥ ॥ ऋषिरुवाच ॥ ॥ किं न पश्यसि भो ब्रह्मन्कराच्छाकरसं
च्युतम् ॥ अत एव हि मे नृत्यं सिद्धोऽहं नात्र संशयः ॥ २० ॥ तस्य तद्वचनं श्रुत्वा हासोऽतीव मया कृतः ॥ अंगुष्ठस्ताडितः स्वीयोंगुल्यग्रेण
च पार्वति ॥ २१ ॥ ततो विनिर्गतं भस्म तत्क्षणाद्धिमपांडुरम् ॥ हासेनोक्तो विशालाक्षि सगर्वो ब्राह्मणो मया ॥ २२ ॥ पश्य मेंऽगुष्ठतो ब्रह्मन्भूरि
भस्म विनिर्गतम् ॥ न नृत्येहं न मे हर्षस्तथापि मुनिसत्तम ॥ २३ ॥ तद्दृष्ट्वा महदाश्चर्यं लज्जितो द्विजसत्तमः ॥ धैर्यं च तादृशं दृष्ट्वा विस्मयं
परमं गतः ॥ २४ ॥ अब्रवीत्प्रांजलिर्भूत्वा विस्मितेनांतरात्मना ॥ नान्यं देवमहं मन्ये त्वां मुक्त्वा वृषभध्वजम् ॥ २५ ॥ नान्यस्य विद्यते शक्ति
रीदृशी भुवनत्रये ॥ तस्मात्क्षमस्व देवेश मयाज्ञानादनुष्ठितम् ॥ २६ ॥ तपःक्षयकरं कर्म विरुद्धं नर्त्तनं सताम् ॥ बहुकालार्जितं पुण्यं तपसा दुष्क
रेण तु ॥ तद्गतं सहसा देव मदीयं नर्त्तनेन तु ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा मयोक्तो द्विजसत्तमः ॥ वरं वरय भद्रं ते तुष्टोऽहं द्विजसत्तम ॥ २८ ॥
ज्ञानेनानेन विप्रेंद्र कं ते कामं करोम्यहम् ॥२९॥ ॥ ऋषिरुवाच ॥ ॥ यदि देव प्रसन्नस्त्वं शरणागतवत्सल ॥ यथा न स्यात्तपोहानिस्तथा नीतिर्वि
धीयताम् ॥३०॥ मया प्रोक्तं प्रसन्नेन तस्य विप्रस्य पार्वति ॥ तपस्ते वर्द्धतां विप्र महाकालवनं व्रज ॥३१॥ तत्रास्ते सर्वदा पुण्या सप्तकल्पोद्भवा गुहा ॥
पिशाचेश्वरदेवस्य उत्तरेण व्यवस्थिता ॥ ३२ ॥ तत्र द्रक्ष्यसि यल्लिंगं सप्तकल्पोद्भवं शुभम् ॥ तस्य दर्शनमात्रेण तपस्ते वृद्धिमेष्यति ॥३३॥ काम
क्रोधोद्भवं पापं लोभमोहसमन्वितम् ॥ ईर्ष्यामत्सरजं चैव नाशं याति च किल्बिषम् ॥३४॥ मदीयं वचनं श्रुत्वा स विप्रो वेदपारगः ॥ श्रुत्वा च
नियमं देवि प्रदुक्तं स ततो द्विजः ॥ ३५ ॥ निःसृतो नियतो भूत्वा नमस्कृत्य पुनःपुनः ॥ आजगाम गुहा यत्र महाकालवनोत्तमे ॥ ३६ ॥ ददर्श
तत्र तल्लिंगं तपसो वर्द्धनं परम् ॥ द्वादशादित्यसंकाशो जातो वै लिंगदर्शनात् ॥३७॥ एतस्मिन्नंतरे देवि देवैरुक्तं नभस्तले ॥ गोप्यं लिंगं गुहोत्थं तु
दृष्टं मंकणकेन तु ॥३८॥ सिद्धिः प्राप्ता द्विजेनैव दर्शनेन सुदुर्लभा ॥ तस्माद्गुहेश्वरो देवि भविष्यति महीतले ॥३९॥ भक्त्या परमयोपेता ये द्रक्ष्यंति
गुहेश्वरम् ॥ न तेषां जायते विघ्नो धर्मस्य तपसस्तथा ॥ ४० ॥ अष्टम्यां वा चतुर्दश्यां दर्शनं यः करिष्यति ॥ ब्रह्मलोकं गमिष्यंति पितरस्तस्य
देहिनः ॥ ४१ ॥ अत्रागत्य प्रयत्नेन दर्शनं यः करिष्यति ॥ उद्धरिष्यति चात्मानं पुरुषानेकविंशतिम् ॥ ४२ ॥ कृत्वा पापसहस्राणि दर्शनं यः
करिष्यति ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ ४३ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ दर्शनात्तस्य लिंगस्य सर्वं यास्यति
संक्षयम् ॥ ४४ ॥ यत्किंचिदशुभं कर्म जन्मकोटिशतार्जितम् ॥ क्षयं यास्यति तत्सर्वं स्पर्शमात्रेण नान्यथा ॥ ४५ ॥ महापातकयुक्ता हि देहिनो
ये महीतले ॥ तेऽपि लिंगं समासाद्य मुच्यंते सर्वपातकैः ॥ ४६ ॥ इत्युक्त्वा स द्विजो देवि दिव्यो मंकणको मुनिः ॥ कृत्वाश्रमपदं पुण्यं तत्रैव
तपसि स्थितः ॥ ४७ ॥ एष वै कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि सर्वपापैः प्रमुच्यते ॥ ४८ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये गुहेश्वरमाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीरुद्र
उवाच ॥ ॥ ढुंढेश्वरं तृतीयं तु सुखस्वर्गफलप्रदम् ॥ सर्वपापहरं लिंगं नृणां दुष्कृतनाशनम् ॥ १ ॥ ढुंढश्चासीत्पुरा देवि कैलासे गणनायकः ॥
स च कामी दुराचारो व्यसनोपहतेन्द्रियः ॥ २ ॥ गतोऽसौ शक्रलोकं तु कौतुकार्थं यदृच्छया ॥ यत्र नृत्यति सा रंभा शक्रस्याग्रे विवृण्वती ॥
॥ ३ ॥ भावान्बहुविधान्रम्यान्दृष्टिहस्तादिकाञ्छुभान् ॥ सूचीविद्धादिकरणान्पताकादिकहस्तकान् ॥ नृत्यं हस्तादिसंयुक्तं लयतालानुगं तथा ॥४॥
शक्रोऽपि त्रिदशैः सार्द्धं तन्मुखासक्तलोचनः ॥ बभूव हृष्टचेता वै हृषितांगरुहाननः ॥ ५ ॥ एतस्मिन्नंतरे देवि ढुंढस्तल्ललितेन तु ॥ कामरागवशे
नैव भाव्यर्थेन च मोहितः ॥ ६ ॥ तेन रंगरता रंभा पुष्पगुच्छेन ताडिता ॥ स शप्तो वासवेनैव दृष्ट्वाऽन्यायं गणस्य तु ॥ ७ ॥ पत त्वं मानुषं
लोकं रंगभंगस्त्वया कृतः ॥ इति शप्तो गणो देवि शक्रेणामिततेजसा ॥ ८ ॥ पतितो मानुषे लोके विसंज्ञो विह्वलेन्द्रियः ॥ कादिग्भूतो हतो
त्साहो विललाप पुनःपुनः ॥ ९ ॥ अहोऽन्यायफलं प्राप्तं मया मोहादनुष्ठितम् ॥ तस्मान्नीतिर्विधातव्या पुरुषेण विजानता ॥ १० ॥ न्यायमार्गं
समाश्रित्य येन सिद्धिर्भवेन्मम ॥ ११ ॥ इत्युक्त्वा स तपस्तेपे महेंद्रे पर्वतोत्तमे ॥ श्रीशैले मलये विंध्ये पारियात्रे यमालये ॥ १२ ॥
नो सिद्धोऽसौ यदा देवि तदा गंगामहत्तटम् ॥ यमुनां चंद्रभागां च वितस्तां नर्मदां नदीम् ॥ १३ ॥ गोदावरीं भीमरथीं कौशिकीं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शारदां शिवाम् ॥ चर्मण्वतीं समासाद्य स्नात्वा यत्क्रियोऽभवत् ॥ १४ ॥ तीर्थं व्यर्थं तपो व्यर्थं तीर्थयात्राफलं यतः ॥ न प्राप्तं च मयाभीष्टसटता कर्मभूमिषु ॥ १५ ॥ एतस्मिन्नंतरे देवि वागुवाचाशरीरिणी ॥ आश्वासयंती गणपं महाकालवने व्रज ॥ १६ ॥ प्रयागाद्यानि तीर्थानि पृथिव्यां यानि संति वै ॥ सदा सिद्धिकरं तेषां महाकालं विशिष्यते ॥ १७ ॥ तत्रास्ते सुमहापुण्यं लिंगं सर्वार्थसाधकम् ॥ पिशाचेश्वरसंज्ञंनिध्यं तमाराधय सत्वरम् ॥ १८ ॥ प्रसादात्तस्य लिंगस्य पुनर्यास्यसि शांकरम् ॥ लोकं तेजस्विनां गम्यं दुर्लभं पापिनां सदा ॥ १९ ॥ इति श्रुत्वा ततो वाणीमाकाशस्थां गणस्तदा ॥ आजगाम मुदा युक्तो महाकालवनोत्तमे ॥ २० ॥ ददर्श तत्र तल्लिंगं सर्वसंपत्करं शुभम् ॥ पूजयामास देवेशं भक्त्या परमया युतः ॥ २१ ॥ लिंगमध्यात्ततो वाणी निःसृता पर्वतात्मजे ॥ अहो तुष्टोस्मि ते वत्स किं कामं प्रददाम्यहम् ॥ २२ ॥ ॥ ढुंढ उवाच ॥ ॥ यदि तुष्टोऽसि देवेश शरणागतवत्सल ॥ त्वत्पादपंकजे भूयाद्भक्तिर्मेऽविचला सदा ॥ २३ ॥ वरमेनं प्रयच्छाशु यदि तुष्टो महेश्वरः ॥ २४ ॥ ये च त्वां मानवा देव पश्यंति परमेश्वर ॥ पापात्सद्यो विनिर्मुक्तास्ते भवंतु महीतले ॥ २५ ॥ ढुंढस्य भाषितं श्रुत्वा लिंगेनोक्तं यशस्विनि ॥ ये च मां पूजयिष्यंति श्रद्धया परया पुनः॥ ते भविष्यंति सततं सदा पातकवर्जिताः ॥ २६ ॥ लप्स्यंति ते परान्कामान्भविष्यंति गणोत्तमाः ॥ पूज्याः सर्वेषु लोकेषु सर्वालंकारभूषिताः ॥२७॥ एवं लब्धवरो ढुंढः प्रांजलिः पुनरब्रवीत् ॥ मन्नाम्ना प्रथितं लिंगं संभूयाद्भुवने सदा ॥ २८ ॥ एवमस्त्विति लिंगेन प्रोक्तं तुष्टेन पार्वति ॥ तदाप्रभृति विख्यातो देवो ढुंढेश्वरः परः ॥ २९ ॥ यस्य दर्शनमात्रेण सदा सिद्धिर्भवेन्नृणाम् ॥ ३० ॥ भक्त्या ये पूजयिष्यंति देवं ढुंढेश्वरं परम् ॥ आजन्मप्रभवं पापं तेषां यास्यति तत्क्षणात् ॥३१॥ स एव सुकृती लोके स एव मम वल्लभः॥ यः पश्यति नरो भक्त्या लिंगं ढुंढेश्वरं परम् ॥ ३२ ॥ राजसूयशतेनेव यत्पुण्यं च भविष्यति ॥ ततो भविष्यत्यधिकं ढुंढेश्वरनिरीक्षणात्॥३३॥ मानसं वाचिकं वापि कायिकं गुह्यसंभवम् ॥ प्रकाशं वाऽप्रकाशं च प्रसंगादपि यत्कृतम् ॥ तत्सर्वं यास्यति क्षिप्रं ढुंढेश्वरस्य दर्शनात् ॥३४॥ इत्युक्तस्तु मया देवि स ढुंढो गणनायकः ॥ कृतो लिंगस्य माहात्म्याद्गतो लोके मदीयके ॥ रेजे च गणपैः सार्द्धं ममाभीष्टनरोऽभवत् ॥३५॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि मम लोके महीयते ॥३६॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये ढुंढेश्वरमाहात्म्यवर्णनंनाम तृतीयोऽध्यायः ॥३॥

॥ श्रीमहादेव उवाच ॥ ख्यातोऽवंत्यां चतुर्थोऽसौ देवो डमरुकेश्वरः॥ दृष्टे यस्मिञ्जगन्नाथे याति पापं च संक्षयम् ॥१॥ पुरा वैवस्वते कल्पे रुरुर्नाम महासुरः ॥ तस्य पुत्रो महाबाहुवज्रोनाम महाबलः ॥ बभूव स महाकायस्तीक्ष्णदंष्ट्रो भयंकरः ॥ २ ॥ तेन देवाः स्वाधिकाराच्चालितास्त्रिदशालयात् ॥ ३ ॥ ततो नीतं धनं तेषां ब्रह्माणं ते ततो ययुः ॥ ब्रह्मापि भयसंविग्नो बभूवाकुलितेंद्रियः ॥ ४ ॥ ज्ञात्वावध्यं सुरैः सार्धं सर्वैः सोऽथ महाबलः ॥ तेषु नष्टेषु ये विप्रा यज्वानोऽथ तपस्विनः ॥ ताञ्जघान स दुष्टात्मा ये चान्ये धर्मचारिणः ॥ ५ ॥ निःस्वाध्यायवषट्कारं तदासीद्भरणीतलम्॥ नष्टयज्ञोत्सवं देवि हाहाभूतमचेतनम् ॥ ६ ॥ ततः प्रव्यथिता देवास्तथा सर्वे महर्षयः ॥ समेत्यामंत्रयन्मंत्रं वधार्थं तस्य दुर्मतेः ॥ ७ ॥ ततः कायोऽभवत्सद्यः सर्वेषां पुरतस्तदा ॥ तेषां चिंतयतां देवि तेजःपुंजेन चावृतः ॥ ८ ॥ तस्मात्कृत्या समुत्पन्ना दिव्या कमललोचना ॥ द्योतयंती दिशः सर्वाः स्वतेजोभिः समंततः ॥ ९ ॥ सान्त्वयित्रिदशान्सर्वान्कस्मात्तृष्टा ह्रदं सुराः ॥ यत्कर्त्तव्यं मया कर्म तच्छीघ्रं संनियंत्र्यताम् ॥ १० ॥ ततस्तु त्रिदशाः सर्वे श्रुत्वा तस्याः शुभा गिरः ॥ आचख्युः सकलं तस्यै तदा वज्रस्य चेष्टितम् ॥ ११ ॥ श्रुत्वा जहास सा देवी साट्टहासं मुहुर्मुहुः ॥ तस्या हसंत्या निःसन्तुः कन्याः कमललोचनाः ॥ १२ ॥ पाशांकुशधरा रौद्रा ज्वालामालावृताननाः ॥ फेत्कारेण च संनादैश्चालयंत्यश्चराचरम् ॥ १३ ॥ गताः सर्वा महादेवि यत्र वज्रो महासुरः ॥ युद्धं तु तुमुलं जातं ताभिस्तस्य भयावहम् ॥ १४ ॥ शस्त्रास्त्रैर्बहुधा मुक्तैर्व्याप्तं चैव दिगंतरम् ॥ संनद्धाखिलसैन्यास्ते युयुधुः समरे भृशम् ॥ १५ ॥ ततः प्रवृत्ते युद्धं तया देव्या सुरद्विषाम् ॥ ततो मातृगणं क्रुद्धं महद्यन्तं महासुरान् ॥ पराङ्मुखं बलं दृष्ट्वा वज्रो मायामथासृजत् ॥ १६ ॥ तामसीनाम दुःसाध्यां यया मुह्यंति कन्यकाः ॥ १७ ॥ तमोभूते ततस्तस्मिन्सा देवी भयविह्वला ॥ ताभिः सार्द्धं समायाता महाकालवनोत्तमम् ॥ १८ ॥ कपालवान्हरो यत्र लिंगाकारेण संस्थितः ॥ ज्ञात्वा मातृगणं नष्टं ततो मायाप्रभावतः ॥ १९ ॥ वज्रोऽपि त्रिदशाञ्ज्ञात्वा देव्या सार्द्धमथोषितान् ॥ आजगाम तमुद्देशं स्वसैन्यपरिवारितः ॥ २० ॥ महाकालवने दिव्ये रथकोटिशतैर्वृतः॥ समंताच्च वनं देवि तत्क्रुद्धो वाक्यमब्रवीत् ॥२१॥ अद्य देवान्हनिष्यामि तया सार्कं सुदुष्टया ॥ कन्याभिः सह या नष्टा तमोमायाबलेन तु ॥ २२ ॥ एतस्मिन्नंतरे काले नारदो मुनिसत्तमः ॥ सोत्सुकस्तु समायातो मंदरे चारुकंदरे ॥ २३ ॥ कथयामास देवानां वज्रादेवपराभवम् ॥ २४ ॥ महाकालवने देव ताडिताखिदशाः प्रभो ॥ वज्रेण रुरुपुत्रेण तस्माद्याहि महेश्वर ॥ २५ ॥ नारदस्य वचः श्रुत्वा ततोऽहं परमेश्वरि ॥ मंदरादागतस्तूर्णं कृत्वा रूपं सुभैरवम् ॥ २६ ॥ सर्पैर्लसद्भिरत्युग्रभीषणैर्गणसंवृतः ॥ अग्रे दृष्टं महत्सैन्यं दानवानां भयावहम् ॥ २७ ॥ महाकालवनं रुद्धं समंतादसुरेण तु ॥ वज्रेण रुरुपुत्रेण दुःसहेन यशस्विनि ॥ २८ ॥ तदागत्य मया ताड्य रौद्रं डमरुकं तथा ॥ मोहितं सहसा सैन्यं वज्रस्यैव दुरात्मनः ॥ २९ ॥ डमरुकस्य नादेन ह्युत्थितं लिंगमुत्तमम् ॥ विदार्य वसुधां देवि ज्वालामालाकुलं तदा ॥ ३० ॥ तस्य लिंगस्य च तदा महाज्वाला विनिर्गता ॥ एकदेशाद्वरारोहे ब्रह्मांड्व्यापिनी तथा ॥ ३१ ॥ लिंगस्यान्यप्रदेशात्तु वायुः समभवन्महान् ॥ ३२ ॥ तेजोज्वालासमूहेन वातेन प्रेरितेन च ॥ सह चक्रेण तत्सैन्यं दग्धं भस्मत्वमागतम् ॥ ३३ ॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ नमश्चक्रुर्हते तस्मिन्रुरुपुत्रे महाबले ॥ ३४ ॥ अस्य देवस्य माहात्म्याद्दग्धो वज्रो महाबलः ॥ ससैन्योभूत्ततस्तस्मादेष डमरुकेश्वरः ॥ ख्यातिं यास्यति लोकेस्मिन्सर्वकामफलप्रदः ॥ ३५ ॥ डमरुकरव तु नादेन जातो यस्मान्महीतले ॥ अतः पूज्यवरो देवो भविष्यति न संशयः ॥ ३६ ॥ दृष्ट्वा ये पूजयिष्यंति देवं डमरुकेश्वरम् ॥ ते सर्वे दुःखनिर्मुक्ता भविष्यंति गतज्वराः ॥ ३७ ॥ चांद्रायणानां विधिवच्छतानामथ यत्फलम् ॥ तत्फलं समवाप्नोति डमरुकेश्वरपूजनात् ॥ ३८ ॥ अस्मिन्स्थाने स्थितं लिंगं भक्त्या डमरुकेश्वरम् ॥ प्रसंगादपि पश्यंति ह्यपि पापपरा नराः ॥ ३९ ॥ तेऽप्यवश्यं तु यास्यंति रुद्रलोकं सनातनम् ॥ भक्ताः स्तोष्यंति ये लिंगं ख्यातं डमरुकेश्वरम् ॥४०॥ मानसैः पातकैर्मुक्ता यास्यंति परमं पदम् ॥ अश्वमेधसहस्रं तु वाजपेयशतं भवेत् ॥ गोसहस्रफलं चात्र दृष्ट्वा प्राप्स्यंति मानवाः ॥ ४१ ॥ यो याति संगरे धीरो दृष्ट्वा डमरुकेश्वरम् ॥ जयेद्रिपूनथांते स रुद्रलोके महीयते ॥ ४२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्तुतस्तु कीर्तितश्चैव सर्वाभीष्टफलप्रदः ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये डमरुकेश्वरमाहात्म्यवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ अनादिकल्पेश्वरं देवं पंचमं विद्धि पार्वति ॥ सर्वपापहरं नित्यमनादिर्गीयते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सदा ॥ १ ॥ कल्पस्यादौ पुरा देवि लिंगमेतद्विनिर्गतम् ॥ यदा नाग्निर्न चादित्यो न भूमिर्न दिशो न खम् ॥ २ ॥ न वायुर्न जलं चैव न द्यौर्नेन्दुर्ग्रहा न च ॥ न देवासुरगंधर्वा न पिशाचा न राक्षसाः ॥ ३ ॥ अतो लिंगात्समुद्भूतं जगत्स्थावरजंगमम् ॥ कालेन च लयं याति लिंगेऽस्मिन्पर्वतात्मजे ॥ ४ ॥ अस्माल्लिंगात्समुद्भूता वंशा देवर्षिपैतृकाः ॥ मन्वंतराणि वंशानि वंश्यानुचरितं च यत् ॥ ५ ॥ यावत्यः सृष्टयश्चैव यावंतः प्रलयास्तथा ॥ समुद्राः पर्वताश्चैव निम्नगाः काननानि च ॥ ६ ॥ भूर्लोकाद्याश्च ये लोकाः पातालाः सप्त ये स्मृताः ॥ गतिस्तथार्कसोमादिग्रहर्क्षज्योतिषामपि ॥ ७ ॥ दृश्यादृश्यं च तत्सर्वमतो लिंगाद्भराानने ॥ अनादिकारणं यत्तदव्यक्ताख्यं महर्षयः ॥ यदाहुः पुरुषं सूक्ष्मं नित्यं सदसदात्मकम् ॥ ८ ॥ ध्रुवमक्षयमजरममेयं नान्यसंश्रयम् ॥ गंधरूपरसैर्हीनं शब्दस्पर्शविवर्जितम् ॥ ९ ॥ अनाद्यंतं जगद्योनिं त्रिगुणप्रभवाव्ययम् ॥ असादृश्यमविज्ञेयं लिंगं प्रोक्तं महर्षिभिः ॥ १० ॥ प्रलयस्यांते तेनेदं दिव्यमासीदशेषतः ॥ ११ ॥ अहमुच्चैः प्रबुद्धस्तु जगदादिरनादिमान् ॥ सर्वहेतुरचिंत्यात्मा परः कोऽप्यपरक्रियः ॥ १२ ॥ प्रकृतिं पुरुषं चैव प्रदश्यांशु जगत्पतिः ॥ क्षोभयामास योगेन परेण परमेश्वरः ॥ १३ ॥ यथा संनिधिमात्रेण गंधः क्षोभाय जायते ॥ मनसो नोपकर्तृत्वात्तथासौ परमेश्वरः ॥ अनादिः कथ्यते देवो जगत्कारणतत्परम् ॥१४॥ प्रधानं क्षोभ्यमाणं तु तेन लिंगेन पार्वति ॥ जायते भुवनाधारो ब्रह्मांड इति विश्रुतः ॥ १५ ॥ यस्मिन्ब्रह्मांडे जगत्सर्वं सदेवासुरमानुषम् ॥ उत्पन्नं च विलीनं च यत्स्यान्नोऽपि न लभ्यते ॥१६॥ स एव क्षोभकः पूर्वं स क्षोभ्यः पृथिवीपृथिः ॥ स संकोचविकासाभ्यां प्रधानत्वे व्यवस्थितः ॥ १७ ॥ उत्पन्नः स जगन्नाथो निर्गुणोऽपि रजोगुणः ॥ भुंजन्प्रवर्तते सर्गं ब्रह्मत्वं समुपागतः ॥ १८ ॥ ब्रह्मत्वे सृजते लोकांस्ततः सत्त्वातिरेकतः ॥ विष्णुत्वमेत्य धर्मेण करोति परिपालनम् ॥ १९ ॥ ततस्तमोगुणोद्रिक्तो रुद्रत्वेनाखिलं जगत् ॥ उपसंहृत्य वै शेते त्रैलोक्यं त्रिगुणोऽगुणः ॥ २० ॥ यथा प्राग्वापकः क्षेत्री पालको लावकस्तथा ॥ स संज्ञा याति तद्वच्च ब्रह्मविष्णुत्वरुद्रताः ॥ २१ ॥ ब्रह्मत्वे सृजते लोकान्रुद्रत्वे संहरत्यपि ॥ विष्णुत्वे पाति तान्सर्वांस्तिस्रोऽवस्थाः स्मृताः सदा ॥ २२ ॥ रजो ब्रह्मा तमो रुद्रः सत्त्वं विष्णुर्जगत्पतिः ॥ एत एव त्रयो वेदा एत एव त्रयो नराः ॥ २३ ॥ कल्पे कल्पे ह्यनादिस्तु गीयते त्रिदशैः सदा ॥ पितृभिश्च गणैः सिद्धैरतोऽनादिकल्पेश्वरः ॥ २४ ॥ नाम ब्राह्मं विशालाक्षि महाकालवनं सदा ॥ यदा जातो विवादस्तु ब्रह्मणः केशवस्य च ॥ २५ ॥ अहं ज्यायानहं ज्यायान्कल्पादौ सृष्टिकारणात् ॥ दिव्या समुत्थिता वाणी निरालंबा तदांबरात् ॥ ॥ २६ ॥ महाकालवने लिंगं कल्पेश्वरेति संज्ञकम् ॥ तस्यादिमथवांतं च यः पश्यति स च प्रभुः ॥ भविष्यति न संदेहो न वादः क्रियतामिति ॥ २७ ॥ ततो देवि गतो ब्रह्मा ऊर्द्धलोकमनंतकम् ॥ अधोलोकं गतो विष्णुस्तेन वाक्येन सत्वरम् ॥ २८ ॥ नादिर्दृष्टो न चांतश्च ब्रह्मणा केशवेन तु ॥ तदा तौ विस्मयापन्नौ तुष्टुवाते परस्परम् ॥ २९ ॥ वेदोक्तसूक्तैर्विविधैरभिनंद्य पुरःस्थितौ ॥ नादिरस्ति न चांतश्च न च कल्पोऽत्र दृश्यते ॥ ३० ॥ तस्मादनादिकल्पोऽयमद्यप्रभृति भूतले ॥ ख्यातिं यास्यति नाम्ना च महाकालवनोत्तमे ॥ ३१ ॥ पञ्चपातकसंयुक्तो यो मर्त्यो दुष्टमानसः ॥ सोऽपि गच्छेच्छिवं दृष्ट्वानादिकल्पेश्वरं शिवम् ॥ ३२ ॥ शिवमस्तु सदा तेषां येषां त्वं दर्शनं गतः ॥ ते धन्या मानुषे लोके ये त्वां शरणमागताः ॥ ३३ ॥ सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः ॥ तत्सर्वमधिकं देव लभ्यते तव दर्शनात् ॥ ३४ ॥ तावत्पतंति संसारे सुखदुःखसमाकुले ॥ तावन्न दृश्यते देव संसारार्णवतारकः ॥ ३५ ॥ यदा पापक्षयः पुंसां तदा त्वद्दर्शनं भवेत् ॥ ३६ ॥ ब्रह्महा वा सुरापो वा स्तेयी च गुरुतल्पगः ॥ तत्संसर्गी नरो यस्तु महाकिल्बिषकारकः ॥ सोऽपि याति परं स्थानं पुनरावृत्तिवर्जितम् ॥ ३७ ॥ यत्फलं चाश्वमेधेन राजसूयेन यत्फलम् ॥ तत्फलं समवाप्नोति तव देव समर्चनात् ॥ ३८ ॥ ते नराः पशवो लोके तेषां जन्म निरर्थकम् ॥ यैर्न दृष्टो महादेवोऽनादिकल्पेश्वरः शिवः ॥ ३९ ॥ इत्युक्ता केशवो देवो ब्रह्मा चैव वरानने ॥ वामे दक्षिणभागे च तस्य लिंगस्य संस्थितौ ॥ ४० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ यस्य श्रवणमात्रेण लभ्यते परमं पदम् ॥ ४१ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे चतुरशीतिर्लिंगमाहात्म्येऽनादिकल्पेश्वरमाहात्म्यवर्णनंनाम पंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ स्वर्णज्वालेश्वरं पष्ठं विद्धि चात्र यशस्विनि ॥ यस्य दर्शनमात्रेण धनवानिह जायते ॥ १ ॥ पुरा सार्द्धं त्वया देवि क्रीडतो मम मंदिरे ॥ जातं वर्षशतं दिव्यं सुरतैकरसस्य च ॥ २ ॥ देवैः सर्वैस्ततो वह्निः प्रेरितो मम संनिधौ ॥ ततो वह्निः समायातस्त्रैलोक्यार्थे यशस्विनि ॥ ॥ ३ ॥ ततो वह्निमुखे क्षिप्तं वीर्यं त्वं क्रीडता मया ॥ दह्यमानस्तदा तेन गंगां वह्निर्जगाम ह ॥ ४ ॥ तत्र गत्वा प्रचिक्षेप वीर्यमग्निः सुदुर्द्धरम् ॥ तथापि दह्यते वह्निर्वीर्यशेषेण पार्वति ॥ ५ ॥ जातं रम्यं ततो दिव्यं वीर्यशेषेण कांचनम् ॥ ज्वलंतं चातितापेन दुःसहं दुर्द्धरं प्रिये ॥ ६ ॥ अग्नेरपत्यं प्रथमं दृष्ट्वोत्पन्नं तु पार्वति ॥ लोभाभिभूता असुराः सुरा गन्धर्वकिन्नराः ॥ ॥ ७ ॥ यक्षाः साध्याः पिशाचाश्च मनुष्या राक्षसाः खगाः ॥ अभ्यधावन्सुसंरब्धास्ते सुवर्णजिघृक्षवः ॥ ८ ॥ सुवर्णार्थे महान्नादो ममेदमिति जल्पताम् ॥ अज्ञानात्संगरश्चैव संजातः प्राणहारकः ॥ ९ ॥ अथावरणमुख्यानि नानाप्रहरणानि च ॥ प्रगृह्याभ्यनदन्नादैर्देवैः सार्द्धं यशस्विनि ॥ १० ॥ असुरा असुरैः सार्द्धं मनुष्या मानुषैः सह ॥ गन्धर्वाः सह गन्धर्वैः किंनरैः सह किंनराः ॥ ॥ ११ ॥ भूतैः सार्द्धं च भूतानि राक्षसैः सह राक्षसाः ॥ वेतालैः सह वेताला युद्धं चक्रुः सुदारुणम् ॥ १२ ॥ पुत्रस्तु पितरं द्वेष्टि पिता पुत्रं तथैव च ॥ हंति भार्यां स्वभर्त्तारं भर्ता च स्त्रियं तथा ॥ १३ ॥ मातरं स्वसुतो हंति माता पुत्रं हिनस्ति च ॥ ततो वैरविनिचयः संजातः स्वर्णकारणात् ॥ १४ ॥ सुराणामसुराणां च सर्वं घोरतरं महत् ॥ प्रासाश्च विपुलास्तीक्ष्णा न्यपतंत सहस्रशः ॥ तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ १५ ॥ सुवर्णार्थे महादेवि ववृतो रुधिरं बहु ॥ १६ ॥ असिशक्तिगदाऋष्टयो निपेतुर्धरणीतले ॥ छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः ॥ १७ ॥ रुधिरेणावलिप्तांगा निहताश्च परस्परम् ॥ अद्रीणामिव कूटानि धातुयुक्तानि शेरते ॥ १८ ॥ हाहाकारः समभवद्भयकृच्च सहस्रशः ॥ अन्योन्यं छिंदतां शस्त्रैः सुवर्णस्य च कारणात् ॥ १९ ॥ परिवेरायसैः पाशैर्वज्रकल्पैश्च मुष्टिभिः ॥ निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ २० ॥ छिंधिभिंधि प्रधाव त्वं पातयाधिसरेति च ॥ अश्रूयन्त महाघोराः शब्दास्तत्र समंततः ॥ २१ ॥ एवं तुमुले युद्धे वर्त्तमाने महाभये ॥ कंपिता धरणी देवि देवास्त्रस्ताः सवासवाः ॥ २२ ॥ क्षुभ्यंति स्म समुद्राश्च चेलुश्च धरणीधराः ॥ तस्यार्थे पीडितं सर्वं सदेवासुरमानुषम् ॥ २३ ॥ ऋषयो वालखिल्याद्या देवाः शक्रपुरोगमाः ॥ बृहस्पतिं पुरस्कृत्य ब्रह्मलोकं गताः स्त्रियः ॥ २४ ॥ सोऽब्रवामा कथयामासुर्जर्जरीकृतमस्तकाः ॥ वृत्तांतं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ २५ ॥ तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ॥ चिंतयित्वा च तैः सार्द्धमाजगाम ममांतिकम् ॥ २६ ॥ मया प्रयास्त ते सर्वे केनैते जर्जरीकृताः ॥ शस्त्रैः पीडिताः केन कस्माद्वो भयमागतम् ॥ २७ ॥

CC-0. Prof. Satya Vrat Shastri Collection. New Delhi. Digitized by eGangotri Archive

कश्चासौ दानवो दुष्टो येन वै पीडिता भृशम् ॥ तत्सर्वं कथितं देवि ममाग्रे भयविह्वलैः ॥ २८ ॥ ते मामूचुस्तदा देवा ब्रह्माद्या भयकारणम् ॥
॥ २९ ॥ लोभात्सर्वे विनष्टाः स्म सुवर्णस्य च कारणात् ॥ पीडितं च जगत्सर्वं सदेवासुरमानुषम् ॥ ३० ॥ इति तेषां वचः श्रुत्वा मया ज्ञातं
वरानने ॥ तस्यार्थे कलहो घोरः संजातो हि परस्परम् ॥ ३१ ॥ लोकत्रयविनाशश्च सहसा येन वै कृतः ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघात
कम् ॥ ३२ ॥ ब्रह्महा वह्निपुत्रस्तु यमुद्दिश्य मृतो जनः ॥ शरीरं शवलं चैव सविकारं भविष्यति ॥ ३३ ॥ यातनां हि भविष्यंति तस्य देहे न
संशयः ॥ लक्ष्यते दुःखमतुलं छेददाहादिदर्पणम् ॥ ३४ ॥ एतस्मिन्नंतरे वह्निर्दृष्ट्वा पुत्रस्य चेष्टितम् ॥ ज्ञात्वा कोपं मदीयं तु भीतो वै पुत्रकार
णात् ॥ ३५ ॥ आजगाम सुवर्णेन सार्द्धं देवि ममांतिकम् ॥ प्रसादितोऽहं पुत्रार्थे वह्निना हि वरानने ॥ ३६ ॥ रक्षणीयस्त्वया देव पुत्रोयं तव
शंकर ॥ भाण्डागारे स्वकार्ये तु क्रियतां परमेश्वर ॥ ३७ ॥ त्वयि तुष्टे महादेव प्राप्योऽयं नात्र संशयः ॥ इच्छया दीयतां देवि यस्य कस्य जनस्य
च ॥ ३८ ॥ इति तस्य वचः श्रुत्वा पितृदेवमुखस्य च ॥ तथेति च प्रतिज्ञातं मया लोभाद्यशस्विनि ॥ ३९ ॥ स्नेहान्मया वह्निपुत्र उत्संगे च
कृतस्तदा ॥ स्नेहार्द्रे चुंबितो मूर्ध्नि परिष्वक्तः पुनःपुनः ॥ ४० ॥ ददामि ते महाभाग वरं वरय शोभनम् ॥ परितुष्टोऽस्मि वै कामं यथेष्टं
समवाप्नुहि ॥ ४१ ॥ अहमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि ॥ ममाभीष्टकरं स्थानं विद्यते पृथिवीतले ॥ ४२ ॥ अक्षयं प्रलये पुत्र महाकालवनं
शुभम् ॥ तत्रैव विद्यते लिंगं कर्कोटकस्य दक्षिणे ॥ ४३ ॥ महापापहरं पुत्र दर्शनादीप्सितप्रदम् ॥ तस्य दर्शनमात्रेण कृतकृत्यो भविष्यसि ॥ ४४ ॥
पुण्यश्चैव पवित्रेण दुर्लभश्च भविष्यति ॥ अकुलीनः कुलीनस्तु समलो निर्मलो नरः ॥ ४५ ॥ विरूपो रूपवांश्चैव त्वत्प्रसादाद्भविष्यति ॥ दानानि
परिपूर्णानि व्रतानि नियमास्तथा ॥ ४६ ॥ यज्ञाश्चैवापवासाश्च तीर्थं पिंडादिकं त्वया ॥ सुसंपूर्णा भविष्यंति तव दानेन सुव्रत ॥ ४७ ॥ सर्वेषां
चैव रत्नानामाधिपत्यं करिष्यसि ॥ प्रियाभीष्टो हि देवानां लोकानां च भविष्यसि ॥४८॥ इत्युक्तोऽसौ महादेवि दिव्यरूपो वरानने ॥ ज्वालामाला
वृतः पुण्यो निर्मलो हि बभूव ह ॥४९॥ लिंगेनोक्तः सुवर्णस्तु दिष्ट्याद्दिष्ट्येति कांचनम् ॥ अद्यप्रभृति नाम्ना वै ख्यातिं यास्यसि भूतले ॥ ५० ॥
स्थातव्यं मत्समीपे तु वह्निपुत्र त्वया सदा ॥ अक्षया भविता कीर्त्तिस्त्वदीया भुवनत्रये ॥ ५१ ॥ इत्युक्तो देवि लिंगेन वह्निपुत्रोऽतिनिर्मलः ॥
ज्वालावृततनुर्जातः सूर्यकोटिसमप्रभः ॥ ५२ ॥ दीप्तिर्लब्धा सुवर्णेन ज्वालामालाकुला तदा ॥ अतो देवि सुविख्यातः स्वर्णज्वालेश्वरः शिवः
॥ ५३ ॥ यस्तमर्चयते भक्त्या स्वर्णज्वालेश्वरं शिवम् ॥ तस्य संजायते देवि विजयो राज्यमूर्जितम् ॥ ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनंतकम् ॥
॥ ५४ ॥ ज्ञानतोऽज्ञानतो वापि यत्पापं कुरुते नरः ॥ तत्क्षालयति देहोत्थं दर्शनान्नात्र संशयः ॥ ५५ ॥ यत्फलं पिंडदानेन गयायां लभते
नरः ॥ तत्फलं द्विगुणं प्रोक्तं पूजया नात्र संशयः ॥ ५६ ॥ गायत्र्याः शतसाहस्रैः सम्यग्जप्तैश्च यत्फलम्॥ तत्फलं समवाप्नोति स्वर्णज्वालेश्वरस्तुतेः
॥ ५७ ॥ यत्पुण्यं सर्वदानेन दत्तेन विधिपूर्वकम् ॥ तत्फलं समवाप्नोति कीर्त्तनान्नात्र संशयः ॥ ५८ ॥ पूजयंति चतुर्दश्यां स्वर्णज्वालेश्वरं तु ये ॥
पूज्यंते ते सदा लक्ष्म्या पूरयंत्या मनोरथान् ॥ ५९ ॥ रक्षितं त्रिदशैर्देवि गणैर्नानाविधैस्तथा ॥ लिंगं कश्चिन्न जानाति मम मायाविमोहितः
॥ ६० ॥ मम प्रसादात्तदेवि दृश्यते लिंगमुत्तमम् ॥ एतत्ते कथितं सम्यगन्यच्छृणु वरानने ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्वर्णज्वालेश्वरमाहात्म्यवर्णनंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ त्रिवि
ष्टपेश्वरं देवि सप्तमं पर्वतात्मजे ॥ यस्य दर्शनमात्रेण लभ्यते त्रिविष्टपम् ॥ १ ॥ पुरा वाराहकल्पे तु देवर्षिर्नारदोऽमलः ॥ त्रिविष्टपं गतो देवि द्रष्टु
कामः शतक्रतुम् ॥ २ ॥ तत्रोद्यानवने रम्ये कल्पवृक्षैर्विराजिते ॥ सर्वत्र कुसुमामोदसुखस्पर्शानिलाकुले ॥ ३ ॥ वीणावेणुरवैर्घुष्टे देवगंधर्वसेविते ॥
वज्रेंद्रनीलवैदूर्यचंद्रकांतादिदीपिते ॥ ४ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणे शुभे ॥ ददर्श तत्र देवेशमुपविष्टं शतक्रतुम् ॥ स्तूयमानं मुदा देवैः सि
द्धचारणकिन्नरैः ॥ ५ ॥ पृष्टस्तु नारदो देवि वासवेन महामुनिः ॥ कथयामास माहात्म्यं महाकालवनस्य च ॥ ६ ॥ महाकालवनं रम्यं सदानंदकरं
शुभम् ॥ सेव्यं पुण्यं पवित्रं च तीर्थानामुत्तमोत्तमम् ॥ ७ ॥ पुण्यं पश्यंति ये लोका महाकालवनं शुभम् ॥ ब्रह्महत्यादिकं पापं तेषां नश्यति निश्चि
तम् ॥ ८ ॥ स्वयं तिष्ठति देवोऽत्र सर्वभूतगणैर्वृतः ॥ तस्मात्तत्तीर्थमुख्यानां प्रवरं कथ्यते बुधैः ॥ ९ ॥ पृथिव्यां नैमिषं पुण्यं सर्वपापप्रणाशनम् ॥
तस्माद्दशगुणं प्रोक्तं पुष्करं तीर्थमुत्तमम् ॥ १० ॥ ततो दशगुणं प्रोक्तं प्रयागं सर्वकामिकम् ॥ तस्माद्दशगुणं प्रोक्तं विख्यातममरेश्वरम् ॥ ११ ॥
प्राची सरस्वती पुण्या तस्माद्दशगुणा स्मृता ॥ तस्माद्दशगुणं प्रोक्तं गयाकूपं विशिष्यते ॥ १२ ॥ तस्माद्दशगुणं देवि कुरुक्षेत्रं विशिष्यते ॥ कुरुक्षे
त्राद्दशगुणा पुण्या वाराणसी तथा ॥ १३ ॥ तस्या दशगुणं श्रेष्ठं महाकालं विशिष्यते ॥ महाकालवनं शक्र किल त्रैलोक्यभूषणम् ॥ १४ ॥ षष्टि
कोटिसहस्राणि षष्टिकोटिशतानि च ॥ लिंगानि तत्र विद्यंते मुक्तिमुक्तिकराणि च ॥ १५ ॥ शक्तयो नव कोट्यस्तु तस्मिन्क्षेत्रे वसंति हि ॥ १६ ॥
कृमिकीटपतंगाश्च मृता यत्र ततः क्रतौ ॥ यांति दिव्यैर्विमानैश्च रुद्रलोकं सनातनम् ॥ माहात्म्यमद्भुतं श्रुत्वा नारदात्सुरसत्तमः ॥ १७ ॥ सर्वदेव
गणैः सार्द्धमाजगाम त्वरान्वितः ॥ वासवः श्रीमहाकालवनं हर्षसमन्वितः ॥ १८ ॥ दृष्ट्वा तथाविधं रम्यं महाकालवनं शुभम् ॥ त्रिविष्टपादप्यधि
कं प्रलयेऽप्यक्षयं स्मृतम् ॥१९॥ विचित्राणि च हर्म्याणि कांचनानि शुभानि च ॥ प्रासादाः शतशो भौममणिविद्रुमभूषिताः ॥ २० ॥ वज्रेंद्रनीलर
चिताः शुद्धस्फटिकसंनिभाः ॥ तोरणानि विचित्राणि माणिक्यरचितानि च ॥ दृष्ट्वा तथाविधं रम्यं महाकालवनोत्तमम् ॥ २१ ॥ नारदं प्रशशं
सुस्ते सर्वे देवा मुदान्विताः ॥ देवर्षीणां महाप्राज्ञो येनेयं कथिता कथा ॥२२॥ न कैलासं गमिष्यामो न च मेरुं तथाविधम् ॥ न मंदरं गमिष्यामो
न यास्यामस्त्रिविष्टपम् ॥ २३ ॥ एषामरावती श्रेष्ठा ह्येषा भोगवती शुभा ॥ एषा पैतामहो लोको विष्णुलोकस्तथैव च ॥ २४ ॥ एतस्मिन्नंतरे
देवि शून्यं जातं त्रिविष्टपम् ॥ ज्ञात्वा शून्यमथात्मानं चिंतयित्वा पुनःपुनः ॥ गमनाय मतिं चक्रे कृत्वा देहमथात्मनः ॥ २५ ॥ त्यक्त्वा मां
त्रिदशाः सर्वे महाकालवनं गताः॥अहं तत्रैव यास्यामि यत्र ते त्रिदशा गताः ॥२६॥ इत्युक्त्वा तत्क्षणं प्राप्तो महाकालवनोत्तमे ॥ कौतुकात्सोऽथ वै
श्रेष्ठं तीर्थं तत्रापि भूतले ॥ ददर्श रमणीयं तैर्देवैः परिवृतं तदा ॥ २७ ॥ एतस्मिन्नेव काले तु वागुवाचाशरीरिणी ॥ भोभोस्त्रिविष्टपात्रैव स्वनाम्ना
स्थापयस्व माम् ॥ कर्कोटकस्य पूर्वे तु महामायाश्च दक्षिणे ॥२८॥ इत्युक्तो देवदेवेन हृष्टस्तद्गतचेतसा ॥ स्वनाम्ना स्थापयामास देवं त्रिविष्टपेश्वरम्
॥ २९ ॥ पूजयित्वा शुभैः पुष्पैरुवाचेदं वरानने ॥ अद्यप्रभृति भूलोको नाम्ना ख्यातिं गमिष्यति ॥ ३० ॥ ये त्वां पश्यंति यत्नेन अपि दुष्कृत
कारिणः ॥ ते यास्यंति परं स्थानं दिव्यालंकारभूषिताः ॥ ३१ ॥ अष्टम्यां च चतुर्दश्यां संक्रांतौ वा विशेषतः ॥ यः करिष्यति पूजां च भक्तियुक्तो
हि मानवः ॥ ३२ ॥ विमानवरमास्थाय कामगं रत्नभूषितम् ॥ उदितादित्यसंकाशं मत्समीपे वसिष्यति ॥ ३३ ॥ किं दानैर्विविधैर्दत्तैः किं
यज्ञैर्विविधैः कृतैः ॥ ते प्राप्स्यंति फलं सर्वं ये त्वां द्रक्ष्यंति भक्तितः ॥ ३४ ॥ यंयं काममभिध्याय पूजयिष्यंति मानवाः ॥ तत्तन्मनोरथप्राप्तिर्भ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विष्यति न संशयः ॥ ३५ ॥ त्रिदशैश्च पुनः प्रोक्तं दृष्ट्वा मल्लिंगमुत्तमम् ॥ त्रिविष्टपेन धन्येन स्थापितं देवमीश्वरम् ॥ ३६ ॥ पूजयिष्यंति ये धन्या देवं त्रिविष्टपेश्वरम् ॥ तेषां वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥ ३७ ॥ इत्युक्त्वा पूजयामास भूयो लिंगं त्रिविष्टपम् ॥ सार्द्धं त्रिविष्टपेनैव पुनः स्थानं स्वकं गतः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ श्रवणात्कीर्त्तनाद्वापि स्वर्गलोकोऽक्षयो भवेत् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये त्रिविष्टपेश्वरमाहात्म्यवर्णनंनाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ कपालेश्वरसंज्ञं च ह्यष्टमं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण ब्रह्महत्या प्रणश्यति ॥ १ ॥ पुरा वैवस्वते कल्पे त्रेताकाले समागते ॥ महाकालवने दिव्ये यज्ञे पैतामहे प्रिये ॥ २ ॥ उपविष्टेषु विप्रेषु हूयमाने हुताशने ॥ वपं कापालिकं कृत्वा गतोऽहं तत्र संसदि ॥ ३ ॥ जीर्णकंथावृतो देवि मुंडः खट्वांगधारकः ॥ चिताभस्मविलिप्तांगो विकृतो विकृताननः ॥ कपालं च करे कृत्वा कपालकृतभूषणः ॥ ४ ॥ ब्राह्मणाश्च ततः क्रुद्धा दृष्ट्वा मां जाल्मरूपिणम् ॥ कपालधारिणं सर्वे धिक्कुर्वंश्च जगर्हिरे ॥ ५ ॥ असत्कृत्यापपापेति गच्छगच्छ विडंबिताः ॥ कथं च होमः क्रियते ग्रामे कापालिके पुरः ॥ ६ ॥ अकपालानि शौचानि इति वेदेषु गीयते ॥ यज्ञवेदिर्न तेर्हा तु मनुष्यास्थि धरस्य वै ॥ ७ ॥ मया प्रोक्तास्तु ते विप्राः शृयतां द्विजसत्तमाः ॥ यूयं कारुणिकाः सर्वे परदुःखेन दुःखिताः ॥ ८ ॥ कर्त्तव्या च दया सद्भिः सर्वदा सर्वदेहिनाम् ॥ सर्वेषामेव जंतूनां मित्रं ब्राह्मण उच्यते ॥ ९ ॥ अहं कापालिको विप्रो भस्मभूषितविग्रहः ॥ कापालव्रतमास्थाय चरामि पृथिवीतले ॥ १० ॥ आराधयामि सततं महादेवं जगत्पतिम् ॥ ब्रह्महत्याविनाशाय व्रतं द्वादशवार्षिकम् ॥ ११ ॥ अघघ्नं विश्रुतं लोके भारघ्नं हि मया द्विजाः ॥ प्रायश्चित्तनिमित्तं तु शुद्धो यास्यामि सद्गतिम् ॥ १२ ॥ मदीयं वचनं श्रुत्वा तेः प्रोक्तं द्विजसत्तमैः ॥ अतीव पापिष्ठतरो यो ह्येवं भाषसेऽधम ॥ १३ ॥ कपालेभूषितो निंद्यो विशेषेण तु विग्रहः ॥ नाकारितो महादेवो दक्षयज्ञमहोत्सवे ॥ १४ ॥ यस्मिन्यज्ञे समायाता आदित्या वसवस्तथा ॥ विश्वेदेवाश्च मरुतो गंधर्वाः किंनरास्तथा ॥ १५ ॥ ब्रह्मा विष्णुः सहस्राक्षो वरुणो वायुरेव च ॥ धनदः सागरा नद्यः सरांसि सकलानि च ॥ १६ ॥ सुपर्णा गिरयो नागाः सर्वे चाकारिताः क्रतौ ॥ सानुगास्ते सभार्याश्च ब्राह्मणा वेदपारगाः ॥ १७ ॥ ब्रह्मर्षयो महाभागास्तथा देवर्षयोऽमलाः ॥ एवमुक्त्वा महादेवं मानुपास्थिविभूषितम् ॥ १८ ॥ अपवित्रमिति ज्ञात्वा कथं त्वं वक्तुमर्हसि ॥ प्रवेशो दीयतां मह्यं विशेषेणासि ब्रह्महा ॥ १९ ॥ इत्युक्तोऽहं यदा विप्रैर्मया प्रोक्तं वचस्तदा ॥ प्रतीक्ष्यतां मुहूर्तं तु भुक्त्वा यास्याम्यहं पुनः ॥ २० ॥ इत्युक्ते वचने देवि ताडितोऽहं भृशं तदा ॥ लोष्टलगुडकैः पादैर्मुष्टिभिश्च पुनःपुनः ॥ २१ ॥ अथ प्रहस्य तत्क्षिप्त्वा तां वेदिं दर्भसंस्तृताम् ॥ कपालदीपवन्नष्टो न ज्ञातोऽहं द्विजोत्तमैः ॥ २२ ॥ मयि नष्टे कपालं तत्क्षिप्तं मंडपबाह्यतः ॥ अथान्यत्तत्र संजातं तादृग्रूपं यशस्वि नि ॥ २३ ॥ एवं शतसहस्राणि प्रयुतान्यर्बुदानि च ॥ तत्र क्षिप्तानि जातानि ततस्ते विस्मयान्विताः ॥ २४ ॥ अथाहुर्ज्ञानिनः सर्वे नेदमन्यस्य चेष्टितम् ॥ ऋते देवान्महादेवाद्गंगाचंद्रार्द्धशेखरात् ॥ २५ ॥ ततोऽहं विविधैः स्तोत्रैः स्तुतो विप्रैः पृथक्पृथक् ॥ होमं चक्रुश्च ते वह्नौ मंत्रैश्च शतरुद्रियैः ॥ २६ ॥ अहं तुष्टस्तदा देवि द्विजानामनुकंपया ॥ ब्रियतां ब्राह्मणाः सर्वे वरं यन्मनसेप्सितम् ॥ २७ ॥ तदा ते ब्राह्मणाः प्रोचुर्यदज्ञानाद्वधस्तव ॥ कृतस्तेन कृतास्माभिर्ब्रह्महत्या जगत्प्रभो ॥ २८ ॥ ब्रह्महत्याविनाशाय प्रसादं कुरु नः प्रभो ॥ वरयामो वरं ह्येनं नान्यं वरमभीप्सितम् ॥ २९ ॥ द्विजानां च तदा तेषामग्रे कथितवानिदम् ॥ यत्र राशिः कपालानां भवद्भिर्विहितो भुवि ॥ ३० ॥ अनादिलिंगं तत्रासीच्छत्रं कालविपर्यये ॥ पश्यंतु विप्रास्तल्लिंगं ब्रह्महत्याविमोचनम् ॥ ३१ ॥ कृता मयापि विप्रेंद्रा ब्रह्महत्या स्वयं पुरा ॥ छिंदता ब्रह्मणः शीर्षं पञ्चमं तेजसोत्कटम् ॥ ३२ ॥ ब्रह्महत्या ततो जाता ममार्तीव सुदुःसहा ॥ कपालं च करे लग्नं तथा चातीव दुःसहम् ॥ ३३ ॥ दह्यमानस्ततश्चाहं व्याप्तो वै ब्रह्महत्यया ॥ नाशाय सत्वरं तस्याः स्वार्थयात्रामहं गतः ॥ ३४ ॥ गतः सर्वेषु तीर्थेषु नैव मुक्तस्तु हत्यया ॥ ततो दुःखी सुसंतप्तो नैव लेभे सुखं क्वचित् ॥ ३५ ॥ एतस्मिन्नंतरे देवी वागुवाचाशरीरिणी ॥ गच्छावन्तीं स्वयं नाथ किमर्थं खिद्यते वृथा ॥ ३६ ॥ महाकालवनं पुण्यं त्वया नाथ विनिर्मितम् ॥ कपालकरसंस्थानं रुद्रमद्भुतदर्शनम् ॥ न जानासि कथं क्षेत्रं महापातकनाशनम् ॥ ३७ ॥ तस्मिन्क्षेत्रे महल्लिंगं गजरूपस्य संनिधौ ॥ विद्यते पश्य देवेश ब्रह्महत्या प्रणश्यति ॥ ३८ ॥ ततोऽहमागतस्तूर्णं वाक्यं श्रुत्वा तदोत्तमम् ॥ महल्लिंगं मया दृष्टं कपालकरसंस्थितम् ॥ ३९ ॥ मम हस्तात्तदा विप्राः कपालमपतद्भुवि ॥ कपालेश्वरदेवोऽयमिति नाम मया कृतम् ॥ ४० ॥ पश्यंतु विप्रास्ते देवं कपालेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण निष्कलंका भविष्यथ ॥ ४१ ॥ लिंगं दृष्टं तदा तैस्तु कपालैर्बहुभिर्वृतम् ॥ कृतार्थास्ते तदा जातास्तस्य लिंगस्य दर्शनात् ॥ ४२ ॥ अतोऽसौ भुवि विख्यातः कपालेश्वरसंज्ञकः ॥ येऽर्चयन्ति महादेवि कपालेश्वरसंज्ञकम् ॥ ४३ ॥ कृतपुण्या नरा देवि ते यांति परमं पदम् ॥ कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ॥ ४४ ॥ तत्पापं विलयं याति लिंगस्यास्य च दर्शनात् ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षपयति देवोऽयं चतुर्दश्यां समर्चितः ॥ ४५ ॥ प्रसंगादपि ये पूजां करिष्यंति वरानने ॥ तेऽपि कामानवाप्स्यंति यांश्च कांश्चित्सुदुर्लभान् ॥ ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ४६ ॥ निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात् ॥ अतीव पापिनो ये च क्रूरकर्मरता नराः ॥ ४७ ॥ विपाप्मानो भविष्यंति गणेशाश्च मम प्रिये ॥ नियमेन प्रपश्यंति ये देवं वत्सरं प्रिये ॥ ते पश्यंति तनुं त्यक्त्वा मदीयं भवनं प्रियम् ॥ ४८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कपालेश्वरदेवस्य स्वर्गद्वारेश्वरं शृणु ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डेचतुर शीतिलिंगमाहात्म्ये कपालेश्वरमाहात्म्यवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ स्वर्गद्वारेश्वरं लिंगं नवमं विद्धि पार्वति ॥ सर्वपापहरं देवि स्वर्गमोक्षफलप्रदम् ॥ १ ॥ यदा देवि समायाताः कैलासे पर्वतोत्तमे ॥ अश्विन्याद्या भगिन्यस्तास्त्वां दृष्ट्वा विस्मयान्विताः ॥ २ ॥ निमंत्रिता वयं यज्ञे सकांताः सपरिग्रहाः ॥ स्नेहेन देवि तातेन बहुमानपुरःसरम् ॥ ३ ॥ कचित्स्मृता विशालाक्षि किं वा तातस्य विस्मृतिः ॥ कारणं किं समुद्दिश्य तातेन न निमंत्रिता ॥ ४ ॥ तासां तद्वचनं श्रुत्वा अवमानात्तदा त्वया ॥ प्राणा मुक्तास्तु योगेन पुरतस्तासु पार्वति ॥ ५ ॥ अथ ताः शोकसंतप्ता गता यत्र प्रजापतिः ॥ आचख्युः सकलं वृत्तं दक्षस्याग्रे यथा तथम् ॥ ६ ॥ तच्छ्रुत्वा दारुणं वाक्यं दक्षो नोवाच किंचन ॥ ७ ॥ मया दृष्टा यदा देवि भूमौ पंचत्वमागता ॥ यज्ञप्रध्वंसनार्थाय तदा वै प्रेरिता गणाः ॥ ८ ॥ ते गत्वाथ गणा रौद्राः शतशोऽथ सहस्रशः ॥ विरूपा भीषणा रौद्रा नानाशस्त्रा महाबलाः ॥ सुमुचुः शरवर्षाणि कुर्वंतो भैरवान्रवान् ॥ ९ ॥ ततो देवगणाः सर्वे वसवः सह भास्करैः ॥ विश्वेदेवाश्च साध्याश्च धनुर्हस्ता महाबलाः ॥ १० ॥ युद्धाय च विनिष्क्रांता मुमुचुः सायकान्सितान् ॥ ते समेत्याथ युयुधुः प्रमथा विबुधैः सह ॥ मुमुचुः शरवर्षाणि वारिधारा यथा घनाः ॥ ११ ॥ तेषां मध्ये गणो नाम वीरभद्रो महाबलः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स शक्रं ताडयामास शूलेन हृदये तथा ॥ १२ ॥ स तु तेन प्रहारेण विसंज्ञो निषसाद ह ॥ अथ मुष्ट्या हतः कुम्भे नाग ऐरावतस्तथा ॥१३॥ स हतः सहसा तेन गजेंद्रो भैरवान्रवान् ॥ विनदन्भयमास्थाय यज्ञवाटमुपाद्रवत् ॥ १४ ॥ एतस्मिन्नंतरे देवाः कृतास्तेन पराङ्मुखाः ॥ ततस्ते शरणं जग्मुर्विष्णुं विश्वैकनायकम् ॥ १५ ॥ ततः कोपसमाविष्टो विष्णुर्दृष्ट्वा दिवालयान् ॥ गणैर्विद्रावितान्सर्वान्मुमोचाशु सुदर्शनम् ॥ १६ ॥ तदापतत्तु वेगेन चक्रं विष्णोः सुदर्शनम् ॥ प्रसार्य वक्त्रं सहसा ह्युदरस्थं चकार ह ॥ १७ ॥ तस्मिंश्चक्रे तदा ग्रस्ते ह्यमोघे दैत्यसूदने ॥ क्रुद्धो नारायणो देवि वीरभद्रमुपाद्रवत् ॥ १८ ॥ गृहीत्वा पादयोर्भूमौ निजघानातिदूरतः ॥ हन्यमानस्याथ भूमौ गदया च सुदर्शनम् ॥ १९ ॥ रुधिरोद्गारसंयुक्तं वक्त्रात्तच्च विनिर्गतम् ॥ मत्तो लब्धवरो देवि वीरभद्रो गणोत्तमः ॥ न तु पंचत्वमापन्नो गदया ताडितोऽपि सः ॥ २० ॥ ततस्तु प्रमथाः सर्वे विष्णुवीर्यबलार्दिताः ॥ कृच्छ्रेण सहसा प्राप्ता यत्राहं देवि संस्थितः ॥ २१ ॥ मां दृष्ट्वा शूलहस्तं तु विष्णुश्चांतरधीयत ॥ इंद्रोऽपि त्रिदशैः सार्द्धं पितृभिर्ब्राह्मणैः सह ॥ २२ ॥ मत्तस्त्रासपरीतात्मा ततश्चादर्शनं गतः ॥ एवं विध्वंसिते यज्ञे नष्टो देवगणो यदा ॥ २३ ॥ मया निरूपितो देवि स्वर्गद्वारे गणस्तदा ॥ प्रवेशो नैव दातव्यस्त्रिदशानां गणेश्वर ॥ २४ ॥ द्वारावरोधः कर्त्तव्यो यत्नतः शासनान्मम ॥ यः कोपि दृश्यते देवः स हंतव्यो न संशयः ॥ २५ ॥ उद्वसश्च ततो जातः स्वर्गो देवा विनिर्जिताः ॥२६॥ स्वर्गद्वारे निरुद्धे तु शक्राद्या भयविह्वलाः ॥ ब्रह्मलोकं गता देवा मंत्रयित्वा पुनःपुनः ॥ २७ ॥ तस्याग्रे कथितं सर्वं स्वर्गद्वारावरोधनम् ॥ महेश्वरगणैर्व्याप्तं स्वर्गद्वारं पितामह ॥ २८ ॥ प्रवेशो दुर्लभो जातः कृते द्वारावरोधने ॥ केनोपायेन यास्यामः स्वर्गलोकं तथाविधम् ॥ २९ ॥ नास्माकं जायते प्रीतिर्विना स्वर्गं पितामह ॥ ॥ ३० ॥ इति तेषां वचः श्रुत्वा प्रोक्तं तु ब्रह्मणा तदा ॥ आराध्यः शंकरो देवो महादेवो जगत्पतिः ॥ ३१ ॥ स्तुत्यो वंद्यो नमस्कार्यः सृष्टिसंहारकारकः ॥ दुर्लभस्तु सुराः स्वर्गो विना तस्य प्रसादतः ॥ ३२ ॥ गोप्ता स्रष्टा समर्थश्च स चास्माकं परा गतिः ॥ स एवाराधनीयस्तु स च पूज्यतमो मतः ॥ ३३ ॥ तस्मात्सर्वप्रयत्नेन गम्यतां शरणं शिवः ॥ उपायं कथयिष्यामि श्रूयतां सावधानतः ॥ ३४ ॥ त्रिदशैः सहितः शक्र तूर्णं गच्छ ममाज्ञया ॥ महाकालवने रम्ये कपालेश्वरपूर्वतः ॥ ३५ ॥ स्वर्गद्वार परं लिंगं विद्यते तत्तु वासव ॥ लोकानामनुकंपार्थं महादेवेन निर्मितम् ॥ तमाराधयत क्षिप्रं स वः कामं प्रदास्यति ॥ ३६ ॥ ब्रह्मणो वचनं श्रुत्वा त्रिदशा मुदिता भृशम् ॥ समायाता महादेवि महाकालवनं तदा ॥ ३७ ॥ स्वर्गद्वारप्रदं पुण्यं ददृशुर्लिंगमुत्तमम् ॥ तस्य दर्शनमात्रेण स्वर्गद्वारमपावृतम् ॥ ३८ ॥ स्वर्गलोकं गताः सर्वे यथापूर्वं यशस्विनि ॥ निःशंकांस्त्रिदशान्दृष्ट्वा विज्ञप्तोहं गणैस्तदा ॥ ३९ ॥ मयाज्ञप्ताश्च ते सर्वे निवर्त्तध्वं गणोत्तमाः ॥ स्वयमेव प्रतिज्ञातं कथं मिथ्या भविष्यति ॥ ॥ ४० ॥ स्वर्गद्वारप्रदो देवो दृष्टो देवैर्न संशयः ॥ महाकालवने रम्ये कथितो हि विरंचिना ॥ ४१ ॥ स्वर्गद्वारं गताः सद्यः शक्राद्यास्त्रिदशा गणाः ॥ अतः प्रभृति विख्यातः स्वर्गद्वारेश्वरः शिवः ॥ ४२ ॥ ख्यातिं यास्यति भूलोके स्वर्गलोकप्रदायकः ॥ ४३ ॥ ये पश्यंति नरा लोके स्वर्गद्वारेश्वरं शिवम् ॥ ते यांति स्वर्गलोकं हि स्वर्गद्वारेश्वरार्चनात् ॥ ४४ ॥ स्वर्गद्वारेश्वरं देवं ये पश्यंति प्रसंगतः ॥ न तेषां भयमस्तीति कल्पकोटिशतैरपि ॥ ४५ ॥ अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं देवि स्वर्गद्वारेश्वरार्चनात् ॥ ४६ ॥ जन्मांतरसहस्रेण यत्पापं पूर्वसंचितम् ॥ यत्पापं विलयं यांति लिंगस्यास्य च कीर्त्तनात् ॥ ४७ ॥ अष्टम्यां वा चतुर्दश्यामथवा चंद्रवासरे ॥ ये पश्यंति नरा भक्त्या स्वर्गद्वारेश्वरं शिवम् ॥ ते देवि मे शरीरं तु प्रविष्टास्त्वपुनर्भवाः ॥ ४८ ॥ दशकोटिसहस्राणि तस्मिँल्लिंगे तु पूजिते ॥ पूजितानि भवंतीह लिंगान्यंतःस्थितानि तु ॥ ४९ ॥ स्पर्शनात्तस्य लिंगस्य कीर्त्तनाद्यजनात्तथा ॥ सुखेन स्वर्गमायांति यथा कामानवाप्नुयात् ॥ ५० ॥ अकामा वा सकामा वा ये पश्यंति दिने दिने ॥ तेऽपि पुण्या महाभागाः स्वर्गलोकं प्रयांति वै ॥ ५१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्वर्गद्वारेश्वरमाहात्म्यवर्णनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ कर्कोटेश्वरसंज्ञं च दशमं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण विषैर्नैवाभिभूयते ॥ १ ॥ मात्रा च भुजगाः शप्ताः स्ववचोभंगकारणात् ॥ मद्वचो न कृतं यस्माद्भवद्भिः पापकर्मणि ॥ २ ॥ वह्निर्हि धक्ष्यते युष्मान्सत्रे जन्मेजयस्य हि ॥ श्रुत्वा शापं ततो मातुर्मृत्युभीताश्च पन्नगाः ॥ ३ ॥ गताः सर्वे यथास्थानं जीवनार्थं यशस्विनि ॥ हिमशैलं गतः शेषस्तपः कर्त्तुं ततः प्रिये ॥ ४ ॥ सर्पश्च कंबलोनाम लोकं पैतामहं गतः ॥ शंखचूडोऽथ नागेंद्रो मणिपूरं गतस्ततः ॥ ५ ॥ यमुनांभसि संलीनः कालियो भयविह्वलः ॥ ६ ॥ एवं ते सर्पराजानो नागाः सुस्मितशोभने ॥ कुरुक्षेत्रे गताः सर्वे तपश्चर्तुं यशस्विनि ॥ धृतराष्ट्रस्तथा नागः प्रयागमगमत्प्रिये ॥७॥ एलापत्रस्तु नागेंद्रो ब्रह्मलोकं जगामह ॥ प्रणम्य तमथोवाच मातुरुत्संगसंस्थिताः ॥ ८ ॥ मात्रा शप्ता वयं देव क्रुद्धया तव संनिधौ ॥ सा कथं शापकाले तु भवता न निवारिता ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ निषिद्धा नैव ते माता भाविकर्मबलान्मम ॥ सर्पसत्रो हि भविता राज्ञो जन्मेजयस्य च ॥ १० ॥ त्वं च वत्स ममादेशान्महाकालवनं व्रज ॥ शांत्यर्थं सर्वनागानां भक्त्या युक्तस्तु सत्वरम् ॥११॥ समाराधय देवेशं महामायासमीपतः ॥ भविता तत्र ते सिद्धिर्देवदेवप्रसादतः ॥ १२ ॥ तत्र गत्वाथ कर्कोटः स्वयं देवि समाहितः ॥ देवमाराधयामास महामायापुरःस्थितः ॥ तस्य तुष्टोथ देवेशो वरं प्रादाद्यशस्विनि ॥ १३ ॥ ये दंदशूकाः क्रूराश्च पापाचारा विषोल्बणाः ॥ तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १४ ॥ भक्त्या तवाद्य तुष्टोस्मि त्वं मे सायुज्यतां व्रज ॥ देवे तत्र विलीनोथ नागः कर्कोटकः प्रिये ॥ १५ ॥ कर्कोटकेश्वरः ख्यातस्ततो देवो महेश्वरः ॥ तस्य दर्शनमात्रेण व्याधयो यांति संक्षयम् ॥ १६ ॥ यस्तं पूजयते देवं भक्त्या युक्तो हि मानवः ॥ ऐश्वर्यं जायते तस्य कुलानां तारयेच्छतम् ॥ १७ ॥ व्याधितो व्याधितो मुक्तो दुःखी दुःखात्प्रमुच्यते ॥ दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ १८ ॥ नियमेन प्रपश्यंति ये च कर्कोटकेश्वरम् ॥ ते सर्वकामानाप्स्यंति वसंत्यंते च मत्पुरे ॥ १९ ॥ पंचम्यां च चतुर्दश्यां ये पश्यंति रवेर्दिने ॥ न तेषां तु कुले सर्पाः पीडां कुर्वंति कर्हिचित् ॥ २० ॥ या नारी दुर्भगा सापि सौभाग्यं लभते सदा ॥ गुर्विणी लभते पुत्रमरोगं कुलभूषणम् ॥ शिशुग्रहाश्च नश्यंति नापमृत्युभयं भवेत् ॥२१॥ यंयं काममभिध्यायेन्मनसा भक्तिमान्नरः ॥ तंतं दुर्लभमाप्नोति कर्कोटेश्वरदर्शनात् ॥ २२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कर्कोटेश्वरदेवस्य शृणु सिद्धेश्वरं परम् ॥२३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कर्कोटेश्वरमाहात्म्यवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीमहादेव उवाच ॥ ॥ लिंगमेकादशं विद्धि देवि सिद्धेश्वरं शुभम् ॥ वीरभद्रसमीपे तु सर्वसिद्धिप्रदायकम् ॥१॥ देवदारुवने पूर्वं विप्रा योगसमन्विताः ॥ स्पर्द्धया सिद्धिलब्ध्यर्थं तपोऽकुर्वत संयताः ॥२॥ शाकाहारा निराहाराः पर्णाहारास्तथापरे ॥ दंतोलूखलिनः केचिदश्मकुट्टास्तथा परे ॥ ३ ॥ केचिद्वीरासनरता धूम्रपानरताः परे ॥ पादैरूर्ध्वैरधोवक्त्रैः केचिदभ्रावकाशिकाः ॥ ४ ॥ कृच्छ्रचांद्रायणादीनि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुर्वन्त्यन्ये समाहिताः ॥ न चापि परमा प्राप्ता सिद्धिर्वर्षशतैरपि ॥ ५ ॥ दुःखार्त्तोश्चितयामासुः कथं सिद्धिर्भविष्यति ॥ तपसा दुष्करेणैव सिद्धिर्नेत्र लभ्यते ॥ ६ ॥ व्यर्था श्रुतिस्तथा जाता या गीता मुनिभिः पुरा ॥ तपसा लभ्यते सर्वं तपोमूलमिदं जगत् ॥ ७ ॥ अंजनं गुटिका चैव पादुकागमनं तथा ॥ खड्गसिद्धिर्विले वासश्चिंतामणिरपेक्षितम् ॥ ८ ॥ एवं तेऽचिंतयन्सिद्धाः परमामर्षपूरिताः ॥ उत्सार्य तत्तपोधर्मं नास्तिक्यं भावमागताः ॥ ९ ॥ एतस्मिन्नेव काले तु वायुवाचाशरीरिणी ॥ आश्वासयंती तान्सिद्धान्माता पुत्रमिवौरसम् ॥ १० ॥ माऽवमन्यध्वं मार्या हि श्रुतिर्व्यर्था महीतले ॥ तपो न निंद्यं धर्मो वा श्रूयतामत्र कारणम् ॥ ११ ॥ भविता भवतां सिद्धिरत्र नैव तपोधनाः ॥ स्पर्द्धया सिद्धिकामैश्च तपस्तद्धि कृतं वृथा ॥ १२ ॥ कामाच्च तपसो ह्यनिरहंकाराच्च विस्मयः ॥ क्रोधाल्लोभात्तथा मोहाज्जायते नात्र संशयः ॥ ॥ १३ ॥ स्पर्द्धया रहितो यस्तु कामक्रोधविवर्जितः ॥ करोति कर्म भावेन स तपःफलमश्नुते ॥ १४ ॥ वासनावासितो यस्तु एकचित्तः समाहितः ॥ आस्तिकः श्रद्दधानश्च स तपःफलमश्नुते ॥ १५ ॥ मातृवत्परदाराणि परद्रव्याणि लोष्टवत् ॥ यः पश्यति नरो नित्यं स तपः फलमश्नुते ॥ १६ ॥ ईदृशे पुरुषे विप्रास्तपःसिद्धिश्च दृश्यते ॥ भवंतः स्पर्द्धया चैव कृतवंतश्च दुष्करम् ॥ १७ ॥ तस्माद्वर्षसहस्रेण नैव सिद्धिर्भविष्यति ॥ यदि भद्रचनं कार्यं निर्विकल्पेन चेतसा ॥ १८ ॥ महाकालवनं गत्वा यूयं सर्वे समाहिताः ॥ आराधयध्वं देवेशं सदा सिद्धिप्रदायकम् ॥ १९ ॥ दर्शनात्तस्य देवस्य लभ्यते सिद्धिरुत्तमा ॥ सनकादयोऽपि ये देवमासाद्य योगतत्पराः ॥ पूजयित्वापि भावेन संसिद्धिं परमां गताः ॥ २० ॥ राज्ञा वसुमता पूर्वं खड्गसिद्धिः सुदुर्लभा ॥ प्राप्ता दर्शनमात्रेण लिंगस्यास्य प्रभावतः ॥ २१ ॥ पादुकागमनं लब्धं हैहयेन महात्मना ॥ कृतवीरात्मजेनैव वाहानां च सहस्रकम् ॥ २२ ॥ अदृश्यकरणं चैव प्राप्तं चानूरुणा पुरा ॥ स्वर्णसिद्धिश्च सिद्धेन पादलेपो रसायनम् ॥ अंजनं च तथा लब्धं लिंगस्यास्य च दर्शनात् ॥ २३ ॥ आकाशवचनं श्रुत्वा ते सिद्धा विस्मयान्विताः ॥ समाप्लाता मुदा युक्ता महाकालवनोत्तमे ॥ २४ ॥ सर्वसिद्धिप्रदं चैव ददृशुर्लिंगमुत्तमम् ॥ दर्शनात्तस्य लिंगस्य संसिद्धिं परमां गताः ॥ २५ ॥ ततःप्रभृति विख्यातो देवैः सिद्धेश्वरः परः ॥ ये पश्यंति नरा देवि देवं सिद्धेश्वरं परम् ॥ न तेषां दुर्लभा सिद्धिर्भविष्यति महीतले ॥ २६ ॥ सिद्धेश्वरं गमिष्यंति भावहीनाः प्रसंगतः ॥ संसिद्धास्ते भविष्यंति नियता नात्र संशयः ॥ २७ ॥ महापातकसंयुक्तो यस्तु सिद्धेश्वरं स्मरेत् ॥ संसिद्धस्तु भवेन्नूनं ज्ञानैश्वर्यसमन्वितः ॥ २८ ॥ नियमेन तु यः पश्येद्देवं सिद्धेश्वरं परम् ॥ षण्मासाज्जायते सिद्धिर्वांछिता या भवेद्धदि ॥ २९ ॥ अष्टम्यां च चतुर्दश्यां कृष्णपक्षे विशेषतः ॥ सिद्धेश्वरं तु यः पश्येत्स पश्येन्मम मंदिरम् ॥ ३० ॥ अपुत्रो लभते पुत्रं निर्धनस्तु धनं लभेत् ॥ विद्यार्थी लभते विद्यां भार्यार्थी लभते स्त्रियम् ॥ ॥ ३१ ॥ संक्रांतौ सोमवारे च ग्रहणे चैव योऽर्चयेत् ॥ कुलानां शतमुद्धृत्य पैतृकं स्वाधिकं प्रिये ॥ मोदते मम लोके च यावदिंद्राश्चतुर्दश ॥ ३२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिद्धेश्वरस्य देवस्य लोकपालेश्वरं शृणु ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ द्वादशं विद्धि देवेशि लोकपालेश्वरं शिवम् ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ पुरा दैत्यगणा देवि प्रादुर्भूताः सहस्रशः ॥ हिरण्यकशिपोर्वक्षःस्थलादतिपराक्रमाः ॥ २ ॥ तैरियं वसुधा व्याप्ता सशैलवनकानना ॥ विध्वस्ताः स्वाश्रमाः सर्वे यज्ञा विध्वंसितास्तथा ॥ ३ ॥ ब्राह्मणा भक्षिताश्चैव वेदवेदांगपारगाः ॥ पूरितान्यग्निकुण्डानि पांसुना मधुना तथा ॥ ४ ॥ विध्वस्ताः कलशाः सर्वे मृद्भांडादि च चूर्णितम् ॥ निःस्वाध्यायवषट्काराः स्वधास्वाहाविवर्जिता ॥ ५ ॥ कृता च धरणी देवि नष्टयज्ञोत्सवाभवत् ॥ लोकपालास्ततो भीता माधवं शरणं गताः ॥ ६ ॥ ऊचुः प्रांजलयः सर्वे क्षुधार्ता दुःखिताः कृताः ॥ वयं ग्लानिं गता देव यज्ञभागं विना कृताः ॥ ७ ॥ वयं त्रातास्त्वया पूर्वं नमुचेर्वृषपर्वणः ॥ हिरण्यकशिपो रौद्रान्नरकाच्च मुरोस्तथा ॥ ८ ॥ तथा रक्ष सुरश्रेष्ठ भयं नः समुपस्थितम् ॥ ९ ॥ तेषां तद्वचनं श्रुत्वा शंखचक्रगदाधरः ॥ जगाम स ततो दैत्याः प्रविष्टा वरुणालयम् ॥ १० ॥ ते निष्क्रम्य ततो रात्रौ निघ्नंति द्विजसत्तमान् ॥ तापसान्दीक्षितान्देवि धर्मव्रतपरायणान् ॥ ११ ॥ अथ स्वर्गं गताः कांते जितः शक्रो मरुत्पतिः ॥ तथैव दक्षिणामाशां धर्मराजो जितस्ततः ॥ १२ ॥ गत्वाथ पश्चिमामाशां जलराजो विनिर्जितः ॥ उत्तरे धनदो देवि तैर्दैत्यैः स विनिर्जितः ॥ १३ ॥ ततस्ते व्याकुला जाता विष्णुं शरणमागताः ॥ उपायः कथितो देवि देवेभ्यो विष्णुना तदा ॥ १४ ॥ महाकालवनं गत्वा देवा भक्त्या समाहिताः ॥ आराधयत सर्वेशं शंकरं लोकशंकरम् ॥ १५ ॥ भवतां भविता सिद्धिस्तत्र तस्य प्रसादतः ॥ १६ ॥ इति तस्य वचः श्रुत्वा कृष्णस्यामिततेजसः ॥ प्रस्थिता लोकपालास्ते महाकालवने शुभे ॥ १७ ॥ तावत्तत्रैव संरुद्धा दैत्यैः शस्त्रधरैस्तदा ॥ भूयो नष्टाश्च संप्राप्ता यत्र देवो जनार्दनः ॥ १८ ॥ कथयामासुरत्युग्रं यथा कष्टं जगत्त्रयम् ॥ नारायणेन ते प्रोक्ता लोकपालाः पुनःपुनः ॥ १९ ॥ यूयं व्रतधरा भूत्वा कपालेश्च विभूषिताः ॥ खट्वांगधारिणः शांताः पंचमुद्राविभूषिताः ॥ २० ॥ भस्मभूषितसर्वांगाः क्षुद्रघंटाविराजिताः ॥ महाव्रतधरा भूत्वा महाकालवनोत्तमम् ॥ गच्छध्वं ब्रह्मणा सार्द्धं पादवद्भेश्च भूपुरैः ॥ २१ ॥ अथ ते लोकपालाश्च श्रुत्वा कृष्णस्य भाषितम् ॥ समायाता महादेवि कृत्वा कापालिकं वपुः ॥ २२ ॥ तत्र दृष्टं महल्लिंगं तेजसां राशिमद्भुतम् ॥ स्तुतं च विविधैः स्तोत्रैर्लोकपालैः पुनःपुनः ॥ २३ ॥ ततस्तु तस्य लिंगस्य ब्रह्मज्वाला विनिःसृता ॥ यया ते दानवाः सर्वे दग्धा भस्मत्वमागताः ॥ २४ ॥ ज्ञात्वा लिंगस्य माहात्म्यं नाम चक्रुः समाहिताः ॥ सेवितं लोकपालैस्तु लिंगं तेजोमयं परम् ॥ २५ ॥ लोकपालेश्वरोनाम ख्यातिं यास्यति भूतले ॥ इत्युक्त्वा त्रिदशाः सर्वे लोकपालैः समावृताः ॥ स्वस्वस्थानं गता दिव्यं यथापूर्वं मुदान्विताः ॥ २६ ॥ ये पश्यंति नरा देवि लोकपालेश्वरं शिवम् ॥ समृद्धिभिः सुसंपन्ना भवेयुर्जन्मजन्मसु ॥ ॥ २७ ॥ न दारिद्र्यं न च व्याधिर्नाकालमरणं तथा ॥ ऐश्वर्यं चातुलं तेषां जायते दर्शनात्सदा ॥ २८ ॥ यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति ॥ तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ २९ ॥ अश्वमेधस्य यज्ञस्य सम्यगिष्टस्य यत्फलम् ॥ तत्फलं लभते देवि लोकपालेश्वरार्चनात् ॥ ३० ॥ प्रसंगेनापि यः पश्येल्लोकपालेश्वरं शिवम् ॥ मोदते स्वर्गलोके स लोकपालैः समं मुदा ॥ ३१ ॥ संक्रांतौ सोमवारे च चतुर्दश्यां विशेषतः ॥ ये पश्यंति नरा भक्त्या ह्यष्टम्यामयनद्वये ॥ ३२ ॥ ते दुर्द्धर्षा भवंतीह शत्रूणां संगरे तथा ॥ मृता यांति विमानेन शक्रलोकं सुदुर्लभम् ॥ ३३ ॥ क्रमेण वारुणं लोकं धनदस्य यथासुखम् ॥ पुनः पैतामहं यांति लोकं देवैः सुदुर्लभम् ॥ ३४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ दुर्लभः परमो गुह्यः कामेश्वरमथो शृणु ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये लोकपालेश्वरमाहात्म्यवर्णनंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ हर उवाच ॥ ॥ विद्धि कामेश्वरं देवि तत्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लिंगं त्रयोदशम् ॥ यस्य दर्शनमात्रेण सौभाग्यं जायते शुभम् ॥ १ ॥ ब्रह्मणो ध्यायमानस्य प्रजाकामस्य पार्वति ॥ उत्पन्नोऽर्कप्रभाकारो लावण्यनिचयो महान् ॥ अलंकाराद्यतः कांतो दिव्यमंडनमंडितः ॥ २ ॥ तं दृष्ट्वा परमं दिव्यं कांतं सौभाग्यशोभितम् ॥ अप्रतर्क्यमविज्ञेयं ब्रह्मा प्रोवाच तं तदा ॥ ३ ॥ को भवान्किंनिमित्तं तु इह वा किमुपागतः ॥ वद त्वं मन्मथाकार कंदर्प इव लक्ष्यसे ॥ ४ ॥ ब्रह्मणो वचनं श्रुत्वा प्रोक्तं तेनैव सादरम् ॥ अहं ते सृष्टिकामस्य भावेन विहितोंशकः ॥ प्रजापते महाभाग किं करोमि दिशस्व माम् ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ मया तु सृष्टिकामेन ये प्रजापतयः कृताः ॥ न ते शक्ताः प्रजाः स्रष्टुं कामैते सुखमाप्नुयुः ॥ ६ ॥ त्वमग्रणीः प्रजासर्गे त्वदधीनमिदं जगत् ॥ कुरु सृष्टिं विचित्रां च कंदर्प मम शासनात् ॥७॥ इत्युक्तो ब्रह्मणा देवि जगामादर्शनं स्मरः ॥ क्रुद्धेन ब्रह्मणा शप्तो विनाशं यास्यसि ध्रुवम् ॥८॥ मद्वचो न कृतं यस्माद्भवनेत्रोद्भवाग्निना ॥ तच्छ्रुत्वा दारुणं शापं कंदर्पो भयविह्वलः ॥ ब्रह्माणं प्रणतो भूत्वा प्रह्वः प्रांजलिरब्रवीत् ॥ ९ ॥ प्रसीद देवदेवेश अनन्यगतिके मयि ॥ नहि निर्भरतां यांति प्रभूणामाश्रिते रुषः ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ यस्मात्ते भक्तिरतुला ममोपरि महामते ॥ तस्मात्स्थानानि दत्तानि तव द्वादश संख्यया ॥ ११ ॥ कामिनीनां कटाक्षेषु केशपाशेषु चैव हि ॥ जघनस्तननाभौ तु दोर्मूलेऽधरपल्लवे ॥ १२ ॥ वसंते कोकिलालापे ज्योत्स्नायां जलदागमे ॥ कामार्थं च मया दत्तो सवली मधुमाधवौ ॥ १३ ॥ स्त्रियोऽसृजन्मया धन्याः संसारे सारकारणम् ॥ रतेश्चैव निधानानि संतानार्थं विनिर्मिताः ॥ १४ ॥ एताभिर्वरनारीभिर्जगदेवं वशीकृतम् ॥ स्त्रीभिरासक्तमनसः कृतः पुंसो मनस्विता ॥ १५ ॥ कृतश्चापि स्ववशता स्त्रीगौरवगतस्य च ॥ स्त्रिय एव विनाशाय पूर्वेषाममरद्विषाम् ॥ १६ ॥ स्त्रिय एव हि देवानामिंद्रादीनां भयाश्रयाः ॥ नारीभिर्लब्धवृत्तेश्च पुरुषस्यापि सर्वतः ॥ १७ ॥ पराभवः प्रभवति विवशत्वं च भीषणम् ॥ स्त्रीभिराजितचित्तस्य सुलभो विपदोदयः ॥ १८ ॥ इत्युक्तो मन्मथो भद्रे ब्रह्मणा च विसर्जितः ॥ दत्त्वा वै पुष्पकं चापं तथा वै बाणपंचकम् ॥ १९ ॥ रतिप्रीतिसमायुक्तो झषकेतुर्मनोभवः ॥ विडंबयति लोकांस्त्रीन्ससहायो धनुर्धरः ॥ २० ॥ पंडितां स्तापसान्वीरान्सुधियश्च जितेंद्रियान् ॥ काले कुशलभावज्ञान्देवान्पितृगणांस्तथा ॥ २१ ॥ भूतप्रेतपिशाचांश्च यक्षगंधर्वकिंनरान् ॥ कृमिकीटपतंगांश्च भूतग्रामं चतुर्विधम् ॥ २२ ॥ ममार्थे च कृतो यत्नश्चिंतयित्वा पुनःपुनः ॥ दुःसाध्यः शंकरो देवः श्रूयते भुवनत्रये ॥ तस्य देवस्य कः शक्तः क्षोभणार्थं मया विना ॥ २३ ॥ इत्युक्त्वा तु समायातो यत्राहं तपसि स्थितः ॥ रत्या युतः स गर्वेण सख्याऽहं मधुनाश्रितः ॥ ॥ २४ ॥ दृष्ट्वान्मां तदा कामः पिंजकूटजटासटम् ॥ किंचिन्निमित्ततोऽविद्धं भोगींद्रकृतभूषणम् ॥ २५ ॥ प्रेक्षमाणमृजुस्थानं नासावंशाग्र लोचनम् ॥ ततोऽमरकाकारमालंब्याश्रयमात्मकम् ॥ २६ ॥ प्रविष्टः करसंघेण मदनो हृदये मम ॥ रत्यर्थं कामतप्तेन संस्मृता भवती मया ॥२७॥ समाधेर्भावना दिव्या लक्ष्यप्रत्यक्षरूपिणी ॥ गता मम विमलता तत्क्षणादेव पार्वति ॥ २८ ॥ उन्मत्ततां गतोऽहं ये विकृतिं मदनात्मिकाम् ॥ निराकृतं मया देवि धैर्यमालंब्य यत्नतः ॥ २९ ॥ दृष्टो मयात्महृदये मन्मथोऽपथ्यकारकः ॥ देहस्थं निर्दहिष्यामि प्रत्याहारप्रयोगतः ॥ ३० ॥ अमानुषीं व्रजेद्योनिं योगिनं प्रविशेद्यदि ॥ वाह्याग्नौ धारणां कृत्वा देहसंस्थे विनिर्दहेत् ॥ ३१ ॥ एतस्मिन्नंतरे सोऽपि संतप्तो मदनो भृशम् ॥ इच्छाशरीरो दुर्ज्ञेयो निःसृतो व्यसनात्मकः ॥ ३२ ॥ सहकारतरोर्मूले भूत्वा मधुसखस्तदा ॥ मुमोच मोहनंनाम मार्गणं मकरध्वजः ॥ ३३ ॥ स चापि हृदये प्राप्तो मदीये लीलया शरः ॥ ततोहं कुपितो देवि नेत्रं कृत्वा तृतीयकम् ॥ ३४ ॥ तन्नेत्रविस्फुलिंगेन क्रोशतां नाकवासिनाम् ॥ गमितो भस्मसात्पूर्णं कंदर्पः कामिदर्पकः ॥ ३५ ॥ तस्मिन्दग्धे ततः कामे रतिः शोकपरायणा ॥ विललाप सुदुःखार्त्ता पतिभक्तिपरायणा ॥ ॥ ३६ ॥ हा नाथ हा मम प्राण हा स्वामिन्किं जहासि माम् ॥ पतिव्रतां पतिप्राणां कस्मान्मां त्यजसि प्रभो ॥ ३७ ॥ एवं च विलपंतीं तां वागुवाचाशरीरिणी ॥ मा त्वं रुद विशालाक्षि पुनरेष पतिस्तव ॥ प्रसादाद्देवदेवस्य उत्थास्यति शिवस्य च ॥ ३८ ॥ प्रार्थितोऽहं ततो देवि तस्मिन्नवसरे प्रिये ॥ एष कामस्त्वया दग्धः क्रोधेन परमेश्वर ॥ ३९ ॥ येनानेन प्रभो नष्टा सृष्टिर्वै धरणीतले ॥ कृपां विधेहि देवेश दीनायै देहि मे पतिम् ॥ ॥ ४० ॥ ततोऽहमब्रुवं देवि तां रतिं दीनभाषिणीम् ॥ अनेन मदनेनाद्य कृतं तरलितं मनः ॥ ४१ ॥ ततो दग्धं मयास्यांगं जीवयै त्वत्प्रसादतः ॥ अंगं दग्धं मयास्याद्य तृतीयनेत्रवह्निना ॥ ४२ ॥ तस्मादनंग एवैष प्रजासु विचरिष्यति ॥ अनंगोऽपि यदावंत्यां लिंगं संसेवयिष्यति ॥ ४३ ॥ देवानामनुकंपार्थमनंगोऽसौ कृतो मया ॥ त्रिदशैश्च समादिष्टः कामोऽवंत्यां जगाम ह ॥ ४४ ॥ तत्र गत्वा ह्यनंगोऽपि भक्तिभावसमन्वितः ॥ ददर्श परमं लिंगं समीहितफलप्रदम् ॥ ४५ ॥ प्रोक्तं तुष्टेन लिंगेन काम काममवाप्स्यसि ॥ अनंगोऽपि समर्थस्त्वं भविष्यसि न संशयः ॥ ४६ ॥ जन्म प्राप्स्यति रुक्मिण्या गर्भे कृष्णस्य संगमात् ॥ भविता विश्रुतो लोके नाम्ना शंबरमूदनः ॥ ४७ ॥ अनंगेन त्वया यस्मान्मनसा तोषितोऽपि सन् ॥ तस्मात्ख्यातिं गमिष्यामि त्वन्नाम्ना काम सर्वदा ॥ ४८ ॥ ये त्वां पश्यंति कंदर्प भक्त्या परमया युताः ॥ प्राप्नुवंति गतिं नित्यं ते सदानंददायिकाम् ॥ ४९ ॥ दीर्घायुषो भविष्यंति रूपं तेषां भविष्यति ॥ कुलं चनिर्मलं तेषां ये त्वां पश्यंति मन्मथ ॥ ५० ॥ ऐश्वर्यं परमान्भोगान्स्त्रियो दिव्यकलान्विताः ॥ अरोगा संततिस्तेषां भविष्यति न संशयः ॥ ५१ ॥ चैत्रशुक्लत्रयोदश्यां ये मां पश्यंति भक्तितः ॥ देवलोकं समासाद्य मोदिष्यंति हि ते नराः ॥ ५२ ॥ यक्षा गणेश्वराः सिद्धाः सिद्धगंधर्वसेविताः ॥ रुद्रलोकं गमिष्यंति विमानैः सर्वकामिकैः ॥ ५३ ॥

इत्युक्तः कामदेवोपि लिंगेन परमेश्वरि ॥ तत्राश्रमपदं चक्रे तस्य लिंगस्य संनिधौ ॥५४॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कामेश्वरस्य शृण्वग्रे कुटुंबेश्वरवैभवम् ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कामेश्वरमाहात्म्यवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ कुटुंबेश्वरसंज्ञं तु देवं विद्धि चतुर्दशम् ॥ यस्य दर्शनमात्रेण गोत्रवृद्धिश्च जायते ॥ १ ॥ यदा देवासुरैः पूर्वं मथितः क्षीरसागरः ॥ तदा च निर्गतं देवि दुर्द्धरं दुःसहं विषम् ॥ २ ॥ कालकूटमयं रौद्रं विषं ज्वालाविभीषणम् ॥ दह्यते च जगत्तेन सदेवासुरमानुषम् ॥ ३ ॥ ततो देवगणाः सर्वे सासुरा यक्षराक्षसाः ॥ विषज्वालाभिभीताश्च मामेव शरणं गताः ॥ ४ ॥ स्तुतोहं विविधैः स्तोत्रैरिदमुक्तं वरानने ॥ अमृतार्थे कृतो यत्नः संप्राप्तं मरणं विभो ॥ ५ ॥ अन्यथा चिंतितं कार्यं देवेन कृतमन्यथा ॥ अतिमथितुमारब्धे लोभाद्वै क्षीरसागरम् ॥६॥ उत्पन्नं कालकूटं तु येन दग्धं चराचरम् ॥ ततोऽस्माकं भयं जातं कालकूटोद्भवं प्रभो ॥ ॥७॥ रक्षां कुरु जगन्नाथ शरणागतवत्सल ॥ हितार्थं सर्वलोकानां यथा न प्रलयो भवेत् ॥ ८ ॥ मया तेषां वचः श्रुत्वा त्रिदशानां यशस्विनि ॥ मायूरं रूपमास्थाय देवानामनुकंपया ॥ कंठे धृतं महारौद्रं कालकूटाह्वयं तदा ॥ ९ ॥ त्वं भीता सहसा नष्टा रूपं दृष्ट्वा तु मामकम् ॥ विषवक्षमसेव्यं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तु ततोऽहं दुःखितोऽभवम् ॥१०॥ नदीसंघसमायुक्ता गंगा दृष्टा च पार्श्वतः ॥ सा च प्रोक्ता मया देवि सादरं स्तुतिपूर्वकम् ॥ ११ ॥ कालकूटविषं गंगे वेगान्नय महोदधिम् ॥ नान्या शक्ता समानेतुं त्वां विना लोकपावनि ॥ १२ ॥ ॥ गंगोवाच ॥ ॥ नास्ति मे भगवच्छक्तिर्विषोढुं च जगत्पते ॥ रौद्ररूपी च दुःसेव्यो दहत्येव न संशयः ॥ १३ ॥ ततस्तु यमुना प्रोक्ता न समर्था सरस्वती ॥ अन्याश्च विविधा नद्यो मयाहूताः पृथक्पृथक् ॥ १४ ॥ अशक्तास्ताः समानेतुं कालकूटाह्वयं विषम् ॥ तदाहूता मया देवि शिप्रा ब्रह्मसमुद्भवा ॥ १५ ॥ शिप्रे पुत्रि ममादेशान्महाकाल वनं व्रज ॥ गृहीत्वा कालकूटं तु पुरः कामेश्वरस्य हि ॥१६॥ विद्यते परमं लिंगं तस्मिल्लिंगे नियोजय ॥ मया प्रोक्ता तदा प्राह ब्रह्मणः परमा कला ॥ १७ ॥ एषास्मि प्रस्थिता देव तव वाक्यादसंशयम् ॥ दुःस्पर्शः कालकूटोऽयं नूनं मां भक्षयिष्यति ॥ १८ ॥ असेव्याहं भविष्यामि दुष्टसंपर्क योगतः ॥ ततो मया पुनः प्रोक्ता शिप्रा पातकनाशिनी ॥ १९ ॥ यानि तीर्थानि भूलोके पाताले यानि संति वै ॥ स्वर्गलोके ह्यंतरिक्षे पुण्यानि चारुहासिनि ॥ २९ ॥ तानि सर्वाणि सेवार्थमागत्य मम वाक्यतः ॥ आज्ञां तव करिष्यंति गच्छ पुत्रि ममाज्ञया ॥ २१ ॥ एवमुक्ता तदा शिप्रा गृहीत्वा कालकूटकम् ॥ समायाता वरारोहे यत्र लिंगमनुत्तमम् ॥ २२ ॥ तद्विषं कालकूटाह्वं निक्षिप्तं लिंगमूर्द्धनि ॥ विषलिंगस्ततो जातो दृष्टो मृत्युप्रदायकः ॥ २३ ॥ पशुः पक्षी नरो वापि यो हि पश्यति तं शिवम् ॥ म्रियते स तदा देवि तस्य देवस्य दर्शनात् ॥ २४ ॥ तीर्थयात्रां ततः कर्त्तुं तत्रायातास्तपोधनाः ॥ तं च देवं ततो दृष्ट्वा मृताः सर्वे च तत्क्षणात् ॥ २५ ॥ ततो हाहाकृतं देवि त्रैलोक्यं सचराचरम् ॥ हाहाकारं महच्छ्रुत्वा मया ते द्विजसत्तमाः ॥ संजीविताश्च वै सर्वे दृष्टिपातेन पार्वति ॥ २६ ॥ तुष्टुवुः प्रणता विप्रा मामतो विविधैः स्तवैः ॥ मया प्रोक्तास्तु ते विप्रा वृणुध्वं वरमुत्तमम् ॥ २७ ॥ तैरुक्तं प्रणतैर्देवि लोकानां च हितार्थतः ॥ संम्रियंते प्रजा देव लिंगेनानेन शंकर ॥ २८ ॥ तां संरक्ष जगन्नाथ ह्यपोऽस्माकं वरः प्रभो ॥ प्रतिज्ञातं मया देवि लोकानामनुकंपया ॥ २९ ॥ क्षेमारोग्यकरं लिंगं भविष्यति न संशयः ॥ कायावरोहणाद्विप्राः स्वयमत्रागमिष्यति ॥ ३० ॥ लकुलीशस्तदा चायं देवः स्पृश्यो भविष्यति ॥ वृद्धिकारी कुटुम्बस्य भविष्यति न संशयः ॥३१॥ कुटुंबेश्वर इति नाम्ना लोके ख्यातिं गमिष्यति ॥ इत्युक्तास्ते मया विप्रास्तत्रैव तपसि स्थिताः ॥ ३२ ॥ लकुलीशोऽथ तल्लिंगमारुरोह ममाज्ञया ॥ जनयन्विस्मयं लोके कीर्तिं जनपदे तथा ॥ ३३ ॥ कुटुम्बेश्वरसंज्ञं तु ये पश्यंति यशस्विनि ॥ तेषां कुले तु वृद्धिः स्यात्कुटुंबस्य न संशयः ॥ ३४ ॥ आश्विनासितपंचम्यां दर्शनं यः करिष्यति ॥ बहुपुत्रो बहुधनो भविष्यति न संशयः ॥ ३५ ॥ महतीं श्रियमाप्नोति रोगैश्चापि प्रमुच्यते ॥ सर्वकामसमृद्धोऽसौ मम लोके स मोदते ॥३६ ॥ दर्शनं ये करिष्यंति स्पर्शनं यजनं तथा ॥ ते सर्वे कामसंपूर्णाः प्रयांति मम मंदिरम् ॥ ३७ ॥ समीपे तु सरिच्छिप्रा वापीकूपेन संयुता ॥ यस्या दर्शनमात्रेण नरः पापात्प्रमुच्यते ॥३८॥ सोमवारेर्कवारे च स्नात्वा तस्यां समाहितः॥अष्टम्यां वा चतुर्दश्यां यः पश्येत्कुटुंबेश्वरम् ॥ ॥ ३९ ॥ राजसूयसहस्रस्य वाजपेयशतस्य च ॥ फलं स लभते देवि सत्यमेतन्मयोदितम् ॥ ४० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कुटुंबेश्वरदेवस्य त्विंद्रद्युम्नेश्वरं शृणु ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कुटुंबेश्वरमाहात्म्यवर्णनंनाम चतुर्दशोऽध्यायः ॥१४॥छ॥ ॥ श्रीमहादेव उवाच ॥ ॥ इंद्रद्युम्नेश्वरं विद्धि शिवं पंचदशं प्रिये ॥ यस्य दर्शनमात्रेण यशः कीर्तिश्च जायते ॥ १ ॥ आसीद्राजा पुरा देवि इंद्रद्युम्नो महीपतिः ॥ येनेयं रक्षिता पृथ्वी पिता पुत्रमिवौरसम् ॥ २ ॥ दृष्ट्वा सोऽथ बहून्यज्ञान्भूमौ प्रचुरदक्षिणान् ॥ गतः स्वर्गं महात्मा वै सर्वकामफलप्रदम् ॥ ३ ॥ स चाथ प्रच्युतः स्वर्गान्नष्टकीर्तिर्यदा क्षितौ ॥ पपात भूमौ सहसा गतपुण्यो नराधिपः ॥ पतितश्चिंतयामास भृशं शोकपरिप्लुतः ॥ ४ ॥ कृतस्य कर्मणस्त्वत्र भुज्यते यत्फलं दिवि ॥ न चान्यत्क्रियते तद्यद्भूतलस्थेन भुज्यते ॥५॥ सोऽत्र दोषो मतस्तस्यामतस्तत्पतनं च यत् ॥ पतनात्तु महद्दुःखं परितापश्च जायते ॥६॥ स्वर्गभाजो भवंतीह यावत्कीर्तिश्च जायते ॥ दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः॥ यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥७॥ अकीर्त्तिः कीर्त्यते यस्य लोके भूतस्य कस्यचित्॥ स पतत्यधमाँल्लोकान्यावच्छब्दोऽस्य कीर्त्तितः ॥ ८ ॥ तस्मात्कल्याणवृत्तः स्यादन्यथा पतनं भुवि ॥ विधाय वृत्तं पापिष्ठं कीर्तिमेवाभिवर्द्धयेत् ॥ ९ ॥ अत्यंतं श्लाघयाम्यत्र कीर्त्तिं स्वर्गकरां पराम् ॥ देवैरपि हि सा कीर्तिः कांक्ष्यते परमा यतः ॥ १० ॥ यावत्कीर्त्तिर्मनुष्याणां वर्त्तते भुवि चाक्षया ॥ तेजःपुंजेन युक्तानि शरीराणि भवंति हि ॥ ११ ॥ न स्वेदो न च दौर्गंध्यं पुरीषं मूत्रमेव वा ॥ तेषां निर्वर्त्तनं राजा विधाता च त्रिविष्टपे ॥ उह्यंते ते विमानैश्च नानाभरणभूषिताः ॥ १२ ॥ एवं विसृज्य नृपतिरिंद्रद्युम्नो वरानने ॥ स्वर्गकामो जगामाथ हिमवंतं नगोत्तमम् ॥ १३ ॥ यत्र तेपे तपस्तीव्रं मार्कंडेयो महामुनिः ॥ दृष्ट्वा प्रणम्य शिरसा साष्टांगं च पुनःपुनः ॥ पप्रच्छ विनयोपेतस्तमृषिं शंसितव्रतम् ॥ १४ ॥ विदितास्तव धर्मज्ञ देवदानवराक्षसाः ॥ राजवंशाश्च विविधा ऋषिवंशाश्च शाश्वताः ॥ १५ ॥ न तेऽस्त्यविदितं किञ्चिदस्मिल्लोके द्विजोत्तम ॥ एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथ्यतां त्वया ॥ कथं कीर्त्तिर्भुवि लोके जायते किंतपःफलात् ॥ १६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ हंत ते कथयिष्यामि यतः कीर्तिं सदाहसे ॥ यावत्कीर्तिर्भूमिसंस्था तावद्रस सुरैः सह ॥ तद्गच्छ शीघ्रं धर्मज्ञ महाकालवनोत्तमम् ॥ १७ ॥ कंलकलेश्वरदेवस्य समीपे वाम भागतः ॥ लिंगं पापहरं तत्र समाराधय यत्नतः ॥ १८ ॥ तस्याभ्यर्चनमात्रेण लप्स्यसे कीर्तिमुत्तमाम् ॥ स्वर्गं सनातनं चैव यत्सुरैरपि दुर्लभम् ॥ ॥ १९ ॥ गत्वा स पूजयामास तल्लिंगं कीर्तितं त्विदम् ॥ ततो देवाः सगन्धर्वाः प्रशस्य च मुदान्विताः ॥ २० ॥ अन्तरिक्षे विमानस्थाः प्रोचुर्वाचं नराधिपम् ॥ त्वत्कीर्त्तिर्निर्मला जाता लिंगस्यास्य समर्चनात् ॥ २१ ॥ अद्यप्रभृति राजेंद्र लिंगं त्वन्नाम नामतः ॥ ख्यातिं यास्यति लोकेऽस्मिन्निंद्रद्युम्नेति निश्चितम् ॥ २२ ॥ इन्द्रद्युम्नेश्वरं देवं पूजयिष्यंति ये नराः ॥ सर्वपापविनिर्मुक्ता विमानैः सर्वकामिकैः ॥ २३ ॥ स्वर्गं यास्यंति ते दृष्टाः स्तूयमानाः सुरर्षिभिः ॥ किंचिच्च दुर्लभं लोके तेषां नैव भविष्यति ॥ २४ ॥ दर्शनं ये करिष्यंति लोभाद्वापि प्रसंगतः ॥ तेषां कीर्तिर्यशः पुण्यं धर्मश्चैवं भविष्यति ॥ २५ ॥ न स्वर्गात्पतनं तेषां यावदिंद्राश्चतुर्दश ॥ ये च पूजां करिष्यंति चतुर्दश्यां विशेषतः ॥ ते कुलं तारयिष्यंति मातृकं पैतृकं सदा ॥ २६ ॥ इत्युक्ता त्रिदशाः सर्वे लिंगं संपूज्य यत्नतः ॥ इंद्रद्युम्नेन सहिताः पुनः स्वर्गं गताः प्रिये ॥ २७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ इन्द्रद्युम्नेशदेवस्य श्रूयतामपरः प्रिये ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य इन्द्रद्युम्नेश्वरमाहात्म्यवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ईशानेश्वरसंज्ञं तु षोडशं विद्धि पार्वति ॥ यस्य दर्शनमात्रेण ऐश्वर्यं जायते नृणाम् ॥ १ ॥ तुहुंडेन पुरा देवि सर्वे द्रुपद्रुताः सुराः ॥ ऋषयश्च महाभागा यक्षगन्धर्वकिंनराः ॥ २ ॥ नंदनाख्यं वनं सर्वं तदधीनमभूत्किल ॥ ऐरावणं द्विपेन्द्रं च जित्वा द्वारि समादधत् ॥ ३ ॥ उच्चैःश्रवससंज्ञं तु हृतवान्दानवेश्वरः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

देवांगनानां सर्वासां विध्वंसं कर्तुमुद्यतः ॥ ४ ॥ स्वर्गमार्गः खिलीभूतस्तद्भयेन ह्यभूत्सति ॥ हृताधिकारा देवाश्च मंत्रं समुपचक्रमुः ॥ ५ ॥ तस्मिन्काले च कालज्ञो नारदोऽथ महामुनिः ॥ आजगाम महातेजा भ्रममाणश्च मंत्रिभिः ॥ ६ ॥ देवैर्नमस्कृतः सोऽथ पूजितश्च यथाविधि ॥ निवेदितं यथावृत्तं तुहुण्डस्य विचेष्टितम् ॥ ७ ॥ पप्रच्छुरथ ते मंत्रं नारदं मुनिसत्तमम् ॥ कथयस्व महाबुद्धे सर्वं जानासि सर्व्वतः ॥ ८ ॥ ईदृक्काले समायाते किं कर्त्तव्यं महामुने ॥ नाज्ञातं त्रिषु लोकेषु किंचिद्देवर्षिसत्तम ॥ ९ ॥ मुहूर्तं ध्यानमालंब्य किंचिन्मील्य च लोचने ॥ उपायं कथयामास सर्वदुःखविनाशनम् ॥ १० ॥ महाकालवने रम्ये शीघ्रं गच्छंतु विह्वलाः ॥ इन्द्रद्युम्नेश्वरस्यैव पश्चाद्भागे व्यवस्थिताः ॥ सेवध्वं परमं लिंगमीशानेश्वरसंज्ञकम् ॥ ११ ॥ पुरा वैशानकल्पे तु ईशानेन सुखेन हि ॥ मुनिना श्रोत्रियेणैव वेदाभ्यासरतेन वै ॥ उत्तमांगपदं लब्धं शंकरस्य च मूर्द्धनि ॥ १२ ॥ तस्याराधनमात्रेण मनोऽभीष्टं हि लभ्यते ॥ १३ ॥ नारदस्य वचः श्रुत्वा देवा मुदितमानसाः ॥ जग्मुर्यत्र महल्लिंगं स्तुतिं सर्वेऽप्यकुर्वत ॥ १४ ॥ ईशानेशान ईशान तत्पुरुष नमोऽस्तु ते ॥ नमो वाम महाघोर सद्योमुख नमोनमः ॥ ॥ १५ ॥ त्र्यक्ष भर्ग महादेव उमाकांत नमोनमः ॥ नमः शिव नमो भीम नमः सर्व नमोनमः ॥ १६ ॥ नमः शंभो नमो रुद्र विरूपाक्ष नमोनमः ॥ त्वया देव प्रजाः सर्वाः सदेवासुरमानुषाः ॥ १७ ॥ स्थावराणि च भूतानि जंगमानि चराणि च ॥ ब्रह्म वेदाश्च वेद्यं च त्वया सृष्टं महेश्वर ॥ १८ ॥ शिरस्ते गगनं देवा नेत्रे शशिदिवाकरौ ॥ निःश्वासः पवनश्चापि तेजोऽग्निश्च तवाच्युतः ॥ १९ ॥ बाहवस्ते दिशः सर्वाः कुक्षिश्चैव महार्णवः ॥ उरू ते पर्वता देव चरणौ पृथिवी मता ॥ २० ॥ इंद्रसोमाग्निवरुणा देवासुरमहोरगाः ॥ ब्रह्मास्त्वामनुतिष्ठंति स्तुवंतो विविधैः स्तवैः ॥ २१ ॥ त्वया व्याप्तानि भूतानि सर्वाणि भुवनेश्वर ॥ त्वयि तुष्टे जगत्तुष्टं त्वयि क्रुद्धे महद्भयम् ॥ २२ ॥ भयानामपनेतासि त्वमेकः शत्रुसूदनः ॥ असुराणां समर्थानां विनाशश्च त्वया कृतः ॥ २३ ॥ न च विक्रमणैर्देव निर्वाणमगमत्परम् ॥ त्वं हि कर्त्ता विकर्त्ता च भूतानामिह सर्वशः ॥ २४ ॥ आराधयित्वा सर्वे ते नमस्यंति च सर्वशः ॥ एतस्मिन्नंतरे देवि लिंगमध्यात्समुत्थिता ॥ २५ ॥ धूमावृता महाज्वाला यथा दग्धः स दानवः ॥ तुहुण्डो मुंडपुत्रस्तु ससैन्यपरिवारितः ॥ २६ ॥ स्वाधिकारांश्च संप्राप्तुलिंगस्यास्य प्रभावतः ॥ सुरैश्चाख्या समादिष्टा लिंगस्यास्यैव हर्षितैः ॥ २७ ॥ ऐश्वर्यशीलमस्यास्तीत्यस्माकं च विनिश्चितम् ॥ ईशान इति विख्यातस्त्रैलोक्ये च भविष्यति ॥ २८ ॥ ईशानेश्वरसंज्ञं तु ये सम्याराधयंति च ॥ कीर्तिर्लक्ष्मीर्भुवा तेषां सिद्धिः प्रीतिर्भविष्यति ॥ २९ ॥ पूज्यमानः सदा देवैर्गंधर्वाप्सरसांगणैः ॥ स्वर्गलोकं गमिष्यंति विमानैरुज्ज्वलैर्मुदा ॥ ३० ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्त्रियः कुमारिकाः ॥ यथाभिलषितान्कामानाप्नुवंति न संशयः ॥३१॥ यः करोति नरः सम्यग्दर्शनं नियमस्थितः ॥ न कुत्र तस्य हानिः स्याद्यावज्जन्मशतं भवेत् ॥ ३२ ॥ सर्वदा सर्वकार्येषु ते समर्था यशस्विनि ॥ ईशानेश्वरसंज्ञं तु ये पश्यंति दिनेदिने ॥ ३३ ॥ एवं ते कथितो देवि प्रभावः पापनाशनः ॥ ईशानेश्वरदेवस्य शृणतामप्सरेश्वरः ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य ईशानेश्वरमाहात्म्यवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ देवं सप्तदशं विद्धि विख्यातमप्सरेश्वरम् ॥ यस्य दर्शनमात्रेण लोकोऽभीष्टानवाप्नुयात् ॥ १ ॥ नंदनाख्ये वने देवि सर्वकामसमन्विते ॥ सिद्धचारणगंधर्वकिंनरोद्गीतनादिते ॥ २ ॥ शुककोकिलचक्राह्वचकोरकुररावृते ॥ दिव्यलोकोपमस्थाने त्रिविष्टपवि भूषणे ॥ ३ ॥ तत्रोपविष्टो वृत्रारिः सुरज्येष्ठश्च सेवितः ॥ ननर्त्त रंभा तस्याग्रे नृत्यभावान्विवृण्वती ॥ ४ ॥ ततोन्यचित्ता संजाता किंचित्स्मृत्वा प्रमादतः ॥ लयतालविहीना च दृष्टा वै वासवेन सा ॥ ५ ॥ चुकोप च सुरश्रेष्ठस्तस्याः शापं ददौ किल ॥ विस्मृतिर्मानुषं कर्म न दिव्यं क्वापि दृश्यते ॥ तस्मात्तु मानुषे लोके गच्छ त्वं निष्प्रभा सती ॥ ६ ॥ अथेंद्रकोपसंक्षोभात्पतिता भुवि साप्सराः॥ निश्चेष्टा विकलीभूता रुदंती विस्वरं बहु ॥ ७ ॥ करुणं विलपंती च किं मया दुष्कृतं कृतम् ॥ निर्मलं न तपस्तप्तं कथं नाराधितः सुरः ॥ ८ ॥ अथाप्सरोगणः सर्वैः सखीगण समन्वितः ॥ रंभा यत्रैव पतिता समायातो वरानने ॥ तस्याः शोकाग्निदाहेन संतप्तोऽप्सरसां गणः ॥ ९ ॥ सुप्ता पद्मिनी साभ्रे यथा नैव विराजते ॥ तथा शापेन विध्वस्ता रंभा नो राजते सदा ॥ १० ॥ सखीगणैः परिवृता रंभा दृष्टा वरानने ॥ देवर्षिणा नारदेन विस्मितेनांतरात्मना ॥ ११ ॥ कस्मादप्सरसः सद्यो दृश्यंते शोकविह्वलाः ॥ कस्माच्च करुणं रंभा रोदित्येषा मुहुर्मुहुः ॥ ॥ १२ ॥ पप्रच्छ च समागत्य कस्मादप्सरसो वराः ॥ विषण्णवदना दीनाः कथ्यतां मम सादरम् ॥ १३ ॥ वृत्तांतं कथयामासुस्ताश्च तस्मै पुरातनम् ॥ श्रुत्वा च नारदस्तत्र ध्यानासक्तोऽभवन्मुनिः ॥ १४ ॥ उपायं कथयामास हितं तासां प्रयत्नतः ॥ गच्छंत्वप्सरसः सर्वा महाकालवनोत्तमे ॥ १५ ॥ आराधयध्वं देवेशं लिंगं सर्वार्थसाधकम् ॥ पृच्छादेव्यास्तु पुरतः पुरा कल्पे प्रपूजितम् ॥ १६ ॥ उर्वश्या मम वाक्येन भर्त्ता प्राप्तः पुरूरवाः ॥ नारदस्य वचः श्रुत्वा समाजग्मुर्गणास्तथा ॥ १७ ॥ महाकालवने रम्ये लिंगाराधनकाम्यया ॥ ततस्तुष्टः स्वयं रुद्रस्तासां भक्त्या वरं ददौ ॥ १८ ॥ रंभे प्राप्स्यसि सौभाग्यं स्वर्गलोकं यशस्विनि ॥ भविष्यसि महाभागे जिष्णोस्त्वं वल्लभा ध्रुवम् ॥ १९ ॥ तस्माद्विविष्टपं गच्छ संघनानेन पूजिता ॥ आराधितोऽप्सरोभिश्च पुरा स्वर्गार्थकाम्यया ॥ अतोप्सरेश्वरः ख्यातो यूयं ख्यातिं जगत्त्रये ॥ २० ॥ ये समाराधयिष्यंति भक्त्या चाप्सरसेश्वरम् ॥ ते सर्वकामसंपूर्णा भविष्यंति युगेयुगे ॥ २१ ॥ प्रेरयिष्यंति ये लोके दर्शनार्थं यशस्विनि ॥ स्थानभ्रंशो वियोगश्च तेषां स्वप्ने न जायते ॥ २२ ॥ किं दानैः किं तपोभिश्च किं यज्ञैर्बहुदक्षिणैः ॥ स्पर्शनाल्लभते राज्यं स्वर्गं मोक्षं क्रमेण तु ॥ २३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अप्सरेश्वरदेवस्य शृयतां कल्कलेश्वरः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽप्सरेश्वरमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ ८ ॥ ॥ ॥ श्रीशिव उवाच ॥ ॥ देवमष्टादशं विद्धि ख्यातं कलकलेश्वरम् ॥ यस्य दर्शनमात्रेण कलहो नैव जायते ॥ १ ॥ सर्वदुःखोपशमनं सर्वपाप प्रमोचनम् ॥ व्याधिसर्पाग्निचौराणां शमनं वांछितप्रदम् ॥ २ ॥ मम देवि त्वयः सार्द्धं कलहः समपद्यत ॥ पुरा विस्तरतो वक्ष्मि शृण्वेकाग्रमनाः शुभे ॥ ३ ॥ यदा त्वं हिमशैलस्य दुहिता वरवर्णिनि ॥ तदा विवाहितं कांते यथोक्तविधिना मया ॥ ४ ॥ विनिवृत्ते विवाहे च त्वया सार्द्धं वरानने ॥ महाकालीति नाम्ना वै वर्णनापि च तादृशी ॥ ५ ॥ नीलोत्पलनिभप्रख्या नीलकुंचितमूर्द्धजा ॥ अप्येकस्मिंस्तदा त्वं हि मातृणां मंडपे शुभे ॥ मध्ये समुपविष्टासि कृष्णांजनसमप्रभा ॥ ६ ॥ कालि सुंदरि मत्पार्श्वे वल्लभे त्वमुपाविश ॥ शरीरे मम तन्वंगि सिते भास्वत्तिद्युतिः॥७॥ भुजंगीवासिता शुभ्रे संश्लिष्टा चंदने तरौ ॥ रजनीवासिते पक्षे दृष्टिदोषहरासि मे ॥ ८ ॥ इत्युक्तासि मया देवि गिरिजे चारुहासिनि ॥ तदा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रोक्तं त्वया वाक्यं मामुद्दिश्य सगद्गदम् ॥ ९ ॥ यदा त्वया मदर्थे हि प्रेरिता वेदपारगाः ॥ सप्तर्षयो महाभागाः किंकृते न तदात्थ माम् ॥ १० ॥ तदात्वया मदर्थेऽपि प्रार्थितो जनको मम ॥ हिमाद्रिराजो यत्नेन किं काली न तदात्थ माम् ॥ ११ ॥ यदाप्युक्तं त्वया दैन्यान्मदर्थे गच्छ नारद ॥ प्रार्थ्यतां पार्वती शीघ्रं किं काली न तदात्थ माम् ॥ १२ ॥ सत्येयं लौकिकी गाथा न वृथा परिजायते ॥ स्वकृतेन जनः सर्वो जाड्येन परि पदेपदे ॥ नेवास्मि कुटिला रौद्रा विषमा न च भूजटे ॥ १५ ॥ नाकुलीना वृथाचारा न दुष्टा न समत्सरा ॥ सविषस्त्वं यतः ख्यातो व्यक्तं दोषा करात्रयः ॥१६॥ अकुलीनो वृथाचारो मात्सर्येणाश्रितः सदा ॥ नाहं मुष्णामि नयने तत्र हंता त्वमेव च ॥१७॥ आदित्यस्त्वां विजानातु भगवा न्ह्रादशात्मकः ॥ मया नोत्पाटिता दंताः कस्यापि निरपत्रप ॥१८॥ पूषा देवो विजानाति द्वादशात्मा दिवाकरः॥मूर्ध्नि शूलं तव यतः स्वैर्दोषैर्मामधिक्षिपः ॥१९॥ यत्तु मामाह कृष्णेति महाकालेतिविश्रुतः॥ इत्यथापि प्रवादोऽयं प्रवरः ख्यामि ते हर ॥२०॥ निदर्शनार्थं न द्वेषाच्छृत्वा तं क्षंतुमर्हसि ॥ विरूपो यावदादर्शं नात्मनः पश्यते मुखम्॥२१॥मन्यते तावदात्मानमन्येभ्यो रूपवत्तमम् ॥ यदा तु मुखमादर्शे विकृतं सोऽभिवीक्षते॥२२॥ तदेतरं विजानाति ह्यात्मानं नेतरं जनम्॥ सत्यधर्मच्युतात्पुंसः क्षुद्रादाशीविषादिव ॥ २३ ॥ स नास्तिकोप्युद्विजते जनः किं पुनरास्तिकः ॥ इत्थं क्रोडं त्वया देवि मया कोलाहलः कृतः ॥ २४ ॥ अनात्मज्ञासि गिरिजे मृडे पंडितमानिनि ॥ सत्यं सर्वैरवद्यैः स्तुतोऽपि सदृशः पितुः ॥२५॥ काठिन्यं कष्टमभ्येति धातुभ्यो बहुधातिता ॥ कुटिलत्वं च सर्वेभ्योऽसेव्यत्वं च हिमादिव ॥२६॥ इत्युक्ताऽसि मया देवि पुनः प्रोक्तं त्वया वचः ॥ तथापि दुष्टसंसर्गात्संक्रांतं सर्वमेव हि ॥२७॥ व्यालेभ्योऽनेकजिह्वत्वं भस्मतः स्नेहवर्जनम् ॥ हृत्कालुष्यं शशांकाद्धे दुर्योधत्वं वृषादपि॥२८॥श्मशा नवासाद्भीरुत्वं नग्नत्वं च न लज्जया ॥ निर्घृणत्वं कपालाच्च दया ते विगता चिरम् ॥ २९ ॥ एवं तदाभवद्द्वंद्वः कलहो भयकृच्छुभे ॥ एवं प्रवृत्ते तु तदा कंपितं भुवनत्रयम् ॥ ३० ॥ भीताश्च देवगंधर्वा यक्षगंधर्वराक्षसाः ॥ तस्मात्कोलाहलो भूमिं भित्त्वा लिंगमभूत्तदा ॥ ३१ ॥ लिंगमध्या त्समुत्पन्ना वाणी सुखकरी शुभा ॥ आश्वासयंती देवान्वै त्रैलोक्यं सचराचरम् ॥ ३२ ॥ नामास्य चक्रुर्देवेशास्तदा कलकलेश्वरम् ॥ स्वरनामा सौ ततोऽभूच्छङ्करो भुवि विश्रुतः ॥ ३३ ॥ यस्तमर्चयते भक्त्या देवं कलकलेश्वरम्॥ न राक्षसाः पिशाचाश्च न भूता न विनायकाः ॥ विघ्नं कुर्युर्न राणोहे कलहो न भवेद्गृहे ॥ ३४ ॥ सुशीला गृहिणी तस्य सुरूपा सुभगा प्रिये ॥ बहुपुत्रा बहुधना जायते दर्शनात्तथा ॥ ३५ ॥ ये पश्यंति चतु ईश्वां देवं कलकलेश्वरम् ॥ न दुःखं न जरा व्याधिर्नाकालमरणं तथा ॥ ३६ ॥ न च शत्रुभयं तेषां जायते गिरिपुत्रके ॥ लोकोऽक्षयो भवेद्देवि यावद्दिद्राश्चतुर्दश ॥ ३७॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ यस्य श्रवणमात्रेण क्षेममत्र परत्र च ॥ ३८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कलकलेश्वरमाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥०॥ ॥ ईश्वर उवाच ॥ ॥ एकोनविंशतितमं नागचंडेश्वरं प्रिये ॥ निर्माल्यलंघनात्पापान्मुच्यते यस्य दर्शनात्॥१॥ तस्य प्रभावं सुभगं कथयाम्यथ विस्तरात्॥ शृण्वेकाग्रमना देवि सर्वपापप्रणाशनम् ॥ २ ॥ पुरा देवर्षिगंधर्वाश्चारणा गुह्यकास्तथा ॥ उपविष्टाः सुधर्मायां कथयंतः शुभां कथाम् ॥ ३ ॥ एत स्मिन्नंतरे शक्रो देवर्षिं नारदं मुनिम् ॥ पप्रच्छ सादरं देवि समायातं शुचिव्रतम् ॥ ४ ॥ दृष्ट्वा विनयसंपन्नं ब्रह्मचर्यपरायणम् ॥ मेखलाजिनकौपीनं वीणादण्डविभूषितम् ॥५॥ त्वया दृष्टमिदं सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ उत्पाद्यमानमुत्पन्नं प्रलयञ्च सहस्रशः ॥६॥ त्वत्तुल्यो नास्ति लोकेऽस्मिन्सु क्त्वैकं परमेष्ठिनम् ॥ जगत्कारणमव्यक्तं नित्यं सदसदात्मकम्॥ ७ ॥ योगेन तपसा भक्त्या यत्त्वया परितोषितः ॥ त्रैलोक्यमभिजानासि तत्सर्वं सर्वतः स्फुटम् ॥ ८ ॥ अतोऽहं प्रष्टुमिच्छामि कथ्यतां मम निश्चयम् ॥ पृथिव्यां प्रवरं क्षेत्रं पावनं भुक्तिमुक्तिदम् ॥ ९ ॥ एवं श्रुत्वा तदा ध्यात्वा चिंतयामास नारदः ॥ चिंतयित्वा चिरं कालमिदं वचनमब्रवीत् ॥१०॥ देवराज स्मृतं पुण्यं क्षेत्रराजमनुत्तमम् ॥ क्षेत्राणामुत्तमं क्षेत्रं प्रयागं च प्रश स्यते ॥ ११ ॥ तस्माद्दशगुणं क्षेत्रं महाकालस्य कथ्यते ॥ भुक्तिदं मुक्तिदं तच्च दर्शनादपि वासव ॥ १२ ॥ एतच्छ्रुत्वा सहस्राक्षो वर्णयित्वा च तं मुनिम् ॥ सर्वैर्देवगणैः सार्द्धं विमानस्थस्त्वरान्वितः ॥ १३ ॥ अंतरिक्षस्थितो जिष्णुरद्राक्षीच्च सुरैः सह ॥ क्षेत्रं लिंगैः समाकीर्णमंगुलस्यांतरं न हि ॥ १४ ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ महाकालवने रम्ये निर्माल्यं लंघ्यते कथम् ॥ १५ ॥ निर्माल्यलंघनाद्दोषो महान्भवति निश्चितम् ॥ इत्यालोच्य पुनर्देवि जग्मुः स्वर्गे मनोरमाः ॥ १६ ॥ निर्माल्यदोषभीतास्ते क्षेत्रे न विविशुः सुराः ॥ एतस्मिन्नंतरे देवि विमानस्था गणोत्तमाः ॥ १७ ॥ गणैर्नानाविधैः सेव्यैर्गीयमानश्च किंनरैः ॥ चारणैः स्तूयमानस्तु स्वर्गलोकं व्रजन्सुरैः ॥ १८ ॥ प्रफुल्लनयनैर्दृष्टः कोऽयं धन्यो महातपाः ॥ तेजसा दीप्यमानोयमप्सरोभिश्च सेव्यते ॥ १९ ॥ पप्रच्छुरमराः सर्वे कोऽयं रुद्रनिभो गणः ॥ याति कुत्र महात्माहो दृष्टात्मा प्रहसन्मुखः ॥ २० ॥ पृष्टस्तदा सुरैः सर्वैर्विस्मयाविष्टमानसैः ॥ कस्त्वं पुरुषशार्दूल किं त्वया सुकृतं कृतम् ॥ २१ ॥ देवानां पुरतो देवि निःशेषं कथितं तदा ॥ महाकालो महादेवः पूजितो भक्तितः स्तुतः ॥ २२ ॥ हृष्टेन तेन मे दत्तं गणत्वं यत्सुदुर्लभम् ॥ नाम दत्तं च सुभगं नाग चंड इति ध्रुवम् ॥ २३ ॥ पप्रच्छुरमरास्तच्च सादरं गणसत्तम ॥ नागचंड त्वया तत्र निर्माल्यं पतितं त्वथ ॥ २४ ॥ महाकालवने पुण्ये लंघितं चरता त्वया ॥ संचारो नास्ति तत्रैव लिंगसंकीर्णता यतः ॥ २५ ॥ उपायस्तेन कथितो देवानां पुरतस्तदा ॥ तत्र तिष्ठति देवेशालिंगं सर्वफलप्रदम् ॥ २६ ॥ ईशानोश्वरदेवस्य तिष्ठतीशानभागतः ॥ तस्य दर्शनमात्रेण न स गच्छति दुष्कृतम् ॥ २७ ॥ निर्माल्यलंघनोद्भूतं यत्पापं जायते महत् ॥ तत्सर्वं नाशमायाति तस्य लिंगस्य दर्शनात् ॥ २८ ॥ ततो देवगणाः सर्वे महाकालवने पुनः ॥ समायाता महाभागा महाकालश्च पूजितः ॥ २९ ॥ यथा लिंगं च तद्दृष्टं सर्वदोषक्षयंकरम् ॥ तस्य दर्शनमात्रेण निर्माल्यलंघनादिभिः ॥ दोषो नष्टः सुराणां च ततो नामास्य चक्रिरे ॥ ३० ॥ अस्माकं तेन कथितं नागचंडेन धीमता ॥ नागचंडेश्वराख्यानमतो लोके भविष्यति ॥ ॥ ३१ ॥ कृत्वास्य नाम ते देवा जग्मुः स्वर्गेहमुत्तमम् ॥ पूजयिष्यंति ये केचिन्नागचंडेश्वरं शिवम् ॥ निर्माल्यलंघनोद्भूतं तेषां नश्यति पातकम् ॥ ॥ ३२ ॥ नागचंडेश्वरं देवं ये पश्यंति दिनेदिने ॥ अज्ञानाज्ज्ञाननः पापं तेषां नश्यति नान्यथा ॥ ३३ ॥ आह्लादं निर्वृतिं स्वास्थ्यमा रोग्यं चारुरूपताम् ॥ नृप जन्मान्यवाप्नोति दर्शनेन न संशयः ॥ ३४ ॥ प्राप्नोत्यभिमतान्कामान्देवानामपि दुर्लभान् ॥ कीर्त्तनान्नात्र संदेहो नागचंडेश्वरस्य च ॥ ३५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ नागचंडेश्वरस्येव प्रतीहारेश्वरं शृणु ॥ ३६ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये नागचंडेश्वरमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ॥ ईश्वर उवाच ॥ ॥ प्रतीहारेश्वरं देवि विद्धि विंशतिमं प्रिये ॥ यस्य दर्शनमात्रेण धनवानिह जायते ॥ १ ॥ दक्षकोपात्त्वं च देवि पुरा प्राणैर्विसर्जितैः ॥ हिमाचले तथा जाता मया प्राप्ता पुनः प्रिये ॥ २ ॥ प्राप्ता च मया देवि त्वया सार्द्धं रतिस्तदा ॥ दिव्यं वर्षशतं जातं साग्रं देवि प्रमोदतः ॥ अनुरागवशाच्चैव मन्मथेन प्रपीडिता ॥ ३ ॥ महारतिं सभीक्ष्याथ देवाः संक्षुब्धमानसाः ॥ चक्रुर्मत्रं यथाकालं वासवाद्या यथोचितम् ॥ ४ ॥ दिव्यं वर्षशतं रुद्रो गौर्या सह सदा रतिम् ॥ कुर्वंस्तिष्ठति देवोऽसौ मंदरे चारुकंदरे ॥ ५ ॥ अनयोर्वीजसंपन्नो पुत्रो यो हि भवेत्तदा ॥ विनश्येत्तेन त्रैलोक्यमखिलं च न संशयः ॥ ६ ॥ तस्य तेजोपि नो वोढुं समर्था निश्चितं वयम् ॥ तस्मात्तत्क्रियतां कर्म रतिर्येनो पशाम्यति ॥ ७ ॥ उपायं दृष्टवांस्तत्र देवानां गुरुरग्रणीः ॥ बृहस्पतिर्महातेजा वेदशास्त्रार्थपारगः ॥ ८ ॥ गच्छंतु त्रिदशाः सर्वे शिवस्य तु समीपतः ॥ स्वयं विज्ञाप्यतां देवस्तत्कर्म न करिष्यति ॥ ९ ॥ इति निश्चित्य ते देवि जग्मुः शीघ्रं सुरास्तदा ॥ मंदराद्रेः शुभे द्वारि स्थितास्ते विस्मयान्विताः ॥ १० ॥ गणानामधिपो नंदी द्वारि तिष्ठति यत्नतः ॥ त्वया सार्द्धमहं देवि कुर्वंस्तिष्ठामि तां रतिम् ॥ ११ ॥ अथ प्रवेशो देवानां दुष्करो मम पार्श्वतः ॥ तदा चिंतयमानाश्च तत्र तिष्ठंति ते सुराः ॥ १२ ॥ अग्निना तद्धितं वाक्यमुक्तं तेषां पुरः शुभम् ॥ हंसरूपं समास्थाय यास्यामि शिवसन्निधौ ॥ १३ ॥ वंचयित्वा प्रतीहारं कृतं तेन तथैव च ॥ हंसरूपेण कथितं कर्णे मम शुचिस्मिते ॥ १४ ॥ इन्द्राद्या अमरा देवा द्वारि तिष्ठंति संयताः ॥ श्रुत्वा तस्य च तद्वाक्यं ततोऽहं द्वारमागतः ॥ १५ ॥ ततश्च तैः कृतो मह्यं प्रणामश्च यथाक्रमम् ॥ मया दृष्टाश्च ते देवा युष्माकं किं करोम्यहम् ॥ १६ ॥ तैरुक्तं त्यज्यतां चैव संभोगस्तु सुदारुणः ॥ तथा मया कृतं देवि गतास्ते त्रिदिवं पुनः ॥ १७ ॥ ततः शप्तो मया नंदी भूलोकं गच्छ सत्वरम् ॥ ततः शापपरिभ्रष्टः पृथिव्यां पतितस्तदा ॥ १८ ॥ सोच्छ्वासहृदयो दीनो दुःखव्याकुललोचनः ॥ विलपंश्च तथा नंदी विलुठञ्छोकतो भुवि ॥ १९ ॥ वंचितश्चाग्निना बाढं वामदेवेन विशेषतः ॥ किं मया दुष्कृतं कर्म कृतं किं चित्पुरातनम् ॥ २० ॥ स दृष्टो लोकपालैस्तु तामवस्थां गतो गणः ॥ पृष्टश्च तैः कुतो नंदिन्विलापं कुरुषे महत् ॥ २१ ॥ सर्वं निवेदितं तेन तेषामग्रे च नंदिना ॥ उपायः कथितस्तैश्च महाकालवनं ततः ॥ २२ ॥ तनश्च वचनं श्रुत्वा नंदी रोमांचकंचुकः ॥ महाकालवने देवि जगाम स तदा गणः ॥ पूजयामास विधिवद्भक्त्वा कपालिकीं तनुम् ॥ २३ ॥ अशरीरसमुत्पन्ना वाणी लिंगात्तदा प्रिये ॥ संजाता शापमोक्षस्ते प्रतीहार सुभाषितः ॥ पूजितोऽसौ महाभक्त्या प्रतीहारेण नंदिना ॥ २४ ॥ तदाप्रभृति लोकेस्मिन्प्रतीहारेश्वरेश्वरः ॥ मया ते कथितो देवि प्रतीहारेश्वरस्य च ॥ प्रभावः सर्वलोकानामत्यभीष्टफलप्रदः ॥ २५ ॥ पूजयिष्यंति ये भक्त्या प्रतीहारेश्वरं शिवम् ॥ स्थानभ्रंशो वियोगश्च तेषां स्वप्नेऽपि नो भवेत् ॥ २६ ॥ सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥ तत्सर्वं नाशमायाति प्रतीहारेश्वरार्चनात् ॥ २७ ॥ मनसा ये स्मरिष्यंति प्रतीहारेश्वरं शिवम् ॥ एवं तस्य कुलं सर्वं याति स्वर्गं न संशयः ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये प्रतीहारेश्वरमाहात्म्यवर्णनंनाम विंशोऽध्यायः ॥ २० ॥७५॥ ॥ ईश्वर उवाच ॥ ॥ एकविंशतिकं विद्धि कुक्कुटेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण तिर्यग्योनिर्न लभ्यते ॥ १ ॥ कौशिकोनाम राजाभूत्कुक्कुटो जायते सदा ॥ दृश्यते वासरे भागे सर्वाभरणभूषितः ॥ २ ॥ व्याप्ता च पृथिवी तेन सशैलवनकानना ॥ पूर्वकर्मप्रभावेन प्राप्तं राज्यमकण्टकम् ॥ ३ ॥ विशालानाम विख्याता भार्या तस्य महीपतेः ॥ रूपलावण्यसंयुक्ता चतुःषष्टिकलान्विता ॥ ४ ॥ तया चकार सहितः स राज्यं राजसत्तमः ॥ सा वल्लभापि नृपतेः प्राणेभ्योऽपि गरीयसी ॥ ५ ॥ तया सार्द्धं कदाचिच्च सुरतं नास्ति पार्वति ॥ संतप्ता सर्वदा सा च रत्यभावाद्बभूव ह ॥ ६ ॥ एवं गच्छति काले तु सह राज्ञा स्मरातुरा ॥ सर्वमत्तरुतज्ञा सा विशाला विपुलेक्षणा ॥ ददर्श कीटमिथुनमनंगकलहातुरम् ॥ ७ ॥ प्रसादयंस्तथा कीटः त्वां प्रियां च मुहुर्मुहुः ॥ दासोऽस्मि तव कांतेऽहं रूपसौभाग्य सुन्दरि ॥ ८ ॥ भजस्व मां यथाकाममनंगशरपीडितम् ॥ शिरसा प्रणतेनैव रचितस्ते मयांजलिः ॥ ९ ॥ न त्वया सदृशी लोके कामिनी विद्यते क्वचित् ॥ सुवर्णवर्णसदृशी मद्भक्ता चारुहासिनी ॥ १० ॥ कुतो वा मयि दीने त्वं क्रुद्धेव प्रियवादिनि ॥ किमर्थं वद कल्याणि सरोषवदना स्थिता ॥ ११ ॥ सा तमाह प्रकोपाच्च किमालपसि मां वृथा ॥ त्वया मोदकचूर्णं तु मां विहाय मनोरमाम् ॥ प्रदत्तं कामलुब्धेन अन्यस्यै कीटजन्मम ॥ १२ ॥ नाहमेवं करिष्यामि कीटः प्राह पुनःपुनः ॥ स्पृशामि पादौ सत्येन प्रणतस्य प्रसीद मे ॥ १३ ॥ इति तद्वचनं श्रुत्वा सा प्रसन्नाभवत्तदा ॥ आत्मानमर्पयामास कामनाय पिपीलिका ॥ १४ ॥ दृष्ट्वा तन्महदाश्चर्यं सा राज्ञी विललाप ह ॥ धिग्राज्यं धिक्च मे रूपं धिक्च यौवनमद्य मे ॥ न कामिताहं कांतेन मरिष्यामि न संशयः ॥ १५ ॥ एवं विलप्य बहुधा विनिःश्वस्य पुनःपुनः ॥ उन्मत्तेव विशालाक्षी गालव स्याश्रमं गता ॥ १६ ॥ दृष्ट्वा तमृषिमासीनं तपोयोनिं दृढव्रतम् ॥ उवाच प्रणतांगी सा शोकसंततमानसा ॥ १७ ॥ एकोऽयं संशयो ब्रह्मन्हृदये परिवर्त्तते ॥ वश्योऽपि हि च मे भर्त्ता रूपलावण्यवानपि ॥ न जाने कारणं किं तु संगमो नोपजायते ॥ १८ ॥ यो गत्वा प्रमदाराज्यं जित्वा सर्वाः पुरा रणे ॥ आजहार शुभास्तासां मध्यादष्टौ वरांगनाः ॥ नैव कामयते तासु किमेतदिति सुव्रत ॥ १९ ॥ वाजिनो वारणाश्चैव धनधान्यमनंतकम् ॥ वर्त्तते हि जनः सर्वो ममाज्ञां पालयन्निती ॥ २० ॥ केन कर्मविपाकेन ममेदं यौवनं दृढम् ॥ व्यर्थं जातं द्विजश्रेष्ठ रतिं न कुरुते नृपः ॥ ॥ २१ ॥ दृश्यते वासरे भागे रात्रौ नैव न दृश्यते ॥ इहजन्मकृतं चेतदाहोस्वित्पारलौकिकम् ॥ २२ ॥ दुष्कृतावर्जनं ब्रह्मन्ममेदं वक्तुमर्हसि ॥ तस्यास्तद्वचनं श्रुत्वा गालवो वाक्यमब्रवीत् ॥ २३ ॥ शृणु पुत्रि पुरावृत्तं बालभावेन यत्कृतम् ॥ अनेन राज्ञा धर्मज्ञे रात्रौ येन न दृश्यते ॥ २४ ॥ विदूरथस्य तनयस्तव भर्ता स निश्चितम् ॥ मांसाहारी दोषरतिर्विषयासक्तमानसः ॥ २५ ॥ कुक्कुटानां च मांसेन प्रीतिस्तस्य तदाऽभवत् ॥ बहवः कुक्कुटास्तेन भक्षिता राजमृत्युना ॥ २६ ॥ एवं भक्षयतस्तस्य बहुशो वत्सरा गताः ॥ कालेन महता राज्ञा ताम्रचूडेन मंत्रिणः ॥ पृष्टाः किं कारणं नात्र समायांति हि कुक्कुटाः ॥ २७ ॥ अथ केनापि कथितं कुक्कुटानां च भक्षणम् ॥ विदूरथस्य पुत्रेण कौशिकेन दुरात्मना ॥ भक्षिताः कुक्कुटाः सर्वे विना कारणतो नृप ॥ २८ ॥ ताम्रचूडोऽथ संक्रुद्धो ददौ शापं दुरात्मने ॥ कौशिकाय क्षयो रोगो भविष्यति भयावहः ॥ ॥ २९ ॥ तदाप्रभृत्यभूत्क्षीणो राजपुत्रो दिनेदिने ॥ ऑपधैरधिकोऽभ्येति व्याधिना पीडितो भृशम् ॥ ३० ॥ अथ केनापि कामेन वामदेवाश्रमं गतः ॥ क्षयरोगाभिभूतोऽसौ मरणोत्सुकमानसः ॥ पप्रच्छ वामदेवं स नमस्कृत्य पुनःपुनः ॥ ३१ ॥ भगवन्केन पापेन क्षीयतेऽद्यैर्निशं वपुः ॥ मदीयं पोष्यमाणं हि मांसेन विविधेन च ॥ ३२ ॥ वामदेवोऽथ तं प्राह कुक्कुटा भक्षितास्त्वया ॥ ताम्रचूडेन शप्तोऽसि कुक्कुटानां नृपेण हि ॥ ३३ ॥ तमेव शरणं गच्छ स उपायं वदिष्यति ॥ ततः स ताम्रचूडस्याभ्यर्णमागान्नृपात्मजः ॥ ३४ ॥ दृष्ट्वा च ताम्रचूडं तं महाभक्त्या कृतांजलिः ॥ प्रोवाच प्रणतो भूत्वा पाहि मां शरणागतम् ॥ ३५ ॥ अज्ञानाद्भक्षिता देव कुक्कुटाः पुष्टिकारणात् ॥ क्षंतुमर्हसि देवेश ममागः कृपणस्य च ॥ ३६ ॥ प्रोवाच ताम्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चूडोऽथ यस्मात्त्रार्थयसे नृप ॥ तस्मात्ते वासरे प्राप्ते पुरुषत्वं भविष्यति॥३७॥शास्ता गोप्ता च लोकानां राजा दंडधरः प्रभुः ॥कुक्कुटो भविता रात्रौ सर्वभोगविवर्जितः ॥३८॥ अतो न दृश्यते पुत्रि तिर्यग्भावं समाश्रितः॥३९॥इति तस्य वचः श्रुत्वा गालवस्य महात्मनः ॥ सा संपूज्य विशालाक्षी गालवं मुनिसत्तमम् ॥ पप्रच्छ परया भक्त्या शापांतो हि कथं भवेत् ॥ ४० ॥ गालवः कथयामास ध्यानेनालोक्य यत्नतः ॥ ४१ ॥ महाकाल वने लिंगं पक्षियोनिविमोचनम् ॥ ज्वालेश्वरस्य देवस्य पूर्वभागे व्यवस्थितम् ॥ तस्य दर्शनमात्रेण शापस्यांतो भविष्यति ॥ ४२ ॥ सा प्रणम्य मुनिश्रेष्ठमाजगाम त्वरान्विता ॥ यत्रास्ते नृपशार्दूलो विध्यन्बहुविधान्मृगान् ॥ ४३ ॥ प्रफुल्लनयनाभ्यां सा दृष्टा लोलेक्षणा प्रिया ॥ आह्लादिता बहुविधैः कोमलैर्वचनामृतैः ॥ ४४ ॥ ततस्तेन तदा राज्ञा-प्रोक्ता सा मृगलोचना ॥ इदानीं किं मया कांते कार्यं भवति कथ्यताम् ॥ ४५ ॥ तया प्रोक्तं महाराज गम्यतेऽद्य मया सह ॥ महाकालवने पुण्ये सर्वदुष्कृतनाशने ॥ ४६ ॥ तस्यास्तद्वचनं श्रुत्वा त्वरमाणो मुदान्वितः ॥ तया नीतोऽथ नृपतिर्लिंगस्यास्य समीपतः ॥ ४७ ॥ पूजयित्वाथ तल्लिंगं पक्षियोनिविमोचनम् ॥ तत्रैव च स्थितो राजा प्रियया सह पार्वति ॥ ४८ ॥ तस्यां रात्रौ न संजातः कुक्कुटो यादृशः सदा ॥ शिवप्रसादादभवद्दिव्यरूपी मनोहरः ॥ ४९ ॥ रूपेण निर्जितः कामस्तेनाप्रतिमतेजसा ॥ ततो विस्मयमापन्नश्चितयामास पार्थिवः ॥ कोऽयं प्रभावो येनाहं शापान्मुक्तः सुदुस्तरात् ॥ ५० ॥ प्रियां पप्रच्छ नृपतिः पूर्णेन्दुवदनां भृशम् ॥ कथं शापाद्विमुक्तोऽहं केन पुण्येन कर्मणा ॥ ५१ ॥ अथ सा कथयामास वृत्तांतं विस्तरान्मुदा ॥ गालवेन हि यत्प्रोक्तं यत्किंचिच्छापमोक्षणम् ॥५२॥ राजञ्छापाद्विमुक्तोऽसि लिंगस्यास्य प्रभावतः ॥ पुनः प्रसाद्य तल्लिंगं भुक्त्वा भोगांश्चिरं भुवि ॥ ५३ ॥ तया सार्द्धं ययौ राजा स्वर्गं सुरगणैः स्तुतः ॥ तदाप्रभृति तल्लिंगं कुक्कुटेश्वरसंज्ञकम् ॥ ५४ ॥ विख्यातं देवि लोकेऽस्मिन्सर्वकामफलप्रदम् ॥ तच्च ये पूजयिष्यंति कुक्कुटेश्वरसंज्ञकम् ॥ तिर्यग्योनिं न यास्यंति न वियोगो भविष्यति ॥ ५५ ॥ न चापि नरकावाप्तिर्न दुःखं न जरा भयम् ॥ नाकाले मरणं नृणां न च कष्टं भविष्यति ॥ ५६ ॥ रूपसौभाग्यसंपन्ना भविष्यंति युगेयुगे ॥ चतुर्दश्यां प्रपश्यंति लिंगं ये कुक्कुटेश्वरम् ॥ तेषां कुले च ये केचित्पितरो निरयस्थिताः ॥ ५७ ॥ तिर्यग्योनिगता ये च पशुयोनिं तु ये गताः ॥ वृक्षत्वमथवा प्राप्तास्तेषां मोक्षो भविष्यति ॥ ५८ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कुक्कुटेश्वरमाहात्म्यंवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ७ ॥ ॥ श्रीविष्णनाथ उवाच ॥ ॥ द्वाविंशतितमं विद्धि कर्कटेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण तिर्यग्योनिर्न दृश्यते ॥ १ ॥ आसीत्पुरा बृहत्कल्पे धर्ममूर्तिर्जनाधिपः ॥ सुहृच्छक्रस्य निहता येन दैत्याः सहस्रशः ॥ २ ॥ सोमसूर्यादयो यस्य तेजसा निष्प्रभाः कृताः ॥ प्रजाश्च पालिता येन निहत्य समरे द्विपः ॥ ३ ॥ यथेच्छारूपधारी च संग्रामेष्वपराजितः ॥ तस्य भानुमतीनाम भार्या त्रैलोक्यसुंदरी ॥ ४ ॥ राज्ञस्तस्याग्रमहिषी प्राणेभ्योऽपि गरीयसी ॥ दशनारीसहस्राणां मध्ये श्रीरिव राजिता ॥ ५ ॥ नृपो नृपसहस्रेण न कदाचित्प्रमुच्यते ॥ कदाचिदेकांतगतः पप्रच्छ स्वपुरोहितम् ॥ विस्मयेनावृतमना वशिष्टमृषिसत्तमम् ॥ ६ ॥ भगवन्केन धर्मेण मम लक्ष्मीरनुत्तमा ॥ कस्माच्च विपुलं तेजो दुःसहं मम दृश्यते ॥ ७ ॥ ॥ ॥ वशिष्ट उवाच ॥ ॥ पुरा त्वमवनीपाऽऽसीः शूद्रजातिसमुद्भवः ॥ बहुदोषसमाविष्टो दुष्टया भार्यया ऽनया ॥ ८ ॥ निवसन्दुष्टहृदयो वर्षाणि सुबहून्यपि ॥ महाक्रोधाभिभूतात्मा सदा निष्ठुरजल्पकः ॥ ९ ॥ सदा ब्रह्मस्वहारी त्वं सदा वेदविनिंदकः ॥ सदा चासूयको राजन्सदा विश्वासघातकः ॥ १० ॥ अथ पंचत्वमापन्नः काले नरकमाप्तवान् ॥ ताम्रभ्राष्ट्रे परं दग्धो दशवर्षाणि पंच च ॥ ११ ॥ रौरवे कुम्भिपाके च गहारौरवसंज्ञके ॥ सूक्ष्माणि तिलमात्राणि कृत्वा खंडान्यनेकशः ॥ १२ ॥ मूषायां धमितो राजन्नसिपत्रे च दारितः ॥ शेषपातकशुद्ध्यर्थं धरायामवतारितः॥१३॥ विधाय कार्कटं रूपं यमेन त्वयि पार्थिव ॥ शिवस्य सरो विख्यातं महाकालवनोत्तमे ॥१४॥ दत्तं जप्तं कृतं यच्च हुतं देवार्चनादि यत्॥ सर्वं तदक्षयं कर्म तस्मिन्सरसि विश्रुतम् ॥१५॥ निक्षिप्तस्त्वं तदा तेन भाविपुण्येन कर्मणा॥ तत्र स्थितस्त्वं भूपाल वर्षाणां पंचकं तथा॥१६॥ कदाचित्तीरभूम्यां त्वं गतः संक्रीडितुं शनैः ॥ समीक्ष्य तत्र कांकेन धृत्वा चंचुपुटेन च ॥१७॥ आकाशमार्गं चोड्डीनः स त्वया ताडितो भृशम् ॥ त्वत्तीक्ष्णपातैश्चरणैस्ताडितो व्यथितस्तदा ॥ १८ ॥ मुक्तस्त्वं चंचुपुटतो वायसेनाकुलेन तु ॥ स्वर्गद्वारस्य पूर्वे तु देव्यगारे सुपुण्यदे ॥ १९ ॥ शिवस्य क्षिप्रस्त्वं शीघ्रं चञ्चुवाक्षेपप्रपीडितः ॥ मृतोऽसि संनिधौ तत्र देवस्य परमेष्ठिनः॥२०॥ विमुच्य देहं तत्क्षणं यावत्तं कार्कटं पुरा ॥ तत्क्षणाद्दिव्य देहश्च दिव्याभरणभूषितः ॥ २१ ॥ तस्य लिंगस्य माहात्म्याद्भूत्वा विद्याधरेश्वरः ॥ कामगेन विमानेन पूज्यमानो गणेश्वरैः ॥२२॥ स्वर्गं व्रजंस्त्वं संपृष्टः सुरसंघैश्च सादरम् ॥ कोयं महात्मा मुदितो याति दिव्यस्त्रियोऽवरात् ॥ २३ ॥ ततो रुद्रगणैः सर्वं सुराणां कथितं पुरा ॥ वृत्तांतं विस्तरात्सर्वं कार्कटत्वविमोचनम् ॥ २४ ॥ तस्य लिंगस्य देवेशाः प्रभावोऽयमुपस्थितः ॥ देवैः प्रोक्तं च सहसा लिंगस्यास्य प्रभावतः ॥२५॥ कार्कटीयोनिमुक्तस्य प्राप्तं स्वर्गसुखं यतः ॥ कर्कटेश्वरनामायमतो लोके भविष्यति ॥ २६ ॥ तदाप्रभृति देवोऽयं कर्कटेश्वरसंज्ञकः ॥ त्वया स्वर्गे महाभोगा भुक्ता राजन्यथेच्छया ॥ २७ ॥ आगतोऽसि पुनर्भूमौ लब्धं राज्यमकंटकम् ॥ तस्य लिंगस्य माहात्म्याज्ञातं सर्वं तवाधुना ॥ २८ ॥ तस्मात्पार्थिव भूयस्त्वं लिंगमाराधय द्रुतम् ॥ जातिस्मरत्वमापन्नो वशिष्टवचनात्तदा ॥ २९ ॥ पूर्वं कर्म स्मृतं तेन स्वकीयं पार्थिवेन तु ॥ पुनर्गत्वा च तल्लिंगं पूजयामास यत्नतः ॥ ३० ॥ तस्मिँल्लिंगे लयं प्राप्तः स्वशरीरेण पार्वति ॥ येऽर्चयंति सदा भक्त्या कर्कटेश्वरसंज्ञकम्॥ भुक्त्वा भोगांश्चिरं भूमौ ते यांति परमां गतिम् ॥ ३१ ॥ नियमेन प्रपश्यंति ये देवं कर्कटेश्वरम् ॥ अष्टम्यां वा चतुर्दश्यां तेषां पुण्यफलं शृणु ॥ ३२ ॥ सूर्यदीप्तिप्रतीकाशैर्विमानैः सार्वकामिकैः ॥ मृता मम पुरं यांति त्रिसप्तकुलसंयुताः ॥ ३३ ॥ तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोरमैः ॥ कल्पकोटिशतंदेवि सेव्यमाना वसंति हि ॥ ३४ ॥ तदंते विष्णुभवने तावत्कालं च संति हि ॥ वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैस्तु सेविताः ॥ ३५ ॥ विष्णुलोकाद्ब्रह्मलोकं संप्राप्य मुदिताः पुनः ॥ भोगान्नानाविधान्भुक्त्वा ततो यांति परं पदम् ॥ ३६ ॥ दशाश्वमेधैर्यत्पुण्यं तत्फलं तीर्थयात्रया ॥ कर्कटेश्वरदेवस्य मेघनादेश्वरं शृणु ॥ ३७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कर्कटेश्वरमाहात्म्यवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रीहर उवाच ॥ ॥ मेघनादेश्वरं देवि त्रयोविंशतिमं शृणु ॥ यस्य दर्शनमात्रेण प्राप्यंते सर्वसिद्धयः ॥१॥ राजमूला महादेवि योगक्षेमाः सुवृष्टयः॥ प्रजाश्च व्याधयश्चैव मरणं च भयानि च ॥२॥ राजा कृतं तथा त्रेता द्वापरश्च तथा कलिः ॥ राजमूलानि सर्वाणि राजा धर्मस्य कारणम् ॥ ३ ॥ राजा बभूव लोकेऽस्मिन्मदांधोनाम पार्वति ॥ अहंकारावृतो दुष्टो देवब्राह्मणकंटकः ॥ ४ ॥ कलिद्वापरयोः संधौ तस्य दोषाच्च भामिनि ॥ अनावृष्टिरभूद्घोरा लोके द्वादशवार्षिकी ॥ ५ ॥ न ववर्ष सहस्राक्षः प्रतिलोमोऽभवत्प्रभुः ॥ नादृश्यन्ता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पि राज्यंते कुत एवाभ्रजातयः ॥ ६ ॥ नद्यः संक्षिततोयौघाः क्वचिदंतर्हितास्तदा ॥ निवृत्तयज्ञस्वाध्याया निर्वषट्कारमंगलाः ॥ ७ ॥ उच्छिन्नकृषि गोरक्षा निवृत्तविपणास्तथा ॥ अस्थिकंकालसंकीर्णा हाहाभूतनराकुलाः ॥ ८ ॥ शून्यभूयिष्ठनगरा दग्धग्रामनिवेशिनः ॥ गोजाश्वमहिषेहीना भक्ष्यमाणाः परस्परम् ॥ ९ ॥ आश्रमान्संपरित्यज्य पर्यधावन्नितस्ततः ॥ ब्राह्मणा दुःखबहुला मृता नष्टाश्च पार्वति ॥ १० ॥ सृष्टिरुन्मूलिता सर्वा जंगमा स्थावराखिला ॥ एतस्मिन्नंतरे देवाः शक्राद्या भयविह्वलाः ॥ ११ ॥ शरण्यं शरणं जग्मुर्देवदेवं जनार्दनम् ॥ क्षीरोदस्योत्तरे कूले श्वेतद्वीपं मनोरमम् ॥ १२ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् ॥ सदानंदकरं शांतं सूर्यकोटिसमप्रभम् ॥ १३ ॥ स्वेच्छाकल्पितविन्यासप्रासादशयनासनम् ॥ वज्रेंद्रनीलवैडूर्यचंद्रकांतादिदीपितम् ॥ १४ ॥ जरामृत्युभयोपेतसव्याधिव्यजितम् ॥ तस्मिन्द्वीपे ततो देवि सूर्य कोटिसमप्रभम् ॥ साष्टांगं प्रणतिं कृत्वा ते देवाः स्तुतिमब्रुवन् ॥ १५ ॥ भवान्ब्रह्मा च रुद्रश्च महेंद्रो देवसत्तमः ॥ भवान्कर्त्ता विकर्त्ता च लोकानां प्रभवोऽव्ययः ॥ १६ ॥ एवं च सत्यं परमं तपश्च परमं तथा ॥ पवित्रं परमं मार्गं यज्ञस्त्वं परमः प्रभो ॥ १७ ॥ परं होत्रं परं धाम त्वामाहुः पुरुषं परम् ॥ एवं स्तुतस्तदा तैस्तु देवदेवो जगन्नने ॥ १८ ॥ प्राह देवांस्ततः कृष्णः किं करोम्यद्य वः सुराः ॥ विज्ञप्तस्तैर्हरिर्देवो ह्यनावृष्ट्या प्रपीडितैः ॥ १९ ॥ उपायः कथ्यतां देव तुष्टिः पुष्टिर्यथा भवेत् ॥ ध्यानेन चिंतयित्वा च कथयामास केशवः ॥ २० ॥ गच्छध्वं त्रिदशाः सर्वे महाकालवने शुभे ॥ लिंगं वृष्टिकरं तत्र पुरा मेघैः प्रतिष्ठितम् ॥ २१ ॥ मेघा वृष्टिकराः सर्वे तस्मिँल्लिंगे च संति वै ॥ तस्य लिंगस्य माहात्म्याद्वृष्टिरेव भविष्यति ॥ २२ ॥ प्रतीहारेश्वराद्वायवादीशाने विद्यते सुराः ॥ तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति ॥२३॥ महाकालवने प्राप्ता यत्रास्ते लिंगमुत्तमम् ॥ तुष्टुवुः परया भक्त्या दृष्ट्वा देवं मनोरमम् ॥ २४ ॥ नमस्तेऽस्तु महेशाय नमोऽनंताय मालिने ॥ नमस्तेजःसमूर्त्तायनमः सौंदर्यशालिने ॥ २५ ॥ नमो योगाय वेदाय नमः पिंगजटाय ते ॥ अनंतज्ञानदेहाय नम ईश्वरमूर्त्तये ॥ २६ ॥ नमः शुभ्राट्टहासाय नमस्तेऽस्तु शिखंडिने ॥ शंकराय नमस्तेऽस्तु नमस्तेस्तु पिनाकिने ॥ २७ ॥ नमोऽतकाय भव्याय व्यंबकायास्तु ते नमः ॥ नमस्ते बहुरूपाय नमस्तेऽचिंत्यमूर्त्तये ॥ २८ ॥ नमो योगशरीराय नमस्ते सर्व सर्वदा ॥ नष्टं देव जगत्सर्वमनावृष्ट्या प्रपीडितम् ॥ २९ ॥ सुवृष्ट्या देवदेवेश पाहि नः शरणागतान् ॥ एतस्मिन्नंतरे मेघा पार्वणांगारवर्चसः ॥ ३० ॥ लिंगमध्यात्समुत्तस्थुर्वादयंतो नभस्तलम् ॥ अन्योन्यवेगाभिहता वसृपुर्भूतले तदा ॥ ३१ ॥ जातं विनिष्प्रभं सर्वं न प्राज्ञायत किंचन ॥ तिमिरौघपरिक्षिप्ता रेजुश्चाथ दिशो दश ॥ ३२ ॥ ते तस्य देवदेवस्य माहात्म्येन प्रतोषिताः ॥ देवाः प्रीतिं परां जग्मुः सर्वेऽमृतमिवोत्तमाः ॥ ३३ ॥ ततस्तमः संहरंतो विनेशुश्च बलाहकाः ॥ प्रववुः शीतला वाताः प्रशांताश्च दिशो दश ॥ ३४ ॥ शुद्धप्रभाणि ज्योतींषि सोमं चक्रुः प्रदक्षिणम् ॥ अविग्रहं ग्रहाश्चक्रुः प्रशांताश्चापि सिन्धवः ॥ ३५ ॥ महर्षयो विशोकाश्च गंधर्वाश्च ककुं जगुः ॥ अभूत्सृष्टिः पुनः सर्वा लिंगस्यास्य प्रभावतः ॥ ३६ ॥ सुरैः संपूज्य भक्त्या ते चक्रुर्नाम यथार्थतः ॥ अस्य लिंगस्य माहात्म्यं दृष्ट्वा प्रीताः सुरा बहु ॥ ३७ ॥ मेघनादेश्वरं नाम भविष्यत्यस्य सर्वतः ॥ मेघनादेश्वराख्यानं मया ते कथितं प्रिये ॥ ३८ ॥ भविष्यंति नरा भूमौ कृतार्थास्तत्प्रभावतः ॥ दर्शनादस्य लिंगस्य कामवृष्टिर्भविष्यति ॥ ३९ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ कुर्वल्लिंगस्य स्नपनं रुद्रलोके महीयते ॥ ४० ॥ प्रभावः पठ्यते यत्र मेघनादस्य पार्वति ॥ अतिवृष्टिश्चैव ततो भविष्यति च भूतले ॥ ४१ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये मेघनादेश्वरमाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ॐ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ महालयं महाभागे चतुर्विंशतिकं शुभम् ॥ ब्रह्मादिस्तंबपर्यंतं त्रैलोक्यं सचराचरम् ॥ १ ॥ उत्पादितं धृतं व्याप्तं त्वया देव मया श्रुतम् ॥ त्वयैकेन विशुद्धेन सर्वगेन महात्मना ॥ २ ॥ अत्यर्थं मुनयः सर्वे मुदिता मौनिनोऽव्ययाः ॥ वदंति कारणं चास्य त्रैलोक्यस्य महेश्वर ॥ ३ ॥ त्वया सर्वमिदं सृष्टं त्रैलोक्यं भूर्भुवादिकम् ॥ उत्पाद्यमानमुत्पन्नं प्रलीयच्च सहस्रशः ॥ ४ ॥ देवदानवगंधर्वमुनिचारणभोगिनाम् ॥ उत्पत्तिस्थितिसंहारास्त्वया दृष्टा मुहुर्मुहुः ॥ ५ ॥ जगच्चराचरं देव कुत्र स्थित्वामृजस्यलम् ॥ लीलया संहरस्येतत्प्रसादाद्वक्तुमर्हसि ॥ ६ ॥ कोऽसौ महालयो रौद्रग्रहरूपी व्यवस्थितः ॥ यस्मिन्धृतं त्वया सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ ॥ ७ ॥ इति पृष्टस्त्वया देवि मया ते कथितं पुरा ॥ इदानीं कथयिष्यामि शृणुष्वैकाग्रमानसा ॥ ८ ॥ पृथिव्यादीनि भूतानि महाकालवने प्रिये ॥ धृतानि प्रलयस्यांते एकोद्देशे महालये ॥ ९ ॥ ब्रह्मलोकादिभिर्लोकैरनौपम्यगुणं शुभम् ॥ स्थानं महालयं तत्र ममानंदकरं परम् ॥ १० ॥ परं ब्रह्ममयं लिंगं तत्र तिष्ठति सर्वदा ॥ तस्य लिंगस्य मध्ये तु धृतं कृत्स्नं चराचरम् ॥ ११ ॥ तत्र ब्रह्मादयो देवा विष्णुस्तत्रैव संस्थितः ॥ लिंगस्याभ्यंतरे देवि सर्वमेवाधितिष्ठति ॥ तस्माल्लिंगात्समुत्पन्नो महानात्मा महामतिः ॥ १२ ॥ भूतादिश्चाप्यहंकारो विष्णुः शंभुश्च पार्वति ॥ बुद्धिः प्रज्ञा धृतिः स्मृतिर्लज्जा सरस्वती ॥१३॥ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१४॥ अस्माद्भूतानि लिंगानि महाभूतानि पञ्च वै ॥ पृथिवी वायुराकाशमापो ज्योतिः प्रलीयते ॥ १५ ॥ स्थलमापस्तथाकाशं जन्म चापि चतुर्विधम् ॥ अण्डजोद्भिज्जं च सस्वेदं जरायुजमथापि वा ॥ १६ ॥ चतुर्द्धा जन्मचिह्नं यल्लिंगेस्मिन्नेव लक्ष्यते ॥ तपः कर्म च पुण्यं च व्रतं दानं तथैव च ॥ १७ ॥ रजःसत्त्वं तमोभावस्तस्माल्लिंगाच्च जायते ॥ तस्मिंस्तच्छ्रूयते सत्यं ज्योतिर्ब्रह्म सनातनम् ॥ १८ ॥ अव्यक्तकारणं सूक्ष्मं यत्तत्सदसदात्मकम् ॥ यस्मात्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ॥ १९ ॥ विश्वेदेवास्तथादित्या वसवोऽथाश्विनावपि ॥ यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा ॥ २० ॥ आपो द्यौः पृथिवी वायुरंतरिक्षं दिशस्तथा ॥ संवत्सरर्तवो मासाः पक्षाहोरात्रयस्तथा ॥ २१ ॥ यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥ यदिदं दृश्यते किंचित्तस्यांते च प्रलीयते ॥ २२ ॥ अतो महालयोनाम विख्यातो भुवनत्रये ॥ मुक्तीश्वरस्य देवस्य दक्षिणे संव्यवस्थितः ॥ २३ ॥ यः पूजयति तल्लिंगं रुद्रमूर्त्या महालयम् ॥ त्रैलोक्यविजयी नित्यं कीर्त्तिमान्स नरो भवेत् ॥ २४ ॥ महालयेश्वरे पुण्ये पूजिते परमेश्वरे ॥ भक्त्या परमया चैव सर्वे देवाः सुपूजिताः ॥ भवंतीह महाभागे यतस्तैरपि पूज्यते ॥ २५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये महालयेश्वरमाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ॐ ॥ ॥ ॥ श्रीहर उवाच ॥ ॥ पंचविंशतिकं देवं विद्धि मुक्तीश्वरं प्रिये ॥ यस्य दर्शनमात्रेण मुक्तिर्भवति पार्वति ॥ १ ॥ पुरा राथंतरे कल्पे बभूव द्विजसत्तमः ॥ मुक्तिर्नाम महाभागे संशितात्मा जितेंद्रियः ॥ २ ॥ महाकालसमीपे तु मुक्तिर्लिंगमनुत्तमम् ॥ महाकालवने रम्ये तत्रास्ते योगतत्परः ॥ ३ ॥ ततस्तेपे जिताहारो वत्सराणि त्रयोदश ॥ कदाचित्सोऽभिषेकाय आजगाम महानदीम् ॥ ४ ॥ शिप्रां विप्रप्रियां पुण्यां महापातकनाशनाम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शिनीम् ॥ तत्र स्नात्वा जपन्विप्रो ददर्शायांतमग्रतः ॥ ५ ॥ व्याघ्रं महाधनुष्पाणिं रक्तनेत्रं सुभीषणम् ॥ वदंतं हन्तुकामं वै वल्कलानां जिघृक्षया ॥ ॥ ६ ॥ तं दृष्ट्वा क्षुभितो विप्रो ब्रह्मन्नस्य भयादिति ॥ ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः ॥ ७ ॥ तं दृष्ट्वांतर्गतहरिर्व्याधो भीत इवाग्रतः ॥ ॥ ६ ॥ तं दृष्ट्वा क्षुभितो विप्रो ब्रह्मन्नस्य भयादिति ॥ ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः ॥ ७ ॥ तं दृष्ट्वांतर्गतहरिर्व्याधो भीत इवाग्रतः ॥ विहाय सशरं चापं ततो वचनमब्रवीत् ॥ ८ ॥ ॥ व्याध उवाच ॥ ॥ हंतुमिच्छुरहं ब्रह्मन्भगवन्तमिहागतः ॥ इदानीं स्वगता बुद्धिस्त्वां दृष्ट्वैव महाप्रभम् ॥ ९ ॥ ब्राह्मणानां सहस्राणि स्त्रीणामयुतशस्तथा ॥ निहतानि मया ब्रह्मन्वृत्तिहेतोः कुटुंबिना ॥ १० ॥ न च मे व्यथितं चित्तं कदाचिदपि जायते ॥ इदानीं तमुमिच्छामि तपोऽहं त्वत्समीपतः ॥ ११ ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ एवमुक्तो ह्यसौ विप्रो नोत्तरं प्रत्यपद्यत ॥ १२ ॥ ब्रह्महा पापकर्मेति मत्वा ब्राह्मणपुंगवः ॥ अनुक्तोऽपि स धर्मस्तु व्याधस्तत्रैव तस्थिवान् ॥ १३ ॥ स्नात्वा सद्यः समायातो मुक्ति लिंगसमीपतः ॥ द्विजेन सहितो देवि दृष्ट्वा देवं सनातनम् ॥ १४ ॥ तत्क्षणाद्दिव्यदेहस्तु तस्मिँल्लिंगे लयं गतः ॥ दृष्ट्वा तन्महदाश्चर्यं मुक्तिर्विप्रो निजांतरे ॥ चिंतयामास सहसा मुक्तिः प्राप्ता वरानने ॥ १५ ॥ व्याधेन पापयुक्तेन समाधिरहितेन च ॥ मया पुनः समाचीर्णं तपः परम दुष्करम् ॥ १६ ॥ न प्राप्ता परमा मूर्त्तिर्मुक्तिर्नैव च लभ्यते ॥ एवं स चिंतयित्वाथ वैराग्याद्ब्राह्मणर्षभः ॥ अन्तर्जलगतो भूत्वा चचार विपुलं तपः ॥ १७ ॥ कस्यचित्त्वथ कालस्य तां नदीमगमत्किल ॥ व्याघ्रो बुभुक्षितः साध्वि तं विहंतुं समुद्यतः ॥ १८ ॥ अंतर्जलचरं विप्रं याव द्व्याघ्रो जिघृक्षति ॥ नमो नारायणायेति तावद्वाक्यं द्विजोऽब्रवीत् ॥ १९ ॥ व्याघ्रेणापि श्रुतो मंत्रोऽजहात्प्राणांश्च तत्क्षणात् ॥ दिव्यांबरधरो देवि दिव्याभरणभूषितः ॥ दिव्यालंकारशोभाढ्यः पुरुषश्चाभवच्छुभः ॥ २० ॥ सोऽब्रवीद्याहि तं देशं यत्र विष्णुः सनातनः ॥ त्वत्प्रसादा द्विजश्रेष्ठ मुक्त्वा शापान्निरामयः ॥ २१ ॥ इत्युक्ते ब्राह्मणः प्राह कोऽसि त्वं पुरुषर्षभ ॥ सोऽब्रवीदस्मि राजेंद्र प्रतापी पूर्वजन्मनि ॥ २२ ॥ दीर्घबाहुरिति ख्यातः सर्वधर्मविशारदः ॥ अहं जानामि वेदांश्च शास्त्राणि विविधानि च ॥ २३ ॥ शुभाशुभमहं वेद्मि सर्वज्ञोऽहं महीतले ॥ ब्राह्मणेनैव मे कार्यं किं वस्तु ब्राह्मणा इति ॥ २४ ॥ तस्यैकस्मिन्दिने विप्राः सर्वे क्रोधसमन्विताः ॥ ददुः शापं दुराधर्षं क्रूरो व्याघ्रो भविष्यति ॥ २५ ॥ अपमानेन विप्राणां मांसाहारी भयावहः ॥ संजातोऽस्मि द्विजश्रेष्ठ पश्य कालविपर्ययं ॥ २६ ॥ इत्युक्तोऽहं पुरा तैस्तु ब्राह्मणैर्वेदपारगैः ॥ दुर्धर्षोऽयं मया प्राप्तो ब्रह्मशापो द्विजर्षभ ॥ २७ ॥ ततस्ते ब्राह्मणाः सर्वे प्रणिपत्य मया मुने ॥ प्रसादिता भृशं विप्र तदा गद्गद या गिरा ॥ २८ ॥ जानामि तेजो विप्राणां महाभाग्यं च धीमताम् ॥ अपेयः सागरः क्रोधात्कृतो यैर्लवणोदकः ॥२९॥ तथैव दीप्ततपसां मुनीनां भाविनात्मनाम् ॥ येषां क्रोधाग्निरद्यापि कण्डके नोपशाम्यति ॥ ३० ॥ ब्राह्मणानां परीभावाद्धातापिश्च दुरात्मवान् ॥ अगस्तिमृषिमासाद्य जीर्णः क्रूरो महासुरः ॥ ३१ ॥ सर्वभक्षः कृतो वह्निर्भृगुणा कारणांतरे ॥ गौतमेन पुरा शक्रः स सहस्रभगः कृतः ॥ ३२ ॥ दशधा केशवो जज्ञे ब्रह्मशापात्सुदुस्तरात् ॥ प्रसन्नैर्वालखिल्यैश्च पक्षींद्रो गरुडः कृतः ॥ ३३ ॥ अश्विनौ देवभिषजौ च्यवनेन महात्मना ॥ विष्टंभयित्वा कुलिशं कृतौ तौ सोमपायिनौ ॥ ३४ ॥ कार्त्तवीर्यार्जुनेनैव बाहूनां च सहस्रकम् ॥ दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् ॥ ३५ ॥ पुरा सेंद्रा वशिष्ठेन रक्षितास्त्रि दिवौकसः ॥ ब्राह्मणप्रभवं सौख्यं कीर्तिरायुर्यशो बलम् ॥ ३६ ॥ लोकालोकेश्वराश्चैव सर्वे ब्राह्मणपूर्वकाः ॥ एते हि सोमराजान ईश्वराः सुख दुःखयोः ॥ ३७ ॥ भस्मीकुर्युर्जगदिदं क्रुद्धाः प्रत्यक्षदर्शनाः ॥ प्रभावा वहवश्चापि श्रूयंते ब्रह्मवादिनाम् ॥ ३८ ॥ क्रोधश्च विपुलः सद्यः सद्यः प्रत्ययकारकः ॥ अहं कोपाद्द्विजेंद्राणां गतो निरययातनाम् ॥ ३९ ॥ नित्यं क्रोधाच्छ्रियं रक्षेद्धनं रक्षेत्समत्सरात् ॥ विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ॥४०॥ मयाऽज्ञानात्कृतं पापं राजगर्वेण दैवतः ॥ क्षंतुमर्हथ विप्रेंद्रा भवतः शरणागतम् ॥४१॥ अथ तुष्टा द्विजाः सर्वे त ऊचुर्मामिदं मुदा॥ पष्ठान्नकालिकस्तेऽग्रे यदा स्थास्यति कश्चन ॥ ४२ ॥ मांसभोक्ता च भविता कञ्चित्कालं नराधिप ॥ यदा शिप्रांतरे पुण्ये स्नातस्तु द्विजसत्तमः ॥ ॥ ४३ ॥ अंतर्जलगतेनोक्तो नमो नारायणेति च ॥ जिघृक्षुर्व्याघ्ररूपेण तदा मुक्तो भविष्यसि ॥ ४४ ॥ एवं स भवता प्रोक्तो नमो नारायणेति च ॥ मंत्रः श्रुतो मया त्वत्तस्तस्येयं व्युष्टिरागता ॥ ४५ ॥ जातोऽहं दिव्यदेहस्तु प्रसादात्तव सुव्रत ॥ स कृतार्थोऽस्मि संजातो भगवन्दर्शनात्तव ॥ ४६ ॥ वरं च गृह्यतां मत्तो यश्च ते संशयो हृदि ॥ तं च ब्रूहि द्विजश्रेष्ठ सर्वं संपादयामि ते ॥ ४७ ॥ तवोपदेशदानेन आनृण्यं गंतुमुत्सहे ॥ ४८ ॥ इति तस्य वचः श्रुत्वा दिव्यदेहस्य स द्विजः ॥ प्रोवाच परया तुष्ट्या प्रफुल्लमुखपंकजः ॥ ४९ ॥ अद्य मे सफलं ज्ञानमद्य मे सफलं तपः ॥ अद्य मे सफला जिह्वा सफलं चक्षुरद्य मे ॥ ५० ॥ श्रुतं देवेन संप्रोक्तं स्नात्वा पश्यंति देहिनः ॥ प्राक्छरीरगतं तेऽद्य व्याघ्ररूपं तपोत्तम ॥ ५१ ॥ तेजोमयं शरीरं तु ब्रह्मरूपं सनातनम् ॥ यदि त्वहमनुग्राह्यो यद्येवं कर्तुमर्हसि ॥ ५२ ॥ कारणं श्रोतुमिच्छामि हृदि मे वर्त्तते चिरम् ॥ कथं मुक्तिर्महाभाग मुक्तिकामेन यत्नतः ॥५३॥ योगाभ्यासरतेनापि वत्सरांश्च त्रयोदश ॥ न लब्धा परमाश्चर्यं तपसा दुष्करेण तु ॥५४॥ व्याधेनापि भृशं तेन प्राप्ता मुक्तिः क्षणेन तु ॥ अत्र मे संशयो जातः को हेतुः कथ्यतां भृशम् ॥ ५५ ॥ तस्य तद्वचनं श्रुत्वा ततो वचनमब्रवीत् ॥ कथयामि परं गुह्यं रहस्यं मुक्तिलक्षणम् ॥ ५६ ॥ महादेवमुपास्याशु मुने मुक्तिः सुदुर्लभा ॥ पुरातनैस्तु विद्वद्भिरिदमुक्तं महात्मभिः ॥ ५७ ॥ शृणुष्वैकमना विप्र कुरु यत्नं यथार्थतः ॥ मन्नियोगाद्द्विजश्रेष्ठ ततो मुक्तिमवाप्स्यसि ॥ ५८ ॥ शप्तोऽहं तैर्यदा विप्रैस्तदा मे तोषिता भृशम् ॥ ममानुकंपया प्रोक्तं मुक्तिस्ते भविता नृप ॥ ५९ ॥ मुक्तिकामो महाकाले मुक्तिर्ब्राह्मणसत्तमः ॥ विद्यते तपसा युक्तः स ते प्रश्नं करिष्यति ॥ ६० ॥ मुक्तीश्वरं तदा लिंगं तस्याग्रे कथयिष्यसि ॥ तवापि तस्य मुक्तेश्च मुक्तिरेवं भविष्यति ॥ ६१ ॥ पूर्वं हि चिह्नितं कर्म देहिनो न विमुंचति ॥ धात्रा विधिरयं दृष्टो बहुधा कर्म भिश्च यः ॥ ६२ ॥ इति तस्य वचः श्रुत्वा स विप्रो ब्रह्मवित्तमः ॥ अंतर्जलात्समुत्थाय ततो वचनमब्रवीत् ॥ ६३ ॥ दिष्ट्या त्वमागतो भूप दिष्ट्या ते संगतं मया ॥ ईदृशा दुर्लभा लोके नरा मुक्तिप्रदर्शकाः ॥ ६४ ॥ इत्युक्त्वा नृपविप्रौ तौ मुक्तिलिंगं समागतौ ॥ दर्शनार्थं विशालाक्षि दृष्ट्वा देवं सनातनम् ॥ ६५ ॥ तत्क्षणात्सशरीरौ तौ तस्मिँल्लिंगे लयं गतौ ॥ ईदृशोऽयं मया देविमहिमा कथितस्तव ॥ ६६ ॥ अस्य लिंगस्य संस्पर्शान्मुक्तिर्भवति नान्यथा ॥ येऽर्चयंति सदा भक्त्या मुक्तिलिंगं सनातनम् ॥ अपि पापसमायुक्तः स याति परमां गतिम् ॥ ६७ ॥ रे मूढाः किं तपोभिश्च किं दानैर्नियमैश्च किम् ॥ कुरुध्वं मुक्तिलिंगस्य दर्शनं मुक्तिदायकम् ॥ ६८ ॥ न मां विदुर्देवगणा नासुरा न महर्षयः ॥ परं रूपं विशालाक्षि यदश्नुवति निर्मलम् ॥ ६९ ॥ न मे वेत्ति परं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रूपं स्वयं साक्षात्प्रजापतिः ॥ न विष्णुस्त्रिदशश्रेष्ठाः कुतोन्ये मुनयः प्रिये ॥ ७० ॥ यदेतद्दृश्यते तेजो लिंगरूपं यशस्विनि ॥ एतदेव शुक्राद्या हि ध्यायंति त्रिदशा अमी ॥ ७१ ॥ अनेकजन्मसंशुद्धा योगिनोऽनुग्रहान्मम ॥ प्रविशंतु तनुं देवि मदीयां मुक्तिदायिकाम् ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये मुक्तीश्वरमाहात्म्यवर्णननाम पंचविंशतितमोऽध्यायः ॥ २५ ॥छ॥ ॥ ईश्वर उवाच ॥ ॥ विद्धि पार्श्वंशकं देवि देवं सोमेश्वरं परम् ॥ यस्य दर्शनमात्रेण निष्कलंको नरो भवेत् ॥ १ ॥ अत्रिर्नाम महाभागो ब्रह्मणो मानसः सुतः ॥ प्रजापतिरभूद्देवि कल्पे वाराहसंज्ञके ॥ २ ॥ तस्य पुत्रोऽभवत्सोमो दक्षोथ मातृभागतः ॥ सप्तविंशतिर्याः कन्या दाक्षायण्यः प्रकीर्त्तिताः ॥ ३ ॥ सोमपत्न्यो हि मंतव्यास्तासां श्रेष्ठा तु रोहिणी ॥ तामेव भजते सोमो नेतरा इति शुश्रुम ॥ ॥ ४ ॥ इतराः प्रोचुरागत्य दक्षस्याग्रे यथातथम् ॥ दक्षोऽथ स तदागत्य तमुवाच स नाकरोत् ॥ ५ ॥ यदा न वारितस्तस्थौ दक्षः क्रुद्धस्तदा प्रिये ॥ शशाप सोमं संक्रुद्धः शीघ्रमंतर्हितो भव ॥ ६ ॥ एवं शप्तस्तु सोमो वै तदा ह्यंतर्हितोऽभवत् ॥ शशाप सोमो दक्षं तु भवानपि भविष्यति ॥ ॥ ७ ॥ अनेकत्वं विहायैतज्जलदेहं सनातनम् ॥ अतः प्राचेतसो दक्षो ब्रह्मपुत्रोऽपि गीयते ॥ ८ ॥ एवमंतर्हितः सोमो गतो वै दक्षशापतः ॥ देवाश्च नागा यक्षाश्च गंधर्वाः पितृभिः सह ॥ वैराजं ब्रह्मसदनं ब्रह्माणं समुपस्थिताः ॥ ९ ॥ तस्याग्रे कथयामासुर्नमस्कृत्य पुनःपुनः ॥ भगवन्सर्वभूतानामादिकर्त्ता स्वयंभुवः ॥ १० ॥ स्रष्टा च हव्यकव्यानां पाहि नः शरणागतान् ॥ देवानां वचनं श्रुत्वा ज्ञात्वा देवः प्रजापतिः ॥ ११ ॥ आश्वासयामास सुरान्सुस्निग्धैर्वचनांबुभिः ॥ अवश्यं त्रिदशास्तेन प्राप्तव्यं कर्मणः फलम् ॥ १२ ॥ शापांतं भगवान्देवो विष्णुरेव करिष्यति ॥ एतच्छ्रुत्वा ततो देवा वाक्यं पंकजजन्मनः ॥ शरण्यं शरणं विष्णुमुपतस्थुर्गतव्यथाः ॥ १३ ॥ ब्रह्मणा सहिता देवि स्तुतिं चक्रुः समाहिताः ॥ नमस्ते देवदेवेश नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ १४ ॥ नारायण जगन्नाथ देवास्त्वां शरणं गताः ॥ त्वं हि नः परमो ध्येय स्त्वं हि नः परमो गुरुः ॥ १५ ॥ त्वं हि नः परमो देवो ब्रह्मादीनां सुरोत्तम ॥ अंतर्धानं गतः सोमो दक्षशापाज्जनार्दन ॥ १६ ॥ विना सोमेन चौषध्यो नष्टा देव महीतले ॥ तेषां तद्वचनं श्रुत्वा विष्णुर्वचनमब्रवीत् ॥ १७ ॥ भयं त्यजध्वममरा अभयं वो ददाम्यहम् ॥ नष्टं चंद्रमसं शीघ्रमानयिष्याम्यसंशयम् ॥ १८ ॥ एवमुक्त्वा तु भगवान्विसृज्य त्रिदशेश्वरान् ॥ सोमं सस्मार सहसा शंखचक्रगदाधरः ॥ १९ ॥ यदा स्मृतो न चाभ्येति तदा क्रुद्धो जनार्दनः ॥ पुराणपुरुषो देवो ब्रह्माणमिदमब्रवीत् ॥ २० ॥ देवैरसुरसंघैश्च मथ्यतां कलशोदधिः ॥ भविष्यति पुनश्चंद्रो मथ्यमाने महोदधौ ॥ २१ ॥ अमृतं तत्र लप्स्यध्वं रत्नानि विविधानि च ॥ तस्य तद्वचनं श्रुत्वा वासुदेवस्य पार्वति ॥ २२ ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा च वासुकिम् ॥ देवा मथितुमारब्धाः समुद्रं निधिमंभसाम् ॥ २३ ॥ सोमार्थं च पुरा देवि तथैवासुरदानवाः ॥ एतेषुरसमुपाश्लिष्टो नागराजो महेर्ष्यया ॥ २४ ॥ विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः ॥ अतो वै भगवान्देवो यतो नारायणस्ततः ॥ २५ ॥ शिरस्युग्रस्य नागस्य पुनः पुनरवाक्षिपत् ॥ उदधौ मथ्यमाने वै महाञ्छब्दो बभूव ह ॥ २६ ॥ तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा ॥ विलयं समुपाजग्मुः शतशोथ सहस्रशः ॥ २७ ॥ तस्मिंस्तु मथिते देवि प्रयत्नात्केशवस्य च ॥ प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्वलः ॥ २८ ॥ तमेव देवा मनुजाः पितरश्च यशस्विनि ॥ उपजीवंति वृक्षाश्च तथैवौषधयो विभुम् ॥ २९ ॥ समुत्पन्नमथो दृष्ट्वा भगवान्प्राह केशवः ॥ पालयेमाः प्रजाश्चंद्र त्वं ज्येष्ठो जगतो भव ॥ ३० ॥ इत्युक्तो वासुदेवेन प्रजाः पालयितुं शशी ॥ पूर्वं सोमोपि यो नष्टः प्रविष्टो गहनं वनम् ॥ ३१ ॥ तस्याग्रे नारदः सर्वं कथयामास सत्वरम् ॥ देवैर्पर्वचनं श्रुत्वा नारदस्य महात्मनः ॥ ३२ ॥ पीडितो दक्षशापेन सोमोऽप्यंतर्हितस्तदा ॥ जगाम शरणं देवि ब्रह्माणं परमेष्ठिनम् ॥ ३३ ॥ तत्र गत्वा यथाशापं कथयामास गद्गदः ॥ पूर्वचंद्रवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ ३४ ॥ अयं मे प्रथमः पुत्रः पीडितः शशिना भृशम् ॥ नवेनोदधिजातेन किं मया क्रियते पुनः ॥ ३५ ॥ विष्णुना च बलं दत्तमस्मै चंद्रमसे दृढम् ॥ तस्माद्यास्यामि तत्राहं यत्र देवो जनार्दनः ॥ ३६ ॥ तं दृष्ट्वा मधुहंतारं ब्रह्मा विष्णुमुवाच ह ॥ त्वदादेशान्मयाथ एष चंद्रः कृतो मया ॥ ३७ ॥ स चायं पीडितो देव शशांकेन नवेन वै ॥ इत्युक्तो ब्रह्मणा देवि वासुदेवो जगत्पतिः ॥ वृत्तांतं कथयामास ब्रह्मणे च पुनःपुनः ॥ ३८ ॥ ब्रह्मापि पूर्वचंद्रार्थे विष्णुं लोकनमस्कृतम् ॥ तुष्टाव प्रणतो भूत्वा प्रांजलिः प्रणतः स्थितः ॥ ३९ ॥ नमः कृष्ण नमो विष्णो नमो जिष्णो नमोनमः ॥ नमो वामन गोविंद नमोऽनंत नमोऽच्युत ॥४०॥ जयस्व गोविंद महानुभाव जयस्व विष्णो जय पद्मनाभ ॥ जयस्व सर्वाद्य गदाधरेश जयस्व विश्वेश्वर विश्वमूर्त्ते ॥ ४१ ॥ एवं स्तुतस्तदा देवि ब्रह्मणा लोककारिणा ॥ ममीपस्थं समालोक्य सोमं वचनमब्रवीत् ॥ ४२ ॥ गच्छ सोम ममादेशान्महाकालवनोत्तमे ॥ उत्तरे मुक्तिलिंगस्य लिंगं कांतिकरं परम् ॥ तमाराधय यत्नेन स ते देहं प्रदास्यति ॥ ॥ ४३ ॥ इत्युक्तो वासुदेवेन ब्रह्मणा च पुनःपुनः ॥ आजगाम महादेवि महाकालवनोत्तमे ॥ लिंगं दृष्ट्वा च तुष्टाव स्तोत्रेणानेन सुव्रते ॥ ४४ ॥ ॥ ॥ चंद्र उवाच ॥ ॥ नमो देवाधिदेवाय त्रिनेत्राय महात्मने ॥ रक्तपिंगलनेत्राय जटामुकुटधारिणे ॥ ४५ ॥ भूतवेतालजुष्टाय महादेवाय शूलिने ॥ भीमाट्टहासयुक्ताय कपर्दिस्थाणवे नमः ॥ ४६ ॥ पूष्णो दंतविनाशाय तथांधकविनाशिने ॥ केलासवरवासाय सर्वदेवाय ते नमः ॥ ॥ ४७ ॥ विकरालोर्द्धकेशाय भैरवाय नमोनमः ॥ अग्निज्वालाकरालाय कलिधर्मविवासिने ॥ ४८ ॥ तथा दारुवनध्वंसकारिणे तिग्मशूलिने ॥ कृतकंकणभोगींद्रकंठमुद्राय शूलिने ॥ ४९ ॥ प्रचंडदंडहस्ताय वडवाग्निमुखाय च ॥ वेदांतवेद्याय नमो यज्ञमूर्त्ते नमोनमः ॥ ५० ॥ दक्षयज्ञविनाशाय जगद्व्यकराय च ॥ विश्वेश्वराय देवाय स्थूलसूक्ष्माय शंभवे ॥ कपर्दिने करालाय सर्वदेवाय ते नमः ॥ ५१ ॥ एवं स्तुतस्तदा देवि चंद्रेणां तर्हितेन च ॥ लिंगरूपी महादेवस्तुष्टो वाक्यमथाब्रवीत् ॥ ५२ ॥ स्तोत्रेणानेन तुष्टोऽस्मि ब्रूहि सोम किमिच्छसि ॥ यत्तेभिलषितं सर्वं तत्कर्त्ता स्मि न संशयः ॥ ५३ ॥ ॥ सोम उवाच ॥ ॥ यदि त्वहमनुग्राह्यो यदि तुष्टोऽसि मे प्रभो ॥ कांत्या दीप्त्या तथा मूर्त्या तथा रूपेण च प्रभो ॥ ॥ ५४ ॥ स्वपदं कर्त्तुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ एवमस्त्विति लिंगेन तत्क्षणाद्रजनीचर ॥ ५५ ॥ द्विजराजेन तत्प्राप्तं लिंगस्यास्य प्रसादतः ॥ ॥ ५४ ॥ सोमेनाराधितो यस्माद्देवदेवो महेश्वरि ॥ ५६ ॥ तेन सोमेश्वरोनाम विख्यातो भुवनत्रये ॥ येऽर्चयंति महादेवि देवं सोमेश्वरं परम् ॥ ५७ ॥ कृतपुण्या नरा मर्त्यास्ते यांति परमं पदम् ॥ यः पश्यति नरो भक्त्या लिंगं सोमेश्वरं प्रिये ॥ ५८ ॥ विमुक्तो जन्मदुःखाद्यैर्लीयते मयि मानवः ॥ ते नराः पशवो लोके किं तेषां जीविते फलम् ॥ ५९ ॥ यैश्च सोमेश्वरो देवो न दृष्टो न च पूजितः ॥ संसारेऽस्मिन्महाघोरे जन्मरोगभयाकुले ॥ ६० ॥ एकः सोमेश्वरः पूज्यः कुष्ठरोगविनाशनः ॥ स एव सुकृती लोके कुलं तेनाभ्यलंकृतम् ॥ ६१ ॥ आधारः सर्वलोकानां येन सोमेश्वरो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

र्चितः ॥ सकृदभ्यर्च्य सोमेशं विल्वपत्रेण मानवः ॥ मुक्तो भोगी निरातंको मम लोके वसेच्चिरम् ॥ ६२ ॥ कांचनैः कुसुमैर्देवि लिंगं सोमेश्वरं
ग्निये ॥ पूजयंति नरा भक्त्या ते यांति परमां गतिम् ॥ ६३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सोमेश्वरस्य देवस्य शृणुष्वानरके
श्वरम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये सोमेश्वरमाहात्म्यवर्णनं
नाम पंचविंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ सप्तविंशतिमं देव्यनरकेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण स्वप्नेपि नरकः
कुतः ॥ १ ॥ पुरा कलियुगे देवि कल्पे वाराहसंज्ञके ॥ कलुषं कालमासाद्य सत्ये च प्रलयं गते ॥ २ ॥ निर्मर्यादा निराधारा निरोंका
नास्तिका जनाः ॥ वर्णाश्रमाश्च संजाता वंचयंति परस्परम् ॥ ३ ॥ नार्चयंति सुरान्विप्राः कर्म कुर्वंति कुत्सितम् ॥ लोभमोहपरा
भूत्वा कामासक्ताश्च मानवाः ॥ ४ ॥ वैरबद्धाश्च संजाताः परस्परवधे रताः ॥ निवृत्तयज्ञस्वाध्यायपिंडोदकक्रियर्जिताः ॥ ५ ॥ ब्राह्मणाः सर्वभक्ष्याश्च
मृषावादपरायणाः ॥ भूयिष्टं कूटमानैश्च पण्यं विक्रीणते तदा ॥ ६ ॥ दृश्यंते षोडशे वर्षे नराः पलितिनः प्रिये ॥ आयुःक्षयो मनुष्याणां
क्षिप्रमेव प्रपद्यते ॥ ७ ॥ एवंविधाः समुद्भूता नरा नार्यश्च पातकैः ॥ नरकेषु प्रपद्यंते क्रमात्पापानुसारतः ॥ ८ ॥ कुठारैर्भिन्नमूर्द्धानः करकचैः
पाटिताः परे ॥ अग्निवर्णैश्च संदंशैरुत्पाटितविलोचनाः ॥ ९ ॥ भिन्नाश्चायोमयैस्तीक्ष्णैरग्नितप्तैश्च कीलकैः ॥ पीड्यंते शेलशिखरैश्चूर्ण्यंते क्रूरभू
धरैः ॥ १० ॥ क्षिप्यंते तप्तकुण्डेषु दह्यंते वह्निराशिषु ॥ अमेध्येऽथोमुखाश्चान्ये मर्दिता दंडपाणिना ॥ ११ ॥ लौहैश्च शूङ्खलैर्बद्धा ह्ययोवक्त्रैश्च
लंबितैः ॥ अंतरिक्षे परिक्षेपात्क्रंदंतोऽतीव दुःखिताः ॥१२॥ कृमिभिश्चमरैस्तीक्ष्णैर्दंशैश्च मशकैस्तथा ॥ लोहतुंडैश्च विहगैर्निर्दयैर्भक्षिता नराः॥१३॥
केचित्कृत्ताः प्रधावंति तोयार्थं च तृषातुराः ॥ स्वमूत्रं पायिताश्चंडैः क्षुधिताश्चापि घातनैः ॥ १४ ॥ यैश्चांगैः पतितं कर्म क्रियते पुरुषैर्भुवि ॥
तेषां तान्येव चांगानि शोष्यंते यातनागतैः ॥ १५ ॥ ये पश्यंति गुरुं देवान्ब्राह्मणान्क्रुद्धचक्षुषा ॥ दुष्टेन परदारांश्च वीक्षंते लोचनेन वै ॥ तेषां
नेत्राणि भिद्यंते कृष्यंते लोहशंकुभिः ॥ १६ ॥ श्रवणौ च प्रपूर्यंते लौहेन शंकुना ततः ॥ पुनश्च शस्त्रैः कृष्यंते पुनस्तैश्च कीलकैः ॥ १७ ॥ लौहै
र्वेगान्निखन्यंते यैः श्रुतं गुरुनिंदनम् ॥ मित्राणां देवतानां च साध्वीनामथवा क्व चित् ॥ १८ ॥ शतशः पाट्यते जिह्वा वह्निवर्णैरयोमुखैः ॥ शंकुभि
स्तीक्ष्णमूक्ष्माग्रैः पूर्यंते चानिलैः पुनः ॥ १९ ॥ तद्भक्षाणि बहून्वारान्येपवादरता नराः ॥ ये गुरुं मातरं वापि पारुष्येण वदंति वै ॥ २० ॥
ये निघ्नंति दुराचाराः सुरार्थायोपकल्पिते ॥ आरामे पुष्पपत्राणि तेषामंगानि कृंतति ॥ २१ ॥ यैरन्यालिंगिता नारी परस्य च दुरात्मभिः ॥ तेषा
मयोमयी नारी वह्निवर्णा तु वक्षसि ॥ २२ ॥ स्थाप्यते वध्यते चापि प्रचंडैर्यमकिंकरैः ॥ नार्यश्च पुरुषैस्तप्तैरालिंग्यंते ह्ययोमयैः ॥ २३ ॥ तदा
लोहमये गेहे ज्वलितानलसंस्तरे ॥ निक्षिप्यंते नरैः सार्द्धमासाद्य कालसंक्षयम् ॥ २४ ॥ यावती वेदना देहे इह लोके प्रदृश्यते ॥ नराणामंगपीडा
वै तस्माच्छतगुणा भवेत् ॥ २५ ॥ काकैश्च वृश्चिकैर्गृध्रैर्भक्ष्यंतेऽप्यपरे नराः ॥ दह्यमाना विलपंति भ्रातस्तातेति चाकुलाः ॥ वदंत्यसकृदुद्विग्ना
न च शांतिं लभंति वै ॥ २६ ॥ दुःखानि ते प्राप्नुवंति यान्यसह्यानि पार्वति ॥ एवं ते यातनादुःखं प्राप्नुवंति सुनिश्चितम् ॥ निमिर्नाम महाभागो
यममार्गं ददर्श ह ॥ २७ ॥ रौद्रं भयानकं दुर्गं पूरितं पापकर्मभिः ॥ तमसा संवृतं चैव केशशैवालशाद्वलम् ॥ २८ ॥ संपूर्णं पापकृद्भिर्मांसशोणि
तकर्दमैः ॥ वह्निज्वालेन दीप्तेन समंतात्परिवारितम् ॥ २९ ॥ अधोमुखैश्च ककोंटैर्गृध्रैश्च समभिद्रुतम् ॥ सूचीमुखैस्तथा प्रेतैर्विध्यशैलोपमैर्वृतम् ॥
॥ ३० ॥ वृतं रुधिरमांसैश्च छिन्नबाहूरुपाणिभिः ॥ निकृत्तोदरहस्तैश्च तत्रतत्र प्रचारितैः ॥ ३१ ॥ वृतं कुणपदुर्गंधैरशिवं भोगवर्जितम् ॥ असिपत्र
वनं चैव समंतात्परिवारितम् ॥ ३२ ॥ करंभवालुकाकीर्णमायसीश्च शिलाः पृथक् ॥ ददर्श चापि देहोत्थयातनां पापकर्मणाम् ॥ ३३ ॥ स तं
दुर्गंधमालक्ष्य पुरुषं तमुवाच ह ॥ कियद्ध्वानमस्माभिर्गंतव्यमिदमब्रवीत् ॥ ३४ ॥ देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ इत्युक्तो यम
दूतस्तु दण्डहस्तोऽग्निसप्रभः ॥ पुरतो दर्शयन्मार्गमित एहीत्युवाच ह ॥ ३५ ॥ भूयः स राजा तं प्राह किंकरं विनयान्वितः ॥ भो
याम्यपुरुषाचक्ष्व किं मया दुष्कृतं कृतम् ॥ ३६ ॥ येनेदं व्यसनं प्राप्तं मया च धार्मिकेण हि ॥ निमिर्नामाहं विख्यातो जनकानामहं
कुले ॥ ३७ ॥ जातो विदेहविषये सम्यग्मनुजपालकः ॥ चातुर्वर्ण्यं च धर्मस्थं कृत्वा संरक्षितं मया ॥ ३८ ॥ धर्मप्रधानकल्पेन मनुनात्र
यथा पुरा ॥ यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही ॥ ३९ ॥ नोत्सृष्टश्चैव संग्रामो नातिथिर्विमुखोऽभवत् ॥ कृता स्पृहा च न मया
परस्त्रीविभवादिषु ॥ ४० ॥ सोऽहं कथमिमं प्राप्तो नरकं भृशदारुणम् ॥ इति पृष्टस्तदा तेन निमिना यमकिंकरः ॥ उवाच प्रणतो भूत्वा
क्रूरोऽपि प्रश्रितं वचः ॥ ४१ ॥ ॥ पुरुष उवाच ॥ ॥ महाराज यथात्थ त्वं तथैतन्नात्र संशयः ॥ किन्तु स्वल्पं कृतं पापं भवंतं स्मारयामि
तत् ॥ ४२ ॥ उक्ता या दक्षिणा श्राद्धे न दत्ता सा त्वया नृप ॥ भ्रमादाद्विस्मृता चैव तस्येदं कर्मणः फलम् ॥ ४३ ॥ एतावदेव ते पापं नान्य
त्किंचन विद्यते ॥ वैदेहागच्छ पुण्यानामुपभोगाय पार्थिव ॥ ४४ ॥ एवं श्रुत्वा तु राजर्षिर्निमिर्दूतमथाब्रवीत् ॥ यास्यामि देवानुचर यत्र मां त्वं
हि नेष्यसि ॥ ४५ ॥ किंचित्पृच्छामि ते तत्त्वं यथावद्वक्तुमर्हसि ॥ वज्रतुंडास्त्वमी काकाः पुंसां नयनहारिणः ॥ ४६ ॥ पुनः पुनश्च नेत्राणि
तद्भक्षेषां भवंति हि ॥ किं कृतं कर्म दूतेंद्र कथयैतज्जुगुप्सितम् ॥ ४७ ॥ हरंत्येषां तथा जिह्वां जायमानां पुनर्नवाम् ॥ करपत्रेण पाट्यंते कस्मादेते
सुदुःखिताः ॥ ४८ ॥ किमेते नष्टचित्ताश्च तुद्यंतेऽहर्निशं नराः ॥ एताश्चान्याश्च दृश्यंते यातनाः पापकर्मिणाम् ॥ कियत्कालं भविष्यंति तन्ममोद्
शतो वद ॥ ४९ ॥ ॥ पुरुष उवाच ॥ ॥ यन्मां पृच्छसि भूपाल पापकर्मफलोदयम् ॥ तत्तेहं संप्रवक्ष्यामि संक्षेपेण यथातथम् ॥ ५० ॥ पुण्या
पुण्ये हि पुरुषः पर्यायेण समश्नुते ॥ भुंजतश्च क्षयं याति पुण्यं पापमथापि वा ॥ ५१ ॥ न तु भोगाद्दते पुण्यं पापं कर्म च मानवः ॥ परित्यजति
राजेंद्र सत्यमेतदुदाहृतम् ॥ ५२ ॥ एवमेते महापापा यातनाभिरहर्निशम् ॥ क्षपयंति महाघोरं नरकांतरवर्त्तिनः ॥ ५३ ॥ देवत्वेऽथ मनुष्यत्वे
तिर्यक्त्वेऽथ शुभाशुभम् ॥ पुण्यपापोद्भवं भुंक्ते सुखदुःखं न संशयः ॥ ५४ ॥ एतदुद्देशतो राजन्भवता कथितं मया ॥ स्वकर्मफलमोक्षाणां पुण्यानां
पापिनां तथा ॥ ५५ ॥ तदेहान्यत्र गच्छाशु यथा दृष्टं त्वयाधुना ॥ ततस्तमग्रतः कृत्वा स राजा गंतुमुद्यतः ॥ ५६ ॥ तदा हि सर्वरुद्ध्वष्टं यातना
स्थायिभिर्नृभिः ॥ प्रसादं कुरु भूपेति तिष्ठ तावन्मुहूर्त्तकम् ॥ त्वदंगसंगी पवनो देहान्बाधयते हि नः ॥ ५७ ॥ परितापं च गात्रेभ्यः पीडा
बाधाश्च कृत्स्नशः ॥ अपहंति नरव्याघ्र कृपां कुरु महीपते ॥ ५८ ॥ एतच्छ्रुत्वा वचस्तेषां तं याम्यपुरुषं नृपः ॥ पप्रच्छ कथमेतेषामाह्लादो मयि
तिष्ठति ॥५९॥ किं मया कर्म तत्पुण्यं मर्त्यलोके ह्यनुत्कृतम् ॥ ह्लादजननी दृष्टिर्यस्येयं तदुदीर्यताम् ॥ ६० ॥ ॥ पुरुष उवाच ॥ ॥ त्वया
दृष्टो महाकाले विख्यातोऽनरकेश्वरः ॥ आश्विनस्य चतुर्दश्यां तस्येदं फलमीदृशम् ॥ ६१ ॥ ततस्तद्गात्रसंसर्गी पवनो ह्याददायकः ॥ पापकर्मकृतां
राजन्यातना न प्रबाधते ॥ ६२ ॥ ॥ राजोवाच ॥ ॥ यदि मत्संनिधाने सा यातना न प्रबाधते ॥ ततो भद्रमुखाद्याहं स्थास्ये स्थाणुरिवा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चलः ॥ ६३ ॥ ॥ पुरुष उवाच ॥ ॥ एहि राजेंद्र गच्छावो निजपुण्यसमार्जितान् ॥ भुंक्ष्व भोगान्न यास्येतां यातनां पापकर्मणाम् ॥ ॥ ६४ ॥ ॥ राजोवाच ॥ ॥ न स्वर्गे ब्रह्मलोके वा तत्सुखं प्राप्यते नरैः ॥ यदार्त्तजंतुनिर्वाणमानेतुमिति मे मतिः ॥ ६५ ॥ तस्मान्न तावद्यास्यामि यावदेते सुदुःखिताः ॥ मत्संनिधानात्सुखिनो भवंतु नरकौकसः ॥ ६६ ॥ प्राप्स्यंते ते यदि सुखं बहवो दुःखिते मयि ॥ किं तु प्राप्तं मया सर्वं तस्मात्त्वं व्रज मा चिरम् ॥ ६७ ॥ ॥ पुरुष उवाच ॥ ॥ एष धर्मश्च शक्रश्च त्वां नेतुं समुपागतौ ॥ अवश्यमस्माद्गंतव्यं तस्मात्पार्थिव गम्यताम् ॥ ६८ ॥ एतस्मिन्नंतरे धर्मः शक्रेण सहितोब्रवीत् ॥ निमे परमधर्मज्ञ प्रीता देवगणास्तव ॥ ६९ ॥ एह्येहि पुरुषव्याघ्र कृतमेतावता प्रभो ॥ सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयान्विताः ॥ ७० ॥ न च मन्युस्त्वया कार्यः शृणु मे वचनं विभो ॥ अवश्यं नरकस्तावद्द्रष्टव्यः सर्वराजभिः ॥ ७१ ॥ नयामि त्वामहं स्वर्गं त्वया सम्यगुपासितः ॥ विमानवरमारुह्य विमलं चाद्य गम्यताम् ॥ ७२ ॥ ॥ निमिरुवाच ॥ ॥ नरके मानवा धर्म पीड्यंतेऽत्र सहस्रशः ॥ ब्राह्मीति वार्त्तां क्रंदंतो मामतो न व्रजाम्यहम् ॥ ७३ ॥ ॥ इन्द्र उवाच ॥ ॥ कर्मणा नरके शास्तिरेषां च पापकर्मणाम् ॥ स्वर्गे त्वयापि गंतव्यं नृप पुण्येन कर्मणा ॥ ७४ ॥ ॥ राजोवाच ॥ ॥ परिजानासि धर्मज्ञ त्वं वा शक्र शचीपते ॥ विशिष्टं मम किं पुण्यं शुभं तद्ब्रूतमर्हसि ॥ ७५ ॥ ॥ धर्म उवाच ॥ ॥ आश्विनस्य तु मासस्य कृष्णपक्षे चतुर्दशी ॥ तस्यां त्वया महाबाहो महाकालवनोत्तमे ॥ दृष्टो देवः सुविख्यातः स्वर्गदोऽनरकेश्वरः ॥ ७६ ॥ तद्विशिष्टं च ते पुण्यं तस्य संख्या न विद्यते ॥ स्वकर्मोपार्जितं पुण्यं भुंक्ष्व राजन्यथासुखम् ॥ एते नारकिकाः सर्वे क्षपयंतु स्वकर्मजाम् ॥ ॥ ७७ ॥ ॥ राजोवाच ॥ ॥ कथं स्मृतिं करिष्यंति सत्संगेषु च मानवाः ॥ यदि मत्संनिधावेषामुत्कर्षो नोपजायते ॥ ७८ ॥ तस्माद्यत्सुकृतं किंचिद्विशिष्टतरमस्ति वै ॥ तेन मुच्यंतु नरकात्पापिनो यातनागताः ॥ ७९ ॥ ॥ धर्म उवाच ॥ ॥ राजंस्त्वया कृतं पूर्वेऽनरकेश्वरदर्शनम् ॥ तदुत्पन्नस्य पुण्यस्य कलामेभ्यः प्रयच्छ वै ॥ ८० ॥ तत्पुण्यस्य प्रभावेण मोक्ष्यंते नरकादिमे ॥ तथा कृते ततस्तेन विमुक्ता नरकाच्च ते ॥ ८१ ॥ ततोऽब्रवीद्धर्मराजो निमिं शक्रसमन्वितः ॥ एवं श्रेष्ठतरं स्थानं त्वया प्राप्तं महीपते ॥ ८२ ॥ एतांश्च नारकान्पश्य विमुक्तान्पापकर्मणः ॥ ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महीपतेः ॥ ८३ ॥ विमानं चाधिरोप्यैनं स्वर्लोकमनयद्धरिः ॥ येये तत्राभवन्पापा यातनाभ्यः परिच्युताः ॥ ८४ ॥ प्रभावात्तस्य देवस्य स्वर्गलोकं गताः प्रिये ॥ अतो देवः सुविख्यातः स देवोऽनरकेश्वरः ॥ ८५ ॥ स्तुतो देव गणैः सर्वैर्नरकादवतारकः ॥ जातः स एव सुकृती कुलं तेनैव पावितम् ॥८६॥ यःपश्यति नरो नित्यं देवं चानरकेश्वरम् ॥ येऽर्चयंति नरा भक्त्या देवं चानरकेश्वरम् ॥ तेषां विलीयते पापं पूर्वजन्मशतोद्भवम् ॥ ८७ ॥ येनुमोदंति देवस्य दर्शनं पर्वतात्मजे ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरे ॥ ८८ ॥ समतीतं भविष्यच्च कुलानामयुतं नरः ॥ मम लोकं नयत्याशु तस्य लिंगस्य दर्शनात् ॥ ८९ ॥ शिवयोगसमायुक्ता कृष्णा या च चतुर्दशी ॥ सा प्रोक्ता वल्लभा तस्य सर्वपापप्रणाशिनी ॥ ९० ॥ ये चायांति नरास्तस्यां देवं चानरकेश्वरम् ॥ उपोष्य पापैर्मुच्यंते ते नराः शतजन्मजैः ॥ ९१ ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षालयति देवोसौ तिथौ तस्यां समर्चितः ॥ ९२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जटेश्वरस्य देवस्य शृणु माहात्म्यमुत्तमम् ॥९३॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्येऽनरकेश्वरमाहात्म्यवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥७॥ ॥ श्रीदेवदेव उवाच ॥ ॥ अष्टाविंशतिकं विद्धि विख्यातं च जटेश्वरम् ॥ यस्य दर्शनमात्रेण मुक्तो भवति मानवः ॥ १ ॥ पुरा रायंतरे कल्पे वीरधन्वा महीपतिः ॥ धर्मात्मा च यशस्वी च बभूव क्षुवि विश्रुतः ॥ २ ॥ स कदाचिद्वनं गत्वा मृगहेतोर्वरानने ॥ व्यापादयन्मृगगणान्धनुषा क्रोधविह्वलः ॥ ३ ॥ जगाम तत्र यत्रासन्भ्रातरः पंच सुव्रताः ॥ संवर्त्तस्य सुता देवि मृगरूपेण संस्थिताः ॥ ४ ॥ ते कदाचिद्वने पंच दृष्ट्वा हरिणपोतकान् ॥ श्वसतो जातमात्रांश्च कौतूहलसमन्विताः ॥ ५ ॥ एकैकं जगृहुस्तत्र मृतास्ते त्वतिदुःखिताः ॥ ततः सर्वे च ते पंच ययुर्वै पितुरंतिकम् ॥ ६ ॥ प्रायश्चित्तं समीहंतः संवर्त्तं सांसदेवृतम् ॥ ऊचुस्ते वचनं चेदं मृगहिंसाश्रितं तदा ॥ ७ ॥ जातमात्रा मृगाः पंच अस्माभिर्निहताः प्रभो ॥ अकामतस्ततोऽस्माकं प्रायश्चित्तं विधीयताम् ॥ ८ ॥ ऊचे स शुद्धिमाप्नोति प्रायश्चित्ते कृते सति ॥ अनधीत्य धर्मशास्त्रं प्रायश्चित्तं ददाति यः ॥ प्रायश्चित्ती भवेत्पूतः किल्विषं दातरि व्रजेत् ॥ ९ ॥ धर्म शास्त्रसमारूढा वेदखड्गधरा द्विजाः ॥ क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः ॥ १० ॥ ब्रह्मच्छिद्रं जपच्छिद्रं यच्छिद्रं यज्ञकर्मणि ॥ अच्छिद्रं जायते सर्वं ब्राह्मणैरुपपादितम् ॥ ११ ॥ अच्छिद्रमिति यद्वाक्यं वदंति क्षितिदेवताः ॥ प्रणश्यत्यखिलं पापमग्निष्टोमफलं भवेत् ॥ १२ ॥ इत्येवं वदति श्रेष्ठे संवर्त्ते द्विजसत्तमे ॥ समागताश्च मुनयो भृग्वत्र्यंगिरसादयः ॥ १३ ॥ तेषामर्थे यथावृत्तं कथयामासुरेव ते ॥ संवर्त्तस्य सुता दीना भक्तिनम्राः पुनःपुनः ॥ १४ ॥ तेऽप्यूचुर्धर्मशास्त्राणि विहितानि यथार्थतः ॥ प्रायश्चित्तं यथोद्दिष्टं देशकालविभागतः ॥ १५ ॥ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ॥ प्रायश्चित्तार्द्धमर्हति स्त्रियो वै व्याधितस्य च ॥ १६ ॥ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ॥ प्रायश्चित्तं प्रकल्प्यं स्यादिति धर्मो व्यवस्थितः ॥ १७ ॥ इदानीं मृगचर्माणि परिधाय धृतव्रताः ॥ चरध्वं पंच वर्षाणि ततः शुद्धा भविष्यथ ॥ ॥ १८ ॥ एवमुक्तास्तु ते बाला मृगधर्मोपजीविनः ॥ वनं विविशुरव्यग्रा ध्यायंतो ब्रह्म शाश्वतम् ॥१९॥ ततो वर्षे व्यतिक्रांते वीरधन्वा महीपतिः ॥ तत्राजगाम यस्मिन्, चरंति मृगरूपिणः ॥ २० ॥ ते चाप्येकतरोर्मूले मृगधर्मोपजीविनः ॥ जपंतः संस्थितास्ते हि राज्ञा दृष्टा मृगा इति ॥ २१ ॥ मत्वा विद्धास्तु नाराचैर्मृतास्ते ब्रह्मवादिनः ॥ तान्दृष्ट्वा च मृतान्राजा ब्राह्मणान्संशितव्रतान् ॥ भयेन वेपमानस्तु देवगताश्रमं ययौ ॥ २२ ॥ तत्रापृच्छद्ब्रह्मवध्या मम जाता महामुने ॥ आमूलांतं वधांतस्य कथयित्वा नराधिपः ॥ २३ ॥ भृशं शोकपरीतात्मा रुरोद भृशदुःखितः ॥ स ऋषिर्देवकल्पस्तु रुदंतं नृपसत्तमम् ॥ २४ ॥ उवाच मा भैर्नृपते अपनेष्यामि पातकम् ॥ पाताले सुतलाख्ये तु निमज्जंती यथा धरा ॥ २५ ॥ उद्धृता देवदेवेन विष्णुना क्रोडमूर्त्तिना ॥ तद्ब्रह्मवधं राजेंद्र ब्रह्महत्यापरिप्लुतम् ॥ उद्धरिष्यति देवोऽसौ स्वयमेव जनार्दनः ॥ २६ ॥ एवमुक्तस्ततो राजा दुर्गतो वाक्यमब्रवीत् ॥ २७ ॥ किमनेन द्विजेनेव निष्प्रभेण दुरात्मना ॥ उद्धर्तुं नैव शक्नोति स्वयमेव द्विजाधमः ॥ २८ ॥ इत्युक्त्वा कोपरक्ताक्षः खड्गेनैव जघान तम् ॥ मृतं दृष्ट्वा द्विजं राजा क्रोधेन कलुषीकृतः ॥ २९ ॥ तस्मिन्नेव वने देवि पापसंघेन मोहितः ॥ जघान कपिलां दोग्ध्रीं सवत्सां गालवस्य च ॥ ३० ॥ क्षुधार्त्तश्च नृपार्त्तश्च बाल्यान्मोहाच्च साहसात् ॥ क्रूरा बुद्धिः समभवज्जटीभूतं च पातकम् ॥ ३१ ॥ जटीभूतेन पापेन बभ्राम गहने वने ॥ स कदाचिदुरुगेण हृतो दूरं महद्वनम् ॥ ३२ ॥ व्याघ्रसिंहगजाकीर्णं मृगशंबरसेवितम् ॥ एकाकी तत्र राजासावश्वं मुक्त्वा तरोरधः ॥ ३३ ॥ कुशोपरि तदा तत्र सुप्तवान् च स निर्भयम् ॥ तत्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्याधाः समचरन्दृष्ट्वा सुतं च निर्भयम् ॥ ॥ ३४ ॥ ते गतास्त्वरिता व्याधाः स्वभर्तुः कथनाय वै ॥ स्वामिना तेन निर्दिष्टा निग्रहीतुं प्रचक्रमुः ॥ ३५ ॥ तावद्राज्ञः शरीरात्तु श्वेतोऽभरणभूषिता ॥ उत्थाय चक्रमादाय तया म्लेच्छाश्च पातिताः ॥ ३६ ॥ दस्यून्निहत्य सा देवी तत्रैवादर्शनं गता ॥ ३७ ॥ अथ राजा तया मुक्तः प्रतिबुद्धोऽथ तत्क्षणात् ॥ म्लेच्छांश्च निहतान्दृष्ट्वा चिंतयामास पार्थिवः ॥ ३८ ॥ गोवध्या ब्रह्मवध्या च वने ह्यस्मिन्सुदारुणा ॥ कथं मया नृशंसेन प्राप्ता पापपरंपरा ॥ ३९ ॥ एवं स चिंतयित्वाथ निःश्वस्य च पुनःपुनः ॥ तमेवाश्वं समारुह्य वामदेवाश्रमं ययौ ॥ ४० ॥ मुनिना वामदेवेन दृष्टो राजा तथाविधः ॥ जटीभूतेन पापेन पीडितो दुःखितस्तदा ॥ ४१ ॥ ॥ वामदेव उवाच ॥ ॥ अयं स पुरुषव्याघ्रो वीरधन्वा महीपतिः ॥ सोमवंशसमुत्पन्नो दशां कष्टां समागतः ॥ ४२ ॥ उद्धरिष्यामि राजानमेनं पुरुषसत्तमम् ॥ इत्यालोच्य तदा विप्रो वामदेवो महातपाः ॥ प्रत्युवाच महीपालं वीरधन्वानमातुरम् ॥ ४३ ॥ भोभो राजन्महीपाल वीरधन्वेति विश्रुतः ॥ विद्युन्नाम्नस्य तनयो विख्यातो भुवनत्रये ॥ ४४ ॥ प्राग्भवे व्याधरूपेण निहिंसा विपिने मृगान् ॥ दृढं जागरणं रात्रावामलक्यास्तरोरधः ॥ ४५ ॥ फाल्गुनामलपक्षे त्वामलक्येकादशी शुभा ॥ पुष्यर्क्षयोगिनी तस्यां जामदग्न्यप्रदक्षिणा ॥ ४६ ॥ पूजा लोकैः कृता दृष्टा विस्मयेन त्वया पुरा ॥ अकामादुपवासोऽभूत्तस्यां जागरणं पुनः ॥ ४७ ॥ तत्प्रभावाद्भू राजा महाबलपराक्रमः ॥ तया संरक्षितो राजन्म्लेच्छवर्गाद्भनेऽधुना ॥ ४८ ॥ निहताः शत्रवः सर्वे तयैव शुभमाप्स्यसि ॥ पूर्वकर्मविपाकेन ब्रह्महत्या समागता ॥ ४९ ॥ ज्ञाता तपःप्रभावेन मया योगबलेन च ॥ जटीभूतं शरीरं ते पापसंघेन पार्थिव ॥ ५० ॥ इदानीं पालयिष्यामि शृणु मे वचनं परम् ॥ ५१ ॥ इत्युक्तो वामदेवेन मुनिना स महीपतिः ॥ प्रणम्य प्रयतो भूत्वा पप्रच्छ च पुनःपुनः ॥५२॥ कथं यास्यंति मे हत्या गोब्राह्मणसमुद्भवाः ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥५३॥ तस्य तद्वचनं श्रुत्वा वामदेवो महामुनिः ॥ कथयामास माहात्म्यं लिंगस्यास्य यशस्विनि ॥ ५४ ॥ महाकालवनं गच्छ महाराज ममाज्ञया ॥ तत्रास्ते देवदेवोऽपि जगद्व्यापी जटेश्वरः ॥ ५५ ॥ पापसंघप्रहर्त्ता च सर्ववेदेषु पठ्यते ॥ देवस्यानरकेशस्य उत्तरे स व्यवस्थितः ॥५६॥ तस्य तद्वचनं श्रुत्वा वामदेवस्य पार्थिवः ॥ आजगाम त्वरायुक्तो महाकालवनोत्तमे ॥५७॥ तत्र दृष्ट्वा जगद्वंद्यं देवदेवं जटेश्वरम् ॥ स्तुतिं चकार राजेंद्रो भक्त्या परमया पुनः ॥५८॥ शिवाय ते नमो नित्यं विश्वकाय नमोनमः ॥ नमो दिव्याय गुह्याय गूढव्रतशरीरिणे ॥५९॥ नमो जटाय रामाय मायया कांतकारिणे ॥ नमोस्तु बहुरूपाय नमो नीलाभरूपिणे ॥ ६० ॥ नमो भोगाय भूम्नाय नमोऽस्तु गगनात्मने ॥ नमो वह्निसमूहाय नमस्ते निर्मलाकर ॥ ६१ ॥ नमो महांधकारार्क नमस्ते शत्रुघातिने ॥ नमः संसारपाराय दिव्यरूपशरीरिणे ॥ नमः कनकवर्णाय नमो मोहितमोहिने ॥ ६२ ॥ नमः सुरूपाय सुरार्चिताय नमो विरूपाय प्रकृतेः पराय ॥ नमोनमो रूपनिराश्रयाय श्यामासुरूपाय नमोनमस्ते ॥ ६३ ॥ इति स्तुतस्तदा देवि महादेवो महेश्वरः ॥ जटावेष्टितसर्वांगो लिंगमध्याच्च निस्सृतः ॥ ६४ ॥ भस्मचर्चितसर्वांगो भोगिभोगांगदोज्ज्वलः ॥ हिमराशिनिभाकारो राजताचलनिर्मलः ॥ ६५ ॥ मुक्तालतानिभाभिस्तु जटाभिर्भूषितो विभुः ॥ कपिलाभिः करालाभिर्विकटाभिश्च वेष्टितः ॥ ६६ ॥ भोगींद्रफणवद्भाभिः सितपीतादिभिस्तथा ॥ नदीरूपाभिरूताभिः शोभितोऽसौ जटेश्वरः ॥ ६७ ॥ राजानं प्रत्युवाचेदं वचनं पर्वतात्मजे ॥ स्तोत्रेणानेन राजेंद्र तुष्टोऽहं तोषितस्त्वया ॥ ॥ ६८ ॥ जटीभूतं च ते पापं गतं मद्दर्शनेन वै ॥ तस्मात्स्थानं परं गच्छ मदीयं शाश्वतं मुदा ॥ ६९ ॥ इत्युक्तो देवदेवेन वीरधन्वा महीपतिः ॥ जगाम परमं स्थानं दाहप्रलयवर्जितम् ॥ ७० ॥ कामगेन विमानेन स्तूयमानो गणैः प्रिये ॥ पापसंघेन मुक्तोऽसौ जटीभूतेशदर्शनात् ॥ ७१ ॥ लिंगश्चातः समाख्यातो नाम्ना देवो जटेश्वरः ॥ जटेश्वरं वरारोहे ये पश्यंति सुभक्तितः ॥ तेषां पापं जटीभूतं तत्क्षणादेव नश्यति ॥ ७२ ॥ येऽर्चयंति सदा देवि देवदेवं जटेश्वरम् ॥ तेषां बलं प्रभावश्च सौभाग्यं च भविष्यति ॥ ७३ ॥ येऽप्यन्ये देवगन्धर्वा यक्षराक्षस मानवाः ॥ लिंगं च पूजयिष्यंति विधिवद्भक्तिभावतः ॥ ७४ ॥ तेऽपि कामानवाप्स्यन्ति यांश्च कांश्च सुदुर्लभान् ॥ ऐश्वर्यं धर्ममतुलं दीर्घमायुररोगताम् ॥ ७५ ॥ निःसपत्नत्वमतुलं यच्चान्यत्तदवाप्नुयात् ॥ पापिनः क्रूरकर्माणो येऽपि लिंगं समाश्रिताः ॥ तेपि पापविनिर्मुक्ता भविष्यंति गतज्वराः ॥ ७६ ॥ जटेश्वरं प्रपश्यंति भक्त्या ये च दिनेदिने ॥ ते धर्मधनसौभाग्यैर्भविष्यंति समन्विताः ॥ ७७ ॥ व्याधितो व्याधिना मुक्तो दुःखी दुःखात्प्रमुच्यते ॥ दर्शनात्तु भवेत्सद्यः सर्वपातकवर्जितः ॥ ७८ ॥ जटेश्वरस्य माहात्म्यं ये पठिष्यंति पार्वति ॥ श्रोष्यंति येऽपि मद्भक्त्या प्रयताः श्रद्धयान्विताः ॥ ७९ ॥ ते सर्वकामानाप्स्यंति गतिमंते च मत्पुरे ॥ या नारी दुर्भगा सापि सौभाग्यं लभते सदा ॥ ८० ॥ गुर्विणी लभते पुत्रमरोगं श्रुतिभूषणम् ॥ शिशुमहाश्च नश्यंति नापमृत्युभयं भवेत् ॥ ८१ ॥ मांगल्यमिदमायुष्यं धर्मकामाश्रयं महत् ॥ दुःस्वप्नजं भयं घोरं पापजं याति संक्षयम् ॥ ८२ ॥ दुर्भुक्तं दुर्जनस्पर्शं यच्चाल्पाष्टुःकरं भवेत् ॥ लिंगाख्यानकथां श्रुत्वा विनश्यति न संशयः ॥ ८३ ॥ श्राद्धेषु यः पठेदेतां जटेश्वरकथां शुभाम् ॥ तदक्षयं भवेच्छ्राद्धं पितॄणां प्रीतिवर्द्धनम् ॥ ८४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जटेश्वरस्य देवस्य शृणु रामेश्वरं शिवम् ॥ ८५ ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये जटेश्वरमाहात्म्यवर्णननामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ श्रीहर उवाच ॥ ॥ एकोनत्रिंशतं विद्धि देवं रामेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण मुच्यते ब्रह्महत्यया ॥ १ ॥ पुरा त्रेतायुगे देवि रामः शस्त्रभृतां वरः ॥ शूरः सर्वगुणोपेतः पितृभक्तो बभूव ह ॥ २ ॥ रेणुकागर्भसंभूतः स्वयं रामो बभूव ह ॥ विष्णुरंशावतीर्णोऽसौ भृगोः शापात्सुदुस्तरात् ॥ ३ ॥ स कदाचिन्नियुक्तोऽसौ मुनिना जमदग्निना ॥ शिरश्छिन्धीत्युवाचेदं मातुस्ते विपुलं सुत ॥ ४ ॥ स पितुर्वचनं श्रुत्वा भ्रातॄणां मातुरेव च ॥ शिरांसि चिच्छिदे रामो जमदग्निर्वरं ददौ ॥ ५ ॥ सर्वेषां पृथिवीशानां त्वमजेयो भविष्यसि ॥ सर्वक्षयकरो भावी न चिरादेव भार्गव ॥ ६ ॥ गृहाण परशुं पुत्र वह्निज्वालोद्भवं दृढम् ॥ अनेन शितशस्त्रेण ततः ख्यातो भविष्यति ॥ ७ ॥ अथ केनापि कालेन कार्त्तवीर्यार्जुनो नृपः ॥ हैहयानां कुले जातः सहस्रबाहुविश्रुतः ॥ ८ ॥ जघान जमदग्निं तु कामधेनुहृते क्रुधीः ॥ पितरं निहतं दृष्ट्वा रामः क्रुद्धोऽब्रवीदिदम् ॥ ९ ॥ अथ पश्यंतु मे वीर्यं त्रयो लोकाः सनातनम् ॥ स च पश्यतु दुर्बुद्धिर्मन्महा कृतवीर्यजः ॥ १० ॥ मत्पिता निहतो येन सत्कर्मनिरतः सदा ॥ तस्य बाहुसहस्रं तु छेत्स्यामीह न संशयः ॥ ११ ॥ इत्युक्त्वा क्रोधरक्ताक्षः कार्त्तवीर्यार्जुनं भुवि ॥ धर्षयित्वा यथाकामं क्रोशमानं पुनःपुनः ॥ १२ ॥ कृत्स्नं बाहुसहस्रं च चिच्छेद भृगुनंदनः ॥ परश्वधेन तीक्ष्णेन ज्ञातिभिः सहितं तदा ॥ १३ ॥ रथस्थं पातयामास जघान नृपतिं प्रिये ॥ त्रिःसप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता ॥ १४ ॥ कृत्वा निःक्षत्रियां चैव भार्गवः स महाबलः ॥ सर्वपापविनाशाय वाजिमेधेन चेष्टवान् ॥ १५ ॥ तस्मिन्यज्ञे महादाने दक्षिणां भृगुनंदनः ॥ मारीचाय ददौ प्रीतः कश्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पाय वसुन्धराम् ॥ १६ ॥ वारुणांस्तुरगाञ्छुभ्रान्रथं च रथिनां वरः ॥ हिरण्यमक्षयं धेनूर्गजेंद्रांश्च महामतिः ॥ १७ ॥ तदा तस्मिन्महायज्ञे वाजिमेधे महायशाः ॥ तथापि न गता हत्या ह्यनेकप्राणिसंभवा ॥ १८ ॥ एवं किल पुराणेषु सर्वागमविदादिषु ॥ विश्वस्तघातिनां चैव निष्कृतिः श्रूयते यथा ॥ १९ ॥ अश्वमेधेन यज्ञेन ब्रह्महत्या विनश्यति ॥ अथवा द्वादशाब्देन यत्रैकोऽस्त्या कृता भुवि ॥ २० ॥ मया पुनर्नृशंसेन बहवः प्राणिनो हताः ॥ विश्वस्ताश्च प्रमत्ताश्च गर्भस्थाश्च पुनःपुनः ॥ २१ ॥ स्त्रिया वृद्धाश्च बालाश्च माता चैव विशेषतः ॥ इति दुःखान्वितो रामो विषादं परमं गतः ॥ २२ ॥ चिंतयित्वा मुहूर्तं तु गतो श्वेतकं गिरिम् ॥ तपोऽतप्यद्घोरं बहून्वर्षगणान्प्रिये ॥ २३ ॥ तथापि न गता हत्या ह्यनेकप्राणिसंभवा ॥ अथ रामो जगामाथ महेन्द्रे मलये तथा ॥ २४ ॥ सह्ये हिमालये रम्ये पुण्ये वदरिकाश्रमे ॥ चरित्वा पर्वतान्सर्वान्नानाथं नर्मदां ययौ ॥ २५ ॥ यमुनां चंद्रभागां च गंगां त्रिपथगामिनीम् ॥ इरावतीं वितस्तां च परां चर्मण्वतीं शुभाम् ॥ २६ ॥ विशालां कपिलां दुर्गां गंभीरां गोमतीं शिवाम् ॥ गोदावरीं दशार्णां च पुण्यां भीमरथीं तथा ॥ २७ ॥ गयां चैव कुरुक्षेत्रं नैमिषं पुष्करं तथा ॥ अट्टहासं प्रभासं च केदारमरमेश्वरम् ॥ २८ ॥ कृतयात्रोऽपि दुःखार्त्तश्चिंतयामास भार्गवः ॥ न नूनं तीर्थमाहात्म्यं दृश्यते भुवि सांप्रतम् ॥ २९ ॥ न गता ब्रह्महत्या मे कृतो धर्मो निरर्थकः ॥ मिथ्या तत्कथ्यते शास्त्रे तीर्थदानादिभिः शुभैः ॥ यदि स्यात्सत्यमेतच्च नष्टं जातं कथं मम ॥ ३० ॥ एतस्मिन्नेव काले तु नारदो मुनिपुंगवः ॥ आजगाम तमुद्देशं यत्र रामो व्यवस्थितः ॥ ॥ ३१ ॥ विषण्णवदनो दीनश्चिंतयानः पुनःपुनः ॥ दृष्ट्वा तथाविधो रामः प्रत्युवाचाथ नारदम् ॥ ३२ ॥ भोभो नारद देवर्षे शृणु मे परमं वचः ॥ जननी निहता पूर्वं पितुर्वाक्याद्द्विजोत्तम ॥ ३३ ॥ पितुः पराभवाद्भ्रातॄ भूमिपाला मया हताः ॥ गर्भा विदारिताः स्त्रीणां बाला वृद्धाश्च शोषितः ॥ ३४ ॥ निरंतरा हता लोका विशोकेनादयालुना ॥ पश्चाद्घृणा समुत्पन्ना परलोकं ममेक्षतः ॥ ३५ ॥ यज्ञः कृतोऽश्वमेधश्च दत्तं दानमनेकधा ॥ स्नातोहं सर्वतीर्थेषु सर्वप्रस्रवणेषु च ॥३६॥ पर्वतेषु तपस्तप्तं हुतं जप्तं निरंतरम् ॥ ब्रह्महत्याविनाशार्थं किं किं नात्र मया कृतम् ॥३७॥ परं नैव गता हत्या तस्मात्सर्वं निरर्थकम् ॥ ३८ ॥ इति तस्य वचः श्रुत्वा नारदो भगवानृषिः ॥ प्रत्युवाच हितं सत्यं चिरं ध्यात्वा वचस्तदा ॥ भोभो राम किमात्मानं न स्मरस्यधुना हरिम् ॥ ३९ ॥ त्वयैव कथितं पूर्व ब्रह्महत्याविनाशनम् ॥ महाकालवने क्षेत्रे क्षेत्राणामुत्तमं परम् ॥ तस्मिन्क्षेत्रे महालिंगं ब्रह्महत्याविनाशनम् ॥ ४० ॥ जटेश्वरो महाभाग विद्यते सर्वसिद्धिदम् ॥ कृतावतार राम त्वं तत्र गच्छाविलंबितम् ॥ नारदस्य वचः श्रुत्वा स्मृत्वा क्षेत्रमनुत्तमम् ॥ ४१ ॥ जगाम त्वरितं दंडी महाकालवने ततः ॥ लिंगमाराधयामास ततो हत्या गता क्षयम् ॥ लिंगमध्यादहं देवि प्रसन्नो निर्गतस्तदा ॥ ४२ ॥ जामदग्न्यो मया प्रोक्तः कांतकामं ददाम्यहम् ॥ स प्रोवाच ततो रामो भक्तिनम्रात्मकंधरः ॥ ॥ ४३ ॥ त्वत्पादपंकजे भूयाद्भक्तिर्मे विपुला सदा ॥ वरमेतं प्रयच्छाद्य यदि तुष्टो महेश्वर ॥ ४४ ॥ इत्युक्तोऽहं तदा तेन श्रुत्वा तुष्टेन पार्वति ॥ तस्मै दत्ता मयाभीष्टा वरा कीर्त्तिकरा स्थितिः ॥ ४५ ॥ अद्यप्रभृति ते नाम्ना देवः ख्यातो भविष्यति ॥ तदा रामेश्वर इति त्रिषु लोकेषु गीयते ॥ ४६ ॥ भक्त्या ये पूजयिष्यंति देवं रामेश्वरं परम् ॥ आजन्मप्रभवं पापं तेषां नश्यति तत्क्षणात् ॥ ४७ ॥ स एव पुण्यवान्पूज्य इह लोके परत्र च ॥ यः पश्यति नरो भक्त्या देवं रामेश्वरं शिवम् ॥ ४८ ॥ येऽनुमोदंति देवस्य दर्शनं यजनं तथा ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरम् ॥ ॥ ४९ ॥ यच्चापि पातकं घोरं ब्रह्महत्यासहस्रकम् ॥ तत्पापं विलयं याति रामेश्वरसमर्चनात् ॥ ५० ॥ दुष्प्राप्यं यत्फलं विप्रैर्वाजपेयादिभिर्मखैः ॥ प्राप्यते तत्सुखेनैव श्रीरामेश्वरदर्शनात् ॥ ५१ ॥ ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ॥ गतिरभ्यधिका तेभ्यो दृष्ट्वा रामेश्वरं शिवम् ॥ ॥ ५२ ॥ जितास्तेन सदा लोका रामेणेव जगत्त्रयम् ॥ दृष्टं येन सदा भक्त्या लिंगं रामेश्वरं शिवम् ॥ ५३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रामेश्वरस्य देवस्य शृणु त्वं च्यवनेश्वरम् ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये रामेश्वरमाहात्म्यवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ श्रीविश्वनाथ उवाच ॥ ॥ त्रिंशत्तमं विजानीहि त्वं देवि च्यवनेश्वरम् ॥ यस्य दर्शनमात्रेण स्वर्गभ्रंशो न जायते ॥ १ ॥ भृगोर्महर्षेः पुत्रश्च च्यवनोनाम पार्वति ॥ स्थाणुभूतस्तपस्तेपे निराहारो

महामुनिः ॥ २ ॥ वितस्तायास्तटे रम्ये बहुवर्षगणान्किल ॥ सवल्मीकोऽभवद्विप्रो लताभिरभिसंवृतः ॥ ३ ॥ कालेन महता देवि ममा कीर्णः पिपीलकैः ॥ तथा स संवृतो धीमान्मृत्पिंड इव सर्वशः ॥ ४ ॥ आजगाम तमुद्देशं विहर्तुं वन उत्तमे ॥ शर्यातिर्नाम धर्मात्मा सकुटुंबो मुदान्वितः ॥ ५ ॥ तस्य स्त्रीणां सहस्राणि चत्वार्यासन्परिग्रहः ॥ एकैव तु सुता सुभ्रूः सुकन्यानाम नामतः ॥ ६ ॥ सा सखीभिः परिवृता सर्वाभरणभूषिता ॥ सा भ्रम्यमाणा वल्मीके दृष्ट्वा भार्गवचक्षुषी ॥ ७ ॥ सा कौतुकात्कण्टकेन बुद्धिमोहवती तदा ॥ किं नु खल्विदमित्युक्त्वा निर्बिभेदास्य लोचने ॥ ८ ॥ अभवत्स तया विद्धो नेत्रयोः परमार्तिमान् ॥ ततः शर्यातिमन्यस्य शकृन्मूत्रं समारुणत् ॥ ९ ॥ ततो रुद्धे शकृन्मूत्रे पर्यतप्यत पार्थिवः ॥ प्रत्युवाच ततः क्रुद्धो राजा गद्गदया गिरा ॥ १० ॥ केनापकृतमद्यह भार्गवस्य महात्मनः ॥ तपोनित्यस्य वृद्धस्य रोषणस्य विशेषतः ॥ ११ ॥ ज्ञातं वा यदि वाज्ञातं तदिदं ब्रूत मा चिरम् ॥ तमूचुः सैनिकाः सर्वे न विद्मोऽपकृतं वयम् ॥ १२ ॥ ततः स पृथिवीपालः साम्ना चोपेण च स्वयम् ॥ पर्यपृच्छत्स्ववर्गं च भूयोभूयः सुदुःखितः ॥ १३ ॥ पितरं दुःखितं दृष्ट्वा सुकन्या तमथाब्रवीत् ॥ मया किंचिच्च वल्मीके दृष्टं सत्त्वमतिच्छवि ॥ १४ ॥ खद्योतवदभिज्ञातं तन्मया विद्धमंतिकम् ॥ एतच्छ्रुत्वा तु शर्यातिर्वल्मीकं क्षिप्रमभ्यगात् ॥ १५ ॥ तत्रापश्यत्तपोवृद्धं वयोवृद्धं च भार्गवम् ॥ प्रार्थयामास सैन्यार्थे प्रांजलिः स महीपतिः ॥ १६ ॥ अज्ञानाद्बालया यत्तेऽपकृतं तु महीसुर ॥ इमामेव च ते कन्यां ददामि सुहृदव्रताम् ॥ १७ ॥ भार्यार्थे त्वं गृहाणेमां प्रसीद द्विजसत्तम ॥ ततो ब्रवीन्महीपालं च्यवनो भार्गवस्तथा ॥ १८ ॥ यद्येवं प्रतिगृह्णेतां क्षमिष्यामि महीपते ॥ ददौ दुहितरं तस्मै च्यवनाय महीपतिः ॥ १९ ॥ प्रतिगृह्य च तां कन्यां भगवान्प्रससाद ह ॥ प्राते प्रसादे राजाथ ससैन्यो विषयं गतः ॥ २० ॥ सुकन्यापि पतिं लब्ध्वा तपस्विनमनिंदिता ॥ नित्यं पर्यचरत्प्रीत्या तपसा नियमेन च ॥ २१ ॥ कस्यचित्त्वथ कालस्य नासत्यावश्विनौ प्रिये ॥ कृताभिषेकां विवृतां सुकन्यां तामपश्यताम् ॥ २२ ॥ तां दृष्ट्वा दर्शनीयांगीं देवराजसुतामिव ॥ ऊचतुः समुपद्रुत्य कस्य त्वमतिशोभने ॥ २३ ॥ सा प्रोवाच महाभागा पतिव्रतपरायणा ॥ शर्यातितनयां चैव भार्यां च च्यवनस्य वै ॥ २४ ॥ ततोश्विनौ प्रहस्येनामब्रूतां पुनरेव तु ॥ कस्मादेवंविधा भूत्वा जगार्जरितं पतिम् ॥२५॥ त्वमप्यस्मद्गतं कल्याणि कामभोगबहिष्कृता ॥ वृद्धं च्यवनमुत्सृज्य वरयस्वैकमावयोः ॥ २६ ॥ पत्यर्थं देवगर्भाभे मा वृथा यौवनं कृथाः ॥ एवमुक्ता सुकन्या तु दर्शं तावित्यमब्रवीत् ॥ २७ ॥ रतार्थं च्यवने देवे सेवं मा पर्यरांकृतम् ॥ ततोऽब्रूतां पुनस्त्वेनामावां देवभिषग्वरौ ॥ २८ ॥ युवानं रूपसंपन्नं कुरु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्यावः पतिं तव ॥ एतेन समयेनावामामंत्रय सुमध्यमे ॥२९॥ सा तयोर्वचनं श्रुत्वा कथयामास भार्गवे ॥ तच्छ्रुत्वा च्यवनो भार्यां क्रियतामित्यभाषत ॥ ३० ॥ ऊचतू राजपुत्रीं तां पतिस्तव विशत्वपः ॥ ततोऽप्सु च्यवनः शीघ्रं रूपार्थी प्रविवेश ह ॥ ३१ ॥ अश्विनावपि तत्काले सरः प्राविशतां प्रिये ॥ ततो मुहूर्त्तादुत्तीर्णाः सर्वे ते सरसस्तदा ॥ ३२ ॥ दिव्यरूपधराः सर्वे युवानो दिव्यकुंडलाः ॥ तुल्यवेषधराश्चैव मनसः प्रीतिवर्द्धनाः ॥ ॥ ३३ ॥ तेऽब्रुवन्सहिताः सर्वे वृणीष्वान्यतमं शुभम् ॥ अस्माकमीप्सितं भद्रे पतित्वे वरवर्णिनि ॥ ३४ ॥ सा समीक्ष्य तु तान्सर्वांस्तुल्यरूपधरान्स्थितान् ॥ निश्चित्य मनसा बुद्ध्या देवी वव्रे स्वकं पतिम् ॥ ३५ ॥ लब्ध्वा तु च्यवनो भार्यां वयो रूपं तु वांछितम् ॥ हृष्टोऽब्रवीन्महातेजास्तौ नासत्यावश्विनाविति ॥ ३६ ॥ यदहं रूपसंपन्नो वयसा च समन्वितः ॥ कृतो भवद्भ्यां वृद्धः सन्भार्यां च प्रापितवानिमाम् ॥ ३७ ॥ तस्माद्युवां करिष्यामि प्रीत्याहं सोमपायिनौ ॥ सत्यमेतन्न संदेहो देवराजस्य पश्यतः ॥ ३८ ॥ तच्छ्रुत्वा हृष्टमनसौ दिवं देवौ प्रजग्मतुः ॥ याजयामास सोमार्हौ नासत्यावश्विनाविति ॥ ३९ ॥ भिषजौ देवतानां हि कर्मणा तेन गर्हितौ ॥ आभ्यामर्थाय सोमं त्वं प्रदास्यसि यदि स्वयम् ॥ ४० ॥ वज्रं ते प्रहरिष्यामि घोररूपं सुदारुणम् ॥ एवमुक्तः स्मयन्निन्द्रमभिवीक्ष्य स भार्गवः ॥ बलिनं वासवं ज्ञात्वा चिंतयामास सत्वरम् ॥ ४१ ॥ देवमाराधयिष्यामि महादेवं महेश्वरम् ॥ यस्य कर्मकरः शक्रो यस्य देवा वशानुगाः ॥ यः समर्थो जगद्रोक्षा सृष्टिसंहारकारकः ॥ ४२ ॥ इत्युक्त्वा च्यवनो देवि महाकालवनं गतः ॥ रामेश्वरस्य देवस्य लिंगमीशानतः स्थितम् ॥ श्रद्धयाराधितं तेन च्यवनेन महात्मना ॥ ४३ ॥ तस्य प्रसन्नो रुद्रस्तु स वज्रादभयं ददौ ॥ तस्य प्रहरतो बाहुं स्तंभयामास भार्गवः ॥ ४४ ॥ समाराधनतुष्टस्य लिंगस्यास्य प्रभावतः ॥ एतस्मिन्नंतरे ज्वाला निःसृता लिंगमध्यतः ॥ ४५ ॥ तया देवगणाः सर्वे दह्यमाना विचेतसः ॥ प्रोचुर्गद्गदया वाचा भूमेनांधीकृते क्षणाः ॥ ४६ ॥ क्रियेतां सोमपावेतावश्विनौ बलसूदन ॥ देवानां वचनं श्रुत्वा च्यवनं भयपीडितः ॥ प्रत्युवाच ततः शक्रः प्रणामानतकंधरः ॥ ४७ ॥ सोमपावश्विनावेतावद्यप्रभृति भार्गव ॥ भविष्यतस्ततः सर्वमेतत्सत्यं ब्रवीमि ते ॥ ४८ ॥ मा तेऽतिध्याभिसंरंभो भविष्यति तपोधन ॥ लिंगस्यास्य प्रभावोऽयं यदहं निष्प्रभीकृतः ॥ ४९ ॥ ततस्त्वन्नामधेयेन प्रसिद्धिर्भुवि यास्यति ॥ आराधितं यतो देवि च्यवनेन महात्मना ॥ ५० ॥ च्यवनेश्वरमेतद्वै ख्यातं त्रिभुवनेऽभवत् ॥ भक्ता ये पूजयिष्यंति देवेशं च्यवनेश्वरम् ॥ आजन्मप्रभवं पापं तेषां नश्यति तत्क्षणात् ॥ ५१ ॥ यः पश्यति नरो नित्यं च्यवनेश्वरसंज्ञकम् ॥ जन्मदुःखजरारोगैर्मुक्तो मुक्तिमवाप्नुयात् ॥ ५२ ॥ यंयं काममभिध्याये न्मनसाभिमतं नरः ॥ तंतं दुर्लभमाप्नोति च्यवनेश्वरदर्शनात् ॥ ५३ ॥ नियमेन प्रपश्यंति ये देवं च्यवनेश्वरम् ॥ ते प्रयांति तनुं त्यक्त्वा मदीये भुवने प्रिये ॥ ५४ ॥ यः शृणोति कथां पुण्यां सर्वपापहरां शुभाम् ॥ स पुण्यात्मा परं स्थानं याति दिव्यं न संशयः ॥ ५५ ॥ भक्तिहीनः क्रियाहीनो यःपश्यति प्रसंगतः ॥ स पुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि ॥ ५६ ॥ पुष्पैर्विचित्रैर्यें देवं यजंते च्यवनेश्वरम् ॥ संसारार्णवमुल्लंघ्यते यांति परमं पदम् ॥ ५७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ च्यवनेश्वरदेवस्य शृणु खंडेश्वरं शिवे ॥ ५८ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये च्यवनेश्वरमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ ॐ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकत्रिंशत्तमं सिद्धि देवं खंडेश्वरं प्रिये ॥ संपूर्णं जायते यस्य दर्शाद्दानव्रतादिकम् ॥ १ ॥ आसीद्वेतायुगे देवि भद्राश्वोनाम पार्थिवः ॥ यस्य नाम्नाऽभवद्रूपं भद्राश्वंनाम नामतः ॥ २ ॥ तस्यागस्त्यः कदाचित्तु गृहमागम्य सत्तमः ॥ उवाच सप्तरात्रं तु वसामि भवतो गृहे ॥ ३ ॥ तं राजा शिरसा नत्वा स्वास्यतामित्यभाषत ॥ तस्य कांतिमतीनाम भार्या परमशोभना ॥ ४ ॥ तस्यास्तेजः समभवद्दादशादित्यसंनिभम् ॥ सपत्नीनां शनं तस्या त्रिभुवने वरवर्णिनि ॥ ५ ॥ ता दास्यं इव कर्माणि कुर्वत्यहरहः सदा ॥ कांतिमत्याः प्रभावेन भयोत्रस्ताः सुलोचनाः ॥ ६ ॥ तामगस्त्यस्तथा दृष्ट्वा तन्नुन्नासकलोचनाम् ॥ एवंभूतां तथा दृष्ट्वा राज्ञीं परमशोभनाम् ॥ साधुसाधु जगन्नाथेत्यगस्त्यः प्राह हर्षितः ॥ ७ ॥ द्वितीये दिवसेप्येवं राज्ञीं दृष्ट्वा महाप्रभाम् ॥ अहो ह्यंगनया सृष्टं जगदेतच्चराचरम् ॥ ८ ॥ इत्यगस्त्यो द्वितीयेऽह्नि राज्ञीं दृष्ट्वेत्युवाच ह ॥ तृतीयेऽह्नि च तां दृष्ट्वा पुनरेवमुवाच ह ॥ ९ ॥ अहो मूढा न जानंति लिंगमाहात्म्यमुत्तमम् ॥ महाकालवने क्षेत्रे च्यवनेशस्य पूर्वतः ॥ १० ॥ खंडव्रतानि जायंते पूर्णानि दर्शनाद्यतः ॥ चतुर्थे दिवसे हस्तावुत्क्षिप्य पुनरब्रवीत् ॥ ११ ॥ साधुसाधु जगन्नाथ साधु भद्राश्व सुव्रत ॥ पंचमे दिवसेऽप्येवं षष्ठे चैव पुनःपुनः ॥ १२ ॥ नृत्यंतं सप्तमे दृष्ट्वा दिने पत्न्या समन्वितः ॥ प्रोवाच चैनं राजा स विस्मितेनांतरात्मना ॥ किं हर्षकारणं ब्रह्मन्येन नृत्यसमन्वितः ॥ १३ ॥ ॥ अगस्त्य उवाच ॥ ॥ अहो भूपाल मूढस्त्वं महामूर्खाश्च मंत्रिणः ॥ अहो पुरोहितो मुग्धो ये न जानंति मे मतम् ॥ १४ ॥ ईदृशा अपि जायंते राजानो यस्य दर्शनात् ॥ एवमुक्तस्ततो राजा कृतांजलिरभाषत ॥ १५ ॥ न जानीमो वयं ब्रह्मन्नभिप्रायं तवाधुना ॥ कथयस्व महाभाग यद्यतुग्रहकृद्भवान् ॥ १६ ॥ ॥ अगस्त्य उवाच ॥ ॥ इयं राज्ञी त्वदीयाप्यदासी वैश्यस्य वैदिशे ॥ नगरे हरिदत्तस्य त्वमस्याः पतिरेव च ॥ खंडव्रतप्रभावेन जातः कर्मकरो भवान् ॥ १७ ॥ स च वैश्यो महाकाले गत्वा देवं महेश्वरम् ॥ अर्चया मास विधिवद्गंधपुष्पादिभिः शुभैः ॥ १८ ॥ अभ्यर्च्य तु गृहं यावद्व्रजंतौ रक्षपालकौ ॥ ततः कालेन महता मृतौ द्वावपि दंपती ॥ १९ ॥ तेन पुण्येन ते जन्म प्रियव्रतगृहेऽभवत् ॥ इयं च पत्नी ते जाता पुरा वैश्यप्रदासिका ॥ २० ॥ परकीयप्रसंगेन संजाता भूमिरुत्तमा ॥ राज्यं पत्नी सुता साधुरित्युक्तं वचनं मया ॥ २१ ॥ तस्य देवस्य माहात्म्याद्यजंतं विविधैर्मखैः ॥ पश्यामित्वां महीपाल भूपालशतवंदितम् ॥ २२ ॥ अतः साधुपुरा प्रोक्तं मया तव महीपते ॥ २३ ॥ इति तस्य वचः श्रुत्वा कुंभयोनेर्महात्मनः ॥ महाकालवने गंतुं मतिं चक्रे महीपतिः ॥ ततः सांतःपुरः प्रायात्तेन सार्द्धं महर्षिणा ॥ २४ ॥ अगस्त्यकथितं लिंगं ददर्श श्रद्धया पुनः ॥ पूजयामास विधिवत्पत्न्या सार्द्धं महीपतिः ॥ २५ ॥ ततस्तुष्टस्तदा देवो नृपं प्राहामितद्युतिः ॥ मनोऽभीष्टं तपस्तेस्तु भोगमैश्वर्यमेव च ॥ २६ ॥ कुलं प्रभावं सौभाग्यं दीर्घमायुररोगिताम् ॥ निःसपत्नं ततो राज्यं कृत्वा स्वर्गमवाप्स्यति ॥ २७ ॥ इत्युक्तो देवदेवेन गतोऽसौ विषयं स्वकम् ॥ निष्कंटकं ततो राज्यं कृत्वा स्वर्गं गतः प्रिये ॥ २८ ॥ अनेकजन्मचरितं खंडव्रतकदम्बकम् ॥ संपूर्णमभवद्देवि लिंगस्यास्य प्रभावतः ॥ २९ ॥ अतः खण्डेश्वरं देवो विख्यातो भुवनत्रये ॥ ये पश्यंति नरा देवि देवं खण्डेश्वरं शिवम् ॥ ३० ॥ खण्डव्रतानि पूर्णानि तेषामाशु भवंति हि ॥ तपःखण्डं व्रते खण्डं दानखंडं च यत्कृतम् ॥ तत्सर्वं पूर्णतां याति श्रीखंडेश्वरदर्शनात् ॥ ३१ ॥ दृष्ट्वा खंडेश्वरं देवं पापविघ्नैः प्रमुच्यते ॥ सप्तजन्मकृतैर्देवि मनोवाक्कायकर्मभिः ॥ ३२ ॥ दृष्ट्वा खण्डेश्वरं देवं कृतकृत्यत्वमाप्यते ॥ तस्य नश्यति दौर्भाग्यं सप्तजन्मोद्भवं प्रिये ॥ ३३ ॥ खंडेश्वरेऽर्चिते देवे सर्वे देवाः सवासवाः ॥ संतुष्टा वरदाश्चैव भवंति वरवर्णिनि ॥ ३४ ॥ देवं खंडेश्वरं ये वै यजंति श्रद्धया प्रिये ॥ पुण्यैर्नानाविधैः स्नानैः सुगन्धैश्च विशेषतः ॥ ३५ ॥ धूप

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दीपैर्नमस्कार्ज्जपैः स्तोत्रैः पृथग्विधैः ॥ ते सर्वे कामसंपन्नाः श्रीमन्तो राज्यसंयुताः ॥ २६ ॥ दीर्घायुषः शुभाचारा जायंते देहिनोऽमलाः ॥ अति श्रेष्ठा गतिस्तेषां विशोका नित्यमक्षयाः ॥ खंडेश्वरप्रसादेन जायते नात्र संशयः ॥ २७ ॥ एते च विष्णुब्रह्मेंद्रकुबेरदहनादयः ॥ परां सिद्धिं सुसं प्राप्ताः खंडेश्वरसमर्चनात् ॥ २८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ खंडेश्वरस्य देवस्य शृणु वै पत्तनेश्वरम् ॥ २९ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये खण्डेश्वरमाहात्म्यवर्णननामैकत्रिंशोऽध्यायः ॥ ॥ ३१ ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिषु लोकेषु विख्यातं द्वात्रिंशत्तममुत्तमम् ॥ विद्धि सिद्धिप्रदं पुंसां पत्तनेश्वरमीश्वरम् ॥ १ ॥ पुराऽहं पर्वते देवि मंदरे चारुकन्दरे ॥ क्रीडन्साद्धं त्वया पृष्टः कदाचिद्रहसि स्थितः ॥ २ ॥ किमर्थं पर्वतं त्यक्त्वा कैलासं रमणीयकम् ॥ मुक्ता फलशिलाशुभ्रं शङ्खचन्द्रांशुनिर्मलम् ॥ ३ ॥ सिद्धचारणगन्धर्वकिंनरोद्गीतनादितम् ॥ सदा पुष्पद्रुमच्छन्नं कदलीवनराजितम् ॥ ४ ॥ अथ कोकिलचक्राह्वचकोरकुरराकुलम् ॥ पुण्यलोकोपमं स्थानं त्रिविष्टपविभूषणम् ॥ ५ ॥ महाकालवने शून्ये नानागुल्मलतावृते ॥ गर्जद्गजशार्दूल सिंहशम्बरसंकुले ॥ ६ ॥ ऋक्षवानरगोमायुजन्तुकादिविराजिते ॥ मयूरसर्पमार्जारमूषिकादिविराजिते ॥ ७ ॥ कथं वासः कृतो देव कौतूहलमिदं मम ॥ ८ ॥ इति पृष्टस्त्वया देवि मंदरे चारुकन्दरे ॥ मया प्रोक्तं प्रसन्नेन पत्तनं च मम प्रिये ॥ ९ ॥ महाकालवनं रम्यं स्वर्गात्सुखकरं परम् ॥ स्मशानपीठसत्क्षेत्रवनोपरसमाश्रितम् ॥ १० ॥ अनौपम्यगुणं विद्धि पत्तनं पर्वतात्मजे ॥ एवं पत्तनदेवो वै न दृष्टो भुवनत्रये ॥ गीतवादित्रचा तुर्यैः स्पर्द्धते यः सुरालयम् ॥ ११ ॥ एतस्मिन्नंतरे देवि देवर्षिर्नारदो मुनिः ॥ द्रष्टुकामः समायातो मन्दरे मां यशस्विनि ॥ १२ ॥ विनोदार्थं मया पृष्टस्त्वत्प्रियार्थं कुतूहलात् ॥ क्व त्वया गमितः कालः कल्पसंख्यो महामुने ॥ १३ ॥ कस्मिन्नाश्रमसंस्थाने तपसः संचयः कृतः ॥ तीर्थानि कानि भ्रांतानि क्व ते रतिरभूच्चिरम् ॥ १४ ॥ कौतुकं दृष्टपूर्वं तु वद मे मुनिसत्तम ॥ इति पृष्टो मया देवि ब्रह्मपुत्रो महामुनिः ॥ कथयामास वृत्तांतं पत्तनस्य प्रयत्नतः ॥ १५ ॥ बहूनि संपरिक्रम्य तीर्थान्यायतनानि च ॥ पत्तनानि विचित्राणि देशाश्च नगराणि च ॥ १६ ॥ अटनार्थं महादेव जंबूद्वीपे मनोरमे ॥ दृष्टः पत्तनराजश्च सदानंदकरः परः ॥ १७ ॥ स्वेच्छाकल्पितविन्यासः प्रासादशतकल्पितः ॥ इच्छाकामफलावाप्तिर निर्देश्यसुखावहः ॥ १८ ॥ सर्वर्तुकुसुमामोदसुखस्पर्शानिलावृतः ॥ वीणावेणुरवैर्घुष्टो मनःप्रह्लादकारकः ॥ १९ ॥ वज्रेंद्रनीलवैडूर्यचन्द्रकांतादिदीपितः ॥ जरामृत्युभयोपेतः सर्वव्याधिविवर्जितः ॥ २० ॥ शक्राग्नियमरक्षोब्धिवायुसोमेशसेवितः ॥ ऊर्द्धाधः सप्तलोकेषु पुण्येषु निवसंति हि ॥ ॥ २१ ॥ सदा प्रमुदिता देवास्तेऽपि कांक्षंति पत्तनम् ॥ तत्र शांता महात्मानो निवसंते महेश्वर ॥ २२ ॥ विद्योतितदिशो दांताः सूर्य वैश्वानरप्रभाः ॥ दिव्यांबरधरा धीरा जटामुकुटधारिणः ॥ २३ ॥ विप्रा माहेश्वराः पुण्याः क्षत्रिया हरतत्पराः ॥ मुमुक्षवस्तपोनिष्ठा वैश्याः शूद्राश्चिरायुषः ॥ २४ ॥ स शुभ्ररूपः स च लोहिताकृतिः स चापि पीतः स सितेतरः क्वचित् ॥ स नामधेयः स च नामवर्ज्यः सोऽदृश्यरूपः स च दृष्टरूपः ॥ २५ ॥ क्वचिद्बिसदलाक्षः क्वचिदेकरविप्रभः ॥ क्वचिच्चन्द्राद्रिशिष्येत क्वचिदंगुलिकांतिमान् ॥ २६ ॥ जन्म मृत्युजरारोगैर्दुःखानि विविधानि च ॥ प्रयांति विलयं तानि प्रसन्ने पत्तनेश्वरे ॥ २७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पत्तनेशस्य देवस्य आनंदेशमतः शृणु ॥ २८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये पत्तनेश्वर माहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ७ ॥ ॥ श्रीहर उवाच ॥ ॥ त्रयस्त्रिंशत्तमं देवमानंदेश्वरमीश्वरम् ॥ विद्धि पापहरं पुण्यं सर्वसंपत्करं सदा ॥ १ ॥ पुरा राथंतरे कल्पे बभूव पृथिवीपतिः ॥ अनमित्र इति ख्यातः सार्वभौमो महीतले ॥२॥ स धर्मात्मा महात्मा च पराक्रमधनो नृपः ॥ अतीत्य सर्वभूतानि बभौ भानुरिवाव्ययः ॥३॥ समः शत्रौ च पुत्रे च मित्रे च परधर्मवित् ॥ गिरिभद्रा गिरेः पुत्री तेनोढा वरवर्णिनी ॥४॥ अतीव वल्लभा सा च प्राणेभ्योऽपि गरीयसी ॥ आनंद इति पुत्रोऽभूत्तस्य ज्ञानरतः सुधीः ॥ ५ ॥ जातमात्रो निजोत्संगे स्थिरमुल्लाप्य वे पुनः ॥ परिष्वजति हार्देन उल्लापयति पुनःपुनः ॥ ६ ॥ स जातिस्मरणो जातो मातुरुत्संगमास्थितः ॥ जहास च तदा माता संक्षुब्धा वाक्यमब्रवीत् ॥ ७ ॥ भीतास्मि किमिदं वत्स हासो यद्रुदने तव ॥ अकालबोधः संजातः किंस्वित्पश्यसि शोभनम् ॥ ८ ॥ इत्युक्तो मातरं प्राह सर्वोऽपि स्वार्थमीहते ॥ मां नेतुमिच्छति पुरो मार्जारी किं न पश्यसि ॥ अंतर्धानगता चेयं द्वितीया जातहारिणी ॥ ९ ॥ पुत्रप्रीत्या च मातस्त्वमतः स्वार्थं समीहसे ॥ उल्लाप्योल्लाप्य बहुशः परिष्वजसि मां बत ॥ १० ॥ उद्भूते बालके स्नेहात्संभ्रमात्स्त्रीजनोऽप्ययम् ॥ ततोयमागतो हासः शृणु चाप्यत्र कारणम् ॥ ॥ ११ ॥ स्वार्थे प्रसक्ता मार्जारी लोलुपा मामवेक्षते ॥ तथांतर्द्धानगा चेयं द्वितीया जातहारिणी ॥ १२ ॥ त्वं तु क्रमेणोपभोग्यं मत्तः फलम भीप्सिसि ॥ न मां जानासि कोऽप्येवं न वै चोपकृतं मया ॥ १३ ॥ संगतिर्नाति बालानां पंचसप्तदिनात्मकम् ॥ तथापि स्निह्यसि प्रीत्या परिष्वजसि संततम् ॥ १४ ॥ ततेति वत्स भो भद्र इत्यलीकं ब्रवीषि माम् ॥ पुत्रस्य वचनं श्रुत्वा क्रुद्धा माताऽब्रवीदिदम् ॥ १५ ॥ नाहं त्वामुपकारार्थं वत्स प्रीत्या परिष्वजे ॥ स्वार्थो मया परित्यक्तो यस्त्वत्तो मे भविष्यति ॥ १६ ॥ इत्युक्त्वा सा तमुत्सृज्य निष्क्रांता सूतिकागृहात् ॥ जहार तत्परित्यक्तं सा तदा जातहारिणी ॥ १७ ॥ सा हृत्वा तं तदा बालं पूर्वजातिस्मरं प्रिये ॥ हैमिन्याः शयने न्यस्यद्विक्रांतस्य महीभृतः ॥ १८ ॥ मत्वा स्वकीयं पुत्रं तु विक्रांतेन महीभृता ॥ कृतं वै नामकरणमानंद इति विश्रुतम् ॥ १९ ॥ विक्रांतस्य सुतो नीतो बोधस्य च द्विजन्मनः ॥ चैत्रनामा कृतस्तेन संस्कृतो वेदमंत्रकैः ॥ २० ॥ तृतीयं भक्षयामास बोधपुत्रं निशाचरी ॥ जातिस्मरोऽप्यथानंदः कृतोपनयनस्तदा ॥ २१ ॥ गुरुणा समनुज्ञातं क्रियतामभिवादनम् ॥ जनन्याः प्रागुपस्थानमित्युक्तो वाक्यमब्रवीत् ॥ २२ ॥ वंद्या मे कतमा माता जनित्री पालिनी च वा ॥ आनंदस्य वचः श्रुत्वा गुरुर्वचनमब्रवीत् ॥ २३ ॥ नन्वियं ते महाभाग जनित्री जनकात्मजा ॥ विक्रांतस्याग्रमहिषी हैमिनीनाम नामतः ॥ २४ ॥ ॥ ॥ आनंद उवाच ॥ ॥ चैत्रस्य प्रसवित्रीयं चैत्रोऽयं द्विजवेश्मनि ॥ संस्कृतो ब्राह्मणैर्मंत्रैर्गिरिभद्रासुतस्त्वहम् ॥ २५ ॥ गुरुराह ततः कस्त्वं चैत्रः को वा त्वयोच्यते ॥ ततः स कथयामास पूर्ववृत्तांतमादितः ॥ २६ ॥ ॥ गुरुरुवाच ॥ ॥ अतीव गहनं वत्स संकटं महदागतम् ॥ न वेद्मि किंचिन्मोहेन भ्रमंति मम बुद्धयः ॥ २७ ॥ ॥ आनंद उवाच ॥ ॥ मोहस्यावसरः कोऽत्र जगत्येवं व्यवस्थितः ॥ कः कस्य पुत्रो विप्रर्षे को वा कस्य न बांधवः ॥ २८ ॥ अतः संसारता हंति संसारं प्राणिनामिह ॥ महामोहहतं चेतश्चित्रमत्र कथं गुरो ॥ २९ ॥ ब्रह्मपुत्रस्य दुष्टस्य दुःसहस्य सुता भुवि ॥ जातहारिणिकानाम परिवर्त्तयते सुतान् ॥ ३० ॥ मातृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि ॥ मातृद्वयमथो प्राप्तं जातिं संस्मरता सता ॥ ३१ ॥ सोऽहं तपः करिष्यामि चैत्र आनीयतामिति ॥ ततः सुविस्मितो राजा सभार्यः सह बंधुभिः ॥३२॥ तस्मान्निवर्त्त्य ममता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मनुमेने च तं प्रति ॥ चैत्रमानीय तनयं राज्ययोग्यं चकार सः ॥ ३३ ॥ सन्मान्य ब्राह्मणं येन पुत्रबुद्ध्या स पालितः ॥ सोऽप्यानंदस्तपस्तेपे महाकालवने शुभे ॥ ३४ ॥ इंद्रेश्वरस्य देवस्य पश्चिमे लिंगमुत्तमम् ॥ भक्त्या ह्याराधयाञ्चास तपसा दुष्करेण तु ॥ ३५ ॥ तपस्यंतं ततस्तं तु देवः प्राह शुचिस्मिते ॥ किमर्थं तप्यसे वत्स तपस्तीव्रं ब्रवीमि ते ॥ ३६ ॥ मनुना भवता भाव्यं षष्ठेन व्रज तत्कुरु ॥ अलं ते तपसा तस्मिंस्ततो मुक्तिमवाप्स्यसि ॥ ३७ ॥ इत्युक्तो देवदेवेन तथेत्याह महामतिः ॥ बभूव स मनुर्देवि ब्रह्मतुल्यो महायशाः ॥ ३८ ॥ पुत्रानुत्पादयामास लिंगस्यास्य समर्चनात् ॥ कृतं नाम तदा देवैरानंदेश्वरमुत्तमम् ॥३९॥ आनंदेन यतः प्राप्ता सिद्धिर्देवि सुदुर्लभा ॥ अतो नाम भुवि ख्यातमानंदेश्वरमीश्यताम् ॥४०॥ ये पश्यंति विशालाक्षि आनंदेश्वरमीश्वरम् ॥ ते पुत्रपौत्रसंपन्ना भविष्यंति महीतले ॥ ४१ ॥ येषां क्षीणं नृणां पापं कोटिजन्मशतोद्भवम् ॥ तेषां भवति सा भक्तिरानंदेश्वरदर्शनात् ॥४२॥ तदेव पुरुषो मुक्तो जन्ममृत्युजरादिभिः ॥ यदा पश्यति देवेशमानंदेश्वरसंज्ञकम् ॥ ४३ ॥ मयोक्तं मुक्तिदं नृणामानन्देश्वरदर्शनम् ॥ स्वर्गापवर्गदं देवमानंदं लिंगमुत्तमम् ॥ अत्र देवैर्विशालाक्षि पूजितं लिंगमुत्तमम् ॥ ॥ ४४ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ आनंदेश्वरदेवस्य शृणु त्वं कंथडेश्वरम् ॥ ४५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य आनंदेश्वरमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ७ ॥ ॥ ॥ श्रीहर उवाच ॥ ॥ चतुस्त्रिंशत्तमं विद्धि देवं वै कंथडेश्वरम् ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ वितस्तायास्तटे रम्ये ब्राह्मणो निवसन्पुरा ॥ बभूव पांडवोनाम दरिद्रेणातिपीडितः ॥ २ ॥ ज्ञातिभिश्च परित्यक्तो दुष्टया भार्यया तथा ॥ कंथाप्येका स्थिता यस्य सर्वस्वप्रेम धारिणी ॥ ३ ॥ तेनाहं सुतकामेन तोषितो गिरिगह्वरे ॥ मयाप्युक्तं विशालाक्षि पुत्रस्तव भविष्यति ॥ ४ ॥ तस्य पुत्रः समुत्पन्नः कंथामध्यादयो निजः ॥ शीतोष्णवारिणी कंथा तस्य पुंस्त्व साऽभवत् ॥ ५॥ स च लब्धः प्रसादेन मदीयेन वरानने ॥ रुद्रेण च वरो दत्तः कंथाया भविता पुनः ॥ ६ ॥ अथ षष्ठे गते वर्षे मौंजीबंधमचिंतयत् ॥ तदामंत्र्य मुनीन्सर्वान्प्रसाद्य च पुनःपुनः ॥ नमस्कृत्य ऋषीन्सर्वान्पूजयामास भक्तितः ॥ ७ ॥ फलैर्वित्तानुसारेण मौंजी तस्याप्यबंधत ॥ तेऽप्युक्ता मुनयः सर्वे प्रसाद्य च पुनःपुनः ॥ ८ ॥ दीयतामाशिषो ह्यस्मै पुत्राय मुनिसत्तमाः ॥ मम पुत्रस्य पुत्रोऽयं दीर्घायुर्जायतां चिरम् ॥ ९ ॥ तूष्णींभूताः स्थिताः सर्वे तच्छ्रुत्वा नोत्तरं ददुः ॥ यदा ते नोत्तरं प्रोचुस्तदा मुनिवरः स्वयम् ॥ ध्यानेन चिंतयामास नूनमल्पायुषं सुतम् ॥ १० ॥ इति ज्ञात्वा तु संमोहमगमत्सहसा मुनिः ॥ विललाप स दुःखार्त्तः सुतस्नेहेन दुःखितः ॥ ११ ॥ ॥ वाडव उवाच ॥ ॥ दत्तः स्वयं महेशेन ममाल्पायुः कथं सुतः ॥ रुद्रेण च वरो दत्तः प्रसन्नेन पुरा मम ॥ १२ ॥ मत्तुल्यवीर्यः पुत्रस्ते कंथामध्याद्भविष्यति ॥ जातं च दत्त्वा ह्यल्पायुं मिथ्या व्यक्षस्य तद्वचः ॥ १३ ॥ पितरं दुःखितं दृष्ट्वा तूष्णींभूतो मुनिस्तदा ॥ स बालः सहसा वाक्यं बभाषे हर्षवर्द्धनम् ॥ १४ ॥ त्यजत भयमिदानीं यन्ममार्थे विपण्णा विनिहतनिजयत्नं प्रेतराजं करोमि ॥ शृणुत मम गिरं भोः सेश्वरा लोकपालाः पितृपतिविजयार्थं सत्प्रतिज्ञा ममेषा ॥ १५ ॥ अतिविषमतपोभिः शंकरं तोषयित्वा स्वपितुरपि च भक्त्या हन्मि मृत्योर्जयाशाम् ॥ किमतिशयविषाद व्याकुलास्तात सर्वे सपदि पितृपतिं तं स्वे वशे स्थापयामि ॥ १६ ॥ प्रयामि रुद्रं शरणं महेश्वरं देवं वरं चाप्युमयाऽविहीनम् ॥ शृण्वंतु सर्वेमुनयः समंतान्न मादृशो मृत्युपराभवोस्ति ॥ १७ ॥ तपोभिरुग्रैः शितिकंठपादौ प्रसाद्य मृत्युं न चिराद्विनेष्ये ॥ कंथाजवाक्यामृतलोलनेत्राः संजातरोमां चलसत्स्वदेहाः ॥ १८ ॥ पप्रच्छुरेनं मुनयः शिशुं तं जानासि रुद्रं परमं कथं त्वम् ॥ वयं चिरं कालमुपासमानास्तपोभिरुग्रैर्व्रतसंचयैश्च ॥ १९ ॥ तथापि विद्मो न वयं महेशं ज्ञातस्त्वयासौ कथमर्भकेण ॥ ईहामहे तं किल पुत्र सम्यक्छ्रोतुं प्रहर्षाद्भुतजातरोमाः ॥ २० ॥ ज्ञातस्त्वया कुत्र कथं महेशो महेश्वरो वै भुवनैकनाथः ॥ २१ ॥ इति तेषां वचः श्रुत्वा मुनीनां भावितात्मनाम् ॥ स बालः कथयामास वृत्तांतं पर्वतात्मजे ॥ २२ ॥ ममात्र क्रीडतः सिद्धः सिद्धिदः समुपागतः ॥ विज्ञायाल्पायुषं मां तु वात्सल्यादब्रवीदिदम् ॥ २३ ॥ गच्छ पुत्र ममादेशान्महाकालवनोत्तमे ॥ दक्षिणे चास्ति यल्लिंगमानंदेश्वरलिंगतः ॥ २४ ॥ तमाराधय शीघ्रं त्वं चिरंजीवी भविष्यसि ॥ तस्योपदेशदानेन ज्ञातं सम्यङ्महेश्वरात् ॥ २५ ॥ नान्यो देवोस्ति लोकेषु सत्यं सत्यं मुनीश्वराः ॥ तस्मादद्यैव यास्यामि महाकालवने शुभे ॥ २६ ॥ लिंगमाराधयिष्यामि विपद्दस्त्यज्यतामिह ॥ तस्य तद्वचनं श्रुत्वा तेन सार्द्धं महर्षयः ॥ २७ ॥ पिता च विस्मितो देवि सर्व एव समागताः ॥ देवमाराधयामास बालः कालजिघांसया॥ २८ ॥ लिंगमध्यात्ततो वाणी निःसृता पर्वतात्मजे ॥ अहो तुष्टोस्मि ते वत्स कं कामं प्रददाम्यहम् ॥ २९ ॥ ॥ बाल उवाच ॥ ॥ यदि तुष्टोऽसि मे देव ये त्वां पश्यंति शंकर ॥ पापकंथाविनिर्मुक्तास्ते संतु चिरजीविनः ॥ ३० ॥ बालस्य भाषितं श्रुत्वा लिंगे नोक्तं यशस्विनि ॥ ये च मां पूजयिष्यंति श्रद्धया परया युताः ॥ ते भविष्यंति सततं जरामरणवर्जिताः ॥ ३१ ॥ लप्स्यंते परमान्कामान्भविष्यंति गणोत्तम ॥ पूज्याः सर्वेषु लोकेषु सर्वालंकारभूषिताः ॥ ३२ ॥ एवं लब्धवरः कंथः प्रांजलिः समुपस्थितः ॥ लिंगेनोक्तः प्रसन्नेन भूयो वरय सुव्रत ॥ ३३ ॥ वरो वै दुर्लभो लोके देवदानवगुह्यकैः ॥ मयावतारितो यस्मान्नास्त्यदेयं तवाधुना ॥ ३४ ॥ बालेनोक्तो महादेव यदि देयो वरः पुनः ॥ मन्नाम्ना देव ते ख्यातिर्भूयान्निभुवने भुवि ॥ ३५ ॥ एवमस्त्विति लिंगेन प्रोक्तं तुष्टेन पार्वति ॥ तदाप्रभृति देवेशो विख्यातः कंथडेश्वरः ॥ यस्य दर्शनमात्रेण चिरायुर्जायते नरः ॥ ३६ ॥ यः समीक्षति तल्लिंगं कंथडेश्वरमीश्वरम् ॥ ३७ ॥ पापकंथाविनिर्मुक्तो मुक्तिं यास्यति गौरि सः ॥ पुण्यं यशस्यं गेयं तल्लिंगं पापप्रणाशनम् ॥ पुनाति पातकान्सर्वान्मम नामानुकीर्त्तनात् ॥ ३८ ॥ तेऽधन्याः पुरुषा लोके तेषां जन्म निरर्थकम् ॥ येन दृष्टो महाकाले देवोऽसौ कंथडेश्वरः ॥ ३९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कंथडेश्वरदेवस्य इन्द्रेश्वरमथो शृणु ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कंथडेश्वरमाहात्म्यवर्णनंनाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ ७ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ पंचत्रिंशत्तमं देवमिंद्रेश्वरमनुत्तमम् ॥ महासिद्धिप्रदं देवि ब्रह्महत्याविनाशनम् ॥ १ ॥ आसीत्प्रजापतिस्त्वष्टा तस्य पुत्रः कुशध्वजः ॥ स्वकर्मनिरतो दांतो वासवेन निपातितः ॥ २ ॥ तस्य पुत्रं हतं श्रुत्वा त्वष्टा क्रुद्धः प्रजापतिः ॥ अवलुच्य जटामेकामिदं वचनमब्रवीत् ॥ ३ ॥ अद्य पश्यंतु मे वीर्यं त्रयो लोकाः सदेवताः ॥ स च पश्यतु दुर्बुद्धिर्ब्रह्महा पाकशासनः ॥ ४ ॥ स्वकर्मनिरतो येन मत्सुतो विनिपातितः ॥ इत्युक्त्वा कोपरक्ताक्षो जटामग्नौ जुहाव ताम् ॥ ५ ॥ ततो वृत्रः समुत्तस्थौ ज्वालामालासमाकुलः ॥ महाकायो महादंष्ट्रो भिन्नांजनचयप्रभः ॥६॥ इंद्रशत्रुरमेयात्मा त्वष्टुस्तेजोऽभिवृंहितः ॥ अहन्यहनि सोऽवर्द्धदिषुपातं महाबलम् ॥७॥ वधाय चात्मनो दृष्ट्वा वृत्रं शक्रो महासुरम् ॥ चिंतयामास सहसा किं कृतं सुकृतं भवेत् ॥ ८ ॥ एतस्मिन्नंतरे प्राप्तो वृत्रो बलवतां वरः ॥ ददर्श वासवं तत्र देवैः सार्द्धं वरानने ॥ ९ ॥ दैत्यो वृत्रो महाकायश्चक्रे संग्रामभुल्बणम् ॥ नानाशस्त्रास्त्रसंक्षोभं भटसंघट्टसंकटम् ॥ १० ॥ छिन्नभिन्नतनुत्राणकोधरक्तधरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तलम् ॥ लूनाननाब्जप्रकरं करपल्लवदुर्गमम् ॥११॥ कबंधसंघघटनं घटितामरसैनिकम् ॥ विकीर्णाभरणस्फीतस्फुरद्योधांगभूषणम् ॥ १२ ॥ कल्लोलरुधिरोद्गारपाटलीकृतदिङ्मुखम् ॥ तस्मिन्रणे महाभीमे देवान्भित्त्वा सगुह्यकान् ॥ १३ ॥ वासवं बंधयित्वा तु स्वर्गलोकं जगाम ह ॥ राज्यं चकार निःशंको निस्सपत्नं वरानने ॥ १४ ॥ ततस्तु बद्धे देवेंद्रे बृहस्पतिरुदारधीः ॥ आजगाम तमुद्देशं यत्र बद्धः शतक्रतुः ॥ १५ ॥ दृष्ट्वा तथाविधं शक्रमाशीर्भिरभिनंद्य च ॥ बंधनान्मोचयित्वा तु प्रोवाचेदं वचस्तदा ॥ १६ ॥ अनुकूलो न कालोयं सुरेशस्य तवाधुना ॥ उद्योगः सुमहान्दृष्टः संघातश्च सुरद्विषाम् ॥ दृष्टा हि प्रवराः सर्वे मया तत्र महासुराः ॥ १७ ॥ एकैकोपि विजेतुं त्वां शक्तः स्यादिति मे मतिः ॥ न तादृक्संगमः शक्र कदाचित्सुरविद्विषाम् ॥ दृष्टो वापि श्रुतो वापि यादृशो ह्यवलोकितः ॥ १८ ॥ बृहस्पतिवचः श्रुत्वा शक्रः संभ्रममागमत् ॥ ध्यात्वा मुहूर्त्तं प्रोवाच बृहद्बुद्धे बृहस्पते ॥१९॥ किमत्र प्रतिकर्त्तव्यं वद तावद्बृहस्पते ॥ बहवो बलवंतश्च दानवाःस्वल्पकैर्दिनैः॥मत्सकाशं समेष्यंति स च वृत्रो महाबलः ॥ २० ॥ इति शक्रवचः श्रुत्वा बृहस्पतिरुवाच तम् ॥ उपायः क्रियतां तूर्णं गच्छ शक्र ममाज्ञया ॥ २१ ॥ महाकालवने रम्ये खंडेश्वरस्य दक्षिणे ॥ सर्वसंपत्करं लिंगं विद्यते तत्र वासव ॥ २२ ॥ तदाराधय यत्नेन तत्ते कामं प्रदास्यति ॥ बृहस्पतिवचः श्रुत्वा शक्रः शीघ्रतरं गतः ॥ २३ ॥ महाकालवने देवि दृष्ट्वा लिंगमनुत्तमम् ॥ स्तुतिं चकार सहसा भक्तिनम्रात्मकंधरः ॥ २४ ॥ नमो देवाधिदेवाय शंकराय वृषाय च ॥ काम्याय बहुरूपाय व्यालयज्ञोपवीतिने ॥ वरेण्याय नमो नित्यं नमस्ते सर्वकामद ॥ २५ ॥ आद्यः प्रजासृष्टिकरस्त्वमेव कालः प्रजाः संहरसि त्वमेव ॥ अपांपतिर्भूतपतिस्त्वमेव धनेश्वरस्त्वं दहनस्त्वमेव ॥ २६ ॥ चंद्रश्च सूर्यः पवनस्त्वमेव धाता विधाता परमः पुराणः ॥ जलाशयस्त्वं वरुणस्त्वमेव शैलोत्तमस्त्वं भुजगेश्वरश्च ॥ डिंडिर्महाकाल वृषस्त्वमेव विनायको गुह्यवरस्त्वमेव ॥ २७ ॥ इतीरितां स्तुतिं श्रुत्वा लिंगेनोक्तः शतक्रतुः ॥ गच्छ शक्र ममादेशान्मत्तेजोबृंहितो रणे ॥ हनिष्यसि न संदेहो वृत्रं रिपुविदारणे ॥ २८ ॥ तस्य लिंगस्य माहात्म्यादपां फेनेन पार्वति ॥ जघान समरे वृत्रं पश्यतां त्रिदशद्विषाम् ॥ २९ ॥ निहत्य दानवान्पश्चाल्लीलया रणकर्कशः ॥ उवाचेन्द्रस्तदा देवान्हतो वृत्रो महारणे ॥ ३० ॥ त्रैलोक्याध्यक्षतां प्राप्ता भवंतो मत्पराक्रमात् ॥ एवमुक्तास्तु शक्रेण ते देवा विस्मयान्विताः ॥ ३१ ॥ अस्य देवस्य माहात्म्याद्धतो वृत्रो महासुरः ॥ शरीरे च स्थिताः पापा दर्शनात्संक्षयं गताः ॥ ३२ ॥ इन्द्रेणाराधितो यस्माद्देवदेवो महेश्वरः ॥ तस्मादिंद्रेश्वरोनाम ख्यातो भुवि भविष्यति ॥ ३३ ॥ दर्शनादस्य लिंगस्य पुरीमिंद्रस्य शोभनाम् ॥ पापिनोपि गमिष्यंति सर्वपातकवर्जिताः ॥ ३४ ॥ यः पश्यति नरो नित्यं श्रीइन्द्रेश्वरसंज्ञकम् ॥ स मुक्तः पातकैः सर्वैर्दिवि मोदिष्यते चिरम् ॥ ३५ ॥ इंद्रेणाराधितं लिंगं भक्त्या यः पूजयिष्यति ॥ स याति वै परं स्थानं दिव्यकल्पचतुष्टयम् ॥ ३६ ॥ येन चेंद्रेश्वरो देवो भक्त्या सम्यक्प्रपूजितः ॥ तेन विष्णुप्रभृतयो वयं सर्वे सवासवाः ॥ मुनयो लोकपालाश्च पूजिताः स्युर्न संशयः ॥ ३७ ॥ इत्युक्तः स सुरैः शक्रो वैकुण्ठाद्यैः समंततः ॥ तैरेव सहितो देवो जगामाथ त्रिविष्टपम् ॥ ३८ ॥ इंद्रेश्वरस्य देवस्य प्रभावः कथितस्त्वयम् ॥ मार्कंडेयेश्वरं देवं शृणु पार्वति सांप्रतम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य इन्द्रेश्वरमाहात्म्यवर्णनंनाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्रीहर उवाच ॥ ॥ मार्कंडेयेश्वरं विद्धि षट्त्रिंशत्तममीश्वरम् ॥ यस्य दर्शनमात्रेण पुत्रवाञ्जायते नरः ॥ १ ॥ ब्रह्मवंशसमुत्पन्नो मृकण्डोनाम तापसः ॥ वेदाध्ययनसंपन्नः स चापुत्रो बभूव ह ॥ २ ॥ पुत्रार्थं चिन्तयामास कथं पुत्रो भवदिति ॥ अपुत्रस्य कुतो लोक इति वेदेषु पठ्यते ॥ ३ ॥ तस्मात्तपः करिष्यामि येन मे तनयो भवेत् ॥ एवं संचिंत्य बहुधा स जगाम हिमालयम् ॥ ४ ॥ चकार वसतिं चापि तपसे भावितात्मवान् ॥ वायुभक्षोंबुभक्षश्च निराहारोर्ध्वपादकः ॥ ५ ॥ शाकमूलफलाहारः पर्णाश्येकद्विपर्णभुक् ॥ एवमादीनि चान्यानि तपांसि सुबहून्यपि ॥६॥ चकार स मुनिस्तत्र वर्षाणि द्वादशैव तु ॥ न तुष्टोऽहं तदा देवि तपसा दुष्करेण तु ॥७॥ ततो ज्ञात्वा मतिं तस्य विज्ञप्तोऽहं तदा त्वया ॥ करोत्येव तपः क्रूरं पुत्रहेतोर्मुनिर्महान् ॥८॥ तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् ॥ तपसा दुष्करेणैव क्षुभिता नाकवासिनः॥९॥ समुद्राः क्षुभिताः सर्वे चन्द्रादित्यौ तथैव च ॥ ऋषयो विस्मृतिं प्राप्ताः कंपेते चापि रोदसी ॥ अकालप्रलयो देव भविष्यति न संशयः ॥१०॥ मुनये तन्मृकण्डाय पुत्रो वै दीयतामिति॥मया प्रोक्तं वरारोहे पुत्रमिच्छत्ययोनिजम् ॥११॥ अक्षयं सुविशालाक्षि सहस्राक्षमिवापरम् ॥ चन्द्राभं चन्द्रवदनं चन्द्रवद्भुवनप्रियम् ॥१२॥ नीलोत्पलदलश्यामं नीलोत्पलदलेक्षणम् ॥ विशालचारुजघनं चारुकुण्डलमंडितम् ॥ पुत्रमिच्छति देवेशि मृकण्डोऽयं महामुनिः ॥ १३ ॥ त्वयाप्युक्तं पुनर्देवि कारुण्याद्भक्तिवत्सले ॥ न ददासि मुनेः पुत्रं तप्यतो विषमं तपः ॥ १४ ॥ फलस्य दाता तपसां कथं त्वं गीयसे बुधैः ॥ कस्त्वां नु शरणं गच्छेल्लोकानां सम्भवं भवम् ॥ १५ ॥ करोषि सर्वदैत्यानां सर्वदेवाकुलाकुलम् ॥ त्वयाहं सुचिरं देवं सत्कृता करुणाकर ॥ १६ ॥ नान्यो मामनुकम्पार्थं प्रयच्छेत्प्रवरं वरम् ॥ स त्वं सर्वजगन्नाथ प्रभुः कर्त्ता प्रशासिता ॥ १७ ॥ हेतुः स्वामी महेशानो दयालुर्भक्तवत्सलः ॥ सर्वेश्वर स्तुतोऽभीष्टं किं न विप्राय दीयते ॥ १८ ॥ तपसा क्षीणपापस्य ब्रह्मत्वे भावितात्मनः ॥ अस्य पुत्रप्रदानं त्वं कुरु मद्वचनाच्छिव ॥ १९ ॥ मया त्वं वर्णिता देवि स्नेहाक्षरपदैः शुभैः ॥ लोलपंकजपत्राक्षि गौरि भूधरगात्रजे ॥ २० ॥ स्कंदमातः कलापूर्णचंद्रबिम्बनिभानने ॥ कृशोदरि विनिःस्पृष्टचामीकरनिभद्युते ॥ २१ ॥ त्वयोक्तं प्रकरिष्यामि वाक्यं द्विरदगामिनि ॥ त्वं सिद्धिः साधका साध्यं त्वं क्रिया प्रक्रमाश्रया ॥ २२ ॥ त्वं माया श्रीर्द्युतिः श्रीमच्छ्रद्धारुचिरसंततिः ॥ कृत्वा मानं बहुविधं मयैव सह सुन्दरि ॥ २३ ॥ भ्राजसे विविधाकारा मोहयित्वाखिलं जगत् ॥ त्वयाप्युक्तं पुनर्देवि क्रियतां तु वचो मम ॥२४॥ मुनयेऽस्मै तपःक्षीणसर्वगात्राय सांप्रतम् ॥ वरः प्रदीयतामस्मै ब्राह्मणाय महेश्वर ॥ २५ ॥ मयाप्युक्तं विशालाक्षि श्रूयतां वचनं मम ॥ असौ गच्छतु विप्रेंद्रो महाकालवनोत्तमे ॥ २६ ॥ पत्तनेश्वरपूर्वे तु तत्रास्ते लिंगमुत्तमम् ॥ पुत्रप्रदं विशालाक्षि महापातकनाशनम् ॥ २७ ॥ मदीयं वचनं श्रुत्वा त्वयाप्युक्तो द्विजोत्तमः ॥ महाकालवनं गच्छ पुत्रार्थमृषिसत्तम ॥ तत्र लिंगं समाराध्य लप्स्यसे पुत्रमुत्तमम् ॥ २८ ॥ त्वया संप्रेरितो विप्रस्तथेति कृतनिश्चयः ॥ आशया परया युक्तः पुत्रकामो जगाम सः ॥ २९ ॥ तत्र दृष्ट्वा महालिंगं पुत्रदं पापनाशनम् ॥ भक्त्या संसेवयामास तपसा दुष्करेण तु ॥ ३० ॥ अथ केनापि कालेन निःसृतोऽत्वया सह॥लिंगमध्याद्वरारोहे स च प्रोक्तो द्विजोत्तमः ॥ ३१ ॥ शर्वोऽहमिति जानीहि ब्रूहि किं करवाणि ते ॥ आवां पुरा प्रसन्नौ ते ज्ञातं तव विचेष्टितम् ॥३२॥ यमिच्छसि वरं ब्रह्मंस्तदद्य प्रददामि ते ॥ मया प्रोक्तः प्रसन्नेन मुनिः परमविस्मितः ॥ ३३ ॥ प्रह्वः प्राह सुहृदये स हृष्टो मुनिसत्तमः ॥ अपत्यहेतोर्देवेशौ किमलभ्यं भवेन्मम ॥ ३४ ॥ मया प्रोक्तस्तदा देवि मृकण्डो मुनिसत्तमः ॥ अयोनिजस्ते तनयो मानुषो वै भवि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ष्यति ॥ ऐश्वर्यज्ञानसंपन्नो दीर्घायुः सर्ववित्सुधीः ॥ ३५ ॥ एतस्मिन्नंतरे देवि प्रादुर्भूतो महातपाः ॥ पुत्रः परमधर्मात्मा मार्कण्डेयो महामुनिः ॥ ॥ ३६ ॥ स जातमात्रो धर्मात्मा तत्रैव तपसि स्थितः ॥ देवमाराधयामास स तुष्टोऽथ वरं ददौ ॥ ३७ ॥ त्वयाहं जातमात्रेण तपसा तोषितो यतः ॥ तस्मात्त्वयार्तिं गमिष्यामि त्वन्नाम्ना द्विजसत्तम ॥ ३८ ॥ ये मां पश्यंति विप्रेंद्र भक्त्या परमया युताः ॥ प्राप्नुवंति गतिं नित्यं ते सदानंद दायिनीम् ॥ ३९ ॥ प्रसंगाद्ये गमिष्यंति ते सदा दुःखवर्जिताः ॥ देवदेवं समाराध्य मोदिष्यंति हि ते नराः ॥ ४० ॥ त्र्यक्षा गणेश्वराः सिद्धाः सिद्धगंधर्वसेविताः ॥ ते भविष्यंति सततं मम भक्ताश्च ये नराः ॥ ४१ ॥ ये मां संपूजयिष्यंति हृद्यैः पुष्पैः सुगंधिभिः ॥ दीर्घायुषो भविष्यंति सदा दुःखविवर्जिताः ॥ ४२ ॥ इत्युक्ते तेन लिंगेन मार्कंडेयो महातपाः ॥ तपश्चचार तत्रैव महाकालवने स्थितः ॥ ४३ ॥ प्रभावः कथितो देवि मार्कंडेयेश्वरस्य च ॥ शिवेश्वरस्य देवस्य माहात्म्यं शृणु सांप्रतम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये मार्कंडेयेश्वरमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ ॥ ॥ श्रीहर उवाच ॥ ॥ सप्तत्रिंशत्तमं विद्धि शिवेश्वरमनंतकम् ॥ यस्य दर्शनमात्रेण जायंते सर्वसंपदः ॥ १ ॥ राजा रिपुंजयोनाम ब्रह्मकल्पे पुराभवत् ॥ महाकालवने रम्ये प्रजापालनतत्परः ॥ २ ॥ देवपूजां व्रतं दानं ध्यानं स्वाध्यायसात्क्रियाम् ॥ प्रजापालनकं कृत्वा न स जानाति किंचन ॥ ३ ॥ स प्रजाः पालयामास पुत्रवत्परिपालिताः ॥ प्रजास्तास्तु सुखसंवृद्धा जरामृत्युविवर्जिताः ॥ ४ ॥ पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ॥ तस्यैव तेजसा व्याप्तं महाकालपुरं प्रिये ॥ ५ ॥ एतस्मिन्नंतरे पृथ्वीं तस्मिन्छासति पार्वति ॥ महाकालवनं देवि स्वपुरं चिह्नितं मया ॥ विना चोज्जयिनीं गंतुं न रतिं प्राप कुत्रचित् ॥ ६ ॥ तदा मया गणेशस्तु शिवसंज्ञो गणाग्रणीः ॥ चिंतितस्तत्क्षणात्प्राप्तः किं करोमीत्युवाच ह ॥ ७ ॥ मयाप्युक्तो गणेशो हि गच्छ पुत्र मम प्रियम् ॥ महाकालपुरं व्याप्तं राज्ञा रिपुंजयेन हि ॥ ८ ॥ इत्युक्तः स मया देवि तथेत्युक्त्वा कृतांजलिः ॥ गतोऽसौ मानुषे लोके ममाज्ञाहर्षितानन ॥ ९ ॥ गते शिवगणे देवि संतुष्टोऽहं शुचिस्मिते ॥ युक्तिज्ञानवृतो दक्षः प्रभोर्भृत्यो हि दुर्लभः ॥ १० ॥ ततः स भिक्षुरूपेण ब्रह्मोपधिपरिग्रहः ॥ गृहीत्वा दुंदुभिं स्कंधे वचनं चेदमब्रवीत् ॥ ११ ॥ कश्च भूतविपन्नस्तो नानादोषैः समाश्रितः ॥ कस्य को व्याधिरत्युग्रो यमहं प्रशमं नये ॥ १२ ॥ कोऽपुत्रः पुत्रवानस्तु मन्मंत्रबलमाश्रितः ॥ वैद्योऽस्मि सर्वयुक्तिज्ञः सर्वकामप्रदायकः ॥ १३ ॥ तस्य वाक्यं समाकर्ण्य कौतूहलसमन्वितः ॥ सवृद्धबालनारीको जनस्तमभिजग्मिवान् ॥ १४ ॥ तेषां स नाशयामास व्याधिं दुर्जयमप्यनि ॥ ते च तस्मै सुमहतीं पूजां चक्रुः सुहर्षिताः ॥ हेमरत्नांवरधनैर्धान्यग्रामपुरादिभिः ॥ १५ ॥ एवं स न्यवसत्तत्र वर्षाणि च चतुर्दश ॥ नृपतेरंतरप्रेक्षी न चांतर मवाप सः ॥ १६ ॥ अहोऽतिदुष्करो राजा अहो लोकपरायणः ॥ अहो तेजोनिधिर्वीरो दुर्जयोऽसौ महामतिः ॥ १७ ॥ एवं स चिंतयंस्तत्र भिक्षु रूपी शिवो गणः ॥ जीर्णोद्यानलताजालगहने संवृतः स्थितः ॥ १८ ॥ अत्रांतरे तु नृपतेस्तस्य लोकत्रतस्य तु ॥ महिषी निर्जरा राज्ञः प्राणेभ्योपि गरीयसी ॥ १९ ॥ रूपेणाप्रतिमा लोके सा चापुत्रा सुतार्थिनी ॥ सपत्नीव्रहुला देवी श्रुत्वा भिक्षुं समाश्रिता ॥ २० ॥ सर्वकामप्रदं ज्ञात्वा नागराणां सकौतुकम् ॥ स्वां सखीं प्रेषयामास सुनंदांनाम भामिनी ॥ २१ ॥ भिक्षोरायतयने गुप्तमंतःपुरमंद्रिता ॥ तया चासादितो भिक्षुर्विचिंत्य नगरं तदा ॥ उवाच चिंतापरमं भिक्षुं भिक्षासमन्वितम् ॥ २२ ॥ प्रणम्य प्रांजलिर्भूत्वा कार्यार्थं विगतव्यथा ॥ भगवन्महिषी राज्ञः प्राणेभ्योऽपि गरीयसी ॥ वंध्या पुत्रार्थिनी देवी गुप्तं त्वां द्रष्टुमिच्छति ॥ २३ ॥ भवान्कृपाकरः प्रायः प्रजानामीहितप्रदः ॥ एवं श्रुत्वा शिवगणो लब्ध्वा रन्ध्र मुवाच ह ॥ २४ ॥ ॥ भिक्षुरुवाच ॥ ॥ भद्रे केयं तव मतिर्विपरीतप्रलापिनी ॥ अविज्ञातो नरपतेर्गृहमेहीति भाषसे ॥ अविज्ञातः पुरे दृष्टः साहसी पुरुषो भवेत् ॥ २५ ॥ एवं मत्वा व्रज क्षिप्रं स्वमेवांतःपुरं शुभे ॥ नाहं तत्रागमिष्यामि यावन्न नृपतेर्वचः ॥ २६ ॥ सा तु तस्य वचः श्रुत्वा भिक्षोः क्षुभितमानसा ॥ जगामान्तःपुरं तूर्णं देव्यै तच्च न्यवेदयत् ॥ २७ ॥ सखीवचस्तु सा श्रुत्वा देवी दीना उवाच ताम् ॥ सुनन्दे क उपायोस्ति राजा येन प्रवर्त्तते ॥ भिक्षोरानयने क्षिप्रं यावन्नासौ व्रजेत्कचित् ॥ २८ ॥ उवाच सा तां युक्त्यैवं सुनंदा युक्तभाषिणी ॥ त्वं तस्य वल्लभा राज्ञः प्राणेभ्योपि गरीयसी ॥ २९ ॥ तस्मादस्वस्थचित्तत्वं राज्ञः स्वं संप्रदर्शय ॥ हेतुना तेन राजा च वाक्यं तव करिष्यति ॥ ३० ॥ एतस्मिन्नेव काले तु देव्या दर्शनलालसः ॥ जगामांतःपुरं राजा प्रियां दीनां ददर्श ह ॥ तामपृच्छत्ततो राजा स्नेहार्द्रीकृतमानसः ॥ ३१ ॥ ॥ ॥ राजोवाच ॥ ॥ किमिदं देवि ते रूपं विमनस्केव भाषसे ॥ भग्नासि केन दुःखेन कस्यापकृतमीदृशम् ॥ ३२ ॥ नृपस्य वचनं श्रुत्वा राज्ञी वचनमब्रवीत् ॥ न पुत्रा नृप मे संति तेन मे नास्ति निर्वृतिः ॥ ३३ ॥ क्रीडनं पीडनायैव तेषां ये पुत्रवर्जिताः ॥ अपुत्रा जगतो दीना दुःखिताः पुत्रवर्जिताः ॥ अपुत्रे च गतिर्नास्ति सुतापुत्रविवर्जिते ॥ ३४ ॥ सुखिनस्ते जना लोके ये बालं पांसुभूषितम् ॥ परिष्वजंति स्वसुतम स्फुटाक्षरभाषकम् ॥ ३५ ॥ अनेन कारणेनास्मि निर्वेदं परमं गता ॥ उपायो हि मया दृष्टः पुत्रार्थे मम सांप्रतम् ॥ ३६ ॥ इह भिक्षुः समायातो देवरूपी सनातनः ॥ तस्य चाव्याहता शक्तिः श्रूयते सर्ववस्तुषु ॥ ३७ ॥ सस्त्रीबालो जनश्चात्र शरणं यस्य गच्छति ॥ तस्य भिक्षोः प्रसादेन सुतवत्यो वयं नृप ॥ भविष्यामोऽत्र संदेहो न मे मनसि वर्त्तते ॥ ३८ ॥ तस्याः सं वचनं श्रुत्वा जीर्णोद्यानं जगाम ह ॥ प्रियया सहितो राजा तं च भिक्षुं ददर्श ह ॥ ३९ ॥ दृष्टमात्रो नृपतिना भिक्षुर्लिंगत्वमागतः ॥ दृष्ट्वा सुमहदाश्चर्यं भक्तिनम्रो महीपतिः ॥ पूजयामास विधिवत्तल्लिंगं भिक्षु रूपकम् ॥ ४० ॥ अपुत्रोऽस्मीत्युवाचेदं धन्येयं महिषी मम ॥ देहि मे तनयं देव शिवो भवान्महेश्वरः ॥ ४१ ॥ इत्युक्तो राजसिंहेन भिक्षुर्लिंगाकृतिस्तदा ॥ उवाच महीपालं पुत्रस्ते भविता नृप ॥ ४२ ॥ ततःप्रभृति राजासौ सकलत्रो महामतिः ॥ सर्वभावेन तं देवं जगाम शरणं मुदा ॥ ४३ ॥ देवदेवस्य माहात्म्यात्पुत्रो जातो महाबलः ॥ धर्मात्मा च यशस्वी च सार्वभौमो गुणाधिकः ॥ ४४ ॥ अथाहं मन्दराद्देवि कौतुकाच्च समागतः ॥ लिंगाकारं गणं दृष्ट्वा राजानं सेवकं तथा ॥४५॥ योगेश्वर्येण च मया कृतं वै पुरमात्मनः ॥ नानारत्नप्रभोद्द्योतं नानासिद्धिनिषेवितम् ॥ तच्छिवं शाश्वतं स्थानं दत्तं देवि तदा मया ॥ ४६ ॥ मार्कंडेयेश्वरादेवादुत्तरे वरवर्णिनि ॥ तदाप्रभृति देवोऽसौ शिवेश्वर इति स्मृतः ॥ ॥ ४७ ॥ येऽर्चयिष्यन्ति सततं शिवेश्वरमनुत्तमम् ॥ निर्धूतसर्वपापास्ते भविष्यंति गणोत्तमाः ॥ ४८ ॥ विदित्वार्भगुरुं लोकं ये द्रक्ष्यंति शिवेश्वरम् ॥ अन्तकाले प्रदास्यामि तेषां ज्ञानमनुत्तमम् ॥४९॥ मोक्षं सुदुर्लभं मत्वा संसारं चातिभीषणम् ॥ अपुनर्भवहेतुत्वात्संसेव्योऽसौ शिवेश्वरः ॥ ॥ ५० ॥ सर्वावस्थोऽपि यो मर्त्यः संश्रयेत्तं शिवेश्वरम् ॥ स तां गतिमवाप्नोति यज्ञैर्दानैर्हि या गतिः ॥ ५१ ॥ आख्यानं प्रयतो मर्त्यो य इदं श्रावयेच्छुचिः ॥ पठेद्वा वाचयेद्वापि स मुच्येत्सर्वकिल्बिषैः ॥ ५२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ शिवेश्वरस्य देवस्य कुसुमेश

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मतः शृणु ॥ ९३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये शिवेश्वरमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥७॥ ॥ ईश्वर उवाच ॥ ॥ अष्टात्रिंशत्तमं विद्धि कुसुमेश्वरसंज्ञकम् ॥ देवं स्वर्गप्रदं देवि महापातकनाशनम् ॥१॥ पुरा वैवस्वते कल्पे प्राप्ते वाराहसंज्ञके ॥ प्रादुर्भूते विशालाक्षि कैलासादहमागतः ॥ २ ॥ महाकालवने रम्ये रममाणस्य पार्वति ॥ त्वया सार्द्धं ममाक्षेभ्य प्रादुरासीन्महास्वनः ॥ ३ ॥ पृष्टोऽहं च तदा श्रुत्वा शब्दं चातीव दुःसहम् ॥ शब्दोत्पत्तिर्मया देवि कथिता सा त्वदग्रतः ॥४॥ एते गणेशाः क्रीडंति मध्ये वै वीरको गणः ॥ कुसुमैर्भूषितोऽत्यर्थं ममातीव सुवल्लभः ॥५॥ कुसुमैर्हन्यतेऽत्यर्थं पूज्यते कुसुमोत्करैः ॥ स एव वीरको देवि सदा मे हर्षदायकः ॥६॥ नानाश्चर्यगुणाधारो गणेश्वरशतार्चितः ॥ मदीयं वचनं श्रुत्वा त्वयाप्युक्तं वरानने ॥७॥ न दृश्यते विना पुण्यैः पुत्रस्यानन्दपंकजम् ॥ ईदृशस्य सुतस्यापि ममोत्कण्ठा महेश्वर ॥ ८ ॥ कदाहमीदृशं पुत्रं द्रक्ष्याम्यानन्ददायकम् ॥ मया तव वचः श्रुत्वा हसित्वा च पुनःपुनः ॥ प्रोक्तं पार्वति पुत्रोऽयं प्रदत्तो वीरकोऽधुना ॥ ९ ॥ एष एव सुतस्तेस्तु नयनानन्ददायकः ॥ त्वया मात्रा कृतार्थस्तु वीरकः कुसुमार्चितः ॥ १० ॥ मदीयं वचनं श्रुत्वा प्रेषिता विजया त्वया ॥ दत्तो हरेण मे पुत्रो विजये शीघ्रमानय ॥ ११ ॥ विजयोक्तश्च गणपं गणैमध्ये च वर्त्तिनम् ॥ एहि वीरक चापल्यात्त्वया देवः प्रकोपितः ॥ किमुन्मत्तवदत्यर्थं नृत्यरागेण मोहितः ॥ १२ ॥ इत्युक्तो भयसंत्रस्तः कुसुमैर्भूषितस्तदा ॥ त्वत्समीपं समायातो विजयानुगतः शनैः ॥ १३ ॥ भूषितं कुसुमैर्दृष्ट्वा भयत्रस्तं च वीरकम् ॥ त्वया चाकारितो देवि गिरा मधुरवर्णया ॥१४॥ एह्येहि जातोऽसि मे पुत्रकस्त्वं देवेन दत्तोऽधुना वीरकोसि ॥ उक्तवत्येवमेके निधायाथ तं पर्यचुम्बःकपोले कलंवादिनम् ॥ १५ ॥ मूर्धन्युपाघ्राय सम्मार्ज्य गात्राणि सा भूषयामास दिव्यैः स्वयं भूषणैः ॥ किंकिणीमेखलानूपुरैः सन्मणीनिष्ककेयूरहारोत्करैः सद्गुणैः ॥ १६ ॥ कोमलैः पल्लवैश्चित्रितैश्चारुभिर्दिव्य सन्नोद्भवैस्तस्य शुभ्रैस्ततः ॥ भूतिभिश्चाकरोन्मिश्रसिद्धार्थकैरंगरक्षाविधौंस्तस्य तुष्टा सती ॥ १७ ॥ एवमाधाय चोवक्त्र कृत्वा स्रजं मूर्ध्नि गोरोचनापत्रभंगोज्ज्वलैः ॥ वत्स गच्छाधुना क्रीड साद्धं गणैरप्रमत्तो यथा बालचर्यां शनैः ॥ १८ ॥ सोऽपि सिद्ध्याकुले गण्डशैले मिलद्व्रजाले बृहच्छालताकाकुले ॥ क्षणं पुष्पमालातमालालिमाले क्षणं वृक्षमूले विलोलालिमाले ॥ १९ ॥ क्षणं स्वल्पपंके जले पंकजाले क्षणं वृक्षखण्डे शुभे निष्कलंके ॥ परिक्रीडते बालको वै विहारी गणेशाधिपो देवतानन्दकारी ॥ २० ॥ एवं विक्रीडतस्तस्य वीरकस्य गणस्य च ॥ संध्या तमो मयी प्राता विज्ञातोऽहं त्वया प्रिये ॥२१॥ ऐश्वर्यं दीयतामस्य मम पुत्रस्य शंकर ॥ शरीरार्द्धं गणेशत्वं लोकपालत्वमग्रतः ॥ २२ ॥ लिंगत्वमक्षयत्वं च स्थानं दिव्यं सुदुर्लभम् ॥ वंद्यमानं यथा देव सिद्धगन्धर्वकिंनरैः ॥ ब्रह्मेन्द्रवरुणादित्यलोकपालेश्वरेश्वरैः ॥ २३ ॥ एतैरेव गणैः सार्द्धं स्तूयमानं महात्मभिः ॥ अलंकृतो मया यस्मात्कुसुमैर्विविधैः शुभैः ॥ २४ ॥ कुंसुमेश्वरसंज्ञस्तु तस्मात्ख्यातो भवत्विति ॥ मयाप्युक्तं विशालाक्षि वीरकं दयितं मम ॥ २५ ॥ मत्प्रभावसमं दिव्यं सेवितं गणपैः सदा ॥ शृणु गन्धर्वगीतानां माधुर्यममृतोपमम् ॥ २६ ॥ पश्य किन्नरनारीणां गायन्तीनां मनोरमम् ॥ पश्याप्सरःसमूहस्य नृत्यमेतन्निरन्तरम् ॥ २७ ॥ विद्याधरैः परिवृतः कुसुमेशो वरानने ॥ विशेषतो मया देवि प्रथमं प्रमथेश्वरः ॥ कुसुमेश्वरतां नीतो यदा कुसुममंडितः ॥ २८ ॥ स्थानं दत्तं विशालाक्षि शिवलिंगस्य चोत्तरे ॥ वरो दत्तो बहुमतो दुष्प्राप्यस्त्रिदशैरपि ॥ २९ ॥ ये त्वां द्रक्ष्यंति गणप कुसुमेश्वरसंज्ञकम् ॥ न तेषां जायते पापं पद्मपत्रे यथा जलम् ॥ ३० ॥ कुसुमैरर्चयिष्यंति ये नराः कुसुमेश्वरम् ॥ मत्स्थानं ते समासाद्य मोदिष्यंति गतव्यथाः ॥ ३१ ॥ योऽप्येकं दिवसं मर्त्यस्त्वां पश्यति समाहितः ॥ स मुक्तः पातकैः सर्वैर्मम लोकं गमिष्यति ॥ ३२ ॥ यः पूजयति भावेन कुसुमैः कुसुमेश्वरम् ॥ स प्राप्स्यति परं स्थानं पुनरावृत्तिदुर्लभम् ॥ ३३ ॥ एवमादिवरैः पुष्टः कृतोयं कुसुमेश्वरः ॥ कृतकृत्यो गणो देवि लिंगनेश्वरतां गतः ॥ ३४ ॥ कुसुमेश्वरदेवस्य प्रभावः कथितस्त्वयम् ॥ अक्रूरेशस्य देवस्य श्रूयतां तदनन्तरम् ॥ ३५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे कुसुमेश्वरमाहात्म्यवर्णनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ७ ॥ ॥ हर उवाच ॥ ॥ अक्रूरेश्वरमेकोनचत्वारिंशत्तमं शृणु ॥ यस्य दर्शनमात्रेण सुबुद्धिर्जायते नृणाम् ॥ १ ॥ पुरा त्वयैव कल्पादौ परया शक्तिरूपया ॥ कृतं कृत्स्नं वरारोहे त्रैलोक्यं सचराचरम् ॥ २ ॥ ततस्त्वं संस्तुता देवैः सकिंनरमहोरगैः ॥ प्रदक्षिणां प्रकुर्वंति गणा नानाविधास्तु ते ॥ ३ ॥ नमस्कारं प्रकुर्वंति स्तोत्रं कुर्वंति चापरे ॥ न करोति नमस्कारमेको भृंगिरिटिस्तदा ॥ ४ ॥ क्रूरां बुद्धिं समासाद्य गर्वेणार्तांव गर्वितः ॥ ५ ॥ एको देवो महादेवः स्त्रिया किमनया मम ॥ यदा नायाति ते पार्श्वं तदा प्रोक्तस्त्वया गतः ॥ ६ ॥ कस्मान्न कुरुषे पूजां प्रदक्षिणमथो स्तुतिम् ॥ मद्भक्तो मदधीनोऽसि मम पुत्रो मया कृतः ॥ इत्थंभूतगणेश त्वं किं वै लौल्येन वर्त्तसे ॥ ७ ॥ इति भृंगिरिटिः श्रुत्वा क्रुद्धस्त्वामाह गर्वितः ॥ नाहं पार्वति ते पुत्रः पुत्रोऽहं शंकरस्य तु ॥ ८ ॥ एष एव च मे माता एष एव च मे पिता ॥ एवं रात्रिदिनं यामि शरणं परमेष्ठिनम् ॥९॥ त्वमप्यस्यैव शरणं ननु पार्वति संस्थिता ॥ यदि च त्वामहं वंदे तद्वंदे सकलान्गाणान् ॥१०॥ इति भृंगिरिटेः श्रुत्वा वाक्यं कुपितया त्वया ॥ तस्योक्तं प्रमथेशस्य भीरु भृंगिरिटेरिदम् ॥११॥ सुतो भूत्वा भवान्कस्मादद्दाक्षिण्यं ब्रवीषि माम् ॥ त्वङ्मांसशोणितांत्रं च मातृकं तनयस्य तु ॥ १२ ॥ नखदंतास्थिसंघातः शिश्नं वाक्च शिरस्तथा ॥ तथैव शुक्रं गणप पैतृकं तु शरीरकम् ॥ १३ ॥ इति भृंगिरिटिः श्रुत्वा सद्यो योगबलेन तु ॥ मांसादि त्यक्तवान्सर्वं मातृकं भागमेव हि ॥ १४ ॥ ततः प्रभृति वामोरु नखदंतास्थिनासिकः ॥ स च क्रूरां मतिं कृत्वा क्रोधसंरक्तलोचनः ॥ ॥ १५ ॥ त्वां परित्यज्य दुःखार्त्त आजगाम ममांतिकम् ॥ अथ त्वया तदा शप्तो गणो भृंगिरिटिः प्रिये ॥ १६ ॥ क्रूरा बुद्धिः कृता यस्मात्त्वया कुमतिना भृशम् ॥ तस्मात्त्वं मानुषे लोके गमिष्यसि न संशयः ॥ १७ ॥ इत्युक्तस्तु त्वया देवि गणो भृंगिरिटिस्तथा ॥ पपात मानुषं लोकं पुण्यांतं सुकृती यथा ॥ १८ ॥ स गत्वा पुष्करद्वीपं तपसे भावितात्मवान् ॥ तत्रैकपादूर्द्धभुजो दशपद्मान्यवस्थितः ॥ दंष्ट्रीभूतं च तपसा जगद्वै दुष्करेण तु ॥ १९ ॥ ततो ब्रह्मा च विष्णुश्च शक्रश्च त्रिदशैः सह ॥ वयं च चारुजघने तत्समीपं समागतः ॥ २० ॥ उपगम्य ततस्तस्य कथितं पुरतो मया ॥ अलं क्रूरेण तपसा लोकस्योत्सादनेन वै ॥ २१ ॥ त्रैलोक्यमपि निःसंज्ञं जातमेवं स्थिते त्वयि ॥ संहरस्व तपो घोरं लोकसंतापनं महत् ॥ २२ ॥ प्रार्थ्यतां पार्वती पुत्र सा दास्यति वरं च ते ॥ अस्याः प्रसादान्मुक्तिस्ते शापाच्चैव भविष्यति ॥ २३ ॥ एवमुक्तस्तदा तेन प्रार्थिता त्वं महेश्वरि ॥ गणेन भृंगिरिटिना भक्तिनम्रेण सादरात् ॥ २४ ॥ त्वया प्रोक्तं विशालाक्षि पुत्र गच्छ ममाज्ञया ॥ महाकालवने रम्ये तत्राऽक्रूरो भविष्यसि ॥ २५ ॥ पुनः प्राप्स्यसि कैलासं सिद्धगंधर्वसेवितम् ॥ अंकपादाग्रतो लिंगं सप्तकल्पानुगं महत् ॥ यस्य दर्शनमात्रेण शुभा बुद्धिः प्रजायते ॥ २६ ॥ कृतघ्ना नास्तिकाः क्रूरा ये च विश्वासघातकाः ॥ महापातकिनो ये च ये च शापवशं गताः ॥ दर्शनात्तस्य लिंगस्य तेऽपि स्वर्गं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुजो नराः ॥ २७ ॥ क्रूरां बुद्धिं समासाद्य कंसं हत्वा च केशिहा ॥ बलदेवेन सहितस्त्यक्त्वा तां मथुरां पुरीम् ॥ २८ ॥ महाकालवनं गत्वा तोष यित्वा महेश्वरम् ॥ अक्रूरत्वं च संप्राप्तं कीर्त्तिर्लब्धा च शाश्वती ॥ २९ ॥ त्वदीयं वचनं श्रुत्वा गणो भृंगिरिटिस्तदा ॥ तथेति प्रत्ययी जातो महा कालवनं गतः ॥ देवमाराधयामास तपसा दुष्करेण तु ॥ ३० ॥ एतस्मिन्नंतरे देवि लिंगमध्यात्त्वमुत्थिता ॥ अर्द्धांगं मामकं कृत्वा स्वकीयांगमथार्द्धतः ॥ फणींद्रबद्धजूटार्द्धमर्द्धचंद्रविराजितम् ॥ ३१ ॥ पत्रवल्लीविचित्रार्धमर्द्धचंद्रविराजितम् ॥ मुक्ताहारनिबद्धार्द्धमर्द्धं सर्पैश्च वेष्टितम् ॥ ३२ ॥ ततो भृंगिरिटिर्देवि दृष्ट्वा तन्महदद्भुतम् ॥ चिंतयामास हृदये मयाऽज्ञानादनुष्ठितम् ॥ ३३ ॥ उमा च शंकरश्चैव देहमेकं सनातनम् ॥ एका मूर्त्तिरनिर्देश्या द्विधा भेदेन दृश्यते ॥ ३४ ॥ एवं चिंतयतस्तस्य भक्तिनम्रस्य पार्व्वति ॥ प्रोक्तं त्वया प्रसन्नाहं वरं वरय पुत्रक ॥ ३५ ॥ तेनोक्तं यदि तुष्टासि मातर्मम महेश्वरि ॥ अस्य लिंगस्य माहात्म्यात्क्रूरा बुद्धिर्गता मम ॥ ३६ ॥ अक्रूरेश्वरनामायं देवः ख्यातो भवत्विति ॥ त्वं देवि सर्वभावानामेका कारणमुच्यते ॥३७॥ त्वं मूर्ता पुण्यनिचया त्वं गतिः पुण्यसेविनाम् ॥ पिता माता सुहृद्बन्धुस्त्वमेका कारणं परम् ॥ ३८ ॥ कुरु पुण्यतमं स्थानं ब्रह्महत्यादिनाशनम् ॥ मुक्तिदं मुक्तिदं चैव वांछितार्थप्रदायकम् ॥ ३९ ॥ तथेति च त्वया प्रोक्तं गिरा मधुरया तदा ॥ यत्ते प्रियतमं वत्स तत्सर्वं प्रकरोम्यहम् ॥ ४० ॥ न मेऽस्ति दुष्करं पुत्र त्वत्कृते कनकप्रभ ॥ अस्मिन्स्थाने तु ये देवमक्रूरेश्वरसंज्ञकम् ॥ प्रसंगादपि पश्यंति अपि पापरता नराः ॥ तेऽप्यत्रस्थं भविष्यंति त्वत्समा नियतं गणाः ॥४१॥ भक्त्या स्तोष्यंति ये नाम लिंगस्यास्य च मानवाः ॥ मानसैः पातकैर्मुक्ता यास्यंति स्वर्गमक्षयम् ॥४२॥ स्नात्वा तु विधिवत्पूजां यः करिष्यति मानवः ॥ स मुक्तः पातकैः सर्वैः प्राप्स्यते रविमंडलम् ॥४३॥ आदुरारोग्यमैश्वर्यं काममत्र हि वांछितम् ॥ गोसहस्रफलं चात्र स्पृष्ट्वा प्राप्स्यति मानवः ॥४४॥ स्नात्वा मंदाकिनीकुंडे योऽक्रूरेश्वरमीश्वरम् ॥ पूजयेद्विधिवः पुष्पैर्महापापहतोपि वा ॥ ४५ ॥ विमानं दिव्यमारूढो यावत्कल्पचतुष्टयम् ॥ गंधर्वैर्गीयमानस्तु सोऽपि स्वर्गं गमिष्यति ॥ ४६ ॥ इत्युक्तः स गणो देवि मत्समीपमुपागतः ॥ शापान्मुक्तस्त्वया सार्धं विस्मृतो किं वरानने ॥ ४७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अक्रूरेश्वरदेवस्य शृणु कुंडेश्वरं परम् ॥ ४८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽक्रूरेश्वरमाहात्म्यवर्णनंनाम षोडशोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि कुंडेश्वरमतः शृणु ॥ यस्य दर्शनमात्रेण लभ्यते सद्गतिः परा ॥ १ ॥ विज्ञप्तोऽहं त्वया देवि मंदरे चारुकंदरे ॥ वीरकं द्रष्टुमिच्छामि क्व गतो मम पुत्रकः ॥ २ ॥ मया प्रोक्तं विशालाक्षि महाकालवनोत्तमे ॥ जलमध्ये स्थितस्तेपे तपः परमदारुणम् ॥३॥ मुनिभिः सहितो धीमान्भ्राजमानोंऽशुमानिव ॥ गच्छामस्तत्र तं द्रष्टुं गणैः सार्द्धं वरानने ॥ ॥ ४ ॥ मदीयं वचनं श्रुत्वा त्वयाहं प्रेरितस्तदा ॥ उत्तिष्ठ शम्भो गच्छामो वृषमारुह सत्वरम् ॥ ५ ॥ सप्रस्नवौ स्तनौ जातौ सद्यः संस्मृत्य वीरकम् ॥ मया स्मृतो वृषो देवि धर्मरूपी सनातनः ॥ ६ ॥ मदीयं चिंतितं ज्ञात्वा मम पार्श्वमुपागतः ॥ आरूढोऽहं त्वया सार्द्धं तस्मिन्नेव वृषे तदा ॥ ७ ॥ प्रस्थितस्तत्क्षणाच्छीघ्रं गणैर्नानाविधैः सह ॥ वेगात्प्रयातो वृषभस्कंधालंबितया त्वया ॥ ८ ॥ रणद्वलयबाहुभ्यां गाढमालिंगितो ह्यहम् ॥ त्वं भीता च तदा जाता यदातीव प्रणोदितः ॥ ९ ॥ वृषो मया विशालाक्षि स कृष्टो गणपैस्तदा ॥ कृष्टं च सत्वरं दृष्ट्वा प्रोक्तं च भीतया तदा ॥ १० ॥ श्रांतास्मि सांप्रतं देव वेगेनानेन भीपिता ॥ तद्विश्रमितुमिच्छामि भूधरस्य तटे विभो ॥ ११ ॥ क्षणं पञ्चां गमिष्यामि विषमोयं गिरिर्महान् ॥ त्वदीयं वचनं श्रुत्वा बाढमुक्तं प्रिये मया ॥ १२ ॥ मुहूर्त्तं चारुजघने शैलपादमुपाश्रिता ॥ कुरु श्रमापनयनं यावद्वेगात्प्रयाम्यहम् ॥ ॥ १३ ॥ पंथानं त्वत्सुखं यत्र तं वयं मृगयावहे ॥ एष कुण्डो गणाध्यक्षस्त्वत्समीपे वसिष्यति ॥ त्वदाज्ञावशवर्त्ती च किंकरः स्थापितो मया ॥ ॥ १४ ॥ एवमुक्ता ततो देवि संस्थाप्य गणरूपकम् ॥ आरूढोऽहं गिरेः प्रांतमुदयाद्रिं रविर्यथा ॥ १५ ॥ ततोऽवलोकितोऽत्यर्थं रमणीयो महा गिरिः ॥ इदं रम्यमिदं रम्यमित्यस्मिन्वरपर्वते ॥ १६ ॥ पश्यतो मम शैलेंद्रं गताः संवत्सरा दश ॥ त्वयाथ चिंतितं देवि क्व गतस्त्रिपुरांतकः ॥ १७ ॥ नूनं न मदनातप्तां वेत्ति मां रतिवर्जिताम् ॥ मां विहाय महादेवो निर्विशंकः क्व वर्त्तते ॥ १८ ॥ हरस्य क्वापि यातस्य वैरं संस्मृत्य चित्तजः ॥ बाधते मामनंगोपि चापरोपितमार्गणः ॥ विलोकयंतीं हा दृष्ट्वा विलपंतीं पुनःपुनः ॥ १९ ॥ ततः कुण्डो गणाध्यक्षो ज्ञात्वा भावं त्वदीयकम् ॥ उत्कृष्टेन स्वरेणोक्तं मा देवि विमना भव ॥ २० ॥ आयात एष ते भर्त्ता मा चेतः कलुषं कुरु ॥ एतच्छ्रुत्वा वचस्तस्य कुण्डस्य कमलानने ॥ २१ ॥ दुःखार्त्तया त्वया प्रोक्तः कुण्ड वेद्मि न शंकरम् ॥ क्व गतः किं च कुरुते कालं दीर्घमिमं शिवः ॥ दर्शयस्व महादेवमित्युक्तोऽसौ पुनःपुनः ॥ २२ ॥ यदा न दर्शितस्तेन कुण्डेनाहं वरानने ॥ तदा शप्तस्त्वया देवि क्रुद्धया गणरक्षकः ॥ २३ ॥ गच्छ त्वं मानुषं लोकं यस्मान्न कथितो हरः ॥ एतस्मिन्नंतरे देवि प्राप्तोऽहं त्वत्समीपतः ॥ २४ ॥ पृष्टश्चाहं त्वया देवि विहाय क्व गतोऽसि माम् ॥ दुर्गमे पर्वते शून्ये तस्मात्त्यक्ष्यामि जीवितम् ॥ २५ ॥ गत्वाग्रे भूधरस्यास्य किं कृतं च त्वया विभो ॥ मया तव वचः श्रुत्वा कथितं सर्वमेव तत् ॥ २६ ॥ दुराधर्षतरः शैलः समंताद्दुरतिक्रमः ॥ त्वत्प्रियार्थं महाभाग मया मार्गोऽवलोकितः ॥ २७ ॥ येन मार्गेण विश्रब्धं गमिष्यामः सुमध्यमे ॥ अयं कुण्डो गणो देवि विषण्णो व्याकुलः कृतः ॥ २८ ॥ त्वयाप्युक्तं महादेव कुण्डः शप्तो मया गणः ॥ ममाज्ञा न कृता यस्माद्विफलं न वचो मम ॥ तस्माद्यातु ममादेशान्महाकालवनं शुभम् ॥ २९ ॥ भैरवं रूपमास्थाय यत्र त्वं चोत्तरे स्थितः ॥ तस्याग्रतः स्थितं लिंगं वर्त्तते कामदं सदा ॥ ३० ॥ तस्य दर्शनमात्रेण गणपोऽयं भविष्यति ॥ कुण्डेश्वरेति विख्यातः स देवो वै भविष्यति ॥ ३१ ॥ इत्युक्तः स त्वया देवि समासाद्य पुनःपुनः ॥ प्रस्थापितस्त्वयादेशाद्भव कुण्ड ममाज्ञया ॥ ३२ ॥ महाकालवनं शीघ्रं लिंगमाराध्य सत्वरम् ॥ कीर्तिस्ते भविता पुत्र त्रिषु लोकेषु शाश्वती ॥ ३३ ॥ इत्युक्तस्तत्क्षणात्प्राप्तो दृष्ट्वा लिङ्गं तु शाश्वतम् ॥ उत्तरस्य शिवस्याग्रे पूजयामास भक्तितः ॥ ३४ ॥ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः ॥ यज्ञाश्चाप्सरसश्चैव समाजग्मुः सहस्रशः ॥ ३५ ॥ अथाहं तत्क्षणात्प्राप्तस्त्वया सार्द्धं गणैर्वृतः ॥ दृष्ट्वा कुण्डं गणेशं तु लिंगाराधनतत्परम् ॥ ३६ ॥ समाधिध्याननिरतं प्रोक्तमस्माभिरादरात् ॥ तुष्टा ते पार्वती पुत्र प्रार्थ्यतां वरमुत्तमम् ॥ ३७ ॥ अक्षयं तु पदं प्राप्तं त्वया लिंगस्य दर्शनात् ॥ अद्यप्रभृति देवोऽयं ख्यातो भुवि भविष्यति ॥ नाम्ना कुण्डेश्वरो यस्मात्सर्वसंपत्करः सदा ॥ ३८ ॥ कुण्डेश्वरमनादिं तु भक्त्या पश्यति यो नरः ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्स्यति नान्यथा ॥ ३९ ॥ तस्य दानफलं सर्वं सर्वतीर्थफलं सदा ॥ लिंगं कुण्डेश्वरं यस्तु भक्त्या संपूजयिष्यति ॥४०॥ दशानामश्वमेधानामग्निष्टोमशतस्य च ॥ स्पर्शनात्फलमाप्नोति कुण्डेश्वरस्य सर्वदा ॥४१॥ प्रातः पश्यंति ये भक्त्या कृत्वा नियमपूर्वकम् ॥ सिद्धिं सुकामिकां दद्याः संप्राप्स्यंति न संशयः ॥४२॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कुण्डेश्वरस्य देवस्य शृणु लुंपेश्वरं परम् ॥४३॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये कुंडेश्वरमाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥छ॥ ॥ श्रीमहादेव उवाच ॥ ॥ चत्वारिंशत्तमं सैकमीश्वरं विद्धि पार्वति ॥ लुंपेश्वरमिति ख्यातं नाम यस्य महीतले ॥ १ ॥ देशे म्लेच्छगणाकीर्णे बभूव जगतीपतिः ॥ लुंपाधिप इति ख्यातो महेंद्रसमविक्रमः ॥ २ ॥ तस्यासीद्दयिता भार्या विशालानाम नामतः ॥ सा यौवनगुणोपेता रूपेणाप्रतिमा भुवि ॥ ३ ॥ स युद्धकामो नृपतिः पर्यपृच्छद्द्विजोत्तमान् ॥ ४ ॥ अथ केनापि कथितमाश्रमे सामगो द्विजः ॥ तेन सार्द्धं महाबाहो युध्यस्व त्वं नृपोत्तम ॥ ५ ॥ ततः स प्रस्थितो राजा म्लेछैः सार्द्धं सहस्रशः ॥ तुषारैर्बर्बरैर्लुंपैः पह्लवैः श्वगणैस्तथा ॥ ६ ॥ दस्युभिः संवृतः क्रूरैः क्रोधेनाकुलितेंद्रियः ॥ आजगामाश्रमं पुण्यं सामगस्य मुनेस्तदा ॥ ७ ॥ मुनिना पूजितस्तेन मधुपर्कादिविष्टरैः ॥ एतस्मिन्नन्तरे राजा होमधेनुं ददर्श ह ॥ ८ ॥ प्रार्थयामास सहसा न दत्ता मुनिना तदा ॥ प्रमथ्य चाश्रमं तस्य होमधेनुं जहार सः ॥ वनं बभंज सकलं तस्य विप्रस्य पश्यतः ॥ ९ ॥ काल्यमानां च गां दृष्ट्वा वत्सं चातीव दुःखितम् ॥ उवाच वचनं विप्रो मा राजन्साहसं कुरु ॥ १० ॥ एवं वदंतं विप्रेंद्रं शरैस्तीक्ष्णैर्जघान ह ॥ लुंपः क्रोधसमाविष्टो दुष्टो दुष्टजनैर्वृतः ॥ ११ ॥ असकृत्पुत्रपुत्रेति विलपंतमनाथवत् ॥ हत्वा च सामगं विप्रं जगाम स्वगृहं नृपः ॥ १२ ॥ एतस्मिन्नंतरे पुत्रः समित्पाणिरुपागतः ॥ दृष्ट्वा च पितरं विप्रं तदा मृत्युवशं गतम् ॥ अनागसं महात्मानं विललाप सुदुःखितः ॥ १३ ॥ केनेदं कुत्सितं कर्म कृतं पापेन मे पिता ॥ अयुध्यमानो वृद्धः सन्हतः शरशतैः शितैः ॥ १४ ॥ विलप्यैवं सकरुणं बहुना नाविधं तथा ॥ प्रेतकार्याणि सर्वाणि पितुश्चक्रे विधानतः ॥ १५ ॥ ददाह पितरं चाग्नौ तोयमादाय सत्वरम् ॥ तस्य लुंपाधिपस्यापि ददौ शापं सुदारुणम् ॥ १६ ॥ स्वधर्मनिरतो विद्वान्येन मे निहतः पिता ॥ स पापात्मा दुराचारः कुष्ठरोगमवाप्नुयात् ॥ १७ ॥ एतस्मिन्नन्तरे राजा कुष्ठरोगेण पीडितः ॥ अचंक्रमणतां प्राप्तो लुंपाधीशो वरानने ॥ १८ ॥ औषधैरधिकोऽभ्येति ब्रह्मशापप्रभावतः ॥ वैराग्यान्मर्तुकामोऽसौ काष्ठान्यादाय दुःखितः ॥ १९ ॥ चितां कर्तुं समारेभे समायातोऽथ नारदः ॥ पूजितो विधिना तेन दुःखितेन नृपेण हि ॥ २० ॥ अथ पप्रच्छ लुंपोऽसौ नारदं मुनिसत्तमम् ॥ अकस्मान्मम देवर्षे कुष्ठरोगो बभूव ह ॥ तेनाहं पीडितोऽतीव न च शांतिं व्रजत्यसौ ॥ २१ ॥ औषधैर्वर्द्धते कस्मादेतदाख्यातुमर्हसि ॥ न तेस्त्यविदितं किंचिदिह लोके परत्र च ॥ २२ ॥ तस्य तद्वचनं श्रुत्वा लुंपाधीशस्य नारदः ॥ कथयामास तत्सर्वं ब्रह्मशापं सुदुस्तरम् ॥ २३ ॥ ततः सभार्यो नृपतिः प्रार्थयामास नारदम् ॥ कथं मे भगवञ्छापो दुस्तरो यास्यति क्षयम् ॥ २४ ॥ एवमुक्तस्तु लुम्पेन नारदो भगवानृषिः ॥ कारुण्यात्कथयामास सभार्यस्य यशस्विनि ॥ २५ ॥ महाकालवने राजँल्लिंगं कुष्ठहरं परम् ॥ सर्वसंपत्करं तत्र विद्यते पापनाशनम् ॥ २६ ॥ शिप्रायाश्च तटे रम्ये केशवार्कस्य पूर्वतः ॥ तत्र त्वं गच्छ राजेंद्र कांत्या युक्तो भविष्यसि ॥ २७ ॥ एवमुक्तस्तु लुंपोऽसौ ह्याजगाम त्वरान्वितः ॥ महाकालवनं रम्यं महर्षिगणसेवितम् ॥ २८ ॥ प्राप्तः स्वर्गोपमं भूपः शिप्रया परिशोभितम् ॥ विवेश च मुदा युक्तो दृष्ट्वा लिंगमनुत्तमम् ॥ २९ ॥ स्नात्वा शिप्राजले पुण्ये महापातकनाशने ॥ दर्शनात्तस्य लिंगस्य दिव्यरूपो बभूव ह ॥ ३० ॥ कुष्ठरोगेण मुक्तस्तु मुक्तो वै ब्रह्महत्यया ॥ कृतकृत्यो नृपो जातो दर्शनादेव पार्वति ॥ ३१ ॥ स तत्र तामुषित्वैकां रजनीं पृथिवीपतिः ॥ तापसानां परं चक्रे सत्कारं भार्यया सह ॥ ३२ ॥ ततः कृतस्वस्त्ययनस्तापसैस्तैर्महात्मभिः ॥ दिव्यज्ञानान्वितैर्दिव्यैः सूर्यवैश्वानरप्रभैः ॥ ३३ ॥ कृतं नाम तदा तस्य लिंगस्य कमलानने ॥ लुंपेनाराधितो यस्माद्देवोऽयं कुष्ठनाशनः ॥ लुम्पेश्वर इति ख्यातो भविष्यति महीतले ॥ ३४ ॥ पूजयिष्यंति ये भक्त्या लिंगं लुम्पेश्वरं परम् ॥ स्नात्वा शिप्राजले पुण्ये ते यास्यंति परं पदम् ॥ ३५ ॥ प्रार्थयिष्यंति यान्कामान्मनसा चेप्सितान्प्रियान् ॥ तानाप्स्यंति न सन्देहो लुम्पेशस्य च दर्शनात् ॥ ३६ ॥ महापापसमायुक्तो यः पश्यति समाहितः ॥ लिंगं लुम्पेश्वरं सोऽपि देवतुल्यो भविष्यति ॥ ३७ ॥ गोघ्नश्चैव कृतघ्नश्च मातृहा गुरुतल्पगः ॥ दुष्टकर्मसमाचारो भ्रातृहा पितृहा तथा ॥ ३८ ॥ लुम्पेश्वरं सकृत्पश्यन्मुच्यते सर्वकिल्बिषैः ॥ पूजितोऽपि दहेत्पापं सप्तजन्मार्जितं च यत् ॥ ३९ ॥ इत्युक्त्वा मुनयः सर्वे पूजयामासुरन्विताः ॥ कुष्ठरोगविनिर्मुक्तो राजा स्वविषयं गतः ॥ ४० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ लुम्पेश्वरस्य देवस्य शृणु गंगेश्वरं परम् ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये लुंपेश्वरमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥छ॥ ॥ श्रीहर उवाच ॥ ॥ द्वाचत्वारिंशतं देवं गंगेश्वरमथो शृणु ॥ यस्य दर्शनमात्रेण सर्वतीर्थफलं लभेत् ॥ ध्रुवाधारं जगद्योनेः पदं नारायणस्य तु ॥ १ ॥ पदात्प्रवृत्ता या देवी गंगा त्रिपथगा नदी ॥ सा प्रविश्य सुधायोनिं सोममाधारमंभसाम् ॥ २ ॥ ततः संवर्द्धमानार्करश्मिसंगतिपावनी ॥ पपात मेरुपृष्ठे च सा चतुर्धा ततो ययौ ॥ ३ ॥ मेरुकूटतटान्तेभ्यो निपतन्ती यशस्विनी ॥ विकीर्यमाणसलिला निरालंबा पपात सा ॥ ४ ॥ मन्दरादिषु शैलेषु प्रविभक्तोदका समम् ॥ तत्र सीतेति विख्याता ययौ चैत्ररथं वनम् ॥ ५ ॥ तत्प्लावयित्वा च ययावरुणोदं सरिद्वरा ॥ ६ ॥ तथैवालकनन्दाख्या दक्षिणे गन्धमादने ॥ मेरुपादवनं गत्वा नन्दने देवनन्दने ॥७॥ मानसं च महावेगात्प्लावयित्वा सरोवरम् ॥ तस्माच्च शैलराजानं रम्यं त्रिशिखरं गता ॥ ८ ॥ तस्माच्च पर्वताः सर्वे प्लाविताः तत्क्षणात्प्रिये ॥ तान्प्लावयित्वा संप्राप्ता हिमवन्तं महागिरिम् ॥ ९ ॥ मया धृता च तत्रैव जटाजूटेन पार्वति ॥ न मुक्ता च यदा गंगा तदा क्रुद्धा ममोपरि ॥ १० ॥ गात्राणि प्लावयामास मदीयानि वरानने ॥ मया च रुद्धा क्रोधेन जटामध्ये यशस्विनि ॥ ११ ॥ तत्रैव सा तपश्चक्रे बहुकल्पशतानि च ॥ भगीरथेनोपवासैः स्तुत्या चाराधितो ह्यहम् ॥ १२ ॥ तदा मुक्ता मया देवि गंगा त्रिपथगामिनी ॥ महाकालमनुप्राप्ता प्लावयित्वोत्तरान्कुरून् ॥ १३ ॥ समुद्रमहिषी जाता प्राणेभ्योऽपि गरीयसी ॥ नदीनामुत्तमा गंगा समुद्रेण कृता तदा ॥ स तया सहितो रेमे समुद्रः सरितांपतिः ॥ १४ ॥ ततः कदाचिद्ब्रह्माणमुपासांचक्रिरे सुराः ॥ तथार्णवो जगामाथ ब्रह्मलोकं सनातनम् ॥ गंगया सहितो देवि दर्शनार्थं महोत्सवे ॥ १५ ॥ अथ गंगा सरिच्छ्रेष्ठा समुपायात्पितामहम् ॥ तस्या वासः समुद्भूतं मारुतेन शशिप्रभम् ॥ १६ ॥ ततोऽभवन्सुरगणाः सहसाऽवाङ्मुखास्तदा ॥ महाभिषस्तु राजर्षिर्निःशंको दृष्टवान्नदीम् ॥ १७ ॥ तस्य भावं विदित्वाऽथ ब्रह्मणा स तिरस्कृतः ॥ उक्तस्तु जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ १८ ॥ गंगा शप्ताथ क्रुद्धेन समुद्रेण यशस्विनि ॥ मां विहायान्यसक्तासि तस्माद्यास्यसि मानुषम् ॥ १९ ॥ लोकमल्पायुषं दीना तत्र दुःखमवाप्स्यसि ॥ तं शापं दारुणं श्रुत्वा गंगा वचनमब्रवीत् ॥ २० ॥ विनापराधाच्छप्ताहं कस्माद्वै देवसंसदि ॥ पतिव्रता पतिप्राणा पतिना परमार्थतः ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रमादाद्वह्मसुद्भूतं वायुना व्यापकेन तु ॥ प्रत्युवाच ततो ब्रह्मा तां नदीं लोकपावनीम् ॥ २२ ॥ वसूनां कारणादेवि शप्ता यस्मान्महानदि ॥ भाव्यर्थे तोयनिधिना तस्माच्छीघ्रं व्रजाधुना ॥ २३ ॥ महाकालवने रम्ये सिद्धगंधर्वसेविते ॥ शिप्राया दक्षिणे भागे विद्यते लिंगमुत्तमम् ॥ २४ ॥ सर्वसिद्धिकरं पुण्यं सर्वपातकनाशनम् ॥ तमाराधय यत्नेन स ते दास्यति वांछितम् ॥ २५ ॥ पितामहवचः श्रुत्वा तुष्टा त्रिपथगामिनी ॥ गमनं तत्र मेऽभीष्टं विद्यते यत्सखी मम ॥ शिप्रापि मे प्रिया पुण्या महापातकनाशिनी ॥ २६ ॥ इति संचिन्त्य मनसा दिव्या देवनदी तदा ॥ आज गाम महाकाले ह्यपश्यल्लिंगमुत्तमम् ॥ २७ ॥ पूजयामास पयसा दिव्येन विधिना तदा ॥ दृष्ट्वा शिप्रां सखीं तत्र संश्लेषं चाभवत्तयोः ॥ २८ ॥ ततः प्रभृति संजाता सा शिप्रा पूर्ववाहिनी ॥ त्रिषु लोकेषु विख्यातो देवो गंगेश्वरः स्वयम् ॥ गंगयाराधितो यस्मात्समीहितफलप्रदः ॥ २९ ॥ संस्तुता देवगंधर्वैर्गंगा देवनदी तदा ॥ ऋषिभिर्वालखिल्याद्यैस्तथान्यैर्मुनिभिर्मुदा ॥ ३० ॥ समुद्रस्तत्र संप्राप्तो मानिता सा महानदी ॥ लिंगे नोक्ता तदा गंगा कलया स्थीयतामिति ॥ ३१ ॥ तत्समीपे महापुण्ये यावत्तिष्ठति मेदिनी ॥ अंगीकृतं समुद्रेण यथोक्तं च तथा स्तिवति ॥३२॥ एवमुक्त्वा गता गंगा कलया तत्र संस्थिता ॥ गंगेश्वरं तु यः पश्येत्स्नात्वा शिप्राम्भसि प्रिये ॥ ३३ ॥ गोसहस्रफलं तस्य जायते नात्र संशयः ॥ सर्वतीर्थफलं तस्य सर्वधर्मफलं तथा॥३४॥सर्वयज्ञफलं सम्यक्सर्वदानफलं तथा ॥ सर्वयोगफलं देवि प्राप्नोत्येव निरन्तरम्॥३५॥तत्र तीर्थानि सुभगे पृथिव्यां यानि कानिचित्॥ धर्मारण्यं फल्गुतीर्थं पुष्करं नैमिषं गया ॥ ३६ ॥ प्रयागं च कुरुक्षेत्रं केदारमरेश्वरम् ॥ चंद्रभागा विपाशा च सरयूर्देविका कुहूः ॥ ३७ ॥ गोदावरी शतद्रुश्च वाहुदा वेत्रवत्यपि ॥ सर्वा एवात्र सरितः संगताः संति गंगया ॥ ३८ ॥ गुप्तानि पुण्यतीर्थानि सिद्धक्षेत्राणि चैव हि ॥ तत्र सर्वाणि तिष्ठंति कलामात्रेण पार्वति ॥ ३९ ॥ एतेषां फलमाप्नोति यः पश्यति समाहितः ॥ स्नात्वा गंगेश्वरं देवं सत्यमेतन्मयोदितम् ॥ अतः पुण्यतमं स्थानं गीयते गणवंदिते ॥४०॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ गंगेश्वरस्य देवस्य शृण्वंगारेश्वरं परम् ॥ ४१ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये गंगेश्व रमाहात्म्यवर्णनंनाम द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ ७ ॥ ॥ श्रीशिव उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि त्र्यधिकं पर्वतात्मजे ॥ यस्य दर्शनमात्रेण जायंते सर्वसंपदः ॥ १ ॥ आदिकल्पे पुरा जातो वक्रांगो लोहितच्छविः ॥ रौद्रस्त्वंगारसदृशो मम गात्राद्वरानने ॥ मया धृतो धरण्यां स विख्यातो भूमिपुत्रकः ॥ २ ॥ जातमात्रे सुते तस्मिन्महाकाये भयावहे ॥ कंपिता धरणी देवी देवाश्चास्ताः सवासवाः ॥ ३ ॥ क्षोभं गताः समुद्राश्च चेलुश्च धरणीधराः ॥ तेनैव पीडितं सर्वं सदेवासुरमानुषम् ॥ ४ ॥ ऋषयो वालखिल्याश्च देवाः शक्रपुरोगमाः ॥ बृहस्पतिं पुर स्कृत्य ब्रह्मलोकं गताः प्रिये ॥ ५ ॥ सोच्छ्वासाः कथयामासुर्नमस्कृत्य पितामहम् ॥ वृत्तांतं विस्तरात्सर्वं लोकत्रयविनाशनम् ॥ ६ ॥ हरगात्रो द्भवेनैव जातमात्रेण लीलया ॥ लोकत्रयं समाक्रांतं पीडितं भक्षितं तथा ॥ ७ ॥ तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ॥ चिंतयित्वा तु तैः सार्द्धमाजगाम ममांतिकम् ॥ ८ ॥ मया पृष्टास्तु ते सर्वे किमर्थं भयविह्वलाः ॥ सोच्छ्वासहृदया दीनाः कस्माद्वो भयमागतम् ॥ ९ ॥ तैः सर्वं कथितं देवि ममाग्रे भयविह्वलैः ॥ त्वदंगसंभवेनैव देवदेव जगत्पते ॥ पीडितं भक्षितं चैव सदेवासुरमानवम् ॥ १० ॥ इति तेषां वचः श्रुत्वा क्षेमार्थं कृपया मया ॥ आकारितो मत्समीपमुवाच वदतां वरः ॥ ११ ॥ आदेशो दीयतां देव किं करोमीत्युवाच सः ॥ नाकर्षं त्वं जगदिदं मया प्रोक्तः पुनःपुनः ॥ १२ ॥ ममांगाद्रजसा जातस्तेनांगारक उच्यसे ॥ लोकानां स्वस्तये नित्यं मंगलोसि मया कृतः ॥ १३ ॥ इदानीं वक्रतां यातो वक्रस्त्वं गीयसे बुधैः ॥ विज्ञप्तोऽहं तदा तेन मम वाक्यं श्रुतं यदा ॥ आहारेण विना देव कथं तृप्तिर्भविष्यति ॥ १४ ॥ तस्मान्मे देहि सुस्थानमाधिपत्यं च देहि मे ॥ शक्तिं च देहि मे शीघ्रमाहारं देहि मे प्रभो ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा पुत्रोऽयं मम वल्लभः ॥ तस्माद्दास्यामि परमं स्थानमक्षयमुत्तमम् ॥ १६ ॥ इति संचिन्त्य मनसा स्मृतं स्थानं मयोत्तमम् ॥ उत्संगे च सुतं कृत्वा प्रेम्णा प्रोक्तं पुनःपुनः ॥ १७ ॥ दत्तं पुत्र मया स्थानं महाकालवनोत्तमे ॥ गंगेश्वरस्य पूर्वे तु प्रशस्यं स्थानमुत्तमम् ॥ १८ ॥ खगर्ता चैव शिप्रा च संगमस्तत्र विद्यते ॥ १९ ॥ यदा मया धृता गंगा तदा सा चन्द्रमण्डलात् ॥ प्रमादात्पतिता भूमौ महाकालवनोत्तमे ॥ २० ॥ खगर्तेति च विख्याता खाद्भ्रष्टा प्रापतत्स्थितौ ॥ अतो मयावतारस्तु सहसा तत्र वै कृतः ॥ २१ ॥ लिंगमूर्तिरहं पुत्र तिष्ठामि सुरपूजितः ॥ तत्स्थानं दुर्लभं देवैस्तस्मात्त्वं गच्छ सत्वरम् ॥ २२ ॥ पूजितोऽहं त्वया तत्र संगमे लोकपूजिते ॥ त्रिषु लोकेषु यास्यामि ख्यातिं वै तव नामतः ॥ २३ ॥ मध्ये ग्रहाणां सर्वेषामाधिपत्यं मया तव ॥ दत्तं तृतीयकं स्थानं तत्र तृप्तिर्भविष्यति ॥ २४ ॥ पूजां प्राप्स्यसि तत्रैव ग्रहमध्ये व्यवस्थितः ॥ तिथिर्दत्ता चतुर्थी ते तस्यां ये व्रततत्पराः ॥ ॥ २५॥ त्वामुद्दिश्य करिष्यंति पूजां शांतिं सदक्षिणाम् ॥ तेन सर्वेण ते तृप्तिर्भविष्यति न संशयः ॥ २६ ॥ वारश्चैकश्च ते दत्तो मंगलार्थं मया तव ॥ नववस्त्रपरीधानं विद्यारंभं दिने तव ॥ तैलाभ्यंगं करिष्यंति न च प्राप्स्यंति ते बलम् ॥ २७ ॥ इत्युक्तस्तु मया देवि वक्रांगो मंगलः सुतः ॥ अंगारकेति विख्यातस्तथेत्यंगीचकार सः ॥ २८ ॥ सन्तुष्टस्तेन वाक्येन मदीयेन वरानने ॥ आजगाम मुदा युक्तो महाकालवनोत्तमे ॥ २९ ॥ शिप्रायाश्च तटे रम्ये खगर्त्तासंगमांतिकम् ॥ दृष्टोऽहं लिंगरूपेण परां तुष्टिमुपागतः ॥ ॥ ३० ॥ मया चालिंगितः प्रेम्णा चुम्बितः शिरसि प्रिये ॥ वरो दत्तो विशालाक्षि वांछितं ते भविष्यति ॥ ३१ ॥ दृष्टोऽहं च त्वया पुत्र भक्त्या चाराधितस्त्वया ॥ मम वाक्यं कृतं यस्मात्तस्मात्तुष्टोऽस्मि मंगल ॥ ३२ ॥ अंगारेश्वरनामाहमद्यप्रभृति पुत्रक ॥ त्रिषु लोकेषु विख्या तो भविष्यामि न संशयः ॥ ३३ ॥ ये मां पश्यंति सततं संगमेऽत्र व्यवस्थितम् ॥ न तेषां पुनरावृत्तिर्भविष्यति महीतले ॥ ३४ ॥ ये मां संपूज यिष्यंति ह्यंगारकदिने नराः ॥ कलौ युगे कृतार्थास्ते भविष्यंति न संशयः ॥ ३५ ॥ चतुर्थ्यां मंगलदिने ये मां पश्यंति सुव्रताः ॥ न ते यास्यंति संसारे घोरे दुःखशताकुले ॥ ३६ ॥ अमावास्या च भौमश्च संयोगो दृश्यते यदा ॥ खगर्त्तायाश्च शिप्रायाः संगमे देवपूजिते ॥ ३७ ॥ स्नात्वा तदा प्रपश्यंति मामत्रैव व्यवस्थितम् ॥ तेषां पुण्यफलं देवि समासाच्छृणु सांप्रतम् ॥ ३८ ॥ वाराणस्यां प्रयागे च कुरुक्षेत्रे च यत्फलम् ॥ गयायां पुष्करे प्रोक्तं तत्पुण्यमधिकं भवेत् ॥ ३९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अंगारेश्वरदेवस्य श्रूयतामुत्तरेश्वरम् ॥ ४० ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्येंऽगारकेश्वरमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥४३॥ ॥ ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ चत्वारिंशत्तमं विद्धि चतुर्भिरधिकं परम् ॥ यस्य दर्शनमात्रेण समीहितफलं लभेत् ॥ उत्तरेशमिति ख्यातं समीहि तफलप्रदम् ॥१॥ पुरा नियुक्ताः शक्रेण ये मेघा वृष्टिकारकाः ॥ तैः प्लावितं जगत्सर्वं सपर्वतमहीतलम्॥२॥एकार्णवे ततो जाते देवा भीता वरानने ॥ निःस्वाध्यायवषट्काराः स्वधास्वाहाविवर्जिताः ॥३॥ नैवाप्यायनमस्माकं विना होमेन जायते ॥ वयमाप्यायिता विप्रैर्यज्ञभागैर्यथोचितैः ॥४॥ नेषां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वयं प्रयच्छामः कामान्यज्ञादिपूजिताः ॥ नास्ति तत्सर्वमेवैतदन्योन्यमवदन्सुराः ॥ ५ ॥ दृष्ट्वा पृथ्वीं जले मग्नां ब्रह्माणं शरणं गताः ॥ कथयामासु रत्युग्रं नमस्कृत्य पितामहम् ॥६॥ एकार्णवा मही जाता विनष्टाः क्रतवः प्रभो ॥ निःस्वाध्यायवषट्कारं जगज्जातं पितामह ॥७॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ मुहूर्त्तं चिंतयामास किमेतदिति विस्मितः ॥ ८॥ अकाले प्रलयः कस्मान्निमग्ना पृथिवी जले ॥ गता सृष्टिर्मदीया तु व्यर्थं जातं वचो मम ॥ ९ ॥ इति संचिंत्य हृदये सस्मार बलसूदनम् ॥ स्मृतमात्रस्तु बलहा ह्याजगाम पितामहम् ॥ १० ॥ प्रोवाच वचनं श्रुत्वा नमस्कृत्य पितामहम् ॥ स्मृतोऽहं केन कार्येण देह्याज्ञां मे पितामह ॥ ११ ॥ ब्रह्मणोक्तस्तदा शक्रः किमर्थं प्लाविता मही ॥ असंबद्धैस्त्वदीयैश्च मेघैः किं सहसा कृतम् ॥ १२ ॥ ततः सर्वे समाहूता मेघाः शक्रेण पार्वति ॥ पितामहसमक्षं तु समायाताश्च तत्क्षणात् ॥ १३ ॥ पितामहेन शक्रेण मर्यादा च कृता तदा ॥ गजोनाम महामेघः पूर्वस्यां दिशि निर्मितः ॥ १४ ॥ गजाकारैस्ततो मेघैः सहस्रैर्दशभिर्वृतः ॥ गवयो दक्षिणामाशां षट् सहस्राधिपः कृतः ॥ १५ ॥ शरभः पश्चिमामाशां सहस्राधिपतिः कृतः ॥ उत्तरोनाम यो मेघो मेघैः कोटिभिरावृतः ॥ १६ ॥ उत्तरस्यां दिशि तदा प्रभुत्वे संप्रतिष्ठितः ॥ मर्यादा च कृता देवि ब्रह्मणा वासवेन तु ॥ १७ ॥ प्रावृट्काले च वर्षध्वं नक्षत्रैर्जलजैर्द्रुतम् ॥ आर्द्रादिस्वातिपर्यंतं नक्षत्रदशकं स्मृतम् ॥ १८ ॥ ब्रह्मशक्रवचः श्रुत्वा तथेति कृतनिश्चयाः ॥ ववृषुर्नियते काले तन्नामानि भवंति हि ॥ १९ ॥ एवं व्यवस्थिते लोके मर्यादायां स्थिता घनाः ॥ ब्राह्मणा विज्वरा जातास्त्रिदशा मुदिता भृशम् ॥ २० ॥ क्रूरग्रहैरथो रुद्धास्ते मेघा वृष्टिकारकाः ॥ शनैश्चरेण भौमेन भास्करेणाथ केतुना ॥ २१ ॥ पीडिताः शरणं जग्मुर्वासवं भयविह्वलाः ॥ निवेदितं भयात्सर्वं नमस्कृत्य पुनःपुनः ॥ २२ ॥ मेघानां वचनं श्रुत्वा संत्रस्तो वासवस्तदा ॥ उवाच वचनं तेषां नाहं शक्तो निवारणे ॥ ग्रहाणामसमर्थोऽहं सर्वदेव पयोधराः ॥ २३ ॥ अहं राज्यात्परिभ्रष्टः कृतः क्रूरग्रहैः पुरा ॥ स्थापितोऽहं कदाचिच्च सुप्रसन्नैर्ग्रहैः पदे ॥ २४ ॥ मम मान्याश्च पूज्याश्च ग्रहा एवं यतोधिकाः ॥ ग्रहाः सर्वहराः प्रोक्ता इति मे वर्त्तते मतिः ॥ ॥ २५ ॥ एतस्मिन्नंतरे भूमौ संजाता शतवार्षिकी ॥ अनावृष्टिर्महारौद्रा सर्वप्राणिविनाशिनी ॥ २६ ॥ अस्थिकंकालशकला श्वेतपर्वतसन्निभा ॥ पृथिवी तत्क्षणाज्जाता विना तोयेन पार्वति ॥ २७ ॥ देवाः सर्वे पुनर्भीता ब्रह्माणं शरणं गताः ॥ ऊचुश्च प्रणताः सर्वे त्राहि नः शरणागतान् ॥ ॥२८॥ अनावृष्ट्या जगत्सर्वं पीडितं च पितामह ॥ अकाले प्रलयो जातः पुनरेव च तादृशः ॥२९॥ त्वया च वासवेनैव नियुक्ता ये पयोधराः ॥ क्रूरग्रहैरतीवोग्रैः पीडितास्ते पितामह ॥ ३० ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ अहं बिभेमि भो देवा ग्रहैस्तैर्बलवत्तरैः ॥ ३१ ॥ सर्वं जानामि माहात्म्यं ग्रहाणां क्रूरचेतसाम् ॥ शनैश्चरेण वक्रेण भवंतः पीडिताः सदा ॥ ३२ ॥ वरुणो यादसां नाथो मंगलेन प्रपीडितः ॥ राज्यभ्रष्टस्तु बहुधा केतुना वासवः कृतः ॥ ३३ ॥ शिरश्छेदो मया प्राप्तो वक्रेण रविणा पुरा ॥ एकैकशः समर्थास्ते किं पुनः संघशस्त्वमी ॥ तस्मात्सर्वे महादेवं गच्छामः शरणं वयम् ॥ ३४ ॥ ब्रह्मणो वचनं श्रुत्वा सर्वे देवाः सवासवाः ॥ ब्रह्माणं च पुरस्कृत्य मामेव शरणं गताः ॥ ३५ ॥ उक्तोऽहं त्रिदशैः सर्वैः पाहि नः शरणागतान् ॥ त्वं नो धाता विधाता च सृष्टिसंहारकारकः ॥ ३६ ॥ क्रूरग्रहैर्महादेव रुद्धा मेघाः समंततः ॥ न कुर्वंति प्रभो वृष्टिमनावृष्टिः सुदारुणा ॥ ३७ ॥ सर्वप्राणिविनाशाय संजाता शतवार्षिकी ॥ तेषां तद्वचनं श्रुत्वा मया ज्ञातं वरानने ॥ क्रूरग्रहाणां सामर्थ्यं यथा च विदितं मम ॥ ३८ ॥ इति ज्ञात्वा महादेवि उपायश्चिंतितो मया ॥ उत्तरोनाम यो मेघो मेघैः कोटिभिरावृतः ॥ आहूतस्तत्क्षणात्प्राप्तः किं करोमीत्युवाच ह ॥ ३९ ॥ मया प्रोक्तो ममादेशाद्गच्छ त्वं घनसंयुतः ॥ महाकालवनं रम्यं वांछितार्थफलप्रदम् ॥ ४० ॥ गंगेश्वरस्य देवस्य दक्षिणे लिंगमुत्तमम् ॥ तमाराधय यत्नेन स ते दास्यति वांछितम् ॥ ४१ ॥ एवमुक्तो मया मेघ उत्तरो मेघसंयुतः ॥ जगाम त्वरया युक्तो महाकालवनोत्तमे ॥ ४२ ॥ दृष्ट्वा वृष्टिकरं लिंगं पूजयामास भक्तितः ॥ शिप्राजलं गृहीत्वा तु स्नात्वास्नात्वा प्रयत्नतः ॥ तावद्यावज्जलं शिप्रां पुनरेवागतं प्रिये ॥ ४३ ॥ एतस्मिन्नंतरे तस्मादुद्भूतं धूममंडलम् ॥ लिंगमध्याद्वरारोहे ज्वालामालाकुलं महत् ॥ ४४ ॥ ततो ज्वालामयं सर्वमभूदम्बरगोचरम् ॥ तस्य ज्वालासमूहेन दग्धं वै ग्रहमंडलम् ॥ ४५ ॥ सनक्षत्रपथं यावत्ततो भीता ग्रहाः प्रिये ॥ तमेव शरणं प्राप्ता धूमज्वालाकुलाननाः ॥ ४६ ॥ ततो ब्रह्मा च विष्णुश्च तद्दृष्ट्वा महदद्भुतम् ॥ देवैर्वृतः सहस्राक्षो लिंगांतिकमुपागतः ॥ ४७ ॥ तल्लिंगं सुमहाज्वालं ज्वालाभिः पूरितांबरम् ॥ दुःप्रेक्ष्यं दुर्विदं भीमं वर्द्धमानं ददर्श सः ॥ ४८ ॥ अक्ष्णोर्निमेषमात्रेण ववृधे योजनायुतम् ॥ दृष्ट्वा तु वर्द्धमानस्य लिंगस्यात्यद्भुताकृतिम् ॥ सुरेशो मोहमापन्नो विसंज्ञाश्च ग्रहास्तदा ॥ ४९ ॥ ततस्तु तस्य लिंगस्य वारिधारा विनिःसृताः ॥ एकोद्देशाद्वरारोहे धरा त्वेकार्णवीकृता ॥ ५० ॥ लिंगस्यान्यप्रदेशात्तु वायुः समभवन्महान् ॥ इतरस्मिन्प्रदेशे तु समूहस्तडितामभूत् ॥ ५१ ॥ सधूमा समभूज्ज्वाला लिंगस्यान्यप्रदेशतः ॥ ५२ ॥ एवमत्यद्भुतं दृष्ट्वा वर्द्धमानं समंततः ॥ लिङ्गमव्यक्तमुद्भूतमापूरितनभोऽन्तरम् ॥ ५३ ॥ ग्रहाश्च विह्वला जाता धूमेनाकुलितेन्द्रियाः ॥ तुष्टुवुश्च तदा लिंगं दह्यमानाः समंततः ॥ ५४ ॥ ॥ ग्रहा ऊचुः ॥ ॥ नमः सुरूपाय सुरार्चिताय नमो विरूपप्रकृतिक्रियाय ॥ नमोनमो रूपनिराश्रयाय जलस्वरूपाय नमो नमस्ते ॥ ५५ ॥ इति स्तुतो यदा देवि ग्रहैः क्रूरैस्तदा प्रिये ॥ लिंगात्प्रादुरभूत्खस्थः स्वरूपो विग्रहाकृतिः ॥ ५६ ॥ भस्मधूसरसर्वांगो भोगिभोगांगदोज्ज्वलः ॥ हिमराशिनिभाकारो रजताचलनिर्मलः ॥ उवाच चैतान्प्रणतान्ग्रहान्कंपितकन्धरान् ॥ ५७ ॥ किं वा कामं मनोऽभीष्टं भवद्भ्यो यद्ददाम्यहम् ॥ ममामोघमिदं सर्वं दर्शनं चातिदुर्लभम् ॥ ५८ ॥ भवद्भ्यो लोकतुष्ट्यर्थं दर्शनं हि ददाम्यहम् ॥ एवमुक्त्वा ग्रहाः सर्वे प्रोचुः प्रांजलयस्तदा ॥ ५९ ॥ यदि देयो वरो देव यदि तुष्टोऽसि शंकर ॥ कर्मारंभेषु सर्वेषु पूजाऽस्माकं यथा भवेत् ॥ तथा कुरु महादेव तेन तृप्तिर्भविष्यति ॥ ६० ॥ एवं भविष्यतीत्युक्त्वा मेघं चोत्तरमुक्तवान् ॥ तुष्टोऽस्म्यहं तु ते वत्स गृहाण वरमीप्सितम् ॥ ६१ ॥ तच्छ्रुत्वा वचनं तत्र ह्युत्तरः प्राह हर्षितः ॥ यन्मे तुष्टोऽसि भगवंस्तन्मह्यं दीयतां वरम् ॥ ६२ ॥ यदास्माकं महाबाधां कदा कोपि करिष्यति ॥ तदा वृष्टिर्विधातव्या त्वया देव सदा भुवि ॥ ६३ ॥ रक्षा कार्या च मेघानां रक्षणीयास्त्वया वयम् ॥ एवमस्त्विति तेनोक्तं लिंगेन नगगात्रजे ॥ ६४ ॥ अद्यप्रभृति ते नाम्ना ख्यातिं यास्यामि भूतले ॥ उत्तरेश्वरसंज्ञोऽहं भविष्यामि न संशयः ॥ ६५ ॥ ये मां संपूजयिष्यंति भक्त्या परमया युताः ॥ तेषां दास्यामि सततं वांछितार्थफलं भुवि ॥ ६६ ॥ पश्यंति प्रयता ये मां कृत्वा नियमपूर्वकम् ॥ ते यास्यंति पुरं शैवं यावत्कल्पाष्टकायुतम् ॥ ६७ ॥ आरूढाः सूर्यसंकाशैर्विमानैः सार्वकामिकैः ॥ रुद्रकन्यासमाकीर्णैर्हंससारससंयुतैः ॥ ६८ ॥ नृत्यवादित्रनिर्घुष्टैरुत्कटध्वनिनादितैः ॥ दोधूयमानैश्च नरैः स्तूयमानाः सुरासुरैः ॥ ६९ ॥ प्रसंगाद्भक्तिहीनोऽपि यो मां पश्यत्यशाठ्यतः ॥ ऐश्वर्य्यं तस्य दास्यामि ह्युत्तरेषु कुरुष्वथ ॥ ७० ॥ स्मरिष्यति च यो नित्यं प्रभाते चोत्तरेश्वरम् ॥ स याति परमं स्थानं दाहप्रलयवर्जितम् ॥ ७१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ उत्तरेश्वरदेवस्य शृणु त्रिलोचनेश्वरम् ॥ ७२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उत्तरेश्वरमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ ७ ॥ ॥ श्रीदेवदेव उवाच ॥ ॥ पंचचत्वारिंकं विद्धि देवं त्रिलोचनेश्वरम् ॥ यस्य दर्शनमात्रेण सर्वसिद्धिरवाप्यते ॥ १ ॥ इतिहासमिहासीद्यत्पीठे विरजसंज्ञके ॥ त्रिलोचनस्य प्रासादे मणिमाणिक्यनिर्मिते ॥ २ ॥ नानाभंगिगवाक्षाढ्ये रत्नसानाविवापरे ॥ देदीप्यमानसौवर्णकलशेन विराजिते ॥ ॥ ३ ॥ पार्वणेन शशांकेन खेदादिव समासिते ॥ तत्र पारावतद्वंद्वं वसत्स्वैरं कृतालयम् ॥ ४ ॥ प्रातः सायं च मध्याह्ने कुर्व नित्यं प्रदक्षिणम् ॥ उड्डीयमानं परितः पक्षवातैरितस्ततः ॥ ५ ॥ रजःप्रासादसंलग्नं दूरीकुर्वद्दिशो दश ॥ त्रिलोचनेति सततं नाम भक्तैरुदाहृतम् ॥ त्रिविष्टपेति च तथा तयोः कर्णातिथीभवेत् ॥ ६ ॥ चतुर्विधानि वाद्यानि शंभुप्रीतिकराण्यलम् ॥ तयोः कर्णगृहां प्राप्य प्रतिशब्दं प्रतन्वते ॥ ७ ॥ मंगलारात्रिकज्योतिस्त्रिसंध्यं पक्षिणोस्तयोः ॥ नेत्रांतं निर्विशन्नित्यं भक्तचेष्टां प्रदर्शयत् ॥ ८ ॥ प्राणयात्रां विहायापि कदाचित्स्थिरमानसौ ॥ नोड्डीय वांछितं यातः पश्यंतौ कौतुकं खगौ ॥ ९ ॥ तत्रासकृज्जनाकीर्णं प्रासादं परितोऽवनौ ॥ तंडुलादि चरंतौ तौ कुर्वतौ च प्रदक्षिणम् ॥ १० ॥ देवदक्षिणदिग्भागे विष्णुदेहोद्भवं जलम् ॥ तृषार्त्तौ पिबतो नित्यं स्नात्वा चाजग्मतुश्च तौ ॥ ११ ॥ तयो रित्थं विचरतोस्त्रिलोचनसमीपतः ॥ अगाद्बहुतिथः कालो द्विजयोः साधुचेष्टयोः ॥ १२ ॥ अथ देवालयस्कंधे गवाक्षांतर्गतौ च तौ ॥ श्येनेन केन चिद्दृष्टौ क्रूरदृष्ट्या सुखं स्थितौ ॥ १३ ॥ तच्च पारावतद्वंद्वं श्येनः पारिजिघृक्षया ॥ अवतीर्यावराद्दाशु उपविष्टः शिवालये ॥ १४ ॥ ततो विलो कयामास तदागमविनिर्गमौ ॥ केन मार्गेण विशतो दुर्गमेण पतत्रिणौ ॥ १५ ॥ केनाध्वना च निर्यातः किंकाले कुरुतश्च किम् ॥ कथं युगपदेतौ मे ग्राह्यौ स्यैरं भविष्यतः ॥ १६ ॥ दुर्बलोऽप्याकलयितुं सहसारिर्न शक्यते ॥ कारिणां च सहस्रेण वराश्वानां च लक्षतः ॥ १७ ॥ न कर्म सिद्ध्ये नृपतेर्दुर्गेणेकेन यद्भवेत् ॥ दुर्गस्थो नाभिभूयेत विपक्षः केनचित्क्वचित्॥स्वतंत्रं यदि दुर्गं स्यादपमार्गप्रकाशकम् ॥१८॥ इति दुर्गे बलं शंसन्श्ये नो रोषारुणेक्षणः ॥ असाध्यसौ कलरवौ वीक्ष्य यातो नभोंगणे ॥ १९ ॥ अथ पारावती दक्षा विपक्षक्षपणेक्षणम् ॥ महाबलं दुर्गबलात्प्राह पारा वतं पतिम् ॥ २० ॥ ॥ कलरव्युवाच ॥ ॥ प्रिय पारावत प्राज्ञ सर्वकामसुखारव ॥ तव दृग्विषयं प्राप्तः श्येनोऽयं प्रबलो रिपुः ॥ २१ ॥ स च तद्वाक्यमाकर्ण्य पारावत्याश्च सत्पतिः ॥ पारावतीमुवाचेदं का चिंतेति तव प्रिये ॥ २२ ॥ ॥ पारावत उवाच ॥ ॥ कति नाम न संतीह सुभगे व्योमचारिणः ॥ कति देवालयाद्येषु खगा नोपवसंति हि ॥ २३ ॥ कति चैव न पश्यंति नौ सुखस्थाविह प्रिये ॥ तेभ्यो यदीह भेतव्यं कुतो नौ तत्सुखं प्रिये ॥ २४ ॥ रम त्वं च मया सार्द्धं त्यज चिंतामिमां शुभे ॥ अस्य श्येनवराकस्य गणनापि न मे हृदि ॥२५॥ इत्थं पारावतवराच्छ्रुत्वा पारावती वचः ॥ मौनमालम्ब्य संतस्थे पत्युः पादार्पितेक्षणा ॥ २६ ॥ हितवत्योपदिश्यापि प्रियं प्रियचिकीर्षया ॥ पत्न्या जोषं समास्थेयं कार्यं पत्युर्वचः सदा ॥ २७ ॥ अन्येद्युरप्यथायातः श्येनः पश्यन्स दंपती ॥ अपरिच्छिन्नया दृष्ट्या यथा मृत्युर्गतायुषम् ॥ २८ ॥ अथ मंडलगत्या स प्रासादं परितो भ्रमन् ॥ प्रोवाच प्रेयसी नाथ दृष्टो दुष्टस्त्वयाऽहितः ॥ २९ ॥ तस्या वाक्यं समाकर्ण्य पुनः कलरवोऽब्रवीत् ॥ किं करिष्यत्य सौ मुग्धे मम व्योमविहारिणः ॥ ३० ॥ दुर्गं च स्वर्गतुल्यं मे यत्र नास्त्यरितो भयम् ॥ अयं न तां गतिं वेत्ति यां वेदाहं नभोंगणे ॥ ३१ ॥ प्रडीनोड्डीनसंडीनकांड्यांडकपाटिका ॥ संसिनी मंडलवती गतयोऽष्टावुदाहृताः ॥ ३२ ॥ यथैतासु हि कौशल्यं मयि वर्त्तति च प्रिये ॥ गतिषु क्वापि कस्यापि पक्षिणो न तथांवरे ॥ सुखेन तिष्ठ का चिंता मयि जीवति ते प्रिये ॥ ३३ ॥ इति तद्वचनं श्रुत्वा आस्थिता मूकवत्सती ॥ अपरेद्युरपि श्येनस्तत्रायातः शिलातले ॥ ३४ ॥ कियदंतरमासाद्य उपविष्टोऽतिहृष्टवत् ॥ आयामांते च स स्थित्वा तत्कुलायकुलस्य च ॥ ३५ ॥ पुनः श्येनो विनिर्यातः सापि कांताऽब्रवीत्पुनः ॥ प्रिय स्थानमिदं त्याज्यं दुष्टदृष्टिविदूषितम् ॥ ३६ ॥ असौ क्रूरोऽतिनिकटमुपविष्टोऽतिहृष्टवत्॥ सावज्ञं स पुनः प्राह किं करिष्यत्यसौ प्रिये ॥ ३७ ॥ मृगाक्षीणां स्वभावोयं प्रायशो भीरुवृत्तयः ॥ इतरेद्युरपि प्रातः स च श्येनो महाबलः ॥ ॥ ३८ ॥ तयोरभिमुखं तत्र स्थितो यामद्वयावधि ॥ पुनर्विलोक्य तद्वर्त्म शीघ्रं यातो यथागतम् ॥ ३९ ॥ गतेथ शकुनौ तस्मिन्सा वभाषे विहंगमम् ॥ नाथ स्थानांतरं यावो मृत्युर्नैकटेऽन्वगात् ॥ ४० ॥ पुनर्दृष्टे प्रणष्टः स्यादावासश्च सुखं प्रिय ॥ प्रिय यस्यास्ति पक्षस्य गतिः सर्वत्र सिद्धिदा ॥ ४१ ॥ स किं स्वदेशरागेण नाशं प्राप्नोति बुद्धिमान् ॥ सोपसर्गं निजं देशं त्यक्त्वा योन्यं तु न व्रजेत् ॥ ४२ ॥ स पंगुर्ना शमाप्नोति कूलस्थित इव द्रुमः ॥ प्रियोदितं निशम्येति स भविन्नीदशार्दितः ॥ ४३ ॥ तां वाक्यं पुनरप्याह प्रिये मा भैः खगार्दिता ॥ अपरस्मिन्न हनि च स श्येनः प्रातरेव हि ॥४४॥ तद्वारदेशमासाद्य सायं यावत्स्थितोऽचलः ॥ अस्ताचलस्य शिखरं याते भानौ गते खगे ॥ ४५ ॥ कुलाया द्वाह्यमागत्योवाच पारावती पतिम् ॥ नाथ निर्गमनस्यायं कालः कालोऽस्ति दूरतः ॥४६॥ यावत्तावद्विनिर्याहि त्यक्त्वा मामपि शंसिनीम् ॥ त्वयि जीवति दुष्प्राप्यं न किंचिज्जगतीतले ॥ ४७ ॥ पुनर्दाराः पुनः पुत्राः पुनर्वसु पुनर्गृहम् ॥ यद्यात्मा रक्षितः पुंसां दारैरपि धनैरपि ॥ ४८ ॥ तदा सर्वं हरिश्चंद्रभूपतेरिव लभ्यते ॥ अयमात्मा प्रियो बंधुरयमात्मा महद्धनम् ॥४९॥ धर्मार्थकाममोक्षाणामयमात्मार्जकः परः ॥ यावदात्मनि वै क्षेमं तावत्क्षेमं जगत्त्रये ॥५०॥ सोऽपि क्षेमः सुगतिना यशसा सह वांछ्यते ॥ यशोहीनं तु यत्क्षेमं तक्षेमान्निधनं वरम् ॥५१॥ तद्यशः प्राप्यते पुंभिर्नीतिमार्गे प्रवर्तिभिः ॥ अतो नीतिपथं चित्यं नाथ स्थानादितो व्रज ॥ न व्रजिष्यसि चेत्प्रातस्ततो मां संस्मरिष्यसि ॥५२॥ इत्युक्तोऽपि स वै पत्न्या पारावत्या सुमेधया ॥ न निर्ययौ ततः स्थानाद्रविव्या प्रतिवारितः ॥५३॥ अथोपसि समागत्य श्येनेन बलिना तदा ॥ निर्गमद्वारमारुद्धं किंचिद्भक्ष्य वता तदा ॥ ५४ ॥ दिनानि कतिचित्तत्रातिष्ठच्छ्येनो महाबलः ॥ पारावतमुवाचेदं धिक्कां पौरुषवर्जितम् ॥ ५५ ॥ किं वा युध्यस्व दुर्बुद्धे किं वा निर्याहि मे गिरा ॥ क्षुधार्क्षीणो मृतः पश्चान्नियं पश्यसि ध्रुवम् ॥ विधिरेव हि साहाय्यं न कुर्यात्तव नोदितम् ॥ ५६ ॥ इत्थं श्येनेन स प्रोक्तः पत्न्या स सहितः खगः ॥ अयुध्यत्तेन श्येनेन स्वदुद्वारमाश्रितः ॥ ५७ ॥ क्षुधितस्तृषितः सोऽथ श्येनेन बलिना धृतः ॥ चरणेन दृढेनाशु चंच्वा सापि धृता खगी ॥ ५८ ॥ तावादायोड्डयांचक्रे श्येनो व्योमनि सत्वरम् ॥ चिंतयन्भक्षणस्थानमन्यत्पक्षिविवर्जितम् ॥ ५९ ॥ अथ पत्न्या कलरवः प्रोक्तस्तत्र सुमेधया ॥ यतोऽवमानिता नाथ त्वयाहं स्त्रीति बुद्धितः ॥ ६० ॥ अतोऽवस्थामिमां प्राप्तः किं कुर्यामबला यतः ॥ अधुनापि वचश्चैकं करोपि यदि मे प्रिय ॥ ६१ ॥ तदा हितं ते वक्ष्यामि कुर्वे तदविचारितम् ॥ ममैकवाक्यकरणात्स्त्रीजितो न भविष्यसि ॥ ६२ ॥ याव दास्यं गतास्यस्य यावत्त्वस्थो न भूमिगः ॥ तावदात्मविमुक्त्यै त्वं चंच्वा पादं दृढं दश ॥ ६३ ॥ इति पत्नीवचः श्रुत्वा तथा स कृतवान्खगः ॥ स पीडितो दृढं पादे श्येनश्चीत्कृतवान्बहु ॥ ६४ ॥ तेन चीत्करणेनाथ मुक्ता सा मुखसंपुटात् ॥ पादांगुलीनां शून्यत्वे सोऽपि पारावतोऽपतत् ॥ ॥ ६५ ॥ विपद्यपि च प्राज्ञैर्न संत्याज्यः कश्चिदुद्यमः ॥ कश्च चंचूपुटस्तस्य क्व च तत्पादपीडनम् ॥६६॥ क्व च द्वयोस्तथाभूतं दूरं मोक्षणमद्भुतम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Foundation USA

दुर्बलेऽप्युद्यमः श्रेयानिति शास्त्रेषु गीयते ॥ ६७ ॥ तस्माद्भाग्यानुसारेण फलत्येव सदोद्यमः ॥ प्रशंसंत्युद्यमं चातो विपद्यपि मनीषिणः ॥ ६८ ॥ अथ तौ कालयोगेन जंबूमार्गे मृतौ तदा ॥ जंबूमार्गे मृता ये वै तेषां स्वर्गः सदाऽक्षयः ॥ ६९ ॥ पुण्यशेषे तदा जातो गंधर्वतनयः शुभः ॥ मंदारदामतनयो नाम्ना परिमलालयः ॥ ७० ॥ अनेकविद्यानिलयः कलाकौशलभाजनम् ॥ कौमारं वपुरासाद्य शिवभक्तिपरोऽभवत् ॥ ७१ ॥ नियमं चापि जग्राह विजितेंद्रियमानसः ॥ एकपत्नीव्रतं नित्यं चरिष्यामीति निश्चितम् ॥ ७२ ॥ परयोषित्समासक्तिरायुः कीर्तिं बलं सुखम् ॥ हरेत्स्वर्गगतिं चापि तस्मात्तां वर्जयेत्सुधीः ॥ ७३ ॥ अपरं चापि नियमं स शुचिष्मान्समाददे ॥ गतजन्मांतराभ्यासात्त्रिलोचनसमाश्रयात् ॥७४॥ समस्तपुण्यनिलयः समस्तार्थप्रकाशकः ॥ समस्तकामजनकं परानंदैककारणम् ॥ ७५ ॥ यावच्छरीरं निरुजं यावन्नेंद्रियविप्लवः ॥ तावत्त्रिलोचनोवंत्यां मंतव्यो नात्र संशयः ॥ ७६ ॥ इत्थं मंदारदामिः स काश्यां परिमलालयः ॥ नित्यं त्रिविष्टपं द्रष्टुं समागच्छेत्प्रयत्नतः ॥७७॥ पारावत्यपि संजाता रत्नदीपस्य मंदिरे ॥ नागराजस्य पाताले नाम्ना रत्नावलीति च ॥ ७८ ॥ समस्तनागकन्यानां रूपशीलकलागुणैः ॥ एकैव रत्नभूताऽऽसीद्रत्नदीपोरगात्मजा ॥ ७९ ॥ तस्याः सखीद्वयं चासीदेका नाम्ना प्रभावती ॥ कलावती तथान्या च नित्यं तदनुगे शुभे ॥ ८० ॥ स्वदेहादनपायिन्यौ छायाकांती यथा तथा ॥ पूर्वे सख्यौ भवेतां हि रत्नावल्या महेश्वरि ॥ ८१ ॥ सा तु बाल्ये व्यतिक्रांते किंचिदुद्भिन्नयौवना ॥ शिवभक्तं स्वपितरं दृष्ट्वा नियममग्रहीत् ॥ ८२ ॥ पितस्त्रिलोचनं काश्यामर्चयित्वा दिनेदिने ॥ आभ्यां सखीभ्यां सहिता मौनं त्यक्ष्यामि नान्यथा ॥ ॥ ८३ ॥ एवं नागकुमारी सा सखीद्वयसमन्विता ॥ त्रिलोचनं समभ्यर्च्य गृहानहरहर्व्रजत् ॥ ८४ ॥ मां प्रत्यग्रैः सुकुसुमैः सुशुभैरिष्टगंधिभिः ॥ सुविचित्राणि माल्यानि परिगुंफ्यार्चयेद्विभुम् ॥ ८५ ॥ तिस्रोऽपि गीतं गायंति ललितं चैव सुस्वरम् ॥ नारीमंडलभेदेन लास्यं तिस्रोऽपि कुर्वते ॥ ८६ ॥ वीणावेणुमृदंगांश्च लयतालविचक्षणाः ॥ वादयंति मुदा युक्तास्तिस्रोऽपि विरमंति वै ॥ ८७ ॥ इत्थमाराधयंतीशं तिस्रो नागकुमारिकाः ॥ विचित्रभंगीमालाभिरर्चयंत्यस्त्रिलोचनम् ॥ ८८ ॥ प्रातश्चतुर्थ्यां ताः स्नात्वा तीर्थे पिलिपिले शुभे ॥ त्रिलोचनं समर्च्याथ प्रसुप्ता रंगमण्डपे ॥ ८९ ॥ सुप्तासु तासु स शिवस्त्रिनेत्रः शशिभूषणः ॥ वामार्द्धविलसच्छक्तिर्नागयज्ञोपवीतकः ॥ ९० ॥ लिंगादेव हि निर्गत्य गंगापन्नगमेखलः ॥ प्रत्युवाच ततः कन्या विभुरुत्तिष्ठतेति सः ॥ ९१ ॥ उत्थाय ता विनिर्मथ्य लोचने श्रुतिसंगमे ॥ अंगमोटनवत्यश्च तदा निर्घूर्णितेक्षणाः ॥ ९२ ॥ यावत्पश्यंति पुरतः संभ्रमापन्नमानसाः ॥ अतर्कितागमस्तावत्ताभिर्दृष्टस्त्रिलोचनः ॥ ९३ ॥ ववंदिरेऽथ ता बाला ज्ञात्वा लक्ष्मभिरीश्वरम् ॥ तुष्टुवुश्च प्रहृष्टास्ताः सन्नकंठ्योऽतिविक्लवम् ॥ ९४ ॥ जय शंभो जयेशान जय सर्वग सर्वद ॥ जय त्रिपुरसंहर्तर्जयांधकनिषूदन ॥ ९५ ॥ जय जालंधरहर जय कंदर्पदर्पहृत् ॥ जय त्रैलोक्यजनक जय त्रैलोक्यवंदित ॥ जय भक्तजनाधीश जय प्रमथनायक ॥ ९६ ॥ नमस्तुभ्य नमस्तुभ्यं नमस्तुभ्यं नमोनमः ॥ त्रिलोचन नमस्तुभ्यं त्रिविष्टप नमोऽस्तु ते ॥ ९७ ॥ इत्युक्त्वा दंडवद्भूमौ प्रणिपेतुः कुमारिकाः ॥ अथोत्थाप्य कुमारीस्ताः प्रोवाच शशिभूषणः ॥ ९८ ॥ सुतो मंदारदाम्नश्च नाम्ना परिमलालयः ॥ पतिर्विद्याधरवरो भवतीनां भविष्यति ॥ ९९ ॥ चिरं विद्याधरे लोके भोगान्भुक्त्वा समंततः ॥ ततो ह्यवंतिकां प्राप्य मां ध्यात्वा सिद्धिमाप्स्यथ ॥ १०० ॥ जन्मांतरेपि मे भक्तिर्भवतीभिश्च तेन च ॥ विहिता तेन वो जन्म निर्मलं भक्तिभावितम् ॥ १०१ ॥ एतत्प्रभावतीस्तोत्रं ये पठिष्यंति मे पुरः ॥ तेभ्यः कामान्प्रदास्यामि भवतीना मयं वरः ॥ १०२ ॥ इत्युक्तवति देवेशे ताः कन्या हृष्टमानसाः ॥ प्रणम्य प्रोचुरीशानं प्रबद्धकरसंपुटाः ॥ १०३ ॥ ॥ ॥ नागकन्या ऊचुः ॥ पृच्छामो ब्रूहि नो नाथ करुणाकर शंकर ॥ जन्मांतरे कथं सेवा चतुर्भिर्भवतः कृता ॥ १०४ ॥ ततः प्राक्तनवृत्तांतमेतस्यापि कृतात्मनः ॥ अस्माकमपि चाख्याहि कृपां कुरु कृपानिधे ॥ १०५ ॥ इति श्रुत्वा प्रणयतो बालोदीरितमीप्सितम् ॥ प्रोवाच तासामपि च भवांतरविचेष्टितम् ॥ १०६ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुध्वं नागतनयास्तिस्रोपि हि समाहिताः ॥ प्राग्भवं भवतीनां च तस्यापि कथयाम्यहम् ॥१०७॥ एषा रत्नावली पूर्वमासीत्पारावती खगी ॥ स च विद्याधरवरः पतिरस्याः खगोऽभवत् ॥१०८॥ प्रासादे च ममैताभ्यामुषितं सुचिरं सुखम् ॥ रजः प्रासादसंलग्नं नुन्नं पक्षानिलैः पुनः ॥ १०९ ॥ उपरिष्टादधस्ताच्च कृता भूरिप्रदक्षिणाः ॥ व्योम्नि संचरमाणाभ्यां संचीर्णं च ममाजिरे ॥ ११० ॥ स्नातं चतुर्नदे तीर्थे पीतं तत्रांबु चासकृत् ॥ आभ्यां कलरवाभ्या च कृताः कलरवा मुदा ॥ १११ ॥ एताभ्यां स्थिरचित्ताभ्यां मुदिता त्वमतीव हि ॥ दृष्ट्वा हि कौतुकान्यत्र मम भक्तैः कृतान्यपि ॥ ११२ ॥ अमूभ्यां बहुशो दृष्टा मम मंगलदीपिकाः ॥ पीतं श्रुतिपुटाभ्यां च मम नामाक्षरामृतम् ॥ तिर्यग्योनिप्रभावेन न मृतौ मम संनिधौ ॥११३॥ जंबूमार्गे मृतौ यस्मात्स्वर्गप्राप्तिकरे ध्रुवम् ॥ तस्मात्पारावती ह्येषा रत्नदीपसुताऽभवत् ॥ ११४ ॥ पतिः पारावतोऽस्याश्च जातो विद्याधरांगजः ॥ एषा प्रभावती नागी नागराजस्य सद्मनि ॥ इह जन्मनि कन्यासीत्पूर्वजन्म ब्रवीमि च ॥ ११५ ॥ त्रिशिखस्योरगेंद्रस्य सुता चेयं कलावती ॥ एतस्या अपि वृत्तांतं निशामय तु वच्म्यहम् ॥ ॥ ११६ ॥ भवांतरे तृतीयेतः कन्ये चारायणस्य च ॥ आस्तां महर्षेः शीलाढ्ये प्रेमवत्यौ परस्परम् ॥ ११७ ॥ पित्रा चारायणेनापि ताभ्यां संप्रेरितेन वै ॥ आमुष्यायणपुत्राय दत्ते नारायणाय हि ॥ ११८ ॥ अप्राप्तयौवनोरण्ये समिदाहरणाय वै ॥ गतो विधिवशाद्दष्टो दंदशूकेन कानने ॥ ११९ ॥ भवानीगौतमीनाम्न्यौ ते तु चारायणांगजे ॥ वैधव्यदुःखमापन्ने दैन्यग्रस्ते बभूवतुः ॥ १२० ॥ अत एव प्रयत्नेन परिणेता विवर्जयेत् ॥ देवतासरिदाह्वानकन्यापाणिग्रहं सुधीः ॥ १२१ ॥ अथर्षेः कस्यचिद्दैवादाश्रमे देवसन्निभे ॥ रंभाफलान्यदत्तानि मोहाज्जग्रहतुस्तदा ॥ ॥ १२२ ॥ कृत्वा नानोपवासादिव्रतानि ब्राह्मणांगजे ॥ अध्यास्य निधनं कालाच्छाखामृग्यौ बभूवतुः ॥ १२३ ॥ फलचौर्यविपाकेन वानरत्वं तयोरभूत् ॥ शीलरक्षणभावेनावंत्यां जनिमवापतुः ॥ १२४ ॥ स च नारायणो विप्रः पितृशुश्रूषणे रतः ॥ दष्टोऽपि दंदशूकेन काश्यां पारावतोभवत् ॥ १२५ ॥ एवं भवांतरे चासीदेतयोः पतिरेव सः ॥ तिसृणां भवतीनां च भावी भर्ता पुनः स वै ॥ १२६ ॥ प्रासादस्यापि पार्श्वे तु न्यग्रोधश्च महानगः ॥ तस्मिञ्छाखिनि वासाढ्ये शाखामृग्यौ बभूवतुः ॥ १२७ ॥ विष्णुदेहजले तीर्थे क्रीडया च ममज्जतुः ॥ पपतुश्चापि पानीयं तस्मिंस्तीर्थे तृषातुरे ॥ १२८ ॥ जातिस्वभावचापल्यात्क्रीडंत्यौ च प्रदक्षिणम् ॥ चक्रतुर्बहुकृत्वश्च लिंगं ददृशतुर्बहु ॥ १२९ ॥ विचरंत्यावितः स्वैरं तत्र न्यग्रोधसंनिधौ ॥ केनचिद्योगवेषेण पाशेन च नियंत्रिते ॥१३०॥ भिक्षार्थं शिक्षिते तेन न प्लुतिर्न निवर्त्तनम् ॥ अथ ते क्वापि मर्कट्यौ कालधर्मवशंगते ॥ १३१ ॥ अवन्तीवासपुण्येन त्रिलोचनस्य सेवया ॥ प्रादक्षिण्यानुरूपेण जाते नागसुते अपि ॥ १३२ ॥ अधुना तं पतिं प्राप्य विद्याधरकुमारकम् ॥ निर्विश्य स्वर्गभोगांश्चावंत्यां निर्वृतिमाप्स्य ॥ १३३ ॥ यैरल्पमपि चावंत्यां कृतं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्म शुभावहम् ॥ तस्य मोक्षः परीपाको निश्चितं मदनुग्रहात् ॥ त्रैलोक्येऽपि च सर्वस्मिञ्छ्रेष्ठाऽवन्तीपुरी सदा ॥ १३४ ॥ ततोऽपि लिंगमों कारं ततोऽप्यत्र त्रिलोचनम् ॥ तिष्ठमानोऽत्र लिंगेऽहं भुक्तिं मुक्तिं ददामि वै ॥ १३५ ॥ अतः सर्वप्रयत्नेनावन्त्यां पूज्यस्त्रिलोचनः ॥ इत्युक्त्वा देवदेवेशस्तत्प्रासादांतरेऽविशत् ॥१३६॥ लिंगस्वरूपमासाद्य शुभं त्रिभुवनादपि ॥ ताश्च स्वसदनं प्राप्य तद्वृत्तांतमशेषतः ॥ स्वमातुः पुरतश्चोक्त्वा कृतकृत्या इवाभवन् ॥ १३७ ॥ एकदा माधवे मासि सह सार्थाः समागताः ॥ विद्याधरास्तथा नागा मिलिताः सपरिच्छदाः ॥ १३८ ॥ विरजस्के महाक्षेत्रे त्रिलोचनसमीपतः ॥ देवस्य वरदानाच्च पृष्ट्वान्योन्यं कुलावलिम् ॥ १३९ ॥ विद्याधराय ताः कन्या नागैस्तिस्रोऽपि कल्पिताः ॥ मंदारदामा सन्तुष्टः प्राप्य तच्च स्नुषात्रयम् ॥१४०॥ रत्नदीपैश्च नागेन्द्रः पद्मी च भुजगेश्वरः ॥ विशिखोऽपि फणींद्रश्च हृष्टा एते त्रयोऽपि च ॥ जामातरं समासाद्य शुभं परिमलालयम् ॥ १४१ ॥ अन्योऽन्यं स्वजनास्ते तु मुदा विकसितेक्षणाः ॥ विवाहोत्सवमारच्य स्वंस्वं भवनमाविशन् ॥ १४२ ॥ त्रिलोचनस्य लिंगस्य वर्णयंतोऽपि गौरवम् ॥ स च विद्याधरः श्रीमान्नागीभिर्विपुलं सुखम् ॥ भुक्त्वावन्तीं ततः प्राप्य संसेव्य च त्रिलोचनम् ॥ १४३ ॥ गायन्गीतं सुमधुरं नागीभिः सहितः कृती ॥ आत्मानं चातिविस्मृत्य मध्येलिंगं लयं गतः ॥ १४४ ॥ त्रिलोचनस्य महिमा कलौ देवेन गोपितः ॥ ततोल्पसत्त्वा मनुजा न तल्लिंगमुपासते ॥ १४५ ॥ त्रिलोचनकथामेतां श्रुत्वा पापान्वितोऽप्यहो ॥ विपापो जायते मर्त्यो लभते च परां गतिम् ॥ १४६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ त्रिलोचनस्य देवस्य शृणु वीरेश्वरं परम् ॥ ॥ १४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये त्रिलोचनमाहात्म्यवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ श्रीहर उवाच ॥ ॥ षट्चत्वारिंशकं देवि वीरेश्वरमथो शृणु ॥ यस्य दर्शनमात्रेण कुलवृद्धिर्भवेद्ध्रुवम् ॥ १ ॥ निशामय महा वि वीरेशाविर्भवं परम् ॥ यच्छ्रुत्वा पितरः पुण्यं प्राप्नुयुर्विपुलं शिवे ॥ २ ॥ आसीदमित्रजिन्नाम राजा परपुरंजयः ॥ धार्मिकः सत्त्वसंपन्नः प्रजारंजनतत्परः ॥ ३ ॥ यशोधनो वदान्यश्च सुधीर्ब्राह्मणदैवतः ॥ सदैवावभृथस्नातः परिक्लिन्नशिरोरुहः ॥४॥ विनीतो नीतिसंपन्नः कुशलः सर्वकर्मसु ॥ विद्याविशारदश्चाथ गुणवान्गुणिवत्सलः ॥ ५ ॥ कृतज्ञो मधुरालापः पापकर्मपराङ्मुखः ॥ सत्यवाञ्छौचनिलयः सत्यवाग्विजितेंद्रियः ॥ ६ ॥ रणांगणे कृतांतस्य संख्यावांश्च सदोजिरे ॥ कामिनीकेलिकालज्ञो युवापि स्थविरप्रियः ॥ ७ ॥ धर्मार्थधनकोशश्च समृद्धबलवाहनः ॥ सुभगश्च सुरूपश्च सुमेधाः सुप्रजाप्रियः ॥ ८ ॥ स्थैर्यधैर्यसमापन्नो देशकालविचक्षणः ॥ मान्यानां मानदो नित्यं सर्वदूषणवर्जितः ॥ ९ ॥ वासुदेवांघ्रियुगले चेतोवृत्तिं निधाय च ॥ चकार राज्यं निर्द्वंद्वं धिग्धिगीतिविवर्जितम् ॥ १० ॥ अलंघ्यशासनः श्रीमान्विष्णुभक्तिपरायणः ॥ अभुनक्प्रवरान्भोगान्समंताद्विष्णुसंस्कृतान् ॥ ११ ॥ हरेराराधनान्युच्चैः प्रतिसौधं पदेपदे ॥ तस्य राज्ये समभवन्महाभागनिधेः शिवे ॥ १२ ॥ गोवृन्दगोपगोपालगोपीजनमनोहर ॥ गदापाणे गुणातीत गुणाढ्य गरुडध्वज ॥ १३ ॥ केशिहन्कैटभाराते कंसारे कमलापते ॥१४॥ कृष्ण केशव कंजाक्ष कीनाशभयनाशन ॥ पुरुषोत्तम पापारे पुण्डरीकविलोचन ॥१५॥ पीतकौशेयवसन पद्मनाभ परात्पर ॥ जनार्दन जगन्नाथ जाह्नवीजलजन्मभूः ॥१६॥ जन्मिनां जन्महरण जंजपूकौघनाशन ॥ श्रीवत्सवक्षः श्रीकंठ श्रीकर श्रेयसांनिधे ॥ १७ ॥ श्रीरंग शार्ङ्गकोदंड शौरे शीतांशुलोचन॥दैत्यारे दानवाराते दामोदर दुरंतक ॥१८॥ देवकीहृदयानंद दंदशूकेश्वरेशय ॥ विष्णो वैकुण्ठनिलय बाणारे विष्टरश्रवः ॥१९॥ विष्वक्सेन विभो वीर वनमालिन्बलिप्रिय ॥ त्रिविक्रम त्रिलोकेश चक्रपाणे चतुर्भुज ॥२०॥ इत्यादीनि पवित्राणि नामानि प्रतिमंदिरे ॥ स्त्रीवृद्धबालगोपालवदनोदीरितानि तु ॥ २१ ॥ श्रूयंते यत्र कुत्रापि रम्याणि मधुविद्विषः ॥ सुरम्यकाननान्येव विलोक्यंते गृहेगृहे ॥ ॥ २२ ॥ विचित्राणि चरित्राणि गीयंते च गृहेगृहे ॥ सौधभित्तिषु दृश्यंते चित्राणि कृत्रिमाणि च ॥ २३ ॥ ऋते हरिकथायास्तु नान्या वार्त्ता निशम्यते ॥ हरिणा नैव वध्यंते हरिणा मांसधारिणः ॥ २४ ॥ तस्य राज्ञो भयाद्व्याधैररण्ये सुखचारिणः ॥ न मत्स्या नैव च बका वराहाश्च न केनचित् ॥ २५ ॥ हन्यंते क्वापि तद्भीत्या मत्स्यमांसाशिनाऽपि वै ॥ अपुत्रा न नरास्तस्य राष्ट्रेऽमित्रजितः क्वचित् ॥ २६ ॥ स्तनपानं न कुर्वंति संप्राप्य हरिवासरम् ॥ पशवोऽपि तृणाहारं परित्यज्य हरेर्दिने ॥ उपोषणपरा जाता अन्येषां का कथा नृणाम् ॥ २७ ॥ महामहोत्सवः सर्वैः पुरौकोभिर्वितन्यते ॥ अस्मिन्प्रशासति भुवं संप्राप्ते हरिवासरे ॥ २८ ॥ यो विष्णुभक्तिरहितः प्राणैरपि धनैरपि ॥ स एव दण्ड्यो भुंक्ते यो राज्ञोऽमित्रजितः क्षितौ ॥ २९ ॥ अन्त्यजा अपि तद्राष्ट्रे शंखचक्रांकधारिणः ॥ संप्राप्य वैष्णवीं दीक्षां दीक्षिता इति संस्थिताः ॥ ३० ॥ शुभानि यानि कर्माणि क्रियंतेऽनुदिनं जनैः ॥ वासुदेवे समर्प्यंते तानि तैरफलेप्सुभिः ॥ ३१ ॥ विना मुकुंदगोविंदपरमानंदमच्युतम् ॥ नान्यो जप्येत नम्येत सभाज्येत जनः क्वचित् ॥ कृष्ण एव परो बंधुस्तस्यासीदवनीपतेः ॥३२॥ एवं तस्मिन्महीपाले राज्ये सम्यक्प्रशासति ॥ एकदा नारदः श्रीमांस्तं दिदृक्षुः समाययौ ॥ ३३ ॥ राज्ञा समर्चितः सोऽथ मधुपर्कविधानतः ॥ नारदो वर्णयामास तममित्रजितं नृपम् ॥ ३४ ॥ ॥ श्रीनारद उवाच ॥ ॥ धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम् ॥ सर्वभूतेषु गोविंदं परिपश्यन्विशांपते ॥ ३५ ॥ यो वेदपुरुषो विष्णुर्यो यज्ञपुरुषो हरिः ॥ योंऽतरात्मास्य जगतः कर्त्ता हर्ताविता विभुः ॥ ३६ ॥ तन्मयं पश्यतो विश्वं तव भूपालसत्तम ॥ दर्शनं प्राप्य शुभदं शुचित्वमगमं परम् ॥ ३७ ॥ एष एव हि सारोऽत्र संसारे क्षणभंगुरे ॥ कमलाकांतपादाब्जभक्तिर्भावोऽखिलप्रदः ॥ ३८ ॥ परित्यज्य हि यः सर्वं विष्णुमेकं सदा भजेत् ॥ सुमेधसं भजंते तं पदार्थाः सर्व एव हि ॥ ३९ ॥ हृषीकेशे हृषीकाणि यस्य स्थैर्यं गतान्यहो ॥ स एव स्थैर्यमाप्नोति ब्रह्मांडेऽतीव चंचले ॥ ४० ॥ यौवनं धनमायुष्यं जलं पद्मदले यथा ॥ अतीव चंचलं ज्ञात्वाऽच्युतमेव सदाश्रयेत् ॥ ४१ ॥ वाचि चेतसि कर्णेऽथ यस्य देवो जनार्दनः ॥ स एव सर्वदा वंद्यो नररूपी जनार्दनः ॥ निर्व्याजप्रणिधानेन शीलयित्वा श्रियःपतिम् ॥ ४२ ॥ पुरुषोत्तमतां को न प्राप्तस्त्वमिव भूतले ॥ अनया विष्णुभक्त्या ते संतुष्टेंद्रियमानसः ॥ उपकर्तुमना ब्रूयां तन्निशामय भूपते ॥ ४३ ॥ मालाविद्याधरसुता नाम्ना मलयगंधिनी ॥ क्रीडंती पितुराक्रोडे हृता कंकालकेतुना ॥ ४४ ॥ कपालकेतुपुत्रेण दानवेन बलीयसा ॥ आगामिन्यां तृतीयायां तस्याः पाणिग्रहः किल ॥ ४५ ॥ पाताले चंपकावत्यां नगर्यां सास्ति सांप्रतम् ॥ हाटकेशात्समागच्छंस्तयाऽहं साश्रुनेत्रया ॥ ॥ ४६ ॥ दृष्टः प्रणम्य विज्ञप्तो यथा तच्च निशामय ॥ ब्रह्मचारिन्मुनिश्रेष्ठ गंधमादनशैलतः ॥ ४७ ॥ बालक्रीडनकासक्तां मां जह्रे त्रस्तमानसाम् ॥ कंकालकेतुर्दुर्वृत्तस्तस्य नास्ति च घातकः ॥ ४८ ॥ स स्वत्रिशूलघातेन म्रियते नान्यथा रणे ॥ जगत्पर्याकुलीकृत्य निद्रात्यथ विनिर्भयः ॥ ४९ ॥ यदि कोपि कृतज्ञो मां हत्वेमं दुष्टदानवम् ॥ मद्दत्तेन त्रिशूलेन नयेद्भद्रं च वै कृतम् ॥ ५० ॥ यद्यत्रोपचिकीर्षुस्त्वं रक्ष मां दुष्टदानवात् ॥ ममापि हि वरो दत्तो भगवत्योमया पुरा ॥ विष्णुभक्तो युवा धीमान्पुत्रि त्वां परिणेष्यति ॥ ५१ ॥ आतृतीयातिथि यथा तद्वाक्यं तथ्यतां व्रजेत् ॥ तथा निमित्तमात्रं त्वं भव यत्नं समाचर ॥ ५२ ॥ इति तद्वचनाद्राजन्विष्णुभक्तिपरायणम् ॥ युवानं चापि धीमन्तं त्वामनुप्राप्त

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वानहम् ॥५३॥ तद्गच्छ कार्यसिद्ध्यै त्वं हत्वा तं दुष्टदानवम् ॥ आनयाशु महाबाहो शुभां मलयगंधिनीम् ॥५४॥ सा तु विद्याधरी बाला विलोक्य त्वां नरेश्वर ॥ अवश्यमेव तच्छूलं दास्यतीति विनिश्चितम् ॥ पार्वतीवचनाद्दुष्टं घातयिष्यस्यसंशयम् ॥ ५५ ॥ इति नारदवाक्यं स निशम्यामित्रजिन्नृपः ॥ अनल्पोत्कलिको जातो विद्याधरसुतां प्रति॥उपायं चापि पप्रच्छ गंतुं वै चंपकावतीम् ॥५६॥ नारदेन पुनः प्रोक्तः स राजा गिरिराजजे ॥ तूर्णमर्णवमासाद्य पूर्णिमादिवसे नृप ॥५७॥भवान्द्रक्ष्यति पोतस्थकल्पवृक्षरथास्थिताम् ॥ तत्र दिव्यांगनां कांचिद्दिव्यपर्यंकसुस्थिताम् ॥ वीणामादाय गायंतीं गाथामत्यंतसुस्वरम् ॥५८॥ यत्कर्म विहितं येन शुभं वाप्यथवाऽशुभम् ॥ स एव भुंक्ते तत्तथ्यं विधिस्तत्र नियंत्रितः ॥५९॥ गाथामिमां तु संगीय सरथा समहीरुहा ॥ सपर्यंका क्षणादेव मध्येसिंधुं प्रवेक्ष्यति ॥६०॥ भवानप्यविशंकं च ततः पोतान्महार्णवे ॥ तमनुव्रजतु क्षिप्रं यज्ञवाराहसात्मवान् ॥ ६१ ॥ ततो द्रक्ष्यसि पाताले नगरीं चंपकावतीम् ॥ महामनोहरां राजन्सनाथां बालया तया ॥ ६२ ॥ इत्युक्त्वांतर्हितो देवि स चतुर्मुखनंदनः ॥ राजाप्यर्णवमासाद्य यथोक्तं परिलक्ष्य च ॥ ६३ ॥ विवेशांतःसमुद्रं च नगरीमाससाद ताम् ॥ सापि विद्याधरी बाला नेत्रयोः प्राघुणीकृता ॥ ६४ ॥ तेन राज्ञा त्रिजगतीसौंदर्यश्रीरिवैकिका ॥ पाताले देवतेयं वा मम नेत्रोत्सवाय किम् ॥ ६५ ॥ निरमायि ममोद्देशात्स्रष्टृसृष्टिर्विलक्षणा ॥ कुहूराहुभयद्वेषात्कांतिश्चांद्रमसी किमु ॥ ६६ ॥ योषिद्रूपं समाश्रि तिष्ठत्यत्राकुतोभया ॥ इत्थं क्षणं च निर्वर्ण्य स राजाऽगच्छदंतिकम् ॥ ६७ ॥ सा विलोक्याथ तं बालं नितरां मधुराकृतिम् ॥ विशालोरःस्थलतलप्रलंबतुलसीस्रजम् ॥ ६८ ॥ शंखचक्रांकसुभगभुजद्वयविराजितम् ॥ हरिनामाक्षरसुधासुधौतरदनावलिम् ॥ ६९ ॥ भवानीभक्तिबीजोत्थभूरुहं पुरुषाकृतिम् ॥ अनेनात्र कृतं कस्य भवनं मधुराकृति ॥ ७० ॥ इति पर्याकुलीकृत्य चक्षुषी च मुहुर्मुहुः ॥ कंकालकेतुर्दुर्वृत्तस्त्ववध्यः परहेतिभिः ॥७१॥ तावद्गूढं समातिष्ठ शस्त्रागारेऽत्र गह्वरे ॥ न मे कन्याव्रतं भग्नं सामर्थ्याच्चण्डिकावरात् ॥७२॥ आगामिन्यां तृतीयायां परश्वः पाणिपीडनम् ॥ स चिकीर्षति दुष्टात्मा गतायुर्मम शापतः ॥७३॥ मा तद्भीतिं कुरु युवंस्त्वत्कार्यं भविताचिरात् ॥ विद्याधर्येति चोक्तः स शस्त्रागारे निगूढवत् ॥ ७४ ॥ स्थिरो वीरो महाबाहुर्दानवागमनेक्षणः ॥ ७५ ॥ अथ सायं समायातो दानवो भीषणाकृतिः ॥ त्रिशूलं कलयन्पाणौ नृत्योरपि भयावहम् ॥ ७६ ॥ आगत्य दानवो रौद्रः प्रलयांबुदनिस्वनः ॥ विद्याधरीं जगादेति मदापूर्णितलोचनः ॥ ७७॥ गृहाणेमानि रत्नानि दिव्यानि वरवर्णिनि ॥ कन्या त्वं हि परश्वस्ते पाणिग्राहो भविष्यति ॥ ७८ ॥ दासीनामयुतं प्रातर्दास्यामि तव सुंदरि ॥ आसुरीणां सुरीणां च दानवीनां मनोहरम् ॥ ७९ ॥ गन्धर्वीणां किंनरीणां सततं परिचारिकाः ॥ विद्याधरीणां नागीनां यक्षीणां च शतानि षट् ॥ ८० ॥ राक्षसीनां शतान्यष्टौ शतमप्सरसां वरम् ॥ एतास्ते परिचारिण्यो भविष्यंत्यमलाशये ॥ ॥ ८१ ॥ यावत्संपत्तिसंभारो दिक्पालानां गृहेषु वै ॥ मत्परिग्रहतां प्राप्तौ तावतस्त्वं महेश्वरी ॥ ८२ ॥ दिव्यान्भोगान्मया सार्द्धं भोक्ष्यसे मत्परिग्रहात् ॥ कदा परश्वो भविता यस्मिन्वैवाहिको विधिः ॥ ८३ ॥ त्वदंगसंगसंस्पर्शसुखस्वादातिमेदुरः ॥ परां निर्वृतिमाप्स्यामि परश्वो निकटं यदि ॥ ॥ ८४ ॥ मनोरथाश्चिरं यावद्ये मे हृदि समेधिताः ॥ तान्कृतार्थीकरिष्यामि परश्वस्तव संगमात् ॥ ८५ ॥ जित्वा देवान्रणे सर्वानिंद्रादीन्मृगलोचने ॥ त्रैलोक्यैश्वर्यसंपत्तेस्त्वां करिष्यामि चेश्वरीम् ॥८६॥आधायांके त्रिशूलं च सुष्वापेति प्रलप्य सः॥नरमांसस्य स्वादेन प्रमत्तो वीतसाध्वसः॥ ॥ ८७ ॥ वरं स्मरंती सा गौर्या विद्याधरकुमारिका ॥ विज्ञाय तं प्रमत्तं च प्रसुप्तं चातिनिर्भरम् ॥ आहूय तं नरवरं वरं सर्वांगसुंदरम् ॥ ८८ ॥ विष्णुभक्तिकृतत्राणं प्राणनाथेति जल्प्य च ॥ शूलं तदंकादादाय ददौ तस्मै च सुंदरी ॥८९॥ तमादाय त्रिशूलं च स तदामित्रजिन्नृपः ॥ संस्मरंश्चक्रिणं चित्ते जगद्रक्षामणिं हरिम् ॥ ९० ॥ जगादोत्तिष्ठ रे दुष्ट कन्यादूषणलालस ॥ युध्यस्व च मया सार्द्धं न सुप्तं हन्म्यहं रिपुम् ॥ ९१ ॥ इति संश्रुत्य संप्राप्तः कस्य दृष्टोद्य चांतकः ॥ क आयुषाद्य संत्यक्तो यः प्राप्तो मम गोचरम् ॥९२॥ मम प्रचंडदोर्दंडकंडूकंडूयनक्षमः ॥ माल्यो नरोऽयं भविता किं त्रिशूलेन सुंदरि ॥ ९३ ॥ मा भैर्मे कौतुकं पश्य भक्षोयं मम सांप्रतम् ॥ कालेन मत्तो भीतेन स्वयमेवोपढौकितः ॥ ९४ ॥ इत्युक्त्वा मुष्टिघातेन तेनोच्चैर्दंडसूनुना ॥ हृदये निहतो राजा शिलातिकठिने द्रुतम् ॥ ९५ ॥ स चक्रिणा कृतत्राणः पीडां नाल्पीयसीमपि ॥ विवेद कठिनोरस्कः करस्तस्य प्रपीडितः ॥ ९६ ॥ अथ कोपवता राज्ञा हतो वक्त्रे चपेटया ॥ आघूर्णितशिरा भूमौ पतित्वा पुनरुत्थितः ॥ उवाच च वचो धैर्यमवष्टभ्य महाबली ॥ ९७ ॥ ॥ दानव उवाच ॥ ॥ ज्ञातं तत्त्वं मनुष्योसि नृरूपेण चतुर्भुजः ॥ ततस्त्वं छिद्रमासाद्य हंतुं मां दानवांतक ॥ ॥९८॥ एवंविधो हि मधुभिद्यदि त्वं बलवानसि॥विहायैतन्महच्छूलं युध्यस्व स्वायुधैर्मया॥ ९९॥त्वया कपटरूपेण बलिना कैटभादयः॥न बलेन हताः संख्ये हता एव च्छलेन हि ॥१००॥ बलिं पातालमनयस्त्वं नृवामनतां दधत् ॥ नृमृगत्वेन भवता हिरण्यकशिपुर्हतः ॥१॥तथा जटिलरूपेण लंकेशो विनिपातितः॥गोपालवेषमालंब्य कंसाद्या घातितास्त्वया ॥ स्त्रीभूय चाहरस्त्वं हि विप्रतार्यासुरान्सुधाम् ॥२॥ यादोरूपेण भवता शंखाद्या निहता इह ॥ मायाविना त्वयाऽगण्याः सर्वमर्मज्ञ माधव ॥ ३ ॥ न त्वत्तोऽहं बिभेम्यद्य सद्यः पातः शरीरिणाम् ॥ वरं तव श्रये मृत्युं बलेनापि छलेन वा ॥ ४ ॥ न त्यक्ष्यसि त्रिशूलं त्वं न त्वां योत्स्याम्यहं रणे ॥ अवश्यमेव मर्त्तव्यं मया प्रातः शरीरिणा ॥ ५ ॥ इयं विद्याधरी कन्या न मया दूषिता सती ॥ साक्षाच्छ्रीरिव मंतव्या तवार्थं रक्षिता मया ॥ ६ ॥ इत्युक्त्वा वामदोर्दंडप्रहारेणापि निष्ठुरम् ॥ निजघान दनोः सूनुस्तं शिलोच्चयघातिना ॥ ७ ॥ नृपतिस्त्वथ संधार्य विषह्य रणमूर्द्धनि ॥ जघानाशु तदा क्रूरं त्रिशूलेनाथ वक्षसि ॥ ८ ॥ तत्प्रहारान्महाबाहुः पंचत्वमगमत्क्षणात् ॥ लक्ष्यीचकार तद्वक्त्रं त्रिशूलं तोलयन्करे ॥ ९ ॥ पश्यतोऽस्य महाबाहोः स च प्राणाञ्जहौ क्षणात् ॥ इत्थं कंकालकेतुं स निहत्य सुरकंपनम् ॥११०॥ विद्याधरीं प्रपश्यंतीं प्राह हृष्टतनूरुहः ॥ नारदस्य मुनेर्वाक्यात्तव सुश्रोणि वांछितम् ॥ ११ ॥ कृतं मया कृतज्ञे किं करवाण्यधुना वद ॥ श्रुत्वेति तस्य सा वाक्यं प्राह गंभीरचेतसा ॥ १२ ॥ ॥ मलयगंधिन्युवाच ॥ ॥ अत्युदारमते वीर निजप्राणैः पणीकृताम् ॥ किं मां पृच्छसि युवतीं कुलकन्यामदूषिताम् ॥ १३ ॥ इति ब्रुवंत्यां कन्यायां पुनः स्वैरचरो मुनिः ॥ अतर्कितागमः प्राप्तो नारदो देवलोकतः ॥ ॥ १४ ॥ ततस्तुष्टुवतुस्तौ तु तं दृष्ट्वा मुनिसत्तमम् ॥ कृतप्रणामौ मुनिना प्रतिज्ञाप्रापिताशिषौ ॥ १५ ॥ पाणिग्रहेण विधिनाऽभिषिक्तौ नारदेन तु ॥ जग्मतुर्नारदादिष्टवर्त्मना कृतमंगलौ ॥ १६ ॥ तया मलयगंधिन्या वृतः सोऽमित्रजिन्नृपः ॥ पुरीं चोज्जयिनीं प्राप्य पौरैर्विहितमंगलाम् ॥ ॥ १७ ॥ तद्वीक्षणादपि नरो नारकीं नैव जातुचित् ॥ गतिं प्राप्नोति मेधावी तां पुरीमविशन्नृपः ॥ १८ ॥ यस्यां पुर्यां प्रवेशं न लभन्ते वासवादयः ॥ कैवल्यजयजैत्र्यां हि तां पुरीमविशन्नृपः ॥ १९ ॥ सापि विद्याधर्यवंतीं समृद्धां वीक्ष्य दूरतः ॥ निनिंद स्वर्गलोकं च पातालनगरीमपि ॥ १२० ॥ प्राप्यामित्रजितं कांतं तथा हृष्टा न सा वधूः ॥ यथा दृष्ट्वाप्यहोऽवंतीं परमानंददायिनीम् ॥ २१ ॥ सा कृतार्थामिवात्मानं मन्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

माना मनस्विनी ॥ तेन पत्योज्जयिन्यां च परां निर्वृतिमाप सा ॥ २२ ॥ सोऽप्यमित्रजिदासाद्य पत्नीं मलयगंधिनीम् ॥ धर्मप्रधानं संसेव्य कामं प्रापोत्तमं सुखम् ॥ २३ ॥ सा पतिं विष्णुभजने रतं प्रोवाच भामिनी ॥ २४ ॥ ॥ राज्ञ्युवाच ॥ ॥ भूपाभीष्टतृतीयायां चरिष्यामि महाव्रतम् ॥ ॥ राजोवाच ॥ ॥ देव्यभीष्टतृतीयायां व्रतं कीदृग्भवेद्वद ॥२५॥ इति राज्ञोदिता राज्ञी प्रवक्तुमुपचक्रमे ॥ इतिकर्त्तव्यतां तस्य व्रतस्य सविधानकाम् ॥ २६ ॥ ॥ राज्ञ्युवाच ॥ ॥ पुरा देवर्षिणा चेदं व्रतं लक्ष्म्यै प्रतिश्रुतम् ॥ तया प्राप्तास्तु सकलाः कामाः स्वर्गापवर्गदाः ॥ २७ ॥ मार्गशीर्षतृतीयायां शुक्लायां कलशोपरि ॥ ताम्रपात्रं निधायैव तंदुलैः परिपूरितम् ॥ २८ ॥ अच्छिद्रं च नवीनं च रजनीरागरंजितम् ॥ वासः पात्रोपरि न्यस्य सूक्ष्मात्सूक्ष्मतरं परम् ॥ २९ ॥ तस्योपरि शुभं पद्मं रविरश्मिप्रकाशितम् ॥ तत्कर्णिकाया उपरि चतुःस्वर्णविनिर्मितम् ॥ विधिं संपूजयेद्भक्त्या रक्तमाल्यांबरादिभिः ॥ १३० ॥ पुष्पैः सुगंधैः कर्पूरकस्तूर्यादिभिरर्चयेत् ॥ रात्रौ जागरणं कार्यं विप्राणां परमोत्सवैः ॥३१॥ होमः कार्यो महाभक्त्या सहस्रपरिसंख्यया ॥ नवप्रसूतां कपिलां दद्याच्च सुपयस्विनीम् ॥ ३२ ॥ दद्यादाचार्यवर्याय सालंकारां सदक्षिणाम् ॥ उपोष्य दंपती भक्त्या नवांबरविभूषितौ ॥ ३३ ॥ प्रातः स्नात्वा चतुर्थ्यां च संपूज्याचार्यमादितः ॥ वस्त्रैराभरणैर्माल्यैर्दक्षिणाभिर्मुदान्वितः ॥ सोपस्करां च तां मूर्तिमाचार्याय प्रदापयेत् ॥ ३४ ॥ मंत्रः ॥ नमो विश्वविधानज्ञे विद्ये विविधकारिणि ॥ सुतं च शंकरं देहि तुष्टा ह्यस्माद्व्रतोत्तमात् ॥ ३५ ॥ सहस्रं भोजयित्वाथ द्विजानां भक्तिपूर्वकम् ॥ भुक्तशेषेण चान्नेन कुर्याद्वै पारणं ततः ॥ ३६ ॥ इत्थमेतद्व्रतं नाथ चिकीर्षामि त्वदाज्ञया ॥ कुरु चैतत्प्रियं मह्यमभीष्टफललब्धये ॥ ३७ ॥ इति भूपालवर्येण श्रुत्वा संहृष्टचेतसा ॥ तदा व्रतं समाचीर्णं सांतर्वत्नी बभूव ह ॥ ३८ ॥ तयाथ प्रार्थिता गौरी गर्भिण्या भक्तितोषिता ॥ पुत्रं देहि महामाये साक्षाद्विष्ण्वंशसंभवम् ॥ ३९ ॥ जातमात्रो व्रजेत्स्वर्गं पुनरायाति चात्र वै ॥ भक्तः सदाशिवेऽत्यर्थं प्रसिद्धः सर्वभूतले ॥ विनैव स्तन्यपानेन षोडशाब्दाकृतिः क्षणात् ॥ १४० ॥ एवंभूतः सुतो गौरि यथा स्यान्मे तथा कुरु ॥ मृडान्यापि तथेत्युक्ता राज्ञी भक्त्यातितुष्टया ॥ ४१ ॥ अथ कालेन तनयं मूलर्क्षे साऽप्यजीजनत् ॥ हितैरमात्यैरथ सा विज्ञप्तारिष्टसंस्थिता ॥ ४२ ॥ देवि राजार्थिनी त्वं तु त्यज दुष्टर्क्षजं सुतम् ॥ सा मंत्रिवाक्यमाकर्ण्य केवलं पतिदेवता ॥ ४३ ॥ अत्याक्षीत्तं तथा प्राप्तं तनयं नयकोविदा ॥ धात्रिकां तु समाहूय प्राहेदं सा नृपांगना ॥ ४४ ॥ पंचमुद्रे महापीठे विकटानाम मातृका ॥ तदग्रे स्थापयित्वामुं बालं धात्रि त्विदं वद ॥ ४५ ॥ गौरि दत्तः शिशुरसौ तवाग्रे विनिवेदितः ॥ राज्ञ्या पत्युः प्रियैषिण्या मंत्रिविज्ञप्तिनुन्नया ॥ ४६ ॥ सापि राज्ञ्युदितं श्रुत्वा बालं शिशुशशिप्रभम् ॥ विकटायाः पुरोभागे संस्थाप्य गृहमागता ॥ ४७ ॥ अथ सा विकटा देवी समाहूय च योगिनीः ॥ उवाच नयत क्षिप्रं शिशुं मातृगणाग्रतः ॥ ४८ ॥ तासामाज्ञां च कुरुत रक्षतामुं प्रयत्नतः ॥ योगिन्यो विकटावाक्यात्खेचर्यस्तत्क्षणेन तम् ॥ ४९ ॥ निन्युर्गगनमार्गेण ब्राह्म्याद्या यत्र मातरः ॥ प्रणम्य योगिनीवृन्दं न शिशुं सूर्यवर्चसम् ॥ १५० ॥ पुरो निधाय मातॄणां प्रोचुश्च विकटोदितम् ॥ ब्रह्माणी वैष्णवी रौद्री वाराही नारसिंहिका ॥ कौमारी चापि माहेन्द्री चामुण्डा चैव चंडिका ॥ ५१ ॥ दृष्ट्वा तं बालकं रम्यं विकटाप्रेषितं ततः ॥ पप्रच्छुर्युगपद्वाक्यं कस्ते बाल प्रमुख्यकः ॥ ५२ ॥ मातृभिश्चेति पृष्टस्तु यदा किंचिन्न वक्ति सः ॥ तदा च योगिनीचक्रं प्राह मातृगणस्त्विति ॥ ५३ ॥ राज्ययोग्यो भवत्येष महालक्षणलक्षितः ॥ पुनस्तत्रैव नेतव्यो योगिन्यस्त्वविलंबितम् ॥ ५४ ॥ पञ्चमुद्रा महादेवी तिष्ठते यत्र कामदा ॥ यस्याः संसेवनान्नृणां निर्वाणश्रीरदूरतः ॥ ५५ ॥ तत्पीठसेवनादस्य षोडशाब्दाकृतेः शिशोः ॥ सिद्धिर्भवित्री परमा रुद्रस्यानुग्रहात्परा ॥ ५६ ॥ एवं मातृगणात्सद्यो योगिनीभिः क्षणेन तु ॥ प्रापितो मातृवाक्येन पञ्चमुद्रांतिकं पुनः ॥ ५७ ॥ संप्राप्य तन्महापीठं स्वर्गलोकादिहागतः ॥ महाकालवने पुण्ये तताप विपुलं तपः ॥ ५८ ॥ तपसातीव तीव्रेण निश्चलेन्द्रियमानसः ॥ तस्य राजकुमारस्य प्रसन्नोऽभूदुमाधवः ॥ ५९ ॥ आविर्बभूव पुरतो लिंगरूपेण शंकरः ॥ उवाच च प्रसन्नोस्मि वरं ब्रूहि नृपांगज ॥ १६० ॥ सर्वज्योतिर्मयं लिंगं पुरतो दृष्टवान्स्वयम् ॥ सप्तपातालमुद्भिद्योत्थितं बृहदनुग्रहात् ॥ ६१ ॥ प्रणम्य दंडवद्भूमौ परितुष्टाव धूर्जटिम् ॥ सूक्तैर्जन्मांतराभ्यासात्सुहृष्टो रुद्रदैवतैः ॥ वरं च प्रार्थयांचक्रे परिहृष्टतनूरुहः ॥ ६२ ॥ देवदेव महादेव यदि देयो वरो मम ॥ तदत्र भवता स्थेयं भवतापहृता सदा ॥ ६३ ॥ अस्मिँल्लिंगे स्थितः शंभो कुरु भक्तसमीहितम् ॥ विना मुद्रादिकरणं मंत्रेणापि विना विभो ॥ ॥ ६४ ॥ अस्य लिंगस्य ये भक्ता मनोवाक्कायकर्मभिः ॥ सदैवानुग्रहस्तेषु कर्त्तव्यो वर एष मे ॥ ६५ ॥ इति तद्वरमाकर्ण्य लिंगरूपोऽवदत्प्रभुः ॥ एवमस्तु यदुक्तं ते वीर वैष्णवसूनुना ६६ ॥ वीर वीरेश्वरंनाम लिंगमेतत्त्वदाख्यया ॥ अवंत्यां संप्रदास्यामि भक्तानां चिंतितान्यहो ॥ ६७ ॥ अत्र दत्तं हुतं जप्तं स्तुतमर्चितमेव च ॥ तदक्षयं भवेदत्र भक्तानां नात्र संशयः ॥ ६८ ॥ त्वं तु राज्यं परं प्राप्य सर्वभूपालदुर्लभम् ॥ भुक्त्वा भोगांश्च विपुलानंते सिद्धिमवाप्स्यसि ॥ ६९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ वीरेश्वरस्य देवस्य नूपुरेशमथो शृणु ॥ १७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये वीरेश्वरमाहात्म्यवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥ ॥ श्रीदेवदेव उवाच ॥ ॥ सप्ताधिकं विजानीहि नूपुरेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण प्राप्यंते सर्वसिद्धयः ॥ ॥ १ ॥ पुरा राथन्तरे कल्पे नूपुरोनाम वै गणः ॥ रुद्रभक्तिपरो नित्यं पंचमुद्राविभूषितः ॥ २ ॥ स एकदा कुबेरस्य सभायां प्राप्य संस्थितः ॥ द्रष्टुं महोत्सवं तत्र अप्सरोभिः कृतं तदा ॥ ३ ॥ ननृतुश्चापरास्तत्र ह्युर्वशी योषितां वरा ॥ रंभा तिलोत्तमा मेना ननृतुर्हर्षसंयुताः ॥ ४ ॥ तासां नृत्यं तदा वीक्ष्य नूपुरो गणपस्तदा ॥ कामबाणार्दितो नूनं तासां मध्ये ननर्त्त ह ॥ ५ ॥ नृत्यमानस्ततो हृष्टः पुष्पगुच्छेन वक्षसि ॥ उर्वशीं ताडयामास कामबाणप्रपीडितः ॥ ६ ॥ उर्वशी तु ततः क्रुद्धा पुष्पगुच्छेन ताडिता ॥ जगाम शरणं देवं धनदं सर्वकामदम् ॥ ७ ॥ उवाच धनदस्तत्र क्रोधेनाकुलमानसः ॥ ८ ॥ यस्मात्त्वया रंगभंगः कृतः कामार्दितेन वै ॥ तस्मात्त्वं मानुषे लोके पतस्व पापपूरुष ॥ ९ ॥ कुबेरस्य च शापात्तु जगाम धरणीतलम् ॥ विललाप सुदुःखार्त्तः किं कृतं पापिना मया ॥ १० ॥ विलप्य सुभृशं सोऽथ शरणं परमेश्वरीम् ॥ जगाम मनसा देवि त्वां स वै वरदायिनीम् ॥ ११ ॥ त्वं तुष्टा तु तदा जाता प्रत्यक्षा परमेश्वरी ॥ उवाच गणपं प्रीत्या भक्तिनम्रं तदा भुवि ॥ १२ ॥ गच्छ पुत्र ममादेशान्महाकालवनं शुभम् ॥ प्राची सरस्वती तत्र वाप्याकारा च विद्यते ॥ १३ ॥ तस्या दक्षिणतो वत्स विद्यते लिंगमुत्तमम् ॥ वाप्यां स्नात्वा च तल्लिंगं समाराधय भक्तितः ॥१४॥ सा प्राची स च देवेशस्त्वन्नाम्ना ख्यातिमेष्यति ॥ इत्युक्तो नूपुरो देवि महाकालवनं गतः ॥ १५ ॥ त्वया च प्रेरितो देवि कीर्त्त्यर्थं तत्र गम्यताम् ॥ इत्युक्तो नूपुरो दिव्यो गणो हृष्टः कृतांजलिः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ १६ ॥ महाकालवनं रम्यं देवगंधर्वसेवितम् ॥ ददर्श तत्र तल्लिंगं सुरगन्धर्वसेवितम् ॥ १७ ॥ प्राची सरस्वती तत्र वाप्याकारा च संस्थिता ॥ तस्यां स्नात्वा ततो देवं पूजयामास नूपुरः ॥ १८ ॥ ततो देवः प्रसन्नात्मा प्रत्युवाचाथ नूपुरम् ॥ साधु नूपुर भद्रं ते स्वस्ति प्राप्नुहि सर्वदा ॥ ॥ १९ ॥ भविता वल्लभो देव्याः पार्वत्याः शंकरस्य च ॥ इत्युक्तस्तेन लिंगेन तत्क्षणान्नूपुरः प्रिये ॥ २० ॥ उदितादित्यसंकाशो विभावसुसम द्युतिः ॥ तेजोराशिश्च संजातो दुर्निरीक्ष्यस्त्रिविष्टपैः ॥ २१ ॥ प्रभावं तादृशं दृष्ट्वा देवैरुक्तं वरानने ॥ अहो लिंगस्य माहात्म्यं दृश्यतेत्यद्भुतं भुवि ॥ २२ ॥ ज्ञाता च कामिकी सिद्धिर्नूपुरेण च दर्शनात् ॥ अतो देवोऽभ्रभृति विख्यातो भूतलेऽभवत् ॥ २३ ॥ सर्वकामप्रदो नित्यं नूपुरेश्वर नामतः ॥ दर्शनं ये करिष्यंति स्नात्वा वाप्यां समाहिताः ॥ २४ ॥ नूपुरेश्वररुद्रस्य ते यांति परमं पदम् ॥ ये च पूजां करिष्यंति भक्तिभावसमन्विताः ॥ वसंति मुदिताः सर्वे यावदाभूतसंप्लवम् ॥ २५ ॥ जन्ममृत्युजरारोगदुःखानि विविधानि च ॥ प्रयांति विलयं सद्यः पूजिते नूपुरेश्वरे ॥ २६ ॥ वापी गंगासमा सा तु स्वयमेव शुभेक्षणे ॥ संगमस्तु वितस्तायां यमुनायास्तु सुव्रते ॥ प्रयागमेतज्ज्ञानीहि भूधरेंद्रांगसंभवे ॥ २७ ॥ सोमतीर्थं तदा देवि सर्वपातकनाशनम् ॥ तत्र स्नात्वा पुनान्देवि वाजपेयफलं लभेत् ॥ २८ ॥ कृष्णाष्टम्यां च यः स्नात्वा पूजयेन्नूपुरेश्वरम् ॥ कुलं वै तारयेत्सोपि मातृकं पितृकं शतम् ॥ २९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ नूपुरेश्वरदेवस्य श्रूयतामभयेश्वरम् ॥ ३० ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये नूपुरेश्वरमाहात्म्यवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ अष्टाधिकं विजानीहि चत्वारिंशत्तमं प्रिये ॥ यस्य दर्शनमात्रेण नाभवेद्भयं भवेत् ॥ १ ॥ कल्पावसाने प्रथमे पाद्मे पद्मनिभेक्षणे ॥ नष्टचंद्रार्कनक्षत्रे नष्टभूमिनिविष्टपे ॥ ब्रह्मा वै चिंतयामास कथं सृष्टिर्भवेदिति ॥ २ ॥ इत्याकुलितरूपस्य तस्य नेत्राद्व्यात्ततः ॥ पपाताश्रुकणः स्थूलो नेत्राद्ब्रह्मात्मनः ॥ ३ ॥ तस्मादश्रुकणाज्जातो हारयोनाम दानवः ॥ तीक्ष्णदंष्ट्रो महाकायो भिन्नांजनचयप्रभः ॥ ४ ॥ दक्षिणाग्रयनाज्जातः कालकेलीतिविश्रुतः ॥ कृष्णदेहोऽतिदीर्घश्च महादंष्ट्रोर्ध्वरोमकः ॥ ५ ॥ कराल वदनो दुष्टो यमरूपो दुरासदः ॥ कृष्णांजनचयाकारः पाशपाणिर्विभीषणः ॥ ६ ॥ तौ तु दैत्यौ समागत्य कृतसंकेतकौ तदा ॥ ब्रह्माणं हंतुमिच्छंतौ प्रमत्तावभिधावितौ ॥ ७ ॥ ततो ब्रह्मा भयाविष्टः काद्दिशीकश्चचार ह ॥ ततो जलेऽतिगंभीरे सोऽपश्यदमिततेजसम् ॥ ८ ॥ पुरुषं पीतवसनं शंखचक्रगदाधरम् ॥ तमालोक्य ततो ब्रह्मा संत्रासं परमं गतः ॥ उवाच को भवाञ्छेते निःशेषेस्मिञ्चराचरे ॥ ९ ॥ तमुवाच ततो विष्णुरहमेवं जगत्पिता ॥ लोककृल्लोकसंहर्त्ता लोकस्थितिविधायकः ॥ १० ॥ इत्युक्तः पद्मजस्तेन कृष्णेनाक्लिष्टकर्मणा ॥ प्रत्युवाच तदा ब्रह्मा रुष्टाहं भुवनत्रये ॥ ११ ॥ मया सृष्टं जगत्सर्वं सदेवासुरमानुषम् ॥ अत्रांतरे च तौ दैत्यावायातौ बलदर्पितौ ॥ १२ ॥ भोक्तुकामौ क्षुधा विष्टौ दृष्ट्वा ब्रह्मात्रवीदिदम् ॥ कृष्णं कमलपत्राक्षं कंपिताधरपल्लवः ॥ १३ ॥ यदि त्वं कारणं किंचिदस्य लोकस्य कथ्यसे ॥ तदा तावसुरौ भीमौ हंतुमर्हसि सांप्रतम् ॥ १४ ॥ तच्छ्रुत्वा तु तदा विष्णुर्ज्ञात्वा दुःखं परस्परम् ॥ क्षणं विश्रम्यतां तावत्पश्चाद्धंद्धं भविष्यति ॥ १५ ॥ इत्युक्त्वा कृतसंकेतौ तौ दैत्यौ बलगर्वितौ ॥ ब्रह्मनारायणौ हंतुं धावितौ तु त्वरान्वितौ ॥ १६ ॥ ब्रह्मविष्णू तदा दृष्ट्वा दानवौ दुर्जयौ रणे ॥ संत्रासं जग्मतुस्तत्र स्वेदकंपपरिप्लुतौ ॥ १७ ॥ अन्योन्यमूचतुस्तौ हि देशकालोचितं वचः ॥ कर्तव्यं किं नु वा कार्यं मम वा तव वा भवेत् ॥ १८ ॥ उपस्थितं भयं घोरं तत्र किं कार्यमस्ति नौ ॥ आसन्नं मरणं दृष्ट्वा ब्रह्मा प्रोवाच केशवम् ॥ १९ ॥ गम्यतां कृष्ण शीघ्रं वै महाकालवनोत्तमम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं तत्र रक्षा भविष्यति ॥ अहं तत्र गमिष्यामि व्रज त्वं तत्र केशव ॥ २० ॥ इत्युक्तो ब्रह्मणा कृष्णो जगाम सह तेन वै ॥ महाकालवनं प्राप्तौ न च दृष्टो महेश्वरः ॥ तत्रापि दशसाहस्रं कालः पर्यटतांस्तयोः ॥ २१ ॥ ततो ज्वालामयं दिव्यं नूपुरेश्वरदक्षिणे ॥ दृष्ट्वा तल्लिंगमाहात्म्यं ब्रह्मविष्णू ततः स्वयम् ॥ प्रार्थयांचक्रतुर्देवमभयं देहि नौ प्रभो ॥ २२ ॥ शरणं भव देवेश दानवाभ्यां प्रपीडितौ ॥ अभयं च ततो दत्तं तेन लिंगेन पार्वति ॥ २३ ॥ शुश्राव गर्जितं ताभ्यां दानवाभ्यां पितामहः ॥ प्रत्युवाच भयत्रस्तो लिंगं कंपितकं घरः ॥ २४ ॥ स एष मृत्युरस्माकमेति शीघ्रं भयावहः ॥ दीयतामभयं देव कृष्णेनोक्तं तदा प्रिये ॥ २५ ॥ भयार्त्तवचनं श्रुत्वा ब्रह्मणः केशवस्य च ॥ तौ देवौ तेन लिंगेन जठरे संनिवेशितौ ॥ २६ ॥ दृष्ट्वं ताभ्यां जगत्सर्वं सार्कचंद्रमहीधरम् ॥ ससिद्धगंधर्वकुलं शैलताललताकुलम् ॥ २७ ॥ समुद्रपीठसंयुक्तं नानावर्णाश्रमोज्वलम् ॥ सपातालतलं देवि सभुजंगनहीरुहम् ॥ २८ ॥ ससप्तलोकविन्यासं सदेवासुरराक्षसम् ॥ पुनस्तौ निःसृतौ तस्माज्जठराद्विस्मयान्वितौ ॥ २९ ॥ दृष्ट्वौ भस्मीकृतौ दैत्यौ तेन लिंगेन पार्वति ॥ तुष्टुवाते परं लिंगं भक्त्या परमया युतौ ॥ ३० ॥ लिंगेनोक्तं प्रसन्नेन भवद्भ्यां किं ददाम्यहम् ॥ ममामोघमिदं देवौ दर्शनं चातिदुर्लभम् ॥ ३१ ॥ ततो ब्रह्मा च विष्णुश्च वरयामासतुर्वरम् ॥ यदि देयो वरोऽस्माकं नृणामभयदो भव ॥ ३२ ॥ ये चं त्वां पूजयिष्यंति यक्ष्यंति च समाहिताः ॥ संस्मरिष्यंति सततं तेषामभयदो भव ॥ ३३ ॥ अभयेश्वरसंज्ञस्तु ख्यातो भुवि भविष्यसि ॥ ते कृतार्था भविष्यंति ये त्वां पश्यंति भक्तितः ॥ ३४ ॥ भविष्यति भयं नैव संसारपतनं तथा ॥ धनपुत्रकलत्राणां वियोगो न भविष्यति ॥ ३५ ॥ दुःखिता दुर्भगा नारी दर्शनं या करिष्यति ॥ सौभाग्यसुखसंयुक्ता भविष्यति न संशयः ॥ वीरं तु गुर्विणी कन्या पतिमाप्स्यति शोभनम् ॥ ३६ ॥ यंयं काममभिध्याय ये त्वां पश्यंति मानवाः ॥ तंतं मनोरथं सर्वं गमिष्यंति न संशयः ॥ ३७ ॥ एवं भविष्यतीत्युक्त्वा लिंगेन परमेश्वरि ॥ विसर्जितौ गतौ देवौ ब्रह्मविष्णू स्वमालयम् ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अभयेश्वर देवस्य श्रूयतां पृथुकेश्वरम् ॥ ३९ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्येऽभयेश्वरमाहात्म्यवर्णनंनामाष्टाचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु पंचाशदेकोनं देवेशं पृथुकेश्वरम् ॥ यस्य दर्शनमात्रेण सार्वभौमो नरो भवेत् ॥ १ ॥ वंशे स्वायंभुवे देवि ह्यंगो राजा बभूव ह ॥ मृत्योस्तु दुहिता तेन परिणीता सुदुर्मुखा ॥ २ ॥ वेननामा सुतो जातो नास्तिको धर्मदूषकः ॥ देवब्रह्मस्वहारी च परभार्यापहारकः ॥ ३ ॥ स च शप्तो द्विजेर्देवि तत्क्षणान्निधनं गतः ॥ तदूरोर्मथ्यमानात्तु निषादस्तुल्यजातयः ॥ ४ ॥ शरीरे मातृदोषेण कृष्णांजनचयप्रभाः ॥ पितुरंशात्समुत्पन्नो धार्मिको द्विजसत्तमैः ॥ मथितादक्षिणाद्धस्तात्पृथुः प्रथितविक्रमः ॥ ५ ॥ स विप्ररभिषिक्तश्च तपः कृत्वा सुदुष्करम् ॥ विष्णोर्वरेण महता प्रभुत्वमगमन्नृपः ॥ ६ ॥ स च स्वाध्यायरहितो निर्वपद्भारनिर्द्धनाः ॥ हाहाभूताः प्रजा दृष्ट्वा ततोऽभूद्बुभुक्षितो नृपः ॥ ७ ॥ स दोग्धुमैच्छद्वैलोक्यं सदेवासुरमानुषम् ॥ ८ ॥ एतस्मिन्नंतरे प्राप्तो नारदो मुनिसत्तमः ॥ कोपाविष्टं पृथुं दृष्ट्वा वाक्यं चेदमुवाच ह ॥ ९ ॥ लोकत्रयविनाशाय मा कोपं कुरु भूपते ॥ पृथ्व्यानया प्रासितानि सस्यानि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विविधानि च ॥ गिलितानि च अन्नानि विद्धचैवैतन्मतं मम ॥ १० ॥ नारदस्य च वाक्येन क्रोधं चक्रे पृथुस्तदा ॥ निर्दग्धुमैच्छत्पृथिवीं सशैलवनकाननाम् ॥ ११ ॥ मुमोच शस्त्रमाग्नेयं तेन सा धरणी तदा ॥ दह्यमाना भयार्त्ता च गौर्भूत्वा पृथुमभ्यगात् ॥ १२ ॥ सा वध्यमाना तेनैव नृपं वचनमब्रवीत् ॥ शरणं समनुप्राप्ता गौरहं नृपसत्तम ॥ १३ ॥ गौरवध्या महीपाल वत्सं कृत्वा च दुग्धि माम् ॥ १४ ॥ तस्यास्तद्वचनं श्रुत्वा दुदोह नृपसत्तमः ॥ भास्वद्रत्नानि सस्यानि कृत्वा वत्सं हिमालयम् ॥१५॥ जाताः प्रजाश्च सुमुखाः प्रवृत्तश्च महोत्सवः ॥ प्रवृत्ता यागदानादि क्रिया मंगलपूर्विकाः ॥ १६ ॥ राजाथ चिंतयामास मया पापमिदं कृतम् ॥ अवध्याश्च स्त्रियः प्रोक्ता गौरवध्या द्विजस्तथा ॥ १७ ॥ स्त्रीरूपधारिणी पृथ्वी मोहादेषा मया हता ॥ गोवधे च कृता बुद्धिरहो पापपरंपरा॥तस्माद्वह्निं प्रवेक्ष्यामि चितां कृत्वा न संशयः ॥ १८ ॥ एवं चिंतयतस्तस्य पृथोरमिततेजसः ॥ आजगाम पुनस्तत्र नारदो भगवानृषिः ॥ १९ ॥ दृष्ट्वा तथाविधं दीनं चिंतयानं पृथुं प्रिये ॥ उवाच नारदो धीमान्किमेतदिति पार्थिव ॥ २० ॥ ततः स कथयामास मया पापमिदं कृतम्॥ अवध्या स्त्री हता विप्र कृता बुद्धिश्च गोवधे ॥ २१ ॥ काँल्लोकान्नु गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ मरिष्यामि न संदेहो ब्रह्महा पापपूरुषः ॥ २२ ॥ अथ चेष्टोपदेशेन दुःखादुद्धर मां द्विज ॥ तस्य तद्वचनं श्रुत्वा कथयामास नारदः ॥ महापापप्रशमनं लिंगमाहात्म्यमुत्तमम् ॥ २३ ॥ महाकालवने लिंगमभयेश्वरपश्चिमे ॥ महापापक्षयकरं विद्यते तत्र भूपते ॥ गच्छ त्वं सहसा राजंस्तत्र पूतो भविष्यसि ॥ २४ ॥ नारदस्य वचः श्रुत्वा पृथुस्तत्र जगाम सः ॥ दृष्ट्वा लिंगं च वै रम्यं विपापस्तत्क्षणादभूत् ॥ ॥ २५ ॥ द्वादशादित्यसंकाशो बभूव पृथिवीपतिः ॥ २६ ॥ ततोंऽतरिक्षगैर्देवि कृतं नाम वरानने ॥ पृथुना पूजितो यस्माद्भविष्यति महीतले ॥ अद्यप्रभृति विख्यातो देवोऽयं पृथुकेश्वरः ॥ २७ ॥ ये च द्रक्ष्यंति देवेशं पृथुकेश्वरमीश्वरम् ॥ ते सर्वकामसंपूर्णा भविष्यंति महीतले ॥ २८ ॥ अज्ञानाज्ज्ञानतो वापि यत्पापं जायते नृणाम् ॥ तत्पापं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ २९ ॥ वाचिकं मानसं वापि कायिकं गुह्यसंभवम् ॥ प्रकाशं वा कृतं पापं प्रसंगादपि यत्कृतम् ॥ तत्सर्वं यास्यति क्षिप्रं पृथुकेश्वरदर्शनात् ॥ ३० ॥ पूजयिष्यंति ये भक्त्या देवं वै पृथुकेश्वरम् ॥ राज्यं प्राप्स्यंति ते सम्यङ्नृलोके च त्रिविष्टपे ॥ ३१ ॥ भुक्त्वा राज्यं मनुष्याणां देवानां च महीतले ॥ यास्यंति परमं स्थानं ब्रह्मणः परमेष्ठिनः ॥ ३२ ॥ इत्युक्त्वा देवसंघैश्च पूजितः पृथुकेश्वरः ॥ पृथुः शशास पृथिवीं सपत्तनां सपर्वताम् ॥ ३३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पृथुकेश्वरदेवस्य शृणु वै स्थावरेश्वरम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिर्लिंगमाहात्म्ये पृथुकेश्वरमाहात्म्यवर्णनंनामैकोनपंचाशत्तमोऽध्यायः॥ ४९॥ ॥ ७ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणु देवि प्रयत्नेन पंचाशत्तममीश्वरम् ॥ यस्य दर्शनमात्रेण ग्रहबाधा न जायते ॥ १ ॥ संज्ञानाम स्वेर्भार्या सा सुता विश्वकर्मणः ॥ भर्तुस्तेजोऽसहंत्याथ कदाचिच्चैव संज्ञया ॥ छायामयी चात्मनस्तु निर्मिता तरसा तया ॥ २ ॥ सा प्रोक्ता सादरेणैव स्थीयतां सूर्यसंनिधौ ॥ पृष्टयापि न वाच्यं ते मदीयं गमनं स्वेः ॥ ३ ॥ इत्युक्त्वा सा तदा संज्ञा जगाम भवनं पितुः ॥ संज्ञेयमिति मन्वानो द्वितीयायां दिवस्पतिः ॥ जनयामास तनयं नामतो यः शनैश्चरः ॥ ४ ॥ तस्मिञ्जाते भयं जग्मुः सदेवासुरमानुषाः ॥ त्रैलोक्यं जातमात्रेण आक्रांतं सचराचरम् ॥ ५ ॥ इन्द्रोऽपि भयसंत्रस्तो ब्रह्माणं शरणं गतः ॥ सूर्यपुत्रस्य वृत्तांतं कथयामास गद्गदम् ॥ ६ ॥ भिन्नं तु रोहिणीचक्रं व्याप्तं नक्षत्रमंडलम् ॥ जातमात्रेण चाक्रांतं त्रैलोक्यं रविसूनुना ॥ ७ ॥ वासवस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ 'आहूय सहसा सूर्यं वचनं चेदमब्रवीत् ॥ ८ ॥ मर्यादा क्रियतां भानो वार्यतां पुत्र औरसः ॥ आक्रांतं तेजसा तेन त्रैलोक्यं भूर्भुवादिकम् ॥ ९ ॥ ब्रह्मणो वचनं श्रुत्वा रविणा प्रोक्तमीदृशः ॥ असाध्योऽयं मम सुतो वार्यतां स्वयमेव तम् ॥ १० ॥ पश्य मे चरणौ दग्धौ दृष्टिमात्रेण लीलया ॥ ब्रह्मापि भयसंत्रस्तो जगाम मनसा हरिम् ॥११॥ सूर्यस्य वचनं श्रुत्वा हरिः प्राप्तस्तु तत्क्षणात् ॥ ब्रह्मणो वचनं श्रुत्वा भीतः कृष्णोऽब्रवीदिदम् ॥ १२ ॥ गम्यतां तत्र यत्रास्ते देवदेवो महेश्वरः ॥ कृष्णस्य वचनात्सर्वे ममांतिकमुपागताः ॥ १३ ॥ वृत्तांतः कथितः सर्वो रविपुत्रस्य पार्वति ॥ मया स्मृतस्तु संप्राप्तः सूर्यपुत्रस्तु तत्क्षणात् ॥ १४ ॥ अधोदृष्टिर्मया दृष्टो वक्रांगो रूपतोऽसितः ॥ स्थैर्यं कृत्वा नमस्कृत्य विज्ञप्तोऽहं शनैःशनैः ॥ १५ ॥ किमर्थं वै स्मृतो देव देह्याज्ञां मम शंकर ॥ आदेशे तव तिष्ठामि किं करोमि प्रशाधि माम् ॥ ॥ १६ ॥ इत्युक्तोऽहं तदा तेन रविपुत्रेण पार्वति ॥ मया स वारितोऽत्यर्थं मा पीडय जगत्त्रयम् ॥ १७ ॥ तेनोक्तं देहि मे स्थानं पानमाहारमेव च ॥ मया दत्तं विशालाक्षि पूजार्थं स्थानमुत्तमम् ॥ १८ ॥ मेषादिराशिसंस्थः संस्त्रिंशन्मासान्प्रपीडय ॥ मानुषान्क्रमशो वत्स तत्र तृप्तिमवाप्स्यसि ॥ १९ ॥ अष्टमश्च चतुर्थश्च द्वितीयो जन्मसंस्थितः ॥ द्वादशराशिसंस्थोऽपि विरुद्धो भव सर्वदा ॥ २० ॥ एकादशो वा षष्ठो वा तृतीयस्थानगोथवा ॥ भव भव्यतरो नृणामतः पूजा भविष्यति ॥ २१ ॥ पंचमो नवमश्चैव उदासीनस्तु सप्तमः ॥ भव राशिगतो नित्यं मानुषे कर्मभिर्युते ॥ २२ ॥ पूजां प्राप्स्यसि चात्यर्थं ग्रहाणामधिकं सदा ॥ गतिः स्थिरा भवित्री ते वरः श्रेष्ठोभिधीयते ॥ २३ ॥ अतस्ते स्थावरं नाम भविष्यति महीतले ॥ शनैश्चरस्त्वं राशिस्थो ग्रहाणामधिको यतः ॥ २४ ॥ अतः शनैश्चरोनाम भविष्यसि सदा भुवि ॥ गजगण्डनिभाकारो मम कण्ठसमोपि च ॥ २५ ॥ वर्णतो ह्यसितोनाम भविष्यसि महीतले ॥ ग्रहमध्ये ह्यधोदृष्टिर्गतिमंदा भविष्यति ॥ तुष्टो ददासि राज्यं च रुष्टो वै हरसि क्षणात् ॥२६॥ देवासुरमनुष्याश्च सिद्धविद्याधरोरगाः ॥ त्वत्क्रूरदृष्टिनिहता नाशं यास्यंति नान्यथा ॥ २७ ॥ तव प्रसादात्प्राप्स्यंति मनोऽभीष्टं सुदुर्लभम् ॥ अन्यच्च ते प्रदास्यामि स्थानं गुह्यं मनोहरम् ॥ २८ ॥ मनोभीष्टकरं पुण्यं देवदानवदुर्लभम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं महाकालवनं परम् ॥ २९ ॥ तत्र गच्छ ममादेशात्पृथुकेश्वरपश्चिमे ॥ विद्यते तत्र यल्लिंगं तत्ते नाम्ना भविष्यति ॥ ३० ॥ कीर्त्तिरेषा त्वदीयापि त्रैलोक्ये भविता ध्रुवम् ॥ ३१ ॥ इत्युक्तः स्थावरो देवि ममाज्ञापालकस्तदा ॥ जगाम त्वरितो रम्यं महाकालवनं शुभम् ॥ ३२ ॥ दृष्ट्वा तत्रैव तल्लिंगं स्थानं लब्धं सुशोभनम् ॥ तल्लिंगं भुवने ख्यातं नामतः स्थावरेश्वरम् ॥ ३३ ॥ शनिनोक्तं तदा देवि येऽत्र द्रक्ष्यंति भक्तितः ॥ मया प्रपूजितं लिंगं विख्यातं स्थावरेश्वरम् ॥ तेषां पीडा मदीया तु न भविष्यति कर्हिचित् ॥ ३४ ॥ मदीये च दिने यो वै नियमेन प्रपश्यति ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ ३५ ॥ धरिष्यामि सततं पीडामन्यग्रहकृतामपि ॥ मदीयं च भयं तस्य स्वप्नेऽपि न भविष्यति ॥ ३६ ॥ न ग्रहा न पिशाचाश्च न यक्षा न च राक्षसाः ॥ विघ्नं कुर्वंति तस्यापि मयि तुष्टे न संशयः ॥ ३७ ॥ संक्रांतौ शनिवारे च व्यतीपातेऽयने तथा ॥ ये पश्यंति नरा भक्त्या लिंगं वै स्थावरेश्वरम् ॥ भविष्यत्यक्षयस्तेषां स्थिरो वासस्त्रिविष्टपे ॥ ३८ ॥ नियमेन प्रपश्यंति मम वारेऽत्र ये नराः ॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ ३९ ॥ भविष्यति न दारिद्र्यं न चेष्टवियोजनम् ॥ दास्यामि पुत्रकामस्य फलं पुत्रकृतं सदा ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ४० ॥ अधनस्य धनं चैव भयार्तस्याभयं तथा ॥ स्वर्गं वै स्वर्गकामस्य प्रयच्छामि च वांछितम् ॥ ४१ ॥ इत्युक्त्वा पूजयामास भूयो लिंगं शनैश्चरः ॥ पूजयित्वा शुभैः पुष्पैर्भक्त्या तत्रैव संस्थितः ॥ ४२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्थावरेश्वरदेवस्य शूलेश्वरमथो शृणु ॥ ४३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये स्थावरेश्वरमाहात्म्य वर्णनंनाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ एकाधिकं विजानीहि पंचाशत्तममीश्वरम् ॥ देवं शूलेश्वरं देवि सर्व व्याधिविनाशनम् ॥ १ ॥ आद्ये कल्पे प्रवृत्ते च राज्यहेतोर्वरानने ॥ देवानां दानवानां च युद्धमासीत्सुदारुणम् ॥ दैत्यानामीश्वरे जंभे देवानां च शचीपतौ ॥ २ ॥ ततो देवाः पराभूता दैत्या विजयिनोऽभवन् ॥ अंधको मंदरं प्राप्तो दूतं ये प्राहिणोत्तदा ॥ ३ ॥ स दूतो मामुवाचेदं सुगर्वो दुष्टमानसः ॥ अन्धकेनाहमादिष्टः शृणु शंकर मद्वचः ॥ ४ ॥ गौरीं मे देहि पत्न्यर्थं मंदरस्त्यज्यतामयम् ॥ एवं कृते कृतार्थस्त्वमन्यथा नास्ति ते गतिः ॥ ५ ॥ उक्तोऽहं तेन दूतेन त्वया सह महागिरौ ॥ स्मितानंनः क्षणं भूत्वा मया प्रोक्तमिदं वचः ॥ ६ ॥ गच्छ दूत ममादेशादंधकं ब्रूहि सत्वरम् ॥ इहाभ्येत्याहवं कृत्वा जित्वेमां सुन्दरीं नय ॥ ७ ॥ इत्युक्तः प्रययौ दूतस्तेनाख्यातं वचो मम ॥ अन्धकोऽपि तदा दैत्यः समगर्थी तु मन्दरम् ॥ समायातः सहामात्यो बलेन चतुरंगिणा ॥ ८ ॥ मया सह ततस्तस्य घोरं बुद्धमभूच्चिरम् ॥ अन्धकस्य रथो घोरश्छिन्नो भिन्नः समं ततः ॥ ९ ॥ ततः क्रुद्धोंऽधको देवि रथात्तस्मादवप्लुतः ॥ मद्वधं बलवान्बुद्ध्वा मया सह बलोत्कटः ॥ युयुधे स महादैत्यः शूलेन ताडितो मया ॥ ॥ १० ॥ मया भृतोन्तरिक्षे स शूलप्रोतो महासुरः ॥ शूलप्रोतोऽथ वै दुष्टस्तावत्स भ्रामितो मया ॥ ११ ॥ सुस्राव तस्य गात्रेभ्यः शोणितौघ स्ततो महान् ॥ बिन्दोर्बिन्दोस्तु रक्तस्य तत्तुल्या दानवास्तथा ॥ १२ ॥ संभूताः कोटिशो देवि तेरहं पुनरर्दितः ॥ किं कर्त्तव्यमिति ध्यायन्स्थितोऽहं तत्र भामिनि ॥ १३ ॥ मया चोत्पादिता दुर्गा रक्तदंता सुभीषणा ॥ अन्धकस्य तदा पीतं रक्तं बहुविधं तया ॥ १४ ॥ तस्मिन्पीते वनो रक्ते नोत्तस्थुर्देवि चापरे ॥ पूर्वोत्थितास्तयैवाशु निहता दानवाधिपाः ॥ तेन शूलवरेणैव तत्क्षणान्निधनं गताः ॥ १५ ॥ स मामुवाच हृष्टात्मा कृतां जलिपुटोंऽधकः ॥ त्वयि भक्तिः सदा मेस्तु दुर्लभं तव दर्शनम् ॥ १६ ॥ स्वामिना निहतश्चाहं कोऽन्यो धन्यतरो हि मत् ॥ त्वच्छूलेन विनि र्भिन्नो ह्यन्तरिक्षे ततोऽप्यहम् ॥ १७ ॥ संकल्पाक्षेपविक्षेपं कल्पकार्यप्रवर्त्तकम् ॥ सहस्रवक्त्रशिरसं त्वामहं शरणं व्रजे ॥ १८ ॥ गिरींद्रतनयानाथं गिरींद्रशिखरालयम् ॥ महालयकृतावासं त्वामहं शरणं व्रजे ॥ १९ ॥ एवं स्तुतोऽहं दैत्येन शूलप्रोतेन सुन्दरि ॥ ततो मे करुणा जाता कृतांधको गणस्तदा ॥२०॥ स च शूलवरो देवि मया प्रोक्तो मुदा तदा ॥ एहि शूल हतो दैत्यस्त्वया दुष्टांधको मृधे ॥२१॥ परितुष्टः प्रयच्छामि परमं स्थान मुत्तमम्॥न देवैर्न च गन्धर्वैर्नापि तत्परमर्षिभिः॥२२॥संप्राप्यं मामनाराध्य तथा विध्वस्तकल्मषैः॥मामुवाच ततः शूलः प्रणम्यानतकन्धरः ॥२३॥ यदि प्रसन्नो भगवन्करुणा मयि ते यदि ॥ कथयस्व परं स्थानं मनो मे यत्र शुद्धयति ॥ दुष्टसंपर्कसंजातमन्यत्पातकमात्मनः ॥ २४ ॥ ततो मया समादिष्टः करुणाश्लिष्टचेतसा ॥ महाकालवनं रम्यमतिपुण्यफलप्रदम् ॥ २५ ॥ तत्रास्मत्प्राप्तिदं लिंगं लोकानुग्रहकारकम् ॥ पृथुकेश्वरपूर्वेण तदाराधय यत्नतः ॥ २६ ॥ मदीयं वचनं श्रुत्वा स जगाम त्वरान्वितः ॥ ददर्श तत्र तल्लिंगमनेकफलदायकम् ॥ २७ ॥ लिंगेन च पुनर्दृष्टः शूलः शंकरवल्लभः ॥ संभूतोऽनेकवक्त्रस्तु हर्षाद्विस्मितमानसः ॥ २८ ॥ स्नेहात्संश्लेषितोऽत्यर्थं पृष्टस्तु कुशलं पुनः ॥ कथितं तेन शूलेन दुष्टांधक वधं तदा ॥ २९ ॥ प्रभुणा प्रेरितोऽत्यर्थं शुद्ध्यर्थं भवतोंतिके ॥ त्वद्दर्शनेन पूतोऽहं यास्यामि शिवसंनिधौ ॥ अद्यप्रभृति भूलोके मन्नाम्ना ख्या तिमेष्यसि ॥ ३० ॥ ततो भविष्यत्यधिकं दर्शनात्ते वृणोम्यहम् ॥ किं तीर्थैर्विविधैः स्नातैः किं दानैर्विविधैः कृतैः ॥ ३१ ॥ ते प्राप्स्यंति फलं सर्वं ये त्वां द्रक्ष्यंति भक्तितः ॥ ३२ ॥ यः करिष्यति ते पूजां भक्तियुक्तोऽपि मानवः ॥ अष्टम्यां वा चतुर्दश्यां दिने भौमस्य भक्तितः ॥ ॥ ३३ ॥ विमानवरमास्थाय कामगं रत्नभूषितम् ॥ उदितादित्यसंकाशं स मुदा विचरिष्यति ॥ ३४ ॥ त्वन्नाम ये ग्रहीष्यंति सर्वदा भयपीडिताः ॥ व्याधिभिः पीडिता नित्यं दुःखैर्वा क्लेशिता भृशम् ॥ न भविष्यति भीस्तेषां घोरसंसारसागरे ॥ ३५ ॥ ये त्वां द्रक्ष्यंति पुरुषा भावहीनाः प्रसंगतः ॥ न पतिष्यंति संसारे नरके चातिदारुणे ॥ ३६ ॥ इत्युक्तं तेन शूलेन लिंगमाश्लिष्य यत्नतः ॥ ३७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ शूलेश्वरस्य देवस्य अथोंकारेश्वरं शृणु ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये शूलेश्वरमाहात्म्यवर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ॥ ॥ श्रीविश्वेश्वर उवाच ॥ ॥ द्व्यधिकं देवि जानीहि पंचाशत्तममीश्वरम् ॥ ओंकारेश्वर इत्याख्या यस्यास्ति भुवनत्रये ॥ १ ॥ प्राकृते कल्पसंज्ञे तु प्रथमे प्रथमं मया ॥ वक्त्रादुत्पादितो देवि पुरुषः कपिलाकृतिः ॥ २ ॥ ततः स पुरुषो दिव्यः किं करोमीत्युपस्थितः ॥ विभजात्मानमित्युक्तो मयांतर्द्धानगोऽभवत् ॥ ३ ॥ निर्वाणस्येव दीपस्य गतिस्तस्य न लक्षिता ॥ ततस्तस्याभवच्चिंता कथमात्मा विभज्यते ॥ ४ ॥ एवं चिंतयतस्तस्य चतुर्मित्योत्थितस्ततः ॥ त्रिवर्णस्वररूपी च चतुर्वर्गफलप्रदः ॥ ५ ॥ ऋग्यजुःसामनामा च ब्रह्मविष्णुशिवात्मकः ॥ व्याप्नुवन्सकलाल्लोकान्प्रभावैः पृथुभिस्तदा ॥ ६ ॥ ओंकार इति तस्याख्या मया दत्ता प्रसादतः ॥ तदोत्थाभिरुदाराभिर्वाणीभिः समलंकृतः ॥ ७ ॥ हृदयात्तस्य देवस्य वषट्कारः समुत्थितः ॥ छंदसां प्रवरा देवी चतुर्विंशाक्षरा परा ॥ ८ ॥ पद्भ्यां क्षिः सा त्रिपादा च पंचशीर्षोपलक्षिता ॥ समीपवर्त्तिनी देवी पार्श्वे तत्र व्यवस्थिता ॥ ९ ॥ गायत्री मधुराभाषा सावित्री लोकविश्रुता ॥ स चोंकारो मया प्रोक्तो गायत्र्या सह पार्वति ॥ मृष्टिं कुरु ममादेशाद्विचित्रामनया सह ॥ १० ॥ इत्युक्तस्त्रिशिखो भूत्वा हिरण्यसदृशाकृतिः ॥ सृष्टिमुत्पादयामास स्वशरीरान्ममाज्ञया ॥ ११ ॥ पूर्वं देवगणांश्चैव त्रयस्त्रिंशच्च देवताः ॥ मनुष्या ऋषयश्चैव वेदप्रामाण्यतः कृताः ॥ १२ ॥ तेषां देहे प्रविष्टानां प्रादुर्भावः पुनर्भवेत् ॥ यथा सूर्यस्य सततमुदयास्तमनं भवेत् ॥ १३ ॥ संदृत्यों कारमखिलान्सदेवासुरपन्नगान् ॥ कृतात्मगर्भे भगवानोंकारो जगतः प्रभुः ॥ १४ ॥ ससर्ज सर्वभूतानि कल्पांते पर्वतात्मजे ॥ अव्यक्तः शाश्वतश्चैव तस्य सर्वमिदं जगत् ॥ १५ ॥ कर्त्ता चैव विकर्त्ता च संहर्ता च महांस्तु यः ॥ ओंकारपूर्वका वेदा यज्ञाश्चोंकारपूर्वकाः ॥ १६ ॥ ओंकारपूर्वकं ज्ञानं तपश्चोंकारपूर्वकम् ॥ स्वयंभूरिति विज्ञेयः स ब्रह्मा भुवनाधिपः ॥ १७ ॥ स वायुरिति विज्ञेयः सर्वज्ञः स प्रजाकरः ॥ विश्वे देवास्तथा साध्या रुद्रादित्यास्तथाश्विनौ ॥ १८ ॥ प्रजानां पतयश्चैव सप्त चैव महर्षयः ॥ वसवोऽप्सरसश्चैव गंधर्वाश्चैव रातसाः ॥ १९ ॥ दैत्याः पिशाचा रक्षांसि भूतानि विविधानि च ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेच्छादयो भुवि ॥ सर्वे चतुष्पदाश्चैव तिर्यग्योनिगतास्तदा ॥ २० ॥ जंगमानि च सत्त्वानि यच्चान्यज्जीवसंज्ञकम्॥कृत्वा सर्वमशेषं च ममांतिकमुपागतः॥२१॥प्रणम्य प्रयतो भूत्वा वचनं चेदमब्रवीत् ॥ कृता सृष्टिर्मया

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

देव त्वत्प्रसादान्महेश्वर ॥२२॥ देहि मे परमं स्थानं यथा कीर्त्तिर्ध्रुवा भवेत् ॥ ओंकारस्य वचः श्रुत्वा मया प्रोक्तं वरानने ॥२३॥ ममाभीष्टकरं स्थानं नित्यमव्ययमक्षयम् ॥ महाकालवनं दिव्यं सर्वसंपत्करं शुभम् ॥२४॥ तत्र ते भविता कीर्त्तिः शाश्वती नात्र संशयः ॥ शूलेश्वरस्य देवस्य पूर्वभागे व्यवस्थितम् ॥२५॥ त्रिकल्पप्रभवं लिंगं त्वन्नाम्ना ख्यातिमेष्यति ॥ ओंकारेश्वर इत्याख्या भविष्यति जगत्त्रये ॥ २६ ॥ इत्युक्तो हि मया देवि ओंकारो हृष्टमानसः ॥ ददर्श तत्र तल्लिंगं तस्मिँल्लिंगे लयं गतः ॥२७॥ ततः प्रभृति वेदेषु ओंकारः क्रियते द्विजैः ॥ पुण्यार्थं मंगलार्थं च प्रथमं सर्ववस्तुषु ॥ ॥ २८ ॥ लयंगतो यदोंकारस्तदाप्रभृति पार्वति ॥ मयोच्यमानं लिंगस्य प्रभावातिशयं शृणु ॥ २९ ॥ यद्युगादिसहस्रेषु व्यतीपातशतेषु च ॥ अयनानां सहस्रेषु यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं देवि ॐकारेश्वरदर्शनात् ॥३०॥ चतुर्ष्वपि च वेदेषु समधीतेषु यत्फलम् ॥ ततोऽधिकं फलं प्रोक्तमोंकारेश्वरदर्शनात् ॥३१॥ ब्रह्मचर्येण यत्पुण्यं यावज्जीवं कृतेन च ॥ तत्पुण्यमधिकं प्रोक्तमोंकारेश्वरदर्शनात् ॥३२॥ करीषसाधने पुण्यं यच्च पुण्यमनाशके ॥ तत्पुण्यमधिकं देवि ॐकारेश्वरदर्शनात् ॥ ३३ ॥ पूजायां यत्फलं प्रोक्तं तस्य संख्या न विद्यते ॥ ३४ ॥ किं यज्ञैर्बहुवित्तादयैः किं तपोभिः सुदुष्करैः ॥ ॐकारदर्शनादेव तत्फलं लभते यतः ॥ ३५ ॥ पूजनात्स्पर्शनाद्वापि कीर्त्तनाच्छ्रवणात्तथा ॥ ॐकारेश्वरदेवस्य नराः स्युर्मुक्तिभाजनाः ॥ ३६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ ॐकारेश्वरदेवस्य शृणु विश्वेश्वरं परम् ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्य ॐकारेश्वरमाहात्म्यवर्णनंनाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिपंचाशत्तमं विद्धि सुप्रसिद्धमथेश्वरम् ॥ परं विश्वेश्वरं ख्यातं विश्वेषु भुवनेष्वपि ॥ १ ॥ बभूव नृपतिः पूर्वं विदर्भायां विदूरथः ॥ सोन्तःपुरार्थुतोपेतं चक्रे राज्यमकंटकम् ॥ २ ॥ जघान तापसं सोऽथ प्रमादान्मृगयां गतः ॥ कृष्णाजिनधरं शांतं ध्यायंतं ब्रह्म शाश्वतम् ॥ ३ ॥ मृगं मत्वा महारण्ये ब्राह्मणं दैवमोहितः ॥ तेन कर्मविपाकेन देहांते रौरवं गतः ॥ ४ ॥ तत्रासौ यातना घोरा अनुभूयात्मकालतः ॥ तस्मादिहागतो मर्त्ये सर्पो विषधरोऽभवत् ॥ ५ ॥ अदशत्सोऽपि कोपेन ब्राह्मणं चरणे प्रिये ॥ लकुटेन हतः सोऽपि पंचत्वं तत्क्षणाद्गतः ॥ ६ ॥ च्युतस्तु नरकान्निद्यो द्वितीयेऽभूत्सुदारुणः ॥ गजानं भक्षयामास राजलोकैर्निपातितः ॥ ७ ॥ पुनर्व्याघ्रो बभूवासौ तृतीयेऽपि भवांतरे ॥ तीक्ष्णपादनखैर्घ्नंतयामास सूकरान् ॥ ८ ॥ तेनापि वैश्यो निधनं नीतः कश्चिद्वनांतरे ॥ निषादैर्निहतः सोऽपि बाणैः पंचत्वमागतः ॥ ९ ॥ चतुर्थेऽपि गजो जातः सिंहाद्भयमवाप्तवान् ॥ पंचमे मकरो जातः क्षारांभसि महोदधौ ॥ १० ॥ स्नातुकामामथो रामामाजघानातिपापकृत् ॥ धीवरैः कृतधिक्कारैर्वंडिशैः सन्निपातितः ॥ ११ ॥ पुनः षष्ठे भवे जातः पिशाचः पिशिताशनः ॥ सिद्धमंत्रैरथोदग्रैरथर्वप्रभवैर्भृशम् ॥ १२ ॥ मंत्री मंत्रविदां श्रेष्ठो ब्राह्मणस्तं जघान ह ॥ सप्तमे स पुनर्जातो दुर्निरीक्ष्यवपुर्भृशम् ॥ १३ ॥ तीक्ष्णदंष्ट्रः करालास्यो मांसशोणितभोजनः ॥ शुष्कांगो मरुभूमीषु पापिष्ठो ब्रह्मराक्षसः ॥ १४ ॥ आक्रम्य निमिराजन राज्ञा राक्षसशत्रुणा ॥ समारोप्य धनुः संख्ये ब्रह्मास्त्रेण निपातितः ॥१५॥ दारुणः सारमेयोऽभूदतिकृष्णोऽष्टमे भवे ॥ स शूकरखुराघातव्रणैः पंचत्वमागतः ॥ १६ ॥ नवमे जंबुको जातः श्मशाने स च मांसभुक् ॥ लौल्यात्स निधनं प्राप्तो दुःखार्त्तो दाववह्निना ॥ १७ ॥ दशमे त्वभवद्भ्रस्तीक्ष्णतुंडो भयावहः ॥ पूतिमांसवसाहारो रोगेण निधनं गतः ॥ १८ ॥ एकादशेऽपि चंडालो गतोऽवंत्यां वरानने ॥ द्रव्यस्य हरणार्थं वै प्रविष्टो द्विजवेश्मनि ॥ १९ ॥ स दंडपाशिकेनैव प्राप्तो बद्धश्च तत्क्षणात् ॥ आनीतो हि वधार्थाय वृक्षाग्रे ह्यवलंबितः ॥ २० ॥ तत्रैव लिंगमासन्नं साध्वि शूलेश्वरोत्तरे ॥ तस्य दृष्टिपथं प्राप्तमतिविक्लवचेतसः ॥ २१ ॥ क्षणेन निधनं प्राप्तः स गतस्त्रिदशालयम् ॥ तत्र भुक्त्वा वरान्भोगानवर्तार्य च भूतले ॥ २२ ॥ जातः ख्यातो विदर्भायां विश्वेशोनाम पार्थिवः ॥ जातिस्मरत्वमापन्नो लिंगदर्शनपुण्यतः ॥ २३ ॥ दुर्लभान्बुभुजे भोगान्प्राप्तं राज्यं चकार सः ॥ सोऽभिषिच्य सुतं राज्ये विनीतमतिधर्मवित् ॥ संस्मरन्पूर्ववृत्तांतं जगामावंतिकां पुरीम् ॥ २४ ॥ तत्र दृष्ट्वा महल्लिंगं दुर्दर्शमतितेजसा ॥ दिव्येन चक्षुषाऽपश्यल्लिंगमध्ये चराचरम् ॥ २५ ॥ लिंगमध्ये स्थिताः सर्वे सागराः सरितस्तथा ॥ द्वीपाश्च पर्वताश्चैव तथान्या दिव्यभूतयः ॥ २६ ॥ चंद्रमाः सह नक्षत्रैरादित्यश्चाग्निना सह ॥ धनदो वरुणश्चैव यमः शक्रो मरुत्पतिः ॥ २७ ॥ मरुतो देवगंधर्वा ऋषयश्च तपोधनाः ॥ नागा यक्षाः पिशाचाश्च राक्षसा भीमविक्रमाः ॥ २८ ॥ ब्रह्माद्या देवताश्चान्याः स्कंदो लंबोदरस्तथा ॥सर्वं त्रिभुवनं देवि लिंगमध्ये विलोकितम्॥२९॥प्रभावं तस्य लिंगस्य ज्ञात्वा सम्यङ्महीपतिः॥ संयतः पूजयामास विश्वयोनिं महेश्वरम् ॥३०॥ प्रसन्नश्चाभवत्तस्य वचनं चेदमब्रवीत्॥वरं वरय भद्रं ते किमभीष्टं ददामि ते॥३१॥तेनोक्तं वचनं राज्ञा यदि तुष्टोसि मे प्रभो ॥ ये त्वां पश्यंति मनुजाः श्रद्धयाऽश्रद्धयाऽथवा ॥३२॥मा भूत्तेषां प्रपतनं घोरे संसारसागरे॥विश्वेश्वरेति नाम्ना वै प्रसिद्धो भव भूतले ॥३३॥ इत्युक्ते वचने भूयो विश्वेशोऽलंकृतो गणैः ॥ विमानेन सुदीप्तेन गतो लोकं मदीयकम् ॥३४॥ गणैर्नानाविधैः सार्द्धं स्तूयमानो वरानने ॥ किरीटी कुण्डली चैव मुक्ताहारविभूषितः ॥ विमानं तस्य तद्दिव्यं परिक्रम्य समंततः ॥ ३५ ॥ समहेंद्रधनाध्यक्षनानानाकनिवासिनः ॥ मुनयः सिद्धगंधर्वास्तथा चाप्सरसां गणाः ॥ ३६ ॥ नृत्येनाभग्नारीणां विलोकितविनोदकः ॥ युगकोटिसहस्रं तु मत्समीपे व्यवस्थितः ॥ ३७ ॥ अग्नो देवि भुवि ख्यातो देवो विश्वेश्वरेश्वरः ॥ दृष्ट्वा लिंगं च विश्वेशं पातकैर्विप्रमुच्यते ॥ ३८ ॥ सप्तजन्मकृतैर्देही मनोवाक्कायकर्मभिः ॥ दृष्ट्वा विश्वेश्वरं लिंगं कृतकृत्यत्वमाप्यते ॥ ३९ ॥ तस्य नश्यति दौर्भाग्यमलक्ष्मीर्नाशमेति च ॥ प्राप्नोति देही कामांश्च समृद्धिं मानसीं सदा ॥ ४० ॥ दुःस्वप्नो व्याधयः क्रूरा ग्रहा भूताश्च दारुणाः ॥ प्रणश्यन्ति वरारोहे विश्वेशे पूजिते सदा ॥ ४१ ॥ ये केचिच्छ्रद्धया युक्ता लिंगमाराधयंति वै ॥ ते सर्वकाम संपन्ना जायंते च युगेयुगे ॥ ४२ ॥ अंते गतिश्च सा दिव्या जायते मत्प्रसादतः ॥ यत्र संपूज्यते लिंगं तस्मिन्देशे शुभाः क्रियाः ॥ ४३ ॥ न तत्र दुर्भिक्षभयं नापमृत्युभयं क्वचित् ॥ प्रेतयोनौ च वैताला न नागा न च दंष्ट्रिणः ॥ ४४ ॥ एते च विष्णुब्रह्मेंद्रकुबेरवरुणादयः ॥ लिंगार्चनेन संप्राप्ताः परां सिद्धिं महौजसः ॥ ४५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ विश्वेश्वरस्य देवस्य कण्टेश्वरमतः शृणु ॥ ४६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये विश्वेश्वरमाहात्म्यवर्णनंनाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ॐ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ चतुःपंचाशतं विद्धि देवं कंटेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ आद्यकल्पे पुरा देवि राजाभूत्सत्यविक्रमः ॥ स शत्रुभिर्जितः संख्ये हृतकोशोऽतिदुःखितः ॥ २ ॥ वनं जगाम गहनमेकाकी श्रमकर्शितः ॥ तत्राश्रमं ददर्शाथ वसिष्ठस्य महात्मनः ॥ ३ ॥ तेनार्पिणा वसिष्ठेन दृष्टमात्रः स भूपतिः ॥ पूजितो विधिवद्येन राजार्हेण च सादरम् ॥ ४ ॥ ज्ञात्वा तपःप्रभावेन सूर्यवंशोद्भवं नृपम् ॥ पप्रच्छागमनं देवि कुशलं च पुनः पुनः ॥ ५ ॥ स नृपः कथयामास वसिष्ठाय सुदुःखितः ॥ राज्यं च सकलं ब्रह्मन्हृतं विद्वेषिभिर्मम ॥ ६ ॥ त्वामहं शरणं प्राप्तो दुःखैकायतनो यतः ॥ निष्कण्टकं कथं राज्यं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भविष्यति पुनः प्रभो ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ ७ ॥ तस्य तद्वचनं श्रुत्वा वसिष्ठो भगवान्नृपिः ॥ ध्यात्वा च कथयामास बहुकौतूहलान्वितः ॥ ८ ॥ महाकालवनं भूप व्रज त्वं कार्यसिद्धये ॥ दिव्या नदी वने तत्र विश्रुता भुवनत्रये ॥ ९ ॥ तस्यास्तीरे शुभं लिंगं पृथुकेश्वर दक्षिणे ॥ द्रक्ष्यसे नृपशार्दूल तपस्यंतं च तापसम् ॥ अस्थिचर्मावशेषं तु चीरवल्कलधारिणम् ॥ १० ॥ वचनात्तस्य विप्रस्य वसिष्ठस्य महात्मनः ॥ जगाम सहसा राजा महाकालवनं शुभम् ॥ ११ ॥ ददर्श तापसं तत्र चिरंजीविनमव्ययम् ॥ उपवासकृतश्रामं द्वादशादित्यवर्चसम् ॥ ॥ १२ ॥ तापसेन नृपो दृष्टो मित्रोऽयं मम वल्लभः ॥ प्राप्तो राज्यपरिभ्रष्टो ज्ञात्वा वचनमब्रवीत् ॥ १३ ॥ एह्येहि नृपशार्दूल दिष्ट्या प्राप्तोऽसि मेंऽतिके ॥ इत्युक्त्वा तापसेनैव हुंकारश्च कृतस्तदा ॥ १४ ॥ तद्धुंकारात्तु पातालं भित्त्वा पंच च कन्यकाः ॥ निर्ययुः कांचनं पीठमेका तासां प्रगृह्य वै ॥ १५ ॥ भृंगारं तु गृहीत्वान्या निःसृता जलसंभृतम् ॥ पादप्रक्षालनार्थाय तृतीया समुपस्थिता ॥ १६ ॥ अन्ये द्वे व्यजने गृह्य पार्श्वाभ्यां च व्यवस्थिते ॥ ततो हुंकारमकरोत्पुनरेव महातपाः ॥ १७ ॥ तेन हुंकारशब्देन देवलोकात्समागतम् ॥ दृष्ट्वा चाप्सरसां संघं नृत्यगीतमनोहरम् ॥ १८ ॥ अनंतरं ददर्शाथ लिंगं ज्योतिष्करं परम् ॥ उत्पन्नं च जगद्यस्मिँल्लीयते सचराचरम् ॥ १९ ॥ तद्दृष्ट्वा विस्मयाविष्टो बभूव नृपसत्तमः ॥ प्रणम्य शिरसा विप्रं किमिदं द्विजसत्तम ॥ २० ॥ एवं पृष्टो नृपेणाथ स विप्रो वाक्यमब्रवीत् ॥ सप्तजन्मानि राजेंद्र त्वयाहं परितोषितः ॥ २१ ॥ अतस्ते दर्शिता माया तपसा दुष्करेण तु ॥ लिंगस्यास्य प्रभावेण पश्य मे तपसो बलम् ॥ २२ ॥ हुंकारेण कृता पृथ्वी जलपूर्णा तु तत्क्षणात् ॥ हुंकाराच्च जलं ग्रस्तं मुखादग्निरजायत ॥ २३ ॥ हुंकारात्पृथिवी सर्वा जाता वह्निमयी तदा ॥ संहृत्य तत्क्षणा द्वह्निं मुखाद्वायुर्विनिर्ययौ ॥ २४ ॥ हुंकारेण कृतं सर्वं तत्क्षणादेव पार्वति ॥ न दिशः प्रदिशो वापि न नक्षत्रग्रहास्तदा ॥ २५ ॥ ततो वभ्राम तत्रास्ति स नृपो विस्मयान्वितः ॥ चिंतयामास सहसा क्व लिंगं क्व च तापसः ॥ २६ ॥ एवं चिंतयतस्तस्य ततः शब्दो महानभूत् ॥ तस्माच्छब्दाच्च संजातं पुरं प्राकारसंवृतम् ॥ २७ ॥ सुहर्म्यकक्ष्यारचितं विशालं विशुद्धजांबूनदभूषितं च ॥ दिव्यैर्जनैः सेवितमात्मविद्भिर्ददर्श राजा सहसा पुरं तत् ॥ २८ ॥ भूयोभवन्महाशब्दस्तस्मात्स्त्रीयुगलं बभौ ॥ सितवस्त्रधरा चैका कृष्णवस्त्रधरा सिता ॥ २९ ॥ पुनः शब्दो बभूवाथ तस्मात्पुरुषसत्तमः ॥ द्विशिराः पण्मुखश्चैव पादैर्द्वादशभिर्युतः ॥ ३० ॥ पुनः शब्दाच्च संजज्ञे पुरुषः सप्तधा गतः ॥ संहृतं हि पुनस्तच्च दर्शयित्वा द्विजेन तु ॥ प्रोक्तमित्थं विशालाक्षि जातं कंटकितं नृपम् ॥ ३१ ॥ पश्य लोकमिमं मह्यं तपसा निर्मितं नृप ॥ त्वत्प्रियार्थमयं लोको दर्शितस्ते नृपोत्तम ॥ ३२ ॥ एवमुक्तस्तदा तेन तापसेन नराधिपः ॥ विस्मयापन्नहृदयः पप्रच्छ प्रयतः सुधीः ॥ ३३ ॥ भगवन्सितकृष्णे द्वे के स्त्रियौ द्विजसत्तम ॥ कोऽसौ द्वादशपाद्विप्र द्विशिराः पण्मुखः पुनः ॥ ३४ ॥ कश्चासौ पुरुषो ब्रह्मन्य एकः सप्तधाऽभवत् ॥ तस्य तद्वचनं श्रुत्वा कथयामास तापसः ॥ ३५ ॥ एते स्त्रियौ त्वया दृष्टे सितकृष्णे नृपोत्तम ॥ ते च राज्यहनी प्रोक्ते ब्रह्मणा निर्मिते पुरा ॥ ३६ ॥ शीर्षद्वयं च यद्दृष्टं तेऽयने द्वे प्रकीर्तिते ॥ मुखानि यानि दृष्टानि षट् च ते ऋतवः स्मृताः ॥ पादा द्वादश ये दृष्टा मासा द्वादश ते स्मृताः ॥ ३७ ॥ यः पुमान्सप्तधा जात एकीभूतो नरेश्वर ॥ स समुद्रस्तु विज्ञेयः सप्तधैको व्यवस्थितः ॥ ३८॥ एतत्संवत्सरं चक्रं त्वत्प्रियार्थं निदर्शितम् ॥ एवं विदित्वा राजेंद्र न शोकं कर्तुमर्हसि ॥ ३९ ॥ सर्वो विनश्वरो लोकः सदेवासुरमानुषः ॥ मया दृष्टो हि बहुशो लिंगस्यास्य प्रभावतः ॥ ४० ॥ कुरु शत्रुविनाशाय लिंगस्यास्य च दर्शनम् ॥ राज्यं निष्कण्टकं राजन्भविष्यति न संशयः ॥ ४१ ॥ एवमुक्तस्तदा राजा दृष्ट्वाँल्लिंगमुत्तमम् ॥ दर्शनात्तस्य लिंगस्य कण्टका ये महीभृतः ॥ विद्वेषिणो मृतास्तेऽपि श्रुतास्तेन महीभृता ॥ ४२ ॥ गतस्तं विषयं राजा चक्रवर्ती बभूव ह ॥ लिंगस्यास्य प्रभावेन राज्यं कृत्वा महाधनैः ॥ ४३ ॥ यज्ञैश्च विविधैरिष्ट्वा परं निर्वाणमाप्तवान् ॥ तापसेन श्रुतं सर्वं दृष्टं ध्यानेन तेन वै ॥ ४४ ॥ लब्धं निष्कण्टकं राज्यं लिंगस्यास्य च दर्शनात् ॥ मम मित्रेण सहसा राज्यभ्रष्टेन तेन वै ॥ ४५ ॥ अतो नाम सुविख्यातं कण्टेश्वर इति क्षितौ ॥ भविष्यति न संदेहो दर्शनाद्राज्यदायकः ॥ ४६ ॥ अद्यप्रभृति पश्यन्ति देवं कण्टेश्वरं शिवम् ॥ तेषां च कण्टकाः सद्यो विनश्यन्ति न संशयः ॥ ४७ ॥ नेमिपेथ कुरुक्षेत्रे गंगाद्वारे च पुष्करे ॥ स्नानात्संसेवनाद्वापि यत्पुण्यं च भविष्यति ॥ तत्पुण्यं भविता सम्यक्श्रीकण्टेश्वरदर्शनात् ॥ ४८ ॥ गृहिणो लिंगिनो वापि ये पश्यंति यतव्रताः ॥ देवं कण्टेश्वरं भक्त्या तेषां सिद्धिर्भविष्यति ॥ ४९ ॥ जन्मांतरसहस्रेण यत्पापं पूर्वसंचितम् ॥ तत्सर्वं यास्यति क्षिप्रं श्रीकण्टेश्वरदर्शनात् ॥ ५० ॥ दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतं च यत् ॥ ध्यानमध्ययनं चैव सर्वं भवति चाक्षयम् ॥ ५१ ॥ एवं ब्रुवाणं तं विप्रं तापसं संशितव्रतम् ॥ लिंगेनोक्तं विशालाक्षि तुष्टेन वरपूर्वकम् ॥ ५२ ॥ जरारोगविनिर्मुक्तः सर्वशोकविवर्जितः ॥ भविष्यति गणाध्यक्षो वरदः सर्वपूजितः ॥ अवध्यश्चापि सर्वेषां योगैश्वर्यसमन्वितः ॥ ५३ ॥ एवमुक्तोऽथ लिंगेन तापसो गणतां गतः ॥ गणैः परिवृतो देवि मम पार्श्वमुपागतः ॥ ५४ ॥ अन्धकेन पुरा युद्धे सिंहनादो यदा कृतः ॥ तदा देवि मदीयं तु जातं कण्टकितं वपुः ॥ ५५ ॥ उत्पन्नं च तदा लिंगमशेषारिविनाशनम् ॥ देवानां कण्टका ये च दग्धा लिंगाग्निना यतः ॥ अतः कंटेश्वरो देवो विख्यातो भुवनत्रये ॥५६॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कंटेश्वरस्य देवस्य शृणु सिंहेश्वरं परम् ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये कंटेश्वरमाहात्म्यवर्णनंनाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ छ ॥

॥ ॥ श्रीईश्वर उवाच ॥ ॥ पंचाधिकं विजानीहि पंचाशत्तममीश्वरम् ॥ सिंहेश्वरं वरारोहे महाभयविनाशनम् ॥ १ ॥ सद्यःकल्पे त्वया देवि मदर्थं हि महत्तपः ॥ कृतं नीलोत्पलापांगि भीषणं संशितव्रतम् ॥ तपसा तव रौद्रेण दग्धं हि भुवनत्रयम् ॥ २ ॥ दुष्करं हि तपो ज्ञात्वा भगवांश्चतुराननः ॥ आगत्योवाच देवेशो देवि त्वां शुभया गिरा ॥ ३ ॥ किं पुत्रि प्राप्तुकामासि किमलभ्यं ददामि ते ॥ विरम्यतामतिक्लेशात्त पसोऽस्मान्मम्माज्ञया ॥ ४ ॥ त्वया च वचनं श्रुत्वा गुरोर्गौरवगर्भितम् ॥ प्रियं तथ्यं हितं तत्र वर्णनिर्णीतवांछितम् ॥ ५ ॥ प्रत्युक्तः स तदा ब्रह्मा प्रणामनम्रया त्वया ॥ तपसा दुष्करेणाप्तः पतित्वे शंकरो मया ॥ ६ ॥ स मां श्यामलवर्णेति बहुशः प्रोक्तवान्भवः ॥ श्यामाहं कांचनकारा वल्लभेन च संयुता ॥ भर्त्ता भूतपतिर्वश्यः कथं स्यादिति मे तपः ॥ ७ ॥ त्वदीयं वचनं श्रुत्वा वराहों वरदः प्रभुः ॥ एवं भविष्यतीत्याह ब्रह्मा लोकपितामहः ॥ ८ ॥ कियता चैव कालेन वांछासिद्धिर्भविष्यति ॥ गौरीनाम्ना तु ते मूर्त्तिः कांत्या दीप्ता भविष्यति ॥ ९ ॥ एतच्छ्रुत्वा त्वया वाक्यं ब्रह्मणः परमेष्ठिनः ॥ क्रुद्धा त्वं गिरिजेऽत्यर्थं कालेऽभीष्टं भविष्यति ॥ १० ॥ क्रोधात्सिंहः समुद्भूतो वदनात्ते भयावहः ॥ विवृतास्यो महारौद्रो जटाजटिलकंधरः ॥ ११ ॥ प्रोद्भूतवल्गुलांगूलो दंष्ट्रोत्कटमुखोत्कटः ॥ तस्यास्ये पतितुं देवि व्यवसायः कृतस्त्वया ॥ १२ ॥ सोऽपि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सिंहः क्षुधाविष्टस्त्वां भक्षयितुमुद्यतः ॥ नचैवासौ समर्थोऽभूद्वीक्षितुं वा तपोधिकाम् ॥ १३ ॥ स दह्यमानः सहसा तेजसा तपसा तव ॥ पराङ्मुखः समभवत्प्राणत्राणपरायणः ॥ १४ ॥ ततस्तवाभूत्करुणा सिंहं प्रति यतव्रते ॥ क्षुधितस्य त्वया तस्य क्षीरं ह्यमृतसन्निभम् ॥ १५ ॥ उत्पादितं स्तनाभ्यां तु तस्य सिंहस्य कारणात् ॥ तथापि दह्यतेऽत्यर्थं दुष्टभावं यतो गतः ॥ १६ ॥ तेनोक्तं दह्यमानेन मातर्दग्धोस्मि तेजसा ॥ त्वदीयेन दुराचारो दुष्टोः पापविग्रहः ॥ १७ ॥ त्वामत्तुकामो दुष्टात्मा त्वयाहं जनितोऽधुना ॥ तस्माद्यास्यामि नरकं मातृहा गुरुघातकः ॥ १८ ॥ तस्य तद्वचनं श्रुत्वा दुःखितस्य सुतस्य तु ॥ ममत्वेन विशालाक्षि सिंहस्य कथितं त्वया ॥१९॥ अघघ्नं विद्यते क्षेत्रं महाकालवनं सुत॥तत्र गच्छ ममादेशाच्छंभुं देवविनिर्मितम् ॥ २० ॥ कंटेश्वरस्य देवस्य समीपे लिंगमुत्तमम् ॥ सिंहनादात्समुत्पन्नं शंकरस्य महात्मनः ॥ २१ ॥ अंधकासुरयुद्धे वै पीडिते वासवे पुरा ॥ त्वदीयं वचनं श्रुत्वा सिंहस्त्वरितविक्रमः ॥ २२ ॥ गतो महाकालवनं दृष्टो देवोऽथ तत्क्षणात् ॥ दिव्यदेहो मृगारिस्तु जातो लिंगस्य दर्शनात् ॥ २३ ॥ ममत्वात्तस्य लिंगस्य त्वं गता तत्र पार्वति ॥ सिंहिकारूपमास्थाय शीघ्रं सिंहस्त्वया प्रिये ॥ २४ ॥ दृष्टो दिव्यशरीरस्तु लिंगस्यास्य प्रभावतः ॥ तव तुष्टिः परा जाता दृष्ट्वा सिंहं महाद्युतिम् ॥ २५ ॥ कृतं नाम त्वया देवि लिंगस्यास्य वरानने ॥ दिव्यदेहस्तु सिंहोयं जातो लिंगस्य दर्शनात् ॥ २६ ॥ अतः सिंहेश्वरो देवो भुवि ख्यातो भविष्यति ॥ एतस्मिन्नंतरे ब्रह्मा संप्राप्तस्तत्र सुव्रते ॥ उवाच त्वां वरारोहे देवैः परिवृतस्तदा ॥२७॥ यःएष सिंहः संभूतस्तव क्रोधात्सुतो यतः ॥ ततोऽसौ वाहनो देवि भविष्यति न संशयः ॥ २८ ॥ लिंगं सिंहेश्वरं भक्त्या यः पश्यति समाहितः ॥ तस्य वासोऽक्षयो दिव्यो भविष्यति त्रिविष्टपे ॥२९॥ कीर्तनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति ॥ स्पर्शनादस्य लिंगस्य पुनात्यासप्तमं कुलम् ॥ ३० ॥ मनसा चिंतितान्कामांस्तांश्च प्राप्नोति पुष्कलान् ॥ तदेव पुरुषो मुक्तो जन्मदुःखजरादिभिः ॥ ३१ ॥ यदा पश्यति सिंहेशं संसारार्णवतारकम् ॥ व्यालव्याघ्रादयश्चौरास्तथा साहसिकाश्च ये ॥३२॥ तेभ्यो भयं न भवति श्रीसिंहेश्वरदर्शनात् ॥ यज्ञानां तपसां चैव दानादीनां च यत्फलम् ॥ तत्फलं जायते सम्यग्दृष्ट्वा सिंहेश्वरं शिवम् ॥ ३३ ॥ मदीयं लोकमाप्नोति सुरासुरनमस्कृतम् ॥ यः पश्यति प्रयत्नेन देवं सिंहेश्वरं तदा ॥ ३४ ॥ इत्युक्त्वासौ जगामाथ ब्रह्मा लोकं स्वकं प्रिये ॥ यद्वपुस्तव पूर्वं स्यात्कालकांतिकलंकितम् ॥ प्रभावात्तपसस्तस्य गौरत्वं प्राप्तमद्भुतम् ॥ ३५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिंहेश्वरस्य देवस्य रेवंतेशमतः शृणु ॥ ३६ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये सिंहेश्वरमाहात्म्यवर्णनंनाम पंचपंचाशत्तमोऽध्यायः ॥ ॥ ५५ ॥ ॥ ७ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ षट्पंचाशत्तमं विद्धि रेवंतेश्वरसंज्ञकम् ॥ यस्य दर्शनमात्रेण परा सिद्धिः प्रजायते ॥ १ ॥ असहंती पुरा संज्ञा रवेस्तेजोऽतिदुःसहम् ॥ तपः कर्तुं गता देवि ज्ञाता सूर्येण सुव्रता ॥ २ ॥ अश्वरूपं ततः कृत्वा जगामाथोत्तरान्कुरून् ॥ ददृशे तत्र संज्ञां च वडवारूपधारिणीम् ॥ ३ ॥ गता सा सम्मुखं तस्य पृष्ठरक्षणतत्परा ॥ ततोभून्नासिकायोर्गस्तयोस्तत्र समेतयोः ॥ ५ ॥ नासत्यौ दस्रौ तनयावश्वक्रौ विनिर्गतौ ॥ रेतसोंऽते च रेवंतः खड्गी चर्मी तनुत्रधृक् ॥ ६ ॥ अश्वारूढः समुद्भूतस्ततो बाणधनुर्द्धरः ॥ तेन वै जातमात्रेण अश्वारूढेन लीलया ॥ निर्जितं च जगच्चेदं सदेवासुरमानुषम् ॥ ७ ॥ ततो देवाः पराभूता ब्रह्माणं शरणं गताः ॥ प्रणम्य कथयामासुर्भयकंपितकंधराः ॥ ८ ॥ अस्माकं विभवं तेजो रविपुत्रेण नाशितम् ॥ रेवंतेन सुरेंद्रेण शृणु लोकपितामह ॥ ९ ॥ तस्य गात्रसमुद्भूतो वह्निर्धावति कालजित् ॥ ज्वलंति पादपास्तेन पतंति शिखराणि च ॥ १० ॥ सर्वतो व्याकुलीभूतं हाहाकारमचेतनम् ॥ तेनैव पीडितं सर्वं ज्वालामालासमाकुलम् ॥ ११ ॥ दशदिक्षु प्रवृत्तोऽयं समृद्धो हव्यवाहनः ॥ सर्वं किंशुकसंकाशं प्रज्वलन्निव दृश्यते ॥ १२ ॥ इति तेषां वचः श्रुत्वा ब्रह्मणोक्तं वरानने ॥ ज्ञातं मया सुरश्रेष्ठा भवतां कार्यमीदृशम् ॥ १३ ॥ भविष्यति च वस्तच्च कांक्षितं यत्सुरोत्तमाः ॥ गच्छध्वं सहसा तस्माच्छंकरं शरणं सुराः ॥ १४ ॥ ब्रह्मणो वचनं श्रुत्वा ममांतिकमुपागताः ॥ त्रिदशा भयसंत्रस्ता नत्वा मामिदमब्रुवन् ॥ १५ ॥ आदित्यतनयेनैव रेवंतेन महेश्वर ॥ दग्धं त्रिभुवनं सर्वं शरीरस्थेन वह्निना ॥ तेजसा महता चैव विक्रमेण बलेन च ॥ १६ ॥ असाध्यः किल सोऽस्माकं सर्वेषां देवसत्तम ॥ भवान्प्रभवते तस्य नान्यः शंकर कश्चन ॥ १७ ॥ त्वां प्रपद्यामहे सर्वे भयार्त्ताः शरणार्थिनः ॥ शरणं वरदं देवं त्रिदशानां महेश्वर ॥ १८ ॥ मया स्मृतः सूर्यपुत्रो रेवंतस्तत्क्षणात्प्रिये ॥ प्राप्तः प्रीतिप्रसन्नात्मा वचनं चेदमब्रवीत् ॥ १९ ॥ किं मया देव कर्त्तव्यं ब्रूहि सर्वमशेषतः ॥ ततो मया सूर्यपुत्र उत्संगे च कृतस्तदा ॥ २० ॥ स्नेहादाघ्रुंबितो मूर्ध्नि परिष्वक्तः पुनःपुनः ॥ ददामि ते महाभाग वरं वरय सुव्रत ॥ २१ ॥ परितुष्टोस्मि ते कामं यथेष्टं काममाप्नुहि ॥ इदमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि ॥ २२ ॥ ममाभीष्टं परं स्थानं विद्यते पृथिवीतले ॥ अक्षयं प्रलये पुत्र महाकालवनं शुभम् ॥ तत्र दास्यामि ते स्थानं तत्र कीर्त्तिर्भविष्यति ॥ २३ ॥ पूर्वं कंटेश्वरस्यापि स्थानं परमदुर्लभम् ॥ तत्र त्वं वस रेवंत लिंगं द्रक्ष्यसि शाश्वतम् ॥ २४ ॥ सर्वदा त्रिदशैः पूज्यो भविष्यसि न संशयः ॥ गुह्यकाधिपतिस्त्वं च स्वर्गलोके भविष्यसि ॥ २५ ॥ अश्वशालासु सर्वासु पूजनीयो भविष्यसि ॥ नृपतीनां गृहे चैव वसिष्यसि सुपूजितः ॥ २६ ॥ तेजो मदीयं तत्स्थानं लिंगाकारं सनातनम् ॥ पूजितं त्रिदशैस्तत्र संसेव्यं यत्नतस्त्वया ॥ २७ ॥ एवमुक्तो मया देवि रेवंतो गरुडध्वजस्तदा ॥ जगामाकाशमाविश्य महाकालवनं क्षणात् ॥ २८ ॥ ददर्श तत्र तल्लिंगं ज्योतीरूपं सनातनम् ॥ सूर्यपुत्रस्तु रेवंतो दृष्टो लिंगेन पार्वति ॥ २९ ॥ प्रोक्तः प्रणयपूर्वेण दिष्ट्या दृष्टोऽसि सूर्यज ॥ अद्यप्रभृति ते नाम्ना ख्यातिं यास्यामि भूतले ॥ ३० ॥ स्थातव्यं मत्समीपे तु सूर्यपुत्र त्वया सदा ॥ अक्षया भविता कीर्त्तिस्त्वदीया भुवनत्रये ॥ ३१ ॥ रेवंतेश्वरसंज्ञोऽहं भविष्यामि न संशयः ॥ ये मां द्रक्ष्यंति रेवंत भक्त्या परमया युताः ॥ तेषामश्वा भविष्यंति विजयो यश ऊर्जितम् ॥ ३२ ॥ ऐश्वर्यं दानशक्तिश्च पुत्रपौत्रमनंतकम् ॥ गुह्यकानां पतिर्भूत्वा स्वर्गलोके स वत्स्यति ॥ ३३ ॥ लिंगस्य वचनं श्रुत्वा प्रोक्तं वै रविसूनुना ॥ रेवंतेन विशालाक्षि संतुष्टेनांतरात्मना ॥३४॥ देहि मे ह्यचलां भक्तिं देहि मे स्थानमुत्तमम् ॥ देहि मे परमं ज्ञानं ध्रुवां कीर्तिं च देहि मे ॥ ३५ ॥ भगवन्भूतभव्येश भववंधभयापह ॥ संस्कृतार्थोऽस्मि संजातस्तव देवस्य दर्शनात् ॥ ३६ ॥ जन्मकोटिसुसंशुद्धा ये त्वां पश्यंति देहिनः ॥ न तेषां पुनरावृत्तिर्घोरसंसारसागरे ॥ ॥ ३७ ॥ इत्युक्त्वा रविसूनुर्वै रेवंतो रविवल्लभः ॥ रेवंतेश्वरदेवस्य समीपे संव्यवस्थितः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रेवंतेश्वरदेवस्य घंटेश्वरमथो शृणु ॥ ३९ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये रेवंतेश्वरमाहात्म्यवर्णनंनाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ सप्तपंचाशतं विद्धि घंटेश्वरमथो शृणु ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यस्य दर्शनमात्रेण कामावाप्तिश्च जायते ॥ १ ॥ घंटोनाम गणश्रेष्ठो बभूव मम वल्लभः ॥ चाक्षुषस्य मनोः काले कौतुकार्थं यदृच्छया ॥ प्रस्थितो ब्रह्मसदनं द्रष्टुं ब्रह्माणमव्ययम् ॥ २ ॥ अयायान्तं समालोक्य गन्धर्वं गीतकोविदम् ॥ चित्रसेनं गणश्रेष्ठः पप्रच्छ कुशलं मुदा ॥ ३ ॥ मयां तत्रैव गन्तव्यं सदने परमेष्ठिनः ॥ गीतैराराधयिष्यामि ब्रह्माणं जगतां पतिम् ॥ ४ ॥ चित्रसेनोऽथ तं देवि प्रत्युक्तो घंटमब्रवीत् ॥ पद्मयोनिः सुरैः सार्धं गुह्यं मन्त्रमचीकरत् ॥ ५ ॥ एतच्छ्रुत्वा गणो घंटस्तस्थौ विस्मितमानसः ॥ मूहूर्तं चिंतयामास प्रतिहारनिवारितः ॥ ६ ॥ हित्वा स्वाभिमतीशानं द्रष्टुं ब्रह्माणमागतः ॥ प्रवेशोपि न लभ्येत प्रसादो दूरतः स्थितः ॥ ७ ॥ एवं चिंतयतस्तस्य साग्रः संवत्सरो गतः ॥ घंटस्य ब्रह्मणो द्वारि प्रवेशो देवि नाभवत् ॥ ८ ॥ निर्गच्छंतमथालोक्य वीणाहस्तं समुत्सुकम् ॥ नारदं स गणश्रेष्ठः पद्मयोनिं गृहोदरात् ॥ ९ ॥ प्रोक्तो घंटेन सहसा मां निवेदय नारद ॥ गणोऽहं गीततत्त्वज्ञो महादेवस्य वल्लभः ॥ १० ॥ दर्शनार्थं समायातो ब्रह्मणः परमेष्ठिनः ॥ घंटस्य वचनं श्रुत्वा प्रीतिमानभवन्मुनिः ॥ नारदः प्रत्युवाचेदं समाश्वास्य सकेतवम् ॥ ११ ॥ अहं बृहस्पतेः पार्श्वे प्रेषितोऽस्मि गणाधिप ॥ किंचित्कार्यांतरं द्रष्टुं ब्रह्मणा लोककर्तृणा ॥ आयास्यामि क्षणेनैव तावत्कालं प्रतीक्ष्यताम् ॥ १२ ॥ इत्युक्त्वा नारदो देवि मम पार्श्वमुपागतः ॥ वृत्तांतं कथयामास घंटस्य मुनिसत्तमः ॥ १३ ॥ ईदृशो दुर्लभो भृत्यो घंटेन सदृशः प्रभो ॥ यस्त्वां त्यक्त्वा गणो देव सेवार्थं परमेष्ठिनः ॥ स्थितः संवत्सरं साग्रं प्रवेशं न च लब्धवान् ॥ १४ ॥ तच्छ्रुत्वा वचनं तस्य नारदस्य मुनेस्तदा ॥ मया शप्तस्तु कोपेन पत घण्ट महीतले ॥ १५ ॥ मां त्यक्त्वा हि गतोन्यत्र सेवार्थं परवेश्मनि ॥ मयेत्युक्ते च वचने ब्रह्मद्वारि स्थितोऽपि सन् ॥ १६ ॥ पतितो भूतले घंटो देवदारुवनांतिके ॥ आत्मानं पतितं दृष्ट्वा भूमौ घंटेन पार्वति ॥ १७ ॥ प्रोक्तं शोकोत्तरेणैव वचनं गद्गदाक्षरम् ॥ सेवार्थं याति योऽन्यत्र परित्यज्य स्वकं प्रभुम् ॥ १८ ॥ स याति नरकं घोरमपकीर्तिं च विंदति ॥ नारदेन मम त्वद्य वंचितस्य द्वयं गतम् ॥ यस्मात्त्वामी न मे ब्रह्मा न च देवो महेश्वरः ॥ १९ ॥ एवं विलपतस्तस्य नारदो मुनिसत्तमः ॥ आजगाम तमुद्देशं यत्र घंटो व्यवस्थितः ॥ २० ॥ देवदारुवने देवि दर्शनार्थं तपस्विनाम् ॥ घंटेन नारदो दृष्टो भीतेनाकुलचेतसा ॥ २१ ॥ अवस्थामीदृशीं कृत्वा किमन्यत्ते करिष्यति ॥ एवं तं चिंतयानं तु नारदो वाक्यमब्रवीत् ॥ २२ ॥ गणाध्यक्ष न ते कार्यो मन्युः पुण्यविनाशनः ॥ कीर्त्यर्थं पतितो घंट प्रायश्चित्तार्थमेव च ॥ २३ ॥ प्रायश्चित्तविशुद्धात्मा प्रभुं प्राप्स्यसि शंकरम् ॥ तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ २४ ॥ श्वेतेश्वरं पूर्वं तु विद्यते लिंगमुत्तमम् ॥ सर्वसंपत्करं दिव्यं त्वन्नाम्ना ख्यातिमेष्यति ॥ २५ ॥ इत्युक्तो नारदेनैव जैगीषव्यः समागतः ॥ तेनापि कथितं सर्वं सत्यमुक्तमनेन वै ॥ २६ ॥ नारदेन गणाध्यक्ष कीर्त्तिस्ते भविताऽक्षया ॥ कश्यपेन मृकण्डेन कण्वेन जमदग्निना ॥२७॥ अग्निना भृगुणा देवि लोमशेन सुरर्षिणा ॥ प्रोक्तो घंटो गतः शीघ्रं महाकालवनं शुभम् ॥ २८ ॥ यत्र घंटानिनादेन युध्यतो मम संयुगे ॥ पापक्षयकरं देवि संभूतं लिंगमुत्तमम् ॥ दृष्टं तत्र गणेनैव लिंगं तेजोमयं शुभम् ॥ २९ ॥ दर्शनात्तस्य लिंगस्य भूयो घंटो गणोऽभवत् ॥ लक्ष्म्या कांत्या समायुक्तः सहस्रकिरणाकृतिः ॥ ३० ॥ घण्टोभिनंदितोऽत्यर्थं विमानैः सार्वकामिकैः ॥ मम पार्श्वं समायातो ममातीव प्रियोऽभवत् ॥ ३१ ॥ ये पश्यन्ति विशालाक्षि देवं घण्टेश्वरं शिवम् ॥ ते घण्टाभिर्नादितास्तु विमानैः सार्वकामिकैः ॥३२॥ यास्यंति सुचिरं कालं मम लोकं सनातनम् ॥ घण्टेश्वरं परं लिंगं नाख्येयं यस्य कस्यचित् ॥ ३३ ॥ व्याधितो यदि वा दीनो दुःखितो वा भवन्नरः ॥ यः पश्यति प्रसंगेन देवं घण्टेश्वरं प्रिये ॥ दीप्तकांचनवर्णाभैर्विमानैः सार्वकामिकैः ॥ ३४ ॥ गंधर्वाप्सरसां मध्ये स्वर्गे मोदति मानवः ॥ ईप्सिताल्लँभते कामान्वीणावेणुविनोदितः ॥ ३५ ॥ ततः स्वर्गात्परिभ्रष्टः सर्वैश्वर्यसमन्वितः ॥ हिरण्यधान्यसंपूर्णे समृद्धे जायते कुले ॥ राजा वा राजतुल्यो वा जंबूद्वीपपतिर्भवेत् ॥ ३६ ॥ यः पूजयति देवेशं श्रद्धया परया युतः ॥ स याति परमं स्थानमपुनर्भवकारणम् ॥ ३७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ घण्टेश्वरस्य देवस्य प्रयागे शमथो शृणु ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये घण्टेश्वर माहात्म्यवर्णनंनाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रयागेश्वरसंज्ञं तु सर्वकामकरं परम् ॥ अष्टाधिकं विजानीहि पंचाशत्तमर्माश्वरम् ॥ १ ॥ आसीत्सप्तमकल्पे तु मनुः स्वायंभुवः पुरा ॥ तस्य प्रियव्रतः पुत्रो यज्वा परमधार्मिकः ॥ २ ॥ स चेष्ट्वा बहुभिर्यज्ञैः समाप्तवरदक्षिणैः ॥ सप्तद्वीपेषु संप्राप्य भरतादीन्सुतान्प्रिये ॥ ३ ॥ स्वयं विशालां वदरीं गत्वा तेपे महत्तपः ॥ कालेन बहुना तत्र नारदः समुपस्थितः ॥ ४ ॥ पूजितो विप्ररावेण राज्ञा प्रियव्रतेन च ॥ स पृष्टः पूजयित्वा तु किमाश्चर्यं वदस्व मे ॥ ५ ॥ इत्युक्तः कथयामास नारदो मुनिसत्तमः ॥ श्वेतद्वीपे मया राजन्कन्या दृष्टा सरोवरे ॥ ६ ॥ सा च पृष्टा विशालाक्षी कस्माद्वससि निर्जने ॥ कासि भद्रे कथं वासि किं वा कार्यमिह त्वया ॥ ७ ॥ कर्त्तव्यं चारुसर्वांगि तन्ममाचक्ष्व शोभने ॥ एवमुक्ता मया सा हि मां दृष्ट्वा मीलितेक्षणम् ॥ ८ ॥ स्तुत्वा तूष्णीं स्थिता यावत्तावन्मे ज्ञानमुत्तमम् ॥ विस्मृताः सर्ववेदाश्च सर्वशास्त्राणि चैव हि ॥९॥ ततोऽहं विस्मयाविष्टश्चिंतामोहसमन्वितः ॥ तामेव शरणं गत्वा यावत्पश्यामि पार्थिव ॥१०॥ तावद्दिव्यः पुमांस्तस्याः शरीरे समदृश्यत ॥ तस्यापि पुंसो हृदये द्वितीयस्तस्य चोरसि ॥ तस्यापि हृदये चान्यस्तृतीयस्तु व्यवस्थितः ॥११॥ ततः पृष्टा मया देवी सा कुमारी कथंचन ॥ वेदा नष्टा ममाशेषा भद्रे किं ब्रूहि कारणम् ॥१२॥ ॥ कन्योवाच ॥ ॥ माताहं सर्ववेदानां सावित्रीनाम नामतः ॥ मां न जानासि येन त्वमतो वेदा हृतास्तव ॥ १३ ॥ एवमुक्ते मया पृष्टा विस्मयेन महीपते ॥ वेदानां त्वं तु माता वै कथयस्व ममानघे ॥ १४ ॥ त्वदीयहृदये देवि क एते पुरुषास्त्रयः ॥ १५ ॥ ॥ कन्योवाच ॥ ॥ य एष मच्छरीरस्थः शुभांगश्चारु शोभनः ॥ एष ऋग्वेदनामा तु यजुर्वेदो द्वितीयकः ॥ १६ ॥ सामवेदस्तृतीयस्तु त्रयो वेदा मयि स्थिताः ॥ त्रयोऽग्नयस्त्रयो देवा मच्छरीरे स्थिता द्विज ॥ १७ ॥ इत्युक्ता सा तदा कन्या पश्यतो मम भूपते ॥ अंतर्द्धानं गता सद्यस्ततोऽहं विस्मितोऽभवम् ॥ १८ ॥ किं करोमि क्व गच्छामि शरणं यामि कं प्रभुम् ॥ कथमाविर्भविष्यंति वेदाः शास्त्राणि सांप्रतम् ॥ १९ ॥ कामिकस्तीर्थराजस्तु प्रयागः श्रूयते श्रुतौ ॥ अहं तत्र गमिष्यामि ज्ञानं सम्यग्नविष्यति ॥ २० ॥ नष्टवेदेन रैभ्येण प्राप्ता सिद्धिरनुत्तमा ॥ सावित्री श्रूयते तत्र अक्षय्यवटसन्निधौ ॥ २१ ॥ एवं मनसि संध्याय गतोऽहं नृपसत्तम ॥ प्रयागं कामिकं तीर्थं सर्वदेवनमस्कृतम् ॥ २२ ॥ तपस्तीव्रं मया तत्र तप्तं परमदुष्करम् ॥ अथाजगाम राजेंद्र प्रयागो मूर्त्तिमान्स्वयम् ॥ २३ ॥ उक्तोऽहं प्रणयात्तेन न मां तापय नारद ॥ ब्रह्मपुत्र प्रयागोऽहं भीषितस्तपसा तव ॥ २४ ॥ भवतः पार्श्वमायातः प्रणयेन तपोधन ॥ धन्योऽसि सर्वथा ब्रह्मंस्तपसा च विशेषतः ॥ २५ ॥ मया सार्धं त्वया ब्रह्मन्गतिः कार्याऽविकल्पतः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महाकालवनं रम्यं तत्र ते ज्ञानमुत्तमम् ॥ भविष्यति न संदेहो मम कीर्तिश्च सुस्थिरा ॥ २६ ॥ एवं हि ब्रुवतस्तस्य प्रयागस्य नृपोत्तम ॥ प्रादुर्बभूव सहसा पीतवासा जनार्दनः ॥ २७ ॥ शङ्खचक्रगदापाणिर्गरुडस्थो वियद्गतः ॥ उवाच मेघगंभीरं वाक्यं स पुरुषोत्तमः ॥ २८ ॥ एहि नारद गच्छामः प्रयागो यत्र यास्यति ॥ कृष्णस्य वचनं श्रुत्वा मया प्रोक्तो जनार्दनः ॥ २९ ॥ ज्ञानं मे देहि देवेश कथं यास्यामि तद्वनम् ॥ महाकालं जगन्नाथ श्रुतज्ञानविवर्जितः ॥ ३० ॥ इत्युक्तः श्रीधरेणाहं महाकालवनं नृप ॥ आनीतस्तत्क्षणाच्छीघ्रं प्रयागसहितस्तदा ॥ ३१ ॥ घंटेश्वरस्य पूर्वं तु नवनद्यास्तु दक्षिणे ॥ तत्र लिंगमनादिं तु ज्योतीरूपं सनातनम् ॥ ३२ ॥ प्रयागः पूजयामास पश्यतो मम भूपते ॥ लिंगेनोक्तं प्रसन्नेन किमर्थं त्वमिहागतः ॥३३॥ प्रयाग प्रयतो भूत्वा प्रसन्नोऽहं सदा तव ॥ दर्शनं च मदीयं तु विफलं न भविष्यति ॥३४॥ इत्युक्तस्तेन लिंगेन मदर्थं प्रार्थितस्तदा ॥ ज्ञानं देहि द्विजायास्मै नारदाय महात्मने ॥ ३५ ॥ नष्टा वेदाश्च शास्त्राणि सावित्र्या दर्शनात्प्रभो ॥ ३६ ॥ ततो लिंगात्समुत्तस्थौ ब्रह्मा वेदैर्वृतस्तदा ॥ षडंगैः सरहस्यैश्च पुराणैः सहितस्तदा ॥ ३७ ॥ इत्युक्तोऽहं तदा देव्या सावित्र्या नृपसत्तम ॥ लिंगस्यास्य प्रभावेण प्रयागाभ्यर्थितस्य वै ॥ ३८ ॥ प्रतिभास्यंति ते वेदा धर्मशास्त्राणि नारद ॥ इत्युक्ते वचने भूयः प्राप्ता वेदा मया नृप ॥ ३९ ॥ ज्ञानं षडंगसहितं शास्त्राणि विविधानि च ॥ लब्धज्ञानेन राजेंद्र मया प्रोक्तं वचस्तदा ॥ ४० ॥ प्रयागेनार्चितो देवो मम ज्ञानस्य कारणात् ॥ प्रयागेश्वरसंज्ञस्तु ख्यातिं लोकेषु यास्यति ॥ ४१ ॥ तदाप्रभृति तल्लिंगं तीर्थकोटिशतैर्वृतम् ॥ स्वर्गापवर्गफलदं तत्र त्वं गंतुमर्हसि ॥ ४२ ॥ किमनेनाश्वमेधेन इष्टेन नृपसत्तम ॥ अश्वमेधशतफलं जायते तस्य दर्शनात् ॥ ४३ ॥ तपसा किं सुतप्तेन कायक्लेशकरेण तु ॥ वाञ्छितं लभते सद्यः प्रयागेश्वरदर्शनात् ॥ ॥ ४४ ॥ ॥ ईश्वर उवाच ॥ ॥ नारदस्य वचः श्रुत्वा स्वायंभुवसुतो नृपः ॥ प्रियव्रतो महादेवि महाकालवनं गतः ॥ ४५ ॥ ददर्श तत्र तल्लिंगं नवनद्यास्तु दक्षिणे ॥ दर्शनात्तस्य लिंगस्य मत्समीपं समागतः ॥ ४६ ॥ मया संमानितो देवि गणानामधिपः कृतः ॥ ये पश्यंति नरा भक्त्या प्रयागेश्वरमीश्वरम् ॥ ते धन्या मानुषे लोके क्लिश्यन्त्यन्ये निरर्थकाः ॥ ४७ ॥ या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः ॥ सा गतिर्जायते सम्यक्प्रयागेश्वरदर्शनात् ॥ ४८ ॥ माघमासे समेष्यंति प्रयागेश्वरदर्शनम् ॥ कर्तुं ये मानुषास्तेषामश्वमेधः पदेपदे ॥ ४९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ प्रयागेश्वरदेवस्य शृणु सिद्धेश्वरं परम् ॥ ५० ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य खंडे चतुरशीतिलिङ्गमाहात्म्ये प्रयागेश्वरमाहात्म्यवर्णनंनामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकोनषष्टिकं विद्धि देवं सिद्धेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण सिद्धिः पुंसां प्रजायते ॥ १ ॥ आसीदश्वशिरानाम राजा परमधार्मिकः ॥ सोऽश्वमेधेन यज्ञेन इष्ट्वा सर्व हुदक्षिणम् ॥ २ ॥ स्नातश्चावभृथे हृष्टो ब्राह्मणैः परिवारितः ॥ यावदास्ते स राजर्षिस्तावत्सिद्धोऽतिदीप्तिमान् ॥ ३ ॥ नानौषधिप्रभावज्ञो मंत्रतंत्र विशारदः ॥ आययौ कपिलः श्रीमाञ्जैगीषव्यश्च सिद्धराट् ॥ ४ ॥ तयोस्त्वरितमुत्थाय स राजाभ्यागतक्रियाम् ॥ चकार परया युक्तो मुदा वै पृथिवीपतिः ॥ ५ ॥ तावर्चितावासनस्थौ क्षमाशीलौ शुचिव्रतौ ॥ महौजसौ महाभागौ मुमुक्षू मुनिपुंगवौ ॥ ६ ॥ विद्याविनयसंपन्नौ ब्रह्मचर्यपरायणौ ॥ अनेकसृष्टिसंहारस्थितिकार्यपरायणौ ॥ ७ ॥ उद्यादित्यसंकाशौ विभावसुसमद्युती ॥ तेजोराशिसमायुक्तौ दुर्निरीक्ष्यौ पृथग्जनैः ॥८॥ विनयेनोपसंगम्य प्रणिपत्याभिवाद्य च ॥ स राजा प्रांजलिर्भूत्वा प्रश्नमेनमपृच्छत ॥ ९ ॥ ॥ अश्वशिरा उवाच ॥ ॥ श्रुतं मया मुनिश्रेष्ठौ नान्यो देवो जनार्दनात् ॥ ध्यातोऽथ पूजितो नृणां मुक्तिदो भवबंधनात् ॥ १० ॥ संस्मृते तु हृषीकेशे नराणां कोटिजन्मजम् ॥ अशुभं क्षयमाप्नोति कथं न प्रणमेद्धरिम् ॥ ११ ॥ समासाद्य जगन्नाथं शक्राद्यास्त्रिदिवौकसः ॥ वसंति मुदिताः स्वर्गे दिव्यद्युतिसमन्विताः ॥ १२ ॥ जन्ममृत्युजरारोगैर्दुःखानि विविधानि च ॥ प्रयांति विलयं सद्यः प्रसन्ने गरुडध्वजे ॥ १३ ॥ इति पृष्टस्तदा तेन प्रार्थितेन यशस्विना ॥ ऊचतुस्तं नृपं सिद्धौ सिद्धिविज्ञानकोविदौ ॥ १४ ॥ क एष प्रोच्यते राजंस्त्वया नारायणोऽधुना ॥ आवां नारायणौ द्वौ तु त्वत्प्रत्यक्षं गतौ नृप ॥ १५ ॥ ॥ अश्वशिरा उवाच ॥ ॥ भवंतौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्बिषौ ॥ युवां नारायणौ कस्मादितिं वाक्यमुवाच सः ॥ १६ ॥ शंखचक्रगदापाणिः पीतवासा जनार्दनः ॥ गरुडस्थो हृषीकेशः कस्तस्य सदृशो भुवि ॥ १७ ॥ तस्य राज्ञो वचः श्रुत्वा संसिद्धौ योगकोविदौ ॥ दर्शयामासतुस्तौ हि कृत्वा नारायणं वपुः ॥ १८ ॥ कपिलो मंत्रमाहात्म्यात्स्वयं विष्णुर्बभूव ह ॥ शंखचक्रगदापाणिः पीतवासाश्च तत्क्षणात् ॥ १९ ॥ जैगीषव्यश्च गरुडस्तत्क्षणात्समजायत ॥ ततः समभवत्तत्र राजवेश्मनि कौतुकम् ॥ २० ॥ दृष्ट्वा नारायणं देवं गरुडस्थं सनातनम् ॥ आश्चर्यं तादृशं दृष्ट्वा स राजा विस्मयान्वितः ॥ उवाच क्षाम्यतां सिद्धौ नायं विष्णुरथे दृशः ॥ २१ ॥ तस्य ब्रह्मा समुत्पन्नो नाभिपंकजमध्यतः ॥ तस्मात्तु ब्रह्मणो रुद्रः स विष्णुः परमेश्वरः ॥ २२ ॥ इति राज्ञो वचः श्रुत्वा तदा तौ सिद्धसत्तमौ ॥ चक्रतुः परमां मायां योगाचार्यौ सुमांत्रिकौ ॥ २३ ॥ कपिलः पद्मनाभस्तु पद्ममध्ये प्रजापतिः ॥ बभूव स्वयमेवात्र सहसा योगतस्तदा ॥ २४ ॥ जैगीषव्योऽथ रुद्रस्तु तस्यैवांके व्यवस्थितः ॥ ददर्श महदाश्चर्यं स राजा योगमोहितः ॥ २५ ॥ कौतुकात्प्रत्युवाचेदं भीतः कंपितकन्धरः ॥ नेत्थं भवति विश्वेशो मायिपा योगिनां तदा ॥ सर्वरूपी हरिः श्रीमान्सर्वगः सर्वदः स्मृतः ॥ २६ ॥ ततो वाक्यावसाने तु तस्य राज्ञश्च संसदि ॥ मशका मत्कुणा यूका भ्रमराः पक्षिणो मृगाः ॥ २७ ॥ अश्वा गावो हयाः सिंहा व्याघ्रा गोमहिषास्तथा ॥ अन्येपि पशवः कीटा ग्राम्या रण्याश्च सर्वशः ॥ २८ ॥ दृश्यंते राजभवने कोटिशः पर्वतात्मजे ॥ तं दृष्ट्वा भूतसंघातं राजा विस्मितमानसः ॥ २९ ॥ यावच्चिंतयते किं स्यात्तावज्ज्ञातं नृपेण हि ॥ जैगीषव्यस्य माहात्म्यं कपिलस्य महात्मनः ॥ ३० ॥ कृतांजलिपुटो भूत्वा स राजाऽश्वशिरास्तदा ॥ पप्रच्छ च द्विजौ भक्त्या किमिदं सिद्धसत्तमौ ॥ ३१ ॥ सामर्थ्यमीदृशं लब्धं कस्माद्वै तपसो बलात् ॥ अद्य मे सफलोत्पत्तिरद्य मे सफलं श्रुतम् ॥ ३२ ॥ सफला मे मनोवृत्तिर्युवयोर्दर्शनेन वै ॥ तस्य तद्वचनं श्रुत्वा कपिलो वाक्यमब्रवीत् ॥ ३३ ॥ महाकालवने राजन्विद्यते लिंगमुत्तमम् ॥ ख्यातं सिद्धेश्वरं नाम्ना सिद्धैरभ्यर्चितं सदा ॥ ३४ ॥ सौभाग्येश्वरपूर्वे तु सौभाग्यारोग्यदायकम् ॥ प्रभावात्तस्य लिंगस्य प्राप्ता सिद्धिरनुत्तमा ॥ ३५ ॥ जैगीषव्येन सिद्धेन मया वै नृपसत्तम ॥ तस्माद्व्रज महाबाहो महाकालवनं शुभम् ॥ ३६ ॥ तत्र द्रक्ष्यसि सर्वेशं शंखचक्रगदाधरम् ॥ लिंगमूर्त्तौ स्थितं विष्णुं यस्ते सिद्धिं प्रदास्यति ॥ ३७ ॥ संसिद्धा बहवस्तत्र सनकाद्या नरेश्वर ॥ तस्य तद्वचनं श्रुत्वा कपिलस्य महात्मनः ॥ ३८ ॥ जगाम सहसा तत्र स राजाश्वशिरास्तदा ॥ ददर्श चैव तां सिद्धां सिद्धेश्वरसमीपतः ॥ ३९ ॥ अन्ये च बहवः सिद्धाः सिद्धनाथास्तथा परे ॥ ज्ञात्वा सिद्धेश्वरं देवं सिद्धसंघैः समर्चितम् ॥ ४० ॥ लिंगमध्ये स्थितं विष्णुं ज्ञात्वा स नृपसत्तमः ॥ पूजयामास भावेन परमेण समाधिना ॥ ४१ ॥ ततस्तोऽत्रवीद्देवो वरं वरय सुव्रत ॥ यत्तेभिलषितं सर्वमहं दास्यामि भूपते ॥ ४२ ॥ लिंगस्य वचनं श्रुत्वा नृपोऽलोक्य च तच्छृणु ॥ यदि मेऽस्ति दया देव प्रसन्नोऽसि हि चेत्प्रभो ॥ ४३ ॥ यत्ते रूपं परं नाथ तदर्शय ममाच्युत ॥ एतदेव हि मे देव सदाभिलषितं हृद्वि ॥ ४४ ॥ आजन्मनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Foundation USA

जगन्नाथ कदा द्रक्ष्ये जनार्दनम् ॥ एतदिच्छाम्यहं देव वराणां प्रवरं वरम् ॥ दीयमानं त्वयाभीष्टं ख्यातं सिद्धेश्वरं क्षितौ ॥ ४५ ॥ नृपस्य वचनं श्रुत्वा लिंगेनोक्तं वरानने ॥ न मे विदुर्देवगणा नासुरा न महर्षयः ॥ ४६ ॥ परं रूपं नृपश्रेष्ठ कृष्णोऽहं लिंगतां गतः ॥ ममलोकं तु ये प्राप्ता मुनयो मंत्रभूषिताः ॥ ४७ ॥ न चैते मां विजानंति परमार्थेन पार्थिव ॥ यदेतद्दृश्यते तेजो लिंगरूपेण मामकम् ॥ ४८ ॥ एतदेव हि ब्रह्माद्या ध्यायन्ति त्रिदशास्त्वमी ॥ अतो न मे परं रूपं द्रष्टुं कश्चित्क्षमो भवेत् ॥ ४९ ॥ अनेकजन्मसंशुद्धा योगिनो मद्गतमहात् ॥ प्रविशंति तनौ मह्यं मुक्ताः संसारबंधनैः ॥५०॥ एवं हि ब्रुवतस्तस्य सिद्धिः प्राप्ता नृपेण हि ॥ विष्णुरूपं समास्थाय तस्मिँल्लिंगे लयं गतः ॥५१॥ अतो देवि सुविख्यातं लिंगं सिद्धेश्वरं परम् ॥ ये पश्यंति नरा भक्त्या तेषां सिद्धिश्च शाश्वती ॥ ५२ ॥ अंजनं पादलेपं च पादुकासिद्धिरेव च ॥ गुटिका खड्गसिद्धिश्च महासिद्धिः सुदुर्लभा ॥ ५३ ॥ दिव्यौषधेश्च या सिद्धिर्मंत्रस्पर्शोद्भवा च या ॥ एतास्तु सिद्धयः प्रोक्ता अपरा लघिमादयः ॥ ५४ ॥ धर्मार्थकाम सिद्धिश्च मोक्षसिद्धिरनुत्तमा ॥ जायते नात्र सन्देहः श्रीसिद्धेश्वरदर्शनात् ॥ ५५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सिद्धेश्वरस्य देवस्य मतंगेशमथो शृणु ॥ ५६ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीति लिङ्गमाहात्म्ये सिद्धेश्वरमाहात्म्यवर्णनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ७ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ मतंगेश्वर संज्ञं तु षष्टिसंख्याकर्माश्वरम् ॥ विद्धि पापहरं देवि समीहितकरं सदा ॥ १ ॥ सुगतिर्नाम विप्रेन्द्रो बभूव द्वापरे युगे ॥ सत्य वादी सदा दांतो वेदाध्ययनतत्परः ॥ २ ॥ मतंगस्तस्य पुत्रोऽभूद्बाल्याद्यरुणतां गतः ॥ स बालं गर्दभं देवि तिष्ठन्तं मातुरंतिके ॥ दण्ड काष्ठेन सहसा ताडयामास चापलात् ॥ ३ ॥ तं तु तीव्राहतं दृष्ट्वा गर्दभी पुत्रगृद्धिनी ॥ उवाच मा शुचः पुत्र चंडालोऽयं न वै द्विजः ॥ ४ ॥ ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते ॥ तुदन्पापाकृतिरयं बाले न कुरुते दयाम् ॥ ५ ॥ स्वकीयां भजते चाथ प्रकृतिं मानवः सदा ॥ एतच्छ्रुत्वा मतंगस्तु दारुणं गर्दभीवचः ॥ ६ ॥ दंडकाष्ठं परित्यज्य रासभीं प्रत्यधावत ॥ ब्रूहि रासभि कल्याणि माता मे येन दूषिता ॥ ७ ॥ कथं मां वेत्सि चंडालं यावत्कुलोद्भवम् ॥ केन जातोस्मि चंडालो ब्राह्मण्यं येन मे गतम् ॥ ८ ॥ ॥ गर्दभ्युवाच ॥ ॥ नापितेन प्रयत्नेन ब्राह्मण्यां वृषलेन हि ॥ ततस्त्वमसि चांडालो ब्राह्मण्यं तेन ते गतम् ॥ ९ ॥ एवमुक्तो मतंगस्तु पितरं वाक्यमब्रवीत् ॥ ताताश्चर्यं श्रुतं मेऽद्य जातोऽहं नापितेन वै ॥ १० ॥ गर्दभ्या कथितं सम्यक्तस्मात्तप्स्ये महत्तपः ॥ एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ॥११॥ स गत्वा च ततोऽरण्यमतप्यत महत्तपः ॥ ततः संतापयामास त्रिदुषांस्तपसान्वितः ॥ १२ ॥ तं तथा तपसा युक्तमुवाच हरिवाहनः ॥ मतंग तप्यसे किं त्वं भोगानुत्सृज्य मानुषान् ॥ वरं ददामि तेऽहं तं वृणीष्व त्वं यदिच्छसि ॥ १३ ॥ ॥ मतङ्ग उवाच ॥ ॥ ब्राह्मण्यं कामयानोऽहमिदमारब्धवां स्तपः ॥ देहि मे शाश्वतं शक्र वर एष वृतो मया ॥ १४ ॥ एतच्छ्रुत्वा तु वचनं तमुवाच पुरंदरः ॥ ब्राह्मण्यं याचसे त्वं हि दुष्प्रापमकृतात्मभिः ॥ ॥ १५ ॥ नाशमेष्यसि दुर्बुद्धे तदुपारम मा चिरम् ॥ चंडालयोनौ जातेन न तत्प्राप्यं कथंचन ॥ १६ ॥ एवमुक्तो मतंगस्तु संरितात्मा यत व्रतः ॥ अतिष्ठदेकपादेन वर्षाणां शतसंख्यया ॥ १७ ॥ तमुवाच ततः शक्रः पुनरेव महायशाः ॥ ब्राह्मण्यं दुर्लभं वीर मा कृथाः साहसं वृथा ॥ १८ ॥ न हि शक्यं प्राप्तुमेवमचिराद्भ्राशमेष्यसि ॥ वृणु वा काममन्यं त्वं ब्राह्मणत्वं सुदुर्लभम् ॥ १९ ॥ एवमुक्तो मतंगस्तु संरितात्मा दृढव्रतः ॥ सहस्रमेकं पादेन ततोऽब्दानामवर्त्तत ॥२०॥ तदेव च पुनर्वाक्यमुवाच बलवृत्रहा ॥ चंडालायोनौ जातेन नावाप्यं ते कथंचन ॥ २१ ॥ अन्यं वरं वृणीष्व त्वं मा कृथास्तत्स्वयं श्रमम् ॥ एवमुक्तो मतंगस्तु भृशं शोकपरायणः ॥ २२ ॥ अतिष्ठत गयां गत्वा सोंगुष्ठेन शतं समाः ॥ सुदुष्करं वहन्योगं प्राणायामपरायणः ॥ २३ ॥ त्वगस्थिभूतो धर्मात्मा तताप परमं तपः ॥ तपंतं तमभिद्रुत्य परिजग्राह वासवः ॥ २४ ॥ वरा णामीश्वरो दाता सर्वभूतहिते रतः ॥ २५ ॥ ॥ शक्र उवाच ॥ ॥ मतंगब्राह्मणत्वं हि विरुद्धमिह दृश्यते ॥ ब्राह्मण्यं दुर्लभं तात ह्यसतां पापशीलिनाम् ॥ २६ ॥ ब्राह्मणे सर्वभूतानां योगक्षेमः समाहितः ॥ तदुत्सृज्येह दुष्प्राप्यं ब्राह्मण्यमकृतात्मभिः ॥ २७ ॥ अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः ॥ २८ ॥ ॥ मतंग उवाच ॥ ॥ किं मां तुदसि दुःखार्तं मृतं मारयसे च माम् ॥ तं तु शोचामि यो लब्ध्वा ब्राह्मण्यं नानु पालयेत् ॥ २९ ॥ ब्राह्मण्यं यदि दुष्प्राप्यं त्रिभिर्वर्णैः शतक्रतो ॥ तपसा च कथं लब्धं विश्वामित्रेण भूभुजा ॥ ३० ॥ वीतहव्यश्च राजर्षिस्तपसा विप्रतां गतः ॥ तस्मात्तपः करिष्यामि निर्द्वंद्वो निष्परिग्रहः ॥३१॥ अहिंसादमसत्यस्थः कथं नार्हामि विप्रताम् ॥ दैवेन कृतमेतद्धि यद्यहं मातृदो षतः ॥ ३२ ॥ एतामवस्थां संप्राप्तो दैवयोगात्पुरंदर ॥ नूनं दैवं न शक्यं तु पौरुषेण निवर्त्तितुम् ॥ ३३ ॥ यदहं यत्रयानेवं न लभे विप्रतां विभो ॥ एवं ज्ञात्वा तु देवेश वातुमर्हसि मे वरम् ॥ ३४ ॥ यदि तेऽहमनुग्राह्यः किंचिद्वा सुकृतं मम ॥ तदुपायं हि मे शंस कथं विप्रो भवामि वै ॥ ३५ ॥ कथं क्षमाक्षया कीर्त्तिर्भवेद्वापि पुरंदर ॥ कर्तुमर्हसि तेनैव शिरसा त्वां प्रसादये ॥ ३६ ॥ इत्युक्तो हि मतंगेन वासवो बलवृत्रहा ॥ कथ यामास संतुष्टो लिंगमाहात्म्यमुत्तमम् ॥ ३७ ॥ ॥ इन्द्र उवाच ॥ ॥ महाकालवने लिंगं स्थापितं ब्रह्मणा पुरा ॥ दिव्यमूर्त्तिधरं दिव्यं श्रीसिद्धेश्वरपूर्वतः ॥ ३८ ॥ तस्य दर्शनमात्रेण विप्रत्वं समवाप्स्यसि ॥ वासवस्य च वाक्येन मतंगो गतवांस्तदा ॥ ३९ ॥ महाकालवनं रम्यं सिद्धक्षेत्रमथापरम् ॥ ददर्श तत्र तल्लिंगमशेषफलदायकम् ॥ ४० ॥ दृष्ट्वा संपूजयामास पुष्पैर्नानाविधैस्तथा ॥ पूजितः प्रत्युवाचेदं मतंगं देवसत्तमः ॥ ४१ ॥ अहो महान्सभाग्योसि यस्त्वया तोषितोऽस्म्यहम् ॥ मत्तः सर्वं समुद्भूतं ब्रह्मांडं भूर्भुवादिकम् ॥ ४२ ॥ वरदोऽस्मि वरार्हाणां शापदोऽस्मि दुरात्मनाम् ॥ ब्राह्मण्यं मत्प्रसादाच्च अक्षयं ते भविष्यति ॥ ४३ ॥ ततोऽसौ विप्रतां यातो मतंगो लिंगदर्शनात् ॥ पुनः पूजाप्रभावेण ब्रह्मलोकं गतो द्विजः ॥ ४४ ॥ ब्राह्मण्यं दुर्लभं लब्धं लिंगस्यास्य प्रभावतः ॥ मतंगेन वरारोहे तस्मादेवो विगीयते ॥ ४५ ॥ मतं गेश्वरको लोके ब्रह्मलोकप्रदायकः ॥ वर्णाश्रमेषु विद्विद्याः पाषंडवचने रताः ॥ ४६ ॥ निर्मर्यादा निराचारा निःशंकाश्चातिलोलुपाः ॥ निर्घृणाः क्रूरकर्माणो भृष्टाः कलियुगे नराः॥दर्शनात्तस्य लिंगस्य तेऽपि यांति त्रिविष्टपम् ॥४७॥ ये विशुद्धा महाभागा ध्यानिनो मुक्तिभागिनः ॥ ते पश्यंति कलौ देवि मतंगेश्वरमीश्वरम् ॥ ४८ ॥ ब्रह्मध्यानपरा ये च यज्ञदानक्रियारताः॥ ते पश्यंति कलौ देवि मतंगेश्वरमीश्वरम् ॥ ४९ ॥ येऽर्चयंति महा देवि मतंगेश्वरमीश्वरम् ॥ कृतपुण्या नरा मर्त्ये तेषां वासोऽक्षयो दिवि ॥५०॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ मतंगेश्वरदेवस्य शृणु सौभा ग्यमीश्वरम् ॥ ५१ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये मतंगेश्वरमाहात्म्य वर्णनंनाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ एकषष्टितमं विद्धि सौभाग्येश्वरमीश्वरम् ॥ यस्य दर्शनमात्रेण सौभाग्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मतुलं लभेत् ॥ १ ॥ प्रथमे प्राकृते कल्पे राजाभूदश्वबाहनः ॥ प्राग्ज्योतिषपुरे रम्ये धर्मात्मा कीर्त्तिवर्द्धनः ॥ २ ॥ अनेकयज्ञकृत्प्राज्ञः संग्रामेष्वप राजितः ॥ तस्य भार्या विशालाक्षि नाम्ना मदनमञ्जरी ॥ ३ ॥ काशिराजसुता सुभ्रू रूपेणातीव शोभना ॥ दक्षा सुशीला धर्मिष्ठा गृहव्यापारकोविदा ॥ ४ ॥ चतुःषष्टिकलायुक्ता सदा भर्तृहिते रता ॥ पूर्णेन्दुवदना सौम्या सदा मधुरभाषिणी ॥ ५ ॥ पूर्वकर्मवशादेवि दुर्भगा समजायत ॥ सा नेष्टा तस्य नृपतेर्नेत्रोद्वेगकरी सदा ॥ ६ ॥ श्रोत्रोद्वेगकरं वाक्यं तस्य राज्ञः करोति सा ॥ ददाह लोचने राज्ञस्तस्याः संदर्शनं सदा ॥ ७ ॥ मृर्छां प्राप्तोत्यसह्यां स तस्याः स्पर्शेन भूपतिः ॥ कदा चालोकितो राजा तया प्रेम्णा वरानने ॥ दह्यमानोऽतितीव्रेण वह्निना वाक्यमब्रवीत् ॥ ॥ ८ ॥ द्वास्थेतां दुर्भगां भार्यामादाय विपिने वने ॥ परित्यजाशु नैतत्ते विचार्यं वचनं मम ॥ ९ ॥ ततो नृपस्य वचनमविचार्यमवेक्ष्य सः ॥ द्वास्थस्तत्याज तां सुभ्रूमागेप्य स्यंदनं वने ॥ १० ॥ सा च त्यक्ता वने शून्ये रुदती च मुहुर्मुहुः ॥ सस्मार तं महीपालं तममन्यत दैवतम् ॥ ॥ ११ ॥ अथ सा चारुसर्वांगी तत्रासक्तात्ममानसा ॥ निश्वासपरमा निन्ये दिनशेषं तथा निशाम् ॥ १२ ॥ निश्वसन्त्यनवद्यांगी हाहेति रुदती मुहुः ॥ मन्दभाग्येति चात्मानं निनिन्द मदिरेक्षणा ॥ १३ ॥ न विहारे न चाहारे रमणीये न तद्वने ॥ न कन्दरेषु शैलानां सा बबन्ध तदा रतिम् ॥ त्यक्ता तेन वरारोहे निनिन्द निजंयौवनम् ॥ १४ ॥ दुर्भगाहं कु जातात्र दुष्टदैववशीकृता ॥ कथं प्राप्तः स मे भर्त्ता तादृशो नृपसत्तमः ॥ १५ ॥ धन्योऽयमतिपुण्योऽयं योऽयं यौवनगोचरः ॥ अन्यासामसतीनां च रमिष्यति न संशयः ॥ १६ ॥ अभीष्टा कस्यचित्कांता कांतः कस्याश्चिदीप्सितः ॥ परस्परानुरागाढ्यं दांपत्यमतिदुर्लभम् ॥ १७ ॥ ममायं वल्लभो राजा न चाहं नृपवल्लभा ॥ परस्परानुरागो हि धन्यानामेव जायते ॥ १८ ॥ यद्यद्य स महीपालो न मया संगमेष्यति ॥ तत्कामाग्निरवश्यं मां क्षपयिष्यति दुःसहः ॥ १९ ॥ रमणीयमभूद्यत्तु पुंस्कोकिलनिनादितम् ॥ हीनं हि वल्लभेनैवं दहतीवाद्य मे वनम् ॥ २० ॥ इत्थं सा मदनाविष्टा विलपन्ती पुनःपुनः ॥ ददर्श तापसं तत्र त्रिकालज्ञं दृढव्रतम् ॥ २१ ॥ मेखलाजिनकौपीनदण्डकाष्ठोपजीवनम् ॥ महौजसं महाभागं मुमुक्षुं मुनिपुंगवम् ॥२२॥ उदयादित्यसंकाशं विभावसुसमद्युतिम् ॥ तं दृष्ट्वा सहसोत्थाय सा राज्ञी दुर्मता सती ॥ २३ ॥ विनयेनोपसंगम्य प्रणिपत्याभिवाद्य च ॥ वियोगकारणं राज्ञः पप्रच्छ प्रणता सती ॥ २४ ॥ भगवन्काशिराजस्य सुताहमतिवल्लभा ॥ भगिनी शत्रुसेनस्य मातुश्चातीव वल्लभा ॥ २५ ॥ अश्वबाहनसंज्ञेन नृपेणोढा महामुने ॥ धर्मतो धर्मकल्पेन प्रजापतिसमेन तु ॥ २६ ॥ सा किमर्थं न चाभीष्टा जाताऽहं तस्य भूपतेः ॥ स चातीव ममाभीष्टो नृपतिः सर्वदा विभो ॥ ॥ २७ ॥ दुर्भगाहं कथं जाता कर्मणा केन तापस ॥ कथं भवति वश्यो मे भर्त्ता नृपतिसत्तमः ॥ सौभाग्यं च कथं मे स्यादिति सत्यं च कथ्यताम् ॥ २८ ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिः संशितव्रतः ॥ ज्ञानेन कथयामास तस्या दौर्भाग्यकारणम् ॥ २९ ॥ पाणिग्रहणकाले त्वं ग्रहैः पापैर्विलोकिता ॥ भर्ता ते नृपतिः पुत्रि ग्रहैः सौम्यैर्विलोकितः ॥ ३० ॥ तेन ते वल्लभो राजा न त्वं भूपस्य वल्लभा ॥ इति तस्य वचः श्रुत्वा सा राज्ञी दीनमानसा ॥ पप्रच्छ विनयोपेता भक्तिनम्रात्मकन्धरा ॥३१॥ भगवन्केन दानेन स्नानेन नियमेन च ॥ कृच्छ्रेण केन सौभाग्यं परमं हि कथं भवेत् ॥ ३२ ॥ इति तस्या वचः श्रुत्वा स मुनिः संशितव्रतः ॥ कथयामास माहात्म्यं सौभाग्यं येन लभ्यते ॥ ३३ ॥ महाकालवने पुत्रि लिंगं सौभाग्यदायकम् ॥ मतंगेश्वरपार्श्वे तु विद्यतऽभीष्टदायकम् ॥ तस्य दर्शनमात्रेण सौभाग्यं रामवाप्स्यसि ॥३४॥ इन्द्राण्या राधितं लिंगं पुरा सौभाग्यकारणात् ॥ सौभाग्यं परमं लब्ध्वा नष्टः शक्रोऽपि लब्धवान् ॥ तस्माद्गच्छ ममादेशान्महाकालवनं शुभम् ॥ ३५ ॥ सौभाग्यं भविता तत्र कतिन सह दर्शनम् ॥ पुंगो भविष्यति शुभे तस्य लिंगस्य दर्शनात् ॥ ३६ ॥ इत्युक्ता सा तदा तेन तापसेन वरानने ॥ विद्यते यत्र तल्लिंगं महाकालवनं गता ॥ ३७ ॥ ददर्श प्रणयोपेता लिंगं सौभाग्यदायकम् ॥ दर्शनात्तस्य लिंगस्य राजा सस्मार तां प्रियाम् ॥ ३८ ॥ पप्रच्छ जमदग्निं तु क्व गता मे प्रिया विभो ॥ भक्षिता विपिने विप्र सिंहव्याघ्रनिशाचरैः ॥ ३९ ॥ मया त्यक्ता नृशंसेन अहं तस्यास्तु वल्लभः ॥ एवं ब्रुवाणो नृपतिः प्रत्युक्तो जमदग्निना ॥ ४० ॥ न भक्षिता सा भूपाल सिंहव्याघ्रनिशाचरैः ॥ सा चाविप्लुतचारित्रा त्वद्भक्ता च पतिव्रता ॥ ॥ ४१ ॥ महाकालवनं राजन्गता सौभाग्यकाम्यया ॥ भार्या रक्ष्या महीपाल इति सा श्रुतिरुत्तमा ॥ ४२ ॥ भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ॥ आत्मा हि जायते तस्यां सा रक्ष्यातो नरेश्वर ॥४३॥ धर्महानिश्चानुदिनमभार्यस्य भवेन्नृप ॥ नित्यक्रियाया विभ्रंशः स चापि पतनाय वै ॥ ४४ ॥ पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्त्तरि ॥ दुःशीला दुर्भगा भार्या पोषणीया नरेश्वर ॥ ४५ ॥ इति तस्य वचः श्रुत्वा समायातो नरेश्वरः ॥ महाकालवने रम्ये ददर्श स्वां प्रियां तदा ॥ ४६ ॥ सौभाग्यालंकृतां सुभ्रूं पूजयंतीं महेश्वरम् ॥ दृष्ट्वा स्नेहेन चालिंग्य प्रत्युवाच स तां प्रियाम् ॥ ४७ ॥ विरहेण त्वदीयेन संतप्तोऽहं वरानने ॥ अद्य मे सफलं चक्षुर्जीवितं च सुजीवितम् ॥ ४८ ॥ यत्त्वां पश्यामि सुभगे कृतार्थोहं कृतस्त्वया ॥ एवं हृष्टातिहर्षेण सा ददर्श तदा पतिम् ॥ उवाच च प्रसीदेति भूयो भूयो मुदान्विता ॥ ४९ ॥ ततः स राजा रभसात्परिष्वज्याद भामिनीम् ॥ प्रिये प्रसन्न एवाहं भूयो भूयो ब्रवीमि किम् ॥ ५० ॥ ततः समागमो जातो जातः पुत्रोऽतिधार्मिकः ॥ तस्य लिंगस्य माहात्म्यादितोनाम स गीयते ॥ ५१ ॥ सौभाग्यमतुलं लब्ध्वं तया देव्या हिमात्मजे ॥ सौभाग्येश्वरसंज्ञं तु ततःप्रभृति भूतले ॥ ५२ ॥ ये पश्यंति विशालाक्षि सौभाग्येश्वरमीश्वरम् ॥ तेषां कुले न दौर्भाग्यं जायते पर्वतात्मजे ॥ ५३ ॥ भविष्यति न दारिद्र्यं वियोगो न च बन्धुभिः ॥ पुत्रमित्रकलत्राणां लिंगस्य च समर्चनात् ॥ ५४ ॥ नोपसर्गभयं तेषां ये पश्यंति वरानने ॥ सौभाग्येश्वरसंज्ञं तु न ग्रहादिभयं भवेत् ॥ ५५ ॥ सर्वव्याधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ मनुष्यो जायते देवि सौभाग्येश्वरदर्शनात् ॥ संपूज्यः सर्वलोकेषु सौभाग्यैकनिधिर्भवेत् ॥ ५६ ॥ जायते भूपतिर्लोके सार्वभौमो वरानने ॥ नापुत्रा नाधना नारी न दीना न च दुःखिता ॥ जायते दुर्भगा नैव सौभाग्येश्वरदर्शनात् ॥ ५७ ॥ न वैधव्यं न च व्याधिर्नाकालमरणं प्रिये ॥ न पुत्रभर्तृजं दुःखं जायते लिंगदर्शनात् ॥ ५८ ॥ यथा लक्ष्मीर्हरेर्नित्यं सावित्री ब्रह्मणः स्मृता ॥ रोहिणी वल्लभा चंद्रोः शची शक्रस्य वल्लभा ॥ तथा सा जायते नारी सौभाग्येश्वरदर्शनात् ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ सौभाग्येश्वरदेवस्य शृणु रूपेश्वरं प्रिये ॥ ६० ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्ये सौभाग्येश्वरमाहात्म्यवर्णनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ ॥ द्विषष्टिकं विजानीहि देवं रूपेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण रूपवान्जायते नरः ॥ १ ॥ पाद्मकल्पे महादेवि पद्मोनाम महीपतिः ॥ पद्मगर्भसमुद्भूतो बभूवातिपराक्रमी ॥ पृथिव्याश्चतुरंताया जातो धर्मरतो बली ॥ २ ॥ स कदाचिन्महाबाहुः प्रभूतबलवाहनः ॥ वनं जगाम गहनं हयनागशतैर्वृतः ॥ ३ ॥ बिल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ॥ मृगसिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ॥ ४ ॥ तत्र वन्यसहस्राणि हत्वा सबलवाहनः ॥ राजा मृगप्रसंगेन वनमन्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्विवेश सः ॥ ५ ॥ एक एवोत्तमबलः क्षुत्पिपासासमन्वितः ॥ स वनस्यांतमासाद्य महदारण्यमासदत् ॥ ६ ॥ तच्चाप्यतीत्य नृपतिर्ददर्शाश्रम मुत्तमम् ॥ मनःप्रह्लादजननं दृष्टिकांतमतीव च ॥ ७ ॥ पुष्पितैः पादपैः कीर्णमतीव सुखशाद्वलम् ॥ ततोऽगच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान् ॥ ८ ॥ नापश्यदाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ उवाच क इहेत्युच्चैर्वनं संनादयन्निव ॥९॥ श्रुत्वाथ तं तथा शब्दं कन्या श्रीरिव रूपिणी ॥ निश्चक्रामाश्रमात्तस्मात्तापसाकारधारिणी ॥१०॥ सा तं दृष्ट्वैव राजानं पद्मगर्भसमद्युतम् ॥ आसनेनार्चयित्वा च पप्रच्छ नाम तं तदा ॥११॥ उवाच स्मयमानाथ किं कार्यं क्रियतामिति ॥ तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ॥१२॥ दृष्ट्वा चैवानवद्यांगीं यथावत्प्रतिपूजितः ॥ आगतोऽहं महाभागे मुनिश्रेष्ठमुपासितुम् ॥ १३ ॥ क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने ॥ एवमुक्ता तु सा कन्या तेन राज्ञा तदाश्रमे ॥ हसंती प्रत्युवाचेदं वाक्यं समधुराक्षरम् ॥ १४ ॥ कन्याहं पृथिवीपाल कौमारब्रह्मचारिणः ॥ तपस्विनो धृतिमतो धर्मज्ञस्य मनस्विनः ॥ १५ ॥ सुता कण्वस्य मामेवं विद्धि त्वं नृपसत्तम ॥ कण्वं हि पितरं मन्ये पितरं स्वमजानती ॥ १६ ॥ तस्यास्तद्वचनं श्रुत्वा नृपेणोक्तं वरानने ॥ सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ॥ १७ ॥ भार्यां मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥ सुवर्णरत्नवासांसि कुंडले परिहारके ॥ १८ ॥ आहरामि तवाद्याहं भार्या मे भव शोभने ॥ गांधर्वेण च मां भीरु विवाहेनैव सुंदरि ॥ विवाहानां च रंभोरु गांधर्वः श्रेष्ठ उच्यते ॥ १९ ॥ नृपस्य वचनं श्रुत्वा कन्या प्रत्युत्तरमब्रवीत् ॥ मुहूर्त्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥ २० ॥ ॥ राजोवाच ॥ ॥ इच्छामि त्वां वरारोहे भजमानमनिंदिते ॥ तदर्थं मां स्थितं विद्धि त्वया मेऽपहृतं मनः ॥ २१ ॥ आत्मनो बंधुरात्मैव गतिरात्मैव चात्मनः ॥ आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः ॥ ॥ २२ ॥ ॥ कन्योवाच ॥ ॥ यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ॥ सत्यं मे प्रतिजानीहि दत्तमात्मानमद्य मे ॥ २३ ॥ इति तस्या वचः श्रुत्वा परिणीता नृपेण हि ॥ गांधर्वेण विवाहेन कामासक्तेन पार्वति ॥ २४ ॥ कामिता सा नृपेणैव ततो गंतुं समुद्यतः ॥ एतस्मिन्नंतरे देवि कण्वस्याश्रममभ्यगात् ॥ २५ ॥ सा कन्या पितरं दृष्ट्वा व्रियं नोपजगाम तम् ॥ विज्ञायाथ च तां विप्रो दिव्यज्ञानो महातपाः ॥ २६ ॥ उवाच परमं क्रुद्धस्तां कन्यां काममोहिताम् ॥ त्वयापि दुष्टे रहसि मामवज्ञाय चत्कृतः ॥ २७ ॥ स्वयं स्वयंवरो मोहात्तस्मात्कृष्णा भविष्यसि ॥ कुत्सिता निर्घृणा दीना निर्लज्जा रूपवर्जिता ॥ २८ ॥ अयं ते नृपतिर्भर्त्ता दुष्टरूपो भविष्यति ॥ २९ ॥ इत्युक्ता तक्षणाज्जाता सा कन्या रूपवर्जिता ॥ कुरूपो नृपतिर्जातः शापात्तस्य महात्मनः ॥ ३० ॥ अथ प्रसादयामास सा कन्यां पितरं तदा ॥ बालानभिज्ञा मूढाहं मन्मथेन प्रपीडिता ॥ ३१ ॥ अज्ञानात्कृतं पापं तात त्वं क्षंतुमर्हसि ॥ अयं महीपतिस्तात प्रत्यग्लीनो महाव्रतः ॥ ३२ ॥ न चाहं प्रार्थिता तेन मयासौ प्रार्थितो नृपः ॥ तस्मा दनुग्रहं तात कर्तुमर्हसि चावयोः ॥ ३३ ॥ इति तस्या वचः श्रुत्वा स विप्रोऽतिकृपान्वितः ॥ उवाच त्वां दुहितरमाश्वास्यैवं पुनःपुनः ॥ ३४ ॥ नैव वागनृतं पुत्रि यावदद्य स्मराम्यहम् ॥ दैवमत्र परं मन्ये धिग्बुद्धिं धिक्पराक्रमम् ॥ ३५ ॥ अकार्यं कारितो येन बलादद्यनिंदिते ॥ उपदेशं प्रदास्यामि तरणं कर्तुमिहार्हसि ॥ ३६ ॥ महाकालवने पुण्ये लिंगं रूपप्रदायकम् ॥ पशुपेश्वरपूर्वे तु विद्यतेऽभीष्टदायकम् ॥ ३७ ॥ तत्त्वं गच्छ त्वरा युक्ता सह भर्त्रा नृपेण हि ॥ रूपं प्राप्स्यसि दुष्प्राप्यं लिंगदर्शनमात्रतः ॥ ३८ ॥ इत्युक्ता सा तदा कन्या सह भर्त्रा गता प्रिये ॥ महाकालवने रम्ये यत्र लिंगमनुत्तमम् ॥ ३९ ॥ ददर्श परया भक्त्या स च राजा नरोत्तमः ॥ तक्षणाद्दिव्यदेहा सा रूपेणातिमनोहरा ॥ दिव्यवस्त्रपरीधाना दिव्यालंकारभूषिता ॥ ४० ॥ स च राजा तथा जातः कंदर्पसदृशाकृतिः ॥ रूपेणाप्रतिमो लोके तस्य लिंगस्य दर्शनात् ॥ ४१ ॥ अतो लोकेषु विख्यातो देवो रूपेश्वरः प्रिये ॥ रूपदो धनदोऽत्यर्थं पुत्रदः स्वर्गदस्तथा ॥ ४२ ॥ स च राजा स्वकं प्राप्तो राष्ट्रं सस्यादिसंयुतम् ॥ प्रियया परया सार्द्धं चक्रे राज्यमकंटकम् ॥ ४३ ॥ राज्यं कृत्वा गतः स्वर्गं भार्यया सह पार्वति ॥ दीप्यमानो वपुषा द्वितीय इव भास्करः ॥ ४४ ॥ विमानेन सुदीप्तेन वंद्यमानो दिवालये ॥ दर्शनात्तस्य लिंगस्य प्राप्तः पदमनामयम् ॥ ४५ ॥ ये पश्यंति विशालाक्षि देवं रूपेश्वरं शिवम् ॥ न ते रूपेण हीयंते यशसा च कुलेन च ॥ ४६ ॥ सदा रूपकरं लिंगं भुक्तिमुक्तिफलप्रदम् ॥ ये पश्यंति वरारोहे तेषां लोकाः सदाऽक्षयाः ॥ ४७ ॥ येऽर्चयंति नरा नित्यं देवं रूपेश्वरं परम् ॥ तेऽर्चिता यांति यानेन मम लोकं सनातनम् ॥ ४८ ॥ स एव सुकृती लोके कुलं तेनाप्यलंकृतम् ॥ यः पूजयति रूपेशं रूपसौभाग्यदायकम् ॥ ४९ ॥ यः पूजयति देवेशं प्रसंगादपि पार्वति ॥ धनवान्रूपवान्सोऽपि राजा भवति भूतले ॥ ५० ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ रूपेश्वरस्य देवस्य धनुःसाहस्रकं शृणु ॥ ५१ ॥ इति श्रीस्कंदे महापुराण एकाशीति साहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्ये रूपेश्वरमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ ॥ ॥ ॥ ॥ श्रीहर उवाच ॥ ॥ धनुःसाहस्रनामानमीश्वरं शृणु पार्वति ॥ त्रिषष्टिसंख्यकं दिव्यं दर्शनात्पापनाशनम् ॥ १ ॥ विदूरथोनाम नृपः ख्यातकीर्त्तिरभूद्भुवि ॥ तस्य पुत्रद्वयं जातं सुनीतिः सुमतिस्तथा ॥ २ ॥ एकदा तु वनं यातो मृगयां स विदूरथः ॥ ददर्श गर्त्तं सुमहद्भूमेर्मुखमिवोद्गतम् ॥ ३ ॥ तं दृष्ट्वा चिंतयामास किमेतदिति पार्थिवः ॥ पातालविवरं मन्ये वडवानलसंनिभम् ॥ ४ ॥ चिंतयन्निव तत्रासौ ददर्श विजने वने ॥ ब्राह्मणं सुव्रतंनाम तपस्विनमकल्मषम् ॥ ५ ॥ स तं पप्रच्छ नृपतिः किमेतदिति भो द्विज ॥ ६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ दानवः सुमहावीर्यो वसत्युग्रो रसातले ॥ कुजंभोनाम विख्यातो भिनत्ति वसुधामिमाम् ॥ ७ ॥ तमजित्वा कथं राज्यं भोक्ष्यसे वसुधाधिप ॥ तेन विध्वंसिता विप्रा राज्ञा निःसृत्य पार्थिव ॥ ८ ॥ उपद्रुतास्तथा देशा ध्वस्ताश्चैव तथाश्रमाः ॥ आप्याययति दैत्योऽयं सबली मुशलायुधः ॥ ९ ॥ यदि त्वं घातयस्येनं पातालांतरगोचरम् ॥ ततः समस्तवसुधापतिरेव भविष्यसि ॥ १० ॥ इति विप्र वचः श्रुत्वा मंत्रयामास पार्थिवः ॥ मंत्रिभिः सहितोऽमोघं श्रुत्वा मुशलमद्रिजे ॥ ११ ॥ तं मंत्रं क्रियमाणं तु भृत्युभ्यां सह मंत्रिभिः ॥ तत्पार्श्ववर्त्तिनी कन्या शुश्राव अथ सुदावती ॥ १२ ॥ ततः कतिपयाहे तु तां कन्यां जलजेक्षणाम् ॥ जहारोपवनादैत्यः कुजंभः स्वसखीवृताम् ॥ १३ ॥ एतच्छ्रुत्वा महीपालः क्रोधपर्याकुलेक्षणः ॥ उवाच पुत्रौ जानेऽहं स कुजंभो महासुरः ॥ १४ ॥ दृष्ट्वा भूमौ पुरा गर्त्तं तत्र संशयिते मयि ॥ कथितो द्विजमुख्येन मया पृष्टेन पुत्रकौ ॥ १५ ॥ स हन्यतां सोऽपहर्त्ता सुदावत्याः सुदुर्मतिः ॥ प्रस्थितौ नृपभक्त्याथ स्वसैन्यपरिवारितौ ॥ १६ ॥ तौ सुतौ तत्र संप्राप्तौ पाताले पितृशासनात् ॥ युयुधाते कुजंभेन स्वशक्त्या सेनया वृतौ ॥ १७ ॥ ततः परिघनिस्त्रिंशशक्तिशूलपरश्वधैः ॥ बाणैश्चिरतरं युद्धं तेपामासीत्सुदारुणम् ॥ १८ ॥ ततो मायाबलवता तेन दैत्येन तत्क्षणात् ॥ अमोघेनाद्वितीयेन मुशलेन वरानने ॥ १९ ॥ हतसैन्यौ रणे बद्धौ राजपुत्रौ महाबलौ ॥ २० ॥ ततः श्रुत्वा महीपालो विवर्णवदनोऽभवत् ॥ बद्धपुत्रः परामार्त्तिं जगाम गिरिपुत्रिके ॥ २१ ॥ रुरोद बहुधात्यर्थं पुत्रस्नेहेन पार्थिवः ॥ ततो विलपतस्तस्य मार्कंडेयो महामुनिः ॥ अनेकसृष्टिसंहारदृष्टकार्यपरावरः ॥ २२ ॥ उदितादित्यसंकाशः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सप्तकल्पानुगो वशी ॥ आजगाम नृपाभ्याशे विलपंतं ददर्श सः ॥ राजानं कथयामास त्रिकालज्ञो महामुनिः ॥ २३ ॥ मा शुचस्त्वं महीपाल क्षत्रियोऽसि दृढव्रतः ॥ क्व शोकः क्व महीपालो दुर्जेयो लोकपालवत् ॥ २४ ॥ शोकं कुपुरुषाचीर्णं त्यज त्वं राजसत्तम ॥ उद्यमं कुरु राजेंद्र कुजंभं घातयिष्यसि ॥ २५ ॥ नात्युच्चं मेरुशिखरं नातिनीचं रसातलम् ॥ व्यवसायः सखा यस्य नास्ति दूरे महोदधिः ॥ २६ ॥ महाकालवने लिंगमाराधय समाहितः ॥ रूपेश्वरस्य देवस्य पार्श्वे दक्षिणतः स्थितम् ॥ २७ ॥ धनुःसाहस्रतुल्यं तु मुशलस्य निवारणम् ॥ धनुः प्राप्स्यसि राजेंद्र कुजंभं विनिपातय ॥ २८ ॥ धनुःसाहस्रहस्तैस्तु रक्षितं योधसत्तमैः ॥ लिंगं देवासुरैर्युद्धे सहस्राक्षेण सेवितम् ॥ इंद्रेण च धनुर्लब्धं जंभो वै येन पातितः ॥ २९ ॥ तस्य तद्वचनं श्रुत्वा स राजाथ विदूरथः ॥ जगाम त्वरितो देवि महाकालवनं शुभम् ॥ ३० ॥ ददर्श तत्र तल्लिंगं पूजयामास भक्तितः ॥ तस्य तुष्टस्तदा देवो ददौ दिव्यं धनुस्तदा ॥ ३१ ॥ धनुःसाहस्रतुल्यं च मुशलस्य निवारणम् ॥ धनुर्लब्ध्वा तदा राजा बद्धगोधां गुलित्रवान् ॥ जगाम धीरः पातालं तेन गर्तेन सत्वरम् ॥ ३२ ॥ ततो ज्यास्वनमत्युग्रं स चक्रे पार्थिवस्तदा ॥ येन पातालमखिलमासीदापूरितांतरम् ॥ ३३ ॥ ततो ज्यास्वनमाकर्ण्य कुजंभो दानवेश्वरः ॥ आजगामातिकोपेन स्वसैन्यपरिवारितः ॥ ३४ ॥ ततो युद्धमभूत्तस्य सह राज्ञा वरानने ॥ दिनानि त्रीणि स यदा योधितस्तेन दानवः ॥ ३५ ॥ ततः कोपपरीतात्मा मुशलायाभ्यधावत ॥ गंधैर्माल्यैस्तथा धूपैः पूज्यमानः स तिष्ठति ॥ ३६ ॥ यावद्गृह्णाति मुशलं तावत्सा च मुदावती ॥ पस्पर्श चंदनव्याजैरनेकैश्च पुनःपुनः ॥ ३७ ॥ ततः स गत्वा युयुधे मुसलेनासुरेश्वरः ॥ तदा मुसलपातास्ते धनुषा निष्प्रभीकृताः ॥ ३८ ॥ धनुर्ज्याघातशब्देन पतिते भूतले तदा ॥ गतो वैवस्वतं लोकं कुजंभोनाम दानवः ॥ ३९ ॥ ततोऽपतत्पुष्पवृष्टिस्तस्योपरि महीपतेः ॥ जगुर्गंधर्वपतयो देववाद्यानि तस्वनुः ॥ ४० ॥ स चापि राजा तं हत्वा पुत्रौ लब्ध्वा सुतां तदा ॥ मुदावतीं मुदा युक्तो हर्षगद्गदनिर्भरः ॥ ४१ ॥ पुत्राभ्यां सहितो देवि सुसंपूर्णमनोरथः ॥ सांतःपुरपरीवारः पुनरायाद्वरानने ॥ ४२ ॥ महाकालवने रम्ये यत्र तल्लिंगमुत्तमम् ॥ पूजयामास रत्नैश्च वस्त्रैराभरणैस्तथा ॥ ४३ ॥ ततः स पूजितो देवैः शक्रेण च पुनःपुनः ॥ अस्य लिंगस्य माहात्म्याद्धनुः प्राप्तं नृपेण वै ॥ ४४ ॥ कुजंभोऽपि हतो दैत्यो देवविद्वेषकारकः ॥ धनुःसाहस्रनामायमतः ख्यातिं गमिष्यति ॥ ४५ ॥ भक्त्या ये पूजयिष्यंति धनुःसाहस्रमीश्वरम् ॥ यास्यन्ति शत्रवस्तेषां क्षयं नैवात्र संशयः ॥ ४६ ॥ अर्चिते देवदेवेशे धनुःसाहस्रिके शिवे ॥ अर्चिताः सर्वदेवाः स्युर्वरदाश्च न संशयः ॥ ४७ ॥ प्रातर्मध्येऽपराह्णे च धनुःसाहस्रकं शिवम् ॥ ये नमन्ति नरा नित्यं न ते नरकभोगिनः ॥ ४८ ॥ तीर्थानां च यथा गंगा रक्षिता योधसत्तमैः ॥ तथायं रक्षको देवो नाम्ना धनुःसहस्रकः ॥ ४९ ॥ तत्र गंगादितीर्थानि विद्यन्ते विविधानि च ॥ सुरहस्यातिपुण्यानि सद्यः पापहराणि च ॥ ५० ॥ तेषां फलं विनिर्दिष्टं ये पश्यन्ति तु भक्तितः ॥ धनुःसाहस्रकंनाम सदा शत्रुक्षयंकरम् ॥ ५१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ धनुःसाहस्रदेवस्य देवं पशुपतिं शृणु ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये धनुःसाहस्रमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु त्वं पशुपत्याख्यं चतुःषष्टिकमीश्वरम् ॥ यस्य दर्शनमात्रेण पशुयोनिर्न लभ्यते ॥ १ ॥ पशुपालो महादेवि बभूव भुवि विश्रुतः ॥ राजा परमधर्मिष्ठः पशूनां पालने रतः ॥ २ ॥ दिदृक्षुः स कदाचिच्च गतस्तोयनिधिं प्रति ॥ ददर्श तत्र पुरुषान्पंच प्राधान्यतः स्थितान् ॥ एका स्त्री मुक्तकेशा सा भ्रमन्ती च पुनःपुनः ॥ ३ ॥ अथ राजा भयाविष्टो विसंज्ञः समपद्यत ॥ संवेष्टितो दस्युभिस्तैस्तया नार्या विशेषतः ॥ ४ ॥ ततोन्ये समपातं च आगत्य नृपसत्तमम् ॥ संवेष्ट्य संस्थितैः सर्वैस्ततो रुद्धो महीपतिः ॥ ५ ॥ रुद्धे राजनि ते सर्वे एकीभूतास्तु दस्यवः ॥ घातिताः पशुपालेन न मृताः पुनरुत्थिताः ॥ ६ ॥ तस्य तां धृष्टतां ज्ञात्वा स्थैर्यं च नृपतेर्मृधे ॥ तस्यैव नृपतेर्देहे लीनास्ते दश दस्यवः ॥ ७ ॥ अमूर्त्ता इव ते सर्वे एकीभूतास्ततोऽभवन् ॥ तान्दृष्ट्वा दुःखितो राजा पशुपालोऽभवत्क्षणात् ॥ ८ ॥ अथापश्यत्तदाऽऽयांतं नारदं मुनिपुंगवम् ॥ ब्रह्मपुत्रं तपोयुक्तं पप्रच्छ स नृपस्तदा ॥ ९ ॥ ॥ पशुपाल उवाच ॥ ॥ भगवन्ब्रह्मपुत्राद्य मया दृष्टं तु कौतुकम् ॥ अकस्मात्पुरुषाः पंच समायाता भयावहाः ॥ १० ॥ तैरहं वेष्टितो दुष्टैर्व्याकुलश्च कृतस्तदा ॥ मुष्टिभिर्हन्यमानोऽहं स्वस्थो जातो द्विज क्षणात् ॥ ११ ॥ ततोऽन्ये पुरुषाः पञ्च समायाता निषुध्य माम् ॥ हन्यतां हन्यतामेष मुक्तिकामो नृपाधमः ॥ १२ ॥ एवं तैः पीडितोऽत्यर्थं पुनर्मोहमुपागतः ॥ एतस्मिन्नन्तरे सा स्त्री मामुवाच पुनःपुनः ॥ १३ ॥ दृढो भव महाराज मा विषादं कुरु प्रभो ॥ हीनवीर्या ह्यमी चोराः समर्थस्त्वं स्थिरो भव ॥ १४ ॥ तस्या वाक्येन विप्रेंद्र मया धैर्येण संयुगे ॥ दश प्रधानपुरुषा जितास्ते न मृताः प्रभो ॥ १५ ॥ प्रलीना मच्छरीरे तु केन्यते कापि साऽबला ॥ पशुपालवचः श्रुत्वा नारदो वाक्यमब्रवीत् ॥ १६ ॥ ये त्वया पुरुषा दृष्टास्त्वयि लीना जिता नृपे ॥ बुद्धीन्द्रियाणि ते पञ्च पंच कर्मेन्द्रियाणि च ॥ भ्रमन्ती या च नारी सा त्वया दृष्टा नृपोत्तम ॥ ॥ १७ ॥ मनोरूपेण सा बुद्धिर्भ्रमत्येव हि न स्थिरा ॥ जेतानि तानि पूर्वेण ब्रह्मणा लोककर्तृणा ॥ १८ ॥ सोऽपि क्रोधवशं नीत इन्द्रियैर्विषयैः प्रियैः ॥ पितामहेन स्वे यज्ञे शम्भोर्भागो न कल्पितः ॥ १९ ॥ महादेवो जगन्नाथः सृष्टिसंहारकारकः ॥ इंद्रियैर्मोहितो राजन्क्रोधं चक्रे सुरान्प्रति ॥ २० ॥ सुरा विभूतयो यस्य क्रीडार्थं भुवनत्रयम् ॥ तेन भागनिमित्तार्थं चक्रे सज्यं धनुस्तदा ॥ २१ ॥ पूष्णश्च दंताः संभग्ना मोहितश्च दिवाकरः ॥ नेत्रे भग्ने भगस्यापि विद्धो यज्ञो मृगाकृतिः ॥ २२ ॥ पशवश्च कृता देवा मुनयो वेदवर्जिताः ॥ ऋषीणां धर्मशास्त्राणि हृतानि विभुना तथा ॥ २३ ॥ दुर्जयानीन्द्रियाण्याहुर्मुनयो वेदपारगाः ॥ मनोरूपेण या बुद्धिः सा चातीव सुदुर्जया ॥ २४ ॥ तस्माद्राजन्महाबाहो मा विषादं वृथा कृथाः ॥ तस्य तद्वचनं श्रुत्वा नारदस्य महात्मनः ॥ पशुपालो महादेवि वक्तुं समुपचक्रमे ॥ २५ ॥ ॥ पशुपाल उवाच ॥ ॥ कथं ते भगवन्मुक्ता देवाः शक्रपुरोगमाः ॥ पशुभावाच्च ब्रह्मंपि श्रोतुमिच्छामि कथ्यताम् ॥ २६ ॥ तस्य तद्वचनं श्रुत्वा नारदः पुनरब्रवीत् ॥ पशुत्वेऽपि गता देवा ऋषिभिर्मुनिभिः सह ॥ २७ ॥ ब्रह्माणमग्रतः कृत्वा गताः शरणमीश्वरम् ॥ स्तुतिभिस्तोषितो देवो भक्ताद्यनुग्रहकारकः ॥ २८ ॥ उवाच वचनं राजन्यत्कर्तव्यं तदुच्यताम् ॥ २९ ॥ ॥ देवा ऊचुः ॥ ॥ वेदशास्त्राणि विज्ञानं देहि नो भव मा चिरम् ॥ देवस्त्वं पूर्ववद्देव यदि तुष्टो महेश्वरः ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ भवंतः पशवः सर्वे मया सार्द्धं च गम्यताम् ॥ महाकालवने क्षेत्रे पशुभावविमोक्षके ॥ ३१ ॥ अहं पतिर्वो भविता ततो मोक्षमवाप्स्यथ ॥ भवतामनुकंपार्थं लोकानुग्रहकारणम् ॥ लिंगरूपी भविष्यामि नाम्ना पशुपतीश्वरः ॥ ३२ ॥ अथ ते त्रिदशाः सर्वे दृष्ट्वा देवं तमीश्वरम् ॥ पशुभावविनिर्मुक्ता गता दृष्ट्वास्त्रिविष्टपम् ॥ ब्रह्मा पशुपतिं प्राह प्रसन्नेनांतरात्मना ॥ ३३ ॥ ये त्वां पश्यन्ति देवेशं भक्त्या परमया युताः ॥ तेषां कुले पशुत्वं च ये गताः पितरः प्रभो ॥ स्वकैः कर्मविपाकैश्च तेषां मोक्षो भविष्यति ॥ ३४ ॥ अज्ञानाज्ज्ञानतो वापि यत्पापं क्रियते नरैः ॥ तत्पापं विलयं यातु तस्य देवस्य पूजनात् ॥ ३५ ॥ ते नराः पशवो लोके किं तेषां जीविते फलम् ॥ येन दृष्टः पशु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पतिः पशुयोनिविमोचकः ॥ २६ ॥ कौमारे यौवने बाल्ये वार्द्धके यदुपार्जितम् ॥ तत्पापं विलयं याति दृष्ट्वा पशुपतिं शिवम् ॥ २७ ॥ पौषमासे तु संप्राप्ते ये त्वां पश्यंति मानवाः ॥ तेषां त्वं वरदो देव सदाभीष्टकरो भवेत् ॥ २८ ॥ सूर्यग्रहे यथा दत्तं कुरुक्षेत्रे विशेषतः ॥ पात्रे दानं सुवर्णस्य प्रोक्तमक्षय्यमव्ययम् ॥ २९ ॥ पौषमासे दिनेकेन नराणामधिकं तथा ॥ तद्दर्शनेन देवेश भविष्यति न संशयः ॥ ३० ॥ इत्युक्त्वा भगवान्ब्रह्मा ब्रह्मलोकं गतो नृप ॥ कृतकृत्यः प्रहृष्टात्मा मुनिभिः कविभिः सह ॥ ३१ ॥ तस्मात्त्वमपि राजेंद्र यदीच्छसि परां गतिम् ॥ समाराधय तल्लिंगं पशुयोनिविमोचनम् ॥ महाकालवनं गत्वा इन्द्रेश्वरस्य दक्षिणे ॥ ३२ ॥ तस्य तद्वचनं श्रुत्वा नारदस्य महात्मनः ॥ जगाम पशुपालोऽपि महाकालवनं प्रिये ॥ दर्शनात्तस्य लिंगस्य गतोऽसौ परमां गतिम् ॥ ३३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पशुपत्याख्यदेवस्य शृणु ब्रह्मेश्वरं शिवम् ॥ ३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पशुपतीश्वरमाहात्म्यवर्णनंनाम चतुष्पष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ७ ॥ ॥ श्रीहर उवाच ॥ ॥ पंचषष्टिकसंख्याकं विद्धि ब्रह्मेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण ब्रह्मलोको ह्यवाप्यते ॥ १ ॥ पुलोमानाम दैत्येंद्रो महाबलपराक्रमः ॥ पौलोमानां सहस्रेस्तु पूज्यमानः स तिष्ठति ॥ २ ॥ आनचुस्तेऽपि तं दैत्यं सुरेशं त्रिदशा इव ॥ स कदाचित्समक्षं तु दैत्यानामिदमब्रवीत् ॥ ३ ॥ अद्यापि लोकपालानामर्केदुज्वलनांभसाम् ॥ शतक्रतोर्द्धनेशस्य यमस्य वरुणस्य च ॥ ४ ॥ यदि नाम ततः किं मे तपसा जीवितेन च ॥ सोऽहं विद्रावयिष्यामि सर्वानेव दिवौकसः ॥ ५ ॥ सर्वैरेतैः परिवृतः पौलोमैर्बलवत्तरैः ॥ इत्युक्त्वा गतवान्देवि सागरं दैत्यसंवृतः ॥ तावच्छ्यानं सहसा ह्यपश्यन्मधुसूदनम् ॥ ६ ॥ शारदाभ्रसमाभासं मध्येकालं यथा घनम् ॥ तमालोक्य ततो दैत्यानब्रवीदनुगांस्तथा ॥ ७ ॥ अयं स दानवगिरिवज्रो हि मधुसूदनः ॥ कीर्त्तिकांताकलाकेलिवैधव्यादेशको द्विषाम् ॥ ८ ॥ दैत्यसीमंतिनीकांतपत्रवल्लीप्रभंजकः ॥ अयमस्मज्जयद्वधूवैधव्यादेशकः परः ॥ ९ ॥ गतशंकः स्वपित्येकः सर्वदा कुटिलाशयः ॥ हंतव्यस्त्वरया दुष्टः कांक्षितो दर्शनं गतः ॥ १० ॥ इत्युक्ता स हि दैत्येंद्रः पुलोमातिरुपान्वितः ॥ अभिदुद्राव वेगेन तावदग्रे पितामहम् ॥ ददर्श नाभिकमले चिन्तयानं पुनःपुनः ॥ ११ ॥ अथ व्याकुलतां प्राप्तो ब्रह्मा दृष्ट्वा तदद्भुतम् ॥ आयांतं दैत्यसिंहानां सैन्यं रणमुदुर्जयम् ॥ ॥ १२ ॥ अथ बोधं गतः क्षिप्रं केटभारिर्महाबलः ॥ ददर्शाग्रे पुलोमं तु स्वसैन्यपरिवारितम् ॥ १३ ॥ अजेयः संगरे धीरो ब्रह्माणमिदमब्रवीत् ॥ १४ ॥ ॥ विष्णुरुवाच ॥ ॥ पुलोमस्य विनाशार्थमुद्योगः क्रियतामिति ॥ असौ लब्धवरो दैत्यः सहसा मां विजेष्यति ॥ १५ ॥ तस्माद्गच्छ त्वरायुक्तो महाकालवने शुभे ॥ लिंगं द्रक्ष्यसि तत्रैव सप्तकल्पोद्भवं परम् ॥ १६ ॥ उत्तरे च्यवनेशस्य शिवशक्तिसमन्वितम् ॥ तस्य लिंगस्य माहात्म्याद्बलं प्राप्स्यति शाश्वतम् ॥ १७ ॥ कुण्डेश्वरकरस्पर्शकारि वारि निरंतरम् ॥ तदानय गृहीत्वा तु तेनायं वध्यतामिति ॥ १८ ॥ इति तस्य वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ आजगाम मुहूर्तेन यत्र तल्लिंगमुत्तमम् ॥ १९ ॥ स्तुतिं चकार सहसा दृष्ट्वा भक्त्या पितामहः ॥ ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते दिव्यरूपाय नमस्ते बहुरूपिणे ॥ नमोऽविपद्मगीर्याय नमो विश्वक्रियात्मने ॥ २१ ॥ नमः पिंगकपर्दाय नमः खंडेंदुधारिणे ॥ नमः कनकवर्णाय नमो वननिवासिने ॥ २२ ॥ वंदे त्वां भूतभर्त्तारं सदा शत्रुविनाशनम् ॥ रणत्कनककेयूरं धृतपूर्णेंदुमंडलम् ॥ २३ ॥ वन्दे त्वां त्रिदशाध्यक्षं विश्वाध्यक्षं महेश्वरम् ॥ क्षीणसंसारदुःखौघं मुनिध्यातपदं सदा ॥ २४ ॥ वंदे त्वां सर्वदा देवं दैत्यसंघातनाशनम् ॥ टंकपट्टिशशूलाग्रधनुःखड्गगदाधरम् ॥ २५ ॥ एवं स्तुतः स भगवाँल्लिंगरूपी महेश्वरः ॥ किंचिन्मितमुखः प्राह ब्रह्माणं लोककारणम् ॥ २६ ॥ किं तेऽभीष्टं करोम्यद्य किं ददामि पितामह ॥ कस्मात्तोषि मुनिश्रेष्ठ कस्मादातोऽसि दृश्यसे ॥ ॥ २७ ॥ इति लिंगवचः श्रुत्वा कथितं ब्रह्मणा तदा ॥ वृत्तांतं विस्तरात्सर्वं लिंगेनोक्तं तदा प्रिये ॥ २८ ॥ जलं गृहाण वाणीश शस्त्रजं शत्रुवारणम् ॥ हनिष्यसि क्षणेनैव पुलोमं सहसैन्यकम् ॥ २९ ॥ इत्युक्तः सत्वरो ब्रह्मा गतो यत्र जनार्दनः ॥ जलेन तेन तान्दैत्यान्पातयामास भूतले ॥ ३० ॥ स पुलोमा महानासीत्स्वारोचिषेंऽतरे मनौ ॥ कृष्णोऽपि ब्रह्मणा सार्द्धमाजगाम कुशस्थलीम् ॥ ३१ ॥ ददर्श तत्र तल्लिंगं नाम चक्रे जनार्दनः ॥ ब्रह्मणा संस्तुतो देवो ममानुग्रहकारणात् ॥ तस्माद्ब्रह्मेश्वरोनाम ख्यातिं लोकेषु यास्यति ॥ ३२ ॥ ये द्रक्ष्यंति नरा भक्त्या देवं ब्रह्मेश्वरं शिवम् ॥ ते ब्रह्मलोकमाक्रम्य समेष्यन्ति ममान्तिकम् ॥ ३३ ॥ यस्तु पश्येत्प्रसंगेन देवं ब्रह्मेश्वरं शिवम् ॥ कृतकृत्यः स पुरुषो न शोचेन्मरणं सदा ॥ ३४ ॥ यः पुष्करं नरो गत्वा तपो वर्षशतं चरेत् ॥ अन्यो ब्रह्मेश्वरं पश्येत्तस्य पुण्यं ततोऽधिकम् ॥ ३५ ॥ पंचपातकसंयुक्तो यो मर्त्यो दुष्टमानसः ॥ सोपि गच्छेच्छिवं स्थानं दृष्ट्वा ब्रह्मेश्वरं शिवम् ॥ ३६ ॥ चांद्रायणानां विधिवदशानामेव यत्फलम् ॥ तत्फलं समवाप्नोति ब्रह्मेश्वरस्य दर्शनात् ॥ ३७ ॥ इत्युक्त्वा गतवान्विष्णुर्वैकुंठं शाश्वतं प्रिये ॥ ब्रह्मलोकं जगामाथ ब्रह्मा लोकपितामहः ॥ ३८ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ ब्रह्मेश्वरस्य देवस्य जल्पेश्वरमथो शृणु ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये ब्रह्मेश्वरमाहात्म्यवर्णनंनाम पंचषष्टितमोऽध्यायः ॥६५॥ ॥७॥ ॥ ईश्वर उवाच ॥ ॥ षट्पष्टितमकं विद्धि देवं जल्पेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण महापापं शमं व्रजेत् ॥ १ ॥ जल्पोनाम महादेवि राजाभूद्भुवि विश्रुतः ॥ सदा जल्परतो नित्यं जल्पवादप्रवर्तकः ॥ २ ॥ विकल्पबहुलो नित्यं संसारगतिचिंतकः ॥ सुबाहुप्रमुखाः पंच पुत्रा जाता महाबलाः ॥३॥ तस्य राज्ञो वरारोहे मूर्त्ताः पंचाग्नयो यथा ॥ सुबाहुः शत्रुमर्दी च जयो विजय एव च ॥ विक्रांतः पंचमः पुत्रः सर्वे शस्त्रास्त्रपारगाः ॥४॥ पित्रा जल्पेन ते राज्ञा पृथग्राज्ये प्रतिष्ठिताः ॥ पृथक्पुत्रा हि ते सर्वे पृथग्देशाधिपाः कृताः ॥५॥ प्राच्यां सुबाहुर्नृपतिर्याम्यां वै शत्रुमर्दनः ॥ पश्चिमायां जयो राजा उत्तरे विजयो नृपः ॥ ६ ॥ मध्ये विक्रांतसंज्ञस्तु स्वपदे विनियोजितः ॥ व्यवस्थामीदृशीं कृत्वा स्वयमेव वनं ययौ ॥ ७ ॥ बभूवुर्मंत्रिणस्तेषां हिता वंशक्रमागताः ॥ बुभुजुः स्वस्वराज्यानि मंत्रिभिः सहितास्तदा ॥ ८ ॥ विक्रांतस्य च यो मंत्री विकल्पैकपरायणः ॥ तेनोक्तं विजने देशे विक्रांतस्य महीभृतः ॥ ९ ॥ यस्यैषा पृथिवी कृत्स्ना स समर्थः प्रकीर्तितः ॥ उद्यमेन पदं लब्धं वासवेन महात्मना ॥ १० ॥ त्रिदशैश्चामृतं लब्धमुद्यमेन महीपते ॥ ११ ॥ हीनोद्यमा मानवा ये क्षत्रियाश्च विशेषतः ॥ ते ह्यास्पदतां यांति हीनवीर्या दिनेदिने ॥ १२ ॥ स्नेहं च कुरुते भ्राता राज्यलुब्धोऽर्थकारणात् ॥ अर्थवीर्येण तेनैव संतोषं कुरुते नृपः ॥ १३ ॥ क्रियते न किमर्थं तु भूप मंत्रपरिग्रहः ॥ भुज्यते सकलं राज्यं मया ते मंत्रिणा बलात् ॥ १४ ॥ परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ॥ अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ १५ ॥ भूमिमेते निगिलंति सर्पा बिलशयानिव ॥ राजानमविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १६ ॥ मायया मोहितं सर्वं को वा कस्य च बांधवः ॥ उद्यमः क्रियतां तस्माद्भ्रातॄणां निग्रहे द्रुतम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ १७ ॥ भ्रातृभिर्भ्रातरः सर्वे निहता राज्यकारणात् ॥ धर्मं च शाश्वतं ज्ञात्वा निहताश्चासुराः सुरैः ॥ १८ ॥ इति मंत्रिवचः श्रुत्वा स राजा विस्मयान्वितः ॥ हसित्वा प्रत्युवाचेदं ममायं शत्रुरागतः ॥ १९ ॥ ॥ विक्रान्त उवाच ॥ ॥ वयं च भ्रातरः पंच पृथिवीं कामयामहे ॥ अतुष्टाः पृथगैश्वर्यं कथं कृत्स्नां भविष्यति ॥२०॥ ज्येष्ठो भ्राता सुबाहुश्च द्वितीयः शत्रुमर्दनः ॥ जयश्च विजयश्चैव तेषां लघुरहं यतः ॥ २१ ॥ ॥ मंत्र्युवाच ॥ ॥ राज्ये स्थितं पूजयंति ज्येष्ठं पूजार्हणैर्वरैः ॥ कनिष्ठज्येष्ठता केयं राज्यं प्रार्थयतां नृणाम् ॥ २२ ॥ तथेति च प्रतिज्ञाते विक्रांतेन महीभृता ॥ स मंत्री कारयामास अभिचारविधिं तदा ॥ २३ ॥ अथर्वणेन मंत्रेण पुरोधाः प्रचकार ह ॥ ज्ञातं पुरोहितैस्तेषां तेऽपि चक्रुः समाहिताः ॥ २४ ॥ अथ कृत्या समुत्पन्ना पश्चात्कृत्याचतुष्टयम् ॥ सपुरोहितभृत्यांस्तानग्रसंस्तु समं तदा ॥ २५ ॥ ततः समस्तलोकस्य विस्मयश्चाभवन्महान् ॥ यदेक कालं नेशुस्ते पृथक्पुरनिवासिनः ॥२६॥ ततः श्रुत्वा च निधनं पुत्राणां जल्पको नृपः ॥ वने वशिष्ठं पप्रच्छ किमेतद्भगवन्प्रभो ॥ २७ ॥ तेनापि कथितं सर्वं वशिष्ठेन महात्मना ॥ दिव्यज्ञानेन वृत्तांतं विकल्पं चाकरोन्नृपः ॥ २८ ॥ ॥ राजोवाच ॥ ॥ निमित्तोऽहं विनाशस्य धिग्धिग्जन्म मदीयकम् ॥ सार्द्धं त्वमात्यपुत्रैश्च मृतं ब्राह्मणपंचकम् ॥ २९ ॥ मत्तोऽन्यः कः पापरतो भविष्यति महान्भुवि ॥ यदि जन्म मदीयं स्यान्न च जातु महीतले ॥ ३० ॥ ततस्ते न विनश्येयुर्मम क्षुद्रपुरोहिताः ॥ धिग्राज्यं धिक्च मे जन्म भूभुजां च महाकुले ॥ ३१ ॥ कारणत्वं गतो योऽहं विनाशस्य द्विजन्मनाम् ॥ कुर्वन्तः स्वामिनस्तेऽर्थं पुत्राणां मम याजकाः ॥ नाशं ययुर्न दुष्टास्ते दुष्टोऽहं नाशकारणे ॥ ३२ ॥ इत्थमुद्विग्नहृदयः स जल्पः पृथिवीपतिः ॥ पप्रच्छ च पुनः प्रह्वो वशिष्ठं ज्ञानिनां वरम् ॥ ३३ ॥ ॥ ॥ राजोवाच ॥ ॥ भगवन्ब्रूहि मे तीर्थमवियोगकरं सदा ॥ सद्यः पापहरं विप्र लिंगं वा कथय प्रभो ॥ ३४ ॥ तस्य तद्वचनं श्रुत्वा जल्पस्य पृथिवीपतेः ॥ वशिष्टः कथयामास दिव्यज्ञानेन पार्वति ॥ ३५ ॥ गच्छ जल्प ममादेशान्महाकालवनोत्तमम् ॥ कृत्वा निःक्षत्रियां पृथ्वीं यत्र रामस्तपस्यति ॥ तत्र लिंगमनाद्यं च कुंकुटेश्वरपश्चिमे ॥ ३६ ॥ तदाराधय राजेंद्र जामदग्न्याश्रमे स्थितः ॥ वशिष्ठस्य वचः श्रुत्वा जल्पोऽसौ पृथिवीपतिः ॥ ३७ ॥ देवदारुवनं त्यक्त्वा महाकालवनं गतः ॥ ददर्श तत्र तल्लिंगमनाद्यं देवसंस्तुतम् ॥ पूजयामास विधिवत्परमेण समाधिना ॥ ३८ ॥ तत्र वाणी समुत्पन्ना लिंगमध्याद्वरानने ॥ न त्वं पापसमाचारो न त्वं मरणकारणम् ॥ पुत्राणां नृप विप्राणामदृष्टं तत्र कारणम् ॥ ३९ ॥ विपाकेन स्वकीयेन गता वैवस्वतं पुरम् ॥ मा शोकं कुरु राजेंद्र गहना कर्मणो गतिः ॥ ४० ॥ अनेन शुद्धभावेन तुष्टोऽहं नृपसत्तम ॥ यदभीष्टं वरं ब्रूहि तत्ते दास्यामि नान्यथा ॥४१॥ ॥ राजोवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ संसारसागरे घोरे मा भवेन्मम जन्म च ॥ ४२ ॥ अक्षयां देहि मे कीर्त्तिं नाम्ना मे विश्रुतो भुवि ॥ अयं जल्पेश्वरो देवो जल्पेनाराधितो विभुः ॥ ४३ ॥ वदंतु त्रिदशाः सर्वे एष मे दुर्लभो वरः ॥ ये त्वां पश्यंति मनुजा मन्नाम्ना ख्यातिमागतम् ॥ तेषां वियोगो मा भूयात्पुत्रतो धनतोऽपि वा ॥ ॥ ४४ ॥ न संसारभयं तेषां दस्युतो नैव राजतः ॥ न भूतग्रहरोगेभ्यो भयमस्तु कदाचन ॥ ४५ ॥ शिवमस्तु सदा तेषां येषां त्वं दर्शनं गतः ॥ ते धन्या मानुषे लोके ये त्वां शरणमागताः ॥ ४६ ॥ सर्वतीर्थाभिषेकैस्तु यत्पुण्यं प्राप्यते नरैः ॥ तत्सर्वमधिकं देव लभ्यते तव दर्शनात् ॥ ॥ ४७ ॥ तावत्पतति संसारे घोरे दुःखशताकुले ॥ यावन्न दृश्यते देवः संसारार्णवतारकः ॥ ४८ ॥ यदा पापक्षयः पुंसां तदा ते दर्शनं भवेत् ॥ महता सुकृतेनैव नाल्पेन तपसा प्रभो ॥ ४९ ॥ एवं भविष्यतीत्युक्त्वा तेन लिंगेन पार्वति ॥ पश्यतां सर्वदेवानां स्वतनौ संनिवेशितः ॥ ५० ॥ तस्मिँल्लिंगे लयं प्राते नृपे जल्पे वरानने ॥ देवो जल्पेश्वरः ख्यातो देवैरुक्तो महीतले ॥ भुक्तिदो मुक्तिदश्चैव सदाभीष्टकरः स्मृतः ॥ ५१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ जल्पेश्वरस्य देवस्य शृणु केदारसंज्ञकम् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये जल्पेश्वरमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ सप्तषष्टिकसंख्याकं केदारेश्वरसंज्ञकम् ॥ देवं शृणु वरारोहे दर्शनात्पापनाशनम् ॥ १ ॥ सृष्टिकाले पुरा देवि देवा व्याप्ता हिमेन हि ॥ शीतार्त्ता विह्वलाः सर्वे ब्रह्माणं शरणं गताः ॥ २ ॥ हिमाद्रिणार्दिताः सर्वे वयं देव जगत्पते ॥ त्राहि भीतांश्चतुर्वक्त्र पितामह नमोऽस्तु ते ॥ ३ ॥ देवानां वचनं श्रुत्वा प्रोक्तं वै ब्रह्मणा प्रिये ॥ पीडिता हिमशैलेन शंकरश्वशुरेण च ॥ ४ ॥ नाहं यातुं समर्थोऽस्मि सत्यमेत-न्मयोदितम् ॥ महादेवं ऋते देवा गतिरन्या न विद्यते ॥ ५ ॥ स एव शरणं देवः सर्वेषां नो भविष्यति ॥ तस्याज्ञया मया सर्वे पर्वता रचिताः पुरा ॥ ६ ॥ कृता सृष्टिर्विचित्रा च हिमाद्रिश्च मया कृतः ॥ असेव्यः सर्वजंतूनामदृश्यो दुर्गमो गिरिः ॥ ७ ॥ हिमाचलस्य तस्यैव शास्ता देवो महेश्वरः ॥ तस्माद्यास्या महे देवा कैलासं पर्वतोत्तमम् ॥ ८ ॥ यत्र तिष्ठति विश्वात्मा देवदेवो महेश्वरः ॥ एवमुक्त्वा गतो ब्रह्मा देवैः सार्द्धं ममांतिकम् ॥ दृष्टोऽहं पूजितस्तैस्तु स्तुतोऽहं विविधैः स्तवैः ॥ ९ ॥ मया संमानिता देवाश्चतुर्वक्त्रः प्रपूजितः ॥ पूजयित्वा मया पृष्टो ब्रह्मा गमनकारणम् ॥१०॥ किं कार्यं त्रिदशैः सार्द्धमागतोऽसि पितामह ॥ कथितं ब्रह्मणा सर्वं श्रुतं सर्वं मया प्रिये ॥ ११ ॥ हिमाचलं समाहूय मर्यादा च कृता मया ॥ शैलानां राजराजस्त्वं हिमाद्रिश्च प्रतिष्ठितः ॥ १२ ॥ देवानां विषयश्चैव गंधर्वाणां तथैव च ॥ यक्षाणामथ नागानां किंनराणां तथैव च ॥ १३ ॥ विद्याधराणां क्रीडार्थं पृथक्पृथङ्निवेशिताः ॥ रूपतो भाति शैलेंद्रः शुद्धस्फटिकसंनिभः ॥ १४ ॥ जाह्नवीनिर्झरोष्णीषः शर्वाणीजनकस्तथा ॥ १५ ॥ सर्वदेवमयो दिव्यः सर्वतीर्थमयः कृतः ॥ सर्वाश्रमनिवासश्च सर्वामरनिषेवितः ॥ १६ ॥ एवं संस्थाप्य शैलेंद्रं लिंगमूर्त्तिरहं स्थितः ॥ विख्यातस्त्रिषु लोकेषु केदारेश्वरनामतः ॥ १७ ॥ उदकं निर्मितं तत्र मंत्रपूर्णं मया प्रिये ॥ माहात्म्यं विविधं प्रोक्तं लिंगस्य च जलस्य च ॥ १८ ॥ योत्रागत्य नरो भक्त्या सम्यङ्मां पूजयिष्यति ॥ जलं योऽत्रैव गृह्णाति विधानेन वरानने ॥ तस्योदरे भविष्यामि लिंगरूपी न संशयः ॥ १९ ॥ इत्युक्ते वचने देवि सदेवासुरपन्नगाः ॥ यक्षराक्षःपिशाचाश्च भूतवैतालकिंनराः ॥ २० ॥ विद्याधरगणाश्चैव मम दर्शनलालसाः ॥ समायाता वरारोहे पीत्वा तत्र जलं शुभम् ॥ २१ ॥ दृष्टोऽहं विधिना तैस्तु लिंगमूर्त्तिगतः प्रिये ॥ मम तुल्याश्च ते जातास्तस्मिन्नद्रिवरे स्थिताः ॥ जनलोकगतैः सिद्धैः पूज्यमाना वरानने ॥ २२ ॥ अथ कालेन वैदुना श्रुत्वा माहात्म्यमुत्तमम् ॥ केदारेश्वरदेवस्य जलस्य च विशेषतः ॥ २३ ॥ मनुष्याः समुपायातास्ते रजोवह्नुला यतः ॥ तमःप्राया विशालाक्षि तदाहं माहिषं वपुः ॥ २४ ॥ कृतवांस्तद्वयार्थाय न च ते भीतिमागताः ॥ इह देवोत्र देवोऽत्र वत्रमुस्ते दिदृक्षवः ॥ २५ ॥ न तैर्दृष्टो महादेवि यतोऽहं महिषाकृतिः ॥ स्थितोऽस्म्यलक्ष्यरूपेण ततस्ते दीनमानसाः ॥ उद्विग्ना निश्वसन्तश्च वैराग्यं परमं गताः ॥ २६ ॥ नात्र देवो न तीर्थानि न गंगा पुण्यदायिनी ॥ न धर्मो न परो लोकः सर्वमेतद्विडम्बनम् ॥ २७ ॥ एवं किल पुराणेषु श्रूयते सर्वदा श्रुतौ ॥ हिमालये च केदारं लिंगं मोक्षप्रदायकम् ॥ २८ ॥ एवं तु वदतां तेषां मानुषाणां यशस्विनि ॥ आकाशादुत्थिता वाणी मया प्रोक्तानुकंपया ॥ २९ ॥ अमार्गं मा वदंत्वत्र न निंद्याः श्रुतयोऽन्यथाः ॥ पुराणं नान्यथा प्रोक्तं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ब्रह्मणा लोककर्तृणा ॥ ३० ॥ ये निंदंति पुराणानि धर्मशास्त्राणि नास्तिकाः ॥ ते यांति नरकं घोरं यावदाभूतसंप्लवम् ॥ ३१ ॥ सदा देवोऽत्र केदारः स्वर्गमोक्षप्रदायकः ॥ विद्यते त्रिदशैः पूज्यः सततं नैव दृश्यते ॥ ३२ ॥ करोति पूजां हिमवान्मासानष्टौ च शाश्वतान् ॥ हिमाद्रिस्तेन पुण्येन नगेन्द्रस्तु कृतो नगैः ॥ सेव्यश्च रमणीयश्च सर्वतीर्थनमस्कृतः ॥ ३३ ॥ सर्वरत्ननिधानश्च देवानां वल्लभस्तथा ॥ ग्रीष्मे चैव वसन्ते च देवदेवोऽत्र दृश्यते ॥ ३४ ॥ नियतेनैव कालेन मानुषाणां च सर्वदा ॥ यदि बुद्धिः परा जाता सर्वदा मम दर्शने ॥ ३५ ॥ आख्यास्ये तदुपायं च शृणुतां सावधानतः ॥ मा विकल्पोऽत्र कर्त्तव्यः सर्वान्कामानवाप्स्यथ ॥ ३६ ॥ क्षेत्राणामुत्तमं क्षेत्रं मुक्तिमुक्तिप्रदायकम् ॥ प्रलयेऽप्यक्षयं प्रोक्तं महाकालवनं नराः ॥ ३७ ॥ तत्राहं संभविष्यामि लोकानामनुकंपया ॥ लिंगरूपेण शिप्रायास्तटे पुण्ये सुशोभने ॥ ३८ ॥ सोमेश्वरस्य देवस्य पश्चिमे स्थानमुत्तमम् ॥ प्रसिद्धमुपयास्यामि केदारेश्वरनामतः ॥ ३९ ॥ सर्वदा दर्शनं तत्र मया सार्द्धं भविष्यति ॥ सर्वेषां च प्रदास्यामि सर्वान्कामान्न संशयः ॥ ४० ॥ इह यावत्फलं तस्मादास्यामि ह्यधिकं ततः ॥ इति ते मानवाः सर्वे श्रुत्वा वाणीं मनोरमाम् ॥ आकाशादुत्थितां दिव्यां मनःप्रह्लादकारिकाम् ॥ ४१ ॥ गता वनं महाकालं संस्मरन्तो महेश्वरम् ॥ विकल्पेन विचित्रेण सत्यमेवेति नान्यथा ॥ ४२ ॥ स्नात्वा शिप्राजले पुण्ये यावत्पश्यन्ति भास्करम् ॥ तावद्दृष्टिपथोत्पन्नं लिंगं पापप्रणाशनम् ॥ ४३ ॥ अथ ते हर्षिताः प्रोचुः केदारोऽयं न संशयः ॥ दृष्टोऽस्माकं न सन्देहो गंगा शिप्राजले स्थिता ॥ ४४ ॥ ततस्ते पूजयामासुः पुष्पैर्नानाविधैस्तथा ॥ पूजितोऽहं विशालाक्षि तेषां तुष्टो वरानने॥ ॥ ४५ ॥ दुर्लभोऽतिवरो दत्तः केलासे स्थानमुत्तमम् ॥ अक्षयं च पदं दत्तं पुनरावृत्तिवर्जितम् ॥ ४६ ॥ अतोऽहं त्रिदशैः प्रोक्तः केदारेश्वरनामतः ॥ प्रार्थितः परया भक्त्या लोकानामनुकंपया ॥ ४७ ॥ इहागत्य नरा ये च त्वां पश्यंति सुभक्तितः ॥ तेषां फलं त्वया देव दातव्यमधिकं यतः ॥ ४८ ॥ हिमाद्रौ हिमनाथस्य यात्रायाः प्रत्यहं फलम् ॥ लभन्ते च नरा नित्यं नात्र कार्या विचारणा ॥ ४९ ॥ ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः ॥ तत्संपर्की नरो यस्तु त्वां दृष्ट्वा किल्बिषाकरः ॥ ५० ॥ सोऽपि यांति परं स्थानं पुनरावृत्तिवर्जितम् ॥ चांद्रायणानां विधिवच्छतानां चैव यत्फलम् ॥ तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥ ५१ ॥ ते नराः पशवो लोके तेषां जन्म निरर्थकम् ॥ येन दृष्टो महाकाले केदारेश्वरसंज्ञकः ॥ ५२ ॥ कौमारे यौवने बाल्ये वार्द्धके यदुपार्जितम् ॥ तत्पापं संक्षयं याति केदारेश्वरदर्शनात् ॥ ५३ ॥ हिमालयकृता यात्रा तस्याः प्रोक्तं च यत्फलम् ॥ तत्फलं समवाप्नोति केदारेश्वरदर्शनात् ॥५४॥ इत्युक्तोऽहं तदा देवि देवैः प्रणतिपूर्वकम् ॥ तथेति च मया प्रोक्तं तेऽपि देवा दिवं गताः ॥ ५५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ केदारेश्वरदेवस्य पिशाचाख्यमुनेः शृणु ॥ ५६ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये केदारेश्वरमाहात्म्यवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ अष्टषष्टिकसंख्याकं पिशाचाख्यमथेश्वरम् ॥ शृणु देवि प्रयत्नेन दर्शनात्पापनाशनम् ॥ १ ॥ आदौ कलियुगे देवि शूद्रो बहुधनोऽभवत् ॥ सोमोनाम सुविख्यातो नास्तिको वेदनिंदकः ॥२॥ अब्रह्मण्यो नृशंसश्च कदर्यो निरपत्रपः ॥ विश्वासघातकश्चैव परस्वहरणे रतः ॥ ॥३॥ त्रिवर्गहंता चान्येषामात्मकामानुवर्त्तकः ॥ स कदाचिन्मृतो देवि कष्टेन परमेण च ॥ ४ ॥ मरुदेशे पिशाचोऽभून्नमो दीनो भयावहः ॥ नाश कृत्स पिशाचानां स्वपक्षोच्छेदकारकः ॥५॥ बहवो मर्दितास्तेन पिशाचा बलवत्तराः ॥६॥ अथ तेनैव मार्गेण कदाचिच्छाकटायनः ॥ स्वाध्यायनिरतो विद्वान्वाग्मी शमपरायणः ॥ ७ ॥ उदयादित्यसंकाशो विभावसुसमद्युतिः ॥ शाकटेन सदा याति स पश्यन्पर्वतात्मजे ॥ ८ ॥ गतो ददर्श तं रौद्रं पिशाचं च भयावहम् ॥ स पिशाचः क्षुधाविष्टो भोक्तुकामोऽभ्यधावत ॥ ९ ॥ दृष्ट्वा तं शाकटारूढं ब्राह्मणं शाकटायनम् ॥ शकटस्य ध्वनिं श्रुत्वा रूपं दृष्ट्वा द्विजस्य च ॥ १० ॥ तथारूपः पिशाचस्तु कर्णाभ्यां बधिरीकृतः ॥ आत्मत्राणपरो भूत्वा नष्टः कष्टेन पार्वति ॥ तं धावंतं समालोक्य पिशाचं ब्राह्मणोऽब्रवीत् ॥ ११ ॥ पिशाच त्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे ॥ क्व धावसि समाचक्ष्व कुतस्तेऽभयमागतम् ॥ १२ ॥ ॥ ॥ पिशाच उवाच ॥ ॥ शाकटस्यास्य महतो घोषं श्रुत्वा भयंकरम् ॥ कर्णाभ्यां बधिरो जातो विसंज्ञस्तव दर्शनात् ॥ १३ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ पिशाचानां बलिष्ठाश्च श्रूयंते ब्रह्मराक्षसाः ॥ स त्वं मां भोक्तुकामोऽसि विख्यातो ब्रह्मराक्षसः ॥ १४ ॥ ॥ पिशाच उवाच ॥ ॥ पिशाचानां समर्थोऽस्मि नष्टोऽहं तव दर्शनात् ॥ दुःखं हि मृत्युः सर्वेषां जीवितं च सुदुर्लभम् ॥ अतो भीतः पलायामि जीवहेतोः सुखार्थतः ॥ १५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ कुतः पिशाच सौख्यं ते मरणं श्रेय एव ते ॥ पैशाची कुत्सिता योनिः पापिनामेव जायते ॥ १६ ॥ ॥ पिशाच उवाच ॥ ॥ सर्वत्र हि गतो जीवो भवत्येव सुखाश्रयः ॥ तस्माज्जीवितुमिच्छामि प्रसीद ब्रह्मराक्षस ॥ ॥ १७ ॥ ॥ ब्राह्मण उवाच ॥ ॥ नाहं त्वां भोक्तुकामोऽस्मि ब्राह्मणोऽहं न राक्षसः ॥ सर्वभूतहितार्थाय विचरामि महीतले ॥ १८ ॥ सर्वेषामेव जंतूनां मैत्रो ब्राह्मण उच्यते ॥ मा कुरुष्व भयं मत्तो मित्रभावगतो ह्यहम् ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा पिशाचः स्वस्थमानसः ॥ प्रणम्य प्रत्युवाचेदं ब्राह्मणं शाकटायनम् ॥ २० ॥ यदि ते सर्वभूतानां दत्ता ह्यभयदक्षिणा ॥ कर्मणा मनसा वाचा मित्रभावं गतो यदि ॥ २१ ॥ पृच्छामि त्वां महाभाग संशयो हृदये स्थितः ॥ श्रुत्वानुकंपया सम्यक्तन्मे व्याख्यातुमर्हसि ॥ २२ ॥ केन कर्मविपाकेन पैशाचं याति मानवः ॥ पिशाचत्वात्कथं मुक्तिः प्राप्यते पापकर्मभिः ॥२३॥ इति तस्य वचः श्रुत्वा पिशाचस्य वरानने ॥ ममत्वेनावृतस्तस्मै प्रावोचच्छाकटायनः ॥२४॥ अपहृत्य च विप्रस्वं देवस्वं च विशेषतः ॥ तेन पापेन पापिष्ठाः पिशाचत्वं प्रयांति च ॥ २५ ॥ पितरं मातरं चैव स्त्रियं बालं द्विजं तथा ॥ वंचयित्वा हरत्यर्थं स पिशाचो भवेन्नरः ॥ २६ ॥ राजद्रव्यं गृहीत्वा तु न यजेन्न ददाति यः ॥ आत्मानमेव पुष्णाति पिशाचत्वं स गच्छति ॥ २७ ॥ विश्वासघातका ये च परदारताश्च ये ॥ प्राप्नुवंति पिशाचत्वं तथा ये वेदनिंदकाः ॥ २८ ॥ निंदंति ये पुराणानि धर्मशास्त्राणि सर्वदा ॥ ते भवंति पिशाचाश्च ये सदा पिशुना नराः ॥ २९ ॥ इति ते कथितं सर्वं वेदप्रामाण्यतोऽधुना ॥ इदानीं कथयिष्यामि यस्त्वं जातोसि तच्छृणु ॥ ॥ ३० ॥ सोमंकोनाम शूद्रस्त्वं परमंमप्रकाशकः ॥ विश्वासघातको जातो देवब्राह्मणदूषकः ॥ ३१ ॥ नास्तिको भिन्नमर्यादो जन्मन्यत्रापि सप्तमे ॥ सकुलं पातयित्वात्र नरके दारुणे भृशम् ॥ ३२ ॥ पिशाचयोनिं संप्राप्तः पुनः प्राप्स्यसि रौरवम् ॥ महारौरवसंज्ञं तु क्रकचं कालसूत्रकम् ॥ यंत्रपीडनकं रौद्रं मथनं कुम्भवालुकम् ॥ ३३ ॥ इत्येवं वदतस्तस्य ब्राह्मणस्य यशस्विनि ॥ सस्मार प्राक्तनं जन्म सत्संगात्कुत्सितं स्वकम् ॥ ॥ ३४ ॥ दुःखाभिभूतो निश्चेष्टो धिग्धिगित्यसकृद्ब्रुवन् ॥ पतितो भूतले देवि इदं वाक्यमथाब्रवीत् ॥ ३५ ॥ अहो केनापि पुण्येन भवता सह दर्शनम् ॥ जातं ममाल्पपुण्यस्य दीनस्य कृपणस्य च ॥ ३६ ॥ नास्ति धर्मसमं मित्रं नास्ति धर्मसमा गतिः ॥ नास्ति धर्मसमं त्राणं स च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नास्ति मम प्रभो ॥ ३७ ॥ मग्नोऽहं दुःखजलधौ मग्नोऽहं पापकर्दमे ॥ भ्रांतोऽहमंधतमसि ततस्त्वां शरणं गतः ॥ ३८ ॥ नमस्तेऽस्तु महाभाग किं करोमि प्रशाधि माम् ॥ तत्तपोबलनिर्दिष्टमिदं प्राप्तं मयाऽधुना ॥ ३९ ॥ एवं निगदतस्तस्य पिशाचस्य वरानने ॥ कथयामास माहात्म्यं स विप्रः शाकटायनः ॥ ४० ॥ पृथिव्यां यानि तीर्थानि आसमुद्रगतानि वै ॥ क्षेत्राणि यानि संतीह तेषां क्षेत्रं सुपुण्यदम् ॥४१॥ महाकालवनं क्षेत्रं प्रलयेऽप्यक्षयं गतम् ॥ लिंगं तत्र महाक्षेत्रे पिशाचत्वविनाशनम् ॥ ४२ ॥ ढुंढेश्वरस्य देवस्य दक्षिणे त्रिदशार्चितम् ॥ पैशाचं विद्यते भूयः पिशाचयोनिनाशनम् ॥ तस्य दर्शनमात्रेण पिशाचत्वात्प्रमोक्ष्यसे ॥ ४३ ॥ तस्य तद्वचनं श्रुत्वा स पिशाचो वरानने ॥ आजगाम त्वरायुक्तो नमस्कृत्य द्विजं तदा ॥४४॥ महाकालवने पुण्ये समीहितफलप्रदे ॥ ददर्श तत्र तल्लिंगं स्नात्वा शिप्राजले शुभे॥४५॥दर्शनात्तस्य लिंगस्य स पिशाचो वरानने ॥ तत्क्षणाद्दिव्यदेहस्तु दिव्याभरणभूषितः ॥ ४६ ॥ दिव्यं विमानमारूढो गतो लोके सनातने ॥ उद्धृत्य सकलं गोत्रं मातृकं पैतृकं तथा ॥४७॥ दृष्ट्वा तन्महदाश्चर्यं माहात्म्यातिशयं प्रिये ॥ प्रोक्तं देवैर्विमानस्थैः सिद्धैराकाशगैस्तथा ॥ ४८ ॥ पिशाचोपि गतः स्वर्गमस्य लिंगस्य दर्शनात् ॥ अतो देवः स विख्यातो भविष्यति महीतले ॥ पिशाचेश्वरसंज्ञस्तु सर्वपापप्रणाशनः ॥ ४९ ॥ ये पश्यंति नरा देवि पिशाचेश्वरसंज्ञकम् ॥ तेषां हि पितरः सद्यो ये चापि निरये स्थिताः ॥ पिशाचत्वाद्विमुच्यंते स्वर्गं यांति न संशयः ॥ ५० ॥ अश्वमेधस्य यज्ञस्य सम्यगिष्टस्य यत्फलम् ॥ तत्फलं लभते सोऽपि पिशाचेश्वरदर्शनात् ॥ ५१ ॥ गयायां पिंडदानेन यत्पुण्यं समुदाहृतम् ॥ तत्पुण्यमधिकं ज्ञेयं पिशाचेश्वरदर्शनात् ॥ ५२ ॥ ये पश्यंति चतुर्दश्यां पिशाचेश्वरसंज्ञकम् ॥ प्रेतत्वं च पिशाचत्वं कुले तेषां न जायते ॥ ५३ ॥ न वियोनिं नरो याति नरकं च न पश्यति ॥ प्रसंगेनापि यः पश्येत्पिशाचेश्वरसंज्ञकम् ॥ ५४ ॥ सर्वैश्वर्यसमायुक्तः सर्वबन्धुसमन्वितः ॥ मोदते पितृलोके स पिशाचेश्वरदर्शनात् ॥ ५५ ॥ कीर्त्तनान्मुच्यते पापाद्दृष्ट्वा स्वर्गं च गच्छति ॥ स्पर्शनादस्य लिंगस्य पुनात्यासप्तमं कुलम् ॥ ५६ ॥ तदैव स नरो मुक्तः संसारनिगडादिभिः ॥ यदैव वीक्षते लिंगं पिशाचेश्वरसंज्ञकम् ॥ ५७ ॥ यज्ञानां तपसां चैव दानानां चैव यत्फलम् ॥ तत्फलं कोटिगुणितं जायते तस्य दर्शनात् ॥ ५८ ॥ यदि पश्येच्चतुर्दश्यां वैशाखे कार्त्तिके तथा ॥ तस्य पुण्यमसंख्यातं जायते नात्र संशयः ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पिशाचेश्वरदेवस्य श्रूयतां संगमेश्वरम् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पिशाचेश्वरमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ एकोनसप्ततिं देवि शृणु पार्वति यत्नतः ॥ यस्य दर्शनमात्रेण संगमो जायते सदा ॥ १ ॥ कलिंगविषये देवि सुबाहुर्नाम पार्थिवः ॥ बभूव भुवि विख्यातो यज्वा परमधार्मिकः ॥ २ ॥ तस्य पत्नी विशालाक्षी दुहिता दृढधन्वनः ॥ कांचीपुरनिवासस्य क्षात्रव्रतरतस्य च ॥ ३ ॥ परस्परानुरागत्वात्परा प्रीतिरभूत्तयोः ॥ तस्य राज्ञः शिरोऽर्त्तिस्तु मध्याह्ने जायते सदा ॥ ४ ॥ आयुर्वेदविदां मुख्यैः शरीरस्य चिकित्सकैः ॥ तैः प्रणीताः प्रिये योगा व्यथावृद्धिर्दिनेदिने ॥ ५ ॥ एवं बहुतरे काले गते देवि महीपतिम् ॥ प्रत्युवाच विशालाक्षी भर्त्तुर्दुःखेन पीडिता ॥ ६ ॥ कथमेषां शिरोरोगे जरा ते पृथिवीपते ॥ वैद्याश्च बहवो देव नानाशास्त्रविशारदाः ॥ प्रयतंतेऽस्य नाशाय तथाप्येष न शाम्यति ॥ ७ ॥ एवं स प्रियया प्रोक्तः सुबाहुः पृथिवीपतिः ॥ प्रत्युवाच प्रियां भार्यां प्रेम्णा प्रणयवत्सलाम् ॥ ८ ॥ सुखदुःखाश्रयं देवि शरीरं सर्वदेहिनाम् ॥ पूर्वकर्मानुसारेण सुखं दुःखं च जायते ॥ ९ ॥ इति संबोधिता राज्ञी तेन राज्ञा वरानने ॥ पुनः प्रोवाच हार्देन तमेवार्थं सुदुःखिता ॥ १० ॥ यदा सा वारितात्यर्थं पृच्छत्येव पुनःपुनः ॥ तदा राजा प्रहस्यैव तां च राज्ञीमुवाच ह ॥ ११ ॥ यदि त्वं श्रोतुकामासि रोगस्यास्य समुद्भवम् ॥ कारणं तत्त्वतो देवि नाख्यास्याम्यहमत्र वै ॥ १२ ॥ महाकालवनं गत्वा सिद्धगंधर्वसेवितम् ॥ तत्र ते कथयिष्यामि यदि कौतूहलं तव ॥ १३ ॥ श्वः प्रभाते गमिष्यामि त्वया सार्द्धं शुचिस्मिते ॥ इति तस्य वचः श्रुत्वा सा राज्ञी विस्मिता स्थिता ॥ उत्सुका गमनार्थाय महाकालवनं शुभम् ॥१४॥ अथ सा रजनी वृत्ता प्रभाते नृपसत्तमः ॥ प्रतस्थे भार्यया सार्द्धं सैन्येन महता वृतः ॥ १५ ॥ आजगाम क्रमेणैव महाकालवनं शुभम् ॥ आवासं विदधे धीमाञ्छिप्रातीरे नृपस्तदा ॥ १६ ॥ पातालवाहिनी तत्र गंगा त्रिपथगामिनी ॥ द्वितीया नीलगंगा च शिप्रया सह संगता ॥ १७ ॥ तासां च संगमस्तत्र तल्लिंगं संगमेश्वरम् ॥ पूजितं गंगया सार्द्धं शिप्रया नीलगंगया ॥ १८ ॥ अथ प्राप्ते सुबाहौ च सा राज्ञी विस्मयान्विता ॥ पप्रच्छ प्रणयोपेता कथ्यतामत्र कारणम् ॥ यत्त्वयोक्तं पुरा देव कथयिष्यामि तत्र वै ॥ १९ ॥ एवमुक्तः सुबाहुस्तु प्रियया पृथिवीपतिः ॥ प्रत्युवाच प्रियां प्रेम्णा प्रहस्य च पुनःपुनः ॥ २० ॥ सुखं स्वपिहि भद्रांगि श्रांता वयमनिंदिते ॥ प्रभाते कथयिष्यामि शिरोरोगस्य कारणम् ॥ २१ ॥ अथ सा रजनी वृत्ता प्रभाते नृपसत्तमः ॥ कथयामास माहात्म्यं देवस्य परमेष्ठिनः ॥ २२ ॥ अहमासं कुशूद्रस्तु सर्वदा वेदनिंदकः ॥ विश्वासघातको नित्यं त्वमप्येवं तथाविधा ॥ २३ ॥ पुत्रो जातस्तु दुःशीलो देवब्राह्मणवंचकः ॥ कुरूपः कर्कशो दुष्टः प्रकृत्या पापपूरुषः ॥ २४ ॥ अथ दीर्घेण कालेन द्वादशाब्दं भयावहा ॥ अनावृष्टिस्तु संजाता सर्वप्राणिभयंकरी ॥ २५ ॥ वियोगस्तु त्वया प्राप्तो मया सार्द्धं सुतेन च ॥ ततोऽहं दुःखसंतप्तो वैराग्यं परमं गतः ॥ २६ ॥ इच्छता निधनं सद्यो मया प्रोक्तमिदं वचः ॥ मम पुण्यविहीनस्य पापध्यानरतस्य च ॥२७॥ सुतेन भार्यया सार्द्धं संगमो दुर्लभः पुनः ॥ कथं स्वपिति पापिष्ठः कृत्वा पापं सुदारुणम् ॥२८॥ कुटुंबार्थे करोत्येवमेकाकी निस्तरत्यसौ ॥ धर्म एव परो बंधुर्धर्म एव परा गतिः ॥ धर्मेण साध्यते सर्वं तस्माद्धर्मं समाश्रयेत् ॥२९॥ इति चिंतयतोऽत्यर्थं मम प्राणा गताः प्रिये ॥ विविधा यातना प्राप्ता मया नरककोटिषु ॥ ३० ॥ अंतकालेऽपि धर्मस्य प्रशंसा या मया कृता ॥ मत्स्योऽहं तेन पुण्येन जातः शिप्राजले शुभे ॥ ३१ ॥ त्वं च श्येनी ततो जाता तस्मिन्नेव वनोत्तमे ॥ प्रावृट्कालेऽथ संप्राप्ते आश्लेषानुगते रवौ ॥ ३२ ॥ नदीत्रयरयेणैव निःसृतोऽहं जलात्ततः ॥ त्वया शिरसि संप्राप्तो नखैर्विद्धोऽस्मि सुंदरि ॥ ३३ ॥ आनीतोऽहं त्वया देवि संगमेश्वरसंनिधौ ॥ कैवर्तैर्निधनं प्राप्तं त्वया सार्द्धं वरानने ॥ ३४ ॥ म्रियमाणेन मे दृष्टो देवोऽसौ संगमेश्वरः ॥ शिप्रया स्नापितोऽत्यर्थं गंगया नीलगंगया ॥ ३५ ॥ तस्य दर्शनमात्रेण जातोऽहं पृथिवीपतिः ॥ कलिंगविषये देवि सर्वभूपालवंदितः ॥ ३६ ॥ सुता त्वं वल्लभा जाता कांचीपुरनिवासिनः ॥ क्षात्रव्रतरतस्यैव सुभगा दृढधन्वनः ॥ ३७ ॥ आवां राजत्वमापन्नौ तस्य लिंगस्य दर्शनात् ॥ त्वया कररुहैर्विद्धो मारितो लगुडैश्च तैः ॥ ३८ ॥ मध्याह्ने कदनं स्मृत्वा ततो मे शिरसि व्यथा ॥ स्मरामि जातिमात्मीयामस्य देवस्य दर्शनात् ॥३९ ॥ एतत्ते कथितं देवि पृष्टोऽहं यत्त्वया पुरा ॥ गच्छ सुंदरि भद्रं ते यत्र ते वर्त्तते मनः ॥४०॥ स्थातव्यं च मयात्रैव सेव्योऽसौ संगमेश्वरः ॥४१॥ ततः सा निरवद्यांगी नीलोत्पलविलोचना ॥ करुणं सुस्वरं कृत्वा भर्त्तार

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मिदमब्रवीत् ॥ ४२ ॥ मयापि संस्मृतं देव पूर्वजन्मनि चेष्टितम् ॥ अस्य लिंगस्य माहात्म्यात्तिर्यग्योनिगतावपि ॥ ४३ ॥ प्राप्तावावां मनुष्यत्वं निर्मलेषु कुलेषु च ॥ प्राप्ता श्रीरतुला लोके प्राप्तं राज्यमकंटकम् ॥ ४४ ॥ प्राप्ता भार्या प्रियाहं ते त्वं च प्राप्तो मया नृप ॥ ख्यातोयं त्रिषु लोकेषु नामतः संगमेश्वरः ॥ ४५ ॥ अस्य देवस्य माहात्म्याद्वियोगो न भविष्यति ॥ यथा कृष्णस्य लक्ष्म्या च पार्वत्या च शिवस्य च ॥ ४६ ॥ पुनः प्रणम्य प्रणता सहसा मन्मथाकुला ॥ भर्त्ता सुवाहुर्मे भूयादन्यस्मिन्निह जन्मनि ॥ ४७ ॥ तव देव प्रसादेन यदि त्वं संगमेश्वरः ॥ ततो विलोक्य सोन्मेषं कुसुमेषुतरंगिताम् ॥ कांतां पिबन्निव दृशा प्राह तां तरलेक्षणाम् ॥ ४८ ॥ सहजेनाभिजन्येन गुणैः कांत्या विभूषिता ॥ मया प्राप्ता विशालाक्षि प्राप्तं गच्छन्मनः फलम् ॥ ४९ ॥ ततस्तां भयसंत्रस्तां कंपिताधरपल्लवाम् ॥ गृहीत्वा च करे कांतां जगामांतःपुरं निजम् ॥ ५० ॥ वद न्कंदर्पसर्पेण दष्टोऽहं देवतोऽधुना ॥ चचार तत्र निःसारं संसारं कलयन्प्रिया ॥५१॥ पुरे मम वरारोहे चिरं रेमे तया सह ॥ एवं राजा प्रियां प्राप्य निवेद्य च निजां कथाम् ॥ ५२ ॥ भेजे राज्यं तया सार्द्धं विस्तारितमहोत्सवः ॥ अशाश्वतमिदं ज्ञात्वा अर्थिभ्योऽपि ददौ धनम् ॥ ५३ ॥ अपू र्वत्यागिना तेन त्रैलोक्यं विस्मयं ययौ ॥ राज्यं कृत्वा चिरं कालं सभार्यो नृपसत्तमः ॥५४॥ भुक्त्वा च विपुलान्भोगांस्तस्मिँल्लिंगे लयं गतः ॥ अतो देवि सुविख्यातो देवोऽसौ संगमेश्वरः ॥ ५५ ॥ यः पश्येत्परया भक्त्या तल्लिंगं संगमेश्वरम् ॥ न वियोगो भवेत्तस्य पुत्रभ्रातृप्रियादिभिः ॥ ॥ ५६ ॥ नियमेन तु यः पश्येत्तल्लिंगं संगमेश्वरम् ॥ राजसूयसहस्रस्य फलं तस्याधिकं भवेत् ॥ ५७ ॥ गांगं च सफलं पुण्यं यामुनं नार्मदं तथा ॥ जायते चांद्रभागं च संगमेश्वरदर्शनात् ॥ ५८ ॥ यः पश्येच्छ्रावणे मासि तल्लिंगं संगमेश्वरम् ॥ कार्तिकस्वामिनो यात्रा कृता तेन न संशयः ॥ ॥ ५९ ॥ मासि चाश्वयुजे देवं यः पश्येत्संगमेश्वरम् ॥ कृतं तेन सहस्रं तु वाजपेयं वरानने ॥ ६० ॥ यः पश्येत्कार्त्तिके मासि तल्लिंगं संगमेश्वरम् ॥ राजसूयसहस्रं तु कृतं तेन न संशयः ॥ ६१ ॥ चतुरो वार्षिकान्मासान्यः पश्येत्संगमेश्वरम् ॥ स याति परमं स्थानं ममाभीष्टतरं प्रिये ॥ ६२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ संगमेश्वरदेवस्य शृणु दुर्द्धर्षमीश्वरम् ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्ये संगमेश्वरमाहात्म्यवर्णननामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु सप्ततिकं देवं दुर्द्धरेश्वरमीश्वरम् ॥ यस्य दर्शनतो देवि नरः पापैः प्रमुच्यते ॥ १ ॥ दुर्द्धर्षोनाम राजाभून्नेपालविषये पुरा ॥ पुण्यकेतुर्यशस्वी च सत्यसंधो दृढव्रतः ॥ २ ॥ तिस्रस्तस्याभवन्भार्यास्तत्तुल्याः सुमनोहराः ॥ विहरन्स वनोद्याने वसन्ते पृथिवीपतिः ॥ ३ ॥ कदा मृगरसाविष्टो दैवाद्वै वातरंहसा ॥ तुरगेणोहितः पाप वनं रुचिरपादपम् ॥ ४ ॥ गजेंद्रमृगशार्दूलसिंहसंवरसंकुलम् ॥ ऋक्षवानरवाराहगण्डकादिविराजितम् ॥ ५ ॥ तस्मिन्वने सुविस्तीर्णं कदलीखंडमंडितम् ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ ६ ॥ ददर्श दर्पणस्वच्छं सरो नीरजराजितम् ॥ स्नातसिद्ध वधूवृन्दकुचकुंकुमपिंजरम् ॥ ७ ॥ ददर्श कन्यां तत्रैव काननस्येव देवताम् ॥ स तां दृष्ट्वा सुचार्वंगीं मन्मथेन प्रपीडितः ॥ ८ ॥ चित्रन्यस्त इव क्षिप्रमभूद्विस्मयनिश्चलः ॥ सा भुजंगीव संक्रुद्धा मन्त्रेणेवांतिकं ययौ ॥ ९ ॥ कन्दर्पकोटिसदृशं विश्रान्तं नृपमब्रवीत् ॥ सुतां मां विद्धि राजेन्द्र कल्पस्य प्राणवल्लभाम् ॥ १० ॥ तपोरतस्य शांतस्य सर्वदा ब्रह्मचारिणः ॥ मदर्थे प्रार्थ्यतां विप्र स मां तुभ्यं प्रदास्यति ॥ ११ ॥ इति तस्या वचः श्रुत्वा मन्मथेनाकुलीकृतः ॥ लज्जां त्यक्त्वा स भूपालो ययाचे विजने च ताम् ॥ १२ ॥ मम प्राणव्ययः सुभ्रूस्त्वां विना समुपस्थितः ॥ कार्याकार्यावेचारो हि कस्य जीवितशांतये ॥ १३ ॥ त्यज्यते प्राप्तमप्राप्तं यदेतद्दुर्द्धिलाववम् ॥ को जानीते परे लोके कस्य किं नु भविष्यति ॥ ॥ १४ ॥ भज मामनवद्यांगि तवैतद्वदनामृतम् ॥ न पाययसि चेन्मह्यं वृतं जानीहि मे प्रिये ॥ १५ ॥ स्वयं पिबामि चेद्विद्धि परलोकगतं हि माम् ॥ श्रुत्वेति चकिता तन्वी प्रोवाच विनयान्विता ॥ १६ ॥ भ्रष्टायां मयि तातस्य विनष्टे कन्यकाफले ॥ कुलं पतति नः सर्वं तस्मादेतद्विचिन्त्यताम् ॥ १७ ॥ यदि ते परमं प्रेम ममोपरि महीपते ॥ मदर्थे प्रार्थ्यतां विप्र स मां नूनं प्रदास्यति ॥ १८ ॥ तस्यास्तद्वचनं श्रुत्वा नान्यथा मे भविष्यति ॥ ज्ञात्वा कन्यां द्विजस्यैव कल्पस्य ब्रह्मचारिणः ॥ १९ ॥ गत्वा ययाचे प्रणतः स्थितं निजतपोवने ॥ मुनीन्द्रश्चंद्रवदनां स चास्मै तां ददौ मुदा ॥ २० ॥ तत्रैव संगतो राजा मन्मथेन वशीकृतः ॥ रेमे रमणकैर्योगैर्न सस्मार निजं पुरम् ॥ २१ ॥ कदलीखण्डकुञ्जेषु रम्यासु वनराजिषु ॥ बहुलाम्रकदंबेषु राजा भेजे नवां वधूम् ॥ सिषेवे चारु सुरतं स विदग्धोऽतिमुग्धया ॥ २२ ॥ एवं हि वसतस्तस्य दुर्द्धर्षस्य वरानने ॥ आजगाम सुदुर्द्धर्षो राक्षसोऽतिभयंकरः ॥ २३ ॥ ज्वलितो विकटाकारो दंष्ट्रोत्कटकटाननः ॥ तं नृपं मोहयित्वा तु तरसा तरलेक्षणाम् ॥ जहार मन्मथाविष्टो रूपयौवनशालिनीम् ॥ २४ ॥ राजा च तां हृतां दृष्ट्वा वियोगविषमूर्छितः ॥ स्मृत्वास्मृत्वा सुचार्वंगीं विललापाकुलेन्द्रियः ॥ ॥ २५ ॥ हा प्रिये प्रेमपीयूषे प्रणयामृतदीर्घिके ॥ हा सुन्दरि विशालाक्षि क्व गता मां विहाय वै ॥ २६ ॥ पुनरिन्दुमिवानंदं कदा द्रक्ष्यामि ते मुखम् ॥ इति प्रलापमकरोत्स्मरंस्तां चारुहासिनीम् ॥ उन्मत्त इव बभ्राम तत्र तत्र स्मरातुरः ॥ २७ ॥ एवं विलपतस्तस्य दुर्द्धर्षस्य नृपस्य तु ॥ आजगाम तमुद्देशं कल्पो ब्राह्मणसत्तमः ॥ ददर्श नृपतिं तत्र भ्रमंतं भ्रमरं यथा ॥ २८ ॥ ज्ञात्वा जामातरं सम्यक्समाश्वास्य वचोऽब्रवीत् ॥ एहि दुर्द्धर्ष राजेन्द्र गहना कर्मणो गतिः ॥ क्व गतो हि महीपाल नेपालविषयस्तव ॥ २९ ॥ कुलीना रूपवत्यश्च तिस्रो भार्याः क्व वै गताः ॥ क्व ते राज्यं गतं भूप कुत्र पुत्री गता मम ॥ ३० ॥ सर्वं विनश्वरं लोके गन्धर्वनगरोपमम् ॥ अनित्यं जीवितं भूप राज्यं वै बुद्बुदोपमम् ॥ ३१ ॥ एव माश्वासितो राजा कल्पेन च पुनःपुनः ॥ सस्मार तां सुचार्वंगीं मन्मथेन प्रपीडितः ॥ ३२ ॥ ब्रूहि मे भगवन्सम्यग्यदि तेऽस्ति दया मयि ॥ कथं राज्यं स्वकीयं स्यात्कथं मे सुहृदागमः ॥ ३३ ॥ तिस्रो भार्याः कथं विप्र पश्यामि पृथिवीतले ॥ लावण्यामृतशालिन्यस्तव पुण्या द्विजोत्तम ॥ कथं ममागमो भूयो भविष्यति मया सह ॥ ३४ ॥ इति तस्य वचः श्रुत्वा विप्रेणोक्तं वरानने ॥ गच्छ भूपाल नेपालं महाकालं ततो व्रज ॥ ३५ ॥ तस्मिन्क्षेत्रे तीर्थवरे लिंगं सर्वार्थसाधकम् ॥ विद्यते यत्र सूर्येण तपस्तप्तं सुदुष्करम् ॥ ३६ ॥ शिप्रायास्तु तटे रम्ये पुण्ये ब्रह्मेशपश्चिमे ॥ तस्य दर्शनमात्रेण तवाभीष्टं भविष्यति ॥ ३७ ॥ कल्पस्य वचनं श्रुत्वा सत्वरो नृपसत्तमः ॥ नेपालं च ततो गत्वा समाश्वास्य सुहृज्जनम् ॥ ३८ ॥ सांतःपुरपरीवारो महाकालवनं गतः ॥ सर्वदा सर्वसिद्धीनामाश्रयं विषयं श्रियः ॥ ३९ ॥ तत्र स्नात्वा जले पुण्ये शिप्रायाश्चाशुसिद्धिदे ॥ सूर्येणाराधितं लिंगं ददर्श नृपसत्तमः ॥ ४० ॥ पूजयामास रत्नैश्च दिव्यैर्वस्त्रैः सुभूषणैः ॥ कर्पूरेण सुगन्धेन लिंगपूजा कृता तदा ॥ ४१ ॥ मुक्ताफलैः सुतारैश्च जलधाराभिरेव च ॥ भक्त्या ननर्त्त तस्याग्रे संस्तुवन्विविधैः स्तवैः ॥ ४२ ॥ शुश्राव श्रोत्रपीयूषं गीतं देवगृहे शुभे ॥ तच्छ्रुत्वा कौतुकाविष्टो ध्वनिं श्रुत्वा मनोरमाम् ॥ प्रियामपश्यत्तत्रस्थां लावण्यललनावधिम् ॥ ४३ ॥ तां दृष्ट्वा विस्मयो त्फुल्ललोचनस्तन्मयोऽभवत् ॥ क्षिप्रं तदर्शनेनैव स्मरेण तरलीकृतः ॥ ४४ ॥ ज्ञात्वा मे सैव पत्नीयं दृष्टा देवप्रसादतः ॥ सापि लावण्यनलिनी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राजहंसं विलोक्य तम् ॥ ४५ ॥ क्षिप्रं पुलकिता तस्या विरराज कुचस्थली ॥ एतस्मिन्नंतरे देवि वाणी लिंगात्समुत्थिता ॥ ४६ ॥ विश्वावसोः सिद्धपतेः सुतेषा प्राणवल्लभा ॥ कल्पेन पालिता सम्यक्त्वदर्थं नृपसत्तम ॥ ४७ ॥ आनीता ते मया पत्नी हत्वा तं राक्षसाधिपम् ॥ गृहाण च मया दत्तां भुंक्ष्व राज्यमकण्टकम् ॥ ४८ ॥ इत्युक्तोऽसौ गतो देवि लब्ध्वा भार्यां प्रियां तदा ॥ सांतःपुरपरीवारो लिंगस्यास्य प्रभावतः ॥ ४९ ॥ आराधितो नरेंद्रेण दुर्द्धर्षेण महात्मना ॥ तदाप्रभृति देवोऽयं दुर्द्धर्षेश्वरसंज्ञकः ॥ त्रिषु लोकेषु विख्यातो वांछितार्थफलप्रदः ॥ ५० ॥ ये पश्यंति विशालाक्षि दुर्द्धर्षेश्वरमंज्ञकम् ॥ ते दुर्द्धर्षा भविष्यंति शत्रूणां समरे सदा ॥ ५१ ॥ संक्रांतौ रविवारे च ग्रहणे चंद्र सूर्ययोः ॥ गत्वार्चयंति ये देवि देवं दुर्द्धर्षमीश्वरम् ॥ ते यांति विमानेन मदीयं स्थानमुत्तमम् ॥ ५२ ॥ पापाचाराश्च ये जीवा दुष्कर्मनिरता नराः ॥ मुच्यंते पातकात्सद्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५३ ॥ दर्शनात्स्पर्शनात्सद्यो नामसंकीर्त्तनादपि ॥ ब्रह्महत्यासहस्रं हि तत्क्षणादेव नश्यति ॥ ॥ ५४ ॥ कृतघ्नो निंदको दुष्टः पापकर्मा दुरात्मवान् ॥ परदाररतश्चौरो ब्रह्मघ्नो गुरुतल्पगः ॥ मुच्यते सर्वपापेभ्यो दुर्द्धर्षेश्वरदर्शनात् ॥ ५५ ॥ अयने विषुवे चैव संप्राप्ते सोमपर्वणि ॥ ये पश्यंति च दुर्द्धर्षं स्नात्वा शिप्राजले शुभे ॥ गंगायाश्चिगुणं पुण्यं जायते नात्र संशयः ॥ ५६ ॥ तत्र यद्दीयते दानं तस्य संख्या न विद्यते ॥ पितरस्तोपितास्तेन आत्मा वै तोपितस्ततः ॥ ५७ ॥ कल्पकोटिसहस्रं तु मत्पुरे पूजितो वसेत् ॥ यदा यांति च भूलोके तदासौ भूपतिर्भवेत् ॥ ५८ ॥ अधृष्यः शत्रुवर्गेण फलं प्राप्नोति चाक्षयम् ॥ पदं यत्रिदशैर्वंद्यं पुनरावृत्तिवर्जितम् ॥ ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ दुर्द्धर्षेश्वरदेवस्य प्रयागेशमतः शृणु ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिंगमाहात्म्य उमामहेश्वरसंवादे दुर्द्धर्षेश्वरमाहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ॥ ७० ॥ ॥ ईश्वर उवाच ॥ ॥ एकसप्ततिकं विद्धि प्रयागेश्वरसंज्ञकम् ॥ अद्रितायं विजानीहि महापातकनाशनम् ॥ १ ॥ हास्तिनेऽभूत्पुरे श्रीमाञ्छंतनुर्नृपसत्तमः ॥ वैवस्वतेऽतरे कल्पे युगे द्वापरसंज्ञके ॥ २ ॥ स चाद्भुतमहावीर्यो वज्रसंहननो युवा ॥ सर्वशास्त्रेषु कुशलः कला पुंजविचक्षणः ॥ ३ ॥ बलेन विष्णुसदृशस्तेजसा भास्करोपमः ॥ गंगामेप चचारैकः सिद्धचारणसेविताम् ॥ ४ ॥ स कदाचिन्महाबाहुः प्रभूत बलवाहनः ॥ वनं जगाम गहनं हयनागशतैर्वृतः ॥ ५ ॥ गत्वा तत्र मृगान्व्याघ्रान्घातयामास लीलया ॥ महिषाश्वरराहांश्च विनिघ्नन्नाजसत्तमः ॥ ॥ ६ ॥ स कदाचिद्वने तस्मिन्ददर्श परमां स्त्रियम् ॥ जाज्वल्यमानां वपुषा साक्षात्पद्मामिवापराम् ॥ ७ ॥ तां दृष्ट्वा हृष्टरोमाभूद्विस्मितो रूपसंपदा ॥ पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः ॥ ८ ॥ सा दृष्ट्वैव च राजानं विचरंतं महाद्युतिम् ॥ स्नेहादागतसौहार्दान्नातृप्यत विलासिनी ॥ ९ ॥ तामुवाच ततो राजा सांत्वयञ्श्लक्ष्णया गिरा ॥ देवी वा दानवी त्वं च गंधर्वी यदि वाप्सराः ॥ १० ॥ यक्षी वा पन्नगी वा त्वं मानुषी वा सुमध्यमे ॥ याचे त्वांऽभोजगर्भाभे भार्यां मे भव शोभने ॥ ११ ॥ एतच्छ्रुत्वा वचो राज्ञः संस्तुतं मृदु वल्गु च ॥ अंगीकृतं तया देवि समयं प्रार्थितो नृपः ॥ १२ ॥ वारिता विप्रिये वापि त्यजेयं त्वामसंशयम् ॥ न प्रष्टव्या त्वया राजन्कासि कस्येति सर्वथा ॥ १३ ॥ एवमस्त्विति तेनोक्तं सत्येन सुकृतेन च ॥ स तस्याः शीलवृत्तेन रूपौदार्यगुणेन च ॥ १४ ॥ उपचारेण च रहस्तुतोष जगतीपतिः ॥ दिव्यरूपा हि सा देवी गंगा त्रिपथगा नदी ॥ १५ ॥ मानुषं विग्रहं कृत्वा श्रीमंतं वरवर्णिनि ॥ राजानं रमयामास यथा रेमे तथैव च ॥ १६ ॥ स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः ॥ संवत्सरानृतून्मासान्न बुबोध बहून्गतान् ॥ १७ ॥ रममाणस्तया सार्द्धं यथाकामं नरेश्वरः ॥ अष्टावजनयत्पुत्रां स्तस्याममरवर्णिनः ॥ १८ ॥ जातं जातं च सा पुत्रं क्षिपत्यंभसि सुव्रते ॥ प्रीणामि त्वामहमिति गंगास्रोतसि पावने ॥ १९ ॥ नास्य तत्तु प्रियं राज्ञः शंतनोर्ब्रह्मभवत्तदा ॥ नोवाच किंचित्तां देवीं त्यागाद्भीतो महीपतिः ॥ २० ॥ अथैनामष्टमे पुत्रे जाते प्रहसतीमिव ॥ उवाच राजा दुःखार्त्तः परीप्सन्पुत्रमात्मनः ॥ २१ ॥ मा वधीः कस्य कासीति किं विध्वंसि सुतानिति ॥ पुत्रहिंसा महत्पापं मा प्राप्सीस्तिष्ठ गर्हिते ॥ २२ ॥ ॥ गंगोवाच ॥ ॥ पुत्रकामा न ते हन्मि पुत्रं पुत्रवतांवर ॥ जीर्णस्तु मम वासोऽयं यथा मे समयः कृतः ॥ २३ ॥ अहं गंगा जह्नुसुता महर्षिगणसेविता ॥ देवकार्यार्थसिद्ध्यर्थमुषित्वाहं त्वया सह ॥ २४ ॥ इमेऽष्टौ वसवो देवा महाभीमा महौजसः ॥ वशिष्ठशापदोषेण मानुषत्वमुपागताः ॥ २५ ॥ तेषामानयिता नान्यस्त्वदृते भुवि विद्यते ॥ मद्विधा मानुषी धात्री न चैवास्ति कदाचन ॥ २६ ॥ तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता ॥ स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रत ॥ २७ ॥ एवमुक्त्वा तदा गङ्गा विष्णुमायाविमोहिता ॥ रुरोद मानुषं भावमाश्रिता तनुमध्यमा ॥ २८ ॥ अहो बत महत्कष्टं यदमी घातिताः सुताः ॥ मया नृशंसया मोहाज्जले क्षिप्तास्तु बालकाः ॥ २९ ॥ हा वत्सा हा सुताः पुत्रा हा तातास्तनयाः क्व वै ॥ मां विहाय गताः कुत्र हृदयं किं न दीर्यते ॥ ३० ॥ मातर्मातेति करुणं ब्रुवाणाः स्वयमागताः ॥ उपगुह्य कदा पुत्रान्वत्सवत्सेति सौहृदात् ॥ ३१ ॥ कस्य जातु प्रणीतेन पिंगेन क्षितिरेणुना ॥ ममोत्तरीयमुत्संगं कदाङ्ग मलयिष्यति ॥ ३२ ॥ अंगप्रत्यंगसंभूता मनोहृदयनंदनाः ॥ मया तु मात्रा हा वत्साः मारिता निधनं गताः ॥ ३३ ॥ काँल्लोकान्गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ कथं पुण्या भविष्यामि पुत्रघ्नी निर्दया सती ॥ ॥ ३४ ॥ इत्येवं करुणं कृत्वा रुदित्वा च पुनःपुनः ॥ मूर्छिता पतिताप्यार्ता निश्चेष्टा धरणीतले ॥ ३५ ॥ एतस्मिन्नंतरे देवि नारदो मुनिसत्तमः ॥ तस्याः विलापशब्दं तमाकर्ण्य सहसा तदा ॥ ३६ ॥ विस्मयोत्फुल्लनयनः किमेतदिति चिंतयत् ॥ एषा सा जाह्नवी गंगा पावनी देववंदिता ॥ ३७ ॥ समुद्रगहिषी दिव्या पुण्या त्रिपथगा नदी ॥ मानुषं भावमाश्रित्य कस्माद्रोदिति विह्वला ॥ ३८ ॥ इत्येवं चिंतयित्वा च समीपमगमन्मुनिः ॥ गंगायाः विलपन्त्याश्च ब्रह्मपुत्रस्तु नारदः ॥ उवाचोच्चैर्वियत्स्थोऽसौ देवि गंगे नमोऽस्तु ते ॥ ३९ ॥ नारदोऽहं महापुण्ये कस्माद्रोदिषि पावनि ॥ हिमाद्रिपुत्री विख्याता देवगंधर्वसेविता ॥ ४० ॥ धृता शिरसि देवेन शिवेन परमेष्ठिना ॥ ४१ ॥ नारदस्य वचः श्रुत्वा दिव्या देवनदी तथा ॥ अवलोक्य विमानस्थं प्रत्युवाच महामुनिम् ॥ ४२ ॥ मया नारद मोहेन कृतोऽधर्मो जुगुप्सितः ॥ जानंत्या सुमहत्पापं सप्तपुत्रा हता मया ॥ ॥ ४३ ॥ समुद्रेण वियोगस्तु संजातो मम देवतः ॥ भार्या जाता मनुष्यस्य पुत्रा जाता हताश्च मे ॥ ४४ ॥ अतो मया विलपितं मग्नया शोकसागरे ॥ कथ्यतां मम देवर्षे येन पुण्या भवामि वै ॥ ४५ ॥ इति तस्या वचः श्रुत्वा नारदो मुनिसत्तमः ॥ त्रिकालवेदी शुद्धात्मा गंगां वचनमब्रवीत् ॥ ४६ ॥ ॥ नारद उवाच ॥ ॥ किं विस्मृतो जगद्वंद्ये देवानां समयः शुभः ॥ प्रतिज्ञातं त्वया देवि वसूनां मोक्षकारणे ॥ ४७ ॥ प्राप्ता स्ते वसवो लोकान्प्रसादात्तव सुव्रते ॥ त्वयावतारितो देवि समुद्रः शंतनुः स्मृतः ॥ ४८ ॥ इति तस्य वचः श्रुत्वा नारदस्य महात्मनः ॥ गंगा त्रिपथगा पुण्या प्रत्युवाच महामुनिम् ॥ ४९ ॥ सत्यमुक्तं त्वया ब्रह्मञ्ज्ञातं सर्वं मयाऽधुना ॥ किंतु योनिर्यती लब्धा मानुषी तेन मोहिता ॥ ५० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपवादभयाद्भीता भवंतं शरणं गता ॥ दीयतामुपदेशो मे कथ्यतां स्थानमुत्तमम् ॥ ५१ ॥ ॥ नारद उवाच ॥ ॥ किं विस्मृतो जगद्वंद्ये देवानां समयः कृतः ॥ अपवादभयाद्भीता यदि त्वं देवि पुण्यदे ॥ मां पृच्छसि परं स्थानं शृणु त्वं वच्मि सुव्रते ॥ ५२ ॥ अवंती तु समाख्याता सप्त कल्पसनातनी ॥ तस्यां सखी त्वदीया तु शिप्रा विप्रप्रिया सदा ॥ ५३ ॥ तस्यास्तीरे शुभं लिंगं दुर्द्धर्षेश्वरदक्षिणे ॥ विद्यते त्रिदशैः पूज्यं सर्वतो यैश्च सेवितम् ॥ ५४ ॥ तस्य दर्शनमात्रेण कृतकृत्या भविष्यसि ॥ तस्माद्गच्छ महापुण्ये गंगे देवर्षिसेविते ॥ ५५ ॥ इत्युक्ता सा त्रिपथगा नारदेन महात्मना ॥ गता तत्र महापुण्या सखीं शिप्रां ददर्श ह ॥ ५६ ॥ संश्लेषं च तदा कृत्वा लिंगं दृष्ट्वा सुपावनम् ॥ पूजयामास भावेन तत्रैव च चिरं स्थिता ॥ ५७ ॥ अथ सूर्यसुता देवी यमुना पापनाशिनी ॥ तत्रायाता सुहार्देन यत्र गंगा व्यवस्थिता ॥ ५८ ॥ ददर्श देवी तां गंगां ध्यायंती शंकरं शिवम् ॥ सापि तत्रैव तिष्ठंती पूजयंती परं शिवम् ॥ ५९ ॥ अथ तेनैव कालेन प्राचीदेवी सरस्वती ॥ समायाता सुगुप्ता च गंगायमुनयोर्जले ॥ ६० ॥ एतस्मिन्नंतरे देवि शक्रं प्राह स नारदः ॥ न दृश्यते प्रयागस्तु महाकालवनं गतः ॥ ६१ ॥ गंगायमुनयोर्मध्ये यत्र गुप्ता सरस्वती ॥ प्रयागः स तु विज्ञेयः सर्वपापप्रणाशनः ॥ ६२ ॥ स सांप्रतं प्रयागस्तु महाकालवनोत्तमे ॥ केनापि कारणेनैव गतो न ज्ञायते मया ॥ ६३ ॥ इति तस्य वचः श्रुत्वा नारदस्य महात्मनः ॥ शक्रेण सहिताः सर्वे ह्यवंतीं तु समागताः ॥ ६४ ॥ स्तुवंतो विविधैः स्तोत्रैर्गंगां त्रिपथगां शुभाम् ॥ गंगे देवि नमस्तुभ्यं सर्वपापप्रणाशिनि ॥ ६५ ॥ वसूनां जननी देवि वसूनां मोक्षदायिनि ॥ त्रैलोक्यपावनी नित्यं हरेः शिरसा धृता ॥ ६६ ॥ सेविता बालखिल्यैश्च कृष्णस्य परमा कला ॥ यमुने त्वां नमस्यामः कालिंदीं वरवाहिनीम् ॥ ६७ ॥ श्रुता त्वं पापिनी देवि मार्तंडस्य दिवस्पतेः ॥ शिप्रे देवि नमस्तुभ्यं ब्रह्मदेहोद्भवे शुभे ॥ ६८ ॥ प्राची त्वमेव विख्याता पुण्यदेहा सरस्वती ॥ या प्राची कौरवक्षेत्रे पुष्करे या महालये ॥ सा त्वं शिप्रा प्रसिद्धा च सर्वपातकनाशिनी ॥ ६९ ॥ त्वं दया सर्वजंतूनां त्वं स्वर्गः शरणं नृणाम् ॥ त्वं माता सर्वजंतूनां त्वं प्राची भुवि गीयसे ॥ ७० ॥ बहुजन्मकलंकांकं दृष्ट्वा या देहिनां भुवि ॥ करोपि क्षालनं देवि सा त्वं त्रैलोक्यसंस्थिता ॥ ७१ ॥ आसां च संगमो यस्तु स प्रयागो बुधैः स्मृतः ॥ अत्रागत्य तु युष्माभिः स्थापितः स्थापितोऽधुना ॥ ७२ ॥ सोद्य प्रभृति देवोऽयं प्रयागेश्वरसंज्ञकः ॥ त्रिषु लोकेषु विख्यातः स्मरणात्पापनाशनः ॥ ७३ ॥ अत्रागत्य प्रपश्यंति ये प्रयागेश्वरं ततः ॥ ते कृतार्था भविष्यंति सर्वपातकवर्जिताः ॥ ७४ ॥ कुलं च तारितं तेषां पितृकं मातृकं तथा ॥ गंगायाश्चियुगं पुण्यं चतुर्वर्गफलप्रदम् ॥ जायते नात्र संदेहः प्रयागेश्वरदर्शनात् ॥ ७५ ॥ गंगायां च प्रयागे च देवदारुवने शुभे ॥ नैमिषे पुष्करे चैव श्रीशैले च त्रिपुष्करे ॥ ७६ ॥ त्र्यंबके धौतपापे च महेन्द्रे भैरवे तथा ॥ गोकर्णे च सुवर्णाख्ये रेवाकपिलसङ्गमे ॥७७॥ एतेषां दर्शनेनैव या सिद्धिर्द्वादशाब्दिका ॥ सा लभ्या मासमात्रेण प्रयागेश्वरदर्शनात् ॥ ७८ ॥ ये पश्यंति चतुर्दश्यामष्टम्यां च विशेषतः ॥ भक्त्या च नियमं कृत्वा प्रयागेश्वरसंज्ञकम् ॥ ७९ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ भोगदं मोक्षदं लिंगं भविष्यति महीतले ॥ ८० ॥ कलास्तिस्रो भविष्यंति लिंगेऽस्मिन्मोक्षदे शुभे ॥ गंगा च यमुना प्राची सर्वपातकनाशिनी ॥ ८१ ॥ एवमुक्त्वा स्तुता गंगा यमुना च सरस्वती ॥ देवैः प्रणतिपूर्वेण गताः स्थानं स्वकं तदा ॥ ८२ ॥ देवाः प्रहृष्टाः शक्राद्याः प्रयागेश्वरसंज्ञकम् ॥ स्तुत्वा च विविधैः स्तोत्रैः पूजयित्वा दिवं गताः ॥ ८३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ प्रयागेश्वर देवस्य चंद्रादित्येश्वरं शृणु ॥ ८४ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखंडे चतुरशीतिलिंगमाहात्म्ये उमामहेश्वरसंवादे प्रयागेश्वरमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ द्विसप्ततीश्वरं विद्धि चन्द्रादित्येश्वरं प्रिये ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ शंवरेण पुरा देवि निर्जिताः संगरे सुराः ॥ नष्टा रणं परित्यज्य प्राणत्राणपरायणाः ॥ २ ॥ ग्रस्तं च राहुणा दृष्ट्वा शशांकं भयविह्वलम् ॥ विनतायाः सुतो ज्येष्ठः प्रोक्तः सूर्येण सारथिः ॥ ३ ॥ वहारुण रथं शीघ्रं यत्र युद्धं न विद्यते ॥ श्रूयते चन्द्रसूर्यौ तौ दैत्यानां बलवत्तरौ ॥ ४ ॥ राहुर्दंष्ट्राकरालस्तु स तृतीयो भयंकरः ॥ न ज्ञायते रणे चन्द्रो मृतो नष्टोऽथवा पुनः ॥ ५ ॥ स च न ज्ञायते शक्रः क्व गतो वरुणो रणे ॥ यमो न ज्ञायते कुत्र धनदस्य च का कथा ॥ ६ ॥ एवमुक्तोऽरुणो रुग्णो रविणा रणमध्यतः ॥ रथं संप्रेरयामास यत्र युद्धं न विद्यते ॥ ७ ॥ एतस्मिन्नंतरे चन्द्रः समायातस्तु तत्क्षणात् ॥ राहुग्रहगृहीतोऽपि यत्र देवो दिवस्पतिः ॥ ८ ॥ संत्रस्तः स विलोलाक्षः क्षणमात्रमचेतनः ॥ बभूव सहसा चन्द्रो दृष्ट्वा देवं दिवाकरम् ॥ ९ ॥ शंवरेण रणे रुद्धा रुद्राश्च भयविद्रुताः ॥ जग्मुर्दिशो दश भयादसुरेन्द्रविभीषिताः ॥ १० ॥ साध्याः सर्वे भयत्रस्ता गता यत्र न दानवाः ॥ तेषु भग्नेषु देवेषु हतशिष्टेषु संगरे ॥ ११ ॥ व्यधमन्सर्वगात्राणि वर्माणि च जनक्षये ॥ पलायमानदेवानामसुरो बलवच्छरैः ॥ १२ ॥ पृष्ठतो निजघानाथ निकृत्ताश्च सहस्रशः ॥ अहं नष्टश्छलेनैव व्यग्रीभूते ऽसुरे तदा ॥ १३ ॥ आसुरं रूपमास्थाय प्राणत्राणपरायणः ॥ शीघ्रं च गम्यते तावद्यावन्नायाति शंवरः ॥ १४ ॥ इत्युक्तं निशिनाथेन भयभीतेन पार्वति ॥ चन्द्रादित्यौ क्षणान्नीतावरुणेन रथेन वै ॥ १५ ॥ यत्र देवो जगन्नाथो गरुडस्थो जनार्दनः ॥ सुरसंघातमंकेतर्किंनराकीर्णकंदरे ॥ ॥ १६ ॥ मंदरे सुरनारीणां नंदने वरचन्दने ॥ दृष्ट्वा तत्र जगन्नाथं शंखचक्रगदाधरम् ॥ स्तुतिं तौ चक्रतुर्देवौ चन्द्रसूर्यौ यशस्विनि ॥ १७ ॥ नमो लोकत्रयाध्यक्ष स्वप्रभाजितभास्कर ॥ नमो विष्णो नमो जिष्णो नमस्ते कैटभांतक ॥ १८ ॥ नमः सर्वक्रियाकर्त्रे जगत्त्रात्रे च ते नमः ॥ नमश्चक्रायुधाधृष्य नमो दानवघातिने ॥ १९ ॥ नमः क्रमत्रयाक्रांतत्रैलोक्यांतर्हितोद्भव ॥ नमः प्रचंडदैत्येंद्रकुलकाल महाबल ॥ ॥ २० ॥ नमो नाभिह्रदोद्भूतपद्मगर्भमहाप्रभो ॥ जनिताशेषलोकेशविरंचाय महाद्युते ॥ २१ ॥ अमरारिविनाशाय महासमरशालिने ॥ नमस्ते विबुधाधीश शरणं भव नः प्रभो ॥ २२ ॥ चन्द्रसूर्यकृतं स्तोत्रं श्रुत्वा देवो जनार्दनः ॥ आश्वास्य स्तुतिपूर्वेण प्राह देवो ह्यधोक्षजः ॥ २३ ॥ ॥ ॥ विष्णुरुवाच ॥ ॥ स्वागतं चन्द्रसूर्यौ भो भवंतौ स्तुतिभाजनौ ॥ किं कारणमिह प्राप्तौ तद्ब्रूतां विगतज्वरौ ॥ २४ ॥ नारायणेनैवमुक्तौ प्रोचतुश्चंद्रभास्करौ ॥ समरे निर्जिता देवाः शंवरेण दुरात्मना ॥ २५ ॥ न ज्ञाताः क्व गतास्ते च आवां नष्टौ प्रयत्नतः ॥ अरुणेन हृता नीतौ दृष्टस्त्वं देव देवतः ॥ २६ ॥ शंवरेण जिता देवाः स च सर्वत्र दृश्यते ॥ स्थले चैव जले चैव शंवरः क्रूररूपधृक् ॥ २७ ॥ नश्यतां त्रिदशेंद्राणां पृष्ठतः शरवृष्टिभिः ॥ चिच्छेद नरवर्माणि च्छत्राणि च धनूंषि च ॥ २८ ॥ वर्माणि च विचित्राणि मुकुटानि महांति च ॥ पृथूनि चापि चापानि चर्माणि विविधानि च ॥ २९ ॥ गजाश्च मदसंभिन्नकपोलाः कोटिशः सुराः ॥ वाजिनश्चामरापीडा रत्नपर्याणभूषणाः ॥ ३० ॥ विबुधाध्वस्तसन्नाहा विगजा विपदातिनः ॥ विपदामाकराकारा बभूव सुरवाहिनी ॥ ३१ ॥ ततो दैत्याधिपो मानी परिवृत्तो महारणात् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निर्जितारिर्महातेजा ज्वालावानिव पावकः ॥ ३२ ॥ वंद्यमानो मुनिगणैः स्तूयमानो महर्षिभिः ॥ आनंदितो जयाशीर्भिः प्रवरैर्दैत्यपुंगवैः ॥ ३३ ॥ तत्र सर्वर्द्धिसंपूर्णमासनं हेमभूषणम् ॥ अध्यतिष्ठत दैत्येंद्रस्तत्र मंगलवेश्मनि ॥ तत्रोपविष्टः शुशुभे दैत्यराजो महायशाः ॥ ३४ ॥ दिव्यचंदनपुष्टांगः सुरपुष्पसमुज्ज्वलः ॥ मुकुटाकारमुष्टांगः सितचामरवीजितः ॥ मृतोत्थितैस्तथा दैत्यैर्दैत्याधीशैरधिष्ठितः ॥ ३५ ॥ क्रतुभिर्मूर्त्तिमद्भिश्च सेव्यमानो महाबलः ॥ सर्वपुष्पोत्करयुतैर्नानाविहगनादिभिः ॥ ३६ ॥ तत्र श्रीरतुला लोके तत्र लक्ष्मीर्निरर्गला ॥ तत्र कांतिर्द्युतिः शोभा शंबरो यत्र दानवः ॥ ३७ ॥ एवं स दैत्यनृपतिः सभृत्यस्तत्र मोदते ॥ स्वयमिंद्रस्तु संजातश्चंद्रसूर्यौ कृतौ स्वकौ ॥ ३८ ॥ तयोरिति वचः श्रुत्वा स देवः पुरुषोत्तमः ॥ चिरं ध्यात्वा स्वमनसि तदावोचदिदं प्रिये ॥ ३९ ॥ चंद्रसूर्यौ मया ज्ञातं शंबरस्य विचेष्टितम् ॥ ब्रह्मणो वरदानेन भोक्तव्यं तपसः फलम् ॥ ४० ॥ शंबराय पुरा क्षिप्तं वज्रं कुलिशपाणिना ॥ हृदये निहतः सोऽपि तथापि न मृतोऽसुरः ॥ ४१ ॥ गम्यतां च मयाज्ञप्तौ महाकालवनोत्तमे ॥ चन्द्रसूर्यौ ममादेशात्तत्र सिद्धिं च लप्स्यथ ॥ ४२ ॥ तत्रानंतो महाकालो लिंगरूपो महेश्वरः ॥ तस्य चोत्तरतो देशे लिंगं कामप्रदं शिवम् ॥ ४३ ॥ तस्य दर्शनमात्रेण कृतकृत्यौ भविष्यथः ॥ तस्य ज्वालासमूहेन मरणं शंबरस्य च ॥ भविष्यति न संदेहस्तस्मात्तत्रैव गम्यताम् ॥ ४४ ॥ इत्युक्तौ वासुदेवेन चंद्रसूर्यौ यशस्विनि ॥ सत्वरं हृष्टरोमाणौ महाकालवनं गतौ ॥ ४५ ॥ तत्र दृष्ट्वा महादेवं तेजसो राशिमव्ययम् ॥ स्तुतं च विविधैः स्तोत्रैः पूजितं कुसुमैः शुभैः ॥ ४६ ॥ एतस्मिन्नंतरे वाणी लिंगमध्यात्समुत्थिता ॥ आश्वासयंती तरसा चन्द्रसूर्यौ हिमात्मजे ॥ ४७ ॥ हतः स शंबरो दैत्यो गतौ तौ चन्द्रभास्करौ ॥ दैत्यानां निर्मितौ दुष्टौ पातालांतरसंस्थितौ ॥ ४८ ॥ राहुकेतू ग्रहांते तु कृतौ समयपूर्वकौ ॥ स्थापितः स्वपदे शक्रो देवैः सह न संशयः ॥ ४९ ॥ स्वं स्वं स्थानं गताः सर्वे लोकपाला मुदा युताः ॥ कांतिप्रतापसंयुक्तौ भवन्तौ भुवनत्रये ॥ ५० ॥ गगने ग्रहनक्षत्रैः सहितौ विचरिष्यथः ॥ पूर्ववत्पुण्यपापानां साक्षिभूतौ भविष्यथः ॥ ५१ ॥ इत्युक्तौ चन्द्रसूर्यौ तु तया वाण्या वरानने ॥ सन्तुष्टौ कृतकृत्यौ तु संजातौ लिंगदर्शनात् ॥ ५२ ॥ एतस्मिन्नंतरे देवा विमानस्थाः समागताः ॥ यत्र चंद्रश्च सूर्यश्च महाकालवने शुभौ ॥ ५३ ॥ ज्ञात्वा लिंगस्य माहात्म्यं नाम चक्रुः समाहिताः ॥ सेवितं चंद्रसूर्याभ्यां लिंगं तेजोमयं परम् ॥ ५४ ॥ चन्द्रादित्येश्वरंनाम ख्यातिं यास्यति भूतले ॥ लिंगस्यास्य समुत्थेन ज्वालासंघेन शंवरः ॥ दग्धो भृत्यजनैः सार्द्धं चन्द्रसूर्यानुसेवनात् ॥ ५५ ॥ इत्युक्ता त्रिदशाः सर्वे समीपे सर्वतः स्थिताः ॥ स्तुवन्तो विविधैः स्तोत्रैश्चंद्रादित्येश्वरं शिवम् ॥ ५६ ॥ चन्द्रादित्यौ च तत्रस्थौ स्थितौ लिंगसमीपतः ॥ आराधयन्तौ देवेशं पदं प्राप्तौ च पूर्ववत् ॥ ५७ ॥ ये पश्यंति नरा भक्त्या चन्द्रादित्येश्वरं शिवम् ॥ ते यांति सूर्यलोकं तु चन्द्रलोकं तथैव च ॥ ५८ ॥ विमानैः सूर्यसंकाशैस्तथा चंद्रप्रभैः शुभैः ॥ यावच्चन्द्रश्च सूर्यश्च तावत्तेषां सुखं भवेत् ॥ ५९ ॥ चन्द्रसूर्योपरागे तु चंद्रादित्येश्वरं शिवम् ॥ ये पश्यंति नरा भक्त्या स्नात्वा शिप्रां च पावनीम् ॥ ६० ॥ तेषां कुलशतं यावत्पैतृकं मातृकं तथा ॥ लोके चंद्रस्य सूर्यस्य मोदते शाश्वतीः समाः ॥ ६१ ॥ अमासोमसमायोगे ये पश्यन्ति प्रसंगतः ॥ चन्द्रादित्येश्वरं देवं न ते यांति यमालयम् ॥ ६२ ॥ एष ते कथितो देवि प्रभावःपापनाशनः ॥ चन्द्रादित्येश्वरेशस्य श्रूयतां करभेश्वरम् ॥ ६३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे चंद्रादित्येश्वरमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ७ ॥ ॥ श्रीहर उवाच ॥ ॥ त्रिसप्ततीश्वरं विद्धि करभेशं वरानने ॥ यस्य दर्शनमात्रेण कुयोनिर्नैव लभ्यते ॥ १ ॥ वीरकेतुरभूद्धीमानयोध्याया महीपतिः ॥ विद्याविनयसौभाग्यलावण्यामृतपूरितः ॥ २ ॥ स सम्यक्पालयामास प्रजाः पुत्रानिवौरसान् ॥ अतीतानागतज्ञानपरिनिष्ठितमानसः ॥ ३ ॥ अथैकस्मिन्दिने राजा जगाम गहनं वनम् ॥ मृगसिंहगजाकीर्णं व्याघ्रसंवरसंकुलम् ॥ ४ ॥ स तत्र विविधान्वन्यान्विव्याध परवीरहा ॥ मृगांश्च महिषांश्चैव वराहांश्च सहस्रशः ॥ ५ ॥ लोडितं तद्वनं सर्वं पशुपक्षिमृगाकुलम् ॥ रहितं श्वापदैः सर्वैः कृतं तेन महीभृता ॥ ६ ॥ यदा न श्वापदास्तस्मिन्दृश्यंते गहने वने ॥ तदा विद्धस्तु करभो बाणेनावतपर्वणा ॥ ७ ॥ स चापि करभो देवि बाणमादाय सत्वरम् ॥ विद्धोऽपि निःसृतोऽत्यर्थं राज्ञस्तस्यैव पश्यतः ॥ स च राजा बली तूर्णं ससार करभं प्रति ॥ ८ ॥ ततो निम्नस्थलं चैव स चोष्ट्रोऽद्रवदाशुगः ॥ मुहूर्त्तेन ततो देवि योजनानि बहून्यपि ॥ ९ ॥ ततः स राजा तारुण्यादौरसेन बलेन च ॥ ससार बाणासनधृक्सखड्गः सहयो नृपः ॥ १० ॥ ततो नदान्नदीश्चैव पल्वलानि वनानि च ॥ अतिक्रम्यानतिक्रम्यं ससारैव वनेचरम् ॥ ११ ॥ स चापि करभो देवि आसाद्यासाद्य तं नृपम् ॥ पुनरप्येति जवनो जवेन महता ततः ॥ १२ ॥ स तस्य बाणैर्बहुभिः करभो विह्वलीकृतः ॥ पृष्ठतः पार्श्वतश्चैव पुनरभ्येति चांतिकम् ॥ पुनश्च जवमास्थाय पार्श्वे चाग्रे च दृश्यते ॥ १३ ॥ अथारण्यं महारौद्रं प्रविष्टः करभस्तदा ॥ अन्तर्धानं जगामाशु स च राजा वनेऽविशत् ॥ १४ ॥ प्रविश्य च महारण्यं तापसानामथाश्रमम् ॥ आमसाद ततो राजा श्रांताश्वोपविशत्पुनः ॥ १५ ॥ तं कार्मुककरं दृष्ट्वा श्रमार्त्तं क्षुधितं तदा ॥ समभ्येत्यर्घ्यमस्तस्मै पूजां चक्रुर्यथाविधि ॥ १६ ॥ स पूजामृषिभिर्दत्तां प्रतिगृह्य यथाविधि ॥ अपृच्छत्तापसान्सर्वांस्तपसो वृद्धिमुत्तमाम् ॥ १७ ॥ ते तस्य राज्ञो वचनं प्रतिगृह्य तपोधनाः ॥ ऋषयो राजशार्दूलं पप्रच्छुस्तत्प्रयोजनम् ॥ १८ ॥ केन भद्र सुखार्थेन संप्राप्तोऽसि तपोवनम् ॥ पदातिर्बद्धनिस्त्रिंशो धन्वी बाणी नरेश्वर ॥ १९ ॥ एतदिच्छामहे श्रोतुं कुतः प्राप्तोऽसि मानद ॥ कस्मिन्कुले च जातस्त्वं किं नामा ब्रूहि पार्थिव ॥ २० ॥ ततः स राजा सर्वेभ्यो द्विजेभ्यः पुरुषर्षभः ॥ आचख्यौ तद्यथा न्यायं कुलं गोत्रं च तत्त्वतः ॥ २१ ॥ इक्ष्वाकूणां कुले जातो वीरकेतुर्द्विजर्षभाः ॥ चरामि मृगयूथानि निघ्नन्बाणैः सहस्रशः ॥ २२ ॥ बलेन महता युक्तः सामात्यः सपरिच्छदः ॥ यदा न लब्धो गहने मृगो वा सूकरोऽपि वा ॥ २३ ॥ महिषश्चित्तलो वापि शशो वा शंवरो वने ॥ तदा मे करभो विद्धो बाणेनानतपर्वणा ॥ २४ ॥ स प्रणष्टः क्षणेनैव सबाणो मम पश्यतः ॥ तं द्रवंतमनुप्राप्तो वनमेतदहच्छया ॥ २५ ॥ भवत्सकाशं नष्टश्रीर्हताशः श्रमकर्शितः ॥ भवतां विदितं सर्वं सर्वज्ञा हि तपोधनाः ॥ भवंतः सुमहाभागास्तस्मात्पृच्छामि संशयम् ॥ २६ ॥ क्व गतः करभो विद्धो मया बाणेन सांप्रतम् ॥ क्व च प्राप्स्यामि सहसा ब्रूत तत्सुसमाहिताः ॥ २७ ॥ ततस्तेषां समस्तानामृषीणामृषिसत्तमः ॥ ऋषभो देवि करभं स्मरन्निदमथाब्रवीत् ॥ २८ ॥ गतः स करभो भूप महाकालवने शुभे ॥ गच्छ त्वं च महाराज महाकालवने शुभे ॥ २९ ॥ यत्र देवो महादेवः कारभं रूपमास्थितः ॥ विनोदार्थं च देवानां लिंगमूर्त्तिरभूत्पुरा ॥ ३० ॥ पश्चिमे क्षेत्रपालस्य कैलासस्य महीपते ॥ समीपे तस्य विघ्नेशो मोदकप्रियसंज्ञकः ॥ ३१ ॥ ब्रह्मणा पूजितो राजन्देवानामर्थसिद्धये ॥ स च धर्मध्वजो राजा हैहयानां कुलोद्वहः ॥ ३२ ॥ तुरगेण कदाचित्तु नीतो बदरिकाश्रमम् ॥ प्रसिद्धं त्रिषु लोकेषु नरनारायणाश्रमम् ॥ ३३ ॥ तत्र वीराजिनधरं कृशं विप्रं ददर्श ह ॥ शरीरमपि राजेंद्र न केनापि समं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तदा ॥ दृष्ट्वा च हसितो विप्रस्तेन राज्ञा प्रमादतः ॥ ३४ ॥ यस्माद्धससि मां दृष्ट्वा तस्मादुष्ट्रो भविष्यसि ॥ लंबोष्टो लंबदंतश्च विस्वरो विकृता कृतिः ॥ ३५ ॥ इत्युक्तस्तेन विप्रेण शप्तोपि नृपसत्तमः ॥ तं विप्रं प्रार्थयामास स च तुष्टोऽब्रवीद्विप्रम् ॥ ३६ ॥ न मे वागनृता भूप कदा चिदपि विद्यते ॥ अवश्यं करभो भूत्वा पश्चान्मुक्तिमवाप्स्यसि ॥ ३७ ॥ यदा त्वं करभो जातो विद्धो वै वीरकेतुना ॥ अयोध्याधिपभूपेन गमिष्यसि शराहतः ॥ ३८ ॥ महाकालवनं दिव्यं तत्र त्वं लिंगदर्शनात् ॥ गमिष्यसि परं स्थानं यत्र देवो महेश्वरः ॥ ३९ ॥ स चेक्ष्वाकुकुलो द्भूतो वीरकेतुर्महाबलः ॥ लिंगदर्शनतो भूप चक्रवर्तित्वमाप्स्यति ॥ ४० ॥ इत्युक्तो नृप भूपालः करभत्वं समागतः ॥ स त्वयाभिष्टुतो भूप वाणेनानतपर्वणा ॥ द्रक्ष्यसि त्वं विमानस्थं विमुक्तं लिंगदर्शनात् ॥ ४१ ॥ इत्युक्तो नृपतिस्तेन ऋषभेण द्विजेन तु ॥ आजगाम त्वरायुक्तो महाकालवनं शुभम् ॥ ४२ ॥ ददर्श तत्र तल्लिंगं पूजितं त्रिदशैः सदा ॥ एतस्मिन्नंतरे वाणी श्रुता तेन महीभृता ॥ ॥ ४३ ॥ विमानस्थेन या प्रोक्ता तूष्णीं मधुरस्वरा ॥ भोभो राजेंद्र मां पश्य विमाने चोद्यते शुभे ॥ ४४ ॥ दर्शनादस्य लिंगस्य प्राप्ता मे परमा गतिः ॥ त्वया हतोऽहं वाणेन तेनाहं त्वागतो वने ॥ समीपमस्य लिंगस्य त्वं मे बंधुः परो यतः ॥ ४५ ॥ इत्युक्त्वा स नृपं देवि वचः समधुराक्षरम् ॥ गतस्तु परमं स्थानं नित्यमव्ययमक्षयम् ॥ ४६ ॥ ततो देवगणा व्योम्नि सकिंनरमहोरगाः ॥ यक्षरा क्षसगंधर्वाः सपिशाचाप्सरोगणाः ॥४७॥ ब्रह्मेंद्रहरिमुख्याश्च विमानैर्देवि संस्थिताः ॥ आजग्मुर्मुदितास्तत्र द्रष्टुं कौतुकमानसाः ॥ ४८ ॥ विलोक्य करभं मुक्तं विमानस्थं विराजितम् ॥ लिंगदर्शनमात्रेण संस्तुतं विविधैः स्तवैः ॥ ४९ ॥ अच्छरसमूहेन मुकुटेनोज्वलत्विषा ॥ भासंतं रविकोटीनां जगदानंदकारकम् ॥ ५० ॥ नाम चक्रुस्ततो देवा दृष्ट्वा माहात्म्यमुत्तमम् ॥ दर्शनादस्य लिंगस्य मुक्तोऽयं करभो यतः ॥ ५१ ॥ तस्मा त्त्रिष्वपि लोकेषु विख्यातः करभेश्वरः ॥ भविष्यति न संदेहः पशुयोनिविमोचकः ॥ ५२ ॥ इत्युक्त्वा त्रिदशाः सर्वे गताः स्वं विष्ण्वमुत्तमम् ॥ अयोध्याधिपतिर्वीरो वीरकेतुः स्वमालयम् ॥ समृद्धं निःसपत्नं च ततो राज्यं चकार सः ॥ ५३ ॥ यः पश्यति नरो देवि करभेश्वरसंज्ञकम् ॥ स प्रयात्यक्षयाँल्लोकान्पूज्यमानो गणाधिपैः ॥ ५४ ॥ यदा कालादिहायातो राजराजेश्वरो महान् ॥ पृथिव्यामेकराड्भूत्वा क्रमान्मोक्षमवाप्नुयात् ॥ ॥ ५५ ॥ न दुःखं जायते तस्य व्याधिशोकभयं तथा ॥ ये पश्यंति प्रसंगेन तल्लिंगं करभेश्वरम् ॥ ५६ ॥ सर्वमेधेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ तत्फलं त्वधिकं देवि करभेश्वरदर्शनात् ॥ ५७ ॥ व्याधयो नोपजायंते दारिद्र्यं न कदाचन ॥ ऐश्वर्यं चातुलं तेषां जायते दर्शनात्सदा ॥ ५८ ॥ पशुयोनिगता ये च पितरो दुःखितास्तु ये ॥ तिष्ठंति चांबरे ते तु चिंतयंतः स्वगोत्रजम् ॥ ५९ ॥ आगमिष्यति नः पुत्रो नप्ता वा संततावित ॥ कदा पश्यति देवेशं करभेश्वरमीश्वरम् ॥ तेन दर्शनमात्रेण मुक्तिनां भविता ध्रुवम् ॥ ६० ॥ यो यमुद्दिश्य वै कामं दर्शनं तु करिष्यति ॥ तस्य तन्मा यते सर्वं मृतस्य परमा गतिः ॥ ६१ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ करभेशस्य देवस्य शृणु राजस्थलेश्वरम् ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे करभेश्वरमाहात्म्य वर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७ ॥ ॥ श्रीहर उवाच ॥ ॥ चतुःसप्ततिकं विद्धि शिवं राजस्थलेश्वरम् ॥ यस्य दर्शन मात्रेण सर्वपापैः प्रमुच्यते ॥ १ ॥ विष्णुकल्पे पुरा वृत्ते मन्वंतरमुखप्रिये ॥ अराजके महीपृष्ठे ब्रह्मा चिंतापरोऽभवत् ॥ २ ॥ न मनुष्यैर्विना देवाः समर्था लोकधारणे ॥ दानेज्याजपतो देवा भजंते पुष्टिमुत्तमाम् ॥ ३ ॥ योग्यो राजा प्रजापालः को भवेज्जनवत्सलः ॥ सोऽपश्यदथ राजर्षिं स्तपस्यंतं रिपुंजयम् ॥ ४ ॥ पृथ्व्यां सर्वगुणाकीर्णं धर्मनिष्ठं महाव्रतम् ॥ तमुवाचाथ देवेशो ब्रह्मा लोकपितामहः ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ रिपुंजय निबोधेदं वचनं मम पुत्रक ॥ राज्यं च पाल्यतां वत्स एककल्पेन चेतसा ॥ ६ ॥ अलं ते तपसा तात कष्टेनानेन सांप्रतम् ॥ धर्मेण विजिताः सर्वे त्वया लोका नरोत्तम ॥ ७ ॥ क्रियतामधुना लोकपालनं तु ममाज्ञया ॥ यतः परोपकारो हि फलं देहस्य देहिनः ॥ ८ ॥ न धर्म स्तादृशोऽन्योऽस्ति न चान्योऽर्थस्य साधकः ॥ निरयान्निरपि श्रेय उपकृत्य परस्य वै ॥९॥ नापकारेण भूतानामपि स्याद्भुवनेशता ॥ सततं लोक कार्यार्थं मदाज्ञागौरवेण च ॥ पृथ्वीं समुद्रवसनां प्रजाश्चैव प्रपालय ॥ १० ॥ इत्युक्तः स तु राजर्षिर्ब्रह्मणा पर्वतात्मजे ॥ प्रोवाच प्रांजलिर्भूत्वा ब्रह्माणं तु रिपुंजयः ॥ ११ ॥ स्वभावेनाचला पृथ्वी त्वया पूर्वं विनिर्मिता ॥ विनैव पालकं ह्येषा कुत्र यास्यति मेदिनी ॥ १२ ॥ यद्यवश्यं मया पृथ्वी पालनीया पितामह ॥ देहि मे नगरीं रम्यामवन्तीं सप्तकल्पगाम् ॥१३॥ मनुष्यलोके विख्याता सकले सामरावती ॥ स्वर्गच्युतानां देवानां निवासार्थं प्रतिष्ठिता ॥ १४ ॥ मर्यादामनुवर्त्तेयुर्यदि मे नाकवासिनः ॥ अदत्ते च मया स्थाने न वासः कस्यचिद्भवेत् ॥ अनेन विधिना पृथ्वीं पालयिष्याम्यहं प्रभो ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ भविष्यत्येष ते कामो यस्त्वयोक्तो नरोत्तम ॥ ये केचिद्विदशाः संति मद्गौरववशेन ते ॥ तवा देशं करिष्यंति सदा त्वद्वशवर्त्तिनः ॥ १६ ॥ देवनाथेति वै नाम भविष्यति च सुव्रत ॥ इत्युक्त्वांतर्दधे ब्रह्मा हंसयानं समास्थितः ॥१७॥अथ राजा प्रतिज्ञाय ब्रह्मणा भूमिपालनम् ॥ पृथ्व्यामुद्घोषयामास प्रोवाच त्रिदिवौकसाम् ॥१८॥ भवतां विहितः स्वर्गो मनुजानां च भूतलम् ॥ ये चात्र कंद रताः स्थले वा भूधरेषु च ॥ १९ ॥ ये स्थिता यांतु ते देवा मनुजानामियं धरा ॥ तच्छ्रुत्वा घोषितं तस्य राज्ञो भयनिपीडिताः ॥ त्रिदशा ब्रह्मणो वाक्याद्गौरवात्त्रिदिवं गताः ॥२०॥ अथ प्रजाः स नृपतिर्धर्मेणावर्धयत्तदा ॥ पुत्रवत्स्नेहयुक्तेन हृदयेनातिनिर्वृताः॥२१॥प्रजास्तत्सुखसंवृद्धा जराभृ त्युविवर्जिताः ॥ पुत्रिणो धनधान्याढ्याः सर्वकामसमन्विताः ॥२२॥ यौवनस्थाश्च निर्द्वंद्वाः सततं धर्मसंश्रयाः ॥ नासीत्पृथिव्यां शैलस्तु स्थलो वा द्वीप एव च ॥ २३ ॥ अकृष्टपच्या पृथिवी स्वादवद्भिः फलैर्युता ॥ देवलोक इवासीद्धि सर्वकामगुणोज्वला ॥२४॥ एवं व्रजति काले वै राज्ञि राज्यं प्रकुर्वति ॥ महामर्षपरा देवा विप्रकार्यार्थमुद्यताः ॥२५॥ प्रजानां बहुदुःखानि मुहुः कुर्वत्यनेकशः ॥ अथानावृष्टिमकरोत्सुदीर्घां पाकशासनः ॥२६॥ तथा संह्रियमाणेषु लोकेषु नृपसत्तमः॥मेघो भूत्वा दिवं प्राप्य सुवृष्टिमकरोन्नृपः ॥२७॥ तेनेवाप्यायितो लोकः सुखी जातो यशस्विनि ॥ ततः काले तु कस्मिंश्चिद्दवर्षत्पाकशासनः ॥ संवर्त्तो वारिदो भूत्वा मेघान्वै विन्यपातयत् ॥ २८ ॥ ततस्तु मारुतो भूत्वा नृपतिस्तामधारयत् ॥ ततोनलः प्रनष्टोऽभूत्सर्वतः पृथिवीतलात् ॥ २९ ॥ न यज्ञा न जपो होमो न च पक्तिरवर्त्तत ॥ लोकश्च व्याधिसंक्षुब्धस्तदाभूद्विषमे स्थितः ॥ ३० ॥ ततः स राजा तं दृष्ट्वा त्वभवद्भव्यवाहनः ॥ सोऽधारयत्प्रजाः सर्वा यज्ञांश्च त्रिदिवौकसः ॥ ३१ ॥ एतस्मिन्नंतरे देवि त्वया सार्द्धं समागतः ॥ दर्शनार्थं स्वनगरीमहं भूतगणैर्वृतः ॥ ३२ ॥ ततो देवगणाः सर्वे सकिंनरमहोरगाः ॥ सयक्षरक्षोगन्धर्वाः सिद्धविद्याधरोरगाः ॥ ३३ ॥ भूताः प्रेताः पिशाचाश्च ये चान्ये गगनेचराः ॥ चत्वारः सागराश्चैव क्षारक्षीरादिसिंधवः ॥ ३४ ॥ गंगा च यमुना सिंधुश्चंद्रभागा सरस्वती ॥ चर्मण्वती भीम रथी पुण्या गोदावरी नदी ॥ ३५ ॥ विपाशा देविका पुण्या शरयूः कौशिकी तथा ॥ गोमती धूतपापा च बाहुदा च दृषद्वती ॥ ३६ ॥ पारा वेद

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्मृतिश्चैव वेत्रवती नर्मदा शिवा ॥ तापी पयोष्णी निर्विन्ध्या सर्वास्तत्र समागताः ॥ ३७ ॥ पुष्करश्च प्रयागश्च प्रभासो नैमिषस्तथा ॥ पृथुतीर्थो दकश्चैव तथैवामरकंटकः ॥ ३८ ॥ गंगाद्वारः कुशावर्त्तो बिल्वको नीलपर्वतः ॥ वाराहपर्वतश्चैव तीर्थं कनखलं तथा ॥ ३९ ॥ भृगुतुंगः सुकुक्षश्चाप्य जगंधश्च पार्वति ॥ कालिंजरः सकेदारो रुद्रकोटिर्महालयः ॥ ४० ॥ स्थानानि च समस्तानि पुण्यान्यायतनानि च ॥ मेरुर्महेंद्रो मलयो मंदरो गंधमादनः ॥ ४१ ॥ मुनयो वालखिल्याश्च देवाश्चत्वार एव च ॥ एते चान्ये च बहवः समायाता मया सह ॥ ४२ ॥ अनंतरं मया मेरुः स्थलाकारः कृतस्ततः ॥ तस्मिन्स्थले स्थितो देवि उपविष्टः सुरैर्वृतः ॥ नियुक्ताः सागराः पार्श्वे चत्वारो लवणादयः ॥ ४३ ॥ अथ व्या कुलतां प्राप्तः स च राजा रिपुंजयः ॥ स्वस्थलस्थं च मां दृष्ट्वा समायातस्तु मां प्रति ॥ ४४ ॥ तेजसा दह्यमानोऽपि मदीयेन वरानने ॥ भीतोऽपि तोषयामास कोऽसि देव नमोऽस्तु ते ॥ ४५ ॥ स्थलेस्मिन्नृप राजाहं मयाप्युक्तं विनोदतः ॥ चतुर्वर्गश्चतुर्मूर्त्तिश्चतुर्द्वा संस्थिता नृपः ॥ ४६ ॥ तेनाहं सर्वतो दृष्टो वाङ्मये सचराचरे ॥ अनंतरं स्तुतस्तेन भक्त्या परमया प्रिये ॥ ४७ ॥ प्रभावमतुलं दृष्ट्वा मदीयं व्यापकं परम् ॥ भक्त्या परमया देवि स च मां शरणं गतः ॥ ४८ ॥ भूयःस्तुतोऽपि तेनाहं तुष्टो वै तस्य भूपतेः ॥ तेनोक्तं यदि मे देव तुष्टस्त्वं परमेश्वर ॥ ४९ ॥ भक्तिर्मे सुदृढा भूयात्त्वयि सर्वेश शाश्वती ॥ तुष्टोहं तेन वाक्येन पुनः प्रोक्तो मया नृप ॥ ५० ॥ एवं भविष्यतीत्युक्त्वा पुनर्मां ब्रूहि पार्थिव ॥ हृदि स्थितश्च ते कामः सर्वकालं भविष्यति ॥ ५१ ॥ अधृष्यः सर्वदेवानां सर्वदा संभविष्यसि ॥ तेनाहं प्रार्थितो देवि भूयो वरमनुत्तमम् ॥ ५२ ॥ अतीव राजते देव स्थलोऽयं तव सन्निधौ ॥ मेरुरेष न संदेहो वल्लभः सर्वदा तव ॥ ५३ ॥ राजस्थलेश्वरोऽसि त्वं विख्यातो भुवनत्रये ॥ भविष्यसि यथा देव तथा त्वं कर्तुमर्हसि ॥ ५४ ॥ अत्रागत्य च यो देव भक्त्या परमया युतः ॥ यात्रां करोति भावेन पुराणोक्तविधानतः ॥ ॥ ५५ ॥ तस्य त्वया प्रदातव्यं सर्वं मनसि चिंतितम् ॥ अणिमादिगुणाः सर्वे गुटिकासिद्धिरंजनम् ॥ ५६ ॥ खड्गं च पादुकां चैव जलवासं रसायनम् ॥ राजस्थलेश्वरं यस्तु भक्त्या पश्यति मानवः ॥ ५७ ॥ दशम्यां तु विशेषेण कृत्वा नियमपूर्वकम् ॥ देवानामपि देवत्वं संप्राप्नोति महेश्वरः ॥ ५८ ॥ पूजनीयस्तु त्रिदिवैर्यथा देवः पुरंदरः ॥ दृष्ट्वा राजस्थले देवं योऽत्र यात्रां करिष्यति ॥ ५९ ॥ तस्य श्रीर्विजयश्चैव भव त्येव वरो मम ॥ शत्रवः संक्षयं यांतु संपद्यतां मनोरथाः ॥ ६० ॥ वृद्धिर्भवतु वंशे च दर्शनात्तव शंकर ॥ सर्वेऽत्र देवास्तिष्ठंतु मेरुरत्रैवतिष्ठतु ॥ तिष्ठंतु सागराः सर्वे तव देव समीपतः ॥ ६१ ॥ इत्युक्तोऽहं तदा तेन मया चोक्तं वरानने ॥ सुद्युम्नोनाम भूपालो यदात्रैवागमिष्यति ॥ ६२ ॥ पुत्रार्थं भार्यया सार्द्धं तदा दास्यामि वांछितम् ॥ तदा समुद्राश्चत्वारः स्थास्यन्ति सफलाः स्वयम् ॥ ६३ ॥ तस्याराधनतो भूप पुत्रं दास्यामि शोभनम् ॥ ये चात्र मानवा राजन्यात्रां कुर्वंति भक्तितः ॥ तेषां मनोरथावाप्तिर्भविष्यति न संशयः ॥ ६४ ॥ राजा रिपुंजयो भक्त्या गणाधीशः कृतो मया ॥ ६५ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ राजस्थलेश्वरेशस्य श्रूयतां वडलेश्वरम् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एका शीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्ये राजस्थलेश्वरमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥०॥

॥ ईश्वर उवाच ॥ ॥ पञ्चसप्ततिकं देवं वडलेश्वरसंज्ञकम् ॥ विद्धि पापहरं देवि दर्शनात्कामदं नृणाम् ॥ १ ॥ धनदस्य सखा देवि मणि भद्रो बभूव ह ॥ ईर्ष्याप्रभावस्तत्पुत्रो वडलोनाम कोपनः ॥ २ ॥ रूपवान्सर्वदा कामी सदा मत्तो बलाधकः ॥ कदाचित्स गतो रम्यां नलिनीं धनदस्य च ॥ ३ ॥ रत्यर्थं कामसेवार्थं गुप्तां रहसि निर्मिताम् ॥ ददर्श कुसुमैश्छन्नां वज्रवैडूर्यभूषिताम् ॥ ४ ॥ तां वै विद्रुमसंछन्नां मुक्तादामविरा जिताम् ॥ सुरम्यां विपुलच्छायां स्वर्णपंकजशोभिताम् ॥ ५ ॥ कुबेरभवनाभ्याशे वल्लभां धनदस्य च ॥ आक्रीडं राजराजस्य कुबेरस्य महा त्मनः ॥ ६ ॥ राक्षसैः किंनरैश्चैव गुप्तां खड्गधरैः सदा ॥ तां दृष्ट्वा परमप्रीतो बभूव वडलस्तदा ॥ ७ ॥ प्रियया सहितो रेमे स्थाने गुप्ते मनो हरे ॥ रेमे रमणकैर्योगैरनंगेन वशीकृतः ॥ ८ ॥ तत्र गुप्ता रणे शूरा राक्षसा रणकोविदाः ॥ रक्षंति शतसाहस्रं सर्वायुधपरिच्छदाः ॥ ९ ॥ ते तु दृष्ट्वैव वडलं मणिभद्रसुतं प्रिये ॥ भक्ष्यैः संपूरितमुखं दिव्यचन्दनभूषितम् ॥ १० ॥ केतकीगर्भपत्राभैर्दंतैर्दिव्यतराननम् ॥ युद्धार्थे वद्धनिस्त्रिंशं शक्तियुक्तमरिंदमम् ॥ ११ ॥ भार्यासहायमुन्मत्तं पर्यंके च स्थितं सदा ॥ रत्यर्थमागतं ज्ञात्वा अन्योन्यमभिचुक्रुशुः ॥ १२ ॥ मा वीरानेन मार्गेण सभायां गन्तुमर्हसि ॥ आक्रीडोऽयं कुबेरस्य धनदस्य महात्मनः ॥ १३ ॥ देवा देवर्षयो यक्षा गन्धर्वाः किंनरास्तथा ॥ आमन्त्र्य यक्षप्र वरं विहरंति रमंति च ॥ १४ ॥ नेह शक्यं विनादेशाद्विहर्तुं क्रीडितुं चिरम् ॥ भ्रात्रामात्येन सुहृदा केनापि च सुतेन च ॥ १५ ॥ येनकेनचिद न्यायादवमन्य धनेश्वरम् ॥ विहारः क्रियते दर्पात्स विनश्येदसंशयम् ॥ १६ ॥ एवं स राक्षसैर्वीरैर्वडलो विनिवारितः ॥ मा मैवमिति सक्रोधं भर्त्सयद्भिः समंततः ॥ १७ ॥ कदर्थीकृत्य तु स तान्राक्षसान्भीमविक्रमः ॥ व्यगाहत महातेजास्ते सर्वे तं न्यवारयन् ॥ १८ ॥ गृह्णीत बध्नीत निकृ न्ततेनं पिबाम खादाम च वृत्तहीनम् ॥ क्रुद्धा ब्रुवंतो ह्यपतन्द्रुतं ते शस्त्राणि चोद्यम्य विवृत्तनेत्राः ॥ १९ ॥ ततः स गुर्वीं यमदण्डकल्पां महागदां कांचनपट्टनद्धाम् ॥ प्रगृह्य तामभ्यपतत्तरस्वी ततोऽब्रवीत्तिष्ठत तिष्ठतेति ॥ २० ॥ ते तस्य वीर्यं च बलं च दृष्ट्वा विद्यावलं बाहुबलं तथैव ॥ न शक्नुवंतः सहितुं समेता हताः प्रवीराः सहसा निवृत्ताः ॥ २१ ॥ विदार्यमाणास्तत एव तूर्णमाकाशमास्थाय विमूढसंज्ञाः ॥ केलासशृंगाण्यभिदु द्रुवुस्ते यक्षार्दिता रक्षपालाः प्रभग्नाः ॥ २२ ॥ स शक्रवदानवदैत्यसंघान्विक्रम्य जित्वा मदनाभितप्तः ॥ विगाह्य तां पुष्करिणीं समर्थः कामं स चिक्रीडति यक्षपुत्रः ॥ २३ ॥ ततस्तु ते रक्षपालाः समेत्य धनेश्वरं वै वडलेन नुन्नाः ॥ यक्षस्य धैर्यं सुबलं च संख्ये यथावदाचख्युरतीव भीताः ॥ ॥ २४ ॥ तेषां तु वचनं श्रुत्वा मणिभद्रो महायशाः ॥ शशाप पुत्रं दयितं वडलं प्रभुकारणात् ॥ २५ ॥ यस्मात्सा नलिनी रम्या सेविता वड लेन तु ॥ दयिता धनदस्यापि यथा माता तथैव सा ॥२६॥ तस्मात्पुत्रो मदीयस्तु सर्वभोगविवर्जितः॥पंग्वन्धो बधिरो दीनः क्षयरोगमवाप्स्यति ॥ ॥ २७ ॥ इति शप्तस्तदा जातो वडलो भोगवर्जितः ॥ पतितो भूतले चैव तस्मिन्स्थाने गतोऽपि सन् ॥ २८ ॥ पीडितः क्षयरोगेण न शशाक विचेष्टितुम् ॥ अन्धोऽथ बधिरो जातो गुरुशापहतस्तदा ॥ २९ ॥ चिंतयामास सहसा शापमत्यद्भुतं महत् ॥ शप्तोऽहं केन सहसा जीवन्योन्यंतरं गतः ॥ ३० ॥ कथं शप्तोऽस्मि तातेन मणिभद्रेण वल्लभः ॥ पुत्रो युवा च शूरश्च शत्रुपक्षक्षयंकरः ॥ ३१ ॥ धन्योऽसौ मणिभद्रोऽपि मत्तातो येन भूतले ॥ प्रभुभक्त्या निजः पुत्रः शप्तस्त्यक्तश्च तत्क्षणात् ॥ ३२ ॥ वडलेन पुनः प्रोक्तं धन्योऽहं प्रभुकारणात् ॥ उत्सवो निधनंनाम भर्तृ पिण्डोपजीविनाम् ॥ ३३ ॥ अन्यायेन यथाकामं प्रारब्धः संचितश्चिरम् ॥ तेनाहं शापतां प्राप्तो यास्यामि नरकं ध्रुवम् ॥ ३४ ॥ एवं विलपत स्तस्य वडलस्य वरानने ॥ आजगाम तमुद्देशं मणिभद्रो महाबलः ॥ ददर्श पुत्रं पंग्वंधं क्षयरोगप्रपीडितम् ॥ ३५ ॥ निःश्वसंतं सुदुःखार्त्तं विल

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पंतं पुनःपुनः ॥ प्रत्युवाच सुतं यक्षो मणिभद्रोऽतिदुःखितः ॥ मया कुपित्रा हा वत्स शप्तस्त्वं प्रभुकारणात् ॥ ३६ ॥ त्वयेयं नलिनी रम्या धन
दस्यातिवल्लभा ॥ सेविता कामतप्तेन प्रवरा राक्षसा हताः ॥ ३७ ॥ तस्मात्पुत्र मया शप्तो न मिथ्या स भविष्यति ॥ प्रभुर्देवः प्रभुः स्वामी
प्रभुर्माता प्रभुः पिता ॥ ३८ ॥ स्वाम्यर्थे यः प्रियान्प्राणान्परित्यजति संगरे ॥ स याति परमं स्थानं ब्रह्मलोकं सनातनम् ॥ ३९ ॥ न मन्त्रसाध्यः
शापोयं नौषधेन व्रतेन च ॥ नियमेन च दानेन तस्मान्मद्वचनं कुरु ॥ ४० ॥ मया श्रुतं शक्रलोके पुराणं स्कंदकीर्त्तितम् ॥ ब्रुवतो नारदस्यैव
देवानां संनिधौ पुरा ॥ ३१ ॥ प्रभावो वर्णितस्तेन महाकालवनस्य च ॥ क्षेत्रे ह्यस्मिन्महालिंगं स्वर्गद्वारस्य दक्षिणे ॥ ४२ ॥ विद्यते व्याधि
शमनं रूपसौभाग्यदायकम् ॥ तत्राहं त्वां च नेष्यामि विमानेनाशुगामिना ॥ ४३ ॥ इत्युक्त्वा मणिभद्रेण समानीतः सुतस्तदा ॥ यत्र देवाधि
देवोऽसौ स्वर्गद्वारस्य दक्षिणे ॥ ४४ ॥ स्पर्शनात्तस्य लिंगस्य चक्षुष्माञ्जपवान्बली ॥ सुपादः श्रुतिसंयुक्तस्तक्षणादभवत्तदा ॥४५॥ दृष्ट्वा सुमहदाश्चर्यं
मणिभद्रेण पार्थिवं ॥ कृतं नाम सुहृष्टेन स्वीयपुत्रस्य नामतः ॥ चक्षुष्मान्वडलो जातो लिंगस्यास्य प्रभावतः ॥ ४६ ॥ अद्यप्रभृति देवोऽयं वडले
श्वरसंज्ञकः ॥ भविष्यति त्रिलोकेषु विख्यातो नेत्रदायकः ॥ ४७ ॥ पूजयिष्यंति ये देवं वडलेश्वरसंज्ञकम् ॥ लिंगं लोकेषु विख्यातं ते प्राप्स्यंति मनो
रथम् ॥४८॥ दृष्टो हरति पापानि स्पृष्टो राज्यं प्रयच्छति ॥ अर्चितो भक्तिभावेन मोक्षं दद्यान्न संशयः ॥४९॥ कार्त्तिके शुक्लपक्षस्य तिथिर्या द्वादशी
भवेत् ॥ तस्यां ये पूजयिष्यंति वडलेश्वरसंज्ञकम् ॥ ५० ॥ दानं तैः सततं दत्तं ते यांति परमं पदम् ॥ प्रयागे च प्रभासे च गंगासागरसंगमे ॥५१॥
तपस्तप्तं भवेत्तैस्तु ते मुक्ता नात्र संशयः ॥ गर्भवासे न जायंते सर्वसौख्यसमन्विताः ॥ ५२ ॥ गाणपत्या भविष्यंति शंकरस्य सदा प्रियाः ॥
सौभाग्यरूपसंपन्नाः पुत्रपौत्रैश्च संयुताः ॥ जायंते मानवा लोके वडलेश्वरदर्शनात् ॥ ५३ ॥ गर्भवासे महाकष्टे यस्य वासो न रोचते ॥ सोऽभ्यर्च
येतु भावेन वडलेश्वरमीश्वरम् ॥ ५४ ॥ न लिंगेन विना सिद्धिर्दुर्लभं परमं पदम् ॥ गतिर्न जायते स्वर्गे यावल्लिंगं तु नार्चयेत् ॥ ५५ ॥ लिंगार्चन
विहीनानां सिद्धिश्चापि सुदुर्लभा ॥ मम पुत्रेण संप्राप्तमीप्सितं लिंगतो यतः ॥ ५६ ॥ इत्युक्त्वा मणिभद्रोऽपि सुतेन सहितो ययौ ॥ यत्र देवो
धनाध्यक्षः स्थानं स्वं परमं गतः ॥ ५७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ वडलेश्वरदेवस्य श्रूयतामरुणेश्वरम् ॥ ५८ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे वडलेश्वरमाहात्म्यवर्णनं
नाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ षट्सप्ततितमं देवमरुणेश्वरसंज्ञकम् ॥ विद्धि पापहरं देवि दर्शना
त्कामदं नृणाम् ॥ १ ॥ पुरा देवयुगे देवि प्रजापतिसुते शुभे ॥ आस्तां भगिन्यौ रूपेण समुपेतेऽद्भुतेऽनघे ॥ २ ॥ ते भार्ये कश्यपस्यास्तां कद्रूश्च
विनता तथा ॥ प्रादात्ताभ्यां वरं प्रीतः प्रजापतिसमः पतिः ॥ ३ ॥ कश्यपो धर्मपत्नीभ्यां मुदा परमया युतः ॥ वरातिसर्गं श्रुत्वैव कश्यपादुत्तमं
तु ते ॥ ४ ॥ हर्षादभ्यधिकां प्रीतिं प्रापतुः स्म वरस्त्रियौ ॥ वव्रे कद्रूः सुताञ्नागान्सहस्रं तुल्यवर्चसः ॥ ५ ॥ द्वौ पुत्रौ विनता वव्रे कद्रूपुत्राधिकौ
बले ॥ ओजसा तेजसा चैव विक्रमेणाधिकौ च तौ ॥ ६ ॥ तस्यै भर्त्ता वरं प्रादाल्लप्स्यसे पुत्रकोत्तमौ ॥ एवमस्त्विति तां चाह कश्यपो विनतां
तदा ॥ ७ ॥ यथा च प्रार्थितं लब्ध्वा वरं तुष्टाऽभवत्तदा ॥ कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ॥ ८ ॥ कद्रूश्च लब्ध्वा पुत्राणां सहस्रं
तुल्यतेजसाम् ॥ धार्यौ गर्भौ प्रयत्नेन इत्युक्त्वा स महातपाः ॥ ९ ॥ ते भार्ये वरसंहृष्टे कश्यपो वनमाविशत् ॥ कालेन महता कद्रूर्नागानां सा
शतीर्दश ॥ जनयामास चार्वंगी द्वे चांडे विनता तदा ॥ १० ॥ तयोरंडानि निदधुः प्रहृष्टाः परिचारिकाः ॥ सोपस्वेदेषु भांडेषु पंचवर्षशतानि
च ॥ ११ ॥ ततः पंचशते काले कद्रूपुत्रा विनिर्गताः ॥ अंडाभ्यां विनतायास्तु मिथुनं न व्यदृश्यत ॥ १२ ॥ ततः पुत्रार्थिनी देवी व्रीडिता सा
तपस्विनी ॥ अंडं विभेद विनता तत्र पुत्रं ददर्श ह ॥ १३ ॥ पूर्वार्द्धकायसंपन्नमितरेणा प्रकाशितम् ॥ स पुत्रो रोषसंरब्धः शशापैनामिति
श्रुतम् ॥ १४ ॥ योऽहमेवं कृतो मातस्त्वया लोभपरीतया ॥ शरीरेणासमग्रेण तस्मादासी भविष्यसि ॥ १५ ॥ पंचवर्षशतान्यस्या यया विस्प
र्द्धसे सदा ॥ एष ते च सुतो मातर्दास्याद्धि मोक्षयिष्यति ॥ १६ ॥ यद्येनमपि मातस्त्वं मामिवांडविभेदनात् ॥ न करिष्यस्यनंगं वा पुत्रं चाति
तरस्विनम् ॥१७॥ प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया ॥ विशिष्टबलमीप्संत्या पंचवर्षशतान्यतः ॥१८॥ एवं शप्त्वा ततो देवि विनतां मातरं
स्वकम् ॥ अरुणो विललापाथ वाष्पशोकपरिप्लुतः ॥ १९ ॥ हाहा मया नृशंसेन माता स्वजननी स्वका ॥ शप्ता विनापराधेन कथं यास्यामि
सद्गतिम् ॥ माता देहारणिः पुंसां माता दुःखसहा परा ॥२०॥ गर्भक्लेशे परं दुःखं माता जानाति यादृशम् ॥ वात्सल्यं चाधिकं मातुर्दृश्यते न तु
पेतृकम् ॥ २१ ॥ गुरूणामेव सर्वेषां माता गुरुतरा स्मृता ॥ एकस्यापि सुतस्यैव न दृष्टा निष्कृतिः श्रुतौ ॥२२॥ यदि पिंडप्रदानं तु गयायां कुरुते
सुतः ॥ गते पितरि पंचत्वं माता पुत्रस्य निर्वृतिः ॥ नच मातृविहीनस्य ममत्वं कुरुते पिता ॥२३॥ विकलो मातृहीनस्तु पुत्रो हि प्रोच्यते तदा ॥
यदा स वृद्धो भवति तदा भवति दुःखितः ॥ तदा शून्यं जगत्सर्वं यदा माता वियुज्यते ॥ २४ ॥ मोऽहं पापसमाचारो जातो मातृविहिंसकः ॥
मरिष्यामि न संदेहः साधयित्वा हुताशनम् ॥ २५ ॥ जातोऽहं विकलांगस्तु प्राक्कृतेनैव कर्मणा ॥ न माता कारणं यस्मात्स्वकीयं कर्म भुज्यते ॥
॥ २६ ॥ एवं विलपतस्तस्य कश्यपस्य सुतस्य च ॥ अरुणस्य विशालाक्षि नारदः समुपागतः ॥ २७ ॥ दृष्ट्वारुणं सुदुःखार्त्तं विलपंतं पुनः
पुनः ॥ प्रत्युवाच प्रसन्नात्मा नारदः प्रहसन्निव ॥ २८ ॥ अरुणोऽयमहो रौति कश्यपस्यात्मसंभवः ॥ विनतायाः सुतो ज्येष्ठः संभूतस्तपसां निधिः ॥
॥ २९ ॥ उत्पादितोऽयमल्पाहैरर्द्धकायो महाबलः ॥ एनमाश्वासयिष्यामि विनतागर्भसंभवम् ॥ मोहेन विलपंतं च श्रेयो मे भविता ध्रुवम् ॥
॥ ३० ॥ इति संचिंत्य मनसि वाक्यैर्मधुरमृतोपमैः ॥ प्रत्युवाचारुणं तत्र नारदो द्विजसत्तमः ॥ ३१ ॥ तात कश्यपदायाद विनतागर्भसंभव ॥
तेजोराशे दुराधर्ष संतापं मा कृथा वृथा ॥ ३२ ॥ भाविनोऽर्था भवंतीह दुःखस्य च सुखस्य च ॥ यत्त्वया विनता शप्ता रहस्यं देवनिर्मितम् ॥
॥ ३३ ॥ यदि तेस्ति घृणा चित्ते शप्तात्मजननी त्वया ॥ तदागच्छ ममादेशान्महाकालवनं शुभम् ॥३४॥ उत्तरे देवदेवस्य यात्रेशस्य च पुण्यदम् ॥
विद्यते त्रिदशैः पूज्यं सर्वदा सर्वदं शिवम् ॥ ३५ ॥ अरुणस्त्वेवमुक्तस्तु नारदेन महात्मना ॥ आजगाम क्षणार्द्धेन महाकालवनं शुभम् ॥ ३६ ॥
ददर्श तत्र तल्लिंगं तेजःकूटोपमं शुभम् ॥ पूजयामास विधिवत्पुष्पैर्भावसमन्वितः ॥ ३७ ॥ लिंगेनोक्तोऽरुणो देवि सारथ्यं कुरु सर्वदा ॥ सूर्यस्य
भ्रमतस्तस्य त्वतुल्यो नास्ति सारथिः ॥ ३८ ॥ मया दत्तं तु सामर्थ्यं सूर्यस्य पुरतः सदा ॥ उदयस्तेऽरुण प्राग्वै पश्चात्सूर्य उदेष्यति ॥ ३९ ॥
तत्रात्मा त्रिषु लोकेषु ख्यातोऽहमरुणेश्वरः ॥ भविष्यामि न संदेहो नृणामर्थप्रदायकः ॥ ४० ॥ ये मां पश्यंति सततं त्वन्नाम्ना चारुणेश्वरम् ॥ ते
यास्यंति परं स्थानं दाहप्रलयवर्जितम् ॥ ४१ ॥ मोदिष्यंति कुलैः सार्द्धं पितृमातृसमुद्भवैः ॥ कल्पकोटिसहस्रं तु ये पश्यंति समाहिताः ॥ ४२ ॥
न दुःखं जायते तेषां ये पश्यंति रवेर्दिने ॥ संसारसागरोत्थं वै यावद्दिनाश्चतुर्दश ॥४३॥ यः पश्यति चतुर्दश्यां कृष्णायामरुणेश्वरम् ॥४४॥ स नेष्यति

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by S3 Foundation USA

पितॄन्स्वर्गे नरकस्थान्न संशयः ॥ संक्रांतौ रविवारे च यः पश्येदरुणेश्वरम् ॥ शुंडीरस्वामिनो यात्रा कृता तेन न संशयः ॥४५॥ इत्युक्तस्तेन लिंगेन विनतानंदनस्तदा॥आगतः कृतकृत्यात्मा यत्र देवो दिवस्पतिः ॥४६॥ अस्य लिंगस्य माहात्म्यात्कश्यपस्यात्मसंभवः ॥ अरुणो दृश्यते ऽगोऽग्रि सूर्यस्य पुरतः सदा ॥ ४७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अरुणेश्वरदेवस्य पुष्पवंतेश्वरं शृणु ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्येऽरुणेश्वरमाहात्म्यवर्णनंनाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ७ ॥ ॥ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ सप्तसप्ततिकं देवि पुष्पदंतेश्वरं शृणु ॥ यस्य दर्शनमात्रेण गर्भवासो न जायते ॥ १ ॥ शिनिर्नाम द्विजो देवि स चापुत्रोऽभवत्पुरा ॥ पुत्रार्थं चिंतयामास स तपांसि बहूनि ह ॥ २ ॥ वायुभक्षोऽब्भुभक्षश्च निराहारोर्ध्ववाहुकः ॥ शाकमूलफलाहारः पर्णाश्येकद्रि पर्णभुक् ॥ ३ ॥ एवमादीनि चान्यानि तपांसि श्रेयसे परम् ॥ एतेषां तपसां मध्ये तप एकं समाश्रये ॥ ४ ॥ परं विघ्नोपशांत्यर्थं तोपयिष्येऽहमीश्वरम् ॥ एवं संचिंत्य मनसा ऊर्ध्ववाहूर्ध्वपादकः ॥ आभ्यां न सं दुरासाद्यो नापराधो भविष्यति ॥ ५ ॥ तथा चकार स मुनिर्वर्षाणां द्वादशैव हि ॥ तपस्यंतं च तं दृष्ट्वा नियमे परमे स्थितम् ॥ ६ ॥ विज्ञातोहं त्वया देवि मंदरे चारुकंदरे ॥ करोत्येष तपः क्रूरं पुत्रहेतोर्मुनिर्मम हान् ॥ ७ ॥ तेजसा दीपयञ्छैलं शोषयन्सलिलाशयान् ॥ तपसा दुष्करेणैव क्षुभिता नाकवासिनः ॥ ८ ॥ व्यालेंद्रा व्याकुलीभूता लुलिताश्चाचलेश्वराः ॥ मुनयो विस्मृतिं प्राप्ताः कंपते चापि रोदसी ॥ ९ ॥ अयोनिजः शिनिर्विप्रः पुत्रमिच्छत्ययोनिजम् ॥ त्वं योनिर्गुणसंघानां त्वं योनिस्तपसामपि ॥ १० ॥ त्वं तपस्त्वं परं धाम शिखिचंद्रार्कलोचन ॥ सर्वेश्वर सुतोऽनीष्टः किं न विप्राय दीयते ॥ ११ ॥ सुरासुरगुरो किं न पुत्रमस्मै प्रयच्छसि ॥ तपसा क्षीणदोषस्य ब्रह्मत्वे भावितात्मनः ॥ १२ ॥ शिनेः पुत्रप्रदानं त्वं कुरु मद्वच नाच्छिव ॥ तपस्ता दुष्करेणैव गाढं क्लिष्टो महामुनिः ॥ १३ ॥ तेजांसि ज्योतिषामेव महतां च विधिस्थितः ॥ अहरत्तेजसा स्वेन तमांसीव दिवाकरः ॥ १४ ॥ त्वद्भक्तस्य च देवेश व्यर्थः कस्मात्परिश्रमः ॥ उदितेऽर्के तमांसीह न भवंति कदाचन ॥ १५ ॥ त्वत्परस्य न देवेश शुल्का दुःखविभीषिका ॥ इत्यहं प्रार्थितो देवि त्वया पर्वतपुत्रिके ॥ १६ ॥ विप्रार्थमनुकंपार्थं पुत्रार्थं च विशेषतः ॥ आकारिता मया देवि गणास्त्व द्वारवेण तु ॥ १७ ॥ रुद्राश्च हरभक्ताश्च कूष्मांडा गगनेचराः ॥ रोमरौद्रा महानीलाः शिखावंतः सकोकिलाः ॥ १८ ॥ अन्ये च विविधाकाराः कालास्या हरिपिंगलाः ॥ जटाजूटधराश्चित्रा वीथिनक्षत्रचारिणः ॥ १९ ॥ नीलग्रीवाः कृष्णमुखाः पिंगधौतजटासटाः ॥ ज्वरो डिंडिमहा कालो लंगुलिश्च महेश्वरः ॥ २० ॥ घंटाकर्णो विशाखश्च परिशेषा गणाश्च ये ॥ वृषारूढाः कामतुल्याः कामरूपबलास्तथा ॥ २१ ॥ शूलचंद्र धराः सर्वे सर्वे तुल्यपराक्रमाः ॥ ममादेशात्समायाताः कृतांजलिपुटाः स्थिताः ॥ २२ ॥ स्तुवंतो विविधैः स्तोत्रैरूचुरेवं समाहिताः ॥ किं कर्त्तव्यमिहास्माभिरादेशो दीयतां प्रभो ॥ २३ ॥ गणानां वचनं श्रुत्वा ज्ञात्वा भक्तिं च तादृशीम् ॥ महातपःप्रभावोऽयं शिनिविप्रस्य कीर्त्तितः ॥ २४ ॥ पुत्रार्थं तप्यति तपः शिनिर्ब्राह्मणसत्तमः ॥ मद्वाक्यात्को नु विप्रस्य पुत्रत्वं संप्रदास्यति ॥ २५ ॥ तस्याहं संप्रदास्यामि सर्वान्कामान्यथेप्सितान् ॥ अमरं चाजरं पुत्रं मुनिर्वांछति सांप्रतम् ॥ २६ ॥ मद्वाक्यं क्रियतां सद्यो विप्रः क्लेशाद्विमुच्यताम् ॥ मद्भक्तस्य न संकल्पो मिथ्याभवितुमर्हति ॥ २७ ॥ मदीयं वचनं श्रुत्वा सर्वे कंपितकंधराः ॥ सर्वे चावाङ्मुखा जाताः सर्वे ध्यानपरायणाः ॥ २८ ॥ न कश्चिद्वापते किंचिन्न कश्चिद्वीक्षते तदा ॥ अथोक्तं पुष्पदंतेन रभसान्मानितेन तु ॥ २९ ॥ मम चित्तमविज्ञाय गणानामनुकंपया ॥ न यास्यंति गणा देव त्वां विहाय महीतलम् ॥ ३० ॥ इह स्थास्यंति सततं त्वत्समीपे न संशयः ॥ कथं योनिं प्रयास्यंति संप्राप्य मुदमुत्तमाम् ॥ ३१ ॥ दीनां रजोऽधिकां दीनां तमोबहुलधारिणीम् ॥ कथं स्वर्गं परित्यज्य यास्यामो नरकं परम् ॥ ३२ ॥ ब्रुवन्नेवं भ्रमेणैव भाव्यर्थेन प्रणोदितः ॥ उक्तो मया विशालाक्षि पुष्पदंतो गणाग्रणीः ॥ ३३ ॥ पत त्वं मानुषे लोके वस्मान्मे विप्रियं कृतम् ॥ शप्त्वा तं पुष्पदंतं तु वीरकः प्रेरितो मया ॥ ॥ ३४ ॥ विप्रस्य पुत्रतां तूर्णं पुत्र गच्छ ममाज्ञया ॥ ततस्ते संप्रदास्यामि सर्वान्कामान्यथेप्सितान् ॥ ३५ ॥ इत्युक्तो वीरको देवि गतो विप्रस्य पुत्रताम् ॥ पुष्पदंतोऽपि करुणं विललाप सुदुःखितः ॥ ३६ ॥ पश्चात्तापेन संयुक्तो निश्वस्य च पुनःपुनः ॥ अहो तत्सफलं जन्म यदाज्ञा क्रियते नरैः ॥ ३७ ॥ प्रभूणामेकचित्तेन ते भृत्या दुर्लभाः स्मृताः ॥ तेषामर्थश्च धर्मश्च कुलं चैव च तारितम् ॥ ३८ ॥ प्रसन्नास्त्रिदशास्तेषां प्रभु भक्ताश्च ये नराः ॥ सेवाधर्मो हि गहनो योगिनामपि दुष्करः ॥ ३९ ॥ न ज्ञेयः केन तत्त्वेन दुराराध्यः प्रभुर्भवेत् ॥ एकेनाप्यपराधेन प्रकोपं कुरुते प्रभुः ॥ ४० ॥ विनश्यंत्युपकाराणि तस्मात्सेवा सुदुष्करा ॥ स्वामी सर्पश्च वह्निश्च तत्तभावं व्रजंति हि ॥ ४१ ॥ तस्माद्यत्नेन संसेव्या आत्मरक्षणतत्परैः ॥ सोऽहं भूमौ निपतितः प्रभोरादेशभंजकः ॥ ४२ ॥ कांस्तु लोकान्गमिष्यामि कलुषी भ्रूणहा इव ॥ एवं विलप्य बहुशो मामेव शरणं गतः ॥ उवाच दीनया वाचा प्रणिपत्य पुनःपुनः ॥ ४३ ॥ दीनोऽस्मि ज्ञानहीनोऽस्मि प्रणतोऽस्मि च शंकर ॥ कुरु प्रसादं देवेश अपराधं क्षमस्व मे ॥ ४४ ॥ न हि निर्वहणं यांति प्रभूणामाश्रिता रुपः ॥ प्रसीद देवदेवेश दीनस्य कृपणस्य च ॥ ४५ ॥ अपि कीट पतंगत्वं गच्छेयं तव शासनात् ॥ भक्तोहं सर्वदा देव पुत्रत्वे हि प्रतिष्ठितः ॥ ४६ ॥ इति तस्य वचः श्रुत्वा पुष्पदंतस्य पार्वति ॥ ममत्वेन तदा देवि प्रोक्तमित्थं त्वया वचः ॥ ४७ ॥ गच्छ पुत्र ममादेशान्महाकालवनं शुभम् ॥ लिंगमाराधय क्षिप्रं तत्त्वज्ञाज्ञा भविष्यति ॥ ४८ ॥ कीर्त्तिस्ते भविता पुत्र यावदाभूतसंप्लवम् ॥ इत्युक्ते तु त्वया देवि मयाप्युक्तं वरानने ॥४९॥ न मे मिथ्या वचः पुत्र भविष्यति कथंचन ॥ दर्शनादेव लिंगस्य ममाभीष्टो भविष्यसि ॥ ५० ॥ विमाने पुष्पपादे तु समारूढो भविष्यसि ॥ पुष्पैः संपूज्यमानस्तु पदं प्राप्स्यसि शाश्वतम् ॥ ५१ ॥ गणैः सार्द्धं मया चैव मुदितो विचरिष्यसि ॥ ममापि न रतिर्वत्स भविष्यति त्वया विना ॥ ५२ ॥ अहं तत्रागमिष्यामि महाकालवने शुभे ॥ तुष्टोऽहं सर्वदा वत्स गणानामग्रणीः कृतः ॥५३॥ अनया शुद्धया भक्त्या लोकानामुपकारकः ॥ भविष्यसि न संदेहस्तस्मिन्क्षेत्रे गतो ध्रुवम् ॥५४॥ इत्युक्तो हि मया देवि पुष्पदंतो गणाग्रणीः ॥ मानी ममाज्ञया मौनी महाकालवने शुभम् ॥ ५५ ॥ लिंगमाराधयामास दुर्वासेशादथोत्तरे ॥ लिंगेनोक्तस्तु सहसा तुष्टोऽहं गणसत्तम ॥ त्वदाज्ञा ख्यातिमेष्यामि प्रसादस्ते कृतोऽधुना ॥ ५६ ॥ एतस्मिन्नन्तरे देवि त्वया सार्द्धमहं गतः ॥ शकाद्यैस्त्रिदशैः सार्द्धं गणैर्नानाविधैस्तथा ॥ ५७ ॥ हृष्टस्तु पुष्पदंतोऽपि पुष्पपट्टासने शुभे ॥ पुष्पैः प्रकीर्यमाणोऽपि पुनः प्राप्तो ममांतिकम् ॥ ५८ ॥ मया संश्लेषितः स्नेहादुत्संगेऽप्यधिरोपितः ॥ स्थानं दत्तं विशालाक्षि इदमुक्तं मया तदा ॥ ५९ ॥ ये पश्यंति नरा लिंगं त्वया संपूजितं भुवि ॥ ते यास्यंति पुष्पकेण क्रीडन्तो वै त्रिविष्टपम् ॥ ६० ॥ गणाध्यक्षा भविष्यंति सर्वकामैरलंकृताः ॥ मम लोके गणाध्यक्षा यावदिंद्राश्चतुर्दश ॥ ६१ ॥ दर्शना

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्क्षीयते पापमैहिकं पूर्वकं तथा ॥ ततः प्रसादान्मे सर्वं ज्ञानं सम्यग्भविष्यति ॥ ६२ ॥ यः पूजयेच्चतुर्दश्यामष्टम्यां सोमवासरे ॥ अमरैः सह संहृष्टो मोदते दिवि सर्वदा ॥ ६३ ॥ पैतृकैर्मातृकैः सार्द्धं कुलैस्तु सप्तभिर्युतः ॥ न वदेत्केनचित्सार्द्धं नरो यः प्रातरुत्थितः ॥ ६४ ॥ पुष्पदंतेश्वरं दृष्ट्वा सोऽश्वमेधफलं लभेत् ॥ मुच्यते पातकाद्यैश्च यः शाठ्येनापि पश्यति ॥ ६५ ॥ मृतो गांधर्वलोके तु याति विद्याधरैर्वृतः ॥ न तस्य संतति च्छेदो यः पश्यति दिनेदिने ॥ नियमेन गणाध्यक्ष जायते ब्रह्मणो दिनम् ॥ ६६ ॥ ऐश्वर्यं सप्तलोकेषु भुक्त्वा भोगान्यथाक्रमम् ॥ पृथिव्यामेकरा ड्भूत्वा ममांगे संभविष्यति ॥ ६७ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पुष्पदन्तेश्वरेशस्य अविमुक्तेश्वरं शृणु ॥ ६८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे पुष्पदन्तेश्वरमाहात्म्यवर्णनंनाम सप्त सप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ अष्टसप्ततिकं विद्धि अविमुक्तेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण तीर्थयात्राफलं लभेत् ॥ १ ॥ शाकले नगरे देवि चित्रसेनो महीपतिः ॥ बभूव भुवि विख्यातो रूपवान्मन्मथाधिकः ॥ २ ॥ तस्य चन्द्रप्रभा भार्या प्राणे भ्योऽपि गरीयसी ॥ पतिव्रता धर्मशीला रूपयौवनशालिनी ॥ ३ ॥ अपुत्रस्यापि नृपतेः पुत्री जाता मनोरमा ॥ तस्या नाम तदा चक्रे पिता पार्थिवसत्तमः ॥ ४ ॥ सर्वलक्षणसंपन्ना कन्या लावण्यवत्यपि ॥ सापि जातिस्मरा देवी संस्मार च पुरातनम् ॥ ५ ॥ वैराग्याद्ब्रह्मचर्यं च चचार तनुमध्यमा ॥ कदाचिद्यौवनं प्राप्ता सा च पृष्टा नृपेण वै ॥ ६ ॥ उत्संगे च निजे कृत्वा मूर्ध्नि चाघ्राय हर्षितः ॥ पुत्रि प्रदानकालस्ते कस्मै देया वराय च ॥ ७ ॥ नृपाय नृपपुत्राय संमताय द्विजाय वा ॥ वृद्धाय बहुभार्याय ग्रामीणाय च पुत्रिणे ॥ हर्षेण चावृतो राजा पुनः पप्रच्छ तां सुताम् ॥ ८ ॥ पृष्टा च सा यदा देवी न चोवाच नृपं प्रति ॥ अधोमुखी च संजाता पुनः प्रोक्ता नृपेण तु ॥ ९ ॥ यदि मद्वचनं पुत्रि प्रतिभाति न सांप्रतम् ॥ वरणं स्वेच्छया पुत्रि कुरु तर्हि स्वयं वरम् ॥ १० ॥ इत्युक्ता सा नृपतिना पित्रा प्रोक्ता पुनःपुनः ॥ रुरोद सा वै करुणं श्रुत्वा तां कुत्सितां गतिम् ॥ ११ ॥ जहास चातिहासेन पुनः श्वासांश्च मुंचति ॥ प्रहर्षं च पुनः क्षिप्रं प्राप्य वाष्पं च मुंचति ॥ १२ ॥ तामवस्थां गतां दृष्ट्वा पुत्री मुन्मत्ततां गताम् ॥ किमेतदिति भूपालो ग्रसिता किं ग्रहेण वै ॥ १३ ॥ भूतेन वा पिशाचेन मत्सुता लक्षणैर्युता ॥ इति चिन्तापरो राजा यदा जातो यशस्विनि ॥ १४ ॥ तदा प्रोक्तस्तया पुत्र्या मा तात विमना भव ॥ नाहं ग्रस्ता ग्रहेणेह न भूतेन न रक्षसा ॥ १५ ॥ न पिशाचेन यक्षेण तव कन्या महीपते ॥ जातिस्मराहमुत्पन्ना श्रूयतां मम जन्म च ॥ १६ ॥ प्राग्ज्योतिषे पुरे विप्रो हरस्वामी बभूव ह ॥ भार्याहं दुर्भगा जाता तस्य विप्रस्य पार्थिव ॥ १७ ॥ रूपयौवनसंपन्ना तस्य नाहं प्रिया विभो ॥ सदा विद्वेषसंयुक्तो मयि निष्ठुरजल्पकः ॥ १८ ॥ नान्यस्य कस्यचिद्द्वेष्टा मुक्त्वा मां पृथिवीपते ॥ पाणिग्रहणकाले तु ग्रहैः पापैर्विलोकिता ॥ १९ ॥ अहमूढां कुलीनेन द्विजेनातिगुणेन च ॥ स चावलोकितो विप्रो ग्रहैः पुण्यैर्नराधिप ॥ २० ॥ तेन मे वल्लभो राजन्न चाहं तस्य वल्लभा ॥ स सदाचारसंयुक्तो वेदाध्ययनतत्परः ॥ २१ ॥ नान्यत्र कुरुते भावं ब्रह्मचर्यव्रते स्थितः ॥ ततोऽहं क्रोधसंयुक्ता वशीकरणलंपटा ॥ अपृच्छं प्रमदास्तात यास्त्यक्ताः पतिभिः किल ॥ २२ ॥ ताभिरुक्ता ह्यहं भूप वश्यो भर्त्ता भविष्यति ॥ अस्माकं प्रत्ययो जातस्तस्मात्त्वं कर्तुमर्हसि ॥ २३ ॥ भेषजैर्विविधैश्चूर्णैर्मंत्रैर्मोहकरैः परैः ॥ तैस्तैस्तु कृतले पोऽपि भविता दासवत्पतिः ॥ २४ ॥ ततोऽहं त्वरिता गत्वा तासां वाक्येन भूपते ॥ चूर्णं मन्त्रं गृहीत्वा च प्राप्ता भर्तृगृहं पुनः ॥ २५ ॥ प्रदोषे पयसा युक्तश्चूर्णो भर्त्तरि योजितः ॥ ग्रीवायां च मया मन्त्रो न्यस्तः सर्वांगसंधिषु ॥ २६ ॥ यदा पीतश्च चूर्णस्तु मन्त्रेणातीव गुंठितः ॥ वशगस्त त्क्षणाज्जातो मंत्रचूर्णप्रभावतः ॥ २७ ॥ द्वारदेशे स्थितः क्रंदन्दासोऽस्मि तव शोभने ॥ त्राहि मां शरणं प्राप्तं त्वद्वशोहं च शोभने ॥ २८ ॥ तत्तस्य रुदितं ज्ञात्वा मंत्रमाहात्म्यतो नृप ॥ स्वस्थीकरणयोगेन तदा स्वस्थः कृतः पतिः ॥ २९ ॥ ततः प्रभृति कांतो मे वश्योऽभूद्भवने स्थितः ॥ पंच त्वं च गता काले तथा नारकयातनाम् ॥ ३० ॥ ताम्रभ्राष्ट्रे च दग्धाहं युगानि दश पंच च ॥ सूक्ष्माणि तिलमात्राणि कृत्वा खंडान्यनेकशः ॥ छेदिता कालसूत्रेण पीडिता घ्राणयंत्रके ॥ ३१ ॥ क्वाथीभूता तप्ततैलैर्घटे दर्व्याथ लोडिता ॥ पिष्टा चैव शिलापृष्ठे कुट्टिता लोहमुद्गरैः ॥ ३२ ॥ दलिता दंतदलने दग्धाहं रौरवे भृशम् ॥ अधोमुखी विनिक्षिप्ता त्वमेध्ये पूयशोणिते ॥ ३३ ॥ यान्यापि युवती तात भर्तुर्वश्यं समाचरेत् ॥ वृथा धर्मा दुराचारा पच्यते नरके भृशम् ॥ ३४ ॥ भर्त्ता नाथो गुरुर्भर्त्ता भर्त्ता वै देवतं परम् ॥ भर्त्ता स्वमी सुहृद्भर्त्ता भर्ता च परमं पदम् ॥ ३५ ॥ तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ विमुखे विमुखाः सर्वे तस्मात्सेव्यः सदा पतिः ॥ भस्मीभवति सा नारी यया भर्त्ता न तोषितः ॥ ३६ ॥ यस्य प्रसादात्प्राप्यंते भोगाश्च विविधाः सदा ॥ तं वश्यं कुरुते या च सा कथं सुखमाप्नुयात् ॥ ३७ ॥ तिर्यग्योनिशतं याति कृमिपक्षिशतानि च ॥ तस्मात्तत्तत्सदा कार्यं स्त्रीभिर्भर्तृवचः किल ॥ ३८ ॥ एवं पुनर्मया भुक्ता नरका भृशदारुणाः ॥ तिर्यग्योनिसहस्रं तु कर्मणा कुत्सितेन च ॥ ॥ ३९ ॥ किंचित्पातकशुद्ध्यर्थं चंडालस्य च वेश्मनि ॥ जाताहमतिरूपेण पीडिता विविधैर्व्रणैः ॥ ४० ॥ सारमेयैर्वृता दीना भक्ष्यमाणा पुनःपुनः ॥ दुष्टाहं भक्ष्यमाणापि मार्गे रुद्धा वृकैरहम् ॥ तैरहं तुद्यमानापि महाकालवनं गता ॥ ४१ ॥ दृष्टो मया महादेवो दैवतो मृगमाणया ॥ समीपे देवदेव स्य पिप्पलादेश्वरस्य च ॥ ४२ ॥ तस्य दर्शनमात्रेण गता शक्रपुरं प्रति ॥ विमानेन सुदीप्तेन किंकिणीजालमालिना ॥ दिव्यांबरधरा दिव्या दिव्यमालाविभूषणा ॥ ४३ ॥ तत्राहं पूजिता देवैः स्तुताहं चारणैस्तथा ॥ दर्शनात्तस्य लिंगस्य जाताहं तव वेश्मनि ॥ ४४ ॥ वल्लभा रूपसंपन्ना शाकले नगरे शुभे ॥ स्मृत्वा तु कुत्सितां योनिं विलापश्च कृतो मया ॥ ४५ ॥ स्मृत्वा लिंगस्य माहात्म्यं हर्षो जातस्तु तत्क्षणात् ॥ तन्मे नैव च वातूल्यं गृहीता न ग्रहेण च ॥ ४६ ॥ जाता जातिस्मरा तात ब्रह्मचर्यव्रते स्थिता ॥ अतो यास्यामि तं देवं दर्शनार्थं पुनः प्रभो ॥ यथा न भूयो मे जन्म स्याच्च संसारसागरे ॥ ४७ ॥ इति पुत्रीवचः श्रुत्वा चित्रसेनो महीपतिः ॥ सभृत्यमंत्रिसहितो महाकालवनं गतः ॥ ४८ ॥ ददर्श तत्र तल्लिंगं पूजयामास भक्तितः ॥ सापि दृष्ट्वैव तल्लिंगं तस्मिँल्लिंगे लयं गता ॥ ४९ ॥ राजा च पुत्रवाञ्जातो लिंगदर्शनतः प्रिये ॥ बभूव चक्रवर्त्ती स यथा स्वायंभुवो मनुः ॥ ५० ॥ एतस्मिन्नंतरे देवि दृष्ट्वा देवे लयं गताम् ॥ राजपुत्रीं महादेवि कृतं नाम मुदान्वितैः ॥ ५१ ॥ अविमुक्तस्य लिंग स्य दर्शनादेव तत्क्षणात् ॥ अविमुक्तेश्वरो देव इति ख्यातो भवत्विति ॥ ५२ ॥ योऽसौ काश्यां प्रसिद्धोऽस्ति देवो विश्वेश्वरः शिवः ॥ स चैवात्र सुवि ख्यातोऽविमुक्तेश्वरसंज्ञया ॥ ५३ ॥ वाराणसी यथा पुण्या तथावंती च मुक्तिदा ॥ तस्या दशगुणं पुण्यं श्रूयतेऽत्र विशेषतः ॥ ५४ ॥ तस्माद्विश्वे श्वरो देवः सभायातः कुशस्थलीम् ॥ यत्रागत्य सुविद्वांसो मानवाः शंसितव्रताः ॥ ५५ ॥ पश्यंति परया भक्त्या ह्यविमुक्तेश्वरं शिवम् ॥ तेषां मुक्तिर्न संदेहो भविष्यति सुनिश्चला ॥ ५६ ॥ अमुक्ता नैव पश्यंति मुक्ताः पश्यंति सर्वदा ॥ ब्रह्मचर्यव्रतैः सम्यगिष्टैः सर्वमखैर्भवेत् ॥ ५७ ॥ तत्फलं प्राप्यते सम्यगविमुक्तेशदर्शनात् ॥ नैःश्रेयसी गतिः पुण्या दर्शनादेव जायते ॥ ५८ ॥ या गतिः प्राप्यते सांख्यैर्योगैर्वा या गतिर्भवेत् ॥ सा गतिः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्राप्यते सम्यगविमुक्तेशदर्शनात् ॥ ५९ ॥ जन्ममृत्युभयं हित्वा स याति परमां गतिम् ॥ यः पूजयति भावेन ह्यविमुक्तेश्वरं शिवम् ॥ ॥ ६० ॥ ब्रह्महापि च यो गच्छेदविमुक्तेश्वर यजेत् ॥ तस्य लिंगस्य माहात्म्यात्सर्व्वपापान्निवर्त्तते ॥ ६१ ॥ शाठ्येनापि च यः पश्येदविमुक्ते श्वरं शिवम् ॥ स मुंचति जरां मृत्युं जन्म चैतदशाश्वतम् ॥ ६२ ॥ स्मृतः संपूजितो भक्त्या स्तुतो वा विविधैः स्तवैः ॥ मुक्तिं ददाति देवेशो ह्यवि मुक्तेश्वरः शिवः ॥ ६३ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ अविमुक्तेश्वरेशस्य हनुमत्केश्वरं शृणु ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादेऽविमुक्तेश्वरमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ॐ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ एकोनाशीतिकं विद्धि हनुमत्केश्वरं प्रिये ॥ यस्य दर्शनमात्रेण समीहितफलं लभेत् ॥ १ ॥ प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते ॥ आगता मुनयो देवि राघवं प्रतिनंदितुम् ॥ २ ॥ रामेण पूजिताः सर्वे ह्यगस्तिप्रमुखा द्विजाः ॥ प्रहृष्टमनसो विप्रा रामं वचनमब्रुवन् ॥ ३ ॥ दिष्ट्या तु निहतो राम रावणः पुत्रपौत्रवान् ॥ दिष्ट्या विजयिनं त्वाऽद्य पश्यामः सह भार्यया ॥ ४ ॥ हनूमता च सहितं वानरेण महात्मना ॥ दिष्ट्या पवनपुत्रेण राक्षसांतकरेण च ॥ ५ ॥ चिरं जीव्तु दीर्घायुर्वानरो हनुमान्सदा ॥ अंजनीगर्भसंभूतो रुद्रांशो हि धरातले ॥ ६ ॥ आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताश्चैव दिक्पालाः पांतु सर्वदा ॥ ७ ॥ श्रुत्वा तेषां तु वचनं मुनीनां भावितात्मनाम् ॥ विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत् ॥ ८ ॥ किमर्थं लक्ष्मणं त्यक्त्वा वानरोऽयं प्रशंसितः ॥ कीदृशः किंप्रभावो वा किंवीर्यः किंपराक्रमः ॥ ९ ॥ अथोचुः सत्यमेवैतत्कारणं वानरोत्तमे ॥ न त्वस्य सदृशो वीर्ये विद्यते भुवनत्रये ॥ १० ॥ एष देव महाप्राज्ञो योजनानां शतं प्लुतः ॥ धर्षयित्वा पुरीं लंकां रावणांतःपुरं गतः ॥ ११ ॥ प्रादेशमात्रप्रतिमं कृतं रूपमनेन वै ॥ दृष्ट्वा संभाषिता सीता पृष्ट्वा विश्वासिता तथा ॥ १२ ॥ सेनाग्रगा मंत्रिपुत्राः किंकरा रावणात्मजाः ॥ हता हनुमता तत्र ताडिता रावणालये ॥ १३ ॥ भूयो बन्धविमुक्तेन संभाष्य तु दशाननम् ॥ लंका भस्मीकृता तेन पातकेनेव मेदिनी ॥ १४ ॥ न कालस्य न शक्रस्य न विष्णोर्वेधसोऽपि वा ॥ श्रूयंते तानि कर्माणि यादृशानि हनूमतः ॥ १५ ॥ ॥ ॥ राम उवाच ॥ ॥ एतस्य बाहुवीर्येण लंका सीता च लक्ष्मणः ॥ प्राप्तो मम जयश्चैव राज्यं मित्राणि बान्धवाः ॥ १६ ॥ सख्यं वानरपतिं मुक्त्वैनं हरिपुंगवम् ॥ प्रवृत्तिमपि को वेत्तुं जानक्याः शक्तिमान्भवेत् ॥ १७ ॥ वाली किमर्थमेतेन सुग्रीवप्रियकाम्यया ॥ तदा वैरे समुत्पन्ने न दग्धस्तृणवत्कथम् ॥ १८ ॥ नायं विदितवान्मन्ये हनुमानात्मनो बलम् ॥ उपेक्षितः क्ष्वियमाने किमर्थं वानराधिपे ॥ १९ ॥ एवं ब्रुवाणं रामं तु मुनयो वाक्यमब्रुवन् ॥ सत्यमेतद्रघुश्रेष्ठ यद्भवीषि हनूमतः ॥ २० ॥ न बले विद्यते तुल्यो न गतौ न मतावपि ॥ अमोघवाक्यैः शापस्तु दत्तोऽस्य मुनिभिः पुरा ॥ २१ ॥ न ज्ञातं हि बलं येन बलिना वालिमर्दने ॥ बाल्येऽप्यनेन यत्कर्म कृतं नाम महात्मना ॥ २२ ॥ तन्न वर्णयितुं शक्यमे तस्य तु बलं महत् ॥ यदि श्रोतुं तवेच्छास्ति निशामय वदामहे ॥ २३ ॥ असौ हि जातमात्रोऽपि बालार्क इव मूर्त्तिमान् ॥ ग्रहीतुकामो बालार्कं पुप्लुवांतरमध्यतः ॥ २४ ॥ तूर्णमाधावतो राम शक्रेण विदितात्मना ॥ हनुस्तेनास्य सहसा कुलिशेनेव ताडितः ॥ २५ ॥ ततो गिरौ पपातेष शक्रवज्राभिताडितः ॥ पततोस्य महावेगाद्वायो हनुरभज्यत ॥ अस्मिंस्तु पतिते बाले मृतकल्पेऽशनिक्षतात् ॥ २६ ॥ ततो वायुः समादाय महा कालवनं गतः ॥ लिंगमाराधयामास पुत्रार्थं पवनस्तदा ॥ २७ ॥ स्पृष्टमात्रस्तु लिंगेन समुत्तस्थौ प्लवंगमः ॥ जलसिक्तं यथा सस्यं पुनर्जीवि तमाप्तवान् ॥ २८ ॥ प्राणवंतमिमं दृष्ट्वा पवनो हर्षितस्तदा ॥ प्रत्युवाच प्रसन्नात्मा पुत्रमादाय सत्वरम् ॥ २९ ॥ स्पर्शनादस्य लिंगस्य मम पुत्रः समुत्थितः ॥ हनुमत्केश्वरो देवो विख्यातोऽयं भविष्यति ॥ ३० ॥ एतस्मिन्नंतरे शक्रः समायातः सुरैर्वृतः ॥ नीलोत्पलमयीं मालां संप्रगृह्येदमब्रवीत् ॥ ३१ ॥ मत्करोत्सृष्टवज्रेण यस्मादस्य हनुर्हतः ॥ तदेष कपिशार्दूलो हनुमांस्तु भविष्यति ॥ ३२ ॥ वरुणोऽस्य वरं प्रादान्नास्य मृत्युर्भविष्यति ॥ यमो दंडादवध्यत्वमागोरग्यं धनदो ददौ ॥ ३३ ॥ सूर्येण च प्रभा दत्ता पवनेन गतिर्द्रुता ॥ लिंगेन च वरो दत्तो देवानां संनिधौ तदा ॥ ३४ ॥ आयुधानां हि सर्वेषामवध्योऽयं भविष्यति ॥ अजरश्चामरश्चैव भविष्यति न संशयः ॥ ३५ ॥ अमित्रभयदो ह्येष मित्राणामभय प्रदः ॥ अजेयो भविता युद्धे लिंगेनोक्तं पुनःपुनः ॥ ३६ ॥ शत्रोर्बलोत्सादनाय राघवप्रीतये सदा ॥ कियत्कालं बलं स्वीयं न स्मरिष्यति शापतः ॥ ३७ ॥ हते तु रावणे भूयो रामस्यानुमते स्थितः ॥ विभीषणं प्रार्थयित्वा मामत्र स्थापयिष्यति ॥ ३८ ॥ ततो मां त्रिदशाः सर्वे पूजयिष्यंति भाविताः ॥ तेनैव नाम्ना विख्यातिं पुनर्यास्यामि भूतले ॥ ३९ ॥ अथ गंधवहः पुत्रं प्रगृह्य गृहमानयत् ॥ अंजनायै तदाचख्यौ वरलब्धिं च लिंगतः ॥ ४० ॥ एवं लिंगप्रभावाच्च बलवान्मारुतात्मजः ॥ स जातस्त्रिषु लोकेषु राम तस्मात्प्रशस्यते ॥ ४१ ॥ पराक्रमोत्साहमति प्रतापैः सौशील्यमाधुर्यनयादिकैश्च ॥ गांभीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकोऽस्ति लोके ॥ ४२ ॥ मेमेव विक्षोभितसागरस्य लोकान्दि धक्षोरिव पावकस्य ॥ प्रजा जिहीर्षोरिव चांतकस्य हनूमतः स्थास्यति कः पुरस्तात् ॥ ४३ ॥ एतद्धे कथितं तुभ्यं यन्मां त्वं परि पृच्छसि ॥ हनूमतोऽस्य बालस्य कर्माण्यद्भुतविक्रम ॥ ४४ ॥ दृष्टः सभाजितश्चापि राम गच्छामहे वयम् ॥ एवमुक्त्वा गताः सर्वे मुनयोऽवंतिमण्डलम् ॥ पूजयामासुरीशानं हनुमत्केश्वरं शिवम् ॥ ४५ ॥ समर्चयंति ये भक्त्या लिंगं त्रिदशपूजितम् ॥ हनुमत्केश्वरं देवं ते कृतार्थाः कलौ युगे ॥ ४६ ॥ व्रजंत्येव सुदुष्प्राप्यं ब्रह्मसायुज्यमव्ययम् ॥ संप्राप्य तु पुनर्जन्म लभंते मोक्षमव्ययम् ॥ ४७ ॥ यः पश्यति नरो लिंगं हनुमत्केश्वरं प्रिये ॥ सोऽधिकं फलमाप्नोति सर्वदुःखविवर्जितः ॥ ४८ ॥ सर्वलोकेषु तस्यैव गतिर्न प्रतिहन्यते ॥ दिव्यैनैश्वर्ययोगेन युज्यते नात्र संशयः ॥ ४९ ॥ बालसूर्यप्रतीकाशविमानेन सुवर्चसा ॥ वृतः स्त्रीणां सहस्रैस्तु स्वच्छंदगमनागमः ॥ ५० ॥ विचरत्यविचारेण सर्वलोकान्दिवौकसाम् ॥ स्पृहणीयतमः पुंसां सर्ववर्णोत्तमोधुना ॥ ५१ ॥ स्वर्गाच्च्युतः प्रजायेत कुले महति रूपवान् ॥ धर्मज्ञो रुद्रभक्तश्च सर्वविद्यार्थपारगः ॥५२॥ राजा वा राजतुल्यो वा दर्शनादस्य जायते ॥ स्पर्शनात्परमं पुण्यं यजनात्परमं पदम् ॥५३॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ हनुमत्केश्वरेशस्य स्वप्नेश्वरमथो शृणु ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे चतुरशीतिलिंगमाहात्म्य उमामहेश्वरसंवादे हनुमत्केश्वरमाहात्म्यवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ आशीतिकं विजानीहि देवं स्वप्नेश्वरं प्रिये ॥ यस्य दर्शनमात्रेण दुःस्वप्नं नश्यति ध्रुवम् ॥ १ ॥ कल्मापपादेति स्यातो लोके राजा बभूव ह ॥ इक्ष्वाकुवंशजो देवि तेजसा सूर्यवद्भुवि ॥ २ ॥ स कदाचिद्वने राजा वशिष्ठसुतमौरसम् ॥ शक्तिं परमधर्मज्ञं ददर्श विजितेंद्रियम् ॥ मार्गस्थितं तपोनिष्ठमपगच्छेति चाब्रवीत् ॥ ३ ॥ अमुंचंतं तु पंथानं तमृषिं नृपसत्तमः ॥ जघान कशया मोहात्तदा राक्षसवन्मुनिम् ॥ ४ ॥ कशाप्रहाराभि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हतस्ततः स मुनिपुंगवः ॥ तं शशाप रुषाविष्टो वशिष्ठः कोपमूर्छितः ॥ ५ ॥ हंसि राक्षसवद्यस्माद्राजापसद तापसम् ॥ तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यति॥६॥ सततं पिशितासक्तश्चरिष्यसि महीमिमाम् ॥ स तु शप्तस्तदा तेन तत्क्षणाद्धे नृपोत्तमः ॥७॥जगाम शरणं शक्तिं प्रसादयितुम् दयत् ॥ यदा न तुष्टो विप्रर्षिः शक्तिः परमकोपनः ॥ प्रसाद्यमानो भूपेन तदा तेनापि भक्षितः ॥ ८ ॥ शक्तिं तं भक्षयित्वा तु वशिष्ठस्यापरान्सु तान् ॥ भक्षयामास सहसा सिंहः क्षुद्रमृगानिव ॥ ९ ॥ तदाप्रभृति संजातः पुरुषादो नृपोत्तमः ॥ रात्रौ पश्यति दुःस्वप्नान्पापसंघेन मोहितः ॥ ॥ १० ॥ दृष्ट्वा भयानकान्स्वप्नान्स राजा पर्य्यतप्यत ॥ पश्चात्तापेन संयुक्तो विललाप सुदुःखितः ॥ ११ ॥ अथाप्युक्तममात्यैश्च किं करोपि महीपते ॥ कस्मात्ते निष्प्रभा कांतिर्विवर्णो हरिणः कृशः ॥ १२ ॥ स राजा कथयामास दुःस्वप्नालुपूर्वशः ॥ स्वप्नेऽहं सागरं शुष्कं चन्द्रं च पतितं भुवि ॥ १३ ॥ उपरुद्धां च जगतीं घनेन तमसा वृताम् ॥ आत्मानं चाहमद्राक्षं मलिनं मुक्तमूर्द्धजम् ॥ १४ ॥ पतंतमद्रिशिखरात्कलुषे गोमये ह्रदे ॥ पिबन्नंजलिना तैलं हसन्निव मुहुर्मुहुः ॥ १५ ॥ तैलेनाभ्यक्तसर्वांगस्तैलमेवावगाहयन् ॥ पीठे कार्ष्णायसे चैव निषण्णोऽहमधोमुखः ॥ १६ ॥ गायंति प्रमदा रक्ता रक्तमाल्यानुलेपनाः ॥ कृष्णांबरधराश्चान्याः कृष्णमाल्यानुलेपनाः ॥ १७ ॥ ताभिरुक्ष्यमाणोऽपि नीतोऽहं दक्षिणां दिशम् ॥ बद्धा रज्ज्वा सुवर्णस्य लोहस्य रजतस्य च ॥ १८ ॥ पांसुकर्दमयोर्मध्ये मग्नोऽहं लोहयंत्रितः ॥ कपोतैस्तुद्यमानोऽहं गृध्रैः काकैश्च दारुणैः ॥ १९ ॥ शृगालैर्भक्ष्यमाणश्च स्थितो मद्गुरमस्तके ॥ ऋक्षवानरयानस्थो गतोऽहं दक्षिणां दिशम् ॥ २० ॥ नदीं निमग्नो निश्चेष्टो जलहीनां महीसमाम् ॥ दंष्टैर्विदारितो रात्रौ रासभेनाहमर्दितः ॥ २१ ॥ ताडितो ह्रदयेत्यर्थं चरणैर्वज्रसंनिभैः ॥ दृष्टिश्च हन्यतेऽत्यर्थं वेतालैर्लोहदंशकुभिः ॥२२॥ करालैः कंटकैः कृष्णैः पुरुषैरुद्यतायुधैः॥स्वप्नेहं ताडितोत्यर्थमप्रमाणैः शितैः शरैः ॥२३॥ एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ॥ संख्यां कर्तुं न शक्येत दुःस्वप्नानपरान्बहून् ॥२४॥ इमां तु दुःस्वप्नगतिं निरीक्ष्य वै ह्यनेकरूपामविचिंतितां पुरा ॥ भयं महन्मे हृदयं न शुद्ध्यति ग्रहा बाहू विलपाम्यनाथवत् ॥ २५ ॥ नृपस्य वचनं श्रुत्वा अमात्या भृशदुःखिताः ॥ पश्यंतो दुर्निमित्तांश्च उल्कापातादिकांस्तदा ॥ २६ ॥ सौरिं सूर्यकुजाक्रांतं नगरं दृश्यतेऽधुना ॥ नागं चतुष्पदं विप्रं किंस्तुघ्नं शकुनिं तथा ॥२७॥ करणानि न शस्यंते मुहूर्त्ता दारुणाभवन् ॥ विदित्वा नृपभंगं तु देशभंगं कुलक्षयम् ॥२८॥ आश्वासयंतो राजानमिदं वचनमब्रुवन् ॥ अलं शोकेन काकुत्स्थ सत्यासत्या हि विभ्रमाः ॥२९॥ दृश्यंते भाविताः पुंसि स्वप्ने धातुक्षयेन हि ॥ तथा पित्रादिदेवांश्च पूजय ब्राह्मणांस्तथा ॥ ३० ॥ एभिस्ततो मोक्ष्यसे त्वं मानसादधिविभ्रमात् ॥ यस्मादेवोपघातानां दैवमेव हि रक्षणम् ॥३१॥ एवमाश्वासितो भूपो ह्यमात्यैर्धर्मकोविदैः ॥ तत्पापं कथयामास गुरुपुत्रवधादिकम् ॥३२॥ वशिष्ठस्य सुतो ज्येष्ठः शक्तिर्वैभक्षितो मया ॥ नृशंसेन तथामात्या एकोनं भक्षितं शतम् ॥ ३३ ॥ तेन पापेन संतप्तः कथं स्वस्थो भवामि वै ॥ एकापि ब्रह्महत्या या सापि देवात्सुदुष्करा ॥ ३४ ॥ मया पुनर्नृशंसेन सा तथा न तु वर्जिता ॥ कांस्तु लोकान्गमिष्यामि कृत्वा कर्म सुदारुणम् ॥ राक्षसोऽहमनेनैव शरीरेण कुलांतकृत् ॥ ३५ ॥ जातः कुल रघूणां वै पापात्मा पापसंभवः ॥ सोऽहमत्र मरिष्यामि साधयित्वा हुताशनम् ॥ ३६ ॥ इति तस्य वचः श्रुत्वा सौदासस्य सुविस्मिताः ॥ अमात्या वेदतत्त्वज्ञाः सर्वशास्त्रविशारदाः ॥ ३७ ॥ अहो पापमिदं भूरि कृतं पापेन सर्वथा ॥ प्रायश्चित्तं न जानीमो वशिष्ठेन विनाऽधुना ॥ ३८ ॥ तस्मादद्यैव गंतव्यमस्य भूपस्य कारणात् ॥ यत्र तिष्ठति विप्रर्षिर्वशिष्ठो भगवान्मुनिः ॥ ३९ ॥ इत्युक्ता सहितास्तेन तेऽमात्या भृशदुःखिताः ॥ गत्वा यत्राश्रमे विप्रो वशिष्ठो भगवानृषिः ॥ ४० ॥ अदृश्यंतीं वधूं दीनां यत्राश्वासयति प्रभुः ॥ अदृश्यंती तु तं दृष्ट्वा क्रूरकर्माणमग्रतः ॥ भयसंविग्नया वाचा वशिष्ठमिदमब्रवीत् ॥ ४१ ॥ असौ मृत्युरिवोग्रेण दण्डेन बहुगर्वितः ॥ प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति भीषणः ॥४२॥ तन्निवारयितुं शक्तो नान्यो वै भुवि कश्चन ॥ त्वामृतेऽद्य महाभाग सर्वेदंदविदां वर ॥ ४३ ॥ त्राहि मां भगवन्पापादस्माद्दारुणदर्शनात् ॥ राक्षसोऽयमिहागत्य नूनमावां समीहते ॥ ४४ ॥ ॥ वशिष्ठ उवाच ॥ ॥ मा भैः पुत्रि न भेतव्यं राक्षसात्ते कथंचन ॥ नैतद्भक्षो भयं यस्मात्पश्यसि त्वमुपस्थितम् ॥ राजा कल्मापपादोऽयममात्यैः सहितो विभुः ॥ ४५ ॥ स एषोऽस्मिन्वनोद्देशे समायातो ममांतिकम् ॥ तमायांतमथालक्ष्य वशिष्ठो भगवानृषिः ॥ वारयामास तेजस्वी हुंकारेण नृपोत्तमम् ॥४६॥ मन्त्रपूतेन च ततः समभ्युक्ष्य च वारिणा ॥ मोक्षयामास वै भावाद्राक्षसाद्राजसत्तमम् ॥ ४७ ॥ प्रतिलभ्य ततः संज्ञामभिवाद्य कृतांजलिः ॥ उवाच नृपतिः काले वशिष्ठमृषिसत्तमम् ॥ ४८ ॥ सौदासोऽहं महाभाग दासोऽहं तव सुव्रत ॥ अस्मिन्काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥ ४९ ॥ तस्य तद्वचनं श्रुत्वा नृपस्य द्विजसत्तमः ॥ ज्ञात्वा तपोबलेनैव विश्वामित्रस्य चेष्टितम् ॥ राजानं प्रत्युवाचेदं विनयावनतं तथा ॥ ५० ॥ ज्ञातमेव यथाकालं गच्छ राजन्कुशस्थलीम् ॥ महाकालसमीपे तु लिंगं दुःस्वप्ननाशनम् ॥ ५१ ॥ राजसंपत्करं दिव्यं पुत्रपौत्रविवर्द्धनम् ॥ ब्रह्महत्यासहस्राणां स्फोटनं पापनाशनम् ॥ तस्य दर्शनमात्रेण विपाप्मा च भविष्यसि ॥ ५२ ॥ दुःस्वप्नजं भयं घोरं विनंक्ष्यति न संशयः ॥ ग्रहाश्च सानुकूलास्ते भविष्यन्ति नृपोत्तम ॥५३॥ इत्युक्तो गुरुणा भूयो वशिष्ठेन महात्मना ॥ जगाम त्वरितो देवि महाकालवनं शुभम् ॥ ददर्श तत्र तल्लिंगं दुष्टदुःस्वप्ननाशनम् ॥५४॥ नष्टाः सर्वेपि दुःस्वप्नाः सुस्वप्नाश्चाभवंस्तदा ॥ राजा निष्कल्मषो भूत्वा पुनः प्राप्नोन्निजं पदम् ॥ अयोध्यायां गतो राज्यं चकार मुदितस्तदा ॥ ॥ ५५ ॥ तदाप्रभृति देवोऽयं सुस्वप्नेश्वरसंज्ञकः ॥ बभूव भुवने ख्यातः सर्वदुःस्वप्ननाशनः ॥५६॥ अष्टम्यां च चतुर्दश्यां देवं स्वप्नेश्वरं शिवम् ॥ दर्शनं ये करिष्यंति स्नात्वा शिप्राजले शुभे ॥ आजन्मप्रभवं तेषां दुःस्वप्नंच विनश्यति ॥५७॥ स एव सर्वदा पूज्य इह लोके परत्र च ॥ यः पश्यति नरो भक्त्या देवं स्वप्नेश्वरं शिवम् ॥ ५८ ॥ यं यं काममभिध्याय मनसाभिगतं नरः ॥ तंतं दुर्लभमाप्नोति सुस्वप्नेश्वरदर्शनात् ॥ ५९ ॥ निय मेन प्रपश्यंति देवं स्वप्नेश्वरं सदा ॥ ते प्रयांति तनुं त्यक्त्वा मदीयं भवनं प्रिये ॥ ६० ॥ भक्तिहीनः क्रियाहीनो यः पश्यति प्रसंगतः ॥ सुपुण्यां गतिमाप्नोति योगिगम्यां यशस्विनि ॥ ६१ ॥ ये च पुष्पैर्विचित्रैश्च पूजयन्ति च पर्वसु ॥ ते सर्वकामसंपन्नाः श्रीबलैश्वर्यसंयुताः ॥ दीर्घायुषः शुभाचारा जायन्ते देहिनोऽमलाः ॥ ६२ ॥ एते च ब्रह्मविष्णुवह्निकुबेरदहनादयः ॥ सुस्वप्नं परमं प्राप्ताः श्रीस्वप्नेश्वरदर्शनात् ॥६३॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ स्वप्नेश्वरस्य देवस्य शृणु लिंगचतुष्टयम् ॥ ६४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्ड उमामहेश्वरसंवादे स्वप्नेश्वरमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ चतुर्द्वारस्थितं देवि शृणु लिंगचतुष्टयम् ॥ यस्य दर्शनमात्रेण कृतकृत्यो नरो भवेत् ॥ १ ॥ अहं पृष्टस्त्वया देवि कौतुकाच्च वरानने ॥ अतीव रमणीयं च स्थलं दर्शय मे प्रभो ॥ २ ॥ सेवितं बहुभिः सिद्धैः पुनरावृत्तिकांक्षिभिः ॥ यद्गुह्यं च पवित्रं च प्रलयेऽप्यविनाशि यत् ॥ ३ ॥ अनन्यसदृशं दिव्यं यतीर्थं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यत्तपोवनम् ॥ असंख्येयगुणोपेतं भुक्तिमुक्तिकरं शुभम् ॥ ४ ॥ सुवर्णशृंगाः प्रासादा हर्म्याणि विविधानि च ॥ उद्यानानि विचित्राणि मार्गाश्च विविधाः शुभाः ॥ ५ ॥ समीहितफलावाप्तिर्यत्र लभ्या सुखेन वै ॥ सिद्धचारणगन्धर्वकिंनरोद्गीतनादितम् ॥ ६ ॥ पुण्यलोकोपमस्थानं त्रिविष्टपविभूषणम् ॥ एवमभ्यर्थितो देवि मंदरे चारुकन्दरे ॥ ७ ॥ मया प्रोक्तं प्रसन्नेन स्थानं शृणु सनातनम् ॥ महाकालवनं रम्यं स्वर्गात्सुखकरं परम् ॥ ८ ॥ अनौपम्यगुणोपेतं भुक्तिमुक्तिकरं शुभम् ॥ तत्समः कोऽपि धन्योऽन्यो न दृष्टो भुवनत्रये ॥ ९ ॥ देवगन्धर्वसिद्धैश्च सेव्यं वै मुक्तिकांक्षिभिः ॥ विनोदार्थं मया सृष्टं त्वत्प्रियार्थं कुतूहलात् ॥ १० ॥ तिलकं सर्वतीर्थानां जंबूद्वीपे मनोरमे ॥ इच्छाकामफलावाप्तिरनायासेन लभ्यते ॥ ११ ॥ जरारोगभयैर्हीनं सर्वव्याधिविवर्जितम् ॥ शक्राग्नियमरक्षोंबुवायुसोमेशसेवितम् ॥ स्वर्गे प्रमुदिता देवास्तेऽपि कांक्षंति सर्वदा ॥ १२ ॥ असंख्येयफलं त्वत्र अक्षया च गतिः सदा ॥ येन संसेवितं स्थानं वंचितास्ते नरा भुवि ॥ १३ ॥ क्षेत्रस्य च गुणान्वक्तुं देवदानवमानवैः ॥ न शक्यते प्रयत्नाच्च स्वयं यत्र स्थितो ह्यहम् ॥ १४ ॥ यत्किंचिदशुभं कर्म कृतं मानुषकर्मणा ॥ महाकालवनं प्राप्य तत्सर्वं भस्मसाद्भवेत् ॥ १५ ॥ न सा गतिः कुरुक्षेत्रे गंगाद्वारे त्रिपुष्करे ॥ या गतिर्विहिता पुंसां महाकालवने सदा ॥ १६ ॥ तिर्यग्योनिगता गत्वा महाकालवने स्थिताः ॥ तत्रैव निधनं प्राप्तास्ते यांति परमां गतिम् ॥ १७ ॥ मेरुमंदरमात्रोपि राशिः पापस्य कर्मणः ॥ महाकालवनं प्राप्य सर्वोपि व्रजति क्षयम् ॥ १८ ॥ श्मशानमिति चाख्यातं महाकालवनं प्रिये ॥ तत्र ब्रह्मादयो देवा नारायणपुरोगमाः ॥ १९ ॥ योगिनश्च तथा सांख्याः सिद्धाश्च सनकादयः ॥ उपासते च मां भक्त्या मद्भक्त्या मत्परायणाः ॥ २० ॥ या गतिर्योगतपसां या गतिर्यज्ञयाजिनाम् ॥ महाकालवने क्षेत्रे सा गतिर्विहिता मया ॥ २१ ॥ संहरामि च तत्रस्थस्त्रैलोक्यं सचराचरम् ॥ अतो देवि समाख्यातं महाकालवनं शुभम् ॥ २२ ॥ एवं बहुविधान्कृत्वा गुणान्बहुविधांस्तथा ॥ देवि त्वं विस्मिता जाता गमनाय मनो दधे ॥ २३ ॥ क्षेत्रस्यालोकने चित्तं जातमुत्कंठितं तव ॥ त्वया सार्द्धं सभा गत्य महाकालवने शुभे ॥ २४ ॥ पश्य देवि विचित्राख्यं यन्मया कथितं तव ॥ अमरेशपुरस्पर्द्धि वर्द्धितानंदसुंदरम् ॥ वर्णितं यन्मया देवि भुक्ति मुक्तिकरं परम् ॥ २५ ॥ त्वया प्रोक्तं विशालाक्षि दृष्ट्वा क्षेत्रमनुत्तमम् ॥ अस्य स्थानस्य रक्षार्थं भक्तं गणचतुष्टयम् ॥ नियुज्यतां महादेव संतोषाय मम प्रभो ॥ २६ ॥ द्वाराणि तत्र चत्वारि क्रियंतां परमेश्वर ॥ चत्वारः कलशाश्चैव हैमाः कार्या दृढाः शुभाः ॥ २७ ॥ पूर्वादिक्रमयोगेन चतुर्वर्गो नियोज्यताम् ॥ धर्मश्चार्थश्च कामश्च मोक्षश्चैव महेश्वर ॥ २८ ॥ त्वदीयं वचनं श्रुत्वा मया देवि प्रयत्नतः ॥ अस्य क्षेत्रस्य रक्षार्थं स्मृतं गणचतुष्टयम् ॥ २९ ॥ चत्वार ईश्वरास्तेऽपि स्थापितास्तदनंतरम् ॥ पिंगलेशो धनाध्यक्षस्तथा कायावरोहणः ॥ ३० ॥ विल्वेश्वरो गणश्रेष्ठो दुर्दर्शो गणनायकः ॥ एते मया नियुक्ता वै समर्थाः क्षेत्ररक्षणे ॥ ३१ ॥ पूर्वादिक्रमयोगेन त्वत्प्रियार्थं वरानने ॥ नियुक्तास्त्वन्मतेनैव पूर्वस्यां दिशि पिंगलः ॥ ॥ ३२ ॥ दक्षिणस्यां दिशि तथा प्रिये कायावरोहणः ॥ बिल्वेश्वरः प्रतीच्यां तु दुर्दर्शश्चोत्तरे तथा ॥ ३३ ॥ मानवा ये म्रियंतेऽत्र क्षेत्रमध्ये गणोत्तमाः ॥ तेषां रक्षा परा कार्या भवद्भिर्मम शासनात् ॥ ३४ ॥ कथां शृणु प्रयत्नेन पिंगलेश्वरसंभवाम् ॥ यस्याः श्रवणमात्रेण कृतकृत्यो नरो भवेत् ॥ ॥ ३५ ॥ पिंगला कन्यका देवि कान्यकुब्जे बभूव ह ॥ सुशीला च सुरूपा च सौंदर्येणातिनिर्मिता ॥ ३६ ॥ पिता तस्या महाभाग्यः सर्वशास्त्रार्थतत्त्ववित् ॥ ज्ञानध्यानरतश्चैव स्वाध्यायपरिनिष्ठितः ॥ ३७ ॥ पिंगलोनाम विप्रेंद्रो भार्या तस्य पतिव्रता ॥ पिंगाक्षी विश्रुता लोके सा च पंचत्वमागता ॥ ३८ ॥ ततस्तेन स दुःखेन गृहस्थाश्रमनिःस्पृहः ॥ तपोवनं जगामाथ गृहीत्वा तनयां स्वकाम् ॥ ३९ ॥ ऋषिभिः सेवितं पुण्यं शाकमूलफलाशनैः ॥ स तत्र मुनिभिः सार्द्धं ध्यानयोगपरायणः ॥ ४० ॥ निवासं कृतवान्देवि पिंगलायाश्च रक्षणम् ॥ पालयामास धर्मात्मा पुत्रिकां हृदयोपमाम् ॥ ४१ ॥ तामेव सततं साध्वीं मन्यमानो महातपाः ॥ न पाणिं ग्राहयामास मातृहीनेति चिंतयन् ॥ ४२ ॥ विरक्तोऽपि महाभाग संसारत्सर्वधर्मवित् ॥ पुत्रिकां प्रेक्षयन्संम्यक्सन्यासं नाकरोद्वशी ॥ ४३ ॥ अथ संरक्षयन्बालां मातृहीनां तपस्विनीम् ॥ संयुक्तः कालधर्मेण स विप्रः स्वर्जगाम ह ॥ ४४ ॥ ततः सा पिंगला दीना हीना पित्रा सुदुःखिता ॥ विललापातुरा देवि पतिता शोकसागरे ॥ ४५ ॥ पिंगलोवाच ॥ ॥ अद्य मे च पिता दैवात्कालधर्ममुपेयिवान् ॥ मां त्यक्त्वा गतवानेको दयालुर्निःस्पृहो यथा ॥ ४६ ॥ स समः सर्वभूतेषु ममात्यंतं हिते रतः ॥ मामेकां संपरित्यज्य परलोकमितो गतः ॥ ४७ ॥ साऽहं परमदुःखार्ता पितृशोकेन विह्वला ॥ शरीरं धारयामीदं कृपणं व्यर्थजीवितम् ॥ ४८ ॥ ब्रह्मज्ञोपि हि तातो मे शांतो दांतो जितेंद्रियः ॥ मामेव पालयामास मातृहीनेति चिंतयन् ॥ ४९ ॥ येन संरक्षिता बाल्ये येनास्मि परिवर्धिता ॥ तेन पित्रा वियुक्ताहं न जीविष्ये कदाचन ॥ ५० ॥ नद्यां वा निपतिष्यामि समिद्धे वा हुताशने ॥ पर्वताद्वा पतिष्यामि पितृहीना निराश्रया ॥ ५१ ॥ इति शोकातुरा बाला विलपंती पुनःपुनः ॥ वोध्यमाना महाभागैः सदारैर्ऋषिसत्तमैः ॥ ५२ ॥ कन्यकाभी रुदंतीभिर्वयस्याभिः समंततः ॥ आलिंग्यालिंग्य बहुशः पीड्यमाना सुदुःखिता ॥ आगत्य करुणाविष्टो धर्मः परहिते रतः ॥ ५३ ॥ स्थविरो ब्राह्मणो भूत्वा प्रोवाचेदं वचस्तदा ॥ अलं बाले विशालाक्षि रोदनेरतिदारुणैः ॥ न भूयः प्राप्यते तातस्तस्मान्नार्हसि शोचितुम् ॥ ५४ ॥ अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ॥ प्रियैः सह च संवासस्तत्र शोचन्ति पंडिताः ॥ ५५ ॥ त्वया वै तत्कृतं कर्म पूर्वजन्मनि शोभने ॥ येन पित्रा वियोगः स्यादरण्ये मुनिसेविते ॥ ५६ ॥ त्वां विहाय गतः क्वापि पश्य बाले विधेर्बलम् ॥ इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम् ॥ ५७ ॥ एवमीहासमासक्तं मृत्युः प्रकुरुते वशे ॥ तस्माद्दुःखं समुत्सृज्य श्रोतुमर्हसि शोभने ॥ ५८ ॥ पितृभ्यां च वियोगश्च येनाभूत्तव कर्मणा ॥ पुरा त्वं सुन्दरीनाम वेश्यारूपेण सुन्दरी ॥ ५९ ॥ नृत्यगेयादिनिपुणा वीणावेणुविचक्षणा ॥ आदिश्य पण्यनारीणां भूषणाच्छादनादिभिः ॥ ६० ॥ तां दृष्ट्वा रूपसंपन्नां सुवेषां सुविभूषिताम् ॥ ब्राह्मणो गुणवान्कश्चिद्बभूव मदनातुरः ॥ ६१ ॥ तं विदित्वा तथाभूतं ब्राह्मणं मदनातुरम् ॥ समाश्वतस्तस्तेन त्वं रमिता कामिना ततः ॥ ६२ ॥ सोऽथ पापरतिर्मूढो ब्राह्मणो विषयात्मकः ॥ इतः शूद्रेण केनापि कामिना तव वेश्मनि ॥ ६३ ॥ विहाय भार्यामप्रौढां शुभां द्वादशवार्षिकीम् ॥ प्रयातो नरकं घोरं शूद्रासंपर्कदूषितः ॥ ६४ ॥ ततस्तस्य पिता विद्वान्मातातीव च दुःखिता ॥ आर्त्ता पुत्रवियोगेन शापो दत्तो भयावहः ॥ ६५ ॥ ॥ मातोवाच ॥ ॥ औषधादि प्रयुक्तं च वशीकर्तुं ममात्मजम् ॥ यदस्माकं वियोगाय वंचितो दुष्टचारिणि ॥ ६६ ॥ यस्माच्च मम पुत्रेण सा वियोगमकारयत् ॥ तेन जन्मांतरे दीना पतिहीना भवत्वसौ ॥ ६७ ॥ ॥ पितोवाच ॥ ॥ बाल्ये वयसि वर्त्तंती मातृहीना सुदुःखिता ॥ बहिष्कृता विवाहेन पितृहीना भविष्यसि ॥ ६८ ॥ ॥ धर्म्म उवाच ॥ ॥ तस्मात्पूर्वकृतेनैव कर्मणा वरवर्णिनि ॥ इदं दुःखमनुप्राप्ता कन्यका भवती सती ॥ ॥ ६९ ॥ ॥ पिंगलोवाच ॥ ॥ त्वया जन्मांतरे वृत्तं मम प्रोक्तं द्विजोत्तम ॥ तस्माद्वद्धि भवन्नाथं पृच्छंत्या निश्चयं स्वकम् ॥ ७० ॥ इत्थं सुघोरपापाढ्यं पापाचारा तथाऽधमा ॥ कथं तु ब्राह्मणेनाहमुत्पन्ना ब्रह्मवादिना ॥ ७१ ॥ दशमूनासमश्चक्री दशचक्रिसमो ध्वजः ॥ दशध्वजसमा वेश्या

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri Foundation USA

दशवैश्यासमो नृपः ॥७२॥ एवं वदंति धर्मज्ञा ब्राह्मणाः संशितव्रताः ॥ तस्माद्विजोत्तमादस्मान्मां जन्माभवन्मम ॥७३॥ ॥ ब्राह्मण उवाच ॥ ॥ पापाचारपरापि त्वं ब्राह्मणानां कुले शुभे ॥ उत्पन्ना तत्र वक्ष्यामि कारणं शृणु पिंगले ॥ ७४ ॥ ब्राह्मणो विषयासक्तः कश्चिद्भद्रो नृपाज्ञया ॥ चौर्यं कर्म कृतं तेन वेश्यालुब्धेन सुन्दरि ॥ ७५ ॥ मुच्यतां च त्वयाप्युक्तं न चौरो नेव पातकम् ॥ यद्धनेन कृतं चौर्यं तन्मयैव कृतं भवेत् ॥ ॥ ७६ ॥ ददामि वित्तमधिकं मुच्यतां द्विजसत्तमः ॥ इत्युक्ता गृहमानीय तेनैव सहिता पुनः ॥ ७७ ॥ गृहं च कल्पितं शुभ्रं पुष्पधूपादिवासितम् ॥ रमितश्च त्वया विप्रो यथानुक्षमनुत्तमम् ॥ ७८ ॥ तस्य पुण्यस्य माहात्म्याद्भूता स्वर्गमनुत्तमम् ॥ समुत्पन्ना कुले पुत्री ब्राह्मणस्य विशेषतः ॥ ७९ ॥ शापाच्चैव वियोगं त्वं प्राप्ता पुत्र्यधुना परम् ॥ ८० ॥ ॥ पिंगलोवाच ॥ ॥ पूर्वजन्मनि वेश्याहं जाता दुष्कृतकारिणी ॥ परद्रव्यपरा दुष्टा शौचाचारविवर्जिता ॥ इदानीं दुःखिता जाता पितृमातृवियोगतः ॥ ८१ ॥ पाणिग्रहणयत्नेन वर्जिता शापतः प्रभो ॥ प्रसादं कुरु मे विप्र को भवान्कथयस्व मे ॥ ८२ ॥ कथं जन्म न मे भूयात्कथं मुक्तिर्भवेन्मम ॥ भवबन्धविनिर्मुक्ता कथं यास्यामि सद्गतिम् ॥ ॥ ८३ ॥ ॥ विप्र उवाच ॥ ॥ धर्मोहं द्विजरूपेण त्वां जिज्ञासुरिहागतः ॥ ममोपदेशात्तत्त्वंगि लिंगस्यैकस्य दर्शनात् ॥ क्षेत्रस्य च प्रसादात्त्वं परां मुक्तिमवाप्स्यसि ॥ ८४ ॥ ॥ पिंगलोवाच ॥ ॥ कस्मिन्क्षेत्रे परा मुक्तिः कस्य लिंगस्य दर्शनात् ॥ लभ्यते सहसा धर्म एतदिच्छामि वेदितुम् ॥ ८५ ॥ ॥ धर्म उवाच ॥ ॥ अस्ति गुह्यतमं क्षेत्रं महाकालवनं शुभम् ॥ सर्वेषामेव जंतूनां हेतुर्मोक्षस्य सर्वदा ॥ ८६ ॥ तस्मिन्क्षेत्रे वरे पुण्ये स्थाने योजनविस्तृते ॥ लिंगं मोक्षप्रदं पुत्रि पूर्वस्यां दिशि संस्थितम् ॥ तस्य दर्शनमात्रेण मुक्तिमाप्स्यसि पिंगले ॥ ८७ ॥ तस्य तद्वचनं श्रुत्वा धर्मस्य च यशस्विनि ॥ जगाम पिंगला तूर्णं यत्र तल्लिंगमुत्तमम् ॥ ददर्श पश्या भक्त्या पस्पर्श च पुनःपुनः ॥ ८८ ॥ दर्शनात्तस्य लिंगस्य तस्मिँल्लिंगे लयं गता ॥ अत्र चावसरे देवाः प्रोचुस्तत्रैव संस्थिताः ॥ ८९ ॥ अन्यजन्मनि पापिष्ठा मुक्ता त्वं पिंगलेक्षणा ॥ ९० ॥ अतो लोकेषु विख्यातः पिंगलेश्वरसंज्ञकः ॥ भविष्यति न संदेहो महापातकनाशनः ॥ ९१ ॥ दिशि पश्यंति ये गत्वा पूर्वस्यां पिंगलेश्वरम् ॥ तेषां शतक्रतुस्तुष्टः पूजां सम्यग्विधास्यति ॥ ९२ ॥ देवा वश्या भविष्यंति स्वर्गस्तेषां न संशयः ॥ भविष्यति च वशगा नगरी चामरावती ॥ ९३ ॥ धर्मो धनेन सहितः कुले तेषां न नश्यति ॥ लोको धर्मेण चरतां वशगः संभविष्यति ॥ पितृणामक्षया तृप्तिर्भविष्यति न संशयः ॥ ९४ ॥ अश्वमेधसहस्रेण यत्पुण्यं समुदाहृतम् ॥ तत्सर्वं भविता सम्यक्पिंगलेश्वरदर्शनात् ॥ ९५ ॥ यानि लिंगानि क्षेत्रेऽस्मिन्गोप्यानि प्रकटानि च ॥ पूजितानि भवंतीह पिंगलेश्वरदर्शनात् ॥ ९६ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ पिंगलेश्वरदेवस्य शृणु कायावरोहणम् ॥ ९७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये पिंगलेश्वरमाहात्म्यवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ॐ ॥ ॥ महादेव उवाच ॥ ॥ कायावरोहणस्यापि उत्पत्तिं शृणु पार्वति ॥ यस्याः श्रवणमात्रेण नं नरः कायवान्भवेत् ॥ १ ॥ ब्रह्मणः सृष्टिकामस्य मनोर्वैवस्वतेऽन्तरे ॥ दक्षस्तस्य जायतांगुष्टाद्दक्षिणात्स प्रजापतिः ॥ २ ॥ वामादजायतांगुष्टाद्भार्या तस्य महात्मनः ॥ तस्यां पञ्चाशतं कन्याः स एवाजनयत्प्रभुः ॥ ३ ॥ तासर्वाश्चानवद्यांगीः कन्याः कमललोचनाः ॥ पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ ४ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ दिव्येन विधिना देवि सप्तविंशतिमिंदवे ॥ ५ ॥ रोहिणी वल्लभा जाता तस्य चन्द्रस्य सर्वदा ॥ षड्विंशतिकृते चन्द्रः शप्तो दक्षेण पार्वति ॥ ६ ॥ चंद्रेणापि तथा शप्तो दक्षः प्राचेतसः कृतः ॥ अयजत्सोऽश्वमेधेन भूत्वा प्राचेतसात्मजः ॥ ७ ॥ नामंत्रितोऽहं मोहेन दक्षेण पर्वतात्मजे ॥ तत्र देवनिकायानां यज्ञभागानशेषतः ॥ ८ ॥ हव्यवाहस्तदा युक्तो वहन्मंत्रैः समीरितः ॥ त्वया दृष्टो विशालाक्षि निरालंबेऽम्बरे स्थितः ॥ ९ ॥ स्मरंत्या पूर्ववैरं तु विज्ञप्तोऽहं त्वया प्रिये ॥ त्वं देवः सर्वदेवानां गतिश्च शरणं तथा ॥ १० ॥ त्वं यज्ञस्त्वं वषट्कारो होताऽध्वर्युस्त्वमेव च ॥ त्वया विना कथं यज्ञो वर्त्तते सर्वदेवप ॥ ११ ॥ देवानां भागधेयानि वहत्यग्निरयं भयात् ॥ सगर्वश्चावलिप्तश्च दक्षः प्राचेतसः किल ॥ १२ ॥ अनुस्मरन्पूर्ववैरं नैव दास्यत्यशासितः ॥ कायहीनश्च कर्त्तव्यो दक्षो वह्निस्तथैव च ॥ १३ ॥ ये च यज्ञे समानीता देवा दक्षस्य शंकर ॥ ते सर्वे कायरहिताः कार्या त्रिपुरसूदन ॥ १४ ॥ एवमुक्ते त्वया देवि मयाप्युक्तं वरानने ॥ पूर्वजन्मनि दक्षोऽयं पिता तव शुचिस्मिते ॥ १५ ॥ वह्निश्चाग्निकारी च देवाः क्रीडनकाः प्रिये ॥ मदीयं वचनं श्रुत्वा कृतः क्रोधस्त्वया प्रिये ॥ १६ ॥ ललाटे भ्रुकुटीं कृत्वा प्रोच्चुसंत्या पुनःपुनः ॥ क्रोधात्करेण नासाग्रं मर्दितं बहुशस्तदा ॥ १७ ॥ तस्मिन्संमर्द्यमाने तु नासाग्रे पर्वतात्मजे ॥ जाता स्त्री भ्रुकुटीवक्त्रा चतुर्दंष्ट्रा त्रिलोचना ॥ १८ ॥ वह्निगोधां गुलित्रा च कवचावद्धमेखला ॥ सखड्गा सधनुष्का च सतूणा सपताकिनी ॥ १९ ॥ सहस्रास्या शतभुजा सहस्रचरणोदरी ॥ प्रतिकूलैः पदैर्देवि कंपयंती तथा भुवम् ॥ २० ॥ कृतं नाम त्वया देवि तां दृष्ट्वा च तमोमयीम् ॥ भद्रकाली च माया च सर्वलोकनमस्कृते ॥ २१ ॥ मया सृष्टस्तु पुरुषस्तादृशो लोमहर्षणः ॥ स चापि प्रांजलिर्भूत्वा मामुवाच पुनःपुनः ॥ आज्ञापय सुरेशान किं करोमि जगत्प्रभो ॥२२॥ ततो देवि मयाज्ञप्तो भावं ज्ञात्वा त्वदीयकम् ॥ कृत्वा नाम मनोज्ञं तु वीरभद्र इति स्मृतः ॥ २३ ॥ वीरभद्र ममादेशाद्भद्रकाल्या सहानया ॥ प्राचेतसात्मजं दक्षं सगर्वं सहदैवतम् ॥ २४ ॥ विध्वंसय गणाध्यक्ष सयज्ञं सपरिग्रहम् ॥ दत्तं मया महत्सैन्यमसंख्येयगुणस्य च ॥ २५ ॥ त्वयापि भद्रकाल्यास्तु दत्तं सैन्यं भयावहम् ॥ कपालकर्त्रिकाहस्तं मातृणां गणमग्रयम् ॥ २६ ॥ ततस्तौ तेन सैन्येन महतातिसमावृतौ ॥ जग्मतुस्तत्र यत्रास्ते दक्षः प्राचेतसो यजन् ॥ २७ ॥ देवैः परिवृतो देवि सदस्यैर्ब्राह्मणैः सह ॥ ततो देवाः सुरुद्धास्ते तेन सैन्येन पार्वति ॥ विश्रब्धा मंत्रपूतं तु पिबंतः सोममध्वरे ॥ ॥ २८ ॥ त्रिनेत्रेण त्रिशूलेन त्रिदशाधिप ईश्वरः ॥ त्रासितः सहसा शक्रो गणेनाध्वरमध्यगः ॥ २९ ॥ यमास्त्येन गणेनैव यमकल्पप्रभेण च ॥ सोमपाने प्रसक्तश्च यमश्चाकर्पितोऽध्वरे॥३०॥ पाशेन वरुणो बद्धः पाशेन गणपेन तु ॥ पश्चिमाशाधिपो वीरः प्राणेन परमेश्वरि ॥३१॥ ताडितोऽनिल एवाथ उत्तरे नरवाहनः ॥ उत्तराशाधिपो देवि निधानैः सहितोऽध्वरे ॥ वीरभद्रनियुक्तास्ते चक्रुर्युद्धं सुदारुणम् ॥ ३२ ॥ अथ युद्धं चकारोच्चैर्भद्रकाली भयावहा ॥ विकराली महाकाली कालिका कलशोदरी ॥ ३३ ॥ प्रज्वालज्वलनाकारा शुष्कमांसातिभैरवा ॥ एताश्चान्याश्च शतशो नरमालाविभूषणाः ॥ ३४ ॥ कपालकर्त्रिकाहस्ता जघ्नुर्देवगणांस्तदा ॥ इति मातृगणं क्रुद्धं मर्दयंतं सुरांस्तदा ॥ दृष्ट्वाभ्युपगता देवास्तुषिता युद्धलालसाः ॥३५॥ केचिच्च चिक्षिपुः शक्तीः केचित्प्रासांस्तथापरे ॥ केचिच्च तोमरैस्तीक्ष्णैः केचित्खड्गैश्च पट्टिशैः ॥३६॥ अर्दितो मातृसंघस्तु पीडितास्ते प्रमथा यदा ॥ भद्रकाली तदा क्रुद्धा गदया शरवृष्टिभिः ॥ ३७ ॥ खड्गादिभिः षडंगांशुः पीड्यामास संयुगे ॥ भगस्य नेत्रे पूष्णस्तु दशनाः पतिता मुखात् ॥ ३८ ॥ करान्दनकरस्यैव चरणौ भास्करस्य च ॥ मुशलेन हता येऽद्यौ वसवो रणकोविदाः ॥ ३९ ॥ वमन्तो रुधिरं तेऽपि नष्टा जर्जर

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मस्तकाः ॥ विदेहाश्च कृता युद्धे तुपिता रणगर्विताः ॥ ४० ॥ वद्धः प्राचेतसो दक्षः पाशेन सुदृढेन च ॥ शेषाश्च त्रिदशा भीता ब्रह्माणं शरणं गताः ॥ ४१ ॥ वृत्तांतः कथितः सर्वो विस्तरेण यथा तथा ॥ आद्या ये तुपिता देवा विदेहाश्चैव ते कृताः ॥ ४२ ॥ नष्टाश्च वसवो देवाः पीडिता भास्करा रणे ॥ न ज्ञायते सहस्राक्षो न यमो न धनेश्वरः ॥ वरुणो यादसां नाथः क्व गतः परमेश्वरः ॥ ४३ ॥ भद्रकाल्या हतं सर्वं वीरभद्रगणेन च ॥ भग्नश्च यज्ञयूपो वै विध्वस्तं कलशं तदा ॥ ४४ ॥ प्रदीपिता महाशाला भग्नं वै यज्ञतोरणम् ॥ तेषां तु वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ आजगाम कृपाविष्टो यत्राहं मन्दरे स्थितः ॥ ४५ ॥ स्तुतिं कृत्वा मदीयां तु वाक्यमुक्तमिदं तदा ॥ आद्या ये तुपिता देवा विदेहाश्चैव ते कृताः ॥ ॥ ४६ ॥ भद्रकाल्या महादेव वसवो जर्जरीकृताः ॥ पीडिता भास्करा युद्धे शेषा नष्टा दिशो गताः ॥ ४७ ॥ कायावरोहणं देव तुपितानां कथं भवेत् ॥ ब्रह्मणो वचनं श्रुत्वा मया प्रोक्तं वरानने ॥ ४८ ॥ महाकालवने क्षेत्रे गच्छन्तु तुपितास्त्वमी ॥ लकुटीशो गतो यत्र कायावरोहणाद्रुहम् ॥ ४९ ॥ ब्राह्मणाश्च ममादेशाद्दक्षशिष्यैः समन्विताः ॥ द्वापरे समतिक्रांते प्राप्ते कलियुगे तथा ॥ ५० ॥ तत्र कायमनुप्राप्ता मम शिष्या ममोपमाः ॥ अवसंत क्षितौ धन्या रक्षणार्थं द्विजन्मनाम् ॥ ५१ ॥ क्षेत्रस्य दक्षिणे तस्य विद्यते लिंगमुत्तमम् ॥ सर्वसंपत्करं दिव्यं सिद्धानां कायदायकम् ॥ ५२ ॥ प्रसादात्तस्य लिंगस्य कायान्प्राप्स्यंत्यमी सुराः ॥ मदीयं वचनं श्रुत्वा गतास्ते तुपिताः प्रिये ॥ ५३ ॥ मुदिता ब्रह्मणा सार्द्धं यत्र तल्लिंगमुत्तमम् ॥ प्रसादात्तस्य लिंगस्य प्राप्तं कायमनुत्तमम् ॥ ५४ ॥ पुनस्ते तादृशा जातास्तुपिता यादृशाऽभवन् ॥ अतो देवैः कृतं नाम कायावरोहणेश्वरः ॥ समीहितप्रदो नित्यं ख्यातो देवो भविष्यति ॥ ५५ ॥ ये गत्वा दक्षिणामाशां देवं कायावरोहणम् ॥ पश्यन्ति परया भक्त्या यमस्तेषां पिता भवेत् ॥ ५६ ॥ जन्मकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ॥ तत्सर्वं नाशमायाति दर्शनादेव नान्यथा ॥ ५७ ॥ स्वकर्मणा गता ये च नरके पितरो गणाः ॥ दर्शनात्तस्य लिंगस्य तेषां मुक्तिर्भविष्यति ॥ ५८ ॥ ये पश्यंति प्रसंगेन देवं कायावरोहणम् ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ५९ ॥ स्पर्शनात्तस्य लिंगस्य पापिनोपि हि ये नराः ॥ ते यास्यंति परं स्थानं सर्वपापविवर्जितम् ॥ ६० ॥ शाठ्येन पूजितो देवः कायावरोहणेश्वरः ॥ ददाति राज्यं भोगांश्च स्वर्गलोकं सनातनम् ॥ ६१ ॥ द्वादश्यां ये प्रपश्यंति स्नात्वा कायावरोहणम् ॥ ते भित्त्वा ब्रह्मसदनं यास्यन्ति परमां गतिम् ॥ ६२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ कायावरोहणेशस्य विल्वेश्वरमथो शृणु ॥ ६३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवादे कायावरोहणेश्वरमाहात्म्यवर्णनंनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ॐ ॥ ॥ श्रीहर उवाच ॥ ॥ विल्वेश्वरस्य माहात्म्यं शृणु सुन्दरि सादरम् ॥ यस्य श्रवणमात्रेण मुच्यते सर्वपातकैः ॥ १ ॥ आदिकल्पे महादेवि लोकानामनुकम्पया ॥ कल्पवृक्षास्ततो जाता ब्रह्मणो ध्यायतः पुरा ॥ २ ॥ तेषां मध्ये विल्ववृक्षः श्रीवृक्ष इति गीयते ॥ अधस्तात्तस्य वृक्षस्य पुरुषः कांचनप्रभः ॥ ३ ॥ उपविष्टस्तदा दृष्टो ब्रह्मणा लोककर्तृणा ॥ फलानि तस्य पत्राणि विविधानि निरन्तरम् ॥ ४ ॥ भक्षयत्यतिसंहृष्टो ह्यानि च मृदूनि च ॥ वद्धगोधांगुलित्रश्च शरी धन्वी तथैव च ॥ ५ ॥ खड्गी किरीटमाली च कुण्डली कवची तथा ॥ महोरस्को महोत्साहः सिंहसंहननो युवा ॥ ६ ॥ ब्रह्मणा च कृतं नाम विल्व इत्यभिविश्रुतम् ॥ तमिन्द्रो वरयामास राजा त्वं भूतले भव ॥ ७ ॥ त्रिविष्टपस्य भूमिस्थः सखाभूतो मम प्रियः ॥ ददामि ते वैजयन्तीं मालाममलानपंकजाम् ॥ ८ ॥ यस्याः प्रभावतः शस्त्रं रणे ने प्रभविष्यति॥सोऽब्रवीद्यदि मे वज्रमायुधं त्वं प्रयच्छसि ॥९॥ तत्स्यां पृथिव्यां राजाहं नान्यथा रोचते मम॥ततोऽहं पालयिष्यामि सत्येनेमां वसुन्धराम्॥१०॥ ॥इंद्र उवाच ॥ ॥ एवं भवतु भद्रं ते भव राजा प्रजाहितः॥ स्मरणादेव वज्रस्ते करे यास्यति नान्यथा ॥११॥ स एवमुक्तस्तेजस्वी विल्वो राजा बभूव ह॥ कपिलोनाम धर्मात्मा वेदवेदांगपारगः ॥१२॥ सखा बभूव विल्वस्य तस्य विप्रर्षिसत्तमः ॥ स तेन सह संगम्य सुखासीनो वरानने ॥१३॥ चक्रे कथा विचित्रार्थाः प्रीयमाणः पुनःपुनः ॥ तथा कथान्तरे वादः परस्परमभूत्तयोः ॥१४॥ दानं प्रधानं तीर्थं तु विल्वेनोक्तं पुनःपुनः ॥ ब्रह्म श्रेष्ठं तपः श्रेष्ठमित्युक्तं कपिलेन तु ॥ १५ ॥ ॥ विल्व उवाच ॥ ॥ दानाद्राज्यं सुखं भोगा ऐश्वर्यं स्वर्गमक्षयम् ॥ प्राप्यते द्विजशार्दूल कथं ब्रह्म प्रशंससि ॥ १६ ॥ ॥ कपिल उवाच ॥ ॥ वेदाद्यज्ञाः प्रवर्त्तंते वेदादिष्टिश्च कामिका ॥ प्रवर्त्तंते क्रिया वेदाद्वेदमूलमिदं जगत् ॥ १७ ॥ ॥ ॥ विल्व उवाच ॥ ॥ संसारे पार्थिवाः श्रेष्ठाः समर्था लोकपालने ॥ लोकपालोपमा लोके कथं ब्रह्म प्रशंससि ॥ १८ ॥ ॥ कपिल उवाच ॥ ॥ मुख्या वै ब्राह्मणाः प्रोक्ताः शापानुग्रहकारकाः ॥ पितरः पार्थिवानां तु किं त्वं विल्व न मन्यसे ॥ १९ ॥ एवं कौतूहले जाते कपिलो द्विजसत्तमः ॥ विल्वेन ताडितो मूर्ध्नि वज्रेणानतपर्वणा ॥ २० ॥ वज्रेण स द्विधा छिन्नः कपिलो ब्रह्मविद्यया ॥ संधार्य स्वशरीरं तु ममां तिकमुपागतः ॥ २१ ॥ स्तुतोऽहं विविधैः स्तोत्रैः सम्यगाराधितो ह्यहम् ॥ मया दत्तमव्ययत्वं कुलिशाद्ब्राह्मणस्य तु ॥ २२ ॥ द्विजः समागतो विल्वं पुनः सख्यमभूत्तयोः ॥ पुनस्तु तादृशो वादः संजातः पर्वतात्मजे ॥ २३ ॥ वामपादेन चाप्येनं विल्वो विप्रमताडयत् ॥ पुनश्च वज्रमादाय जघानेनं तदा दृढम् ॥ २४ ॥ न मृतिं न व्यथां तस्य तद्वज्रमकरोत्पुनः ॥ अवध्यत्वमथो ज्ञात्वा विल्वस्तस्य महात्मनः ॥ २५ ॥ नारायणमथाऽऽद्य प्रार्थयामास चेप्सितम् ॥ वरदोऽस्मीति तुष्टेन विष्णुना स च मोदितः ॥ प्रोवाच प्रणतो विष्णुमिदं देवि महामनाः ॥ २६ ॥ ॥ विल्व उवाच ॥ ॥ कपिलोनाम विप्रर्षिरवध्योऽक्षय एव च ॥ सखा मम हृषीकेश स च मामाह नित्यशः ॥ विभेम्यहं न देवस्य राक्षसस्यासुरस्य च ॥ ॥ २७ ॥ पिशाचस्यापि यक्षस्य न चैवान्यस्य कस्यचित् ॥ बिभेमीति यथा ब्रूयां तथा त्वं कर्त्तुमर्हसि ॥ २८ ॥ एवमुक्तस्तु विल्वेन स देवः पुरुषोत्तमः ॥ एवं भविष्यतीत्युक्त्वा कपिलस्याश्रमं गतः ॥२९॥ स प्रविश्याश्रमं देवं कपिलेन प्रपूजितः ॥ कपिलं प्रत्युवाचेदं सामपूर्वं जनार्दनः ॥ ॥ ३० ॥ भगवन्ब्राह्मणश्रेष्ठ वेदवेदांगपारग ॥ वरमेकं वृणोम्यद्य विप्रेंद्र दातुमर्हसि ॥ ३१ ॥ प्रसादितोऽहं बिल्वेन नृपेंद्रेण पुनःपुनः ॥ वरदोऽस्मीति चाप्युक्तो वरं वव्रे महामुने ॥ ३२ ॥ त्वया प्रोक्तं बिभेमीति ब्रूहि तस्मादनुग्रहात् ॥ अभीतस्त्वं तथाप्यद्य मदर्थं तु वद प्रभो ॥ ३३ ॥ कपिलस्त्वेवमुक्तो वै विष्णुना मधुरं वचः ॥ उवाच न बिभेमीति भूयोभूयो जनार्दन ॥ ३४ ॥ नाहं वक्ष्ये बिभेमीति तेनोक्तं नोच्यते मया ॥ एतच्छ्रुत्वा वचस्तस्य कपिलस्य जनार्दनः ॥ उवाच चक्रमुद्यम्य भयं विप्रस्य दर्शयन् ॥ ३५ ॥ न चेद्वक्ष्यसि भीतोऽहं चक्रं ते प्रहरामि वै ॥ ३६ ॥ ॥ ॥ कपिल उवाच ॥ ॥ किं वृथा प्रियचक्रस्य विष्णो क्लेशमिहेच्छसि ॥ नाहं चक्रस्य ते गम्यः प्रसादात्त्र्यंबकस्य हि ॥ ३७ ॥ ततः स

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुष्टिमादाय कुशानां कपिलस्तदा ॥ वासुदेवं समासाद्य तिष्ठतिष्ठेत्यभाषत ॥ ३८ ॥ अद्य गर्वं च दर्पं च बलं यच्च तवाद्भुतम् ॥ तत्सर्वं नाशयिष्यामि तिष्ठेदानीं जनार्दन ॥ ३९ ॥ ततो युद्धं समभवत्तुमुलं लोमहर्षणम् ॥ निमेषांतरमात्रं तु कृष्णस्य कपिलस्य च ॥ ४० ॥ दिव्यास्त्राणां कुशानां च युद्धं समभवद्दृढम् ॥ निरालंबेंऽबरे देवि देवानां भयमाविशत् ॥ ४१ ॥ एतस्मिन्नंतरे ब्रह्मा सुरैः परिवृतस्तदा ॥ आजगामाति संतप्तः कृष्णं वचनमब्रवीत् ॥ ४२ ॥ भगवन्भूतभव्येश भववंधभयापह ॥ हृषीकेश हृषीकेश सृष्टिसंहारकारक ॥ ४३ ॥ समाराध्य जगन्नाथ शक्राद्यास्त्रिदिवौकसः ॥ वसंति मुदिताः सर्वे सर्वकामसमन्विताः ॥ ४४ ॥ आब्रह्मस्तंबपर्यंतं त्रैलोक्यं सचराचरम् ॥ उत्पादितं धृतं व्याप्तं विष्णुना प्रभविष्णुना ॥ ४५ ॥ तेनैकेन विशुद्धेन सर्वगेन महात्मना ॥ इति स्म मुनयः सर्वे उदिता मुनिसत्तमाः ॥ ४६ ॥ वदंति कारणं चास्य त्रैलोक्यस्य जनार्दनः ॥ देवदानवदैत्येश्च मुनिचारणपन्नगैः ॥ ४७ ॥ वरार्थिभिश्च प्रवरैः पूज्यसे गरुडध्वज ॥ किं भवानेव गोविंद वृथा युध्यसि स द्विजैः ॥ ॥ ४८ ॥ कपिलस्य च विप्रस्य हराल्लब्धवरस्य च ॥ किं न वेत्सि यथा ह्येष प्रसादात्पारमेश्वरात् ॥ ४९ ॥ अवध्यत्वमनुप्राप्तो ह्यजेयत्वं च संयुगे ॥ न चैवं त्वद्विधा देव ब्राह्मणेषु विकुर्वते ॥ ५० ॥ ब्रह्म च ब्रह्मणो मूलं त्वयैव प्राक्प्रतिश्रुतम् ॥ तस्मादाशु निवर्त्तस्व यत्त्वेनं ब्राह्मणं विभो ॥ ५१ ॥ इत्थं निशम्य देवेशो वाक्यं ब्रह्ममुखाच्च्युतम् ॥ योगेन तद्बलं ज्ञात्वा कपिलस्य तु शंकरम् ॥ ५२ ॥ जगाम परमं लोकं पूज्यमानस्त्रिविष्टपैः ॥ गते जनार्दने विल्वो विललाप पुनःपुनः ॥ ५३ ॥ युद्धं सुदारुणं श्रुत्वा कृष्णस्य कपिलस्य च ॥ कथं जेष्यामि कपिलं कथं मे निर्वृतिर्भवेत् ॥ कस्याहं शरणं यामि को मे त्राता भविष्यति ॥ ५४ ॥ न जितः कपिलो युद्धे विष्णुना प्रभविष्णुना ॥ मया संस्पर्द्धते नित्यं कथं जेयो भविष्यति ॥ ५५ ॥ अजेया ब्राह्मणा युद्धे शापानुग्रहकारकाः ॥ भस्म कुर्युर्जगत्सर्वं सदेवासुरमानुषम् ॥ ५६ ॥ ब्राह्मं हि परमं तेजो देवैरपि दुरासदम् ॥ एवं विलपतस्तस्य वासवः समुपागतः ॥ ५७ ॥ विलपंतं कृशं विल्वं वज्रहस्तमवेक्ष्य सः ॥ ममत्वाकृष्टहृदयः प्रत्युवाच पुरंदरः ॥५८॥ अलं शोकेन भूपाल शृणु मे वचनं परम् ॥ यदाहं पीडितो युद्धे शंबरेण दुरात्मना ॥ बलिष्ठेन सगर्वेण तदा पृष्टो मया गुरुः ॥५९॥ बृहस्पतिर्महातेजास्तेनोक्तं तु तदा नृप ॥ गच्छ शक्र ममादेशान्महाकालवनं शुभम् ॥ ६० ॥ यत्र संति सुदिव्यानि लिंगानि विविधानि च ॥ भुक्तिमुक्तिकराण्येव वांछितार्थप्रदानि च ॥६१॥ तेषां मध्ये लिंगमेकमाराधय शचीपते ॥ यस्य दर्शनमात्रेण रणे धृष्टो भविष्यसि ॥ तस्य तद्वचनाद्विल्व सम्यगाराधना कृता ॥ ६२ ॥ मया लिंगस्य हर्षेण जितो वै शंबरस्तदा ॥ प्रसिद्धिं तु गतो देवः स चैंद्रेश्वरसंज्ञकः ॥ ६३ ॥ तस्मात्त्वं पश्चिमामाशां गत्वा क्षेत्रस्य तस्य वै ॥ समाराधय यत्नेन लिंगं वरुणपूजितम् ॥६४॥ तल्लिंगं त्रिषु लोकेषु त्वन्नाम्ना ख्यातिमेष्यति ॥ कपिलस्त्वत्सखा विप्रो जितोऽस्मीति वदिष्यति ॥ तस्य लिंगस्य माहात्म्यान्मित्रभावं गमिष्यति ॥ ६५ ॥ इत्युक्त्वा तु गते शक्रे देवलोकं यशस्विनि ॥ पूजयामास भावेन पुष्पैर्दिव्यैः सुगंधिभिः ॥ ६६ ॥ जगाम विल्वो भूपालो महाकालवनं शुभम् ॥ ददर्श पश्चिमे भागे लिंगं त्रिदशपूजितम् ॥ ६७ ॥ मुक्ताफलैश्च रत्नैश्च वासोभिर्भूषणैस्तथा ॥ एतस्मिन्नंतरे चैव कपिलोऽपि समागतः ॥ ६८ ॥ ददर्श विल्वं भूपालं पूजयंतं पुनःपुनः ॥ शरीरे तस्य विल्वस्य मदीयं रूपमुत्तमम् ॥ दृष्ट्वा मत्वा महादेवं जितोऽस्मीति द्विजोऽब्रवीत् ॥६९॥ प्रार्थयामि त्वया सख्यमनंतं शिवसंनिधौ ॥ एवमुक्तस्तदा विल्वः कपिलेन महात्मना ॥ ७० ॥ प्रसन्नः प्रांजलिर्भूत्वा कपिलं द्विजसत्तमम् ॥ एवं भवतु भद्रं ते कृतार्थोऽहं महात्मना ॥७१॥ सख्यं तदेव भवतु शश्वद्वदसि मन्यसे ॥ एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमम् ॥७२॥ चिक्रीडतुश्चिरं कालं परं हर्षमुपागतौ ॥ तस्य लिंगस्य माहात्म्याद्भूयो राज्यं चकार सः ॥ ७३ ॥ स हि मित्रेण भूपालो विल्वो देवि मुदान्वितः ॥ तदाप्रभृति विख्यातो देवो विल्वेश्वरः क्षितौ ॥ बिल्वेनाराधितो लोके वांछितार्थफलप्रदः ॥ ७४ ॥ ये पश्यंति विशालाक्षि देवं विल्वेश्वरं परम् ॥ ते कृतार्था भविष्यंति सर्वपातकवर्जिताः॥७५॥येऽनुमोदंति देवस्य दर्शनं पर्वतात्मजे ॥ तेऽपि पापविनिर्मुक्ताः प्रयांति मम मंदिरे ॥७६॥ समतीतं भविष्यं च कुलानामयुतं नरः ॥ मम लोकं नयत्याशु तस्य लिंगस्य दर्शनात् ॥ ७७ ॥ प्रयांति पितरो हृष्टा मम लोके ह्यतंद्रिताः ॥ विमुक्ताः पातकैर्घोरैः कृत्वा लिंगस्य दर्शनम् ॥७८॥ कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ॥ तत्पापं विलयं याति श्रीविल्वेश्वरदर्शनात् ॥ ७९ ॥ या तिथिः श्रूयते देवि कृष्णपक्षे त्रयोदशी ॥ सा प्रोक्ता वल्लभा तस्य सर्वपातकनाशिनी ॥ ८० ॥ येऽर्चयंति नरास्तस्यां देवं विल्वेश्वरं प्रिये ॥ न तेषां पुनरावृत्तिर्घोरसंसारगह्वरे ॥ ८१ ॥ कर्मणा मनसा वाचा यत्पापं समुपार्जितम् ॥ तत्क्षालयति देवोऽसौ तिथौ तस्यां समर्चितः ॥ ८२ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ विल्वेश्वरस्य देवस्य श्रूयतामुत्तरेश्वरम् ॥ ८३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे चतुरशीतिलिङ्गमाहात्म्ये विल्वेश्वरमाहात्म्यवर्णनंनाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ उत्तरेश्वरमाहात्म्यमशेषपापनाशनम् ॥ जन्ममृत्युजराव्याधिस्फोटनं शृणु पार्वति ॥ १ ॥ अयोध्यायामतिख्यातकुलोत्पन्नश्च पार्थिवः ॥ सुधीः परीक्षिन्नामा च मृगयामगमत्स च ॥ २ ॥ मृगमनुससाराथ मृगो दूरमपासरत् ॥ ३ ॥ तदाध्वनि जातश्रमः क्षुत्तृष्णाभिभूतः कस्मिंश्चिद्वनोद्देशे नीलवनमपश्यच्चाविवेश ॥ ४ ॥ तस्य वनखण्डस्य दक्षिणभागे सरो दृष्ट्वा साश्व एव व्यगाहत ॥ ५ ॥ अथाश्वस्थः सन्मृणालमश्वस्याग्रतो निक्षिप्य पुष्करिणीं समुपाविशत् ॥ ६ ॥ शयितस्ततः शयानो गीतमशृणोत् ॥ ७ ॥ स श्रुत्वाचिंतयन्नेह मनुष्यगतिं प्रपश्यामि ॥ ८ ॥ कस्य खल्वयं गीतशब्द इत्यवलोकयामास ॥ ९ ॥ अथापश्यत्कन्यां परमरूपदर्शनीयां पुष्पाणि विचिन्वंतीं चाथ राजा समीपे पर्यक्रामत् ॥ १० ॥ तामब्रवीद्राजा कस्यासि त्वं कन्या परमरूपदर्शनीया पुष्पाणि विचिन्वंती ॥ ११ ॥ साथ राजसमीपे गत्वेति प्रोवाच कन्यास्मीति ॥ १२ ॥ ॥ ॥ राजोवाच ॥ ॥ अर्थी तवास्मीति ॥ १३ ॥ अथोवाच कन्या ॥ समयेनाहं त्वया शक्योपालब्धुं नान्यथेति ॥ १४ ॥ तां राजा समपृच्छत्कस्ते समय इति ॥ १५ ॥ ततः कन्या तमुवाच नोदकं दर्शयितव्यमिति ॥ १६ ॥ राजा वाढमित्युक्त्वा तां समागम्य तया सहास्ते ॥ १७ ॥ तत्रैवासन्ने राजनि सेना त्वागच्छत् तया सहोपविष्टं राजानं परिवार्य चातिष्ठत् ॥ १८ ॥ समाजितश्च राजा तथैव शिबिकया प्रायात् ॥ अथ झटिति तया सह स्वं नगरमनुप्राप्य रहसि तया सह रममाणः सन्नान्यं किंचिदपश्यदथ प्रधानोमात्यस्तस्याभ्याशचारस्ताः स्त्रियोऽभ्यपृच्छत् ॥ १९ ॥ किमत्र प्रयोजनं विद्यते इत्यब्रुवंस्ताः स्त्रियोपूर्वमेव पश्यामस्तदुदकं नात्राश्रियत इति ॥ २० ॥ अथामात्यश्च निरुदकं कारयित्वा दारुवृक्षं वृद्धपुष्पफलं शरद्युपलभ्य राजानामब्रवीत् ॥ वनमिदमनुदकं साध्वत्र रम्यतामिति ॥ २१ ॥ स तस्य वचनात्त

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यैव सह देव्या वनं प्राविशत् ॥ २२ ॥ सकलत्रस्तस्मिन्वने रम्ये तयैव सह रेमे ॥ २३ ॥ प्रविश्य च राजा सह प्रियया सुधाधवलसलिलपूर्णां वापीमपश्यत् ॥ २४ ॥ वापीं दर्दुरैः पूर्णां दृष्ट्वैव च तां तस्या एव तीरे तया देव्यातिष्ठत् ॥ २५ ॥ अथ तां देवीं राजात्रवीत् ॥ शांततरं वापीसलिलमिति ॥ २६ ॥ सा च तद्वचः श्रुत्वा तीर्थवापीं न्यमज्जन्न पुनरुदमज्जत् ॥ तां मृगयमाणो राजा नापश्यत् ॥ २७ ॥ वापीं दर्दुरैः पूर्णां दृष्ट्वा आज्ञापयामास भृत्यान्सर्वदर्दुरवधः क्रियतामिति ॥ २८ ॥ यो ममार्थी स तैर्दर्दुरैरुपायनैर्ममानुतिष्ठत् ॥ २९ ॥ अथ कश्चिन्महान्दर्दुरो दर्दुरवधे क्रियमाणे सर्वासु दिक्ष्वभ्यगात् ॥ ३० ॥ उपेत्य चैनमुवाचेदं ज्ञात्वा कोपवशंगतम् ॥ प्रसादं कुरु नार्हसि दर्दुराणामनपराधिनां वधं कर्तुमिति ॥ ३१ ॥ श्लोकश्चात्र भवति ॥ मा दर्दुरान्प्रभिद्यास्त्वं कोपं संधारयाच्युत ॥ प्रक्षीयते महाधर्मो जनानां परिजानताम् ॥ ३२ ॥ तमेवं वादिनमिष्ट जनवियोगे शोकपरीतात्मानं स राजा प्रोवाच ॥ न हि काममप्येतन्निष्कामेन निवर्हणीया इति ॥३३॥ एतैर्दुरात्मभिर्मे स्त्री भक्षिता सर्वथैव त्विमे वध्या दर्दुराः ॥ नार्हसि विद्वन्नुपरोद्धुमिति ॥ ३४ ॥ स तद्वाक्यमुपश्रुत्य व्यथितेंद्रियमनाः प्रोवाच प्रसीद राजन्नहमायुर्नाम भूपालः ॥ ३५ ॥ प्राप्ता सा मम दुहिता ॥ सा कन्या नागलोकं गता ॥ अत्रास्ते नागचूडो नागराजः ॥ स्मृता आगमिष्यति ॥ ३६ ॥ तामत्रवीद्राजा तां स्मृत्वा नीय मे दीयतामिति ॥ ३७ ॥ अथैनां स्मृत्वा राज्ञे अदात् ॥ अत्रवीच्च ॥ ३८ ॥ मयावहसितो गालवो महान्मुनिः तपसा कर्शितांगः ॥ क्षमेश्वरो दर्दुरवाल्यात्प्रकोपितः तेनाहं शप्तः यन्मामनादृत्य दर्दुरवाल्यादवहसितस्तस्माद्दर्दुरो भविष्यसि ॥ ३९ ॥ प्रसादितस्तु विप्रः प्रत्युवाच ॥ ॥ ४० ॥ अवितथोऽयं मम शापस्तस्मादन्यजन्मनि दर्दुरराजो भूत्वा त्वं हि दुहितरमिक्ष्वाकुकुलोत्पन्नाय सर्वगुणान्विताय दत्त्वा यदा यास्यसि महाकालवने तस्योत्तरदिग्भागे तदा लिंगस्य दर्शनेन मुक्तिमवाप्स्यसि ॥ ४१ ॥ दुहिता कियत्पातालं यास्यति स्मृता चागमिष्यति ॥ स्वस्ति तेऽस्तु साधयिष्यामि कार्याणि, इत्युक्त्वा दर्दुरो महाकालवनमगच्छत् ॥ ४२ ॥ तस्योत्तरे लिंगं ददर्श तस्य दर्शनादनेकमाणिक्यरचितं सिद्धगन्धर्वसेवितं विमानवरमारुह्य शक्रलोकं गतः ॥ ४३ ॥ तस्य माहात्म्यमवलोक्य देवाचार्यो बृहस्पतिर्वाक्यं जगाद ॥ ४४ ॥ अहो लिंगस्य माहात्म्यमहो लिंगस्य वैभवम् ॥ संप्राप्तो वासवं लोकं शापभ्रष्टो हि दर्दुरः ॥ ४५ ॥ आयुराख्यो हि भूपालो मुक्तो दर्दुरतां गतः ॥ ॥ ४६ ॥ इति तद्वचनं श्रुत्वा देवाचार्यस्य पार्वति ॥ देवास्ते हृष्टमनसो नाम चक्रुः समाहिताः ॥ ४७ ॥ यस्माद्दर्दुरभूपालो मुक्तो दर्दुरयोनितः ॥ दर्शनात्तस्य लिंगस्य तस्मात्ख्यातो भविष्यति ॥ ४८ ॥ उत्तरेश्वरदेवश्च शापपापप्रणोदकः ॥ इत्युक्त्वा त्रिदशैः सर्वैः पूजितो ह्युत्तरेश्वरः ॥ ॥ ४९ ॥ मुक्तिमुक्तिप्रदो देवि महापातकनाशनः ॥ क्षेत्रस्य रक्षणार्थाय नियुक्तो यो मया गणः ॥ दर्दुरो हि दुराधर्षः स चापीश्वरतां गतः ॥ ॥ ५० ॥ उत्तराशामथो गत्वा यः पश्येदुत्तरेश्वरम् ॥ स सर्वैश्वर्यसंयुक्तो याति लोकमथोत्तरम् ॥ ५१ ॥ सुभगः सर्वदा दांतः सुरूपः पुत्रवानिति ॥ नीरोगः पुण्यशीलश्च जायते सप्तजन्म च ॥ ५२ ॥ या वृद्धिस्तु कुबेरस्य शक्रस्य च यमस्य च ॥ वरुणस्य च या वृद्धिः सा वृद्धिरुत्तरोत्तरा ॥ जायते नात्र सन्देह उत्तरेश्वरदर्शनात् ॥ ५३ ॥ कृष्णपक्षे चतुर्दश्यां ये पश्यंति यशस्विनि ॥ उत्तरेश्वरसंज्ञं तु ते कृतार्थाः कलौ युगे ॥ ५४ ॥ किं दानैः किं तपोभिश्च किं यज्ञैर्बहुदक्षिणैः ॥ दर्शनाल्लभते राज्यं स्वर्गं मोक्षं क्रमेण तु ॥ ५५ ॥ आजन्म च कृतं पापं स्वल्पं वा यदि वा बहु ॥ तत्सर्वं नाशमायाति उत्तरेश्वरदर्शनात् ॥ ५६ ॥ इत्येवं चतुराशीतिः संख्याता ईश्वरास्तव ॥ कथिता ये त्वया पृष्टा महाकालवने मया ॥ ५७ ॥ य एतेषां देवि यात्रां प्रतिलोमानुलोमतः ॥ करिष्यंति नरा भक्त्या ते यास्यंति परं पदम् ॥ ५८ ॥ यश्चापि पूजयेत्तत्र लिंगं भक्त्या तु मानवः ॥ स कुलं तारयत्येव पितृकं मातृकं शतम् ॥ ५९ ॥ एष ते कथितो देवि प्रभावः पापनाशनः ॥ चतुराशीतिलिंगानां किं भूयः श्रोतुमिच्छसि ॥ ६० ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे चतुरशीतिलिङ्गमाहात्म्य उमामहेश्वरसंवाद उत्तरेश्वरलिंगमाहात्म्यवर्णनपूर्वकचतुरशीतिलिंगमाहात्म्यवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ॥

॥ अथ श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं प्रारभ्यते ॥(५-३)॥

॥ श्रीगणेशाय नमः ॥ ॥ ॐ नमः श्रीपुरुषोत्तमाय ॥ ॐ नमः श्रीनर्मदायै ॥ ॐ नमो हरिहरहिरण्यगर्भेभ्यो नमो व्यासवाल्मीकिशुकपराशरेभ्यो नमो गुरुगोब्राह्मणेभ्यः ॥ ॐ मज्जन्मातंगगण्डच्युतमदमदिरामोदमत्तालिमालं स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगम् ॥ सायं प्रातर्मुनीनां कुसुमचयसमाच्छन्नतीरस्थवृक्षं पायाद्वो नर्मदाम्भः करिमकरकराक्रान्तरंहस्तरंगम् ॥ १ ॥ उभयतटपुण्यतीर्था प्रक्षालित सकललोकदुरितौघा ॥ देवमुनिमनुजवंद्या हरतु सदा नर्मदा दुरितम् ॥२॥ नाशयतु दुरितमखिलं भूतं भव्यं भवच्च भुवि भविनाम् ॥ सकलपवित्रि तवसुधा पुण्यंजला नर्मदा भवति ॥ ३ ॥ तटपुलिनं शिवदेवा यस्या यतयोऽपि कामयन्ते वा ॥ मुनिनिवह विहितसेवा शिवाय मम जायतां रेवा ॥ ४ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ५ ॥ नैमिषे पुण्यनिलये नानाऋषिनिषेविते ॥ शौनकः सत्रमासीनः सूतं पप्रच्छ विस्तरात् ॥ ६ ॥ मन्येऽहं धर्मनेपुण्यं त्वयि सूत सदार्चितम् ॥ पुण्यामृतकथावक्ता व्यासशिष्यस्त्वमेव हि ॥ ॥ ७ ॥ अतस्त्वां परिपृच्छामि धर्मतीर्थाश्रयं कवे ॥ बहूनि सन्ति तीर्थानि बहुशो मे श्रुतानि च ॥ ८ ॥ श्रुता दिव्यनदी ब्राह्मी तथा विष्णु नदी मया ॥ तृतीया न मया क्वापि श्रुता रौद्री सरिद्वरा ॥ ९ ॥ तां वेदगर्भां विख्यातां विबुधौघाभिवंदिताम् ॥ वद मे त्वं महाप्राज्ञ तीर्थपूगपरिष्कृताम् ॥ १० ॥ कं देशमाश्रिता रेवा कथं श्रीरुद्रसंभवा ॥ तत्संश्रितानि तीर्थानि यानि तानि वदस्व मे ॥ ११ ॥ ॥ सूत उवाच ॥ ॥ साधु पृष्टं कुलपते चरित्रं नर्मदाश्रितम् ॥ चित्रं पवित्रं दोषघ्नं श्रुतमुक्तं च सत्तम ॥ १२ ॥ वेदोपवेदवेदांगादीन्यभिव्यस्य पूरितः ॥ अष्टादशपुराणानां वक्ता सत्यवतीसुतः ॥ १३ ॥ तं नमस्कृत्य वक्ष्यामि पुराणानि यथाक्रमम् ॥ येषामभिव्याहरणादभिवृद्धिर्वृषायुषोः ॥ १४ ॥ श्रुतिः स्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते ॥ काणस्तत्रैकया हीनो द्वाभ्यामंधः प्रकीर्तितः ॥ १५ ॥ श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् ॥ यस्त्रिभिर्नयनैः पश्येत्सोंऽशो माहेश्वरो मतः ॥ १६ ॥ आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ॥ शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ॥ १७ ॥ तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये ॥ पुराणं पंचमो वेद इति ब्रह्मानुशासनम् ॥ १८ ॥ यो न वेद पुराणं हि न स वेदात्र किंचन ॥ कतमः स हि धर्मोऽस्ति किं वा ज्ञानं तथाविधम् ॥ १९ ॥ अन्यद्वा तत्किमत्राह पुराणे यन्न दृश्यते ॥ वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र संशयः ॥ २० ॥ विभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ इतिहासपुराणैश्च कृतोऽयं निश्चयः पुरा ॥ २१ ॥ आत्मा पुराणं वेदानां पृथगंगानि तानि षट् ॥ यच्च दृष्टं हि वेदेषु तद्दृष्टं स्मृतिभिः किल ॥ २२ ॥ उभाभ्यां यत्तु दृष्टं हि तत्पुराणेषु गीयते ॥ पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृतम् ॥ २३ ॥ अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीदस्मिन्कल्पांतरे मुने ॥ २४ ॥ त्रिवर्गसाधनं पुण्यं शतकोटि प्रविस्तरम् ॥ स्मृत्वा जगाद च मुनीन्प्रति देवश्चतुर्मुखः ॥ २५ ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो मुनिः ॥ २६ ॥ व्यासरूप विभुः कृत्वा संहरंस्तु युगेयुगे ॥ अष्टलक्षप्रमाणे तु द्वापरेद्वापरे सदा ॥ २७ ॥ तदष्टादशधा कृत्वा भूलोकेस्मिन्प्रभाप्यते ॥ अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ २८ ॥ तदथात्र चतुर्लक्षं संक्षेपेण निवेशितम् ॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥ नामतस्तानि वक्ष्यामि शृणु त्वमृषिसत्तम ॥ २९ ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ ३० ॥ ब्राह्मं पुराणं तत्राद्यं संहितायां विभूषितम् ॥ श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥ ३१ ॥ पाद्मं च पंचपंचाशत्सहस्राणि निगद्यते ॥ तृतीयं वैष्णवंनाम त्रयोविंशतिसंख्यया ॥ ३२ ॥ चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ॥ शिवभक्तिसमायोगाच्छैवं तच्चतुरास्यया ॥ ३३ ॥ चतुर्विंशतिसंख्यातं सहस्राणि तु शौनक ॥ चतुर्भिः पर्वभिः प्रोक्तं भविष्यं पंचमं तथा ॥ ३४ ॥ चतुर्दशसहस्राणि तथा पंचशतानि तत् ॥ मार्कण्डं नवसाहस्रं षष्ठं तत्परिकीर्तितम् ॥ ३५ ॥ आग्नेयं सप्तमं प्रोक्तं सहस्राणि तु षोडश ॥ अष्टमं नारदीयं तु प्रोक्तं वै पञ्चविंशतिः ॥ २६ ॥ नवमं भगवन्नाम आसहस्रयविभूषितम् ॥ तदष्टादशसाहस्रं प्रोच्यते ग्रन्थसंख्यया ॥ ३७ ॥ दशमं ब्रह्मवैवर्तं तावत्संख्यमिहो

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by S3 Foundation USA

च्यते ॥ लैंगमेकादशं ज्ञेयं तथैकादशसंख्यया ॥ ३८ ॥ भागद्वयं विरचितं तल्लिंगमृषिपुंगव ॥ चतुर्विंशतिसाहस्रं वाराहं द्वादशं विदुः ॥ ३९ ॥ विभक्तं सप्तभिः खण्डैः स्कांदं भाग्यवतां वर ॥ तदेकाशीतिसाहस्रं संख्यया वै निरूपितम् ॥ ४० ॥ ततस्तु वामनंनाम चतुर्दशतमं स्मृतम् ॥ संख्यया दशसाहस्रं प्रोक्तं कुलपते पुरा ॥ ४१ ॥ कौर्मं पञ्चदशं प्राहुर्भागद्वयविभूषितम् ॥ दशसप्तसहस्राणि पुरा संख्यपते कलौ ॥ ४२ ॥ मात्स्यं मत्स्येन यत्प्रोक्तं मनवे षोडशं क्रमात् ॥ तच्चतुर्दशसाहस्रं संख्यया वदतां वर ॥४३॥ गारुडं सप्तदशमं स्मृतं चैकोनविंशतिः ॥ अष्टादशं तु ब्रह्माण्डं भागद्वयविभूषितम् ॥ ४४ ॥ तच्च द्वादशसाहस्रं शतमष्टसमन्वितम् ॥ तथैवोपपुराणानि यानि चोक्तानि वेधसा ॥ ४५ ॥ इदं ब्रह्म पुराणस्य सुलभं सौख्यमुत्तमम् ॥ संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् ॥ ४६ ॥ आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ॥ सनत्कुमार नाम्ना हि तद्विख्यातं महामुने ॥ ४७ ॥ द्वितीयं नारसिंहं च पुराणं पाद्मसंज्ञितं ॥ शौकेयं हि तृतीयं तु पुराणं वैष्णवं मतम् ॥ ४८ ॥ वाह्नं स्पत्यं चतुर्थं च वायव्यं संमतं सदा ॥ दौर्वाससं पंचमं च स्मृतं भागवतं सदा ॥ ४९ ॥ भविष्ये नारदोक्तं च मार्गभिः कथितं पुरा ॥ कापिलं मानवं चैव तथैवोशनसार्गनम् ॥ ५० ॥ ब्रह्माण्डं वारुणं चाथ कालिकाद्वयमेव च ॥ माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम् ॥ ५१ ॥ पाराशरं भागवतं कौर्मं चाष्टादशं क्रमात् ॥ एतान्युपपुराणानि मयोक्तानि यथाक्रमम् ॥ ५२ ॥ पुराणसंहितामेतां यः पठेद्वा शृणोति च ॥ सोऽनंतपुण्य भागी स्यान्मृतो ब्रह्मपुरं व्रजेत ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पुराण संहितावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ नर्मदायास्तु माहात्म्यं कृष्णद्वैपायनोऽब्रवीत् ॥ तत्तेऽहं संप्रवक्ष्यामि यत्त्वया परिपृच्छितम् ॥ १ ॥ विस्तरं नर्मदायास्तु तीर्थानां मुनिसत्तम ॥ कोन्यः शक्तोस्ति वै वक्तुमृते ब्रह्माणमीश्वरम् ॥ २ ॥ एतमेव पुरा प्रश्नं पृष्टवाञ्जनमेजयः ॥ वैशंपायनसंज्ञं तु शिष्यं द्वैपायनस्य ह ॥ ३ ॥ रेवातीर्थाश्रितं पुण्यं तत्ते वक्ष्यामि शौनक ॥ पुरा पारीक्षितो राजा यज्ञदीक्षासु दीक्षितः ॥४॥ संभृते तु हविर्द्रव्ये वर्तमानेषु कर्मसु ॥ आर्त्विजेषु द्विजाग्र्येषु हूयमाने हुताशने ॥५॥ वर्तमानासु सर्वत्र तथा धर्मकथासु च ॥ श्रूयमाण तथा शब्दे जनैरुक्ते त्वहर्निशम् ॥६॥ यज्ञभूमौ कुलपते दीयतां भुज्यतामिति ॥ विविधांश्च विनोदान्वै कुर्वाणेषु विनोदिषु ॥ ७ ॥ एवंविधे वर्तमाने यज्ञे स्वर्गसदःसमे ॥ वैशंपायनमासीनं पप्रच्छ जनमेजयः ॥ ८ ॥ ॥ जनमेजय उवाच ॥ ॥ द्वैपायनप्रसादेन ज्ञानवानसि मे मतः ॥ वैशंपायन तस्मात्त्वां पृच्छामि ऋषिसन्निधौ ॥ ९ ॥ ब्रूहि मे त्वं पुरावृत्तं पितॄणां तीर्थसेवनम् ॥ चिरं नानाविधान्क्लेशान्प्राप्तास्त इति मे श्रुतम् ॥ १० ॥ कथं द्यूतजिताः पार्था मम पूर्वपितामहाः ॥ आसमुद्रां महीं विप्र भ्रमंतस्तीर्थलोभतः ॥११॥ कानं ते सहितास्तात भूमिभागान् नेकशः ॥ चेरुः कथय तत्सर्वं सर्वज्ञोऽसि मतो मम ॥ १२ ॥ ॥ वैशंपायन उवाच ॥ ॥ कथयिष्यामि भूनाथ यत्पृष्टं तु त्वयाऽनघ ॥ नमस्कृत्य विरूपाक्षं वेदव्यासं महाकविम् ॥ १३ ॥ पितामहास्तु ते पंच पांडवाः सह कृष्णया ॥ उषित्वा ब्राह्मणैः सार्द्धं काम्यके वन उत्तमे ॥ १४ ॥ प्रधानोद्दालके तत्र कश्यपोऽथ महामतिः ॥ विभांडकश्च राजेंद्र गुरुश्चैव महामुनिः ॥ १५ ॥ पुलस्त्यो लोमशश्चैव तथान्ये पुत्रपौत्रिणः ॥ स्नात्वा निःशेषतीर्थेषु गतास्ते विंध्यपर्वतम् ॥ १६ ॥ ते च तत्राश्रमं पुण्यं सर्ववृक्षैः समाकुलम् ॥ चंपकैः कर्णकारैश्च पुन्नागैर्नागकेसरैः ॥ १७ ॥ वकुलैः कोविदारैश्च दाडिमैरुपशोभितम् ॥ पुष्पितैरर्जुनैश्चैव विल्वपाटलकेतकैः ॥ १८ ॥ कदंबाम्रमधूकैश्च निंबजंबीरतिंदुकैः ॥ नालिकेरैः कपित्थैश्च खर्जूरपनसैस्तथा ॥ १९ ॥ नानाद्रुमलताकीर्णं नानावल्लीभिरावृतम् ॥ सपुष्पं फलितं कांतं वनं चैत्ररथं यथा ॥ २० ॥ जलाश्रयैस्तु विपुलैः पद्मिनीखंडमंडितम् ॥ सितोत्पलैश्च संछन्नं नीलपीतैः सितारुणैः ॥२१॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ आडीकाकवलाकाभिः सेवितं कोकिलादिभिः ॥२२॥ सिंहैर्व्याघ्रैर्वराहैश्च गजैश्चैव महोत्कटैः ॥ महिषैश्च महाकायैः कुरंगैश्चित्रकैः शशैः ॥२३॥ गंडकैश्चैव खड्गैश्च गोमायुसुरभी युतम् ॥ सारंगैर्मल्लकैश्चैव द्विपदैश्च चतुष्पदैः ॥ २४ ॥ तथान्य कोकिलाकीर्णं मनःकांतं सुशोभितम् ॥ जीवंजीवकसंघैश्च नानापक्षिसमायुतम् ॥ ॥ २५ ॥ दुःखशोकविनिर्मुक्तं सत्त्वोत्कटमनोरमम् ॥ क्षुत्तृषारहितं कांतं सर्वव्याधिविवर्जितम् ॥ २६ ॥ सिंहीस्तनं पिबंत्यत्र कुरंगाः स्नेहसंयुतम् ॥ मार्जारमूषकौ चोभावत्रलेहत उन्मुखौ ॥ २७ ॥ पंचास्याः पोतकेभाश्च भोगिनस्तु कलापिनः ॥ दृष्ट्वा तद्विपिनं रम्यं प्रविष्टाः पांडुनंदनाः ॥२८॥ मार्कंडं दृष्टवांस्तत्र तरुणादित्यसन्निभम् ॥ ऋषिभिः सेव्यमानं तु नानाशास्त्रविशारदैः ॥ २९ ॥ कुलीनैः सत्त्वसंपन्नैः शौचाचारसमन्वितैः ॥ धीमंगतैः क्षमायुक्तैस्त्रिमंध्यं जपतत्परैः ॥ ३० ॥ ऋग्यजुःसामविहितैर्मंत्रैर्होमपरायणैः केचित्पंचाग्निमध्यस्थाः केचिदेकांतसंस्थिताः ॥ ३१ ॥ ऊर्द्ध्ववाहुनिरालंवा आदित्यभ्रमणाः परे ॥ सायंप्रातर्भुजश्चान्ये एकाहारास्तथा परे ॥ ३२ ॥ द्वादशाहात्तथा चान्ये अन्ये मासार्द्धभोजनाः ॥ दर्शे दर्शे तथा चान्ये अन्ये शैवालभोजनाः ॥ ३३ ॥ पिण्याकमपरेऽभुंजन्केचित्पालाशभोजनाः ॥ अपरे नियताहारा वायुभक्ष्यांबुभोजनाः ॥ ३४ ॥ एवंभूतैस्तथा बृंदैः सेव्यते मुनिपुंगवैः ॥ ततो धर्म्मसुतः श्रीमानाश्रमं तं प्रविश्य सः ॥ ३५ ॥ दृष्ट्वा मुनिवरं शांतं ध्यायमानं परं पदम् ॥ प्रादक्षिण्येन सहसा दंडवत्पतितोऽग्रतः ॥ ३६ ॥ भक्त्यानुपतितं दृष्ट्वा चिरादादाय लोचनम् ॥ को भवानित्युवाचेदं धर्मं धीमानपृच्छत ॥ ३७ ॥ तस्य तद्वचनं श्रुत्वा दारकस्तत्समीपगः ॥ आहायं धर्मराजस्ते दर्शनार्थं समागतः ॥ ३८ ॥ तच्छ्रुत्वादारकेणोक्तं वचनं प्राह सादरः ॥ एह्येहि वत्सवत्सेति किंचित्स्थानाच्चलन्मुनिः ॥ तं तु स्नेहादुपाघ्राय आसने उपवेशयत् ॥ ३९ ॥ उपविष्टे सभायां तु पूजां कृत्वा यथाविधि ॥ वन्यैर्धान्यैः फलैर्मूलै रसैश्चैव पृथग्विधैः ॥ ४० ॥ पांडवा ब्राह्मणैः सार्द्धं यथावोग्यं प्रपूजिताः ॥ मुहूर्त्तादथ विश्रम्य धर्मपुत्रो युधिष्ठिरः ॥ ४१ ॥ पृच्छति स्म मुनिश्रेष्ठं कौतूहलसमन्वितः ॥ भगवन्सर्वलोकानां दीर्घायुस्त्वं मतो मम ॥ ४२ ॥ सप्तकल्पानशेषेण कथयस्व ममानघ ॥ कल्पक्षये पि लोकस्य स्थावरस्यैनरस्य च ॥ ४३ ॥ न विनष्टोऽसि विप्रेंद्र कथं वा केन हेतुना ॥ गङ्गाद्याः सरितः सर्वाः समुद्रांताश्च या मुने ॥ ४४ ॥ तासां मध्ये स्थिताः काः स्वित्काश्चैव प्रलयं गताः ॥ का नु पुण्यजला नित्यं का नु न क्षयमागता ॥ ४५ ॥ एतत्कथय मे तात प्रसन्नेनांतरात्मना ॥ श्रोतुमिच्छाम्यशेषेण ऋषिभिः सह वांधवैः ॥ ४६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ धर्मपुत्र युधिष्ठिर ॥ कथयामि यथा न्यायं यत्पृच्छसि ममानघ ॥ ४७ ॥ सर्वपापहरं पुण्यं पुराणं रुद्रभाषितम् ॥ यः शृणोति नरो भक्त्या तस्य पुण्यफलं शृणु ॥ ४८ ॥ अश्वमेध सहस्रेण वाजपेयशतेन च ॥ तत्फलं समवाप्नोति राजन्नास्त्यत्र संशयः ॥ ४९ ॥ ब्रह्मघ्नश्च सुरापी च स्तेयी गोघ्नश्च यो नरः ॥ मुच्यंते सर्वपापेभ्यो रुद्रस्य वचनं यथा ॥ ५० ॥ गंगा तु सरितां श्रेष्ठा तथा चैव सरस्वती ॥ कावेरी देविका चैव सिंधुः सालकुटी तथा ॥५१॥ सरयूः शतरुद्रा च मही चर्मिलया सह ॥ गोदावरी तथा पुण्या तथैव यमुना नदी ॥ ५२ ॥ पयोष्णी च शतद्रुश्च तथा धर्मनदी शुभा ॥ एताश्चान्याश्च सरितः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वपापहराः स्मृताः ॥ ५३ ॥ किं तु ते कारणं तात वक्ष्यामि नृपसत्तम ॥ समुद्राः सरितः सर्वाः कल्पेकल्पे क्षयं गताः ॥५४॥ सप्तकल्पक्षये क्षीणे न मृता तेन नर्मदा ॥ नर्मदैकैव राजेंद्र परं निष्टित्सरिद्वरा ॥ ५५ ॥ तोयपूर्णा महाभाग मुनिसंघैरभिष्टुता ॥ गंगाद्याः सरितश्चान्याः कल्पेकल्पे क्षयं गताः ॥ ५६ ॥ एषा देवी पुरा दृष्टा तेन वक्ष्यामि तेऽनघ ॥ ५७ ॥ आश्चर्यभूता राजेंद्र त्रिषु लोकेषु विश्रुता ॥ ५८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखंडे रेवामाहात्म्यवर्णनन्नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सप्तकल्पक्षया घोरास्त्वया दृष्टा महामुने ॥ न चापीहास्ति भगवन्दीर्घायुर्हि कश्चन ॥ १ ॥ त्वया ह्येकार्णवे सुप्तः पद्मनाभः सुरारिहा ॥ दृष्टः सहस्रचरणः सहस्रनयनोदरः ॥ २ ॥ त्वं किलानुग्रहात्तस्य दह्यमाने चराचरे ॥ न क्षयं समनुप्राप्तो वरदानान्महात्मनः ॥ ॥ ३ ॥ किं त्वाश्चर्यभूतं हि दृष्टं च भ्रमताऽनघ ॥ एतदाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ ४ ॥ संप्राप्ते च महाघोरे युगस्यांते महाक्षये ॥ अनावृष्टिहते लोके पुरा वर्षशताधिके ॥ ५ ॥ ओषधीनां क्षये घोरे देवदानववर्जिते ॥ निर्वीर्ये निर्वपत्काले कलिना दूषिते भृशम् ॥ ६ ॥ सरित्सरस्तडागेषु पल्वलोपवनेषु च ॥ संशुष्केषु तदा ब्रह्मन्निराकारे युगक्षये ॥ ७ ॥ जनं प्राप्ते महर्लोके ब्रह्म क्षत्रविशादयः ॥ ऋषयश्च महात्मानो दिव्यतेजःसमन्विताः ॥ ८ ॥ स्थितानि कानि भूतानि गतान्येव महामुने ॥ एतत्सर्वं महाभाग कथयस्व पृथक्पृथक् ॥ ९ ॥ भूतानि कानि विप्रेंद्र कथं सिद्धिमवाप्नुयात् ॥ ब्रह्मविष्ण्विन्द्ररुद्राणां काले प्राप्ते सुदारुणे ॥ १० ॥ एवमुक्तस्ततः सोऽथ धर्मराजेन धीमता ॥ मार्कंडः प्रत्युवाचेदमृषिसंघैः समावृतः ॥ ११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृण्वंतु ऋषयः सर्वे त्वया सह नरेश्वर ॥ महत्पुराणं पूर्वोक्तं शंभुना वायुदैवते ॥ १२ ॥ वायोः सकाशात्स्कंदेन श्रुतमेतत्पुरातनम् ॥ वशिष्ठः श्रुतवांस्तस्मात्पराशरस्ततः परम् ॥ १३ ॥ तस्माच्च जातूकर्ण्येन तस्माच्चैव महर्षिभिः ॥ एवं परंपराप्राप्तं शतसंख्यैर्द्विजोत्तमैः ॥ १४ ॥ संहिता शतमाद्यासी पुरोक्ता शंभुना किल ॥ आलोड्य सर्वशास्त्राणि वेदार्थं तत्त्वतः पुरा ॥ १५ ॥ युगरूपेण सा पश्चाच्चतुर्धा विनियोजिता ॥ मंदप्रज्ञानुसारेण नराणां तु महर्षिभिः ॥ १६ ॥ आराध्य पशुभर्तारं मया पूर्वं महेश्वरम् ॥ पुराणं श्रुतमेतद्धि तत्ते वक्ष्याम्यशेषतः ॥ १७ ॥ यच्छ्रुत्वा मुच्यते जंतुः सर्वपापैर्नरेश्वर ॥ मानसैः कर्मजैश्चैव सप्तजन्म सुसंचितैः ॥ १८ ॥ सप्तकल्पक्षया घोरा मया दृष्टाः पुनःपुनः ॥ प्रसादाद्देवदेवस्य विष्णोश्च परमेष्ठिनः ॥ १९ ॥ द्वादशादित्यनिर्दग्धे जगत्यै कार्णवीकृते ॥ श्रांतोऽहं विभ्रमंस्तत्र तरन्बाहुभिरर्णवम् ॥ २० ॥ अथाहं सलिले राजन्नादित्यसमरूपिणम् ॥ पुरा पुरुषमद्राक्षमनादिनिधनं प्रभुम्॥ ॥ २१ ॥ शृंगं चैवाद्विराजस्य भासयंतं दिशो दश ॥ द्वितीयोन्यो मनुर्दृष्टः पुत्रपौत्रसमन्वितः ॥ २२ ॥ अगाधे भ्रमते सोपि तमोभूते महार्णवे ॥ अविश्रमन्मुहूर्त्तं तु चक्रारूढ इव भ्रमन् ॥ २३ ॥ अथाहं भयादुद्विग्नस्तरन्बाहुभिरर्णवम् ॥ तत्रस्थोहं महामत्स्यमपश्यं मदसंयुतम् ॥ २४ ॥ ततो ऽब्रवीत्स मां दृष्ट्वा एह्येहीति च भारत ॥ परं प्रधानः सर्वेषां मत्स्यरूपो महेश्वरः ॥ २५ ॥ ततोऽहं त्वरया गत्वा तन्मुखे मनुजेश्वर ॥ सुश्रांतो विगतज्ञानः परं निर्वेदमागतः ॥ २६ ॥ ततोऽद्राक्षं समुद्रांते महदावर्त्तसंकुलाम् ॥ उद्यत्तरंगसलिलां फेनपुंजाट्टहासिनीम् ॥ २७ ॥ नदीं कामगमां पुण्यां झषमीनसमाकुलाम् ॥ नद्यास्तस्यास्तु मध्यस्था प्रमदा कामरूपिणी ॥ २८ ॥ नीलोत्पलदलश्यामा महत्यश्रोभवाहिनी ॥ दिव्यहाटकचित्रांगी कनकोज्वलशोभिता ॥ २९ ॥ द्वाभ्यां संगृह्य जानुभ्यां महत्पोतं व्यवस्थिता ॥ तां मनुः प्रत्युवाचेदं का त्वं दिव्यवरांगने ॥ ३० ॥ तिष्ठसे केन कार्येण त्वमत्र सुरसुंदरि ॥ सुरासुरगणे नष्टे भ्रमसे लीलयार्णवे ॥३१॥ सरितः सागराः शैलाः क्षयं प्राप्ता ह्यनेकशः ॥ त्वमेका तु कथं साध्वि तिष्ठसे कारणं महत् ॥ श्रोतुमिच्छाम्यहं देवि कथयस्व ह्यशेषतः ॥ ३२ ॥ ' ॥ अवलोवाच ॥ ॥ ईश्वरांगसमुद्भूता ह्यमृतानाम विश्रुता ॥ सरित्पापहरा पुण्या मामाश्रित्य भयं कुतः ॥ ३३ ॥ साहं पोतमिमं तुभ्यं गृहीत्वा ह्यागता द्विज ॥ न ह्यस्य पोतस्य क्षयो यत्र तिष्ठति शंकरः ॥३४॥ तस्यास्तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः ॥ मनुना सह राजेंद्र पोतारूढो ह्यहं तदा ॥ ३५ ॥ कृतांजलिपुटो भूत्वा प्रणम्य शिरसा विभुम् ॥ व्यापिनं परमेशानमस्तोपमभयप्रदम् ॥ ३६ ॥ सद्योजाताय देवाय वामदेवाय वै नमः ॥ भवेभवे नमस्तुभ्यं भक्तिगम्याय ते नमः ॥ ॥ ३७ ॥ भूर्भुवाय नमस्तुभ्यं रामज्येष्ठाय वै नमः ॥ नमस्ते भद्रकालाय कलिरूपाय वै नमः ॥ ३८ ॥ अचिंत्याव्यक्तरूपाय महादेवाय धामने ॥ विद्महे देवदेवाय तन्नो रुद्र नमोनमः ॥ ३९ ॥ जगत्सृष्टिविनाशानां कारणाय नमोनमः ॥ एवं स्तुतो महादेवः पूर्वं सृष्ट्वा मयाऽनघ ॥ ४० ॥ प्रसन्नोमांऽवदत्पश्चाद्वरं वरय सुव्रत ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये मार्कण्डेयधर्मराजसंवादे कल्पक्षये मार्कण्डेयकृतपोतार्धारोहणवृत्तान्तवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततोऽर्णवात्समुत्तीर्य त्रिकूटशिखरे स्थितम् ॥ महाकनकवर्णाभे नानावर्णशिलाचिते ॥ १ ॥ महाशृंगे समासीनं रुद्रकोटिसमन्वितम् ॥ महादेवं महात्मानमीशानमजमव्ययम् ॥ २ ॥ सर्वभूतमयं तात मनुना सह सुव्रत ॥ भूयो ववंद चरणौ सर्व देवनमस्कृतौ ॥ ३ ॥ तत्काले युगसाहस्रं सह रुद्रेण मानद ॥ तस्मिन्नेकार्णवे घोरे स्थितोऽहं कुरुनंदन ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ एतच्छ्रुत्वा तु मे तात परं कौतूहलं हृदि ॥ जातं तत्कथयस्वेति शृण्वतः सह बांधवैः ॥ ५ ॥ का सा पद्मपलाशाक्षी तमोभूते महार्णवे ॥ योगिवद्भ्रमते नित्यं रुद्रजां स्वां च यात्रवीत् ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतमेव मया प्रश्नं पुरा पृष्टो मनुः स्वयम् ॥ तदेव तेऽद्य वक्ष्यामि अबलायाः समुद्भवम् ॥ ७ ॥ व्यतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः ॥ ततः प्रभाते विमले सृज्यमानेषु जन्तुषु ॥ ८ ॥ मनुं प्रणम्य शिरसा पृच्छाम्येतद्युधिष्ठिर ॥ केयं पद्मपलाशाक्षी श्यामा चंद्रनिभानना ॥ ९ ॥ एकार्णवे भ्रमत्येका रुद्रजाऽस्मीति वादिनी ॥ सावित्री वेदमाता च ह्यथवा सा सरस्वती ॥ १० ॥ मंदाकिनी सरिच्छ्रेष्ठा लक्ष्मीर्वा किमथो उमा ॥ कालरात्रिर्भवेत्साक्षात्प्रकृतिर्वा सुखोचिता ॥ ११ ॥ एतदाचक्ष्व भगवन्का सा ह्यमृतसंभवा ॥ चरत्येकार्णवे घोरे प्रनष्टोडुगणाक्षमे ॥ १२ ॥ ॥ ॥ मनुरुवाच ॥ ॥ शृणु वत्स यथान्यायमस्या वक्ष्यामि संभवम् ॥ यया रुद्रसमुद्भूता या चेयं वरवर्णिनी ॥ १३ ॥ पुरा शिवः शांततनुश्चचार विपुलं तपः ॥ हिताथं सर्वलोकानामुमया सह शंकरः ॥ १४ ॥ ऋक्षशैलं समारुह्य तपस्तेपे सुदारुणम् ॥ अदृश्यः सर्वभूतानां सर्वभूतत्रिकाको वशी ॥ १५ ॥ तपतस्तस्य देवस्य स्वेदः समभवत्किल ॥ तं गिरिं प्लावयामास स स्वेदो रुद्रसंभवः ॥ १६ ॥ तस्मादासीत्समुद्भूता महापुण्या सरिद्वरा ॥ या सा त्वयार्णवे दृष्टा पद्मपत्रायतेक्षणा ॥ १७ ॥ स्त्रीरूपं समवस्थाय रुद्रमाराधयत्पुरा ॥ आद्ये कृतयुगे तस्मिन्समानाम युतं नृप ॥ १८ ॥ ततस्तुष्टो महादेव उमया सह शंकरः ॥ ब्रूहि त्वं तु महाभागे यत्ते मनसि वर्त्तते ॥ १९ ॥ ॥ सरिदुवाच ॥ ॥ प्रलये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समनुप्राप्ते नष्टे स्थावरजंगमे ॥ प्रसादात्तव देवेश अक्षयाहं भवे प्रभो ॥ २० ॥ सरित्सु सागरेष्वेव पर्वतेषु क्षयिष्वपि ॥ तव प्रसादादेवेश पुण्या क्षय्या भवे प्रभो ॥ २१ ॥ पापोपपातकैर्युक्ता महापातकिनोऽपि ये ॥ मुच्यन्ते सर्वपापेभ्यो भक्त्या स्नात्वा तु शंकर ॥ २२ ॥ उत्तरे जाह्नवी देशे महापातकनाशिनी ॥ भवामि दक्षिणे मार्गे यद्येवं सुरपूजिता ॥ २३ ॥ स्वर्गादागम्य गंगेति यथा ख्याता क्षितौ विभो ॥ तथा दक्षिणगंगेति भवेयं त्रिदशेश्वर ॥ २४ ॥ पृथिव्यां सर्वतीर्थेषु स्नात्वा यल्लभते फलम् ॥ तत्फलं लभते मर्त्यो भक्त्या स्नात्वा महेश्वर ॥ २५ ॥ ब्रह्महत्यादिकं पापं यदास्ते संचितं क्वचित् ॥ मासमात्रेण तद्देव क्षयं यात्यवगाहनात् ॥ २६ ॥ यत्फलं सर्व्वदेवेषु सर्वयज्ञेषु शंकर ॥ अवगाहेन तत्सर्वं भवत्विति मतिर्मम ॥ २७ ॥ सर्वदानोपवासेषु सर्वतीर्थावगाहने ॥ तत्फलं मम तोयेन जायतामिति शंकर ॥ २८ ॥ मम तीरे नरा ये तु अर्चयंति महेश्वरम् ॥ ते गतास्तव लोकं स्थुरेतदेव भवेच्छिव ॥ २९ ॥ मम कूले महेशान उमया सह दैवतैः ॥ वस नित्यं जगन्नाथ एष एव वरो मम ॥ ३० ॥ सुकर्मा वा विकर्मा वा शांतो दांतो जितेंद्रियः ॥ मृतो जंतुर्मम जलं गच्छतादमरावतीम् ॥ ३१ ॥ त्रिषु लोकेषु विख्याता महापातकनाशिनी ॥ भवामि देवदेवेश प्रसन्नो यदि मन्यसे ॥ ३२ ॥ एतांश्चान्यान्वरान्दिव्यान्प्रार्थितो नृपसत्तम ॥ नर्म्मदया ततः प्राह प्रसन्नो वृषवाहनः ॥ ३३ ॥ ॥ श्रीमहेश उवाच ॥ ॥ एवं भवतु कल्याणि यत्त्वयोक्तमनिन्दिते ॥ नान्या वरार्हा लोकेषु मुक्त्वा त्वां कमलेक्षणे ॥ ३४ ॥ यदेव मम देहात्त्वं समुद्भूता वरानने ॥ तदेव सर्वपापानां मोचिनी त्वं न संशयः ॥ ३५ ॥ कल्पक्षयकरे काले काले घोरे विशेषतः ॥ उत्तरं कूलमाश्रित्य निवसंति च ये नगाः ॥ ३६ ॥ अपि कीटपतंगाश्च वृक्षगुल्मलतादयः ॥ आदेहपतनादेवि तेऽपि यास्यन्ति सद्गतिम् ॥ ३७ ॥ दक्षिणं कूलमाश्रित्य ये द्विजा धर्मवत्सलाः ॥ आ मृत्योर्निवसिष्यन्ति तेऽगताः पितृमंदिरे ॥ ३८ ॥ अहं हि तव वाक्येन कस्मिंश्चित्कारणांतरे ॥ त्वत्तीरे निवसिष्यामि सदैव द्रुमया समम् ॥ ३९ ॥ एवं देवि महादेवि एवमेव न संशयः ॥ ब्रह्मेन्द्रचन्द्ररुद्राद्यैः साध्यैश्च सह विष्णुना ॥ ४० ॥ उत्तरे देवि ते कूले वसिष्यन्ति ममाज्ञया ॥ दक्षिणे पितृभिः सार्द्धं तथान्ये सुरसुन्दरि ॥ ४१ ॥ वसिष्यंति प्रया सार्द्धमेष ते वर उत्तमः ॥ गच्छगच्छ महाभागे मर्त्यान्पापाद्विमोचय ॥ ४२ ॥ सहिता ऋषिसंघैश्च तथा सिद्धसुरासुरैः ॥ एवमुक्ता महादेव उमया सहितो विभुः ॥ ४३ ॥ वंद्यमानोऽथ मनुना मया चादर्शनं गतः ॥ तेन चैषा महापुण्या महापातकनाशिनी ॥ ४४ ॥ कथिता पृच्छयते या ते मा ते भवतु विस्मयः ॥ एषा गंगा महापुण्या त्रिषु लोकेषु विश्रुता ॥ ४५ ॥ दशभिः पंचभिः स्रोतैः प्लावयन्ती दिशो दश ॥ शोणो महानदश्चैव नर्मदा सुरसा कृता ॥ ४६ ॥ मंदाकिनी दशार्णा च चित्रकूटा तथैव च ॥ तमसा विदशा चैव करभा यमुना तथा ॥ ४७ ॥ चित्रोत्पला विपाशा च रंजना वालुवाहिनी ॥ ऋक्षपादप्रसूतास्ताः सर्वा वै रुद्रसंभवाः ॥ ४८ ॥ सर्वपापहराः पुण्याः सर्वमंगलदाः शिवाः ॥ इत्येतैर्नामभिर्दिव्यैः स्तूयते वेदपारगैः ॥ ४९ ॥ पुराणज्ञैर्महाभागैराख्यातैः सोमपैस्तथा ॥ इत्येतत्सर्वमाख्यातं महाभाग्यं नरोत्तम ॥ ५० ॥ मनुनोक्तं पुरा मह्यममृतायाः समुद्भवम् ॥ पुण्यं पवित्रमतुलं रुद्रोद्गीतमिदं शुभम् ॥ ५१ ॥ ये नराः कीर्त्तयिष्यंति भक्त्या शृण्वंति येऽपि च ॥ प्रातरुत्थाय नामानि दश पंच च भारत ॥ ५२ ॥ ते नराः सकलं पुण्यं लभिष्यंत्यवगाहजम् ॥ विमानेनार्कवर्णेन घंटाशतनिनादिना ॥ ५३ ॥ त्यक्त्वा मानुष्यकं भावं यास्यंति परमां गतिम् ॥ ५४ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदापञ्चदशनामवर्णननाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यमेतदखिलं कथितं भो द्विजोत्तम ॥ विस्मयं परमापन्ना ऋषिसंघा मया सह ॥ १ ॥ अहो भगवती पुण्या नर्मदेयमयोनिजा ॥ रुद्रदेहाद्विनिष्कांता महापापक्षयंकरी ॥ २ ॥ सप्तकल्पक्षये प्राप्ते त्वयं मह सुव्रत ॥ न मृता च महाभागा किमतः पुण्यमुत्तमम् ॥ ३ ॥ के ते कल्पाः समुद्दिष्टाः सप्त कल्पक्षयंकराः ॥ न मृता चेदियं देवी त्वं चैव ऋषिपुंगव ॥ ४ ॥ अपक्षिगणसंघाते जगत्यकार्णवीकृते ॥ कीदृग्रूपः समभवन्महादेवो युगक्षये ॥ ५ ॥ कथं संहरते विश्वं कथं चाऽऽस्ते महार्णवे ॥ कथं च सृजते विश्वं कथं धारयते प्रजाः ॥ ६ ॥ कीदृग्रूपा भवेद्देवी सरिदकार्णवीकृते ॥ किमर्थं नर्मदा प्रोक्ता रेवेति च कथं स्मृता ॥ ७ ॥ अंजनेति किमर्थं वा किमर्थं सुरसेति च ॥ मंदाकिनी किमर्थं च शोणश्चेति कथं भवेत् ॥ ८ ॥ त्रिकूटेति किमर्थं वा किमर्थं वालुवाहिनी ॥ कोटिकोट्यो हि तीर्थानां प्रविष्टा या महार्णवम् ॥ ९ ॥ कियत्यः सरितां कोट्यो नर्मदां समुपासते ॥ यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैव च ॥ १० ॥ विभक्तेयं किमर्थं च श्रूयते मुनिसत्तम ॥ वैष्णवीति पुराणज्ञैः किमर्थमिह चोच्यते ॥ ११ ॥ केषु स्थानेषु तीर्थेषु पूजनीया सरिद्वरा ॥ तीर्थानि च पृथग्ब्रूहि यत्र संनिहितो हरः ॥ १२ ॥ यत्प्रमाणा च सा देवी या रुद्रेण विनिर्मिता ॥ कीदृशानि च कर्माणि रुद्रेण कथितानि ते ॥ १३ ॥ कथं म्लेच्छसमाकीर्णां देशोऽयं द्विजसत्तम ॥ एतदाचक्ष्व मां ब्रह्मन्मार्कण्डेय महामते ॥ १४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृण्वंतु ऋषयः सर्वे त्वं च तात युधिष्ठिर ॥ पुराणं नर्मदायां तु कथितं च त्रिशूलिना ॥ १५ ॥ वायोः सकाशाच्च मया तेनापि च महेश्वरात् ॥ अशक्यत्वान्मनुष्याणां संक्षिप्तमृषिभिः पुरा ॥ १६ ॥ मांधूरं प्रथमं तात कौम्यं च तदनंतरम् ॥ पुरं तथा कौशिकं च मात्स्यं द्विरदमेव च ॥ १७ ॥ वाराहं यन्मया दृष्टं वैष्णवं चाष्टमं परम् ॥ न्यग्रोधाख्यमतश्चासीदाकांक्षं पुनरुत्तमम् ॥ १८ ॥ पद्मं च तामसं चैव संवर्त्तोद्वर्त्तमेव च ॥ महाप्रलयमित्याहुः पुराणे वेदवादकाः ॥ १९ ॥ एतत्संक्षेपतः सर्वं संक्षिप्तं तैर्महात्मभिः ॥ विभक्तं च चतुर्भागैर्ब्रह्माद्यैश्च महर्षिभिः ॥ २० ॥ तदहं संप्रवक्ष्यामि पुराणार्थविशारद ॥ सप्त कल्पा महाघोरा यैर्न्यं न मृता सरित् ॥ २१ ॥ आजंगमं तमोभूतमप्रज्ञातमलक्षणम् ॥ नष्टचंद्रार्ककिरणमासीद्भूतविवर्जितम् ॥ २२ ॥ तमसांऽते महानात्मा पुरुषः स जगद्गुरुः ॥ चचार तस्मिन्नेकाकी व्यक्ताव्यक्तः सनातनः ॥ २३ ॥ स चोंकारमयोऽतीतो गायत्रीमसृजद्विजः ॥ स तया सार्द्धमीशानश्चिक्रीड पुरुषो विराट् ॥ २४ ॥ स्वदेहादसृजद्विश्वं पंचभूतात्मसंज्ञितम् ॥ क्रीडन्सृजद्विराट्संज्ञः सवीजं च हिरण्मयम् ॥ तच्चांडमभवद्दिव्यं द्वादशादित्यसन्निभम् ॥ २६ ॥ तद्भित्त्वा पुरुषो जज्ञे चतुर्वक्त्रः पितामहः ॥ सोऽसृजद्विश्वमेवं तु सदेवासुरमानुषम् ॥ २७ ॥ सतिर्यक्पशुपक्षीकं स्वेदांडजजरायुजम् ॥ एतदंडं पुराणेषु प्रथमं परिकीर्तितम् ॥ २८ ॥ पूर्वकल्पे नृपश्रेष्ठ क्रीडंत्या परमेष्ठिना ॥ उमया सह रुद्रस्य क्रीडतश्चार्णवीकृतः ॥ २९ ॥ हर्षाज्जज्ञे शुभा कन्या उमायाः स्वेदसंभवा ॥ शर्वस्योरःस्थलाज्जज्ञे उमा कुचविमर्दनात् ॥ ३० ॥ स्वेदाद्विजज्ञे महती कन्या राजीवलोचना ॥ द्वितीयः संभवो यस्या रुद्रदेहाद्युधिष्ठिर ॥ ३१ ॥ सा परिभ्रमते लोकान्सदेवासुरमानवान् ॥ त्रैलोक्योन्मादजननी रूपेणाऽप्रतिमा तदा ॥ ३२ ॥ तां दृष्ट्वा देवदैत्येंद्रा मोहिता लभते कथम् ॥ मृगयंति स्म तां कन्यामितश्चेतश्च भारत ॥ ३३ ॥ हावभावविलासैश्च मोहयत्यखिलं जगत् ॥ भ्रमते दिव्यरूपा सा विद्युत्सौदामिनी यथा ॥ ३४ ॥ मेघमध्ये स्थिता भामिः सर्वयोषिदनुत्तमा ॥ ततो रुद्रं सुराः सर्वे दैत्याश्च सह दानवैः ॥ ३५ ॥ वरयंति स्म तां कन्यां कामनाऽऽकुलिता भृशम् ॥ ततोऽब्रवीन्महादेवो देवदानवयोर्द्वयोः ॥ ३६ ॥ बलेन तेजसा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

चैव ह्यधिको यो भविष्यति ॥ स इमां प्राप्स्यते कन्यां नान्यथा वै सुरोत्तमाः ॥ ३७ ॥ ततो देवासुराः सर्वे कन्यां वै समुपागमन् ॥ अहमेनां ग्रहीष्यामि अहमेनामिति ब्रुवन् ॥ ३८ ॥ पश्यतामेव सर्वेषां सा कन्यांऽतरधीयत ॥ पुनस्तां ददृशुः सर्वे योजनांतरधिष्ठिताम् ॥ ३९ ॥ जग्मुस्ते त्वरिताः सर्वे यत्र सा समदृश्यत ॥ त्रिभिश्चतुर्भिश्च तथा योजनैर्दशभिः पुनः ॥ ४० ॥ धिष्ठितां समपश्यंस्ते सर्वे मातंगगामिनीम् ॥ योजनानां शतैर्भूयः सहस्रैश्चाप्यधिष्ठिताम् ॥ ४१ ॥ तथा शतसहस्रेण लघुत्वात्समदृश्यत ॥ अग्रतः पृष्ठतश्चैव दिशासु विदिशासु च ॥ ॥ ४२ ॥ तां पश्यंति वरारोहामेकधा बहुधा पुनः ॥ दिव्यवर्षसहस्रं तु भ्रामितास्ते तया पुरा ॥ ४३ ॥ न चावाप्ता तु सा कन्या महादेवांगसंभवा ॥ सहोमया ततो देवो जहासोच्चैः पुनःपुनः ॥ ४४ ॥ गणास्तालकसंपातैर्नृत्यंति च मुदान्विताः ॥ अकस्मादृश्यते कन्या शंकरस्य समीपगा ॥ ४५ ॥ तां दृष्ट्वा विस्मयापन्ना देवा यांति पराङ्मुखाः ॥ तस्याश्चक्रे ततो नाम स्वयमेव पिनाकधृक् ॥ ४६ ॥ नर्म चैम्यो ददे यस्मात्तत्कृतैश्चेष्टितैः पृथक् ॥ भविष्यसि वरारोहे सरिच्छ्रेष्ठा तु नर्मदा ॥ ४७ ॥ स्वरूपमास्थितो देवः प्राप हास्यं यतो भुवि ॥ नर्मदा तेन चोक्तेयं सुशीतलजला शिवा ॥ ४८ ॥ सप्तकल्पक्षये जाते यदुक्तं शंभुना पुरा ॥ न मृता तेन राजेंद्र नर्मदा ख्यातिमागता ॥ ४९ ॥ ततस्तामददात्कन्यां शीलवतीं सुशोभनाम् ॥ महार्णवाय देवेशः सर्वभूतपतिः प्रभुः ॥ ५० ॥ ततः सा ऋक्षशैलेंद्रात्फेनपुंजाद्विनिर्गता ॥ विवेश नर्मदा देवी समुद्रं सरितां पतिम् ॥ ५१ ॥ एवं ब्राह्मे पुरा कल्पे समुद्भूतेयमीश्वरात् ॥ मात्स्ये कल्पे मया दृष्टा समाख्याता मया शृणु ॥ ५२ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्यनर्मदानामनिरुक्तिवर्णननाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुनर्युगांते संप्राप्ते तृतीये नृपसत्तम ॥ द्वादशार्कवपुर्भूत्वा भगवान्नीललोहितः ॥ १ ॥ सप्तद्वीप समुद्रांतां सशैलवनकाननाम् ॥ निर्दग्धां तु महीं कृत्स्नां कालो भूत्वा महेश्वरः ॥ २ ॥ ततो महाघनो भूत्वा प्लावयामास वारिणा ॥ कृष्णं कृष्ण वपुस्त्वेनां विद्युच्चंद्रायुधांकिताम् ॥ ३ ॥ प्लावयित्वा जगत्सर्व्वं तस्मिन्नेकार्णवीकृते ॥ सुप्वाप विमले तोये जगत्संक्षिप्य मायया ॥ ४ ॥ ततोऽहं भ्रममास्तु तमोभूते महार्णवे ॥ दिव्यं वर्षसहस्रं तु वायुभूते महेश्वरे ॥ ५ ॥ ओंकृत्वा देवदेवेशं येनेदं गहनीकृतम् ॥ ध्यायमानस्ततो देवं राजेंद्र विमले जले ॥ ६ ॥ तस्मिन्महार्णवे घोरे नष्टे स्थावरजंगमे ॥ मयूरः स्वर्णपद्माढ्यमपश्यंसहसा जले ॥ विचित्रचन्द्रकोपेतं नीलकंठं सुलोचनम् ॥ ७ ॥

ततो मयूरः स महार्णवांते विक्षोभयित्वा हि महारवेण ॥ चचार देवस्त्रिशिखी शिखंडी त्रैलोक्यगोप्ता स महानुभावः ॥ ८ ॥ शिवश्च रौद्रेण मयूररूपिणा विक्षोभ्यमाणे सलिलेऽपि तस्मिन् ॥ सह भ्रमंतीं च महार्णवांते सारिन्महौघां सुमहान्ददर्श ॥ ९ ॥ स तां महादेवमयूररूपो दृष्ट्वा भ्रमंतीं सहसोर्मिजालैः ॥ का त्वं शुभे शाश्वतदेहभूता क्षयं न यातासि महाक्षयांते ॥ १० ॥ देवासुरगणे नष्टे सरित्सरमहार्णवे ॥ का त्वं भ्रमसि पद्माक्षि क्व गतासि च न क्षयम् ॥ ११ ॥ ॥ नर्मदोवाच ॥ ॥ तव प्रसादाद्देवेश मृत्युर्भ्रम न विद्यते ॥ सृज देव पुनर्विश्वं शर्वरी क्षयमागता ॥ १२ ॥ एवमुक्तो महादेवो व्यधुनोत्पक्षपंजरम् ॥ तावत्पंजरमध्यांते तस्य पक्षाद्विनिःसृताः ॥ १३ ॥ तावंतो देवदैत्येंद्राः पक्षाभ्यां तस्य जज्ञिरे ॥ तेषां मध्ये पुनः सा तु नर्मदा भ्रमते सरित् ॥ १४ ॥ ततश्चान्यो महाशैलो दृश्यते भरतर्षभ ॥ त्रिभिः कूटैः सुविस्तीर्णैः शृंगवानिव गोवृषः ॥ १५ ॥ त्रिकूटस्तु इति ख्यातः सर्वरत्नैर्विभूषितः ॥ ततस्तस्माच्त्रिकूटाच्च प्लावयंती महीं ययौ ॥ १६ ॥ त्रिकूटी तेन विख्याता पितॄणां त्रायणी परा ॥ द्वितीयाच्च ततो गङ्गा विस्तीर्णा धरणीतले ॥ १७ ॥ तृतीयं च ततः शृंगं सप्तधा खंडशो गतम् ॥ जंबूद्वीपे तु संजाताः सप्त ते कुलपर्वताः ॥ १८ ॥ चन्द्रनक्षत्रसहिता ग्रहग्रामनदीनदाः ॥ अंडजं स्वेदजं जातमुद्भिज्जं च जरायुजम् ॥ १९ ॥ एवं जगदिदं सर्व्वं मयूरादभवत्पुरा ॥ समस्तं नरशार्दूल महादेवसमुद्भवम् ॥ २० ॥ ततो नदीः समुद्रांश्च संविभज्य पृथक्पृथक् ॥ नर्मदामाह देवेशो गच्छ त्वं दक्षिणां दिशम् ॥ २१ ॥ एवं सा दक्षिणा गंगा महापातकनाशिनी ॥ उत्तरे जाह्नवी देशे पुण्या त्वं दक्षिणे शुभा ॥ २२ ॥ यथा गंगा महापुण्या मम मस्तकसंभवा ॥ तद्विशिष्टा महाभागे त्वं चेदेति न संशयः ॥ २३ ॥ त्वया सह भविष्यामि एकेनाशेन सुव्रते ॥ महापातकयुक्तानामौषधं त्वं भविष्यसि ॥ २४ ॥ एवमुक्ता तु देवेन महापातकनाशिनी ॥ दक्षिणं दिग्विभागं तु सा जगामाऽऽशु विक्रमा ॥ २५ ॥ ऋक्षशैलेंद्रमासाद्य चंद्रमौलेरनुग्रहात् ॥ वार्योघैः प्रस्थिता यस्मान्महादेवप्रणोदिता ॥ २६ ॥ महता चाऽपि वेगेन यस्मादेषा समुच्छ्रिता ॥ महती तेन सा प्रोक्ता महादेवान्महीपते ॥ २७ ॥ तपतस्तस्य देवस्य शूलाग्राद्विदवोऽपतन् ॥ तेनैषा शोणसंज्ञा तु दश सप्त च ताः स्मृताः ॥ २८ ॥ सर्वेषां नर्मदा पुण्या रुद्रदेहाद्विनिःसृता ॥ सर्वाभ्यश्च सरिद्भ्यश्च वरदानान्महात्मनः ॥ २९ ॥ शंकराऽनुग्रहादेवी महापातकनाशिनी ॥ यस्मान्महार्णवे घोरे दृश्यते महती च सा ॥ ३० ॥ सुव्यक्तांगी महाकाया महती तेन सा स्मृता ॥ तस्माद्विशोभ्यमाणा हि दिग्गजैरंबुदोपमैः ॥ ३१ ॥ कलुषत्वं नयत्येव रसेन सुरसा तथा ॥ कृपां करोति सा यस्माल्लोकानामभयप्रदा ॥ ३२ ॥ संसारार्णवमग्नानां तेन चैषा कृपा स्मृता ॥ पुरा कृतयुगे पुण्ये दिव्यमन्दारभूषिता ॥ ३३ ॥ कल्पवृक्षसमाकीर्णा रोहीतकसमाकुला ॥ वहत्येषा च मंदेन तेन मंदाकिनी स्मृता ॥ ३४ ॥ भित्त्वा महार्णवं क्षिप्रं यस्माल्लोकमिहागता ॥ पूज्या सुरैश्च सिद्धैश्च तस्मादेषा महार्णवा ॥ ३५ ॥ विचित्रोत्पलसंघातैर्ऋक्षद्विपसमाकुला ॥ ३६ ॥ भित्त्वा शैलं च विपुलं प्रयात्येवं महार्णवम् ॥ भ्रामयंती दिशः सर्वा रवेण महता पुरा ॥ ३७ ॥ प्लावयन्ती विराजंती तेन रेवा इति स्मृता ॥ भार्यापुत्रसुदुःखाढ्यान्नराञ्छापैः समावृतान् ॥ ३८ ॥ विपापान्कुरुते यस्माद्विपापा तेन सा स्मृता ॥ विण्मूत्रनिचयां घोरां पांशु शोणितकर्दमाम् ॥ ३९ ॥ पाशैर्नित्यं तु संबाधां यस्मान्मोचयते भृशम् ॥ विपाशेति च सा प्रोक्ता संसारार्णवतारिणी ॥ ४० ॥ नर्मदा विमलांभा च विमलेंदुशुभानना ॥ तमीभूते महाघोरे यस्माद्देषा महाप्रभा ॥ ४१ ॥ विमला तेन सा प्रोक्ता विद्वद्भिर्नृपसत्तम ॥ करेरिंडुकरप्रख्यैः सूर्यरश्मिसमप्रभा ॥ ४२ ॥ क्षरंती मोदते विश्वं करभा तेन चोच्यते ॥ यस्माद्रंजयते लोकान्दर्शनादेव भारत ॥ ४३ ॥ रंजनाद्रंजना प्रोक्ता धात्वर्थे राजसत्तम ॥ तृणवीरुधगुल्माद्यास्तिर्यंचः पक्षिणस्तथा ॥ तानुद्धृतान्नयेत्स्वर्गं तेनोक्ता वायुवाहिनी ॥ ४४ ॥ एवं यो वेत्ति नामानि निर्गमं च विशेषतः ॥ स याति पापविमुक्तो रुद्रलोकं न संशयः ॥ ४५ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये सहस्रकरेवानाममाहात्म्यवर्णने मयूरकल्पसमुद्भवोनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनरेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ सलिलेनाप्लुते लोके निरालोके तमोद्रवे ॥ १ ॥ ब्रह्मैको विचरंस्तत्र तमीभूते महार्णवे ॥ दिव्यं वर्षसहस्रं तु खद्योत इव रूपवान् ॥ २ ॥ शेते योजनसाहस्रमप्रमेयमनुत्तमम् ॥ द्वादशादित्यसंकाशं सहस्रचरणेक्षणम् ॥ ३ ॥ प्रसुप्ते चार्णवे घोरे ह्यपश्यत्कूर्मरूपिणम् ॥ तं दृष्ट्वा विस्मयापन्नो ब्रह्मा बोधयते शनैः ॥ ४ ॥ स्तुतिभिर्मंगलैश्चैव हृदयेनांगसंयुतैः ॥ वाचस्पते विबुध्यस्व महाभूत

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नमोऽस्तु ते ॥ ५ ॥ तवोदरे जगत्सर्वं तिष्ठते परमेश्वर ॥ तद्विमुंच महासत्त्व यत्पूर्वं संहृतं त्वया ॥ ६ ॥ व्यतीता रजनी ब्राह्मी दिनं समनुवर्त्तते ॥
निरीक्ष्य सर्वलोकेश येन संभवते जगत् ॥ ७ ॥ स निशम्य वचस्तस्य उत्थितः परमेश्वरः ॥ समुद्विरन्सलोकांस्त्रीन्ग्रस्तान्कल्पक्षये तदा ॥ ८ ॥
देवदानवगन्धर्वाः सयक्षोरगराक्षसाः ॥ सचंद्रार्कग्रहाः सर्व्वे शरीरात्तस्य निर्गताः ॥ ९ ॥ ततो ह्येकार्णवं सर्वं विभज्य परमेश्वरः ॥ विस्तीर्णां
पलतोयौघां सरित्सरविवर्द्धिताम् ॥ १० ॥ पश्यते मेदिनीं देवः सवृक्षौषधिपल्वलाम् ॥ हिमवंतं गिरिश्रेष्ठं श्वेतं पर्वतमुत्तमम् ॥ ११ ॥
शृंगवन्तं महाशैलं ये चान्ये कुलपर्वताः ॥ जंबूद्वीपं कुशं क्रौंचं सगोमेदं सशाल्मलम् ॥ १२ ॥ पुष्करांताश्च ये द्वीपा ये च सप्त
महार्णवाः ॥ लोकालोकं महाशैलं सर्वं च पुरतः स्थितम् ॥ १३ ॥ चतुःप्रकृतिसंयुक्तं जगत्स्थावरजंगमम् ॥ युगांते तु विनिष्क्रांतमपश्यत्स
महेश्वरः ॥ १४ ॥ विप्रकीर्णशिलाजालामपश्यत्स वसुन्धराम् ॥ कूर्मपृष्ठोपगां देवीं महार्णवगतां प्रभुः ॥ १५ ॥ तस्मिन्विशीर्णशैलाग्रे
सरित्सरोविवर्जिते ॥ नानातरंगभिन्नोद आवर्तोद्वर्त्तसंकुले ॥ १६ ॥ नानौषधिप्रज्वलिते नानोत्पलशिलातले ॥ नानाविहंगसंघुष्टां
मत्स्यकूर्म्मसमाकुलाम् ॥ १७ ॥ दिव्यमायामयीं देवीसुत्कृष्टांबुदसन्निभाम् ॥ नदीमपश्यद्देवेशो ह्यनौपम्यजलाशयाम् ॥ १८ ॥
मध्ये तस्यांबुदश्यामां पीनोरुजघनस्तनीम् ॥ वस्त्रैरनुपमैर्दिव्यैर्नानाभरणभूषिताम् ॥ १९ ॥ सतूपुरवोद्दामां हारकेयूरमंडिताम् ॥ तादृशीं
नर्मदां देवीं स्वयं स्त्रीरूपधारिणीम् ॥ २० ॥ योगमायामयैश्चित्रैर्भूषणैः स्त्रैर्विभूषिताम् ॥ अव्यक्तांगीं महाभागामपश्यत्स तु नर्मदाम् ॥ २१ ॥
अर्द्धोद्यतभुजां बालां पद्मपत्रायतेक्षणाम् ॥ स्तुवन्तीं देवदेवेशमुत्थितां तु जलात्तदा ॥ २२ ॥ विस्मयाऽऽविष्टहृदयो ह्यहमुद्वीक्ष्य तां शुभाम् ॥
स्नात्वा जले शुभे तस्याः स्तोतुमभ्युद्यतस्ततः ॥ २३ ॥ अर्चयामास संहृष्टो मन्त्रैर्वेदांगसंभवैः ॥ सृष्टं च तत्पुरा राजन्पश्येयं सचराचरम् ॥
॥ २४ ॥ सदेवासुरगन्धर्वं सपन्नगमहोरगम् ॥ पश्याम्यपा महाभागा नेव याता क्षयं पुरा ॥ २५ ॥ महादेवप्रसादाच्च तच्छरीरसमुद्भवा ॥
भूयोभूयो मया दृष्टा कथिता ते नृपोत्तम ॥ २६ ॥ प्रादुर्भावमिमं कौम्यं येऽधीयन्ते द्विजोत्तमाः ॥ येऽपि शृण्वंति विद्वांसो मुच्यन्ते तेऽपि
किल्विषैः ॥ २७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कूर्मकल्पसमुद्भवोनाम
सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नष्टे लोके पुनश्चान्ये सलिलेन समावृते ॥ महार्णवस्य मध्यस्थो बाहुभ्यामतरं
जलम् ॥ १ ॥ दिव्ये वर्षशते पूर्णे श्रांतोऽहं नृपसत्तम ॥ ध्यातुं समारभं देवं महदर्णवतारणम् ॥ २ ॥ ध्यायमानस्ततः काले अपश्यं पक्षिणं परम् ॥
हारकुन्देन्दुसंकाशं वकं गोक्षीरपांडुरम् ॥ ३ ॥ ततोऽहं विस्मयाविष्टस्तं वकं समुदीक्ष्य वै ॥ अस्मिन्महार्णवे घोरे कुतोऽयं पक्षिसंभवः ॥ ४ ॥
तरन्बाहुभिरश्रांतस्तं वकं प्रत्यभाषिषि ॥ पक्षिरूपं समास्थाय कस्त्वमेकार्णवीकृते ॥ ५ ॥ भ्रमसे दिव्ययोगात्मन्मोहयन्निव मां प्रभो ॥ एतत्क
थय मे सर्व्वं योऽसि सोऽसि नमोऽस्तु ते ॥ ६ ॥ सोऽब्रवीन्मां महादेवो ब्रह्माऽहं विष्णुरेव च ॥ जगत्सर्वं मया वत्स संहृतं किं न बुध्यसे ॥ ७ ॥
तव माता पिताऽहं वै विश्वस्य च महामुने ॥ कारुण्यं मम संजातं दृष्ट्वा मग्नं महार्णवे ॥ ८ ॥ पक्षिरूपं समास्थाय अतोऽत्राऽहं समागतः ॥ किम-
र्थमातुरो भूत्वा भ्रमसीत्थं महार्णवे ॥ ९ ॥ शीघ्रं प्रविश मत्पक्षौ येन विश्रमसे द्विज ॥ एवमुक्तस्ततस्तेन देवेनाऽहं नरेश्वर ॥ १० ॥ ततोऽहं तस्य
पक्षांते प्रलीनस्तु भ्रमञ्जले ॥ काले युगसाहस्रांते अश्रांतोऽर्णवमध्यगः ॥ ११ ॥ ततः शृणोमि सहसा दिक्षु सर्वासु सुव्रत ॥ किंचिन्नूपुरसंमिश्रम
द्भुतं शब्दमुत्तमम् ॥ १२ ॥ तदार्णवजलं सर्वं संक्षिप्तं सहसाऽभवत् ॥ किमेतदिति संचिंत्य दिशः समवलोकयम् ॥ १३ ॥ दश कन्यास्ततो दिक्षु
आगताश्च महार्णवे ॥ वस्त्रालंकारसहिता दिग्भ्यो नृपुरभूषिताः ॥ १४ ॥ काचिच्चन्द्रसमाभासा काचिदादित्यसप्रभा ॥ काचिदंजनपुंजाभा काचि
द्रक्तोत्पलप्रभा ॥ १५ ॥ नानारूपधरा सौम्या नानाऽऽभरणभूषिता ॥ अर्घ्यपाद्यादिभिर्माल्यैर्वकमभ्यर्च्य सुव्रताः ॥ १६ ॥ ततस्तं पर्वताकारं
गुह्यं पक्षिणमव्ययम् ॥ प्रविवेश महाघोरं पर्वतो ह्यर्णवं स्वराट् ॥ १७ ॥ योजनानां सहस्राणि तावन्त्येव शतानि च ॥ त्रिंशद्योजनसाहस्रं याव
द्भूमंडलं त्विति ॥ १८ ॥ ततो भूमण्डलं दिव्यं पंचरत्नसमाकुलम् ॥ दिव्यस्फटिकसोपानं रुक्मस्तंभमनोरमम् ॥ १९ ॥ योजनानां सहस्रं तु
विस्तरादिगुणोऽऽयतम् ॥ वापीकूपसमाकीर्णं प्रासादाट्टालकावृतम् ॥ २० ॥ कल्पवृक्षसमाकीर्णं ध्वजपट्टिविभूषितम् ॥ तस्मिन्पुरवरे रम्ये नाना
रत्नोपशोभितम् ॥ २१ ॥ तथान्यच्च पुरं रम्यं पताकोज्वलवेदिकम् ॥ शतयोजनविस्तीर्णं तावद्विगुणमायतम् ॥ २२ ॥ पुरमध्ये ततस्तस्मिन्नदी प
रमशोभना ॥ महती पुण्यसलिला नानारत्नशिला तथा ॥ २३ ॥ तस्यास्तीरे मया दृष्टं तडित्सूर्यसमप्रभम् ॥ इन्द्रनीलमहानीलैश्चितं रत्नैः
समंततः ॥ २४ ॥ क्वचिद्रह्निसमाकारं क्वचिदिन्द्रायुधप्रभम् ॥ क्वचिद्भग्नं क्वचित्पीतं क्वचिद्रक्तं क्वचित्सितम् ॥ २५ ॥ नानावर्णैः समा
युक्तं लिंगमद्भुतदर्शनम् ॥ ब्रह्मविष्णिवद्रसाध्यैश्च समंतात्परिवारितम् ॥ २६ ॥ नन्दीश्वरगणाध्यक्षैश्चंद्रादित्यैश्च तद्वृतम् ॥ पश्यामि
लिंगमीशानं महालिंगं तमेव च ॥ २७ ॥ परिवार्य ततस्तं तु प्रसुप्तान्देवदानवान् ॥ निर्मीलिताक्षान्पश्यामि दिव्याभरणभूषितान् ॥
॥ २८ ॥ ततस्ताः पद्मपत्राक्ष्यो नार्य्यः परमसम्मताः ॥ नद्यास्तस्या जले स्नात्वा दिव्यपुष्पैर्मनोरमैः ॥ २९ ॥ दत्त्वार्घपाद्यं विधिवल्लिंगस्य
सह पक्षिणा ॥ अर्चयंतीर्वरारोहा दश ताः प्रमदोत्तमाः ॥ ३० ॥ ततस्त्वभ्यर्च्य तल्लिंगं तस्मिन्नेव पुरोत्तमे ॥ सर्वा अदर्शनं जग्मुर्विद्युतोऽभ्र
गणेष्विव ॥ ३१ ॥ न चाऽसौ पक्षिराट् तस्मिन्न स्त्रियो न च देवताः ॥ तदेवैकं स्थितं लिंगमर्चयन्विस्मयान्वितः ॥ ३२ ॥ ततोहं दुःखमूढात्मा रुद्र
मायेति चिंतयन् ॥ ततः कन्याः समुत्तीर्य दिव्यांबरविभूषणाः ॥ ३३ ॥ भासयंत्यो जगत्सर्वं विद्युतोऽभ्रगणानिव ॥ पद्मैर्हिरण्मयैर्दिव्यैरर्चयित्वा
शुभाननाः ॥ ३४ ॥ विविशुस्तज्जलं क्षिप्रं समंताद्वरभूषणाः ॥ तस्मिन्पुरवरे चाऽन्ये तामेवाहं पुनःपुनः ॥ ३५ ॥ पश्यामि ह्यमरां कन्यां अर्चयं
तीं महेश्वरम् ॥ ततोऽहं तां वरारोहामपृच्छं कमलेक्षणाम् ॥ ३६ ॥ का त्वमस्मिन्पुरे देवि वससे शिवमर्चती ॥ ताश्चागताः स्त्रियः सर्वाः क गतास्ते
गणेश्वराः ॥ ३७ ॥ नमोऽस्तु ते महाभागे ब्रूहि पुण्ये महेश्वरि ॥ तव प्रसादाद्विज्ञातुमेतदिच्छामि सुव्रते ॥ दयां कृत्वा महादेवि कथयस्व ममाऽनघे
॥ ३८ ॥ ॥ स्युवाच ॥ ॥ विस्मृताऽहं कथं विप्र दृष्ट्वा कल्पे पुरातने ॥ मा तेऽभूत्स्मृतिविभ्रंशः सा चाऽहं कल्पवाहिनी ॥ ३९ ॥ नर्मदानाम
विख्याता रुद्रदेहाद्विनिःसृता ॥ यास्ताः कन्यास्त्वया दृष्टा ह्यर्चयंत्यो महेश्वरम् ॥ ४० ॥ याभिस्त्विह समानीतः पक्षिराजसमन्वितः ॥ दिशस्ता
विद्धि सर्वेशाः सर्वास्त्वं मुनिसत्तम ॥ ४१ ॥ तिर्यक्पक्षिस्वरूपेण महायोगी महेश्वरः ॥ एभिः शिवपुराद्विप्र आनीतः स महेश्वरः ॥ ४२ ॥ सैष देवो
महादेवो लिंगमूर्त्तिर्व्यवस्थितः ॥ अर्च्यते ब्रह्मविष्णिवद्रैः सुरासुरजगद्गुरुः ॥ ४३ ॥ लयमायाति यस्माद्धि जगत्सर्वं चराचरम् ॥ तेन लिंगमिति प्रोक्तं
पुराणज्ञैर्महर्षिभिः ॥ ४४ ॥ तेन देवगणाः सर्व्वे संक्षिप्ता मायया पुरा ॥ प्रलीनाश्चैव लोकेश न दृश्यंते हि साम्प्रतम् ॥ ४५ ॥ पुनर्दृश्या भविष्यंति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सृजमानाः स्वयंभुवा ॥ साऽहं लिंगार्चनपरा नर्मदानाम नामतः ॥ ४६ ॥ कालं युगसहस्रस्य रुद्रस्य परिचारिका ॥ अस्य प्रसादादमरस्तथा त्वं द्विजपुंगव ॥ ४७ ॥ सत्यार्जवदयायुक्तः सिद्धोऽसि त्वं शिवार्चनात् ॥ एवमुक्त्वा तु सा देवी तत्रैवांतरधीयत ॥ ४८ ॥ ताः स्त्रियः स च देवेशो बकरूपो महेश्वरः ॥ तस्यास्तद्वचनं श्रुत्वा अवतीर्य्य महानदीम् ॥ ४९ ॥ स्नात्वा समर्चय त्वं हि विधिना मंत्रपूर्वकम् ॥ ततोऽहं सहसा तस्मात्समुत्तीर्य्य जलाशयात् ॥ ५० ॥ न च पश्यामि तल्लिंगं न च तां निम्नगां नृप ॥ तदैव लोकाः संजाताः क्षितिश्चैव सकानना ॥ ५१ ॥ ऋक्षचंद्रार्कविततं तदेव च नभस्तलम् ॥ यथापूर्वमदृष्टं तु तथैव च पुनः कृतम् ॥ नतोहं मनसा देवमपूजयं महेश्वरम् ॥ ५२ ॥ एवं बके पुरा कल्पे मया दृष्टेयमव्यया ॥ नर्मदा मर्त्त्यलोकस्य महापातकनाशिनी ॥५३॥ तस्माद्धर्मपरैर्विप्रैः क्षत्रशूद्रविशादिभिः ॥ सदा सेव्या महाभागा धर्म्मवृद्ध्यर्थकारिभिः ॥ ५४ ॥ येऽपि भक्त्या सकृत्तोये नर्मदाया महेश्वरम् ॥ स्नात्वाऽर्च्चयंति ते सर्वं पापं नाश्यंत्यसंशयम् ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये बककल्पसमुद्भवोनामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनर्युगांतं ते चाऽन्यं संप्रवक्ष्यामि तच्छृणु ॥ सूर्यैरादीपिते लोके जंगमे स्थावरे पुरा ॥ १ ॥ सरित्सरःसमुद्रेषु क्षयं यातेषु सर्वशः ॥ निर्म्मानुषवषट्कारे ह्यमर्यादगतिं गते ॥ २ ॥ नानारूपैस्ततो मेघैः शक्रायुधविराजितैः ॥ सर्वमापूरितं व्योम वार्योघैः पूरिते तदा ॥ ३ ॥ ततस्त्वेकार्णवीभूते सर्वतः सलिलावृते ॥ जगत्कृत्वोदरे सर्व्वं सुष्वाप भगवान्हरः ॥ ४ ॥ प्रकृतिं स्वामवष्टभ्य योगात्मा स प्रजापतिः ॥ शेते युगसहस्रांतं कालमाविश्य सार्णवम् ॥ ५ ॥ तत्र सुप्तं महात्मानं ब्रह्मलोकनिवासिनः ॥ भृग्वादिऋषयः सर्व्वे ये चाऽन्ये सनकादयः ॥ ६ ॥ पर्यंके विमले शुभ्रे नानास्तरणसंस्तृते ॥ शयानं ददृशुर्देवं सपत्नीकं वृषध्वजम् ॥ ७ ॥ विश्वरूपा तु सा नारी विश्वरूपो महेश्वरः ॥ गाढमालिंग्य सुप्तस्तां ददृशे चाहमव्ययम् ॥ ८ ॥ पादमूले ततस्तस्य श्यामां तां पद्मलक्षणाम् ॥ कन्यां पश्यामि सुश्रोणीं चरणौ तस्य मृद्नतीम् ॥ ९ ॥ विमलांबरसंवीतां व्यालयज्ञोपवीतिनीम् ॥ श्यामां कमलपत्राक्षीं सर्वाभरणभूषिताम् ॥ १० ॥ सकलं युगसाहस्रं नर्मदेयं विजानती ॥ प्रसुप्तं देवदेवेशमुपास्ते वरवर्णिनी ॥ ११ ॥ हृतैर्वेदैश्चतुर्भिश्च ब्रह्माऽप्येवं महेश्वरः ॥ भृग्वाद्यैर्मानसैः पुत्रैः स्तौति शंकरमव्ययम् ॥ १२ ॥ भक्त्या परमया राजंस्तत्र शंभुमनामयम् ॥ स्तुवंतस्तत्र देवेशं मंत्रैरीश्वरसंभवैः ॥ १३ ॥ अकस्मात्संप्रलीनास्ते चत्वारः श्रुतयोऽर्णवे ॥ वेदैः प्रलीनैर्भगवानज्ञानतमसा वृतः ॥ १४ ॥ प्रसुप्तं देवमीशानं बोधयन्समुपस्थितः ॥ उत्तिष्ठ हर पिंगाक्ष महादेव महेश्वर ॥ १५ ॥ मम वेदा हृताः सर्वे अतोऽहं स्तोतुमुद्यतः ॥ वेदैर्व्याप्तं जगत्सर्वं दिव्यादिव्यं चराचरम् ॥ १६ ॥ अतीतं वर्त्तमानं च स्मरामि च सृजाम्यहम् ॥ तैर्विना चाऽहमेकस्तु मूकोंऽधो जडवत्सदा॥१७॥गतिर्वीर्य्यं बलोत्साहौ तैर्विना न प्रजायते॥ तैर्विना देवदेवेश नाऽहं किंचित्स्मरामि वै॥१८॥ तान्वेदान्देवदेवेश शीघ्रं मे दातुमर्हसि ॥ जडांधबधिरं सर्वं जगत्स्थावरजंगमम् ॥ १९ ॥ स्थानादि दश चत्वारि न शोभंते सुरेश्वर ॥ प्रणमाम्यल्पवीर्यत्वाद्वेदहीनः सुरेश्वर ॥ २० ॥ वेदेभ्यः सकलं जातं यत्किंचित्सचराचरम् ॥ तावच्छोभंति शास्त्राणि समस्तानि जगद्गुरो ॥ २१ ॥ यावद्वेदनिधिरयं नोपतिष्ठेत्सनातनः ॥ यथोदितेन सूर्येण तमो याति विनाशताम् ॥ २२ ॥ एवं समस्तपापानि यांति वेदस्य धारणात् ॥ वेदे रहसि यत्सूक्ष्मं यत्तद्ब्रह्म सनातनम् ॥ २३ ॥ हृदिस्थं देव जानामि गतं तद्वेदगर्जनात् ॥ वेदानुच्चरतो मेऽद्य तव शंकर चाग्रतः ॥ २४ ॥ अकस्मात्ते गता वेदा न सृजेयं विभो भुवम् ॥ तेऽपि सर्व्वे महादेव प्रविष्टाः सम्मुखार्णवम् ॥ २५ ॥ ते याच्यमाना देवेश तिष्ठंतु स्मरणे मम ॥ दुहितेयं विशालाक्षी सर्वः सर्वं विजानते ॥ २६ ॥ जायती युगसाहस्रं नान्या काचिद्भवेदृशी ॥ ऋषिश्चायं महाभागो मार्कंडो धीमतां वरः ॥ २७ ॥ कल्पेकल्पे महादेव त्वामयं पर्युपासते ॥ जगत्त्रयहितार्थाय चरते व्रतमुत्तमम् ॥ २८ ॥ एवमुक्तस्तु देवेशो ब्रह्मणा परमेष्ठिना ॥ उवाच श्लक्ष्णया वाचा नर्मदां सरितां वराम् ॥ २९ ॥ कथयस्व महाभागे ब्रह्मणस्त्वं तु पृच्छतः ॥ केन वेदा हृताः सर्वे वेधसो जगतीगुरोः ॥ ३० ॥ एवमुक्ता तु रुद्रेण उवाच मृगलोचना ॥ ब्रह्मणो जपतो वेदांस्त्वयि सुप्ते महेश्वर ॥ ३१ ॥ भवतश्छिद्रमासाद्य घोरेऽस्मिन्सलिलावृते ॥ पूर्वकल्पसमुद्भूतावसुरौ सुरदुर्जयौ ॥ ३२ ॥ श्रियावृत्तौ महादेव त्वया चोत्पादितौ पुरा ॥ सुरासुरसुदुर्जेयौ दानवौ मधुकैटभौ ॥ ३३ ॥ तौ वायुभूतौ सूक्ष्मौ च पठतोऽस्मात्पितामहात् ॥ तावाशु हृत्वा वेदांश्च प्रविष्टौ च महार्णवम् ॥ ३४ ॥ एतच्छ्रुत्वा महातेजा ह्यमृतायास्ततो वचः ॥ सस्मार स च देवेशं शंखचक्रगदाधरम् ॥ ३५ ॥ स विवेश महाराज भूतलं ससुरोत्तमः ॥ दानवांतकरो देवः सर्वदैवतपूजितः ॥ ३६ ॥ मीनरूपधरो देवो लोडयामास चार्णम् ॥ वेदांश्च ददृशे तत्र पाताले निहितान्प्रभुः ॥ ३७ ॥ तौ च दैत्यौ महावीर्य्यौ दृष्टवान्मधुसूदनः ॥ महावेगौ महाबाहू सूदयामास तेजसा ॥ ३८ ॥ वेदांस्तत्राऽपि तोयस्थानानिनाय जगद्गुरुः ॥ चतुर्वक्त्राय देवायाददाच्चक्रविभूषितः ॥ ३९ ॥ ततः प्रहृष्टो भगवान्वेदाल्लब्ध्वा पितामहः ॥ जनयामास निखिलं जगद्भूयश्चराचरम् ॥ ४० ॥ सा च देवी नदी पुण्या रुद्रस्य परिचारिका ॥ पावनी सर्वभूतानां प्रोवाह सलिलं तदा ॥ ४१ ॥ तस्यास्तीरे ततो देवा ऋषयश्च तपोधनाः ॥ यजंति त्र्यंबकं देवं प्रहृष्टेनांऽतरात्मना ॥ ४२ ॥ एका मूर्त्तिर्महेशस्य कारणांतरमागता ॥ त्रैगुण्या कुरुते कर्म्म ब्रह्मचक्रीशरूपतः ॥ ४३ ॥ एतेषां तु पृथग्भावं ये कुर्वंति सुमोहिताः ॥ तेषां धर्म्मः कुतः सिद्धिर्जायते पापकर्मिणाम् ॥ ४४ ॥ एवमेता महानद्यस्तिस्रो रुद्रसमुद्भवाः ॥ एका एव त्रिधा भूता गङ्गा रेवा सरस्वती ॥ ४५ ॥ गङ्गा तु वैष्णवी मूर्त्तिः सर्वपापप्रणाशिनी ॥ रुद्रदेहसमुद्भूता नर्मदा चैवमेव तु ॥ ४६ ॥ ब्राह्मी सरस्वती मूर्त्तिस्त्रिषु लोकेषु विश्रुता ॥ दिव्या कामगमा देवी वाग्विभूत्यै तु संस्थिता ॥ ४७ ॥ नर्मदा परमा काचिन्मर्त्यमूर्त्तिकला शिवा ॥ दिव्या कामगमा देवी सर्वत्र सुरपूजिता ॥ ४८ ॥ व्यापिनी सर्वभूतानां सूक्ष्मात्सूक्ष्मतरा स्मृता ॥ अक्षया ह्यमृता ह्येषा स्वर्गसोपानमुत्तमा ॥ ४९ ॥ सृष्टा रुद्रेण लोकानां संसारार्णवतारिणी ॥ ५० ॥ सरिज्जलं येऽपि पिबंति लोके मुच्यंति ते पापविशेषसंघैः ॥ व्रजंति संसारमनादिभावं त्यक्त्वा चिरं मोक्षपदं विशुद्धम् ॥ ५१ ॥ यथा गंगा तथा रेवा तथा चैव सरस्वती ॥ समं पुण्यफलं प्रोक्तं स्नानदर्शनचिंतनैः ॥ ५२ ॥ वरदानान्महाभागा ह्यधिका चोच्यते बुधैः ॥ कारुण्यांतरभावेन न मृता समुपागता ॥ ॥ ५३ ॥ मुच्यंते दर्शनात्तेन पातकैः स्नानमंगलैः ॥ नर्मदायां नृपश्रेष्ठ ये नमंति त्रिलोचनम् ॥ ५४ ॥ उमारुद्रांगसंभूता येन चैषा महानदी ॥ लोकान्प्रापयते स्वर्गं तेन पुण्यत्वमागता ॥ ५५ ॥ य एवमीशानवरस्य देहं विभज्य देवीमिह संशृणोति ॥ स याति रुद्रं महता रवेण गंधर्व्वयक्षैरिव गीयमानः ॥ ५६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नर्मदामाहात्म्ये नर्मदोत्पत्तितत्स्नानफलादिकथनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मिन्कल्पे महाभागा नर्म्मदेयं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्विजोत्तम ॥ विभक्ता ऋषिभिः सर्व्वैस्तपोयुक्तैर्महात्मभिः ॥ १ ॥ एतद्विस्तरतः सर्वं ब्रूहि मे वदतां वर ॥ कल्पांते यद्भवत्कष्टं लोकानां तत्त्व मेव च ॥ २ ॥ अतीते तु पुरा कल्पे यथेयं वर्त्ततेऽनघ ॥ अस्यांत्यस्य च कल्पस्य व्यवस्थां कथय प्रभो ॥ एवमुक्तः सभामध्ये मार्कंडो वाक्यम ब्रवीत् ॥ ३ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ वक्ष्येऽहं श्रूयतां सर्वैः कथेयं पूर्वतः श्रुता ॥ ४ ॥ महत्कथेयं वैशिष्टी कल्पादस्मात्परं तु या ॥ लोकक्षयकरो घोर आसीत्कालः सुदारुणः ॥ ५ ॥ तस्मिन्नपि महाघोरे यथेयं न मृता सती ॥ परितुष्टैर्विभक्ता च शृणुध्वं तां कथामिमाम् ॥ ६ ॥ युगांते समनुप्राप्ते पितामहदिनत्रये ॥ मानसा ब्रह्मणः पुत्राः साक्षाद्ब्रह्मेव सत्तमाः ॥ ७ ॥ सनकाद्या महात्मानो ये च वैमानिका गणाः ॥ यमेंद्र वरुणाद्याश्च लोकपाला दिनत्रये ॥ ८ ॥ कालापेक्षास्तु तिष्ठंति लोकवृत्तांततत्पराः ॥ ततः कल्पक्षये प्राप्ते तेषां ज्ञानमनुत्तमम् ॥ ९ ॥ सर्वेषां नश्यते चायुर्युगरूपाऽनुसारतः ॥ भूर्लोकं ते परित्यज्य अगमंश्च भुवं तदा ॥ १० ॥ स्वर्लोकं च महश्चैव जनश्चैव तपस्तदा ॥ आश्रयं सत्य लोकं च सर्वलोकमनुत्तमम् ॥ ११ ॥ कालं युगसहस्रांतं पुत्रपौत्रसमन्विताः ॥ सत्यलोके च तिष्ठंति यावत्संजायते जगत् ॥ १२ ॥ ब्रह्मपुत्राश्च ये केचित्कल्पादौ न भवंति ह ॥ त्रैलोक्यं ते परित्यज्य अनाधारं भवंति च ॥ १३ ॥ तैः सार्धं ये तु ते विप्रा अन्ये चापि तपोधनाः ॥ यक्षरक्षः पिशाचाश्च अन्ये वैमानिका गणाः ॥ १४ ॥ ऋषयश्च महाभागा वर्णाश्चान्ये पृथग्विधाः ॥ सीदंति भूम्यां सहिता ये चाऽन्ये तलवासिनः ॥ ॥ १५ ॥ अनावृष्टिरभूत्तत्र महती शतवार्षिकी ॥ लोकक्षयकरी रौद्रा वृक्षवीरुद्विनाशिनी ॥ १६ ॥ त्रैलोक्यसंक्षोभकरी सप्तार्णवविशोषणी ॥ ततो लोकाः क्षुधाविष्टा भ्रमंतीव दिशो दश ॥ १७ ॥ कंदैर्मूलैः फलैर्वापि वर्त्तयंते सुदुःखिताः ॥ सरितः सागराः कूपाः सेवंते पावनानि च ॥ १८ ॥ तत्राऽपि सर्वे शुष्यंति सरिद्भिः सह सागराः॥ ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले ॥ १९ ॥ तान्येवाग्रे प्रलीयंते भिन्नान्युरुजलेन वै ॥ अथ संक्षीयमाणासु सरित्सु सह सागरैः ॥ २० ॥ ऋषीणां षष्टिसाहस्रं कुरुक्षेत्रनिवासिनाम् ॥ ये च वैखानसा विप्रा दन्तोलूखलिनस्तथा ॥ २१ ॥ हिमाचलगुहागुह्ये ये वसंति तपोधनाः ॥ सर्वे ते मामुपागम्य क्षुत्तृषार्त्तास्तपोधनाः ॥ २२ ॥ ऊचुः प्रांजलयः सर्वे सीदयामो महामुने ॥ सरित्सा गरशैलांतं जगत्संशुष्यते द्विज ॥ २३ ॥ कुत्र यास्याम सहिता यावत्कालस्य पर्ययः ॥ दीर्घायुरसि विप्रेंद्र न मृतस्त्वं युगक्षये ॥ २४ ॥ भूतं भव्यं भविष्यच्च सर्वं तव हृदि स्थितम् ॥ तस्मात्त्वं वेत्सि सर्व्वं च कथयस्व महाव्रत ॥ २५ ॥ कीदृक्कालं महाभाग क्षपिष्यामोऽथ सुव्रत ॥ अनावृष्टिहतं सर्वं सीदते सचराचरम् ॥ २६ ॥ परित्राहि महाभाग न यथा याम संक्षयम् ॥ ततः संचिंत्य मनसा त्वरन्विप्रानथाब्रवम् ॥ २७ ॥ कुरुक्षेत्रं त्यजध्वं च पुत्रदारसमन्विताः ॥ त्यक्त्वोदीचीं दिशं सर्वे यामो याम्यामनुत्तमाम् ॥ २८ ॥ नगरग्रामघोषाढ्यां पुरपत्तनशोभिताम् ॥ गच्छा मो नर्मदातीरं बहुसिद्धनिषेवितम् ॥ २९ ॥ रुद्रांगीं तां महापुण्यां सर्वपापप्रणाशिनीम् ॥ पश्यामस्तां महाभागां न्यग्रोधावारसंकुलाम् ॥ ॥ ३० ॥ तरंगावर्त्तसलिलां दर्दुरीमत्स्यसंकुलाम् ॥ नानाविहगसंघुष्टामृषिकोटिनिषेविताम् ॥ ३१ ॥ माहेश्वरैर्भागवतैः सांख्यैः सिद्धैः सुसे विताम् ॥ अनावृष्टिभयाद्भीताः कूलयोरुभयोरपि ॥ ३२ ॥ आश्रमे ह्याश्रमान्दिव्यान्कारयामो जितव्रताः ॥ एवमुक्तास्तु ते सर्वे समेता नुचरैः सह ॥ ३३ ॥ नर्म्मदातीरमासाद्य स्थिताः सर्वेऽकुतोभयाः ॥ किंचित्पूर्वमनुस्मृत्य पुरा कल्पादिभिर्भयम् ॥ ३४ ॥ प्राप्तास्तु नर्मदातीरमादावेव कलौ युगे ॥ ततो वर्षशतं पूर्णं दिव्यं रेवातटेऽवसन् ॥ ३५ ॥ षट्त्रिंशच्च सहस्राणि वर्षाणां मानुषाणि च ॥ तत्राश्चर्यं मया दृष्टमृषीणां वसतां नृप ॥ ३६ ॥ अनावृष्टिहते लोके संशुष्के स्थावरे चरे ॥ भिन्ने युगादिकलने हाहाभूते विचेतने ॥ ३७ ॥ चातुर्वर्णे प्रलीने तु नष्टे होमबलिक्रमे ॥ निःस्वाहे निर्वषट्कारे शौचाचारविवर्जिते ॥ ३८ ॥ इयमेका सरिच्छ्रेष्ठा ऋषिकोटिनिषेविता ॥ नान्या काचित्त्रिलोकेऽपि रमणीया नरेश्वर ॥ ३९ ॥ यथेयं पुण्यसलिला इंद्रस्येवामरावती ॥ देवतायतनैः शुभ्रैराश्रमैश्च सुकल्पितैः ॥ ४० ॥ शोभते नर्मदा देवी स्वर्गे मंदाकिनी यथा ॥ यावद्वृक्षा महाशैला यावत्सागरसंभवा ॥ ४१ ॥ उभयोः कूलयोस्तावन्मंडितायतनैः शुभैः ॥ हूयद्भिरग्निहोत्रैश्च हविर्धूमसमाकुला ॥ ४२ ॥ बभूव नर्मदा देवी प्रावृट्कालेव शर्वरी ॥ देवतायतनैर्नकः पूजासंस्कारशोभिता ॥ ४३ ॥ सरिद्भिर्भ्राजते श्रेष्ठा पुरी शाक्री च भास्करी ॥ केचित्पंचाग्नितपसः केचिदप्यग्निहोत्रिणः ॥ ४४ ॥ केचिद्धूमकमश्नंति तपस्युग्रे व्यवस्थिताः ॥ आत्मयज्ञरताः केचिदपरे भक्तिभागिनः ॥ ४५ ॥ वैष्णवज्ञानमासाद्य केचिच्छैवं व्रतं तथा ॥ एकरात्रं द्विरात्रं च केचित्पष्टाहभोजनाः ॥ ४६ ॥ चांद्रायणविधानैश्च कृच्छ्रिणश्चातिकृच्छ्रिणः ॥ एवंविधैस्तपोभिश्च नर्मदातीरशोभितैः ॥ ४७ ॥ यजद्भिः शंकरं देवं केशवं भाति नित्यदा ॥ एक त्वे च पृथक्त्वे च यजतां च महेश्वरम् ॥ ४८ ॥ कलौ युगे महाघोरे प्राप्ताः सिद्धिमनुत्तमाम् ॥ यस्ययस्य हि या भक्तिर्विज्ञानं यस्य यादृशम् ॥ ॥ ४९ ॥ यस्मिन्यस्मिंश्च देवे तु तांतामीशोऽददात्प्रभुः ॥ स्वभावैकतया भक्त्या तामेत्यांतःप्रलीयते ॥ ५० ॥ संसारे परिवर्त्तंते ये पृथग्भा जिनो नराः ॥ ये महावृक्षमीशानं त्यक्त्वा शाखावलंबिनः ॥ ५१ ॥ पुनरावर्त्तमानास्ते जायन्ते हि चतुर्युगे ॥ देवांते स्थावरांते च संसारे चाऽभ्र मन्क्रमात् ॥ ५२ ॥ पुनर्जन्म पुनः स्वर्गे पुनर्घोरे च रौरवे ॥ ये पुनर्देवमीशानं भवं भक्तिसुसंस्थिताः ॥ ५३ ॥ यजंति नर्मदातीरे न पुनस्ते भवंति च ॥ आदेहपतनात्केचिदुपासंतः परं गताः ॥ ५४ ॥ केचिद्द्वादशभिर्वर्षैः षड्भिरन्ये तपोधनाः ॥ त्रिभिः संवत्सरैः केचित्केचित्संवत्सरेण तु ॥ ॥ ५५ ॥ षड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथाऽपरे ॥ मुनयो देवमाश्रित्य नर्मदां च यशस्विनीम् ॥ ५६ ॥ छित्त्वा संसारदोषांश्च अगमन्ब्रह्म शाश्वतम् ॥ एवं कलियुगे घोरे शतशोऽथ सहस्रशः ॥ ५७ ॥ नर्मदातीरमाश्रित्य मुनयो रुद्रमाविशन् ॥ ५८ ॥ ये नर्मदातीरमुपेत्य विप्राः शैवे व्रते यत्नमुपप्रपन्नाः ॥ त्रिकालमंभः प्रविगाह्य भक्त्या देवं समभ्यर्च्य शिवं व्रजन्ति ॥ ५९ ॥ ध्यानार्च्चनैर्जाप्यमहाव्रतैश्च नारायणं वा सततं स्मरं ति ॥ ते धौतपांडुरपटा इव राजहंसाः संसारसागरजलस्य तरंति पारम् ॥ ६० ॥ सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ६१ ॥ यो वा हरं पूजयते जितात्मा मासं च पक्षं च वसेन्नरेन्द्र ॥ रेवां समाश्रित्य महानुभावः स देवदेवोऽथ भवेत्पि नाकी ॥ ६२ ॥ कीटाः पतंगाश्च पिपीलिकाश्च ये वै म्रियन्तेंऽभसि नर्मदायाः ॥ ते दिव्यरूपास्तु कुलप्रसूताः शतं समा धर्मपरा भवंति ॥ ६३ ॥ कालेन वृक्षाः प्रपतन्ति येऽपि महातरंगौघनिकृत्तमूलाः ॥ ते नर्मदांभोभिरपास्तपापा देदीप्यमानास्त्रिदिवं प्रयांति ॥ ६४ ॥ अकामकामाश्च तथा सकामा रेवांतमाश्रित्य म्रियंति तीरे ॥ जडांधमूकास्त्रिदिवं प्रयांति किमत्र विप्रा भवभावयुक्ताः ॥ ६५ ॥ मासोपवासैरपि शोषितांगा न तां गतिं यांति विमुक्तदेहाः ॥ म्रियंति रेवाजलपूतकायाः शिवार्चने केशवभावयुक्ताः ॥ ६६ ॥ ये नर्मदातीरमनुप्रपन्ना अभ्यर्च्ययित्वा शिवमव्यया ख्यम् ॥ नारायणं वा मनसा सुपूताः पिबंति मातुर्न पुनः स्तनं ते ॥ ६७ ॥ नीवारश्यामाकयवेंगुदाद्यैरन्यैर्मुनीन्द्रा इह वर्त्तयंति ॥ आश्रित्य कूलं त्रिदशानुगीतं ते नर्मदाया न विशंति मृत्युम् ॥ ६८ ॥ भ्रमंति ये तीरमुपेत्य देव्यास्त्रिकालदेवार्चनसत्यपूताः ॥ विण्मूत्रचर्मास्थिशिरोपधानाः कुक्षौ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

युक्त्या न वसंति भूयः ॥ ६९ ॥ किं यज्ञदानैर्बहुभिश्च तेषां निषेवितैस्तीर्थवरैः समस्तैः ॥ रेवातटं दक्षिणमुत्तरं वा सेवंति ते रुद्रचरानुपूर्वम् ॥७०॥
ते वंचिताः पंशुजडांधभूता लोकेषु मर्त्याः पशुभिश्च तुल्याः ॥ ये नाऽऽश्रिता रुद्रशरीरभूतां सोपानपंक्तिं त्रिदिवस्य रेवाम् ॥ ७१ ॥ युगं कलिं
घोरमिमं च इच्छेद्भुवं कदाचिन्न पुनर्द्विजेंद्रः ॥ स नर्मदातीरमुपेत्य सर्वं संपूजयेत्सर्वविशुद्धसंगः ॥ ७२ ॥ विघ्नैरनेकैरनियोज्यमाना ये तीरमुज्झंति
न नर्मदायाः ॥ ते चैव सर्वस्य हितार्थभूता वंद्याश्च ते सर्वजनस्य मान्याः ॥ ७३ ॥ भृग्वत्रिगार्गेयवशिष्टकंकाः शंतेः समेतैर्नियतास्त्वसंख्यैः ॥
सिद्धिं परां ते हि जलप्लुतांगाः प्राप्तास्तु लोकान्मरुतां न चान्ये ॥ ७४ ॥ ज्ञानं महत्पुण्यतमं पवित्रं पठंत्यदो नित्यविशुद्धसत्त्वाः ॥ गतिं
परां यांति महानुभावा रुद्रस्य वाक्यं हि यथा प्रमाणम् ॥ ७५ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पंचम
आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये नर्मदास्नानफलश्रुतिकथनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अहो महत्पुण्यतमा विशिष्टा क्षयं न याता इह या युगांते ॥ तस्मात्सदा नेष्यतमा मुनींद्रैर्ध्यानार्चनस्नानपरायणैश्च ॥ १ ॥ यामाश्रित्य गता मोक्षमृषयो
धर्मवत्सलाः ॥ ये त्वयोक्तास्तु नियमा ऋषीणां वेदनिर्मिताः ॥ २ ॥ मोक्षावाप्तिर्भवेद्येषां नियमैश्च पृथग्विधैः ॥ दशद्वादशभिर्वाऽपि पद्भिरष्टाभिरेव
वा ॥ ३ ॥ त्रिभिस्तथा चतुर्भिर्वा वर्षैर्मासैस्तथैव च ॥ मुच्यंते कलिदोषैस्ते देवेशानसमर्चनात् ॥ ४ ॥ ब्रह्माणं वा मुरश्रेष्ठं केशवं वा जगद्गुरुम् ॥
अर्चयन्पापमखिलं जहात्येव न संशयः ॥ ५ ॥ एतद्विस्तरतः सर्वं कथयस्व ममाऽनघ ॥ यस्मिन्संसारगहने निमग्नाः सर्वजंतवः ॥ ते कथं त्रिदिवं
प्राप्ता इति ये संशयो वद ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जन्मांतरैरनेकैस्तु मानुष्यमुपलभ्यते ॥ भक्तिरुत्पद्यते चाऽत्र कथं त्रिदपि
शंकरे ॥ ७ ॥ तीर्थदानोपवासानां यज्ञैर्देवद्विजार्चनैः ॥ अवाप्तिर्जायते पुंसां श्रद्धया परया नृप ॥ ८ ॥ तस्माच्छ्रद्धा प्रकर्त्तव्या मानवैर्धर्मवत्सलैः ॥
ईशोऽपि श्रद्धया साध्यस्तेन श्रद्धा विशिष्यते ॥९॥ अन्यथा निष्फलं सर्वं श्रद्धाहीनं तु भारत ॥ तस्मात्समाश्रयेद्भक्तिं रुद्रस्य परमेष्ठिनः॥ १० ॥
तेषांहि सफलं जन्म येषां भक्तिरचंचला ॥ सा चैव त्रिविधा भक्तिः सात्त्विकी राजसी तथा ॥ ११ ॥ तामसी सर्वलोकस्य त्रिविधं च फलं लभेत्॥
ते कर्मफलसंयोगादावर्त्तंते पुनःपुनः ॥ १२ ॥ जन्मांतरशतैस्तेषां ज्ञानिनां देवयाजिनाम् ॥ देवैक्ये भवेद्भक्तिः क्षयात्पापस्य कर्म्मणः ॥१३॥ ईशा
नात्तु पुनर्भोक्षो जायते छिन्नसंशयः ॥ ये पुनर्नर्मदातीरमाश्रित्य द्विजपुंगवाः ॥ १४ ॥ त्रयीमार्गमसंदिग्धास्ते यांति परमां गतिम् ॥ एकाग्रम
नसो ये तु शंकरं शिवमव्ययम् ॥ १५ ॥ अर्चयंतीह निरताः क्षिप्रं सिद्ध्यंति ते जनाः ॥ कालेन महता सिद्धिर्जायतेऽन्यत्र दंभिनाम् ॥ १६ ॥
नर्मदायाः पुनस्तीरे क्षिप्रं सिद्धिरवाप्यते ॥ पद्भिर्वर्षैस्तु सिध्यंति ये तु सांख्यविदो जनाः ॥ १७ ॥ वैष्णवा ज्ञानसंपन्नास्तेऽपि सिद्ध्यंति चाऽग्रतः ॥
सर्वयोगविदो ये च समुद्रमिव सिंधवः ॥ १८ ॥ एकीभवंति कल्पांते योगे माहेश्वरे गताः ॥ सर्वेषामेव योगानां योगो माहेश्वरो वरः ॥ १९ ॥
तमासाद्य विमुच्यंते येऽपि स्युः पापयोनयः ॥ शिवमर्च्य नदीकूलं जायंते ते न योनिषु ॥ २० ॥ गतिरेषा दुरारोहा सर्वपापक्षयंकरी ॥ मुच्यंते
मंक्षु संसाराद्रेवामाश्रित्य जंतवः ॥ २१ ॥ तस्मात्सायी भवेन्नित्यं तथा भस्मविलेपनः ॥ नर्मदातीरमासाद्य क्षिप्रं सिद्धिमवाप्नुयात ॥ २२ ॥
त्रिकालं पूजयच्छांतो यो नरो लिंगमादरात् ॥ सर्वरोगविनिर्मुक्तः स याति परमां गतिम् ॥ २३ ॥ पद्भिः सिद्ध्यति मांसैस्तु यद्यपि स्यात्स पापकृत् ॥ ये पुनः शुद्धमनसो मासैः शुध्यंति ते त्रिभिः ॥ २४ ॥ यथा दिनकरस्पृष्टं हिमं शैलाद्विशीर्यते ॥ तद्वद्विलीयते पापं स्पृष्टं भस्मकणैः शुभैः
॥ २५ ॥ सद्योजातादियुक्तेन भस्मना ये समुक्षिताः ॥ सूर्यवद्विमला भांति द्विजा रुद्रपरायणाः ॥ २६ ॥ वैनतेयभयत्रस्ता यथा नश्यंति पन्नगाः॥
तद्वत्पापानि नश्यंति भस्मनाऽभ्युक्षितानि हि ॥ २७ ॥ नर्मदातोयपूतेन भस्मनोद्धूलयंति ये ॥ सद्यस्ते पापसंघाच्च मुच्यंते नाऽत्र संशयः ॥
॥ २८ ॥ व्रतं पाशुपतं भक्त्या यथोक्तं पालयंति ये ॥ शूद्रान्नेन विहीनास्तु ते यांति परमां गतिम् ॥ २९ ॥ अमृतं ब्राह्मणस्याऽन्नं क्षत्रियान्नं पयः
स्मृतम् ॥ वैश्यान्नमन्नमेव स्याच्छूद्रान्नं रुधिरं स्मृतम् ॥ ३० ॥ शूद्रान्नरससंपुष्टा ये म्रियंते द्विजोत्तमाः ॥ ते तपोज्ञानहीनास्तु काका गृध्रा भवंति ते
॥ ३१ ॥ दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ॥ यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम् ॥ ३२ ॥ विशेषाद्यतिधर्मेण तपोलौल्यं
समाश्रिताः ॥ नरकं यान्त्यसंदिग्धमित्येवं शंकरोऽब्रवीत् ॥ ३३ ॥ ईदृग्रूपाश्च ये विप्राः पाशुपत्ये व्यवस्थिताः ॥ ते महत्पापसंघातं दहंत्येव न
संशयः ॥ ३४ ॥ विडंबेन च संयुक्ता लौल्येन च पीडिताः ॥ असंभाव्या असंग्राह्या इत्येवं श्रुतिनोदना ॥ ३५ ॥ मातापितृकृतैर्दोषैरन्ये केचि
त्स्वकर्मजैः ॥ नष्टा ज्ञानावलेपेन अहंकारेण चाऽपरे ॥ ३६ ॥ शांकरे प्रस्थिता धर्मे ये स्तृत्यर्थबहिष्कृताः ॥ क्लिश्यमानास्तु कालेन ते यांति परमां
गतिम् ॥ ३७ ॥ अश्रद्दधानाः पुरुषा मूर्खा दंभविवर्द्धिताः ॥ न सिद्ध्यंति दुरात्मानः कुहश्चांतार्थकीर्तनाः ॥ ३८ ॥ महाभाग्येऽपि तीर्थस्य शांकरं
व्रतमास्थिताः ॥ वियोनिं यांत्यसंदिग्धं लौल्येन समन्विताः॥३९॥न तीर्थेन च दानैश्च दुष्कृतं हि विलुप्यते॥ अज्ञानाच्च प्रमादाच्च कृतं पापं विन
श्यति ॥ ४० ॥ एवं ज्ञात्वा तु विधिना वर्त्तितव्यं द्विजातिभिः ॥ परं ब्रह्म जपद्भिश्च वोक्तव्यं मुहुर्मुहुः ॥४१॥ ऊर्ध्वरूपं विरूपाक्षं योगीते रुद्रमेव
च ॥ ईशानं पश्यते साक्षात्पण्मासात्संगवर्जितः ॥४२॥ संहिताया दशावृत्तीर्यः करोति सुसंयतः ॥ नर्मदातटमाश्रित्य स मुच्येत्सर्वपातकैः ॥ ४३ ॥
पुराणसंहितां वापि शैवीं वा वैष्णवीमपि ॥ यः पठेन्नर्मदातीरे शिवाग्रे स शिवात्मकः ॥ ४४ ॥ आभूतसंक्षयं यावत्स्वर्गलोके महीयते ॥ संसारव्य
सनं हातुं पुरा प्रोक्तं तु नंदिना ॥ ४५ ॥ देवर्षिसिद्धगंधर्वसमवाये शिवालये ॥ नंदिगीतामिमां राजञ्छृणुष्वैकमनाः शुभाम् ॥ ४६ ॥ स्वर्गमोक्ष
प्रदां पुण्यां संसारभयनाशिनीम् ॥ ४७ ॥ संसारगह्वरगुहां प्रविहातुमेतां चेदिच्छथ प्रतिपदं भवतापखिन्नाः ॥ नानाविधैर्निजकृतैर्बहुकर्मपाशैर्बद्धाः
सुखाय शृणुतेकहितं मयोक्तम् ॥ ४८ ॥ शक्र वक्रगतिं मा गा मा कृथा यम यातनाम् ॥ चेतः प्रचेतः शमय लौल्यं त्यज वित्तप ॥ ४९ ॥ दीना
नाथविशिष्टेभ्यो धनं सर्वं परित्यज ॥ यदि संसारजलधेर्वीचीप्रेखोद्धनातुरः ॥ ५० ॥ जन्मोद्विग्नं मृतेस्त्रस्तं ग्रस्तं कामादिभिर्नरम् ॥ त्रस्तं यो न
यमादिभ्यः पिनाकी पाति पावनः ॥५१॥ मा धेहि गर्वं कीनाश हास्यं यास्यसि पीडयन् ॥ प्राणिनं सर्वशरणं तद्भावि शरणं तव ॥ ५२ ॥ कालः
करालको वालः को मृत्युः को यमाधमः ॥ शिवविष्णुपराणां हि नराणां किं भयं भवेत् ॥ ५३ ॥ भवभारार्तजंतूनां रेवातीरनिवासिनाम् ॥
भर्गश्च भगवांश्चैव भवभीतिविभेदनौ ॥ ५४ ॥ शिवं भज शिवं ध्याय शिवं स्तुहि शिवं यज ॥ शिवं नम वराक त्वं ज्ञानं मोक्षं यदीच्छसि ॥५५॥
पठ पंचाननं शास्त्रं मंत्रं पंचाक्षरं जप ॥ धेहि पंचात्मकं तत्त्वं यज पंचाननं परम् ॥ ५६ ॥ किं तैः कर्मगणैः शौच्यैर्नानाभावविशेषिनैः ॥ यदि
पंचाननः श्रीमान्सेव्यते सर्वथा शिवः ॥ ५७ ॥ किं संसारगजोन्मत्तदुर्हितैर्निभृतैरपि ॥ यदि पंचाननो देवो भावगंधोपसेवितः ॥ ५८ ॥ रे मूढ
किं विषादेन प्राप्य कर्मकदर्थनाम् ॥ भवानीवल्लभं भीमं जप त्वं भयनाशनम् ॥ ५९ ॥ नर्मदातीरनिलयं दुःखौघविलयंकरम् ॥ स्वर्गमोक्षप्रदं
भर्गं भज मूढ सुरेश्वरम् ॥ ६० ॥ विहाय रेवां सुरसिंधुसेव्यां तत्तीरसंस्थं च हरं हरिं च ॥ उन्मत्तवद्भावविवर्जितस्त्वं क्व यासि रे मूढ दिगंतराणि ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ६१ ॥ भज रेवाजलं पुण्यं यज रुद्रं सनातनम् ॥ जप पंचाक्षरीं विद्यां व्रज स्थानं च वांछितम् ॥ ६२ ॥ क्लेशयित्वा निजं कायमुपायैर्बहुभि
स्तु किम् ॥ भज रेवां शिवं प्राप्य सुखसाध्यं परं पदम् ॥ ६३ ॥ एवं कैलासमासाद्य नंदी स शिवसन्निधौ ॥ जगौ यल्लोकपालानां तन्ममाख्यं
तवाधुना ॥ ६४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्नानदानपरो यस्तु नित्यं धर्ममनुव्रतः ॥ नर्मदातीरमाश्रित्य मुच्यते सर्वपातकैः ॥ ६५ ॥
विधिहीनो जपेन्नित्यं वेदान्सर्वान्छतं समाः ॥ मृत्युलाङ्गलजाप्येन समो योऽप्यधिको गुणैः ॥ ६६ ॥ बीजयोन्यविशुद्धस्तु यथा रुद्रं न विंदति ॥
तथा लाङ्गलमंत्रोऽपि न तिष्ठति गतायुषि ॥ ६७ ॥ गायत्रीजपसंयुक्तः संयमी ह्यधिको गुणैः॥ अग्निमीळे इषेत्वो वा अग्न आयाहि नित्यदा ॥६८॥
शन्नो देवीति कूलस्थो जपेन्मुच्येत किल्बिषैः ॥ ६९ ॥ सांगोपांगांस्तथा वेदाञ्जपन्नित्यं समाहितः ॥ न तत्फलमवाप्नोति गायत्र्या संयमी यथा
॥ ७० ॥ रुद्राध्यायं सकृज्जप्त्वा विप्रो वेदसमन्वितः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७१ ॥ अन्यद्वै जप्य संस्थानं
मृत्तमारण्यकं तथा ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७२ ॥ यत्किंचित्क्रियते जाप्यं यच्च दानं प्रदीयते ॥ नर्म
दाजलमाश्रित्य तत्सर्वं चाक्षयं भवेत् ॥ ७३ ॥ एवंविधैर्व्रतैर्नित्यं नर्मदां ये समाश्रिताः ॥ ते मृता वैष्णवं यांति पदं वा शैवम
व्ययम् ॥ ७४ ॥ सत्यलोकं नराः केचित्सूर्यलोकं तथापरं ॥ अप्सरोगणसंवीता यावदाभूतसंप्लवम् ॥ ७५ ॥ एवं वै वर्तमाने
स्मिँल्लोके तु नृपपुंगव ॥ ऋषीणां दशकोटयस्तु कुरुक्षेत्रनिवासिनाम् ॥ ७६ ॥ मया सह महाभाग नर्मदातटमाश्रिताः ॥
फलमूलकृताहारा अर्चयंतः स्थिताः शिवम् ॥ ७७ ॥ तच्च वर्षशतं दिव्यं कालसंख्यानुमानतः ॥ पंचिंशतिसहस्राणि तानि मानुषसंख्यया ॥
॥ ७८ ॥ ततस्तस्यामतीतायां संध्यायां नृपसत्तम ॥ शेषं मानुष्यमेकं तु काले वर्षशतं स्थितम् ॥ ७९ ॥ ततोऽभवद्दनावृष्टिर्लोकक्षयकरी
तदा ॥ यया यातं जगत्सर्वं क्षयं भूयो हि दारुणम् ॥ ८० ॥ ये पूर्वमिह संसिद्धा ऋषयो वेदपारगाः ॥ तेषां प्रभावाद्भगवान्ववर्ष बलवृत्रहा ॥ ८१ ॥
महती भूरिसलिला समंताद्दृष्टिराहिता ॥ ततो वृष्ट्यां तु तेषां वै वर्तनं समजायत ॥ ८२ ॥ श्यामाकैर्नुदविल्वाद्यैर्नर्मदातीरमाश्रितैः ॥ नीयते स
महान्कालो महासिद्धिमभीप्सुभिः ॥ ८३ ॥ पुनर्युगांते संप्राप्ते किंचिच्छेषे कलौ युगे ॥ निःशेषमभवत्सर्वं शुष्कं स्थावरजंगमम् ॥ ८४ ॥
निर्वृक्षौषधगुल्मं च तृणवीरुद्विवर्जितम् ॥ अनावृष्टिहतं सर्वं भूमण्डलमभूद्भृशम् ॥ ८५ ॥ ततस्ते ऋषयः सर्वे क्षुत्तृषार्ताः सहस्रशः ॥ युगस्वभाव
मविदो हीनसत्त्वाभवन्नृप ॥ ८६ ॥ नष्टहोमस्वधाकारे युगांते समुपस्थिते ॥ किं कार्यं क्व नु यास्यामः कोऽस्माकं शरणं भवेत् ॥ ८७ ॥
तानहं प्रत्युवाचेदं मा भैष्टेति पुनःपुनः ॥ ईदृग्विधा मया दृष्टा बहवः कालपर्ययाः ॥ ८८ ॥ नर्मदातीरमाश्रित्य ते सर्वे गमिता मया ॥
सा हि शरणं देवी संप्राप्ते हि युगक्षये ॥ ८९ ॥ नान्या गतिरिहास्माकं विद्यते द्विजसत्तमाः ॥ जननी सर्वभूतानां विशेषेण द्विजोत्तमाः ॥९०॥
पितामहा ये पितरो ये चान्ये प्रपितामहाः ॥ ते समस्ता गताः स्वर्गं समाश्रित्य महानदीम् ॥ ९१ ॥ भृग्वाद्याः सप्त ये त्वासन्मम पूर्वपिता
महाः ॥ धौम्यणी च महाभागा मम भार्या शुचिस्मिता ॥ मनस्वती च या माता भार्गवोऽङ्गिरसस्तथा ॥ ९२ ॥ पुलस्त्यः पुलहश्चैव वसिष्ठा
त्रेयकाश्यपाः ॥ तथान्ये च महाभागा नियमव्रतचारिणः ॥ अन्ये च शतसाहस्रा अत्र सिद्धिं समागताः ॥ ९३ ॥ तस्मादियं महाभागा न
मोक्तव्या कदाचन ॥ नान्या काचिन्नदी शक्ता लोकत्रयफलप्रदा ॥ ९४ ॥ द्वंद्वैरनेकैर्बहुभिः क्षुत्तृषाद्यैर्महाभयैः ॥ मुच्यंते तें नराः सद्यो नर्मदा
तीरवासिनः ॥ ९५ ॥ तस्मात्सर्वप्रयत्नेन सेवितव्या सरिद्वरा ॥ वांछद्भिः परमं श्रेय इह लोके परत्र च ॥ ९६ ॥ इति श्रीस्कांदे महापुराण एका
शीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्यवर्णनंनाम एकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ एतच्छ्रुत्वा वचो राजन्संहृष्टा ऋषयोऽभवन् ॥ नर्मदां स्तोतुमारब्धाः कृतांजलिपुटा द्विजाः ॥ १ ॥ नमोऽस्तु ते पुण्यजले नमो म
करगामिनि ॥ नमस्ते पापमोचिन्यै नमो देवि वरानने ॥२॥ नमोऽस्तु ते पुण्यजलाश्रये शुभे विशुद्धसत्त्वे सुरसिद्धसेविते ॥ नमोस्तु ते तीर्थगणै
र्निषेविते नमोऽस्तु रुद्रांगसमुद्भवे वरे ॥ ३ ॥ नमोऽस्तु ते देवि समुद्गमिनि नमोस्तु ते देवि वरप्रदे शिवे ॥ नमोस्तु लोकद्वयसौख्यदायिनि
ह्यनेकभूतौघसमाश्रितेऽनघे ॥ ४ ॥ सरिद्वरे पापहरे विचित्रिते गन्धर्वयक्षोरगसेवितांगे ॥ सनातनि प्राणिगणानुकंपिनि मोक्षप्रदे देवि विधेहि
शं नः ॥ ५ ॥ महागजौघैर्महिषैर्वराहैः संसेविते देवि महोर्मिमाले ॥ नताः स्म सर्वे वरदे सुखप्रदे विमोचयास्मान्पशुपाशबन्धात् ॥ ६ ॥ पापैरनेकैर
शुभैर्निबद्धा भ्रमंति तावन्नरकेषु मर्त्याः ॥ महानिलोद्धूततरंगभूतं यावत्तवांभो हि न संस्पृशंति ॥ ७॥ अनेकदुःखौघभयार्दितानां पापैरनेकैरभिवे
ष्टितानाम् ॥ गतिस्त्वमंभोजसमानवक्त्रे द्वंद्वैरनेकैरपि संवृतानाम् ॥ ८ ॥ नद्यश्च पूता विमला भवन्ति त्वां देवि संप्राप्य न संशयोऽत्र ॥ दुःखा
तुराणामभयं ददासि शिष्टैरनेकैरभिपूजितासि ॥ ९ ॥ स्पृष्टं करैश्चन्द्रमसो रवेश्च तदैव दद्यात्परमं पदं तु ॥ यत्रोपलाः पुण्यजलाप्लुतास्ते शिवत्व
मायांति किमत्र चित्रम् ॥ १० ॥ भ्रमंति तावन्नरकेषु मर्त्या दुःखातुराः पापपरीतदेहाः ॥ महानिलोद्धूततरंगभंगं यावत्तवांभो न हि संश्रयंति ॥
॥११॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबंति येंऽभस्तव देवि पुण्यम् ॥ मुक्ता भवन्तीह भयात्तु घोरान्निःसंशयं तेऽपि किमत्र चित्रम् ॥१२॥
सरांसि नद्यः क्षयमभ्युपेता घोरे युगेस्मिन्हि कलौ प्रदूषिते ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे च गंगा ॥१३॥ तव प्रसादाद्धरदे वरिष्ठे
कालं यथेमं परिपालयित्वा ॥ योगोऽथ रुद्रं तव सुप्रसादाद्ययं तथा त्वं कुरु वै प्रसादम् ॥१४॥ गतिस्त्वमंबेव पितेव पुत्रांस्त्वं पाहि नो यावदिमं
युगांतम् ॥ काले त्वनावृष्टिहतं सुघोरं यावत्तरामस्तव सुप्रसादात् ॥ १५ ॥ पठंति ये स्तोत्रमिदं द्विजेंद्राः शृण्वंति ये चापि नराः प्रशां
ताः ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्याम्बरभूषिताश्च ॥ १६ ॥ ये स्तोत्रमेतत्सततं पठंति स्नात्वा तु तोये खलु नर्मदायाः ॥ अन्ते हि
तेषां सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ १७ ॥ प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवं च ॥ स मुक्तपापः सुविशुद्धदेहः
समाश्रयं याति महेश्वरस्य ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदा
माहात्म्ये नर्मदास्तोत्रकथननाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं भगवती पुण्या स्तुता सा मुनिपुंगवैः ॥
चिंतयामास सर्वेषां दास्यामि वरमुत्तमम् ॥ १ ॥ ततः प्रसुप्तांस्ताञ्ज्ञात्वा रात्रौ देवी जगाम ह ॥ एकैकस्य ऋषेः स्वप्ने दर्शनं चारुहासिनी ॥
॥ २ ॥ ततोऽर्धरात्रे संप्राप्ते उत्थिता जलमध्यतः ॥ विमलांबरसंवीता दिव्यमालाविभूषिता ॥ ३ ॥ धृतातपत्रा सुश्रोणी पद्मरागविभूषिता ॥
जगाद मामैरिति तानेकैकं तु पृथक्पृथक् ॥ ४ ॥ वसध्वं मम पार्श्वे तु भयं त्यक्त्वा क्षुधादिजम् ॥ ५ ॥ एवमुक्त्वा तदा देवी स्वप्नांते तान्महा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुनीन् ॥ जगामादर्शनं पश्चात्प्रविश्य जलमात्मिकम् ॥ ६ ॥ ततः प्रभाते मुनयो मिथ ऊचुर्मुदान्विताः ॥ तथा दृष्टा मया दृष्टा स्वप्ने देवी सुदर्शना ॥७॥ अभयं दत्तमस्माकं सिद्धिश्चाप्यचिरेण तु ॥ प्रशस्तं दर्शनं तस्या नर्मदाया न संशयः ॥८॥ अथान्यदिवसे राजन्मत्स्यानां रूपमुत्तमम्॥ पश्यंति सपरीवाराः स्वकीयाश्रमसन्निधौ ॥ ९ ॥ तान्दृष्ट्वा विस्मयाविष्टा मत्स्यांस्तत्र महर्षयः ॥ पूजयामासुरव्यग्रा हव्यकव्येन देवताः ॥ १० ॥ तान्मत्स्यसंघान्संप्राप्य महादेव्याः प्रसादतः॥ सपुत्रदारभृत्यास्ते वर्तयन्ति पृथक्पृथक् ॥ ११ ॥ दिनेदिने तथाप्येवमाश्रमेषु द्विजातयः॥ मत्स्यानां संचयं दृष्ट्वा विस्मिताश्चाभवंस्तदा ॥ १२ ॥ मृतांस्तांस्तु सुपुष्टांगान्पाठीनांश्च विशेषतः ॥ द्वारेद्वारे चाश्रमाणां तापसानां युष्टिर ॥ १३ ॥ हृष्टपुष्टास्तदा सर्वे नर्मदातीरवासिनः ॥ ऋषयस्ते भयं सर्वे तत्यजुः क्षुत्तृषोद्भवम् ॥१४॥ ते जपंतस्तपंतश्च तिष्ठंति भरतर्षभ ॥ अर्चयंति पितॄन्देवान्नर्मदातटमाश्रिताः ॥१५॥ तैर्जपद्भिस्तपद्भिश्च सततं द्विजसत्तमैः॥ भ्राजते सा सरिच्छ्रेष्ठा ताराभिर्द्यौर्ग्रहैरिव ॥१६॥ तत्र तैर्बहुलैः शुभ्रैर्ब्राह्मणैर्वेदपरागैः॥ नर्मदा धर्मदा पूर्वं संविभक्ता यथाक्रमम् ॥ १७ ॥ ऋषिभिर्दशकोटीभिर्नर्मदातीरवासिभिः ॥ विभक्तेयं विभक्तांगी नर्मदा शर्मदा नृणाम् ॥ १८ ॥ यज्ञोपवीतैश्च शुभैरक्षसूत्रैश्च भारत ॥ कूलद्वये महापुण्या नर्मदोदधिगामिनी ॥१९॥ पृथगायतनैः शुभ्रैर्लिंगैर्वालुकमृन्मयैः ॥ भ्राजते या सरिच्छ्रेष्ठा नक्षत्रैरिव शर्वरी ॥ २० ॥ एवं त ऋषयः सर्वे तर्पयंतः सुरान्पितॄन् ॥ न्यवसन्नर्मदातीरे यावदाभूतसंप्लवम् ॥ २१ ॥ किंचिद्गते ततस्तस्मिन्घोरे वर्षशताधिके ॥ अर्धरात्रे तदा कन्या जलादुत्तीर्य भारत ॥ २२ ॥ विद्युत्पुंजसमाभासा व्यालयज्ञोपवीतिनी ॥ त्रिशूलाग्रकरा सौम्या तानुवाच ऋषींस्तदा ॥ २३ ॥ आगच्छध्वं मुनिगणा विशध्वं मामयोनिजाम् ॥ समेताः पुत्रदारैश्च ततः सिद्धिमवाप्स्यथ ॥ २४ ॥ यस्ययस्य हि या वांछा तस्य तांतां ददाम्यहम् ॥ विष्णुं ब्रह्माणमीशानमन्यं वा सुरमुत्तमम् ॥ २५ ॥ तत्र सर्वान्नयिष्यामि प्रसन्ना वरदा ह्यहम् ॥ प्राणायामपरा भूत्वा मां विशध्वं समाहिताः ॥ २६ ॥ सह पुत्रैश्च दारैश्च त्यक्त्वाश्रमपदानि च ॥ कालक्षेपो न कर्तव्यः प्रलयोऽयमुपस्थितः ॥ २७ ॥ संहारः सर्वभूतानां कल्पदाहः सुदारुणः ॥ एकाहमभवं पूर्वं महाघोरे जनक्षये ॥ २८ ॥ शेषा नद्यः समुद्राश्च सर्व एव क्षयंगताः ॥ वरदानान्महेशस्य तेनाहं न क्षयं गता ॥ २९ ॥ अमृतः शाश्वतो देवः स्थाणुरीशः सनातनः ॥ स पूजितः प्रार्थितो वा किं न दद्याद्द्विजोत्तमाः ॥ ३० ॥ एवमुक्त्वा ऋषीन्रेवा प्रविवेश जलं ततः ॥ करात्तशूला सा देवी व्यालयज्ञोपवीतिनी ॥ ३१ ॥ ततस्ते तद्वचः श्रुत्वा विस्मयापन्नमानसाः ॥ अभिवंद्य च मां सर्वे क्षामयंतः पुनःपुनः ॥ ३२ ॥ क्षम्यतां नो यदुक्तं हि वसतां तव संश्रये ॥ गृहांस्त्यक्त्वा महाभागाः सशिष्याः सह बांधवाः ॥ ३३ ॥ जप्त्वा चैकाक्षरं ब्रह्म हृदि ध्यात्वा महेश्वरम् ॥ स्नात्वा च मन्त्रपूताभिरथ चाद्भिर्जितव्रताः ॥३४॥ विविशुर्नर्मदातोयं सपक्षा इव पर्वताः ॥ द्योतयंतो दिशः सर्वाः कुशहस्ताः सहाग्नयः ॥ ३५ ॥ गतेषु तेषु राजेंद्र अहमेकः स्थितस्तदा ॥ अमरेशं समासाद्य पूजयन्नर्मदां नदीम् ॥ ३६ ॥ अनुभूताः सप्तकल्पा मायूराद्या मया नृप ॥ प्रसादाद्वेधसः सर्वे रेवया सह भारत ॥३७॥ जन्मतोद्य दिनं यावन्न जानेऽस्याः पुरास्थितिम् ॥ ३८ ॥ इयं हि शांकरी शक्तिः कला शंभोरिलाह्वया ॥ नर्मदा दुरितध्वंसकारिणी भवतारिणी ॥ ३९ ॥ यदाहमपि नाभूवं पुराकल्पेषु पांडव ॥ चतुर्दशसु कल्पेषु तेष्वियं सुखसंस्थिताः ॥४०॥ चतुर्दश पुरा कल्पा न मृता येषु नर्मदा ॥ तानहं संप्रवक्ष्यामि देवी प्राह यथा मम ॥ ४१ ॥ कापिलं प्रथमं विद्धि प्राजापत्यं द्वितीयकम् ॥ ब्राह्मं सौम्यं च सावित्रं बार्हस्पत्यं प्रभासकम् ॥ ४२ ॥ माहेंद्रमग्निकल्पं च जयंतं मारुतं तथा ॥ वैष्णवं बहुरूपं च ज्यौतिषं च चतुर्दशम् ॥ ४३ ॥ एते कल्पा मया ख्याता न मृता येषु नर्मदा ॥ मायूरं पंचदशमं कौर्मं चैवात्र षोडशम् ॥ ४४ ॥ बकं मात्स्यं च पाद्मं च वटकल्पं च भारत ॥ एकविंशतिमं चैतं वाराहं सांप्रतीनकम् ॥ ४५ ॥ इमे सप्त मया साकं रेवया परिशीलिताः ॥ एकविंशतिकल्पास्तु नर्मदायाः शिवांगतः ॥ ४६ ॥ संजाताया नृपश्रेष्ठ मया दृष्टा ह्यनेकशः ॥ कथिता नृपतिश्रेष्ठ भूयः किं कथयामि ते ॥ ४७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नर्मदामाहात्म्य एकविंशतिकल्पकथानकवर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ततस्त ऋषयः सर्वे महाभागास्तपोधनाः ॥ गतास्तु परमं लोकं ततः किं जातमद्भुतम् ॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततस्तेषु प्रयातेषु नर्मदातीरवासिषु ॥ बभूव रौद्रसंहारः सर्वभूतक्षयंकरः ॥ २ ॥ कैलासशिखरस्थं तु महादेवं सनातनम् ॥ ब्रह्माद्याः प्रास्तुवन्देवमृग्यजुःसामभिः शिवम् ॥ ३ ॥ संहरं त्वं जगद्देव सदेवासुरमानुषम् ॥ प्राप्तो युगसहस्रांतः कालः संहरणक्षमः ॥ ४ ॥ मद्रूपं तु समास्थाय त्वया चैतद्विनिर्मितम् ॥ वैष्णवीं मूर्तिमास्थाय त्वयैतत्परिपालितम् ॥ ५ ॥ एका मूर्तिस्त्रिधा जाता ब्राह्मी शैवी च वैष्णवी ॥ सृष्टिसंहाररक्षार्थं भवेदेवं महेश्वर ॥ ६ ॥ एतच्छ्रुत्वा वचस्तथ्यं विष्णोश्च परमेष्ठिनः ॥ सगणः सपरीवारः सह ताभ्यां सहोमया ॥ ७ ॥ सप्तलोकान्विभिद्येमान्भगवान्नीललोहितः ॥ भूराद्यब्रह्मलोकांतं भित्त्वांडं परतः परम् ॥ ८ ॥ शैवं पदमजं दिव्यमाविशत्सह तैर्विभुः ॥ न तत्र वायुर्नाकाशं नाग्निस्तत्र न भूतलम् ॥९॥ यत्र संतिष्ठते देव उमया सह शंकरः ॥ न सूर्यो न ग्रहास्तत्र न ऋक्षाणि दिशस्तथा ॥१०॥ न लोकपाला न सुखं न च दुःखं नृपोत्तम ॥११॥ ब्राह्मं पदं यत्कवयो वदंति शैवं पदं यत्कवयो वदंति ॥ क्षेत्रज्ञमीशं प्रवदंति चान्ये सांख्याश्च गायंति किलादिमोक्षम् ॥ १२ ॥ यद्ब्रह्म आद्यं प्रवदंति केचिद्यं सर्वमीशानमजं पुराणम् ॥ तमेकरूपं तमनेकरूपमरूपमाद्यं परमव्ययाख्यम् ॥ १३ ॥ अवर्णमप्यर्थमनामगोत्रं तुर्यं पदं यत्कवयो वदंति ॥ ध्यानार्थविज्ञानमयं सुसूक्ष्ममात्मस्थमीशानवरं वरेण्यम् ॥१४॥ ततस्त्रयस्ते भगवन्तमीशं संप्राप्य संक्षिप्य भवंत्यथैकम् ॥ पृथक्स्वरूपैस्तु पुनस्त एव जगत्समस्तं परिपालयंति ॥ १५ ॥ संहारं सर्वभूतानां रुद्रत्वे कुरुते प्रभुः ॥ विष्णुत्वे पालयेल्लोकान्ब्रह्मत्वे सृष्टिकारकः ॥ १६ ॥ प्रकृत्या सह संयुक्तः कालो भूत्वा महेश्वरः ॥ विश्वरूपा महाभागा तस्य पार्श्वे व्यवस्थिता ॥ १७ ॥ यामाहुः प्रकृतिं तज्ज्ञाः पदार्थानां विचक्षणाः ॥ पुरुषत्वे प्रकृतित्वे च कारणं परमेश्वरः ॥ १८ ॥ तस्मादेतज्जगत्सर्वं समुद्भूतं चराचरम् ॥ तस्मिन्नेव लयं याति जगति समुपस्थिते ॥ १९ ॥ भगलिंगांकितं सर्वं व्याप्तं वै परमेष्ठिना ॥ भगरूपो भवेद्विष्णुर्लिंगरूपो महेश्वरः ॥ २० ॥ भाति सर्वेषु लोकेषु भोगेषु भुवादिषु ॥ प्रविष्टः सर्वभूतेषु तेन विष्णुर्भगः स्मृतः ॥ २१ ॥ विशनाद्विष्णुरित्युक्तः सर्वदेवमयो महान् ॥ भासनाद्गमनाच्चैव भगसंज्ञा प्रकीर्तिता ॥ ॥ २२ ॥ ब्रह्मादिस्तंबपर्यंतं यस्मिन्नेति लयं जगत् ॥ एकभावं समापन्नं लिंगं तस्माद्विदुर्बुधाः ॥ २३ ॥ महादेवस्ततो देवीमाह पार्श्वे स्थितां तदा ॥ संहरस्व जगत्सर्वं मा विलंबस्व शोभने ॥ २४ ॥ त्यज सौम्यमिदं रूपं सितचन्द्रांशुनिर्मलम् ॥ रौद्रं रूपं समास्थाय संहरस्व चराचरम् ॥ २५ ॥ रौद्रैर्भूतगणैर्घोरैर्देवि त्वं परिवारिता ॥ जीवलोकमिमं सर्वं भक्षयस्वांबुजेक्षणे ॥ २६ ॥ ततोऽहं मर्दयिष्यामि प्लावयिष्ये तथा जगत् ॥ कृत्वा चैकार्णवं भूयः सुखं स्वप्स्ये त्वया सह ॥ २७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ नाहं देव जगच्चैतत्संहरामि महा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्युते ॥ अंबा भूत्वा विचेष्टं न भक्षयामि भृशातुरम् ॥ २८ ॥ स्त्रीस्वभावेन कारुण्यं करोति हृदयं मम ॥ कथं वै निर्दहिष्यामि जगदेतज्जगत्पते ॥ २९ ॥ तस्मात्त्वं स्वयमेवेदं जगत्संहर शंकर ॥ अथैवमुक्तस्तां देवीं धूर्जटिर्नीललोहितः ॥ ३० ॥ क्रुद्धो निर्भर्त्स यामास हुंकारेण महेश्वरीम् ॥ ॐ हुंफट् त्वं स इत्याह कोपाविष्टेरथेक्षणैः ॥ ३१ ॥ हुंकारिता विशालाक्षी पीनोरुजघनस्थला ॥ तत्क्षणाच्चाभवद्रौद्रा कालरात्रीव भारत ॥ ३२ ॥ हुंकुर्वती महानादेर्नादयन्ती दिशो दश ॥ व्यवर्धत महारौद्रा विद्युत्सौदामिनी यथा ॥ ॥ ३३ ॥ विद्युत्संपातदुष्प्रेक्ष्या विद्युत्संघातचंचला ॥ विद्युज्ज्वालाकुला रौद्रा विद्युदग्निनिभेक्षणा ॥ ३४ ॥ मुक्तकेशी विशालाक्षी कृशग्रीवा कृशोदरी ॥ व्याघ्रचर्माम्बरधरा व्यालयज्ञोपवीतिनी ॥ ३५ ॥ वृश्चिकैरग्निपुंजाभैर्गोनसैश्च विभूषिता ॥ त्रैलोक्यं पूरयामास विस्तारेणोच्छ्रयेण च ॥ ३६ ॥ भासुरांगा तु संवृत्ता कृष्णसर्पैककुण्डला ॥ चित्रदण्डोद्यतकरा व्याघ्रचर्मोपसेविता ॥ ३७ ॥ व्यवर्धत महारौद्रा जगत्संहारकारिणी ॥ सृक्किणी लेलिहाना च क्रूरफूत्कारकारिणी ॥ ३८ ॥ व्यात्तास्या घुर्घुरारावा जगत्संक्षोभकारिणी ॥ खेलद्भूतानुगा क्रूरा निःश्वासोच्छ्वासकारिणी ॥ ३९ ॥ जाताट्टहासा दुर्नासा वह्निकुण्डसमेक्षणा ॥ प्रोद्यत्किलकिलारावा ददाह सकलं जगत् ॥ ४० ॥ दह्यमानाः सुरास्तत्र पतंति धरणीतले ॥ पतंति यक्षगन्धर्वाः सकिन्नरमहोरगाः ॥ ४१ ॥ पतंति भूतसंघाश्च हाहाहेहेविराविणः ॥ हुंवापातैः सनिर्घातै रुदितार्तस्वरैरपि ॥ ४२ ॥ व्याप्तमासीत्तदा विश्वं त्रैलोक्यं सचराचरम् ॥ संपतद्भिः पतद्भिश्च ज्वलद्भूतगणैर्महीं ॥ ४३ ॥ जातैश्चटचटाशब्दैः पतद्भिर्गिरिसानुभिः ॥ तत्र रौद्रोत्सवे जाता रुद्रानंदविवर्धिनी ॥ ४४ ॥ विहिंसमाना भूतानि चर्वमाणाचरानपि ॥ तत्तद्गंधमुपादाय शिवाराव विराविणी ॥ ४५ ॥ गलच्छोणितधाराभिमुखा दिग्धकलेवरा ॥ चंडशीलाऽभवच्चण्डी जगत्संहारकर्मणि ॥ ४६ ॥ येऽपि प्राप्ता महर्लोकं भृग्वाद्याश्च महर्षयः ॥ तेऽपि नश्यंति शतशो ब्रह्मक्षत्रविशादयः ॥ ४७ ॥ देवासुरा भयत्रस्ताः सयक्षोरगराक्षसाः ॥ विशंति केपि पातालं लीयंते च गुहादिषु ॥ ४८ ॥ सा च देवी दिशः सर्वा व्याप्य मृत्युरिव स्थिता ॥ युगक्षयकरे काले देवेन विनियोजिता ॥ ४९ ॥ एकापि नवधा जाता दशधा दशधा तथा ॥ चतुःषष्टिस्वरूपा च शतरूपाट्टहासिनी ॥ ५० ॥ जज्ञे सहस्ररूपा च लक्षकोटितनुः शिवा ॥ नानारूपायुधाकारा नाना वादनचारिणी ॥ ५१ ॥ एवंरूपाऽभवद्देवी शिवस्यानुज्ञया नृप ॥ दिक्षु सर्वासु गगने विकटायुधशीलिनः ॥ ५२ ॥ रुंधंतो नश्यमानांस्ता न्गणा माहेश्वराः स्थिताः ॥ विचरंति तया सार्द्धं शूलपट्टिशपाणयः ॥ ५३ ॥ ततो मातृगणाः केचिद्विनायकगणैः सह ॥ व्यवर्धंत महारौद्रा जगत्संहारकारिणः ॥ ५४ ॥ ततस्तस्या व्यवर्धंत दंष्ट्राः कुन्देंदुसन्निभाः ॥ योजनानां सहस्राणि अयुतान्यर्बुदानि च ॥ ५५ ॥ दंष्ट्रावलिः कररुहाः क्रूरास्तीक्ष्णाश्च कर्कशाः ॥ वियद्दिशो लिखंत्येव सप्तद्वीपां वसुन्धराम् ॥ ५६ ॥ तस्या दंष्ट्राभिसंपातैश्चूर्णिता वनपर्वताः ॥ शिलासंचयसंघाता विशीर्यंते सहस्रशः ॥ ५७ ॥ हिमवान्हेमकूटश्च निषधो गंधमादनः ॥ माल्यवांश्चैव नीलश्च श्वेतश्चैव महागिरिः ॥ ५८ ॥ मेरुमध्यमिलापीठं सप्तद्वीपं च सार्णवम् ॥ लोकालोकेन सहितं प्राकंपत नृपोत्तम ॥ ५९ ॥ दंष्ट्राशनिविस्पृष्टाश्च विशीर्यंते महाद्रुमाः ॥ उत्पातैश्च दिशो व्याप्ता घोररूपैः समंततः ॥ ६० ॥ तारा ग्रहगणाः सर्वे ये च वैमानिका गणाः ॥ शिवासहस्रैराकीर्णा महामातृगणैस्तथा ॥ ६१ ॥ सा चचार जगत्कृत्स्नं युगांते समुपस्थिते ॥ भ्रमद्भिश्च ध्रुवद्भिश्च क्रोशद्भिश्च समंततः ॥ ६२ ॥ प्रमथद्भिर्ज्वलद्भिश्च रौद्रैर्व्याप्ता दिशो दश ॥ विस्तीर्णं शैलसंघातं विघूर्णित गिरिद्रुमम् ॥ ६३ ॥ प्रभिन्नगोपुरद्वारं केशशुष्कास्थिसंकुलम् ॥ प्रदग्धग्रामनगरं भस्मपुंजाभिसंवृतम् ॥ ६४ ॥ चिताधूमाकुलं सर्वं त्रैलोक्यं सचराचरम् ॥ हाहाकाराकुलं सर्वमहहस्वननिस्वनम् ॥ ६५ ॥ जगदेतदभूत्सर्वमशरण्यं निराश्रयम् ॥ ६६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कल्पानुकथने कालरात्रिकृतजगत्संहरणवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो मातृसहस्रैश्च रौद्रैश्च परिवारिता ॥ कालरात्रिर्जगत्सर्वं हरते दीप्तलोचना ॥ १ ॥ ततस्ता मातरो घोरा ब्रह्मविष्णुशिवात्मिकाः ॥ वाग्विद्यानलकौवेरा यमतोयेशशक्तयः ॥ २ ॥ स्कन्दक्रोडनृसिंहानां विचरंत्यो भयानकाः ॥ चक्रशूलगदाखड्गवज्रशक्त्यृष्टिपट्टिशैः ॥ ३ ॥ खट्वांगैरुल्मुकैर्दीप्तैर्व्यचरन्मातरः क्षये ॥ उमासंनोदिताः सर्वाः प्रधावंत्यो दिशो दश ॥ ४ ॥ तासां चरणविक्षेपैर्हुंकारोद्धारनिस्वनैः ॥ त्रैलोक्यमेतत्सकलं विप्रदग्धं समंततः ॥ ५ ॥ हाहारवार्कंदितनिस्वनैश्च प्रभिन्नरथ्यागृहगोपुरैश्च ॥ बभूव घोरा धरणी समंतात्कपालकेशांकुलकर्बुरांगी ॥ ६ ॥ यदेतच्छतसाहस्रं जंबूद्विपं निगद्यते ॥ सर्वमेव तदुच्छन्नं समाधृत्य नृपोत्तम ॥ ७ ॥ जंतु शाकं कुशं क्रौंचं गोमेदं शाल्मलिस्तथा ॥ पुष्करद्वीपसहिता ये च पर्वतवासिनः ॥ ८ ॥ ते ग्रस्ता मृत्युना सर्वे भूतैर्मातृगणैस्तथा ॥ महासुरकपालैश्च मांसमेदोवसोत्कटैः ॥ ९ ॥ महानादपरैर्घोरैर्वारुणीगंधमोहितैः ॥ ज्वालासहस्रसंवीता विद्युज्ज्वलितकुण्डला ॥ १० ॥ रुधिरोद्गारशोणांगी महामाया सुभीषणा ॥ पिबंती रुधिरं तत्र महामांसवसाप्रिया ॥ ११ ॥ कपालहस्ता विकटा भक्षयन्ती सुरासुरान् ॥ नृत्यन्ती च हसन्ती च विपरीता महारवा ॥ १२ ॥ त्रैलोक्यसंत्रासकरी विद्युत्संस्फोटहासिनी ॥ सप्तद्वीपसमुद्रांतां भक्षयित्वा च मेदिनीम् ॥ १३ ॥ ततः स्वस्थानमगमद्यत्र देवो महेश्वरः ॥ नर्मदातीरमाश्रित्यावसन्मातृगणैः सह ॥ १४ ॥ अमगणां कटे तुंगे नृत्यन्ती हसिता ननां ॥ अमरा देवताः प्रोक्ताः शरीरं कटमुच्यते ॥ १५ ॥ तैः कटैरावृतो यस्मात्पर्वतोऽयं नृपोत्तम ॥ छिन्नभिन्नास्थिनिकरैर्वसामेदोस्रविप्लुतैः ॥ ॥ १६ ॥ अमरंकट इत्येवं तेन प्रोक्तो मनीषिभिः ॥ महापवित्रो लोकेषु शंभुना स विनिर्मितः ॥ १७ ॥ नित्यं सन्निहितस्तत्र शंकरो ह्युमया सह ॥ ततोऽहं नियतस्तत्र तस्य पादाग्रसंस्थितः ॥ १८ ॥ प्रह्वः प्रणतभावेन स्तौमि तं नीललोहितम् ॥ ततस्तालकसंपातैर्गणैर्मातृगणैः सह ॥ ॥ १९ ॥ संप्रनृत्यति संहृष्टो मृत्युना सह शंकरः ॥ खट्वांगैरुल्मुकैश्चैव पट्टिशैः परिघैस्तथा ॥ २० ॥ मांसमेदोवसाहस्ता दृष्ट्वा नृत्यन्ति संघशः ॥ वामना जटिला मुण्डा लंबग्रीवोष्ठमूर्द्धजाः ॥ २१ ॥ महाशिश्नोदरभुजा नृत्यन्ति च हसन्ति च ॥ विकृतैराननैर्घोरैर्भुजोल्बणमुखादिभिः ॥२२॥ अमरं कण्टकं चक्रुः प्राप्ते कालविपर्यये ॥ तेषां मध्ये महाघोरं जगत्सन्त्रासकारणम् ॥ २३ ॥ मृत्युं पश्यामि नृत्यन्तं तडित्पिंगलमूर्द्धजम् ॥ तस्य पार्श्वे स्थितां देवीं विमलांबरभूषिताम् ॥ २४ ॥ कुण्डलोद्घृष्टगंडां तां नागयज्ञोपवीतिनीम् ॥ विचित्ररूपहारैश्च पूजयन्तीं महेश्वरम् ॥ २५ ॥ अपश्यं नर्मदां तत्र मातरं विश्ववंदिताम् ॥ नानातरंगां सावर्तां सुवेलार्णवसंनिभाम् ॥ २६ ॥ महासरः सरित्पातैरदृश्यां दृश्यरूपिणीम् ॥ वन्द्यमानां सुरैः सिद्धैर्मुनिसंघैश्च भारत ॥ २७ ॥ एतस्मिन्नन्तरे घोरां सप्तसप्तकसंज्ञिताम् ॥ महावीच्यौघफेनाढ्यां कुर्वन्तीं सजलं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जगत् ॥ २८ ॥ दृष्ट्वान्नमर्दनं देवीं मृगकृष्णांबरां पुनः ॥ सधूमाशनिनिर्ह्रादिर्विहंतीं सतथा तदा ॥ २९ ॥ इति महारमतुलं दृष्ट्वाब्राजसत्तम ॥ नष्टचंद्रार्ककिरणमभूदेतच्चराचरम् ॥ ३० ॥ महोत्पातसमुद्भूतं नष्टनक्षत्रमंडलम् ॥ अलातचक्रवत्तूर्णमशेषं भ्रामयंस्तनः ॥ ३१ ॥ विमानकोटिसंकीर्णः स किंनरमहोरगः ॥ महावातः सनिर्घातो येनाकंपच्चराचरम् ॥ ३२ ॥ रुद्रवक्त्रात्समुद्भूतः संवर्तोनाम विश्रुतः ॥ वायुः संशोषयामास वितत न्सप्तसागरान् ॥ ३३ ॥ उज्ज्वलितांगः कपिलाक्षश्मश्रूर्जटो जटाकलापैरवबद्धमूर्द्धजः ॥ महारवो दीप्तविशालशूलधृक्स पातु युष्मांश्च दिनेदिने हरः ॥ ॥ ३४ ॥ शूली धनुष्मान्कवची किरीटी श्मशानभस्मोक्षितसर्वगात्रः ॥ कपालमालाकुलकण्ठनालो महाहिसूत्रेरवबद्धमौलिः ॥ ३५ ॥ स गोन सौघैः परिवेष्टितांगो विषाग्निचन्द्रामरसिन्धुमौलिः ॥ पिनाकसद्बाणकरालपाणिः स कृत्तिवासा डमरुप्रगादः ॥ ३६ ॥ स सप्तलोकांतरनिःसृतात्मा महाभुजावेष्टितसर्वगात्रः ॥ नेत्रेण सूर्योदयसन्निभेन प्रवालकांकुरनिभोदरेण ॥ ३७ ॥ संध्याभ्रताम्रोत्पलपद्मरागसिन्दूरविद्युत्प्रकरारुणेन ॥ ततेन लिंगेन च लोचनेन चिक्रीडमानः स युगांतकाले ॥ ३८ ॥ हिरण्मयेनेव समुत्सृजन्स दण्डेन बद्धद्रगवान्समेरुः ॥ पादाग्रविक्षेपविशीर्ण शैलः कुर्वञ्जगन्सोऽपि जगाम तत्र ॥ ३९ ॥ संहर्तुकामस्त्रिदिवं त्वशेषं प्रमुंचमानो विकृताट्टहासम् ॥ जहार सर्वं त्रिदिवं महात्मा संक्षोभयन्वै जगदीश एकः ॥ ४० ॥ तं देवमीशानमजं वरेण्यं दृष्ट्वा जगत्संहरणं महेशम् ॥ सा कालरात्रिः सह मातृभिश्च गणाश्च सर्वे शिवमर्चयन्ति ॥४१॥ नन्दी च भृंगी च गणादयश्च तं सर्वभूतं प्रणमंति देवम् ॥ जगद्भरं सर्वजनस्य कारणं हरं स्मरारातिमहर्निशं ते ॥ ४२ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां पंचम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये सृष्टिसंहरणसंरंभवर्णनंनाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ समातृभिर्भूतगणैश्च घोरैर्वृतः समंतात्स ननर्त शूली ॥ गजेंद्रचर्मावरणे वसानः संहर्तुकामश्च जगत्समस्तम् ॥ १ ॥ महेश्वरः सर्वसुरेश्वराणां मन्त्रैरनेकैरवबद्धमाली ॥ मेदोवसारक्तविचर्चितांगस्त्रैलोक्यदाहे प्रणनर्त शंभुः ॥ २ ॥ स कालरात्र्या सहितो महात्मा काले त्रिलोकीं सकलां जहार ॥ संवर्तकाख्यः सहभानुभावः शम्भुर्महात्मा जगतो वरिष्ठः ॥ ३ ॥ स विस्फुलिंगोत्करधूमभिश्रं महोल्कवज्राशनिवातदुस्त्यम् ॥ ततोऽट्टहासं प्रमुमोच घोरं विवृत्य वक्त्रं वडवामुखाभम् ॥ ४ ॥ सहस्रवज्राशनिसंनिभेन तेनाट्टहासेन हरोद्भवेन ॥ आपूरितास्तत्र दिशो दशैव संक्षोभिताः सर्वमहार्णवाश्च ॥ ५ ॥ स ब्रह्मलोकं प्रजगाम शब्दो ब्रह्मांडभांडं प्रचचाल सर्वम् ॥ किमेतदित्याकुलचेतनास्ते विस्रस्तरूपा ऋषयो बभूवुः ॥ ६ ॥ प्रणम्य सर्वे सहसैव भीता ब्रह्माणमूचुः परमेश्वरेशम् ॥ भीताश्च सर्वे ऋषयस्ततस्ते सुरासुरैश्चैव महोरगैश्च ॥ ॥ ७ ॥ विद्युत्प्रभाभासुरभीषणांगः क एष चिक्रीडति भूतलस्थः ॥ कालानलं गात्रमिदं दधानो यस्याट्टहासेन जगद्विमूढम् ॥ ८ ॥ विस्रस्तरूपं प्रबभौ क्षणेन संहर्तुमिच्छेत्किमयं त्रिलोकीम् ॥ सार्धं त्वया सप्तभिरर्णवैश्च जनस्तपःसत्यमभिप्रयाति ॥ ९ ॥ संहर्तुकामो हि क एष देव एतत्समस्तं कथयाप्रमेय ॥ न दृष्टमेतद्विषयं कदापि जानासि तत्त्वं परमो मतो नः ॥ १० ॥ निशम्य तद्वाक्यमथाब्जभाषे ब्रह्मा समाश्वास्य सुरादिसंघान् ॥ ११ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ स एष कालस्त्रिदिवं त्वशेषं संहर्तुकामो जगदक्षयात्मा ॥ पूर्णे च शते परिवत्सराणां भविष्यतीशानविभुर्न चित्रम् ॥ १२ ॥ संवत्सरोऽयं परिवत्सरश्च उद्वत्सरो वत्सर एष देवः ॥ दृष्टोऽप्यदृष्टः प्रकृतः प्रकाशी स्थूलश्च सूक्ष्मः परमाणुरेषः ॥ १३ ॥ नातः परं किंचिदिहास्ति लोके परापरोऽयं प्रभुरात्मवादी ॥ तुष्येत मे कालसमानरूप इत्येवमुक्त्वा भगवान्सुरेशः ॥ १४ ॥ सनत्कुमारप्रमुखैः समेतः संतोषयामास ततो यतात्मा ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमोऽस्तु सर्वाय सुशांतमूर्तये ह्यघोररूपाय नमोनमस्ते ॥ सर्वात्मने सर्व नमोनमस्ते महात्मने भूतपते नमस्ते ॥ १६ ॥ ओंकार हुंकारपरिष्कृताय स्वधावषट्कार नमोनमस्ते ॥ गुणत्रयेशाय महेश्वराय ते त्रयीमयाय त्रिगुणात्मने नमः ॥ १७ ॥ त्वं शंकरस्त्वं हि महेश्वरोसि प्रधानमव्यं त्वमसि प्रविष्टः ॥ त्वं विष्णुरीशः प्रपितामहश्च त्वं सप्तजिह्वस्त्वमनंतजिह्वः ॥ १८ ॥ स्रष्टासि सृष्टिश्च विभो त्वमेव विश्वस्य वेद्यं च परं निधानम् ॥ आहुर्द्विजा वेदविदो वरेण्यं परात्परस्त्वं परतः परोऽसि ॥ १९ ॥ सूक्ष्मातिसूक्ष्मं प्रवदन्ति यच्च वाचो निवर्तन्ति मनो यतश्च ॥ ॥ २० ॥ ॥ श्रीमहादेव उवाच ॥ ॥ त्वया स्तुतोहं विविधैश्च मंत्रैः पुष्णामि शांतिं तव पद्मयोने ॥ ईक्षस्व मां लोकमिमं ज्वलंतं वक्त्रैरनेकैः प्रसभं हरंतम् ॥ २१ ॥ एवमुक्त्वा स देवेशो देव्या सह जगत्पतिः ॥ पितामहं समाश्वास्य तत्रैवांतरधीयत ॥ २२ ॥ इदं महत्पुण्यतमं वरिष्ठं स्तोत्रं निशम्येह गतिं लभंते ॥ पापैरनेकैः परिवेष्टिता ये प्रयांति रुद्रं विमलैर्विमानैः ॥ २३ ॥ भयं च तेषां न भवेत्कदाचित्पठन्ति ये तात इदं द्विजाग्र्याः ॥ संग्रामचौराग्निजने तथाब्धौ तेषां शिवस्त्राति न संशयोऽत्र ॥ २४ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये ब्रह्मकृतशिवस्तुतिवर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं संस्तूयमानस्तु ब्रह्मादैर्मुनिपुंगवैः ॥ ब्रह्मलोकगतैस्तत्र संजहार जगत्प्रभुः ॥ १ ॥ स तद्भीमं महारौद्रं दक्षिणं वक्त्रमव्ययम् ॥ महादंष्ट्रोत्कटारावं पातालतलसन्निभम् ॥ २ ॥ विद्युज्ज्वलनपिंगाक्षं भैरवं लोमहर्षणम् ॥ महाजिह्वं महादंष्ट्रं महासर्पशिरोधरम् ॥ ३ ॥ महासुरशिरोमालं महाप्रलयकारणम् ॥ असत्समुद्रनिहितवातवारिमयं हविः ॥ ४ ॥ वडवामुखसंकाशं महादेवस्य तन्मुखम् ॥ जिह्वाग्रेण जगत्सर्वं लेलिहानमपश्यत ॥ ॥ ५ ॥ योजनानां सहस्राणि सहस्राणां शतानि च ॥ दिशो दश महाघोरा मांसमेदोवसोत्कटाः ॥ ६ ॥ तस्य दंष्ट्रा व्यवर्धंत शतशोऽथ सहस्रशः ॥ सासुरान्सुरगंधर्वान्सयक्षोरगराक्षसान् ॥ ७ ॥ तस्य दंष्ट्राग्रसंलग्नान्स ददर्श पितामहः ॥ दंतयंत्रांतसंविष्टं विकृर्णितशिरोधरम् ॥ ८ ॥ जगत्प्यामि राजेंद्र विशंतं व्यादिते मुखे ॥ नानातरंगभंगांगा महाफेनौघसंकुलाः ॥ यथा नद्यो लयं यांति समुद्रं प्राप्य सत्वनाः ॥ ९ ॥ तथा ततं विश्वमिदं समस्तमनेकजीवाणवदुर्विगाह्यम् ॥ विवेश रुद्रस्य मुखं विशालं ज्वलत्तदुग्रं घननादघोरम् ॥ १० ॥ ज्वालास्ततस्तस्य मुखात्सुघोराः सविस्फुलिंगा बहुलाः सधूमाः ॥ अनेकरूपा ज्वलनप्रकाशाः प्रदीपयंतीव दिशोऽखिलाश्च ॥ ११ ॥ ततो रविज्वालसहस्रमालि बभूव वक्त्रं चलजिह्वदंष्ट्रम् ॥ महेश्वरस्याद्भुतरूपिणस्तदा स द्वादशात्मा प्रबभूव एकः ॥ १२ ॥ ततस्ते द्वादशादित्या रुद्रवक्त्राद्विनिर्गताः ॥ आश्रित्य दक्षिणामाशां निर्दहंतो वसुंधराम् ॥ १३ ॥ भौमं यज्जीवनं किंचिन्नानावृक्षतृणालयम् ॥ शुष्कं पूर्वमनावृष्ट्या संक्ष्याकुलभूतलम् ॥ १४ ॥ तदीप्यमानं सहसा सूर्यैस्तै रुद्रसंभवैः ॥ धूमाकुलमभूत्सर्वं प्रणष्टग्रहतारकम् ॥ १५ ॥ जज्वाल सहसा दीप्तं भूमंडलमशेषतः ॥ ज्वालामालाकुलं सर्वमभूदेतच्चराचरम् ॥ १६ ॥ सप्तद्वीपसमुद्रेषु सरित्सु च सरस्सु च ॥ अग्निरासीज्जगत्सर्वमाज्याहुतिमिवाध्वरे ॥ १७ ॥ विशालतेजसा दीप्ता महाज्वालासमाकुलाः ॥ दह्यंते जगत्सर्वमादित्या रुद्रसंभवाः ॥ १८ ॥ आदित्यानां रश्मयस्तु संस्पृष्टा वै परस्परम् ॥ एवं ददाह भगवांस्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri Foundation USA

लोक्यं सचराचरम् ॥ १९ ॥ सप्तद्वीपप्रमाणस्तु सोऽग्निर्भूत्वा महेश्वरः ॥ सप्तद्वीपसमुद्रांतां निर्ददाह वसुंधराम् ॥ २० ॥ सुमेरुमंदरांतां च निर्दहु र्वसुधां तदा ॥ भित्त्वा तु सप्तपातालं नागलोकं ततोऽदहत् ॥ २१ ॥ भूम्यधः सप्तपातालान्निर्दहंस्तारकैः सह ॥ चचाराग्निः समन्तात्तु निर्दहन्वै युधिष्ठिर ॥ २२ ॥ धम्यमान इवांगारैर्लोहरात्रिरिव ज्वलन् ॥ तथा तत्प्राज्ज्वलत्सर्वं संवर्त्ताग्निप्रदीपितम् ॥ २३ ॥ निर्वृक्षा निस्तृणा भूमिर्निर्नि र्झरसरःसरित् ॥ विशीर्णशैलशृंगौघा कूर्मपृष्ठोपमाऽभवत् ॥ २४ ॥ ज्वालामालाकुलं कृत्वा जगत्सर्वं चिदात्मकम् ॥ महारूपधरो रुद्रो व्यतिष्ठत महेश्वरः ॥ २५ ॥ समातृगणभूयिष्ठा सयक्षोरगराक्षसा ॥ ततो देवी महादेवं विवेश हरिलोचना ॥ २६ ॥ निर्वाणं परमापन्ना शांतेव शिखिनः शिखा ॥ जगत्सर्वं हि निर्दग्धं त्रिभिर्लोकैः सहानघ ॥ २७ ॥ रुद्रप्रसादान्मुक्त्वा मां नर्मदां चाप्ययोनिजाम् ॥ युगानामयुतं देवो मया चाद्य बुभक्षणात् ॥ २८ ॥ पुरा ह्याराधितः शूली तेनाहमजरामरः ॥ अघमर्षणघोरं च वामदेवं च त्र्यंबकम् ॥ २९ ॥ ऋषभं त्रिसुपर्णं च दुर्गां सावित्र मेव च ॥ बृहदारण्यकं चैव बृहत्साम तथोत्तरम् ॥ ३० ॥ रौद्रीं परमगायत्रीं शिवोपनिषदं तथा ॥ यथा प्रतिरथं सूक्तं जप्त्वा मृत्युंजयं तथा ॥ ॥ ३१ ॥ सरित्सागरपर्यन्ता वसुधा भस्मसात्कृता ॥ वर्जयित्वा महाभागां नर्मदाममृतोपमाम् ॥ ३२ ॥ महेन्द्रो मलयः सह्यो हेमकूटोऽ थ माल्यवान् ॥ विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ ३३ ॥ द्वादशादित्यनिर्दग्धाः शैलाः शीर्णशिलाः पृथक् ॥ भस्मीभूतास्तु दृश्यंते न नष्टा नर्मदा तदा ॥ ३४ ॥ हिमवान्हेमकूटश्च निषधो गंधमादनः ॥ माल्यवांश्च गिरिश्रेष्ठो नीलः श्वेतोऽथ शृङ्गवान् ॥ ३५ ॥ एते पर्वतरा जानो देवगंधर्वसेविताः ॥ युगांताग्निविनिर्दग्धाः सर्वे शीर्णमहाशिलाः ॥ ३६ ॥ एवं मया पुरा दृष्टो युगांते सर्वसंक्षयः ॥ वर्जयित्वा महापुण्यां नर्मदां नृपसत्तम ॥ ३७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्ये द्वादशादि त्यरूपेण जगत्संहरणवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ निर्दग्धेऽस्मिंस्ततो लोके सूर्यैरीश्वरसंभवैः ॥ सप्तभि श्चार्णवैः शुष्केद्वीपैः सप्तभिरेव च ॥१॥ ततो मुखात्तस्य घना महोल्वणा निश्चेरुरिंद्रायुधतुल्यरूपाः ॥ घोराः पयोदा जगदंधकारं कुर्वंत ईशानवर प्रयुक्ताः ॥ २ ॥ नीलोत्पलाभाः क्वचिदंजनाभा गोक्षीरकुंदेंदुनिभाश्च केचित् ॥ मयूरचंद्राकृतयस्तथाऽन्ये केचिद्विधूमानलसप्रभाश्च ॥ ३ ॥ केचि न्महापर्वतकल्परूपाः केचिन्महामीनकुलोपमाश्च ॥ केचिद्गजेन्द्राकृतयः सुरूपाः केचिन्महाकूटनिभाः पयोदाः ॥ ४ ॥ चलत्तरंगोर्मिसमानरूपा महापुरोधाननिभाश्च केचित् ॥ सगोपुराट्टालकसन्निकाशाः सविद्युदुल्काशनिमंडितांताः ॥ ५ ॥ समावृतांगः स बभूव देवः संवर्तकोनाम गणः स रौद्रः ॥ प्रवर्षमाणो जगदप्रमाणमेकार्णवं सर्वमिदं चकार ॥ ६ ॥ ततो महामेघविवर्द्धमानमीशानमिन्द्राशनिभिर्वृताङ्गम् ॥ ददर्श नाहं भयविह्व लाङ्गो गङ्गाजलौघैश्च समावृताङ्गः ॥ ७ ॥ गजाः पुनश्चैव पुनः पिबन्तो जगत्समन्तात्परिदह्यमानम् ॥ आपूरितं चैव जगत्समंतात्सर्वैश्च तैर्जग्मुर दर्शनं च ते ॥ ८ ॥ महार्णवाः सप्त सरांसि द्वीपा नद्योऽथ सर्वा अथ भूर्भुवश्च ॥ आपूर्यमाणाः सलिलौघजालैरेकार्णवं सर्वमिदं बभूव ॥ ९ ॥ न दृश्यते किंचिदहो चराचरे निरग्निचंद्रार्कमयेपि लोके ॥ प्रणष्टनक्षत्रतमोंधकारे प्रशांतवातास्तमितैकनीडे ॥ १० ॥ महाजलौघेस्य विशुद्धसत्त्वा स्तुतिर्मया भूप कृता तदानीम् ॥ ततोहमित्येव विचिंतयानः शरण्यमेकं क्व नु यामि शांतम् ॥ ११ ॥ स्मरामि देवं हृदि चिन्तयित्वा प्रभुं शरण्यं जलसंनिविष्टः ॥ नमामि देवं शरणं प्रपद्ये ध्यानं च तस्येतिकृतं मया च ॥ १२ ॥ ध्यात्वा ततोऽहं सलिलं ततार तस्य प्रसादादविमूढचेताः ॥ ग्लानिः श्रमश्चैव मम प्रणष्टौ देव्याः प्रसादेन नरेन्द्रपुत्र ॥ १३ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्यवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥छ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततस्त्वेकार्णवे तस्मिन्मुमूर्षुरहमा तुरः ॥ काकृच्छ्वासस्तरंस्तोयं बाहुभ्यां नृपसत्तम ॥ १ ॥ शृणोम्यर्णवमध्यस्थो निःशब्दस्तिमिते तदा ॥ अंभोरवमनौपम्यं दिशो दश विनादिनम् ॥ २ ॥ हंसकुंदेंदुसंकाशां हारगोक्षीरपांडुराम् ॥ नानारत्नविचित्रांगीं स्वर्णशृंगां मनोरमाम् ॥ ३ ॥ खुरैः प्रवालकमयैर्लांगूलध्वजशोभिताम् ॥ प्रलं बघोणां नर्दन्तीं खुरैरर्णवगाहिनीम् ॥ ४ ॥ गां ददर्शाहमुद्विग्नो मामेवाभिमुखीं स्थिताम् ॥ किंकिणीजालमुक्ताभिः स्वर्णघंटासमावृताम् ॥ ५ ॥ तस्याश्चरणविक्षेपैः सर्वमेकार्णवं जलम् ॥ विक्षिप्तफेनपुंजौघैर्नृत्यंतीव समंततः ॥ ६ ॥ ररास सलिलोत्क्षेपैः क्षोभयंती महार्णवम् ॥ सा मामाह महा भाग श्लक्ष्णगम्भीरया गिरा ॥ ७ ॥ मा भैषीर्वत्सवत्सेति मृत्युस्तव न विद्यते ॥ महादेवप्रसादेन न मृत्युस्ते ममापि च ॥ ८ ॥ ममाश्रयस्व लांगूलं त्वामतस्तारयाम्यहम् ॥ घोरादस्माद्भयाद्विप्र यावत्संप्लवते जगत् ॥ ९ ॥ क्षुत्तृषाप्रतिघातार्थं स्तनौ मे त्वं पिबस्व ह ॥ पयोऽमृताश्रयं दिव्यं तत्पीत्वा निर्वृतो भव ॥ १० ॥ तस्यास्तद्वचनं श्रुत्वा हर्षात्पीतो मया स्तनः ॥ न क्षुत्तृषा पीतमात्रे स्तने मह्यं तदाऽभवत् ॥ ११ ॥ दिव्यं प्राणबलं जज्ञे समुद्रप्लवनक्षमम् ॥ ततस्तां प्रत्युवाचेदं का त्वमेकार्णवीकृते ॥ १२ ॥ भ्रमसे ब्रूहि तत्त्वेन विस्मयो मे महान्हृदि ॥ भ्रमतोऽत्र ममा र्तस्य मुमूर्षोः प्रहतस्य ह ॥ १३ ॥ त्वं हि मे शरणं जाता भाग्यशेषेण सुव्रते ॥ १४ ॥ ॥ गौरुवाच ॥ ॥ किमहं विस्मृता तुभ्यं विश्वरूपा महेश्वरी ॥ नर्मदा धर्मदा नृणां स्वर्गशर्मबलप्रदा ॥ १५ ॥ दृष्ट्वा त्वां सीदमानं तु रुद्रेणाहं विसर्जिता ॥ तं द्विजं तारयस्वार्ये मा प्राणांस्त्यजतां जले ॥ १६ ॥ गोरूपेण विभोर्वाक्यात्त्वत्सकाशमिहागता ॥ मा मृषावचनः शंभुर्भवेदिति च सत्वरा ॥ १७ ॥ एवमुक्तस्तयाहं तु इंद्रायुधनिभं शुभम् ॥ लांगूलमव्ययं ज्ञात्वा भुजाभ्यामवलंबितः ॥ १८ ॥ ततोऽतरं तं जलधिं लांगूलध्वजमाश्रितः ॥ असौ देवो महादेव इति मां प्रत्यभाषत ॥ १९ ॥ ततो युगसहस्रांतमहं कालं तया सह ॥ व्यचरं वै तमीभूते सर्वतः सलिलावृते ॥२०॥ महार्णवे ततस्तस्मिन्भ्रमन्गोः पुच्छमाश्रितः ॥ नि र्वाते चांधकारे च निरालोके निरामये॥२१॥अकस्मात्सलिले तस्मिन्नतसीपुष्पसन्निभम्॥विभिन्नांजनसंकाशमाकाशमिव निर्मलम्॥२२॥ नीलोत्प लदलश्यामं पीतवाससमव्ययम्॥किरीटेनार्कवर्णेन विद्युद्विद्योतकारिणा॥२३॥भ्राजमानेन शिरसा खमिवात्यंतरूपिणम्॥ कुंडलोद्घृष्टगल्लं तु हारोद्द्यो तितवक्षसम् ॥२४॥ जांबूनदमयैर्दिव्यैर्भूषणैरुपशोभितम् ॥ नागोपधानशयनं सहस्रादित्यवर्चसम् ॥ २५॥ अनेकबाहूरुधरं नैकवक्त्रं मनोरमम् ॥ सुप्त मेकार्णवे वीरं सहस्राक्षशिरोधरम् ॥ २६ ॥ जटाजूटेन महता स्फुरद्विद्युत्समार्चिषा ॥ एकार्णवं जगत्सर्वं व्याप्य देवं व्यवस्थितम् ॥२७॥ ग्रसित्वा शंकरः सर्वं सदेवासुरमानवम् ॥ प्रपश्याम्यहमीशानं सुप्तमेकार्णवे प्रभुम् ॥ २८ ॥ सर्वव्यापिनमव्यक्तमनन्तं विश्वतोमुखम् ॥ तस्य पादतला भ्याशे स्वर्णकेयूरमंडिताम् ॥ २९ ॥ विश्वरूपां महाभागां विश्वमायावधारिणीम् ॥ श्रीमयीं ह्रीमयीं देवीं धीमयीं वाङ्मयीं शिवाम् ॥ ३० ॥ सिद्धिं कीर्तिं रतिं ब्राह्मीं कालरात्रिमयोनिजाम् ॥ तामेवाहं तदात्यन्तमीश्वरांतिकमास्थिताम् ॥ ३१ ॥ अद्राक्षं चन्द्रवदनां धृतिं सर्वेश्वरीमु माम् ॥ ३२ ॥ शांतं प्रसुप्तं नवहेमवर्णमुमासहायं भगवन्तमीशम् ॥ तमोवृतं पुण्यतमं वरिष्ठं प्रदक्षिणीकृत्य नमस्करोमि ॥ ३३ ॥ ततः प्रसुप्तः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सहसा विबुद्धो रात्रिक्षये देववरः स्वभावात् ॥ विक्षोभयन्बाहुभिरर्णवांभो जगत्प्रणष्टं सलिले विमृश्य ॥ ३४ ॥ किं कार्यमित्येव विचिंतयित्वा वाराहरूपोऽभवदद्भुतांगः ॥ महाघनांभोधरतुल्यवर्चाः प्रलंबमालांबरनिष्कमाली ॥ ३५ ॥ सशंखचक्रासिधरः किरीटी सवेदवेदांगमयो महात्मा ॥ त्रैलोक्यनिर्माणकरः पुराणो देवत्रयीरूपधरश्च कार्ये ॥ ३६ ॥ स एव रुद्रः स जगज्जहार सृष्ट्यर्थमीशः प्रपितामहोभूत् ॥ संरक्षणार्थं जगतः स एव हरिः सुचक्रासिगदाब्जपाणिः ॥ ३७ ॥ तेषां विभागो न हि कर्तुमर्हो महात्मनामेकशरीरभाजाम् ॥ मीमांसहेत्वर्थविशेषतर्कैर्यस्तेषु कुर्यात्प्रविभेदमज्ञः ॥ ३८ ॥ स याति घोरं नरकं क्रमेण विभागकृद्द्वेषमतिर्दुरात्मा ॥ या यस्य भक्तिः स तथैव नूनं देहं त्यजन्स्वं ह्यमृतत्वमेति ॥ ३९ ॥ संमोहयन्मूर्तिभिरत्र लोकं स्रष्टा च गोप्ता क्षयकृत्स देवः ॥ तस्मान्न मोहात्मकमाविशेत द्वेषं न कुर्यात्प्रविभिन्नमूर्तिः ॥ ४० ॥ वाराहमीशानवरोऽप्यतोऽसौ रूपं समास्थाय जगद्विधाता ॥ नष्टे त्रिलोकेऽर्णवतोयमग्ने विमार्गितोयौघमयेऽन्तरात्मा ॥ ४१ ॥ भित्त्वार्णवं तोयमथांतरस्थं विवेश पातालतलं क्षणेन ॥ जले निमग्नां धरणीं समस्तां समस्पृशत्पंकजपत्रनेत्राम् ॥ ४२ ॥ विशीर्णशैलोपलशृङ्गकूटां वसुन्धरां तां प्रलये प्रलीनाम् ॥ दंष्ट्रैकया विष्णुरतुल्यसाहसः समुद्दधार स्वयमेव देवः ॥ ४३ ॥ सा तस्य दंष्ट्राग्रविलंबितांगी कैलासशृंगाग्रगतेव ज्योत्स्ना ॥ विभ्राजते साप्यसमानमूर्तिः शशांकशृंगे च तडिद्विलग्ना ॥ ४४ ॥ तामुज्जहारार्णवतोयमग्नां करी निमग्नामिव हस्तिनीं हठात् ॥ नावं विशीर्णामिव तोयमध्यादुदीर्णसत्त्वोनुपमप्रभावः ॥ ४५ ॥ स तां समुत्तार्य महाजलौघात्समुद्रमायों व्यभजत्समस्तम् ॥ महार्णवेष्वेव महार्णवांभो निक्षेपयामास पुनर्नदीषु ॥ ४६ ॥ शीर्णांश्च शैलान्स चकार भूयो द्वीपान्समस्तांश्च तथार्णवांश्च ॥ शैलोपलैर्ये विचिताः समन्ताच्छिलोच्चयांस्तान्स चकार कल्पे ॥ ४७ ॥ अनेकरूपं प्रविभज्य देहं चकार देवेन्द्रगणान्समस्तान् ॥ मुखाच्च वह्निर्मनसश्च चन्द्रश्चक्षोश्च सूर्यः सहसा बभूव ॥ ४८ ॥ जज्ञेऽथ तस्येश्वरयोगमूर्तेः प्रध्यायमानस्य सुरेन्द्रसंघः॥ वेदाश्च यज्ञाश्च तथैव वर्णास्तथा हि सर्वौषधयो रसाश्च ॥ ४९ ॥ जगत्समस्तं मनसा बभूव यत्स्थावरं किंचिदिहांडजं वा ॥ जरायुजं स्वेदजमुद्भिजं वा यत्किंचिदाकीटपिपीलकाद्यम् ॥ ५० ॥ ततो विजज्ञे मनसा क्षणेन अनेकरूपाः सहसा महेश ॥ चकार यन्मूर्तिभिरव्ययात्मा अष्टाभिराविश्य पुनः स तत्र ॥ ५१ ॥ लीलां चकाराथ समृद्धतेजा अतोऽत्र मे पश्यत एव विप्राः ॥ तेषां मया दर्शनमेव सर्वं यावन्मुहूर्तात्समकारि भूप ॥ ५२ ॥ कृत्वा त्वशेषं किल लीलयैव स देवदेवो जगतां विधाता ॥ सर्वत्रदृक्सर्वग एव देवो जगाम चादर्शनमादिकर्ता ॥ ५३ ॥ यत्तन्मुहूर्तादिह नामरूपं तावत्प्रपश्यामि जगत्तथैव ॥ द्वीपैः समुद्रैरभिसंवृतं हि नक्षत्रतारादिविमानकीर्णम् ॥ ५४ ॥ वियत्पयोदग्रहचक्रचित्रं नानाविधैः प्राणिगणैर्वृतं च ॥ तां वै न पश्यामि महानुभावां गोरूपिणीं सर्वसुरेश्वरीं च ॥ ५५ ॥ क्व सांप्रतं सेति विचिंत्य राजन्विभ्रांतचित्तस्त्वभवं तदैव ॥ दिशो विभागानवलोकयान ऋते पुनस्तां कथमीश्वरांगीम् ॥ ॥ ५६ ॥ पश्यामि तामत्र पुनश्च शुभ्रां महाभ्रनीलां शुचिशुभ्रतोयाम् ॥ वृक्षैरनेकैरुपशोभितांगीं गजैस्तुरंगैर्विहगैर्वृतां च ॥ ५७ ॥ यथा पुरा तीरमुपेत्य देव्याः समास्थितश्चाप्यमरकण्टके तु ॥ तथैव पश्यामि सुखोपविष्ट आत्मानमव्यग्रमवाप्तसौख्यम् ॥ ५८ ॥ तथैव पुण्यामलतोयवाहां दृष्ट्वा पुनः कल्पपरिक्षयेपि ॥ अम्बामिवार्यामनुकंपमानामक्षीणतोयां विरुजां विशोकः ॥ ५९ ॥ एवं महत्पुण्यतमं च कल्पं पठंति शृण्वन्ति च ये द्विजेंद्राः ॥ महावराहस्य महेश्वरस्य दिनेदिने ते विमला भवन्ति ॥ ६० ॥ अशुभशतसहस्रं ते विधूय प्रपन्नास्त्रिदिवममरजुष्टं सिद्धगंधर्वयुक्तम् ॥ विमलशशिनिभाभिः सर्व एवाप्सरोभिः सह विविधविलासैः स्वर्गसौख्यं लभन्ते ॥ ६१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे श्रीनर्मदामाहात्म्ये वाराहकल्पवृत्तान्तवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुता मे विविधा धर्माः संहारास्त्वत्प्रसादतः ॥ कृता देवेन सर्वेण ये च दृष्टास्त्वयानघ ॥ ॥ १ ॥ सांप्रतं श्रोतुमिच्छामि प्रभावं शार्ङ्गधन्वनः ॥ त्वयानुभूतं विप्रेंद्र तन्मे त्वं वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि प्रजासंहारलक्षणम् ॥ यच्चिह्नं दृश्यते तत्र यथा कल्पो विधीयते ॥ ३ ॥ उल्कापाताः सनिर्घाता भूमिकंपस्तथैव च ॥ पतते पांशुवर्षं च निर्घोषश्चैव दारुणः ॥ ४ ॥ यक्षकिन्नरगंधर्वाः पिशाचोरगराक्षसाः ॥ सर्वे ते प्रलयं यांति युगांते समुपस्थिते ॥ ५ ॥ पर्वताः सागरा नद्यः सरांसि विविधानि च ॥ वृक्षाः शोषं समायांति वल्लीजातं तृणानि च ॥ ६ ॥ एवं हि व्याकुलीभूते सर्वौषधिजलोज्झिते ॥ काष्ठभूते तु संजाते त्रैलोक्ये सचराचरे ॥ ७ ॥ यावत्पश्यामि मध्याह्ने स्नानकाल उपस्थिते ॥ त्रैलोक्यं ज्वलनाकारं दुर्निरीक्षं दुरासदम् ॥ ८ ॥ द्वौ सूर्यौ पूर्वतस्तात पश्चिमोत्तरयोस्तथा ॥ तथैव दक्षिणे द्वौ च सूर्यौ दृष्टौ प्रतापिनौ ॥ ९ ॥ द्वौ सूर्यौ नागलोकस्थौ मध्ये द्वौ गगनस्य च ॥ इत्येते द्वादशादित्यास्तपन्ते सर्वतो दिशम् ॥ १० ॥ पृथिवीमदहन्सर्वां सशैलवनकाननाम् ॥ नादग्धं दृश्यते किंचिदृते रेवां च मां तथा ॥ ११ ॥ पृथिव्यां दह्यमानायां हविर्गंधश्च जायते ॥ ततो मे शुष्यते गात्रं तृषाप्येवं दुरासदा ॥ १२ ॥ न हि विंदामि पानीयं शोषितं च दिवाकरैः ॥ यावत्कमण्डलुं वीक्षे शुष्कं तत्रापि तज्जलम् ॥ १३ ॥ ततोऽहं शोकसंतप्तो विशेषात्क्षुत्तृषार्दितः॥ उत्पपात क्षितेरूर्ध्वं पश्यमानो दिवं प्रति ॥ १४ ॥ तावत्पश्यामि गगने गृहं शृंगारभूषितम् ॥ ततस्तज्ज्ञातुकामोऽहं प्रस्थितो राजसत्तम ॥ १५ ॥ प्राकारेण विचित्रेण कपाटार्गलभूषितम् ॥ विचित्रशिखरोपेतं द्वारदेशमुपागतः ॥ १६ ॥ षडशीतिसहस्राणि योजनानां समुच्छ्रये ॥ तदर्धं तु पृथक्त्वेन कांचनं रत्नभूषितम् ॥ १७ ॥ तत्र मध्ये परां शय्यां पश्यामि नृपसत्तम ॥ शय्योपरि शयानं तु पुरुषं दिव्यमूर्धजम् ॥ १८ ॥ विकुंचिताग्रकेशांतं समस्तं योजनायतम् ॥ मुकुटेन विचित्रेण दीप्तिकांतेन शोभितम् ॥ १९ ॥ श्यामं कमलपत्राभं सुप्रभं च सुनासिकम् ॥ सिंहास्यमायतभुजं गल्लश्मश्रुवरांकितम् ॥ २० ॥ त्रिवलीभंगसुभगं कर्णकुण्डलभूषितम् ॥ विशालाभं सुपीनांगं पार्श्वस्वावर्तभूषितम् ॥ २१ ॥ शोभितं कटिभागेन विभक्तं जानुजंघयोः ॥ पद्मांकिततलं देवमाताम्रसुनखांगुलिम् ॥ २२ ॥ मेघनादसुगंभीरं सर्वावयवसुन्दरम् ॥ शय्यामध्यगतं देवमपश्यं पुरुषोत्तमम् ॥ २३ ॥ शंखचक्रगदापाणिं शयानं दक्षिणेन तु ॥ अक्षसूत्रोद्यतकरं सूर्यायुतसमप्रभम् ॥ २४ ॥ तं दृष्ट्वा भक्तिमान्देवं स्तोतुकामो व्यवस्थितः ॥ जयेश जय वागीश जय दिव्यांगभूषण ॥ ॥ २५ ॥ जय देवपते श्रीमन्साक्षाद्ब्रह्म सनातन ॥ तव लोकाः शरीरस्थास्त्वं गतिः परमेश्वर ॥ २६ ॥ त्वदाधारा हि देवेश सर्वे लोका व्यवस्थिताः ॥ त्वं श्रेष्ठः सर्वसत्त्वानां त्वं कर्ता धरणीधरः ॥ २७ ॥ त्वं हौत्रमग्निहोत्राणां सूत्रमन्त्रस्त्वमेव च ॥ गोकर्णं भद्रकर्णं च त्वं च माहेश्वरं पदम् ॥ २८ ॥ त्वं कीर्तिः सर्वकीर्तीनां दैन्यपापप्रणाशिनी ॥ त्वं नैमिषं कुरुक्षेत्रं त्वं च विष्णुपदं परम् ॥ २९ ॥ त्वया तु लीलया देव पदाक्रांता च मेदिनी ॥ त्वया बद्धो बलिर्देव त्वयेंद्रस्य पदं कृतम् ॥ ३० ॥ त्वं कलिर्द्वापरं देव त्रेता कृतयुगं तथा ॥ प्रलंबदमनश्च त्वं स्रष्टा त्वं च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विनाशकृत् ॥ ३१ ॥ त्वया वै धार्यते लोकास्त्वं कालः सर्वसंक्षयः ॥ त्वया हि देव सृष्टास्ताः सर्वा वै देवयोनयः ॥ ३२ ॥ त्वं पन्थाः सर्व लोकानां त्वं च मोक्षः परा गतिः ॥ ब्रह्मा त्वदुद्भवो देवो रजोरूपः सनातनः ॥ रुद्रः क्रोधोद्भवोऽप्येवं त्वं च सत्त्वे व्यवस्थितः ॥ ३३ ॥ एतच्चराचरं देव क्रीडनार्थं त्वया कृतम् ॥ एवं संतप्तदेहेन स्तुतो देवो मया प्रभुः ॥ ३४ ॥ भक्त्या परमया राजन्सर्वभूतपतिः प्रभुः ॥ स्तुवन्वै तत्र पश्यामि वारिपूर्णांस्ततो घटान् ॥ ३५ ॥ ततो मया विस्मृता या तृषा सा वर्द्धिता पुनः ॥ उपासर्पं ततस्तस्य पार्श्वं वै पुरुषस्य हि ॥ ३६ ॥ पानीयं पातुकामेन चिंतितं च मया पुनः ॥ नापश्यत हि मां चेष सुप्तोऽपि न च बुध्यते ॥३७॥ यस्तु पापेन संमूढः सुखं सुप्तं प्रबोधयेत् ॥ जायते तस्य पापस्य ब्रह्महत्याफलं महत् ॥३८॥ एवं संचिंत्यमाने तु द्वितीयो ह्यागतः पुमान् ॥ नेक्षते जल्पते किंचिद्वामस्कन्धे मृगाजिनी ॥३९॥ जटी कमण्डलुधरो दण्डी मेखलया वृतः ॥ भस्मोन्मृदितसर्वांगो महातेजास्त्रिलोचनः ॥ ४० ॥ यावत्तं स्तोतुकामोऽहमपश्यं स्वच्छचक्षुषा ॥ तावत्सर्वांगसंभूत्या महत्या रूपसंपदा ॥ ४१ ॥ अपश्यं संवृतां नारीं सर्वाभरणभूषिताम् ॥ दृष्ट्वा तां पतितो भूमौ जयस्वेति ब्रुवंस्ततः ॥ ४२ ॥ जय रुद्रांगसंभूते जय महत्या रूपसंपदा ॥ ४१ ॥ अपश्यं संवृतां नारीं सर्वाभरणभूषिताम् ॥ दृष्ट्वा तां पतितो भूमौ जयस्वेति ब्रुवंस्ततः ॥ ४२ ॥ जय रुद्रांगसंभूते जय ब्राह्मि सनातनि ॥ जय कौमारि माहेंद्रि वैष्णवी वारुणी तथा ॥ ४३ ॥ जयकौबेरि सावित्रि जय धात्रि वरानने ॥ तृष्णया तप्तदेहस्य रक्षां कुरु चराचरे ॥ ४४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ प्रसन्ना विप्रशार्दूल तव वाक्यैः सुशोभनैः ॥ वर्त्तते मानसे यत्ते मया ज्ञातं द्विजोत्तम ॥ ४५ ॥ शृणु विप्र ममाप्यस्ति व्रतमेतत्सुदारुणम् ॥ स्त्रीलघुत्वान्मयाख्यं दुष्करं मंदमेधया ॥ ४६ ॥ यदि भावी च मे पुत्रो धर्मिष्ठो लोकविश्रुतः ॥ विप्रस्य तु स्तनं दत्त्वा पश्चाद्दास्यामि बालके ॥ ४७ ॥ स मे पुत्रः समुत्पन्नो यथोक्तो मे महामुने ॥ स्तनं पिब त्वं विप्रेंद्र यदि जीवितुमिच्छसि ॥ ४८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अकार्यमेतद्विप्राणां यस्त्वमं पिबते स्तनम् ॥ पुंनश्चैवोपनयनं व्रतसिद्धिं न गच्छति ॥ ४९ ॥ ब्राह्मणत्वं त्रिभिर्लोकैर्दुर्लभं पद्मलोचने ॥ संस्कारैः संस्कृतो विप्रो यैश्च जायेत तच्छृणु ॥५०॥ प्रथमं चैव नारीषु संस्कारैर्बीजवापनम् ॥ बीजप्रक्षेपणादेव बीजक्षेपः स उच्यते ॥ ५१ ॥ तदंते च महाभागे गर्भाधानं द्वितीयकम् ॥ पुंसवनं तृतीयं तु सीमंतं च चतुर्थकम् ॥ ५२ ॥ पंचमं जातकर्म स्यान्नाम वै षष्ठमुच्यते ॥ निष्क्रामः सप्तमश्चैव ह्यन्नप्राशनमष्टमम् ॥ ५३ ॥ नवमं वै चूडकर्म्म दशमं मौंजिबंधनम् ॥ वैधिकं दार्विकं चैव सौमिकं भौमिकं तथा ॥ ५४ ॥ पत्नीसंयोजनं चान्यदैवैकर्म्म ततः परम् ॥ मानुष्यं पितृकर्म स्याद्दशमाष्टासु शोभने ॥ ५५ ॥ भूतं भव्यं तथेष्टं च पार्वणं च ततः परम् ॥५६॥ श्राद्धं श्रौवण्यामाश्रयणं च चैत्राश्वयुज्यां दशपौर्णमास्याम् ॥ निरूढपशुसवनसौत्रामण्यग्निष्टोमात्यग्निष्टोमाः ॥ ५७॥ षोडशीवाजपेयातिरात्राप्तोर्यामोदशवाजपेयाः ॥ सर्वभूतेषु क्षांतिरनसूया शौचंमंगलमकार्पण्यमस्पृहेति ॥ ५८ ॥ एभिरष्टचत्वारिंशद्भिः संस्कारैः संस्कृतो ब्राह्मणो भवति ॥ ५९ ॥ एवं ज्ञात्वा महाभागे न तु मां पातुमर्हसि ॥ शिशुपेयं स्तनं भद्रे कथं वै गर्हितः पिबेत् ॥ ६० ॥ ममैतद्वचनं श्रुत्वा नारी वचनमब्रवीत् ॥ ६१ ॥ यदि त्वं न पिबेः स्तन्यं पयो बालो मरिष्यति ॥ श्रूयते त्रिषु लोकेषु वेदेषु च स्मृतिष्वपि ॥ मुच्यते सर्वपापेभ्यो भ्रूणहत्या न मुंचति ॥ ६२ ॥ भवित्री तव हत्या च महाभागवतः पुनः ॥ जन्मानि च शतान्यष्टौ क्लिश्यते भ्रूणहत्यया ॥ ॥ ६३ ॥ मृतः शुनत्वं चाप्नोति वर्षाणां तु शतत्रयम् ॥ ततस्तस्य क्षये जाते काकयोनिं व्रजेत्पुनः ॥ ६४ ॥ तत्रापि च शतान्यष्टौ क्लिश्यते पापकर्मणि ॥ वराहो दश जन्मानि तदंते जायते कृमिः ॥ ६५ ॥ ततश्चारोहिणीं प्राप्य गोगजाश्वनृजन्मभाक् ॥ श्रूयते श्रुतिशास्त्रेषु वेदेषु च परंतप ॥ ॥६६॥ सर्वपापाधिकं पापं बालहत्या द्विजोत्तम ॥ बालहत्यायुतो विप्रः पच्यते नरके ध्रुवम् ॥६७॥ वर्षाणि च शतान्यष्टौ प्राप्नोति समयातनाम् ॥ तस्मादल्पतरो दोषः पिबतो मे स्तनं तव ॥ ६८ ॥ तथैवापिबतः पापं जायते बहुवार्षिकम् ॥ क्षुधातृषाविरामस्ते पुण्यं च पिबतः स्तनम् ॥६९॥ अतो न चेतः संदिग्धं कर्तव्यमिह कर्हिचित् ॥ एहि विप्र यथाकामं बालार्थे पिब मे स्तनम् ॥ ७० ॥ ततोऽहं वचनं श्रुत्वा स्तनं पातुं समुद्यतः ॥ न च तृप्तिं विजानामि पिबतः स्तनमुत्तमम् ॥ ७१ ॥ त्रिंशद्वर्षसहस्राणि भारतैवं शतानि च ॥ ततः प्रबुद्धोत्संगेहं मायानिद्राविमोहितः ॥ ७२ ॥ निद्राविगतमोहोहं यावत्पश्यामि पांडव ॥ तावत्सुतं न पश्यामि न च तं बालकं विभो ॥ ७३ ॥ चतुरस्तांश्च वै कुंभान्पश्यामि तत्र भारत ॥ न च पश्यामि तां देवीं गता वै कुत्रचिच्च ते ॥ ७४ ॥ एवं विसृश्यमानस्य चिंतयानस्य तिष्ठतः ॥ ईषद्धसितया वाचा देवी वचनमब्रवीत् ॥ ॥ ७५ ॥ ॥ श्रीदेव्युवाच ॥ ॥ कृष्णः स पुरुषः सुतो द्वितीयोऽप्यागतो हरः ॥ ये चत्वारश्च ते कुंभाः समुद्रास्ते द्विजोत्तम ॥ ७६ ॥ यश्च बालस्त्वया दृष्टो ब्राह्मा लोकपितामहः ॥ अहं च पृथिवी ज्ञेया सप्तद्वीपा सर्वता ॥ ७७ ॥ या गता त्वां परित्यज्य भूतले सुप्रतिष्ठिता ॥ इमां च प्रेक्षसे विप्र नर्मदां सरितां वराम् ॥ ७८ ॥ सर्वसत्त्वोपकाराय वृहते पुण्यलक्षणा ॥ रेवानदी तु विख्याता न सृता तेन नर्मदा ॥ ७९ ॥ एवं ज्ञात्वा शमं गच्छ स्वस्थो भव महामुने ॥ इत्युक्त्वा मां तदा देवी तत्रैवान्तरधीयत ॥ ८० ॥ एवं हि शेते भगवान्सत्त्वस्थः प्रलये सदा ॥ सत्त्वरूपो महादेवो यदाधारे जगत्स्थितम् ॥ ८१ ॥ एवं मयानुभूतं तु दृष्टमाश्चर्यमुत्तमम् ॥ सर्वपापहरं पुण्यं कथितं ते नरोत्तम ॥ ८२ ॥ विष्णोश्चरितमित्युक्तं यत्त्वया परिपृच्छितम् ॥ भूय एव महाबाहो किमन्यच्छ्रोतुमिच्छसि ॥ ८३ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे वाराहकल्पवृत्तान्तवर्णनंनाम विंशोऽध्यायः ॥ २० ॥ ॥७॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुतं मे विविधाश्चर्यं त्वत्प्रसादाद्विजोत्तम ॥ भूयश्च श्रोतुमिच्छामि तन्मे कथय सुव्रत ॥ १ ॥ कथमेषा नदी पुण्या सर्वनदीषु चोत्तमा ॥ नर्मदानाम विख्याता भूयो मे कथयानघ ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥ ३ ॥ नर्मदायास्तु माहात्म्यं यत्पूर्वेण मया श्रुतम् ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ४ ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥५॥ त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम् ॥ सद्यः पुनाति गांगेयं दर्शनादेव नार्मदम् ॥ ६ ॥ कलिंगदेशात्पश्चार्द्धे पर्वतेऽमरकंटके ॥ पुण्या च त्रिषु लोकेषु रमणीया पदेपदे ॥ ७ ॥ तत्र देवाश्च गंधर्वा ऋषयश्च तपोधनाः ॥ तपस्तप्त्वा महाराज सिद्धिं परमिकां गताः ॥ ८ ॥ तत्र स्नात्वा नरो राजन्नियमस्थो जितेंद्रियः ॥ उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥ ॥ ९ ॥ सिद्धिक्षेत्रं परं तात पर्वतो ह्यमरंकटः ॥ सर्वदेवाश्रितो यस्मादृषिभिः परिसेवितः ॥१०॥ सिद्धविद्याधरा भूतगंधर्वाः स्थानमुत्तमम् ॥ दृश्या दृश्याश्च गजेंद्र सेवंते सिद्धिकांक्षिणः ॥ ११ ॥ अहं च परमं स्थानं ततः प्रभृति संश्रितः ॥ अत्र प्रणवरूपो वै स्थाने तिष्ठत्युमापतिः ॥ १२ ॥ श्रीकंठः सगणः सर्वभूतसंघैर्निषेवितः ॥ अस्माद्गिरिवराद्रूप वक्ष्ये तीर्थस्य विस्तरम् ॥ १३ ॥ यानि संतीह तीर्थानि पुण्यानि नृपसत्तम ॥ यानि यानीह तीर्थानि नर्मदायास्तटद्वये ॥ १४ ॥ न तेषां विस्तरं वक्तुं शक्तो ब्रह्मापि भूपते ॥ योजनानां शतं साग्रं श्रूयते सरिदुत्तमा ॥ १५ ॥ विस्तरेण तु गजेंद्र अर्धयोजनमायता ॥ षष्टितीर्थ सहस्राणि षष्टिकोट्यस्तथैव च ॥ १६ ॥ पर्वतादुदधिं यावद्रुमे कूले न संशयः ॥ १७ ॥ सप्तषष्टि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सहस्राणि सप्तषष्टिशतानि च ॥ सप्तषष्टिस्तथा कोट्यो वायुस्तीर्थानि चाब्रवीत् ॥ १८ ॥ परं कृतयुगे तानि यांति प्रत्यक्षतां नृप ॥ पश्यंति मानवाः सर्वे सततं धर्मबुद्धयः ॥ १९ ॥ यथायथा कलिर्घोरो वर्तते दारुणो नृप ॥ तथातथाल्पतां यांति हीनसत्त्वा यतो नराः ॥ २० ॥ जालेश्वरादितीर्थानि पर्वतेस्मिन्नराधिप ॥ पितृतृप्तिप्रदान्याहुः स्वर्गमोक्षप्रदानि च ॥ २१ ॥ श्रेष्ठं दारुवनं तत्र चरुकासंगमः शुभः ॥ उत्तरे नर्मदायास्तु चरुकेश्वरमुत्तममम् ॥ २२ ॥ दारुकेश्वरतीर्थं च व्यतीपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञं तथैव च ॥ २३ ॥ इति चैवोत्तरे कूले रेवाया नृपसत्तम ॥ अमरेश्वरपार्श्वे च लिंगान्यष्टोत्तरं शतम् ॥ २४ ॥ वरुणेश्वरमुख्यानि सर्वपापहराणि च ॥ २५ ॥ मांधातृपुरपार्श्वे च सिद्धेश्वरयमेश्वरौ ॥ ॐकारात्पूर्वभागे च केदारं तीर्थमुत्तमम् ॥ २६ ॥ तत्समीपे महाराज स्वर्गद्वारमघापहम् ॥ नाम्ना ब्रह्मेश्वरं पुण्यं सप्तसारस्वतं पुरः ॥ २७ ॥ रुद्राष्टकं च सावित्रं सोमतीर्थं तथैव च ॥ एतानि दक्षिणे तीरे रेवाया भरतर्षभ ॥ २८ ॥ अस्मिंस्तु पर्वते तात रुद्राणां कोटयः स्थिताः ॥ स्नानैस्तुष्टिर्भवेत्तेषां गंधमाल्यानुलेपनैः ॥ २९ ॥ प्रीतास्तेऽपि भवंत्यत्र रुद्रा राजन्न संशयः ॥ जपेन पापसंशुद्धिर्ध्यानेनानंत्यमश्नुते ॥ ३० ॥ दानेन भोगानाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ पर्वतात्पश्चिमे देशे स्वयं देवो महेश्वरः ॥ स्थितः प्रणवरूपोसौ जगदादिः सनातनः ॥ ३१ ॥ तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेंद्रियः ॥ पितृकार्यं प्रकुर्व्वीत विधिदृष्टेन कर्मणा ॥ ३२ ॥ तिलोदकेन तत्रैव तर्पयेत्पितृदेवताः ॥ आसप्तमं कुलं तस्य स्वर्गे मोदति पांडव ॥ ३३ ॥ आत्मना सह भोगांश्च विविधाँल्लभते सुखी ॥ षष्टिवर्षसहस्राणि क्रीडते सुरपूजितः ॥ ३४ ॥ मोदते सुचिरं कालं पितृपूजाफलधितः ॥ ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले ॥३५॥ धनवान्दानशीलश्च नीरोगो लोकपूजितः ॥ पुनः [illegible]ति तत्तीर्थं गमनं कुरुते पुनः ॥ ३६ ॥ द्वितीये जन्मनि भवेद्भद्रस्यानुचरोत्कटः ॥ तथैव ब्रह्मचर्येण सोपवासो जितेंद्रियः ॥ ३७ ॥ सर्वहिंसानिवृत्तस्तु लभते फलमुत्तमम् ॥ एवं धर्मसमाचारो यस्तु प्राणान्परित्यजेत् ॥ ३८ ॥ तस्य पुण्यफलं यद्वै तन्निबोध नराधिप ॥ शतं वर्षसहस्राणि स्वर्गे मोदति पांडव ॥ ॥ ३९ ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ दिव्यगंधानुलिप्तांगो दिव्यालंकारभूषितः ॥ ४० ॥ क्रीडते दैवतैः सार्द्धं सिद्धगंधर्वसंस्तुतः ॥ ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्यवान् ॥ ४१ ॥ हस्त्यश्वरथयानैश्च धर्मज्ञः शास्त्रतत्परः ॥ गृहे स्तंभशताकीर्णे सौवर्णे रजतान्विते ॥ ४२ ॥ सप्ताष्टभूमिसुद्वारे दासीदाससमाकुले ॥ मत्तमातंगनिःश्वासैर्वाजिहेषितनादितैः ॥ ४३ ॥ क्षुभ्यते तस्य तद्द्वारमिंद्रस्य भुवनं यथा ॥ राजराजेश्वरः श्रीमान्सर्वस्त्रीजनवल्लभः ॥ ४४ ॥ तस्मिन्गृहे वसित्वा तु क्रीडाभोगसमन्वितः ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ४५ ॥ एवं तेषां भवेत्सर्वं ये मृता ह्यमरेश्वरे ॥ अग्निप्रवेशं यः कुर्याद्भक्त्या ह्यमरकंटके ॥ ४६ ॥ स मृतः स्वर्गमाप्नोति यास्यते परमां गतिम् ॥ स्नानं दानं जपो होमः शुभं वा यदि वाऽशुभम् ॥ ४७ ॥ पुराणे श्रूयते राजन्सर्वं कोटिगुणं भवेत् ॥ तस्यास्तीरे तु ये वृक्षाः पतिताः कालपर्यये ॥ ४८ ॥ नर्मदातोयसंस्पृष्टास्ते यांति परमां गतिम् ॥ अनिवृत्तिका गतिस्तस्य पवनस्यांबरे यथा ॥ ४९ ॥ पतनं कुरुते यस्तु तस्मिंस्तीर्थे नराधिप ॥ कन्यास्त्रीणि सहस्राणि पाताले भोगभागिनः ॥ ५० ॥ तिष्ठंति भवने तस्य प्रेषणे प्रार्थयंति च ॥ दिव्यभोगैः सुसंपन्नः क्रीडते कालमीप्सितम् ॥ ५१ ॥ पृथिव्यां ह्यासमुद्रायां तादृशो नैव जायते ॥ यादृशोऽयं नरश्रेष्ठ पर्वतोऽमरकंटकः ॥ ५२ ॥ तत्र तीर्थं तु विज्ञेयं पर्वतस्यानु पश्चिमे ॥ ह्रदो जालेश्वरोनाम त्रिषु लोकेषु विश्रुतः ॥ ५३ ॥ तत्र पिंडप्रदानेन संध्योपासनकेन तु ॥ पितरो द्वादशाब्दानि तर्पितास्तु भवंति वै ॥ ५४ ॥ दक्षिणे नर्मदातीरे कपिला तु महानदी ॥ सरलार्जुनसंच्छन्ना खदिरैरुपशोभिता ॥ ५५ ॥ माधवीसल्लकीभिश्च वल्लीभिश्चाप्यलंकृता ॥ श्वापदैर्गर्जमानैश्च गोमायुवानरादिभिः ॥ ५६ ॥ पक्षिजातिविशेषैश्च नित्यं प्रमुदिता नृप ॥ साग्रं कोटिशतं तत्र ऋषीणामिति शुश्रुम ॥ ५७ ॥ तपस्तप्त्वा गतं मोक्षं येषां जन्म न चागमः ॥ येन तत्र तपस्तप्तं कपिलेन महात्मना ॥ ५८ ॥ तत्र तच्चा[illegible]तीर्थं पुण्यं सिद्धनिषेवितम् ॥ येन सा कापिलैस्तात सेविता ऋषिभिः पुरा ॥ ५९ ॥ तेन सा कपिलानाम गीता पापक्षयंकरी ॥ तत्र कोटिशतं साग्रं तीर्थानाममरेश्वरे ॥ ६० ॥ अहोरात्रोपितो भूत्वा मुच्यते सर्वकिल्बिषैः ॥ दानं च विधिवद्दत्त्वा यथाशक्त्या द्विजोत्तमे ॥ ६१ ॥ ईश्वरानुग्रहात्सर्वं तत्र कोटिगुणं भवेत् ॥ यस्मादनक्षरं रूपं प्रणवस्येह भारत ॥ ६२ ॥ शिवस्वरूपस्य ततः कृतमात्राक्षरं भवेत् ॥ तिर्यंचः पशवश्चैव वृक्षा गुल्मलतादयः ॥६३॥ तेऽपि तत्र क्षयं याताः स्वर्गं यांति न संशयः ॥ विशल्या तत्र या प्रोक्ता तत्रैव तु महानदी ॥६४॥ स्नात्वा दत्त्वा यथान्यायं तत्रापि सुकृती भवेत् ॥ तत्र देवगणाः सर्व्वे सकिन्नरमहोरगाः ॥ ६५ ॥ यक्षराक्षसगंधर्व्वा ऋषयश्च तपोधनाः ॥ सर्व्वे समागतास्तां वै पश्यन्ति ह्यमरेश्वरे ॥ ६६ ॥ तैश्च सर्वैः समागम्य वन्दितौ तौ शुभौ कटौ ॥ पुरा युगे महाघोरे सर्वलोकभयंकरे ॥ ६७ ॥ नर्मदायाः सुतस्तत्र सशल्यो विशलीकृतः ॥ सर्वदेवैश्च ऋषिभिर्विशल्या तेन सा स्मृता ॥ ६८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उत्पन्ना तु कथं तात विशल्या कपिला कथम् ॥ कथं वा नर्मदापुत्रः शल्ययुक्तोऽभवन्मुने ॥ ६९ ॥ आश्चर्यभूतं लोकस्य श्रोतुमिच्छामि सुव्रत ॥ ७० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा दाक्षायणीनाम सहिता शूलपाणिना ॥ क्रीडित्वा नर्मदातोये परया च मुदा नृप ॥७१॥ जलादुत्तीर्य सहसा वस्त्रमन्यत्समाहरत् ॥ देव्यास्तु स्नानवस्त्रं तत्पीडितं लीलया नृप ॥ ७२ ॥ सहितानुचरीभिस्तु इन्द्रायुधनिभं भृशम् ॥ तस्मिन्निष्पीड्यमाने तु वारि यन्निःसृतं तदा ॥ ॥ ७३ ॥ तस्मादियं सरिज्जज्ञे कपिलाख्या महानदी ॥ संयोगादंगरागस्य वस्त्रोद्यत्कपिलं जलम् ॥ ७४ ॥ गलितं तेन कपिला वर्णतो नामतोऽभवत् ॥ तथा गन्धरसैर्युक्तं नानापुष्पैस्तु वासितम् ॥ ७५ ॥ नानावर्णारुणं शुभ्रं वस्त्राद्यद्वारि निःसृतम् ॥ पीड्यमानं करैः शुभ्रैस्तैस्तु पल्लवकोमलैः ॥ ७६ ॥ कपिलं जलमिश्रैस्तु तस्मादेषा सरिद्वरा ॥ कपिला चोच्यते तज्ज्ञैः पुराणार्थविशारदैः ॥ ७७ ॥ एषा वै वस्त्रसंभूता नर्मदातोयसंभवा ॥ महापुण्यतमा ज्ञेया कपिला सरिदुत्तमा ॥ ७८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कपिलासरित्सम्भववर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि सा विशल्या ह्यभूद्यथा ॥ आश्चर्यभूता लोकस्य सर्वपापक्षयंकरी ॥ १ ॥ ब्रह्मणो मानसः पुत्रो मुख्यो ह्यग्निरजायत ॥ मुख्यो वह्निरितिप्रोक्त ऋषिः परमधार्म्मिकः ॥ २ ॥ तस्य स्वाहाभवत्पत्नी स्मृता दाक्षायणी तु सा ॥ तस्यां मुख्या महाराज त्रयः पुत्रास्तदाऽभवन् ॥ ३ ॥ अग्निराहवनीयस्तु दक्षिणाग्निस्तथैव च ॥ गार्हपत्यस्तृतीयस्तु त्रैलोक्यं यैश्च धार्यते ॥ ४ ॥ तथा वै गार्हपत्योग्निर्जज्ञे पुत्रद्वयं शुभम् ॥ पद्मकः शंकुनामा च तावुभावग्निसत्तमौ ॥ ५ ॥ वसन्नग्निर्नदीतीरे समाश्रित्य महत्तपः ॥ रुद्रमाराधयामास जितात्मा सुसमाहितः ॥ ६ ॥ दशवर्षसहस्राणि चचार

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विपुलं तपः ॥ तमुवाच महादेवः प्रसन्नो वृषभध्वजः ॥ ७ ॥ भोभो ब्रूहि महाभाग यत्ते मनसि वर्तते ॥ दाता ह्यहमसन्देहो यद्यपि स्यात्सुदुर्लभम् ॥ ८ ॥ ॥ अग्निरुवाच ॥ ॥ नर्मदेयं महाभागा सरितो याश्च षोडश ॥ भवन्तु मम पत्न्यस्तास्त्वत्प्रसादान्महेश्वर ॥ ९ ॥ तासु वै चिंतितान्पुत्रानम्यात्पादयाम्यहम् ॥ एष एव वरो देव दीयतां मे महेश्वर ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ एतास्तु धिष्ण्यिनाम्न्यो वै भविष्यन्ति सरिद्वराः ॥ पत्न्यस्तव विशालाक्ष्यो वेदे ख्याता न संशयः ॥ ११ ॥ तासां पुत्रा भविष्यन्ति ह्यग्नयो येऽध्वरे स्मृताः ॥ धिष्ण्यानाम सुविख्याता यावदाभूतसंप्लवम् ॥ १२ ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ नर्मदा च सरिच्छ्रेष्ठा तस्य भार्य्या बभूव ह ॥ १३ ॥ कावेरी कृष्णवेणी च रेवा च यमुना तथा ॥ गोदावरी वितस्ता च चन्द्रभागा इरावती ॥ १४ ॥ विपाशा कौशिकी चैव सरयूः शतरुद्रिका ॥ शिप्रा सरस्वती चैव ह्यदिनी पावनी तथा ॥ १५ ॥ एताः षोडश नद्यो वै भार्यार्थं संव्यवस्थिताः ॥ तदात्मानं विभज्याशु धिष्णीषु स महाद्युतिः ॥ १६ ॥ व्यभिचारात्तु भर्तुर्वै नर्मदाद्यासु धिष्णिषु ॥ उत्पन्नाः शुचयः पुत्राः सर्वे ते धिष्ण्यपाः स्मृताः ॥ १७ ॥ तस्याश्च नर्मदायास्तु धिष्णीन्द्रोनाम विश्रुतः ॥ बभूव पुत्रो बलवान्रूपेणाप्रतिमो नृप ॥ १८ ॥ ततो देवासुरं युद्धमभवल्लोमहर्षणम् ॥ मयतारक मित्येवं त्रिषु लोकेषु विश्रुतम् ॥ १९ ॥ तत्र दैत्यैर्महाघोरैर्मयतारपुरोगमैः ॥ ताडितास्ते सुराश्चस्ता विष्णुं वै शरणं ययुः ॥ २० ॥ त्रायस्व नो हृषीकेश घोरादस्मान्महाभयात् ॥ दैत्यान्सर्वान्संहरस्व मयतारपुरोगमान् ॥ २१ ॥ एवमुक्तः स भगवान्दिशो दश व्यलोकयत् ॥ ततो भगवता दृष्टौ रणे पावकमारुतौ ॥ २२ ॥ आहूतौ विष्णुना तौ तु सकाशं जग्मतुः क्षणात् ॥ स्थितौ तौ प्रणतौ चाग्रे देवदेवस्य धीमतः ॥ ॥ २३ ॥ ततो धिष्णिः पावकेंद्रो देवेनोक्तो महात्मना ॥ निर्दहेमान्महाघोरान्नार्मदेय महासुरान् ॥ २४ ॥ अथैवमुक्तौ तौ देवौ रणे पावकमारुतौ ॥ दैत्यान्ददहतुः सर्व्वान्मयतारपुरोगमान् ॥ २५ ॥ दह्यमानास्तु ते सर्वे शस्त्रैरग्निं त्ववेष्टयन् ॥ दिव्यैरभ्यर्कसंकाशैः शतशोऽथ सहस्रशः ॥ २६ ॥ तांश्चाग्निः शस्त्रनिकरैर्निर्ददाह महासुरान् ॥ ज्वालामालाकुलं सर्वं वायुनानिर्मितं तदा ॥ २७ ॥ दह्यमानास्ततो दैत्या अग्नि ज्वालासमावृताः ॥ प्रविश्य पातालतलं जले लीनाः सहस्रशः ॥ २८ ॥ ततः कुमारमग्निं तु नर्मदापुत्रमब्रुवन् ॥ पूजयित्वा सुराः सर्वे जग्मुस्ते त्रिदशालयम् ॥ २९ ॥ सशल्यस्तु महातेजा रेवापुत्रो वृतोऽग्निभिः ॥ नर्मदामागतः क्षिप्रं मातरं द्रष्टुमुत्सुकः ॥ ३० ॥ तं दृष्ट्वा पुत्रमायांतं शल्येन परिक्षतम् ॥ नर्मदा पुण्यसलिला अभ्युत्थाय सुविस्मिता ॥ ३१ ॥ पर्यष्वजत बाहुभ्यां प्रस्नवापीडितस्तनी ॥ सशल्यं पुत्रमादाय कापिलं ह्रदमाविशत् ॥ ३२ ॥ प्रविष्टमात्रे तु ह्रदे कापिले पापनाशिनि ॥ सशल्यं तं विशल्यं च क्षणात्कृतवती तदा ॥३३॥ स विशल्योऽभवद्यस्मात्प्राप्य तस्याः शिवं जलम् ॥ कपिला नामतस्तेन विशल्या चोच्यते बुधैः ॥ ३४ ॥ अन्येपि तत्र ये स्नाताः शुचयस्तु समाहिताः ॥ पापशल्यैः प्रमुच्यंते मृता यांति सुरालयम् ॥ ३५ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं पुरा त्वया ॥ उत्पत्तिकारणं तात विशल्याया नरेश्वर ॥ ३६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये विशल्यासंभवोनाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ॥ ७ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ तत्रैव संगमे राजन्भक्त्या परमया नृप ॥ प्राणांस्त्यजंति ये मर्त्यास्ते यांति परमां गतिम् ॥ १ ॥ संन्यस्तसर्वसंकल्पो यस्तु प्राणान्परित्यजेत् ॥ अमरेश्वरमासाद्य स स्वर्गे नियतं वसेत् ॥ २ ॥ शैलेंद्रं यः समासाद्य आत्मानं मुंचते नरः ॥ विमानेनार्कवर्णेन स गच्छेदमरावतीम् ॥ ३ ॥ नरं पतंतमालोक्य नगादमरकन्टकात् ॥ ब्रुवंत्यप्सरसः सर्वा मम भर्त्ता भवेदिति ॥ ४ ॥ समं जलं धर्मविदो वदंति सारस्वतं गांगमिति प्रबुद्धाः ॥ तस्योपरिष्टात्प्रवदंति तज्ज्ञा रेवाजलं नात्र विचारणास्ति ॥ ५ ॥ अनेकविद्याधरकिन्नराद्यैर ध्यासितं पुण्यतमाधिवासैः ॥ रेवाजलं धारयतो हि मूर्ध्ना स्थानं सुरेंद्राधिपतेः समीपे ॥ ६ ॥ नर्मदा सर्वदा सेव्या बहुनोक्तेन किं नृप ॥ यदीच्छेन्न पुनर्द्रष्टुं घोरं संसारसागरम् ॥ ७ ॥ त्रयाणामपि लोकानां महती पावनी स्मृता ॥ यत्र तत्र मृतस्यापि ध्रुवं गाणेश्वरी गतिः ॥ ८ ॥ अनेक यज्ञायतनैर्वृतांगी न ह्यत्र किंचिद्बृहतीर्थमस्ति ॥ तस्यास्तु तीरे भवता यदुक्तं तपस्विनो वाप्यतपस्विनो वा ॥ ९ ॥ म्रियंते ये पापकृतो मनुष्यास्ते स्वर्गमायांति यथाऽमरेंद्राः ॥ १० ॥ एवं तु कपिला चैव विशल्या राजसत्तम ॥ ईश्वरेण पुरा सृष्टा लोकानां हितकाम्यया ॥ ११ ॥ तत्र स्नात्वा नरो राजन्सोपवासो जितेंद्रियः ॥ अश्वमेधस्य महतोऽसंशयं फलमाप्नुयात् ॥ १२ ॥ अनाशकं च यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ॥ सर्वपापविनिर्मुक्तो याति वै शिवमंदिरम् ॥ १३ ॥ पृथिव्यां सागरांतायां स्नानदानेन यत्फलम् ॥ विशल्यासंगमे स्नात्वा सकृत्तत्फलमश्नुते ॥ ॥ १४ ॥ एवं पुण्या पवित्रा च कथिता तव भूपते ॥ भूयो मां पृच्छसि च यत्तच्चैव कथयाम्यहम् ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे विशल्यासंगममाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ संगमः करनर्मदयोः पुरे मांधातृसंज्ञिते ॥ गत्वा स्नात्वा तपयित्वा पितॄन्विष्णुपुरं नयेत् ॥ १ ॥ मर्दयित्वा करौ पूर्वं विष्णुर्देहं यजिघांसया ॥ चक्रं जग्राह तत्रैव स्वेदाज्जाता सरिद्वरा ॥ २ ॥ संगता रेवया तत्र स्नात्वा पापैः प्रमुच्यते ॥ ३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये करनर्मदासंगममाहात्म्यवर्णनंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ॐकारात्पूर्वभागे वै संगमो लोकविश्रुतः ॥ रेवया संगता यत्र नीलगंगा नृपोत्तम ॥ १ ॥ तत्र स्नात्वा जपित्वा च कोऽर्थोऽलभ्यो भवेद्भुवि ॥ षष्टिवर्षसहस्राणि नीलकण्ठपुरे वसेत् ॥ २ ॥ तर्पयित्वा पितॄञ्छ्राद्धे तिलमिश्रैर्जलैरपि ॥ उद्धरेदात्मना सार्द्धं पुरुषानेकविंशतिम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये नीलगंगायाः संगममाहात्म्यवर्णनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ जालेश्वरेपि यत्प्रोक्तं त्वया पूर्वं द्विजोत्तम ॥ तत्कथं तु भवेत्पुण्यमृषिसिद्धनिषेवितम् ॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जालेश्वरात्परं तीर्थं न भूतं न भविष्यति ॥ तस्योत्पत्तिं कथयतः शृणु त्वं पांडुनंदन ॥ २ ॥ पुरा ऋषिगणाः सर्वे सेंद्राश्चैव मरुद्गणाः ॥ तापिता असुरैः सर्व्वैः क्षयं नीता ह्यनेकशः ॥ ३ ॥ बाणासुरप्रभृतिभिर्जंभशुम्भपुरोगमैः ॥ वध्यमाना ह्यनेकैश्च ब्रह्माणं शरणं गताः ॥ ४ ॥ विमानैः पर्वताकारैर्हयैश्चैव गजोपमैः ॥ स्यंदनैर्नगराकारैः सिंहशार्दूलयोजितैः ॥ ५ ॥ कच्छपैर्मकरैश्चान्ये जग्मुरन्ये पदातयः ॥ प्राप्य ते परमं स्थानमशक्यं यदधार्मिकैः ॥ ६ ॥ दृष्ट्वा पद्मोद्भवं देवं सर्वलोकस्य शंकरम् ॥ ते सर्वे तत्र गत्वा तु स्तुतिं चक्रुः समाहिताः ॥ ७ ॥ ॥ ॥ देवा ऊचुः ॥ ॥ जयामेय जयाभेद जय संभूतिकारक ॥ पद्मयोने सुरश्रेष्ठ त्वां वयं शरणं गताः ॥ ८ ॥ तच्छ्रुत्वा तु वचो देवो देवानां भावितात्मनाम् ॥ मेघगंभीरया वाचा प्रत्युवाच पितामहः ॥ ९ ॥ किं वो ह्यागमनं देवाः सर्वेषां च विवर्णता ॥

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by eGangotri Foundation USA

केनावमानिताः सर्वे शीघ्रं कथयतामराः ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ बाणोनाम महावीर्यो दानवो बलदर्पितः ॥ तेनास्माकं हृतं सर्वं धनरत्नैर्वियोजिताः ॥ ११ ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ चिंतयामास देवेशस्तस्य नाशाय या क्रिया ॥ १२ ॥ अवध्यो दानवः पापः सर्वेषां वै दिवौकसाम् ॥ मुक्त्वा तु शंकरं देवं न मया न च विष्णुना ॥ १३ ॥ तस्मैव सर्वे गच्छामो यत्र देवो महेश्वरः ॥ स गतिश्चैव सर्वेषां विद्यतेऽन्यो न कश्चन ॥ १४ ॥ एवमुक्त्वा सुरैः सर्वैर्ब्रह्मा वेदविदांवरः ॥ ब्राह्मणैः सह विद्वद्भिर्गतो यत्र महेश्वरः ॥ १५ ॥ स्तुतिभिश्च सुपुण्याभिस्तुष्टाव परमेश्वरम् ॥ १६ ॥ ॥ देवा ऊचुः ॥ ॥ जय त्वं देवदेवेश जयोमार्द्धशरीरधृक् ॥ वृषासन महाबाहो शशांकृतभूषण ॥ १७ ॥ नमः शूलाग्रहस्ताय नमः खट्वांगधारिणे ॥ जय भूतपते देव दक्षयज्ञविनाशन ॥ १८ ॥ पञ्चाक्षर नमो देव पंचभूतात्मविग्रह ॥ पञ्चवक्त्रमयेशान वेदैस्त्वं तु प्रगीयसे ॥ १९ ॥ सृष्टिपालनसंहारांस्त्वं सदा कुरुषे नमः ॥ अष्टमूर्ते स्मरहर स्मर सत्यं यथा स्तुतः ॥ २० ॥ पञ्चात्मिका तनुर्देव ब्राह्मणैस्ते प्रगीयते ॥ सद्यो वामे तथाऽघोरे ईशे तत्पुरुषे तथा ॥ २१ ॥ हेमजाल सुविस्तीर्णे हंसवत्कूजसे हर ॥ एवं स्तुतो मुनिगणैर्ब्रह्माद्यैश्च सुरासुरैः ॥ २२ ॥ प्रहृष्टः सुमना भूत्वा सुरसंघानुवाच ह ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ स्वागतं देवविप्राणां सुप्रभाताय शर्वरी ॥ किं कुर्मो वदत क्षिप्रं कोन्यः सेव्यः सुरासुरैः ॥ २४ ॥ किं दुःखं को नु संतापः कुतो वो भयमागतम् ॥ कथयध्वं महाभागाः कारणं यन्मनोगतम् ॥ २५ ॥ एवमुक्तास्तु रुद्रेण प्रत्यूचुस्तान्सुरर्षभाः ॥ स्वान्स्वान्देहान्दर्शयंतो लज्जमाना अधोमुखाः ॥ २६ ॥ अस्ति घोरो महावीर्यो दानवो बलदर्पितः ॥ बाणोनामेति विख्यातो यस्य त्रिपुरं महत् ॥ २७ ॥ तेन वै सुतपस्तप्तं दशवर्षशतानि हि ॥ तस्य तुष्टो ऽभवद्ब्रह्मा नियमेन दमेन च ॥ २८ ॥ पुराणि तान्यभेद्यानि ददौ कामगमानि वै ॥ आयसं राजतं चैव सौवर्णं च तथा परम् ॥ २९ ॥ त्रिपुरं ब्रह्मणा सृष्टं भ्रमत्तत्कामगामि च ॥ तस्यैव तु बलोत्कृष्टास्त्रिपुरे दानवाः स्थिताः ॥ ३० ॥ त्रैलोक्यं सकलं देव पीडयंति महासुराः ॥ दंडपाशासिशस्त्राणि अविकारे विकुर्वते ॥ त्रिपुरं दानवैर्जुष्टं भ्रमत्तच्चक्रसंनिभम् ॥ ३१ ॥ क्वचिद्दृश्यमदृश्यं वा मृगतृष्णेव लक्ष्यते ॥ ३२ ॥ यस्मिन्पतति तद्दिव्यं दग्धस्य त्रिपुरं महत् ॥ न तत्र ब्राह्मणा देवा गावो नैव तु जंतवः ॥ ३३ ॥ न तत्र दृश्यते किंचित्पतेद्यत्र पुरत्रयम् ॥ नद्यो ग्रामाश्च देशाश्च बहवो भस्मसात्कृताः ॥ ३४ ॥ सुवर्णं रजतं चैव मणिमौक्तिकमेव च ॥ स्त्रीरत्नं शोभनं यच्च तत्सर्वं कर्षते बलात् ॥ ३५ ॥ न शस्त्रेण न चास्त्रेण न दिवा निशि वा हर ॥ शक्यते देवसंघैश्च निहंतुं स कथंचन ॥ ३६ ॥ तद्दहस्व महादेव त्वं हि नः परमा गतिः ॥ एवं प्रसादं देवेश सर्वेषां कर्तुमर्हसि ॥ ३७ ॥ येन देवाश्च गंधर्वा ऋषयश्च तपोधनाः ॥ परां धृतिं समायांति तत्प्रभो कर्तुमर्हसि ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ एतत्सर्वं करिष्यामि मा विषादं गमिष्यथ ॥ अचिरेणैव कालेन कुर्यां युष्मत्सुखावहम् ॥ ३९ ॥ आश्वासयित्वा तान्देवान्सर्वानिंद्रपुरोगमान् ॥ चिंतयामास देवेशस्त्रिपुरस्य वधं प्रति ॥ ४० ॥ कथं केन प्रकारेण हंतव्यं त्रिपुरं मया ॥ तमेकं नारदं मुक्त्वा नान्योपायो विधीयते ॥ ४१ ॥ एवं संस्तंभ्य चात्मानं ततो ध्यातः स नारदः ॥ तत्क्षणादेव संप्राप्तो वायुभूतो महातपाः ॥ ४२ ॥ कमंडलुधरो देवस्त्रिदंडी ज्ञानकोविदः ॥ योगपट्टाक्षसूत्रेण व्यक्तेनैव विराजितः ॥ ४३ ॥ जटाजूटावद्धशिरा ज्वलनार्कसमप्रभः ॥ त्रिधा प्रदक्षिणीकृत्य दंडवत्पतितो भुवि ॥ ४४ ॥ कृतांजलिपुटो भूत्वा नारदो भगवान्मुनिः ॥ स्तोत्रेण महता शर्वः स्तुतो भक्त्या महामनाः ॥ ४५ ॥ ॥ नारद उवाच ॥ ॥ जय शंभो विरूपाक्ष जय देव त्रिलोचन ॥ जय शंकर ईशान रुद्रेश्वर नमोऽस्तु ते ॥ ४६ ॥ त्वं पतिस्त्वं जगत्कर्ता त्वमेव लयकृद्विभो ॥ त्वमेव जगतां नाथो दुष्टांतकनिषूदनः ॥ ४७ ॥ त्वं नः पाहि सुरेशान त्रयीमूर्ते सनातन ॥ भवमूर्ते भवारे त्वं भजतामभयो भव ॥ ४८ ॥ भवभावविनाशार्थं भव त्वां शरणं भजे ॥ किमर्थं चिंतितो देव आज्ञा मे दीयतां प्रभो ॥ ४९ ॥ कस्य संक्षोभये चित्तं को वाद्य पततु क्षितौ ॥ ब्रूहि कलहेनाहं योजये जयतांवर ॥ ५० ॥ नारदस्य वचः श्रुत्वा देवदेवो महेश्वरः ॥ उत्फुल्लनयनो भूत्वा इदं वचनमब्रवीत् ॥ ५१ ॥ स्वागतं ते मुनिश्रेष्ठ सदैव कलहप्रिय ॥ वीणावादनतत्त्वज्ञ ब्रह्मपुत्र सनातन ॥ ५२ ॥ गच्छ नारद शीघ्रं त्वं यत्र तत्त्रिपुरं महत् ॥ बाणस्य दानवेंद्रस्य सर्वलोकभयावहम् ॥ ५३ ॥ भर्त्तारो देवतातुल्याः स्त्रियस्तत्राप्सरः समाः ॥ तासां वै तेजसा चैव भ्रमते त्रिपुरं महत् ॥ ५४ ॥ न शक्यते कथं भेत्तुं सर्वोपायैर्द्विजोत्तम ॥ गत्वा त्वं मोहय क्षिप्रं पृथग्धर्मैरनेकधा ॥ ५५ ॥ ॥ नारद उवाच ॥ ॥ तव वाक्येन देवेश भेदयामि पुरोत्तमम् ॥ अभेद्यं बहुभोपायैर्यत्तु देवैः सवासवैः ॥ ५६ ॥ एवमुक्त्वा गतो भूप शतयोजनमायतम् ॥ बाणस्य तत्पुरश्रेष्ठमृद्धिवृद्धिसमायुतम् ॥ ५७ ॥ कृतकौतुकसंवाधं नानाधातुविचित्रितम् ॥ अनेकहर्म्यसंछन्नमनेकायतनोज्ज्वलम् ॥ ५८ ॥ द्वारतोरणसंयुक्तं कपाटार्गलभूषितम् ॥ बहुयंत्रसमोपेतं प्राकारपरिखोज्ज्वलम् ॥ ५९ ॥ वापीकूपतडागैश्च देवतायतनैर्युतम् ॥ हंसकारंडवाकीर्णं पद्मिनीखंडमंडितम् ॥ ६० ॥ अनेकवनशोभाढ्यं नानाविहगमंडितम् ॥ एवंगुणगणाकीर्णं बाणस्य पुरमुत्तमम् ॥ ६१ ॥ तस्य मध्ये महाकायं सप्तकक्षं सुशोभितम् ॥ बाणस्य भवनं दिव्यं सर्वं कांचनभूषितम् ॥ ६२ ॥ मौक्तिकादामशोभाढ्यं वज्रवैडूर्यभूषितम् ॥ रुक्मपट्टतलाकीर्णं रत्नभूम्या सुशोभितम् ॥ ६३ ॥ मत्तमातंगनिःश्वासैः स्यंदनैः संकुलीकृतम् ॥ हयहेषितशब्दैश्च नारीणां नूपुरस्वनैः ॥ ६४ ॥ खड्गतोमरहस्तैश्च वज्रांकुशशरायुधैः ॥ रक्षितं घोररूपैश्च दानवैर्बलदर्पितैः ॥ ६५ ॥ एवं गुणगणाकीर्णं बाणस्य भवनोत्तमम् ॥ कैलासशिखरप्रख्यं महेन्द्रभवनोपमम् ॥ ६६ ॥ नारदो गगने शीघ्रमगमत्पुरसन्मुखः ॥ द्वारदेशं समासाद्य क्षत्तारं वाक्यमब्रवीत् ॥ ६७ ॥ भोभोः क्षत्तर्महाबुद्धे राजकार्यविशारद ॥ शीघ्रं बाणाय चाचक्ष्व नारदो द्वारि तिष्ठति ॥ ६८ ॥ स वंदयित्वा चरणौ नारदस्य त्वरान्वितः ॥ सभामध्यगतं बाणं विज्ञप्तुमुपचक्रमे ॥ ६९ ॥ वेपमानांगयष्टिस्तु करेणापिहिताननः ॥ शृण्वतां सर्वयोधानामिदं वचनमब्रवीत् ॥ ॥ ७० ॥ वंदितो देवगन्धर्वैर्यक्षकिन्नरदानवैः ॥ कलिप्रियो दुराराध्यो नारदो द्वारि तिष्ठति ॥ ७१ ॥ द्वारपालस्य तद्वाक्यं श्रुत्वा बाणस्त्वरान्वितः ॥ द्वाःस्थमाह महादैत्यः सविस्मयमिदं तदा ॥ ७२ ॥ ॥ बाण उवाच ॥ ॥ ब्रह्मपुत्रं सुतेजस्कं दुःसहं दुरतिक्रमम् ॥ प्रवेशय महाभागं किमर्थं वारितो बहिः ॥ ७३ ॥ श्रुत्वा प्रभोर्वचस्तस्य प्रावेशयदुदीरितम् ॥ गत्वा वेगेन महता नारदं गृहमागतम् ॥ ७४ ॥ दृष्ट्वा देवर्षिमायांतं नारदं सुरपूजितम् ॥ सहसोत्थाय संहृष्टो ववंदे चरणौ मुनेः ॥ ७५ ॥ ददौ चासनमर्घ्यं च पाद्यं पूजां यथाविधि ॥ न्यवेदयच्च तद्राज्यमात्मानं बांधवैः सह ॥ ७६ ॥ पप्रच्छ कुशलं चापि मुनिं बाणासुरः स्वयम् ॥ ७७ ॥ ॥ नारद उवाच ॥ ॥ साधुसाधु महाबाहो दनोर्वंशविवर्द्धन ॥ कोऽन्यस्त्रिभुवने श्लाघ्यस्त्वां मुक्त्वा दनुपुंगव ॥ ७८ ॥ पूजितोऽहं दनुश्रेष्ठ धनरत्नैः सुशोभनैः ॥ राज्येन चात्मना वापि ह्येवं कः पूजयेत्परः ॥ ७९ ॥ न मे कार्यं हि भोगेन भुंक्ष्व राज्यमनामयम् ॥ त्वद्दर्शनोत्सुकः प्राप्तो दृष्ट्वा देवं महेश्वरम् ॥ ८० ॥ भ्रमते त्रिपुरं लोके स्त्रीसतीत्वान्मया श्रुतम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तान्द्रष्टुकामः संप्राप्तस्त्वद्वारान्दानवेश्वर ॥ ८१ ॥ मन्यसे यदि मे शीघ्रं दर्शयस्व च मा चिरम् ॥ नारदस्य वचः श्रुत्वा कंचुकिं समुदीक्ष्य वै ॥ ॥ ८२ ॥ अंतःपुरचरं वृद्धं दंडपाणिं गुणान्वितम् ॥ उवाच राजा हृष्टात्मा शब्देनापूरयन्दिशः ॥८३॥ नारदाय महादेवीं दर्शयस्वेह कंचुकिन् ॥ अंतःपुरचरैः सर्वैः समेतामविशंकितः ॥ ८४ ॥ नाथस्याज्ञां पुरस्कृत्य गृहीत्वा नारदं करे ॥ प्रविश्याकथयद्देव्यै नारदोऽयं समागतः ॥ ८५ ॥ हृष्ट्वा देवी मुनिश्रेष्ठं कृत्वा पादाभिवंदनम् ॥ आसनं कांचनं शुभ्रमर्घ्यपाद्यादिकं ददौ ॥ ८६ ॥ तस्यै स भगवांस्तुष्टो ह्याशीर्वादमदात्परम् ॥ नान्या देवि त्रिलोकेपि त्वत्समा दृश्यतेऽङ्गना ॥ ८७ ॥ पतिव्रता शुभाचारा सत्यशौचसमन्विता ॥ यस्याः प्रभावात्त्रिपुरं भ्रमते चक्रवत्सदा ॥ ८८ ॥ तच्छ्रुत्वा वचनं देवी नारदस्य मुदान्वितम् ॥ पर्यपृच्छद्दृषिं भक्त्या धर्मं धर्मभृतांवरा ॥ ८९ ॥ ॥ रोहिण्युवाच ॥ ॥ भगवन्मानुषे लोके देवास्तु प्रीयंति कैर्व्रतैः ॥ कानि दानानि दीयंते येषां च स्यान्महत्फलम् ॥ ९० ॥ उपवासाश्च ये केचित्स्त्रीधर्मे कथिता बुधैः ॥ यैः कृतैः स्वर्गमायांति सुकृतिन्यः स्त्रियो यथा ॥ ९१ ॥ एतत्सर्वं महाभाग कथयस्व यथातथम् ॥ श्रोतुमिच्छाम्यहं सर्वं कथयस्वाविशंकितः ॥ ९२ ॥ ॥ नारद उवाच ॥ ॥ साधुसाधु महाभागे प्रश्नोऽयं वेदितस्त्वया ॥ यं श्रुत्वा सर्वनारीणां धर्मवृद्धिस्तु जायते ॥ ९३ ॥ उपवासैश्च दानैश्च पतिपुत्रौ वशानुगौ ॥ बांधवैः पूज्यते नित्यं यैः कृतैः कथयामि ते ॥ ९४ ॥ दुर्भगा सुभगा यैस्तु सुभगा दुर्भगा भवेत् ॥ पुत्रिणी पुत्ररहिता ह्यपुत्रा पुत्रिणी तथा ॥ ९५ ॥ भर्तारं लभते कन्या तथान्या भर्तृवर्जिता ॥ कृताकृतैश्च जायंते तन्निबोधस्व सुंदरि ॥ ९६ ॥ तिलधेनुं सुवर्णं च रूप्यं गा वाससी तथा ॥ पानीयं भूमिदानं च गंधधूपानुलेपनम् ॥ ९७ ॥ पादुकोपानहौ छत्रं पुण्यानि व्यजनानि च ॥ पादाभ्यंगं शिरोभ्यंगं स्नानं शय्यासनानि च ॥ ९८ ॥ एतानि ये प्रयच्छंति नोपसर्पंति ते यमम् ॥ मधु माषं पयः सर्पिर्लवणं गुडमौषधम् ॥ ९९ ॥ पानीयं भूमिदानं च शालीनिक्षुरसांस्तथा ॥ आरक्तवाससी श्लक्ष्णे दंपत्योर्ललितादिने ॥ १०० ॥ सौभाग्यं जायते चैव इह लोके परत्र च ॥ ब्राह्मणे वृत्तसंपन्ने सुरूपे च गुणान्विते ॥ १ ॥ तिथौ यस्यामिदं देयं तत्ते राज्ञि वदाम्यहम् ॥ प्रतिपत्सु च या नारी पूर्वाह्णे च शुचिव्रता ॥ २ ॥ इंधनं ब्राह्मणे दद्यात्प्रीयतां मे हुताशनः ॥ तस्या जन्मानि षड्विंशदंगप्रत्यंगसंधिषु ॥ ३ ॥ न रजो नैव संतापो जायते राजवल्लभे ॥ द्वितीयायां तु या नारी नवनीतं सुदान्विता ॥ ४ ॥ ददाति द्विजमुख्याय सुकुमारतनुर्भवेत् ॥ लवणं विप्रवर्याय तृतीयायां प्रयच्छति ॥ ५ ॥ गौरी मे प्रीयतां देवी तस्याः पुण्यफलं शृणु ॥ कौमारिका पतिं प्राप्य तेन सार्द्धसुखा यथा ॥ ६ ॥ क्रीडत्यविधवा चापि लभते सा महद्यशः ॥ नक्तं कृत्वा चतुर्थ्यां वै दद्याद्विप्राय मोदकान् ॥ ७ ॥ प्रीयतां मम देवेशो गणनाथो विनायकः ॥ तस्यास्तेन फलेनाशु सर्वकर्मसु भामिनि ॥ ८ ॥ विघ्नं न जायते क्वापि एवमाह पितामहः ॥ पञ्चमीं तु ततः प्राप्य ब्राह्मणे तिलदा तु या ॥ ९ ॥ सा भवेद्रूपसंपन्ना यथा चैव तिलोत्तमा ॥ षष्ठ्यां तु या मधूकस्य फलदा तु भवेत्सदा ॥ ११० ॥ उद्दिश्य चाग्निजं देवं ब्राह्मणे वेदपारगे ॥ तस्याः पुत्रो यथा स्कन्दो देवसंघेषु चोत्तमः ॥ ११ ॥ उत्पद्यते महाराजः सर्वलोकेषु पूजितः ॥ सप्तम्यां या द्विजश्रेष्ठं सुवर्णेन प्रपूजयेत् ॥ १२ ॥ उद्दिश्यं जगतो नाथं देवदेवं दिवाकरम् ॥ तस्य पुण्यफलं यद्वै कथितं द्विजसत्तमैः ॥ १३ ॥ तत्ते राज्ञि प्रवक्ष्यामि शृणुष्वैकमनाः सति ॥ दद्याच्चित्रककुष्ठानि मण्डलानि विचर्चिका ॥ १४ ॥ न भवन्तीह चांगेषु पूर्वकर्मार्जितान्यपि ॥ कृष्णां धेनुं तथाष्टम्यां या प्रयच्छति भामिनी ॥ १५ ॥ ब्राह्मणे वृत्तसंपन्ने प्रीयतां मे महेश्वरः ॥ तस्या जन्मार्जितं पापं नश्यते विभवान्विता ॥ १६ ॥ जायते नात्र सन्देहो यस्माद्दानमनुत्तमम् ॥ गन्धधूपं तु या नारी भक्त्या विप्राय दापयेत् ॥ १७ ॥ कात्यायनीं समुद्दिश्य नवम्यां शृणु यत्फलम् ॥ तस्या भ्राता पिता पुत्रः पतिर्वा रणमुत्तमम् ॥ १८ ॥ प्राप्यते नैव सीदन्ति तेन दानेन रक्षिताः ॥ इक्षुदंडरसं देवि दशम्यां या प्रयच्छति ॥ १९ ॥ लोकपालान्समुद्दिश्य ब्राह्मणे व्यंगवर्जिते ॥ तेन दानेन सा नित्यं सर्वलोकस्य वल्लभा ॥ १२० ॥ जायते नात्र सन्देह इत्येवं शंकरोऽब्रवीत् ॥ एकादश्यामुपोष्याथ द्वादश्यामुदकप्रदा ॥ २१ ॥ नारायणं समुद्दिश्य ब्राह्मणे विष्णुतत्परे ॥ सा सदा स्पर्शसंभोगैर्द्भावयेद्भावयेज्जनम् ॥ २२ ॥ यस्माद्दानं महल्लोके ह्यनन्तमुदके भवेत् ॥ पादाभ्यंगं शिरोभ्यंगं कामसुद्दिश्य वै द्विजे ॥ २३ ॥ ददाति च त्रयोदश्यां भक्त्या परमयांगना ॥ यस्यांयस्यां धृता जायेद्भूयो योन्यां तु जन्मनि ॥ २४ ॥ तस्यां तस्यां तु सा भर्तुर्न वियुज्येत कर्हिचित् ॥ तथा प्येवं चतुर्दश्यां दद्यात्पात्रमुपानहौ ॥ २५ ॥ ब्राह्मणे धर्ममुद्दिश्य तस्या लोका ह्यनामयाः ॥ एवं च पक्षपक्षांते श्राद्धे तर्पेद्द्विजोत्तमान् ॥ २६ ॥ अव्युच्छिन्ना सदा राज्ञि संततिर्जायते भुवि ॥ एवं ते तिथिमाहात्म्यं दानयोगेन भाषितम् ॥ २७ ॥ तथा वनस्पतीनां तु आराधनविधिं शृणु ॥ जम्बूं निम्बतरुं चैव तिंदुकं मधुकं तथा ॥२८॥ आम्रं चामलकं चैव शाल्मलिं वटपिप्पलौ ॥ शमीबिल्वाम्रलीवृक्षं कदलीं पाटलीं तथा ॥ २९ ॥ अन्यान्पुण्यतमान्वृक्षानुपेत्य स्वर्गमाप्नुयात् ॥ ३० ॥ ॥ नारद उवाच ॥ ॥ चैत्रे मासे तु या नारी कुर्याद्व्रतमनुत्तमम् ॥ तस्य व्रतस्य चान्यानि कलां नार्हंति षोडशीम् ॥ ३१ ॥ श्रुतेन येन सुभगे दुर्भगत्वं न पश्यति ॥ यथा हिमं रविं प्राप्य विलयं याति भूतले ॥ ३२ ॥ तथा दुःखं च दौर्भाग्यं व्रतादस्माद्विलीयते ॥ मधुकाख्यां तु ललितामाराधयति येन वै ॥ ३३ ॥ विधिं तं शृणु सुभगे कथ्यमानं सुखावहम् ॥ चैत्रे शुक्लतृतीयायां सुस्नाता शुद्धमानसा ॥ ३४ ॥ प्रतिमां मधुवृक्षस्य शांकरीमुमया सह ॥ कारयित्वा द्विजवरैः प्रतिष्ठाप्य यथाविधि ॥ ३५ ॥ सुगंधिकुसुमैर्धूपैस्तथा कर्पूरकुंकुमैः ॥ पूजयेद्विधिना देवं मन्त्रयुक्तेन भामिनी ॥ ३६ ॥ पादौ नमः शिवायेति मंत्रे वै मन्मथाय च ॥ कालोदरायेत्युदरं नीलकंठाय कंठकम् ॥३७॥ शिरः सर्वात्मने पूज्य उमां पश्चात्प्रपूजयेत्॥ क्षामोदरायै ह्युदरं सुकंठायै च कंठकम् ॥३८॥ शिरः सौभाग्यदायिन्यै पश्चादर्घ्यं प्रदापयेत्॥३९॥नमस्ते देवदेवेश उमावर जगत्पते॥अर्घ्येणानेन मे सर्वं दौर्भाग्यं नाशय प्रभो ॥१४०॥ इति अर्घ्यमंत्रः ॥ अर्घ्यं दत्त्वा ततः पश्चात्करकं वारिपूरितम्॥मधूकपात्रोपभृतं सहिरण्यं तु शक्तितः॥४१॥करकं वारिसंपूर्णं सौभाग्येन तु संयुतम्॥ दत्तं तु ललिते तुभ्यं सौभाग्यादिविवर्धनम् ॥४२॥ ॥ इति करकदानमंत्रः ॥ ॥ मंत्रेणानेन विप्राय दद्यात्करकमुत्तमम् ॥ लवणं वर्जयेच्छुक्लां यावदन्यां तृतीथिकाम् ॥४३॥ क्षमाप्य देवीं देवेशं नक्तमद्या त्स्वयंहविः ॥ अनेन विधिना सार्धं मासि मासि ह्युपक्रमेत् ॥ ४४ ॥ फाल्गुनस्य तृतीयायां शुक्लायां तु समाप्यते ॥ वैशाखे लवणं देयं ज्येष्टे चोज्यं प्रदीयते ॥ ४५ ॥ आषाढे मासि निष्पावाः पयो देयं तु श्रावणे ॥ सुद्गा देया नभस्ये तु शालिमाश्वयुजे तथा ॥ ४६ ॥ कार्त्तिके शर्करापात्रं करकं रससंभृतम् ॥ मार्गशीर्षे तु कार्पासं करकं घृतसंयुतम् ॥ ४७ ॥ पौषे तु कुंकुमं देयं माघे पात्रं तिलैर्भृतम् ॥ फाल्गुने मासि संप्राप्ते पात्रं मोदकसंभृतम् ॥ ४८ ॥ पश्चात्तृतीयादेयं यत्तत्पूर्वस्यां विवर्जयेत् ॥ विधानमासां सर्वासां सामान्यं मनसः प्रिये ॥ ४९ ॥ प्रतिमां मधुवृक्षस्य तामेव प्रतिपूजयेत् ॥ तस्मै सर्वं तु विप्राय आचार्याय प्रदीयते ॥ १५० ॥ ततः संवत्सरस्यांते उद्यापनविधिं शृणु ॥ मधुवृक्षं ततो गत्वा बहुसंभारसंवृतः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ५१ ॥ निखनेत्प्रतिमां मध्ये माधूकीं मधुकस्य च ॥ तत्रस्थं पूजयेत्सर्वसुमादेहार्द्धधारिणम् ॥ ५२ ॥ पूजोपहारैर्विपुलैः कुंकुमेन पुनःपुनः ॥
श्लक्ष्णाभिः पुष्पमालाभिः कौसुंभैः केसरेण च ॥५३॥ कौसुंभे वाससी शुभ्रे अतसीपुष्पसन्निभे ॥ परिधाप्य तां प्रतिमां दंपती रविसंख्यया ॥५४॥
उपानद्युगलैश्छत्रैः कंठसूत्रैः सकंठिकैः ॥ कटकैरंगुलीयैश्च शयनीयैः शुभास्तृतैः ॥ ५५ ॥ कुंकुमेन विलिप्तांगौ बहुपुष्पैश्च पूजितौ ॥ भोजयेद्वि
विधैरन्नैर्मधूकावासके स्थितौ ॥ ५६ ॥ भुक्तोत्थितौ तु विश्राम्य शय्यासु च क्षमापयेत् ॥ गुरुमूलं यतः सर्वं गुरुर्ज्ञेयो महेश्वरः ॥ ५७ ॥ प्रीते
गुरौ ततः सर्वं जगत्प्रीतं सुरासुरम् ॥ यद्यदिष्टतमं लोके यत्किंचिद्दयितं गृहे ॥ ५८ ॥ तत्सर्वं गुरवे देयमात्मनः श्रेय इच्छता ॥ इदं तु धनिभि
र्देयमन्यैर्देयं यथोच्यते ॥ ५९ ॥ दांपत्यमेकं विधिवत्प्रतिपूज्य शुभव्रतैः ॥ द्वितीयं गुरुदांपत्यं वित्तशाठ्यं विवर्जयेत् ॥ १६० ॥ ततः क्षमापयेद्देवीं
देवं च ब्राह्मणं गुरुम् ॥ यथा त्वं देवि ललिते न वियुक्तासि शंभुना ॥ ६१ ॥ तथा मे पतिपुत्राणामवियोगः प्रदीयताम् ॥ अनेन विधिना कृत्वा
तृतीयां मधुसंज्ञिकाम् ॥ ६२ ॥ इन्द्राणी चेंद्रपत्नीत्वमवाप सुतसुत्तमम् ॥ सौभाग्यं सर्वलोकेषु सर्वर्द्धिसुखसुत्तमम् ॥ ६३ ॥ अनेन विधिना या
तु कुमारी व्रतमाचरेत् ॥ शोभनं पतिमाप्नोति यथेंद्राण्या शर्तक्रतुः ॥ ६४ ॥ दुर्भगा सुभगत्वं च सुभगा पुत्रिणी भवेत् ॥ पुत्रिण्यक्षयमाप्नोति
न शोकं पश्यति क्वचित् ॥ ६५ ॥ अनेकजन्मजनितं दौर्भाग्यं नश्यति ध्रुवम् ॥ मृता तु त्रिदिवं प्राप्य उमया सह मोदते ॥ ६६ ॥ कल्पकोटि
शतं साग्रं भुक्त्वा भोगान्यथेप्सितान् ॥ पुनस्तु संभवे लोके पार्थिवं पतिमाप्नुयात् ॥ ६७ ॥ सुभगा रूपसंपन्ना पार्थिवं जनयेत्सुतम् ॥ ६८ ॥
एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ॥ अन्यत्पृच्छस्व सुभगे वांछितं यद्धृदि स्थितम् ॥ १६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवंत्यखंडे रेवाखंडे नर्मदामाहात्म्ये मधूकतृतीयाव्रतविधानमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ ॥
श्रीमार्कंडेय उवाच ॥ ॥ नारदस्य वचः श्रुत्वा राज्ञी वचनमब्रवीत् ॥ प्रसादं कुरु विप्रेंद्र गृह्ण दानं यथेप्सितम् ॥ १ ॥ सुवर्णमणिरत्नानि
वस्त्राणि विविधानि च ॥ तत्ते दास्यामि विप्रेंद्र यच्चान्यदपि दुर्लभम् ॥ २ ॥ राज्ञ्यास्तु वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ॥ अन्येषां दीयतां
भद्रे ये द्विजाः क्षीणवृत्तयः ॥ ३ ॥ वयं तु सर्वसंपन्ना भक्तिग्राह्याः सदैव हि ॥ इत्युक्ता सा तदा राज्ञी वेदवेदाङ्गपारगान् ॥ ४ ॥ आहूय
ब्राह्मणान्निःस्वान्दातुं समुपचक्रमे ॥ यत्किंचिन्नारदेनोक्तं दानं सौभाग्यवर्द्धनम् ॥ ५ ॥ तेन दानेन मे नित्यं प्रीयेतां हरिशंकरौ ॥ ततो
राज्ञीच सा प्राह नारदं मुनिपुंगवम् ॥ ६ ॥ ॥ राज्ञ्युवाच ॥ ॥ दानं दत्तं त्वयोक्तं यद्भर्तृकर्म्मपरं हि तत् ॥ आजन्मजन्म मे भर्ता भवेद्बाणो
द्विजोत्तम ॥ ७ ॥ नान्यो हि देवतं तात मुक्त्वा बाणं द्विजोत्तम ॥ तेन सत्येन मे भर्त्ता जीवेच्च शरदां शतम् ॥ ८ ॥ नान्यो
धर्म्मो भवेत्स्त्रीणां देवतं हि पतिर्यथा ॥ तथापि तव वाक्येन दानं दत्तं यथाविधि ॥ ९ ॥ स्वकं कर्म करिष्यामो भर्त्तारं प्रति मानद ॥
ब्रह्मपें गच्छ चेदानीं त्वमाशीर्वादः प्रदीयताम् ॥ १० ॥ तथेति तामनुज्ञाप्य नारदो नृपसत्तम ॥ सर्वासां मानसं हृत्वा अन्यतः कृतमानसः॥ ११ ॥
जगामादर्शनं विप्रः पूज्यमानस्तु खेचरैः ॥ ततो गतमनस्कास्ता भर्त्तारं प्रति भारत ॥ १२ ॥ विवर्णा निष्प्रभा जाता नारदेन विमोहिताः ॥१३॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये त्रिपुरक्षोभणवर्णनंनाम सप्तविंशोऽध्यायः
॥ २७ ॥ ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतस्मिन्नंतरे रुद्रो नर्मदातटमास्थितः ॥ क्रीडते ह्युमया सार्द्धं नारदस्तत्र चागतः॥१॥प्रणम्य देवदेवेश
मुमया सह शंकरम् ॥ व्यज्ञापयत्तदा देवं यद्वृत्तं त्रिपुरे तदा ॥ २ ॥ गतोऽहं स्वामिनिर्देशाच्चत्र तद्बाणमंदिरम् ॥ दृष्ट्वा बाणं यथान्यायं गतो ह्यंतः
पुरं महत् ॥ ३ ॥ तत्र भार्यासहस्राणि दृष्ट्वा बाणस्य धीमतः ॥ यथायोग्यं यथाकाममागतः क्षोभ्य तत्पुरम् ॥ ४ ॥ नारदस्य वचः श्रुत्वा साधुमा
ध्विति पूयजन् ॥ चिंतयामास देवेशो भ्रमणं त्रिपुरस्य हि ॥ ५ ॥ करमुक्तं यथा चक्रं विष्णुना प्रभविष्णुना ॥ महावेगं महायामं रक्षितं तेजसा मम
॥ ६ ॥ स च मे भक्तिनिरतो बाणो लोके च विश्रुतः ॥ भौरती च मया दत्ता ब्राह्मणानां विशेषतः ॥ ७ ॥ एवं स सुचिरं कालं देवदेवो महेश्वरः ॥
चिंतयित्वा मुनिर्बाणं कार्यं प्रति जनेश्वरः ॥ ८ ॥ ततोऽसौ मंदरं ध्यात्वा चापं कृत्वा गुणं महीम ॥ विष्णुं मनातनं देवं बाणे ध्यात्वा त्रिलो
चनः ॥ ९ ॥ फले हुताशनं देवं ज्वलंतं सर्वतोमुखम् ॥ सुपर्णं पुंखयोर्मध्ये जवे वायुं प्रकल्प्य च ॥ १० ॥ रथं महीमयं कृत्वा धुरि तावश्विना
वुभौ ॥ अक्षे सुरेश्वरं देवमग्रकील्यां धनाधिपम् ॥ ११ ॥ यमं तु दक्षिणे पार्श्वे वामे कालं सुदारुणम् ॥ आदित्यचंद्रौ चक्रे तु गंधर्वानोरका
दिषु ॥ १२ ॥ यन्तारं च सुरज्येष्ठं वेदान्कृत्वा हयोत्तमान् ॥ ग्रहलीनादिषु चाङ्गानि रश्मींश्छंदांसि चाकरोत् ॥ १३ ॥ कृत्वा प्रतोदमोंकारं
सुखग्राह्यं महेश्वरः ॥ धातारं चाग्रतः कृत्वा विधातारं च पृष्ठतः ॥ १४ ॥ मारुतात्सर्वतो दिग्भ्य ऊर्ध्वयंत्रे तथैव च ॥ महोरगपिशाचांश्च सिद्ध
विद्याधरांस्तथा ॥ १५ ॥ गणांश्च भूतसंघांश्च सर्वे सर्वांगसंधिषु ॥ युगमध्ये स्थितो मेरुर्युगस्याधो महागिरिः ॥ १६ ॥ सर्पा यन्त्रस्थिता घोराः
शम्ये वरुणनैर्ऋतौ ॥ गायत्रीचैव सावित्री स्थिते ते रश्मिबंधने ॥ १७ ॥ सत्यं रथध्वजे शौचं दमं रक्षां समंततः ॥ रथं देवमयं कृत्वा देवदेवो
महेश्वरः ॥ १८ ॥ सन्नद्धः कवची खड्गी बद्धगोधांगुलित्रवान् ॥ बद्ध्वा परिकरं गाढं जटाजूटं नियम्य च ॥ १९ ॥ सज्जं कृत्वा धनुर्दिव्यं योज
यित्वा रथोत्तमम् ॥ रथमध्ये स्थितो देवः शुशुभे च युधिष्ठिर ॥ २० ॥ धनुषः शब्दनादेनाकम्पयच्च जगत्त्रयम् ॥ स्थानं कृत्वा तु वैशाखं
निभृतं संस्थितो हरः ॥ २१ ॥ निरीक्ष्य सुचिरं कालं कोपसंरक्तलोचनः ॥ ध्यात्वा तं परमं मंत्रमात्मानं च निरुध्य सः ॥ २२ ॥ मुमोच
सहसा बाणं पुरस्य वधकांक्षया ॥ यदा त्रीणि समेतानि अंतरिक्षस्थितानि तु ॥ २३ ॥ ततः कालनिमेषार्धं दृष्ट्वैक्यं त्रिपुरस्य च ॥ त्रिपर्वणा
त्रिशल्येन ततस्तान्यवसादयत् ॥ २४ ॥ ततो लोका भयत्रस्ता त्रिपुरे भरतोत्तम ॥ सर्वासुरविनाशाय कालरूपा भयावहाः ॥ २५ ॥
अट्टहासान्प्रमुंचंति कपटरूपा नरास्तदा ॥ निमेषोन्मेषणं चैव कुर्वंति लिपिकर्मसु ॥ २६ ॥ निष्पंदनयना मर्त्याश्चित्रेष्वालिखिता इव ॥ देवायत
नगा देवा रटंति प्रहसंति च ॥ स्वप्ने पश्यंति चात्मानं रक्तांबरविभूषितम् ॥ २७ ॥ रक्तमाल्योत्तमांगाश्च पतंतः कार्दमे ह्रदे ॥ पश्यंति नाम
चात्मानं सतैलाभ्यंगमस्तकम् ॥ २८ ॥ पश्यंति यानमारूढं रासभैश्च नृपोत्तम ॥ संवर्तको महावायुर्युगांतप्रतिमो महान् ॥ २९ ॥ गृहानुन्मूल
यामास वृक्षजातीननेकशः ॥ भूमिकम्पाः सनिर्घाता उल्कापाताः सहस्रशः ॥ ३० ॥ रुधिरं वर्षते देवो मिश्रितं कर्करेर्बहु ॥ अग्निकुण्डेषु
विप्राणां हुतः सम्यग्घुताशनः ॥ ३१ ॥ ज्वलते धूमसंयुक्तो विस्फुलिंगकणैः सह ॥ कुंजरा विमदा जातास्तुरगाः सत्त्ववर्जिताः ॥ ३२ ॥
अवादितानि वाद्यंते वादित्राणि सहस्रशः ॥ ध्वजा ह्यकंपिताः पेतुश्छत्राणि विविधानि च ॥ ३३ ॥ ज्वलंति पादपास्तत्र पर्णानि च समं
ततः ॥ सर्वं तद्व्याकुलीभूतं हाहाकारसमन्वितम् ॥ ३४ ॥ उद्यानानि विचित्राणि प्रवभंज प्रभंजनः ॥ तेन संप्रेरिताः सर्वे ज्वलंति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विशिखाः शिखाः ॥ ३५ ॥ वृक्षगुल्मलतावल्ल्यो गृहाणि च समंततः ॥ दिग्विभागेश्च सर्वैश्च प्रवृत्तो हव्यवाहनः ॥ ३६ ॥ सर्वं किंशुकपर्णाभं प्रज्वलञ्चैव दृश्यते ॥ गृहाद्गृहं तदा गन्तुं नैव धूमेन शक्यते ॥ ३७ ॥ हरकोपाग्निनिर्दग्धाः क्रन्दंते त्रिपुरे जनाः ॥ प्रदीप्तं सर्वतो दिक्षु दह्यते त्रिपुरं परम् ॥ ३८ ॥ पतंति शिखराग्राणि विशीर्णानि सहस्रशः ॥ पावको धूमसंपृक्तो दह्यमानः समंततः ॥ ३९ ॥ नृत्यन्वै व्याप्तदिग्देशः कांतारेष्वभिधावति ॥ देवागारेषु सर्वेषु गृहेष्वट्टालकेषु च ॥ ४० ॥ प्रवृत्तो हुतभुक्तत्र पुरे कालप्रचोदितः ॥ ददाह लोकान्सर्वत्र हरकोप प्रकोपितः ॥ ४१ ॥ दहते त्रैपुरं लोकं बालवृद्धसमन्वितम् ॥ सपुरं सगृहद्वारं सवाहनवनं नृप ॥ ४२ ॥ केचिद्भोजनसक्ताश्च पानासक्तास्तथा परे ॥ अपरा नृत्यगीतेषु संसक्ता वारयोषितः ॥ ४३ ॥ अन्योन्यं च परिष्वज्य हुताशनशिखार्दिताः ॥ दह्यमाना नृपश्रेष्ठ सर्वे गच्छंत्य चेतनाः ॥ ४४ ॥ अथान्ये दानवास्तत्र दह्यंतेग्निविमोहिताः ॥ न शक्ताश्चान्यतो गन्तुं धूमेनाकुलिताननाः ॥ हंसकारंडवाकीर्णा नलिन्यो हेमपंकजाः ॥४५॥ दह्यन्ते विविधास्तत्र वाप्यः कूपाश्च भारत ॥ दृश्यन्तेऽनलदग्धानि पुरोद्यानानि दीर्घिकाः ॥ अम्लानैः पंकजैश्छन्ना विस्तीर्णा वसुयोजनाः ॥ ४६ ॥ गिरिकूटनिभास्तत्र प्रासादा रत्नशोभिताः ॥ दृश्यंतेऽनलसंदग्धा विशीर्णा धरणीतले ॥ ४७ ॥ नरस्त्रीबालवृद्धेषु दह्यमानेषु सर्वतः ॥ निर्दयं ज्वलते वह्निर्हाहाकारो महानभूत्॥ काचिच्च सुखसंसुप्ताप्र मत्तान्या नृपोत्तम ॥४८॥ क्रीडित्वा च सुविस्तीर्णशयनस्था वरांगना ॥ काचित्सुप्ता विशालाक्षी हारावलिविभूषिता ॥ धूमेनाकुलिता दीना न्यपतद्धव्यवाहने ॥ ४९ ॥ काचित्तस्मिन्पुरे दीप्ते पुत्रस्नेहाकुलालसा ॥ पुत्रमा लिंगते गाढं दह्यते त्रिपुरेऽग्निना ॥ ५० ॥ काचित्कनकवर्णाभा इंद्रनीलविभूषिता ॥ भर्त्तारं पतितं दृष्ट्वा पतिता तस्य चोपरि ॥ ५१ ॥ काचिदा दित्यवर्णाभा प्रसुप्ता तु प्रियोपरि ॥ अग्निज्वालाहता गाढं कंठमालिंगते नृप ॥ ५२ ॥ मेघवर्णा परा नारी चलत्कनकमेखला ॥ श्वेतवस्त्रोत्तरीया तु पपात धरणीतले ॥ ५३ ॥ काचित्कुंदेंदुवर्णाभा नीलरत्नविभूषिता ॥ शिरसा प्रांजलिर्भूत्वा विज्ञापयति पावकम् ॥ ५४ ॥ कस्याश्चिज्ज्वलते वस्त्रं केशाः कस्याश्च भारत ॥ ज्वलज्ज्वलनसंकाशैर्हेमभांडैस्त्रसंति च ॥ ५५ ॥ काचिन्मभूतदुःखार्ता विललाप वरांगना ॥ भस्मीभूतं पतिं दृष्ट्वा क्रंदंती कुररी यथा ॥ ५६ ॥ आलिंग्य गाढं सहसा पतिता तस्य मूर्द्धनि ॥ काचिच्च बहुदुःखार्त्ता व्यलपत्स्त्री स्ववेश्मनि ॥ ५७ ॥ भस्मसाच्च कृतं दृष्ट्वा क्रंदते कुररी यथा ॥ मातरं पितरं काचिद्दृष्ट्वा विगतचेतनम् ॥ ५८ ॥ वेपते पतिता भूमौ खेदिता वडवा यथा ॥ इतश्चेतश्च काचिच्च दह्यमाना वरांगना ॥ ५९ ॥ नापश्यद्बालमुत्संगे विपरीतमुखी स्थिता ॥ कुंभिलस्य गृहं दग्धं पतितं धरणीतले ॥६०॥ कूष्मांडस्य च धूम्रस्य कुहकस्य बक स्य च ॥ विरूपनयनस्यापि विरूपाक्षस्य चैव हि ॥ ६१ ॥ शुंभो डिंभश्च रौद्रश्च प्रह्लादश्चासुरोत्तमः ॥ दंडपाणिर्विपाणिश्च सिंहवक्त्रस्तथाऽनघ ॥ ॥ ६२ ॥ दुंदुभश्चैव संह्लादो डिंडिमुंडिस्तथैव च ॥ बाणभ्राता च बाणश्च क्रव्यादव्याघ्रवक्त्रकौ ॥ ६३ ॥ एवमन्येपि ये केचिद्दानवा बलदर्पिताः ॥ तेषां गृहे तथा वह्निर्ज्वलते निर्दयो नृप ॥ दह्यमानाः स्त्रियस्तात विलपंति गृहेगृहे ॥ ६४ ॥ करुणाक्षरवादिन्यो निराधारा गताः शिवम् ॥ यदि वैरं सुरारेश्च पुरुषोपरि पावक ॥ ६५ ॥ स्त्रियः किमपराध्यंति गृहपंजरकोकिलाः ॥ अनिर्दयो नृशंसस्त्वं कस्ते कोपः स्त्रियं प्रति ॥ ६६ ॥ किं त्वया न श्रुतं लोके अवध्याः सर्वथा स्त्रियः ॥ किं तु तुभ्यं गुणो ह्यस्ति दहने पवनेरितः॥ ६७ ॥ न कारुण्यं त्वया किंचिद्दाक्षिण्य च स्त्रियं प्रति ॥ दयां म्लेच्छा हि कुर्वंति वचनं वीक्ष्य योषिताम् ॥ ६८ ॥ म्लेच्छानामपि च म्लेच्छो दुर्ग्राह्यो ह्यचेतनः ॥ एवं विलपमानानां स्त्रीणां तत्रैव भारत ॥ ६९ ॥ ज्वालाकलापबहुलः प्रज्वलत्येव पावकः ॥ एवं दृष्ट्वा ततो बाणो दह्यमान उवाच ह ॥ ७० ॥ अवज्ञायं विनष्टोऽहं पापात्मा हर मंजसा ॥ मया पापेन मूर्खेण ये लोका नाशिता ध्रुवम् ॥ ७१ ॥ गोब्राह्मणा हता नित्यमिह लोके परत्र च ॥ नाशितान्यन्नपानानि मठारामाश्र मास्तथा ॥ ७२ ॥ ऋषीणामाश्रमाश्चैव देवारामा गणालयाः ॥ तेन पापेन मे ध्वंसस्तपसश्च बलस्य च ॥ ७३ ॥ किं धनेन करिष्यामि राज्येणां तःपुरेण च ॥ ७४ ॥ वरं शंकरपादौ च शरणं यामि मूढधीः ॥ न माता न पिता चैव न बंधुर्नापरो जनः ॥ ७५ ॥ मुक्त्वा चैव महेशानं परमार्ति हरं परम् ॥ आत्मना च कृतं पापमात्मनैव तु भुज्यते ॥ ७६ ॥ अहं पुनः समस्तैश्च दह्यामि सह साधुभिः ॥ एवमुक्त्वा शिवं लिंगं कृत्वा तन्मस्त कोपरि ॥ ७७ ॥ निर्जगाम गृहाच्छीघ्रं पावकेनावगुंठितः ॥ स खिन्नः स्विन्नगात्रस्तु प्रस्खलंस्तु मुहुर्मुहुः ॥७८॥ हरं गद्गदया वाचा स्तुवन्वै शरणं ययौ ॥ त्वत्कोपानलनिर्दग्धो यदि वध्योस्मि शंकर ॥ ७९ ॥ त्वत्प्रसादान्महादेव मा मे लिंगं प्रणश्यतु ॥ अर्चितं मे सुरश्रेष्ठ ध्यातं भक्त्या मया विभो ॥ ८० ॥ प्राणादिष्टतमं देव तस्माद्रक्षितुमर्हसि ॥ यदि तेऽहमनुग्राह्यो वध्यो वा सुरसत्तम ॥ ८१ ॥ प्रतिजन्म महादेवे त्वद्भक्तिरचलास्तु मे ॥ पशुकीटपतंगेषु तिर्यग्योनिगतेषु च ॥ स्वकर्मणा महादेव त्वद्भक्तिरचलास्तु मे ॥ ८२ ॥ एवमुक्त्वा महाभागो बाणो भक्तिमतां वरः ॥ स्तोत्रेण देवदेवेशं च्छंन्दयामास भारत ॥ ८३ ॥ ॥ बाण उवाच ॥ ॥ शिव शंकर सर्वहराय नमो भवभीतभयार्तिहराय नमः ॥ कुसुमायुधदेहविना शकर भ्रमदाप्रियकामक देव नमः ॥ ८४ ॥ जय पार्वतीश परमार्थसार जय विरचितभीमभुजंगहार ॥ जय निर्मलभस्मविलिप्तगात्र जय मंत्रमू ल जगदेकपात्र ॥ ८५ ॥ जय विषधरकपिलजटाकलाप जय भैरवविधृतपिनाकचाप ॥ जय विषमनयनपरिमुक्तसंग जय शंकर धृत गांगतरंग ॥ ८६ ॥ जय भीमरूप खट्वांगहस्त शशिशेखर जय जगतां प्रशस्त ॥ जय सुरवरेश सुरलोकसार जय सर्वसकलनिर्दग्ध सार ॥ ८७ ॥ जय कीर्त्तनीय जगतां पवित्र जय वृषांक बहुविधचरित्र ॥ जय विरचितनरककालमाल अघासुरदेहकंकालकाल ॥ ८८ ॥ जय नीलकंठ वरवृषभगमन जय सकललोकदुरितानुशमन ॥ जय सिद्धसुरासुरविनतचरण जय रुद्र रौद्रभवजलधितरण ॥ ८९ ॥ जय गिरिश सुरेश्वरमाननीय जय सूक्ष्मरूप संचिंतनीय ॥ जय दग्धत्रिपुर विश्वसत्त्व जय सकलशास्त्रपरमार्थतत्त्व ॥ ९० ॥ जय दुरवबोध संसारतार कलिकलुषमहार्णवघोरतार ॥ जय सुरासुरदेवगणेश नमो हयवानरसिंहगजेंद्रमुख ॥ ९१ ॥ अतिह्रस्वस्थूलसुदीर्घतम उपलब्धिर्न शक्यते ते ह्यमरैः ॥ प्रणतोऽस्मि निरंजन ते चरणौ जय सांब सुलोचनकांतिहर ॥ ९२ ॥ अप्राप्य त्वां किमत्यन्तसुच्छ्रयी न विनाशयेत् ॥ अतिप्रमाथि च तदा तपो महत्सुदारुणम् ॥ ९३ ॥ न पुत्रबांधवा दारा न समस्तः सुहृज्जनः ॥ संकटेऽभ्युपगच्छंति व्रजंतमेकगामिनम् ॥ ९४ ॥ यदेव कर्म केवल्यं कृतं तेन शुभाशुभम् ॥ तदेव सार्थवत्तस्य भवत्यग्रे तु गच्छतः ॥ ९५ ॥ निर्द्धनस्यैव चरतो न भयं विद्यते क्वचित् ॥ धनी मोहेन मुह्येत वनं तस्मात्त्यजाम्यहम् ॥ ९६ ॥ लुब्धाः पापानि कुर्वंति शुद्धांशा नैव मानवाः ॥ श्रुत्वा धर्मस्य सर्वस्वं श्रुत्वा चैवावधार्य तत् ॥ ॥ ९७ ॥ त्वं विष्णुस्त्वं जगन्नाथो ब्रह्मरूपः सनातनः ॥ इंद्रस्त्वं देवदेवेश सुरनाथ नमोस्तु ते ॥ ९८ ॥ त्वं क्षितिर्वरुणश्चैव पवनस्त्वं हुता शनः ॥ त्वं दीक्षा यजमानश्च आकाशं सोम एव च ॥ ९९ ॥ त्वं सूर्यस्त्वं तु वित्तेशो यमस्त्वं गुरुरेव च ॥ त्वया व्याप्तं जगत्सर्वं त्रैलोक्यं भास्वता यथा ॥ १०० ॥ एतद्बाणकृतं स्तोत्रं श्रुत्वा देवो महेश्वरः ॥ क्रोधं मुक्त्वा प्रसन्नात्मा तदा वचनमब्रवीत् ॥ १०१ ॥ ॥ ईश्वर उवाच ॥ ॥ न भेतव्यं न भेतव्यमद्यप्रभृति दानव ॥ सौवर्णे भवने तिष्ठ मम पार्श्वेऽथवा पुनः ॥ १०२ ॥ पुत्रपौत्रप्रपौत्रैश्च बांधवैः सह

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भार्यया ॥ अद्यप्रभृति वत्स त्वमवध्यः सर्वशत्रुषु ॥ १०३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ भूयस्तस्य वरो दत्तो देवदेवेन भारत ॥ स्वर्गे मर्त्ये च पाताले पूजितः सासुरासुरैः ॥ १०४ ॥ अक्षयश्चाव्ययश्चैव वस त्वं वै यथासुखम् ॥ ततो निवारयामास रुद्रः सप्तशिखं तदा ॥ १०५ ॥ तृतीयं रक्षितं तस्य पुरं देवेन शम्भुना ॥ ज्वालाभालाकुलं चान्यत्पतितं धरणीतले ॥१०६॥ अर्द्धेन प्रस्थिताद्दूरं तस्य ज्वाला दिवं गताः ॥ हाहाकारो महांस्तत्र ऋषिसंघैरुदीरितः॥१०७॥देवतैश्च महाभागैः सिद्धविद्याधरादिभिः ॥ एकं तु पतितं तत्र श्रीशैले खण्डमुत्तरम् ॥१०८॥ द्वितीयं पतितं राजञ्छैले ह्यमरकण्टके ॥ प्रज्वलत्पतितं तत्र तेन ज्वालेश्वरं स्मृतम् ॥ १०९ ॥ दग्धे तु त्रिपुरे राजन्पतिते खंड उत्तमे ॥ रुद्रो देवः स्थितस्तत्र ज्वालामालानिवारकः ॥ ११० ॥ हाहाकारपराणां तु ऋषीणां रक्षणाय च ॥ स्वयंमूर्तिर्महेशान उमावृषभसंयुतः ॥ १११ ॥ मनसापि स्मरेद्यस्तु भक्त्या ह्यमरकण्टकम् ॥ चांद्रायणाधिकं पुण्यं स लभेन्नात्र संशयः ॥ ११२ ॥ अतिपुण्यो गिरिश्रेष्ठो यस्माद्रतसत्तम ॥ अस्मान्नित्यं भवेद्राज न्सर्वपापक्षयंकरः ॥ ११३ ॥ नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः ॥ नानागुल्मलताकीर्णो नानावल्लीभिरावृतः ॥ ११४ ॥ सिंहव्याघ्रसमाकी र्णोवृगयूथैरलंकृतः ॥ श्वापदानां च घोषेण नित्यं प्रमुदितोऽभवत् ॥ ११५ ॥ ब्रह्मेंद्रविष्णुप्रमुखैर्ह्यमरैश्च सहस्रशः ॥ सेव्यते देवदेवेशः शंकरस्तत्र पर्वते ॥११६॥ पतनं कुरुते योऽस्मिन्पर्वतेऽमरकण्टके ॥ क्रीडते क्रमशो राजन्भुवनानि चतुर्दश ॥११७॥ ऐन्द्रं वाह्नं च कौबेरं वायव्यं याम्यमेव च ॥ नैर्ऋत्यं वारुणं चैव सौम्यं सौरं तथैव च ॥ ११८ ॥ ब्राह्मं च पदमाक्षिप्तं वैष्णवं तदनन्तरम् ॥ उमारुद्रं महाभाग ऐश्वरं तदनन्तरम् ॥११९॥ परं सदाशिवं शांतं सूक्ष्मं ज्योतिरतीद्रियम् ॥ तस्मिन्याति लयं धीरो विधिना नात्र संशयः ॥ १२० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽप्यत्र विधिरुद्दिष्टः पतने ऋषिसत्तम ॥ एतन्मे सर्वमाचक्ष्व संशयोऽस्ति महामुने ॥ १२१ ॥ ॥ श्रीमार्कण्डेय उवाच ॥ ॥ ॥ शृणुष्व कथयि ष्यामि तं विधिं पाण्डुनन्दन ॥ यत्कृत्वा प्रथमं कर्म्म निपतेत्तदनन्तरम् ॥ १२२ ॥ कृत्वा कृच्छ्रत्रयं पूर्वं जप्त्वा लक्षं दशैव तु ॥ शाकयावकभुक्त्वैव शुचिस्त्रिपवणो नृप ॥ १२३ ॥ त्रिकालमर्चयेदीशं देवदेवं त्रिलोचनम् ॥ दशांशेन तु राजेंद्र होमं तत्रैव कारयेत् ॥ १२४ ॥ लक्षवारं जपेद्देवं गंधमा ल्यैश्च पूजयेत् ॥ रात्रौ स्वप्ने तदा पश्येद्विमानस्थं ततः क्षिपेत् ॥ १२५ ॥ अनेनैव विधानेन आत्मानं यस्तु निक्षिपेत् ॥ स्वर्गलोकमनुप्राप्य क्रीडते त्रिदशैः सह ॥१२६॥ त्रिंशद्वर्षसहस्राणि त्रिंशत्कोट्यस्तथैव च ॥ भुक्त्वा मनोरमान्भोगांस्तदागच्छेन्महीतलम् ॥१२७॥ पृथिवीमेकच्छत्रेण भुनक्ति लोकपूजितः॥व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥१२८॥ ज्वालेश्वरं तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तत्र ज्वाला नदी पार्थ प्रस्रुता शिवनि र्मिता॥ १२९॥निर्वाप्य तद्भाणपुरं रेन्या सह संगता॥तत्र स्नात्वा महाराज विधिना मंत्रसंयुतः॥१३०॥तिलसंमिश्रतोयेन तर्पयेत्पितृदेवताः॥पिंडदानेन च पितॄन्पौंडरीकफलं लभेत् ॥१३१॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥१३२॥ अमराणां शतैश्चैव सेवितो ह्यमरेश्वरः ॥ तथैव ऋषिसंघैश्च तेन पुण्यतमो महान् ॥ १३३ ॥ समंताद्योजनं तीर्थं पुण्यं ह्यमरकंटकम् ॥ रुद्रकोटिसमोपेतं तेन तत्पुण्यमुत्तमम् ॥ १३४ ॥ तस्य पर्वतराजस्य यः करोति प्रदक्षिणम् ॥ प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ॥ १३५ ॥ वाचिकं मानसं चैव कायिकं त्रिविधं च यत् ॥ नश्यते पातकं सर्वमित्येवं शंकरोऽब्रवीत् ॥ १३६ ॥ अमरेश्वरपार्श्वे च तीर्थं शक्रेश्वरं नृप ॥ तपस्तप्त्वा पुरा तत्र शक्रेण स्थापितं किल ॥ १३७ ॥ कुशावर्तनाम तीर्थं ब्रह्मणा च कृतं शुभम् ॥ ब्रह्मकुंडमिति ख्यातं हंसतीर्थं तथा परम् ॥ १३८ ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ कावेर्याः पूर्वभागे च तीर्थं वै मातृकेश्वरम् ॥ १३९ ॥ एतानि दक्षिणे तीरे रेवाया भरतर्षभ ॥ संसेवन स्नानदानैः पापसंघहराणि च ॥ १४० ॥ भृगुतुंगे महाराज प्रसिद्धो भैरवः शिवः ॥ तस्य याम्यविभागे च तीर्थं वै चपलेश्वरम् १४१ ॥ एतौ स्थितौ दुःखहरौ रेवाया उत्तरे तटे ॥ तावभ्यर्च्य तथा नत्वा सम्यग्यात्राफलं भवेत् ॥ अदृष्टपूजितौ तौ हि नराणां विघ्नकारकौ ॥ १४२ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे त्रिपुरविध्वंसने ज्वालेश्वरतीर्थामरेश्वतीर्थमाहात्म्यवर्णनंनामाष्टा विंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कावेरीति च विख्याता त्रिषु लोकेषु सत्तम ॥ माहात्म्यं श्रोतुमिच्छामि तस्या मार्कंड तत्त्वतः ॥ १ ॥ कीदृशं दर्शनं तस्याः फलं स्पर्शेऽथवा विभो ॥ स्नाने जाप्येऽथवा दान उपवासे तथा मुने ॥ २ ॥ कथयस्व महाभाग कावेरीसंगमे फलम् ॥ धर्म्मः श्रुतोऽथ दृष्टो वा कथितो वा कृतोपि वा ॥ ३ ॥ अनुमोदितो वा विप्रेंद्र पुनातीति श्रुतं मया ॥ यथा धर्मप्रसंगे तु मुने धर्म्मोपि जायते ॥ ४ ॥ स्वर्गश्च नरकश्चैव इत्येवं वैदिकी श्रुतिः ॥ ५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाभाग यत्पृष्टोहं त्वयाऽधुना ॥ शृणुष्वैकमना भूत्वा कावेरीफलमुत्तम् ॥ ६ ॥ अस्ति यक्षो महासत्त्वः कुबेरोनाम विश्रुतः ॥ सोऽपि तीर्थप्रभावेन राजन्यक्षाधिपोऽभवत् ॥ ७ ॥ तच्छृणुष्व विधानेन भक्त्या परमया नृप ॥ सिद्धिं प्राप्तो महाभाग कावेरीसंगमेन तु ॥ ८ ॥ कावेर्या नर्म्मदायास्तु संगमे लोकविश्रुते ॥ तत्र स्नात्वा शुचिर्भूत्वा कुबेरः सत्यविक्रमः ॥ ९ ॥ विधिवन्नियमं कृत्वा शास्त्रयुक्त्या नरोत्तम ॥ आराधयन्महादेवमेकचित्तः सनातनम् ॥ १० ॥ एकाहारो वसन्मासं तथा षष्ठान्नकालिकः ॥ पक्षोपवासी न्यवसत्कंचित्कालं नृपोत्तम ॥ ११ ॥ मूलशाकफलैश्चान्यं कालं नयति बुद्धिमान् ॥ किंचित्कालं वसंस्तत्र तीर्थे शैवालभोजनः ॥ १२ ॥ पराकेणानयत्कालं कृच्छ्रेणापि च मानद ॥ चांद्रायणेन चाप्यन्यमन्यं वायुंबुभोजनः ॥ ॥ १३ ॥ एवं तत्र नरश्रेष्ठ कामरागविवर्जितः ॥ स्थितो वर्षशतं साग्रं कर्षयन्स्वं तथा वपुः ॥ १४ ॥ ततो वर्षशतस्यांते देवदेवो महेश्वरः ॥ तुष्टस्तु परया भक्त्या तमुवाच हसन्निव ॥ १५ ॥ भोभो यक्ष महासत्त्व वरं वरय सुव्रत ॥ परितुष्टोऽस्मि ते भक्त्या तव दास्ये यथेप्सितम् ॥ ॥ १६ ॥ ॥ यक्ष उवाच ॥ ॥ यदि तुष्टोसि देवेश उमया सह शंकर ॥ अद्यप्रभृति सर्वेषां यक्षाणामधिपो भवे ॥ १७ ॥ अक्षयश्चाव्ययश्चैव तव भक्तिपुरस्सरः ॥ धर्मे मतिं च मे नित्यं ददस्व परमेश्वर ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वया प्रार्थितं सर्वं फलं धर्म्मस्य तत्तथा ॥ इत्ये वमुक्त्वा तं तत्र जगामादर्शनं हरः ॥ १९ ॥ सोऽपि स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ आमंत्रयित्वा तत्तीर्थं कृतार्थश्च गृहं ययौ ॥ २० ॥ पूजितस्तत्र यक्षैस्तु सोऽभिषिक्तो विधानतः ॥ चकार विपुलं तत्र राज्यमीप्सितमुत्तमम् ॥ २१ ॥ तत्र चान्ये सुराः सिद्धा यक्षगंधर्वकिंनराः ॥ गणाश्चाप्सरसां तत्र ऋषयश्च तथाऽनघ ॥ २२ ॥ कावेरीसंगमं तेन सर्वपापहरं विदुः ॥ स्वर्गाणामपि सर्वेषां द्वारमेतद्युधिष्ठिर ॥ २३ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ कावेरीसंगमे स्नात्वा यैर्दत्तं हि तिलोदकम् ॥ २४ ॥ दश पूर्वे परे तात मातृतः पितृतस्तथा ॥ पितरः पितामहास्तेन उद्धृता नरकार्णवात् ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नायीत मानवः ॥ अर्चयेदीश्वरं देवं यदीच्छेच्छाश्वतीं गतिम् ॥ २६ ॥ कावेरीसंगमे राजन्स्नानदानार्चनं नरैः ॥ कृतं भक्त्या नरश्रेष्ठ अश्वमेधाधिकं फलम् ॥ २७ ॥ होमेन चाक्षयः स्वर्गो जपादायुर्विवर्धते ॥ ध्यानतो नित्यमा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

याति पदं शिवकलात्मकम् ॥ २८ ॥ अग्निप्रवेशं यः कुर्य्यात्तस्मिंस्तीर्थे नरेश्वर ॥ अग्निलोके वसेत्तावद्यावद्भूतसंप्लवम् ॥ २९ ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ तस्य पुण्यफलं यद्वै तच्छृणुष्व नरोत्तम ॥ ३० ॥ गंधर्वाप्सरसंकीर्णे विमाने सूर्यसन्निभे ॥ वीज्यमानो वरस्त्रीभिर्दिवतैः सह मोदते ॥ ३१ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ क्रीडते रुद्रलोकस्थस्तदंते भुवि चागतः ॥ ३२ ॥ भोगवान्दानशीलश्च जायते पृथिवीपतिः ॥ आधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ३३ ॥ एवंगुणगणाकीर्णा कावेरी सा सरिन्नृप ॥ त्रिषु लोकेषु विख्याता नर्मदासंगमे सदा ॥ ३४ ॥ जितवाक्कायचित्ताश्च ध्येयध्यानरतास्तथा ॥ कावेरीसंगमे तात तेऽपि मोक्षमवाप्नुयुः ॥ ३५ ॥ शृणु तेऽन्यत्प्रवक्ष्यामि आश्चर्यं नृपसत्तम ॥ त्रिषु लोकेषु का त्वन्या दृश्यते सरिता समा ॥ ३६ ॥ लब्धं यैर्नर्मदातोयं ये च कुर्युः प्रदक्षिणम् ॥ ये पिबंति जलं तत्र ते पुण्या नात्र संशयः ॥ ३७ ॥ न तेषां संततिच्छेदो दश जन्मानि पंच च ॥ तेषां पापं विलीयेत हिमं सूर्योदये यथा ॥ ३८ ॥ गंगायमुनसंगे वै यत्फलं लभते नरः ॥ तत्फलं लभते मर्त्यः कावेरीस्नानमाचरन् ॥३९॥ भौमे तु भूतजायोगे व्यतीपाते च संक्रमे ॥ राहुसोमसमायोगे तदेवाष्टगुणं स्मृतम् ॥४०॥ अशीतिश्च गवां प्रोक्ता गंगायामुनसंगमे ॥ कावेरीनर्मदायोगे तदेवाष्टगुणं स्मृतम् ॥ ४१ ॥ गंगा षष्टिसहस्रैस्तु क्षेत्रपालैः प्रभूज्यते ॥ तदर्द्धैरन्य तीर्थानि रक्षंते नात्र संशयः ॥ ४२ ॥ अमरेश्वरे तु सरितां ये योगाः परिकीर्तिताः ॥ ते त्वशीतिसहस्रैस्तु क्षेत्रपालैस्तु रक्षिताः ॥ ४३ ॥ तथाम्रेश्वरे याम्ये लिंगं वै चपलेश्वरम् ॥ द्वितीयं चंडहस्ताख्यं द्वे लिंगे तीर्थरक्षके ॥ ४४ ॥ शिवेन स्थापिते पूर्वं कावेर्याद्यभिरक्षके ॥ लक्षेण रक्षिता देवी नर्मदा बहुकल्पगा ॥ ४५ ॥ धनुषां षष्टयभियुतैः पुरुषैरीशयोजितैः ॥ ॐ कारशतसाहस्रैः पर्वतश्चाभिरक्षितः ॥ ४६ ॥ अन्यदेशकृतं पापम स्मिन्क्षेत्रे विनश्यति ॥ अस्मिंस्तीर्थे कृतं पापं वज्रलेपो भविष्यति ॥ ४७ ॥ एषा ते कथिता तात कावेरी सरितां वरा ॥ रुद्रदेहसमुत्पन्ना तेन पुण्या सरिद्वरा ॥ ४८ ॥ इति श्रीमत्काशीखंडे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये कावेरी संगममाहात्म्यवर्णनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदोत्तरकूले तु दारुतीर्थमनुत्तमम् ॥ यत्र सिद्धो महाभाग तपस्तप्त्वा द्विजोत्तमः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ द्विजवरश्रेष्ठः सिद्धस्तत्र महामुने ॥ दारुकेति श्रुतः कस्य एतन्मे वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भार्गवे विपुले वंशे धीमतो देवशर्म्मणः ॥ दारुर्नाम महाभागो वेदवेदांगपारगः ॥ ३ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो विधिक्रमात् ॥ यतिधर्म्मविधानेन चचार विपुलं तपः ॥४॥ ध्यायन्वै स महादेवं निराहारो युधिष्ठिर ॥ उवास तीर्थे तस्मिन्वै यावत्प्राणपरिक्षयम् ॥ ५ ॥ तस्य नाम्ना तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तत्र स्नात्वा विधानेन अर्चयेत्पितृदेवताः ॥ ६ ॥ सत्यवादी जितक्रोधः सर्वभूतहिते रतः ॥ सर्वान्कामानवाप्नोति राजन्नेव सवर्था ॥ ७ ॥ यः कुर्यादुपवासं च सत्यशौचपरायणः ॥ सौम्रामणिफलं चास्य संभवत्यविचारितम् ॥ ८ ॥ ऋग्वेदजापी ऋग्वेदी साम वा सामपारगः ॥ यजुर्वेदी यजुर्जप्त्वा लभते फलमुत्तमम् ॥ ९ ॥ प्राणांस्त्यजति यो मर्त्यस्तस्मिंस्तीर्थे विधानतः ॥ अनिवर्त्तिका गतिस्तस्य इत्येवं शंकरोऽब्रवीत् ॥ १० ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे दारुतीर्थमाहात्म्यवर्णनंनाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र तीर्थं त्रैलोक्यविश्रुतम् ॥ ब्रह्मावर्त्तमिति ख्यातं सर्वपापप्रणाशनम् ॥ १ ॥ तत्र सन्निहितो ब्रह्मा नित्यसेवी युधिष्ठिर ॥ ऊर्ध्वबाहुर्निरालंब श्चकार भ्रमणं सदा ॥ २ ॥ एकाहारवशेऽतिष्ठद्वादशाब्दं महाव्रती ॥ अत्र तीर्थे विधानेन चिंतयन्वै महेश्वरम् ॥ ३ ॥ तेन तत्पुण्यमाख्यातं ब्रह्मा वर्त्तमिति प्रभो ॥ तत्र स्नात्वा विधानेन तर्पयेत्पितृदेवताः ॥ ४ ॥ अर्चयेद्देवमीशानं विष्णुं वा परमेश्वरम् ॥ यत्फलं सर्वयज्ञानां विधिवद्दक्षिणा वताम् ॥ ५ ॥ तत्फलं समवाप्नोति तत्तीर्थस्य प्रभावतः ॥ यस्मिंस्तीर्थे तु यो देवो दानवो वा द्विजोऽथ वा ॥ ६ ॥ सिद्धस्तेनैव तत्रात्मा ख्यातं लोके महच्च तत् ॥ न जलं न स्थलं नाम क्षेत्रं वा पुष्पराणि च ॥ ७ ॥ पवित्रत्वं लभंत्येते पौरुषेण विना नृणाम् ॥ सामर्थ्यान्निश्चयाद्धैर्यात्सिध्यंति पुरुषा नृप ॥ ८ ॥ प्रमादात्तस्य लोभेन पतंति नरके ध्रुवम् ॥ ९ ॥ सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषंपुष्कराणि च ॥ १० ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे ब्रह्मावर्त्ततीर्थमाहात्म्यवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पत्रेश्वरं ततो गच्छेत्सर्वपापप्रणाशनम् ॥ यत्र सिद्धो महाभागश्चित्रसेनसुतो बली ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ सिद्धस्तदा ब्रह्मंस्तस्मिंस्तीर्थे महातपाः ॥ पुत्रः कस्य तु को हेतुरेतदिच्छामि वेदितुम् ॥ २ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ चित्रोनाम महातेजा इन्द्रस्य दयितः पुरा ॥ तस्य पुत्रो नृपश्रेष्ठ पत्रेश्वर इति श्रुतः ॥ ३ ॥ रूपवान्सुभगश्चैव सर्वशत्रुभयंकरः ॥ इंद्रस्य दयितोऽत्यर्थं जय इत्येव चापरः ॥ ४ ॥ स कदाचित्सभामध्ये सर्वदेवसमागमे ॥ मेनकानृत्यगीतेन मोहितः सुचिरं किल ॥ ५ ॥ तिष्ठते गतमर्यादो गतप्राण इव क्षणात् ॥ तावत्सुरपतिर्देवः शशापाथाजितेंद्रियम् ॥ ६ ॥ यस्मात्त्वं स्वर्गसंस्थोपि मर्त्यधर्ममुपेयिवान् ॥ तस्मान्मर्त्ये चिरं कालं क्षपयिष्यस्यसंशयम् ॥ ७ ॥ एवमुक्तः सुरेंद्रेण चित्रसेनसुतो युवा ॥ वेपमानः सुरश्रेष्ठं कृतांजलिरुवाच ह ॥ ८ ॥ ॥ ॥ पत्रेश्वर उवाच ॥ ॥ मया पापेन मूढेन अजितेंद्रियचेतसा ॥ प्राप्तं वै यत्फलं तस्य प्रसादं कर्त्तुमर्हसि ॥ ९ ॥ ॥ शक्र उवाच ॥ ॥ नर्मदातटमाश्रित्य द्वादशाब्दं जितेंद्रियः ॥ आराधय शिवं शांतं पुनः प्राप्स्यसि सद्गतिम् ॥ १० ॥ सत्यशौचरतानां च धर्मिष्ठानां जितात्म नाम् ॥ लोकोऽयं पापिनां नैव इति शास्त्रस्य निश्चयः ॥११॥ एवमुक्ते महाराज सहस्राक्षेण धीमता ॥ गंधर्वतनयो धीमान्प्रणम्यागात्तु भूतलम् ॥ ॥ १२ ॥ रेवाया विमले तोये ब्रह्मावर्त्तसमीपतः ॥ स्नात्वा जप्त्वा विधानेन अर्चयित्वा च शंकरम् ॥ १३ ॥ वाय्वंबुपिण्याकफलैश्च पुष्पैः पर्णैश्च मूलाशनयावकेन ॥ ततोप पंचाग्नितपोभिरुग्रैस्ततश्च तोषं समगात्स देवः ॥ १४ ॥ पिनाकपाणिं वरदं त्रिशूलिनमुमापतिं ह्यंधकना शनं च ॥ चंद्रार्धमौलिं गजकृत्तिवाससं दृष्ट्वा पपाताग्रतं समीक्ष्य ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व भद्रं ते वरदोऽहं तवानघ ॥ यमिच्छसि ददाम्यद्य नात्र कार्या विचारणा ॥ १६ ॥ ॥ पत्रेश्वर उवाच ॥ ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ अत्र त्वं सततं तीर्थे मम नाम्ना भव प्रभो ॥ १७ ॥ एतच्छ्रुत्वा महादेवो हर्षगद्गदया गिरा ॥ तथेत्युक्त्वा ययौ हृष्ट उमया सह शंकरः ॥ ॥ १८ ॥ सोऽपि तत्तीर्थमाप्लुत्य गते देवे दिवं प्रति ॥ स्नात्वा जाप्यविधानेन तर्पयित्वा पितॄन्पुनः ॥ १९ ॥ स्थापयामास देवेशं तस्मिंस्तीर्थे विधा नतः ॥ पत्रेश्वरं तु विख्यातं त्रिषु लोकेषु भारत ॥ २० ॥ इंद्रलोकं गतः शापान्मुक्तः सोऽपि नरेश्वर ॥ हृष्टः प्रमुदितो रम्यं जयशब्दादिमंगलैः ॥ ॥ २१ ॥ एष ते कथितः प्रश्नः प्रश्नो यो वै युधिष्ठिर ॥ तत्र स्नानेन चैकेन सर्वपापैः प्रमुच्यते ॥ २२ ॥ यस्त्वर्चयेन्महादेवं तस्मिंस्तीर्थे युधिष्ठिर ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रुत्वाऽभ्यर्च्य पितॄन्देवान्सोऽश्वमेधफलं लभेत् ॥ २३ ॥ मृतो वर्षशतं साग्रं क्रीडित्वा च शिवे पुरे ॥ राजा वा राजतुल्यो वा पश्चान्मर्त्येषु जायते ॥ ॥ २४ ॥ वेदवेदांगतत्त्वज्ञो जीवेच्च शरदः शतम् ॥ व्याधिशोकविनिर्मुक्तः पुनः स्मरति तत्फलम् ॥ २५ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पत्रेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र अग्नितीर्थमनुत्तमम् ॥ यत्र संनिहितो ह्यग्निर्गतः कामेन मोहितः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं देवो जगद्धाता कामेन कलुषीकृतः ॥ कथं च नित्यदा वास एकस्थानेषु जायते ॥ २ ॥ एतत्त्वाश्चर्यमतुलं सर्वलोकेष्वनुत्तमम् ॥ कथयस्व महाभाग परं कौतूहलं मम ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाराज पृष्टः प्रश्नस्त्वयाऽनघ ॥ कथयामि यथापूर्वं श्रुतमेतन्महेश्वरात् ॥ ॥ ४ ॥ आसीत्कृतयुगे राजा नाम्ना दुर्योधनो महान् ॥ हस्त्यश्वरथसंपूर्णो मेदिनीपरिपालकः ॥५॥ रूपयौवनसंपन्नं दृष्ट्वा तं पृथिवीपतिम् ॥ दिव्यो पभोगसंपन्ना प्रार्थयामास नर्मदा ॥ ६ ॥ स तु तां चक्रमे कन्यां त्यक्त्वाऽन्यं प्रमदाजनम् ॥ मुदा परमया युक्तो माहिष्मत्याः पतिर्नृप ॥ ७ ॥ रमते स तया सार्द्धं काले वै नृपसत्तम ॥ नर्मदा जनयामास कन्यां पद्मपलेक्षणाम् ॥ ८ ॥ अंगप्रत्यंगसंपन्ना यस्माल्लोकेषु विश्रुता ॥ तस्यां पिता च माता च चक्रतुः प्रेमबंधनम् ॥ ९ ॥ कालेनाऽतिसुदीर्घेण यौवनस्था वरांगना ॥ प्रार्थ्यमानाऽपि राजन्वै नात्मानं दातुमिच्छति ॥ १० ॥ ततोऽन्यदिवसे वह्निर्द्विजरूपो महातपाः ॥ राजानं प्रार्थयामास रहो गत्वा शनैः शनैः ॥ ११ ॥ भोभो रघुकुलश्रेष्ठ द्विजोहं मंदसंततिः ॥ दरिद्रो ह्यसहायश्च भार्यार्थे वरयामि ताम् ॥ १२ ॥ कन्या सुदर्शना नाम रूपेणाप्रतिमा भुवि ॥ तां ददस्व महाभाग वर्द्धते तव मंदिरे ॥ १३ ॥ ब्रह्मचर्येण निर्विण्ण एकाकी कामपीडितः ॥ याचमानस्य मे तात प्रसादं कर्तुमर्हसि ॥ १४ ॥ ॥ राजोवाच ॥ ॥ नाहं द्रव्यविहीनस्य असवर्णस्य कर्हिचित् ॥ दास्यामि त्वां सुतां शुभ्रां गम्यतां द्विजपुंगव ॥१५॥ एवमुक्तस्तदा वह्निः परां पीडामुपागतः ॥ न किंचिदुक्त्वा राजानं तत्रैवांतरधीयत ॥ ॥ 16 ॥ गते चादर्शनं विप्रे राजा मंत्रिपुरोहितैः ॥ मंत्रयित्वाथ कालेतु तुष्टो मखमुखे स्थितः ॥ १७ ॥ यजतश्च मखे भक्त्या ब्राह्मणैः सह भागत ॥ ततश्चादर्शनं वह्निः सर्वेषां पश्यतामगात् ॥ १८ ॥ विप्रा दुर्मनसो भूत्वा गता राज्ञो हि मंदिरम् ॥ वह्निनाशं विमनसो राजानमिदमब्रुवन् ॥ ॥ १९ ॥ ब्राह्मणा ऊचुः ॥ दुर्योधन महाराज श्रूयतां महदद्भुतम् ॥ न श्रुतं न च दृष्टं वा कौतुकं नृपपुंगव ॥२०॥ अग्निकार्यप्रवृत्तानां सर्वेषां विधिवन्नृप ॥ केनापि हेतुना वह्निर्दृश्यते न ज्वलत्युत ॥ २१ ॥ तच्छ्रुत्वा विप्रियं घोरं राजा विप्रमुखाच्च्युतम् ॥ आसनात्पतितो भूमौ छिन्नमूल इव द्रुमः ॥ २२ ॥ आश्वस्य च मुहूर्त्तेन उन्मत्त इव संस्तदा ॥ निरीक्ष्य च दिशः सर्वा इदं वचनमब्रवीत् ॥ २३ ॥ किमेतदाश्चर्यपरमिति भोभो द्विजोत्तमाः ॥ कथ्यतां कारणं सर्वं शास्त्रदृष्ट्या विभाव्य च ॥ २४ ॥ मम वा दुष्कृतं किंचिदुताहो भवतामिह ॥ येन नष्टोग्निशालायां हुतभुक्केन हेतुना ॥ २५ ॥ मंत्रच्छिद्रमथान्यद्वा नैव किंचिददक्षिणम् ॥ क्रियाहीनं कृतं वाथ केन वह्निश्च दृश्यते ॥ २६ ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः ॥ दातारं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥ २७ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ न मंत्रहीना हि वयं न च राजन्व्रतैस्तथा ॥ द्रव्येण च न हीनस्त्वमन्यत्पापं विचिंत्यताम् ॥ २८ ॥ ॥ राजोवाच ॥ ॥ तथापि यूयं सहिता उपायं चिंतयंत्विति ॥ येन श्रेयो भवेन्नित्यमिह लोके परत्र च ॥ २९ ॥ एवमुक्तास्ततः सर्वे ब्राह्मणाः कृतनिश्चयाः ॥ निराहाराः स्थिताः सर्वे यत्र नष्टो हुताशनः ॥ ३० ॥ ततः स्वप्ने महातेजा हुतभुग्ब्राह्मणांस्तदा ॥ उवाच श्रूयतां सर्व्वेमम नाशस्य कारणम् ॥ ३१ ॥ प्रार्थितोऽयं मया राजा सुतां दातुं न चेच्छति ॥ तेन नष्टोऽग्निशरणादहं भो द्विजसत्तमाः ॥ ३२ ॥ यदि मे स्वसुतां राजा ददाति परमार्चिताम् ॥ तदास्य ज्वलमानोऽहं गृहेतिष्ठामि नान्यथा ॥ ३३ ॥ तच्छ्रुत्वा वचनं विप्रा वैश्वानरमुखोद्गतम् ॥ विस्मयोत्फुल्लनयना राजानमिदमब्रुवन् ॥ ३४ ॥ भवतो मतमाज्ञाय सर्वे गत्वाग्निमन्दिरम् ॥ निराहाराः स्थिता राजौ पश्यामो जातवेदसम् ॥ ३५ ॥ तेनोक्ताः स्वसुतां चेत्तु राजा मे दातुमिच्छति ॥ ततोऽस्य भूयोऽपि गृहे ज्वलेऽहं नान्यथा द्विजाः ॥ ॥ ३६ ॥ एवं ज्ञात्वा महाराज स्वसुतां दातुमर्हसि ॥ ३७ ॥ ॥ राजोवाच ॥ ॥ भवतां तस्य वा कार्यं देवस्य वचनं ह्रदि ॥ समयं कर्तुमिच्छामि कन्यादाने ह्यनुत्तमम् ॥ ३८ ॥ मम संनिहितो नित्यं गृहे तिष्ठतु पावकः ॥ ददामि रुचिरापांगीं नान्यथा करवाणि वै ॥ ३९ ॥ एवं ते ब्राह्मणाः श्रुत्वा तथाग्निं प्राप्य सत्वरम् ॥ कथयित्वा विवाहेन योजयामासुराशु वै ॥ ४० ॥ सुदर्शनाया लाभेन परितुष्टो हुताशनः ॥ ज्वलते सन्निधौ नित्यं माहिष्मत्यां युधिष्ठिर ॥ ४१ ॥ ततः प्रभृति तत्तीर्थमग्नितीर्थं प्रचक्षते ॥ ये तत्र पक्षसन्धौ तु स्नानदानैस्तु भाविताः ॥ ४२ ॥ तर्पयन्ति पितन्देवांस्तेऽश्वमेधफलैर्युताः ॥ सुवर्णं ये प्रयच्छन्ति तस्मिंस्तीर्थे नराधिप ॥ ४३ ॥ पृथ्वीदानफलं तत्र जायते नात्र संशयः ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ ४४ ॥ स मृतो ह्यग्निलोके तु क्रीडते सुरपूजितः ॥ एष ते ह्यग्नितीर्थस्य संभवः कथितो मया ॥ ४५ ॥ सर्वपापहरः पुण्यः श्रुतमात्रो नरोत्तम ॥ धन्यः पापहरो नित्यमित्येवं शंकरोऽब्रवीत् ॥ ४६ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डेऽग्नितीर्थमाहात्म्यवर्णनंनाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तत्रैव तु भवेदन्यदादित्यस्य महात्मनः ॥ कीर्त्तयामि नरश्रेष्ठ यदि ते श्रवणे मतिः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ एतदाश्चर्यमतुलं श्रुत्वा तव मुखोद्गतम् ॥ विस्मयाद्धृष्टरोमाहं जातोस्मि मुनिसत्तम ॥ २ ॥ सहस्रकिरणो देवो हर्ता कर्ता निरंजनः ॥ अवतारेण लोकानामुद्धर्ता नर्मदातटे ॥ ३ ॥ पुरुषाकारो भगवानुताहो तपसः फलात् ॥ कस्य गोत्रे समुत्पन्नः कस्य देवोऽभवद्वशी ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कुलिकान्वयसंभूतो ब्राह्मणो भक्तिमान्शुचिः ॥ ईश्यामीति रविं तत्र तीर्थे यात्राकृतोद्यमः ॥ ५ ॥ योजनानां शतं साग्रं निराहारो गतोदकः ॥ प्रस्थितो देवदेवेन स्वप्नांते वारितः किल ॥ ६ ॥ भोभो मुने महासत्त्व अलं ते व्रतमीदृशम् ॥ सर्वं व्याप्य स्थितं पश्य स्थावरं जंगमं च माम् ॥ ७ ॥ तपाम्यहं ततो वर्षं निगृह्णाम्युत्सृजामि च ॥ न मृतं चैव मृत्युं च यः पश्यति स पश्यति ॥ ८ ॥ वरं वरय भद्रं त्वमात्मनो यस्तवेप्सितम् ॥ ९ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि तुष्टोसि मे देव देयो यदि वरो मम ॥ उत्तरे नर्मदाकूले सदा संनिहितो भव ॥ १० ॥ ये भक्त्या परया देव योजनानां शते स्थिताः ॥ स्मरिष्यंति जितात्मानस्तेषां त्वं वरदो भव ॥ ११ ॥ कुब्जांधबधिरा मूका ये केचिद्विकलेन्द्रियाः ॥ तव पादौ नमस्यंति तेषां त्वं वरदो भव ॥ १२ ॥ शीर्णघ्राणा गतधियो ह्यस्थिचर्मावशेषिताः ॥ तेषां त्वं करुणां देव अचिरेण कुरुष्व ह ॥ १३ ॥ येऽपि त्वां नर्मदातोये स्नात्वा तत्र दिनेदिने ॥ अर्चयंति जगन्नाथ तेषां त्वं वरदो भव ॥ १४ ॥ प्रभाते ये स्तविष्यंति स्तवैर्वैदिकलौकिकैः ॥ अभिप्रेतं वरं देव तेषां त्वं ददद्योच्युत ॥ १५ ॥ तवाग्रे वपनं देव कारयंति नरा भुवि ॥ स्वामिंस्तेषां वरो देय एष मे परमो वरः ॥ १६ ॥ एवमस्त्विति तं चोक्त्वा मुनि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

करुणया पुनः ॥ शतभागेन राजेंद्र स्थित्वा चादर्शनं गतः ॥ १७ ॥ तत्र तीर्थे नरो भक्त्या गत्वा स्नान समाचरेत् ॥ तर्प्पयेत्पितृदेवांश्च सोऽग्नि
ष्टोमफलं लभेत् ॥ १८ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ द्योतयन्वै दिशः सर्वा अग्निलोकं स गच्छति ॥ १९ ॥ यस्तत्तीर्थं समा
साद्य त्यजतीह कलेवरम् ॥ स गतो वारुणं लोकमित्येवं शंकरोऽब्रवीत् ॥२०॥ तत्र तीर्थे तु यः कश्चित्संन्यासेन तनुं त्यजेत् ॥ षष्टिवर्षसहस्राणि
स्वर्गलोके महीयते ॥ २१ ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ उपित्वाऽऽयाति मर्त्ये वै वेदवेदांगविद्भवेत् ॥ २२ ॥ व्याधिशोकविनिर्मुक्तो
धनकोटिपतिर्भवेत् ॥ पुत्रदारसमोपेतो जीवेच्च शरदः शतम् ॥ २३ ॥ प्रातरुत्थाय यस्तत्र स्मरते भास्करं तदा ॥ आजन्मजनितात्पापान्मुच्य
ते नाऽत्र संशयः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रवितीर्थवर्णनंनाम चतुस्त्रिंशोऽ
ध्यायः ॥ ३४ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ जलमध्ये महादेवः केन तिष्ठति हेतुना ॥ उत्तरं दक्षिणं कूलं वर्जयित्वा द्विजोत्तम ॥
॥ १ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतदाख्यानमतुलं पुण्यं श्रुतिसुखावहम् ॥ पुराणे यच्छ्रुतं तात तत्ते वक्ष्याम्यशेषतः ॥ २ ॥ त्रेतायुगे
महाभाग रावणो देवकण्टकः ॥ त्रैलोक्यविजयी रौद्रः सुरासुरभयंकरः ॥ ३ ॥ देवदानवगंधर्वैर्ऋषिभिश्च तपोधनैः ॥ अवध्योऽयं विमानेन याव
त्पर्यटते महीम् ॥ ४ ॥ तावद्विंध्यगिरेर्मध्ये दानवो बलदर्पितः ॥ मयो नामेति विख्यातो गुहावासी तपश्चरन् ॥ ५ ॥ तस्य पार्श्वगतो रक्षो विनया
दवनिंगतः ॥ पूजितो दानसन्मानैरिदं वचनमब्रवीत् ॥ ६ ॥ कस्येयं पद्मपत्राक्षी पूर्णचंद्रनिभानना ॥ किंनामधेया तपति तप उग्रं कथं विभो ॥
॥ ७ ॥ ॥ मय उवाच ॥ ॥ दानवानां पतिः श्रेष्ठो मयोऽहं नाम नामतः ॥ भार्या तेजोवती नाम तस्यास्तु तनया शुभा ॥ ८ ॥ मन्दोदरीति
विख्याता तपते भर्तृकारणात् ॥ आराधयंती भर्त्तारमुमाया दयितं शुभम् ॥ ९ ॥ तच्छ्रुत्वा वचनं तस्य रावणो मदमोहितः ॥ प्रकृतः प्रणतो भूत्वा
मयं वचनमब्रवीत् ॥ १० ॥ पौलस्त्यान्वयसंजातो देवदानवदर्पहा ॥ प्रार्थयामि महाभाग सुतां त्वं दातुमर्हसि ॥ ११ ॥ ज्ञात्वा चैतामहं वृत्तं
मयेनाऽपि महात्मना ॥ रावणाय सुता दत्ता पूजयित्वा विधानतः ॥ १२ ॥ गृहीत्वा तां तदा रक्षोऽभ्यर्च्यमानो निशाचरैः ॥ देवोद्याने विमानेश्च
क्रीडते स तया सह ॥ १३ ॥ केनचित्त्वथ कालेन रावणो लोकरावणः ॥ पुत्रं पुत्रवतां श्रेष्ठो जनयामास भारत ॥ १४ ॥ तेनैव जातमात्रेण
रावो मुक्तो महात्मना ॥ संवर्त्तकस्य मेघस्य तेन लोका जडीकृताः ॥ १५ ॥ श्रुत्वा तन्नर्दितं घोरं ब्रह्मा लोकपितामहः ॥ नाम चक्रे तदा तस्य
मेघनादो भविष्यति ॥ १६ ॥ एवंनामा कृतः सोऽपि परमं व्रतमास्थितः ॥ तोषयामास देवेशमुमया सह शंकरम् ॥ १७ ॥ व्रतैर्नियमदानैश्च
होमजाप्यविधानतः ॥ कृच्छ्रचांद्रायणैर्नित्यं कृशं कुर्वन्कलेवरम् ॥ १८ ॥ एवमन्यद्दिने तात कैलासं धरणीधरम् ॥ गत्वा लिंगद्वयं गृह्य प्रस्थितो
दक्षिणामुखः ॥ १९ ॥ नर्मदातटमाश्रित्य स्नातुकामो महाबलः ॥ निक्षिप्य पूजयन्देवं कृतजाप्यो नरेश्वर ॥ २० ॥ तत्रायतनमात्रेण स्नातो
हुतहुताशनः ॥ कृतकृत्यमिवात्मानं मानयित्वा निशाचरः ॥ २३ ॥ गंतुकामः परं मार्गं लंकायां नृपसत्तम ॥ एकमुद्धरतो लिंगं प्रणतः सव्य
पाणिना ॥ २२ ॥ द्वितीयं तु द्वितीयेन भक्त्या पौलस्त्यनंदनः ॥ तावदेव महालिंगं पतितं नर्मदांऽभसि ॥ २३ ॥ याहियाहीति चेत्युक्त्वा जलमध्ये
प्रतिष्ठितः ॥ नमित्वा रावणिस्तस्य देवस्य परमेष्ठिनः ॥ २४ ॥ जगामाकाशमाविश्य पूज्यमानो निशाचरैः ॥ तदाप्रभृति तत्तीर्थं मेघनादेति
विश्रुतम् ॥२५॥ पूर्वं तु गर्जनं नाम सर्वपापक्षयंकरम् ॥ तस्मिंस्तीर्थे तु राजेंद्र यस्तु स्नानं समाचरेत् ॥ २६ ॥ अहोरात्रोपितो भूत्वा अश्वमेधफलं
लभेत् ॥ पिंडदानं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ २७ ॥ यत्फलं सत्रयज्ञेन तद्भवेन्नाऽत्र संशयः ॥ तेन द्वादशवर्षाणि पितरः संप्रतर्पिताः ॥
॥ २८ ॥ यस्तु भोजयते विप्रं षड्रसाऽन्नेन भारत ॥ अक्षयं पुण्यमाप्नोति तत्र तीर्थे नरोत्तम ॥ २९ ॥ प्राणत्यागं तु यः कुर्याद्भावितो भावि
तात्मना ॥ स वसेच्छांकरे लोके यावदाभूतसंप्लवम् ॥ ३० ॥ एषा ते नरशार्दूल गर्जनोत्पत्तिरुत्तमा ॥ कथिता स्नेहवंधेन सर्वपापक्षयंकरी ॥
॥३१॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे मेघनादतीर्थमाहात्म्यवर्णनंनाम पंचत्रिंशोऽध्यायः ॥
॥ ३५ ॥ ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र दारुतीर्थमनुत्तमम् ॥ दारुको यत्र संसिद्ध इंद्रस्य दयितः पुरा ॥ १ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ दारुकेण कथं तात तपश्चीर्णं पुराऽनघ ॥ विधानं श्रोतुमिच्छामि त्वत्सकाशाद्विजोत्तम ॥ २ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ हंत ते कथयिष्यामि विचित्रं यत्पुरातनम् ॥ वृत्तं स्वर्गसभामध्ये ऋषीणां भावितात्मनाम्॥३॥सूतो वज्रधरस्येष्टो मातलिर्नाम नामतः ॥
स पुत्रं शतवान्पूर्वं कस्मिंश्चित्कारणांतरे ॥ ४ ॥ शापाहतो वेपमान इन्द्रस्य चरणौ शुभौ ॥ प्रपीड्य मूर्ध्ना देवेशं विज्ञापयति भारत ॥५॥ तमुवाचा
भिशप्तं चाप्यनाथं च सुरेश्वरः ॥ कर्मणा केन शापस्य घोरस्यांऽतो भविष्यति ॥६॥ नर्मदातटमाश्रित्य तोषयन्वै महेश्वरम् ॥ तिष्ठ यावद्युगस्यांतं
पुनर्जन्म ह्यवाप्स्यसि॥७॥ पुनर्भूत्वा तु पूतस्त्वं दारुकोनाम विश्रुतः ॥ संसेव्य परमं देवं शंखचक्रगदाधरम् ॥८॥ मानुषं भावमापन्नस्ततः सिद्धिमवा
प्स्यसि ॥ एवमुक्तस्तु देवेन सहस्राक्षेण धीमता ॥ ९ ॥ प्रणम्य शिरसा भूमिमागतोसौ ह्यचेतनः ॥ नर्मदातटमाश्रित्य कर्षयन्त्रिजविग्रहम् ॥ १० ॥
व्रतोपवाससंखिन्नो जपहोमरतः सदा ॥ महादेवं महात्मानं वरदं शूलपाणिनम् ॥ ११ ॥ भक्त्या तु परया राजन्यावदाभूतसंप्लवम् ॥ अंशावतरणा
द्विष्णोः सूतो भूत्वा महामतिः ॥ १२ ॥ तोषयन्वै जगन्नाथं ततो यातो हि सद्गतिम् ॥ १३ ॥ एष तत्संभवस्तात दारुतीर्थस्य सुव्रत ॥ कथितोऽयं
मया पूर्वं यथा मे शंकरोऽब्रवीत् ॥ १४ ॥ ततो युधिष्ठिरः श्रुत्वा विस्मयं परमं गतः ॥ भ्रातॄन्त्रिलोकयामास हृष्टरोमा मुहुर्मुहुः ॥ १५ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिपूर्वं नरेश्वर ॥ उपास्य संध्यां देवेशमर्चयेद्यश्च शंकरम् ॥ १६ ॥ वेदाऽभ्यासं
तु तत्रैव यः करोति समाहितः ॥ सोऽश्वमेधफलं राजँल्लभते नाऽत्र संशयः ॥ १७ ॥ तस्मिंस्तीर्थे तु यो भक्त्या भोजयेद्ब्राह्मणाञ्शुचिः ॥ स तु
विप्रसहस्रस्य लभते फलमुत्तमम् ॥ १८ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ यत्कृतं शुद्धभावेन तत्सर्वं सफलं भवेत् ॥१९॥ इति
श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दारुकतीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ ७ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र देवतीर्थमनुत्तमम् ॥ येन देवास्त्रयस्त्रिंशत्स्नात्वा सिद्धिं परां गताः ॥ १ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ कथं तात सुराः सर्व्वे दानवैर्बलवत्तरैः ॥ निर्जितास्तत्र तीर्थे च स्नात्वा सिद्धिं परां गताः ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा
दैत्यगणैरुग्रैर्युद्धेऽतिबलवत्तरैः ॥ इन्द्रो देवगणैः सार्द्धं स्वराज्याच्यावितो नृप ॥ ३ ॥ हस्त्यश्वरथयानौघैर्मर्दयित्वा वरूथिनीम् ॥ विध्वस्ता भेजिरे
मार्गं प्रहारैर्जर्जरीकृताः ॥ ४ ॥ जंभशुंभनिशुंभैश्च कूष्मांडकुदकादिभिः ॥ वेपमानार्दिताः सर्व्वे ब्रह्माणमुपतस्थिरे ॥ ५ ॥ प्रणम्य शिरसा देवं
ब्रह्माणं परमेष्ठिनम् ॥ तदा विज्ञापयामासुर्देवा वह्निपुरोगमाः॥६॥पश्यपश्य महाभाग दानवैः शकलीकृताः॥ वियोजिताः पुत्रदारैस्त्वामेव शरणं गताः
॥ ७ ॥ परित्रायस्व देवेश सर्वलोकपितामह ॥ नाऽन्या गतिः सुरेशान त्वां मुक्त्वा परमेश्वर ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ दानवानां विघातार्थं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नर्मदातटमास्थिताः ॥ तपः कुरुध्वं स्वस्थाः स्थ तपो हि परमं बलम् ॥ ९ ॥ नाऽन्योपायो न वै मंत्रो विद्यते न च मे क्रिया ॥ विना रेवाजलं पुण्यं सर्वपापक्षयंकरम् ॥ १० ॥ दारिद्र्यव्याधिमरणबंधनव्यसनानि च ॥ एतानि चैव पापस्य फलानीति मतिर्मम ॥ ११ ॥ एवं ज्ञात्वा तत श्चैव तपः कुरुत दुष्करम् ॥ तथा चैव सुराः सर्वे देवा ह्यग्निपुरोगमाः ॥ १२ ॥ तच्छ्रुत्वा वचनं तथ्यं ब्रह्मणः परमेष्ठिनः ॥ नर्मदामागताः सर्वे देवा ह्यग्निपुरोगमाः ॥ १३ ॥ चेरुर्वै तत्र विपुलं तपः सिद्धिमवाप्नुवन् ॥ तदाप्रभृति तत्तीर्थं देवतीर्थमनुत्तमम् ॥ १४ ॥ गीयते त्रिषु लोकेषु सर्वपाप क्षयंकरम् ॥ तत्र गत्वा च यो मर्त्यो विधिना संयतेंद्रियः ॥१५॥ स्नानं समाचरेद्भक्त्या स लभेन्मौक्तिकं फलम् ॥ यत्तु भोजयते विप्रां स्तस्मिंस्तीर्थे नराधिप ॥ १६ ॥ स लभेन्मुख्यविप्राणां फलं साहस्रिकं नृप ॥ तत्र देवशिला रम्या महापुण्यविवर्द्धिनी ॥ १७ ॥ संन्यासेन मृता ये तु तेषां स्याद्दक्षया गतिः ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ १८ ॥ रुद्रलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ एवं स्नानं जपो होमः स्वाध्यायो देवतार्चनम् ॥१९॥ सुकृतं दुष्कृतं वाऽपि तत्र तीर्थेऽक्षयं भवेत् ॥ एष ते विधिरुद्दिष्ट उत्पत्तिश्चैव भारत ॥२०॥ देवतीर्थस्य निखिला यथा वै शंक राच्छ्रुता ॥ पठंति ये पापहरं सर्वदुःखविमोचनम् ॥ २१ ॥ देवतीर्थस्य चरितं देवलोकं व्रजन्ति ते ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाह स्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे देवतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र गुहाऽऽवासीति चोत्तमम् ॥ यत्र सिद्धो महादेवो गुहावासी समार्बुदम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ केन कार्येण भो तात महादेवो जगद्गुरुः ॥ गुहायामनयत्कालं सुदीर्घं द्विजसत्तम ॥ २ ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ श्रोतुमिच्छाम्यहं सर्वं परं कौतूहलं हि मे ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ साधु प्रश्नो महाराज पृष्टो यो वै त्वयोत्तमः ॥ पुराणे विस्तरो ह्यस्य न शक्यो हि मयाऽधुना ॥ ४ ॥ कथितुं वृद्धभाव त्वादतीतो बहुकालिकः ॥ संक्षेपात्तेन ते तात कथयामि निबोध मे ॥ ५ ॥ पुरा कृतयुगे राजन्नासीद्दारुवनं महत् ॥ नानाद्रुमलताकीर्णं नाना वल्ल्युपशोभितम् ॥ ६ ॥ सिंहव्याघ्रवराहैश्च गजैः खड्गैर्निषेवितम् ॥ बहुपक्षियुतं दिव्यं यथा चैत्ररथं वनम् ॥ ७ ॥ तत्र केचिन्महा प्राज्ञा वसंति संशितव्रताः ॥ वसंति परया भक्त्या चतुराश्रमभाविताः ॥ ८ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ स्वधर्मनिरताः सर्वे वांछंतः परमं पदम् ॥ ९ ॥ तावद्वसंतसमये कस्मिंश्चित्कारणांतरे ॥ विमानस्थो महादेवो गच्छन्वै द्युमया सह ॥ १० ॥ ददर्श तोय आवासमृ क्सामयजुर्नादितम् ॥ अलक्ष्यांगतनिर्गम्यं सर्वपापक्षयंकरम् ॥ ११ ॥ तं दृष्ट्वा मुदिता देवी हर्षगद्गदया गिरा ॥ पप्रच्छ देवदेवेशं शशांककृतभूष णम् ॥ १२ ॥ ॥ देव्युवाच ॥ ॥ कस्यायमाश्रमो देव वेदध्वनिनिनादितः ॥ यं दृष्ट्वा क्षुत्पिपासाद्यैः श्रमैश्च परिहीयते ॥ १३ ॥ ॥ महेश्वर उवाच ॥ ॥ किं त्वया न श्रुतं देवि महादारुवनं महत् ॥ बहुविप्रजनो यत्र गृहधर्मेण वर्त्तते ॥ १४ ॥ अत्र यः स्त्रीजनः कश्चिद्भर्तृशुश्रूषणे रतः ॥ नान्यो देवो न वै धर्मो ज्ञायते शैलनंदिनि ॥ १५ ॥ एतच्छ्रुत्वा परं वाक्यं देवदेवेन भाषितम् ॥ कौतूहलसमाविष्टा शंकरं पुनरब्रवीत् ॥ ॥ १६ ॥ यत्त्वयोक्तं महादेव पतिधर्मरताःस्त्रियः ॥ तासां त्वं मदनो भूत्वा चारित्रं क्षोभय प्रभो ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वयोक्तं च वचनं न हि मे रोचते प्रिये ॥ ब्राह्मणा हि महद्भूतं न चैषां विप्रियं चरेत् ॥ १८ ॥ मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः ॥ चक्रात्क्रूरतरो मन्युस्त स्माद्विप्रं न कोपयेत् ॥ १९ ॥ न ते देवा न ते लोका न ते नागा न चासुराः ॥ दृश्यन्ते त्रिषु लोकेषु ये तैर्दृष्टैर्न नाशिताः ॥ २० ॥ तेषां मोक्षस्तथा स्वर्गो भूमिर्मर्त्ये फलानि च ॥ येषां तुष्टा महाभागा ब्राह्मणाः क्षितिदेवताः ॥ २१ ॥ एवं ज्ञात्वा महाभागे असद्ग्राहं परित्यज ॥ तत्र लोके विरुद्धं वै कुप्यन्ते येन वै द्विजाः ॥ २२ ॥ ॥ देव्युवाच ॥ ॥ नाहं ते दयिता देव नाऽहं ते वशवर्त्तिनी ॥ अकृत्वाऽध्वश्च वै तासां मानं सुरसुपूजितम् ॥ २३ ॥ लोकालोके महादेव अशक्यं नास्ति ते प्रभो ॥ क्रियतां मम चैवैकमेतत्कार्यं सुरोत्तम ॥ २४ ॥ एवमुक्तो महादेवो देव्या वाक्यहिते रतः ॥ कृत्वा कापालिकं रूपं ययौ दारुवनं प्रति ॥ २५ ॥ महाहिजटाजूटं नियम्य शशिभूषणम् ॥ कण्ठत्राणं परं कृत्वा धार यन्कर्णकुण्डले ॥ २६ ॥ व्याघ्रचर्मपरीधानो मेखलाहारभूषितः ॥ नूपुरध्वनिनिर्घोषैः कम्पयन्वै वसुन्धराम् ॥ २७ ॥ महानूर्द्धजटामाली कृत्तिभ स्मानुलेपनः ॥ कृत्वा हस्ते कपालं तु ब्रह्मणश्च महात्मनः ॥ २८ ॥ महाडमरुघोषेण कम्पयन्वै वसुन्धराम् ॥ प्रभातसमये प्राप्तो महादारुवनं प्रति ॥ २९ ॥ तावत्पुण्यजनः सर्वपुष्पपत्रफलार्थिकः ॥ निर्गतो बहुभिः सार्द्धं पवमानः समन्ततः ॥ ३० ॥ तद्दृष्ट्वा महदाश्चर्यं रूपं देवस्य भारत ॥ युवतीनां मनस्तासां कामेन कलुषीकृतम् ॥ ३१ ॥ शोभनं पुरुषं दृष्ट्वा सर्वा अपि वरांगनाः ॥ क्लेदभावं ततो जग्मुर्मुदा दारुवनस्त्रियः ॥ ॥ ३२ ॥ विकारा बहवस्तासां देवं दृष्ट्वा महाद्भुतम् ॥ संजाता विप्रपत्नीनां तदा तासु नरोत्तम ॥ ३३ ॥ परिधानं न जानंति काश्चिद्दृष्ट्वा वरां गनाः ॥ उत्तरीयं तथा चान्या महामोहसमन्विताः ॥ ३४ ॥ केशभारपरिभ्रष्टा काचिदेवासनोत्थिता ॥ दातुकामा तदा भेदं चेष्टितुं नैव चाश कत् ॥ ३५ ॥ काचिद्दृष्ट्वा महादेवं रूपयौवनगर्विता ॥ उत्संगे संस्थितं बालं विस्मृता पायितुं स्तनम् ॥ ३६ ॥ कामबाणहता चाऽन्या बाहुभ्यां पीडय सुस्तनौ ॥ निःश्वसन्ती तदा चोष्णं न किंचित्प्रतिजल्पति ॥३७॥ एवं संक्षोभ्य तं सर्वं स्त्रीजनं परमेश्वरः ॥ जगाम तत्र वै तासां क्षोभं कृत्वा महाद्भुतम् ॥ ३८ ॥ तावत्ते ब्राह्मणाः सर्वे भ्रमित्वा काननं महत् ॥ आगताः स्वगृहे दारान्ददृशुश्च हतौजसः ॥ ३९ ॥ यासां पूर्वतरा भक्तिः पाति व्रत्ये पतीन्प्रति ॥ चलितास्ता विदित्वाशु निर्जग्मुर्द्विजसत्तमाः ॥ ४० ॥ संविदं परमां कृत्वा ज्ञात्वा देवं महेश्वरम् ॥ क्षोभयित्वा मनस्तासां ततश्चादर्शनं गतम् ॥ ४१ ॥ क्रोधाविष्टो द्विजः कश्चिद्दण्डमुद्यम्य धावति ॥ कल्मापयष्टिमन्ये च तथान्ये दर्भमुष्टिकाम् ॥ ४२ ॥ इतश्चेतश्च ते सर्वे भ्रमित्वा काननं नृप ॥ एकीभूत्वा महात्मानो व्याजह्रुश्च रुषा गिरम् ॥ ४३ ॥ यदिदं च हुतं किंचिद्धवस्तोषिता यदि ॥ तेन सत्येन देवस्य लिंगं पततु चोत्तमम् ॥४४॥ आश्रमादाश्रमं सर्वे न त्यजामो विधिक्रमात् ॥ तेन सत्येन देवस्य लिंगं पततु भूतले ॥ ४५ ॥ एवं सत्यप्रभावेन त्रिरुक्तेन द्विजन्मनाम् ॥ शिवस्य पश्यतो लिंगं पतितं धरणीतले ॥ ४६ ॥ हाहाकारो महानासील्लोकालोकेऽपि भारत ॥ देवस्य पतिते लिंगे जगतश्च महाक्षये ॥ ४७ ॥ पतमानस्य लिंगस्य शब्दोभूच्च सुदारुणः ॥ उल्कापाता दिशां हाहा भूमिकम्पाश्च दारुणाः ॥ ४८ ॥ पतंति पर्वताग्राणि शोषं यांति च सागराः॥ देवस्य पतिते लिंगे देवा विमनसोऽभवन् ॥ ४९ ॥ समेत्य सहिताः सर्वे ब्रह्माणं परमेष्ठिनम् ॥ कृतांजलिपुटाः सर्वे स्तु वन्ति विविधैः स्तवैः ॥ ५० ॥ ततस्तुष्टो जगन्नाथश्चतुर्वदनपंकजः ॥ आर्त्तान्प्राह सुरान्सर्वान्मा विषादं गमिष्यथ ॥ ५१ ॥ ब्रह्मशापाभिभूतोऽसौ देवदेवस्त्रिलोचनः ॥ तुष्टैस्तैस्तपसा युक्तैः पुनर्मोक्षं गमिष्यति ॥ ५२ ॥ एतच्छ्रुत्वा ययुर्देवा यथागतमरिंदम ॥ भावयित्वा ततः सर्वे मुनयश्चैव भा रत ॥ ५३ ॥ विश्वामित्रवसिष्ठाद्या जाबालिरथ कश्यपः ॥ समेत्य सहिताः सर्वे तमूचुस्त्रिपुरांतकम् ॥५४॥ ब्रह्मतेजो हि बलवद्विज्ञानं हि सुरेश्वर ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्षांति युक्तस्तपस्तप्त्वा भविष्यसि गतक्लमः ॥ ५५ ॥ यतः क्षोभाद्पीणां च तदेवं लिंगमुत्तमम् ॥ पतितं ते महादेव न तत्पूज्यं भविष्यति ॥ ५६ ॥ न तच्छ्रेयोऽग्निहोत्रेण नाग्निष्टोमेन लभ्यते ॥ प्राप्नुवंति च यच्छ्रेयो मानवा लिंगपूजने ॥ ५७ ॥ देवदानवयक्षाणां गंधर्वोरगरक्षसाम् ॥ वचनेन तु विप्राणामेतत्पूज्यं भविष्यति ॥ ५८ ॥ ब्रह्मविष्णिंद्रचंद्राणामेतत्पूज्यं भविष्यति ॥ यत्फलं तव लिंगस्य इह लोके परत्र च ॥ ५९ ॥ एवमुक्तो जगन्नाथः प्रणिपत्य द्विजोत्तमान् ॥ मुदा परेमया युक्तः कृतांजलिरभाषत ॥ ६० ॥ ब्राह्मणा जंगमं तीर्थं निर्जलं सार्वकामिकम् ॥ येषां वाक्यो दकेनैव शुद्धयंति मलिनो जनाः ॥ ६१ ॥ न तत्क्षेत्रं न तत्तीर्थमूपरं पुष्करणि च ॥ ब्राह्मणे मन्युमुत्पाद्य यत्र गत्वा स शुद्धयति ॥ ६२ ॥ न तच्छास्त्रं यत्र विप्रप्रणीतं न तद्दानं यत्र विप्रप्रदेयम् ॥ न तत्सौख्यं यत्रविप्रप्रसादान्न तद्दुःखं यत्र विप्रप्रकोपात् ॥ ६३ ॥ पृथिव्यां यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ एकस्य विप्रवाक्यस्य कलां नार्हंति षोडशीम् ॥ ६४ ॥ अभिनंद्य द्विजान्सर्वाननुज्ञातो महर्षिभिः ॥ ततोऽगम त्तदा देवो नर्मदातटमुत्तमम् ॥ ६५ ॥ परमं व्रतमास्थाय गुहावासी स्मादुदम् ॥ तपश्चचार भगवान्नपन्नानरतः सदा ॥ ६६ ॥ समाप्ते नियमे तात स्थापयित्वा महेश्वरम् ॥ वंद्यमानः सुरैः सार्द्धं कैलासमगमत्प्रभुः ॥ ६७ ॥ नर्मदायास्तटे तेन स्थापितः परमेश्वरः ॥ तेनैव कारणेनासौ नर्मदेश्वर उच्यते ॥ ६८ ॥ योऽर्चयेन्नर्मदेशानं यतिर्वै संजितेंद्रियः ॥ स्नात्वा चैव महादेवमश्वमेधफलं लभेत् ॥ ६९ ॥ ददाति यः पितृभ्यस्तु तिलपुष्पकुशोदकम् ॥ त्रिःसप्तपूर्वजास्तस्य स्वर्गे मोदंति पांडव ॥ ७० ॥ यस्तु भोजयते विप्रांस्तस्मिंस्तीर्थे नराधिपः ॥ पायसं घृतमिश्रं तु स लभेत्कोटिजं फलम् ॥ ७१ ॥ सुवर्णं रजतं वापि ब्राह्मणेभ्यो युधिष्ठिर ॥ ददाति तोयमध्यस्थः सोऽग्निष्टोमफलं लभेत् ॥ ७२ ॥ अष्टम्यां वा चतुर्दश्यां निराहारो वसेत्तु यः ॥ नर्मदेश्वरमासाद्य प्राप्नुयाज्जन्मानः फलम् ॥ ७३ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ तस्य व्याधिभयं न स्यात्सप्तजन्मसु भारत ॥ ७४ ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोके भविष्यति ॥ ॥ ७५ ॥ एष ते विधिरुद्दिष्टस्तस्योत्पत्तिर्नरोत्तम ॥ पुराणे विहिता तात संज्ञा तस्य तु विस्तरात् ॥ ७६ ॥ एतं कीर्त्तयते यस्तु नर्मदेश्वरसंभवम् ॥ भक्त्या शृणोति च नरः सोऽपि स्नानफलं लभेत् ॥ ७७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवा खण्डे नर्मदामाहात्म्ये नर्मदेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेंद्र कपिलातीर्थमुत्तमम् ॥ स्नानमात्रान्नरो भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेषु कथितं द्विज सत्तम ॥ नर्मदेश्वरमाहात्म्यं कापिलं कथयस्व मे ॥ २ ॥ यस्मिन्कालेऽथ संबन्धे उत्पन्नं तीर्थमुत्तमम् ॥ सर्वपापहरं पुण्यं तीर्थं जातं कथं प्रभो ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु वक्ष्येद्य ते राजन्कपिलातीर्थमुत्तमम् ॥ येन ते विस्मयः सर्वः श्रुत्वा गच्छति भारत ॥ ४ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ उत्पादयित्वा सकलं भूतग्रामं चतुर्विधम् ॥ ५ ॥ जपहोमपरो भक्त्या क्षणं ध्यात्वा च तिष्ठति ॥ ज्वल मानात्तु कपिला तावत्कुण्डात्समुत्थिता ॥६॥ अग्निज्वालोज्वलैः शृंगैस्त्रिनेत्रा सुपयस्विनी ॥ अग्निपूर्णा ह्यग्निमुखा अग्निघ्राणाग्निलोचना ॥७॥ अग्निखुरा ह्यग्निपृष्ठा अग्निसर्वांगसंस्थितिः ॥ सर्वलक्षणसंपूर्णा वंटाललितनिःस्वना ॥८॥ दृष्ट्वा तु तां महाभागां कपिलां कुण्डमध्यगाम् ॥ ब्रह्मा लोकगुरुस्तात प्रणम्येदमुवाच ह ॥९॥ नमस्ते कपिले पुण्ये सर्वलोकनमस्कृते ॥ मंगल्ये मंगले देवि त्रिषु लोकेष्वनूपमे ॥१०॥ त्वं लक्ष्मीस्त्वं स्मृति र्मेधा त्वं धृतिस्त्वं वरानने ॥ उमादेवीति विख्याता त्वं सती नात्र संशयः ॥११॥ वैष्णवी त्वं महादेवी ब्रह्माणी त्वं वरानने ॥ कुमारी त्वं महाभागे भक्तिः श्रद्धा तथैव च ॥१२॥ कालरात्रिस्तु भूतानां कुमारी परमेश्वरी ॥ त्वं लवस्त्वं त्रुटिश्चैव मुहूर्त्त लक्षमेव च ॥१३॥ संवत्सरस्त्वं मासस्त्वं काल स्त्वं च क्षणस्तथा ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्ये सचराचरे ॥ १४ ॥ एवं स्तुता तु मानेन कपिला परमेष्ठिना ॥ तमुवाच महाभागं प्रहृष्य पद्मसंभवम् ॥ १५ ॥ प्रसन्ना तव वाक्येन देवदेव जगद्गुरो ॥ किं करोमि प्रियं तेऽद्य ब्रूहि सर्वं पितामह ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ॥ जग द्धिताय जनिता मया त्वं परमेश्वरि ॥ स्वर्गान्मर्त्यं ततो याहि लोकानां हितकाम्यया ॥ १७ ॥ सर्वदेवमयी त्वं तु सर्वलोकमयी तथा ॥ विधिना ये प्रदास्यंति तेषां वासस्त्रिविष्टपे ॥ १८ ॥ एवमुक्ता ततो देवी ब्रह्माणं परमेश्वरी ॥ वंद्यमाना सुरैः सिद्धैराजगाम धरातलम् ॥ १९ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदायातेह सा तात ब्राह्मणो वचनाच्छुभा ॥ तदा देवाश्च लोकाश्च कथमंगेषु संस्थिताः ॥ २० ॥ कथं वा संस्थि तागत्य कपिला सा द्विजोत्तम ॥ तीर्थे वा ह्यपरे क्षेत्र एतन्मे कथय द्विज ॥ २१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ सा तदा ब्रह्मणा चोक्ता धात्रा लोकस्य भारत ॥ ब्रह्मलोकाद्गता पुण्यां नर्मदां लोकपावनीम् ॥ २२ ॥ तपः कृत्वा सुविपुलं नर्मदातटमाश्रिता ॥ चचार पृथिवीं सर्वां सशैल वनकाननाम् ॥ २३ ॥ तदाप्रभृति राजेंद्र कपिलातीर्थमुत्तमम् ॥ सर्वपापहरं ख्यातमृषिसंघैर्निषेवितम् ॥ २४ ॥ तत्तीर्थे विधिवत्स्नात्वा कपिलां यः प्रयच्छति ॥ पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ २५ ॥ तां तु पश्यति यो भक्त्या दीयमानां द्विजोत्तमे ॥ तस्य वर्षशतं पापं नश्यते नात्र संशयः ॥ २६ ॥ भूर्भुवः स्वर्महश्चैव जनः सत्यं तपस्तथा ॥ ते तत्पृष्ठं समाश्रित्य स्थिता लोका नृपोत्तम ॥ २७ ॥ मुखे ह्यग्निः स्थितो देवो दंतेषु च भुजंगमाः ॥ धाता विधाता ह्योष्ठौ च जिह्वायां तु सरस्वती ॥ २८ ॥ सहस्रकिरणौ देवौ चन्द्रादित्यौ सुलोचनौ ॥ नासिकामध्यगश्चैव मारुतो नृपसत्तम ॥ २९ ॥ ललाटे तु महादेवो ह्यश्विनौ कर्णसंस्थितौ ॥ नरनारायणौ शृंगे शृंगमध्ये पितामहः ॥ ३० ॥ कंबलोधिगतस्तात पाशधृग्वरुणस्तथा ॥ यमश्च भगवान्देव आश्रित्य चोदरं श्रितः ॥ ३१ ॥ खुरेषु पन्नगाश्चैव पुच्छाग्रे सूर्यरश्मयः ॥ एवंभूतां हि कपिलां सर्वदेवमयीं नृप ॥ ३२ ॥ ये धारयंति च गृहे धन्यास्ते नात्र संशयः ॥ प्रातरुत्थाय यस्तस्याः कुरुते तु प्रदक्षिणाम् ॥ ३३ ॥ प्रदक्षि णा कृता तेन सशैलवनकानना ॥ कपिलापंचगव्येन यः स्नापयति शंकरम् ॥ ३४ ॥ उपवासपरो यस्तु तस्मिंस्तीर्थे नराधिप ॥ स्नात्वा ह्युक्त विधानेन तर्पयेत्पितृदेवताः ॥ ३५ ॥ तस्य ते वंशजाः सर्वे दश पूर्वे दशापरे ॥ तृप्ता रोहंति वै स्वर्गे ध्यायंतोऽस्य मनोरथान् ॥ ३६ ॥ एष ते विधिरुद्दिष्टः संभवो नृपसत्तम ॥ तीर्थस्य च फलं पुण्यं किमन्यत्परिपृच्छसि ॥ ३७ ॥ धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ३८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीनर्मदा माहात्म्ये कपिलातीर्थमाहात्म्यवर्णनंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र करं जेश्वरमुत्तमम् ॥ यत्र सिद्धो महाभागो दैत्यो लोकेषु विश्रुतः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ योऽसौ सिद्धो महाभाग तत्र तीर्थे महातपाः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कस्य पुत्रः कथं सिद्धः कस्मिन्काले वद द्विज ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा कृतयुगे राजन्मानसो ब्रह्मणः सुतः ॥ वेदवेदांगतत्त्वज्ञो मरीचिर्नाम नामतः ॥ ३ ॥ तस्यापि तपसो राशेः कालेन महतानघ ॥ पुत्रोऽथ मानसो जातः साक्षाद्ब्रह्मेव चापरः ॥ ४ ॥ क्षमा दमो दया दानं सत्यं शौचमथार्जवम् ॥ मरीचेश्च गुणा ह्येते संति तस्य च भारत ॥ ५ ॥ एवं गुणगणाकीर्णं कश्यपं द्विजसत्तमम् ॥ ज्ञात्वा प्रजापतिर्दक्षो भार्यार्थे स्वसुतां ददौ ॥ ६ ॥ अदितिर्दितिर्दनुश्चैव तथान्येवं दशापराः ॥ यासां पुत्राश्च संजाताः पौत्राश्च भरतर्षभ ॥ ७ ॥ अदितिर्जनयामास पुत्रानिन्द्र पुरोगमान् ॥ जातास्तस्य महाबाहो कश्यपस्य प्रजापतेः ॥ ८ ॥ यैस्तु लोकत्रयं व्याप्तं स्थावरं जंगमं महत् ॥ तथान्यस्य महाभागो दनोः पुत्रो व्यजायत ॥ ९ ॥ सर्वलक्षणसंपन्नः करंजो नाम नामतः ॥ बाल एव महाभाग चचार स महत्तपः ॥ १० ॥ नर्मदातटमाश्रित्य चातिघोरमनुत्तमम् ॥ दिव्यं वर्षसहस्रं च कृच्छ्रचान्द्रायणं नृप ॥ ११ ॥ शाकमूलफलाहारः स्नानहोमपरायणः ॥ ततस्तुष्टो महादेव उमया सहितः किल ॥ १२ ॥ वरेण च्छन्दयामास त्रिपुरांतकरः प्रभुः ॥ भोः करंज महासत्त्व परितुष्टोऽस्मि तेऽनघ ॥ १३ ॥ वरं वृणीष्व ते दद्मि ह्यमरत्वव्रते मम ॥ १४ ॥ ॥ करंज उवाच ॥ ॥ यदि तुष्टो महादेव यदि देयो वरो मम ॥ तर्हि पुत्राश्च पौत्राश्च संतु मे धर्मवत्सलाः ॥ १५ ॥ तथेत्युक्त्वा महादेव उमया सहितस्तदा ॥ वृषारूढो गणैः सार्द्धं तत्रैवांतरधीयत ॥ १६ ॥ गते चादर्शनं देवे सोऽपि दैत्यो मुदान्वितः ॥ स्वनाम्ना तत्र महादेवं स्थापयित्वा ययौ गृहम् ॥ १७ ॥ तदाप्रभृति तत्तीर्थं सर्वतीर्थेष्वनुत्तमम् ॥ स्नानमात्रान्नरस्तत्र मुच्यते सर्वपातकैः ॥ १८ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ सोऽग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ १९ ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ अनिवर्त्या गतिस्तस्य रुद्रलोकं स गच्छति ॥ २० ॥ अथवाग्निजले प्राणान्यस्त्यं जेद्धर्मनंदन ॥ अक्षुतद्वितयं यस्ते वर्षाणां शिवमंदिरे ॥ २१ ॥ ततश्चैव क्षये जाते जायते विमले कुले ॥ वेदवेदांगतत्त्वज्ञः सर्वशास्त्रविशारदः ॥ २२ ॥ राजा वा राजतुल्यो वा जीवेच्च शरदः शतम् ॥ पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः ॥ २३ ॥ एवं ते सर्वमाख्यातं पृष्टं यद्यत्त्वयाऽनघ ॥ तीर्थस्य तु फलं तस्य स्नानदानेषु भारत ॥ २४ ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चैव तीर्थमाहात्म्यमुत्तमम् ॥ ॥ २५ ॥ यस्तु श्रावयते श्राद्धे पठेत्पितृपरायणः ॥ अक्षयं जायते पुण्यमित्येवं शंकरोऽब्रवीत् ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये करञ्जेश्वरतीर्थमाहात्म्यवर्णनंनाम चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेच्च राजेन्द्र कुण्डलेश्वरमुत्तमम् ॥ यत्र सिद्धो महायक्षः कुण्डधारो नृपोत्तम ॥ १ ॥ तपः कृत्वा सुविपुलं सुरासुरभयंकरम् ॥ पौलस्त्यमंदिरे चैव चिक्रीड नृपसत्तम ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मिन्युगे समुत्पन्नः कस्य पुत्रो महामतिः ॥ तपस्तप्त्वा सुविपुलं तोषितो येन शंकरः ॥ ३ ॥ एतद्विस्तरतस्तात कथयस्व ममानघ ॥ शृण्वतश्च न तृप्तिर्मे कथामृतमनुत्तमम् ॥ ४ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ त्रेतायुगे ब्रह्मसमः पौलस्त्योनाम विश्रवाः ॥ तपः कृत्वा सुविपुलं भरद्वाजसुतोद्भवः ॥ ५ ॥ पुत्रं पौत्रगणैर्युक्तं पत्न्यां भक्त्या सुतोषितः ॥ धनदं जनयामास सर्वलक्षणलक्षितम् ॥ ६ ॥ जातमात्रं तु तं ज्ञात्वा ब्रह्मा लोकपितामहः ॥ चकार नाम सुप्रीत ऋषिदेवसमन्वितः ॥ ७ ॥ यस्माद्विश्रवसो जातो मम पौत्रत्वमागतः ॥ तस्माद्वैश्रवणो नाम तव दत्तं मयाऽनघ ॥ ८ ॥ तथा त्वं सर्वदेवानां धनगोप्ता भविष्यसि ॥ चतुर्थो लोकपालानामक्षयश्चाव्ययो भुवि ॥ ९ ॥ तस्य भार्या महाराज ईश्वरीति च विश्रुता ॥ यक्षो यक्षाधिपः श्रेष्ठस्तस्य कुण्डोऽभवत्सुतः ॥ १० ॥ स च रूपं परं प्राप्य मातापित्रोरनुज्ञया ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ११ ॥ ग्रीष्मे पंचाग्निसंतप्तो वर्षासु स्थण्डिलेशयः ॥ हेमंते जलमध्यस्थो वायुभक्षः शतं समाः ॥ १२ ॥ एवं वर्षशते पूर्णे एकांगुष्ठेऽभवन्नृप ॥ अस्थिभूतः परं तात ऊर्ध्ववाहुस्ततः परम् ॥ ॥ १३ ॥ अतपच्च धृतश्वासः कुण्डलो भरतर्षभ ॥ चतुर्थे वर्षशतके तुतोष वृषवाहनः ॥ १४ ॥ वरं वृणीष्व भो वत्स यत्ते मनसि रोचते ॥ ददामि ते न संदेहस्तपसा तोषितो ह्यहम् ॥ १५ ॥ ॥ कुण्डल उवाच ॥ ॥ यक्षाधिपप्रसादेन तस्येवानुचरः पुरे ॥ विचरामि यथाकामम वध्यः सर्वशत्रुषु ॥ १६ ॥ तथेत्युक्त्वा महादेवः सर्वलोकननस्कृतः ॥ जगामाकाशमाविश्य कैलासं धरणीधरम् ॥ १७ ॥ गते चादर्शनं देवे सोऽपि यक्षो मुदान्वितः ॥ स्थापयामास देवेशं कुण्डलेश्वरमुत्तमम् ॥ १८ ॥ अलंकृत्वा जगन्नाथं पुष्पधूपानुलेपनैः ॥ विमानेश्वामरैश्चैव स्तुत्वा तथा वै लिंगपूरणैः ॥ १९ ॥ तर्पयित्वा द्विजान्सम्यगन्नपानादिभूषणैः ॥ प्रीणयित्वा महादेवं ततः स्वभवनं ययौ ॥ २० ॥ तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ उत्तमं परमं पुण्यं कुण्डलेश्वरनामतः ॥ २१ ॥ तत्र तीर्थे तु यः कश्चिदुपवासपरायणः ॥ अर्चयेद्देवमीशानं सर्वपापैः प्रमुच्यते ॥ २२ ॥ सुवर्णं रजतं वापि मणिं मौक्तिकमेव च ॥ दद्याद्ब्रह्मण्येभ्य स सुखी मोदते दिवि ॥ २३ ॥ तत्र तीर्थे तु यः स्नात्वा ऋग्यजुःसामगोऽपि वा ॥ ऋचमेकां जपित्वा तु सकलं फलमश्नुते ॥ २४ ॥ गां प्रयच्छति विप्रेभ्यस्तत्फलं शृणु पांडव ॥ यावंति तस्या रोमाणि तत्प्रमृतिकुलेषु च ॥ २५ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ स्वर्गे वासो भवेत्तस्य पुत्रपौत्रैः समन्वितः ॥ ॥ २६ ॥ तावन्ति वर्षाणि महानुभावः स्वर्गे वसेत्पुत्रपौत्रैश्च सार्द्धम् ॥ तत्रान्नदो याति महेशलोकमसंख्यवर्षाणि न संशयोऽत्र ॥ २७ ॥ स वै सुखी मोदते स्वर्गलोके गंधर्वसिद्धाप्सरःसंप्रगीते ॥ एवं तु ते धर्मसुत प्रभावस्तीर्थस्य सर्वैः कथितश्च पार्थ॥२८॥श्रुत्वा स्तुवन्मुच्यते सर्वपापैः पुनस्त्रिलोकीमिह तत्प्रभावात् ॥ २९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे नर्मदामाहात्म्ये कुंडलेश्वरतीर्थमाहात्म्यवर्णनंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पिप्पलेश्वर मुत्तमम् ॥ यत्र सिद्धो महायोगी पिप्पलादो महातपाः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पिप्पलादस्य चरितं श्रोतुमिच्छाम्यहं विभो ॥ माहात्म्यं तस्य तीर्थस्य यत्र सिद्धो महातपाः ॥ २ ॥ कस्य पुत्रो महाभाग किमर्थं कृतवांस्तपः ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ ३ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मिथिलास्थो महाभागो वेदवेदांगपारगः ॥ याज्ञवल्क्यः पुरा तात चचार विपुलं तपः ॥ ४ ॥ तापसी तस्य भगिनी याज्ञवल्क्यस्य धीमतः ॥ सा सप्तमेपि वर्षे च वैधव्यं प्राप दैवतः ॥ ५ ॥ पूर्वकर्मविपाकेन हीनाऽभूत्पितृमातृतः ॥ नाभूत्तत्पतिपक्षेऽपि कोपीत्येकाकिनी स्थिता ॥ ६ ॥ भूमौ भ्रमंती भ्रातुः सा समीपमगमच्छनैः ॥ चचार च तपः सोऽपि परलोकसुखेप्सया ॥ ७॥ चचार सापि तत्र स्था शुश्रूषंती महत्तपः ॥ कस्मिंश्चित्समये साऽथ स्नाताहनि रजस्वला ॥ ८ ॥ अंतर्वासो धृतवती दृष्ट्वा कर्पटकं रहः ॥ याज्ञवल्क्योपि तद्रात्रौ सुप्तो यत्र सुसंवृतः ॥ ९ ॥ स्वप्नं दृष्ट्वाऽत्यजच्छुक्रं कौपीने रक्तबिंदुवत् ॥ विराजितेन तपसा सिद्धं तदनलप्रभम् ॥ १० ॥ यावत्प्रबुद्धो विप्रोसौ वीक्ष्यो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च्छिष्टं तदंशुकम् ॥ चिक्षेप दूरतोऽस्पृश्यं शौचं कृत्वा विधानतः ॥ ११ ॥ निपिद्धं तु निशि स्नानमिति सुप्वाप स द्विजः ॥ निशीथे सापि तद्वस्त्रं भगस्यावरणं व्यधात् ॥ १२ ॥ प्रातरन्वेषयामास मुनिर्वस्त्रमितस्ततः ॥ ततः सा ब्राह्मणी प्राह किमन्वेषयसे प्रभो ॥ केन कार्यं तव तथा वदस्व मम तत्त्वतः ॥ १३ ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ अपवित्रो मया भद्रे स्वप्नो दृष्टोऽद्य वै निशि ॥ सक्तुदं तत्र मे वस्त्रं निक्षितं तन्न दृश्यते ॥ १४ ॥ तच्छ्रुत्वा ब्राह्मणी वाक्यं भीतभीताऽवदन्नृप ॥ तद्वस्त्रं तु मया विप्र स्नात्वा ह्यंतःकृतं महत् ॥ १५ ॥ तस्यास्तद्वचनं श्रुत्वा हाहेत्युक्त्वा महामुनिः ॥ निपपात तदा भूमौ च्छिन्नमूल इव द्रुमः॥१६॥ किमेतदिति सेत्युक्त्वा ह्याकाशमिव निर्मला ॥ आश्वासयन्ती तं विप्रं प्रोवाच वचनं तदा ॥ १७ ॥ वदस्व कारणं तात गुह्याद्गुह्यतरं यदि ॥ प्रतीकारोऽस्य येनैव विमृश्य क्रियते त्वरा ॥ १८ ॥ ततः स सुचिरं ध्यात्वा लब्धवाग्वै ततः क्षणम् ॥ प्रोवाच साध्वसमना यत्तच्छृणु नरेश्वर ॥ १९ ॥ नात्र दोषोस्ति ते कश्चिन्मम चैव शुभव्रते ॥ तवोदरे तु गर्भो यस्तत्र दैवं परायणम् ॥ ॥ २० ॥ तस्य तत्त्वेन रक्षा च त्वया कार्या सदैव हि ॥ विनाशी नैव कर्त्तव्यो यावत्कालस्य पर्ययः ॥ २१ ॥ तथेति व्रीडिता साध्वी दूयमानेन चेतसा ॥ अपालयच्च तं गर्भं यावत्पुत्रो ह्यजायत ॥ २२ ॥ जातमात्रं च तं गर्भं गृहीत्वा ब्राह्मणी च सा ॥ अश्वत्थच्छायामाश्रित्य तमुत्सृज्य वचोऽब्रवीत् ॥ २३ ॥ यानि सत्त्वानि लोकेषु स्थावराणि चराणि च ॥ तानि सर्वाणि रक्षंतु त्यक्तं वै बालकं मया ॥ २४ ॥ एवमुक्त्वा गता सा तु ब्राह्मणी नृपसत्तम ॥ तथागतः स तु शिशुस्तत्र स्थित्वा मुहूर्त्तकम् ॥ २५ ॥ पाणिपादौ विनिक्षिप्य निकुंच्य नयने शुभे ॥ आस्यं तु विवृतं कृत्वा रुरोद विकृतैः स्वरैः ॥ २६ ॥ तेन शब्देन वित्रस्ताः स्थावरा जंगमाश्च ये ॥ आकंपिता महोत्पातैः सशैलवनकानना ॥२७॥ ततो ज्ञात्वा महद्भूतं क्षुधाविष्टं द्विजर्षभम् ॥ न जहाति नगश्छायां पानार्थाय ततः परम् ॥ अपिवच्च स्रुतं तस्मादमृतं चैव भारत ॥ २८ ॥ एवं स वर्द्धितस्तत्र कुमारो निजचेतसि ॥ चिंतयामास विश्रब्धः किं मम ब्रह्मगोचरम् ॥२९॥ ततः क्रूरसमाचारः क्रूरं दृष्ट्वा निरीक्षितः ॥ पपात सहसा भूमौ शनैश्चारी शनैश्चरः ॥३०॥ उवाच च भयत्रस्तः कृतांजलिपुटस्तदा ॥ किं मयापकृतं विप्र पिप्पलाद महामुने ॥३१॥ चरन्वै गगनाद्येन पातितो धरणीतले॥ सौरिणा ह्येवमुक्तस्तु पिप्पलादो महामुनिः ॥ ३२ ॥ क्रोधरूपोऽब्रवीद्वाक्यं तच्छृणुष्व नराधिप ॥ पितृमातृविहीनस्य मम बालस्य दुर्मते ॥ पीडां करोपि कस्मात्त्वं सौरे ब्रूहि ह्यशेषतः ॥ ३३ ॥ ॥ शनैश्चर उवाच ॥ ॥ क्रूरस्वभावः सहजो मम दृष्टिस्तथेदृशी ॥ मुंचस्व मां तथा कर्त्ता यद्भवीपि न संशयः ॥ ३४ ॥ ॥ पिप्पलाद उवाच ॥ ॥ अद्यप्रभृति बालानां वर्षादापोडशाद्ग्रह ॥ पीडा त्वया न कर्त्तव्या एष ते समयः कृतः ॥ ३५ ॥ एवमस्त्विति चोक्त्वा स जगाम पुनरागतः ॥ देवमार्गं शनैश्चारी प्रणम्य ऋषिसत्तमम् ॥ ॥ ३६ ॥ गते चादर्शनं तत्र सोऽपि बालो महाग्रहः ॥ विचिंतयन्वै पितरं क्रोधेन कलुषीकृतः ॥ ३७ ॥ आग्नेयीं धारणां ध्यात्वा जनयामासपावकम् ॥ कृत्यामंत्रैर्गृहाग्नौ कृत्या वै संभवत्विति ॥ ३८ ॥ तावज्झटिति सा कन्या ज्वालामालाविभूषिता ॥ हुताशुक्सदृशाकारा किं करोमीति चाब्रवीत् ॥ ३९ ॥ शोषयामि समुद्रार्न्कि चूर्णयामि च पर्वतान् ॥ अवनिं वेष्टयामीति पातये किं नभस्तलम् ॥ ४० ॥ कृत्यं मूर्ध्नि पतिष्यामि घातयामि च कं द्विज ॥ शीघ्रमादिश्यतां कार्यं मा मे कालात्ययो भवेत् ॥ ४१ ॥ तस्यास्तद्वचनं श्रुत्वा पिप्पलादो महातपाः ॥ क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ ४२ ॥ महता क्रोधवेगेन मया त्वं चिंतिता शुभे ॥ पिता मे याज्ञवल्क्यश्च तस्य त्वं पत मा चिरम् ॥ ४३ ॥ एवमुक्त्वाऽगमच्छ्रीघ्रं स्फोटयन्ती नभस्तलम् ॥ मिथिलास्थो महाप्राज्ञस्तत्पस्तेपे महामनाः ॥ ४४ ॥ यावत्पश्यति दिग्भागं ज्वलनार्कसमप्रभम् ॥ याज्ञवल्क्यो महातेजा महद्भूतमुपस्थितम् ॥ ४५ ॥ तद्दृष्ट्वा सहसायांतं भीतभीतो महामुनिः ॥ अनुबुक्तोऽथ भूतेन जनकं नृपतिं ययौ ॥ ४६ ॥ शरण्यं मामनुप्राप्तं विद्धि त्वं नृपसत्तम ॥ महद्भूतभयाद्रक्ष यदि शक्रोपि पार्थिव ॥ ४७ ॥ ब्रह्मतेजोभवं भूतमनिवार्यं दुरासदम् ॥ न च शक्नोम्यहं त्रातुं राजा वचनमब्रवीत् ॥ ४८ ॥ ततश्चान्यं नृपश्रेष्ठं शरणार्थी महातपाः ॥ जगाम तेन मुक्तोऽसौ चेन्द्रस्य सदनं भयात् ॥४९॥ देवराज नमस्तेऽस्तु महाभूतभयान्नृप ॥ कम्पमानोऽब्रवीद्विप्रो रक्षस्वेति पुनःपुनः ॥ ५० ॥ तस्य तद्वचनं श्रुत्वा देवराजोऽब्रवीदिदम् ॥ न शक्नोमि परित्रातुं ब्रह्मकोपाद्दहं मुने ॥ ५१ ॥ ततः स ब्रह्मभवनं ब्राह्मणो ब्रह्मवित्तमः ॥ जगाम विष्णुलोकं च तेनापीत्युक्त एव सः ॥ ५२ ॥ ततः स मुनिरुद्विग्नो निराशो जीविते नृप ॥ अनुगम्यमानो भूतेन अगच्छच्छंकरालयम् ॥ ५३ ॥ तस्य योगबलोपेतो महादेवस्य पांडव ॥ नखमांसांतरे गुप्तो यथा देवो न पश्यति ॥ ५४ ॥ तदंते चागमद्भूतं ज्वलनार्कसमप्रभम् ॥ मुंचमुंचेति पुरुषं देवदेवं महेश्वरम् ॥ ५५ ॥ एवमुक्तो महादेवस्तेन भूतेन भारत ॥ योगींद्रं दर्शयामास नखमांसांतरे तदा ॥ ५६ ॥ संस्थाप्य भूतं भूतेशः परमापन्नतं मुनिम् ॥ उवाच मा भैस्त्वं विप्र निर्गच्छस्व महामुने ॥५७॥ ततः सुसूक्ष्मदेहस्थं भूतं दृष्ट्वाब्रवीदिदम् ॥ किमस्य त्वं महाभूत करिष्यसि वदस्व मे ॥ ५८ ॥ ॥ कृत्योवाच ॥ ॥ क्रोधाविष्टेन देवेश पिप्पलादेन चिंतिता ॥ अस्य देहं हनिष्यामि हिंसार्थं विद्धि मां प्रभो ॥ ५९ ॥ एतच्छ्रुत्वा महादेवो भूतस्य वदनाच्युतम् ॥ कटित्थं याज्ञवल्क्यं च मंत्रयामास मंत्रवित् ॥ ६० ॥ योगीश्वरेति विप्रस्य कृत्वा नाम युधिष्ठिर ॥ विसर्जयित्वा देवेशस्तत्रैवांतरधीयत ॥ ६१ ॥ प्रेषयित्वा तु तं भूतं पिप्पलादोपि दुर्मनाः ॥ पितृमातृसमुद्विग्नो नर्मदातटमाश्रितः ॥ ६२ ॥ एकांगुष्ठो निराहारो वर्षादापोडशान्नृप ॥ तोषयामास देवेशमुमया सह शंकरम् ॥ ६३ ॥ ततस्तत्तपसा तुष्टः शंकरो वाक्यमब्रवीत् ॥ ६४ ॥ ॥ ईश्वर उवाच ॥ ॥ परितुष्टोस्मि ते विप्र तपसानेन सुव्रत ॥ वरं वृणीष्व ते दद्मि मनसा चेप्सितं शुभम् ॥ ६५ ॥ ॥ पिप्पलाद उवाच ॥ ॥ यदि मे भगवांस्तुष्टो यदि देयो वरो मम ॥ अत्र संनिहितो देव तीर्थे भव महेश्वर ॥ ६६ ॥ एवमुक्तस्तथेत्युक्त्वा पिप्पलादं महामुनिम् ॥ जगामादर्शनं देवो भूतसंघसमन्वितः ॥ ६७ ॥ पिप्पलादो गते देवे स्नात्वा तत्र महांभसि ॥ स्थापयित्वा महादेवं जगामोत्तरपर्वतम् ॥ ६८ ॥ तत्र तीर्थे नरो भक्त्या स्नात्वा मंत्रयुतं नृप ॥ तर्पयेत्वा पितॄन्देवान्पूजयेच्च महेश्वरम् ॥ ६९ ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ॥ मृतो रुद्रपुरं याति नात्र कार्या विचारणा ॥ ७० ॥ अथ यो भोजयेद्विप्रान्पितॄनुद्दिश्य भारत ॥ तस्य ते द्वादशाब्दानि मोदंते दिवि तर्पिताः ॥ ७१ ॥ संन्यासेन तु यः कश्चित्तत्र तीर्थे तनुं त्यजेत् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ७२ ॥ एतत्सर्वं समाख्यातं यत्पृष्टं हि त्वयाऽनघ ॥ माहात्म्यं पिप्पलादस्य तीर्थस्योत्पत्तिरेव च ॥ ७३ ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चैव सर्वपापक्षयो भवेत् ॥ ७४ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये पिप्पलादतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र विमलेश्वरमुत्तमम् ॥ तत्र देवशिला रम्या स्वयं देवैर्विनिर्मिता ॥ १ ॥ तत्र स्नात्वा तु यो भक्त्या ब्राह्मणान्पूजयेन्नृप ॥ स्वल्पेनापि हि दानेन तस्य चांतो न विद्यते ॥२॥ ॥ युधिष्ठिर उवाच ॥ ॥ कानि दानानि विप्रेंद्र शस्तानि धरणीतले ॥ यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुवर्णं रजतं ताम्रं मणिमौक्तिकमेव च ॥ भूमिदानं च गोदानं मोचयत्यशुभान्नरम् ॥ ४ ॥ तत्र तीर्थे तु यः कश्चित्कुरुते प्राणसंक्षयम् ॥ रुद्रलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ ५ ॥ ततः पुष्करिणीं गच्छेत्सर्वपापक्षयंकरीम् ॥ तत्र स्नात्वार्चयेद्देवं तेजोराशिं दिवाकरम् ॥६॥ ऋचमेकां जपेत्साम्नः सामवेदफलं लभेत् ॥ यजुर्वेदस्य जपनादृग्वेदस्य तथैव च ॥ ७॥ अक्षरं वा जपेन्मंत्रं ध्यायमानो दिवाकरम् ॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वकिल्बिषैः ॥८॥ तत्र तीर्थे तु यः स्नात्वा विधिना जयेद्द्विजान् ॥ तस्य कोटिगुणं पुण्यं जायते नात्र संशयः ॥ ९ ॥ अनाशकेनाग्निगत्या जले वा देहपातनात् ॥ तस्मिंस्तीर्थे मृतो यस्तु स याति परमां गतिम् ॥ १० ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा नृपसत्तम ॥ विहितं कर्म कुर्वाणः स गच्छेत्परमां गतिम् ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्याधिं सत्त्वक्षयं मोहं ज्ञात्वा वर्णा द्विजोत्तम ॥ पापेभ्यो विप्रमुच्यंते केन तत्साधनं वद ॥१२॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तिलोदकी तिलस्नायी कामक्रोधविवर्जितः ॥ ब्राह्मणोऽनशनैः प्राणांस्त्यजल्लँभति सद्गतिम् ॥१३॥ संग्रामे सद्गतिं तात क्षत्रियो निधने लभेत् ॥ तदभावान्महाप्राज्ञ सेवमानो लभेदिति ॥ १४ ॥ व्याधिग्रहगृहीतो वा वृद्धो वा विकलेंद्रियः ॥ आत्मानं दाहयित्वाग्नौ विधिना सद्गतिं लभेत् ॥ १५ ॥ वैश्योपि हि त्यजन्प्राणानेवं वै शुभभाग्भवेत् ॥ जले वा शुद्धभावेन त्यक्त्वा प्राणाञ्छिवो भवेत् ॥१६॥ शूद्रोऽपि द्विजशुश्रूषुस्तोषयित्वा महेश्वरम् ॥ विमुच्य नान्यथा पापः पतते नरके ध्रुवम् ॥ १७ ॥ अथवा प्रणवाशक्तो द्विजेभ्यो गुरवे तथा ॥ पंचाग्नौ शोषयेद्देहमापृच्छ्य द्विजसत्तमान् ॥ ॥ १८ ॥ शांतदांतजितक्रोधाञ्छास्त्रयुक्तान्विचक्षणान् ॥ तेषां चैवोपदेशेन करीषाग्निं प्रसाधयेत् ॥ १९ ॥ एवं वर्णा यथात्वेन मूढाहंकारमोहिताः ॥ पतंति नरके घोरे यथांधो गिरिगह्वरे ॥२०॥ ये शास्त्रविधिमुत्सृज्य वर्त्तंते कामचारतः ॥ कृमियोनिं प्रपद्यंते तेषां पिंडो न च क्रिया ॥ ॥२१॥ श्रुतिस्मृत्युदितं धर्मं त्यक्त्वा यथेच्छाचार सेविनः ॥ अष्टाविंशतिर्वै कोट्यो नरकाणां युधिष्ठिर ॥२२॥ प्रत्येकं वा पतंत्येते मग्ना नरकसागरे ॥ दुर्लभं मानुषं जन्म बहुधर्मार्जितं नृप ॥ २३ ॥ तल्लब्ध्वा मदमात्सर्यं यो वै त्यजति मानवः ॥ संनियम्य सदात्मानं ज्ञानचक्षुर्नरो हि सः ॥ २४ ॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥ २५ ॥ यस्य नोन्मीलितं चक्षुर्ज्ञेयो जात्यंध एव सः ॥ एतत्ते कथितं सर्व्वं यत्पृष्टं नृपसत्तम ॥ २६ ॥ तथानिष्टतराणां हि रुद्रस्य वचनं यथा ॥ नर्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता ॥ २७ ॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥ सर्वदेवाधिदेवेन ईश्वरेण महात्मना ॥ २८ ॥ लोकानां च हितार्थाय महापुण्यावतारिता ॥ मानसं वाचिकं पापं स्नानान्नश्यति कर्मजम् ॥ २९ ॥ रुद्रदेहाद्विनिष्क्रांता तेन पुण्यतमा हि सा ॥ प्रातरुत्थाय यो नित्यं भूमिमाक्रम्य भक्तितः ॥ ३० ॥ एतन्मंत्रं जपेत्तात स्नानस्य लभते फलम् ॥ नमः पुण्यजले देवि नमः सागरगामिनि ॥ ३१ ॥ नमोस्तु पापनिर्मोचे नमो देवि वरानने ॥ ३२ ॥ नमोस्तु ते ऋषिवरसंघसेविते नमोऽस्तु ते त्रिनयनदेहनिःसृते ॥ नमोऽस्तु ते सुकृतवतां सदा वरे नमोऽस्तु ते सततपवित्रपावनि ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तीर्थानां परमं तीर्थं तच्छृणुष्व नराधिप ॥ रेवाया दक्षिणे कूले निर्मितं शूलपाणिना ॥ १ ॥ मोक्षार्थं मानवेंद्राणां निर्मितं नृपसत्तम ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुता मे विविधा धर्मास्तीर्थानि विविधानि च ॥ दानधर्माः समस्ताश्च त्वत्प्रसादाद्द्विजोत्तम ॥ २ ॥ अन्यच्च श्रोतुमिच्छामि संसारश्छिद्यते यथा ॥ पुनरागमनं नास्ति मोक्षप्राप्तिर्भवेद्यथा ॥ ३ ॥ एतदाख्याहि मे सर्वं प्रसादाद्द्विजसत्तम ॥ ४ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणुष्वैकमना भूत्वा तीर्थात्तीर्थांतरं महत् ॥ श्रुते यस्य प्रभावे तु मुच्यते चाब्दिकादघात् ॥ ५ ॥ वाचिकैर्मानसैर्वापि शारीरैश्च विशेषतः ॥ कीर्त्तनात्तस्य तीर्थस्य मुच्यते सर्वपातकैः ॥ ६ ॥ पंचक्रोशप्रमाणं तु तच्च तीर्थं महीपते ॥ मुक्तिमुक्तिप्रदं दिव्यं प्राणिनां पापकर्मिणाम् ॥ ७ ॥ रेवाया दक्षिणे कूले पर्वतो भृगुसंज्ञितः ॥ तस्य मूर्ध्नि च तत्तीर्थं स्थापितं चैव शंभुना॥८॥शूलभेदेति विख्यातं त्रिषु लोकेषु भूपते ॥तत्र स्थिताश्च ये वृक्षास्तीर्थाच्चैव चतुर्दिशम्॥९॥पतिता निलयं यांति रुद्रस्य नात्र संशयः॥ मृतास्तत्रैव ये केचिज्जन्तवो भुवि पक्षिणः ॥ १० ॥ ते यांति परमं लोकं तत्र तीर्थे न संशयः ॥ पातालान्निःसृता गंगा भोगवतीतिसंज्ञिता ॥११॥ निष्क्रांता शूलभेदाच्च सर्वपापक्षयंकरी ॥ या सा गीर्वाणनाम्न्यन्या वहेत्पुण्या महानदी ॥ १२ ॥ पतिता कुण्डमध्ये तु यत्र भिन्नं त्रिशूलिना ॥ शंभुना च पुरा तात उत्पाद्य च सरस्वती ॥ १३ ॥ सा तत्र पतिता राजन्प्राचीनाघविमोचिनी ॥ भास्वत्या त्रितयं यत्र शिला गीर्वाणसंज्ञिता ॥ १४ ॥ तत्र तीर्थे च तत्तीर्थं न भूतं न भविष्यति ॥ केदारं च प्रयागं च कुरुक्षेत्रं गया तथा ॥ १५ ॥ अन्यानि च सुतीर्थानि कलां नार्हंति षोडशीम् ॥ पंच स्थानानि तीर्थानि पृथग्भूतानि यानि च ॥ १६ ॥ वक्ष्यामि च समासेन एकैकं च पृथक्पृथक् ॥ गया नाभ्यां यथा पुण्या चक्रतीर्थं च तत्समम् ॥ १७ ॥ धर्मारण्ये यथा कूपं शूलभेदं च तत्समम् ॥ ब्रह्मयूपं यथा पुण्यं देवनद्यास्तथैव च ॥ १८ ॥ यथा गयाशिरः पुण्यं सुराणां च यथा शिला ॥ यथा च पुष्करं स्थानं मार्कंडह्रद एव च ॥ १९॥ दत्त्वा पिंडोदकं तत्र पि णां च तथाक्षयम् ॥ यस्तत्र कुरुते श्राद्धं तोयं पिबति नित्यशः ॥ मुच्यते सर्वपापैस्तु उरगः कंचुकैरिव ॥ अनिंद्यान्पूजयेद्विप्रान्दंभक्रोधविवर्जितान् ॥ २० ॥ त्रयोदशदिनं दानं त्रयोदशगुणं भवेत् ॥ अभ्यर्चितं सुरं दृष्ट्वा गणनाथं गजाननम् ॥ २१ ॥ सर्व्वे विघ्ना विनश्यंति दृष्ट्वा कम्बलक्षेत्रपम् ॥२२॥ पूजयेत्परया भक्त्या शूलपाणिं महेश्वरम् ॥ ॥ २३ ॥ देवस्य पूर्वभागे तु उमा पूज्या प्रयत्नतः ॥ मार्कंडेशं ततो भक्त्या पूजयेद्गृहवासिनम् ॥ २४ ॥ मुच्यंते पातकैः सर्व्वैरज्ञानज्ञानसंचितैः ॥ गुहामध्ये प्रविष्टस्तु जपेत्सूक्तं तु त्र्यक्षरम् ॥ २५ ॥ नीलपर्वतजं पुण्यं षष्ठांशेन लभेत सः ॥ त्रिनरास्तत्र तिष्ठन्ति सादित्यमरुतैः सह ॥ २६ ॥ सर्वदेवमयं स्थानं कोटिलिंगमनुत्तमम् ॥ यथा नदीनदाः सर्वे सागरे यांति संक्षयम् ॥ २७ ॥ तथा पापानि नश्यंति शूलभेदस्य दर्शनात् ॥ प्रत्यक्षो दृश्यतेऽद्यापि प्रत्ययो ह्यवनीपते ॥ २८ ॥ विस्फुलिंगा लिंगमध्ये स्पंदंते स्नानयोगतः ॥ द्वितीयः प्रत्ययस्तत्र तैलबिंदुर्न सर्पति ॥ ॥ २९ ॥ एवं हि प्रत्ययस्तत्र शूलभेदप्रभावजः ॥ यः स्मरेच्छूलभेदं तु त्रिकालं नित्यमेव च ॥ ३० ॥ स पूतश्च भवेत्साक्षात्सबाह्याभ्यंतरो नृप ॥ न कस्यचिन्मया ख्यातं पृष्टोऽहं त्रिदशैरपि ॥ ३१ ॥ गुह्याद्गुह्यतरं तीर्थं सदा गोप्यं कृतं मया ॥ सर्वपापहरं पुण्यं सर्वदोषघ्नमुत्तमम् ॥ ३२ ॥ सर्वतीर्थमयं तीर्थं शूलभेदं जनेश्वर ॥ श्रुते यस्य प्रभावे तु मुच्यते सर्वपातकैः ॥ ३३ ॥ शूलभेदं मया तात संक्षेपात्कथितं तव ॥ यः शृणोति

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नरो भक्त्या मुच्यते सर्वपातकैः ॥ ३४ ॥ इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शूलभेद प्रशंसावर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एष एत्र पुरा प्रश्नः परिपृष्टो महेश्वरम् ॥ राज्ञा चोत्तानपादेन ऋषिदेवसमागमे ॥ १ ॥ ॥ उतानपाद उवाच ॥ ॥ इदं तीर्थं महापुण्यं सर्वदेवमयं परम् ॥ गुह्याद्गुह्यतरं स्थानं न दृष्टं न श्रुतं हर ॥२॥शूलभेदं कथं जातं केनैवोत्पादितं पुरा ॥ माहात्म्यं तस्य तीर्थस्य विस्तराच्छंस मे प्रभो ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महावीर्यो दानवो बलदर्पितः ॥ मत्त्यें न तादृशः कश्चिद्विक्रमेण बलेन वा ॥ ४ ॥ सूनुर्ब्रह्मसुतस्याऽयमंधकोनाम दुर्मदः ॥ निजस्थाने वसन्पापः कुर्वन्राज्य मकण्टकम् ॥ ५ ॥ हृष्टपुष्टो वसन्मत्त्यें स सुरैर्नाभिभूयते ॥ भवनं तस्य पापस्य वह्निरूपवनं यथा ॥ ६ ॥ एतस्मिन्नंधकः काले चिंतयामास भारत ॥ तोषयामि महादेवं येन सानुग्रहो भवेत् ॥ ७ ॥ प्रार्थयामि वरं दिव्यं यो मे मनसि वर्त्तते ॥ परं स निश्चयं कृत्वा सोंऽधको निर्गतो गृहात् ॥ ८ ॥ रेवातटं समासाद्य दानवस्तपसि स्थितः ॥ ऊर्ध्वं तपश्चाराऽसौ दारुणं लोमहर्षणम् ॥ ९ ॥ दिव्यं वर्षसहस्रं स निराहारोऽ भवत्ततः ॥ द्वितीयं तु सहस्रं स न्यवसद्वारिभोजनः ॥१०॥ तृतीयं तु सहस्रं स धूमपानरतोऽभवत् ॥ चतुर्थं वर्षसाहस्रं योगाभ्यासेन संस्थितः ॥ ॥ ११ ॥ कोपीह नेदृशं चक्रे तपः परमदारुणम् ॥ अस्थिचर्माऽवशेषोऽसौ यावत्तिष्ठति भारत ॥ १२ ॥ तस्य मूर्ध्नि ततो राजन्धूमवर्त्तिर्विनिः सृता ॥ देवलोकमतीत्याऽसौ कैलासं व्याप्य संस्थिता ॥ १३ ॥ तावद्देवसमीपस्था उमा वचनमब्रवीत् ॥ कोऽस्त्ययं मानुषे लोके तपसोग्रेण संस्थितः ॥ १४ ॥ चतुर्वर्षसहस्राणि व्यतीयुः परमेश्वर ॥ न केनाऽपीदृशं तप्तं तपो दृष्टं श्रुतं तथा ॥ १५ ॥ अवज्ञां कुरुषे देव किमत्र नियमाऽन्विते ॥ सर्वस्य दत्से शीघ्रं त्वमल्पेन तपसा विभो ॥ १६ ॥ नाशकीडां करिष्येऽद्य त्वया सह महेश्वर ॥ यावन्नोत्थाप्यते ह्येष दानवो भक्तवत्सल ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महादेवि सर्वलक्षणलक्षिते ॥ अहं तं न विजानामि क्लिश्यंतं दानवेश्वरम् ॥ १८ ॥ योग ध्यासे स्थितो भद्रे ध्यायंस्तत्परमं पदम् ॥ तत्रागच्छ मया सार्द्धं यत्र तप्यत्यसौ तपः ॥ १९ ॥ उमया सहितो देवो गतस्तत्र महेश्वरः ॥ अस्थि चर्मावशेषस्तु दृष्टो देवेन शम्भुना ॥ २० ॥ प्रत्युवाच प्रसन्नोऽसौ देवदेवो महेश्वरः ॥ भोभोः कष्टं कृतं भीमं दारुणं लोमहर्षणम् ॥ २१ ॥ ईदृशं च तपो घोरं कस्माद्वत्स त्वया कृतम् ॥ वरं दास्यान्यहं वत्स यस्ते मनसि वर्त्तते ॥ २२ ॥ ॥ अंधक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरदो यदि शंकर ॥ सुरान्सर्वान्विजेष्यामि त्वत्प्रसादान्महेश्वर ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ त्वन्नेऽपि त्रिदशाः सर्वे न योद्धव्याः कदाचन ॥ असंभाव्यं न वक्तव्यं मनसो यन्न रोचते ॥ २४ ॥ अन्यं किमपि याचस्व यस्ते मनसि वर्त्तते ॥ स्वर्गे वा यदि वा मर्त्त्यें पातालेषु च संस्थि तान् ॥ २५ ॥ मर्त्त्येषु विविधान्भोगान्भोक्ष्यसि त्वं यथेप्सितान् ॥ कुरु निष्कण्टकं राज्यं स्वर्गे देवपतिर्यथा ॥ २६ ॥ देवस्य वचनं श्रुत्वा सोंऽधको विमनाः स्थितः ॥ वृथा क्लेशश्च मे जातो न किंचित्साधितं मया ॥ २७ ॥ निःश्वासं परमं मुक्त्वा निपपात धरातले ॥ मूलच्छिन्नो यथा वृक्षो निरुच्छ्वासस्तदाभवत् ॥ २८ ॥ मूर्च्छापन्नं ततो दृष्ट्वा देवी वचनमब्रवीत् ॥ यं कामं कामयत्येष तमस्मै देहि शंकर ॥ २९ ॥ भक्तानुपेक्ष माणस्य तव कीर्त्तिर्भविष्यति ॥ ३० ॥ ॥ ईश्वर उवाच ॥ ॥ ॥ यदि दास्ये वरं देवि इच्छाभूतं कदाचन ॥ ततो न मंस्यते विष्णुं न ब्रह्माणं न मामपि ॥ ३१ ॥ उच्चत्वमाप्तो देवेशिअ न्यानपि सुरासुरान् ॥ ३२ ॥ ॥ देव्युवाच ॥ ॥ कमप्युपायमाश्रित्य उत्थापय महे श्वर ॥ विष्णुवर्जं सुरान्सर्वान्नयस्वेति वरं वद ॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ उपायः शोभनो देवि यो मे मनसि वर्त्तते ॥ तमेवास्मै प्रदा स्यामि यस्त्वया कथितो वरः ॥ ३४ ॥ ततोऽमृतेन संसिक्तः स्वस्थोऽभूत्तत्क्षणादयम् ॥ तथा पुनर्नवो जातः सर्वाऽवयवशोभितः ॥ ३५ ॥ शृणु ष्वैकमना भूत्वा गृहाण वरमुत्तमम् ॥ विष्णुवर्जं प्रदास्यामि यत्तवाभिमतं प्रियम् ॥ ३६ ॥ सर्वं च सफलं तुभ्यं मा धर्मस्तेऽन्यथा भवेत् ॥ ददा मीति वरं तुभ्यं मन्यसे यदि चासुर ॥ ३७ ॥ विष्णुवर्जं सुरान्सर्वाञ्जेष्यसि त्वं च मां विना ॥ ३८ ॥ ॥ अन्धक उवाच ॥ ॥ भवत्वेव मिति प्राह बलमास्थाय केवलम् ॥ विष्णुवर्जं विजेष्येहं स्वबलेन महेश्वर ॥ ३९ ॥ कृतार्थोऽहं हि संजात इत्युक्त्वा प्रणतिं गतः ॥ गच्छ देवोमया सार्द्धं कैलासशिखरं वरम् ॥ ४० ॥ वृषपुंगवमारुह्य देवोसाधुमया सह ॥ वरं दत्त्वा स तत्स्थैव तत्रैवांतरधीयत ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे अंधकवरप्रदानवर्णनंनाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ स दानवो वरं लब्ध्वा जगाम स्वपुरं प्रति ॥ ददर्श स्वपुरं राजञ्छोभितं चित्रचत्वरैः ॥ १ ॥ उद्यानैश्चैव विविधैः कदलीखंडमंडितैः ॥ पनसैर्बकुलैश्चैवाम्रातिराम्रैश्च चंपकैः ॥ २ ॥ अशोकैर्नालिकेरैश्च मातुलिंगैः सदाडिमैः ॥ नानावृक्षैश्च शोभाढ्यं तडागैरुपशोभितम् ॥ ३ ॥ देवतायतनैर्दिव्यैर्ध्वजमालासुशोभितैः ॥ वेदाध्ययननिर्घोषैर्मंगलाद्यैर्विनादितम् ॥ ४ ॥ प्राविशद्भवने दिव्ये कांचने रुक्ममालिनि ॥ अपश्यत्स सुतान्भार्यांममात्यान्दासभृत्यकान् ॥ ५ ॥ ततो जयप्रदान्सर्वान्नित्रश्वेतश्च धावतः ॥ दृष्ट्वोभौ च प्रकुर्वाणान्वेजयं तीभिरुच्चकैः ॥ ६ ॥ केचित्तोरणमाबद्ध्य केचित्पुष्पाण्यवाकिरन् ॥ मातुलिंगकराश्चान्ये धावंति ह्यंधकं प्रति ॥ ७ ॥ पुरं जनाश्च दृश्यंते भाजनैर व्यपूरितैः ॥ पूर्णहस्ताः प्रदृश्यंते तत्रैव बहवो जनाः ॥ ८ ॥ साक्षतैर्भाजनैस्तत्र शतसाहस्रयोषितः ॥ मंत्रान्पठंति विप्राश्च मंगलान्यपि योषितः ॥ ॥ ९ ॥ अमात्याश्चैव भृत्याश्च गजांश्चाढौकयंति च ॥ वर्धापयंति ते सर्वे येःकेचित्पुरवासिनः ॥ १० ॥ दृष्टस्तुष्टोऽवसत्तत्र सचिवैः सह सोंऽ धकः ॥ ददर्श स जगत्सर्वं तुरंगांश्च पदातिकान् ॥ ११ ॥ तथैव विविधान्कोशांस्तत्र कांचनपूरितान् ॥ महिषीर्गा वृषांश्चैवापश्यच्छत्राण्यने कधा ॥ १२ ॥ स एवमंधकस्तत्र कियंतं कालमावसत् ॥ दृष्टस्तुष्टो वसन्मर्त्त्ये स सुरैर्नाभ्यभूयत ॥ १३ ॥ वरं लब्धं तु तं ज्ञात्वा शंकिताः स्वर्गवासिनः ॥ एकीभूताश्च ते सर्वे वासवं शरणं गताः ॥ १४ ॥ ॥ शक्र उवाच ॥ ॥ कथमागमनं वोऽत्र सर्वेषामपि नाकिनाम् ॥ कस्माद्वो भयमुत्पन्नमागताः शरणं कथम् ॥ १५ ॥ ततस्ते ह्यमराः सर्वे शक्रमेतद्वचोऽब्रुवन् ॥ १६ ॥ ॥ देवा ऊचुः ॥ ॥ सुर नाथांधकोनाम दैत्यः शंभुवरोर्जितः ॥ अजेयः सर्वदेवानां किं नु कार्यमतः परम् ॥ १७ ॥ तत्त्वं चिंतय देवेश क उपायो विधीयताम् ॥ इत्थं वदन्ति ते देवाः शक्राग्रे मन्त्रणोद्यताः ॥ १८ ॥ मन्त्रयन्ति च यावद्वै तावच्चारमुखेरितम् ॥ ज्ञात्वा तत्र स देवौघं दानवो निर्गतो गृहात् ॥ १९ ॥ एकाकी स्यंदनाऽऽरूढ आयुधैर्बहुभिर्वृतः ॥ दुर्गमं मेरुपृष्ठं स लीलयैव गतो नृप ॥ २० ॥ स्वर्णप्राकारसं युक्तं शोभितं विविधाश्रमैः ॥ दुर्गमं शत्रुवर्गस्य तदा पार्थिवसत्तम ॥ २१ ॥ प्रविवेशाऽऽसुरस्तत्र लीलया स्वगृहे यथा ॥ वृत्रहा भयमापन्नः स्वकीयं चासनं ददौ ॥ २२ ॥ उपविष्टोंऽधकस्तत्र शक्रस्येवाऽऽसने शुभे ॥ आस्थानं कलयामास सर्वतश्चिदशावृतम् ॥ २३ ॥ ॥ शक्र उवाच ॥ किं तवाऽऽगमनं चाऽत्र किं कार्यं कथयस्व मे ॥ यदस्मदीयं वित्तं हि तत्ते दास्यामि दानव ॥ २४ ॥ ॥ अंधक उवाच ॥ ॥ नाऽहं वै कामयेकोशं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

न गजांश्च सुरेश्वर ॥ स्वकीयं दर्शयस्वाद्य स्वर्गशृंगारभूषितम् ॥ २५ ॥ ऐरावतं महानागं तं चैवोच्चैःश्रवोहयम् ॥ उर्वश्यादीनि रत्नानि मम दर्शय गोपते ॥ २६ ॥ पारिजातकपुष्पाणि वृक्षजातीननेकशः ॥ वादित्राणि च सर्वाणि दर्शयस्व शचीपते ॥ २७ ॥ तस्य तद्वचनं श्रुत्वा शक्रश्चिंति तवानिदम् ॥ योऽसुं निहंति पाप्मानं न तं पश्यामि कर्हिचित् ॥ २८ ॥ नास्ति रक्षाप्रदः कश्चित्स्वर्गलोकस्य दुःखिनः ॥ भयत्रस्तो ददावन्यद्यादि ग्राद्यप्सरोगणैः ॥ २९ ॥ रंगभूमाधुपाविश्य कारयामास तांडवम् ॥ उपविष्टाः सुराः सर्वे यक्षसारुतकिन्नराः ॥ ३० ॥ उर्वश्याद्या अप्सरसो गीतवा दित्रयोगतः ॥ ननृतुः पुरतस्तस्य सर्वा एकैकशो नृप ॥ ३१ ॥ न व्यश्राम्यत तच्चित्तं दृष्ट्वा चाप्सरसस्तदा ॥ शचीं प्रति मनस्तस्य सकाममभव न्नृप ॥ ३२ ॥ गृहीत्वा शक्रभार्यां स प्रस्थितः स्वपुरं प्रति ॥ ततः प्रवृते युद्धमंधकस्य सुरैः सह ॥ ३३ ॥ तेन देवागणाः सर्वे ध्वस्ताः पार्थिवस त्तम ॥ संग्रामे विविधैः शस्त्रैश्चक्रवज्रादिभिर्घनैः ॥ ३४ ॥ संतापिताः सुराः सर्वे क्षयं नीता ह्यनेकशः ॥ सर्वेऽपि मरुतस्तेन भग्नाः संग्राममूर्द्धनि ॥ ३५ ॥ यथा सिंहोगजान्सर्वान्निचित्य विचरेद्वनम् ॥ तद्वदेकेन ते देवा जिताः सर्वे पराङ्मुखाः ॥ ३६ ॥ बालोऽधियो यथा ग्रामे स्वेच्छया पीड येज्जनान् ॥ स्वैरमाक्रम्य गृह्णाति कोशवासांसि चाऽसकृत् ॥ ३७ ॥ गतं न पश्यत्यात्मानं प्रजासंतापनेन च ॥ गृहीत्वा शक्रभार्यां स गतो वै दानवोत्तमः ॥ ३८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शूलभेदमाहात्म्ये शचीहरण वर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गीर्वाणाश्च ततः सर्वे ब्रह्माणं शरणं गताः ॥ गजैर्गि रिवराकारैर्हयैश्चैव गजोपमैः ॥ १ ॥ स्यंदनैर्नगराकारैः सिंहशार्दूलयोजितैः ॥ कच्छपैर्महिषैश्चान्यैर्मकरैश्च तथाऽपरे ॥ २ ॥ ब्रह्मलोकमनुप्राता देवाः शक्रपुरोगमाः॥ दृष्ट्वा पद्मोद्भवं देवं साष्टांगं प्रणताः सुराः ॥ ३ ॥ ॥ देवा ऊचुः ॥ ॥ जय देव जगद्वंद्य जय संसृतिकारक ॥ पद्मयोने सुर श्रेष्ठ त्वामेव शरणं गताः ॥ ४ ॥ सोद्वेगं भाषितं श्रुत्वा देवानां भावितात्मनाम् ॥ मेघगंभीरया वाचा देवराजमुवाच ह ॥ ५ ॥ किमत्राऽऽगमनं देवाः सर्वेषां वै विवर्णता ॥ केनापमानिताः सर्वे शीघ्रं मे कथ्यतां स्वयम् ॥ ६ ॥ ॥ देवा ऊचुः ॥ ॥ अंधकाख्यो महादैत्यो बलवान्पद्मसंभव ॥ तेन देवगणाः सर्वे धनरत्नैर्वियोजिताः ॥ ७ ॥ हत्वा देवगणांस्तावद्भिचक्रपरश्वधैः ॥ गृहीत्वा शक्रभार्यां स दानवोऽपि गतो बलात् ॥ ८ ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ चिंतयामास राजेंद्र वधार्थं दानवस्य ह ॥ ९ ॥ अवध्यो ह्यनवः पापः सर्वेषां वो दिवौकसाम् ॥ स ह्याता सर्वजगतां नान्यो विद्येत कुत्रचित् ॥ १० ॥ एवमुक्ताः सुराः सर्वे ब्रह्मणा तदनंतरम् ॥ ब्रह्माणं पुरस्कृत्य गता यत्र स केशवः॥ तुष्टुवु र्विविधैः स्तोत्रैर्ब्रह्माद्याश्चक्रपाणिनम् ॥ ११ ॥ ॥ देवा ऊचुः ॥ ॥ जय त्वं देवदेवेश लक्ष्म्या वक्षस्थलाऽऽश्रितः ॥ असुरक्षय देवेश वयं ते शरणं गताः ॥ १२ ॥ स्तूयमानः सुरैः सर्वैर्ब्रह्माद्यैश्च जनार्दनः ॥ संप्रहृष्टमना भूत्वा सुरसंघमुवाच ह ॥ १३ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ स्वागतं देवविप्राणां सुप्रभाताऽद्य शर्वरी ॥ किं कार्यं प्रोच्यतां क्षिप्रं कस्य रुष्टा दिवौकसः ॥१४॥ किं दुःखं कश्च संतापः कुतो वा भयामागतम् ॥ कथयंतु महाभागाः कारणं यन्मनोगतम् ॥ १५ ॥ पराभवः कृतो येन सोऽद्य यातु यमालयम् ॥ एवमुक्तास्तु कृष्णेन कथयामासुरस्य तद् ॥ ॥ १६ ॥ दर्शयंतः स्वकान्देहाँल्लम्बमाना ह्यधोमुखाः ॥ हृतराज्या ह्यंधकेन कृता निस्तेजसः प्रभो ॥ १७ ॥ पितेव पुत्रं परिरक्ष देव जहींद्र शत्रुं सह पुत्रपौत्रैः ॥ तथेति चोक्तः कमलासनेन सुरासुरैर्वंदितपादपद्मः ॥ १८ ॥ शंखं चक्रं गदां चापं संगृह्य परमेश्वरः ॥ उत्थितो भोगपर्यंका देवानां पुरतस्तदा ॥ १९ ॥ ॥ श्रीवासुदेव उवाच ॥ ॥ पाताले यदि वा मर्त्ये नाके वा यदि तिष्ठति ॥ तं हनिष्याम्यहं पापं येन संतापिताः सुराः ॥ २० ॥ स्वं स्थानं यांतु गीर्वाणाः संतुष्टा भावितौजसः ॥ विष्णोस्तद्वचनं श्रुत्वा ब्रह्माद्यास्ते सवासवाः ॥ २१ ॥ स्वयानैस्तु हरिं नत्वा हृदि तुष्टा दिवं ययुः ॥२२॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गी र्वाण स्वर्गमनवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कस्मिन्स्थानेऽवसद्देव सोंऽधको दैत्यपुंगवः ॥ सर्वान्देवांश्च निर्जित्य कस्मिन्स्थाने समास्थितः ॥ १ ॥ ॥ श्रीमहेश उवाच ॥ ॥ प्रविष्टो दानवो यत्र कथयामि नराधिप ॥ पातालंलोकमा श्रित्य कन्याविध्वंसते तु सः ॥ २ ॥ तत्र स्थितं तं विज्ञाय चापमादाय केशवः ॥ व्यसृजद्बाणमाग्नेयं दह्यतामिति चिंतयन् ॥ ३ ॥ दह्यमानोऽ ग्निना सोऽपि वारुणास्त्रं स संदधे ॥ वारुणास्त्रेण महता आग्नेयं शमितं तदा ॥ ४ ॥ ततोऽसौ चिंतयामास केन बाणो विसर्जितः ॥ कस्येषा पौरुषी शक्तिः को यास्यति यमालयम् ॥ ५ ॥ ततोंऽधको नृपे क्रुद्धो बाणमार्गेण निर्गतः ॥ स दृष्ट्वा बाणमार्गेण चापहस्तं जनार्दनम् ॥ ६ ॥ ॥ ॥ अंधक उवाच ॥ ॥ न शर्म्म लप्स्यसे ह्यद्य मया दृष्टश्चाऽभिरक्षितः ॥ न शक्रोषि तथा गन्तुं नागः शार्दूलदर्शनात् ॥ ७ ॥ अगाच्छति यथा भक्ष्यं मार्जारस्य च मूषिकः ॥ शक्रोपि तथा यातुं संस्थितस्त्वं ममाऽग्रतः ॥ ८ ॥ अहं त्वां प्रेषयिष्यामि यममार्गे सुदारुणे ॥ अहमन्वे षयिष्यामि किल यास्यामि ते गृहम् ॥ ९ ॥ उपनीतोऽसि कालेन संग्रामे मम केशव ॥ ये त्वया निर्जिताः पूर्वं दानवा अप्यनेकशः ॥१०॥ न भवंति पुमांसस्ते स्त्रियस्ताश्चैव केशव ॥ परं न शस्त्रसंग्रामं करिष्यामि त्वया सह ॥ ११ ॥ वदतो दानवेंद्रस्य न चुकोप स केशवः ॥ अयुध्यमानं तं दृष्ट्वा चिंतयामास दानवः ॥ १२ ॥ द्वंद्वयुद्धं करिष्यामि निश्चित्य युयुधे नृप ॥ स कृष्णेन पदाक्षिप्तः पतितः पृथिवीतले ॥ १३ ॥ मुहूर्त्तात्स समाश्वस्य उत्थायेदं व्यचिंतयत् ॥ अशक्तो द्वंद्वयुद्धाय ततः साम प्रयुक्तवान् ॥ पाणिभ्यां संपुटं कृत्वा साष्टांगं प्रणतः शुचिः ॥ १४ ॥ अन्धक उवाच॥ ॥ जय कृष्णाय हरये विष्णवे जिष्णवे नमः ॥ हृषीकेश जगद्धात्रे अच्युताय महात्मने ॥१५॥ नमः पंकजनाभाय नमः पंकजमालिने॥ जनार्दनाय श्रीशाय श्रीपते पीतवाससे ॥ १६ ॥ गोविंदाय नमो नित्यं नमो जलधिशायिने ॥ नमः करालवक्त्राय नरसिंहाय नादिने ॥ १७ ॥ शार्ंगिणे सितवर्णाय शंखचक्रगदाभृते ॥ नमो वामनरूपाय यज्ञरूपाय ते नमः ॥ १८ ॥ नमो वराहरूपाय क्रांतलोकत्रयाय च ॥ व्यासाशेषदिगंताय केशवाय नमोनमः ॥ १९ ॥ वासुदेव नमस्तुभ्यं नमः कैटभनाशिने ॥ लक्ष्म्यालय सुरश्रेष्ठ नमस्ते सुरनायक ॥ २० ॥ विष्णोर्देवाधिदेवस्य प्रमाणं येऽपि कुर्वते ॥ प्रजापतेर्जगद्धातुस्तेषामपि नमाम्यहम् ॥ २१ ॥ समस्तभूतदेवस्य वासुदेवस्य धीमतः ॥ प्रणामं ये प्रकुर्वंति तेषामपि नमाम्यहम् ॥ २२ ॥ तस्य यज्ञवराहस्य विष्णोरमिततेजसः ॥ प्रणामं ये प्रकुर्वंति तेषामपि नमाम्यहम् ॥ २३ ॥ गुणानां हि निधानाय नमस्तेऽस्तु पुनःपुनः ॥ कारुण्यांबुनिधे देव सर्वभक्तिप्रियाय च ॥ २४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तुष्टस्ते दानवेंद्राहं वरं वृणु यथेप्सितम् ॥ ददामि ते वरं नूनमपि त्रैलोक्यदुर्लभम् ॥ २५ ॥ ॥ अन्धक उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरं दास्यसि चेप्सि तम् ॥ तदा दद्स्व मे देव युद्धं परमशोभनम् ॥ त्वद्धस्तपूतो येनाहं लोकान्गंताऽस्मि शोभनान् ॥ २६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कथं ददामि ते युद्धं तोषितोऽहं त्वया पुनः ॥ न त्वां तु प्रभवेत्कोपः कथं गृह्णामि तेंऽधक ॥ ३७ ॥ यदि ते वर्त्तते बुद्धिर्युद्धं प्रति न संशयः ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri

ततो गच्छस्व युद्धाय देवं प्रति महेश्वरम् ॥ २८ ॥ ॥ अन्धक उवाच ॥ ॥ न तत्र सिद्ध्यते कार्यं देवं प्रति महेश्वरम् ॥ २९ ॥ ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ पुत्र त्वं शिखरं गत्वा धूनयस्व बलेन च ॥ ३० ॥ विधूते तत्र देवेशः कोपं कर्त्ता सुदारुणम् ॥ कोपितः शंकरो रौद्रं युद्धं दास्यति दानव ॥ ३१ ॥ विष्णुवाक्यादसौ पापो गतो यत्र महेश्वरः ॥ कैलासशिखरं प्राप्य धुनोति स्म मुहुर्मुहुः ॥ ३२ ॥ धूनिते तत्र शिखरे कंपितं भुवनत्रयम् ॥ निपेतुः शिखराग्राणि कंपमानान्यनेकशः ॥ ३३ ॥ चत्वारः सागराः क्षिप्रमेकीभूता महीपते ॥ निपेतुरुल्कापाताश्च पादपा अप्यनेकशः ॥ ३४ ॥ उमया सहितो देवो विस्मयं परमं गतः ॥ गाढमालिंग्य गिरिजा देवं वचनमब्रवीत् ॥ ३५ ॥ किमर्थं कम्पते शैलः किमर्थं कम्पते धरा ॥ किमर्थं कंपते नागो मर्त्यः पातालमेव च ॥ किं वा युगक्षयो देव तन्ममाख्यातुमर्हसि ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ कस्यैषा दुर्मतिर्जाता क्षिप्तः सर्पमुखे करः ॥ ललाटे च कृतं वर्म्म स यास्यति यमालयम् ॥ ३७ ॥ कैलासमाश्रितो येन सुप्तोऽहं येन बोधितः ॥ तं वधिष्ये न संदेहः सम्मुखो वा भवेद्यदि ॥ ३८ ॥ चिन्तयामास देवेशो ह्यंधकोऽयं न संशयः ॥ उपायं चिंतयामास येनाऽसौ वध्यते क्षणात् ॥ ३९ ॥ आगताश्च सुराः सर्वे ब्रह्माद्या वसुभिः सह ॥ रथं देवमयं कृत्वा सर्वलक्षणसंयुतम् ॥ ४० ॥ केचिद्देवाः स्थिताश्चक्रे केचित्तुण्डाग्रपार्श्वयोः ॥ केचिन्नाभ्यां स्थिता देवाः केचिद्धुर्येषु संस्थिताः ॥ ४१ ॥ धुरीषु निश्चलाः केचित्केचिद्यूपेषु संस्थिताः ॥ केचित्स्यंदनसंस्तंभाः केचित्स्यंदनवेष्टकाः ॥ ४२ ॥ आमलसारकेऽन्येऽपि अन्येऽपि कलशे स्थिताः ॥ रिपोर्भयंकरं दिव्यं ध्वजमालादिशोभितम् ॥ ४३ ॥ रथं देवमयं कृत्वा तमारूढो जगद्गुरुः ॥ निर्ययौ दानवो यत्र कोपाविष्टो महेश्वरः ॥ ४४ ॥ तिष्ठतिष्ठेत्युवाचाऽथ क्व प्रयास्यसि दुर्मते ॥ शरासनं करे गृह्य शरांश्चिक्षेप दानवे ॥४५॥ दानवेऽधिष्ठिते युद्धे शरैश्चिच्छेद सायकान् ॥ शरासारेण तत्रैव अंधकश्छादितस्तदा ॥ ४६ ॥ न तत्र दृश्यते सूर्यो नाकाशं न च चंद्रमाः ॥ आग्नेयमस्त्रं व्यसृजद्दानवोपि शिवं प्रति ॥ ४७ ॥ दह्यमानाः शरांगारैस्तत्रसुः सर्वदेवताः ॥ रक्षरक्ष महादेव दह्यमानांस्तु दानवात् ॥ ४८ ॥ ततो देवाधिदेवोऽसौ वारुणास्त्रमयोऽजयत् ॥ वारुणाऽस्त्रेण निमिषादाग्नेयं नाशितं तदा ॥ ४९ ॥ दानवेन तदा मुक्तं वायव्यास्त्रं रणाजिरे ॥ वारुणं च गतं तात वायव्यास्त्रविनाशितम् ॥ ५० ॥ देवो व्यसर्जयत्सार्पं क्रोधाविष्टेन चेतसा ॥ मारुतं नाशितं बाणैः सर्प्पैस्तत्र न संशयः ॥ ५१ ॥ दानवेन ततो मुक्तं गरुडास्त्रं च लीलया ॥ गारुडास्त्रं च तद्दृष्ट्वा सार्प्पं नैव व्यदृश्यत ॥ ५२ ॥ ततो देवाधिदेवेन नारसिंहं विसर्जितम् ॥ नारसिंहास्त्रबाणेन गारुडास्त्रं प्रशामितम् ॥ ५३ ॥ अस्त्रमस्त्रेण शाम्येत न बाध्येत परस्परम् ॥ महद्युद्धमभूत्तात सुरासुरभयंकरम् ॥ ५४ ॥ चक्रनालीकनाराचैस्तोमरैः खड्गमुद्गरैः ॥ वत्सदंतैस्तथा भल्लैः कर्णिकारैश्च शोभनैः ॥ ५५ ॥ एवं न शक्यते हन्तुं दानवो विविधायुधैः ॥ तदा ज्वालाकरालाश्च खड्गनाराचतोमराः ॥ ५६ ॥ वृषांकेन विमुक्तास्तु समरे दानवं प्रति ॥ न संस्पृशंति शस्त्राणि गात्रं गौडवधूरिव ॥ ५७ ॥ आयुधानि ततस्त्यक्त्वा बाहुयुद्धमुपस्थितौ ॥ करं करेण संगृह्य प्रहरन्तौ स्वमुष्टिभिः ॥ रणप्रयोगैर्युध्यन्तौ युयुधाते शिवांधकौ ॥ ५८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अन्धकं प्रति देवेशश्चिन्तयामास निग्रहम् ॥ हनिष्यामि न संदेहो दुष्टात्मानं न संशयः ॥ ५९ ॥ स शिवेन यदा क्षिप्तः पतितः पृथिवीतले ॥ ऊर्ध्वबाहुरधोवक्त्रो दानवो नृपसत्तम ॥ ६० ॥ क्रोधाविष्टेन देवेशः संग्रामे देवशत्रुणा ॥ कक्षयोः कुहरे क्षिप्त्वा बन्धेनाऽऽक्रम्य पीडितः ॥६१॥ निस्पंदश्चा भवद्देवो मूर्च्छायुक्तो महेश्वरः ॥ मूर्च्छापन्नं तु तं ज्ञात्वा चिन्तयामास दानवः॥६२॥ हाहा कष्टं कृतं मेऽद्य दुष्कृतं पापकर्मणा ॥ किं करोमि कथं कर्म्म कस्मिन्स्थाने तु मोचये ॥ ६३ ॥ गृहीत्वा देवमुत्संगे गतः कैलासपर्वतम् ॥ शय्यायां शंकरं न्यस्य निर्ययौ दैत्यराट्ततः ॥६४॥ शय्यायां पतितो देवः प्रपेदे वेदनां ततः ॥ तावद्ददर्श चात्मानं स्वकीयभवनस्थितम् ॥६५॥ पराभवः कृतो मह्यं कथं तेन दुरात्मना ॥ क्रोधावेगसमाविष्टो निर्ययौ दानवं प्रति ॥ ६६ ॥ आयसीं लगुडीं गृह्य प्रभुर्भारसहस्रजाम् ॥ दानवं च ततो दृष्ट्वा प्राक्षिपत्तस्य मूर्द्धनि ॥ ६७ ॥ खड्गेन ताडयामास दानवः प्रहसन्रणे ॥ देवेनाथस्मृतं चाऽस्त्रं कौच्छेराख्यं महाहवे ॥ ६८ ॥ दीप्यमानं समुत्सृज्य हृदये ताडितः क्षणात् ॥ ततः स ताडिस्तेन रुधिरोद्गारमुद्वमन्॥६९॥पतितोऽधोमुखो भूत्वा ततः शूलेन भेदितः॥ पुनश्च देवदेवेन शूलेन द्विदलीकृतः॥७०॥शूलाग्रेऽसौ स्थितः पापो भ्रांतवांश्चक्रवत्तदा॥येये भूम्यां पतंति स्म तत्कायाद्रक्तबिंदवः॥७१॥तेते सर्वे समुतस्थुर्दानवाः शस्त्रपाणयः॥व्याकुलस्तु ततो देवो दानवेन तरस्विना॥७२॥देवेनाथ स्मृता दुर्गा चामुंडा भीषणानना॥आयाता भीषणाकारा नानायुधविराजिता ॥ ॥ ७३ ॥ महादंष्ट्रा महाकाया पिंगाक्षी लंबकर्णिका ॥ आदेशो दीयतां देव को यास्यति यमालयम् ॥ ७४ ॥ ॥ ईश्वर उवाच ॥ ॥ पिबास्य रुधिरं भद्रे यथेष्टं दानवस्य च॥ निपतद्रुधिरं भूमौ दुर्गे गृह्णीष्व मा चिरम् ॥७५॥ निहन्मि दानवं यावत्साहाय्यं कुरु सुन्दरि ॥ एवमुक्ता तु सा दुर्गा पपौ च रुधिरं ततः ॥७६॥ निहता दानवाः सर्वे देवेशेन सहस्रशः ॥ अन्धकोऽपि च तान्दृष्ट्वा दानवानवनिं गतान्॥ततो वाग्भिः प्रतुष्टाव देवदेवं महेश्वरम् ॥ ७७ ॥ ॥ अंधक उवाच ॥ जयस्व देवदेवेश उमार्द्धार्द्धशरीरधृक् ॥ नमस्ते देवदेवेश सर्वाय त्रिगुणात्मने ॥ ७८ ॥ वृषभासनमारूढ शशांककृतशेखर ॥ जय खट्वांगहस्ताय गंगाधर नमोऽस्तु ते ॥ ७९ ॥ नमो डमरुहस्ताय नमः कपालमालिने ॥ स्मरदेहविनाशाय महेशाय नमोऽस्तु ते ॥ ८० ॥ पूष्णो दंतनिपाताय गणनाथाय ते नमः ॥ जय स्वरूपदेहाय अरूपबहुरूपिणे ॥ ८१ ॥ उत्तमांगविनाशाय विरिंचेरपि शंकर ॥ श्मशानवासिने नित्यं नित्यं भैरवरूपिणे ॥ ८२ ॥ त्वं सर्वगोऽसि त्वं कर्त्ता त्वं हर्त्ता नान्य एव च ॥ त्वं भूमिस्त्वं दिशश्चैव त्वं गुरुर्भार्गवस्तथा ॥ ८३ ॥ सौरिस्त्वं देवदेवेश भूमिपुत्रस्तथैव च ॥ ऋक्षग्रहादिकं सर्वं यद्दृश्यं तत्त्वमेव च ॥ ८४ ॥ एवं स्तुतिं तदा कृत्वा देवं प्रति स दानवः ॥ संहताभ्यां तु पाणिभ्यां प्रणनाम महेश्वरम् ॥ ८५ ॥ ॥ ईश्वर उवाच ॥ ॥ साधुसाधु महासत्त्व वरं याचस्व दानव ॥ दाताऽहं याचकस्त्वं हि ददामीह यथेप्सितम् ॥ ८६ ॥ ॥ अंधक उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ तदात्मसदृशोऽहं ते कर्त्तव्यो नाऽपरो वरः ॥ ८७ ॥ भस्मी जटी त्रिनेत्री च त्रिशूली च चतुर्भुजः ॥ व्याघ्रचर्मोत्तरीयश्च नागयज्ञोपवीतकः ॥ ८८ ॥ एतदिच्छाम्यहं सर्वं यदि तुष्टो महेश्वर ॥ ८९ ॥ ॥ ईश्वर उवाच ॥ ॥ ददामि ते वरं ह्यद्य यस्त्वया याचितोऽनघ ॥ गणेषु मे स्थितः पुत्र भृंगीशस्त्वं भविष्यसि ॥ ९० ॥ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाख्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डेऽन्धकवधतद्वरप्रदानवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अंधकं तु निहत्याथ देवदेवो महेश्वरः ॥ उमया सहितो रुद्रः कैलासमगमन्नगम् ॥ १ ॥ आगताश्च ततो देवा ब्रह्माद्याश्च सवासवाः ॥ हृष्टास्तुष्टाश्च ते सर्वे प्रणेमुः पार्वतीपतिम् ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ उपाविशंतु ते सर्वे ये केचन समागताः ॥ निहतो दानवो ह्येष गीर्वाणार्थे पितामह ॥ ३ ॥ रक्तेन तस्य मे शूलं निर्म्मलं नैव जायते ॥ शुभव्रततपोजप्यरतो ब्रह्मन्मया

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इतः ॥ ४ ॥ कर्तुमिच्छाम्यहं सम्यक्तीर्थया । चतुर्मुख ॥ आगच्छंतु मया सार्द्धं ये सूर्यमिह संगताः ॥ ५ ॥ इत्युक्त्वा देवदेवेशः प्रभासं प्रति निर्ययौ ॥ प्रभासाद्यानि तीर्थानि गंगासागरमध्यतः ॥ ६ ॥ अवगाह्यापि सर्वाणि नैर्मल्यं नाभवन्नृप ॥ नर्मदायां ततो गत्वा देवो देवैः समन्वितः ॥ ७ ॥ उत्तरं दक्षिणं कूलमवागाहत्प्रयत्नतः ॥ गतस्तु दक्षिणे कूले पर्वते भृगुसंज्ञितम् ॥ ८ ॥ तत्र स्थित्वा महादेवो देवैः सह महीपते ॥ श्रांत्वा श्रांत्वा चिरं श्रांतो निर्विण्णो निषसाद ह ॥ ९ ॥ मनोहारि यतः स्थानं सर्वेषां वै दिवौकसाम् ॥ तीर्थं विशिष्टं तन्मत्त्वा स्थितो देवो महेश्वरः ॥ १० ॥ गिरिं विव्याध शूलेन भिन्नं तेन रसातलम् ॥ निर्मलं चाऽभवच्छूलं न लेपो दृश्यते क्वचित् ॥ ११ ॥ देवैराह्वानिता तत्र महापुण्या च भारती ॥ पर्वताग्निःसृता तत्र महापुण्या सरस्वती ॥ १२ ॥ द्वितीयः संगमस्तत्र यत्र वेण्यां सितासितः ॥ तत्र ब्रह्मा स्वयं देवो ब्रह्मेशं लिंगमुत्तमम् ॥ १३ ॥ संस्थापयामास पुण्यं सर्वदुःखप्रमुक्तमम् ॥ तस्य याम्ये दिशो भागे स्वयं देवो जनार्दनः ॥ १४ ॥ तिष्ठते च सदा तत्र विष्णुपादाग्रसंस्थिता ॥ अंभसो न भवेन्मार्गः कुंडमध्यस्थितस्य च ॥ १५ ॥ शूलाग्रेण कृता रेखा ततस्तोयं वहेन्नृप ॥ तत्तोयं च गतं तत्र यत्र रेवा महानदी ॥ १६ ॥ जललिंगं महापुण्यं चक्रतीर्थं नृपोत्तम ॥ शूलभेदे च देवेशः स्नानं कुर्याद्यथाविधि ॥ १७ ॥ आत्मानं मन्यते शुद्धं न किंचित्कल्मषं कृतम् ॥ तस्यैवोत्तरकाष्ठायां देवदेवो जगद्गुरुः ॥ १८ ॥ आत्मना देवदेवेशः शूलपाणिः प्रतिष्ठितः ॥ सर्वतीर्थेषु तत्तीर्थं सर्वदेवमयं परम् ॥ १९ ॥ सर्वपापहरं पुण्यं सर्वदुःखप्रमुक्तमम् ॥ तत्र तीर्थे प्रतिष्ठाप्य देवदेवं जगद्गुरुः ॥ २० ॥ रक्षापालांस्ततो मुक्त्वा शतं साष्टविनायकान् ॥ क्षेत्रपालाः शतं साष्टं तद्रक्षंति प्रयत्नतः ॥ २१ ॥ विघ्नास्तस्योपजायंते यस्तत्र स्थातुमिच्छति ॥ केचित्कुष्ठान्विता भु व्याग्राः केचित्कृपीषु च ॥ २२ ॥ केचित्सभां प्रकुर्वंति केचिद्व्याजने रताः ॥ परोक्षवादं कुर्वंति केऽपि हिंसारताः सदा ॥ २३ ॥ परदाररताः केचित्केचिद्वृत्तिविहिंसकाः ॥ अन्ये केचिद्वदंत्येवं कथं तीर्थेषु गम्यते ॥ २४ ॥ क्षुधया पीड्यते भार्या पुत्रभृत्यादयस्तदा ॥ मोहजालेषु योज्यंते एवं देवगणैर्नराः ॥ २५ ॥ पापाचाराश्च ये मर्त्याः स्नानं तेषां न जायते ॥ संरक्षंति च तत्तीर्थं देवभूत्यगणाः सदा ॥ २६ ॥ धन्याः पुण्याश्च ये मर्त्यास्तेषां स्नानं प्रजायते ॥ सरस्वत्या भोगवत्या देवनद्या विशेषतः ॥ २७ ॥ अयं तु संगमः पुण्यो यथा वेण्यां सितासितः ॥ दृष्ट्वा तीर्थं तु ते सर्वे गीर्वाणा हृष्टचेतसः ॥ २८ ॥ देवस्य सन्निधौ भूत्वा वर्णयामासुरुत्तमम् ॥ इदं तीर्थं तु देवेश गयाती र्थेन ते समम् ॥ २९ ॥ गुह्याद्गुह्यतमं तीर्थं न भूतं न भविष्यति ॥ शूलपाणिः समभ्यर्च्य इन्द्राद्यैरप्सरोगणैः ॥ ३० ॥ यक्षकिंनरगंधर्वैर्दिक्पालैर्लोक पैरपि ॥ नृत्यगीतैस्तथा स्तोत्रैः सर्वैश्चापि सुरासुरैः ॥ ३१ ॥ पूज्यमानो गणैः सर्वैः सिद्धैर्नागैर्महेश्वरः ॥ देवेन भेदितं तत्र शूलाग्रेण नराधिप ॥ ३२ ॥ त्रिधा यत्रेक्ष्यतेऽद्यापि ह्यावर्त्तः सुरपूरितः ॥ कुंडत्रयं नरव्याघ्र महत्कलकलान्वितम् ॥ ३३ ॥ सर्वपापक्षयकरं सर्वदुःखप्रमुक्तमम् ॥ तत्र तीर्थे तु यः स्नाति उपवासपरायणः ॥ ३४ ॥ दीक्षामंत्रविहीनोऽपि मुच्यते चाब्दिकादघात् ॥ ये पुनर्विधिवत्स्नांति मंत्रैः पंचभिरेव च ॥ ३५ ॥ वेदोक्तैः पंचभिर्मंत्रैः सहिरण्यघटैः शुभैः ॥ अक्षरैर्दशभिश्चैव पद्भिर्वा त्रिभिरेव वा ॥ ३६ ॥ पृथग्भूतैर्द्विजातीनां तीर्थे कार्यं नराधिप ॥ ब्रह्मक्षत्र विशां वाऽपि स्त्रीशूद्राणां तथैव च ॥ ३७ ॥ पुरुषाणां त्रयीं ध्यात्वा स्नानं कुर्याद्यथाविधि ॥ दशाक्षरेण मंत्रेण ये पिबंति जलं नराः ॥ ३८ ॥ ते गच्छंति परं लोकं यत्र देवो महेश्वरः ॥ केदारे च यथा पीतं रुद्रकुंडे तथैव च ॥ ३९ ॥ पंचरेफसमायुक्तं क्षकारं सुरपूजितम् ॥ ॐकारेण समा युक्तमेतद्वेद्यं प्रकीर्तितम् ॥ ४० ॥ यस्तत्र कुरुते स्नानं विधियुक्तो जितेंद्रियः ॥ तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः ॥ ४१ ॥ कुलानां तारये द्विंशं दशपूर्वान्दशापरान् ॥ गयादिपंचस्थानेषु यः श्राद्धं कुरुते नरः ॥ ४२ ॥ स तत्र फलमाप्नोति शूलभेदे न संशयः ॥ यस्तत्र विधिना युक्तो दद्याद्दानानि भक्तितः ॥ ४३ ॥ तदक्षयं फलं तत्र सुकृतं दुष्कृतं तथा ॥ गयाशिरो यथा पुण्यं पितृकार्येषु सर्वदा ॥ ४४ ॥ शूलभेदं तथा पुण्यं स्नानदानादितर्पणैः ॥ भक्त्या ददाति यस्तत्र कांचनं गां महीं तिलान् ॥ ४५ ॥ आसनोपानहौ शय्यां वराश्चान्क्षत्रियस्तथा ॥ वस्त्रयुग्मं च धान्यं च गृहं पूर्णं प्रयत्नतः ॥ ४६ ॥ सयोक्त्रं लांगलं दद्यात्कृष्टां चैव वसुंधराम् ॥ दानान्येतानि यो दद्याद्ब्राह्मणे वेदपारगे ॥ ४७ ॥ श्रोत्रिये कुलसंपन्ने शुचि ष्मति जितेंद्रिये ॥ श्रुताध्ययनसंपन्ने दंभहीने क्रियान्विते ॥ त्रयोदशाहःस्वेकैकं त्रयोदशगुणं भवेत् ॥ ४८ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शूलभेदोत्पत्तिमाहात्म्यवर्णनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ॥ ॥ ॥ उत्तानपाद उवाच ॥ ॥ द्विजाश्च कीदृशाः पूज्या अपूज्याः कीदृशाः स्मृताः ॥ श्राद्धे वैवाहिके कार्ये दाने चैव विशेषतः ॥ १ ॥ यदि श्रद्धा भवेद्देवयोगाच्छ्राद्धादिके विधौ ॥ एतदाख्याहि मे देव कस्य दानं न दीयते ॥ २ ॥ ॥ ईश्वर उवाच ॥ ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ ३ ॥ यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला ॥ यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥ ४ ॥ यथाऽनृणे बीजमुप्त्वा वप्ता न लभते फलम् ॥ तथाऽनृचे हविर्दत्त्वा न दाता लभते फलम् ॥ ५ ॥ रोगी हीनाऽतिरिक्तांगः काणः पौनर्भवस्तथा ॥ अवकीर्णी श्यावदंतः सर्वाशी वृषलीपतिः ॥ ६ ॥ मित्रध्रुक्पिशुनः सोमविक्रयी परनिंदकः ॥ पितृमातृगुरुत्यागी नित्यं ब्राह्मणनिंदकः ॥ ७ ॥ शूद्रान्नं मंत्रसंयुक्तं यो विप्रो भक्षयेन्नृप ॥ सोऽस्पृश्यः कर्मचांडालः त्यृष्ट्वा स्नानं समाचरेत् ॥ ८ ॥ कुनखी वृषली स्तेयी वार्द्धुष्यः कुंडगोलकौ ॥ महादानरतो यश्च यश्चात्महनने रतः ॥ ९ ॥ भृतकाध्यापकः क्लीवः कन्यादूष्यभिशस्तकः ॥ एते विप्राः सदा त्याज्याः परिभाव्य प्रयत्नतः ॥ १० ॥ प्रतिग्रहं गृहीत्वा तु वाणिज्यं यस्तु कारयेत् ॥ तस्य दानं न दातव्यं वृथा भवति तस्य तत् ॥ ११ ॥ श्रुताध्ययन संपन्ना ये द्विजा वृत्ततत्पराः ॥ तेषां यदीयते दानं सर्वमक्षयतां व्रजेत् ॥ १२ ॥ दरिद्रान्भर भूपाल मा समृद्धान्कदाचन ॥ व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥ १३ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कीदृशोऽथ विधिस्तत्र तीर्थश्राद्धस्य का क्रिया ॥ दानं च दीयते यद्वत्तन्ममाख्याहि शंकर ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ श्राद्धं कृत्वा गृहे भक्त्या शुचिश्चाऽपि जितेंद्रियः ॥ गुरुं प्रदक्षिणीकृत्य भोज्य सीमांतके ततः ॥ १५ ॥ वाग्यतः प्रव्रजेत्तावद्यावत्सीमां न लंघयेत् ॥ शूलभेदं ततो गत्वा स्नानं कुर्याद्यथाविधि ॥ १६ ॥ पंचस्थानेषु च श्राद्धं दिव्यकव्या दिभिः क्रमात् ॥ पिंडदानं च यः कुर्यात्पायसैर्मधुसर्पिषा ॥ १७ ॥ पितरस्तस्य तृप्यंति द्वादशाब्दानि पंच च ॥ अक्षतैर्बदरैर्बिल्वै रिंगुदैर्मधुसर्पिषा ॥ १८ ॥ सोपि तत्फलमाप्नोति तीर्थेऽस्मिन्नाऽत्र संशयः ॥ उपानहौ च यो दद्या द्ब्राह्मणेभ्यः प्रयत्नतः ॥ १९ ॥ सोऽपि स्वर्गमवाप्नोति ह्याऽऽरूढो न संशयः ॥ शय्यामथं च यो दद्याच्छत्रिकां वा विशेषतः ॥ २० ॥ गच्छेद्विमानमारूढः सोप्सरो वृन्दवेष्टितः ॥ उत्तमं यो गृहं दद्यात्सप्तधान्यसमन्वितम् ॥ २१ ॥ स्वेच्छया मे वसेल्लोके कांचने भवने हि सः ॥ तिलधेनुं च यो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दद्यात्सवत्सां वस्त्रसंवृताम् ॥ २२ ॥ नाकपृष्ठे वसेत्तावद्यावदाभूतसंप्लवम् ॥ गृहे वा यदि वाऽरण्ये तीर्थवर्त्मनि वा नृप ॥ २३ ॥ तोयमन्नं च यो दद्याद्यमलोकं स नेक्षते ॥ सर्वदानानि दीयन्ते तेषां फलमवाप्यते ॥ २४ ॥ उदकं चान्नदानं च दद्यादभयमेव च ॥ अन्नदानात्परं दानं न भूतं न भविष्यति ॥ २५ ॥ कन्यादानं तु यः कुर्याद्वृषं वा यः समुत्सृजेत् ॥ तस्य वासो भवेत्तत्र यत्राऽहमिति नाऽन्यथा ॥ २६ ॥ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कन्यादानं कथं स्वामिन्कर्त्तव्यं धार्मिकैः सदा ॥ परिग्रहो यथा पोष्यैः कन्योद्वाहस्तथैव च ॥ २७ ॥ अन्यत्पृच्छामि देवेश कस्य कन्या न दीयते ॥ दातव्यं कुत्र तद्देव कस्मै दत्तमथाक्षयम् ॥ २८ ॥ उत्तम मध्यमं वाऽपि कनीयः स्यात्कथं विभो ॥ राजसं तामसं वाऽपि निःश्रेयसमथाऽपि वा ॥ २९ ॥ ॥ ईश्वर उवाच ॥ ॥ सर्वेषामेव दानानां कन्यादानं विशिष्यते ॥ यो दद्यात्परया भक्त्याभिगम्य तनयां निजाम् ॥ ३० ॥ कुलीनाय सुरूपाय गुणज्ञाय मनीषिणे ॥ सुलग्ने सुमुहूर्ते च दद्यात्कन्यामलंकृताम् ॥ ३१ ॥ अश्वान्गाश्च वासांसि योऽत्र दद्यात्स्वशक्तितः ॥ तस्य वासो भवेत्तत्र पदं यत्र निरामयम् ॥ ३२ ॥ येनाऽत्र दुहिता दत्ता प्राणेभ्योऽपि गरीयसी ॥ तेन सर्वमिदं दत्तं त्रैलोक्यं सचराचरम् ॥३३॥ यः कन्यार्थं ततो लब्ध्वा भिक्षते चैव तद्धनम् ॥ स भवेत्कर्मचण्डालः काष्टकीलो भवेन्मृतः ॥३४॥ गृहेऽपि तस्य योश्नीयाज्जिह्वालौल्यात्कथंचन ॥ चांद्रायणेन शुद्धयेत तप्तकृच्छ्रेण वा पुनः ॥ ३५ ॥ ॥ उत्तानपाद उवाच ॥ ॥ वित्तं न विद्यते यस्य कन्यैवास्ति च यद्गृहे ॥ कथं चोद्वाहनं तस्य न याच्ञां कुरुते यदि ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ अवित्तेनैव कर्त्तव्यं कन्योद्वहनकं नृप ॥ कन्यानाम समुच्चार्य न दोषाय कदाचन ॥ ३७ ॥ अभिगम्योत्तमं दानं यच्च दानमयाचितम् ॥ भविष्यति युगस्यांतस्तस्यांतो नैव विद्यते ॥ ३८ ॥ अभिगम्योत्तमं दानं स्मृतमाहूय मध्यमम् ॥ याच्यमानं कनीयः स्यादेहिदेहीति चाधमम् ॥ ३९ ॥ यथैवाऽश्माश्मना बद्धो निक्षिप्तो वारिमध्यतः ॥ द्वावंतौ निधनं यातस्तद्वदत्रमपात्रके ॥ ४० ॥ असमर्थे ततो दानं न प्रदेयं कदाचन ॥ दातारं नयतेऽधस्तादात्मानं च विशेषतः ॥ ४१ ॥ समर्थस्तारयेद्यो तु काष्टं शुष्कं यथा जले ॥ यथा नौश्च तथा द्विद्वान्प्रापयेदपरं तटम् ॥ ४२ ॥ आहिताग्निश्च गृह्णाति यः शूद्राणां प्रतिग्रहम् ॥ इह जन्मनि शूद्रोऽसौ मृतः श्वा चोपजायते ॥ ४३ ॥ वृथा क्लेशश्च जायेत ब्राह्मणे ह्यग्निहोत्रिणि ॥ असत्प्रतिग्रहं कुर्वन्युक्तं नीचस्य गर्हितम् ॥ ४४ ॥ अभोज्यः स भवेन्मर्त्यो दह्यते कारिषाऽग्निना ॥ कटकारो भवेत्पश्चात्सप्त जन्म न संशयः ॥ ४५ ॥ लज्जादाक्षिण्यलोभाद्य यदानं चोपरोधजम् ॥ भृत्येभ्यश्च तु यदानं तद्वृथा निष्फलं भवेत् ॥ ४६ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शूलभेदमाहात्म्ये पात्रापात्रपरीक्षादानादिनियमवर्णनंनाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ॐ ॥ ॥ ॥ उत्तानपाद उवाच ॥ ॥ काले तत्क्रियते कस्मिञ्छ्राद्धं दानं तथेश्वर ॥ यात्रा तत्र प्रकर्त्तव्या तिथौ यस्यां वदाऽशु तत् ॥ १ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ पितृतीर्थं यथा पुण्यं सर्वकामिकमुत्तमम् ॥ इदं तीर्थं तथा पुण्यं स्नानदानादितर्पणैः ॥ २ ॥ विशेषेण तु कुर्वीत श्राद्धं सर्वयुगादिषु ॥ मन्वन्तरादयो वत्स श्रूयंतां च चतुर्दश ॥ ३ ॥ अश्वयुक्कृष्णनवमी द्वादशी कार्त्तिकस्य च ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥४॥आषाढस्यैव दशमी माघस्यैव तु सप्तमी ॥ श्रावणस्याऽष्टमी कृष्णा तथाऽऽषाढस्य पूर्णिमा॥५॥फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी तथा ॥ ६ ॥ मन्वंतरादयश्चैते अनंतफलदाः स्मृताः ॥ अयने चोत्तरे राजन्दक्षिणे श्राद्धमाचरेत् ॥७॥ कार्त्तिकी च तथा माघी वैशाखस्य तृतीयिका ॥ पौर्णमासी च चैत्रस्य ज्येष्ठस्य च विशेषतः॥८॥अष्टकासु च संक्रांतौ व्यतीपाते तथैव च ॥ श्राद्धकालाइमे सर्वे दत्तमेष्वक्षयं स्मृतम् ॥९॥ मधुमासे सिते पक्ष एकादश्यामुपोषितः ॥ निशि जागरणं कुर्याद्विष्णुपादसमीपतः ॥ १० ॥ धूपदीपादिनैवेद्यैः सद्भालागुरुचन्दनैः ॥ अर्चां कुर्वंति ये विष्णोः पठेयुः प्राक्तनीं कथाम् ॥ ११ ॥ ऋग्यजुःसाममन्त्रोक्तं सूक्तं जपति यो द्विजः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ॥ प्रातः श्राद्धं प्रकुर्वीत द्विजान्संपूज्य यत्नतः ॥ दानं दद्याद्यथाशक्ति गोहिरण्यांबरादिकम् ॥ १३ ॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ श्राद्धदस्तु व्रजेत्तत्र यत्र देवो जनार्दनः ॥ १४ ॥ त्रयोदश्यां ततो गच्छेद्वृषावासिनि लिंगके ॥ दृष्ट्वा मार्कंडमीशानं मुच्यते सर्वपातकैः ॥ १५ ॥ ॥ उत्तानपाद उवाच ॥ ॥ गुहामध्ये महादेव लिंगं परमशोभितम् ॥ येन प्रतिष्ठितं देव तन्ममाख्यातुमर्हसि ॥ ॥ १६ ॥ ॥ ईश्वर उवाच ॥ ॥ त्रिषु लोकेषु विख्यातो मार्कंडेयो मुनीश्वरः ॥ दिव्यं वर्षसहस्रं स तपस्तेपे सुदारुणम् ॥ १७ ॥ गुहामध्यं प्रविष्टोऽसौ योगाभ्यासमुपाश्रितः ॥ लिंगं तु स्थापितं तेन मार्कंडेश्वरसंज्ञितम् ॥ १८ ॥ तत्र स्नात्वा च यो भक्त्या सोपवासो जितेंद्रियः ॥ तत्र जागरणं कुर्वन्द्यादीपं प्रयत्नतः ॥ १९ ॥ देवस्य स्नपनं कुर्यादमृतैः पंचभिस्तथा ॥ यथाशक्त्या समालभ्य पूजां कुर्याद्यथाविधि ॥ २० ॥ स्वशाखोत्पन्नमंत्रैश्च जपं कुर्युर्द्विजातयः ॥ सावित्र्यष्टसहस्रं तु शताष्टकमथापि वा ॥ २१ ॥ एतत्कृत्वा नृपश्रेष्ठ जन्मनः फलमाप्नुयात् ॥ चतुर्दश्यां तु वै स्नात्वा पूजां कृत्वा यथाविधि ॥ २२ ॥ पात्रं परीक्ष्य दातव्यमात्मनः श्रेय इच्छता ॥ पितरस्तस्य तृप्यंति द्वादशाब्दान्यसंशयम् ॥ २३ ॥ ज्ञाता स गच्छते तत्र यत्र भोगाः सनातनाः ॥ गुहामध्ये प्रविष्टस्तु लोटयेच्चैव शक्तितः ॥ २४ ॥ नीले गिरौ हि यत्पुण्यं तत्समस्तं लभंति ते ॥ शूलभेदे तु यः कुर्याच्छ्राद्धं पर्वणिपर्वणि ॥ २५ ॥ विशेषाच्चैत्रमासांते तस्य पुण्यफलं शृणु ॥ केदारे चैव यत्पुण्यं गंगासागरसंगमे ॥ २६ ॥ सितासिते तु यत्पुण्यमन्यतीर्थे विशेषतः ॥ अर्बुदे विद्यते पुण्यं पुण्यं चामरपर्वते ॥ २७ ॥ गयादिसर्वतीर्थानां फलमाप्नोति मानवः ॥ विधिमंत्रसमायुक्तस्तर्पयेत्पितृदेवताः ॥ २८ ॥ कुलानां तारयेद्विंशं दशपूर्वान्दशापरान् ॥ दक्षिणस्यां ततो मूर्त्तौ शुचिर्भूत्वा समाहितः ॥ २९ ॥ न्यासं कृत्वा तु पूर्वोक्तं प्रदद्यादष्टपुष्पिकाम् ॥ शास्त्रोक्तैरष्टभिः पुष्पैर्मानसैः शृणु तद्यथा ॥ ३० ॥ वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः ॥ वानस्पत्यं भवेत्पष्ठं प्राजापत्यं तु सप्तमम् ॥ ३१ ॥ अष्टमं शिवपुष्पं स्यादेषां शृणु विनिर्णयम् ॥ वारिजं सलिलं ज्ञेयं सौम्यं मधुघृतं पयः ॥ ३२ ॥ आग्नेयं धूपदीपाद्यं वायव्यं चंदनादिकम् ॥ पार्थिवं कन्दमूलाद्यं वानस्पत्यं फलात्मकम् ॥ ३३ ॥ प्राजापत्यं तु पाठाद्यं शिवपुष्पं तु वासना ॥ अहिंसा प्रथमं पुष्प पुष्पमिंद्रियनिग्रहः ॥३४॥ तृतीयं तु दया पुष्पं क्षमा पुष्पं चतुर्थकम् ॥ ध्यानपुष्पं तपः पुष्पं ज्ञानपुष्पं तु सप्तमम् ॥ ३५ ॥ सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यंति देवताः ॥ भक्त्या तपस्विनः पूज्या ज्ञानेनश्च नराधिप ॥३६॥ छत्रमावरणं दद्याद्रुपानद्युगलं तथा ॥ तेन पूजितमात्रेण पूजिताः पुरुषास्त्रयः ॥ ३७ ॥ स्वर्गलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ शूलपाणेस्तु भक्त्या वै जाप्यं कुर्वंति ये नराः ॥ ३८ ॥ पंचामृतैः पंचगव्यैर्यक्षकर्दमकुंकुमैः ॥ समालभेत देवेशं श्रीखंडागुरुचंदनैः ॥ ३९ ॥ नानाविधैश्च ये पुष्पैरर्चां कुर्वंति शूलिनः ॥ निशि जागरणं कुर्युर्दीपदानं प्रयत्नतः ॥ ४० ॥ धूपनैवेद्यकं दद्यात्पठेत्पौराणिकीं कथाम् ॥ तत्र स्थाने स्थिता भक्त्या जपं कुर्वंति ये नरः ॥ ४१ ॥ श्रीसूक्तं पौरुषं सूक्तं पावमानं वृषाकपिम् ॥ वेदोक्तैश्चैव मन्त्रैश्च रौद्रीं वा बहुरूपिणीम् ॥ ४२ ॥ ब्राह्मणान्पूजयेद्दत्तया पूजयित्वा व्रजम्य च ॥ नानाविधैर्महाभोगैः शिवलोके महीयते ॥ ४३ ॥ अग्निमीत्यादिजाप्यानि ऋग्वेदी जपते तु यः ॥ रुद्रान्पुरुषसूक्तं च श्लोकाध्यायं च शुक्रियम् ॥ ४४ ॥ इष्ट्वा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दिक्मन्त्रौघं ज्योतिर्ब्राह्मणमेव च ॥ गायत्र्यं वे मधु चैव मंडलब्राह्मणानि च ॥ ४५ ॥ एताञ्जप्यांस्तु यो भक्त्या यजुर्वेदी जपेद्यदि ॥ देवव्रतं वामदेव्यं पुरुषर्षभमेव च ॥ ४६ ॥ बृहद्रथंतरं चैव यो जपेद्भक्तितत्परः ॥ स प्रयाति नरः स्थानं यत्र देवो महेश्वरः ॥ ४७ ॥ पादशौचं तथाऽभ्यंगं कुरुते योऽत्र भक्तितः ॥ गोदाने चैव यत्पुण्यं लभते नाऽत्र संशयः ॥ ४८ ॥ ब्राह्मणान्भोजयेत्तत्र मधुना पायसेन च ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ ४९ ॥ सुवर्णं रजतं वस्त्रं दद्याद्भक्त्या द्विजोत्तमे ॥ तर्प्पितास्तेन देवाः स्युर्मनुष्याः पितरस्तथा ॥ ॥ ५० ॥ चंद्रसूर्यग्रहे भक्त्या स्नानं कुर्वंति ये नराः ॥ देवार्चनं ये च कुर्युर्जपं होमं विशेषतः ॥ दद्यादानं यथाशक्ति ब्राह्मणे वेदपारगे ॥ ॥ ५१ ॥ अश्वं रथं गजं यानं तुलापुरुषमेव च ॥ शकटं यः प्रदद्याद्वा सप्तधान्यप्रपूरितम् ॥ ५२ ॥ सयोक्त्रं लांगलं दद्याद्युवानौ तु धुरंधरौ ॥ गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम् ॥ ५३ ॥ अपात्रे विदुषा किंचिन्न देयं भूतिमिच्छता ॥ यतोऽसौ सर्वभूतानि दधाति धरणी किल ॥५४॥ ततो विप्राय सा देया सर्वसस्यौघमालिनी ॥ अथाऽन्यच्छृणु राजेंद्र गोदानस्य तु यत्फलम् ॥ ५५॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते॥ तावद्द्यौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥ ५६ ॥ येन केनाप्युपायेन ब्राह्मणे तां समर्प्पयेत् ॥ पृथ्वी दत्ता भवेत्तेन सशैलवनकानना ॥ ५७ ॥ तारयेन्नियतं दत्ता कुलानामेकविंशतिम् ॥ रौप्यखुरों कांस्यदोहां सवस्त्रां च पयस्विनीम् ॥ ५८ ॥ ये प्रयच्छंति कृतिनो ह्यस्ते सूर्ये निशाकरे ॥ तेषां संख्यां न जानामि पुण्यस्याब्दशतैरपि ॥ ५९ ॥ सर्वस्याऽपि हि दानस्य संख्याऽस्तीह नराधिप ॥ चंद्रसूर्योपरागे च दानसंख्या न विद्यते ॥ ॥ ६० ॥ यत्र गौर्दृश्यते राजन्तत्सर्वतीर्थानि तत्र हि ॥ तत्र पर्वं विजानीयान्नाऽत्र कार्या विचारणा ॥ ६१ ॥ पुनः स्मृत्वा तु तत्तीर्थं यः कुर्यादमनं नरः ॥ अथवा म्रियते योऽत्र रुद्रस्याऽनुचरो भवेत् ॥ ६२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे शूलभेदे दानधर्मप्रशंसावर्णनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यदाख्यानकं वक्ष्ये पुरावृत्तं नराधिप ॥ सकुटुंबो गतः स्वर्गं मुनिर्यत्र महातपाः ॥ १ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कथं नाकं गतो विप्रः सकुटुंबो महानृपिः ॥ कौतुकं परमं देव कथयस्व मम प्रभो ॥ २ ॥ ॥ ईश्वर उवाच ॥ चित्रसेन इति ख्यातः काशीराजः पुराऽभवत् ॥ शूरो दाता सुधर्मात्मा सर्व कामसमृद्धिमान् ॥ ३ ॥ सा पुरी जनसंकीर्णा नाना रत्नोपशोभिता ॥ वाराणसीति विख्याता गंगातीरमुपाश्रिता ॥ ४ ॥ शरच्चंद्रप्रतीकाशा विद्वज्जनविभूषिता ॥ इन्द्रयष्टिसमाकीर्णा गोपगोकुलसंवृता ॥ ५ ॥ वहुध्वजसमाकीर्णा वेदध्वनिनिनादिता ॥ वणिग्जनैर्वहुविधैः क्रयविक्रयशालिनी ॥ ६ ॥ यंत्राऽऽदानैः प्रतोलीभिरुच्चैश्चान्यैः सुशोभिता ॥ देवतायतनैर्दिव्यैराश्रमैर्मठदानैर्युता ॥ ७ ॥ नानापुष्पफले रम्या कदलीखंडमंडिता ॥ पनसैर्वकुलैस्तालैरशोकैराम्रकैस्तथा ॥८॥ राजवृक्षकपित्थैश्च दाडिमैरुपशोभिता ॥ वेदाध्ययननिर्घोषैः पवित्रीकृतमंगला ॥ ९ ॥ तस्या उत्तरदिग्भागे आश्रमोऽभूत्सुशोभनः ॥ तन्मंदारवनंनाम त्रिषु लोकेषु विश्रुतम् ॥ १० ॥ वहुमंदारसंयुक्तं तेन मंदारकं विदुः ॥ विप्रो दीर्घतपा नाम सर्वदा तत्र तिष्ठति ॥ ११ ॥ तपस्तप्तं पुरोऽत्यर्थं तेन दीर्घतपाः स्मृतः ॥ स तिष्ठति सपत्नीकः सप्रुतः सप्रुपस्तथा ॥ १२ ॥ शुश्रूषंति सदा तस्य पुत्राः पंच प्रयत्नतः ॥ तस्य पुत्रः कनीयांस्तु ऋष्यशृंगो महातपाः ॥ १३ ॥ वेदाऽध्ययनसंपन्नो ब्रह्मचारी गुणान्वितः ॥ योगाभ्यासरतो नित्यं कंदमूलफलाशनः ॥ १४ ॥ तिष्ठते मृगरूपेण मृगयूथचरस्तदा ॥ दिनांते च दिनांते च मातापित्रोः समीपगः ॥ १५ ॥ अभिवादयते नित्यं भक्तिमान्मुनिपुंगवः ॥ पुनर्गच्छति तत्रैव कानने गिरिगह्वरे ॥ १६ ॥ क्रीडन्बालमृगैः सार्द्धं प्रत्यहं स मुनेः सुतः ॥ कदाचिद्देवयोगेन ऋष्यशृंगो ममार सः ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शूलभेदमाहात्म्ये ऋष्यशृंगचरित्रे दीर्घतपोमुन्याख्यानवर्णनंनाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ॐ ॥ ॥ उत्तानपाद उवाच ॥ ॥ आश्रमे वसतस्तस्य स दीर्घतपसो मुनेः ॥ कनीयांस्तनयो देव कथं मृत्युमुपागतः ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणुष्वैकमना भूत्वा कथां दिव्यां महीपते ॥ श्रवणादेव यस्यास्तु मुच्यते सर्वकिल्विषैः ॥ २ ॥ काशीराजो महावीर्यो महाबलपराक्रमः ॥ चित्रसेन इति ख्यातो धरण्यां स नराधिपः ॥ ३ ॥ तस्य राज्ये सदा धर्मो नाऽधर्मो विद्यते क्वचित् ॥ वेदधर्म्मरतो नित्यं प्रजा धर्मेण पालयन् ॥ ४ ॥ स्वधर्मनिरतश्चैव युद्धातिथ्यप्रियः सदा ॥ क्षत्रधर्मं समाश्रित्य भोगान्भुंक्ते स कामतः ॥५॥ कोशस्यांतो न विद्येत हस्त्यश्वरथपत्तिमान् ॥ इतिहासपुराणज्ञैः पंडितैः सह संकथाम् ॥ ६ ॥ कथयन्राजते राजा कैलास इव शंकरः ॥ एवं स पालयन्राज्यं राजा मंत्रिणमब्रवीत् ॥ ७ ॥ मृगयायां गमिष्यामि तिष्ठध्वं राज्यपालने ॥ गम्यतां सचिवैः प्रोक्ते गतोऽसौ वसुधाधिपः ॥८॥ अश्वारूढाश्च धावंतो राजानो मंडलाऽधिपाः ॥ छत्रैश्छत्राणि धृष्यंतोऽनुजग्मुः काननं प्रति ॥ ॥ ९ ॥ रजस्तत्रोत्थितं भौमं गजवाजिगदाहतम् ॥ तेनैतच्छादितं सर्वं सदिङ्मार्त्तंडमंडलम् ॥१०॥ न तत्र दृश्यते सूर्यो न काष्ठा न च चंद्रमाः ॥ पादपाश्चान दृश्यंते गिरिशृंगाणि सर्वतः ॥ ११ ॥ परस्परं न पश्यंति निशार्द्धे वार्षिके यथा ॥ तत्राऽसौ सुमहद्यूथं मृगाणां समलक्ष्यत ॥ १२ ॥ अधावत्सहितः सर्वैः स राजा राजपुत्रकैः॥ वृंदास्फोटोऽभवत्तेषां शीघ्रं जग्मुर्दिशो दश ॥१३॥ एकमार्गगतो राजा चित्रसेनो महीपतिः ॥ एकाकी स गतस्तत्र यत्र यत्र च ते मृगाः ॥१४॥ प्रविष्टोऽसौ ततो दुर्गं काननं गिरिगह्वरम् ॥ वल्लीगुल्मसमाकीर्णं स्थितो यत्र न लक्ष्यते ॥१५॥ अदृश्यांस्तु मृगान्मत्त्वा दिशो राजा व्यलोकयत् ॥ कां दिशं तु गमिष्यामि क्व मे सैन्यसमागमः ॥ १६ ॥ एवं कष्टं गतो राजा चित्रसेनो नराधिपः ॥ वृक्षच्छायां समाश्रित्य विश्राममकरोन्नृपः ॥ १७ ॥ क्षुत्तृषार्त्तो भ्रमन्दुर्गे कानने गिरिगह्वरे ॥ ततोऽपश्यत्सरो दिव्यं पद्मिनीखंडमंडितम् ॥ ॥ १८ ॥ हंसकारंडवाऽऽकीर्णं चक्रवाकोपशोभितम् ॥ ततो दृष्ट्वा स राजेंद्रः संप्रहृष्टतनूरुहः ॥ १९ ॥ कमलानि गृहीत्वा तु ततः स्नानं समाचरत् ॥ तर्पयित्वा पितृदेवान्मनुष्यांश्च यथाविधि ॥२०॥ अच्छाद्य शतपत्रैश्च पूजयामास शंकरम्॥ ययौ पानीयममलं यथावत्स समाहितः॥२१॥ उत्तीर्य सलिलात्तीरे दृष्ट्वा वृक्षं समीपगम् ॥ उत्तीर्यमधः कृत्वोपविष्टो धरणीतले ॥ २२ ॥ चिंतयन्नुपविष्टोऽसौ किमद्य प्रकरोम्यहम् ॥ तत्राऽऽसीनो ददर्शाथ वनोद्देशे मृगान्बहून् ॥२३॥ केचित्पूर्वमुखास्तत्र चापरे दक्षिणामुखाः ॥ वारुण्यभिमुखाः केचित्केचित्कौबेरदिङ्मुखाः ॥२४॥ केचिन्निद्रापराः केचिद्ऊर्ध्वकर्णाः स्थिताः परे ॥ मृगमध्ये स्थितो योगी ऋष्यशृंगो महातपाः ॥२५॥ मृगान्दृष्ट्वा ततो राजा आहारार्थमचिंतयत् ॥ हत्वैतेषु कंचिद्भक्षयामि यदृच्छया ॥ २६ ॥ स्वस्थावस्थो भविष्यामि मृगमांसस्य भक्षणात् ॥ काशीं प्रति गमिष्यामि मार्गमन्विष्य यत्नतः ॥२७॥ विचिंत्येवं ततो राजा वृक्षमूलमुपाश्रितः॥ चापं गृह्य कराग्रेण स शरं संदधे ततः॥२८॥विचिक्षेप शरं तत्र यत्र ते बहवो मृगाः॥ तेषां मध्ये स वै विद्ध ऋष्यशृंगो महातपाः ॥२९॥ जग्मुस्त्रस्तास्तु ते सर्वे शब्दं कृत्वा वनौकसः ॥ स ऋषिः पतितस्तत्र कृष्णकृष्णेति चाब्रवीत् ॥३०॥ हाहा कष्टं कृतं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तेन येनाहं घातितोऽधुना ॥ कस्यैषा दुर्मतिर्जाता पापबुद्धेर्ममोपरि ॥ ३१ ॥ मृगमध्ये स्थितश्चाहं न कंचिदुपरोधये ॥ तां वाचं मानुषीं श्रुत्वा स राजा विस्मयान्वितः ॥ ३२ ॥ शीघ्रं गत्वा ततोऽपश्यद्ब्राह्मणं ब्रह्मतेजसा ॥ हाहा कष्टं कृतं मेऽद्य येनासौ घातितो द्विजः ॥ ३३ ॥ ॥ चित्रसेन उवाच ॥ ॥ अकामाद्घातितस्त्वं तु मृगभ्रांत्या मयाऽनघ ॥ गृहीत्वा बहुदारूणि स्वतनुं दाहयाम्यहम् ॥ ३४ ॥ दृष्टादृष्टं तु यत्किंचिन्न समं ब्रह्महत्यया ॥ अन्यथा ब्रह्महत्यायाः शुद्धिर्मे न भविष्यति ॥ ३५ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ न ते सिद्धिर्भवेत्काचिन्मयि पंचत्वमागते ॥ ब्रह्महत्या भविष्यंति विनाशे मम सांप्रतम् ॥३६॥ जननी मे पिता वृद्धो भ्रातरश्च तपस्विनः ॥ भ्रातृजाया मरिष्यंति मयि पंचत्वमागते॥३७॥ एता हत्या भविष्यंति कथं शुद्धिर्भवेत्तव ॥ उपायं कथयिष्यामि तं कर्तुं यदि मन्यसे ॥ ३८ ॥ ॥ चित्रसेन उवाच ॥ ॥ उपायः कथ्यतां मेऽद्य यस्ते मनसि वर्त्तते ॥ करिष्ये तमहं सर्वं यत्नेनापि महामुने ॥ ३९ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ पृच्छामि त्वां कथं को वा कुतस्त्वमिह चागतः ॥ ब्रह्मक्षत्रविशां मध्ये को भवानुत शूद्रजः ॥ ४० ॥ चित्रसेन उवाच ॥ ॥ नाहं शूद्रोऽस्मि भोस्तात न वैश्यो ब्राह्मणो न वा ॥ न चांत्यजोऽस्मि विप्रेंद्र क्षत्रियोऽस्मि महामुने ॥ ४१ ॥ धर्मज्ञश्च कृतज्ञश्च सर्वसत्त्वहिते रतः ॥ अकामात्पातकं जातं कथं शुद्धिर्भविष्यति ॥ ४२ ॥ ॥ ऋक्षशृंग उवाच ॥ ॥ मां गृहीत्वा आश्रमं गच्छ यत्र तौ पितरौ मम ॥ आवेदयस्व चात्मानं पुत्रघातिनमातुरम् ॥ ४३ ॥ तेदृष्ट्वा मां करिष्यंति कारुण्यं च तवोपरि ॥ उपायं कथयिष्यंति येन शांतिर्भविष्यति ॥ ४४ ॥ तस्य तद्वचनं श्रुत्वा चित्रसेनो नृपोत्तम ॥ स्कंधे कृत्वा तु तं विप्रं जगामाश्रमसन्निधौ ॥ ४५ ॥ न शक्नोति यदा वोढुं विश्राम्यति पुनःपुनः ॥ तावत्पश्यति तं विप्रं मूर्छितं विकलेंद्रियम् ॥ ४६ ॥ सुमोच चित्रसेनस्तं छायायां वटभूरुहः ॥ वस्त्रं चतुर्गुणं कृत्वा चक्रे वातं मुहुर्मुहुः ॥ ४७ ॥ पश्यतस्तस्य राजेंद्र ऋक्षशृंगो महातपाः ॥ पंचत्वमगमच्छीघ्रं ध्यानयोगेन योगवित् ॥ ४८ ॥ दाहयामास तं विप्रं विधिदृष्टेन कर्मणा ॥ स्नानं कृत्वा स शोकार्त्तो विललाप मुहुर्मुहुः ॥ ४९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे शूलभेदमाहात्म्ये ऋक्षशृंगस्वर्गगमनवर्णनं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ ईश्वर उवाच ॥ ॥ ततश्चानंतरं राजा जगामोद्वेगमुत्तमम् ॥ कथं यामि गृहं त्वद्य वाराणस्यामहं पुनः॥१॥ब्रह्महत्यासमाविष्टो जुहोम्यग्नौ कलेवरम्॥ अथवा तस्य वाक्येन तं गच्छाम्याश्रमं प्रति ॥२॥ कथयामि यथावृत्तं गत्वा तस्य महामुनेः ॥ एवं संचिंत्य राजासौ जगामाश्रमसन्निधौ॥३॥ऋक्षशृंगस्य चास्थीनि गृहीत्वा स नृपोत्तमः॥दृष्टिमार्गे स्थितस्तस्य महर्षेर्भावितात्मनः॥४॥दीर्घतपा उवाच ॥ ॥ आगच्छ स्वागतं तेस्तु आसनेत्रोपविश्यताम्॥अर्घं ददाम्यहं येन मधुपर्कं सविष्टरम् ॥५॥ ॥ चित्रसेन उवाच॥ ॥अर्घस्यास्य न योग्योहं महर्षे नास्मि भाषणे ॥ मृगमध्यस्थितो विप्रस्तव पुत्रो मया हतः ॥ ६ ॥ पुत्रघ्नं विद्धि मां विप्र तीव्रदण्डेन दंडय ॥ मृगभ्रांत्या हतो विप्र ऋक्षशृंगो महातपाः ॥७॥ इति मत्त्वा मुनिश्रेष्ठ कुरु मे त्वं यथोचितम् ॥ माता तद्वचनं श्रुत्वा गृहान्निष्क्रम्य विह्वला ॥ ८ ॥ हा हताऽस्मीत्युवाचेदं पपात धरणीतले ॥ विललाप सुदुःखार्ता पुत्रशोकेन पीडिता ॥ ९ ॥ हा हता पुत्रपुत्रेति करुणं कुररी यथा ॥ विललापाऽतुरा माता क्व गतो मां विहाय वै ॥ मुखं दर्शय चात्मीयं मातरं मां हि मानय ॥ १० ॥ श्रुताऽध्ययनसंपन्न जपहोमपरायणम् ॥ आगतं त्वां गृहद्वारे कदा द्रक्ष्यामि पुत्रक ॥११॥ लोकोक्त्या श्रूयते चेतच्चंदनं किल शीतलम् ॥ पुत्रगात्रपरिष्वंगश्चन्दनादपि शीतलः ॥ १२ ॥ किं चंदनेन पीयूषपरिंदुना किं किमिंदुना ॥ १३ ॥ पुत्रगात्रपरिष्वंगपात्रं गात्रं भवेद्यदि ॥ १४ ॥ परिष्वजितुमिच्छामि त्वामहं पुत्र सुप्रिय ॥ पंचत्वमनुयास्यामि त्वद्विहीनाद्य दुःखिता ॥ १५ ॥ एवं विलपती दीना पुत्रशोकेन पीडिता ॥ मूर्च्छिता विह्वला दीना निपपात महीतले ॥ १६ ॥ भार्यां च पतितां दृष्ट्वा पुत्रशोकेन पीडिताम् ॥ चुकोप स मुनिस्तत्र चित्रसेनाय भूभृते ॥ १७ ॥ ॥ दीर्घतपा उवाच ॥ ॥ याहियाहि महापाप मा मुखं दर्शयस्व मे ॥ किं त्वया घातितो विप्रो ह्यकामाच्च सुतो मम ॥ १८ ॥ ब्रह्महत्या भविष्यंति बह्वयस्ते वसुधाधिप ॥ सकुटुम्बस्य मे त्वं हि मृत्युरूप उपस्थितः ॥ १९ ॥ एवमुक्त्व ततो विप्रो विचिन्त्य च पुनःपुनः ॥ परित्यज्य तदा क्रोधं मुनिभावाच्चगाद ह ॥ २० ॥ ॥ दीर्घतपा उवाच ॥ ॥ उद्वेगं त्यज भो वत्सा दुरुक्तं गदितो मया ॥ पुत्रशोकाभिभूतेन दुःखतप्तेन मानद ॥ २१ ॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः ॥ प्रागेव हि मनुष्याणां बुद्धिः कर्मानुसारिणी ॥ २२ ॥ अनेनैव विधानेन पंचत्वं विहितं मम ॥ हत्यास्तव भविष्यंति पूर्वमुक्ता न संशयः ॥ २३ ॥ ब्रह्मक्षत्रविशां मध्ये शूद्रचण्डालजातिषु ॥ कस्त्वं कथय सत्यं मे कस्माच्च निहतो द्विजः ॥ २४ ॥ ॥ चित्रसेन उवाच ॥ ॥ विज्ञापयामि विप्रर्षे क्षन्तव्यं ते ममोपरि ॥ नाऽहं विप्रोस्मि वै तात न वैश्यो न च शूद्रजः ॥ २५ ॥ न व्याधश्चांत्यजातो वा क्षत्रियोऽहं महामुने ॥ काशीराजो मृगान्हन्तुमागतो वनमुत्तमम् ॥ २६ ॥ भ्रांत्या निपातितो ह्येष मृगरूपधरो मुनिः ॥ इदानीं तव पादांते संश्रितः पातकान्वितः ॥ २७ ॥ किं कर्त्तव्यं मया विप्र उपायं कथयस्व मे ॥ २८ ॥ ॥ दीर्घतपा उवाच ॥ ॥ ब्रह्महत्या न शक्येताप्येका निस्तारितुं प्रभो ॥ दशैका च कथं शक्यास्ताः शृणुष्व नरेश्वर ॥ २९ ॥ चत्वारो मे सुता राजन्त्सभार्या मातृपूर्वकाः ॥ मया सह न जीवंति ऋक्षशृंगस्य कारणे ॥ ३० ॥ उपायं शोभनं तात कथयिष्ये शृणुष्व तम् ॥ शक्तोपि यदि तं कर्तुं सुखोपायं नरेश्वर ॥ ३१ ॥ सकुटुम्बं समस्तं मां दाहयित्वाऽनले नृप ॥ अस्थीनि नर्मदातोये शूलभेदे विनिक्षिप ॥ ३२ ॥ नर्मदादक्षिणे कूले शूलभेदं हि विश्रुतम् ॥ सर्वपापहरं तीर्थं सर्वदुःखघ्नमुत्तमम् ॥ ३३ ॥ शुचिर्भूत्वा ममाऽस्थीनि तत्र तीर्थे विनिक्षिप ॥ मोक्ष्यसे सर्वपापैस्त्वं मम वाक्यान्न संशयः ॥ ३४ ॥ ॥ राजोवाच ॥ ॥ आदेशो दीयतां तात करिष्यामि न संशयः ॥ समस्तं मेस्ति यत्किंचिद्राज्यं कोशः सुहृत्सुताः ॥ ३५ ॥ तवाऽधीनं महाविप्र प्रयच्छामि प्रसीद मे ॥ परस्परं विवदतोर्विप्र राज्ञोस्तदा नृप ॥ ३६ ॥ स्फुटित्वा हृदयं शीघ्रं मुनिभार्या मृता तदा ॥ पुत्रशोकसमाविष्टा निर्जीवा पतिता क्षितौ ॥ ३७ ॥ पुत्राश्च मातृशोकेन सर्वे पंचत्वमागताः॥ स्नुषाश्चैव तदा सर्वा मृताश्च सह भर्तृभिः ॥ ३८ ॥ पंचत्वं च गताः सर्वे मुनिमुख्या नृपोत्तम ॥ विप्रानाह्वापयामास ये तत्राश्रमवासिनः ॥ ३९ ॥ तेभ्यो निवेदयामास यथावृत्तं नृपोत्तमः॥ स तैस्तदाऽभ्यनुज्ञातः काष्ठान्यादाय यत्नतः ॥ ४० ॥ दाहं संचयनं चक्रे चित्रसेनो महीपतिः ॥ ऋक्षशृंगादिसर्वेषां गृहीत्वाऽस्थीनि यत्नतः॥ ४१ ॥ याम्याशां प्रस्थितो राजा पादचारी महीपते ॥ न शक्नोति यदा गन्तुं छायामाश्रित्य तिष्ठति ॥४०॥ विश्रम्य च पुनर्गच्छेद्वाराक्रांतो महीपतिः॥ सचैलं कुरुते स्नानं मुक्ताऽस्थीनि पदेपदे ॥४२॥ पिबेज्जलं निराहारः स गच्छन्दक्षिणामुखः ॥ अचिरेण च कालेन संगतो नर्मदातटम् ॥४४॥ आश्रमस्थान्द्विजान्दृष्ट्वा पप्रच्छ पृथिवीपतिः ॥ ४५ ॥ ॥ चित्रसेनउवाच ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कथ्यतां शूलभेदस्य मार्गं मे द्विजसत्तमाः ॥ येन यामि महाभागा स्वकार्यार्थस्य सिद्धये ॥४६॥ ॥सुनय ऊचुः॥ ॥इतः क्रोशांतरादर्वाक्तीर्थं परमशोभनम्॥नर्मदादक्षिणे कूले ततो द्रक्ष्यसि नाऽन्यथा॥४७॥ऋषिवाक्येन राजाऽसौ शीघ्रं गत्वा नरेश्वरः॥स ददर्श ततः शीघ्रं बहुद्विजसमाकुलम्॥४८॥ बहुद्रुमलताकीर्णं बहुपुष्पोपशोभितम् ॥ ऋक्षसिंहसमाकीर्णं नानाव्रतधरैः शुभैः ॥ ४९ ॥ एकपादास्थिताः केचिदपरे मूर्यदृष्टयः ॥ एकांगुष्ठ स्थिताः केचिदूर्ध्वबाहुस्थिताः परे ॥ ५० ॥ दिनैकभोजनाः केचित्केचित्कंदफलाशनाः ॥ त्रिरात्रभोजनाः केचित्पराकव्रतिनोऽपरे ॥ ५१ ॥ चांद्रायणरताः केचित्केचित्पक्षोपवासिनः ॥ मासोपवासिनः केचित्केचिद्दत्तंतपारणाः ॥ ५२ ॥ योगाभ्यासरताः केचित्केचिद्ध्यायंति तत्पदम् ॥ शीर्णपर्णाशिनः केचित्केचिच्च कटुकाशनाः ॥ ५३ ॥ शैवालभोजनाः केचित्केचिन्मारुतभोजनाः ॥ गार्हस्थ्ये च स्थिताः केचित्केचिच्चैवाऽग्निहोत्रिणः ॥ ५४ ॥ एवं विधान्द्विजान्दृष्ट्वा जानुभ्यामवनिं गतः ॥ प्रणम्य शिरसा राजन्राजा वचनमब्रवीत् ॥ ५५ ॥ ॥ चित्रसेन उवाच ॥ ॥ कस्मिन्देशे च तत्तीर्थं सत्यं कथयत द्विजाः ॥ येनाऽभिलषिता सिद्धिः सफला मे भविष्यति ॥ ५६ ॥ ॥ ऋषय ऊचुः ॥ ॥ धन्वंतरशतं गच्छ भृगुतुंगस्य मूर्द्धनि॥ कुण्डं द्रक्ष्यसि तत्पूर्णं विस्तीर्णं पयसा शिवम् ॥५७॥ तेषां तद्वचनं श्रुत्वा गतः कुण्डस्य सन्निधौ ॥ दृष्ट्वा चैव तु तत्तीर्थं भ्रांतिर्जाता नृपस्य वै ॥ ५८ ॥ ततो विस्मयमापन्नश्चिंतयन्वै मुहुर्मुहुः ॥ आकाशस्थं ददर्शाऽसौ सामिषं कुररं नृपः ॥ ५९ ॥ भ्रममाणं गृहीतामिं वध्यमानं निरामिषैः ॥ परस्परं च युयुधुः सर्वेऽप्यामिषकांक्षया ॥ ६० ॥ हतश्चंचुप्रहारेण स ततः पतितोऽभसि ॥ शूलेन शूलिना यत्र भूभागो भेदितः पुरा ॥ ६१ ॥ तत्तीर्थस्य प्रभावेण स सद्यः पुरुषोऽभवत् ॥ विमानस्थं ददर्शाऽसौ पुमांसं दिव्यरूपिणम् ॥ ६२ ॥ गन्धर्वाऽप्सरसो यक्षास्तं यांतं तुष्टुवुर्दिवि ॥ अप्सरोगीयमाने तु गते सूर्यस्य मूर्द्धनि ॥ चित्रसेनस्ततस्तस्मिन्नाश्चर्यं परमं गतः ॥ ६३ ॥ ऋषिणा कथितं यद्वत्, द्वत्तीर्थं न संशयः ॥ दृष्टरोमाऽभवद्दृष्ट्वा प्रभावं तीर्थसंभवम् ॥ ६४ ॥ ममाऽद्य दिवसो धन्यो यस्मादत्र समागतः ॥ अस्थीनि भूमौ निक्षिप्य स्नानं कृत्वा यथाविधि ॥ ६५ ॥ तिलमिश्रेण तोयेनातर्पयत्पितृदेवताः ॥ गृह्यास्थीनि ततो राजा क्षिप्तवांस्तज्जले तदा ॥ ६६ ॥ क्षणमेकं ततो वीक्ष्य राजोर्द्ध्ववदनः स्थितः ॥ तान्ददर्श पुनः सर्वान्दिव्यरूपधराञ्छुभान् ॥ ६७ ॥ दिव्यवस्त्रैश्च संवीतान्दिव्याभरणभूषितान् ॥ विमानैर्विविधैर्दिव्यैरप्सरोगणसेवितैः ॥ ६८ ॥ पृथग्भूतांश्च तान्सर्वान्विमानेषु व्यवस्थितान् ॥ उत्पत्तित्वत्समालोक्य राजा संहर्षितोऽभवत् ॥ ६९ ॥ ऋषिं विमानमारूढश्चित्रसेनमथाब्रवीत् ॥ भोभोः साधो महाराज चित्रसेन महीपते ॥ ७०॥ त्वत्प्रसादान्नृपश्रेष्ठ गतिर्दिव्या ममेदृशी ॥ जातेयं यत्त्वया कार्यं कृतं परमशोभनम् ॥ ७१ ॥ स्वसुतोऽपि न शक्नोति पितॄणां कर्तुमीदृशम् ॥ मदीयवचनात्तात निष्पापस्त्वं भविष्यसि ॥ ७२ ॥ फलं प्राप्स्यसि राजेंद्र कामिकं मनसेप्सितम् ॥ आशीर्वादांस्ततो दत्त्वा चित्रसेनाय धीमते ॥ स्वर्गं जगाम ससुतस्ततो दीर्घतपा मुनिः ॥ ७३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे दीर्घतपसःस्वर्गारोहणवर्णनंनाम चतुःपंचाशत्तमोऽध्यायः ॥ ॥ ५४ ॥ ॥ ७ ॥ ॥ उत्तानपाद उवाच ॥ ॥ माहात्म्यं तीर्थजं दृष्ट्वा चित्रसेनो नरेश्वरः ॥ किं चकार क्व वा वासं किमाहारो बभूव ह ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ भृगुतुंगं समारुह्य ऐशानीं दिशमाश्रितः ॥ तपश्चचार विपुलं कुण्डे तत्र नृपोत्तमः ॥ २ ॥ सर्वान्देवान्हृदि ध्यात्वा ब्रह्मविष्णुमहेश्वरान् ॥ विचिक्षेप यदात्मानं प्रत्यक्षौ रुद्रकेशवौ ॥ करे गृहीत्वा राजानं रुद्रो वचनमब्रवीत् ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ प्राप्तत्यागं महाराज मा काले त्वं कृथा वृथा ॥ अद्याप्यसि युवा त्वं वै न युक्तं मरणं तव ॥ ४ ॥ स्वस्थानं गच्छ शीघ्रं त्वं भुक्त्वा भोगान्यथेप्सितान् ॥ कुरु निष्कण्टकं राज्यं नाके शक्र इवापरः ॥ ५ ॥ ॥ चित्रसेन उवाच ॥ ॥ न राज्यं कामये देव न पुत्रान्न च बांधवान् ॥ न भार्यां न च कोशं च न गजान्न तुरंगमान् ॥ ६ ॥ मुञ्चमुञ्च महादेव मा विघ्नः क्रियतां मम ॥ स्वर्गप्राप्तिर्ममाऽद्यैव त्वत्प्रसादान्महेश्वर ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ यस्याऽग्रतो भवेद्ब्रह्मा विष्णुः शंभुस्तथैव च ॥ स्वर्गेण तस्य किं कार्यं स गतः किं करिष्यति॥८॥तुष्टा वयं त्रयो देवा वृणीष्व वरमुत्तमम् ॥ यथेप्सितं महाराज सत्यमेतदसंशयम् ॥ ९ ॥ ॥ चित्रसेन उवाच ॥ ॥ यदि तुष्टास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ अद्यप्रभृति युष्माभिः स्थातव्यमिह सर्वदा ॥ १० ॥ गयाशिरो यथा पुण्यं कृतं युष्माभिरेव च ॥ तथैवेदं प्रकर्त्तव्यं शूलभेदं च पावनम् ॥११॥ यत्रयत्र स्थिता यूयं तत्रतत्र वसाम्यहम् ॥ गणानां चैव सर्वेषामाधिपत्यमथाऽस्तु मे ॥ १२ ॥ ॥ ईश्वर उवाच ॥ ॥ अद्यप्रभृति तिष्ठामः शूलभेदे नरेश्वर ॥ त्रिकालं हि त्रयो देवाः कलांशेन वसामहे ॥ १३ ॥ नंदिसंज्ञो गणाधीशो भविष्यति भवान्धुवम् ॥ मत्समीपे तु भक्त आदौ पूजा भविष्यति ॥ ॥ १४ ॥ प्रक्षिप्य तानि चास्थीनि यत्र दीर्घतपा ययौ ॥ सकुटुंबो विमानस्थः स्वर्गतस्त्वं तथा कुरु ॥ १५ ॥ एवं देवा वरं दत्त्वा चित्रसेनाय पार्थिव ॥ कुंडमूर्द्धनि याम्यायां त्रयो देवास्तदा स्थिताः ॥१६॥ परस्परं वदंत्येवं पुण्यतीर्थमिदं परम् ॥ यथा हि गयाशिरः पुण्यं पूर्वमेव पठ्यते ॥ तथा रेवातटे पुण्यं शूलभेदं न संशयः ॥ १७ ॥ ॥ ईश्वर उवाच ॥ ॥ इदं तीर्थं तथा पुण्यं यथा पुण्यं गयाशिरः ॥ सकृत्पिंडोदकेनैव नरो निर्मलतां व्रजेत् ॥ १८ ॥ एकं गयाशिरो मुक्त्वा सर्वतीर्थानि भूपते ॥ शूलभेदस्य तीर्थस्य कलां नार्हंति षोडशीम् ॥ १९ ॥ कुंडमुदीच्यां याम्यायां दशहस्तप्रमाणतः ॥ रौद्रवारुणकाष्ठायां प्रमाणं चैकविंशति ॥ २० ॥ एतत्प्रमाणं तत्तीर्थं पिंडदानादिकर्मसु ॥ नाधर्मनिरता दातुं लभंते दानमत्र हि ॥ २१ ॥ विष्णुस्तु पितृरूपेण ब्रह्मरूपी पितामहः ॥ प्रपितामहो रुद्रोऽभूदेवं त्रिपुरुषाः स्थिताः ॥ २२ ॥ कदा पश्यति तीर्थं वै कदा नस्तारयिष्यति ॥ इति प्रतीक्षां कुर्वंति पुत्राणां सततं नृप ॥ शूलभेदे नरः स्नात्वा दृष्ट्वा शूलधरं सकृत् ॥ २३ ॥ नापुत्रो नाधनो रोगी सप्तजन्मसु जायते ॥ एकविंशतिं पितुः पक्षे मातुश्चैवैकविंशतिम् ॥ २४ ॥ भार्यापक्षे दशैवेह कुलान्यतानि तारयेत् ॥ शूलभेदवने राजञ्छाकमूलफलैरपि ॥ ॥ २५ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ पंचस्थानेषु यः श्राद्धं कुरुते भक्तिमान्नरः ॥२६॥ कुलानि प्रेतभूतानि सर्वाण्यपि हि तारयेत् ॥ द्विजदेवप्रसादेन पितॄणां च प्रसादतः ॥२७॥ श्राद्धदो निवसेत्तत्र यत्र देवो महेश्वरः ॥ स्युरात्मघातिनो ये च गोघ्नाब्रह्मघ्नाश्च ये ॥ २८॥ दंष्ट्रिभिर्जलपातं च विद्युत्पातैषु ये मृताः ॥ न येषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥ २९ ॥ तत्र तीर्थे तु यस्तेषां श्राद्धं कुर्वीत भक्तितः ॥ मोक्षावाप्तिर्भवेत्तेषां युगमेकं न संशयः ॥ ३० ॥ अज्ञानाद्यत्कृतं पापं बालभावाच्च यत्कृतम् ॥ तत्सर्वं नाशयेत्पापं स्नानमात्रेण भूपते ॥ ३१ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथा पापोऽपि तत्तीर्थे स्नातो भवति निर्मलः ॥ ३२ ॥ संन्यासं कुरुते योऽत्र तीर्थे विधिसमन्वितम् ॥ ध्यायन्नित्यं महादेवं स गच्छेत्परमं पदम् ॥ ३३ ॥ क्रीडित्वा स यथाकामं स्वेच्छया शिवमंदिरे ॥ वेदवेदांगतत्त्वज्ञो जायतेऽसौ शुभे कुले ॥३४॥ रूपवान्सुभगश्चैव सर्वव्याधिविवर्जितः ॥ राजा वा राजपुत्रो वा धर्माऽऽचारसमन्वितः ॥ ३५ ॥ एतत्ते कथितं राजंस्तीर्थस्य फलमुत्तमम् ॥ पच्छ त्वः मानवो नित्यं सच्यते सर्वकिल्बिषैः ॥ ३६ ॥ य इदं श्रावयेन्नित्यमाख्यानं द्विजपुंगवान् ॥ श्राद्धे देवकुले वाऽपि पठेत्पर्वणि पर्वणि ॥ ३७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गीर्वाणास्तस्य तुष्यंति मनुष्याः पितृभिः सह ॥ पठतां शृण्वतां चैव नश्यते सर्वपातकम् ॥ ३८ ॥ लिखित्वा तीर्थमाहात्म्यं ब्राह्मणेभ्यो ददाति यः ॥ जातिस्मरत्वं लभते प्राप्नोत्यभिमतं फलम् ॥ ३९ ॥ रुद्रलोके वसेत्तावद्यावदक्षरमन्वितम् ॥ ४० ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवन्त्य खंडे रेवाखण्डे शूलभेदमाहात्म्ये काशीराजमोक्षगमनंनाम पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ॐ ॥ ॥ ॥ उत्तानपाद उवाच ॥ ॥ अन्यच्च श्रोतुमिच्छामि केन गंगाऽवतारिता ॥ रुद्रशीर्षे स्थिता देवी पुण्या कथमिहाऽऽगता ॥ १ ॥ पुण्या देवशिलानाम तस्या माहात्म्यमुत्तमम् ॥ एतदाख्याहि मे सर्वं प्रसन्नो यदि शंकर ॥ २ ॥ ॥ ईश्वर उवाच ॥ शृणुष्वैकमना भूत्वा यथा गंगाऽत्र तारिता ॥ देवैः सर्वैर्महाभागा सर्वलोकहिताय वै ॥ ३ ॥ अस्ति विंध्यो नगो नाम याम्याशायां महीपते ॥ गीर्वाणास्तु गताः सर्वे तस्य मूर्ध्नि नरेश्वर ॥ ४ ॥ तत्र चाह्वानिता गंगा ब्रह्माद्यैरखिलैः सुरैः ॥ अभ्यर्च्येशं जगन्नाथं देवदेवं जगद्गुरुम् ॥ ५ ॥ जटामध्यस्थितां गंगां मोचयस्वेति भूतले ॥ भास्वंती सा ततो मुक्ता रुद्रेण शिरसा भुवि ॥ ६ ॥ तत्र स्थाने महापुण्या देवैरुत्पादिता स्वयम् ॥ ततो देवनदी जाता सा हिताय नृणां भुवि ॥ ७ ॥ वसंति ये तटे तस्याः स्नानं कुर्वंति भक्तितः ॥ पिबंति च जलं नित्यं न ते यांति यमालयम् ॥ ८ ॥ यत्र सा पतिता कुंडे शूलभेदे नराधिप ॥ देवनद्याः प्रतीच्यां तु तत्र प्राची सरस्वती ॥ ९ ॥ याम्यायां शूलभेदस्य तत्र तीर्थं मनुत्तमम् ॥ तत्र देवशिला पुण्या स्वयं देवेन निर्मिता ॥ १० ॥ तत्र स्नात्वा तु यो भक्त्या तर्पयेत्पितृदेवताः ॥ पितरस्तस्य तृप्यंति यावदाभूत संप्लवम् ॥ ११ ॥ तत्र स्नात्वा तु यो भक्त्या ब्राह्मणान्भोजयेन्नृप ॥ स्वल्पान्नेनापि दत्तेन तस्य चांऽतो न विद्यते ॥ १२ ॥ ॥ उत्तानपाद उवाच ॥ ॥ कानि दानानि दत्तानि शस्तानि धरणीतले ॥ यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ १३ ॥ देवशिलाया माहात्म्यं स्नानं दानादि जं फलम् ॥ व्रतोपवासनियमैर्यत्प्राप्यं तद्वदस्व मे ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ आसीत्पुरा महावीर्यश्चेदिनाथो महाबलः ॥ वीरसेन इति ख्यातो मंडलाधिपतिर्नृप ॥ १५ ॥ राष्ट्रे तस्य रिपुर्नाऽस्ति न व्याधिर्न च तस्कराः ॥ न चाधर्मोऽभवत्तत्र धर्म एव हि सर्वदा ॥ १६ ॥ सदा मुदान्वितो राजा सभार्यो बहुपुत्रकः ॥ एकासीद्दुहिता तस्य सुरूपा गिरिजा यथा ॥ १७ ॥ इष्टा सा पितृमातृभ्यां बंधुवर्गजनस्य च ॥ कृतं वैवाहिकं कर्म काले प्राप्ते यथाविधि ॥ १८ ॥ अनंतरं चेदिपतिर्द्वादशाब्दमथे स्थितः ॥ ततस्तस्यास्तु यो भर्त्ता स मृत्युवशमागतः ॥ १९ ॥ विधवां तां सुतां दृष्ट्वा राजा शोकसमन्वितः ॥ उवाच वचनं तत्र स्वभार्यां दुःखपीडिताम् ॥ २० ॥ प्रिये दुःखमिदं जातं यावज्जीवं सुदुःसहम् ॥ नेयं रक्षयितुं शक्या रूपयौवनगर्विता ॥ २१ ॥ दूषयेत कुलं क्वाऽपि कथं रक्ष्या हि बालिका ॥ नोपायो विद्यते क्वाऽपि भानुमत्याश्च रक्षणे ॥ परस्परं विवदतोः श्रुत्वा तत्कन्यकाऽब्रवीत् ॥ २२ ॥ ॥ भानुमत्युवाच ॥ ॥ न लज्जामि तवाग्रेऽहं जल्पंती तात कर्हिचित् ॥ सत्यं नोत्पद्यते दोषो मदर्थे ते नराधिप ॥ २३ ॥ अद्यप्रभृत्यहं तात धारयिष्ये न मूर्द्धजान् ॥ स्थूलवस्त्रपटार्द्धं तु धारयिष्यामि ते गृहे ॥ २४ ॥ करिष्यामि व्रतान्याशु पुराणविहितानि च ॥ आत्मानं शोषयिष्यामि तोषयिष्ये जनार्दनम् ॥ २५ ॥ ममैषा वर्त्तते बुद्धिर्यदि त्वं तात मन्यसे ॥ भानुमत्या वचः श्रुत्वा राजा संहर्षितोऽभवत् ॥ २६ ॥ तीर्थयात्रां समुद्दिश्य कोशं दत्त्वा सुपुष्कलम् ॥ विमृज्य पुरुषान्वृद्धान्कृत्वा तस्याः सुरक्षणे ॥ २७ ॥ पुरुषान्त्सायुधांश्चापि ब्राह्मणान्सपुरोहितान् ॥ दासीदासान्पदातींश्च चास्याः संरक्षणक्षमान् ॥ २८ ॥ ततः पितुर्मतेनैव गंगातीरं गता सती ॥ अवगाह्य तटे द्वे तु गंगायाः स नराधिप ॥ २९ ॥ नित्यं संपूज्य सद्विप्रान्गंधमाल्यादिभूषणैः ॥ द्वादशाब्दानि सा तीरे गंगायाः समवस्थिता ॥ ३० ॥ त्यक्त्वा गंगां तदा राज्ञी गत्वा काष्ठां तु दक्षिणाम् ॥ प्राप्ता सा सचिवैः सार्द्धं यत्र रेवा महानदी ॥ ३१ ॥ समाः पंच स्थिता तत्र ॐकारेऽमरकंटके ॥ उदग्याम्येषु तीर्थेषु तीर्थात्तीर्थं जगाम सा ॥ ३२ ॥ स्नात्वास्नात्वाऽऽपूज्य विप्रान्भक्तिपूर्वमतंद्रिता ॥ वारुणीं सा दिशं गत्वा देवनद्याश्च संगमे ॥ ३३ ॥ ददर्श चाऽऽश्रमं पुण्यं मुनिसंघैः समाकुलम् ॥ दृष्ट्वा मुनिसमूहं सा प्रणिपत्येदमब्रवीत् ॥ ३४ ॥ माहात्म्यमस्य तीर्थस्य नाम चैवाऽस्य कीदृशम् ॥ कथयंतु महाभागाः प्रसादः क्रियतां मम ॥ ३५ ॥ ॥ ऋषय ऊचुः ॥ ॥ चक्रतीर्थं तु विख्यातं चक्रं दत्तं पुरा हरेः ॥ महेश्वरेण तुष्टेन देवदेवेन शूलिना ॥ ३६ ॥ अत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ अनिवर्त्तिका गतिस्तस्य जायते नात्र संशयः ॥ ३७ ॥ द्वितीयेऽह्नि ततो गच्छेच्छूलभेदे तपस्विनि ॥ पूर्वोक्तेन विधानेन स्नानं कुर्याद्यथाविधि ॥ ३८ ॥ जन्मत्रयकृतैः पापैर्मुच्यते नात्र संशयः ॥ जलेन तिलमात्रेण प्रदद्यादंजलित्रयम् ॥ ३९ ॥ तृप्यंति पितरस्तस्य द्वादशाब्दान्यसंशयम् ॥ यः श्राद्धं कुरुते भक्त्या श्रोत्रियैर्ब्राह्मणैर्नृप ॥ ४० ॥ वार्धुष्याद्यास्तु वर्ज्यंते पितॄणां दत्तमक्षयम् ॥ अपरेह्णि ततो गच्छेत्पुण्यां देव शिलां शुभाम् ॥ ॥ ४१ ॥ वीक्ष्यते जाह्नवी पुण्या देवैरुत्पादिता पुरा ॥ स्नात्वा तत्र जलं दद्यात्तिलमिश्रं नराधिप ॥ ४२ ॥ सकृत्पिंडप्रदानेन मुच्यते ब्रह्महत्यया ॥ एकादश्यामुपोषित्वा पक्षयोरुभयोरपि ॥ ४३ ॥ क्षपाजागरणं कुर्यात्पठेत्पौराणिकीं कथाम् ॥ विष्णुपूजां प्रकुर्वीत पुष्पधूपनिवेदनैः ॥ ४४ ॥ प्रभाते भोजयेद्विप्रान्दानं दद्यात्स्वशक्तितः ॥ चतुर्थेऽह्नि ततो गच्छेद्यत्र प्राची सरस्वती ॥ ४५ ॥ ब्रह्मदेहाद्विनिष्क्रांता पावनार्थं शरीरिणाम् ॥ तत्र स्नात्वा नरो भक्त्या तर्पयेत्पितृदेवताः ॥ ४६ ॥ श्राद्धं कृत्वा यथान्यायमनिंद्यान्भोजयेद्द्विजान् ॥ पितरस्तस्य तृप्यंति द्वादशाब्दान्यसंशयम् ॥ ४७ ॥ सर्वदेवमयं स्थानं सर्वतीर्थमयं तथा ॥ देवकोटिसमाकीर्णं कोटिलिंगोत्तमोत्तमम् ॥ ४८ ॥ त्रिरात्रं कुरुते योऽत्र शुचिः स्नात्वा जितेंद्रियः ॥ पक्षं मासं च षण्मासमब्दमेकं कदाचन ॥ ४९ ॥ न तस्य संभवो मर्त्ये तस्य वासो भवेद्दिवि ॥ नियमस्थो विमुच्येत त्रिजन्मजनितादघात् ॥ ५० ॥ विना पुंसा तु या नारी द्वादशाब्दं शुचिव्रता ॥ तिष्ठते साऽक्षयं कालं रुद्रलोके महीयते ॥ ५१ ॥ मुनीनां वचनं श्रुत्वा मुदा परमया यया ॥ ततोऽवगाह्य तत्तीर्थमहर्निशमतंद्रिता ॥ ५२ ॥ दृष्ट्वा तीर्थप्रभावं तु पुनर्वचनमब्रवीत् ॥ श्रूयतां वचनं मेऽद्य ब्राह्मणाः सपुरोहिताः ॥ ५३ ॥ न त्यजामीदृशं स्थानं यावज्जीवमहर्निशम् ॥ मातुः कथयध्वमिदं वचः ॥ ५४ ॥ त्वत्कन्या शूलभेदस्था नियता व्रतचारिणी ॥ एवमुक्त्वा स्थिता सा तु तत्र भानुमती नृप ॥ ५५ ॥ एकांतरोपवासस्था शनैर्मासोपवासिता ॥ देवशिलास्थिता नित्यं ध्यायी सा चक्रपाणिनम् ॥ ५६ ॥ अहर्निशं ददेद्धूपं चंदनं च सदीपकम् ॥ पादशौचं स्वयं कृत्वा स्वयं भोजयते द्विजान् ॥ द्वादशाब्दानि सा राज्ञी सुव्रता तत्र संस्थिता ॥ ५७ ॥ ॥ ईश्वर उवाच ॥ ॥ अन्यद्देवशिलायास्तु माहात्म्यं शृणु भूपते ॥ कथयामि महाबाहो सेतिहासं पुरातनम् ॥ ५८ ॥ कश्चिद्वनेचरो व्याधः शबरः सह भार्यया ॥ दुर्भिक्षपीडितस्तत्र आमिषार्थं वनं गतः ॥ ५९ ॥ नापश्यत्पक्षिणस्तत्र न मृगान्न फलानि च ॥ सरस्ततो ददर्शाऽथ पद्मिनीखण्डमंडितम् ॥ ६० ॥ दृष्ट्वा सरोवरं तत्र शबरी वाक्यमब्रवीत् ॥ कुमुदानि गृहाण त्वं दिव्यान्याहारसिद्धये ॥ ६१ ॥ देवस्य पूजनार्थं तु शूलभेदस्य यत्नतः ॥ विक्रया भविता तत्र धर्मशीलो जनो यतः ॥ ६२ ॥ भार्यायाः वचनं श्रुत्वा जग्राह कुमुदानि सः ॥ उत्तीर्णस्तु तटे यावद्दृष्ट्वा

CC-0. Prof. Satya Vrat Shastri Collection. New Delhi. Digitized by S3 Foundation USA

श्रीवृक्षमव्रतः ॥ ६३ ॥ श्रीफलानि गृहीत्वा तु सुपक्वानि विशेषतः ॥ शूलभेदं स संप्राप्तो ददर्श सुबहूजनान् ॥ ६४ ॥ चैत्रमासे सिते पक्षे एकादश्यां नरधिप ॥ तस्मिन्नहनि नाश्नीयुर्बाला वृद्धास्तथा स्त्रियः ॥ ६५ ॥ मण्डपं ददृशे तत्र कृतं देवशिलोपरि ॥ वस्त्रैः संवेष्टितं दिव्यं स्रङ्माल्यैरुपशोभितम् ॥६६॥ ऋषयश्चाऽऽगतास्तत्र ये चाऽऽश्रमनिवासिनः ॥ सोपवासाः सनियमाः सर्वे साग्निपरिग्रहाः ॥ ६७ ॥ देवनद्यास्तटे रम्ये मुनिसंघैः समाकुले ॥ आगच्छद्भिर्नृपश्रेष्ठ मार्गस्तत्र न लभ्यते ॥ ६८ ॥ दृष्ट्वा जनपदं तत्र तां भार्यां शवरोऽब्रवीत् ॥ गच्छ पृच्छस्व कमपि किमद्य स्नानकारणम् ॥ ६९ ॥ पर्वाणि यानि श्रूयंते किंस्वित्सूर्येन्दुसंप्लवः ॥ अयनं किं भवेदद्य किं वाऽक्षयतृतीयका ॥ ७० ॥ ततः स्वभर्तुर्वचनाच्छवरी प्रस्थिता तदा ॥ पप्रच्छ नारीं दृष्ट्वाऽग्रे दत्त्वाग्रे कमले शुभे ॥ ७१ ॥ तिथिरद्यैव का प्रोक्ता किं पर्व कथयस्व मे ॥ किमयं स्नाति लोकोऽयं किं वा स्नानस्य कारणम् ॥ ७२ ॥ ॥ नार्युवाच ॥ ॥ अद्य चैकादशी पुण्या सर्वपापक्षयंकरी ॥ उपोषिता सकृच्चैव नाकप्राप्तिं करोति सा ॥ ७३ ॥ तस्यास्तद्वचनं श्रुत्वा शवरी शवराय वै ॥ कथयामास चाव्यग्रा स्त्रीवाक्यं नृपसत्तम ॥ ७४ ॥ अद्य त्वेकादशी पुण्या बालवृद्धैरुपोषिता ॥ मदनैकादशीनाम सर्वपापक्षयंकरी ॥ ७५ ॥ नियता श्रूयते तत्र राजपुत्री सुशोभना ॥ व्रतस्था नियताहारा नाम्ना भानुमती सती ॥ ७६ ॥ नैतयासदृशी काचिच्चिषु लोकेषु विश्रुता ॥ दृश्यते सा वरारोहा ह्यवतीर्णा महीतले ॥ ७७ ॥ भार्यायाः वचनं श्रुत्वा शवरस्तां जगाद ह ॥ कमलानि यथालाभं दत्त्वा भुंक्ष्व हि सत्वरम् ॥ ७८ ॥ ममैषा वर्त्तते बुद्धिर्न भोक्तव्यं मया ध्रुवम् ॥ न मयोपार्जितं भद्रे पापबुद्ध्या शुभं क्वचित् ॥ ७९ ॥ ॥ शवर्युवाच ॥ ॥ न पूर्वं तु मया भुक्तं कस्मिंश्चैव तु वासरे ॥ भुक्तशेषं मया भुक्तं यावत्कालं स्मराम्यहम् ॥ ८० ॥ भार्यायाः निश्चयं ज्ञात्वा स्नानं कर्तुं जगाम ह ॥ अधोत्तरीयवस्त्रेण स्नानं कृत्वा तु भक्तितः ॥ ॥ ८१ ॥ सर्वान्देवान्नमस्कृत्य गतो देवशिलां प्रति ॥ तस्थौ स शंकमानोऽपि नमस्कृत्य जनार्दनम् ॥ ८२ ॥ यस्यास्तु कुमुदे दत्ते तया राज्ञ्ये निवेदितम् ॥ तद्दृष्ट्वा पद्मयुगलं तां दासीं साऽब्रवीत्तदा ॥ ८३ ॥ कुत्र पद्मद्वयं लब्धं कथ्यतामग्रतो मम ॥ शीघ्रं तत्रैव गत्वा च पद्मानानय चापरान् ॥ ८४ ॥ धान्येन वसुना वाऽपि कमलानि समानय ॥ भानुमत्या वचः श्रुत्वा गता सा शवरं प्रति ॥ ८५ ॥ श्रीफलानि च पुष्पाणि बहून्यन्यानि देहि मे ॥ ८६ ॥ ॥ शवर्युवाच ॥ ॥ श्रीफलानि सपुष्पाणि दास्यामि च विशेषतः ॥ न लोभो न स्पृहा मेऽस्ति गत्वा राज्ञीं निवेदय ॥ ८७ ॥ तया च सत्वरं गत्वा यथावृत्तं निवेदितम् ॥ शवर्युक्तं पुरस्तस्याः सविस्तरपरं वचः ॥ ८८ ॥ तस्यास्तु वचनं श्रुत्वा राज्ञी तत्र स्वयं गता ॥ उवाच शवरीं प्रीत्या देहि पद्मानि मूल्यतः ॥ ८९ ॥ ॥ शवर्युवाच ॥ ॥ न मूल्यं कामये देवि फलपुष्पसमुद्भवम् ॥ श्रीफलानि च पुष्पाणि यथेष्टं मम गृह्यताम् ॥ ९० ॥ अर्चां कुरु यथान्यायं वासुदेवे जगत्पतौ ॥ ९१ ॥ ॥ राज्ञ्युवाच ॥ ॥ विना मूल्यं न गृह्णामि कमलानि तवाऽधुना ॥ धान्यस्य खारिकामेकां ददामि प्रतिगृह्यताम् ॥ ९२ ॥ दश विंशत्यथ त्रिंशच्चत्वारिंशदथापि वा ॥ गृहाण वा खारिशतं दुर्भिक्षांभोधिमुत्तर ॥ ९३ ॥ वसुरत्नं सुवर्णं च अन्यत्ते यदभीप्सितम् ॥ तत्सर्वं संप्रदास्यामि कमलार्थे न संशयः ॥ ९४ ॥ ॥ शवर्युवाच ॥ ॥ नाहारं चिंतयाम्यद्य मुक्त्वा देवं वरानने ॥ देवकार्यं विना भद्रे नान्या बुद्धिः प्रवर्त्तते ॥ ९५ ॥ ॥ राज्ञ्युवाच ॥ ॥ न त्वयाऽन्नं परित्याज्यं सर्वमन्ने प्रतिष्ठितम् ॥ तस्मात्सर्वप्रयत्नेन ममान्नं प्रतिगृह्यताम् ॥ ९६ ॥ तपस्विनो महाभागा ये चाऽरण्यनिवासिनः ॥ गृहस्थद्वारि ते सर्वे याचंतेऽन्नमतंद्रिताः ॥ ९७ ॥ ॥ शवर्युवाच ॥ ॥ निषेधश्च कृतः पूर्वं सर्वं सत्ये प्रतिष्ठितम् ॥ सत्येन तपते सूर्यः सत्येन ज्वलते ऽनलः ॥ ९८ ॥ सत्येन तिष्ठत्युदधिर्वायुः सत्येन वाति हि ॥ सत्येन पच्यते सस्यं गावः क्षीरं स्रवंति च ॥ ९९ ॥ सत्याधारमिदं सर्वं जगत्स्थावरजंगमम् ॥ तस्मात्सर्वप्रयत्नेन सत्यं सत्येन पालयेत् ॥ १०० ॥ देवकार्यं तु मे मुक्त्वा नाऽन्या बुद्धिः प्रवर्त्तते ॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां गदाभृतः ॥ १०१ ॥ श्रूयते द्विजवाक्येस्तु न दोषो विद्यते क्वचित् ॥ कुशाः शाकं पयो मत्स्या गंधाः पुष्पाक्षता दधि ॥ मांसं शय्यासनं धानाः प्रत्याख्येया न वारि च ॥ १०२ ॥ ॥ राज्ञ्युवाच ॥ ॥ आरामोपहृतं पुष्पमारण्यं पुष्पमेव च ॥ क्रीतं प्रतिग्रहे लब्धं पुष्पमेवं चतुर्विधम् ॥ १०३ ॥ उत्तमं पुष्पमारण्यं गृहीतं स्वयमेव च ॥ मध्यमं फलमारामे त्वधमं क्रीतमेव च ॥ प्रतिग्रहेण यल्लब्धं निष्फलं तद्विदुर्बुधाः ॥ ॥ १०४ ॥ ॥ पुरोहित उवाच ॥ ॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां गदाभृतः ॥ उपकारः प्रकर्त्तव्यो व्यपदेशेन कर्हिचित् ॥ १०५ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ श्रीफलानि सपद्मानि दत्तानि शवरेण तु ॥ गृहीत्वा तानि राज्ञी सा पूजां चक्रे सुशोभनाम् ॥ १०६ ॥ क्षपा जागरणं चक्रे श्रुत्वा पौराणिकीं कथाम् ॥ शवरस्तु ततो भार्यामिदं वचनमब्रवीत् ॥ १०७ ॥ दीपार्थं गृह्यतां स्नेहो यथालाभेन सुन्दरि ॥ कृत्वा दीपं ततस्तौ तु कृत्वा पूजां हरेः शुभाम् ॥१०८॥ चक्रतुर्जागरं रात्रौ ध्यायन्तो धरणीधरम् ॥ ततः प्रभातसमये दृष्ट्वा स्नानोत्सवं जनम् ॥१०९॥

स्नाति वै शूलभेदे तु देवनद्यां तथाऽपरे ॥ सरस्वत्यां नराः केचिन्मार्कंडस्य ह्रदेऽपरे ॥ ११० ॥ चक्रतीर्थं गताश्चक्रुः स्नानं केचिद्विधानतः ॥ शुचयस्ते जनाः सर्वे स्नात्वा देवशिलोपरि ॥ १११ ॥ श्राद्धं चक्रुः प्रयत्नेन श्रद्धया पूतचेतसा ॥ तान्दृष्ट्वा शवरो विल्वैः पिंडांश्चक्रे प्रयत्नतः ॥ ११२ ॥ भानुमत्या तथा भर्तुः पिंडनिर्वपणं कृतम् ॥ अनिंद्या भोजिता विप्रा दंभमदार्ध्यवर्जिताः ॥ ११३ ॥ हविष्यान्नैस्तथा दध्ना शर्करामधुसर्पिषा ॥ पायसेन तु गव्येन कृतान्नेन विशेषतः ॥ ११४ ॥ भोजयित्वा तथा राज्ञी ददौ दानं यथाविधि ॥ पादुकोपानही छत्रं शय्यां गोवृषमेव च ॥ ११५ ॥ विविधानि च दानानि हेमरत्नधनानि च ॥ चक्रतीर्थे महाराज कपिलां यः प्रयच्छति ॥ पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ ११६ ॥ ॥ उत्तानपाद उवाच ॥ ॥ यानियानि च दत्तानि शस्तानि जगतीपतेः ॥ तानि सर्वाणि देवेश कथयस्व प्रसादतः ॥ ॥ ११७ ॥ ॥ ईश्वर उवाच ॥ ॥ तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥ भूमिदः स्वर्गमाप्नोति दीर्घमायुर्हिरण्यदः ॥ ११८ ॥ गृहदो रोगरहितो रूप्यदो रूपवान्भवेत् ॥ वासोदश्चंद्रसालोक्यमर्कसायुज्यमश्वदः ॥ ११९ ॥ वृषदस्तु श्रियं पुष्टां गोदाता च त्रिविष्टपम् ॥ यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ॥ १२० ॥ धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ॥ वायव्यपृथिवीवाससस्तिलकांचनसर्पिषाम् ॥ १२१ ॥ सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ॥ येनयेन हि भावेन यद्यद्दानं प्रयच्छति ॥ १२२ ॥ तेनतेन स भावेन प्राप्नोति प्रतिपूजितम् दृष्ट्वा दानानि सर्वाणि राज्ञी दत्तानि यानि च ॥ १२३ ॥ उवाच शवरो भार्यां यत्तच्छृणु नरेश्वर ॥ पुराणं पठितं भद्रे ब्राह्मणेवेदपारगैः ॥ १२४ ॥ श्रुतं च तन्मया सर्वं दानधर्मं फलं शुभम् ॥ पूर्वजन्मार्जितं पापं स्नानदानव्रतादिभिः ॥ १२५ ॥ शरीरं दुस्त्यजं मुक्त्वा लभते गतिमुत्तमाम् ॥ संसारसागराद्भीतः सत्यं भद्रे वदामि ते ॥ १२६ ॥ अनेकानि च पापानि कृतानि बहुशो मया ॥ घातिता जंतवो भद्रे निर्दयाः पक्षिणः सदा ॥ १२७ ॥ तेन पापेन

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दग्धोऽहं दारिद्र्यं न निवर्त्तते ॥ तीर्थावगाहनं पूर्वं पापेन न कृतं मया ॥ १२८ ॥ तेनाऽहं दुःखितो भद्रे दारिद्र्यमनिवर्त्तकम् ॥ मातुर्गृहं प्रयाहि त्वं त्यज स्नेहं ममोपरि ॥ नगशृंगं समारुह्य मोक्तुमिच्छाम्यहं तनुम् ॥१२९॥ ॥ शवर्युवाच ॥ मात्रा पित्रा न मे कार्यं नाऽपि स्वजनबांधवैः ॥ या गतिस्तव जीवेश सा ममापि भविष्यति ॥ १३० ॥ न स्त्रीणामीदृशो धर्मो विना भर्त्रा स्वजीवितम् ॥ श्रूयंते बहवो दोषा धर्मशास्त्रेष्वनेकधा ॥१३१॥ पारणं कुरु भोजेंद्र व्रतं येन न नश्यति ॥ यत्तेऽभिवांछितं किंचिद्विष्णवे कर्तुमर्हसि ॥१३२॥ भार्यायाः वचनं श्रुत्वा सुमुदेशं वरस्ततः ॥ गृहीत्वा श्रीफलं शीघ्रं होमं कृत्वा यथाविधि ॥१३३॥ सर्वदेवान्नमस्कृत्य भुक्तोऽपि च तया सह ॥ चैत्र्यां तु विषुवं ज्ञात्वा तस्थौ तत्र दिनत्रयम्॥१३४॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे व्याधवाक्योपदेशकथनपूर्वकदानादिफलवर्णनंनाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ॐ ॥ ॥ ईश्वर उवाच ॥ ॥ भानुमती द्विजान्भोज्य बुभुजे भुक्तशेषतः ॥ भुक्त्वा सुसुखमास्थाय तद्भक्तं परिणाम्य च ॥ १ ॥ त्रयोदश्यां ततो गत्वा मदनाख्यतिथौ तदा ॥ मार्कंडस्य ह्रदे स्नात्वाऽऽनर्च्य देवं गुहाशयम् ॥ २ ॥ कृतोपवासनियमा क्षापयित्वा महेश्वरम् ॥ पञ्चामृतसुगन्धेन धूपदीपनिवेदनैः ॥ ३ ॥ आर्चयद्विविधैः पुष्पैर्नैवेद्यैश्च सुशोभनैः ॥ क्षपाजागरणं कृत्वा श्रुत्वा पौराणिकीं कथाम् ॥ ४ ॥ नृत्यगीतैस्तथा स्तोत्रैर्देव्यौ देवं महेश्वरम् ॥ अन्नं विस्तारितं सर्वं देवस्याऽग्रे यथाविधि ॥ ५ ॥ चातुर्वर्ण्यसुताः सर्वे भोजिताः सपरिच्छदाः ॥ चतुर्दश्यां दिनं यावत्संपूज्य वृषभध्वजम् ॥ ६ ॥ शंखवाद्यैर्भेरीभिः पटह्वनिनादितम् ॥ क्षपाजागरणं कृत्वा प्रभूतजनसंकुलम् ॥ ७ ॥ नृत्यगीतैस्तथा स्तोत्रैः प्रेरिता सा निशा तदा ॥ प्रभाते भोजिता विप्राः पायसैर्मधुसर्पिषा ॥ ८ ॥ दत्त्वा दानानि विप्रेभ्यः शक्त्या विप्रानुसारतः ॥ अर्चयित्वा महापुष्पैः सुगन्धैर्मदनेन च ॥ ९ ॥ विचित्रैः सूक्ष्मवस्त्रैश्च देवः संपूज्य वेष्टितः ॥ स्रग्दामलंबमानैश्च बहुदीपसमुज्वलैः ॥ १० ॥ पक्वान्नैर्विविधैर्भक्ष्यैः सुवृत्तैर्मोदकादिभिः ॥ ततस्ते ब्राह्मणाः सर्वे वेदाध्ययनतत्पराः ॥ ११ ॥ तत्पर्व कीर्त्तयांचक्रुः पद्मकं नाम नामतः ॥ आदित्यस्य दिनं त्वद्य तिथिः पञ्चदशी तथा ॥ १२ ॥ त्वाष्ट्रमेव च नक्षत्रं संक्रांतिर्विषुवन्तथा ॥ व्यतीपातस्तथा योगः करण विष्टिरेव च ॥ १३ ॥ पद्मकंनाम पर्वेतदयनादिचतुर्गुणम् ॥ अत्र दत्तं हुतं जप्तं सर्वं भवति चाऽक्षयम् ॥ १४ ॥ ते द्विजा भानुमत्याऽथ शूलभेदं गताः सह ॥ ददृशुः शवरं कुण्डे भार्यया सह संस्थितम् ॥ १५ ॥ ऐशानीं स दिशं गत्वा पर्वते भृगुमूर्द्धनि ॥ पतितुं च समारूढो भार्यया सह पार्थिव॥ ॥ १६ ॥ ॥ भानुमत्युवाच ॥ ॥ तिष्ठतिष्ठ महासत्त्व शृणुष्व वचनं मम ॥ किमर्थं त्यजसि प्राणानद्यापि च युवा भवान् ॥ १७ ॥ कः सन्तापः क उद्वेगः किं दुःखं व्याधिरेव च ॥ शिशुः संदृश्यसेऽद्यापि कारणं कथ्यतामिदम् ॥ १८ ॥ ॥ शवर उवाच ॥ ॥ कारणं नास्ति मे किंचित्र दुःखं किंचिदेव तु ॥ संसारभयभीतोऽहं नान्या बुद्धिः प्रवर्त्तते ॥ १९ ॥ दुःखेन लभ्यते यस्मान्मानुष्यं जन्म भाग्यतः ॥ मानुष्यं जन्म चाऽऽद्य यो न धर्मं समाचरेत् ॥ २० ॥ स गच्छेन्निरयं घोरमात्मदोषेण सुन्दरि ॥ तस्मात्पतितुमिच्छामि तीर्थेऽस्मिन्पापानाशने ॥ २१ ॥

राज्युवाच ॥ अद्यापि वर्त्तते कालो धर्मस्योपार्जने तव ॥ कृतापकृतकर्मा वै व्रतदानैर्विशुद्ध्यति ॥ २२ ॥ अहं दास्यामि धान्यं वा वासांसि द्रविणं बहु ॥ नित्यमाचर धर्मं त्वं ध्यायन्नित्यं महेश्वरम् ॥ २३ ॥ ॥ शवर उवाच ॥ नैवाहं कामये वित्तं न धान्यं वस्त्रमेव च ॥ यो यस्येवान्नमश्नाति स तस्याऽश्नाति किल्बिषम् ॥ २४ ॥ ॥ राज्युवाच ॥ ॥ कंदमूलफलाहारो भ्रमित्वा भैक्ष्यमुत्तमम् ॥ अवगाह्य सुतीर्थानि सर्वपापैः प्रमुच्यते ॥ २५ ॥ ततो विमुक्तपापस्तु यत्किंचित्कुरुते शुचिः ॥ कर्मणा तेन पूतस्त्वं सद्गतिं प्राप्स्यसि ध्रुवम् ॥ २६ ॥ ॥ शवर उवाच ॥ ॥ अन्नमद्य मया त्यक्तं प्राणेभ्योऽपि महत्तरम् ॥ सत्यं न लोपये देवि निश्चिताऽत्र मतिर्मम ॥ २७ ॥ प्रसादः क्रियतां देवि क्षमस्वाऽद्य जनैः सह ॥ अधोत्तरीयवस्त्रेण संयम्यात्मानमुद्यतः ॥ २८ ॥ भार्यया सहितो व्याधो हरिं ध्यात्वा पपात ह ॥ नगार्द्धात्पतितो यावद्गतजीवो नराधिप ॥२९॥ चूर्णीभूतौ हि तौ दृष्ट्वा कुंडस्योपरि भूमिप ॥ त्रिमुहूर्त्ते गते काले शवरो भार्यया सह ॥३० ॥ दिव्यं विमानमारूढो गतश्चानुत्तमां गतिम् ॥३१॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे व्याधस्वर्गगमनवर्णनंनाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ॐ ॥ ॥ उत्तानपाद उवाच ॥ ॥ अथातो देवदेवेश भानुमत्यकरोच्च किम् ॥ एष मे संशयो देव कथयस्व प्रसादतः ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ चिंतयित्वा मुहूर्त्तं सा गता कुंडस्य सन्निधौ ॥ दृष्ट्वा कुंडस्य माहात्म्यं राज्ञी हर्षेण पूरिता ॥ २ ॥ विप्रान्बहून्समाहूय पूजयामास तत्क्षणात् ॥ दत्त्वा तु विधिवद्दानं ब्राह्मणेभ्यो नृपात्मज ॥ ३ ॥ निश्चयं परमं कृत्वा स्थिता शांतेन चेतसा ॥ ततः संपूज्य विधिवत्पितॄन्देवान्नराधिप ॥ ४ ॥ क्षपयित्वा पक्षमेकं मधुमासस्य सा स्थिता ॥ अमावास्यां ततो राज्ञी गता पर्वत सन्निधौ ॥ ५ ॥ नगशृंगं समारुह्य कृत्वा मुकुलितौ करौ ॥ विज्ञाप्य ब्राह्मणान्सर्वानिदं वचनमब्रवीत् ॥ ६ ॥ मम माता पिता भ्राता ये चान्ये सखिबांधवाः ॥ क्षमाप्रयित्वा सर्वांस्तान्वचनं मम कथ्यताम् ॥ ७ ॥ त्वत्पुत्री शूलभेदे तु तपः कृत्वा स्वशक्तितः ॥ विसृज्य चैव सात्मानं तस्मिंस्तीर्थे दिवं ययौ॥ ८ ॥ ॥ ब्राह्मणा ऊचुः ॥ ॥ संदेशं कथयिष्यामस्त्वयोक्तं शोभनव्रते ॥ मातापितृभ्यां सुश्रोणि मा तेऽभूदत्र संशयः ॥ ९ ॥ ततो विसृज्य तांल्लोकान्स्थिताः पर्वतमूर्द्धनि ॥ अधोत्तरीयवस्त्रेण गाढं बद्धा पुनःपुनः ॥ १० ॥ ततश्चिक्षेप साऽऽत्मानमेकचित्ता नराधिप ॥ नगार्द्धे पतिता यावत्तावद्दृष्टाः सुरांगनाः ॥ ११ ॥ भोभो वत्से महाभागे भानुमत्यतितापसि ॥ दिव्यं विमानमारुह्य कैलासं प्रति गम्यताम् ॥ १२ ॥ ततः सा पश्यतां तेषां जनानां त्रिदिवं गता ॥ १३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इति ते कथितः सर्वः शूलभेदस्य विस्तरः ॥ यः श्रुतः शंकरात्पूर्वमृषिदेवसमागमे ॥ १४ ॥ य इदं पठते भक्त्या तीर्थे देवकुलेऽपि वा ॥ स मुच्यते महापापादपि जन्मशतार्जितात् ॥ ॥ १५ ॥ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ गोघाती स्त्रीविघाती च देवब्रह्मस्वहारकः ॥ १६ ॥ स्वामिद्रोही मित्रघाती तथा विश्वास घातकः ॥ परन्यासापहारी च परनिक्षेपलोपकः ॥ १७ ॥ रसभेदी तुलाभेदी तथा वार्द्धुषिकस्तु यः ॥ यः कन्याविघ्नकर्त्ता च तथा विक्रयकारकः ॥ १८ ॥ परभार्यां भ्रातृभार्यां गौः स्नुषा कन्यका तथा ॥ अभिगामी परद्वेषी तथा धर्मप्रदूषकः ॥१९॥ मुच्यंते सर्व एवैते शूलभेदप्रभावतः ॥ ॥ २० ॥ य इदं श्रावयेच्छ्राद्धे विप्राणां भुंजतां नृप ॥ मुदं प्रयांति संहृष्टाः पितरस्तस्य सर्वशः ॥ २१ ॥ यश्चेदं शृणुयाद्भक्त्या पठ्यमानं नरो वशी ॥ स मुक्तः सर्वपापेभ्यः सर्वकल्याणभाग्भवेत् ॥ २२ ॥ इदं यशस्यमायुष्यमिदं पावनमुत्तमम् ॥ पठतां शृण्वतां नृणामायुःकीर्त्तिविवर्द्धनम् ॥ ॥ २३ ॥ इति कथितमिदं ते शूलभेदस्य पुण्यं महिमं न हि मनुष्यैः श्रूयते यत्सपापैः ॥ मदनरिपुतटिन्या याम्यकूलस्थितस्य प्रबलदुरितकंदोच्छेदकुद्दालकल्पम् ॥ २४ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे शूलभेदतीर्थमाहात्म्यवर्णनं

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri

नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ॐ ॥ शूलभेदमाहात्म्यं समाप्तम् ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः पुष्करिणीं गच्छेत्सर्वपाप
प्रणाशिनीम् ॥ श्रुते यस्याः प्रभावे तु सर्वपापैः प्रमुच्यते ॥ १ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ यत्राऽस्ते सर्वदा देवो वेदमूर्त्तिर्दिवाकरः
॥ २ ॥ कुरुक्षेत्रं यथा पुण्यं सार्वकामिकमुत्तमम् ॥ इदं तीर्थं तथा पुण्यं सर्वकामफलप्रदम् ॥ ३ ॥ कुरुक्षेत्रे यथा वृद्धिर्दानस्य जगतीपते ॥ पुष्क
रिण्यां तथा दानं वर्द्धते नाऽत्र संशयः ॥ ४ ॥ यवमेकं तु यो दद्यात्सौवर्णं मस्तके नृप ॥ पुष्करिण्यां तथा स्थानं यथा स्थानं नरे स्मृतम् ॥ ५ ॥
सूर्यग्रहे तु यः स्नात्वा दद्याद्दानं यथाविधि ॥ हस्त्यश्वरथरत्नादि गृहं गाश्च युगंधरान् ॥ ६ ॥ सुवर्णं रजतं वाऽपि ब्राह्मणेभ्यो ददाति यः ॥ त्रयोदश
दिनं यावत्त्रयोदशगुणं भवेत् ॥ ७ ॥ तिलमिश्रेण तोयेन तर्प्पयेत्पितृदेवताः ॥ द्वादशाब्दे भवेत्प्रीतिस्तत्र तीर्थे महीपते ॥ ८ ॥ यस्तत्र कुरुते
श्राद्धं पायसैर्मधुसर्पिषा ॥ श्राद्धदो लभते स्वर्गं पितॄणां दत्तमक्षयम् ॥ ९ ॥ अक्षतैर्वदरैर्बिल्वैरिंगुदैर्वा तिलैः सह ॥ अक्षयं फलमाप्नोति तस्मिंस्तीर्थे
न संशयः ॥ १० ॥ तत्र स्नात्वा तु यो देवं पूजयेच्च दिवाकरम् ॥ आदित्यहृदयं जप्त्वा पुनरादित्यमर्चयेत् ॥ स गच्छेत्परमं लोकं त्रिदशैरपि वंदि
तम् ॥ ११ ॥ ऋचमेकां जपेद्य तु यजुर्वा साम एव च ॥ स समग्रस्य वेदस्य फलमाप्नोति वै नृप ॥ १२ ॥ यस्त्यक्षरं जपेन्मंत्रं ध्यायमानो दिवाक
रम् ॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वपातकैः ॥ १३ ॥ यस्तत्र विधिवत्प्राणांस्त्यजते नृपसत्तम ॥ स गच्छेत्परमं स्थानं यत्र देवो दिवाकरः ॥
॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चम आवंत्यखंडे रेवाखंडे पुष्करिण्यामादित्यतीर्थमाहात्म्यवर्णननामैकोन
षष्टितमोऽध्यायः ॥ ५९ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूयोऽप्यहं प्रवक्ष्यामि आदित्येश्वरमुत्तमम् ॥ सर्वदुःखहरं पार्थ सर्वदा
प्रविनाशनम् ॥ १ ॥ आयुःश्रीवर्द्धनं नित्यं पुत्रदं स्वर्गदं शिवम् ॥ यस्य तीर्थस्य चाऽन्यानि तीर्थानि कुरुनंदन ॥ २ ॥ नालभंत श्रियं नाके
मर्त्ये पातालगोचरे ॥ कुरुक्षेत्रं गया गंगा नैमिषं पुष्करं तथा ॥ ३ ॥ वाराणसी च केदारं प्रयागं रुद्रनंदनम् ॥ महाकालं सह
स्राक्षं शुक्रतीर्थं नृपोत्तम ॥ ४ ॥ रवितीर्थस्य सर्वाणि कलां नार्हंति षोडशीम् ॥ रवितीर्थे हि यद्वृत्तं तच्छृणुष्व नृपोत्तम ॥ ५ ॥
स्नेहात्ते कथयिष्यामि वार्द्धकेनातिपीडितः ॥ शृण्वंतु ऋषयः सर्वे तपोनिष्ठा महौजसः ॥ ६ ॥ श्रुतं मे रुद्रसान्निध्य नंदिस्कंदगणैः सह ॥
पार्वत्या पृष्टः शंभुश्च रवितीर्थस्य यत्फलम् ॥ ७ ॥ शंभुना च यदाऽख्यातं गिरिजायाः ससंभ्रमम् ॥ तत्सर्वमेकचित्तेन रुद्रोद्गीतं श्रुतं मया ॥
॥ ८ ॥ तत्तेऽहं संप्रवक्ष्यामि शृणु यत्नेन पांडव ॥ दुर्भिक्षोपहता विप्रा नर्मदां तु समाश्रिताः ॥ ९ ॥ उद्दालको वशिष्ठश्च मांडव्यो गौतमस्तथा ॥ याज्ञव
ल्क्योऽथ गर्गश्च शांडिल्यो गालवस्तथा ॥ १० ॥ नाचिकेतो विभांडश्च बालखिल्यादयस्तथा ॥ शातातपश्च शंखश्च जैमिनिर्गोभिलस्तथा ॥ ११ ॥ जैगी
षव्यः शतानीकः सर्व एव समागताः ॥ तीर्थयात्रां कृता तैस्तु नर्मदायाः समंततः ॥ १२ ॥ आदित्येश्वरमायाताः प्रसंगाद्दपिपुंगवाः ॥ वृक्षैः
संच्छादितं शुभ्रं धवतिन्दुकपाटलैः ॥ १३ ॥ जंबीरैरर्जुनैः कुब्जैः शमीकेसरकिंशुकैः ॥ तस्मिंस्तीर्थे महापुण्ये सुगंधिकुसुमाकुले ॥ १४ ॥ पुन्ना
गनालिकेरैश्च खदिरैः कल्पपादपैः ॥ अनेकश्वापदाकीर्णं मृगमार्जारसंकुलम् ॥ १५ ॥ ऋक्षहस्तिसमाकीर्णं चित्रकैश्चोपशोभितम् ॥ प्रविष्टा
ऋषयः सर्वे वने पुष्पसमाकुले ॥ १६ ॥ वनांते च स्त्रियो दृष्ट्वा रक्ता रक्तांबरान्विताः ॥ रक्तमाल्यानुशोभाढ्या रक्तचन्दनचर्चिताः ॥ १७ ॥
रक्ताभरणसंयुक्ताः पाशहस्ता भयावहाः ॥ तासां समीपगा दृष्टाः कृष्णजीमूतसन्निभाः ॥ १८ ॥ महाकाया भीमवक्त्राः पाशहस्ता भयावहाः ॥
अनावृष्ट्युपमा दृष्टा आतुराः पिंगलोचनाः ॥ १९ ॥ दीर्घजिह्वा करालास्या तीक्ष्णदंष्ट्रा दुरासदा ॥ वृद्धा नारी कुरुश्रेष्ठ दृष्टाऽन्या ऋषिपुंगवैः ॥
॥ २० ॥ ततः समीपगा वृद्धा तस्य वृन्दस्य भारत ॥ स्वाध्यायनिरता विप्रा दृष्टास्तैः पापकर्मभिः ॥ २१ ॥ ऊचुस्ते तु समूहेन ब्राह्मणांस्त
पसि स्थितान् ॥ अस्माकं स्वामिनः सर्वे तिष्ठन्ते तीर्थमध्यतः ॥ ते प्रस्थाप्या महाभागाः सर्वथैव त्वरान्विताः ॥ २२ ॥ तच्छ्रुत्वा वचनं तेषां
सर्वे चैव त्वरान्विताः ॥ जग्मुस्ते नर्मदाकक्षं दृष्ट्वा रेवां द्विजोत्तमाः ॥ २३ ॥ ततः केचित्स्तुवंत्यन्ये जय देवि नमोऽस्तु ते ॥ २४ ॥ नमोस्तु ते
सिद्धगणैर्निषेविते नमोऽस्तु ते सर्वपवित्रमंगले ॥ नमोऽस्तु ते विप्रसहस्रसेविते नमोऽस्तु रुद्रांगसमुद्भवे वरे ॥ २५ ॥ नमोस्तु ते सर्वपवित्रपावने
नमोऽस्तु ते देवि वरप्रदे शिवे ॥ नमामि ते शीतजले सुखप्रदे सरिद्वरे पापहरे विचित्रिते ॥ २६ ॥ अनेकभूतौघसुसेवितांगे गन्धर्वयक्षोरगपावि
तांगे ॥ महागजौघैर्महिषैर्वराहैरापीयसे तोयमहोर्मिमाले ॥ २७ ॥ नमामि ते सर्ववरे सुखप्रदे विमोचयास्मानघपाशबद्धान् ॥ २८ ॥ भ्रमन्ति
तावन्नरकेषु मर्त्या यावत्तवांभो नहि संश्रयन्ति ॥ स्पृष्टं करैश्चन्द्रमसो रवेश्चैत्तदेवि दद्यात्परमं पदं तु ॥ २९ ॥ अनेकसंसारभयार्दितानां पापैरने
कैरभिवेष्टितानाम् ॥ गतिस्त्वमंभोजसमानवक्त्रे द्वन्द्वैरनेकैरभिसंवृतानाम् ॥ ३० ॥ नद्यश्च पूता विमला भवन्ति त्वां देवि संप्राप्य न संशयोऽत्र ॥
दुःखातुराणामभयं ददासि शिष्टैरनेकैरभिपूजिताऽसि ॥ ३१ ॥ विष्मूत्रदेहाश्च निमग्नदेहा भ्रमन्ति तावन्नरकेषु मर्त्याः ॥ महावलध्वस्ततरंगभंगं
जलं न यावत्तव संस्पृशंति ॥ ३२ ॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबन्ति येऽभस्तव देवि पुण्यम् ॥ तेऽपि प्रमुच्यन्ति भयाच्च घोरात्कि
मत्र विप्रा भवपाशभीताः ॥ ३३ ॥ सरांसि नद्यः क्षयमभ्युपेता घोरे युगेऽस्मिन्कलिनाऽसृष्टे ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे च
गंगा ॥ ३४ ॥ तव प्रासादाद्धरदे विशिष्टे कालं यथेमं परिपालयित्वा ॥ यास्याम मोक्षं तव सुप्रसादाद्धयं यथा त्वं कुरु नः प्रसादम् ॥ ३५ ॥
त्वामाश्रिता ये शरणं गताश्च गतिस्त्वमंबेव पितेव पुत्रान् ॥ त्वत्पालिता यावदिमं सुघोरं कालं त्वनावृष्टिहतं क्षिपामः ॥ ३६ ॥ एवं स्तुता तदा
देवी नर्मदा सरितां वरा ॥ प्रत्यक्षा सा परा मूर्तिर्ब्राह्मणानां युधिष्ठिर ॥ ३७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पठंति ये स्तोत्रमिदं नरेन्द्र शृण्वंति
भक्त्या परया प्रशांताः ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्यांवरभूषितांगाः ॥ ३८ ॥ ये स्तोत्रमेतत्सततं जपन्ति स्नात्वा च तोयेन तु नर्म
दायाः ॥ तेभ्योंतकाले सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ ३९ ॥ प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवेन्द्रम् ॥ दक्षयं
स्वे सलिले ददाति समाश्रयं तस्य महानुभाव ॥ ४० ॥ पापैर्विमुक्ता दिवि मोदमानाः संभोगिनश्चैव तु नान्यथा च ॥ ४१ ॥ प्रसन्ना नर्मदा
देवी स्तोत्रेणाऽनेन भारत ॥ जलेनाप्याथितान्विप्रान्दक्षिणापथवाहिनी ॥ ४२ ॥ अमृतत्वं तु वो दद्मि योगिभिर्यत्र गम्यते ॥ दुर्लभं यत्सुरैः
सर्वैर्मत्प्रसादाल्लभिष्यथ ॥ ४३ ॥ इति ते ब्राह्मणा राजल्लब्ध्वा वरमनुत्तमम् ॥ गमिष्यंतः प्रीतचित्ता ददुश्चित्रमद्भुतम् ॥ ४४ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ दृष्टास्तैः पुरुषाः पार्थ नर्मदातटसंस्थिताः ॥ स्नानदेवार्चनासक्ताः पंच एव महाबलाः ॥ ४५ ॥ ते दृष्टा ब्राह्मणैः सर्व्वैर्वंदवेदांग
पारगैः ॥ संपृष्टास्तैर्महाराज यथा तदवधारय ॥ ४६ ॥ ॥ विप्रा ऊचुः ॥ ॥ वनांते स्त्रीयुगं दृष्ट्वा महारौद्रं भयावहम् ॥ वृद्धाश्च पुरुषास्तत्र
पाशहस्ता भयावहाः ॥ ४७ ॥ दुर्धर्षा दुर्निरीक्ष्याश्च इतश्चेतश्च चंचलाः ॥ व्याहरंतः शुभां वाचं न तत्र गतिरस्ति वै ॥ ४८ ॥ अपरस्परयोः सर्वे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निरीक्षतः पुनःपुनः ॥ तेस्तु यद्वचनं प्रोक्तं तत्सर्वं कथ्यतामिति ॥४९ ॥ अस्माकं पुरुषाः पंच तिष्ठंति तत्र सत्तमाः ॥ ते ह्यस्थाप्या महाभागाः सर्व थैव त्वरान्विताः॥५०॥अथ ते पुरुषाः पंच श्रुत्वा वाक्यमिदं शुभम् ॥परस्परं निरीक्षंतो वदन्ति च पुनःपुनः॥५१॥क्व ते कस्य कुतो याताः किमुक्तं ते भयावहैः ॥ ५२ ॥ पुरुषा ऊचुः ॥ तीर्थावगाहनं सर्वैः पूर्वदक्षिणपश्चिमैः ॥ उत्तरैश्च कृतं भक्त्या न पापं तैर्व्यपोहितम् ॥ ५३ ॥ निष्पापाश्चाथ संजातास्तीर्थस्याऽस्य प्रभावतः ॥ शृण्वंतु ऋषयः सर्वे वह्निकालोपमा द्विजाः ॥ ५४ ॥ पातकानि च घोराणि यान्यचिंत्यानि देहिनाम् ॥ पापिष्ठेन तु चैकेन गुरुदारा निषेविता ॥५५॥ हृतं चाऽन्येन मित्रस्वं सुवर्णं च धनं तथा ॥ ब्रह्महत्या महारौद्रा कृता चाऽन्येन पातकम् ॥५६॥ सुरापानं तु चान्यस्य संजातं चाप्यकामतः ॥ गोहत्या चाप्यकामेन कृता चैकेन पापिना ॥ ५७ ॥ अकामतोऽपि सर्वेषां पातकानि नराधिप ॥ ब्राह्मणानां तु ते श्रुत्वा वाक्यं तद्विस्मयान्विताः ॥ ५८ ॥ सद्य एव तदा जाताः पापिष्ठा गतकल्मषाः ॥ तीर्थस्याऽस्य प्रभावेन नर्मदायाः प्रभावतः ॥ ५९ ॥ न क्वचित्पातकानां तु प्रवेशश्चाऽत्र जायते ॥ एवं संचित्य ते सर्वे पापिष्ठाश्च परस्परम् ॥ ६० ॥ चित्रभानुः स्मृतस्तैस्तु विचिंत्य हृदये हरिम् ॥ स्नात्वा रेवाजले पुण्ये तर्पिताः पितृदेवताः ॥ ६१ ॥ नत्वा तु भास्करं देवं हृदि ध्यात्वा जनार्दनम् ॥ प्रदक्षिणं तु तं भक्त्या ज्वलंतं जातवेदसम् ॥६२॥ पतिताः पांडवश्रेष्ठ पापोद्विग्ना महीपते ॥ सात्त्विकीं वासनां कृत्वा त्यक्त्वा रजस्तमस्तथा ॥ ६३ ॥ हुतं तैः पावके सर्वं रेवाया उत्तरे तटे ॥ विमानस्थास्तदा दृष्टा ब्राह्मणैस्ते युधिष्ठिर ॥ ६४ ॥ आश्चर्यमतुलं दृष्टमृषिभिर्नर्मदातटे ॥ तदाप्रभृति ते सर्वे रागद्वेष विवर्जिताः ॥ ६५ ॥ रवितीर्थं द्विजा हृष्टाः सेवन्ते मोक्षकांक्षया ॥ तीर्थस्याऽस्य च यत्पुण्यं तच्छृणुष्व नराधिप ॥ ६६ ॥ पीडितो वृद्धभावेन भक्त्या प्रीतो नरेश्वर ॥ उद्देशं कथयिष्यामि द्विक्रोशाभ्यंतरे स्थितः ॥ ६७ ॥ कुरुक्षेत्रं यथा पुण्यं रवितीर्थं श्रुतं मया ॥ ईश्वरेण पुरा ख्यातं पण्मुखस्य नराधिप ॥ ६८ ॥ श्रुतं रुद्राच्च तैः सर्व्वैरहं तत्र समीपगः ॥ ॥ ईश्वर उवाच ॥ ॥ मार्त्तंडग्रहणे प्राप्ते ये व्रजंति षडानन ॥ रवितीर्थे कुरुक्षेत्रे तुल्यमेतत्फलं लभेत् ॥ ६९ ॥ स्नाने दाने तथा जप्ये होमे चैव विशेषतः॥ कुरुक्षेत्रे समं पुण्यं नाऽत्र कार्या विचारणा ॥७०॥ ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ रवितीर्थे विशेषेण रेवा पुण्यफलप्रदा ॥ ७१ ॥ षष्ठ्यां सूर्यदिने भक्त्या व्यतीपाते च वै धृतौ ॥ संक्रांतौ ग्रहणेऽमायां ये व्रजंति जितेंद्रियाः ॥ ७२ ॥ कामक्रोधैर्विमुक्ताश्च रागद्वेषैस्तथैव च ॥ उपोष्य परया भक्त्या देवस्याऽग्रे नराधिप ॥ ॥ ७३ ॥ रात्रौ जागरणं कृत्वा दीपं देवस्य बोधयेत् ॥ कथां वै वैष्णवीं पार्थ वेदाभ्यसनमेव च ॥ ७४ ॥ ऋग्वेदं वा यजुर्वेदं सामवेदमथर्वणम् ॥ ऋचमेकां जपेद्यस्तु स वेदफलमाप्नुयात् ॥ ७५ ॥ गायत्र्या च चतुर्वेदफलमाप्नोति मानवः ॥ प्रभाते पूजयेद्विप्रानन्नदानहिरण्यतः ॥ ७६ ॥ भूमिदानेन वस्त्रेण अन्नदानेन शक्तितः ॥ छत्रोपानहशय्यादिगृहदानेन पाण्डव ॥ ७७ ॥ ग्रामधूर्वहदानेन गजकन्याहयेन च ॥ विद्याशकट दानेन सर्वेषामभयं भवेत् ॥ ७८ ॥ शत्रुश्च मित्रतां याति विषं चैवाऽमृतं भवेत् ॥ ग्रहा भवंति सुप्रीताः प्रीतस्तस्य दिवाकरः ॥ ७९ ॥ एतत्ते सर्वमाख्यातं रवितीर्थफलं नृप ॥ ये शृण्वंति नरा भक्त्या रवितीर्थफलं शुभम् ॥८०॥ तेऽपि पापविनिर्मुक्ता रविलोके वसंति हि ॥ गोदानेन च यत्पुण्यं यत्पुण्यं भृगुदर्शने ॥ ८१ ॥ केदारे उदकं पीत्वा तत्पुण्यं जायते नृणाम् ॥ अब्दमश्वत्थसेवायां तिलपात्रप्रदो भवेत् ॥ ८२ ॥ तत्फलं समवाप्नोति आदित्येश्वरकीर्त्तनात् ॥ श्रुते यस्य प्रभावे न जायते यन्नृपात्मज ॥ ८३ ॥ तत्सर्वं कथयिष्यामि भक्त्या तव महीपते ॥ पापानि च प्रलीयन्ते भिन्नपात्रे यथा जलम् ॥ ८४ ॥ तीर्थस्याऽभिमुखो नित्यं जायते नाऽत्र संशयः ॥ गुह्याद्गुह्यतरं तीर्थं कथितं तव पांडव ॥ ८५ पापिष्ठानां कृतघ्नानां स्वामिमित्रावघातिनाम् ॥ तीर्थाख्यानं शुभं तेषां गोपितव्यं सदा बुधैः ॥ ८६ ॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥६०॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं पुण्यं नर्मदादक्षिणे तटे ॥ शक्रतीर्थं सुविख्यातमशेषाघविनाशनम् ॥ १ ॥ पुरा शक्रेण तत्रैव तपो वै दुरतिक्रमम् ॥ प्राप्तं परया भक्त्या देवं प्रति महेश्वरम् ॥ २ ॥ ततः संतोषितो देव उमापतिर्नराधिप ॥ देवेंद्रत्वं वरं राज्यं दानवानां वधं ददौ ॥ ३ ॥ लब्धं शक्रेण नृपते नर्मदातीर्थभावतः॥ ततः पुण्यतमं तीर्थं संजातं वसुधातले ॥४॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे त्रयोदशीम् ॥ उपोष्य वै नरो भक्त्या सर्व पापैः प्रमुच्यते ॥५॥ दुःस्वप्नसंभवैः पापैर्दुर्निमित्तसमुद्भवैः॥ ग्रहशाकिनिसंभूतैर्मुच्यते पांडुनंदन ॥६॥ शक्रेश्वरं नृपश्रेष्ठ ये प्रपश्यंति भक्तितः ॥ तेषां जन्मकृतं पापं नश्यते नाऽत्र संशयः ॥७॥ अगम्यागमने चैव अवाह्ये चैव वाहिते ॥ स्वामिमित्रविघाते यन्नश्यते नाऽत्र संशयः ॥ ८ ॥ गोप्रदानं प्रकर्तव्यं शुभं ब्राह्मणपुंगवे ॥ धुर्यं वा दापयेत्तस्मिन्सर्वांगरुचिरं नृप ॥ ९ ॥ दातव्यं परया भक्त्या स्वर्गे वासमभीप्सता ॥ एतत्ते सर्वमाख्यातं शक्रेश्वरफलं नृप ॥१०॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शक्रेश्वरतीर्थमाहात्म्यवर्णनंनामैक षष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र करोडीश्वरमुत्तमम् ॥ यत्र वै निहतास्तात दानवाः सपदानुगाः ॥ १ ॥ इन्द्रादिदेवैः संहृष्टैः सततं जयबुद्धिभिः ॥ तेषां ये पुत्रपौत्राश्च पूर्ववैरमनुस्मरम् ॥ २ ॥ क्रुद्धैर्देवगणैश्च दानवा निहता रणे ॥ तेषां शिरांसि संगृह्य सर्वे देवाः सवासवाः ॥ ३ ॥ निक्षिप्य नर्मदातोये बंधुभावमनुस्मरम् ॥ तत्र स्नात्वा सुराः सर्वे स्थापयित्वा उमापतिम् ॥४॥ इन्द्रेण सहिताः सर्वेऽपूजयँल्लोकसिद्धये ॥ हृष्टचित्ताः सुराः सर्वे जग्मुराकाशमंडलम् ॥ ५ ॥ दानवानां महाभाग सूदिता कोटिरुत्तमा ॥ तदाप्रभृति तत्तीर्थं करोडीति महीतले ॥ ६ ॥ विख्यातं तु तदा लोके पापघ्नं पांडुनंदन ॥ अष्टम्यां च चतुर्दश्यामुभौ पक्षौ च भक्तितः ॥ उपोष्य शूलिनश्चाग्रे रात्रौ कुर्वीत जागरम् ॥ ७ ॥ सत्कथापाठसंयुक्तो वेदाध्ययनसंयुतः ॥ प्रभाते विमले प्राप्ते पूजयेत्त्रिदशेश्वरम् ॥ ८ ॥ पंचामृतेन संस्नाप्य श्रीखण्डेन च गुंठयेत् ॥ शस्तैः पल्लवपुष्पैश्च पूजयेत्तु प्रयत्नतः ॥ ९ ॥ बहुरूपं जपन्मंत्रं दक्षिणाशां व्यवस्थितः ॥ यथोक्तेन विधानेन नाभिमात्रे जले क्षिपेत् ॥ १० ॥ तिलांजलिं तु प्रेताय दक्षिणाशामुपस्थितः ॥ श्राद्धं तत्रैव विप्राय कारयेद्विजितेंद्रियः ॥ ११ ॥ विषमैरग्रजातैश्च वेदाभ्यसनतत्परैः ॥ गोदिरण्येन संपूज्य तांबूलैर्भोजनैस्तथा ॥ १२ ॥ भूषणैः पादुकाभिश्च ब्राह्मणान्पांडुनंदन ॥ भवेत्कोटिगुणं तस्य नात्र कार्या विचारणा ॥ १३ ॥ तस्मिंस्तीर्थे तु यः कश्चित्स्नानेदेहं विधानतः ॥ तस्य भवति यत्पुण्यं तच्छृणुष्व नराधिप ॥ १४ ॥ यावदस्थीनि तिष्ठंति मर्त्यस्य नर्मदाजले ॥ तावद्वसति धर्मात्मा शिवलोके सुदुर्लभे ॥ १५ ॥ ततः कालाच्च्युतस्तस्मादिह मानुषतां गतः ॥ कोटीधनपतिः श्रीमाञ्जायते राजपूजितः ॥ १६ ॥ सर्वधर्मसमायुक्तो मेधावी वीजपुत्रकः ॥ विख्यातो वसुधापृष्ठे दीर्घायुर्मानवो भवेत् ॥ १७ ॥ पुनः स्मरति तत्तीर्थं तत्र गत्वा नृपोत्तम ॥ करोडेश्वरमभ्यर्च्य प्राप्नोति परमां गतिम् ॥ १८ ॥ इन्द्रचन्द्रयमै रुद्रैरादित्यैर्वसुभिस्तथा ॥ विश्वेदेवैस्तथा सर्वैः स्थापितस्त्रिदशेश्वरः ॥ १९ ॥ रेवाया उत्तरे कूले लोकानां हितकाम्यया ॥ मानवो भक्तिसंयुक्तः प्रासादं कारयेत्तु यः ॥ २० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation

तस्मिंस्तीर्थे नरश्रेष्ठ सद्गतिं समवाप्नुयात् ॥ न्यायोपार्जितधनेनैव दारुपाषाणकेटुकैः ॥ २१ ॥ ब्राह्मणः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिश्च शक्तितः ॥ तेपि यांति नरा लोके शांकरे सुरपूजिते ॥ २२ ॥ यः शृणोति सदा भक्त्या माहात्म्यं तीर्थजं नृप ॥ तस्य पापं क्षणश्चेत षण्मासाभ्यंतरं च यत् ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे करोडीश्वरतीर्थमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्त राजेंद्र कुमारेश्वरमुत्तमम् ॥ प्रसिद्धं सर्वतीर्थानामगस्त्येश्वरसंनिधौ ॥ १ ॥ पण्मुखेन पुरा तात सर्वपातकनाशनम् ॥ आराध्य परया भक्त्या सिद्धिः प्राप्ता नराधिप ॥ २ ॥ देवसेन्याधिपो जातः सर्वशत्रुनिबर्हणः ॥ उग्रतेजा महात्माऽसौ संजातस्तीर्थसेवनात् ॥ ३ ॥ तदाप्रभृति तत्तीर्थं संजातं नर्मदातटे ॥ तत्र तीर्थे तु यो गत्वा एकचित्तो जितेंद्रियः ॥ ४ ॥ कार्त्तिकस्य चतुर्दश्यामष्टम्यां च विशेषतः ॥ स्नापयेद्विरिजानाथं दधिदुग्धेन सर्पिषा ॥ ५ ॥ गीतं तत्र प्रकर्तव्यं पिंडदानं यथाविधि ॥ ब्राह्मणैः श्रोत्रियैः पार्थ षट्कर्मनिरतैः शुभैः ॥ ६ ॥ यत्किंचिद्दीयते तत्र अक्षयं पांडुनन्दन ॥ सर्वतीर्थमयं तीर्थ निर्मितं शिखिना नृप ॥ ७ ॥ एतत्ते सर्वमाख्यातं कुमारेश्वरजं फलम् ॥ कुमारदर्शनात्पुण्यं प्राप्यते पांडुनन्दन ॥ ८ ॥ मृतः स्वर्गमवाप्नोति सत्यमीश्वरभाषितम् ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुमारेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ नराणां पापनाशाय अगस्त्येश्वरमुत्तमम् ॥ १ ॥ तत्र स्नात्वा नरो राजन्मुच्यते ब्रह्महत्यया ॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशी ॥ २ ॥ घृतेन स्नापयेद्देवं समाधिस्थो जितेंद्रियः ॥ एकविंशति कुलोपेतो व्यवदेश्वरात्पदात् ॥ ३ ॥ घनं चोपानहौ छत्रं दद्याच्च घृतकंबलम् ॥ भोजनं चैव सर्वेषां सर्वं कोटिगुणं भवेत् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे अगस्त्येश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र आनंदेश्वरमुत्तमम् ॥ रुद्रस्य परमानंदो यत्र जातो युधिष्ठिर ॥ तत्तीर्थं कथयिष्यामि सर्वपापक्षयं करम् ॥ १ ॥ युधिष्ठिर उवाच ॥ ॥ आनंदश्चैव संजातो रुद्रस्य द्विजसत्तम ॥ कथ्यतां मे च तत्सर्वं संक्षेपात्सह बांधवैः ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कथयामि नृपश्रेष्ठ आनंदेश्वरमुत्तमम् ॥ दानवानां वधं कृत्वा देवदेवो महेश्वरः ॥ ३ ॥ पूजितो देवतैः सर्वैः किन्नरैर्यक्षपन्नगैः ॥ आनंदसंयुतो देवो ननर्त वृषवाहनः ॥ ४ ॥ भैरवं रूपमास्थाय गौर्या चार्द्धांगसंस्थितः ॥ भूतवेतालकंकालैर्भैरवैर्भैरवो वृतः ॥ ५ ॥ ननर्त नर्मदातीरे दक्षिणे पांडुनंदन ॥ तुष्टैर्मरुद्गणैः सर्वैः स्थापितः कमलासनः ॥ ६ ॥ तदाप्रभृति तत्तीर्थमानंदेश्वरमुच्यते ॥ अष्टम्यां च चतुर्दश्यां पौर्णमास्यां नराधिप ॥ ७ ॥ विधिवच्चार्च्चयेद्देवं सुगंधेन विलेपयेत् ॥ ब्राह्मणान्पूजयेत्तत्र यथाशक्त्या युधिष्ठिर ॥ ८ ॥ गोदानं तत्र कर्त्तव्यं वस्त्रदानं शुभावहम् ॥ वसंतस्य त्रयोदश्यां श्राद्धं तत्रैव कारयेत् ॥ ९ ॥ इंगुदैर्बदरैर्बिल्वैरक्षतैश्च जलेन वा ॥ प्रेतानां कारयेच्छ्राद्धमानंदेश्वर उत्तमे ॥ १० ॥ आनंदित भवेयुस्ते यावदाभूतसंप्लवम् ॥ संततेर्वै न विच्छेदः सप्तजन्मसु जायते ॥ आनंदोहि भवत्तेषां प्रतिजन्मनि भारत ॥ ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे आनंदेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मातृतीर्थमनुत्तमम् ॥ संगमस्य समीपस्थं नर्मदादक्षिणे तटे ॥ १ ॥ मातरस्तत्र राजेंद्र संजाता नर्मदातटे ॥ उमार्द्धनारिदेवेशो व्यालयज्ञोपवीतधृक् ॥ २ ॥ उवाच योगिनीवृंदं कष्टंकष्टमहो हर ॥ अजेयाः सर्वदेवानां त्वत्प्रसादान्महेश्वर ॥ ३ ॥ तीर्थमत्र विधानेन प्रख्यातं वसुधातले ॥ एवं भवतु योगिन्य इत्युक्त्वाऽन्तरधाच्छिवः ॥ ४ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तत्र तीर्थे तुः यो भक्त्या नवम्यां नियतः शुचिः ॥ उपोष्य परया भक्त्या पूजयेन्मातृगोचरम् ॥ ५ ॥ तस्य स्युर्मातरः प्रीताः प्रीतोऽयं वृषवाहनः ॥ वंध्याया मृतवत्साया अपुत्राया युधिष्ठिर ॥ ६ ॥ स्नापनं चारभेत्तत्र मंत्रशास्त्रविदुत्तमः ॥ सहिरण्येन कुंभेन पंचरत्नफलान्वितः ॥ ७ ॥ स्नापयेत्पुत्रकामायाः कांस्यपात्रेण देशिकः ॥ पुत्रं सा लभते नारी वीर्यवंतं गुणान्वितम् ॥ ८ ॥ यो यं काममभिध्याये त्तत्तः स लभते नृप ॥ मातृतीर्थात्परं तीर्थं न भूतं न भविष्यति ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे मातृतीर्थमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात जलमध्ये व्यवस्थितम् ॥ लुंकेश्वरमिति ख्यातं सुरासुरनमस्कृतम् ॥ १ ॥ इदं तीर्थं महापुण्यं नानाश्चर्यं महीतले ॥ अस्य तीर्थस्य माहात्म्यमुत्पत्तिं शृणु भारत ॥ २ ॥ आसीत्पुरा महावीर्यो दानवो बलदर्पितः ॥ कालपृष्ठ इति ख्यातः सुतो ब्रह्मसुतस्य च ॥ ३ ॥ गंगातटं समाश्रित्य चचार विपुलं तपः ॥ अधोमुखोऽपि संस्थित्वाऽपिबद्धममहर्निशम् ॥ ४ ॥ ततश्चानंतरं देवस्तिष्ठते द्युमया सह ॥ दृष्ट्वा तं पार्वती सा तु तपस्युग्रे व्यवस्थितम् ॥ ५ ॥ पश्यपश्य महादेव धूमाशी तिष्ठते नरः ॥ प्रसीद तं कुरुष्वाद्य देहि शीघ्रं वरं विभो ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ यदुक्तं वचनं देवि न तन्मे रोचते प्रिये ॥ स्वकार्यं च सदा चिंत्यं परकार्यं विसर्जयेत् ॥ ७ ॥ मूर्खस्त्रीबालशत्रूणां वच्छेदेनाऽनुवर्त्तते ॥ व्यसने पतते घोरे सत्यमेतदुदीरितम् ॥ ८ ॥ ॥ देव्युवाच ॥ ॥ भार्यायाऽभ्यर्थितो भर्त्ता कारणं बहु भाषते ॥ लघुत्वं याति सा नारी एवं शास्त्रेषु पठ्यते ॥ ९ ॥ प्राणत्यागं करिष्यामि यदि मां त्वं न मन्यसे ॥ पार्वत्या प्रेरितो देवो गतोऽसौ दानवं प्रति ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ किमर्थं पिबसे धूमं किमर्थं तप्यसे तपः ॥ किं दुःखं किं नु संतापो वद कार्यमभीप्सितम् ॥ ११ ॥ युवा त्वं दृश्यसेऽद्यापि वर्षविंशतिरेव च ॥ तदाचक्ष्व हि मे सर्वं तपसः कारणं महत् ॥ १२ ॥ ॥ दानव उवाच ॥ ॥ अचला दीयतां भक्तिर्मम स्थैर्य्यं तवोपरि ॥ अपरं वर्षसाहस्रं निर्विघ्नं मे गतं विभो ॥ ॥ १३ ॥ दिवसानां सहस्रे द्वे पूर्णे त्वत्तपसा मम ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ याचयाऽभीप्सितं कार्यं तुष्टोऽहं तव सुव्रत ॥ देवस्य वचनं श्रुत्वा चिंतयामास दानवः ॥ १५ ॥ किं नाकं याचयाम्यद्य किमद्य सकलां महीम् ॥ एवं संचिंतयामास कामबाणेन पीडितः ॥ १६ ॥ ॥ दानव उवाच ॥ ॥ यदि तुष्टोऽसि मे देव वरं दास्यसि मे प्रभो ॥ संग्रामेस्तु न तुष्टोऽहं बलं नास्तीति किंच न ॥ १७ ॥ यस्य मूर्द्धन्यहं देव पाणिना समुपस्पृशे ॥ देवदानवगंधर्वा भस्मसाद्यातु तत्क्षणात् ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ यत्त्वया चिंतितं किंचित्तत्सर्वं सफलं तव ॥ उत्तिष्ठ गच्छ शीघ्रं त्वं भवनं प्रति दानव ॥ १९ ॥ ॥ दानव उवाच ॥ ॥ स्थीयतां देवदेवेश याचज्ञास्यामि ते वरम् ॥ युष्मन्मूर्ध्नि न्यसे पाणिं प्रत्ययो मे भवेद्यथा ॥ २० ॥ ततश्चानंतरं देवश्चियानो महेश्वरः ॥ न स्कंदो न हरिर्ब्रह्मा यः कार्येषु क्षमोऽधुना ॥ २१ ॥ ज्ञात्वा चैवापदं प्राप्तां देवः प्रार्थयते वृषम् ॥ अनेन सह पापेन युध्यस्व सांप्रतं क्षणम् ॥ २२ ॥ करं प्रासारयद्दैत्यो देवं मूर्ध्नि किल स्पृशेत् ॥ लांगूलेनाऽहतो दैत्यो विपण्णः पतितो भुवि ॥ २३ ॥ देवस्तु दक्षिणामाशां गतश्चैवोमया सह ॥ भयभीतो निरीक्षेत ग्रीवां भज्यं पुनःपुनः ॥ २४ ॥ गते चाऽदर्शनं देवे युयुधे वृषभेण सः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्वावेतौ बलिनां श्रेष्ठौ युयुधाते महाबलौ ॥ २५ ॥ प्रहारैर्वज्रसदृशैः कोटी घटिकात्रयम् ॥ पाणिभ्यां न स्पृशद्यौ वै वृषभस्य शिरस्तथा ॥ २६ ॥ हत्वा लांगूलपातेन आगतो वृषभस्तदा ॥ उत्थितश्चाप्यसौ दैत्यो व्रजते वृषपृष्ठतः ॥ २७ ॥ वायुवेगेन संप्राप्तो यत्र देवो महेश्वरः ॥ आगतं दानवं दृष्ट्वा वृषो वचनमब्रवीत् ॥ २८ ॥ आरुह्य पृष्ठे मे देव शीघ्रमेव हि गम्यताम् ॥ आरुह्य वृषभं देवो जगाम चोमया सह ॥ २९ ॥ नाकं प्राप्तस्ततो देवो गतः शक्रस्य मंदिरम् ॥ नात्यजद्देवपृष्ठं तु दानवो बलदर्पितः ॥ ३० ॥ इंद्रलोकं परित्यज्य ब्रह्मलोकं गतस्तदा ॥ यत्रयत्र व्रजे देवो भयात्सह दिवौकसैः ॥ ३१ ॥ अपश्यत्तत्र तत्रैव पृष्ठे लग्नं तु दानवम् ॥ सर्वाल्लोकान्भ्रमित्वा तु देवो विस्मयमागतः ॥ ३२ ॥ न स्थानं विद्यते किंचिद्यत्र विश्राम्यते क्षणम् ॥ देवदानवयोस्तत्र युद्धं ज्ञात्वा सुदारुणम् ॥ ३३ ॥ हर्षितात्मा मुनिस्तत्र चिरं नृत्यति नारदः ॥ धन्योऽहमद्य मे जन्म जीवितं च सुजीवितम् ॥ ३४ ॥ महांतं च कलिं दृष्ट्वा सन्तोषः परमोऽभवत् ॥ देवदानवयोस्तत्र युद्धं त्यक्त्वा च नारदः ॥ ३५ ॥ आजगाम ततो विप्रो यत्र देवो महेश्वरः ॥ दृष्ट्वा देवोथ तं विप्रं प्रतिपूज्याऽब्रवीदिदम् ॥३६॥ भो नारद मुनिश्रेष्ठ जानीषे केशवं क्वचित् ॥ गत्वा तत्र च शीघ्रं त्वं केशवाय निवेदय ॥ ३७ ॥ ॥ नारद उवाच ॥ ॥ देवदानवसिद्धानां गंधर्वोरगरक्षसाम् ॥ सर्वेषामेव देवेशो हरते ध्रुवमापदम् ॥ ॥ ३८ ॥ असंभाव्यं न वक्तव्यं मनसाऽपि न चिंतयेत् ॥ ईदृशीं नैव बुद्ध्यामि आपदं च विभो तव ॥ ३९ ॥ ॥ ईश्वर उवाच ॥ ॥ गच्छ नारद शीघ्रं त्वं यत्र देवो जनार्दनः ॥ विदितं च त्वया सर्वं यत्कृतं दानवेन तु ॥ ४० ॥ अवध्यो दानवो ह्येष सेन्द्रैरपि मरुद्गणैः ॥ गत्वा तु केशवं देवं निवेदय महामुने ॥ ४१ ॥ ॥ नारद उवाच ॥ ॥ न तु गच्छाम्यहं देव सुप्तः क्षीरोदधौ सुखी ॥ केशवः प्रेरणे ह्येषामादेशो दीयतां प्रभो ॥४२॥ भ्रात्रा स्वस्रा दुहित्रा वा राजानं च तथा प्रभुम् ॥ गुरुं चैवाऽदितः कृत्वा शयानं न प्रबोधयेत् ॥ ४३ ॥ ॥ ईश्वर उवाच ॥ ॥ यदि कश्चिद्गारेषु वह्निरुत्पद्यते महान् ॥ निधनं यांति तत्रस्था यद्बुद्ध्येरन्नसूरयः ॥ ४४ ॥ ॥ नारद उवाच ॥ ॥ शीघ्रं गच्छ महादेव आत्मानं रक्ष सुप्रभो ॥ गच्छाम्यहं न सन्देहो यत्र देवो जनार्दनः ॥ ४५ ॥ ततो नंदिमहाकालौ स्तम्भहस्तौ भयानकौ ॥ जघ्नतुर्दानवं तत्र मुद्गरादिभिरायुधैः ॥ ४६ ॥ त्रयोऽपि च महाकायाः सप्ततालप्रमाणकाः ॥ न शमो जायते तेषां युध्यतां च परस्परम् ॥ ४७ ॥ ततश्चानंतरं विप्रोऽगच्छत्तं केशवं प्रति ॥ सुप्तं क्षीरार्णवेऽपश्यच्छेषपर्यंकसंस्थितम् ॥ ४८ ॥ लक्ष्म्या पादयुगं गृह्य ऊरूपरि निवेशितम् ॥ अप्सरोगीयमानं तु भक्त्याऽऽनम्य च केशवम् ॥ ४९ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ उत्थापयस्व देवेशं लक्ष्मि त्वमविशंकिता ॥ ५० ॥ नारदस्य वचः श्रुत्वा पदांगुष्ठं व्यमर्दयत् ॥ नारदस्तिष्ठते द्वारि उत्तिष्ठ मधुसूदन ॥ ५१ ॥ देवोऽपि नारदं दृष्ट्वा परं हर्षमुपागतः ॥ स्वागतं तु मुनिश्रेष्ठ सुप्रभातोऽद्य शर्वरी ॥ ५२ ॥ ॥ नारद उवाच ॥ ॥ अद्य मे सफलं देव प्रभातं तव दर्शनात् ॥ कुशलं च न देवानां शीघ्रमुत्तिष्ठ गम्यताम् ॥ ५३ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ ब्रह्मा चेंद्रश्च रुद्रश्च ये चान्ये तु मरुद्गणाः ॥ आपदः कारणं यच्च तत्समाख्यातुमर्हसि ॥ ५४ ॥ ॥ नारद उवाच ॥ ॥ दानवेन महातीव्रं तपस्तप्तं सुदारुणम् ॥ रुद्रेण च वरो दत्तो भस्मत्वं मनसेप्सितम् ॥ ५५ ॥ वरदानबलेनैव स देवं हन्तुमर्हति ॥ ईदृशं चेष्टितं ज्ञात्वा नीतो देवोऽमरैः सह ॥ ५६ ॥ नारदस्य वचः श्रुत्वा जगाम समुनिर्हरिः ॥ दृष्ट्वा देवस्तमीशानं गच्छन्तं दिशमुत्तराम् ॥ ५७ ॥ दृष्ट्वा देवं च रुद्रोथ परिष्वज्य पुनःपुनः ॥ नमस्कृत्य जगन्नाथं देवं च मधुसूदनः ॥५८॥ ॥विष्णुरुवाच॥ ॥भयस्य कारणं देव कथ्यतां च महेश्वर ॥ देवदानवयक्षाणां प्रेषयेयं यमालयम् ॥५९॥ ललाटे च कृतो धर्मो युष्माकं च महेश्वर॥छित्त्वा शिरस्तथांगानि इंद्रियाणि न संशयः ॥६०॥ ॥ ईश्वर उवाच ॥ नास्ति सौख्यं च मूर्खेषु नास्ति सौख्यं च रोगिषु ॥ पराधीनेन सौख्यं तु स्त्रीजिते च विशेषतः ॥६१॥ स्त्रीजितेन मया विष्णो वरो दत्तस्तु दानवे ॥ यस्य मूर्ध्नि न्यसेत्पाणिं स भवेद्भस्मपुंजवत् ॥६२॥ अजेयश्चामरश्चैव मया ह्युक्तः स केशव ॥ हंतुमिच्छति मां पाप उपायस्तव विद्यते ॥६३॥ ॥विष्णुरुवाच ॥ गच्छंतु अमराः सर्वे युष्माभिः सह शंकर ॥ उपायं सर्जयाम्यद्य वधार्थं दानवस्य च॥६४॥रेवायाश्च तटे तिष्ठ देव त्वममरैः सह ॥कालक्षेपो न कर्त्तव्यो गम्यतां त्वरितं प्रभो॥६५॥दक्षिणा यत्र गंगा च रेवा चैव महानदी ॥यत्रयत्र च दृश्येत प्राची चैव सरस्वती॥६६॥तत्समं च महातीर्थं न मर्त्ये चैव दृश्यते ॥ स्नानं ये तत्र कुर्वंति दानं चैव तु भक्तितः ॥ ६७ ॥ सप्तजन्मकृतं पापं नश्यते नात्र संशयः ॥ एतत्तीर्थं महापुण्यं सर्वपातकनाशनम् ॥ ६८ ॥ गम्यतां तत्र देवेश लुंकेशं त्वं सहामरैः ॥ विष्णोस्तु वचनादेव प्रविष्टो ह्रदमुत्तमम् ॥ ६९ ॥ रतिं सुमहतीं चक्रे सह तत्र मरुद्गणैः ॥ ततश्चानंतरं देवो मायां कृत्वा ह्यनेकधा ॥ ७० ॥ वसंतमासं संसृज्य उद्यानवनशोभितम् ॥ अशोकैर्बकुलैश्चैव ब्रह्मवृक्षैः सुशोभनैः ॥ ७१ ॥ श्रीवृक्षैश्च कपित्थैश्च शिरीषैः राजचंपकैः ॥ श्रीफलैश्च तथा तालैः कदंबोदुंबरैस्तथा ॥ ७२ ॥ अश्वत्थादिद्रुमैश्चैव नानावृक्षैरनेकशः ॥ नानापुष्पैः सुगंधाढ्यैर्भ्रमरैश्च निनादितम् ॥ ७३ ॥ तस्मिन्मध्ये महावृक्षो न्यग्रोधश्च सुशोभनः ॥ बहुपक्षिसमायुक्तः कोकिलारावनादितः ॥ ७४ ॥ कृष्णेन च कृतं तस्मिन्कन्यारूपं च तत्क्षणात् ॥ न तस्याः सदृशी कन्या त्रैलोक्ये सचराचरे ॥ ७५ ॥ अन्याश्च कन्यकाः सप्त सुरूपाः शुभलोचनाः ॥ दिव्यरूपधराः सर्वा दिव्याभरणभूषिताः ॥ ७६ ॥ पुमांसमभिकांक्षंत्यो यद्येकः कामयेत्स्त्रियः ॥ मौक्तिकैः रत्नमणिकैर्वैदूर्यैश्च सुशोभनैः ॥ ७७ ॥ कामहारैश्च वंशैश्च वद्धो हिंदोलकः कृतः ॥ आरब्धाश्च महाकन्या गायंते सुस्वरं तदा ॥७८॥ मारुतः शीतलो वाति वनं स्पृष्ट्वा सुशोभनम् ॥ वातेन प्रेरितो गंधो दानवो घ्राणपीडितः ॥ ७९ ॥ ततः कुसुमगंधेन विस्मयं परमं गतः ॥ आघ्राय चेदृशं पुण्यं न दृष्टं न श्रुतं मया ॥ ८० ॥ वने चिंतयतः किंचिद्ध्वनिं गीतं सुशोभनम् ॥ गीतस्य च ध्वनिं श्रुत्वा मोहितो मायया हरेः ॥ ८१ ॥ व्याधस्येव महाकूटे पतंति च यथा मृगाः ॥ कालस्पृष्टस्तथा कृष्णे पतितश्च नराधिप ॥ ८२ ॥ दृष्ट्वा कन्यां च तां दैत्यो मूर्च्छया पतितो भुवि ॥ पतितेन तु दृष्टैका कन्या वटतले स्थिता ॥ ८३ ॥ आस्यं दृष्ट्वा तु नारीणां पुनः कामेन पीडितः ॥ गृहीत्वा हेमदंडं तु तां पातयितुमिच्छति ॥ ८४ ॥ ॥ कन्योवाच ॥ ॥ मा मानुस्पर्शय त्वं हि कुमार्यहं कुलोत्तम ॥ भो मुंचमुंच मां शीघ्रं यावद्गच्छाम्यहं गृहम् ॥ ८५ ॥ ॥ दानव उवाच ॥ ॥ अहं विवाहमिच्छामि त्वया सह सुशोभने ॥ भूपृष्ठे सकले राज्ञी भवस्येवं न संशयः ॥ ८६ ॥ ॥ कन्योवाच ॥ ॥ पिता रक्षति कौमार्ये भर्त्ता रक्षति यौवने ॥ पुत्रो रक्षति वृद्धत्वे न स्त्री स्वातंत्र्यमर्हति ॥ ८७ ॥ न स्वातंत्र्यं ममेवास्ति उत्पन्नाहं महत्कुले ॥ याच्यस्तु मत्पिता भ्राता मातापि हि तथैव च ॥ ८८ ॥ ॥ दानव उवाच ॥ ॥ यदि मां नेच्छसे त्वद्य स्वातंत्र्यं नावलंबसे ॥ ममापि च तदा हत्या सत्यं च शुभलोचने ॥ ८९ ॥ ॥ कन्योवाच ॥ ॥ विश्वासो नैव कर्तव्यो यादृशे तादृशे नरे ॥ नराः स्त्रीषु विचित्राश्च लंपटाः काममोहिताः ॥ ९० ॥ प्रणीय तु मां त्वं हि भुंक्ष्व भोगान्मया सह ॥ जन्मनाशो भवेत्पश्चात्र त्वं नान्यो भवेन्मम ॥ ९१ ॥ ब्राह्मणी क्षत्रिणी वैशी शूद्री यावत्तथैव

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च ॥ द्वितीयो न भवेद्भर्त्ता एकाकी चेह जन्मनि ॥ ९२ ॥ ॥ दानव उवाच ॥ ॥ यत्त्वया गदितं वाक्यं तन्मया धारितं हृदि ॥ प्रत्ययं मे कुरुष्वाऽद्य यत्ते मनसि रोचते ॥ ९३ ॥ ॥ कन्योवाच ॥ ॥ जानीष्व गोपकन्यां मां क्रीडामि सखिभिः सह ॥ अस्मत्कुलेषु यद्दिव्यं तत्कुरुष्व यथाविधि ॥ ९४ ॥ न तद्दिव्यं कुलेऽस्माकं विषं कोशं न तत्तुला ॥ गोपान्वयेषु सर्वेषु हस्तः शिरसि दीयते ॥ ९५ ॥ कामांधेनैव राजेंद्र निक्षिप्तो मस्तके करः ॥ तत्क्षणाद्भस्मसाद्भूतो दग्धस्तृणचयो यथा ॥ ९६ ॥ केशवोपरि देवैस्तु पुष्पवृष्टिः शुभा कृता ॥ हृष्टाः सर्वेऽगमन्देवाः स्वस्थानं विगतज्वराः ॥ ९७ ॥ क्षीरोदं केशवोगच्छत्कालपृष्ठे निपातिते ॥ य इदं शृणु याद्भक्त्या चरितं दानवस्य च ॥ ९८ ॥ स जयी जायते नित्यं शंकरस्य वचो यथा ॥ एतस्मात्कारणाद्राजँल्लिंगेश्वरमिति श्रुतम् ॥ ९९ ॥ लीनं च पातकं यस्मात्स्नानमात्रेण नश्यति ॥ त्वगस्थि शोणितं मांसं मेदस्नायुस्तथैव च ॥१००॥ मज्जाशुक्रगतं पापं नश्यते जन्मकोटिजम् ॥ लुंकेश्वरे महाराज तोयं पिबति भक्तितः ॥ १ ॥ त्रिभिः प्रसृतिमात्राभिः पापं यांति सहस्रधा ॥ विशेषेण चतुर्दश्यामुभौ पक्षौ तु चाष्टमी ॥ २ ॥ उपोष्य यो नरो भक्त्या पितॄणां पांडुनन्दन ॥ उद्धतास्तेन ते सर्वे नारकीयाः पितामहाः ॥ ३ ॥ काकिणीं चैव यो दद्याद्ब्राह्मणे वेदपारगे ॥ तेन दानफलं सर्वं कुरुक्षेत्रादिकं च यत् ॥ ४ ॥ प्राप्तं तु नान्यथा राजञ्छंकरो वदते त्विदम् ॥ स्पर्शलिंगमिदं राजञ्छंकरेण तु निर्मितम् ॥ ५ ॥ स्पर्शमात्रे मनुष्याणां रुद्रवासोऽभिजायते ॥ तेन दानफलं सर्वं कुरुक्षेत्रादिकं च यत् ॥ ६ ॥ एतस्मात्कारणाद्राजँल्लोकपालाश्च रक्षकाः ॥ दुर्गा च रक्षणे सृष्टा चतुर्हस्तधरा शुभा ॥ ७ ॥ धनदो लोकपालेशो रक्षकश्चेश्वरस्य च ॥ रक्षति च सदा कालं ग्रहव्यापाररूपतः॥८॥पुत्रभ्रातृसमारूपैः स्वामिसंबंधरूपिभिः॥ लंकेश्वरं च राजेंद्र देवैर्नाऽद्यापि मुच्यते ॥ १०९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे लुंकेश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धनदस्य तु तत्तीर्थं ततो गच्छेद्युधिष्ठिर ॥ नर्मदादक्षिणे कूले सर्वपापक्षयंकरम् ॥ १ ॥ सर्वतीर्थफलं तत्र प्राप्यते नात्र संशयः ॥ चैत्रमासत्रयोदश्यां शुक्लपक्षे जितेंद्रियः ॥ २ ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम् ॥ पंचामृतेन राजेंद्र स्नापयेद्धनदं बुधः ॥ ३ ॥ दीपं घृतेन दातव्यं गीतं वाद्यं च कारयेत् ॥ प्रभाते पूजयेद्विप्रानात्मनः श्रेय इच्छति ॥ ४ ॥ प्रतिग्रहसमर्थांश्च विद्यासिद्धांतवादिनः ॥ श्रौतस्मार्त्तक्रियायुक्तान्परदारपराङ्मुखान् ॥ ५ ॥ पूजयेद्गोहिरण्येन वस्त्रोपानहभोजनैः ॥ छत्रशय्याप्रदानेन सर्वपापक्षयो भवेत् ॥६॥ त्रिजन्मजनितं पापं धनदस्य प्रभावतः ॥ स्वर्गदं दुर्विनीतानां विनीतानां च मोक्षदम् ॥ ७ ॥ अन्नदं च दरिद्राणां भवेज्जन्मनिजन्मनि ॥ कुलीनत्वं दुःखहानिः स्वभावाज्जायते नरे ॥८॥ व्याधिध्वंसो भवेत्तेषां नर्मदोदकसेवनात् ॥ धनदस्य तु यस्तीर्थे विद्यादानं प्रयच्छति ॥ ॥९॥स याति भास्करे लोके सर्वव्याधिविवर्जिते ॥ देवद्रोणीं च तत्रैव स्वशक्त्या पांडुनंदन ॥ १० ॥ ये प्रकुर्वंति भूयिष्ठां रेवाया दक्षिणे तटे ॥ ते यांति शांकरे लोके सर्वदुःखविवर्जिते ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे धनदतीर्थमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मंगलेश्वरमुत्तमम् ॥ स्थापितं भूमिपुत्रेण लोकानां हितकाम्यया ॥ १ ॥ तोषितः परया भक्त्या शंकरः शशिशेखरः ॥ चतुर्दश्यां गुरुर्देवः प्रत्यक्षो मङ्गलेश्वरः ॥ २ ॥ ब्रूहि पुत्र वरं शुभ्रन्तन्ते दास्यामि मंगल ॥ ३ ॥ ॥ मंगल उवाच ॥ ॥ प्रसादं कुरु मे शंभो प्रतिजन्मनि शंकर ॥ त्वदंगस्वेदसंभूतो ग्रहमध्ये वसाम्यहम्॥४॥ त्वत्प्रसादेन ईशान पूज्योऽहं सर्वदैवतैः ॥ कृतार्थोह्यद्य संजातस्तव दर्शनभाषणात् ॥ ५ ॥ स्थानेऽस्मिन्देवदेवेश मम नाम्ना महेश्वरः ॥ एवं भवतु ते पुत्रेत्युक्त्वा चांतरधीयत ॥ ६ ॥ मंगलोऽपि महात्मा वै स्थापयित्वा महेश्वरम् ॥ आत्मयोगबलेनैव शूलिनाऽपूजयत्ततः ॥ ७ ॥ सर्व्वदुःखहरं लिंगं नाम्ना वै मंगलेश्वरम् ॥ तत्र तीर्थे तु वै राजन्ब्राह्मणान्प्रीणयेत्सुधीः ॥ ८ ॥ सपत्नीकान्नृपश्रेष्ठ चतुर्थ्यंगारके व्रते ॥ पत्नीभर्त्तारसंयुक्तं विद्वांसं श्रोत्रियं द्विजम् ॥ ९ ॥ व्रतांते चैव गौर्धुर्यैः शिवमुद्दिश्य दीयते ॥ प्रीयतां मे महादेवः सपत्नीको वृषध्वजः ॥ १० ॥ वस्त्रयुग्मं प्रदातव्यं लोहितं पांडुनंदन ॥ धूर्वहौ रक्तवर्णौ च शुभ्रं कृष्णं तथैव च ॥ ११ ॥ छत्रं शय्यां शुभां चैव रक्तमाल्यानुलेपनम् ॥ दातव्यं पाण्डवश्रेष्ठ विशुद्धेनांतरात्मना ॥ १२ ॥ चतुर्थ्यां तु तथाऽष्टम्यां पक्षयोः शुक्लकृष्णयोः ॥ श्राद्धं तत्रैव कर्त्तव्यं वित्तशाठ्येन वर्जितः ॥ १३ ॥ प्रेता भवंति सुप्रीता युगमेकं महीपते ॥ सपुत्रो जायते मर्त्त्यः प्रतिजन्म नृपोत्तम ॥ १४ ॥ तस्य तीर्थस्य भावेन सर्वांगरुचिरो नृप ॥ मंगलं भवते वंशे नाऽशुभं विद्यते क्वचित् ॥ १५ ॥ भक्त्या यः कीर्त्तयेन्नित्यं तस्य पापं व्यपोहति ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे मंगलेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ रविणा निर्मितं पार्थ सर्वपापक्षयंकरम् ॥ १ ॥ स्वांशेन भास्करस्तत्र तिष्ठते चोत्तरे तटे ॥ सर्वव्याधिहरः पुंसां नर्मदायां व्यवस्थितः ॥ २ ॥ षष्ठ्यांषष्ठ्यां नृपश्रेष्ठ ह्यष्टम्यां च चतुर्दशीम् ॥ स्नानं यः कारयेन्मर्त्त्यः श्राद्धं प्रेतेषु भक्तितः ॥ तस्य पापक्षयः पार्थ सूर्यलोके महीयते ॥ ३ ॥ ततः स्वर्गाच्च्युतः सोऽपि जायते विमले कुले ॥ धनाढ्यो व्याधिनिर्मुक्तो जीवेज्जन्मनिजन्मनि ॥ ४ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रवितीर्थमाहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामेश्वरं ततश्चान्यच्छृणु पांडवसत्तम ॥ सिद्धो यत्र गणाध्यक्षो गौरीपुत्रो महाबलः ॥ १ ॥ तत्र तीर्थे तु यो भक्त्या भक्तियुक्तो जितेंद्रियः ॥ पंचामृतेन संस्नाप्य धूपनैवेद्यपूजनैः ॥ २ ॥ प्रसाद्य जगतामीशं सर्वपापैः प्रमुच्यते ॥ अष्टम्यां मार्गशीर्षस्य तत्र स्नात्वा युधिष्ठिर ॥ ३ ॥ यो येन यजते तत्र स तं काममवाप्नुयात् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कामेश्वरतीर्थमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ॥ ७१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र मणिनागेश्वरं शुभम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरम् ॥ स्थापितं मणिनागेन लोकानां हितकाम्यया ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आशीविषेण सर्प्पेण ईश्वरस्तोषितः कथम् ॥ क्षुद्राः सर्वस्य लोकस्य भयदा विषशालिनः ॥ २ ॥ कथ्यतां तात मे सर्वं पातकस्योपशांतिदम् ॥ मम संतापजं दुःखं दुर्योधनसमुद्भवम् ॥ ३ ॥ कर्णभीष्मोद्भवं रौद्रं दुःखं पांचालिसंभवम् ॥ तव वक्त्रांबुजौघेन प्लावितं निर्वृतिं गतः ॥ ४ ॥ श्रुत्वा तव मुखोद्गीतां कथां वै पापनाशिनीम् ॥ अयुक्तमिदमस्माकं द्विज क्लेशो न शाम्यति ॥ ५ ॥ अथवा प्राप्स्यते तात विद्यादानस्य यत्फलम् ॥ तत्फलं प्राप्यते नित्यं कथाश्रवणतो हरेः ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यथायथा त्वं नृप भाषसे च तथातथा मे सुखमेति भारती ॥ शैथिल्यता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वा जरयान्वितस्य त्वत्सौहृदं नश्यति नैव तात ॥ शृणुष्व तस्मात्सह बांधवैश्च कथांममा पापहरां प्रशस्ताम् ॥ ७ ॥ कथयामि यथावृत्तांमितिहासं पुरातनम् ॥ ८ ॥ कथितं पूर्वतो वृत्तेः पारंपर्येण भारत ॥ ९ ॥ द्वे भार्ये कश्यपस्यास्तां सर्वलोकेष्वनुत्तमे ॥ गरुत्मन्तं च विनताऽसूत कद्रूरहीनथ ॥ १० ॥ संतोषेण च ते तात तिष्ठतः काश्यपे गृहे ॥ कद्रूश्च विनतानाम ह्रष्टे च वनिते सदा ॥ ११ ॥ ताभ्यां सार्द्धं क्रीडते च कश्यपोऽपि प्रजापतिः ॥ ततस्त्वेकदिने प्राप्ते आश्रमस्था शुभानना ॥ १२ ॥ उच्चैःश्रवं हयं दृष्ट्वा मनोवेगसमन्वितम् ॥ पश्यपस्य हि तन्वंगी हयं सर्वत्र पांडुरम् ॥ १३ ॥ धावमानमविश्रांतं जवेन मनसोपमम् ॥ तं दृष्ट्वा सहसा चाऽश्वमीर्ष्याभावेन चाब्रवीत् ॥ १४ ॥ ॥ कद्रूरुवाच ॥ ब्रूहि भद्रे सहस्रांशोरश्वः किंवर्णको भवेत् ॥ अहं ब्रवीमि कृष्णोऽयं त्वं किं वदसि तद्वद ॥ १५ ॥ ॥ विनतोवाच ॥ ॥ पश्यसे ननु नेत्रेश्च कृष्णं श्वेतं न पश्यसि ॥ असत्यभाषणाद्भद्रे यमलोकं गमिष्यसि ॥ १६ ॥ ॥ सत्यानृते तु वचने पणस्तव ममैव तु ॥ सहस्रं चैव वर्षाणां दास्यहं तव मंदिरे ॥ १७ ॥ असत्या यदि मे वाणी कृष्ण उच्चैः श्रवा यदि ॥ तदाहं त्वद्गृहे दासी भवामि सर्पमातृके ॥ १८ ॥ यदि उच्चैश्रवाः श्वेतोऽहं दासी च तवैव तु ॥ एवं परस्परं द्वाभ्यां संवादोऽयं व्यवर्द्धत ॥ १९ ॥ आश्रमेषु गता बाला रात्रौ चिंतापरा स्थिता ॥ बंधुवर्गस्य कथितं समस्तं तद्विचेष्टितम् ॥ २० ॥ पुत्राणां कथितं पार्थ पणं चैव मया कृतम् ॥ हाहाकारः कृतः सर्पैः श्रुत्वा मात्रा पणं कृतम् ॥ २१ ॥ जाता दासी न संदेहः श्वेतो भास्करवाहनः ॥ उच्चैःश्रवा हयः श्वेतो न कृष्णो विद्यते क्वचित् ॥ २२ ॥ ॥ कद्रूरुवाच ॥ ॥ यथाऽहं न भवे दासी तत्कार्यं च विचिंत्यताम् ॥ विशध्वं रोमकूपेषु ह्युच्चैःश्रवहयस्य तु ॥ २३ ॥ एकं मुहूर्त्तमात्रं तु यावत्कृष्णः स दृश्यते ॥ क्षणमात्रेण चैकेन दासी गा भवते मम ॥ २४ ॥ दासीं कृत्वा तु तां तन्वीं विनतां सत्यगर्विताम् ॥ ततः स्वस्थानगाः सर्वे भविष्यथ यथासुखम् ॥ २५ ॥ ॥ सर्पा ऊचुः ॥ ॥ यथा त्वं जननी चाव सर्वेषां भुवि पूजिता ॥ तथा साऽपि विशेषेण वंचितव्या न मातरः ॥२६॥ माता च पितृभार्या च माता माता पितामही ॥ कर्मणा मनसा वाचा हितं तासां समाचरेत् ॥ २७ ॥ सा ततस्तेन वाक्येन क्रुद्धा कालानलोपमा ॥ मम वाक्यमकुर्वाणा ये केचिद्भुवि पन्नगाः ॥ २८ ॥ हव्यवाहमुखे सर्वे ते यास्यंत्यविचारितम् ॥ मातुस्तद्वचनं श्रुत्वा सर्वे चैव भुजंगमाः ॥ २९ ॥ केचित्प्रविष्टा रोमेषु उच्चैःश्रवहयस्य च ॥ नष्टाः केचिद्दिशादिशं कद्रूशापभयात्ततः ॥ ३० ॥ केचिद्गाजले नष्टाः केचिन्नष्टाः सरस्वतीम् ॥ केचिन्महोदधौ लीनाः प्रविष्टा विंध्यकंदरे ॥ ३१ ॥ आश्रित्य नर्मदातोये मणिनागोत्तमो नृप ॥ तपश्चचार विपुलमुत्तरे नर्मदातटे ॥ ३२ ॥ मातृशापभयात्पार्थ ध्यायते कामनाशनम् ॥ अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्जितम् ॥ ३३ ॥ वायुभक्षः शतं साग्रं तदर्धं रविवीक्षकः ॥ एवं ध्यानरतस्यैव प्रत्यक्षद्विपुरां तकः ॥ ३४ ॥ साधुसाधु महाभाग सत्त्ववांस्तु भुजंगम ॥ त्वया भक्त्या गृहीतोऽहं प्रीतस्ते ह्युरगेश्वर ॥ वरं याचय मे क्षिप्रं यत्ते मनसि वर्त्तते ॥ ३५ ॥ ॥ मणिनाग उवाच ॥ ॥ मातृशापभयात्राथ क्लिष्टोऽहं नर्मदातटे ॥ त्वत्प्रसादेन मे नाथ मातृशापो भवेद्वृथा ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ हव्यवाहमुखं वत्स न प्राप्स्यसि ममाऽज्ञया ॥ मम लोके निवासश्च तव पुत्र भविष्यति ॥ ३७ ॥ ॥ मणिनाग उवाच ॥ ॥ अत्र स्थाने महादेव स्थीयतामंशभागतः ॥ सहस्रांशेन भागेन स्थीयतां नर्मदाजले ॥ उपकाराय लोकानां मम नाम्नैव शंकर ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ स्थापयस्व परं लिंगमाज्ञया मम पन्नग ॥ इत्युक्त्वांतर्हितो देवो जगाम ह्युमया सह ॥३९॥ मार्कंडेय उवाच ॥ तत्र तीर्थे तु ये गत्वा शुचि प्रयतमानसाः ॥ पंचम्यां वा चतुर्दश्यामष्टम्यां शुक्लकृष्णयोः ॥४०॥ अर्चयंति सदा पार्थं नोपसर्पंति ते यमम् ॥ दध्ना च मधुना चैव घृतेन क्षीरयोगतः ॥ ४१ ॥ स्नापयंति विरूपाक्षमुमादेहार्धधारिणम् ॥ कामांगदहनं देवमघासुरनिषूदनम् ॥ ४२ ॥ स्नाप्यमानं च ये भक्त्वा पश्यंति परमेश्वरम् ॥ ते यांति च परे लोके सर्वपापविवर्जिते ॥ ४३ ॥ श्राद्धं प्रेतेषु ये पार्थ चाष्टम्यां पंचमीषु च ॥ ब्राह्मणेश्च सदा योग्ये वेदपाठकर्चितकैः ॥ ४४ ॥ स्वदारनिरतैः शुद्धैः परदारविवर्जितैः ॥ षट्कर्मनिरतैस्तात शूद्रप्रेषणवर्जितैः ॥ ४५ ॥ खंजाश्च दर्दुराः पंढा वार्द्धुष्याश्च कृपीवलाः ॥ भिन्नवृत्तिकराः पुत्र नियोज्या न कदाचन ॥ ४६ ॥ वृषली मंदिरे यस्य महिषीं यस्तु पालयेत् ॥ स विप्रो दूरतस्त्याज्यो व्रते श्राद्धे नराधिप ॥ ४७ ॥ काणाष्टंटांश्च मंदांश्च वेदपाठविवर्जिनः ॥ न ते पूज्या द्विजाः पार्थ मणिनागेश्वरे शुभे ॥ ४८ ॥ यदीच्छेदूर्ध्वगमनमात्मनः पितृभिः सह ॥ सर्वांगरुचिरां धेनुं यो दद्यादग्रजन्मने ॥ ४९ ॥ स याति परमं लोकं यावदाभूतसंप्लवम् ॥ ततः स्वर्गाच्युतः सोऽपि जायते विमले कुले ॥ ५० ॥ ये पश्यंति परं भक्त्या मणिनागेश्वरं नृप ॥ न तेषां जायते वंशे पन्नगानां भयं नृप ॥ ५१ ॥ पन्नगः शंकते तेषां मणिनागप्रदर्शनात् ॥ सौपर्णरूपिणस्ते वै दृश्यन्ते नागमण्डले ॥ ५२ ॥ फलानि चैव दानानां शृणुष्वाऽथ नृपोत्तम ॥ अन्नं संस्कारसयुक्तं ये ददंते नरोत्तमाः ॥ ५३ ॥ तोयं शय्यां तथा छत्रं कन्यां दासीं सुभाषिणीम् ॥ पात्रे देयं यतो राज न्यदीच्छेच्छ्रेय आत्मनः ॥ ५४ ॥ सुरभीणि च पुष्पाणि गन्धवस्त्राणि दापयेत् ॥ दीपं धान्यं गृहं शुभ्रं सर्वोपस्करसंयुतम् ॥५५॥ ये ददन्ते परं भक्त्या ते व्रजंति त्रिविष्टपम् ॥ मणिनागे नृपश्रेष्ठ यच्च दानं प्रदीयते ॥ ५६ ॥ तस्य दानस्य भावेन स्वर्गे वासो भवेद्ध्रुवम् ॥ पातकानि प्रलीयन्ते आमपात्रे यथा जलम् ॥ ५७ ॥ नर्मदातोयसंसिद्धं भोज्यं विप्रे ददाति यः ॥ सोऽपि पापैर्विनिर्मुक्तः क्रीडते दैवतैः सह ॥ ५८ ॥ ततः स्वर्गच्युतानां हि लक्षणं प्रवदाम्यहम् ॥ दीर्घायुषो जीवपुत्रा धनवंतः सुशोभनाः ॥ ५९ ॥ सर्वव्याधिविनिर्मुक्ताः सुतभृत्यैः समन्विताः ॥ त्यागिनो भोगसंयुक्ता धर्मास्थानरताः सदा ॥ ६० ॥ देवद्विजगुरोर्भक्तास्तीर्थसेवापरायणाः ॥ मातापितृवशा नित्यं द्रोहक्रोधविवर्जिताः ॥ ६१ ॥ एभिरेव गुणैर्युक्ता ये नराः पांडुनंदन ॥ सत्यंते स्वर्गदायाताः स्वर्गे वासं व्रजंति ते ॥ ६२ ॥ सर्वतीर्थवरं तीर्थं मणिनागं नृपोत्तम ॥ तीर्थाख्यानमिदं पुण्यं यः पठेच्छृणुयादपि ॥ ६३ ॥ सोऽपि पापैर्विनिर्मुक्तः शिवलोके महीयते ॥ न विघ्नं क्रमते तेषां विचरंति यथेच्छया ॥ ६४ ॥ भाद्रपद्यां च यत्पुण्यं पुण्यं सूर्यस्य दर्शने ॥ तत्फलं समवाप्नोति आख्यानश्रवणेन तु ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे मणिनागेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदा दक्षिणे कूले तीर्थं परमशोभनम् ॥ सर्वपापहरं पार्थ गोपारेश्वरसुत्तमम् ॥ गोदेहान्निःसृतं लिंगं पुण्यं भूमितले नृप ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गोदेहान्निःसृतं कस्माल्लिंगं पापक्षयंकरम् ॥ दक्षिणे नर्मदाकूले मणिनागसमीपतः ॥ संक्षेपात्कथ्यतां विप्र गोपारेश्वरसम्भवम् ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामधेनुस्तपस्तत्र पुरा पार्थ चकार ह ॥ ध्यायते परया भक्त्या देवदेवं महेश्वरम् ॥ ३ ॥ तुष्टस्तस्या जगन्नाथः कपिलाया महेश्वरः ॥ निःसृतो देहमध्यात्तु अच्छेद्यः परमेश्वरः ॥ ४ ॥ तुष्टो देवि जगन्मातः कपिले परमेश्वरि ॥ आराधनं कृत यस्मात्त

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ब्रवाऽऽशु शुभानने ॥ ५ ॥ ॥ सुरभ्युवाच ॥ ॥ लोकानामुपकाराय सृष्टाऽहं परमेष्ठिना ॥ लोककार्याणि सर्वाणि सिद्धयंति मत्प्रसादतः ॥ ६ ॥ लोकाः स्वर्गं प्रयास्यन्ति मत्प्रसादेन शंकर ॥ तीर्थं त्वं भव मे शम्भो लोकानां हितकाम्यया ॥ ७ ॥ तथेति भगवानुक्त्वा तीर्थे तत्रावसन्मुदा ॥ तदाप्रभृति तत्तीर्थं विख्यातं वसुधातले ॥ स्नानेनैकेन राजेंद्र पापसंघं व्यपोहति ॥८॥ गोपारेश्वरगोदानं यस्तु भक्त्या च कारयेत् ॥ योग्ये द्विजो त्तमे देया योग्या धेनुः सकांचना ॥ ९ ॥ सवत्सा तरुणी शुभ्रा बहुक्षीरा सवस्त्रका ॥ कृष्णपक्षे चतुर्दश्यामष्टम्यां वा प्रदापयेत् ॥ १० ॥ सर्वेषु चैव मासेषु कार्त्तिके च विशेषतः ॥ दापयेत्परया भक्त्या द्विजे स्वाध्यायतत्परे ॥ ११ ॥ विधिना च प्रदद्याद्यो विधिना यस्तु गृह्णते ॥ तावुभौ पुण्यकर्माणौ प्रेक्षकः पुण्यभाजनम् ॥ १२ ॥ पिंडदानं प्रकुर्याद्यः प्रेतानां भक्तिसंयुतः ॥ पिंडेनैकेन राजेंद्र प्रेता यांति परां गतिम् ॥ १३ ॥ भक्त्या प्रणामं रुद्रस्य ये कुर्वंति दिनेदिने ॥ तेषां पापं प्रलीयेत भिन्नपात्रे जलं यथा ॥ १४ ॥ तत्र तीर्थे तु यो राजन्वृषभं च समुत्सृजेत् ॥ पितर श्चोद्धतास्तेन शिवलोके महीयते ॥ १५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ वृषोत्सर्गं कृते तात फलं यज्जायते नृणाम् ॥ तत्सर्वं कथयस्वाशु प्रय त्नेन द्विजोत्तम ॥ १६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वलक्षणसंपूर्णे वृषे चैव तु यत्फलम् ॥ तदहं संप्रवक्ष्यामि शृणुष्व धर्मनंदन ॥ १७ ॥ कार्त्तिके चैव वैशाखे पूर्णिमायां नराधिप ॥ रुद्रस्य सन्निधौ भूत्वा शुचिः स्नातो जितेंद्रियः ॥ १८ ॥ वृषस्यैव समुत्सर्गं कारयेत्प्रीयतां हरः ॥ सान्निध्ये कारयेत्पुत्र चतस्रो वत्सिकाः शुभाः ॥ १९ ॥ दत्त्वा तु विप्रमुख्याय सर्वलक्षणसंयुताः ॥ प्रीयतां च महादेवो ब्रह्मा विष्णुर्महेश्वरः ॥ ॥ २० ॥ वृषभे रोमसंख्या या सर्वांगेषु नराधिप ॥ तावद्वर्षप्रमाणं तु शिवलोके महीयते ॥ २१ ॥ शिवलोके वसित्वा तु यदा मर्त्येषु जाय ते ॥ कुले महति संभूतिर्धनधान्यसमाकुले ॥ २२ ॥ नीरोगा रूपवांश्चैव विद्याढ्यः सत्यवाक्छुचिः ॥ गोपारेश्वरमाहात्म्यं मया ख्यातं युधिष्ठिर ॥ गोदेहान्निःसृतं लिंगं नर्मदादक्षिणे तटे ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गोपारेश्वरमाहात्म्यवर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ रेवाया उत्तरे कूले तीर्थं परमशोभनम् ॥ सर्वपापहरं मर्त्यैः नात्रा वै गौतमेश्वरम् ॥ १ ॥ स्थापितं गौतमेनैव लोकानां हितकाम्यया ॥ स्वर्गसोपानरूपं तु तीर्थं पुंसां युधिष्ठिर ॥ २ ॥ तत्र गच्छ परं भक्त्या यत्र देवो जगद्गुरुः ॥ पातकस्य विनाशार्थं स्वर्गवासप्रदस्तथा ॥ ३ ॥ सौभाग्यवर्द्धनं तीर्थं जयदं दुःखनाशनम् ॥ पिंडदानेन चैकेन कुलानामुद्धरेत्त्रयम् ॥ ४ ॥ यत्किंचिद्दीयते भक्त्या स्वल्पं वा यदि वा बहु ॥ तत्सर्वं शतसाहस्रमाज्ञया गौतमस्य हि ॥ ५ ॥ तीर्थानां परमं तीर्थं स्वयं रुद्रेण भाषितम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ शंखचूडस्य नाम्ना वै प्रसिद्धं भूमिमंडले ॥ १ ॥ शंखचूडः स्वयं तत्र संस्थितः पांडुनंदन ॥ वैनतेयभयात्पार्थ सुखद नर्मदातटे ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या शुचिर्भूत्वा समाहितः ॥ स्नापयेच्छंखचूडं तु क्षीरशाद्रेण सर्पिषा ॥ ३ ॥ रात्रौ जागरणं कुर्याद्दवस्याग्रे नराधिप ॥ दधिभक्तेन संपूज्य ब्राह्मणान्च्छंसितव्रतान् ॥ गोप्रदाने द्विजेंद्रोऽयं सर्वपापक्षयंकरः ॥ ४ ॥ तस्मिंस्तीर्थे तु यः पार्थ सर्प्पदष्टं प्रतर्प्पयेत् ॥ स याति परमं लोकं शंकरस्य वचो यथा ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शंखचूडतीर्थमाहात्म्यवर्णनंनाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र पारेश्वरमनुत्तमम् ॥ पराशरो महात्मा वै नर्मदायास्तटे शुभे ॥ १ ॥ तपश्चचार विपुलं पुत्रार्थं पांडुनंदन ॥ हिमवद्दुहिता तेन गौरी नारायणी नृप ॥ २ ॥ तोषिता परया भक्त्या नर्मदोत्तरके तटे ॥ तस्य तुष्टा महादेवी शंकरर्द्धांगधारिणी ॥ ३ ॥ भोभो ऋषिवर श्रेष्ठ तुष्टाऽहं तव भक्तितः ॥ वरं याचय मे विप्र पराशर महामते ॥ ४ ॥ ॥ पराशर उवाच ॥ ॥ परितुष्टाऽसि मे देवि यदि देयो वरो मम ॥ देहि पुत्रं भगवति सत्यशौचगुणान्वितम् ॥ ५ ॥ वेदाभ्यसनशीलं हि सर्वशास्त्रविशारदम् ॥ तीर्थे चाऽत्र भवेदेवि सन्निधानवरेण तु ॥ ६ ॥ लोकोपकारहेतोश्च स्थीयतां गिरिनंदिनि ॥ पराशराभिधानेन नर्मदादक्षिणे तटे ॥ ७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ एवं भवतु ते विप्र तत्रै वांतरधीयत ॥ पराशरो महात्मा वै स्थापयामास पार्वतीम् ॥ ८ ॥ शंकरं स्थापयामास सुरासुरनमस्कृतम् ॥ अच्छेद्यमप्रतर्क्यं च देवानां तु दुरासदम् ॥ ९ ॥ पराशरो महात्मा वै कृतार्थो ह्यभवन्नृप ॥ १० ॥ तत्र तीर्थे तु यो भक्त्या शुचिः प्रयतमानसः ॥ रुयथवा पुरुषो वापि काम क्रोधविवर्जितः ॥ ११ ॥ माघे चैत्रेऽथ वैशाखे श्रावणे नृपनंदन ॥ मासि मार्गशिरे चैव शुक्लपक्षे तु सर्वदा ॥ १२ ॥ तत्र गत्वा शुभे स्थाने नर्मदादक्षिणे तटे ॥ १३ ॥ उपोष्य परया भक्त्या व्रतमेतत्समाचरेत् ॥ रात्रौ जागरणं कृत्वा दीपदानं स्वशक्तितः ॥ १४ ॥ गीतं नृत्यं तथा वा द्यं कामक्रोधविवर्जितः ॥ प्रभाते विमले प्राप्ते द्विजाः पूज्याः स्वशक्तितः ॥ १५ ॥ संपूज्य ब्राह्मणान्पार्थ धनदानहिरण्यतः ॥ वस्त्रेण च्छत्रदानेन शय्यातांबूलभोजनैः ॥ १६ ॥ प्रीणयेन्नर्मदातीरे ब्राह्मणान्च्छंसितव्रतान् ॥ श्राद्धं कार्यं नृपश्रेष्ठ आमैः पक्वैर्जलेन च ॥ १७ ॥ स्त्रीणां चैव तु शूद्राणामामश्राद्धं प्रशस्यते ॥ आमं चतुर्गुणं देयं ब्राह्मणानां युधिष्ठिर ॥ १८ ॥ वेदोक्तेन विधानेन द्विजाः पूज्याः प्रयत्नतः ॥ हस्तमात्रैः कुशैश्चैव तिलैश्चैवाक्षतैर्नृप ॥ १९ ॥ विप्रा उदङ्मुखाः कार्याः स्वयं वै दक्षिणामुखः ॥ दर्भेषु निक्षिपेदन्नमित्युच्चार्य द्विजाग्रतः ॥ २० ॥ प्रेता यांतु परे लोके तीर्थस्याऽस्य प्रभावतः ॥ पापं मे प्रशमं यातु एतु वृद्धिं शुभं सदा ॥ २१ ॥ वृद्धिं यातु सदा वंशो ज्ञातिवर्गो द्विजोत्तम ॥ एवमुच्चार्य विप्राय दानं देयं स्वशक्तितः ॥ २२ ॥ गोभूतिसहिरण्यादि चान्नं वस्त्रं स्वशक्तितः ॥ दातव्यं पांडवश्रेष्ठ पारेश्वरवराग्रमे ॥ २३ ॥ ये शृण्वंति परं भक्त्या मुच्यंते सर्वपातकैः ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पारेश्वरतीर्थ माहात्म्यवर्णनंनाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भीमेश्वरं ततो गच्छेत्सर्वपापक्षयंकरम् ॥ सेवितं ऋषिसंघैश्च भीमव्रतधरैः शुभैः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा सोपवासो जितेंद्रियः ॥ जपेदेकाक्षरं मंत्रमूर्ध्ववाहुर्दिवाकरे ॥ २ ॥ तस्य जन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ सप्तजन्मार्जितं पापं गायत्र्या नश्यते ध्रुवम् ॥३॥ दशभिर्जन्मभिर्जातं शतेन तु पुरा कृतम् ॥ सहस्रेण त्रिजन्मोत्थं गायत्री हंति किल्बिषम् ॥ ४ ॥ वैदिकं लौकिकं वापि जाप्यं जप्तं नरेश्वर ॥ तत्क्षणाद्दहते सर्वं तृणन्तु ज्वलनो यथा ॥ ५ ॥ न देवबलमाश्रित्य कदाचि त्पापमाचरेत् ॥ अज्ञानान्नश्यते क्षिप्रं नोत्तरं तु कदाचन ॥ ६ ॥ तत्र तीर्थे तु यो दानं शक्तिमाश्रित्य चाचरेत् ॥ तदक्षय्यफलं सर्वं जायते पांडुनं दन ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे भीमेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तसप्तति तमोऽध्ययः ॥७७॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नारदेश्वरमुत्तमम् ॥ तीर्थानां परमं तीर्थं निर्मितं नारदेन तु ॥१॥ ॥ युधिष्ठिर

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उवाच ॥ ॥ नारदेन मुनिश्रेष्ठ कस्मात्तीर्थं विनिर्मितम् ॥ एतदाख्याहि मे सर्वं प्रसन्नो यदि सत्तम ॥२॥ श्रीमार्कंडेय उवाच ॥ ॥ परमेष्ठिसुतः पार्थ नारदो मुनिसत्तमः ॥ रेवायाश्चोत्तरे कूले तपस्तेन पुरा कृतम् ॥ ३ ॥ नवनाडीनिरोधेन काष्ठावत्यां गतेन च ॥ तोषितः पशुभर्त्ता वै नारदेन युधिष्ठिर ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ तुष्टोऽहं तव विप्रेंद्र योगिनाथ अयोनिज ॥ वरं प्रार्थय मे वत्स यस्ते मनसि वर्त्तते ॥ ५ ॥ ॥ नारद उवाच ॥ ॥ त्वत्प्रसादेन मे शंभो योगश्चैव प्रसिध्यतु ॥ अचला ते भवेद्भक्तिः सर्वकालं ममैव तु ॥ ६ ॥ स्वेच्छाचारी भवे देव वेदवेदांगपारगः ॥ त्रिकालज्ञो जगन्नाथ गीतज्ञोऽहं सदा भवे ॥ ७ ॥ दिनेदिने यथा युद्धं देवदानवमानुषैः ॥ पाताले मर्त्यलोके वा स्वर्गे वाऽपि महेश्वर ॥ ८ ॥ पश्येयं त्वत्प्रसादेन भक्तं पार्वतीं तथा ॥ तीर्थं लोकेषु विख्यातं सर्वपापक्षयंकरम् ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं नारद सर्वं तु भविष्यति न संशयः ॥ चिंतितं मत्प्रसादेन सिद्धयते नात्र संशयः ॥ १० ॥ स्वेच्छाचारो भवेर्वत्स स्वर्गे पातालगोचरे ॥ मर्त्ये वा भ्रम वै योगिन्न केनाऽपि निवार्यसे ॥ ११ ॥ सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः ॥ ताना एकोनपंचाशत्प्रसादान्मे तव ध्रुवम् ॥ १२ ॥ मम प्रियंकरं दिव्यं नृत्य गीतं भविष्यति ॥ कलिं च पश्यसे नित्यं देवदानवकिन्नरैः ॥ १३ ॥ त्वत्तीर्थं भूतले पुण्यं मत्प्रसादाद्भविष्यति ॥ वेदवेदांगतत्त्वज्ञो ह्यशेषज्ञानको विदः ॥ एकत्त्वमसि निःसंगो मत्प्रसादेन नारद ॥१४॥ इत्युक्त्वांतर्दधे देवो नारदस्तत्र शूलिनम् ॥ स्थापयामास राजेंद्र सर्वसत्त्वोपकारकम् ॥ ॥ १५ ॥ पृथिव्यामुत्तमं तीर्थं निर्मितं नारदेन तु ॥ तत्र तीर्थे नृपश्रेष्ठ यो गच्छेद्विजितेंद्रियः ॥ १६ ॥ मासि भाद्रपदे पार्थ कृष्णपक्षे चतुर्दशी ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम् ॥ १७ ॥ छत्रं तत्र प्रदातव्यं ब्राह्मणे शुभलक्षणे ॥ शस्त्रेण तु हता ये वै तेषां श्राद्धं प्रदापयेत् ॥ ते यांति परमं लोकं पिंडदानप्रभावतः ॥ १८ ॥ कपिला तत्र दातव्या पितॄनुद्दिश्य भारत ॥ इत्युच्चार्य द्विजे देया यांतु ते परमां गतिम् ॥ १९ ॥ अस्य श्राद्धस्य भावेन ब्राह्मणस्य प्रसादतः ॥ नर्मदातोयभावेन न्यायार्जितधनस्य च ॥ तेषां चैव प्रभावेन प्रेता यांतु परां गतिम् ॥ २० ॥ इत्युच्चार्य द्विजे देया दक्षिणा च स्वशक्तितः॥ हविष्यान्नं विशालाक्ष द्विजानां चैव दापयेत् ॥ २१ ॥ दीपं भक्त्या प्रदातव्यं नृत्यं गीतं च कारयेत् ॥ अवार्यं तेन वै सर्वं यः करोतीश्वरालये ॥ २२ ॥ स याति रुद्रसान्निध्यमिति रुद्रः स्वयं जगौ ॥ विद्यादानेन चैकेन अक्षयां गतिमाप्नुयात् ॥ ॥ २३ ॥ धूर्वहास्तत्र दातव्या भूमिः सस्यवती नृप ॥ चित्रभानुं शुभैर्मंत्रैः प्रीणयेत्तत्र भक्तितः ॥ २४ ॥ आज्येन सुप्रभूतेन होमद्रव्येण भारत ॥ ये यजंति सदा भक्त्या त्रिकालं नृत्यमेव च ॥ २५ ॥ तीर्थे नारदनामाख्ये रेवायाश्चोत्तरे तटे ॥ चित्रभानुमुखा देवाः सर्वदेवमयो ऋषिः ॥ २६ ॥ ऋषिणा प्रीणिताः सर्वे तस्मात्प्रीत्यो हुताशनः ॥ पूजिते हव्यवाहे तु दारिद्र्यं नैव जायते ॥ २७ ॥ धनेन विपुला प्रीतिर्जायते प्रतिजन्मनि ॥ कुलीनाश्च सुवेषाश्च सर्वकालं धनेन तु ॥ २८ ॥ ध्रुवो नदीनां पतिरंगनानां राजा च सद्वृत्तरतः प्रजानाम् ॥ धनं नराणामृतवस्तरूणां गतं गतं यौवनमानयंति ॥२९॥ धनदत्वं धनेशेन तस्मिंस्तीर्थे ह्युपार्जितम् ॥ यमेन च यमत्वं हि इंद्रत्वं चैव वज्रिणा ॥३०॥ अन्यैरपि महीपालैः पार्थिवत्व मुपार्जितम् ॥ नारदेश्वरमाहात्म्याद्भवो निश्चलतां गतः ॥ ३१ ॥ सर्वतीर्थवरं तीर्थं निर्मितं नारदेन तु॥ पृथिव्यां सागरांतायां रेवायाश्चोत्तरे तटे ॥ तद्धरं सर्वतीर्थानां महापातकनाशनम् ॥ ३२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां सांहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे नारदेश्वस्तीर्थमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थद्वयमनुत्तमम् ॥ दधिस्कन्दं मधुस्कंदं सर्वपापक्षयंकरम् ॥ १ ॥ दधिस्कन्दे नरः स्नात्वा यस्तु दद्याद्विजे दधि ॥ उपतिष्ठेत्ततस्तस्य सप्तजन्मनि भारत ॥ २ ॥ न व्याधिर्न जरा तस्य न शोको नैव मत्सरः ॥ दशचंद्रशतं यावज्जायते विमले कुले ॥ ३ ॥ मधुस्कन्देऽपि मधुना मिश्रितान्यस्तिलान्ददेत् ॥ नाऽसौ वैवस्वतं देवं पश्येद्वै जन्मसप्ततिम् ॥ ४ ॥ मधुना सह संमिश्रं पिंडं यस्तु प्रदापयेत् ॥ तस्य पौत्रप्रपौत्रेभ्यो दारिद्र्यं नैव जायते ॥ ॥ ५ ॥ दधिभिः सह संमिश्रं पिंडं यस्तु प्रदापयेत् ॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिवद्दक्षिणामुखः ॥ ६ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ द्वादशाब्दानि तुप्यंति नाऽत्र कार्या विचारणा ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दधिस्कन्दमधुस्कंदतीर्थमाहात्म्यवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नंदिकेश्वरमुत्तमम् ॥ यत्र सिद्धो महानंदी तत्ते सर्वं वदाम्यहम् ॥ १ ॥ रेवायां पुरतः कृत्वा पुरा नंदी गणेश्वरः ॥ तपस्तप्त्वजयं कुर्वंस्तीर्थात्तीर्थं जगाम ह ॥ २ ॥ दधिस्कंदं मधुस्कंदं यावत्त्यक्त्वा तु गच्छति ॥ तावत्तुष्टो महादेवो नंदिनाथ मुवाच ह ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ भोभोः प्रसन्नो नंदीश वरं वृणु यथेप्सितम्॥ तपसा तेन तुष्टोऽहं तीर्थयात्राकृतेन ते ॥ ४ ॥ नंदीश्वर उवाच ॥ न चाऽहं कामये वित्तं न चाऽहं कुलसंततिम्॥मुक्त्वा न कामये कामं तव पादांबुजात्परम् ॥ ५ ॥ कृमिकीटपतंगेषु तिर्यग्योनिं गतस्य वा ॥ जन्म जन्मांतरेऽप्यस्तु भक्तिस्त्वयि ममाऽचला ॥ ६ ॥ तथेत्युक्त्वा महादेवः परया कृपया नृप ॥ गृहीत्वा तं करे सिद्धं जगाम निलयं हरः ॥ ७ ॥ तस्मिंस्तीर्थे तु यः स्नात्वा भक्त्या त्र्यक्षं प्रपूजयेत् ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा प्राणत्यागं करोति चेत् ॥ शिवस्याऽनुचरो भूत्वा मोदते कल्पमक्षयम् ॥ ९ ॥ ततः कालेन महता जायते विमले कुले ॥ वेदवेदांगतत्त्वज्ञो जीवेच्च शरदां शतम् ॥ १० ॥ एतत्ते कथितं तात तीर्थमाहात्म्यमुत्तमम् ॥ दुर्लभं मर्त्यसंज्ञस्य सर्वपापक्षयंकरम् ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे नंदिकेश्वरतीर्थमाहात्म्यवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज वरुणेश्वरमुत्तमम् ॥ यत्र सिद्धो महादेवो वरुणो नृपसत्तम ॥ १ ॥ पिण्याकशाकपर्णैश्च कृच्छ्रचांद्रायणादिभिः ॥ आराध्य गिरिजा नाथं ततः सिद्धिं परां गतः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा संतर्प्य पितृदेवताः ॥ पूजयेच्छंकरं भक्त्या स याति परमां गतिम् ॥ ३ ॥ कुंडिकां कर्दनीं वाऽपि मृद्घटं जलभाजनम् ॥ अन्नेन सहितं पार्थ तस्य पुण्यफलं शृणु ॥४॥ यत्फलं लभते मर्त्यः सत्रे द्वादशवार्षिके ॥ तत्फलं समवाप्नोति नाऽत्र कार्या विचारणा ॥ ५ ॥ सर्वेषामेव दानानामन्नदानं परं स्मृतम् ॥ सद्यः प्रीतिकरं तोयमग्नं च नृपसत्तम ॥ ६ ॥ तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ॥ वरुणस्य पुरे वासो यावदाभूतसंप्लवम् ॥ ७ ॥ पश्चात्पूर्णे ततः काले मर्त्यलोके प्रजायते ॥ अन्नदानप्रदो नित्यं जीवेद्वर्षशतं नरः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे वरुणेश्वरतीर्थमाहात्म्यवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल वह्नितीर्थमनुत्तमम् ॥ यत्र सिद्धो महातेजास्तपः कृत्वा हुताशनः ॥ १ ॥ सर्वभक्ष्यः कृतो योऽसौ दंडके मुनिना पुरा ॥ नर्मदातटमाश्रित्य पूतो जातो हुताशनः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूज

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यित्वा महेश्वरम् ॥ अग्निप्रवेशं कुरुते स गच्छेदग्निसाम्यताम् ॥ ३ ॥ भक्त्या स्नात्वा तु यस्तत्र तर्प्पयेत्पितृदेवताः ॥ अग्निष्टोमस्य यज्ञस्य फलमा प्नोत्यसंशयम् ॥ ४ ॥ तस्यैवाऽनंतरं राजन्कौवेरं तीर्थमुत्तमम् ॥ कुबेरो यत्र संसिद्धो यक्षाणामधिपः पुरा ॥ ५ ॥ तत्र तीर्थे नरः स्नात्वा समभ्यर्च्य जगद्गुरुम् ॥ उमया सहितं भक्त्या सर्वपापैः प्रमुच्यते ॥ ६ ॥ तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय कांचनम् ॥ नाभिमात्रे जले तिष्ठन्स लभेतार्बुदं फलम् ॥ ७ ॥ दधिस्कंदे मधुस्कंदे नंदीशे वरुणालये ॥ आग्नेये यत्फलं तात स्नात्वा तत्फलमाप्नुयात् ॥ ८ ॥ ते वंद्या मानुषे लोके धन्याः पूर्णमनोरथाः ॥ यैस्तु दृष्टं महापुण्यं नर्मदातीर्थपंचकम् ॥ ९ ॥ ते यांति भास्करे लोके परमे दुःखनाशने ॥ भास्करादैश्वरे लोके चैश्वरादनिवर्त्तके ॥ ॥ १० ॥ नीयते स परे लोके यावदिंद्राश्चतुर्दश ॥ ततः स्वर्गाच्च्युतो मर्त्यो राजा भवति धार्मिकः ॥ ११ ॥ सर्वरोगविनिर्मुक्तो भुनक्ति सचराचरम् ॥ विष्णुश्च देवता येषां नर्मदातीर्थसेविनाम् ॥ १२ ॥ अखंडितप्रतापास्ते जायंते नाऽत्र संशयः ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ॥ १३ ॥ ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ रेवातीरे वसेन्नित्यं रेवातोयं सदा पिबेत् ॥ १४ ॥ स स्नातः सर्वतीर्थेषु सोमपानं दिनेदिने ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ कल्पांते संक्षयं यांति न मृता तेन नर्मदा ॥ १५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दधिस्कंदादिपंचतीर्थमाहात्म्यवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थं परमशोभनम् ॥ ब्रह्महत्याहरं प्रोक्तं रेवातटसमाश्रयम् ॥ हनूमताभिधं ह्यत्र विद्यते लिंगमुत्तमम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ हनूमंतेश्वरं नाम कथं जातं वदस्व मे ॥ ब्रह्महत्याहरं तीर्थं रेवादक्षिणसंस्थितम् ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधु साधु महाबाहो सोमवंशविभूषण ॥ गुह्याद्गुह्यतरं तीर्थं नाख्यातं कस्यचिन्मया ॥ ३ ॥ तव स्नेहात्प्रवक्ष्यामि पीडितो वार्द्धकेन तु ॥ पूर्वं जातं महद्युद्धं रामरावणयोरपि ॥ ४ ॥ पुलस्त्यो ब्रह्मणः पुत्रो विश्रवास्तस्य वै सुतः ॥ रावणस्तेन संजातो दशास्यो ब्रह्मराक्षसः ॥ ५ ॥ त्रैलोक्यविजयी भूतः प्रसादाच्छूलिनः स च ॥ गीर्वाणा विजिताः सर्वे रामस्य गृहिणी हृता ॥ ६ ॥ वारितः कुम्भकर्णेन सीतां मोचयमोचय ॥ विभीषणेन वै पापो मन्दोदर्या पुनःपुनः ॥ ७ ॥ त्वं जितः कार्त्तवीर्येण रेणुकेयेन सोऽपि च ॥ स रामो रामभद्रेण तस्य संख्ये कथं जयः ॥ ८ ॥ ॥ रावण उवाच ॥ ॥ वानरैश्च नरैर्ऋक्षैर्वराहैश्च निरायुधैः ॥ देवासुरसमूहैश्च न जितोऽहं कदाचन ॥ ९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुग्रीवहनुमद्भ्यां च कुमुदेनांगदेन च ॥ एतैरन्यैः सहायैश्च रामचन्द्रेण वै जितः ॥ १० ॥ रामचन्द्रेण पौलस्त्यो हतः संख्ये महाबलः ॥ वनं भग्नं हताः शूराः प्रभंजनसुतेन च ॥ ११ ॥ रावणस्य सुतो जन्ये हतश्चाक्षकुमारकः ॥ आयामो रक्षसां भीमः संपिष्टो वानरेण तु ॥ १२ ॥ एवं रामायणे वृत्ते सीतामोक्षे कृते सति ॥ अयोध्यां तु गते रामे हनुमान्स महाकपिः ॥ १३ ॥ कैलासाख्यं गतः शैलं प्रणामाय महेशितुः ॥ तिष्ठतिष्ठेत्यऽसौ प्रोक्तो नंदिना वानरोत्तमः ॥ १४ ॥ ब्रह्महत्यायुतस्त्वं हि राक्षसानां वधेन हि ॥ भैरवस्य सभा नूनं नद्रष्टव्या त्वया कपे ॥ १५ ॥ ॥ हनुमानुवाच ॥ ॥ नंदिनाथ हरं पृच्छ पातकस्योपशांतिदम् ॥ पापोऽहं प्लवगो यस्मात्संजातः कारणांतरात् ॥ १६ ॥ ॥ नन्द्युवाच ॥ ॥ रुद्रदेहोद्भवा किं ते न श्रुता भूतले स्थिता ॥ श्रवणाज्जन्मजनितं द्विगुणं कीर्त्तनाद्व्रजेत् ॥ १७ ॥ त्रिंशज्जन्मार्जितं पापं न श्येद्रेवावगाहनात् ॥ तस्मात्त्वं नर्मदातीरं गत्वा चर तपो महत् ॥ १८ ॥ गन्धवाहसुतोऽप्येवं नंदिनोक्तं निशम्य च ॥ प्रयातो नर्मदातीरमौर्व्या दक्षिणसंगमम् ॥ १९ ॥ दध्यौ सुदक्षिणे देवं विरूपाक्षं त्रिशूलिनम् ॥ जटामुकुटसंयुक्तं व्यालयज्ञोपवीतिनम् ॥ २० ॥ भस्मोपचितसर्वांगं डमरुस्वरनादितम् ॥ उमार्द्धांगहरं शांतं गोनाथासनसंस्थितम् ॥ २१ ॥ वत्सरान्त्सुबहून्यावदुपासांचक्र ईश्वरम् ॥ तावत्तुष्टो महादेव आजगाम सहोमया ॥ २२ ॥ उवाच मधुरां वाणीं मेघगंभीरनिस्वनाम् ॥ साधुसाध्वित्युवाचेशः कष्टं वत्स त्वया कृतम् ॥ २३ ॥ न च पूर्वं त्वया पापं कृतं रावणसंक्षये ॥ स्वामिकार्यरतस्त्वं हि सिद्धोऽसि मम दर्शनात् ॥ २४ ॥ हनुमांश्च हरं दृष्ट्वा उमार्द्धांगहरं स्थिरम् ॥ साष्टांगं प्रणतोऽवोचज्जय शंभो नमोऽस्तु ते ॥ जयांऽधकविनाशाय जय गंगाशिरोधर ॥ २५ ॥ एवं स्तुतो महादेवो वरदो वाक्यमब्रवीत् ॥ वरं प्रार्थय मे वत्स प्राणसंभवसंभव ॥ २६ ॥ ॥ श्रीहनूमानुवाच ॥ ॥ ब्रह्मरक्षोवधाज्जाता मम हत्या महेश्वर ॥ न पापोऽहं भवेदेव युष्मत्संभाषणे क्षणात् ॥ २७ ॥ ॥ ईश्वर उवाच ॥ ॥ नर्मदातीर्थमाहात्म्याद्धर्मयोगप्रभावतः ॥ मन्मूर्त्तिदर्शनात्पुत्र निष्पापोऽसि न संशयः ॥ २८ ॥ अन्यच्च ते प्रयच्छामि वरं वानरपुंगव ॥ उपकाराय लोकानां नामानि तव मारुते ॥ २९ ॥ हनूमानंजनिसुतो वायुपुत्रो महाबलः ॥ रामेष्टः फाल्गुनो गोत्रः पिंगाक्षोऽमितविक्रमः ॥ ३० ॥ उदधिक्रमणश्रेष्ठो दशग्रीवस्य दर्पहा ॥ लक्ष्मणप्राणदाता च सीताशोकनिवर्त्तनः ॥ ३१ ॥ इत्युक्त्वांतर्दधे देव उमया सह शंकरः ॥ हनूमानीश्वरं तत्र स्थापयामास भक्तितः ॥ ३२ ॥ आत्मयोगबलेनैव ब्रह्मचर्यप्रभावतः ॥ ईश्वरस्य प्रसादेन लिंगं कामप्रदं हि तत् ॥ अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्जितम् ॥ ॥ ३३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ हनूमंतेश्वरे पुत्र प्रत्यक्षप्रत्ययं शृणु ॥ यद्वृत्तं द्वापरस्याऽऽदौ त्रेतांते पांडुनन्दन ॥ ३४ ॥ सुपर्वानाम भूपालो बभूव वसुधातले ॥ तस्य राज्ञः सदा सौख्यं नरा दीर्घायुषः सदा ॥ ३५ ॥ स पुत्रधनसंयुक्तश्चौरोपद्रववर्जितः ॥ शतबाहुर्बभूवाऽस्यः पुत्रो भीमपराक्रमः ॥ ३६ ॥ आसक्तोऽसौ सदा कालं पापधर्मैर्नरेश्वर ॥ अटाट्यत धरां सर्वां पर्वतांश्च वनानि च ॥ ३७ ॥ वधार्थं मृगयूथानामागतो विंध्यपर्वतम् ॥ तरुजातिसमाकीर्णे हस्तियूथसमाचिते ॥ ३८ ॥ सिंहचित्रकशोभाढ्ये मृगवाराहसंकुले ॥ क्रीडित्वा स वने राजा नर्मदामानतः क्वचित् ॥ ॥ ३९ ॥ हनूमंतवने प्राप्तः शतक्रोशप्रमाणके ॥ चिंचिणीवनशोभाढ्ये कदंबतरुसंकुले ॥ ४० ॥ नित्यं पालाशजंबीरैः करंजखदिरैस्तथा ॥ पाटलैर्बदरैर्युक्तैः शमीतिंदुकशोभितम् ॥ ४१ ॥ मृगयूथैः समाच्छन्नशिखंडिस्वरनादितम् ॥ पारावतकसंघानां समंतात्स्वरशोभितम् ॥ ४२ ॥ शरत्कालेऽरमद्राजा बहुले चाऽश्विनस्य सः ॥ वनमध्यं गतोऽद्राक्षीद्भ्रमन्तं पिंगलद्विजम् ॥ ४३ ॥ पुस्तिकाकरसंस्थं च पप्रच्छ चपलं द्विजम् ॥ ४४ ॥ ॥ शतबाहुरुवाच ॥ ॥ एकाकी त्वं वने कस्माद्भ्रमसे पुस्तिकाकरः ॥ इतस्ततोऽपि संपश्यन्कथयस्व द्विजोत्तम ॥ ४५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ कान्यकुब्जात्समायातः प्रेषितो राजकन्यया ॥ अस्थिक्षेपाय वै राजन्हनूमंतेश्वरे जले ॥ ४६ ॥ ॥ राजोवाच ॥ ॥ अस्थिक्षेपो जले कस्माद्धनूमंतेश्वरे द्विज ॥ क्रियते केन कार्येण साश्चर्यं कथ्यतां मम ॥ ४७ ॥ सुपर्वणः सुतो यानं त्यक्त्वा भूमौ प्रणम्य च ॥ कृतांजलिपुटो भूत्वा ब्राह्मणाय नरेश्वर ॥ समस्तं कथयामास वृत्तांतं स्वं पुरातनम् ॥ ४८ ॥ ॥ ब्राह्मण उवाच ॥ ॥ शिखंडीनाम राजाऽस्ति कान्यकुब्जे प्रतापवान् ॥ अपुत्रोऽसौ महीपालः कन्या जाता मनोरथैः ॥ ४९ ॥ जातिस्मरा सुचार्वंगी नर्मदायाः प्रभावतः ॥ पित्रा च सैकदा कन्या विवाहाय प्रजल्पिता ॥ ५० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनित्ये पुत्रि संसारे कन्यादानं ददाम्यहम् ॥ श्वः कृत्यमद्य कुर्वीत पूर्वाह्णे चाऽपराह्णिकम् ॥ न हि प्रतीक्षते मृत्युः कृतं चास्य न चाकृतम् ॥ ५१ ॥ ॥ कन्योवाच ॥ ॥ इच्छेयं यत्र काले हि तत्र देया त्वया पितुः ॥ पुत्रीवाक्यादसौ राजा विस्मितो वाक्यमब्रवीत् ॥ ५२ ॥ शिखण्ड्युवाच ॥ ॥ कथ्यतां मे महाभागे साश्चर्यं भाषितं त्वया ॥ पितुर्वाक्येन सा बाला उत्तमा ह्यागतांतिकम् ॥ ५३ ॥ कथयामास यद्वृत्तं हनूमंतेश्वरे नृप ॥ कलापिनी ह्यहं तात युता भर्त्रावसं तदा ॥ ५४ ॥ रेवौर्न्यासंगमान्तिस्था रेवाया दक्षिणे तटे ॥ हनूमंतवने पुण्ये चिक्रीडाहं यदृच्छया ॥ ५५ ॥ भर्तृयुक्ता च संसुप्ता रजन्यां सरले नगे ॥ आगता लुब्धकास्तत्र क्षुधार्त्ता वनमुत्तमम् ॥ ५६ ॥ भर्तृयोगयुता पापैर्दृष्टाऽहं वध चिंतकैः ॥ पाशबंधं समादाय बद्धाहं स्वमिना सह ॥ ५७ ॥ ग्रीवां ते मोटयामासुः पिच्छाच्छोटनकं कृतम् ॥ हुताशनमुखे तैस्तु सह कांतेन लुब्धकैः ॥ ५८ ॥ परिभज्यांत्रयोर्मांसं भक्षयित्वा यथेप्सितः ॥ सुप्ताः स्वस्थेंद्रिया रात्रौ सा गता शर्वरी क्षयम् ॥ ५९ ॥ प्रभाते मांसशेषं च जंबुकैर्गृध्रबातिभिः ॥ मच्छरीरोद्भवं चास्थि स्नायुमांसेन चावृतम् ॥ ६० ॥ गृहीतं घातिनैकेन चाकाशात्पतितं तदा ॥ तं मांसभक्षणं दृष्ट्वा परे पक्षिण आगताः ॥ ६१ ॥ दृष्ट्वा पक्षिसमूहं तु अस्थिखंडं व्यसर्जयत् ॥ विहगानां समस्तानां धावतां चैव पश्यताम् ॥ ६२ ॥ पतितं नर्मदातोये हनूमंतेश्वरे नृप ॥ मदीयमस्थिखंडं च पतितं नर्मदाजले ॥ ६३ ॥ तस्य तीर्थस्य पुण्येन जाताऽहं पुत्रिका तव ॥ भूपकन्या त्वहं जाता पूर्ण चन्द्रनिभानना ॥ ६४ ॥ जातिस्मरा नरेंद्रस्य संजाता भवतः कुले ॥ तस्माद्विवाहं नेच्छामि मम भर्त्ता नृपोत्तम ॥ ६५ ॥ विषमे वर्त्तते ऽद्यापि शकुंतमृगजातिषु ॥ तस्यास्थिशेषं राजेंद्र तस्मिंस्तीर्थे भविष्यति ॥ ६६ ॥ तत्क्षेपणार्थं वै तात प्रेषयाद्य द्विजोत्तमम् ॥ एतत्ते सर्वमाख्यातं कारणं नृपसत्तम ॥ ६७ ॥ मद्भर्त्ता विषमे स्थाने शकुंतमृगजातिषु ॥ यदि प्रेषयसे तात कंचित्त्वं नर्मदातटे ॥ ६८ ॥ तस्याहं कथयिष्यामि स्थानेश्चिह्नैश्च लक्षितम् ॥ शिखंडिनाऽप्यहं तत्र ह्याहूतो ह्यवनीपते ॥ ६९ ॥ दास्यामि विंशतिग्रामान्गच्छ त्वं नर्मदातटे ॥ प्रेषणं मे प्रतिज्ञातमलक्ष्म्या पीडितेन तु ॥ ७० ॥ ॥ कन्योवाच ॥ ॥ गच्छ त्वं नर्मदां पुण्यां सर्वपापक्षयंकरीम् ॥ आग्नेय्यां सोमनाथस्य हनूमंतेश्वरः परः ॥ ७१ ॥ अर्द्धक्रोशेन रेवाया विस्तीर्णो वटपादपः ॥ करंजः कटहश्चैव सन्निधाने वटस्य च ॥ ७२ ॥ न्यग्रोधमूलसान्निध्ये सूक्ष्मान्यस्थीनि द्रक्ष्यसि ॥ समूह्य तानि संगृह्य गच्छ रेवां द्विजोत्तम ॥ ७३ ॥ आश्विनस्याऽसिते पक्षे त्रिपुरारेस्तु वै तिथौ ॥ स्नाप्य त्रिशूलिनं भक्त्या रात्रौ त्वं कुरु जागरम् ॥ ७४ ॥ क्षिपेः प्रभाते तानि त्वं नाभिमात्रजलस्थितः ॥ इत्युच्चार्य द्विजश्रेष्ठ विमुक्तिस्तस्य जायताम् ॥ ७५ ॥ क्षिप्त्वास्थीनि पुनः स्नानं कर्त्तव्यं त्वघनाशनम् ॥ एवं कृते तु राजेंद्र गतिस्तस्य भविष्यति ॥ ॥ ७६ ॥ कथितं कन्यया यच्च तत्सर्वं पुस्तिकाकृतम् ॥ आगतोऽहं नृपश्रेष्ठ तीर्थेऽत्र दुरितापहे ॥ ७७ ॥ सोऽभिज्ञानं ततो दृष्ट्वा नीत्वास्थीनि नरेश्वर ॥ पूर्वोक्तेन विधानेन प्राक्षिपं नर्मदांभसि ॥ ७८ ॥ पुष्पवृष्टिः पपाताऽऽशु साधुसाध्विति पांडव ॥ विमानं च ततो दिव्यमागतं बर्हिणस्तदा ॥ ७९ ॥ दिव्यरूपधरो भूत्वा गतो नाके कलापवान् ॥ एवं तु प्रत्ययं दृष्ट्वा हनूमंतेश्वरे नृप ॥ ८० ॥ चकारानशनं विप्रः शतबाहुश्च भूपतिः ॥ शोषयामासतुस्तौ स्वमीश्वराराधने रतौ ॥ ८१ ॥ ध्यायंतौ तस्यतद्देवं शतबाहुद्विजोत्तमौ ॥ मासार्धेन मृतो राजा शतबाहुर्महामनाः ॥ ८२ ॥ किंकणीजालशोभाढ्यं विमानं तत्र चागतम् ॥ साधु साधु नृपश्रेष्ठ विमानारोहणं कुरु ॥ ८३ ॥शतबाहुरुवाच ॥ नायामि स्वर्गमार्गाग्रं विप्रो यावन्न संस्थितः ॥ उपदेशप्रदो मह्यं गुरुरूपी द्विजोत्तमः ॥ ॥८४॥अप्सरस ऊचुः ॥ लोभावृतो ह्ययं विप्रो लोभात्पापस्य संग्रहः॥ हनूमंतेश्वरे राजन्ये मृताः सत्त्वमास्थिताः॥८५॥ते यांति शांकरे लोके सर्वपापक्षयंकरे ॥ नैव पापक्षयश्चास्य ब्राह्मणस्य नरेश्वर ॥ ८६ ॥ गृहं च गृहिणी चित्ते ब्राह्मणस्य प्रवर्त्तते ॥ शतबाहुस्ततो विप्रमुवाच विनयान्वितः ॥ ॥ ८७ ॥ त्यज मूलमनर्थस्य लोभमेनं द्विजोत्तम ॥ इत्युक्त्वा स्वर्ययौ राजा स्वर्गकन्यासमावृतः ॥ ८८ ॥ दिनैः कैश्चिद्गतो विप्रः स्वर्गं वैतालि कैर्वृतः ॥ वर्द्धी च काशीराजस्य पुत्रस्तीर्थप्रभावतः ॥ ८९ ॥ आत्मानं कन्यया दत्तं पूर्वजन्म व्यचिंतयन् ॥ सा च तं प्रौढमालोक्य पितुराज्ञाम वाप्य च ॥ स्वयंवरे स्वभर्तारं लेभे साध्वी नृपात्मजम् ॥ ९० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतदृत्तांतमभवत्तस्मिंस्तीर्थे नृपोत्तम ॥ एतस्मात्कारणान्मेध्यं तीर्थमेतत्सदा नृप ॥ ९१ ॥ अपत्म्यां वा चतुर्दश्यां सर्व्वकालं नरेश्वर ॥ विशेषाच्चाश्विने मासि कृष्णपक्षे चतुर्दशीम् ॥ ९२ ॥ ह्याप्य येदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ दध्ना च खंडयुक्तेन कुशतोयेन वै पुनः ॥ ९३ ॥ श्रीखंडेन सुगंधेन गुंठयेच्च महेश्वरम् ॥ ततः सुगंधपुष्पैश्च विल्वपत्रैश्च पूजयेत् ॥ ९४ ॥ मुचकुंदेन कदंब जातीकाशकुशोद्भवैः ॥ उन्मत्तमुनिपुष्पौघैः पुष्पैस्तत्कालसंभवैः ॥ ९५ ॥ अर्चयेत्परया भक्त्या हनूमंतेश्वरं शिवम् ॥ घृतेन दापयेद्दीपं तैलेन तदभावतः ॥ ९६ ॥ श्राद्धं च कारयेत्तत्र ब्राह्मणैर्वेदपारगैः ॥ सच्चलक्षणसंपूर्णैः कुलीनैर्गृहपालकैः ॥ ॥ ९७ ॥ तर्पयेद्ब्राह्मणान्भक्त्या वसनान्नहिरण्यतः ॥ नरकस्था दिवं यांतु प्रोच्येति प्रणमेद्द्विजान् ॥ ९८ ॥ पतितान्वर्जयेद्विप्रान्वृषली यस्य गेहिनी ॥ स्ववृषं चापरित्यज्य वृषैरन्यैर्वृषायते ॥ ९९ ॥ वृषलीं तां विदुर्देवा न शूद्री वृषली भवेत् ॥ ब्रह्महत्या सुरापानं गुरुदारनिषेणम् ॥ ॥ १०० ॥ सुवर्णहरणन्यासमित्रद्रोहोद्भवं तथा ॥ नश्यते पातकं सर्वमित्येवं शंकरोऽब्रवीत् ॥ १०१ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ वाक्यप्रलापेन भो वत्स बहुनोक्तेन किं मया ॥ सर्वपातकसंयुक्तो दद्याद्दानं द्विजन्मने ॥ २ ॥ गोदानं च प्रकर्त्तव्यमस्मिंस्तीर्थे विशेषतः ॥ गोदानं हि यतः पार्थ सर्वदानाधिकं स्मृतम् ॥ ३ ॥ सर्व्वदेवमया गावः सर्वे देवास्तदात्मकाः ॥ शृंगाग्रेषु महीपाल शक्रो वसति नित्यशः ॥ ४ ॥ उरः स्कंदः शिरो ब्रह्मा ललाटे वृषभध्वजः ॥ चंद्रार्कौ लोचने देवी जिह्वायां च सरस्वती ॥ ५ ॥ मरुद्गणाः सदा साध्या यस्या दंता नरेश्वर ॥ हुंकारे चतुरो वेदान्विद्यात्सांगपदक्रमान् ॥ ६ ॥ कृपयो रोमकूपेषु ह्यसंख्याताःतपस्विनः ॥ दंडहस्तो महाकायः कृष्णो महिषवाहनः ॥ ६ ॥ यमः पृष्ठस्थितो नित्यं शुभाशुभपरीक्षकः ॥ चत्वारः स[illegible]ः पुण्याः क्षीरधाराः स्तनेषु च ॥ ७ ॥ विष्णुपादोद्भवा गंगा दर्शनात्पापनाशनी ॥ प्रस्रावे संस्थिता यस्मात्तस्माद्बुधा सदा बुधैः ॥८॥ लक्ष्मीश्च गोमये नित्यं पवित्रा सर्वमंगला ॥ गोमयालेपनं तस्मात्कर्त्तव्यं पांडुनंदन ॥ ९ ॥ गंधर्वाप्सरसो नागाः सुराग्रेषु व्यवस्थिताः ॥पृथिव्यां सागरांतायां यानि तीर्थानि भारत ॥ तानि सर्वाणि जानीयाद्गोर्गव्यं तेन पावनम् ॥११०॥ ॥ युधिष्ठिर उवाच ॥ सर्वदेवमयी धेनुर्गीर्वाणाद्यैरलंकृता ॥ एतत्कथय मे तात कस्माद्गोषु समाश्रिताः ॥ ११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वदेवमयो विष्णुर्गावो विष्णुशरीरजाः ॥ देवास्तदुभयात्तस्मात्कल्पिता विविधा जनैः ॥ १२ ॥ श्वेता वा कपिला वापि शीरिणी पांडुनंदन ॥ सवत्सा च सुशीला च सितवस्त्रावगुंठिता ॥ १३ ॥ कांस्यदोहनिका देया स्वर्णशृंगी सुभूषिता ॥ हनूमंतेश्वरस्याऽग्रे भक्त्या विप्राय दापयेत् ॥ १४ ॥ नियमस्थेन सा देया स्वर्गमानंत्यमिच्छता ॥ असमर्थाय ये दद्युर्विष्णुलोके प्रयांति ते ॥ १५ ॥ असौ लोके च्युतो राजन्भूतले द्विजमंदिरे ॥ कुशलो जायते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुत्रो गुणविद्याधनर्द्धिमान् ॥ १६ ॥ सर्वपापहरं तीर्थं हनूमंतेश्वरं नृप ॥ शृण्वन्निमुच्यते पापाद्गर्णसंकरसंभवात् ॥ १७ ॥ दूरस्थश्चितयन्पश्यन्मु
च्यते नाऽत्र संशयः ॥ ११८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे हनूमंतेश्वरतीर्थमाहात्म्यवर्ण
नंनाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ कैलासे पृच्छते भक्त्या
पण्मुखाय शिवोदितम् ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ पूर्वं त्रेतायुगे स्कंद हतो रामेण रावणः ॥ चतुर्दश तदा कोट्यो निहता ब्रह्मरक्षसाम् ॥
॥ २ ॥ हतेषु तेषु वै तत्र रक्षणाय दिवौकसाम् ॥ महानंदस्तदा जातस्त्रिषु लोकेषु पुत्रक ॥ ३ ॥ ततः सीतां समासाद्य समं
वानरपुंगवैः ॥ रामोप्ययोध्यामायातो भरतेन कृतोत्सवः ॥ तस्मै समर्पयामास स राज्यं लक्ष्मणाग्रजः ॥ ४ ॥ तस्मिन्प्रशासति ततो
राज्यं निहतकंटकम् ॥ कृतकार्योऽथ हनुमान्कैलासमगत्पुरा ॥ ५ ॥ ततो नंदी प्रतीहारो रुद्रांशमपि तं कपिम् ॥ न च संगमयामास रुद्रेणाऽवौ
वहारिणा ॥ ६ ॥ तेन पृष्टस्तदा नन्दी किं मया पातकं कृतम् ॥ येन रुद्रवपुः पुण्यं न पश्याम्यंबिकान्वितम् ॥ ७ ॥ ॥ नन्द्युवाच ॥ ॥
त्वयाऽवतरणं चक्रे कपींद्राऽमरहेतुना ॥ तथाऽपि हि कृतं पापमुपभोगेन शाम्यति ॥ ८ ॥ ॥ हनुमानुवाच ॥ ॥ किं मयाऽकारि
तत्पापं नंदिन्देवार्थकारिणा ॥ राक्षसाश्च हता दुष्टा विघ्नयज्ञाङ्गघातिनः ॥ ९ ॥ ततस्तदालापकुतूहली हरो निजांशभाजं कपिमुग्रतेजसम् ॥
उवाच द्वारांतरदत्तदृष्टिः पुरःस्थितं प्रेक्ष्य कपीश्वरं पुनः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ गंगा गया कपे रेवा यमुना च सरस्वती ॥ सर्वपाप
हरा नद्यस्तासु स्नानं समाचर ॥ ११ ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ सोमनाथसमीपस्थं तत्र त्वं गच्छ वानर ॥ १२ ॥ तत्र स्नात्वा
महापापं गमिष्यति ममाऽऽज्ञया ॥ उत्पत्य वेगाद्धनुमान्च्छ्रीरेवादक्षिणे तटे ॥ १३ ॥ जगाम सुमहानादस्तपश्चक्रे सुदुष्करम् ॥ तस्य वै तप्यमा
नस्य रक्षोवधकृतं तमः ॥ १४ ॥ विलीनं पार्थ कालेन कियतेशप्रसादतः ॥ ततो देवैः समं देवस्तत्तीर्थमगमद्धरः ॥ १५ ॥ कपिमालिंगयामास
वरं तस्मै प्रदत्तवान् ॥ अद्यप्रभृति ते तीर्थं भविष्यति न संशयः ॥ १६ ॥ कपितीर्थं ततो जातं तस्यौ तत्र स्वयं हरः ॥ हनूमन्तेश्वरो नाम्ना
सर्वहत्याहरस्तदा ॥ १७ ॥ तत्र तीर्थे तु यः स्नात्वा भक्त्या लिंगं प्रपूजयेत् ॥ सर्वपापानि नश्यंति हरस्य वचनं यथा ॥ १८ ॥ तत्रास्थीनि
विलीयन्ते पिंडदानेऽक्षया गतिः ॥ यत्किञ्चिद्दीयते तत्र तद्धि कोटिगुणं भवेत् ॥ १९ ॥ हनुमानप्ययोध्यायां रामं द्रष्टुमथाऽगमत् ॥ चकार कुश
लप्रश्नं स्वस्वरूपं न्यवेदयत् ॥ २० ॥ ॥ श्रीराम उवाच ॥ ॥ कुर्वतो देवकार्यं ते मम कार्यं च कुर्वतः ॥ ततोऽहमपि पापीयांस्तपस्तप्स्याम्य
संशयम् ॥ २१ ॥ तत्रैव दक्षिणे कूले रेवायाः पापहारिणि ॥ चतुर्विंशतिवर्षाणि तपस्तेपेऽथ राघवः ॥ २२ ॥ ज्योतिष्मतीपुरीसंस्थः श्रीरेवास्नान
माचरन् ॥ तस्य शुश्रूषणं चक्रे लक्ष्मणोऽपि तदाज्ञया ॥ २३ ॥ स्थापयामासतुर्लिंगे तौ तदा रामलक्ष्मणौ ॥ प्रभावात्सत्यतपसो रेवातीरे महा
मती ॥ निष्पापतां तदा वीरौ जग्मतू रामलक्ष्मणौ ॥ २४ ॥ ततस्तदा देवपुरोगमो हरो गतो हि वै पुण्यमुनीश्वरैः सह ॥ आगत्य तीर्थं च वरं
ददौ तदा निजां कलां तत्र विमुच्य तीर्थे ॥ २५ ॥ मुनिभिः सर्वतीर्थानां क्षिप्तं कुंभोदकं भुवि ॥ एकस्थं लिंगनाभाथ कलाकुंभस्तथाऽभवत् ॥
॥ २६ ॥ कुंभेश्वर इति ख्यातस्तदा देवगणार्चितः ॥ रामोऽपि पूजयामास तल्लिंगं देवसेवितम् ॥ २७ ॥ ततो वरं ददौ देवो रामकीर्त्यभिवृद्धये ॥
चतुर्विंशतिमे वर्षे रामो निष्पापतां गतः ॥ २८ ॥ यदा कन्यागतः पंगुर्गुरुणा सहितो भवेत् ॥ तदेव देवयात्रेयमिति देवा जगुर्मुदा ॥ २९ ॥ यथा
गोदावरीतीर्थे सर्वतीर्थफलं भवेत् ॥ तथात्र रेवास्नानेन लिंगानां दर्शनेनृणाम् ॥ ३० ॥ करिष्यंत्यत्र ये श्राद्धं पितॄणां नर्मदातटे ॥ कुंभेश्वरसमीप
स्थास्तत्फलं शृणु पण्मुख ॥ ३१ ॥ यावन्तो रोमकूपाः स्युः शरीरे सर्वदेहिनाम् ॥ तावद्वर्षप्रमाणेन पितॄणामक्षया गतिः ॥ ३२ ॥ पृथिव्यां
देवताः सर्वा सर्वतीर्थानि यानि तु ॥ लभन्ते तत्फलं मर्त्या लिंगत्रयविलोकनात् ॥ ३३ ॥ अपुत्रो लभते पुत्रं निर्द्धनो धनमाप्नुयात् ॥ सरोगो
मुच्यते रोगान्नाऽत्र कार्या विचारणा ॥ ३४ ॥ सिंहराशिं गते जीवे यत्स्याद्गोदावरीफलम् ॥ तद्दादशगुणं स्कंद कुंभेश्वरसमीपतः ॥ ३५ ॥ ये
जानंति न पश्यंति कुंभशंभुमुमापतिम् ॥ नर्मदादक्षिणे कूले तेषां जन्म निरर्थकम् ॥ ३६ ॥ यथा गोदावरीयात्रा कर्त्तव्या मुनिशासनात् ॥ चतु
र्विंशतिमे वर्षे तथेयं देवभाषितम् ॥३७॥ यावच्चंद्रश्च सूर्यश्च यावद्वै दिवि तारकाः ॥ तावत्तदक्षयं दानं रेवाकुंभेश्वरांतिके ॥३८॥ महादानानि देयानि
तत्र लौकैर्विचक्षणैः ॥ गोदानमत्र शंसंति सौवर्णं राजतं तथा ॥ ३९ ॥ यस्याः स्मरणमात्रेण नश्यते पापसंचयः ॥ स्नानेन किं पुनः स्कन्द ब्रह्म
हत्यां व्यपोहति ॥ ४० ॥ तत्र तीर्थे तु यः स्नात्वा श्राद्धं कुर्याद्युधिष्ठिर ॥ एकोत्तरं कुलशतमुद्धरेच्छिवशासनात् ॥ ४१ ॥ यानि कानि च
तीर्थानि चासमुद्रसरांसि च ॥ शिवलिंगार्चनस्येह कलां नार्हंति षोडशीम् ॥ ४२ ॥ एवं देवा वरं दत्त्वा हरीश्वरपुरोगमाः ॥ स्वस्थानमगमन्पूर्वं
मुक्त्वा तन्नाम चोत्तमम् ॥ ४३ ॥ तीर्थस्याऽस्य वरं दत्त्वा स रामो लक्ष्मणाग्रजः ॥ अयोध्यां प्रविवेशाऽसौ निष्पापो नर्मदाजलात् ॥ ४४ ॥ सौवर्णी
च ततः कृत्वा सीतां यज्ञं चकार सः ॥ अनुमन्त्र्य मुनींल्लोकान्देवताश्च निजं कुलम् ॥ ४५ ॥ पुरा त्रेतायुगे जातं तत्तीर्थं स्कन्दनामकम् ॥ नियमेन ततो लोकैः कर्त्तव्यं लिंगदर्शनम् ॥ ४६ ॥ तावत्पापानि देहेषु महापातकजान्यपि ॥ यावन्न प्रेक्षते जंतुस्तत्तीर्थं देवसेवितम् ॥ ४७ ॥ ते
धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ ज्योतिष्मतीपुरीसंस्थं ये द्रक्ष्यंति हरं परम् ॥ ४८ ॥ तस्मान्मोहं परित्यज्य जनैर्गंतव्यमादरात् ॥
तीर्थांऽशेषफलावाप्त्यै तीर्थं कुम्भेश्वराह्वयम् ॥ ४९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ श्रुत्वेति शंभुवचसा स षडाननोऽथ नत्वा पितुः पदयुगांबुज
मादरेण ॥ संप्राप्य दक्षिणतटं गिरिशस्रवन्त्याः कीशाभ्यरामकलशाख्यशिवान्ददर्श ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवंत्यखंडे रेवाखंडे कपितीर्थरामेश्वरलक्ष्मणेश्वरकुम्भेश्वरमाहात्म्यवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र नर्मदायाः पुरातनम् ॥ ब्रह्महत्याहरं तीर्थं वाराणस्या समं हि तत् ॥ १ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ आश्चर्यं कथ्यतां ब्रह्मन्यद्वृत्तं नर्मदातटे ॥ वाराणस्या समं कस्मादेतत्कथय मे प्रभो ॥ २ ॥ निमग्नो दुःखसंसारे हृतराज्यो द्विजो
त्तम ॥ युष्मद्वाणीजलस्नातो निर्दुःखः सह बांधवैः ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाबाहो सोमवंशविभूषण ॥ पृष्टोऽस्मि
दुर्लभं तीर्थं गुह्याद्गुह्यतरं परम् ॥ ४ ॥ आदौ पितामहस्त्रात्वत्समस्तजगतः प्रभुः ॥ मनसा तस्य संजाता दशैव ऋषिपुंगवाः ॥ ५ ॥ मरीचिमत्र्यं
गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥ प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ॥ ६ ॥ जज्ञे प्राचेतसं दक्षं महातेजाः प्रजापतिः ॥ दक्षस्याऽपि तथा
जाताः पंचाशद्दुहिताः किल ॥ ७ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ तथैव स महाभागः सप्तविंशतिमिंदवे ॥ ८ ॥ रोहिणीनाम या
तासामभीष्टा साऽभवद्विधोः ॥ शेषासु करुणां कृत्वा शप्तो दक्षेण चंद्रमाः ॥ ९ ॥ क्षयरोग्यभवच्चंद्रो दक्षस्यायं प्रजापतेः ॥ स च शापप्रभावेण

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निस्तेजाः शर्वरीपतिः ॥ १० ॥ गतः पितामहं सोमो वेपमानोऽमृतांशुमान् ॥ पद्मयोने नमस्तुभ्यं वेदगर्भ नमोऽस्तु ते ॥ शरणं त्वां प्रसन्नोस्मि पाहि मां कमलासन ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ निस्तेजाः शर्वरीनाथ कलाहीनश्च दृश्यसे ॥ उद्विग्नमानसस्तात संजातः केन हेतुना ॥ ॥ १२ ॥ ॥ सोम उवाच ॥ ॥ दक्षशापेन मे ब्रह्मन्निस्तेजस्त्वं जगत्पते ॥ निर्हारश्चाऽस्य शापस्य कथ्यतां मे पितामह ॥ १३ ॥ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ सर्वत्र सुलभा रेवा त्रिषु स्थानेषु दुर्लभा ॥ ओंकारेऽथ भृगुक्षेत्रे तथा चैवार्वसंगमे ॥ १४ ॥ तत्र गच्छ क्षपानाथ यत्र रेवांतरं तटम् ॥ त्वरितोऽसौ गतस्तत्र यत्र रेवार्विसंगमः ॥ १५ ॥ काष्ठावस्थःस्थितः सोमो दध्यौ त्रिपुरवैरिणम् ॥ यावद्वर्षशतं पूर्णं तावत्तुष्टो महेश्वरः ॥ १६ ॥ प्रत्यक्षः सोमराजस्य वृषासन उमापतिः ॥ साष्टांगं प्रणिपत्योच्चैर्जय शंभो नमोऽस्तु ते ॥ १७ ॥ जय शंकर पापहरांय नमो जय ईश्वर ते जगदीश नमः ॥ जय वासुकिभूषणधार नमो जय शूलकपालधराय नमः ॥ १८ ॥ जय अन्धकदैत्यविनाश नमो जय दानववृन्द वधाय नमः ॥ जय निष्कलरूप सकलाय नमो जय काल कामदहाय नमः ॥ १९ ॥ जय मेचककण्ठधराय नमो जय सूक्ष्मनिरंजनशब्द नमः ॥ जय आदिरनादिरनंत नमो जय शंकर किंकरमीश भजे ॥ २० ॥ एवं स्तुतो महादेवः सोमराजेन पांडव ॥ तुष्टस्तस्य नृपश्रेष्ठ शिवया शंकरोऽब्रवीत् ॥ ॥ ईश्वर उवाच ॥ ॥ २१ ॥ वरं प्रार्थय मे भद्र यत्ते मनसि वर्त्तते ॥ साधुसाधु महासत्त्व तुष्टोऽहं तपसा तव ॥ २२ ॥ ॥ ॥ सोम उवाच ॥ ॥ दक्षशापेन दग्धोऽहं क्षीणसत्त्वो महेश्वर ॥ शापस्योपशमं देव कुरु शर्म मम प्रभो ॥ २३ ॥ ॥ ईश्वर उवाच ॥ ॥ तव भक्तिग्रहीतोऽहमुमया सह तोषितः ॥ निष्पापः सोमनाथस्त्वं संजातस्तीर्थसेवनात् ॥ २४ ॥ इत्यूचे देवदेवेशः क्षणं ध्यात्वेंदुना ततः ॥ स्थापितं परमं लिंगं कामदं प्राणिनां भुवि ॥ सर्वदुःखहरं तत्तु ब्रह्महत्याविनाशनम् ॥ २५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सोमनाथप्रभावं मे संक्षेपात्कथय प्रभो ॥ दुःखार्णवनिमग्नानां त्राता प्राप्तो द्विजोत्तम ॥ २६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु तीर्थप्रभावं ते संक्षेपात्कथयाम्यहम् ॥ यद्वृत्तमुत्तरे कूले रेवाया उरिसंगमे ॥ २७ ॥ शंबरो नाम राजाभूत्तस्य पुत्रस्त्रिलोचनः ॥ त्रिलोचनसुतः कण्वः स पापर्द्धिपरोऽभवत् ॥ २८ ॥ वने नित्यं भ्रमन्सोऽथ मृगयूथं ददर्श ह ॥ मृगयूथं हतं तत्तु त्रिलोचनसुतेन च ॥ २९ ॥ मृगरूपी द्विजो मध्ये चरते निर्जने वने ॥ स हतस्तेन संगेन कण्वेन मुनिसत्तम ॥ ३० ॥ ब्रह्महत्यान्वितः कण्वो निस्तेजा व्यचरन्महीम् ॥ व्यचरंश्चैव संप्राप्तो नर्मदासुरिसंगमे ॥ ३१ ॥ किंशुकाशोकवहले जंबीरपनसाकुले ॥ कदंबपाटलाकीर्णे विल्वनारंगशोभिते ॥ ३२ ॥ चिंचिणीचंपकोपेते ह्यगस्तिततरुच्छादिते ॥ प्रभूतभूतसंयुक्तं वनं सर्वत्र शोभितम् ॥ ३३ ॥ चित्रकैर्मृगमार्जारैर्हिस्रैः शंबरशूकरैः ॥ शरभैर्गवयसंयुक्तैः शिखंडिखरमंडितम् ॥ ३४ ॥ प्रविष्टस्तु वने कण्वस्तृषार्त्तः श्रमपीडितः ॥ स्नातो रेवाजले पुण्ये संगमे पापनाशने ॥ ३५ ॥ अर्चितः परया भक्त्या सोमनाथो युधिष्ठिर ॥ पपौ सुविमलं तोयं सर्वपापक्षयंकरम् ॥ ३६ ॥ फलानि च विचित्राणि चखाद सह किंकरैः ॥ सुप्तः पादपच्छायायां श्रांतो मृगवधेन च ॥ ३७ ॥ तावत्तीर्थवरं विप्रः स्नानार्थं संगमं गतः ॥ मार्गगो ब्राह्मणो हर्षोद्युक्तस्तद्गतमानसः ॥ ३८ ॥ अबला तमुवाचेदं तिष्ठतिष्ठ द्विजोत्तम ॥ त्रस्तो निरीक्षते यावद्दिशः सर्वा नरेश्वर ॥ ३९ ॥ तावद्दृश्यतमारूढां स्त्रियं रक्ताम्बरावृताम् ॥ रक्तमाल्यां तदा बालां रक्तचंदनचर्चिताम् ॥ रक्ताभरणशोभाढ्यां पाशहस्तां ददर्श ह ॥ ४० ॥ ॥ स्त्र्युवाच ॥ ॥ संदेशं श्रूयतां विप्र यदि गच्छसि संगमे ॥ मद्भर्त्ता तिष्ठते तत्र शीघ्रमेव विसर्जय ॥ ४१ ॥ एकाकिनी च ते भार्या तिष्ठते वनमध्यगा ॥ इत्याकर्ण्य गतो विप्रः संगमे सुरदुर्लभे ॥ ४२ ॥ वृक्षच्छायान्वितः कण्वो ब्राह्मणेनाऽवलोकितः ॥ उवाच तं प्रति तदा वचनं ब्राह्मणोत्तमः ॥ ४३ ॥ ॥ ब्राह्मण उवाच ॥ ॥ वनांतरे मया दृष्टा बाला कमललोचना ॥ रक्तांबरधरा तन्वी रक्तचंदनचर्चिता ॥ ४४ ॥ रक्तमाल्या सुशोभाढ्या पाशहस्ता मृगेक्षणा ॥ वृक्षारूढावदद्वाक्यं मद्भर्त्ता प्रेष्यतामिति ॥ ४५ ॥ ॥ कण्व उवाच ॥ ॥ कस्मिन्स्थाने तु विप्रेंद्र विद्यते मृगलोचना ॥ कस्य सा केन कार्येण सर्वमेतद्वदाशु मे ॥ ४६ ॥ ॥ ब्राह्मण उवाच ॥ ॥ संगमादर्द्धक्रोशे सा उद्यानांते हि विद्यते ॥ वचनाद्ब्रह्मणस्येषा न ज्ञाता पार्थिवेन तु ॥ ४७ ॥ तदा स कण्वभूपालः स्वकं दूतं समादिशत् ॥ ॥ कण्व उवाच ॥ ॥ गच्छ त्वं पृच्छतां तां कागता कच गमिष्यसि ॥ प्रेषितस्त्वरितो दूतो गतो नारी समीपतः ॥ ४८ ॥ वृक्षस्थां ददृशे बालामुवाच नृपसत्तम ॥ मन्नाथः पृच्छति त्वां तु काऽसि त्वं क्व गमिष्यसि ॥ ४९ ॥ ॥ कन्योवाच ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ॥ इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ५० ॥ ब्रह्महत्या च संजाता मृगरूपधरद्विजात् ॥ मया युक्तोऽपि ते राजा मुक्तस्तीर्थप्रभावतः ॥ ५१ ॥ अर्द्धक्रोशांतरान्मध्ये ब्रह्महत्या न संविशेत् ॥ सोमनाथप्रभावोऽयं वाराणस्याः समः स्मृतः ॥ ॥ ५२ ॥ गच्छ त्वं प्रेष्यतां राजा शीघ्रमत्र न संशयः ॥ गतो भृत्यस्ततः शीघ्रं वेपमानः सुविह्वलः ॥ ५३ ॥ समस्तं कथयामास यद्वृत्तं हि पुरातनम् ॥ तस्य वाक्यादसौ राजा पतितो धरणीतले ॥ ५४ ॥ ॥ भृत्य उवाच ॥ ॥ कस्मात्त्वं शोचसे नाथ पूर्वोपात्तं शुभाशुभम् ॥ इत्याकर्ण्य वचस्तस्य राजा वचनमब्रवीत् ॥ ५५ ॥ प्राणत्यागं करिष्यामि सोमनाथसमीपतः ॥ शीघ्रमानीयतां वह्निरिंधनानि बहूनि च ॥ ५६ ॥ आनीतं तत्क्षणात्सर्वं भृत्यैस्तद्भयवर्त्तिभिः ॥ स्नानं कृत्वा शुभे तोये संगमे पापनाशने ॥ ५७ ॥ अर्चितः परया भक्त्या सोमनाथो महीभृता ॥ त्रिःप्रदक्षिणतः कृत्वा ज्वलंतं जातवेदसम् ॥ ५८ ॥ प्रविष्टः कण्वराजाऽसौ हृदि ध्यात्वा जनार्दनम् ॥ पीतांबरधरं देवं जटामुकुटधारिणम् ॥ ५९ ॥ श्रिया युक्तं सुपर्णस्थं शंखचक्रगदाधरम् ॥ मुरारिसूदनं दध्यौ सुगतिर्मे भवत्विति ॥ ६० ॥ पपात पुष्पवृष्टिस्तु साधु साधु नृपात्मज ॥ आश्चर्यमतुलं दृष्ट्वा निरीक्ष्य च परस्परम् ॥ ६१ ॥ मृतं तैः पावके भृत्यैर्हृदि ध्यात्वा गदाधरम् ॥ विमानस्थास्ततः सर्वे संजाताः पांडुनंदन ॥ ६२ ॥ निष्पापास्ते दिवं याताः सोमनाथप्रभावतः ॥ ब्राह्मणे संगमे तत्र ध्यायमाने वृषध्वजम् ॥ ६३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सोमनाथप्रभावोऽयं शृणुष्वैकमना विधिम् ॥ अष्टम्यां वा चतुर्दश्यां सर्वकालं रवेर्दिने ॥ ६४ ॥ विशेषाच्छुक्लपक्षे चेत्सूर्यवारेण सप्तमी ॥ उपोष्य यो नरो भक्त्या रात्रौ कुर्वीत जागरम् ॥ ६५ ॥ पंचामृतेन गव्येन स्नापयेत्परमेश्वरम् ॥ श्रीखंडेन ततो गुंध्य पुष्पधूपादिकं ददेत् ॥ ६६ ॥ घृतेन बोधयेद्दीपं नृत्यं गीतं च कारयेत् ॥ सोमवारे तथाऽष्टम्यां प्रभाते पूजयेद्द्विजान् ॥ ६७ ॥ जितक्रोधानात्मतः परनिंदाविवर्जितान् ॥ सवांगरुनिराच्छस्तान्स्वदारपरिपालकान् ॥ ६७ ॥ गायत्रीपाठमात्रांश्च विकर्मविरतान्सदा ॥ पुनर्भूवृषली शूद्री च रेतुर्यस्य मंदिरे ॥ ६९ ॥ दूरतोऽसौ द्विजस्त्याज्य आत्मनः श्रेय इच्छता ॥ हीनांगाऽनतिरिक्तांगान्येषां पूर्वापरं न हि ॥ ७० ॥ व्रते श्राद्धे तथा दाने दूरतस्तान्विवर्जयेत् ॥ आयसी तरुणी तुल्या द्विजाः स्वाध्यायवर्जिताः ॥ ७१ ॥ आत्मानं सह याज्येन पातयंति न संशयः ॥ शाल्मलीनाववतुल्याः स्युः षट्कर्मनिरता द्विजाः ॥ ७२ ॥ दातारं च तथाऽऽत्मानं तारयंति तरंति च ॥ श्राद्धं सोमेश्वरे पार्थ यः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कुर्याद्गतमत्सरः ॥ ७३ ॥ प्रेतास्तस्य हि सुप्रीता यावदाभूतसंप्लवम् ॥ अन्नं वस्त्रं हिरण्यं च यो दद्यादजन्मने ॥ ७४ ॥ स याति शांकरं लोक इति मे सत्यभाषितम् ॥ हयं यो यच्छते तत्र संपूर्णं तरुणं सितम् ॥ ७५ ॥ रक्तं वा पीतवर्णं वा सर्वलक्षणसंयुतम् ॥ कुंकुमेन विलिप्तांगावंग्रजन्महयावपि ॥ ७६ ॥ लम्दाम्भूषितौ कार्यौ सितवस्त्रावगुंठितौ ॥ अंघ्रिः प्रदीयतां स्कन्धे मदीये हयमारुह ॥ ७७ ॥ आरूढे ब्राह्मणे ब्रूयाद्रास्करः प्रीयतामिति ॥ स याति शांकरं लोकं सर्वपापविवर्जितः ॥ ७८ ॥ उपरागे तु सोमस्य तीर्थं गत्वा जितेंद्रियः ॥ सत्यलोका च्युतश्चाऽपि राजा भवति धार्मिकः ॥ ७९ ॥ तस्य वासः सदा राजन्न नश्यति कदाचन ॥ दीर्घायुर्जायते पुत्रो भार्या च वशवर्तिनी ॥ ८० ॥ जीवेद्वर्षशतं साग्रं सर्वदुःखविवर्जितः ॥ सोपवासो जितक्रोधो धेनुं दद्याद्विजन्मने ॥ ८१ ॥ सवत्सां क्षीरसंयुक्तां श्वेतवस्त्रावलोकिताम् ॥ शवलां पीतवर्णां च धूम्रां वा नीलकंबुराम् ॥ ८२ ॥ कपिलां वा सवत्सां च घण्टाभरणभूषिताम् ॥ रूप्यखुरां कांस्यदोहां स्वर्णशृंगीं नरेश्वर ॥ ८३ ॥ श्वेतया वर्द्धते वंशो रक्ता सौभाग्यवर्द्धिनी ॥ शवला पीतवर्णा च दुःखघ्नी संप्रकीर्तिते ॥ ८४ ॥ कपिला नाशयेत्पापं सप्तजन्मससुद्भवम् ॥ सत्य लोकमवाप्नोति गोप्रदायी नरेश्वर ॥ ८५ ॥ पशातेऽथ व्यतीपाते वैधृतौ रविसंक्रमे ॥ दिनक्षये गजच्छायां ग्रहणे भास्करस्य च ॥ ८६ ॥ ये व्रजंति महात्मानः संगमे सुरदुर्लभे ॥ मृदावगुण्ठयित्वा तु चात्मानं संगमे विशेत् ॥ ८७ ॥ हृदयांतर्जले जाप्या प्राणायामोथवा नृप ॥ गायत्री वैष्णवी चैव सौरी शैवी यदृच्छया ॥ तेऽपि पापैः प्रमुच्यंत इत्येवं शंकरोऽब्रवीत् ॥ ८८ ॥ जगतीं सोमनाथस्य यस्तु कुर्यात्प्रदक्षिणाम् ॥ प्रदक्षीणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ८९ ॥ ब्रह्महत्या सुरापानं गुरुदारनिषेवणम् ॥ भ्रूणहा स्वर्णहर्त्ता च मुच्यंते नाऽत्र संशयः ॥ ९० ॥ तीर्थास्यानमिदं पुण्यं यः शृणोति जितेंद्रियः ॥ व्याधितो मुच्यते रोगी चारोगी सुखमाप्नुयात् ॥ ९१ ॥ यत्ते संदह्यते चेतः शृणु तन्मे युधिष्ठिर ॥ नैकापि भुव लोकेऽस्मिन्भ्रूणहत्या सुदुस्त्यजा ॥ ९२ ॥ किंतु पंचाशतिं पार्थ प्राप याः क्षणदाकरः ॥ सोऽपि तीर्थमिदं प्राप्य तपस्तप्त्वा सुदुश्चरम् ॥ ९३ ॥ बभूवुक्तः सर्वपापेभ्यः शीतरश्मिरभूत्सुखी ॥ श्रूयते नृप पौराणी गाथा गीता महर्षिभिः ॥ ९४ ॥ लिंगं प्रतिष्ठितं ब्रह्मे कं दशभ्रूणहनं भवेत् ॥ अतो लिंगत्रयं सोमः स्थापयामास भारत ॥ ९५ ॥ रेवोरिसंगमे ह्याद्यं द्वितीयं भृगुकच्छके ॥ ततः सिद्धिं परां प्राप्य प्रभासे तु तृतीयकम् ॥ ९६ ॥ इति ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं संशुद्धिकृन्नृणाम् ॥ ९७ ॥ पुत्रार्थी लभते पुत्रान्विष्कामः स्वर्गमाप्नुयात् ॥ मुच्यते सर्वपापेभ्यस्तीर्थं कृत्वा परं नृप ॥ ९८ ॥ एतत्ते सर्वमाख्यातं सोमनाथस्य यत्फलम् ॥ श्रुत्वा पुत्रमवाप्नोति स्नात्वा चाऽर्थी न संशयः ॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे सोमनाथतीर्थमाहात्म्यवर्णनंनाम पंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज पिंगलावर्त्तमुत्तमम् ॥ संगमस्य समीपस्थं रेवाया उत्तरे तटे ॥ हव्यवाहेन राजेंद्र स्थापितः पिंगलेश्वरः ॥ १ ॥ युधिष्ठिर उवाच ॥ ॥ हव्यवाहेन भगवन्नीश्वरः स्थापितः कथम् ॥ एतदाख्याहि मे सर्वं प्रसादाद्वक्तुमर्हसि ॥ २ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शंभुना रेतसा राजंस्तर्पितो हव्यवाहनः ॥ प्राप्तसौख्येन रौद्रेण गौर्याक्रीडनचेतसा ॥ ॥ ३ ॥ हव्यवाहमुखे क्षिप्तं रुद्रेणामिततेजसा ॥ रुद्रस्य रेतसा दग्धस्तीर्थयात्राकृतादरः ॥ ४ ॥ सागरांश्च नदीर्गत्वा क्रमाद्देवां समागतः ॥ चचार परया भक्त्या ध्यानमुग्रं हुताशनः ॥ ५ ॥ वायुभक्षः शतं साग्रं यावत्तेपे हुताशनः ॥ तावत्तुष्टो महादेवो वरदो जातवेदसः ॥ संनिधौ समुपेत्याथ वचनं चेदमब्रवीत् ॥ ६ ॥ ॥ ईश्वर उवाच ॥ ॥ वरं वृणीष्व हव्याश यस्ते मनसि वर्त्तते ॥ ७ ॥ ॥ वह्निरुवाच ॥ ॥ नमस्ते सर्व लोकेश उग्रमूर्त्ते नमोस्तु ते ॥ रेतसा तव संदग्धः कुष्ठी जातो महेश्वर ॥ कृपां कुरु महादेव मम रोगं विनाशय ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ हव्यवाह भवारोगो मत्प्रसादाच्च सत्वरम् ॥ अत्र तीर्थे कृतस्नानः स्वरूपं प्रतिपत्स्यसे ॥ ९ ॥ इत्युक्त्वा च महादेवस्तत्रैवान्तरधीयत ॥ अनंतरं हव्यवाहः सस्नौ रेवाजले त्वरन् ॥ १० ॥ तदैव रोगनिर्मुक्तोऽभवद्दिव्यस्वरूपवान् ॥ स्थापयामास देवेशं स वह्निः पिंगलेश्वरम् ॥ ११ ॥ नाना संपूजयामास तुष्टाव स्तुतिभिर्मुदा ॥ ततो जगाम देशं स्वं देवानां हव्यवाहनः ॥ १२ ॥ हव्यवाहेन भूपैवं स्थापितः पिंगलेश्वरः ॥ जितक्रोधो हि यस्तत्र उपवासं समाचरेत् ॥ १३ ॥ अतिरात्रफलं तस्य अंते रुद्रत्वमाप्नुयात् ॥ गुणान्विताय विप्राय कपिलां तत्र भारत ॥ १४ ॥ अलंकृत्य सवत्सां च शक्त्याऽलंकारभूषिताम् ॥ यः प्रयच्छति राजेंद्र स गच्छेत्परमां गतिम् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे पिंगलेश्वरतीर्थमाहात्म्यवर्णनंनाम षडशीतितमोऽध्यायः ॥८६॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं परमशोभनम् ॥ स्थापितं मुनिसंघैर्यद्ब्रह्मवंशसमुद्भवैः ॥ १ ॥ ऋणमोचनमित्याख्यं रेवातटसमाश्रितम् ॥ षण्मासं मनुजो भक्त्या तर्पयन्पितृदेवताः ॥ २ ॥ देवैः पितृमनुष्यैश्च ऋणमात्मकृतं च यत् ॥ मुच्यते तत्क्षणान्मर्त्यः स्नातो वै नर्मदाजले ॥ ॥ ३ ॥ प्रत्यक्षं दुरितं तत्र दृश्यते फलरूपतः ॥ तत्र तीर्थे तु यो राजन्नेकचित्तो जितेंद्रियः ॥ ४ ॥ स्नात्वा दानं च वै दद्यादर्चयेद्विरिजापतिम् ॥ ऋणत्रयविनिर्मुक्तो नाके दीप्यति देववत् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे ऋणत्रय मोचनतीर्थमाहात्म्यवर्णनंनाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्येवानंतरं पार्थ कापिलं तीर्थमाश्रयेत् ॥ स्थापितं कपिलेनैव सर्वपातकनाशनम् ॥ १ ॥ अष्टम्यां च सिते पक्षे चतुर्दश्यां नरेश्वर ॥ स्नापयेत्परया भक्त्या कपिलाक्षीरसर्पिषा ॥ ॥ २ ॥ श्रीखंडेन सुगंधेन गुंठयेत महेश्वरम् ॥ ततः सुगंधपुष्पैश्च श्वेतैश्च नृपसत्तम ॥ ३ ॥ येऽर्चयंति जितक्रोधा न ते यांति यमालयम् ॥ असिपत्रवनं घोरं यमचुंडी सुदारुणा ॥ ४ ॥ दृश्यते नैव विद्वद्भिः कपिलेश्वरपूजनात् ॥ स्नात्वा रेवाजले पुण्ये भोजयेद्ब्राह्मणान्शुभान् ॥ ५ ॥ गोप्र दानेन वस्त्रेण तिलदानेन भारत ॥ छत्रशय्याप्रदानेन राजा भवति धार्मिकः ॥ ६ ॥ तीव्रतेजा विरोचश्च जीवत्पुत्रः प्रियंवदः ॥ शत्रुवर्गो न तस्य स्यात्कदाचित्पांडुनंदन ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कपिलेश्वरतीर्थमाहात्म्य वर्णनंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पूतिकेश्वरमुत्तमम् ॥ नर्मदादक्षिणे कूले सर्वपापक्षयंकरम् ॥ १ ॥ स्थापितं जांबुवंतेन लोकानां तु हितार्थिना ॥ राजा प्रसेनजिन्नाम तस्यां वसत्स्थलान्मणौ ॥ २ ॥ समुत्क्षिप्ते तु तेनैव सपूतिरभवद्व्रणः ॥ तत्र तीर्थे तपस्तप्त्वा निर्व्रणः समजायत ॥ ३ ॥ तेन तत्स्थापितं लिंगं पूतिकेश्वरमुत्तमम् ॥ यस्तत्र मनुजो भक्त्या स्नायाद्वरासप्तम ॥ ४ ॥ सर्वान्कामानवाप्नोति संपूज्य परमेश्वरम् ॥ कृष्णाष्टम्यां चतुर्दश्यां सर्वकालं नराधिप ॥ येऽर्चयंति सदा देवं ते न यांति यमालयम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पूतिकेश्वरतीर्थमाहात्म्यवर्णनंनामैकोन नवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ रेवाया उत्तरे कूले वैष्णवं तीर्थमुत्तमम् ॥ जलशायीति वै नाम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विख्यातं वसुधातले ॥ १ ॥ दानवानां वधं कृत्वा सुप्तस्तत्र जनार्दनः ॥ चक्रं प्रक्षालितं तत्र देवदेवेन चक्रिणा ॥ सुदर्शनं च निष्पापं रेवाजलसमाश्रयात् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ चक्रतीर्थं समाचक्ष्व मुनिसंघैश्च वंदितम् ॥ विष्णोः प्रभावमतुलं रेवायाश्चैव यत्फलम् ॥ ३ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ विरक्तस्त्वं युधिष्ठिर ॥ गुह्याद्गुह्यतरं तीर्थं निर्मितं चक्रिणा स्वयम् ॥ ४ ॥ तत्तेऽहं संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ आसीत्पुरा महादैत्यस्तालमेघ इति श्रुतः ॥ ५ ॥ तेन देवा जिताः सर्वे हृतराज्या नराधिप ॥ यज्ञभागान्त्स्वयं भुंक्ते अहं विष्णुर्न संशयः ॥ ६ ॥ धनदस्य हृतं चित्तं हृतः शक्रस्य वारणः ॥ इंद्राणीं वांछते पापो हयरत्नं रवेरपि ॥७॥ तालमेघभयात्पार्थ रविरुद्राः सवासवाः ॥ यमः स्कंदो जलेशोऽग्निर्वायुर्देवो धनेश्वरः ॥८॥ सवाक्पतिमहेशाश्च नष्टचित्ताः पितामहम् ॥ गता देवा ब्रह्मलोकं तत्र दृष्ट्वा पितामहम् ॥ ९ ॥ तुष्टुवुर्विविधैः स्तोत्रैर्वागीशप्रमुखाः सुराः ॥ गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ १० ॥ दृष्ट्वा देवान्निरुत्साहान्विवर्णानवनीपते ॥ प्रसादाभिमुखो देवः प्रत्युवाच दिवौकसः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वागतं सुरसंघस्य कान्तिर्नष्टा पुरातनी ॥ हिमक्लिष्टप्रभावेण ज्योतींषीव मुखानि वः ॥ १२ ॥ प्रशमादर्चिषामेतदमुद्गीर्णं सुरायुधम् ॥ वृत्रस्य हंतुः कुलिशं कुंठितश्रीव लक्ष्यते ॥ १३ ॥ किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ॥ मंत्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ १४ ॥ कुबेरस्य मनःशल्यं शंसतीव पराभवम् ॥ अपविद्धगतो वायुर्भग्नशाख इव द्रुमः ॥ १५ ॥ यमोपि विलिखन्भूमिं दंडेनास्तमितत्विषा ॥ कुरुतेस्मिन्नमोघोपि निर्वाणालातलाघवम् ॥ १६ ॥ अमी च कथमादित्याः प्रतापक्षतिशीतलाः ॥ चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ १७ ॥ तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ॥ किमागमनकृत्यं वो ब्रूत निःसंशयं सुराः ॥ १८ ॥ मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ ततो मंदानिलोद्धूतकमलाकरशोभिना ॥ १९ ॥ गुरुं नेत्रसहस्रेण प्रेरयामास वृत्रहा ॥ स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ॥ २० ॥ वाचस्पतिरुवाचेदं प्रांजलिर्जलजासनम् ॥ युष्मद्वंशोद्भवस्तात तालमेघो महाबलः ॥ २१ ॥ उपतापयते देवान्धूमकेतुरिवोच्छ्रितः ॥ तेन देवगणाः सर्वे दुःखिता दानवेन च ॥ ॥ २२ ॥ तालमेघो दैत्यपतिः सर्वान्नो बाधते बली ॥ तस्मात्त्वां शरणं प्राप्ताः शरणं नो विधे भव ॥ २३ ॥ ततः प्रसन्नो भगवान्वेधास्तानब्रवीद्वचः ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ तालमेघेन वो मध्ये बली तेन समः सुराः ॥ विना माधवदेवेन साध्यो मे नैव दानवः ॥ २५ ॥ ततः सुरगणाः सर्वे विरिंचिप्रमुखा नृप ॥ क्षीरोदं प्रस्थिताः सर्वे दुःखितास्तेन वैरिणा ॥ २६ ॥ त्वरिताः प्रस्थिता देवाः केशवं द्रष्टुकाम्यया ॥ क्षीरोदं सागरं गत्वाऽस्तुवंस्ते जलशायिनम् ॥ २७ ॥ ॥ देवा ऊचुः ॥ ॥ जगदादिरनादिस्त्वं जगदंतोऽप्यनंतकः ॥ जगन्मूर्त्तिरमूर्त्तिस्त्वं जय गीर्वाणपूजितं ॥ २८ ॥ जय क्षीरोदशयन जय लक्ष्म्या सदा वृत ॥ जय दानवनाशाय जय देवकिनंदन ॥२९॥ जय शंखगदापाणे जय चक्रधर प्रभो ॥ इति देवस्तुतिं श्रुत्वा प्रबुद्धो जलशाय्यथ ॥ ३० ॥ उवाच मधुरां वाणीं मेघगंभीरनिस्वनाम् ॥ किमर्थं बोधितो ब्रह्मन्समर्थैर्वः सुरासुरैः ॥ ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ॥ तालमेघभयात्कृष्ण संप्राप्तास्तव मंदिरम् ॥ न वध्यः कस्यचित्पापस्तालमेघो जनार्दन ॥ ३२ ॥ त्वमेव जहि तं दुष्टं मृत्युं यास्यति नान्यथा ॥ ३३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ स्वस्थानं गम्यतां देवाः स्वकीयां लभत प्रजाम् ॥ दुष्टात्मानं हनिष्यामि तालमेघं महाबलम् ॥ ३४ ॥ स्थानं ब्रुवंतु मे देवा वसेद्यत्र स दानवः ॥ ३५ ॥ ॥ देवा ऊचुः ॥ ॥ हिमाचलगुहायां स वसते दानवेश्वरः ॥ चतुर्विंशतिसाहस्रैः कन्याभिः परिवारितः ॥ ३६ ॥ तुरंगैः स्यंदनैः कृष्ण संख्या तस्य न विद्यते ॥ नटा नानाविधास्तत्र असंख्यातगुणा हरे ॥ ३७ ॥ द्विरदाः पर्वताकारा हयाश्च द्विरदोपमाः ॥ महाबलो वसेत्तत्र गीर्वाणभयदायकः ॥ ३८ ॥ श्रुत्वा देवो वचस्तेषां देवानामातुरात्मनाम् ॥ अचिंतयद्गरुत्मंतं शत्रुसंघविनाशनम् ॥ ३९ ॥ चक्रं करेण संगृह्य गदाचक्रधरः प्रभुः ॥ शार्ङ्गं च मुशलं सीरं करैर्गृह्य जनार्दनः ॥ ४० ॥ आरूढः पक्षिराजेंद्रं वधार्थं दानवस्य च ॥ दानवस्य पुरे पेतुरुत्पाता घोररूपिणः ॥ ४१ ॥ गोमायुर्गृध्रमध्ये तु कपोतैः सममाविशत् ॥ विना वातेन तस्यैव ध्वजदंडः पपात ह ॥ ४२ ॥ सर्पमूषकयोर्युद्धं तथा केसरिनागयोः ॥ उन्मार्गाः सरितस्तत्रावहन्रक्तविमिश्रिताः ॥ अकालतरुपुष्पाणि दृश्यंते स्म समंततः ॥ ४३ ॥ ततः प्राप्तो जगन्नाथो हिमवंतं नगेश्वरम् ॥ पांचजन्यश्च सहसा पूरितः पुरसन्निधौ ॥ ४४ ॥ तेन शब्देन महता ह्यारूढो दानवेश्वरः ॥ उवाच च तदा वाक्यं तालमेघो महाबलः ॥ ४५ ॥ ॥ तालमेघ उवाच ॥ ॥ कोऽयं मृत्युवशं प्राप्तो ह्यज्ञात्वा मम विक्रमम् ॥ धुंधुमाराज्ञया ह्याशु स्वसैन्यपरिवारितः ॥ ४६ ॥ बलादानय तं बद्ध्वा ममाग्रे बाहुशालिनम् ॥ ४७ ॥ ॥ ॥ धुंधुमार उवाच ॥ ॥ आनयामि न संदेहः सुरो यक्षोऽथ किन्नरः ॥ स्यंदनौघैः समायुक्तो गजवाजिभटैः सह ॥ ४८ ॥ हृष्टस्ततो जगद्योनिः सुपर्णस्थो महाबलः ॥ गृह्यतांगृह्यतामेष इत्युक्तास्तेन किंकराः ॥ ४९ ॥ चतुर्दिक्षु प्रधावंत इतश्चेतश्च सर्वतः ॥ सुपर्णेनाऽग्निरूपेण दग्धास्ते शलभा यथा ॥ ५० ॥ धुंधुमारोऽपि कृष्णेन शरघातेन ताडितः ॥ हतो वक्षस्थले पापो मृतावस्थो रथोपरि ॥ ५१ ॥ हाहाकारं ततः सर्वे दानवाश्चक्रुरातुराः ॥ तालमेघस्ततः क्रुद्धो रथारूढो विनिर्गतः ॥ ददृशे केशवं पार्थ शंखचक्रगदाधरम् ॥ ५२ ॥ ॥ तालमेघ उवाच ॥ ॥ अन्ये ते दानवाः कृष्ण ये हताः समरे त्वया ॥ हिरण्यकशिपुप्रख्या न पुमांसो हि तेऽच्युत ॥ ५३ ॥ इत्युक्त्वा दानवः पार्थ वर्षयामास सायकैः ॥ दानवस्य शरान्मुक्तांच्छेदयामास केशवः ॥ ५४ ॥ गरुत्मानवधीत्सैन्यमवध्यं यत्सुरासुरैः ॥ कृष्णेन द्विगुणास्तस्य प्रेषिताः स्वशिलीमुखाः ॥ ५५ ॥ द्विगुणं द्विगुणीकृत्य प्रेषयामास दानवः ॥ तानप्यष्टगुणैः कृष्णश्छादयामास सायकैः ॥ ५६ ॥ ततः क्रुद्धेन दैत्येन ह्याग्नेयं बाणमुत्तमम् ॥ ५७ ॥ वारुणं प्रेषयामास त्वाग्नेयं शमितं ततः ॥ वारुणेनैव वायव्यं तालमेघो व्यसर्जयत् ॥ ॥ ५८ ॥ सार्पं चैव हृषीकेशो वायव्यस्य प्रशांतये ॥ नारसिंहं नृसिंहोऽपि प्रेषयामास पांडव ॥ ५९ ॥ नारसिंहं ततो दृष्ट्वा तालमेघो महाबलः ॥ उत्तीर्य स्यंदनाच्छीघ्रं गृहीत्वा खड्गचर्मणी ॥ ६० ॥ कृष्ण त्वां प्रेषयिष्यामि यममार्गं सुदारुणम् ॥ इत्युक्त्वा दानवः पार्थ आगतः केशवं प्रति ॥ ६१ ॥ खड्गेनाताडयद्दैत्यो गदापाणिं जनार्दनम् ॥ मंडलाग्रं ततो गृह्य केशवो हृष्टमानसः ॥ ६२ ॥ जघनोरःस्थले पार्थ तालमेघं महाहवे ॥ जनार्दनस्तदा दैत्यं दैत्यो हरिमहन्मृधे ॥ ६३ ॥ जनार्दनस्ततः क्रुद्धस्तालमेघाय भारत ॥ अमोघं चक्रमादाय मुक्तं तस्य च मूर्द्धनि ॥ ६४ ॥ निपपात शिरस्तस्य पर्वताश्च चकंपिरे ॥ समुद्राः क्षुभिताः पार्थ नद्य उन्मार्गगामिनीः ॥ ६५ ॥ पुष्पवृष्टिं ततो देवा मुमुचुः केशवोपरि ॥ अवध्यः सुरसंघानां सूदितः केशव त्वया ॥ ६६ ॥ स्वस्थाश्चैव ततो देवास्तालमेघे निपातिते ॥ जनार्दनोऽपि क्षीरोदं नर्मदातटमाश्रितः ॥ ६७ ॥ क्षीरोदां नर्मदां मत्वा अनन्तभुजगोपरि ॥ लक्ष्म्या समन्वितः कृष्णो निलीनश्चोत्तरे तटे ॥ ६८ ॥ चक्रं विभीषणं मर्त्यं ज्वालामालासमन्वितम् ॥ पतितं नर्मदातोये जलशायिसमीपतः ॥ ६९ ॥ निर्धूतकल्मषं जातं नर्मदातोययोगतः ॥ तालमे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वबंधोत्पन्नं यत्पापं नृपनन्दन ॥ ७० ॥ तत्सर्वं क्षालितं सद्यो नर्मदाम्भसि भारत ॥ तदाप्रभृति लोकेऽस्मिञ्जलशायी महीपते ॥ ७१ ॥ चक्रतीर्थं वदन्त्यन्ये केचित्कालावनाशनम् ॥ विख्यातं भारते वर्षे नर्मदायां महीपते ॥ ७२ ॥ तत्तीर्थस्य प्रभावोऽयं श्रूयतामवनीपते ॥ यथाऽनन्तो हि नागानां देवानां च जनार्दनः ॥ ७३ ॥ मासानां मार्गशीर्षोऽस्ति नदीनां नर्मदा यथा ॥ मासि मार्गशिरे पार्थ ह्येकादश्यां सितेऽहनि ॥ ७४ ॥ गत्वा यो मनुजो भक्त्या कामक्रोधविवर्जितः ॥ वैष्णवीं भावनां कृत्वा जलशेते तु व्रजेत वै ॥ ७५ ॥ एकभुक्तं च नक्तं च तथैवाऽयाचितं नृप ॥ उपवासं तथा दानं ब्राह्मणानां च भोजनम् ॥ ७६ ॥ करोति च कुरुश्रेष्ठ न स याति यमालयम् ॥ यमलोकभयाद्भीता ये लोकाः पांडुनन्दन ॥ ॥ ७७ ॥ ते पश्यंतु श्रियः कांतं नागपर्यंकशायिनम् ॥ गोपीजनसमावृत्तं योगनिद्रां समाश्रितम् ॥ विश्वरूपं जगन्नाथं संसारभयनाशनम् ॥७८॥ स्नापयेत्परया भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ खंडेन तोयमिश्रेण जगद्योनिं जनार्दनम् ॥ ७९ ॥ स्नाप्यमानं च पश्यंति ये लोका गतमत्सराः ॥ ते यांति परमं लोकं सुराऽसुरनमस्कृतम् ॥ ८० ॥ घृतेन बोधयेद्दीपमथवा तैलपूरितम् ॥ रात्रौ जागरणं कृत्वा देवस्याग्रे विमत्सराः ॥ ८१ ॥ ये कथां वैष्णवीं भक्त्या शृण्वंति च नृपोत्तम ॥ ब्रह्महत्यादिपापानि नश्यन्ते नाऽत्र संशयः ॥ ८२ ॥ प्रदक्षिणंति ये मर्त्या जलशायिजगद्गुरुम् ॥ प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥ ८३ ॥ ततः प्रभाते विमले पितॄन्संतर्प्ययेज्जलैः ॥ श्राद्धं च ब्राह्मणैस्तत्र योग्यैः पाण्डव मानवाः ॥ ॥ ८४ ॥ स्वदारनिरतैः शांतैः परदारविवर्जकैः ॥ वेदाभ्यसनशीलैश्च स्वकर्म्मनिरतैः शुभैः ॥ ८५ ॥ नित्यं यजनशीलैश्च त्रिसंध्यापरिपालकैः ॥ श्रद्धया कारयेच्छ्राद्धं यदीच्छेच्छ्रेय आत्मनः ॥ ८६ ॥ ते धन्या मानुषे लोके वंद्या हि भुवि मानवाः ॥ ये वसन्ति सदाकालं पादपद्माश्रया हरेः ॥ ८७ ॥ जलशायं प्रपश्यन्ति प्रत्यक्षं सुरनायकम् ॥ पक्षोपवासं पाराकं व्रतं चांद्रायणं शुभम् ॥ ८८ ॥ मासोपवासमुग्रं च षष्ठानं पञ्चमं व्रतम् ॥ तत्र तीर्थे तु यः कुर्यात्सोऽक्षयां गतिमाप्नुयात् ॥ ८९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि तिलधेनोश्च यत्फलम् ॥ यथा यस्मिन्यदा देया दाने तस्याः शुभं फलम् ॥ ९० ॥ एतत्कथांतरं पुण्यमृषेर्द्वैपायनात्पुरा ॥ श्रुतं हि नैमिषे पुण्ये नारदाद्येरनेकधा ॥ ९१ ॥ इदं परममायुष्यं मंगल्यं कीर्त्तिवर्द्धनम् ॥ विप्राणां श्रावयन्विद्वान्फलानंत्यंसमश्नुते ॥ ९२ ॥ बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ॥ विप्र ऋदक्षिणा ह्येता दातारं नाशयन्ति च ॥ ९३ ॥ एकमेतत्प्रदातव्यं न बहूनां युधिष्ठिर ॥ सा च विक्रयमापन्ना दहत्यासप्तमं कुलम ॥ ९४ ॥ तिलाः श्वेतास्तिलाः कृष्णास्तिला गोमूत्रसन्निभाः ॥ तिलानां तु विचित्राणां धनुं वत्सं च कारयेत् ॥९५॥ यथालाभा तु सर्वेषां चतुर्द्रोणा तु गौः स्मृता ॥ द्रोणस्य वत्सकः कार्यो बहूना वाऽपि कामतः ॥९६॥ यस्मिन्देशे तु यन्मानं विषये वा विचारितम् ॥ तेन मानेन तां कुर्वन्नक्षयं फलमश्नुते ॥९७॥ सुख पूर्वं शुचौ भूमौ पुष्पधूपाक्षतैस्तथा ॥ कर्णाभ्यां रत्नं दातव्ये दीपौ नेत्रद्वये तथा ॥९८॥ श्रीखंडमुरसि स्थाप्यं ताभ्यां चैव तु कांचनम् ॥ उद्धें मधु घृतं देयं कुर्यात्सर्पपरोमकम् ॥९९॥ कंबले कंबलं दद्याच्छ्रोण्यां मधु घृतं तथा ॥ यवसं पायसं दद्याद्घृतं क्षौद्रसमन्वितम् ॥ १०० ॥ स्वर्णशृंगी रूप्यशिफा रुक्मलांगूलसंयुता ॥ रत्नपृष्टी तु दातव्या कांस्यपात्रावदोहिनी ॥ १०१ ॥ यत्स्याद्बाल्यकृतं पापं यद्वा कृतमजानता ॥ वाचा कृतं कर्मकृतं मन सा यद्विचिंतितम् ॥१०२॥ जले निष्ठीवितं चैव मुशलं वाऽपि लंघितम्॥वृषलीगमनं चैव गुरुदारनिषेवणम् ॥१०३॥ कन्याया गमनं चैव सुवर्णस्ते यमेव च ॥ सुरापानं तथा चान्यत्तिलधेनुः पुनाति हि ॥ १०४ ॥ अहोरात्रोपवासेन विधिवत्तां विसर्जयेत् ॥ या सा यमपुरे घोरे नदी वैतरणी स्मृता ॥ १०५ ॥ वालुकाऽयोऽश्मस्थला च पच्यते यत्र दुष्कृती ॥ अवीचिर्नरको यत्र यत्र यामलपर्वतौ ॥१०६॥ यत्र लोहमुखाः काका यत्र श्वानो भयंकराः ॥ असिपत्रवनं चैव यत्र सा कूटशाल्मली ॥ १०७ ॥ तान्सुखेन व्यतिक्रम्य धर्मराजालयं व्रजेत् ॥ धर्मराजस्तु तं दृष्ट्वा सूनृतं वक्ति भारत ॥१०८॥ विमानमुत्तमं योग्यं मणिरत्नविभूषितम् ॥ अत्रारुह्य नरश्रेष्ठ प्रयाहि परमां गतिम् ॥ १०९ ॥ मा च चाटु भटे देहि मेव देहि पुरोहि ते ॥ मा च काणे विरूपे च न्यूनांगे न च दुबले ॥ ११० ॥ अवेदविदुषे नैव ब्राह्मणे सर्वविक्रये ॥ मित्रघ्ने च कृतघ्ने च मंत्रहीने तथैव च ॥ १११ ॥ वेदांतगाय दातव्या श्रोत्रियाय कुटुंबिने ॥ वेदांतगसुते देया श्रोत्रिये गृहपालके ॥ ११२ ॥ सर्वांगरुचिरे विप्रे सद्वृत्ते च प्रियंवदे ॥ पूर्णिमायां तु माघस्य कार्त्तिक्यामथ भारत ॥ ११३ ॥ वैशाख्यां मार्गशीर्ष्यां वाऽऽषाढ्यां चैत्र्यामथापि वा ॥ अयने विषुवे चैव व्यतीपाते च सर्वदा ॥ ॥ ११४ ॥ षडशीतिमुखे पुण्ये छायायां कुंजरस्य वा ॥ एष ते कथितः कल्पस्तिलधेनोर्मयाऽनघ ॥ ११५ ॥ व्रजंति वैष्णवं लोकं दत्त्वा पादं यमोपरि ॥ प्राणत्यागात्परं लोकं वैष्णवं नात्र संशयः ॥ भित्त्वाऽऽशु भास्करं यांति नाऽत्र कार्या विचारणा ॥ ११६ ॥ एतत्ते सर्वमाख्यातं चक्रतीर्थं फलं नृप ॥ यच्छ्रुत्वा मानवो भक्त्या सर्वपापैः प्रमुच्यते ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य खण्डे रेवाखण्डे जलशायितीर्थमाहात्म्यवर्णनंनामैकनवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्नृप द्वीपाल तीर्थ परमपावनम् ॥ चंडादित्यं नृपश्रेष्ठ स्थापितं चंडमुंडयोः ॥ १ ॥ आस्तां पुरा महादैत्यौ चंडमुंडौ सुदारुणौ ॥ नर्मदातीरमाश्रित्य चेरतुर्विपुलं तपः ॥ २ ॥ ध्यायंतौ भास्करं देवं तमोनाशं जगत्रये ॥ तुष्टस्तत्तपसा देवः सहस्रांशुरुवाच ह ॥ ३ ॥ साधुसाध्विति तौ पार्थ नर्मदा याः शुभे तटे ॥ वरं प्रार्थयतं वीरौ यथेष्टं चेतसेच्छितम् ॥ ४ ॥ ॥ चंडमुंडावूचतुः ॥ ॥ अजेयौ सर्वदेवानां भूयास्वावां समाहितौ ॥ सर्वरोगैः परित्यक्तौ सर्वकालं दिवाकर ॥ ५ ॥ एवमस्त्विति तौ प्राह भास्करो वारितस्करः ॥ इत्युक्त्वांतर्दधे भानुर्दैत्याभ्यां तत्र भास्करः ॥६॥ स्थापितः पस्या भक्त्या त गच्छेदात्मसिद्धये ॥ गीर्वाणांश्च मनुष्यांश्च पितॄंस्तत्राऽपि तर्पयेत् ॥ ७ ॥ स वसेद्भास्करे लोके विरंचिदिवसं नृप ॥ घृतेन बोधये दीपं षष्ठ्यां स च नरेश्वर ॥ भुञ्यते सर्वपापैस्तु प्रतियाति पुरं रवेः ॥८॥ उत्पत्तिं चंडभानोर्यः शृणोति भरतर्षभ ॥ विजयी स सदा नूनमाधिव्याधिविवर्जितः ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे चंडादित्यतीर्थमाहात्म्यवर्णनंनामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र यमहास्यमनुत्तमम् ॥ सर्वपापहरं तीर्थं नर्मदातटमाश्रितम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यमहास्यं कथं जातं पृथिव्यां द्विजपुंगव ॥ एतत्सर्वं ममाख्याहि परं कौतूहलं हि मे ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ पृष्टोऽहं नृपनंदन ॥ स्नानार्थं नर्मदां पुण्यामागतस्ते पिता पुरा ॥ ३ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथाऽसौ निर्मलो जातो धर्मराजो युधिष्ठिर ॥ ४ ॥ स पश्यन्निर्मलं देहं हसन्प्रोवाच विस्मितः ॥ ५ ॥ ॥ यम उवाच ॥ ॥ मत्पुरं कथमायांति मनुजाः पापवृंहिताः ॥ स्नानेनैकेन रेवायाः प्राप्यते वैष्णवं पदम् ॥ ६ ॥ समर्था ये न पश्यंति रेवां पुण्य जलां शुभाम् ॥ जात्यंधैस्ते समा ज्ञेया मृतैः पंगुभिरेव वा ॥७॥ समर्था ये न पश्यति रेवां पुण्यजलां नदीम् ॥ एतस्मात्कारणाद्राजन्हसितो लोक शासनः ॥ ८ ॥ स्थापयित्वा यमस्तत्र देवं स्वर्गं जगाम ह ॥ यमहासेश्वरे राजञ्जितक्रोधो जितेंद्रियः ॥ ९ ॥ विशेषाच्चाऽश्विने मासि कृष्णपक्षे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्दशीम् ॥ उपोष्य परया भक्त्या सर्वपापैः प्रमुच्यते ॥ १० ॥ रात्रौ जागरणं कुर्यादीपं देवस्य बोधयेत् ॥ घृतेन चैव राजेंद्र शृणु तत्राऽस्ति यत्फलम् ॥ ११ ॥ मुच्यते पातकैः सर्वैरगम्यागमनोद्भवैः ॥ अभक्ष्यभक्षणोद्भूतैरपेयापेयजैरपि ॥ १२ ॥ अवाह्यवाहिते यत्स्याददोह्या दोहने यथा ॥ स्नानमात्रेण तस्यैवं यांति पापान्यनेकधा ॥ १३ ॥ यमलोकं न वीक्षेत मनुजः स कदाचन ॥ पितॄणां परमं गुह्यमिदं भूमौ नृपेश्वर ॥ १४ ॥ ददतानक्षयं सर्वं यमहास्ये न संशयः ॥ अमावास्यां जितक्रोधो यस्तु पूजयते द्विजान् ॥ १५ ॥ हिरण्यभूमिदानेन तिलदानेन भूयसा ॥ कृष्णाजिनप्रदानेन तिलधेनुप्रदानतः ॥ १६ ॥ विधानोक्तद्विजाभ्याय ये प्रदास्यंति भक्तितः ॥ हयं वा कुंजरं वाऽथ धूर्वहौ सीरसंयुतौ ॥ १७ ॥ कन्यां वसुमतीं गां च महिषीं वा पयस्विनीम् ॥ ददते ये नृपश्रेष्ठ नोपसर्पंति ते यमम् ॥ १८ ॥ यमोऽपि भवतिं प्रीतः प्रतिजन्म युधिष्ठिर ॥ यमस्य वाहो महिषो महिष्यस्तस्य मातरः ॥ १९ ॥ तासां दानप्रभावेण यमः प्रीतो भवेद्ध्रुवम् ॥ नाऽसौ यममवाप्नोति यदि पापैः समावृतः ॥ २० ॥ एतस्मात्कारणादत्र महिषीदानमुत्तमम् ॥ तस्याः शृंगे जलं कार्यं धूम्रवस्त्रावगुंठिता ॥२१॥ आयसस्य खुराः कार्यास्ताम्रपृष्ठाः सुभूषिताः ॥ लवणाचलं पूर्वस्यामाग्नेय्यां गुडपर्वतम् ॥ २२ ॥ कार्पासं याम्यभागं तु नवनीतं तु नैर्ऋते ॥ पश्चिमे सप्तधान्यानि वायव्ये तंदुलाः स्मृताः ॥ २३ ॥ सौम्ये तु कांचनं दद्यादीशाने घृतमेव च ॥ प्रदद्याद्यमराजो मे प्रीयतामित्युदीरयन् ॥ २४ ॥ इत्युच्चार्य द्विजस्याग्रे यमलोकं महाभयम् ॥ असिपत्रवनं घोरं यमचुल्ली सुदारुणा ॥ २५ ॥ रौद्रा वैतरणी चैव कुम्भीपाको भयावहः ॥ कालसूत्रो महाभीमस्तथा यमलपर्वतौ ॥ ॥ २६ ॥ क्रकचं तैलयंत्रं च श्वानो गृध्राः सुदारुणाः ॥ निरुच्छ्वासा महानादा भैरवो रौरवस्तथा ॥ २७ ॥ एते घोरा याम्यलोके श्रूयंते द्विज सत्तम ॥ त्वत्प्रसादेन ते सौम्यास्तीर्थस्याऽस्य प्रभावतः ॥ २८ ॥ दानस्याऽस्य प्रभावेण यमराजप्रसादतः ॥ नरकेऽहं न यास्यामि द्विज जन्मनि जन्मनि ॥ २९ ॥ यमहास्यस्य चाख्यानमिदं शृण्वंति ये नराः ॥ तेऽपि पापविनिर्मुक्ता न पश्यंति यमालयम् ॥ ३० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे यमहास्यतीर्थमाहात्म्यवर्णनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र कल्होडीतीर्थमुत्तमम् ॥ विख्यातं भारते लोके गंगायाः पापनाशनम् ॥ १ ॥ दुर्लभं मनुजैः पार्थ रेवातटसमाश्रितम् ॥ प्राणिनां पापनाशाय ऊषरं पुष्करं तथा ॥ २ ॥ तत्तु तीर्थमिदं पुण्यमित्येवं शूलिनो वचः ॥ जाह्नवी पशुरूपेण तत्र स्नानार्थमागता ॥ ३ ॥ अतस्तद्विश्रुतं लोके कल्होडीतीर्थमुत्तमम् ॥ त्रिरात्रं कारयेत्तत्र पूर्णिमायां युधिष्ठिर ॥ ४ ॥ रजस्तमस्तथा क्रोधं दंभं मात्सर्यमेव च ॥ एतांस्त्यजति यः पार्थ तेनातं मोक्षजं फलम् ॥५॥ पयसा स्नापयेद्देवं त्रिसंध्यं च त्र्यहं तथा ॥ पयो गोसंभवं सद्यः सवत्सा जीवपुत्रिणी ॥ ६ ॥ कृत्वा तत्ताम्रजे पात्रे क्षौद्रेण चैव योजिते ॥ ॐ नमः श्रीशिवायेति स्नानं देवस्य कारयेत् ॥ ७ ॥ स याति त्रिदशस्थानं नाकस्त्रीभिः समावृतः ॥ यस्तत्र विधिवत्स्नात्वा दानं प्रेतेषु यच्छति ॥ ८ ॥ शुक्लां गां दापयेत्तत्र प्रीयतां मे पितामहाः ॥ ब्राह्मणे शौचसंपन्ने स्वदारनिरते सदा ॥ ९ ॥ सवत्सां वस्त्रसंयुक्तां हिरण्योपरि संस्थिताम् ॥ सत्त्वयुक्तो ददद्राजञ्छांभवं लोकमाप्नुयात् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कल्होडीतीर्थमाहात्म्यवर्णनंनाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ तस्यैवानंतरं राजन्नंदितीर्थं व्रजेच्छुभम् ॥ सर्वपापहरं पुंसां नंदिना निर्मितं पुरा ॥ १ ॥ पापौघहतजंतूनां मोक्षदं नर्मदातटे ॥ अहोरात्रोषितो भूत्वा नंदिनाथे युधिष्ठिर ॥ २ ॥ पञ्चोपचारपूजायामर्चयेन्नंदिकेश्वरम् ॥ रत्नानि चैव विप्रेभ्यो यो दद्याद्धर्म नंदन ॥ ३ ॥ स याति परमं स्थानं यत्र वासः पिनाकिनः ॥ सर्वसौख्यसमायुक्तोऽप्सरोभिः सह मोदते ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नंदिकेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र बदर्याश्रममुत्तमम् ॥ सर्वतीर्थवरं पुण्यं कथितं शंशुना पुरा ॥ १ ॥ यश्चैष भारतस्याऽर्थे तत्र सिद्धः किरीटभृत् ॥ भ्राता ते फाल्गुनो नाम विद्धचेनं नरदैवतम् ॥ २ ॥ नरनारायणौ द्वौ तावागतौ नर्मदातटे ॥ ज्ञानं तस्यैव यो राज न्भक्तिमान्वै जनार्दने ॥ ३ ॥ समं पश्यति सर्वेषु स्थावरेषु चरेषु च ॥ ब्राह्मणं श्वपचं चैव तत्र प्रीतो जनार्दनः ॥ ४ ॥ ऐकात्म्यं पश्य कौंतेय मयि चात्मनि नांतरम् ॥ नरनारायणाभ्यां हि कृतं बदरिकाश्रमम् ॥ ५ ॥ स्थापितः शंकरस्तत्र लोकानुग्रहकारणात् ॥ त्रिमूर्त्तिस्थापितं लिंगं स्वर्ग मार्गानुमुक्तिदम् ॥ ६ ॥ तत्र गत्वा शुचिर्भूत्वा ह्येकरात्रोपवासकृत् ॥ रजस्तमस्तथा त्यक्त्वा सात्त्विकं भावमाश्रयेत् ॥ ७ ॥ रात्रौ जागरणं कृत्वा मधुमासाष्टमीदिने ॥ अथवा च चतुर्दश्यामुभौ पक्षौ च कारयेत् ॥ ८ ॥ आश्विनस्य विशेषेण कथितं तव पांडव ॥ स्नापयेत्परया भक्त्या क्षीरेण मधुना सह ॥ ९ ॥ दध्ना शर्करया युक्तं घृतेन समलंकृतम् ॥ पंचामृतमिदं पुण्यं स्नापयेद्वृषभध्वजम् ॥ १० ॥ स्नाप्यमानं शिवं भक्त्या वीक्षते यो विमत्सरः ॥ तस्य वासः शिवोपांते शक्रलोके न संशयः ॥ ११ ॥ शाठ्येनाऽपि नमस्कारः प्रयुक्तः शूलपाणिने ॥ संसारमूलबद्धाना मुद्वेष्टनकरो हि यः ॥ १२ ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥ येनोंनमः शिवायेति मंत्राभ्याराः स्थिरीकृतः ॥ १३ ॥ यः पुनः स्नाप येद्भक्त्या एकभक्तो जितेन्द्रियः ॥ तस्याऽपि यत्फलं पार्थ वक्ष्ये तल्लेशतस्तव ॥ १४ ॥ पीडितो वृद्धभावेन तव भक्त्या वदाम्यहम् ॥ ते यांति परमं स्थानं भित्त्वा भास्करमण्डलम् ॥ १५ ॥ संसारे सर्वसौख्यानां निलयास्ते भवन्ति च ॥ आश्चर्य ज्ञातिवर्गाणां धर्माणां निलयास्तु ते ॥ ॥ १६ ॥ संपन्नाः सर्वकामैस्ते पृथिव्यां पृथिवीपते ॥ श्राद्धं तत्रैव यः कुर्यान्नर्मदोदकमिश्रितम् ॥ १७ ॥ योग्यैश्च ब्राह्मणे राजन्कुलीनैर्वेदपारगैः ॥ सुरूपैश्च सुशीलैश्च स्वदारनिरतैः शुभैः ॥ १८ ॥ आर्यदेशप्रसूतैश्च श्लक्ष्णैश्चैव सुरूपिभिः ॥ कारयेत्पिंडदानं वै भास्करे कृतपस्थिते ॥ १९ ॥ पितॄणां परमं लोकं यदीच्छेद्धर्मनन्दन ॥ वर्जयेत्तान्प्रयत्नेन काणान्दुष्टांश्च दांभिकान् ॥ २० ॥ पुरुषान्क्रूरषण्डांश्च ब्राह्मणानां च निन्दकान् ॥ एतांश्च वर्जयेद्विप्रान्यदीच्छेच्छ्रेय आत्मनः ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन योग्यं विप्रं समाश्रयेत् ॥ नरकान्मोचयेत्प्रेतान्कुम्भीपाकपुरोगमान् ॥ ॥ २२ ॥ मोक्षो भवति सर्वेषां पितॄणां नृपनन्दन ॥ विप्रेभ्यः कांचनं दद्यात्प्रीयतां मे पितामहः ॥ २३ ॥ अन्नं च दापयेत्तत्र भक्त्या वस्त्रं च भारत ॥ गां वृषं मेदिनीं दद्याच्छत्रं शस्तं नृपोत्तम ॥ २४ ॥ स पुमान्स्वर्गमाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ प्राणत्यागं तु यः कुर्याच्छिखिना सलिलेनवा ॥ २५ ॥ अनाशकेन वा भूयः स गच्छेच्छिवमंदिरम् ॥ नरनारायणीतीरे देवद्रोण्यां च यो नृप ॥ २६ ॥ स वसेदीश्वरस्याग्रे यावदिंद्राश्चतुर्दश ॥ पुनः स्वर्गाच्युतः सोऽपि राजा भवति वीर्य्यवान् ॥ २७ ॥ सर्व्वैश्वर्यगुणैर्युक्तः प्रजापालनतत्परः ॥ ततः स्मरति तत्तीर्थं पुनरेवाऽऽगमिष्यति ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नारायणीतीर्थमाहात्म्यवर्णनंनाम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं कोटीश्वरं परम् ॥ ऋषिकोटिः समायाता यत्र वै कुरुनन्दन ॥ १ ॥ कृष्णद्वैपायनस्येव क्षेमार्थं मुनिपुंगवाः ॥ मन्त्रयित्वा द्विजैः सर्व्वैर्दमंगलपाठकैः ॥ २ ॥ स्थापितः शंकरस्तत्र कारणं बन्धनाशनम् ॥ संसारच्छेदकरणं प्राणिनामार्त्तिनाशनम् ॥ ३ ॥ कोटीश्वरमिति प्रोक्तं पृथिव्यां नृपनन्दन ॥ श्रापयेत्तं तु यो भक्त्या पूर्णिमायां नृपोत्तम ॥ ४ ॥ पितॄणां तर्प्पणं कृत्वा पिंडदानं यथाविधि ॥ श्रावणस्य विशेषेण पूर्णिमायां युधिष्ठिर ॥ ५ ॥ पितृणामक्षया तृप्तिर्यावदाभूतसंप्लवम् ॥ पितॄणां परमं गुह्यं रेवातटसमाश्रितम् ॥ मोक्षदं सर्वजंतूनां निर्मितं मुनिसत्तमैः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥

ततो गच्छेन्महीपाल व्यासतीर्थमनुत्तमम् ॥ दुर्ल्लभं मनुजैः पुण्यमन्तरिक्षे व्यवस्थितम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्माद्वै व्यासतीर्थं तदन्तरिक्षे व्यवस्थितम् ॥ एतदाख्याहि संक्षेपात्त्वञ्च ग्रन्थस्य विस्तरम् ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाबाहो धर्मवान्साधुवत्सल ॥ स्वकर्मनिरतः पार्थ तीर्थयात्राकृतादरः ॥ ३ ॥ दुर्ल्लभं सर्वजंतूनां व्यासतीर्थं नरेश्वर ॥ पीडितो वृद्धभावेन अकल्पोऽहं नृपात्मज ॥ ४ ॥ विसंज्ञो गतचित्तस्तु संजातः स्मृतिवर्जितः ॥ गुह्याद्गुह्यतरं तीर्थं नाऽऽख्यातं कस्य चिन्मया ॥ ५ ॥ कलिस्तत्रैव राजेंद्र न विशेद्व्याससंश्रयात् ॥ अन्तरिक्षे तु संजातं रेवायाश्चेष्टितेन तु ॥ ६ ॥ विरिंचिर्वेत्ति शक्नोति रेवायाः गुणकीर्तनम् ॥ कथं ज्ञास्याम्यहं तात रेवामाहात्म्यमुत्तमम् ॥ ७ ॥ व्यासतीर्थं विशेषेण लवमात्रं ब्रवीम्यतः ॥ प्रत्यक्षः प्रत्ययो यत्र दृश्यतेऽद्य कलौ युगे ॥ ८ ॥ विहंगो गच्छते नैव भित्त्वा शूलं सुदारुणम् ॥ तस्योत्पत्तिं समासेन कथयामि नृपात्मज ॥ ९ ॥ आसीत्पूर्वं महीपाल मुनिर्मान्यः पराशरः ॥ तेनात्युग्रं तपश्चीर्णं गंगांभसि महाफलम् ॥ १० ॥ प्राणायामेन सन्तस्थौ प्रविष्टो जाह्नवीजले ॥ पूर्णे द्वादशमे वर्षे निष्क्रांतो जलमध्यतः ॥ ११ ॥ भिक्षार्थी संचरन्ग्रामं नावा यत्रैव तिष्ठति ॥ तत्र तेन परा दृष्टा बाला चैव मनोहरा ॥ १२ ॥ तां दृष्ट्वा स च कामार्त्त उवाच मधुरं तदा ॥ यां नयस्व परं पारं काऽसि त्वं मृगलोचने ॥ १३ ॥ नावारूढे नदीतीरे मम चित्तमथाधिनि ॥ एवमुक्ता तु सा तेन प्रणम्य ऋषिपुंगवम् ॥ ॥ १४ ॥ कथयामास चाऽऽत्मानं दृष्ट्वा तं काममोहितम् ॥ केवर्त्तानां गृहे दासी कन्याऽहं द्विजसत्तम ॥ १५ ॥ नावासंरक्षणार्थाय आदिष्टा स्वामिना विभो ॥ यथा विज्ञापितं वृत्तमशेषं ज्ञातुमर्हसि ॥ १६ ॥ एवमुक्तस्तया सोऽथ क्षणं ध्यात्वाऽब्रवीद्दिदम् ॥ १७ ॥ ॥ पराशर उवाच ॥ ॥ अहं ज्ञानबलाद्भद्रे तव जानामि संभवम् ॥ कैवर्त्तपुत्रिका न त्वं राजकन्याऽसि सुन्दरि ॥ १८ ॥ कन्योवाच ॥ ॥ कः पिता कस्यतो ब्रह्मन्कस्या वा ह्युदरोद्भवा ॥ कस्मिन्वंशे प्रसूताऽहं कैवर्त्ततनया कथम् ॥ १९ ॥ ॥ पराशर उवाच ॥ ॥ कथयामि समस्तं यत्त्वया पृष्टम शेषतः ॥ वसुर्नामेति भूपालः सोमवंशविभूषणः ॥ २० ॥ जंबूद्वीपाऽधिपो भद्रे शत्रूणां भयवर्धनः ॥ शतानि सप्त भार्याणां पुत्राणां च दशैव तु ॥ २१ ॥ धर्मेण पालयेल्लोकानीशवत्प्रूज्यते सदा ॥ म्लेच्छास्तस्याविधेयाश्च क्षीरद्वीपनिवासिनः ॥ २२ ॥ तेषामुत्सादनार्थाय ययावुद्धुंड्य सागरम् ॥ संयुक्तः पुत्रभृत्यैश्च पौरुषे महति स्थितैः ॥ २३ ॥ समरं तैः समारब्धं म्लेच्छैश्च वसुना सह ॥ जिता म्लेच्छाः समस्तास्ते वसुना नृग लोचने ॥ २४ ॥ करदास्ते कृतास्तेन सपुत्रबलवाहनाः ॥ प्रधाना तस्य सा राज्ञी तव माता नृगेक्षणे ॥२५॥ प्रवासस्थे महीपाले संजाता सा रजस्वला ॥ नारीणां तु सदाकालं मन्मथो ह्यधिको भवेत् ॥ २६ ॥ विशेषेण ऋतोः काले भिद्यते कामसायकैः ॥ मन्मथेन तु संतप्तार्चिंत यत्सा शुभेक्षणा ॥ २७ ॥ दूतं वै प्रेषयाम्यद्य वसुराज्ञः समीपतः ॥ आहूतः सत्वरं दूत गच्छ त्वं नृपसन्निधौ ॥ २८ ॥ ॥ दूत उवाच ॥ ॥ परतीरं गतो देवि वसुराजाऽरिशासनः ॥ तत्र गंतुमशक्येत जलयानेविना शुभे ॥ २९ ॥ तानि यानानि सर्वाणि गृहीतानि परे तटे ॥ दूतवाक्येन सा राज्ञी विषण्णा कामपीडिता ॥ ३० ॥ तत्सखी तामुवाचाऽथ कस्मात्त्वं परितप्यसे ॥ स्वलेखः प्रेष्यतां देवि शुकहस्ते यथार्थतः ॥ ३१ ॥ समुद्रं लंघयित्वा तु शकुंता यांति सुन्दरि ॥ सखिवाक्येन सा राज्ञी स्वस्था जाता नराधिप ॥ ३२ ॥ व्याहृतो लेखकस्तत्र लिख लेखं ममाज्ञया ॥ त्वद्धीना सत्यभामाद्य वसो राजन्न जीवति ॥ ३३ ॥ ऋतुकालोऽद्य संजातो लिख लेखं तु लेखक ॥ लिखिते भूर्जपत्रे तु लेखे वै लेखकेन तु ॥ ३४ ॥ शुकः पंजरमध्यस्थ आनीतोद्धैव सन्निधौ ॥ ३५ ॥ ॥ सत्यभामोवाच ॥ ॥ नीत्वा लेखं गच्छ शीघ्रं वसुराज्ञः समीपतः ॥ शकुनिः प्रणतो भूत्वा गृहीत्वा लेखमुत्तमम् ॥ ३६ ॥ उत्पत्य सहसा राजञ्जगामाऽऽकाशमंडलम् ॥ ततः पक्षी गतः शीघ्रं वसुराजसमीपतः ॥ ३७ ॥ क्षिप्ते लेखे शुकेनैव सत्यभामाविसर्जिते ॥ वसुराज्ञा ततो लेखो गृह्य हस्तेऽवधारितः ॥ ३८ ॥ लेखार्थं चिंतयित्वा तु गृह्य वीर्यं नरेश्वरः ॥ अमोघं पुटिकां कृत्वा प्रतिलेखेन मिश्रितम् ॥ ३९ ॥ शुकस्य सोऽर्पयामास गच्छ राज्ञीसमीपतः ॥ प्रणम्य वसुराजानं वीजं गृह्योत्पपात ह ॥ ४० ॥ समुद्रोपरि संप्राप्तः शुकः श्येनेन वीक्षितः ॥ सामिषं तं शुकं ज्ञात्वा श्येनस्तमभ्यधावत ॥ ४१ ॥ हतश्चंचुप्रहारेण शुकः श्येनेन भारत ॥ मूर्च्छया तस्य तद्वीजं पतितं सागरांभसि ॥ ४२ ॥ मत्स्येन गिलितं तत्र वीजं वसुमहीपतेः ॥ कन्या मत्स्योदरे जाता तेन वीजेन सुन्दरि ॥ ४३ ॥ प्राप्तोऽसौ लुब्धकैर्मत्स्य आनीतः स्वगृहं ततः ॥ यावद्विदारितो मत्स्यस्तावद्दृष्टा त्वमुत्तमे ॥ ॥ ४४ ॥ शशिमंडलसंकाशा सूर्यतेजःसमप्रभा ॥ दृष्ट्वा त्वां हर्षिताः सर्वे केवर्त्ता जाह्नवीतटे ॥ ४५ ॥ हर्षितास्ते गताः सर्वे प्रधानस्य च मंदिरम् ॥ स्त्रीरत्नं कथयामासुर्गृहाण त्वं महाप्रभम् ॥ ४६ ॥ गृहीता तेन तन्वंगी ह्यपुत्रेण मृगेक्षणा ॥ भार्यां स्वामाह तन्वंगि पालयस्व मृगेक्षणे ॥ ४७ ॥ ततः सा चिंतयामास पराशरवचस्तदा ॥ एवमुक्ता तु सा तेन दत्ताऽऽत्मानं नरेश्वर ॥४८॥ उवाच साधु मे ब्रह्मन्मत्स्यगंधोऽत्र वर्त्तते ॥ तत्तस्तेन तु सा बाला दिव्यगंधाधिवासिता ॥ ४९ ॥ कृता योगबलेनैव ज्वालयित्वा विभावसुम् ॥ कृत्वा प्रदक्षिणं वह्निभूता तेन ससा तदा ॥५०॥ जलयानस्य मध्ये तु कामस्थानान्यसंस्पृशत् ॥ ज्ञात्वा कामोत्सुकं विप्रं भीता सा धर्मनंदन ॥ ५१ ॥ इसंती तमुवाचाऽथ देव त्वं लोक सन्निधौ ॥ न लज्जसे कथं धीमन्कुर्वाणः पामरोचितम् ॥५२॥ ततस्तेन क्षणं ध्यात्वा संस्मृता हृदि तामसी ॥ आगता तामसी माया यया व्याप्तं चराचरम् ॥ ५३ ॥ ततः सा विस्मिता तेन कर्मणैव तु रंजिता ॥ ब्रह्मचर्याभितप्तेन स्त्रीसौख्यं क्रीडितं तदा ॥ ५४ ॥ ततः सा तत्प्रसादेव गर्भभारेण पीडिता ॥ प्रसूता बालकं तत्र जटिलं दंडधारिणम् ॥ ५५ ॥ कमंडलुधरं शांतं मेखलाकटिभूषितम् ॥ उत्तरीयकृतस्कंधं विष्णु मायाविवर्जितम् ॥ ५६ ॥ ततोऽपि शंकिता पार्थ दृष्ट्वा तं कलबालकम् ॥ वेपमाना ततो बाला जगाम शरणं मुनेः ॥५७॥ रक्षरक्ष मुनिश्रेष्ठ पराशर महामते॥जातं मेऽत्यद्भुतं पुत्रं कौपीनवरमेखलम् ॥ दंडहस्तं जटायुक्तमुत्तरीयविभूषितम् ॥५८॥ ॥ पराशर उवाच ॥॥ मा भैषीः स्वसुते जाते कुमारी त्वं भविष्यसि ॥ नाम्ना योजनगंधेति द्वितीयं सत्यवत्यपि ॥५९॥ शंतनुर्नाम राजा यः स ते भर्त्ता भविष्यति ॥ प्रथमा महिषी तस्य सोमवंशविभू

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

षणः ॥६०॥ गच्छ त्वं स्वाश्रयं शुभ्रे पूर्वरूपेण संस्थिता ॥ मा विषादं कुरुष्वाऽत्र दृष्टं ज्ञानस्य मे बलम् ॥६१॥ इत्युक्ता प्रययौ विप्रः सा बाला पुत्रमाश्रिता ॥ नत्वोचे मातरं भक्त्या साष्टांगं विनयानतः ॥ ६२ ॥ क्षम्यतां मातरुक्तं मे प्रसादः क्रियतामपि ॥ ईश्वराराधने यत्नं करिष्याम्यहमंबिके ॥६३॥ ततः सा पुत्रवाक्येन विषण्णा वाक्यमब्रवीत् ॥६४॥ ॥ योजनगंधोवाच ॥ ॥ मा त्यक्ता गच्छ वत्साद्य मातरं मामनागसम् ॥ त्वद्वियोगेन मे पुत्र पंचत्वं भाव्यसंशयम् ॥६५॥ नास्ति पुत्रसमः स्नेहो नास्ति भ्रातृसमं कुलम् ॥ नाऽस्ति सत्यपरो धर्मो नानृतात्पातकं परम् ॥६६॥ बालभावे मया जात आधारः किल जायसे ॥ न मे भर्त्ता न मे पुत्रः पश्य कर्मविडंबनम्॥६७॥ ॥ व्यास उवाच ॥॥ मा विषादं कुरुष्वांतः सत्यमेतन्मयेरितम् ॥ आपत्कालेऽस्मि ते देवि स्मर्त्तव्यः कार्यसिद्धये ॥ ६८ ॥ आपदस्तारयिष्यामि शम्यतां मे दुरुत्तरम् ॥ इत्युक्ता प्रययौ व्यासः कन्या साऽपि गता गृहम् ॥ ६९ ॥ पराशरसुतस्तत्र विषण्णो वनमध्यतः ॥ त्रेतायुगावसाने तु द्वापरादौ नरेश्वर ॥ ७० ॥ व्यासार्थं चिंतयामासुर्देवाः शक्रपुरोगमाः ॥ आख्यातो नारदेनैव पुत्रः पराशरस्य सः ॥ ७१ ॥ कैवर्त्तपुत्रिकाजातो ज्ञानी जह्नुसुतातटे ॥ ततो नारदवाक्येन आगताः सुरसत्तमाः ॥ ७२ ॥ रामः पितामहः शक्रो मुनिसंघैः समावृताः ॥ ऑस्यादिकं पृथग्दत्त्वा साधुसाध्वित्युदीरयन् ॥ ७३ ॥ पितामहेन वै बालो गर्भाधानादिसंस्कृतः ॥ द्वीपायनो द्वीपजन्मा पाराशर्यः पराशरात् ॥ ७४ ॥ कृष्णांशात्कृष्णनामार्थं व्यासो वेदान्व्यसिष्यति ॥ विरंचिनाऽभिषिक्तोऽसौ मुनिसंघैः पुनःपुनः ॥ ७५ ॥ व्यासस्त्वं सर्वलोकेषु इत्युक्त्वा प्रययुः सुराः ॥ तीर्थयात्रा समारब्धा कृष्णद्वैपायनेन तु ॥ ७६ ॥ गंगावगाहिता तेन केदारश्च सपुष्करः ॥ गया च नैमिषं तीर्थं कुरुक्षेत्रं सरस्वती ॥ ७७ ॥ उज्जयिन्यां महाकालं सोमनाथं प्रभासके ॥ पृथिव्यां सागरांतायां स्नात्वा यातो महामुनिः ॥ ७८ ॥ अमृतां नर्मदां प्राप्तो रुद्रदेहोद्भवां शुभाम् ॥ साह्लादो नर्मदां दृष्ट्वा चित्तविश्रांतिमाप च ॥ ७९ ॥ तप श्चचार विपुलं नर्मदातटमाश्रितः ॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः ॥ ८० ॥ सार्द्रवासाश्च हेमंते तिष्ठन्दध्यौ महेश्वरम् ॥ स्वांतर्हृत्कमले स्थाप्य ध्यायते परमेश्वरम् ॥ ८१ ॥ सृष्टिसंहारकर्त्तारमच्छेद्यं वरदं शुभम् ॥ नित्यं सिद्धेश्वरं लिंगं पूजयेद्ध्यानतत्परः ॥ ८२ ॥ अर्चनात्सिद्धलिंगस्य ध्यानयोगप्रभावतः ॥ प्रत्यक्षः शंकरो जातः कृष्णद्वैपायनस्य सः ॥ ८३ ॥ ॥ ईश्वर उवाच ॥ ॥ तोषितोऽहं त्वया वत्स वरं वरय शोभनम् ॥ ८४ ॥ ॥ व्यास उवाच ॥ ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ प्रत्यक्षो नर्म्मदातीरे स्वयमेव भविष्यसि ॥ अतीतानागतज्ञोऽहं त्वत्प्रसादादुमापते ॥ ८५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भवतु ते पुत्र मत्प्रसादादसंशयम् ॥ त्वयि भक्तिर्गृहीतोऽहं प्रत्यक्षो नर्मदातटे ॥ ॥ ८६ ॥ महत्तांशार्द्धभावेन प्रत्यक्षोऽहं त्वदाश्रमे ॥ इत्युक्त्वा प्रययौ देवः कैलासं नगमुत्तमम् ॥ ८७ ॥ पत्नीसंग्रहणं जातं कृष्णद्वैपायनस्य तु ॥ शास्त्रोक्तेन विधानेन पत्नी पालयतस्तथा ॥ ८८ ॥ पुत्रो जातो ह्यपुत्रस्य पराशरसुतस्य च ॥ देवैर्वर्द्धापितः सर्वैरिंद्रेद्रपुरोगमैः ॥ ८९ ॥ पुत्रजन्मन्यथाजग्मुर्वशिष्ठाद्या मुनीश्वराः ॥ तीर्थयात्राप्रसंगेन पराशरपुरोगमाः ॥ ९० ॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः ॥ यमापस्तंबसंवर्त्ताः कात्यायनबृहस्पती ॥ ९१ ॥ एवमादिसहस्राणि लक्षकोटिशतानि च ॥ सशिष्याश्च महाभागा नर्मदातटमाश्रिताः ॥ ९२ ॥ व्यासाश्रमे शुभे रम्ये संतुष्टा आययुर्नृप ॥ दृष्ट्वा तान्सोऽपि विप्रेंद्रानभ्युत्थानकृतोद्यमः ॥ ९३ ॥ पितुः पूर्वं प्रणम्याऽदौ सर्वेषां च यथाविधि ॥ आसनानि ददौ भक्त्या पाद्यमर्घं न्यवेदयत् ॥ ९४ ॥ कृतांजलिपुटो भूत्वा वाक्यमेतदुवाच ह ॥ उद्धृतोऽहं न संदेहो युष्मत्संभाषणार्चनात् ॥ ९५ ॥ आरण्यानि च शाकानि फलान्यारण्यजानि च ॥ तानि दास्यामि युष्माकं सर्वेषां प्रीतिपूर्वकम् ॥ ९६ ॥ न्यमंत्रयत तान्सर्वान्प्रत्येकं प्रणिपत्य च ॥ ततस्ते प्रणतं दृष्ट्वा कृष्णद्वैपायनं मुनिम् ॥ ९७ ॥ वर्द्धयित्वा जयाशीर्भिरवलोक्य परस्परम् ॥ पराशरः समस्तैश्च वीक्षितो मुनिपुंगवैः ॥ ९८ ॥ उत्तरं दीयतां तात कृष्णद्वैपायनस्य च ॥ एवमुक्तस्तु तैः सर्वैर्भगवान्स पराशरः ॥ प्रोवाच स्वात्मजं व्यासमृषीणां यच्चिकीर्षितम् ॥ ॥ ९९ ॥ श्रीपराशर उवाच ॥ ॥ नेच्छंति दक्षिणे कूले व्रतभंगभयादथ ॥ भोजनं भोक्तुकामास्ते श्राद्धे चैव विशेषतः ॥ १०० ॥ ॥ व्यास उवाच ॥ ॥ करोमि भवतामुक्तमत्रैव स्थीयतां क्षणम् ॥ यावत्प्रसाद्य सरितं करोमि विधिमुत्तमम् ॥ १ ॥ एवमुक्ता शुचिर्भूत्वा नर्मदातटमास्थितः ॥ स्तोत्रं जगाद सहसा तन्निबोध नरेश्वर ॥ २ ॥ जय भगवति देवि नमो वरदे जय पापविनाशिनि बहुफलदे ॥ जय शुंभनिशुंभकपालधरे प्रणमामि तु देवनरार्त्तिहरे ॥ ३ ॥ जय चन्द्र दिवाकरनेत्रधरे जय पावकभूषितवक्त्रवरे ॥ जय भैरवदेहनिलीनपरे जय अंधकरक्तविशोषकरे ॥ ४ ॥ जय महिषविमर्द्दिनि शूलकरे जय लोकसमस्तकपापहरे ॥ जय देवि पितामहरामनते जय भास्करशक्रशिरोऽवनते ॥ ५ ॥ जय पण्मुखसायुधईशनुते जय सागरगामिनि शांभुनुते ॥ जय दुःखदरिद्रविनाशकरे जय पुत्रकलत्रविवृद्धिकरे ॥ ६ ॥ जय देवि समस्तशरीरधरे जय नाकविदर्शिनि दुःखहरे ॥ जय व्याधिविनाशिनि मोक्षकरे जय वांछितदायिनि सिद्धवरे ॥ ७ ॥ एतद्व्यासकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ॥ गृहे वा शुद्धभावेन कामक्रोधविवर्जितः ॥ ८ ॥ तस्य व्यासो भवेत्प्रीतः प्रीतश्च वृषवाहनः ॥ प्रीता स्यान्नर्मदा देवी सर्वपापक्षयंकरी ॥ ९ ॥ न ते यांति यमालोकं ये स्तुता भुवि नर्मदा ॥ पितामहोऽपि मुह्येत देवि त्वद्गुणकीर्त्तनात् ॥ १० ॥ वाक्पतिर्नैव ते वक्तुं स्वरूपं वेद नर्मदे ॥ कथं गुणानहं देवि त्वदीयाञ्ज्ञातुमुत्सहे ॥ ११ ॥ इति ज्ञात्वा शुचिं भावं वाङ्मनःकायकर्मभिः ॥ प्रसन्ना नर्मदा देवी ततो वचनमब्रवीत् ॥ १२ ॥ सत्यवादेन तुष्टाऽहं भोभो व्यास महामुने ॥ यदीच्छसि वरं किंचित्तं ते सर्वं ददाम्यहम् ॥ १३ ॥ ॥ व्यास उवाच ॥ ॥ यदि तुष्टासि मे देवि यदि देयो वरो मम ॥ आतिथ्यमुत्तरे कूले ऋषीणां दातुमर्हसि ॥ १४ ॥ ॥ नर्मदोवाच ॥ ॥ अयुक्तं याचितं व्यास विमार्गे यत्प्रवर्तनम् ॥ इंद्रचन्द्रंयमैः शक्या मुन्मार्गे न प्रवर्त्तितुम् ॥ १५ ॥ याचस्वान्यं वरं पुत्र यत्किंचिद्भुवि दुर्लभम् ॥ ॥ एतच्छ्रुत्वा वचो देव्या व्यासो मूर्च्छां गतस्तदा ॥ १६ ॥ वृथा क्लेशोऽद्य मे जात इति मत्वा पापात ह ॥ धरणी चलिता सर्वा सशैलवनकानना ॥ १७ ॥ मूर्च्छापन्नं ततो व्यासं दृष्ट्वा देवाः सवासवाः ॥ हाहाकारमुखाः सर्वे तत्राऽऽजग्मुः सहस्रशः ॥ १८ ॥ व्यासमुत्थापयामासुर्वेदव्यसनतत्परम् ॥ ब्राह्मणार्थे च संक्लिष्टो नात्महेतोः सरिद्वरे ॥ १९ ॥ गवार्थे ब्राह्मणार्थे च सद्यः प्राणान्परित्यजेत् ॥ एवं सा नर्मदा प्रोक्ता ब्रह्माद्यैः सुरसत्तमैः ॥ १२० ॥ सुशीतलैस्तं बहुभिश्च वाते रेवाभ्यर्पिचत्स्वजलेन भीता ॥ सचेतनः सत्यवतीसुतोऽपि प्रणम्य देवान्सरितं जगाद ॥ २१ ॥ ॥ व्यास उवाच ॥ ॥ तीर्थैः समस्तैः किल सेवनाय फलं प्रदिष्टं मम मंदभाग्यात् ॥ यद्देवि पुण्या विफला ममाशा आरण्यपुष्पाणि यथा जनानाम् ॥ २२ ॥ ॥ नर्मदोवाच ॥ ॥ यतोयतो मां हि महानुभाव निनीषते चित्तमिलातलेऽत्र ॥ विंध्येन सार्द्धं तव मार्गमद्य आस्थास्यहं दंडधरस्य पृष्ठे ॥ २३ ॥ एवमुक्तो महा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तेजा व्यासः सत्यवतीसुतः ॥ दक्षिणे चालयामास स्वाश्रमस्य सरिद्वराम् ॥ २४ ॥ दंडहस्तो महातेजा हुंकारमकरोन्मुनिः ॥ व्यासहुंकारभीता सा चलिता रुद्रनंदिनी ॥ २५ ॥ दंडेन दर्शयन्मार्गं देवी तत्र प्रवर्त्तिता ॥ व्यासमार्गं गता देवी दृष्टा शक्रपुरोगमैः ॥ २६ ॥ पुष्पवृष्टिं ततो देवा व्यमुंचन्त्सह किंकरैः ॥ प्रोत्फुल्लनयना जाताः पराशरमुखा द्विजाः ॥ किं कुर्मो ब्रूहि मे पुत्र कर्मणा ते स्म रंजिताः ॥ २७ ॥ ॥ व्यास उवाच ॥ ॥ तपश्च विपुलं कृत्वा दानं दत्त्वा महाफलम् ॥ एतदेव नरैः कार्यं साधूनां यत्सुखावहम् ॥ २८ ॥ यदि तुष्टा महाभागा अनुग्राह्यो ह्यहं यदि ॥ तस्मान्ममाश्रमे सर्वैः स्थीयतां नाऽत्र संशयः ॥ २९ ॥ आतिथ्यं शाकपर्णेन रेवामृतविमिश्रितम् ॥ प्रतिपन्नं समस्तैर्वः पराशर मुखैर्मम ॥ स्थातव्यं स्वाश्रमे सर्वे रेवाया उत्तरे तटे ॥ १३० ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्नानतर्पणनित्यानि कृतानि द्विजसत्तमैः ॥ व्यासकुंडे ततो गत्वा होमः सर्वैः प्रकल्पितः ॥ १३१ ॥ श्रीफलैर्बिल्वपत्रैश्च जुहुवुर्जातवेदसम् ॥ गौतमो भृगुर्मांडव्यो नारदो लोमशस्तथा ॥ ॥ ३२ ॥ पराशरस्तथा शंखः कौशिकश्च्यवनो मुनिः ॥ पिप्पलादो वसिष्ठश्च नाचिकेतो महातपाः ॥ ३३ ॥ विश्वामित्रोऽप्यगस्त्यश्च उद्दालकयमौ तथा ॥ शांडिल्यो जैमिनिः कण्वो याज्ञवल्क्योशनोंगिराः ॥ ३४ ॥ शातातपो दधीचिश्च कपिलो गालवस्तथा ॥ जैगीषव्य स्तथा दक्षो भरतो मुद्गलस्तथा ॥ ३५ ॥ वात्स्यायनो महातेजाः संवर्त्तः शक्तिरेव च ॥ जातूकर्ण्यो भरद्वाजो वालखिल्यारुणिस्तथा ॥ ॥ ३६ ॥ एवमादिसहस्राणि जुह्वते जातवेदसम् ॥ अक्षमालाकरोत्कीर्णा ध्यानयोगपरायणाः ॥ ३७ ॥ एकचित्ता द्विजाः सर्वे चक्रुर्होमक्रियां तदा ॥ ततः समुत्थितं लिंगं मोक्षदं व्याधिनाशनम् ॥ ३८ ॥ अच्छेद्यं परमं देवं दृष्ट्वा व्यासस्तुतोष च ॥ पुष्पवृष्टिं ददुर्देवा आशीर्वादान्द्विजोत्तमाः ॥ ३९ ॥ साष्टांगं प्रणतो व्यासो देवं दृष्ट्वा त्रिलोचनम् ॥ ब्राह्मणान्पूजयामास शाकमूलफलेन च ॥ १४० ॥ पितृपूर्वं द्विजाः सर्वे भोजिताः पांडुनन्दन ॥ आशीर्वादांस्ततः पुण्यान्दत्त्वा विप्रा ययुः पुनः ॥ ४१ ॥ तदा प्रभृति तत्तीर्थं व्यासाख्यं प्रोच्यते बुधैः ॥ ४२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्यासतीर्थस्य यत्पुण्यं तत्सर्वं कथयस्व मे ॥ स्नानदानविधानं च यस्मिन्काले महाफलम् ॥ ४३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कथयामि समस्तं ते भ्रातृभिः सह पांडव ॥ कार्त्तिकस्य सिते पक्षे चतुर्दश्यां जितेन्द्रियः ॥ ४४ ॥ उपोष्य यो नरो भक्त्या रात्रौ कुर्वीत जागरम् ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्प्पिषा ॥ ४५ ॥ दध्ना च खण्डयुक्तेन कुशतोयेन वै पुनः ॥ श्रीखंडेन सुगन्धेन गुंठयेत्परमेश्वरम् ॥ ४६ ॥ ततः सुगन्धकुसुमैर्बिल्वपत्रैश्च पूजयेत् ॥ मुचुकुन्देन कुन्देन कुशजाती प्रसूनकैः ॥ ४७ ॥ उन्मत्तमुनिपुष्पैश्च तथान्यैः कालसंभवैः ॥ अर्चयेत्परया भक्त्या द्वीपेश्वरमनुत्तमम् ॥ ४८ ॥ इक्षुगडुकदानेन तुष्यते परमेश्वरः ॥ गडुकाष्टकदानेन पातकं यात्यहोर्जितम् ॥ ४९ ॥ मासार्जितं च नश्येत गडुकाष्टशतेन च ॥ षाण्मासिकं सहस्रेण द्विगुणैरब्दिकं तथा ॥ ॥ ५० ॥ आजन्मजनितं पापमयुतेन प्रणश्यति ॥ द्विगुणैर्नश्यते व्याधिस्त्रिगुणैः स्याद्धनागमः ॥ ५१ ॥ षड्गुणैर्जायते वाग्मी सिद्धस्तद्द्विगुणैस्तथा ॥ रुद्रत्वं दशलक्षैश्च जायते नाऽत्र संशयः ॥ ५२ ॥ पौर्णमास्यां नृपश्रेष्ठ स्नानं कुर्वीत भक्तितः ॥ मन्त्रोक्तेन विधानेन सर्वपापक्षयंकरम् ॥ ५३ ॥ वारुणं च तथाग्नेयं ब्राह्मयं चैवाक्षयंकरम् ॥ देवान्पितॄन्मनुष्यांश्च विधिवत्तर्पयेद्बुधः ॥ ५४ ॥ ऋचा ऋग्वेदजं पुण्यं साम्ना साम फलं लभेत् ॥ यजुर्वेदस्य यजुषा गायत्र्या सर्वमाप्नुयात् ॥ ५५ ॥ अक्षरं च जपेन्मन्त्रं सौरं वा शिवदैवतम् ॥ अथवा वैष्णवं मन्त्रं द्वादशाक्षरसंज्ञितम् ॥ ५६ ॥ पूजयेद्ब्राह्मणान्भक्त्या सर्वलक्षणलक्षितान् ॥ स्वदारनिरतान्विप्रान्दंभलोभविवर्जितान् ॥ ५७ ॥ भिन्नवृत्तिकरान्पापान्पतिताञ्च्छूद्रसेवनान् ॥ शूद्रीग्रहणसंयुक्तान्वृषली यस्य मंदिरे ॥ ५८ ॥ परोक्षवादिनो दुष्टान्गुरुनिंदापरायणान् ॥ वेदद्वेषणशीलांश्च हैतुकान्बकवृत्तिकान् ॥ ५९ ॥ ईदृशान्वर्जयेच्छ्राद्धे दाने सर्वव्रतेषु च ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयंत्रितः ॥ ६० ॥ नायंत्रितश्चतुर्व्वेदी सर्वाशी सर्वविक्रयी ॥ ईदृशान्पूजयेद्विप्रानन्नदानहिरण्यतः ॥ ६१ ॥ उपानहौ च वस्त्राणि शय्यां छत्रमथासनम् ॥ यो दद्याद्ब्राह्मणे भक्त्या सोऽपि स्वर्गे महीयते ॥ ६२ ॥ प्रत्यक्षा सुरभी तत्र जलधेनुस्तथाघृता ॥ तिलधेनुः प्रदातव्या महिष्यश्च तथैव च ॥ ६३ ॥ कृष्णाजिनप्रदाता यो दाता यस्तिलसर्पिषोः ॥ कन्यापुस्तकयोर्दाता सोऽक्षयं लोकमाप्नुयात् ॥ ६४ ॥ धूर्वाहौ खुरसंयुक्तौ धान्योपस्करसंयुतौ ॥ दापयेत्स्वर्गकामस्तु इति मे सत्यभाषितम् ॥ ६५ ॥ सूत्रेण वेष्टयेद्द्वीपमथवा जगतीं शुभाम् ॥ मंदिरं परया भत्या परमेशमथापि वा ॥ ६६ ॥ प्रदक्षिणां विधानेन यः करोत्यत्र मानवः ॥ जम्बूप्लाक्षाह्वयौ द्वीपौ शाल्मलिश्चाऽपरो नृप ॥ ॥ ६७ ॥ कुशः क्रौंचस्तथा काशः पुष्करश्चैव सप्तमः ॥ सप्तसागरपर्यंता वेष्टिता तेन भारत ॥ ६८ ॥ द्वीपेश्वरे महाराज वृषोत्सर्गं च कारयेत् ॥ वृषेणाऽरुणवर्णेन माहेशं लोकमाप्नुयात् ॥ ६९ ॥ यस्तु वै पांडुरो वक्त्रे ललाटे पादयोस्तथा ॥ लांगूले यस्तु वै शुभ्रः स वै नाकस्य दर्शकः ॥ ॥ ७० ॥ नीलोऽयमीदृशः प्रोक्तो यस्तु द्वीपेश्वरे त्यजेत् ॥ स समा रोमसंख्याता नाके वसति भारत ॥ ७१ ॥ सौरं च शांकरं लोकं वैरंचं वैष्णवं क्रमात् ॥ भुनक्ति स्वेच्छया राजन्व्यासतीर्थप्रभावतः ॥ ७२ ॥ सपत्नीकं ततो विप्रं पूजयेत्तत्र भक्तितः ॥ सितरक्तानि वस्त्राणि यो दद्यादग्रजन्मने ॥ ७३ ॥ कृत्वा प्रदक्षिणं युग्मं प्रीयतां मे जगद्गुरुः ॥ नाऽस्ति विप्रसमो बन्धुरिह लोके परत्र च ॥ ७४ ॥ यमलोके महाघोरे पतंतं योऽभिरक्षति ॥ इतिहासपुराणज्ञं विष्णुभक्तं जितेंद्रियम् ॥ ७५ ॥ पूजयेत्परया भक्त्या सामगं वा विशेषतः ॥ द्वीपेश्वरं च ये भक्त्या संस्मरंति गृहे स्थिताः ॥ ७६ ॥ न तेषां जायते शोको न हानिर्न च दुष्कृतम् ॥ प्रथमं पूजयेत्तत्र लिंगं सिद्धेश्वरं ततः ॥ ७७ ॥ यत्र सिद्धो महाभागा व्यासः सत्यवतीसुतः ॥ अस्यैव पूजनात्सिद्धो धारासर्पो महामतिः ॥७८॥ तत्र तीर्थे तु यो राजन्प्राणत्यागं करोति च ॥ सूर्यलोकमसौ भित्त्वा प्रयाति शिवसन्निधौ ॥ ७९ ॥ समाः सहस्राणि च सप्त वै जले दशैकमग्नौ पतने च षोडश ॥ महाहवे षष्टिरशीति गोग्रहे ह्यनाशके भारत चाक्षया गतिः ॥ ८० ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ वायुभूतं निरीक्षंते ह्यागच्छंतं स्वगोत्रजम् ॥ ८१ ॥ अस्मद्गोत्रेऽस्ति कः पुत्रो यो नो दद्यात्तिलोदकम् ॥ कार्त्तिक्यां च विशेषेण वैशाख्यां वा तथैव च ॥ ८२ ॥ स्वर्गतिं च प्रयास्यामस्तत्र तीर्थोपसेवनात् ॥ एतत्ते कथितं सर्वं द्वीपेश्वरमनुत्तमम् ॥ ८३ ॥ यः पठेत्परया भक्त्या शृणुयात्तद्गतो नृप ॥ सोऽपि पापविनिर्मुक्तो मोदते शिममंदिरे ॥ ८४ ॥ ऊपरं सर्वतीर्थानां निर्मितं मुनिपुंगवैः ॥ कामप्रदं नृपश्रेष्ठ व्यासतीर्थं न संशयः ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे व्यासतीर्थमाहात्म्यवर्णनंनाम सप्तनवतितमोऽध्यायः ॥ १९७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र प्रभासेश्वरमुत्तमम् ॥ विख्यातं त्रिषु लोकेषु स्वर्गसोपानमुत्तमम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ प्रभासं तात मे ब्रूहि कथं जातं महाफलम् ॥ स्वर्गसोपानदं दृश्यं संक्षेपात्कथय शु मे ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ दुर्भगा रविपत्नी च प्रभानामेति विश्रुता ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तया चाऽऽराधितः शंभुरुग्रेण तपसा पुरा ॥ ३ ॥ वायुभक्षा स्थिता वर्षं वर्षं ध्यानपरायणा ॥ ततस्तुष्टो महादेवः प्रभायाः पांडुनन्दन ॥ ४ ॥
॥ ॥ ईश्वर उवाच ॥ ॥ कस्मात्संक्लिश्यसे बाले कथ्यतां यद्विवक्षितम् ॥ अहं हि भास्करोऽप्येको नानात्वं नैव विद्यते ॥ ५ ॥ ॥ प्रभोवाच ॥ ॥
नान्यो देवः स्त्रियः शंभो विना भर्त्रा क्वचित्प्रभो ॥ सगुणो निर्गुणो वाऽपि घनाढ्योवाप्यकिंचनः ॥ ६ ॥ प्रियो वा यदि वा द्वेष्यः स्त्रीणां भर्त्तैव देवतम् ॥ दुर्भगत्वेन दग्धाहं सखीमध्ये सुरेश्वर ॥ भर्त्तर्यलब्धसौख्यास्मि तेन क्लिश्याम्यहं भृशम् ॥ ७ ॥ ॥ ईश्वर उवाच ॥ ॥ वल्लभा
भास्करस्यैव मत्प्रसादाद्भविष्यसि ॥ ८ ॥ ॥ पार्वत्युवाच ॥ ॥ अप्रमाणं भवद्वाक्यं भास्करोऽपि करिष्यति ॥ वृथा क्लेशो भवेदस्याः प्रभायाः परमेश्वर ॥९॥ उमावाक्यान्महेशान ध्यातस्तिमिरनाशनः ॥ आगतो गगनाद्भानुर्नर्मदोत्तररोधसि ॥ १० ॥ ॥ भानुरुवाच ॥ ॥ आहूतोऽस्मि
कथं देव ह्यघासुरनिषूदन ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रभां पालय भो भानो संतोषेण परेण हि ॥ १२ ॥ ॥ उमोवाच ॥ ॥ प्रभाया मंदिरे नित्यं स्थीयतां हिमनाशन ॥ अग्रपत्नी समस्तानां भार्याणां क्रियतां रवे ॥ १३ ॥ ॥ भानुरुवाच ॥ ॥ एवं देवि करिष्यामि तव वाक्यं वरानने ॥ एतच्छ्रुत्वा प्रभाऽऽहूता प्रत्युवाच महेश्वरम् ॥ १४ ॥ ॥ प्रभोवाच ॥ ॥ स्वांशेन स्थीयतां देव मन्मथारे उमापते ॥
एकांशः स्थाप्यतामत्र तीर्थस्योन्मीलनाय च ॥ १५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सर्वदेवमयं लिंगं स्थापितं तत्र पांडव ॥ प्रभासेश इति ख्यातं सर्वलोकेषु दुर्लभम् ॥ १६ ॥ अन्यानि यानि तीर्थानि काले तानि फलंति वै ॥ प्रभासेशस्तु राजेंद्र सद्यः कामफलप्रदः ॥ १७ ॥ माघ
मासे सिते पक्षे सप्तम्यां च विशेषतः ॥ अश्वं यः स्पर्शयेत्तत्र यथोक्तब्राह्मणे नृप ॥ १८ ॥ इन्द्रत्वं प्राप्यते तेन भास्करस्याऽथवा पदम् ॥ स्नात्वा परमया भक्त्या दानं दद्याद्विजातये ॥ १९ ॥ गोप्रदाता लभेत्स्वर्गं सत्यलोकं वरेश्वर ॥ सर्वांगसुन्दरीं शुभ्रां क्षीरिणीं तरुणीं शुभाम् ॥ २० ॥
सवत्सां घण्टासंयुक्तां कांस्यपात्रावदोहिनीम् ॥ ददते ये नृपश्रेष्ठ न ते यांति यमालयम् ॥ २१ ॥ अथ यः परया भक्त्या स्नानं देवस्य कारयेत् ॥ स प्राप्नोति परं लोकं यावदाभूतसंप्लवम् ॥ २२ ॥ दौर्भाग्यं नाशमायाति स्नानमात्रेण पांडव ॥ तत्र तीर्थे तु यो भक्त्या कन्यादानं प्रयच्छति ॥
॥ २३ ॥ ब्राह्मणाय विवाहेन दापयेत्पांडुनंदन ॥ समानवयसे देया कुलशीलधनैस्तथा ॥ २४ ॥ ये ददन्ते महाराज ह्यपि पातकसंयुताः ॥ तेषां पापानि लीयन्ते ह्युदके लवणं यथा ॥ २५ ॥ स्वामिद्रोहकृतं पापं निक्षेपस्याऽपहारिणि ॥ मित्रघ्ने च कृतघ्नेच कूटसाक्ष्यसमुद्भवम् ॥ २६ ॥
तद्भ्रामोद्यानभेदोत्थं परदारनिषेवणम् ॥ वाद्धुषिकस्य यत्पापं यत्पापं स्तेयसंभवम् ॥ २७ ॥ कूपभेदोद्भवं यच्च बैडालव्रतधारिणः ॥ दाम्भिकं वृक्षच्छेदोत्थं विवाहस्य निषेधजम् ॥ २८ ॥ आरामस्यतरुच्छेदमगम्यागमनोद्भवम् ॥ स्वभार्यात्यजने यच्च परभार्यासमीहनात् ॥ २९ ॥ ब्रह्मस्वहरणे यच्च गरदे गोविघातिनि ॥ विद्याविक्रयणोत्थं च संसर्गाद्यच्च पातकम् ॥ ३० ॥ श्वविडालव्रघाद्घोरं सर्पशूद्रोद्भवं तथा ॥ भूमिहर्त्तुश्च यत्पापं भूमिहारिणि चैव हि ॥ ३१ ॥ मा ददस्वेति यत्पापं गोवह्निब्राह्मणेषु च ॥ तत्पापं
याति विलयं कन्यादानेन पांडव ॥ ३२ ॥ स गत्वा भास्करं लोकं रुद्रलोके शुभे व्रजेत् ॥ क्रीडते रुद्रलोकस्थो यावदिंद्राश्च तुर्दश ॥ ३३ ॥ सर्वपापक्षये जाते शिवे भवति भावना ॥ एतद्व्रजति यस्तीर्थं प्रभासं पांडुनंदन ॥ ३४ ॥ सर्वतीर्थफलं प्राप्य सोऽश्वमेधफलं लभेत् ॥ गोप्रदानं महापुण्यं सर्वपापक्षयं परम् ॥ प्रशस्तं सर्वकालं हि चतुर्दश्यां विशेषतः ॥ ३५ ॥ इति श्रीस्कान्दे महा
पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे प्रभासतीर्थमाहात्म्यवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ ७ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल नर्मदादक्षिणे तटे ॥ स्थापितं वासुकीशं तु समस्ताघौघनाशनम् ॥१॥ ॥ युधिष्ठिर उवाच ॥
कस्माच्च कारणात्तात रेवाया दक्षिणे तटे ॥ वासुकीशस्थापितो वै विस्तराद्वद मे गुरो ॥२॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एतत्सर्वं समास्थाय नृत्यं शंभुश्चकार वै ॥३॥ श्रमादजायत स्वेदो गंगातोयविमिश्रितम् ॥ पतंतमुरगोऽश्राति हरमौलिविनिर्गतम् ॥४॥ मंदाकिनी ततः क्रुद्धा व्यालस्योपरि
भारत ॥ प्राग्वज्रजगरत्वं हि भुजंग क्षुद्रजंतुक ॥ ५ ॥ ॥ वासुकिरुवाच ॥ ॥ अनुग्राह्योऽस्मि ते पापो दुर्नयोऽहं दराद्दते ॥ त्रैलोक्यपावनी पुण्या सरित्त्वं शुभलक्षणा ॥ ६ ॥ संसारच्छेदनकरी ह्यार्त्तानामार्त्तिनाशनी ॥ स्वर्गद्वारे स्थिता त्वं हि दयां कुरु मयीश्वरि ॥ ७ ॥ ॥ गंगोवाच ॥
कुरुष्व विपुलं विंध्यं तपस्त्वं शंकरं प्रति ॥ ततः प्राप्स्यसि स्वं स्थानं पन्नगत्वं ममाज्ञया ॥ ८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततोसौ त्वरितो विंध्यं नागो गत्वा नगं शुभम् ॥ तपस्तप्तुं समारेभे शंकराराधनोद्यतः ॥ ९ ॥ नित्यं ध्यायो महादेवं त्र्यक्षं डमरुकोद्यतम् ॥ ततो वर्षशते पूर्णे उप
रुद्धो जगद्गुरुः ॥ आगतस्तत्समीपं तु श्रुत्वा वाणीमुदाहरत् ॥१०॥ वरं वरय मे वत्स पन्नग त्वं कृतादर ॥ ११ ॥ ॥ वासुकिरुवाच ॥ ॥ यदि
तुष्टोऽसि मे देव वरं दास्यसि शंकर ॥ प्रसादात्तव देवेश भूयान्निष्पापता मम ॥ तीर्थं किंचित्समाख्याहि सर्वपापप्रणाशनम् ॥१२॥ ॥ ईश्वर उवाच ॥
पन्नग त्वं महाबाहो रेवां गच्छ शुभंकरीम् ॥ याम्ये तस्यास्तटे पुण्ये स्नानं कुरु यथाविधि ॥ १३ ॥ इत्युक्त्वांतर्दधे देवो वासुकिस्त्वरयान्वितः ॥
रूपेणाऽजगरेणैव प्रविष्टो नर्मदाजलम् ॥ १४ ॥ मार्गेण तस्य संजातं जाह्नव्याः स्रोत उत्तमम् ॥ निर्धूतकल्मषः सर्पः संजातो नर्मदाजले ॥
॥ १५ ॥ स्थापितः शंकरस्तत्र नर्मदायां युधिष्ठिर ॥ ततो नागेश्वरं लिंगं प्रसिद्धं पापनाशनम् ॥ १६ ॥ अष्टम्यां वा चतुर्दश्यां स्नापयेन्मधुना शिवम् ॥ विमुक्तकल्मषः सद्यो जायते नाऽत्र संशयः ॥ १७ ॥ अपुत्रा येऽनराः पार्थ स्नानं कुर्वंति संगमे ॥ ते लभंते सुताञ्छ्रेष्ठान्कार्त्तवीर्योप
माञ्छ्रुभान् ॥ १८ ॥ श्राद्धं तत्रैव यः कुर्यादुपवासपरायणः ॥ कुर्वन्प्रमोचयेत्प्रेतान्नरकान्नृपनंदन ॥१९॥ सर्पाणां च भयं वंशे ज्ञातिवर्गे न जायते ॥
निर्दोषं नंदते तस्य कुलं नागप्रसादतः ॥ २० ॥ एतत्ते सर्वमाख्यातं तव स्नेहान्नृपोत्तम ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनशततमोऽध्यायः ॥ ९९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं परमरोचनम् ॥ मार्कंडेशमिति ख्यातं नर्मदादक्षिणे तटे ॥ १ ॥ उत्तमं सर्वतीर्थानां गीर्वाणैर्वंदितं शिवम् ॥ गुह्याद्गुह्यतरं पुत्र नाख्यातं कस्यचिन्मया ॥ २ ॥ स्थापितं तु मया पूर्वं स्वर्गसोपानसंनिभम् ॥ ज्ञानं तत्रैव मे जातं प्रसादाच्छंकरस्य
च ॥३॥ अन्यस्तत्रैव यो गत्वा द्रुपदामंतर्जले जपेत् ॥ स पातकैरशेषैश्च मुच्यते पांडुनंदन ॥ ४ ॥ वाचिकैर्मानसैश्चैव कर्मजैरपि पातकैः ॥ पिंडि
कां चाप्यवगृह्य याम्यामाशां च संस्थितः ॥ ५ ॥ योजयेच्छूलिनं भक्त्या द्वात्रिंशद्वृषरूपिणम् ॥ देहपाते शिवं गच्छेदिति मे निश्चयो नृप ॥
॥ ६ ॥ आज्येन बोधयेद्दीपमष्टम्यां निशि भारत ॥ स्वर्गलोकमवाप्नोति इत्येवं शंकरोऽब्रवीत् ॥ ७ ॥ श्राद्धं तत्रैव यो भक्त्या कुर्वीत नृपनंदन ॥
पितरस्तस्य तृप्यंति यावदाभूतसंप्लवम् ॥ ८ ॥ इंगुदैर्वदरैर्बिल्वैरक्षतेन जलेन वा ॥ तर्प्पयेत्तत्र यो वंश्यानाप्नुयाज्जन्मनः फलम् ॥९॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे मार्कंडेश्वरतीर्थमाहात्म्यवर्णनंनाम शततमोऽध्यायः ॥ १०० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri Foundation USA

॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ उत्तरे नर्मदाकूले यज्ञवाटस्य मध्यतः ॥ १ ॥ संकर्षणमितिख्यातं पृथिव्यां पापनाशनम् ॥ तपश्चीर्णं पुरा राजन्बलभद्रेण तत्र वै ॥ २ ॥ गीर्वाणा. अपि तत्रैव संनिधौ नृपनंदन ॥ उमया सहितः शंभुः स्थितस्त त्रैव केशवः ॥ ३ ॥ बलभद्रेण राजेंद्र प्राणिनामुपकारतः ॥ स्थापितः परया भक्त्या शंकरः पापनाशनः ॥ ४ ॥ यस्तत्र स्नाति वै भक्त्या जित क्रोधो जितेंद्रियः ॥ एकादश्यां सिते पक्षे मधुना स्नापयेच्छिवम् ॥ ५ ॥ श्राद्धं तत्रैव यो भक्त्या पितृणामथ दापयेत् ॥ सं याति परमं स्थानं बलभद्रवचो यथा ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे संकर्षणतीर्थमाहात्म्यवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ मन्मथेशं ततो गच्छेत्सर्वदेवनमस्कृतम् ॥ स्नानमात्रान्नरो राजन्यमलोकं न पश्यति ॥ १ ॥ अनपत्या या च नारी स्नायाद्वै पांडुनंदन ॥ पुत्रं सा लभते पार्थ सत्यसंधं दृढव्रतम् ॥ २ ॥ तत्र स्नात्वा नरो राजञ्छुचिः प्रय तमानसः ॥ उपोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ ३ ॥ कामिकं तीर्थराजं तु तादृशं न भविष्यति ॥ त्रिरात्रं कुरुते राजन्स गोलक्षफलं लभेत् ॥ ४ ॥ तत्र नृत्यं प्रकर्त्तव्यं तुष्यते परमेश्वरः ॥ गीतवादित्रनिर्घोषे रात्रौ जागरणेन च ॥ ५ ॥ एवंच्यां च महादेवो दृष्टो मे मन्मथेश्वरः ॥ किं समर्थो यमो रुष्टो भद्रो भद्राणि पश्यति ॥६॥ कामेन स्थापितः शंभुरतस्मात्कामदो नृप ॥ सोपानः स्वर्गमार्गस्य पृथिव्यां मन्मथेश्वरः ॥ ७ ॥ विशेषश्चात्र संध्यायां श्राद्धदाने च भारत ॥ अन्नदानेन राजेंद्र कीर्त्तितं फलमुत्तमम् ॥ ८ ॥ एतत्ते सर्वमाख्यातं तव भक्त्या तु भारत ॥ पृथिव्यां सागरांतायां प्रख्याता मन्मथेश्वरः ॥ ९ ॥ गोदानं पांडवश्रेष्ठ त्रयोदश्यां प्रकारयेत् ॥ चैत्रे मासि सिते पक्षे तत्र गत्वा जितेंद्रियः ॥ १० ॥ रात्रौ जागरणं कृत्वा देवस्याग्रे नृपोत्तम ॥ दीपं भक्त्या घृतेनैव देवस्याग्रे निवेदयेत् ॥ ११ ॥ रुथ वा पुरुषो वाऽपि सममेतत्फलं स्मृतम् ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे मन्मथेश्वरतीर्थ माहात्म्यवर्णनंनाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल एरंडीसंगमं परम् ॥ यच्छ्रुतं वै मया राजञ्छिवस्य वदतः पुरा ॥ १ ॥ एतदेव पुरा प्रश्नं गौर्या पृष्टस्तु शंकरः ॥ प्रोवाच नृपशार्दूल गुह्याद्गुह्यतरं शुभम् ॥ २ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि परं गुह्यं नाऽऽख्यातं कस्यचिन्मया ॥ रेवायाश्चोत्तरे कूले तीर्थं परमशोभनम् ॥ भ्रूणहत्याहरं देवि कामदं पुत्रवर्द्धनम् ॥ ३ ॥ ॥ पार्वत्युवाच ॥ ॥ कथयस्व महादेव तीर्थं परमशोभनम् ॥ भ्रूणहत्याहरं कस्मात्कामदं स्वर्गदर्शनम् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ अत्रिर्नाम महादेवि मानसो ब्रह्मणः सुतः ॥ अग्निहोत्ररतो नित्यं देवतातिथिपूजकः ॥ ५ ॥ सोमसंस्थाश्च सप्तैव कृता विप्रेण पार्वति ॥ अनसूयेति विख्याता भार्या तस्य गुणान्विता ॥ ६ ॥ पतिव्रता पतिप्राणा पत्युः कार्यहिते रता ॥ एवं याति ततः काले न पुत्रा न च पुत्रिका ॥ ७ अपराह्णे महादेवि सुखासीनौ तु सुन्दरि ॥ वदंतौ सुखदुःखानि पूर्ववृत्तानि यानि च ॥ ८ ॥ ॥ अत्रिरुवाच ॥ ॥ सौम्ये शुभे प्रिये कांते चारुसर्वांगसुन्दरि ॥ विद्याविनयसंपन्ने पद्मपत्रनिभेक्षणे ॥ ९ ॥ पूर्णचंद्रनिभाकारे पृथुश्रोणिभरालसे ॥ न त्वया सदृशी नारी त्रैलोक्ये सचराचरे ॥ १० ॥ रतिपुत्रफला नारी पठ्यते वेदवादिभिः ॥ पुत्रहीनस्य यत्सौख्यं तत्सौख्यं मम सुन्दरि ॥ ११ ॥ यथाऽहं न तथा पुत्रः समर्थः सर्वकर्मसु ॥ पुन्नामनरकाद्भद्रे जातमात्रेण सुन्दरि ॥ १२ ॥ पतंतं रक्षयेद्देवि महापातकिनं यदि ॥ महाघोरे गता वापि दुष्टकर्मपितामहाः ॥ १३ ॥ तद्धरंति सुपुत्राश्च वैतरण्यां गतानपि ॥ पुत्रेण लोकाञ्जयति पौत्रेण परमा गतिः ॥ १४ ॥ अथ पुत्रस्य पौत्रेण प्रगच्छेद्ब्रह्म शाश्वतम् ॥ नास्ति पुत्रसमो बंधुरिह लोके परत्र च ॥ १५ ॥ अहश्च मध्यरात्रे च चिंतयानस्य सर्वदा ॥ शुष्यंति मम गात्राणि ग्रीष्मे नद्युदकं यथा ॥ १६ ॥ ॥ अनसूयोवाच ॥ ॥ यत्त्वया शोचितं विप्र तत्सर्वं शोचयाम्यहम् ॥ तवोद्वेगकरं यच्च तन्मे दहति चेतसि ॥ १७ ॥ येन पुत्रा भविष्यंति आयुष्मंतो गुणान्विताः ॥ तत्कार्यं च समीक्षस्व येन तुष्येत्प्रजापतिः ॥ १८ ॥ ॥ अत्रिरुवाच ॥ ॥ तपस्तप्तं मया भद्रे जातमात्रेण दुष्करम् ॥ व्रतोपवासनियमैः शाकाहारेण सुन्दरि ॥ १९ ॥ क्षीणदेहस्तु तिष्ठामि ह्यशक्तोऽहं महाव्रते ॥ तेन शोचामि चात्मानं रहस्यं कथितं मया ॥ २० ॥ ॥ अनसूयोवाच ॥ ॥ भर्तुः पतिव्रता नारी रतिपुत्रविवर्धिनी ॥ त्रिवर्गसाधना सा च श्लाघ्या च विदुषां जने ॥ २१ ॥ जपस्तप्तस्तीर्थयात्रा मृडेज्यामंत्रसाधनम् ॥ देवताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥ २२ ॥ ईदृशं तु महादोषं स्त्रीणां तु व्रतसाधने ॥ वदंति मुनयः सर्वे यथोक्तं वेदभाषितम् ॥ २३ ॥ अनुज्ञाता त्वया ब्रह्मंस्तपस्तप्स्यामि दुष्करम् ॥ पुत्रार्थित्वं समुद्दिश्य तोषयामि सुरोत्तमान् ॥ २४ ॥ ॥ अत्रिरुवाच ॥ ॥ साधुसाधु महाप्राज्ञे मम संतोषकारिणि ॥ आज्ञाता त्वं मया भद्रे पुत्रार्थं तप आश्रय ॥ २५ ॥ देवतानां मनुष्याणां पितृणामनृणो भव ॥ न भार्यासदृशो बंधुस्त्रिषु लोकेषु विद्यते ॥ २६ ॥ ॥ तेन देवाः प्रशंसंति न भार्यासदृशं सुखम् ॥ सन्सुखं मन्सुखाः पुत्राः विलोमे तु पराङ्मुखाः ॥ २७ ॥ तेन भार्यां प्रशंसंति सदे वासुरमानुषाः ॥ महाव्रते महाप्राज्ञे सत्त्ववति शुभेक्षणे ॥ २८ ॥ तपस्तप्तव शीघ्रं त्वं पुत्रार्थं तु ममाज्ञया ॥ एतद्वाक्यावसाने तु साष्टांगं प्रणताऽ ब्रवीत् ॥ २९ ॥ त्वत्प्रसादेन विप्रेंद्र सर्वान्कामानवाप्नुयाम् ॥ हंसलीलागतिः सा च मृगाक्षी वरवर्णिनी ॥ ३० ॥ नियमस्था ततो भूत्वा संप्राप्ता नर्मदां नदीम् ॥ शिवस्वेदोद्भवां देवीं सर्वपापप्रणाशनीम् ॥ ३१ ॥ यस्या दर्शनमात्रेण नश्यते पापसंचयः ॥ स्नानमात्रेण वै यस्या अश्वमेधफलं लभेत् ॥ ३२ ॥ ये पिबंति महादेवि श्रद्दधानाः पयः शुभम् ॥ सोमपानेन तत्तुल्यं नाऽत्र कार्या विचारणा ॥ ३३ ॥ ये स्मरंति दिवा रात्रौ योजनानां शतैरपि ॥ मुच्यंते सर्वपापेभ्यो रुद्रलोकं प्रयांति ते ॥ ३४ ॥ नर्मदायाः समीपे तु तावुभौ योजनद्वये ॥ न पश्यंति यमं तत्र ये मृता वरवर्णिनि ॥ ३५ ॥ ततस्तदुत्तरे कूले एरंडयाः संगमे शुभे ॥ नियमस्था विशालाक्षी शाकाहारेण सुन्दरि ॥ ३६ ॥ तोषयन्ती त्रींश्च देवाञ्छुभै स्तोत्रैर्व्रतैस्तथा ॥ ग्रीष्मेषु च महादेवि पञ्चाग्निं साधयेत्ततः ॥ ३७ ॥ वर्षाकाले चार्द्रवासाश्चरेच्चांद्रायणानि च ॥ हेमंते तु ततः प्राप्ते तोयमध्ये वसेत्सदा ॥ ३८ ॥ प्रातःस्नानं ततः संध्यां कुर्य्यादेवर्षितर्पणम् ॥ देवानामर्चनं कृत्वा होमं कुर्याद्यथाविधि ॥ ३९ ॥ यजते वैष्णवांल्लोकान्स्नान जाप्यहुतेन च ॥ एवं वर्षशते प्राप्ते रुद्रविष्णुपितामहाः ॥ ४० ॥ संप्राप्ता द्विजरूपैस्तु ऐरंड्याः संगमे प्रिये ॥ पुरतः संस्थितास्तस्या वेदमभ्यु द्धरंति च ॥ ४१ ॥ अनसूया जपं त्यक्त्वा निरीक्ष्य तान्मुहुर्मुहुः ॥ उत्थिता सा विशालाक्षी अर्घं दत्त्वा यथाविधि ॥ ४२ ॥ अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ दर्शनेन तु विप्राणां सर्वपापैः प्रमुच्यते ॥ ४३ ॥ प्रदक्षिणं ततः कृत्वा साष्टांगं प्रणताऽब्रवीत् ॥ कन्दमूलफलं शाकं नीवा रानपि पावनान् ॥ प्रयच्छाम्यहमद्यैव मुनीनां भावितात्मनाम् ॥ ४४ ॥ ॥ विप्रा ऊचुः ॥ ॥ तपसा तु विचित्रेण तपः सत्येन सुव्रते ॥ धृता:

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्म सर्वकामेस्तु सुव्रते तव दर्शनात् ॥ ४५ ॥ अस्माकं कौतुकं जातं तापसेन व्रतेन यत् ॥ स्वर्गमोक्षसुतस्यार्थं तपस्तप्सि दुष्करम् ॥ ४६ ॥
॥ ॥ अनसूयोवाच ॥ ॥ तपसा सिध्यते स्वर्गस्तपसा परमा गतिः ॥ तपसा चार्थकामौ च तपसा गुणवान्सुतः ॥ तप एव च मे विप्राः
सर्वकामफलप्रदम् ॥ ४७ ॥ ॥ विप्रा ऊचुः ॥ ॥ तन्वी श्यामा विशालाक्षी स्निग्धांगी रूपसंयुता ॥ हंसलीलागतिगमा त्वं च सर्वांगसुन्दरी ॥
॥ ४८ ॥ किं च ते तपसा कार्यमात्मानं शोच्यसे कथम् ॥ ४९ ॥ ॥ अनसूयोवाच ॥ ॥ यदि रुद्रश्च विष्णुश्च स्वयं साक्षात्पितामहः ॥
गूढरूपधराः सर्वे तच्चिह्नमुपलक्षये ॥ ५० ॥ तस्या वाक्यावसाने तु स्वरूपं दर्शयंति ते ॥ स्वस्वरूपैः स्थिता देवाः सूर्यकोटिसमप्रभाः ॥ ५१ ॥
चतुर्भुजो महादेवि शंखचक्रगदाधरः ॥ अतसीपुष्पवर्णस्तु पीतवासा जनार्दनः ॥ ५२ ॥ गरुत्मान्वाहनं यस्य श्रिया च सहितो हरिः ॥ प्रसन्न
वदनः श्रीमान्स्वयंरूपो व्यवस्थितः ॥ ५३ ॥ पीतवासा महादेवि चतुर्वदनपंकजः ॥ हंसोपरि समारूढो ह्यक्षमालाकरोद्यतः ॥ ५४ ॥ आगतो
नर्मदातीरे ब्रह्मा लोकपितामहः ॥ योऽसौ सर्वजगाद्व्यापी स्वयं साक्षान्महेश्वरः ॥ ५५ ॥ वृषभं तु समारूढो दशबाहुसमन्वितः ॥ भस्मांगराग
शोभाढ्यः पंचवक्त्रस्त्रिलोचनः ॥ ५६ ॥ जटामुकुटसंयुक्तः कृतचंद्रार्द्धशेखरः ॥ एवंरूपधरो देवः सर्वव्यापी महेश्वरः ॥ ५७ ॥ अनसूया निरीक्ष्यैते
तद्देवानां दर्शनं परम् ॥ वेपमाना ततः साध्वी मुरान्दृष्ट्वा मुहुर्मुहुः ॥ ५८ ॥ ॥ अनसूयोवाच ॥ ॥ किं व्यापारस्वरूपास्तु विष्णुरुद्रपिता
महाः ॥ एतद्वै श्रोतुमिच्छामि ह्यशेषं कथयंतु मे ॥ ५९ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रावृड्कालो ह्यहं ब्रह्मा आपश्चैव प्रकीर्त्तिताः ॥ मेघरूपो ह्यहं
प्रोक्तो वर्षयामि च भूतले ॥६०॥ अहं सर्वाणि बीजानि प्राक्संध्यासूदिते रवौ ॥ एतद्वै कारणं सर्वं रहस्यं कथितं परम् ॥६१॥ ॥ विष्णुरुवाच ॥
हेमंतश्च भवेद्विष्णुर्विश्वरूपं चराचरम् ॥ पालनाय जगत्सर्वं विष्णोर्माहात्म्यमुत्तमम् ॥ ६२ ॥ ॥ रुद्र उवाच ॥ ॥ ग्रीष्मकालो ह्यहं
प्रोक्तः सर्वभूतक्षयंकरः ॥ कर्षयामि जगत्सर्वं रुद्ररूपस्तपस्विनि ॥ ६३ ॥ एवं ब्रह्मा च विष्णुश्च रुद्रश्चैव महाव्रते ॥ त्रयो देवास्त्रयः संध्यास्त्र
यः कालास्त्रयोऽग्नयः ॥ ६४ ॥ तथा ब्रह्मा च विष्णुश्च रुद्रश्चैकात्मतां गतः ॥ वरं ब्रूयुश्च ते भद्रे यस्त्वया मनसीप्सितम् ॥ ६५ ॥
॥ ॥ अनसूयोवाच ॥ ॥ धन्या पुण्या ह्यहं लोके श्लाघ्या वंद्या च सर्वदा ॥ ब्रह्मा विष्णुश्च रुद्रश्च प्रसन्नवदनाः शुभाः ॥ ६६ ॥ यदि तुष्टास्त्रयो
देवा दयां कृत्वा ममोपरि ॥ अस्मिंस्तीर्थे तु सांनिध्याद्वरदाः सन्तु मे सदा ॥ ६७ ॥ ॥ रुद्र उवाच ॥ ॥ एवं भवतु ते वाक्यं यत्त्वया
प्रार्थितं शुभे ॥ प्रत्यक्षा वैष्णवी माया एरण्डीनाम नामतः ॥ ६८ ॥ यस्या दर्शनमात्रेण नश्यते पापसंचयः ॥ चैत्रमासे तु संप्राप्ते अहोरात्रो
पितो भवत् ॥ ६९ ॥ एरंड्याः संगमे स्नात्वा ब्रह्महत्यां व्यपोहति ॥ रात्रौ जागरणं कुर्यात्प्रभाते भोजयेद्द्विजान् ॥ ७० ॥ यथोक्तेन विधानेन
पिंडं दद्याद्यथाविधि ॥ प्रदक्षिणां ततो दद्याद्धिरण्यं वस्त्रमेव च ॥ ७१ ॥ रजतं च तथा गावो भूमिदानमथाऽपि वा ॥ सर्वं कोटिगुणं प्रोक्तमिति
स्वायंभुवोऽब्रवीत् ॥ ७२ ॥ ये म्रियंति नरा देवि एरंड्याः संगमे शुभे ॥ यावद्युगसहस्रं तु रुद्रलोके वसन्ति ते ॥७३॥ अहोरात्रोपितो भूत्वा जपेद्ब्रु
द्रांश्च वैदिकान् ॥ एकादशैकसंज्ञांश्च स याति परमां गतिम् ॥ ७४ ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ पुत्रार्थी लभते पुत्रांछ्रेष्ठभेत्का
मान्यथेप्सितान् ॥ ७५ ॥ एरंड्याः संगमे स्नात्वा रेवाया विमले जले ॥ महापातकिनो वाऽपि ते यांति परमां गतिम् ॥ ७६ ॥ ॥ अनसूयो
वाच ॥ ॥ यदितुष्टास्त्रयो देवा मम भक्तिप्रचोदिताः ॥ मम पुत्रा भवन्त्वेव हरिरुद्रपितामहाः ॥ ७७ ॥ ॥ विष्णुरुवाच ॥ ॥ पूज्या यत्पु
त्रतां यांति न कदाचिच्छुतं मया ॥ शुभे ददामि पुत्रांस्ते देवतुल्यपराक्रमान् ॥ रूपवंतो गुणोपेतान्यज्विनश्च बहुश्रुतान् ॥ ७८ ॥ ॥ अनसूयो
वाच ॥ ॥ ईप्सितं तच्च दातव्यं यन्मया प्रार्थितं हरे ॥ नान्यथा चैव कर्त्तव्या मम पुत्रेषणा तु या ॥ ७९ ॥ ॥ विष्णुरुवाच ॥ ॥ पूर्वं तु
भृगुसंवादे गर्भवास उपार्जितः ॥ तस्याहं चैव पारं तु नैव पश्यामि शोभने ॥८०॥ स्मरमाणः पुरा वृत्तं चिंतयामि पुनःपुनः ॥ एवं संचिंत्य ते देवाः
पितामहमहेश्वराः ॥ ८१ ॥ अयोनिजा भविष्यामस्तव पुत्रा वरानने ॥ योनिवासे महाप्राज्ञि देवा नैव व्रजंति च ॥ ८२ ॥ सांन्निध्यात्संगमे देवि
लोकानां तु वरप्रदाः ॥ एरण्डी वैष्णवी माया प्रत्यक्षा त्वं भविष्यसि ॥ ८३ ॥ त्रयो देवाः स्थिताः पार्थ रेवाया उत्तरे तटे ॥ वरप्राप्ता तु सा देवी
गता माहेन्द्रपर्वतम् ॥ ८४ ॥ क्षीणांगी शुक्लदेहा च रूक्षकेशी सुदारुणा ॥ कृतयज्ञोपवीता सा तपोनिष्ठा शुभेक्षणा ॥ ८५ ॥ शिलातलनिवि
ष्टोऽसौ दृष्टः कांतो महायशाः ॥ दृष्टचित्तोऽभवद्देवि उत्तिष्ठोत्तिष्ठ साऽब्रवीत् ॥ ८६ ॥ ॥ अत्रिरुवाच ॥ ॥ साधुसाधु महाप्राज्ञे ह्यनसूये
महाव्रते ॥ अचिंत्यं गालवादीनां वरं प्राप्ताऽसि दुर्लभम् ॥ ८७ ॥ ॥ अनसूयोवाच ॥ ॥ त्वत्प्रसादेन देवर्षे वरं प्राप्ताऽस्मि दुर्लभम् ॥ तेन
देवाः प्रशंसन्ति सिद्धाश्च ऋषयोऽमलाः ॥ ८८ ॥ एवमुक्ता तु सा देवी हर्षेण महता युता ॥ आलोकयेत्ततः कांतं तेनाऽपि शुभदर्शना ॥ ८९ ॥
ईक्षणाच्चैव संजातं ललाटे मंडलं शुभम् ॥ नवयोजनसाहस्रं मंडलं रश्मिभिर्वृतम् ॥ ९० ॥ कदंबगोलकाकारं त्रिगुणं परिमण्डलम् ॥ तस्य मध्ये
तु देवेशि पुरुषो दिव्यरूपधृक् ॥९१॥ हेमवर्णोऽमृतमयः सूर्यकोटिसमप्रभः ॥ आद्यः पुत्रोऽनुसूयायाः स्वयं साक्षात्पितामहः ॥ ९२ ॥ चन्द्रमा इति
विख्यातः सोमरूपो नृपात्मज ॥ इष्टापूर्त्तं च संपाति कलाषोडशकेन तु ॥ ९३ ॥ प्रतिपच्च द्वितीया च तृतीया च महेश्वरि ॥ चतुर्थी पंचमी चैव
अव्यया षोडशी कला ॥ ९४ ॥ चतुर्विधस्य लोकस्य सूक्ष्मो भूत्वा वरानने ॥ आप्रीणाति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ९५ ॥ सर्वे ते
ह्युपजीवंति हुतं दत्तं शशिस्थितम् ॥ वनस्पतिगते सोमे धनवांश्च वरानने ॥ ९६ ॥ भुंजन्परगृहे मूढो ददेदग्दकृतं शुभम् ॥ वनस्पतिगते
सोमे यस्तु छिंद्याद्वनस्पतीन् ॥ तेन पापेन देवेशि नरा यांति यमालयम् ॥ ९७ ॥ वनस्पतिगते सोमे मैथुनं यो निषेवते ॥ ब्रह्महत्या
समं पापं लभते नात्र संशयः ॥ ९८ ॥ वनस्पतिगते सोमे मंथानं योऽधिरोहयेत् ॥ गावस्तस्य प्रणश्यंति याश्च वै पूर्वसंचिताः ॥ ९९ ॥ वन
स्पतिगते सोमे ह्यध्वानं योऽधिगच्छति ॥ भवन्ति पितरस्तस्य तं मासं रेणुभोजनाः ॥ १०० ॥ अमावस्यां महादेवि यस्तु श्राद्धप्रदो भवेत् ॥
अब्दमेकं विशालाक्षि तृप्तास्तत्पितरो ध्रुवम् ॥१०१॥ हिरण्यं रजतं वस्त्रं यो ददाति द्विजातिषु ॥ सर्वं लक्षगुणं देवि लभते नात्र संशयः ॥१०२॥
एवं गुणविशिष्टोऽसौ सोमरूपः प्रजापतिः ॥ संजातः प्रथमः पुत्रो ह्यनसूयासुनन्दनः ॥१०३॥ द्वितायस्तु महादेवि दुर्वासानाम नामतः ॥ सृष्टि
संहारकर्त्ता च स्वयं साक्षान्महेश्वरः ॥१०४॥ ऋक्षमध्यगतो देवि तपस्तप्तति दुष्करम् ॥ सोऽपि रुद्रत्वमायाति संप्राप्ते भूतविप्लवे॥१०५॥ इन्द्रोऽ
पिशप्तस्तेनैव दुर्वाससा वरानने ॥ द्वितीयस्य तु पुत्रस्य संभवः कथितो मया ॥ १०६ ॥ दत्तात्रेयस्वरूपेण भगवान्मधुसूदनः ॥ जगद्व्यापी जग
त्राथः स्वयं साक्षाज्जनार्दनः ॥ १०७ ॥ एते देवास्त्रयः पुत्रा अनसूयाया महेश्वरि ॥ वरदानेन ते देवा ह्यवतीर्णा महीतले ॥ १०८ ॥ पुत्रप्राप्तिकरं
तीर्थं रेवायाश्चोत्तरे तटे ॥ अनसूयाकृतं पार्थे सर्वपापक्षयं परम् ॥१०९॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आश्चर्यभूतं लोकेऽस्मिन्नर्मदायां पुरातनम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भ्रूणहत्या गता तत्र ब्राह्मणस्य नराधिप ॥११०॥ ॥ युधिष्ठिर उवाच ॥ ॥ इतिहासं द्विजश्रेष्ठ कथयस्व ममाऽनघ ॥ सर्वपापहरं लोके दुःखार्त्तस्य च कथ्यताम् ॥ १११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ सुवर्णशिलके ग्रामे गौतमान्वयसंभवः ॥ कृपीवलो महादेवि भार्यापुत्रसमन्वितः ॥ ११२ ॥ वसते तत्र गोविंदः संजातो विपुले कुले ॥ पुत्रदारसमोपेतो गृहक्षेत्ररतः सदा ॥ ११३ ॥ शकटं पूरयित्वा तु काष्ठानामगमद्गृहम् ॥ प्रक्षिप्तानि च काष्ठानि ह्येकाकी क्षुधयाऽन्वितः ॥ ११४ ॥ रिंगमाणस्तदा पुत्रः पितुः शब्दात्समागतः ॥ न दृष्टस्तेन वै पुत्रः काष्ठैः सञ्च्छादितोऽवशः ॥ ॥ ११५ ॥ आगतस्त्वरितो गेहे पिपासार्त्तो नराधिप ॥ शकटं मोच्य तद्वारे सवृषं रज्जुसंयुतम् ॥ ११६ ॥ भार्या तस्यैव या दृष्टा चित्तज्ञा वशवर्त्तिनी ॥ दृष्ट्वा निपातितं पुत्रं काष्ठैर्निर्भिन्नमस्तकम् ॥११७॥ अजल्पमाना करुणं निक्षिप्तं झोलिकां शिशुम् ॥ शुश्रूषणे रता साध्वी प्रियस्य च नराधिप ॥ ११८ ॥ ततः स्नानादिकं कृत्वा भोजनाच्छयनं शुभम् ॥ पुत्रं पुत्रवतां श्रेष्ठा ह्युत्थापयति शासनैः ॥ ११९ ॥ यदा च नोत्थितः सुप्तः पुत्रः पंचत्वमागतः ॥ तदा सा दीनवदना रुरोद च मुमोह च ॥ १२० ॥ तच्छ्रुत्वा रुदितं शब्दं गोविंदस्त्रस्तमानसः ॥ किमेतदिति चोक्त्वा तु पतितो धरणीतले ॥ १२१ ॥ ह्यावेतौ मुक्तकेशौ तु भूमौ निपतितौ नृप ॥ विलपाते च राजेंद्र निःश्वासोच्छ्वासितेन च ॥ १२२ ॥ कं पश्ये प्रांगणे पुत्रं दृष्ट्वा क्रीडंतमातुरम् ॥ संधारयिष्ये हृदयं स्फुटितं तव कारणे ॥ १२३ ॥ त्वज्जन्मान्तं यशो नित्यमक्षयां कुलसंततिम् ॥ दृष्ट्वा किम नृणीभूतो यास्यामि परमां गतिम् ॥ १२४ ॥ मम वृद्धस्य दीनस्य गतिस्त्वं किल पुत्रक ॥ एते मनोरथाः सर्वे चिंतिता विफला गताः ॥ १२५ ॥ इमां तु विकलां दीनां विहीनां सुतबांधवैः ॥ रुदंतीं पतितां पाहि मातरं धरणीतले ॥ १२६ ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तेन पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ १२७ ॥ अपुत्रस्य गृहं शून्यं दिशः शून्या ह्यबांधवाः ॥ मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता ॥ १२८॥

मृषाऽयं वदते लोकश्चंदनं किल शीतलम् ॥ पुत्रगात्रपरिष्वंगश्चंदनादपि शीतलः ॥ १२९ ॥ श्मश्रुग्रहणक्रीडंतं धूलिधूसरिताननम् ॥ पुण्यहीना न पश्यंति निजोत्संगसमास्थितम् ॥ १३० ॥ दिगंबरं गतव्रीडं जटिलं धूलिधूसरम् ॥ पुण्यहीना न पश्यंति गंगाधरमिवात्मजम् ॥ १३१ ॥ वीणा वाद्यस्वरो लोके सुस्वरः श्रूयते किल ॥ रुदितं बालकस्यैव तस्मादाह्लादकारकम् ॥ १३२ ॥ मृगपक्षिषु काकेषु पशूनां स्वरयोनिषु ॥ पुत्रं तेषु समस्तेषु वल्लभं ब्रुवते बुधाः ॥ १३३ ॥ मत्स्याश्वग्रकराश्चैव कूर्मग्राहादयोऽपि वा ॥ पुत्रोत्पत्तौ च हृष्यंति विपत्तौ यांति दुःखिताम् ॥ १३४ ॥ देव गंधर्वयक्षाश्च हृष्यंते पुत्रजन्मनि ॥ पंचत्वे तेऽपि शोचंति मंदभाग्योऽस्मि पुत्रक ॥ १३५ ॥ ऋषिमेलापकं चक्रे पुत्रार्थे राघवो नृप ॥ इंद्रस्थाने स्थितस्तस्य प्रोक्षते ह्यासनं यतः ॥ १३६ ॥ स्वर्गवासं सुताद्वाह्यं विद्यते न तु पांडव ॥ चक्रे दशरथस्तस्मात्पुत्रार्थं यज्ञमुत्तमम् ॥ १३७ ॥ रामो लक्ष्मणशत्रुघ्नौ भरतस्तत्र संभवात् ॥ कार्त्तवीर्यो जितो येन रामेणाऽमिततेजसा ॥ १३८ ॥ स रामो रामचंद्रेण अष्टवर्षेण निर्जितः ॥ एकाकिना हतो वाली प्लवगः शत्रुदुर्जयः ॥ १३९ ॥ रावणो ब्रह्मपुत्रो यस्त्रैलोक्यं यस्य शंकते ॥ हतः स रामचंद्रेण सपुत्रः सहबांधवः ॥ ॥ १४० ॥ एवं पुत्रं विना सौख्यं मर्त्यलोके न विद्यते ॥ वंशार्थे मैथुनं यस्य स्वर्गार्थे यस्य भारती ॥ १४१ ॥ मृष्टान्नं ब्राह्मणस्यार्थे स्वर्गे वासं तु यांति ते ॥ ब्रह्महत्याश्चमेधाभ्यां न परं पापपुण्ययोः ॥ १४२ ॥ पुत्रोत्पत्तिविपत्तिभ्यां न परं सुखदुःखयोः ॥ किं ब्रवीमीति भो वत्स न तु सौख्यं सुतं विना ॥ १४३ ॥ एवं बहुविधं दुःखं प्रलपित्वा पुनःपुनः ॥ जनैश्चाश्वासितो विप्रो बालं गृह्य बहिर्गतः ॥१४४॥ ततः संस्कृत्य तं बालं विधिदृष्टेन कर्मणा ॥ समवेतो तु दुःखार्त्तावागतौ स्वगृहं पुनः ॥१४५॥ एवं गृहागते विप्रे रात्रिर्जाता युधिष्ठिर ॥ भूमौ प्रसुप्तो गोविंदः पुत्रशोकेन पीडितः ॥ १४६ ॥ यावन्निरीक्षते भार्या भर्त्तारं दुःखपीडितम् ॥ कृमिराशिगतं सर्वं गोविंदं समपश्यत ॥ १४७ ॥ दुःखाद्दुःखतरे मग्ना दृष्ट्वा तं पातकान्वितम् ॥ एवं दुःखनिमग्नायाः शर्वरी विगता तदा ॥ १४८ ॥ पशुपालस्तु महिपीमुक्त्वाऽरण्येगमद्गृहात् ॥ अरण्ये महिपीः सर्वा रक्षयित्वा गृहागतः ॥ १४९ ॥ विज्ञप्तः पशुपालेन गोविंदो ब्राह्मणोत्तमः ॥ ॥ भार्योवाच ॥ ॥ अतीते पंचमे चाह्नि त्विंधनं क्षिप्तस्तु ते ॥ गृहपश्चाद्गतो बालो ह्यज्ञानाद्घातितस्त्वया ॥ १५७ ॥ मया तत्पातकं घोरं रहस्यं न प्रकाशितम् ॥ तेन प्रच्छन्नपापेन दह्यमाना दिवानिशम् ॥ १५८ ॥ न सुखं तव गात्रस्य पश्यामि न हि चात्मनः ॥ निद्रा मम शमं याता रतिश्चैव त्वया सह ॥ १५९ ॥ श्रूयते मानवे शास्त्रे श्लोको गीतो महर्षिभिः ॥ स्मृत्वास्मृत्वा तु तं चित्ते परितापो न शाम्यति ॥ १६० ॥ कीर्त्तनान्नश्यते धर्म्मो वर्धतेऽसौ निगूहनात् ॥ इह लोके परे चैव पापस्याऽप्येवमेव च ॥ १६१ ॥ एवं संचिंत्यमानाऽहं स्थिता रात्रौ भयातुरा ॥ कृमिराशिगतं त्वां हि कस्याऽहं कथयामि किम् ॥ १६२ ॥ पुनस्त्वं चाऽद्य मे दृष्टो भ्रूणहत्याकृमिश्रितः ॥ क्वचिद्भिंदंति ते गात्रं क्वचिन्नद्यः समंततः ॥ १६३ ॥ एतत्संस्मृत्य संस्मृत्य विमृशामि पुनःपुनः ॥ न जाने कारणं किंचित्पृच्छंत्याः कथयस्व मे ॥१६४॥ तडागं वा सरिद्वाऽपि तीर्थं वा देवतार्चनम् ॥ यं गतोऽसि प्रभावोऽयं तस्य नाऽन्यस्य मे स्थितम् ॥ १६५ ॥ एवमुक्तस्तुविप्रोऽसौ कथयामास भारत ॥ भार्यावा यद्दिवा वृत्तं शंक मानोनृपोत्तम ॥ १६६ ॥ अद्याहं महिपीसार्थं एरंडीसंगमं गतः ॥ नाभिमात्रे जले गत्वा पीतवान्सलिलं बहु ॥ १६७ ॥ नान्यत्तीर्थं विजानामि सरितं सर एव वा ॥ सत्यंसत्यं पुनः सत्यं कथितं तव भामिनि ॥ १६८ ॥ एवं ज्ञात्वा तु सा सर्वमुपवासकृतक्षणा ॥ सपत्नीको गतस्तत्र संगमे वरवर्णिनि ॥ १६९ ॥ स्नात्वा तत्र जले रम्ये नत्वा देवं तु भास्करम् ॥ स्नापयामास देवेशं शंकरं चोमया सह ॥ १७० ॥ पंचगव्यं घृतक्षीरैर्दधिक्षौद्रघृतैर्जलैः ॥ गंधमाल्यादिधूपैश्च नैवेद्यैश्च सुशोभनैः ॥ १७१ ॥ पूज्य त्रयीमयं लिंगं देवीं कात्यायनीं शुभाम् ॥ रात्रौ जागरणं कृत्वा पत्या सह पतिव्रता ॥ १७२ ॥ ततः प्रभाते विमले द्विजान्संपूज्य यत्नतः ॥ गोदानेन हिरण्येन वस्त्रेणान्नेन भारत ॥ १७३ ॥ गोविंदः पूजयामास स्वशक्त्या ब्राह्मणाञ्च्छुभान् ॥ मुक्तपापो गृहायातः स्वभार्यासहितो नृप ॥ १७४ ॥ एवं यः शृणुते भक्त्या गोविंदाख्यानमुत्तमम् ॥ पठते परया भक्त्या भ्रूणहत्या प्रणश्यति ॥ १७५ ॥ क्रीडते शांकरे लोके यावदाभूतसंप्लवम् ॥ यश्चैवाश्वयुजे मासि चैत्रे वा नृपसत्तम ॥ १७६ ॥ सप्तम्यां च सिते पक्षे सोपवासो जितेंद्रियः ॥ सात्त्विकीं वासनां कृत्वा यो वसेच्छिवमंदिरे ॥ १७७ ॥ ध्यायमानो विरूपाक्षं त्रिशूलकरसंस्थि

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by S3 Foundation USA

तम् ॥ कंसासुरनिहंतारं शंखचक्रगदाधरम् ॥ १७८ ॥ पक्षिराजसमारूढं त्रैलोक्यवरदायकम् ॥ पितामहं ततो ध्यायेद्धंसस्थं चतुराननम् ॥ १७९ ॥ सर्गप्रदं समस्तस्य कमलाकरशोभितम् ॥ यो ह्येवं वसते तत्र त्रियमे स्थान उत्तमे ॥ १८० ततः प्रभाते विमले ह्यदृष्ट्वा च नराधिप ॥ ब्राह्मणान्पूजयेद्भक्त्या सर्वदोषविवर्जितान् ॥ १८१ ॥ सर्ववेदसंपूर्णान्सर्वशास्त्रविशारदान् ॥ वेदाभ्यासरताञ्नित्यं स्वदारनिरतान्सदा ॥ १८२ ॥ श्राद्धे दाने व्रते योग्यान्ब्राह्मणान्पांडुनंदन ॥ प्रेतानां पूजनं तत्र देवपूर्वं समारभेत् ॥ १८३ ॥ प्रेतत्वान्मुच्यते शीघ्रमेरंड्यां पिंडतर्पणैः ॥ दानानि तत्र देयानि ह्यन्नमुख्यानि सर्वदा ॥ १८४ ॥ हिरण्यभूमिकन्याश्च धूर्वाहौ शुभलक्षणौ ॥ सीरेण सहितौ पार्थ धान्यं द्रोणकसंख्यया ॥ १८५ ॥ अलंकृतां सवत्सां च क्षीरिणीं तरुणीं सिताम् ॥ रक्तां वा कृष्णवर्णां वा पाटलां कपिलां तथा ॥ १८६ ॥ कांस्यदोहनसंयुक्तां रुक्म खुरविभूषणाम् ॥ स्वर्णशृंगीं सवत्सां च ब्राह्मणायोपपादयेत् ॥ १८७ ॥ प्रीयतां मे जगन्नाथा हरकृष्णपितामहाः ॥ संसाररक्षणी देवी सुरभी मां समुद्धरेत् ॥ १८८ ॥ पुत्रार्थं याः स्त्रियः पार्थ ह्येरण्डीसंगमे नृप ॥ स्नाप्यन्ते रुद्रसूक्तैश्च चतुर्वेदोद्भवैस्तथा ॥ १८९ ॥ चतुर्भिर्ब्राह्मणैः शस्तं द्वाभ्यां योग्यैश्च कारयेत् ॥ एकेन सार्द्रकुम्भेन दांपत्यमभिषेचयेत् ॥ १९० ॥ दैवज्ञेनैव चैकेन अथवा सामगेन वा ॥ पंचरत्नसमायुक्तं कुम्भे तत्रैव कारयेत् ॥ १९१ ॥ गन्धतोयसमायुक्तं सर्वौषधिविमिश्रितम् ॥ आम्रपल्लवसंयुक्तमश्वत्थमधुकं तथा ॥ १९२ ॥ गुंठितं सितवस्त्रेण सितचन्दनचर्चितम् ॥ सितपुष्पैस्तु संच्छन्नं सिद्धार्थकृतमध्यमम् ॥ १९३ ॥ कांस्यपात्रे तु संस्थाप्य पुत्रार्थी देशिकोत्तमः ॥ अंगलग्नं तु यद्वस्त्रं कटकाभरणं तथा ॥ १९४ ॥ तत्सर्वं मण्डले त्याज्यं सिद्ध्यर्थं चात्मनस्तदा ॥ प्रणम्य भास्करं पश्चादाचार्यं रुद्ररूपिणम् ॥ १९५ ॥ मधुरं च ततोऽश्नीयाद्देव्या भुवन उत्तमे ॥ फलदानं च विप्राय छत्रं तांबूलमेव च ॥ १९६ ॥ उपानहौ च यानं च स भवेद्दुःखवर्जितः ॥ भास्करे क्रीडते लोके यावदाभूतसंप्लवम् ॥ १९७ ॥ दानं कोटिगुणं सर्वं शुभं वा यदि वाऽशुभम् ॥ यथा नदीनदाः सर्वे सागरे यांति संक्षयम् ॥ १९८ ॥ एवं पापानि नश्यंति ह्येरण्डीसंगमे नृणाम् ॥ समंताच्छेलपातेन ह्येरण्डीसंगमे नृप ॥ १९९ ॥ भ्रूणहत्यासमं पापं नश्यते शंकरोऽब्रवीत् ॥ प्राणत्यागं च यो भक्त्या जातवेदसि कारयेत् ॥ २०० ॥ अनाशकं नृपश्रेष्ठ जले वा तदनन्तरम् ॥ पंचसाहस्रिकं मानं वर्षाणां जातवेदसि ॥२०१॥ जले त्रीणि सहस्राण्यनाशके षष्टि भुञ्जते ॥ काका बकाः कपोताश्च ह्युलूकाः पशवस्तथा ॥ २०२ ॥ संगमोदकसंस्पृष्टास्ते यांति परमां गतिम् ॥ स्नाश्च तत्पदं ज्ञात्वा यां गतिं यांति योगिनः ॥२०३॥ एरंडिका मया देवी दृष्टो मे मन्मथेश्वरः ॥ किं समर्थो यमो रुष्टो भद्रो भद्राणि पश्यति ॥ ॥ २०४ ॥ मृत्तिकां संगमोद्भूतां ये च गुण्ठंति नित्यशः ॥ भ्रूणहत्यादिपापानि नश्यंते नाऽत्र संशयः ॥ २०५ ॥ एरण्डीसंगमे मर्त्यो लुण्ठ्य मानो नराधिप ॥ सर्वपापैर्विनिर्मुक्तः पदं गच्छत्यनामयम् ॥ २०६ ॥ एरंड्याः संगमं मर्त्याः कीर्त्तयंत्याऽऽश्रमस्थिताः ॥ विमुक्तपापा जायन्ते सत्यं शंकरभाषितम् ॥ २०७ ॥ एरण्डीपादपाग्रेस्तु दृष्टेः पापं व्यपोहति ॥ २०८ ॥ तीर्थाख्यानमिदं पुण्यं ये पठिष्यन्ति मानवाः ॥ शृण्वन्ति चाऽपरे भक्त्या मुक्तपापा भवंति ते ॥ २०९ ॥ एतत्ते सर्वमाख्यातमेरण्डीसंगमं नृप ॥ भूयश्चाऽन्यत्प्रवक्ष्यामि सर्वपापक्षयंकरम् ॥ २१० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे एरण्डीसंगमतीर्थफलमाहात्म्यवर्णनंनाम त्र्यधिक शततमोऽध्यायः ॥ १०३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सौवर्णशिलमुत्तमम् ॥ प्रख्यातमुत्तरे कूले सर्वपापक्षयंकरम् ॥ १ ॥ समंताच्छतपातेन मुनिसंघैः पुरा कृतम् ॥ रेवायां दुर्लभं स्थानं संगमस्य समीपतः ॥ २ ॥ विभक्तं हस्तमात्रं च पुण्य क्षेत्रं नराधिप ॥ सुवर्णशिलके स्नात्वा पूजयित्वा महेश्वरम् ॥ ३ ॥ नत्वा तु भास्करं देवं होतव्यं च हुताशने ॥ बिल्वेनाऽऽज्यविमिश्रेण बिल्वप त्रैरथापि वा ॥ ४ ॥ प्रीयतां मे जगन्नाथो व्याधिर्नश्यतु मे ध्रुवम् ॥ द्विजाय कांचने दत्ते यत्फलं तच्छृणुष्व मे ॥ ५ ॥ बहुस्वर्णस्य यत्प्रोक्तं यागस्य फलमुत्तमम् ॥ तथाऽसौ लभते सर्वं कांचनं यः प्रयच्छति ॥ ६ ॥ तेन दानेन पूतात्मा मृतः स्वर्गमवाप्नुयात् ॥ रुद्रस्यानुचरस्तावद्यावदिन्द्राश्चतुर्दश ॥ ७ ॥ ततः स्वर्गावतीर्णस्तु जायते विशदे कुले ॥ धनधान्यसमोपेतः पुनः स्मरति तज्जलम् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सुवर्णशिलातीर्थमाहात्म्यवर्णनंनाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ करंजाख्यं ततो गच्छेत्सोपवासो जितेंद्रियः ॥ तत्र स्नात्वा तु राजेंद्र सर्वपापैः प्रमुच्यते ॥ १ ॥ अर्चयित्वा महादेवं दत्त्वा दानं तु भक्तितः ॥ सुवर्णं रजतं वाऽपि मणिमौक्तिकविद्रुमान् ॥ २ ॥ पादुकोपानहौ छत्रं शय्यां प्रावरणानि च ॥ कोटिकोटिगुणं सर्वं जायते नाऽत्र संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे करंजतीर्थ माहात्म्यवर्णनंनाम पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं परमशोभनम् ॥ सौभाग्यकरणं दिव्यं नरनारीमनोरमम् ॥ १ ॥ तत्र या दुर्भगा नारी नरो वा नृपसत्तम ॥ स्नात्वाऽर्च्चयेदुमारुद्रौ सौभाग्यं तस्य जायते ॥ २ ॥ तृतीयायामहोरात्रं सोपवासो जितेंद्रियः ॥ निमंत्रयेद्द्विजं भक्त्या सपत्नीकं सुरूपिणम् ॥ ३ ॥ गन्धमाल्यैरलंकृत्य वस्त्र धूपाद्विवासितम् ॥ भोजयेत्पायसान्नेन कृसरेणाऽथ भक्तितः ॥ ४ ॥ भोजयित्वा यथान्यायं प्रदक्षिणमुदाहरेत् ॥ प्रीयतां मे महादेवः सपत्नीको वृषध्वजः ॥ ५ ॥ यथा ते देवदेवेश न वियोगः कदाचन ॥ ममाऽपि करुणां कृत्वा तथास्त्विति विचिंतयेत् ॥ ६ ॥ एवं कृते ततस्तस्य यत्पुण्यं समुदाहृतम् ॥ तत्ते सर्वं प्रवक्ष्यामि यथा देवेन भाषितम् ॥ ७ ॥ दौर्भाग्यं दुर्गतिश्चैव दारिद्र्यं शोकबन्धनम् ॥ वंध्यत्वं सप्तजन्मानि जायते न युधिष्ठिर ॥ ८ ॥ ज्येष्ठमासे सिते पक्षे तृतीयायां विशेषतः ॥ तत्र गत्वा तु यो भक्त्या पंचाग्निं साधयेत्ततः ॥ ९ ॥ सोऽपि पापैरशेषैस्तु मुच्यते नाऽत्र संशयः ॥ गुग्गुलं दहते यस्तु द्विधाचित्तविवर्जितः ॥ १० ॥ शरीरं भेदयेद्यस्तु गौर्याश्चैव समीपतः ॥ तस्मिन्कर्मप्रविष्टस्य उत्क्रांतिर्जायते यदि ॥ ११ ॥ देहपाते व्रजेत्स्वर्गमित्येवं शंकरोऽब्रवीत् ॥ सितरक्तैस्तथा पीतैर्वस्त्रैश्च विविधैः शुभैः ॥ १२ ॥ ब्राह्मणीं ब्राह्मणं चैव पूजयित्वा यथाविधि ॥ पुष्पैर्नानाविधैश्चैव गंधधूपैः सुशोभनैः ॥ १३ ॥ कण्ठसूत्रकसिंदूरैः कुंकुमेन विलेपयेत् ॥ कल्पयेत स्त्रियं गौरीं ब्राह्मणं शिवरूपिणम् ॥ १४ ॥ तेषां तद्रूपकं कृत्वा दानमुत्सृज्यते ततः ॥ कंकणं कर्णवेष्टं च कण्ठिकां मुद्रिकां तथा ॥ १५ ॥ सप्तधान्यं तथा चैव भोजनं नृपसत्तम ॥ अन्यान्यपि च दानानि तस्मिंस्तीर्थे ददाति यः ॥ १६ ॥ सर्वदानेश्च यत्पुण्यं प्राप्नुयान्नात्र संशयः ॥ सहस्रगुणितं सर्वं नात्र कार्या विचारणा ॥ १७ ॥ शंकरेण समं तस्माद्भोगं भुंक्ते ह्युत्तमम् ॥ सौभाग्यं तस्य विपुलं जायते नाऽत्र संशयः ॥१८॥ अपुत्रो लभते पुत्रमधनो धन माप्नुयात् ॥ राजेंद्र कामदं तीर्थं नर्मदायां व्यवस्थितम् ॥ १९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्य खण्डे रेवाखण्डे कामदतीर्थमाहात्म्यवर्णनंनाम षडुत्तरशततमोऽध्यायः ॥ १०६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत राजेंद्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भण्डारीतीर्थमुत्तमम् ॥ दरिद्रच्छेदकरणं युगान्येकोनविंशतिः ॥ १ ॥ धनदेन तपस्तप्त्वा प्रसन्ने पद्मसंभवे ॥ तत्रैव स्वल्पदानेन प्राप्तं वित्तस्य
रक्षणम् ॥ २ ॥ तत्र गत्वा तु यो भक्त्या स्नात्वा वित्तं प्रयच्छति ॥ तस्य वित्तपरिच्छेदो न कदाचिद्भविष्यति ॥ ३ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे भण्डारीतीर्थमाहात्म्यवर्णनंनाम सप्तोत्तरशततमोऽध्यायः ॥ १०७ ॥ ॥ ७ ॥ ॥

॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल रोहिणीतीर्थमुत्तमम् ॥ विख्यातं त्रिषु लोकेषु सर्वपापहरं परम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
रोहिणीतीर्थमाहात्म्यं सर्वपापप्रणाशनम् ॥ श्रोतुमिच्छामि तत्त्वेन तन्मे त्वं वक्तुमर्हसि ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्मिन्नेकार्णवे
घोरे नष्टे स्थावरजंगमे ॥ उदधौ च शयानस्य देवदेवस्य चक्रिणः ॥ ३ ॥ नाभौ समुत्थितं पद्मं रविमंडलसन्निभम् ॥ कर्णिकाकेसरोपेतं
पत्रैश्च समलंकृतम् ॥ ४ ॥ तत्र ब्रह्मा समुत्पन्नश्चतुर्वदनपंकजः ॥ किं करोमीति देवेश आज्ञा मे दीयतां प्रभो ॥ ५ ॥ एवमुक्तस्तु देवेशः शंख
चक्रगदाधरः ॥ उवाच मधुरां वाणीं तदा देवं पितामहम् ॥ ६ ॥ सरस्वत्यां महाबाहो लोकं कुरु ममाज्ञया ॥ भूतग्राममशेषस्य उत्पादनविधि
क्षयम् ॥ ७ ॥ एतच्छ्रुतं तु वचनं पद्मनाभस्य भारत ॥ चिंतयामास भगवान्सप्तपींन्हितकाम्यया ॥ ८ ॥ क्रमात्ते चिंतिताः प्राज्ञाः पुलस्त्यः
पुलहः क्रतुः ॥ प्राचेतसो वसिष्ठश्च भृगुर्नारद एव च ॥ ९ ॥ यज्ञे प्राचेतसो दक्षो महातेजाः प्रजापतिः ॥ दक्षस्यापि तथा जाताः पंचाशद्वृद्धि
तरोऽनघ ॥ १० ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ तथैव स महाभागः सप्तविंशतिमिंदवे ॥ ११ ॥ रोहिणीनाम या तासां मध्ये
तस्य नराधिप ॥ अनिष्टा सर्वनारीणां भर्तुश्चैव विशेषतः ॥ १२ ॥ ततः सा परमं कृत्वा वैराग्यं नृपसत्तम ॥ आगत्य नर्मदातीरे चचार विपुलं
तपः ॥१३॥ एकरात्रेद्विरात्रेश्च षड्द्वादशभिरेव च ॥ पक्षमासोपवासैश्च कर्शयन्ती कलेवरम् ॥ १४ ॥ आराधयन्ती सततं महिषासुरनाशिनीं ॥
देवीं भगवतीं तात सर्वोत्तिविनिवारणीम् ॥ १५ ॥ स्नात्वास्नात्वा जले नित्यं नर्मदायाः शुचिस्मिता ॥ ततस्तुष्टा महाभागा देवी नारायणी नृप ॥
॥ १६ ॥ प्रसन्ना ते महाभागे व्रतेन नियमेन च ॥ एतच्छ्रुत्वा तु वचनं रोहिणी शशिनः प्रिया ॥१७॥ यथा भवामि न चिरात्तथा भवतु मानदे ॥
एवमस्त्विति सा चोक्ता भवानी भक्तवत्सला ॥ १८ ॥ स्तूयमाना मुनिगणैस्तत्रैवांतरधीयत ॥ तदाप्रभृति तत्तीर्थं रोहिणी शशिनः प्रिया ॥
॥ १९ ॥ संजाता सर्वकालं तु वल्लभा नृपसत्तम ॥ तत्र तीर्थे तु या नारी नरो वा स्नानि भक्तितः ॥ २० ॥ वल्लभा जायते सा तु भर्तुश्चैव रोहिणी
यथा ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करोति वै ॥ २१ ॥ सप्तजन्मानि दांपत्यवियोगो न भवेत्क्वचित् ॥ २२ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे रोहिणीसोमनाथतीर्थमाहात्म्यवर्णनं नामाष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥
॥ ॥ ८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चक्रतीर्थमनुत्तमम् ॥ सेनापुरमितिख्यातं सर्वपापक्षयंकरम् ॥ १ ॥

सेनापत्याभिषेकाय देवदेवेन चक्रिणा ॥ आनीतश्च महासेनो देवैः सेंद्रपुरोगमैः ॥ २ ॥ दानवानां वधार्थाय जयाय च दिवौकसाम् ॥
भूमिदानेन विप्रेंद्रांस्तर्पयित्वा यथाविधि ॥ ३ ॥ शंखभेरीनिनादैश्च पटहानां च निस्वनैः ॥ वीणावेणुनृदंगैश्च झल्लरीस्वरमंगलैः ॥ ४ ॥
ततः कृत्वा स्वनं घोरं दानवो बलदर्पितः ॥ रुरुर्नाम विघातार्थमभिषेकस्य चागतः ॥ ५ ॥ हस्त्यश्वरथपत्त्याद्यैः पूरयन्दिशो दश ॥ तत्र तेन
महद्युद्धं प्रवृत्तं किल भारत ॥ ६ ॥ शक्त्यृष्टिपाशमुशलैः खड्गैस्तोमरटंकनैः ॥ भल्लैः कर्णिकनाराचैः कबंधपटसंकुलैः ॥ ७ ॥ ततस्तु तां शत्रुबल
स्य सेनां क्षणेन चापच्युतबाणघातैः ॥ विध्वस्तहस्त्यश्वरथान्महात्मा जग्राह चक्रं रिपुसंघनाशनः ॥ ८ ॥ ज्वलच्च चक्रं निशितं भयंकरं सुरासुरा
णां च सुदर्शनं रणे ॥ चकर्त दैत्यस्य शिरस्तदानीं करात्प्रमुक्तं मधुघातिनश्च तत् ॥ ९ ॥ तं दृष्ट्वा सहसा विघ्नमभिषेके पडाननः ॥ त्यक्त्वा तु तत्र
संस्थानं चचार विपुलं तपः ॥ १० ॥ मुक्तं चक्रं विनाशाय हरिणा लोकधारिणा ॥ द्विदलं दानवं कृत्वा पपात विमले जले ॥ ११ ॥ तदा प्रभृति
तत्तीर्थं चक्रतीर्थमिति श्रुतम् ॥ सर्वपापविनाशाय निर्मितं विश्वमूर्त्तिना ॥ १२ ॥ चक्रतीर्थे तु यः स्नात्वा पूजयेद्देवमच्युतम् ॥ पुंडरीकस्य यज्ञस्य
फलमाप्नोति मानवः ॥१३॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्ब्राह्मणाञ्छुभान् ॥ शांतदांतजितक्रोधान्स लभेत्कोटिजं फलम् ॥ १४ ॥ तत्र तीर्थे तु
यो भक्त्या त्यजते देहमात्मनः ॥ विष्णुलोकं मृतो याति जयशब्दादिमंगलैः ॥ १५ ॥ क्रीडयित्वा यथाकामं देवगंधर्वपूजितः ॥ इहागत्य च
भूयोपि जायते विपुले कुले ॥ १६ ॥ एतत्पुण्यं पापहरं धन्यं दुःखप्रणाशनम् ॥ कथितं ते महाभाग भूयश्चान्यच्छृणुष्व मे ॥ १७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे सेनापुरे चक्रतीर्थमाहात्म्यवर्णनंनाम नवोत्तरशततमोऽध्यायः
॥ १०९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धौतपापं ततो गच्छेन्महापातकनाशनम् ॥ समीपे चक्रतीर्थस्य विष्णुना निर्म्मितं पुरा
॥ १ ॥ निहतेर्दानवैर्घोरैर्देवदेवो जनार्दनः॥ तत्पापस्य विनाशार्थं दानवान्तोद्भवस्य च ॥२॥ तत्र तीर्थे जितक्रोधश्चचार विपुलं तपः॥ दुश्चरं मौन
मास्थाय ह्यशक्यं देवदानवैः ॥ ३ ॥ स्नात्वा दत्त्वा द्विजातिभ्यो दानानि विविधानि च ॥ तत्क्षणान्मुपापस्तु गतस्तद्वैष्णवं पदम् ॥ ४ ॥ एवं
युक्तस्तु यस्तत्र पापं कृत्वा सुदारुणम् ॥ स्नात्वा जप्त्वा विधानेन मुच्यते सर्वपातकैः ॥ ५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखण्डे रेवाखण्डे धौतपापतीर्थमाहात्म्यवर्णनंनाम दशोत्तरशततमोऽध्यायः ॥ ११० ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ स्कंदेन निर्मितं पूर्वं तपः कृत्वा सुदारुणम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्कंदस्य चरितं सर्वमा
जन्म द्विजसत्तम ॥ तीर्थस्य च विधिं पुण्यं कथयस्व यथार्थतः ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ देवदेवेन वै तप्तं तपः पूर्वं युधिष्ठिर ॥ विज्ञतेन
सुरैः सर्वैरुमादेवी विवाहिता ॥ ३ ॥ नास्ति सेनापतिः कश्चिद्देवानां सुरसत्तम ॥ नीयंते दानवैर्घोरैः सर्वे देवाः सवासवाः ॥ ४ ॥ यथा निशा
विना चंद्रं दिवसो भास्करं विना ॥ न शोभते मुहूर्तं वै तथा सेना विनायका ॥ ५ ॥ एवं ज्ञात्वा महादेव परया दयया विभो ॥ सेनानीर्दीयतां
कश्चिद्विषु लोकेषु विश्रुतः ॥ ६ ॥ एतच्छ्रुत्वा शुभं वाक्यं देवानां परमेश्वरः ॥ कामयान उमां देवीं सस्मार मनसा स्मरम् ॥ ७ ॥ तेन मूर्च्छितस
र्वांगः कामरूपो जगद्गुरुः ॥ कामयामास रुद्राणीं दिव्यं वर्षशतं किल ॥ ८ ॥ देवराजस्ततो ज्ञात्वा महामैथुनगं हरम् ॥ संमंत्र्य देवतैः सार्द्धं
प्रेषयन्नातवंदसम् ॥ ९ ॥ तेन गत्वा महादेवः परमानंदसंस्थितः ॥ सहसा तेन दृष्टोऽसौ हाहेत्युक्त्वा समुत्थितः ॥ १० ॥ ततः क्रुद्धा महादेवी शाप
वाचमुवाच ह ॥ वेपमाना महाराज शृणु यत्ते वदाम्यहम् ॥११॥ अहं यस्मात्सुरैः सर्वैर्यांचिता पुत्रजन्मनि ॥ कृता रतिश्च विफला संप्रेष्य जातवेद
सम् ॥ १२ ॥ तस्मात्सर्वे पुत्रहीना भविष्यंति न संशयः ॥ हरेणोक्तस्ततो वह्निरस्माकं बीजमावह ॥ १३ ॥ यथा भवति लोकेषु तथा त्वं कर्तु
मर्हसि ॥ मम तेजस्त्वया शक्यं ग्रहीतुं सुरसत्तम ॥ देवकार्यार्थसिद्ध्यर्थं नाऽन्यः शक्तो जगत्त्रये ॥ १४ ॥ ॥ अग्निरुवाच ॥ ॥ तेजसस्तव मे देव
का शक्तिर्धारणे विभो ॥ करोति भस्मसात्सर्वं त्रैलोक्यं सचराचरम् ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ उदरस्थेन बीजेन यदि ते जायते रुजा ॥ तदा

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by S3 Foundation USA

क्षिपस्व तत्तेजो गंगातोयं हुताशन ॥१६॥ एवमुक्त्वा महादेवो अमोघं बीजमुत्तमम् ॥ हव्यवाहमुखे सर्वं क्षिप्यांतरधीयत ॥१७॥ गते चादर्शनं देवे दह्यमानो हुताशनः ॥गंगातोयं विनिक्षिप्य जगाम स्वंनिवेशनम्॥१८॥ असहंती तु तत्तेजो गंगाऽपि सरितां वरा ॥ शरस्तंबे विनिक्षिप्य जगामाशु यथागतम् ॥१९॥ तत्र जातं तु तद्दृष्ट्वा सर्वे देवाः सवासवाः ॥ कृत्तिकां प्रेसयामासुः स्तन्यं पाययितुं तदा ॥२०॥ दृष्ट्वा ता आगताः सर्वा गंगागर्भं महामतेः ॥ षण्मुखैः षण्मुखो भूत्वा पिपासुरपिवत्स्तनम् ॥ २१ ॥ जातकर्मादिसंस्कारान्वंदोक्तान्पद्मसंभवः ॥ चकार सर्वान्राजेंद्र विधिदृष्टेन कर्मणा ॥ २२ ॥ षण्मुखात्षण्मुखो नाम कार्त्तिकेयस्तु कृत्तिकात् ॥ कुमारश्च कुमारत्वाद्गंगागर्भोऽग्निजोऽपरः ॥ २३ ॥ एवं कुमारः संभूतो ह्यनधीत्य स वेदवित् ॥ शास्त्राण्यनेकानि वेद चचार विपुलं तपः ॥ २४ ॥ देवाऽरण्येषु सर्वेषु नदीषु च नदेषु च ॥ पृथिव्यां यानि तीर्थानि समुद्राद्यानि भारत ॥ २५ ॥ ततः पर्याययोगेन नर्मदातटमाश्रितः ॥ नर्मदादक्षिणे कूले चचार विपुलं तपः ॥ २६ ॥ ऋग्यजुःसामविहितं जपन्जाप्यमहर्निशम् ॥ ध्यायमानो महादेवं शुचिर्धर्मनिषंततः ॥ २७ ॥ ततो वर्षसहस्रांते पूर्णे देवो महेश्वरः ॥ उमया सहितः काले तदा वचनमब्रवीत् ॥ २८ ॥ ॥ ईश्वर उवाच ॥ ॥ अहं ते वरदस्तात गौरी माता पिता ह्यहम् ॥ वरं वृणीष्व यत्तेष्टं त्रिषु लोकेषु दुर्लभम् ॥ २९ ॥ ॥ ॥ षण्मुख उवाच ॥ ॥ यदि तुष्टो महादेव उमया सह शंकर ॥ वृणोमि मातापितरौ नान्या गतिर्ममेतिर्मम ॥ ३० ॥ एतच्छ्रुत्वा शुभं वाक्यं पुत्रस्य वदनाच्युतम् ॥ तथेत्युक्त्वा तु स्नेहेन प्रेम्णा तं परिषस्वजे ॥ ३१ ॥ ततस्तं मूर्ध्न्युपाघ्राय ह्युमयोवाच शंकरः ॥ ३२ ॥ ॥ ईश्वर उवाच ॥ अक्षयश्चाव्ययश्चैव सेनानीस्त्वं भविष्यसि ॥ ३३ ॥ शिखी च ते वाहनं दिव्यरूपो दत्तो मया शक्तिधरस्य संख्ये ॥ सुरासुरादींश्च जयेति चोक्त्वा जगाम कैलासवरं महात्मा ॥ ३४ ॥ गते चाऽदर्शनं देवे तदा स शिखिवाहनः ॥ स्थापयित्वा महादेवं जगाम सुरसन्निधौ ॥ ३५ ॥ तदाप्रभृति तत्तीर्थं स्कन्दतीर्थमिति श्रुतम् ॥ सर्वपापहरं पुण्यं मर्त्यानां भुवि दुर्लभम् ॥ ३६ ॥ तत्र तीर्थे तु यो राजन्भक्त्या स्नात्वाऽर्चयेच्छिवम् ॥ गंधमाल्याभिषेकैश्च याज्ञिकं स लभेत्फलम् ॥ ३७ ॥ स्कन्दतीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ तिलमिश्रेण तोयेन तस्य पुण्यफलं शृणु ॥ ॥ ३८ ॥ पिंडदानेन चैकेन विधियुक्तेन भारत ॥ द्वादशाब्दानि तुष्यंति पितरो नाऽत्र संशयः ॥ ३९ ॥ तत्र तीर्थे तु राजेंद्र शुभं वा यदि वा शुभम् ॥ इह लोके परे चैव तत्सर्वं जायतेऽक्षयम् ॥ ४० ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति ॥ शास्त्रयुक्तेन विधिना स गच्छेच्छिव मंदिरम् ॥ ४१ ॥ कल्पमेकं वसित्वा तु देवगंधर्वपूजितः ॥ अत्र भारतवर्षे तु जायते विमले कुले ॥ ४२ ॥ वेदवेदांगतत्त्वज्ञः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः ॥ ४३ ॥ इदं ते कथितं राजन्स्कंदतीर्थस्य संभवम् ॥ धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् ॥ सर्वपापहरं पुण्यं देवदेवेन भाषितम् ॥ ४४ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे स्कंदतीर्थ माहात्म्यवर्णनंनामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थमांगिरसस्य तु ॥ उत्तरे नर्मदाकूले सर्वपापविनाशनम् ॥ १ पुरासीदंगिरानाम ब्राह्मणो वेदपारगः ॥ पुत्रहेतोर्युगस्याऽदौ चचार विपुलं तपः ॥ २ ॥ नित्यं त्रिषवणस्नायी जपन्देवं सनातनम् ॥ पूजयंश्च महादेवं कृच्छ्रचांद्रायणादिभिः ॥ ३ ॥ द्वादशाब्दे ततः पूर्णे तुतोष परमेश्वरः ॥ वरेण च्छंदयानास द्विजमां गिरसं वरम् ॥ ४ ॥ वव्रे स तु महादेवं पुत्रं पुत्रवतां वरम् ॥ वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् ॥५॥ देवानां मंत्रिणं राजन्सर्वलोकेषु पूजितम् ॥ त्रैलक्ष्म्याः सदावासमक्षयं चाव्ययं सुतम् ॥ ६ ॥ तथाभिलषितः पुत्रः सर्वविद्याविशारदः ॥ भविष्यति न संदेहश्चैवमुक्त्वा ययौ हरः ॥७॥ वरैरंगि रसश्चाऽपि बृहस्पतिरजायत ॥ यथाभिलषितः पुत्रो वेदवेदांगपारगः ॥ ८ ॥ जाते पुत्रेंगिरास्तत्र स्थापयामास शंकरम् ॥ हृष्टतुष्टमना भूत्वा जगामोत्तरपर्वतम् ॥ ९ ॥ तत्र चांगिरसे तीर्थे यः स्नात्वा पूजयेच्छिवम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ १० ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ इच्छते यश्च यं कामं स तं लभति मानवः ॥ ११ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डेऽग्निरसतीर्थमाहात्म्यवर्णनंनाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कोटितीर्थमनुत्तमम् ॥ ऋषिकोटिर्गता तत्र परां सिद्धिमुपागता ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा भोजयेद्ब्राह्मणा न्शुचिः ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ पूजिते तु महादेवे वाजपेयफलं लभेत् ॥ ३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनं नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ अयो निजं महापुण्यं सर्वपापप्रणाशनम् ॥ १ ॥ अयोनिजे नरः स्नात्वा पूजयेत्परमेश्वरम् ॥ पितृदेवार्चनं कृत्वा मुच्यते सर्वकिल्बिषैः ॥ २ ॥ तत्र तीर्थे तु विधिना प्राणत्यागं करोति यः ॥ स कदाचिन्महाराज योनिद्वारं न पश्यति ॥ ३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे अयोनिसम्भवतीर्थमाहात्म्यवर्णनंनाम चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थमांगारकं परम् ॥ रूपदं सर्वलोकानां विश्रुतं नर्मदातटे ॥ १ ॥ अंगारकेण राजेंद्र पुरा तप्तं तपः किल ॥ अर्बुदं च निखर्वं च प्रयुतं वर्षसंख्यया ॥ २ ॥ ततस्तुष्टो महादेवः परया कृपया नृप ॥ प्रत्यक्षदर्शी भगवा नुवाच क्षितिनन्दनम् ॥३॥ वरदोऽस्मि महाभाग दुर्लभं त्रिदशैरपि ॥ वरं दास्याम्यहं वत्स ब्रूहि यत्ते विवक्षितम् ॥ ४ ॥ ॥ अंगारक उवाच ॥ ॥ तव प्रसादादेवेश सर्वलोकमहेश्वर ॥ ग्रहमध्यगतो नित्यं विचरामि नभस्तले ॥ ५ ॥ यावद्धरा धरो लोके यावच्चंद्रदिवाकरौ ॥ नद्यो नदाः समुद्राश्च वरो मे चाक्षयो भवेत् ॥ ६ ॥ एवमस्त्विति देवेशो दत्त्वा वरमनुत्तमम् ॥ जगामाकाशमाविश्य वन्द्यमानः सुरासुरैः ॥ ७ ॥ भूमिपुत्रस्तत स्तस्मिन्स्थापयामास शंकरम् ॥ गतः सुरालये लोके ग्रहभावे निवेशितः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ हुतहोमो जितक्रोधः सोऽश्वमेधफलं लभेत् ॥ ९ ॥ चतुर्थ्यंगारके यस्तु स्नात्वा चाभ्यर्चयेद्गृहम् ॥ अंगारकं विधानेन सप्तजन्मानि भारत ॥ १० ॥ दशयोजन विस्तीर्णे मंडले रूपवान्भवेत् ॥ तत्रैव तु मृतो जंतुः कामतोऽकामतोऽपि वा ॥ रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ ११ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अंगारकतीर्थमाहात्म्यवर्णनंनाम पञ्चदशोत्तरशततमोऽध्यायः ॥ ११५ ॥ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पांडुतीर्थं ततो गच्छेत्सर्वपापविनाशनम् ॥ तत्र स्नात्वा नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा दापयेत्कांचनं शुचिः ॥ भ्रूणहत्यादिपापानि नश्यंते नाऽत्र संशयः ॥ २ ॥ पिंडोदकप्रदानेन वाजपेयफलं लभेत् ॥ पितरः पितामहाश्च नृत्यंते च प्रहर्षिताः ॥ ३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे पांडुतीर्थ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

माहात्म्यवर्णननाम षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र पुण्यं तीर्थं त्रिलोचनम् ॥ तत्र तिष्ठति देवेशः सर्वलोकनमस्कृतः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा भक्त्यार्चयति शंकरम् ॥ रुद्रस्य भवनं याति मृता नास्त्यत्र संशयः ॥ २ ॥ कल्पशते ततः पूर्णे क्रीडित्वा च इहागतः ॥ आविर्योगेन तिष्ठत पूज्यमानः शतं समाः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे त्रिलोचनतीर्थमाहात्म्यवर्णननाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु गजेंद्र तीर्थं परमशोभनम् ॥ इन्द्रतीर्थेतिविख्यातं नर्मदादक्षिणे तटे ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नर्मदा दक्षिणे कूले इन्द्रतीर्थं कथं भवेत् ॥ श्रोतुमिच्छामि विप्रेंद्र ह्यादिमध्यांतविस्तरैः ॥ २ ॥ एतच्छ्रुत्वा तु वचनं धर्मपुत्रस्य धीमतः ॥ कथयामास तद्वृत्तमितिहासं पुरातनम् ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ विश्वासयित्वा सुचिरं धर्मराजं महाबलम् ॥ वृत्रं जित्वाऽथ हत्वा तु गच्छमानं शचीपतिम् ॥ ४ ॥ निष्कामयाणं मार्गेण ब्रह्महत्यादुरासदा ॥ अहोरात्रमविश्रांता जगाम भुवनत्रयम् ॥ ५ ॥ यतोयतो ब्रह्महणं याति यानेन शोभनम् ॥ दिशो भागं सुरैः सार्द्धं ततो हत्या न मुञ्चति ॥ ६ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ पातकानां गतिर्दृष्टा न तु विश्वासघातिनाम् ॥ ७ ॥ पापकर्मसुखं दृष्ट्वा स्नानदानैर्विशुध्यति ॥ नारी वा पुरुषो वाऽपि नैव विश्वासघातिनः ॥८॥ एतस्मादीनि चाऽन्यानि श्रुत्वा वाक्यानि देवराट् ॥ वचनं तद्विधेरुक्तं विषादमगमत्परम् ॥९॥ त्यक्त्वा राज्यं सुरैः सार्धं जगाम तप उत्तमम् ॥ पुत्रदाग्गृहं राज्यं वसूनि विविधानि च ॥१०॥ फलान्येतानि धर्मस्य शोभयन्ति जनेश्वरम् ॥ फलं धर्मस्य भुंजेति सुहृत्त्वजनवांधवाः ॥ ११ ॥ पश्यतां सर्वमेतेषां पापमेकेन भुज्यते ॥ परं हि सुखमुत्सृज्य कर्शयन्वै कलेवरम् ॥ १२ ॥ देवराजो जगामासौतीर्थान्यायतनानि च ॥ गंगातीर्थेषु सर्वेषु यामुनेषु तथैव च ॥ १३ ॥ सारस्वतेषु सर्वेषु साधुसेवितेषु पृथक्पृथक् ॥ नदीषु देवखातेषु तडागेषु सरःसु च ॥ १४ ॥ पापं न मुञ्चते सर्वं पश्चाद्वनमागमे ॥ रेवाप्रभवतीर्थेषु कूलयोरुभयोरपि ॥ १५ ॥ पूजयन्वै महाक्षेत्रं स्कंदतीर्थं समासदत् ॥ तत्र स्थित्वोपवासैश्च कृच्छ्रचांद्रायणादिभिः ॥ १६ ॥ कर्शयन्वै स्वकं देहं न लेभे शर्म वै क्वचित् ॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः ॥ १७ ॥ आर्द्रवासास्तु हेमंते चचार विपुलं तपः ॥ एवं तु तपतस्तस्य इंद्रस्य विदितात्मनः ॥ १८ ॥ वत्सराणां सहस्राणि गतानि दश भारत ॥ ततस्त्वेकादशे प्राप्ते वर्षे तु नृपसत्तम ॥ १९ ॥ सहसा भगवान्देवस्तु तोष परमेश्वरः ॥ तथा ब्रह्मर्षयः सिद्धा ब्रह्मविष्णुपुरोगमाः ॥ २० ॥ तत्राऽऽजग्मुः सुराः सर्वे यत्र देवः शतक्रतुः ॥ दृष्ट्वा समागतान्देवानृषींश्चैव महामतिः ॥ २१ ॥ उवाच प्रणतो भूत्वा सर्वदेवपुरोहितः ॥ विदितं सर्वमेतेषां यथा वृत्रवधः कृतः ॥ २२ ॥ युष्माकं चाऽऽज्ञया पूर्वं ब्रह्मविष्णुमहेश्वराः ॥ तथाप्येवं ब्रह्महणं यत्त्वा पापस्य कारिणम् ॥ २३ ॥ भ्रमंतं सर्वतीर्थेषु ब्रह्महत्या न मुंचति ॥ न नंदति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ २४ ॥ यथा विहीनचंद्रार्कं तथा राज्यमनायकम् ॥ तस्मात्सर्वे सुरश्रेष्ठा विज्ञाप्यं मम संप्रति ॥ २५ ॥ कुर्वंतु शक्रं निर्दोषं तथा सर्वं भविष्यति ॥ बृहस्पतिमुखोद्गीर्णं श्रुत्वा तद्वचनं शुभम् ॥ २६ ॥ ततः प्रोवाच भगवान्ब्रह्मा लोकपितामहः ॥ एतत्पापं महाघोरं ब्रह्महत्याममुद्भवम् ॥ ॥ २७ ॥ देवतेभ्योऽथ भूतेभ्यश्चतुर्भागं क्षिपाम्यहम् ॥ एवं मुक्ताक्षिपत्तेनो जलोपरि महामतिः ॥ २८ ॥ अवगाह्य ततः पेया आपो वै नान्यथा बुधैः ॥ धरायामक्षिपद्भागं द्वितीयं पद्मसंभवः ॥ २९ ॥ अभक्ष्या तेन संजाता सदाकालं वसुंधरा ॥ तदार्धमर्द्धं नारीणां द्विर्नीरेऽद्रि युधिष्ठिर ॥ ॥ ३० ॥ निक्षिप्य भगवान्देवः पुनरन्यज्जगाद ह ॥ असंग्राह्या त्वसंग्राह्या तेन जाता रजस्वला ॥ ३१ ॥ चतुर्दिनानि सा प्राज्ञैः पापस्य महतो महात् ॥ चतुर्थं तु ततो भागं विभज्य परमेश्वरः ॥ ३२ ॥ कृषिगोरक्ष्यवाणिज्ये शूद्रसेवाकरे द्विजे ॥ ततोऽभिनंदयामासुः सर्वे देवा महर्षयः ॥ ॥ ३३ ॥ देवेंद्रं वाग्भिरिष्टाभिर्नर्मदाजलसंस्थितम् ॥ वरेण च्छन्दयामास ततस्तुष्टो महेश्वरः ॥ ३४ ॥ वरं दास्यामि देवेश वरं वृणु यथेप्सितम् ॥ ३५ ॥ ॥ इंद्र उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ अत्र संस्थापयिष्यामि सदा सन्निहितो भव ॥ ३६ ॥ एवमस्त्विति चोक्ता तं ब्रह्मविष्णुमहेश्वराः ॥ जग्मुराकाशमाविश्य स्तूयमाना महर्षिभिः ॥ ३७ ॥ गतेषु देवदेवेषु देवराजः शतक्रतुः ॥ स्थापयित्वा महादेवं जगाम त्रिदशालयम् ॥ ३८ ॥ इंद्रतीर्थे तु यः स्नात्वा तर्प्पयेत्पितृदेवताः ॥ महापातकयुक्तोऽपि मुच्यते सर्वपातकैः ॥ ३९ ॥ इंद्रतीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ सोऽश्वमेधस्य यज्ञस्य पुष्कलं फलमश्नुते ॥ ४० ॥ एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ श्रुतमात्रेण येनैव मुच्यंते पातकैर्नराः ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे इंद्रतीर्थमाहात्म्यवर्णननामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कद्रोडीतीर्थमुत्तमम् ॥ रेवायाश्चोत्तरे कूले सर्वपापविनाशनम् ॥ १ ॥ हितार्थं सर्वभूतानामृषिभिः स्थापितं पुरा ॥ तपसा तु समुद्धृत्य नर्मदायां महांभसि ॥ २ ॥ स्नात्वा तु कपिलातीर्थे कपिलां यः प्रयच्छति ॥ श्रुत्वा चाऽऽख्यानकं दिव्यं ब्राह्मणाञ्छ्रणु यत्फलम् ॥ ३ ॥ सर्वेषामेव दानानां कपिलादानमुत्तमम् ॥ ब्राह्मणान्वेषितं पूर्वमृषिदेवसमागमे ॥ ४ ॥ सद्यः प्रसूतां कपिलां शोभनां यः प्रयच्छति ॥ सोपवासो जितक्रोधस्तस्य पुण्यफलं शृणु ॥ ५ ॥ ससमुद्रगुहा तेन सशैलवनकानना ॥ दत्ता चैव महाबाहो पृथिवी नात्र संशयः ॥ ६ ॥ वाचिकं मानसं पापं कर्मणा यत्पुरा कृतम् ॥ नश्यते कपिलां दत्त्वा सप्तजन्मार्जितं नृप ॥ ७ ॥ भूमिदानं धनं धान्यं हस्त्यश्वकनकादिकम् ॥ कपिलादानस्यैकस्य कलां नार्हंति षोडशीम् ॥ ८ ॥ तत्र तीर्थे नरः स्नात्वा कपिलां यः प्रयच्छति ॥ मृतो विष्णुपुरं याति गीयमानोऽप्सरोगणैः ॥ ९ ॥ यावंति तस्या रोमाणि सवत्सायास्तु भारत ॥ तावद्वर्षसहस्राणि स स्वर्गे क्रीडते चिरम् ॥ १० ॥ ततोऽवकीर्णकालेन त्विह मानुष्यतां गतः ॥ धनधान्यसमोपेतो जायते विपुले कुले ॥ ११ ॥ वेदविद्याव्रतस्नातः सर्वशास्त्रविशारदः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ १२ ॥ एतत्ते सर्वमाख्यातं कद्रोडीतीर्थमुत्तमम् ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कद्रोडीतीर्थमाहात्म्यवर्णननामैकोनविंशत्युत्तरशततमोऽध्यायः ॥११९॥ ॥श्री॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कन्धुकेश्वरमुत्तमम्॥ हिरण्यकशिपुर्दैत्यो दानवो बलदर्पितः॥१॥अवध्यः सर्वलोकानां त्रिषु लोकेषु विश्रुतः ॥ तस्य पुत्रो महातेजाः प्रह्लादो नाम नामतः ॥२॥ विष्णुप्रसादाद्भक्त्या च तस्य राज्ये प्रतिष्ठितः ॥ विरोचनस्तस्य सुतस्तस्याऽपि बलिरेव च ॥ ३ ॥ बलिपुत्रोऽभवद्बाणस्तस्मादपि च शंवरः ॥ शंबरस्याऽन्वये जातः कंधुर्नाम महासुरः ॥ ४ ॥ ज्ञात्वा विष्णुमयं घोरं महद्भयमुपस्थितम् ॥ दानवानां विनाशाय नाऽन्यो हेतुः कदाचन ॥ ५ ॥ स त्यक्त्वा पुत्रदारांश्च सुहृद्बंधुपरिग्रहान् ॥ चचार मौनमास्थाय तपः कंधुर्महामतिः ॥ ६ ॥ अक्षसूत्रकरो भूत्वा दंडी मुंडी च मेखली ॥ शाकवायुकभक्षश्च वल्क

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लाजिनसंवृतः ॥ ७ ॥ स्नात्वा नित्यं धृतिपरो नर्मदाजलमाश्रितः ॥ पूजयंस्तु महादेवमर्बुदं वर्षसंख्यया ॥ ८ ॥ ततस्तुतोष भगवान्देवदेवो महेश्वरः ॥ उवाच दानवं काले मेघगंभीरया गिरा ॥ ९ ॥ भोभोः कंबो महाभाग तुष्टोऽहं तव सुव्रत ॥ इष्टं व्रतानां परमं मौनं सर्वार्थसाधनम् ॥ १० ॥ चरितं च त्वया लोके देवदानवदुश्चरम् ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि रोचते ॥ ११ ॥ ॥ कंबुरुवाच ॥ ॥ यदि प्रसन्नो देवेश यदि देयो वरो मम ॥ अक्षय्यश्चाव्ययश्चैव स्वेच्छया विचराम्यहम् ॥ १२ ॥ दैत्यदानवसंघानां संयुगेष्वपलायिता ॥ भयं चान्यत्र विद्येत मुक्त्वा देवं गदाधरम् ॥ १३ ॥ तस्माद्देहं संयुगे साध्यो येनोपायेन शंकर ॥ भवामि न सदा कालं तं वदस्व वरं मम ॥ १४ ॥ ॥ ईश्वर उवाच ॥ ॥ मम सन्निहितो यत्र त्वं भविष्यसि दानव ॥ तत्र विष्णुभयं नास्ति वसात्रावितज्वरः ॥ १५ ॥ तस्य देवाधिदेवस्य वेदगर्भस्य संयुगे ॥ शंखचक्रधरस्येशा नाऽहं सर्वे सुरासुराः ॥ १६ ॥ किं पुनर्यो द्विपत्येनं लोकालोकप्रभुं हरिम् ॥ स सुखी वर्त्तते कालं न निमेषं मतं मम ॥ १७ ॥ तस्मात्त्वं परया भक्त्या सर्वभूतहिते रतः ॥ वसिष्यसि चिरं कालमित्युक्त्वाऽदर्शनं गतः ॥ १८ ॥ गते चाऽदर्शनं देवे तत्र तीर्थे महामतिः ॥ स्थापयामास देवेशं शिवं शांतमनामयम् ॥ १९ ॥ तस्मिंस्तीर्थे महादेवं स्थापयित्वा दिवं गतः ॥ तदाप्रभृति तत्पार्थं कंबुतीर्थमिति श्रुतम् ॥ विख्यातं सर्वलोकेषु महापातकनाशनम् ॥ २० ॥ कंबुतीर्थे नरः स्नात्वा विधिनाऽभ्यर्च्य भास्करम् ॥ ऋग्यजुःसामभंत्रैश्च स्तूयमानो नृपोत्तम ॥ २१ ॥ तस्य पुण्यं समुद्दिष्टं ब्राह्मणैर्वेदपारगैः ॥ तत्सर्वं तु शृणुष्वाद्य मत्तेव गदतो नृप ॥ २२ ॥ ऋग्यजुःसामगीतेषु सांगोपांगेषु यत्फलम् ॥ तत्फलं समवाप्नोति गायत्रीमात्रमंत्रवित् ॥ २३ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ पूजयेद्देवमीशानं सोऽग्निष्टोमफलं लभेत् ॥ २४ ॥ अकामो वा सकामो वा तत्र तीर्थे कलेवरम् ॥ यस्त्यजेन्नात्र संदेहो रुद्रलोकं स गच्छति ॥ २५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे कंबुकेश्वरतीर्थमाहात्म्यवर्णनंनामविंशत्युत्तरशततमोऽध्यायः ॥ १२० ॥ ॥ ॐ ॥ ॥ ॥

मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चंद्रहासमतः परम् ॥ यत्र सिद्धिं परां प्राप्तः सोमराजः सुरोत्तमः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धिं परां प्राप्तः सोमनाथो जगत्पतिः ॥ तत्सर्वं श्रोतुमिच्छामि कथयस्व ममाऽनघ ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा शप्तो मुनींद्रेण दक्षेण किल भारत ॥ असेवनाद्धि दाराणां क्षयरोगी भविष्यसि ॥ ३ ॥ उद्वाहितानां पत्नीनां ये न कुर्वंति सेवनम् ॥ या निष्टा जायते नृणां तां शृणुष्व नराधिप ॥ ४ ॥ ऋतावृतौ हि नारीणां सेवनाज्जायते सुतः ॥ सुतात्स्वर्गश्च मोक्षश्च इत्येवं श्रुतिभाषितम् ॥ ५ ॥ तत्कालोचितधर्मेण वंचितो गौरवं पतेत् ॥ तस्यास्तद्रुधिरं पापः पिबते कालमीप्सितम् ॥ ६ ॥ ततोऽवतीर्णः कालेन यांयां योनिं प्रयास्यति ॥ तस्यांतस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ७ ॥ नारीणां तु सदा कामोऽभ्यधिकः परिवर्त्तते ॥ विशेषेण ऋतौ काले पीड्यते कामसायकैः ॥ ८ ॥ परिभूता हि ता भर्त्रा ध्यायंतेऽन्यं पतिं स्त्रियः ॥ ततः पुत्रः समुत्पन्नो ह्यटते कुलमुत्तमम् ॥ ९ ॥ स्वर्गस्थास्तेन पितरः पूर्वजास्ते पितामहाः ॥ पतंति जातमात्रेण कुलटस्तेन चोच्यते ॥ १० ॥ तेन कर्मविपाकेन क्षयरोग्यभवच्छशी ॥ त्यक्त्वा लोकं सुरेंद्राणां मर्त्यलोकमुपागतः ॥ ११ ॥ ततस्तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ भ्रमन्वे नर्मदां प्राप्तः सर्वपापप्रणाशनीम् ॥ १२ ॥ उपवासं च दानानि व्रतानि नियमांस्तथा ॥ चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ १३ ॥ स्नापयित्वा महादेवं सर्वपातकनाशनम् ॥ जगाम प्रभया पूर्णः स च लोकमनुत्तमम् ॥ १४ ॥ येनैव स्थापितो देवः पूज्यते वर्षसंख्यया ॥ तावद्वर्षसहस्राणि रुद्रलोके स पूज्यते ॥ १५ ॥ तेन देवान्विधानोक्तान्स्थापयंति नरा भुवि ॥ अक्षयं चाव्ययं यस्मात्कालं भुंजंति मानवाः ॥ १६ ॥ सोमतीर्थे नरः स्नात्वा पूजयेद्देवमीश्वरम् ॥ स याजते नरो लोकं सोमवत्प्रियदर्शनः ॥ १७ ॥ चंद्रहासे तु यो गत्वा ग्रहणं चंद्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १८ ॥ तत्र स्नानं च दानं च चंद्रहासे शुभाऽशुभम् ॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयम् ॥ १९ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ चन्द्रहासे तु ये स्नात्वा पश्यंति ग्रहणं नराः ॥ २० ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ स्नानमात्रेण राजेंद्र तत्र तीर्थे प्रणश्यति ॥ २१ ॥ बहवस्तं न जानंति महामोहसमन्विताः ॥ देहस्थमिव सर्वेषां परमानंदरूपिणम् ॥ २२ ॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलम् ॥ तत्समग्रमवाप्नोति चन्द्रहासे न संशयः ॥ २३ ॥ संक्रांतौ च व्यतीपाते अयने विषुवे तथा ॥ चन्द्रहासे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ २४ ॥ ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम् ॥ चंद्रहासं न जानंति ये रेवायां व्यवस्थितम् ॥ २५ ॥ चंद्रहासे तु यः कश्चित्संन्यासं कुरुते द्विजः ॥ अनिवर्त्तिका गतिस्तस्य सोमलोकान्न संशयः ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सोमतीर्थमाहात्म्यवर्णनंनामैकविंशत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल कोहनस्तेति विश्रुतम् ॥ सर्वपापहरं पुण्यं तीर्थं मृत्युविनाशनम् ॥ १ ॥ पुरा तत्र द्विजः कश्चिद्वेदवेदांगपारगः ॥ पत्नीपुत्रसुहृद्वर्गैः स्वकर्मनिरतोऽवसत् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ब्राह्मणस्य तु यत्कर्म उत्पत्तिः क्षत्रियस्य तु ॥ वैश्यस्याऽपि च शूद्रस्य तत्सर्वं कथयस्व मे ॥ ३ ॥ धर्मस्याऽर्थस्य कामस्य मोक्षस्य च परं विधिम् ॥ निखिलं ज्ञातुमिच्छामि नान्यो वेत्ता मतिर्मम ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ उत्पत्तिकारणं ब्रह्मा देवदेवः प्रकीर्त्तितः ॥ प्रथमं सर्वभूतानां चराचरजगद्गुरुः ॥ ५ ॥ द्विजातयो मुखाज्जाताः क्षत्रिया बाहुयंत्रतः ॥ ऊरुप्रदेशाद्वैश्यास्तु शूद्राः पादेभ्योऽभवन् ॥ ६ ॥ ततस्त्वन्ये पृथग्वर्णाः पृथग्धर्मान्समाचरन् ॥ पर्यायेण समुत्पन्ना ह्यनुलोमविलोमतः ॥ ७ ॥ तेषां धर्मं प्रवक्ष्यामि श्रुतिस्मृत्यर्थचोदितम् ॥ येन सम्यक्कृतेनैव सर्वे यांति परां गतिम् ॥ ८ ॥ गतिर्ध्यानं विना भक्तैर्ब्राह्मणैः प्राप्यते नृप ॥ अध्यापयन्यतो वेदान्वेदं वाऽपि यथाविधि ॥ ९ ॥ कुलजां रूपसंपन्नां सर्वलक्षणलक्षिताम् ॥ उद्वाहयेत्ततः पत्नीं गुरुणाऽनुमते तदा ॥ १० ॥ ततः स्मार्त्तं विवाहाग्निं श्रौतं वा पूजयेत्क्रमात् ॥ प्रतिग्रहधनो भूत्वा दंभलोभविवर्जितः ॥ ११ ॥ पंचयज्ञविधानानि कारयेद्वै यथाविधि ॥ वनं गच्छेत्ततः पश्चात्तृतीयाश्रमसेवनात् ॥ १२ ॥ पुत्रेषु भार्यां निक्षिप्य सर्वसंगविवर्जितः ॥ इष्टाल्लोकानवाप्नोति न चेह जायते पुनः ॥ १३ ॥ क्षत्रियस्तु स्थितो राज्ये पालयित्वा वसुन्धराम् ॥ शस्त्रधर्ममनाश्चैव प्राप्नोति परमां गतिम् ॥ १४ ॥ वैश्यधर्मो न संदेहः कृषिगोरक्षणे रतः ॥ सत्यशौचसमो देवो गम्यते स्वर्गमुत्तमम् ॥ १५ ॥ न शूद्रस्य पृथग्धर्मो विहितः परमेष्ठिना ॥ न मन्त्रो न च संस्कारो न विद्यापरिसेवनम् ॥ १६ ॥ न शब्दविज्ञानसमो देवताभ्यर्चनानि च ॥ यथा जातेन सततं वर्त्तितव्यमहर्निशम् ॥ १७ ॥ स धर्मः सर्ववर्णानां पुरा सृष्टः स्वयंभुवा ॥ मन्त्रसंस्कारसंपन्नो वर्णो द्विजातयः ॥ १८ ॥ तेषां मतमनादृत्य यदि वर्त्तेत कामतः ॥ स मृतो जायते श्वा वै गतिरूर्ध्वा न विद्यते ॥ १९ ॥ न तेषां प्रेषणं नित्यं तेषां मतमनुस्मरन् ॥ यशोभागी स्वधर्मस्थः स्वर्गभागी स जायते ॥ २० ॥ एवं गुणगणाकीर्णोऽवसद्विप्रः स भारत ॥ हनुस्वतिहन

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वेति शृणोति वाक्यमीदृशम् ॥ २१ ॥ ततो निरीक्षते चोर्ध्वमधश्चैव दिशो दश ॥ वेपमानः स भीतश्च प्रस्खलंश्च पदेपदे ॥ २२ ॥ शृंखलायुध
हस्तैश्च पार्श्वैश्चैव सुदारुणैः ॥ वेष्टितं महिषारूढं नरं पश्यति सन्मुखम् ॥ २३ ॥ कृष्णांजनचयप्रख्यं कृष्णांबरविभूषितम् ॥ रक्ताक्षमायतभुजं
सर्वलक्षणलक्षितम् ॥ २४ ॥ दृष्ट्वा तं तु समायांतं निरीक्ष्यात्मानमात्मना ॥ जपञ्जाप्यं च परमं शतरुद्रीयसंस्तवम् ॥ २५ ॥ ततः प्रोवाच
भगवान्यमः संयमनो महान् ॥ शृणु वाक्यमतो ब्रह्मन्यमोऽहं सर्वजन्तुषु ॥ २६ ॥ संहरस्व महाभाग रुद्रजाप्यं सुदुर्भिदम् ॥ येनाहं काल
पाशैस्त्वां संयमामि गतव्यथः ॥ २७ ॥ तच्छ्रुत्वा निर्गुरं वाक्यं यमस्य मुखनिर्गतम् ॥ महाभयसमोपेतो ब्राह्मणः प्रपलायितः ॥ २८ ॥
तस्य मार्गे गताः सर्वे यमेन सह किंकराः ॥ तिष्ठतिष्ठेति तं विप्रमूचुस्ते सोऽप्यधावत ॥ २९ ॥ त्वरमाणः परिश्रांतो हा हतोऽहं दुरात्मभिः ॥
रक्षरक्ष महादेव शरणागतवत्सल ॥ ३० ॥ एवमुक्ताऽपतद्भूमौ लिंगमालिंग्य भारत ॥ गतसत्त्वः स विप्रेंद्रः समाश्रित्य सुरेश्वरम् ॥ ३१ ॥
तं दृष्ट्वा पतितं भूमौ देवदेवो महेश्वरः ॥ को हनिष्यति माभैस्त्वं हुंकारमकरोत्तदा ॥ ३२ ॥ तेन ते किंकराः सर्वे यमेन सह भारत ॥ हुं
कारेण गताः सर्वे मेघा वातहता यथा ॥ ३३ ॥ तदाप्रभृति तत्तीर्थं कोहनस्यंति विश्रुतम् ॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमम् ॥ ३४ ॥ तत्र
तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अग्निष्टोमस्य यज्ञस्य फलमाप्नोत्यनुत्तमम् ॥ ३५ ॥ तत्र तीर्थे तु राजेंद्र प्राणत्यागं करोति यः ॥ न
पश्यति यमं देवमित्येवं शंकरोऽब्रवीत् ॥ ३६ ॥ अग्निप्रवेशं यः कुर्याज्जले वा नृपसत्तम ॥ अग्निलोके वसेत्तावद्यावत्कल्पशतत्रयम् ॥ ३७ ॥
एवं वरुणलोकेऽपि वसित्वा कालमीप्सितम् ॥ इह लोकमनुप्राप्तो महाधनपतिर्भवेत् ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोहनतीर्थमाहात्म्यवर्णनंनाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ ॥ ७ ॥ ॥
॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र कर्मदीतीर्थमुत्तमम् ॥ यत्र तिष्ठति विघ्नेशो गणनाथो महाबलः ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा
चतुर्थ्यां वा ह्युपोषितः ॥ विघ्नं न विद्यते तस्य सप्तजन्मनि भारत ॥ २ ॥ तत्र तीर्थे हि यत्किंचिद्दीयते नृपसत्तम ॥ तदक्षयफलं सर्वं जायते नाऽत्र
संशयः ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कर्मदेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयो
विंशत्युत्तरशततमोऽध्यायः ॥ १२३ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल नर्मदेश्वरमुत्तमम् ॥ तत्र तीर्थे
नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ १ ॥ अग्निप्रवेशश्च जलेऽथवा मृत्युरनाशके ॥ अनिवर्त्तिका गतिस्तस्य यथा मे शंकरोऽब्रवीत् ॥ २ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे नर्मदेश्वरतीर्थमाहात्म्यवर्णनं नाम चतुर्विंशत्युत्तरशत
तमोऽध्यायः॥ १२४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल रवितीर्थमनुत्तमम् ॥ यत्र देवः सहस्रांशुस्तपस्तप्त्वा
दिवं गतः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं देवो जगद्धाता सर्वदेवनमस्कृतः ॥ तपस्तप्तवान्देवेशस्तापसो भास्करो रविः ॥२॥ आराध्य सर्वभू
तानां सर्वदेवैश्च पूजितः ॥ प्रत्यक्षो दृश्यते लोके सृष्टिसंहारकारकः ॥३॥ आदित्यत्वं कथं प्राप्तः कथं भास्कर उच्यते ॥ सर्वमेतत्समासेन कथयस्व
ममाऽनघ ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ महाप्रश्नो महाराज यस्त्वया परिपृच्छितः ॥ तत्सर्वं संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवम् ॥ ५ ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ६ ॥ ततस्तेजश्च दिव्यं च ननर्पिंडमनुत्तमम् ॥ आकाशात्तु यथैवो
ल्कासृष्टिहेतोरधोमुखी ॥७॥ तत्तेजसोंऽतः पुरुषः संजातः सर्वभूषितः ॥ स शिरोऽपाणिपादश्च येन सर्वमिदं ततम्॥ ८ ॥ तस्योत्पन्नस्य भूतस्य तेजो
रूपस्य भारत ॥ पश्चात्प्रजापतिर्भूयः कालः कालांतरेण वै ॥ ९ ॥ अग्निर्जातः स भूतानां मनुष्यासुररक्षसाम् ॥ सर्वदेवादिदेवश्च आदित्यस्तेन
चोच्यते ॥१०॥ आदौ तस्य नमस्कारोन्येषां च तदनंतरम् ॥ क्रियते देवतैः सर्वैस्तेन सर्वेमहर्षिभिः ॥११॥ तिस्रः संध्यास्त्रयो देवाः सान्निध्याः
सूर्यमण्डले ॥ नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः ॥ १२ ॥ न दिवा न भवेद्रात्रिः षण्मासा दक्षिणायनम् ॥ अयनं चोत्तरं चाऽपि भास्करेण
विना नृप ॥ १३ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ न वर्त्तते विना सूर्यं तेन पूज्यतमो रविः ॥ १४ ॥ शब्दगाः श्रुतिमुख्याश्च
ब्रह्मविष्णुमहेश्वराः ॥ प्रत्यक्षो भगवान्देवो दृश्यते लोकपावनः ॥ १५ ॥ उत्पत्तिः प्रलयस्थानं निधानं बीजमव्ययम् ॥ हेतुरेको जगन्नाथो नाऽन्यो
विद्येत भास्करात् ॥ १६ ॥ एवमात्मभवं कृत्वा जगत्स्थावरजंगमम् ॥ लोकानां तु हितार्थाय स्थापयेद्धर्मपद्धतिम् ॥ १७ ॥ नर्मदातटमाश्रित्य
स्थापयित्वाऽमनस्तनुम् ॥ सहस्रांशुं निधिं धात्रां जगामाऽऽकाशमव्ययम् ॥ १८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ सहस्रकिरणं
देवं नाममन्त्रविधानतः ॥ १९ ॥ तेन तप्तं हुतं तेन तेन सर्वमनुष्ठितम् ॥ तेन सम्यग्विधानेन संप्राप्तं परमं पदम् ॥ २० ॥ ते धन्यास्ते महात्मान
स्तेषां जन्म सुजीवितम् ॥ स्नात्वा ये नर्मदातोये देवं पश्यंति भास्करम् ॥ २१ ॥ तथा देवस्य राजेंद्र ये कुर्वंति प्रदक्षिणम् ॥ अनन्यभक्त्या
सततं त्रिरेकरसान्विताः ॥ २२ ॥ तेन पूतशरीरास्ते मंत्रेण गतपातकाः ॥ यत्पुण्यं च भवेत्तेषां तदिहैकमनाः शृणु ॥ २३ ॥ ससमुद्रगुहा तेन
सशैलवनकानना ॥ प्रदक्षिणीकृता सर्वा पृथिवी नाऽत्र संशयः ॥ २४ ॥ मंत्रमूलमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ तेन मंत्रविहीनं तु कार्यं
लोके न सिद्ध्यति ॥ २५ ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ कार्यार्थं नैव सिद्ध्येत तथा कर्म ह्यमंत्रकम् ॥ २६ ॥ यथा
भस्महुतं पार्थ यथा तोयविवर्जितम् ॥ निष्फलं जायते दानं तथा मंत्रविवर्जितम् ॥ २७ ॥ काष्ठपाषाणलोष्टेषु मृन्मयेषु विशेषतः ॥ मं
त्रेण लोके पूजां तु कुर्वन्ति न ह्यमंत्रतः ॥ २८ ॥ द्वादशाद्वान्नमस्काराद्धत्त्या यल्लभते फलम् ॥ मंत्रयुक्तनमस्कारात्समग्रं तल्लभते फलम् ॥ २९ ॥
संक्रांतौ च व्यतीपाते अयने विषुवे तथा ॥ नर्मदाया जले स्नात्वा यस्तु पूजयते रविम् ॥ ३० ॥ द्वादशाब्देन यात्पापमज्ञानज्ञानसंचितम् ॥
तत्क्षणान्नश्यते सर्वं वह्निना तु तृणं यथा ॥ ३१ ॥ चन्द्रसूर्यग्रहे स्नात्वा सोपवासो जितेंद्रियः ॥ तत्रादित्यमुखं दृष्ट्वा मुच्यते सर्वकिल्बिषैः ॥
॥ ३२ ॥ माघमासे तु संप्राप्ते सप्तम्यां नृपसत्तम ॥ सोपवासो जितक्रोध उषित्वा सूर्यमंदिरे ॥ ३३ ॥ प्रातः स्नात्वा विधानेन ददात्यर्घं
दिवाकरे ॥ विधिना मंत्रयुक्तेन स लभेत्पुण्यमुत्तमम् ॥ ३४ ॥ पितृदेवमनुष्याणां कृत्वा ह्युदकतर्पणम् ॥ मंदिरे देवदेवस्य ततः पूजां समाचरेत्
॥ ३५ ॥ गंधैः पुष्पैस्तथा धूपैर्दीपनैवेद्यशोभनैः ॥ पूजयित्वा जगन्नाथं ततो मंत्रमुदीरयेत् ॥ ३६ ॥ विष्णुः शक्रो यमो धाता मित्रोऽथ वरुण
स्तथा ॥ विवस्वान्सविता पूषा चंडांशुर्भर्ग एव च ॥ ३७ ॥ इति द्वादशनामानि जपन्कृत्वा प्रदक्षिणाम् ॥ यत्फलं लभते पार्थ तदिहैकमनाः
शृणु ॥ ३८ ॥ दरिद्रो व्याधितो मूको बधिरो जड एव च ॥ न भवेत्सप्त जन्मानि इत्येवं शंकरोऽब्रवीत् ॥ ३९ ॥ एवं ज्ञात्वा विधानेन जपन्मंत्रं
विचक्षणः ॥ आराधयेद्रविं भक्त्या य इच्छेत्पुण्यमुत्तमम् ॥ ४० ॥ मंत्रहीनां तु यः कुर्याद्भक्तिं देवस्य भारत ॥ स विडंबति चात्मानं पशु
कीटपतंगवत् ॥ ४१ ॥ तत्र तीर्थे तु यः कश्चित्त्यजते देहमुत्तमम् ॥ स गतस्तत्र देवेन्द्र पूज्यमानो महर्षिभिः ॥४२॥ स्वेच्छया सुचिरं कालमिह

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri Foundation USA

लोके नृपो भवेत् ॥ ४३ ॥ पुत्रपौत्रसमायुक्तो हस्त्यश्वरथसंकुलः ॥ दासीदासशतोपेतो जायते विपुले कुले ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे रवितीर्थमाहात्म्यवर्णनंनाम पञ्चविंशत्युत्तरशततमोऽध्यायः ॥ १२५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र परं तीर्थमयोनिजम् ॥ स्नातमात्रो नरस्तत्र न पश्येद्योनिसंकटम् ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा पूजयेद्देवमीश्वरम् ॥ अयोनिजो महादेव यथा त्वं परमेश्वर ॥ २ ॥ तथा मोचय मां देव संभवाद्योनिसंकटात् ॥ गंधपुष्पादिधूपैश्च स मुच्येत्सर्वपातकैः ॥ ३ ॥ तस्य देवस्य यो भक्त्या कुरुते लिंगपूरणम् ॥ स वसेद्देवदेवस्य यावत्सिक्थस्य संख्यया ॥ ४ ॥ अयोनिजे महादेवं स्नापयेद्गंधवारिणा ॥ मधुक्षारण दध्ना वा स लभेद्विपुलां श्रियम् ॥ ५ ॥ अष्टम्यां च सिते पक्षे असितां वा चतुर्दशीम् ॥ पूजयित्वा महादेवं प्रीणयेद्गीतवाद्यकैः ॥ ६ ॥ वसेत्स च शिवे लोके ये कुर्वंति मनोहरम् ॥ ते वसंति शिवे लोके यावदाभूतसंप्लवम् ॥ ७ ॥ तस्य देवस्य भक्त्या तु यः करोति प्रदक्षिणाम् ॥ विज्ञापयंश्च सततं मंत्रेणानेन भारत ॥ ८ ॥ तस्य यत्फलमुद्दिष्टं पारंपर्येण मानवैः ॥ सकाशाद्देवदेवस्य तच्छृणुष्व समाधिना ॥ ९ ॥ अयोनिजो महादेव यथा त्वं परमेश्वर ॥ तथा मोचय मां शर्व संभवाद्योनिसंकटात् ॥ १० ॥ किं तस्य बहुभिर्मंत्रैः कंठशोषणतत्परैः ॥ येनों नमः शिवायेति प्रोक्तं देवस्य सन्निधौ ॥ ११ ॥ तेनाऽधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥ येनोंनमः शिवायेति मंत्राभ्यासः स्थिरीकृतः ॥ १२ ॥ न तत्फलमवाप्नोति सर्वदेवेषु वै द्विजः ॥ यत्फलं समवाप्नोति षडक्षर उदीरणात् ॥ १३ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेच्छिवयोगिनम् ॥ द्विजानामयुतं साग्रं स लभेत्फलमुत्तमम् ॥ १४ ॥ अथवा भक्तियुक्तस्तु तेषां दांते जितेंद्रिये ॥ संस्कृत्य ददते भिक्षां फलं तस्य ततोधिकम् ॥ १५ ॥ यतिहस्ते जलं दद्याद्भिक्षां दत्त्वा पुनर्जलम् ॥ सा भिक्षा मरुणा तुल्या तज्जलं सागरोपमम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अयोनिप्रभवतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र अग्नितीर्थमनुत्तमम् ॥ तत्र स्नात्वा तु पक्षादौ मुच्यते सर्वकिल्बिषैः ॥ १ ॥ तत्र तीर्थे तु यः कन्यां दद्यात्स्वयमलंकृताम् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नरोत्तम ॥ २ ॥ अग्निष्टोमातिरात्राभ्यां शतं शतगुणीकृतम् ॥ प्राप्नोति पुरुषो दत्त्वा यथाशक्त्या ह्यलंकृताम् ॥ ३ ॥ तस्याः पुत्रप्रपौत्राणां या भवेद्रोमसंगतिः ॥ स याति तेन मानेन शिवलोके परां गतिम् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे अग्नितीर्थमाहात्म्यवर्णनंनाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र भृकुटेश्वरमुत्तमम् ॥ यत्र सिद्धो महाभागो भृगुः परमकोपनः ॥ १ ॥ तेन वर्षशतं साग्रं तपश्चीर्णं पुराऽनघ ॥ पुत्रार्थं वरयामास पुत्रं पुत्रवतां वरः ॥ २ ॥ वरो दत्तो महाभाग देवेनांधकघातिना ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ ३ ॥ अग्निष्टोमस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ भृकुटेशं तु यः कश्चिद्घृतेन मधुना सह ॥ ४ ॥ पुत्रार्थी स्नापयेद्भक्त्या स लभेत्पुत्रमीप्सितम् ॥ तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय कांचनम् ॥ ५ ॥ गोदानं वा महीं वाऽपि तस्य पुण्यफलं शृणु ॥ ६ ॥ ससमुद्रगुहा तेन सशैलवनकानना ॥ दत्ता पृथ्वी न संदेहस्तेन सर्वा नृपोत्तम ॥ ७ ॥ तेन दानेन स स्वर्गे क्रीडयित्वा यथासुखम् ॥ मर्त्ये भवति राजेंद्रो ब्राह्मणो वा सुपूजितः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे भृकुटेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टाविंशत्युत्तरशततमोऽध्यायः ॥ १२८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल ब्रह्मतीर्थमनुत्तमम् ॥ अन्येषां चैव तीर्थानां परात्परतरं महत् ॥ १ ॥ तत्र तीर्थे सुरश्रेष्ठो ब्रह्मा लोकपितामहः ॥ चतुर्णामपि वर्णानां नर्मदातटमाश्रितः ॥ २ ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ तत्क्षालयति देवेशो दर्शनादेव पातकम् ॥ ३ ॥ श्रुतिस्मृत्युदितान्येव तत्र स्नात्वा द्विजर्षभाः ॥ प्रायश्चित्तानि कुर्वंति तेषां वासस्त्रिविष्टपे ॥ ४ ॥ ये पुनः शास्त्रमुत्सृज्य कामलोभप्रपीडिताः ॥ प्रायश्चित्तं वदिष्यंति ते वै निरयगामिनः ॥ ५ ॥ स्नात्वाऽदौ पातकी ब्रह्मन्नत्वा तु कीर्त्तयेदघम् ॥ तस्य तन्नश्यते क्षिप्रं तमः सूर्योदये यथा ॥ ६ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ अग्निष्टोमस्य यज्ञस्य स लभेत्फलमुत्तमम् ॥ ७ ॥ तत्र तीर्थे तु यद्दानं ब्रह्मोद्दिश्य प्रयच्छति ॥ तदक्षयफलं सर्वमित्येवं शंकरोऽब्रवीत् ॥ ८ ॥ गायत्रीसारमात्रोऽपि तत्र यः क्रियते जपः ॥ ऋग्यजुःसाममहितः स भवेन्नात्र संशयः ॥ ९ ॥ तत्र तीर्थे तु यो भक्त्या त्यजेद्देहं सुदुस्त्यजम् ॥ अनिवर्त्तिका गतिस्तस्य ब्रह्मलोकान्न संशयः ॥ १० ॥ यावदस्थीनि तिष्ठंति ब्रह्मतीर्थे च देहिनाम् ॥ तावद्वर्षसहस्राणि देवलोके महीयते ॥ ११ ॥ अवतीर्णस्ततो लोके ब्रह्मज्ञो जायते कुले ॥ उत्तमः सर्ववर्णानां देवानामिव देवता ॥ १२ ॥ विद्यास्थानानि सर्वाणि वेत्ति वेदांगपारगः ॥ जायते पूजितो लोके राजभिः स न संशयः ॥ १३ ॥ पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं ब्रह्मतीर्थप्रभावतः ॥ १४ ॥ एतत्पुण्यं पापहरं तीर्थं ज्ञानवतां वरम् ॥ ये पश्यंति महात्मानो ह्यमृतत्वं प्रयांति ते ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे ब्रह्मतीर्थमाहात्म्यवर्णनंनामैकोनत्रिंशदधिकशततमोऽध्यायः ॥ ॥ १२९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले देवतीर्थमनुत्तमम् ॥ तत्र देवैः समागत्य तोषितः परमेश्वरः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा कामक्रोधविवर्जितः ॥ स लभेन्नात्र संदेहो गोसहस्रफलं ध्रुवम् ॥ २ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनंनाम त्रिंदशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले नागतीर्थमनुत्तमम् ॥ यत्र सिद्धा महानागा भये जाते ततो नृप ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ महाभयानां लोकस्य नागानां द्विजसत्तम ॥ कथं जातं भयं तीव्रं येन ते तपसि स्थिताः ॥ २ ॥ भूतं भव्यं भविष्यच्च यत्पुरासुरमानवे ॥ तात ते विदितं सर्वं तेन मे कौतुकं महत् ॥ ३ ॥ मम संतापजं दुःखं दुर्योधनसमुद्भवम् ॥ तव वक्त्रांबुजौघेन प्लावितं निर्वृतिं गतम् ॥ ४ ॥ श्रुत्वा तव मुखोद्गीतां कथां पापप्रणाशनीम् ॥ भूयोभूयः स्मृतिर्जाता श्रवणे मम सुव्रत ॥ ५ ॥ न क्लेशत्वं द्विजे युक्तं न चान्यो जानते फलम् ॥ विद्यादानस्य महतः श्रावितस्य सुतस्य च ॥ ६ ॥ एवं ज्ञात्वा यथान्यायं यः प्रश्नः पृच्छितो मया ॥ कथा तु कथ्यतां विप्र दयां कृत्वा ममोपरि ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ यथायथा त्वं नृप भाषसे च तथा तथा मे सुखमेति भारती ॥ शैथिल्यभावाज्जरयाऽन्वितस्य त्वत्सौहृदं नश्यति नैव तात ॥ ८ ॥ कथयामियथावृत्तमितिहासं पुरातनम् ॥ कथितं पूर्वतो वृद्धैः पारंपर्येण भारत ॥ ९ ॥ द्वे भार्ये कश्यपस्याऽऽस्तां सर्वलोकेष्वनुत्तमे ॥ गरुत्मतो वै विनता सर्पाणां कद्रूरेव च ॥ १० ॥ अश्वसंदर्शनात्ताभ्यां कलिरूपं व्यवस्थितम् ॥ प्रभातकाले राजेंद्र भास्कराकारवर्चसम् ॥ ११ ॥ तं दृष्ट्वा विनता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रूपमश्वं सर्वत्र पांडुरम् ॥ अथ तां कद्रूमवोचत्सा पश्य पश्य वरानने ॥ १२ ॥ उच्चैःश्रवसः सादृश्यं पश्य सर्वत्र पांडुरम् ॥ धाव
मानमविश्रांतं जवेन पवनोपमम् ॥ १३ ॥ तं दृष्ट्वा सहसा यांतमीर्ष्याभावेन मोहिता ॥ कृष्णं मत्वा तथाऽजल्पत्तया सह नृपो
त्तम ॥ १४ ॥ विनते त्वं नृपा लोके नृशंसे कुलपांसनि ॥ कृष्णं चैनं वद श्वेतं नरकं यास्यसे परम् ॥ १५ ॥ ॥ विनतोवाच ॥
सत्याऽनृते तु वचने पणोऽयं ते ममैव तु ॥ सहस्रं वत्सरान्दासी भवेयं तव वेश्मनि ॥ १६ ॥ तथेति ते प्रतिज्ञाय रात्रौ गत्वा स्वकं गृहम् ॥ परि
त्यज्य उभे ते तु क्रोधमूर्छितमूर्छिते ॥ १७ ॥ बन्धुगर्वस्य गत्वा तु कथयामास तं पणम् ॥ कद्रूर्विनतया सार्द्धं यद्वृत्तं प्रमदालये ॥ १८ ॥
तच्छ्रुत्वा बांधवाः सर्वे कद्रूपुत्रास्तथैव च ॥ न मन्यंते हितं कार्यं कृतं मात्रा विगर्हितम् ॥ १९ ॥ अकृष्णः कृष्णतामेव कथं गच्छेद्धयोत्तमः ॥
दासत्वं प्राप्स्यसे त्वं हि पणेनाऽनेन सुव्रते ॥ २० ॥ ॥ कद्रूरुवाच ॥ ॥ भवेयं न यथादासी तत्कुरुध्वं हि सत्वरम् ॥ विशध्वं रोमकूपेषु
तस्याश्वस्य मतिर्मम ॥ २१ ॥ क्षणमात्रं कृते कार्ये सा दासी च भवेन्मम ॥ ततः स्वस्थोरगाः सर्वे भविष्यथ यथासुखम् ॥ २२ ॥ ॥ सर्पा
ऊचुः ॥ ॥ यथा त्वं जननी देवि पन्नगानां मता भुवि ॥ तथाऽपि सा विशेषेण वंचितव्या न कर्हिचित् ॥ २३ ॥ ॥ कद्रूरुवाच ॥ ॥ मम
वाक्यमकुर्वाणा ये केचिद्भुवि पन्नगाः ॥ हव्यवाहमुखं सर्वे ते यास्यंत्यविचारिताः ॥ २४ ॥ एतच्छ्रुत्वा तु वचनं घोरं मातृमुखोद्भवम् ॥ केचित्प्र
विष्टा रोमाणि तथाऽन्ये गिरिसंस्थिताः ॥ २५ ॥ केचित्प्रविष्टा जाह्नव्यामन्ये च तपसि स्थिताः ॥ २६ ॥ ततो वर्षसहस्रांते तुतोष परमेश्वरः ॥
महादेवो जगद्धाता ह्युवाच परया गिरा ॥ २७ ॥ भो भोः सर्पा निवर्त्तध्वं तपसोऽस्य महत्फलम् ॥ यमिच्छथ ददाम्यद्य नाऽत्र कार्या विचा
रणा ॥ २८ ॥ ॥ सर्पा ऊचुः ॥ ॥ कद्रूशापभयाद्भीता देवदेव महेश्वर ॥ तव पार्श्वे वसिष्यामो यावदाभूतसंप्लवम् ॥ २९ ॥ ॥ देवदेव
उवाच ॥ ॥ एकश्चायं महाबाहुर्वासुकिर्भुजगोत्तमः ॥ मम पार्श्वे वसेन्नित्यं सर्वेषां भयरक्षकः ॥ ३० ॥ अन्येषां चैव सर्पाणां भयं नाऽस्ति ममाऽ
ज्ञया ॥ आप्लुत्य नर्मदातोये भुजगास्ते च रक्षिताः ॥ ३१ ॥ नास्ति मृत्युभयं तेषां वसध्वं यत्र चेप्सितम् ॥ कद्रूशापभयं नाऽस्ति ह्येष मे
विस्तरः परः ॥ ३२ ॥ एवं दत्त्वा वरं तेषां देवदेवो महेश्वरः ॥ जगामाऽऽकाशमाविश्य कैलासं धरणीधरम् ॥ ३३ ॥ गते चादर्शनं देवे वासुकिप्र
मुखा नृप ॥ स्थापयित्वा तथा जग्मुर्देवदेवं महेश्वरम् ॥ ३४ ॥ तत्र तीर्थे तु यः कश्चित्पंचम्यामर्चयेच्छिवम् ॥ तस्य नागकुलान्यष्टौ न हिंसंति
कदाचन ॥ ३५ ॥ मृतः कालेन महता तत्र तीर्थे नरेश्वर ॥ शिवस्यानुचरो भूत्वा वसते कालमीप्सितम् ॥ ३६ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनं नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ ॥ छ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र उत्तरे नर्मदातटे ॥ सर्वपापहरं तीर्थं वाराहंनाम नामतः ॥ १ ॥ तत्र देवो जगद्धाता वाराहं
रूपमास्थितः ॥ स्थितो लोकहितार्थाय संसारार्णवतारकः ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्धरणीधरम् ॥ गंधमाल्यविशेषैश्च जयशब्दादिमं
गलैः ॥ ३ ॥ उपवासपरो भूत्वा द्वादश्यां नृपसत्तम ॥ वृषलाः पापकर्माणस्तथैवांधपिशाचिनः ॥ ४ ॥ आलापाद्गात्रसंपर्कान्निःश्वासात्सहभोज
नात् ॥ पापं संक्रमते यस्मात्तस्मात्तान्परिवर्जयेत् ॥ ५ ॥ ब्राह्मणान्पूजयेद्भक्त्या यथाशक्त्या यथाविधि ॥ रात्रौ जागरणं कार्यं कथायां तत्र
भारत ॥ ६ ॥ प्रभाते विमले स्नात्वा तत्र तीर्थे जगद्गुरुम् ॥ ये पश्यंति जितक्रोधास्ते मुक्ताः सर्वपातकैः ॥ ७ ॥ यथा तु दृष्ट्वा भुजगाः सुपर्णं
नश्यंति मुक्त्वा विषमुग्रतेजः ॥ नश्यंति पापानि तथैव शीघ्रं दृष्ट्वा मुखं शूकररूपिणस्तु ॥८॥ नभोगतं नश्यति चांधकारं दृष्ट्वा रविं देववरं तथैव ॥
नश्यंति पापानि सुदुस्तराणि दृष्ट्वा मुखं पार्थ धराधरस्य ॥ ९ ॥ किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने ॥ नमो नारायणायेति मंत्रः सर्वार्थसा
धकः ॥ १० ॥ एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ ११ ॥
ध्यायमाना महात्मानो रूपं नारायणं हरेः ॥ ये त्यजंति स्वकं देहं तत्र तीर्थे जितेंद्रियाः ॥ १२ ॥ ते गच्छन्त्यमलं स्थानं यत्सुरैरपि दुर्लभम् ॥
क्षराक्षरविनिर्मुक्तं तद्विष्णोः परमं पदम् ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवा
खण्डे आदिवाराहतीर्थमाहात्म्यवर्णनंनाम द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
ततो गच्छेन्महीपाल परं तीर्थचतुष्टयम् ॥ येषां दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ १ ॥ कौबेरं वारुणं याम्यं वायव्यं तु ततः परम् ॥
यत्र सिद्धा महाप्राज्ञा लोकपाला महाबलाः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमर्थं लोकपालैश्च तपश्चीर्णं पुराऽनघ ॥ नर्मदातटमाश्रित्य
ह्येतन्मे वक्तुमर्हसि ॥ ३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अधिष्ठानं समिच्छन्ति ह्यचलं निर्बले सति ॥ संसारे सर्वभूतानां तृणबिन्दुवदस्थिरे ॥
॥ ४ ॥ कदलीसारनिःसारे मृगतृष्णेव चंचले ॥ स्थावरे जंगमे सर्वे भूतग्रामे चतुर्विधे ॥ ५ ॥ धर्मो माता पिता धर्मो धर्मो बन्धुः सुहृत्तथा ॥
आधारः सर्वभूतानां त्रैलोक्ये सचराचरे ॥ ६ ॥ एवं ज्ञात्वा तु ते सर्वे लोकपालाः कृतक्षणाः ॥ तपस्ते चक्रुरतुलं मारुताहारतत्पराः ॥ ७ ॥ तत
स्तुष्टो महादेवः कृतस्यार्द्धे गते तदा ॥ अनुरूपेण राजेंद्र युगस्य परमेश्वरः॥ ८ ॥ वरेण च्छंदयामास लोकपालान्महाबलान् ॥ यो यमिच्छति कामं
वै तंतं तस्य ददाम्यहम् ॥ ९ ॥ एतच्छ्रुत्वा वचस्तस्य लोकपाला जगद्धिताः ॥ वरदं प्रार्थयामासुर्देवं वरमनुत्तमम् ॥ १० ॥ ॥ कुबेर उवाच ॥ ॥
यदि तुष्टो महादेव यदि देयो वरो मम ॥ यक्षाणामीश्वरश्चाहं भवामि धनदस्त्विति ॥ ११ ॥ ततः प्रोवाच देवेशं यमः संयमने रतः ॥ तत्र प्रधानो
भगवान्भवेयं सर्वजंतुषु ॥ १२ ॥ वरुणोऽनंतरं प्राह प्रणम्य तु महेश्वरम् ॥ क्रीडेयं वारुणे लोके यादोगणसमन्वितः ॥ १३ ॥ जगादाऽऽशु ततो
वायुः प्रणम्य तु महेश्वरम् ॥ व्यापकत्वं त्रिलोकेषु प्रार्थयामास भारत ॥ १४ ॥ तेषां यदीप्सितं काममुमया सह शंकरः ॥ सर्वेषां लोकपालानः
दत्त्वा चादर्शनं गतः ॥ १५ ॥ गते महेश्वरे देवे यथास्थानं तु ते स्थिताः ॥ स्थापना च कृता सर्वैः स्वनाम्नैव पृथक्पृथक् ॥ १६ ॥ कुबेरश्च
कुबेरेशं यमश्चैव यमेश्वरम् ॥ वरुणो वरुणेशं तु वातो वातेश्वरं नृप ॥१७॥ तर्प्पणं विदधुः सर्व्वे मंत्रैश्च विविधैः शुभैः ॥ सर्वे सर्वेश्वरं देव पूजयित्वा
यथाविधि ॥ १८ ॥ आह्वयामासुस्तान्विप्रान्सर्वे सर्वेश्वराइव ॥ क्षांतदांतांजितक्रोधान्सर्वभूताभयप्रदान् ॥ १९ ॥ वेदविद्याव्रतस्नातान्सर्वशास्त्रवि
शारदान् ॥ ऋग्यजुःसामसंयुक्तांस्तथाऽथर्व्वविभूषितान् ॥ २० ॥ चातुर्विध्यं तु सर्वेषां दानं दास्याम गृह्णत ॥ एवमुक्त्वा तु सर्व्वेषां विप्राणां दान
मुत्तमम् ॥ २१ ॥ तत्र स्थाने ददुस्तेषां भूमिदानमनुत्तमम् ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ २२ ॥ तावद्दानं तु युष्माकं परिपंथी
न कश्चन ॥ राजा वा राजतुल्यो वा लोकपालैरनुत्तमम् ॥ २३ ॥ दत्तं लोपयते मूढः श्रूयतां तस्य यो विधिः ॥ शोषयेद्धनदो वित्तं तस्य पापस्य
भारत ॥ २४ ॥ शरीरं वरुणो देवः संततीं श्वसनस्तथा ॥ आयुर्न्नयति तस्याऽऽशु यमः संयमनो महान् ॥ २५ ॥ निःशेषं भस्मसात्कृत्वा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हुतभुग्याति भारत ॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणेभ्यो युधिष्ठिर ॥ भक्तिः कार्या नृपैः सर्वैरिच्छद्भिः श्रेय आत्मनः ॥ २६ ॥ राजा वृक्षो ब्राह्मणास्तस्य मूलं भृत्याः पर्णा मंत्रिणस्तस्य शाखाः ॥ तस्मान्मूलं यत्नतो रक्षणीयं मूले गुप्ते नास्ति वृक्षस्य नाशः ॥ २७ ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आच्छेत्ता चाऽवमंता च तान्येव नरके वसेत् ॥ २८ ॥ स्वदत्तां परदत्तां वा पालनीया वसुन्धरा ॥ यस्ययस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २९ ॥ देवताज्ञामनुस्मृत्य राजानो येऽपि तां नृप ॥ पालयिष्यंति सततं तेषां वासस्त्रिविष्टपे ॥ ३० ॥ स्वदत्तां परदत्तां वा यत्नाद्रक्ष्या युधिष्ठिर ॥ मही महीक्षिता नित्यं दानाच्छ्रेयोऽनुपालनम् ॥ ३१ ॥ आयुर्यशो बलं वित्तं संततिश्चाऽक्षया नृप ॥ तेषां भविष्यते नूनं ये प्रजापालने रताः ॥ ३२ ॥ एवमुक्ता तु तान्सर्वांल्लोकपालान्द्विजोत्तमान् ॥ पूजयित्वा विधानेन प्रणिपत्य व्यसर्जयन् ॥ ३३ ॥ गतेषु विप्रमुख्येषु स्नात्वा हुतहुताशनाः ॥ लोकपालाः क्षुधाविष्टाः पर्यटन्भैक्षमात्मनः ॥ ३४ ॥ अस्थिचर्मावशेषांगाः कपालोद्धृतपाणयः ॥ अलब्ध ग्रासमर्द्धार्धं निर्ययुर्नगराद्बहिः ॥ ३५ ॥ शापं दत्त्वा तदा क्रोधाद्ब्राह्मणाय युधिष्ठिर ॥ दरिद्राः सततं मूर्खा भवेयुश्च ययुर्गृहान् ॥ ३६ ॥ तदाप्रभृति ते सर्वे ब्राह्मणा धनवर्जिताः ॥ शापदोषेण कौबेर्या संजाता दुःखभाजनाः ॥ ३७ ॥ न धनं पैतृकं पुत्रैर्न पिता पुत्रपौत्रिकम् ॥ भुञ्जते सकलं काल मित्येवं शंकरोऽब्रवीत् ॥ ३८ ॥ कुबेरेशे नरः स्नात्वा यस्तु पूजयते शिवम् ॥ गंधधूपनमस्कारैः सोऽश्वमेधफलं लभेत् ॥ ३९ ॥ यमतीर्थे तु यः स्नात्वा संपश्यति यमेश्वरम् ॥ सर्वपापैः प्रमुच्येत सप्तजन्मांतरार्जितैः ॥ ४० ॥ पूर्णमास्यामथावास्यां स्नात्वा तु पितृतर्पणम् ॥ यः करोति तिलैः स्नानं तस्य पुण्यफलं शृणु ॥ ४१ ॥ सुतृप्तास्तेन तोयेन पितरश्च पितामहाः ॥ स्वर्गस्था द्वादशाब्दानि क्रीडन्ति प्रपितामहाः ॥ ४२ ॥ वरुणेशे नरः स्नात्वा ह्यर्चयित्वा महेश्वरम् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ ४३ ॥ मृतां कालेन महता लोके यत्र जलेश्वरः ॥ स गच्छेत्तत्र यानेन गीयमानोऽप्सरोगणैः ॥ ४४ ॥ वातेश्वरे नरः स्नात्वा संपूज्य च महेश्वरम् ॥ जायते कृतकृत्योऽसौ लोकपालानवेक्षयन् ॥ ४५ ॥ किं तस्य बहुभिर्यज्ञैर्दानैर्वा बहुदक्षिणैः ॥ स्नात्वा चतुष्टये लोके अवाप्तं जन्मनः फलम् ॥ ४६ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ नित्यं वसंति कौरिल्यां लोकपालान्निमंत्र्य ये ॥ ४७ ॥ एतत्पुण्यं पापहरं धन्यमायुर्विवर्धनम् ॥ पठतां शृण्वतां चैव सर्वपापक्षयो भवेत् ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्य खंडे रेवाखंडे कुबेरादितीर्थचतुष्टयमाहात्म्यवर्णनंनाम त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले रामेश्वरमनुत्तमम् ॥ तीर्थं पापहरं पुण्यं सर्वदुःखघ्नमुत्तमम् ॥ १ ॥ तत्र तीर्थे तु ये स्नात्वा पूजयंति महेश्वरम् ॥ महादेवं महात्मानं मुच्यंते सर्वकिल्बिषैः ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यंखंडे रेवाखण्डे रामेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं चान्यत्सिद्धेश्वरमनुत्तमम् ॥ तीर्थं सर्वगुणोपेतं सर्वलोकेषु पूजितम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा ह्युमारुद्रं प्रपूजयेत् ॥ वाजपेयस्य यज्ञस्य स लभेत्फलमुत्तमम् ॥ २ ॥ तेन पुण्येन महता मृतः स्वर्गमवाप्नुयात् ॥ अप्सरोगणसंवीतो जयशब्दादिमंगलैः ॥ ३ ॥ सहस्रवत्सरांस्तत्र क्रीडयित्वा यथासुखम् ॥ धनधान्य समोपेते कुले महति जायते ॥ ४ ॥ पूज्यमानो नरश्रेष्ठ वेदवेदांगपारगः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे सिद्धेश्वरमाहात्म्यवर्णनंनाम पंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल चाहल्येश्वरमुत्तमम् ॥ यत्र सिद्धा महाभागा त्वहल्या तापसी पुरा ॥ १ ॥ गौतमो ब्राह्मणस्त्वासीत्साक्षाद्ब्रह्मेव चाऽपरः ॥ सत्यधर्मसमायुक्तो वानप्रस्थाश्रमे रतः ॥ २ ॥ तस्य पत्नी महाभागा ह्यहल्यानाम विश्रुता ॥ रूपयौवनसंपन्ना त्रिषु लोकेषु विश्रुता ॥ ३ ॥ अस्या अप्यतिरूपेण देवराजः शतक्रतुः ॥ मोहितो लोभयामास ह्यहल्यां बलसूदनः ॥ ४ ॥ मां भजस्व वरारोहे देवराजमनिंदिते ॥ क्रीडयस्व मया सार्द्धं त्रिषु लोकेषु पूजिता ॥ ८ ॥ किं करिष्यसि विप्रेण शौचाचारकृशेन तु ॥ तपःस्वाध्या यशीलेन क्लिश्यंतीव सुलोचने ॥ ६ ॥ एवमुक्ता वरारोहा स्त्रीस्वभावात्सुचंचला ॥ मनसाऽध्याय शक्रं सा कामेन कलुषीकृता ॥ ७ ॥ तस्या विदित्वा तं भावं स देवः पाकशासनः ॥ गौतमं वंचयामास दुष्टभावेन भावितः ॥ ८ ॥ विदित्वा चांतरं तस्य गृहीत्वा वेषमुत्तमम् ॥ अहल्यां रमयामास विश्वस्तां मंदिरांतिके ॥ ९ ॥ क्षणमात्रांतरे तत्र देवराजस्य भारत ॥ आजगाम मुनिश्रेष्ठो मंदिरं त्वरयाऽन्वितः ॥ १० ॥ आगतं गौतमं दृष्ट्वा भीतभीतः पुरंदरः ॥ निर्गतः स ततो दृष्ट्वा शक्रोऽयमिति चिंतयन् ॥ ११ ॥ ततः शशाप देवेंद्रं गौतमः क्रोधमूर्च्छितः ॥ अजितें द्रियोऽसि यस्मात्त्वं तस्माद्भुवि भगो भव ॥ १२ ॥ एवमुक्तस्तु देवेंद्रस्तत्क्षणादेव भारत ॥ भगानां तु सहस्रेण तत्क्षणादेव वेष्टितः ॥ १३ ॥ त्यक्त्वा राज्यं सुरैः सार्द्धं गतश्रीको जगाम ह ॥ तपश्चचार विपुलं गौतमेन महीतले ॥ १४ ॥ अहल्याऽपि ततः शप्ता यस्मात्त्वं दुष्टचारिणी ॥ प्रेक्ष्य मां रमसे शक्रं तस्मादश्ममयी भव ॥ १५ ॥ गते वर्षसहस्रांते रामं दृष्ट्वा यशस्विनम् ॥ तीर्थयात्राप्रसंगेन धौतपापा भविष्यसि ॥ १६ ॥ एवं गते ततः काले दृष्ट्वा रामेण धीमता ॥ विश्वामित्रसहायेन त्यक्त्वा साऽश्ममयीं तनुम् ॥ १७ ॥ पूजयित्वा यथान्यायं गतपापा विमत्सरा ॥ आगता नर्मदातीरे तीर्थे स्नात्वा यथाविधि ॥ १८ ॥ कृतं चांद्रायणं मासं कृच्छ्रं चाऽन्यं ततः परम् ॥ ततस्तुष्टो महादेवो दत्त्वा वरमनुत्तमम् ॥ १९ ॥ जगामाऽदर्शनं भूयो रेमे चोमापतिश्चिरम् ॥ अहल्या तु गते देवे स्थापयित्वा जगद्गुरुम् ॥ २० ॥ अहल्येश्वरनामानं स्वगृहे चागमत्पुनः ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ २१ ॥ स मृतः स्वर्गमाप्नोति यत्र देवो महेश्वरः ॥ क्रीडयित्वा यथाकामं तत्र लोके महातपाः ॥ २२ ॥ गते वर्षसहस्रांते मानुष्यं लभते पुनः ॥ धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः ॥ २३ ॥ वेदविद्याऽऽश्रयो धीमाञ्जायते विमले कुले ॥ रूपसौभाग्यसंपन्नः सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रमहल्यातीर्थसेवनात् ॥ २४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे अहल्यातीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ ७ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ धर्मपुत्र ततो गच्छेत्कर्कटेश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयं करम् ॥ १ ॥ तत्र स्नात्वा विधा नेन यस्तु पूजयते शिवम् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ २ ॥ तस्य तीर्थस्य माहात्म्यं पुराणे यच्छ्रुतं मया ॥ न तद्वर्णयितुं शक्यं संक्षेपेण वदाम्यतः ॥ ३ ॥ तत्र तीर्थे तु यः कुर्यात्किंचित्कर्म शुभाशुभम् ॥ हर्षान्मदान्महाराज तत्सर्वं जायतेऽक्षयम् ॥ ४ ॥ तत्र तीर्थे तपस्तप्त्वा बालखिल्या मरीचयः ॥ रमंतेऽद्यापि लोकेषु स्वेच्छया कुरुनन्दन ॥ ५ ॥ तत्रस्थास्तत्र जानन्ति नरा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ज्ञानबहिष्कृताः ॥ शरीरस्थमिवाऽऽत्मानमक्षयं ज्योतिरव्ययम् ॥ ६ ॥ तत्र तीर्थे नृपश्रेष्ठ देवी नारायणी पुरा ॥ अद्यापि तपते घोरं तपो यावत्किलार्बुदम् ॥ ७ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ तस्य ते ह्लादरान्दानि तृप्तिं यांति पितामहाः ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कर्कटेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्पांडुपुत्र शक्रतीर्थमनुत्तमम् ॥ यत्र सिद्धो महाभागो देवराजः शतक्रतुः ॥ १ ॥ गौतमेन पुरा शप्तं ज्ञात्वा देवाः सुरेश्वरम् ॥ ब्रह्माद्या देवताः सर्वे ऋषयश्च तपोधनाः ॥ २ ॥ गौतमं प्रार्थयामासुर्वाक्यैः सानुनयैः शुभैः ॥ गतराज्यं गतश्रीकं शक्रं प्रति मुनीश्वर ॥ ३ ॥ इन्द्रेण रहितं राज्यं न कश्चित्कामयेद्विज ॥ देवो वा मानवो वाऽपि एतत्ते विदितं प्रभो ॥ ४ ॥ तस्य त्वं भगयुक्तस्य दृष्टो कुरु द्विजोत्तम ॥ गतश्चादर्शनं शक्रो दूषितः स्वेन पाप्मना ॥ ५ ॥ देवानां वचनं श्रुत्वा गौतमो वेदवित्तमः ॥ तथेति कृत्वा शक्रन्तु वरं दातुं प्रचक्रमे ॥ ६ ॥ एतद्भगसहस्रं तु पुरा जातं शतक्रतो ॥ तल्लोचनसहस्रं तु मत्प्रसादाद्भविष्यति ॥ ७ ॥ एवमुक्तः सहस्राक्षः प्रणम्य मुनिसत्तमम् ॥ ब्राह्मणांस्तान्महाभागान्नर्मदां प्रत्यगात्ततः ॥ ८ ॥ स्नात्वा स विमले तोये संस्थाप्य त्रिपुरांतकम् ॥ जगाम त्रिदशावासं पूज्यमानोऽप्सरोगणैः ॥ ॥ ९ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ परदाराभिगमनान्मुच्यते पातकान्नरः ॥ १० ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शक्रतीर्थमाहात्म्यवर्णनंनामाष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज सोमतीर्थमनुत्तमम् ॥ यत्र सोमस्तपस्तप्त्वा नक्षत्रपथमास्थितः ॥ १ ॥ तत्र तीर्थे तु यः स्नायादाचम्य विधिपूर्वकम् ॥ कृतजाप्यो रविं ध्यायेत्तस्य पुण्यफलं शृणु ॥ २ ॥ ऋग्वेदयजुर्वेदाभ्यां सामवेदेन भारत ॥ जपतो यत्फलं प्रोक्तं गायत्र्या चाऽत्र तत्फलम् ॥ ३ ॥ तत्र तीर्थे तु यो भक्त्या ब्राह्मणान्भोजयेच्छुचिः ॥ तेन सम्यग्विधानेन कोटिर्भवति भोजिता ॥ ४ ॥ पादुकोपानहौ छत्रं वस्त्रं कंबलवाजिनः ॥ यो दत्ते विप्रमुख्याय तस्य तत्कोटिसंमितम् ॥ ५ ॥ सहस्रं तु सहस्राणामृचां यस्तु भोजयेत् ॥ एकस्य मंत्रयुक्तस्य कलां नार्हति षोडशीम्॥ ६ ॥एवं तु भोजयेत्तत्र वह्वृचं वेदपारगम् ॥ शाखांतगमथाध्वर्युं छंदोगं वा समाप्तिगम् ॥ ७ ॥ अग्निहोत्रसहस्रस्य यत्फलं प्राप्यते बुधैः ॥ समं तद्वेदविदुषा तीर्थे सोमस्य तत्फलम् ॥ ८ ॥ भोजयेद्यः शतं तेषां सहस्रं लभते नरः ॥ एकस्य योगयुक्तस्य तत्फलं कवयो विदुः॥९॥

सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १० ॥ तस्मात्सर्वप्रयत्नेन ग्रहणे चंद्रसूर्ययोः ॥ संक्रांतौ च व्यतीपाते योगी भोज्यो विशेषतः ॥ ११ ॥ संन्यासं कुरुते यस्तु तत्र तीर्थे युधिष्ठिर ॥ विमानेन महाभागाः स याति त्रिदिवं नरः ॥ १२ ॥ सोमस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ १३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे सोमतीर्थमाहात्म्यवर्णनंनामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज नंदाह्रदमनुत्तमम् ॥ यत्र सिद्धा महाभागा नंदादेवी वरप्रदा ॥ १ ॥ महिषासुरे महाकये पुरा देवभयंकरे ॥ शूलिन्या शूलभिन्नांगे कृते दानवसत्तमे ॥ २ ॥ येनैकादश रुद्राश्च ह्यादित्याः समरुद्गणाः ॥ वसवो वायुना सार्द्धं चन्द्रादित्यौ सुरेश्वर ॥ ३ ॥ बलिना निर्जिता येन ब्रह्मविष्णुमहेश्वराः ॥ संग्रामे सुमहाघोरे कृते देवभयंकरे ॥ ४ ॥ कृत्वा तत्कदनं घोरं नंदा देवी सुरेश्वरी ॥ यस्मात्स्नाता विशालाक्षी तेन नंदाह्रदः स्मृतः ॥ ५ ॥ तत्र तीर्थे तु यः स्नात्वा नंदामुद्दिश्य भारत ॥ ददाति दानं विप्रेभ्यः सोऽश्वमेधफलं लभेत् ॥ ६ ॥ भैरवं चैव केदारं तथा रुद्रं महालयम् ॥ नंदाह्रदश्चतुर्थः स्यात्पंचमं भुवि दुर्लभम् ॥ ७ ॥ वह्वस्तं न जानंति कामरागसमन्विताः ॥ नर्मदायां ह्रदं पुण्यं सर्वपातकनाशनम् ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा नंदां देवीं प्रपूजयेत् ॥ किं तस्य हिमवन्मध्यगमनेन प्रयोजनम् ॥ ९ ॥ परमार्थमविज्ञाय पर्यटंति तमोवृताः ॥ तेषां समागमे पार्थ श्रम एव हि केवलम् ॥ १० ॥ पृथिव्यां सागरांतायां स्नानदानेन यत्फलम् ॥ तत्फलं समवाप्नोति स्नात्वा नंदाह्रदे नृप ॥ ११ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम, आवन्त्यखण्डे रेवाखण्डे नन्दाह्रदतीर्थमाहात्म्यवर्णनंनाम चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तापेश्वरमनुत्तमम् ॥ यत्र सा हरिणी सिद्धा व्याधभीता नरेश्वर ॥ १ ॥ जले प्रक्षिप्य गात्राणि ह्यंतरिक्षं गता तु सा ॥ व्याधो विस्मितचित्तस्तु तां मृगीमवलोक्य च ॥२॥ विमुच्य सशरं चापं प्रारेभे तप उत्तमम् ॥ दिव्यं वर्षसहस्रं तु व्याधेनाऽऽचरितं तपः ॥ ३ ॥ अतीते तु ततः काले परितुष्टो महेश्वरः ॥ वरं ब्रूहि महाव्याध यत्ते मनसि रोचते ॥ ॥ ४ ॥ ॥ व्याध उवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ तव पार्श्वे महादेव वासो मे प्रतिदीयताम् ॥ ५ ॥ ॥ ईश्वर उवाच ॥ ॥ एवं भवतु ते व्याध यस्त्वया कांक्षितो वरः ॥ देवदेवो महादेव इत्युक्त्वांतरधीयत ॥ गते चाऽदर्शनं देवे स्थापयित्वा महेश्वरम् ॥ ६ ॥ पूजयित्वा विधानेन गतो व्याधस्ततो दिवम् ॥ तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ७ ॥ व्याधानुतापसंजातं तापेश्वरमिति श्रुतम् ॥ तत्र तीर्थे तु यः स्नात्वा संपूजयति शंकरम् ॥ ८ ॥ शिवलोकमवाप्नोति मामुवाच महेश्वरः ॥ ये स्नाता नर्मदातोये तीर्थे तापेश्वरे नराः ॥ ९ ॥ तापत्रय विमुक्तास्ते नाऽत्र कार्या विचारणा ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ॥ १० ॥ स्नानं समाचरेन्नित्यं सर्वपातकशांतये ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे तापेश्वरतीर्थमाहात्म्यवर्णनंनामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज रुक्मिणीतीर्थमुत्तमम् ॥ यत्रैव स्नानमात्रेण रूपवान्सुभगो भवेत् ॥ १ ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ॥ स्नानं समाचरेत्तत्र न चेह जायते पुनः ॥ २ ॥ यः स्नात्वा रुक्मिणीतीर्थे दानं दद्यात्तु कांचनम् ॥ तत्तीर्थस्य प्रभावेन शोकं नाप्नोति मानवः ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तीर्थस्याऽस्य कथं जातो महिमेदृङ्मुनीश्वर ॥ रूपसौभाग्यदं येन तीर्थमेतद्भवीहि मे ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ कथयामि यथावृत्तमितिहासं पुरातनम् ॥ कथितं पूर्वतो वृद्धैः पारंपर्येण भारत ॥ ५ ॥ तन्तेहं संप्रवक्ष्यामि शृणुष्वैकाग्रमानसः ॥ नगरं कुंडिनं नाम भीष्मको परिपाति हि ॥ ६ ॥ हस्त्यश्वरथसंपन्नो धनाढ्योऽति प्रतापवान् ॥ स्त्रीसहस्रस्य मध्यस्थः कुरुते राज्यमुत्तमम् ॥ ७ ॥ तस्य भार्या महादेवी प्राणेभ्योऽपि गरीयसी ॥ तस्यामुत्पादयामास पुत्रमेकं च रुक्मकम् ॥ ८ ॥ द्वितीया तनया जज्ञे रुक्मिणी नाम नामतः ॥ तदाऽशरीरिणी वाचा राजानं तमुवाच ह ॥ ९ ॥ चतुर्भुजाय दातव्या कन्येयं भुवि भीष्मक ॥ एवं तद्वचनं श्रुत्वा जहर्ष प्रियया सह ॥ १० ॥ ब्राह्मणैः सह विद्वद्भिः प्रविष्टः सूतिकागृहम् ॥ स्वस्तिकं वाचयित्वास्याश्चके नामेति रुक्मिणी ॥ ११ ॥ यतः सुवर्णतिलको जन्मना सह भास्वत ॥ ततः सा रुक्मिणीनाम ब्राह्मणैः कीर्तिता तदा ॥ १२ ॥ ततः सा कालपर्यायादष्ट वर्षा व्यजायत ॥ पूर्वोक्तं चैव तद्वाक्यमशरीरिण्युदीरितम् ॥ १३ ॥ स्मृत्वा स्मृत्वाऽथ नृपतिश्चतयामास भूपतिः ॥ कस्मै देया मया बाला भविता

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कश्चतुर्भुजः ॥ १४ ॥ एतस्मिन्नंतरे तावद्रैवतात्पर्वतोत्तमात् ॥ मुख्यश्चेदिपतिस्तत्र दमघोषः समागतः ॥ १५ ॥ प्रविष्टो राजसदनं यत्र राजा स भीष्मकः ॥ तं दृष्ट्वा चाऽऽगतं गेहे पूजयामास भूपतिः ॥ १६ ॥ आसनं विपुलं दत्त्वा सभां गत्वा निवेशितः ॥ कुशलं तव राजेंद्र दमघोष श्रिया युत ॥ १७ ॥ पुण्याहमद्य संजातमहं त्वद्दर्शनोत्सुकः ॥ कन्या मदीया राजेंद्र ह्यष्टवर्षा व्यजायत ॥ १८ ॥ चतुर्भुजाय दातव्या वागुवाचाऽशरीरिणी ॥ भीष्मकस्य वचः श्रुत्वा दमघोषोऽब्रवीदिदम् ॥ १९ ॥ चतुर्भुजो मम सुतस्त्रिषु लोकेषु विश्रुतः ॥ तस्येयं दीयतां कन्या शिशुपालस्य भीष्मक ॥ २० ॥ तस्य तद्वचनं श्रुत्वा दमघोषस्य भूमिप ॥ भीष्मकेन ततो दत्ता शिशुपालाय रुक्मिणी ॥ २१ ॥ प्रारब्धं मंगलं तत्र भीष्मकेण युधिष्ठिर ॥ दिक्षु देशांतरेष्वेव ये वसंति स्वगोत्रजाः ॥ २२ ॥ निमंत्रितास्तु ते सर्वे समाजग्मुर्यथाक्रमम् ॥ ततो यादववंशस्य तिलकौ बलकेशवौ ॥ २३ ॥ निमंत्रितौ समायातौ कुंडिनं भीष्मकस्य तु ॥ भीष्मकेण यथान्यायं पूजितौ तौ यदूत्तमौ ॥ २४ ॥ ततः प्रदोषसमये रुक्मिणी काममोहिनी ॥ सखीभिः सहिता याता पूर्वहिश्चांबिकार्चने ॥ २५ ॥ साऽपश्यत्तत्र देवेशं गोपवेषधरं हरिम् ॥ तं दृष्ट्वा मोहमापन्ना कामेन कलुषीकृता ॥ २६ ॥ केशवोऽपि च तां दृष्ट्वा संकर्षणमुवाच ह ॥ स्त्रीरत्नप्रवरं तात हर्तव्यमिति मे मतिः ॥ २७ ॥ केशवस्य वचः श्रुत्वा संकर्षण उवाच ह ॥ गच्छ कृष्ण महाबाहो स्त्रीरत्नं चाऽऽशु गृह्यताम् ॥ २८ ॥ अहं च तव मार्गेण ह्यागमिष्यामि पृष्ठतः ॥ दानवानां च सर्वेषां कुर्वंश्च कदनं महत् ॥ २९ ॥ संकर्षणमतं प्राप्य केशवः केशिसूदनः ॥ ययौ कन्यां गृहीत्वा तु रथमारोप्य सत्वरम् ॥ ३० ॥ निर्गतः सहसा राजन्वेगेनैवाऽनिलो यथा ॥ हाहाकारस्तदा जातो भीष्मकस्य पुरे महान् ॥ ३१ ॥ निर्गता दानवाः क्रुद्धा वेला इव महोदधेः ॥ गर्जंतः सायुधाः सर्वे धावंतो रथवर्त्मनि ॥ ३२ ॥ बलदेवं ततः प्राप्ता रथमार्गाऽनुगामिनम् ॥ तेषां युद्धं बलस्याऽसीत्सर्वलोकक्षयंकरम् ॥ ३३ ॥ यथा तारामये पूर्वं संग्रामे लोकविश्रुते ॥ गदाहस्तो महाबाहुस्त्रैलोक्येऽप्रतिमो बलः ॥ ३४ ॥ हलेनाऽऽकृष्य सहसा गदापातैरपातयत् ॥ अशक्यो दानवैर्हंतुं बलभद्रो महाबलः ॥ ३५ ॥ बभंज दानवान्सर्वांस्तस्थौ गिरिरिवाऽचलः ॥ तं दृष्ट्वा च बलं क्रुद्धं दुर्धर्षं त्रिदशैरपि ॥ ३६ ॥ भीष्मपुत्रो महातेजा रुक्मीनाम महायशाः ॥ नराणामतिशूरणामक्षौहिण्या समन्वितः ॥ ३७ ॥ बलभद्रमतिक्रम्य ततो युद्धे निराकरोत् ॥ तद्युद्धं वंचयित्वा तु रथमार्गेण सत्वरम् ॥ ३८ ॥ केशवोऽपि तदा देवो रुक्मिण्या सहितो ययौ ॥ विंध्यं तु लंघयित्वाऽग्रे त्रैलोक्यगुरुरव्ययः ॥ ३९ ॥ नर्मदातटमापेदे यत्र सिद्धः पुरा पुनः ॥ अजेयो येन संजातस्तीर्थस्यास्य प्रभावतः ॥ ४० ॥ एतस्मात्कारणात्तातयोधनीपुरमुच्यते ॥ रुक्मोऽपि दानवेंद्रोऽसौ प्राप्तः स्थानमनुत्तमम् ॥ ४१ ॥ प्रत्युवाचाऽच्युतं क्रुद्धस्तिष्ठ तिष्ठेति मा व्रज ॥ अद्य त्वां निशितैर्बाणैर्नेष्यामि यमसादनम् ॥ ४२ ॥ एवं परस्परं वीरौ जगर्जतुरुभावपि ॥ तयोर्युद्धमभूद्घोरं तारकाग्निजसन्निभम् ॥ ४३ ॥ चिक्षेप शरजालानि केशवं प्रति दानवः ॥ नाऽनुचिंत्य शरांस्तस्य केशवः केशिसूदनः ॥ ४४ ॥ ततो रुक्मोथ संक्रुद्धो गृहीत्वा धनुरुत्तमम् ॥ सायकेन सुतीक्ष्णेन तं बिभेद तदोरसि ॥ ४५ ॥ ततो विष्णुः स्वयं क्रुद्धश्चक्रं गृह्य सुदर्शनम् ॥ संप्रहरत्यमुं यावद्रुक्मिण्याऽत्र निवारितः ॥ ४६ ॥ त्वां न जानाति देवेशं चतुर्बाहुं जनार्दनम् ॥ दर्शयस्व स्वकं रूपं दयां कृत्वा ममोपरि ॥ ॥ ४७ ॥ एवमुक्तस्तु रुक्मिण्या दर्शयामास भारत ॥ देवा दृष्ट्वापि तद्रूपं स्तुवंत्याकाशसंस्थिताः ॥ दिव्यं चक्षुस्तदा देवो ददौ रुक्मस्य भारत ॥ ४८ ॥ ॥ रुक्म उवाच ॥ ॥ यन्मया पापनिष्ठेन मंदभाग्येन केशव ॥ सायकैराहतं वक्षस्तत्सर्वं क्षंतुमर्हसि ॥ ४९ ॥ पूर्वं दत्ता स्वयं देव जानकी जनकेन वै ॥ मया प्रदत्ता देवेश रुक्मिणी तव केशव ॥ ५० ॥ उद्वाहय यथान्यायं विधिदृष्टेन कर्मणा ॥ रुक्मस्य वचनं श्रुत्वा ततस्तुष्टो जगद्गुरुः ॥ ५१ ॥ बभाषे देवदेवेशो रुक्मिणं भीष्मकात्मजम् ॥ गच्छ स्वकं पुरं मा भैः कुरु राज्यमकंटकम् ॥ ५२ ॥ केशवस्य वचः श्रुत्वा रुक्मो दानवपुंगवः ॥ तं प्रणम्य जगन्नाथं जगाम भवनं पितुः ॥ ५३ ॥ गते रुक्मे तदा कृष्णः समामंत्र्य द्विजोत्तमान् ॥ मरीचिमत्र्यगिरसं पुलस्त्यं पुलहं क्रतुम् ॥ ५४ ॥ वसिष्ठं च महाभागमित्येते सप्त मानसाः ॥ इत्येते ब्राह्मणाः सप्त पुराणे निश्चयं गताः ॥ ॥ ५५ ॥ क्षमावंतः प्रजावंतो महर्षिभिरलंकृताः ॥ इत्येवं ब्रह्मपुत्राश्च सत्यवंतो महामते ॥ ५६ ॥ नर्मदातटमाश्रित्य निवसंति जितेंद्रियाः ॥ तपःस्वाध्यायनिरता जपहोमपरायणाः ॥ ५७ ॥ निमंत्रितास्तु राजेंद्र केशवेन महात्मना ॥ श्राद्धं कृत्वा यथान्यायं ब्रह्मोक्तविधिना ततः ॥ ५८ ॥ हरिस्तान्पूजयामास सप्त ब्रह्मर्षिपुंगवान् ॥ प्रददौ द्वादश ग्रामांस्तेभ्यस्तत्र जनार्दनः ॥ ५९ ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ तावद्दानं मया दत्तं परिपंथी न कश्चन ॥ ६० ॥ मद्दत्तं पालयिष्यंते ये नृपा गतकल्मषाः ॥ तेभ्यः स्वस्ति करिष्यामि दास्यामि परमां गतिम् ॥ ६१ ॥ यावद्धियांति लोकेषु महाभूतानि पंच च ॥ तावत्ते दिवि मोदंते मद्दत्तपरिपालकाः ॥ ६२ ॥ यस्तु लोपयते मूढो दत्तं वः पृथिवीतले ॥ नरके तस्य वासः स्याद्यावदाभूतसंप्लवम् ॥ ६३ ॥ स्वदत्ता परदत्ता वा पालनीया वसुन्धरा ॥ यस्ययस्य यदा भूमिस्तस्यतस्य तदा फलम् ॥ ६४ ॥ स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ॥ स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ ६५ ॥ अन्यायेन हृता भूमिरन्यायेन च हारिता ॥ हर्त्ता हारयिता चैव विष्ठायां जायते कृमिः ॥ ६६ ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आच्छेत्ता चानुमंता च तान्येव नरके वसेत् ॥ ६७ ॥ यानीह दत्तानि पुरा नरेंद्रैर्दानानि धर्मार्थयशस्कराणि ॥ निर्माल्यरूपप्रतिमानि तानि को नाम साधुः पुनराददाति ॥ ६८ ॥ एवं तान्पूजयित्वा तु सम्यङ्न्यायेन पांडव ॥ रुक्मिण्या विधिवत्पाणिं जग्राह मधुसूदनः ॥ ६९ ॥ मुशली च ततः सर्वाञ्जित्वा दानवपुंगवान् ॥ स्वस्थानमगमत्तत्र कृत्वा कार्यं सुशोभनम् ॥ ७० ॥ प्रयातौ द्वारवत्यां तौ कृष्णसंकर्षणावुभौ ॥ गच्छमानं तु तं दृष्ट्वा केशवं क्लेशनाशनम् ॥ ७१ ॥ ब्राह्मणाः सत्यवंतश्च निर्गताः शंसितव्रताः ॥ आगच्छमानांस्तौ वीक्ष्य रथमार्गेण ब्राह्मणान् ॥ ७२ ॥ मुहूर्त्तं तत्र विश्रम्य केशवो वाक्यमब्रवीत् ॥ किमागमनकार्यं वो ब्रूत सर्वं द्विजोत्तमाः ॥ ७३ ॥ कुर्वाणाः स्वीयकर्माणि मम कृत्यं तु तिष्ठते ॥ देवस्य वचनं श्रुत्वा मुनयो वाक्यमब्रुवन् ॥ ७४ ॥ कल्पकोटिसहस्रेण सत्यभावात्तु वंदितः ॥ दुष्प्राप्योऽसि मनुष्याणां प्राप्तः किं त्यजसे हि नः ॥ ७५ ॥ ब्राह्मणानां वचः श्रुत्वा भगवानिदमब्रवीत् ॥ मथुरायां द्वारवत्यां यो धनीपुर एव च ॥ ७६ ॥ त्रिकालमागमिष्यामि सत्यंसत्यं पुनःपुनः ॥ एवं ते ब्राह्मणाः श्रुत्वा योधनीपुरमागताः ॥ ७७ ॥ अवतीर्णस्त्रिभागेन प्रादुर्भावे तु माथुरे ॥ एतत्ते कथितं सर्वं तीर्थस्योत्पत्तिकारणम् ॥ ७८ ॥ भूतं भव्यं भविष्यच्च वर्त्तमानं तथाऽपरम् ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ ७९ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता पूजितस्त्रिगुणात्मवान् ॥ ८० ॥ उपवासी नरो भूत्वा यस्तु कुर्यात्प्रदक्षिणम् ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ८१ ॥ तत्र तीर्थे तु ये वृक्षास्तान्पश्यंत्यपि ये नराः ॥ तेऽपि पापैः प्रमुच्यंते भ्रूणहत्यासमैरपि ॥ ८२ ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ तेन ते सदृशाः स्युर्वै देवदेवेन चक्रिणा ॥ ८३ ॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजी

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वितम् ॥ ये नमंति जगन्नाथं देवं नारायणं हरिम् ॥ ८४ ॥ तत्र तीर्थे तु यद्दानं स्नानं देवार्चनं नृप ॥ तत्सर्वमक्षयं तस्य इत्येवं शंकरोऽब्रवीत ॥ ॥ ८५ ॥ प्रविश्याग्नौ हुतानां च यत्फलं समुदाहृतम् ॥ तच्छृणुष्व नृपश्रेष्ठ प्रोच्यमानमशेषतः॥८६॥ विमानेनार्कवर्णेन किंकिणीजालमालिना॥ आग्नेयं भवते तत्र मोदते कालमीप्सितम् ॥८७॥ जले चैवा हुतानां तु योषनीपुरमध्यतः ॥ वसंति ब्राह्मणे लोके यावदाभूतसंप्लवम्॥ ८८ ॥ अनाशके हुतानां तु तत्र तीर्थे नराधिप ॥ अनिवर्त्तिका गतिर्नृणां नाऽत्र कार्या विचारणा ॥ ८९ ॥ तत्र तीर्थे तु यो दद्यात्कपिलादानमुत्तमम् ॥ विधानेन तु संयुक्तं शृणु तस्याऽपि यत्फलम् ॥ ९० ॥ यावंति तस्या रोमाणि तत्प्रसूतेश्च भारत ॥ तावंति दिवि मोदंते सर्वकामैः सुपूजिताः ॥ ९१ ॥ यावंति रोमाणि भवंति धेन्वास्तावंति वर्षाणि महीयते सः ॥ स्वर्गाच्च्युतश्चाऽपि ततश्चिलोक्यां कुले समुत्पत्स्यते गोमंतां सः ॥९२॥ तत्र तीर्थेतु यो दद्याद्रूप्यं कांचनमेव वा॥कांचनेन विमानेन विष्णुलोके महीयते॥९३॥तस्मिंस्तीर्थे तु यो दद्यात्पादुके वस्त्रमेव च॥दानस्याऽस्य प्रभावेन लभते स्वर्गमीप्सितम् ॥ ९४ ॥ ऋग्यजुःसामवेदानां पठनाद्यत्फलं भवेत् ॥ तत्र तीर्थे तु राजेंद्र गायत्र्या तत्फलं लभेत् ॥९५॥ प्रयागे यद्भवेत्पुण्यं गयायां च त्रिपुष्करे ॥ कुरुक्षेत्रे तु राजेंद्र राहुग्रस्ते दिवाकरे ॥ ९६ ॥ सोमेश्वरे च यत्पुण्यं सोमस्य ग्रहणे तथा ॥ तत्फलं लभते तत्र स्नानमात्रान्न संशयः ॥ ९७ ॥ द्वादश्यां तु नरः स्नात्वा नमस्कृत्य जनार्दनम् ॥ उद्धृताः पितरस्तेन अवाप्तं जन्मनः फलम् ॥ ९८ ॥ संक्रांतौ च व्यतीपाते द्वादश्यां च विशेषतः ॥ ब्राह्मणं भोजयेदेकं कोटिभोजितो ॥ ९९ ॥ पृथिव्यां यानि तीर्थानि स्नानसुद्राणि पांडव ॥ तानि सर्वाणि तत्रैव द्वादश्यां पांडुनंदन ॥ १०० ॥ क्षयं यांति च दानानि यज्ञहोमबलिक्रियाः ॥ न क्षीयते महाराज तत्र तीर्थे तु यत्कृतम् ॥ १ ॥ यद्भूतं यद्भविष्यच्च तीर्थमाहात्म्यमुत्तमम् ॥ कथितं ते मया सर्वं पृथग्भावेन भारत ॥ १०२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रुक्मिणीतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज योजनेश्वरमुत्तमम् ॥ यत्र सिद्धौ पुरा कल्पे नरनारायणावृषी ॥ १ ॥ तत्र तीर्थे तपस्तप्त्वा संग्रामे देवदानवैः ॥ जयं प्राप्तौ महात्मानौ नरनारायणावुभौ ॥ २ ॥ पुनस्त्रेतायुगे प्राप्ते तौ देवौ रामलक्ष्मणौ ॥ तत्र तीर्थे पुनः स्नात्वा रावणो दुर्जयो हतः ॥ ३ ॥ पुनः पार्थ कलौ प्राप्ते तौ देवौ बलकेशवौ ॥ वसुदेवकुले जातौ दुष्करं कर्म चक्रतुः ॥ ४ ॥ नरकं कालनेमिं च कंसं चाणूरमुष्टिकौ ॥ शिशुपालं जरासंधं जघ्नतुर्बलकेशवौ ॥ ५ ॥ ततस्तत्र रिपून्संख्ये भीष्मद्रोणपुरःसरान् ॥ कर्णदुर्योधनादींश्च निहनिष्यति स प्रभुः ॥ ६ ॥ धर्मक्षेत्रे कुरुक्षेत्रे तत्र युध्यंति ते क्षणम् ॥ भीमार्जुननिमित्तेन शिष्यौ कृत्वा परस्परम् ॥ ७ ॥ तत्र तीर्थे पुनर्गत्वा तपः कृत्वा सुदुष्करम् ॥ पूजयित्वा द्विजान्भक्त्या यास्येते द्वारकां पुनः ॥ ८ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता पूजितश्चिगुणात्मवान् ॥९॥ उपवासी नरो भूत्वा यस्तु कुर्यात्प्रजागरम् ॥ मुच्यते सर्वपापेभ्यो गायंस्तस्य शुभां कथाम् ॥१०॥ यावतस्तत्र तीर्थे तु वृक्षान्पश्यंति मानवाः ॥ ब्रह्महत्यादिकं पापं तावदेषां प्रणश्यति ॥ ११ ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ तेनैव सदृशाः सर्वे देवदेवेन चक्रिणा ॥ १२ ॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितम् ॥ ये नमंति जगत्पूज्यं देवं नारायणं हरिम् ॥ १३ ॥ तत्र तीर्थे तु यद्दानं स्नानं देवार्चनं नृप ॥ क्रियते तत्फलं सर्वमक्षयायोपकल्पते ॥१४॥ अग्नेरपत्यं प्रथमं सुवर्णं भूर्वेप्यनी सूर्यसुताश्च गावः॥ लोकाश्चयस्तेन भवंति दत्ता यः कांचनं गां च घृतं च दद्यात् ॥ १५ ॥ एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ॥ अतीतं च भविष्यच्च वर्तमानं महाबलम् ॥ १६ ॥ श्रुत्वा वाऽपि पठित्वेदं श्रावयित्वाऽथ धार्मिकान् ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे योजनेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज द्वादशीतीर्थमुत्तमम् ॥ शरंति सर्वदानानि जपहोमबलिक्रियाः ॥१॥ न क्षीयते तु राजेंद्र चक्रतीर्थे तु यत्कृतम् ॥ यद्भूतं यद्भविष्यच्च तीर्थमाहात्म्यमुत्तमम् ॥ २ ॥ कथितं तन्मया सर्वं पृथग्भावेन भारत ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे द्वादशीतीर्थमहात्म्यवर्णनंनाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥ मार्कंडेय उवाच ॥ ततो गच्छेद्धरापाल शिवतीर्थमनुत्तमम् ॥ दर्शनाद्यस्य देवस्य मुच्यते सर्वकिल्बिषैः ॥ १ ॥ शिवतीर्थे तु यः स्नात्वा जितक्रोधो जितेंद्रियः ॥ पूजयेत महादेवं सोग्निष्टोमफलं लभेत् ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या सोपवासोऽर्चयेच्छिवम् ॥ अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शिवतीर्थमाहात्म्यवर्णनंनाम पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ अस्माहकं ततो गच्छेत्पितृतीर्थमनुत्तमम् ॥ प्रेतत्वाद्यत्र मुच्यंते पिंडेनैकेन पूर्वजाः ॥ १ ॥ युधिष्ठिर उवाच ॥ ॥ अस्माहकस्य माहात्म्यं कथयस्व ममानघ ॥ स्नानदानेन यत्पुण्यं तथा पिंडोदकेन च ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ पुरा कल्पे नृपश्रेष्ठ ऋषिदेवसमागमे ॥ प्रश्नः पृष्टो मया तात यथा त्वमनुपृच्छसि ॥३॥ एकत्र सागराः सप्त सप्रयागाः सपुष्कराः॥ नात्य सान्यं लभंते ते नात्र कार्या विचारणा ॥ ४ ॥ सोमनाथं तु विख्यातं यत्सोमेन प्रतिष्ठितम् ॥ तत्र सोमग्रहे पुण्यं तत्पुण्यं लभते नरः ॥ ५ ॥ मांसंति पितरो नृणां वीक्षंते संततिं स्वकाम् ॥ कश्चिदस्मत्कुलेऽस्माकं पिंडमत्र प्रदास्यति ॥६ ॥ प्रपितामहास्तथादित्याः श्रुतिरेषा सनातनी ॥ एवंब्रुवंति देवाश्च ऋषयः सतपोधनाः ॥ ७ ॥ सकृत्पिंडोदकेनैव शृणु पार्थिव यत्फलम् ॥ द्वादशाब्दानि राजेंद्र योगं भुक्त्वा सुशोभनम् ॥ ८ ॥ युगेयुगे महाराज अस्माहके पितामहाः ॥ सर्वदा ह्यवलोकंत आगच्छंतं स्वगोत्रजम् ॥ ९ ॥ भविष्यति किमस्माकममावास्याप्यमाहके ॥ स्नानं दानं च ये कुर्युः पितृणां तिलतर्पणम् ॥ १० ॥ ते सर्वपापनिर्मुक्ताः सर्वान्कामांल्लभंति वै ॥ जलमध्येत्र भूपाल अग्नितीर्थं च तिष्ठति ॥ ११ ॥ दर्शनात्तस्य तीर्थस्य पापराशिर्विलीयते ॥ स्नानमात्रेण राजेंद्र ब्रह्महत्यां व्यपोहति ॥ १२ ॥ शुक्लांबरधरो नित्यं नियतः स जितेंद्रियः ॥ एककालं तु भुंजानो मासं तीर्थस्य सन्निधौ ॥ १३ ॥ सुवर्णालंकृतानां तु कन्यानां शतदानजम् ॥ फलमाप्नोति संपूर्णं पितृलोके महीयते ॥ १४ ॥ पृथिव्यामासमुद्रायां महाभोगपतिर्भवेत् ॥ धनधान्यसमायुक्तो दाता भवति धार्मिकः ॥ १५ ॥ उपवासी शुचिर्भूत्वा ब्रह्मलोकमवाप्नुयात् ॥ अस्माहकं समासाद्य यस्तु प्राणान्परित्यजेत् ॥ १६ ॥ कोटिवर्षसहस्राणि रुद्रलोके महीयते ॥ ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ॥ १७ ॥ सुवर्णमणिमुक्ताढ्ये कुले जायेत रूपवान् ॥ कृत्वाऽभिषेकविधिना ह्यमेधफलं लभेत् ॥ १८ ॥ धनाढ्यो रूपवान्दक्षो दाता भवति धार्मिकः ॥ चतुर्वेदयुक्तो यत्पुण्यं सत्यवादिषु यत्फलम् ॥ १९ ॥ तत्फलं लभते मूढस्तत्र तीर्थेऽभिषेचनात् ॥ तीर्थानां परमं तीर्थं निर्मितं शंभुना पुरा ॥ २० ॥ हृदयेशः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वयं विष्णुर्जपेद्देवं महेश्वरम् ॥ गन्धर्वाप्सरसश्चैव मरुतो मारुतास्तथा ॥ २१ ॥ विश्वेदेवाश्च पितरः सचन्द्राः सदिवाकराः ॥ मरीचिरङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ २२ ॥ प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च ॥ च्यवनो गालवश्चैव वामदेवो महामुनिः ॥ २३ ॥ बालखिल्याश्च गंधारास्तृणबिंदुश्च जाजलिः ॥ उद्दालकश्चर्ष्यशृंगो वसिष्ठश्च सनंदनः ॥ २४ ॥ शुक्रश्चैव भरद्वाजो वात्स्यो वात्स्यायनस्तथा ॥ अगस्तिर्मित्रावरुणौ विश्वामित्रो मुनीश्वरः ॥ २५ ॥ गौतमश्च पुलस्त्यश्च पौलस्त्यः पुलहः क्रतुः ॥ सनातनस्तु कपिलो वाह्निः पंचशिखस्तथा ॥ २६ ॥ अन्येऽपि बहवस्तत्र मुनयः शंसितव्रताः ॥ क्रीडन्ति देवताः सर्व्वे ऋषयः सतपोधनाः ॥ २७ ॥ मनुष्याश्चैव योगींद्राः पितरः सपितामहाः ॥ अस्माहकेऽत्र तिष्ठंति सर्व एव न संशयः ॥ २८ ॥ पितरः प्रितामहाश्चैव तथैव प्रपितामहाः ॥ येषां दत्तमुपस्थायि सुकृतं वाऽपि दुष्कृतम् ॥ २९ ॥ अक्षयं तत्र तत्सर्वं यत्कृतं योधनीपुरे ॥ मातरं पितरं त्यक्त्वा सर्ववन्धुसुहृज्जनान् ॥ ३० ॥ धनं धान्यं प्रियान्पुत्रांस्तथा देहं नृपोत्तम ॥ गच्छते वायुभूतस्तु शुभाऽशुभसमन्वितः ॥ ३१ ॥ अदृश्यः सर्वभूतानां परमात्मा महत्तरः ॥ शुभाऽशुभगतिं प्राप्तः कर्मणा स्वेन पार्थिव ॥ ॥ ३२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शुभाऽशुभं न बन्धूनां जायते केन हेतुना ॥ एकः प्रमूयते जंतुरेक एव प्रलीयते ॥ ३३ ॥ एको हि भुंक्ते सुकृतमेक एव हि दुष्कृतम् ॥ ३४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एष त्वयोक्तो नृपते महाप्रश्नः स्मृतो मया ॥ ३५ ॥ पितामहमुखोद्गीतं शृणु ते कथयाम्यहम् ॥ यन्मे पितामहात्पूर्वं विज्ञातमृषिसंसदि ॥ ३६ ॥ न माता न पिता बन्धुः कस्यचिन्न सुहृत्क्वचित् ॥ कस्य न ज्ञायते रूपं वायुभूतस्य देहिनः ॥ ३७ ॥ यद्येवं न भवेत्तात लोकस्य तु नरेश्वर ॥ अमर्यादं भवेन्नूनं विनश्यति चराचरम् ॥ ३८ ॥ एवं ज्ञात्वा पुरा राजन्समस्तैर्लोककर्तृभिः ॥ मर्यादा स्थापिता लोके यथा धर्मो न नश्यति ॥ ३९ ॥ धर्मे नष्टे मनुष्याणामधर्मोऽभिभवेत्पुनः ॥ ततः स्वधर्मचलनान्नरके गमनं ध्रुवम् ॥ ४० ॥ लोको निरंकुशः सर्वो मर्यादालंघने रतः ॥ मर्यादा स्थापिता तेन शास्त्रं दृष्ट्वा महर्षिभिः ॥ ४१ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ पिंडोदकप्रदानं च तथैवाऽतिथिपूजनम् ॥ ४२ ॥ पितरः पितामहाश्चैव तथैव प्रपितामहाः ॥ त्रयो देवाः स्मृतास्तात ब्रह्मविष्णुमहेश्वराः ॥ ४३ ॥ पूजितैः पूजिताः सर्वे तथा मातामहास्त्रयः ॥ तस्मात्सर्वप्रयत्नेन श्रुतिस्मृत्यर्थनोदितान् ॥ ४४ ॥ धर्मं समाचरन्नित्यं पापाशेन न लिप्यते ॥ श्रुतिस्मृत्युदितं धर्मं मनसाऽपि न लंघयेत् ॥ ४५ ॥ इह लोके परे चैव यदीच्छेच्छ्रेय आत्मनः ॥ पितापुत्रौ सदाप्येकौ त्रिंबार्द्धिबमित्योद्धतौ ॥ ४६ ॥ विभक्तौ वाऽविभक्तौ वा श्रुतिस्मृत्यर्थतस्तथा ॥ उद्धरेदात्मनात्मानमात्मनैवसादयेत् ॥ ४७ ॥ पिंडोदकप्रदानाभ्यामृते पार्थ न संशयः ॥ एवं ज्ञात्वाप्रयत्नेन पिंडोदकप्रदो भवेत् ॥ ४८ ॥ आयुर्धर्मो यशस्तेजः संततिश्चैव वर्द्धते ॥ पृथिव्यां सागरांतायां पितृक्षेत्राणि यानि च ॥ ४९ ॥ तानि ते संप्रवक्ष्यामि येषु दत्तं महाफलम् ॥ गयायां पुष्करे ज्येष्ठे प्रयागे नैमिषे तथा ॥ ५० ॥ सन्निहत्यां कुरुक्षेत्रे प्रभासे कुरुनन्दन ॥ पिंडोदकप्रदानेन यत्फलं कथितं बुधैः ॥ ५१ ॥ अस्माहके तदाऽऽप्नोति नर्मदायां न संशयः ॥ तत्र ब्रह्मा मुरारिश्च रुद्रश्च उमया सह ॥ ५२ ॥ इन्द्राद्या देवताः सर्वे पितरो मुनयस्तथा ॥ सागराः सरितश्चैव पर्वताश्च वलाहकाः ॥५३॥ तिष्ठन्ति पितरः सर्वे सर्वतीर्थाधिकं ततः ॥ स्थिता ब्रह्मशिला तत्र गजकुम्भनिभा नृप ॥५४॥ कलौ न दृश्या भवति प्रथानं यद्गयाशिरः ॥ वैशाखे मासि संप्राप्तेऽमावास्यां नृपोत्तम ॥ ५५ ॥ व्याप्य सा तिष्ठते तीर्थं गजकुम्भनिभा शिला ॥ तच्च गव्यूतिमात्रं हि तीर्थं तत्प्रचक्षते ॥ ५६ ॥ तस्मिन्दिने तत्र गत्वा यस्तु श्राद्धप्रदो भवेत् ॥ पितॄणामक्षया तृप्तिर्जायते शतवार्षिकी ॥ ५७ ॥ अन्यस्यामप्यमावास्यां यः स्नात्वा विजितेंद्रियः ॥ करोति मनुजः श्राद्धं विधिवन्मंत्रसंयुतम् ॥ ५८ ॥ तस्य पुण्यफलं यत्स्यात्तच्छृणुष्व नराधिप ॥ अग्निष्टोमाश्वमेधाभ्यां वाजपेयस्य यत्फलम् ॥ ५९ ॥ तत्फलं समवाप्नोति यथा मे शंकरोऽब्रवीत् ॥ रौरवादिषु सर्वेषु नरकेषु व्यवस्थिताः ॥ ६० ॥ पितामहाद्याश्च पितृके मातृके तथा ॥ पिंडोदकेन चैकेन तर्पणेन विशेषतः ॥ ६१ ॥ क्रीडंति पितृलोकस्था यावदाभूतसंप्लवम् ॥ ये कर्मस्था विकर्मस्था ये जाताः प्रेतकल्मषाः ॥ ६२ ॥ पिंडेनैकेन मुच्यंते तेऽपि तत्र न संशयः ॥ अस्माहके शिला दिव्या तिष्ठते गजसन्निभा ॥ ६३ ॥ ब्रह्मणा निर्मिता पूर्वं सर्वपापक्षयंकरी ॥ उपर्यस्या यथान्यायं पितॄनुद्दिश्य भारत ॥ ६४ ॥ दक्षिणाग्रेषु दर्भेषु दद्यात्पिंडान्विचक्षणः ॥ भूमौ चान्नेन सिद्धेन श्राद्धं कृत्वा यथाविधि ॥ ६५ ॥ श्राद्धिभ्यो वस्त्रयुग्मानि छत्रोपानत्कमंडलु ॥ दक्षिणा विविधा देया पितॄनुद्दिश्य भारत ॥ ॥ ६६ ॥ यो ददाति द्विजश्रेष्ठ तस्य पुण्यफलं शृणु ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति न संशयः ॥ ६७ ॥ अस्माहके महाराज पितरश्च पितामहाः ॥ वायुभूता निरीक्षंते आगच्छंतं स्वगोत्रजम् ॥ ६८ ॥ अत्र तीर्थे सुतोऽभ्येत्य स्नात्वा तोयं प्रदास्यति ॥ श्राद्धं वा पिंडदानं वा तेन यास्याम सद्गतिम् ॥ ६९ ॥ स्नाने कृते तु ये केचिज्जायंते वस्त्रविप्लुषः ॥ प्रीणयेन्नरकस्थांस्तु तैः पितॄन्नात्र संशयः ॥ ७० ॥ केशोद्विंदव स्तस्य ये चाऽन्ये लेपभाजिनः ॥ तृप्यंत्यनग्निसंस्कारा ये मृताः स्युः स्वगोत्रजाः ॥ ७१ ॥ तत्र तीर्थे तु ये केचिच्छ्राद्धं कृत्वा विधानतः ॥ नरकादुद्धरंत्याशु जपंतः पितृसंहिताम् ॥ ७२ ॥ वनस्पतिगते सोमे यदा सोमदिनं भवेत् ॥ अक्षयाल्लभते लोकान्पिंडेनैकेन मानवः ॥ ७३ ॥ अक्षयं तत्र वै सर्वं जायते नाऽत्र संशयः ॥ नरकादुद्धरंत्याशु जपन्ते पितृसंहिताम् ॥ ७४ ॥ तस्मिंस्तीर्थे त्वमावास्यां पितॄनुद्दिश्य भारत ॥ नीलं सर्वांगसंपूर्णं योऽभिपिच्य समुत्सृजेत् ॥ ७५ ॥ तस्य पुण्यफलं वक्तुं न तु वाचस्पतिः क्षमः ॥ अस्माहके वृषोत्सर्गाद्यत्पुण्यं समवाप्यते ॥ ७६ ॥ तव शुश्रूषणात्सर्वं तत्प्रवक्ष्यामि भारत ॥ रौरवादिषु ये किंचित्पच्यंते तस्य पूर्वजाः ॥ ७७ ॥ वृषोत्सर्गेण तान्सर्वांस्तारयेदेकविंशतिम् ॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ ७८ ॥ पिंगः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥ यस्तु सर्वांगपिंगश्च श्वेतः पुच्छखुरेषु च ॥ ७९ ॥ स पिंगो वृष इत्याहुः पितॄणां प्रीतिवर्धनः ॥ पारावतसवर्णश्च ललाटे तिलको भवेत् ॥ ८० ॥ तं वृषं बभ्रुमित्याहुः पूर्णं सर्वांगशोभनम् ॥ सर्वांगेष्वेकवर्णो यः पिंगः पुच्छखुरेषु च ॥ ८१ ॥ खुरपिंगं तमित्याहुः पितॄणां सद्गतिप्रदम् ॥ नीलं सर्वशरीरेण स्वारक्तनयनं दृढम् ॥ ८२ ॥ तमेव नीलमित्याहुर्नीलः पञ्चविधः स्मृतः ॥ यस्तु वैश्यगृहे जातः स वै नीलो विशिष्यते ॥ ८३ ॥ न वाहयेद्वृहे जातं वत्सकं तु कदाचन ॥ तेनैव च वृषोत्सर्गे पितॄणामनृणो भवेत् ॥ ८४ ॥ जातं तु स्वगृहे वत्सं द्विजन्मा यस्तु वाहयेत् ॥ पतंति पितर स्तस्य ब्रह्मलोकगता अपि ॥ ८५ ॥ यथायथा हि पिबति पीत्वा धूनाति मस्तकम् ॥ पिबन्पितॄन्प्रीणयति नरकादुद्धरेद्धुनन् ॥ ८६ ॥ यथा पुच्छाभिघातेन स्कन्धं गच्छंति विंदवः ॥ नरकादुद्धरंत्याशु पतितान्गोत्रिणस्तथा ॥ ८७ ॥ गर्जन्प्रावृषि काले तु विषाणाभ्यां भुवं लिखन् ॥ खुरेभ्यो या वृद्धदृता तया संप्रीणयेत्पितॄन् ॥ ८८ ॥ पिबन्पितॄन्प्रीणयते खादनोल्लेखनेन तु ॥ गर्जन्नृषिमनुष्याश्च धर्मरूपो हि धर्मज ॥ ८९ ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by S3 Foundation USA

भूतेर्वापि पिशाचैर्वा चातुर्थिकज्वरेण वा ॥ गृहीतोऽस्माहकं गच्छेत्सर्वेषामाधिनाशनम् ॥ ९० ॥ स्नात्वा तु विमले तोये दर्भपृथिं निबन्धयेत् ॥ मस्तके बाहुमूले वा नाभ्यां वा गलकेऽपि वा ॥ ९१ ॥ गत्वा देवसमीपं च प्रादक्षिण्येन केशवम् ॥ ततः समुच्चरन्मंत्रं गायत्र्या वाथ वैष्णवम् ॥ ९२ ॥ नारायणं शरण्येशं सर्वदेवनमस्कृतम् ॥ नमो यज्ञांगसंभूत सर्वव्यापिन्नमोऽस्तु ते ॥ ९३ ॥ नमो नमस्ते देवेश पद्म गर्भ सनातन ॥ दामोदर जयानंत रक्ष मां शरणागतम् ॥ ९४ ॥ त्वं कर्त्ता त्वं च हर्त्ता च जगत्यस्मिंश्चराचरे ॥ त्वं पालयसि भूतानि भुवनं त्वं बिभर्षि च ॥ ९५ ॥ प्रसीद देवदेवेश सुप्तमंगं प्रबोधय ॥ त्वद्भक्तानिरतो नित्यं त्वद्भक्तिपरमो हरे ॥ ९६ ॥ इति स्तुतो मया देव प्रसादं कुरु मेऽच्युत ॥ मां रक्षरक्ष पापेभ्यस्त्रायस्व शरणागतम् ॥ ९७ ॥ एवं स्तुत्वा च देवेशं दानवान्तकरं हरिम् ॥ पुनरुक्तेन वै स्नात्वा ततो विप्रांस्तु भोजयेत् ॥ ९८ ॥ वेदोक्तेन विधानेन स्नानं कृत्वा यथाविधि ॥ पिंडनिर्वपणं कृत्वा वाचयेत्स्वस्तिकं ततः ॥ ९९ ॥ एवं स्तुत्वा च देवेशं दानवांतकरं हरिम् ॥ पुनरुक्तेन वै स्नात्वा ततो विप्रांस्तु भोजयेत्॥१००॥वेदोक्तेन विधानेन स्नानं कृत्वा यथाविधि ॥ एवं तान्वाचयित्वा तु ततो विप्रान्विसर्जयेत ॥ १०१ ॥ यत्तत्रोच्चरितं किंचित्तद्विप्रेभ्यो निवेदयेत॥ तत्र तीर्थे नरः स्नात्वा नारी वा भक्तितत्परा ॥ शक्तितो दक्षिणां दद्या त्कृत्वा श्राद्धं यथाविधि ॥ १०२ ॥ तत्र तीर्थे नरो यावत्स्नापयेद्विधिपूर्वकम् ॥ क्षीरेण मधुना वापि दध्ना वा शीतवारिणा ॥ १०३ ॥ तावत्पुष्क रपात्रेषु पिबंति पितरो जलम्॥अयने विषुवे चैव युगादौ सूर्यसंक्रमे ॥१०४॥ पुष्पैः संपूज्य देवेशं नैवेद्यं यः प्रदापयेत ॥ सोश्वमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ १०५ ॥ तत्र तीर्थे तु यो राजन्सूर्यग्रहणमाचरेत् ॥ सूर्यतेजोनिभैर्यानैर्विष्णुलोके महीयते ॥ १०६ ॥ तत्र तीर्थे तु यः श्राद्धं पितृभ्यः संप्रयच्छति ॥ सत्पुत्रेण च तेनैव संप्राप्तं जन्मनः फलम् ॥१०७॥ इति श्रुत्वा ततो देवाः सर्वे शक्रपुरोगमाः॥ ब्रह्मविष्णुमहेशाश्च स्थापयां चक्रुरीश्वरम् ॥ १०८ ॥ सर्वरोगोपशमनं सर्वपातकनाशनम्॥ यस्तु संवत्सरं पूर्णममावास्यां तु भावितः ॥ १०९ ॥ पितृभ्यः पिंडदानं च कुर्याद्वै स्माहके नृप ॥ त्रिपुष्करे गयायां च प्रभासे नैमिषे तथा ॥११०॥ यत्पुण्यं श्राद्धकर्तृणां तदिहैव भवेद्ध्रुवम् ॥ तिलोदकं कुशैर्मिश्रं यो दद्यादक्षिणा मुखः ॥ १११ ॥ मन्वादौ च युगादौ च व्यतीपाते दिनक्षये॥ यो दद्यात्पितृमातृभ्यः सोऽश्वमेधफलं लभेत् ॥११२॥ अस्माहके नरो यस्तु स्नात्वा संपूजयेद्धरिम् ॥ ब्रह्माणं शंकरं भक्त्या कुर्य्याज्जागरणक्रियाम्॥ ११३ ॥ सर्वपापविनिर्मुक्तः शक्रातिथ्यमवाप्नुयात् ॥ तत्र तीर्थे नरः स्नात्वा यः पश्यति जनार्दनम् ॥ ११४ ॥ विशेषविधिनाऽभ्यर्च्य प्रणम्य च पुनःपुनः ॥ सपुत्रेण च तेनैव पितॄणां विहिता गतिः ॥ ११५ ॥ एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ सृष्टिकार्यकारणोपेताः सुसूक्ष्माः सुमहाफलाः॥ ११६ ॥ एतत्ते कथितं राजन्महापातकनाशनम् ॥ अस्माहकस्य माहात्म्यं किमन्यत्परिपृच्छसि ॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे अस्माहकतीर्थ माहात्म्यवर्णनं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सिद्धेश्वरमनुत्तमम् ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्वृषभध्वजम् ॥ सर्वपापविनिर्मुक्तो गतिं यात्यश्वमेधिनाम् ॥ २ ॥ तत्र तीर्थे तुयः स्नात्वा श्राद्धं कुर्यात्प्रयत्नतः॥ पितॄणां श्रीणनार्थाय सर्वं तेन कृतं भवेत् ॥ ३ ॥ तत्र तीर्थे मृतानां तु जंतूनां नृपसत्तम ॥ गर्भवासे मतिस्तेषां न जायेत कदाचन ॥ ४ ॥ गर्भवासो हि दुःखाय न सुखाय कदाचन ॥ तत्तीर्थवारिणा स्नातुर्न पुनर्भवसंभवः ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थमंगारकं शिवम् ॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरम् ॥ १ ॥ चतुर्थ्यंगारकदिने संकल्प्य कृतनिश्चयः ॥ स्नायादस्तं गते सूर्ये संध्योपासनतत्परः ॥ २ ॥ पूजयेल्लोहितं भक्त्या गंधमाल्यविभूषणैः॥ संस्थाप्य स्थंडिले देवं रक्तचंदनचर्चितम् ॥ ३ ॥ अंगारकायेति नमः कर्णिकायां प्रपूजयेत् ॥ कुजाय भूमिपुत्राय रक्तांगाय सुवाससे ॥ ४ ॥ हरकोपोद्भवा येति स्वेदजायाऽतिबाहवे ॥ सर्वकामप्रदायेति पूर्वादिषु दलेषु च ॥ ५ ॥ एवं संपूज्य विधिवद्यादर्घ्यं विधानतः ॥ भूमिपुत्र महावीर्य स्वेदोद्भव पिनाकिनः ॥ ६ ॥ अंगारक महातेजा लोहितांग नमोऽस्तु ते ॥ करकं वारिसंयुक्तं शालितंदुलपूरितम् ॥ ७ ॥ सहिरण्यं सवस्त्रं च मोदकोपरि संस्थितम् ॥ ब्राह्मणाय निवेद्यं तत्कुजो मे प्रीयतामिति ॥ ८ ॥ अर्घं दत्त्वा विधानेन रक्तचंदनवारिणा ॥ रक्तपुष्पसमाकीर्णं तिलतंदुलमिश्रितम् ॥ ॥ ९ ॥ कृत्वा ताम्रमये पात्रे मंडले वर्तुले शुभे ॥ कृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं गतः ॥ १० ॥ मंत्रपूतं महाभाग दद्यादर्घ्यं विचक्षणः ॥ एवं चतुर्थ्यं संप्राप्ते चतुर्थ्यंगारके नृप ॥ १२ ॥ ततो भुंजीत मौनेन क्षारतिलाम्लवर्जितम् ॥ ११ ॥ स्निग्धं मृदुसमधुरमात्मनः श्रेय इच्छता ॥ एवं चतुर्थ्यं संप्राप्ते चतुर्थ्यंगारके नृप ॥ १२ ॥ सौवर्णं कारयेद्देवं यथाशक्ति सुरूपिणम् ॥ स्थापयेत्ताम्रके पात्रे गुडपीठसमन्विते ॥ १३ ॥ गंधपुष्पादिभिर्देवं पूजयेद्गुडसंस्थितम् ॥ ईशान्यां स्थापयेद्देवं गुडतोयसमन्वितम् ॥१४॥ कासारेण तथाग्नेय्यां स्थापयेत्करकं परम् ॥ रक्ततंदुलसंमिश्रं नैर्ऋत्यां वायुगोचरे ॥१५॥ स्थापयेन्मोदकैः साधं चतुर्थं करकं बुधः ॥ सूत्रेण वेष्टितग्रीवं गंधमाल्यैरलंकृतम् ॥ १६ ॥ शंखतूर्यनिनादेन जयशब्दादिमंगलैः ॥ रक्तांबरधरं विप्रं रक्तमाल्यानुलेपनम् ॥ १७ ॥ वेदिमध्यगतं वाऽपि महदासनसंस्थितम् ॥ सुरूपं सुभगं शांतं सर्वभूतहिते रतम् ॥१८॥ वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् ॥ पूजयित्वा यथान्यायं वाचयेत्पां डुनंदन ॥ १९ ॥ रक्तां गां च ततो दद्याद्रक्तेनानडुहा सह ॥ प्रीयतां भूमिजो देवः सर्वदेवतपूजितः ॥ २० ॥ विप्रं प्रदक्षिणीकृत्य पत्नीपुत्रसमन्वितः ॥ पितृमातृसुहृत्साद्धं क्षमाप्य च विसर्जयेत् ॥ २१ ॥ एवं कृतस्य तस्याऽथ तस्मिंस्तीर्थे विशेषतः ॥ यत्पुण्यं फलमुद्दिष्टं तत्ते सर्वं वदा म्यहम् ॥ २२ ॥ सप्त जन्मानि राजेंद्र सुरूपः सुभगो भवेत् ॥ तीर्थस्याऽस्य प्रभावेन नाऽत्र कार्या विचारणा ॥ २३ ॥ अकामो वा सकामो वा तत्र तीर्थे मृतो नरः ॥ अंगारकपुरं याति देवगंधर्वपूजितः ॥ २४ ॥ उपभुज्य यथान्यायं दिव्यान्भोगाननुत्तमान् ॥ इह मानुष्य लोके वै राजा भवति धार्मिकः ॥ २५ ॥ सुरूपः सुभगश्चैव सर्वव्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं सर्वलोकनमस्कृतः ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे मंगलेश्वरतीर्थमाहात्म्यवर्णननामाष्टाचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवाऽनंतरं तीर्थं लिंगेश्वरमिति श्रुतम् ॥ दर्शनाद्देवदेवस्य यत्र पापं प्रणश्यति ॥ १ ॥ कृत्वा तु कदनं घोरं दानवानां युधिष्ठिर ॥ वाराहं रूपमास्थाय नर्मदायां व्यवस्थितः ॥ २ ॥ तत्र तीर्थे तु यः स्नानं कृत्वा देवं नमस्यति ॥ स मुच्यते नृपश्रेष्ठ महापापैः पुराकृतैः ॥ ३ ॥ द्वादश्यां कृष्णपक्षस्य शुक्ले च समुपोषितः ॥ गंधमाल्यैर्जगन्नाथं पूजयेत्पांडुनंदन ॥ ४ ॥ ब्राह्मणान्भोजयेत्तत्र तदेव लभते फलम् ॥ ६ ॥ तर्पयित्वा पितॄन्देवान्स्नात्वा तत्र तमानसः ॥ जपेदष्टशतानामि देवस्य पुरतः स्थितः ॥ ७ ॥ मासिनासि नि

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by eGangotri

हारो द्वादश्यां कुरुनंदन ॥ केशवं पूजयेन्नित्यं मासि मार्गशिरे बुधः॥८॥ पौषे नारायणं देवं माघमासे तु माधवम् ॥ गोविंदं फाल्गुने मासि विष्णुं चैत्रे समर्चयेत् ॥ ९ ॥ वैशाखे मधुहंतारं ज्येष्ठे देवं त्रिविक्रमम् ॥ वामनं तु तथाऽऽषाढे श्रावणे श्रीधरं स्मरेत् ॥ १० ॥ हृषीकेशं भाद्रपदे पद्मनाभं तथाऽश्विने ॥ दामोदरं कार्त्तिके तु कीर्त्तयन्नावऽसीदति ॥ ११ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ तन्नश्यति न संदेहो मासनामानुकीर्त्तनात् ॥ १२ ॥ स्वयं विबुद्धः सततमुन्मिषन्निमिषंस्तथा ॥ शीघ्रं ग्रपश्य भुंजानो मंत्रहीनं सशुद्धिरेत् ॥ १३ ॥ परमापद्गतस्याऽपि जंतोरेषा मतिः क्रिया ॥ यन्मासाधिपतेर्विष्णोर्मासनामानुकीर्त्तनम् ॥ १४ ॥ ता निशास्ते च दिवसास्ते मासास्ते च वत्सराः ॥ नराणां सफला येषु चिंतितो भगवान्हरिः ॥ १५ ॥ परमापद्गतस्याऽपि यस्य देवो जनार्दनः ॥ नाऽवसर्पति हृत्पद्मात्स योगी नाऽत्र संशयः ॥ १६ ॥ ते भाग्यहीना मनुजाः सुशोच्यास्ते भूमिभाराय कृतावताराः ॥ अचेतनास्ते पशुभिः समाना ये भक्तिहीना भगवत्यनंते ॥ १७ ॥ ते पूर्णकार्या पुरुषाः पृथिव्यां ते स्वांगपाताद्भुवनं पुनंति ॥ विचक्षणा विश्वविभूषणास्ते ये भक्तियुक्ता भगवत्यनंते ॥१८॥ स एव सुकृती तेन लब्धं जन्मतरोः फलम् ॥ चित्ते वचसि काये च यस्य देवो जनार्दनः ॥ १९ ॥ एतत्तीर्थवरं पुण्यं लिंगो यत्र जनार्दनः ॥ वंचयित्वा रिपून्संख्ये क्रोडो भूत्वा सनातनः ॥२०॥ उपप्लुवे चंद्रमसो रवेश्च योह्यष्टकानामयनद्वये च ॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ २१ ॥ घोणोन्मीलितपेरुरंभनिवहो दुःखाब्धि मज्जत्प्लवः प्रादुर्भूतरसातलोदरबृहत्पंकार्द्धमग्नक्षुरः ॥ फूत्कारोत्करनुन्नवातविदलद्दिग्दंतिनादश्रुतिन्यस्तस्तब्धवपुः श्रुतिर्भवतु वः क्रोडो हरिः शांतये ॥ २२ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे लिंगवाराहतीर्थमाहात्म्यवर्णनंनामैकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज कुसुमेश्वरमुत्तमम् ॥ दक्षिणे नर्मदाकूले उपपातकनाशनम् ॥ १ ॥ कामेन स्थापितो देवः कुसुमेश्वरसंज्ञितः ॥ ख्यातः सर्वेषु लोकेषु देवदेवः सनातनः ॥ २ ॥ कामो मनोभवो विश्वः कुसुमायुधचापभृत् ॥ स कामान्ददाति सर्वान्पूजितो मीनकेतनः ॥ ३ ॥ तेन निर्दग्धकायेन चाराध्य परमेश्वरम् ॥ अनंगेन तथा प्राप्तमंगित्वं नर्मदातटे ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अंगिभूतस्य नाशत्वमनंगस्य तु मे वद ॥ न श्रुतं न च मे दृष्टं भूतपूर्वं कदाचन ॥ ५ ॥ एतत्सर्वं यथावृत्तमाचक्ष्व द्विजसत्तम ॥ श्रोतुमिच्छामि विप्रेंद्र भीमार्जुनयमैः सह ॥६॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आदौ कृतयुगे तात देवदेवो महेश्वरः ॥ तपश्चचार विपुलं गंगासागरसंस्थितः ॥ ७ ॥ तेन संपादिता लोकास्तपसा ससुरासुराः ॥ जग्मुस्ते शरणं सर्वे देवदेवं शचीपतिम् ॥ ८ ॥ व्यापकः सर्वभूतानां देवदेवो महेश्वरः ॥ संतापयति लोकांस्त्रींस्तन्निवारय गोपते ॥९॥ श्रुत्वा तद्वचनं तेषां देवानां बलवृत्रहा ॥ चिंतयामास मनसा तपोविघ्नाय चादिशत् ॥ १० ॥ अप्सरां मेनकां रंभां घृताचीं च तिलोत्तमाम् ॥ वसंतं कोकिलं कामं दक्षिणानिलमुत्तमम् ॥ ११ ॥ गत्वा तत्र महादेवं तपश्चरणतत्परम् ॥ क्षोभयध्वं यथान्यायं गंगासागरवासिनम् ॥ १२ ॥ एवमुक्तास्तु ते सर्वे देवराजेन भारत ॥ देवाप्सरःसमोपेता जग्मुस्ते हरसन्निधा ॥ १३ ॥ वसंतमास कुसुमाकराकुले मयूरदात्यूहसुकोकिलाकुले ॥ प्रनृत्य देवाप्सरगीतसंकुल प्रवाति वाते मयनैरुतांकुले ॥ १४ ॥ तेन संमूर्च्छिताः सर्वे संसर्गाच्च खगोत्तमाः ॥ मधुमाधवगंधेन सकिन्नरमहोरगाः ॥ १५ ॥ यावदालोकते तावत्तद्वनं व्याकुलीकृतम् ॥ क्षीयते मदना विष्टं देशावस्थागतं जनम् ॥ १६ ॥ देवदेवोऽपि देवानामवस्थात्रितयं गतः ॥ सात्त्विकीं राजसीं राजंस्तामसीं तां शृणुष्व मे ॥ १७ ॥ एकं योगसमाधिना मुकुलितं चक्षुर्द्वितीयं पुनः पार्वत्या जघनस्थलस्तनतटे शृंगारभारालसम् ॥ अन्यद्रुनिरस्तचापमदनक्रोधानलोद्दीपितं शंभोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ १८ ॥ एवं दृष्टः स देवेन सशरः सशरासनः ॥ भस्मीभूतो गतः कामो विनाशः सर्वदेहिनाम् ॥ १९ ॥ कामं दृष्ट्वा क्षयं यातं तत्र देवाऽप्सरोगणाः ॥ भीता यथाऽऽगतं सर्वे जग्मुश्चैव दिशो दश ॥ २० ॥ कामेन रहिता लोकाः ससुरासुरमानवाः ॥ ब्रह्माणं शरणं जग्मुर्देवा इन्द्रपुरोगमाः ॥ २१ ॥ सीदमानं जगद्दृष्ट्वा तमूचुः परमेष्ठिनम् ॥ जानासि त्वं जगच्छेषं प्रभो मैथुनसंभवात् ॥ २२ ॥ प्रजाः सर्वा विशुष्यंति कामेन रहिता विभो ॥ २३ ॥ एतच्छ्रुत्वा वचस्तेषां देवानां प्रपितामहः॥ जगाम सहितस्तत्र यत्र देवो महेश्वरः ॥ २४ ॥ अतोषयज्जगन्नाथं सर्वभूतमहेश्वरम् ॥ स्तुतिभिस्तंडकैः स्तोत्रैर्वेदवेदांगसंभवैः ॥ २५ ॥ ततस्तुष्टो महादेवो देवानां परमेश्वरः ॥ उवाच मधुरां वाणीं देवान्ब्रह्मपुरोगमान् ॥ २६ ॥ किं कार्यं कश्च संतापः किं वाऽऽगमनकारणम् ॥ देवतानामृषीणां च कथ्यतां मम मा चिरम् ॥ २७ ॥ ॥ देवा ऊचुः ॥ ॥ कामनाशाज्जगन्नाशो भविताऽयं चराचरे ॥ त्रैलोक्यं त्वं पुनः शंभो उत्पादयितुमर्हसि ॥ २८ ॥ एतच्छ्रुत्वा वचस्तेषां विमृश्य परमेश्वरः ॥ चिंतयामास कामस्य विग्रहं भुवि दुर्लभम् ॥ २९ ॥ आजगाम ततः शीघ्रमनंगो ह्यंगतां गतः॥ प्राणदः सर्वभूतानां पश्यतां नृपसत्तम ॥ ३० ॥ ततः शंखनिनादेन भेरीणां निःस्वनेन च ॥ अभ्यनन्दंस्ततो देवं सुरासुरमहोरगाः ॥ ३१ ॥ नमस्ते देवदेवेश कृतार्थाः सुरसत्तमाः ॥ विसर्जिताः पुनर्जग्मुर्यथागतमरिंदम ॥ ३२ ॥ गतेषु सर्वदेवेषु कामदेवोऽपि भारत ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ३३ ॥ तपोजपक्रुशीभूतो दिव्यं वर्षशतं किल ॥ महाभूतैर्विघ्नकरैः पीड्यमानः समंततः ॥ ३४ ॥ आत्मविघ्नविनाशार्थं संस्मृतः कुण्डलेश्वरः ॥ चकार रक्षां सर्वत्र शरपाते नृपोत्तम ॥ ३५ ॥ ततस्तुष्टो महादेवो दृढभक्त्या वरप्रदः ॥ वरेण च्छंदयामास कामं कामविनाशनः ॥ ३६ ॥ ज्ञात्वा तुष्टं महादेवमुवाच झषकेतनः ॥ प्रणतः प्रांजलिर्भूत्वा देवदेवं त्रिलोचनम् ॥ ३७ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ अत्र तीर्थे जगन्नाथ सदा सन्निहितो भव ॥ ३८ ॥ तथेति चोक्त्वा वचनं देवदेवो महेश्वरः ॥ जगामाऽऽकाशमाविश्य स्तूयमानोऽप्सरोगणैः ॥ ३९ ॥ गते चाऽदर्शनं देवे कामदेवो जगद्गुरुम् ॥ स्थापयामास राजेंद्र कुसुमेश्वरसंज्ञितम् ॥ ४० ॥ तत्र तीर्थे तु यः स्नात्वा ह्युपवासपरायणः ॥ चैत्रमासे चतुर्दश्यां मदनस्य दिनेऽथ वा ॥ ४१ ॥ प्रभाते विमले प्राप्ते स्नात्वा पूज्य दिवाकरम् ॥ तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः ॥ ४२ ॥ कृत्वा स्नानं विधानेन पूजयित्वा च तं नृप ॥ पिंडनिर्वपणं कुर्यात्तस्य पुण्यफलं शृणु ॥ ४३ ॥ सत्रयाजिफलं यच्च लभते द्वादशाब्दिकम् ॥ पिंडदानात्फलं तच्च लभते नाऽत्र संशयः ॥ ४४ ॥ अंकुशमूले यः पिंडं पितॄनुद्दिश्य दापयेत् ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति पितामहाः ॥ ४५ ॥ कृमिकीटपतंगा ये तत्र तीर्थे युधिष्ठिर ॥ प्राप्नुवंति मृताः स्वर्गं किं पुनर्ये नरा मृताः ॥ ४६ ॥ संन्यासं कुरुते योऽत्र जितक्रोधो जितेंद्रियः ॥ कुसुमेशो नरो भक्त्या स गच्छेच्छिवमन्दिरम् ॥ ४७ ॥ तत्र दिव्याप्सरोभिश्च देवगन्धर्वगायनैः ॥ क्रीडते सेव्यमानस्तु कल्पकोटिशतं नृप ॥ ४८ ॥ पूर्णे चैव ततः काल इह मानुष्यतां गतः ॥ जायते राजराजेंद्रैः पूज्यमानो नृपो महान् ॥ ४९ ॥ सुरूपः सुभगो वाग्मी विक्रांतो मतिमाञ्छुचिः ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ५० ॥ एतत्पुण्यं पापहरं तीर्थकोटिशताधिकम् ॥ कुसुमेशेति विख्यातं सर्वदेवनमस्कृतम् ॥ ५१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुसुमेश्वरतीर्थमाहात्म्यवर्णनंनाम पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ उत्तरे नर्मदाकूले तीर्थं परमशोभनम् ॥ जयवाराहमाहात्म्यं सर्वपापप्रणाशनम् ॥ १ ॥ उद्धृता जगती येन सर्वदेवनमस्कृता ॥ लोकानुग्रहबुद्ध्या च संस्थितो नर्मदातटे ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा वीक्षते मधुसूदनम् ॥ मुच्यते सर्वपापेभ्यो दशजन्माऽनुकीर्त्तनात् ॥ ३ ॥ मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ॥ रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ मत्स्येन किं कृतं तात कूर्मेण मुनिसत्तम ॥ वराहेण च किं कर्म नरसिंहेन किं कृतम् ॥ ५ ॥ वामनेन च रामेण राघवेण च किं कृतम् ॥ बुद्धरूपेण किं वाऽपि कल्किना किं कृतं वद ॥ ६ ॥ एवमुक्तस्तु विप्रेंद्रो धर्मपुत्रेण धीमता ॥ उवाच मधुरां वाणीं तदा धर्मसुतं प्रति ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ मीनो भूत्वा पुरा कल्पे प्रीत्यर्थं ब्रह्मणो विभुः ॥ समर्पयत्समुद्धृत्य वेदान्मग्नान्महार्णवे ॥ ८ ॥ अमृतोत्पादने राजन्कूर्मो भूत्वा जगद्गुरुः ॥ मंदरं धारयामास तथा देवीं वसुन्धराम् ॥ ९ ॥ उज्जहार धरां मग्नां पातालतलवासिनीम् ॥ वाराहं रूपमास्थाय देवदेवो जनार्दनः ॥ १० ॥ नरस्यार्द्धतनुं कृत्वा सिंहस्यार्द्धतनुं तथा ॥ हिरण्यकशिपोर्वक्षो विददार नखांकुशैः ॥ ॥ ११ ॥ जटी वामनरूपेण स्तूयमानो द्विजोत्तमैः ॥ तद्दिव्यं रूपमास्थाय क्रमित्वा मेदिनीं क्रमैः ॥ १२ ॥ कृतवांश्च बलिं पश्चात्पातालतलवासिनम् ॥ स्थापयित्वा सुरान्सर्वान्गतो विष्णुः स्वकं पुरम् ॥ १३ ॥ जमदग्निसुतो रामो भूत्वा शस्त्रभृतां वरः ॥ क्षत्रियान्पृथिवीपालानवधीद्धैहयादिकान् ॥ १४ ॥ कश्यपाय महीं दत्त्वा सपर्वतवनाकराम् ॥ तपस्तपति देवेशो महेन्द्रेऽद्यापि भारत ॥१५॥ ततो दाशरथी रामो रावणं देवकण्टकम् ॥ सगणं समरे हत्वा राज्यं दत्त्वा विभीषणे ॥ १६ ॥ पालयित्वा नयाद्भूमिं मखैः संतर्प्य देवताः ॥ स्वर्गं गतो महातेजा रामो राजीवलोचनः ॥ १७ ॥ वसुदेवगृहे भूयः संकर्षणसहायवान् ॥ अवतीर्णो जगन्नाथो वासुदेवो युधिष्ठिर ॥ १८ ॥ सोऽवधीत्तव सामर्थ्याद्वधार्थं दुष्टभूभृताम् ॥ चाणूरकंसकेशीनां जरासंधस्य भारत ॥ १९ ॥ तेन त्वं सुसहायेन हत्वा शत्रून्नरेश्वर ॥ भोक्ष्यसे पृथिवीं सर्वां भ्रातृभिः सह संभृताम् ॥ २० ॥ तथा बुद्धत्वमपरं नवमं प्राप्स्यतेऽच्युतः ॥ शांतिमान्देवदेवेशो मधुहंता मधुप्रियः ॥ २१ ॥ तेन बुद्धस्वरूपेण देवेन परमेष्ठिना ॥ भविष्यति जगत्सर्वं मोहितं सचराचरम् ॥ २२ ॥ न श्रोष्यंति पितुः पुत्रास्तदाप्रभृति भारत ॥ न गुरोर्वांधवाः शिष्या भविष्यत्यधरोत्तरम् ॥ ॥ २३ ॥ जितो धर्मो ह्यधर्मेण चासत्येन ऋतं जितम् ॥ जिताश्चौरैश्च राजानः स्त्रीभिश्च पुरुषा जिताः ॥ २४ ॥ सीदंति चाग्निहोत्राणि गुरौ पूजा प्रणश्यति ॥ सीदंति मानवा धर्म्माः कलौ प्राप्ते युधिष्ठिर ॥ २५ ॥ द्वादशे दशमे वर्षे नारी गर्भवती भवेत् ॥ कन्यास्तत्र प्रसूयंते ब्राह्मणो हरिपिंगलः ॥ २६ ॥ भविष्यति ततः कल्किर्दशमे जन्मनि प्रभुः ॥ २७ ॥ एकत्ते कथितं राजन्देवस्य परमेष्ठिनः ॥ कारणं दश जन्मानां सर्वपापक्षयंकरम् ॥ २८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे श्वेतवाराहतीर्थमाहात्म्यवर्णनंनामैकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धरापाल भार्गलेश्वरमुत्तमम् ॥ शंकरं जगतः प्राणं स्मृतमात्राघनाशनम् ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ २ ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे भार्गलेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विपंचाशदधिकशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ छ ॥

॥ ॥ मार्कण्डेय उवाच ॥ ॥ तस्यैवानंतरं चान्यद्रवितीर्थमनुत्तमम् ॥ यस्य संदर्शनादेव मुच्यन्ते पातकैर्नराः ॥ १ ॥ रवितीर्थे तु यः स्नात्वा नरः पश्यति भास्करम् ॥ तस्य यत्फलमुद्दिष्टं स्वयं देवेन तच्छृणु ॥ २ ॥ नांधो न मूको बधिरः कुले भवति कश्चन ॥ कुरूपः कुनखी वापि तस्य जन्मानि षोडश ॥ ३ ॥ दद्रुचित्रककुष्ठानि मण्डलानि विचर्चिका ॥ नश्यंति देवभक्तस्य षण्मासान्नात्र संशयः ॥ ४ ॥ चरितं तस्य देवस्य पुराणे यच्छ्रुतं मया ॥ न तत्कथयितुं शक्यं संक्षेपेण नृपोत्तम ॥ ५ ॥ तत्र तीर्थे तु यद्दानं रविमुद्दिश्य दीयते ॥ विधिना पात्रविप्राय तस्यांतो नाऽस्ति कर्हिचित् ॥ ६ ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ रवितीर्थे प्रदत्तानां दानानां फलमुत्तमम् ॥ ७ ॥ संक्रांतौ यानि दानानि हव्यकव्यानि भारत ॥ अपामिव समुद्रस्य तेषामंतो न लभ्यते ॥ ८ ॥ येनयेन यदा दत्तं येनयेन यदा हुतम् ॥ तस्य तस्य तदा काले सविता प्रतिदायकः ॥ ९ ॥ सप्त जन्मानि तान्येव ददात्यर्कः पुनःपुनः ॥ शतमिंदुक्षये दानं सहस्रं तु दिनक्षये ॥ १० ॥ संक्रांतौ शतसाहस्रं व्यतीपाते त्वनंतकम् ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रवितीर्थं कथं तात पुण्यात्पुण्यतरं स्मृतम् ॥ विस्तरेण ममाख्याहि श्रवणौ मम लंपटौ ॥ १२ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणुष्वाऽवहितो भूत्वा ह्यादित्येश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वव्याधिविनाशनम् ॥ १३ ॥ पुरा कृतयुगस्यादौ जाबालिर्ब्राह्मणोऽभवत् ॥ वसिष्ठाऽन्वयसंभूतो वेदशास्त्रार्थपारगः ॥ १४ ॥ पतिव्रता साधुशीला तस्य भार्या मनस्विनी ॥ ऋतुकाले तु सा गत्वा भर्त्तारमिदमब्रवीत् ॥ १५ ॥ वर्त्तते ऋतुकालो मे भर्त्तारं त्वामुपस्थिता ॥ भज मां प्रीतिसंयुक्तः पुत्रकामां तु कामिनीम् ॥ १६ ॥ एवमुक्तो द्विजः प्राह प्रियेऽद्याऽहं व्रतान्वितः ॥ गच्छेदानीं वरारोहे दास्य ऋत्वंतरे पुनः ॥ १७ ॥ पुनर्द्वितीये संप्राप्ते ऋतुकालेऽप्युपस्थिता ॥ पुनः सा च्छंदिता तेन व्रतस्थोऽद्येति भारत ॥ १८ ॥ इत्थं वा बहुशस्तेन च्छंदिता च पुनःपुनः ॥ निराशा चाऽभवत्तत्र भर्त्तारं प्रति भामिनी ॥ १९ ॥ दुःखेन महताविष्टा विधायानशनं मृता ॥ तेन भ्रूणहतेनैव पापेन सहसा द्विजः ॥ २० ॥ शीर्णघ्राणांघ्रिरभवत्तपः सर्वं ननाश च ॥ दृष्ट्वात्मानं स कुष्ठेन व्याप्तं ब्राह्मणसत्तमः ॥ २१ ॥ विषादं परमं गत्वा नर्मदातटमाश्रितः ॥ अपृच्छद्भास्करं तीर्थं द्विजेभ्यो द्विजसत्तमः ॥ २२ ॥ आरोग्यं भास्करादिच्छेदिति संचिंत्य चेतसि ॥ कुतस्तद्भास्करं तीर्थं भो द्विजाः कथ्यतां मम ॥ २३ ॥ तपस्तप्स्याम्यहं गत्वा तस्मिंस्तीर्थे सुभावितः ॥ २४ ॥ ॥ द्विजा ऊचुः ॥ ॥ रेवाया उत्तरे कूले आदित्येश्वरनामतः ॥ विद्यते भास्करं तीर्थं सर्वव्याधिविनाशनम् ॥ २५ ॥ तत्र याह्यविचारेण गंतुं चेच्छक्यते त्वया ॥ एवमुक्तो द्विजैर्विप्रो गंतुं तत्र प्रचक्रमे ॥ २६ ॥ व्याधिना परिभूतस्तु घोरेण प्राणहारिणा ॥ यदा गंतुं न शक्नोति तदा तेन विचिंतितम् ॥ २७ ॥ सामर्थ्यं ब्राह्मणानां हि विद्यते भुवनत्रये ॥ लिंगपातः कृतो विप्रैर्देवदेवस्य शूलिनः ॥ २८ ॥ समुद्रः शोषितो विप्रैर्विन्ध्यश्चापि निवारितः ॥ अहमप्यत्र संस्थस्तु ह्यानयिष्यामि भास्करम् ॥ २९ ॥ तपोबलेन महता ह्यादित्येश्वरसंज्ञितम् ॥ इति निश्चित्य मनसा ह्युग्रे तपसि संस्थितः ॥ ३० ॥ वायुभक्षो निराहारो ग्रीष्मे पंचाग्निमध्यगः ॥ शिशिरे तोयमध्यस्थो वर्षास्वप्रावृताकृतिः ॥ ३१ ॥ साग्रे वर्षशते पूर्णे रविस्तुष्टोऽब्रवीदिदम् ॥ ३२ ॥ ॥ सूर्य उवाच ॥ ॥ वरं वरय भद्रं ते किं ते मनसि वांच्छितम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अदेयमपि दास्यामि ब्रूहि मां त्वं चिरं कृथाः ॥ ३३ ॥ किमसाध्यं हि ते विप्र इदानीं तपसि स्थितः ॥ ३४ ॥ ॥ जावालिरुवाच ॥ ॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम ॥ मम प्रतिज्ञा देवेश ह्यादित्येश्वरदर्शने ॥ ३५ ॥ कृता तां पारितुं देव न शक्तो व्याधिना वृतः ॥ शुक्रतीर्थेऽत्र तिष्ठ त्वमादित्येश्वरमूर्त्तिधृक् ॥ ३६ ॥ एवमुक्ते तु देवेशो बहुरूपो दिवाकरः ॥ उत्तरे नर्मदाकूले क्षणादेव व्यदृश्यत ॥ ३७ ॥ तदाप्रभृति भूपाल तद्धि तीर्थं प्रचक्षते ॥ सर्वपापहरं प्रोक्तं सर्वदुःखविनाशनम् ॥ ३८ ॥ यस्तु संवत्सरं पूर्णं नित्यमादित्यवासरे ॥ स्नात्वा प्रदक्षिणाः सप्त दत्त्वा पश्यति भास्करम् ॥ ३९ ॥ यत्फलं लभते तेन तच्छृणुष्व मयोदितम् ॥ प्रसुप्तं मंडलानीह दद्रुकुष्ठविचर्चिकाः ॥ ४० ॥ नश्यंति सत्वरं राजंस्तूलराशिरिवाऽनले ॥ धनपुत्रकलत्राणां पूरयेद्वत्सरत्रयात् ॥ ४१ ॥ यस्तु श्राद्धप्रदस्तत्र पितॄनुद्दिश्य संक्रमे ॥ तृप्यंति पितरस्तस्य पितृदेवो हि भास्करः ॥ ४२ ॥ इति ते कथितं सर्वमादित्येश्वरमुत्तमम् ॥ सर्वपापहरं दिव्यं सर्वरोगविनाशनम् ॥ ४३ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिपंचाशदधिकशततमोऽध्यायः ॥ १५३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं कलकलेश्वरम् ॥ विख्यातं सर्वलोकेषु स्वयं देवेन निर्मितम् ॥ १ ॥ अंधकं समरे हत्वा देवदेवो महेश्वरः ॥ सहितो देवगंधर्वैः किन्नरैश्च महोरगैः ॥ २ ॥ शंखतूर्यनिनादैश्च मृदंगपणवादिभिः ॥ वीणावेणुरवैश्चान्यैः स्तुतिभिः पुष्कलादिभिः ॥ ३ ॥ गायंति सामानि यजूंषि चान्ये छन्दांसि चान्ये ऋचमुद्गिरंति ॥ स्तोत्रैरनेकैरपरे गृणंति महेश्वरं तत्र महानुभावाः ॥ ४ ॥ प्रमथानां निनादेन कलकलेन च वन्दिनाम् ॥ यस्मात्प्रतिष्ठितं लिंगं तस्माज्जातं तदाख्यया ॥५॥ तत्र तीर्थे तु यः स्नात्वा वीक्षेत्कलकलेश्वरम् ॥ वाजपेयात्परं पुण्यं स लभेन्मानवो भुवि ॥६॥ तेन पुण्येन पूतात्मा प्राणत्यागादिवं व्रजेत् ॥ आरूढः परमं यानं गीयमानोऽप्सरोगणैः ॥ ७ ॥ उपभुज्य महाभोगान्कालेन महता ततः ॥ मर्त्यलोके महात्माऽसौ जायते विमले कुले ॥ ८ ॥ ब्राह्मणः सुभगो लोके वेदवेदांगपारगः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ॥ ९ ॥

इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे कलकलेश्वरतीर्थफलमाहात्म्यवर्णनंनाम चतुःपंचाशदधिकशततमोऽध्यायः ॥ १५४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि सर्वतीर्थादनुत्तमम् ॥ उत्तरे नर्मदाकूले शुक्रतीर्थं युधिष्ठिर ॥ १ ॥ तस्य तीर्थस्य चाऽन्यानि पुण्यत्वाच्छुभदर्शनात् ॥ पृथिव्यां सर्वतीर्थानि कलां नार्हंति षोडशीम् ॥ २ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तस्य तीर्थस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ भ्रातृभिः सहितः सर्व्वैस्तथान्यैर्द्विजसत्तमैः ॥ ३ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शुक्रतीर्थस्य चोत्पत्तिमाकर्णय नरेश्वर ॥ यस्य संदर्शनादेव ब्रह्महत्या प्रलीयते ॥ ४ ॥ नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ यच्च बाल्ये कृतं पापं दर्शनादेव नश्यति ॥ ५ ॥ मोक्षदानि न सर्वत्र शुक्रतीर्थमृते नृप ॥ शुक्रतीर्थस्य माहात्म्यं पुराणे यच्छ्रुतं मया ॥६॥ समागमे मुनीनां तु देवानां हि तथैव च ॥ कथितं देवदेवेन शितिकण्ठेन भारत ॥ कैलासे पर्वतश्रेष्ठे तत्ते संकथयाम्यहम् ॥ ॥ ७ ॥ पुरा कृतयुगस्याऽऽदौ तोषितुं गिरिजापतिम् ॥ तपश्चचार विपुलं विष्णुर्वर्षसहस्रकम् ॥ वायुभक्षो निराहारः शुक्रतीर्थे व्यवस्थितः ॥ ८ ॥ ततः प्रत्यक्षतामागादेवदेवो महेश्वरः ॥ प्रादुर्भूतस्तु सहसा तत्र तीर्थे नराधिप ॥९॥ क्रोशद्वयमिदं चक्रे मुक्तिमुक्तिप्रदायकम् ॥ तस्मिंस्तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ १० ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥ ११ ॥ सर्वौषधीनामशनं प्रधानं सर्वेषु पेयेषु जलं प्रधानम् ॥ निद्रा सुखानां प्रमदा रतीनां सर्वेषु गात्रेषु शिरः प्रधानम् ॥ १२ ॥ स्नातस्याऽपि यथा पुण्यं ललाटं नृपसत्तम ॥ शुक्रतीर्थं तथा पुण्यं नर्मदायां युधिष्ठिर ॥ १३ ॥ सरितां च यथा गंगा देवतानां जनार्दनः ॥ शुक्रतीर्थं तथा पुण्यं नर्मदायां व्यवस्थितम् ॥ १४ ॥ चतुष्पदानां सुरभिर्वर्णानां ब्राह्मणो यथा ॥ प्रधानं सर्वतीर्थानां शुक्रतीर्थं तथा नृप ॥ १५ ॥ ग्रहाणां तु यथाऽऽदित्यो नक्षत्राणां यथा शशी ॥ शिरो वा सर्वगात्राणां धर्माणां सत्यमिष्यते ॥ १६ ॥ तथैव पार्थ तीर्थानां शुक्रतीर्थमनुत्तमम् ॥ दुर्विज्ञेयो यथा लोके परमात्मा सनातनः ॥ १७ ॥ सुसूक्ष्मत्वादनिर्देश्यः शुक्रतीर्थं तथा नृप ॥ मन्दप्रज्ञत्वमापन्नो महामोहसमन्वितः ॥ १८ ॥ शुक्रतीर्थं ना जानाति नर्मदातटसंस्थितम् ॥ बहुनाऽत्र किमुक्तेन धर्म्मपुत्र पुनःपुनः ॥ १९ ॥ शुक्रतीर्थं महापुण्यं संप्राप्तं कल्मषक्षयात् ॥ योऽत्र दत्ते शुचिर्भूत्वा एकं रेवाजलांजलिम् ॥ २० ॥ कल्पकोटिसहस्राणि पितरस्तेन तर्पिताः ॥ २१ ॥ एकः पुत्रो धरापृष्ठे पितॄणामार्त्तिनाशनः ॥ चाणक्यो नाम राजाऽभूच्छुक्रतीर्थं च वेद सः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽसौ द्विजवरश्रेष्ठ चाणक्योनाम नामतः ॥ शुक्रतीर्थस्य यो वेत्ता नाऽन्यो वेत्ता हि कश्चन ॥ २३ ॥ केनोपायेन तत्तीर्थं तेन ज्ञातं धरातले ॥ तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥२४॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इक्ष्वाकुप्रभवो राजा नप्ता शुद्धोदनस्य च ॥ चाणक्यो नाम राजर्षिर्भुभुजे पृथिवीमिमाम् ॥ २५ ॥ विक्रांतो मतिमानञ्छूरः सर्वलोकैरवंचितः ॥ वंचितः सहसा धूर्तवायसाभ्यां नृपोत्तमः ॥ २६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं स वञ्चितो राजा वायसाभ्यां कुतोऽथवा ॥ पुरा येन प्रतिज्ञातं धीगर्भेण महात्मना ॥ २७ ॥ न जीवे वंचितोऽन्येन प्राणांस्त्यक्ष्ये न संशयः ॥ एतन्मे वद विप्रेंद्र परं कौतूहलं मम ॥ ॥ २८ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आत्मानं वंचितं ज्ञात्वा तदा संगृह्य वायसौ ॥ प्रेषयामास तीव्रेण दण्डेन यमसादनम् ॥ ॥ २९ ॥ ॥ वायसावूचतुः ॥ ॥ सुन्दोपसुन्दयोः पुत्रावावां काकत्वमागतौ ॥ मा वधीस्त्वं महाभाग कस्मिंश्चित्कारणांतरे ॥ ३० ॥ तावावां कृतसंकल्पौ त्वया कोपेन मानद ॥ निरस्तावानरस्तौ ना यास्यावः परमां गतिम् ॥ ३१ ॥ तदादेशय राजेंद्र कृत्वा तव महत्प्रियम् ॥ मुक्तशापौ भविष्यावो ब्रह्मणो वचनं तथा ॥ ३२ ॥ तच्छ्रुत्वा काकवचनं चाणक्यो नृपसत्तमः ॥ नाहं जीवे विदित्वैवं वञ्चितः केन कर्हिचित् ॥ ३३ ॥ तस्मात्तीर्थं विजानीतं यमस्य सदने द्विजौ ॥ प्रेषयामि यथान्यायं श्रुत्वा तत्कथयिष्यथः ॥ ३४ ॥ तेनैव मुक्तौ तौ काकौ स्रक्चन्दनविभूषितौ ॥ शीघ्रगौ प्रेषयामास यमस्य सदनं प्रति ॥ ३५ ॥ ॥ राजोवाच ॥ ॥ तत्र धर्मपुरं गत्वा विचरंतावितस्ततः ॥ यदि पृच्छति धर्मात्मा यमः संयमनो महान् ॥ ३६ ॥ कुतो वामागतं ब्रूतं केन वा भूषितावुभौ ॥ मदीया भारती तस्य कथनीया ह्यशंकितम् ॥ ३७ ॥ इक्ष्वाकुसम्भवो राजा चाणक्योनाम धार्मिकः ॥ द्वादशाहे मृतस्याऽस्य तर्प्पितावशनादिना ॥ ३८ ॥ तच्छ्रुत्वा वचनं राज्ञो गतौ तौ यमसादनम् ॥ क्रीडितौ प्रांगणे तस्य स्रक्चंदनविभूषितौ ॥ धर्मराजेन तौ दृष्टौ पृष्टौ धृष्टौ च वायसौ ॥ ३९ ॥ ॥ ॥ यम उवाच ॥ ॥ कुतः स्थानात्समायातौ केन वा भूषितावुभौ ॥ वृत्तं वै कथ्यतामेतद्वायसाविशंकया ॥ ४० ॥ ॥ काकावूचतुः ॥ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इक्ष्वाकुसम्भवो राजा चाणक्योनाम धार्मिकः ॥ द्वादशाहे मृतस्याऽस्य तर्पितावशनादिभिः ॥ ४१ ॥ तयोस्तद्वचनं श्रुत्वा तदा वैवस्वतो यमः ॥ चित्रगुप्तं कलिं कालं वीक्ष्यतामिदमब्रवीत् ॥ ४२ ॥ अंडजस्वेदजातीनां भूतानां सचराचरे ॥ विहितं लोककर्तृणां सान्निध्ये ब्रह्मणा मम ॥ ४३ ॥ गतः कुत्र दुराचारश्चाणक्यो नाम्नतास्त्विह ॥ अन्विष्यतां पुराणेषु त्रितिहासेषु या गतिः ॥ ४४ ॥ ततस्तेधर्म्मपालैस्तु यमराज प्रचोदितैः ॥ निरीक्षिता पुराणोक्ता कर्मजा गतिरागतिः ॥ ४५ ॥ ततः प्रोवाच वचनं धर्मो धर्मभृतां वरः ॥ शृण्वतां धर्मपालानां मेघगंभीरया गिरा ॥ ४६ ॥ शुक्लतीर्थे मृतानां तु नर्मदाविमले जले ॥ अण्डजस्वेदजातीनां न गतिर्मम सन्निधौ ॥ ४७ ॥ तत्तीर्थं धार्मिकं लोके ब्रह्मविष्णुमहेश्वरैः ॥ निर्मितं परया भक्त्या लोकानां हितकाम्यया ॥ ४८ ॥ पापोपपातकैर्युक्ता ये नरा नर्मदाजले ॥ शुक्लतीर्थे मृताः शुद्धा न ते मद्विषयाः क्वचित् ॥ ४९ ॥ एतच्छ्रुत्वा तु वचनं तौ काकौ यमभाषितम् ॥ आगतौ शीघ्रगौ पार्थ दृष्ट्वा यमपुरं महत् ॥ ५० ॥ पृष्टौ तौ प्रगतौ राज्ञा यथा वृत्तं यथाश्रुतम् ॥ कथयामासतुः पार्थ दानवौ काकतां गतौ ॥ ५१ ॥ अस्मात्स्थानाद्गतावावां यमस्य पुरमुत्तमम् ॥ पृथिव्या दक्षिणे भागे ह्यतीत्य बहुयोजनम् ॥ ५२ ॥ तत्पुरं कामगं दिव्यं स्वर्णप्राकारतोरणम् ॥ अनेकगृहसंबाधं मणिकांचनभूषितम् ॥ ५३ ॥ चतुष्पथैश्चत्वरैश्च घंटा मार्गोपशोभितम् ॥ उद्यानवनसंच्छन्नं पद्मिनीखंडमंडितम् ॥ ५४ ॥ हंससारससंघुष्टं कोकिलाकुलसंकुलम् ॥ सिंहव्याघ्रगजाकीर्णनृक्षवानरसेवितम् ॥ ५५ ॥ नरनारीसमाकीर्णं नित्योत्सवविभूषितम् ॥ शंखदुन्दुभिनिर्घोषैर्वीणावेणुनिनादितम् ॥ ५६ ॥ यममार्गेऽपि विहितं स्वर्गलोकमिवाऽपरम् ॥ गतौ तत्र पुनश्चान्यैर्यमदूतैर्यमाज्ञया ॥ ५७ ॥ विदितौ प्रेषितौ तत्र यत्र देवो जगत्प्रभुः ॥ प्राणस्य भीत्या दृष्टोऽसौ सिंहासनगतः प्रभुः ॥ ५८ ॥ महाकायो महाजंघो महास्कन्धो महोदरः ॥ महावक्षा महाबाहुर्महावक्त्रेक्षणो महान् ॥ ५९ ॥ महामहिषमारूढो महामुकुटभूषितः ॥ तत्राऽन्यश्च कलिः कालश्चित्रगुप्तो महामतिः ॥ ६० ॥ समागतौ तदा दृष्टौ मध्ये ज्वलितपावकौ ॥ पुण्यपापानि जंतूनां धृतिस्तृत्यर्थपारगौ ॥ ६१ ॥ विचारयंतौ सततं तिष्ठतो तौ दिवानिशम् ॥ ततो ह्यावां प्रणमते यमेन यममूर्तिना ॥ ६२ ॥ पृष्टावागमने हेतुं तमब्रूव शृणुष्व तत् ॥ उज्जयिन्यां महीपालश्चाणक्योऽभूत्प्रतापवान् ॥ ६३ ॥ द्वादशाहे मृतस्याऽस्य भुक्ता प्राप्तौ यमालयम् ॥ ततोऽस्माकं वचः श्रुत्वा कंपयित्वा शिरो यमः ॥ ६४ ॥ उवाच वचनं सत्यं सभामध्ये हसन्निव ॥ अस्ति तत्कारणं येन चाणक्यः पापपूरुषः ॥ ६५ ॥ नायातो मम लोके तु सर्वपापभयंकरे ॥ शुक्लतीर्थे मृतानां तु नर्मदायां परं पदम् ॥ ६६ ॥ जायते सर्वजंतूनां नाऽत्र काचिद्विचारणा ॥ अवशः स्ववशोवाऽपि जंतुस्तत्क्षेत्रमंडले ॥ ६७ ॥ मृतः स वै न सन्देहो रुद्रस्यानुचरो भवेत् ॥ तद्धर्मवचनं श्रुत्वा निर्गत्य नगराद्बहिः ॥ ६८ ॥ पश्यन्तौ विविधां घोरां नरके लोकयातनाम् ॥ त्रिंशत्कोट्यो हि घोराणां नरकाणां नृपोत्तम ॥६९॥ दृष्ट्वा भीतौ परामार्त्तिं गतौ तत्र महापथि ॥ नरको रौरवस्तत्र महारौरव एव च ॥ ७० ॥ पेषणः शोषणश्चैव कालसूत्रोऽस्थिभंजनः ॥ तामिस्रश्चांधतामिस्रः कृमिभूतिवहस्तथा ॥ ७१ ॥ दृष्ट्वान्यो महाज्वालस्तत्रैव विषभोजनः ॥ नरकौ दंशमशकौ तथा यमलपर्वतौ ॥ ७२ ॥ नदी वैतरणी दृष्ट्वा सर्वपापप्रणाशिनी ॥ शीतलं सलिलं यत्र पिबन्ति ह्यमृतोपमम् ॥ ७३ ॥ तदेव नीरं पापानां शोणितं परिवर्तते ॥ असिपत्रवनं चाऽन्यद्दृष्टाऽन्या महती शिला ॥ ७४ ॥ अग्निकुंभनिभाकारा विशाला शाल्मली परा ॥ इत्यादयस्तथैवान्ये शतसाहस्रसंज्ञिताः ॥ ७५ ॥ घोरघोरतरा दृष्टाः क्लिश्यंते यत्र मानवाः ॥ वाचिकैर्मानसैः पापैः कर्मजैश्च पृथग्विधैः ॥ ७६ ॥ अहंकारकृतैर्द्रोहैर्मायावचनपूर्वकैः ॥ पिता माता गुरुर्भ्राता अनाथा विकलेंद्रियाः ॥ ७७ ॥ भ्रमन्ति नोद्धृता येषां गतिस्तेषां हि रौरवे ॥ तत्र ते द्वादशाब्दानि क्षपित्वा रौरवेऽधमाः ॥७८॥ इह मानुष्यके लोके दीनांधाश्च भवंति ते ॥ देवब्रह्मस्वहर्तॄणां नराणां पापकर्मणाम् ॥ ७९ ॥ महारौरवमाश्रित्य ध्रुवं वासो यमालये ॥ ततः कालेन महता पापाः पापेन वेष्टिताः ॥ ८० ॥ जायन्ते कण्टकैर्भिन्नाः कोशे वा कोशकारकाः ॥ मृगपक्षिविहंगानां घातका मांसभक्षकाः ॥ ८१ ॥ पेषणं नरकं यांति शोषणं जीवबन्धनात् ॥ तत्रत्यां यातनां घोरां सहित्वा शास्त्रचोदिताम् ॥ ८२ ॥ इह मानुष्यतां प्राप्य पंग्वंधबधिरा नराः ॥ गवार्थे ब्राह्मणार्थे च ह्यनृतं वदतामिह ॥ ८३ ॥ पतनं जायते पुंसां नरके कालसूत्रके ॥ तत्रत्या यातना घोरा विहिता शास्त्रकर्तृभिः ॥ ८४ ॥ भुक्त्वा समागता ह्यत्र ते यास्यंत्यंत्यजां गतिम् ॥ बंधयंति च ये जीवांस्त्यक्त्वात्मकुलसंततिम् ॥ ८५ ॥ पतन्ति नात्र सन्देहो नरके तेऽस्थिभंजने ॥ तत्र वर्षशतस्यांऽत इह मानुष्यतां गताः ॥ ॥ ८६ ॥ कुब्जा वामनकाः पापा जायन्ते दुःखभागिनः ॥ ये त्यजंति स्वकां भार्यां मूढाः पंडितमानिनः ॥ ८७ ॥ ते यांति नरकं घोरं तामिस्रं नाऽत्र संशयः॥ तत्र वर्षशतस्यांते इह मानुष्यतां गताः ॥८८॥ दुर्भगाणो दुर्भगाश्च जायन्ते मानवा हि ते ॥ मानकूटं तुलाकूटं कूटकं तु वदंति ये ॥ ॥ ८९ ॥ नरके तेंऽधतामिस्रे प्रपच्यंते नराधमाः ॥ शतसाहस्रिकं कालमुषित्वा तत्र ते नराः ॥ ९० ॥ इह शत्रुगृहे त्वंधा भ्रमन्ते दीनमूर्त्तयः ॥

पितृदेवद्विजेभ्योऽन्नमदत्त्वा येऽत्र भुंजते ॥ ९१ ॥ नरके कृमिभक्ष्ये ते पतंति स्वात्मपोषकाः ॥ ततः प्रमूतिकाले हि कृमिभुक्तश्च सव्रणः ॥९२॥ जायतेऽशुचिगन्धोऽत्र परभाग्योपजीवकः ॥ स्वकर्मविच्युताः पापा वर्णाश्रमविवर्जिताः ॥ ९३ ॥ नरके पूयसंपूर्णे क्लिश्यन्त ह्ययुतं समाः ॥ पूर्णे तत्रैव ततः काले प्राप्य मानुष्यकं भवम् ॥ ९४ ॥ उद्वेजनीया भूतानां जायन्ते व्याधिभिर्वृताः ॥ अग्निदो गरदश्चैव लोभमोहान्वितो नरः ॥ ९५ ॥ नरके विषसंपूर्णे निमज्जति दुरात्मवान् ॥ तत्र वर्षशतात्कालादुन्मज्जनमवस्थितः ॥ ९६ ॥ भुवि मानुषतां प्राप्य कृपणो जायते पुनः ॥ पादुको पानहौ छत्रं शय्यां प्रावरणानि च ॥ ९७ ॥ अदत्त्वा दंशमशकैर्भक्ष्यंते जन्यसप्ततिम् ॥ पितुर्द्रव्यापहर्त्तारस्ताडनकोशने रताः ॥९८॥ पीडनं क्रियते तेषां यत्र तौ युग्मपर्वतौ ॥ या सा वैतरणी घोरा नदी रक्तप्रवाहिनी ॥ ९९ ॥ पिबन्ति रुधिरं तत्र येऽभियांति रजस्वलाम् ॥ असिपत्रवने घोरे पीड्यंते पापकारिणः ॥ १०० ॥ परपीडाकरा नित्यं ये नरोन्त्यजगामिनः ॥ गुरुदारररतानां तु महापातकिनामपि ॥ १०१ ॥ शिलायां तेषां जायते जन्मसप्ततिम् ॥ ज्वलन्तीमायसीं घोरां बहुकण्टकसंवृताम् ॥ २ ॥ शाल्मलीं तेऽवगूहंति परदाररता हि ये ॥ परस्य योषितं वयूहनं तेषां जायते जन्मसप्ततिम् ॥ ३ ॥ अरण्ये निर्जले देशे स भवेत्क्रूरराक्षसः ॥ देवस्वं ब्राह्मणस्वं च लोभेनैवाऽऽहरेच्च यः ॥ ४ ॥ स पापात्मा परे हत्वा ब्रह्मस्वमपहृत्य च ॥ ५ ॥ येषां तु दर्शनादेव श्रवणाच्चायते भयम् ॥ तथा दानफलं चाऽन्ये लोके गृध्नोच्छिष्टेन जीवति ॥ एवमादीनि पापानि भुञ्जते यमशासनात् ॥ ६ ॥ दृष्टास्तत्र महाभाग तपःसंभुंजाना यममंदिरे ॥ ७ ॥ दृष्टाः श्रुतं कथयतां दूतानां च यमाऽऽज्ञया ॥ रथैरन्ये गजैरन्ये केचिद्वाजिभिरावृताः॥ ८ ॥ शय्याशनगृहादीनां स लोकः कामदो नृणाम् ॥ अन्नं पानीयसहितं ददते येऽत्र चयसंस्थिताः ॥ गोदाता स्वर्णदाता च भूमिरत्नप्रदा नराः ॥ ९ ॥ मानवाः ॥९॥ तत्र तृप्ताः सुसंतुष्टाः क्रीडन्ते यमसादने ॥ अत्र यद्दीयते दानमपि वालाग्रमात्रकम् ॥ ११० ॥ तदक्षयफलं सर्वं शुक्लतीर्थे नृपोत्तम ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एतत्ते कथितं सर्वं यदृष्टं यच्च वै श्रुतम् ॥११॥ कुरुष्व यदभिप्रेतं यदि शक्रोपि मुच्यताम् ॥ तयोस्तद्वचनं श्रुत्वा चाणक्यो हृष्टमानसः ॥ १२ ॥ विसर्जयामास खगावभिनंद्य पुनःपुनः ॥ ताभ्यां गताभ्यां सर्वस्वं दत्त्वा विप्रेषु भारत ॥ १३ ॥ कामक्रोधौ परित्यज्य जगामाऽमरपर्वतम् ॥ तत्र बध्वोडुपं गाढं कृष्णरज्ज्वावलंबितम्॥१४॥प्लवमानो जगामाऽशु ध्यायन्देवं जनार्दनम् ॥ आरोग्यं भास्करादिच्छेद्धनं वै जातवेदसः॥१५॥ग्राप्नोति ज्ञानमीशानान्मोक्षं प्राप्नोति केशवात् ॥ नीलं रक्तं तदभवन्मेचकं यद्धि सूत्रकम् ॥ १६ ॥ शुद्धस्फटिकसंकाशं दृष्ट्वा रज्जुं महामतिः ॥ आप्लुत्य विमले तोये गतोऽसौ वैष्णवं पदम् ॥ १७ ॥ गायंति यद्वेदविदः पुराणं नारायणं शाश्वतमच्युताह्वयम् ॥ प्रातः स तं राजसुतो महात्मा निक्षिप्य देहं शुभशुक्रतीर्थे ॥ १८ ॥ एषा ते कथिता राजन्सिद्धिश्चाणक्यभूभृतः ॥ तथाऽन्यत्तव वक्ष्यामि शृणुष्वैकाग्रमानसः ॥ ११९ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे चाणक्यसिद्धिप्राप्तिवर्णनं नाम पंचपंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नास्ति लोकेषु तत्तीर्थं पृथिव्यां यन्नरेश्वर ॥ शुक्रतीर्थेन सदृशमुपमानेन गीयते ॥ ॥ १ ॥ शुक्रतीर्थं महातीर्थं नर्मदायां व्ययेस्थितम् ॥ शृणुदक्षवणे देशे मुनिसंघनिषेवितम् ॥ २ ॥ वैशाखे च तथा मासि कृष्णपक्षे चतुर्दशी ॥ कैलासादुमया सार्द्धं स्वयमायाति शंकरः ॥ ३ ॥ मध्याह्नसमये स्नात्वा पश्यत्यात्मानमात्मना ॥ ब्रह्मविष्णुवह्निसहितः शुक्रतीर्थे समाहितः ॥ ४ ॥ कार्त्तिक्यां तु विशेषेण वैशाख्यां च नरोत्तम ॥ ब्रह्मविष्णुमहादेवान् स्नात्वा पश्यति तद्दिने ॥ ५ ॥ देवराजः सुरैः सार्द्धं वायुमार्गव्यवस्थितः ॥ कृष्णपक्षे चतुर्दश्यां स्नात्वा पश्यति शंकरम् ॥ ६ ॥ गंधर्वाप्सरसो यक्षाः सिद्धविद्याधरोरगाः ॥ तद्दिने तेऽपि देवेशं दृष्ट्वा मुंचंति किल्बिषम् ॥ ॥ ७ ॥ अर्द्धयोजनविस्तारं तद्धनेनैव चायतम् ॥ शुक्रतीर्थं महापुण्यं महापातकनाशनम् ॥ ८ ॥ यत्र स्थितैः प्रदृश्यंते वृक्षाग्राणि नरोत्तमैः ॥ तत्र स्थिता महापापैर्मुच्यंते पूर्वसंचितैः ॥ ९ ॥ पापोपपातकैर्युक्तो नरः स्नात्वा प्रमुच्यते ॥ उपार्जितां विनश्येत भ्रूणहत्यापि दुस्त्यजा ॥ १० ॥ यस्मात्तत्रैव देवेश उमया सह तिष्ठति ॥ वैशाख्यां च विशेषेण कैलासादेति शंकरः ॥ ११ ॥ तेन तीर्थं महापुण्यं सर्वपातकनाशनम् ॥ कथितं ब्रह्मणा पूर्वं मया तत्र तथा नृप ॥ १२ ॥ रजकेन यथा धौतं वस्त्रं भवति निर्मलम् ॥ तथा तत्र वपुःस्नानं पुरुषस्य भवेच्छुचि ॥ १३ ॥ पूर्वं वयसि पापानि कृत्वा पुष्टानि मानवः ॥ अहोरात्रोपितो भूत्वा शुक्रतीर्थे व्यपोहति ॥ १४ ॥ शुक्रतीर्थे महाराज राकां रेवाजलांजलिम् ॥ कल्पकोटिसहस्राणि दत्त्वा स्युः पितरः शिवाः ॥ १५ ॥ न माता न पिता बंधुः पतनं नरकार्णवे ॥ उद्धरंति यथा पुण्यं शुक्रतीर्थे नरेश्वर ॥ १६ ॥ तपसा ब्रह्मचर्य्येण न तां गच्छंति सद्गतिम् ॥ शुक्रतीर्थे मृतो जंतुर्देहत्यागेन यां लभेत् ॥ १७ ॥ कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशीम् ॥ घृतेन स्नापयेद्देवमुपोष्य प्रयतो नरः ॥ १८ ॥ स्नात्वा प्रभाते रेवायां दद्यात्सघृतकंबलम् ॥ सहिरण्यं यथाशक्ति देवमुद्दिश्य शंकरम् ॥ १९ ॥ देवस्य पूरणां कुर्याद्घृतेन घृतकंबलम् ॥ स गच्छति महातेजाः शिवलोकं मृतो नरः ॥ २० ॥ एकविंशकुलोपेतो यावदाभूतसंप्लवम् ॥ शुक्रतीर्थे नरः स्नात्वा ह्युमां रुद्रं च योऽर्चयेत् ॥ २१ ॥ गंधपुष्पादिधूपैश्च सोऽश्वमेधफलं लभेत् ॥ मासोपवासं यः कुर्यात्तत्र तीर्थे नरेश्वर ॥ २२ ॥ मुच्यते स महत्पापैः सप्तजन्मसुसंचितैः ॥ उष्ट्रीक्षीरमविक्षीरं नवश्राद्धे च भोजनम् ॥ २३ ॥ वृषलीगमनं चैव तथाऽभक्ष्यस्य भक्षणम् ॥ अविक्रयेऽनृते पापं माहिषेऽज्याज्ययाजके ॥ २४ ॥ वार्धुष्ये पंक्तिगरदे देवब्राह्मणदूषके ॥ एवमादीनि पापानि तथाऽन्यान्यपि भारत ॥ २५ ॥ चांद्रायणेन नश्यंति शुक्रतीर्थे न संशयः ॥ शुक्रतीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ २६ ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति सुतर्पिताः ॥ पादुकोपानहौ छत्रं शय्यामासनमेव च ॥२७ ॥ सुवर्णं धनधान्यं च श्राद्धं युक्तहलं तथा ॥ अन्नं पानीयसंहितं तस्मिंस्तीर्थे ददंति ये ॥ २८ ॥ हृष्टाः पुष्टा मृता यांति शिवलोकं न संशयः ॥ तत्र तीर्थे तु यो भक्त्या शिवमुद्दिश्य भारत ॥ २९ ॥ भिक्षामात्रं तथाऽन्नं ये तेऽपि स्वर्ग्यांति वै नराः ॥ यज्विनां व्रतिनां चैव तत्र तीर्थनिवासिनाम् ॥ ३० ॥ अपि वालाग्रमात्रं हि दत्तं भवति चाऽक्षयम् ॥ अग्निप्रवेशं यः कुर्याच्छुक्रतीर्थे समाहितः ॥ ३१ ॥ रागद्वेषविनिर्मुक्तो हृदि ध्यात्वा जनार्दनम् ॥ सर्वकामसुसंपूर्णः स गच्छेद्भारुणं पुरम् ॥ ३२ ॥ न रोगो न जरा तत्र यत्र देवोंऽभसां पतिः ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर ॥ ३३ ॥ अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ अवशः स्ववशो वाऽपि जंतुस्तत्क्षेत्रमंडले ॥ ॥ ३४ ॥ मृतः स तु न संदेहो रुद्रस्यानुचरो भवेत् ॥ शुक्रतीर्थे तु यः कन्यां शक्त्या दद्यादलंकृताम् ॥ ३५ ॥ विधिना यो नृपश्रेष्ठ कुरुते वृषमोक्षणम् ॥ तस्य यत्फलमुद्दिष्टं पुराणे रुद्रभाषितम् ॥ ३६ ॥ तदहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ यावंतो रोमकूपाः स्युः सर्वांगेषु पृथक्पृथक् ॥ ३७ ॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ शुक्रतीर्थे तु यदत्तं ग्रहणे चंद्रसूर्ययोः ॥ ३८ ॥ वर्धते तद्गुणं तावद्दिनानि दश पंच च ॥ शुक्रतीर्थं शुचिर्भूत्वा यः करोति प्रदक्षिणम् ॥ ३९ ॥ पृथ्वीप्रदक्षिणा तेन कृता यत्तस्य तत्फलम् ॥ शोभनं मिथुनं यस्तु रुद्रमुद्दिश्य पूजयेत् ॥ ४० ॥ सप्त जन्मानि तस्यैव वियोगो न च वै क्वचित् ॥ एतत्ते कथितं राजन्संक्षेपेण फलं महत् ॥ ४१ ॥ शुक्रतीर्थस्य यत्पुण्यं यथा देवाच्छ्रुतं मया ॥ य इदं शृणुयाद्भक्त्या पुराणे विहितं फलम् ॥ ४२ ॥ स लभेन्नात्र संदेहः सत्यं सत्यं पुनःपुनः॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥ ४३ ॥ मोक्षार्थी लभते मोक्षं स्नानदानफलं महत् ॥४४॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे शुक्रतीर्थमाहात्म्यवर्णनंनाम षट्पंचाशदधिकशततमोऽध्यायः ॥ १५६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं राजञ्छुक्रतीर्थसमीपतः ॥ वासुदेवस्य तीर्थं तु सर्वलोकेषु पूजितम् ॥ १ ॥ तद्धि पुण्यं सुविख्यातं नर्मदायां पुरातनम् ॥ यत्र हुंकारमात्रेण रेवा क्रोशं जगाम सा ॥ २ ॥ यदा प्रभृति राजेंद्र हुंकारेण गता सरित् ॥ तदाप्रभृति स स्वामी हुंकारः शब्दितो बुधैः ॥ ३ ॥ हुंकारतीर्थे यः स्नात्वा पश्यत्यव्ययमच्युतम् ॥ स मुच्यते नरः पापैः सप्तजन्मकृतैरपि ॥ ४ ॥ संसारार्णवमग्नानां नराणां पापकर्मिणाम् ॥ नैवोद्धर्त्ता जगन्नाथं विना नारायणं परः ॥ ५ ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ॥ तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥ येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥ ७ ॥ यद्यन्यदेवतार्चायाः फलं प्राप्नोति मानवः ॥ साष्टांगप्रणिपातेन तत्फलं लभते हरेः ॥ ८ ॥ रेणुगुंठितगात्रस्य यावन्तोऽस्य रजःकणाः ॥ तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥ ९ ॥ सम्मार्जनाभ्युक्षणलेपनेन तदालये नश्यति सर्वपापम् ॥ नारी नराणां परया तु भक्त्या दृष्ट्वा तु रेवां नरसत्तमस्य ॥ १० ॥ येनाऽर्चितो भगवान्वासुदेवो जन्मार्जितं नश्यति तस्य पापम् ॥ स याति लोकं गरुडध्वजस्य विधूतपापः सुरसंघपूज्यताम् ॥ ११ ॥ शाठ्येनाऽपि नमस्कारं प्रयुंजंश्चक्रपाणिनः ॥ सप्तजन्मार्जितं पापं गच्छत्याऽशु न संशयः ॥ १२ ॥ पूजायां प्रीयते रुद्रो जपहोमैर्दिवाकरः ॥ शंखचक्रगदापाणिः प्रणिपातेन तुष्यति ॥ १३ ॥ भवजलधिगतानां द्वंद्वमाताहतानां सुतदुहितृकलत्रत्राणभाराहितानां

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नाम् ॥ विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ १४ ॥ हुंकारतीर्थे राजेंद्र शुभं वा यदि वाऽशुभम् ॥ यत्कृतं पुरुषव्याघ्र तन्नश्यति न कर्हिचित् ॥ १५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे हुंकारस्वामितीर्थमाहात्म्यवर्णनंनाम सप्तपंचाशदधिकशततमोऽध्यायः ॥ १५७ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं तीर्थं संगमेश्वरमुत्तमम् ॥ नर्मदादक्षिणे कूले सर्वपापभयापहम् ॥ १ ॥ धनदस्तत्र विश्रांतो मुहूर्त्तं नृपसत्तम ॥ पितृलोकात्समायातः कैलासं धरणीधरम् ॥ २ ॥ प्रत्ययार्थं नृपश्रेष्ठ ह्यद्यापि धरणीतले ॥ कृष्णवर्णा हि पाषाणा दृश्यंते स्फटिकोज्ज्वलाः ॥ ३ ॥ विंध्यनिर्झरनिष्क्रांता पुण्यतोया सरिद्वरा ॥ प्रविष्टा नर्मदातोये सर्वपापप्रणाशने ॥४॥ संगमे तत्र यः स्नात्वा पूजयेत्संगमेश्वरम् ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम्॥५॥ घंटापताकावितनं यो ददेत्संगमेश्वरे ॥ हंसयुक्तविमानस्थो दिव्यस्त्रीशतसंवृतः ॥ ६ ॥ स रुद्रपदमाप्नोति रुद्रस्यानुचरो भवेत् ॥ दधि भक्तेन देवस्य यः कुर्य्याल्लिंगपूरणम् ॥ ७ ॥ सिक्थसंख्यं शिवे लोके स वसेत्कालमीप्सितम् ॥ श्रीफलैः पूरयेल्लिंगं निःस्वो भूत्वा भवस्य तु ॥ ८ ॥ सोऽपि तत्फलमाप्नोति गतः स्वर्गे नरेश्वर ॥ अक्षया संततिस्तस्य जायते सप्तजन्मसु ॥ ९ ॥ स्नपनं देवदेवस्य दध्ना मधुघृतेन वा ॥ यः करोति विधानेन तस्य पुण्यफलं शृणु ॥ १० ॥ घृतक्षीरवहा नद्यो यत्र वृक्षा मधुस्रवाः ॥ तत्र ते मानवा यांति सुप्रसन्ने महेश्वरे ॥ ११ ॥ पत्रं पुष्पं फलं तोयं यस्तु दद्यान्महेश्वरे ॥ तत्सर्वं सप्तजन्मानि ह्यक्षयं फलमश्नुते ॥ १२ ॥ सर्वेषामेव पात्राणां महापात्रं महेश्वरः ॥ तस्मात्सर्वप्रयत्नेन पूजनीयो महेश्वरः ॥ १३ ॥ ब्रह्मचर्यस्थितो नित्यं यस्तु पूजयते शिवम् ॥ इह जीवन्स देवेशो मृतो गच्छेदनामयम् ॥ १४ ॥ शिवे तु पूजिते पार्थ यत्फलं प्राप्यते बुधैः ॥ योगींद्रे चैव तत्पार्थ पूजिते लभते फलम् ॥ १५ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ येषां गृहेषु भुञ्जंति शिवभक्तिरता नराः ॥ १६ ॥ सन्निरुध्येंद्रियग्रामं यत्रयत्र वसेन्मुनिः ॥ तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १७ ॥ यत्फलं वेदविदुषि भोजिते शतसंख्यया ॥ तत्फलं जायते पार्थ ह्येकेन शिवयोगिना ॥ १८ ॥ यत्र भुञ्जति भस्मांगी मूर्खो वा यदि पंडितः ॥ तत्र भुञ्जति देवेशः सपत्नीको वृषध्वजः ॥ १९ ॥ विप्राणां वेदविदुषां कोटिं संभोज्य यत्फलम् ॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनाम् ॥ २० ॥ संगमेश्वरमासाद्य प्राणत्यागं करोति यः ॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाचन ॥ २१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे संगमेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज तीर्थं परमपावनम् ॥ नर्मदायां सुदुष्प्रापं सिद्धं ह्यनरकेश्वरम् ॥ १ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पापकर्माऽपि भारत ॥ न पश्यति महाघोरं नरकद्वारसंज्ञिकम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शुभाशुभफलैस्तात भुक्तभोगा नरास्त्विह ॥ जायंते लक्षणैर्यैस्तु तानि मे वद सत्तम ॥ ३ ॥ यथा निर्गच्छते जीवस्त्यक्त्वा देहं न पश्यति ॥ तथा गच्छन्पुनर्देहं पंचभूतसमन्वितः ॥ ४ ॥ त्वगस्थिमांसमेदोऽसृक्केशस्नायुशतैः सह ॥ विण्मूत्ररेतःसंघाते का संज्ञा जायते नृणाम् ॥ ५ ॥ एवमुक्तः स मार्कंडः कथयामास योगवित् ॥ ध्यात्वा सनातनं सर्वं देवदेवं महेश्वरम् ॥ ६ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु पार्थ महाप्रश्नं कथयामि यथाश्रुतम् ॥ सकाशाद्ब्रह्मणः पूर्वमृषिदेवसमागमे ॥ ७ ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ॥ इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ८ ॥ अचीर्णप्रयाश्चित्तानां यमलोके ह्यनेकधा ॥ यातनाभिर्वियुक्तानामनेकां जीवसंततिम् ॥ ९ ॥ गत्वा मनुष्यभावे तु पापचिह्ना भवंति ते ॥ तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ १० ॥ सहित्वा यातनां सर्वां गत्वा वैवस्वतक्षयम् ॥ विस्तीर्णयातना ये तु लोकमायांति चिह्निताः ॥ ११ ॥ गद्गदोऽनृतवादी स्यान्मूकश्चैव गवानृते ॥ ब्रह्महा जायते कुष्ठी श्यावदंतस्तु मद्यपः ॥ १२ ॥ कुनखी स्वर्णहरणाद्दुःश्चर्मा गुरुतल्पगः ॥ संयोगी हीनयोनिः स्याद्दरिद्रोऽदत्तदानतः ॥ १३ ॥ ग्रामशूकरतां याति ह्ययाज्ययाजको नृप ॥ खरो वै बहुयाजी स्याच्छ्वाऽनिमंत्रितभोजनात् ॥ १४ ॥ अपरीक्षितभोजी स्याद्वानरो विजने वने ॥ वितर्जकोऽथ मार्जारः खद्योतः कक्षदाहतः ॥ १५ ॥ अविद्यां यः प्रयच्छेत बलीवर्दो भवेद्धि सः ॥ अन्नं पर्युषितं विप्रे ददानः क्लीवतां व्रजेत् ॥ १६ ॥ मात्सर्यादथ जात्यंधो जन्मांधः पुस्तकं हरन् ॥ फलान्याहरतोऽपत्यं म्रियते नाऽत्र संशयः ॥ १७ ॥ मृतो वानरतां यांति तन्मुक्तोऽथ गलाडवान् ॥ अदत्त्वा भक्षयंस्तानि ह्यनपत्यो भवेन्नरः ॥ १८ ॥ हरन्वस्त्रं भवेद्गोधा गरदः पवनाशनः ॥ प्रव्राजीगमनाद्राजन्भवेन्मरुपिशाचकः ॥ १९ ॥ वातको जलहर्त्ता च धान्यहर्त्ता च मूषकः ॥ अप्राप्तयौवनां गच्छन्भवेत्सर्प इति श्रुतिः ॥ २० ॥ गुरुदाराभिलाषी च कृकलासो भवेच्चिरम् ॥ जलप्रस्रवणं यस्तु भिंद्यान्मत्स्यो भवेन्नरः ॥ २१ ॥ अविक्रेयान्विक्रयन्वै विकटाक्षो भवेन्नरः ॥ अयोनिगो वृको हि स्यादुलूकः क्रयवंचनात् ॥ २२ ॥ मृतस्यैकादशाहे तु भुंजानः श्वोपजायते ॥ प्रतिश्रुत्य द्विजायार्थमददन्मधुको भवेत् ॥ २३ ॥ राज्ञीगमाद्भवेद्दुष्टतस्करो विड्वराहकः ॥ परिवादी द्विजातीनां लभते काच्छपीं तनुम् ॥ २४ ॥ व्रजेद्देवलको राजन्योनिं चांडालसंज्ञिताम् ॥ दुर्भगः फलविक्रेता वृश्चिको वृषलीपतिः ॥ २५ ॥ मार्जारोऽग्निं पदा स्पृष्ट्वा रोगवान्परमांसभुक् ॥ सोदर्यागमनात्पंढो दुर्गंधश्च सुगंधहृत् ॥ २६ ॥ ग्रामभट्टो दिवाकीर्त्तिर्दैवज्ञो गर्दभो भवेत् ॥ कुपंडितः स्यान्मार्जारो भषणो व्यास एव च ॥ २७ ॥ स एव दृश्यते राजन्प्रकाशात्परमर्मणाम् ॥ यद्वा तद्वापि पारक्यं स्वल्पं वा यदि वा बहु ॥ २८ ॥ कृत्वा वै योनिमाप्नोति तैरश्चीं नात्र संशयः ॥ एवमादीनि चान्यानि चिह्नानि नृपसत्तम ॥ २९ ॥ स्वकर्मविहितान्येव दृश्यंते यैस्तु मानवाः ॥ ततो जन्म ततो मृत्युः सर्वजंतुषु भारत ॥ ३० ॥ जायते नाऽत्र संदेहः समीभूते शुभाऽशुभे ॥ स्त्रीपुंसोः संप्रयोगेण विशुद्धे शुक्रशोणिते ॥ ३१ ॥ पंचभूतसमोपेतः स षष्ठः परमेश्वरः ॥ इंद्रियाणि मनः प्राणा ज्ञानमायुः सुखं धृतिः ॥ ३२ ॥ धारणं प्रेरणं दुःखमिच्छाहंकार एव च ॥ प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ॥ ३३ ॥ तस्येदमात्मनः सर्वमनादेरादिमिच्छतः ॥ प्रथमे मासि स क्लेदभूतो धातुविमूर्च्छितः ॥ ३४ ॥ मास्यर्बुदं द्वितीये तु तृतीये चेंद्रियैर्युतः ॥ आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रबलादिकम् ॥ वायोस्तु स्पर्शनं चेष्टां दहनं रौक्ष्यमेव च ॥ ३५ ॥ पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशनम् ॥ सलिलाद्रसनां शैत्यं स्नेहं क्लेदं समार्दवम् ॥ ३६ ॥ भूमेर्गंधं तथा घ्राणं गौरवं मूर्त्तिमेव च ॥ आत्मा गृह्णात्यजः पूर्वं तृतीये स्पंदते च सः ॥ ३७ ॥ दौर्हृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥ ३८ ॥ स्थैर्यं चतुर्थे त्वंगानां पंचमे शोणितोद्भवः ॥ षष्ठे बलं च वर्णश्च नखरोम्णां च संभवः ॥ ३९ ॥ मनसा चेतनायुक्तो नखरोमशतावृतः ॥ सप्तमे चाऽष्टमे चैव त्वचावान्स्मृतिवानपि ॥ ४० ॥ पुनर्गर्भं पुनर्द्धात्रीमेनस्तस्य प्रधावति ॥ अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ ४१ ॥ नवमे दशमे वाऽपि प्रबलैः सूतिमारुतैः ॥ निर्गच्छते बाण इव यंत्रच्छिद्रेण सज्वरः ॥ ४२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शरीरावयवैर्युक्तो ह्यंगप्रत्यंगसंयुतः ॥ अष्टोत्तरं मर्मशतं तत्रास्था तु शतत्रयम् ॥ ४३॥ सप्त शिरःकपालानि विहितानि स्वयंभुवा ॥ तिस्रः कोट्यो र्द्धकोटी च रोम्णामंगेषु भारत ॥ ४४ ॥ द्वासप्ततिसहस्राणि हृदयादभिनिसृताः ॥ हितानाम हि ता नाड्यस्तासां मध्ये शशिप्रभा ॥ ४५ ॥ एवं प्रवर्त्तते चक्रं भूतग्रामे चतुर्विधे ॥ उत्पत्तिश्च विनाशश्च भवतः सर्वदेहिनाम् ॥ ४६ ॥ गतिरूर्ध्वा च धर्मेण ह्यधर्म्मेण त्वधोगतिः ॥ जायते सर्व वर्णानां स्वधर्म्मचलनान्नृप ॥ ४७ ॥ देवत्वे मानवत्वे च दानभोगादिकाः क्रियाः ॥ दृश्यंते या महाराज तत्सर्वं कर्मजं फलम् ॥ ४८ ॥ स्वकर्म विहिते घोरे कामक्रोधार्जिते शुभे ॥ निमज्जेन्नरके घोरे यस्योत्तारो न विद्यते ॥ ४९ ॥ उत्तारणाय जंतूनां नर्मदातटसंस्थितम् ॥ एवमेतन्महा तीर्थं नरकेभ्यस्तुत्तमम् ॥ ५० ॥ नरकापहं महापुण्यं महापातकनाशनम् ॥ तत्तीर्थं सर्वतीर्थानामुत्तमं भुवि दुर्लभम् ॥ ५१ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत महेश्वरम् ॥ महापातकयुक्तोऽपि नरकं नैव पश्यति ॥ ५२ ॥ तत्र तीर्थे तु यो दद्याद्धेनुं वैतरणीं शुभाम् ॥ स मुच्यते सुखेनैव वैतरण्यां न संशयः ॥ ५३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यमद्वारे महाघोरे या सा वैतरणी नदी ॥ किंरूपा किंप्रमाणा सा कथं सा वहति द्विज ॥ ५४ ॥ कथं तस्याः प्रमुच्यंते केषां वासस्तु संततम् ॥ केषां तु साऽनुकूला सा ह्येतद्विस्तरतो वद ॥ ५५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ धर्मपुत्र महाबाहो शृणु सर्वं मयोदितम् ॥ या सा वैतरणी नाम यमद्वारे महासरित् ॥ ५६ ॥ अगाधा पाररहिता दृष्टमात्रा भयावहा ॥ पूयशोणि ततोया सा मांसकर्दमनिर्मिता ॥ ५७ ॥ तत्तोयं भ्रमते तूर्णं तापीमध्ये घृतं यथा ॥ कृमिभिः संकुलं पूयं वज्रतुंडैरयोमुखैः ॥ ५८ ॥ शिशुमारैश्च मकरैर्वज्रकर्त्तृसंयुतैः ॥ अन्यैश्च जलजीवैः सा सुहिंस्रैर्मर्मभेदिभिः ॥ ५९ ॥ तपंति द्वादशादित्याः प्रलयांत इवोल्बणाः ॥ पतंति तत्र वै मर्त्याः क्रंदंतो भृशदारुणम् ॥ ६० ॥ हा भ्रातः पुत्र हा मातः प्रलपंति मुहुर्मुहुः ॥ असिपत्रवने घोरे पतंतं योऽभिरक्षति ॥ ६१ ॥ प्रतरंति निमज्जंति ह्यानिं गच्छंति जंतवः ॥ चतुर्विधैः प्राणिगणैर्दृष्टव्या सा महानदी ॥ ६२ ॥ तरंति तस्यां सद्यानैरन्यथा तु पतंति ते ॥ मातरं ये न मन्यंते ह्याचार्यं गुरुमेव च ॥ ६३ ॥ अवजानंति मूढा ये तेषां वासस्तु संततम् ॥ पतिव्रतां साधुशीलामूढां धर्म्मेषु निश्चलाम्॥६४॥परित्यजंति ये पापाः संततं तु वसंति ते ॥ विश्वासप्रतिपन्नानां स्वामिमित्रतपस्विनाम् ॥ ६५ ॥ स्त्रीबालवृद्धदीनानां च्छिद्रमन्वेषयंति ये ॥ पच्यंते तत्र मध्ये वै क्रंदमानाः सुपापिनः ॥ ६६ ॥ श्रांतं बुभुक्षितं विप्रं यो विघ्नयति दुर्मतिः ॥ कृमिभिर्भक्ष्यते तत्र यावत्कल्पशतत्रयम् ॥ ६७ ॥ ब्राह्मणाय प्रतिश्रुत्य यो दानं न प्रयच्छति ॥ आहूय नास्ति यो ब्रूते तस्य वासस्तु संततम् ॥ ६८ ॥ अग्निदो गरदश्चैव राजगामी च पैशुनी ॥ कथाभंगकरश्चैव कूटसा क्षी च मद्यपः ॥ ६९ ॥ वज्रविध्वंसकश्चैव स्वयंदत्तापहारकः ॥ सुक्षेत्रसेतुभेदी च परदारप्रधर्षकः ॥ ७० ॥ ब्राह्मणो रसविक्रेता वृषलीपतिरेव च ॥ गोकुलस्य तृषार्त्तस्य पालीभेदं करोति यः ॥ ७१ ॥ कन्याभिदूषकश्चैव दानं दत्त्वा तु तापकः ॥ शूद्रस्तु कपिलापानी ब्राह्मणो मांसभोजनी ॥ ॥ ७२ ॥ एते वसंति सततं मा विचारं कृथा नृप ॥ सानुकूला भवेद्येन तच्छृणुष्व नराधिप ॥ ७३ ॥ अयने विषुवे चैव व्यतीपाते दिनक्षये ॥ अन्येषु पुण्यकालेषु दीयते दानमुत्तमम् ॥ ७४ ॥ कृष्णां वा पाटलां वापि कुर्याद्धेतरणीं शुभाम् ॥ स्वर्णशृंगीं रूप्यखुरां कांस्यपात्रस्य दोहिनीम् ॥ ॥ ७५ ॥ कृष्णवस्त्रयुगाच्छन्नां सप्तधान्यसमन्विताम् ॥ कुर्यात्सद्रोणशिखरं आसीनां ताम्रभाजने ॥ ७६ ॥ यमं हेमं प्रकुर्वीत लोहदंडसमन्वितम् ॥ इक्षुदंडमयं बद्धा ह्युडुपं पट्टवंधनैः ॥७७॥ उडुपोपरि तां धेनुं सूर्यदेहसमुद्भवाम् ॥ कृत्वा प्रकल्पयेद्विद्वांच्छत्रोपानद्युगान्विताम् ॥७८॥ अंगुलीय कवासांसि ब्राह्मणाय निवेदयेत् ॥ इममुच्चारयेन्मंत्रं संगृह्यास्याश्च पुच्छकम् ॥ ७९ ॥ ॐयमद्वारे महाघोरे या सा वैतरणी नदी ॥ तर्त्तुकामो ददाम्येनां तुभ्यं वैतरणि नमः ॥ ८० ॥ ॥ इत्यधिवासनमंत्रः ॥ ॥ गावो मे चाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहम् ॥ ८१ ॥ ॐ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन ॥ सदक्षिणा मया दत्ता तुभ्यं वैतरणि नमः ॥ ८२ ॥ इति दानमंत्रः ॥ ॥ ब्राह्मणं धर्मराजं च धेनुं वैतरणीं शिवाम् ॥ सर्वं प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥ ८३ ॥ पुच्छं संगृह्य सुरभेरग्रे कृत्वा द्विजं ततः ॥ ८४ ॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ॥ उत्तितीर्षुरहं धेनो वैतरण्यै नमोऽस्तु ते ॥ ८५ ॥ ॥ ॥ इत्यनुव्रजमन्त्रः ॥ ॥ अनुव्रजेत गच्छंतं सप्तं तस्य गृहं नयेत् ॥ एवं कृते महीपाल सरित्स्यात्सुखवाहिनी ॥ ८६ ॥ तारयते तया धेन्वा सा सरिज्जलवाहिनी ॥ सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः ॥८७॥ रोगी रोगाद्विमुक्तः स्याच्छाम्यंति परमापदः ॥ स्वस्थे सहस्र गुणितमातुरे शतसम्मितम् ॥ ८८ ॥ मृतस्यैव तु यदानं परोक्षे तत्समं स्मृतम् ॥ स्वहस्तेन ततो देयं मृते कः कस्य दास्यति ॥ इति मत्वा महाराज स्वदत्तं स्यान्महाफलम् ॥ ८९ ॥ इत्येवमुक्तं तव धर्मसूनो दानं मया वैतरणीसमुत्थम् ॥ शृणोति भक्त्या पठतीह सम्यक्स याति विष्णोः पदमप्रमेयम् ॥ ९० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ प्राप्ते चाश्वयुजे मासि तस्मिन्कृष्णा चतुर्दशी ॥ स्नात्वा कृत्वा ततः श्राद्धं संपूज्य च महेश्वरम् ॥ ९१ ॥ पितृभ्यो दीयते दानं भक्तिश्रद्धासमन्वितैः ॥ पश्चाज्जागरणं कुर्यात्सत्कथाश्रवणादिभिः ॥ ९२ ॥ ततः प्रभातसमये स्नात्वा वै नर्मदाजले ॥ तर्प्पणं विधिवत्कृत्वा पितॄणां देवपूर्वकम् ॥ ९३ ॥ सौवर्णे घृतसंयुक्तं दीपं दद्याद्विजातये ॥ पश्चात्संभोजयेद्विप्रान्स्वयं चैव विमत्सरः ॥ ९४ ॥ एवं कृते नरश्रेष्ठ न जन्तुर्नरकं व्रजेत् ॥ अवश्यमेव मनुजैर्द्रष्टव्या नारकी स्थितिः ॥ ९५ ॥ अनेन विधिना कृत्वा न पश्येन्नरकान्नरः ॥ तत्र तीर्थे मृतानां तु नराणां विधिना नृप ॥ ९६ ॥ मन्वंतरं शिवे लोके वासो भवति दुर्लभे ॥ विमानेनार्कवर्णेन किंकिणीशतशोभिना ॥ ९७ ॥ स गच्छति महाभाग सेव्यमानोऽप्सरोगणैः ॥ भुनक्ति विविधान्भोगानुक्तकालं न संशयः ॥ ९८ ॥ पूर्णे चैव ततः काल इह मानुष्यतां गतः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ९९ ॥ प्राप्य चाश्वयुजे मासि कृष्णपक्षे चतुर्दशीम् ॥ अहोरात्रो पितो भूत्वा पूजयित्वा महेश्वरम् ॥ महापातकयुक्तोऽपि मुच्यते नाऽत्र संशयः ॥ १०० ॥ अष्टाविंशति कोट्यो वै नरकाणां युधिष्ठिर ॥ विमुक्ता नरकैर्दुःखैः शिवलोकं व्रजंति ते ॥ १ ॥ तत्र भुक्त्वा महाभोगान्दिव्यैश्वर्यसमन्वितान् ॥ लभन्ते मानुषं जन्म दुर्लभं भुवि मानवाः ॥ १०२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डेऽनरकेश्वरतीर्थमाहात्म्यवर्णनं नामैकोनषष्ट्युत्तरशततमोऽध्यायः ॥ १५९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्पांडुपुत्र मोक्षतीर्थमनुत्तमम् ॥ सेवितं देवगन्धर्वैर्मुनिभिश्च तपोधनैः ॥ ॥ १ ॥ बहवस्तत्र जानंति विष्णुमायाविमोहिताः ॥ यत्र सिद्धा महाभागा ऋषयः सतपोधनाः ॥ २ ॥ पुलस्त्यः पुलहो विद्वान्क्रतुश्चैव महामतिः ॥ प्राचेतसो वसिष्ठश्च दक्षो नारद एव च ॥ ३ ॥ एते चाऽन्ये महाभागाः सप्तसाहस्रसंहिताः ॥ मोक्षं गताः सह सुतैस्तत्तीर्थं तेन मोक्षदम् ॥ ४ ॥ तत्र प्रवाहमध्ये तु पतिता तमहा नदी ॥ तत्र तत्संगमं तीर्थं सर्वपापक्षयंकरम् ॥ ५ ॥ ऋग्यजुःसामसंज्ञानामभ्यस्तानां तु यत्फलम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सम्यग्जत्वा तु विधिना गायत्रीं तत्र तल्लभेत् ॥ ६ ॥ तत्र दत्तं हुतं जप्तं तीर्थसेवार्जितं फलम् ॥ सवमक्षयतां याति मोक्षसाधनमुत्तमम् ॥ ७ ॥
तत्र तीर्थे मृतानां तु संन्यासेन द्विजन्मनाम् ॥ अनिवर्त्तिका गतिस्तेषां मोक्षतीर्थप्रभावतः ॥ ८ ॥ एष ते विधिरुद्दिष्टः संक्षेपेण मयाऽनघ ॥
व्युष्टिस्तीर्थस्य महती पुराणे याऽभिधीयते ॥ ९ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
मोक्षतीर्थमाहात्म्यवर्णनं नाम षट्युत्तरशततमोऽध्यायः ॥ १६० ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज सर्पतीर्थमनुत्तमम् ॥ यत्र सिद्धा महासर्पास्तप्तस्त्वा युधिष्ठिर ॥१॥ वासुकिस्तक्षको घोरः सर्प्प ऐरावतस्तथा ॥ कालियश्च महाभागः कर्कोटकधनंजयौ ॥२॥
शंखचूडो महातेजा धृतराष्ट्रो वृकोदरः ॥ कुलिको वामनश्चैव तेषां ये पुत्रपौत्रिणः ॥३॥ तत्र तीर्थे महापुण्ये तपस्तप्त्वा सुदुष्करम् ॥ भुंजंति विविधान्भोगान्क्रीडन्ति च यथासुखम् ॥४॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ वाजपेयफलं तस्य पुरा प्रोवाच शंकरः ॥ ५ ॥ स्नातानां सर्पतीर्थे तु नराणां भुवि भारत ॥ सर्पवृश्चिकजातिभ्यो न भयं विद्यते क्वचित् ॥६ ॥ मृतो भोगवतीं गत्वा पूज्यमानो महोरगैः ॥ नागकन्यापरिवृतो महाभोगपतिर्भवेत् ॥ ७ ॥ मार्गशीर्षस्य मासस्य कृष्णपक्षे च याऽष्टमी ॥ सोपवासः शुचिर्भूत्वा लिंगं संपूरयेत्तिलैः ॥ यथाविभवसारेण गंधपुष्पैः
समर्चयेत् ॥ ८ ॥ एवं विधाय विधिवत्प्रणिपत्य क्षमापयेत् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नरेश्वर ॥९॥ तिलास्तत्र च यत्संख्याः पत्रपुष्पफलानि च ॥ तावत्स्वर्गपुरे राजन्मोदते कालमीप्सितम् ॥१०॥ ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले ॥ सुरूपः सुभगश्चैव धनकोटिपतिर्भवेत् ॥११॥
इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे सर्पतीर्थमाहात्म्यवर्णनंनामैकषष्ट्युत्तरशततमोऽध्यायः ॥
॥ १६१ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गोपेश्वरं ततो गच्छेत्सर्प्पेक्षेत्रादनंतरम् ॥ यत्र स्नानेन चैकेन मुच्यंते पातकैर्नराः ॥ १ ॥

तत्र तीर्थे तु यः स्नात्वा कुरुते प्राणसंक्षयम् ॥ स गच्छेद्यदि युक्तोपि पापेन शिवमंदिरम् ॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरम् ॥
मुच्यते सर्वपापेभ्श्च रुद्रलोकं स गच्छति ॥ ३ ॥ क्रीडित्वा च यथाकामं रुद्रलोके महातपाः ॥ इह मानुष्यतां प्राप्य राजा भवति धार्मिकः ॥
॥ ४ ॥ हस्त्यश्वरथसंपन्नो दासीदाससमन्वितः ॥ पूज्यमानो नरेन्द्रैश्च जीवेद्वर्षशतं सुखी ॥ ५ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पंचम आवन्त्यखंडे रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥ १६२ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महाराज नागतीर्थमनुत्तमम् ॥ आश्विनस्य सिते पक्षे पंचम्यां नियतः शुचिः ॥ १ ॥ रात्रौ जागरणं कृत्वा गन्ध
धूपनिवेदनैः ॥ प्रभाते विमले स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ २ ॥ मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ तत्र तीर्थे तु यो राजन्प्राण
त्यागं करिष्यति ॥ ३ ॥ अनिवर्त्तिका गतिस्तस्य प्रोवाचेति शिवः स्वयम् ॥ ४ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम
आवन्त्यखंडे रेवाखंडे नागतीर्थमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो
गच्छेन्महाराज सांवोरं तीर्थमुत्तमम् ॥ यत्र सन्निहितो भानुः पूज्यमानः सुरासुरैः ॥ १ ॥ तत्र ये पंगुतां प्राप्ताः शीर्णघ्राणनखा नराः ॥ दद्रुमण्डल
भिन्नांगा मक्षिकाकृमिसंकुलाः ॥ २ ॥ मातापितृभ्यां रहिता भ्रातृभार्याविवर्जिताः ॥ अनाथा विकला व्यंगा मग्ना ये दुःखसागरे ॥ ३ ॥ तेषां
नाथो जगद्योनिर्नर्मदातटमाश्रितः ॥ सांवोरनाथो लोकानामार्त्तिहा दुःखनाशनः ॥ ४ ॥ तत्र तीर्थे तु यः स्नात्वा मासमेकं निरंतरम् ॥ पूजये
द्भास्करं देवं तस्य पुण्यफलं शृणु ॥ ५ ॥ यत्फलं चोत्तरे पार्थ तथा वै पूर्वसागरे ॥ दक्षिणे पश्चिमे स्नात्वा तत्र तीर्थे तु तत्फलम् ॥ ६ ॥ कौमारे
यौवने पापं वार्द्धके यच्च संचितम् ॥ तत्प्रणश्यति सांवोरे स्नानमात्रान्न संशयः ॥ ७ ॥ न व्याधिर्नैव दारिद्र्यं न चैवेष्टवियोजनम् ॥ सप्तजन्मानि
यौवने पापं वार्द्धके यच्च संचितम् ॥ तत्प्रणश्यति सांवोरे स्नानमात्रान्न संशयः ॥ ७ ॥ न व्याधिर्नैव दारिद्र्यं न चैवेष्टवियोजनम् ॥ सप्तजन्मानि
राजेंद्र सांवोरपरिसेवनात् ॥ ८ ॥ सप्तम्यामुपवासेन तद्दिने चाप्युपोषिते ॥ स तत्फलमवाप्नोति तत्र स्नात्वा न संशयः ॥ ९ ॥ रक्तचंदनमिश्रेण
यदर्घ्येण फलं स्मृतम् ॥ तत्र तीर्थे नृपश्रेष्ठ स्नात्वा तत्फलमाप्नुयात् ॥ १० ॥ नर्मदासलिलं रम्यं सर्वपातकनाशनम् ॥ निरीक्षितं विशेषेण
सांवोरेण महात्मना ॥ ११ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ स्नात्वा पश्यंति देवेशं सांवोरेश्वरमुत्तमम् ॥ १२ ॥ सूर्यलोके
वसेत्तावद्यावदाभूतसंप्लवम् ॥ १३ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सांवोरेश्वरतीर्थ
माहात्म्यवर्णनंनाम चतुःषष्ट्युत्तरशततमोऽध्यायः ॥ १६४ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले सिद्धेश्वरमिति

श्रुतम् ॥ तीर्थं परं महाराज सिद्धैः कृतमिति प्रभो ॥ १ ॥ तत्र तीर्थं महापुण्यं सर्वतीर्थेषु पावनम् ॥ नर्मदाया महाराज दक्षिणं कूलमाश्रितम् ॥
॥ २ ॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ श्राद्धं तत्रैव यो दद्यात्पितॄनुद्दिश्य भारत ॥ ३ ॥ तृप्यंति पितरस्तस्य द्वादशाब्दान्न संशयः ॥
तत्र तीर्थे तु यो भक्त्या स्नात्वा पूजयते शिवम् ॥ ४ ॥ रात्रौ जागरणं कृत्वा पठेत्पौराणिकीं कथाम् ॥ ततः प्रभाते विमले स्नानं कुर्याद्यथा
विधि ॥ ५ ॥ वीक्षते गिरिजाकांतं स गच्छेत्परमां गतिम् ॥ पुरा सिद्धा महाभागाः कपिलाद्या महर्षयः ॥ ६ ॥ जपंतश्च परं ब्रह्म योगसिद्धा
महाव्रताः ॥ सिद्धिं ते परमां प्राप्ता नर्मदायाः प्रभावतः ॥ ७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे
रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥ ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः सिद्धे
श्वरी देवी वैष्णवी पापनाशिनी ॥ आनंदं परमं प्राप्ता दृष्ट्वा स्थानं सुशोभनम् ॥ १ ॥ तत्र तीर्थे नरः स्नात्वा पूजयेत्पितृदेवताः ॥ देवीं पश्यति
यो भक्त्या मुच्यते सर्वपातकैः ॥ २ ॥ मृतवत्सा तु या नारी वन्ध्या स्त्रीजननी तथा ॥ पुत्रं सा लभते नारी शीलवन्तं गुणान्वितम् ॥ ३ ॥
तत्र तीर्थे तु यः स्नात्वा पश्येद्देवीं सुभक्तितः ॥ अष्टम्यां वा चतुर्दश्यां सर्वकालेऽथवा नृप ॥ ४ ॥ संगमे तु ततः स्नाता नारी वा
पुरुषोऽपि वा ॥ पुत्रं धनं तथा देवी ददाति परितोषिता ॥ ५ ॥ गोत्ररक्षां प्रकुरुते दृष्ट्वा देवी सुपूजिता ॥ प्रजां च पाति सततं
पूज्यमाना न संशयः ॥ ६ ॥ नवम्यां च महाराज स्नात्वा देवीसुपोषितः ॥ पूजयेत्परया भक्त्या श्रद्धापूतेन चेतसा ॥ ७ ॥ स
गच्छेत्परमं लोकं यः सुरैरपि दुर्लभः ॥ ८ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे
सिद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम षट्षष्ट्युत्तरशततमोऽध्यायः ॥ १६६ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नर्मदादक्षिणे
कूले त्वद्भिन्नेनोपलक्षितम् ॥ तीर्थमेतन्ममाऽऽख्यादि संभवं च महामुने ॥ १ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा कृतयुगस्यादौ दक्षिणे
गिरिसत्तमम् ॥ विंध्यं सर्वगुणोपेतं नियतो नियताशनः ॥ २ ॥ ऋषिसंघैः कृतातिथ्यो दंडके न्यवसं चिरम् ॥ उषित्वा शुचिरं
काले वर्षाणामयुतं सुखी ॥ ३ ॥ तानृषीन्समनुज्ञाप्य शिष्यैरनुगतस्ततः ॥ निवृत्तः सुमहाभाग नर्मदाकूलमागतः ॥ ४ ॥ पुण्यं च रमणीयं च
सर्वपापविनाशनम् ॥ कृत्वाऽऽश्रमपदं तत्र द्विजैरुषसमावृतः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri Siddhanta eGangotri Gyaan Foundation USA

तात्मभिः ॥ ६ ॥ तपस्विभिर्महाभागैः कामक्रोधविवर्जितैः ॥ तत्राऽहं वर्षमयुतं तपः कृत्वा सुदारुणम् ॥ ७ ॥ आराधयं वासुदेवं प्रभुं कर्तारमीश्वरम् ॥ जपंस्तपोभिर्नियमैर्नर्मदाकूलमाश्रितः ॥ ८ ॥ ततस्तौ वरदौ देवौ समायातौ युधिष्ठिर ॥ प्रत्यक्षौ भास्करौ राजन्नुमाश्रीभ्यां विभूषितौ ॥ ९ ॥ प्रणम्याऽहं ततो देवौ भक्तियुक्तो वचोऽब्रुवम् ॥ भवंतौ प्रार्थयामि स्म वरार्हौ वरदौ शिवौ ॥ १० ॥ धर्मस्थितिं महाभागौ भक्तिं वाऽच्युतजां युवाम् ॥ अजरो व्याधिरहितः पंचविंशतिवर्षवत् ॥ अस्मिन्स्थाने सदा स्थेयं सह देवैरसंशयम् ॥ ११ ॥ एवमुक्तौ मया पार्थ तौ देवौ कृष्णशंकरौ ॥ मामूचतुः प्रहृष्टौ तौ निवासार्थं युधिष्ठिर ॥ १२ ॥ ॥ देवावूचतुः ॥ ॥ अस्मिन्स्थाने स्थितौ विद्धि सह देवैः सवासवैः ॥ एवमुक्त्वा ततो देवौ तत्रैवांतरधीयताम् ॥ १३ ॥ अहं च स्थापयित्वा तौ शंकरं कृष्णमव्ययम् ॥ कृतकृत्यस्ततो जातः संपूज्य सुसमाहितः ॥ १४ ॥ तस्मिंस्तीर्थे नरः स्नात्वा पूजयेत्परमेश्वरम् ॥ मार्कंडेश्वरनाम्ना वै विष्णुं त्रिभुवनेश्वरम् ॥ १५ ॥ स गच्छेत्परमं स्थानं वैष्णवं शैवमेव च ॥ घृतेन पयसा वाऽथ दध्ना च मधुना तथा ॥ १६ ॥ नार्मदेनोदकेनाऽथ गंधधूपैः सुशोभनैः ॥ पुष्पोपहारैश्च तथा नैवेद्यैर्नियतात्मवान् ॥ १७ ॥ एवं विष्णोः प्रकुर्वीत जागरं भक्तितत्परः ॥ स्नानादीनि तथा राजन्प्रयतः शुचिमानसः ॥ १८ ॥ ज्येष्ठे मासि सिते पक्षे चतुर्दश्यामुपोषितः ॥ द्वादश्यां कारयेद्देवपूजनं वैष्णवो नरः ॥ १९ ॥ एवं कृत्वा चतुर्दश्यामेकादश्यां नरोत्तम ॥ वैष्णवं लोकमाप्नोति विष्णुतुल्यो भवेन्नरः ॥ २० ॥ माहेश्वरे च राजेंद्र गणवन्मोदते पुरे ॥ श्राद्धं च कुरुते तत्र पितॄनुद्दिश्य सुस्थिरः ॥ २१ ॥ तस्य ते क्षयां तृप्तिं प्राप्नुवंति न संशयः ॥ नर्मदायां द्विजः स्नात्वा मौनी नियतमानसः ॥ २२ ॥ उपास्य संध्यां तत्रस्थो जपं कृत्वा सुशोभनम् ॥ तर्पयित्वा पितन्देव.न्मनुष्यांश्च यथाविधि ॥ २३ ॥ कृष्णस्य पुरतः स्थित्वा मार्कंडेयस्य वा पुनः ॥ ऋग्यजुःसाममंत्रांश्च जपेदत्र प्रयत्नतः ॥ २४ ॥ ऋचमेकां जपेद्यस्तु ऋग्वेदस्य फलं लभेत् ॥ यजुर्वेदस्य यजुषा साम्ना सामफलं लभेत् ॥ २५ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ मृतप्रजा तु या नारी वंध्या स्त्रीजननी तथा ॥ २६ ॥ रुद्रांस्तु विधिवज्ज्ञात्वा ब्राह्मणो वेदतत्त्ववित् ॥ लिंगस्य दक्षिणे पार्श्वे स्थापयेत्कलशं शिवम् ॥ २७ ॥ रुद्रैकादशभिर्मंत्रैः स्नापयेत्कलशांभसा ॥ पुत्रमाप्नोति राजेंद्र दीर्घायुषमकल्मषम् ॥ २८ ॥ मार्कंडेश्वरवृक्षान्यो दूरस्थानपि पश्यति ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते शंकरोऽब्रवीत् ॥ २९ ॥ य इदं शृणुयाद्भक्त्या पठेद्वा नृपसत्तम ॥ सर्वपापविशुद्धात्मा जायते नाऽत्र संशयः ॥ ३० ॥ इदं यशस्यमायुष्यं धन्यं दुःस्वप्ननाशनम् ॥ पठतां शृण्वतां वाऽपि सर्वपापप्रमोचनम् ॥ ३१ ॥ इति श्रीस्कंदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे मार्कंडेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तपष्ट्युत्तरशततमोऽध्यायः ॥१६७॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे रोधस्यंकूरेश्वरमुत्तमम् ॥ तीर्थं सर्वगुणोपेतं त्रिषु लोकेषु विश्रुतम् ॥ १ ॥ यत्र सिद्धं महारक्ष आराध्य तु महेश्वरम् ॥ शंकरं जगतः प्राणं स्मृतिमात्रावहारिणम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किं तद्रक्षो द्विजश्रेष्ठ किंनाम कस्य वाऽन्वये ॥ एतद्विस्तरतः सर्वं कथयस्व ममाऽनघ ॥ ३ ॥ अज्ञानतिमिरांधा ये पुमांसः पापकारिणः ॥ युष्मद्विधैर्दीपभूतैः पश्यंति सचराचरम् ॥ ४ ॥ धर्मपुत्रवचः श्रुत्वा मार्कंडेयो मुनीश्वरः ॥ स्मितं कृत्वा बभाषे तां कथां पापप्रणाशनीम् ॥५॥ ॥ मार्कंडेय उवाच ॥ ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्योनाम पार्थिव ॥ वेदशास्त्रप्रवक्ता च साक्षाद्वेधा इवाऽपरः ॥ ६ ॥ तृणविंदुसुता तस्य भार्याऽऽसीत्परमेष्ठिनः ॥ तस्य धर्मप्रसंगेन पुत्रो जातो महामनाः ॥ ७ ॥ यस्माद्वेदेतिहासैश्च सषडंगपदक्रमाः ॥ विश्रांता ब्रह्मणा दत्ता नामविश्रवसेति च ॥ ८ ॥ कस्मिंश्चिदथ काले च भरद्वाजो महामुनिः ॥ स्वसुतां प्रददौ राजन्मुदा विश्रवसे नृप ॥ ९ ॥ स तया रमते सार्धं पौलोम्या मघवा इव ॥ मुदा परमया राजन्ब्राह्मणो वेदवित्तमः ॥ १० ॥ केनचित्त्वथ कालेन पुत्रः पुत्रगुणैर्युतः ॥ जज्ञे विश्रवसो राजन्नाम्ना वैश्रवणः श्रुतः ॥ ११ ॥ सोऽपि मौनव्रतं कृत्वा बालभावाद्युधिष्ठिर ॥ सर्वभूताभयं दत्त्वा चचार परमं व्रतम् ॥ १२ ॥ तस्य तुष्टो महादेवो ब्रह्मा ब्रह्मर्षिभिः सह ॥ सखित्वं चेश्वरो दत्त्वा धनदत्वं जगाम ह ॥ १३ ॥ यमेंद्रवरुणानां च चतुर्थस्त्वं भविष्यसि ॥ ब्रह्माऽप्युक्त्वा जगामाशु लोकपालत्वमीप्सितम् ॥ १४ ॥ ततस्त्वनंतरे काले कैकसी नाम राक्षसी ॥ पातालं भूतलं त्यक्त्वा विश्रवं चकमे पतिम् ॥ १५ ॥ पुत्रोऽथ रावणो जातस्तस्या भरतसत्तम ॥ कुंभकर्णो महारक्षो धर्मात्मा च विभीषणः ॥ १६ ॥ कुंभश्चैव विकुंभश्च कुंभकर्णसुतावुभौ ॥ महाबलौ महावीर्यौ महांतौ पुरुषोत्तम ॥ १७ ॥ अंकूरो राक्षसश्रेष्ठः कुंभस्य तनयो महान् ॥ विभीषणं च गुणवद्ध्येवं राक्षसोत्तमः ॥ १८ ॥ ततः स यौवनं प्राप्य ज्ञात्वा रक्षः पितामहम् ॥ परं निर्वेदमापन्नश्चचार सुमहत्तपः ॥ १९ ॥ दक्षिणं पश्चिमं गत्वा सागरं पूर्वसुत्तरम् ॥ नर्मदायां प्रसंगेन ह्यंकूरो राक्षसेश्वरः ॥ २० ॥ तपश्चचार सुमहद्दिव्यं वर्षशतं किल ॥ ततस्तुष्टो महादेवः साक्षात्परपुरंजयः ॥ २१ ॥ वरेण च्छंदयामास राक्षसं वृषकेतनः ॥ वरं वृणीष्व भद्रं ते तव दास्यामि सुव्रत ॥ २२ ॥ प्रोवाच राक्षसो वाक्यं देवदेवं महेश्वरम् ॥ वरदं सोऽग्रतो दृष्ट्वा प्रणम्य च पुनःपुनः ॥२३॥ यदि तुष्टो महादेव वरदोऽसि सुरेश्वर ॥ दुर्लभं सर्वभूतानाममरत्वं प्रयच्छ मे ॥ २४ ॥ मम नाम्ना स्थितोऽनेन वरेण त्रिपुरांतक ॥ सदा संनिहितोऽप्यत्र तीर्थे भवितुमर्हसि ॥ २५ ॥ ॥ ॥ ईश्वर उवाच ॥ ॥ यावद्विभीषणमतं यावद्धर्मनिषेवणम् ॥ करिष्यसि दृढात्मा त्वं तावदेतद्भविष्यति ॥ २६ ॥ एवमुक्त्वा ययौ देवः सर्वदेवतपूजितः ॥ विमानेनाऽर्कवर्णेन कैलासं धरणीधरम् ॥ २७ ॥ गते चाऽदर्शनं देवे स्नात्वाऽऽचम्य विधानतः ॥ स्थापयामास राजेंद्र ह्यंकूरेश्वरमुत्तमम् ॥ २८ ॥ गंधपुष्पैस्तथा धूपैर्वस्त्रालंकारभूषणैः ॥ पताकैश्चामरैश्छत्रैर्जयशब्दादिमंगलैः ॥ २९ ॥ पूजयित्वा सुरेशानं स्तोत्रैर्हृद्यैः सुपुष्कलैः ॥ जगाम भवनं रक्षो यत्र राजा विभीषणः ॥ ३० ॥ पूजितः स यथान्यायं दानसन्मानगौरवैः ॥ सौदर्ये स्थापितो भावे सोऽवात्सीत्परया मुदा ॥ ३१ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ अंकूरेश्वरनामानं सोऽश्वमेधफलं लभेत् ॥ ३२ ॥ मांडव्यख्यातमारभ्य संगमं वाऽपि पुण्यदम् ॥ रेवाया आमलक्याश्च देवक्षेत्रं महेश्वरम् ॥ ३३ ॥ मांडव्यख्यातात्पश्चिमतस्तीर्थं तदंकूरेश्वरम् ॥ तत्र तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः ॥ ३४ ॥ संध्यामाचम्य यत्नेन जपं कृत्वाऽथ भारत ॥ तर्पयित्वा पितॄन्देवान्मनुष्यान्भरतर्षभ ॥ ३५ ॥ सचैलः क्लिन्नवसनो मौनमास्थाय संयतः ॥ अष्टम्यां वा चतुर्दश्यामुपोष्य विधिवन्नरः ॥ ३६ ॥ पूजां यः कुरुते राजंस्तस्य पुण्यफलं शृणु ॥ साग्रं तु योजनशतं तीर्थान्यायतनानि च ॥ ३७ ॥ भवंति तानि दृष्टानि ततः पापैः प्रमुच्यते ॥ तत्र तीर्थे तु यद्दानं देवमुद्दिश्य दीयते ॥ ३८॥ स्नात्वा तु विधिवत्पात्रे तदक्षयमुदाहृतम् ॥ सोमादरगुणं प्रोक्तं फलं जाप्ये ततोऽधिकम् ॥ ३९ ॥ त्रिगुणं चोपवासेन स्नानेन च चतुर्गुणम् ॥ संन्यासं कुरुते यस्तु प्राणत्यागं करोति वा ॥ ॥४०॥ अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ कृमिकीटपतंगानां तत्र तीर्थे युधिष्ठिर ॥ अंकूरेश्वरनामास्थे मृतानां सुगतिर्भवेत् ॥४१॥ एतत्ते कथितं राजन्कूरेश्वरसंभवम् ॥ तीर्थं सर्वगुणोपेतं परमं पापनाशनम् ॥ ४२ ॥ येऽपि शृण्वंति भक्त्येदं कीर्त्यमानं महाफलम् ॥ लभंते नात्र...

CC-0. Mumukshu Bhawan Varanasi Collection. New Delhi. Digitized by eGangotri Foundation USA

संदेहः शिवस्य भुवनं हि ते ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे अंकूरेश्वरतीर्थमाहा
त्म्यवर्णनंनामाष्टमष्टयुत्तरशततमोऽध्यायः ॥ १६८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्परं तीर्थं पुण्यं पापप्रणाशनम् ॥
मांडव्यो यत्र संसिद्ध ऋषिर्नारायणस्तथा ॥ १ ॥ नारायणेन शुश्रूषा शूलस्थेन कृता पुरा ॥ तत्र स्नात्वा महाराज मुच्यते पापकंचुकात् ॥
॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यमेतल्लोकेषु यत्त्वया कथितं मुने ॥ न दृष्टं न श्रुतं तात शूलस्थेन तपः कृतम् ॥ ३ ॥ एतत्सर्वं
कथय मे ऋषिभिः सहितस्य वै ॥ अस्य तीर्थस्य माहात्म्यं मांडव्यस्य कुतूहलात् ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ शृणु राजन्यथा वृत्त
पुरा त्रेतायुगे क्षितौ ॥ लोकपालोपमो राजा देवपन्नो महामतिः ॥ ५ ॥ धर्मज्ञश्च कृतज्ञश्च यज्वा दानरतः सदा ॥ प्रजा रक्ष यत्नेन पिता
पुत्रानिवौरसान् ॥ ६ ॥ दात्यायनी प्रिया भार्या तस्य राज्ञो वशानुगा ॥ हारनूपुरघोषेण झंकाररवनादिता ॥ ७ ॥ परस्परं तयोः प्रीतिर्वर्द्धतेनुदिनं
नृप ॥ वंशस्तंबे स्थितो राजा संशास्ति पृथिवीमिमाम् ॥ ८ ॥ हस्त्यश्वरथसंपूर्णां धनवाहनसंयुताम् ॥ अलंकृतो गुणैः सर्वैरनपत्यो महीपतिः ॥
॥ ९ ॥ दुःखेन महताऽऽविष्टः संतप्तः संततिं विना ॥ स्नानहोमरतो नित्यं द्वादशाब्दानि भारत ॥ १० ॥ व्रतोपवासनियमैः पत्नीभिः सह तस्थिवान् ॥
आराधयद्भगवतीं चामुण्डां मुण्डमर्दिनीम् ॥ ११ ॥ स्तोत्रैरनेकैर्भक्त्या च पूजाविधिसमाधिना ॥ जय वाराहि चामुण्डे जय देवि त्रिलोचने ॥ १२ ॥
ब्राह्मि रौद्रि च कौमारि कात्यायनि नमोऽस्तु ते ॥ प्रचंडे भैरवे रौद्रि योगिन्याकाशगामिनि ॥ १३ ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्ये सचरा
चरे ॥ राज्ञा स्तुता च संतुष्टा देवी वचनमब्रवीत् ॥ १४ ॥ वरयस्व यथाकामं यस्ते मनसि वर्त्तते ॥ आराधिता त्वया भक्त्या तुष्टा दास्यामि
ते वरम् ॥ १५ ॥ ॥ देवपन्न उवाच ॥ ॥ यदि तुष्टासि देवेशि वरार्हो यदि वाऽप्यहम् ॥ पुत्रसंतानरहितं संतप्तं मां समुद्धर ॥ १६ ॥ संतानं
नय मे वृद्धिं गोत्ररक्षां कुरुष्व मे ॥ अपुत्रिणां गृहाणीह श्मशानसदृशानि हि ॥ १७ ॥ पितरस्तस्य नाश्नन्ति देवता ऋषिभिः सह ॥ क्रियमाणेऽ
प्यहरहः श्राद्धे मत्पितरः सदा ॥ १८ ॥ दर्शयंति सदाऽऽत्मानं स्वप्ने क्षुत्पीडितं मम ॥ इति राज्ञो वचः श्रुत्वा देवी ध्यानमुपागता ॥ १९ ॥
दिव्येन चक्षुषा दृष्टं त्रैलोक्यं सचराचरम् ॥ प्रसन्नवदना देवी राजानमिदमब्रवीत् ॥ २० ॥ संतानं नाऽस्ति ते राजंस्त्रैलोक्ये सचराचरे ॥ यजस्व
यज्ञपुरुषमपत्यं नास्ति तेऽन्यथा ॥ २१ ॥ मया दृष्टं महीपाल त्रैलोक्यं दिव्यचक्षुषा ॥ एवमुक्त्वा गता देवी राजा स्वगृहमागमत् ॥ २२ ॥
इयाज यज्ञपुरुषं संजाता कन्यका ततः ॥ तेजस्विनी रूपवती सर्वलोकमनोहरा ॥ २३ ॥ देवगन्धर्वलोकेऽपि तादृशी नास्ति कामिनी ॥ तस्या
नाम कृतं पित्रा हर्षात्कामप्रमोदिनी ॥ २४ ॥ ततः कालेन ववृधे रूपेणास्तंभयज्जगत् ॥ हंसलीलागतिः सुभ्रूः स्तनभारावनामिता ॥ २५ ॥
रक्तमाल्यांबरधरा कुण्डलाभरणोज्ज्वला ॥ दिव्यानुलेपनवती सखीभिः सा सुरक्षिता ॥ २६ ॥ कुचमध्यगतो हारो विद्युन्मालेव राजते ॥ भ्रमरां
चितकेशी सा बिंबोष्ठी चारुहासिनी ॥ २७ ॥ कर्णांतप्राप्तनेत्राभ्यां पिबन्तीवाथ कामिनः ॥ चंद्रतांबूलसौरभ्यैराकर्षंतीव मन्मथम् ॥ २८ ॥
कुम्बुग्रीवा चारुमध्या ताम्रपादांगुलीनखा ॥ निम्ननाभिः सुजघना रंभोरू सुदती शुभा ॥ २९ ॥ मातापितृसुहृद्वर्गे क्रीडानन्दविवर्द्धिनी ॥ एक
स्मिन्दिवसे बाला सखीवृन्दसमन्विता ॥ ३० ॥ चंदनागरुतांबूलधूपसौमनसांचिता ॥ गृहीत्वा पुष्पधूपादि गता देवीप्रपूजने ॥ ३१ ॥ तडागतट
उत्सृज्य भूषणान्यंगवेष्टकान् ॥ चक्रुः सरसि ताः क्रीडां जलमध्यगतास्तदा ॥ ३२ ॥ क्रीडन्तीं तामवेक्ष्याथ ससखीं विमले जले ॥ राक्षसः शंबरो
नाम श्येनरूपेण चाऽगमत् ॥ ३३ ॥ गृहीता जलमध्यस्था तेन सा काममोदिनी ॥ खमुत्पपात दुष्टात्मा गृहीत्वाऽऽभरणान्यपि ॥ ३४ ॥
वायुमार्गं गतः सोऽथ कामिन्या सह भारत ॥ अपतन्कुण्डलादीनि यत्र तोये महामुनिः ॥ ३५ ॥ मांडव्यो नर्मदातीरे काष्ठवत्संजितेंद्रियः ॥
लीनो माहेश्वरे स्थाने नारायणपदे परे ॥ ३६ ॥ तस्य चानुचरो भ्राता भ्रातुः शुश्रूषणे रतः ॥ तपोजपकृशीभूतो दध्यौ देवं जनार्दनम् ॥ ३७ ॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे काममोदिनीहरणवर्णनंनामैकोनसप्तत्यधिशततमो
ऽध्यायः ॥ १६९ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ कामप्रमोदिनीसख्यो नीयमानां च तेन तु ॥ दृष्ट्वा ताश्चक्रुशुः सर्वा निःसृत्य
जलमध्यतः ॥ १ ॥ गता राजगृहे सर्वाः कथयंति सुदुःखिताः ॥ कामप्रमोदिनी राजन्हृता श्येनेन पक्षिणा ॥ २ ॥ क्रीडंती च जलस्थाने
तडागे देवसन्निधौ ॥ अन्वेष्या च त्वयाराजंस्तस्य मार्गं विजानता ॥ ३ ॥ तासां तद्वचनं श्रुत्वा देवपन्नः सुदुःखितः ॥ हाहेत्युक्त्वा समुत्थाय
रुदमानो वरासनात् ॥ ४ ॥ मंत्रिभिः सहितस्तस्मिंस्तडागे जलसन्निधौ ॥ न चिह्नं न च पन्थानं दृष्ट्वा दुःखान्मुमोह च ॥ ५ ॥ तस्य
राज्ञस्तु दुःखेन दुःखितो नागरो जनः ॥ क्षणेनाऽऽश्वासितो राजा मंत्रिभिः सपुरोहितैः ॥ ६ ॥ किं कुर्म इत्युवाचेदमस्मिन्काले विधीय
ताम् ॥ सर्वैस्तत्संविदं कृत्वा वाहिनीं चतुरंगिणीम् ॥ ७ ॥ प्रेषयामि दिशः सर्वा हस्त्यश्वरथसंकुला ॥ वादित्राणि च वाद्यंते व्याकुली
भूतसंकुले ॥ ८ ॥ नाराचैस्तोमरैर्भल्लैः खड्गैः परश्वधादिभिः ॥ राजा संनाहबद्धोऽभूद्गगनं ग्रसते किल ॥ ९ ॥ न देवो न च गन्धर्वो न दैत्यो
न च राक्षसः ॥ किं करिष्यति राजाऽद्य न जाने रोषनिष्कृतिम् ॥ १० ॥ नागरोऽपि जनस्तत्र दृष्ट्वा चकितमानसः ॥ चतुर्दशसहस्राणि दंतिनां सृणि
धारिणाम् ॥ ११ ॥ अश्वारोहसहस्राणि ह्यशीतिः शस्त्रपाणिनाम् ॥ रथानां त्रिसहस्राणि विंशतिर्भरतर्षभ ॥ १२ ॥ संग्रामभेरीनिनदैः खुररेणु
र्नभोगता ॥ एतस्मिन्नंतरे तात रक्षको नगरस्य हि ॥ १३ ॥ गृहीत्वाऽऽभरणं तस्यास्त्वंगप्रत्यंगिकं तथा ॥ कुण्डलांगदकेयूरहारनूपुरझल्लरीः ॥
॥ १४ ॥ निवेद्याकथयद्राज्ञे मया दृष्टं त्ववेक्षणात् ॥ तापसानामाश्रमे तु मांडव्यो यत्र तिष्ठति ॥ १५ ॥ तापसैर्वेष्टितो यत्र ददृशे तत्र सन्निधौ ॥
दण्डवासिवचः श्रुत्वा प्रत्यक्षांगविभूषणम् ॥ १६ ॥ स क्रोधरक्तनयनो मंत्रिणो वीक्ष्य नैगमान् ॥ ईदृग्भूतस्समाचारो ब्राह्मणो नगरे मम ॥ १७ ॥
चौरचर्यां व्रतच्छन्नः परद्रव्यापहरकः ॥ तेन कन्या हृता मेऽद्य तपस्विपापकर्मिणा ॥ १८ ॥ शाकुन्तं रूपमास्थाय जलस्थो गगनं ययौ ॥
पाखंडिनो विकर्मस्थान्बिडालव्रतिकाञ्छठान् ॥ १९ ॥ चाटुतस्करदुर्वृत्तान्हंन्यान्नस्त्यस्य पातकम् ॥ न द्रष्टव्यो मया पापः स्तेयी कन्या
पहारकः ॥ २० ॥ शूलमारोप्यतां क्षिप्रं न विचारस्तु तस्य वै ॥ स च वध्यो मया दुष्टो रक्षोरूपी तपोधनः ॥ २१ ॥ एवं ब्रुवंश्चलन्क्रोधादा
दिश्य दण्डवासिनम् ॥ कार्याकार्यं न विज्ञाय शूलमारोपयद्द्विजम् ॥ २२ ॥ पौरा जानपदाः सर्वे अश्रुपूर्णमुखास्तदा ॥ हाहेत्युक्त्वा रुदंत्यन्ये
वदंति च पृथक्पृथक् ॥ २३ ॥ कुत्सितं च कृतं कर्म्म राज्ञा चंडालचारिणा ॥ ब्राह्मणो नैव वध्यो हि विशेषेण तपोवृतः ॥ २४ ॥ यदि रोषस
माचारो निर्वास्यो नगराद्बहिः ॥ न जातु ब्राह्मणं हन्यात्सर्वपापेप्यवस्थितम् ॥ २५ ॥ राष्ट्रादेनं बहिःकुर्यात्समग्रधनमक्षतम् ॥ नाश्नाति च गृहे
राजन्नाग्निर्नगरवासिनाम् ॥ सर्वेऽप्युद्विग्नमनसो गृहव्याप्तिविवर्जिताः ॥ २६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आवन्त्यखण्डे रेवाखण्डे मांडव्यशूलारोपणवर्णनंनाम सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥
कथितं ब्राह्मणं दृष्ट्वा शूले क्षिप्तं तपोधनैः ॥ नारायणसमीपे तु गताः सर्वे महर्षयः ॥ १ ॥ नारदो देवलो रैभ्यो यमः शातातपोऽङ्गिराः ॥ वसिष्ठो
जमदग्निश्च याज्ञवल्क्यो बृहस्पतिः ॥ २ ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽरुणिर्मुनिः ॥ बालखिल्यादयोऽन्ये च सर्वेऽप्यृषिगणाऽन्वयाः ॥ ३ ॥
दृष्ट्वुः शूलमारूढं मांडव्यमृषिपुंगवाः ॥ प्रोचुर्नारायणं विप्रं किं कुर्मस्तव चेप्सितम् ॥ ४ ॥ सर्वे ते तत्र सान्निध्यान्मांडव्यस्य महात्मनः ॥
संभ्रांता आगता ऊचुः किं मृतः किं नु जीवति ॥ ५ ॥ अवस्थां तस्य ते दृष्ट्वा विषादमगमन्परम् ॥ असहित्वा तु तद्दुःखं सर्वे ते मनसा
द्विजाः ॥ ६ ॥ पृच्छ्यतां यदि मन्येत राजानं भस्मसात्कुरु ॥ तेषां तद्वचनं श्रुत्वा वाक्यं नारायणोऽब्रवीत् ॥ ७ ॥ मयि जीवति मद्भक्ता नाव
स्पाभीदृशीं गतः ॥ धिग्जीवितं च मे किंतु तपसो विद्यते फलम् ॥ ८ ॥ दृष्ट्वा शूलस्थितं ज्येष्ठं मन्मनोऽनुविदीर्यते ॥ परं किं तु करिष्यामि
येन राष्ट्रं सराजकम् ॥ ९ ॥ भस्मसाच्च करोम्यद्य भवद्भिः क्षम्यतामिह ॥ एवमुक्त्वा गृहीत्वाऽसौ करस्थमभिमन्त्रयेत् ॥ १० ॥ क्रोधेन पश्यते
यावत्तावद्धुंकारकोऽभवत् ॥ तेन हुंकारशब्देन ऋषयो विस्मितास्तदा ॥ ११ ॥ मांडव्यस्य समीपे तु ह्यपृच्छंस्ते द्विजोत्तमाः ॥ निवारयसि किं
विप्र शापं नृपजिघांसनम् ॥ १२ ॥ अपापस्य तु येनेह कृतमस्य जिघांसनम् ॥ ऋषीणां वचनं श्रुत्वा कृच्छ्रान्मांडव्यकोऽब्रवीत् ॥ १३ ॥ अभि
वन्दामि वो मूर्ध्ना स्वागतं पयः सदा ॥ अर्घ्यसन्मानपूजार्हाः सर्वेऽत्रोपविशंतु ते ॥ १४ ॥ निविष्टेष्वाश्रमनसा सर्वान्मांडव्यकोऽब्रवीत् ॥ १५ ॥
प्राप्तं दुःखं मया घोरं पूर्वजन्मार्जितं फलम् ॥ मा विषादं कुरुध्वं भोः कृतं पापं तु भुज्यते ॥ १६ ॥ ॥ ऋषय ऊचुः ॥ ॥ केन कर्मविपा
केन इह जात्यंतरं व्रजेत् ॥ दानधर्मफलेनैव केन स्वर्गं च गच्छति ॥ १७ ॥ ॥ मांडव्य उवाच ॥ ॥ अदत्तदाना जायंते परभाग्योप
जीविनः ॥ न स्नानं न जपो होमो नातिथ्यं न सुरार्चनम् ॥१८॥ न पर्वणि पितृश्राद्धं न दानं द्विजसत्तमाः ॥ व्रजंति नरके घोरे यांति ते त्वंत्यजां
गतिम् ॥१९॥ पुनर्दरिद्राः पुनरेव पापाः पापप्रभावान्नरके वसंति ॥ तेनैव संसारिणि मर्त्यलोके जीवादिभूते कृमयः पतंगाः ॥२०॥ ये स्नानशीला
द्विजदेवभक्ता जितेंद्रिया जीवदयानुशीलाः ॥ ते देवलोकेषु वसंति हृष्टा ये धर्मशीला जितमानरोषाः ॥ २१ ॥ विद्याविनीता न परोपतापिनः
स्वदारतुष्टाः परदारवर्जिताः ॥ तेषां न लोके भयमस्ति किंचित्स्वभावशुद्धा गतकल्मषा हि ते ॥ २२ ॥ ॥ ऋषय ऊचुः ॥ ॥ पूर्वजन्मनि विप्रेंद्र किं
त्वया दुष्कृतं कृतम् ॥ येन कष्टमिदं प्राप्तं संधानं शूलगर्हितम् ॥२३॥ शूलस्थं त्वां समालक्ष्य ह्यागताः सर्व एव हि ॥ जीवंतं त्वां प्रपश्याम त्वंतर
व्रतारयन् ॥ रुजा संतापजं दुःखं सोढापि त्वमवेदनः ॥ २४ ॥ ॥ मांडव्य उवाच ॥ ॥ स्वयमेव कृतं कर्म स्वयमेवोपभुज्यते ॥ सुकृतं दुष्कृतं पूर्वं
नान्ये भुंजंति कर्हिचित् ॥ २५ ॥ यथा धेनुसहस्रेषु वत्सो विंदति मातरम् ॥ तथा पूर्वकृतं कर्म्म कर्त्तारमुपगच्छति ॥ २६ ॥ न माता न पिता
भ्राता न भार्या न सुताः सुहृत् ॥ न कस्य कर्मणां लेपः स्वयमेवोपभुज्यते ॥ २७ ॥ शृण्वंतां मम वाक्यं च भवद्भिः पृच्छितो ह्यहम् ॥ पूर्वं वयसि
भो विप्रा मल स्नानकृतक्षणः ॥ २८ ॥ अज्ञानाद्बालभावेन यूका कंटेधिरोपिता ॥ तैलाभ्यक्तशिरोगात्रे मया यूका धृता न हि ॥२९॥ कंकतीं रोप्य
केशेषु सासा कंटेऽधिरोपिता ॥ तेषु पापं कृतं सद्यः फलमेतन्ममाभवत् ॥ ३० ॥ किंचित्कालं क्षपित्वाहं प्राप्स्ये मोक्षं निरामयम् ॥ भवंतस्त्विह
संतापं मा कुरुध्वं महर्षयः ॥ ३१ ॥ इमामवस्थां भुक्त्वाऽहं कंचिच्छपे न चोच्चरे ॥ अहानि कतिचिच्छूले क्षपयिष्यामि किल्बिषम् ॥ ३२ ॥ प्राक्तनं
कर्म भुंजामि यन्मया संचितं द्विजाः ॥ क्षंतव्यमस्य राज्ञोऽथ कोपश्चैव विसर्ज्यताम् ॥ ३३ ॥ श्रुत्वा तु तस्य तद्वाक्यं मांडव्यस्य महर्षयः ॥ प्रहर्ष
मतुलं लब्ध्वा साधुसाध्वित्यपूजयन् ॥ ३४ ॥ ॥ नारायण उवाच ॥ ॥ इदं जलं मंत्रपूतं कस्मिन्स्थाने क्षिपाम्यहम् ॥ येन राजा भवेद्भस्म स
राष्ट्रः सपुरोहितः ॥ ३५ ॥ ॥ मांडव्य उवाच ॥ ॥ इदं जलं च रक्षस्व कालकूटविषोपमम् ॥ समुद्रे क्षिपयिष्यामि देवकार्यं समुत्थितम् ॥
॥ ३६ ॥ अथ ते मुनयः सर्वे मांडव्यं प्रणिपत्य च ॥ आमंत्रयित्वा दर्पाच्च कश्यपाद्या गृहान्ययुः ॥ ३७ ॥ गच्छमानास्तु ते चोक्ताः पंचमेऽहनि ता
पसाः ॥ आगंतव्यं भवद्भिश्च मत्सकाशं प्रतिज्ञया ॥ ३८ ॥ तथेति ते प्रतिज्ञाय नारदाद्या अदर्शनम् ॥ गतेषु विप्रमुख्येषु शांडिली च तपोधना ॥
॥ ३९ ॥ द्वितीयेऽह्नि समायाता न तु बुध्वाऽथ तं ऋषिम् ॥ भर्त्तारं शिरसा धार्य रात्रौ पर्यटते स्म सा ॥ ४० ॥ न दृष्टः शूलके विप्रो भराक्रांत्या
युधिष्ठिर ॥ स्खलिता तस्य जानुभ्यां शूलस्थस्य पतिव्रता ॥ ४१ ॥ सर्वांगेषु व्यथा जाता तस्याः प्रस्खलनान्मुनेः ॥ ईदृशीं वर्त्तमानां च ह्यवस्थां
पूर्वदेविकीम् ॥ ४२ ॥ पुनः पापफलं किंचिद्य कष्टं मम वर्त्तते ॥ व्यथितोऽहं त्वया पापे किमर्थं सूनकर्मणि ॥ ४३ ॥ स्वैरिणीं त्वां प्रपश्यामि राक्ष
सी तस्करी नु किम् ॥ एवमुक्त्वा क्षणं मोहात्क्रंदमानो मुहुर्मुहुः ॥४४ ॥ तपस्विनोऽथ ऋषयः सर्वे संत्रस्तमानसाः ॥ पश्यमाना मुनेः कष्टं पृच्छंते
ते युधिष्ठिर ॥ ४५ ॥ पर्यटसे किमर्थं त्वं निशीथे वहनं तु किम् ॥ क्षिप्तं तु झोलिकाभारं किंवाऽऽगमनकारणम् ॥ व्यथामुत्पाद्य ऋषये दुःखाद्दुःख
विलासिनि ॥ ४६ ॥ ॥ शांडिल्युवाच ॥ ॥ नाऽसुरीं न च गंधर्वीं न पिशाचीं न राक्षसीम् ॥ पतिव्रतां तु मां सर्वे जानंतु तपसि स्थिताम् ॥
॥ ४७ ॥ न मे कामो न मे क्रोधो न वैरं न च मत्सरः ॥ अज्ञानाद्दृष्टिमांद्याच्च स्खलनं क्षंतुमर्हथ ॥ ४८ ॥ वहनं भर्तृसौख्याय दिवा संपीड्य
ते रुजा ॥ अयं भर्त्ता विजानीयाद्झोलिकासंस्थितः सदा ॥ ४९ ॥ भरणं पानवस्त्रं च ददाम्येतस्य रोगिणः ॥ ऋषिः शौनकमुख्योऽसौ शांडिलीं
मां विजानत ॥ ५० ॥ स्वभर्तृधर्मिणीं कोपं मा कुरुष्वातिथिं कुरु ॥ सतां समीपं संप्राप्तां सर्वं मे क्षंतुमर्हथ ॥ ५१ ॥ ॥ ऋषय ऊचुः ॥ ॥ पर
व्यथां न जानीषे व्यचरंती यदृच्छया ॥ प्रभातेऽभ्युदिते सूर्ये तव भर्त्ता मरिष्यति ॥ ५२ ॥ आत्मदुःखात्परं दुःखं न जानासि कुलाधमे ॥ तेन
वाक्येन घोरेण शांडिली विमनाऽभवत् ॥ ५३ ॥ परं विषादमापन्ना क्षणं ध्यात्वाऽब्रवीद्वचः ॥ कोपात्संरक्तनयना निरीक्षंती मुनींस्तदा ॥ ५४ ॥
सतां गेहे किल प्राप्ता भवतां चापकारिणी ॥ सामेनातिथिपूजायां शिष्टे च गृहमागते ॥५५॥ भवद्भिरीदृगातिथ्यं कृतं चैव ममैव तु ॥ स्वर्गापवर्ग
धर्मश्च भवद्भिर्न निरीक्षितम् ॥ ५६ ॥ प्राजापत्यामिमां दृष्ट्वा मां यथा प्राकृताः स्त्रियः ॥ भवंतः स्त्रीवलं मेऽद्य पश्यंतु दिवि देवताः ॥ ५७ ॥
मरिष्यति न मे भर्त्ता ह्यादेत्यो नोदयिष्यति ॥ अन्धकारं जगत्सर्वं क्षीयते नाऽद्य शर्वरी ॥ ५८ ॥ एवमुक्ते तया वाक्ये स्तंभितेऽर्के तमोमयम् ॥
न च प्रजायते सर्वं निर्वपद्वारसत्क्रियम् ॥ ५९ ॥ स्वाहाकारः स्वधाकारः पंचयज्ञविधिर्नहि ॥ स्नानं दानं जपो नास्ति संध्यालोपव्यतिक्रमः ॥
षण्मासं च तदा पार्थ लुप्तपिंडोदकक्रियम् ॥ ६० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
शांडिलीऋषिसंवादवर्णनंनामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अथ ते ऋषयः सर्वे
देवाश्चेंद्रपुरोगमाः ॥ मांडव्यस्याऽश्रमे पुण्ये समीपुर्नर्मदातटे ॥ १ ॥ शंखदुंदुभिनादेन दीपिकाज्वलनेन च ॥ अप्सरोगीतनादेन
प्रत्यंत्यो वारयोषितः ॥ २ ॥ कथानकैः स्तुवत्यन्ये तस्य शूलाग्रधारिणः ॥ अष्टाशीतिसहस्राणि स्नातकानां तपस्विनाम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ३ ॥ समाजे त्रिदशैः सार्द्धं तत्र ते च दिदृक्षया ॥ ब्रह्मविष्णुमहेशानास्तत्र हर्षात्समागताः ॥ ४ ॥ मातरो मल्लिकाद्याश्च क्षेत्रपाला विनायकाः ॥ दिक्पाला लोकपालाश्च गंगाद्याश्च सरिद्वराः ॥ ५ ॥ ऋषिदेवसमाजे तु नित्यं हर्षप्रमोदने ॥ तत्र राजा समायातः पौरजानपदैः सह ॥ ६ ॥ दृष्ट्वा कौतूहलं तत्र व्याकुलीकृतमानसम् ॥ वित्रस्तमनसो भूत्वा भयात्सर्वे समास्थिताः ॥ ७ ॥ तस्मिन्समागमे दिव्ये ब्रह्मविष्ण्वीश मब्रुवन् ॥ भो मांडव्य महासत्त्व वरदास्तेऽमरैः सह ॥ ८ ॥ अनेककष्टतपसा तव सिद्धिर्भविष्यति ॥ प्रार्थयस्व यथाकामं यस्ते मनसि रोचते ॥ ॥ ९ ॥ अनादित्यमयं लोकं निर्वषट्कारमाकुलम् ॥ नष्टधर्मं विजानीहि प्रकृतिस्थं कुरुष्व च ॥ अनुग्रहं तु शांडिल्याः प्रार्थयाम द्विजोत्तम ॥ १० ॥ एष ते कष्टदो राजा समायातस्तवाऽग्रतः ॥ संभूषयस्व विप्रर्षे जनं देवासुरं गणम् ॥ ११ ॥ ॥ मांडव्य उवाच ॥ ॥ यदि प्रसन्ना मे देवाः समायाताः सुरैः सह ॥ त्रिकालमत्र तीर्थे च स्थातव्यमृषिभिः सह ॥ १२ ॥ भवतां तु प्रसादेन रुजा मे शाम्यतां सदा ॥ एवमस्त्विति देवेशा यावज्जल्पंति पांडव ॥१३॥ तावद्रक्षो गृहीत्वाऽग्रे कन्यां कामप्रमोदिनीम् ॥ उवाच भगवञ्छापं पुरा दत्त्वोर्वशी मम ॥ १४ ॥ यदा कन्यां हरे रक्षः शापांतस्ते भविष्यति ॥ तेन मे गर्हितं कर्म्म शापेनाऽकृतबुद्धिना ॥ १५ ॥ क्षंतव्यमिति चोक्त्वा च गतश्चाऽदर्शनं पुनः गते चैव तु सा कन्या दृष्ट्वा पद्मदलेक्षणा ॥ १६ ॥ मंत्रयित्वा सुरैः सर्वैर्दत्ता मांडव्यधीमते ॥ तां वज्रशूलिकां प्राप्य पवित्रैर्नर्मदोदकैः ॥ १७ ॥ मांडव्यमृषिमुत्तार्य जयशब्दादिमंगलैः ॥ विवाहयित्वा ता कन्यां मांडव्य ऋषिपुंगवः ॥ १८ ॥ अभिवाद्य च तान्सर्वान्दानसन्मानगौरवैः ॥ अथ राजा समीपस्थो रत्नैश्च विविधैरपि ॥ १९ ॥ धिग्वादैर्निंदितः सर्वैस्तैर्जनैर्भूषितः पुनः ॥ राज्ञा च ब्राह्मणाः सर्वे भूषणाच्छादनाशनैः ॥ ॥ २० ॥ सुवर्णकोटिदानेन तुष्टान्कृत्वा क्षमापिताः ॥ वृत्ते विवाह आहूय शांडिलीं तामथाब्रवीत् ॥ २१ ॥ मानयस्व इमान्विप्रान्मोचयस्व दिवाकरम् ॥ अपहृत्य तमो येन कृपा सद्यः प्रवर्त्तते ॥ २२ ॥ ऋषीणां वचनं श्रुत्वा शांडिली दुःखिताऽब्रवीत् ॥ उदितेऽर्के तु मे भर्त्ता मृत्युं यास्यति भो द्विजाः ॥ २३ ॥ तं कथं मोचयामीह ह्यात्मनोऽनिष्टसिद्धये ॥ क्रियाप्रवर्त्तनाच्चाद्य किं कार्यं मे महर्षयः ॥ २४ ॥ निःपुंसी स्त्री ह्यनाथाऽहं भवामि भवतो मतम् ॥ तिष्ठ त्वमंधकारे तु नेच्छामि रविणोदयम् ॥ २५ ॥ तेन वाक्येन ते सर्वे देवासुरमहर्षयः ॥ शिरःसंचालनाः सर्व्वे साधु साध्विति चाऽब्रुवन् ॥ २६ ॥ पतिव्रते महाभागे शृणु वाक्यं तपोधने ॥ मन्यसे यदि नः सर्वान्कुरुष्व वचनं च यत् ॥ २७ ॥ ॥ शांडिल्युवाच ॥ ॥ येन मे न मरेद्भर्त्ता येन सत्यं मुनेर्वचः ॥ तत्कुरुध्वं विचार्याशु येन संवर्धते सुखम् ॥ २८ ॥ तस्यास्तद्वचनं श्रुत्वा स्वप्नावस्थाकृतो ऋषिः ॥ अंतर्हितो मुहूर्त्तं च शांडिल्याश्च प्रपश्य ताम् ॥ २९ ॥ पुनरादाय ते सर्वे कृत्वा निर्व्रणसत्तनुम् ॥ ३१ ॥ स्नापितो नर्मदातोये शांडिल्यायै समर्पितः ॥ ३० ॥ ततः सा हृष्टमनसा पतिं दृष्ट्वा तु तैजसम् ॥ प्रणम्य तानृषीन्देवान्विमलार्कं जगत्कृतम् ॥ ३१ ॥ क्रियाप्रवर्त्तिताः सर्वे देवगंधर्वमानुषाः ॥ हृष्टतुष्टा गताः सर्वे स्वमाश्रमपदं महत् ॥ ३२ ॥ पतिव्रता स्वभर्त्रा सा मासमेवाऽऽश्रमे स्थिता ॥ मांडव्येनाऽप्यनुज्ञाता ययौ नत्वा स्वमाश्रमम् ॥ ३३ ॥ गतेषु तेषु सर्वेषु स्थापयामास चाच्युतम् ॥ मांडव्येश्वरनामानं नारायण इति स्मृतम् ॥ ३४ ॥ दिव्यं वर्षसहस्रं तु पूजयामास भारत ॥ गतोऽसावृषिसंघैश्च सहितोऽमरपर्वतम् ॥ ३५ ॥ तपस्तपन्तौ तौ तत्र ह्यद्यापि किल भारत ॥ भ्रातरौ संयतात्मानौ ध्यायतः परमं पदम् ॥ ३६ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ पितरस्तस्य तृप्यंति पिंडदानाद्दशाब्दिकम् ॥ ३७ ॥ देवगृहे तु पक्षादौ यः करोति विलेपनम् ॥ गोदानशतसाहस्रे दत्ते भवति यत्फलम् ॥ ३८ ॥ उपलेपनेन द्विगुणमर्चने तु चतुर्गुणम् ॥ दीपप्रज्वलने पुण्यमष्टधा परिकीर्त्तितम् ॥ ३९ ॥ दिव्यनेत्रधरो भूत्वा त्रैलोक्यं सचराचरे ॥ दध्ना मधुघृतैर्देवं पयसा नर्मदोदकैः ॥ ४० ॥ स्नपनं ये प्रकुर्वंति पुष्पमालाविलेपनैः ॥ येऽर्च्चयंति विरूपाक्षं देवं नारायणं हरिम् ॥ ४१ ॥ तेऽपि दिव्यविमानेन क्रीडंते कल्पसंख्यया ॥ दीपाष्टकं तु यः कुर्यादष्टमीं च चतुर्दशीम् ॥ ४२ ॥ एकादश्यां तु कृष्णस्य न पश्यंति यमं तु ते ॥ फलैर्नानाविधैः शुभ्रैर्यः कुर्य्याल्लिंगपूरणम् ॥ ४३ ॥ तेऽपि यांति विमानेन सिद्धचारणसेविताः ॥ घण्टा चैव पताका च विमाने पुष्पमालिका ॥४४ ॥ वादित्राणि यथार्हाणि प्रांते च गच्छते शिवम् ॥ देवालयं तु यः कुर्याद्वैष्णवं मांडवेश्वरम् ॥ ४५ ॥ स्वर्गे वसति धर्मात्मा यावदाभूतसंप्लवम् ॥ मांडव्यनारायणाख्ये विप्रान्भोजयतेऽग्रतः ॥ ४६ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ आश्विने मासि संप्राप्ते शुक्लपक्षे चतुर्दशीम् ॥ ४७ ॥ कृतोपवासनियमो रात्रौ जागरणेन च ॥ दीपमालां चतुर्दिक्षु पूजां कृत्वा तु शक्तितः ॥ ४८ ॥ नारी वा पुरुषो वाऽपि नृत्यगीतप्रवादनैः ॥ प्रभाते विमले सूर्ये स्नानादिकविधिं नृप ॥४९॥ अभिनिर्वर्त्य मौनेन पश्यते देवमीदृशम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥ ५० ॥ अथवा मार्गशीर्षे च चैत्रवैशाखयोरपि ॥ श्रावणे वा महाराज सर्वकालेऽथ वापि च ॥ ५१ ॥ शिवरात्रिसमं पुण्यमित्येवं शिवभाषितम् ॥ वाजपेयाऽश्वमेधाभ्यां फलं भवति नाऽन्यथा ॥ ५२ ॥ दुर्भगा दुःखिता वंध्या दरिद्रा च मृतप्रजा ॥ स्नाति रुद्रघटैर्या स्त्री सर्वान्कामानवाप्नुयात् ॥५३॥ कृमिकीटपतंगाश्च तस्मिंस्तीर्थे तु ये मृताः ॥ स्वर्गं प्रयांति ते सर्वे दिव्यरूपधरा नृप ॥ ५४ ॥ अनाशके जलेऽग्नौ तु ये मृता व्याधिपीडिताः ॥ अनिवर्त्तिका गतिस्तेषां रुद्रलोके ह्यसंशयम् ॥ ५५ ॥ नित्यं नमति यो राजञ्छिवनारायणावुभौ ॥ गोदानफलमाप्नोति तस्य तीर्थप्रभावतः ॥ ५६ ॥ देवालये तु राजेंद्र यस्य कुर्यात्प्रदक्षिणाम् ॥ प्रदक्षिणीकृता तेन ससागरधरा धरा ॥ ५७ ॥ सार्द्धं शतं च तीर्थानि मल्लिकाभवनाद्बहिः ॥ तस्य तीर्थप्रमाणं तु विस्तरं राजसत्तम ॥ ५८ ॥ सूत्रेण वेष्टयेत्क्षेत्रमथवा शिवमन्दिरम् ॥ अथवा शिवलिंगं च तस्य पुण्यफलं शृणु ॥ ५९ ॥ जंबूद्वीपश्च कृत्स्नश्च शाल्मली कुशक्रौंचकौ ॥ शाकपुष्करगोमेदैः सप्तद्वीपा वसुन्धरा ॥ ६० ॥ भूपिता तेन राजेंद्र सशैलवनकानना ॥ रेवायां दक्षिणे भागे शिवक्षेत्रात्समीपतः ॥ ६१ ॥ देवखातं महापुण्यं निर्मितं त्रिदशैरपि ॥ तस्मिन्यः कुरुते स्नानं मुच्यते सर्वपातकैः ॥ ६२ ॥ पूर्णिमायाममावस्यां व्यतीपातेऽर्कसंक्रमे ॥ श्राद्धं च संग्रहे कुर्यात्स गच्छेत्परमां गतिम् ॥ ६३ ॥ देवखाते त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ तिष्ठंति ऋषिभिः सार्द्धं पितृदेवगणैः सह ॥ ६४ ॥ तत्र तीर्थेऽश्विने मासि चतुर्दश्यां विशेषतः ॥ वायुमार्गे स्थितः शक्रस्तिष्ठते दैवतैः सह ॥ ६५ ॥ पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा ॥ विशंति तानि सर्वाणि देवखाते दिनद्वयम् ॥ ६६ ॥ गयाशिरे च यत्पुण्यं प्रयागेमकरकण्टके ॥ प्रयागे सोमतीर्थे च तत्पुण्यं मांडवेश्वरे ॥ ६७ ॥ पट्टबन्धेन यत्पुण्यं मात्रायां लकुलेश्वरे ॥ आश्विन्यामश्विनीयोगे तत्पुण्यं मांडवेश्वरे ॥ ६८ ॥ उज्जयिन्यां महाकाले वाराणस्यां त्रिपुष्करे ॥ सन्निहत्यां रविग्रस्ते मांडव्याख्ये सनातनम् ॥ ६९ ॥ इति ज्ञात्वा महाराज सर्वतीर्थेषु चोत्तमम् ॥ पितॄन्देवान्समभ्यर्च्य स्नानदानादिपूजनैः ॥ ७० ॥ चतुर्दश्यां निराहारः स्थितो भूत्वा शुचिव्रतः ॥ पूजयेत्परया भक्त्या रात्रौ जागरणे शिवम् ॥ ७१ ॥ स्नानैश्च विविधैर्देवं पुष्पागरुविलेपनैः ॥ प्रभाते पौर्ण

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मास्यां तु स्नानादिविधितर्पणैः ॥ ७२ ॥ श्राद्धेन हव्यकव्येन शिवपूजार्चनेन च ॥ अग्निष्टोमादियज्ञैश्च विधिवच्चाप्तदक्षिणैः ॥ ७३ ॥ धौतपापो विशुद्धात्मा फलते फलमुत्तमम् ॥ गोसहस्रप्रदानेन दत्तं भवति भारत ॥ ७४ ॥ स्नानाद्यैर्विधिवत्तत्र तद्दिने शिवसन्निधौ ॥ हिरण्यं वृषभं धेनुं भूमिं गोमिथुनं हयम् ॥ ७५ ॥ शिवमुद्दिश्य वै वस्त्रयुग्मे दद्यात्सुरूपिणे ॥ पादुकोपानहौ छत्रं भाजनं रक्तवाससी ॥ ७६ ॥ होमं जाप्यं तथा दान मक्षयं सर्वमेव तत् ॥ ऋचमेकां तु ऋग्वेदे यजुर्वेदे यजुस्तथा ॥ ७७ ॥ सामैकं सामवेदे तु जपेदेवाग्रसंस्थितः ॥ सम्यग्वेदफलं तस्य भवेद्वै नाऽत्र संशयः ॥ ७८ ॥ गायत्रीजाप्यमात्रस्तु वेदत्रयफलं लभेत् ॥ कुलकोटिशतं साग्रं लभते तु शिवार्चनात् ॥ ७९ ॥ स्नाने दाने तथा श्राद्धे जागरे गीतवादिते ॥ अनिवर्त्तिका गतिस्तस्य शिवलोकात्कदाचन ॥ ८० ॥ कालेन महताऽविष्टो मर्त्यलोके समाविशेत् ॥ राजा भवति मेधावी सर्व व्याधिविवर्जितः ॥ ८१ ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रधनान्वितः ॥ तच्च तीर्थं पुनः स्मृत्वा लीयमानो महेश्वरे ॥ ८२ ॥ उपास्ते यस्तु वै सन्ध्यां तस्मिंस्तीर्थे च पर्वणि ॥ सांगोपांगैश्चतुर्वेदैर्लभते फलमुत्तमम् ॥ ८३ ॥ तत्र सर्वं शिवक्षेत्राच्छरपातं समंततः ॥ न संचरेद्भयोद्विग्ना ब्रह्महत्या नराधिप ॥ ८४ ॥ यत्र तत्र स्थितो वृक्षान्पश्यते तीर्थतत्परः ॥ विविधैः पातकैर्मुक्तो मुच्यते नाऽत्र संशयः ॥ ८५ ॥ श्वश्री तत्र हाराज जलमध्ये प्रदृश्यते ॥ कथानिका पुराणोक्ता वानरी तीर्थसेवनात् ॥ ८६ ॥ तत्र कूपो महाराज तिष्ठते देवनिर्मितः ॥ शिवस्य पश्चिमे भागे शिवक्षेत्रमनुत्तमम् ॥ ८७ ॥ वृषोत्सर्गं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ क्रीडंति पितरस्तस्य स्वर्गलोके यदृच्छया ॥ ८८ ॥ अगम्याऽऽगमने पापगया ज्ययाजने कृते ॥ स्तेयाच्च ब्रह्मगोहत्यागुरुघाताच्च पातकम् ॥ तत्सर्वं नश्यते पापं वृषोत्सर्गे कृते तु वै ॥ ८९ ॥ मांडव्यतीर्थमाहात्म्यं यः शृणोति समाधिना ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ९० ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये मांडव्यतीर्थमाहात्म्यवर्णनंनाम द्विसप्तत्यधिकशततमोऽध्यायः ॥१७२॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ नर्मदादक्षिणे कूले सर्वपापप्रणाशनम् ॥१॥ सिद्धेश्वरमिति ख्यातं महापातकनाशनम् ॥ यत्र शुद्धेश्वरः प्राप्तो देवदेवो महेश्वरः ॥ पुरा हत्यायुतः पाथ देवदेवस्त्रिशूलधृक् ॥ २ ॥ पुरा पंचशिरा आसीद्ब्रह्मा लोकपितामहः ॥ तेनाऽनृतं वचश्चोक्तं कस्मिंश्चित्कारणांतरे ॥ ३ ॥ तच्छ्रुत्वा सहसा तस्मै चुकोप परमेश्वरः ॥ छेदयामास भगवान्मूर्द्धानं करजैस्तदा ॥ ४ ॥ तस्य तत्करसंलग्नं च्यवते न कदाचन ॥ ततो हि देवदेवेशः पर्यटन्पृथिवीमिमाम् ॥ ५ ॥ ततो वाराणसीं प्राप्तस्तस्यां तदपतच्छिरः ॥ पतिते तु कपाले च ब्रह्महत्या न मुंचति ॥ ६ ॥ ततस्तु सागरे गत्वा पूर्वे च दक्षिणे तथा ॥ पश्चिमे चोत्तरे पार्श्व देवदेवो महेश्वरः ॥ ७ ॥ पर्यटन्सर्वतीर्थेषु ब्रह्महत्या न मुंचति ॥ नर्मदादक्षिणे कूले सुतीर्थं प्राप्तवान्प्रभुः ॥ ८ ॥ कुलकोटिं समासाद्य पार्थयामास चात्मवान् ॥ प्रायश्चित्तं ततः कृत्वा बभूव गतकल्मषः ॥ ९ ॥ ततो निष्कल्मषो जातो देवदेवो महेश्वरः ॥ दत्त्वा सुरेभ्यस्तत्स्थानं ततश्चांतर्दधे प्रभुः ॥ १० ॥ तदाप्रभृति तत्तीर्थं शुद्धरुद्रेति कीर्त्तितम् ॥ विख्यातं त्रिषु लोके ब्रह्महत्याहरं परम् ॥ ११ ॥ मासे मासे सिते पक्षेऽमावास्यायां युधिष्ठिर ॥ स्नात्वा तत्र विधानेन तर्पयेत्पितृदेवताः ॥ १२ ॥ दद्यात्पिंडं पितॄणां तु भावितेनांतरात्मना ॥ तस्य ते द्वादशाब्दानि सुतृप्ताः पितरो नृप ॥ १३ ॥ गंधधूपप्रदीपाद्यैरभ्यर्च्य परमेश्वरम् ॥ शुद्धेश्वराभिधानं तु शिवलोके महीयते ॥ १४ ॥ एतत्ते कथितं राजञ्छुद्धरुद्रमनुत्तमम् ॥ मया श्रुतं यथा देव सकाशाच्छूलपाणिनः ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ १५ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शुद्धेश्वर तीर्थमाहात्म्यवर्णनंनाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥ १७३ ॥ ॥ ० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गोपेश्वरं ततो गच्छेदुत्तरे नर्मदा तटे ॥ यत्र स्नानेन चैकेन मुच्यते पातकैर्नराः ॥ १ ॥ तत्र तीर्थे तु यः स्नात्वा कुरुते प्राणसंक्षयम् ॥ बर्हियुक्तेन यानेन स गच्छेच्छिवमंदिरे ॥ २ ॥ क्रीडित्वा सुचिरं कालं शिवलोके नराधिप ॥ इह मानुष्यतां प्राप्य राजा भवति वीर्यवान् ॥ ३ ॥ हस्त्यश्वरथसंपन्नो दासीदाससमन्वितः ॥ पूज्यमानो नरेंद्रैश्च जीवेद्वर्षशतं नरः ॥ ४ ॥ संप्राप्ते कार्त्तिके मासि नवम्यां शुक्लपक्षतः ॥ सोपवासः शुचिर्भूत्वा दीपकांस्तत्र दापयेत् ॥ ५ ॥ गंधपुष्पैः समभ्यर्च्य रात्रौ कुर्वीत जागरम् ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नराधिप ॥ ६ ॥ यावत्पुण्यं फलं संख्या दीपकानां तथैव च ॥ तावद्युगसहस्राणि शिवलोके महीयते ॥ ७ ॥ तस्मिंस्तीर्थे तु राजेंद्र लिंगपूरणकं विधिम् ॥ तथैव पद्मकेशैव दधिभक्तैस्तथैव च ॥ ८ ॥ यस्तु कुर्या न्नरश्रेष्ठ तस्य पुण्यफलं शृणु ॥ यावंति तिलसंख्यानि दधिभक्तं तथैव च ॥ ९ ॥ पद्मसंख्या शिवे लोके मोदते कालमीप्सितम् ॥ तस्मिंस्तीर्थे तु राजेंद्र यत्किंचिद्दीयते नृप ॥ १० ॥ सर्वं कोटिगुणं तस्य संख्यातुं वा न शक्य ते ॥ एवंते कथितं सर्वं सर्वतीर्थमनुत्तमम् ॥ ११ ॥ इति श्रीस्कन्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनंनामचतुःसप्तत्युत्तरशततमोऽध्यायः ॥ ॥ १७४ ॥ ॥ ० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ उत्तरे नर्मदाकूले भृगुक्षेत्रस्य मध्यतः ॥ कपिलेश्वरं तु विख्यातं विशेषात्पापनाशनम् ॥ १ ॥ योऽसौ सनातनो देवः पुराणे परिपठ्यते ॥ वासुदेवो जगन्नाथः कपिलत्वमुपागतः ॥ २ ॥ पातालं सुतलं नाम तस्यैव नितलं ह्यधः ॥ गभस्तिगं च तस्याऽधो ह्यंधतामिस्रमेव च ॥ ३ ॥ पातालं सप्तमं यच्च ह्यधस्तात्संस्थितं महत् ॥ वसते तत्र वै देवः पुराणः परमेश्वरः ॥ ४ ॥ स ब्रह्मा स महादेवः स देवो गरुडध्वजः ॥ पूज्यमानः सुरैः सिद्धैस्तिष्ठते ब्रह्मवादिभिः ॥ ५ ॥ वसतस्तस्य राजेंद्र कपिलस्य जगद्गुरोः ॥ विनाशं चाऽप्यतः प्राप्ताः क्षणेन सगरात्मजाः ॥ ६ ॥ भस्मीभूतांस्तु तान्दृष्ट्वा कपिलो मुनिसत्तमः ॥ जगाम परमं शोकं चिंत्यमानोऽथ किल्बिषम् ॥ ७ ॥ सर्वसंगपरित्यागे चित्ते निर्विषयीकृते ॥ अयुक्तं षष्टिसहस्राणां कर्त्तुं मम विनाशनम् ॥ ८ ॥ कृतस्य करणं नास्ति तस्मात्पापविनाशनम् ॥ गत्वा तु कपिलं तीर्थं मोचयाम्यघमात्मनः ॥ ९ ॥ पातालं तु ततो मुक्त्वा कपिलो मुनिसत्तमः ॥ तपश्चचार सुमहन्नर्मदातटमास्थितः ॥ १० ॥ व्रतोपवासैर्विविधैः स्नानदानजपादिकैः ॥ परं निर्व्वाणमापन्नः पूजयन्रुद्रमव्ययम् ॥ ११ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ॥ गोसहस्रफलं तस्य लभते नाऽत्र संशयः ॥ १२ ॥ ज्येष्ठमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी ॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रयच्छति॥१३॥पात्रभूताय विप्राय स्वल्पं वा यदि वा बहु ॥ अक्षयं तत्फलं प्रोक्तं शिवेन परमेष्ठिना ॥१४॥ अंगारकदिने प्राप्ते चतुर्थ्यां नवमीषु च ॥ स्नानं करोति पुरुषो भक्त्योपोष्य वरांगना ॥ १५ ॥ रूपमैश्वर्यमतुलं सौभाग्यं संततिं पराम् ॥ लभते सप्तजन्मानि नित्यं नित्यं पुनःपुनः ॥ १६ ॥ पौर्णमास्याममावास्यां स्नात्वा पिंडं प्रयच्छति ॥ तस्य ते द्वादशाब्दानि तृप्ता यांति सुरालयम् ॥ १७ ॥ तत्र तीर्थे तु यो भक्त्या दद्यादीपं सुशोभनम् ॥ जायते तस्य राजेंद्र महादीप्तिः शरीरजा ॥ १८ ॥ तत्र तीर्थे मृतानां तु जंतूनां सर्वदा किल ॥ अनिवर्त्तिका संवर्त्तेषां गतिस्तु शिवमंदिरात् ॥ १९ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कपिलेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचसप्ताधिकशततमोऽध्यायः ॥ १७५ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल पिंगलावर्त्तमुत्तमम् ॥ तीर्थं सर्वगुणोपेतं कामिकं भुवि दुर्लभम् ॥ १ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ पिंगलेश्वरमासाद्य तत्सर्वं विलयं व्रजेत् ॥ २ ॥ तत्र स्नानं च दानं च देवखाते कृतं नृप ॥ अक्षयं तज्ज्ञवेत्सर्वमित्येवं शंकरोऽब्रवीत् ॥ ३ ॥ पृथिव्यां सर्वतीर्थेषु समुद्धृत्य शुभोदकम् ॥ मुक्तं तत्र सुरैः खात्वा देवखातं ततोऽभवत् ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं तु देवखातं तत्संजातं द्विजसत्तम ॥ सुराः सर्वे कथं तत्र मुमुचुर्वारि तीर्थजम् ॥ सर्वं कथय मे विप्र श्रवणे लंपटं मनः ॥ ५ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ यदा तुशूलशुद्ध्यर्थं रुद्रो देवगणैः सह ॥ बभ्राम पृथिवीं सर्वां कमंडलुधरः शुभाम् ॥ ६ ॥ प्रभासाद्येषु तीर्थेषु स्नानं चक्रुः सुरास्तदा ॥ सर्वतीर्थोत्थितं तोयं पात्रे वै निहितं तु तैः ॥ ७ ॥ शूलभेदमनुप्राप्य शूलं शुद्धं तु शूलिनः ॥ तत्तोत्थमुदकं गृह्य आगता भृगुकच्छके ॥ ८ ॥ तत्राऽपश्यंस्ततो ह्यग्निं पिंगलाक्षं च रोगिणम् ॥ तपस्युग्रे व्यवसितं ध्यायमानं महेश्वरम् ॥ ९ ॥ हविर्भागैस्तु विप्राणां राज्ञां चैवामयाविनाम् ॥ दृष्ट्वा तु बहुरोगार्त्तमग्निं देवमुखं सुराः ॥ प्राहुस्ते सहिता देवं शंकरं लोकशंकरम् ॥ १० ॥ ॥ देवा ऊचुः ॥ ॥ प्रसादः क्रियतां शंभो पिंगलस्यामयाविनः ॥ यथा हि नीरुजः कायो हविषां ग्रहणक्षमः ॥ पुनर्भवति पिंगस्तु तथा कुरु महेश्वर ॥ ११ ॥ ॥ ईश्वर उवाच ॥ ॥ भोभोः सुरा हि तपसा तुष्टोऽहं वो विशेषतः ॥ वचनाच्च विशेषेण ददाम्यभिमतं वरम् ॥ १२ ॥ ॥ पिंगल उवाच ॥ ॥ यदि तुष्टोऽसि देवेश दीयते देव चेप्सितम् ॥ चंद्रादित्यौ च नेत्रे कृत्वात्र कलया स्थितः ॥ १३ ॥ तथा पुनर्नवः कायो भवेद्वै मम शंकर ॥ तथा कुरु विरूपाक्ष नमस्तुभ्यं पुनःपुनः ॥ १४ ॥ ॥ मार्कंड्य उवाच ॥ ॥ ततः स भगवाञ्छंभुर्मूर्त्तिमादित्यरूपिणीम् ॥ कृत्वा तु तस्य तद्रोगमपानुदत शंकरः ॥ १५ ॥ ततः पुनर्नवीभूतः पुनः प्रोवाच शंकरम् ॥ अत्रैव स्थीयतां शंभो तथैव भास्करः स्वयम् ॥ १६ ॥ प्राणिनामुपकाराय रोगाणामुपशांतये ॥ पापानां ध्वंसनार्थाय श्रेयसां चैव वृद्धये ॥ १७ ॥ एवमुक्तस्तु भगवान्पिंगलेन महात्मना ॥ अवतारं च कृतवान्गीर्वाणानिदमब्रवीत् ॥ १८ ॥ ॥ ईश्वर उवाच ॥ ॥ शृंचध्वमुदकं देवास्तीर्थेभ्यो यत्समाहृतम् ॥ मम चोत्तरतः कृत्वा खातं देवमयं शुभम् ॥ १९ ॥ तत्र निक्षिप्यतां वारि सर्वरोगविनाशनम् ॥ सर्वपापहरं दिव्यं सर्वैरपि सुरादिभिः ॥ २० ॥ एवमुक्ताः सुराः सर्वे खातं कृत्वा तथोत्तरे ॥ त्रयस्त्रिंशत्कोटिगणैर्मुक्तं तत्तीर्थजं जलम् ॥ २१ ॥ प्रोचुस्ते सहिताः सर्वे विरूपाक्षपुरोगमाः ॥ यः कश्चिद्देवखातेऽस्मिन्मृदालंभनपूर्वकम् ॥ २२ ॥ स्नानं कृत्वा रविदिने संस्नाय नर्मदाजले ॥ श्राद्धं कृत्वा पितृभ्यो वै दानं दत्त्वा स्वशक्तितः ॥ २३ ॥ पूजयिष्यति पिंगेशं तस्य वासस्त्रिविष्टपे ॥ भविष्यति सुरैरुक्तं शृणोति सकलं जगत् ॥ २४ ॥ आमया भुवि मर्त्यानां क्षयरोगविचर्चिकाः ॥ व्याधयो विकृताकाराः कासश्वासज्वरोद्भवाः ॥ २५ ॥ एकद्वित्रिचतुर्थाह्ना ये ज्वरा भूतसंभवाः ॥ ये चाऽन्ये विकृता दोषा दद्रुश्च कामलं तथा ॥२६॥ दिनैस्ते सप्तभिर्यांति नाशं स्नाने खेर्दिने ॥ शतभेदप्रभिन्ना ये कुष्ठा बहुविधास्तथा ॥२७॥ शतमादित्यवाराणां स्नायादष्टोत्तरं तु यः ॥ संपूज्य शंकरं दद्यात्तिलपात्रं द्विजातये ॥ २८ ॥ नश्यंति तस्य कुष्ठानि गरुडेनेव पन्नगाः ॥ एवमुक्ता गताः सर्वे त्रिदशास्त्रिदशालयम् ॥ २९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नदीषु देवखातेषु तडागेषु सरित्सु च ॥ स्नानं समाचरेन्नित्यं नरः पापैः प्रमुच्यते ॥ ३० ॥ षष्टितीर्थसहस्रेषु षष्टितीर्थशतेषु च ॥ यत्फलं स्नानदानेषु देवखाते ततोऽधिकम् ॥ ३१ ॥ देवखातेषु यः स्नात्वा तर्पयित्वा पितॄन्नृप ॥ पूजयेद्देवदेवेशं पिंगलेश्वरमुत्तमम् ॥ ३२ ॥ सोऽश्वमेधस्य यज्ञस्य वाजपेयस्य भारत ॥ द्वयोः पुण्यमवाप्नोति नाऽत्र कार्या विचारणा ॥ ३३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे पिंगलेश्वरतीर्थमाहात्म्यवर्णनंनाम षट्सप्तत्युत्तरशततमोऽध्यायः ॥ १७६ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूतीश्वरं ततो गच्छेत्सर्वतीर्थेष्वनुत्तमम् ॥ दर्शनादेव राजेंद्र यस्य पापं प्रणश्यति ॥ १ ॥ तत्र स्थाने पुरा पार्थ देवदेवेन शूलिना ॥ उद्मूलनं कृतं गात्रे तेन भूतीश्वरं तु तत् ॥ २ ॥ पुण्ये वा जन्मनक्षत्र अमावास्यां विशेषतः ॥ भूतीश्वरे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ ३ ॥ तत्र स्थाने पापैः प्रमुच्यते ॥ ४ ॥ यावन्तो भूतिकणिका गात्रे लग्नाः शिवालये ॥ तावद्वर्षसहस्राणि शिवलोके महीयते॥५॥सर्वेषामेव स्नानानां भस्मस्नानं परं स्मृतम् ॥पुराणैर्ऋषिभिः प्रोक्तं सर्वशास्त्रेष्वनुत्तमम्॥६॥एककालं द्विकालं वा त्रिकालं चाऽपि यः सदा ॥ स्नानं करोति चाऽऽग्नेयं पापं तस्य प्रणश्यति ॥७॥ दिव्यस्नानाद्वरं स्नानं वायव्यं भरतर्षभ ॥वायव्यादुत्तमं ब्राह्यं वरं ब्राह्म्यात्तु वारुणम् ॥ ८ ॥ आग्नेयं वारुणाच्छ्रेष्ठं यस्मादुक्तं स्वयंभुवा ॥ तस्मात्सर्वप्रयत्नेन ह्याग्नेयं स्नानमाचरेत् ॥ ९ ॥ युधिष्ठिर उवाच ॥ ॥ आग्नेयं भस्मना आग्नेयं वारुणं ब्राह्यं वायव्यं दिव्यमेव च ॥ किमुक्तं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १० ॥ ॥ मार्कंडेय उवाच ॥ ॥ आग्नेयं भस्मना स्नानमवगाह्य च वारुणम् ॥ आपोहिष्टेति च ब्राह्यं वायव्यं गोरजः स्मृतम् ॥ ११ ॥ सूर्ये दृष्टे तु यत्स्नानं गंगातोयेन तत्समम् ॥ तत्स्नानं पंचमं प्रोक्तं दिव्यं पांडवसत्तम ॥ १२ ॥ तस्मात्सर्वप्रयत्नेन स्नात्वा भूतेश्वरे तु यः ॥ पूजयेद्देवमीशानं स बाह्याभ्यंतरः शुचिः ॥ १३ ॥ तत्र स्थाने तु ये नित्यं ध्यायंति परमं पदम् ॥ सूक्ष्मं चातींद्रियं नित्यं ते धन्या नाऽत्र संशयः ॥ १४ ॥ मुक्तितीर्थं तु तत्तीर्थं सर्वतीर्थेष्वनुत्तमम् ॥ दर्शनादेव यस्यैव पापं याति महत्क्षयम् ॥ १५ ॥ जायते पूजया राज्यं तत्र स्तुत्वा महेश्वरम् ॥ जपेन पापसंशुद्धिर्ध्यानेनानन्त्यमश्नुते ॥ १६ ॥ ॐ ज्योतिःस्वरूपमनादिमध्यमनुत्पाद्यमानमनुच्चार्यमाणाक्षरम् ॥ सर्वभूतस्थितं शिवं सर्वयोगेश्वरं सर्वलोकेश्वरं मोहशोकहीनं महाज्ञानगम्यम् ॥ १७ ॥ तत्र तीर्थे तु यो गत्वा स्नानं कुर्यान्नरेश्वर ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ एवंभूतं न जानंति मोक्षापेक्षणिका नराः ॥ १८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे भूतीश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र गंगावाहकमुत्तमम् ॥ नर्मदायां महापुण्यं भृगुतीर्थसमीपतः ॥ १ ॥ तत्र गंगा महापुण्या चचार विपुलं तपः ॥ पुरा वर्षशतं साग्रं परमं व्रतमास्थिता ॥ २ ॥ ध्यात्वा देवं जगद्योनिं नारायणमकल्मषम् ॥ आत्मानं परमं धाम सरित्सा जगतीपते ॥ ३ ॥ ततो जनार्दनो देव आगत्येदमुवाच ह ॥ ४ ॥ ॥ विष्णुरुवाच ॥ ॥ तपसा तव तुष्टोऽहं मत्पादांबुजसंभवे ॥ मत्तः किमिच्छसे देवि ब्रूहि किं करवाणि ते ॥ ५ ॥ ॥ गंगोवाच ॥ ॥ त्वत्पादकमलाद्भ्रष्टा गंगा सहचरा विभो ॥ यदृच्छया त्रिलोकेश वन्द्यमाना दिवौकसैः ॥ ६ ॥ नृपो भगीरथस्तस्मात्तपः कृत्वा सुदुष्करम् ॥ समाराध्य जगन्नाथं शंकरं लोकशंकरम् ॥ ७ ॥ अवतारयामास हि मां पृथिव्यां धरणीधर ॥ मया वै मुनयो वाक्यादवतारः कृतो भुवि ॥ ८ ॥ वैष्णवीमिति मां मत्वा जनः सर्वोऽस्तुतो मयि ॥ ये वै ब्रह्महणो लोके ये च वै गुरुतल्पगाः ॥ ९ ॥ त्यागिनः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पितृमातृभ्यां ये च स्वर्णहरा नराः॥ गोघ्ना ये मनुजा लोके तथा ये प्राणिहिंसकाः ॥१०॥अगम्यागामिनो ये च ह्यभक्ष्यस्य च भक्षकाः ॥ ये चा
ऽनृत प्रवक्तारो ये च विश्वासघातकाः ॥ ११ ॥ देवब्राह्मणवित्तानां हर्त्तारो ये नराधमाः ॥ देवब्रह्मगुरुस्त्रीणां ये च निंदाकरा नराः ॥१२॥ ब्रह्मशाप
प्रदग्धा ये ये चैवात्महनो द्विजाः ॥ भ्रष्टानशनसंन्यासनियतव्रतचारिणः ॥ १३ ॥ तथैवापेयपेयाश्च ये च स्वगुरुनिंदकाः ॥ निषेधका ये
दानानां पात्रदानपराङ्मुखाः ॥ १४ ॥ ऋतुघ्ना ये स्वपत्नीनां पित्रोः स्नेहपरा न हि ॥ बांधवेषु च दीनेषु करुणा यस्य नास्ति वै ॥
॥ १५ ॥ क्षेत्रसेतुविभेदी च पूर्वमार्गप्रलोपकः ॥ नास्तिकः शास्त्रहीनस्तु विप्रः संध्याविवर्जितः ॥ १६ ॥ अहुताशी ह्यसंतुष्टः सर्वाशी
सर्वविक्रयी ॥ कदर्या नास्तिकाः क्रूराः कृताघ्ना ये द्विजायः ॥ १७ ॥ पैशुन्या रसविक्रेयाः सर्वकालविनाकृताः ॥ स्वगोत्रां परगोत्रां वा
ये भुंजंति द्विजाधमाः ॥ १८ ॥ ते मां प्राप्य विमुच्यंते पापसंघैः सुसंचितैः ॥ तत्पापक्षारतप्ताया न शर्म मम विद्यते ॥ १९ ॥ तथा कुरु
जगन्नाथ यथाऽहं शर्म चाप्नुयाम् ॥ एवमुक्तस्तु देवेशस्तुष्टः प्रोवाच जाह्नवीम् ॥ २० ॥ ॥ विष्णुरुवाच ॥ ॥ अहमत्र वसिष्यामि
गंगाधरसहायवान् ॥ प्रविशस्व सदा रेवां त्वमत्रैव च मूर्त्तिना ॥ २१ ॥ मम पादतलं प्राप्य वह त्रिपथगामिनि ॥ यदा बहूदक काले नर्मदाजल
संभृता ॥ २२ ॥ प्रावृट्कालं समासाद्य भविष्यति जलाकुला ॥ प्लाव्योभयतटं देवी प्राप्य मामुत्तरस्थितम् ॥ २३ ॥ प्लावयिष्यति तोयेन यदा
शंखं करे स्थितम् ॥ तदा पर्वशतोद्युक्तं वैष्णवं पर्वसंज्ञितम् ॥ २४ ॥ न तेन सदृशं किंचिद्व्यतीपातादिसंक्रमम् ॥ अयने द्वे च न तथा पुण्यात्पुण्य
तरं यथा ॥ २५ ॥ तस्मिन्पर्वणि देवेशि शंखं संस्पृश्य मानवः ॥ स्नानमाचरते तोये मिश्रे गांगेयनार्मदे ॥ २६ ॥ पुण्यं त्वशेषपुण्यानां मंगलानां
च मंगलम् ॥ विष्णुना विधृतो येन तस्माच्छांतिः प्रचक्रमे ॥ २७ ॥ तत्रांतं पापसंघस्य ध्रुवमाप्नोति मानवः ॥ शंखोद्धारे नरः स्नात्वा तर्पयेत्पि
तृदेवताः ॥ २८ ॥ तृप्तास्ते द्वादशाब्दानि सिद्धिं च सार्वकामिकीम् ॥ गंगावहे तु यः श्राद्धं शंखोद्धारे प्रदास्यति ॥ २९ ॥ तेन पिंडप्रदानेन
नृत्यंति पितरस्तथा ॥ शंखोद्धारे नरः स्नात्वा पूजयेद्बलकेशवौ ॥ ३० ॥ रात्रौ जागरणं कृत्वा शुद्धो भवति जाह्नवि ॥ यत्त्वं लोककृतं कर्म मन्यसे
भुवि दुःसहम् ॥ ३१ ॥ तस्मिन्पर्वणि तत्सर्वं तत्र स्नात्वा व्यपोहय ॥ एवमुक्त्वा नरश्रेष्ठ विष्णुश्चांतरधीयत ॥ ३२ ॥ तदाप्रभृति तत्तीर्थं गंगावाह
कमुत्तमम् ॥ ब्रह्माद्यैर्ऋषिभिस्तात पारंपर्यक्रमागतैः ॥ ३३ ॥ तत्र तीर्थे तु यः स्नात्वा भक्तिभावेन भारत ॥ गंगातीर्थे तु स स्नातः समस्तेषु न
संशयः ॥ ३४ ॥ तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ॥ अनिवर्त्तिका गतिस्तेषां विष्णुलोकात्कदाचन ॥ ३५ ॥ इति श्रीस्कांदे महापु
राण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गंगावहकतीर्थमाहात्म्यवर्णनंनामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥ १७८ ॥ छ ॥
॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र गौतमेश्वरमुत्तमम् ॥ सर्वपापहरं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ १ ॥ गौतमेन तपस्तप्तं तत्र तीर्थे
युधिष्ठिर ॥ दिव्यं वर्षसहस्रं तु ततस्तुष्टो महेश्वरः॥ २ ॥ प्रणम्य शिरसा तत्र स्थापितः परमेश्वरः ॥ स्थापितो गौतमेनेशो गौतमेश्वर उच्यते ॥ ३ ॥
तत्र देवैश्च गंधर्वैर्ऋषिभिः पितृदैवतैः ॥ संप्राप्ता ह्युत्तमा सिद्धिराराध्य परमेश्वरम् ॥४॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ पूजयेत्परमीशानं
सर्वपापैः प्रमुच्यते ॥५॥ बहवस्तन्न जानंति विष्णुमायाविमोहिताः॥ तत्र सन्निहितं देवं शूलपाणिं महेश्वरम् ॥ ६ ॥ ब्रह्मचारी तु यो भूत्वा तत्र तीर्थे
नरेश्वर ॥ स्नात्वाऽर्चयेन्महादेवं सोऽश्वमेधफलं लभेत् ॥ ७ ॥ ब्रह्मचारी तु यो भूत्वा तर्पयेत्पितृदेवताः॥ पूजयेत्परमीशानं सर्वपापैः प्रमुच्यते ॥८॥
तत्र तीर्थे तु यो दानं भक्त्या दद्याद्द्विजायते ॥ तदक्षयफलं सर्वं नाऽत्र कार्या विचारणा ॥ ९ ॥ मासे चाऽश्वयुजे राजन्कृष्णपक्षे चतुर्दशीम् ॥ स्ना
त्वा तत्र विधानेन दीपकानां शतं ददेत् ॥ १० ॥ पूजयित्वा महादेवं गंधपुष्पादिभिर्नरः ॥ मुच्यते सर्वपापेभ्यो मृतः शिवपुरं व्रजेत् ॥ ११ ॥
अष्टम्यां च चतुर्दश्यां कार्त्तिक्यां तु विशेषतः ॥ उपोष्य प्रयतो भूत्वा घृतेन स्नापयेच्छिवम् ॥ १२ ॥ पंचगव्येन मधुना दध्ना वा शीतवारिणा ॥
स च सर्वस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १३ ॥ भक्त्या तु पूजयेत्पश्चात्स लभेत्फलमुत्तमम् ॥ बिल्वपत्रैरखंडैश्च पुष्पैरुन्मत्तकोद्भवैः ॥
॥ १४ ॥ कुशापामार्गसहितैः कदंबद्रोणजैरपि ॥ मल्लिकाकरवीरैश्च रक्तपीतैः सितासितैः ॥ १५ ॥ पुष्पैरन्यैर्यथालाभं यो नरः पूजयेच्छिवम् ॥
नैरंतर्येण षण्मासं योऽर्चयेद्गौतमेश्वरम् ॥ सर्वान्कामानवाप्नोति मृतः शिवपुरं व्रजेत् ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥ ॥ छ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल दशाश्वमेधिकं परम् ॥ तीर्थं सर्वगुणोपेतं महापातकनाशनम् ॥ १ ॥ यत्र गत्वा महा
राज स्नात्वा संपूज्य चेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अश्वमेधो महायज्ञो बहुसंभारद
क्षिणः ॥ अशक्यः प्राकृतैः कर्त्तुं कथं तेषां फलं लभेत् ॥ ३ ॥ अत्याश्चर्यमिदं तत्त्वं त्वयोक्तं वदता सता ॥ यथा मे जायते श्रद्धा दीर्घायुस्त्वं तथा
वद ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इदमाश्चर्यभूतं हि गौर्या पृष्टस्त्रियंबकः ॥ तत्तेऽहं संप्रवक्ष्यामि पृच्छते निपुणाय वै ॥
॥ ५ ॥ पुरा वृषस्थो देवेश ह्युमया सह शंकरः ॥ कदाचित्पर्यटन्पृथ्वीं नर्मदातटमाश्रितः ॥ ६ ॥ दशाश्वमेधिकं तीर्थं दृष्ट्वा
देवो महेश्वरः ॥ तीर्थं प्रत्यंजलिं बद्ध्वा नमश्चक्रे त्रिलोचनः ॥ ७ ॥ कृतांजलिपुटं देवं दृष्ट्वा देवीदमब्रवीत् ॥ ८ ॥
॥ ॥ देव्युवाच ॥ ॥ किमेतद्देवदेवेश चराचरनमस्कृत ॥ प्रह्वनम्रांजलिं बद्ध्वा भक्त्या परमया युतः ॥ ९ ॥ एतदाश्चर्य
मतुलं सर्वं कथय मे प्रभो ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ प्रत्यक्षं पश्य तीर्थस्य फलं मा विस्मिता भव ॥ वियत्स्था मे भुविस्थस्य क्षणं
देवि स्थिरा भव ॥ ११ ॥ एवमुक्त्वा तु देवेशो गौरवर्णो द्विजोऽभवत् ॥ क्षुत्क्षामकण्ठो जटिलः शुष्को धमनिसंततः ॥ १२ ॥ उपविश्य भुवः
पृष्ठे सुस्वरं मंत्रमुच्चरन् ॥ क्रमप्रियो महादेवो माधुर्येण प्रमोदयन् ॥ १३ ॥ श्रुत्वा तां मधुरां वाणीं स्वयं देवेन निर्मिताम् ॥ संभ्रांता ब्राह्मणाः सर्वे
स्नातुं ये तत्र चाऽऽगताः ॥ १४ ॥ नित्यक्रिया च सर्वेषां विस्मृता श्रुतिविभ्रमात् ॥ तं दृष्ट्वा पठमानं तु क्षुत्पिपासाऽभिपीडितम् ॥ १५ ॥
द्विजोऽन्यमंत्रयत्कश्चिद्भक्त्या तं भोजनाय वै ॥ प्रसादः क्रियतां ब्रह्मन्भोजनाय गृहे मम ॥ १६ ॥ अद्य मे सफलं जन्म ह्यद्य मे सफलाः
क्रियाः ॥ सर्वान्कामान्प्रदास्यंति प्रीता मेऽद्य पितामहाः ॥ १७ ॥ त्वयि भुक्ते द्विजश्रेष्ठ प्रसीद त्वं ध्रुवं मम ॥ एवमुक्तो महादेवो द्विजरूपधर
स्तदा ॥ १८ ॥ प्रहस्य प्रत्युवाचेदं ब्राह्मणं श्लक्ष्णया गिरा ॥ मया वर्षसहस्रं तु निराहारं तपः कृतम् ॥ १९ ॥ इदानीं तु गृहे तस्य करिष्ये द्विज
सत्तम ॥ दशभिर्वाजिमेधैश्च येनेष्टं पारणं तथा ॥ २० ॥ इत्युक्तो देवदेवेन ब्राह्मणो विस्मयान्वितः ॥ उत्तमांगं विधुन्वन्वै जगाम स्वगृहं प्रति ॥
॥ २१ ॥ एवं ते बहवो विप्राः प्रत्याख्याते निमंत्रणे ॥ पुराणार्थमजानंतो नास्तिका बहवो गताः ॥ २२ ॥ अथ कश्चिद्द्विजो विद्वान्पुराणार्थस्य
तत्त्ववित् ॥ देवं निमंत्रयामास द्विजरूपधरं शिवम् ॥ २३ ॥ तथैव सोऽपि देवेन प्रोक्तः स प्राह तं पुनः ॥ मनसा चिंतयित्वा तु पुराणोक्तं द्विजो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्तमः ॥ २४ ॥ स्मृतिवेदपुराणेषु यदुक्तं तत्तथा भवेत् ॥ इति निश्चित्य तं विप्रमुवाच प्रहसन्निव ॥ २५ ॥ भोभो विप्र प्रतीक्षस्व यावदागमनं पुनः ॥ इत्युक्त्वा तु द्विजो गत्वा दशाश्वमेधिकं परम् ॥ २६ ॥ स्नानं महालंभनादि कृतं तेन द्विजन्मना ॥ जपं श्राद्धं तथादानं कृत्वाधर्मानुसारतः ॥ २७ ॥ संकल्प्य कपिलां तत्र पुराणोक्तविधानतः ॥ समाप्यात्वरितं तत्र यज्ञाऽसौ तिष्ठते द्विजः ॥ २८ ॥ अथाऽऽगत्य द्विजं प्राह वाजिमेधः कृतो मया ॥ उत्तिष्ठ मे गृहं रम्यं भोजनार्थं हि गम्यताम् ॥ २९ ॥ इत्युक्तः शंकरस्तेन ब्राह्मणेनाऽतिविस्मितः ॥ उवाच ब्राह्मणं देव इदानीं त्वमितो गतः ॥ ३० ॥ द्विजवर्य कथं चेष्टा दश यज्ञा महाधनाः ॥ ३१ ॥ ॥ द्विज उवाच ॥ ॥ न विचारस्त्वया कार्यः कृता यज्ञा न संशयः ॥ यदि वेदाः प्रमाणं ते भुवि देवा द्विजास्तथा ॥ ३२ ॥ दशाश्वमेधिकं तीर्थं तथा सत्यं द्विजोत्तम ॥ यदि वेदपुराणोक्तं वाक्यं निःसंशयं भवेत् ॥ ३३ ॥ तदा प्राप्तं मया सर्वं नाऽत्र कार्या विचारणा ॥ एवमुक्तस्तु देवेश आस्तिक्यं तस्य चेतसः ॥ ३४ ॥ विमृश्य बहुभिः किंचिदुत्तरं न प्रपद्यत ॥ जगाम तद्गृहं रम्यं पठन्ब्रह्म सनातनम् ॥ ३५ ॥ संप्राप्तं तं द्विजं भक्त्या पाद्यार्घ्येण तमर्चयत् ॥ षड्रसं भोजनं तेन दत्तं पश्चाद्यथाविधि ॥ ३६ ॥ ततो भुक्ते महादेवे सर्वदेवमये शिवे ॥ पुष्पवृष्टिः पपाताऽऽशु गगनात्तस्य मूर्द्धनि ॥ तस्यास्तिक्यं तु संलक्ष्य तुष्टः प्रोवाच शंकरः ॥ ३७ ॥ ॥ ईश्वर उवाच ॥ ॥ किं तेऽद्य क्रियतां ब्रूहि वरदोऽहं द्विजोत्तम ॥ अदेयमपि दास्यामि एकचित्तस्य ते ध्रुवम् ॥ ३८ ॥ ॥ ॥ ब्राह्मण उवाच ॥ ॥ यदि प्रीतोऽसि मे देव यदि देयो वरो मम ॥ अस्मिंस्तीर्थे महादेव स्थातव्यं सर्वदेव हि ॥ ३९ ॥ उपकाराय देवेश एष मे वर उत्तमः ॥ एवमुक्तस्तु देवेन आरुरोह द्विजोत्तमः ॥ ४० ॥ गंधर्वाप्सरःसंबाधं विमानं सार्वकामिकम् ॥ पूज्यमानो गतस्तत्र यत्र लोका निरामयाः ॥ ४१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतदाश्चर्यमतुलं दृष्ट्वा देवी सुविस्मिता ॥ विस्मयोत्फुल्लनयना पुनः पप्रच्छ शंकरम् ॥ ४२ ॥ ॥ ॥ पार्वत्युवाच ॥ ॥ कथमेतद्भवेत्सत्यं यत्रेदमसमंजसम् ॥ स्नानं कुर्वंति बहवो लोका ह्यत्र महेश्वर ॥ ४३ ॥ तेषां तु स्वर्गगमनं यथेष स्वर्गतिं गतः ॥ कथमेतत्समाचक्ष्व विस्मयः परमो मम ॥ ४४ ॥ एतच्छ्रुत्वा तु देवेशः प्रहसन्प्रत्युवाच ताम् ॥ वेदवाक्ये पुराणार्थे स्मृत्यर्थे द्विजभाषिते ॥ ४५ ॥ विस्मयो हि न कर्त्तव्यो ह्यनुमानं हि तत्तथा ॥ असंभाव्यं हि लोकानां पुराणे यत्प्रगीयते ॥ ४६ ॥ यदि पक्षं पुरस्कृत्य लोकाः कुर्वंति पार्वति ॥ तस्मान्न सिद्धिरेतेषां भवत्येको न विस्मयः ॥ ४७ ॥ नास्तिका भिन्नमर्यादा ये निश्चयविहिष्कृताः ॥ तेषां सिद्धिर्न विद्यंत आस्तिक्याद्भवते ध्रुवम् ॥ ४८ ॥ श्रुत्वाख्यानमिदं देवी ववंदे तीर्थमुत्तमम् ॥ सर्वपापहरं पुण्यं नर्मदायां व्यवस्थितम् ॥ ४९ ॥ ॥ मार्कंडेय उवाच ॥ ॥ दशाश्वमेधं राजेंद्र सर्वतीर्थोत्तमोत्तमम् ॥ तीर्थं सर्वगुणोपेतं महापातकनाशनम् ॥ ५० ॥ तत्रागता महाभागा स्नातुकामा सरस्वती ॥ पुण्यानां परमा पुण्या नदीनामुत्तमा नदी ॥ ५१ ॥ नाममात्रेण यस्यास्तु सर्वपापैः प्रमुच्यते ॥ स्नातास्तत्र दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ ५२ ॥ दशाश्वमेधे सा राजन्नियता ब्रह्मचारिणी ॥ आराधयित्वा देवेशं परं निर्वाणमाप्नुयात् ॥ ५३ ॥ कालुष्यं ब्रह्मसंभूता संवत्सरसमुद्भवम् ॥ प्रक्षालयितुमायाति दशभ्यामाश्विनस्य च ॥ ५४ ॥ उपोष्य रजनीं तां तु संपूज्य त्रिपुरांतकम् ॥ राजन्निष्कल्मषा यांति शोभूते शाश्वतं पदम् ॥ ५५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सरस्वती महापुण्या नदीनामुत्तमा नदी ॥ दशाश्वमेधमायाति स्नातुं संवत्सरे सदा ॥ किमधिकृत्य भवेत्तीर्थं दशम्यां तत्र शंस मे ॥ ५६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ राजन्नाश्वयुजे मासि दशम्यां तद्विशिष्यते ॥ पार्थिवेषु च तीर्थेषु तु सर्वेष्वेव न संशयः ॥ ५७ ॥ दशाश्वमेधिके राजन्नित्यं हि दशमी शुभा ॥ विशेषादाश्विने शुक्ला महापातकनाशिनी ॥ ५८ ॥ तस्यां स्नात्वार्च्ययेद्देवानुपवासपरायणः ॥ श्राद्धं कृत्वा विधानेन पश्चात्संपूजयेच्छिवम् ॥ ५९ ॥ तत्रस्थां पूजयेद्देवीं स्नातुकामां सरस्वतीम् ॥ नमो नमस्ते देवेशि ब्रह्मदेहसमुद्भवे ॥ ६० ॥ कुरु पापक्षयं देवि संसारान्मां समुद्धर ॥ गन्धधूपैश्च संपूज्य ह्यर्चयित्वा पुनःपुनः ॥ ६१ ॥ दश प्रदक्षिणा दत्त्वा सूत्रेण परिवेष्टयेत् ॥ कपिलां तु ततो विप्रे दद्याद्विगतमत्सरः ॥ ६२ ॥ सर्वलक्षणसंपन्नां सर्वोपस्करसंयुताम् ॥ दत्त्वा विप्राय कपिलां न शोचति कृतार्थे ॥ ६३ ॥पश्चाज्जागरणं कुर्याद्घृते नोज्ज्वाल्य दीपकम् ॥ पुराणपठनेनैव नृत्यगीतविवादनैः ॥६४॥ वेदोक्तैश्चैव जाप्यैश्च पूजयेच्छशिशेखरम् ॥ प्रभाते विमले पश्चात्स्नात्वा वै नर्मदाजले ॥६५॥ ब्राह्मणान्भोजयेद्भक्त्या शिवभक्तांश्च योगिनः ॥ एवं कृते ततो राजन्सम्यक्तीर्थफलं लभेत् ॥ ॥ ६६ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेच्छंकरं नरः ॥ दशाश्वमेधावभृथं लभते पुण्यमुत्तमम् ॥६७॥ पूतात्मा तेन पुण्येन रुद्रलोकं स गच्छति ॥ आरूढः परमं यानं कामगं च सुशोभनम् ॥ ६८ ॥ तत्र दिव्याऽप्सरोभिस्तु वीज्यमानोऽथ चामरैः ॥ क्रीडते सुचिरं कालं जयशब्दादिमंगलैः ॥ ॥ ६९ ॥ ततोऽवतीर्णः कालेन इह राजा भवेद्ध्रुवम् ॥ हस्त्यश्वरथसंपन्नो महाभोगी परंतपः ॥ ७० ॥ दशाश्वमेधे यद्दानं दीयते शिवयोगिनाम् ॥ दशाश्वमेधसदृशं भवेत्तन्नाऽत्र संशयः ॥ ७१ ॥ सर्वेषामेव यज्ञानामश्वमेधो विशिष्यते ॥ दुर्लभः स्वल्पवित्तानां भूरिशः पापकर्मणाम् ॥ ७२ ॥ तत्र तीर्थे तु राजेंद्र दुर्लभोऽपि सुरासुरैः ॥ प्राप्यते स्नानदानेन इत्येवं शंकरोऽब्रवीत् ॥ ७३ ॥ अकामो वा सकामो वा मृतस्तत्र नरेश्वर ॥ देवत्वं प्राप्नुयात्सोऽपि नाऽत्र कार्या विचारणा ॥ ७४ ॥ अग्निप्रवेशं यः कुर्यात्तत्र तीर्थे नरोत्तम ॥ अग्निलोके वसेत्तावद्यावदाभूतसंप्लवम् ॥ ७५ ॥ जलप्रवेशं यः कुर्यात्तत्र तीर्थे नराधिप ॥ ध्यायमानो महादेवं वारुणं लोकमाप्नुयात् ॥ ७६ ॥ दशाश्वमेधे यः कश्चिच्छ्रद्धया तनुं त्यजेत् ॥ अन्यथा तु गतिस्तस्य इत्येवं श्रुतिनोदना ॥ ७७ ॥ न तां गतिं यांति भृगुप्रपातिनो न दंडिनो नैव च सांख्ययोगिनः ॥ ध्वजाकुले दुंदुभिशंखनादिते क्षणेन यां यांति महाहवे मृताः ॥ ७८ ॥ यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ॥ अक्षयाल्लँभते लोकान्यदि क्लीवं न भाषते ॥ ७९ ॥ दशाश्वमेधे संन्यासं यः करोति विधानतः ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ८० ॥ दशाश्वमेधे यत्पुण्यं संक्षेपेण युधिष्ठिर ॥ कथितं परया भक्त्या सर्वपापप्रणाशनम् ॥ ८१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे दशाश्वमेधतीर्थमाहात्म्यवर्णनंनामाशीत्युत्तरशततमोऽध्यायः ॥ १८० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं प्रवक्ष्यामि भृगुतीर्थस्य विस्तरम् ॥ यं श्रुत्वा ब्रह्महा गोघ्नो मुच्यते सर्वपातकैः ॥ १ ॥ तत्र तीर्थे तु विख्यातं वृषखातमिति श्रुतम् ॥ भृगुणा तत्र राजेंद्र तपस्तप्तं पुरा किल ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भृगुकच्छे स विप्रेंद्रो निवसन्केन हेतुना ॥ तपस्तप्त्वा सुविपुलं परां सिद्धिमुपागतः ॥ ३ ॥ को वा वृष इति प्रोक्तस्तत्खातं येन खानितम् ॥ एतत्सर्वं यथान्यायं कथयस्व ममाऽनघ ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एष प्रश्नो महाराज यस्त्वया परिपृच्छितः ॥ तत्सर्वं कथयिष्यामि शृणुष्वैकमना नृप ॥ ५ ॥ पद्मस्तु ब्रह्मणः पुत्रो मानसो भृगुसत्तमः ॥ तपश्च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चार विपुलं श्रीवृते क्षेत्र उत्तमे ॥ ६ ॥ दिव्यं वर्षसहस्रं तु संशुष्को मुनिसत्तमः ॥ निराहारो निरानन्दः काष्ठपाषाणवत्स्थितः ॥ ७ ॥
ततः कदाचिद्देवेशो विमानवरमास्थितः ॥ उमया सहितः श्रीमांस्तेन मार्गेण चागतः ॥ ८ ॥ दृष्ट्वा तत्र महाभागं भृगुं वल्मीकवत्स्थितम् ॥ उवाच देवी देवेशं किमिदं दृश्यते प्रभो ॥ ९ ॥ ॥ ईश्वर उवाच ॥ ॥ भृगुर्नाम महादेवि तपस्तप्त्वा सुदारुणम् ॥ दिव्यं वर्षसहस्रं तु मम ध्यानपरायणः ॥ १० ॥ जलबिंदु कुशाग्रेण मासेमासे पिबेच्च सः ॥ संवत्सरशतं साग्रं तिष्ठते च वरानने ॥ ११ ॥ तच्छ्रुत्वा वचनं गौरी क्रोधसंवर्त्ततेक्षणा ॥ उवाच देवी देवेशं शूलपाणिं महेश्वरम् ॥ १२ ॥ सत्यमुग्रोऽसि लोके त्वं ख्यापितो वृषभध्वज ॥ निष्कारुण्यो दुराराध्यः सर्वभूतभयंकरः ॥ १३ ॥ दिव्यं वर्षसहस्रं तु ध्यायमानस्य शंकरम् ॥ ब्राह्मणस्य वरं कस्मान्न प्रयच्छसि शंस मे ॥ १४ ॥ एवमुक्तोऽथ देवेशः प्रहस्य गिरिनंदिनीम् ॥ उवाच नरशार्दूल मेघगम्भीरया गिरा ॥ १५ ॥ स्त्री विनश्यति गर्वेण तपः क्रोधेन नश्यति ॥ गावो दूरप्रचारेण शूद्रान्नेन द्विजोत्तमाः ॥ १६ ॥ क्रोधान्वितो द्विजो गौरि तेन सिद्धिर्न विद्यते ॥ वर्षाशुतेस्तथा लक्षैर्न किंचित्कारणं प्रिये ॥ १७ ॥ एवंभूतस्य तस्याऽपि क्रोधस्य चरितं महत् ॥ एवमुक्त्वा ततः शम्भुर्वृषं दध्यौ च तत्क्षण ॥ ॥ १८ ॥ वृषो हि भगवन्ब्राह्मा वृषरूपी महेश्वरः ॥ ध्यानप्राप्तः क्षणादेव गर्जयन्वै मुहुर्मुहुः ॥ १९ ॥ किं करोमि सुरश्रेष्ठ ध्यातः केनैव हेतुना ॥ करोमि कस्य निधनमकाले परमेश्वर ॥ २० ॥ ॥ ईश्वर उवाच ॥ ॥ कोपयस्व द्विजश्रेष्ठं गत्वा त्वं भृगुसत्तमम् ॥ येन मे श्रद्दधत्येषा गौरी लोकैकसुन्दरी ॥ २१ ॥ एतच्छ्रुत्वा वृषो गत्वा धर्षणार्थं द्विजोत्तमम् ॥ नर्मदायास्तटे रम्ये समीपे चाऽऽश्रमे भृगुः ॥ २२ ॥ ततः शृंगैर्गृहीत्वा तु क्षिप्तो नर्मदाजले ॥ ततः क्रुद्धो भृगुस्तत्र दण्डहस्तो महामुनिः ॥ २३ ॥ पशुवत्ते वधिष्यामि दण्डघातेन मस्तके ॥ शिखायज्ञोपवीते च परिधानं वरासने ॥ २४ ॥ मुसंवृतं कृतं तेन धावन्वै पृष्ठतो ब्रवीत् ॥ २५ ॥ ॥ भृगुरुवाच ॥ ॥ पापकर्मन्दुराचार कथं यास्यसि मे वृष ॥ अवमानं समुत्पाद्य कृत्वा गर्त्तं खुरैस्तथा ॥ २६ ॥ गर्जयित्वा महानादं ततो विप्रमपातयत् ॥ आत्मानं पातितं ज्ञात्वा वृषेण परमेष्ठिना ॥ २७ ॥ भृगुः क्रोधेन जज्वाल हुताहुतिरिवानलः ॥ करे गृह्य महादण्डं ब्रह्मदण्डमिवाऽपरम् ॥ २८ ॥ हन्तुकामो वृषं विप्रोऽभ्यधावत युधिष्ठिर ॥ धावमानं ततो दृष्ट्वा स वृषः पूर्वसागरे ॥ २९ ॥ जम्बूद्वीपं कुशं क्रौंचं शाल्मलिं शाकमेव च ॥ गोमेदं पुष्करं प्राप्तः पूर्वतो दक्षिणापथम् ॥ ३० ॥ उत्तरं पश्चिमं चैव द्वीपादीपं नरेश्वर ॥ पातालं सुतलं पश्चाद्वितलं च तलातलम् ॥ ३१ ॥ तामिस्रमंधतामिस्रं पातालं सप्तमं ययौ ॥ ततो जगाम भूर्लोकं त्राणार्थी स वृषोत्तमः ॥ ३२ ॥ भुवः स्वश्चैव च महस्तपः सत्यं जनस्तथा ॥ अनुगम्यमानो विप्रेण न शर्म लभते क्वचित् ॥ ३३ ॥ पापं कृत्वैव पुरुषः कामक्रोधबलार्दितः ॥ ततो जगाम शरणं ब्रह्माणं विष्णुमेव च ॥ ३४ ॥ इन्द्रं चन्द्रं तथाऽऽदित्यैर्याम्यवारुणमारुतैः ॥ यदा सर्वैः परित्यक्तो लोकालोकैः सुरेश्वरैः ॥ ३५ ॥ तदा देवं नमस्कृत्वा रक्ष रक्षस्व चाऽब्रवीत् ॥ वध्यमानं महादेवो भृगुणा परमेष्ठिना ॥ ३६ ॥ सर्वलोकैः परित्यक्तमनाथमिव तं प्रभो ॥ दृष्ट्वा श्रांतं वृषं देवः पतितं चरणाऽग्रतः ॥ ३७ ॥ ततः प्रोवाच भगवान्स्मितपूर्वमिदं वचः ॥ ३८ ॥ ॥ ईश्वर उवाच ॥ ॥ पश्य देवि महाभागे शमं विप्रस्य सुन्दरि ॥ ३९ ॥ ॥ पार्वत्युवाच ॥ ॥ यावद्विप्रो न चास्माकं कुप्यते परमेश्वर ॥ तावद्वरं प्रयच्छाऽऽशु यदि चेच्छसि मत्प्रियम् ॥ ४० ॥ ततो भस्मी जटी शूली चंद्रार्धकृतशेखरः ॥ उमार्द्धदेहो भगवान्भूत्वा विप्रमुवाच ह ॥ ४१ ॥
भोभो द्विजंवरश्रेष्ठ क्रोधस्ते न शमं गतः ॥ यस्मात्तस्मादिदं तात क्रोधस्थानं भविष्यति ॥ ४२ ॥ ततो दृष्ट्वा च तं शंभुं भृगुः श्रेष्ठं त्रिलोचनम् ॥ जानुभ्यामवनिं गत्वा इदं स्तोत्रमुदैरयत् ॥ ४३ ॥ ॥ भृगुरुवाच ॥ ॥ प्रणिपत्य भूतनाथं भवोद्भवं भूतिदं भयातीतम् ॥ भवभीतो भुवनपते विज्ञप्तुं किंचिदिच्छामि ॥ ४४ ॥ त्वद्गुणनिकरान्वक्तुं का शक्तिर्मानुषस्यास्य ॥ वासुकिरपि न तावद्वक्तुं वदनसहस्रं भवेद्यस्य ॥ ४५ ॥ भक्त्या तथाऽपि शंकर शशिधर करजालधवलिताशेष ॥ स्तुतिमुखरस्य महेश्वर प्रसीद तव चरणनिरतस्य ॥ ४६ ॥ सत्त्वं रजस्तमस्त्वं स्थित्युत्पत्तिविनाशनं देव ॥ भवभीतो भुवनपते भुवनेश शरणनिरतस्य ॥ ४७ ॥ यमनियमयज्ञदानं वेदाभ्यासश्च धारणायोगः ॥ त्वद्भक्तेः सर्वमिदं नार्हति वे कलासहस्रांशम् ॥ ४८ ॥ उत्कृष्टरसरसायनखड्गांजनविवरपादुकासिद्धिः ॥ चिह्नं हि तव नतानां दृश्यत इह जन्मनि प्रकटम् ॥ ४९ ॥ शाम्भवे न यदि प्रणमति वितरसि तस्याऽपि भूतिमिच्छया देव ॥ भवति भवच्छेदकरी भक्तिर्मोक्षाय निर्मिता नाथ ॥ ५० ॥ परदारपरस्वरतं परपरिभवदुःखशोकसंतप्तम् ॥ परवदनवीक्षणपरं परमेश्वर मां परित्राहि ॥ ५१ ॥ अधिकाभिमानमुदितं क्षणभंगुरविभवविलसंतम् ॥ क्रूरं कुपथाभिमुखं शंकर शरणागतं परित्राहि ॥ ५२ ॥ दीनं द्विजं वरार्थे बंधुजने नैव पूरिता ह्याशा ॥ छिंधि महेश्वर तृष्णां किं मूढं मां विडंबयसि ॥ ॥ ५३ ॥ तृष्णां हरस्व शीघ्रं लक्ष्मीं ददत्र हृदयवासिनीं नित्यम् ॥ छिंधि मदमोहपाशं मामुत्तारय भवाच्च देवेश ॥ ५४ ॥ करुणाभ्युदयंनाम स्तोत्रमिदं सर्वसिद्धिदं दिव्यम् ॥ यः पठति भृगुं स्मरति च शिवलोकमसौ प्रयाति देहांते ॥ ५५ ॥ एतच्छ्रुत्वा महादेवः स्तोत्रं च भृगुभाषितम् ॥ उवाच वरदोऽस्मीति देव्या सह वरोत्तमम् ॥ ५६ ॥ ॥ भृगुरुवाच ॥ ॥ प्रसन्नो देवदेवेश यदि देयो वरो मम ॥ सिद्धिक्षेत्रमिदं सर्वं भवितां मम नामतः ॥ ५७ ॥ भवद्भिः सन्निधानेन स्थातव्यं हि सदोमया ॥ देवक्षेत्रमिदं पुण्यं येन सर्वं भविष्यति ॥ ५८ ॥ अत्र स्थाने महास्थानं करोमि जगदीश्वर ॥ तव प्रसादादेवेश पूर्यतां मे मनोरथाः ॥ ५९ ॥ ॥ ईश्वर उवाच ॥ ॥ श्रिया कृतमिदं पूर्वं किं न ज्ञातं त्वया द्विज ॥ अनुमान्य श्रियं देवीं ततीयं मन्यते भवान् ॥ ६० ॥ कुरुष्व यदभिप्रेतं त्वत्कृतं नः तदन्यथा ॥ एवमुक्त्वा गते देवे स्नात्वा गत्वा भृगुः श्रियम् ॥ ६१ ॥ कृत्वा च पारणं तत्र वसन्विप्रस्तथा सह ॥ श्रिया च सहितः काल इदं वचनमब्रवीत् ॥ ६२ ॥ ॥ भृगुरुवाच ॥ ॥ यदि ते रोचते भद्रे दुःखासीनं च ते यदि ॥ त्वया धृते महाक्षेत्रे स्वीयं स्थानं करोम्यहम् ॥ ६३ ॥ ॥ श्रीरुवाच ॥ ॥ मम नाम्ना तु विप्रर्षे तव नाम्ना तु शोभनम् ॥ स्थानं कुरुष्वाभिप्रेतमविरोधेन मे मतिः ॥ ६४ ॥ ॥ भृगुरुवाच ॥ ॥ कच्छपाधिष्ठितं ह्येतत्तस्य पृष्ठिगतं रमे ॥ संमंत्र्य सहितं तेन शोभनं भवती कुरु ॥ ६५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे भृगुकच्छोत्पत्तिवर्णननामैकाशीत्युत्तरशततमोऽध्यायः ॥ १८१ ॥ ॥ ॐ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो भृगुः श्रिया चैव समेतः कच्छपं गतः ॥ अभिनंद्य यथान्यायमुवाच वचनं शुभम् ॥ १ ॥ त्वया धृता धरा सर्वा तथा लोकाश्चराऽचराः ॥ तथैव पुण्यभावत्वात्स्थितस्तत्र महामते ॥ २ ॥ चातुर्विद्यस्य संस्थानं करोमि रमया सह ॥ यदि त्वं मन्यसे देव तदादेशय मां विभो ॥ ३ ॥ ॥ कूर्म उवाच ॥ ॥ एवमेव द्विजश्रेष्ठ मम नामांकितं पुरम् ॥ भविष्यति महत्कालं ममोपरि सुसंस्थितम् ॥ ४ ॥ अचलं सुस्थिरं तात न भीः कार्या सुलोचने ॥ एतच्छ्रुत्वा शुभं वाक्यं कच्छपस्य मुखाच्युतम् ॥ ५ ॥ हृष्टस्तुष्टः श्रिया सार्द्धं पद्मयोनिसुतो भृगुः ॥ अमीचि उदये प्राप्ते कृतकौतुकमंगलः ॥ ६ ॥ नंदने वत्सरे माघे पंचम्यां भरतर्षभ ॥ शस्ते तु सुप्त

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रायोगे कुंभस्थे शशिमंडले ॥ ७ ॥ रेवाया उत्तरे तीरे गभीरे चाभिवारुणि ॥ शुक्लपक्षवणे देशे कोटितीर्थसमन्वितम् ॥ ८ ॥ क्रोशप्रमाणं तत्क्षेत्रं प्रासादशतसंकुलम् ॥ अचिरेणैव कालेन तपोबलसमन्वितः ॥ विचिंत्य विश्वकर्माणं चकार भृगुसत्तमः ॥ ९ ॥ ब्राह्मणा वेदविद्वांसः क्षत्रिया राज्य पालकाः ॥ वैश्या वृत्तिरतास्तत्र शूद्राः शुश्रूषकाश्चिरम् ॥ १०॥ एवं श्रिया वृतं क्षेत्रं परमानंदनंदितम् ॥ निर्म्मितं भृगुणा तात सर्वपातकनाशनम् ॥ ॥ ११ ॥ इति भृगुकच्छोत्पत्तिः ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततःकालेन महता कस्मिंश्चित्कारणांतरे ॥ देवलोकं जगामाशु लक्ष्मीर्ऋषिसमागमे ॥ १२ ॥ समर्प्य कुंचिकाद्वारं भृगवे ब्रह्मवादिने ॥ पालयस्व यथार्थं वै स्थानकं मम सुव्रत ॥१३॥ देवकार्याण्यशेषाणि कृत्वा श्रीः पुनरागता ॥ आजगाम रमा देवी भृगुकच्छं त्वरान्विता ॥ १४ ॥ प्रार्थितं कुंचिकाद्वारं स्वगृहं सपरिग्रहम् ॥ भृगुर्यदा तदा पार्थ मिथ्या नास्ति तदावदत् ॥ १५ ॥ एवं विवादः सुमहान्संजातश्च नरेश्वर ॥ अलेति मम चैवेति परस्परसमागमे ॥ १६ ॥ ततः कालेन महता भृगुणा परमर्षिणा ॥ चातुर्विद्यप्रमाणार्थं चकार महतीं स्थितिम्॥ १७ ॥ अस्मदीयं यथा सर्वं नगरं भृगुलोचने ॥ चातुर्विद्या द्विजाः सर्वे तथा जानंति सुन्दरि॥१८॥ ॥ ॥ श्रीरुवाच ॥ ॥ प्रमाणं मम विप्रेंद्र चातुर्वेद्या न संशयः ॥ मदीयं वा त्वदीयं वा कथयंतु द्विजोत्तमाः ॥ १९ ॥ ततः समस्तैर्विबुधैः संप्रधार्य परस्परम् ॥ द्विधा तैर्वाक्स्थलं दृष्ट्वा ब्राह्मणा नृपसंहितम् ॥ २० ॥ अष्टादशसहस्राणि नोचुर्वै किंचिदुत्तरम् ॥ अष्टादशसदस्थेषु भृगुकोपभयान्नृप ॥ उक्तं च तालकं हस्ते यस्य तस्येदमुत्तरम् ॥ २१ ॥ एतच्छ्रुत्वा तु सा देवी निगमं नैगमैः कृतम् ॥ क्रोधेन महताविष्टा शशाप द्विजपुंगवान् ॥ २२ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यस्मात्सत्यं समुत्सृज्य लोभोपहतमानसैः ॥ मदीयं लोपितं स्थानं तस्माच्छृण्वंतु मे गिरम् ॥ ॥ २३ ॥ त्रिपौरुषा भवेद्विद्या त्रिपुरुषं न भवेद्धनम् ॥ न द्वितीयस्तु वो वेदः पठितो भवति द्विजाः ॥ २४ ॥ गृहाणि न द्विभौमानि न च भूतिः स्थिरा द्विजाः ॥ पक्षपातेन वो धर्मो न च निःश्रेयभावतः॥२५॥ इष्टो गोत्रजनः कश्चिल्लोभेनावृतमानसः ॥ न च द्वेषं परित्यज्य ह्येकं सत्यं भविष्यति ॥ २६ ॥ अद्यप्रभृति सर्वेषामहंकारो द्विजन्मनाम् ॥ न पिता पुत्रवाक्येन न पुत्रः पितृकर्मणि ॥ २७ ॥ अहंकारकृताः सर्वे भविष्यंति न संशयः ॥ इति शप्त्वा रमादेवी तदैव च दिवं ययौ ॥ २८ ॥ ततो गतायां वै लक्ष्म्यां देवा ब्रह्मर्षयोऽमलाः ॥ क्रोधलोभमिदं स्थानं तेऽपि चोक्त्वा दिवं ययुः ॥ २९ ॥ गतां दृष्ट्वा ततो देवीमृषींश्चैव तपोधनान् ॥ भृगुश्च परमेष्ठी स विषादमगमत्परम् ॥ प्रसादयामास पुनः शंकरं त्रिपुरांतकम् ॥ ३० ॥ तपसा महता पार्थ ततस्तुष्टो महेश्वरः ॥ उवाच वचनं काले हर्षयन्भृगुसत्तमम् ॥ ३१ ॥ किं विषण्णोऽसि विप्रेंद्र किं वा संताप कारणम् ॥ मयि प्रसन्नेऽपि तव ह्येतत्कथय मेऽनघ ॥ ३२ ॥ ॥ भृगुरुवाच ॥ ॥ शापयित्वा द्विजान्सर्वान्पुरा लक्ष्मीर्विनिर्गता ॥ अपवित्रमिदं चोक्त्वा ततो देवा विनिर्गताः॥ ३३ ॥ ॥ ईश्वर उवाच ॥ ॥ पुरा मया यथा प्रोक्तं तत्तथा न तदन्यथा ॥ क्रोधस्थानमसंदेहं तथाऽन्यदपि तच्छृणु ॥ ३४ ॥ तत्र स्थानसमुद्भूता महद्भयविवर्जिताः ॥ ब्राह्मणा मत्प्रसादेन भविष्यंति न संशयः ॥ ३५ ॥ वेदविद्यात्रतस्नाताः सर्वशास्त्र विशारदाः ॥ येपि ते शतसाहस्रास्त्वरिता ह्यागतास्त्विह ॥ ३६ ॥ अपठस्यापि मूर्खस्य सर्वावस्थांगतस्य च ॥ उत्तरादुत्तरं शक्तो दातुं नैव तु भृगूत्तम ॥ ३७ ॥ कोटितीर्थमिदं स्थानं सर्वपापप्रणाशनम् ॥ अद्यप्रभृति विप्रेंद्र भविष्यति न संशयः ॥ ३८ ॥ मत्प्रसादाद्देवगणैः सेवित च भविष्यति ॥ भृगुक्षेत्रे मृता ये तु कृमिकीटपतंगकाः ॥ ३९ ॥ वासस्तेषां शिवे लोके मत्प्रसादाद्भविष्यति ॥ वृषखाते नरः स्नात्वा पूजयित्वा महेश्वरम् ॥ ४० ॥ सर्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ भृगुतीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ ४१ ॥ तस्य ते द्वादशाब्दानि शांतिं गच्छन्ति तर्पिताः ॥ दधिक्षीरेण तोयेन घृतेन मधुना सह ॥ ४२ ॥ ये स्नपंति विरूपाक्षं तेषां वासस्त्रिविष्टपे ॥ मत्प्रसादाद्विजश्रेष्ठ सर्वदेवानुसेवितम् ॥ ४३ ॥ भविष्यति भृगुक्षेत्रं कुरुक्षेत्रादिभिः समम् ॥ मार्त्तंडग्रहणे प्राप्ते यत्फलं कृत्वा हिरण्मयम् ॥ ४४ ॥ दत्त्वा शिरसि यः स्नाति भृगुक्षेत्रे द्विजोत्तम ॥ अविचारेण तं विद्धि संस्नातं कुरुजांगले ॥४५॥ अहं चैव वसिष्यामि अंबिका च मम प्रिया ॥ सर्वदुःखापहा देवी नाम्ना सौभाग्यसुन्दरी ॥ ॥ ४६ ॥ वसिष्यामि तया देव्या सहितो भृगुकच्छके ॥ एवमुक्त्वा स्थितो देवो भृगुकच्छेंबिका तथा ॥ ४७ ॥ भृगुस्तु स्वपुरं प्रायाद्ब्रह्मघोषनिनादितम् ॥ ऋग्यजुःसामघोषेण ह्यथर्वणनिनादितम् ॥ ४८ ॥ तत्र तीर्थे तु यः स्नात्वा वृषमुत्सृजते नरः ॥ स याति शिवसायुज्यमित्येवं शंकरोऽब्रवीत् ॥ ४९ ॥ तत्र तीर्थे तु यः स्नात्वा चैत्रे मासि समाचरेत् ॥ दद्याच्च लवणं विप्रे पूज्य सौभाग्यसुन्दरीम् ॥५०॥ गोभूहिरण्यं विप्रेभ्यः प्रीयेतां ललिताशिवौ ॥ न दुःखं दुर्भगत्वं च वियोगं पतिना सह ॥ ५१ ॥ प्राप्नोति नारी राजेंद्र भृगुतीर्थानुभावेन च ॥ यस्तु नित्यं भृगुं देवं पश्येद्वै पांडुनंदन ॥ ५२ ॥ आब्रह्मसदनं यावत्तत्रस्थैर्देवतैः सह ॥ यत्फलं समवाप्नोति तच्छृणुष्व नृपोत्तम ॥ ५३ ॥ सुवर्णशृंगीं कपिलां पयस्विनीं साध्वीं सुशीलां तरुणीं सवत्साम् ॥ दत्त्वा द्विजे सर्वव्रतोपपन्ने फलं च यत्स्यात्तदिहैव नूनम् ॥ ५४ ॥ समाः सहस्राणि तु सप्त वै जले त्रियेल्लभेद्दशवह्निमध्ये ॥ त्यजंस्तनुं शूरवृत्त्या नरेंद्र शक्राऽतिथ्यं याति वै मर्त्यधर्मा ॥ ५५ ॥ आख्यानमेतच्च सदा यशस्यं स्वर्ग्यं धन्यं पुण्यमायुष्यकारि ॥ शृण्वल्लभेत्सर्वमेतद्धि भक्त्या पर्वणिपर्वण्याजमीढस्सदैव ॥ ५६ ॥ संन्यासं कुरुते यस्तु भृगुतीर्थे विधानतः ॥ स मृतः परमं स्थानं गच्छेद्वै यत्र दुर्लभम् ॥ ५७ ॥ एतच्छ्रुत्वा भृगुश्रेष्ठो देवदेवेन भाषितम् ॥ प्रहृष्टवदनो भूत्वा तत्रैव संस्थितो द्विजः ॥ ५८ ॥ तिरोभावं गते देवे भृगुःश्रेष्ठो द्विजोत्तमः ॥ स्वमूर्तिं तत्र मुक्त्वा तु ब्रह्मलोकं जगाम ह ॥ ५९ ॥ भृगुकच्छस्य चोत्पत्तिः कथिता तव पांडव ॥ संक्षेपेण महाराज सर्वपापप्रणाशनी ॥ ६० ॥ एतत्पुण्यं पापहरं क्षेत्रं देवेन कीर्त्तितम् ॥ चतुर्युगसहस्रेण पितामहदिनं स्मृतम् ॥ ६१ ॥ प्राप्ते ब्रह्मदिने विप्रा जायते युगसंभवः ॥ न पश्यामि त्विदं क्षेत्रमिति रुद्रः स्वयं जगौ ॥ ६२ ॥ यः शृणोति त्विदं भक्त्या नारी वा पुरुषोऽपि वा ॥ स याति परमं लोकमिति रुद्रः स्वयं जगौ ॥ ६३ ॥ देवखाते नरः स्नात्वा पिंडदानादिसत्क्रियाम् ॥ यां करोति नृपश्रेष्ठ तामक्षयफलां विदुः ॥ ६४ ॥ य इमं शृणुयाद्भक्त्या भृगुकच्छस्य विस्तरम् ॥ कोटितीर्थफलं तस्य भवेद्वै नाऽत्र संशयः ॥ ६५ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे भृगुकच्छतीर्थमाहात्म्यवर्णनंनाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ ॥ १८२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अतः परं महाराज गच्छेत्केदारसंज्ञकम् ॥ यत्र गत्वा महाराज श्राद्धं कृत्वा पिबेज्जलम् ॥ संपूज्य देवदेवेशं केदारोत्थं फलं लभेत् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यथात्र सुरश्रेष्ठ केदाराख्यः स्थितः स्वयम् ॥ उत्तरे नर्मदाकूले एतद्भिक्षुरतो वद ॥ २ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुरा कृतयुगस्याऽऽदौ शंकरस्तु महेश्वरः ॥ भृगुणाराधितः शक्तः श्रिया च भृगुकच्छके ॥३॥ अपवित्रमिदं क्षेत्रं सर्ववेदविवर्जितम् ॥ भविष्यति नृपश्रेष्ठ गतेत्युक्त्वा हरिप्रिया ॥ ४ ॥ तपश्चचार विपुलं भृगुर्वर्षसहस्रकम् ॥ वायुभक्षो निराहारश्चिरं धमनिसंततः ॥ ५ ॥ ततः प्रत्यक्षतामागाद्गिरीभूतो महेश्वरः ॥ प्रादुर्भूतस्तु सहसा भित्त्वा पातालं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

लसप्तकम् ॥ ६ ॥ ददर्शाऽथ भृगुर्देवमौत्पलीं केलिकामिव ॥ स्तुतिं चक्रे स देवाय स्थाणवे त्र्यंबकेति च ॥७॥ एवं स्तुतः स भगवान्प्रोवाच प्रह
सन्निव ॥ पुनःपुनर्भृगुं प्रीतः किन्नु प्रार्थयसे मुने ॥ ८ ॥ ॥ भृगुरुवाच ॥ ॥ पंचक्रोशमिदं क्षेत्रं पद्मया शापितं विभो ॥ अपवित्रमिदं क्षेत्रं
सर्ववेदविवर्जितम् ॥ भविष्यतीति च प्रोच्य गता देवी दिवं प्रति ॥ ९ ॥ पुनः पवित्रतां याति यथेदं क्षेत्रमुत्तमम् ॥तथा कुरु महेशान प्रसन्नो यदि
शंकर ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ केदाराख्यमिदं ब्रह्मँल्लिंगमाद्यं भविष्यति ॥ कृत्वेदमादिलिंगानि भविष्यंति दशैव हि ॥ ११ ॥ एका
दशमदृश्यं हि क्षेत्रमध्ये भविष्यति ॥ पावयिष्यति तत्क्षेत्रमेकादशः स्वयं विभुः ॥ १२ ॥ तथा वै द्वादशादित्या मत्प्रसादात्तु मूर्त्तितः ॥ वसि
ष्यंति भृगुक्षेत्रे रोगदुःखनिबर्हणाः ॥ १३ ॥ दुर्गाः ह्यष्टादश तथा क्षेत्रपालास्तु षोडश ॥ भृगुक्षेत्रे भविष्यंति वीरभद्राश्च मातरः ॥ १४ ॥ पवित्री
कृतमेतद्धि नित्यं क्षेत्रं भविष्यति ॥ माघमासे ह्युपःकाले स्नात्वा मासं जितेंद्रियः ॥ १५ ॥ यः पूजयति केदारं स गच्छेच्छिवमंदिरम् ॥ तस्मिं
स्तीर्थे नरः स्नात्वा पितॄनुद्दिश्य भारत ॥ श्राद्धं ददाति विधिवत्तस्य प्रीताः पितामहाः ॥ १६ ॥ इति ते कथितं सम्यक्केदाराख्यं सविस्तरम् ॥ सर्व
पापहरं पुण्यं सर्वदुःखप्रणाशनम् ॥ १७ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे केदारे
श्वरतीर्थमाहात्म्यवर्णनंनाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥ १८३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ धौतपापं ततो गच्छेद्भृगुतीर्थं
समीपतः ॥ वृषेण तु भृगुस्तत्र भूयोभूयो श्रुतस्ततः ॥ १ ॥ धौतपापं तु तत्तेन नाम्ना लोकेषु विश्रुतम् ॥ तत्र स्थितो महादेवस्तुष्टश्चर्थं भृगुसत्तमे ॥
॥ २ ॥ तत्र तीर्थे तु यः स्नात्वा शाठ्येनाऽपि नरेश्वर ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ३ ॥ यस्तु सम्यग्विधानेन तत्र स्नात्वाऽर्च
येच्छिवम् ॥ देवान्पितॄन्समभ्यर्च्य मुच्यते सर्वपातकैः ॥ ४ ॥ ब्रह्महत्या गवां वध्या तत्र तीर्थे युधिष्ठिर ॥ प्रविशेन्न सदा भीता प्रविष्टापि क्षयं
व्रजेत् ॥ ५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेऽस्मिन्कथयस्व द्विजोत्तम ॥ प्रविशेन्न ब्रह्महत्या यथा वै धौतपाप्मनि ॥ ६ ॥
ब्रह्महत्यासमं पापं भविता नेह किंचन ॥ कथं वा धौतपापे तु प्रविष्टं नश्यते द्विज ॥ एतद्विस्तरतः सर्वं पृच्छामि वद कौतुकात् ॥ ७ ॥
॥ ॥ मार्कंडेय उवाच ॥ ॥ आदिसर्गे पुरा शंभुर्ब्रह्मणः परमेष्ठिनः ॥ विकारं पंचमं दृष्ट्वा शिरोऽम्बुरुहसन्निभम् ॥ ८ ॥ अंगुष्ठांगुलियोगेन
तच्छिरस्तेन कृंतितम् ॥ कृत्तमात्रे तु शिरसि ब्रह्महत्याऽभवत्तदा ॥ ९ ॥ ब्रह्महत्यायुतश्चासीदुत्तरे नर्मदातटे ॥ धुनितं तु यतो राजन्वृषेण
धर्म्ममूर्त्तिना ॥ १० ॥ तत्र धौतेश्वरीं देवीं स्थापितां वृषभेण तु ॥ ददर्श भगवाञ्छंभुः सर्वदेवतपूजिताम् ॥ ११ ॥ दृष्ट्वा धौतेश्वरीं दुर्गां ब्रह्मह
त्याविनाशिनीम् ॥ तत्र विश्रममाणश्च शंकरस्त्रिपुरांतकः ॥ १२ ॥ स शंकरो ब्रह्महत्या विहीनं मेने त्मानं तस्य तीर्थस्य भावात् ॥ सुविस्मितो देव
देवो वरेण्यो दृष्ट्वा दूरे ब्रह्महत्यां च तीर्थात् ॥ १३ ॥ विधौतपापं महितं धर्मशक्त्या विशेन्न हत्या देवीभयात्प्रभीता ॥ रक्तांबरा रक्तमाल्योपयुक्ता
कृष्णा नारी रक्तदामप्रसक्ता ॥ १४ ॥ मां वांछंती स्कंधदेशं रहस्ये दूरे स्थिता तीर्थवर्यप्रभावात् ॥ संचिंत्य देवो मनसा स्मरारिर्वासाय बुद्धिं तत्र
तीर्थे चकार ॥ १५ ॥ विमृश्य देवो बहुशः स्थितः स्वयं विधौतपापः प्रथितः पृथिव्याम् ॥ बभूव तत्रैव निवासकारी विधूतपापनिकटप्रदेशे ॥
॥ १६ ॥ तदाप्रभृति राजेंद्र ब्रह्महत्याविनाशनम् ॥ विधौतपापं तत्तीर्थं नर्मदायां व्यवस्थितम् ॥ १७ ॥ अभ्युच्छ्रुनवधी तत्र तीर्थे विशि
ष्यते ॥ दिनत्रयं तु राजेंद्र सप्तम्यादिविशेषतः ॥ १८ ॥ समुपोष्याष्टमीं भक्त्या सांगं वेदं पठेत्तु यः ॥ अहोरात्रेण चैकेन ऋग्यजुःसामयसं
ज्ञकम् ॥ १९ ॥ अभ्यस्तब्रह्महत्याया मुच्यते नाऽत्र संशयः ॥ वृषलीगमनं चैव यस्य गुर्वंगनागमः ॥ २० ॥ स्नात्वा ब्रह्मरसोत्कु
टे कुंभेनैव प्रमुच्यते ॥ वंध्या स्त्रीजननी या तु काकवंध्या मृतप्रजा ॥ २१ ॥ सापि कुंभोदकैः स्नाता जीवत्पुत्रा प्रजावती ॥
अपठन्तु नरोपोष्य ऋग्यजुःसामसंभवाम् ॥ २२ ॥ ऋचमेकां जपन्भिक्षस्तथा पर्वणि यो नृप ॥ अनृणोपोष्य गायत्रीं जपेद्वै वेदमातरम् ॥ २३ ॥
जपन्नवम्यां विप्रेंद्रो मुच्यते पापसंचयात् ॥ एवं तु कथितं तात पुराणोक्तं महर्षिभिः ॥ २४ ॥ धौतपापं महापुण्यं शिवेन कथितं मम ॥ प्राणत्यागं
तु यः कुर्याज्जले वाऽग्नौ स्थलेऽपि वा ॥ २५ ॥ स गच्छति विमानेन ज्वलनार्कसमप्रभः ॥ हंसबर्हिमयुक्तेन सेव्यमानोऽप्सरोगणैः ॥ २६ ॥
शिवस्य परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ क्रीडते स्वेच्छया तत्र यावच्चन्द्रार्कतारकम् ॥ २७ ॥ धौतपापे तु या नारी कुरुते प्राणसंक्षयम् ॥
तत्क्षणादेव सा पार्थ पुरुषत्वमवाप्नुयात् ॥ २८ ॥ अथ किं बहुनोक्तेन शुभं वा यदि वाऽशुभम् ॥ तत्क्षयफलं सर्वं धौतपापे कृतं नृप ॥ २९ ॥
संन्यसेन्नियमेनान्नं संन्यसेद्विषयादिकम् ॥ फलमूलादिकं चैव जलमेकं न संत्यजेत् ॥ ३० ॥ एवं यः कुरुते पार्थ रुद्रलोकं स गच्छति ॥ तत्र
भुक्त्वाखिलान्भोगान्जायते भुवि भूपतिः ॥ ३१ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे धौत
पापतीर्थमाहात्म्यवर्णनंनाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल एरंडी
तीर्थमुत्तमम् ॥ स्नानमात्रेण तत्रैव ब्रह्महत्या प्रणश्यति ॥ १ ॥ मासि चाश्वयुजे तत्र शुक्लपक्षे चतुर्दशीम् ॥ उपोष्य प्रयतः स्नातस्तर्प्पयेत्पितृदे
वताः ॥ २ ॥ पुत्रर्द्धिरूपसंपन्नो जीवेच्च शरदां शतम् ॥ शिवलोकं मृतो याति नाऽत्र कार्या विचारणा ॥ ३ ॥ इति श्रीस्कंदे महापुराण एकाशीति
साहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे एरण्डीतीर्थमाहात्म्यवर्णनंनाम पंचाशीत्युत्तरशततमोऽध्यायः ॥ १८५ ॥ ॥ छ ॥ ॥
॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल तीर्थं कनखलोत्तमम् ॥ गरुडेन तपस्तप्तं पूजयित्वा महेश्वरम् ॥ १ ॥ दिव्यं वर्षशतं याव
न्मात्रेण भारत ॥ तपोजपैः कृशीभूतो दृष्टो देवेन शंभुना ॥ २ ॥ ततस्तुष्टो महादेवो वैनतेयं मनोजवम् ॥ उवाच परमं वाक्यं विनतानंदवर्ध
नम् ॥ ३ ॥ प्रसन्नस्ते महाभाग वरं वरय सुव्रत ॥ दुर्लभं त्रिषु लोकेषु ददामि तव खेचर ॥ ४ ॥ ॥ गरुड उवाच ॥ ॥ इच्छामि वाहनं
विष्णोर्द्विजेंद्रत्वं सुरेश्वर ॥ प्रसन्ने त्वयि मे सर्वं भवत्विति मतिर्मम ॥ ५ ॥ ॥ श्रीमहेश उवाच ॥ ॥ दुर्लभः प्राणिनां तात यो वरः प्रार्थितोऽ
नघ ॥ देवदेवस्य वहनं द्विजेंद्रत्वं सुदुर्लभम् ॥ ६ ॥ नारायणोदरे सर्वं त्रैलोक्यं सचराचरम् ॥ त्वया स कथमूह्येत देवदेवो जगद्गुरुः ॥ ७ ॥
तेनैव स्थापितश्चेंद्रस्त्रैलोक्ये सचराचरे ॥ कथमन्यस्य चेंद्रत्वं भवतीति सुदुर्लभम् ॥ ८ ॥ तथाऽपि मम वाक्येन वाहनं त्वं भविष्यसि ॥ शंखचक्र
गदापाणेर्वदतोऽपि जगन्नयम् ॥ ९ ॥ इन्द्रस्त्वं पक्षिणां मध्ये भविष्यसि न संशयः ॥ इति दत्त्वा वरं तस्मा अंतर्धानं गतो हरः ॥ १० ॥ ततो
गते महादेवे ह्युरुणस्याऽनुजो नृप ॥ आराधयामास तदा चामुण्डां मुण्डमण्डिताम् ॥ ११ ॥ श्मशानवासिनीं देवीं बहुभूतसमन्विताम् ॥
योगिनीं योगसंसिद्धां वसामांसासवप्रियाम् ॥ १२ ॥ ध्यातमात्रा तु तेनैव प्रत्यक्षा ह्यभवत्तदा ॥ जालंधरे च या सिद्धिः कौलीने उड्डिशे परे ॥
॥ १३ ॥ समग्रा सा भृगुक्षेत्रे सिद्धक्षेत्रे तु संस्थिता ॥ चामुण्डा तत्र सा देवी सिद्धक्षेत्रे व्यवस्थिता ॥ १४ ॥ संस्तुता ऋषिभिर्देवैर्योगक्षेमार्थसि
द्धये ॥ विनताऽनंदजननस्तत्र तां योगिनीं नृप ॥ भक्त्या प्रसादयामास स्तोत्रैर्वैदिकलौकिकैः ॥ १५ ॥ ॥ गरुड उवाच ॥ ॥ अँया सा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रुत्क्षामकण्ठा नवरुधिरमुखा श्वेतपद्मासनस्था भूतानां वृन्दवृन्दैः पितृवननिलया क्रीडते शूलहस्ता ॥ शङ्खध्वस्तप्रवीरप्रजरुधिरगलन्मुण्डमालोत्त
रीया देवी श्रीवीरमाता विमलशशिनिभा पातु वश्चर्ममुण्डा ॥ १६ ॥ या सा श्रुत्क्षामकण्ठा विकृतभयकरी भासिनी दुष्कृतानां मुखज्ज्वालाकला
पेर्दशनकसमसैः खादति श्वेतमांसम् ॥ पिंगोर्द्ध्वोर्द्धजूटारविसदृशतनुर्व्याघ्रचर्मोत्तरीया दैत्येंद्रैर्यक्षरक्षोऽप्सरसुरनमिता पातु वश्चर्ममुण्डा ॥ १७ ॥
या सा दोर्दण्डचंडैर्डमरुरणरणाटोपटंकारघंटैः कल्पांतोत्पातवाताहतपटुपटहैर्वल्गते भूतमाता ॥ श्रुत्क्षामा शुष्ककुक्षिः खरतरनखरैः क्षोदति प्रेत
मांसं मुंचंती चाट्टहासं घुरघुरितरवा पातु वश्चर्ममुण्डा ॥ १८ ॥ या सा निम्नोदरास्या विकृतभवभयत्रासिनी शूलहस्ता चामुंडा मुण्डमाला रणरणि
तरणज्झल्लरीनादरम्या ॥ त्रैलोक्यं त्रासयन्ती ककहकहकहैर्घोररावैरनेकैर्नृत्यंती मातृमध्ये पितृवननिलया पातु वश्चर्मखंडा ॥ १९ ॥ यां धत्ते
विश्वमस्खिलं निजांशेन महोज्वला ॥ कनकप्रसवे लीना पातु मां कनकेश्वरी ॥ २० ॥ हिमाद्रिसंभवा देवी दयादर्शितविग्रहा ॥ शिवप्रिया शिवे
सक्ता पातु मां कनकेश्वरी ॥ २१ ॥ अनादिजगदादिर्या रत्नगर्भा वसुप्रिया ॥ रथांगपाणिना पद्मा पातु मां कनकेश्वरी ॥ २२ ॥ सावित्री या च
गायत्री भृडानी वागथेंदिरा ॥ स्मर्तृणां या सुखं दत्ते पातु मां कनकेश्वरी ॥ २३ ॥ सौम्यासौम्यैः सदा रूपैः सृजत्यवति या जगत् ॥ परा शक्तिः
परा बुद्धिः पातु मां कनकेश्वरी ॥ २४ ॥ ब्रह्मणः सर्गसमये सृज्यशक्तिः परा तु या ॥ जगन्माया जगद्धात्री पातु मां कनकेश्वरी ॥ २५ ॥ विश्वस्य
पालने विष्णोर्या शक्तिः परिपालिका ॥ सदनोन्मादिनी मुख्या पातु मां कनकेश्वरी ॥ २६ ॥ विश्वसंलयने मुख्या या रुद्रेण समाश्रिता ॥ रौद्री
शक्तिः शिवानंता पातु मां कनकेश्वरी ॥ २७ ॥ कैलाससानुसंरूढकनकप्रसवेराया ॥ भस्मकाभिहता पूर्वं पातु मां कनकेश्वरी ॥ २८ ॥ पतिम्र
भावमिच्छंती त्रस्यन्ती या विना पतिम् ॥ अबला त्वेकभावा च पातु मां कनकेश्वरी ॥ २९ ॥ विश्वसंरक्षणे सक्ता रक्षिता कनकेन या ॥ आब्रह्म
स्तम्बजननी पातु मां कनकेश्वरी ॥ ३० ॥ ब्रह्मविष्णवीश्वराः शक्त्या शरीरग्रहणं यया ॥ प्रापिताः प्रथमा शक्तिः पातु मां कनकेश्वरी ॥ ३१ ॥
श्रुत्वा तु गरुडेनोक्तं देवीवृत्तचतुष्टयम् ॥ प्रसन्ना सम्मुखी भूत्वा वाक्यमेतदुवाच ह ॥ ३२ ॥ ॥ श्रीचामुण्डोवाच ॥ ॥
प्रसन्ना ते महासत्त्व वरं वरय वाञ्छितम् ॥ ददामि ते द्विजश्रेष्ठ यत्ते मनसि रोचते ॥ ३३ ॥ ॥ गरुड उवाच ॥ ॥ अजरश्चामरश्चैव
अधृष्यश्च सुरासुरैः ॥ तव प्रसादाच्चैवान्यैरजेयश्च भवाम्यहम् ॥ ३४ ॥ त्वया चाऽत्र सदा देवि स्थातव्यं तीर्थसन्निधौ ॥ ॥ मार्क
डेय उवाच ॥ ॥ एवं भविष्यतीत्युक्त्वा देवी देवैरभिष्टुता ॥ ३५ ॥ जगामाकाशमाविश्य भूतसंघसमन्विता ॥ यदा लक्ष्म्या नृप
श्रेष्ठ स्थापितं पुरमुत्तमम् ॥ ३६ ॥ अनुमान्य तदा देवीं कृतं तस्यां समर्पितम् ॥ ॥ लक्ष्मीरुवाच ॥ ॥ रक्षणाय मया देवि योगक्षेमार्थ
सिद्धये ॥ ३७ ॥ मातृवत्प्रतिपाल्यं ते सदा देवि पुरं मम ॥ गरुडोऽपि ततः स्नात्वा संपूज्य कनकेश्वरीम् ॥ ३८ ॥ तीर्थं तत्रैव संस्थाप्य जगामा
ऽऽकाशमुत्तमम् ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ ३९ ॥ सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥ गन्धपुष्पादिभिर्यस्तु पूजयेत्कन
केश्वरम् ॥ ४० ॥ तस्य योगैश्वर्यसिद्धियोंगपीठेषु जायते ॥ मृतो योगेश्वरं लोकं जयशब्दादिमंगलैः ॥ स गच्छेन्नाऽत्र संदेहो योगिनीगण
संयुतः ॥ ४१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कनखलेश्वरतीर्थमाहात्म्यवर्णनंनाम
षडशीत्युत्तरशततमोऽध्यायः ॥ १८६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ जालेश्वरं ततो गच्छेल्लिंगमाद्यं स्वयंभुवः ॥ कालाग्निरुद्र
विख्यातं भृगुकच्छे व्यवस्थितम् ॥ १ ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनम् ॥ क्षेत्रपापविनाशाय कृपया च समुत्थितम् ॥ २ ॥ पुरा कल्पेऽसुर
गणैराक्रान्ते भुवनत्रये ॥ वेदोक्तकर्मनाशे च धर्मे च विलयं गते ॥ ३ ॥ देवर्षिमुनिसिद्धेषु विश्वासपरमेषु च ॥ कालाग्निरुद्रादुत्पन्नो धूमः काले
न्नोद्भवः ॥ ४ ॥ धूमात्समुत्थितं लिंगं भित्त्वा पातालसप्तकम् ॥ अवटं दक्षिणे कृत्वा लिंगं तत्रैव तिष्ठति ॥ ५ ॥ तत्र तीर्थे नृपश्रेष्ठ कुण्डं ज्वाला
समुद्भवम् ॥ यत्र सा पतिता ज्वाला शिवस्य दहतः पुरम् ॥ ६ ॥ तत्रावटे समुद्भूतं धूमावर्त्तस्ततोऽभवत् ॥ तस्मिन्कुंडे तु यः स्नानं कृत्वा
वै नर्मदाजले ॥ ७ ॥ कुर्याच्छ्राद्धं पितृभ्यो वै पूजयेच्च त्रिलोचनम् ॥ कालाग्निरुद्रनामानि स गच्छेत्परमां गतिम् ॥ ८ ॥ यत्किंचित्कामिकं
कर्म ह्याभिचारिकमेव वा ॥ रिपुसंक्षयकृद्वापि सांतानिकमथापि वा ॥ अत्र तीर्थे कृतं सर्वमविचारात्सिद्ध्यते नृप ॥ ९ ॥ इति श्रीस्कांदे महा
पुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कालाग्निरुद्रतीर्थमाहात्म्यवर्णनंनाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥
॥ १८७ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः परं महाराज चत्वारिंशत्कमांतरे ॥ शालग्रामं ततो गच्छेत्सर्वदेवतपूजितम् ॥ १ ॥
यत्रादिदेवो भगवान्वासुदेवस्त्रिविक्रमः॥ स्वयं तिष्ठति लोकात्मा सर्वेषां हितकाम्यया ॥ २ ॥ नारदेन तपस्तप्त्वा कृता शाला द्विजन्मनाम् ॥ सिद्धि
क्षेत्रं भृगुक्षेत्रं ज्ञात्वा रेवातटे स्वयम् ॥ ३ ॥ शालग्रामाभिधो देवो विप्राणां त्वधिवासितः ॥ साधूनां चोपकाराय वासुदेवः प्रतिष्ठितः ॥ ४ ॥ योगि
नामुपकाराय योगिध्येयो जनार्दनः ॥ शालग्रामेति तेनैव नर्मदातटमाश्रितः ॥ ५ ॥ मासि मार्गशिरे शुक्ला भवत्येकादशी यदा ॥ स्नात्वा
रेवाजले पुण्ये तद्दिनं समुपोषयेत् ॥ ६ ॥ रात्रौ जागरणं कुर्यात्संपूज्य च जनार्दनम् ॥ पुनः प्रभातसमये द्वादश्यां नर्मदाजले ॥ ७ ॥ स्नात्वा
संतर्प्य देवांश्च पितॄन्मातॄस्तथैव च ॥ श्राद्धं कृत्वा ततः पश्चात्पितृभ्यो विधिपूर्वकम् ॥ ८ ॥ शक्तितो ब्राह्मणान्पूज्य स्वर्णवस्त्रान्नदानतः ॥ क्षमा
पयित्वा तान्विप्रांस्तथा देवं खगध्वजम् ॥ ९ ॥ एवं कृते महाराज यत्पुण्यं च भवेन्नृणाम् ॥ शृणुष्वावहितो भूत्वा तत्पुण्यं नृपसत्तम ॥ १० ॥ न
शोकदुःखे प्रतिपत्स्यतीह जीवन्मृतो याति मुरारिसान्यम् ॥ महांति पापानि विसृज्य दुग्धं पुनर्न मातुः पिबते स्तनोद्भवं ॥ ११ ॥ शाल
ग्रामं पश्यते यो हि नित्यं स्नात्वा जले नार्मदेऽघौघहारे ॥ स मुच्यते ब्रह्महत्यादिपापैर्नारायणानुस्मरणेन तेन॥१२॥वसंति ये संन्यसित्वा च तत्र
निगृह्य दुःखानि विमुक्तसंघाः ॥ ध्यायंतो वै सांख्यवृत्त्या तुरीयं पदं मुरारेस्तेपि तत्रैव यांति ॥१३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां
संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शालग्रामतीर्थमाहात्म्यवर्णनं नामाष्टाशीत्युत्तरशततमोऽध्यायः ॥ १८८ ॥ ॥ ७ ॥ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेत्तु राजेंद्र तीर्थं परमशोभनम् ॥ उदीर्णो यत्र वाराहो ह्यभवद्धरणीधरः ॥ १ ॥ धुन्वन्दंष्ट्रां करालाग्रां
विभ्रच्च पृथिवीमिमाम् ॥ स एव पंचमः प्रोक्तो वाराहो मुक्तिदायकः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमुदीर्णरूपोऽभूद्वाराहो धरणीधरः ॥
वाराहत्वं गतः केन पंचमः केन संज्ञितः ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ आदिकल्पे पुरा राजन्क्षीरोदे भगवान्हरिः ॥ शेते स भोगिशयने
योगनिद्राविमोहितः ॥ ४ ॥ लक्ष्मीकरांबुजयुगभृद्यमानपदद्वयः ॥ तस्मिन्स्वपति देवेशे भाराक्रांता वसुन्धरा ॥ ५ ॥ बभूव नृपतिश्रेष्ठ गत्वा
वै देवसंनिधौ ॥ अवोचद्भारखिन्नाहं गमिष्यामि रसातलम् ॥ ६ ॥ दृष्ट्वा देवाः समुद्विग्ना गता यत्र जनार्दनः ॥ तुष्टुवुर्वाग्भिरिष्टाभिः केशवं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जगत पतिम् ॥ ७ ॥ ॥ देवा ऊचुः ॥ ॥ नमो नमस्ते देवेश सुरार्तिहर सर्वग ॥ विश्वमूर्ते नमस्तुभ्यं त्राहि सर्वान्महद्भयात् ॥ ८ ॥ इत्युक्तो देवतैर्देवो ह्युवाच किमुपस्थितम् ॥ कार्यं वदध्वं मे देवा यत्कृत्यं मा चिरं कृथाः ॥ ९ ॥ ॥ देवा ऊचुः ॥ ॥ धरा धरित्री भूतानां भारो द्विग्ना निमज्जति ॥ तामुद्धर हृषीकेश लोकान्संस्थापय स्थितौ ॥ १० ॥ एवमुक्तः सुरैः सर्वैः केशवः परमेश्वरः ॥ वाराहं रूपमास्थाय सर्वयज्ञमयं विभुः ॥ ११ ॥ दंष्ट्राकरालं पिंगाक्षं समाकुंचितमूर्द्धजम् ॥ कृत्वाऽनंतं पादपीठं दंष्ट्राग्रेणोद्धरन्भुवम् ॥ १२ ॥ सपर्वतवनामुर्वीं समुद्रपरिमेखलाम् ॥ उद्धृत्य भगवान्विष्णुरुद्दीर्णः समजायत ॥ १३ ॥ दर्शयन्पंचधात्मानमुत्तरे नर्मदातटे ॥ तथाऽऽद्यं कोरलायां तु द्वितीयं योगनीपुरे ॥ १४ ॥ जयक्षेत्राभिधाने तु जयेति परिकीर्त्तितम् ॥ असुरान्मोहयल्लिंगस्तृतीयः परिकीर्त्तितः ॥ १५ ॥ पावनाय जगद्धेतोः स्थितो यस्माच्छशिप्रभः ॥ अतस्तु नृपशार्दूल श्वेत इत्यभिधीयते ॥ १६ ॥ उद्धृत्य जगतां देवी मुदीर्णो भृगुकच्छके ॥ ततः पंचम उदीर्णो वराह इति संज्ञितः ॥ १७ ॥ इति पंचवराहास्ते कथितः पांडुनंदन ॥ युगपद्दर्शनं चैषां ब्रह्महत्यां व्यपोहति ॥ १८ ॥ ज्येष्ठे मासि सिते पक्ष एकादश्यां विशेषतः ॥ गत्वा ह्यादिवराहं तु संप्राप्ते दशमीदिने ॥ १९ ॥ हविष्यमन्नं भुंजीयाल्लघु सायं गते रवौ ॥ रात्रौ जागरणं कुर्याद्वाराहे ह्यादिसंज्ञके ॥ २० ॥ ततः प्रभाते ह्युषसि संस्नात्वा नर्मदाजले ! संतर्प्य पितृदेवांश्च तिलैर्यवविमिश्रितैः ॥ ॥ २१ ॥ धेनुं दद्याद्द्विजे योग्ये सर्वाभरणभूषिताम् ॥ निर्ममो निरहंकारो दानं दद्याद्द्विजातये ॥ २२ ॥ गत्वा संपूजयेद्देवं वाराहं ह्यादिसंज्ञितम् ॥ अनेन विधिना पूज्य पश्चाद्गच्छेज्जयं त्वरन् ॥२३॥ त्वरितं तु जयं गत्वा पूर्वकं विधिमाचरेत् ॥ अश्वं दद्याद्द्विजाग्र्याय जयपूर्वाभिनिर्गतम्॥ २४ ॥ लिंगे चैव तिला देयाः श्वेते हिरण्यमेव च ॥ उदीर्णे च भुवं दद्यात्पूर्वकं विधिमाचरेत् ॥ २५ ॥ अनस्तमित आदित्ये वराहान्पंच पश्यतः ॥ यत्फलं लभते पार्थ तदिहैकमनाः शृणु ॥ २६ ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ एभिस्तु सह संयोगो विश्वस्तानां च वंचनम् ॥ २७ ॥ स्वसृदुहितृभगिनीकुलदारोपवृंहणम् ॥ आजन्ममरणाद्यावत्पापं भरतसत्तम ॥ २८ ॥ तीर्थपंचकभूतस्य वैष्णवस्य विशेषतः ॥ युगपच्च विनश्येत तूल राशिरिवानलात् ॥ २९ ॥ नारायणानुस्मरणाज्जपध्यानाद्विशेषतः ॥ विप्रणश्यंति पापानि गिरिकूटसमान्यपि ॥ ३० ॥ दृष्ट्वा पंच वराहान्वै पौरुषे महति स्थितः ॥ आश्वन्नर्मदातोये श्राद्धं कृत्वा यथाविधि ॥ ३१ ॥ उद्यास्तमनादर्वाग्यः पश्येल्लोटणेश्वरम् ॥ कलेवरविमुक्तः स इत्येवं शंकरोऽब्रवीद् ॥ ३२ ॥ मुक्तिं प्रयाति सहसा दुष्प्रापां परमेश्वरीम् ॥ पौरुषे क्रियमाणेऽपि न सिद्धिर्जायते यदि ॥ ३३ ॥ ह्युवंति स्वर्गगमनमपि पापान्वितस्य च ॥ यत्र तत्र गतस्यैव भवेत्पंचवराहकी ॥ ३४ ॥ ज्येष्ठस्यैकादशीतिथौ ध्रुवं तत्र वसेन्नरः ॥ आदिं जयं तथा श्वेतं लिंगमुदीर्णमेव च ॥ ३५ ॥ आश्रित्य तस्या द्रष्टव्या वराहास्तु यतस्ततः ॥ ज्येष्ठस्यैकादशीतिथौ विष्णुना प्रभुविष्णुना ॥ ३६ ॥ वाराहं रूपमास्थाय उद्धृता धरणी विभो ॥ पुण्यात्पुण्यतमा तेन ह्यशेषाघौघनाशिनी ॥ ३७ ॥ दृष्ट्वा पंचवराहान्वै क्रोडमुदीर्णरूपिणम् ॥ पूजयित्वा विधानेन पश्चाज्जागरणं चरेत् ॥ ३८ ॥ सपंचवर्त्तिकान्दीपान्घृतेनोज्ज्वाल्य भक्तितः ॥ पुराणश्रवणैर्नृत्यैर्गीतवाद्यैः सुमंगलैः ॥ ३९ ॥ वेदजाप्यैः पवित्रैश्च क्षपयित्वा च शर्वरीम् ॥ यत्पुण्यं लभते मर्त्त्यो ह्याजमीढ शृणुष्व तत् ॥ ४० ॥ रेवाजलं पुण्यतमं पृथिव्यां तथा च देवो जगतां पतिर्हरिः ॥ एकादशी पापहरा नरेन्द्र ब्रह्मायासैर्लभ्यते मानवानाम् ॥ ४१ ॥ एकैकशो ब्रह्महत्यादिकानि शक्तानि हंतुं पापसंघानि राजन् ॥ नैते सर्वे युगपद्वै समेता हंतुं शक्ताः किन्न तद्ब्रूहि राजन् ॥ ४२ ॥ यथेदमुक्तं तव धर्मसूनो श्रुतं च यच्छंकराच्चंद्रमौलेः ॥ श्रुत्वेदमिच्छन्मुच्यते सर्वपापैः पठन्पदं याति हि वृत्र शत्रोः ॥ ४३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे नर्मदामाहात्म्ये उदीर्णवराहतीर्थमाहात्म्यवर्णनंनामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल सोमतीर्थमनुत्तमम् ॥ चंद्रहासेति विख्यातः सर्वदेवतपूजितम् ॥ १ ॥ यत्र सिद्धिं परां प्राप्तः सोमो राजा सुरोत्तमः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धिमनुप्राप्तः सोमो राजा जगत्पतिः ॥ तत्सर्वं श्रोतुमिच्छामि कथयस्व ममाऽनघ ॥ ३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुरा शप्तो मुनींद्रेण दक्षेण किल भारत ॥ असेवनाद्धि दाराणां क्षयरोगी भविष्यसि ॥ ४ ॥ उद्वाहितानां पत्नीनां ये न कुर्वंति सेवनम् ॥ या निष्ठा जायते तेषां तां शृणुष्व नरोत्तम ॥ ५ ॥ ऋतुकाले तु नारीणां सेवनाज्जायते सुतः ॥ सुतात्स्वर्गश्च मोक्षश्च ह्रीत्येवं श्रुतिनोदना ॥ ६ ॥ तत्कालोचितधर्मेण ये न सेवंति तां नराः ॥ तेषां ब्रह्मभ्रजं पापं जायते नाऽत्र संशयः ॥ ७ ॥ तेन पापेन घोरेण वेष्टतो रौरवे पतेत् ॥ तस्य तद्रुधिरं पापाः पिबंते कालमीप्सितम् ॥ ८ ॥ ततोऽवतीर्णकालेन यांयां योनिं प्रयास्यति ॥ तस्यांतस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ९ ॥ नारीणां तु सदा कामो ह्यधिकः परिवर्त्तते ॥ विशेषेण ऋतोः काले भिद्यते कामसायकैः ॥ १० ॥ परिभूता हि सा भर्त्रा ध्यायतेऽन्यं पतिं ततः ॥ तस्याः पुत्रः समुत्पन्नो ह्यटते कुलमुत्तमम् ॥ ११ ॥ स्वर्गस्थास्तेन पितरः पूर्वं जाता महीपते ॥ पतंति जातमात्रेण कुलटस्तेन चोच्यते ॥ १२ ॥ तेन कर्मविपाकेन क्षयरोगी शशी ह्यभूत् ॥ त्यक्त्वा लोकं सुरेन्द्राणां मर्त्यलोकमुपागतः ॥ १३ ॥ तत्र तीर्थान्यनेकानि पुण्यान्यायतनानि च ॥ भ्रमित्वा नर्मदां प्राप्तः सर्वपापप्रणाशिनीम् ॥ १४ ॥ उपवासस्तु दानानि व्रतानि नियमाश्च ये ॥ चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ ॥ १५ ॥ स्थापयित्वा महादेवं सर्वपातकनाशनम् ॥ जगाम प्रभया पूर्णः सोमलोकमनुत्तमम् ॥ १६ ॥ येनैव स्थापितो देवः पूज्यते वर्षसंख्यया ॥ तावद्युगसहस्राणि तस्य लोकं समश्नुते ॥ १७ ॥ तेन देवान्विधानोक्तान्स्थापयंति नरा भुवि ॥ अक्षयं चाव्ययं यस्मात्फलं भवति नाऽन्यथा ॥ १८ ॥ सोमतीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरम् ॥ जायते स नरो भूत्वा सोमवत्प्रियदर्शनः ॥ १९ ॥ चन्द्रप्रभासे यो गत्वा स्नानं विधिवदाचरेत् ॥ व्याधिना नाभिभूतः स्यात्क्षयरोगेण वा पुनः ॥ २० ॥ चंद्रहास्ये नरः स्नात्वा द्वादश्यां तु नरेश्वर ॥ चतुर्दश्यामुपोष्यैव वीरस्य क्रतुयाजिनः ॥ २१ ॥ मन्त्रैः पंचभिरीशानं पुरुषंत्र्यंबकं यजेत् ॥ हविःशेषं स्वयं प्राश्य चंद्रहास्येशमीक्षयेत् ॥ २२ ॥ अनेन विधिना राजंस्तुष्टो देवो महेश्वरः ॥ विधिना तीर्थयोगेन क्षयरोगाद्विमुच्यते ॥ २३ ॥ सप्तभिः सोमवारैर्यैः स्नानं तत्र समाचरेत् ॥ स वै कर्णकृताद्रोगान्मुच्यते पूजयञ्छिवम् ॥ २४ ॥ अक्षिरोगस्तथा राजंश्चन्द्रहास्ये विनश्यति ॥ चंद्रहास्ये तु यो गत्वा ग्रहणे चन्द्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वपातकैः ॥ २५ ॥ तत्र स्नानं च दानं च चंद्रहास्ये शुभाशुभम् ॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयम् ॥ २६ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ॥ चंद्रहास्ये तु ये स्नात्वा पश्यंति ग्रहणं नराः ॥ २७ ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतम् ॥ स्नानमात्रात्तु राजेंद्र तत्र तीर्थे प्रणश्यति ॥ २८ ॥ बहवस्तत्र जानंति महामोहसमन्विताः ॥ देहस्थ इव सर्वेषां परमात्मेव संस्थितम् ॥ २९ ॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु मत्फलम् ॥ तत्समग्रमवाप्नोति चन्द्रहास्ये न संशयः ॥ ३० ॥ संक्रांतौ च व्यतीपाते विषुवे चायने तथा ॥ चंद्रहास्ये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ३१ ॥ ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम् ॥ चंद्रहास्यं न जानंति नर्मदायां व्यवस्थितम् ॥ ३२ ॥ चंद्र
हास्ये तु यः कश्चित्संन्यासं कुरुते नृप ॥ अनिवर्त्तिका गतिस्तस्य सोमलोकात्कदाचन ॥३३॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहि
तायां पञ्चम आवन्त्यखंडे रेवाखंडे चंद्रहास्यतीर्थमाहात्म्यवर्णनंनाम नवत्युत्तरशततमोऽध्यायः ॥ १९० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥
सिद्धेश्वरं ततो गच्छेत्तस्यैव तु समीपतः ॥ अमृतस्रावि तल्लिंगमाद्यं स्वायंभुवं तथा ॥ १ ॥ दृष्टमात्रेण येनेह ह्यनृणो जायते नरः ॥ पुरा वर्षशतं
साग्रमाराध्य परमेश्वरम् ॥ २ ॥ प्राप्नुवुः परमां सिद्धिमादित्या द्वादशैव तु ॥ अतः सिद्धेश्वरः प्रोक्तः सिद्धिदः सिद्धिकांक्षिणाम् ॥ ३ ॥ ॥ युधि
ष्ठिर उवाच ॥ ॥ कथं सिद्धेश्वरे प्राप्ताः सिद्धिं देवा द्विजोत्तम ॥ आदित्या इति यच्चोक्तं तन्मे विस्मापनं कृतम् ॥ ४ ॥ तपस्युग्रे व्यवसिता
आदित्याः केन हेतुना ॥ संप्राप्तास्तु द्विजश्रेष्ठ सिद्धिं चैवाभिलाषिकीम् ॥ ५ ॥ संक्षिप्य तु मया पृष्टं विस्तराद्विज शंस मे ॥ ६ ॥ ॥ मार्कंडेय
उवाच ॥ ॥ अदितेर्द्वादशादित्या जाताः शक्रपुरोगमाः ॥ इन्द्रो धाता भगस्त्वष्टा मित्रोथ चरुणोर्यमा ॥ ७ ॥ विवस्वान्सविता पूषा ह्यंशु
मान्विष्णुरेव च ॥ त इमे द्वादशादित्या इच्छंतो भास्करं पदम् ॥ ८ ॥ नर्मदातटमाश्रित्य तपस्युग्रे व्यवस्थिताः ॥ सिद्धेश्वरे महाराज काश्यपेयै
र्महात्मभिः ॥ ९ ॥ परा सिद्धिरनुप्राप्ता द्वादशादित्यसंज्ञितैः ॥ स्थापितश्च जगद्धाता तस्मिंस्तीर्थे दिवाकरः ॥ १० ॥ स्वकीयांशविभागेन
द्वादशादित्यसंज्ञितैः ॥ तदाप्रभृति तत्तीर्थं राजन्ख्यातिं गतं भुवि ॥ ११ ॥ प्रलये समनुप्राप्ते ह्यादित्या द्वादशैव ते ॥ द्वादशादित्यतो राजन्संभवंति
युगक्षये ॥ १२ ॥ इंद्रस्तपति पूर्वेण धाता चैवाग्निगोचरे ॥ गभस्तिपतिर्वैयाम्ये त्वष्टा नैर्ऋतदिङ्मुखः ॥ १३ ॥ वरुणः पश्चिमे भागे मित्रस्तु वायवे
तथा ॥ विष्णुश्च सौम्यदिग्भागे विवस्वानीशगोचरे ॥१४॥ ऊर्ध्वतश्चैव सविता ह्यधः पूषा विशोषयन् ॥ अंशुमांस्तु तथा विष्णुर्मुखतो निर्गतं जग
त् ॥१५॥ प्रदहन्वै नरश्रेष्ठ बभ्रमुश्च इतस्ततः ॥ यथैव ते महाराज दहंति सकलं जगत् ॥१६॥ तथैव द्वादशादित्या भक्तानां भावसाधनाः ॥ प्रात
रुत्थाय यः स्नात्वा द्वादशादित्यसंज्ञितम् ॥ १७ ॥ पश्यते देवदेवेशं शृणु तस्यैव यत्फलम् ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ॥ १८ ॥
नश्यते तत्क्षणादेव द्वादशादित्यदर्शनात् ॥ प्रदक्षिणं तु यः कुर्यात्तस्य देवस्य भारत ॥ १९ ॥ प्रदक्षिणीकृता तेन पृथिवी नाऽत्र संशयः ॥ तत्र तीर्थे
तु सप्तम्यामुपवासेन यत्फलम् ॥२०॥ अन्यत्र सप्तसप्तम्यां लभंति न लभंति च ॥ षष्ठ्यां वारे दैनकरे द्वादशादित्यदर्शनात् ॥२१॥ प्रदक्षिणं तु यः
कुर्यात्तस्य पापं तु नश्यति ॥ अरोगी सप्तजन्मानि भवेद्वै नाऽत्र संशयः ॥ २२ ॥ यस्तु प्रदक्षिणशतं दद्याद्भक्त्या दिनेदिने ॥ दद्रूपिटककुष्ठानि
मण्डलानि विचर्चिकाः ॥ २३ ॥ नश्यंति व्याधयः सर्वे गरुडेनेव पन्नगाः ॥ पुत्रप्राप्तिर्भवेत्तस्य षष्ट्या वासरसेवनात् ॥ २४ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे द्वादशादित्यतीर्थमाहात्म्यवर्णनंनामैकनवत्युत्तरशततमोऽध्यायः ॥
॥ १९१ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात देवतीर्थमनुत्तमम् ॥ दृष्ट्वा तु श्रीपतिं पापैर्मुच्यते मानवो भुवि ॥ १ ॥
महर्षेस्तस्य जामाता भृगोर्देवो जनार्दनः ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कोऽयं श्रियः पतिर्देवो देवानामधिपो विभुः ॥ कथं जन्माऽभव
त्तस्य देवेषु त्रिषु वा मुने ॥ ३ ॥ सम्बन्धी च कथं जातो भृगुणा सह केशवः ॥ एतद्विस्तरतो ब्रह्मन्वक्तुमर्हसि भार्गव ॥ ४ ॥ ॥ मार्कंडेय
उवाच ॥ ॥ संक्षेपात्कथयिष्यामि साध्यस्य चरितं महत् ॥ न हि विस्तरतो वक्तुं शक्ताः सर्वे महर्षयः ॥ ५ ॥ नारायणस्य नाभ्यब्जाज्जातो
देवश्चतुर्मुखः ॥ तस्य दक्षोंगजो राजन्दक्षिणांगुष्ठसंभवः ॥ ६ ॥ धर्मः स्तनांतात्संजातस्तस्य पुत्रोऽभवत्किल ॥ नारायणसहायोसावजोपि
भरतर्षभ ॥ ७ ॥ मरुत्वती वसुर्ज्ञाना लंबा भानुमती सती ॥ संकल्पा च मुहूर्त्ता च साध्या विश्वावती ककुप् ॥ ८ ॥ धर्मपत्न्यो दशैवैता दाक्षा
यण्यो महाप्रभाः ॥ तासां साध्या महाभागा पुत्राऽनजनयन्नृप ॥ ९ ॥ नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥ विष्णोरंशांशका ह्येते चत्वारो
धर्मसूनवः ॥ १० ॥ तथा नारायणनरौ गंधमादनपर्वते ॥ आत्मन्यात्मानमाधाय तेपतुः परमं तपः ॥ ११ ॥ ध्यायमानावनौपम्यं स्वं कार
णमकारणम् ॥ वासुदेवमनिर्देश्यमप्रतर्क्यमनंतरम् ॥ १२ ॥ योगयुक्तौ महात्मानावास्थितावुरुतापसौ ॥ तयोस्तपःप्रभावेण न तताप दिवाकरः ॥
॥ १३ ॥ ववाह शंकितो वायुः सुखस्पर्शो ह्यशंकितः ॥ शिशिरोऽभवदत्यर्थं ज्वलन्नपि विभावसुः ॥ १४ ॥ सिंहव्याघ्रादयः सौम्याश्चेरुः सह
मृगैर्गिरौ ॥ तयोर्गौरिव भारार्त्ता पृथिवी पृथिवीपते ॥ १५ ॥ चेरुश्च भूधराश्चैव चुक्षुभे च महोदधिः ॥ देवाश्च स्वेषु धिष्ण्येषु निष्प्रभेषु हतप्रभाः ॥
बभूवुरवनीपाल परमं क्षोभमागताः ॥ १६ ॥ देवराजस्तथा शक्रः संतप्तस्तपसा तयोः ॥ युयोजाप्सरसस्तत्र तयोर्विघ्नचिकीर्षया ॥ १७ ॥
॥ ॥ इन्द्र उवाच ॥ ॥ रम्भे तिलोत्तमे कुब्जे घृताचि ललिते शुभे ॥ प्रम्लोचे सुभ्रु सुम्लोचे सौरभेयि महोद्धते ॥ १८ ॥ अलंबुषे
मिश्रकेशि पुण्डरीके वरूथिनि ॥ विलोकनीयं बिभ्राणा वपुर्मन्मथबोधनम् ॥ १९ ॥ गन्धमादनमासाद्य कुरुध्वं वचनं मम ॥ नरनारायणौ
तत्र तपोदीक्षान्वितौ द्विजौ ॥ २० ॥ तेपाते धर्मतनयौ तपः परमदुश्चरम् ॥ तावस्माकं वरारोहाः कुर्वाणौ परमं तपः ॥ २१ ॥ कर्म्मातिशय
दुःखार्त्तिप्रदावार्यतिनाशनौ ॥ तद्गच्छत न भीः कार्या भवतीभिरिदं वचः ॥ २२ ॥ स्मरः सहायो भविता वसंतश्च वरांगनाः ॥ रूपं वयः समा
लोक्य मदनोद्दीपनं परम् ॥ कन्दर्प्पवशमभ्येति विवशः को न मानवः ॥ २३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्युक्त्वा देवराजेन मदनेन समं
तदा ॥ जग्मुरप्सरसः सर्वा वसंतश्च महीपते ॥ २४ ॥ गन्धमादनमासाद्य पुंस्कोकिलकुलाकुलम् ॥ चचार माधवो रम्यं प्रोत्फुल्लवनपादपम् ॥
॥ २५ ॥ प्रववौ दक्षिणाशीयां मलयानुगतोऽनिलः ॥ भृंगमालारुतरवै रमणीयमभूद्वनम् ॥ २६ ॥ गंधश्च सुरभिः सद्यो वनराजिसमुद्भवः ॥
किन्नरोरगयक्षाणां बभूव घ्राणतर्पणः ॥ २७ ॥ वरांगनाश्च ताः सर्वा नरनारायणावृषी ॥ विलोभयितुमारब्धा वागंगललितस्मितैः ॥ २८ ॥ जगौ
मनोहरं काचिन्ननर्त तत्र चाऽप्सराः ॥ अवादयत्तथैवान्या मनोहरतरं नृप ॥ २९ ॥ हावैर्भावैः सृतैर्हास्यैस्तथाऽन्या वल्गुभाषितैः ॥ तयोः क्षोभाय
तन्वंग्यश्चक्रुरुद्यममंगनाः ॥ ३० ॥ तथापि न तयोः कश्चिन्मनसः पृथिवीपते ॥ विकारोऽभवदध्यात्मपारसंप्राप्तचेतसोः ॥ ३१ ॥
निवातस्थौ यथा दीपावकंपौ नृप तिष्ठतः ॥ वासुदेवार्प्पणस्वस्थे तथैव मनसी तयोः ॥ ३२ ॥ पूर्यमाणोऽपि चांभोभिर्भुवमन्यां
महोदधिः ॥ यथा न याति संक्षोभं तथा तन्मानसं क्वचित् ॥ ३३ ॥ सर्वभूतहितं ब्रह्म वासुदेवमयं परम् ॥ मन्यमानौ न रागस्य द्वेषस्य
च वशंगतौ ॥ ३४ ॥ स्मरोऽपि न शशाकाथ प्रवेष्टुं हृदयं तयोः ॥ विद्यामयं दीपयुतमंधकार इवालयम् ॥ ३५ ॥ पुष्पोज्ज्वलांस्तरुवरान्व
संतं दक्षिणानिलम् ॥ ताश्चैवाप्सरसः सर्वाः कन्दर्प्पं च महामुनी ॥ ३६ ॥ यच्चारब्धं तपस्ताभ्यामात्मानं गन्धमादनम् ॥ ददर्शातेऽखिलं रूपं
ब्रह्मणः पुरुषर्षभ ॥ ३७ ॥ दाहाय नामलो वह्नेर्नापः क्लेदाय चांभसः ॥ तद्द्रव्यमेव तद्द्रव्यविकाराय न वै यतः ॥ ३८ ॥ ततो विज्ञाय विज्ञाय

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परं ब्रह्म स्वरूपतः ॥ मधुकंदर्पयोषित्सु विकारो नाऽभवत्तयोः ॥ ३९ ॥ ततो गुरुतरं यत्नं वसंतमदनौ नृप ॥ चक्राते ताश्च तन्वंग्यस्तत्क्षोभाय पुनःपुनः ॥ ४० ॥ अथ नारायणो धैर्यं संधार्योदीर्णमानसः ॥ ऊरोरुत्पादयामास वरांगीमबलां तदा ॥ ४१ ॥ त्रैलोक्यसुन्दरीरत्नमशेषमवनीपते ॥ गुणैर्लाघवमभ्येति यस्याः संदर्शनादनु ॥ ४२ ॥ तां विलोक्य महीपाल चकंपे मनसाऽनिलः ॥ वसंतो विस्मयं यातः स्मरः सस्मार किंचन ॥ ४३ ॥ रंभातिलोत्तमाद्याश्च वैलक्ष्यं देवयोषितः ॥ न रेजुरवनीपाल तल्लक्ष्यहृदयेक्षणाः ॥ ४४ ॥ ततः कामो वसंतश्च पार्थिवाप्सरसश्च ताः ॥ प्रणम्य भगवंतौ तौ तुष्टुवुर्मुनिसत्तमौ ॥ ४५ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ प्रसीदतु जगद्धाता यस्य देवस्य मायया ॥ मोहिताः स्म विजानीमो नांतरं विद्यते द्वयोः ॥ ४६ ॥ प्रसीदतु स वां देवो यस्य रूपमिदं द्विधा ॥ धामभूतस्य लोकानामनादेरप्रतिष्ठतः ॥ ४७ ॥ नर नारायणौ देवौ शंखचक्रायुधावुभौ ॥ आस्तां प्रसादसुमुखावस्माकमपराधिनाम् ॥ ४८ ॥ निधानं सर्वविद्यानां सर्वपापवनानलः ॥ नारायणोऽतो भगवान्सर्वपापं व्यपोहतु ॥ ४९ ॥ शार्ङ्गचिह्नायुधः श्रीमानात्मज्ञानमयोऽनघः ॥ नरः समस्तपापानि हतात्मा सर्वदेहिनाम् ॥ ५० ॥ जटाकलापबद्धोऽयमनयोर्नः क्षमावतोः ॥ सौम्यास्यदृष्टिः पापानि हंतुं जन्मार्जितानि वै ॥ ५१ ॥ तथात्मविद्यादोषेण योऽपराधः कृतो महान् ॥ त्रैलोक्यवंद्यौ यौ नाथौ विलोभयितुमागताः ॥५२॥ प्रसीद देव विज्ञानघन मूढदृशामिव ॥ भवंति संतः सततं स्वधर्मपरिपालकाः ॥५३॥ दृष्ट्वैतन्नः समुत्पन्नं यथा स्त्रीरत्नमुत्तमम् ॥ त्वयि नारायणोत्पन्ना श्रेष्ठा पारवती मतिः ॥ ५४ ॥ तेन सत्येन सत्यात्मन्परमात्मन्सनातन ॥ नारायण प्रसीदेश सर्वलोकपरायण ॥ ५५ ॥ प्रसन्नबुद्धे शांतात्मन्प्रसन्नवदनेक्षण ॥ प्रसीद योगिनामीश नर सर्वगताऽच्युत ॥ ५६ ॥ नमस्यामो नरं देवं तथा नारायणं हरिम् ॥ नमो नराय नम्याय नमो नारायणाय च ॥ ५७ ॥ प्रसन्नानामनाथानां तथा नाथवतां प्रभो ॥ शं करोतु नरोऽस्माकं शं नारायण देहि नः ॥ ५८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एवमभ्यर्चितः स्तुत्या रागद्वेषादिवर्जितः ॥ प्राहेशः सर्वभूतानां मध्ये नारायणो नृप ॥ ५९ ॥ ॥ ॥ नारायण उवाच ॥ ॥ स्वागतं माधवे कामे भवत्वप्सरसामपि ॥ यत्कार्यमागतानां च इहास्माभिस्तदुच्यताम् ॥ ६० ॥ यूयं संसिद्धये नूनमस्माकं बलशत्रुणा ॥ संप्रेषितास्ततोऽस्माकं नृत्ययोगादिदर्शनम् ॥ ६१ ॥ न वयं गीतनृत्येन नांगचेष्टादिभाषितैः ॥ लुब्धा वै विषयैर्मन्ये विषया दारुणात्मकाः ॥ ६२ ॥ शब्दादिसंगदुष्टानि यदा नाक्षाणि नः शुभाः ॥ तदा नृत्यादयो भावाः कथं लोभप्रदायिनः ॥ ६३ ॥ ते सिद्धाः स्म न वै साध्या भवतीनां स्मरस्य च ॥ माधवस्य च शक्रोऽपि स्वास्थ्यं यात्वविशंकिताः ॥ ६४ ॥ योऽसौ परश्च परमः पुरुषः परमेश्वरः ॥ परमात्मा समस्तस्य स्थावरस्य चरस्य च ॥ ६५ ॥ उत्पत्तिहेतुरेते च यस्मिन्सर्वं प्रलीयते ॥ सर्वावासीति देवत्वाद्वासुदेवेत्युदाहृतः ॥ ६६ ॥ वयमंशांशकास्तस्य चतुर्व्यूहस्य मानिनः ॥ तदादेशितवार्त्मानौ जगद्बोधाय देहिनाम् ॥६७॥ तत्सर्वभूतं सर्वेशं सर्वत्र समदर्शिनम् ॥ कुतः पश्यंतौ रागादीन्करिष्यामो विभेदिनः ॥ ६८ ॥ वसंते मयि चेंद्रे च भवतीषु तथा स्मरे ॥ यदा स एव भूतात्मा तदा द्वेषादयः कथम् ॥ ६९ ॥ तन्मयाऽन्य विभक्तानि यदा सर्वेषु जंतुषु ॥ सर्वेश्वरेश्वरो विष्णुः कुतो रागादयस्ततः ॥ ७० ॥ ब्रह्माणमिंद्रमीशानमादित्यमरुतोखिलान् ॥ विश्वेदेवानृषीन्साध्यान्वसून्पितृगणांस्तथा ॥ ७१ ॥ यक्षराक्षसभूतादीन्नागान्सर्पान्सरीसृपान् ॥ मनुष्यपक्षिगोरूपगजसिंहजलेचरान् ॥ ७२ ॥ मक्षिकामशकान्दंशाञ्च्छलभाञ्जलजान्कृमीन् ॥ गुल्मवृक्षलतावल्लीत्वक्सारतृणजातिषु ॥ ७३ ॥ यच्च किंचिददृश्यं वा दृश्यं वा त्रिदशांगनाः ॥ मन्यध्वं जातमेकस्य तत्सर्वं परमात्मनः ॥ ७४ ॥ जायमानः कथं विष्णुमात्मानं परमं च यत् ॥ रागद्वेषौ तथा लोभं कः कुर्यादमरांगनाः ॥ ७५ ॥ सर्वभूतमये विष्णौ सर्वगे सर्वधातरि ॥ निपात्य तं पृथग्भूते कुतो रागादिको गुणः ॥ ७६ ॥ एवमस्मासु युष्मासु सर्वभूतेषु चाबलाः ॥ तन्मयैकत्वभूतेषु रागाद्यवसरः कुतः ॥ ७७ ॥ सम्यग्दृष्टिरियं प्रोक्ता समस्तैक्यावलोकिनी ॥ पृथग्विज्ञानमात्रैव लोकसंव्यवहारवत् ॥ ७८ ॥ भूतेंद्रियांतःकरणप्रधानपुरुषात्मकम् ॥ जगद्वै ह्येतदखिलं तदा भेदः किमात्मकः ॥ ७९ ॥ भवंति लयमायांति समुद्रसलिलोर्मयः ॥ न वारिभेदतो भिन्नास्तथैवैक्यादिदं जगत् ॥ ८० ॥ यथाग्नेरर्चिषः पीताः पिंगलारुणधूसराः ॥ तथाऽपि नाऽग्नितो भिन्नास्तथैतद्ब्रह्मणो जगत् ॥ ८१ ॥ भवतीभिश्च यत्क्षोभमस्माकं स पुरंदरः ॥ कारयत्यसदेतच्च विवेकाचारचेतसाम् ॥ ॥ ८२ ॥ भवंत्यः स च देवेंद्रो लोकाश्च ससुरासुराः ॥ समुद्राद्रिवनोपेता मद्देहांतरगोचराः ॥ ८३ ॥ यथेयं चारुसर्वांगी भवतीनां मयाऽग्रतः ॥ दर्शिता दर्शयिष्यामि तथा चैवाऽखिलं जगत् ॥ ८४ ॥ प्रयातु शक्रो मा गर्वमिंद्रत्वं कस्य सुस्थिरम् ॥ यूयं च मा स्मयं यात संति रूपान्विताः स्त्रियः ॥ ८५ ॥ किं सुरूपं कुरूपं वा यदा भेदो न दृश्यते ॥ तारतम्यं सुरूपत्वे सततं भिन्नदर्शनात् ॥ ८६ ॥ भवतीनां स्मयं मत्वा रूपौदार्यगुणोद्भवम् ॥ मयेयं दर्शिता तन्वी ततस्तु शममेष्यथ ॥ ८७ ॥ यस्मान्मदूरोर्निष्पन्ना त्वियमिंदीवरेक्षणा ॥ उर्वशीनाम कल्याणी भविष्यति वराप्सराः ॥ ८८ ॥ तदियं देवराजस्य नीयतां वरवर्णिनी ॥ भवत्यस्तेन चाऽऽस्माकं प्रेषिताः प्रीतिमिच्छना ॥ ८९ ॥ वक्तव्यश्च सहस्राक्षो नाऽस्माकं भोगकारणात् ॥ तपश्चर्या न वाप्राप्यफलं प्राप्तुमभीप्सता ॥ ९० ॥ सन्मार्गमस्य जगतो दर्शयिष्ये करोम्यहम् ॥ तथा नरेण सहितो जगतः पालनोद्यतः ॥ ९१ ॥ यदि कश्चित्तवाबाधां करोति त्रिदशेश्वर ॥ तमहं वारयिष्यामि निवृत्तो भव वासव ॥ ९२ ॥ कर्त्ताऽसि चेत्त्वमाबाधां न दुष्टस्येह कस्यचित् ॥ तं चाऽपि शास्ता तदहं प्रवर्त्तिष्याम्यसंशयम् ॥ ९३ ॥ एतज्ज्ञात्वा न संतापस्त्वया कार्यो हि मां प्रति ॥ उपकाराय जगतामवतीर्णोस्मि वासव ॥ ९४ ॥ या चेयमुर्वशी मत्तः समुद्भूता पुरंदर ॥ त्रेताग्निहेतुभूतेयं एवं प्राप्य भविष्यति ॥ ९५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे नर्मदामाहात्म्ये श्रीपत्युत्पत्तिवर्णनं नाम द्विनवत्युत्तरशततमोऽध्यायः ॥ १९२ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इत्युक्तेऽप्सरसः सर्वाः प्रणिपत्य पुनःपुनः ॥ ऊचुर्नारायणं देवं तद्दर्शनसमीहया ॥ १ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ भगवन्भवता योऽयमुपदेशो हितार्थिना ॥ प्रोक्तः स सर्वो विज्ञातो माहात्म्यं विदितं च ते ॥ २ ॥ यत्त्वेतद्भवता प्रोक्तं प्रसन्नेनांतरात्मना ॥ दर्शितेयं विशालाक्षी दर्शयिष्यामि वो जगत् ॥ ३ ॥ तत्रार्थे सर्वभावेन प्रपन्नानां जगत्पते ॥ दर्शयात्मानमखिलं दर्शितेयं यथोर्व्वशी ॥ ४ ॥ यदि देवाऽपराधेपि नाऽस्मासु कुपितं तव ॥ नमस्ते जगतामीश दर्शयात्मानमात्मना ॥ ५ ॥ ॥ ॥ नारायण उवाच ॥ ॥ पश्यतेहाऽखिलाँल्लोकान्मम देहे सुरांगनाः ॥ मधुं मदनमात्मानं यच्चान्यद्द्रष्टुमिच्छथ ॥ ६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इत्युक्त्वा भगवान्देवस्तदा नारायणो नृप ॥ उच्चैर्जहास स्वनवत्तत्राऽभूदखिलं जगत् ॥ ७ ॥ ब्रह्मा प्रजापतिः शक्रः सह रुद्रैः पिनाकधृक् ॥ आदित्या वसवः साध्या विश्वेदेवा महर्षयः ॥ ८ ॥ नासत्यदस्रावनिलः सर्वशश्च तथाग्नयः ॥ यक्षगन्धर्व्वसिद्धाश्च पिशाचोरगकिन्नराः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ९ ॥ समस्ताप्सरसो विद्याः सांगा वेदास्तदुक्तयः ॥ मनुष्याः पशवः कीटाः पक्षिणः पादपास्तथा ॥ १० ॥ सरीसृपाश्चाथ सूक्ष्मा यच्चान्य
जीवसंज्ञितम् ॥ समुद्राः सकलाः शैलाः सरितः काननानि च ॥ ११ ॥ द्वीपान्यशेषाणि तथा तथा सर्वसरांसि च ॥ नगरग्रामपूर्णा च मेदिनी
मेदिनीपते ॥ देवांगनाभिर्देवस्य देहे दृष्टं महात्मनः ॥ १२ ॥ नक्षत्रग्रहताराभिः समंपूर्णं नभस्तलम् ॥ दह्यमुस्ताः सुचार्वंग्यस्तस्यांतर्विश्वं
रूपिणः ॥ १३ ॥ ऊर्ध्वं न तिर्यग्गधस्ताच्चदांतस्तस्य दृश्यते ॥ तमनंतमनादिं च ततस्तास्तुष्टुवुः प्रभुम् ॥ १४ ॥ मदनेन समं सर्वा मधुना च
वरांगनाः ॥ सस्राध्वसा भक्तिपराः परं विस्मयमागताः ॥ १५ ॥ ॥ वसंतकामाप्सरस ऊचुः ॥ ॥ पश्याम नादिं तव देव नांतं न
मध्यमव्याकृतरूपपारम् ॥ परात्परं त्वां जगतामनंतं नताः स्म नारायणमात्मभूतम् ॥ १६ ॥ महीनभोवायुजलाग्नयस्त्वं शब्दादिरू
पस्तु परापरात्मन् ॥ त्वत्तो भवत्यच्युत सर्वमेतद्वेदादिरूपोऽसि विभो त्वमात्मन् ॥ १७ ॥ ब्रह्मासि रूपस्य परस्य वक्ता श्रोता च
शब्दस्य हरे त्वमेकः ॥ स्रष्टा भवान्सर्वगतोऽखिलस्य ज्ञाता च गन्धस्य पृथक्छरीरी ॥ १८ ॥ सुरेषु सर्वेषु न सोऽस्ति कश्चिन्मनुष्य
लोकेषु न सोऽस्ति कश्चित् ॥ पश्वादिवर्गेषु न सोऽस्ति कश्चिद्यो नांऽशभूतस्तव देवदेव ॥ १९ ॥ ब्रह्मांबुधींदुप्रमुखानि सौम्य शक्रादि
रूपाणि तवोत्तमानि ॥ समुद्ररूपं तव धैर्यवत्सु तेजःस्वरूपेषु रविस्तथाग्निः ॥ २० ॥ क्षमाधनेषु क्षितिरूपमग्र्यं शीघ्रेषु शीघ्रो बलवत्सु
वायुः ॥ मनुष्यरूपं तव राजवेषो मूढेषु सर्वेश्वर पादपोऽसि ॥ २१ ॥ सर्वान्नयेष्वच्युत दानवस्त्वं सनत्सुजातश्च विवेकवत्सु ॥ रसन्वरूपेण
जलस्थितोऽसि गन्धस्वरूपं भवतो धरित्र्याम् ॥ २२ ॥ दृश्यस्वरूपश्च हुताशनस्त्वं स्पर्शस्वरूपं भवतः समीरे ॥ शब्दादिके ते न
भसि स्वरूपं भेतव्यरूपो मनसि प्रभो त्वम् ॥ २३ ॥ बोधस्वरूपश्च मतौ त्वमेकः सर्वत्र सर्वेश्वर सर्वभूत ॥ पश्यामि ते नाभिसरोजमध्ये ब्रह्माण
मीशं च हरं भृकुट्याम् ॥ २४ ॥ तवाऽश्विनौ कर्णगतौ समस्तास्तवाऽऽस्थिता बाहुषु लोकपालाः ॥ प्राणोऽनिलो नेत्रगतौ रवींन्दू जिह्वा च ते
नाथ सरस्वतीयम् ॥ २५ ॥ पादौ धरित्री जठरं समस्ताल्लोकान्वपीकेश विलोकयामः ॥ जंघे वयं पादतलांगुलीषु पिशाचयक्षोरगसिद्धसंघाः ॥
॥ २६ ॥ पुंस्त्वे प्रजानां पतिरोष्ठयुग्मे प्रतिष्ठितास्ते ऋतवः समस्ताः ॥ सर्वे वयं ते दशनेषु देव दंष्ट्रासु देवा ह्यभवंश्च दंताः ॥ २७ ॥ रोमाण्यशेषा
स्तव देवसंघा विद्याधरा नाथ तवांघ्रिरेखाः ॥ सांगाः समस्तास्तव देव वेदाः समास्थिताः संधिषु बाहुभूताः ॥ २८ ॥ वराहभूतं धरणीधरस्ते
नृसिंहरूपं च सदा करालम् ॥ पश्याम ते वाजिशिरस्तथोच्चैस्त्रिविक्रमे यच्च तदाऽप्रमेयम् ॥ २९ ॥ अमी समुद्रास्तव देव देहे मौर्वालयः शैलधरा
स्तथाऽमी ॥ इमाश्च गंगाप्रमुखाः स्रवंत्यो द्वीपाण्यशेषाणि वनादिदेशाः ॥ ३० ॥ स्तुन्वंति चैमे मुनयस्तवेशं देहे स्थितास्त्वन्महिमानमग्र्यम् ॥
त्वामीशितारं जगतामनंतं यजंति यज्ञैः किल यज्ञिनोऽमी ॥ ३१ ॥ त्वत्तोऽहि सौम्यं जगतीह किंचित्त्वतो न रौद्रं च समस्तभूतें ॥ त्वत्तो न
शीतं च न केशवोष्णं सर्वस्वरूपातिशयी त्वमेव ॥ ३२ ॥ प्रसीद सर्वेश्वर सर्वभूत सनातनात्मन्परमेश्वरेश ॥ त्वन्मायया मोहितमानसाभिर्यत्तेऽप
राद्धं तदिदं क्षमस्व ॥ ३३ ॥ किं वाऽपराद्धं तव देवदेव यन्मायया नो हृदयं तवाऽपि ॥ मायाभिशंकिप्रणतार्त्तिहंतर्मनो हि नो विह्वलतामुपैति ॥
॥३४॥ न तेपराद्धं यदि तेऽपराद्धमस्माभिरुन्मार्गविवर्त्तनीभिः ॥ तत्क्षम्यतां सृष्टिकृतस्तवैव देवाऽपराधः सृजतो विवेकम् ॥३५॥ नमो नमस्ते गो
विंद नारायण जनार्दन ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३६ ॥ नमोऽनंत नमस्तुभ्यं विश्वात्मन्विश्वभावन ॥ त्वन्नामस्मरणात्पापमशेषं
नः प्रणश्यतु ॥ ३७ ॥ वरेण्य यज्ञपुरुष प्रजापालन वामन ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३८ ॥ नमोऽस्तु तेऽज्ञनाभाय प्रजापति
कृते हर ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३९ ॥ संसारार्णवपोताय नमस्तुभ्यमधोक्षज ॥ त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥
॥ ४० ॥ नमः परस्मै श्रीशाय वासुदेवाय वेधसे ॥ स्वेच्छया गुणयुक्ताय सर्गस्थित्यंतकारिणे ॥ ४१ ॥ उपसंहर विश्वात्मन्रूपमेतत्सनातनम् ॥
वर्धयानं न नो द्रष्टुं समर्थं चक्षुरीश्वर ॥ ४२ ॥ प्रलयाग्निसहस्रस्य समा दीप्तिस्तवाऽच्युत ॥ प्रमाणेन दिशो भूमिर्गगनं च समावृतम् ॥ ४३ ॥
न विद्मः कुत्र वर्त्तामो भवान्नाथोपलक्ष्यते ॥ सर्वं जगदिहैकस्थं पिंडितं लक्षयामहे ॥ ४४ ॥ किं वर्णयामो रूपं ते किं प्रमाणमिदं हरे ॥ माहात्म्यं
किं नु ते देव यज्जिह्वाया न गोचरे ॥ ४५ ॥ वक्तारो वाऽयुतेनापि बुद्धीनामयुतायुतैः ॥ गुणनिर्वर्णनं नाथ कर्तुं तव न शक्यते ॥ ४६ ॥ तदेतद्
शितं रूपं प्रसादः परमः कृतः ॥ छंदतो जगतामीश तदेतदुपसंहर ॥ ४७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्येवं संस्तुतस्ताभिरप्सरोभिर्जना
र्दनः ॥ दिव्यज्ञानोपपन्नानां तासां प्रत्यक्षमीश्वरः ॥ ४८ ॥ विवेश सर्वभूतानि स्वैरंशैर्भूतभावनः ॥ तं दृष्ट्वा सर्वभूतेषु लीयमानमधोक्षजम् ॥ ४९ ॥
विस्मयं परमं चक्रुः समस्ता देवयोषितः ॥ स च सर्वेश्वरः शैलान्पादपान्सागरान्भुवम् ॥ ५० ॥ जलमग्निं तथा वायुमाकाशं च विवेश ह ॥
काले दिक्ष्वथ सर्वात्मा ह्यात्मनश्चाऽन्यथाऽपि च ॥ ५१ ॥ आत्मरूपस्थितं स्वेन महिम्ना भावयञ्जगत् ॥ देवदानवरक्षांसि यक्षविद्याधरोरगाः ॥
॥ ५२ ॥ मनुष्यपशुकीटादिमृगपक्ष्यंतरिक्षगाः ॥ चेऽन्तरिक्षे तथा भूमौ दिवि ये च जलाश्रयाः ॥ ५३ ॥ तान्विवेश स विश्वात्मा पुनस्त
द्रूपमास्थितः ॥ नरेण सार्धं यत्ताभिर्दृष्टपूर्वमरिंदम ॥ ५४ ॥ ताः परं विस्मयं जग्मुः सर्वास्त्रिदशयोषितः ॥ प्रणेमुः साध्वसात्पांडुवदना नृपस
त्तम ॥ ५५ ॥ नारायणोऽपि भगवानाह तास्त्रिदशांगनाः ॥ ५६ ॥ ॥ नारायण उवाच ॥ ॥ नीयतामुर्वशी भद्रा यत्राऽसौ त्रिदशेश्वरः ॥
भवतीनां हितार्थाय सर्वभूतेष्वसाविति ॥ ५७ ॥ ज्ञानमुत्पादितं भूयो लयं भूतेषु कुर्वता ॥ तद्गच्छध्वं समस्तोऽयं भूतग्रामो मदंशकः ॥ ५८ ॥ अहं
मध्यात्मभूतस्य वासुदेवस्य योगिनः ॥ अस्मात्परतरं नाऽस्ति योऽनंतः परिपठ्यते ॥ ५९ ॥ तद्गजं सर्वभूतेशं जानीत परमं पदम् ॥ अहं भवत्यो
देवाश्च मनुष्याः पशवश्च ये ॥ एतत्सर्वमनंतस्य वासुदेवस्य वै कृतम् ॥ ६० ॥ एवं ज्ञात्वा समं सर्वं सदेवासुरमानुषम् ॥ सपश्वादिगुणं चैव द्रष्टव्यं
त्रिदशांगनाः ॥ ६१ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इत्युक्तास्तेन देवेन समस्तास्ताः सुरस्त्रियः ॥ प्रणम्य तौ समदनाः सवसन्ताश्च
पार्थिव ॥ ६२ ॥ आदाय चोर्वशीं भूयो देवराजमुपागताः ॥ आचख्युश्च यथावृत्तं देवराजाय तत्तथा ॥ ६३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तथा
त्वमपि राजेंद्र सर्वभूतेषु केशवम् ॥ चिंतयन्समतां गच्छ समतैव हि मुक्तये ॥ ६४ ॥ जानन्नेवं विशेषेण भूतेषु परमेश्वरम् ॥ वासुदेव कथं दोषाञ्छो
भादीन्न प्रहास्यसि ॥ ६५ ॥ सर्वभूतानि गोविंदाद्यदा नाऽन्यानि भूपते ॥ तदा वैरादयो भूत्वाः क्रियतां न तु पुत्रक ॥ ६६ ॥ इति पश्य जग
त्सर्वं वासुदेवात्मकं नृप ॥ एतदेव हि कृष्णेन रूपमाविष्कृतं नृप ॥ ६७ ॥ परमेश्वरेति यद्रूपं तदेतत्कथितं तव ॥ जन्मादिभावरहितं तद्विष्णोः परमं
पदम् ॥ ६८ ॥ संक्षेपेणाऽथ भूपाल श्रूयतां यद्ब्रवीमि ते ॥ यन्मतं पुरुषः कृत्वा परं निर्वाणमृच्छति ॥ ६९ ॥ सर्वो विष्णुसमासो हि भावाभावौ
च तन्मयौ ॥ सदसत्सर्वमीशोऽसौ महादेवः परं पदम् ॥ ७० ॥ भवजलधिगतानां द्वंद्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विषमविषयतोये मज्जतामङ्गवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥ ७१ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे श्रीपतिमाहात्म्यवर्णनंनाम त्रिनवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ तच्छ्रुत्वानंतदेवेन विश्वरूपमुदाहृतम् ॥ देवराजस्तथा देवाः परं विस्मयमागताः ॥ १ ॥ दृष्ट्वा चाप्सरसं पुण्यामुर्व्वशीं कमलाननाम् ॥ संत्रस्तो विस्मितश्चाऽभूद्देंद्रो राजश्रिया वृतः ॥ २ ॥ न किंचिदुत्तरं वाक्यमुक्तवान्जोपमास्थितः ॥ इति वृत्तांतभूतं हि नारायणविचेष्टितम् ॥ ३ ॥ भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीः श्रुत्वा तु वै नृप ॥ वैश्वरूपं परं रूपं विस्मिताऽचिंतयत्तदा ॥ ४ ॥ केनोपायेन स स्यान्मे भर्त्ता नारायणः प्रभुः ॥ व्रतेन तपसा वाऽपि दानेन नियमेन च ॥ ५ ॥ वृद्धानां सेवनेनाऽथ देवताराधनेन वा ॥ इति चिंतापरां कन्यां सती ज्ञात्वा युधिष्ठिर ॥ ६ ॥ प्राह प्राप्तो मया भर्त्ता शंकरस्तपसा किल ॥ प्रजापतिश्च गायत्र्या ह्यन्याभिरभिवांछिताः ॥ ७ ॥ तपसैव हि ते प्राप्यस्तस्मात्तच्चर सुव्रते ॥ तपस्त्वं हि महच्चोग्रं सर्ववांछितदायकम् ॥ ८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ सागरांतं समासाद्य लक्ष्मीः परपुरंजय ॥ चचार विपुलं कालं तपः परमदुश्चरम् ॥ ॥ ९ ॥ स्थाणुवत्संस्थिता साऽभूद्दिव्यं वर्षसहस्रकम् ॥ तत इंद्रादयो देवाः शंखचक्रगदाधराः ॥१०॥ भूत्वा जग्मुस्तदर्थं ते सा तु पृष्टवती सुरान् ॥ विश्वरूपं वैष्णवं यत्तद्दर्शयत मा चिरम् ॥ ११ ॥ विलक्षा व्रीडिता देवा गत्वा नारायणं तदा ॥ अब्रुवन्वैश्वरूपं नो शक्ता दर्शयितुं वयम् ॥ १२ ॥ ततो ययेष्टं ते जग्मुः स च विष्णुरचिंतयत् ॥ उग्ररूपा स्थिता देवी देहं दहति भार्गवी ॥ १३ ॥ तां तस्मात्तत्र गत्वाऽहं वरं दत्त्वा तु वाञ्छितम् ॥ पुनस्तपः करिष्यामि दर्शयिष्यामि वा पुनः ॥ वैष्णवं विश्वरूपं यद्दुर्दृश्यं देवदानवैः ॥ १४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गत्वा हृषीकेशः सागरांतस्थितां श्रियम् ॥ प्राह तुष्टोऽस्मि ते देवि वरं वृणु यथेप्सितम् ॥ १५ ॥ ॥ श्रीरुवाच ॥ ॥ यदि तुष्टोऽसि मे देव प्रपन्नाया जनार्दन ॥ तदा दर्शय यद्दृष्टमप्सरोभिस्तवाऽनघ ॥ १६ ॥ विश्वरूपमनंतं च भूतभावन केशव ॥ गंधमादनमासाद्य कृतं यच्च तपस्त्वया ॥ १७ ॥ तद्ददस्व विभो विष्णो न मिथ्या यदि केशव ॥ श्रद्दधामि न चैवाऽहं रूपस्यांऽस्य कथंचन ॥१८॥ बहुभिर्यक्षरक्षोभिर्मायाचारिप्रचारिभिः ॥ छंदिता मम जानद्भिर्भावमंतर्गतं हरौ ॥ १९ ॥ भूत्वा विष्णुस्वरूपास्ते चक्रिणश्च चतुर्भुजाः ॥ सुव्रीडिता गताः सर्वे विश्वरूपोसहा यतः ॥ २० ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नारायणोऽथ भगवान्छंखचक्रगदाधृतम् ॥ तया तथोक्तस्तद्रूपं मुक्त्वा वै सुरपूजितम् ॥ २१ ॥ रूपं परं यथोक्तं वै विश्वरूपमदर्शत् ॥ दर्शयित्वा वचः प्राह पंचरात्रविधानतः ॥ २२ ॥ योऽर्चयिष्यति मां नित्यं स पूज्यः स च पूजितः ॥ धनधान्यसमायुक्तः सर्व भोगसमन्वितः ॥ २३ ॥ मूलं हि सर्वधर्माणां ब्रह्मचर्यं परं तपः ॥ तेनाहं तत्र स्थास्यामि मूलश्रीपतिसंज्ञितः ॥ २४ ॥ मूलश्रीः प्रोच्यते ब्राह्मी ब्रह्मचर्यस्वरूपिणी ॥ सर्वयोगमयी पुण्या सर्वपापहरी शुभा ॥ २५ ॥ पतिस्तस्याः प्रभुरहं वरदः प्राणिनां प्रिये ॥ रेवा जले नरः स्नात्वा योऽर्चयेन्मां यतव्रतः ॥ २६ ॥ मूलश्रीपतिनामानं वाञ्छितं प्राप्नुयात्फलम् ॥ दानानि तत्र यो दद्या न्महादानानि च प्रिये ॥ २७ ॥ सहस्रगुणितं पुण्यमन्यस्थानादवाप्यते ॥ दृष्टं त्वया तत्र देशे सम्यक्चैवावधारितम् ॥ तद चिंत्य परान्कामानाप्स्यसि त्वं न संशयः ॥ २८ ॥ वरं वृणीष्व देवेशि वाञ्छितं दुर्लभं सुरैः ॥ दुर्गसंसारकांतारपतितैः परमेश्वरि ॥ २९ ॥ ॥ श्रीरुवाच ॥ ॥ नारायण जगद्धातर्नारायण जगत्पते ॥ नारायण परब्रह्म नारायणपरायण ॥ ३० ॥ प्रसीद पाहि मां भक्त्या सम्यक्सर्गे नियोजय ॥ प्रियो ह्यसि प्रियाऽहं ते यथा स्यां तत्तथा कुरु ॥ ३१ ॥ गृहं धर्मार्थकामानां कारणं देव संमतम् ॥ तदा स्थायाऽश्रमं पुण्यं मां श्रेयसि नियोजय ॥ ३२ ॥ ॥ नारायण उवाच ॥ ॥ नारायणगिरा देवि विज्ञप्तोऽस्मि यतस्त्वया ॥ नारायणगिरिर्नाम तेन मेऽत्र भविष्यति ॥ ३३ ॥ नारायणस्मृतौ याति दुरितं जन्मकोटिजम् ॥ यस्माद्विरति तस्माच्च गिरिरित्येव शब्दितम् ॥ ३४ ॥ तस्मात्सर्वाश्रयो देवि गिरिः पर्वतराड् भवेत् ॥ सुरासुरमनुष्याणां यथाहमपि चाऽऽश्रयः ॥ ३५ ॥ य एतत्पूजयिष्यंति मंडलस्थं परं मम ॥ नारायण गिरिर्नाम देवरूपं शुभेक्षणे ॥ ३६ ॥ ते दिव्यज्ञानसंपन्ना दिव्यदेहविचेष्टिताः ॥ दिव्यं लोकमवाप्स्यंति दिव्यभोगसमन्विताः ॥ ३७ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तयोरेवं संवदतोर्देवा इंद्रपुरोगमाः ॥ समागता वनोद्देशं सागरांते महर्षयः ॥ ३८ ॥ ततो भृगुं देवराजो नारायणविचिंतितम् ॥ वत्रे ज्ञात्वा तु तत्कन्यां धर्मात्मा स ददौ च ताम् ॥ ३९ ॥ धर्मोऽपि विधिवद्वत्स विवाहं समकारयत् ॥ देवदेवस्य राजर्षे देवतार्थे समाहितः ॥ ४० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्मो विवाहमकरोद्विधिवद्यत्त्वयोदितम् ॥ को विधिस्तत्र का दत्ता दक्षिणा भृगुणाऽपि च ॥ ॥ ४१ ॥ विवाहयज्ञे समभूत्कश्यपग्रहणे च कः ॥ ऋत्विजः के सदस्याश्च तस्यांसन्द्विजसत्तम ॥ ४२ ॥ किं तस्याऽवभृथं त्वासीत्तत्सर्वं वद विस्तरात् ॥ त्वद्वाक्यामृतपानेन तृप्तिर्मम न विद्यते ॥ ४३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ नारायणविवाहस्य यज्ञस्य च युधिष्ठिर ॥ तपसस्तस्य देवस्य सम्यगाचरणस्य च ॥ ४४ ॥ वक्तुं समर्थो न गुणान्ब्रह्माऽपि परमेश्वरः ॥ तथाप्युद्देशतो वक्ष्मि शृणु भूत्वा समाहितः ॥ ४५ ॥ ब्रह्मा सप्तर्षयस्तत्र कृत्युवग्रहणे रताः ॥ अग्नीञ्जुहुविरे राजन्वेदिर्धात्री ससागरा ॥ ४६ ॥ ददुः समुद्रा रत्नानि ब्रह्मर्षिभ्यो नृपोत्तम ॥ धनदोऽपि ददौ वित्तं सर्वब्राह्मणवाञ्छितम् ॥ ४७ ॥ विश्वकर्माऽपि देवानां ब्रह्मर्षीणां परंतप ॥ वेश्मानि सुविचित्राणि सर्वरत्नमयानि च ॥ ४८ ॥ कृत्वा प्रदर्शयामास देवेंद्राय यशस्विने ॥ शतक्रतुस्ततो विप्रान्कापिष्ठलपुरोगमान् ॥ ४९ ॥ शौनकादींश्च पप्रच्छ बाष्कलाञ्छागलानपि ॥ आत्रेयानपि राजेंद्र शृण्वन्नमिवाच्छितम् ॥ ५० ॥ दृष्ट्वा ते चित्ररत्नानि प्राहुः सर्वेश्वरेश्वरम् ॥ देवानां च ऋषीणां च संगमोऽयं सुपुण्यकृत् ॥ ५१ ॥ अस्मिन्पुण्ये सुरेशान वस्तुं वाञ्छामहे सदा ॥ शतक्रतुः प्राह पुनर्वासो वोऽत्र भविष्यति ॥ सत्यधर्मरता यूयं यावत्कालं भविष्यथ ॥ ५२ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पृष्टं यद्राजशार्दूल के मखे होत्रिणोऽभवन् ॥ तत्प्रोच्यमानमधुना शृणु भूत्वा समाहितः ॥ ५३ ॥ सनत्कुमारप्रमुखाः सदस्यास्तस्य चाऽभवन् ॥ औद्गात्रमत्र्यंगिरसौ मरीचिश्च चकार ह ॥ ५४ ॥ हौत्रं धर्मवशिष्ठौ च ब्रह्मत्वं सनको मुनिः ॥ षट्त्रिंशद्ग्रामसाहस्रं प्रादात्तेभ्यः शतक्रतुः ॥ ५५ ॥ लक्ष्मीर्भर्त्रा च संयुक्तामवत्तत्कृतवान्प्रभुः ॥ ब्रह्मणो जुह्वतो वह्निं यावदेशस्थितैः सुरैः ॥ ५६ ॥ दृष्टं ललाटं देशोऽसौ ललाट इति संज्ञितः ॥ स देशः श्रीपतेः क्षेत्रपुण्यं देवर्षिसेवितम् ॥ ५७ ॥ सर्वाश्चर्यमयं दिव्यं दिव्यसिद्धिसमन्वितम् ॥ ब्राह्मणानां ततः पंक्तिं निवेशयितुमुद्यता ॥ ५८ ॥ लक्ष्मीः श्रीपतिनामानमाह देवं वचस्तदा ॥ ॥ श्रीरुवाच ॥ ॥ य एते ब्राह्मणाः शिष्या भृग्वादीनां समागताः ॥ ५९ ॥ तान्निवेशयितुमिच्छामि त्वत्प्रसादादधोक्षज ॥ मरीच्यादय सुरेशेन स्थापिता गरुडध्वज ॥ ६० ॥ नैष्ठिकव्रतिनो विप्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहवोऽत्र यतव्रताः ॥ प्राजापत्ये व्रते ब्राह्मे केचिदत्र व्यवस्थिताः ॥ तानहं स्थापयिष्यामि त्वत्प्रसादादधोक्षज ॥ ६१ ॥ ॥ मार्कंडेय उवाच ॥
ततः कौतूहलधरो भगवान्वृषभध्वजः ॥ पप्रच्छ व्रतिनः सर्वान्वृत्तिभेदे व्यवस्थितान् ॥ ६२ ॥ नारदोऽपि महादेवमुपेत्य च सतीपतिम् ॥ प्राह
कृष्णाजिनधरो नैष्ठिका ब्राह्मणा ह्यमी ॥ ६३ ॥ अमी कार्याः सुवस्त्रेण छन्नगुह्या द्विजोत्तमाः ॥ प्राजापत्याश्चतुर्विंशसहस्राणि नरेश्वर ॥ ६४ ॥
ब्रह्मचर्यव्रतस्थानां व्रतब्रह्मविचारिणाम् ॥ द्वादशैषां सहस्राणि संति वै वृषभध्वज ॥ ६५ ॥ नारदस्य वचः श्रुत्वा देवा देवर्षयोऽपि
च ॥ साधुसाध्वित्यमन्यंत नोचुः केचन किंचन ॥ ६६ ॥ समाह्वयत्ततो लक्ष्मीस्तान्विप्रान्भक्तिसंयुता ॥ उवाच चरणान्गृह्य
प्रसादः क्रियतां मयि ॥ ६७ ॥ षट्त्रिंशच्च सहस्राणि वेश्मनामत्र संस्थितिः ॥ विश्वकर्मकृतानां तु तेषु तिष्ठंतु वोऽखिलाः ॥ ६८ ॥
ते तथेति प्रतिज्ञाय स्थिताः संप्रीतमानसाः ॥ धनधान्यसमृद्धाश्च वाञ्छितप्राप्तिलक्षणाः ॥ सर्वकामसमृद्धाश्च ह्यनारंभेषु कर्मणाम् ॥ ६९ ॥
इति संस्थाप्य तान्विप्रान्सा स्थिता पर्यपालयत् ॥ चतुर्द्वा तु स्थितो विष्णुः श्रिया देव्याः प्रिये रतः ॥ ७० ॥ एवं वैवाहिकमखे
निवृत्ते ऋषयस्तु तम् ॥ ऊचुश्चावभृथस्नानं कुरु कुर्मो जनार्दन ॥ ७१ ॥ इति श्रुत्वा तु वचनं श्रीपतिः पादपंकजात् ॥ मुमोच जाह्नवीतोयं
रेवामध्यगमं शुचि ॥ ७२ ॥ हरेः पादोदकं दृष्ट्वा निःसृतं मुनयस्तु ते ॥ विस्मिताः समपद्यंत जानंतस्तस्य गौरवम् ॥ ७३ ॥ रुद्रेण सहिताः
सर्वे देवता ऋषयस्तथा ॥ संकथा विस्मिताश्चक्रुर्विधुन्वंतः शिरांसि च ॥ ७४ ॥ ॥ ऋषय ऊचुः ॥ ॥ ब्रूहि शंभो किमत्रायं अकस्माद्वारि
संभवः ॥ विष्णोः पादांबुजोत्थश्च सम्मोहकरणः परः ॥ ७५ ॥ ॥ ईश्वर उवाच ॥ ॥ पादोदकमिदं विष्णोरहं जानामि वै सुराः ॥ दशाश्व
मेधावभृथैः स्नानमत्रातिरिच्यते ॥ ७६ ॥ युष्माभिः श्रीपतिः पूज्यः स्नानं चावभृथं कृतः ॥ भविष्यतीति तेनाशु इदं वोऽर्थे विनिर्मितम् ॥ ७७ ॥
स्नात्वात्र त्रिदशेशाना यत्फलं संप्रपद्यते ॥ वक्तुं न केनचिद्याति ततः किमुत्तरं वचः ॥ ७८ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एवमुक्ता तु ते सर्वे स्नानं
कृत्वा यथागतम् ॥ जग्मुर्देवा महेशानपुरोगा भरतर्षभ ॥ ७९ ॥ ब्राह्मणाश्च ततः सर्वे स्ववेश्मान्येव भेजिरे ॥ देवतीर्थे महाराज सर्वपापप्रणाश
ने ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे श्रीपतिविवाहवर्णनंनाम चतुर्नवत्युत्तरशततमोऽ
ध्यायः ॥ १९४ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देवतीर्थे तु किन्नाम माहात्म्यं समुदाहृतम् ॥ फलं किं स्नानदानादिकारिणां जायते मुने ॥ १ ॥
॥ ॥ मार्कंडेय उवाच ॥ ॥ पृथिव्यां यानि तीर्थानि देवैर्मुनिगणैरपि ॥ सेवितानि महाबाहो तानि ध्यातानि विष्णुना ॥ २ ॥ समागतान्येकतां
वै तत्र तीर्थे युधिष्ठिर ॥ तत्तीर्थं वैष्णवं पुण्यं देवतीर्थमिति श्रुतम् ॥ ३ ॥ कुरुक्षेत्रं भुवि परमंतरिक्षे त्रिपुष्करम् ॥ पुरुषोत्तमं दिवि परं देवतीर्थं परा
त्परम् ॥४॥ देवतीर्थसमं नास्ति तीर्थमत्र परत्र च ॥ यत्प्राप्य मनुजस्तप्येन्न कदाचिद्युधिष्ठिर ॥५॥ देवैरुक्तानि तीर्थानि योऽत्र स्नानं समाचरेत् ॥
देवतीर्थे स सर्वत्र स्नातो भवति मानवः ॥ ६ ॥ एवमस्त्विति तैरुक्ता देवा ऋषिगणा अपि ॥ संतुष्टाः श्रीशमभ्यर्च्य स्वंस्वं स्थानं तु भेजिरे ॥७॥
सूर्यग्रहेऽत्र वै क्षेत्रे स्नात्वा यत्फलमश्नुते ॥ स्नात्वा श्रीशं समभ्यर्च्य समुपोष्य यथाविधि ॥ ८ ॥ यद्ददाति हिरण्यानि दानानि विधिवन्नृप ॥
तदनंतफलं सर्वं सूर्यस्य ग्रहणे यथा ॥ ९ ॥ भूमिदानं धेनुदानं स्वर्णदानमनंतकम् ॥ वस्त्रदानमनंतं च फलं प्राह शतक्रतुः ॥ १० ॥ सोमो वै
वस्त्रदानेन मौक्तिकानां च भार्गवः ॥ सुवर्णस्य रविर्दानं धर्मराजो ह्यनंतकम् ॥ ११ ॥ देवतीर्थे तु यद्दानं श्रद्धायुक्तेन दीयते ॥ तदनंतफलं प्राह
बृहस्पतिरुदारधीः ॥ १२ ॥ देवतीर्थं भृगुक्षेत्रे सवंतीर्थाधिकं नृप ॥ देवतीर्थे नरः स्नात्वा श्रीपतिं योऽनुपश्यति ॥ १३ ॥ सोमग्रहे कुलशतं
स समुद्धृत्य नाकभाक् ॥ दानानि द्विजमुख्येभ्यो देवतीर्थे नराधिप ॥ १४ ॥ यैर्दत्तानि नरैर्भोगभागिनः प्रेत्य चेह ते ॥ देवतीर्थे विप्रभोज्यं
हरिमुद्दिश्य यश्चरेत् ॥ १५ ॥ स सर्वाह्लादमाप्नोति स्वर्गलोके युधिष्ठिर ॥ देवतीर्थे नरो नारी स्नात्वा नियतमानसौ ॥ १६ ॥ उपोष्यैकादशीं
भक्त्या पूजयेद्यः श्रियः पतिम् ॥ रात्रौ जागरणं कृत्वा घृतेनोद्द्योध्य दीपकम् ॥ १७ ॥ द्वादश्यां प्रातरुत्थाय तथा वै नर्मदाजले ॥ विप्रदां
पत्यमभ्यर्च्य विधिवत्कुरुनंदन ॥ १८ ॥ वस्त्राभरणतांबूलपुष्पधूपविलेपनैः ॥ अक्षये विष्णुलोकेऽसौ मोदते चरितव्रतः ॥ १९ ॥ यः सदैकाद
शीतिथौ स्नात्वोपोष्याऽर्चयेद्धरिम् ॥ रात्रौ जागरणं कुर्याद्विदशास्त्रविधानतः ॥ २० ॥ धर्मराजकृतां पापां न स पश्यति यातनाम् ॥ पंचरात्र
विधानेन श्रीपतिं योऽर्चयिष्यति ॥ २१ ॥ दीक्षामवाप्य विधिवद्वैष्णवीं पापनाशिनीम् ॥ स्वर्गमोक्षप्रदां पुण्यां भोगदां वित्तदामथ ॥ २२ ॥
राज्यदां वा महाभाग पुत्रदां भाग्यदामथ ॥ सुकलत्रप्रदां वापि विष्णोर्भक्तिप्रदामिति ॥ २३ ॥ तरिष्यति भवांभोधिं स नरः कुरुनंदन ॥
योऽर्चयिष्यति तत्रैव देवतीर्थे श्रियः पतिम् ॥ २४ ॥ विश्वरूपमथो सम्यङ्मूलश्रीपतिमेव वा ॥ नारायणगिरिं वाऽपि गृहे वैकादशीतिथौ ॥
॥ २५ ॥ भक्तिमाञ्छ्रद्धया युक्तः क्षीरैस्तीर्थोदकैरपि ॥ सुसूक्ष्मैरहतैर्वस्त्रैर्महाकौशेयकैर्नृप ॥ २६ ॥ विचित्रैर्नेत्रजैर्वाऽपि धूपैरगुरुचंदनैः ॥
गुग्गुलैर्घृतमिश्रैश्च नैवेद्यैर्विविधैरपि ॥ २७ ॥ पायसाद्यैर्मनुष्येंद्र पयसा वा युधिष्ठिर ॥ पिष्टदीपैः पुविमलैर्वर्द्धमानैर्मनोहरैः ॥ २८ ॥
पूजयित्वा नरो याति यथा तच्छृणु भारत ॥ शंखी चक्री गदी पद्मी भूत्वाऽसौ गरुडध्वजः ॥ २९ ॥ देवलोकानतिक्रम्य विष्णुलोकं
प्रपद्यते ॥ यस्तु वै परया भक्त्या श्रीपतेः पादपंकजम् ॥ ३० ॥ चतुर्द्वाऽधिष्ठितं पश्येच्छ्रियं त्रैलोक्यमातरम् ॥ नृत्यगीतविनोदेन मुच्यते पात
कर्धुवम् ॥ ३१ ॥ नीराजने तु देवस्य प्रातर्मध्ये दिने तथा ॥ सायं च नियतो नित्यं यः पश्येत्पूजयेद्धरिम् ॥ ३२ ॥ स तीर्त्वा ह्यापदं दुर्गां
नैवार्त्तिं समवाप्नुयात् ॥ आयुःश्री वर्द्धनं पुंसां चक्षुषामपि पूरकम् ॥ ३३ ॥ उपपापहरं चैव सदा नीराजनं हरेः ॥ तदा नीराजनाकाले यो हरेः
पठति स्तवम् ॥ ३४ ॥ स धन्यो देवदेवस्य प्रसन्ननांऽतरात्मना ॥ हरेर्नीराजनाशेषं पाणिभ्यां यः प्रयच्छति ॥ ३५ ॥ संगृह्य चक्षुषी तेन योजये
न्मार्जयन्मुखम् ॥ तिमिरादीनक्षिरोगान्नाशयेदीप्तिमन्मुखम् ॥ ३६ ॥ भवत्यशेषदुष्टानां नाशायालं नरोत्तम ॥ दीपप्रज्वलनं यस्य नित्यमग्रे
श्रियः पतेः ॥ ३७ ॥ स्नात्वा रेवाजले पुण्ये प्रदद्यादधिकं व्रती ॥ सप्तद्वीपवती तेन ससागरवनापगा ॥ ३८ ॥ प्रदक्षिणीकृता स्याद्वै धरणी शंक
रोऽब्रवीत् ॥ इदं यः पठ्यमानं तु शृणुयात्पठतेऽपि वा ॥ ३९ ॥ स्मरणं सोंऽतसमये विपाप्मा प्राप्नुयाद्धरेः ॥ इदं यशस्यमायुष्यं स्वर्ग्यं पितृगुण
भियम् ॥ ४० ॥ माहात्म्यं श्रावयेद्विप्राञ्छ्रीपतेः श्राद्धकर्मणि ॥ घृतेन मधुना तेन तर्पिताः स्युः पितामहाः ॥ ४१ ॥ इति श्रीस्कान्दे महापु
राण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे श्रीपतिमाहात्म्यवर्णनंनाम पंचनवत्युत्तरशततमोऽध्यायः ॥ १९५ ॥ ॥ छ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश हंसतीर्थमनुत्तमम् ॥ यत्र हंसस्तपस्तप्त्वा ब्रह्मवाहनतां गतः ॥ १ ॥ हंसतीर्थे नरः स्नात्वा
दानं दत्त्वा च कांचनम् ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोके स गच्छति ॥ २ ॥ हंसयुक्तेन यानेन तरुणादित्यवर्चसा ॥ सर्वकामसमृद्धेन सेव्यमानोऽ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्सरोगणैः ॥ ३ ॥ तत्र भुक्त्वा यथाकामं सर्वान्भोगान्यथेप्सितान् ॥ जातिस्मरो हि जायेत पुनर्मानुष्यमागतः ॥ ४ ॥ संन्यासेन त्यजेद्देहं मोक्ष मामोति भारत ॥ ५ ॥ एतत्ते कथितं पार्थ हंसतीर्थस्य यत्फलम् ॥ सर्वपापहरं पुण्यं सर्वदुःखविनाशनम् ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे हंसतीर्थमाहात्म्यवर्णननाम षण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ ॥ ७ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं गच्छेत्सूर्यतीर्थमनुत्तमम् ॥ मूलस्थानमिति ख्यातं पद्मजस्थापितं शुभम् ॥ १ ॥ मूलश्रीप तिना देवी प्रोक्ता स्थापय भास्करम् ॥ श्रुत्वा देवोदितं देवी स्थापयामास भास्करम् ॥ २ ॥ प्रोच्यते नर्मदातीरे मूलस्थानाख्यभास्करः ॥ ३ ॥ तत्र तीर्थे नरो यस्तु स्नात्वा नियतमानसः ॥ संतर्प्य पितृदेवांश्च पिंडेन सलिलेन च ॥ ४ ॥ मूलस्थानं ततः पश्येत्स गच्छेत्परमां गतिम् ॥ गुह्याद्गुह्यतरस्तत्र विशेषस्तु श्रुतो मया ॥ ५ ॥ समागमे मुनीनां तु शंकराच्छशिशेखरात् ॥ सदा वै शुक्लसप्तम्यां मूलमादित्यवासरः ॥ ६ ॥ तदा रेवाजलं गत्वा स्नात्वा संतर्प्य देवताः ॥ पितॄंश्च भरतश्रेष्ठ दत्त्वा दानं स्वशक्तितः ॥ ७ ॥ करवीरैस्ततो गत्वा रक्तचन्दनवारिणा ॥ संस्थाप्य भास्करं भक्त्या संपूज्य च यथाविधि ॥ ८ ॥ ततः साधुरुकैर्धूपैः कुन्दरैश्च विशेषतः ॥ धूपयेद्देवदेवेशं दीपान्वोध्य दिशो दश ॥ ९ ॥ उपोष्य जागरं कुर्याद्गीतवाद्यं विशेषतः ॥ एवं कृते महीपाल न भवेदुग्रदुःखभाक् ॥ १० ॥ सूर्यलोके वसेत्तावद्यावत्कल्पशतत्रयम् ॥ गंधर्वैरप्सरोभिश्च सेव्य मानो नृपोत्तम ॥ ११ ॥ इति श्रीस्कंदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे मूलस्थानतीर्थमाहात्म्यवर्णनं नाम सप्तनवत्युत्तरशततमोऽध्यायः ॥ १९७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल भद्रकालीतिसंगमम् ॥ शूलतीर्थमिति ख्यातं स्वयं देवेन निर्मितम् ॥ १ ॥ पञ्चायतनमध्ये तु तिष्ठते परमेश्वरः ॥ शूलपाणिर्महादेवः सर्वदैवतपूजितः ॥ २ ॥ स संगमो नृपश्रेष्ठ नित्यं देवैर्नि षेवितः ॥ दर्शनात्तस्य तीर्थस्य स्नानदानाद्विशेषतः ॥ ३ ॥ दौर्भाग्यं दुर्निमित्तं च ह्यभिशापो नृपग्रहः ॥ यदन्यदुष्कृतं कर्म नश्यते शंकरोऽब्रवीत् ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं शूलेश्वरी देवी कथं शूलेश्वरी हरः ॥ ग्रथितो नर्मदातीरे एतद्विस्तरतो वद ॥ ५ ॥ ॥ मार्क डेय उवाच ॥ ॥ बभूव ब्राह्मणः कश्चिन्मांडव्य इति विश्रुतः ॥ वृत्तिमान्सर्वधर्मज्ञः सत्ये तपसि च स्थितः ॥ ६ ॥ अशो काश्रममध्यस्थो वृक्षमूले महातपाः ॥ ऊर्द्ध्वबाहुर्महातेजास्तस्थौ मौनव्रतान्वितः ॥ ७ ॥ तस्य कालेन महता तीव्रे तपसि वर्त्ततः ॥ तमाश्रममनुप्राप्ता दस्यवो लोप्त्रहारिणः ॥ ८ ॥ अनुसर्प्यमाणा बहुभिः पुरुषैर्भरतर्षभ ॥ ते तस्यावसथे लोध्रं न्यदधुः कुरुनन्दन ॥ ९ ॥ निधाय च तदा लीनास्तत्रैवाऽऽश्रममण्डले ॥ तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम् ॥ १० ॥ आज गाम ततोऽपश्यंस्तमृषिं तस्करानुगाः ॥ तमपृच्छंस्तदा वृत्तं रक्षिणस्तं तपोधनम् ॥ ११ ॥ वद केन पथा याता दस्यवो द्विजसत्तम ॥ तेन गच्छा महे ब्रह्मन्यथा शीघ्रतरं वयम् ॥ १२ ॥ तथा तु वचनं तेषां ब्रुवतां स तपोधनः ॥ न किंचिद्वचनं राजन्नवदत्साध्वसाधु वा ॥ १३ ॥ ततस्ते राज पुरुषा विचिन्वंतस्तमाश्रमम् ॥ संयम्यैनं ततो राज्ञे सर्वान्दस्यून्यदेदयन् ॥ १४ ॥ तं राजा सहितैश्चोरैरन्वशाद्ध्यतामिति ॥ संबध्य तं च ते राजञ्छू ले प्रोतो महातपाः ॥ १५ ॥ ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा ॥ प्रतिजग्मुर्महीपाल धनान्यादाय तान्यथ ॥ १६ ॥ शूलस्थः स तु धर्मात्मा कालेन महता तदा ॥ ध्यायन्देवं त्रिलोकेशं शंकरं तमुमापतिम् ॥ १७ ॥ बहुकालं महेशानं मनसाऽऽध्याय संस्थितः ॥ निराहारोऽपि विप्रर्षि मरणं नाऽभ्यपद्यत ॥ १८ ॥ धारयामास विप्राणामृषभः स हृदा हरिम् ॥ शूलाग्रे तप्यमानेन तपस्तेन कृतं तदा ॥ १९ ॥ संतापं परमं जग्मुः श्रुत्वैतन्मुनयोऽखिलाः ॥ ते रात्रौ शकुना भूत्वा संन्यवर्त्तंत भारत ॥ २० ॥ दर्शयंतो मुनेः शक्तिं तमपृच्छन्द्विजोत्तमम् ॥ श्रोतुमिच्छाम ते ब्रह्म न्किं पापं कृतवानसि ॥ २१ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः स मुनिशार्दूलस्तानुवाच तपोधनान् ॥ दोषतः किं गमिष्यामि न हि मेऽन्यो पराध्यति ॥ २२ ॥ एवमुक्त्वा ततः सर्वानाचचक्षे ततो मुनिः ॥ मुनयश्च ततो राज्ञे द्वितीयेह्नि न्यवेदयन् ॥ २३ ॥ राजा तु तमृषिं श्रुत्वा निष्क्रांतः सह बंधुभिः ॥ प्रसादयामास तदा शूलस्थमृषिसत्तमम् ॥ २४ ॥ ॥ राजोवाच ॥ ॥ यन्मयाऽपकृतं तात तवाऽज्ञानवशाद्वहु ॥ प्रसादये त्वां तत्राऽहं न मे त्वं क्रोद्धुमर्हसि ॥ २५ ॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः ॥ कृतप्रसादं राजा तं ततः समवतारयत् ॥ २६ ॥ अवतार्यमाणस्तु मुनिः शूले मांसत्वमागते ॥ अतिसंपीडितो विप्रः शंकरं मनसाऽगमत् ॥ २७ ॥ संध्यातः शंकरस्तेन बहुकालोपवासतः ॥ प्रादुर्भूतो महादेवः शूलं तस्य तथाच्छिनत् ॥ २८ ॥ शूलमूलस्थितः शंभुस्तुष्टः प्राह पुनःपुनः ॥ ब्रूहि किं क्रियतां विप्र सत्त्वस्थानपरायण ॥ २९ ॥ अदेयमपि दास्यामि तुष्टोऽस्म्यद्योमया सह ॥ किं तु सत्यवतां लोके सिद्धिर्न स्याच्च भूयसी ॥ ३० ॥ स्वकर्मणोनुरूपं हि फलं भुंजंति जंतवः ॥ शुभेन कर्मणा भूतिर्दुःखं स्यात्पातकेन तु ॥ ३१ ॥ बहुभेदप्रभिन्नं तु मनुष्येषु विपच्यते ॥ केषां दरिद्रभावेन केषां धनविपत्तिजम् ॥ ३२ ॥ संतत्यभा वजं केषां केषां चित्तविपर्ययैः ॥ तथा दुर्वृत्तितस्तेषां फलभाविर्भवेन्नृणाम् ॥ ३३ ॥ केषांचित्पुत्रमरणे वियोगात्प्रियमित्रयोः ॥ राजचौराग्नितः केषां दुःखं स्याद्देवनिर्मितम् ॥ ३४ ॥ तच्छरीरे तु केषांचित्कर्मणा संप्रदृश्यते ॥ जराश्च विविधाः केषां दृश्यंते व्याधयस्तथा ॥ ३५ ॥ दृश्यंते चाऽभिशापाश्च पूर्वकर्मानुसंचिताः ॥ कष्टाः कष्टतरावस्था गताः केचिदनागसः ॥ ३६ ॥ पूर्वकर्मविपाकेन धर्म्मेण तपसि स्थिताः ॥ दांताः स्वदारनिरता भूरिदाः परिपूजकाः ॥ ३७ ॥ ह्रीमंतो नयसंयुक्ता अन्ये बहुगुणैर्युताः ॥ दुर्गमामापदं प्राप्य निजकर्मसमुद्भवाम् ॥ ३८ ॥ न संज्वरंति ये मर्त्या धर्मनिंदां न कुर्वते ॥ इदमेव तपो मत्वा क्षिपंति सुविचेतसः ॥ ३९ ॥ हा भ्रातर्मातः पुत्रेति कष्टेषु न वदंति ये ॥ स्मरंति मां महेशानमथवा पुष्करेक्षणम् ॥ ॥ ४० ॥ दुष्कृतं पूर्वजं भोगैः क्षुधं तदुपशाम्यति ॥ ४१ ॥ दिनानि यावंति वसेत्स कष्टे यथाकृतं चिंतयदेवमीशम् ॥ तावंति सौम्यानि कृतानि तेन भवंति विप्र श्रुतिनोदनेषा ॥ ४२ ॥ यस्मात्त्वया कष्टगतेन नित्यं स्मृतश्चाहं मनसा पूजितश्च ॥ गौरीसहायस्तेन इहाऽगतोऽस्मि ब्रूहद्य कृत्यं किं यत्तं किं तु विप्र ॥ ४३ ॥ ॥ मांडव्य उवाच ॥ ॥ तुष्टो यद्युमया सार्धं वरदो यदि शंकर ॥ तदा मे शूलसंस्थस्य संशयं परमं वद ॥ ४४ ॥ न रुजा मम काऽपि स्याच्छूलसंभोतितेऽगके ॥ अमृतस्रावि तच्छूलं प्रभावात्कस्य शंस मे ॥ ४५ ॥ ॥ श्रीशूलपाणिरुवाच ॥ ॥ शूलस्थेन त्वया विप्र मनसा चिंतितोऽस्मि यत् ॥ अनयानां निहंताऽहं दुःखानां विनिवर्हणः ॥ ४६ ॥ ध्यातमात्रो ह्यऽहं विप्र पाताले वाऽपि संस्थितः ॥ शूलमूले त्वहं शंभुरूपेणी स्वयं स्थिता ॥ जगन्मातांबिका देवी त्वांऽमृतेनान्वपूरयत् ॥ ४७ ॥ ॥ मांडव्य उवाच ॥ ॥ पूर्वमेव स्थितो यस्मा च्छूलं व्याप्योमया सह ॥ प्रसादप्रवणो मह्यमिदानीं चानया सह ॥ ४८ ॥ यस्याः संस्मरणादेव दौर्भाग्यं प्रलयं व्रजेत् ॥ न दौर्भाग्यात्परं लोके दुःखाद्दुःखतरं किल ॥ ४९ ॥ किलैवं श्रूयते गाथा पुराणेषु सुरोत्तम ॥ त्रैलोक्यं दहतस्तुभ्यं सौभा ग्यमेकतां गतम् ॥ ५० ॥ विष्णोर्वक्षःस्थलं प्राप्य तस्थितं चेति नः श्रुतम् ॥ पीतं तद्वक्षसस्तस्तदक्षेण परमेष्ठिना ॥ ५१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तस्मात्सतीति संजज्ञ इयमिंदीवरेक्षणा ॥ यजतस्तस्य देवेश तव मानावखंडनात् ॥ ५२ ॥ जुहावाग्नौ तु सा देवी ह्यात्मानं प्राणसंज्ञिकम् ॥ आत्मानं भस्मसात्कृत्वा प्रालेयाद्रेस्ततः सुता ॥ ५३ ॥ मेनकायां प्रभो जाता सांप्रतं या ह्युमाभिधा ॥ अनादिनिधना देवी ह्यप्रतर्क्या सुरेश्वर ॥ ५४ ॥ यदि तुष्टोसि देवेश ह्युमा मे वरदा यदि ॥ उभावप्यत्र वै स्थाने स्थितौ शूलाग्रमूलयोः ॥ ५५ ॥ अवतारो यत्र तत्र संस्थितिं वै ततः कुरु ॥ ५६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तेनैवमुक्ते सहसा कृत्वा भूमंडलं द्विधा ॥ निःसृतौ शूलमूलाग्रा लिंगार्चाप्रतिरूपिणौ ॥ ५७ ॥ प्रद्योतयद्दिशः सर्वा लिंगं मूले प्रदृश्यते ॥ वामतः प्रतिमा देवी तदा शूलेश्वरी स्थिता ॥ ५८ ॥ विलोभयन्ती च जगद्भाति पूरयती दिशः ॥ दृष्ट्वा कृतांजलिपुटः स्तुतिं चक्रे द्विजोत्तमः ॥ ५९ ॥ ॥ मांडव्य उवाच ॥ ॥ त्वमस्य जगतो माता जगत्सौभाग्यदेवता ॥ न त्वया रहितं किंचिद्ब्रह्मांडेऽस्ति वरानने ॥ ६० ॥ प्रसादं कुरु धर्मज्ञे मम त्वाज्ञप्तुमर्हसि ॥ ईदृशेनैव रूपेण केषु स्थानेषु तिष्ठसि ॥ प्रसादप्रवणा भूत्वा वद तानि महेश्वरि ॥ ६१ ॥ ॥ श्रीदेव्युवाच ॥ ॥ सर्वगा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि ॥ सर्वलोकेषु यत्किंचिद्विहितं न मया विना ॥ ६२ ॥ तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः ॥ स्मर्त्तव्या भूतिकामेन तानि वक्ष्यामि तत्त्वतः ॥ ६३ ॥ वाराणस्यां विशालाक्षी नैमिषे लिंगधारिणी ॥ प्रयागे ललिता देवी कामुका गन्धमादने ॥ ६४ ॥ मानसे कुमुदानाम विश्वकाया तथाऽपरे ॥ गोमंते गोमती नाम मंदरे कामचारिणी ॥ ६५ ॥ मदोत्कटा चैत्ररथे हयन्ती हास्तिने पुरे ॥ कान्यकुब्जे स्थिता गौरी रंभा ह्यमलपर्वते ॥ ६६ ॥ एकाम्रके कीर्त्तिमती विश्वां विश्वेश्वरे विदुः ॥ पुष्करे पुरुहूता च केदारे मार्गदायिनी ॥ ६७ ॥ नंदा हिमवतः प्रस्थे गोकर्णे भद्रकर्णिका ॥ स्थानेश्वरे भवानी तु बिल्वके बिल्वपत्रिका ॥ ६८ ॥ श्रीशैले माधवीनाम भद्रे भद्रेश्वरीति च ॥ जया वराहशैले तु कमला कमलालये ॥ ६९ ॥ रुद्रकोट्यां तु कल्याणी काली कालंजरे तथा ॥ महालिंगे तु कपिला माकोटे मुकुटेश्वरी ॥ ७० ॥ शालिग्रामे महादेवी शिवलिंगे जलप्रिया ॥ मायापुर्यां कुमारी तु संताने ललिता तथा ॥ ७१ ॥ उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ॥ गयायां विमलानाम मंगला पुरुषोत्तमे ॥ ७२ ॥ विपाशायाममोघाक्षी पाटला पुंड्रवर्धने ॥ नारायणी सुपार्श्वे तु त्रिकूटे भद्रसुन्दरी ॥ ७३ ॥ विपुले विपुलानाम कल्याणी मलयाचले ॥ कोटवी कोटितीर्थेषु सुगन्धा गंधमादने ॥ ७४ ॥ गोदाश्रमे त्रिसंध्या तु गंगाद्वारे रतिप्रिया ॥ शिवचंडे सभानंदा नंदिनी देविकातटे ॥ ७५ ॥ रुक्मिणी द्वारवत्यां तु राधा वृंदावने वने ॥ देवकी मथुरायां तु पाताले परमेश्वरी ॥ ७६ ॥ चित्रकूटे तथा सीता विंध्ये विंध्यनिवासिनी ॥ सह्याद्रावेकवीरा तु हरिश्चंद्रे तु चंडिका ॥ ७७ ॥ रमणा रामतीर्थे तु यमुनायां मृगावती ॥ करवीरे महालक्ष्मी रूपादेवी विनायके ॥ ७८ ॥ आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥ अभयेत्युष्णतीर्थे तु मृगी वा विंध्यकंदरे ॥ ७९ ॥ मांडव्ये मांडुकीनाम स्वाहा माहेश्वरे पुरे ॥ छागलिंगे प्रचंडा तु चंडिकाऽमरकण्टके ॥ ८० ॥ सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥ वेदमाता सरस्वत्यां पारा पारातटे मुने ॥ ८१ ॥ महालये महाभागा पयोष्ण्यां पिंगलेश्वरी ॥ सिंहिका कृतशौचे तु कार्त्तिके चैव शांकरी ॥ ८२ ॥ उत्पलावर्तके लोला सुभद्रा शोणसंगमे ॥ मता सिद्धवटे लक्ष्मीस्तरंगा भारताश्रमे ॥ ८३ ॥ जालंधरे विश्वमुखी तारा किष्किंधपर्वते ॥ देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ॥ ८४ ॥ भीमादेवी हिमाद्रौ तु पुष्टिर्वस्त्रेश्वरे तथा ॥ कपालमोचने शुद्धिर्माता कायावरोहणे ॥ ८५ ॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडारके तथा ॥ काला तु चंद्रभागायामच्छोदे शक्तिधारिणी ॥ ८६ ॥ वेणायाममृतानाम बदर्यामुर्वशी तथा ॥ ओषधी चोत्तरकुरौ कुशद्वीपे कुशोदका ॥ ८७ ॥ मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥ अश्वत्थे वंदिनीका तु निधिर्वैश्रवणालये ॥ ८८ ॥ गायत्री वेदवदने पार्वती शिवसन्निधौ ॥ देवलोके तथेंद्राणी ब्रह्मास्ये तु सरस्वती ॥ ८९ ॥ सूर्यबिम्बे प्रभानाम मातॄणां वैष्णवी मता ॥ अरुंधती सतीनां तु रामासु च तिलोत्तमा ॥ ९० ॥ चित्रे ब्रह्मकलानाम शक्तिः सर्वशरीरिणाम् ॥ शूलेश्वरी भृगुक्षेत्रे भृगौ सौभाग्यसुन्दरी ॥ ९१ ॥ एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम् ॥ अष्टोत्तरं च तीर्थानां शतमेतदुदाहृतम् ॥ ९२ ॥ इदमेव परं विप्र सर्वेषां तु भविष्यति ॥ पठत्यष्टोत्तरशतं नाम्नां यः शिवसन्निधौ ॥ ९३ ॥ स मुच्यते नरः पापैः प्राप्नोति स्त्रियमीप्सिताम् ॥ स्नात्वा नारी तृतीयायां मां समभ्यर्च्य भक्तितः ॥ ९४ ॥ न सा स्याद्दुःखिनी जातु मत्प्रभावान्नरोत्तम ॥ नित्यं मद्दर्शने नारी नियता या भविष्यति ॥ ९५ ॥ पतिपुत्रकृतं दुःखं न सा प्राप्स्यति कर्हिचित् ॥ मदालये तु या नारी तुलापुरुषसंज्ञितम् ॥ ९६ ॥ संपूज्य मंडयेद्देवांल्लोकपालांश्च साग्निकान् ॥ सपत्नीकान्द्विजान्पूज्य वासोभिर्भूषणैस्तथा ॥ ९७ ॥ भूतेभ्यस्तु बलिं दद्यादृत्विग्भिः सह देशिकः ॥ ततः प्रदक्षिणीकृत्य तुलामित्यभिमंत्रयेत् ॥ ९८ ॥ शुचिरक्तांबरो वा स्याद्गृहीत्वा कुसुमांजलिम् ॥ नमस्ते सर्वदेवानां शक्तिस्त्वं परमा स्थिता ॥ ९९ ॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता ॥ १०० ॥ कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन्नुमामुखम् ॥ ततो परे तुलाभागे न्यसेयुर्द्विजपुंगवाः ॥ १ ॥ द्रव्यमष्टविधं तत्र ह्यात्मवित्तानुसारतः ॥ मदंशभूतं विप्रेंद्र पृथिव्यां यदधिष्ठितम् ॥ २ ॥ सुवर्णं चैव निष्पावांस्तथा राजिकुसुम्भकम् ॥ तृणराजेंदुलवणं कुंकुमं तु तथाष्टमम् ॥ ३ ॥ एषामेकतमं कुर्याद्यथा वित्तानुसारतः ॥ साम्यादभ्यधिकं यावत्कांचनादि भवेद्द्विज ॥ ४ ॥ तावत्तिष्ठेन्नरो नारी पश्चादिदमुदीरयेत् ॥ नमो नमस्ते ललिते तुलापुरुषसंज्ञिते ॥ ५ ॥ त्वमुमे तारयस्वास्मानस्मात्संसारकर्दमात् ॥ ततोऽवतीर्य गुरवे पूर्वमर्द्धं निवेदयेत् ॥ ६ ॥ ऋत्विग्भ्योऽपरमर्द्धं च दद्यादुदकपूर्वकम् ॥ तेभ्यो लब्धा ततोऽनुज्ञां दद्यादन्येषु चार्थिषु ॥ ७ ॥ सपत्नीकं गुरुं रक्तवाससी परिधापयेत् ॥ अन्यांश्च ऋत्विजः शक्त्या गुरुं केयूरकंकणैः ॥ ८ ॥ शुक्लां गां क्षीरिणीं दद्याल्ललिता प्रीयतामिति ॥ अनेन विधिना या तु कुर्यान्नारी ममालये ॥ ९ ॥ मत्तुल्या सा भवेद्राज्ञां तेजसा श्रीरिवामला ॥ सावित्रीव च सौंदर्य्ये जन्मानि दश पंच च ॥ ११० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं निशम्य वचनं गौर्या द्विजवरोत्तमः ॥ नमस्कृत्य जगामाऽऽशु धर्मराज निवेशनम् ॥ ११ ॥ तदा प्रभृति तत्तीर्थं ख्यातं शूलेश्वरीति च ॥ तस्मिंस्तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ १२ ॥ ब्राह्मणानन्नवासोभिः पिंडैः पितृपितामहान् ॥ भक्तोपहारैर्देवेशमुमया सह शंकरम् ॥ १३ ॥ धूपगुग्गुलदानैश्च दीपदानैः सुबोधितैः ॥ सर्वपापविनिर्मुक्तः स गच्छेच्छिवसन्निधिम् ॥ १४ ॥ तस्मिंस्तीर्थे तु यः कश्चिदभियुक्तो नरेश्वर ॥ अभिशापी तथा स्नातस्त्रिदिनं मुच्यते नरः ॥ १५ ॥ कृष्णपक्षे चतुर्दश्यां रात्रौ जागर्त्ति यो नरः ॥ उपवासपरः शुद्धः शिवं संपूजयेन्नरः ॥ प्रमुच्य पापसंमोहं रुद्रलोकं स गच्छति ॥ १६ ॥ त्रिनेत्रश्च चतुर्बाहुः साक्षाद्रुद्र इवाऽपरः ॥ क्रीडते देवकन्याभिर्यावच्चंद्रार्कतारकम् ॥ १७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे शूलेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टनवत्युत्तरशततमोऽध्यायः ॥ १९८ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं राजन्नाश्विनं तीर्थमुत्तमम् ॥ कामिकं सर्वतीर्थानां प्राणिनां सिद्धिदायकम् ॥ १ ॥ तत्र तीर्थेऽश्विनौ देवौ सुरूपौ भिषजां वरौ ॥ तपः कृत्वा सुविपुलं संजातौ यज्ञ

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भागिनौ ॥ २ ॥ सम्मतौ सर्वदेवानामादित्यतनयावुभौ ॥ नासत्यौ सत्त्वसंपन्नौ सर्वदुःखप्रशमत्तमौ ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आदित्यस्य सुतौ तात नासत्यौ येन हेतुना ॥ संजातौ श्रोतुमिच्छामि निर्णयं परमं द्विज ॥ ४ ॥ ॥ मार्कंडेय उवाच ॥ ॥ पुराणे भास्करे तात एतद्विस्तरतो मया ॥ संश्रुतं देवदेवस्य मार्त्तंडस्य मदात्मनः ॥ ५ ॥ तत्ते संक्षेपतः सर्वं भक्तियुक्तस्य भारत ॥ कथयामि न संदेहो वृद्धभावेन कर्शितः ॥ ६ ॥ अतितेजो रवेर्दृष्ट्वा राज्ञी देवी नरोत्तम ॥ चचार मेरुकांतारे वडवा तप उल्बणम् ॥ ७ ॥ ततः कतिपयाऽहस्य कालस्य भग वान्रविः ॥ दृष्ट्वा तु रूपमुत्सृज्य परमं तेज उज्ज्वलम् ॥ ८ ॥ मनोभववशीभूतो हयो भूत्वा लघुक्रमः ॥ विस्फुरंती यथाप्राणं धावमाना इतस्ततः ॥ ॥ ९ ॥ देषमाणः स्वरेणाऽसौ मैथुनायोपचक्रमे ॥ सम्मुखी तु ततो देवी निवृत्ता लघुविक्रमा ॥ १० ॥ यथा तथा नासिकायां प्रविष्टं बीजमुत्तमम् ॥ ततो नासागते बीजे संजातो गर्भ उत्तमः ॥ ११ ॥ जातौ यतः सुतौ पार्थ नासत्यौ विश्रुतौ ततः ॥ सुसमौ सुविभक्तांगौ बिंबाद्बिंबमिवोद्धतौ ॥ १२ ॥ अधिकौ सर्वदेवानां रूपैश्वर्य्यसमन्वितौ ॥ नर्मदातटमाश्रित्य भृगुकच्छे गतावुभौ ॥ परां सिद्धिमनुप्राप्तौ तपः कृत्वा सुदुश्चरम् ॥ ॥ १३ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ सुरूपः सुभगः पार्थ जायते यत्र तत्र च ॥ १४ ॥ इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे आश्विनतीर्थमाहात्म्यवर्णनंनामैकोनद्विशततमोऽध्यायः ॥ १९९ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं पार्थ सावित्रीतीर्थमुत्तमम् ॥ यत्र सिद्धा महाभागा सावित्री वेदमातृका ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सावित्री का द्विजश्रेष्ठ कथं वाऽऽराध्यते बुधैः॥ प्रसन्ना वा वरं कं च ददाति कथयस्व मे ॥२॥ श्रीमार्कंडेय उवाच ॥ पद्मा पद्मासनस्थेनाधिष्ठिता पद्मयोगिनी ॥ सावित्रतेजःसदृशी सावित्री तेन चोच्यते ॥ ३ ॥ पद्मानना पद्मवर्णा पद्मपत्रनिभेक्षणा ॥ ध्यातव्या ब्राह्मणैर्नित्यं क्षत्रवैश्यैर्यथाविधि ॥ ४ ॥ ब्रह्महत्याभयात्सा हि न तु शूद्रैः कदाचन ॥ उच्चारणाद्धारणाद्वा नरके पतति ध्रुवम् ॥ ५ ॥ वेदोच्चारणमात्रेण क्षत्रियैर्द्धर्मपालकैः ॥ जिह्वाच्छेदोऽस्य कर्त्तव्यः शूद्रस्येति विनिश्चयः ॥ ६ ॥ बालां बालेंदुसदृशीं रक्तवस्त्रानुलेपना ॥ उषःकाले तु ध्यातव्या संध्या संधान उत्तमे ॥ ७ ॥ उत्तुंगपीवरकुचा सुमुखी शुभदर्शना ॥ सर्वाभरणसंपन्ना श्वेतमाल्यानुलेपना ॥ ८ ॥ श्वेतवस्त्रपरिच्छन्ना श्वेतयज्ञोपवीतिनी ॥ मध्याह्नसंध्या ध्यातव्या तरुणा मुक्तिमुक्तिदा ॥ ९ ॥ प्रदोषे तु पुनः पार्थ श्वेता पांडुरमूर्द्धजा ॥ स्मृता तु दुर्गकांतारे मातृवत्परिरक्षति ॥ ॥ १० ॥ विशेषेण तु राजेंद्र सावित्रीतीर्थमुत्तमम् ॥ स्नात्वाऽऽचम्य विधानेन मनोवाक्कायकर्मभिः ॥ ११ ॥ प्राणायमैर्दहेद्दोषान्सप्तजन्मार्जितान्बहून् ॥ आपोहिष्ठेति मन्त्रेण प्रोक्षयेदात्मनस्तनुम् ॥ १२ ॥ नवषट् च तथा तिस्रस्तत्र तीर्थे नृपोत्तम ॥ आपोहिष्ठेति त्रिरावृत्त्य प्रतिग्राहैर्न लिप्यते ॥ १३ ॥ अघमर्षणं त्र्यृचं तोये यथावेदमथाऽपि वा ॥ उपपापैर्न लिप्येत पद्मपत्रमिवांभसा ॥ १४ ॥ त्र्यांपं हि कुरुते विप्र उल्लेखत्रयमाचरेत् ॥ चतुर्थं क्रारयेद्यस्तु ब्रह्महत्यां व्यपोहति ॥ १५ ॥ द्रुपदाख्यश्च यो मन्त्रो वेदे वाजसनेयके ॥ अन्तर्जले सकृज्जप्तः सर्वपापक्षयं करः ॥ १६ ॥ उदुत्यमिति मंत्रेण पूजयित्वा दिवाकरम् ॥ गायत्रीं च जपेद्देवीं पवित्रां वेदमातरम् ॥ १७ ॥ गायत्रीं तु जपेद्देवीं यः संध्यानंतरं द्विजः ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ १८ ॥ दशभिर्जन्मभिर्लब्धं शतेन तु पुराकृतम् ॥ त्रियुगं तु सहस्रेण गायत्री हन्ति किल्बिषम् ॥ १९ ॥ गायत्रीसारमात्रोऽपि वरं विप्रः सुयंत्रितः ॥ नायंत्रिताश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ २० ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदन्यत्कुरुते किंचिन्न तस्य फलभाग्भवेत् ॥ २१ ॥ संध्यां नोपासते यस्तु ब्राह्मणो मंदबुद्धिमान् ॥ स जीवन्नेव शूद्रः स्यान्मृतः श्वा संप्रजायते ॥ २२ ॥ सावित्रीतीर्थमासाद्य सावित्रीं यो जपेद्द्विजः ॥ त्रैविद्यं तु फलं तस्य जायते नाऽत्र संशयः ॥ २३ ॥ पितॄनुद्दिश्य यः स्नात्वा पिंडनिर्वपणं नृप ॥ कुरुते द्वादशाब्दानि तृप्यंति तत्पितामहाः ॥२४॥ सावित्रीतीर्थमासाद्य यः कुर्यात्प्राणसंक्षयम् ॥ ब्रह्मलोकं वसेत्तावद्यावदाभूतसंप्लवम् ॥ २५ ॥ पूर्णे चैव ततः काल इह मानुष्यतां गतः ॥ चतुर्वेदो द्विजो राजञ्जायते विमले कुले ॥ २६ ॥ धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ २७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सावित्रीतीर्थमाहात्म्यवर्णनंनाम द्विशततमोऽध्यायः ॥ २०० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेन्महीपाल देवतीर्थमनुत्तमम् ॥ यत्र सिद्धा महाभागा देवाः सेन्द्रा युधिष्ठिर ॥ १ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ तत्र तीर्थप्रभावेन कृतमानंत्यमश्नुते ॥ २ ॥ विशोपाद्भद्रपदे तु कृष्णपक्षे त्रयोदशीम् ॥ प्रधानं सर्वतीर्थानां देवैरध्यासितं पुरा ॥ ३ ॥ स्नात्वा त्रयोदशीदिने श्राद्धं कृत्वा विधानतः ॥ देवैः संस्थापितं देवं संपूज्य वृषभध्वजम् ॥ सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥ ४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनंनामैकोत्तरद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ छ ॥ ॥ ॥ मार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं चान्यच्छिखितीर्थमनुत्तमम् ॥ प्रधानं सर्वतीर्थानां पञ्चायतनमुत्तमम् ॥ १ ॥ तत्र तीर्थे तपस्तप्त्वा शिखार्थं हव्यवाहनः ॥ शिखां प्राप्य शिखी भूतो शिखाख्यं स्थापयच्छिवम् ॥ २ ॥ प्रतिपच्छुक्लपक्षे या भवेदाश्वयुजे नृप ॥ तदा तीर्थवरे गत्वा स्नात्वा वै नर्मदाजले ॥ ३ ॥ देवानृषीन्पितॄंश्चान्यांस्तर्पयेत्तिलवारिणा ॥ हिरण्यं ब्राह्मणे दद्यात्संतर्प्य च हुताशनम् ॥ ४ ॥ गंधमाल्यैस्तथा धूपैस्ततः संपूजयेच्छिवम् ॥ अनेन विधिनाऽभ्यर्च शिखितीर्थे महेश्वरम् ॥ ५ ॥ विमानेनार्कवर्णेन ह्यप्सरोगणसंवृतः ॥ गीयमानस्तु गन्धर्वै रुद्रलोकं स गच्छति ॥ ६ ॥ शत्रुक्षयमवाप्नोति तेजस्वी जायते भुवि ॥ ७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे शिखितीर्थमाहात्म्यवर्णनंनाम व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ ॥ छ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश कोटितीर्थमनुत्तमम् ॥ यत्र सिद्धा महाभागाः कोटिसंख्या महर्षयः ॥ १ ॥ तपः कृत्वा सुविपुलमृषिभिः स्थापितः शिवः ॥ तथा कोटीश्वरी देवी चामुण्डा महिषार्दिनी ॥२॥ कृष्णपक्षे चतुर्दश्यां मासि भाद्रपदे नृप ॥ तीर्थकोटीः समाहूय मुनिभिः स्थापितः शिवः ॥३॥ तस्यां तिथौ च हस्तर्क्षं सर्वपापप्रणाशनम् ॥ तत्र तीर्थे तदा गत्वा स्नानं कृत्वा समाहितः ॥ ४ ॥ नरकादुद्धरत्याशु पुरुषानेकविंशतिम् ॥ तिलोदकप्रदानेन किमुत श्राद्धदो नरः ॥ ५ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ॥ तस्य तीर्थस्य योगेन सर्वं कोटिगुणं भवेत् ॥ ॥ ६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनाम त्र्युत्तरद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भृगुतीर्थं ततो गच्छेत्तीर्थराजमनुत्तमम् ॥ पैतामहं महापुण्यं सर्वपातकनाशनम् ॥ १ ॥ ब्रह्मणा तत्र तीर्थे तु पुरा वर्षशतत्रयम् ॥ आराधनं कृतं शंभोः कस्मिंश्चित्कारणांतरे ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमर्थं मुनिशार्दूल ब्रह्मा लोकपितामहः ॥ आराधयद्देवदेवं महाभक्त्या महेश्वरम् ॥ ३ ॥ आराध्यः सर्वभूतानां जगद्धर्ता जगद्गुरुः ॥ श्रोतव्यं श्रोतु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मिच्छामि महदाश्चर्यमुत्तमम् ॥ ४ ॥ धर्मपुत्रवचः श्रुत्वा मार्कंडेयो मुनीश्वरः ॥ कथयामास तद्वृत्तमितिहासं पुरातनम् ॥ ५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ स्वपुत्रिकामभिगंतुमिच्छन्पूर्वं पितामहः ॥ शप्तस्तु देवदेवेन कोपाविष्टेन सत्तम ॥ ६ ॥ वेदास्तव विनश्यंति ज्ञानं च कमलासन ॥ अपूज्यः सर्वलोकानां भविष्यसि न संशयः ॥ ७ ॥ एवं दत्ते ततः शापे ब्रह्मा खेदावृतस्तदा ॥ रेवाया उत्तरे कूले स्नात्वा वर्षशतत्रयम् ॥ तोषया मास देवेशं तुष्टः प्रोवाच शंकरः ॥ ८ ॥ पूज्यस्त्वं भविता लोके प्राप्ते पर्वणिपर्वणि ॥ अहमत्र च वत्स्यामि देवैश्च पितृभिः सह ॥ ९ ॥ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तदाप्रभृति तत्तीर्थं ख्यातिं प्राप्तं पितामहात् ॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमम् ॥ १० ॥ तत्र भाद्रपदे मासि कृष्णपक्षे विशेषतः ॥ अमावास्यां तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ ११ ॥ पिंडदानेन चैकेन तिलतोयेन वा नृप ॥ तृप्यंति द्वादशाब्दानि पितरो नाऽत्र संशयः ॥ १२ ॥ कन्यागते तु यस्तत्र नित्यं श्राद्धप्रदो भवेत् ॥ अन्नाप्य तृप्तिं तत्पूर्वे वल्गंति च हसंति च ॥ १३ ॥ सर्वेषु पितृतीर्थेषु श्राद्धं कृत्वास्ति यत्फलम् ॥ तत्फलं समवाप्नोति दर्शे तत्र न संशयः ॥ १४ ॥ पेतामहे नरः स्नात्वा पूजयन्पार्वतीपतिम् ॥ मुच्यते नाऽत्र सन्देहः पातकैश्चोपपातकैः ॥१५॥ तत्र तीर्थे मृतानां तु नराणांभावितात्मनाम् ॥ अनिवर्तिका गती राजन्रुद्रलोकादसंशयम् ॥ १६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे पेतामहतीर्थमाहात्म्यवर्णनंनाम चतुरधिकद्विशततमोऽध्यायः ॥ ॥ २०४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गच्छेत्ततः क्षोणिनाथ तीर्थं परमशोभनम् ॥ कुर्कुरीनाम विख्यातं सर्वपापप्रणाशनम् ॥ १ ॥ यंयं प्रार्थयते कामं पशुपुत्रधनादिकम् ॥ तं तं ददाति देवेशी कुर्कुरी तीर्थदेवता ॥ २ ॥ क्षेत्रपालो वसेत्तत्र ढुंढिरोनाम नामतः ॥ तस्य चाऽऽराधनं कृत्वा नारी वा पुरुषोऽपि वा ॥ ३ ॥ वंदनादपि राजेंद्र दौर्भाग्यं नाशमाप्नुयात् ॥ अपुत्रो लभते पुत्रमधनो धनमुत्तमम् ॥ ४ ॥ नारी नरस्तथाप्येवं लभते कामसुत्तमम् ॥ स्पर्शनादर्शनात्तस्य तीर्थस्य विधिपूर्वकम् ॥ ५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे कुर्कुरीतीर्थमाहात्म्यवर्णनंनाम पंचाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गच्छेत्ततः क्षोणिनाथतीर्थं परमशोभनम् ॥ सर्वपापहरं पुण्यं दशकन्येति विश्रुतम् ॥ महादेवकृतं पुण्यं सर्वकामफलप्रदम् ॥ १ ॥ तत्र तीर्थे महादेवो दशकन्या गुणान्विताः ॥ ब्रह्मणो वरयामास ह्युद्वाहेन युयोज ह ॥ २ ॥ तदाप्रभृति तत्तीर्थं दशकन्येति विश्रुतम् ॥ सर्व पापहरं पुण्यमक्षयं कीर्तितं फलम् ॥ ३ ॥ तत्र तीर्थे तु यः कन्यां ददाति समलंकृताम् ॥ प्राप्नोति पुरुषो दत्त्वा यथाशक्त्या स्वलंकृताम् ॥ ४ ॥ तेन दानोत्थपुण्येन भूतात्मानो नराधिप ॥ वसंति रोमसंख्यानि वर्षाणि शिवसन्निधौ ॥ ५ ॥ ततः कालेन महता त्विह लोके नरेश्वर ॥ मानुष्यं प्राप्य दुःप्राप्यं धनकोटीपतिर्भवेत् ॥ ६ ॥ तत्र तीर्थे तु यो भक्त्या स्नात्वा विप्राय कांचनम् ॥ संप्रयच्छति शांताय सोऽत्यंतं सुखमश्नुते ॥ ॥ ७ ॥ वाचिकं मानसं वाऽपि कर्मजं यत्पुरा कृतम् ॥ तत्सर्वं विलयं याति स्वर्णदानेन भारत ॥ ८ ॥ नरो दत्त्वा सुवर्णं च अपि वालाग्रमात्रकम् ॥ तत्र तीर्थे दिवं याति मृतो नाऽस्त्यत्र संशयः ॥ ९ ॥ तत्र विद्याधरैः सिद्धैर्विमानवरमास्थितः ॥ पूज्यमानो वसेत्तावद्यावदाभूतसंप्लवम् ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे दशकन्यातीर्थमाहात्म्यवर्णनंनाम षडुत्तरद्विशततमोऽध्यायः ॥ २०६ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्याग्रे पावनं तीर्थं स्वर्णबिंदुरिति विश्रुतम् ॥ यत्र स्नात्वा दिवं यांति मृताश्च न पुनर्भवम् ॥१॥ तत्र तीर्थे तु यः स्नात्वा दत्ते विप्राय कांचनम् ॥ तेन यत्तु फलं प्रोक्तं तच्छृणुष्व महीपते ॥२॥ सर्वेषामेव रत्नानां कांचनं रत्नमुत्तमम् ॥ अग्नितेजःसमुद्भूतं तेन तत्परमं भुवि ॥ ३ ॥ तेनैव दत्ता पृथिवी सशैलवनकानना ॥ सपत्तनपुरा सर्वा कांचनं यः प्रयच्छति ॥ ॥४॥ मानसं वाचिकं पापं कर्मणा यत्पुरा कृतम् ॥ तत्सर्वं नश्यति क्षिप्रं स्वर्णदानेन भारत ॥ ५ ॥ स्वर्णदानं तु यो दत्त्वा ह्यपि वालाग्रमात्रकम् ॥ तत्र तीर्थे मृतो याति दिवं नास्त्यत्र संशयः ॥ ६ ॥ तत्र विद्याधरैः सिद्धैर्विमानवरमास्थितः ॥ पूज्यमानो वसेत्तावद्यावदाभूतसंप्लवम् ॥ ७ ॥ पूर्णे तत्र ततः काले प्राप्य मानुष्यमुत्तमम् ॥ सुवर्णकोटिसहिते गृहे वै जायते द्विजः ॥ ८ ॥ सर्वव्याधिविनिर्मुक्तः सर्वलोकेषु पूजितः ॥ जीवेद्वर्षशतं साग्रं राजसत्सु विश्रुतः ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे सुवर्णबिंदुतीर्थमाहात्म्यवर्णनंनाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भूमिपाल ततो गच्छेत्तीर्थं परमशोभनम् ॥ विख्यातं त्रिषु लोकेषु पितॄणामृणमोचनम् ॥ १ ॥ तत्र स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ मनुष्यश्च नृपश्रेष्ठ दानं दत्त्वाऽनृणो भवेत् ॥ २ ॥ इच्छंति पितरः सर्वे स्त्रार्थहेतोः सुतं यतः ॥ पुन्नाम्नो नरकात्पुत्रोऽस्मानयं मोचयिष्यति ॥ ३ ॥ पिंडदानं जलं तात ऋणमुत्तममुच्यते ॥ पितॄणां तद्धि वै प्रोक्तमृणं देवमतः परम् ॥ ४ ॥ अग्निहोत्रं तथा यज्ञाः पशुबंधास्तथेष्टयः ॥ इति देवऋणं प्रोक्तं शृणु मानुष्यकं ततः ॥ ५ ॥ ब्राह्मणेषु च तीर्थेषु देवायतन कर्मसु ॥ प्रतिश्रुत्य ददेत्तत्तद्व्यवहारः कृतो यथा ॥ ६ ॥ ऋणत्रयमिदं प्रोक्तं पुत्राणां धर्मनंदन ॥ सत्पुत्रास्ते तु राजेंद्र स्नाता य ऋणमोचने ॥ ७ ॥ ऋणत्रयाद्विमुच्यंते ह्यपुत्राः पुत्रिणस्तथा ॥ तस्मात्तीर्थवरं प्राप्य पुत्रेण नियतात्मना ॥ पितृभ्यस्तर्पणं कार्यं पिंडदानं विशेषतः ॥ ८ ॥ तत्र तीर्थे हुतं दत्तं गुरवस्तोपिता यदि ॥ मृतानां सप्त जन्मानि फलमक्षयमश्नुते ॥ ९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे ऋणमोचनतीर्थमाहात्म्यवर्णनं नामाष्टोत्तरद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ तस्यैवानंतरं पार्थ पुष्कलीतीर्थमुत्तमम् ॥ तत्र तीर्थे नरः स्नात्वा ह्यश्वमेधफलं लभेत् ॥ १ ॥ क्षमानाथं ततो गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ॥ देव दानवगंधर्वैरप्सरोभिश्च सेवितम् ॥ २ ॥ तत्र तिष्ठति देवेशः साक्षाद्रुद्रो महेश्वरः ॥ भारेण महता जातो भारभूतिरिति स्मृतः ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भारभूतीति विख्यातं तीर्थं सर्वगुणान्वितम् ॥ श्रोतुमिच्छामि विप्रेंद्र परं कौतूहलं हि मे ॥ ४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ भारभूतिसमुत्पत्तिं शृणु पांडवसत्तम ॥ विस्तरेण यथा प्रोक्ता पुरा देवेन शंभुना ॥ ५ ॥ आसीत्कृतयुगे विप्रो वेदवेदांगपारगः ॥ विष्णुशर्मेति विख्यातः सर्वशास्त्रार्थपारगः ॥ ६ ॥ क्षमा दमो दया दानं सत्यं शौचं धृतिस्तथा ॥ विद्या विज्ञानमास्तिक्यं सर्वं तस्मिन्प्रतिष्ठितम् ॥ ७ ॥ ईदृग्गुणा हि ये विप्रा भवंति नृपसत्तम ॥ पतिताम्नरके घोरे तारयंति पितॄंस्तु ते ॥ ८ ॥ इंद्रियलोलुपा विप्रा ये भवंति नृपोत्तम ॥ पतंति नरके घोरे रौरवे पापमोहिताः ॥ ९ ॥ ये क्षांतदांताः श्रुतिपूर्णकर्णा जितेंद्रियाः प्राणिवधान्निवृत्ताः ॥ प्रतिग्रहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ १० ॥ एवं गुणगणाकीर्णो ब्राह्मणो नर्मदातटे ॥ वसते ब्राह्मणैः सार्धं शिलोञ्छवृत्तिजीवनः ॥ ११ ॥ तादृशं ब्राह्मणं ज्ञात्वा देवदेवो महेश्वरः ॥ द्विज रूपधरो भूत्वा तस्याश्रममगात्स्वयम् ॥ १२ ॥ दृष्ट्वा तं ब्राह्मणैः सार्धमुच्चरंतं पदक्रमम् ॥ अभिवादयते विप्रं स्वागतेन च पूजितः ॥ १३ ॥ प्रोवाच तं मुहूर्तेन ब्राह्मणो विस्मयान्वितः ॥ किमर्थं तद्भटो ब्रूहि किं करोमि तवेप्सितम् ॥ १४ ॥ ॥ वटुरुवाच ॥ ॥ विद्यार्थिनमनुप्राप्तं विद्धि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मां द्विजसत्तम ॥ ददासि यदि मे विद्यां ततः स्थास्यामि ते गृहे ॥ १५ ॥ ॥ ब्राह्मण उवाच ॥ ॥ सर्वेषामेव विप्राणां वटो त्वं गोत्र उत्तमे ॥ दानानां परमं दानं कथं विद्या च दीयते ॥ १६ ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या भवतीह फलप्रदा ॥ १७ ॥ ॥ ॥ वटुरुवाच ॥ ॥ यथान्ये बालकाः स्नाताः शुश्रूषंति ह्यहर्निशम् ॥ तथाऽहं वटुभिः सार्धं शुश्रूषामि न संशयः ॥ १८ ॥ तथेति चोक्त्वा विप्रेंद्रः पाठयंस्तं दिनेदिने ॥ वर्त्तते सह शिष्यैः स शिलोञ्छानुपहारयन् ॥ १९ ॥ ततः कतिपयाहोभिः प्रोक्तो वटुभिरीश्वरः ॥ पचनाद्यं वटो कर्म कुरु क्रमत आगतम् ॥ २० ॥ तथेति चोक्तो देवेशो भारग्रामसुपागतः ॥ ध्यात्वा वनस्पतीः सर्वा इदं वचनमब्रवीत् ॥ २१ ॥ यावदागच्छते विप्रो वटुभिः सह मंदिरम् ॥ अदर्शनाभिः कर्त्तव्यं तावदन्नं सुसंस्कृतम् ॥ २२ ॥ एवमुक्त्वा तु ताः सर्वा विश्वरूपो महेश्वरः ॥ क्रीडनार्थं गतस्तत्र वटुवेष धरः पृथक् ॥ २३ ॥ दृष्ट्वा समागतं तत्र वटुवेषधरं पृथक् ॥ धिक्त्वां च परुषं वाक्यमूचुस्ते गिरिसन्निधौ ॥ २४ ॥ क्षुत्क्षामकंठाः सर्वे च गत्वा तु किल मंदिरम् ॥ त्वया सिद्धन चाऽन्नेन तृप्तिं यास्यामहे वयम् ॥ २५ ॥ तद्वृथा चिंतितं सव त्वयागत्य कृतं द्विज ॥ मिथ्याप्रतिज्ञेन सता दुरनुष्ठितमद्य ते ॥ २६ ॥ वटुरुवाच ॥ संतापमनुतापं वा भोजनार्थं द्विजर्षभाः ॥ मा कुरुध्वं यथान्यायं सिद्धेऽन्ने गृहमेष्यथ ॥ २७ ॥ वटुरुवाच ॥ दिनशेषेण चास्माकं पंचतां च दिनेदिने ॥ निष्पत्तिं याति वा नेति तदसिद्धमशेषतः ॥ २८ ॥ असिद्धं सिद्धमस्माकं यत्त्वया समुदाहृतम् ॥ दृष्ट्वाऽनृतं गतास्तत्र त्वां बद्धांऽ भसि निक्षिपे ॥ २९ ॥ ॥ वटुरुवाच ॥ ॥ भोभोः शृणुद्ध सर्वेऽत्र सोपाध्याया द्विजोत्तमाः ॥ प्रतिज्ञां मम दुर्द्धर्षां यां श्रुत्वा विस्मयो भवत् ॥ ३० ॥ यदि सिद्धमिदं सर्वमन्नं स्यादाश्रमे गुरोः ॥ यूयं बध्वा मया सर्वे क्षेप्तव्या नर्मदांभसि ॥ ३१ ॥ अथवाऽन्नं न सिद्धं स्याद्भवद्भि र्दंढबन्धनैः ॥ गुरोस्तु पश्यतो बध्वा क्षेप्तव्योऽहं नर्मदाह्रदे ॥ ३२ ॥ तथेति कृत्वा ते सर्वे समयं गुरुसन्निधौ ॥ स्नात्वा जाप्यविधानेन भूतग्रामं ततो ययुः ॥ ३३ ॥ दृष्ट्वा ते विस्मयं जग्मुर्विस्तृते भक्ष्यभोजने ॥ षड्रसेन नृपश्रेष्ठ भुक्त्वा हुत्वा पृथक्पृथक् ॥ ३४ ॥ ततः प्रोवाच वचनं हृष्टपुष्टो द्विजोत्तमः ॥ वरदोऽस्मि वरं वत्स वृणु यत्तव रोचते ॥ ३५ ॥ सांगोपांगास्तु ते वेदाः शास्त्राणि विविधानि च ॥ प्रतिभास्यंति ते विप्र मदीयोऽस्तु वरस्त्वयम् ॥ ३६ ॥ प्रणम्य वटुभिः सार्धं स चिक्रीड यथासुखम् ॥ द्वितीये तु ततः प्राते दिवसे नर्मदाजले ॥ ३७ ॥ क्रीडनार्थं गताः सर्वे सोपाध्याया युधिष्ठिर ॥ ततः स्मृत्वा पणं सर्वे भाषयित्वा विधानतः ॥ ३८ ॥ उपाध्यायमथोवाच नत्वा देवः कृतांजलिः ॥ जले प्रक्षेपयाम्यद्य निष्प्रतिज्ञान्वटून्प्रभो ॥ ३९ ॥ तद्देवस्य वचः श्रुत्वा नष्टास्ते वटवो नृप ॥ गुरोस्तु पश्यतो राजन्धावमाना दिशो दश ॥ ४० ॥ वायुवेगेन देवेन लुंजितास्ते समंततः ॥ भारं बध्वा तु सर्वेषां वटूनां च नरेश्वर ॥ ४१ ॥ शापानुग्रहको देवोऽक्षिपत्तोये यथा गृहे ॥ ततो विषादमगमद्दृष्ट्वा तान्नर्मदाजले ॥ ४२ ॥ गुरुणा वटुरुक्तोऽथ किमेतत्साहसं कृतम् ॥ एतेषां मातृपितरो बालकानां गृहेऽगनाः ॥ ४३ ॥ यदि पृच्छंति ते बालान्क गतान्कथयाम्यहम् ॥ त्वं स्थिते महाभाग यदि कश्चिन्मरिष्यति ॥ ४४ ॥ तदा स्वकीयजीवेन त्वं योजयितुमर्हसि ॥ मृतेषु तेषु विप्रेषु न जीवे निश्च यो मृतः ॥ ४५ ॥ ब्रह्महत्याश्च ते बह्व्यो भविष्यंति मृते मयि ॥ द्विजबन्धनमात्रेण नरको भवति ध्रुवम् ॥ ४६ ॥ मरणाद्यां गतिं यासि न तां वेद्मि द्विजाधम ॥ एवमुक्तः स्मितं कृत्वा देवदेवो महेश्वरः ॥ ४७ ॥ भारभूतेश्वरे तीर्थे उज्जहार जलाद्विजान् ॥ मुक्त्वा भारं तु देवेन च्छादयित्वा तु तान्द्विजान् ॥ ४८ ॥ लिंगं प्रतिष्ठितं तत्र भारभूतेति विश्रुतम् ॥ मृतांस्तान्वै द्विजान्दृष्ट्वा ब्रह्महत्या निराकृता ॥ ४९ ॥ गतानिपञ्चवेदृष्ट्वाब्रह्महत्याशतानि वै ॥ ततः स विस्मयाविष्टो दृष्ट्वा तान्बालकान्गुरुः ॥ ५० ॥ नाऽन्यस्य कस्यचिच्छक्तिरेवं स्यादीश्वरं विना ॥ ज्ञात्वा तं देवदेवेशं प्रणाममकरोद्विजः ॥ ५१ ॥ अज्ञानेन मया सर्व यदुक्तं परमेश्वर ॥ अग्रियं यत्कृतं सर्वं क्षंतव्यं तन्मम प्रभो ॥ ५२ ॥ ॥ देव उवाच ॥ ॥ भगवन्गुरुर्भवान्देवो भवान्मम पिता मह ॥ वेदगर्भ नमस्तेस्तु नास्ति कश्चिद्व्यतिक्रमः ॥ ५३ ॥ जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ॥ अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥ ५४ ॥ एवमुक्त्वा जगन्नाथो विष्णुशर्माणमानतः ॥ तत्र तीर्थे जगामाऽऽशु कैलासं धरणीधरम् ॥ ५५ ॥ तदाप्रभृति तत्तीर्थं भारभूतीति विश्रु तम् ॥ विख्यातं सर्वलोकेषु महापातकनाशनम् ॥ ५६ ॥ तत्र तीर्थे पुनर्वृत्तमितिहासं ब्रवीमि ते ॥ सर्वपापहरं दिव्यमेकाग्रस्त्वं शृणुष्व तत् ॥ ॥ ५७ ॥ पुरा कृतयुगस्यादौ वैश्यैः कश्चिन्महामनाः ॥ सुकेश इति विख्यातस्तस्य पुत्रोऽतिधार्मिकः ॥ ५८ ॥ सोमशर्मेति विख्यातो मृतः पृथुललोचनः ॥ स सखायं वणिक्पुत्रं कंचिच्चक्रे दरिद्रिणम् ॥ ५९ ॥ सहदेवमिति ख्यातं सर्वकर्मसु कोविदम् ॥ एकदा तु समं तेन व्यवहारम चिंतयत् ॥ ६० ॥ सखे समुद्रयानेन गच्छावोत्तरणैः शुभैः ॥ भांडं बहु समादाय मदीये द्रव्यसाधने ॥ ६१ ॥ परं तीरं गमिष्याव उत्कर्षस्त्वा वयोः समः ॥ इति तौ मंत्रयित्वा तु मंत्रवत्समभीप्सितम् ॥ ६२ ॥ सर्वं प्रयाणकं गृह्य ह्यारूढौ लवणोदधिम् ॥ तौ गत्वा तु परं भांडं विक्रीय पुरतस्तदा ॥ ६३ ॥ प्राप्तौ बहु सुवर्णं च रत्नानि विविधानि च ॥ नावं तां संगतां कृत्वा पश्चात्तावारुरोहतुः ॥ ६४ ॥ नावमंतर्जले दृष्ट्वा निशीथे स्वर्णसंभृताम् ॥ दृष्ट्वा तु सोमशर्माणमुत्संगे कृतमस्तकम् ॥ ६५ ॥ शयानमतिविश्वस्तं सहदेवो व्यचिंतयत् ॥ एष निद्रावशं यातो मयि प्राणान्निधाय वै ॥ ६६ ॥ अस्याधीनमिदं सर्वं द्रव्यरत्नमशेषतः ॥ उत्कर्षार्द्धं तु मे दद्यात्तत्र गत्वेति वा नवा ॥ ६७ ॥ इति निश्चित्य मनसा पापस्त्वं लवणोदधौ ॥ चिक्षेप सोमशर्माणं पापध्यातेन चेतसा ॥ ६८ ॥ उत्तीर्य तरणात्तस्माद्गत्वा संगृह्य तद्धनम् ॥ ततः कतिपयाहोभिः संयुक्तः कालधर्मणा ॥ ६९ ॥ गतो यमपुरं घोरं गृहीतो यमकिंकरैः ॥ स नीतस्तेन मार्गेण यत्र संतपते रविः ॥ ७० ॥ कृत्वा द्वादशधात्मानं संप्राप्ते प्रलये यथा ॥ सुतीक्ष्णाः कण्टका यत्र यत्र श्वानः सुदारुणाः ॥ ७१ ॥ तीक्ष्णदंष्ट्रा महाव्याला व्याघ्रा यत्र महाबृकाः ॥ सुतप्ता वालुका यत्र क्षुधा तृष्णा तमो महत् ॥ ७२ ॥ पानीयस्य कथा नास्ति न च्छाया नाऽऽश्रमः क्वचित् ॥ अन्नं पानीयसहितं यावत्त दीयते विपम् ॥ ७३ ॥ छायां संप्रार्थयमानानां भृशं ज्वलति पावकः ॥ तैर्दह्यमाना बहुशो विलपंति मुहुर्मुहुः ॥ ७४ ॥ हा भ्रातर्मातः पुत्रेति पतन्ति पथि मूर्च्छिताः ॥ इत्थंभूतेन मार्गेण स नीतो यमकिंकरैः ॥ ७५ ॥ यत्र तिष्ठति देवेशः प्रजासंयमनो यमः ॥ ते द्वारदेशे तं मुक्त्वा च चत्वुर्यमकिंकराः ॥ ७६ ॥ बद्धा तं गलपाशेन ह्यासीनं मित्रघातिनम् ॥ अवधारय देवेश बुध्यस्व यदनन्तरम् ॥ ७७ ॥ ॥ यम उवाच ॥ ॥ न तु पूर्वं सुतं दृष्टं मया विश्वास घातिनाम् ॥ ये मित्रद्रोहिणः पापास्तेषां किं शासनं भवेत् ॥ ७८ ॥ ऋषयोऽत्र विचारार्थं नियुक्ता निपुणाः स्थिताः ॥ ते यत्र ब्रुवते तत्र क्षिपध्वं मा विचार्यताम् ॥ ७९ ॥ इत्युक्तास्ते तमादाय किंकराः शीघ्रगामिनः ॥ मुनीशांस्तत्र तान्नत्वुस्तं निवेद्य समाहृता ॥ ८० ॥ द्विजा अनेन मित्रं स्वं प्रसुप्तं निशि घातितम् ॥ विश्वस्तं धनलोभेन को दण्डोऽस्य भविष्यति ॥ ८१ ॥ ॥ मुनय

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ऊचुः ॥ ॥ अदृष्टपूर्वमस्माभिर्वदनं मित्रघातिनाम् ॥ कृत्वा पर्वतरे घोरं शृण्वन्तु गतिमस्य ताम् ॥ ८२ ॥ ते शास्त्राणि विचार्याथ ऋषयश्च परस्परम् ॥ आहूय यमदूतांस्तानूचुर्ब्राह्मणपुंगवाः ॥ ८३ ॥ आलोकितानि शास्त्राणि वेदाः सांगाः स्मृतीरपि ॥ पुराणानि च मीमांसा हृष्टास्माभिरत्र च ॥ ८४ ॥ ब्रह्मघ्ने च सुरापे च स्तेये गुर्वंगनागमे ॥ निष्कृतिर्विहिता शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८५ ॥ ये स्त्रीभ्राश्च गुरुघ्राश्च ये बालब्रह्मघातिनः ॥ विहिता निष्कृतिः शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८६ ॥ पापीकूपतडागानां भेत्तारो ये च पापिनः ॥ उद्यानवाटिकानां च छेत्तारो ये च दुर्जनाः ॥ ८७ ॥ दावाग्निदाहका ये च सततं येऽसुहिंसकाः ॥ न्यासापहारिणो ये च गरदाः स्वामिवंचकाः ॥ ८८ ॥ मातापितृगुरूणां च त्यागिनो दोषदायिनः ॥ स्वभर्तृवंचनपरा या स्त्री गर्भप्रघातिनी ॥ ८९ ॥ विवेकरहिता या स्त्री याऽज्ञाता भोजने रता ॥ द्विकालभोजनरतास्तथा वैष्णववासरे ॥ ९० ॥ तासां स्त्रीणां गतिर्दृष्टा न तु विश्वासघातिनाम् ॥ विश्वासघातिनां पुंसां मित्रद्रोहकृतां तथा॥९१॥ तेषां गतिर्न वेदेषु पुराणेषु च का कथा ॥ इति स्थितेषु पापेषु गतिरेषां न विद्यते ॥ ९२ ॥ नाऽन्या गतिर्मित्रहनने विश्वस्तघ्ने च नः श्रुतम् ॥ इतो नीत्वा यमदूता एनं विश्वस्तघातिनम् ॥ ९३ ॥ कल्पकोटिशतं साग्रं पर्यायेण पृथक्पृथक् ॥ नरकेषु च सर्वेषु त्रिंशत्कोटिषु संख्यया ॥ ९४ ॥ क्षिप्यतामेष मित्रघ्नो विचारो मा विधीयताम् ॥ इति ते वचनं श्रुत्वा किंकरास्तं नियुज्य च ॥ ९५ ॥ यत्र ते नरका घोरास्तत्र क्षेप्तुं गतास्ततः ॥ ते तमादाय हि नरके घोरे रौरवसंज्ञिते ॥ ९६॥ चिक्षिपुस्तत्र पापिष्ठं क्षिप्ते रावोऽभवन्महान् ॥ नरकस्थितभूतेषु मोक्तव्यो नेष पापकृत् ॥ ९७ ॥ अस्य संस्पर्शनादेव पीडा शतगुणा भवेत् ॥ यथा व्यथासिकाष्टेश्च सभिद्यैर्दहनात्मकैः ॥ ९८ ॥ भवति स्पर्शनात्तस्य किमेतेन कृतामलम् ॥ यथा दुर्जनसंसर्गात्सुजनो याति लाघवम् ॥ ९९ ॥ सन्निधानात्तथास्याऽऽशु क्षते क्षारावसेचनम् ॥ प्रसादः क्रियतामाशु नीयतां नरकेऽन्यतः ॥ ॥ १०० ॥ एवमुक्तास्ततस्तेस्तु गतास्ते स्वगुरुं प्रति ॥ तत्र ते नारकाः संति पूर्ववत्तेऽपि दुष्कृशुः ॥ १ ॥ एवं ते किंकराः सर्वेऽपर्यटन्नरकक्रमं डले ॥ नरकेऽपि स्थितिस्तस्य नास्ति पापस्य दुर्मतेः ॥ २ ॥ यदा तदा तु ते सर्वे तं गृह्य यमसन्निधौ ॥ गत्वा निवेद्य तत्सर्वं यदुक्तं नारकैर्नरैः ॥ नरके न स्थितिर्यस्य तस्य किं क्रियतां वद ॥ ३ ॥ ॥ यम उवाच ॥ ॥ पापिष्ठ एष वै यातु योनिं तिर्यङ्निषेवताम् ॥ कालं मुनिभिरुद्दिष्टः तिर्यग्योनिं प्रवेश्यताम् ॥ ४ ॥ एवमुक्ते तु वचने प्रजासंयमनेन च ॥ स गतः कृमितां पापो विष्ठासु च पृथक्पृथक् ॥ ५ ॥ ततोऽसौ दंशमशकान्पिपीलिकसमुद्भवान् ॥ यूकामत्कुणकाद्यांश्च गत्वा पक्षित्वमागतः ॥ ६ ॥ स्थावरत्वं गतः पश्चात्पाषाणत्वं ततः परम् ॥ सरीसृपानजगरवराहमृगहस्तिनः ॥ ७ ॥ वृकश्वानखरोष्ट्रांश्च शूकरीं ग्रामजातिकाम् ॥ योनिमाश्वतरीं प्राप्य तथा महिषसंभवाम् ॥ ८ ॥ एताश्चान्याश्च वह्वीर्वै प्राप योनीः क्रमेण वै ॥ स ता योनीरनुप्राप्य धुर्योऽभूद्भारवाहकः ॥ ९ ॥ स गृहे पार्थिवेशस्य धार्मिकस्य यशस्विनः ॥ स दृष्ट्वा कार्त्तिकीं प्राप्तामेकदा नृपसत्तमः ॥ ११० ॥ पुरोहितं समाहूय ब्राह्मणांश्च तथा बहून् ॥ प्रोवाच गृहे कार्त्तिकीं कुर्य्या देतन्मे बहुशः श्रुतम् ॥ ११ ॥ समेता कुत्र यास्याम इति ब्रूत द्विजोत्तमाः ॥ यो गृहे कार्तिकीं कुर्यात्स्नानदानादिवर्जितः ॥ १२ ॥ संवत्सरकृतात्पुण्यात्स वह्निर्भवति श्रुतिः ॥ तस्मात्सर्वप्रयत्नेन तीर्थं सर्वगुणान्वितम् ॥ १३ ॥ सहितास्तत्र गच्छामः स्नातुं दातुं च शक्तितः ॥ एवमुक्ते तु वचने पार्थिवेन द्विजोत्तमाः ॥ १४ ॥ ऊचुः श्रेष्ठं नृपश्रेष्ठ रेवाया उत्तरे तटे ॥ भारेश्वरेति विख्यातं मुक्तितीर्थं नृपोत्तम ॥ १५ ॥ तत्र यामो वयं सर्वे सर्वपापक्षयावहम् ॥ एवमुक्तः स नृपतिर्गृहीत्वा प्रचुरं वसु ॥ १६ शकटं संभृतं कृत्वा तत्र युक्तः स पूर्वहः ॥ यः कृत्वा मित्रहननं गोयोनिं समुपागतः ॥ १७ ॥ इत्थं स नर्मदातीरे संप्राप्तस्तीर्थमुत्तमम् ॥ गत्वा चतुर्दशीदिने ह्युपवासकृतक्षणः ॥ १८ ॥ गत्वा स नर्मदातीरे नाम रुद्रेत्यनुस्मरन् ॥ शुचिप्रदेशाच्च मृदं मंत्रेणाऽनेन गृह्यताम् ॥ १९ ॥ उद्धतासि वराहेण रुद्रेण शतबाहुना ॥ अहमप्युद्धरिष्यामि प्रजया बंधनेन च ॥ १२० ॥ स एवं तां मृदं नीत्वा मुक्त्वा तीरे तथोत्तरे ॥ ददर्श भास्करं पश्चान्मंत्रेणाऽनेन चालभेत् ॥ २१ ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुन्धरे ॥ मृत्तिके हर मे पापं जन्मकोटिशतार्जितम् ॥ २२ ॥ तत एवं विगाह्यापो मंत्रमेतमुदीरयेत् ॥ त्वं नर्मदे पुण्यजले तवांभः शंकरोद्भवम् ॥ २३ ॥ स्नानं प्रकुर्वतो मेऽद्य पापं हरतु चार्जितम् ॥ स स्नात्वाऽनेन विधिना संतप्य पितृदेवताः ॥ २४ ॥ यथा देवालयं पश्चादुपहारैः समन्वितः ॥ भक्त्या संचित्य सान्निध्ये शंकरं लोकशंकरम् ॥ २५ ॥ पुराणोक्तविधानेन पूजां समुपचक्रमे ॥ पूजाचतुष्टयं देवि शिवरात्र्यां निगद्यते ॥ २६ ॥ संस्नाप्य प्रथमे यामे पंचगव्येन शंकरम् ॥ घृतेन पूरणं पश्चात्कृतं नृपवरेण तु ॥ २७ ॥ धूपदीपौनिवेद्याद्यं संकल्प्य च यथाविधि ॥ अर्घेणानेन देवेशं मंत्रेणानेन शंकरम्॥२८॥नमस्ते देवदेवेश शंभो परमकारण ॥ गृहाणार्घमिमं देव संसाराघमपाकुरु ॥२९॥ वित्तानुरूपतो दत्तं सुवर्णं मंत्रकल्पितम् ॥ अग्निहिदेवाः सर्वे सुवर्णं च हुताशनात् ॥ १३० ॥ अतः सुवर्णदानेन प्रीताः स्युः सर्वदेवताः ॥ तदर्घं सर्वदा दातुः प्रीतो भवतु शंकरः ॥ ३१ ॥ अनेन विधिना तेन पूजितः प्रथमे शिवः ॥ यामे द्वितीये तु पुनः पूर्वोक्तविधिना चरेत् ॥ ३२ ॥ स्नापयामास दुग्धेन गव्येन त्रिपुरांतकम् ॥ तंदुलैः पूरणं पश्चात्कृतं लिंगस्य शूलिनः ॥ ३३ ॥ कृत्वा विधानं पूर्वोक्तं दत्तं वस्त्रयुगं सितम् ॥ श्वेतवस्त्रयुगं यस्माच्छंकरस्यातिवल्लभम् ॥ ३४ ॥ प्रीतो भवति वै शंभुर्दत्तेन श्वेतवाससा ॥ यामं तृतीयं संप्राप्तं दृष्ट्वा नृपतिसत्तमः ॥ ३५ ॥ देवं संस्नाप्य मधुना पूरणं चक्रिवांस्तिलैः ॥ तिलद्रोणप्रदानं च कुर्यान्मंत्रमुदीरयन् ॥ ३६ ॥ तिलाः श्वेतास्तिलाः कृष्णाः सर्वपापहरास्तिलाः ॥ तिलद्रोणप्रदानेन संसारिच्छ्यतां मम ॥ ३७ ॥ अनेन विधिना राजा यामिनीयामपूजनम् ॥ अतिवाह्य विनोदेन ब्रह्मघोषेण जागरम् ॥ ३८ ॥ चकार पूजनं शंभोर्बहुपुण्यप्रसाधकम् ॥ ये जागरे त्रिनेत्रस्य शिवरात्र्यां शिवस्थिताः ॥३९॥ ते यां गतिं गताः पार्थ न तां गच्छंति यज्विनः ॥ पापानि यानि कानि स्युः कोटिजन्मार्जितान्यपि ॥ ॥ १४० ॥ हरकेशवयोः स्नांति जागरे यांति संक्षयम् ॥ यावंतो निमिषा नृणां भवंति निशि जाग्रताम् ॥ ४१ ॥ निमिषेनिमिषे राजन्नश्वमेधफलं ध्रुवम् ॥ उपवासपराणां च देवायतनवासिनाम् ॥ ४२ ॥ शृण्वतां धर्मप्राख्यानं ध्यायतां हरकेशवौ ॥ न तां बहुसुवर्णेन क्रतुना गतिमाप्नुयुः ॥ ॥ ४३ ॥ शिवरात्रिस्तिथिः पुण्या कार्तिकी च विशेषतः ॥ रेवाया उत्तरं कूलं तीरं भारेश्वरेति च ॥ ४४ ॥ जाग्रतश्चातिदुःखेन कथं पापं न हास्यति ॥ इत्थंस जागरं कृत्वा शिवरात्र्यां नरेश्वरः ॥ ४५ ॥ प्रभाते विमले गत्वा नर्मदातीरमुत्तमम् ॥ स्नापितास्तेन ते सर्वे वाहनानि गजा क्यः ॥ ४६ ॥ येस्तु वाहैर्गतस्तीर्थं स्नातोऽहं स्नापयामि तान् ॥ तत्र मध्यस्थितः स्नातस्तिर्यक्त्वान्निर्गतो वणिक् ॥ ४७ ॥ दानं ददौ तानुद्दिश्य किंचिच्छक्त्यनुरूपतः ॥ तेन वाहकृतादोषान्मुक्तो भवति मानवः ॥ ४८ ॥ अन्यथाऽसौ कृतो लाभः कृतो व्रजति तान्प्रति ॥ संस्नाप्य तं ततो राजा स्वयं स्नात्वा विधानतः ॥४९॥ संतर्प्य पितृदेवांश्च कृत्वा श्राद्धं यथाविधि॥कृत्वा पिंडानिपितृभ्यश्च वृषमुत्सृज्य लक्षणम् ॥१५०॥ गत्वा देवालयं पश्चादेवं तीर्थोदकेन च॥संस्नाप्य पंचगव्येन ततः पंचामृतेन च ॥५१॥सर्व्वौषधिजलेनैव ततः शुद्धोदकेन च॥चंदनेन सुगंधेन समालभ्य च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शंकरम्॥५२॥कुंकुमैश्च सकर्पूरैर्गंधैश्च विविधैस्तथा ॥ पुष्पौघैश्च सुगंधाढ्यैश्चतुर्थं लिंगपूरणम् ॥५३॥कृतं नृपवरेणाऽत्र कुर्वता पूर्वकं विधिम्॥ गोदानं च कृतं पश्चाद्विधिदृष्टेन कर्मणा ॥ ५४ ॥ धेनुके रुद्ररूपाऽसि रुद्रेण परिनिर्मिता ॥ अस्मिन्नगाधे संसारे पतंतं मां समुद्धर ॥ ५५ ॥ धेनुं स्वलंकृतां दद्यादनेन विधिना ततः ॥ क्षमाप्य देवदेवेशं ब्राह्मणान्भोजयेद्बहून् ॥ ५६ ॥ पञ्चैर्भोजनैर्भक्ष्यैर्वासोभिस्तान्समर्चयेत् ॥ दक्षिणाभिर्विचित्राभिः पूजयित्वा क्षमापयेत् ॥ ५७ ॥ स स्वयं भुभुजे पश्चात्परिवारसमन्वितः ॥ तामेव रजनीं तत्र न्यवसज्जगतीपतिः ॥ ५८ ॥ तस्य तत्रोपितस्यैवं निशीथेऽथ नरेश्वर ॥ आकाशे सोऽति शुश्राव दिव्यवाणीसमीरितम् ॥ ५९ ॥ ॥ वायुवाच ॥ ॥ राजन्समंततो लोके फलं भवति सांप्रतम् ॥ संसारसागरे ह्यत्र पतितानां दुरात्मनाम् ॥ १६० ॥ यदि संनिधिमात्रेण फलं तत्रोच्यते कथम् ॥ यदि शंतनुवंशस्य तत्रोन्मादकरं भवेत् ॥ ६१ ॥ य एष त्वद्गृहे वोढा ह्यतिभारधुरंधरः ॥ अनेन मित्रहननं पापं विश्वासघातनम् ॥ ६२ ॥ कृतं जन्मसहस्राणामतीते परिजन्मनि ॥ गतेन पाप्मना ऽऽत्मानं नरकेषु च संस्थितिः ॥ ६३ ॥ ततो योनिसहस्रेषु गतिस्तिर्यक्षु चैव हि ॥ गोयोनिं समनुप्राप्तस्त्वद्गृहे स सुदुर्मतिः ॥ ६४ ॥ स्नापितश्च त्वया तीर्थे ह्यस्मिन्पर्वसमागमे ॥ दृष्ट्वा पूजां त्वया कृत्स्नां कृता जागरणक्रिया ॥ ६५ ॥ तेन निष्कल्मषो जातो मुक्त्वा देहं तवाऽग्रतः ॥ स्वर्गं प्रति विमानस्थः सोद्य राजन्गमिष्यति ॥ ६६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवमुक्ते निपतितो धुर्यः प्राणैर्व्ययुज्यत ॥ विमानवरमारूढस्तत्क्षणा त्समदृश्यत ॥ ६७ ॥ स तं प्रणम्य राजेंद्रमुवाच प्रहसन्निव ॥ ६८ ॥ ॥ वृष उवाच ॥ ॥ भोभो नृपवरश्रेष्ठ तीर्थमाहात्म्यमुत्तमम् ॥ यत्र चाऽस्मद्विधस्तीर्थे मुच्यते पातकैर्नरः ॥ मया ज्ञातमशेषेण मत्समो नास्ति पातकी ॥ ६९ ॥ अतः परं किं तु कुर्या परं तीर्थोऽनुकीर्त्तनम् ॥ भवान्माता भवान्भ्राता भवांश्चैव पितामहः ॥ १७० ॥ क्षंतव्यं प्रणतोऽस्म्यद्य यस्मिंस्तीर्थे हि मादृशाः ॥ गतिमीदृग्विधां यांति न जाने तव का गतिः ॥ ७१ ॥ समाराध्य महेशानं संपूज्य च यथाविधि ॥ का गतिस्तव संभाष्या देह्यनुज्ञां मम प्रभो ॥ ७२ ॥ त्वरयंति च मां ह्येते दिविस्थाः प्रणयाद्गणाः ॥ स्वस्त्यस्तु ते गमिष्यामीत्युक्त्वा सोऽतदधे क्षणात् ॥ ७३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ गते चाऽदर्शनं तत्र स राजा विस्म यान्वितः ॥ तीर्थमाहात्म्यमतुलं वर्णयन्स्वपुरं गतः ॥ ७४ ॥ इत्थंभूतं हि तत्तीर्थं नर्मदायां व्यवस्थितम् ॥ सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तमम् ॥ ॥ ७५ ॥ उपपापानि नश्यंति स्नानमात्रेण भारत ॥ कार्त्तिकस्य चतुर्दश्यामुपवासपरायणः ॥ ७६ ॥ चतुर्द्धा पूरयेल्लिंगं तस्य पुण्यफलं शृणु ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः॥७७॥महापापानि चत्वारि चतुर्भिर्यांति संक्षयम् ॥ सोश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ॥७८॥ कार्त्तिके शुक्लपक्षस्य चतुर्दश्यामुपोषितः॥ स्वर्णदानाच्च तत्तीर्थे यज्ञस्य लभते फलम् ॥७९॥ अष्टम्यां वा चतुर्दश्यां वैशाखे मासि पूर्ववत् ॥ दीपं पिष्टमयं कृत्वा पितॄन्सर्वान्विमोक्षयेत् ॥ १८० ॥ तत्र यदीयते दानमपि वालाग्रमात्रकम् ॥ तदक्षयफलं सर्वमेवमाह महेश्वरः ॥८१॥ भारभूत्यां मृतानां तु नराणां भावितात्मनाम् ॥ अनिवर्त्तिका गती राजञ्छिवलोकान्निरन्तरम् ॥ ८२ ॥ अथवा लोकवृत्त्यर्थं मर्त्यलोकं जिगीषति ॥ सांगवेदज्ञविप्राणां जायते विमलेकुले ॥ ८३ ॥ धनधान्यसमायुक्तो वेदविद्यासमन्वितः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ८४ ॥ पुनस्तत्तीर्थमासाद्य ह्यक्षयं पदमाप्नुयात् ॥ ८५ ॥ एतत्पुण्यं पापहरं कथितं ते नृपोत्तम ॥ भारतेदं महाख्यानं शृणु चैव ततः परम् ॥ १८६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे भारभूतितीर्थमाहात्म्यवर्णनंनाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ तस्यैवानंतरं तात पुंखिलं तीर्थमुत्तमम् ॥ तत्र तीर्थे पुरा पुंखः पार्थ सिद्धिमुपागतः ॥ १ ॥ जामदग्न्यो महातेजाः क्षत्रियांतकरः प्रभुः ॥ तपः कृत्वा सुविपुलं नर्मदोत्तरतीरभाक् ॥ २ ॥ ततः प्रभृति विख्यातं पुंखतीर्थं नरेश्वर ॥ तत्र तीर्थे तु यः स्नात्वा ह्याराध्य परमेश्वरम् ॥ ३ ॥ इहलोके वलैर्युक्तः परे मोक्षमवाप्नुयात् ॥ देवान्पितॄन्समभ्यर्च्य पितॄणामनृणी भवेत् ॥ ४ ॥ तत्र तीर्थे नरो यस्तु प्राणत्यागं करोति वै ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ५ ॥ तत्र तीर्थं नरः स्नात्वा हयमेधफलं लभेत् ॥ ६ ॥ तत्र तीर्थे नरो यस्तु ब्राह्मणान्भोजयेन्नृप ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ ७ ॥ तत्र तीर्थे तु यः कश्चित्पूजयेद्वृषभध्वजम् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे पुंखिल तीर्थमाहात्म्यवर्णनंनाम दशोत्तरद्विशततमोऽध्यायः ॥ २१० ॥ ॥७॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आश्चर्यभूतं लोकस्य देवदेवेन यत्कृतम् ॥ तत्ते सर्वं प्रवक्ष्यामि नर्मदातटवासिनाम् ॥ १ ॥ द्विजान्सुकृपणान्देवः कुष्ठी भूत्वा ययाच ह ॥ श्राद्धकाले तु संप्राप्ते रक्तगंधानुलेपनः ॥२॥ स्रवद्वृद्वुदगात्रस्तु मक्षिकाकृमिसंवृतः ॥ दुश्चर्मा दुर्मुखो गन्धी प्रस्खलंश्च पदेपदे ॥ ३ ॥ ब्राह्मणावसथं गत्वा स्खलन्द्वारेऽब्रवीदिदम् ॥ भोभो गृहपते त्वद्य ब्राह्मणैः सह भोजनम् ॥ ४ ॥ त्वद्गृहे कर्तुमिच्छामि ह्येभिः सह सुसंस्कृतम् ॥ ततस्तं ब्राह्मणं दृष्ट्वा यजमानसमन्विताः ॥ ५ ॥ स्रवंतं सर्वगात्रेषु धिग्धिगीत्येवमब्रुवन् ॥ निर्गच्छस्वाऽऽशु दुर्गंध गृहाच्छीघ्रं द्विजाधम ॥ ६ ॥ अभोज्यमेतत्सर्वेषां दर्शनात्तव सत्कृतम् ॥ एवमेव तथेत्युक्त्वा देवदेवो महेश्वरः ॥ ७ ॥ जगामाऽऽकाशममलं दृश्यमानो द्विजोत्तमैः ॥ गते चाऽदर्शनं देवे स्नात्वाऽभ्युक्ष्य समंततः ॥ ८ ॥ भुंजतेऽस्म द्विजा राजन्यावत्पात्रे पृथक्पृथक् ॥ यत्रयत्र च पश्यंति तत्रतत्र कृमिर्बहुः ॥ ९ ॥ दृष्ट्वा विस्मयमापन्नाः सर्वे किमिति चाऽब्रुवन् ॥ ततः कश्चिदुवाचेदं ब्राह्मणो गुणवानजः ॥ १० ॥ योगीन्द्रः शंकया तत्र बहुविप्रसमागमे ॥ योऽत्र पूर्वं समायातः स योगी परमेश्वरः ॥११॥ तस्येदं क्रीडितं मन्ये भर्त्सितस्य विपाकजम् ॥ फलं भवति नाऽन्यस्य ह्यतिथेः शास्त्रनिश्चयात् ॥ १२ ॥ संपूज्य परमात्मा वै ह्यतिथिश्च विशेषतः ॥ श्राद्धकाले तु संप्राप्तमतिथिं यो न पूजयेत् ॥ १३ ॥ पिशाचा राक्षसास्तस्य तद्विलुंपन्त्यसंशयम् ॥ रूपान्वितं विरूपं वा मलिनं मलिनांबरम् ॥ १४ ॥ योगीन्द्रं श्वपचं वाऽपि अतिथिं न विचारयेत् ॥ तच्छ्रुत्वा वचनं तस्य यजमानपुरोगमाः ॥ १५ ॥ ब्राह्मणा द्विजमन्वेषुं धाविताः सर्वतोदिशम् ॥ तावत्कथंचित्तेनाऽपि गहनं वनमाश्रितः ॥ १६ ॥ दृष्टो दृष्ट इति प्रोक्तं तेन ते सर्व आगताः ॥ ततः पश्यंति तं विप्रं स्थाणुवन्निश्चलं स्थितम् ॥ १७ ॥ क्रंदते न चलति स्पन्दते न च पश्यति ॥ जल्पंति करुणं केचित्स्तुवंति च तथाऽपरे ॥ १८ ॥ वाग्भिः सततमिष्टाभिः स्तूयमानस्त्रिलोचनः ॥ क्षुधार्दितानां देवेश ब्राह्मणानां विशेषतः ॥ विनष्टमन्नं सर्वेषां पुनः संकर्तुमर्हसि ॥ १९ ॥ श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिर ॥ परया कृपया देवः प्रसन्नस्तानुवाच ह ॥ २० ॥ मया प्रसन्नेन महानुभावास्तदेव वोऽन्नं विहितं सुधेव ॥ भुंजंतु विप्राः सह बन्धुभृत्यैरचंतु नित्यं मम मंडलं च ॥ २१ ॥ ततश्चायतनं पार्थ देवदेवस्य शूलिनः ॥ मुण्डिनामेति विख्यातं सर्वपापहरं शुभम् ॥ कार्तिक्यां तु विशेषेण गयातीर्थेन तत्समम् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे मुण्डितीर्थमाहात्म्यवर्णनंनामैकादशोत्तरद्विशततमोऽध्यायः ॥ २११ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनाऽऽशु

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वपापैः प्रमुच्यते ॥ १ ॥ भिक्षुरूपं परं कृत्वा देवदेवो महेश्वरः ॥ एकशालां गतो ग्रामं भिक्षार्थी क्षुत्पिपासितः ॥ २ ॥ अक्षसूत्रोद्यतकरो भस्म
गुंठितविग्रहः ॥ स्फुरत्त्रिशूलो विश्वेशो जटाकुण्डलभूषितः ॥ ३ ॥ कृत्तिवासा महाकायो महाहिकृतभूषणः ॥ वादयन्वै डमरुकं डिंडिमप्रतिमं
शुभम् ॥ ४ ॥ कपालपाणिर्भगवान्बालकैर्बहुभिर्वृतः ॥ क्वचिद्गायन्हसंश्चैव नृत्यन्वादन्क्वचित्क्वचित् ॥ ५ ॥ यत्रयत्र गृहे देवो लीलया डिंडमं न्यसे
त् ॥ भाराक्रांतं गृहं पार्थ तत्रतत्र विनश्यति ॥६॥ एवं संप्रचरन्देवो वेष्टितो बहुभिर्जनैः ॥ दृश्यादृश्येन रूपेण निर्जगाम बहिः प्रभुः ॥ ७ ॥ इतश्चे
तश्च धावन्तं न पश्यंति यदा जनाः ॥ विस्मितास्ते स्थिताः शम्भुर्भविष्यति ततोऽस्तुवन् ॥ ८ ॥ तेषां तु स्तुवतां भक्त्या शंकरं जगतां
पतिम् ॥ डिंडिरूपो हि भगवांस्तदाऽसौ प्रत्यदृश्यत ॥ ९ ॥ तदाप्रभृति देवेशो डिंडिमेश्वर उच्यते ॥ दर्शनात्स्पर्शनाद्राजन्सर्वपापैः प्रमु
च्यते ॥ १० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखण्डे एकशालडिंडिमेश्वरतीर्थमाहात्म्यवर्णनं
नाम द्वादशोत्तरद्विशततमोऽध्यायः ॥ २१२ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनरन्यत्प्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनैव
सर्वपापैः प्रमुच्यते ॥ १ ॥ अवालो बालरूपेण ग्रामण्येर्बालकैः सह ॥ आमलैः क्रीडते शंभुस्तत्ते वक्ष्यामि भारत ॥ २ ॥ सर्वैस्तैरामलाः क्षिप्ता ये
ते देवेन पांडव ॥ आनीतास्तत्क्षणादेव ततः पश्चात्क्षिपेद्धरः ॥ ३ ॥ यावद्भत्वा दिशो दिग्भ्य आगच्छन्ति पृथक्पृथक् ॥ तावत्तमामलं भूतं पश्य
ति परमेश्वरम् ॥ ४ ॥ तृतीये चैव यत्कर्म देवदेवस्य धीमतः ॥ स्थानानां परमं स्थानमामलेश्वरमुत्तमम् ॥ ५ ॥ तेन पूजितमात्रेण प्राप्यते परमं
पदम् ॥६॥ इति श्रीस्कांदे महापुराणे एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखंडे रेवाखंडे आमलेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयोदशोत्त
रद्विशततमोऽध्यायः ॥२१३॥ ॥७॥ ॥ श्रीमार्कंडेयउवाच ॥ ॥ चतुर्थं संप्रवक्ष्यामि देवस्य चरितं महत्॥श्रुतमात्रेण येनैव सर्वपापैः प्रमुच्यते ॥ १ ॥
कपाली कांथिको भूत्वा यथा स.व्यचरन्महीम् ॥ पिशाचै राक्षसैर्भूतैर्डाकिनीयोगिनीवृतः ॥२॥ भैरवं रूपमास्थाय प्रेतासनपरिग्रहः॥त्रैलोक्यस्या
ऽभयं दत्त्वा चचार विपुलं तपः ॥ ३ ॥ आपाढी तु कृता तत्र ह्यापाढीनाम विश्रुतम् ॥ कंथा मुक्ता ततोऽन्यत्र देवेन परमेष्ठिना ॥४॥ तदाप्रभृति
राजेंद्र स कंथेश्वर उच्यते ॥ तस्य दर्शनमात्रेण ह्यश्वमेधफलं लभेत् ॥ ५ ॥ देवो मार्गे पुनस्तत्र भ्रमते च यदृच्छया ॥ विक्रीणाति बलाकारो दृष्ट्वा
चोक्तो हरेण तु ॥ ६ ॥ यदि भद्र न चेत्कोपं करोपि मयि सांप्रतम् ॥ बलाभिर्भर मे लिंगं ददामि बहु ते धनम् ॥ ७ ॥ एवमुक्तोऽथ देवेन स वणि
ग्लोभमोहितः ॥ योजयामास बलका लिंगे चोत्तममध्यमान् ॥ ८ ॥ तावद्यावत्क्षयं सर्वे गताः काले सुसंचिताः ॥ स्थितं समुन्नतं लिंगं दृष्ट्वा
शोकमुपागमत् ॥ ९ ॥ कृत्वा तु खंडखंडानि स देवः परमेश्वरः॥ उवाच ग्रहसन्वाक्यं तं दृष्ट्वा गतसाध्वसम्॥१०॥न च मे पूरितं लिंगं यास्यामि
यदि मन्यसे ॥ ददामि तत्र वित्तं ते यदि लिंगं प्रपूरितम् ॥ ११ ॥ ॥ वणिगुवाच ॥ ॥ अथन्योकृतपुण्योऽहं निग्राह्यः परमेश्वर ॥ तव प्रियम
कुर्वाणः शोचिष्ये शाश्वतीः समाः ॥१२॥ एतच्छ्रुत्वा वचस्तस्य वणिक्पुत्रस्य भारत ॥ असंक्षयं धनं दत्त्वा स्थितस्तत्र महेश्वरः ॥ १३ ॥ तदा
प्रभृति राजेंद्र बलाकेरिव भूपितम् ॥ प्रत्ययार्थं स्थितं लिंगं लोकानुग्रहकाम्यया ॥ १४ ॥ देवेन रचितं पार्थ क्रीडया सुप्रतिष्ठितम् ॥ देवमार्गमिति
ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ पश्यन्प्रपूजयन्वाऽपि सर्वपापैः प्रमुच्यते ॥ १५ ॥ देवमार्गे तु यो गत्वा पूजयेद्बलाकेश्वरम् ॥ पंचायतनमासाद्य रुद्र
लोकं स गच्छति ॥ १६ ॥ देवमार्गे मृतानां तु नराणां भावितात्मनाम् ॥ न भवेत्पुनरावृत्ती रुद्रलोकात्कदाचन ॥ १७ ॥ देवमार्गस्य माहा
त्म्यं भक्त्या श्रुत्वा नरोत्तम ॥ मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां
पञ्चम आवंत्यखण्डे रेवाखण्डे श्रीकपालतीर्थमाहात्म्यवर्णनंनाम चतुर्दशोत्तरद्विशततमोऽध्यायः ॥ २१४ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय
उवाच ॥ ॥ शृंगितीर्थं ततो गच्छेन्मोक्षदं सर्वदेहिनाम् ॥ मृतानां तत्र राजेंद्र मोक्षप्राप्तिर्न संशयः ॥ १ ॥ तत्रैव पिंडदानेन पितृणामनृणो
भवेत् ॥ तेन पुण्येन पूतात्मा लभेद्वाणेश्वरीं गतिम् ॥ २ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवा
खण्डे शृंगितीर्थमाहात्म्यवर्णनंनाम पंचदशोत्तरद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ अपाढीतीर्थमागच्छे
त्ततो भूपालनंदन ॥ कामिकं रूपमास्थाय स्थितो यत्र महेश्वरः ॥ १ ॥ चातुर्युगमिदं तीर्थं सर्वतीर्थेष्वनुत्तमम् ॥ तत्र स्नात्वा नरो राजन्दृस्या
नुचरो भवेत् ॥ २ ॥ तत्र तीर्थे तु यः कश्चित्कुरुते प्राणमोक्षणम् ॥ अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखंडे अपाढीतीर्थमाहात्म्यवर्णनंनाम षोडशोत्तरद्विशततमोऽध्यायः ॥ २१६ ॥
॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एरंडीसंगमं गच्छेत्सुरासुरनमस्कृतम् ॥ तत्तु तीर्थं महापुण्यं महापातकनाशनम् ॥ १ ॥ उप
वासपरो भूत्वा नियतेंद्रियमानसः ॥ तत्र स्नात्वा विधानेन मुच्यते ब्रह्महत्यया ॥ २ ॥ तत्र तीर्थे तु यो भक्त्या प्राणत्यागपरो भवेत् ॥ अनिव
र्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे
एरंडीतीर्थमाहात्म्यवर्णनंनाम सप्तदशोत्तरद्विशततमोऽध्यायः ॥ २१७ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश
तीर्थं परमशोभनम् ॥ जमदग्निरिति ख्यातं यत्र सिद्धो जनार्दनः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं सिद्धो द्विजश्रेष्ठ वासुदेवो जगद्गुरुः ॥
मानुषं रूपमास्थाय लोकानां हितकाम्यया ॥ २ ॥ एतत्सर्वं यथान्यायं देवदेवस्य चक्रिणः ॥ चरितं श्रोतुमिच्छामि कथ्यमानं त्वयाऽनघ ॥ ३ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ आसीत्पूर्वं महाराज हैहयाधिपतिर्महान् ॥ कार्त्तवीर्य इति ख्यातो राजा बाहुसहस्रवान् ॥ ४ ॥ हत्स्यश्वरथसं
पन्नः सर्वशस्त्रभृतां वरः ॥ वेदविद्याव्रतस्नातः सर्वभूताभयप्रदः ॥ ५ ॥ माहिष्मत्याः पतिः श्रीमान्राजा ह्यसौहिणीपतिः ॥ स कदाचिन्मृगान्हंतुं निर्ज
गाम महाबलः ॥ ६ ॥ बहुभिर्हिवसैः प्राप्तो भृगुकच्छमनुत्तमम् ॥ जमदग्निर्महातेजा यत्र तिष्ठति तापसः ॥ ७ ॥ रेणुकासहितः श्रीमान्सर्वभूता
भयप्रदः ॥ तस्य पुत्रोऽभवद्रामः साक्षान्नारायणः प्रभुः ॥ ८ ॥ सर्वज्ञस्त्रगुणैर्युक्तो ब्रह्मविद्ब्राह्मणोत्तमः ॥ तोषयन्पित्रया भक्त्या पितरौ
परमार्थवत् ॥ ९ ॥ तं तदा चार्जुनं दृष्ट्वा जमदग्निः प्रतापवान् ॥ चरंतं मृगयां गत्वा ह्यातिथ्येन न्यमंत्रयत् ॥ १० ॥
तथेति चोक्त्वा स नृपः सभृत्यबलवाहनः ॥ जगाम चाऽऽश्रमं पुण्यमृषेस्तस्य महात्मनः ॥ ११ ॥ तत्क्षणादेव संपन्नं श्रिया परमया वृतम् ॥
विस्मयं परमं तत्र दृष्ट्वा राजा जगाम ह ॥ १२ ॥ गतमात्रस्तु सिद्धेन परमान्नेन भोजितः ॥ सभृत्यबलवाहाजा ब्राह्मणेन यदृच्छया ॥ किमेतदिति
यप्रच्छ कारणं शक्तिमेव च ॥ १३ ॥ कामधेनोः प्रभावं तं ज्ञात्वा प्राह ततो द्विजम् ॥ दक्षिणां देहि मे विप्र कल्मषां धेनुमुत्तमाम् ॥ १४ ॥ शत
शतसहस्राणामयुतं नियुतं परम् ॥ भूपितानां च धेनूनां ददामि तव चार्जुदम् ॥ १५ ॥ ॥ जमदग्निरुवाच ॥ ॥ अयुतैः प्रयुतैर्नाऽहं शतकोटि
भिरुत्तमाम् ॥ कामधेनुमिमां तात न दद्मि प्रतिगम्यताम् ॥ १६ ॥ एवमुक्तः स राजेंद्रस्तेन विप्रेण भारत ॥ क्रोधसंरक्तनयन इदं वचनम

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रवीत् ॥ १७ ॥ यस्येदृशः कामचारो मय्यपि द्विजपांसन ॥ अहं ते पश्यतस्तस्मान्नयामि सुरभिं गृहात् ॥ १८ ॥ ॥ द्विज उवाच ॥ ॥ कः क्रीडति सरोषेण निर्भयो हि महाहिना ॥ मृत्युदृष्टेंतरेणाऽपि मम धेनुं नयेत यः ॥१९॥ एवमुक्त्वा महादण्डं ब्रह्मदंड मिवाऽपरम् ॥ गृहीत्वा परम क्रुद्धो जमदग्निरुवाच ह ॥ २० ॥ यस्याऽस्ति शक्तिस्तेजो वा क्षत्रियस्य कुलाऽधमः ॥ धेनुं नयतु मे सद्यः क्षीणायुः सपरिच्छदः ॥ २१ ॥ एतच्छ्रुत्वा वचः क्रूरं हैहयः शतशो वृतः ॥ धावमानः क्षितितले ब्रह्मदंडहतोऽपतत् ॥ २२ ॥ हुंकृतेन ततो धेन्वाः खड्गपाशासिपाणयः ॥ निर्गच्छंतः प्रदृश्यंते कल्मषायाः सहस्रशः ॥ २३ ॥ नासापुटाद्रोमगर्त्ताद्रोमाग्रात्किराता मागधा गुदात् ॥ रंध्रांतरेषु चोत्पन्नाः शतशोथ सहस्रशः ॥ २४ ॥ एवम न्योऽन्यमाहत्य हैहयष्टंकणान्दहन् ॥ विनाशं सह विप्रेण गता ह्यर्जुनतेजसा ॥ २५ ॥ कार्त्तवीर्यो जयं लब्ध्वा संख्ये हत्वा द्विजोत्तमम् ॥ जगाम स्वां पुरीं हृष्टः कृतांतवशमोहितः ॥ २६ ॥ ततस्त्वरान्वितः प्राप्तः पश्चाद्रामो गते रिपौ ॥ आक्रंदमानां जननीं ददर्श पितुरंतिके ॥ २७ ॥ ॥ राम उवाच ॥ ॥ केनेदमात्मनाशाय ह्यज्ञानात्साहसं कृतम् ॥ मम तातं जिघांसुर्यो द्रष्टुं मृत्युमिहेच्छति ॥ २८ ॥ ततः सा रामवाक्येन गतसत्त्वेव विह्वला ॥ उदरं करयुग्मेन ताडयंती ह्युवाच तम् ॥ २९ ॥ अर्जुनेन नृशंसेन क्षत्रियैरपरैः सह ॥ इहाऽऽगत्य पिता तेन निहतो बाहुशालिना ॥ ॥ ३० ॥ तं पश्य निहतं तातं गतासुं गतचेतसम् ॥ संस्कृत्य विधिवत्पुत्र तर्पयस्व यथातथम् ॥ ३१ ॥ एतच्छ्रुत्वा स वचनं जननीमभिवाद्य ताम् ॥ प्रतिज्ञामकरोद्यां तां शृणुष्व च नराधिप ॥ ३२ ॥ निःसप्तकृत्वः पृथिवीं निःक्षत्रियकुलान्वयाम् ॥ स्नात्वा च तेषामसृजा तर्पयिष्याम्यहं ते पितम् ॥ ३३ ॥ तस्यापि परशुना बाहून्कार्त्तवीर्यस्य दुर्मतेः ॥ च्छित्वा पास्यामि रुधिरमिति सत्यं शृणुष्व मे ॥ ३४ ॥ एवं प्रतिज्ञां कृत्वाऽसौ जामदग्न्यः प्रतापवान् ॥ क्रोधेन महताऽविष्टा संस्कृत्य पितरं ततः॥ ३५ ॥ माहिष्मतीं पुरीं रामो जगाम क्रोधमूर्च्छितः॥ च्छित्वा बाहुवनं तस्य हत्वा तं क्षत्रियाधमम् ॥ ३६ ॥ जगाम क्षत्रियांताय पृथिवीमवलोकयन् ॥ सप्तद्वीपार्णवयुतां सशैलवनकाननाम् ॥ ३७ ॥ पूर्वतः पश्चिमामाशां दक्षिणोत्तरतः कुरून् ॥ समंतपंचके पंच चकार रुधिरह्रदान् ॥ ३८ ॥ स तेषु रुधिरांभस्सु ह्रदेषु क्रोधमूर्च्छितः ॥ पितॄन्संतर्प्पयामास रुधिरेणेति नः श्रुतम् ॥ ३९ ॥ अथत्रींकादयोपेत्य पितरो ब्राह्मणर्षभम् ॥ तं क्षमस्वेति जगदुस्ततः स विरराम ह ॥ ४० ॥ तेषां समीपे यो देशो ह्रदानां रुधिरांभसाम् ॥ समंतपंचकमिति पुण्यं तत्पारकीर्त्तितम् ॥ ४१ ॥ निवर्त्य कर्मणस्तस्मात्पितॄन्रोशाच पांडव ॥ रामः परम धर्मात्मा यदिदं रुधिरं मया ॥ ४२ ॥ क्षिप्तं पंचसु तीर्थेषु तद्भ्यात्तीर्थमुत्तमम् ॥ तथेत्युक्ता तु ते सर्वे पितरोऽदृश्यतां गताः ॥ ४३ ॥ एवं रामस्य संसर्गो देवमार्गे युधिष्ठिर ॥ सर्वपापक्षयकरो दर्शनात्स्पर्शनान्नृणाम् ॥ ४४ ॥ रेणुकाप्रत्ययार्थाय अद्यापि पितृदेवताः ॥ दृश्यंते देव मार्गस्थाः सर्वपापक्षयंकराः ॥ ४५ ॥ तत्र तीर्थे तु राजेंद्र नर्मदोदधिसंगमे ॥ स्थानं कृत्वा विधानेन मुच्यंते पातकैर्नराः ॥ ४६ ॥ कुशाग्रेणाऽपि कौंतेय न स्पृष्ट्व्यो महोदधिः ॥ अनेन तत्र मंत्रेण स्नातव्यं नृपसत्तम ॥ ४७ ॥ नमस्ते विष्णुरूपाय नमस्तुभ्यमपां पते ॥ सान्निध्यं कुरु देवेश सागरे लवणांभसि ॥ ४८ ॥ ॥ इति स्पर्शनमन्त्रः ॥ ॥ अग्निश्च तेजो मृडया च देहे रेतोऽथ विष्णुरमृतस्य नाभिः ॥ एतद्ब्रुवन्पांडव सत्य वाक्यं ततोऽवगाहेत पतिं नदीनाम् ॥ ४९ ॥ पंचरत्नसमायुक्तं फलपुष्पाक्षतैर्युतम् ॥ मंत्रेणाऽनेन राजेंद्र दद्यादर्घं महोदधेः ॥ ५० ॥ सर्वरत्ननिधानस्त्वं सर्वरत्नाकराकरः ॥ सर्वामरप्रणामेन गृहाणार्घं नमोऽस्तु ते ॥५१॥ इत्यर्घमन्त्रः ॥ आजन्मजनितात्पापान्मामुद्धर महोदधे ॥ याह्यर्चितो रत्ननिधे पर्वतान्पार्ष्णिणोत्तम ॥ ॥ इति विसर्जनमन्त्रः ॥ ॥५२॥ कोऽपरः सागरादेवात्स्वर्गद्वारविपाटन ॥ तत्र सागरपर्यन्तं महातीर्थमनुत्तमम् ॥ ॥५३॥ जामदग्न्येन रामेण तत्र देवः प्रतिष्ठितः॥ यत्र देवाः सगन्धर्वा मुनयः सिद्धचारणाः॥५४॥उपासते विरूपाक्षं जमदग्निमनुत्तमम्॥ इष्णुकां चैव ये देवीं पश्यंति भुवि मानवाः ॥ ५५ ॥ प्रियवासे शिवे लोके वसन्ति कालमीप्सितम् ॥ तत्र स्नात्वा नरो राजंस्तर्पयन्पितृदेवताः ॥ ५६ ॥ तारयेन्नरकाद्घोरात्कुलानां शतमुत्तरम् ॥ स्नात्वा दत्त्वाऽत्र सहिताः श्रुत्वा वै भक्तिपूर्वकम् ॥ ५७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे जामदग्न्यतीर्थमाहात्म्यवर्णनंनामाष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ नर्मदादक्षिणे कूले तीर्थं कोटीश्वरं परम् ॥ यत्र स्नानं च दानं च सर्वं कोटिगुणं भवेत् ॥ १ ॥ तत्र देवाः सगन्धर्वा ऋषयो ये तथाऽमलाः ॥ कोटितीर्थे परां सिद्धिं संप्राप्ता भुवि दुर्लभाम् ॥ २ ॥ स्थापितश्च महादेवस्तत्र कोटीश्वरो नृप ॥ तं दृष्ट्वा देवदेवेशं सिद्धिं प्राप्तो त्यनुत्तमाम् ॥ ३ ॥ तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम् ॥ क्रियते तन्नृपश्रेष्ठ सर्वं कोटिगुणं भवेत् ॥ ४ ॥ तत्र दक्षिणमार्गस्था ये केचिन्मुनिसत्तमाः ॥ सिद्धा मृताः पदं यांति पितृलोकं ध्रुवं हि ते ॥ ५ ॥ उत्तरं नर्मदाकूलं ये श्रेष्ठा मुनिपुंगवाः ॥ देवलोकं गताः पूर्वमिति शास्त्रस्य निश्चयः ॥ ६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनामैकोनविंशदधिकद्विशततमोऽध्यायः ॥ २१९ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततो गच्छेद्धराधीश लोटणेश्वरमुत्तमम् ॥ उत्तरे नर्मदाकूले सर्वपातकनाशनम् ॥ १ ॥ तत्क्षणादेव तत्सर्वं सप्तजन्मार्जितं त्वघम् ॥ नश्यते देवदेवस्य दर्शनादेव तन्नृप ॥ २ ॥ बाल्यात्प्रभृति यत्पापं यौवने चाऽपि यत्कृतम् ॥ तत्सर्वं विलयं याति देवदेवस्य दर्शनात् ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आश्चर्यभूतं लोकेषु नर्मदाचरितं महत् ॥ त्वया वै कथितं विप्र सकलं पापनाशनम् ॥ ४ ॥ यदेकं परमं तीर्थं सर्वतीर्थफलप्रदम् ॥ श्रोतुमिच्छामि तत्सर्वं दयां कृत्वा वदाऽऽशु मे ॥ ५ ॥ ये केचिद्दुर्लभाः प्रश्नास्त्रिषु लोकेषु सत्तम ॥ त्वत्प्रसादेन ते सर्वे श्रुता मे सह बांधवैः ॥ ६ ॥ एतमेकं परं प्रश्नं सर्वप्रश्नविदां वर ॥ श्रुत्वाऽहं त्वत्प्रसादेन यत्र यामि सबांधवः ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधुसाधु महाप्राज्ञ यस्य ते मतिरीदृशी ॥ दुर्लभं त्रिषु लोकेषु तस्य ते नाऽस्ति किंचन ॥ ८ ॥ धर्ममर्थं च कामं च मोक्षं च भरतर्षभ ॥ काले काले च यो वेत्ति कर्त्तव्यस्तेन धीमता ॥ ९ ॥ तस्मात्ते संप्रवक्ष्यामि प्रश्नस्यास्योत्तरं शुभम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते भुवि मानवाः ॥ १० ॥ नर्मदा सरितां श्रेष्ठा सर्वतीर्थमयी शुभा ॥ विशेषः कथितस्तस्या रेवासागरसंगमे ॥११॥आगच्छन्तीं नृपश्रेष्ठ दृष्ट्वा रेवां महोदधिः ॥ प्रणम्य च पुनर्देवीं संगमे रेवया सह ॥१२॥ संचिंत्य मनसा केयमिति मां वै सरिद्वरा ॥ ज्ञात्वा संचिंत्य मनसा रेवां लिंगोद्भवां पराम् ॥ १३ ॥ लुठन्वै सम्मुखस्तात गतो रेवां महोदधिः ॥ समुद्रे नर्मदा यत्र प्रविष्टाऽस्ति महानदी ॥ १४ ॥ तत्र देवाधिदेवस्य समुद्रे लिंगमुत्थितम् ॥ लिंगोद्भूता महाभागा नर्मदा सरितां वरा ॥ १५ ॥ लयं गता तत्र लिंगे तेन पुण्यतमा हि सा ॥ नर्मदायां वसन्नित्यं नर्मदांबु पिबन्सदा ॥ दीक्षितः सर्वयज्ञेषु सोमपानं दिनेदिने ॥ १६ ॥ संगमे तत्र यः स्नात्वा लोटणेश्वरमर्चयेत् ॥ सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १७ ॥ वाचिकं मानसं पापं कर्मणा यत्कृतं नृप ॥ लोटणेश्वरमासाद्य सर्वं विलयतां व्रजेत् ॥ १८ ॥ कार्त्तिक्यां तु विशेषेण कथितं शंकरेण तु ॥ तच्छृणुष्व नृपश्रेष्ठ सर्वपापापनोदनम् ॥ १९ ॥ संप्राप्तां कार्त्तिकीं दृष्ट्वा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गत्वा तत्र नृपोत्तम ॥ चतुर्दश्यामुपोष्यैव स्नात्वा वै नर्मदाजले ॥ २० ॥ संतर्प्य पितृदेवांश्च श्राद्धं कृत्वा यथाविधि ॥ रात्रौ जागरणं कुर्यात्सं
पूज्य लोटणेश्वरम् ॥ २१ ॥ सफलं जीवितं तस्य सफलं तस्य चेष्टितम् ॥ पंगवस्ते न सन्देहो जन्म तेषां निरर्थकम् ॥ २२ ॥
एकाग्रमनसा यैस्तु न दृष्टो लोटणेश्वरः ॥ पिशाचत्वं वियोनित्वं न भवेत्तस्य वै कुले ॥ २३ ॥ संगमे तत्र यो गत्वा स्नानं कृत्वा यथा
विधि ॥ पुण्यैश्चैव तथा कुर्याद्गीतैर्नृत्यैः प्रबोधनम् ॥ २४ ॥ ततः प्रभातां रजनीं दृष्ट्वा नत्वा महोदधिम् ॥ आमन्त्र्य स्नानवि
धिना स्नानं तत्र तु कारयेत् ॥ २५ ॥ ॐनमो विष्णुरूपाय तीर्थनाथाय ते नमः ॥ सान्निध्यं कुरु मे देव समुद्र लवणांऽ
भसि ॥ २६ ॥ ॥ इत्यामंत्रणमन्त्रः ॥ ॥ अग्निश्च तेजो मृडया च देहो रेतोऽधा विष्णुरमृतस्य नाभिः ॥ एवं ब्रुवन्पांडव सत्यवाक्यं ततोऽवगाहेत
पतिं नदीनाम् ॥ २७ ॥ ॥ इति स्नानमन्त्रः ॥ ॥ आजन्मशतमाहस्रं यत्पापं कृतवान्नरः ॥ सकृत्स्नानाद्व्ययोहेत पापोघं लवणांभसि ॥
॥ २८ ॥ अन्यथा हि कुरुश्रेष्ठ देवयोनिरसौ विभुः ॥ कुशाग्रेणाऽपि विबुधैर्न स्पृष्टव्यो महार्णवः ॥ २९ ॥ सर्वरत्नप्रधानस्त्वं सर्वरत्नाकराकर ॥
सर्वामरप्रधानेश गृहणार्घं नमोऽस्तु ते ॥ ३० ॥ ॥ इति अर्घमन्त्रः ॥ ॥ पितृदेवमनुष्यांश्च संतर्प्य तदनंतरम् ॥ उत्तीर्य तीरे तस्यैव
पंचभिर्द्विजपुंगवैः ॥ ३१ ॥ श्राद्धं समाचरेत्पश्चाल्लोकपालानुरूपिभिः॥ कृत्वाऽग्रे लोकपालांस्तु प्रतिष्ठाप्य यथाविधि ॥ ३२ ॥ संपूज्य च यथान्यायं
तानेव ब्राह्मणैः सह ॥ सुकृतं दुष्कृतं पश्चात्तेभ्यः सर्वं निवेदयेत् ॥ ३३ ॥ बाल्यात्प्रभृति यत्पापं कृतं वार्धक्यवर्तने ॥ प्रख्यापयित्वा तेभ्योग्रे लोक
पालान्निमंत्रयेत् ॥ ३४ ॥ बाल्यात्प्रभृति यत्किंचित्कृतमाजन्मतोऽशुभम् ॥ विप्रेभ्यः कथितं सर्वं तत्सान्निध्यं स्थितेषु मे ॥ ३५ ॥ इत्युक्त्वा स
लुठेत्पश्चात्तेभ्योऽग्रेण च सम्मुखम् ॥ अनुमान्य च तान्पंच पश्चात्स्नानं समाचरेत् ॥ ३६ ॥ श्राद्धं च कार्यं विधिवत्पितृभ्यो नृपसत्तम ॥ एवं
कृते नृपश्रेष्ठ सर्वपापक्षयो भवेत् ॥ ३७ ॥ जिज्ञासार्थं तु यः कश्चिदात्मानं ज्ञातुमिच्छति ॥ शुभाऽशुभं च यत्कर्म तस्य निष्ठामिमां शृणु ॥
॥ ३८ ॥ स्नात्वा तत्र महातीर्थे लुठमानो व्रजेन्नरः ॥ पापकर्मान्यतो याति धर्मकर्मा व्रजेन्नदीम् ॥ ३९ ॥ पापकर्मा ततो ज्ञात्वा पापं मे पूर्वसंचि
तम् ॥ स्नात्वा तीर्थवरे तस्मिन्दानं दद्याद्यथाविधि ॥ ४० ॥ लोटणेश्वरमभ्यर्च्य सर्वपापैः प्रमुच्यते ॥ अवक्रगमनं गत्वा मुच्यते सर्वपातकैः ॥
॥ ४१ ॥ तस्मात्सर्वप्रयत्नेन ज्ञातव्यं नृपसत्तम ॥ स्नातव्यं मानवैस्तत्र यत्र संनिहितो हरः ॥ ४२ ॥ एवं स्नात्वा विधानेन ब्राह्मणान्वेदपारगान्॥
पूजयेत्पृथिवीपाल सर्वपापोपशांतये ॥ ४३ ॥ एवंगुणविशिष्टं हि तत्तीर्थं नृपसत्तम ॥ तस्य तीर्थस्य माहात्म्यं शृणुष्वैकमना नृप ॥ ४४ ॥ तत्र
तीर्थे नरः स्नात्वा संतर्प्य पितृदेवताः ॥ श्राद्धं यः कुरुते तत्र पितॄणां भक्तिभावितः ॥ ४५ ॥ दानं ददाति विप्रेभ्यो गोभूतिलहिरण्यकम् ॥ षष्टि
वर्षसहस्राणि कोटिवर्षशतानि च ॥ ४६ ॥ विमानवरमारूढः स्वर्गलोके महीयते ॥ नर्मदासर्वतीर्थेभ्यः स्नाने दाने च यत्फलम् ॥ ४७ ॥ तत्फलं
एमवाप्नोति रेवासागरसंगमे ॥ सुवर्णं रजतं ताम्रं मणिमौक्तिकभूषणम् ॥ ४८ ॥ गोवृषं च महीं धान्यं तत्र दत्त्वाऽक्षयं फलम् ॥ शुभस्याप्यशुभ
स्याऽपि तत्र तीर्थे न संशयः ॥ ४९ ॥ तत्र तीर्थे नरः कश्चित्प्राणत्यागं युधिष्ठिर ॥ करोति भक्त्या विधिवत्तस्य पुण्यफलं शृणु ॥ ५० ॥ कोटि
वर्षं तु वर्षाणां क्रीडित्वा शिवमंदिरे ॥ वेदवेदांगविद्विप्रो जायते विमले कुले ॥ ५१ ॥ पुत्रपौत्रसमृद्धोऽसौ धनधान्यसमन्वितः ॥ सर्वव्याधिविनि
र्मुक्तो जीवेच्च शरदांशतम् ॥ ५२ ॥ अपि द्वादशयात्रासु सोमनाथे यदर्चिते ॥ कार्त्तिक्यां कृत्तिकायोगे तत्पुण्यं लोटणेश्वरे ॥५३॥ गया गंगा कुरु
क्षेत्रे नैमिषे पुष्करे तथा ॥ तत्पुण्यं लभते पार्थ लोटणेश्वरदर्शनात् ॥ ५४ ॥ यः शृणोति नरो भक्त्या पठ्यमानमिदं शुभम् ॥ सर्वपापविनिर्मुक्तो
रुद्रलोकं स गच्छति ॥ ५५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे लोटणेश्वरतीर्थमाहा
त्म्यवर्णनंनाम विंशत्युत्तरद्विशततमोऽध्यायः ॥ १२० ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र रेवाया दक्षिणे तटे ॥ कोरा
द्वयांतरे तीर्थं मातृतीर्थादनुत्तमम् ॥ १ ॥ नाम्ना हंसेश्वरं पुण्यं वेमनस्यविनाशनम् ॥ कश्यपस्य कुले जातो हंसो दाक्षायणीसुतः ॥ २ ॥ ब्रह्मणो
वाहनं जातः पुरा तप्त्वा तपो महत् ॥ सैकदाः विधिनिर्देशं विना वेद्यभ्यमास्थितः ॥ ३ ॥ अभिभूतः शिवगणैः प्रगनाश युधिष्ठिर ॥ दक्षयज्ञमप
थने कांदिशीको विधिं विना ॥ ४ ॥ ब्रह्मणा संस्मृतोऽप्याशु नायाति स यदा खगः ॥ तदा तं शप्तवान्ब्रह्मा पातयामास वै पदात् ॥ ५ ॥ ततः स
शप्तमात्मानं मत्वा हंसस्त्वरान्वितः ॥ पितामहमुपागम्य प्रणिपत्येदमब्रवीत् ॥ ६ ॥ ॥ हंस उवाच ॥ ॥ तिर्यग्योनिसमुत्पन्नं भवान्छप्तुं न
चार्हति ॥ स्वभाव एव तिर्यक्षु विवेकविकलं मनः ॥ ७ ॥ तथापि देव पापोऽस्मि यदहं स्वामिनं त्यजं ॥ किं तु धावद्भिरत्युग्रैर्गणैः शार्वैः पिता
मह ॥ सहसाहं भयाक्रांतस्रस्तस्त्यक्त्वा पलायितः ॥८॥ अद्यापि भयमेवाहं पश्यन्नस्मि विभो पुरः ॥ तेन स्मृतोऽपि भवता नाव्रजं भवदंतिकं ॥
॥ ९ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ इति ब्रुवन्नेव हि धातुरग्रे हंसः श्वसत्यक्षिपूज्यः सुदीनः ॥ तिर्यञ्चं मां पापिनं मूढबुद्धिं प्रभो पुरः पतितं पाहि
पाहि ॥ १० ॥ एको देवस्त्वं हि सर्गस्य कर्ता नानाविधं सृष्टमेतत्त्वयैव ॥ अहं सृष्टस्त्वीदृशो यत्त्वया वै सोऽयं दोषो धातरद्धा तवैव ॥ ११ ॥
शापस्यः वानुग्रहस्यापि शक्तस्त्वत्तो नान्यः शरणं कं व्रजामि ॥ सेवाधर्माद्विच्युतं दासभूतं चपेटैर्हतव्यं वै तात मां त्राहि भक्तम् ॥ १२ ॥ विद्या
विद्ये त्वत्त एवाविरास्तां धर्माधर्मौ सदस द्वर्युनिशे च ॥ नानाभावाञ्जगतस्त्वं विधत्सेस्तं त्वामेकं शरणं वै प्रपद्ये ॥१३॥ एकोऽसि बहुरूपोऽसि
नानाचित्रैकधर्मतः ॥ निष्कर्माखिलकर्मासि त्वामतः शरणं व्रजे ॥ १४ ॥ नमोनमो वरेण्याय वरदाय नमोनमः ॥ नमो धात्रे विधात्रे
च शरण्याय नमोनमः ॥ १५ ॥ शिक्षाक्षरविमुक्तेयं वाणी मे स्तौति किं विभो ॥ का शक्तिः किं परिज्ञानमिदमुक्तं क्षमस्व मे ॥ १६ ॥
॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं वदति हंसे वै ब्रह्मा प्राह प्रसन्नधीः ॥ शिक्षा दत्ता तवैवेयं मा विषादं कृथाः खग ॥ १७ ॥ तपसा शोध
यात्मानं यथा शापांतमाप्नुयाः ॥ रेवासेवां कुरु स्नात्वा स्थापयित्वा महेश्वरम् ॥ अचिरेणैव कालेन ततः संस्थानमाप्स्यसि ॥ १८ ॥ यत्रेष्ट्वा
बहुभिर्यज्ञैः समाप्तवरदक्षिणैः ॥ गोस्वर्णकोटिदानैश्च तत्फलं स्थापिते शिवे ॥ १९ ॥ ब्रह्मघ्नो वा सुरापो वा स्वर्णेट्टङ्कुरुतल्पगः ॥ रेवातीरे शिवं
स्थाप्य मुच्यते सर्वपातकैः ॥ २० ॥ तस्माद्गंगसरित्तीरे स्थापयित्वा त्रियंबकम् ॥ वियुक्तः सर्वदोषैस्त्वं यास्यसे पदमुत्तमम् ॥ २१ ॥ एवमुक्तः स
विधिना हृष्टतुष्टः खगोत्तमः ॥ तथेत्युक्त्वा जगामाशु नर्मदातीरमुत्तमम् ॥ २२ ॥ तपस्तप्त्वा कियत्कालं स्थापयामास शंकरम् ॥ २३ ॥ स्व
नाम्ना भरतश्रेष्ठ हंसेश्वरमनुत्तमम् ॥ पूजयित्वा परं स्थानं प्राप्तवान्खगसत्तमः ॥ २४ ॥ तत्र हंसेश्वरे तीर्थे गत्वा स्नात्वा युधिष्ठिर ॥ पूजयेत्परमे
शानं स पापैः परिमुच्यते ॥ २५ ॥ स्तुवन्नेकमना देवं न दैन्यं प्राप्नुयात्क्वचित् ॥ श्राद्धं दीपप्रदानं च ब्राह्मणानां च भोजनम् ॥ दत्त्वा शक्त्या
नृपश्रेष्ठ स्वर्गलोके महीयते ॥ २६ ॥ त्रिकालमेककालं वा यो भक्त्या पूजयेच्छिवम् ॥ नवप्रसूतां धेनुं च दत्त्वा पार्थ द्विजोत्तमे ॥ षष्टिवर्षसहस्राणि
शिवलोके महीयते ॥२७॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखंडे हंसेश्वरतीर्थमाहात्म्यवर्णनंनामैक

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विंशदधिकद्विशततमोऽध्यायः ॥ २२१ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे गच्छेत्तिलादं तीर्थमुत्तमम् ॥ तिलप्राशनकृद्यत्र जावालिः शुद्धिमाप्तवान् ॥ १ ॥ पितृमातृपरित्यागी भ्रातुर्भार्याभिलापकृत् ॥ पुत्रविक्रयकृत्पापश्छलकृद्गुरुणा सह ॥ २ ॥ एवं दोषसमाविष्टो यत्र यत्रापि गच्छति ॥ तत्र तत्रापि धिक्कारं लभते सत्सु भारत ॥ न कोऽपि संगतिं धत्ते तेन सार्द्धं सभास्वपि ॥ ३ ॥ इति लज्जान्वितो विप्रः काले न महता नृप ॥ चिंतामवाप महतीमगतिज्ञो हि पावने ॥ ४ ॥ चकार सर्वतीर्थानि रेवां चाप्यवगाहयत् ॥ ५ ॥ अणिवापांतमासाद्य दक्षिणे नर्मदातटे ॥ तस्थौ यत्र व्रती पार्थ जावालिः प्राशयंस्तिलान् ॥ ६ ॥ तिलैरेकाशनं कुर्वंस्तथैवैकांतराशनम् ॥ त्र्यहषट्द्वादशाहाशी पक्षमासाशनस्तथा ॥ ॥ ७ ॥ कृच्छ्रचांद्रायणादीनि व्रतानि च तिलैरपि ॥ तिलादत्वमनुप्राप्तो ह्यब्दद्वासप्ततिं क्रमात् ॥ ८ ॥ कालेन गच्छता तस्य प्रसन्नोऽभवदीश्वरः ॥ प्रादादिहामुत्रिकीं तु शुद्धिं सालोक्यमात्मकम् ॥ ९ ॥ तेन स स्थापितो देवः स्वनाम्ना भरतर्षभ ॥ तिलादेश्वरसंज्ञां च प्राप लोकादपि प्रभुः ॥ ॥ १० ॥ तदा प्रभृति विख्यातं तीर्थं पापप्रणाशनम् ॥ तत्र तीर्थे नरः स्नात्वा चतुर्दश्यष्टमीषु च ॥ ११ ॥ उपवासपरः पार्थ तथैव हरिवासरे ॥ तिलहोमी तिलोद्वर्ती तिलस्नायी तिलोदकी ॥ १२ ॥ तिलदाता च भोक्ता च नानापापैः प्रमुच्यते ॥ तिलैरापूरयेल्लिंगं तिलतैलेन दीपदः ॥ रुद्रलोकमवाप्नोति पुनात्यासप्तमं कुलम् ॥ १३ ॥ तिलपिंडप्रदानेन श्राद्धे नृपतिसत्तम ॥ विकर्मस्थाश्च गच्छंति गतिमिष्टां हि पूर्वजाः ॥ १४ ॥ स्वर्गलोकस्थिताः श्राद्धैर्ब्राह्मणानां च भोजनैः ॥ अक्षयां तृप्तिमासाद्य मोदंते शाश्वतीः समाः ॥ १५ ॥ पितुः कुलं मातृकुलं तथा भार्याकुलं नृप ॥ कुलत्रयं समुद्धृत्य स्वर्गं नयति वै नरः ॥ १६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखंडे रेवाखण्डे तिलादेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वाविंशदधिकद्विशततमोऽध्यायः ॥ २२२ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पार्थ वासवं तीर्थमुत्तमम् ॥ वसुभिः स्थापितं तत्र स्थित्वा वै द्वादशाब्दकम् ॥ १ ॥ धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविमे पुरा ॥ २ ॥ पितृशापपरिक्लिष्टा गर्भवासाय भारत ॥ नार्मदं तीर्थमासाद्य तपश्चक्रुर्यतेंद्रियाः ॥ ३ ॥ आराधयंतः परमं भवानीपतिमव्ययम् ॥ द्वादशाब्दानि राजेंद्र ततस्तुष्टो महेश्वरः ॥ ४ ॥ प्रत्यक्षः प्रददौ तेभ्यस्त्वभीष्टं वरमुत्तमम् ॥ ततः स्वनाम्ना संस्थाप्य वसवस्तं महेश्वरम् ॥ जग्मुराकाशमाविश्य प्रसन्ने सति शंकरे ॥ ५ ॥ ततः प्रभृति विख्यातं तीर्थं तद्वासवाह्वयम् ॥ तस्मिंस्तीर्थे महाराज यो भक्त्या पूजयेच्छिवम् ॥ यथालब्धोपहारैश्च दीपं दद्यात्प्रयत्नतः ॥ ६ ॥ शुक्लपक्षे तदाष्टम्यां प्रत्यहं वापि शक्तितः ॥ अष्टौ वर्षसहस्राणि स वसेच्छिवसंनिधौ ॥ ७ ॥ ततः शिवालयं याति गर्भवासं न पश्यति ॥ पुष्पैर्वा पल्लवैर्वापि फलैर्धान्यैस्तथापि वा ॥ ८ ॥ पूजयेद्देवमीशानं स दैन्यं नाप्नुयात्क्वचित् ॥ सर्वशोकविनिर्मुक्तः स्वर्गलोके महीयते ॥ ९ ॥ एकाहमपि कौंतेय यो वसेद्वासवेश्वरे ॥ पापराशिं विनिर्धूय भानुवद्दिवि मोदते ॥ १० ॥ विप्रांश्च भोजयेद्भक्त्या दद्याद्वासांसि दक्षिणाम् ॥ ११ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे वासवेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पार्थ तीर्थं कोटीश्वरं परम् ॥ यत्र स्नानं च दानं च जपहोमार्चनादिकम् ॥ भक्त्या कृतं नरैस्तत्र सर्वं कोटिगुणं भवेत् ॥ १ ॥ तत्र देवाः सगन्धर्वा ऋषयः सिद्धचारणाः ॥ जलधिं प्रति गच्छंति नर्मदां वीक्षितुं किल ॥ २ ॥ मिलिताः कोटिशो राजन्रेवासागरसंगमे ॥ विनोदमतुलं दृष्ट्वा रेवार्णवसमागमे ॥ ३ ॥ स्नात्वा शिवं च संस्थाप्य पूजयित्वा महेश्वरम् ॥ कोटीश्वराभिधानं तु स्वस्वभक्त्या विधानतः ॥ ४ ॥ कोटीतीर्थे परां सिद्धिं संप्राप्ताः सर्वतोषणात् ॥ तेन तत्पुण्यमतुलं सर्वतीर्थेषु चोत्तमम् ॥ ५ ॥ तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम् ॥ क्रियते नृपशार्दूल सर्वं कोटिगुणं भवेत् ॥ ६ ॥ तत्र तीर्थे तु मार्गस्था ये केचिदृषिसत्तमाः ॥ सिद्धामृतपदं यांति पितृलोकं तथोत्तमम् ॥ ७ ॥ उत्तरे नर्मदातीरे दक्षिणे चाश्रिताश्च ये ॥ देवलोकं गतास्तत्र इति मे निश्चिता मतिः ॥ ८ ॥ बिल्वार्कपुष्पैर्धत्तूरकुशकाशप्रसूनकैः ॥ ऋतूद्भवैस्तथान्यैश्च पूजयित्वा महेश्वरम् ॥ ९ ॥ नानोपचारैर्विधिवन्मंत्रपूर्वं युधिष्ठिर ॥ धूपदीपार्घनैवेद्यैस्तोषयित्वा च धूर्जटिम् ॥ १० ॥ शिवलोकमवाप्नोति यावदिंद्राश्चतुर्दश ॥ पौषकृष्णाष्टमीयोगे विशेषः पूजने स्मृतः ॥ ११ ॥ नित्यं च नृपतिश्रेष्ठ चतुर्दश्यष्टमीषु च ॥ शिवमभ्यर्च्य विप्रांश्च भोजयेद्भक्तितो वरान् ॥ १२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनाम चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥ ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे गच्छेदलिकातीर्थमुत्तमम् ॥ अलिकानाम गांधर्वी कुशीला कुटिलाशया ॥ १ ॥ चित्रसेनस्य दौहित्री विद्यानंदमृषिं गता ॥ वव्रे तं स्वीकृता तेन दशवर्षाणि तं श्रिता ॥ २ ॥ पतिं जघान तं सुप्तं कस्मिंश्चित्कारणांतरे ॥ गत्वा निवेदयामास पितरं रत्नवल्लभम् ॥ ३ ॥ पित्रा मात्रा च संत्यक्ता बहुभिर्भर्त्सिता नृप ॥ गर्भघ्नी त्वं पतिघ्नी त्वमिति दर्शय मा मुखम् ॥ ४ ॥ ब्रह्मघ्नी याहि पापिष्ठे परित्यक्ता गृहाजद्य ॥ ५ ॥ ॥ मार्कंडेय उवाच ॥ ॥ इति दुःखान्विता मूढा ताभ्यां निर्भर्त्सिता सती ॥ तनुं त्यक्तुं मनश्चक्रे प्राप्य तीर्थांतरं क्वचित् ॥ ६ ॥ संपृच्छ्यमाना तीर्थानि ब्राह्मणेभ्यो युधिष्ठिर ॥ श्रुत्वा पापहरं तीर्थं रेवासागरसंगमे ॥ ७ ॥ तत्र पार्थ तपश्चक्रे निराहारा जितव्रता ॥ कृच्छ्रातिकृच्छ्रपाराकमहासांतपनादिभिः ॥ ८ ॥ चांद्रायणैर्ब्रह्मकूर्चैः कर्शयामास वै तनुम् ॥ एवं वर्षशतं सार्द्धं व्यतीतं तपसा नृप ॥ ९ ॥ तस्या विशुद्धिमिच्छंत्याः शिवध्यानार्चनादिभिः ॥ ततः कतिपयाहोभिस्तस्या ज्ञात्वा हठं परम् ॥ परितुष्टः शिवः प्राह पार्वत्या परिनोदितः ॥ १० ॥ ॥ ईश्वर उवाच ॥ ॥ पुत्रि मा साहसं कार्षीः शुद्धदेहासि सांप्रतम् ॥ तुष्टोऽहं तपसा तेऽद्य वरं वरय वांछितम् ॥ ११ ॥ ॥ अलिकोवाच ॥ ॥ यदि तुष्टोऽसि देवेश वरार्हा यद्यहं मता ॥ नानापापाग्नितप्ताया देहि शुद्धिं परां मम ॥ १२ ॥ त्वं मे नाथो ह्यनाथायास्त्वमेव जगतां गुरुः ॥ दीनानाथसमुद्धर्त्ता शरण्यः सर्वदेहिनाम् ॥ १३ ॥ ॥ ईश्वर उवाच ॥ ॥ त्वं भद्रे शुद्धदेहासि मा किंचिदनुशोचिथाः ॥ स्वनाम्ना स्थापयित्वेह मां ततः स्वर्गमेष्यसि ॥ १४ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ अलिकापि ततो भक्त्या स्नात्वा संस्थाप्य शंकरम् ॥ १५ ॥ दत्त्वा दानं च विप्रेभ्यो लोकमाप महोत्कटम् ॥ पितरं च समासाद्य मातरं च युधिष्ठिर ॥ १६ ॥ तैश्च सन्मानिता प्रीत्या बन्धुभिः सालिका ततः ॥ विमानवरमारूढा दिव्यमालान्विता नृप ॥ १७ ॥ गौरीलोकमनुप्राप्ता सखित्वेद्यापि मोदते ॥ ततः प्रभृति तत्पार्थ विख्यातमलिकेश्वरम् ॥ १८ ॥ तत्र तीर्थे तु या नारी पुरुषो वा युधिष्ठिर ॥ स्नात्वा संपूजयेद्भक्त्या महादेवमुमायुतम् ॥ ॥ १९ ॥ स पापैर्विविधैर्मुक्तो लोकमाप्नोति शांकरम् ॥ मानसं वाचिकं पापं कायिकं यत्पुरा कृतम् ॥ २० ॥ सर्वं तद्विलयं याति भोजयित्वा द्विजान्सदा ॥ दीपं दत्त्वा च देवाग्रे न रोगैः परिभूयते ॥ २१ ॥ धूपपात्रं विमानं च घण्टां कलशमेव च ॥ दत्त्वा देवाय राजेंद्र शाक्रं लोकमवाप्नुयात् ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखंडे रेवाखंडे रेवासागरसंगमेऽलिकेश्वरतीर्थमाहात्म्यवर्णनंनाम पंचविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ ॥ छ ॥ ॥ मार्कंडेय उवाच ॥ ॥ ततः क्रोशांतरे पुण्यं तीर्थं तद्विमले

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्वरम् ॥ यत्र स्नानेन दानेन जपहोमार्चनादिभिः ॥ १ ॥ विमलेश्वरमाराध्य यो यदिच्छेत्स तल्लभेत् ॥ स्वर्गलाभादिकं वापि पार्थिवं वा यथेप्सितम् ॥ २ ॥ पुरा त्रिशिरसं हत्वा त्वष्टुः पुत्रं शतक्रतुः ॥ यस्य तीर्थस्य माहात्म्याद्वैमल्यं परमं गतः ॥ ३ ॥ यत्र वेदनिधिर्विप्रो महत्तप्त्वा तपः पुरा ॥ नानाकर्ममलैः क्षीणैर्विमलोऽभवदर्ककवत् ॥ ४ ॥ महादेवप्रसादेन सोमवत्प्रियदर्शनः ॥ पुरा भानुमतीं भानुः सुतां स्मरशरार्दितः ॥ ५ ॥ चकमे तेन दोषेण कुष्ठरोगार्दितोऽभवत् ॥ स चाप्यत्र तपस्तप्त्वा विमलत्वमुपागतः ॥ ६ ॥ महादेवेन तुष्टेन स्वस्थानं मुदितोऽभजत् ॥ तथैव च पुरा पार्थ त्रिभांडकसुतो मुनिः ॥ ७ ॥ योगिसंगं वने प्राप्य पुरे च नृपतेस्तथा ॥ राजसंसर्गदोषाद्धि मालिन्यं परमात्मनः ॥ ८ ॥ विचार्यैव भ्युपेत्य रेवासागरसंगमम् ॥ शांतया भार्यया सार्द्धं तप्त्वा द्वादशवत्सरान् ॥ ९ ॥ कृच्छ्रचांद्रायणैर्देवं तोषयंस्त्र्यंबकं मुनिः ॥ महादेवेन तुष्टेन सोऽपि वैमल्यमाप्तवान् ॥ १० ॥ शर्वाण्या प्रेरितः शर्वः पुरा दारुवने नृप ॥ मोहनान्मुनिपत्नीनां स्वं वीक्ष्य विमलं किल ॥ ११ ॥ विचार्य परमस्थानं नर्मदोदधिसंगमम् ॥ तत्र स्थित्वा महाराज तपस्तप्त्वा सहोमया ॥ १२ ॥ विमलोऽसौ यतो जातस्तेनासौ विमलेश्वरः ॥ तेन नाम्ना स्वयं तस्थौ लोकानां हितकाम्यया ॥ १३ ॥ ततस्तिलोत्तमां सृष्ट्वा ब्रह्मा लोकपितामहः ॥ प्रजानाथोपि तां मृद्वीं दृष्ट्वाग्रे सुमनोहराम् ॥ १४ ॥ भावियोगबलाक्रांतः स तस्यामभिकोऽभवत् ॥ तेन वीक्ष्य सदोषत्वं रेवातीरद्वयं श्रितः ॥ १५ ॥ तीर्थान्यनुसरन्मौनी त्रिषवायी संस्मरञ्छिवम् ॥ रेवार्णवसमायोगे स्नात्वा संपूज्य शंकरम् ॥ कालेनाल्पेन राजर्षे ब्रह्माप्यामलतां गतः ॥ १६ ॥ एवमन्येपि बहुशो देवर्षिनृपसत्तमाः ॥ त्यक्त्वा दोषमलं तत्र विमला बहवोऽभवन् ॥ १७ ॥ तथा त्वमपि राजेंद्र तत्र स्नात्वा शिवार्चनात् ॥ अमलोपि विशेषेण वैमल्यं प्राप्स्यसे परम् ॥ १८ ॥

तत्र स्नात्वा नरो नारी पूजयित्वा महेश्वरम् ॥ पापदोषविनिर्मुक्तो ब्रह्मलोके महीयते ॥ १९ ॥ तत्रोपवासं यः कृत्वा पश्येत विमलेश्वरम् ॥ अष्टम्यां च चतुर्दश्यां सर्वपर्वसु पार्थिव ॥ २० ॥ सप्तजन्मकृतं पापं हित्वा याति शिवालयम् ॥ श्राद्धं कृत्वा विधानेन पितॄणामनृणी भवेत् ॥ ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ २१ ॥ यद्यदिष्टतमं लोके यच्चेवात्महितं गृहे ॥ तत्तद्गुणवते देयं तच्चेवाक्षयमिच्छता ॥ स्वर्गधान्यानि वासांसि छत्रोपानत्कमण्डलुम् ॥ २२ ॥ गृहं देवस्य वै शक्त्या कृत्वा स्याद्भुवि भूपतिः ॥ गीतनृत्यकथाभिश्च तोषयेत्परमेश्वरम् ॥ ॥ २३ ॥ इति श्रीस्कांदे महापुराण एकाशीसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥ ॥ ७ ॥ ॥ मार्कंडेय उवाच ॥ ॥ एतानि तव संक्षेपात्प्राधान्यात्कथितानि च ॥ न शक्यो विस्तराद्वक्तुं संख्यां तीर्थेषु पांडव ॥ १ ॥ एषा पवित्रा विमला नदी त्रैलोक्यविश्रुता ॥ नर्मदा सरितां श्रेष्ठा महादेवस्य वल्लभा ॥ २ ॥ मनसा संस्मरेद्यस्तु नर्मदां सततं नृप ॥ चांद्रायणशतस्याशु लभते फलमुत्तमम् ॥ ३ ॥ अश्रद्दधानाः पुरुषा नास्तिकाश्चात्र ये स्थिताः ॥ पतंति नरके घोरे प्राहैवं परमेश्वरः ॥ ४ ॥ नर्मदां सेवते नित्यं स्वयं देवो महेश्वरः ॥ तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ॥ ५ ॥ इयं माहेश्वरी गंगा महेश्वरतनूद्भवा ॥ प्रोक्ता दक्षिणगंगेति भारतस्य युधिष्ठिर ॥ ६ ॥ जाह्नवी वैष्णवी गंगा ब्राह्मी गंगा सरस्वती ॥ इयं माहेश्वरी गंगा रेवा नास्त्यत्र संशयः ॥ ७ ॥ यथा हि पुरुषे देवास्त्रैमूर्तत्वमुपाश्रिताः ॥ ब्रह्मविष्णुमहेशाख्यं न भेदस्तत्र वै यथा ॥ तथा सरित्रये पार्थ भेदं मनसि मा कृथाः ॥ ॥ ८ ॥ कोटिशो ह्यत्र तीर्थानि लक्षशश्चापि भारत ॥ तथा सहस्रशो रेवातीरद्वयगतानि तु ॥ ९ ॥ वृक्षांतरिक्षसंस्थानि जलस्थलगतानि च ॥ कः शक्तस्तानि निर्गंतुं वागीशो वा महेश्वरः ॥ १० ॥ स्मरणाज्जन्मजनितं दर्शनाच्च त्रिजन्मजम् ॥ सप्तजन्मकृतं नश्येत्पापं रेवावगाहनात् ॥ ११ ॥ देवकार्यं कृतं तेन अग्नयो विधिवद्धुताः ॥ वेदा अधीताश्चत्वारो येन रेवावगाहिता ॥ १२ ॥ प्राधान्याच्चापि संक्षेपात्तीर्थान्युक्तानि ते मया ॥ न शक्यो विस्तरः पार्थ श्रोतुं वक्तुं च वै मया ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ विधानं च यमांश्चैव नियमांश्च वदस्व मे ॥ प्रायश्चित्तार्थगमने को विधिस्तं वदस्व ह्म ॥ १४ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधु पृष्टं महाराज यच्छ्रेयः पारलौकिकम् ॥ शृणुष्वावहितो भूत्वा यथाज्ञानं वदामि ते ॥ १५ ॥ अध्रुवेण शरीरेण ध्रुवं कर्म समाचरेत् ॥ अवश्यमेव यास्यंति प्राणाः प्राघूर्णिका इव ॥ १६ ॥ दानं वित्तादृणं वाचः कीर्तिधर्मौतथा स्वयुषः ॥ परोपकरणं कायादसारात्सारमुद्धरेत् ॥ १७ ॥ अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेंधनेन ॥ मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता ॥ १८ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ १९ ॥ मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ २० ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २१ ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २२ ॥ संतीह विविधोपाया नृणां देहविशोधनाः ॥ तीर्थसेवासमं नास्ति स्वशरीरस्य शोधनम् ॥ २३ ॥ कृच्छ्रचांद्रायणाद्यैर्वा द्वितीयं तीर्थसेवया ॥ यदा तीर्थं समुद्दिश्य प्रयाति पुरुषो नृप ॥ तदा देवाश्च पितरस्तं व्रजंत्यनु खेचराः ॥ २४ ॥ परमा मोदपूर्णास्ते प्रयांत्यस्यानुयायिनः ॥ कृत्वाऽऽभ्युदयिकं श्राद्धं समापृच्छ्य तु देवताम् ॥ २५ ॥ इष्टबन्धूंश्च विप्रांश्च शंकरं सगणेश्वरम् ॥ व्रजेद्द्विजान् भ्यनुज्ञातो गृहीत्वा नियमानपि ॥ २६ ॥ एकाशनं ब्रह्मचर्यं भूशय्यां सत्यवादिताम् ॥ वर्जनं च परान्नस्य प्रतिग्रहविवर्जनम् ॥ २७ ॥ वर्जयित्वा तथा द्रोहवंचनादि नृपोत्तम ॥ साधुवेषं समास्थाय विनयेन विभूषितः ॥ २८ ॥ दंभाहंकारमुक्तो यः स तीर्थफलमश्नुते ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥ २९ ॥ विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः ॥ ३० ॥ आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ ३१ ॥ वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥ स्नानं सुरार्चनं चैव श्राद्धं वै पिण्डपातनम् ॥ ३२ ॥ विप्राणां भोजनं शक्त्या सर्वतीर्थेष्वयं विधिः ॥ प्रायश्चेतनिमित्तं च यो व्रजेद्व्रतमानसः ॥ ३३ ॥ तस्यापि च विधेर्वक्ष्ये शृणु पार्थ समाहितः ॥ एकाशनं ब्रह्मचर्यमक्षारलवणाशनम् ॥ ३४ ॥ स्नात्वा तीर्थाभिगमनं हविष्येकान्नभोजनम् ॥ वर्जयेत्पनिवालापं बहुभाषणमेव च ॥ ३५ ॥ परीवादं परान्नं च नीचसंगं विवर्जयेत् ॥ व्रजेच्च निरुपानत्को वसानो वाससी शुचिः ॥ ३६ ॥ संकल्पं मनसा कृत्वा ब्राह्मणानुज्ञया व्रजेत् ॥ तीर्थे गत्वा तथा स्नात्वा कृत्वा चैव सुरार्चनम् ॥ ३७ ॥ दुष्कर्मतो विमुक्तः स्यादनुतापी भवेद्यदि ॥ वेदे तीर्थे च देवे च देवज्ञे चौषधे गुरौ ॥ ३८ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ उक्ततीर्थफलानां च पुराणेषु स्मृतिष्वपि ॥ ३९ ॥ अर्थवादमतां शंकां विहाय भरतर्षभ ॥ कृत्वा विचारं शास्त्रोक्तं परिकल्प्य यथोचितम् ॥ ४० ॥ कायेन कृच्छ्रचरणे ह्यशक्तानां विशुद्धये ॥ ज्ञात्वा तीर्थतिथिं हि प्रायश्चित्तं समाचरेत् ॥ ४१ ॥ तच्छृणुष्व महाराज नर्मदायां यथोचितम् ॥ चतुर्विंशतिसंख्येभ्यो योजनेभ्यो व्रजेन्नरः ॥ ४२ ॥ चतुर्विंशति कृच्छ्राणां फलमाप्नोति शोभनम् ॥ अत ऊर्ध्वं योजनेषु पादकृच्छ्रं उदाहृतः ॥ ४३ ॥ तन्मध्ये च महाराज यो व्रजेदर्धिकत्रया ॥ योजने

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

योजने तस्य प्रायश्चित्तं विदुर्बुधाः ॥ ४४ ॥ प्रणवाख्ये [illegible] तज्ज तथा रेवोरिसंगमे ॥ भृगुक्षेत्रे तथा गत्वा फलं तद्द्विगुणं स्मृतम् ॥ ४५ ॥ संगमे देवनद्याश्च शूलभेदे नृपोत्तम ॥ द्विगुणं पादहीनं स्यात्करजाऽऽगमे तथा ॥ ४६ ॥ एरण्डीसंगमे तद्वत्कपिलायाश्च संगमे ॥ केचिद्विगुणितं प्राहुः कुब्जारेवोत्यसंगमे ॥ ४७ ॥ ॐकारे च महाराज तदपि स्यात्समंजसम् ॥ संगमेषु तथान्यासां नदीनां रेवया सह ॥ ४८ ॥ प्राहुस्तै सार्द्धकृच्छ्रं वै फलं पूर्वं युधिष्ठिर ॥ त्रिगुणं कृच्छ्रमाप्नोति रेवासागरसंगमे ॥ ४९ ॥ कृच्छ्रं चतुर्गुणं प्रोक्तं शुक्लतीर्थे युधिष्ठिर ॥ योजने योजने गत्वा चतुर्विंशतियोजनम् ॥ तत्र तत्र वसेद्यस्तु सुचिरं नृवरोत्तम ॥ ५० ॥ रेवासेवासमाचारः संयुक्तः शुद्धबुद्धिमान् ॥ दंभाहंकाररहितः शुद्ध्यर्थं स विमुच्यते ॥ ५१ ॥ इति ते कथितं पार्थ प्रायश्चित्तार्थलक्षणम् ॥ रेवायात्रानिधानं च गुह्यमेतद्युधिष्ठिर ॥ ५२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ योजनस्य प्रमाणं मे वद त्वं मुनिसत्तम ॥ यज्ज्ञात्वा निश्चितं मे स्यान्मनःशुद्धेस्तु कारणम् ॥ ५३ ॥ ॥ मार्कंडेय उवाच ॥ ॥ शृणु पांडव वक्ष्यामि प्रमाणं योजनस्य यत् ॥ तथा यात्राविशेषेण विशेषं कृच्छ्रसम्भवम् ॥ ५४ ॥ तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ॥ प्रमाणमंगुलस्याहुर्वितस्तिर्द्वादशांगुला ॥ ५५ ॥ वितस्तिद्वितयं हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥ स एव दण्डो गदितो विशेषज्ञैर्युधिष्ठिर ॥ ५६ ॥ धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशं च योजनम् ॥ एतद्योजनमानं ते कथितं भरतर्षभ ॥ ५७ ॥ येन यात्रां व्रजन्वेत्ति फलमानं निजार्जितम् ॥ उक्तं कृच्छ्रफलं तीर्थे जलरूपं नृपोत्तम ॥ ५८ ॥ यथाविशेषं ते वच्मि पूर्वोक्ते तत्र तत्र च ॥ तन्मे शृणु महीपाल श्रद्दधानाय कथ्यते ॥ ५९ ॥ यस्मिंस्तीर्थे हि यत्प्रोक्तं फलं कृच्छ्रादिकं नृप ॥ तत्राप्युपोषणात्कृच्छ्रफलं प्राप्नोत्यथाधिकम् ॥ ६० ॥ दिनजाप्याच्च लभते फलं कृच्छ्रस्य शक्तितः ॥ तत्र विख्यातदेवेशं स्नात्वा दृष्ट्वाभिपूज्य च ॥ ६१ ॥ प्रणम्य लभते पार्थ फलं कृच्छ्रभवं सुधीः ॥ तीर्थे मुख्यफलं स्नानाद्वितीयं चाप्युपोषणात् ॥ ६२ ॥ तृतीयं ख्यातदेवस्य दर्शनाभ्यर्चनादिभिः ॥ चतुर्थं जाप्ययोगेन देहशक्त्या त्वहर्निशम् ॥ ६३ ॥ पंचमं सर्वतीर्थेषु कल्पनीयं हि दूरतः ॥ तीरस्थो योजनादर्वाग्दशांशं लभते फलम् ॥ ६४ ॥ उक्तत्तीर्थफलात्पार्थ नात्र कार्या विचारणा ॥ ६५ ॥ उपवासेन सहितं महानद्यां हि मज्जनम् ॥ अभ्यर्वाग्योजनात्पार्थ दद्यात्कृच्छ्रफलं नृणाम् ॥ ६६ ॥ षड्योजनवहा कुल्या नद्योऽल्पा द्वादशैव च ॥ चतुर्विंशतिगा नद्यो महानद्यस्ततोऽधिकाः ॥ ६७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे तीर्थयात्रादिविधानविशेषकथनं नाम सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ परार्थं तीर्थयात्रायां गच्छतः कस्य किं फलम् ॥ कियन्मात्रं मुनि श्रेष्ठ तन्मे ब्रूहि कृपानिधे ॥ १ ॥ ॥ मार्कंडेय उवाच ॥ ॥ परार्थं गच्छतस्तन्मे वदतः शृणु पार्थिव ॥ यथा यावत्फलं तस्य यात्रादिविहितं भवेत् ॥ २ ॥ उत्तमेनेह वर्णेन द्रव्यलोभादिना नृप ॥ नाधमस्य क्वचित्कार्यं तीर्थयात्रादिसेवनम् ॥ ३ ॥ धर्मकर्म महाराज स्वयं विद्वान्समाचरेत् ॥ शरीरस्याथवा शक्त्या अन्यद्वा कार्ययोगतः ॥ ४ ॥ धर्मकर्म सदा प्रायः सवर्णेनैव कारयेत् ॥ पुत्रपौत्रादिकैर्वापि ज्ञातिभिर्गोत्रसंभवैः ॥ ५ ॥ श्रेष्ठं हि विहितं प्राहुर्धर्मकर्म युधिष्ठिर ॥ तैरेव कारयेत्तस्मान्नोत्तमैर्नाधमैरपि ॥ ६ ॥ अधमेन कृतं सम्यङ्न भवेदिति मे मतिः ॥ उत्तमश्चाधमार्थे वै कुर्वन्दुर्गतिमाप्नुयात् ॥ ७ ॥ न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ॥ न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ ८ ॥ जपस्तपस्तीर्थयात्रा प्रव्रज्या मंत्रसाधनम् ॥ देवताराधनं दीक्षा स्त्रीशूद्रपतनानि षट् ॥ ९ ॥ पत्निवत्नी पत्न्येव विधवा सर्वमाचरेत् ॥ सभर्तृकाऽऽर्के पत्यौ सर्वं कुर्यादनुज्ञया ॥ १० ॥ गत्वा परार्थं तीर्थादौ षोडशांशफलं लभेत् ॥ गच्छतश्च प्रसंगेन तीर्थमर्द्धफलं स्मृतम् ॥ ११ ॥ अनुसंगेन तीर्थस्य स्नाने स्नानफलं विदुः ॥ नैव यात्राफलं तज्ज्ञाः शास्त्रोक्तं कल्मषापहम् ॥ १२ ॥ पित्रर्थं च पितृव्यस्य मातुर्मातामहस्य च ॥ मातुलस्य तथा भ्रातुः श्वशुरस्य सुतस्य च ॥ १३ ॥ पोषकार्थादयोश्चापि मातामह्या गुरोस्तथा ॥ स्वसुर्मातृष्वसुः पैत्र्या आचार्याध्यापकस्य च ॥ १४ ॥ इत्याद्यर्थे नरः स्नात्वा स्वयमष्टांशमाप्नुयात् ॥ साक्षात्पित्रोः प्रकुर्वाणश्चतुर्थांशमवाप्नुयात् ॥ १५ ॥ पतिपत्न्योर्मिथश्चार्द्धं फलं प्राहुर्मनीषिणः ॥ भागिनेयस्य शिष्यस्य भ्रातृव्यस्य सुतस्य च ॥ षट्त्रिपंचचतुर्भागान्फलमाप्नोति वै नरः ॥ १६ ॥ इति ते कथितं पार्थ पारंपर्यक्रमागतम् ॥ कर्तव्यं ज्ञातिवर्गस्य परार्थे धर्मसाधनम् ॥ १७ ॥ वर्षाऋतुसमायोगे सर्वा नद्यो रजस्वलाः ॥ मुक्त्वा सरस्वतीं गंगां नर्मदां यमुनानदीम् ॥ १८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे परार्थतीर्थयात्राफलकथनंनामाष्टविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥ ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ एवं ते कथितं राजन्पुराणं धर्मसंहितम् ॥ शिवप्रीत्या यथा प्रोक्तं वायुना देवसंसदि ॥ १ ॥ षष्टितीर्थसहस्राणि षष्टिकोटिस्तथैव च ॥ आदिमध्यावसानेषु नर्मदायां पदेपदे ॥ २ ॥ मया द्वादशसाहस्री संहिता या श्रुता पुरा ॥ देवदेवस्य गदतः सांप्रतं कथिता तव ॥ ३ ॥ पृष्टस्त्वयाऽहं भूपाल पर्वतेऽमरकंटके ॥ स्थितः संक्षेपतः सर्वं मया तत्कथितं तव ॥ ४ ॥ नर्मदाचरितं पुण्यं शृणु तस्यास्ति यत्फलम् ॥ यत्फलं सर्ववेदैः स्यात्सषडंगपदक्रमैः ॥ ५ ॥ पठितैश्च श्रुतैर्वाऽपि तस्माद्बहुतरं भवेत् ॥ सत्रयाजी फलं यत्र लभते द्वादशाब्दिकम् ॥ ६ ॥ चरिते तु श्रुते देव्या लभते तादृशं फलम् ॥ सर्वतीर्थेषु यत्पुण्यं स्नात्वा सागरमातृतः ॥ ७ ॥ सकृत्स्नात्वा तथा श्रुत्वा नर्मदायां फलं हि तत् ॥ आदिमध्यावसानेन नर्मदाचरितं शुभम् ॥ ८ ॥ यः शृणोति नरो भक्त्या तस्य पुण्यफलं शृणु ॥ स प्राप्य शिवसंस्थानं रुद्रकन्यासमावृतः ॥ ९ ॥ रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ एतद्धर्ममुपाख्यानं सर्वशास्त्रेषु सत्तमम् ॥ १० ॥ देशे वा मंडले वाऽपि वा ग्रामे नगरेऽपि वा ॥ गृहे वा तिष्ठते यस्य चातुर्वर्ण्यस्य भारत ॥ ११ ॥ स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः ॥ त्रिविधं कारणं लोके धर्मपंथानमुत्तमम् ॥ १२ ॥ देवतानां गुरुं शास्त्रं परमं सिद्धिकारणम् ॥ श्रुत्वेश्वरमुखात्पार्थ मयाऽपि तव कीर्तितम् ॥ १३ ॥ दक्षिणे चोत्तरे कूले यानि तीर्थानि कानिचित् ॥ प्रधानतः सुपुण्यानि कथितानि विशेषतः ॥ १४ ॥ स्पर्शनाद्दर्शनात्तेषां कीर्तनाच्छ्रवणात्तथा ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ १५ ॥ इदं यः शृणुयान्नित्यं पुराणं शिवभाषितम् ॥ ब्राह्मणो वेदविद्यावान्क्षत्रियो विजयी भवेत् ॥ १६ ॥ धनभागी भवेद्वैश्यः शूद्रो वै धर्मभाग्भवेत् ॥ सौभाग्यं संततिं स्वर्गं नारी श्रुत्वाऽप्नुयाद्धनम् ॥ १७ ॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ माहात्म्यं नर्मदायास्तु श्रुत्वा पापवहिष्कृताः ॥ १८ ॥ पापभेदी कृतघ्नश्च स्वामिविश्वासघातकः ॥ गोघ्नश्च गरदश्चैव कन्याविक्रयकारकः ॥ १९ ॥ एते श्रुत्वैव पापेभ्यो मुच्यंते नाऽत्र संशयः ॥ ये पुनर्भावितात्मानः शृण्वंति सततं नृप ॥ २० ॥ पूजयंत इदं देवा पूजिता गुरवश्च तैः ॥ नर्मदा पूजिता तेन भगवांश्च महेश्वरः ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन गंधपुष्पविभूषणैः ॥ पूजितं परया भक्त्या शास्त्रमेतत्फलप्रदम् ॥ २२ ॥ लेखापयित्वा सकलं नर्मदाचरितं शुभम् ॥ उत्तमं सर्वशास्त्रेभ्यो यो ददाति द्विजन्मने ॥ २३ ॥ नर्मदा सर्वतीर्थेषु स्नाने दाने च यत्फलम् ॥ तत्फलं समवाप्नोति स नरो नाऽत्र संशयः ॥ २४ ॥ एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् ॥ स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्तिवर्द्ध

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri Foundation, USA

नम् ॥२५॥ सर्वपापहरं पार्थं दुःखदुःस्वप्ननाशनम् ॥ पठतां शृण्वतां राजन्सर्वकमार्थसिद्धिदम् ॥२६॥ शांतिरस्तु शिवं चास्तु लोकाः सन्तु निरा
मयाः ॥ गोब्राह्मणेभ्यः स्वस्त्यस्तु धर्म्मं धर्म्मात्मजाऽऽश्रयः ॥ २७ ॥ नरकान्तकरी रेवा सतीर्था विश्वपावनी ॥ नर्मदा धर्मदा चास्तु शर्मदा पार्थ
ते सदा ॥ २८ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे मार्कंडेययुधिष्ठिरसंवादे रेवाखण्डपठन
श्रवणदानादिफलश्रुतिवर्णनंनामैकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥ ॥ ॐ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वोपररामथ पाण्डोः
पुत्राय वै मुनिः ॥ मृकण्डतनयो धीमान्सप्तकल्पस्मरः पुरः ॥१॥ मार्कंडमुनिना प्रोक्तं यथा पार्थाय सत्तमाः ॥ तथा वः कथितं सर्वं रेवामाहात्म्य
मुत्तमम् ॥ २ ॥ इयं पुण्या सरिच्छ्रेष्ठा रेवा विश्वैकपावनी ॥ रुद्रदेहसमुद्भूता सर्वभूताभयप्रदा ॥ ३ ॥ ॐकारजलधिं यावद्वाच भृगुनन्दनः ॥
तीर्थसंगमभेदान्वै धर्मपुत्राय पृच्छते ॥ ४ ॥ समासेनैव मुनयस्तथाहं कथयामि वः ॥ सप्तषष्टिसहस्राणि षष्टिकोट्यस्तथैव च ॥ ५ ॥ कथं केनात्र
शक्यन्ते वक्तुं वर्षशतैरपि ॥ तथाप्यत्र मुनिश्रेष्ठाः प्रोक्तं पार्थाय वै यथा ॥ ६ ॥ तीर्थमोङ्कारमारभ्य वक्ष्ये तीर्थावलिं शुभाम् ॥ प्रोच्यमानां समा
सेन तां शृणुध्वं महर्षयः ॥ ७ ॥ नत्वा सोमं महेशानं नत्वा ब्रह्माच्युताबुभौ ॥ सरस्वतीं गणेशानं वेदव्यासांघ्रिपङ्कजम् ॥ ८ ॥ पूर्वाचार्यास्तथा
सर्वान्दृष्टादृष्टार्थवेदिनः ॥ प्रणम्य नर्मदां देवीं वक्ष्ये तीर्थावलिं त्विमाम् ॥ ९ ॥ ॐ नमो विश्वरूपाय ॐकारायाखिलात्मने ॥ यमारभ्य प्रव
क्ष्यामि रेवातीर्थावलिं द्विजाः ॥ १० ॥ अस्मिन्मार्कंडगदिते रेवातीर्थक्रमे शुभे ॥ पुराणसंहिताध्याया मार्कण्डाश्रमवर्णनम् ॥११॥ ततः प्रश्ना
धिकारश्च प्रशंसा नर्मदोद्भवा ॥ तथा पञ्चदशानां च प्रवाहानां प्रकीर्तनम् ॥ १२ ॥ नामनिर्वचनं तद्वत्तथा कल्पसमुद्भवाः ॥ एकविंशतिकल्पानां
तद्वन्नामानुकीर्त्तनम् ॥ १३ ॥ मार्कंडेयानुभूतानां सप्तानां लक्षणानि च ॥ माहात्म्यं चैव रेवायाः शिवविष्ण्वोस्तथैव च ॥ १४ ॥ संहारलक्षणं
तद्वदोंकारस्य च संभवः ॥ तथैवोंकारमाहात्म्यममरंकटकीर्तनम् ॥ १५ ॥ अमरेश्वरतीर्थं च तथा दारुवनं महत् ॥ दारुकेश्वरतीर्थं च तीर्थं वै
चरुकेश्वरम् ॥ १६ ॥ चरुकासंगमस्तद्वच्चद्रतीपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञाह्वयं तथा ॥ १७ ॥ वरुणेश्वरतीर्थं च लिंगान्यष्टोत्तरं
शतम् ॥ सिद्धेश्वरं यमेशं च ब्रह्मेश्वरमतः परम् ॥ १८ ॥ सारस्वतं चाष्टरुद्रं सावित्रं सोमसंज्ञितम् ॥ शिवख्यातं महातीर्थरुद्रावर्तं द्विजोत्तमाः ॥ १९ ॥ ब्रह्मावर्तं परं
तीर्थं सूर्यावर्तमतः परम् ॥ पिप्पलावर्ततीर्थं च पिप्पल्याश्चैव संगमः ॥ २० ॥ अमरकण्टमाहात्म्यं कपिलासंगमस्तथा ॥ विशल्यासंभवश्चापि भृगुतुं
गाद्रिकीर्तनम् ॥ २१ ॥ विशल्यासंगमः पुण्यः करमर्दासमागमः ॥ करमर्देश्वरं तीर्थं चक्रतीर्थमनुत्तमम् ॥ २२ ॥ संगमो नीलगंगायाः विघ्नं
सन्निपुरस्य च ॥ कीर्तनं तीर्थदानानां मधुकतृतीयाव्रतम् ॥२३॥ अप्सरेश्वरतीर्थं च देहक्षेपे विधिस्ततः ॥ तीर्थं ज्वालेश्वरं नाम ज्वालायाः संगम
स्तथा ॥ २४ ॥ शक्रतीर्थं कुशावर्तं हंसतीर्थं तथैव च ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ २५ ॥ मातृकेश्वरतीर्थं च भृगुतुंगानुवर्णनम् ॥
तत्र भैरवमाहात्म्यं चपलेश्वरकीर्तनम् ॥ २६ ॥ चण्डपाणेश्च माहात्म्यं कावेरीसंगमस्तथा ॥ कुबेरेश्वरतीर्थं च वाराहीसंगमस्तथा ॥ २७ ॥
संगमश्चंडवेगायास्तीर्थं चण्डेश्वरं तथा ॥ एरण्डीसंगमः पुण्य एरण्डेश्वरमुत्तमम् ॥ २८ ॥ पितृतीर्थं च तत्रैव ॐकारस्य च संभवम् ॥ माहात्म्यं
पंचलिंगानामोंकारस्य मुनीश्वराः ॥ २९ ॥ कोटितीर्थस्य माहात्म्यं तीर्थं काकह्रदं तथा ॥ जम्बुकेश्वरतीर्थं च सारस्वतमतः परम् ॥ ३० ॥
कपिलासंगमस्तद्वत्तीर्थं च कपिलेश्वरम् ॥ दैत्यसूदनतीर्थं च चक्रतीर्थं च वामनम् ॥ ३१ ॥ तीर्थलक्षं विदुः पूर्वे कपिलायास्तु संगमे ॥ स्वर्गस्य
नरकस्यापि लक्षणं मुनिभाषितम् ॥ ३२ ॥ व्यवस्थानं शरीरस्य गोप्रदानानुवर्णनम् ॥ अशोकवनिकातीर्थं मतंगाश्रमवर्णनम् ॥ ३३ ॥ अशोके
श्वरतीर्थं च मतंगेश्वरमुत्तमम् ॥ तथा मृगवनं पुण्यं तत्र तीर्थं मनोरथम् ॥ ३४ ॥ संगमोंऽगारगर्तायां अंगारेश्वरमुत्तमम् ॥ तथा मेघवनं तीर्थं
देव्या नामानुकीर्तनम् ॥ ३५ ॥ संगमश्चापि कुब्जायास्तीर्थं कुब्जेश्वरं तथा ॥ बिल्वाम्रकं तथा तीर्थं पूर्णद्वीपमतः परम् ॥ ३६ ॥ तथा हिरण्य
गर्भायाः संगमः पुण्यकीर्तनः ॥ द्वीपेश्वरं नाम तीर्थं पुण्यं यज्ञेश्वरं तथा ॥ ३७ ॥ मांडव्याश्रमतीर्थं च विशोकासंगमस्तथा ॥ वागीश्वरं नाम तीर्थं
पुण्यो वै वायुसंगमः ॥ ३८ ॥ सहस्रावर्तकं तत्र तीर्थं सौगंधिकं तथा ॥ संगमश्च सरस्वत्या ईशानं तीर्थमुत्तमम् ॥ ३९ ॥ देवताम्रयतीर्थं च शूल
खातं ततः परम् ॥ ब्रह्मोदं शांकरं सौम्यं सारस्वतमतः परम् ॥ ४० ॥ सहस्रयज्ञतीर्थं च कपालमोचनं तथा ॥ आग्नेयमदितीशं च वाराहं
तीर्थमुत्तमम् ॥ ४१ ॥ तथा देवपथं तीर्थं तीर्थं यज्ञसहस्रकम् ॥ शुक्रतीर्थं दीप्तिकेशं विष्णुतीर्थं च योधनम् ॥ ४२ ॥ नर्मदेश्वरतीर्थं च वरु
णेशं च मारुतम् ॥ योगेशं रोहिणीतीर्थं दारुतीर्थं च सत्तमाः ॥ ४३ ॥ ब्रह्मावर्तं च पत्रेशं वाह्नं सौरं च कीर्त्यते ॥ मेघनादं दारुतीर्थं देवतीर्थं
गुहाश्रयम् ॥ ४४ ॥ नर्मदेश्वरसंज्ञं तत्कपिलानीर्थमुत्तमम् ॥ करंजेशं कुण्डलेशं पिप्पलादमतः परम् ॥ ४५ ॥ विमलेश्वरतीर्थं च पुष्करिण्याश्च
संगमः ॥ प्रशंसा शूलभेदस्य तत्रैवांधकविक्रमः ॥ ४६ ॥ देवाश्वासनदानं च तथैवांधकनिग्रहः ॥ शूलभेदस्य चोत्पत्तिस्तथा पात्रपरीक्षणम् ॥
॥ ४७ ॥ प्रशंसा दानधर्मस्य ऋषिशृंगानुभावनम् ॥ स्वर्गतिं दीर्घतपसो भानुमत्यास्तथैंगितम् ॥ ४८ ॥ शबरस्वर्गगमनं माहात्म्यं शूलभेद
जम् ॥ कपिलेश्वरतीर्थं च मोक्षतीर्थमतः परम् ॥ ४९ ॥ संगमो मोक्षनद्याश्च तीर्थं च विमलेश्वरम् ॥ तथैवोलूकतीर्थं च पुष्करिण्याश्च संगमः ले
॥ ५० ॥ आदित्येश्वरतीर्थं च तीर्थं वै संगमेश्वरम् ॥ संगमो भीमकुल्यायास्तीर्थं भीमेश्वरं शुभम् ॥ ५१ ॥ मार्कंडेश्वरतीर्थं च तथा वै पिप्पा
श्वरम् ॥ करोटीश्वरतीर्थं च तीर्थमिंद्रेश्वरं शुभम् ॥५२॥ अगस्त्येशं कुमारेशं व्यासेश्वरमनुत्तमम् ॥ वैद्यनाथं च केदारमानन्देश्वरसंज्ञितम् ॥५३॥ मातृ
तीर्थं च मुंडेशं चौरं कामेश्वरं तथा ॥ संगमश्चानुदुह्या वै तीर्थं भीमार्जुनाह्वये ॥ तीर्थं धर्मेश्वरं नाम लुंकेश्वरमतः परम् ॥ ५४ ॥ ततो धनदतीर्थं च
जटेशं मंगलेश्वरम् ॥ कपिलेश्वरतीर्थं च गोपारेश्वरमुत्तमम् ॥५५॥ मणिनागेश्वरं नाम मणिनद्याश्च संगमः ॥ तिलकेश्वरतीर्थं च गौतमेशमतः परम्
॥ ५६ ॥ तत्रैव मातृतीर्थं च मुनिनोक्तं मुनीश्वराः ॥ शंखचूडं च केदारं पाराशरमतः परम् ॥५७॥ भीमेश्वरं च चंद्रेशमश्ववत्याश्च संगमः ॥ वह्नीश्वरं
नारदेशं वैद्यनाथं कपीश्वरम् ॥ ॥ ५८ ॥ कुम्भेश्वरं च मार्कंडं रामेशं लक्ष्मणेश्वरम् ॥ मेघेश्वरं मत्स्यकेशमप्सराह्रदसंज्ञकम् ॥ ५९ ॥ दधिस्कन्दं
मधुस्कन्दं नंदिकेशं च वारुणम् ॥ पावकेश्वरतीर्थं च तथैव कपिलेश्वरम् ॥ ६० ॥ नारायणाह्वयं तीर्थं चक्रतीर्थमनुत्तमम् ॥ चण्डादित्यं परं
तीर्थं चंडिकातीर्थमुत्तमम् ॥ ६१ ॥ यमहासाह्वयं तीर्थं तथा गंगेश्वरं शुभम् ॥ नंदिकेश्वरसंज्ञं च नरनारायणाह्वयम् ॥ ६२ ॥ नलेश्वरं च
मार्कंडं शुक्रतीर्थमतः परम् ॥ व्यासेश्वरं परं तीर्थं तत्र सिद्धेश्वरं तथा ॥ ६३ ॥ कोटितीर्थं प्रभातीर्थं वासुकीश्वरमुत्तमम् ॥ संगमश्च
करंजाया मार्कंडेश्वरमुत्तमम् ॥ ६४ ॥ तीर्थं कोटीश्वरं नाम तथा संकर्षणाह्वयम् ॥ कनकेशं मन्मथेशं तीर्थं चैवानसूयकम् ॥ ६५ ॥ एरण्डीसंगमः
पुण्यो मातृतीर्थं च शोभनम् ॥ तीर्थं स्वर्णशलाकाख्यं तथा चैवांत्रिकेश्वरम् ॥ ६६ ॥ करंजेशं भारतेशं नागेशं मुकुटेश्वरम् ॥ सौभाग्यसुन्दरी
तीर्थं धनदेश्वरमुत्तमम् ॥ ६७ ॥ रोहिण्यं चक्रतीर्थं च उत्तरेश्वरसंज्ञितम् ॥ भोगेश्वरं च केदारं निष्कलंकमतः परम् ॥ ६८ ॥ मार्कंडं चैतपापं च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तीर्थमांगिरसेश्वरम् ॥ कोटवीसंगमः पुण्यं कोटितीर्थं च तत्र वै ॥ ६९ ॥ अयोनिजं परं तीर्थमंगारेश्वरमुत्तमम् ॥ स्कांदं च नार्मदं ब्राह्मं वाल्मीकेश्वरसंज्ञितम् ॥ ७० ॥ कोटितीर्थं कपालेशं पांडुतीर्थं त्रिलोचनम् ॥ कपिलेशं कम्बुकेशं प्रभासं कोहनेश्वरम् ॥ ७१ ॥ इन्द्रेशं वालुकेशं च देवेशं शाक्रमेव च ॥ नागेश्वरं गौतमेशमहल्यातीर्थमुत्तमम् ॥ ७२ ॥ रामेश्वरं मोक्षतीर्थं तथा कुशलवेश्वरौ ॥ नर्मदेशं कपर्दीशं सागरशमतः परम् ॥ ॥ ७३ ॥ धौम्यादित्यं परं तीर्थं तीर्थं चापरयोनिजम् ॥ पिंगलेश्वरतीर्थं च भृग्वीश्वरमनुत्तमम् ॥ ७४ ॥ दशाश्वमेधिकं तीर्थं कोटितीर्थं च सत्तमाः ॥ मार्कंडं ब्रह्मतीर्थं च आदिवाराहमुत्तमम् ॥ ७५ ॥ आशापूराभिधं तीर्थं कौबेरं मारुतं तथा ॥ वरुणेशं यमेशं च रामेशं कर्कटेश्वरम् ॥ ॥ ७६ ॥ शक्रेशं सोमतीर्थं च नंदाह्रदमनुत्तमम् ॥ वैष्णवं चक्रतीर्थं च रामकेशवसंज्ञितम् ॥ ७७ ॥ तथैव रुक्मिणीतीर्थं शिवतीर्थमनुत्तमम् ॥ जयवाराहतीर्थं च तीर्थमस्माहकाह्वयम् ॥७८॥ अंगारेशं च सिद्धेशं तापेश्वरमतः परम् ॥ पुनः सिद्धेश्वरं नाम तीर्थं च वरुणेश्वरम् ॥७९॥ पराशरेश्वरं पुण्यं कुसुमेशमनुत्तमम् ॥ कुण्डलेश्वरतीर्थं च तथा कलकलेश्वरम् ॥ ८० ॥ न्यंकुवाराहसंज्ञं च अंकोलं तीर्थमुत्तमम् ॥ श्वेतवाराहतीर्थं च भार्गलं सौरमुत्तमम् ॥ ८१ ॥ हुंकारस्वामितीर्थं च शुक्रतीर्थं च शोभनम् ॥ संगमो मधुमत्याश्च तीर्थं वै संगमेश्वरम् ॥ ८२ ॥ नर्मदेश्वरसंज्ञं च नदीत्रितयसंगमः ॥ अनेकेश्वरतीर्थं च शर्मेशं मोक्षसंज्ञितम् ॥ ८३ ॥ कावेरीसंगमः पुण्यस्तीर्थं गोपेश्वराह्वयम् ॥ मार्कंडेशं च नागेशमुदंवर्याश्च संगमः ॥ ८४ ॥ सांवादित्याह्वयं तीर्थमुदंवर्याश्च संगमः ॥ सिद्धेश्वरं च मार्कंडं तथा सिद्धेश्वरीकृतम् ॥ ८५ ॥ गोपेशं कपिलेशं च वैद्यनाथमनुत्तमम् ॥ पिंगलेश्वरतीर्थं च सैंधवायतनं महत् ॥ ८६ ॥ भूतीश्वराह्वयं तीर्थं गंगावाहमतः परम् ॥ गौतमेश्वरतीर्थं च दशाश्वमेधिकं तथा ॥ ८७ ॥ भृगुतीर्थं तथा पुण्यं ख्याता सौभाग्यसुन्दरी ॥ वृषखातं च तत्रैव केदारं धूतपातकम् ॥ ८८ ॥ तीर्थं धूतेश्वरीसंगमेरण्डीसंज्ञकं तथा ॥ तीर्थं च कनकेश्वर्या ज्वालेश्वरं ततः परम् ॥ ८९ ॥ शालग्रामाह्वयं तीर्थं सोमनाथमनुत्तमम् ॥ तथैवोदीर्णवाराहं तीर्थं चन्द्रप्रभासकम् ॥ ९० ॥ द्वादशादित्यतीर्थं च तथा सिद्धेश्वराभिधम् ॥ कपिलेश्वरतीर्थं च तथा त्रैविक्रमं शुभम् ॥ ९१ ॥ विश्वरूपाह्वयं तीर्थं नारायणकृतं तथा ॥ मूलश्रीपतितीर्थं च चौलश्रीपतिसंज्ञकम्॥९२॥ देवतीर्थं हंसतीर्थं प्रभासं तीर्थमुत्तमम् ॥ मूलस्थानं च कण्ठेशमट्टहासमतः परम् ॥९३॥ भृगुवेश्वरतीर्थं च ख्याता शूलेश्वरी तथा ॥ सारस्वतं दारुकेशमश्विनोस्तीर्थमुत्तमम् ॥ ९४ ॥ सावित्रीतीर्थमतुलं बालखिल्येश्वरं तथा ॥ नर्मदेशं मातृतीर्थं देवतीर्थमनुत्तमम् ॥ ९५ ॥ मच्छकेश्वरतीर्थं च शिखितीर्थं च शोभनम् ॥ कोटितीर्थं मुनिश्रेष्ठास्तत्र कोटीश्वरी नृडा ॥ ९६ ॥ तीर्थं पैतामहं नाम मांडव्येश्वरसंज्ञितम् ॥ तत्र नारायणेशं च अक्रूरेशमतः परम् ॥ ९७ ॥ देवखातं सिद्धरुद्रं वैद्यनाथमनुत्तमम् ॥ तथैव मातृतीर्थं च उत्तरेशमतः परम् ॥ ॥ ९८ ॥ तथैव नर्मदेशं च मातृतीर्थं तथा पुनः ॥ तथा च कुररीतीर्थं ढौंढेशं दशकन्यकम् ॥ ९९ ॥ सुवर्णबिंदुतीर्थं च ऋणपापप्रमोचनम् ॥ भारभूतेश्वरं तीर्थं तथा मुण्डीश्वरं विदुः ॥ १०० ॥ एकशालं डिंडिपार्णि तीर्थं चाप्सरसं परम् ॥ मुन्यालयं च मार्कंडं गणितादेवताह्वयम् ॥ ॥ १०१ ॥ आमलेश्वरतीर्थं च तीर्थं कन्येश्वरं तथा ॥ आषाढीतीर्थमित्याहुः शृंगीतीर्थं तथैव च ॥ १०२ ॥ वकेश्वरतीर्थं च कपालेशं तथैव च ॥ मार्कंडं कपिलेशं च एरण्डीसंगमस्तथा ॥ १०३ ॥ एरण्डीदेवतातीर्थं रामतीर्थमतःपरम् ॥ जमदग्नेः परं तीर्थं रेवासागरसंगमः ॥ १०४ ॥ लोटनेश्वरतीर्थं तल्लुंकेशनामकं तथा ॥ वृषखातं तत्र कुण्डं तथैव ऋषिसत्तमाः ॥ १०५ ॥ तथा हंसेश्वरंनाम तिलादं वासवेश्वरम् ॥ तथा कोटीश्वरं तीर्थमलिकातीर्थमुत्तमम् ॥ विमलेश्वरतीर्थं च रेवासागरसंगमे ॥ १०६ ॥ एवं तीर्थावलिः पुण्या मया प्रोक्ता महर्षयः ॥ तीर्थमुक्तावलिः पुण्या ग्रथिता तट्टरज्जुना ॥ १०७ ॥ नर्मदानीरनिर्णिक्ता मार्कंडेयविनिर्मिता ॥ मण्डनायेह साधूनां सर्वलोकहिताय च ॥ १०८ ॥ दुरितध्वांतशमनी धार्या धर्मार्थिभिः सदा ॥ अहोरात्रकृतं पापं सकृज्जप्त्वाशु नाशयेत्॥१०९॥त्रिकालं जप्त्वा मासोत्थं शिवाग्रे च त्रिमासिकम् ॥ मासं जप्त्वाथ वर्षोत्थं वर्षं जप्त्वा शताब्दिकम् ॥ ११० ॥ श्राद्धकाले च विप्राणां भुञ्जतां पुरतः स्थितः ॥ पठँस्तीर्थावलिं पुण्यां गयाश्राद्धप्रदो भवेत् ॥१११॥ पूजाकाले च देवानां श्रद्धया पुरतः पठन् ॥ प्रीणयेत्सर्वदेवांश्च पुनाति सकलं कुलम् ॥ ११२ ॥ एवं तीर्थावलिः पुण्या रेवातीरद्वयाश्रिता ॥ मया प्रोक्ता मुनिश्रेष्ठा स्तथैवशृणुतानघाः ॥ ११३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पंचम आवन्त्यखण्डे रेवाखण्डे तीर्थावलिकथनं नाम त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ तथैव तीर्थस्तवकान्वक्ष्येहमृषिसत्तमाः ॥ यैस्तु तीर्थावलीगुंफः पूर्वोक्तैरेकतः कृतः ॥ १ ॥ त्रिभक्तो भक्तलोकानामानंदप्रथनः शुभः ॥ मृकंडतनयः पूर्वं प्राह पार्थाय पृच्छते ॥ २ ॥ यथा तथाहं वक्ष्यामि तीर्थानां स्तवकानिह ॥ शिवांबुपानजा पुण्या रेवा कल्पलता किल ॥ ३ ॥ तीरद्वयोद्भूततीर्थप्रसूनैः पुष्पिता शुभा ॥ यत्पुण्यगंधलक्ष्म्या वै त्रैलोक्यं सुरभीकृतम् ॥ ४ ॥ तत्पुष्पमकरंदस्य रसास्वादविदुत्तमः ॥ भ्रमरः खलु मार्कंडो मुनिर्मतिमतां वरः ॥ ५ ॥ तत्पुष्पमालां हृदये तीर्थस्तवक चित्रिताम् ॥ दधाति सततं पुण्यां मुनिर्भृगुकुलोद्वहः ॥ तस्याः स्तवकसंस्थानं वक्ष्येहमृषिसत्तमाः ॥६॥ ॐकारतीर्थमारभ्य यावत्पश्चिमसागरम् ॥ संगमाः पंचत्रिंशद्वै नदीनां पापनाशनाः ॥ ७ ॥ दशैकमुत्तरे तीरे सत्रिंशति दक्षिणे ॥ पंचत्रिंशत्तमः श्रेष्ठो रेवासागरसंगमः ॥ ८ ॥ संगमैः सहितान्येवं रेवातीरद्वयेपि च ॥ चतुःशतानि तीर्थानि प्रसिद्धानि द्विजोत्तमाः ॥ ९ ॥ त्रिशतं शिवतीर्थानि त्रयस्त्रिंशत्समन्वितम् ॥ तत्रापि व्यक्तितो वक्ष्ये शृणुध्वं तानि सत्तमाः ॥१०॥ मार्कंडेश्वरतीर्थानि दश तेषु मुनीश्वराः ॥ दशादित्यभवान्यत्र नवैव कपिलेश्वराः ॥ ११ ॥ सोमसंस्था पितान्यष्टौ तावंतो नर्मदेश्वराः ॥ कोटितीर्थान्यथाष्टौ च सप्त सिद्धेश्वरास्तथा ॥१२॥ नागेश्वराश्च सप्तैव रेवातीरद्वयेऽपि तु ॥ सप्तैव वह्निविहिता न्यथाप्यावर्तसप्तकम् ॥ १३ ॥ केदारेश्वरतीर्थानि पंच पंचेंद्रजानि च ॥ वरुणेशाश्च पंचैव पंचैव धनदेश्वराः ॥ १४ ॥ देवतीर्थानि पंचैव चत्वारो वै यमेश्वराः ॥ वैद्यनाथाश्च चत्वारश्चत्वारो वानरेश्वराः ॥ १५ ॥ अंगारेश्वरतीर्थानि तावंत्येव मुनीश्वराः ॥ सारस्वतानि चत्वारि चत्वारो दारुकेश्वराः ॥ १६ ॥ गौतमेश्वरतीर्थानि त्रीणि रामेश्वराह्वयः ॥ कपालेश्वरतीर्थानि त्रीणि हंसकृतानि च ॥ १७ ॥ त्रीण्येव मोक्षतीर्थानि त्रयो वै विमलेश्वराः ॥ सहस्रयज्ञतीर्थानि त्रीण्येव मुनिरब्रवीत् ॥ १८ ॥ भीमेश्वराह्वयः ख्याताः स्वर्णतीर्थानि त्रीणि च ॥ धौतपापद्वयं प्रोक्तं करंजेशद्वयं तथा ॥ १९ ॥ ऋणमोचनतीर्थे द्वे तथा स्कंदेश्वरद्वयम् ॥ दशाश्वमेधतीर्थे द्वे नंदीतीर्थद्वयं द्विजाः ॥ २० ॥ मन्मथेशद्वयं चैव भृगुतीर्थद्वयं तथा ॥ पराशरेश्वरौ द्वौ च अयोनिसंभवद्वयम् ॥ २१ ॥ व्यासेश्वरद्वयं प्रोक्तं पितृतीर्थद्वयं तथा ॥ नंदिकेश्वरतीर्थे द्वे द्वौ च गोपेश्वरौ स्मृतौ ॥ २२ ॥ मारुतेशद्वयं तद्वद्वौच ज्वालेश्वरौ स्मृतौ ॥ शुक्रतीर्थद्वयं पुण्यमप्सरेशद्वयं तथा ॥ २३ ॥ पिप्पलेश्वरतीर्थे द्वे मांडव्येश्वरसंज्ञिते ॥ द्वीपेश्वरद्वयं चैव प्राह तद्वद्भृगूद्वहः ॥ उत्तरेश्वरतीर्थे द्वे अशोकेशद्वयी तथा ॥२४ ॥ द्वे योधनपुरे चैव रोहिणीतीर्थकद्वयम् ॥ लुंकेश्वरद्वयं ख्यातमाख्यानं मुनिना तथा ॥ २५ ॥ सैकोनविंशतिशतं तीर्थान्येकैकशो द्विजाः ॥ स्तवकेषु कृतं तीर्थं द्विशतं सचतुर्दशम् ॥ ॥ २६ ॥ रेवान्येतानि तीर्थानि वैष्णवानि च सत्तमाः ॥ शृणुध्वं प्रोच्यमानानि ब्राह्मशाक्तानि च क्रमात् ॥ २७ ॥ अष्टाविंशति तीर्थानि वैष्ण

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वान्यत्रवीन्मुनिः ॥ तेषु वाराहतीर्थानि षडेव मुनिसत्तमाः ॥ २८ ॥ चत्वारि चक्रतीर्थानि शेषाण्यष्टादशैव हि ॥ विष्णुनाधिष्ठितान्येव प्राह पूर्वं मृकंडजः ॥ २९ ॥ तथैव ब्रह्मणा सिद्धये सप्ततीर्थान्यवीवदत् ॥ त्रिषु च ब्रह्मणः पूजा ब्रह्मशाश्वतुरोऽपरे ॥ अष्टाविंशन्मया ख्याता यथासंख्यं यथाक्रमम् ॥ ३० ॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परम् ॥ नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितम् ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ एवमुद्देशतः प्रोक्तो रेवातीर्थक्रमो मया ॥ यथा पार्थाय संक्षेपान्मार्कंडो मुनिरब्रवीत ॥ ३२ ॥ अवांतराणि तीर्थानि तेषु गुप्तान्यनेकशः ॥ यत्र यावत्प्रमाणानि तान्याकर्णयतानघाः ॥ ३३ ॥ ॐकारतीर्थपरितः पर्वतादमरंकटात् ॥ क्रोशाद्ये सर्वदिक्षु सार्द्धकोटीत्रयी मता ॥ ३४ ॥ तीर्थानां संख्यया गुप्त प्रकटानां द्विजोत्तमाः ॥ कोटिरेका तु तीर्थानां कपिलासंगमे पृथक् ॥ ३५ ॥ अशोकवनिकायाश्च तीर्थं लक्षं प्रतिष्ठितम् ॥ शतमं गारगर्तायाः संगमे मुनिसत्तमाः ॥ ३६ ॥ तीर्थानामयुतं तद्वत्कुब्जायाः संगमे स्थितम् ॥ शतं हिरण्यगर्भायाः संगमे समवस्थितम् ॥ ३७ ॥ तीर्थानामष्टषष्टिश्च विशोकासंगमे स्थिता ॥ तथा सहस्रं तीर्थानां संस्थितं वायुसंगमे ॥ ३८ ॥ शतं सरस्वतीसंगे शुक्ल तीर्थे शतद्वयम् ॥ सहस्रं विष्णुतीर्थेषु माहिष्मत्यामथायुतम् ॥ ३९ ॥ शूलभेदे च तीर्थानां साग्रं लक्षं स्थितं द्विजाः ॥ देवग्रामे सहस्रं च तीर्थानां मुनिरब्रवीत् ॥ ४० ॥ लुंकेश्वरे च तीर्थानां साग्रा सप्तशती स्थिता ॥ तीर्थान्यष्टोत्तरशतं मणिनद्याश्च संगमे ॥ वेद्य नाथे च तीर्थानां शतमष्टाधिकं विदुः ॥ ४१ ॥ एवं तावत्प्रमाणानि तीर्थे कुम्भेश्वरे द्विजाः ॥ साग्रं लक्षं च तीर्थानां स्थितं रेवोत्संगमे ॥ ४२ ॥ ततश्चाप्यधिकानि स्युरिति मार्कंडभाषितम् ॥ अष्टाशीतिसहस्राणि व्यासद्वीपाश्रितानि च ॥ ४३ ॥ संगमे च करंजायाः स्थितमष्टोत्तरायुतम् ॥ एरण्डीसंगमे तद्वत्तीर्थान्यष्टाधिकं शतम् ॥ ४४ ॥ धूतपापे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ स्कंदतीर्थे शतं पुण्यं तीर्थानां मुनिरुक्तवान् ॥ ॥ ४५ ॥ कोहनेशे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ सार्द्धकोटी च तीर्थानां स्थिता वै कोरिलापुरे ॥ ४६ ॥ रामकेशवतीर्थे च सहस्रं साग्र मुक्तवान् ॥ अस्माहके सहस्रं च तीर्थानि निवसंति हि ॥ ४७ ॥ लक्षाष्टकं सहस्रे द्वे शुक्लतीर्थे द्विजोत्तमाः ॥ तीर्थानि कथयामास पुरा पार्थाय भार्गवः ॥ ४८ ॥ शतमष्टाधिकं प्राह प्रत्येकं संगमेषु च ॥ नदीनामवशिष्टानां कावेरीसंगमं विना ॥ ४९ ॥ कावेर्याः संगमे विप्राः स्थिता पंचशती तथा ॥ तीर्थानां पर्वसु तथा विशेषो मुनिनोदितः ॥ ५० ॥ मोक्षतीर्थं हि सन्प्राहुः पुराणपुरुषाश्रितम् ॥ भृगोः क्षेत्रे च तीर्थानां कोटिरेका समाश्रिता ॥ ५१ ॥ साधिकानामृषिश्रेष्ठा वक्तुं शक्तो हि को भवेत् ॥ सर्वामराश्रयं प्रोक्तं सर्वतीर्थाश्रयं तथा ॥ ५२ ॥ त्रिषु लोकेषु विख्यातं पूजितं सिद्धिसाधनम् ॥ भारभूत्यां च तीर्थानां स्थितमष्टोत्तरं शतम् ॥ ५३ ॥ अक्रूरेश्वरतीर्थे च सार्द्धं तीर्थशतं स्थितम् ॥ विमलेश्वरतीर्थे तु रेवासागरसंगमे ॥ दशायुतानि तीर्थानां साधिकान्यब्रवीन्मुनिः ॥ ५४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवंत्यखण्डे रेवाखण्डे तीर्थसंख्यापरिगणनवर्णनं नामैकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥ ॥ ० ॥ ॥ ॥ सूत उवाच ॥ ॥ इति वः कथितं विप्रा रेवामाहात्म्यमुत्तमम् ॥ यथोपदिष्टं पार्थाय मार्कंडेयेन वै पुरा ॥ १ ॥ तथा तीर्थकदंबाश्च तेषु तीर्थविशेषतः ॥ प्राधान्येन मया ख्याता यथासंख्यं यथाक्रमम् ॥ २ ॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परम् ॥ नर्म दाचरितं पुण्यं माहात्म्यं मुनिभाषितम् ॥ ३ ॥ सप्तकल्पानुगो विप्रो नर्मदायां मुनीश्वराः ॥ मृकण्डतनयो धीमान्परमार्थविदुत्तमः ॥ ॥ ४ ॥ संसेव्य सर्वतीर्थानि नदीः सर्वाश्च वै पुरा ॥ बहुकल्पस्मरां रेवामालक्ष्य शिवदेहजाम् ॥ ५ ॥ मे कलेति च शर्वोक्तां शरणं शर्मजां ययौ ॥ अजराममरां देवीं दैत्यध्वंसकरीं पराम् ॥ ६ ॥ महाविभवसंयुक्तां भवघ्नीं भवजाह्नवीम् ॥ तस्यामावभ्य सत्प्रेम जातः सोऽप्यजरामरः ॥ ७ ॥ षष्टितीर्थसहस्राणि षष्टिकोट्यश्च सत्तमाः ॥ व्यवस्थितानि रेवायास्तीरयुग्मे पदेपदे ॥ ८ ॥ सरितः परितः संति सतीर्थास्तु सहस्रशः ॥ न तुलां यांति रेवायास्ताश्च मन्ये मुनीश्वराः ॥ ९ ॥ एतद्वः कथितं सर्वं यत्पृष्टमखिलं द्विजाः ॥ यन्मद्देशमुखाच्छ्रुत्वा वायुराह ऋषीन्प्रति ॥ १० ॥ तद्वन्मृकण्डतनयोऽप्यनुभूयाखिलां नदीम् ॥ सतीर्थां पदशः प्राह पांडुपुत्राय पावनीम् ॥ ११ ॥ एतच्च कथितं सर्वं संक्षेपेण द्विजोत्तमाः ॥ नर्मदाचरितं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥ १२ ॥ किमन्यैः सरितां तोयैः सेवितैस्तु सहस्रशः ॥ यदि संसे व्यते तोयं रेवायाः पापनाशनम् ॥ १३ ॥ मेकलाजलससेवी मुक्तिमाप्नोति शाश्वतीम् ॥ १४ ॥ यथा यथा भजेन्मर्त्यो यद्यदिच्छति तीर्थगः ॥ तत्तदाप्नोति नियतं श्रद्धयाऽश्रद्धयापि च ॥ १५ ॥ इदं ब्रह्म हरिरिदमिदं साक्षात्परो हरः ॥ इदं ब्रह्म निराकारं कैवल्यं नर्मदा जलम् ॥ ॥ १६ ॥ तावद्भ्रमंति तीर्थानि नद्यो ह्यद्यफलप्रदाः ॥ यावन्न स्मर्यते रेवा सेवाहेवा कलौ नरैः ॥ १७ ॥ ध्रुवं लोके हितार्थाय शिवेन स्वशरीरतः ॥ शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥ १८ ॥ तावद्भ्रमंति यज्ञाश्च वनक्षेत्रादयो भृशम् ॥ यावन्न नर्मदानामकीर्तनं क्रियते कलौ ॥ १९ ॥ गरिमा गण्यते तावत्तपोदानव्रतादिषु ॥ नरैर्वा प्राप्यते यावद्भुवि भर्गभवा धुनी ॥ २० ॥ ये वसंत्युत्तरे कूले रुद्रस्या नुचरा हि ते ॥ वसंति याम्यतीरे ये लोकं ते यांति वैष्णवम् ॥ २१ ॥ धन्यास्ते देशवर्यास्ते येषु देशेषु नर्मदा ॥ नरकांतकरी शश्वत्संश्रिता शर्वनिर्मिता ॥ २२ ॥ कृतपुण्याश्च ते लोकाः शोकाय न भवंति ते ॥ ये पिबंति जलं पुण्यं पावतीपतिसिंधुजम् ॥ २३ ॥ इदं पवित्र मतुलं रेवायाश्चरितं द्विजाः ॥ शृणोति यः कीर्तयते मुच्यते सर्वपातकैः ॥ २४ ॥ यत्फलं सर्ववेदेश सपडंगपदक्रमैः ॥ श्रुतेश्च पठितेस्तस्मात्फलम ष्टगुणं भवेत् ॥२५॥ सत्रयाजी फलं यच्च लभते द्वादशाब्दिकम्॥श्रुत्वा सकृच्चं रेवायाश्चरितं तत्फलं लभेत् ॥२६॥ सर्वतीर्थावगाहाच्च यत्फलं साग रादिषु ॥ सकृच्छ्रुत्वा च माहात्म्यं रेवायास्तत्फलं लभेत् ॥ २७ ॥ एतद्धर्म्यमुपाख्यानं सर्वशास्त्रेष्वनुत्तमम् ॥ देशे वा मण्डले वापि नगरे ग्रामम ध्यतः ॥ २८ ॥ गृहे वा तिष्ठते यस्य लिखितं सार्ववर्णिकम् ॥ स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः ॥ २९ ॥ धर्मार्थकाममोक्षाणां मार्गोऽयं देवसेवितः ॥ गुरूणां च गुरुः शास्त्रं परमं सिद्धिकारणम् ॥ ३० ॥ यश्चेदं शृणुयान्नित्यं पुराणं देवभाषितम् ॥ ब्राह्मणो वेदवान्भूयात्त्रि योविजयी भवेत् ॥३१॥ धनाढ्यो जायते वैश्यः शूद्रो वै धर्मभाग्भवेत् ॥ ३२ ॥ सौभाग्यसंततिं नारी श्रुत्वैतत्समवाप्नुयात् ॥ श्रियं सौख्यं स्वर्गवासं जन्म चैवोत्तमे कुले ॥ ३३ ॥ रुग्भेदी कृतघ्नश्च स्वामिभुङ् मित्रवंचकः ॥ गोघ्नश्च गरदश्चैव कन्याविक्रयकारकः ॥ ३४ ॥ ब्रह्मघ्नश्च सुरापी च स्तेयी च गुरुतल्पगः ॥ नर्मदाचरितं शृण्वंस्तानब्दं योऽभिषेवते ॥ ३५ ॥ सर्वपापविनिर्मुक्तो जायते नाऽत्र संशयः ॥ पाकभेदी वृथा पाकी देवब्राह्मणनिंदकः ॥ ३६ ॥ परीवादी गुरोः पित्रोः साधूनां नृपतेस्तथा ॥ तेऽपि श्रुत्वा च पापेभ्यो मुच्यन्ते नात्र संशयः ॥ ३७ ॥ ये पुनर्भावितात्मानः शास्त्रं शृण्वंति नित्यशः ॥ पूजयंति च तच्छास्त्रं नार्मदं वस्त्रभूषणैः ॥ ३८ ॥ पुष्पैः फलैश्चंदनाद्यैर्भोजनैर्विविधैरपि ॥ शास्त्रेऽ स्मिन्पूजिते देवा पूजिता गुरवस्तथा ॥ ३९ ॥ इह लोके परे चैव नात्र कार्या विचारणा ॥ तस्मात्सर्वप्रयत्नेन गन्धवस्त्रादिभूषणैः ॥ ४० ॥ पूज येत्परया भक्त्या वाचकं शास्त्रमेव च ॥ वेदपाठैश्च यत्पुण्यमग्निहोत्रैश्च पालितैः ॥ ४१ ॥ तत्फलं समवाप्नोति नर्मदाचरिते शुभे ॥ कुरुक्षेत्रे च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यत्पुण्यं प्रभासे पुष्करे तथा ॥४२॥ रुद्रावर्ते गयायां च वाराणस्यां विशेषतः ॥ गंगाद्वारे प्रयागे च गंगासागरसंगमे ॥ ४३ ॥ एवमादिषु तीर्थेषु यत्पुण्यं जायते नृणाम् ॥ नर्मदाचरितं श्रुत्वा तत्पुण्यं सकलं लभेत् ॥ ४४ ॥ आदिमध्यावसानेषु नर्मदाचरितं शुभम् ॥ यः शृणोति नरो भक्त्या शृणुध्वं तत्फलं महत् ॥ ४५ ॥ समाप्य शिवसंस्थानं देवकन्यासमावृतः ॥ रुद्रस्यानुचरो भूत्वा शिवेन सह मोदते ॥ ४६ ॥ धर्माख्या नमिदं पुण्यं सर्वाख्यानेष्वनुत्तमम् ॥ गृहेपि पठ्यते यस्य चतुर्वर्णस्य सत्तमाः ॥ ४७ ॥ धन्यं तस्य गृहं मन्ये गृहस्थं चापि तत्कुलम् ॥ पुस्तकं पूजयेद्यस्तु नर्मदाचरितस्य तु ॥ ४८ ॥ नर्मदा पूजिता तेन भगवांश्च महेश्वरः ॥ वाचके पूजिते तद्वदेवाश्च ऋषयोचिताः ॥ ४९ ॥ लेखयित्वा च सकलं रेवाचरितमुत्तमम् ॥ भूषणं सर्वशास्त्राणां यो ददाति द्विजन्मने ॥ ५० ॥ नर्मदासर्वतीर्थेषु स्नानदानेन यत्फलम् ॥ तत्फलं समवाप्नोति स नरो नात्र संशयः ॥ ५१ ॥ एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् ॥ स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्तिवर्धनम् ॥ ५२ ॥ धर्म्यमायुष्यमतुलं दुःखदुःस्वप्ननाशनम् ॥ पठतां शृण्वतां चापि सर्वकामार्थसिद्धिदम् ॥ ५३ ॥ यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः ॥ शिवलोके स्थितिस्तस्य पुराणाक्षरवत्सरी ॥ ५४ ॥ इति निगदितमेतन्नर्मदायाश्चरित्रं पवनगदितमग्र्यं शर्ववक्त्रादवाप्य ॥ त्रिभुवनजनवंद्यं त्वेतदादौ मुनीनां कुलपतिपु रतस्तत्सूतमुख्येन साधु ॥ ५५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डे रेवाखण्डे रेवाखंडसमाप्तिरेवा खंडपुस्तकदानादिमाहात्म्यवर्णनं नाम द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥

इति श्रीस्कांदे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं समाप्तम् ॥ (५-३) ॥

॥ इति श्रीस्कान्दे महापुराणे पञ्चम आवन्त्यखण्डे तृतीयं रेवाखण्डं समाप्तम् ॥(५-३)॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

SOME VALUABLE PUBLICATION

Aiyangar, S.K. : Hindu India from Originals Sources,
Aiyar, P.S.S.: Evolution of Hindu Moral Ideas
Bali, Saraswati : Brihaspati in Vedas and Puranas
Bali, S.K. (Ed.) : Historical & Critical studies in Atharvaveda
Banerjee, R.D.: Prehistoric Ancient & Hindu India
Basu, P.C.: Indo-Aryan Polity : Rigvedic Period
Bhargava, D.N.: Glimpses of Indian Philosophy and Sanskrit Literature
Canney, M.A.: Encyclopaedia of Religions
Chakravarti, S.C. : Philosophy of Upanishads
Choudhuri, U. : Indra & Varuna in Indian Mythology
Durrany, M.K. : The Geeta and: The Quran— A Comparative Study
Govinda, A.B. : Psychological attitude of early Buddhist Philosophy
Jamuna, K.A. : Nalayir Divya Prabandham aur Sursagar Men Krishnakatha ka Swaroop
Keith, A.B. : History of Samkhya Philosophy
Kumar, P. : Nagarjuna Yogaratnamala
" (Ed): Aesthetic and Sanskrit Literature
" : Treatment of Pathos in Sanskrit Dramas
" (Intro) : Shivamahapurana (Text)
Law, B.C. :Life and work of Buddhaghosa
Macdonell, Keith etc. : Commemorative Essays
McGovern, W.M. : Manual of Buddhist Philosophy
Maitra, S.K. : Madhava's Pramanachandrika
Max Muller : Survey of Languages
" : Vedanta Philosophy
Mitra, Cowell and Roer : Twelve Principal Upanishads
Reed, E.A. :Ancient Books of India
Roy, Raja Rammohan : Vedas
Sharma, R.N. : Ancient India according to Manu
" : Culture and Civilization as revealed in Srautasutras
Shastri, R.S. : Evolution of Indian Polity
Shastri, A.R. : Vasuki Purana (Sanskrit)
Simpson, W. : Buddhist Praying Wheel
Trikha, U.R. : Concept of religion in Mahabharata
Vedalankar, R (Ed.) : Comparative and Analytical study of Vedas
Vyas, R.N. : Bhagavat Bhakti Cult & Three Advait Acharyas
Wallesser : Life of Nagarjuna from Chinese and Tibetan Source
Wilson, H.H. : Analysis of Puranas
" : Grammar and Dictionaries of Sanskrit Language
" : Hindu Fiction
" : Rigveda Samhita : Text, Trans. and Notes in Eng.
" : Vishnu Purana :
" : Sanskrit English Dictionary

PURANA TEXT ONLY
SHIVA MAHAPURANA
SKANDA MAHAPURANA
(Complete in 3 Vols.)
VASUKI PURANA : A.R. Shastri
REMAINING MAHAPURANAS (TEXT)
ARE IN THE PRESS

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

THE ŚIVA : Śiva Purāṇa gives the geneologies of the patriarchs and descriptions of the universe, mingled with praises of Śiva and with myths and legends of which He is the hero. It also teaches the efficacy of Yoga, a sort of penance for the purpose of concentrating thought with the greatest intensity upon the syallable *Om* which is defined Brahman, and again as the representative of all the gods of the earth, the air and the sky. It describes the glories of Śivapura or dwelling of Śiva with whom the yogi or devotee is to be united—in the sanctum of the Heart.

THE SKANDA is the biggest among Purāṇas. Herein the six-faced deity Skanda relates the events of the Tatpuruṣa Kalpa enlarged with many tales. They contain minute descriptions of the Temple of Śiva and a vast number of legends purporting the holiness of Kāśī. Other portions are devoted to the holiness of Orissa and other localities and temples.

THE BRAHMA is devoted to the legendary and local descriptions of the augustness and sanctity of particular temples and deities.

THE PADMA contains an account of the time when the world was Golden Lotus (Padma) from which Creation emerged.

THE BHĀGAVATA has the most powerful influence in India, controlling life and feelings of the people more than any other Purāṇa.

THE MĀRKANḌEYA is the story of the birds explained by the holy sages in reply to the questions of Muni Mārkaṇḍeya.

THE AGNI treats of primitive and subsequent creations, the geneologies of demi-gods and kings, the histories of royal dynasties, and other matters.

THE VĀYU treats of the families of sages and kings, followed by a cosmogony terminating with the destruction of the world at the end of each Kalpa.

THE BHAVIṢYA treats of the creation and religious rites and ceremonials.

THE BRAHMA-VAIVARTA induces faith in Rādhā and Kṛṣṇa.

THE LINGA is said to have been originally composed by Brahmā. Brahmā and Viṣṇu acknowledge and eulogize the superiority of Śiva.

THE VARĀHA is narrated by Viṣṇu as the Boar rescuing the earth. This is religious manual almost wholly occupied with forms of prayers and rules for devotional observances unfolded by Viṣṇu.

THE VĀMANA contains an account of the Dwarf incarnation of Viṣṇu. It is largely devoted to the worship of the Linga and of the sanctity of certain holy places.

THE KURMA in which Janārdana, in the form of a Tortoise, regions under the earth, explains objects of life, duty, wealth, pleasure and literature and inculcates the worship of Śiva and Durgā.

THE MATṢYA opens with the account to how the Matṣya or Fish Avatāra of Viṣṇu rescued Manu for humanity.

THE GARUḌA is devoted to the description of Vratas—of self-restraint, holidays, sacred places and prayers to the Sun, Śiva and Viṣṇu. It contains also treatises on astrology, palmistry and minerology and medicine.

THE BRAHMĀNḌA gives an account of the future Kalpas.

NAG PUBLISHERS
JAWAHARNAGAR DELHI-7

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi.,Digitized by S3 Foundation USA